॥ श्री ॥

चौखम्बा संस्कृत ग्रन्थमाला

ग्रन्थ संख्या ९३

शब्दकल्पद्रुमः

स्यार-राजा-राधाकान्तदेव-बाहादुरेण

विरचितः

श्रीवरदाप्रसाद-वसुना तदनुजेन श्रीहरिचरण-वसुना च

अशेषशास्त्रविशारदकोविदवृन्दसाहाय्येन सपरिवर्द्धितः ।

द्वितीयो भागः

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : तृतीय, सं० २०२४ वि०
मूल्य : सम्पूर्ण ग्रन्थ १–५ भाग रु० १५०–००

पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी–१ (उ० प्र०)
भारतवर्ष
फोन नं० ३१४८

THE
CHOWKHAMBA SANSKRIT SERIES
WORK NO 93

SHABDA-KALPADRUM

OR

AN ENCYCLOPEDIC DICTIONARY OF SANSKRIT WORDS ARRANGED IN ALPHABETICAL ORDER GIVING THE ETYMOLOGICAL ORIGIN OF THE WORDS ACCORDING TO PANINI THEIR GENDER VARIOUS MEANINGS AND SYNONYMS AND ILLUSTRATING THEIR SYNTACTICAL USAGE AND CONNOTATION WITH QUOTATIONS DRAWN FROM VARIOUS AUTHORITATIVE SOURCES SUCH AS VEDAS VEDANTA NYAYA OTHER DARSHANAS PURANETIHAS MUSIC ART ASTRONOMY TANTRA, RHETORICS AND PROSODY AND MEDICINE ETC.

BY
RAJA RADHA KANTA DEVA

PART TWO

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
POST BOX 8, VARANASI-1

Publisher The Chowkhamba Sanskrit Series Office, Varanasi
Printer Vidya Vilas Press, Varanasi
Edition Third, 1967
Price 1–5 Vols Complete Rs 150–00

Oriental and Foreign Book-Sellers and Publishers
P O Chowkhamba, Post Box 8,
Varanasi–1 (India)
1967
Phone 3145

शब्दकल्पद्रुमः।

द्वितीयकाण्डम्।

क, ककारः। (वर्णस्य स्वरूपग्रहणाय कारः।) स तु व्यञ्जनप्रथमवर्णः। अस्योच्चारणस्थानं कण्ठः। इति व्याकरणम्॥ (तथा चोक्तम् "तुल्यास्यप्रयत्नं सवर्णम्"। १।१।९। सिद्धान्तकौमुद्याम्। "अकुहविसर्जनीयानां कण्ठः"। इति।*।) (वङ्गीयभाषायां) तस्य लेखनप्रकारो यथा,—
"वामरेखा भवेद्ब्रह्मा विष्णुर्दक्षिणरेखिका।
अधोरेखा भवेद्रुद्रो मात्रा साक्षात् सरस्वती॥
कुण्डली चाङ्कुशाकारा मध्यशून्यः सदाशिवः।
कदम्बगोलकाकारं ककारं भावयेत् सुधीः"॥
इति वर्णोद्धारतन्त्रम्॥*॥ तस्य नामानि यथा,—
"कः क्रोधीशो महाकाली कामदेवप्रकाशकः।
कपाली तैजसः शान्तिर्वासुदेवो जयानलः॥
चक्री प्रजापतिः सृष्टिर्दक्षगुल्फो विशाम्पतिः।
अनन्तः पार्थिवो बिन्दुर्व्यापिनी परमात्मकः॥
वर्णादिश्च गुरुर्ब्रह्मा कालरात्रोऽम्भः शिवो जलम्।
माहेश्वरी तुषा पूज्या मङ्गलस्वरगः करः।
विद्या कामेश्वरी मुख्यः कामरूपो गजेन्द्रकः।
धीरेशं रमणो रक्तकुसुमा परमात्मकः"॥
इति तन्त्रशास्त्रम्॥
"अधुना सम्प्रवक्ष्यामि ककारतत्त्वमुत्तमम्।
रहस्यं परमाश्चर्यं त्रैलोक्यानाञ्च सम्मतम्॥
वामरेखा भवेद्ब्रह्मा विष्णुर्दक्षिणरेखिका।
अधोरेखा भवेद्रुद्रो मात्रा साक्षात् सरस्वती॥
कुण्डली चाङ्कुशाकारा मध्ये शून्यः सदाशिवः।
जवायावकसङ्काशा वामरेखा वरानने॥
शरच्चन्द्रप्रतीकाशा दक्षरेखा च मूर्त्तिमान्।
अधोरेखा वरारोहे। महामरकतद्युतिः॥
शङ्खकुन्दसमा कीर्त्तिर्मात्रा साक्षात् सरस्वती।
कुण्डली चाङ्कुशा या तु कोटिविद्युल्लताकृतिः॥
कोटिचन्द्रप्रतीकाशो मध्ये शून्यः सदाशिवः।
शून्यगर्भे स्थिता काली कैवल्यपददायिनी॥
ककाराज्जायते सर्व्वं कामं कैवल्यमेव च।
अपवर्गं जायते देवि। तथा धर्म्मश्च नान्यथा॥
ककारः सर्व्ववर्णानां मूलप्रकृतिरेव च।
ककारः कामदा कामरूपिणी स्फुरदव्यया॥
कामनीया महेशानि। स्वयं प्रकृतिसुन्दरी।
माता सा सर्व्वदेवानां कैवल्यपददायिनी॥
ऊर्द्ध्वकोणे स्थिता कामा ब्रह्मशक्तिरितीरिता।
वामकोणे स्थिता ज्येष्ठा विष्णुशक्तिरितीरिता॥
दक्षकोणे स्थिता बिन्दू रौद्री संहाररूपिणी।
ज्ञानात्मा सा तु चार्व्वङ्गि। कलाचतुष्टयात्मकः।
इच्छाशक्तिर्भवेद्ब्रह्मा विष्णुश्च ज्ञानशक्तिमान्।
क्रियाशक्तिर्भवेद्रुद्रः सर्व्वे प्रकृतिमूर्त्तिमान्॥
आत्मविद्या शिवस्तत्र सदा मत्त प्रतिष्ठितः।
आसनं त्रिपुरादेव्या ककारं पञ्चदैवतम्॥
ईश्वरो यस्तु देवेशि। त्रिकोणे तस्य संस्थितिः।
त्रिकोणमेतत् कथितं योनिमण्डलमुत्तमम्॥
केवलं प्रपदे यस्याः कामिनी सा प्रकीर्त्तिता।
ॐ जवायावकसिन्दूरसदृशीं कामिनीं परम्॥
चतुर्भुजां त्रिनेत्राञ्च बाहुवल्लीविराजिताम्।
कदम्बकोरकाकारस्तनद्वयविभूषिताम्॥
रत्नकङ्कणकेयूरमङ्गदैरुपशोभिताम्।
रत्नहारैः पुष्पहारैः शोभितां परमेश्वरीम्॥
एवं हि कामिनीं ध्यात्वा ककारं दशधा जपेत्।
प्रफुल्लश्च ततो ध्यात्वा जपस्य फलभाग्भवेत्॥
एतत्ते कथितं देवि। ककारतत्त्वमुत्तमम्"॥
इति कामधेनुतन्त्रम्॥ (अनुबन्धविशेषः। यथाह कविकल्पद्रुमः। "कथादिः किन्तु वा"। एतेन गणत कं सङ्ख्याने गणयति कथत् कं वाक्यप्रबन्धे कथयति इत्यादि स्यात्॥)

क, क्ली, (कायति शब्दो निर्गच्छति यतः यस्मिन् सतीत्यर्थं सन्निकृष्टकस्य शिरोऽभ्यवस्थितत्वात्। यद्वा कायति वर्णात्मकं ध्वन्यात्मकं वा शब्दं करोति जीवो यस्मिन् सतीति यावत्। कै शब्दे "अन्येभ्योऽपि दृश्यते" ३।२।१ १।) शिरः। (यथा तन्त्रसारे।
"हाभ्यामोष्ठौ दिवनृत्य चैकेन चालयेत्करम्।
मुखं प्राणं नेत्रं श्रोत्रं नाभ्युरस्कं मुखौ क्रमात्"॥
अत्र कं शिरः इति तट्टीका॥ कायति शब्दायते स्रोतोविशेषात् लोडनेन वेति यावत्।) जलम्। (यथा, भागवते ६।१।४२।
"सूर्य्योऽग्निः खं मरुद्गावः सोमः सन्ध्याहनी दिशः।
कं कुः कालो धर्म्म इति ह्येते दैह्यस्य साक्षिणः"॥
कायन्ति आनन्दोत्सवध्वनिं कुर्व्वन्ति यस्मिन् समागते उपस्थिते इत्यर्थः सुहृद इति शेषः। वा गन्धध्वनेस्तु सुखानुवर्त्तित्वात्।) सुखम्। इति मेदिनी॥ (यथा, छान्दोग्योपनिषदि ४।१०।५।
"प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति स होवाच विजानाम्यहं यत् प्राणो ब्रह्म कञ्च तु खञ्च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणञ्च हास्मै तदाकाशञ्चोचुः"॥ "तमेवमुक्तवन्तं ब्रह्मचारिणं ते ह्यग्नय ऊचुः यद्वाव यदेव वयं कमवोचाम तदेव खं ... इत्येवं खेन विशेष्यमाणं कं विषयेन्द्रियसंयोगजातसुखाभिवर्त्तितं स्यान्नीलेनेव ... उत्पलं रक्तादिभ्यः। यदेव खं ... तदेव च कं सुखमिति जानीहि एवञ्च ... विशेष्यमाणं खं भौतिकादचेतनात् ... स्यान्नीलोत्पलवदेव"॥ इति भाष्यम्॥ कचते दीप्यते मस्तकोपरि शोभते इति भावः। बध्यते ग्रथ्यते कराभ्याम्। कच् बन्धने डः।) केशः। इति धरणी॥

क, पुं (कचति दीप्यते स्वेन ज्योतिषा ज्योतिर्म्मयत्वात कच्+डः।) ब्रह्मा (यथा, भागवते ३।१२।५१।
"एवं युक्तकृतस्तस्य दैवं चावेक्षतस्तदा।
कस्य रूपमभूद्द्वेधा यत्कायमभिचक्षते॥)
विष्णुः। (यथा महाभारते। १३। विष्णोर्नामकथने। १४९।९१।
एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्'
प्रजापतिः। यथा भागवते। ८।५।३९।
'विप्राश्च छन्दांस्यृषयो मेढ्रतः कः
प्रसीदतां नः स महाविभूतिः'॥)
दक्षः। (यथा भागवते। ९।१०।१।
"अङ्गोऽङ्गुलैकवपुमाऽम्बतोऽपकृष्टो

मारीचमाशु विशिखेन यथा कमुग्रः" ।)
कामदेवः । अग्निः । वायुः । यमः । सूर्य्यः । आत्मा । राजा । ग्रन्थिः । मयूरः । इति मेदिनी । मनः । शरीरम् । कालः । धनम् । शब्दः । इत्यनेकार्थकोषः । प्रकाशः । इत्येकाक्षरकोषः ।

कः, त्रि, सर्व्वनाम । इति विश्वः । के कि इति भाषा । (यथा विष्णुपुराणे । १ । १७ । २० ।
"शमस्ते परमात्मानं तात ! कः केन शास्यते" ।)

कंशः, पुं क्ली, कांस्यम् । पानपात्रम् । इत्यमरटीका ।

कंसः, क्ली पुं, (काम्यते काम्यते वा अनेन धातुमिति शेषः । "वृतॄवदिहनिकमिकषिभ्यः सः" । उणां । ३ । ६२ ।) मद्यादिपानपात्रम् । तत्पर्य्यायः । पानभाजनम् २ । इत्यमरः । २ । ९ । ३२ । कंसम् ३ । कांस्यम् ४ । इति तट्टीका । तैजसद्रव्यम् । स्वर्णरजतादिनिर्म्मितपात्रमात्रम् । मानविशेषः । तत्तु आढकपरिमाणम् । इति मेदिनी । (चतुःषष्टिपलात्मकाढकात्मकम् । यथा भावप्रकाशे ।
"कुडवोऽथ प्रस्थश्चाढकमत्र विपश्चितः ।
शरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैस्तथाढकः ।
भाजनं कांसपात्रञ्च चतुःषष्टिपलश्च सः" ॥
ताम्रवङ्गमिश्रितधातुविशेषः । काँसा इति भाषा । तत्पर्य्यायः । कांस्यम् २ । कंसास्थि ३ । ताम्राङ्गम् ४ । इति त्रिकाण्डशेषः । (वर्त्तुलाकारविशेषपात्रमेव । यथा शतपथब्राह्मणे । १ । ७ । ८ । ३ । ९ ।
"औदुम्बरे कंसे चमसे वा" ।)

कंसः, पुं, (कामयति पितॄन्निन्दुवर्गान् अभिभूय पापाचरणं राज्यविषयादिभोगं च । कम् + स । यद्वा कंसे पाति पालयति कंसः शासने इत्यस्मात् सः ।) विष्णुद्वेष्टृराजविशेषः । इति हेमचन्द्रः । स तु मथुराधिपतिः । यदुवंशीयोग्रसेनराजपुत्रः । श्रीकृष्णमातुलः । तेन वधः प्राप्तः । (तद्विवरणं भागवते । १० । ४४ अध्याये विशेषेण द्रष्टव्यम् । कंसनामकारणं हरिवंशे यथा,
"कस्य त्वमिति दर्षात् त्वयोक्तो मयाकापिनि ।
कंसमानादिनु ध्वंसी तव पुत्रो भविष्यति" ॥
अनयैव कंसधातुनिष्पन्नत्वमेव प्रदर्श्यते ।)

कंसकं, क्ली, (काम्यतेऽनेन चक्षुष्यादिकमिति शेषः । कम् + सः । ततो स्वार्थे कन् ।) चक्षुरौषधधातुविशेषः । स तु तुत्थकदीप्रभेदः । तत्पर्य्यायः । पुष्पकाशीशम् २ । नयनौषधम् ३ । इति हेमचन्द्रः ।

कंसकारः पुं, स्त्री, (कंसं तदाख्यधातुविशेषं करोति य । कंस + कृ + "कर्म्मण्यण्" । ३ । २ । १ । केचित्तु तच्छब्दकारमित्युक्तवन्तः ।) जातिविशेषः । काँसारि इति भाषा । तदुत्पत्तिर्यथा ।
"वैश्यो वीराङ्कणाज्ञातः कंसकोऽशस्त्रिको वणिक् ।
कंसकारः शङ्खकारो ब्राह्मणात् सम्बभूवतुः" ॥
इति ब्रह्मवैवर्त्तपुराणम् । अपि च ।
"विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः ॥
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कंसकारः षडेते शिल्पिनो वराः" ॥
इति ब्रह्मवैवर्त्तपुराणम् ।

कंसजित्, पुं, (कंसं जयति जितवान् वा कंस + जि + कर्त्तरि क्विप् ।) श्रीकृष्णः । इति शब्दमाला ॥

कंसवती, स्त्री, (कंसः भ्रातृत्वेनास्त्यस्याः । कंस + मतुप् मस्य वत्वम् । यद्वा कंस भ्रातृत्वेनाश्रयति ।) कंसभगिनी । सा उग्रसेनसुता । वसुदेवानुजपत्नी च । (यथा भागवते । ९ । २४ । २५ ।
"कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः" ॥)

कंसहा, [न्] पुं, (कंसं हन्ति हतवान् वा । कंस + हन् + क्विप् ।) विष्णुः । इति हेमचन्द्रः ।

कंसा, स्त्री (कंस + टाप् ।) कंसभगिनी । सा उग्रसेनसुता । वसुदेवानुजपत्नी च ।
(यथा भागवते । ९ । २४ । २५ ।
"कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः" ॥)

कंसारातिः, पुं, (कंसस्य अरातिः ।) विष्णुः । इत्यमरः । १ । १ । २१ ।

कंसारिः, पुं, (कंसस्य अरिः शत्रुः ।) श्रीकृष्णः । इति शब्दरत्नावली । (यथा राजतरङ्गिण्याम् । १ । ५९ ।
"साहाय्यमथमात्तो भरतारयेन मन्त्रिणा ।
सम करोच कंसारेर्मथुरां एवुभित्स्य" ॥)

कंसास्थि क्ली, (कंसस्य अस्थि । अस्थि रूपमित्यर्थः ।) कांस्यधातुः । इति त्रिकाण्डशेषः ॥

कंसोद्भवा, स्त्री, (कंसात् तैजसधातुविशेषमध्यात् उद्भवति या । यद्वा कंसात् निर्गतात् उद्भवा कंसायां उद्भवो यस्या वा । कंस + उत् + भू + अच् । कंस इव मुख्यात् उद्भवतीति केचित् ।) सुगन्धिमृत्तिकाविशेषः । तत्पर्य्यायः । आढकी २ तुवरी ३ काक्षी ४ मृत्स्ना ५ सौराष्ट्री ६ पार्व्वती ७ कालिका ८ मृत्तिका ९ सती १० । इति हेमचन्द्रः ।

कक इ ङ गमने । इति कविकल्पद्रुमः । (भ्वा-आत्म-सक-सेट् ।) इ, कङ्क्यते । ङ, कङ्कते । इति दुर्गादासः ।

कक ङ इच्छायां । गर्व्वे । चापल्ये । इति कविकल्पद्रुमः । (भ्वा-आत्म-सक-अक-च-सेट् ।) इच्छेह इच्छा । चापलं चञ्चलीभावः । ङ, ककते काकः । शठशायचक्षुषी वा इत्यादिकर्दमे । सर्व्वे धातवो दृश्यन्ते । इति दुर्गादासः ।

ककन्दः, पुं (कको गर्व्वः चापल्यं वा भवत्यस्मात् । कक + अन्दच् । यद्वा ककः गर्व्वः चापलं इच्छा वा ददातीति । कक + दा + कः ।) स्वर्णम् । इत्युणादिकोषः ।

ककुञ्जलः, पुं स्त्री (कं जलं कुजति कायति याचते इति यावत् । क + कुज् + अलच् । पृषोदरादित्वात् गुणः साधुः ।) चातकपक्षी । इति राजवल्लभः ।

ककुत् [द्] स्त्री, (क सुखं कायति प्रकाशयति वा कं कायति गायति वा । ककुत्मान् हि ककुत् पृष्ठांशस्य उन्नतमिति भावः । ककुद्मत्त्वेन याचते दर्शिता इति मन्तव्यात् । क + कु + विच् + एपोदरादित्वात् दुक्कस्य गुणाभावः ।) ककुद्विशेषः । काँकुद् इति भाषा । (यथा, अथर्व्ववेदे । ६ । ८६ । ३ । "समुद्र इव भूमीनां ककुत् मनुष्याणाम् । देवानामर्द्धभाग्भव सजातानां उत्तमो भव" ॥ स्कन्धभागः ।

यथा भागवते ५ । २५ । ७ । "ध्यायमानः सुरासुरोरगसिद्धगन्धर्व्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचनः सुललितमुखरिकामृतेनाप्यायमानः स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुकरव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो बिभर्त्ति" ।) ध्वजः । वर्हः । इति मेदिनी । (यथा ऋग्वेदे । ८ । ४४ । १६ ।
"अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्" ।)

ककुत्स्थः, पुं, (वृषरूपधरस्य देवेन्द्रस्य ककुदि तिष्ठति यः सः । ककुत् + स्था + कः ।) सूर्य्यवंशीयराजविशेषः । स तु अयोध्याधिपतिः । (पुरञ्जयनामा ।) शशादराजपुत्रः । इक्ष्वाकुराजपौत्रश्च । (येन बाहौ ककुत्स्थनामालोभि तत्कथा हरिवंशे तैतालकाः । ११ । १९—२ ।
"शशादस्य तु दायादः ककुत्स्थो नाम वीर्य्यवान् ।
इन्द्रस्य वृषभूतस्य ककुत्स्थोऽजयतासुरान् ॥
पूर्व्वं देवासुरे युद्धे ककुत्स्थस्तेन स स्मृतः ।
अनेनास्तु ककुत्स्थस्य पृथुरानेनसः स्मृतः" ॥
तथा च महाभारते १ । १ । २२९ ।
"पुत्रः ककुत्स्थः शूरो विख्यातो महायुतिः ।
अयुतो युवनाश्वस्य ककुत्स्थो विक्रमी रघुः" ।)
रामादेरप्युक्ते च ।)

ककुदः, पुं क्ली, (क सुखे उत्कर्षे वा कौति प्रकाशं प्रति धातूनामनेकार्थत्वात् कुधातुरत्र प्रकाशनार्थः अत्यन्तप्रकाशार्थश्च । कु + क्विप् तुक् च पृषोदरादित्वात् तस्य दः । यद्वा कस्य सुखस्य शरीरस्य वा कुभूमिं सुखं आकारमिति यावत् ददातीति । ककु + दा + कः । यद्वा "ककुद्यवस्थायां लोपः" । ५ । ४ । १४६ । अकारादि वा । २ । ४ । ३२ ।) प्राधान्यम् । (यथा अथर्व्ववेदे । १ । १ । १८ ।
"ऊर्द्धो विश्वदराभ्यं मध्ये ककुदादधि" ।
रघौ । ६ । ७१ ।
"इक्ष्वाकुवंश्यः ककुदं नृपाणां
ककुत्स्थ इत्याहितलक्षणोऽभूत् ।
काकुत्स्थशब्दं यत उन्नतेच्छाः
श्लाघ्यं दधत्युत्तरकोशलेन्द्राः" ॥)
राजचिह्नम् । तत्तु श्वेतच्छत्रादि । (यथा मनुः । ७ । ७ ।
"अथ स विषमदामलाला यथाविधि मूर्द्धनि
सर्व्वककुदं दत्त्वा पुत्रे निजोत्थराज्यम्" ॥)
वृषांशम् । झुँट इति भाषा । इत्यमरः । ३ । ३ । ९१ । (यथा महाभारते । १३ । १४ । ७१६-७१८ ।
"वृषकस्कन्धं कायान्तरं क्षीरोदमिव सागरम् ।
कृष्णपुच्छं महाकायं मधुपिङ्गललोचनम् ।

वज्रसारमये श्रृङ्गैर्निष्टप्तकनकप्रभे ।
शतीस्त्रैर्म्वदुरक्षायेर्रत्निरन्तमिवावनिम् ॥
जाम्बूनदेन दाम्ना च सर्व्वत समलङ्कृतम् ।
सुवक्त्रखुरनासञ्च सकर्णं सुकटीतटम् ॥
सुपार्श्वं विपुलस्कन्धं सुरूप चारुदर्शनम् ।
ककुदं तस्य चाभाति स्कन्धमापूर्य्य धिष्ठितम्" ॥)
पर्व्वताग्रभाग । इति अमरटीकायां स्वामी ॥

ककुद्मान् [त्] पुं, (ककुदस्यास्तीति । मतुप् इति "मादुपधायाश्च मतोर्वो यवादिभ्य"। ८।२।९। न अस्य वकारत्वम् ।) वृष । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । ५६ ।
"तुषारसङ्घातशिला खुराग्रै
समुल्लिखन् दर्पकलः ककुद्मान्" ॥)
पर्व्वत । इत्यमरटीकायां स्वामी ॥ (यथा, विष्णुपुराणे २ । ४ । २० ।
"ककुद्मान् पर्व्वतवर सरिन्नामानि मे शृणु" ॥)
ऋषभौषधम् । इति राजनिर्घण्टः ॥ अत्र क्वचिदप वादविषयेऽप्युत्सर्गोऽभिनिविशते इति न्यायात् वतुप्राप्तौ मतुप्प्रत्यय ॥ इति मुग्धबोधमतम् ॥ (ऊर्म्मिः । यथा, यजुर्व्वेदे । ९ । ६ ।
"ऊर्म्मिः मधुमान् ककुद्मान्" ॥)

ककुद्मती, स्त्री, (ककुदिव वृषस्कन्धवत् अतिशयितो मांसपिण्ड अस्त्यस्याम् । मतुप् । यवादित्वात् न मस्य वत्व स्त्रियां ङीप्।) कटि । इत्यमर ॥ २।६। ७४ । पाछा इति भाषा ॥

ककुन्दर,क्ली,(कस्य शरीरस्य कु भूमि नितम्बरूपप्रदेशविशेष दृणातीति । कक्+दृ+खच् मुम् च।) कुकुन्दरम् । नितम्बस्थकूपकद्वयम् । इत्यमरटीकायां रमानाथः राजनिर्घण्टश्च॥ (यथाह, याज्ञवल्क्य । ३ । ९६ ।
"कनीनिके चाक्षिकूटे शङ्खौ नीश्यपनकौ ।
कर्णौ शङ्खौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे" ॥
"सतडितमतुलचतुरश्र ककुन्दरविभागशोभी
रथाङ्गाकारसंस्थितश्च नितम्बभाग" ।
इति दशकुमारे ॥)

ककुप्, [भ्] स्त्री, (कं वातं स्कुभ्नाति विस्तारयति या । स्कुभ इति सौत्र । क्विप् । पृषोदरादित्वात् सलोपः ।) दिक् । इत्यमर ॥ १ । ३ । १ । प्रवेणी । शोभा । चम्पकमाला । इति मेदिनी ॥ शास्त्रम् । इति विश्व ॥

ककुभ, स्त्री, (कं सुखं आनन्दं स्कुभ्नाति विस्तारयति या पृषोदरादित्वात् सलोप ।) रागिणीविशेष । तस्या नामान्तरम् । कुञ्ज । तस्या लक्षणम् ।
"पीत वसाना वसन सुकेशी
वने रुदन्ती पिकनादभूना ।
विलोकयन्ती ककुभोऽतिभीता
मूर्त्ति प्रदिष्टा ककुभस्तथेयम्" ॥
इति सङ्गीतदामोदरः ॥ (दिक् । यथा भागवते । २ । ७ । २५ ।
"वक्षःस्थलस्पर्शरुग्णमहेन्द्रवाहदन्तैर्विडम्बितककुब्जुष ऊढहासम्" ॥ दक्षकन्या । सैव धर्म्मपत्नी । यथा तत्रैव । ६ । ६ । ४ ।
"भानुर्लम्बा ककुब् जामिर्विश्वा साध्या मरुत्वती" ॥)

ककुभः, पुं, (कस्य वातस्य कु भूमि स्थानं प्रकाशरूपविशेष इति यावत् भात्यस्मात् । कक्+भा+क । यद्वा कं वातं स्कुभ्नाति विस्तारयति । क+स्कुभ+कः+पृषोदरादित्वात् सलोपः ।) अर्ज्जुनवृक्ष । (यथा, चक्रपाणिदत्तसङ्ग्रहे ॥
"गोधूमककुभचूर्णं छागपयोगव्यसर्पिषा पक्वम् ।
मधुशर्करासमेतं शमयति हृद्रोगमुद्धतं पुंसाम् ॥
मूलं नागबलायास्तु चूर्णं दुग्धेन पाययेत ।
हृद्रोगश्वासकासघ्नं ककुभस्य च वल्कलम् ॥
रसायनं परं बल्यं वातजिन्मासयोजितम् ।
संवत्सरप्रयोगेन जीवेत वर्षशतं नरः" ॥)
वीणाङ्गम् । तत्पर्य्यायः । प्रसेवकः २ । इत्यमर ॥ १ । ७ । ७ ॥ वीणाप्रान्तवक्रकाष्ठम् । दण्डाग्रे शब्दगाम्भीर्य्यार्थं दारुमयं भाण्डं चर्म्मणाच्छाद्य दीयते तदित्यन्ये । वीणाच्छिलाबालवक इत्यपरे । इति भरतः ॥ रागविशेषः । इति मेदिनी ॥ (शिव । यथा महाभारते १३ । शिवसहस्रनामकीर्त्तने १० । १२ ।
"दम्यक्षकुभो वच्चो शतजिह्वः सहस्रपात" ॥)

ककुभा, स्त्री, (केन वायुना कुत्सितानि भानि नक्षत्राणि यस्याम् । टावन्तोऽपीति कश्चित् तन्न । अधिकरणकर्म्मणोश्चेति प्रसङ्गात् ।) दिक् । इत्यमरटीकायां रायमुकुटः ॥ (केन सूर्य्येण दिनप्रकाशेनेति भाव कुत्सिता भाति । भा दीप्तौ । इति धातो सुपीति क । भिदादित्वात् वा । रात्रावेवास्या माधुर्य्यस्याधिक्यमिति तात्पर्य्यार्थ ।) रागिणीविशेष । इति हलायुध ॥

ककुभादनी,स्त्री (ककुभः अर्ज्जुन इव अद्यतेऽसौ तुल्यगुणत्वात् । ककुभ+अद्+कर्म्मणि ल्युट्+स्त्रियां ङीप्।) नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

कक्क हासे । इति कविकल्पद्रुम ॥ (भ्वा-पर-अक-सेट् ।) कोपध । कक्कति । इति दुर्गादास ॥

कक्कोल, पुं स्त्री, (ककते गच्छति दिक्षु प्रकाशते इत्यर्थ तत क्विप् कक् कोलति सङ्ख्यायति कुल धातोर्ज्वलादित्वात् ण । कन्चासौ कोलश्चेति ।
"पूगकक्कोलकर्पूरलवङ्गकुसुमैः फलैरित्युक्ते" ।)
सुगन्धिद्रव्यविशेषः । काँकला इति भाषा । अस्य गुणा । कटुत्वम् । लघुत्वम् । सुगन्धित्वम् । कफवातनाशित्वञ्च । इति राजवल्लभ ॥ (यथा रामायणे ४ काण्डे ।
"वनानि च सुरम्याणि कक्कोलानां लवङ्गस्य च" ॥)

कक्कोलक,क्ली, (कक्कोलस्य+इदमर्थे स्वार्थे वा कन् । शाल्मलिद्वीपान्तर्गतसप्तमवर्षपर्व्वत । तद्विवरणं विष्णुपुराणे २ अंशे ४ अध्याये द्रष्टव्यम्" ॥)
गन्धद्रव्यविशेषः । काँकला इति ख्यातम् । तत्पर्य्याय कोलकम् २ कोषफलम् ३ । इत्यमर ॥ कृतफलम् ४ कटुकफलम् ५ वैष्णम् ६ स्थूलमरिचम् ७ कक्कोलम् ८ माधवोचितम् ९ मालम १० कटफलम ११ मरिचम् १२ । अस्य गुणा । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वक्त्रजाड्यहरत्वम् । दीपनत्वम । पाचनत्वम् । रुचिकारित्वम । कफवातरोगनाशित्वञ्च । इति राजनिर्घण्ट ॥ ("कक्कोलकं लवङ्गञ्च तिक्तं कटुकफापहम् ।
लघूष्णमास्य वक्त्रक्लेददौर्गन्ध्यनाशनम्" ॥
इति सुश्रुत ॥)

कक्ख हासे । इति कविकल्पद्रुम ॥ (भ्वा-पर-अक-सेट् ।) कोपध । कक्खति । इति दुर्गादास ॥

कक्खट, त्रि, (कक्खति हसति य ॥ जन । इति व्युत्पत्त्यर्थ । अन्यस्तु रूढ्यर्थ । अटन् । अथवा कक्ख प्रसन्नभावं अटति कर्कशान्तर्वर्त्तित्वात् कक्ख+अट्+अच् । कठिण्या यस्ते तदा कक्खति हाट्या वर्णान् । अन्तर्णिजर्थ ।) कठिन । इत्यमरः ॥

कक्खटपत्रक, पुं, (कक्खटानि पत्राणि यस्य । कप् ।) वृक्षविशेष । भाषा । तत्पर्य्याय । पट्ट २ वाजपत्र ३ चिम ४ । इति शब्दमाला ॥

कक्खटी, स्त्री, (कक्खति भूकर्षणेन वर्णान् । अन्यत्रापि दृश्यत इति शकादिभ्योऽटन् । गौरादित्वात ङीष् ।) खटिका । खडी इति तत्पर्य्याय । वर्णलेखा २ कठिनी ३ खग्नी ४ । निकाविशेष ॥

कक्ष, पुं (कषतीति । कष हिंसायाम् "वृतॄवदिहनिकमिकषिभ्य स" । उणां ३ । ६२ । स ।) बाहुमूलम् । इत्यमर । २ । ६ ।
काक् बगल इति च भाषा ॥ (यथा, महाभारते ४ । ६ । १ ।
"वैदूर्य्यरूपान् प्रतिमुच्य काञ्चना
नक्षान् स कक्षे परिरभ्य वाससा" ॥)
तृणम् । वीरुत् । इत्यमर ॥ ३ । ३ । २१८ । (यथा, मनु ७ । ११० ।
"यथोद्धरति निर्द्दाता कक्षं धान्यञ्च रक्षति" ॥
"यथा क्षेत्रे धान्यतृणादिकयो ... धान्यानि अवाकत्ता रक्षति तृणादिकञ्चोद्धरति इति तट्टीकायां कुल्लूकभट्टः ॥) शुष्कवनम् । धरणी ॥ (यथा, माघ । २ । ४२ ।
"प्रक्षिप्योदर्च्चिषं कक्षे शेरते तेऽभिमारुतम्"
कक्ष । (यथा महाभारते ।१। १४६ । २२ ॥
"कक्षघ्न शिशिरघ्नश्च महाकक्षे बिलौकस ।
न दहेदिति चात्मानं यो रक्षति स जीवति" ॥
बिलौकसो महाकक्षे वृहत्कक्षे इत्यर्थ ॥) वनम् । पापम् । इति हेमचन्द्र ॥ इति रुद्र ॥ (यथा महाभारते १ पर्व्वणि । २२१ । ३ ।
"अयमग्निर्दहन् कक्षमित आयाति भीषण"
भित्ति । पार्श्वः । इति भरतधृतानयः ॥ (यथा, रामायणे । ५ । ५ । २५ ।
'तमः वानरसिंहस्य क्रममाणस्य सागरम् ।
कक्षान्तरगतो वायुर्जीमूत इव गर्ज्जति' ॥)

कक्षरुहा, स्त्री, (कक्षे कक्षे जलप्राये रोहति इति कक्ष+रुह्+क । अस्या अनूपजातत्वात्तथात्वम् ।) नागरमुस्ता । इति राजनिर्घण्टः ॥

सादीयमाद्य विशिष्टेन यथा कमुच ”।)
कामदेव । अग्नि । वायु । यमः । सूर्य्यः । आत्मा । राजा । ग्रन्थिः । मयूरः । इति मेदिनी । मन । शरीरम् । कालः । धनम् । शब्दः । इत्यनेकार्थकोषः । प्रकाशः । इत्येकाक्षरकोषः ॥
क, त्रि, सुखनाम । इति रिक्थ । के क्रि इति भाषा । (यथा विष्णुपुराणे । १ । १७ । २० ।
“कस्त्वं महतामाम तात । क केन शास्यते ”।)
कंसः, पुं क्ली, कंस । पानपात्रम् । इत्यमरटीका ॥
कंस क्ली पुं, (कामयति काम्यते वा अनेन धातुभिरिति शेषः । “वृतृवदिहनिकमिकषिभ्यः सः” उणां । ३ । ६२ ।) मद्यादिपानपात्रम् । तत्पर्य्यायः । पानभाजनम् २ । इत्यमर । २ । ९ । ३२ । चषकम् ३ । कांस्यम् ४ । इति तट्टीका । तैजसद्रव्यम् । स्वर्णरूप्यादिनिर्म्मितपात्रमात्रम् । मानविशेष तत्तु आढकपरिमाणम् । इति मेदिनी । (चतुःषष्टिपलात्मकाढकरूपम् । यथा मानप्रकाशे ।
“शरावोऽष्टपल तद्वत् ज्ञेयमत्र विचक्षणैः ।
शरावाभ्यां भवेत् प्रस्थश्चतुःप्रस्थैस्तथाढकः ।
भाजनं कांसपात्रञ्च चतुःषष्टिपलश्च सः ”।
ताम्रत्रपुमिश्रितधातुविशेषः काँसा इति भाषा । तत्पर्य्यायः । कांस्यम् २ । कंसास्थि ३ । ताम्राद्धम् ४ । इति त्रिकाण्डशेषः । (वतुलाकारगभीरपात्रभेदः । यथा शतपथब्राह्मणे । १४ । ८ । ४ । १ ।
“औदुम्बरे कंसे चमसे वा” ।)
कंसः, पुं, (कामयति पित्रादिबन्धुवर्गान् अभिभूय पापात्मा राज्यविषयादिभोग वा । कम् + स । यद्वा कंसे शास्ति प्रभून् कंस शासने इत्यस्मात् सः ।) विष्णुद्वेष्टासुरविशेषः । इति हेमचन्द्रः । स तु मथुराधिपराजः । यदुवंशीयोग्रसेनराजपुत्रः । श्रीकृष्णमातुलः । तेन वधः प्राप्तः । (एतद्विवरणं भागवते । १० । ४४ अध्याये विशेषेण द्रष्टव्यम् । कंसनामकारणं हरिवंशे यथा,
“कश्च त्वमिति यथार्थं यथोक्तो मनोकामिनि ।
कंसकंसादिदुःश्रुती तव पुत्रो भविष्यति ।
अतएव कंसनामाभिधेयमेव प्रचक्ष्यते ।)
कंसकः, क्ली, (कांस्यमिवेन चक्षुर्भ्यामादिकमिति शेषः । कम् + सः । ततो स्वार्थे कन् ।) चक्षुरौषधधातुविशेषः । स तु धात्वालम्बिनभेदः । तत्पर्य्यायः । पुष्पकासीसम् २ । नेत्रौषधम् ३ । इति हेमचन्द्रः ॥
कंसकारः, पुं, स्त्री, (कंस कांस्यपात्रादिकं करोति यः । कंस + कृ + “कर्म्मण्यण्” । ३ । २ । १ । कैश्चित् तान्तवकारभिन्नः ।) जातिविशेषः । काँसारि इति भाषा । तस्योत्पत्तिर्यथा ।
“वैश्यां तां ब्राह्मणात्तस्मात् कंसकारो मणिकारौ च ।
कंसकारशङ्खकारौ ब्राह्मणात् सम्बभूवतुः ” ।
इति ब्रह्मवैवर्त्तपुराणम् । अपि च ।
“विश्वकर्म्मा च शूद्रायां वीर्य्याधानं चकार सः ।
ततो बभूवुः पुत्राश्च नवैते शिल्पकारिणः ।
मालाकारः कर्म्मकारः शङ्खकारः कुविन्दकः ।
कुम्भकारः कंसकारः षडेते शिल्पिनो वराः ”।
इति ब्रह्मवैवर्त्तपुराणम् ।
कंसजित्, पुं, (कंस जयति जितवान् वा कंस + जि + कर्त्तरि क्विप् ।) श्रीकृष्णः । इति पुराणम् ।
कंसवती, स्त्री, (कंसः भ्रातृत्वसम्बन्धेनास्त्यस्याः । कंस + मतुप् मस्य वत्वम् । यद्वा कंस आत्मत्वेनास्त्यस्याः ।) कंसभगिनी । सा उग्रसेनसुता । वसुदेवानुजपत्नी च । (यथा भागवते । ९ । २४ । २५ ।
“कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः ”।)
कंसहा, [न्] पुं, (कंस हन्ति हतवान् वा । कंस + हन + क्विप् ।) विष्णुः । इति हेमचन्द्रः ।
कंसा, स्त्री, (कंस + टाप् ।) कंसभगिनी । सा उग्रसेनसुता । वसुदेवानुजपत्नी च ।
(यथा भागवते । ९ । २४ । २५ ।
“कंसा कंसवती कङ्का शूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः ”।)
कंसारातिः, पुं, (कंसस्य अरातिः ।) विष्णुः । इत्यमरः । १ । १ । २१ ।
कंसारिः, पुं, (कंसस्य अरिः शत्रुः ।) श्रीकृष्णः । इति शब्दरत्नावली । (यथा राजतरङ्गिण्याम् । १ । ५९ ।
“साहाय्यकार्य्यमाहूतो जरासन्धेन बन्धुना ।
सम रुरोध कंसारेर्मथुरां प्रभुभिर्बलैः ” ।)
कंसास्थि क्ली, (कंसस्य अस्थि । अस्थि रूपमित्यर्थः ।) कांस्यधातुः । इति त्रिकाण्डशेषः ।
कंसोद्भवा, स्त्री, (कंसात् तैजसधातुविशेषसम्बन्धात् उद्भवति या । यद्वा कंसादाः तिष्ठन्त्यः उद्भवा कंसादी उद्भवो यस्या वा । कंस + उत् + भू + अच् । कंस इव शुभ्रत्वात् उद्भवतीति केचित् ।) सुगन्धिमृत्तिकाविशेषः । तत्पर्य्यायः । आढकी २ तुवरी ३ काची ४ मृत्स्ना ५ सौराष्ट्री ६ पार्वती ७ कालिका ८ पर्पटी ९ सती १० । इति हेमचन्द्रः ।
कक ह ठ गत्ये । इति कविकल्पद्रुमः । (भ्वा-आत्म-सक-सेट् ।) ह ककि कङ्कते । ठ कङ्ग्ते । इति दुर्गादासः ।
कक उ इच्छायां । गर्व्वे । चापल्ये । इति कविकल्पद्रुमः । (भ्वा-आत्म-सक-अक-च-सेट् ।) इच्छेह इच्छा । चापल्यं चञ्चलीभावः । उ ककते काकः । सहस्थ्यवक्तो वा स्यादित्यर्थः । गर्व्वे केचिन्न पठन्ते । इति दुर्गादासः ।
ककन्द, पुं (ककौ सम्पत्यामस्य वा भवकसात् । कक + अन्दच् । यद्वा कक गर्व्वं चापल्यं इच्छां वा ददातीति । कक + दा + ड ।) नृपः । इत्युणादिकोषः ।
ककुञ्जल, पुं स्त्री, (क जलं कूजति आहूयते वा येन इति यावत् । क + कुज् + अलच् । पृषोदरादित्वात् नुम् ।) चातकपक्षी । इति शब्दार्णवः ।
ककुत् [द्] स्त्री, (क सुखं कायति शब्दयति वौ प्रतिपादयतीति यावत् । दृष्टान्तं हि ककुत् सहस्रस्य शुभसम्बन्धं बिभर्ति इति भाव । ककुदीनस्य पालन दृष्टत्वा इति भावः । क + कु + क्विप् + पृषोदरादित्वात् कस्य तुगागमश्च ।) वृषाङ्गविशेषः । माँडेर झुँटि इति भाषा । (यथा अथर्व्ववेदे । ६ । ८६ । ३ । ‘समाकृत् सुमनो ककुत् मनुष्याणाम् । देवानामर्द्धभागसि त्वमको समो भव” ।) प्रधानम् ।
यथा भागवते ५ । २५ । ७ “धार्य्यमाण सुरासुरोरगसिद्धगन्धर्व्वविद्याधरमुनिगणैरनवरतमदमुदितविकृतविह्वललोचन सुललितमुखरिकामृतेनाप्याय्यमान स्वपार्षदविबुधयूथपतीनपरिम्लानरागनवतुलसिकामोदमध्वासवेन माद्यन्मधुव्रतव्रातमधुरगीतश्रियं वैजयन्तीं स्वां वनमालां नीलवासा एककुण्डलो हलककुदि कृतसुभगसुन्दरभुजो भगवान् माहेन्द्रो वारणेन्द्र इव काञ्चनीं कक्षामुदारलीलो बिभर्त्ति’ ।) श्रेष्ठ । वरः । इति मेदिनी । (यथा, ऋग्वेदे । ८ । ४४ । १६ ।
“अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम्” ।)
ककुत्स्थः, पुं, (वृषरूपधरस्य इन्द्रस्य ककुदि तिष्ठति य सः । ककुत् + स्था + क ।) सूर्य्यवंशीयराजविशेषः । स तु अयोध्याधिपतिः । (पुरञ्जयनामाय ।) शशादराजपुत्रः । इक्ष्वाकुराजपौत्रश्च । (येन चासौ ककुत्स्थनामाभूत् तत् कथा हरिवंशे तेनोक्ता । ११ । १९—२० ।
“शशादस्य तु दायादः ककुत्स्थो नाम वीर्य्यवान् ।
इन्द्रस्य वृषभूतस्य ककुत्स्थोऽजयतासुरान् ।
पूर्व्वं देवासुरे युद्धे ककुत्स्थस्तेन स स्मृतः ।
अनेनास्तु ककुत्स्थस्य पृथुराश्व स्मृतः ” ।
तथा च महाभारते ३ । १ । २०९ ।
“युवा कुवलयाश्वः सुतो विश्वगश्वो महामतिः ।
कतुषो युवनाश्वश्च ककुत्स्थो विक्रमो रघुः” ।)
श्यामदेहविशेषे त्रि ।)
ककुदः, पुं क्ली, (क सुखं उत्कर्षं वा कौति प्रकाशयति धातूनामनेकार्थत्वात् कुधातुश्च प्रकाशनार्थः अस्मत्प्रकाशार्थेन । कु + क्विप् तुक् च पृषोदरादित्वात् तस्य द । यद्वा कस्य सुखस्य शरीरस्य वा कुभूमि भूतं आकारमिति यावत् ददातीति । कक + दा + क । यद्वा “ककुदस्त्रावस्थायां लोपः” । ५ । ४ । १४६ । अष्टाध्यायी । २ । ४ । ३१ ।) प्राधान्यम् । (यथा अथर्व्ववेदे । १० । १ । १८ ।
‘उद्धा विश्वरूपस्य ककुदस्य ककुन्नदधि’ ।
रघुः । ६ । ७१ ।
“इक्ष्वाकुवंश्यः ककुदं नृपाणां
ककुत्स्थ इत्याहितलक्षणोऽभूत् ।
काकुत्स्थशब्दं यत उन्नतेच्छा
श्लाघ्यं दधत्युत्तरकोशलेन्द्राः ” ।)
राजचिह्नम् । तत्तु श्वेतच्छत्रादि । (यथा रघौ । ३ । ७० ।
“अथ स विषयव्यावृत्तात्मा यथाविधि सूनवे
नृपतिककुदं दत्त्वा यूने सितातपवारणम् ” ।)
वृषाङ्गम् । झुँटि इति भाषा । इत्यमरः । ३ । ३ । ९१ । (यथा महाभारते । १६ । १४ । ३६—३८ ।
“ददर्श तत्र कान्तम् गौरीरिव भास्करम् ।
हययन्त्र महाकायं सप्तद्विपसमन्वितम् ।

वज्रसारमये प्रकोष्ठैर्निरस्तकनकप्रभे ।
सुतीक्ष्णैर्मेदुरक्षोदैर्विलिखन्तमिवावनिम् ॥
आलूनदेन दाम्ना च सम्यक् समवरुद्धकम् ।
सवल्गदुरुमाश्च सुकर्णं सुकटीतटम् ॥
सुपार्श्वं विपुलस्कन्धं सुरूपं चारुदर्शनम् ।
ककुदं यस्य चाभाति स्कन्धमापूर्य धिष्ठितम्" ॥)
पर्व्वताग्रभागः । इति अमरटीकायां स्वामी ॥

ककुद्मान् [त्] पुं (ककुदस्यास्तीति । मतुप् इति "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" । ८।२।९ । न मस्य वकारत्वम् ।) वृषः । इति हेमचन्द्रः ॥ (यथा, कुमारे । १ । ५६ ।
"तुषारसङ्घातशिलाः खुराग्रैः
समुल्लिखन् दर्पकलः ककुद्मान्" ।)
पर्व्वतः । इत्यमरटीकायां स्वामी ॥ (यथा, विष्णुपुराणे २ । ४ । २७ ।
"ककुद्मान् पर्व्वतवरः सरिन्नामानि मे शृणु" ।)
ऋषभौषधम् । इति राजनिर्घण्टः ॥ अत्र क्वचिदम्वार्थविषयेऽप्युत्सर्गोऽभिनिविशते इति न्यायात् मतुप्रान्तो मतुप्रत्ययः । इति मुग्धबोधमतम् ॥ (ऊर्म्मि । यथा, यजुर्व्वेदे । ८ । ६ ।
"ऊर्म्मि प्रतूर्त्ति ककुद्मान्" ।)

ककुद्मती, स्त्री, (ककुदिव स्वस्कन्धवत् अतिशयितो मांसपिण्डः अस्त्यस्याम् । मतुप् । यवादित्वात् न मस्य वत्वं स्त्रियां ङीप् ।) कटिः । इत्यमरः । २।६ । ७४ । पाछा इति भाषा ॥

ककुन्दर,क्ली,(कस्य शरीरस्य कु भूमिं नितम्बरूपावयविशेषं दृणातीति । कक+दृ+खच् मुमश्च ।) कुकुन्दरम् । नितम्बकूपकद्वयम् । इत्यमरटीकायां रमानाथ राजनिर्घण्टश्च ॥ (यथाह, याज्ञवल्क्यः । ३ । ९६ ।
"कर्णीनिके चाक्षिकूटे शङ्खपीकर्णपत्रकौ ।
कर्णौ शङ्खौ भ्रुवौ दन्तवेष्टावोष्ठौ ककुन्दरे" ॥
"सहितमहाक्षयुरश्च ककुन्दरविभागशोभी
रथाङ्गाकारसंस्थितश्च नितम्बभागः" ।
इति दशकुमारे ।)

ककुप्, [भ्] स्त्री, (कं वातं स्कुभ्नाति विस्तारयति या । स्कुभ इति सौत्रः । क्विप् । पृषोदरादित्वात् सलोपः ।) दिक् । इत्यमरः ॥ १ । ३ । १ ॥ प्रवेणी । शोभा । चम्पकमाला । इति मेदिनी ॥ शास्त्रम् । इति विश्वः ॥

ककुभ, स्त्री, (कं सुखं आनन्दं स्कुभ्नाति विस्तारयति या पृषोदरादित्वात् सलोपः ।) रागिणीविशेषः । तस्या ध्यानान्तरम् । कुञ्ज । तस्या लक्षणम् ।
"पीतं वसाना वसने सुकेशी
वने रुदन्ती पिकनाददूना ।
विलोकयन्ती ककुभोऽतिभीता
मूर्त्तिः प्रदिष्टा ककुभाभिधेयम्" ॥
इति सङ्गीतदामोदरः ॥ (दिक् । यथा भागवते । २ । ७ । २५ ।
"यद्बाणपातपरिमर्द्दितसिन्धुवाहूर्त्तैविडम्बितककुभूप ऊरुद्धासम्" ॥ दक्षकन्या । सैव धर्म्मपत्नी । यथा तत्रैव । ६ । ६ । ४ ।
"भानुर्लम्बा ककुब् जामिर्विश्वा साध्या मरुत्वती" ॥)

ककुभ, पुं, (कस्य वातस्य कु भूमिं स्थानं प्रकाशरूपविशेषं इति यावत् भात्यस्मात् । कक+भा+कः । यद्वा कं वातं स्कुभ्नाति विस्तारयति । क+स्कम्भ+कः+पृषोदरादित्वात् सलोपः ।) अर्ज्जुनवृक्षः । (यथा, चक्रपाणिसङ्ग्रहे ॥
"गोधूमककुभचूर्णं छागपयोगव्यसर्पिषा पक्वम् ।
मधुशर्करासमेतं शमयति हृद्रोगमुद्धतं पुंसाम् ॥
मूलं नागबलायास्तु चूर्णं दुग्धेन पाययेत् ।
हृद्रोगश्वासकासघ्नं ककुभस्य च वल्कलम् ॥
रसायनं परं बल्यं वातजिन्मासयोजितम् ।
संवत्सरप्रयोगेण जीवेत् वर्षशतं नरः" ॥)
वीणाङ्गम् । तत्पर्य्यायः । प्रसेवकः २ । इत्यमरः ॥ १ । ७ । ७ ॥ वीणाप्रान्तवक्रकाष्ठम् । दण्डाधःप्रदेशगाम्भीर्यार्थं दारुमयभाण्डं यत्सम्बध्यते तदित्यन्ये । वीणाभिनालावयवे इत्यपरे । इति भरतः ॥ रागविशेषः । इति मेदिनी ॥ (शिवः । यथा महाभारते १३ । शिवसहस्रनामकीर्त्तने १७ । १३० ।
"ककुद्मी ककुभो वज्री शतजिह्वः सहस्रपात्" ।)

ककुभा स्त्री, (केन वायुना कुत्सितानि भानिमच्छत्यस्याम् । टापप्यपीति कथितं तत्र । अधिकरणकर्म्मणोर्बाहुलकात् ।) दिक् । इत्यमरटीकायां रायमुकुटः ॥ (केन सूर्येण दिनप्रकाशेनेति भावः कुत्सिता भाति । भा दीप्तौ । इति धातोः सुपीति कः । भिदाद्यङ् वा । रात्रावेवास्याः माधुर्य्यस्य विकासमिति तात्पर्य्यार्थः ।) रागिणीविशेषः । इति हलायुधः ॥

ककुभादनी,स्त्री,(ककुभं अर्ज्जुनमिव अद्यतेऽसौ तुल्यगुणत्वात् । ककुभ+अद+कर्म्मणि ल्युट्+स्त्रियां ङीप् ।) नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

कक्क हासे । इति कविकल्पद्रुमः । (भ्वा०-पर०-अक०-सेट् ।) कोपधः । कक्कति । इति दुर्गादासः ॥

कक्कोल, पुं स्त्री, (ककते गच्छति दिशि प्रकाशते इत्यर्थः ततः क्विप् कक्कोलति सञ्जायति कुल धातोः ज्वलादित्वात् णः । कक् धामो कोलश्चेति ।
"पूगकक्कोलकर्पूरलवङ्गसुमनफलैरिवार्चितः" ।)
सुगन्धिद्रव्यविशेषः । काँकला इति भाषा । अस्य गुणाः । कटुत्वम् । तीक्ष्णत्वम् । सुगन्धित्वम् । कफवातनाशित्वम् । इति राजवल्लभः ॥ (यथा रामायणे २ काण्डे ।
"वनानि च सुरम्याणि कक्कोलानां तथैव च" ॥)

कक्कोलक,क्ली, (कक्कोलस्य+इदमर्थे स्वार्थे वा कन् । भ्रमरोन्निदीपान्तगतसप्तमलयपर्व्वते । तदिदत्य विष्णुपुराणे २ अंशे ४ अध्याये द्रष्टव्यम्" ।) गन्धद्रव्यविशेषः । काँकला इति ख्यातः । तत्पर्य्यायः कोलकम् २ कोषफलम् ३ । इत्यमरः ॥ स्थूलफलम् ४ कटुकफलम् ५ देयम् ६ सूक्ष्ममरिचम् ७ कक्कोलम् ८ माधवोचितम् ९ कालम् १० कटफलम् ११ मरिचम् १२ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वक्त्रजाड्यहरत्वम् । दीपनत्वम् । पाचनम् । रुचिकारित्वम् । कफवातरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥
("कक्कोलकं लवङ्गञ्च तिक्तं कटुकपाकपाचनम् ।
मधुरश्लेष्मघ्नं वक्त्रक्लेददौर्गन्ध्यनाशनम्" ॥
इति सुश्रुतः ॥)

कक्ख हासे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) कोपधः । कक्खति । इति दुर्गादासः ॥

कक्खट, त्रि, (कक्खति हसति च । प्रफुल्लमुखो भवेत् । इति श्रुतपाठः । अन्यस्तु यथा । कक्खं अटन । अथवा कक्खं प्रसन्नभावं अटति अत्यति कर्कशान्तर्वर्तित्वात् कक्ख+अट्+अच् । यदा कठिन्या वसते तदा कक्खति छाया प्रकाशयति वर्णान् । अन्तर्भिंशर्थः ।) कठिनः । इत्यमरः ॥

कक्खटपत्रक, पुं (कक्खटानि प्रकाशान्वितानि पत्राणि यस्य । कप् ।) वृक्षविशेषः । घाट इति भाषा । तत्पर्य्यायः । मङ्गः २ वाजमूल ३ शाखि ४ चिम ५ । इति शब्दमाला ॥

कक्खटी स्त्री, (कक्खति भूरूपेण प्रकाशयति वर्णान् । अचायन्तर्णिषु प्रकारिभ्योऽटन् गौरादित्वात् ङीष् ।) खटिका । खडी इति भाषा । तत्पर्य्यायः । वर्णलेखा २ कठिनी ३ खटी ४ । इति त्रिकाण्डशेषः ॥

कक्ष, पुं, (कषतीति । कष हिंसायां "वृतृवदिहनिकमिकषिभ्यः सः" । उणा ३ । ६२ । इति सः ।) बाहुमूलम् । इत्यमरः । २ । ६ । ७९ ॥ काख् वगल इति च भाषा ॥ (यथा, महाभारते ४ । ६ । १ ।
"वदर्थ्यरूपान् प्रतिमुच्य काञ्चना
नथान स कक्षे परिगृह्य वाससा" ॥)
तृणम् । वीरुत् । इत्यमरः ॥ ३ । ३ । २१८ । (यथा, मनुः ७ । ११० ।
"यथोद्धरति निर्द्दाता कक्षं धान्यञ्च रक्षति" ॥
"यथा क्षेत्रे धान्यतृणादिकयोः सञ्जातयोरपि धान्यानि लवनकर्त्ता रक्षति तृणादिकञ्चोद्धरति" ।
इति तट्टीकायां कुल्लूकभट्टः ॥) शुष्कतृणम् । इति धरणी ॥ (यथा, माघ । २ । ४२ ।
"प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम्" ॥)
कच्छः । (यथा महाभारते । १ । आस्तीकपर्व्वणि । १४६ । १२ ।
"कक्षान् शिशिरप्रख्य मत्काक्षे विलोकसः ।
न दहेदिति चात्मानं यो रक्षति स जीवति" ॥
विलोकसो महाकक्षे छन्नकक्षे इत्यर्थः ॥) गुल्मवनम् । पापम् । इति हेमचन्द्रः ॥ अरण्यम् । इति रुद्रः ॥ (यथा महाभारते १ । खाण्डवदहनपर्व्वणि । २३१ । ३ ।
'अयमग्निर्दहन् कक्षमित आयाति भीषणः' ॥)
भित्तिः । पार्श्वः । इति भरतधृतरुद्रः ॥ (यथा, रामायणे । ५ । ५ । २५ ।
'तस्य चान्तरसितस्य कक्षमादाय सागरम् ।
कक्षान्तरगतो वायुर्जीमूत इव गर्ज्जति" ॥)

कक्षरुहा, स्त्री, (कक्षे कच्छे जलप्राये रोहति इति । कक्ष+रुह्+क । अस्याः जलप्रधानात्वात् तथात्वम् ।) नागरमुस्ता । इति राजनिर्घण्टः ॥

कक्षा, स्त्री, (कष हिंसायां + स टाप् च ।) इति रज्जुः । काञ्ची । गेहप्रकोष्ठकः ।
(यथा, भागवते ३ । १५ । २७ ।
"तस्मिन्नतीत्य मुनयः षडसज्जमानाः
कक्षाः समानवयसावथ सप्तमायाम्" ॥)
भित्तिः । साम्यम् । रथभागः । अन्तरीयपश्चिमाञ्चलम् । परिधानवस्त्रस्य पृष्ठतो निहिताञ्चलम् । उद्याहिनी । इति हेमचन्द्रः ॥ (काछा काँचा काँचल इत्यादि भाषा ॥ यथाह योगियाज्ञवल्क्यः ।
"परिधानाद्बहिः कक्षा निबद्धा ह्यासुरी भवेत्" ॥)
"वामे पृष्ठे तथा नाभौ कक्षात्रयमुदाहृतम् ।
एभिः कक्षैः परीधत्ते यो विप्रः स शुचिः स्मृतः" ॥
इति स्मृतिः ॥
स्पर्द्धापदम् । इति मेदिनी दन्त्य ॥ कच्छा । हस्तिमध्यदेशबन्धनरज्जुः । इत्यमरटीकायां भरतः ॥ क्षुद्ररोगविशेषः । तस्य लक्षणं यथा,—
'बाहुपार्श्वांसकक्षेषु कृष्णस्फोटां सवेदनाम् ।
पित्तप्रकोपसम्भूतां कक्षामित्यभिनिर्दिशेत्' ॥
इति माधवकरः ॥ तच्चिकित्सा यथा,—
"कक्षाञ्च गन्धनाम्नीञ्च चिकित्सति चिकित्सकः ।
पैत्तिकस्य विसर्पस्य क्रियया पूर्ब्बमुक्तया" ॥
इति भावप्रकाशः ॥

कक्षापटः, पुं, (कक्षाकारः हस्तिरज्जुतुल्यः पटोऽस्य ।) कौपीनम् । इति हलायुधः ॥ (कक्षायाः गृहप्रकोष्ठकस्य पटः इति विग्रहे गृहभित्तिश्च पटः ॥)

कक्षावान्, [त्] पुं, (कक्षा अन्तर्वत्नि साम्यं वा विद्यते यस्य । कक्षा + मतुप्, मस्य वः ।) मुनिविशेषः । इति हेमचन्द्रः ॥

कक्षावेक्षकः, पुं, (कक्षायाः अवेक्षकः यद्वा कक्षा वनोपवनादिकं राजान्तःपुरं वा अवेक्षते इति । अव + ईक्ष + ण्वुल् ।) शुद्धान्तपालः । उद्यानपालः । रङ्गाजीवः । कविः । विटः । द्वाःस्थः । इति मेदिनी ॥

कक्षोत्था, स्त्री, (कक्षात् अकक्षायदेशात् उत्तिष्ठति जायते या । कक्ष + उत् + स्था + कः टाप् च ।) भद्रमुस्ता । इति राजनिर्घण्टः ॥

कक्ष्य, क्ली, (कक्षायै साम्याय भवम् । कक्षा + यत् ।) पयःक्षिकाद्युक्तकटोरा । इति मिताक्षरा । निक्षिर वाटी इति भाषा ॥ (त्रि, कक्षापूरकः । यथा, ऋग्वेदे ५ । ४४ । ११ ।
"श्येन आसामदितिः कक्ष्यो मदो
विश्ववारस्य यजतस्य मायिनः" ॥)

कक्ष्या, स्त्री, (कक्षे भवा । कक्ष + शरीरावयवात् + यत् टाप् च ।) कक्षरज्जुः । काछदड़ी इति ख्याता । चर्म्मरज्जुः । इत्यन्ये । इति भरतः ॥ गजमध्यबन्धनचर्म्मरज्जुः । इति सारसुन्दरी ॥ तत्पर्य्यायः । दूष्या २ वरत्रा ३ । इत्यमरः । २।८।४२। कक्षा ४ दूष्या ५ दूष्या ६ कक्षा ७ । इति सट्टीका । हर्म्म्यादिप्रकोष्ठः । राजगृहादेर्वेष्टनावच्छिन्नो देशः । (महल इति भाषा । यथा रामायणे । २ । २० । ११ ।
'प्रविश्य प्रथमां कक्ष्यां द्वितीयायां ददर्श सः ।
ब्राह्मणान् वेदसम्पन्नान् वृद्धान् राज्ञाभिसत्कृतान्' ॥)
काञ्ची । इत्यमरः । ३।३।१५७ । अन्तःपुरमिति सभूतिः ॥ (यथा, कुमारे ७ । ७० ।
'कान्तानि पूर्ब्बं कमलासनेन
कक्ष्यान्तराण्यद्रिपतेर्विवेश' ॥)
सादृश्यम् । उद्योगः । अङ्गुलिका । उत्तरीयवस्त्रम् । इति हेमचन्द्रः ॥ गुञ्जा । इति शब्दरत्नावली ॥

कख ङ म हासे । इति कविकल्पद्रुमः ॥ (भ्वा पर अक सेट ।) एदित् घटादि इति वोपदेवः । पाणिनीयमते तु एदित्त्व न तेन अकखीत् अकाखीत् इति स्यात् ।) न कखयति ए अकखीत् । इति दुर्गादासः ॥

कख्या, स्त्री, (कखति हसतीव प्रकाशते शोभते । कख् + यत् + स्त्रियां टाप् ।) कक्षा । हर्म्म्यादिप्रकोष्ठः । इति शब्दरत्नावली ॥

कग ङ म क्रियायाम् । क्रियासामान्ये । इति कविकल्पद्रुमः ॥ (भ्वा पर सक अक च सेट । घटादि एदित् इति वोपदेवः । नेदित् इति पाणिनिः । अकगीत् अकागीत् ।) तेन न कगयति । ए अकगीत् । क्रियामात्रे । कगति लोकाः गच्छन्ती त्यर्थः । इति दुर्गादासः ॥

कङ्कः, पुं, (कङ्कते उद्गच्छति इति । ककि गतौ । कक + अच् + इदित्वान्नुम् ।) पक्षिविशेषः । काक इति भाषा । तत्पर्य्यायः । लोहपृष्ठः २ । इत्यमरः । २ । ५ । १९ ॥ खरप्रवदनः ३ खरः ४ रणालङ्करणः ५ मरः ६ आमिषप्रियः ७ । इति राजनिर्घण्टः ॥ अरिष्टः ८ कणपुरः ९ क्षितिपादः १० लोहपृष्ठकः ११ । इति जटाधरः ॥ दीर्घपादः १२ दीर्घपात् १३ । इति शब्दरत्नावली ॥ (यथा भागवते ३ । १ । २१ ।
"कङ्कप्रकटश्रेन्भासभासकवर्हिणः" ।) यमः । क्षत्रियः । इति मेदिनी ॥ युधिष्ठिरराजः । इति विराटपर्व्व ॥ (यथा, महाभारते । ४ । ६ । १४ ।
"इहागमन्तु मे ज्ञानपदाः समागता
कङ्को यथाहं विषये प्रभुस्तथा" ।
शाल्मलिद्वीपान्तर्गतपर्व्वतवर्षपर्व्वतः । तद्विवरणं विष्णुपुराणे २ अंशे ४ अध्याये द्रष्टव्यम् । क्षत्रियः । इति शब्दमाला ॥ कंसासुरभ्राता । स तु उग्रसेनपुत्रः । (यथा, भागवते ९ । २४ । २४ ।
"कंस सुनामा न्यग्रोधः कङ्कः शङ्कुः सुहूस्तथा" ॥)
महाराजचूतः । इति राजनिर्घण्टः ॥

कङ्कटः, पुं (कं देहं कटति आवृणोतीति । क + कट + अच् । अथवा-ककि लौल्ये इति कङ्कते चाञ्चल्येन गच्छति याति अचिरस्थायित्वात् ककि + अटन् ।) (कवच । इत्युणादिकोषः ॥ प्रतिसरस्तेनामरस्य ॥ (यथा, रघु । ७ । ५९ । "अर्द्धाथितैः कङ्कटभेदिभिश्च" ॥)

कङ्कटकः पुं, (कङ्कट + स्वार्थे कन् ।) सन्नाहः । इत्यमरः । २ । ८ । ६४ । साञोया इति भाषा ॥

कङ्कण क्ली, (कं शुभं कणतीति । क + कण शब्दे + कर्म्मणि अच् पृषोदरादित्वात् णत्वम् ।) हस्ताग्रस्थितवस्त्राभरणम् । तत्पर्य्यायः । करभूषणम् २ ॥ इत्यमरः २ । ६ । १०८ ॥ कौतुकम् ३ । इति शब्दरत्नावली ॥ (यथा, भागवते ६ । १६ । ३ ।
"मृणालगौरं शितिवाससं स्फुरत्
किरीटकेयूरकटिचकङ्कणम्" ॥)
हस्तसूत्रम् । मण्डनम् । शेखरम् । इति विश्वः ॥

कङ्कणी, स्त्री, (ककि गतौ घञ् कङ्कः तस्मिन् अणति अण शब्दे ततः अच् गौरादित्वात् ङीष् । शकन्ध्वादिवत् सन्धिः । यद्वा कं सुखं कणति इति कण + पचाद्यच् ।) किङ्किणी । क्षुद्रघण्टिका । इत्यमरटीकायां भरतः ॥

कङ्कणीका, स्त्री (चङ्क्रम्यते पुनः पुनः कणति । कण शब्दे अस्माद् यङ्लुगन्तात् "चञ्चिका कङ्कणश्च" । ४ । १८ । उणा इति ईकन् धातोः कङ्कणा देशश्च ।) क्षुद्रघण्टिका । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कङ्कत, क्ली, (कङ्कते शिरोमलं प्राप्नोतीति । ककि गतौ + अतच् ।) कङ्कतिका । इत्यमरटीकायां भरतः ॥ चिरुणी इति ख्यातम् ॥

कङ्कत, पुं, (कङ्कते भूमिं भित्त्वा उद्गच्छति झटिति गाढं गच्छति वा । ककि गतौ इति धातोः अतच् ।) हस्तः । इत्युणादिकोषः ॥ (केशप्रसाधनी कङ्कती । चिरुणीइति भाषा । यथा अथर्व्ववेदे १४ । २ । ६८ । "शमितः कङ्कत शतदन्य यः । अपास्या केश्य मलमपशीर्षण्यम् लिखात्" ॥ अल्पविषप्राणिविशेषः । यथा, ऋग्वेदे । १ । १९१ । १ ।
"कङ्कतो नकङ्कतोऽथो सतीनकङ्कत" ॥)

कङ्कतिका, स्त्री, (कङ्कते मूर्द्धजेन सम्बन्धं गच्छतीति । ककिगतौ बाहुलकादतच् । गौरादित्वात् ङीष् स्वार्थे कन् केश इति ह्रस्व । यद्वा कस्य शिरसो अङ्कः । शकन्ध्वादित्वात् सन्धिः । कङ्के षु अतति ततः क्वुन् । तत इत्वं टाप् च ।) केशप्रसाधनार्थं काष्ठादिनिर्म्मितद्रव्यम् । चिरुणी काँकुइ इत्यादि भाषा । तत्पर्य्यायः । प्रसाधनी २ । इत्यमरः । २ । ६ । १३९ ॥ कङ्कती ३ कङ्कतम् ४ प्रसाधनम् ५ । इति सट्टीका । केशमार्जनम् ६ । इति जटाधरः ॥ फणी ७ फणिका ८ पालि ९ । इति शब्दरत्नावली ॥ अस्य गुणाः । धूलीजन्तुमलकण्डुशिरोरोगनाशित्वम् । कान्तिकेशवर्द्धकेशप्रसन्नताकारित्वञ्च । इति राजवल्लभः । नागबला । इति वैद्यकम् ॥

कङ्कती स्त्री, (कङ्कते शिरोवक्षः प्राप्नोति । ककि गतौ + बाहुलकादतच् गौरादित्वात् ङीष् ।) कङ्कतिका । इत्यमरटीकायां भरतः ॥

कङ्कत्रोटः, पुं, (कङ्कात् पक्षिविशेषात् आत्मानं त्राति । कङ्क + त्रा + अटन् पृषोदरादित्वात् साधुः । यद्वा कङ्कवत् त्रोटयति कङ्क + त्रुट् + णिच् + कर्त्तरि अण् ।) मत्स्यविशेषः । काकिला इति भाषा । तत्पर्य्यायः । जलव्याघ्र २ । इति त्रिकाण्डशेषः ॥

कङ्कत्रोटि, पुं, (कङ्कस्य त्रोटिरिव त्रोटिर्मुखमस्य ।) मत्स्यविशेषः । काँकिलाः इति भाषा । तत्पर्य्यायः । जलसूचिः २ । इति जटाधरः ॥

कङ्कपत्त्र, पुं, (कङ्कस्य पक्षिविशेषस्य पत्त्रमेव पत्त्रं पक्षो यस्य ।) बाणविशेषः । इति हलायुधः ॥ (यथा रामायणे ६ । ९८ । ४ ।
"विव्यधुर्वीरसंघासे कङ्कपत्त्रैरजिह्मगैः" ॥
कङ्कस्य पक्षिविशेषस्य पत्त्रम् । यथा,
"मणिप्रभाभूषितकङ्कपत्त्रे" । रघु २ । ३१ ।)

कङ्कमाला, स्त्री (कङ्कं चापल्यं करचापल्यं मलते धारयति । ककि चापल्ये + घञ् । कङ्क + मल धृतौ । मलधातोः उपपदे कर्म्मण्यण टाप् च ।) करतालीवाद्यम् । इति शब्दरत्नावली ॥

कङ्कमुख, पुं, (कङ्कस्य मुखमिव मुखं यस्य ।) सन्दंशः । इति हेमचन्द्रः ॥ साँड़ाशि इति भाषा । (स्त्री, शल्योद्धरणार्थं यन्त्रभेदः । स तु अस्थिविलग्न शल्योद्धरणाय उपदिश्यते ।) अस्य प्रशंसा यथा,
"निर्व्वर्त्तते साध्ववगाहते च
शल्यं प्रगृह्योद्धरते च यस्मात् ।
यन्त्रेष्वतः कङ्कमुखं प्रधानं
स्थानेषु सर्व्वेष्वधिकारि चैव" ॥ सुश्रुते ॥
(त्रि, यथा रामायणे ६ । ७९ । ६९ ।
"श्वापि सिंहमुखान् बाणान् काकचङ्कमुखानपि" ॥)

कङ्कर, स्त्री, (क जलं कीर्य्यतेऽत्र । क + कॄ आधारे अप् ।) तक्रम् । इति हेमचन्द्रः ॥

कङ्कर, त्रि, (कं सुखं किरति क्षिपतीति । क + कॄ + अच् ।) कुत्सितः । इति हेमचन्द्रः ॥

कङ्करोल, पुं, (कङ्कः इव लोलः लस्य रः ।) निकोचकवृक्षः । इति शब्दचन्द्रिका ॥ काँकरोल इति ख्याता लता च ॥

कङ्कलोड्य, स्त्री, (कङ्क इव लोड्यते आलोड्यते । इति कङ्क + लोड् + ण्यत् ।) अङ्कोठम् । चटियिता चिचोड़मूल इति च भाषा । अस्य गुणाः । गुरुत्वम् । अग्निकारित्वम् । शीतलत्वञ्च । इति कश्चिद्राजवल्लभः ॥

कङ्कशत्रु, पुं, (कङ्कस्य शत्रुः । एतन्निर्यासात् कङ्कमांसकस्माद्धः अस्य तथात्वम् ।) एरण्डवृक्षः । इति शब्दचन्द्रिका ॥

कङ्कशाय, पुं, (कङ्क इव शेते । शीङ् + अच् ।) कुक्कुरः । इति शब्दमाला ॥

कङ्का, स्त्री, (कङ्कते चापल्यं गच्छति या पित्रा दीदरवशात् । ककि + अच् ।) उग्रसेनराजकन्या । सा तु वसुदेवानुजपत्नी । (यथा, श्रीभागवते । ९ । २४ । २५ ।
"कंसा कंसवती कङ्का सूरभू राष्ट्रपालिका ।
उग्रसेनदुहितरो वसुदेवानुजस्त्रियः" ॥)
गोशीर्षचन्दनम् । तद्यथा ।
"गोशीर्षं चन्दनं ख्यातं समुत्पन्नगन्धिकम् ।
कङ्का" इत्यादि शब्दमाला ॥

कङ्काल, पुं, (कं सुखं शिरो वा कालयति क्षिपतीति क + कालि + अच् ।) शरीरास्थि । इत्यमरः । २ । ६ । ६९ । समुदितशरीरास्थिसंघातः त्वङ्मांसरहितः । इति भरतः ॥ तत्पर्य्यायः । करङ्कः २ अस्थिपञ्जरः ३ । इति वैद्यकम् ॥ (यथा, सुन्दोपसुन्दोपाख्याने २ । २४ । "अस्थिकङ्काल सङ्कीर्णा भूर्बभूव" ॥)

कङ्कालमाली, [न्] पुं, (कङ्कालानां माला अस्ति अस्य शीलार्थेत्वादिनिः ।) महादेवः । इति शब्दरत्नावली ॥

कङ्कु, पुं, (कङ्कते चौर्य्यं लौल्यं वा प्राप्नोतीति । ककि गतौ + उन् ।) उग्रसेनपुत्रः । स तु कंसा सहभाता । (यथा, श्रीभागवते ९ । २४ । २४ ।
("कंस सुनामा न्यग्रोध कङ्क कङ्कुः सुहूस्तथा" ॥)
क्वचित् शङ्कुरितिपाठः ।) कङ्कुष्ठम् । इति त्रिकाण्डशेषः ॥

कङ्कुष्ठ, क्ली, (कङ्कुः तृणविशेषः तस्य समीपे तिष्ठति । कङ्क + स्था + क + षत्वम् ।) पर्व्वतीयमृत्तिकाविशेषः । तत्पर्य्यायः । कालकुष्ठम् २ विरङ्गम् ३ रङ्गदायकम् ४ रेचकम् ५ पुलकम् ६ शोधकम् ७ कालपालकम् ८ । तद्द्विधा रक्ताभं श्यामाभञ्च । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातव्रणशूलनाशित्वम् । रेचकत्वञ्च । इति राजनिर्घण्टः ॥ अपिच ।
"पीतप्रभं गुरु स्निग्धं श्रेष्ठं कङ्कुष्ठमादिमम् ।
श्यामं पीतं लघु त्यक्तसत्त्वं नेष्टं हि रेणुकम्" ॥
(इदन्तु हिमालयशिखरे जायते । यदुक्तं —
"हिमवत्पादशिखरे कङ्कुष्ठमुपजायते ।
तत्रैकं नालिकाख्यं स्यात्तदन्यदण्डकं स्मृतम्" ॥
"कङ्कुष्ठं रेचनं तिक्तं कटूष्णं वर्णकारकम् ।
कृमिशोथोदराध्मानगुल्मानाहकफापहम्" ॥)

कङ्केर, पुं, (कङ्कते भक्ष्याय लौल्यं गच्छति । ककि + एर ।) काकविशेषः । तत्पर्य्यायः । द्रारबलिभुक् २ । इति त्रिकाण्डशेषः ॥

कङ्केलि, पुं, (कं सुखं तस्मै केलिः यत्र ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥

कङ्केल, पुं, (ककि + एलच्प्रत्ययः ।) वास्तूकम् । इति शब्दमाला ॥

कङ्केल्लि, पुं, (कङ्क + बाहुलकात् एलि पृषोदरादित्वात् लत्वं ।) अशोकवृक्षः । इति त्रिकाण्डशेषः ॥

कङ्ख, क्ली, (कं सुखं खनत्यनेन । खन + बाहुलकात् डः ।) भोगः । इति शब्दमाला ॥ (क + ख । ब्रह्म । यथा छान्दोग्योपनिषदि ४ । १० । ५ ।
"प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मेति स होवाच विजानाम्यहं यत्प्राणो ब्रह्म कञ्च तु खञ्च न विजानामीति ते होचुर्यद्वाव कं तदेव खं यदेव खं तदेव कमिति प्राणञ्च हास्मै तदाकाशञ्चोचुः" ॥)

कङ्गु, स्त्री, (कं सुखं अङ्गति अङ्गयति वा अगि गतौ + ण्यन्तादस्मात् मृगय्वादित्वात् कु शकन्ध्वादित्वात् अकारस्य लोपश्च ।) पीततण्डुला । काङ्गनि इति भाषा । तत्पर्य्यायः । प्रियङ्गुः २ । इत्यमरः । २ । ९ । २० । कङ्गू ३ प्रियङ्गू ४ । इति तट्टीका ॥ (तथाचोक्तम् ।
"स्त्रियां कङ्गुप्रियङ्गू द्वे कृष्णरक्तसितातथा ।
पीता चतुर्व्विधा कङ्गुस्तासां पीता वरा स्मृता" ॥)

कङ्गुका, स्त्री, (कं सुखं अङ्गयति प्रापयति ज्ञापयति वा । अगि गतौ ण्यन्तात् मृगय्वादित्वात् कु इदित्वात् नुम् शकन्ध्वादित्वात् अलोपे सन्धिः । स्वार्थे कन् ततष्टाप् ।) कङ्गुः । अस्य गुणाः । धातुशोषणत्वम् । पित्तश्लेष्मनाशित्वम् । रूक्षत्वम् । वायुवर्द्धकत्वम् । पुष्टिकारित्वम् । गुरुत्वम् । भग्नसन्धानकारित्वञ्च । इति राजवल्लभः ॥

कङ्गनी स्त्री, (कङ्गवा नीयते कङ्गुशब्देन ज्ञायते इत्यर्थः । कङ्ग + नी + बाहुलकात् कर्म्मणि डः । गौरादित्वात् ङीष् ।) धान्यविशेषः । काङ्गनि इति भाषा । तत्पर्य्यायः । प्रियङ्गुः २ कङ्गुः ३ चीनकः ४ पीततण्डुलः ५ अत्यन्तसुकुमारः ६ । अस्याः गुणाः । मधुरत्वम् । रुचिकारित्वम् । कषायत्वम् । स्वादुत्वम् । शीतलत्वम् । वातकारित्वम् । पित्तदाहनाशित्वम् । रूक्षत्वम् । भग्नास्थिसन्धानकारित्वञ्च । इति राजनिर्घण्टः ॥

कङ्गुनीपत्त्रा, स्त्री, (कङ्गुन्याः पत्त्रमिव पत्त्रमस्याः ।) पण्यान्धाक्षम् । इति राजनिर्घण्टः ॥

कङ्गुल, पुं, (कङ्गु आतिं प्रकाशं लाति अनेन कङ्गु + ला + बाहुलकात् कृदर्थे करणे कः ।) पाणिः । इति शब्दचन्द्रिका ॥

कच रवे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट् ।) कचति । रवः शब्दः । इति दुर्गादासः ॥

कच इ बन्धे । लिपि । इति कविकल्पद्रुमः ॥ (भ्वां-पर बन्धे सक दीप्तौ अक-इदित्-सेट् ।) इ कञ्चति । इति दुर्गादासः ॥

कच ङ बन्धे । लिपि । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म बन्धे सक दीप्तौ अक-सेट् ।) ङ कचते कचते । लिट् दीप्तिः । इति दुर्गादासः ॥

कच, पुं, (कचते शोभते शिरसीति । कच् + पचाद्यच् । कच्यते बध्यते इति कच बन्धे + कर्म्मणि अप् वा ।) केशः । इत्यमरः ॥ २ । ६ । ९५ ॥ (यथा, महाभारते १ । १२८ । १९ ॥)
"कचेषु च निष्टृहीतान् निविष्टुत्य बलाद्वशी ।
भकश क्रोशतो भूमौ ह्रष्टवागुशिरोऽशकान्" ॥)
वृहस्पतिपुत्रः । (कचते दीप्यते तपःक्लेशेनेति कच् + दीप्तौ + पचाद्यच् । पुरा किल सुरासुरसंग्रामे असुराणां यानेव देवा निजघ्नुस्तांश्चासुरगुरुरुशना सञ्जीवनीविद्यया पुनर्जीवयामास । सुरगुरुर्वृहस्पतिः शुक्रविद्यानभिज्ञतया सुरान् रणनिहतान् जीवयितुं न शशाक । तद्भयभीता देवा गुरुपुत्रं कचमुपागम्य अभ्यर्थिनिर्व्विबन्धेन सन्तोष्य तं सञ्जीवनीलाभाय शुक्रसकाशं प्रेरयामासुः । कचोऽपि सुरकार्य्यसिद्धये गुरुसेवाङ्गीकृत्य विनया भक्त्या परिचर्य्यया च कार्य्यं परितोषयन् ब्रह्मचर्य्यमास्थायाधीतवान् । क्रूरप्रकृतयो दैत्याः खलु कचाभिसन्धिं विज्ञाय तं वारद्वयं निहत्यापि यदा मृत्युवशं नानयन् तदा भूयोऽपि तन्मांसादिकं लवणं कृत्वा शुक्रमेव सुरयासह भोजयामासुः शुक्रस्तु सदुहितुर्देवयान्याः सस्नेहनिर्व्वन्धातिशयेन स्वोदरगतं कचं सञ्जीवनीविद्यां प्रदायाजीवयत् । ततः प्राणमेव ज्ञात्वा कचो ऽतीवहृष्टचित्तया देवयान्या पतित्वेन अनुरुद्धो ऽपि सम्बन्धगुरुरोधात् नैव स्वीचकार । सुतरां क्रोधपरतन्त्रया तया विफलविद्यो भवेत्यभि

अप्रकोपापि त्वमपि क्षत्रियभार्य्या भविष्यसीति शप्ता देवयानी ॥ एतद्विवरणं सविस्तरं महाभारते आदिपर्व्वणि १। ७६ अध्याये द्रष्टव्यम् ॥) ग्रन्थः। शुष्कव्रणः। इति मेदिनी॥ मेघः। इति शब्दमाला॥

कचङ्गलं, क्ली, (कचस्य जलकोलाहलस्य अङ्गलम्। शकन्ध्वादित्वात् सन्धिः।) विक्रयस्थानम्। तस्य पर्य्यायः। निम्मुट २ पण्यशिरम् ३। इति त्रिकाण्डशेषः॥

कचङ्गन, पुं, (कच्यते बध्यते वेलया अथवा कचते आत्मानं वेलाभूमिं न लङ्घयतीति यावत् बाहुलकात् अङ्गलच्।) समुद्रः। इति त्रिकाण्डशेषः॥

कचपं क्ली, (कचते शोभते। "उपिकुटिदलिकचिखजिभ्यः कपन्" इति उणां ३।१४२। कच + कपन्।) तृणम्। शाकपत्रम्। इत्युणादिकोषः॥

कचपक्षः, पुं, (कचानां केशानां पक्षः समूहः।) केशसमूहः। इत्यमरः॥ २। ६। ९८॥

कचपाशः, पुं, (कचानां केशानां पाशः समूहः।) केशसमूहः। इत्यमरः॥ २। ६। ९८॥

कचमालः, पुं, (कचं कचवत् वक्रं मालते धारयतीति। कच + माल् + कर्म्मण्यण्।) धूमः। इति हारावली॥ खतमाल इति च पाठः॥

कचरिपुफला, स्त्री (कचस्य रिपुः फलमस्याः।) शमीवृक्षः। इति राजनिर्घण्टः॥

कचहस्तः, पुं, (कचानां हस्तः समूहः।) केशसमूहः। इत्यमरः॥ २। ६। ९८॥

कचा, स्त्री, (कच्यते बध्यते लौहशृङ्खलादिभिरिति यद्वा कचते शोभते राजस्थे इति।) कच + अच् + टाप्।) हस्तिनी इति मेदिनी॥ शोभा। इति शब्दरत्नावली॥

कचाकु, त्रि, (कच इव अकति वक्रं गच्छति। अक + उण्।) दुराधर्षः। दुःशीलः। इति मेदिनी॥

कचाकुः, पुं, (कच इव कचनिर्म्मितवेणीवत् अकति कौटिल्यं यथा तथा गच्छतीति अक + उण्।) सर्पः। इति मेदिनी॥

कचाटुरः, पुं, (कचवत् अटति मेघवत् शून्ये विचरतीति। कच + अट् + उरच्।) पक्षिविशेषः। डाक् इति भाषा। तत्पर्य्यायः। शितिकण्ठ २ दात्यूह ३ कालकण्ठक ४। इति त्रिकाण्डशेषः॥

कचामोदं, क्ली, (कचं आमोदयतीति आ + मुद् + णिच् + अण्।) बालकम्। इति राजनिर्घण्टः॥ बाला इति भाषा।

कचु, स्त्री, (कचते शोभते। कच + उन्।) कची। स्वनामख्यातगुल्मः। इति पुराणम्॥ मूलशाकविशेषः। यथा,—
"कच्वी दाडिमी धान्य हरिद्रा मानक कचु।
बिल्वोऽशोको जयन्ती च विज्ञेया नवपत्रिका"॥
इति तिथ्यादितत्त्वे दुर्गोत्सवतत्त्वम्॥

कचटं, क्ली, (कु कुत्सितं चटति। चट् + अच्। बाहुलकात् कोः कत्। कुत्सितम्।) जलपिप्पली। इति वैद्यकम्॥

कचरं, त्रि, (कु कुत्सितं चरतीति। कु + चर + अच्। कोः कदादेशः। अथवा चरेट।) मलिनम्। इत्यमरः॥ ३।१।५५। कुत्सितम्। इति मेदिनी॥

कचरा, स्त्री, (कु कुत्सितं चर्यते आचर्यते दत् यद्वा केन जलेन चर्यते व्यवह्रियते यत् पृषोदरादित्वात् चकारस्य द्वित्वम्।) तक्रं। इति मेदिनी॥

कच्चित्, अव्य, (कच् चित् अनयोः समाहारः। कोः कदादेशः। अथवा काम्यते इति कत् चीयते निश्चीयते यस्मात्। कम + क्विप्। चि + क्विप् ततः पृषोदरादित्वात् मस्य दकारत्वम्।) कामप्रवेदनम्। इष्टपरिप्रश्नः। इत्यमरः। ३। ४। १। यथा, "कच्चित् जीवति मे माता"॥ (तथा रघुः। ५।५। "आपद्यते न व्ययमन्तरायैः
कच्चिन्महर्षेस्त्रिविधं तपस्तत्"॥)

कच्छः, पुं, (केन जलेन छ्यति दीप्यते छाद्यते वा, उच्छृदिर् दीप्तिदेवनयोः छद् वा अन्येष्वपि इति डः। कं जलं छ्यति परिच्छिनत्ति इति वा, छो छेदने + आतोऽनुपेति कः" ३।२।३। इति कः।) अनूपप्रायस्थानम्। इत्यमरः। २।१।१०। काछाड़ इति भाषा। (यथा, किराते १२। ५४।
"कच्छान्ते सुरसरितो निधाय सेनामन्वीतः स कतिपयैः किरातवर्य्यैः"॥)
सिन्धूनां सरसाञ्च प्रान्तभागः। इति मधुः॥ जलाशयप्रान्तदेशः। इति रमानाथः। नदीपर्व्वतादिसमीपम्। इति सारः॥ (यथा महाभारते। १ सम्भवपर्व्वणि शाकुन्तले ७०। २६।
"नदीकच्छोद्भवं कान्तमुच्छ्रितध्वजसन्निभम्"॥)
तुन्नवृक्षः। इत्यमरः। २ ४।१२८ तुंद इति भाषा। परिधानाञ्चलम्। इत्यमरमेदिनीकरौ॥ काछा कोंचा कछनी इतिभाषा। शेषस्य पर्य्यायः। कक्षा २ कच्छा ३ कच्छोटिका ४। इति हेमचन्द्रः॥ कच्छटिका ५ कच्छाटिका ६। इति शब्दरत्नावली॥ नौकाङ्गम्। इति हेमचन्द्रः॥ (देशविशेषः। यथोक्तम्।
"गणेश्वरात् पूर्व्वभागे समुद्रादुत्तरे शिवे।
कच्छदेशः समाख्यातस्तन्ते श्रीशक्तिसङ्गमे"॥)

कच्छः, त्रि, (केन जलेन छूयति दीप्यते इति। छद् + बाहुलकात् डः।) जलप्रान्तः। इति नानार्थे अमरः॥

कच्छटिका, स्त्री, (कच्छं कच्छस्थानं अटति प्राप्नोति शकन्ध्वादित्वात् अलोपे सन्धिः। अट् अच् स्वार्थे कन् अत इत्वं च। यद्वा कच्छेन पश्चाद्भागस्थकच्छपविशेषेण अट्यते प्राप्यते व्याप्यते वा अट् कर्म्मणि घञ्। ततः कन् इत्वं च।) कच्छा। इति शब्दरत्नावली। काछा इति भाषा॥

कच्छपः, पुं, (कच्छं आत्मनो मुखसम्पुटं पाति रक्षति किञ्चिद्दृष्ट्वा शरीरे एव मुखसम्पुटं प्रवेशयति सम्पुटे हि कच्छशब्दः प्रसिद्धः। यद्वा कच्छे अनूपदेशे पाति आत्मानं रक्षतीति। कच्छ + पा + कर्त्तरि डः।) स्वनामख्यातजलजन्तुः। काछिम इति भाषा। तत्पर्य्यायः। कूर्म्मः २ कमठः ३। इत्यमरः॥ १।१०।२१। गूढाङ्गः ४ धराधरः ५ कच्छटः ६ पञ्चनखः ७ कठिनपृष्ठकः ८। [illegible] ९ क्रोडाङ्गः १०। इति शब्दरत्नावली॥ पञ्चगुप्त ११ गुह्य १२ पीवर १३ जलगुल्म १४। इति जटाधरः। अस्य मांसगुणाः।
वातहरत्वम्। शुक्रवृद्धिकारित्वम्। चक्षुर्हितत्वम्। बलवर्द्धनत्वम्। मेधास्मृतिकारित्वम्। पथ्यत्वम्। शोषदोषनाशित्वञ्च। तस्य चर्म्म पित्तनाशकम्। [illegible] हारकः। अस्य स्वादु वाजीकरञ्च॥ (अवतारविशेषः। यथा भागवते ८।७।१०।
"सुरासुरेन्द्रैर्भुजवीर्य्यवेपितं
परिभ्रमन्तं गिरिमङ्ग पृष्ठतः।
बिभ्रत्तदावर्त्तनमादिकच्छपो
मेनेऽङ्गकण्डूयनमप्रमेयः"॥)
नन्दीवृक्षः। इति राजनिर्घण्टः। कुवेरस्य निधिविशेषः। मल्लस्य बन्धविशेषः। इति मेदिनी॥ मदिरायन्त्रविशेषः। इति शब्दचन्द्रिका॥ (ऋषिविशेषः स तु विश्वामित्रपुत्रः। यथा हरिवंशे २७। ४०—५०॥
"विश्वामित्रस्य पुत्रास्तु देवरातादयः स्मृताः।
विख्यातास्त्रिषु लोकेषु तेषां नामानि मे शृणु॥
देवश्रवाः कतिश्चैव यस्मात् कात्यायनाः स्मृताः।
शालावत्यां हिरण्याक्षो रेणोर्जातोऽथ रेणुमान्॥
साङ्कृतिर्गालवश्चैव मुद्गलश्चेति विश्रुताः।
मधुच्छन्दादयश्चैव देवलश्च तथाष्टकः॥
कच्छपः पूरितश्चैव विश्वामित्रस्य वै सुताः।
तेषां नामानि गोत्राणि कौशिकानां महात्मनाम्"॥
नागविशेषः। यथा महाभारते १। १२३। ६८।
"कर्कोटकोऽथ सर्पश्च वासुकिश्च भुजङ्गमः।
कच्छपश्चाथ कुण्डश्च तक्षकश्च महोरगः"॥)

कच्छपिका, स्त्री (कच्छेन पातीति कच्छ + पा + डः + स्वार्थे कन्। अत इत्वं टाप् च। यद्वा कच्छाभ्यां जातानि कच्छप इव पृष्ठघटवत् दाववानि उन्नतानि यस्याः समायां कन् टापि इत्वं च।) क्षुद्ररोगविशेषः। तस्य लक्षणम्।
"ग्रथिताः पञ्च वा षड्वा दारुणाः कच्छपोन्नताः।
कफानिलाभ्यां पिडका ज्ञेया कच्छपिका बुधैः"॥
प्रमेहोपेक्षया जातदशपिडकान्तर्गतपिडकाविशेषः। तस्य लक्षणम्।
"सदाहा कूर्म्मसंस्थाना ज्ञेया कच्छपिका बुधैः"।
इति सुश्रुतः॥
("अवगाढार्त्तिनिस्तोदा महावास्तुपरिग्रहा।
श्लक्ष्णा कच्छपपृष्ठाभा पिडका कच्छपी मता"॥
इति चरके। चिकित्सा तु कच्छपीशब्दे द्रष्टव्या॥)

कच्छपी, स्त्री, (कच्छं कच्छेन वा पाति। पा + सुपीति कः। ३। २। ४। यद्वा कच्छेन पिबति। अत्र तु "पापोऽस्य न पिबते सुराशीधुरेरिति" वचनात् जातेरिति ङीष्। ४।१।६३।) कूर्म्मी। तत्पर्य्यायः। हुलि २ डुलि ३ कमठी ४। वीणाविशेषः। सा तु सरस्वतीवीणा। इत्यमरः॥ ३।३।१७१। क्षुद्ररोगविशेषः। इति मेदिनी॥ कच्छपिकारोगः। तच्चिकित्सा यथा,
"कच्छपीं स्वेदयेत् पूर्व्वं तत एभिः प्रलेपयेत्।
कल्काङ्कोलनिशाकुष्ठतालताम्रकदारुभिः॥

तां पक्कां साधयेच्छीघ्रं भिषगमलचिकित्सया”॥
इति भावप्रकाशः॥

कच्छुरुहा, स्त्री, (कच्छे रोहति या। कच्छ+रुह्+इगुपधेति क। ३।१।१३५। स्त्रियां टाप् च।) दूर्व्वा। इति जटाधरः॥

कच्छा, स्त्री, (कच पश्चाद्देशं छादयतीति। छद+णिच्+ड पृषोदरादित्वात् ह्रस्वः। टाप् च। कच्छ्याद्यतेऽनया वा।) परिधानापराञ्चलम्। इति हेमचन्द्रः॥ चीरिका। झिंझीपोका इति भाषा। वाराही। इति मेदिनी॥

कच्छाटिका स्त्री (कच्छ एव आञ्चलकारः अटन् ततः स्वार्थे कन् टाप् च।) कच्छटिका। इति शब्दरत्नावली॥

कच्छु, स्त्री, (कषति देहं। कष हिंसायां+“कषश्छ चेति”१।८६। उणां ऊ कान्तादेशश्च।) पृषोदरादित्वात् वा ह्रस्वः। रोगविशेषः। तस्य लक्षणम्।

“सूक्ष्मा बह्व्यः पिडकाः स्राववत्यः
पामेत्युक्ताः कण्डुमत्यः सदाहाः।
सैव स्फोटैस्तीव्रदाहैरुपेता
ज्ञेया पाण्योः कच्छुरुग्राम्स्फिचोश्च”॥

इति निदानम्॥ तच्चिकित्सा यथा।
“अर्कपत्ररसे पक्वं हरिद्राकल्कसंयुतम्।
नाशयेत् सार्षपं तैलं पामाकच्छुविचर्च्चिकाम्”॥
इति अर्कतैलम्॥१॥
“मनःशिलालं कासीसं गन्धाश्मा सिन्धुजन्म च।
मर्कन्दोदी शिलाभेदी शुण्ठी कुष्ठञ्च मागधी॥
वाकुचीरजनीद्वन्द्वं दन्तीमूलं हलाहलः।
एभी निम्बरसस्तैर्भिः पृथक् कर्षमितैर्भिषक्॥
कल्कीकृतैः पचेत्तैलं कटुप्रस्थद्वयोन्मितम्।
अर्कक्षीरार्कदुग्धेन पृथक् पलमितेन च॥
गोमूत्रस्याढकेनापि शनैर्मृद्वग्निना पचेत्।
अभ्यङ्गेन हरेदेतत् कच्छुं दुःसाध्यतामपि॥
पामामपि तथा कण्डूं त्वग्व्याधिविविधामयान्।
कच्छुराक्षसनामेदं तैलं हारीतभाषितम्”॥
कच्छुराक्षसनाम तैलम्॥२॥ इति भावप्रकाशः॥
(“अवल्गुजं कासमर्दं चक्रमर्दं निशायुतम्।
माणिमन्थेन तुल्यांशं मस्तुकाञ्जिकपेषितम्॥
कच्छूं कण्डूं जयत्याशु सिद्धमेतत्प्रयोगराट्॥
कोमलं सिंहास्यदलं सनिशं सुरभिजलेन पिष्टम्।
दिवसत्रयेण नियतं क्षपयति कच्छूं विलेपनतः॥
हरिद्राकल्कसंयुक्तं गोमूत्रस्य पलद्वयम्।
पिबेन्नरः कामचारी कच्छुपामाविनाशनम्॥
शोथपाण्ड्वामयहरी गुल्ममेहकफापहा।
कच्छुपामापहरी चैव पथ्या गोमूत्रसाधिता॥*॥
स्वरसेऽपि च दूर्व्वाया पचेत्तैलं चतुर्गुणम्।
कच्छुविचर्च्चिका पामा अभ्यङ्गादेव नाशयेत्”॥
इति दूर्व्वाद्यं तैलम्॥*॥
“सोमराजी हरिद्रे द्वे सर्षपारग्वधं गदम्।
करञ्जैडगजं गर्भं दत्त्वा विपाचयेत्॥
तैलं सर्षपसम्भूतं नाडीदुष्टव्रणापहम्।
अनेनाशु प्रशाम्यन्ति कुष्ठान्यष्टादशैव तु॥
नीलिकापि पुरोद्भूतगम्भीरं वातशोणितम्।
कण्डूकच्छुप्रशमनं कच्छुपामाविनाशनम्”॥
इति सोमराजीतैलम्॥*॥
इति चक्रपाणिदत्तसंग्रहः॥)

कच्छुघ्नी स्त्री, (कच्छुं हन्ति या। कच्छु+हन+टक्+ङीप्।) पटोलः। क्षुपभेदः। इति राजनिर्घण्टः॥

कच्छुर, त्रि (कच्छूरस्त्यस्य। “कच्छ्वा ह्रस्वश्चेति” र। ह्रस्वश्च। पा। ५।२।१०७। वार्त्तिक।) कच्छुरोगयुक्तः। खोसरोगी इति भाषा। तत्पर्य्यायः। पामनः २। इत्यमरः॥ २।६।५८ पुंश्चलः। इति मेदिनी॥

कच्छुरा, स्त्री (कच्छुं कण्डूरोगं राति ददातीति। आत इति क। टाप् च। पृषोदरादित्वात् ह्रस्वः पूर्व्वस्य। यद्वा कच्छूः साध्यत्वेनास्ति अस्याः ह्रस्वश्चेति कैयाच्छिन्नम्।) शूकशिम्बी। शटी। दुरालभा। इति मेदिनी॥ यवासः। इति राजनिर्घण्टः॥ वाशिराशेफ्। इति रत्नमाला॥ छोद इति भाषा॥

कच्छू स्त्री, (कषति हिनस्ति देहं “कषेश्छश्च”। इति ऊ। १।८६। उणां।) रोगविशेषः। खोस पाचड़ा इति भाषा। तत्पर्य्यायः। पाम २ पामा ३ विचर्च्चिका ४। इत्यमरः॥२।६।५६॥

कच्छूमती, स्त्री (कच्छूः साधनत्वेनास्त्यस्याः अस्त्यर्थे मतुप् ततो ङीप्।) शूकशिम्बी। इति शब्दचन्द्रिका॥

कच्छोटिका, स्त्री (कच्छ+अटन् वा कन्। अत इत्त्वं टाप् च। पृषोदरादित्वात् ओकारादेशः।) कच्छः। इति हेमचन्द्रः। काछा इति भाषा॥

कच्छोर, क्ली, (केन शिरसा शरीरेण वा क्षुभ्यते लिप्यते इति। क+क्षुर क्षेपे+कर्म्मणि घञ्।) शटी। इति रत्नमाला॥

कची,स्त्री, (कचते दीप्यते शोभते। कच् उन्। तत कचुशब्दात् ङीप्।) कन्दविशेषः। कचु इति ख्याता। तत्पर्य्यायः। वितुन्न २। इति जटाधरः॥ अस्या गुणाः। भेदकत्वम्। गुरुत्वम्। कटुत्वम्। आमवातपित्तकारित्वम्। पिच्छिलत्वञ्च। इति राजवल्लभः॥
(“कची सदा गुरुः आमवातहृत् कटुपित्तदा”। इति वैद्यकद्रव्यगुणे॥) कचु इति हिन्दीभाषा॥
“महिषासुरयुद्धेषु कचीरूपासि संभवे।
मम विघ्नविनाशाय पूजां गृह्ण प्रसीद मे”॥
इति शारदीयदुर्गापूजापद्धतिः॥

कज, इ वधे। जन्मनि। चौरधातुरयम्। इति कविकल्पद्रुमः॥ इ कञ्जति। वधो जन्म। शब्दो कमाये इति भावे क। इति दुर्गादासः॥

कज क्ली,(के जले जायते जात वा। जन+कर्त्तरि+ड।) कमलम्। इति राजनिर्घण्टः॥

कज्जल, क्ली (कु कुत्सितं जलं यस्मात् शुभ्रमपि जलं संयोगात् मलयुक्तं भवतीति यावत् यद्वा कुत्सितं उद्गतं चक्षुर्गतं जलं दूरीभूतं भवत्यस्मात्। कोः कदादेशः।) अञ्जनम्। इति हेमचन्द्रः॥ काजल इति भाषा। तत्पर्य्यायः। चोचक २। इति त्रिकाण्डशेषः॥
(“तत साकारयद्भूरि चेटीभिः कज्जलाञ्चितम्।
कस्तूरिकादिसंयुक्तं कज्जलं तैलमिश्रितम्”॥
इति कथासरित्सागरे। ४। ४७॥ तथा, भागवते ६।७।२७।
“धिग्वा विगर्हितं सद्भिर्दुष्कृतं कुलकज्जलम्”॥)

कज्जल, पुं, (कत् कुत्सितं यथा तथा जलयति आच्छादयति आतपादिकं। यद्वा कुत्सितमपि लतागुल्मादिकञ्जेति यावत् जलयति जीवयति वर्षणेनेति शेषः। कु+जल्+णिच् अच् ततो ह्रस्वः।) मेघः। इति शब्दमाला॥

कज्जलध्वज, पुं (कज्जलं ध्वज इव यस्य।) दीपः। इति त्रिकाण्डशेषः॥

कज्जलरोचक, पुं क्ली, (कज्जलं रोचयति। दीपेनोद्भासयति। कज्जल+रुच+णिच् ततोऽण् स्वार्थे कन्। ण्वुल् वा।) दीपाधारः। पिलसुज देरको इत्यादि भाषा। तत्पर्य्यायः। कौमुदीवृक्ष २ दीपवृक्ष ३ शिखातरु ४ दीपध्वज ५। इति जटाधरः॥ ज्योतिर्वृक्ष ६। इति त्रिकाण्डशेषः॥

कज्जली, स्त्री, (कु कुत्सितं जलति जीवतीति। जल+टक् ङीप् च कोः कत। यद्वा कुत्सितं रोगयुक्तम् जलयति आरोग्यं नयति। जल+णिच्+अच् गौरादित्वात् ङीष् ह्रस्वश्च। यद्वा कज्जलमिवाचरतीति कद्+जल्+क्विप्+अच् ङीष् च।) मत्स्यविशेषः। तत्पर्य्यायः। कज्जला २ अनन्ता ३ इति शब्दरत्नावली॥ मिश्रितरसगन्धकम्। (यथा
‘गन्धकेन रसं प्राज्ञः सुदृढं मर्द्दयेद्द्वयम्।
कज्जलाभो यथा स्तूतो विहाय घनचापलम्॥
दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदैः।
असौ रोगचयं हन्यादनुपानस्य योगतः”॥
इति वैद्यकरसेन्द्रसारसंग्रहः॥)

कञ्चट स्त्री (कं उद्गतं चक्षुर्जलं चक्षुरोगविशेषं ज्वालयति शोषयति नाशयतीति यावत्। ज्वल+णिच्+अच् ह्रस्वश्च।) कञ्जलम्। इति त्रिकाण्डशेषः॥

कञ्चट, स्त्री, (कच्यते दीप्यते लवादामादिभिः शोभते इति भावः। कचि+अटन्।) जलशाकविशेषः। कोंचडादाम इति भाषा। तत्पर्य्यायः। जलभूः २ शाकुली ३। इति शब्दचन्द्रिका॥ शारदी ४ तोयपिप्पली ५ शकुलादनी ६। इति रत्नमाला॥ जलतण्डुलीयम् ७। इति भावप्रकाशः॥ तस्य गुणाः। श्लेष्मकारित्वम्। धारकत्वम्। हिमत्वम्। पित्तरक्तनाशित्वम्। लघुत्वञ्च। इति राजवल्लभः॥ अपि च। विशुल्वम्। वायुहरत्वञ्च। इति भावप्रकाशः॥

कञ्चड पुं (कच्यते बध्नाति मध्यगतं मनुष्यादिजीवम्। कचि धातोरडन् बाहुलकात् इदित्वात् नुम्। कच्यते शोभते वा।) कञ्जनभेदः। तत्पर्य्यायः। कञ्चट २ काच ३ चक्रनद ४ अम्बुप ५। इति शब्दचन्द्रिका॥

कञ्चार, पुं (कं देहमात्रे अम् कच प्रकाशं न ऋच्छति प्राप्नोतीति ऋ+कर्म्मण्यण्। यद्वा कं स्पर्शं चारयति चालयति यद्वा कं जलं चारयति निजरश्मिभिरिति शेषः। कचि+णिच् अच्। कर्म्मणि उपपदे अच् वा।) सूर्य्यः। इति जटाधरः॥

लिका, स्त्री, (कच्यते वेष्ट्यते प्रकाश्यते। कचि+ण्वुल् स्त्रियां टाप् इत्वञ्च।) वेणुदारुका। कञ्ची इति भाषा। तत्पर्य्यायः। कुञ्चिका २ कुञ्चुः ३। इति शब्दचन्द्रिका॥ सुदस्फोट। इति वैद्यकम्॥

कञ्चुकः पुं, (कच्यते आमुच्यते अपकञ्चुकपर्य्यन्तं धमिनी दीप्यते प्रकाश्यते शोभते वा कच्यते आवृणोति शस्त्रनिक्षेपाखाडादिनिवारणाय। कचि+बाहुलकादुकन्।) सर्पत्वक्। सापेर खोलोस इति भाषा। तत्पर्य्यायः। निर्म्मोकः २। (यथा पञ्चतन्त्रे।१।६९।

"भोगिन कञ्चुकाविष्टा कुटिलाः क्रूरचेष्टिताः।
सुदुष्टा मन्त्रसाध्याश्च राजानः पन्नगा इव"॥)

भटादेर्वोराङ्गत्रसन्नाहः। सांजोया इति भाषा। तत्पर्य्यायः। वारबाणः २ वारवारः ३। इत्यमरः॥ (तथा हि रामायणे ६।९९।२७।

"कञ्चुकोष्णीषिणस्तत्र वेत्रझर्झरपाणयः।
उत्सारयन्तः सहसा समन्तात् परिचक्रमुः"॥)

चोलकम्। कांचलि इति भाषा। तत्पर्य्यायः। चोलः २ कञ्चुलिका ३ कूर्पासकः ४ अङ्गिका ५। वर्द्धापकस्त्रीलाकृष्टवस्त्रम्। इति हेमचन्द्रः॥ (यथाऽमरुशतके ८२।

"सख्यः किं करवाणि यान्ति
शतधा यत् कञ्चुके सन्धय"॥)

वस्त्रम्। इत्युणादिकोषः॥ (यथा भागवते ८।७।१५।

"देवाश्च सञ्जातशिखास्तनप्रभान्
धूम्राम्बरखादरकञ्चुकाननान्"॥)

कञ्चुकालुः, पुं, (कञ्चुकोऽस्त्यस्य। कञ्चुक+आलुच्।) सर्पः। इति शब्दचन्द्रिका॥

कञ्चुकी, [न्] पुं, (कञ्चुकोऽस्त्यस्येति। कञ्चुक+अस्त्यर्थे इनिः।) सर्वाङ्गरक्षकः। अन्तःपुराध्यक्षः। स तु वर्षीयसहस्रमीनां सुरक्षितां प्रेषकपुरुषान्तराः वारस्याय राज्ञा स्थापितो यो वेत्रधरो नियुक्तः। तत्पर्य्यायः। सौविदल्लः २ स्थापत्यः ३ सौविदः ४। इत्यमरः॥ २।८।८॥ (यथा रत्नावलीनाटिकायां २ अङ्के।

"नष्टं वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपा
मन्तः कञ्चुकिकञ्चुकस्य विशति त्रासादयं वामनः"॥

अस्य लक्षणमुक्तं भरतेन।
"अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः।
सर्व्वकार्य्यार्थकुशलः कञ्चुकीत्यभिधीयते"॥)

यवः। चणकः। सर्पः। इति राजनिर्घण्टः॥ विट्। जारवृक्षः। इति मेदिनी॥

कञ्चुकी, स्त्री, (कञ्चयति शरीरकान्त्यादिकं प्रकाशयति रोगादिकमुपशमयति वा। कच णिच् बाहुलकादुकन् गौरादित्वात् ङीष् जातित्वात् कलात् ङीप् वा।) ओषधिभेदः। इति मेदिनी॥ क्षीरीवृक्षः। इति रत्नमाला॥

कञ्चुलिका, स्त्री (कच्यते हृदयादङ्गान्यावृणोतीति। कचि+उलच्+स्वार्थे कन् गौरादित्वात् ङीष् ह्रस्वः। टाप् च।) कञ्चुकः। स्त्रीणामङ्गरक्षिणी। इति हेमचन्द्रः॥ कांचुलि इति भाषा॥ (यथा अमरुशतके।२२। 'ल गुम्भाति विनैव कञ्चुलिकया धत्ते मनोहारिणीम्।)

कञ्ज, क्ली, (कम् नीरोदधौ जायते सागरस्यापि मन्थनमथनात् सदृति इति सूच्यते। कम् जले जातम्। जनेः कर्त्तरि डः।) अमृतम्। पद्मम्। इति मेदिनी॥ (यथा, भागवते।८।६।३।

"विरिञ्चो भगवान् दृष्ट्वा सह शर्व्वेण तां तनुम्।
स्वच्छामरकतश्यामां कञ्जगर्भारुणेक्षणाम्"॥)

कञ्जः, पुं, (कम् के जले शिरसि च जायते। जनेर्डः।) ब्रह्मा। केशः। इति मेदिनी॥

कञ्जकः, पुं, (कञ्जते मनुष्यवत् प्रायेणोच्चारयितुं शक्नोतीति। कजि+कर्त्तरि ण्वुल्।) पक्षिविशेषः। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जजः, पुं, (कञ्जात् विष्णोर्नाभिपद्मात् जातः। जन+कर्त्तरि डः।) ब्रह्मा। इति शब्दरत्नावली॥

कञ्जनः, पुं, (कं सुखं जनयतीति। कम्+जनि+अच्।) कन्दर्पः। इति त्रिकाण्डशेषः॥ पक्षिविशेषः। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जारः, पुं, (कं जलं स्वकार्य्यत्वसलिलं जारयति शोषयति। कम् जलाति रश्मिभिराकर्षति। कजि+आरन्।) ब्रह्मा। सूर्य्यः। उदरम्। हस्ती। इत्युणादिकोषः॥

कञ्जलः, पुं, (कञ्जते उपदिष्टविषयं पठितुं शक्नोति। कजि+कलच्।) मदनपक्षी। इति शब्दचन्द्रिका॥ मयना इति भाषा॥

कञ्जारः, पुं, (कम् जलं मुखरस्यादिकं जारयति। कम्+जरः जारयति शोषयति रश्मिभिः। कम् एकार्णवजलप्रलयसलिलं जारयति योगबलेन जारयति। कं जलं जारयति शोषयति शुण्डेनेति शेषः। कम्+जॄ+णिच्+अण्। यद्वा "कञ्जिमर्दिभ्यां चित्"। इति आरन्। उणा० ३।१३७।) जठरम्। सूर्यः। विरिञ्चिः। वारणः। मुनिः। इति मेदिनी॥ (मयूरः। व्यञ्जनम्। इत्युणादिकोषः। ३।१३७॥ कम् जलं सागरं जारयति शोषयति अगस्त्यभीतस्य योगबलेन इति विग्रहे अगस्त्यमुनिः।)

कञ्जिका, स्त्री, (कञ्जते तरसा भूमिं भित्त्वा उत्पद्यते। कजि+कर्त्तरि+ण्वुल्+टाप् इत्वञ्च।) ब्राह्मणयष्टिकावृक्षः। इति शब्दरत्नावली॥ वा मनूभाटी इति भाषा॥

कट गतौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-सक-सेट्।) कटति। इति दुर्गादासः॥

कट इ गतौ। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट्-इदित्।) कण्ट्यते। इति दुर्गादासः॥

कट ई गतौ। इति कविकल्पद्रुमः॥ (भ्वा पर-सक सेट्।) कटति अकटीत् अकाटीत् चकाट। ई कट्टः इति दुर्गादासः॥

कट ए वर्षे। इति। वर्षावरणम्। कट् वर्षणम्। (भ्वा पर-सक अक च सेट्।) कटति। एदित् अकटीत् चकाट।) ए अकटीत् पटो गात्रम्। कटति मेघः। इति दुर्गादासः॥

कटः, पुं, (कटति वर्षादि वृणोति च। कट वर्षे-आवरणे च-पचाद्यच्।) करिगण्डस्थलम्। "कण्डूय-मानेन कटं कदाचित् वन्यद्विपेनोन्मथिता त्वगस्य"। इति रघुः। २।३७।) कटिदेशः। तत्पर्य्यायः। किलिञ्जकः। इत्यमरः॥ मादुर् दरमा इत्यादि भाषा। काष्ठादिरचितरज्जुः येन कुसूल वेष्ट्यते। कुसूलश्च मराइ इति टीकान्तरम्॥ इत्यरचितटाटी इतिख्याता इत्यन्ये। इति भट्टी कायां भरतः॥

(यथा भागवते।१।३।१८।

"चतुर्द्दश नारसिंह बिभ्रद्दैत्येन्द्रमूर्ज्जितम्।
ददार करजैर्वक्षस्येरकां कटकृद् यथा"॥)

अतिशयः। शरः। समयः। इति मेदिनी॥ श्मशानम्। इति धरणी॥ (यथा मनुः २।२०४।

"गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च"॥

"कटेषु तृणादिनिर्म्मितेषु" इति कुल्लूकभट्टः॥)

शवः। शवरथः। ओषधी। श्मशानम्। इति हेमचन्द्रः॥ तृणविशेषः। ताड़ा इति भाषा। इति शब्दरत्नावली॥ (यथा,—रामायणे।२।५६।२१।

"तां निष्ठितां बद्धकटां दृष्ट्वा रामः सुदर्शनाम्।
शुश्रूषमाणमेकाग्रमिदं वचनमब्रवीत्"॥

"बद्धकटां बद्धकवाटाम्" इति तट्टीका॥) समास प्रसिद्धशङ्खः। यथा,—रामायणे।६।१९।१३।

"शुकसारणयोः कटाय विकटस्य च।
हृष्यतो लोमहर्षस्य दष्टाक्षस्याब्दयो"॥)

कटः, त्रि, (कटयति प्रकाशयति क्रियामिति शेषः। कट्+णिच्+अच्।) क्रियाकारः। इति हेमचन्द्रः॥

कटकः, पुं क्ली, (कटति वर्षति अस्मिन् मेघ इति। अथवा कच्यते निर्गम्यते अस्मात् निर्झरिण्या दिभिः "कृञादिभ्यः संज्ञायां वुन्"।५।३५। उणा इति वुन्।) पर्व्वतमध्यभागः। तत्पर्य्यायः। नितम्बः २। इत्यमरः॥२।३।५॥ मेखला ३ इति भरतः॥ (यथा रघुः।१६।३१। "नार्गे पिबन्ती सा कटकान्तरेषु सैन्येषु सेना बहुधा विभिन्ना"॥) वलयः। चक्रम्। इत्यमरः॥२।६।१०७। हस्तिदन्तमण्डनम्। सामुद्रलवणम्। राजधानी। इति मेदिनी॥ नगरी। इति शब्दरत्नावली॥ सैन्यम्। इति हेमचन्द्रः॥ (यथा हितोपदेशे १।१२९। "स च दिग्विजयव्यापारक्रमेणागत्य चन्द्रभागानदीतीरे समावेशितकटको वर्तते"॥) सानुः। पर्व्वतस्य समभूभागः। इति विश्वः॥

("गिरिकूटेषु दुर्गेषु नानाजनपदेषु च।
नगारीर्षेषु देशेषु कटकेषु भवेषु च"॥
इति महाभारतम् ३।२३।१२।)

कटकी, [न्] पुं (कटकोऽस्त्यस्य अस्त्यर्थे इनिः।) पर्व्वतः। इति त्रिकाण्डशेषः॥

कटकोलः, पुं (कटति वर्षति खादति इति। कट+अच्। कटस्य निष्ठीवनरूपजलस्य कोलः घनीभावो यत्र। कुल सस्त्याने अधिकरणे घञ्।) निष्ठी वनपात्रम्। इति त्रिकाण्डशेषः॥ पिकदानी इति भाषा॥

("स्वादाम्लमल्पं प्रोक्तं कटफलं मतद्वयम्"।)

कटखादक, त्रि, (कटं हस्त्यादिकं सर्व्वमपि खादति इत्यर्थः। कट्+खाद्+ण्वुल्। सर्व्वभक्षकम्।) खादकम्। भक्षकम्। इति मेदिनी॥

कटखादक, पुं, (कटस्य आवरणस्य ख मध्यस्थित छिद्रं अत्ति। कट+ख+अद्+ण्वुल्।) काचकलस। काक। जम्बूक। इति मेदिनी॥ (कटं शवं खादतीति व्युत्पत्त्या शवखादके त्रि।)

कटङ्कटः, पुं, (कटं शवं कटति ज्वालया आवृणोतीति। कट+कट्+बाहुलकात् खच्।) अग्निः। यथा,—

"कटङ्कटाय भीमाय नमः पचपचाय च।
अघोरघोररूपाय घोरघोरतराय च"॥

इति वह्निपुराणे अग्निस्तवनामाध्यायः॥

कटङ्कटेरी, स्त्री, (कटङ्कटं वह्निं सुवर्णं तद्वान्ति मिलिता इरयति प्रापयति आपयति आत्मानं सुवर्णकान्तितुल्यपीतवर्णत्वात्। कटङ्कट+ईर गतौ+अच्। ङीप् गौरादित्वात् ङीष् वा।) हरिद्रा। इति त्रिकाण्डशेषः॥ दारुहरिद्रा। इति रत्नमाला॥

कटपू:, पुं, (कटे श्मशाने प्लवते। कट कटेन वा प्लवते। पुङ् गतौ क्विप् निपातनात् दीर्घः। पा। ३।२। १७। "क्विव्वचिप्रच्छिश्रिद्रुप्रुज्वां दीर्घोऽसम्प्रसारणञ्च।" उणा २। ५७।) महादेवः। राक्षसः। विद्याधरः। यक्षदेवनः। इति मेदिनी। कीटः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कटभङ्गः पुं, (कटानां शस्यानां ओषधीनामिति यावत् हस्तेन भङ्गः छेदनम्। कटस्य सैन्यसघस्य भङ्गः यस्मात् शेनो सैन्यभङ्गस्तु राजमरणहेतुरेव।) शस्यानां हस्तच्छेदः। हात दिया शस्य छेंडा कुड़न इत्यादि भाषा। नृपात्ययः। राजविनाशः। इति मेदिनी॥

कटभी, स्त्री, (कटवद् भाति। कट+भा+कः। गौरादित्वात् ङीष्।) ज्योतिष्मती लता। इत्यमरः। २।४।१५०॥ नया पटिकी इति भाषा। अपराजिता। वृक्षभेदः। तत्पर्य्यायः। शाभिकः २ शौण्डी ३ पाटली ४ किणिही ५ मधुरेणुः ६ शुद्धश्यामा ७ कैडर्य्य ८ श्यामला ९। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। गुल्मविषाध्मानशूलदोषनाशित्वम्। वातकफाजीर्णरोगशमताकारित्वम्। श्वेता चेत् गुणदुःसलत्व। "तन्त्रज्ञ सद्गुण श्रेयविशेषात स्पर्शसत"। इति राजनिर्घण्टः॥ (यथा भावप्रकाशे।

"कटभी तु प्रमेहार्शोनाडीव्रणविषक्रिमीन्।
हन्त्युष्णा कफकण्ठघ्नी कटुरुष्णा च कीर्त्तिता"॥)

वृक्षभेदः। कोंटाश्रिरीष इति ख्यातः। इति रत्नमाला॥

कटमालिनी, स्त्री, (कटानां क्रियाद्योषधीनां माला साधनत्वेनास्ति अस्याः अस्त्यर्थे इनि ततो ङीप्। मदिरामादकतायास्तु क्रियाद्योषधीगणप्रभवत्वात्। "मद्यादौ किण्वमाक्षिवत्"। इति वाभ्वाख्यसूत्र १ अध्यायः।) मदिरा। इति शब्दमाला॥

कटम्बः, पुं, (कटतीति "कृकदिकडिकटिभ्योऽम्बच्"। उणा। ४। ८२। इति अम्बच् धातूनामनेकार्थत्वात् अत्र वादनेऽपि।) वाद्यभेदः। (कटते आव्रियते शरनेनेति करणे अम्बच।) वाणः। इत्युणादिकोषः॥

कटम्बरा स्त्री, (कटं गुणातिशयम् रुणोति धारयतीति। वृ+अच्+टाप् च।) कटुकी। इत्यमरः। २। ४। ८५॥ कटम्भरा इति च पाठः॥

कटम्भरः, पुं, (कटं गुणातिशयं बिभर्त्ति। भृ+धारणपोषणयोः संज्ञायां भृतॄवृजिधारिसहितपिदमीति खच् मुम् च पा ३।२।४६।) श्योनाकवृक्षः। इति राजनिर्घण्टः॥ कटभीवृक्षः। इति वैद्यकम्॥

कटम्भरा, स्त्री, (कटं बिभर्त्ति या। भृ+खच् मुम् टाप् च।) रामबला। इत्यमरः। २।४।१५२। प्रसारणी। गन्धभादालिया इति भाषा। रोहिणी। कटकी इति भाषा। हस्तिनी। कलम्बिका। गोधा। वर्षाभूः। मूर्व्वा। इति मेदिनी॥

कटप्रू, पुं, (कटः उत्कटो प्रश्नो युद्धकण्डुरस्य।) भीमसेनः। इति त्रिकाण्डशेषः॥

कटशर्करा, स्त्री, (कटः गन्ध शिष्टरसत्वात् शर्करेव दस्याः।) गाङ्गेरुकीलता। इति शब्दावली॥ गाटा इति ख्याता।

कटाकु पुं, (कटति छन्देन जीविका निर्व्वाहयति। कट छन्दजीवने "कटिकषिभ्यां काकु" उणा ३। ७७। इति काकुः।) पक्षी। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कटाक्ष, पुं, (कटावतिक्रयितौ अक्षिणी यत्र, कट+अक्षिन्+अच्। यद्वा कटं गण्डं अक्ष्नाति व्याप्नोति। अक्षु व्याप्तौ+अच् कर्म्मण्यण् वा।) अपाङ्गदर्शनम्। आडचक्षे देखन इति भाषा। इत्यमरः। २।६।९४॥ (यथा मेघदूते ३७। "आमोक्ष्यन्ति त्वयि मधुकरश्रेणिदीर्घान् कटाक्षान्"॥)

कटायन, स्त्री, (कटस्य ख्यातिनामस्थानमस्य अयनमुत्पत्तिस्थानम्।) वीरणम्। इति शब्दरत्नावली॥

कटारः, पुं, (कट कन्दर्पमदं ऋच्छति। कट+ऋ+अण्।) नागरः। कामी। इति शब्दमाला।

कटाह, पुं, (कट उष्णतादिकं आहन्ति निवारयतीति। कट्+आ+हन्+ड।) कूर्म्मकर्परः। द्वीपभेदः। (कट कटुगन्धादिकं आहन्ति तैलादिकटुगन्ध आहन्यतेऽत्र वा।) तैलादिपाकपात्रम्। (कटं शवं आहन्यतऽसौ जायमानविषाणासमहिषीशावकः। इति मेदिनी॥ (कट पापी आहन्यतेऽत्र।) नरकः। इति शब्दावली॥ कर्प्परः। इति जटाधरः॥ कूपः। इति शब्दरत्नावली॥ (यथा सिद्धान्तकौमुद्याम्। ५।१।५२। "प्रस्थं सम्भवति माक्षिकं कटाहं")

कटिः, पुं, स्त्री (कट्यते वस्त्रादिना त्रियतेऽसौ सर्व्वधातुभ्य इन् इति कट्+इन्।) शरीरावयवविशेषः। काकालि इति भाषा। तत्पर्य्यायः। कटः २ श्रोणिफलकं ३ श्रोणी ४ ककुद्मती ५। इत्यमरः। २। ६। ७४॥ श्रोणिफलम् ६ कटी ७ श्रोणि ८।

इति तट्टीका॥ कलत्रम् ९ कटीरम् १० काञ्चीपदम् ११। इति हेमचन्द्रः। करभ १२। इति जटाधरः॥ अत्र पूर्व्वद्वय कटिपार्श्वं। इति भरतः॥ (यथा, भागवते। ३।१५।२०।

"येषां वृहत कटितटाः स्मितशोभिमुख्यः"।
इत्यात्मनां न रज आदधुरुत्स्मयाद्यैः"॥)

कटित्र, स्त्री (कटिः त्रायते इति। कटि+त्रै+क।) रसना। कटिवस्त्रम्। कटिवन्ध। इति मेदिनी कर हेमचन्द्रौ॥ (यथा भागवते। ६।१६।३०।

"मृणालगौरं शितिवाससं स्फुरत्
किरीटकेयूरकटित्रकङ्कणम्"।)

कटिप्रोथः, पुं, (प्रोथतीति प्रोथृ+पर्य्याप्तौ पुंसीति घः। कट्याः प्रोथः मांसपिण्डः।) कटिदेशस्थमांसपिण्डम्। गुदयुक्ता पोंदेर पेंशी इति भाषा। तत्पर्य्यायः। स्फिक् २। इत्यमरः। २। ६। ७५॥ पुतः ३ कटीप्रोथ ४। इति रभसः॥ कटिः ५ प्रोथः ६। इति केचित्॥ पूतः ७। इति भरतः॥

कटिरोहकः, पुं, (कटि हस्तिपश्चाद्भाग रोहतीति। कटि+रुह्+ण्वुल्।) हस्तिपश्चाद्भागरोहकः। इति शब्दमाला॥

कटिल्लक, पुं, (कटति लतायां प्रकाशते उत्पद्यते वा। कट+बाहुलकादिल्लप्रत्यय। तत स्वार्थे कन्।) कारवेल्लः। इत्यमरः। करला इति भाषा॥

कटिशीर्षक, पुं, (कटि शीर्षमिव। संज्ञायां कन्।) कटिदेशः। इति हलायुधः॥

कटिशूल, पुं (कटिस्थं शूलं शूलरोगः।) कटिदेशस्थशूलरोगः। तस्यौषध यथा।

"रजनीकदलीक्षारस्तेष सिन्धुविनाशनः।
कुलत्थ भागमेकन्तु पथ्याभागद्वय तथा॥
उष्णोदकेन सपीता कटिशूलविनाशनम्"।
इति गारुडे १८८ अध्यायः॥
("गुडूच्यारग्वधश्चैव क्वाथमेषां विपाचयेत।
गुग्गुलुचूर्णेन संयुक्तं पिबेज्जङ्घाकटिग्रहे॥
इति शार्ङ्गधरः।)

कटिशृङ्खला, स्त्री, (कट्यां धार्य्या शृङ्खला। यद्वा कट्याः शृङ्खला।) किङ्किणी। कटिधार्य्यक्षुद्रघण्टिका। इति शब्दावली॥

कटिसूत्र, स्त्री, (कट्यां धार्य्यं सूत्रम्। शाकपार्थिवादित्वात मध्यपदलोपः।) कट्यलङ्कारविशेषः। इति हलायुधः। चन्द्रहार गोट इत्यादि भाषा॥ (यथा, भागवते। ५। ३। ४। "स्फुटकिरणप्रवरमणिमयमुकुटकुण्डलकटककटिसूत्रहारकेयूरनूपुराद्यङ्गभूषणविभूषितस्त्विकुपदस्वष्टमपत्यो ऽधना इव"॥)

कटी [न्] पुं, (कट गण्डस्थल प्राशस्त्येनास्यास्तीति प्रशस्यर्थे इनि।) हस्ती। इति त्रिकाण्डशेषः॥

कटी स्त्री (कट्यते कटुरसेन व्याप्यतेऽसौ। कट्यते आव्रियते वस्त्रादिना। सर्व्वधातुभ्य इन्। कटात् ओणिवचन इति गौरादिषु पाठात् वा ङीष्। पा ४।१।४१।) पिप्पली। श्रोणिदेशः। इति मेदिनी॥ (यथा, महाभारते।१। वकवधपर्व्वणि १६४।२७।

"सञ्जेन च कटीदेशे ग्रह्य वाससि पाण्डव ।
लङ्घ्नो द्विगुण चक्रे सवन्त भैरव रवम ’ ॥)

कटीतल्म्, क्ली, (कट्याः तलमासदमस्य । अस्य कटि देशे धारणप्रसिद्धत्वात् ।) न्युङ्गारङ्क । इति त्रिकाण्डशेष । बाका खाँडा इति भाषा ॥

कटीर, स्त्री, (कष्यते धाव्यतेऽसौ वाससेति शेष । कट+"कृगृशृवृटिपटिशौटीभ्य ईरन्" । उणा । ४ । ३ ॥ इति ईरन् ।) कटिः । इति हेमचन्द्र ॥

कटीर, पुं, (कष्यते आव्रियतेऽसौ अथवा कट्यते गम्यते अनेन । कर्म्मणि करणे वा ईरन् । उणा । ४ । ३ ।) जघनम । कन्दर । इत्यमरादिकोष ॥ कटिः । इति जटाधर ॥

कटीरक, पु, (कटीर एव स्वार्थे संज्ञायां वा कन ।) नितम्बः । इति त्रिकाण्डशेष ॥

कटु स्त्री, (कटति वदाचारमावृणोतीति । कट+उन् ।) अकार्य्यम । इत्यमर । ३ । ३ । २५ ॥ दूषणम् । इति विश्व ॥

कटु, पुं, (कटति तीक्ष्णतया रसना मुखं वा आवृणोति यद्वा कटति वर्षति चक्षुर्मुखनासादिभ्यो जल स्रावयतीति । कट+उन । "कटिवटिभ्या च" । उणा । १ । ८ ।) रसविशेष । इत्यमरः । १ । ५ । ८ । झाल इति भाषा ॥ अस्य गुणाः कण्ठजदोषशोषमन्दाग्नि श्वित्ररोगनाशित्वम् । अस्य बहुसेवने भ्रमदाह त्वम् । वीर्य्यबलापहत्वञ्च । इति राजनिघण्ट ॥ अपि च । आरोग्यपित्ताग्निवायुकारित्वम । कृमि कण्डूविषरोगकफश्लेष्ममेदःस्थौल्यनाशित्वम् । लघु त्वम । अतिशयभक्षणे श्रमक्लैब्यतानुशोषातिदा हकारित्वञ्च । इति राजवल्लभ ॥ (तथा चोक्तम् । भावप्रकाशे ।

"कटुरुष्णः कान्तिमेदोघ्नो कफवातविनाशनः ।
वातपित्तकृन्मेधा शोषी पाचनरोचनः' ॥
अस्य लक्षणं यथाह वाभट ॥
"उद्वेजयति जिह्वाग्रं कुर्व्वंश्चिमिचिमां कटु ।
स्रावयत्यक्षिनासास्यं कपोलौ दहतीव च ' ॥
गुणकर्म्माणि च यथा, तत्रैव ।
' कटुर्गलामयोदर्द्दकुष्ठालसकशोफजित् ।
व्रणावसादनः स्नेहमेदःक्लेदोपशोषणः ॥
दीपनः पाचनो रुच्यः शोधनोऽन्नस्य शोषणः ।
छिनत्ति बन्धान् स्रोतांसि विवृणोति कफापहः ॥
कुरुते सोऽतियोगेन तृष्णां शुक्रबलक्षयम् ।
मूर्च्छामाकुञ्चनं कम्पं कटीपृष्ठादिषु व्यथाम्" ॥ ७ ॥

कटुको रसो वक्त्रं शोधयति अग्निं दीपयति भुक्तं शोषयति, घ्राणमास्रावयति चक्षुर्विरेचयति, स्फुटीकरोतीन्द्रियाणि अलसकश्वयथूपचयोदर्द्दाभिष्यन्दस्नेहस्वेदक्लेदमलानुपहन्ति, रोचयत्यशनं कण्डूर्विनाशयति व्रणानवसादयति, क्रिमीन् हिनस्ति मांसं विलिखति शोणितसङ्घातं भिनत्ति बन्धांश्छिनत्ति, मार्गान् विवृणोति, श्लेष्माणं शमयति, लघुरुष्णो रूक्षश्च । स एवंगुणोऽप्येक एवात्यर्थमुपयुज्यमानो विपाकप्रभावात् पौंस्त्वमुपहन्ति रसवीर्य्यप्रभावान्मोहयति, ग्लापयति सादयति, कर्षयति, मूर्च्छयति, नमयति तमयति, भ्रमयति, कण्ठं परिदहति शरीरतापमुपजनयति, बलं क्षिणोति, तृष्णां जनयति वाय्वग्निबाहुल्याद् भ्रम मद दवथु कम्प तोद भेदैश्चरणभुज पार्श्वपृष्ठप्रभृतिषु मारुतजान् विकारानुपजनयति ॥ इति चरक ॥) चम्पकवृक्ष । इति शब्द चन्द्रिका ॥ चीनकर्पूरः । पटोल । कट्वीलता । इति राजनिघण्ट ॥

कटु, स्त्री, (कष्यते कटुत्वेनास्वाद्यते इति । कट्+उ) कटुकी । इत्यमरः ॥ प्रियङ्गुवृक्षः । रा जिका । इति विश्वमेदिन्यौ ॥

कटु, त्रि, (कटति परमनांसीत्यनेन क्षुधार्त्ता गच्छतीति । कट्+उ ।) मत्सर । तीव्रा । इत्यमरः । ३।३।६५ ॥ (यथा महाभारते १ । पौष्यपर्व्वणि ३ । ५५ । 'आरतिक्तकटुरूक्षतीक्ष्णविपाकि भक्षणाच्चक्षुरुपहतोऽन्धो बभूव"।) कटुरसयुक्त । (यथा, भागवते । ३ । २६ । ४२ ।
"कषायो मधुरस्तिक्तः कट्वम्ल इति नैकधा ।
भौतिकानां विकारेण रस एको विभिद्यते" ॥)
सुगन्धि । इति मेदिनी ॥ (यथा, रघु ५।४८।
"समक्षमुद्दीरितकटुप्रवाह
मसह्यमाघ्राय मद तदीयम्" ॥)
अप्रिय । इति त्रिकाण्डशेष ॥ (यथा, रघु ६।८५
"इति क्रमशायोगमीतयस्त न भीरा
ययथकटु न्यपाग्रामेववाक्य विशेष" ॥)
दुर्गन्ध । इत्यमरटीकायां स्वामी ॥

कटुक, क्ली, (कटुकानां कटुरसानां त्रय कटौ संज्ञायां कन् ।) त्रिकटु । इति मेदिनी ॥ यथा शुण्ठी पिप्पली मरिचञ्च ॥ (कटु एव । स्वार्थे कन् । इति विग्रहे वाच्यलिङ्ग । अप्रियम् । यथा, महाभारते । २ । अनुद्यूतपर्व्वणि ७७ । १६ ।
' दुर्य्योधनस्य कर्णस्य कटुकान्यभिभाषताम् ।
इति सर्व्वमिदं राजन्नाकुलं प्रतिभाति मे ' ॥)

कटुक, पु, (कटुरेव कटुक स्वार्थे कन् ।) कटुरसः । (यथा, सुश्रुते "यो जिह्वाग्रं बाधते उद्वेगं जनयति शिरो गृह्णीते नासिकाञ्च स्रावयति स कटुको रस ' ॥) पटोल । इति राजनिघण्टः ॥ सुगन्धि तृणम । इति शब्दरत्नावली ॥ कुटजवृक्ष । अर्क वृक्ष । इति शब्दचन्द्रिका ॥ राजसर्षप । इति हारावली ॥

कटुकन्द, पुं, (कटु कन्दोमूलमस्य ।) शिग्रुवृक्षः । आर्द्रकम । लशुनम । इति मेदिनी ॥

कटुकफल स्त्री, (कटुक फलमस्य ।) कक्कोलकम् । इति राजनिघण्ट ॥

कटुका, स्त्री, (कटु+संज्ञायां कन् । स्त्रियां टाप ।) कुटचवृक्ष । लताविशेषः । कट्की इति भाषा । तत्पर्य्याय । अशोकी २ तिक्ता ३ रोहिणी ४ तिक्त रोहिणी ५ चक्राङ्गी ६ मत्स्यपित्ता ७ शकुला ८ । शकुलादनी ९ मत्स्यी १० शतपर्व्वा ११ चित्राङ्गी १२ मर्मभेदिनी १३ अशोकरोहिणी १४ कृष्णा १५ कृष्णभेदी १६ महौषधी १७ कट्वी १८ अञ्जनी १९ कांडरुहा २० कटु २१ कटुरोहिणी २२ केदारकटुका २३ अरिष्टा २४ पाली २५ । इति राजनिघण्ट ॥ कटम्भरा २६ कटुम्भरा २७ अशोका २८ । इत्यमर टीका च ॥ (अस्या गुणा ।
"कटुका कटुका पाके तिक्ता रूक्षा हिमा लघु ।
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा ।
प्रमेहश्वासकासास्रदाहकुष्ठकृमिप्रणुत्" ।
इति शब्दार्थचिन्तामणिधृतवैद्यकवचनम् ॥)
अतिकटुत्वम् । तिक्तत्वम् । शीतत्वम् । पित्तास्र दाहज्वरश्वासशोषकफाश्मरीनाशित्वम् । रुचिका रित्वञ्च । इति राजनिघण्टः । सारकत्वम् । रूक्ष त्वम् । कफनाशित्वञ्च । इति राजवल्लभः ॥ ताम्बूली । इति शब्दचन्द्रिका ॥ कुष्ठिकावृक्ष । इति रत्न माला ॥

कटुकालाबुः पुं (कटुका अलाबु ।) कटुतुम्बी । इति रत्नमाला ॥ तितलाउ इति भाषा ॥

कटुकी, स्त्री, (कटु+स्वार्थे कन् । गौरादित्वात् ङीष ।) कटुका । इति मेदिनीशब्दरत्नावल्यौ । कट्की इति भाषा ॥ (अस्या गुणा ।
"कटुकी तु सरा रूक्षा कफपित्तज्वरापहा" ।
इति वैद्यकपथ्यगुणग्रन्थे ॥
"कट्वी तु कटुका पाके तिक्ता रूक्षा हिमा लघु ।
भेदिनी दीपनी हृद्या कफपित्तज्वरापहा ।
प्रमेहश्वासकासास्रदाहकुष्ठकृमिप्रणुत्" ॥
इति भावप्रकाशः ॥)

कटुकीटक, पुं, (कटुः तीक्ष्णः दंशनेन दुःखप्रदत्वात कीट । ततः स्वार्थे कन् ।) मशक । इति जटाधरः ॥

कटुक्वाण, पुं (कटुः कर्कशः क्वाणः क्वणन शब्दो यस्य ।) टिट्टिभपक्षी । इति हेमचन्द्रः ॥

कटुग्रन्थि स्त्री, (कटुस्तीव्रो ग्रन्थिर्मूलमस्य ।) पिप्पलीमूलम् । शुण्ठी । इति राजनिघण्ट ॥

कटुचातुर्जातक, क्ली, (चतुर्भ्यो जातक ततः स्वार्थे अण् ततः कर्म्मधारयः ।) एलात्वक्पत्रकमरिचा नाञ्चतुष्टयम् । इति राजनिघण्ट ॥

कटुच्छद, पुं, (कटुश्छदः पत्र यस्य ।) तगरवृक्ष । इति शब्दरत्नावली ॥

कटुतिक्तक, पु, (कटुश्चासौ तिक्तश्चेति । स्वार्थे कन् ।) शणवृक्ष । इति राजनिघण्टः ॥ भूनिम्ब । इति वैद्यकम् ॥

कटुतिक्तका, स्त्री, (विपाके कटुः स्वादे तिक्ता । स्वार्थे कन् । अत इत्वम् ॥) कटुतुम्बी । इति शब्दरत्नावली ॥

कटुतुण्डी, स्त्री, (कटु तीव्र तुण्डमस्याः ।) लताभेद । कटुतराइ इति ख्याता । तत्पर्य्याय । तिक्ततुण्डी २ तिक्ताख्या ३ कटुका ४ कटुतुण्डिका ५ विम्बी ६ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । अम्ल वान्तिविकारशोधकरक्तपित्तनाशित्वम् । सदा पथ्य त्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥

कटुतुम्बी, स्त्री, (कटुश्चासौ तुम्बी चेति ।) लता विशेषः । तितलाउ इति भाषा । तत्पर्य्यायः । इक्ष्वाकु २ । इत्यमरः । २ । ४ । १५६ । कटुका लाबुः ३ नृपात्मजा ४ । इति रत्नमाला ॥ कटुति क्तिका ५ । इति शब्दरत्नावली ॥ कटुफला ६

तुम्बिनी ७ कटुतुम्बिनी ८ इक्ष्वाकुफला ९ राजपुत्री १० तिक्तबीजा ११ तुम्बिका १२ । अस्या गुणाः । कटुत्वम् । तीक्ष्णत्वम् । वान्तिकारित्वम् । श्वासवातकासश्वेथयक्ष्मशूलविषनाशित्वम् । शोधनलघु । इति राजनिर्घण्टः ॥ पाण्डुत्वमिक्तपवार्यनाशित्वम् । लघुपाकित्वञ्च । इति राजवल्लभः ॥ ("कटुतुम्बी हिमा हृद्या पित्तकासविषापहा । तिक्ता कटुर्विपाके च वातपित्तज्वरान्तकृत्" ॥)

कटुत्रय, क्ली, (कटूनां कटुरसानां त्रयम् ।) त्रिकटु । इति राजनिर्घण्टः ॥ (अस्य गुणाः । "त्र्य त्रिकटुक नयेत् स्थौल्याग्नि सदनश्वास कास श्लीपद पीनसान्" । इति वाग्भटः ॥)

कटुदला, स्त्री, (कटु दलं पत्रं यस्याः ।) कर्कटी । इति राजनिर्घण्टः । काँकुड़ इति भाषा ॥

कटुनिष्पाव पुं, (कटुश्चासौ निष्पावश्चेति ।) नदीनिष्पावधान्यम् । इति राजनिर्घण्टः ॥

कटुपत्र , पु, (कटु तीव्रं पत्रं यस्य ।) पर्पट । श्वित-तक । इति राजनिर्घण्टः ॥

कटुपत्रिका,स्त्री (कटु पत्रं यस्याः । ततः कप् । अत इत्वं टाप् च ।) श्वेतवचा । इति राजनिर्घण्टः ॥

कटुफल , पुं,(कटु फलं यस्य । अस्य पत्रस्यापि तिक्तत्वेऽपि फले कटुपाकत्वात् ।) पटोल । इति राजनिर्घण्टः ॥

कटुफला, स्त्री, (कटु फलं यस्याः ।) श्रीवल्लीवृक्षः । इति राजनिर्घण्टः ॥

कटुभङ्ग , पु (कटु एकैकदेशभङ्गश्च यस्य ।) शुण्ठी । इति त्रिकाण्डशेषः ॥

कटुभद्र क्ली, (कट्वपि भद्रं सेवनेन हितजनकम् ।) शुण्ठी । इति राजनिर्घण्टः ॥ आर्द्रकम् । इति केचित् ॥

कटुमञ्जरिका, स्त्री, (कटु तीक्ष्णा मञ्जरी अस्ति अस्याः । अच् गौरादित्वात् ङीष् संज्ञायां कन् टाप् पूर्व्वह्रस्वश्च ।) अपामार्ग । इति राजनिर्घण्टः ॥

कटुमोद, क्ली, (कटुरेव मोद गन्धो यस्य तत् ।) जवादिनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

कटुर, क्ली, (कटति मन्थनेन रसान्तरं गुणान्तरं वा वर्षतीति । कट+उरन् । यद्वा कथ्यते प्रकाश्यते मन्थनात् रसान्तरेण गुणान्तरेण च प्रकाश्यते इति ।) तक्रम् । इति जटाधरः ॥ कट्टर इत्यपि पाठः ।

कटुरव,पु (कटुः कर्कशो रवः ध्वनिर्यस्य ।) मण्डूक । इति राजनिर्घण्टः ॥

कटुरोहिणी, स्त्री (कटुश्चासौ कट्वी चासौ वा रोहिणी चेति । केचित्तु कटुः सती रोहतीति + रुह+णिनि ततो ङीप् ।) कटुकी । इत्यमरः । २।४।८५ ॥

कटुवार्त्ताकी, स्त्री, (कटुः कट्वी वार्त्ताकी ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

कटुबीजा, स्त्री, (कटु बीजं यस्याः ।) पिप्पली । इति राजनिर्घण्टः ।

कटुश्रृङ्गाल क्ली, (कटूनां शृङ्गाय प्राधान्याय अलति पर्य्याप्नोतीति । अल+अच् ।) गौरसुवर्णशाकम् । इति राजनिर्घण्टः ॥

कटुस्नेह,पु, (कटु तीक्ष्णः स्नेहः रसविशेषो यस्य ।) सर्षप । इति त्रिकाण्डशेषः ॥ गौरसर्षपः । इति राजनिर्घण्टः ॥

कटूत्कट, क्ली, (कटुषु उत्कटम् ।) आर्द्रकम् । इति रत्नमाला ॥

कटूत्कटक, स्त्री, (कटुषु उत्कटम् । ततः संज्ञायां कन् ।) शुण्ठी । इति राजनिर्घण्टः ॥

कटोर क्ली, (कथ्यते दृश्यते निषिच्यते वा भक्ष्यद्रव्य यत्र । कट + अधिकरणे ओरच । रलयोरैक्यात् लस्य रत्वम् ।) पात्रविशेष । कटोरा इति भाषा । यथा,—नैषधे षष्ठमप्रकाशे ॥ * ॥

"मल्लप्रदे सद्युतकाचकूप्या
टावा सुख सौहृदमौषधसूत्रे ।
निष्क्रासितो धूमरसस्तु तस्य
सौगन्धिकै काचकटोरके च" ॥

किञ्च ।

"रम्याम देवदीदत्त पात्रे काञ्चननिर्म्मिते ।
कटोराख्ये अनुपदि पात्रसौभाग्य स्थिता' ।
इति जैमिनिभारते आश्वमेधिके पञ्चत्रिंशोऽध्यायः ॥

कटोरा, स्त्री, (कथ्यते दृश्यते दीयते खाद्यते वा भक्ष्यद्रव्यादिकमस्याम् । कट + ओरच । लस्य रत्वम् ।) स्नानसत्यतपात्रम् । इति ब्रह्मवैवर्त्तपुराणम् । बाटि इति भाषा ॥

कटोल , पु (कटति सदाचारं निराचारसप्त ओल चोलतीति । "कपिगतिगमिकटिपटिभ्य ओलच्" । उणां १।६७ । इति ओलच् ।) चण्डाल । इत्युणादिकोषः ॥ कटुरस । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कटोलवीणा, स्त्री, (कटोलस्य चाण्डालस्य वीणा वाद्ययन्त्रविशेष ।) वीणाविशेष । इति शब्दरत्नावली । केन्दुड़ा इति ख्याता ॥

कट्फल, पु, (कटति कटुतया अन्यरसमावृणोतीति । कट् + क्विप् । कट् फलं यस्य स ।) स्वनामख्यातवृक्षविशेष । कायफल इति भाषा । तत्पर्य्यायः । श्रीपर्णिका २ कुमुदिका ३ कुम्भी ४ कैटर्य्य ५ । इत्यमर २ । ४ । ४ ॥ सोमवल्क ६ महासोमवृक्ष ७ रोहिणी ८ । इति रत्नमाला ॥ लघुगर्भ ९ प्रचेतसी १० भद्रावती ११ महाकुम्भी १२ रामसेनक १३ कुमुदा १४ उग्रगन्धा १५ भद्रा १६ रञ्जनका १७ लघुकाश्मर्य्य १८ श्री पर्णी १९ कायफल २० महव २१ कुमुदी २२ । इति शब्दरत्नावली । अपि च ।

"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च ॥
कट्फलस्तुवरस्तिक्तः कटुर्वातकफज्वरान् ।
हन्ति श्वासप्रमेहार्शःकासकण्ठामयारुचीः ' ॥
इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कासश्वासज्वरोग्रदाहनाशित्वम् । रुचिकारित्वम् । मुखरोगप्रमप्रदत्वञ्च । इति राजनिर्घण्टः ॥ कफरोगनाशित्वम् । इति राजवल्लभः ॥ ("कट्फलः कफरोगघ्नः कासश्वासज्वरापहः" ॥ इति वैद्यकद्रव्यगुणः ॥)

कट्फला स्त्री, (कटति इति । कट + क्विप् सदैव फलमस्या ।) गम्भारीवृक्षः । इति रत्नमाला ॥ दन्ती । काकमाची । देवदाली । वार्त्ताकी । भार्गी । इति राजनिर्घण्टः ॥

कट्वङ्गः, पुं (कटु अङ्गमस्य ।) श्योनाकवृक्षः । इत्यमर । २।४।५६ ॥ कटूनि उग्राणि वीर्य्यप्रकाशीनि अङ्गानि यस्य ।) दिलीपराज । इति त्रिकाण्डशेषः ॥

कट्वर, क्ली, (कटति वर्षति रसान्तरम् । "छित्वरछत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः" उणां ३।१ । इति कट + ष्वरच् । निपातनात् साधुः ।) दधिसरः । इति रत्नमाला ॥ व्यञ्जनम् । इत्युणादिकोषः ॥ तक्रम् । यथा ।

'दध्न ससारकस्यात्र तक्रं कट्वरमुच्यते ।
इति चक्रपाणिदत्तसङ्ग्रहे ॥

("सुवर्च्चिका नागर कुष्ठ मूर्व्वा
लाक्षा निशा लोहितयष्टिकाभिः ।
तैलं ज्वरे षड्गुणतक्रसिद्ध
मभ्यञ्जनाच्छीतविदाहनुत् स्यात्" ॥
इति षट्कट्वरं तैलम् ॥)

कट्वी, स्त्री, (कथ्यत कटुरसतया खाद्यते अनुभूयते वा । कट्+उन । ततः स्त्रियां ङीप् । वोतो गुणवचनादिति ङीष् वा । पां । ४ । १ । ४४ ।) कटुका । लताविशेष । तत्पर्य्याय । कटुकवल्ली २ सुकाष्ठा ३ काष्ठवल्लिका ४ सुवल्ली ५ मधुवल्ली ६ मधुमोहनिका ७ कटुः ८ । अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । कफश्वासभ्रमाज्वरहारित्वम् । रुचिकारित्वम् । राजयक्ष्मनिवारणत्वञ्च । इति राजनिर्घण्टः ॥ (कटुकाशब्देऽस्या गुणादयो व्याख्याता ।)

कठ इ कि आध्याने । उत्कण्ठापूर्व्वकस्मरणे इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वा-पर-सक-सेट्-इदित् ।) इ कम्मणि कण्ठ्यते । कि कण्ठयति । आध्यान स्म म सौत्क्ष्यं इत्यन्ये व्याख्यातम् । इति दुर्गादासः ॥

कठ तङ्गने । तङ्गन दुःखेन जीवनम् । इति कविकल्पद्रुमः ॥(भ्वा-परं-अक-सेट् ।) कठति दीनः । इति दुर्गादासः ॥

कठ इ ङ आध्याने । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट्-इदित् ।) इ कर्म्मणि कण्ठ्यते । ङ कर्त्तरि कण्ठते । "देवारोधसि गतचीतवतश्चेत समुत्कण्ठते" । इति दुर्गादासः ॥

कठः, पु, (कठेन प्रोक्तमधीते य । कठशाखां अभिजानाति वा "कठचरकात् लुक्" । इति लुक् । ४।३।१०७ ।) मुनिविशेष । कठशाखाध्ययनकर्त्ता कठप्रोक्ताम । (यथा महाभारते । १ । पौलमे ८ । २४ ।

"उद्दालक कठश्चैव श्वेतश्चैव महायशा" ॥
स्वरभेद । स्वर ।
("कठो मुनौ तदाख्यातवेदाध्येतृस्वरे स्वरे" ।)
इति हेमचन्द्र ॥ ब्राह्मण । इति त्रिकाण्डशेष ॥
(उपनिषद्विशेष । यदुक्तं मुक्तिकोपनिषदि ।

"ईशा केन कठ प्रश्न मुण्ड माण्डूक्य तित्तिरि" ।)

कठमर्द्द, पुं, (कठं कष्टजीवनं मर्द्दातीति । कठ मर्द्द + अण् ।) शिवः । इति त्रिकाण्डशेषः ॥

कठरः, त्रि, (कठ + अरन् ।) कठिनः । इति जटाधरः ॥

कठशाखा, स्त्री, (यजुर्व्वेदान्तर्गता कठेन प्रोक्ता शाखा ।) यजुर्व्वेदस्य शाखाविशेषः । एतद्विवरणं वेदशब्दे द्रष्टव्यम् ॥

कठाहक, पुं, (कठं काठिन्यमाहन्तीति । आ + हन् + ड । कठाहः तादृशः कः शिरो यस्य ।) दात्यूह पक्षी । इति शब्दरत्नावली ॥

कठिञ्जरः, पुं, (कठिं कठिनं जरयति । जृष वयोहानौ णिजन्तात् अण् । पृषोदरादित्वात् साधुः । यद्वा जॄ + णिच् + बाहुलकात् + खच् मुम् च ।) तुलसीवृक्षः । तत्पर्य्यायः । पर्णासः २ कुठेरकः ३ । इत्यमरः । २ । ४ । ७९ ॥ ("लोमशिका नातुवर्णिका मधूर जीवक सुवर्चला कुठेरक कठिञ्जर कुन्तलिका कुरण्टिकाप्रभृतीनि" ॥ इति सुश्रुते सूत्रस्थाने ।)

कठिन, त्रि, (कठ् + इनन् । उणादिमते तु इनच् । "बहुलमन्यत्रापि" । उणा । २ । ४ । ९ ।) कठरम् । तत्पर्य्यायः । कक्खटम् २ क्रूरम् ३ कठोरम् ४ निष्ठुरम् ५ दृढम् ६ जठरम् ७ मूर्त्तिमत् ८ मूर्त्तम् ९ । इत्यमरः । ३ । १ । ७६ ॥ खक्खटम् १० कठोलम् ११ जरठम् १२ । इति तट्टीका ॥ ककरम् १३ काठरम् १४ । इति जटाधरः ॥ काठरम् १५ कमठायितम् १६ । इति शब्दरत्नावली ॥ स्तब्धम् । इति मेदिनी ॥ ("उन्मूलयन् कठिनान् न्पान् वायुरिव द्रुमान्" । कथासरित्सागरे १९ । ८९ ॥ तथा कुमारे ४ । ५ ।

"न विदीर्य्ये कठिना खलु स्त्रियः" ॥

अपि च "भक्ष्याद्यातिकठिनान् दन्तरोगी विवर्जयेत्" । सुश्रुते ॥)

कठिना, स्त्री, स्त्री, (कठ + "बहुलमन्यत्रापि" । उणा २ । ४९ । इति इनच् ।) स्थाली । इति मेदिनीशब्दरत्नावल्यौ ॥

कठिनपृष्ठक, पुं, (कठिनं पृष्ठकमस्य । पृष्ठ स्वार्थे संज्ञायां वा कन् ।) कच्छपः । इति राजनिर्घण्टः ॥

कठिना, स्त्री, (कठ + इनच् । स्त्रियां टाप् ।) गुडशर्करा । इति विश्वमेदिन्यौ ॥

कठिनिका, स्त्री, (कठ + इनच् + गौरादित्वात् ङीष् स्वार्थे कन् । टापि ह्रस्वश्च ।) कठिनी । इति शब्दावली । खड़ी इति भाषा ॥

कठिनी स्त्री, (कठिन + गौरादित्वात् ङीष् ।) खटिका । इति मेदिनी । खड़ी इति भाषा ॥ तत्पर्य्यायः । पाकशुक्ला २ धवलिकाधातुः ३ कठ्टटी ४ खटी ५ खड़ी ६ वर्णलेखिका ७ । इति रत्नमाला ॥ धातुपल ८ कठिनिका ९ । इति शब्दावली ॥ (तथा च हितोपदेशे १ । १९ ।

'गुणिगणगणनारम्भे न पतति कठिनी ससम्भ्रमाद् यस्य । तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी नाम" ॥)

कठिल्ल, पुं, (कठति श्रोणने दुःखेन उद्गेन वा जन्मति । अतीवतिक्तत्वात् तथात्वं । कठ शोके इति धातोर्बाहुलकादिल्लप्रत्ययः ।) कारवेल्लः । इत्युणादिकोषः । करला इति भाषा ॥ (वाग्भटे शाकवर्गाणां मध्ये गणितम् ॥ यथा,—

"कठिल्लं केम्बुकं शीतं सकोषातकि कर्कशम् ।
तिक्तं पाके कटु ग्राहि वातलं कफपित्तजित्" ॥)

कठिल्लक, पुं, (कठिल्ल + स्वार्थे कन् ।) कारवेल्लः । पुनर्नवा । तुलसी । इति त्रिकाण्डशेषः ॥

कठी, स्त्री, (कठेन प्रोक्तमधीते या शाखाध्येत्री वाचित्वेन जातित्वात् ङीष् । कठप्रोक्तमधीयाना इत्यर्थः ।) ब्राह्मणी । इति जटाधरः ॥

कठेर, पुं, (कठति कष्टेन जीवति जीविकां निर्व्वाहयति । "पतिकठिकुठिगडिगुडिदंशिभ्य एरक्" । उणा । १ । ५९ इति एरक् ।) कष्टजीवी । दरिद्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कठोर, त्रि, (कठति पारुष्यमाचरति । "कठिचकिभ्यामोरन्" उणा १ । ६५ । इति कठ + ओरन् ।) कठिनः । इत्यमरः । ३ । १ । ७६ ॥ (यथा, भागवते ३ । १९ । १५ ।

"प्रवृद्धरोम स कठोरसटिना
न्दन् प्रणत्यान्तरधीयतासुरः" ॥

दारुणः । तथाहि भागवते । ५ । १३ । ३ ।

"कठोरदंशैर्मशकैरुपद्रुतः" ॥ अतिनिष्ठुरः । तत्रैव ६ । १२ । २ । "वृत्रान्ताभिकठोरशिक्षः" ॥

पूर्णः । तथाहि ।

"स तप्तकार्त्तस्वरभासुराम्बर
कठोरताराधिपलाञ्छनच्छविः" ।

इति माघ । १ । २ । "कठोरताराधिपस्य पूर्णेन्दोः" इति तट्टीकायां मल्लिनाथः ॥)

कठोल, त्रि (कठ + ओलच् "कपिगतिगण्डिकटिपटिभ्य ओलच्" उणा । १ । ६७ ।) कठोरः । इत्युणादिवृत्तिकायां नीलकण्ठः ॥

कडि इ ड म दर्पे । दर्पं इत्यर्थः । इति कविकल्पद्रुमटीकायां दुर्गादासः । (भ्वा-आत्म-अक-सेट्-पक्षे उभ-इदित् ।) इ कण्ड्यते । ण कण्डति कण्डते । ङ कण्डते मनो दृष्ट इत्यादि त्वथ । आत्मानेपदीत्वये । कदाचित् परस्मैपदी । अकारः । अनेकार्थत्वात् तुषापनयने च । (भ्वा-आत्म-सक ।) "कण्डते तण्डुलं लोकः" । इति दुर्गादासः ॥

कड श मदे । दर्पे । इति कविकल्पद्रुमः ॥ (तुदा-पर-सक-दर्पे अक-सेट् ।) श कडती कडन्ती । प्राञ्चस्तु वेदे तुदादिगणेऽस्य भ्वादावप्येव पठन्ति । तथा च । "कड मद इति धातुः पठ्यते भूतुदाद्योः कडति कडति रूपं तुल्यमेव द्वयोः स्यात् । तदु भयगणपाठे किं फलं नेति मार्ग्यं भवतस्व इह भेदः शपशयोरस्ति यस्मात्" इति । स्वरकृत इति उदात्तानुदात्तस्वरितत्रिविधस्वरकृतचतुर्विधस्वरकृत इत्यर्थः । इति दुर्गादासः ॥

कड इ क भेदे । रक्षणे । इति कविकल्पद्रुमः । (चुरा-पर-सक-सेट्-इदित् ।) इ कण्डयति । इति दुर्गादासः ॥

कड्ड, त्रि, (कडति माद्यतीति । कड मदे + पचाद्यच् ।) मूर्खः । इति हारावली ॥

कडङ्क, स्त्री, (कण्यते अद्यते इति । कण अदने + अप् संज्ञायां कन् । कर्म्मणि अप् स्वार्थे संज्ञायां वा कन् ।) अवयवविशेषः । कड़कच इति भाषा ॥ तत्पर्य्यायः । सामुद्रम् २ त्रिकूटम् ३ । इति रत्नमाला ॥ अस्य गुणाः सामुद्रशब्दे द्रष्टव्याः ॥

कडङ्ग, पु, (कड़ मादकताशक्तिं गमयति जनयति वा कड़ात् गमेड़ः । अन्तर्भूतो ण्यन्तो वा ।) सुराविशेषः । इत्युणादिकोषः ॥

कडङ्गर, पुं, (कडान् भक्ष्यीयतण्डुलादेः सकाशात् गिर्य्यते क्षिप्यते दूरीक्रियते इति मात्रः । कड + गिरते कर्म्मणि खच् । यद्वा कड़ भक्ष्यीयशस्यादि गिरति उद्गिरति आत्मनः सकाशात् । गॄ + अच् ।) बुषः इत्यमरः । २ । ९ । २२ । भाटुआ इति भाषा ॥

("नीवारपाकादि कडङ्गरीयै
राम्पृष्यते जानपदैर्न कश्चित्" ।

इति रघु । ५ । ९ ॥ कडङ्गरं बुषम् अर्हन्तीति कडङ्गरीया इति तट्टीकायां मल्लिनाथः ॥)

कड़न, स्त्री, (गड्यते सिच्यतेऽत्र जलादिकम् । गड़ + अन्नम् गड़ेरादेश्च कः ।) पात्रविशेषः । इति उणादिकोषः ॥ (गड्यते सिच्यतेऽनेन । गड़ + सेचने "गड़ेरादेश्च कः" उणाम् । ३ । १०६ । इति अत्रन् प्रत्ययः डलयोरैकात्म्यग्रहणात् कलत्रम् ॥

कडम्ब, पुं, (कड़ + "कृकदिकडिकटिभ्योऽम्बच्" उणाम् । ४ । ८२ । इति कडधातोरम्बच्प्रत्ययः ।) शाकनाडिका । डाँटा इति भाषा ॥ तत्पर्य्यायः । कलम्ब २ । इत्यमरः । २ । ९ । ३५ ॥ अग्रम् । प्रान्तभागः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (कलम्बशब्दे विशेषो ज्ञेयः ॥)

कडम्बी, स्त्री, (कडम्बः कलम्बो भूयसा विद्यते अस्याः । इति अर्शआदित्वात् अच् ततः गौरादित्वात् ङीष् ।) कलम्बीशाकम् । इति शब्दरत्नावली । (कलम्बीशब्दे गुणादयोऽस्या ज्ञातव्याः ॥)

कडार, पु (गड़ । सेचने इति + "गड़ेः कड् च" । उणाम् । ३ । १३५ । इति आरन् ककारादेशश्च धातोः ।) पिङ्गलवर्णः । तद्वयुक्ते त्रि । इत्यमरः । १ । ५ । १६ ॥ (यथा माघ । ५ । ३ ।

"सविद्युदन्तरविभाभि चमूरमुष्य
एवीरलः करभकण्ठकडारमाशा" ॥)

कडारकृष्णपिङ्गलवत् इत्यन्ये इति भरतः ॥ दासः । इति मेदिनी ॥

कड़्तुम, पुं, (कड़ा तुम्बा योषितः यस्य यस्य पृषोदरादित्वात् टस्य डः ।) खड्गः । इति शब्दरत्नावली ॥

कड्ड कार्कश्ये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सेट् ।) टवर्गतृतीयोपधः । द्विषि संयोगान्तोऽपि च । कड्डति सदृशानां पादानां स्मादिरूपाणि । इति दुर्गादासः ॥

कण क्ष आर्त्तस्वरे । इति कविकल्पद्रुमः ॥ (भ्वा-

पर-सक-सेट्।) कः कणोकथया अथकायत्। कणति भीतः। इति दुर्गादासः॥

कण, म गतौ। इति कविकल्पद्रुमः। (भ्वा-पर-सक्-सेट्-घटादि।) म कणयति। इति दुर्गादासः॥

कण, क निमीलने। इति कविकल्पद्रुमः। (चुरा-पर-सक-सेट्।) निमीलनं पक्ष्मावरणम्। क काणयति चक्षुः पक्ष्मभिराच्छादयतीत्यर्थः। इति दुर्गादासः॥

कणः, पुं, (कणति अतिसूक्ष्मत्वात् शब्दति। कण+पचाद्यच्।) अतिसूक्ष्मः। ("आनन्दाश्रुकणान् पिबन्ति शकुना निःशङ्कमङ्के था"।
इति शान्तिशतकम् ५॥) धान्यांशः। इत्यमरः।
३।१।६२॥ (यथा, मनुः। ११।९०।
"कणान् वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि"॥)
तस्य स्त्रीलिङ्गे कणी कणिका। वनजीरकः। इति राजनिर्घण्टः॥

कणगुग्गुलु, पुं, (कणप्रधानो गुग्गुलुश्चेति।) गुग्गुलुभेदः। तत्पर्यायः। गन्धराजः २ कणकणः ३ सुवर्णः ४ कनकः ५ वंशपीतः ६ सुरभिः ७ पलङ्कषः ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। सुगन्धित्वम्। वातशूलगुल्मोदराध्मानकफनाशित्वम्। रसायनत्वञ्च। इति राजनिर्घण्टः॥

कणजीरः, पुं, (कणश्चासौ जीरश्चेति नित्यकर्म्मधारयः।) श्वेतजीरकः। इति राजनिर्घण्टः। (श्वेतजीरकशब्देऽस्य गुणा ज्ञेयाः॥)

कणजीरक, क्ली, (कणः क्षुद्रं जीरकम्। कणजीर+स्वार्थे कन्।) क्षुद्रजीरकः। तत्पर्यायः। सुगन्धिः २ सुगन्धम् ३। इति रत्नमाला शब्दचन्द्रिका च॥

कणभक्षकः, पुं (कणान् भक्षयति भक्षति वा। कण+भक्ष+ण्वुल्।) स्फटिकपक्षी। इति राजनिर्घण्टः॥

कणलाभः, पुं, (कणानां लाभो यस्मात् सः। पेषणसाधनयन्त्रविशेषः स सादृश्येनास्त्यस्य। अर्श आदिभ्य अच्।) आवर्त्तः। इति त्रिकाण्डशेषः। जलेर घूर्णी इति भाषा॥

कणा, स्त्री (कण+स्त्रियां टाप्।) जीरकम्। कुम्भीरमक्षिका। पिप्पली। इति मेदिनी॥
("आर्द्रा कणा पद्ममूलं कणाटं च पचेज्जले।
तेन क्षीरं सदा पीत्वा पिबेत् सप्तशुक्रकम्"।
इति चिकित्सायचिकित्सायां वा टेनोक्तम्॥)
श्वेतजीरकम्। इति राजनिर्घण्टः॥ ("कणा स्यात् दीर्घजीरकः"। इति भावप्रकाशः॥ *॥) अल्पम्। यथा,—
"कदलीदलमध्यस्य कणामात्रं प्रपक्कम्"।
इति तिथ्यादितत्त्वम्॥

कणाटीनः, पुं, (कणाय अटतीति। कण+अट+इनम् दीर्घश्च पृषोदरादित्वात्।) खञ्जनपक्षी। इति त्रिकाण्डशेषः॥

कणाटीरः, पुं (कणाय अटति। कण+अट+ईरन्।) खञ्जनपक्षी। इति शब्दरत्नावली॥

कणाटीरकः, पुं, (कणाटीर+स्वार्थे कन्।) खञ्जनपक्षी। इति शब्दरत्नावली॥

कणादः, पुं, (कणान् अत्ति भक्षयति। कण+अद+कर्म्मण्युपपदे अण्।) स्वनामख्यातमुनिविशेषः। तत्पर्यायः। काश्यपः २। इति त्रिकाण्डशेषः॥ स च वैशेषिकदर्शनकर्त्ता। मतान्तरे। कणादो वक्षःकारक इत्यमरोऽपि कणाद इत्यपि पाठः। इति सारसुन्दरी॥

कणिकः, पुं, (कणैव इति स्वार्थे कन अत इत्वम्।) कणा। गव। गोधूमचूर्णविधि। इति सारस्वतः॥ शुष्कगोधूमचूर्णम्। इति राजनिर्घण्टः॥ (कणा विद्यतेऽस्य अत्यर्थे ठन्। स्वार्थे ठन् वा। "नामे रभूत् सकणिकाद् वटवन्महात्म" इति भागवतम्। ७।९।३३॥ धृतराष्ट्रमन्त्रिविशेषः। यथा महाभारते।१। सम्भवपर्व्वणि १४१।२।
"तत आहूय मन्त्रज्ञं राजशास्त्रार्थवित्तमम्।
कणिकं मन्त्रिणां श्रेष्ठं धृतराष्ट्रोऽब्रवीदिदम्"॥)

कणिका स्त्री, (कणा सन्त्यस्याः। "अत इनठनाविति ठन्" ५।२।११५। कणति सूक्ष्मत्वात् क्रमशो गच्छति अत्यन्तसूक्ष्मतां प्राप्नोति इत्यर्थः। पचाद्यच् स्वार्थे कन् अत इत्वं टाप् च।) अत्यन्तसूक्ष्मवस्तु। अग्निमन्थवृक्षः। इति मेदिनी॥ कणा। तण्डुलविशेषः। इत्यमरटीकायां रायमुकुटः॥ (जलादीनां सूक्ष्मांशः। यथा, मेघदूते ९८।
"तामुत्थाप्य स्वजलकणिकाशीतलेनानिलेन
प्रत्याश्वस्तां सममभिनवैर्जालकैर्मालतीनाम्"॥)

कणित, क्ली (कण आर्त्तनादे+भावे क्त।) पीडितानां शब्दः। इति हेमचन्द्रः॥

कणिश, स्त्री, (कणो विद्यतेऽस्य इति इनि तं श्यति। कणिन्+शो+क। यद्वा कणिनः धान्यतेऽस्मिन्। कणिन्+शी+ड। कणाः सन्त्यस्य इत्यमरटीकाकृत्।) शस्यमञ्जरी। इत्यमरः। २।९।२१। धान्यादिर शिष इति भाषा॥

कणी, स्त्री, (कण+स्त्रियां ङीप् गौरादित्वात् ङीष् वा।) कणिका। इत्यमरटीकायां भरतः॥

कणीक, त्रि, (कण+ईकन्।) अल्पम्। इत्युणादिकोषः॥

कणीयस्, [स्] त्रि, (कण+ईयसुन्।) अत्यल्पम्। इत्यमरः॥ कनिष्ठम्। इति तट्टीका॥ (यथा हठयोगदीपिकायाम् २।१२। "कणीयसि भवेत् स्वेदः कम्पो भवति मध्यमे"॥)

कणेरः पुं, (कण+एरप्रत्ययः।) कर्णिकारवृक्षः। इत्युणादिकोषः॥

कणेरा, स्त्री (कण+एरटाप् च।) वेश्या। हस्तिनी। इत्युणादिकोषः॥

कणेरुः स्त्री, (कण+एरु।) वेश्या। करिणी। कर्णिकारवृक्षे पु। इति मेदिनी॥

कण्टकः, पुं, क्ली, (कण्टति इति कटि ण्वुल्। अकाद्यादिषा २।४।३१।) क्षुद्रशत्रुः। (यथा विष्णुपुराणे १।१९।७१। "प्रजानां पालनं सम्यक् सदा कण्टकशोधनम्"॥) मत्स्यास्थि। नैयायिकादि दोषोक्तिः। रोमाञ्चः। द्रुमाङ्गम्। इति मेदिनी॥ काँटा इति भाषा॥ (यथा चोक्तं चाणक्यशतके २२।
"उपकारगृहीतेन शत्रुणा शत्रुमुद्धरेत्।
पादलग्नं करस्थेन कण्टकेनैव कण्टकम्"॥)
वेन्धम्। इति दीपिका॥

कण्टकः, पुं (कटि+ण्वुल्।) सूच्यग्रम्। क्षुद्रशत्रुः। (यथा, मनुः। ९।२५२।
"सम्यङ्निविष्टदेशस्तु कृतदुर्गश्च शास्त्रतः।
कण्टकोद्धरणे नित्यमातिष्ठेद्यत्नमुत्तमम्"॥)
लोमहर्षः। इत्यमरः ३।५।३२॥ कर्म्मस्थानम्। दोषः। इति जटाधरः॥ मकरः। इति विश्वः॥ वेणुः। इति हेमचन्द्रः॥ (लोकोपद्रवकारी। यथा भागवते। ३।१८।२३।
"अन्वेषन्नप्रतिरथो लोकानटति कण्टकः"॥)

कण्टकद्रुमः, पुं, (कण्टकप्रधानो द्रुमः। कण्टकेनाचितो द्रुमो वा।) शाल्मलिवृक्षः। इति राजनिर्घण्टः॥ (यथा मृच्छकटिके। १४०।४।
"किं कुलेनोपदिष्टेन शीलमेवात्र कारणम्।
भवन्ति नितरां स्फीताः सुक्षेत्रे कण्टकद्रुमाः"॥
'देवेयचन्दनवने जातोऽयं कण्टकद्रुमः'।
इति भागवतम्। ७।५।१७॥ शाल्मलीशब्दे विशेषोऽस्य ज्ञेयः॥)

कण्टकप्रावृता, स्त्री, (कण्टकैः प्रावृता व्याप्ता। कण्टक+प्र+आ+वृ+कर्म्मणि क्त+टाप्।) घृतकन्या। इति राजनिर्घण्टः। घृतकुमारी इति भाषा॥

कण्टकफलः पुं, (कण्टकैराचितं व्याप्तं फलं यस्य। शाकपार्थिवादिवत् मध्यपदलोपी समासः।) पनसवृक्षः। इत्यमरटीकायां भरतः॥ गोक्षुरवृक्षः। इति रत्नमाला॥ (अस्य गुणादयः कण्टफलशब्दे ज्ञेयाः॥)

कण्टकफलाकी, स्त्री, (कण्टकाचिता फलाकी। शाकपार्थिवादित्वात् मध्यपदलोपश्च।) वार्त्ताकी। इति राजनिर्घण्टः॥

कण्टकश्रेणी, स्त्री, (कण्टकानां श्रेणिर्यत्र। श्रेणी यस्या वा।) कण्टकारी। इति शब्दचन्द्रिका॥

कण्टकागारः, पुं, (कण्टका आगारो यस्य। यद्वा कण्टकं आगिरति। आ+गॄ+अच्।) सरटजन्तुः। इति राजनिर्घण्टः॥

कण्टकाढ्यः, पुं, (कण्टकैराढ्यः।) कुब्जकवृक्षः। इति राजनिर्घण्टः॥

कण्टकारिका, स्त्री, (कण्टकान् इयर्त्ति ऋच्छति वा कण्टक+ऋ+कर्म्मणि+ण्वुल्। स्त्रियां टाप् इत्वं च। यद्वा कण्टकं ऋच्छति+अट् कर्म्मण्यण् ततः कन् च ततः प्राग्वत्। तत्पक्षे तु अपि कृते हरीतक्यादित्वात् लुक्।) स्वनामख्यातक्षुद्रवृक्षः। तत्पर्यायः। निदिग्धिका २ स्पृशी ३ व्याघ्री ४ बृहती ५ प्रचोदनी ६ कुली ७ क्षुद्रा ८ दुःस्पर्शा ९ राष्ट्रिका १०। इत्यमरः॥ धनाक्रान्ता ११ भण्टाकी १२ सिंही १३ धावनिका १४। इति रत्नमाला॥ कण्टकारी १५ कण्टकिनी १६ दुष्प्रधर्षिणी १७ निदिग्धा १८ धावनी १९ क्षुद्रकण्टिका २० बहुकण्टा २१ क्षुद्रकण्टा २२ कण्टा

लिका २३ चित्रफला २४। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। दीपनत्वम्। श्वास कास प्रतिश्याय दोष-कफ वात ज्वर नाशित्वञ्च। इति राजनिघण्टः॥ हृद्यत्वम्। ग्राहित्वम्। इति राजवल्लभः॥ तस्याः फलगुणाः। पित्तकफकण्डूकुष्ठक्रिमिनाशित्वम्। लघुत्वम्। उष्णत्वम्। कटुत्वम्। तिक्तत्वञ्च। इति राजनिघण्टराजवल्लभौ॥

("मुस्तान्तनामल्पस्य नागर कण्टकारिका।
कथायुक्तान्वित क्वाथस्तथा मधुसमन्वित।
एकाहिक वा सर्वाश्च ज्वरजात समोहति"॥
इति हारीते १म॰। अस्या विशेषश्च कण्टकारी शब्दे ज्ञातव्य॥)

कण्टकारी, स्त्री, (कण्टक ऋच्छति। कण्टक + ऋ + अण् + ङीप् च।) कण्टकारिकावृक्षः। इति राजनिघण्टः॥ क्षुद्रकीवृक्षः। इति जटाधरः॥ विकङ्कतवृक्षः। इति शब्दरत्नावली बैंइचि इति भाषा॥ तत्पर्य्यायगुणाः।

"कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका।
कण्टालिका कण्टकिनी धावनी बृहती तथा"॥

उभे च बृहत्यौ। यदाह शाश्वतः।

"क्षुद्रायां बृहत्यां च बृहतीति निगद्यते।
श्वेता क्षुद्रा चन्द्रहासा लक्ष्मणा क्षेत्रदूतिका।
गर्भदा चन्द्रमा चन्द्रा चन्द्रपुष्पा प्रियङ्करी।
कण्टकारी सरा तिक्ता कटुका दीपनी लघुः।
रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान्।
निहन्ति पीनस पार्श्वपीडाकृमिहृद्रोगान्।
तयोः फल कटुरसे पाके च कटुकं भवेत्।
शुक्रस्य रेचन भेदि तिक्तं पित्ताग्निदीपनम्।
हन्यात् कफमरुत्कण्डूकासमेदःकृमिज्वरान्।
तद्वत् प्रोक्ता सिता क्षुद्रा विशेषाद्गर्भकारिणी"॥
इति भावप्रकाशः॥ (शब्दार्थचिन्तामणिधृत वैद्यकम्। यथा

"कण्टकारी कण्टकिनी तथा स्वादुश्च गुरुणा।
पञ्चपञ्चतशोषघ्नी पाचिनी ज्वरनाशनुत्।
दोषत्रयहरी लघ्वी मधुरोऽतिसारजित्"॥
'कण्टकार्य्यमृताभार्गी नागरेन्द्रयवासकम्।
भूनिम्ब चन्दन मुस्त पटोल कटुरोहिणी॥
कषाय पाययेदेतत् पित्तश्लेष्मज्वरापहम्।
दाहतृष्णारुचिच्छर्द्दिकासहृत् पार्श्वशूलनुत्"॥
इति वैद्यकचक्रपाणिसंग्रहः॥

"कण्टकारीतुला नीरद्रोणे पक्त्वा कषायकम्।
पादशेषं गृहीत्वा च तस्मिंश्चूर्णानि दापयेत्॥
पृथक् पलांशान्येतानि गुडूचीचव्यचित्रकाः।
मुस्त कर्कटशृङ्गी च त्र्यूषणं धन्वयासकम्॥
भार्गी रास्ना शठी चैव शर्करा पलविंशतिः।
प्रत्येकञ्च पलान्यष्टौ प्रदद्यात् घृततैलयोः॥
पक्त्वा लेहत्वमानीय शीते मधुपलाष्टकम्।
चतुष्पलं तु गार्श्याः पिप्पलीनां चतुष्पलम्॥
क्षिप्त्वा निदध्यात् दृढे मृण्मये भाण्डे शुभे।
लेहोऽयं हन्ति हिक्काश्वासकासानशेषतः"॥
कण्टकाव्यवलेहः॥ इति च शार्ङ्गधरः॥)

कण्टकाग्र, पुं, (कण्टकैः कण्टकाकीर्णपत्रैः अणति

शोभते। कण्टक + अण् + अच्। कण्टः कण्टका कारः पत्र काशयति वा। अण् + अच।) पनसवृक्षः। इति शब्दचन्द्रिका॥

कण्टकालुक, पुं, (कण्टकैरलति पर्य्याप्नोति कण्टकान् लयति वा कण्टक + अल् + उकञ्।) यवासवृक्षः। इति राजनिघण्टः॥ (यवास शब्देऽस्य गुणादयो बोद्धव्याः॥)

कण्टकाशन, पुं, (कण्टक अश्नातीति। कण्टक + अश् भोजने + कर्त्तरि + ल्यु।) उष्ट्रः। इति त्रिकाण्डशेषः॥

कण्टकाष्ठील, पुं, (कण्टकं अष्ठीलेव यस्य।) मत्स्यविशेषः। तत्पर्य्यायः। कुलिशम् २। इति त्रिकाण्डशेषः॥

कण्टकिनी, स्त्री, (कण्टका सन्त्यस्याः। इनि। ईप् च।) वार्त्ताकी। क्षुद्रभिण्टी। मधुखर्ज्जुरी। इति राजनिघण्टः॥

कण्टकिफल, पुं, (कण्टकि कण्टकयुक्तं फल यस्य।) वृक्षविशेषः। काँटाल इति भाषा। तत्पर्य्यायः। पनसः २। इत्यमरः।२।४।६१॥ पनसः ३ कण्टकीफल ४ कण्टकफल ५। इति तट्टीका॥ महासर्ज्ज ६ फलिन ७ फलवृक्षक ८ स्थूल ९ कण्टाफल १० मूलफलद ११ अपुष्पफलदः १२ पूतफल १३ चम्पकोषः १४ चम्पालुः १५ रसालः १६ मृदङ्गफल १७ पानसः १८। इति शब्दरत्नावली॥ अस्य गुणाः कण्टाफलशब्दे पनसशब्दे च द्रष्टव्याः॥ समष्ठिलवृक्षः। इति राजनिघण्टः॥

कण्टकिल, पुं, (कण्टकोऽस्त्यस्य। कण्टक + अस्त्यर्थे इलच्।) वंशविशेषः। इति शब्दचन्द्रिका। वेउ बाँश इति भाषा॥

कण्टकिलता, स्त्री, (कण्टकिनी चासौ लता चेति।) त्रपुषी। इति राजनिघण्टः। शसा इति भाषा॥ (त्रपुषीशब्दे विशेषोऽस्या द्रष्टव्यः॥)

कण्टकी, [न्] पुं, (कण्टकाऽस्त्यस्य अस्त्यर्थे इनिः।) मत्स्यः। इति शब्दरत्नावली॥ खदिरवृक्षः। इति शब्दमाला॥ मदनवृक्षः। इति रत्नमाला॥ गोक्षुरवृक्षः। वंशः। वंशवृक्षः। इति राजनिघण्टः॥ (यथा, महाभारते १। शाकुन्तले ७०।७।
"नापुष्पः पादपः कश्चिन्नाफलो नापि कण्टकी"॥)

कण्टकी, स्त्री, (कण्टक + अच् अर्शआदित्वात् अच गौरादित्वात् ङीष्।) वार्त्ताकीविशेषः। काँटा बेगुन् इति भाषा। अस्या गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। रक्तपित्तप्रकोपकत्वम्। कण्डूकृच्छ्रकृत्वम्। दोषकत्वञ्च। इति राजवल्लभः॥

कण्टकीद्रुम, पुं, (कण्टकी द्रुमः। पृषोदरादित्वात् दीर्घः।) खदिरवृक्षः। इति रत्नमाला॥ (खदिरशब्दे विशेषो ज्ञातव्यः॥ कण्टकी एव द्रुमः। वार्त्ताकीयञ्च॥)

कण्टकीफल, पुं, (कण्टकि कण्टकाचित

पृषोदरात् साधुः।) कण्टकिफल[illegible]

टीकायां भरतः॥ काँटाल इति भा[illegible]

कण्टकुरण्ट[illegible] कण्टकप्रधान[illegible]

भिण्टी। इति राजनिर्घण्टः॥ (भिण्टीशब्देऽस्य विशेषो ज्ञेयः॥)

कण्टतनु, स्त्री, (कण्टा कण्टकान्विता तनुर्यस्याः।) बृहती इति राजनिघण्टः॥ (यथा हि तिक्ता कटुका। इति वैद्यकद्रव्यगुणः॥)

कण्टदला, स्त्री, (कण्टा कण्टकाचित दल यस्याः। शाकपार्थिवादित्वात् मध्यपदलोपः।) केतकी। इति राजनिर्घण्टः॥

कण्टपत्र, पुं, (कण्टं कण्टकान्वित पत्र यस्य।) विकङ्कतवृक्षः। इति शब्दमाला। बैंइचि इति भाषा॥

कण्टपत्रफला, स्त्री, (कण्टं कण्टकान्वित पत्र फलञ्च यस्याः। कण्टकान्विते पत्रफले अस्य वा।) ब्रह्मदण्डी वृक्षः। इति राजनिघण्टः॥

कण्टपाद, पुं, (कण्टं कण्टकान्वित पादो मूल यस्य।) विकङ्कतवृक्षः। इति राजनिर्घण्टः॥

कण्टफल, पुं, (कण्टं कण्टकान्वित फल यस्य।) क्षुद्रगोक्षुरः। पनसः। धुस्तूरः। लताकरञ्जः। इति राजनिर्घण्टः॥ तैलफलः। एरण्डः। इति केचित्॥

कण्टफला, स्त्री (कण्टं कण्टकाकीर्ण फल यस्याः।) देवदालीलता। इति राजनिघण्टः॥ (देवदालीशब्दे ऽस्या गुणादयो ज्ञेयाः॥)

कण्टल, पुं, (कण्टः अस्त्यस्य। मत्वर्थे अच्। यद्वा कण्टेन कण्टकेन अलति पर्य्याप्नोति शोभते वा। कण्ट + अल् + अच्। शकन्ध्वादिवत् अस्य लोपः।) वृक्षविशेषः। बावला इति भाषा। तत्पर्य्यायः। बावल २ सपुष्पः ३ स्वल्पपत्रः ४। इति शब्दचन्द्रिका॥

कण्टवल्ली, स्त्री, (कण्टा कण्टकान्विता वल्ली।) श्रीवल्लीवृक्षः। इति राजनिघण्टः॥

कण्टवृक्ष, पुं, (कण्टप्रधानः कण्टकमयः कण्टकबहुलो वा वृक्षः। मध्यपदलोपी।) तेजःफलवृक्षः। इति राजनिघण्टः॥

कण्टाफल, पुं, (कटि + मार्ग + अच्। कण्टा कण्टकमयवेष्टन तद्युक्तस्थित फलमस्य।) पनसवृक्षः। इति शब्दमाला। काँटाल इति भाषा॥ अस्य पक्वफलगुणाः। समधुरत्वम्। रक्तवर्द्धकत्वम्। स्निग्धत्वम्। शीतलत्वम्। दुर्जरत्वम्। वायुपित्तनाशित्वम्। श्रमशुक्रबलप्रदत्वञ्च। इति राजवल्लभः॥ पिच्छिलत्वम्। गुरुत्वम्। हृद्यत्वम्। भ्रमदाहविशोषनाशित्वम्। रुचिकारित्वम्। ग्राहित्वञ्च। इति राजनिघण्टः॥ *॥ तद्बीजगुणाः। रक्तपित्तनाशित्वम्। स्वादुत्वम्। मलगुल्मगुरुत्वञ्च। इति राजवल्लभः॥ कुमत् कषायत्वम्। मधुरत्वम्। रुचिवायुवृद्धिकारित्वम्। गुरुत्वम्। स्वरदोषतरुणपिडकादिनाशित्वञ्च। इति राजनिघण्टः॥ *॥ तस्यापक्वस्य गुणाः। कषायत्वम्। स्वादुत्वम्। वायुकारित्वम्। इति राजवल्लभः॥ शीतलत्वञ्च॥ *॥ घृतपक्वस्य तस्य गुणाः॥ स्निग्धत्वम्। हृद्यत्वम्। बलप्रदत्वम्। हृदिन्द्राग्नित्वम्। अपथ्यत्वम्। शुक्रकारित्वम्। वातपित्तनाशित्वञ्च॥ तन्मज्जगुणाः। शुक्रकारित्वम्। वात[illegible]॥ विशेषात् पनस वर्णा

शुक्तिभिर्मन्दवज्ञिभिः ॥ इति राजनिघण्टः ॥ (अन्यत्सर्वं पनसशब्दे द्रष्टव्यम् ।)

कण्टार्त्तगला, स्त्री, (कण्टः कण्टयुक्ता आर्त्तगला । आर्त्ता पीत गलदेशो यया ।) नीलझिण्टी । इति राजनिघण्टः ।(नीलझिण्टीशब्देऽस्य गुणा दयो ज्ञेया ।)

कण्टालु, पुं, (कण्टाय कण्टकाय अलति पर्याप्नोति । कण्ट+अल्+उन् ।) वंश । बृहती । वार्त्ताकी । बर्ब्बूरः । इति राजनिघण्टः ॥

कण्टाङ्कय, स्त्री, (कण्ट कण्टकमाङ्कयते स्पर्द्धते । कण्ट+आ+ह्वे+क ।) पद्मकन्द । इति राजनिघण्टः ॥

कण्टी, [न्] पुं, (कण्ट कण्टका अस्त्यस्य । अस्त्यर्थे इनिः ।) कल्पायः । अपामार्गः । खदिरः । गोक्षुर । इति राजनिघण्टः ॥

कण्ठः, पुं, (कठि+अच्+इदित्वात् नुम् ।) मदनवृक्षः । इति मेदिनी ॥ ओष्ठसम्पुटादिरक्तलिपरिमितस्थानम् । यथा,—
"ताताह्लादोऽङ्कुल कण्ठ सर्व्वकुण्ठेप्ययं विधिः" ॥
इति तिथ्यादितत्त्वम् ॥ (कण्ठशब्द "कण्ठेष्ठ" । इति ठ । उण १ । १०५ ।)
ग्रीवापुरोभागः ॥ तत्पर्य्यायः ।
गल २ । इत्यमरः । २ । ६ । ८८ ॥
(यथा, शाकुन्तले । ४र्थ अङ्के ।
"विक्लवसरक्षितायाः स्तोकनिमुक्तकण्ठ
निजमिवकमलिन्याः कर्क्कशं कन्तनालम्" ।)
अथ विशुद्धनामषोडशदलपद्ममस्ति । यथा,—
"तदूर्द्धन्तु विशुद्धाख्यं दलषोडशपङ्कजम् ।
स्वरैः षोडशभिर्युक्तं धूम्रवर्णमहाप्रभम् ॥
विशुद्धपद्मआख्यातमाकाशाख्यं महाद्भुतम्" ॥
इति गौतमतन्त्रम् ॥ निकट । ध्वनि । इति मेदिनी ॥

कण्ठकूणिका, स्त्री, (कण्ठ इव कण्ठध्वनिरिव कूणयतीति । कण्ठ+कूण+ण्वुल् । टापि अत इत्त्व च वीणाया कण्ठतुल्यस्वरध्वनिरितिप्रसिद्धेः ।) वीणा । इति हेमचन्द्रः ॥

कण्ठतलासिका, स्त्री, (कण्ठतले अस्यते कण्ठदेशे आस्ते इति । कण्ठ+आस+ण्वुल्+टापि अत इत्त्व च ।) अश्वग्रीवावेष्टकरज्ज्वादि । इति शब्दमाला ॥

कण्ठनीडका, पु, (कण्ठे निकटस्थे नीडे ग्रामतृ वृक्षा कायति शब्दायते । कण्ठ+कै+क । यद्वा कण्ठे प्रासादवृक्षादीनां शिरोभागे नीड यस्य+कप् ।) चिल्लपक्षी । इति त्रिकाण्डशेषः । चिल इति भाषा ॥

कण्ठनीलक, पुं, (कण्ठ धारकस्य कण्ठादिकमूर्द्धस्थान नीलयति स्वशिखाकज्जलेन नीलवर्णं करोतीति । कण्ठ+नील+णिच्+ण्वुल् । अथवा कण्ठे शिखाग्रभागे नीलवर्णोऽस्य कप् ।) उल्का । इति शब्दमाला । मसाल इति भाषा ॥

कण्ठपाशक, पुं, (कण्ठे पाश इव कायति प्रकाशते । कण्ठपाश+कै+क ।) हस्तिगलवेष्टरज्जुः । इति शब्दमाला ।

कण्ठभूषा, स्त्री, (भूष्यतेऽनया इति भूषा । कण्ठस्य भूषा ।) ग्रीवालङ्कार । तत्पर्य्याय । ग्रैवेयकम् २ । इत्यमरः । २ । ६ । १०४ ॥ ग्रैवेयम् ३ ग्रैवम् ४ । इति शब्दरत्नावली ॥ वलक ५ निष्कम् ६ । इति जटाधरः ॥

कण्ठमणिः, पु (कण्ठे कण्ठस्थाने धारणीयो मणिः । कण्ठस्य मणिर्वा ।) गलदेशधारणीयमणिः । तत्पर्य्यायः । काकलम् २ । इति त्रिकाण्डशेषः ॥

कण्ठ्य, त्रि, (कण्ठे+भव । शरीरावयवत्वात् यत् । ४ । ३ । ५५ ।) कण्ठोद्भवशब्दादिः । इति व्याकरणम् ॥ "अकुहविसर्ज्जनीयानां कण्ठः" । पां । १ । १ । ९ वार्त्तिके ।)

कण्ठाग्नि, पु (कण्ठे कण्ठाभ्यन्तरे अग्नि पाचन रूपाग्निरस्य ।) पक्षी । इति त्रिकाण्डशेषः ॥

कण्ठाल, पुं, (कठि+आलच् ।) शूरणः । युद्धम् । नौका । खनित्रम् । इति विश्वः ॥ क्रमेलक । गोणीप्रभेद । इति मेदिनी ॥

कण्ठाला, स्त्री (कठि+आलच्+टाप् ।) आलयो नौका । इति त्रिकाण्डशेषो मेदिनी च ॥

कण्ठिका, स्त्री, (कण्ठो भूष्यतयास्त्यस्या । कण्ठ+ठन् टाप् च । यद्वा कण्ठयति कण्ठ भूषयति या । कठि+णिच्+ण्वुल्+टाप् अत इत्वम् ।) कण्ठाभरणम् । इति हेमचन्द्रः ॥ मकमरी कण्ठी इति भाषा ॥

कण्ठी, स्त्री, (कण्ठ+अल्पार्थे ङीप् ।) अश्व कण्ठ वेष्टनरज्ज्वाभरणादि । इति शब्दमाला ॥ गल । इत्यमरटीकायां भरत ॥

कण्ठीरव, पुं, (कण्ठ्यां रवो यस्य ।) सिंहः । इति त्रिकाण्डशेष ॥ पारावत । इति राजनिघण्टः ॥ मत्तहस्ती । इति सारस्वत ॥

कण्ठीरवी, स्त्री (कण्ठीरव+गौरादित्वात् जातौ वा ङीष् ।) वासकवृक्ष । इति राजनिघण्टः ॥

कण्ठेकाल, पुं, (कण्ठे+काल क्षीरोदमथनोद्भव विषपाननिबन्धनकृष्णवर्णो यस्य । सप्तम्या च लुक् ।) महादेव । इति त्रिकाण्डशेष ॥ (कण्ठे जीवानां कण्ठदेशे काल कालस्वरूपेण वसते । यद्वा कण्ठदेशपर्य्यन्त आकाश तम प्रधाना माया यस्य । परमात्मनः मायाप्रवर्त्तितविषयात्तस्य तथात्वम् । अथ सर्व्वज्ञ सर्व्वान्तर्यामीश्वरः । एतस्मात् पादत्रयात्मकात् तुरीय निष्कल निखयाधिक शिवपादमस्ति ।
यथा, माण्डूक्योपनिषदि ।
'सर्व्व ह्येतद्ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्" ॥ २ ॥
"जागरितस्थानो बहिः प्रज्ञ सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुक् वैश्वानर प्रथमः पाद" ॥ ३ ॥
"स्वप्नस्थानोऽन्त प्रज्ञ सप्ताङ्ग एकोनविंशतिमुख प्रविविक्तभुक् तैजसो द्वितीय पादः' ॥ ४ ॥
"यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्न पश्यति तत्सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुख प्राज्ञस्तृतीय पाद" ॥ ५ ॥

"एष सर्व्वेश्वरः एष सर्व्वज्ञ एषोऽन्तर्याम्येष योनि सर्व्वस्य प्रभवाप्ययौ हि भूतानाम्" ॥ ६ ॥
"नान्त प्रज्ञ न बहिःप्रज्ञ नोभयतः प्रज्ञ न प्रज्ञानघन न प्रज्ञ नाप्रज्ञम् अदृष्टमव्यवहार्य्यम ग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसार प्रपञ्चोपशम शान्त शिवमद्वैत चतुर्थमन्यन्ते स आत्मा स विज्ञेय" ॥ ७ ॥)

कण्डन, क्ली (कडि+भावे ल्युट् ।) उदूखलादिना तण्डुलादेर्निर्म्मलीकरण । इति हेमचन्द्र । काडान इति भाषा ॥

कण्डनी, स्त्री, (कण्ड्यते तुषादिरपनीयतेऽनया । कडि+करणे ल्युट् । ङीपच ।) उदूखलम् । इति त्रिकाण्डशेष ॥ (यथा मनुः । ३ । ६८ ।
"पञ्चसूना गृहस्थस्य चुल्लीपेषण्युपस्करम् ।
कण्डनी चोदकुम्भश्च बध्यते यास्तु वाहयन्" ॥)

कण्डरा, स्त्री, (कडि+अरन् टापच ।) महास्नायुः । महानाडी । इति हेमचन्द्र ॥
("महत्य स्नायवः प्रोक्ताः कण्डरास्तास्तु षोडश । प्रसार्य्याकुञ्चनयोर्दृष्टं तासां प्रयोजनम् ॥ चतस्रो हस्तयोस्तासां तावत्यः पादयो स्मृता । ग्रीवायामपि तावन्त्यस्तावत्य पृष्ठसंश्रिता" ॥
"तत्र पादस्थितानां कण्डराणां नखा प्ररोहा ग्रीवानिबन्धनगतानामधोभागगतानां प्ररोहा मेढ्र पृष्ठनिबन्धनो प्ररोहो नितम्बमूर्द्धोरुवक्षोंऽस स्तनपिण्डा " ॥ इति भावप्रकाशः ॥
' तत्र प्रत्यङ्गलीना या कण्डरा बाहुपृष्ठत । बाह्वोः कर्म्मक्षयकरी विश्वाचीति हि सोच्यते" ॥ इति च सुश्रुत ॥)

कण्डु स्त्री, (कण्डते शरीरं मादति यस्मात् उन्मादोत्थितत्वात् । यद्वा कण्डयति कण्डुयनं करोति शरीरम् । कडि+मदे । "मृगय्वादयश्च" । उणा १ । ३८ । इति कु ।) कण्डूः । इति रायमुकुट ॥ (पु ऋषिविशेष ।
(यथा, विष्णुपुराणे १ । १५ । ११ ।
"कण्डुर्नाम मुनिः पूर्व्वमासीत् वेदविदा वरः । सुरम्ये गोमतीतीरे स तेपे परम तपः" ॥
तद्विवरण तत्रैव १मांशे १५ अध्याये द्रष्टव्यम् ।)

कण्डुर, पुं, (कण्डू राति ददातीति । ' आतोनुपसर्गे क " । ३ । २ । ३ । पृषोदरादित्वात् ह्रस्व ।) कारवेल्लकलता । कुन्दरुकलम । इति राजनिघण्टः ॥

कण्डुरा स्त्री कण्डु राति । कण्डु+रा+क । ततष्टाप् ।) कपिकच्छू । धावकदर्वी । इति राजनिघण्ट । (शूकशिम्बीशब्दे विशेषोऽस्य वक्तव्य ॥

कण्डू, स्त्री (कण्डूय+सम्पदादित्वात् क्विप् यलोप यलोपौ ।) रोगविशेषः । चुलकानि खोस् इत्यादि भाषा । (यथा, भागवते । २ । ७ । १३ ।
"यस्तेन कच्छ्वयत्सुविदधार गोत्र विद्याद्रयोऽपि विचित्त कषाय कण्ड्वः" ।)
तत्पर्य्याय । खर्ज्जूः २ कण्डूया ३ । इत्यमरः । २ । ६ । ५३ ॥ कण्डूति ४ । इति तट्टीका ॥ कण्डूयनम् ५ । इति राजनिघण्टः ॥
अथचिकित्सा यथा—

"दूर्वानिशायुतो लेपः कच्छूपामविनाशनः ।
कृमिदद्रुहरश्चैव शीतपित्तापहः स्मृतः ॥ १ ॥
हरिद्रायाः पलान्यष्टौ षट्पलं हविषस्तथा ।
क्षीराढ़केन सम्पक्वं खण्डस्यार्द्धशतं तथा ॥
पचेन्मृदग्निना वैद्यो भाजने मृण्मये दृढे ।
त्रिवृच्चित्रकजातञ्चैव कृमिघ्नं त्रिवृता तथा ॥
त्रिफला केशरं मुस्तं लौहं प्रति पलं पलम् ।
सञ्चूर्ण्य प्रक्षिपेत्तत्र कर्षमेकन्तु भक्षयेत् ॥
कण्डूविस्फोटदद्रूणां नाशनं परमौषधम् ।
प्रतप्तकाञ्चनाभासो देहो भवति नान्यथा ॥
शीतपित्तोदर्दकोठान् सप्ताहादेव नाशयेत् ।
हरिद्राखण्डनामायं कण्डूनां परमौषधम्" ॥
इति हरिद्राखण्डः ॥ २ ॥

"अमृतवृषपटोलं मुस्तकं सप्तपर्णं
खदिरमसितवेत्रं निम्बपत्रं हरिद्रे ।
विविधविषविनाशं कुष्ठविस्फोटकण्डू-
रपनयति मसूरीं शीतपित्तज्वरञ्च" ॥

इति अमृतादिः ॥ ३ ॥ इति भैषज्यरत्नावली ॥ ('द्विधा ते कोठपिडका कण्डूमत्यः प्रकुप्यते" । इति वाभटः ॥ * ॥ "चन्दननलदकृतमालनक्तमालनिम्बकुटजसर्षपमधुकदारुहरिद्रामुस्तानीति दशेमानि कण्डूघ्नानि भवन्ति" ॥ इति चरकः ॥)

कण्डूकरी, स्त्री, (कण्डूं करोति इति । कण्डू+कृ+ट । स्त्रियां ङीप् ।) शूकशिम्बीवृक्षः । इति शब्दचन्द्रिका ॥

कण्डूघ्नः, पुं (कण्डूं हन्ति । कण्डू+हन्+टक् ।) आरग्वधः । गौरसर्षपः । इति राजनिर्घण्टः ॥

कण्डूतिः, स्त्री, (कण्डूय+भावे क्तिन् । अल्लोपयलोपौ ।) कण्डूः । इति भरतहलायुधौ ॥ चुलकानि इति भाषा ॥ ("राज्ञा बप्पटदेव्याः स निर्दये सुरतोत्सवे । खण्डयामास कण्डूतिम् आत्मस्यार्थे यथा धनी" ॥ इति राजतरङ्गिण्याम् ॥ ४ । २८६ ॥)

कण्डूयनं, क्ली, (कण्डूय+भावे ल्युट् ।) कण्डूः । इति हलायुधः ॥ (यथा भागवते । ७ । ९ । ४५ ।

"यन्मैथुनादि गृहमेधिसुखं हि तुच्छं
कण्डूयनेन करयोरिव दुःखदुःखम्" ॥)

कण्डूया, स्त्री (कण्डू+'कण्ड्वादिभ्यो यक्' ३ । १ । २७ । इत्यप्रत्ययात् स्त्रीत्वात् टाप् च ।) कण्डूः । इत्यमरः । २ । ६ । ५२ ॥

कण्डूरा, स्त्री (कण्डूं राति । कण्डू+रा+कः । टाप् ।) क्षुपविशेषः । आलकुशी इति भाषा । तत्पर्य्यायः । आत्मगुप्ता २ जडा ३ अव्यण्डा ४ प्रावृषायणी ५ ऋष्यप्रोक्ता ६ शूकशिम्बिः ७ कपिकच्छुः ८ मर्कटी ९ । इत्यमरः । २ । ४ । ६ ॥ कण्डुरा १० अव्यण्डा ११ कण्डुरा १२ शूकशिम्बी १३ शूकशिम्बा १४ कपिकच्छूः १५ । इति तट्टीका ॥ ऋषभः १६ मसृणा १७ । इति रत्नकोषः ॥

कण्डूलः, पुं (कण्डू+अस्त्यर्थे+लच् । कण्डूतिकारकत्वात् तथात्वम् ।) शूरणः । इति राजनिर्घण्टः ॥ कण्डूयुक्ते त्रि ॥

कण्डोलः, पुं (कडि+बाहुलकात् ओलच् ।) वंशवेत्रादिरचितधान्यादिस्थापनपात्रम् । डोल् इति भाषा । तत्पर्य्यायः । पिटः २ । इत्यमरः । २ । ९ । २६ ॥ पिटकः ३ पेटकः ४ । इति भरतः ॥ उष्ट्रः । इत्युणादिकोषः ॥

कण्डोलकः पुं, (कडि+बाहुलकादोलच् । स्वार्थे कन् ।) कण्डोलः । इति हेमचन्द्रः ॥

कण्डोलवीणा, स्त्री (कण्डोल इव वीणा । कण्डोलस्य वीणा वा ।) चण्डालवीणा । केँदरा इति ख्याता । तत्पर्य्यायः । चाण्डालिका २ चण्डालवल्लकी ३ । इत्यमरः । १ । १० । ३९ ॥ चण्डालिका ४ कटोलवीणा ५ । इति भरतः ॥

कण्डोली, स्त्री, (कण्डोलस्तदाकारोऽस्त्यस्याः । अर्श आदित्वात् अच्+गौरादित्वात् ङीष् ।) कण्डोलवीणा । इति शब्दरत्नावली ॥

कण्डोषः, पुं (कण्डूनामोषः सन्तापोऽस्मात् शूककीटस्पर्शे कण्डूसन्तापमिति प्रसिद्धत्वात्तथात्वम् ।) शूककीटः । इति शब्दचन्द्रिका ॥ शुयापोका इति भाषा ॥

कण्वं, क्ली, (कण्यते अपेक्ष्यते इति । कण+क्वन् ।) पापम् । इति मेदिनी ॥

कण्वः, पुं, (कण+क्वन् ।) मुनिविशेषः । इति मेदिनी ॥ स तु पुरुवंशजातप्रतिरथनामक्षत्रियपुत्रः । यथा,—

"सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ।
तस्य मेधातिथिस्तस्मात् प्रस्कण्णाद्या द्विजातयः" ॥

इति श्रीभागवते । ९ । २० । ६ ॥ (अयमपि ऋषिभेदः । अनेनैव मुनिशार्दूलेन यजुर्वेदीयकाण्वशाखा प्रणीता । यथा, यजुर्वेदे १७ । ७४ ।

"यामस्य कण्वोऽदुहत् प्रपीनां
सहस्रधारां पयसा महीं गाम्" ॥

तथा भागवते च १२ । ६ । ७४ ।

"यजुर्भिरकरोच्छाखा दशपञ्चशतैर्विभुः ।
जगृहुर्वाजसन्यस्ताः काण्वमाध्यन्दिनादयः" ॥

अयन्तु काश्यपवंशोद्भव शकुन्तलायाः प्रतिपालकपिता । यथा, महाभारते १ । शाकुन्तले । ७० । ३० ।

"महर्षिं काश्यपं द्रष्टुमथ कण्वं तपोधनम्" ॥

एतस्य सविस्तरन्तु तत्रैव ७१ अध्याये द्रष्टव्यम् । अयमेव गोत्रप्रवर्त्तकः । ऋग्वेदे १ । ४४—५० सूक्तेषु ऋषिगोत्रप्रवर्त्तककण्वकस्तान्तमवधेयम् ॥ कण्व इत्यस्यार्थः कण्वः शब्दनः सत्वविद्यामाधनात् भवति संसारजन्मदुःखमय नहि तत्त्वज्ञानिनां कश्चित् शब्दायतिः अविद्याधर्म्माभावादिति नीलकण्ठः । विद्याक्रियाकुशलः मेधावी च । इति ऋग्वेदभाष्ये दयानन्दः ॥ सभामाम्नातदीपविशेषः । यथा, महाभारते । ३ । ८२ । ४४ ।

"कण्वाश्रमं ततो गच्छेत् श्रीजुष्टं लोकपूजितम् ।
धर्म्मारण्यं हि तत्पुण्यमाद्यञ्च भरतर्षभ !" ॥)

कतः, पुं, मुनिविशेषः । इत्युणादिकोषः ॥ (अयन्तु विश्वामित्रपुत्राणामेकतमः । क जलं शुद्धं तनोति क+तन+ड ।) कतकवृक्षः । इति राजनिर्घण्टः ॥

कतकः पुं (कत+चासे+बाहुलकात् । कम् जलस्य तकः हासः प्रकाशः प्रसादः इति यावत् अस्मात् ।) वृक्षविशेषः । निर्मली इति भाषा । तत्पर्य्यायः । अम्बुप्रसादः २ कतः ३ तिक्तपत्रः ४ तत्त्यः ५ छेदनीयः ६ गुच्छफलः ७ कतफलः ८ विषमर्दिषः ९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । चक्षुर्हितत्वम् । रुचिकारित्वम् । कृमिदोषमूत्ररोगनाशित्वञ्च । तस्य बीजं अम्बुप्रसादनम् । इति राजनिर्घण्टः ॥ (यथा, मनुः । ६ । ६७ ।

'फलं कतकवृक्षस्य यद्यप्यम्बुप्रसादकम् ।
न नामग्रहणादेव तस्य वारि प्रसीदति' ॥
"पयः प्रसादि कतकफलकं तज्जलं सह ।
कतकस्य फलं नेत्र्यं तन्निर्मलता परम् ।
वातश्लेष्महरं शीतं मधुरं तुवरं गुरु" ॥

इति भावप्रकाशः ॥)

कतमः पुं, (क जलं तमोति प्रसन्नं सम्पादयति । क+तम्+ड । वाहुल्य ज्ञानस्य ।) कतकवृक्षः । इति राजनिर्घण्टः ॥

कतमालः, पुं,(तम+घञ् कृतः । कस्य जलस्य तमाय शोषणाय अलति पर्य्याप्नोति । क+तम+अल+अच् ।) अग्निः । इति शब्दमाला ॥ कपमालः खतमालश्च पाठः ॥

कति, त्रि, (का संख्या परिमाणं वा एषां "किमः संख्यापरिमाणे डति" ५ । २ । ४१ । इति डति) कियत्परिमाणम् । इति व्याकरणम् ॥ कत इति भाषा । (यथा, अथर्ववेदे १ । ९ । ४ ।
"कति देवाः कतमे त आसन् य उरोग्रीवाश्चिक्युः पुरुषस्य कतिस्तनौ व्यदधुः कः कफोडौ कति स्कन्धान् कतिपृष्टी रचिन्वन्" ॥ पुं । विश्वामित्रस्य पुत्राणामेकतमः । यस्माज्जातोऽभूत् कात्यायनर्षिः ॥)

कतिपयः, त्रि, (किम्+डति कति अयच् पुगागमः ।) कति । इति व्याकरणम् । कतकगुलि इति भाषा । (यथा, मेघदूते २५ ।
"सम्पत्स्यन्ते कतिपयदिनस्थायिहंसा दशार्णाः" ॥)

कत्तृणं, क्ली, (कुत्सितं तृणं इति । अत्र कु स्वार्थे कोः कदादेशः "तृणे च जातौ" । ६ । ३ । १०३ ।) सुगन्धितृणविशेषः । रामकर्पूर इति ख्यातम् । तत्पर्य्यायः । पौरम् २ सौगन्धिकम् ३ ध्यामम् ४ देवजग्धकम् ५ रौहिषम् ६ । इत्यमरः । २ । ४ । १६६ ॥ सुगन्धम् ७ दग्धीतम् ८ सुगोत्रकम् ९ । इति रत्नमाला ॥ रौहिषलवम् १० कालतृणम् ११ भूति १२ भूतिकम् १३ ध्यामकम् १४ ध्यामकम् १५ पूति १६ मुद्गकम् १७ देवजग्धकम् १८ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । कफरक्तपित्तादिदोषवान्तिविनाशित्वञ्च । इति राजनिर्घण्टः ॥ (गुणाः । रक्तकण्ठव्याधिपित्तशूलकासज्वरनाशित्वञ्च । इति भावप्रकाशः ॥) वृष्णिः । इति मेदिनी ॥ चाकुलिया इति भाषा ।

कत्तोयं क्ली (कु कुत्सितं तोयं यस्य ।) मद्यम् । इति त्रिकाण्डशेषः ॥

कत्थ ङ श्लाघे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट । इदित् अस्य च ।) कत्थमानः श्लाघते ।

श्लाघ प्रशंसा । स कत्थते गुणिन गुणी । इति दुर्गादास ।

कथ, स क शैथिल्ये । इति कविकल्पद्रुम । (चुरा-पर-अक-सेट ।) कत्थयति कथापयति । इति दुर्गादासः ।

कत्सवर,स्त्री, (कद वैकल्ये + स । कत्स विकलता तया त्रियते शिरः स्वाम्यशरणस्थान अन्यस्य शिरो उत्कर्त्तितात् तथात्वम् । कत्स + वृ + अप ।) स्कन्धः । इति शब्दचन्द्रिका ।

कथ, त क वाक्यप्रबन्धे । इति कविकल्पद्रुम । (चुरा-पर-सक-सेट ।) कथयति । इति दुर्गादास ।
("हन्त ! ते कथयिष्यामि सेतिहास पुरातनम्" । इति भागवतम् ।)

कथ ग्य, कथम् । किं प्रकारम् । इति व्याकरणम् ।
(यथा, मनुः ५ । २ ।
"कथ मृत्यु प्रभवति वेदशास्त्रविदां प्रभो" ।)

कथकः, त्रि, (कथयति यः । कथ + कर्त्तरि ण्वुल ।) वक्ता । कथोपजीवी । नाटकश्रवणकर्त्ता । तत्पर्य्यायः । शकनटः २ कथाप्राण ३ । इति शब्दरत्नावली । (यथा महाभारते १ । २१५ । ३ ।
"कथकाश्चापरे राजन् श्रमणाश्च वनौकस" ।)
न्यायकल्पविशेष । (यथा, अनुमानचिन्तामणि ।
"वादकथायामव्यपथुलोऽपि कथकैरपाधि बद्धाय" ।)

कथङ्कथिकः, त्रि, (कथ कथमिति प्रवृत्तिमाख्यस्य इति । कथंकथ + आकृतगणात् ठञ् तत्तल्लोपः ।) प्रष्टा । प्रश्नकर्त्ता । इति त्रिकाण्डशेषभूरिप्रयोगौ ।

कथङ्कथिकता, स्त्री, (कथङ्कथिक + भावे तल ।) पृच्छा । प्रश्न । इति हेमचन्द्रः ।

कथन, क्ली, (कथ्यते इति । कथत वाक्यप्रबन्धे । भावे + ल्युट ।) कथा । इति हलायुधः । कहन इति भाषा । (यथा पञ्चतन्त्रे १ । १३ ।
"मिथ्यात्मकथन कूटतुलामानम्" ।)

कथम् अ्य, (कस्मिन प्रकारे इति प्रकारार्थे + "किमश्चेति" ।५।३।२५। थमुः कादेशश्च ।) हर्षे । गर्हा । प्रकारार्थः । सम्भ्रम । प्रश्न । सम्भावना । इति मेदिनी । (यथा शाकुन्तले १ अङ्के
"कथमिदानीमात्मान निवेदयामि
कथ वा आत्मापहारं करोमि ' ।)

कथा, स्त्री, (कथ + "चितिपूजिकथिकुम्बिचर्चि श्चेति" । ३ । ३ । १०५ । अङ् । टाप च ।) प्रबन्धकल्पना । इत्यमर । १ । ६ । ६ । प्रबन्धेन कल्पना अथवा प्रबन्धस्य अभिधेयस्य कल्पना स्वय रचना इति सारसुन्दरी । 'प्रबन्धस्य कल्पना रचना बह्वल्पसत्यालोकसत्या" । इति भरत ।
"प्रबन्धकल्पनां स्तोकसत्या प्राज्ञा कथा विदु ।
परम्पराश्रया या स्यात् सा मताख्यायिका क्वचित' ।
इति कोलाहलाचार्य्य । ("नैयायिकमते चि गीषावक्तृकपूर्व्वपक्षसिद्धान्तवान् वाक्यसन्दर्भ" । यथा मनु । ३ ।२३१ ।
"अध्यक्षोचेत विप्रेभ्यस्तत्तद्यादमत्सर ।
ब्रह्मोद्याश्च कथा कुर्य्यात्पितॄणामेतदीप्सितम् ' ।

वार्त्ता । वाक्यम् । यथा, रघुः । ८ । ४३ ।
"अभितप्तमयोऽपि मार्द्दवं
भजते कैव कथा शरीरिषु" ।
विवरणम् । यथा, रामायणे । १ । ८ । ६ ।
"सनत्कुमारो भगवान् पुरा कथितवान् कथाम् ।
भविष्य विदुषां मध्ये तव पुत्रसमुद्भवम्" ।)

कथाप्रसङ्गः, त्रि, (कथायां प्रसङ्गो यस्य ।) अ स्याकः । इति शब्दरत्नावली ("तेन सह नाना कथाप्रसङ्गेनावस्थित" । इति हितोपदेश ।) वातूल । विषवैद्य । इति मेदिनी । (किराता र्जुनीये । १ । २४ । "कथाप्रसङ्गेन जनैरुदाहृता दनुस्मृताऽखण्डलसूनुविक्रम" । वार्त्ता । गोष्ठी वचनम् । उक्तञ्च कथासरित्सागरे २२ । १८२ ।
"मिथः कथाप्रसङ्गेन विवाद किल चक्रतु " ।)

कथाप्राण ,त्रि,(कथया प्राणिति जीवति कथां आव यित्वैव जीवनोपाय करोतीत्यर्थ । प्र + अन + अच् । यद्वा कथायां प्राणा जीवनोपाया यस्य ।) कथक । स तु नाटकवक्ता । इति शब्दरत्नावली ।

कथित, त्रि (कथ्यतेऽसौ । कथ + कर्म्मणि + क्त ।) उक्त । (यथा, श्रीभागवतम् । १० । १ । १ ।
"कथितो वंशविस्तारो भवता सोमसूर्य्ययो" ।
कथ + भावे क्तः । कथनम् । यथा रघु । ११ । १० ।
"पूर्व्ववृत्तकथितैः पुराविद
सानुजः पितृसखस्य राघव' ।)

कद, इ रोदने । आह्वाने । वैकल्ये । इति कविकल्पद्रुम । (भ्वा-पर-सक अक च-सेट्-इदित ।) इ कम्मथि कन्द्यते । इति दुर्गादास ।

कद, घ म ङ वैकल्ये । विक्लवीभावे । इति कविकल्पद्रुम । (भ्वादि-आत्म-अक-सेट्-घटादि ।) घ कदा । म कदयति । ङ कदते । इति दुर्गादासः ।

कदः, पुं, (क जल ददाति । क + दा + क ।) मेघ । इति शब्दरत्नावली ।

कदकः पु, (कदः मेघ इव कायति प्रकाशते उपरि भागे । कद + कै + क ।) वितानम् । इति हेमचन्द्र । चाँदोया इति भाषा ।

कदक्षर, क्ली (कुत्सित अक्षर । को कदादेश ।) कुत्सितवर्णं ।

कदध्वा, [न्] पुं, (कुत्सितोऽध्वा । कुगतीति समास । को' कत तत्पुरुषेचेति कदादेश ।) निन्दितपथः । तत्पर्य्याय । अध्व २ दुरध्व ३ विपथ ४ कापथ ५ । इत्यमरः २ । १ । १६ ।

कदन, क्ली, (कदयति दुःख वैकल्य वा प्राप्नोत्यनेन कद्यते दुःखप्राप्यतेऽनेन वा । कद + णिच् + करणे ल्युट् । घटादित्वात न वृद्धि । कद्यते इति भावे ल्युट् । कद्यते आहन्यते विक्लवीक्रियते निहन्यते वा यत्र । अधिकरणे णिच् ल्युट यद्वा कद्यते म्रियते यत्र ।) पापम् । (यथा, भागवते ७।९।१६ ।
"त्रस्तोऽस्म्यहं कृपणवत्सल ! दुःसहोग्र
संसारचक्रकदनात् ग्रसतां प्रणीत' ।)
मर्द । (यथा रामायणे । ६ । २८ । २ ।
"क्रोधेन कदन चक्रे वानराणां युयुत्सताम ' ।)
युद्धम । इति मेदिनी । (यथा भागवते ।८।२।१७ ।
"इति ते मर्द्दनिर्द्दिष्टमादाय शिरसादृता ।
तथा प्रजानां कदन विदधु कदनप्रिया" ।)
मारणम् । इति भूरिप्रयोग जटाधरश्च ।

कदन्न क्ली, (कुत्सित अन्न । को कदादेशश्च ।) कुत्सितान्नम् । इति व्याकरणम् ।
(यथा, भागवते ।५ ।६ । ८ । 'मिष्ट कदन्न वा अभ्यवहरति यत् नेन्द्रियप्रीतिनिमित्तम' ।
"हविर्विना हरिर्याति विना पीठेन माधव ।
कदन्नै पुण्डरीकाक्ष प्रहारेण धनञ्जय" । इत्युद्भट ।)

कदम्ब, क्ली, ("कदिकडिकटिभ्योऽम्बच्" । उणा । ४ । ८२ । इति कद + अम्बच् ।) निकुरम्बम् । समूह । इति मेदिनी ।

कदम्ब , पुं (कद्यते रुदनात् विरहिणां चित्तवैकल्य जायतेऽनेन । कद + करणे अम्बच् ।) वृक्षविशेष । कदम् इति भाषा । तत्पर्य्याय । नीप २ प्रियक ३ हलिप्रिय ४ । इत्यमर ।२। ४। ४२ । कादम्ब ५ । इति तट्टीका । षट्पदेष्ट ६ प्रावृषेण्य ७ हरिप्रिय ८ । इति रत्नमाला । वृत्तपुष्प ९ सुरभि १० ललनाप्रिय ११ कादम्बर्य्य १२ सीधुपुष्प १३ महाढ्य १४ कर्णपूरक १५ । अस्य गुणा । तिक्तत्वम । कटुत्वम् । कषायत्वम् । वातपित्त दाहार्त्तिनाशित्वम् । शीतलत्वम् । शुक्रवर्द्धनत्वञ्च । इति राजनिर्घण्ट । (यथा भावप्रकाशे ।
'कदम्बो मधुर शीतो कषायो लवणो गुरु ।
सरो विष्टम्भकृद्रूक्ष कफस्तन्यानिलप्रद" ।
तथा च सुश्रुत ।
"गरदोषहर नीप प्राचीनामलक तथा' ।)
अत्र नीपहलिप्रियौ धाराकदम्बवाचिनावपि कदम्बसाम्यात् पठितौ । यथा साङ्ग ।
"नीपो महाकदम्ब स्याद्धाराकदम्ब इत्यपि ।
द्वितीयोऽस्यप्रसरश्च वृत्तपुष्पः कदम्बक" ।
इत्यस्य भेद । तथा रत्नेऽपि । हारिद्रस्तु दलो बक । यथामरटीकायां भरत ।
"धूलीकदम्बका धारा कदम्बः षट्पदप्रिय ।
वृत्तपुष्प केशराढ्य प्रावृषेण्य कदम्बक ।
नीपो महाकदम्बोऽपि तथा बकुलको मतः" ।
(यथा,—साहित्यदर्पणम् । "य कौमारहर स एव हि वरस्ता एव चैत्रक्षपास्ते चोन्मीलि तमालतीसुरभयः प्रौढा कदम्बानिला" । कविभिस्तु प्रायशो वर्षाकाले एव अस्य वर्णन क्रियते । माघे रैवतकपर्व्वतवर्णने द्रष्टव्यम् ।) सर्षप । इति मेदिनी । देवताडवृक्षम् । इति रत्नमाला ।
(क प्रजापत्यधिष्ठातृत्वेनेन्द्रिय दमयति इति व्युत्पत्त्या जितेन्द्रियतत्त्वज्ञानी । कद कदन विनाश याति गच्छति प्रलये इति शेष । इति व्युत्पत्त्या जगत् । यथा,—
'स एव सौम्य स्निग्ध राजते मूले विश्व कदम्बस्य परमो वै पुरुष आत्मा । इति श्रुतौ ।)

कदम्बक स्त्री (कदम्ब + सञ्ज्ञायां कन् ।) समूह । इत्यमर । २ । ५ । ४ । (यथा शाकुन्तले २ अङ्के । 'गाहन्तां महिषा निपानसलिल शृङ्गै

मुष्टचक्रादिभिः छायावृक्षकदम्बक नगकुल रोम स्वभ्यस्यतु” ॥)

कदम्बक, पुं (कदम्ब इव कायति प्रकाशते । हरिद्रा पीतवर्णत्वात् कदम्बकोरकोपरिस्थितसूक्ष्माग्र तुल्यफलत्वाच्च सर्षपस्यापि तथात्वम् । वृक्षे तु कदम्ब एव स्वार्थे कन् ।) सर्षप । हरिद्रा । इति राजनिर्घण्टः ॥ कदम्ववृक्षः । इति शब्दरत्नावली ॥

कदम्बद, पुं (कदम्बः कदम्बस्योपरिस्थ सूक्ष्माग्र इव दीयतेऽसौ । कदम्ब+दो अवखण्डने + कर्म्मणि + घञर्थे क । सर्षपस्य कदम्बकोरकोपरिस्थ सूक्ष्माग्रतुल्यफलत्वात् तथात्वम् ।) सर्षप । इति शब्दचन्द्रिका ॥

कदम्बपुष्पा स्त्री (कदम्बस्येव पुष्पमस्त्यस्याः । अर्श आदित्वात् अच् ततष्टाप् ।) मुण्डितिकावृक्ष । इति रत्नमाला । मुण्डिरी इति भाषा ॥ (विशेषोऽस्या मुण्डितिकाशब्दे ज्ञातव्य ॥)

कदम्बपुष्पी, स्त्री (कदम्बपुष्पमिव पुष्पमस्याः । कदम्ब पुष्प + ङीप् ।) महाश्रावणिकावृक्ष । इति राजनिर्घण्टः शब्दचन्द्रिका च । मुण्डिरी इति भाषा ॥

कदम्बी, स्त्री, (कद्+करणे अम्बच् गौरादित्वात् ङीष् ।) देवदालीलता । इति राजनिर्घण्टः ॥ (देवदालीशब्दे गुणादयोऽस्या ज्ञातव्याः ॥)

कदर, स्त्री, (कं जलं दृणाति दारयति नाशयतीत्यर्थः । क+दॄ+अच् ।) पायसभेदः । इति शब्दमाला ॥

कदर, पुं, (कं जलं दृणाति श्लेष्मणा शुष्कतया नाशयतीत्यर्थः । क+दॄ+अच् ।) श्वेतखदिरः । काँटा बावला इति भाषा । तत्पर्य्यायः । सोमवल्कः २ । इत्यमरः । २ । ४ । ४ ॥ ब्रह्मशल्यः ३ खदिरोपम ४ । इति रत्नमाला ॥ (श्वेतसारः ५ । खदिर ६ । सोमवल्कल ७ । इति भावप्रकाश ॥

गुणाश्चास्य तत्रैव ।

“कदरो विशदो वर्ण्यो मुखरोगकफास्रजित्” ॥

व्यवहारो यथा, चरके ।

“तिन्दुकप्रियालबदरकदरखदिरसप्तपर्णाश्वकर्णार्जुनासनारिमेदा इति दशेमान्युदर्दप्रशमनानि भवन्ति’ ॥) क्रकच । करात् इति भाषा ॥ व्याधि भेदः । इति मेदिनी ॥ कड़ा आगुड़ा इति भाषा ॥ तस्य लक्षणम् । यथा निदाने ।

‘शर्करोन्मथिते पादे क्षते वा कण्टकादिभि ।

ग्रन्थिः कीलवदुत्पन्नो जायते कदरस्तु सः’ ॥

(‘शर्करोन्मथिते पादे क्षते वा कण्टकादिभि ।

मेदोरक्तानुगैश्चैव दोषैर्वा जायते नृणाम् ॥

सकोलं कठिनो ग्रन्थिर्निम्नमध्योन्नतोऽपि वा ।

कोलमात्रः सरुक्स्रावी जायते कदरस्तु सः” ॥

इति सुश्रुत ॥) तच्चिकित्सा यथा भावप्रकाश ॥

‘स्नेहेन कदरमुद्धृत्य तैलेन दहनेन वा’ ॥

कद्रुम । इति हारावली ॥

कदर्य्य, त्रि (कुत्सितोऽर्य्यः स्वामी ॥ कुगतीति समास ।) क्षुद्रः । कृपण । इत्यमरः । ३ । १ । ४८ ॥

‘आत्मानं धर्म्मकृत्यञ्च पुत्त्रदारांश्च पीडयन् ।

यो लोभात् सञ्चिनोत्यर्थान् स कदर्य्य इति स्मृत” ॥

इति स्मृति ॥ (यथा, छान्दोग्योपनिषदि । ५ । ११ ।

५ । “तेभ्योऽप्रातेभ्य पृथगर्हाणि कारयाञ्चकार स प्रातः सञ्जिहान उवाच नमेस्तेनो जनपदे न कदर्य्यो न मद्यपो नानाहिताग्निर्नाविद्वानिति ’ ॥)

कदल, पुं (कद+वृषादित्वात् कलच् ।) कदली वृक्ष । पृश्निपर्णी । इति मेदिनी ॥

(यथा, अमरुशतके । ९५ ।

‘ऊरुद्वयं मृगदृशः कदलस्य काण्डौ मध्यञ्च वेदिरतुला स्तनयुग्मगत्या ” ॥)

कदलक, पुं (कदल+स्वार्थे कन् ।) कदलीवृक्ष । इति शब्दरत्नावली ॥

कदला, स्त्री, (कदल+टाप् ।) पृश्नी । चाकुलिया इति भाषा । शिम्बिका । शाल्मलीवृक्ष । इति मेदिनी ॥

कदली, स्त्री, (कदल+गौरादित्वात् ङीष् । यद्वा काय जलाय दल्यते खण्ड्यते गौरादित्वात् ङीष् ।) स्वनामप्रसिद्धौषधिविशेष । कला इति भाषा । तत्पर्य्याय । वारणबुसा २ रम्भा ३ मोचा ४ अंशुमत्फला ५ काष्ठीला ६ । इत्यमरः ॥ कदल ७ वारणवषा ८ वारवषा ९ । इति तट्टीका ॥ सुफला १० सुकुमारा ११ सकृत्फला १२ गुच्छफला १३ हस्तिविषाणी १४ गुच्छदन्तिका १५ निःसारा १६ राजेष्टा १७ बालकप्रिया १८ ऊरुस्तम्भा १९ भानुफला २० वनलक्ष्मी २१ । कदलक २२ मोचक २३ रोचन २४ लोचक २५ वारबुषा २६ । इति शब्दरत्नावली ॥ वारणवल्लभा २७ चम्पकवती २८ । इति जटाधर ॥ (यथा, महाभारते ३ । द्रुतपर्व्वणि ६६ । १२ ।

“कदलीषण्डसदृशं सम्पन्नावासयुतम् ।

गजहस्तप्रतीकाश वक्षप्रतिमगौरवम्” ॥)

अस्याः फलगुणाः । कषायत्वम् । मधुरत्वम् । शीतलत्वम् । पित्तास्रविनाशनत्वम् । गुरुत्वम् । मन्दाग्नेः अपथ्यत्वम् । सद्यः शुक्रविवर्द्धनत्वम् । क्लमतृष्णाहरत्वम् । कान्तिप्रदत्वम् । दीप्ताग्नौ सुखदत्वम् । कफामयकरत्वम् । सन्तर्पणत्वम् । दुर्ज्जरत्वञ्च ॥ * ॥ (यथा हारीते ।

“पक्वं मनोज्ञं कफवृद्धिकारि

शीतञ्च सन्तर्पणमेव बल्यम् ।

रक्तं सपित्तं श्वसनं सदाहं

रम्भाफलञ्चापि नरस्य हन्ति ॥

अपक्वकं ग्राहि च शीतलञ्च

कषायकं वातकफं करोति ।

विष्टम्भि वल्यं गुरु दुर्ज्जरञ्च

धाराग्निरम्भाफलमेव वदन्ति” ॥)

मोचकगुणाः । रुच्यत्वम् । कफवह्निनाशित्वम् । कुष्ठातीसारहरत्वम् । अग्निदीपनत्वम् । बलिशोधनत्वञ्च ॥ * ॥

(‘मोचाफलं स्वादु शीतं विष्टम्भि कफकृद्गुरु ।

स्निग्धं पित्तास्रदाहक्षतक्षयसमीरजित ॥

पक्वं स्वादु हिमं पाके स्वादु वृष्यञ्च वृंहणम् ।

क्षुत्तृष्णाश्रम्हृन्नेत्ररोगमेहहरम्प्रतम्” ॥

इति भावप्रकाश ॥ कदली पुष्पगुणाश्च ॥

‘कदल्याः कुसुमं स्निग्धं मधुरं तुवरं गुरु ।

वातपित्तहरं शीतं रक्तपित्तक्षयप्रणुत” ॥)

अस्याः मूलगुणाः । वलकारित्वम् । वातपित्त नाशित्वम् । गुरुत्वञ्च ॥ * ॥

“माणिक्यमर्त्त्याम्रतचम्पकाद्या

भेदा कदल्या बहवोऽपि सन्ति ।

उक्ता गुणास्तेष्वधिका भवन्ति

निर्द्दोषता स्याल्लघुता च तेषाम्” ॥

इति राजनिर्घण्ट ॥ * ॥ चम्पकाख्यकदली फलगुणाः । वातपित्तहरत्वम् । गुरुत्वम् । शुक्र वृद्धिकारित्वम् । अतिशीतलत्वम् । रुच्ये पाके मधुरत्वञ्च । दुग्धदधिलवणाद्युक्तं कदलं दुर्ज्जरम् । इति राजवल्लभ ॥ * ॥ हरिणविशेष । पताका । इति मेदिनी ॥ करिवैजयन्ती । इति हलायुध ॥ हातिर उपरेर निशान इति भाषा ॥

कदा, अ, (किम्+काले दा । “सर्व्वैकान्यकियत्तदः काले दा” । ५ । ३ । १५ ।) कस्मिन् काले । इति व्याकरणम् ॥ कबे कखन इति भाषा ॥ (यथा, ऋग्वेदे १ । ८४ । ८ । ‘कदा नः शुश्रवद्गिर इन्द्रो अङ्ग’ ॥ तथा हितोपदेशे । १ । १२२ ।

“जातिमात्रेण किं कश्चिद्वध्यते पूज्यते क्वचित् ।

व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत्” ॥)

कदाकार, पुं (कुत्सित आकार । नैतन्न कद्रु भावीह निषिद्धत्वात् । यथा, “को कत्पुरुष इति” । ६ । ३ । १०१ ।) कुत्सिताकार ॥ (कुत्सिताकारविशिष्टे, त्रि ॥)

कदाख्य,क्ली (कुत्सिता आख्या नाम यस्य ।) कुष्ठवृक्षः । कुड़ इति भाषा । तत्पर्य्याय । कौवेरम् २ दुष्टम् ३ व्याप्यम् ४ । इति शब्दचन्द्रिका ॥

कदाचन अ, (कदा+अनिश्चितार्थे चनप्रत्ययः ।) कस्मिन् काले । इति व्याकरणम् । कोन समये इति भाषा । (यथा, मनु । २ । ५८ ।

“प्राजापत्येन तीर्थेन नित्यकालमुपस्पृशेत् ।

कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन” ॥)

कदाचित् अ (कदा+अनिश्चितार्थे चित् ।) कस्मिंश्चित् काले । तत्पर्य्याय । जातु २ । इत्यमरः । ३ । ४ । ४ ॥ कश्चित् ३ । इति हेमचन्द्रः ॥ (यथा मनु । ४ । ७४ ।

“नाक्षैः क्रीडेत् कदाचित्तु स्वयं नोपानहौ हरेत् ।

शयनस्थो न भुञ्जीत न पाणिस्थं न चासने” ॥)

कदुष्ण क्ली, (कद् ईषत् उष्णं ईषदर्थे कोः “कव चोष्णे” ६ । ३ । १०७ । अकारात् । कदादेश ।) ईषदुष्णम् । तत्पर्य्याय । कोष्णम् २ कवोष्णम् ३ मन्दोष्णम् ४ । (यथा भट्टि । ३ । १८ ।

“ससीतयोराघवयोरधीयन्

श्वसन् कदुष्णं पुरमाविवेश” ॥)

तद्वति त्रि । इत्यमरः । १ । ३ । ३५ ॥

कद्द वाचशब्दे । (भ्वा०-पर०-अक०-सेट्) अवगमस्तोरे यथा । क्विप् सम्बोधनान्तार्थे कद्द इति । कद्दति परस्मैपदे कद्दक स्यादित्यथ । इति दुर्गादासः ॥

कद्रथः पुं, (कुत्सितः रथः । कोः कदादेशः । ‘रथवदयोश्च’ ६ । ३ । १०२ ।) कुत्सितरथः । इति व्याकरणम् ॥ (यथा, भट्टिः ५ । १०३ ।

"युधिकदम्बबद्धीम वमस्त्र स्वनद्यानिवम्" ।)

कदु, पुं, (कद्+उः ।) पिङ्गलवर्णः । तद्वति त्रि । इत्यमरः । १ । ५ । १६ ।

कद्रुः, स्त्री, (कद्+रु । यद्वा भृगय्यादित्वात् साधु ।) नागमाता । इति मेदिनी । सा तु दक्षकन्या, कश्यपपत्नी च । इति पुराणम् । (यथा, रामायणम् । ३ । २० । २९ ।

"रोहिण्यां जज्ञिरे गावो गन्धर्व्या वाजिनस्तथा । सुरसाजनयन्नागान् राम ! कद्रुश्च पन्नगान्" ।)

कद्रुपुत्र, पुं, (कद्रोः पुत्रः ।) नागः । इति शब्दचन्द्रिका ।

कद्रुसुतः, पुं, (कद्रोः सुतः ।) नागः । तत्पर्य्यायः । काद्रवेयः २ । इति शब्दरत्नावली । कद्रुजातः ३ कद्रुपुत्रः ४ । इति शब्दचन्द्रिका ।

कद्वदः, त्रि, (कुत्सितं वदतीति । वदे यथायथम् । कुत्सितः वदः इति वा "रथवदयोश्च" । ६ । ३ । १०२ । इति कादादेशः ।) कुत्सितवक्ता । तत्पर्य्यायः । गर्ह्यवादी २ । इत्यमरः । ३ । १ । ३० । दुर्म्मुखः ३ । अतिकुत्सितः । इति हेमचन्द्रः । (यथा, भट्टिः ६ । ७५ ।

"कल्यं दयितादीनं सुव्यक्तं रामणीयकम् । येन जातं प्रियापाये कद्वदं हंसकोकिलम्" ।)

कन, ङ दीप्तौ । गतौ । युतौ । इति कविकल्पद्रुमः । (भ्वा-पर-सक-सक च-सेट्, इदित् ।) ई ङि कान्तोऽसि । इति दुर्गादासः ।

कनकं, क्ली, (कनति दीप्यते इति । कनी दीप्तौ + लाञ्छादिभ्यो वुन् ।) स्वर्णम् । इत्यमरः । २ । ९ । ९४ । (यथा, मेघदूते । २ ।

"तस्मिन्नद्रौ कतिचिदबला विप्रयुक्तः स कामी नीत्वा मासान् कनकवलयभ्रंशरिक्तप्रकोष्ठः" ।)

कनकः, पुं, (कनति दीप्यते यः । कनी दीप्तौ + लाञ्छादिभ्यो वुन् ।) पलाशवृक्षः । नागकेशरवृक्षः । धुस्तूरवृक्षः । (यथा, इन्द्रजालतन्त्रे ।

'कपालं मानुषं ग्राह्यं कनकस्य फलानि च" ।)

काञ्चनारवृक्षः । कालीयवृक्षः । चम्पकवृक्षः । इति मेदिनी । काशमर्द्दवृक्षः । कृष्णगुग्गुलुवृक्षः । इति राजनिर्घण्टः । काञ्चालक । इति शब्दमाला । (क्लीव । यथा, महाभारते । १३ । १०७ । ९३ ।

"उपकारं प्रियं सर्व्वं कनकं कांचनच्छवि" ।

यदुवंशीयस्य दुर्द्दमस्य पुत्रः ।

यथा, हरिवंशे ३३ । ६ ।

"दुर्द्दमस्य सुतो धीमान् कनको नाम नामतः" ।)

कनकक्षारः, पुं, (कनकस्य मारणाय क्षारः ।) टङ्कणम् । इति राजनिर्घण्टः । सोहागा इति भाषा । (टङ्कणशब्देऽस्य गुणा ज्ञातव्याः ।)

कनकदण्डक, क्ली, (कनकस्य कनकनिर्म्मितो वा दण्डो यत्र । कप् स्वार्थे कन् वा ।) राजच्छत्रम् । इति त्रिकाण्डशेषः ।

कनकपल, पुं, (कनकस्य मापपरिमाणतः पलम् तत्परिमाणम् ।) पलपरिमाणम् । तत्तु सुवर्णादिपरिमाणकमोडशमाषकम् । तत्पर्य्यायः । कुरुविस्तः २ । इति हारावली । (कनकमिव पलं मांसमस्य इति । गुत्पत्त्या मत्स्यविशेषः ।)

कनकप्रभा, स्त्री, (कनकस्य प्रभेव प्रभा यस्याः ।) महाज्योतिष्मती । इति राजनिर्घण्टः । (स्वनामख्याते ज्वरातीसाररोगस्यौषधविशेषो यथा ।

"सुवर्णबीजं मरिचं विशालं मदं कणा टङ्कणकं विषञ्च । गन्धं जयाद्विखिदिनं विमर्द्द्य गुञ्जाप्रमाणा वटिका विधेया । रसाऽतिसारग्रहणीज्वरादि मान्द्यादि हन्यात् कनकप्रभेयम् । दध्योदनं भोज्यमनुष्णवारि मांसं भजेत्तित्तिरिलावकानाम्" ।

इति वैद्यकरसेन्द्रसारसंग्रहे ॥ *।)

कनकप्रसवा, स्त्री, (कनकवत् प्रसवः पुष्पं यस्याः ।) स्वर्णकेतकी । इति राजनिर्घण्टः ।

कनकरम्भा, स्त्री, (कनकवर्णेव रम्भा । यद्वा कनकवर्णयुक्तिनी रम्भा ।) सुवर्णकदली । इति राजनिर्घण्टः ।

कनकरसः, पुं, (कनकवर्णो रसः ।) हरितालम् । इति राजनिर्घण्टः । ('कलमोऽयं पूर्व्वापरसमुद्रावगाढ़ः कनकरसनिस्यन्दी सान्ध्य इव मेघपरिघः सानुमानालोक्यते" । इति शाकुन्तले ७ अङ्के ।)

कनकलोद्भवः, पुं, (कनति दीप्यते इति । कना दीप्ता कला अवयवः तया उद्भवतीति । कनकला + उद् + भू + अच् ।) राजः । इति राजनिर्घण्टः । धुना इति भाषा ।

कनकाचलः, पुं, (कनकमयो अचलः पर्व्वतः ।) स्वर्णाचलः । सुमेरुपर्व्वतः । इति सिद्धान्तशिरोमणिः । दानविशेषः । इति स्मृतिः ।

(अस्य परिमाणादयुक्तं मत्स्यपुराणे यथा,—

"अथ पापहरं वक्ष्ये सुवर्णाचलमुत्तमम् । यस्य प्रसादाद्भवनं विरिञ्चेर्यातिमानवः । उत्तमः पलसाहस्रो मध्यमः पञ्चभिः शतैः । तदर्द्धेनाधमस्तद्वत् अल्पवित्तोऽपि शक्तितः । दद्यादेकपलादूर्द्धं यथा शक्त्या विमत्सरः । धान्यपर्व्वतवत् सर्व्वं विदध्यात् विधिमुत्तमम् । विष्कम्भशैलास्तद्वच्च ऋत्विग्भ्यः प्रतिपादयेत्" ।)

कनकाध्यक्ष, पुं, (कनकस्य रक्षणे अध्यक्षः मध्यपदलोपः ।) सुवर्णरक्षकः । तत्पर्य्यायः । भौरिकः २ । इत्यमरः । २ । ८ । ७ ।

कनकारकः, पुं, (कनकं दीप्तद्रव्यदीप्तिमिव सव्यतो काक्कृति धाप्नोतीति । कनक + ऋ + अण् । स्वार्थे + कन् ।) कोविदारवृक्षः । इति राजनिर्घण्टः । (कोविदारशब्देऽस्य गुणादिकं ज्ञातव्यम् ।)

कनकालुका, स्त्री, (कनकनिर्म्मितं आलु । सलिलाद्याधारपात्रविशेषः स्वार्थे कन् टाप् च ।) स्वर्णकलसः । तत्पर्य्यायः । भृङ्गारः २ । इत्यमरः । २ । ८ । ३२ ।

कनकाह्वा, स्त्री, (कनकस्याह्वा नाम यस्य ।) नागकेशरपुष्पम् । इति राजनिर्घण्टः । (नागकेशरशब्देऽस्य विशेषो ज्ञेयः ।)

कनकाह्वयः, पुं, (कनकम् आह्वयोऽस्य । कनकमाह्वयते स्तुतं वा । कनक + आ + ह्वे + क ।) धुस्तूरवृक्षः । इत्यमरः । २ । ४ । ७७ । नागकेशरवृक्षः । इति शब्दचन्द्रिका ।

कनन, त्रि, (कन् + युच् ।) काणः । इति हेमचन्द्रः ।

कनिष्ठ, त्रि, (अतिशयेन युवा अल्पो वा । इष्ठन् । कनादेशश्च ।) अतियुवा । अल्पः । पश्चाज्जातः । तत्पर्य्यायः । जघन्यजः २ यवीयान् ३ अवरजः ४ अनुजः ५ । इत्यमरः । २ । ६ । ४३ । कनीयान् ६ कन्यसः ७ यविष्ठः ८ । इति जटाधरसारसुन्दरी । (यथा मनुः । ९ । ११२ ।

'ज्येष्ठश्चैव कनिष्ठश्च संहरेतां यथोदितम् । येऽन्ये ज्येष्ठकनिष्ठाभ्यां तेषां स्यान्मध्यमं धनम्' ।

क्लीव । यथा, महाभारते । १३ । १७ । १३१ ।

"पवित्रं त्रिककुन्मन्त्रः कनिष्ठं छन्दपिङ्गलः" ।)

कनिष्ठक, क्ली, (कनिष्ठमिव कायति प्रकाशते । कनिष्ठ + कै + क ।) शूकतृणम् । इति राजनिर्घण्टः ।

कनिष्ठा, स्त्री, (कनिष्ठ + स्त्रीयादिक बाधिता अजादित्वात् टाप् ।) दुर्म्मुखाङ्गुलिः । इत्यमरमेदिनीकरौ । कडे आङ्गुल इति भाषा । (यथा, रामायणे ३ । ५१ । ७ ।

"कनिष्ठायामप्युक्त्वा भ्रातुर्म्मम च राक्षस । दुःख कर्त्तुंमपर्य्याप्तो देवि । कस्माद्विषीदसि" ।)

धीरादिभिर्मिश्रा द्विधाभेदान्तर्गतनायिकाविशेषः । अस्या लक्षणम् । परिणीतत्वे सति भर्त्तुर्न्यूनस्नेहा । इति रसमञ्जरी । (त्रि, मनुः ९ । १२२ ।

पुत्रः कनिष्ठो ज्येष्ठाया कनिष्ठायाश्च पूर्व्वजः" ।

"यदि प्रथमोढायां कनीयान् पुत्रो जातः पश्चाद् द्वितीयायां ज्येष्ठः" । इति कुल्लूकभट्टः ।)

कनी, स्त्री, (कन + अच् + गौरादित्वात् ङीष् ।) कन्या । इति हेमचन्द्रः ।

कनीचि, स्त्री, (कन् + बाहुलकात् इचि प्रत्ययः । पृषोदरादित्वात् दीर्घश्च ।) गुञ्जा । इति शब्दरत्नावली । कुच् इति भाषा । पुष्पयुक्तलता । शकटः । इत्यादिकोषः । मूर्द्धन्यमध्योऽपि पाठः ।

कनीनिका, स्त्री, (कन् + ईन । संज्ञायां कन् । ततष्टाप् + अत इत्वम् ।) चक्षुस्तारा । कनिष्ठाङ्गुलिः । इति मेदिनी ।

कनीनी, स्त्री, (कन् + इन् ततो ङीष् ।) कनिष्ठाङ्गुलिः । इत्यमरटीका ।

कनीयस, क्ली, (कन् दीप्तौ + अच् । कनः सूर्य्यः तस्येदम् । कन + अण् कनायम् । तद्रूपत्वेन नीयते अवनीयते इति । णी + घञर्थे कः । सूर्य्यदेवाधिष्ठातृकत्वमिति तात्पर्य्यम् ।) ताम्रम् । इति हेमचन्द्रः ।

कनीयान् [स] त्रि, (अयमनयोरतिशयेन युवा अल्पो वा इयसुन् । ततः कनादेशः ।) अनुजः । अतियुवा । अत्यल्पः । इति मेदिनी । (यथा ऋग्वेदे । ४ । २४ । ९ । 'स भूयसा कनीयो नारिरेचीद्दीना दक्षा विदुहन्ति प्रवाणम्' ।

'मातुः पितुः कनीयांस न नमेद् वयसाऽधिकम् । प्रणमेद् गुरोः पत्नीं ज्येष्ठभार्य्यां विमातरम्" । इति स्मृतिः ।)

कन्तु, पुं, (“कमिमनिजनिगाभायाहिभ्यश्च” इति तु । ५ । २ । १३८ । कम् + तुः । कामयते इति कमु कान्तौ । अनिट्श्रीत्यादिना तुप्रत्यये तुकि सिद्ध स्यात । “कमिमनिजनिगाभायाहिभ्यश्च” । उणा १ । ७३ ।) कामदेव । इति त्रिकाण्डशेषः ॥ हृदयम । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (चित्तम् । इति उज्ज्वलदत्त । कं सुखं अस्यास्तीति व्युत्पत्त्या सुखी जन ॥)

कन्था स्त्री, (कम् + बाहुलकात् थन + टाप ।) स्यूतकर्पट । इति स्त्रीलिङ्गसंग्रहे अमर ॥ काँथा इति भाषा । (यथा यतिपञ्चके २ । “कन्थामिव श्रीमपि कुत्सयन्त कौपीनवन्त खलु भाग्यवन्तः” ॥) मृण्मयभित्ति । इति मेदिनी । काँथ इति भाषा ॥ उशीनरादिजनपदप्रसिद्धग्रामाणां नामसु विषय भूतेषु यद्यस्मात् परा कन्था क्लीबे स्यात । यथा सौशमीनां कन्था सौशमिकन्थम् । आह्वरीणां कन्था आह्वरकन्थम् । इत्यमरटीकायां भरत ॥

कन्थारी स्त्री, (कम् + थारन् । पृषोदरादित्वात् यत्व गौरादित्वात ङीष् ।) वृक्षविशेष । तत्प र्याय । कन्थरी २ कन्था ३ दुःस्पर्शा ४ तीक्ष्ण कण्टका ५ तीक्ष्णगन्धा ६ मृगगन्धा ७ दुष्प्रवेशा ८ । अस्या गुणा । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातश्लेष्मक्षयश्लेष्मरोगित्वम् । दीपन त्वम् । रुचिकारित्वञ्च । इति राजनिघण्टः ॥

कन्द स्त्री पुं, (कन्दयति जिह्वायाः वैकल्य जनयति रोदयति वा भक्षयन्त जनम् । कदि + णिच् + अच् । यद्वा कन्द्यते कन्द इति भाषा ख्यायते । कदि + कर्म्मणि + घञ् ।) सूरण । ग्रन्थिमूलम् । इति मेदिनी ॥ लशुनम् । इति राजनिघण्टः ॥ (यथा, महाभारते १३ । १४ । ११९ ॥
“वने निवसतां नित्य कन्दमूलफलाशिनाम्” ॥
यथा च, शान्तिशतके । २ । २ ।
“शीत निर्झरवारिपानमशन कन्दाः सहाया मृगाः” ॥
सूरणशब्देऽस्य विशेषो ज्ञेय ॥)

कन्द, पुं, (कं जल ददातीति । क + दा + क । कन्दति कन्दयति कन्द्यते वा । कदि आह्वाने रोदने च । अच् घञ् वा ।) मेघ । इति मेदिनी ॥ योनिरोगविशेषः । अस्य निदानलक्षणे । यथा,—
“दिवास्वप्नातिकोपाद्व्यायामादतिमैथुनात् ।
क्षताच्च नखदन्ताद्यैर्वाताद्याः कुपिता यदा ॥
पूयशोणितसङ्काशं लकुचाकृतिसन्निभम् ।
उत्पद्यते यदा योनौ नाम्ना कन्दः स योनिज ” ॥
स चतुर्विध । वातिक १ पैत्तिकः २ श्लैष्मिक ३ सान्निपातिकश्च ४ । एषां यथाक्रम लक्षणानि ।
“रूक्षं विवर्णं स्फुटित वातिक त विनिर्दिशेत् ।
दाहरागज्वरयुत विद्यात् पित्तात्मकन्तु तम् ॥
नीलपुष्पप्रतीकाश कण्डूमन्त कफात्मकम् ।
सर्वलिङ्गसमायुक्त सन्निपातात्मक विदुः ।
सन्निपातात्मकोऽसाध्य” यथा कष्टप्रसाधनाः ॥
इति भावप्रकाशः ॥ (अस्य चिकित्सामाह भाव प्रकाश ॥
“गैरिकाम्रास्थि जम्बुत्वग् रजन्याम्लकटफलैः ।

मूत्रयेद्योनिमेतेषां चूर्णैः क्षौद्रसमन्वितैः ॥
त्रिफलायाः कषायेण सक्षौद्रेण च सेचयेत् ।
प्रमदा योनिकन्देन व्याधिना परिमुच्यते” ॥
अन्यत्सर्वं योनिशब्दे द्रष्टव्यम् ॥)

कन्दगुडूची, स्त्री, (कन्दोद्भवा गुडूची । शाकपार्थिवादिवत् समास । मध्यपदलोपश्च ।) गुडूची विशेषः । तत्पर्यायः । कन्दोद्भवा २ कन्दामृता ३ वक्रच्छिन्ना ४ वक्रदला ५ पिण्डालु ६ कन्दरोहिणी ७ । इति राजनिर्घण्टः ॥

कन्दट, क्ली, (कदि + अटन् ।) श्वेतोत्पलम् । इति शब्दरत्नावली । चादा सुँदि इति भाषा ॥

कन्दफला, स्त्री, (कन्दात् कन्दमारभ्य वा फल यस्याः ।) कुष्माण्डवल्ली । इति राजनिर्घण्टः ॥

कन्दबहुला, स्त्री, (कन्दादारभ्य कन्देन कन्देषु बहुला वा ।) त्रिपर्णिका । इति राजनिघण्टः ॥

कन्दमूल, क्ली, (कन्द एव कन्दरूप वा मूल यस्य ।) मूलकम् । इति राजनिघण्टः ॥ (मूलकशब्देऽस्य गुणा वक्तव्या ॥)

कन्दर, क्ली, (केन जलेन दीर्य्यते । दृ + विदारे + कर्म्मणि अप् । क जल येन गलित द्रवाति गाम्यतीति वा । दृ + अच् ।) आर्द्रकम् । इति राजनिघण्टः ॥ (आर्द्रकशब्देऽस्य गुणादयो ज्ञेया ॥)

कन्दर, पु स्त्री, (केन जलेन दीर्य्यते विदीर्य्यतेऽसौ । दृ + कर्म्मणि अप् ।) गुहा । इति मेदिनी ॥ (“निद्रादीर्घैर्मुरज इव ते कन्दरेषु ध्वनिः स्यात्” । इति मेघदूते ५८ ॥) कृत्रिमोऽकृत्रिमो वा सजलो निर्जलो वा गृहाकारो गिरिनितम्बदेशः । इति भरत ॥ तत्पर्याय । दरी २ कन्दरा ३ इत्यमरः । २ । ३ । ६ ॥ कन्दरी ४ । इति जटिका ॥ दरः ५ । इति स्वामी ॥ (यथा, भागवते । ४ । ६ । ११ ।
“नानाऽमलप्रस्रवणैर्नानाकन्दरसानुभिः” ॥)

कन्दरः, पु, (कं गजमङ्कुशाद्दीर्यतेऽनेन । दृ + करणे अप् ।) अङ्कुशः । इति मेदिनी ॥

कन्दरा, स्त्री, (कन्दर + टाप् ।) गुहा । इत्यमरः । २ । ३ । ६ ॥)

कन्दराकर, पु, (कन्दरस्य आकारः ।) पर्व्वत । इति हारावली ॥

कन्दराल, पुं, (कन्दराय अङ्कुराय अलतीति । कन्दर + अल् + अच् ॥) गर्द्दभाण्डवृक्षः । अक्षवृक्षः । इति मेदिनी ॥ आस्फोटवृक्षः । इति राजनिर्घण्टः ॥

कन्दरालक, पुं, (कन्दराल एव स्वार्थे कन् ।) प्लक्षवृक्षः । इति शब्दरत्नावली ॥ (प्लक्षशब्दे विशेषोऽस्य ज्ञातव्य ॥)

कन्दरी, स्त्री, गुहा । इत्यमरः । २ । ३ । ६ ॥

कन्दरोद्भवा, स्त्री, (कन्दर उद्भवतीति । कन्दर + उत् + भू + अच + टाप् ।) क्षुद्रपाषाणभेदीलता इति राजनिघण्टः ॥

कन्दर्प, पुं, (कमित्यव्यय कुत्सायां, क कुत्सितो दर्पो यस्मात् । यद्वा क सुख तेन दर्प वा दृप्यति । दृप + अच् । कं ब्रह्माणमपि दर्पितवान् वा ।) कामदेवः । इत्यमरः । १ । १ । २६ ॥ (यथा, महाभारते १ । २१५ । १८ ।
“आहन्त्वामभिषेकार्थमस्तीर्थ समन्वगाम् ।
दृष्ट्वैव पुरुषव्याघ्र । कन्दर्पेणाभिमूर्च्छिता” ॥)
पुरुषभेद । यथा,—रतिमञ्जरी ।
“वयोविंशतिवर्षाद्धि पुंसि कन्दर्पसंज्ञकः ।
वीरे वा करभे वा स्यात् स्वद्गताशे विधीयते” ॥

कन्दर्पकूपः, पुं, (कन्दर्पस्य कूप इव ।) योनिः । इति जटाधरः ॥

कन्दर्पजीवः, पुं, (कन्दर्पं जीवयति परिवर्द्धयतीति । कन्दर्प + जीव + अच् ।) कामवृद्धिनामक्षुपः । इति राजनिर्घण्टः ॥

कन्दर्पमुषल पुं, (कन्दर्पस्य मुषल इव ।) लिङ्गम् । इति त्रिकाण्डशेष ॥

कन्दर्पशृङ्खल, पुं, (कन्दर्पः शृङ्खल यत्र । यद्वा कन्दर्पाय शृङ्खलः ।) शृङ्गारबन्धविशेषः । तस्य लक्षणम् । यथा रतिमञ्जरी ।
“नारी पदद्वय स्थाप्य कान्तस्योरुद्वयोपरि ।
कटिदेशे समेत्याशु बन्ध कन्दर्पशृङ्खल ” ॥

कन्दल, त्रि, (कदि + अलच् ।) कपाल । उपराग । नवाङ्कुर । कलध्वनिः । इति मेदिनी ॥ अपवादः । इति शब्दरत्नावली ॥ (कदलीविशेषः । यथा, अमरुशतके ४८ । “प्रारम्भे निपतन्ति कन्दल दलोल्लासाः पयोविन्दवः” ॥)

कन्दल, पुं, (कदि + अलच् ।) कनकम् । युद्धम् । कपालः । इति धरणी ॥

कन्दलता, स्त्री (कन्दप्रधाना लता ।) मालाकन्द । इति राजनिघण्टः ॥

कन्दली, स्त्री, (कन्दल + गौरादित्वात् ङीष् ।) मृगविशेषः । यस्य चर्म्म आस्क्रियते । पद्मभेदः । (यथा, मेघदूते २१ ।
“आविर्भूतप्रथममुकुलाः कन्दलीश्चानुकच्छम्” ॥)
कदली । इति मेदिनी ॥ (यथा, विक्रमोर्व्वश्यां । ७८ ।
“आरक्तराजिभिरिय कुसुमैर्नवकन्दलीसलिल गर्भैः” । इति ॥)
पताका । इति त्रिकाण्डशेषः ॥ पद्मबीजम् । इति राजनिघण्टः ॥

कन्दलीकुसुम, क्ली, (कन्दल्या इव कुसुममस्य ।) शिलीन्ध्रम् । इति जटाधरः ॥

कन्दवर्द्धन पुं, (कन्देन वर्द्धते इति । वृध् + ल्यु ।) सूरणः । इति राजनिघण्टः । (सूरणशब्देऽस्य गुणादयो ज्ञेया ॥)

कन्दवल्ली, स्त्री, (कन्दाकारा + वल्ली ।) वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥

कन्दशूरणः, पुं, (कन्देषु शूरण श्रेष्ठः ।) ओलः । इति राजनिर्घण्टः ॥ (ओलशब्देऽस्य गुणादयो व्याख्याता ॥)

कन्दसंज्ञ क्ली (कन्द इति संज्ञा यस्य कन्दनाम्ना सञ्जायते वा ।) योनिरूपरोगविशेषः । तत्पर्यायः । योन्यर्शः २ । इति त्रिकाण्डशेषः ॥ तस्य निदानादि कन्दशब्दे द्रष्टव्यम् ॥

कन्दसार, क्ली, (कन्दानां सारो यत्र ।) नन्दनवनम् । इति त्रिकाण्डशेषः ॥ [राजनिघण्टः ॥

कन्दाढ्य, पुं, (कन्देन आढ्य ।) धरणीकन्दः । इति

कन्दार्हः, पु, (कन्देषु अर्हः आदरणीय ।) शूरणः । इति राजनिर्घण्टः ॥

कन्दालु, पु, (कन्दमय आलुः ।) काष्ठालु । धरणी कन्दः । विषयिका । इति राजनिर्घण्टः ॥

कन्दिरी, स्त्री, (कन्द + इरच + गौरादित्वात् ङीष् ।) लज्जालुवृक्षः । इति वैद्यकम् ॥ (लज्जालुशब्दे विशेषोऽस्या ज्ञातव्य ।)

कन्दी, [न्] पु, (कन्दोऽस्त्यस्य । अस्त्यर्थे इनि ।) शूरणः । इति राजनिर्घण्टः ॥

कन्दु, पु स्त्री, (स्कन्दति शोषयति अन्नादिक स्कन्दे सलोपश्च ।) लौहमयपाकपात्रम् । ताओया इति लोहला इति च भाषा । तत्पर्यायः । मेदिनी २ । इत्यमर । २ । ९ । ३० ॥

कन्दुक, पुं, (कं सुखं ददातीति । कम् + दा + मितद्र्वादित्वात् डु संज्ञाया कन् ।) गेण्डुकः । इत्यमरः । २ । ७ । १९८ ॥ गेँडु इति भाषा ॥ (यथा, कुमारे । १ । २९ । "सा कन्दुकैः कृत्रिमपुत्रकैश्च" ॥)

कन्दुपक्व, स्त्री, (कन्दौ पक्वम् ।) स्नेहोपसेकं विना केवलपात्रे यत् वह्निना पक्वं भ्रष्टतण्डुलादि । यथा,—
"कन्दुपक्वानि तैलेन पायसं दधि शक्तवः ।
द्विजैरेतानि भोज्यानि शूद्रगेहकृतान्यपि ॥"
इति तिथ्यादितत्त्वे कूर्म्मपुराणम् ॥

कन्दोट, स्त्री, (कदि + ओटन् ।) नीलोत्पलम् । इति शब्दरत्नावली ॥

कन्दोट, पुं (कदि + ओटन् ।) शुक्लोत्पलम् । इति शब्दरत्नावली ॥

कन्दोत, पु, (कन्दे मूले उत । कद + वेञ् + क्त ।) कुमुदम् । इति त्रिकाण्डशेषः ॥

कन्ध, पुं, (कं जलं दधाति धारयति । क + धा + क ।) मेघः । इति शब्दरत्नावली ॥

कन्धर, पुं, (कं जलं धरति धारयति वा । कम् + धृ + अच् ।) मेघः । इति मेदिनी ॥ मारिषशाकः । इति राजनिर्घण्टः ॥ (कं शिरो धरतीति ।) ग्रीवा । इत्यमरटीकासारसुन्दरी ॥ (भागवते ६ । १२ । ३३ ।
"वज्रन्तु तत्कन्धरमाशु वेग-
कृत्तन्समन्तात् परिवर्त्तमानः" ॥)

कन्धरा, स्त्री, (कं शिरो धरतीति । कम् + धृ + अच् + टाप् ।) ग्रीवा इत्यमरः । २ । ६ । ८८ ॥ (यथा, याज्ञवल्क्ये । २ । २२३ ।
"कन्धरा बाहुसक्थ्नां च भङ्गे मध्यमसाहसः" ॥)

कन्धि, स्त्री, (कं शिरः समुद्रपक्षे जलं ध्रियते यत्र । धृ + अधिकरणे + कि ।) ग्रीवा । समुद्रे पु । इति राजनिर्घण्टः ॥

कन्न, स्त्री, (कन्यते प्राप्यते दुःखमनेन । कन गत्या + करणे क्त ।) पातकम् । मूर्च्छा । इति शब्दमाला ॥ कश्मलमिति च पाठः ॥

कन्यका, स्त्री, (कन्या + अल्पार्थे कन् पूर्व्वह्रस्वश्च ।) कुमारी । इति त्रिकाण्डशेषः ॥ यथा ।
"अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी ।
दशमे कन्यका प्रोक्ता अत ऊर्द्ध्वं रजस्वला" ॥
इति स्मृतिः ॥ परकीयनायिकाविशेषः । यथा ।
"अप्रकटपरपुरुषानुरागा परकीया । सा च द्विविधा परोढ़ा कन्यका च । कन्यायाः पित्राद्यधीनतया परकीयत्वम् । अस्या गर्भेव सकला चेष्टा" । इति रसमञ्जरी ॥

कन्यकाजात पुं स्त्री, (कन्यकाया अनूढ़ाया जात । कन्यका + जन + कर्त्तरि क्त ।) अविवाहितापुत्रः । तत्पर्य्याय । कानीन २ । इत्यमर । २ । ६ । १३७ ॥ (यथाह याज्ञवल्क्यः । १२ । १३२ ।
"कानीन कन्यकाजातो मातामहसुतो मत" ॥
कर्णः । स तु अनूढ़ायां कुन्त्यां जात ॥)

कन्यकापतिः पु, (कन्यकाया पति ।) जामाता । इति शब्दरत्नावली ॥

कन्यसः, पुं, (कन + अल्पार्थादित्वात् । ४ । १११ । उणा । निपातनात् कन्य । कन्यत्वेन काम्यत्वेन सीयत अवसीयत इति । कन्य + सो + घञर्थे क ।) कनिष्ठभ्राता । इत्यमरटीकासारसुन्दरी ।
(यथा रामायणम् । ५ । ३३ । १० ।
"रामस्य कन्यसो भ्राता सुमित्रा येन सुप्रजाः" ॥)

कन्यसा, स्त्री, (कन्यस + टाप् ।) कनिष्ठभगिनी । इत्यमरटीका ॥

कन्या, स्त्री, (कन दीप्तौ + अघ्न्यादित्वात् यक इत्युणादौ ४ । १११ । कन्यायाः कनीन् चेति निर्द्देशात् पाणिनिमतानुसारेण न ङीष् अतष्टाप् ।) कुमारी । इत्यमरः ॥ २ । ६ । ८ । सा तु दशमवर्षीया । इति स्मृति ॥ (यथा महाभारते वनपर्व्वणि ।
"यस्मात् कामयते सर्व्वान् कमेर्धातोश्च भामिनि ।
तस्मात् कन्येह सुश्रोणि । स्वतन्त्रा वरवर्णिनि" ॥)
भारी । ओषधीविशेष । घृतकुमारी इति ख्याता । इति मेदिनी ॥ यथा सुश्रुते निदानस्थाने ।
("कान्तैर्द्वादशभि पत्रैर्मयूराङ्गरुहोपमै ।
कन्दजा काञ्चनक्षीरी कन्या नाम महौषधी" ।
"ओषधी कामदा कन्या" । इति वैद्यकग्रन्थ ॥ विशेषगुणादयोऽस्या घृतकुमारीशब्दे द्रष्टव्याः ॥) स्थूलैला । वाराहीकन्द । वन्ध्याकर्क्कोटकी । इति राजनिर्घण्टः ॥ * ॥ मेषादिद्वादशराश्यन्तर्गतषष्ठराशि । सा तु उत्तरफल्गुनीशेषपादत्रयहस्ताससुदायचित्राप्रथमार्द्धेन भवति । तदधिष्ठातृदेवताया स्वरूप यथा । जलेनौकास्थशस्याग्निधारिणी स्त्री । इति दीपिका ॥ अपि च । नीलकण्ठीजातके ॥
"पाण्डुर्द्दिपात् स्त्रीदितनुर्यमाशा
निशाप्रबन्धोतसमोदयाढ्या ।
कन्याशब्दा शुभभूमिवैश्य
रूक्षाल्पसङ्गप्रसवा शुभा च ॥" * ॥
मतान्तरे सा तु शीर्षोदया । दिनबला । पिङ्गलवर्णा । दक्षिणदिक्स्वामिनी । वायुप्रकृति । शीतलस्वभावा । शुद्धभूमिचरा । वैश्यवर्णा । रूक्षा । द्विपादा । खटच्छन्दा । अल्पसन्तानाः । अल्पप्रसङ्गा च ॥ * ॥ तत्र जातफलम् । "वेदशास्त्रे श्रद्धावान् सामरोषे खेदित भार्य्यायाः सदा विरतश्च" । इति ज्योतिषम ॥ * ॥ जन्मकालीनचन्द्राश्रितलग्नाश्रितफलम् । यथा कोष्ठीप्रदीपः ॥
"युवतिगे शशिनि प्रमदाजन-
प्रवरकेलिविलासकुतूहली ।
विमलशीलयुता जननीतवेः
सुविधिना विधिना सहितः पुमान्" ॥ * ॥
तस्या उदये सप्रामकन्या भवति । तस्य गणित-प्रमाणपरिमाण दशाधिकपञ्चाशत्पलप्रमे देशे वर्त्तमानोनविंशायनांशे उनत्रिंशत्पलाधिकपञ्चदण्डा । इति ज्योतिषम् ॥ * ॥ तत्र जातफलम् ।
"कन्याप्रभोद्भवो मर्त्यो नानाशास्त्रविशारद ।
सौभाग्यगुणसम्पन्न सुन्दरः सुरतप्रिय" ॥
इति कोष्ठीप्रदीप ॥ * ॥ सुता । तस्या विवाह विनान्यसंस्कारकर्म्मणि वृद्धिश्राद्धनिषेधो यथा —
"कन्याया निष्क्रमो नास्ति वृद्धिश्राद्ध न विद्यते ।
नामान्नप्राशने चूड़ा कुर्य्यात् स्त्रीणाममन्त्रकम्" ॥
"जातकर्म्मादिचूड़ान्त कुमार्य्याश्चाप्यमन्त्रकम् ।
कारयेत् पञ्चभिर्व्वर्षैरेक निष्क्रमणं विना" ॥
इति च महानिर्व्वाणतन्त्रे नवमोल्लास ॥
(तीर्थविशेष । यथा महाभारते ३ । ८३ । १०४ ।
"ततो गच्छेत धर्म्मज्ञ । कन्यातीर्थमनुत्तमम् ।
कन्यातीर्थे नर स्नात्वा गोसहस्रफल लभेत्" ॥)

कन्याका, स्त्री, (कन्यैव इति स्वार्थे कन अनुक्तगुणत्वात् न ह्रस्व ।) कुमारी । इति शब्दरत्नावली ॥

कन्याकुल, पुं, (कन्या कुब्जा यत्र देशे स । वायुना हि अस्मिन् देशे कन्या कुब्जीकृता अतोऽस्य तथात्वम् ।) कान्यकुब्जदेश । इति हेमचन्द्र ॥ (यथा, महाभारते । वनपर्व्वणि ॥
"कन्याकुब्जेऽपिबत्सोममिन्द्रेण सह कौशिक" ॥
वायुना हि अस्मिन देशे पुरा कन्या कुब्जीकृता । तद्विवरणमुच्यते । पुरा किल कुशनाभो राजर्षिर्घृताच्यां कन्याशत जनयामास । रूपयौवनसम्पन्नास्तास्तु कदाचित् उद्यानभूमिमागम्य परमानन्दसन्तत्या विक्रीड़ु । अथ सर्व्वगो वायुस्ताः सम्वीक्ष्य अवलोक्य कामशरपीडितोऽब्रवीत । अहं व कामये, भवत्यो मे भार्य्या भवन्तु । अथ ता अङ्गनास्तस्य तद्वचन श्रुत्वा उच्चैर्विहस्य तमब्रुवन् भो वायो । त्व भूताना अन्तश्चरसि तत्कथमस्माक मनोभाव न वेत्सि । वय किल कुशनाभसुता कथ पितर कामत समतिक्रम्य स्वय वरमभिलषाम । पिता हि अस्मान् यस्मै दास्यति स नो भर्त्ता भविष्यतीति । अत त्वन्तया सह भवन्नियोग कर्त्तुमशक्ता वयम् । वायुस्तु तासामेतद्वचनमाकर्ण्य कोपसमन्वित सन् तेजसा तासां शरीरेषु प्रविश्य मध्ये बभञ्ज । तत प्रभृति देशोऽयं कन्याकुब्ज इत्येव ख्यात ॥ अस्य विस्तृतिस्तु रामायणे आदिकाण्डे ३२ अध्याये द्रष्टव्या ॥ अयन्तु काश्मीनदीतटे स्थित । अधुना कुश-स्थल इत्याख्यया प्रसिद्ध । इति कनिंहामेनोक्तम् । अस्य समीपे जाह्नवीप्रवहमाना वर्त्तते । इति महाभारते अनुशासनपर्व्व ॥)

कन्याट, पु, (कन्या अटति अत्र । कन्या + अट् + अधिकरणे घञ् ।) वासगृहम् । इति (

कन्यादान, क्ली, (कन्याया दानं वराय सम्प्रदानम् ।) वराय कन्यासम्प्रदानम् । तद्दानफलादि यथा ।
यम उवाच ।
"कन्या ये तु प्रयच्छन्ति यथाशक्त्या स्वलङ्कृताम् ।
ब्रह्मदेया द्विजश्रेष्ठ ! ब्रह्मलोकं व्रजन्ति ते ॥
कन्यादानन्तु सर्व्वेषां दानानामुत्तमं स्मृतम्" ॥ * ॥
तदयोग्ये दशकुलत्यागो यथा,—
"महान्त्यपि समृद्धानि गोऽजाविधनधान्यतः ।
स्त्रीसम्बन्धे दशैमानि कुलानि परिवर्ज्जयेत् ॥
हीनक्रियं निष्पुरुषं निश्छन्दो रोमशार्शसम् ।
क्षय्यामयाव्यपस्मारिश्वित्रिकुष्ठिकुलानि च ॥
यस्यास्तु न भवेद् भ्राता न च विज्ञायते पिता ।
नोपयच्छेत तां प्राज्ञः पुत्त्रिकाधर्म्मशङ्कया" ॥ * ॥
ततोऽष्टप्रकारविवाहानन्तरम् ।
"कन्यां ये तु प्रयच्छन्ति यथाशक्त्या स्वलङ्कृताम् ।
विवाहकाले सम्प्राप्ते यथोक्ते सदृशे वरे ।
क्रमात् क्रमं क्रतुशतमनुपूर्व्वं लभन्ति ते ॥
सुता कन्याप्रदानन्तु पितरः प्रपितामहाः ।
विमुक्ताः सर्व्वपापेभ्यो ब्रह्मलोकं व्रजन्ति ते ॥
प्राजेय तु विवाहेन यस्तु कन्यां प्रयच्छति ।
ब्रह्मलोकं व्रजेच्छीघ्रं ब्रह्मादौ पूजितं सुरैः ॥
दिव्येन तु विवाहेन यस्तु कन्यां प्रयच्छति ।
भित्त्वा द्वारन्तु सूर्य्यस्य स्वर्गलोकञ्च गच्छति ॥
गान्धर्व्वेण विवाहेन यस्तु कन्यां प्रयच्छति ।
गन्धर्व्वलोकमासाद्य क्रीडते देववच्चिरम् ॥
शुल्केन दत्त्वा यः कन्यां तां पश्चात् सम्प्रदर्शयेत् ।
स किन्नरैश्च गन्धर्व्वैः क्रीडते कालमक्षयम् ॥
न मन्ये कार्य्यमेतस्यां पूज्यास्य सततं गृहे ।
ब्रह्मदेया विशेषेण साध्वीमोक्ष्या सदा भवेत् ॥
कन्यायां ब्रह्मदेयायामधर्म्मात् सुखमश्नुते ।
अथ गृह्णाति यो मोहात् शुल्कं स नरकं व्रजेत् ॥
अप्रजायाश्च कन्याया न गृह्णीयात् कदाचन ।
दौहित्रस्य मुखं दृष्ट्वा किमर्थमनुशोचसि ॥
महातमस्तमाकीर्णमुभाभ्यां ते नरकाद्भयम् ।
तीर्थेभ्य सर्व्वदु खेभ्यः परं स्वर्गमवाप्स्यसि ॥
दौहित्रस्य तु दानेन नन्दन्ति पितरः सदा ।
यत्किञ्चित् कुरुते दानं तदानन्त्याय कल्पते ॥
मातापितृश्च विज्ञेय तत्कुलस्याभिगामिनः ।
मातुः पितुर्हिरण्यस्य दौहित्रोऽक्षयमवाप्नुते ॥
दत्त्वा कन्यां न शोचेत सुखितां मुदितां तथा ।
तथा दुःखाभिभूतां वा तथैव सधनां शुभाम् ।
कृष्णाम्बरं ग्रहेवास्या याचमानापि पोषयेत् ॥
बहुलमथवेत् किञ्चित् सर्व्वं तत् प्रतिपादयेत् ।
अप्रयच्छन् पतेत् ब्रह्मन् ! नरके नात्र संशयः" ॥ * ॥
"शोचन्ति जामयो यत्र विनश्यत्याशु तत्कुलम् ।
न शुध्यन्ति च यत्रैव निरयं यान्ति पूर्व्वजाः ॥
तस्मादेताः सदा पूज्या भूषणाच्छादनाशनैः ।
भूतिकामैर्नरैर्नित्यं सत्कारेषूत्सवेषु च ॥
तथा स्तुयाया पूज्या श्राद्धे चैवोत्सवेषु च ।
यस्मिन्नेव कुले नित्यं कल्याणं तत्र वै ध्रुवम् ।
इह कीर्त्तिर्भवेत् स्वर्गे परत्र द्विजसत्तम ! ।
तिष्ठन्त्यपि स्वर्गे तावत् दिवाकरसम ध्रुवम् ॥
यावन्ति ग्रहणमासेषु तिलं एको भवेद् यत्र ।
सोऽस्य लभते तावत् ब्रह्मलोकं सनातनम् ॥
शतगावा प्रमाणेन स्नातः रोमसञ्चये ।
विशीर्य्यन्ते तु या लोकं सर्व्वं पूर्व्वं सुतापदः ।
तावत् स्वर्गे लभेत सोऽपि यावच्चाश्वश्च सञ्चयः ॥
मही दानञ्च गोदानं कन्यादानस्तथैव यथा ।
कन्यादानगुणाः सर्व्वात्मनं यान्ति नयो दृशाः ॥
कन्यादानं दरिद्रस्य यो ददाति सुसत्कृतौ ।
पूर्व्वं धर्म्ममवाप्नोति यथावत् विधिकल्पितम् ।
तस्मात् कन्या प्रयत्नेन दातव्या श्रेय इच्छता" ॥
इत्याद्ये वह्निपुराणे कन्यादाननामाध्यायः ॥

कन्यापतिः, पुं, (कन्यायाः पतिः ।) जामाता । इति जटाधरः ॥

कन्यापाल, पुं, (कन्याप्रधानः पालः । पालस्य वर्णिगिति यावत् ।) पालवणिक । शूद्रजातिविशेषः । इति त्रिकाण्डशेषः ॥

कन्यारामः, पुं, बुद्धभेदः । इति त्रिकाण्डशेषः ॥

कन्यिका स्त्री, (कन्या एव स्वार्थे कन् टाप् अत इत्वम् ।) कन्यका । इति शब्दरत्नावली ॥

कन्युष, क्ली, (कन + उष् । कन्या दीप्ता कान्त्या तेजसा वा ओषति दह । कनि + उष् + कः ।) हस्ताघः । इति हारावली । कातेर पौंछा इति भाषा ॥

कप चलने । सौत्रधातुरयं । इति कविकल्पद्रुमः ॥ (भ्वा—पर—अक—सेट ।) कपोतः । इति दुर्गादासः ॥

कप इ ङ चलने । इति कविकल्पद्रुमः ॥ (भ्वा—आत्मं—अक—सेट्—इदित् ।) इ कम्पयति कम्पते ॥ ङ कम्पते वायुना वृक्षः । इति दुर्गादासः ॥

कपटः, पुं, क्ली (पटतीति पटः । पट् + अच् । कस्य मतेः ब्रह्मणोऽपि पटः आवरकः । यद्वा कम् + अटन् ।) अयथार्थव्यवहारः । प्रतारणा । तत्पर्य्यायः । व्याजः २ दम्भः ३ उपधिः ४ छद्म ५ कैतवम् ६ । इत्यमरः । १ । ७ । ३० ॥ कूटम् ७ कल्कम् ८ छलम् ९ मिषम् १० कैरवम् ११ । इति शब्दरत्नावली ॥
("नरेन्द्रमिव । कपटं न वेद्मि त्वमिहार्हसि" । इति महाभारते १ । ७४ । ११ ॥ दनुपुत्त्रः । यथा महाभारते १ । ६४ । २५ ।
"निचन्द्रश्च निकुम्भश्च कुपटः कपटस्तथा ।
एते ख्याता दनोर्वंशे दानवाः परिकीर्त्तिताः" ॥)

कपटिक, त्रि (कपटः विद्यतेऽस्मिन् अस्यास्ति वा । कपट + अस्त्यर्थे + ठन् ।) कपटविशिष्टः । इति शब्दरत्नावली ॥

कपटिनी, स्त्री, (कपटिन् + गौरादित्वात् ङीष् ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

कपटी, स्त्री, (कप + अटन् । गौरादित्वात् ङीष् ।) परिमाणविशेषः । इति शब्दरत्नावली । कच अंजाड़ इति भाषा ॥

कपटी [न्] त्रि, (कपटोऽस्त्यस्य अस्मिन् वा अस्त्यर्थे + इनि ।) कपटविशिष्टः । कपटधारी । इति शब्दरत्नावली ॥

कपटेश्वरी, स्त्री, (कमिव शुभ्रः पटः वसनं यस्याः अत एव ईष्टे + ऐश्वर्य्यतीति । कपट + ईश् + वरच् + स्त्रियां ङीप् ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

कपर्द्द, पुं, (मूर्द्धं पूरयति + सम्पदादित्वात् भावे क्विप् । "रात् लोपः" । ६ । ४ । २१ । इति वलोपे पर् पूर्त्तिः । केन सुखेन जलेन वा पर् पूर्त्तिं ददातीति । क + पर् + दा + घञिति योगविभागात् कः । कस्य ब्रह्मणस्य परां पूरणं दापयति शुध्यति वा । क + पर + दैप् शोधने "आतोऽनुपसर्गे कः" । ३ । २ । ३ । इति कः ।) शिवजटा । इत्यमरः । १ । १ । ३७ ॥ (यथा काशीखण्डे । २९ । ४४ ।
"कमनीयकपाकम्रा कपर्द्दिसुकपर्द्दगा" ॥)
वराटकः । इति मेदिनी ॥ ("पञ्चभिः कपर्द्दैः पणिका नाम भूसन्ति" । इति पा ४ । १ । १ । सूत्रस्य हरदत्तटीका ।)

कपर्द्दक, पुं (कपर्द्द + कन् ।) शिवस्य जटाजूटः । वराटकः । इति मेदिनी । कड़ि इति भाषा ॥
("पञ्चदशभिः प्रातराशं क्रीत्वा दश कपर्द्दकान् प्राप्नोमि" ॥ इति हितोपदेशः ॥) शेषस्य पर्य्यायः । वराटः २ कपर्द्दः ३ वराटिका ४ चराचरः ५ चरः ६ वज्रः ७ बालक्रीड़नकः ८ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कर्णशूलव्रणगुल्मशूलनेत्ररोगनाशित्वञ्च ॥ तस्य भेदाः । पृष्ठवर्णा सिंही १ धूम्रवर्णा व्याघ्री २ पीतवर्णासितोदरा मृगी ३ श्वेतवर्णा हंसी ४ नातिदीर्घिका विदग्धा ५ । इति राजनिर्घण्टः ॥ (वराटकशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

कपर्द्दी, [न्] पुं, (कपर्द्दो जटाजूटोऽस्त्यस्य । इनिः ।) शिवः । इत्यमरः । १ । १ । ३४ ॥ (यथा, महाभारते १३ । १७ । ४५ ।
"वनश्च बहुरूपश्च गन्धधारी कपर्द्द्यपि" ॥
"कपर्द्दी कैलासः करिवरमयोऽय कुलिशभृत्" ।
इति कालिदासः ॥
यथा, ऋग्वेदे । १ । १० । ८ ।
"शुनमद्वा कपर्द्द कपर्द्दी" ॥)

कपाट, त्रि, (क वायुं जलञ्च वा पाटयतीति । पट गतौ + णिच् + कर्म्मणि उपपदे अण् ।) स्नानस्थानद्वाराच्छादककाष्ठफलकविशेषः । तत्पर्य्यायः । अररम् २ । इत्यमरः । २ । २ । १८ ॥ कवाटः ३ कपाटी ४ कवाटी ५ अररी ६ अररिः ७ । इति तट्टीका ॥ द्वारकण्टकम् पत्रसारम् ८ । इति शब्दरत्नावली ॥ (यथा महाभारते १ । जतुगृहदाह । १४८ । १७ ।
"चक्रे च वेश्मनस्तस्य मध्ये नातिमहाबिलम् ।
कपाटयुक्तमज्ञातं समं भूम्याश्च भारत" ॥ ॥
क शिरः इत्युपलक्षणेन मनुष्यादीनां मस्तकमिति बोध्यम् । क वातं वा पाटयति भञ्जयति अत्र द्वारदेश आश्रित्येत्यर्थः । मनुष्यादीनां गतिं वर्जति वा । क + पट् + णिच् + अण् । यथा,
"द्वाराणि स्मुपाटयन् कपाटान्यवबद्धयम्" ।
इति रामायणम् ।

कपाल,, पुं क्ली, (क मस्तकं पालयतीति । क+पालि+अण् । यद्वा कम्पते वा । कपि चलने+"तमि विशिविडिमृणिकुलिकपिपलिपञ्चिभ्यः कालन्" । उणा १ । ११७ । इति कालन् । कपिनिर्देशाद् नलोप ।) शिरोऽस्थि । माथार खुलि इति भाषा । तत्पर्य्याय । कर्पर इत्यमरः । २ । ६ । ६८ ॥ (यथाह याज्ञवल्क्य । ३ । ८ ।
"द्वौ शङ्खौ कपालानि चत्वारि शिरसस्तथा" ॥) घटादेः खण्डम् । खापरा खोला इत्यादि भाषा । (यथा भाषापरिच्छेदे । ११ ।
"घटादीनां कपालादौ द्रव्येषु गुणकर्म्मणोः ।
तेषु जातेश्च सम्बन्धः समवायः प्रकीर्त्तितः" ॥) समूहः । इति मेदिनी । (मृण्मयकर्परादिभि क्षाचाम् । यथा, मनु । ६ । ४४ ।
"कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्" ॥) पुरोडाशः । यथा शतपथब्राह्मणे ।
"कपालानि चोपदधाति पुरोडाशं चाधिश्रयति" ॥) कुष्ठरोगविशेष । इति हेमचन्द्र । तस्य लक्षणम् । यथा, माधवकरः ।
"कृष्णारुणकपालाभं यद्रूक्षं परुषं तनु ।
कापालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम्" ॥

कपालनालिका, स्त्री, (कपालस्य सूत्रसंघस्य ना लिका ।) तर्कुः । इति त्रिकाण्डशेष । टेको इति भाषा ॥

कपालभृत्, पुं, (कपालं भिक्षापात्रं ब्रह्मकपालं वा बिभर्त्ति धारयति । कपाल+भृ+क्विप् तुक् च ।) शिव । इत्यमरः । १ । १ । ३४ ॥

कपालिका, स्त्री, (कपाल+कन्+टाप ।) दन्त रोगविशेष । तस्य लक्षणम् ।
"कपालेष्विव दीर्य्यत्सु दन्तानां सैव शर्करा ।
कपालिकेति पठिता सदा दन्तविनाशिनी" ॥
इति माधवकर । अस्याश्चिकित्सा दन्तरोगशब्दे द्रष्टव्या । (घटकपालिका । यथा विष्णुपुराणे । २ । १२ । ४१ ।
"मृद्वीघटत्व घटत कपालिका
कपालिकाचूर्णरजस्ततोऽणुः ।
जनैः स्वकर्म्मस्तिमितात्मनिश्चयै
रालक्ष्यते ब्रूहि किमत्र वस्तु" ॥)

कपालिनी, स्त्री, (कपालोऽस्त्यस्य । कपाल+इनि+स्त्रियां ङीप् ।) दुर्गा । इति हेमचन्द्र ।

कपाली, [न्] पुं, (कपालोऽस्त्यस्य । कपाल+इनि ।) महादेव । इति हलायुध । सङ्कीर्णजातिविशेषः । स तु ब्राह्मणकन्यायां धीवराज्जातः । इति पराशरपद्धतिः । (त्रि, कपालविशिष्ट । यथा, कुमारे । ५ । ७८ ।
'कपालि वा स्यादथवेन्दुशेखरं
न विश्वमूर्त्तेरवधार्य्यते वपु ' ॥
"नटी कपालिनी वेश्या रजकी नापिताङ्गना" ।
इति च तन्त्रम् । योगिविशेष । यथा, हठयोगदीपिकायां १ । ७ ।
"कपाली बिन्दुनाथश्च काकचण्डीश्वराह्वय" ॥)

कपि, पुं, (कम्पते य सदा । कपिचलने । "कुण्डिकम्प्योर्नलोपश्च" उणा । ४ । १४३ । इ प्रत्यय ।) वानरः । इत्यमर । २ । ५ । ३ ॥ (यथा, मनु । ११ । १५५ ।
"विड्वराहखरोष्ट्राणां गोमायोः कपिकाकयोः ।
प्राश्य मूत्रपुरीषाणि द्विजश्चान्द्रायणं चरेत्" ॥) सिह्लकः । मधुसूदन । इति मेदिनी । (यथा, महाभारते १३ । १४९ । १०८ ।
"सनात्सनातनतमः कपिलः कपिरव्ययः" ॥) धात्रिका । इति शब्दमाला । करञ्जभेद । इति शब्दचन्द्रिका । (कात् उदकात् रश्मीं पाति इति । वराह । राजचन्दनम् । पिङ्गलम् । तद्वर्णवति त्रि ॥)

कपिकच्छु, स्त्री, (कपीनामपि कच्छुर्यस्या कण्डू हेतुत्वात ।) वृक्षविशेष । आलकुशी इति भाषा । केवाँच इति हिन्दीभाषा । तत्पर्य्यायः । आत्मगुप्ता २ जड़ा ३ अव्यण्डा ४ कण्डूरा ५ प्रावृषायणी ६ ऋष्यप्रोक्ता ७ शूकशिम्बि ८ मर्कटी ९ । इत्यमरः । २ । ४ । ८७ ॥ स्वगुप्ता १० । अजहा ११ कण्डुरा १२ प्रावृषायिणी १३ प्रावृषा १४ शूकशिम्बी १५ शूकशिम्बा १६ कपिकच्छू १७ । इति भरतः ॥ स्वयङ्गुप्ता १८ मर्कटी १९ लाङ्गली २० कुण्डली २१ चण्डा २२ दुरभिग्रहा २३ कपिरोमफला २४ गुप्ता २५ दुःस्पर्शा २६ अजड़ा २७ प्रावृषेण्या २८ वदरी २९ गुच्छ ३० आर्षभी ३१ शिम्बी ३२ वराहिका ३३ तीक्ष्णा ३४ रोमालु ३५ वनशूकरी ३६ कोशरोमा ३७ रोमवल्ली ३८ । शूकशिम्बि ३९ वानरी ४० कपीकच्छु ४१ शूकपिण्डी ४२ शूकपिण्डी ४३ कपिप्रभा ४४ । इति शब्दरत्नावली ॥ अस्या गुणा । स्वादुरसत्वम् । शुक्रवृद्धिकारित्वम् । वातक्षयपित्तास्रविक्षतव्रणनाशित्वम् । शीतलत्वञ्च । तस्या बीजगुणौ । वातघ्नत्वम् । परमवाजीकरत्वञ्च । इति राजनिघण्टः ॥ (शूकशिम्बीशब्देऽस्या विशेषो ज्ञेय ॥)

कपिकच्छुफलोपमा, स्त्री, (कपिकच्छुफलस्य उपमा ।) मधुकाकता । इति राजनिघण्टः ॥

कपिकच्छुरा, स्त्री, (कपिभ्य कच्छुं कण्डूं राति ददाति । कपिकच्छु+रा+क ।) कपिकच्छु । इति शब्दमाला ॥ (यथा, गारुडे १९७ अध्याये ।
"शरपुङ्खारिका यष्टी गुडूची कपिकच्छुरा ।
एषां दशपलान् भागान् क्वाथयेत सलिलेऽमले" ॥)

कपिकन्दुक, क्ली, (कपि+कदि+उक । अतो लोप । कस्य शिरस पिकन्दुक अस्थि । यद्वा कपि परमात्मा विष्णु कन्दति क्रीड़ति यत्र तादृशं अस्थि ।) शिरोऽस्थि । इति शब्दचन्द्रिका । माथार खुलि इति भाषा ॥

कपिका, स्त्री, (कपिरिव कायति यद्वा राहवत नील वर्णतया प्रकाशते शोभते वा । एकदेशत्वात् तथात्वम् ।) नीलसिन्दुवारवृक्ष । इति राजनिघण्ट । (नीलसिन्दुवारशब्देऽस्या गुणादयो ज्ञातव्याः ।)

कपिकोलि पुं (कपीनां प्रियः कोलिः ।) कोलि विशेष । इति रत्नमाला । शेयाकुल इति भाषा ॥

कपिचूडा, स्त्री, (कपीनां चूडा इव । आम्रातक मुकुलस्य कपिचूडातुल्यत्वात् ।) आम्रातकवृक्ष । इति राजनिघण्ट । (आम्रातकशब्दे विशेषो ज्ञेय ॥)

कपिचूत, पुं, (कपीनां चूत इव अत्यन्तप्रियत्वात ।) आम्रातकवृक्ष । इति त्रिकाण्डशेष ॥

कपिज, पुं (कपेः शिलायां जायते । जन्+डः । कपितैलम् ।) तुरुष्क । इति राजनिघण्ट । शिलारस इति भाषा ।

कपिजङ्घिका, स्त्री, (कपे वानरस्य जङ्घा इव जङ्घा यस्याः । संज्ञायां कन् । कपिसदृशजङ्घाया दैर्घ्यात तथात्वम् ।) तैलपिपीलिका । इति राजनिघण्ट ॥

कपिञ्जल ,पुं,(कपिरिव चलते वेगेन गच्छति यद्वा कम् सुतिसुखद शब्दम् पिञ्जयति कपिवत पिञ्जलो वा । ईषत्पिङ्गलवर्णो चरितालवर्णो वा । पृषो दरादित्वात साधु ।) चातकपक्षी । तन्मांसगुणा । लघुत्वम् । शीतत्वम् । कफरक्तपित्तनाशित्वम् । अग्निदायकत्वञ्च । इति राजवल्लभ । पक्षिविशेष । तत्पर्य्याय । तैत्तिर २ । तस्य मांसगुणाः वृद्धिकरम् । इति राजनिर्घण्ट । तित्तिरिपक्षी । इति त्रिकाण्डशेष । (यथा,—
"कपिञ्जल इति प्राज्ञैः कथितो गौरतित्तिरः ।
कपिञ्जल इति ख्यातो लोके कपिशतित्तिरः" ॥
इति भावप्रकाश ।
"पित्तश्लेष्मविकारेषु सरक्तेषु कपिञ्जलाः ।
मन्दवातेषु शस्यन्ते शैत्यमाधुर्य्यलाघवात्" ॥
इति चरक । तथा सुश्रुत ।
"रक्तपित्तहरः शीतो लघुश्चापि कपिञ्जलः ।
कफोत्थेषु च रोगेषु मन्दवाते च शस्यते" ॥
ऋषिकुमारभेद । अयं तु श्वेतकेतुपुत्रस्य पुण्डरीकस्य वपु । यथा कादम्बर्य्यां महाश्वेतोपाख्याने ।
"सखे ! कपिञ्जल ! किं मामन्यथा सम्भावयसि" ॥)

कपितैल, क्ली, (कपिरिव वानरे शिलायाः विदारणात् तस्मादिव यत् तैलम् ।) तुरुष्कनामगन्धद्रव्यम् । इति भावप्रकाश । (तथाचोक्तम् ।
"सिह्लकस्तु तुरुष्क स्यायतो यवनदेशजः ।
कपितैलञ्च सङ्ख्यात तथा च कपिनामक" ॥)

कपित्थ, पुं, (कपि तिष्ठति फलप्रियत्वात् लोभात् वा यत्र । कपि+स्था+क । पृषोदरादित्वात् सलोपे साधु ।) वृक्षविशेष । कतबेल इति भाषा तत्पर्य्याय । दधित्थ २ ग्राही ३ मन्मथ ४ दधिफल ५ पुष्पफल ६ दन्तशठ ७ । इत्यमरः २ । ४ । २१ । कपित्थ ८ । इति भरत । मालूरः ८ मङ्गल्य १० नीलमल्लिका ११ ग्राहिफल १२ चिरपाकी १३ ग्रन्थिफल १४ कुचफल १५ कपीष्ट १६ गन्धफल १७ दन्तफल १८ करभवल्लभ १९ काठिन्यफल २ करञ्जफल २१ । अस्यामफलगुणा । अम्लत्वम् । उष्णत्वम् । कफनाशित्वम् । ग्राहित्वम् । वायुवर्द्धकत्वम् । कण्ठरोगजिह्वाविजड़ताकारित्वम् । त्रिदोषवर्द्धकत्वम् । विषहरत्वम् । रोचकत्वञ्च । तत्पक्वफलगुणा । दोषत्रयहरत्वम् । मधुराम्लरसत्वम् ।

गुरुत्वम् । श्वासवमिथ्यमश्रमहरत्वम् । हिक्कापकोदनत्वम् । पाचित्वम् । रुचिप्रदत्वम् । सतत सर्व्वदा सेव्यम् । इति राजनिर्घण्टः ॥

"कपित्थमामं संग्राहि विषघ्नं ग्राहि वातलम् ।
मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम्" ॥

इति राजवल्लभः ॥ (तथा च चरके ।

"कपित्थं विषकण्ठघ्नमामं संग्राहि वातलम् ।
मधुराम्लकषायत्वात् सौगन्ध्याच्च रुचिप्रदम् ।
परिपक्वं दोषघ्नं विषघ्नं ग्राहि गुर्व्वपि" ॥

"कुशद्वीपेश्वरस्य राज्ञो ज्योतिष्मतश्चकस्य नाम पुत्रस्यापि एकतमः । तद्वर्षमपि तन्नाम्ना ख्यातम् । तद्विवरणन्तु विष्णुपुराणे २ यांशे ४ अध्याये द्रष्टव्यम्")

कपित्थत्वक्, स्त्री, (कपित्थस्य मालूरस्य त्वगिव त्वग् यस्य ।) एलवालुकम् । इति राजनिर्घण्टः ॥ (एलवालुकशब्देऽस्य विशेषगुणा ज्ञातव्याः ॥)

कपित्थपर्णी, स्त्री, (कपित्थस्य पर्णमिव पर्णं यस्याः । कपित्थपर्ण + गौरादित्वात् ङीष् ।) वृक्षविशेषः । कपित्थानीति ख्याता । तत्पर्य्यायः । विरजा २ सुरभा ३ चित्रपर्णिका ४ । इति रत्नमाला ॥

कपित्थास्यः, पुं, (कपित्थवत् कपित्थफलवत् वर्त्तुलाकारं आस्यं मुखं यस्य ।) वानरविशेषः । तत्पर्य्यायः । गोलाङ्गूलः २ दधिशोणः ३ नगाटनः ४ । इति त्रिकाण्डशेषः ॥

कपिध्वजः, पुं, (कपिर्हनूमान् ध्वजे यस्य सः । प्रतिज्ञापालनपरतन्त्रेण महावीरेण हनूमताधिष्ठितध्वजत्वात् वानरचिह्नध्वजवत्त्वाद्वा तथात्वम् ।) अर्ज्जुनः । इति त्रिकाण्डशेषः ॥ (यथा गीतायाम् । १ । २० ।

"अथ व्यवस्थितान् दृष्ट्वा धार्त्तराष्ट्रान् कपिध्वजः" ॥)

कपिनामा, [न्] पुं, (कपेर्नामेव नाम यस्य ।) सिह्लकः । इति रत्नमाला ॥ (स्वार्थे कन् प्रत्ययेनास्य पर्य्यायमुक्तं भावप्रकाशे यथा,—

"कपिर्नैलश्च सल्यात तथा च कपिनामकः" ॥)

कपिपिप्पली, स्त्री, (कपिः कपिश्च रक्तवर्णा पिप्पलीव रक्तवर्णपिप्पलीतुल्येति यावत् ।) रक्तापामार्गः । इति वैद्यकम् ॥ रक्तापामार्गः । इति रत्नमाला ॥

कपिप्रभा, स्त्री, (कपिष्वपि प्रभा निजप्रभूतगुण प्रभावश्च यस्याः । वर्मीणामपि कण्डूजनकत्वात् तथात्वम् ।) कपिकच्छुः । इति शब्दरत्नावली ॥

कपिप्रभुः, पुं, (कपीनां हनूमदादीनां प्रभुः नियन्ता ।) रघुनाथः । इति शब्दरत्नावली ॥ (वानरराजः वाली सुग्रीवश्च ॥)

कपिप्रियः पुं (कपीनां प्रियः ।) आम्रातकः । इति राजनिर्घण्टः ॥ कपित्थः । इति जटाधरः ॥

कपिरथः, पुं (कपिर्हनूमान् रथे इव ध्वजरूपेण वाहनं वा यस्य ।) श्रीरामः । इति शब्दरत्नावली ॥ (अपि गदाधरः हनूमान् रथे यस्य इति व्युत्पत्त्या कपिध्वजेऽर्ज्जुनः ॥)

कपिलः पुं, (कम्प् कम्पने "कपेर्हश्च" । उणा' १ । ५६ । इलच् । मध्यान्तादेशः ।) मुनिविशेषः । स तु सांख्ययोगप्रचारार्थं भगवदवतारः । कर्द्दमप्रजापतेर्देवहूत्यां जातः । इति श्रीभागवतम् ॥ (यथा गीतायां १० । २६ ।

"गन्धर्व्वाणां चित्ररथः सिद्धानां कपिलो मुनिः" ॥

सगरराजसन्ततिध्वंसकारी रसातलस्थः कपिलो मुनिः केषाञ्चिन्मते सांख्ययोगप्रचारकर्त्ता न । अयन्तु अपरः कश्चित् स्वनामख्यातो मुनिः । एतदर्थे प्रमाणं यथा, रघुः ३ । ५० ।

"अतोऽयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः" ॥)

अग्निः । कुक्कुरः । इति हेमचन्द्रः ॥ सिह्लकनामगन्धद्रव्यम् । इति रत्नमाला ॥ पिङ्गलवर्णः । तद्युक्ते त्रि । इत्यमरः । १।५।१६—१९ ॥ नीलपीतः । कपिशः । इति भरतः ॥ "कपिलो रोचनाच्छविरिति स्मृतः" । इति भरतः ॥ (यथा, महाभारते १।३।२४।

"अनन्तः कपिलो भानुः कामदः सर्व्वतोमुखः" ॥

महादेवः । यथा तत्रैव १३ । १७ । ८७ ।

"कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः" ॥

विष्णुः । यथा तत्रैव १३ । १४९ । १०९ ।

"सनात्सनातनतमः कपिलः कपिरव्ययः" ॥

नागविशेषः । यथा, हरिवंशे ३ । १२४ ।

"शङ्खश्च शङ्खपालश्च कपिलो वामनस्तथा" ॥

दानवभेदः । यथा तत्रैव ३ । ८२ ।

"अयोमुखः शम्बरश्च कपिलो वामनस्तथा" ॥)

कपिलद्युतिः, पुं (कपिला रक्ता पिङ्गलवर्णा वा द्युतिः यस्य ।) सूर्य्यः । इति शब्दचन्द्रिका ॥

कपिलद्राक्षा, स्त्री, (कपिला द्राक्षा ।) द्राक्षाविशेषः । तत्पर्य्यायः । मृद्वीका २ गोस्तनी ३ कपिलफला ४ अमृतरसा ५ दीर्घफला ६ मधुवल्ली ७ मधुफला ८ मधूली ९ हरिता १० हारहूरा ११ तापसा १२ मृद्वी १३ हिमोत्तरा १४ पथिका १५ हैमवती १६ शतवीर्य्या १७ काश्मरी १८ । अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । पथ्यत्वम् । मदकर्त्तृत्वम् । दाहमूर्च्छाज्वरश्वासतृष्णाहृल्लासनाशित्वञ्च । इति राजनिर्घण्टः ॥ (मृद्वीकाशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

कपिलद्रुमः पुं (कपिलः कपिलवर्णो द्रुमः ।) काष्ठीनामगन्धिकाष्ठम् । इति शब्दचन्द्रिका ॥

कपिलधारा, स्त्री, (कपिलानां धारा इव दुग्धधारा सदृशी शुभ्रा धारा यस्याः । यद्वा कपिलानां दुग्धधाराभिः सम्भूता निर्म्मिता धारा यस्याः । संज्ञायां कन्याकोटिरिति धारकिरितुपासुपाचेश कृता ।) गङ्गा । तीर्थभेदः । इति हेमचन्द्रः ॥

कपिलशिंशपा स्त्री, (कपिला रक्तपीतमिश्रितवर्णा शिंशपा ।) शिंशपावृक्षविशेषः । तत्पर्य्यायः । कपिला २ पीता ३ सारिणी ४ कपिलाक्षी ५ भस्मगर्भा ६ कुशिंशपा ७ । अस्या गुणाः । तिक्तत्वम् । शीतवीर्य्यत्वम् । श्रमवमनपित्तज्वरच्छर्द्दिहिक्कानाशित्वञ्च इति राजनिर्घण्टः ॥

कपिला, स्त्री, (कपिलो वर्णोऽस्त्यस्याः अर्श आद्यच् टाप् च ।) पुण्डरीकनामदिग्गजपत्नी । इत्यमरः । १ । ३ । ४ ॥ भस्मगर्भा शिंशपा । रेणुकानामगन्धद्रव्यम् । इत्यमरः । २ । ६३—१२० ॥ (यथाह राजवल्लभः ।

"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपुत्री स्मृता कौन्ती हरेणुका" ॥

अस्या गुणादिकं रेणुकाशब्दे द्रष्टव्यम् ॥) गोविशेषः । इति हेमचन्द्रः ॥ सा तु भगवत्याः । इति पुराणम् ॥ (यथा, महाभारते १ । ८३ । ८९ ।

"कपिला सत्यवत्या वै पश्यते विचरन्त्युत" ॥

दक्षकन्या । यथा महाभारते १ । ६५ । १२ ।

"क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः" ॥

कपिलवर्णयोगात् । अनुदात्तत्वाभावात् वर्णादिति न ङीप् ।) महाकन्या । शिंशपा । राजरीतिः इति राजनिर्घण्टः ॥ नदीविशेषः । यथा,—

"कामरूपे पश्चिमेशे पूर्व्वस्मिन् शुभपर्व्वतः ।
यत्र सह पुरा रेमे यत्र शक्रः सुरेश्वरः ॥
तत्पूर्व्वस्यां महादेवी नदी कपिलसंज्ञिता ।
तस्यां स्नात्वा नरो गङ्गास्नानजं फलमाप्नुयात्" ॥

इति कालिकापुराणे ८२ अध्यायः ॥ (तीर्थविशेषः । यथा, महाभारते ३ । ८३ । ४५ ।

"कपिलातीर्थमासाद्य ब्रह्मचारी समाहितः ।
तत्र स्नात्वार्च्चयित्वा च पितॄन् स्वान् दैवतान्यपि ।
कपिलानां सहस्रस्य फलं विन्दति मानवः" ॥

कपिलानां पयस्विनीधेनूनाम् इत्यर्थः ।) पिङ्गलवर्णा । यथा विष्णुपुराणे ३यांशे । ४ । ३१ ।

"कपिलाश्चावदाताः पीताः तथाश्वैव पृथक् पृथक्" ॥

कपिला काया गौः यया ख्याता चक्रुः सहस्र ३ । ८ ।

"गोदक्षैत्यपिता कन्या नाधिकाङ्गीं न रोगिणीम्" ॥)

कपिलाक्षी, स्त्री, (कपिले अक्षि वत् पुष्पं यस्याः ।) मृगेर्वारुः । कपिलशिंशपा । इति राजनिर्घण्टः ॥

कपिलाश्वः, पुं, (कपिलाः कपिलवर्णाः अश्वाः यस्य ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

कपिलोमफला, स्त्री, (कपिलोमवत् अपि फलति कण्डूप्रकाशाय प्रभवति या ।) कपिकच्छुः । इति राजनिर्घण्टः ॥ (शूकशिम्बीशब्देऽस्या गुणा ज्ञेयाः ॥)

कपिलोमा, स्त्री, (कपिलोमवत् लोमशः शरीरं यस्याः ।) रेणुका । इति राजनिर्घण्टः ॥ (विवृतिरस्तु रेणुकाशब्दे द्रष्टव्या ॥)

कपिलोहं क्ली (कपिरिव कपिवर्णयुक्तं लोहम् ।) पित्तलम् । इति हेमचन्द्रः ॥ (पित्तलशब्देऽस्य गुणा ज्ञातव्याः ॥)

कपिवल्लिका, स्त्री, (कपिवर्णा वल्लिका । पृषोदरादित्वात् वर्णलोपे साधुः ।) गजपिप्पली । इति रत्नमाला ॥ (गजपिप्पलीशब्देऽस्या गुणा ज्ञेयाः ॥)

कपिवक्त्रः, (कपेर्वानरस्य वक्त्रमिव वक्त्रं यस्य नारदस्य पर्व्वतमुनिशापप्रभावात् भातुलकन्यायाम् तथात्वम् ।) नारदः । इति त्रिकाण्डशेषः ॥ (यथा हि नारदस्य कपिवक्त्रत्वं श्रूयते ।

पुरा किल मातुलभागिनेयौ नारदपर्व्वतौ मानुषेषु सर्व्वेषु विचरन्तौ देवलोकादिहागतवन्तौ । स्वाध्याय च ब्रह्म हृत्वायितेन तदा तौ ऊचतुः । यावीव

श्चिकामयोः समयः शुभमशुभं वा हृदि जात मुत्पन्नं परस्परेण कथनीयमिति। अथ कदाचित् राजा तावभ्युपेत्य स्वसुतां तदाराधनाय नियोजितवान्। अथ गच्छति काले नारदस्तु कन्दर्पबाणवशगः राजदुहितरि मनो निदधे। धर्म्मविदपि नारदः व्रीडमानः तोतमिदं मनोभावं भागिनेयाय न प्रत्यस्त। भागिनेयः पर्व्वतस्तु इङ्गितादिभिर्मातुलं कामार्त्तं वीक्ष्य समयभङ्गादति क्रुद्धः "इयं नृपसुता तव भार्य्या भविष्यति त्वमपि वानरमूर्त्तिधरोऽत्र विचरिष्यसि" इति तं शप्तवान्। एतच्छापात् खलु नारदो वानरमुख आसीत् इति पौराणिकी कथा अत्र अनुसन्धेया। विवृतिस्तु महाभारते शान्तिपर्व्वणि ३० अध्याये द्रष्टव्या।)

कपिवल्ली, स्त्री, (कपिरिव कपिलोमसदृशी वल्ली।) गजपिप्पली। इत्यमरः। २। ४। ९६॥

कपिशः पुं, (कपि वर्णविशेषः अस्त्यस्य कपिनामा स्यास्ति वा लोमादित्वात् शः।) श्यावः। कृष्ण पीतमिश्रितवर्णः। तद्युक्ते त्रि। इत्यमरः १।५।१६॥ (यथा, रघुः १२। २८।

"सन्ध्याभ्रकपिशस्तस्य विराधो नाम राक्षसः। अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रहः"॥

सर्व्ववर्णमयत्वात् शिवः। यथा, महाभारते १३। शिवसहस्रनामकीर्त्तने १७। ८७।

"कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः"॥) सिह्लकनाम गन्धद्रव्यम्। इति मेदिनी॥

कपिशाञ्जन, पुं, (कपिशं अञ्जनं कपिशयुक्तं अञ्जनं वा यस्य। अञ्जनस्य श्यामवर्णतया तस्य श्वेतवर्णत्वाच्च एवमुच्यते।) शिवः। इति त्रिकाण्डशेषः॥

कपिशापुत्त्र पुं, (कपिशाया मदोन्मत्ताया पिशाच्याः पुत्त्रः।) पिशाचः। इति शब्दमाला॥

कपिशी, स्त्री, (कपिश इति वर्णवाचितया ङीष्।) माधवी। मदिरा। इति मेदिनी जटाधरश्च॥ (हलायुधमतेऽस्य क्लीवत्वमपि दृश्यते॥)

कपिशीका, स्त्री, (कपिश+स्वार्थे बाहुलकात् ईकन् टाप् च।) मदिरा। इति त्रिकाण्डशेषः॥

कपिशीर्ष, क्ली, (कपीनां प्रियस्थानं शीर्षं यस्य प्राकारादीनां शिरोदेश एव कपिप्रियत्वात् प्रसिद्धः। शाकपार्थिवादित्वात् समासः।) प्राकाराग्रम्। तत्पर्य्यायः॥ लोककशीर्षकम् २ कपिशीर्षम् ३। इति त्रिकाण्डशेषः॥

कपिशीर्षक, क्ली, (कपीनां शीर्षवर्णवत् कायति प्रकाशते। कै+कः।) हिङ्गुलम्। इति शब्दचन्द्रिका॥ (हिङ्गुलशब्देऽस्य गुणादयो ज्ञातव्याः॥)

कपीकच्छु, पुं (कपिकच्छुरिति संज्ञायां वा दीर्घः।) कपिकच्छुः। इति शब्दरत्नावली॥

कपीज्य, पुं, (कपिभिर्वानरैरतिप्रियत्वात् इज्यते पूज्यते। कपि+यज्+क्यप्।) क्षीरिकावृक्षः। इति जटाधरः॥ (रामचन्द्रः। इति व्युत्पत्त्यर्थे॥)

कपीतः, पुं (कं जलं तनुत्वाच्छ्वेतवर्णं अपि इतं प्राप्तः अपेरल्लोपः। यद्वा कपिभिरितः प्रियत्वेन प्राप्तः।) श्वेतकुशावृक्षः। इति रत्नमाला॥

कपीतन, पुं, (कपीनां ईं शोभां तनोति विस्तारयतीति। कपि+ई+तन्+पचाद्यच्। कपीनां कपेवर्णस्य वा तनः। अन्येषामपीति। ६। ३। १३७। दीर्घः।) आम्रातकवृक्षः। गर्द्दभाण्डवृक्षः। शिरीषवृक्षः। इत्यमरः। २। ४। २७॥ अश्वत्थवृक्षः। इति मेदिनी। गुवाकवृक्षः। बिल्ववृक्षः। इति शब्दरत्नावली॥ (आम्रातकशब्दे शिरीषशब्दे अश्वत्थशब्दे बिल्वशब्दे चास्य गुणादयो ज्ञातव्याः॥)

कपीन्द्र, पुं, (कपिस्वामी इन्द्रश्चेति कपिरिन्द्र इव इति वा।) हनूमान्। इति शब्दरत्नावली॥ (कपीनां वानराणामिन्द्रः। सुग्रीवः। वाली। इति रामायणम्॥ विष्णुः। यथा, महाभारते। १३। विष्णुसहस्रनामकीर्त्तने १४९। ६६।

"शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः"॥)

कपीष्ट, पुं (कपीनां इष्टः प्रियः।) राजादनीवृक्षः। कपित्थः। इति राजनिर्घण्टः॥ (कपित्थशब्देऽस्य गुणादय उक्ताः॥)

कपोत, पुं (को वायुः पोतः नौरिवास्य। यद्वा कबृ वर्णे+"कबेरोतच् पश्च"। उणा। १। ६३। इति ओतच् +बस्य पश्च।) गृहकपोतः। पायरा इति भाषा। तत्पर्य्यायः। कलरवः २ पारावतः ३। इत्यमरः। २। ५। १४॥ पारापतः ४ छेद्यः ५ रक्तलोचनः ६। इति रभसः॥ गृहकुक्कुटः ७। यथा —

'मार्ज्जारच्छिते दुःखं यादृशं गृहकुक्कुटे'।

इति प्रयोगात् इति सारसुन्दरी॥

(यथा रामायणे। ५। ९१। ४।

"श्रूयते हि कपोतेन शत्रुः शरणमागतः।

अर्च्चितश्च यथान्यायं स्वैश्च मांसैर्निमन्त्रितः"॥)

वनकपोतः। घुघु इति भाषा। तत्पर्य्यायः। चित्रकण्ठः २। इति मेदिनी॥ कोकदेवः ३ धूसरः ४ धूम्रलोचनः ५ दहनः ६ अग्निसहायः ७ भीषणः ८ गृहनाशनः ९। तन्मांसगुणाः। वीर्य्यबलवृद्धिकारित्वम्। स्वादुत्वम्। कफपित्तास्रनाशित्वञ्च। इति राजनिर्घण्टः॥ मधुरत्वम्। शीतलत्वम्। कषायत्वम्। वातपित्तनाशित्वम्। कार्य्यपतनभञ्जनेन विषडलञ्च। इति राजवल्लभः॥

(अस्य गुणान्तरं यथा,—

'पारावतो गुरुः स्निग्धो रक्तपित्तानिलापहः।

संग्राही शीतलस्तज्ज्ञैः कथितो वीर्य्यवर्द्धनः'॥

इति भावप्रकाशः॥

'कपोता हृद्यो बल्यो वातपित्तविनाशनः।

तपश्च शुक्रजननो हितो व्यक्तं कषिप्रद'॥

इति हारीतः॥ कपोतविशेषस्य गुणाः॥ यथा,—

"गुरुः सलवणः काणकपोतः सर्व्वदोषहृत्"॥

इति वाभटः॥

'कषायमधुराः शीता रक्तपित्तनिबर्हणाः।

विपाके मधुराश्चैव कपोता गृहवासिनः॥ १॥

तेभ्यो लघुतराः किञ्चित् कपोता वनवासिनः।

शीताः संग्राहिणश्चैव स्वल्पमूत्रकराश्च ते"॥ २॥

इति चरकः॥

"सर्व्वदोषहरस्तेषां भेदाशी मलदूषकः।

कषायस्वादुलवणो गुरुः काणकपोतकः"॥

इति सुश्रुतः॥)

कपोतक, क्ली, (कपोत इव कपोतवर्णत्वात् कायति प्रकाशते। कै+कः।) सौवीराञ्जनम्। इति राजनिर्घण्टः॥

कपोतचरणा, स्त्री, (कपोतचरणः चरणाकारो अस्त्यस्याः।) नलीनामगन्धद्रव्यम्। इति जटाधरः॥

कपोतपालिका, स्त्री, (पालयति इति। पाल रक्षणे+ कर्त्तरि ण्वुल्। कपोतानां पालिका कपोतान् पालयति इति वा कर्म्मण्यण्।) विटङ्कः। घोषादिप्रान्तकाष्ठादिरचितपक्षिस्थानम्। इत्यमरः। २। २। १५॥ पायरार खोप इति भाषा॥

कपोतपाली, स्त्री, (कपोतान् पालयति इति। पाल कर्म्मण्यण् ङीप् च। केचित्तु पाल+अच् गौरादित्वात् ङीष्।) कपोतपालिका। इति हलायुधः॥ (यथा माघे ३। ५१।

"विलम्बया छन्निमपञ्चिपङ्क्ते

कपोतपालीषु निकेतनानाम्"॥)

कपोतवङ्का, स्त्री, (कपोतो वङ्क्यते प्रतार्य्यतेऽनया। वन्क+करणे घञ् कुत्वं टाप् च।) ब्राह्मीवृक्षः। इति राजनिर्घण्टः॥ (यथा सुश्रुते।

"कपोतवङ्कामूलं हि विवेदस्वसरादिभि"॥)

कपोतवर्णी, स्त्री, (कपोतस्य वर्ण इव वर्णो यस्याः गौरादित्वात् ङीष्।) सूक्ष्मैला। इति राजनिर्घण्टः॥ (सूक्ष्मैलाशब्देऽस्या विशेषो ज्ञेयः॥)

कपोतवाया, स्त्री, (कपोतपाद इव यो बाध्यः तद्वदाकारोऽस्याः।) नलिकानामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

कपोतसार, क्ली, (कपोतः कपोतवर्ण इव सारः श्रेष्ठो वर्णो यत्र।) स्रोतोऽञ्जनम्। इति राजनिर्घण्टः॥

कपोताङ्घ्रि, स्त्री, (कपोतस्य अङ्घ्रिरिव।) नलीनामगन्धद्रव्यम्। इत्यमरः। २। ४। १२१॥

कपोताभ, पुं, (कपोतस्य आभा इव आभाऽस्य।) कपोतवर्णः। इति हेमचन्द्रः॥ (मूषिकभेदः।

'मूषिकश्च कपोताभश्चैवाष्टादश स्मृताः'।

इति सुश्रुतः॥)

कपोतारि, पुं, (कपोतानां अरिः शत्रुः।) श्येनपक्षी। इति शब्दरत्नावली॥

कपोल, पुं (कम्पते 'कपिगडि कटिपटिभ्य ओलच्'। उणा १। ६७। इति ओलच् कपि इति निर्द्देशात् नलोपः। कं सुखं पोलतीति वा पुल महत्त्वे कर्म्मण्यण्।) एतन्निर्य्यकसन्निधिभागः। गाल इति भाषा। तत्पर्य्यायः। गण्डः २। इत्यमरः। २। ६। ९०॥ गल्लः ३। इति राजनिर्घण्टः। (यथा रघुः। ४। ६८।

"तत्र हूणावरोधानां भर्त्तृषु व्यक्तविक्रमम्।

कपोलपाटलादेशि बभूव रघुचेष्टितम्"॥)

कफः, पुं, (केन जलेन फलति इति। फल निष्पत्तौ "अन्येष्वपि" ३। २। १०१। इति डः। केशिरसि फलति वा पृषोदरादित्वात् साधुः।) शरीरस्थधातुविशेषः। तत्पर्य्यायः। श्लेष्मा २ बलासः ३ सौम्यधातुः ४॥

घन ५ वशी ६। अस्य गुणाः। गुरुत्वम्। स्निग्धत्वम्। पिच्छिलत्वम्। मृदुत्वम्। प्रमर्द्दनत्वम्। स्थिरत्वम्। कटुत्वम्। शीतत्वम्। अङ्गाकारित्वम्। शुक्लत्वम्। शीते वसन्ते दिवामुखे पूर्व्वाङ्गे भुक्ते च प्रकोपयत्वम्। इति राजनिर्घण्टः ॥ * ॥ अस्य प्रकोपहेतु। "गुरुमधुररसातिस्निग्धदुग्धेक्षुभक्ष्यद्रवदधिदिननिद्रापूपसर्पिःप्रपूरैः। तुहिनपतनकाले श्लेष्मणः सम्प्रकोपः प्रभवति दिवसादौ भुक्तमात्रे वसन्ते"। * । तस्य कर्म्माणि। "स्नैग्ध्यं मधुरता स्थिरता शैत्यं प्रसेको गुरुता प्रावृत्यं स्थिरता रसस्य कथयः कण्डूरविसक्तता। आलस्यं चिरकारिता कठिनता शोथादयश्चित्रिमता तन्द्रा दृष्टापदेहकासगुरुता श्लेष्मा कफोत्था रुजः" ॥ * ॥

अस्य प्रशमनोपायम्।

"गुरुशीतमृदुस्निग्धमधुरस्थिरपिच्छिलाः।
श्लेष्मणः प्रशमं यान्ति विपरीतगुणैर्गुणाः"॥
"रूक्षक्षारकषायतिक्तकटुकव्यायामनिष्ठीवनस्त्रीसेवाध्वनियुद्धजागररतिक्रीडाप्रदाहादिकम्।
धूमागुरु शिरोविरेचनवमनस्वेदोपवासादिकं पानाहारविहारभेषजमिदं श्लेष्मामयं जयेत्"॥

स च पञ्चविधो यथा,—

"अवलम्बनः क्लेदकः बोधकः श्लेष्मकोऽपरः।
बोधकस्तर्पकश्चेति श्लेष्मा पञ्चविधः स्मृतः" ॥ * ॥

एतेषां लक्षणानि यथा,—

"कफधामानि यथास्थं स्यात् कफरोत्यवलम्बनम्।
यतोऽन्नमम्बुकारादाति श्लेष्मा प्राप्नोत्युरःस्थितः ॥१॥
आमाशयस्थितः सोऽन्नक्लेदनात् क्लेदकः स्मृतः ॥२॥
श्लेषकश्लेषणात् सन्धौ स च सन्धौ व्यवस्थितः ॥३॥
रसनायां स्थितस्त्वेष बोधको रसबोधनात् ॥४॥
शिरसि प्रस्थितश्चासौ तर्पको नेत्रतर्पणात् ॥५॥" * ॥

अस्य स्थानानि।

"उरःकण्ठशिरः क्लोमपर्व्वाण्यामाशयो रसः।
मेदो प्राणश्च जिह्वा च कफस्थानमुरः परम्"॥ * ॥

(सन्धिसंश्लेषस्नेहनरोपणपूरणबलस्थैर्य्यकृत् श्लेष्मा पञ्चधा प्रविभक्त उदककर्म्मणानुग्रहं करोति। इति तु प्रकारभेदेनास्य कार्य्यमुक्तम्॥

अतः परमस्य स्थानगमाह।

श्लेष्माशये कण्ठतामाशये आमाशयेतराश्रय शिरसो गुरुता सन्धिशैथिल्यं तृष्णा दौर्ब्बल्यं प्रजागरणम्। तथ स्रोतोनिरुद्धमदयाश्चेव प्रतीकारः। अत परमस्यातिवृद्धौ यच्चान्यं तदाह।

श्लेष्मवृद्धौ शैत्यं प्रैत्यं सौम्यं गौरवमवसादतन्द्रानिद्रासन्ध्यस्थिविश्लेषश्च।)

तत्प्रकृतिकस्य लक्षणम्।

"गम्भीरबुद्धिः स्थूलाङ्गः स्निग्धकेशो महाबलः।
स्वप्ने जलाशयालोकी श्लेष्मप्रकृतिको नरः"॥ * ॥

(अपरञ्च यथाह हारीतः।

"सुस्निग्धकेशः सितनेत्रदीप्तः
प्रज्ञाः सुवेशो न च दीर्घरोमा।
गम्भीरशब्दः प्रगमाक्षविशः
तन्द्रालिमतिमदद्युष्णभोजी।
सुलोचनः स्थिरकृतस्थिरश्च

सङ्गीतवाद्योऽतिषितिषधरितः।
व्यायामशीलो दृढगात्रसोऽपि
भवेत् कफात्मप्रकृतिर्मनुष्यः॥
गुरुत्वाढ्यः स्थिरकुटिलातिनीलकेशो
जल्पीवाग् जलरवगम्भीरघोषः।
इष्टः सन् सरसमकहरम्यवाक्यान्
सम्पश्येदपि च जलाशयान् मनोज्ञान्॥
रक्तान्तनेत्रः सुविभक्तगात्र
स्निग्धच्छविः सत्त्वगुणोपपन्नः।
क्लेशक्षमो मानयिता गुरूणां
श्लेष्मा बलासप्रकृतिर्मनुष्यः॥
दृढशास्त्रमतिः स्थिरमित्रधनः
परिगण्य चिरात् प्रददाति बहु।
परिनिश्चितवाक्यपदः सततं
गुरुमानकरश्च भवेत् स सदा॥
ब्रह्मरुद्रेन्द्रवरुणैः सिंहाश्वगजगोवृषैः।
तार्क्ष्यहंससमानूका श्लेष्मप्रकृतयो नराः"॥
इति सुश्रुतः॥

श्लेष्मस्थानान्यत ऊर्द्ध्वं वक्ष्यामः। तत्रामाशय पित्ताशययोरुपरिष्टात् तत्प्रत्यनीकत्वादूर्द्ध्वगतित्वात् तेजसश्चन्द्र इवादित्यस्य स चतुर्व्विधस्याहारस्याधारः। स च तत्रोदकैर्गुणैराहारः प्रक्लिन्नो भिन्नसङ्घातः सुखजरश्च भवति।

"माधुर्य्यात् पिच्छिलत्वाच्च प्रक्लेदित्वात्तथैव च।
आमाशये सम्भवति श्लेष्मा मधुरशीतलः"॥

स तत्रस्थ एव स्वशक्त्या शेषाणां श्लेष्मस्थानानां शरीरस्य चोदककर्म्मणानुग्रहं करोति। उरःस्थस्त्रिकसन्धारणमात्मवीर्य्येणान्नरसवाहितेन हृदयावलम्बनं करोति। जिह्वामूलकण्ठस्थो जिह्वेन्द्रियस्य सौम्यत्वात् सम्यग्रसज्ञाने वर्त्तते। शिरःस्थः स्नेहसन्तर्पणाधिकृतत्वादिन्द्रियाणामात्मवीर्य्येणानुग्रहं करोति। सन्धिस्थस्तु श्लेष्मा सर्व्वसन्धिसंश्लेषात् सर्व्वसन्ध्यनुग्रहं करोति॥ भवति चात्र।
"श्लेष्मा श्वेतो गुरुः स्निग्धः पिच्छिलः शीत एव च।
मधुरस्त्वविदग्धः स्याद्विदग्धो लवणः स्मृतः"॥)

तत्प्रकुपितस्य कर्म्म।

"स्नेहो बन्धः स्थिरत्वञ्च गौरवं वृषता बलम्।
क्षमा धृतिरलोभश्च कफकर्म्माविकारजम्॥ * ॥
इति सुखबोधः। मेघ। यथा कफिकथा इत्यादि।

कफकूर्च्चिका, स्त्री, (कफं कूर्च्चति विकृतं करोतीति। कफ + कूर्च्च + विकारे + ण्वुल् + टाप्। इत्वञ्च।) लाला। लाल् थुतु थिकुनि इत्यादि भाषा। तत्पर्य्यायः। स्यन्दिनी २ स्यन्दिनी ३ लाला ४ आस्यासवः ५। इति हेमचन्द्रः॥

कफघ्नी, स्त्री, (कफं कफविकारं हन्तीति। कफ + हन् + टक् + ङीप्।) क्षुद्रकारिका। इति राजनिर्घण्टः। (यथा, राजनिघण्टौ प्रतापादिवर्गे।
"शीतघ्नी विषघ्नी च कफघ्नी चापराजिता"॥)

कफणि, पुं, स्त्री, (केन सुखेन फणति गच्छति अनायासेन प्रकोपविशेषमनेन प्राप्नोति स्फुरति वा। फण गतौ, स्फुर सञ्चलने इति वा धातोः इन्

पृषोदरादित्वात् साधुः।) कफोणिः। इति हेमचन्द्रः॥

कफवर्द्धन, पुं, (कफं कफजनितविकारं वर्द्धयतीति। कफ + वृध् + णिच् + ल्यु।) पिण्डीतगरवृक्षः। इति वैद्यकशब्दः। श्लेष्मवर्द्धके त्रि। इति वैद्यकम्। (दिवास्वप्नाव्यायामालस्यमधुराम्ललवणशीतस्निग्धगुरुपिच्छिलाभिष्यन्दिहायनकयवकनैषधेत्कटमाषमहामाषगोधूमतिलपिष्टविकृतिदधिदुग्धकृशरापायसेक्षुविकारानूपौदकमांसवसाबिसमृणालकशेरुशृङ्गाटकमधुरवल्लीफलसमशनाध्यशनप्रभृतिभिः श्लेष्मप्रकोपमापद्यते॥
"सशीतैः शीतकाले च वसन्ते च विशेषतः।
पूर्व्वाह्णे च प्रदोषे च भुक्तमात्रे प्रकुप्यति"॥
इति सुश्रुतः॥)

कफविरोधि, क्ली, (कफं विरोधेन रुणद्धीति। कफ + वि + रुध् + णिनिः।) मरिचम्। इति राजनिर्घण्टः। (श्लेष्मनाशके, त्रि। मरिचशब्दे ऽस्य गुणा ज्ञेयाः॥)

कफान्तक, पुं, (कफस्य अन्तकः नाशकः। यद्वा। कफं अन्तयतीति। कफ + अन्त + करोत्यर्थे णिच् + ण्वुल्।) बन्धुकवृक्षः। इति राजनिर्घण्टः। (अस्य गुणादिकं बन्धूकशब्दे ज्ञातव्यम्॥ कफनाशके, त्रि॥)

कफारिः पुं, (कफस्य अरिः दमयितेत्यर्थः।) शुण्ठी। इति राजनिर्घण्टः। (श्लेष्मनाशके, त्रि। शुण्ठीशब्देऽस्य विशेषो ज्ञेयः॥)

कफी, [न्] त्रि, (कफोऽस्यास्ति। कफ + अस्त्यर्थे। "वर्णादपनयेति"। ५। २। १२८। इति।) श्लेष्मयुक्तः। तत्पर्य्यायः। श्लेष्मलः २ श्लेष्मणः ३। इत्यमरः। २। ६। ६०। मते पुं। इति भरतः॥

कफेलुः, त्रि, (कफं आति आदत्ते इति। कफ + आ आदाने + "अन्दू-दृम्भू-जम्बू-कफेलू-कर्कन्धू-दिधिषु"। उणां १। ६५। इति कुमत्ययान्तो निपातितः।) कफयुक्तः। इति सिद्धान्तकौमुद्यां उणादिवृत्तिः॥ (पुं, श्लेष्मातकवृक्षः।
"कफेलूः श्लेष्मातकतरौ रेवतीति रूपमञ्जरी"।
इति "उज्ज्वलदत्तवचनात्"। १। ६५॥)

कफोणि, पुं, (कं जलं फोणयति। स्फुर स्फुरणे सञ्चलने च धातोः कफ इः। यद्वा केन सुखेन फणति स्फुरतीति वा। स्फुर, फण वा + इन् उभयतः पृषोदरादित्वात् साधुः।) भुजमध्यग्रन्थिः। कनुइ इति भाषा॥ तत्पर्य्यायः। कूर्परः २। इत्यमरः। २। ६। ८०॥ (कूर्परशब्दे ऽस्य विशेषो ज्ञेयः॥)

कब, ऋ उ वर्णे। वर्णे। इति कविकल्पद्रुमः। (भ्वा-आत्म-सक-सेट् ऋदित्।) वर्णः शुक्लादिक्रिया। ऋ अचकावत्। उ कवते कविर्विन्दुम्। कवते पतिमां चित्रकारः। इति दुर्गादासः॥

कबन्ध, क्ली (कस्य प्राणवायोः बन्धं आबन्धः। अथ पानमेव प्राणधारकत्वात्। करणि प्राणस्थितिः अर्थ विना नैव स्यात्। यथा, श्रुतिः।

"पञ्चदशाहानि भाऽग्नी कामसम पिबापोमयः प्राप्तो न पिपतस्ते विप्रवेक्ष्यते" ।) जलम् । इत्यमरः । १ । १० । ४ ॥ (यथा, ऋग्वेदे ५ । ८५ । ३ ॥
"नीचीनवारं वरुणः कबन्धं प्रससर्ज रोदसी अन्तरीक्षम्' ॥)

कबन्धः पुं, (कं सुखं बध्यते रुध्यतेऽस्मात् । क + बन्ध + घञ् ।) राहुः । रक्षोविशेषः । (यथा, रघुः १२ । ५७ ।
"वधनिर्द्धूतशापस्य कबन्धस्योपदेशतः ।
मुमूर्च्छ सख्यं रामस्य समानव्यसने हरौ" ॥
अस्य विवरणादिकमुच्यते । पुरा किल दनुनामा कश्चिद्दानवः उग्रेण तपसा पितामहं सन्तोष्य दीर्घमायुः प्राप्तवान् । प्राप्तदीर्घायुरतिगर्व्वः सुरराजेन सह योद्धुं सुरपुरमगच्छत् । शक्रस्तु रणभूमिगतः प्रमुक्तेन वज्रेणास्य सक्थिनी शिरश्च शरीरमध्ये प्रावेशयत् । न त्वसौ पितामहवरप्रभावतया प्राणान् मुमोच । अथ स एव विकृतविग्रहोऽनाहारादितया क्लिश्यमानो बहुधा याचमानः सुरपतिं प्रसादयामास । इन्द्रस्तु प्रणतो योजनमायतौ बाहू तीक्ष्णदशनं वदनमस्मै वक्षसि प्रादात् । तदा प्रभृत्येवासौ वने विचरन् सुदीर्घबाहुभ्यां वनजादीन् प्राणिनो गृहीत्वा भक्षयन् विचचार । अथ गच्छति काले दशरथात्मजो रामः ससीतालक्ष्मणः पितृसत्यपालनार्थं वने भ्रमन् अमुना कबन्धेन समागतः । प्रभूतबलशालिनानेन गृहीतोऽपि रामः खड्गेनैनं व्यापादयामास । अथ रामहस्तघातात् प्राप्तशापमोचनसमयोऽयं कबन्धः विकृतरूपं विहाय दिव्यमूर्त्तिधरः स्वर्लोकं ययौ । इति वाल्मीकीयरामायणमतम् । महाभारतमते तु अयं विश्वावसुनामा गन्धर्व्व आसीत् ब्राह्मणशापेन राक्षसयोनिं प्राप्तवान् । यदुक्तं तत्रैव ३ । २७८ । ४२ ।
"विश्वावसुर्नाम गन्धर्व्वो विश्वावसुरहं नृप ! ।
प्राप्तो ब्राह्मणशापेन योनिं राक्षससेविताम्" ॥)
उदरम् । इति मेदिनी ॥ (केन वायुना बध्यते सम्बध्यते वा । धूमकेतुः । प्रबन्धवायनोपचीयमानत्वात् तथात्वमस्य च लोकसम्बन्धकत्वप्रसिद्धम् ॥)

कबन्ध, पुं, क्ली, (केन प्राणवायुना पुनर्बध्यते सम्बध्यते मस्तकहीनस्यापि दैवेन प्राणावेशात् जीवतो नरस्येव क्रियाकारित्वशक्तित्वात्तथात्वम् । क + बन्ध + घञ् ।) क्रियायुक्तापमूर्द्धकलेवरम् । इत्यमरः २ । ८ । ११८ ॥ यथा, मार्कण्डेये ८२ । ६२ ।
"कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः" ॥
अपि च । "नागानामयुतं तुरङ्गनियुतं सार्द्धं रथानां शतं पत्तीनां दशकोटयो निपतिता एकः कबन्धो रणे । तादृक्कोटिकबन्धनर्त्तनविधौ खेलत्यतः खे शिरस्तेषां कोटिनिपातने रघुपतेः कोदण्डघण्टारव" ॥ इति प्राचीनाः ॥

कबित्थः, पुं (कपित्थशब्दस्य । "समिस्र" इति कः । पृषोदरादित्वात् साधुः ।) कपित्थवृक्षः । इत्यमरटीका ॥ कवित्थ । इत्यमरमालायां पाठः ॥

कबिल, पुं, (कद्वर्णे + इलच् ।) कपिलवर्णः । इति भरतो द्विरूपकोषश्च ॥

कम, उ ङ इ स्पृहि । इति कविकल्पद्रुमः ॥ (चुरा-आत्म-सक-सेट् ।) उ कमित्वा कान्त्वा । ङ इ कामयते । अन्यैर्भ्वादौ पठ्यमानस्याप्यस्य णिङ्स्य कम कान्तौ इत्यादिना विहितस्य णिङो ज्ञापनार्थं तेन इरे णिङोऽप्राप्तिपक्षे अचकमत । चकमे कमिता इत्यादि सिद्धम् । इति दुर्गादासः ॥

कम, उ ङ कान्तौ । इति मुग्धबोधव्याकरणम् । (भ्वा आत्म अक-सेट् ।)

कम्, व्य (कमु कान्तौ णिङभावे क्विप् ।) जलम् । शिरः । सुखम् । मङ्गलम् । पादपूरणम् । इति शब्दरत्नावली ॥ (यथा ऋग्वेदे । १ । १२९ । ११ ।
"सुशकाशा माहस्रवेव योषा विलम्ब्य क्षयुषे वृषे कम्" । "अत्र कमिति पादपूरणे अथवा कमिति सुखवचनं सुखं यथा भवतीति" भाष्यम् ॥)

कमठ, क्ली, (कम + "कमेरठ" । उणां १ । १ २ । इति + अठ ।) भाण्डभेदः । तत्तु मुनीनां जलपात्रम् । इति मेदिनी ॥

कमठ, पुं, (के जले मठति वसतीति । क + मठ वासे + पचाद्यच् ।) कच्छपः । इत्यमरः । १ । १० । २१ ॥ (यथा महानाटके ।
"कमठपृष्ठकठोरमिदं धनु
र्मधुरमूर्त्तिरसौ रघुनन्दनः" ॥
मर्कटात्कामठं मांसं रामठेन समन्वितम् ।
यदि सर्पिःसमायुक्तं का सुधा वसुधातले" ॥
इत्युद्भटः ॥ ० ॥ गुणादयोऽस्य कच्छपशब्दे ज्ञातव्याः ॥ भगवद्विष्णोर्द्वितीयावतारः । यथा हठयोगदीपिकायाम् । १ । १० ।
"अशेषतापतप्तानां समाश्रयमठो हठः ।
अशेषयोगयुक्तानामाधारकमठो हठः" ॥)
वंशः । इति शब्दरत्नावली ॥ दैत्यविशेषः । मुनिभाजनम् । इति हेमचन्द्रः ॥ शल्लकी इति भरतः ॥ (नृपविशेषः । यथा महाभारते । २ । ४ । २२ ।
"कृतसेनः क्षितिपतिः क्षेमकश्चापराजितः ।
काम्बोजराजः कमठः कम्पनश्च महाबलः" ॥)

कमठी, स्त्री (कमठ + पुंयोगादिति जातेरिति वा ङीष् प्रत्ययः ।) कच्छपी । इत्यमरः । १ । १ । २४ ॥ (यथा शान्तिशतके ४ । १३ ।
"इदानीमश्नाक जठरकमठीपृष्ठकठिना
मनोहृन्निःशल्यं किं व्यसनविमुखैव स्वपयसि' ॥)

कमण्डलुः, पुं, क्ली, (कस्य प्रजापतेः जलस्य वा मण्डः सारः तं लाति आदत्ते । ला + मितद्र्वादित्वात् डुः ।) सन्न्यासिनां मृत्तिकाकाष्ठादिमयपात्रम् । तत्पर्य्यायः । कुण्डी २ । इत्यमरः ७ । २ । ४६ ॥ करकः ३ । (यथा मनुः २ । ६४ ।
"मेखलामजिनं दण्डमुपवीतं कमण्डलुम् ।
अप्सु प्रास्य विनष्टानि गृह्णीतान्यानि मन्त्रवित्" ॥)
प्लक्षवृक्षः । इति मेदिनी ॥

कमण्डलुतरु, पुं, (कमण्डल्वाकारफलः ।) प्लक्षवृक्षः । इति रत्नमाला ॥

कमन, त्रि, (कम + णिङभावे युच् । अनुदात्तेतश्चेति कमेर्युच् वा ।) कामुकम् । अभिरूपम् । इति मेदिनी ॥ (यथा भागवते १ । ९ । ३३ ।
"त्रिभुवनकमनं तमालवर्णं
रविकरगौरवराम्बरं दधाने" ॥)

कमन, पुं, (काम्यतेऽनेन । कमे + करणे + युच् ।) कामः । अशोकवृक्षः । इति मेदिनी । ब्रह्मा ॥ इति हेमचन्द्रः ॥

कमनच्छदः, पुं, (कमनं कमनीयं छदं पक्षो यस्य ।) कङ्कपक्षी । इति हेमचन्द्रः ॥

कमनीय, त्रि, (काम्यते यत् कमेः कर्म्मणि अनीयर् ।) कामनायोग्यम् । तत्पर्य्यायः । चारु २ हारि ३ रुचिरम् ४ मनोहरम् ५ वल्गु ६ कान्तम् ७ अभिरामम् ८ बन्धुरम् ९ वामम् १० रुच्यम् ११ सुषमम् १२ शोभनम् १३ मञ्जु १४ मञ्जुलम् १५ मनोरमम् १६ साधु १७ रम्यम् १८ मनोज्ञम् १९ पेशलम् २० हृद्यम् २१ सुन्दरम् २२ काम्यम् २३ कम्रम् २४ सौम्यम् २५ मधुरम् २६ प्रियम् २७ । इति हेमचन्द्रः ॥ (यथा, कुमारे १ । ३७ ।
"आरोपितं यद्गिरिशेन पश्चा
दनन्यनारीकमनीयमङ्कम्" ॥)

कमन्ध, क्ली, (कम् शिरः अन्धं शून्यं यस्य ।) कबन्धम् । (कम कान्तिं जीवनं वा दधाति विदधातीति । कम + धा + ड । पृषोदरादित्वात् साधुः ।) जलम् । इत्यमरटीकायां रायमुकुटः ॥

कमरः, त्रि, (कामयते इति । कम् + "अर्त्तिकमिभ्रमीति" उणां ३ । १३२ । अरन्श्चित् ।) कामी । इत्युणादिकोषः ॥

कमल, क्ली, (कमे णिङ् भावे वृषादित्वात् कलच् । कम् जलं अलति अलङ्करोति वा । अल् + अच् । अन्तर्णिजन्तो वा ।) जलजपुष्पविशेषः । तत्पर्य्यायः । पद्मम् २ पाथोजम् ३ नलम् ४ नलिनम् ५ अम्भोजम् ६ अम्बुजन्म ७ अम्बुजम् ८ श्रीः ९ अम्बुरुहम् १० अम्बुपद्मम् ११ सुजलम् १२ अम्भोरुहम् १३ सारसम् १४ पङ्कजम् १५ सरसीरुहम् १६ कुटपम् १७ पाथोरुहम् १८ पुष्करम् १९ वार्जम् २० तामरसम् २१ कुशेशयम् २२ कञ्जम् २३ कजम् २४ अरविन्दम् २५ शतपत्रम् २६ बिसकुसुमम् २७ सहस्रपत्रम् २८ महोत्पलम् २९ वारिरुहम् ३० सरसिजम् ३१ सलिलजम् ३२ पङ्केरुहम् ३३ राजीवम् ३४ । (यथा रघुः । ३ । ३६ ।
"अगच्छदंशेन गुणाभिलाषिणी
नवावतारं कमलादिवोत्पलम्' ॥)
अस्य गुणाः शीतलत्वम् । स्वादुत्वम् । रक्तपित्तश्रमार्त्तिनाशित्वम् । सुगन्धित्वम् । भ्रान्तिसन्तापशान्तिपरमहर्षकारित्वञ्च । इति राजनिर्घण्टः ॥
(तथाच भावप्रकाशः ।
'कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित् ।
तृष्णादाहास्रविस्फोटविषवीसर्पनाशनम् ॥
विशेषतः सितं पद्मं पुण्डरीकमिति स्मृतम् ।
रक्तं कोकनदं ज्ञेयं नीलमिन्दीवरं स्मृतम् ॥
धवलं कमलं शीतं मधुरं कफपित्तजित् ।
तस्मादल्पगुणं किञ्चिदन्यदक्तोत्पलादिकम्" ॥)

जलम् । ताम्रम् । क्लोम । औषधम् । इति मेदिनी । सारसपक्षी । इत्यमरः ।२।५।४० ॥

कमठ, पुं, (कमेः + अठन् । यद्वा के वायुः तस्य अमः गतिः तं लाति आदत्ते । क + अम + ला + क ।) मृगविशेषः । इति मेदिनी । भुवनभेदः । यथा, सङ्गीतदामोदरः ॥
"उक्तौ मनयताचेन लघमध्ये स्फुरेद्ध्रुवः ।
समदमात्त्वरैर्युक्तः कमलोऽयं भयानकः" ॥

कमला, स्त्री, (काम्यतेऽसौ कमेः वृषादित्वात् कलच् कमलं अस्त्यस्याः इति वा । अर्श + आद्यच् । टाप् च ।) लक्ष्मीः । ("कमला श्रीर्हरिप्रिया" इत्यमरः । १ । १ । २८ ।) वरस्त्री । इति मेदिनी । सनामख्यातनिम्बुकः । कमलालेबु इति भाषा । यथा,—
"रम्भाफलं तिन्तिडीकं कमला नागरङ्गकम् ।
पलाण्डोलानि भोज्यानि रम्भोऽम्लानि विवर्जयेत्" ॥
इति तन्त्रसारे पुरश्चरणप्रकरणम् ॥
(छन्दोविशेषः । यथा, छन्दोमञ्जर्याम् ।
'द्विगुणगणसहितः सगण इह हि विहितः ।
यदि पतति तिविगमात् तिष्ठति भवति कमलेति" ॥
नर्तकीविशेषः । यथा राजतरङ्गिण्याम् ४ । ४२४ ।
"नर्तकी कमला नाम कान्तिमत्स्तदर्शसम् ।
असामान्याकृतेः एम् सा ददर्श सविस्मया" ॥
पुरीविशेषः । यथा तत्रैव ४ । ४८३ ।
"राजा सञ्जयपुरस्थ चक्रे विपुलकेशवम् ।
कमला सा समासाधि कमलाख्यं पुरं व्यधात्" ।
गङ्गा । यथा काशीखण्डे २९ । ४४ ।
"कमला कल्पलतिका कामी कलुषवैरिणी ' ।)

कमलासन, पुं, (कमलमासनमस्य । विष्णोर्नाभि पद्मजातत्वात् तथात्वम् ।) ब्रह्मा । इत्यमरः । १ । १ । १७ । (यथा भागवते ५।२० । ३० । 'यस्मिन् स्वतुषारः स्वननदिगस्तामलककमलायुतायुत भगवत कमलासनस्याध्यासन परिकल्पितम्" ॥ स्त्री, कमलायां लक्ष्म्याः आसनं लोपश्च दानमित्यादि । यथा, शम्भुविरचिते राजेन्द्रकर्णपूरे ५६ ।
"सत्यर्थं कमलासने विघटितं गौरिश्विमि मांकाला' ॥
"कमलायाः लक्ष्म्याः आसने लोपक्षे याचकेभ्यो दाने इत्यर्थः । अपच कमलरूपे विष्टरे ब्रह्मणः पद्म समस्तात । इति तट्टीका ॥)

कमलिनी, स्त्री, (कमलानि सन्त्यत्र । पुष्करादिभ्यो देशे इति इनिः ।) पद्मिनी । (यथा रघुः ९।३० ।
"अभियदु सरसो मधुसम्भृतां कमलिनीमलि नीरपतन्त्रिव") पद्माकरः । इति शब्दरत्नावली । (गङ्गा यथा काशीखण्डे २९ । ४० ।
' कुमुद्वती कमलिनी कान्तिः कल्पितदायिनी" ।)

कमलोत्तर, क्ली, (कमलमिव उत्तरं । यद्वा कमला दुत्तरं उत्कृष्टमिव ।) कुसुम्भपुष्पम् । इत्यमरः । २ । ९ । १०६ ॥

कमा स्त्री, (कम मिथ्याभावे बाहुलकात् भिदादिभावे अ । टाप् ।) शोभा । इति राजनिघण्टः ॥

कमिता [तृ] त्रि, (कम + णिङभावे तृच् ।) कामुकः । इत्यमरः । ३ । १ । २३ ॥

कम्प, पुं, (कपि चलने + भावे अच् ।) गात्रादिचलनम् । तत्पर्यायः । वेपथुः २ । इत्यमरः १ । ७ । ३८ । वेपनम् ३ वेप ४ कम्पनम् ५ । इति राजनिघण्टः । (यथा विक्रमोर्वश्याम् । "मुखतिमतारदत्या नयनम्य कुसुमकोमलं हृदयम्" । "न कम्पो वायुना विना" । इति वैद्यकम् ।)

कम्पन, त्रि, (कपि चलनशब्दार्थादिति युच् ।) कम्पयुक्तः । कांपने इति भाषा । तत्पर्यायः । चलनम् २ कम्पम् ३ चलम् ४ लोलम् ५ चलाचलम् ६ चञ्चलम् ७ तरलम् ८ पारिप्लवम् ९ परिप्लवम् १० । इत्यमरः । ३ । १ । ७४ ॥ चपलम् ११ चटुलम् १२ । इति तट्टीका ॥
(यथा महाभारते १३ । १४ । ७२ ।
"हिरण्यकशिपुर्योऽभूद्दानवो मेरुकम्पन" ॥
यथा सिद्धान्तकौमुद्याम् । 'कम्पा कम्पना शाखा' । पा ३।२ । १५३। कपि + भावे + ल्युट् ।) कम्पे क्ली । इति मेदिनी ।

कम्पन , पुं, (कम्पयति वेपथयुक्तं करोति शिशिरे ऽतेति यावत् कपि + णिच् + युच् । ल्युर्वा ।) शिशिरर्तुः । इति राजनिघण्टः ।
(नृपविशेषः । यथा महाभारते २ । ४ । २२ ।
"काम्बोजराजः कमठः कम्पनश्च महाबल ।
सततं कम्पयामास यवनानेक एव यः" ॥)

कम्पलक्ष्मा, [न्] पुं (कम्पः चलनं लक्ष्म लक्षणं यस्य ।) वायुः । इति शब्दरत्नावली ।

कम्पाक, पुं, (कम्पया चलनेन कायति प्रकाशते इति । कम्प + कै + कः ।) वायुः । इति हेमचन्द्रः ।

कम्पित, क्ली, (कपि + भावे + क्तः ।) चलनम् । तत्पर्यायः । कम्पनम् २ कम्पः ३ वेपनम् ४ वेपथुः ५ । इति शब्दरत्नावली । (कपि + कर्तरि + क्तः ।) कम्पयुक्ते त्रि । (यथा रघुः । २ । १३ ।
"एतत्समारेभिरिदिग्भिरभोगा मनोज्ञ्याज्ञ्यामितपुष्पगन्धी" ।)

कम्पिल्ल, पुं (कम्प + इलच् ।) रोचनी । कमला गुंडि इति भाषा । तस्य रूपान्तराणि काम्पिल्लः । काम्पिल्लः । कम्पीलः । कम्पिल्लः । इत्यमरटीकायां मुकुटादयः ।

कम्पिल्लक, पुं (कम्पिल्ल + स्वार्थे + कन् ।) वृक्षविशेषः । कमिला इति देशान्तरभाषा । तत्पर्यायः । रक्ताङ्गः २ रेची ३ रेचनकः ४ रञ्जकः ५ लोहिताङ्गः ६ काम्पिल्लः ७ रक्तचूर्णकः ८ । तस्य गुणाः । विरेचकत्वम् । कटुत्वम् । उष्णत्वम् । श्लेष्मकासजन्तुप्रमेहनाशित्वम् । जयावह । इति राजनिघण्टः । (अस्य तैलगुणा । गुल्मोऽनोमाधदन्ती स्वरश्लेष्मगणमता श्रीमिकाकम्पिल्लश्च सिद्धिनी बोधाम्भिकाकटुककाथया अधोभागदोषहराः क्रिमिकफकुष्ठानिलघ्ना दूष्यविषानिलघ्नाश्च । इति सुश्रुतः ।)

कम्प्र, त्रि (कपि + नमि कम्पीति र ।) कम्पयुक्तः । कम्पान्वितः । इत्यमरः । ३ । १ । ७४ ।
(यथा नैषधे । २ । १०२ ।
'सुताः कमाप्य विराय पुष्पैः

विंघाय कम्प्राणि मुखानि कं प्रति' ।)

कम्ब, गतौ । इति कविकल्पद्रुमः । (भ्वा-पर-सक०-सेट् ।) कम्बति । इति दुर्गादासः ।

कम्बर, पुं, (कम्ब + अरन् ।) चित्रवर्णः । कर्म्बुर वर्णः । तद्वति त्रि । इति शब्दरत्नावली ।

कम्बल क्ली, (कम्यते । इति कमु कान्तौ + वृषादित्वात् कलच् बा ।) जलम् । इति शब्दरत्नावली ।

कम्बल, पुं, (क कुत्सितं शिरो वा क सलिलं वा बलते वल संवरणे सञ्चारणे च अच् । यद्वा कम्ब + गतौ इति धातोः वृषादित्वात् कलच् ।) सनामख्यातमेषादिलोमरचितवस्त्रविशेषादि । तत्पर्यायः । रल्लकः २ । इत्यमरः । २ । ६ । ११६ ॥ पेषकः ३ लोमयोनिः ४ रेणुकः ५ । इति शब्दरत्नावली । प्रावारः ६ । इति जटाधरः ।
(यथा महाभारते ३ । ३ । ५१ ।
"न तथा सुखयन्त्यपि प्रावारा न कम्बलाः ।
शीतवातार्दितं लोके यथा तव मरीचयः" ।)
नागराजः । सास्ना । प्रावारः । कृमिः । इत्यमरः । ३ । ३ । १९३ । मेदिनी च । उत्तरासङ्गः । इति मेदिनी । मृगविशेषः । इति जटाधरः ।
(नागभेदौ । अनयोरेकः अधस्तात् पाताले वासुकिप्रमुखो निवसति अपरस्तु वरुणदेवसभायां । यथाक्रमं उदाहरणे द्रष्टव्ये ।
यथा, भागवते ५ । २४ । ३१ ।
"ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्रशङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति ' ।
यथा महाभारते । २ । ९ । ९ ।
"कम्बलाश्वतरौ नागौ नागराजश्च कालकः" ।
कम्बलाद्यधिष्ठितप्रयागान्तर्गततीर्थविशेषः ।
यथा, महाभारते ।३। तीर्थयात्रापर्व्वणि ८५।७५।
"प्रयाग सप्रतिष्ठानं कम्बलाश्वतरौ तथा ।
तीर्थं भोगवती चैव वेदिरेषा प्रजापतेः ' ।

कम्बलिवाह्यक क्ली, (कम्बलः शाखा अस्ति एषाम् इति इनिः । कम्बलिभिर्बैर्वाह्यते । वह + कर्म्मणि ण्यत् स्वार्थे सञ्ज्ञायां वा कन् ।) वृषवहनीय शकटम् । तत्पर्यायः । गन्त्री १ । इत्यमरः । २ । ८ । ५२ ॥ गान्त्री ३ । इति तट्टीका ॥

कम्बि स्त्री, (कमु + बाहुलकात् + विन् । यद्वा कम्बति प्राप्नोति आनाति वा अन्नादि अनया । कम्ब + करणे इन् ।) दर्व्वि । इत्यमरः । २।९।३४। हाता इति भाषा । इति मेदिनी । वंशाङ्कः । बाँसेर पाब् इति भाषा ।

कम्बु, पु क्ली, (कमु + मृगय्वादयश्चेति निपातनात् साधु । कमु + उन् बुक्चेति वा ।) शङ्खः । इत्यमरः ।१।१० ।२३। (यथा भागवते ।४।७। २० ।
' कम्बुमण्डलचारुपाणिदाभिरामैः
र्धाघ्रिरञ्जरमुखैरिव करिणाः' ।)

कम्बु, पुं, (कम्ब गतौ इति मृगय्वादित्वात् उन् बुगागमो वा । निपातनात् वा साधुः ।) वलयम् ।

(यथा महाभारते ३ । १२२ । ११ ।
"प्रत दासीसहस्राणि कौन्तेयस्य महात्मनः ।
कम्बुकेयूरधारिण्यो निष्ककण्ठ्यः स्वलङ्कृता" ॥)
शम्बूकः । हस्ती । इत्यमरः ।३।३।१९३। मेदिनी च ॥
कर्बूरवर्णः । ग्रीवा । वलयम् । इति हेमचन्द्रः ।
शाँखा हाड इति भाषा ॥

कम्बुका, स्त्री, (कम्बुरिव कायति शोभते प्रकाशते वा । कै + कः टाप् च ।) अश्वगन्धावृक्षः । इति रत्नमाला । (गुणादयोऽस्या अश्वगन्धाशब्दे ज्ञेयाः ॥)

कम्बुकाष्ठा, स्त्री, (कम्बु चित्रवर्णं काष्ठं यस्याः ।) अश्वगन्धावृक्षः । इति राजनिर्घण्टः ॥

कम्बुग्रीवा स्त्री, (कम्बुवत् रेखात्रयशोभिता ग्रीवा ।) कम्बाकृतिरेखात्रययुक्तग्रीवा । इत्यमरः ।२।६।८८॥ (कम्बुः शङ्खस्तद्वत् रेखात्रययुक्ता ग्रीवा यस्येति विग्रहे त्रिलिङ्ग । यथा महाभारते । १ । १५१ । १८ ।
"कम्बुग्रीव पुष्कराक्षो भर्त्ता युक्तो भवेन्मम" ॥)

कम्बुपुष्पी, स्त्री, (कम्बु शङ्ख तद्वत् शुक्लं पुष्पं यस्याः ।) शङ्खपुष्पीवृक्षः । इति राजनिर्घण्टः । (शङ्खपुष्पीशब्देऽस्या गुणा ज्ञातव्याः ॥)

कम्बुमालिनी, स्त्री, (कम्बुतुल्यपुष्पाणां माला समूहः अस्ति अस्याः ।) शङ्खपुष्पी । इति राजनिर्घण्टः ॥

कम्बोज, पुं, (कम्ब + ओज ।) शङ्खविशेषः । देशभेदः । (यथा तन्त्रशास्त्रम् ।
"पञ्चनदं समारभ्य म्लेच्छाद्दक्षिणपूर्वतः ।
कम्बोजदेशो देवेशि ! वाजिराशिपरायणः" ॥)
हस्तिप्रभेदः । इति मेदिनी । (तद्देशवासिनि त्रि ॥)

कम्बाताली, [न्] पुं, (कम्बु शङ्ख स इव आताली । शङ्खतुल्यशुक्लपूर्णकाद्रत्वात्तथात्वम् ।) शङ्खचिल्लः । इति महाभारतम् ॥

कम्भारी, स्त्री, (कं जलं बिभर्त्ति धारयतीति । डु भृ धारणपोषणयोः + कर्म्मण्यण् + ङीप् गौरादित्वात् ङीष् वा ।) गम्भारीवृक्षः । इति शब्दमाला राजनिर्घण्टौ । (गम्भारीशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

कम्भु स्त्री, (कं जलं तत्तुल्य शैत्यं बिभर्त्ति । भृ + डु ।) उशीरम् । इति राजनिर्घण्टः ॥

कम्रः, त्रि, (कामयतीति । कम् + नमिकम्पीति रः । ३ । २ । १६७ ।) कामुकः । मैथुनेच्छाविशिष्टः । इत्यमरः । ३ । १ । २४ ॥
(स्त्री, गङ्गा । यथा काशीखण्डे २९ । ४४ ।
'कमनीयजला कम्रा कपर्द्दिसुकपर्द्दगा' ॥
शन्तनु प्रतीप शान्तनुं कामितवती कम्रा कामुका ॥ इति तट्टीका । काम्यतेऽसौ इति ।)
कमनीयम् । यथा,—
'लोला दृष्टिनितम्बतो विचलते सम्भूलताविभ्रमा मामुद्देन विवर्त्तिता प्रतिमता मध्येन कम्रस्तनी" ।
इति शाकुन्तले १ अङ्के ।

कयस्था, स्त्री, (कः वायुः स इव वेगेन याति अथवा कं जलं तस्य स्रोत इव याति । क + या + ड । तत्र तिष्ठति । स्था + कः टाप् च ।) वयस्था । इत्यमरटीकायां स्वामी । काकोली इति ख्याता ॥

करः, पुं (कं सुखं राति ददातीति । रा + कः ।) राजग्राह्यम् । खाजाना इति पारस्यभाषा । तत्पर्य्यायः । भागधेयः २ बलिः ३ । इत्यमरः । २ । ८ । २७ ॥ कारः ४ । इति तट्टीका ॥ प्रत्यायः ५ । इति मेदिनी ॥ * ॥
अथ राज्ञां करग्रहणप्रकारः । क्रयविक्रयादिना लाभादीन् समीक्ष्य राज्ञा करो ग्रहीतव्यः ।
यथा, मनुः । ७ । १२७ १२९ ।
"क्रयविक्रयमध्वानं भक्तञ्च सपरिव्ययम् ।
योगक्षेमञ्च संप्रेक्ष्य वणिजो दापयेत् करान् ॥
यथा फलेन युज्येत राजा कर्त्ता च कर्म्मणां ।
तथावेक्ष्य नृपो राष्ट्रे कल्पयेत् सततं करान्" ॥ * ॥
राज्ञा राज्यात् वार्षिक करोऽल्पाल्प हत्वा ग्रहीतव्यः । यथा,—
"यथाल्पाल्पमदन्त्याद्यं वार्य्योकोवत्सषट्पदाः ।
तथाल्पाल्पो ग्रहीतव्यो राष्ट्राद्राज्ञाब्दिकः करः" ॥
मूल्यादधिकयोः पशुहिरण्ययोः पञ्चाशद्भागरूपः करो ग्राह्यः । धान्यानां भूम्युत्कर्षापेक्षया कर्षणक्लेशलाघवगौरवापेक्षया च षष्ठोऽष्टमो द्वादशो वा भागो राज्ञा ग्रहीतव्यः ।
यथा,—
"पञ्चाशद्भाग आदेयो राज्ञा पशुहिरण्ययोः ।
धान्यानामष्टमो भागः षष्ठो द्वादश एव वा" ॥ * ॥
द्रुमांसमधुसर्पिरादीनां
षड्भागो लाभात् ग्रहणीयः । यथा,—
"आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम् ।
गन्धौषधिरसानाञ्च पुष्पमूलफलस्य च ॥
पत्रशाकतृणानाञ्च चर्म्मणां वैदलस्य च ।
मृण्मयानाञ्च भाण्डानां सर्व्वस्याश्ममयस्य च" ॥ * ॥
म्रियमाणोऽपि राजा
श्रोत्रियब्राह्मणात् करं न गृह्णीयात् । यथा,—
"म्रियमाणोऽप्याददीत न राजा श्रोत्रियात् करम् ।
न च क्षुधास्य संसीदेच्छ्रोत्रियो विषये वसन्" ॥ * ॥
(कीर्य्यते विक्षिप्यतेऽसौ कर्म्मणि + अप् । हस्तकरिशुण्डयोस्तु करणेऽपि अप् ॥) वर्षोपलः । किरणः । (यथा रामायणे ६ । ११ । ४४ ।
'तीक्ष्णः पटुर्दिनकरः करैस्तापयते जगत्" ॥)
हस्तः । (अमरः । २ । ६ । १९२ ।) हस्तिशुण्डः । इति मेदिनी । (यथा, महाभारते ३ । ११ । २८ ।
"एवन्तु ब्रुवतस्तस्य मैत्रेयस्य विशाम्पते ।
ऊरुं गजकराकारं करेणाभिजघान सः" ॥)
कर्म्मोपपदे कर्त्तृवाचकः । यथा । सुखकर इत्यादि ॥ (यथा, रामायणे ६ । ११ । ४४ ।
"तीक्ष्णः पटुर्दिनकरः करैस्तापयते जगत् ।
प्रतिलोमश्च ते वायुस्त्वत्पराभवलक्षणम्" ॥)

करक, स्त्री पुं, (किरति विक्षिपति जलं अस्मात् करोति जलमत्र वा । कृ + वा ड "कृञादिभ्यः संज्ञायां वुन्" । उणा ५ । ३५ । इति वुन् ।) करङ्कः । कमण्डलुः । इति मेदिनी ॥
(यथा, मनुः । ४ । ३६ ।
"उपानहौ च वासश्च धृतमन्यैर्न धारयेत् ।
उपवीतमलङ्कारं स्रजं करकमेव च" ॥)

करकः, पुं, (करोति वाय्वादिजनितदोषाभावं कृणोति भक्षणादिभिः वायुपित्तादिदोषं नाशयति वा कृञ् हिंसायां "कृञादिभ्यः संज्ञायां वुन्" । उणा ५ । ३५ । इति वुन् ।) दाड़िमवृक्षः । रक्तकरः । पक्षिविशेषः । चन्द्राकरकवृक्षः । इति हेमचन्द्रः । पलाशवृक्षः । इति हारावली ॥ कोविदारवृक्षः । बकुलवृक्षः । करीरवृक्षः । नारिकेलास्थि । इति राजनिर्घण्टः । माला इति भाषा । (यथा, रामायणे ५ । १४ । ४८ ।
"हिरण्मयैश्च करकैर्मणिभिः स्फाटिकैरपि" ॥)

करकच्छपिका, स्त्री, (कच्छपस्येवाकृतिरस्त्यस्या ठन् । करे स्थिता कच्छपिका कच्छपाकारमुद्रा ।) कूर्म्ममुद्रा । यथा,—कालिकापुराणे ५६ अध्यायः ।
'करकच्छपिकां कुर्य्यात् कूर्म्ममन्त्रेण साधकः ।
तत्र सङ्कल्पपुष्पेण पूजयेदात्मनो वपुः" ॥

करकण्टकः, पुं, (करे हस्ते कण्टक इव ।) नखः । इति त्रिकाण्डशेषः ॥

करका, स्त्री पुं (कृणोति हिनस्ति शस्यादिफलम् । "कृञादिभ्यो वुन्" । वुनन्तात् टापि क्षिपकादित्वात् प्रत्ययस्थादिति इत्वं न किरति क्षिपति जलं वा ।) मेघभवशिला । शिल इति भाषा । तत्पर्य्यायः । वर्षोपलः २ । इत्यमरः । १ । ३ । १२ ॥ मेघोपलः ३ । इति मेदिनी ॥ वीजोदकम् ४ घनकफः ५ मेघास्थि ६ वार्धरः ७ करः ८ करकः ९ । इति शब्दरत्नावली ॥ धाराङ्कुरः १० धाराङ्कुरः ११ । इति जटाधरः ॥ मेदिन्यां धाराङ्कुर इति पाठः ॥ (यथा मेघदूते ५६ ।
"तान्कुर्व्वीथास्तुमुलकरकावृष्टिहासावकीर्णान्" ॥)

करकाम्भाः, [स्] पुं, (करकावत् शीतलं अम्भो जलं यत्र ।) नारिकेलवृक्षः । इति त्रिकाण्डशेषः ॥

करग्रह, पुं, (करः इयं मम भार्य्या इति प्रतिज्ञया गृह्यतेऽत्र वरेणेति यावत् । ग्रह + अधिकरणे अप् ।) विवाहः । इति त्रिकाण्डशेषः ॥ (यथा, आर्य्यासप्तशती । ६ ३ ।
"सा गुणमयी स्वभावस्वच्छा सुतनुः करग्रहायत्ता ।
जनिता शङ्खमणविदा भवता काश्मीरमालेव" ॥)
करग्रहणञ्च ॥ (यथा, आर्य्यासप्तशती । ६२९ ।
'सकरग्रह सदयित
सास्वेव सगर्वमुष्टिं सजिगीषम्' ॥)

करग्रहारम्भ, पुं, (करग्रहस्य करादानस्य आरम्भः प्रजाभ्यः ।) राज्ञां प्रजाभ्यो नववर्षीयकरस्य प्रथमादानम् । तद्दिन पुण्याह इति ख्यातम् । तस्यापरभाषा पुण्या । तस्य शुभदिननिरूपणम् यथा,—
"तीक्ष्णोग्रवर्ज्जीतरभेषु चापे
सौर्य्योदये भानुदिने शुभाहे ।
कुर्य्याद्गृहाणि समीहितानि
करग्रहारम्भमपि प्रजाभ्यः" ॥
इति ज्योतिषम् ॥ अस्यार्थः । अश्वेषामार्द्राज्येष्ठामूलापूर्व्वफल्गुनीपूर्व्वाषाढ़ापूर्व्वभाद्रपदभरणीवर्ज्जितान्यनक्षत्रेषु । मिथुनसिंहकन्यातुलाधनुःकुम्भमीनधनुःषु । रविसोमबुधबृहस्पतिशुक्रवारेषु करग्रहारम्भः कर्त्तव्यः ॥

करग्रहः, पुं, (कराभ्यां गृह्यतेऽसौ । कर + ग्रह +

कर्म्मणि ल्युट् ।) दधिमन्थनदण्डः । तत्पर्य्यायः । वैशाखः २ दधिचारः ३ मन्थाटः ४ । इति हारावली ॥ छत्रदण्डे स्त्री ॥

करघर्षी, [न्] पुं, (कराभ्यां करयोर्वा घर्षं घर्षणं अस्ति अस्मिन् वा । करघर्ष + इनि ।) मन्था मदण्डः । इति शब्दमाला ॥

करञ्जः, पुं, (कस्य रञ्ज इव ।) मस्तकम् । (कीर्य्यते नखमत्र इति करः । कृ + अप् । अवहीनः अङ्गे गर्भो यस्य शकन्ध्वादित्वात् अलोपे साधु ।) आम्रस्य नारिकेलफलास्थि । इति मेदिनी । नारिकेलेर खोल इति भाषा ॥ शरीरास्थि । इति हेमचन्द्रः ॥ इक्षुभेदः । इति राजनिघण्टः ॥ (पात्रविशेषः । यथा, "ताम्बूलकरङ्कवाहिनी" इति कादम्बरी ॥)

करङ्कशालिः, पुं, (करङ्क इति नाम्ना शालते शोभते इति । करङ्क + शाल + इन् ।) करङ्कनामेक्षुः । इति राजनिर्घण्टः ॥

करच्छदः, पुं, (करवत् आवरणकारी छदो यस्य ।) शाखोटवृक्षः । शेओड़ा इति भाषा । इति भावप्रकाशः । (अस्य गुणादिकं शाखोटशब्दे द्रष्टव्यम् ॥)

करच्छदा, स्त्री, (कर इव किरण इव लोहितवर्णः छदः पत्रं यस्याः । कर इव आवरकश्छदो वा यस्याः ।) सिन्दूरपुष्पीवृक्षः । इति राजनिर्घण्टः ॥

करज स्त्री, (करे जायते इति । कर + जन् + ड । व्याघ्रनखवदस्याकारोत्पादत्वम् ।) व्याघ्रनखनाम गन्धद्रव्यम् । इत्यमरः ।२।४।१२९। (नखीशब्देऽस्य गुणा वक्तव्याः ॥)

करजः, पुं, (कं सुखं जलं वा रञ्जयतीति । कर्म्मण्यण् ।) करञ्जवृक्षः । ("करञ्जकः स्यात् करजः चक्रकी चकाह्वयः" । इति शब्दरत्नावली । करे जायते इति । जन + ड ।) नखः । इति मेदिनी ॥ (यथा, मनुः । ४ । ७० । "न कुर्व्वीत वृथा चेष्टां न वार्य्यञ्जलिना पिबेत्" ॥)

करजाख्यः, पुं, (करजस्याख्या इव आख्या यस्य ।) नखीनामगन्धद्रव्यम् । इति रत्नमाला ।

करञ्जोदिः, पुं, वृक्षश्योऽदिवृक्षः । इति राजनिर्घण्टः ॥ (केचित् करञ्जोडिरिति वदन्ति ॥)

करञ्जः, पुं, (कं सुखं शिरो जलं वा रञ्जयतीति । क + रञ्ज + णिच् + अच् ।) स्वनामख्यातवृक्षविशेषः । करमचा इति भाषा । तत्पर्य्यायभेदो यथा,— "करञ्जकः स्यात् करजः चक्रकी चकाह्वयः । अङ्गारवल्ली वक्रयष्टी मर्कटाङ्गारवल्लरी । करञ्जभेदास्त्वपरे विज्ञेयाः लोकतश्च ते" ॥ इति शब्दरत्नावली ॥ अपि च । "चिरबिल्वो नक्तमालः करजश्च करञ्जकः । सोमवल्कः कलिद्रुमः पूतिकः कलिमारकः ॥ प्रकीर्य्यः पूतिकरजः षड्ग्रन्था दुस्सहा अपि । करञ्जभेदाः वक्रयष्टी मर्कटाङ्गारवल्लरी" ॥ इति जटाधरः ॥ स चतुर्विधः । तत्र करञ्जस्य पर्य्यायाः । नक्तमालः २ पूतिकः ३ चिरबिल्वकः ४ पूतिपर्णः ५ वृक्षकः ६ रोचनः ७ । इति राजनिर्घण्टः ॥ चिरबिल्वः ८ करजः ९ करञ्जकः १० । इत्यमरः । २ । ४ । ४७ ॥ चिरिविल्वः ११ । इति भट्टीका ॥ उदकीर्य्यः १२ । इति रत्नमाला ॥ * ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । भस्तुष्टिकत्वम् । वातनाशित्वञ्च । इति राजनिर्घण्टः ॥ वातकफमेहव्रणकृमिकुष्ठनाशित्वञ्च ॥ * ॥ तत्फलगुणाः । कफवातामयकृमिकुष्ठार्शोनाशित्वम् । भेदकत्वम् । पाके कटुत्वम् । वीर्य्योष्णत्वम् । पित्तवर्द्धकत्वम् । लघुत्वञ्च । इति भावप्रकाशः ॥ * ॥ तत्तैलगुणाः । अतिस्निग्धत्वम् । वातनाशित्वम् । स्थिरदीप्तिदाहत्वम् । नयनामयवातरोगकुष्ठकण्डूविषवृश्चिकानाशित्वम् । तीक्ष्णत्वम् । उष्णत्वम् । लेपेन नानाविधचर्म्मदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ किटिभघ्नत्वम् । कृमिनाशित्वम् । रक्तपित्तदोषकारित्वञ्च । इति राजवल्लभः ॥ * ॥ अथ नाटाकरञ्जपर्य्यायः । प्रकीर्य्यः १ पूतिकरजः २ पूतिकः ३ कलिमारकः ४ । इत्यमरः २।४।४८ ॥ पूतीकरजः ५ सकण्टकः ६ । इति रत्नमाला ॥ * ॥ मधुमयः । काँटाकरञ्ज गाँटिया करञ्ज इति भाषा ॥ * ॥ मर्कटी । माकड़ाकरञ्ज इति भाषा ॥ * ॥ अङ्गारवल्लरी । इत्यमरभरतौ विषकरञ्ज इति भाषा ॥ * ॥ अथ अङ्गारकरञ्जपर्य्यायः ॥ करमर्द्दी १ वनेक्षुदा २ कराह्वः ३ करमर्द्दकः ४ । इति रत्नमाला ॥ क्षुद्रपाकफलः ५ अविघ्नः ६ सुषेणः ७ । इत्यमरः ।२।४।६७ ॥ अस्य फलगुणाः । पिपासानाशित्वम् । रुचिपित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ राजनिर्घण्टोक्तगुणपर्य्यायौ करमर्द्दकशब्दे द्रष्टव्यौ ॥ (यथा, महाभारते ३ । २२८ । २५ । "पादपानाञ्च या माता करञ्जनिलया हि सा । वरदा सा हि सौम्या च नित्यं भूतानुकम्पिनी । करञ्जे तां नमस्यन्ति तस्मात् पुत्त्रार्थिनो नराः" ॥ किरति विक्षिपति धार्म्मिकानिति । कॄ विक्षेपे + बाहुलकादौणादिकोऽञ्जन्प्रत्ययः । धर्म्मद्वेष्टरि, त्रि । यथा ऋग्वेदे । १ । ५३ । ८ । "त्वं करञ्जमुत पर्णयं वधीः तेजिष्ठयातिथिग्वस्य वर्त्तनी" ॥)

करञ्जकः, पुं, (करञ्ज + स्वार्थे कन् ।) करञ्जवृक्षः । इत्यमरः ।२।४।४७ ॥ अङ्गारवल्ली । इति जटाधरः ॥ (यथा महाभारते । १३ । १२८ । ८ । "यश्च संवत्सरं पूर्णं दद्याद्दीपं करञ्जके । सुवर्णमूलश्चक्षुः प्रजानाञ्च विवर्द्धते" ॥)

करञ्जफलकः, पुं (करञ्जफलमिव फलं यस्य । ततः स्वार्थे कन् । करञ्जफलमिव कायते इति वा । कै + क ।) कपित्थवृक्षः । इति राजनिर्घण्टः ॥

करटः, पुं, (कं कुत्सितं रटति शब्दं करोतीति । रट शब्दे + पचाद्यच् ।) काकः । (यथा गङ्गास्तोत्रे । "वरमिह गङ्गातीरे सरटः करटः ।" इति ॥ किरति विक्षिपति सम्बद्धाति इति । कॄ + अटन् ।) हस्तिगण्डः । इत्यमरः । ३ । ३ । ३४ ॥ (यथा महाभारते । ३ । १७३ निवातकवचयुद्धे १८ । "अर्थं हि भिन्नकरटं पतितं वज्रमोचनम् । उपस्थाय महानागा करेषु भूतले पृष्ठैः" ॥) कुसुम्भवृक्षः । निन्द्यजीवनः । एकादशाहादिश्राद्धम् । दुर्द्दुरूढः । नास्तिक इति यावत् । (अथ तु दुर्भिक्षभेदाभिप्रायेणोक्तः । यथा च महाभारते ६ । ९ । ६२ । "माथवा वङ्गाश्चैव तथैवापरवर्त्तकाः । कुलिन्दाः काशदाश्चैव चरका करटाकराः" ॥) वाद्यविशेषे । इति मेदिनी ॥

करटकः, पुं, (करट + स्वार्थे कन् ।) काकः । इति शब्दरत्नावली ॥ (पिङ्गलकनाम्नः सिंहस्य मन्त्रिपुत्त्रविशेषः शृगालः । यथा हितोपदेशे २।२५ । "स च तथाविधः करटकदमनकाभ्यां मन्त्रिपुत्त्राभ्यां शृगालाभ्यां दृष्टः" ॥ स्तेयशास्त्रप्रवर्त्तकः कर्णीसुतः । यथा कादम्बरीटीका । "कर्णीसुतः करटकः स्तेयशास्त्रप्रवर्त्तकः" ॥)

करटा, स्त्री, (करट + "अजाद्यतष्टाप्" ।४।१।४। इति टाप् ।) दुःखदोह्या गवी । इति हेमचन्द्रः ॥

करटी, [न्] पुं स्त्री, (करटः मदस्रवणशीलगण्डः प्रशस्तत्वेन अस्ति अस्य । करट + इनिः ।) हस्ती । इति हेमचन्द्रः ॥ (यथा, लक्ष्मीश्वरविरचितचम्पूः । ४ । "कमदिनि कुमुदतीरमवलम्ब्य भुवामयो करटीतटपटाभयकरटिचर्म्मणि सन्धाय ॥)

करडुः, पुं, (कृ + अडु ।) पक्षिविशेषः । इति हेमचन्द्रः । करकटिया इति भाषा ॥

करणं, क्ली (क्रियतेऽनेन । कृ + करणे + ल्युट् ।) साधकतमम् । इत्यमरः । ३ । २ । ४० ॥ तत्तु षट्कारकान्तर्गतकारकविशेषः । तस्य लक्षणम् । "क्रियायाः साध्यायां बहूनां कारकाणां मध्ये कारकाणामपेक्षया प्राधान्ये यत्तु क्रियानिष्पत्तिकारकं विवक्षितं तस्मिन् करणत्वं प्रकीर्त्तितम् । तेन दात्रेण धान्यं लुनातीत्यत्र हस्तादेः कारकत्वेऽपि दात्रस्यैव करणत्वं विवक्षितम् । यथोक्तम् । "कारकाण्यपराण्यपि क्रिया निष्पत्तिकारकम् । यद्धि विवक्षितं तेषु करणत्वं प्रकीर्त्तितम्" ॥ इति मुग्धबोधटीकायां दुर्गादासः ॥ * ॥ तिथ्यर्द्धपरिमितज्योतिःशास्त्रप्रसिद्धकालविशेषः । तेषां नामानि । ववः १ वालवः २ कौलवः ३ तैतिलः ४ गरः ५ वणिज् ६ विष्टिः ७ शकुनिः ८ चतुष्पदः ९ किन्तुघ्नः १० नागः ११ । तेषां यथाक्रमेणाधिष्ठातृदेवाः । इन्द्रः १ कमलजः २ मित्रः ३ अर्य्यमा ४ भूः ५ श्रीः ६ यमः ७ कलिः ८ वृषः ९ फणी १० मारुतः ११ । एकैकस्मिन् तिथौ द्वे द्वे करणे भवतः । तेषां ववादयः सप्त चरा कृष्णचतुर्द्दश्यपरार्द्धमारभ्य शुक्लप्रतिपत्पूर्व्वार्द्धपर्यन्तं भवन्ति । शेषाश्चत्वारः स्थिराः कृष्णचतुर्द्दश्यपरार्द्धादिप्रतिपत्पूर्व्वार्द्धावधि नियमेन भवन्ति अतो ध्रुवाणि करणानि । पूर्व्वं स्थाप्यानि । तथाच ज्योतिषे यथा । "तिथिद्विघ्ना कलोनागदिग्भिर्युक्तसमाहिते । भवे शेषे तु मैत्रं तत्करणं भवपूर्व्वकम्" ॥ इति ज्योतिषम् ॥ * ॥ क्षेत्रम् । गात्रम् । इन्द्रि-

नम्। इत्यमरः। २। ३। ५८॥ (यथा गीतायां १८। १४।
"अधिष्ठानं तथा कर्त्ता करणञ्च पृथग्विधम्" ॥)
हेतुः। कर्म्म। इन्द्रियम्। नृत्यभेदः। गीतविशेषः। (सङ्गे ध्रुवस्थापककलाङ्गविशेषः। यदुक्तं शाङ्गदेवेन।
"नृत्यवादित्रगीतानां प्रयोगवशभेदिना।
सङ्ख्यानं ताड़नं वाद्यैः करणानि प्रचक्षते" ॥
अस्य प्रमाणं यथा कुमारे ६। ४०।
"शिखरासक्तमेघानां व्यज्यन्ते यत्र वेश्मनाम्।
अनुगर्ज्जितसन्दिग्धाः करणैर्मुरजस्वनाः" ॥)
क्रियाभेदः। संवेशनम्। कायस्थः। इति मेदिनी॥
कायस्थपद्धतिः॥ वर्णानां स्पष्टतादि। योगिनामासनादि। छलादि। इति हेमचन्द्रः॥ (सर्व्वेषां कारणत्वात् विष्णुः। यथा, महाभारते १३। १४९। ५७।
"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः"।
क्षेत्रमनवाप्तिरित्यादि। यथा मनु ८। ४१।
"अर्थेऽपव्ययमानन्तु करणेन विभावितम्।
दापयेद्धनिकस्यार्थं दण्डलेशञ्च शक्तितः"।
भावे ल्युट्। कृतिः। यथा रामायणे ४। १७। ५६।
"अस्मत् प्रियकरणे प्रतीक्षिष्यामहे वयम्" ॥)
करणः, पुं, शूद्राविश्योर्जातजातिविशेषः। इत्यमरः। २। १०। २॥ अयं लिखनवृत्तिः कायस्थ इति ख्यातः। इति भरतः॥ यथा,—
"शूद्राविशोस्तु करणोऽम्बष्ठो वैश्याद्विजन्मनोः"।
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे १० अध्यायः॥ *॥
अपि च।
"कायस्थे साधने क्लीवं पुंसि शूद्राविशोः सुते"।
इति करणशब्दार्थे मेदिनी॥ *॥ अन्यच्च।
"झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च।
नटश्च करणश्चैव खसद्रविड़ एव च" ॥
इति मानवे १०। २२॥ झल्लोमल्लश्चेति। "क्षत्रियात् व्रात्यात् सवर्णायां झल्लमल्लनिच्छिविनटकरणखसद्रविड़ाख्या जायन्ते। एतान्येकस्यैव नामानि"। इति तट्टीकायां कुल्लूकभट्टः॥ *॥
तस्य कर्म्मविपाको यथा,—
"तैलचौरस्तैलकीटो भूत्वा कीटस्त्रिजन्मकम्।
ततो भवेत् स्वर्णकारो जन्मैकं दुष्टमानसः॥
तप्तकुण्डे वसन्नत्र स्थित्वा स्वर्णवणिक् भवेत्।
जन्मैकञ्च दुराचारो जन्मैकं करणो भवेत्॥
विश्वैकलिपिकर्त्ता च मस्यदातुर्धनं हरेत्॥
कायस्थेनोदरस्थेन मातुर्म्मांसं न खादितम्।
तत्र नास्ति कृपा तस्य दन्ताभावेन केवलम्॥
स्वर्णकारः स्वर्णवणिक् कायस्थश्च व्रजेश्वर।
नरेषु मध्ये ते धूर्त्ता कृपाहीना महीतले॥
हृदयं क्षुरधाराभं तेषाञ्च नास्ति चादरम्।
शतेषु सत्सु कोऽपि कायस्थो नेतरौ च तौ॥
सशुद्धिः शिवयुक्तश्च प्राज्ञको धर्म्मनामकः।
न विश्वसेत्तेषु तात आत्मकल्याणहेतवे" ॥
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८५ अध्यायः॥
करणत्राण, क्ली, (करणं ज्ञानकर्म्मादिरूपं इन्द्रियं त्रायतेऽनेन। करण+त्रै+करणे+ल्युट्। मस्तकस्य प्रधानकरणैकादशस्य मनस स्थानत्वात्। करणैर्हस्तादिकर्म्मेन्द्रियादिभिः त्रायते वा इति कर्म्मणि ल्युट्।) मस्तकम्। इति हेमचन्द्रः॥
करणीय,त्रि, (कर्त्तुमुचितं कर्त्तुमर्हं वा। कृ+अनीयर्।) कर्त्तव्यम्। कार्य्यम्। इति व्याकरणम्॥ (यथा रामायणे २। १४। १०।
"मया किं करणीयञ्च इत्युक्ते द्विजसन्निधौ।
सर्व्वैरेव च तैरार्त्तैरागिय समुदाहृता" ॥)
करण्ड, पु (कृञ्+"शृस्वृस्निहि"। इत्यण्डन्। उणां ।१।१२८।) मधुकोषः। मौचाक् इति भाषा। असिः। कारण्डवपक्षी। दलाढ़कम्। इति मेदिनी हेमचन्द्रश्च॥ वंशादिरचितभाण्डविशेषः समुद्गकः। इत्यमरः। २। ५। १८॥ साजि झाँपि इत्यादि भाषा। (यथा भागवते ५। १४। ४। "एवमेव महाधनः कर्म्मदेन यस्मिन् न हि कर्म्माण्युत् सीदन्ति यदयं कामकरण्ड एष आवसथः" ॥)
करण्डी, [न्] पुं (करण्डस्येव आकारोऽस्यास्तीति। करण्ड+इनि।) मत्स्यः। इति त्रिकाण्डशेषः। (मत्स्यशब्देऽस्य गुणादिकथनं ज्ञेयम्॥)
करतल, पुं, (करस्य हस्तस्य तल।) हस्ततलः। हातेर तेलो इति भाषा। (यथा। जयदेवः। २। ४५।
"करतलतालतरलवलयावलिकलितकलस्वनवंशे"
अपि च। यथा, श्रीभागवते। ८। ७। ४२।
"ततः करतलीकृत्य व्यापि हालाहलं विषम्।
अभक्षयन् महादेवः कृपया भूतभावनः" ॥)
करताल, क्ली, (कराभ्यां हस्ताभ्यां दीयमानस्तालो यत्र।) वाद्यविशेषः। यथा,—
"शिवागारे झल्लकञ्च सूर्य्यागारे च शङ्खकम्।
दुर्गागारे वंशिवाद्य मधुरीञ्च न वादयेत्" ।
झल्लकं कांस्यनिर्म्मितकरतालकम्। इति तिथ्यादितत्त्वे रघुनन्दनभट्टाचार्य्येण व्याख्यातम्॥
करताली, स्त्री, (करताल+गौरादित्वात् ङीष्।) वाद्यविशेषः। करताल खरताल इति ख्याता। तत्पर्य्यायः। कराङ्कि २। इति त्रिकाण्डशेषः॥ करतलध्वनिः। तथा च। "यथा न स्यादासो कपटकरतालीपटुरव"। इति उद्भटः॥
करतोया, स्त्री, (करात् शङ्करस्य हस्तात् च्युतं तोयं जलं अस्ति यत्र। अर्श आद्यच्।) स्वनामख्यात उत्तरदेशस्थनदीविशेषः। तत्पर्य्यायः। सदानीरा २। इत्यमरः। १। १०। ३३॥ सदानीरवहा ३। इति शब्दरत्नावली॥ *॥ गौरीविवाहसमये शङ्करकरगलितसम्प्रदानतोयप्रभवत्वात्करस्य तोय विद्यतेऽत्र इति करतोया। आषाढे एतद्व्यं सर्व्वा नद्यो रजस्वला इयं तु न रजस्वला अत एव सदा सर्व्वदा नीरमस्या इति सदानीरा। तथा च स्मृतिः।
"अमादौ कर्कटे देवी त्र्यहं गङ्गा रजस्वला।
सर्व्वा रक्तवहा नद्यः करतोयाम्बुवाहिनी" ॥
इत्यमरटीकायां भरतः॥ (इयं हि तीर्थविशेषः। यथा महाभारते ३। तीर्थयात्रापर्व्वणि। ८५। ३।
"करतोयां समासाद्य त्रिरात्रोपोषितो नरः।
अश्वमेधमवाप्नोति प्रजापतिकृतो विधिः" ॥)
करद्रुम, पुं, (किरति शाखाः सर्व्वतः य। स चासौ द्रुमश्चेति।) कारस्करवृक्षः। इति राजनिर्घण्टः॥
करपत्र, क्ली, (करेण करात् वा पततीति। पत+"सर्व्वधातुभ्य ष्ट्रन्" इति ष्ट्रन्।) क्रकचः। इत्यमरः। २। १०। ३५॥ करात् इति भाषा। (करौ पत्रमिव नौरिव यत्र।) जलक्रीड़ा। इति जटाधरः॥
करपत्रवान्, [त्] पुं, (करपत्राकारपत्रमस्ति यस्मिन् मतुप् मस्य वः।) तालवृक्षः। इति शब्दचन्द्रिका॥
करपत्रिका, स्त्री, (करौ पत्र नौरिव यस्याः। पत्र+कप्+टाप्+अत इत्वम्।) जलक्रीड़ा। इति जटाधरः॥
करपर्णः, पुं (करौ हस्त तद्वत्पर्णं यस्य।) भिण्डातरुः। रक्तैरण्डः। इति राजनिर्घण्टः॥ (एरण्ड शब्देऽस्य विशेष ज्ञेयः॥)
करपल्लवः, पुं (करस्य पल्लव इव।) अङ्गुलिः। यथा, मार्कण्डेये ८४। २६।
"करपल्लवसङ्गीनि तैरस्त्राण्यत्र सर्व्वतः" ॥
करपात्र, स्त्री, (करः पात्रमिव यत्र।) जलक्रीड़ा। इति हारावली॥
करपाल, पुं, (करं पालयति रक्षति। पाल+कर्म्मण्यण्।) खड्गः। इत्यमरः। २। ८। ८९॥
करपालिका, स्त्री, (करपाल+ण्वुल्+टाप् अत इत्वम्।) ह्रस्वगदाकारहस्तदण्डः। सोटा इति ख्यातः। इति भरतः॥ एकधारास्त्रम्। इति स्वामी। तत्पर्य्यायः। ईली २। इत्यमरः। २। ८। ९१॥ इली ३ इलि ४ करवालिका ५। इति तट्टीका॥
करवाल, पुं, (करस्य बालः पुत्र इव। नखस्य करजातत्वात् तथात्वम्।) नखम्। इति शब्दमाला॥ (करं वलति सवृणोति वल+अण्।) खड्गः। इत्यमरटीकायां भरतादयः। करवाल इति भाषा। (यथा, गीतगोविन्दे। १। १०।
"म्लेच्छनिवहनिधने कलयसि करवालम्" ॥)
करवालिका, स्त्री, (कर+वल+ण्वुल्+टाप्+अत इत्वम्।) करपालिका। इत्यमरटीकायां रायमुकुटादयः॥
करभ, पुं, (कृणाति कीर्य्यतेऽनेन वा। कृञ् हिंसायां कृञ विक्षेपे वा "कृशृशलिकलिगर्दिभ्योऽभच्"। उणां ।३।१२२। इति अभच्। करे भाति शोभते इति वा। भा+कः।) मणिबन्धावधिकनिष्ठापर्य्यन्त करस्य बहिर्भागः। (यथा, रघुः। ६। ८३।
"साची कराभ्यां करभोपमोरु" ॥)
उष्ट्रशिशुः। इत्यमरः॥ २। ९। ७५।
करिशावकः। इत्यमरटीकासारसुन्दरी॥ (यथा भागवते ८।२।२२।
"सघर्म्मतप्तः करिभिः करेणुभिः
वृतो मदच्युत्करभैरनुद्रुतः" ॥)
उष्ट्रः। इति मेदिनी॥ नखनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥ कटिः। इति जटाधरः॥
करभकाञ्चिका, स्त्री, (करभमिव काञ्चमस्याः।

करभकाण्ड+कप+अत इत्वम ।) उष्ट्रकाण्डी- वृक्षः । इति राजनिर्घण्टः ॥

करभप्रिया, स्त्री, (करभस्य करिशावकस्य उष्ट्रस्य वा प्रिया ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

करभवल्लभ, पुं, (करभस्य करिशावकस्य वल्लभः प्रियः ।) कपित्थवृक्षः । पीलुवृक्षः । इति राजनिर्घण्टः ॥

करभादनी, स्त्री, (करभेण उष्ट्रेण अद्यतेऽसौ । अद्+कर्म्मणि ल्युट् । ततो+ङीप् ।) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

करभी, [न्] पुं, (करः इव भाति करभः शुण्डः स अस्यास्ति । करभ+इनिः । यद्वा करभः हस्तावयवविशेषः सोऽस्य शुण्डाविच्छेदे अस्तीति इति ।) हस्ती । इति राजनिर्घण्टः ॥

करभी, स्त्री, (करभ+ङीप् ।) उष्ट्री । तत्पर्य्यायः । वामी २ । इति जटाधरः ॥

करभीरः, पुं, (करभिणं हस्तिनं ईरयति प्रेरयति भग्नमुखम् । करभि+ईर्+अण् ।) सिंहः । इति शब्दरत्नावली ॥

करभूषण, क्ली, (करयोर्भूषणम् ।) कङ्कणम् । इत्यमरः ।२।६।१०८॥ हस्ताभरणमात्रम् ॥

करमट्ट, पु, (करं करिशुण्डमपि अट्टति तुच्छी करोति । अस्य सरलकाण्डत्वात् तथात्वम् । अट्ट अनादरे+खशम् प्रत्यय ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः ॥ (गुवाकशब्देऽस्य गुणा ज्ञातव्याः ॥)

करमरी, [न्] पुं, (किरति क्षिपति अत्र दण्डान् इति करः कारागारः । कॄ+अधिकरणे अप् । तस्मिन् करे मरः मरणं मृत्युवत् यातना यस्य आऊकत्वात् इति । तत्र म्रियते वा ।) बन्दी । इति त्रिकाण्डशेषः । कयेदी इति भाषा ॥

करमर्द्द, पुं, (करं मर्द्दातीति । करस्य अणुपदत्वात् । मृद क्षोदे+कर्म्मण्यण् । करेण मृद्यते इति कर्म्मणि अप् वा ।) करमर्द्दकवृक्षः । इति शब्दरत्नावली ॥ (यथा भावप्रकाशे,—अस्य गुणा उक्ताः ।
"अम्लदोषपत्वाभ्यां तु करमर्द्दद्वयं मतम् ।
करमर्द्दद्वयं त्वाममम्लं गुरुरक्ताम्रकरम् ॥
उष्णं रुचिकरं प्रोक्तं पित्तरक्तकफप्रदम् ।
तत्पक्वं मधुरं रुच्यं लघुपित्तसमीरजित् ॥
करमर्द्दः सुषेणः स्यात् तद्वत्पाणिकलाषणा ।
तस्माल्लघुफला या तु सा ज्ञेया करमर्द्दिका ॥)

करमर्द्दक, पुं, (कर+मृद्+ण्वुल् । करमर्द्द एव स्वार्थे कन् इति वा ।) वृक्षविशेषः । इत्यमरटीकायां सारसुन्दरी । पानि आमला इति भाषा । इति रत्नमालाराजनिर्घण्टादयः । करौन्दा इति करञ्चा इति च भाषा ॥ तत्पर्य्यायः । करमर्द्द मन २ अविग्न ३ सुषेणः ४ । इत्यमरः ।२।४।६०। कृष्णपाक ५ पाकफल ६ कृष्णपक्वः ७ पाकहस्य फल ८ तद्भवपाकः ९ पाकतन्त्र १० वन कृष्णः ११ माध्यफलाढ्य १२ वनालयः १३ वनाम्लः १४ करामला १५ योगा १६ वरः १७ पा बिम १८ । इति तट्टीकायां भरतः ॥ करमर्द्दी १९ वनेक्षुद्रा २० कराम्ल २१ । इति रत्नमाला ॥ करमर्द्दः २२ पाणिमर्द्द २३ । तद्गुणफलगुणाः । तिक्तत्वम् । अम्लत्वम् । दीपनत्वम् । दाहकारकत्वञ्च । तत्पक्वफलगुणाः । त्रिदोषशमनत्वम् । अरुचि विषनाशित्वञ्च । इति राजनिर्घण्टः ॥ पिपासा नाशित्वम् । अम्लत्वम् । रक्तपित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥ (यथा, वाग्भटः ।
"गुल्मघ्नवीर्य्यं वातघ्नं रुच्यं करमर्द्दकम्" ॥)

करमर्द्दी, स्त्री, (करं मृद्नातीति । कर+मृद्+अण् ङीप् ।) करमर्द्दकवृक्षः । इति रत्नमाला ॥

करमाल, पुं, (करः करिशुण्डः तदाकारा माला समूहः यस्य मेघस्य धूमस्य वा क्रमशः करि शुण्डवत् प्रसरत्वात् तथात्वम् ।) खतमालः । धूमः । इति हेमचन्द्रः ॥

करमाला, स्त्री, (कराङ्गुलीभिर्मालेव जपनात् करस्था माला । कराङ्गुल्य मालेव वा ।) करपर्व्वरूपमाला । यथा,
"अनामिकात्रयं पर्व्व कनिष्ठादित्रयं तथा ।
तर्ज्जनीमूलपर्य्यन्तं करमाला प्रकीर्त्तिता" ॥
इति मुण्डमालातन्त्रे सामान्यविषयम् ॥ * ॥
"तर्ज्जनी मध्यमानामा कनिष्ठा चेति ताः क्रमात् ।
तिस्रोऽङ्गुल्यस्त्रिपर्व्वाण्यो मध्यमा चैकपर्व्विका ।
पर्व्वद्वयं मध्यमाया मेरुत्वेनोपकल्पयेत्" ॥
इति शिवरहस्यीय शक्तिभिन्नविषयम् ॥ * ॥
"अनामामूलमारभ्य कनिष्ठादिक्रमेण तु ।
तर्ज्जनीमध्यपर्य्यन्तमष्टपर्व्वसु संजपेत्" ॥
इति सनत्कुमारसंहितावचनं शक्तीतरैमागार वारविषयम् ॥ * ॥
"अनामिकात्रयं पर्व्व कनिष्ठा च त्रिपर्व्विका ।
मध्यमायाश्च त्रितयं तर्ज्जनीमूलपर्व्विका ॥
करमाला समाख्याता आरभ्यानामिकान्तरात् ।
तर्ज्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत्" ॥
इति शक्तिविषये मुण्डमालातन्त्रम् ॥ * ॥ तथा ।
"अनामामूलमारभ्य प्रादक्षिण्यक्रमेण तु ।
मध्यमामूलपर्य्यन्तं जपेदष्टसु पर्व्वसु" ॥
इदमपि शक्तिविषये अष्टवारपरम् । इति तन्त्र सारश्च ॥

करमुक्त, क्ली, (करेण गृहीत्वा शत्रुं प्रति मुच्यते । कर+मुच+कर्म्मणि क्त ।) अस्त्रविशेषः । इति हलायुधः । बरछी भाला इत्यादि भाषा ॥

करम्ब, पुं, (कम् करणे+ 'शकादि भ्योऽम्बच्' । उणा । ४ । ८२ ।) करम्भः । इत्यमरटीकायां नीलकण्ठः ॥ मिश्रिते त्रि । इति हेमचन्द्रः ॥

करम्बितः, त्रि, (करम्बः मिश्रणं जातोऽस्य । करम्ब+इतच् ।) मिश्रितः । खचितः । इति त्रिकाण्डशेषः ॥ ("ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे" ॥ इति गीतगोविन्दः । १ । ३ ।)

करम्भः, पुं, (केन जलेन रभ्यते मिश्रीक्रियते । रभि धातोरनेकार्थत्वात् "अकर्त्तरि चेति" घञ् ।३।३। १९। रभेरशब्लिटोः ।७।१।६३। इति नुम् ।) दधिमिश्रितसक्तुः । इत्यमरः ।२।९।४८ ॥ (यथा शतपथब्राह्मणे । २ । ५ । २ । ४ ।
"अनुषाग्नि यवान् हुत्वा ताभीपरोपशतम्य तेषां करम्भपात्राणि कुर्व्वन्ति" ॥ उदमन्थः । यथा, यजुर्व्वेदे १९ । २१ ।
"धानाः करम्भः सक्तवः परिवापः पयो दधि" ।
"करम्भ उदमन्थः । इति वेददीधितिः ॥
भ्रष्टयवमात्रम् । यथा मनु १२ । ७६ ।
"करम्भवालुकातापान् कुम्भीपाकांश्च दारुणान्" ।
करम्भवालुकातापान् करम्भैर्य्यवैः सह भ्रष्टा या वालुकाः तत्तप्तवालुकादीन् इत्यर्थः ॥ मिश्रान्नम् । यथा भागवते ९ । २६ । ४५ ।
"करम्भपूतिसौरभ्य शान्तोदयादिभिः पृथक् ।
द्रव्यावयववैषम्याद् गन्ध एको विभिद्यते" ॥)

करम्भक, क्ली, (करम्भ एव स्वार्थे कन् ।) करम्भः । दधिसक्तवः । तत्पर्य्यायः । कर्णसारम् २ । इति हारावली ॥

करम्भा, स्त्री, (केन जलेन रभ्यते मिश्यते इति । अथवा केन वायुना रभ्यते मिश्रीक्रियते नानागन्धो यस्याः । रभेर्नानार्थत्वात् क+रभ+घञ्+नुम् टाप् च ।) शतावरी । प्रियङ्गुवृक्षः । इति राजनिर्घण्टः ॥ (समागता कलिङ्गदेशोत्पन्ना रमणी । सा तु पूरुवंशीयस्याक्रोधनस्य पत्नी । यथा महाभारते १ । ९५ । २२ ।
"अक्रोधनः खलु कालिङ्गीं करम्भां नामोपयेमे ।
तस्यामस्य जज्ञे देवातिथिः" ॥)

कररुह, पुं, (करे रोहति कराङ्गुलीभ्य उत्पद्यते इत्यर्थः । कर+रुह+"इगुपधेति" । ३ । १ । १३४ । कः ।) नखः । इत्यमरः । २ । ६ । ८३ ॥ (यथा आर्य्यासप्तशती ३७ । "अस्याः कररुह खण्डितकाण्ड पटप्रकटनिगता दृष्टि" ॥)

करर्द्धि, स्त्री, (करस्य ऋद्धिः करेण ऋद्धिर्यस्याः वा । करसम्पत् ।) करताली । इति त्रिकाण्डशेषः ॥

करवालिका, स्त्री, (करं वलते । वल हिंसादानयोः अच् । करेण वाल्यते वा । स्त्रियामाच्छ इः ततः कन्+टाप् च ।) करपालिका । इत्यमरटीकायां भरत ॥

करवी, स्त्री, (कस्य वायोः रवः यत्र । गौरादित्वात् ङीष् ।) करवी । हिङ्गुपत्रम् । इति शब्दचन्द्रिका ॥

करवीरः, पुं, (करं वीरयति । वीर+विक्रान्तौ+कर्म्मण्यण् ।) खड्गः । दैत्यविशेषः । इति मेदिनी । श्मशानम् । इति हेमचन्द्रः ॥ ब्रह्मावर्त्ते दृषद्वती नदीतीरे चन्द्रशेखरराजपुरम् । इति कालिका पुराणे ४९ अध्यायः ॥ (पर्व्वतविशेषः । यथा, भागवते ५।१६।२८ ।
"एवमपरेण पवनपारियात्रौ
दक्षिणेन कैलासकरवीरौ प्रागायतौ" ॥
नागविशेषः । यथा, महाभारते १ । ३५ । १२ ।
"करवीरः पुष्पदंष्ट्रो विल्वको विल्वपाण्डुरः" ॥)
वृक्षविशेषः । करवी इति भाषा ॥
(यथा रामायणे २ । १० । १ ।
"दाडिमान्करवीरांश्च अशोकांस्तिलकांस्तथा" ॥)
तत्पर्य्यायः । प्रतिहास २ शतप्रासः ३ चण्डातः ४ हयमारकः ५ । इत्यमरः ।२।४।७६ ॥ प्रतीहास

६। इति तट्टीका। अश्वघ्न ७ हयारिः ८ अश्वमारक ९ शीतकुम्भ १० तुरङ्गारिः ११। इति रत्नमाला। अश्वहा १२ वीरः १३ हयमारः १४ हयघ्न १५ प्रतकुन्द १६ अश्वरोधक १७ वीरक १८ कुन्द १९ सकुन्द २० श्वेतपुष्पकः २१ अश्वान्तक २२ नखराह्व २३ अश्वनाशनः २४ स्थलकुमुद २५ दिव्यपुष्प २६ हरिप्रियः २७ गौरीपुष्पः २८ सिद्धपुष्पः २९। अस्य गुणाः। कटुत्वम्। तीक्ष्णत्वम्। कुष्ठकण्डूतिनाशित्वम्। व्रणार्त्तिविषविस्फोटकशमनत्वम्। अश्वमृतिप्रदत्वञ्च। इति राजनिर्घण्टः॥ (श्वेतरक्तभेदेन यथा —

"करवीरः श्वेतपुष्पः शीतकुम्भोऽश्वमारकः।
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा॥
करवीरद्वयं तिक्तं कषायं कटुकञ्च तत्।
व्रणलाघवकृन्नेत्रकोपकुष्ठव्रणापहम्।
वीर्य्योष्णं क्रिमिकण्डूघ्नं भक्षितं विषवन्मतम्"।

इति भावप्रकाशः। नागविशेषः। इति भारतम्॥)

करवीरक, पुं, (करवीर इव कायति प्रकाशते। कै+क। कर वीरयतीति। कर+वीर विक्रान्तौ+ण्वुल्।) अर्ज्जुनवृक्षः। इति राजनिर्घण्टः॥ खड्गः। इति शब्दमाला॥ (करवीर एव स्वार्थे कन्।) करवीरः। विषभेदः। स तु करवीरस्य मूलम्। इति हेमचन्द्रः॥

करवीरकन्दसंज्ञ, पुं (करवीरकन्दस्येव संज्ञा यस्य। करवीरकन्द इति संज्ञा यस्य वा।) तैलकन्दः। इति राजनिर्घण्टः॥

करवीरभुजा, स्त्री, (करवीरस्य भुज इव शाखावत् भुजः शाखाऽस्याः।) आढ़कीवृक्षः। इति राजनिर्घण्टः। अरहर इति भाषा॥

करवीरी, स्त्री, (किरति क्षिपति राक्षसासुरादीन् इति। कृ+अच्। करः तादृशः वीरः पुत्रो यस्याः। यद्वा क सुखं राति ददातीति क+रा+कः। सुखप्रदः वीरपुत्रो यस्याः।) अदितिः। श्रेष्ठगवी। पुत्रवती। इति मेदिनी॥

करशाखा स्त्री, (करस्य शाखा इव।) अङ्गुली। इत्यमरः।२।६।८२॥ तासां परिमाणं यथा।

"अष्टभिस्तैर्भवेत् ज्येष्ठं मध्यमं सप्तभिर्यवैः।
कन्यसं षड्भिरुद्दिष्टमङ्गुलं मुनिसत्तम॥
मानन्तु पार्श्वेन। यदुक्तं वा पार्श्वसम्मिता। इति बाह्यायामदर्शनात्"। इति तिथ्यादितत्त्वम्॥

तत्पर्य्यायः। अयुवः १ अण्व्यः २ क्षिपः ३ क्षिपः ४ शर्य्याः ५ रशनाः ६ धीतयः ७ अथर्य्यः ८ विपः ९ कक्ष्याः १० अवनयः ११ हरितः १२ स्वसारः १३ जामयः १४ सनाभयः १५ योक्त्राणि १६ योजनानि १७ धुरः १८ शाखाः १९ अभीशवः २० दीधितयः २१ गभस्तयः २२। इति द्वाविंशतिरङ्गुलिनामानि। इति वेदनिघण्टौ २ अध्यायः॥

करशीकरः, पुं (करात् करिशुण्डात् निःसृतः शीकरः। करस्य गजशुण्डस्य शीकरो वा।) हस्तिशुण्डनिर्गतजलकणाः। तत्पर्य्यायः। वमथुः २। इत्यमरः।२।८।३७॥ (यथा रघुः।७।४८।

"उद्यन्तमपि भ्रमयाम्बभूव
गजा विविग्ना करशीकरेण"॥)

करशूक, पुं (करस्य शूकः सूच्यग्र इव सूक्ष्माग्र इव वा।) नखः। इति त्रिकाण्डशेषः॥

करहाट पुं, (करेण किरणेन सूर्य्यस्येति यावत् हाट्यते दीप्यते इति। हट+णिच्+कर्म्मणि घञ्।) पद्ममूलम्। मदनवृक्षः। इति मेदिनी॥ महापिण्डीतरुः। इति राजनिर्घण्टः॥

करहाटकः, पुं, (करहाट एव इति स्वार्थे कन्। करं हाटयतीति ण्वुल् वा।) मदनवृक्षः। इत्यमरः।२।४।५२॥ हस्तीयसूर्य्ये स्त्री॥

करामर्द्दः पुं, (करं आमर्द्दातीति। कर+आ+मर्द्द+अण्।) करमर्द्दवृक्षः। इति शब्दरत्नावली॥ करम्चा इति भाषा॥

कराम्बुकः, पुं, (कीर्य्यते क्षिप्यते। कॄ+कर्म्मणि अप्। करं अम्बु यस्मात् कप्।) करम्पाकफल वृक्षः। इति शब्दचन्द्रिका भरतधृतवाचस्पतिश्च॥ पानि आमला इति भाषा॥

करालकः, पुं, (कीर्य्यते इति करं कीर्य्यमाणं अलकं यतः। अलक+कप्।) करमर्द्दकवृक्षः। इति राजनिर्घण्टः॥

करायिका स्त्री, (करावित आचरति उड्डीनादिकाले करवल्लम्बमानत्वात्तथात्वम्। कर+आ+चारे क्यङ्। ततो+ण्वुल्+टाप् च।) बलाका पक्षी। क्षुद्रबकः। इति भूरिप्रयोगः॥

करारोटः, पुं, (करे आरोटते दीप्यते। आ+रुट्+अच्।) अङ्गुरीयकम्। इति त्रिकाण्डशेषः॥

कराल, स्त्री, (कराय चक्षुरोगादिनाशाय अलति पर्य्याप्नोतीति। अल्+अच्।) कृष्णकुठेरकः। इति मेदिनी॥ काल तुलसी इति भाषा॥

कराल, पुं, (करं आशाति स्फ़ाति। आ+शा+कः। कराय क्षेपाय अलति पर्य्याप्नोति वा।) सर्ज्जरसयुक्तसैलम्। इति मेदिनी॥ गर्ज्जनतैल इति भाषा॥ तैले घृते वा पक्ववेसवारः। इति पाकराजेश्वरः॥ (क्वचित् क्लीवेऽपि दृश्यते। यथा,

"तप्ततैले पचेत् पूर्व्वं वेसवारकसम्भृतम्।
पाकप्रापितसौरभ्यं करालं सूदकैमतम्"॥

गन्धर्व्वभेदः॥ यथा, महाभारते।१।१२३।५४।
"सद्धा हव्वद्धा ऊहुक करालश्च महामनाः"॥)

कराल, त्रि, (कराय क्षेपाय भयप्रदर्शनाय अलति पर्य्याप्नोति।) दन्तुरः। दाँतो इति भाषा॥ (यथा

"करालं वदनां घोरां मुक्तकेशीं चतुर्भुजाम्"।

इति कालीध्यानम्।) तुङ्गः। उच्च इति भाषा॥ भीषणः। इति मेदिनी॥ भयानक इति यावत्॥ (यथा, रघुः।१२।९८।

"सद्योभिन्नशतधा भिन्नं ददृशे दीप्तिमन्मुखम्।
वपुर्महोरगस्येव करालफणमण्डलम्"॥)

करालकः, पुं (कराल एव स्वार्थे कन्। करालवत् कायति वा।) कृष्णतुलसी। इति रत्नमाला॥ करालशब्दार्थश्चात्र॥

करालत्रिपुटा, स्त्री (करालानि त्रीणि पुटानि यस्याः।) यवधान्यम्। इति राजनिर्घण्टः॥

कराला स्त्री (करालवाला नाम यस्याः।) शारिवा। अनन्तमूल इति ख्याता। इति रत्नमाला॥ (शारिवाशब्दे अस्या गुणा ज्ञातव्याः॥)

करालिका, पुं, (कराणां करवद्वृक्षशाखानां आलिः श्रेणिर्यत्र। कप्।) वृक्षः। इति हेमचन्द्रः॥

करालो, स्त्री, (कराल+गौरादित्वात् ङीष्।) अग्नेः सप्तजिह्वान्तर्गतजिह्वाविशेषः। इति जटाधरः॥ (यथा मुण्डकोपनिषदि।१।२।४।

"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा।
स्फुलिङ्गिनी विश्वरुची च देवी
लेलायमाना इति सप्त जिह्वाः"॥)

करिकणावल्ली, स्त्री, (करिकणाया इव वल्ली।) चविकावृक्षः। इति राजनिर्घण्टः। चइ इति भाषा॥ (चविकाशब्देऽस्या विशेषो ज्ञेयः॥)

करिकुसुम्भ, पुं, (करीति नागकेशरः तद्वत् कुसुम्भः।) नागकेशरचूर्णकम्। इति हारावली॥

करिगर्ज्जित, क्ली, (करिणः गर्ज्जितं गर्ज्जनम्। करि+गर्ज्ज+भावे क्तः।) हस्तिगर्ज्जनम्। तत्पर्य्यायः। बृंहितम् २। इत्यमरः।२।८।१०७॥

करिज, पुं, (करिणो जायते इति। करि+जन+कर्त्तरि डः।) हस्तिशिशुः। इति शब्दमाला॥

करिणी, स्त्री, (करिन्+स्त्रियां ङीप्।) हस्तिनी। तत्पर्य्यायः। धेनुका २ वशा ३। इत्यमरः।२।८।३६॥ करेणू ४ करेणुः ५ करेणुका ६ रेणुका ७ वासिता ८ वाशा ९ हस्तिनी १०। इति शब्दरत्नावली॥ कटम्भरा ११ पुष्करिणी १२ काचा १३ गणिका १४ गजयोषित् १५। इति जटाधरः॥ पद्मिनी १६ इत्यमरटीका॥ (यथा भागवते।४।९।५३।

"आरोप्य करिणीं हृष्टः स्तूयमानोऽविशत्पुरम्"॥)

करिदारक, पुं, (करिणं दृणाति छिनत्ति दारयतीत्यर्थः। दृ विदारे+णिच्+ण्वुल्।) सिंहः। इति शब्दरत्नावली॥

करिपत्र, क्ली, (करिणः कर्णवत् पत्रं यस्य।) तालीशपत्रम्। इति राजनिर्घण्टः॥

करिपिप्पली स्त्री, (करिसंज्ञया संज्ञा यस्याः पिप्पल्याः सा। करिनामिका पिप्पली।) गजपिप्पली। इत्यमरः।२।४।९७॥

करिपोत, पुं (करिणः पोतः शिशुः।) करिशावकः। इति हलायुधः।२।६९॥

करिबन्ध, पुं, (करी बध्यते यत्रेऽस्मिन्। यद्वा करिणं हस्तिनं बध्नाति अच्। बन्ध+अधिकरणे घञ्।) हस्तिबन्धनस्तम्भः। तत्पर्य्यायः। आलानम् २। इति हारावली॥

करिमाचल, पुं, (मच शाठ्यदम्भयोः इति धातोर्भावे घञ्। करिणि हस्तिविषये माचं शाठ्यं लाति स्फुटतीति। ला+कः।) सिंहः। इति त्रिकाण्डशेषः॥

करिमुख, पुं, (करिणो मुखमिव मुखं यस्य।) गणेशः। इति त्रिकाण्डशेषः॥

करिर, पुं, क्ली (कॄ+इरन्।) करीरः। इति शब्दरत्नावली॥

करिशावकः, पुं, (करिणः शावकः शिशुः ।) हस्ति-शिशुः । तत्पर्य्यायः । कलभः १ । करभ इत्यपि पाठः । इत्यमरः । २ । ८ । ३५ ॥ करिपोतः २ । इति हलायुधः ॥ करिभः ३ । इति शब्दमाला ॥ विक्कः ५ । चिक्कः ६ । यथा, शब्दरत्नावल्याम् ।
'यावत् पञ्चाब्दमेतस्मिन् करभः कलभोऽपि च ।
विंशाब्दिकी तथा स्त्री तु करभी कलभ्यपि" ॥
करी, [न्] पुं, (करः शुण्डः अस्यास्तीति इनिः ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा भागवते । ८ । २ । २२ ।
"स घर्म्मतप्तः करिभिः करेणुभि-
र्वृतो मदच्युत्कलभैरनुद्रुतः" ॥)
करीरः, पुंस्त्री (किरति विक्षिपति प्रदेशजातं बाधादीनिति । "कॄगॄशॄकटिपटिशौटिभ्य ईरन्" । उणां । ४ । ३० । इति ईरन् ।) वंशाङ्कुरः । इत्यमरः । २ । ४ । १०३ ॥ बाँशेर कोँडा इति भाषा ॥ (यथा, माघे ४ । १४ ।
"रुद्धे पुनर्यत्र तथा कथञ्चा-
दालिम्पिते वंशकरीरनीलैः" ॥
'वंशशब्दस्यासन्नत्वाद्धेतोरनुगताया प्रतिपत्त्य-र्थत्वात्पौनरुक्त्यम् । अथवैकार्थपदप्रयोगोऽपि यथा करिकलभकरभकतालादिषु प्रतिपत्तिविधौ प्रकरेषु न दोष इत्याह वामनः' । इति तट्टी-कायां मल्लिनाथः ॥)
अस्य गुणाः । दीपनाग्नित्वम् । कषायत्वम् । दाह-कफनाशत्वञ्च । इति राजवल्लभः ॥ (यथाह वाभटः ।
करीरमाध्मानकरं कषायस्वादुतिक्तकम्" ॥
वैद्यो करीरः कफलो मधुरो रसपाकतः ।
विदाहिनो मारुतघ्नः स कषायो विरूक्षणः ॥" ॥
इति सुश्रुते ॥)
करीरः पुं (कीर्य्यते क्षिप्यते अनेन "कॄशॄपॄ-कटिपटि" इति ईरन् । उणां । ४ । ३० ।) घटः । इति मेदिनी ॥ (कीर्य्यते दूरे निक्षिप्यते दूरतः त्यज्यते कण्टकादि भयादिति यावत् ।) मरुभूमिज वृक्षविशेषः । करील इति भाषा । तत्-पर्य्यायः । क्रकरः २ मन्थिलः ३ । इत्यमरः । २ । ४ । १०३ । ग्रन्थिलः ४ । इति तट्टीका । निष्पत्रिका ५ करीरः ६ गूढपत्रः ७ करकः ८ तीक्ष्णकण्टकः ९ मरुभूरुहः । (यथा भावप्रकाशे ।
"करीरः कटुकस्तिक्तः स्वेदनो भेदनः स्मृतः ।
दुर्नामकफवातामगरशोथव्रणप्रणुत्" ॥)
अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कटुत्वम् । उष्ण-त्वम् । अर्शःश्लेष्मवातारिरत्वम् । श्वासानिल-वान्तिकफानाहार्श्वारोचकनाशित्वञ्च । इति राजनिघण्टुः ॥
करीरा, स्त्री (करिर + "अजाद्यतष्टाप्" । ४ । १ । ४ ।) चीरिका । झिँझि पोका इति भाषा । इति शब्दमाला । करिदन्तशीर्षः ॥
करीरिका स्त्री (करीरिव शाखाविस्तारः । करीर + इव + टाप् च ।) हस्तिदन्तमूलम् । इति त्रिकाण्डशेषः ॥
करीरी स्त्री, (कॄ + ईरन् + गौरादित्वात् ङीष् ।) चीरिका । हस्तिदन्तमूलम् । इति मेदिनी ॥
करीषः, पुं न्नी, (कीर्य्यते विक्षिप्यते इति । "कॄतॄ-भ्यामीषन्" । उणां ४ । २६ । इति कॄ + ईषन् ।) शुष्कगोमयम् । इत्यमरः । २ । ९ । ५१ ॥ घुटे इति भाषा । तत्पर्य्यायः । गोमयाग्निः २ छगणः ३ । इति हेमचन्द्रः ॥ (यथा, रामायणे । २ । १ । ७ ।
"ददर्श च वने तस्मिन् महतः सञ्चयान् कृतान् ।
मृगाणां महिषीणाञ्च करीषैः शीतकारणात्" ॥)
करीषाग्निः, पुं (करीषे करीषस्थितो वा अग्निः ।) शुष्कगोमयवह्निः । घुटेर आगुन इति भाषा । तत्पर्य्यायः । छागणः २ । इति त्रिकाण्डशेषः ॥
करुणः, पुं, (करोति मनः आनुकूल्याय । कृ + "कॄ-वृदारिभ्य उनन्" । उणां । ३ । ५३ । इति उनन् ।) वृक्षविशेषः । करुणा लेबु गाछ इति भाषा । तत्फलगुणः । कफवाय्वामनाशित्वम् । पित्त-प्रकोपकत्वञ्च । इति राजवल्लभः । बुद्धभेदः । इति त्रिकाण्डशेषः ॥ शृङ्गारादयष्टरसान्तर्गतनवमरसः । इत्यमरः । १ । ७ । १७ ॥ तल्लक्षणादि ।
"इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् ।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ॥
शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् ।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः ॥
अनुभावा दैवनिन्दाभूपातक्रन्दितादयः ।
वैवर्ण्योच्छासनिःश्वासस्तम्भप्रलपनानि च ॥
निर्व्वेदमोहापस्मारव्याधिग्लानिस्मृतिश्रमाः ।
विषादजडतोन्मादचिन्ताद्या व्यभिचारिणः ॥
शोच्यं विनष्टबन्धुप्रभृति । यथा राघवविलासे ।
विपिने क्व जटानिबन्धनं
तव चेदं क्व मनोहरं वपुः ।
अनयोर्घटना विधेः स्फुटं
ननु खड्गेन शिरीषकर्त्तनम् ॥
अत्र रामवनवासजनितशोकार्त्तस्य दशरथस्य दैवनिन्दा । एवं बन्धुवियोगविभवनाशादावपि उदाहार्य्यम् । परिपोषस्तु महाभारते स्त्रीपर्व्वणि बोद्धव्यः । इति साहित्यदर्पणे ३ । २२२ ॥ (सत्त्व-श्रीविष्णुदयावान् । यथा भागवते । ३ । २१ । ८ ।
"यद्भूत्युपवनश्रेष्ठे सत्यदृष्टो मितस्मितः स्मितः ।
विविक्तवाचा प्राप्तो नैव करुणः भवानाम्" ॥)
करुणमल्ली, स्त्री (करुणा करुणास्या सल्ला मल्ली ।) नवमल्लिका । इति शब्दचन्द्रिका ॥
करुणविप्रलम्भः, पुं (करुणयुक्तो विप्रलम्भः ।) पूर्व्व-रागादिचतुर्भेदविप्रलम्भशृङ्गारमध्ये विप्रलम्भवि-शेषः । तस्य लक्षणम् । यथा साहित्यदर्पणे ३ परिच्छेदे २२३ ।
"यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये ।
विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भाख्यः" ॥
यथा कादम्बर्य्याम् । पुण्डरीकमहाश्वेतावृत्तान्ते पुनरलभ्ये शरीरान्तरेण वा लभ्ये तु करुणाख्य एव रसः । किञ्चात्राकाशसरस्वतीभाषानन्तरमेव शृङ्गारः । सङ्गमप्रत्याशया रतेरुद्भवात् प्रथ-मन्तु करुण एवेत्यभियुक्ता मन्यन्ते यथाच महत् प्रवासाख्यतामपि भवतो विप्रलम्भशृङ्गारस्य प्रवासात् भेद इति केचिदाहुः तदन्ये मरण-रूपविशेषसम्भवात्तद्भिन्नमपि मन्यन्ते ॥
करुणा, स्त्री ("कॄवृदारिभ्य उनन्" । उणां । ३ । ५३ । इति कृ + उनन् । टाप् च ।) परदुःखप्रहा-णेच्छा । तत्पर्य्यायः । कारुण्यम् २ घृणा ३ कृपा ४ दया ५ अनुकम्पा ६ । अनुक्रोशः ७ । इत्य-मरः । १ । ७ । १८ ॥ शूकः ८ । इति हेमचन्द्रः ॥ (यथा रघुः ८ । ६७ ।
"करुणाविमुखेन मृत्युना
हरता त्वां वद किं न मे हृतम्" ॥)
गङ्गानामविशेषः । यथा काशीखण्डे २९ । ४३ ।
"कूटस्था करुणा कान्ता कूर्म्मयाना कलावती" ॥
करुणा दयास्वरूपा । इति तट्टीका ॥)
करुणापरः, त्रि (करुणा परा यस्य करुणायां परः अनुरागी वा ।) दयापरः । तत्पर्य्यायः । दयालुः २ कृपालुः ३ सूरतः ४ । इति हेमचन्द्रः ॥
करुणी, स्त्री (कृ + उनन् + ङीष् ।) पुष्पवृक्षविशेषः । करुणलेबु इति लोके प्रसिद्धा । तत्पर्य्यायः । शीतपुष्पी २ सहापुष्पी ३ चारिणी ४ राजप्रिया ५ राजपुष्पी ६ सुवृत्ता ७ मदनचारिणी ८ । अस्याः गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफ-मारुतशूलविषविषचिह्नविषघ्नमूर्च्छानाशित्वञ्च । इति राजनिघण्टुः ॥
करेटः, पुं, (करे अङ्गुल्यां अटति उत्पद्यते इति अट + अच् अलुक्समासः ।) नखः । इति त्रिकाण्डशेषः ॥
करेटका, स्त्री, (करे अटं अन्नं कायतीति । कै + कः ततष्टाप् ।) चमच्छुपक्षी । इति त्रिकाण्डशेषः ॥
करेटुः, पुं (के जले करोति वा रेटतीति । रेट् भाषणे बाहुलकात् + मृगय्वादित्वात् कुः ।) पक्षिविशेषः । कारकटिया इति भाषा । तत्पर्य्यायः । ककरेटुः २ । इत्यमरः । २ । ५ । १९ ॥ करटुः ३ ककराटुकः ४ । इति हेमचन्द्रः ॥
करेणुः, पुं ("कृञ्जाभ्यामेणुः" । उणां । २ । १ । इति कृ + एणुः । के मस्तके रेणुः पांशुरस्य वा । मस्तके शुण्डाग्रधूलीनिक्षेपणात् तथात्वम् ।) हस्ती । इत्यमरः । ३ । ३ । ५४ ॥ (यथा माघे १२ । ५ ।
"उत्क्षिप्तगात्रः स्म विडम्बयन्नभः
समुत्पतिष्यन्तमगेन्द्रमुच्चकैः ।
आकुञ्चितप्रोहितपीवरक्रमं
करेणुरारोहयते निषादिनम्" ॥)
कर्णिकारवृक्षः । इति विश्वः ॥
करेणुः स्त्री, (कृ + एणु ।) हस्तिनी । इत्यमरः । २ । ८ । ३५ ॥ (यथा रामायणे २ । ४ । २९ ।
"मुखेन वायत स्त्रीणां करेणूनां महाबल ।
यथा नागः करेणूनां वने महति कुञ्जरः" ॥
अस्या दुग्धगुणा यथोक्तं सुश्रुते ।
"हस्तिन्याः [दुग्धं] मधुरं वृष्यं कषायानुरसं गुरु ।
स्निग्धं स्थैर्य्यकरं शीतं चक्षुष्यं बलवर्द्धनम्" ॥)
करेणुभूः पुं (करेणौ करेणुविषये भवति वर्त्तते ज्ञानावलम्बनेन प्रभवति वा । भू + क्विप् ।) पाल-काप्यमुनिः । इति हेमचन्द्रः ॥

करेणुसुतः, पुं, (करेणुशालकाप्याय उत्पन्नः सुतः ।) मुनिविशेषः । इति त्रिकाण्डशेषः । (करेणोः सुतः । इति व्युत्पत्त्या करभः ।)

करेणुः, पुं स्त्री (कृ+एनु ।) हस्ती । हस्तिनी । इत्यमरटीकायां रायमुकुटः ।

करेन्दुकः पुं (करेण रश्मिना दीप्ता इति यावत् इन्दुरिव कायति शोभते । कै+क ।) भूतृणम् । इति राजनिर्घण्टः । (भूतृणशब्देऽस्य गुणादयो ज्ञेयाः ।)

करेवरः, पुं (कीर्य्यते क्षिप्यते पाषाणः कपिभिरिति यावत् करः तस्मिन् व्रियते उत्पद्यते ।) तुरुष्कः । इति राजनिर्घण्टः । शिलारस इति भाषा ।

करोटं, क्ली, (कं वायुं जलं वा अयम् । रोटते प्रतिहन्ति के मस्तके रोटते दीप्यते वा । रुट्+अच् ।) शिरोऽस्थि । इति भरतो द्विरूपकोषश्च ।

करोटिः, स्त्री, (केन वायुना अन्तर्वायुना रुध्यते प्रतिहन्यते । के शिरसि रोटते दीप्यते शोभते वा । रुट+इन् ।) शिरोऽस्थि । इत्यमरः । २ । ६ । ६९ । माथार खुलि इति भाषा ।

करोटी स्त्री (करोट+गौरादित्वात् ङीष् ।) शिरोऽस्थि । इति भरतो द्विरूपकोषश्च ।

कर्क, हासे । सौत्रधातुरयम् । इति कविकल्पद्रुमः । (भा-पर-अक-सेट् ।) कर्कति । इति दुर्गादासः ।

कर्कः पुं (करोति व्याधिं पालयति "कृदाधारार्च्चिकलिभ्यः कः" । उणां ३ । ४० । इति कः । बहुलवचनात् ककारस्येत् संज्ञा ।) शुक्लाश्वः । इत्यमरः । २ । ८ । ४६ । कुलीरः । दर्पणः । (किन्तेऽग्नौ) घटः । कर्कटराशिः । (करोति दहति) अग्निः । इति हेमचन्द्रः शब्दरत्नावली च । कर्कटवृक्षः । इति राजनिर्घण्टः ।

कर्कचिर्भिटी, स्त्री, (कर्कवत् कर्कशा चिर्भिटी वा । कर्कशा वा चिर्भिटी ।) चिर्भिटा । कर्कटीभेदः । इति राजनिर्घण्टः ।

कर्कटः, पुं, (कर्क+अटन् प्रत्ययः ।) वृक्षविशेषः । तत्पर्य्यायः । कर्कः २ स्वादुधात्री ३ क्षुद्रामलकम् ४ कर्कफलम् ५ । * । जलजन्तुविशेषः । काकडा इति भाषा । तत्पर्य्यायः । कर्कटकः २ कुलीरः ३ कुलीरकः ४ सदंशकः ५ पङ्कवासः ६ तिर्य्यग्गामी ७ । (यथाह आर्य्यासप्तशती । ३२२ । "अयमुद्गृहीतबडिशः कर्कट इव मर्कट पुरतः" ।) अस्य गुणाः । स्पष्टविण्मूत्रत्वम् । भग्नसन्धानत्वम् । वायुपित्तनाशित्वञ्च । कृष्णकर्कटगुणाः । बलकारित्वम् । ईषदुष्णत्वम् । अनिलापहत्वञ्च । इति राजनिर्घण्टः । * । पक्षिविशेषः । इति मेदिनी । कारकटिया इति भाषा । पद्मकन्दः । तुम्बी । इति जटाधरः । * । मेषादिद्वादशराश्यन्तर्गतचतुर्थराशिः । स तु पुनर्व्वसुशेषपादेन सह पुष्याश्लेषाभ्यां भवति । अस्य देवता कुलीराकृतिः । स तु पृष्ठोदयः । श्वेतवर्णः । कफप्रकृतिः । स्निग्धः । जलचरः । विप्रवर्णः । उत्तरदिक्स्वामी । बहुस्त्रीसङ्गः । बहुसन्तानश्च । अत्र जातस्य फलम् । कपटमस्य मृदुभाषित्वं मलिनत्वं अप्रवासित्वं अटनशीलत्वञ्च । इति ज्योतिषम् । * ।

जन्मकालीनचन्द्राधिष्ठितराशिफलम् ।

"अतनुतामलनिम्नगतस्तथा
सुतसुगन्धजनाश्रयकेतनः ।
किल नरास्तु कुलीरगते विधौ
वसुमतः सुमतोऽधिमनस्विनः" ॥

इति कोष्ठीप्रदीपः । * । तस्योदये तन्नामकलग्नं भवति । तस्य गणितप्राप्तपरिमाणं यथा । दशाङ्गुलाधिकपञ्चाङ्गुलप्रभे कलिकाताख्यदेशे वर्त्तमानोनविंशायनांशे चत्वारिंशदधिकपञ्चदण्डाः । इति ज्योतिषम् । तत्र जातफलम् ।

"कर्किलग्ने समुत्पन्नो भोगी सर्व्वजनप्रियः ।
मिष्टान्नपानभोगी च जायते स्वजनप्रियः" ॥

इति कोष्ठीप्रदीपः ॥ (नागविशेषः । यथा पुराणम् ।

"अनन्तो वासुकी पद्मो महापद्मस्तु तक्षकः ।
कुलीरः कर्कटः शङ्खश्चाष्टौ नागाः प्रकीर्त्तिताः" ।)

कर्कटकः, पुं (कर्कट एव स्वार्थे कन् ।) कुलीरः । इत्यमरः । १ । १० । २१ ॥ (यथाह सुश्रुतः ।

'कृष्णकर्कटकस्तेषां बल्यः कोष्णोऽनिलापहः ।
शुक्लः सन्धानकृत् सृष्टविण्मूत्रोऽनिलपित्तहा" ।)

कर्कटशृङ्गिका, स्त्री, (कर्कटतुल्यं शृङ्गं यस्याः कर्कटशृङ्गीव स्वार्थे कन् ततष्टापि इत्वम् ।) कर्कटशृङ्गीवृक्षः । इति शब्दरत्नावली ।

("मोचोत्पलं मृणालञ्च यष्टी कर्कटशृङ्गिका ।
गोक्षीरेण द्वितीये च पीता शाम्यति वेदना" ।
इति वृन्दमाले गर्भस्रावचिकित्सा ।)

कर्कटशृङ्गी, स्त्री, (कर्कटस्य शृङ्गमिव दण्डकमिवेत्यर्थः शृङ्गमग्रभागो यस्याः ।) वृक्षविशेषः । काकडाशिङ्गी इति भाषा । तत्पर्य्यायः । कर्कटाख्या २ महाघोषा ३ शृङ्गी ४ कुलीरशृङ्गी ५ चक्राङ्गी ६ कुलिङ्गी ७ कासनाशिनी ८ । इति रत्नमाला ॥ घोषा ९ वनमूर्द्धजा १० चक्रा ११ शिखरी १२ कर्कटाङ्गा १३ कर्कटी १४ विषाणिका १५ कौलीरा १६ चन्द्रास्पदा १७ वक्राङ्गा १८ । अस्या गुणाः । तिक्तत्वम् । गुरुत्वम् । उष्णत्वम् । वायुहिक्कातिसारकासश्वासपित्तास्रनाशित्वञ्च । इति राजनिर्घण्टः ॥

कर्कटाख्या, स्त्री (कर्कटस्याख्यैव आख्याऽस्याः ।) कर्कटशृङ्गीवृक्षः । इति रत्नमाला ॥

कर्कटाक्षः पुं (कर्कटं आक्ष्यते रञ्जते कण्टकमयत्वात् । आ+क्षै+क । कर्कट इति नाम्ना आख्यायते वा ।) चिर्भटः । इति राजनिर्घण्टः ॥

कर्कटाङ्गा, स्त्री (कर्कटाङ्ग+टाप् ।) कर्कटशृङ्गीवृक्षः । इति वैद्यकम् ॥

कर्कटिः स्त्री, (कर्क कटति प्राप्नोति । कट+"सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इति इन् । कर्क परिणामे शुक्लतां घटति गच्छति वा कर्क+घट+इन । शकन्ध्वादित्वात् अलोपे साधुः ।) कर्कटी । इति शब्दरत्नावली । काकुड इति भाषा ॥

कर्कटिनी स्त्री (कर्कटाकाराः सन्त्यस्याः । कर्कट+इन ततो ङीप् ।) राजहरिद्रा । इति राजनिर्घण्टः ॥

कर्कटी, स्त्री, (कर्कं कण्टकं घटति गच्छति । कर्क+घट्+इन् । शकन्ध्वादित्वात् साधुः ततो ङीष् । कर्कटति वा कटे इन ततो ङीष ।) शाल्मलिफलम् । इति मेदिनी ॥ घटः । इति शब्दरत्नावली ॥ देवदालीलता । कर्कटशृङ्गीवृक्षः । एर्व्वारुः । बड़ काँकुड़ इति भाषा । घोटिकावृक्षः । फललताविशेषः । काँकुड इति भाषा ॥ तत्पर्य्यायः । कटुदली २ छर्द्दापनिका ३ पीनसा ४ मूत्रफला ५ त्रपुषा ६ हस्तिपर्णी ७ लोमशकाण्डा ८ मूत्रला ९ बहुकन्दा १० । इति राजनिर्घण्टः । कर्कटाह्वः ११ शान्तनु १२ । इति रत्नमाला ॥ चिर्भटी १३ वालुकी १४ एर्व्वारु १५ त्रपुषी १६ । इति हेमचन्द्रः ॥ अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । तिक्तायास्तु रक्तपित्तनाशित्वम् । कफदोषकारित्वञ्च । पक्वायास्तु मूत्ररोधाश्मनाशित्वम् । इति राजनिर्घण्टः ॥ (तथा च भावप्रकाशे ।

"कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ।
रुच्या पित्तहरा सामा पक्वा तृष्णाग्निपित्तकृत्" ।

अस्याः पाकप्रकारस्तु ।

"सबीजरहिता प्रौढा गुलिकाकारखण्डिता ।
तलिता सुष्ठु तैले तु कर्कटी वाऽवलेहिता ॥
विपाच्य खण्डं घृतदुग्धसार्द्धं
विभावितं वेसनशर्कराभ्याम् ।
एलेन्द्रवासश्च कटुष्णमेतत्
प्रतिक्षणं रोचनमातनोति ।)

कर्कटुः, पुं (कर्क निपातनात् साधुः । कर्कट+मृगय्वादित्वात् कु वा ।) करेटुपक्षी । इति शब्दरत्नावली ॥ करकटिया इति भाषा ॥

कर्कन्धुः, पुं स्त्री, (कर्कं कण्टकं दधातीति । धा+निपातनात् कुः नुम् च ।) कोलिवृक्षः । इत्यमरटीकायां स्वामी ॥ (बदरीफलम् । अस्य पर्य्यायः गुणा यथा भावप्रकाशस्य पूर्व्वखण्डे १ मभागे ॥

"पुंसि स्त्रियाञ्च कर्कन्धुर्बदरी कोलमित्यपि ।
फेनिलं कुवलं घोण्टा सौवीरं बदरं महत् ।
अजप्रिया कुहा कोली विषमोभयकण्टका' ॥

तत्र बदरविशेषाणां लक्षणानि गुणाश्च ।

"पच्यमानं सुमधुरं सौवीरं बदरं महत् ।
सौवीरं बदरं शीतं भेदनं गुरुशीतलम् ॥
बृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम् ।
सौवीरं लघु सम्पक्वं मधुरं कोलमुच्यते ॥
कोलन्तु बदरं ग्राहि रुच्यमुष्णञ्च वातलम् ।
कफपित्तकरञ्चापि गुरु सारकमीरितम् ॥
कर्कन्धुः क्षुद्रबदरं कथितं पूर्व्वसूरिभिः ।
अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक् ॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ।
शुष्कं भेदाग्निकृत् सर्व्वं लघु तृष्णाक्लमास्रजित् ।

क्वचित् सार्व्वोऽपि दृश्यते यथा

'कर्कन्धुकोलबदरमामं पित्तकफावहम् ।
पक्वं पित्तानिलहरं स्निग्धं समधुरं सरम् ॥
पुरातनं तृड्शमनं श्रमघ्नं दीपनं लघु ।
सौवीरं बदरं स्निग्धं मधुरं वातपित्तजित्' ॥

इति सुश्रुते सूत्रस्थाने । ४६ अध्याये ।)

कर्कन्धु पुं स्त्री, (कर्कं कण्टकं दधातीति । धा + 'अन्दूदृम्भूजम्बूकफेलूकर्कन्धूदिधिषूः' । उणां-१ । ९५ । इति कूः निपातनात् साधुः ।) बदरीवृक्षः । इत्यमरः । २ । ४ । ३६ ॥ (यथा भागवते । ३ । ३१ । २ ।

'कललं त्वेकरात्रेण पञ्चरात्रेण बुद्बुदम् । दशाहेन तु कर्कन्धूः पेश्यण्डं वा ततः परम्' ।

बदरशब्देऽस्या विवरणं ज्ञेयम् ॥)

कर्कर त्रि, (कर्क + अरन् ।) कठिनम् । इति मेदिनी ॥

कर्करट, स्त्री (कर्क घूर्णनकालेन हास्यरत भुकाता प्रकाशं ददातीति । कर्क + दा + क ।) घूर्णनक दाक्ष्यापाङ्गवस्त्रम् । तत्पर्यायः । घूर्णखण्डम् २ । इति हारावली । काँकर घुटि इत्यादि भाषा ॥ ("शिलोचयैः कर्करैः प्रियशर्करामय विलीयते" ॥ इति अमरटीका ७ ॥)

कर्कर पुं, (कर्कं हासं प्रतिबिम्बप्रकाशं राति । रा + क । कर्क + अरन् वा ।) दर्पणः । इति मेदिनी ॥ (नागभेदः । इति भारते १ । ३५ । १६ ॥)

कर्कराङ्ग, पुं (कर्करतुल्यम् अङ्गं यस्य ।) कालकण्ठ पक्षी । इति शब्दमाला ॥

कर्कराटु, पुं, (कर्कं हासं रटति प्रकटयतीव । रट + कु । कुण् वा । णिजन्तात् कुवा ।) कटाक्षः । इति जटाधरः ॥

कर्कराटुक, पुं (कर्कं कठिनं कर्कशमिव्यर्थं रटति गीतीति रट + उकञ् ।) करेटुपक्षी । इति शब्दरत्नावली । करकटिया इति भाषा ॥

कर्करान्धुक, पुं (कर्करः कठोरः अन्धुः । अत्यन्तान्धकारतया दुर्दर्शत्वात् । संज्ञायां कन् ।) अन्धकूपः । इति त्रिकाण्डशेषः ॥

कर्कराल पुं स्त्री, (कर्कर कर्कशतया कठिनोऽपि अलति पर्याप्नोति । अल + अच् ।) चूर्णकुन्तलः । इति हेमचन्द्रः ॥

कर्करी, स्त्री, (कर्कं हासं शाम्यप्रकाशवत् निर्मलं सलिलं राति । रा + क + गौरादित्वात् ङीष् ।) गल्वर्यादिपात्रिका । झारी इति भाषा । तत्पर्यायः । आलू १ गलन्तिका २ । इत्यमरः । २ । ९ । ३१ ॥ कलशः ३ आलूः ४ । इति तट्टीका ॥

कर्करीका स्त्री, (कर्करी + स्वार्थे कन् ह्रस्वो न ।) कर्करी । इत्यमरादिकोषः ॥

कर्करेट, स्त्री, (कर्क कर्क इतिशब्दं गलेहस्तमाधाय दूरीकृत्य इत्याकारं रेटते यत्र । रेट + अधिकरणे घञ् ।) गलेहस्ताधानम् । गलाटिपि इति भाषा । तत्पर्यायः । अर्द्धचन्द्रम् २ अङ्गुलिनी रवम् ३ । इति हारावली ॥

कर्करेटु पुं (कर्कं कर्कोतशब्दं वा रेटते भाषते रौति इत्यर्थः । रेट् भाषणे याचने च + बाहुलका दिकात् साधु ।) करेटुपक्षी । इत्यमरः । २ । ५ । १९ करकटिया इति भाषा ।

कर्कश, पुं (कर्कशब्दात् स्वार्थे लोमादित्वात् श ।) काम्पिल्लवृक्षः । इत्यमरः । २ । ४ । १४४ । गुण्डारोचनी इति भाषा । (कम्पिल्लोऽस्य यथा, चरक विमाने ८ अध्याये । "कर्कोटककारवेल्लीकर्कश काकमाचीकारवल्लीत्यादिषु" ।) कासमर्द्दः । इक्षुः । (खनीति छिनत्ति शर्करा तृणं हिंसायां + बाहुलकात् अणेऽपीति विच् । कशति कश् शब्दे इति पचाद्यच् कर्कशासौ कशश्चेति । कर्कं कशति वा ।) खड्गः । इति हेमचन्द्रः ॥

कर्कश: त्रि (कर्कात् लोमादित्वात् श । तत प्राग्वत् छन्दादिभ्यो निर्भ्यादिलार्थे च ।) साहसिकः । कठोरः । (यथा भागवते । ३ । १७ । ११ ।

'ससाध कर्कशैः खुरैः शृङ्गैरुन्मत्तो धरातलम्' ॥) अमसृणः । (यथा रघौ । ३ । ३५ ।

'हरेः कुमारोऽपि कुमारविक्रम सुरद्विपास्फालनकर्कशाङ्गुली' ॥)

दुष्पर्शः । इत्यमरः । ३ । ३ । २१६ ॥ क्रूरः । निर्दयः । इति मेदिनी ॥ (यथा रामायणे । ५ । ४८ । ५ ।

"तस्य तद्वचनं श्रुत्वा राक्षसा कोपकर्कशाः" ॥)

कृपणः । इति विश्वः ॥

कर्कशच्छद पुं, (कर्कशः छदः पत्रं यस्य ।) पटोलः । इति शब्दमाला ॥ शाकोटवृक्षः । शेओडा इति भाषा । इति त्रिकाण्डशेषः ॥

कर्कशच्छदा, स्त्री, (कर्कशः असमृणच्छदो यस्याः ।) कोषातकी । झिङ्गा इति भाषा । दग्धारुहः । इति राजनिर्घण्टः ॥ (झिङ्गाकोऽस्याः विवरणं ज्ञातव्यम् ॥)

कर्कशदल, पुं, (कर्कशं दलं पत्रं यस्य ।) पटोलः । इति रत्नमाला ॥

कर्कशदला, स्त्री (कर्कशं दलं यस्याः ।) दग्धारुहा । इति राजनिर्घण्टः ॥ कोषातकी । झिङ्गा इति भाषा ॥

कर्कशवाक्य, क्ली, (कर्कशं च तत् वाक्यञ्चेति ।) निष्ठुरवचनम् । परुषा वाक् । इति शब्दरत्नावली ॥

कर्कशा स्त्री (कर्कशात् लोमादित्वात् शः तत टाप् च ।) वृश्चिकालीवृक्षः । इति राजनिर्घण्टः ॥

कर्कशिका स्त्री, (कर्कश + संज्ञायां कन् ततष्टाप् अत इत्वम् ।) वनकोलिः । इति रत्नमाला ॥

कर्कशार, क्ली (कर्कं कर्कशं कठिनो वा सारोदधिः सारो यत्र ।) कम्पकम् । दधिसारः । इति हारावली ॥

कर्कार पुं (कर्कं श्वेतवर्णं शौक्ल्यं ऋच्छति प्राप्नोतीति । कर्क + ऋ + बाहुलकात् उण् ।) कुष्माण्डः । इत्यमरः । २ । ४ । १५५ । (अस्य पर्याया गुणाश्च यथा —

"कुष्माण्डी तु भृशं लघ्वी कर्कारुरपि कीर्त्तिता । कर्कारुर्ग्राही शीता रक्तपित्तहरा गुरुः । पक्वा तिक्ताग्निजननी सक्षारा कफवातनुत्" ॥

इति भावप्रकाशस्य पूर्वखण्डे १ मे भागे ॥ अस्यार दोषनाशकगुणभेदोऽपि दृश्यते । तथाच सुश्रुते सूत्रस्थाने ४६ अध्याये ।

"कर्कारुक वातकरं गुरु च कफवातलम् । अलाबु आग्रं चैव शीतलं वातपित्तनुत्" ॥)

कर्कारुक, पुं (कर्कं श्वेतं भोजने विरुचादिनिवारणात् बाहुल्यात् बाल्यान् आरदतीति । कर्क + ऋ + उकञ् । कर्कं हासं हितकरत्वात् आह्लादकरत्वम् ऋच्छति वा ।) कालिन्दवृक्षः । इति हारावली ॥ (अस्य गुणा यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।

"त्रपुषैर्वारुकर्कारुकशीर्षफलानि च । गवेधुम्भिघातानि स्वादूनि कफवन्ति च । स्तम्भनानि सुशीतानि वातनाशकराणि च" ॥)

कर्कि, पुं, (कर्क + इन् ।) कर्कटराशिः । इति ज्योतिषम् ॥

कर्केतन, क्ली पुं (कर्कं शुभ्रं तनोतीति । कर्क + तन् + अच् । संज्ञायां अलुक् ।) रत्नविशेषः । तद्लक्षणादि यथा, गारुडे ७५ अध्याय ॥

सूत उवाच ।

'वायुर्नखान् दैत्यपतेर्गृहीत्वा
चिक्षेप सम्यग् वनेषु हृष्टः ।
ततः प्रसूतं पवनोपपन्नं
कर्केतनं पूज्यतमं पृथिव्याम् ॥
वर्णेन तद्रुधिरसोममधुप्रकाशम्
आताम्रपीतदहनोज्ज्वलितं विभाति ।
नीलं पुनः शकलितं परुषं विभिन्नं
व्याध्यादिदोषकरणेन न तद्विभाति ॥
स्निग्धाः विशुद्धाः समरागिणश्च
आपीतवर्णा गुरवो विचित्राः ।
त्रासव्रणव्याधिविवर्जिताश्च
कर्केतनास्ते परमाः पवित्राः ॥
पत्रेण काञ्चनमयेन तु वेष्टयित्वा
हुत्वे गतेऽपि हुतमेतदतिप्रकाशम् ।
रोगप्रणाशनकरं कलिनाशनञ्च
आयुष्करं कुलकरं सुखदञ्च ॥
एवंविधं बहुगुणं मणिमावहन्ति
कर्केतनं शुभमणं श्रुतये नरा ये ।
ते पूजिता बहुधना बहुबान्धवाश्च
नित्योज्ज्वला प्रमुदिता अपि ते भवन्ति ॥
एकोऽपरश्च शिखिमाकुलनीलभासः
प्रस्थानरागमुषिता कलुषा विरूपा ।
तेजोऽतिदीप्तिकुलपद्धतिविहीनवर्णा
कर्केतनस्य सदृशं वपुरादधाति ॥
कर्केतनं यदि परीक्षितवर्णरूपं
प्रत्यग्रभास्करदिवाकरसुप्रकाशम् ।
तस्योपमानमखिलाद्विदा मणिसा
मूल्यन्तु मूल्यमुदितं तुलितस्य काम्यम्' ॥

हस्ते गतेऽप्यहुतमेतदतिप्रकाशमित्यत्र तत्र यत्र कृतके भवति प्रकाशमिति पुस्तकान्तरे पाठः ॥

कर्कोट, पुं (कर्क + ओटप्रत्ययः ।) नागराजविशेषः । इति त्रिकाण्डशेषः ॥

कर्कोटक पुं (कर्कं कण्टकमयत्वात् कठोरं अर्त्ति प्राप्नोति सवर्णतया कायति प्रकाशते । पृषोदरादित्वात् आकारादेशे साधुः ।) बिल्ववृक्षः । (कर्कोट + संज्ञायां कन् ।) अष्टकुलनागराज विशेषः । इति मेदिनी ॥ (यथा, महाभारते । १ । आस्तीके । ३५ । ५ ।

"ऐरावतस्तक्षकश्च कर्कोटकधनञ्जयौ" ॥)

वृक्षः । इति राजनिर्घण्टः ॥ फलस्ताविशेषः ॥ काँकरोल इति भाषा । तत्पर्य्यायः । किलासघ्नः २ तिक्तपत्रः ३ सुगन्धकः ४ । इति हेमचन्द्रः ॥ अस्य गुणाः । शुक्रकफपित्तनाशित्वम् । रुचिकारित्वञ्च । इति राजवल्लभः ॥ ('तद्वत् कर्कोटकं प्रोक्तम्' । इति सुश्रुते । सूत्रे । ४६ अध्याये ॥ विशेषस्त्वस्य कर्कोटकशब्दे प्रदर्शितः ॥)

कर्कोटकी, स्त्री, (कर्कोटक + गौरादित्वात् ङीष् ।) पीतघोषा वृक्षः । इति रत्नमाला ॥ (अस्याः पर्य्यायमाह चरकः कल्पे ४ अध्याये ।
'कर्कोटकी कटुफला महाजालिनिरेव च ।
धामार्गवस्य पर्य्याया राजकोषातकी तथा' ॥
विशेषविवरणमस्या धामार्गवशब्दे ज्ञातव्यम् ।) फलस्ताविशेषः । काँकुड़ इति भाषा ॥ एतद्‌फलगुणपाकादि उक्तं वैद्यके । यथा,—
"कर्कोटकीफलं कुष्ठहृल्लासारुचिनाशनम् ।
श्वासकासज्वरान् हन्ति कटुपाकञ्च दीपनम् ॥
इषद्विभिन्नमरिचैः परिपूर्णगर्भं
तैलेन रञ्जितसुसैन्धवमातयोगम् ।
बाह्लीकयुक्तपयसा विहिताभिषेकं
कर्कोटकीफलमिदं रुचिकृत्तदुक्तम्" ॥)

कर्कोटिका, स्त्री, (कर्कोट + स्वार्थे कन् ततष्टाप् अत इत्वञ्च ।) कर्कोटकः । काँकरोल इति भाषा । तत्पर्य्यायः । कुमारुढी २ कर्कोटी ३ । तत्फलम् कारवेल्लकतुल्यगुणम् । इति राजनिर्घण्टः ॥

कर्चरिका, स्त्री, क सुखं यथा तथा चर्च्यते उपभुज्यते यद्वा कं जलं चूर्ण्यते चूर्णीक्रियतेऽत्र । क + चर + वा चुर् + पृषोदरात् रेफादेशे कनादिभिः साधुः ।) पिष्टकविशेषः । इति पाकराजेश्वरः । कचुरी इति भाषा ॥

कर्चूर, स्त्री, (कच + खर्ज्जूरादित्वात् ऊरः । पृषोदरादित्वात् ककारस्य चकारे साधुः ।) कर्ब्बुरम् । स्वर्णम् । कर्चुरमपि पाठः । इत्यमरटीका ॥

कर्चूर, पुं, (कर्च्च + उर । पृषोदरादित्वात् साधुः ।) वृक्षविशेषः । कचूर इति भाषा । तत्पर्य्यायः । द्राविडः २ काल्यः ३ दुर्लभः ४ गन्धमूलकः ५ वेधमुख्यः ६ गन्धसारः ७ जटालः ८ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कफकासगलगण्डादिदोषनाशित्वम् । मुखवैशद्यजनकत्वञ्च । इति राजनिर्घण्टः । (यथा चरके सूत्रे २७ अध्याये ।
रोचनो दीपनो हृद्यः सुगन्धिस्त्वग्विवर्ज्जितः ।
कर्चूरः कफवातघ्नः श्वासहिक्काऽर्शसां हितः" ॥)

कर्चूरक, पुं, (कर्चूरं स्वर्णमिव कायति प्रकाशते । कर्चूर + कै + क । कर्चूर + स्वार्थे कन् वा ।) कर्चूरकः । इत्यमरटीकायां स्वामी । काँचा हलुद इति भाषा ॥

कर्च्च दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) कर्च्चति । इति दुर्गादासः ॥

कर्ण क भिदि । इति कविकल्पद्रुमः ॥ (अदन्तचुरा-पर-सक-सेट् ।) कर्णयति कर्णापयति । आङ्पूर्व्वोऽयं श्रवणे । देवाकर्णय येन येन सहसा यद्यत् समासादितमिति । उपसर्गास्तदर्थानां द्योतका एव न तु वाचकाः । केवलधातोरनेकार्थत्वेऽवगमकत्वे उपसर्गपूर्व्वस्यान्यार्थो धातोरेव कल्प्यते लाघवात् । क्वचिदुपसर्गा धात्वर्थमेवानुवर्त्तन्ते । तथा च ।
"धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्त्तते ।
तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा" ॥
इति विस्तरः । क्रमेणोदाहरणानि । आदत्ते गृह्णातीत्यर्थः । प्रसूयतेऽत्र प्रसव एव धात्वर्थः । प्रशब्दस्तमेवार्थं द्योतयति । प्रणमति प्रकर्षेण नमतीत्यर्थः । केचित्तु अनर्थकोऽन्य प्रयुज्यते । इति चतुर्थचरणं पठन्ति तच्चिन्त्यम् । इति दुर्गादासः ॥

कर्ण, पुं, (कीर्य्यते क्षिप्यते । शब्दो वायुना यत्र । किरति शब्दग्रहणेन मनसि सुखं क्षिपति इति वा । कॄ विक्षेपे + "कॄवृजॄसीति" नन् । उणा ३ । १० । यद्वा कर्ण्यते आकर्ण्यते अनेन । कर्ण + करणे अप् ।) श्रवणेन्द्रियम् । काण इति भाषा । तत्पर्य्यायः । शब्दग्रहः २ श्रोत्रम् ३ श्रुतिः ४ श्रवणम् ५ श्रवः ६ । इत्यमरः । २ । ६ । ९४ ॥ श्रोत्रम् ७ । इति तट्टीका ॥ वचोग्रहः ८ । इति राजनिर्घण्टः ॥
(यथा रघुः । १ । ९ ।
"तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः" ॥)
कर्णस्तु श्रवणेन्द्रियस्य गोलकस्थानम् । तत्र श्रोत्रमिन्द्रियम् । तत्तु कर्णशष्कुल्यवच्छिन्ननभोभागः । तस्य देवता दिक् । विषयः शब्दः । इति श्रीभागवतम् ॥ युधिष्ठिराग्रजः । स तु कुन्त्याः कन्याकाले सूर्य्यौरसजातः । एतेन कानीन इत्याख्ययापि प्रसिद्धः । अस्य जन्मादिविवरणन्तु महाभारते १ । १११ अध्याये द्रष्टव्यम् । तत्पर्य्यायः । राधेयः २ वसुषेणः ३ अर्कनन्दनः ४ घटोत्कचान्तकः ५ चाम्पेशः ६ सूतपुत्रकः ७ । इति त्रिकाण्डशेषः ॥ चम्पाधिपः ८ अङ्गराट् ९ राधासुतः १० अर्कतनयः ११ । इति हेमचन्द्रः ॥ अङ्गाधिपः १२ । इति भूरिप्रयोगः ॥ (यथा महाभारते । १ । सम्भवपर्व्वणि १११ । ३१ ।
प्रावृणोत् तस्य कवचं वसुषेण इति क्षितौ ।
कर्णो वैकर्त्तनश्चैव कर्म्मणा तेन सोऽभवत्' ॥
अयं हि दातृणामग्रगण्यः । अस्य किमपि नादेयमासीत् । अनेनैव सहजमपि स्वदेहकवचं शरीरात् समुत्कृत्य ब्राह्मणरूपधारिणे याचमानाय इन्द्राय दत्तवान् तथा उपोषितद्विजरूपधारिणं विष्णुं स्वपुत्रमांसेन प्रीणयामास । एतद्विवरणन्तु जैमिनिभारते सम्यग्द्रष्टव्यम् । अयं परशुरामशिष्यो महावीर्य्यो भारतयुद्धे दुर्य्योधनपक्षावलम्बी आसीत् । अष्टादशदिवसव्यापिनि भारतसंग्रामे भीष्मदेवः सेनापतिपदमधिरुह्य दशाहं यावत् युद्धमकरोत् । तत् शरशय्यां गते तस्मिन् द्रोणस्तु दिनानि अयुध्यत । एतस्मिन्नेव समयेऽयं कर्णोऽपि स्वसेनावलमादाय पाण्डवैः सह युयुधे । ततो गतजीविते द्रोणे सैनापत्यमधिरूढोऽसौ दिवसद्वयं वियुध्य शल्यसहायेनार्जुनेन निहत आसीत् ॥) सुवर्णालिवृक्षः । इति मेदिनी ॥ (धृतराष्ट्रशतपुत्रेषु एकः पुत्रः । यथा, महाभारते १ । ११७ । ३ ।
'दुर्म्मर्षणो दुर्म्मुखश्च दुष्कर्णः कर्ण एव च' ।)
नौकायाः क्षेपणीविशेषः । (दाँड़ इति भाषा ॥ यथा रामायणे ६ । २९ । ३ ।
"हतप्रवीरा विध्वस्ता निरुत्साहा निरुद्यमा ।
सेना भवति संग्रामे हतकर्णेव नौर्जले" ॥
कर्णः अस्त्यस्य प्राशस्त्येन । अर्श आद्यच् । दीर्घकर्णे त्रि यथा यजुर्व्वेदे । ७ । ४ । ४० ।
"खड्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभः" ॥)

कर्णकण्डु, पुं, (कर्णस्य कर्णे वा जाता कण्डुः ।) कर्णरोगविशेषः । तस्य निदानम् । 'मारुतः कफसंयुक्तः कर्णकण्डूं करोति च' । इति माधवकरः ॥
("कफेन कण्डूः प्रचितेन कर्णयो
र्भृशं भवेत् स्रोतसि कर्णसंज्ञिते' ।
इति सुश्रुते उत्तरतन्त्रे २० अध्याये ।
चिकित्सास्य यथा ।
"विधिश्च कफहृत्सर्व्वः कर्णकण्डूमपोहति" ।
इति तत्रैवोत्तरतन्त्रे २१ अध्याये ॥)

कर्णकीटी, स्त्री, (कर्णस्थितः कर्णस्य भेदकः क्षुद्रकीटो कीटविशेषः । यद्वा कर्णयति भिनत्ति तादृशी कीटी । कर्ण + अच् । ततः कीटः कीटी स्वार्थे ङीष् ततः कर्म्मधारयः ।) कीटविशेषः । कानकोटारी केन्नइ इत्यादि भाषा । तत्पर्य्यायः । कर्णजलौका २ शतपदी ३ । इति हेमचन्द्रः ॥ चित्राङ्गी ४ । इति राजनिर्घण्टः ॥ एधिका ५ कर्णदुन्दुभिः ६ । इति शब्दमाला ॥

कर्णक्ष्वेड, पुं, (कर्णस्य कर्णे जातः क्ष्वेडो वा ।) कर्णरोगविशेषः । (तस्य लक्षणम् ।
"वायुः पित्तादिभिर्युक्तो वेणुघोषोपमं स्वनम् ।
करोति कर्णयोः क्ष्वेडं कर्णक्ष्वेडः स उच्यते" ॥
इति माधवकरः ॥ कर्णरोगशब्देऽस्यापि विस्तृतसनिदानचिकित्सितादिकं ज्ञेयम् ॥)

कर्णगूथ, स्त्री, (कर्णस्य कर्णे स्थितं कर्णजातं वा गूथं मलम् ।) कर्णमलम् । इति हारावली ॥ कानेर खलि इति भाषा ॥

कर्णगूथक, पुं (कर्णगूथ + संज्ञायां कन् । कर्णगूथमिव कायति वा । कै + क ।) कर्णरोगविशेषः । तस्य निदानम् । यथाह माधवकरः ।
'पित्तोष्मशोषितः श्लेष्मा जायते कर्णगूथकः' ॥
('विशोषिते श्लेष्मणि पित्ततेजसा
यथा भवेत् स्रोतसि कर्णगूथकः' ।
इति सुश्रुते उत्तरतन्त्रे २० अध्याये ।
चिकित्साऽस्य वैद्यकचक्रपाणिसंग्रहे ॥ यथा
'स्नेहयित्वा तु तैलेन स्वेदेन प्रविलाप्य च ।
शोधयेत् कर्णगूथन्तु भिषक् सम्यक् शलाकया" ॥)

कर्णजलूका, स्त्री, (कर्णस्य कर्णे वा जलूका इव ।) कर्णकीटी । इति शब्दरत्नावली ॥

कर्णजलौका, स्त्री, (कर्णे जलौकेव ।) शतपदी । इत्यमरः । २ । ५ । १३ ॥

कर्णजलौका, [स्] स्त्री, (कर्णे जलौका इव ।) कर्ण-

कर्णीका । इत्यमरटीकायां भरतः ॥

कर्णमूल, क्ली, (कर्णस्य मूलम् । "तस्य पाकमूले" ५ । २ । २४ इत्यादिना जाहच ।) कर्णमूलम् । इति व्याकरणम् ॥

कर्णजित्, पुं, (कर्णं जितवान् । कर्ण + जि + क्विप् भूते वर्त्तमाने च इति भूते क्विप् तुगागमश्च ।) अर्ज्जुनः । इति हेमचन्द्रः ॥

कर्णदर्पण, पुं, (कर्णे दर्पण इव ।) ताडङ्कनामकर्ण भूषणम् । इति त्रिकाण्डशेषः । कानतड़का इति भाषा ॥

कर्णदुन्दुभि, स्त्री, (कर्णे कर्णाभ्यन्तरे प्रविश्य ध्वनि जनकतया दुन्दुभिरिव ।) कर्णकीटी । इति शब्द माला ॥

कर्णधार, पुं, (कर्णं धरति धारयति वा । कर्ण + धृ + "कर्म्मण्यण्" ३ । २ । १ इति अण् धारयतेरच् वा ।) नाविकः । इत्यमरः । १ । १० । १२ ॥ कान्डारि माझि इत्यादि भाषा ॥ (यथा हितोपदेशे । ३ । ४ ।
'यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा ।
अकर्णधारा जलधौ विप्लवेतेह नौरिव' ॥)

कर्णपाली, स्त्री, (कर्ण पालयति स्त्रीयोऽलङ्कारेण अलीव शोभां सम्पादयतीति । कर्ण + पाल + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् । गौरा दित्वात् ङीष् ।) कर्णान्दुः । इति हारावली । कानबाला इति भाषा ॥

कर्णपिशाची, स्त्री, (कर्णे स्वर्णेन पिनष्टीति । कर्ण + पिश + क्विप् । कर्णपिट् तत्र आचामति अश्नाति ... इति सङ्क्षेपेण । ततः आ + चि + क्विप् ... ङीष् च ।) देवीविशेषः । तन्मन्त्रादि यथा, तन्त्रान्तरे ।
"ककारं ... सहिता ...
... ।
... ।
..." ॥
अस्यार्थः । कस्य ... ।
... । ... ।
... । ... स्वाहा ।
एतेन ॐ कर्णपिशाचि वदातीतानागतं ह्रीं स्वाहा ॥ * ॥ मन्त्रान्तरम् ।
"... ।
... स्वाहेति मन्त्रस्य कथिता लिपे" ॥
... कर्णपिशाचि ... स्वाहा ॥ * ॥ ध्यानं यथा,
'... ।
... ।
... ।
... ' ॥
अथ पूजा ।
"... ।
... " ॥
... ।
... सिद्धिं कुरु कुरु स्वाहेति इत्यन्तेन ... ।

"रामचन्द्रमन्त्रकर्णपुष्पादिकञ्च यत् ।
अस्तु कुरु देवेशि स्वाहेति प्रोच्यते जले" ॥
पूर्व्वाह्णे किञ्चिन्मात्रं मध्याह्ने ... निशा
मिषं भुक्त्वा रात्रावपि तत मन्त्रं जपेत् । अन्यत्
किञ्चिन्न भोक्तव्यं ताम्बूलादिकं विना । ... दशाय
तमन्त्रम् । ॐ ... कर्णपिशाचि ... ह्रीं
स्वाहा । एवं क्रमेण ... पुरश्चरणं कृत्वा
दशांशं होमयेत् । तदभावे दशांशं जपं कृत्वा
... । ... लिखित्वा तदो
परि इष्टदेवतां पूजयेत् ॥ * ॥
... ।
... सिद्धिर्भविष्य
तीति ज्ञात्वा तथाविधमाचरेत् ॥ * ॥
मन्त्रान्तरम् । "... कर्णपिशाचि मे
कर्णे कथय हुं फट् स्वाहा' । इति प्रदीपतैल
पादयोर्दत्त्वा रात्रौ ... जपेत् । तत सम्यक्
भवति । ... ॥ * ॥ ...
... स्वाहा । ...
... ।
... ।
... सिध्यति ।
सिद्धिस्तु ... ।
... भूतभविष्यदादिकं वदति ।
इति कृष्णानन्दकृततन्त्रसारः ॥

कर्णपुष्प, पुं, (कर्णमस्तु ... पुष्पं यस्य । यद्वा कर्णभूषणार्थं पुष्पं यस्य ।) मोरटलता । इति राजनिर्घण्टः ॥

कर्णपू, [र] स्त्री (कर्णस्य ... । ... ।) ... । तस्य ... । ... इति हेमचन्द्रः ॥

कर्णपूर, पुं, (कर्ण पूरयति अलङ्करोतीति । कर्ण + पूर् + उपपदे ... इति अण् ।) शिरीषवृक्षः । नीलोत्पलम् । अशोकः । इति मेदिनी ॥ (यथा अमरुशतके १ ।
"... ।
... ।
... ।
... " ॥)
अशोकवृक्षः । इति राजनिर्घण्टः ॥

कर्णपूरक, पुं, (कर्ण पूरयति अलङ्करोति । कर्ण + पूर + ण्वुल् । यद्वा कर्णपूर स्वार्थे कन् ।) शिरीष वृक्षः । नीलोत्पलम् । अशोकवृक्षः । ... कर्णपूरक ... ।) कदम्बवृक्षः । इति राज निर्घण्टः ॥ (कर्णपूरशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कर्णप्रतिनाह, पुं (कर्णे ... प्रतिनाहः रोग विशेषः ।) कर्णरोगविशेषः । तस्य लक्षणं यथा,
"... ।
... ।
... ।
... " ॥

इति माधवकरः ॥ (अस्य चिकित्सा यथा,—
"अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत्
ततो विरिक्तशिरसः ... समाचरेत् ॥
इति वैद्यकचक्रपाणिसंग्रहे कर्णरोगाधिकारे ॥)

कर्णफल, पुं (कर्ण ... यस्य ।) मत्स्यविशेषः कानफल माछ इति भाषा ॥ अस्य गुणाः । ...
... । इति राजवल्लभः ॥

कर्णमल, क्ली (कर्णस्य मलं ... ।) ... । ... २ । इति हारावली ॥

कर्णमुकुर, पुं (कर्णे मुकुरः दर्पण इव ।) ताडङ्क नामकर्णाभरणम् । इति भूरिप्रयोगः ॥

कर्णमोटी, स्त्री, (कर्ण ... मोटयति ... । यद्वा ... विशेषं मोटयतीति । कर्ण + मुट् + इन् वा ङीप् ।) चामुण्डादेवी । इति हेमचन्द्रः ॥

कर्णरोग, पुं, (कर्णस्य कर्णे वा रोगः ।) श्रवणव्याधि । यथा । अथ कर्णरोगाधिकारः ।
तत्र कर्णरोगाणां नामानि माधव आह
'कर्णशूलं प्रणादश्च बाधिर्य्यं क्ष्वेड एव च ।
कर्णस्रावः कर्णकण्डूः कर्णगूथस्तथैव च ॥
प्रतिनाहो ... ।
... ॥
... ।
... रोगा अष्टाविंशतिरीरिताः" ॥ * ॥
तेषु कर्णशूलस्य ... ।
"समीरणः श्रोत्रगतोऽन्यथा चरन्
... ।
करोति दोषैश्च यथास्वमावृतः
स कर्णशूलं कथितो दुराचरः" ॥
... ।
... ।
... ।
... ॥ * ॥
कर्णशूलस्य ... ।
"... ।
... कर्णशूले ... " ॥ * ॥
... ।
"... ।
... " ॥ * ॥
... ।
'... ।
... ' ॥ * ॥
... ।
'... ' ॥
... ।
"... ।
... ।
... ।
... ।
... ।
... ।

कर्णस्रोतस पित्तादियुक्तेन वातेन अत्यर्थं तत्र निश्वेन वेणुघोषमिव शृणोतीति भेदः ॥ ० ॥

कर्णस्रावमाह ।

'शिरोऽभिघातादथवा निमज्जतो
जले प्रपाकादथवापि विद्रधेः ।
स्रवेद्धि पूयं श्रवणोऽनिलार्दितः
स कर्णसंस्राव इति प्रकीर्त्तितः ' ॥

पूयमित्युपलक्षणं जल रसञ्च स्रावयेत् ॥
श्रवणाब्द पुलिङ्गोऽप्यस्ति ॥ ० ॥ कर्णकण्डूमाह ।
'मारुतः कफसंयुक्तः कर्णे कण्डूं करोति हि ॥'॥

कर्णगूथमाह ।

पित्तोष्मशोषितः श्लेष्मा कुरुते कर्णगूथकम्" ॥
कर्णगूथ इत्यस्मात् स कर्णगूथव्याधिः ॥ ० ॥

प्रतिनाहमाह ।

स कर्णगूथो द्रवतां यदा गतो
विलायितो घ्राणमुखं प्रपद्यते ।
तदा स कर्णप्रतिनाहसंज्ञितो
भवेद्विकारः शिरसोऽर्द्धभेदकृत ' ॥

घ्राणञ्च मुखञ्च एकत्व द्वन्द्वे । शिरसोऽर्द्धभेदकृत अर्द्धावभेदकाख्यशिरोरोगकृत ॥ ॥

कृमिकर्णमाह ।

यदा तु मूर्च्छन्त्यथवापि जन्तवः
सृजन्त्यपत्यान्यथवापि मक्षिकाः ।
तदञ्जनत्वात् श्रवणो निरुध्यते
भिषग्भिराद्यैः कृमिकर्णको गदः ' ॥

तदञ्जनत्वात् कृमिलक्षणत्वात् ॥ श्रवणे कृमिकर्णको गदो निरुध्यत इत्यन्वयः ॥ ० ॥

पतङ्गादिषु कर्णप्रविष्टेषु लक्षणमाह ।

पतङ्गाः शतपद्यश्च कर्णस्रोतः प्रविश्य हि ।
अरतिं व्याकुलत्वञ्च भृशं कुर्वन्ति वेदनाम् ॥
कर्णो निस्तुद्यते तस्य तथा फरफरायते ।
कीटे चरति रुक् तीव्रा निस्पन्दे मन्दवेदना' ॥
निस्पन्दे निश्चले ॥ ० ॥ द्विविधकर्णविद्रधिमाह ।

"क्षताभिघातप्रभवस्तु विद्रधि-
र्भवेत्तथा दोषकृतोऽपरः पुनः ।
सरक्तपीतारुणमस्रमास्रवेत्
प्रतोदधूमायनदाहचोषवान् ॥

दोषजश्चाघातजश्चेत्यर्थः तयोः ० याप्यत्व जलादेयम् ॥
पय आयासमिदम् ॥ ॥ कर्णपाकमाह ।
कर्णपाकस्तु पित्तेन कोथविक्लेदकृद्भवेत ' ।
कोथः पतिभावः । क्लेदः आर्द्रता ॥ ० ॥

पूतिकर्णमाह ।

'कर्णविद्रधिपाकाद्वा सर्वांश्चा वारिपूरणात ।
पूयं स्रवति यत्र पूति स ज्ञेयः पूतिकर्णकः ॥ ० ॥

कर्णस्रावाद्भेदायमाह ।

यत्नतः नियमेन पूति यथा स्यादेव स्रवति ॥ ० ॥
कर्णगतानां शोफार्बुदार्शसां लक्षणान्याह ।
"कर्णशोफार्बुदार्शांसि जानीयादुक्तलक्षणैः ' ॥
कर्णशोफाश्च चत्वारो वातपित्तकफरक्तजाः ।
एवमर्शोऽपि चतुर्विधम् । अन्येषां शोफानामत्र नाशाशासम्भव आधारप्रभावात् ॥ अर्बुदं सप्तविधम् । वातपित्तकफरक्तमांसमेदःशिराजम् ॥

एते कर्णरोगा अष्टाविंशति सुश्रुतोक्ता उक्ताः ॥ ॥
इदानीं चरकोक्तकर्णरोगचतुष्टयं वातपित्तकफसन्निपातकृतमाह । तत्र वातजमाह ।

"नादोऽतिरुक् कर्णमले तु शोषः
स्रावस्तनुश्चाश्रवणञ्च वातात्" ॥*॥

पित्तजमाह ।

शोथः सरागो दरणं विदाहः
सपीतपीतस्रवणञ्च पित्तात' ॥ ० ॥

कफजमाह ।

वैश्रुत्य कण्डूः स्थिरशोथशुक्ल
स्निग्धस्रुतिस्वल्परुजः कफाच्च ॥
वैश्रुत्यं अन्यथा श्रवणम् ॥ ॥

त्रिदोषजमाह ।

सर्वाणि रूपाणि च सन्निपातात
स्रावश्च तत्राधिकदोषवर्णः ॥*॥

कर्णपाल्याः कर्णावयवत्वात तद्विकारमप्यत्रैवाह ।
तत्र सनिदानं परिपोटकलक्षणमाह ॥
सौकुमार्य्यात चिरोत्सृष्टे सहसैवातिवर्द्धिते ।
कर्णशोथो भवेत पाल्यां सरुजः परिपोटवान ॥
कृष्णारुणनिभः स्तब्धः स वातात् परिपोटकः" ॥ ० ॥

उत्पातमाह ।

' गुर्व्वाभरणसंयोगात ताडनात घर्षणादपि ।
शोथः पाल्यां भवेत् श्यावो दाहपाकरुजान्वितः ॥
रक्तो वा रक्तपित्ताभ्यामुत्पातः स गदः स्मृत ' ॥*॥

उन्मन्थकमाह ।

कर्णं बलाद्वर्द्धयतः पाल्यां वायुः प्रकुप्यति ।
कफं सङ्गृह्य कुरुते शोथं स्तब्धमवेदनम् ॥
उन्मन्थकः सकण्डूको विकारः कफवातजः " ।
अवेदनं इषद्वेदनम् । ० ॥ दुःखवर्द्धनमाह ।
'संवर्द्ध्यमाने दुर्विद्धे कण्डूदाहरुजान्वितः ।
शोथो भवति पाकश्च त्रिदोषो दुःखवर्द्धन " ॥
संवर्द्ध्यमाने दुर्विद्धे कर्णे इति शेषः ॥ ० ॥

परिलेहिनमाह ।

कफासृक्कृमयः क्रुद्धाः सर्षपाभा विसर्पिणः ।
कुर्व्वन्ति पिडकाः पाल्यां कण्डूदाहसमन्विताम ॥
कफासृक्कृमिसम्भूतः स विसर्पान्वितस्ततः ।
लिह्यात सशष्कुलीं पालीं परिलेही स च स्मृत "॥
स पीडकात्मकः परिलेहिसंज्ञो गदः । लिह्यात् विनाशीकुर्य्यात ॥ ० ॥

अथ कर्णरोगाणां चिकित्सा ।

कर्णशूले कर्णनादे बाधिर्य्ये क्ष्वेड एव च ॥
चतुर्ष्वपि च रोगेषु सामान्यं भेषजं स्मृतम् ।
शृङ्गवेरञ्च मधु च सैन्धवं तैलमेव च ।
कदुष्णं कर्णयोर्धार्य्यमेतत स्याद्वेदनापहम्" ॥ १ ॥
लशुनार्द्रकशिग्रूणां वारुण्या मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे' ॥
वारुणी वरुणः ॥ २ ॥
' अश्वत्थपत्रखल्लं वा विधाय बहुसर्पिषा ।
तैलाक्तमङ्गारपूर्णं निदध्याच्छ्रवणोपरि ।
यत्तैलं च्यवते तस्मात् खल्लात् तत् ...
सुखोष्णं तद्रसं कर्णे प्रक्षिपेच्छूलशान्तये' ॥ ३ ॥
'अर्कस्य पत्रं परिणामपीत

माज्येन लिप्तं शिखियोगतप्तम् ।
आपीड्य तस्याम्बुसुखोष्णमेव
कर्णे निषिक्तं हरतेऽतिशूलम्' ॥ ४ ॥

तीव्रशूलातुरे कर्णे सशब्दे क्लेदवाहिनि ।
छागमूत्रं प्रशंसन्ति कोष्णं सैन्धवसंयुतम् ॥ ५ ॥
तैलं श्योनाकमूलेन मन्देऽग्नौ विधिना शृतम् ।
हरेदाशु त्रिदोषोत्थं कर्णशूलं प्रपूरणात ॥ ६ ॥
हिङ्गुसैन्धवशुण्ठीभिस्तैलं सर्षपसम्भवम ।
विपक्वं हरतेऽवश्यं कर्णशूलं प्रपूरणात ॥ ७ ॥
कर्णशूले कर्णनादे बाधिर्य्ये क्ष्वेड एव च ।
पूरणं कटुतैलेन हितं वातघ्नमौषधम् ॥ ८ ॥
शिखरीक्षारजलेन तत्कृतकल्केन साधितं तैलम ।
अपहरति कर्णनादं बाधिर्य्यञ्चापि पूरणात ' ॥
शिखरी अपामार्गः ॥ ९ ॥
'गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत ।
सजलं सदुग्धञ्च तद्बाधिर्य्यहरं परम्" ॥
क्षीरमात्र ग्राह्यम् । बिल्वतैलम् ॥ १० ॥
"कर्णस्रावे पूतिकर्णे तथैव कृमिकर्णके ।
सामान्यं कर्म कुर्व्वीत योगान वैशेषिकानपि ॥ ११ ॥
स्वर्जिकाचूर्णसंयुक्तं बीजपूररसं क्षिपेत् ।
कर्णस्रावरुजा दाहास्तेन नश्यन्त्यसंशयम् ॥ १२ ॥
आम्रजम्बूप्रवालानां मधुकस्य वटस्य च ।
एभिस्तु साधितं तैलं पूतिकर्णगदं हरेत ॥ १३ ॥
जातीपत्ररसे तैलं विपक्वं पूतिकर्णजित् ॥ १४ ॥
स्पष्टं रसाञ्जनं नार्य्याः क्षीरक्षौद्रेण संयुतम् ।
प्रशस्यते चिरोत्थे तत् सस्रावे पूतिकर्णके ॥ १५ ॥
कुष्ठहिङ्गुवचादारुशताह्वाविश्वसैन्धवैः ।
पूतिकर्णापहं तैलं वस्तमूत्रेण साधितम्" ॥
कुष्ठादितैलम ॥ १६ ॥
"शम्बूकस्य तु मांसेन कटुतैलं विपाचयेत् ।
तस्य पूरणमात्रेण कर्णनाडी प्रशाम्यति" ॥
शम्बूकाद्यं तैलम् ॥ १७ ॥

' सूर्य्येण गन्धकशिलारजनीभवेन
सुश्वेतकेन कटुतैलपलाष्टके तु ।
धत्तूरपत्ररसतुल्यमिदं विपक्वं
नाडीं जयेच्चिरभवामपि कर्णजाताम् ' ॥

सूर्य्यं ताम्रम् । शिला तैलम् ॥ १८ ॥
'कृमिकर्णविनाशाय कृमिघ्नीं कारयेत् क्रियाम् ।
वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च ॥ १९ ॥
पूरणं हरितालेन गव्यमूत्रयुतेन च ।
धूपने कर्णदौर्गन्ध्ये गुग्गुलुः श्रेष्ठ उच्यते ॥ २० ॥
चिकित्सा कर्णशोफानां तथा कर्णार्शसामपि ।
कर्णार्बुदानां कुर्व्वीत शोफार्शोऽर्बुदवद्भिषक् ॥ ॥
अथ कर्णपालीविकाराणां चिकित्सा ।
' पाल्यामशोषे कुर्य्यात् वातकर्णवत क्रियाम् ।
स्वेदयेत्प्रलेपाच्च शिरां संवर्द्धयेत्तिलैः ॥ १ ॥
शताह्वरीवाजिगन्धापयस्यैरण्डजीवकैः ।
तैलं विपक्वं सक्षीरं पाल्यां संवर्द्धयेत् सुखम् ' ॥
पयस्या क्षीरकाकोली । शतावरीतैलम् ॥ २ ॥
'जीवनीयस्य कल्केन तैलं दुग्धेन पाचयेत ।
चिकित्सेत्तेन तैलेन स्नातो परिपोटकम् ॥ ३ ॥
शीतलैपैर्जलौकाभिस्तथोत्पात समुपाचरेत् ॥ ४ ॥

वल्मिकीसुरसोन्मत्त गोधाकृष्णतान्वितम् ।
तैल विपक्वमभ्यङ्गाद् दुर्नाम नाशयेद्ध्रुवम् ॥ ५ ॥
दुग्धवृक्षस्य शिफा कर्षमात्रविल्वपत्रैः ।
सर्षपैः स्नेहसुक्तिश्च सदुर्वाया विधूपयेत ॥
मत्स्यो गोमयेस्तत्ते श्वेदित परिवेपितम् ।
घनसारे समाविश्येदगारूढैव कथ्यते" ॥ ६ ॥
इति कर्णरोगाधिकारः । इति भावप्रकाशः ॥७॥

("प्रतिश्यायजलक्रीड़ाकर्णकण्डूयनैस्तथा ।
मिथ्यायोगेन शस्त्रस्य कुपितोऽन्यैश्च कोपनैः ॥
प्राप्य श्रोत्रशिरा कुर्याच्छूलं स्रोतसि वेगवत् ।
अर्द्धावभेदकं स्तम्भं शिशिराणामनन्दनम ॥
चिराच्च पाकं पाकस्तु लसिकामस्रवणं चरेत् ।
श्रोत्रं शून्यमकस्माच्च स्यात सञ्चारविचारवत् ॥
शूलं पित्तात् सदाहोषा शीतेच्छाश्वयथुर्ज्वरम् ।
आशुपाकं प्रपक्वं च सपीतलसिकास्रुतिः ॥
सा यतोयात्र प्रदिग्धं स्रवेत्ता जमुपैति च ।
कफाच्छिरोहनुग्रीवा गौरवं मन्दतारुजः ॥
कण्डूः श्वयथुरुष्णेच्छा पाकात् श्वेतघनास्रुति ।
करोति श्रवणे शूलमभिघातादिदूषितम् ॥
रक्तं पित्तसमानार्त्ति किञ्चिदधिकलक्षणम् ।
शूलं समुदितैर्दोषैः सशोफज्वरतीव्ररुक ॥
पर्य्यायादुष्णशीतेच्छ जायते श्रुतिजाड्यवत् ।
पक्वं सितासितारक्तघनपूयं प्रवाहि च ॥
शब्दवाहिशिरासंस्थे शृणोति पवने मुहुः ।
नादानकस्वादिविधान् कर्णनादं वदन्ति तम् ॥
श्लेष्मानुगतो वायुर्नादो वा समुपेक्षितः ।
उच्चैः कृच्छ्राच्छ्रुति कुर्य्याद्बधिरत्वं क्रमेण च ॥
वातेन शोषितः श्लेष्मा स्रोतो लिम्पेत्ततो भवेत् ।
रुग्गौरवं पिधानञ्च सप्रतीनाह संज्ञितः ॥
कफपूर्णो कफात् श्रोत्रे सिरो तत्रापरापरौ ।
कर्णो विन्ध्य पित्तेन सरुजं शोथसंयुतम् ।
समपूर्ति वक्त्रभेदं कुरुते पूतिकर्णकम् ।
वातादिदूषितं श्रोत्रं मांसासृक्क्लेदजां रुजम् ।
खादन्तो जन्तवः कुर्य्युस्तीव्रां स क्रिमिकर्णकः ।
श्रोत्रकण्डूयनाज्जाते क्षते स्यात् पूर्ववच्च ॥
विद्रधिः पूर्ववच्चान्यः शोफोऽर्शोऽर्बुदमीरितम् ।
तेषु रुक् पूतिकर्णत्वं बधिरत्वञ्च बाधते ॥
गर्भेऽनिलात्संकुचिता शष्कुली कुचिकर्णकः ।
एको नीरुगनेको वा गर्भे मांसाङ्कुरः स्थिरः ।
पिप्पली पिप्पलीमांस सन्निपातात्मिकारिका ।
सहजा सरुजस्त्वया सवृत्त स उपेक्षितः ॥
कटुतैलनिभं पक्वं स्रवेत् कृच्छ्रेण रोहति ।
सङ्कोचयति रुक्पाकं च सा श्रुत कर्णकुष्ठी ॥
विरस्ता कुरुते वायुः पालीशोषं तदाह्वयम् ।
त्वचा दुष्टा च तन्त्वीतान् पालीपातेन तन्त्रिका ॥
सुकुमारे चिरोत्सर्गात् सद्यस्तैः परिपाल्यते ।
कण्डूशोफा सरुक्पाकं पालीशोष परिपोटवान् ॥
अविदोषः समुत्पन्नः स्यात् पित्तघ्नोऽश्विनात् ।
दुर्नामसम्बन्धे शोषो कार्याद पावकान् ॥
कर्णस्य स्नायुदितां शल्यो नाड़ीस्त्रोतसा ।
तस्य शोषं, विकारान् कर्णो निरर्थको स्त ॥
सास्त्रं शोफं, विकारान् कर्णो निर्दिष्टा सिरापपू ।
...

दुर्म्मेदं वर्द्धिते कर्णे संकण्डूदाहपाककृत् ॥
श्वयथुः सन्निपातोत्थः स नाम्ना दुःखवर्द्धनः ।
कफासृक्क्रिमिजाः सूक्ष्माः सकण्डूक्लेदवेदनाः ॥
लेह्याख्याः पिटिकास्ताश्च लिह्युः पालीमुपेक्षिताः ।
पिप्पली सरुजः शूल विदारीकुचिकर्णकः ॥
एवमष्टादश प्रोक्ता सन्निकालाश्च साधयेत् ।
पञ्चविंशतिरित्युक्ता कर्णरोगविभागतः" ।
इत्युत्तरस्थाने सप्तदशेऽध्याये वाग्भटेनोक्तम् ॥७॥
अस्य चिकित्सा तेनोक्ताष्टादशेऽध्याये, यथा,—
"कर्णशूले पवनजे पिबेद्रात्रौ रसाशितः ।
वातघ्नसाधितं सर्पिः कर्णं स्निग्धं पूरयेत् ॥
पत्राणां पृथगश्वत्थबिल्वार्कैरण्डजन्मनाम् ।
तैलसिन्धूत्थदिग्धानां सिद्धानां पुटपाकतः ॥
रसैः कवोष्णैस्तद्वच्च मूलकस्यारलोरपि ।
ग्राहे वातहरैः स्वेदं मूत्रैश्च विपाचितैः ॥
महास्नेहो रुतं हन्ति सुतीव्रामपि वेदनाम् ।
महतः पञ्चमूलस्य काष्ठात् क्षौमेण वेष्टितात् ॥
तैलसिक्तात् प्रदीप्ताग्रात् स्नेहः सद्यो रुजापहः ।
योज्यश्चैवं भद्रकाष्ठात् कुष्ठात् काष्ठाच्च सारलात् ॥
वातव्याधि प्रतिश्याय विहितं हितमत्र च ।
वक्त्रस्यच्छिद्रसा स्याने शीताम्बु पानमप्यपि ॥
पित्तशूले सितायुक्त घृतस्निग्धं विरेचयेत् ।
द्राक्षायष्टिशृतं स्तन्यं शस्यते कर्णपूरणम् ॥
यष्ट्यनन्ता हिमोशीरकाकोलीरोध्रजीवकैः ।
मृणालविसमञ्जिष्ठासारिवाभिश्च साधयेत् ॥
यष्टीमधुरसप्रस्थ क्षीरद्विप्रस्थसंयुतम् ।
तैलस्य कुडवं सम्यक्पूरणाच्छूलनाशनम् ॥
निहन्ति शूलदाहोषाः केवलं क्षौद्रमेव वा ।
पाक्यादिभिश्च स्रुते कर्णे विद्यात् सामस्रुतः ॥
वामयेत् पिप्पलीसिद्धसर्पिः स्निग्धं कफोद्भवे ।
धूमनावनगण्डूषस्वेदान् कुर्य्यात् कफापहान् ॥
लशुनार्द्रकशिग्रूणां सुरस्या मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे ॥
अर्काङ्कुरानम्लपिष्टांस्तैलाक्तांल्लवणान्वितान् ।
सन्निधाय स्नुहीकाण्डे कोरिते तच्छदावृतान् ॥
स्वेदयेत् पुटपाकेन स रसः शूलजित्परम् ।
रसेन बीजपूरस्य कपित्थस्य च पूरयेत् ॥
शुक्तेन पूरयित्वा वा फेनेनाल्पमवधूलयेत् ।
सुरसादिगणस्थ वा सिद्ध तैलञ्च पूरणम् ॥
सिद्धं वा सार्षपं तैलं हिङ्गुतुम्बरुनागरैः ।
रक्तजे पित्तवत् कार्यं शिराञ्च विमोक्षयेत् ॥
पक्वे पूयवहे कर्णे धूमगण्डूषनावनम् ।
युञ्ज्यान्नाड़ीविधानञ्च दुष्टव्रणहरञ्च यत् ॥
स्रोतः प्रमृज्य दिग्धन्तु द्वौ कालौ पिचुवर्त्तिभिः ।
पूरयेत्पूर्य्यदिग्धा तु मादिकेन प्रपूरयेत् ॥
सुरसादिकषायेण कषायैश्च धावयेत् ।
पिचुवर्त्तिसंरुद्धं च कर्णे तैलपूरयेत ॥
शुक्लेऽनुगतानां विधिरेषनिवर्त्तकः ।
निपुड़ सप्तच्छदादा पातशूलमर्दितिः ॥
सक्षिद्रजीरकाध्यामि बधिरत्वञ्च रसेन च ।
वधिरेत्वं तथाप्त निम्बकाथा शरावं ॥
भारवाविद्धरो कुष्ठादात्रृश्चोदकीवधम् ।

श्लेष्मानुबन्धे श्लेष्माप्र प्राग्जयेदम्बिकाभिः ॥
स्वेदयामिश्रितवृश्चिकमूलकात् पचेद्रसे ।
चतुर्गुणे पचेत्तैल धीरे चाल्पशुक्लेम्मिते ॥
यष्ट्याह्वास्वीरबलाकोलीकनकतालु सिद्धान्ति तत्र
नादवाधिर्य्यशूलानि नावनाभ्यङ्गपूरणैः ॥
पञ्च प्रतिविधाविङ्गमिश्रितञ्च सविल्वबीजैः ।
समुक्तैः पूरणान्येव वस्त्रप्रम्लितादिशुत ॥
कदलादि स्थित तत्र सप्तमीत्यञ्च पूर्वात् ।
शुष्कमूलककाश्मर्य्या क्षारो हिङ्गु महौषधम् ॥
शतपुष्पावचाकुष्ठदारुशिग्रुरसाञ्जनम् ।
सौवर्च्चलयवक्षारसर्जिकौद्भिदसैन्धवम् ॥
भूर्जग्रन्थिविडं मुस्ता मधुशुक्तं चतुर्गुणम् ।
मातुलुङ्गरसस्तद्वत् कदलीसरतःतः ॥
पक्व तैलं जयत्याशु सुकृच्छ्रानपि पूरणात् ।
कण्डूं क्लेदञ्च बाधिर्य्यं पूतिकर्णत्व कृमिनाशेत् ॥
क्षारतैलमिदं श्रेष्ठ मुखदन्तामयेषु च ।
अथ शृङ्गाविरसाते कर्णे रक्तं हरेदतः ॥
सर्व्वोपक्लेदयोगान्दसुवेशमयामाचरेत् ।
बाधिर्य्ये वर्ज्जयेद्बालवृद्धयोश्चिरजञ्च यत् ॥
प्रतिनाहे परिक्लेद्य स्नेहस्वेदैर्विशोधयेत् ।
कर्णशोधनकेनानु कर्णं तैलस्य पूरयेत् ॥
ससुरसैन्धवमधीवार्त्ताकुसुम्भस्य वा ।
शोधनाद्धृततोयं पर्य्यु घृतमग्रस्य पूरणम् ॥
कर्णोऽथ सतूर्णद्वपि कर्णं यथा कफापहम् ।
सम्यादितस्वत्वेऽपि कर्णेऽजीनात्र श्रेयस्तु ॥
कफवातेदिन कुर्य्यात् मुखिशिरोविधानमिकयोः ।
पूरयेत् कटुतैलेन विशेषात् कृमिकर्णके ॥
वमिधूमाश्चितारकं विधविविधविधि ।
पित्तोत्थकर्णपाकोक्त कषाय घृतविद्धरौ ॥
कर्णोत्थितेषु नासावदामककविधिक्रिया ।
कर्णविद्रधियाधा यथा शायोदयेन च ॥
पालीशोषेऽनिलश्रोत्रशूलवद्भन स्वेदनम् ।
स्वेदञ्च कुर्य्यात् स्निग्धञ्च पालीमुपवेशितः ॥
प्रियालबीजयष्ट्याह्वहयगन्धा यवान्विते ।
तत उद्वर्तितैः स्वेदैः स्निग्धमाचरेत् ॥
शतावरी वाजिगन्धा पयस्यैरण्डबीजकैः ।
तैलं विपक्व सक्षीरं पालीनां पुष्टिकृत्परम् ॥
कल्केन जीवनीयेन तैलं पयसि साधितम् ।
आनूपमांसक्वाथे च पालीपोषणवर्द्धनम् ॥
पाल्यौ छित्वातिसङ्क्षेपौ ग्रन्थौ सन्धाय योजयेत् ।
दग्धेषु तत्रिकाल्पाति परिपाटेष्विदं विधि ॥
उत्पाते शीतसेकः स्याच्छो घृततोयाभि ।
कर्णाल्पप्रवृतबनायौशीतप्रतिलोमने ॥
कर्णाबाधाद्दे समहितो कषदमो स्यादिरौ ।
सिद्धमाषाङ्गतैलं विसर्पोक्ततालानि च ॥
पञ्चादौ अवसन्त तैलं गोधाकर्णशशानि हम् ।
तान्यपाचयत्यार्क बाष्पतिलशर्कराः ॥
गुरवाकपुत्रीवा तिक्तः शान्ते माषस्त
दुर्नामं महानामसप्तदशादेव वधितम् ॥
तैलेन पाली सन्धि सुवदस्तैरपि पूरयेत् ।
चर्मैः पचकर्म्मसिद्धा पुष्पाक्तनिकाइवे ॥
कण्डूयाविकृतिमिद्धाश्च तैलमभ्यङ्गं हितम् ।

कर्णरो

स्निग्धां गोमयजैः पिण्डैर्भङ्गुरां परिलेहिकाम् ।
विडङ्गसारैरालिम्पेत् सुरभीमूत्रकल्कितैः ।
कीटजे कुष्ठकारञ्जबीजमध्याकवन्याके ।
अथवाऽभ्यञ्जने तैलं कटुतैलं विपाचयेत् ।
सनिम्बपत्रमरिचमदनैर्लेहिकापहम् ॥
छिन्नं तु कर्णं शुद्धस्य बन्धमालोच्य योजितम् ।
शुद्धास्रं लागयेदस्रे सद्यश्छिन्ने विशोधनम् ॥
अथ घर्षित्वा केशान्तं कृत्वा छेदनलेखनम् ।
निवेश्य सन्धिं सुसमं न निम्नं न समुन्नतम् ॥
अभ्यज्य मधुसर्पिर्भ्यां पिचुप्लोतावगुण्ठितम् ।
सूत्रेणागाढशिथिलं बद्ध्वा चूर्णैरवाकिरेत् ॥
शोणितस्थापनैर्व्रणमाचारमादिशेत्ततः ।
सप्ताहादामतैलाक्तं शनैरपनयेत् पिचुम् ॥
सुरूढं जातरोमाणं श्लिष्टसन्धिं समं स्थिरम् ।
सुवर्णं सरागञ्च शनैः कर्णं विवर्द्धयेत् ॥
जलशूकः स्वयंगुप्ता रजन्यौ बृहतीद्वयम् ।
अश्वगन्धा बला हस्तिपिप्पली गौरसर्षपाः ॥
मूलं कोशातकाश्वघ्नरूपिका सप्तपर्णजम् ।
छुछुन्दरी कालमृता गृह मधुकरीशकृत् ॥
जलुका स्पृक्का च तथा शावरकन्दकम् ।
एभिः कल्कैः खरं पक्वं सतैलं माहिषं घृतम् ॥
हस्त्यश्वमूत्रेण परमभ्यङ्गात् कर्णवर्द्धनम् ।
अथ कुर्याद्वयस्थस्य छिन्नां शुद्धस्य नासिकाम् ॥
छिन्नाग्रनासासमं पत्रं तत्तुल्यञ्च कपोलतः ।
तद्दास नासिकासन्ने रक्षंस्तत्तनुतां नयेत् ॥
सीव्येद्गण्डं ततः सूच्या सेविन्या पिचुयुक्तया ।
नासाच्छेदे च लिखिते परिवर्त्योपरि त्वचम् ॥
कपोलबन्धं सन्दध्यात् सीव्येन्नासां च यत्नतः ।
नाडीभ्यामुत्क्षिपेदन्तः सुखोच्छ्वासप्रवृत्तये ॥
आमतैलेन सिक्त्वा तु पतङ्गमधुकाञ्जनैः ।
शोणितस्थापनैश्चान्यैः सुश्लक्ष्णैरवचूर्णयेत् ॥
ततो मधुघृताभ्यक्तं बद्ध्वाचारिकमादिशेत् ।
ज्ञात्वावस्थान्तरं कुर्यात् सद्यो व्रणविधिं ततः ॥
छिन्द्यादरूढेऽधिकं मांसं नासोपान्ते च चर्मवत् ।
सीव्येत्तत्र सुसन्धानं हीनं संवर्द्धयेत् पुनः ॥
निवेशिते यथान्यासं सद्यश्छेदेऽप्ययं विधिः ।
नाडीयोगाद्विनौष्ठस्य नासासन्धानवद्विधिः ॥
इति वाग्भटे उत्तरस्थाने १८ अध्यायः ॥ * ।
"सामान्यं कर्णरोगेषु घृतपानं रसायनम् ।
अव्यायामोऽशिरःस्नानं ब्रह्मचर्य्यमकत्थनम् ॥
कर्णशूले प्रणादे च बाधिर्य्ये क्ष्वेडयोरपि ।
चतुर्णामपि रोगाणां सामान्यं भेषजं विदुः ॥
स्निग्धं वातहरैः स्वेदैः स्नेहविरेचितम् ।
नाडीस्वेदैरुपचरेत् पिण्डस्वेदैस्तथैव च ॥
बिल्वैरण्डार्कवर्षाभूदधित्थोन्मत्तशिग्रुभिः ।
वत्सगन्धाश्वगन्धाभ्यां तर्कारीयववेणुभिः ॥
आरनालशृतैरेभिर्नाडीस्वेदः प्रयोजितः ।
अपवातसमुत्थानं कर्णशूलं निरस्यति ॥
मीनकुक्कुटबालानां मांसजैः पयसापि वा ।
पिण्डैः स्वेदञ्च कुर्वीत कर्णशूलनिवारणम् ।
अश्वत्थपत्रखल्लं वा विधाय बहुपत्रकम् ।
तैलाक्तमङ्गारपूर्णं निदध्याच्छ्रवणोपरि ॥

६ ७

कर्णरो

यत्तैलं च्यवते तस्मात् खल्लादङ्गारतापितात् ।
तत्प्राप्तं श्रवणस्रोतः सद्यो गृह्णाति वेदनाम् ॥
क्षौमगुग्गुल्वगुरुभिः सघृतैर्धूपयेच्च तम् ।
भक्तोपरि हितं सर्पिर्वस्तिकर्म्म च पूजितम् ॥
निशायां निशि तत्सर्पिः पीत्वोपरि पयः पिबेत् ।
मूर्द्धवस्तिषु नस्ये च मस्तिष्के परिषेचने ॥
शतपाकं बलातैलं प्रशस्तञ्चापि भोजने ।
कण्टकारीमजाक्षीरे पक्त्वा क्षीरेण तेन च ।
विपचेत् कुक्कुटवसां कर्णयोस्तत्प्रपूरणम् ।
मधुशीग्रुकमूलानि कमलकोठन्तथा ॥
अश्विकावैन्द्रकामूलं सरलं देवदारु च ।
लशुनं शृङ्गवेरञ्च तथा वत्सावलेखनम् ॥
कल्कैरेषां तथा तैलं पचेत् स्नेहं चतुर्विधम् ।
वेदनायाः प्रशान्त्यर्थं हितं तत्कर्णपूरणम् ॥
लशुनार्द्रकशिग्रूणां मुरङ्ग्या मूलकस्य च ।
कदल्याः स्वरसः श्रेष्ठः कदुष्णः कर्णपूरणे ॥
शृङ्गवेररसं क्षौद्रं सैन्धवं तैलमेव च ।
कदुष्णं कर्णयोर्देयमेतद्वा वेदनापहम् ॥
वत्सावलेखसंयुक्ते मूत्रे चाजाविके भिषक् ।
सर्पिः पचेत्तेन कर्णौ पूरयेत् कर्णशूलिनः ॥
महतः पञ्चमूलस्य काष्ठमष्टाङ्गुलम् ।
क्षौमेणावेष्ट्य संसिच्य तैलेनादीपयेत्ततः ॥
यत्तैलं च्यवते तेभ्यो दग्धेभ्यो भाजनोपरि ।
ज्ञेयं तद्दीपिकातैलं सद्यो गृह्णाति वेदनाम् ॥
कुर्यादेवं भद्रकाष्ठे कुष्ठे काष्ठे च सारले ।
मतिमान् दीपिकातैलं कर्णशूलनिवर्हणम् ॥
अर्काङ्कुरानम्लपिष्टांस्तैलाक्तान् लवणान्वितान् ।
सन्निदध्यात् स्नुहीकाण्डे कोरिते तच्छदावृते ॥
पुटपाकक्रमस्विन्नान् पीडयेदार्द्रभावतः ।
सुखोष्णं तद्रसं कर्णे दापयेच्छूलशान्तये ॥
कपित्थमातुलुङ्गाम्लशृङ्गवेररसैः शुभैः ।
सुखोष्णैः पूरयेत् कर्णं तच्छूलविनिवृत्तये ॥
कर्णं कोष्णेन शुक्तेन पूरयेत् कर्णशूलिनः ।
समुद्रफेनचूर्णेन युक्त्या चाप्यवचूर्णयेत् ॥
अष्टानामिह मूत्राणां मूत्रेणान्यतमेन वा ।
कोष्णेन पूरयेत् कर्णं कर्णशूलोपशान्तये ॥
मूत्रेष्वेषु वातघ्ने गव्ये च क्वथिते भिषक् ।
पचेच्चतुर्विधं स्नेहं पूरणं तच्च कर्णयोः ॥
एता एव क्रियाः कुर्यात् पित्तघ्नीः पित्तसंयुते ।
काकोल्यादौ दशक्षीरे सिद्धसर्पिर्हितं सदा ।
क्षीरवृक्षप्रवालेषु मधुके चन्दने तथा ।
कल्कक्वाथे पचेत्तैलं प्रशस्तं मधुकं सरे ॥
इङ्गुदीसर्षपस्नेहौ सकफे पूरणे हितौ ।
तिक्तौषधानां यूषाश्च स्वेदाश्च कफनाशनाः ॥
सुरसादौ शृतं तैलं पञ्चमूले महत्यपि ।
मातुलुङ्गरसः शुक्तं लशुनार्द्रकयो रसः ॥
एकैकः पूरणे पथ्यस्तैलमथवा शृतम् ।
सोत्सादा मूर्द्धविरेकाश्च कवलाश्च पूजिताः ॥
कर्णशूलविधिं कृत्वा पित्तघ्नं शोणिताहते ।
शूलप्रणादबाधिर्य्यक्ष्वेडानान्तु प्रकीर्त्तितम् ॥
सामान्यतो विशेषेण बाधिर्य्ये पूरणं शृणु ।
गवां मूत्रेण बिल्वानि पिष्ट्वा तैलं विपाचयेत् ॥

कर्णरो

सजलञ्च सदुग्धञ्च बाधिर्य्ये कर्णपूरणम् ।
सितामधुकबिल्वैर्वा सिद्धं वाऽजे पयस्यथ ॥
सिद्धं वा बिल्वनि क्वाथे शीतीभूतं तदुद्धृतम् ।
पुनः पचेद्धृतक्षीरे सितामधुकचन्दनैः ॥
बिल्वाम्बुगाढं यत्तैलं बाधिर्य्ये कर्णपूरणम् ।
वक्ष्यते यः प्रतिश्याये विधिः सोऽप्यत्र पूजितः ॥
वातव्याधिषु यश्चोक्तो विधिः स च हितो भवेत् ।
कर्णस्रावे पूतिकर्णे तथैव क्रिमिकर्णके ॥
समानं कर्म्म कुर्वीत योगान् वैशेषिकानपि ।
शिरोविरेचनञ्चैव धूपनं पूरणन्तथा ॥
प्रमार्जनं धावनञ्च वीक्ष्य वीक्ष्यावचारयेत् ।
राजवृक्षादितोयेन सुरसादिगणेन वा ॥
कर्णप्रक्षालनं कार्य्यं चूर्णैरेषाञ्च पूरणम् ।
चूर्णं पञ्चकषायोत्थं कपित्थरसयोजितम् ॥
कर्णस्रावे प्रशंसन्ति पूरणं मधुना सह ।
सर्ज्जत्वक्चूर्णसंयुक्तः कार्पासीफलजो रसः ॥
योजितो मधुना वापि कर्णस्रावे प्रशस्यते ।
लाक्षासर्ज्जरसौ वापि चूर्णितौ कर्णपूरणम् ॥
[illegible] ।
कुम्भीरक्षौद्रमण्डूकी सिद्धं तैलञ्च पूजितम् ॥
तिन्दुकान्यभयारोध्रं समङ्गामलकं मधु ।
पूरणञ्चात्र पथ्यं स्यात् कपित्थरसयोजितम् ॥
रसमाम्रकपित्थानां मधूकधवशालजम् ।
पूरणार्थं प्रशंसन्ति तैलं वा तैर्विपाचितम् ॥
प्रियङ्गुमधुकाम्बष्ठा धातकी शीतपर्णिभिः ।
मञ्जिष्ठालोध्रलाक्षाभिः कपित्थस्य रसेन वा ॥
पचेत्तैलं तदास्रावमवश्यं हन्ति पूरणात् ।
हृष्टं रसाञ्जनं नार्य्याः क्षीरेण क्षौद्रसंयुतम् ॥
प्रशस्यते चिरोत्थेऽपि सास्रावे पूतिकर्णके ।
निर्गुण्डीस्वरसे तैलं सिन्धुधूमरजोगुडैः ।
पूरणं पूतिकर्णस्य शमनो मधुसंयुतः ।
क्रिमिकर्णकनाशाय क्रिमिघ्नं योजयेद्विधिम् ॥
वार्त्ताकुधूमश्च हितः सार्षपस्नेह एव च ।
क्रिमिघ्नं हरितालेन गवां मूत्रयुतेन च ॥
गुग्गुलुः कर्णदौर्गन्ध्ये धूपनं श्रेष्ठमुच्यते ।
छर्द्दनं धूमपानञ्च कवडस्य च धारणम् ।
कर्णक्ष्वेडे हितं तैलं सार्षपञ्चैव पूरणम् ॥
विद्रधौ चापि कुर्वीत विद्रध्युक्तं चिकित्सितम् ।
प्रक्लेदधौमांसच्छेदेन स्वेदेन प्रविलाप्य च ।
शोधयेत् कर्णविट्कन्तु भिषक् सम्यक् शलाकया ॥
नाडीस्वेदोऽथ वमनं धूमो मूर्द्धविरेचनम् ।
विधिश्च कफहृत्सर्व्वः कर्णकण्डूमपोहति ॥
अथ कर्णप्रतीनाहे स्नेहस्वेदौ प्रयोजयेत् ।
ततोऽतिविरिक्तशिरसः क्रियां प्राप्तां समाचरेत् ॥
कर्णपाकस्य भैषज्यं कुर्यात् पित्तविसर्पवत् ।
कर्णच्छिद्रे वर्त्तमानं कीटं क्लेदमलादि वा ॥
अपहरेत् प्रदेशीमानमथापि शलाकया ।
शेषाणान्तु विकाराणां प्राक्चिकित्सितमीरितम्" ॥
इति सुश्रुते उत्तरतन्त्रे एकविंशतितमोऽध्यायः ॥ *

चिकित्सितस्थाने २६ अध्याये सनिदानवत्
चिकित्सितान्युक्तानि चरकेण यथा,—
"विषदेन वा तोयपूर्वेण

अवश्यं करणीयं यत् तत् कर्त्तव्यमिति ख्यातम्। कृ+योग्यार्थे तव्य।) करणीयोग्य। यथा, हितोपदेशे।

"श्रीमसेवा न कर्त्तव्या कर्त्तव्यो महदाश्रयः।

अजा सिंहप्रसादेन वने चरति निर्भयम्"॥

कर्त्ता, [ऋ] त्रि,(करोति क्रिया निष्पादयतीति वा। करोति यः कर्म्मेति शेष। कृ+कर्त्तरि तृच्।) कारकः। इति मेदिनी॥ षट्कारकान्तर्गतकारक विशेष। बोपदेवेनास्य संज्ञा कृता। अस्य उक्तार्थे प्रथमा अनुक्तार्थे तृतीया विभक्तिर्भवति। तस्य लक्षणम्। "क्रियानुकूलकृतिमत्त्वम्"। इति कारकमञ्जरी॥ "य करोति स"। इति सर्व्वकर्म्मा। "स्वतन्त्रः"। इति कारिका। "चेतनान्तरव्या पाराव्यवधानेन धात्वर्थनिष्पादकश्चेतनः कर्म्मकर णादिकारकचक्रप्रयोक्ता वा"। इति प्रायश्चित्तवि वेकः॥ "क्रियामुख्यप्रयोजको कर्त्ता"। इति क्रम दीश्वरः॥ स तु पञ्चविधः। क्रियामुख्यः १ हेतुकर्त्ता २ प्रयोजकः ३ अनुमन्ता ४ ग्रहीता ५। तथा च।

"क्रियामुख्यो भवेत् कर्त्ता हेतुकर्त्ता प्रयोजकः।

अनुमन्ता ग्रहीता च कर्त्ता पञ्चविधः स्मृतः"।

इति गोयीचन्द्रटीकाधृतदायाधिकारवर्त्ती॥ स च त्रिविधः। सात्त्विकः १ राजसः २ तामसः ३।

सात्त्विको यथा,—

"मुक्तसङ्गोऽनहंवादी धृत्युत्साहसमन्वितः।

सिद्ध्यसिद्ध्योर्निर्विकारः कर्त्ता सात्त्विक उच्यते"॥

राजसो यथा,—

"रागी कर्म्मफलप्रेप्सुर्लुब्धो हिंसात्मकोऽशुचिः।

हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः"॥

तामसो यथा,—

"अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः।

विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते"।

इति श्रीभगवद्गीता। १८। २६-२८।

कर्त्ता, [ऋ] पुं, (करोति सृजति चतुर्दशभुवनानि यः सर्व्वलोकस्रष्टेति यावत्। कृ+तृच्।) पर मेष्ठी। ब्रह्मा। इति मेदिनी॥ क्रियानुकूलकृति मान्। स च त्रिविधः। यथा,—

"त्रिविध श्रूयते कर्त्ता विधर्म्मेण प्रतिक्रियाम्।

योऽधर्म्मप्रतिसिद्धार्थविधिवक्यपरायणे"॥

अस्यार्थः। किन्तु प्रति प्रकारत्रयेण कर्त्ता त्रिधा भवेत् तस्य विवरणम्। स्वाध्यायोऽध्येतव्य इत्यत्र योऽध्येयेन स्वविधिवाक्योदितः॥१॥ अथ पदद्वयं यस्मात् पौर्ण्णमासी न रवासीत्यत्र प्रतिषिद्धेनैव दीक्षिते तत्परः॥२॥ स्वकामो यजेतेत्यत्र विधिवत्पराश्रयेण अस्वकामः कर्त्ता श्रूयते॥३॥

नित्ये निषेधे च यदत् साधर्म्यं सदभावस्वभाव त्वादत्र इदनुमतविधाया विधायकनित्यविधायक तया प्रवृत्ताधायकं स्वाध्यायं लक्षणाभावो नित्यार्थकं नित्यविधायकस्य प्रत्यवायाभावकाम मिति प्रत्यवायपरिहारार्थो नित्योऽस्योऽर्थेति स्फोटकविशेषणसाध्यसाध्यमिति बोधकत्वेन विधिवाक्यत्वाद्रथे। यथा स्वप्ने कर्त्तव्यं दत्तेतेत्यत्र स्वप्नस्य कर्त्तव्यविषयक कार्यम्।

नित्ये अकरणे प्रत्यवायश्रुतेः इत्यत्र प्रत्यवाय परिहारार्थिनः कर्त्तुः प्रवृत्तः सन्ध्यावन्दनविषयक। कार्य्यम्। न चास्य सन्ध्यावेदित्वमपि प्रत्यवायपरि हारार्थिन कर्त्तुः कर्त्तव्यत्वाभावविषयकं कार्य्यं मितीव रूपा। इति धर्म्मदीपिका॥

(महादेवः। यथा, महाभारते। १३। १७। ६४।

"संग्रहो निग्रहः कर्त्ता सर्पचीरनिवासनः"॥

विष्णुः। अकर्त्तापि कर्त्तृत्वात् आदिकर्त्ता विष्णुः॥ यथा महाभारते १३। १४९। ३७।

"कोधहा कोधकृत् कर्त्ता विश्वबाहुर्म्महीधरः"॥)

कर्त्तरिका, स्त्री, (कृन्तति छिनत्तीति। कृत्+तृच्। स्वार्थे कन् टाप् च।) क्षुद्रखड्गः। यथा,—

"हास्यपुक्तां विनैवास्य कथां कर्त्तरिकाकराम्"॥

इति कथासरित्सागरे ग्रामाध्यायम्॥

कर्त्तृत्व, क्ली, (कर्त्तुर्भावः। कर्त्तृ+भावे त्व।) कर्त्तृ धर्म्मः। यथा, श्रीभगवद्गीता। ५। १४।

"न कर्त्तृत्वं न कर्म्माणि लोकस्य सृजति प्रभुः"॥

कर्द, ऋ क शैथिल्ये। इति कविकल्पद्रुमः॥ (अदन्त चुरा०-पर०-अक०-सेट्।) रेफद्वयगाम्भीर्य्यकारः। कर्द यति कर्दयति धूलिक्षेपेण। इति दुर्गादासः॥

कर्त्री, स्त्री, (करोति या कर्म्माणीतिशेषः। कृ+तृच् +ङीप् च।) कर्त्तरी। इति शब्दरत्नावली॥ कारिका। इति मुग्धबोधव्याकरणम्॥

कर्द, कुत्सितशब्दे। इति कविकल्पद्रुमः॥ (भ्वा०-पर०- अक०-सेट्।) उदरशब्दे। इति रमानाथः॥ मकोऽयम्। कर्द्दति काकः। रमानाथस्तु कोष्ठे कर्द्दतीति मङ्गलदश्चादुदरसम्बन्धिशब्द एव अस्य प्रयोग इति मन्यते। कर्द्दति शिशुरिति यदु दाहरणं तदेवम्। तन्मते कर्द्दं दुर्दमित्येव स्यात्। इति दुर्गादासः॥

कर्द, पुं,(कर्द+अच्।) कर्द्दमः। इति शब्दरत्नावली॥ कादा इति भाषा॥

कर्द्दट, पुं, (कर्द्दं कर्द्दमं अटति व्याप्नोतीति। कर्द्द+अट+अच्। पृषोदरादित्वात् साधुः।) करहाट। पङ्कः। पङ्कजः। इति मेदिनी॥

कर्द्दन,क्ली,(कर्द्दने इति। कर्द्द+भावे ल्युट्।) उदर शब्दः। इति हेमचन्द्रः। पेटेर काक इति भाषा॥

कर्द्दम, क्ली (कर्द+"कलिकर्दोरमः"। उणा ।४। ८४ इति अमः।) मांसम्। इति शब्दचन्द्रिका॥

कर्द्दम, पुं, (कर्द्द कुत्सितशब्दे+"कलिकर्दोरमः"। उणा ४। ८४ इति अमः।) कर्द्दः। कादा इति भाषा। तत्पर्य्यायः। निषद्वरः २ जम्बालः ३ पङ्कः ४ शादः ५। इत्यमरः। १। १०। ८॥ (यथाह हास्यार्णवः। १। १६०।

"रत्नाकर्द्दमशीतानि स्वच्छान्दस्वच्छादसौ।

मातृभैव गुप्तानि पद्मेडवनिपातिनः"॥)

अस्य गुणाः शीतलत्वम्। रूक्षत्वम्। पित्त शोषिदाहदोषनाशित्वम्। व्रणशोधनत्व मसृणत्वम्। इति राजवल्लभः॥

("कर्द्दमो दाहपित्तास्त्रशोफघ्नः शीतलः सरः"। इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे।) प्रजा

पतिविशेषः। स तु ब्रह्मणश्छायायां जातः। तस्य भार्य्या स्वायम्भुवमनुकन्या देवहूतिः। पुत्रः कपिलदेवः कन्याः कलाद्या नव। इति श्रीभागवतम्। ३। १२। २७॥ पापम्। इत्युणादिकोषः। ४। ८४॥ कादा। यथा,—

"देशेषु कर्द्दमं शब्दभाषायां वसति स्फुटम्।

बभूव कर्द्दमाद्भूतः कर्द्दमस्तेन कीर्त्तितः"॥

इति ब्रह्मवैवर्त्ते ब्रह्मखण्डे २२ अध्यायः॥ (नाग विशेषः। यथा महाभारते १। ५७। १६।

"कर्द्दमश्च महानागो नागश्च बहुमूलकः"॥)

कर्द्दमाटकः, पुं, (कर्द्दमो मलादिः आट्यते निक्षि प्यते यत्र। कर्द्दम+अट्+अधिकरणे घञ्। तत कप्। यद्वा कर्द्दमस्य मलादेः आटो निक्षेपो ऽत्र। कर्द्दमे इव आटोऽगतिर्गतिर्वा केचित्। ततः कप्।) विष्ठादिनिक्षेपस्थानम्। इति शब्द रत्नावली॥

कर्द्दमी स्त्री, मुद्गरक्षणम्। इति वैद्यकम्॥

कर्पट, पुं, (कीर्य्यते क्षिप्यते इति। कॄ+कर्म्मणि विच्। कर् चासौ पटश्चेति कर्म्मधारयः। यद्वा कारस्य पटः। शकन्ध्वादित्वात् पृषोदरादि साधु।) मलिनवस्त्रादिखण्डजीर्णवस्त्रखण्डम्। नक्ता इति भाषा। (यथा कथासरित्सागरे ५। ६१।

"जीर्णकर्द्दककर्पटं"॥) तत्पर्य्यायः। नक्तकः २। इत्यमरः। ३। ५। ३२॥ नक्तकः ३। इति भरतः॥ पर्व्वतविशेषः। यथा कालिकापुराणे ८२ अध्याये।

"नीलकूटस्य पूर्व्वस्मिन् स्वल्पः प्रतिपादितम्।

नातिमात्रमपूर्व्वाश्रमी मलकूटस्य दक्षिणे॥

पूर्व्वस्यां कर्पटो नाम पर्व्वतो यमलवपूरक।

तत्र याम्यशिला श्यामा नीलाञ्जनसमप्रभा॥

अधित्यकायां तस्यैव व्यासप्रायतु विस्तृता।

पूजयेतत्र चण्डां तां याम्यां दक्षिणदिग्गताम्॥

धत्ते तु पाशिनां नित्यं प्रायश्चित्ताय तापकम्।

स्वयम्भूस्तु शिवः किरीटमुकुटोज्ज्वलम्॥

दधत्स्वाक्षिपुत्रोऽपि वामपार्श्वे करे च हि।

लम्बवस्त्र स्थूलपदं अचिरत्निचयभूषणम्॥

बराभयकरं नित्यं गृध्रां अक्षिमवाहनम्।

पूजयेत् परया भक्त्या याम्यदीपेन साधकः॥

उपोष्याचारस्यादियो सर्वे विशिष्टुभुदृतः।

यमयोनिमिति स्थानं यमस्य प्रीतिकारकम्॥

यत्नेनैव तु अर्च्चेत नाम यम पूजयेत्।

कर्पटाख्येऽस्मरे नामस्य वामाख्याद्"॥

कर्पटधारी [न्] त्रि (कर्पटं धरति धारयति वा। कर्पट+धृ+णिनि।) गलितजीर्णवस्त्रखण्ड धारी। भिक्षुकः। इति शब्दरत्नावली॥

कर्पटिका, त्रि, (कर्पटोऽस्त्यस्य। कर्पट+अस्त्यर्थे ठन्।) कर्पटधारी। इति शब्दरत्नावली॥

कर्पटी, [न्] त्रि (कर्पटोऽस्त्यस्य। कर्पट+इनि।) भिक्षुकः। कर्पटधारी। इति शब्दरत्नावली॥

कर्पर, पुं (कृप्+बाहुलकात् अरन्। स्वा र्थ्ये अच्।) कटाहः। इत्यमरः। ३।६।१५८॥ मार्त्त ण्डः इति भाषा। कपालम्। खटाहः। इति मेदिनी॥ शङ्कारः। इति शब्दचन्द्रिका॥

कर्पराशः, पुं, (कर्परस्य अंशः ।) शर्करा । इति शब्दरत्नावली । खोलाकुचि इति भाषा ॥

कर्पराल, पुं, (कर्पर इवालति पर्य्याप्नोति । कर्पर + अल् + अच् । कर्परं अलति इति केचित् । अल + कर्म्मण्यण् ।) कन्दराल । पर्व्वतजातपीलुवृक्षः । इत्यमरटीकायां रमानाथः । आखरोट इति भाषा ॥

कर्परिकातुत्थं, क्ली, (कर्पर्य्येव इति स्वार्थे कन् तत ष्टाप् अत इत्वं कर्परिकेव तुत्थम् ।) तुत्थविशेषः । कर्परी । इति हेमचन्द्रः ॥

कर्परी, स्त्री, (कृप् + बाहुलकात् अरट् । लत्वाभावश्च । टित्वात् ङीप् । केचित्तु कृपधातोररन् प्रत्ययेन निष्पादितोऽयं तन्मते गौरादित्वात् ङीष् ।) क्वाथोद्भव तुत्थम् । दारुहरिद्रार क्वाथेर तुतिया इति भाषा । तत्पर्य्यायः । दार्व्विका २ । इत्यमरः । २ । ९ । १ १ ॥ तुत्थाञ्जनम् । इति तट्टीकायां स्वामी ॥

कर्पास, पुं क्ली, ("कृपः पासः" । उणां ५ । ४५ इति कृपातोः पासः ।) कार्पास । इत्यमरटीका । कापास इति भाषा ॥

कर्पासी, स्त्री, (कर्पास इति जातित्वात् गौरादित्वात् वा ङीष् ।) कार्पासी । इति भरतः । कापासगाछ इति भाषा ॥

कर्पूर, पुं क्ली (कृप् + "खर्जूरादिश्च" उणां ४ । ९० । इति ऊरः ।) स्वनामख्यातसुगन्धिद्रव्यम् । काफुर इति पारस्य भाषा । कपूर इति हिन्दी भाषा । (यथा,—राजेन्द्रकर्णपूरे ३३ ।
"कर्पूरैरिव मारवैरिव सुधास्यन्दैरिवाद्राविते जाते द्वन्द्व । दिवापि देव । ककुभां गर्भे भवत्कीर्त्तिभिः" ॥) तत्पर्य्यायः । घनसारः २ चन्द्रसंज्ञः ३ सिताभ्रः ४ हिमवालुका ५ । इत्यमरः २ । ६ । १३ ॥ सिताभः ६ । इति तट्टीका ॥ घनसारक ७ शितकरः ८ शीत ९ शशाङ्क १० शिला ११ शीतांशु १२ हिमवालुका १३ हिमकर १४ शीतप्रभ १५ शाम्भव १६ शुभ्रांशु १७ स्फटिकाभ्र १८ कारमिहिका १९ ताराभ्र २० चन्द्रक २१ चन्द्र २२ लोकतुषारः २३ गौरः २४ कुमुदः २५ इन्दुः २६ हिमाह्वयः २७ चन्द्रभस्म २८ वेधक २९ रेणुसारकः ३० । इति शब्दरत्नावली । अस्य गुणाः । शिशिरत्वम् । तिक्तत्वम् । कटुत्वम् । श्लेष्मकफपित्ततृष्णाविदाहकण्ठशोषास्यरोगनाशित्वञ्च ।
"कर्पूरो नूतनस्तिक्तः स्निग्धशोथ्यातदाहहा ।
चिरस्थो दाहशोषघ्नः स शीतः शुभदस्तरः" ॥
इति राजनिर्घण्टः ॥
अपि च । पाके शीतत्वम् । चक्षुर्हितकारित्वम् । पक्वकर्पूरादपक्वस्याधिकगुणत्वञ्च । इति राजवल्लभः ॥ तद्भेदा यथा । पोतास १ भीमसेनः २ शितकरः ३ शङ्करावासस ४ पांशुः ५ पिञ्जः ६ अब्दसारः ७ हिमवालुकः ८ जूतिका ९ तुषारः १० हिमः ११ शीतल १२ पक्विकाख्य १३ । इति राजनिर्घण्टः ॥
(तत्रादौ कर्पूरस्य नाम गुणाश्च ।
"कर्पूरः शीतलो वृष्यश्चक्षुष्यो लेखनो लघुः ।
सुरभिर्मधुरस्तिक्तः कफपित्तविषापहः ।
दाहतृष्णास्यवैरस्यमेदोदौर्गन्ध्यनाशनः ॥
कर्पूरो द्विविधः प्रोक्तः पक्वापक्वप्रभेदतः ।
पक्वात् कर्पूरतः प्राहुरपक्वं गुणवत्तरम्" ॥
अथ चीनाककर्पूरः । चीनेकपूर इति भाषा ।
"चीनाकसंज्ञः कर्पूरः कफक्षयकरः स्मृतः ।
कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च सः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ म भागे ॥
"सतिक्तः सुरभिः शीतः कर्पूरो लघुलेखनः ।
तृष्णायां मुखशोषे च वैरस्ये चापि पूजितः" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

कर्पूरक, पुं (कर्पूर इव कायति प्रकाशते शोभते वा । कर्पूर + कै + क ।) कर्च्चूरक । कचूरव । इति शब्दचन्द्रिका ॥

कर्पूरतिलक, पुं, (कर्पूर इव शुभ्रं तिलकं ललाटचिह्नं यस्य ।) स्वनामख्यातो हस्ती । यथा हितोपदेशे १ । २४६ ।
"अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती" ॥)
स्त्री, उमासखिभेदः । जया । इति शब्दमाला ॥

कर्पूरतैल, क्ली, (कर्पूराज्जातं तैलं स्नेहः । कर्पूरस्य तैलमिव स्नेहो वा ।) कर्पूरस्नेह । तत्पर्य्यायः । हिमतैलम् २ सुधांशुतैलम् ३ शीतांशुतैलम् ४ तुहिनांशुतैलम् ५ सितांशुतैलम् ६ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातामयनाशित्वम् । दन्तदार्ढ्यपित्तकारित्वञ्च । इति राजनिर्घण्टः ॥

कर्पूरनालिका, स्त्री, पक्वान्नविशेषः । कर्पूरनाडि इति नेशोयाल इति च ख्याता । यथा भावप्रकाशे ।
"एलाद्यया समितया इत्वा सम्पुटं ततः ।
लवङ्गोषणकर्पूरयुतया सितयान्वितम् ॥
घृतेदाव्येन सिद्धैषा ख्याता कर्पूरनालिका ।
सयावसदृशी ख्याता गुणैः कर्पूरनालिका" ॥

कर्पूरमणि, पुं, (कर्पूरवर्णो मणिः ।) पाषाणभेदः ।
कर्पूरमणिनामायं शुभ्रः वातादिदोषनुत्" ॥
इति राजनिर्घण्टः ॥

कर्ब्बरः, पुं, (कीर्य्यते क्षिप्यते इति । कॄ + विच् । कर । चल्यते इति चलः प्रतिविम्ब । चल + कः । लस्य रः । कीर्य्यमाणः चरः प्रतिविम्बः यत्र । दर्पणे हि मुखादीनां प्रतिविम्बपतनात् तथा बोध्यते ।) दर्पणः । इति जटाधरः ॥

कर्ब्ब गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) रेफोपधः । कर्ब्बति । इति दुर्गादासः ॥

कर्ब्बुदार, पुं, (कर्ब्बुरिव कर्ब्बु सन् वा श्लेष्माणं मलं वा दारयतीति । कर्ब्बु + दृ + णिच् + अण् ।) कोविदारवृक्षः । इति शब्दमाला ॥ श्वेतकाञ्चनः । अस्य गुणौ । ग्राहित्वम् । रक्तपित्तरोगे विशेषेण पथ्यत्वञ्च । इति राजवल्लभः ॥
("प्रथमं कोविदारस्य कर्ब्बुदारस्य शाल्मलेः ।
पुष्पं ग्राहि प्रशस्तञ्च रक्तपित्ते विशेषतः" ॥
इति चरके सूत्रस्थाने । २७ अध्याये ॥)
नीलझिण्टी । इति शब्दचन्द्रिका ॥

कर्ब्बुदारक, पुं, (कर्ब्बुदारवत् कायति । कै + क । यद्वा कर्ब्बु सन् कर्ब्बुरिव वा श्लेष्माणं कफं दारयति । दृ + णिच् + ण्वुल् ।) श्लेष्मान्तकवृक्षः । इति राजनिर्घण्टः ॥

कर्ब्बुर, क्ली, (कर्ब्बति गच्छति यस्मात् यस्मिन् सति वा गर्व्वो भवति कार्पण्येन वा । कर्ब्ब दर्पे इति "मद्गुरादयश्च" उणां १ । ४२ । इति उरच् ।) स्वर्णम् । धुस्तूरवृक्षः । इत्यमरः । २ । ९ । ९४ ॥ जलम् । इति मेदिनी ॥

कर्ब्बुर, पुं (कर्ब्बति हिनस्ति जीवम् । कर्ब्ब हिंसायाम् + "मद्गुरादयश्च" । उणां । १ । ४२ । इति उरच् ।) राक्षसः । ("कर्ब्बुर श्वेतरक्षसोः" उज्ज्वलः । १ । ४२ । कर्ब्बति नानावर्णतां गच्छति । कर्ब्ब गतौ + उरच् । उणां १ । ४२ ।) नानावर्णः । तत्पर्य्यायः । चित्रम् २ किर्म्मीर ३ कल्माष ४ शबल ५ एत ६ । (यथा कुमारे । ४ । २७ ।
"इति चैनमुवाच दुःखिता
सुहृदः पश्य वसन्त । किं स्थितम् ।
तदिदं कणशो विकीर्य्यते
पवनैर्भस्म कपोतकर्ब्बुरम्" ॥)
तद्वति त्रि । इत्यमरः । १ । ६ । १७ । शटी । इत्यमरटीका ॥ पापम् । इति मेदिनी ॥ नदी निष्पावधान्यम् । इति राजनिर्घण्टः ॥

कर्ब्बुरफल, पुं, (कर्ब्बुरं चित्रवर्णं फलं यस्य ।) साकुरुण्डवृक्षः । इति राजनिर्घण्टः ॥

कर्ब्बुरा, स्त्री, (कर्ब्बुर + टाप् ।) कृष्णवृन्तावृक्षः । इति मेदिनी ॥ पारुल इति भाषा ॥ बर्ब्बरा । इति जटाधरः ॥ बावुइ तुलसी इति भाषा ॥ (जलौकोजातिविशेषः ।
"वर्म्मिमत्स्यवदायता छिन्नोन्नतकुक्षिः कर्ब्बुरा" ॥
इति सुश्रुते । १३ अध्याये ॥)

कर्ब्बुरी, स्त्री (कर्ब्बुर + गौरादित्वात् ङीष् ।) दुर्गा । इति त्रिकाण्डशेषः ॥

कर्ब्बूर क्ली, (कर्ब्बति गर्व्वं प्राप्नोति यस्मात् कर्ब्ब दर्पे गतौ वा खर्ज्जूरादित्वात् ऊरः । उणां ४ । ९० । पृषोदरात् दीर्घो वा ।) स्वर्णम् । इति मेदिनी ॥ हरितालम् । इति त्रिकाण्डशेषः ॥

कर्ब्बूर, पुं, (कर्ब्बति गच्छति हिनस्ति वा । कर्ब्ब + ऊरः ।) शटी । इत्यमरः । २ । ४ । ९४ ॥ राक्षसः । इत्युणादिकोषः ॥ पाशिवृक्ष । इति शब्दरत्नावली । कांचहलुद इति भाषा ॥

कर्ब्बूरक, पुं, (कर्ब्बूर + स्वार्थे कन् ।) हरिद्राभकन्दः । कांचहलुद इति ख्यातः । इति भरतः ॥ वनहरिद्रा । इति सारसुन्दरी ॥ कर्पूरहरिद्रा । इति सारमञ्जरी ॥ आम्रगन्धः । इति मनोरमा ॥ आदिया हरिद्रेति ख्याता । इति टीकासर्व्वस्वम् ॥ हरिद्राभकचोरा इति ख्याता । इति मधुमाधवी ॥ तत्पर्य्यायः । द्राविडकः २ कालकः ३ वेधमुख्यकः ४ । इत्यमरः । २ । ४ । १३५ ॥ कास्वकः ५ इति टीकासर्व्वस्वम् ॥

कर्म्मन्, [न्] क्ली, (क्रियते यत् । कृ + मनिन् ।) कर्तुः क्रियया आप्यतमं तत् क्रियाव्याप्यं कर्म्मेति

भोजनं चोरयित्वा तु मक्षिका जायते नरः ।
धान्यादर्द्धेव मार्ज्जारस्तिलपिण्याकमूषिकः ॥
घृतं हृत्वा च नकुलः काको मद्गुरमामिषम् ।
मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलिकः ॥
अपो हृत्वा तु पापात्मा वायसः सम्प्रजायते ।
हृते कांस्ये च हारीतः कपोतो वा प्रजायते ॥
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते ।
कार्पासिके हृते क्रौञ्चो वह्निहर्त्ता बकस्तथा ॥
मयूरो वर्णकं हृत्वा शाकं पत्रञ्च जायते ।
जीवञ्जीवकतां याति रक्तवस्त्रापहारकः ॥
छुछुन्दरिः शुभान् गन्धान् वासो हृत्वा शशो भवेत् ।
षण्ढः फलापहरणे काष्ठस्य काष्ठकीटकः ॥
पुष्पापहृद्दरिद्रस्तु पङ्गुर्यानापहारकः ।
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः ॥
भूहृद्धरकान् गत्वा रौरवादीन् सुदारुणान् ।
तृणगुल्मलतावल्लीत्वक्सारतरुतां व्रजेत् ॥
एष एव क्रमो दृष्टो गोसुवर्णादिहारिणः ।
विद्यापहारी मूकश्च गत्वा च नरकान् बहून् ॥
अनमिद्धेऽग्नौ हुते च मन्दाग्निः सम्प्रजायते ।
परनिन्दा कृतघ्नत्वं परमर्म्मावघट्टनम् ॥
नैष्ठुर्य्यं निर्घृणत्वञ्च परदारोपसेवनम् ।
परस्वहरणाशौचं देवतानाञ्च कुत्सनम् ॥
निकृत्य वञ्चनं नृणां कार्पण्यञ्च नृणां वधः ।
उपलक्ष्याणि जानीयात् मुक्तानां नरकादनु ॥
दयाभूतेषु सम्वादः परलोकप्रतिक्रिया ।
सत्यं हितार्थं प्रीतिर्वेदप्रामाण्यदर्शनम् ॥
गुरुदेवर्षिपूजा च कैवल्यं साधुसङ्गमः ।
सत्क्रियाभ्यसनं मैत्री स्वर्गिणो भद्रायं विदुः ।
अष्टाङ्गयोगविज्ञानात् प्राप्नोत्यात्यन्तिकं फलम् ॥
इति गारुडे कर्म्मविपाकः २२६ अध्यायः ॥

शातातपस्तु मन्यतोऽस्य पापरोगप्रायश्चित्तानां विपर्य्ययमाह । प्रायश्चित्तविहीनपापिनो नरकान्ते प्रतिजन्म तत्पापचिह्नरोगयुक्तं शरीरं भवति । अतो दुष्कृतजा रोगा जपदेवार्चनहोमदानादिभिः शमं यान्ति ॥०॥ महापातकजा रोगाः सप्त जन्मसु जायन्ते । तद्यथा—कुष्ठम् । राजयक्ष्मा । प्रमेहः । ग्रहणी । मूत्रकृच्छ्रम् । अश्मरी । कासः । अतीसारः । भगन्दरः । दुष्टव्रणः । गण्डमाला । पक्षाघातः । अक्षिनाशनम् । इत्यादयः । अत्र सम्पूर्णं प्रायश्चित्तम् ॥०॥ उपपातकोद्भवा रोगाः पञ्चजन्मसु जायन्ते । तद्यथा—जलोदरम् । यकृत् । प्लीहा । शूलम् । व्रणः । श्वासः । जीर्णज्वरः । छर्द्दिः । भ्रमः । मोहः । गलग्रहः । रक्तार्ब्बुदम् । विसर्पः । इत्यादयः । अत्र अर्द्धं प्रायश्चित्तम् ॥०॥

पापसमुद्भवा रोगा त्रिषु जन्मसु जायन्ते । तद्यथा—दण्डापतानकः । चित्रवपुः । कम्पः । विचर्च्चिका । वल्मीकः । पुण्डरीकम् । इत्यादयः । अत्र पादांशं प्रायश्चित्तम् ॥०॥ अतिपातकात् अर्द्धं यावत् रोगा भवन्ति अन्ये वक्ष्यमाणा रोगा वक्तव्याः ॥०॥ अथ दानादिषु आधारविधिः ।

गोदाने तद्गोका सवत्सा पयस्विनी गौः । वस्त्रदाने शुक्लवस्त्रद्वयमपरिहितं शुभोऽक्षतम् । भूमिदाने दशनिवर्त्तनपरिमिता भूः । सुवर्णदाने सुवर्णनिष्कं तदर्द्धं वा । अन्नदाने उपस्करसहित शुद्धान्नम् । महिषदाने सवत्सापयस्विनीमहिषी । गन्धदाने सुवर्णकर्पूरचन्दनम् । देवार्चन दीपावयवसम्प्रदानम् । आसनभोजने सद्य द्विजेभ्यो मिष्टान्नदानम् । वस्त्रे अलङ्कारदाने पुष्परत्नस्वर्णमुक्तामणिमयालङ्कारः सहस्रामृतगुणवच्चामरछत्रसम्बलितविचित्रवस्त्र धान्यदाने षष्टिमन्त्रकाषादी परिमितधान्यम् । वस्त्रदाने कर्पूरमिश्रितपुष्पवस्त्रादयम् ॥०॥

अथ प्रायश्चित्तार्थबलानुष्ठानादि । तत्र यथाशक्ति गुरो वा ब्राह्मणानुपवेश्य तेषामनुज्ञया प्रायश्चित्तपूर्वकं विष्णुं सम्पूज्य निजशक्त्या अनुग्रहेभ्यो द्विजेभ्यो धेनुदानादि दक्षिणाय दत्त्वा तान् नत्वा कृष्णकर्म्मकलुषस्य पापप्रसादेन प्रायश्चित्तं याचेत । तेषामनुज्ञया प्रायश्चित्तं यथाविधि कृत्वा परिपूर्णं ग्राम् तान् यथाविधि पूजयित्वा तेभ्योऽनुज्ञाता विप्रान् प्रतिपत्य ब्राह्मणान् भोजयित्वा बन्धुभिः सह भोक्तव्यम् । इति शातातपोक्तकर्म्मविपाकप्रथमाध्यायविवरणम् ॥०॥ अन्यान्तरोक्तब्रह्महत्यादिरोगविशेषकुष्ठादिरोगाणां प्रायश्चित्तं यदाचरेत महापातकादिपातकस्य गुरुत्वात् तत्पापसम्बन्धि कुष्ठरोगस्य प्रायश्चित्तं द्विगुणम् । इति शाता ॥०॥

अथ शातातपोक्तहिंसास्तेयाऽगम्यागमनाऽगतिप्रायश्चित्तानि क्रमेण लिख्यन्ते ॥

पापी	रोगी	प्रायश्चित्तम्
१ अन्नघाती	१ अधिकाङ्ग	१ तिलाम्बरप्रसुलां कन्यां दद्यात् ॥
२ अश्वहन्ता	२ वक्रतुण्ड	२ शतपलानि चन्दनानि दद्यात् ॥
३ उष्ट्रघाती	३ पाण्डुरोगी	३ ब्राह्मणाय मणपरिमितकर्पूरं दद्यात् ॥
४ उष्ट्रहन्ता	४ विकृतस्वरः	४ कर्पूरक पल दद्यात् ॥
५ काकघाती	५ कर्णपीड	५ कृष्णां गां दद्यात् ॥
६ काकहन्ता	६ कृष्ण	६ शुक्लवस्त्रद्वयं दद्यात् ॥
७ सूकरहन्ता	७ खररोमा	७ ब्रह्महत्याव्रतवत् प्रायश्चित्तं कुर्य्यात् ॥
८ गर्भपाती	८ सर्व्वाङ्गीणसिद्धाघ	८ प्रासादं कारयित्वा रुद्रप्रतिमां स्थापयेत् अथवा कृष्णचतुर्द्दश्यां धूपेन सह शान्तिपूर्ब्बकं जलसम्पूर्णकलशमेकमर्पयेत् ॥
९ गोवधी	९ कुष्ठी विकीर्ण	९ प्रतमागायत्रप्रतदर्शितो ब्राह्मणाय भूमिं दक्षिणां दद्यात् पारणं कुर्य्यात् ॥
१० गोवधी	१० कुष्ठी	१० यवचूर्णकचूर्णयवतण्डुलमिश्रितदधिपञ्चगव्यमिश्रितरक्तचन्दनचन्दनसहितकुङ्कुमैः दिने दिने स्नात्वा सप्त तिलपुष्पमहिमामयाज विप्राणा तद्गत विप्रमिति सुवर्णनिर्म्मितवृषभेण युक्तवृषभसहितेन सद्गुणं पापं मे शान्तमिति वाचयेत् । तत ततोऽपि ब्राह्मणाय चतुर्व्वेदविदे ग्रामदानं कुर्य्यात् । ततो दक्षिणां दत्त्वा याचमानान् प्रति भोजनं कुर्य्यात् । ततो "यन्मयापि महापापमद्य तत्पापनाशकात् वर्जितम्" इति सम्यक् दक्षिणां दत्त्वा विप्रान् वाचयेत् ॥
११ मत्स्यहन्ता	११ देवरोगः	११ दुग्धवतीं धेनुं दद्यात् ॥

पापी	रोगी—	प्रायश्चित्तम्
१२ पितृहा	१२ चेतनाहीनः	१२ त्रिंशत् प्राजापत्यानि कृत्वा पलपरिमितां सुवर्णमयीं कारयित्वा ताम्रपात्रे रूप्यमय कुम्भं स्थापयित्वा निष्कपरिमितसुवर्णनिर्म्मितं विष्णुं पट्टवस्त्रेण संवेष्ट्य विधानतः पूजयेत्। ततः सर्व्वं ब्राह्मणाय दत्त्वा ब्राह्मणं विसर्ज्जयेत्। अन्येभ्योऽपि विप्रेभ्यो भूयसीं दक्षिणां दद्यात् ॥
१३ बालघाती	१३ मृतवत्सः	१३ ब्राह्मणोद्वाहनं यथाविधि हरिवंशश्रवणञ्च कुर्य्यात्। महारुद्रजपान् कारयेत्। तद्दशांशेन अयुतसंख्यकदूर्व्वया च हुत्वा दक्षिणासहितनिष्कपरिमितैकादशसुवर्णानि दिगनुसारतः एकादशपलानि च दद्यात्। अन्यब्राह्मणेभ्यो यथाशक्ति दक्षिणां दद्यात्। तत आचार्य्यो वरुणदैवतमन्त्रैर्दम्पती स्नापयेत्। यजमान आचार्य्याय वस्त्राद्यलङ्कारयानि दद्यात् ॥
१४ भ्रातृहा	१४ पाण्डुकुष्ठी	१४ यज्ञमानचतुर्दिक्षु पञ्चपल्लवपञ्चवर्णसंयुक्तचतुरः कलसान् संस्थाप्य तन्मध्ये कुम्भोपरि रौप्यमष्टदलपद्मं विन्यस्य तदुपरि पलार्द्धार्द्धपरिमितसुवर्णनिर्म्मितदशभुजं चतुर्म्मुखदेवं संन्यस्य प्रत्यहं त्रिकालं पुरुषसूक्तेन पूजयेत्। ततः पूर्व्वादिकुम्भेषु ब्रह्मचारिणो ब्राह्मणा ऋग्वेदप्रभृतीन् सर्व्ववेदान् शनैः पठेयुः। ततो मध्यकुम्भे तिलाज्यघृतहोममिश्रद्रव्यैः शान्तिपुरःसरं दशांशेन होमं कुर्य्यात्। ततो ब्राह्मणो द्वादशाहेनेदं कर्म्म समाप्य तत्र पीठे यथाविधि यजमानमभिषिञ्चेत्। ततो यजमानो ब्राह्मणेभ्यो यथाशक्ति गोभूहेमतिलोदकानि दत्त्वा कुम्भादीन् आचार्य्याय निवेदयेत् ॥
१५ मातृहा	१५ मूकः	१५ चान्द्रायणव्रतं चरित्वा "सरस्वति जगन्मातः शब्दब्रह्मादिदेवते। दुष्कर्म्मकरणात् पापात् पाहि मां परमेश्वरि"॥ इमं मन्त्रमुच्चार्य्य पलपरिमितसुवर्णसहितपुस्तकं ब्राह्मणाय दत्त्वा तं ब्राह्मणं विसर्ज्जयेत्।
१६ भगिनीघाती	१६ अन्धगुल्मी	१६ निष्कत्रयपरिमितसुवर्णमयीं प्रतिमां दद्यात् ॥
१७ भ्रातृहा	१७ अन्धः	१७ पितृहवत् प्रायश्चित्तं कुर्य्यात् ॥
१८ मार्ज्जारहा	१८ पीतमाक्षिः	१८ निष्कमितसुवर्णनिर्म्मितं पारावतं दद्यात् ॥
१९ रामहा	१९ क्षयरोगी	१९ गोभूहिरण्यमिष्टान्नजलवस्त्राणि घृतधेनुं तिलधेनुञ्च दद्यात् ॥
२० वकघाती	२० दौर्गन्ध्यः	२० सुशीलां गां दद्यात् ॥
२१ वैश्यहन्ता	२१ रक्तार्बुदी	२१ चत्वारि प्राजापत्यव्रतानि चरित्वा सप्तधान्यानि उत्सृजेत् ॥
२२ शुकशारिकाघाती	२२ स्खलितवाक्	२२ ब्राह्मणाय सदक्षिणं सच्छास्त्रपुस्तकं दद्यात् ॥
२३ शूकरहन्ता	२३ दन्तुरः	२३ सदक्षिणं घृतकुम्भं दद्यात्।
२४ शूद्रहन्ता	२४ दण्डापतानकः	२४ एकं प्राजापत्यव्रतं चरित्वा सदक्षिणैकधेनुं दद्यात् ॥
२५ प्रतापहा	२५ विपादकः	२५ खञ्जवत् प्रायश्चित्तं कुर्य्यात् ॥
२६ स्त्रीहन्ता	२६ अतिसारी	२६ दशाश्वत्थवृक्षान् रोपयेत् शर्कराधेनुं दद्यात् शतं ब्राह्मणांश्च भोजयेत् ॥
२७ हरिणघाती	२७ खञ्जः	२७ पलपरिमितसुवर्णाश्वं दद्यात् ॥ * ॥ 'हिंसायां निष्कृतिरियं ब्राह्मणे समुदाहृता। तदर्द्धार्द्धप्रमाणेन क्षत्रियादिष्वनुक्रमात्"॥ इति शातातपोक्तकर्म्मविपाकद्वितीयाध्याये हिंसाप्रायश्चित्तविवरणम् ॥ * ॥

१ अभक्ष्यभोक्ता	१ कृमिकोदरः	१ भीष्मपञ्चकोपवासं कुर्य्यात् ॥
२ अस्पृश्यस्पृष्टान्नभोक्ता	२ कृमिलोदरः	२ त्रिरात्रमुपवसेत् ॥
३ गरदानकर्त्ता	३ यकृत्प्लीहजलोदररोगी	३ पलत्रयपरिमितसुवर्णकल्पनाभ्यामन्वितजलधेनुदानं कुर्य्यात् ॥
४ दारुभिदः	४ रक्तातिसारी	४ उद्याने वटवृक्षारोपणं कुर्य्यात् ॥
५ दुष्टवाग्मी	५ खण्डितः	५ दुग्धसमन्वितघटद्वयं पलद्वयपरिमितरूप्यञ्च द्विजातये दद्यात् ॥
६ दधे सति कदन्नद	६ मन्दोदराग्निः	६ प्राजापत्यत्रयं कृत्वा शतं द्विजान् भोजयेत् ॥
७ धूर्त्तः	७ अपस्मारी	७ मधुकूष्माण्डीधेनुं दत्त्वा सदक्षिणां गां दद्यात् ॥
८ परनिन्दावान्	८ खल्वाटः	८ काञ्चनसहितं धेनुं दद्यात् ॥
९ पराम्नविघ्नकर्त्ता	९ अजीर्णी	९ यथाविधि लक्षहोमं कुर्य्यात् ॥
१० परोपतापी	१० शूली	१० अन्नदानं लक्षजपञ्च प्रकुर्व्वीत ॥
११ परोपहासकृत्	११ काणः	११ सवत्सां गां दद्यात् ॥
१२ पिशुनः	१२ श्वासकासी	१२ सहस्रपलसम्मितं घृतं दद्यात् ॥

पापी	रोगी	प्रायश्चित्तम्
१३ प्रतिमाभङ्गकारी	१३ अप्रतिष्ठ	१३ वत्सरमेकं प्रतिदिनं चैत्यवन्दनं कार्यं शक्त्या विधिना सार्धं सम्पूजयेत् सम्पूज्य विप्रांश्च तर्पयेत् ।
१४ मद्यप	१४ रक्तपित्ती	१४ सर्पिषो घट मधिकं च मधुनो घटं च दद्यात् ।
१५ मांसप	१५ पादरोगी	१५ धर्म दद्यात् ।
१६ स्वकन्याद्यगम्यागामी	१६ शनिलोदर	१६ त्रिरात्रं गोमूत्रयावकं भुञ्जीत ।
१७ विप्र	१७ मूर्द्धरोगी	१७ दश पयस्विनीर्गा दद्यात् ।
१८ सभार्या पत्नीगामी	१८ मणवातवान्	१८ स्वयवर्णिने निष्कत्रयपरिमितं धेनुं दद्यात् ।
१९ सुराप	१९ श्यामदन्त	१९ प्राजापत्यव्रतत्रयं सप्तकृष्णपरिमितानि दद्यात् ज्योतिष्टोमं तत्र तिलैः होमं कृत्वा वसिष्ठोक्तविधिना कुर्यात् ।
२० सुरापाने कृते च श्रुतनाशकारी	२० गुल्मरोगी	२० मास यावत् सुरापानं गोदानं प्राजापत्यमेकं च कुर्यात् । २० । इति शातातपोक्तकर्मविपाकस्थलीयाध्यायप्रोक्तप्रायश्चित्तविवरणम् । ७ ।
१ भ्रातृस्त्रीगामी	१ भुवमण्डी	१ शाखासम्भारकाल्यादीन् सम्पूज्य तिलपरिमितसौवर्णधेनुं "सुरभी वैष्णवी माता मम पापं व्यपोहतु" इमं मन्त्रमुच्चार्य दद्यात् ।
२ मातृयोनिगामी	२ गुल्मवान्	२ मास यावत् प्रतिदिनं वृषभगवाश्वादिकं दानं कुर्यात् । स्त्रीगामिनं तत्तत्स्वर्णसमानप्रायश्चित्तम् ।
३ श्यामाकहारी	३ क्षीणाग्नि	३ निष्कद्वयपरिमितां स्वर्णकुमारीं दद्यात् ।
४ स्त्रीविक्रयकारी	४ उदरगण्डवान्	४ गृहधेनुं प्रदद्यात् ।
५ उत्कोचकारी	५ मालक	५ कर्षपरिमितनिष्कपरिमितप्रतिमूर्तिं च कृत्वा ब्राह्मणाय दद्यात् ।
६ औषधापहर्ता	६ मृगीरोगी	६ मास यावत् सूर्याय कर्षमेकं दद्यात् ।
७ कन्दमूलहारी	७ क्षयरोगी	७ यथाशक्ति देवस्य उद्यानं च कुर्यात् ।
८ कांस्यहारी	८ पुण्डरीकसमन्वित	८ आत्मसमगुल्मं तस्मै कांस्यं दद्यात् ।
९ गुरुपत्न्यभिगामी	९ मूत्रकृच्छ्री	९ गोगण्डप्रमितस्वर्णेन द्रोणमिते घटे पश्चिमायां दिशि स्थाप्य तदुपरि ताम्रपात्रे तद्युक्तस्वर्णनिर्मितं तत्र पुरुषमूर्तिं यजेत । सामवेदी मध्ये कल्पयेत् सामवेदमार्गेण निष्कत्रयमितसुवर्णपुत्तलिकां निर्माय तामलङ्कृत्य ब्राह्मणाय दद्यात् । "दाता भविता दशा त्रिभिर्वामधियो वः । यतस्ते गौरवधारो वयं पापेभ्यो मुक्ताः" । इति मन्त्रेण ब्राह्मणाय सदक्षिणं दद्यात् ।
१० भ्रातृभार्यागामी	१० क्षीणमुष्क	१० मासपर्यन्तं प्रायश्चित्तं कुर्यात् ।
११ सपत्नीगमनकारी	११ प्रमेहवान्	११ मास यावत् वेदं जपेत् यथाशक्ति चान्द्रायणं स्यात् ।
१२ सपत्नीबन्धुगामी	१२ काकरोगी	१२ मधुधेनुं हिरण्यपरिमितकांस्यपात्रपरिमितनिष्क दद्यात् ।
१३ ताम्बूलहारी	१३ श्वेतोष्ठ	१३ गां तिलपात्रमितमेकं दद्यात् ।
१४ ताम्रचोर	१४ कीटकारी	१४ प्राजापत्यं तप्तकृच्छ्रपरिमितताम्रदानं च कुर्यात् ।
१५ तैलचोर	१५ कण्डूत्यादियुक्त	१५ उपोष्य त्रिरात्रं तैलघटं दद्यात् ।
१६ मधुहारी	१६ नेत्ररोगवान्	१६ उप व्रतविधिवत् दत्तधेनुं स्यात् ।
१७ दधिचोरः	१७ मदवान्	१७ त्रिरात्रं दधिधेनुं दद्यात् ।
१८ दारुहारी	१८ त्रिदोषादि	१८ त्रिसूर्ये चन्दनपरिमितकुसुमं स्यात् ।
१९ पीलुवनदाहकारी	१९ दुष्टरक्तकुष्ठ	१९ प्राणपरिहारं कुर्यात् ।
२० दुग्धहारी	२० मधुमूत्र	२० ब्राह्मणाय यथाविधि दुग्धधेनुं दद्यात् ।
२१ देवहारी	२१ त्रिविधज्वरी	२१ सम स्वरे वर्णं वद जपेत् महास्वरे महाघर दीर्घस्वरे चातिरोग वैधस्वरे तथा कर्णिकादौ च जपेत् ।
२२ गन्धादिद्रव्यचोरः	२२ दुर्गन्धि	२२ शर्करागुडादिपात्राणि क्षीराणि चैव दद्यात् ।
२३ वस्त्रहारी	२३ शिरोरोगी	२३ कपालचान्द्रायणं स्वयं तिलधान्यं ब्राह्मणभोजनं कुर्यात् ।
२४ पत्रपुष्पहर्ता	२४ त्रिगोमि	२४ धेनुं दद्यात् ।
२५ वस्त्रविक्रयी	२५ मुखारोगी	२५ त्रिरूद्र महदपं दद्यात् ।
२६ त्रिवर्णगन्धहर्ता	२६ वधिर प्रबलो	२६ ब्राह्मण भार्यां दद्यात् ।
२७ ब्रह्मचारिणीगामी	२७ हस्तकुष्ठी	२७ मासपर्यन्तं मासिकद्व्यादिवस्त्रदानं ब्राह्मणभोजनं च कुर्यात् ।

पापी	रोगी	प्रायश्चित्तम्
२८ फलहारी	२८ ग्रथितांगुलि	२८ हिमालये अयुतसंख्यकनामार्पण दद्यात् ।
२९ भ्रातृजायाभिगामी	२९ गुल्मकुष्ठी	२९ स्वसृगमनप्रायश्चित्तस्यार्द्धं घृताक्ततिलकरणकदशांशहोमञ्च कुर्य्यात् ।
३० मधुचौरः	३० नेत्ररोगवान्	३० उपवासं कृत्वा मधुधेनुं दद्यात् ।
३१ मातुलानीगन्ता	३१ पृष्ठकुब्ज	३१ कृष्णाजिनं प्रदद्यात् ।
३२ मातृगामी	३२ लिङ्गहीन	३२ उत्तरतः कृष्णमाल्यादिभूषितकृष्णवस्त्रसमाच्छन्नकुम्भं विन्यस्य तदुपरि कांस्यपात्रे निष्कपटकमितसुवर्णनिर्म्मितनरवाहनकुवेरं पुरुषसूक्तेन यजेत् । अथर्व्ववेदविद्ब्राह्मणस्तत्र अथर्व्वोक्तकर्म्म कुर्य्यात् । ब्राह्मणाय विंशतिनिष्कपरिमितसुवर्णनिर्म्मितपुत्तलिकां निष्पापोऽहमिति ब्रुवन् दद्यात् । "निधीनामधिपो देव शङ्करस्य प्रियः सखा । सौम्याशाधिपतिः श्रीमान् मम पापं व्यपोहतु ॥ इति मन्त्रेण तं कुवेरं आचार्य्याय दद्यात् ॥
३३ मातृष्वसृगन्ता	३३ नागाङ्गे मयवान्	३३ दासदानं अगम्यागमनप्रायश्चित्तञ्च कुर्य्यात् ।
३४ मृतभार्य्याभिगामी	३४ मृतभार्य्य	३४ एकां ब्राह्मणं विवाहयेत् ।
३५ रत्नप्रवालहारी	३५ रक्तवातवान्	३५ मणिरागसमन्वितां सवत्सां महिषीं दद्यात् ।
३६ लौहहारी	३६ कर्कशाङ्ग	३६ एकदिनमुपोष्य शतपललौहं दद्यात् ।
३७ वस्त्रहारी	३७ कुष्ठी	३७ निष्कमितहेमनिर्म्मितप्रजापतिं वस्त्रयुग्मञ्च दद्यात् ।
३८ विद्यापुस्तकहारी	३८ मूकः	३८ ब्राह्मणाय सदक्षिणं न्यायेतिहासं दद्यात् ।
३९ विप्रक्षेत्रापहारी	३९ अनपत्य	३९ महारुद्रजपादिकं कुर्य्यात् तद्दशांशपलाशसमिद्भिर्यथाविधि जुहुयात् मृतवत्सोक्तं सर्व्वकर्म्म च कुर्य्यात् ।
४० विप्रदेशाहृत्	४० कुष्ठम्	४० चान्द्रायणत्रयानन्तरं सुवर्णशतं दद्यात् ।
४१ शाकहारी	४१ नीलनेत्र	४१ ब्राह्मणाय महानीलमणिद्वयं दद्यात् ।
४२ शुक्तिहारी	४२ पाण्डुमूत्रक	४२ उपवासानन्तरं पञ्चशतशुक्तिं दद्यात् ।
४३ सौगन्धिकहारी	४३ दुर्गन्धाङ्गः	४३ लक्षसंख्यकपद्मैर्होमं कुर्य्यात् ।
४४ सगोत्रस्त्रीप्रसङ्गी	४४ भगन्दररोगी	४४ महिषीं दद्यात् ।
४५ सजातिस्त्रीगामी	४५ हृदयव्रणी	४५ प्राजापत्यद्वयं कुर्य्यात् ।
४६ स्वसृगामी	४६ रक्तकुष्ठी	४६ पूर्व्ववत् पीतमाल्यादिभूषितपीतवस्त्रसमाच्छन्नकलसं संस्थाप्य तस्योपरि स्वर्णपात्रं निष्कषटकमितसुवर्णनिर्म्मितवासवं पुरुषसूक्तेन यजेत् । तत्र ऋग्यजुः सामानि समाचरेत् ब्राह्मणं सम्पूज्य निष्पापोऽहमिति ब्रुवन् तस्मै शतसुवर्णनिर्म्मितपुत्तलिकां दद्यात् । "देवानामधिपो देवो वज्री विष्णुनिकेतनः । शतयज्ञः सहस्राक्षः पापं मम निकृन्ततु" । इति मन्त्रं पठेत् ॥ *॥ इति शातातपीयकर्म्मविपाके चतुर्थाध्यायोक्तगोत्रप्रायश्चित्तस्य तथा पञ्चमाध्यायोक्तागम्यागमनप्रायश्चित्तस्य च विवरणम् ॥ * ॥

पापयुक्त —	मरणविशेषविशिष्ट —	और्द्ध्वदैहिकपूर्व्वकालीनतत्पुत्रादिकर्त्तव्यप्रायश्चित्तम् ।
१ अनध्यायेऽध्ययनकर्त्ता	१ विद्युद्धत	१ विद्यादानं कुर्य्यात् ।
२ असूयी	२ अस्पर्शसङ्गी मृत	२ वेदपारायणं कुर्य्यात् ।
३ कारवृत्तिः	३ शृङ्गाहतः दन्तहतः	३ यथाशक्ति काञ्चनं दद्यात् ।
४ कुमतिप्रदः	४ विषहत	४ तिलसयुतां मेदिनीं दद्यात् ।
५ कुमारीगन्ता	५ व्याघ्रादिहत	५ परकन्यां विवाहयेत् ।
६ कृतवासाः नित्यस्नानस्य	६ क्रिमिहत	६ द्विजाय गोधूमान् दद्यात् ।
७ क्रतुनिन्दकः श्रुतिनिन्दकोऽपि पाठः	७ शस्त्रहत	७ सदक्षिणां महिषीं दद्यात् ।
८ गुरुघाती	८ शय्यामृत	८ निष्कमितसुवर्णनिर्म्मितपात्रस्थितविष्णुअधिष्ठिततुलसीसमन्वितशय्यां दद्यात् ।
९ दक्षिणाचौरः	९ दवहत दारुहत	९ सदने सभां कुर्य्यात् ।
१० मोघी	१० सन्ध्याकालीनमृत	१० कुमारं विवाहयेत् ।
११ द्विजनिन्दाकर्त्ता	११ प्रस्तरहत	११ सवत्सां पयस्विनीं गां दद्यात् ।
१२ द्विजवस्त्रहृत्	१२ अनपत्यमृत	१२ नवति कृच्छ्राणि चरेत् ।

पापकृत्—	महाविषयविशिष्ट—	पौर्व्वदैहिकपूर्ब्बकालीनपापादिकर्म्मप्रायश्चित्तम् ।
१३ निक्षेपहारक	१३ कुकुरहत	१३ अस्य प्रायश्चित्तस्यानुष्ठानात् स्वाप्यादिहत इत्यादिप्रदर्शनात् तथाविधप्रायश्चित्तम् ।
१४ रूपनाशक	१४ गजहतः	१४ चतुर्निष्कमितहेमधेनुं दद्यात् ।
१५ मधुविक्रयकः	१५ कीटहत	१५ धेनुं दद्यात् ।
१६ मांसिकः	१६ वराहशूकरहतः	१६ कुकुरवृषवत् ।
१७ मत्सरी	१७ मीनहोमहत	१७ दशनिष्कमयतरणिं दद्यात् ।
१८ मद्यविक्रेता	१८ पतितहत	१८ गोत्रमाशाम्बवानि कुर्य्यात् ।
१९ भिन्नभेदी	१९ वैद्यहत	१९ वृषं दद्यात् ।
२० मेदिनाशीर	२० अनुपातहत	२० धान्यपर्व्वतं दद्यात् ।
२१ स्तवानिन्दकः	२१ वह्निहतः	२१ सप्तत्रिंश उपानहं दद्यात् ।
२२ राजकुमारघ्न	२२ राजहत	२२ हिरण्यपुरुषं दद्यात् ।
२३ गन्धविक्रयकृत्	२३ व्याघ्रहत	२३ शाकसहितं सौवर्णपद्मं दद्यात् ।
२४ चौरघ्नत्	२४ चाण्डालहतः	२४ भवतो महाभयब्राह्मणभोजनं भवेत् ।
२५ विषदः	२५ सर्पदष्ट	२५ नागबलिप्रदानं भाद्रपदास्य कुर्य्यात् ।
२६ सङ्करभोजी	२६ दंष्ट्रिहतः	२६ तत्साधनपुरुषरत्नं दद्यात् ।
२७ मार्गहत्	२७ वानराश्मभिः हत अजपदापराह्णहतश्च	२७ सहस्रपलपुष्पकं दद्यात् ।
२८ सूचकः	२८ शकटहतः	२८ उपस्कराभिरन्नं दद्यात् ।
२९ सेतुभेदी	२९ जलहत	२९ निष्कत्रयमितस्वर्णवृषं दद्यात् ।
३० शरणागतत्यागकारकः	३० शाकिन्यादिहत	३० यथोचितं वद भवेत् ।
३१ द्विज	३१ उद्वन्धनमृतः	३१ पञ्चनिष्कां गां दद्यात् ।
	३२ स्थावरहत	३२ निष्कत्रयमितं स्वर्णं दद्यात् ।
	३३ अद्रिहतः	३३ कनकनिर्म्मितकपिं दद्यात् ।
	३४ विद्युदिभमृत	३४ शतं द्विजान् भोजयेत् ।
	३५ जलान्तर्मृत	३५ तिलधेनुं दद्यात् ।
	३६ केशरोगमृत	३६ षष्टौ कृच्छ्रान् समाचरेत् । ० ।

इति शातातपीयकर्म्मविपाके भवतीनां विशेषप्रायश्चित्तम् । ० ।

अनागौस्थिताधारणप्रायश्चित्तम् ।

तत्र कलसधान्योपरि सव्यपञ्चकलस्यैर्विधिवत्स्थापितकुम्भकलसमाच्छन्नकलशमूलं जलस सम्पाद्य तत्र गङ्गिद्यावत्पूजयित्वा अनुरूप दद्यात् सर्वपुरुष तात्ते निष्कसर्णिनिर्म्मितं विष्णुदिव्य पुरुषं संस्थाप्य पूजयेत् । प्रथम पुरुषसूक्तेन द्वितीय मदयन तत्र कलसे अक्षुक्षत भवेत् । तमप्यनेन इमपूजान्ते कार्य्यदिवसद्वयं मासयोनिर तत्रशास्तिपूजनान्तं हवित्रहोमञ्च कुर्य्यात् । तदन्ते गोविन्दादिमन्त्रविधि तस्मै दद्यात् ।

"इम निष्कमय विष्णु यथाशक्ति समन्वितम् ।
ददामि तस्मै प्रीतात च पीडा कुरुते मम ॥

इति मन्त्रेण स्वरूपप्रदानपूर्वकमिति सम्यक्त्विन विप्रविरुद्धे प्रिणमथ दद्यात् । तत्राथ देह महिषस्य तिलपात्रसहितान् हाटककम्बलकरणान् विष्णुर्हिन्दुःर्त्ते कलसञ्च दद्यात् । तावत्यथा पुर्व्वेरागाथ उदग्नमथो कर्माद्दिकेऽस्मिन् कर्मधिकेन् । ततो तत्रस्थ धान्यादिस्य दक्षिणां दद्यात् नरोत्तमरसिक कुर्य्यात् । ० ।

"एवं कृते विधानेन प्रकुर्व्वतोऽशुचिहितम् ।
तत प्रेतत्वनिर्म्मुक्ता पतितास्तिपितामहा ॥
दत्त्वा दानाय पौत्राय आयुरारोग्यसम्पद" ॥

इति शातातपीयकर्म्मविपाकसप्ताध्यायोक्ता गतिप्रायश्चित्तविवरणम् । ० ।

(मार्कण्डेयोक्तः कर्म्मविपाकश्च । यथा, तत्रैव १५ अध्याये उक्तः ।

"पतितात् प्रतिग्रहादौ अधर्मोऽपि मतोऽपि च ।
तस्मात् प्रतिगृह्णन् कृमि पतितताञ्जः ॥
उपाध्यायव्यलीकस्य कृता स्या भवति द्विज ।
तस्यादौ मकरः तास्मन् स्नुर्य पापवान्मम ॥
स्त्रयो जायते जन्म पिष्टोदकमानकः ।
मातृपितृसाङ्गुरु दारेषु अमर्ज्जयते ।
भ्रातृ पत्नीमयो च अमानव प्रयत ।
मातैव पीड्यमानस्तु कम्पनम प्रयते ।
महतिमृत्युदान्तु कर्म्मन्द्र न विवदे ।
कोऽपि मोहलमायन्तो जायते वानरो मनः ॥
व्यापादयन्त नाम न विद्या जायते कृमिः ।
कदम्बकस्य राजस्य कृतो भवति दारुण ।

विश्वासहन्ता च नरो मीनयोनौ प्रजायते ।
धान्यमाषतिलाम्बाजान् कुलत्थान् सर्षपांश्चणान् ।
कलायान् कलमान् मुद्गान् गोधूमानतसीस्तथा ।
शस्याम्यन्यानि वा मूत्वा मोहाज्जन्तुरचेतनः ।
सञ्जायते महावक्त्रो मूषिको बभ्रुसन्निभः ।
परदाराभिमर्शात्तु वृको घोरोऽभिजायते ।
श्वा सृगालो बको गृध्रो व्याघ्रः कङ्कस्तथा क्रमात् ।
भ्रातृभार्य्यां तु दुर्बुद्धिर्योऽभिधर्षति पापकृत् ।
पुंस्कोकिलत्वमाप्नोति स चापि नरकाधमः ।
सखिभार्य्यां गुरोर्भार्य्यां राजभार्य्यां च पापकृत् ।
प्रधर्षयित्वा कामात्मा शूकरो जायते नरः ।
यज्ञदानविवाहानां विघ्नकर्त्ता भवेत् कृमिः ।
दत्त्वा च कन्यां यो कन्यां द्वितीये सम्प्रयच्छति ।
देवता पितृविप्राणामदत्त्वा योऽश्नुते ।
प्रभुतो नरकान् सोऽपि च ततो काकोऽभिजायते ।
ज्येष्ठं पितृसमं चापि भ्रातरं योऽवमन्यते ।
मृतश्च सोऽपि नियतं क्रौञ्चयोनौ प्रजायते ।
शूद्रश्च ब्राह्मणीं गत्वा कृमियोनौ प्रजायते ।
तस्यामपत्यमुत्पाद्य काष्ठान्तःकीटको भवेत् ।

शूकरः कृमिको मद्गुश्चण्डालश्च प्रजायते ।
कृतघ्नोऽधमः पुंसां विमुक्तो नरकान्नरः ।
कृतघ्नः कृमिकः कीटः पतङ्गो वृश्चिकस्तथा ।
मत्स्यस्तु वायसः कूर्म्मः पुल्कशो जायते ततः ॥
अशस्त्रं पुरुषं हत्वा नरः सञ्जायते खरः ।
कृमिः स्त्रीवधकर्त्ता च बालहन्ता च जायते ॥
भोजनं चोरयित्वा तु मक्षिका जायते नरः ।
तत्राप्यस्ति विशेषो वै भोजनस्य शृणुष्व तत् ।
हृत्वान्नन्तु स मार्जारो जायते नरकागतः ॥
तिलपिण्याकसम्मिश्रमन्नं हृत्वा तु मूषिकः ॥
घृतं हृत्वा तु नकुलः काको मद्गुरजामिषम् ॥
मत्स्यमांसापहृत् काकः श्येनो मांसामिषापहृत् ।
चीचीकाकस्त्वपहृते लवणे दधनि कृमिः ॥
चोरयित्वा पयश्चापि बलाका सम्प्रजायते ।
यस्तु चोरयते तैलं तैलपायी स जायते ॥
मधु हृत्वा नरो दंशः पूपं हृत्वा पिपीलिका ।
चोरयित्वा तु निष्पावान् जायते ग्रहगोलकः ॥
आसवं चोरयित्वा तु तित्तिरित्वमवाप्नुयात् ॥
अयो हृत्वा तु पापात्मा वायसः सम्प्रजायते ।
हृते कांस्ये च हारीतः कपोतो रूप्यभाजने ।
हृत्वा तु काञ्चनं भाण्डं कृमियोनौ प्रजायते ॥
पत्रोर्णां चोरयित्वा तु क्रकरत्वञ्च गच्छति ।
कोषकारश्च कौषेये हृते वस्त्रेऽभिजायते ॥
दुकूले शार्ङ्गिकः पापो हृते चैवांशुके शुकः ।
तथैवाजाविकं हृत्वा वस्त्रं क्षौमञ्च जायते ।
कार्पासिके हृते क्रौञ्चो वाल्कहर्त्ता बकस्तथा ।
मयूरो वर्णकान् हृत्वा शाकपत्रञ्च जायते ॥
जीवञ्जीवकतां याति रक्तवस्त्रापहृन्नरः ।
छुछुन्दरिः शुभान् गन्धान् वासो हृत्वा शशो भवेत् ॥
षण्ढः फलापहरणात् काष्ठस्य घुणकीटकः ।
पुष्पापहृद्दरिद्रश्च पङ्गुर्यानापहृन्नरः ।
शाकहर्त्ता च हारीतस्तोयहर्त्ता च चातकः ।
भूहृत्वा नरकान् गत्वा रौरवादीन् सुदारुणान्
तृणगुल्मलतावल्लीत्वक्सारतरुतां क्रमात् ।
प्राप्य क्षीणाल्पपापस्तु नरो भवति वै ततः ॥
कृमिः कीटः पतङ्गोऽथ पक्षी तोयचरो मृगः ।
गोत्वं प्राप्य च चण्डालपुल्कशादि जुगुप्सितम् ।
पङ्ग्वन्धो बधिरः कुष्ठी यक्ष्मणा च प्रपीडितः
मुखरोगाक्षिरोगैश्च गुदरोगैश्च बाध्यते ॥
अपस्मारी च भवति शूद्रत्वञ्च स गच्छति ।
एष एव क्रमो दृष्टो गोसुवर्णापहारिणाम् ।
विद्यापहारिणश्चोग्रा निष्कृदक्षिणो गुरोः ।
जायामन्यस्य पुरुषः पारक्यां प्रतिपादयन् ।
प्राप्नोति षण्ढतां मूढो यातनाश्च परिप्लुतः ।
यः करोति नरो होममसमिद्धे विभावसौ ।
सोऽजीर्ण्याधिदुःखार्त्तो मन्दाग्निः सम्प्रजायते" ॥ ।
नानापुराणोक्तकर्म्मविपाकसंक्षेपमाह ।

१ । अकिञ्चनता । यः किल प्रभूतधनवानपि
धर्म्मनिन्दको देवाग्निब्राह्मणदरिद्रेभ्यः किञ्चिदपि
धनं न दत्तवान् । स तु आयुषोऽवसाने मृतो यम
दूतैः प्रपीडितो लोलास्यनरके, अब्दलक्षं पञ्च
अपि निराहारः परमं दुःखमाप्नोति । ततो जन्मा
न्तरं परिदृष्टाकिञ्चनत्वमासाद्य जीर्णवस्त्रधरः
बहुना क्लेशेनापि स्वजीविकां निष्पादयेत ॥

२ । अपुत्रता बहुपुत्रता च । यस्तु गवीमुखात्
भोजनीयद्रव्यं आदाय दूरतो विसर्जयेत । स
मन्वन्तरत्रयं निर्जने घोरे मरुप्रान्तस्थाने उषित्वा
पुनर्जन्मान्तरं प्राप्य पुत्रविहीनो बहुपुत्रो वा
भवेदिति ॥

३ । अर्शोरोगः । या खलु पतिव्रता धर्म्मनियता
ऋतुस्नाता पतिं नोपगच्छेत । यश्च आत्महा
भ्रूणहा गोहन्ता च स्यात । स मृत गाढान्ध
तमसावृत तामिस्राख्य नरकं गत्वा कर्म्मक्षयम
प्राप्य जन्मान्तरेण पुनर्मानुषयोनिमभिगम्य अर्शो
रोगेणाक्रान्तो भवेदिति ॥

४ । अल्पायुःसन्तानता । यो हि तृष्णार्त्तां
वारिपानरतां गां निवारयति । अनेनैव पापेन
तस्य अल्पायुषः सन्ताना भवेयुः ॥

५ । अश्मरीरोगः । यस्तु ऋतुस्नातां स्त्रियं
क्रोधादप्रीत्या वा नोपगच्छति । स मृत पूय
शोणितसमिश्रे नरके प्रपीडितः पुनर्मानुषत्व
प्राप्य अश्मरीरोगाक्रान्तो जायते इति ॥

६ । उन्मादरोगः । यस्तु ब्राह्मणं वैष्णवं पितरौ
हिंसादिकं मार्गं नाचयेत् परं निन्देत् स
मृत पुरीषाख्ये नरके अधःशिरा नाना दुःखभाक्
भवेत । तत कर्म्मक्षये मानुषीं तनुमुपलभ्य
उन्मादरोगवान् जायते । तथा येन च ब्राह्मणेषु
गुरौ च दम्भाचारः कृतः तेभ्यः स्मृतिभ्रम
कराणि द्रव्याणि च दत्तानि सोऽपि जन्मान्तरे
उन्मादरोगवान् भवेदिति ॥

७ । कासः । कासस्तु पञ्चविधः । येन कर्म्मणा
यद्रूपो भवेत्तदुच्यते । अतिकठोरैर्मिथ्यावाक्यैर्यस्तु
लोकं पीडयेत स पित्तप्रबलकेन कासेन पी
डितो भवेत् । यो हि ब्राह्मणस्थानविनष्टकारी
स वातकासेन पीडितो भवेत । यस्तु जलाशय
ध्वंसकारी स श्लेष्मकासेन पीडितः स्यात् । यो हि
ब्रह्म विष्णुं शिवञ्च भेदबुद्ध्या पश्यति स सन्नि
पातोत्थकासपीडितः स्यात । यश्च विना यज्ञं हत्वा
तन्मांसभक्षणकारी सर्व्वदोषोत्थकासेन गृह्यते ।
यदुक्तं तन्त्रे पुराणे च,—
"अयज्ञेन पशुं हत्वा भुङ्क्ते मांसन्तु यो नरः ।
सर्व्वदोषोत्थकासेन गृह्यते स तु भूपते ।" ॥

८ । कुब्जत्वम् । यदुक्तं पुराणेषु ।
"देवताप्रतिमां दृष्ट्वा यत्ता नैवाभिवादयेत् ।
ब्राह्मणञ्च गुरुं श्रेष्ठं ब्रह्मचारितपस्विनम् ।
श्मशाने जायते वृक्षः काकगृध्रोपसेवितः ।
भुक्त्वा कर्म्मशेषञ्च मानुषत्वमवाप्य सः ।
कुब्जत्वमश्नुते तस्मात् कर्म्मणो मानुषं ध्रुवम्" ॥

९ । गर्भस्रावः । या काचित् नारी हिंसापर
तन्त्रा सती सपत्न्यादीनामन्यासां स्त्रीणां दुष्टौ
षधादिभिर्दुष्कर्म्मैर्वा गर्भं अपातानि च नाशयति
सा नरकाग्निभुक्ता पुनर्मानुषीं योनिमासाद्य
पुत्राकांक्षिणी ऐश्वर्य्यवत्यपि गर्भस्रावदुःखे प्रपीडिता
भवेत ।

१० । गलगण्डः । यः खलु मोहाद् गुरुस्त्री
कण्ठदर्शनं कृतवान् । स मृतो यमकिङ्करैर्नि
र्जने प्रान्तरे देशे दिव्यवर्षायुतत्रयं पात्यते ।
पुनर्जन्म समासाद्य च गलगण्डरोगाक्रान्त
सीदेत ॥

११ । यक्ष्मा । ये च धनवन्तः प्रभूत
धनसंग्रहं कृत्वा न यच्छन्ति न चाश्नन्ति न
ततः कलात्मकं तत्परमद्भुतं ध्याय कुम्भे निःक्षिपेत् । ततोऽश्वत्थपनसचूतपल्लवैरिन्द्रवल्लीपत्रैर्वा कलस-मुद्रया कुम्भवक्त्रं पिधाय तदुपरि वस्त्रे शफला-क्षतं चषकं कन्यरत्नाङ्कमुद्रया स्थापयेत् । तत्र कुम्भं निम्मितेन क्षौमयुग्मेन संवेष्ट्य मूलेन कुम्भे मूर्त्तिं सङ्कल्प्य यथोक्तरूपेण देवतां ध्यात्वा तस्या आवाहनादिकं कृत्वा पूजयेत् । देवताङ्गे षडङ्गन्यासं कृत्वा धेनुमुद्रायरमीकरणमुद्रे प्रदर्श्य प्राणप्रतिष्ठां कृत्वा षोडशोपचारैरपि पूजयेत् । ततोऽष्टोत्तरं सहस्रं शतं वा तन्मन्त्रं जप्त्वा समर्पयेत् । ततो मन्त्रार्दशसंस्कारान् कृत्वा गुरुः शिष्यमानीय मन्त्रेण शिष्यनेत्रं वस्त्रेणाच्छाद्य शिष्याञ्जलिं पुष्पैः पूरयित्वा गुरुः स्वयमेव मन्त्रं जपन् कलसे देवतायै क्षिपेत् । ततो नेत्रबन्धनं दूरीकृत्य दर्भा-सने आसीनं शिष्यं स्वकृतपूजनादिसाङ्गसमुद्रा-दिकं विधाय तत्तन्मन्त्रोक्तन्यासान् शिष्यस्य देहे कुर्य्यात् । कुम्भस्थां देवतां पुनः यथोपचारैः सम्पूज्याच्छद्मत शिष्यमन्त्रविषुवेष्टयेत । ततो मङ्गलाचारपूर्वकं तत्कुम्भं समुद्धृत्य तन्मुखस्थान् तत्रस्थकलान् पल्लवान् शिष्यशिरसि निधाय मातृका मन्त्रं जपन् मूलेन साधितैस्तोयैर्वैष्टि सञ्चितोदकाभिषेकमन्त्रेणाभिषिञ्चेत् । शिष्योऽपि शिष्टजलेनाचम्य वाससी परिधाय गुरोः सन्निधा-वुपविशेत । ततस्तस्मिन्नेव गुरुरात्मनो देवतां शिष्य-स्यात्मना तयोरैक्यं विभाव्य गन्धादिभिः पूजयेत् । ततो मन्त्रेण शिष्यस्य शिरो बद्ध्वा मन्त्रं शिष्य-शरीरे कलान्यासं कुर्य्यात् । तत शिष्यशिरसि हस्तं दत्त्वा अष्टोत्तरशतं मन्त्रं जपन् तेऽपि दद्यामीति शिष्यहस्ते जलं दद्यात् । ददस्वेति शिष्यो ब्रूयात् । तत अष्टार्दियुक्तं मन्त्रं गुरु-र्दिशतौ । दक्षिणकर्णे त्रिः श्रावयेत वामे सकृत् । स्त्रीशूद्राणां वामकर्णे त्रिः श्रावयेत दक्षिणे सकृत् । ततः शिष्यो गुरुचरणे पतित एव तिष्ठेत । ततो गुरुस्तमुत्थापयेत । तत शिष्यो लब्धमन्त्रं यथाशक्ति जपेत् । तत शिष्यः कृताञ्जलिर्नत्वा गुरवे दक्षिणां सुवर्णं काञ्चनं वा दद्यात् । दीक्षाप्रयोगमशेषेण निवे-दयेत् । अन्यांश्च ब्राह्मणान् परितोषयेत । गुरुः सांसिद्धिकायाय यथाधिकं सहस्रं शतं वा मन्त्रं जपेत् । ततः शिष्यो मिष्टान्नपानादिना ब्राह्मणान् परितोष्य स्वयं भुञ्जीत । दीक्षादिवसे गर्त्तशिष्यदोषप्रवासे दोषः । इति तन्त्रसारोक्ता कलावतीदीक्षा समाप्ता ॥

कलाविक पुं, (कलं आविकायति विशेषेण रौतीति कल+आ+वि+कै+क ।) कुक्कुटः । इति त्रि-काण्डशेषः ॥

कलाविकलः पुं (कलं मधुराव्यक्तं आविकलं यस्य सः । यद्वा कलया अंशमात्रेणैव विकल-श्चपलः ।) चटकः । इति शब्दरत्नावली ॥

कलाहकः, पुं (कलमाहन्तीति । कल+आ+हन् +डः । स्वार्थे कन् ।) काहलनामवाद्यम् । इति शब्दरत्नावली ॥

कलि, पुं, (कलते कलेराश्रयत्वेन वर्त्तते इति । कल +“सर्व्वधातुभ्य इन्” । उणा ४ । ११७ । इति इन् ।) विभीतकवृक्षः । (विभीतकस्य कलिद्रुमत्व कारणमुक्तं यथा, वामने २० अध्याये ।

“इत्येवमुक्तो देवेन मघवा कलिरव्ययः ।

दानान् दृष्ट्वा च प्रह्लादीन् विभीतकवनं ययौ” ॥

अस्य गुणादिकं विभीतकशब्दे द्रष्टव्यम् ॥ *॥)

कलते स्यन्दते इति कल+“सर्व्वधातुभ्यः इन्” । उणा ४।११७। इति इन् ।) शूरः । (कलन्ते स्पर्द्धं मानाः भाषन्तेऽस्मिन्निति । कल+“सर्व्वधातुभ्य इन्” । उणा ४ । ११७ । इति इन ।) विवादः । (यथा, भागवते ८ । ६ । ४४ ।

“तासां कलिरभूद्भूयांस्तदर्थेऽपोह्य सौहृदम् ।

अहमाहं पूर्व्वमहं पूर्व्वमिति तदच्छेतसाम्” ॥)

युद्धम् । (कल्यते पापेषु निक्षिप्यते अनेन यद्वा कलयति पापेन मज्जयति कलुषितं करोति । कल+इन् ।) अन्त्ययुगम् । इति हेमचन्द्रः ॥

तस्योत्पत्तिर्यथा ।

“प्रलयान्ते जगत्स्रष्टा ब्रह्मा लोकपितामहः ।

ससर्ज्ज घोरं मलिनं पृष्ठदेशात् स्वपातकम् ॥

स चाधर्म्म इति ख्यातस्तस्य वंशानुकीर्त्तनात् ।

श्रवणात् स्मरणाल्लोकः सर्व्वपापैः प्रमुच्यते ॥

अधर्म्मस्य प्रिया रम्या मिथ्या मार्ज्जारलोचना ।

तस्याः पुत्त्रोऽतितेजस्वी दम्भः परमकोपनः ॥

स मायायां भगिन्यान्तु लोभं पुत्त्रञ्च कन्यकाम् ।

निकृतिं जनयामास तयोः क्रोधः सुतोऽभवत् ॥

स हिंसायां भगिन्यान्तु जनयामास तत्कलिम् ।

वामहस्तधृतोपस्थं तैलाभ्यक्ताञ्जनप्रभम् ॥

काकोदरं करालास्यं लोलजिह्वं भयानकम् ।

पूतिगन्धं द्यूतमद्यस्त्रीसुवर्णकृतालयम् ॥

भगिन्यान्तु दुरुक्त्यां स भयं पुत्त्रञ्च कन्यकाम् ।

मृत्युं सञ्जनयामास तयोश्च निरयोऽभवत् ॥

यातनायां भगिन्यान्तु लेभे पुत्त्रानयुतायुतम् ।

इत्थं कलिकुले जाता बहवो धर्म्मनिन्दकाः” ॥

इति कल्किपुराणे १ अध्यायः ॥ *॥

कलिधर्म्मा यथा ।

“यदा यज्ञस्तपो दानं सत्यं शौचं दया दमः ।

लोकस्तु साम्प्रतं दैन्यं स कलिस्तु तदा स्मृतः ॥

यस्मिन् जना कामिनः स्युः शश्वत्कटुकभाषिणः ।

दस्युक्लिष्टा जनपदा वेदाः पाषण्डदूषिताः ॥

राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ।

अव्रता बटवोऽशौचा भिक्षवश्च कुटुम्बिनः ॥

तपस्विनो ग्रामवासा न्यासिनो ह्यर्थलोलुपाः ।

ह्रस्वकाया महाहारा धौर्य्यमायाविसाहसाः ॥

त्यक्ष्यन्ति भृत्यास्च पतिं तापसास्तु दिशं व्रतम् ।

शूद्राः प्रतिग्रहीष्यन्ति तपोवेशोपजीविनः ॥

उद्विग्नास्त्वल्पदुर्भिक्षा निराशश्च कलौ प्रजाः ।

अनावृष्टिभयेनापि देवताऽतिथिपूजनम् ॥

करिष्यन्ति जनाः प्राप्ते न च पित्रानुवर्त्तिताम् ।

स्त्रीपराश्च जनाः सर्व्वे शूद्रप्रायाश्च शौनक ॥

बहुप्रजाल्पभाग्याश्च भविष्यन्ति कलौ स्त्रियः ।

शिरःकण्डूयनपरा आज्ञां भेत्स्यन्ति भर्त्तृताः ॥

विष्णुं न पूजयिष्यन्ति पाषण्डोपहता जनाः ।

कलेर्दोषनिधेर्विप्र अस्ति ह्येको महान् गुणः ।

कीर्त्तनादेव कृष्णस्य मुक्तबन्धः परं व्रजेत् ॥

कृते यद्ध्यायतो विष्णुं त्रेतायां यजतः फलम् ।

द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात् ॥

तस्माद्ध्येयो हरिर्नित्यं ध्येयः पूज्यश्च शौनक” ॥

इति गारुडे युगधर्म्मे २२७ अध्यायः ॥

(माघपूर्णिमायां शुक्रवारे कलियुगोत्पत्तिः ।) तद्युगमानम् । द्वात्रिंशत्सहस्राधिकचतुर्लक्षवत्सराः (४३२०००) ।

(आर्य्यभट्टमते तु १५७७९१७५ दिवसाः ।

सूर्य्यसिद्धान्तमते १५७७९१७८२ । ४८ दिवसाः ।

ज्योतिषसिद्धान्तिकमते च १५७७९१७८२ दिवसाः ।

अतो वक्ष्यमाणमासभङ्गयाते ३६५ । १५ । ३१ । १५ । दिवसाः ।

सूर्य्यसिद्धान्तमते ३६५।१५।३१।३१।२४। दिवसाः ।

ज्योतिषसिद्धान्तिकमते च ३६५ । १५ । ३१ । ३० दिवसाः ।)

तस्यातीताब्दाः १८ ६ गतांश्च अस्य ४६८८ ॥

(कलेस्त्रिपञ्चाशदधिकषट्शतमितेषु (६५३) वत्सरेषु गतेषु युधिष्ठिरादयो जाताः । यदुक्तं राजतरङ्गिण्याम् १ । ५१ ।

“शतेषु षट्सु सार्द्धेषु त्र्यधिकेषु च भूतले ।

कलेर्गतेषु वर्षाणामभवन् कुरुपाण्डवाः” ॥

चतुष्पञ्चाशदधिकमितेषु (२५२६) युधिष्ठिराब्देषु कलेश्च एकोनाशीत्यधिकशतत्रयमितेषु (३१७९) वत्सरेषु गतेषु च महाविषुववलाख्यात् प्राणिवाहनस्य राज्ञः अन्मदिनमारभ्य शकाब्दः प्रवर्त्तितः । यदुक्तं तत्रैव १ । ५६ ।

“आसन् मघासु मुनयः शासति पृथ्वीं युधिष्ठिरे नृपतौ । षड्द्विकपञ्चद्वियुतः शककालस्तस्य राज्ञश्च” । अयमपि महाविषुवसङ्क्रान्तिमधिगम्य परिगणितो भवति ॥

कलेश्चतुश्चत्वारिंशदधिकत्रिसहस्रपरिमितेषु (३०४४) वत्सरेषु गतेषु चैत्रशुक्लप्रतिपदि उज्ज-यिनीपतेर्विक्रमादित्यस्य राज्यप्राप्तिकालमारभ्य संवत् इत्याख्यया प्रसिद्धो वत्सरः प्रवर्त्तितः । अयन्तु चैत्रशुक्लप्रतिपत्तिथिमधिगम्य परिगणितो भवति ॥

कलेरेकोनशताधिकत्रिसहस्रपरिमितेषु (३१०१) वत्सरेषु गतेषु मार्गशीर्षस्य अष्टा-दशदिवसे खीष्टीयाब्दः प्रवर्त्तितः ॥

पञ्चनवत्यधिकषट्शताधिकत्रिसहस्रपरिमितेषु (३६९५) कलेरतीताब्देषु सप्तदशाधिकपञ्च-शतमिते (५१७) च शकाब्दे प्रभृति आमजाति-ह्रारात उत्पलदत्तप्रवर्त्तितः विक्रमादित्य इत्याख्यया प्रसिद्धो वत्सरः प्रवर्त्तितः । अयमपि माघ-शुक्लद्वादशीमधिगम्य परिगणितो भवति ।

त्रयोविंशत्यधिकसप्तशताधिकत्रिसहस्रपरिमितेषु (३७२३) कलेरतीताब्देषु पञ्चचत्वारिंशदधिक-पञ्चशतमिते (५४५) च शकाब्दे प्रभृति स्वदेश्य विश्वस्तितदिवसीयं सुदर्शनात् मक्कानगरान्मदी

अस्यारम्भकालमारभ्य "हिजरि" इति प्रसिद्धो हायनः प्रचलितः । अयन्तु चान्द्रमासेन परिगणितो भवति । अत प्रायशः सौरसम्वत्सरतिसम वर्षैरस्य शततमा वत्सरा भवेयुः ।

पञ्चाशीत्यधिकपञ्चशताधिकचतुःसहस्रपरिमितेषु कलेरतीताब्देषु (४५८५) सप्ताधिकचतुर्दशशतपरिमिते (१४०७) च शकाब्दे प्रचरति फाल्गुनीपौर्णमासीदिवसे शुक्रवारे पूर्णिमायां भगवान् चैतन्यदेवः प्रादुर्बभूव । अस्य जन्मदिनमारभ्य चैतन्याब्दः प्रचलितः ।)

अस्मिन् युगे धर्म्मः एकपादः । अधर्म्मस्तु त्रिपादः । आयुः शतवर्षाणि । अवतारः श्रीकृष्णः । तद्युगशेषे पापिनां विनाशाय भगवद्दशमावतारः कल्किर्भविष्यति । तद्युगधर्म्मो यथा ।

"कलौ तु धर्म्मपादानां तुर्य्यांशोऽधर्म्महेतुभिः ।
एधमानैः क्षीयमाणो ह्यन्ते सोऽपि विनङ्क्ष्यति ॥
तस्मिन् लुब्धा दुराचारा निर्द्दया शुष्कवैरिणः ।
दुर्भगा भूरितर्षाश्च शूद्रदासोत्तराः प्रजाः" ।
"यदा मायानृतं तन्द्रा निद्रा हिंसा विषादनम् ।
शोकमोहौ भयं दैन्यं स कलिस्तामसः स्मृतः ॥
यस्मात् क्षुद्रदृशो मर्त्त्याः क्षुद्रभाग्या महाशनाः ।
कामिनो वित्तहीनाश्च स्वैरिण्यश्च स्त्रियोऽसतीः ।
दस्यूत्कृष्टा जनपदा वेदाः पाषण्डदूषिताः ।
राजानश्च प्रजाभक्षाः शिश्नोदरपरा द्विजाः ॥
अव्रता वटवोऽशौचा भिक्षवश्च कुटुम्बिनः ।
तपस्विनो ग्रामवासा न्यासिनोऽत्यर्थलोलुपाः ॥
ह्रस्वकाया महाहारा भूर्य्यपत्या गतह्रियः ।
शश्वत्कटुकभाषिण्यश्चौर्य्यमायोरुसाहसाः ॥
पणयिष्यन्ति वै क्षुद्राः किराटाः कूटकारिणः ।
अनापद्यपि मंस्यन्ते वार्त्तां साधुजुगुप्सिताम् ॥
पतिं त्यक्ष्यन्ति निर्द्रव्यं भृत्या अप्यखिलोत्तमम् ।
भृत्यं विपन्नं पतयः कौलं गाश्चापयस्विनीः ॥
पितृभ्रातृसुहृज्ज्ञातीन् हित्वा सौरतसौहृदाः ।
ननान्दृश्यालसंवादा दीनाः स्त्रैणाः कलौ नराः ॥
शूद्राः प्रतिग्रहीष्यन्ति तपोवेषोपजीविनः ।
धर्म्मं वक्ष्यन्त्यधर्म्मज्ञा अधिरुह्योत्तमासनम् ॥
नित्यमुद्विग्नमनसो दुर्भिक्षकरकर्शिताः ।
निरन्ने भूतले राजन्ननावृष्टिभयातुराः ॥
वासोऽन्नपानशयनव्यवायस्नानभूषणैः ।
हीनाः पिशाचसन्दर्शा भविष्यन्ति कलौ प्रजाः ॥
कलौ काकिणिकेऽप्यर्थे विगृह्य त्यक्तसौहृदाः ।
त्यक्ष्यन्ति हि प्रियान् प्राणान् हनिष्यन्ति स्वकानपि ॥
न रक्षिष्यन्ति मनुजाः स्थविरौ पितरावपि ।
पुत्त्रान् भार्य्याञ्च कुलजां क्षुद्राः शिश्नोदरम्भराः ॥
कलौ न राजन् जगतां परं गुरुं
त्रिलोकनाथानतपादपङ्कजम् ।
प्रायेण मर्त्त्या भगवन्तमच्युतं
यक्ष्यन्ति पाषण्डविभिन्नचेतसः" ॥ * ॥

कलिकृतदोषविनाशोपायः । यथा,
"यन्नामधेयं म्रियमाण आतुरः
पतन् स्खलन् वा विवशो गृणन् पुमान् ।
विमुक्तकर्म्मार्गल उत्तमां गतिं
प्राप्नोति यक्ष्यन्ति न तं कलौ जनाः ॥
पुंसां कलिकृतान् दोषान् द्रव्यदेशात्मसम्भवान् ।
सर्व्वान् हरति चित्तस्थो भगवान् पुरुषोत्तमः ॥
श्रुतः सङ्कीर्त्तितो ध्यातः पूजितश्चादृतोऽपि वा ।
नृणां धुनोति भगवान् हृत्स्थो जन्मायुताशुभम् ॥
यथा हेम्नि स्थितो वह्निर्दुर्व्वर्णं हन्ति धातुजम् ।
एवमात्मगतो विष्णुर्योगिनामशुभाशयम् ॥
विद्यातपःप्राणनिरोधमैत्री
तीर्थाभिषेकव्रतदानजप्यैः ।
नात्यन्तशुद्धिं लभतेऽन्तरात्मा
यथा हृदिस्थे भगवत्यनन्ते ॥
तस्मात् सर्व्वात्मना राजन् हृदिस्थं कुरु केशवम् ।
म्रियमाणो ह्यवहितस्ततो यासि परां गतिम्" ॥
"कलेर्दोषनिधे राजन्नस्ति ह्येको महान् गुणः ।
कीर्त्तनादेव कृष्णस्य मुक्तसङ्गः परं व्रजेत् ॥
कृते यद्ध्यायतो विष्णुं त्रेतायां यजतो मखैः ।
द्वापरे परिचर्य्यायां कलौ तद्धरिकीर्त्तनात्" ॥
इति श्रीभागवते महापुराणे १२ । ३ अध्यायः ॥ * ॥
तद्युगशेषधर्म्माः यथोक्तास्तत्रैव १२ । १ । ३६ ४० ।
"सौराष्ट्रावन्त्याभीराश्च शूरा अर्ब्बुदमालवाः ।
व्रात्या द्विजा भविष्यन्ति शूद्रप्राया जनाधिपाः ॥
सिन्धोस्तटं चन्द्रभागां कौन्तीं काश्मीरमण्डलम् ।
भोक्ष्यन्ति शूद्रा व्रात्याद्या म्लेच्छाश्चाब्रह्मवर्च्चसः ॥
तुल्यकाला इमे राजन् म्लेच्छप्रायाश्च भूभृतः ।
एतेऽधर्म्मानृतपराः फल्गुदास्तीव्रमन्यवः ॥
स्त्रीबालगोद्विजघ्नाश्च परदारधनादृताः ।
उदितास्तमितप्राया अल्पसत्त्वाल्पकायुषः ।
असंस्कृताः क्रियाहीना रजसा तमसा वृताः ।
प्रजास्ते भक्षयिष्यन्ति म्लेच्छा राजन्यरूपिणः ॥
तन्नाथास्ते जनपदास्तच्छीलाचारवादिनः ।
अन्योन्यतो राजभिश्च क्षयं यास्यन्ति पीडिताः" ॥
तत्रैव १२ । २ । १ १६ ।
"ततश्चानुदिनं धर्म्मः सत्यं शौचं क्षमा दया ।
कालेन बलिना राजन् नङ्क्ष्यत्यायुर्ब्बलं स्मृतिः ॥
वित्तमेव कलौ नृणां जन्माचारगुणोदयः ।
धर्म्मन्यायव्यवस्थायां कारणं बलमेव हि ॥
दाम्पत्येऽभिरुचिर्हेतुर्मायैव व्यावहारिके ।
स्त्रीत्वे पुंस्त्वे च हि रतिर्विप्रत्वे सूत्रमेव हि ॥
लिङ्गमेवाश्रमख्यातावन्योन्यापत्तिकारणम् ।
अवृत्त्या न्यायदौर्ब्बल्यं पाण्डित्ये चापलं वचः ॥
अनाढ्यतैवासाधुत्वे साधुत्वे दम्भ एव हि ।
स्वीकार एव चोद्वाहे स्नानमेव प्रसाधनम् ॥
दूरे वार्य्ययनं तीर्थं लावण्ये केशधारणम् ।
उदरम्भरता स्वार्थः सत्यत्वे धार्ष्ट्यमेव हि ॥
दाक्ष्ये कुटुम्बभरणं यशोऽर्थे धर्म्मसेवनम् ।
एवं प्रजाभिर्दुष्टाभिराकीर्णे क्षितिमण्डले ॥
ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ।
प्रजा हि लुब्धै राजन्यैर्निर्घृणैर्दस्युधर्म्मभिः ।
आच्छिन्नदारद्रविणा यास्यन्ति गिरिकाननम् ॥
शाकमूलामिषक्षौद्रफलपुष्पास्थिभोजनाः ।
अनावृष्ट्या विनङ्क्ष्यन्ति दुर्भिक्षकरपीडिताः ॥
शीतवातातपप्रावृड्हिमैरन्योऽन्यतः प्रजाः ।
क्षुत्तृड्भ्यां व्याधिभिश्चैव सन्तप्स्यन्ते च चिन्तया ॥
त्रिंशद्विंशतिवर्षाणि परमायुः कलौ नृणाम् ।
क्षीयमाणेषु देहेषु देहिनां कलिदोषतः ।
वर्णाश्रमवतां धर्म्मे नष्टे वेदपथे नृणाम् ॥
पाषण्डप्रचुरे धर्म्मे दस्युप्रायेषु राजसु ।
चौर्य्यानृतवृथाहिंसानानावृत्तिषु वै नृषु ॥
शूद्रप्रायेषु वर्णेषु च्छागप्रायासु धेनुषु ।
गृहप्रायेष्वाश्रमेषु यौनप्रायेषु बन्धुषु ॥
अणुप्रायास्वोषधीषु शमीप्रायेषु स्थास्नुषु ।
विद्युत्प्रायेषु मेघेषु शून्यप्रायेषु सद्मसु ॥
इत्थं कलौ गतप्राये जनेषु खरधर्म्मिषु ।
धर्म्मत्राणाय सत्त्वेन भगवानवतरिष्यति" ॥
(देवगन्धर्व्वविशेषः । स तु काश्यपात् दक्षकन्यायां मुनौ जातः । यथा, महाभारते १ । ६५ । ४४ ।
"तथा शालिशिरा राजन् पर्ज्जन्यश्च चतुर्द्दशः ।
कलिः पञ्चदशस्तेषां नारदश्चैव षोडशः" ॥
शिवः । यथा महाभारते । १३ । १७ । ७८ ।
"दम्भो ह्यदम्भो वैदम्भो वश्यो वशकरः कलिः ॥)

कलि, स्त्री, (कलयति इयत्प्रकाशतेऽङ्कुरयते वा कल्+तत इन् ।) कलिका । इति मेदिनी ॥

कलिक, पुं, (कलो मन्द्रगम्भीरध्वनिरस्यास्ति । कल+मत्वर्थे ठन् ।) क्रौञ्चपक्षी । इति शब्दरत्नावली ॥

कलिका, स्त्री, (कलिरेव । स्वार्थे कन् टाप् च ।) अस्फुटितपुष्पम् । तत्पर्य्यायः । कोरकः २ । इत्यमरः । २ । ४ । १६ ॥ कलिः ३ कलो ४ । कोरकम् । ५ इति तट्टीका ॥ (यथा, साहित्यदर्पणे ३ । १६८ ।
"मुग्धामजातरजसं कलिकामकाले
व्यर्थं कदर्थयसि किं नवमालिकायाः" ॥)
वीणामूलम् । इति हेमचन्द्रः ॥ मदसन्ततियुक्तरचनाविशेषः । तद्विवरणम् यथा,—
"स्युर्मेचकलिकारम्भे श्लोकास्तु युगशः स्मृताः ।
अन्यासां कलिकानान्तु भवन्त्येकैकशो हि ते ॥
पूर्त्तौ द्वौ कलिकाभिस्तु विवदान्तुल्यसंज्ञकाः" ॥ * ॥
कलिकालक्षणम् ।
"कला नाम भवेत्तालनियता पदसन्ततिः ।
कलाभिः कलिका प्रोक्ता तद्भेदाः षट् समीरिताः ।
कलिका पञ्चदशाख्या दिग्वादिगदहस्तका ।
तथा चित्रभङ्गी ह्रस्ताख्या मध्या मिश्रा च केवला" ॥
पद्धस्ते दशधा सयकवधा ।
"अत्र संयुक्तवर्णानां नियमो दशधा च ते ।
मधुरं स्निग्धविस्निग्धशिथिलकठिनादिकक्रमी ॥
भिद्यन्ते क्रमदोषाभ्यां ते दर्श्यन्ते स्फुटं यथा ।
क्रमान्मधुरसंयोगा ङ्कगाङ्कककिङ्कराः ॥
तस्मात् स्निग्धसंयुक्ता रपकपरसपवत् ।
ततो विस्निग्धसंयुक्ता भक्षवच्चार्क्वसिद्धय ॥
तथा शिथिलसंयुक्ताः यत्र काक्षप वाक्षवत् ।
प्रोक्ता क्रादियुता भक्त सर्व्व गुह्य प्रमद्यवत् ॥
मर्द्दावीम् क्रादिसंयुक्तभेदान् केचित् समूचिरे ।
दोषाणुक्रान् स्वार्थान् वाच्य तैस्तथ वाद्यकम्" ॥
कलापरिमाणमुक्तम् ।

"अधिकास्तेषु गुणपरिन्यूना द्वादश ता कलाः ।
न्यासाभ्यो नाधिकाः कार्य्या न्यूनाश्चापि न पण्डितैः" ॥
तत्र तालधनुष्टलकलिका द्विधा । गद्यो विशिख
श्चेति भेदात् । तत्र रत्नादि विंशतिभेदस्य गतस्येह
वर्ज्जितादयो नव भेदा गृहीताः ।
"वर्ज्जिन मीरमदश समयोऽच्युत उत्पलम् ।
गुरुद्रुः श्रीगुरुरतिस्तथा मातङ्गखेलितम् ।
तिलकश्चेति कलिका नवस्यैवोदिता नव" ॥ इत्युक्तेः ॥
अथ विशिखः । पद्मकुन्दचम्पकवञ्जुलभेदात् पञ्च
विधः । तेष्वादिम पद्म पद्मेन्द्रसितकञ्जपाण्डूत्पले
न्दीवरारक्ताम्भोजकह्लारभेदात् षड्विधम् ।
अन्तिमं वञ्जुलन्तु मालूरमञ्जुलभेदात् द्विविधमित्ये
कादशभेदो विशिखः ।
"पद्मञ्च सितकञ्जं तथा पाण्डूत्पलं परम् ।
इन्दीवरारक्ताम्भोजे कह्लारश्चेति षड्विधम् ॥
इयङ्क्लेदेन कथितपद्ममेव मनीषिभिः ।
चम्पकं वञ्जुलं कुन्दं वकुलं द्विविधं तथा" ॥
इति पञ्चविधस्यापि विशिखस्यैकादशधा इत्युक्ते ।
तत्र गद्यकलिका विंशतिधा गृहीता ॥ * ॥
अथ पद्यानां विगादिगणकलिका मञ्जरी
त्वभिहिता क्रमात् कोरकगुच्छकसंपुटकुसुम
गन्धाख्या । तस्याश्च कोरकगुच्छकुसुमानि
गृहीतानि । कोरको गुच्छकुसुमैर्मञ्जरी त्रिविधाच
लितयुक्ता । त्रिभङ्गी कलिका तु द्विरुक्तिप्रादि
पूर्वा चोढ़ा । तस्याश्च दण्डकपूर्वा विदग्धपूर्वा
च गृहीता । दण्डकाख्या विदग्धाख्या त्रिभङ्गीव
द्विधा मतेत्युक्तेः ॥ * ॥ अथ मिश्रकलिका तु
कलिकागद्यपद्यका भ्रमविमलिका वा । अत्र
मधी सम्बन्धी चेति द्विभेदा केवला चेत्यष्टौ ।
तदेव षड्भ्यो मञ्जकलिकाभ्योऽष्टाविंशतिरिह
कलिका गृहीताः । एवमस्य सत्यादस गणभेदाः ।
सम्मुञ्चरात्रौ मञ्जरीभेदौ । त्रिरुक्तिरिशादयः त्रिभ
ङ्गीभेदा मध्यकलिका च अत्राप्यावतताधिक्यविर
हात् । इति रूपगोस्वामिकृतगोविन्दविरुदावली
भाष्ये बलदेवविद्याभूषणः ॥ (छन्दोभेदः । यदुक्तं
वृत्तरत्नाकरे ४ अध्याये ।
"प्रथममभरचरणसमुत्थ
यदि च यदि यदि च ।
इतरदितरमिदमपि यदि च युग्मम्
चरणयुगलकमविरतमपरमिति कलिका सा" ॥
कला । यथोक्तं सिद्धान्तशिरोमणौ ।
"तथ्यन्ते कलिका यथास्यात्कान्तिर्यथा स्मृताः" ॥)

कलिकापूर्व्वं, क्ली, (कलिकया अग्रेण अन्य अपूर्व्व
मदृष्टम् ।) अङ्गप्रधानान्यतरकर्म्मसाध्यस्वर्गा
दिजनकजनकापूर्व्वान्तरो तत्तदङ्गजन्यमपूर्व्व
रूपम् । इति स्मृतिः ।

कलिकार, पुं, (कलि किचिकुचीतिशब्देन कलह
करोतीति । कलि + कृ + अण ।) धूम्याटपक्षी ।
पीतमल्लकपक्षी । (कलि सन्देशदानादिनेस्तिरिष्ठ
करोतीति ।) पूतिकरञ्ज । इति मेदिनी ।

कलिकारकः, पुं, (कलिं कलहं नारदेहरिष्टं करोति ।
कलि + कृ + णिच् + ण्वुल् ।) पूतिकरञ्जः । काँटा
करञ्ज नाटाकरञ्ज इति च भाषा । इत्यमरः । २ ।
४ । ४८ ॥ (कलिं कलहं कारयति । कलि + कृ +
णिच + ण्वुल् ।) नारदमुनिः । इति हेमचन्द्रः ॥

कलिकारी, स्त्री, (कलिं गर्भपातादिमनिष्टं करोतीति ।
कलि + कृ + अण् । जातित्वात् ङीष् ।) उप
विषभेदः । विषलाङ्गलीया इति भाषा । तत्प
र्य्यायः । लाङ्गली २ हलिनी ३ गर्भपातनी ४
दीप्ता ५ विशल्या ६ अग्निमुखी ७ हली ८ नक्ता
९ इन्द्रपुष्पिका १० विद्युज्ज्वाला ११ अग्निजिह्वा
१२ व्रणहृत् १३ पुष्पसौरभा १४ स्वर्णपुष्पा
१५ वह्निशिखा १६ । अस्या गुणाः । कटुत्वम् ।
उष्णत्वम् । कफवातनाशित्वम् । गर्भान्तःशल्यनि
ष्कासनकारित्वम् । सरसारित्वञ्च । इति राज
निर्घण्टः ॥

कलिङ्गः, स्त्री, (कलि + गम् + ड । निपातनात्
साधुः ।) इन्द्रयवम् । इत्यमरः । २ । ४ । ६७ ॥

कलिङ्गः, पुं, (कलिं पूतिगन्धादिकं गच्छति प्राप्नोति
कलि + गम् + ड । निपातनात् साधुः ।) पूतिक
रञ्जः । (कि मलके लिङ्ग पीतादिचिह्नमस्य ।)
धूम्याटपक्षी । देशविशेषः । इति हेमचन्द्रः ।
(तन्नामन्यातो नृपतिविशेषः । अस्य नामानुसारे
णैव कलिङ्ग इति देशाख्या जाता । यदुक्तं महा
भारते । १ । १०४ । ४८,४९ ।
"अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्मश्च ते सुताः ।
तेषां देशाः समाख्याताः स्वनामप्रथिता भुवि ॥
अङ्गस्याङ्गोऽभवद्देशो वङ्गो वङ्गस्य च स्मृतः ।
कलिङ्गविषयश्चैव कलिङ्गस्य च स स्मृतः" ॥)
मेदिनीमते अयमर्थे पुंसि भुवि । (यदुक्तं तत्रैव
नान्ते ११ ।
"कलिङ्गः पूतिकरजे धूम्याटे भुवि नीवृति" ॥
अस्य प्रमाणं यथा, गौः रामायणे । ४ । ४० । २१ ।
"ततः सपुलिन्दांश्च कलिङ्गांश्चैव सर्वतः" ॥
तद्देशवासिमात्रवाचक । यथा, महाभारते । १ ।
११४ । ३ ।
"ततः समुद्रतीरेण जगाम वसुधाधिपः ।
भ्रातृभिः सहितो वीरः कलिङ्गान् प्रति भारत" ॥)
कुटजवृक्षः । (अस्य पर्य्यायो यथा भावप्रकाशे
पूर्ब्बखण्डे १ भागे ।
"उक्तं कुटजबीजन्तु यवमिन्द्रयवस्तथा ।
कलिङ्गश्चापि कालिङ्गं तथा भद्रयवा अपि" ॥
इन्द्रयवशब्देऽस्य गुणावली ज्ञेया ।
व्यवहारो यत्र तद्यथा ।
"विश्व श्रावणः सिद्धं सितामोचरसान्वितम् ।
कलिङ्गपूतिकयुक्तं रक्तातीसारनाशनम्" ॥
इति वैद्यकचक्रपाणिसंग्रहेऽतीसाराधिकारे ॥)
शिरीषवृक्षः । प्लक्षवृक्षः । इति राजनिर्घण्टः ॥

कलिङ्गकः, पुं, (कलिङ्ग + स्वार्थे कन् । कलिङ्ग
इव कायति वा । कै + क ।) इन्द्रयवम् । इति
रत्नमाला ॥ (यथा, वैद्यकचक्रपाणिसंग्रहे ज्वरा
धिकारे ।
"कलिङ्गकाः पटोलस्य पत्रं कटुकरोहिणी" ॥)

कलिङ्गा, स्त्री, (क सुखं लिङ्गतीति । क + लिङ्ग
अच् टाप् ।) नितम्बिनी । नर्त्तकी । इति मेदिनी
करहेमचन्द्रौ । त्रिवृत् । इति शब्दचन्द्रिका ।
तेउड़ि इति भाषा ॥

कलिञ्ज, पुं, (क वातं अञ्जति तिरस्करोति रोधने
नेति यावत् । क + अञ्जि भञ्जने + "कर्म्मण्यण्"
३ । २ । १ । इति अण् । निपातनात् साधुः ।)
कटः । इति हेमचन्द्रः ॥ चाँच् दरमा इत्यादि
भाषा ॥

कलितं, त्रि, (कल + कर्म्मणि क्त ।) विदितम् ।
आप्तम् । इति मेदिनी ॥ गृहीतम् । गणितम् ।
इति शब्दरत्नावली ॥ युतम् यथा,—
"भारकलितकपाला कुण्डली दण्डपाणिः" । इति
भैरवध्यानम् ॥
(मात्रः । यथा आर्य्यासप्तशत्यां ३५५ ।
"विशिख इव कलितकर्णः प्रविशति हृदयं न
निःसरति" ॥ भावे + क्त । ध्यानम् ॥)

कलिद्रुम, पुं, (कलिना आश्रितो द्रुमः शाकपार्थि
वादिवत् मध्यपदलोपः ।) विभीतकवृक्षः । इत्य
मरः । २ । ४ । ५८ । बयड़ा इति भाषा ॥ (अस्य
पर्य्यायो यथा भावप्रकाशस्य पूर्व्वखण्डे । १ भागे ।
"विभीतकस्त्रिलिङ्गः स्यादक्षः कर्षफलश्च सः ।
कलिद्रुमो भूतवासस्तथा कलियुगालयः" ॥
विशेषविवरणमस्य विभीतकशब्दे ज्ञेयम् ।)

कलिन्दः, पुं, (कलिं ददाति यति वा खच् मुम् च ।)
विभीतकवृक्षः । इति राजनिर्घण्टः ॥ (विभीतक
शब्देऽस्य विशेषो ज्ञातव्यः ॥) सूर्य्यः । पर्व्वत
विशेषः । यस्मात् यमुना निर्गता । इति कवि
कल्पद्रुमटीकायां भरतः ॥ (यथा रघुः ६ । ४८ ।
"कलिन्दकन्या मथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति" ॥)

कलिन्दकन्या, स्त्री, (कलिन्दस्य पर्व्वतविशेषस्य कन्या
तदुत्पन्नत्वात् ।) यमुनानदी । इति राजनिर्घण्टः ॥
("कलिन्दकन्यामथुरां गतापि
गङ्गोर्म्मिसंसक्तजलेव भाति" ॥
इति रघुः । ६ । ४८ ॥)

कलिन्दनन्दिनी, स्त्री, (कलिन्दं नन्दयति । कलिन्द +
नन्द + णिनि ङीप् च । कलिन्दस्य नन्दिनी वा ।)
यमुनानदी । इति शब्दरत्नावली ॥

कलिप्रियः, पुं (कलिः कलहः प्रियो यस्य ।) नारद
मुनिः । यथा । "कलिप्रियस्य प्रियविग्रहस्य" ।
इति रघुः ॥ (कपेः प्रियः । दुष्टप्रकृतिक ।) वा
नरः । इति शब्दरत्नावली ॥

कलिमारकः, पुं, (कलीनां कलिकानां मारा यत्र ।
तस्य रः कप् स्वार्थे कन् वा । यद्वा कलिना
सन्देहवदनकाघातदुःखेन मारयतीति । कलि
+ मृ + णिच् + ण्वुल् ।) कलिकारकः । इत्यमर
टीकायां रमानाथः । २ । ४ । ४८ ॥

कलिमारकः, पुं, (कलीनां मारा यत्र । अथ कलिना
मारयति वा रम्य वा ।) कलिकारकः । इति
स्वामी इत्यमरटीकायां भरतः ॥

कलिमाल्यः, पुं, (कलीनां माल्यं यत्र ।) पूतिकरञ्जः ।
इति राजनिर्घण्टः ॥

कलियुगं, क्ली, (कलिरेव युगम्। यद्वा कलिः विवादो भवति इति यत् कलेर्युगं वा।) चतुर्थयुगम्। (यथा मनुः १। ८५।
"अन्ये कृतयुगे धर्म्मास्त्रेतायां द्वापरे परे।
अन्ये कलियुगे नृणां युगह्रासानुरूपतः" ॥)
तस्योत्पत्त्यादि यथा। माघीपूर्णिमायां शुक्रवारे कलियुगोत्पत्तिः। तत्र अवतारः कल्कि। पुण्य मेकपादम्। पाप त्रिपादम्। गङ्गा तीर्थम्। शास्त्री निरर्थिः। अन्नगताः प्राणाः। सार्द्ध त्रिहस्तपरिमितो मनुष्यदेहः। शताधिकशत वर्षं परमायुः। भोजनपात्रस्य नियमो नास्ति। इति कलियुगस्य लक्षणम्॥ कलियुगाब्दाः ४३२०००। आदौ कलिराजा धर्म्मपुत्त्रो युधिष्ठिरः। हरिश्चन्द्रः मुनिचन्द्रः तेजश्चेखरः विक्रमादित्यः विक्रमसेनः आजसेनः कल्याणसेनः देवपालः भूपालः महीपालः। एते राजचक्रवर्त्तिनः॥
तन्माहात्म्यं यथा,—
'धर्म्मः सङ्कुचितस्तपो विरहितं सत्यञ्च दूरं गतम्। लोकाः धर्म्महता द्विजाश्च सुखिता नारीवशा मानवाः'॥
तत्र तारकब्रह्मनाम।
"हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे।
हरे राम हरे राम राम राम हरे हरे"॥
इति केचित्॥

कलियुगाद्या, स्त्री, (कलियुगस्य आद्या आद्यतिथिः।) माघीपौर्णमासी। तत्प्रमाणं युगाद्याशब्दे द्रष्टव्यम्॥

कलिल, त्रि, (कल्यते मिश्र्यते इति। "सलिकलि" उणां १। ५५। इति इलच्।) गहनम्। इत्यमरः। ३। १। ८५॥ (यथा गीतायाम् २। ५२।
"यदा ते मोहकलिलं बुद्धिर्व्यतितरिष्यति" ॥)
मिश्रः। इत्युणादिकोषः॥ (यथा भागवते ६। २। ४६।
"न यत्पुनः कर्म्मसु सज्जते मनो
रजस्तमोभ्यां कलिलं ततोऽन्यथा" ॥)

कलिवृक्षः, पुं (कलेराश्रयरूपो वृक्षः।) कलिद्रुम। बहेडुवृक्षः। इति हेमचन्द्रः॥

कली, स्त्री, (कल्+"सर्व्वधातुभ्य इन्" ततः वा ङीप्।) कलिका। इत्यमरटीकायां भरतः॥

कलुष, क्ली, (कं सुखं लुषति हिनस्ति। क+लुष्+अच्। यद्वा कल्+"पृनहिकलिभ्य उषच्"। उणां ४। ७५। इति उषच्।) पापम्। इत्यमरः। १। ४। २८॥ (यथा माध्यन्दिनस्तुतात्मबोधे ५।
"अज्ञानकलुषं जीवं ज्ञानाभ्यासाद्विनिर्म्मलम्।
कृत्वा ज्ञानं स्वयं नश्येज्जलं कतकरेणुवत्" ॥
आविल्ये यथा ऋतुसंहारे। ३। २३।
"विगतकलुषमम्भः श्यामशष्पा धरित्री।
विमलकिरणचन्द्रं व्योम ताराविचित्रम्" ॥)

कलुषः, पुं स्त्री, (कस्य जलस्य लुषः हिंसकः। आविलकारक इत्यर्थः। क+लुष्+क।) महिषः। इति राजनिर्घण्टः॥ (वक्रः। यथा शाकुन्तलायां "कण्ठः स्तम्भितबाष्पवृत्तिकलुषः"॥ निन्दितः। यथा मनुः १। ५७।
"वर्णापेतमविज्ञातं नरं कलुषयोनिजम्" ॥)

कलुष, त्रि, (कल्+उषच्।) अनच्छः। आविल। इत्यमरः। १। १०। १४॥ ('निष्प्रभकलुषे नेत्रे" इति सुश्रुते उत्तरतन्त्रे। ३१ अध्याये॥)

कलेवरं, क्ली, (कले शुक्रे वरं श्रेष्ठं देहोत्पत्तिहेतुत्वात् पवित्रम्। सप्तम्या अलुक्।) शरीरम्। इत्यमरः। २। ६। ७१॥ (यथा गीतायाम् ८।६।
"यं यं वापि स्मरन् देही त्यजत्यन्ते कलेवरम्।
तं तमेवैति कौन्तेय। सदा तद्भावभावितः" ॥)

कल्कः, पुं स्त्री, (कल् गतौ+"इण्‌भीकापाशल्यर्त्तिमर्च्चिभ्यः कन्"। उणां ३। ४०। इति कः।) घृततैलादिशेषः। (यथा याज्ञवल्क्ये। १। २७७।
"स्नपनं तस्य कर्त्तव्यं पुण्येऽह्नि विधिपूर्व्वकम्।
गौरसर्षपकल्केन साज्येनोत्सादितस्य च" ॥)
दम्भः। (यथा महाभारते १। १। २७१।
"तपो न कल्कोऽध्ययनं न कल्कः
स्वाभाविको वेदविधिर्न कल्कः।
प्रसह्य वित्ताहरणं न कल्कः
तान्येव भावोपहतानि कल्कः" ॥)
विभीतकवृक्षः। विष्ठा। किट्टम्। पापम्। इति मेदिनी॥ (यथा भागवते २। २। २४।
"विधूतकल्कोऽथ हरेरुदस्तात्
प्रयाति चक्रं नृप ! शैशुमारम्" ॥
यस्य कस्यचित् वस्तुनो चूर्णम्। यथा कुमारे। ७। ९।
"तां लोध्रकल्केन हृताङ्गतैलाम्
आश्यानकालेयकृताङ्गरागाम्" ॥)
कर्णमलः। इति शब्दरत्नावली॥ तुरुष्कनाम गन्धद्रव्यम्। इति राजनिर्घण्टः॥ घृततैलादिपाके देयमौषधद्रव्यम्। तत्तु पञ्चकषायान्तर्गत द्रव्यादि पेषितम्। अस्य पूर्व्वाचार्य्या नामैकं ति च्छन्ति। यथा,—
"द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत्।
तदेव सूरिभिः पूर्व्वैः कल्क इत्यभिधीयते" ॥
तत्पर्य्यायः। पिष्ठ २ विनीत ३। इति रत्नमाला॥ आवापः ४ प्रक्षेपः ५। इति वैद्यकपरिभाषा॥ ("द्रव्यमार्द्रं शिलापिष्टं शुष्कं वा सजलं भवेत्।
प्रक्षेपावापकल्कास्ते तन्मानं कर्षसम्मितम्॥
इति मध्यखण्डे। ५। १। शार्ङ्गधरेणोक्तम्। यत्तु द्रवेष्वपयुज्यते समूयः कल्क इति सञ्ज्ञां लभते विवृद्धावेपनस्य पलेनाञ्जनस्निरोधो न दुष्टा मूर्तिर्मांसापकर्षणमग्निदोषतात्वशुद्धिश्च भवति"॥ इति सुश्रुते सूत्रस्थाने। १८ अध्याये।)
शाठ्यम्। इति मोक्षधर्म्मटीकायां नीलकण्ठः॥

कल्कः, त्रि, (कल्कयति पापमाचरति। कल्क+अच्।) पापाशयः। पापात्मा। इति मेदिनी॥

कल्कफल, पु, (कल्कस्य विभीतकस्य फलमिव फलं यस्य अवयवसादृश्यात्।) दाडिमवृक्षः। इति राजनिर्घण्टः॥ (दाडिमशब्देऽस्य गुणादयो ज्ञातव्याः॥)

कल्कि, पुं, (कल्कं पापं नाश्यतया अस्ति अस्य। कल्क+इन्।) विष्णोर्दशमावतारः। स तु कलिशेषे पापात्मनां विनाशाय सम्भलग्रामे भविष्यति। यथा,—
"सम्भलग्राममुख्यस्य ब्राह्मणस्य महात्मनः।
भवने विष्णुयशसः कल्किः प्रादुर्भविष्यति" ॥
तस्य कर्म्म यथा,—
"अश्वमाशुगमारुह्य देवदत्तं जगत्पतिः।
असिनाऽसाधुदमनमष्टैश्वर्य्यगुणान्वितः॥
विचरन्नाशुना क्षौण्यां हयेनाप्रतिमद्युतिः।
नृपलिङ्गच्छदो दस्यून् कोटिशो निहनिष्यति" ॥
इति श्रीभागवतम्॥ तस्योत्पत्तिर्यथा,—
"स्तुत्वा प्राह पुरो ब्रह्मा देवानां हृदयेप्सितम्।
तं श्रुत्वा पुण्डरीकाक्षो ब्रह्माणमिदमब्रवीत्॥
सम्भले विष्णुयशसो गृहे प्रादुर्भवाम्यहम्।
सुमत्यां मातरि विभो कन्यायां त्वन्निदेशतः॥
चतुर्भिर्भ्रातृभिर्देव करिष्यामि कलिक्षयम्।
भवन्तो बान्धवा देवाः स्वांशेनावतरिष्यथ॥
इयं मम प्रिया लक्ष्मीः सिंहले सम्भविष्यति।
बृहद्रथस्य भूपस्य कौमुद्यां कमलेक्षणा।
भार्य्यायां मम भार्य्येषा पद्मा नाम्नी जनिष्यति॥
यात यूयं भुवं देवाः स्वांशावतरणे रताः॥
राजानौ मरुदेवापी स्थापयिष्याम्यहं भुवि।
पुनः कृतयुगं कृत्वा धर्म्मान् संस्थाप्य पूर्व्ववत्।
कलिव्यालं सन्निरस्य प्रयास्ये स्वालयं विभो॥
इत्युदीरितमाकर्ण्य ब्रह्मा देवगणैर्वृतः।
जगाम ब्रह्मसदनं देवाश्च त्रिदिवं ययुः॥
महीमागत्य भगवान् निजजन्मकृतोद्यमः।
सम्भलग्रामविप्रर्षिमाविवेश परात्मकः॥
सुमत्यां विष्णुयशसा गर्भमाधत्त वैष्णवम्।
ग्रहनक्षत्रराश्यादिसेवितश्रीपदाम्बुजम्॥
सरित् समुद्रा गिरयो लोकाः सस्थाणुजङ्गमाः।
सहर्षा ऋषयो देवा जाते विष्णौ जगत्पतौ॥
बभूव सर्व्वसत्त्वानामानन्दो विविधाश्रयः।
नृत्यन्ति पितरो हृष्टास्तुष्टा देवा जगुर्यशः॥
चक्रुर्व्वाद्यादि गन्धर्व्वा ननृतुश्चाप्सरोगणाः।
द्वादश्यां शुक्लपक्षस्य माधवे मासि माधवः।
जातो ददृशतुः पुत्त्रं पितरौ हृष्टमानसौ॥
धात्री माता महाषष्ठी नाडीच्छेत्री तदाम्बिका।
गङ्गोदकक्लेदमोक्षा सावित्री मार्ज्जनोद्यता॥
तस्य विष्णोरनन्तस्य वसुधाऽदात् पयः सुधाम्।
मातृका माङ्गल्यवचः कृष्णजन्मदिनेऽभवत्॥
ब्रह्मा तदुपधार्य्याशु स्वाशुगं प्राह सेवकम्।
याहीति सूतिकागारं गत्वा विष्णुं प्रबोधय॥
चतुर्भुजमिदं रूपं देवानामपि दुर्लभम्।
त्यक्त्वा मानुषवद्रूपं कुरु नाथ विचारितम्॥
इति ब्रह्मवचः श्रुत्वा पवनः सुरभिः सुखम्।
सशीतः प्राह तरसा ब्रह्मणो वचनादृतः।
तच्छ्रुत्वा पुण्डरीकाक्षस्तत्क्षणात् द्विभुजोऽभवत्।
तदा तत्पितरौ दृष्ट्वा विस्मयापन्नमानसौ॥
भ्रमसंस्कारवत्तत्र मेनाते तस्य मायया।
ततस्तु सम्भलग्रामे सोत्सवा जीवजातयः॥
मङ्गलाचारबहुलाः पापतापविवर्ज्जिताः।
सुमतिं तत्र सम्भाव्य विष्णुं जिष्णुं जगत्पतिम्।
पूर्णकामा विप्रमुख्यमाहूयादात् सुधनम्।

हरेः कल्याणशक्तिर्ज्ञाप्युषया शुद्धेन चेतसा ।
नामभ्यमुखैर्वर्द्धितयैः कर्म्माभिकरणे रतः ।
तदा राम कथा गाथा मौषिभिस्तु प्रतीरिता ।
समायाता हरिं द्रष्टुं बालकत्वमुपागतम् ।
तानागतान् समालोक्य चतुर सूर्य्यसन्निभान् ।
हृष्टरोमा द्विजवरः पूजां चक्रे स ईश्वरान् ।
पूजितास्ते स्वासनेषु संविष्टाः सुसुखाश्रयाः ।
हरिं क्रोडगतं तस्य ददृशुः कालमूर्त्तिनः ।
तं बालकं नराकारं विष्णुं नत्वा मुनीश्वराः ।
कल्किं कल्कविनाशार्थमाविर्भूतं विदुर्बुधाः ।
नामाकुर्व्वस्ततस्तस्य कल्किरित्यभिविश्रुतम् ।
कृत्वा संस्कारकर्म्माणि ययुस्ते हृष्टमानसाः ।
ततः स ववृधे तत्र सुमत्या परिपालितः ।
कालेनाल्पेन कंसारिः शुक्लपक्षे यथा शशी ।
कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्त्रकाः ।
पितृमातृप्रियकरा गुरुविप्रप्रतिष्ठिताः ।
कल्केरंशाः पुरो जाताः साधवो धर्म्मतत्पराः ।
गार्ग्यभर्ग्यविशालाद्या ज्ञातयस्तदनुव्रताः ।
विशाखयूपभूपालपालितास्तापवर्ज्जिताः ।
ब्राह्मणाः कल्किमालोक्य परां प्रीतिमुपागताः ।
ततो विष्णुयशाः पुत्त्रं धीरं सर्व्वगुणाकरम् ।
कल्किं कमलपत्राक्षं प्रोवाच पठनादृतम् ।
तात ते ब्रह्मसंस्कारं यज्ञसूत्रमनुत्तमम् ।
सावित्रीं वाचयिष्यामि ततो वेदान् पठिष्यसि ।
इति श्रीकल्किपुराणेऽनुभागवते भविष्ये कल्किजन्मोपनयनम् २ अध्यायः ॥

कल्की, [न्] पु, (कल्कं पापं नाशकतया अस्ति अस्य । कल्क + इनि ।) कल्किः । भगवतो दशावतारेषु दशमोऽवतारः । यथा पुराणे ।
"मत्स्यः कूर्म्मो वराहश्च नरसिंहोऽथ वामनः ।
रामो रामश्च रामश्च बुद्धः कल्की च ते दश" ॥
(अस्य जन्मादिविवरणन्तु कल्किशब्दे द्रष्टव्यम् ॥)

कल्प पुं, (कल्प्यते विधीयते असौ । कृप् + कर्म्मणि घञ् ।) विधिः । (यथा मनुः ३ । १४७ ।
'एष वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः ।
अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः' ॥
(कल्पयति सृष्टिं नाशं वा अत्र । कृप् + णिच् + अधिकरणे अच् ।) प्रलयः ।
("युगानां सप्ततिः सैका मन्वन्तरमिहोच्यते" ।
"कृताब्दसंख्यस्तस्यान्ते सन्धिः प्रोक्तो जलप्लवः" ॥
"ससन्धयस्ते मनवः कल्पे ज्ञेयाश्चतुर्द्दश ।
कृतप्रमाणः कल्पादौ सन्धिः पञ्चदशस्मृतः" ॥
ते एकसप्ततियुगरूपा मनवः सन्ध्यन्तरालाः सह अतः मनुसन्धिसहिताः कल्पकाले व्यवस्थाः । चतुर्द्दशमनुयुगसहितः कल्पो भवेदित्यर्थः । इति सूर्य्यसिद्धान्तोक्तकल्पपरिमाणम् ॥ अस्य विवरणं शिरोमणिसिद्धान्तग्रन्थप्रकरणे विवृतिस्तु तत्तच्छब्दे द्रष्टव्यम् ॥ * ॥
कल्पते शक्तियादौ समर्थो भवत्यत्र । कृप् + अधिकरणे घञ् ।) ब्राह्मदिनम् । तत्तु देवादिमानेन । इत्यमरः । १ । ४ । २१ ॥ (यथा विष्णुपुराणे १ । ३ । १९ ।
"कल्पान् कल्पविकल्पांश्च चतुर्युगविकल्पितान् ।
कल्पान्तस्य स्वरूपञ्च युगधर्म्मांश्च कृत्स्नशः" ॥)
विधातुः कल्पैस्त्रिंशद्भिः एको मासो भवति तेषां नामानि यथा । श्वेतवाराह १ नीललोहितः २ वामदेवः ३ गाथान्तर ४ रौरव ५ प्राण ६ बृहत्कल्प ७ कन्दर्पः ८ सद्य ९ ईशान १० ध्यान ११ सारस्वत १२ उदानः १३ गरुड १४ कौर्म्मः १५ अयं ब्रह्मणः पौर्णमासी । नारसिंह १६ समाधि १७ आग्नेयः १८ विष्णुज १९ सौर २० सोमकल्प २१ भावन २२ सुपुमाली २३ वैकुण्ठ २४ आर्च्चिषः २५ वल्मीकल्प २६ वैराज २७ गौरीकल्प २८ माहेश्वरः २९ पितृकल्प ३० अयं ब्रह्मणोऽमावास्या । इति क्रमसन्दर्भे प्रभासखण्डम् ॥ एतादृग्द्वादशमासैर्ब्रह्मणो वर्षं भवति । एवं वर्षशतं ब्रह्मण आयुः । तत्र पञ्चाशद्वर्षाणि अतीतानि एकपञ्चाशदारम्भे अधुना श्वेतवाराहकल्पः । इति महाभारतम् ॥ (कल्पारम्भकालश्च ब्रह्मसिद्धान्ते उक्तः कृत्यया,—
"चैत्रसितादेरुदयाद्भानोर्दिनमासवर्षयुगकल्पाः ।
सृष्ट्यादौ लङ्कायां समं प्रवृत्ता दिनेऽर्कस्य" ॥
चैत्रसितादेश्चैत्रशुक्लप्रतिपदमारभ्य इत्यर्थः ।
तथा च ब्रह्मपुराणम् ।
"चैत्रे मासि जगद्ब्रह्मा ससर्ज्ज प्रथमेऽहनि ।
शुक्लपक्षे समग्रन्तु तदा सूर्य्योदये सति ।
प्रवर्त्तयामास तदा कालस्य गणनामपि" ॥
इति कालसामान्यगणनाया यदारम्भकथनात् ।
एष चैत्रशुक्लप्रतिपदि कल्पारम्भोऽपि ।
"माघशुक्लतृतीयायां कृष्णायां फाल्गुनस्य च ।
पञ्चमी चैत्रमासस्य तस्यैवान्त्या तथा परा ।
शुक्ला त्रयोदशी माघे कार्त्तिकस्य तु सप्तमी ।
नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहम् ।
कल्पानामादयो ह्येता दत्तस्याक्षयकारकाः" ॥
इति वराहवाक्यानि समूलानि चेत् तदा कल्पभेदादविरुद्धानि कल्पादित्वेन तत्तत्तिथिषु श्राद्धकालत्वोपयोगित्वाभिप्रायकत्वेन वा समर्थनीयानि । अत एव सूर्य्यसिद्धान्ते उक्तम् । यथा—
"ग्रहग्रहाणामन्योन्यमप्योदयविपर्य्ययात् ।
यत प्रोक्तं तद्भेदेऽपि भागोभगणपूरणात् ।
अस्मकारणवशा च प्राप्तापत्रमुदाहृतम् ।
न तत्र युग्मतोभेदो ब्राह्मकल्पे प्रवर्त्तितः" ॥
इत्यादीनां युगमन्वन्तरकल्पानां सौरत्वेन उक्तिः । सौरमाने च नियतयुगादिकालेषु अनियततिथिसम्भवेऽपि सर्व्वेषां कल्पानामादौ चैत्रसितादितिथिरेव नियता ब्राह्ममानप्रामाण्यात् । किन्तु ब्राह्मकल्पावृत्ते ब्राह्मकल्पानां चान्द्रत्वकथनात् तिथिरेव क्रमात् । इति सूर्य्यसिद्धान्तवाक्ये यद् यदि तोदरयोरपि तोयविरोधः ।) विकल्पः । कल्पवृक्षः । स्यात् । शास्त्रविशेषः । स तु वेदस्य षडङ्गान्तर्गतो यागविधानादिप्रदेशकः । इति हेमचन्द्रः ॥ (यथा रघु १ । ९४ ।
"कल्पवित् कल्पयामास वन्यामेवास्य संविधाम्" ॥)
व्याकरणस्य प्रत्ययविशेषः । स च स्याद्यन्ताख्यातान्तपदाभ्यामीषदूनार्थे भवति । तत्र स्याद्यन्ते यथा, ईषदूनो विद्वान् विद्वत्कल्पः । ईषदूनं पचति पचतिकल्पम् । इति मुग्धबोधव्याकरणम् ॥ (यथा महाभारते १ । १२६ । ५ ।
"ते परस्परमासाद्य देवकल्पा महारथाः" ॥)

कल्पक, पु (कल्पयति क्षौरकर्म्मादिना वेशादिकं रचयतीति । कृप् + णिच् + ण्वुल् ।) नापितः । इति शब्दमाला । कर्चूरः । इति राजनिर्घण्टः ॥ (कल्पयति नवपद्धतिकमुद्धारं रचयतीति वाच्ये रचयिता । ग्रन्थकर्त्ता ॥)

कल्पन, क्ली, (कृप् + भावे ल्युट् ।) कृतिः । छेदनम् । इति मेदिनी ॥

कल्पना, स्त्री, (कृप् + णिच् + भावे युच् टाप् ।) हस्तिसज्जना । नागस्यारोहणार्थे सज्जीकरणम् । इत्यमरः । २ । ८ । ४२ ॥ अनुमितिः । इति न्यायशास्त्रम् ॥ रचना । यथा "प्रकृष्ट कल्पना काव्या" । इत्यमरः । १ । ६ । ६ ॥

कल्पनी स्त्री, (कल्पयति केशादीन् छिनत्ति अनया । कृप् छेदने + करणे ल्युट् । ततो ङीप् ।) कर्त्तरी । इति हेमचन्द्रः ॥ काँचि इति भाषा ॥

कल्पपादप, पुं, (कल्पयति सङ्कल्पं सम्पादयति । इति कल्पः । स चासौ पादपश्चेति कर्म्मधारयः ।) कल्पवृक्षः । यथा नैषधे । १ । १५ । "द्विजा न चक्रेऽन्वितकल्पपादपः" ॥

कल्पपादपदान, क्ली, (कल्पपादपस्य सुवर्णनिर्म्मितपादपाकृतेर्दानम् ।) महादानविशेषः । तद्विधानं यथा
"कल्पपादपदानाख्यमतः परमनुत्तमम् ।
महादानं प्रवक्ष्यामि सर्व्वपापप्रणाशनम् ।
पुण्यं दिनमथासाद्य तुलापुरुषदानवत् ।
पुण्याहवाचनं कृत्वा लोकेशावाहनं तथा ।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ।
काञ्चनं कारयेद्वृक्षं नानाफलसमन्वितम् ।
नानाविहगवस्त्राणि भूषणानि च कारयेत् ।
शक्तितस्त्रिपलादूर्द्ध्वमासहस्रात् प्रकल्पयेत् ।
अर्द्धक्लृप्त तदर्द्धस्य कारयेत् कल्पपादपम् ।
गुडप्रस्थोपरिष्टाच्च सितवस्त्रयुगावृतम्" ॥
ब्रह्मविष्णुशिवोपेतं पञ्चशाखं सभास्करम् ।
कामदेवमधस्ताच्च सकलत्रं प्रकल्पयेत् ।
सन्तानं पूर्व्वतस्तद्वत्तुरीयांशेन कल्पयेत् ।
मन्दारं दक्षिणे पार्श्वे श्रिया सार्द्धं घृतोपरि' ।
मन्ताप पूर्व्वपश्चादिति गुरुप्रस्थस्य सितवस्त्रयुगावृतम् । काम देवमधस्ताच्चेति तस्यान्वयस्य प्रकार सकलत्रं कामदेवं प्रकल्पयेदिति योजनम् ।
मन्दारादिष्वेकैकं देवतामव्ययतेः ॥
"पश्चिमे पारिजातन्तु सावित्र्या सह क्षीरके ।
सुरभीसंयुतं तद्वदुत्तरे हरिचन्दनम् ।
दधीशोद्भेन कुर्व्वीत सौम्येन पञ्चयुगम् ।
कौशेयवस्त्रसम्पन्नानिक्षुमाल्यफलान्वितान्' ॥
इत्यादीन्यष्टमाप्तपटानांमिलितमाख्यतानि ...
सौम्येन उत्तरदिग्विभागेन ॥

"तथाष्टपूर्णकलसान् पादुकासनभाजनान् ।
दीपिकोपानहच्छत्रचामरासनसंयुतम्" ॥
पादुकासनभाजनान् पादुकासनभाजनमष्टि तात्रितयं । आसनपदञ्चात्र कम्बलावस्त्रानो चितासनपरम् । चामरासनसंयुतमिति पुनरासनपदश्रवणात् ।
"पञ्चवर्णयुतं तद्वदुपरिष्टाद्वितानकम् ।
तथाष्टादश धान्यानि समन्तात् परिकल्पयेत् ।
होमाधिवासनान्ते तु स्नापितो वेदपुङ्गवैः ।
त्रिःप्रदक्षिणमावृत्य मन्त्रमेतमुदीरयेत् ।
नमस्ते कल्पवृक्षाय चिन्तितार्थप्रदाय च ।
विश्वम्भराय देवाय नमस्ते विश्वमूर्त्तये ।
यस्मात्त्वमेव विश्वात्मा ब्रह्मा स्थाणुर्दिवाकरः ।
मूर्त्तामूर्त्तपरं बीजमतः पाहि सनातन ! ।
त्वमेवामृतसर्व्वस्वमनन्तः पुरुषोऽव्ययः ।
सन्तानाद्यैरुपेतः सन् पाहि संसारसागरात् ।
एवमामन्त्र्य तं दद्याद्गुरवे कल्पपादपम् ।
चतुर्भ्यश्चापि ऋत्विग्भ्यः सन्तानादीन् प्रकल्पयेत्" ॥
अनेन चत्वार ऋत्विजः कर्त्तव्याः । कुण्डमपि चत्वारो अध्याय इत्युक्तं सम्भवति ।
"स्वल्पेष्वेकाग्निवत् कुर्य्यात् गुरुरेवाभिपूजितः ।
न वित्तशाठ्यं कुर्व्वीत न च विस्मयवान् भवेत्" ।
न च विस्मयवान् इदम्मया दत्तमिति गाढस्मरणवान् भवेदित्यर्थः ।
"अनेन विधिना यस्तु महादानं निवेदयेत् ।
सर्व्वपापविनिर्मुक्तः सोऽश्वमेधफलं लभेत् ।
अप्सरोभिः परिवृतः सिद्धचारणकिन्नरैः ।
भूतान् भव्यांश्च मनुजांस्तारयेद्गोत्रसम्मितान् ।
स्तूयमानो दिवः पृष्ठे पुत्त्रपौत्त्रप्रपौत्त्रजान् ।
विमानेनार्कवर्णेन विष्णुलोकं स गच्छति ।
दिवि कल्पशतं तिष्ठेद्राजराजो भवेत्ततः ।
नारायणबलोपेतो नारायणपरायणः ।
नारायणकथासक्तो नारायणपुरं व्रजेत् ।
यो वा पठेत् कनककल्पतरुप्रदानं
यो वा शृणोति पुरुषोऽल्पधनः स्मरेद्वा ।
सोऽपीन्द्रलोकमधिगम्य सहाप्सरोभि-
र्मन्वन्तरं वसति पापविमुक्तदेहः" ॥ * ॥

अत्र यजमान समुपगतकल्पपादपमहादान दानञ्च तुलापुरुषलिखितं खड्गचर्म्मधनुश्छत्रमाल्य तुलास्थाप्यहरिप्रतिमालङ्कार तुलावलयाद्या धरितमात्र ऋत्विक्चतुष्टयवरणादिदक्षिणासामग्री वर्ज्जितः सर्व्वसम्भार अधिकत्वेन पलत्रयादूर्द्ध्वसहस्र पलावधियथेष्टकाञ्चनमुपादाय तस्यार्द्धेन कल्प पादपमपरार्द्धेन समभागेन सन्तान मन्दार पारिभद्र हरिचन्दनमेव पञ्चतरून् पञ्चशाखान् सौवर्णनानाफलसहितरत्ननिर्म्मितानेकवसनाकार सहितान् केयूरकुण्डलाद्यभिमतालङ्कारभूषितान् एषामाच्छादनाय श्वेतवस्त्रयुगपञ्चक तरूणाम् स्थापनार्थं गुडप्रस्थद्वयं प्रत्येकं प्रस्थपरिमितान् धान्यघृतक्षीरकतिलांश्च कल्पवृक्षाधःस्थापनार्थं मभीष्टसुवर्णान्तरयन्त्रोत्खाटिता ब्रह्मविष्णुशिव भास्करप्रतिमा यथोक्तान्तरचतुष्टयाधःस्थाप नार्थमभिमतसुवर्णान्तरयन्त्रोत्खाटिता सरति कामदेवलक्ष्मीसावित्रीसुरभिप्रतिमाश्च कल्पतरु पार्श्वस्थापनार्थमष्टौ कम्भान् तदधःस्थापनार्थं कुशादिनिर्म्मितासनाष्टक कुम्भाच्छादनार्थं कौषेय वस्त्राष्टक कुम्भपार्श्वस्थापनार्थमिक्षुदण्डाष्टक पुष्प मालाष्टक सामग्रीं यथेष्टफलाष्टक पादुकायुगा ष्टक कांस्यभाजनाष्टकञ्च कल्पतरुपार्श्वार्थमाय दीपिकोपानद्युगच्छत्रचामरासनाष्टादशधान्यानि च उत्पादयेत । ततस्तुलापुरुषोक्तसमयानामन्य तमस्य पूर्व्वतरदिने यजमानगुरुर्त्विक्जापकास्तुला पुरुषवद्भविष्यभोजनादिकं कृत्वा निवेदनपूर्व्व वाक्ययोस्तुलापुरुषपदस्थाने कल्पपादपपदं प्रक्षिप्य यथायथं निवेदनसङ्कल्पञ्च कुर्य्युः । ततोऽपरदिने यजमानस्तुलापुरुषवद्गोविन्दाद्याराधनादिमधुपर्क दानान्त गोविन्दाद्यभ्यर्च्चनब्राह्मणानुज्ञापनदान सङ्कल्पपुण्याहादिवाचनवरणशाकेषु तुलापुरुष पदस्थाने कल्पपादपपदं प्रक्षिप्य कुर्य्यात् । ततो गुर्व्वृत्विगयजमानजापका उपवसेयुः । अपर दिने च कृतनित्यास्तुलापुरुषवदग्निस्थापनादिमध्य ब्राह्मणवाचनान्त कर्म्म यथायथं कुर्य्युः । एवञ्च मध्यब्राह्मणवाचनान्तकर्म्म तुलापुरुषप्रत्य अनु सन्धायानुष्ठातव्यम् । तत ऋत्विज कल्पतरुमा नीय प्रधानवेद्यां लिखितचक्रमध्ये गुडप्रस्थं दत्त्वा तदुपरि स्थापयेयुः । ततस्तस्याधो गुडप्रस्थोपरि पङ्क्तिक्रमेण सुवर्णयन्त्रोत्खाटिता ब्रह्मविष्णुशिव भास्करप्रतिमाः स्थापयेयुः । तत्पूर्व्वत अधस्तादा रोपितसरतिकामदेवप्रतिमा गुडप्रस्थोपरि स न्तान कल्पतरुदक्षिणत अधःसमारोपितलक्ष्मी प्रतिमां घृतप्रस्थोपरि मन्दार कल्पतरो पश्चि मत अधःसमारोपितसावित्रीप्रतिमा क्षीरक प्रस्थोपरि पारिभद्र कल्पतरूत्तरत अधःसमारो पितसुरभिप्रतिमां तिलप्रस्थोपरि हरिचन्दनञ्चा रोपयेयुः । सर्व्वांश्च तरून् प्रत्येकं सितवस्त्रयुगे नाच्छादयेयुः । अष्टासु दिक्षु प्रत्येकं कौषेयवस्त्रा च्छादितान् इक्षुदण्डफलान्वितान् माल्याभूषिता नष्टौ पूर्णकुम्भान् पार्श्वारोपितपादुकायुगभाजना नासनेष्वारोप्य कल्पतरुपार्श्वे पुष्पोक्तदीपिका युगकरणमारोपयेयुः । ततो मङ्गलतूर्य्यगीतवन्दि घोषेषु सत्सु ऋत्विजः कुण्डसमीपस्थकुम्भचतुष्टय जलेन यजमानं स्नापयेयुः । ततो यजमानः शुक्ल माल्याम्बरधरो धृतसर्व्वालङ्कारः पुष्पाञ्जलिमादाय कल्पपादपं त्रिः प्रदक्षिणीकृत्य नमस्ते कल्प वृक्षायेत्यादि पाहि संसारसागरादित्यन्तमन्त्रान् पठित्वा पुष्पाञ्जलिनाभ्यर्च्च्य गुर्व्वृत्विग्भ्यो यथायथं दद्यात् । ॐ अद्यामुकामुकसगोत्रेभ्योऽमुका मुकवेदामुकामुकशाखाध्यायिभ्य अमुकामुकदेव शर्म्मभ्यो युष्मभ्यं मत्स्यपुराणोक्तकल्पपादपमहा दानदानफलप्राप्तिकामोऽहं मत्स्यपुराणोक्तभाग व्यवस्थया एतं गुडप्रस्थारोपितसौवर्णब्रह्मविष्णु महेश्वरभास्करप्रतिमासितवस्त्रयुगान्वितगुडप्र स्थारोपितसौवर्णसरतिकामदेवप्रतिमासितवस्त्र युगान्वितसौवर्णसन्तानसहितं घृतप्रस्थारोपित सौवर्णलक्ष्मीप्रतिमासितवस्त्रयुगान्वितसौवर्णम न्दारसहितं क्षीरकप्रस्थारोपितसौवर्णसावित्री प्रतिमासितवस्त्रयुगलान्वितसौवर्णपारिभद्रसहित तिलप्रस्थारोपितसौवर्णसुरभिप्रतिमासितवस्त्र युगान्वितसौवर्णहरिचन्दनसहितं कौषेयवस्त्रयुग वेष्टितप्रोक्षुमाल्यफलान्वितकुम्भासनपादुकायुग कांस्यभाजनयुतपूर्णकुम्भाष्टकदीपिकोपानद्युगच्छ त्रचामरासनफलमाल्ययुतपञ्चवर्णवितानकाष्टादश धान्ययुतं कल्पपादपमहादानमहं ददे । प्रति ग्रहीतारः स्वस्तीत्युक्त्वा सावित्रीं पठित्वा यथायथं अमुकपादपोऽयं विष्णुदैवतमित्युक्त्वा यथाशाख कामस्तुतिं पठेयुः । ततो दक्षिणादानम् ।
ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं युष्मभ्यमहं दक्षिणा मिमां यदुत्पत्तियोग्या भूमिरेतानि च रत्नानि ददे । प्रतिग्रहीतारः स्वस्तीत्युक्त्वा प्रत्येकं तरून् मूलेषु स्पृशेयुः । ततो यजमानस्तुलापुरुषवत् याच केभ्यो दक्षिणादानं दीनानाथादितर्पणं ब्राह्मण वाचनञ्च कुर्य्यात् । तत कल्पपादपं गुरवे सन्तान कादींश्चतुरो तरून् ऋग्वेदादिक्रमेण चतुर्भ्य ऋत्विग्भ्यो निवेदयेत । स्वल्पकल्पपादपदाने तु गुरुरेवैकाग्निवत् स्वगृह्योक्तविधिना सर्व्वं ब्रह्माण्ड दानवत् कुर्य्यात । इति कल्पपादपमहादान समाप्तम् ॥ * ॥ इति महाराजाधिराजनिःशङ्कशङ्कर- श्रीमद्बल्लालसेनदेवविरचिते श्रीदानसागरे महा दानदानावर्त्तः ॥

कल्पलतादान, क्ली, (महादानान्तर्गता सुवर्णकल्पिता लता तस्या दानम् ।) महादानविशेषः ।
तस्य विधिर्यथा ।
"अथातः सम्प्रवक्ष्यामि महादानमनुत्तमम् ।
महाकल्पलता नाम महापातकनाशनम् ।
पुण्यान्तिथिमथासाद्य कृत्वा ब्राह्मणवाचनम् ।
ऋत्विङ्मण्डपसम्भारभूषणाच्छादनादिकम् ।
तुलापुरुषवत् कुर्य्यात् लोकेशावाहनादिकम् ।
चामीकरमयी कुर्य्याद्दश कल्पलता शुभाः ।
नानापुष्पफलोपेता नानांशुकविभूषिताः ।
विद्याधरसुपर्णानां मिथुनैरुपशोभिताः" ।
सुपर्णानां किन्नराणाम् ।
"हारानादित्सुभिः सिद्धैः फलानि च विहङ्गमैः ।
लोकपालानुसारिण्यः कर्त्तव्यास्ताश्च देवताः" ।
लोकपालानुसारिण्य इति लोकपालसमानाश्रयतया ।
"ब्राह्मीमनन्तशक्तिञ्च लतयोरुपरि न्यसेत् ।
अधस्ताच्च तयोर्मध्ये महाशङ्खधरे शुभे" ।
पद्मशङ्खकरे इति क्वचित् पाठः ।
"ऐरावतगता माहेन्द्री पूर्व्वेण कुलिशायुधा ।
रजनीसहिता मेषी स्रुवपाणिरथानला" ।
रजनी हरिद्रा ।
"याम्या तु महिषारूढा गदिनी कमलोपरि ।
नैरृती नैरृती श्यामा खड्गिनी च नरोपरि ।
वारुणी वारुणी गौरी सर्पस्था नागपाशिनी ।
पताकिनी च वायव्ये मृगस्था मरुतोपरि ।
सौम्या निधेश समारूढा कौबेरदिशि संस्थिता ।
माहेश्वरी शूलकरा ऐशाने तु वृषस्थिता ।

मौलिन्यो वरदास्तद्वत् कर्त्तव्या बालकान्विता ।
मध्या पञ्चमशाद्रूर्द्धमासहस्तात् प्रकल्पयेत्” ॥

मौलिन्यो मुकुटवत्य । वरदा प्रसन्नमूर्त्तय । बालकान्विताः क्रोड़निहितपुत्रकाः । एतेन क्रोड़निविष्टबालकदत्तपुत्रका दक्षिणहस्तविहस्त यथोक्तप्रशस्ता प्रसन्नमूर्त्तयो बद्धमुकुटा सवाहना घटनीया । अनुक्तवाहनानान्तु ब्राह्मामैशी मैष्णवीनामन्तरक्षौबलाकवाहनानि । लोकपालानु सारिण्य इति श्रुतेः । तेन हंसारूढा ब्राह्मी छागारूढाग्नेयी नराक्रूढा नैरृती घटनीया । अनन्तस्य तु हविबाधनादमग्नात् अनन्तशक्तिर्ब्राह्मणस्येव कर्त्तव्या ॥
‘सर्व्वासामुपरिष्टाच पञ्चवर्णं वितानकम् ।
धेनवो दशकुम्भाश्च वस्त्रयुग्मानि चैव हि ॥
मध्यमे द्वे तु गुरवे ऋत्विग्भ्योऽन्यास्तथैव च ।
ततो मङ्गलशब्देन स्नात शुक्लाम्बरो बुध ।
त्रिः प्रदक्षिणमाहृत्य मन्त्रमेतमुदीरयेत्” ॥
‘नमो मम पापविनाशिनीभ्यो
ब्रह्माण्डलोकेश्वरपालनीभ्य ।
आसन्नितार्थिक्यपथप्रदाभ्यो
दिग्भ्यस्तथा कल्पलतावधूभ्य ॥
इति सकलदिगङ्गनाप्रदान
मवभयसूदनकारि यः करोति ।
अभिमतफलदे स नाकलोके
वसति पितामहवत्सराणि त्रिंशत ॥
पितृशतमथ तारयेद्भवाब्धे
गुरुदुरितौघविघातशुद्धदेहम् ।
सुरपतिवनितासहस्रसद्यः
परिवृतमम्बरलोकवामिनन्द्यम् ॥
इति विधानमिदं महिगङ्गना
कमकल्पलताविनिवेदने ।
पठति यः स्मरतीह सधीयते
स पदमेति पुरन्दरसेवितम्” ॥ ७ ॥
अथ यजमानः समुपगतमहाकल्पलतामहादान दानेच्छुः शुक्लाङ्गवस्त्रिलिखित स्वकगणमभ्यर्थ्य महाच्छ्रम समाहृतुनाड्मस्थापनीयहरिप्रतिमाखालङ्कारतु लाचक्रयान्नप्रतिमावहि सम्भसम्भारसधिकृत्य पञ्चहस्तादूर्द्धपञ्चहस्तावधिपर्यन्त हेमनिर्म्मिता सुगन्धापघटितविद्याधरकिन्नरमिथुनसिद्धगण पक्षवाद्यनिर्म्मितसयदेच्छाकृतिपञ्चकुसुमपल्लव शोभितमध्ये सिद्धपक्षसारसपुच्छसाह्नमुक्ता हारभूषिता नानाविधचित्रैश्चादिवस्त्रोपशो भिता दशलता । तासामथ स्थापनाय यथेच्छ हेमपद्मोत्खातिता यथोक्तरूपा ब्राह्मादिदश प्रतिमा । तदारोपणाय वस्तुयुक्तदिव्यासक्त पत्रक्षीरप्रकरातिलनवनीतानि । लतापार्श्वस्थाप नाय धेनुदशक कुम्भदशकञ्च वस्त्रयुगदशकञ्चो पाददेत् । ततो यजमानकुलाद्वर्णोक्तसमयागाम न्तलग्नस्य पूर्व्वतरदिने शुभ्र त्विग्ग्रमावनापक्षान् आपुर्ववत्तृत्वविघ्नशान्तिर्हि कृत्वा निर्व्वैरमना पुण्याहादीन्युक्ताङ्गदानस्थान्ते महाकल्पलताप्रद निर्देशं निवेदन पञ्च्यन्वक्कुर्युः । अपरदिने च यज

मान पूर्व्ववद्दोविन्दाराधनादिमधुपर्कदानान्त कर्म्म गोविन्दाद्यभ्यर्च्चनमाचम्यानुष्ठापनदानसङ्कल्प पुण्याहादिवाचनवरणवाक्यानु गुलापुरुषपदस्थान महाकल्पलतापदं प्रक्षिप्य कुर्य्यात् । ततो गुरुः स्त्रिग्यजमानमापका उपवसेयुः । अपरदिने तत शिवात्तुलापुरुषवदग्निस्थापनादि मध्यमाद्यावाघ मान्त कर्म्म यथायथ कुर्य्युः । एवञ्च मध्यमाह्नस वचनात् कर्म्म तुलापुरुषवदथमनुसन्धायानुष्ठा तव्यम् । तत ऋत्विज प्रधानवेदाः लिखितपक्षोपरि लतानां मध्ये पूर्व्वादिदिक्क्रमेणाष्टौ लता समा रोप्य लतामण्डलमध्ये लताद्वयमारोप्य तदधो लवण दत्त्वा तत्र ब्राह्मीमनन्तशक्तिञ्च आरोप्य पूर्व्वादिदिक्क्रमारोपिताष्टलतासु क्रमेण गुडादि द्रव्याणि दत्त्वा तेषु क्रमात् कुलिशायुधादिशक्तिप्रतिमा समारोपयेयुः । लतापार्श्वे दशधेनू पूर्णकुम्भादशक दशवस्त्रयुगानि च स्थापयेयुः । ततो मङ्गलगीतवाद्यवन्दिघोषेषु मत्सु कुम्भसमीपस्थकुम्भ चतुष्टयजलेन यजमान स्नापयेयुः । ततो यजमानः शुक्लमाल्याम्बरधरो हस्तगन्धाक्षतपुष्पाञ्जलि मादाय लता त्रिः प्रदक्षिणीकृत्य नमो मम पापविनाशिनीभ्य इत्यादिमन्त्रेण पुष्पाञ्जलिना भर्च्य गुर्व्वृत्विग्भ्यो दद्यात् । तद्यथा । ॐ अद्या मुकामुकमगोत्रेभ्य अमुकामुकवेदामुकामुक शाखाध्यायिभ्योऽमुकामुकदेवशर्म्मभ्यो ब्राह्मणेभ्यो मत स्यपुराणोक्तकल्पलतामहादानदानफलप्राप्तिकामो ऽह मत्स्यपुराणोक्तभागध्वजसंयुक्ता कवचगुडहरि द्रातण्डुलक्षीरघृतशर्करातिलावमीलापितकल्पवृक्षा ब्राह्मानन्तकुलिशायुधशक्तिदण्डनिऋतिपाशध्वजायु सोमम त्रिशूलशक्तिप्रतिमासहिता प्रत्यर्पितवितानकधेनुदशककुम्भदशकवस्त्रयुगदशकान्विताः दश कल्पलता सम्प्रददे । प्रतिग्रहीतार सत्वोत्युक्ता सावित्रीं पठेयुः । ततो गुरु कल्पलतेयं विष्णु दैवतेति ब्रूयात् । ऋत्विजस्तु प्रत्येकं कल्पलतय विष्णुर्दैवतेति ब्रूयु । ततो यथाशास्त्र कामस्तुति पठेत् । तत ॐ अद्य कृतैतद्दानप्रतिष्ठार्थं दक्षिणामिमां दद्विरण्यदक्षिणां दत्त्वा भूमिमेतानि च रत्नानि सम्प्रददे । ब्राह्मणा स्वस्त्युक्ता कल्पलता गृह्णीयुः । तत्तुलापुरुषवदवशिष्टेभ्यो दक्षिणां दीनानाथार्त्तिभ्यश्च ब्राह्मणवाचन स्वयं कल्पलताना यथायथ प्रतिपादनञ्च कुर्य्यात् । इति कल्पलतामहादान समाप्तम् । इति दानसागरः ॥
कल्पवृक्षः, पु, कल्पस्य सङ्कल्पस्य दाता वृक्षः । कल्पश्चासौ वृक्ष इति वा । इति भरतसुन्दरी । देवतरु । इत्यमरः । १ । १ । ५३ ॥ (यथा, शान्तिमार्गे ।
“नमस्ते कल्पवृक्षाय चिन्तिताञ्जप्रदाय च ।
विश्वम्भराय देवाय नमस्ते विश्वमूर्त्तये” ॥)
कल्पान्तः, पुं, (कल्पस्य अन्तो नाशः ।) ब्रह्मणो दिनान्तः । प्रलयः । इत्यमरः । १ । ४ । २० ॥ (यथा, गोः रामायणे ४ । ५० । ४ ।
“उपयासरसाधाय अबो कल्पान्तवासिनः” ॥)
कल्पित, पुं, (कल्प्यते सम्भ्रियते यत्र । कृप + णिच् + क्त । इति क्त ।) सन्निपातदशी । इति हेम

चन्द्रः । रचिते त्रि । (यथा, महानिर्व्वाणोक्ता ब्रह्मज्ञाननिर्णये ।
“ब्रह्मादितृणपर्य्यन्त मायया कल्पित जगत् ।
सत्यमेक पर ब्रह्म विदित्वैव सुखी भवेत्” ॥)
कल्मष, क्ली, (कर्म्म शुभकर्म्म स्यति नाशयति स्यत शब्दे षत्वे च पृषोदरादित्वात् साधुः ।) पापम् । इत्यमरः । १ । ४ । २६ ॥ (यथा, मनु १७ । २२ ।
“यामीस्ता यातनाः प्राप्य सजीवो वीतकल्मषः ।
तान्येव पञ्चभूतानि पुनरप्येति भागशः” ॥)
कलुषम् । इति त्रिकाण्डशेष ॥ (मालिन्यम् । यथा, रामायणे २ । ३६ । २७ ।
“न हि कञ्चन पश्यामो राघवस्यागुणं वयम् ।
दुर्लभोऽस्य निरयः शशाङ्कस्येव कल्मषम्” ॥)
कल्मष, पुं, (कर्म्म शुभकर्म्म स्यति नाशयति । कर्म्म + सो + क । रस्य ल शस्य षत्वञ्च निपातनात ।) नरकविशेष । इति मेदिनी ॥ मलिने त्रि । इति जटाधरः ॥
कल्माष, पु, (कलयति इति क्विप् कल् । माषयति अभासा अभिभवति अन्यवर्णान् । मष् हिंसायां णिच् + अच् । कल चासौ माषश्चेति ।) चित्रवर्ण । तद्वति त्रि । इत्यमरः । १ । ६ । १७ ॥ कृष्णपाण्डर वर्ण । कृष्णवर्ण ॥ (कल शुभकर्म्म माषयति हिन स्ति । कल + मष् + णिच् + अच् वा ।) राक्षसः । इति मेदिनी ॥ गन्धशालि । इति राजनिर्घण्टः ॥ (नागविशेष । यथा, महाभारते १ । ३५ । ७ ।
“शिलानीको तथा नागौ कल्माष शबलौ तथा” ॥)
कल्माषकण्ठः, पुं (कल्माषः कृष्णवर्ण कण्ठो यस्य ।) शिवः । इति हारावली ॥
कल्माषपादः, पु, (कल्माषौ शापजलपतनात् कृष्णवर्णौ पादौ यस्य ।) सौदासराजः । इति श्रीभागवतम् ॥ (यथा, महाभारते १ । १०७ । १ ।
“कल्माषपाद इत्येव लोके राजा बभूव ह ।
इक्ष्वाकुवंशज पार्थ तेजसासदृशो भुवि” ॥)
अस्य यथा कल्माषपादत्व जात तदुच्यते ।
इक्ष्वाकुकुलस्य ऋतुपर्णस्य वंशजः सौदासनामा नृपति पुरा मृगयां चरन् एक राक्षसमवधीत् । अस्य रक्षसो भ्राता तु वैरशोधन चिकीर्षु सूदरूपधरोऽस्य राज्ञो गृहे प्रयुवास । कदाचित्तु असौ राजस भोक्तुकामाय ऋषये सौदासस्य गुरवे वशिष्ठाय नरामिष पक्त्वा ददौ । वशिष्ठस्तु सम्भोज्य द्रव्यानिरूप्य राजको भविष्यतीति” राजानमशपत् । राजा तु शाप वृत्तान्त विदित्वा विनापराधेन मन्त्र शाप इति विचिन्त्य जलमादाय गुरुं प्रतिशप्तुं समुद्यतः । तत्सन्निधिस्थिताऽस्य पत्नी मदयन्ती इत्येवमकार्षीत् पति निवारयामास । राजा तु तदा निवारितः शापाम्भो स्वायम्भुवे प्रक्षिपवान् । तदवरम्भाय पादयोः कल्माषतां प्राप्तवान् । कथा चास्या विस्तरितु भागवते ९ । ९ अध्याये, तथा महाभारते १ । १०० अध्याये द्रष्टव्या ॥)
कल्य, क्ली, (कल्यते ज्ञायते । कल गतौ + कर्म्मणि यत् ।) प्रत्यूष । इत्यमरः । १ । ४ । २ ॥ (यथा,

भागवते ४ । २४ । ७८ ।
"इदं य कल्य उत्थाय प्राञ्जलिः श्रद्धयान्वितः ।
शृणुयाच्छ्रावयेन्मर्त्त्यो मुच्यते कर्म्मबन्धनैः" ॥
कल्यते मित्त्वतां सम्पादयतीति । अघ्न्यादित्वात् यक् ।) मधु । इति हेमचन्द्रः ॥

कल्य, त्रि, (कलासु साधुः इति यत् ।) दक्षः । (यथा, महाभारते १ । ५ । ३ ।
कथयस्व कथामेतां कल्याः स्म श्रवणे तव' ।) निरामयः । इत्यमरः । ३ । ३ । १५९ । वाक्श्रुतिवर्जितः । दक्षः । कल्याणवचनम् । उपायवचनम् । इति मेदिनी ॥

कल्यजग्धि, स्त्री, (कल्ये प्रातर्जग्धिर्भोजनम् ।) प्रातराशः । प्रातर्भोजनम् । इति जटाधरः ॥

कल्यत्व, क्ली, (कल्य + भावे "तस्य भावस्त्वतलौ" । इति त्वम् ।) आरोग्यम् । इति जटाधरः ॥

कल्यपाल, पुं, (कल्यं मधु मद्यमित्यर्थः पालयतीति । कल्य + पाल् + अण् ।) शौण्डिकः । इति हेमचन्द्रः ॥

कल्यपालक, पुं, (कल्यं पालयति । कल्य + पाल + ण्वुल् ।) शौण्डिकः । इति शब्दमाला ॥

कल्यवर्त्त, पुं, (कल्ये प्रातः वर्त्त्यते प्राप्यते भुज्यते इति वा यद्वा वर्त्तते जीव्यते अनेन । वृत + णिच् + कर्म्मणि करणे वा अच् ।) प्रातर्भोजनम् । इति त्रिकाण्डशेषः ॥

कल्या, स्त्री, (कडयति मादयति । कडमदे णिच् अघ्न्यादित्वात् यक् टाप् च । डस्य लत्वम् । कलयति मादयति वा । कल् + णिच् + यक् टाप् च ।) मद्यम् । इति मेदिनी ॥ शुभात्मिका वाणी । कल्याणवचनम् । इत्यमरः । १ । ६ । १८ ॥ हरीतकी । इति शब्दरत्नावली ॥

कल्याण, क्ली, (कल्ये प्रातः अण्यते शब्द्यते इति । कल्य + अण + "अकर्त्तरि चेति" ३ । ३ । १९ । घञ् ।) मङ्गलम् । (यथा, विष्णुपुराणे । १ । १३ । १०२ ।
"कल्याणं न चाप्नोति दिवि वा यदि वा भुवि ।
सर्व्वकल्याणसंयुक्तो दीर्घकालञ्च जीवति" ।)
तत्पर्य्यायः । श्वः २ श्रेयसम् ३ शिवम् ४ भद्रम् ५ शुभम् ६ भावुकम् ७ भविकम् ८ भव्यम् ९ कुशलम् १० क्षेमम् ११ शस्तम् १२ । तद्युक्ते त्रि । इत्यमरः । १ । ४ । २५, २६ ॥ (यथा, मनुः ८ । १९२ ।
"भक्तिश्चेष्टानुवृत्तौ च कल्याणे विप्रतिश्रुते' ।)
स्वर्णम् । इति मेदिनीकरहेमचन्द्रौ ॥

कल्याणबीज, पुं, (कल्याणं बीजं यस्य ।) मसूरः । इति राजनिर्घण्टः ॥ (मसूरशब्दे विशेषोऽस्य ज्ञेयः ।)

कल्याणिका, स्त्री, (कल्याण + संज्ञायां कन् तत टाप् अत इत्वम् ।) मनःशिला । इति राजनिर्घण्टः ॥ (मनःशिलाशब्देऽस्या विवृतिर्ज्ञेया ।)

कल्याणिनी, स्त्री, (कल्याणमस्यास्तीति इनिः ततः स्त्रियां ङीप् ।) बला । इति राजनिर्घण्टः ॥ कल्याणविशिष्टे त्रि ।

कल्याणी, स्त्री, (कल्याण + स्त्रियां ङीप् । माषपर्णी । गौः । इति राजनिर्घण्टः । (यथा, रघुः १ । ८७ ।
"उपस्थितेयं कल्याणी नाम्नि कीर्त्तित एव यत्' ।
कल्याणवती । यथा महाभारते । ३ । ७४ । ५ ।
"दमयन्त्यपि कल्याणी प्रासादस्था ह्युदैक्षत" ।)

कल्यापाल, पुं, (कल्यां मद्यं पालयतीति । कल्या + पालि + अण् ।) शौण्डिकः । इति त्रिकाण्डशेषः ॥

कल्ल, ऋ शब्दे । अशब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म-अक-सेट् ।) ऋदयान्तः । ऋ कल्लते लोकः अव्यक्तशब्दं करोति शब्दं न करोति वेत्यर्थः । कूजने इति चान्द्रा गोमराश्च ॥ शब्दमात्रे इति केचित् । अशब्दे इति कलापाः । इति दुर्गादासः ॥

कल्ल, त्रि, (कल्लते शब्दं न शक्नोति इति । कल्ल + अच् ।) बधिरः । इति त्रिकाण्डशेषः । काला इति भाषा ॥

कल्लत्व, क्ली, (कल्लस्य भावः । कल्ल + त्वम् ।) स्वरभेदः । इति हेमचन्द्रः ॥ बधिरता च ॥

कल्लोल, पुं, (कल्ल + बाहुलकात् ओलच् । यद्वा कं जलं लोलं चपलं यस्मात् निपातनात् साधु ।) महातरङ्गः । बड ढेउ इति भाषा । तत्पर्य्यायः । उल्लोलः २ । इत्यमरः । १ । १० । ६ ॥ ('कालिन्दीजलकल्लोलकोलाहलकुतूहली" ।
इत्युद्भटः ।) हर्षः । शत्रौ त्रि । इति मेदिनी ॥

कव, ऋ ङ स्तुतौ । वर्णे । इति कविकल्पद्रुमः । (भ्वां-आत्म-सक-सेट् । ऋदित् ।) ऋ अचकवत् । ङ कवते । इति दुर्गादासः ॥

कवक, क्ली, (कवते आच्छादयति विस्तारयति वा । कव् + अच् । संज्ञायां कन् ।) छत्राकम् । यथा,—
"देवताय हविः शिग्रु लोहितान् व्रश्चनांस्तथा ।
अनुपाकृतमांसानि विड्जानि कवकानि च" ।
कवकानि छत्राकाराणि । वर्ज्जयेदिति प्रत्येकमभिसम्बध्यते । इति मिताक्षरायामाचाराध्यायः ॥

कवक, पुं, (कव + अच् + संज्ञायां कन् ।) कवलः । ग्रासः । इति हेमचन्द्रः ॥

कवच, पुं क्ली, (कं देहं वञ्चति विपक्षास्त्राणि वञ्चयित्वा रक्षति इति शेषः । क + वञ्च् + अच् । कं वातं वञ्चति वा अन्तर्णीतण्यर्थो वा । यद्वा कवते इति कुधातोरच प्रत्ययः इति केचित् इत्युणादिकोषः ४२ । २ ।) सन्नाहः । साञोया इति भाषा । (यथा, विष्णुपुराणे । १ । १९ । ४ ।
'शराश्च दिव्या नभसः कवचश्च पपात च" ।)
तत्पर्य्यायः । तनुत्रम् २ वर्म्म ३ दंशनम् ४ उरश्छदः ५ कङ्कटकः ६ जगरः ७ । इत्यमरः । २ । ८ । ६४ ॥ दंशम् ८ जागरः ९ अजगरः १० । इति तट्टीका ॥ कटकः ११ योगः १२ सन्नाहः १३ कञ्चुकः १४ । इति जटाधरः ॥ * ॥ तस्य युक्तिर्यथा ।
खड्गादीनान्तु गदता पूर्व्वमेव निदर्शिता ।
अधुनात्मैव निर्दिष्टकवचादिरपीष्यते ॥
तल्लक्षणं सदोषेण प्रवक्ष्यामि निबोधत ।
काष्ठं चर्म्म च सकलं नरमेतत्तु दुस्तरम् ॥
यथोत्तरं गुणवत तथा पूर्व्वन्तु निन्दितम् ।
शरीरावरकत्वन्तु लघुत्वं दृढता तथा ॥
दुर्भेद्यतेति कथितं कवचे गुणसंग्रहः ।
सच्छिद्रतातिगुरुता तनुता सुखभेद्यता ।
कवचानां विनिर्दिष्टः समासाद्दोषसंग्रहः ।
अथ वर्णो विनिर्दिष्टः क्रमादेव चतुर्व्विधः ॥
सितो रक्तस्तथा पीतः कृष्णो ब्रह्मादिषु क्रमात् ।
केचित् कुर्व्वन्ति कुशलाः कवचं धातुसम्भवम् ॥
कनकं रजतं ताम्रं लौहं तेषु यथाक्रमम्' ॥
इति युक्तिकल्पतरुः ॥ * ॥
"यथा शस्त्रप्रहाराणां कवचं प्रतिवारणम् ।
तथा दैवोपघातानां शान्तिर्भवति वारणम्" ॥
इति मलमासतत्त्वम् ॥ लोहादिवर्म्मवत् अङ्गादिरक्षार्थं देवतामन्त्रविग्रहम् । तत्तु पूजायां पाठ्यं भूर्ज्जे विलिख्य कण्ठादौ धार्य्यञ्च । इति तन्त्रम् ॥ गर्द्दभाण्डवृक्षः । पटहवाद्यम् । इति मेदिनी ॥

कवचपत्र, क्ली, (कवचमिवाभेद्यं पत्रमिव पत्रं वल्कलं यस्य ।) भूर्ज्जपत्रम् । इति शब्दचन्द्रिका ॥

कवटी, स्त्री (कौति शब्दायते इति । कु + अटन् + गौरादित्वात् ङीष् ।) कवाटः । इति भरतो द्विरूपकोषश्च ॥

कवयी, स्त्री, (कं जलात् वयते गच्छति इति । क + वय् गतौ + इन् "कृदिकारादक्तिनः" वा ङीष् ।) मत्स्यविशेषः । कयी माछ इति भाषा ॥ तत्पर्य्यायः । क्रकचपृष्ठी २ । इति त्रिकाण्डशेषः ॥ अस्या गुणाः । मधुरत्वम् । स्निग्धत्वम् । बलकारित्वम् । वातकफनाशित्वञ्च । इति राजवल्लभः ॥ किञ्चित्पित्तकारीति केचित् ॥ ("कवय्यः स्निग्धमधुराः" । इति चक्रपाणिदत्तद्रव्यगुणे ।)

कवर, त्रि, (के मस्तके वरं शोभमानत्वात् श्रेष्ठम् ।) केशपाशः । इत्यमरटीका ॥ (यथा भागवते ५ । २ । ७ । 'वल्गुस्पन्दनस्तनकलशकवरभाररशना देवीम्' ।) संपृक्तम् । खचितम् । इति हलायुधः ॥

कवर, पुं स्त्री, (कं जलं वृणोति । क + वृ + अच् ।) लवणम् । अम्लः । इति मेदिनी हेमचन्द्रश्च ॥ (कौतीति । कुशब्दे + "कोरन्" । उणां ४ । १५४ । इति अरन् । पाठकः । इत्युज्ज्वलदत्तः ॥ कर्बुरवर्णः । इति हलायुधः । यथा, माघे ५ । १९ ।
"धृष्टैव निर्ज्जितकलापभरामधस्तात्
व्याकीर्णमाल्यकवरां कवरीं तरुण्याः" ।)

कवरकी, स्त्री, (कवरं केशपाशं किरति विक्षिपति यत्र इति । कवर + कॄ + बाहुलकात् ड गौरादित्वात् ङीष् । कारावासदुःखेन केशादिपारिपाट्याभावात् तथात्वम् ।) कारागारबन्दः । इति हारावली । कयेदी इति भाषा ॥

कवरा, स्त्री, (कवर + अजादित्वात् टाप् ।) खरपुष्पा । इति शब्दचन्द्रिका । बाबुइ इति भाषा ॥

कवरी, स्त्री, (कं शिरः वृणोति आच्छादयति । क + वृ + अच् + गौरादित्वात् ङीष् । कु + अरन् ङीष् वा ।) केशविन्यासः । खुवेर खोपा टिकी इति भाषा । तत्पर्य्यायः । केशवेशः २ कवरः ३ केशगर्भकः ४ । इति शब्दरत्नावली ॥
('गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकवरी निःश्वसन्ती विशालम्" ।
इति पदाङ्कदूते । १ ।) भरा । बाबुइ इति

भाषा। काउरी। इत्यमरो मेदिनी च। त्रिकूट पाता इति भाषा।

कवल, पुं, (किम अनेन बलते चलतीति। वल्+अच्।) ग्रास। इत्यमर। २।८।१४। ("निखटुकमनमोदा सैन्धव औरके द्वे समधरवदताममध्मो हिङ्गुभागः। प्रथमकवलभुक्त सर्पिषा भुञ्जीत ज्वलयति जठराग्नि वातरोगांश्च हन्ति"। इति वैद्यकचक्रपाणिसंग्रहे अग्निमान्द्याधिकारे। "यद्वन्न कवलाग्रागा गावोवत्सान्न पाययन्"। इति हेरामायणे। २। ८१। ८।) मत्स्यविशेष। इति शब्दचन्द्रिका। वेजे माछ इति भाषा।

कवलित, त्रि, (कवलं कारोति। कवल+णिच्+कर्म्मणि क्त।) भुक्त। इति जटाधर। ("ग्रस्त कवलितानेकजीवम्"। इति कथासरित्सागर। ८६। १४२।)

कवस, पु, (कौति कायते वा। कुशब्दे+"अतसी त्यादिना" उणा ३। २। अस्।) कवच। इत्युणादिकोष।

कवाट, त्रि, (कुशब्दे+भावे अप्। कव शब्दं वटतीति। कव+वट्+अण्। यद्वा क वातं वटति वृणोति वारयतीत्यर्थः क+वट्+अण्।) कपाट। इत्यमरटीकायां वाचस्पतिः। (यथा हेरामायणे २। ७१। २०। "असंवृतकवाटानि श्रीविहीनानि सर्वशः"।)

कवाटवक्र, स्त्री, (कवाट वक्र यस्मात्।) वृक्षविशेष। कवाटवेटु इति भाषा। कवाडपट्टुया इति केचित्। तत्पर्यायः। चक्राह्वम् २ कवाटवक्रम् ३ अपराजित ४। इति रत्नमाला।

कवाटी स्त्री, (कवाट+स्वार्थे+ङीप्।) कपाटम्। इत्यमरटीकायां भरतः।

कवार स्त्री, (क जलं आवरयति वृणोति। क+आ+वृ+अण्।) पद्मम्। इति त्रिकाण्डशेषः।

कवि, पुं, (कवते सर्वं जानाति सर्वं वर्णयति सर्वं सरूपतः गच्छति वा। कव् इन्। यद्वा कुशब्दे+"अच इः"। उणा ४। १३८। इति इः।) ब्रह्मा। इति हेमचन्द्रः। (धर्म्मादिकवि यथा, "तेने ब्रह्म हृदा य आदिकवये" इति भागवत। १। १। १।) वाल्मीकिमुनि। (यस्मादुत्पन्नशोकात् ततः प्रभृति ऋषिभ्यो वाल्मीकादयः कवय एव प्रथिता वर्णयिताः"। इत्युत्तरे।) शुक्राचार्य्य। (यथा महाभारते १। ६६। ४२। "शुक्रो ब्रह्मचारी च सदा भगवान् भृगुः। भृगोः सुतः कविर्विद्वान् शुक्रः कविसुतो ग्रहः"।) सूर्य्य। काव्यकर्त्ता। (यथा रघु १। ३। "मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम्"।) खलीने स्त्री। इति मेदिनी। (विज्ञ। यथा महाभारते १३। १४८। २०। "वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित् कविः"।) कल्किदेवस्य ज्येष्ठभ्राता। यथा,— "कल्केर्ज्येष्ठास्त्रयः शूराः कविप्राज्ञसुमन्त्रकाः। तातमातृप्रियकराः गुरुविप्रप्रतिष्ठिताः"।

इति कल्किपुराणे २ अध्याय। * अपि च। "विशाखयूपभूपाल पापात् साधुजनप्रिय। कल्किर्जयति दुष्टरिपुघ्नाविर्भूतश्च धाम्नि। कवि प्राज्ञ सुमन्त्रश्च पुरस्कृत्य महायशम्। गार्ग्यभर्ग्यविशालाद्यैः ज्ञातिभिः परिवारितम्। विशाखयूपो ददृशे चन्द्र तारागणैरिव"। इति तत्रैव ३ अध्याय। १०। चौरयोद्धा। यथा। "देशत्यागे रणे मन्त्री दुर्गं रक्षति पण्डिते। कविप्रवेशनं तत्र योधाघातश्च तत्र वै"। इति समरसारे ज्योतिःकारस्य।

कवि, त्रि, (कवते श्लोकान् ग्रथते वर्णयति वा। कव+इन्।) पण्डित। इत्यमरः। २। ७। ५। (यथा मनु २। १५१। "अध्यापयामास पितॄन् शिशुराङ्गिरसः कविः"।)

कवि, स्त्री, (कवति शब्दायते इति। कुशब्दे "अच इः"। उणा ४। १३८ इति इ। अश्वमुखे च स्थापयमानलौहखण्डम्।) खलीनः। इति मेदिनी। लागाम् इति भाषा।

कविक, स्त्री, (कवि+स्वार्थे कन्।) खलीन। इति शब्दार्णव।

कविका, स्त्री, (कवि+स्वार्थे कन् टाप् च।) खलीन। इत्यमरः। २। ८। ४९। लागाम इति भाषा। केविकापुष्पम्। इति राजनिर्घण्ट। कवयी मत्स्यः। इति भावप्रकाश। (अस्या गुणा यथा,— "कविका मधुरा स्निग्धा कफघ्नी रुचिकारिणी। किञ्चित् पित्तकरी वात-नाशिनी वह्निवर्द्धिनी"। इति च भावप्रकाशस्य पूर्वखण्डे मांसवर्गे।)

कविज्येष्ठ पुं, (कविषु ज्येष्ठ।) वाल्मीकिमुनिः। इति त्रिकाण्डशेषः।

कविता स्त्री, (कवेः रचयितुर्भावः तल्।) कवित्वम्। काव्यम्। यथा,— "कविता वनिता चापि स्वयमाता सुखप्रदा"। इत्युद्भट।

कविवेदी [न्] त्रि, (कविं कवित्वं वेत्ति। कवि+विद्+णिनि।) पण्डितः। इति जटाधरः।

कविय, स्त्री पु, (क सुखं अवति। क+अव्+क।) खलीन। इति त्रिकाण्डशेषः। (अत्रपाने ति।)

कविरामायण पुं, (कविता कवित्वया कविषु कामेषु वा रामः अयनं आश्रयो यस्य।) वाल्मीकिमुनिः। इति शब्दरत्नावली।

कविकालिका, स्त्री (कं सुखं विकासयति उदीपयतीति। क+वि+कस्+णिच्+ण्वुल् टाप् अत इत्वम्।) वीणाविशेष। इति शब्दरत्नावली।

कविवाल्मीकि पुं (कविश्चासौ वाल्मीकिश्चेति।) वाल्मीकिमुनिः। इति शब्दरत्नावली।

कवी स्त्री, (कवि वा ङीष्।) खलीन। इति मेदिनी भरतश्च। [जटाधरः।

कवीय स्त्री (कवि+स्वार्थे छः।) खलीन। इति

कवेल, स्त्री, (कं जलं विलति भुनक्ति। क+विल+अच्।) कुवलयम्। उत्पलम्। इति शब्दचन्द्रिका।

कवोष्णं, त्रि (कुत्सितं उष्णं इषदुष्णं वा।) ईषदुष्णम्। (यथा रघौ ५। ५४।

"सत्यात् दुर्लभ सता कुम्भादखिल त्वया। यद पूर्वं कविष्णोपि कवोष्णमुपयुज्यते")॥ इत्यपि च। इत्यमरः। १। ४। ३४।

कव्य क्ली, (कूयते पितृभ्यः। पितृदेशेन दीयते यत् श्राद्धादिकम्। कु+"अचो यत्" ३। १। ९७। इति यत्।) पित्र्यम्। पितृसम्प्रदानकान्नम्। इत्यमरः। २। ७। २४। (यथा, मनु १। ९५। "यस्यास्येन सदाश्नन्ति हव्यानि त्रिदिवौकसः। कव्यानि चैव पितरः किम्भूतमधिकं ततः"।)

कव्यानि तु वेदतत्त्वविदे ब्राह्मणाय दातव्यानि अन्यथा सद्यः निष्फलं स्यादित्युक्तं मनौ ३ अध्याये।

"श्रोत्रियायैव देयानि हव्यकव्यानि दातृभिः। अर्हत्तमाय विप्राय तस्मै दत्तं महाफलम्। एकैकमपि विद्वांसं दैवे पित्र्ये च भोजयेत्। पुष्कलं फलमाप्नोति नामन्त्रज्ञान् बहूनपि। दूरादेव परीक्षेत ब्राह्मणं वेदपारगम्। तीर्थं तद्धव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः। सहस्रं हि सहस्राणामनृचां यत्र भुञ्जते। एकस्तान् मन्त्रवित् प्रीतः सर्व्वानर्हति धर्म्मतः। ज्ञानोत्कृष्टाय देयानि कव्यानि च हवींषि च। न हि हस्तावसृग्दिग्धौ रुधिरेणैव शुध्यतः। यावतो ग्रसते ग्रासान् हव्यकव्येष्वमन्त्रवित्। तावतो ग्रसते प्रेत्य दीप्तशूलर्ष्ट्ययोगुडान्। ज्ञाननिष्ठा द्विजाः केचित् तपोनिष्ठास्तथापरे। तपःस्वाध्यायनिष्ठाश्च कर्म्मनिष्ठास्तथापरे। ज्ञाननिष्ठेषु कव्यानि प्रतिष्ठाप्यानि यत्नतः। हव्यानि तु यथान्यायं सर्व्वेष्वेव चतुर्ष्वपि। एव वै प्रथमः कल्पः प्रदाने हव्यकव्ययोः। अनुकल्पस्त्वयं ज्ञेयः सदा सद्भिरनुष्ठितः। मातामहं मातुलञ्च स्वस्रीयं श्वशुरं गुरुम्। दौहित्रं विट्पतिं बन्धुमृत्विग्याज्यौ च भोजयेत्। ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः। तान् हव्यकव्ययोर्विप्राननर्हान्मनुरब्रवीत्। चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा। विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः"। इत्यादि। विवृतिश्च तत्रैव द्रष्टव्या।)

कव्यवाल, पुं, (कव्यं वल्यते दीयते यस्मै। कव्य+वल दाने+सम्प्रदाने घञ्।) पितृगणविशेषः। इति त्रिकाण्डशेषः। (यथा, वायुपुराणे। "कव्यवालोऽनलः सोमो यमश्चैवार्यमा तथा। अग्निष्वात्ता बर्हिषदः सोमपाः पितृदेवताः"।)

कश शब्दे। इति कविकल्पद्रुमः। (भ्वा-पर-अक-सेट।) कशति। इति दुर्गादासः।

कशा, स्त्री, (कशति शब्दायते ताड्यति वा। कश्+करणस्य वक्रविवक्षया कर्त्तरि अच् टाप् च। ताड्यतया वा।) अश्वादिताडनी। इत्यमरः। २।८।४१। घोड़ा चाबुक इति च भाषा। ("अथास्य कशया घोरां तदा चाब्रवत्तच्छिरम्"। इति महाभारते। १। १७०। १०।) मांसरोहिणी। इति भावप्रकाशः।

कशार्ह, त्रि (कशां अर्हति इति। कशा+अर्ह+

अर्ह ।) कशाघातयोग्य । कोड़ा मारिवार उपयुक्त इति भाषा। तत्पर्याय । काश्य २। इत्यमरः। ३।९।४४।

कशिपु, पुं, (कशति दुःख काश्यते वा काशयति शासनयोः। कश+सृशय्यादित्वात् निपातनात् साधुः।) भक्तम्। आच्छादनम्। एकोक्त्याद्वयस्ते कशिपू इति द्विवचनान्तम्। इति मेदिनी। (शय्या। यथा, भागवते २।२।४।

"चर्या सितौ किं कशिपोः प्रयासैः")

कशेरु, स्त्री पु, (के देहे शीर्यते। क+शृ+"केश एरु च वास्य"। उणा १।९०। इति उ एरुच धात्वादेश।) पृष्ठास्थि। पिठेर दाड़ा इति भाषा। इति हलायुध। (पुंसि उदाहरणम्।

"किं कुब्जता बराहेय ख्यायन्ते हि कशेरव"।

इत्युणादिकावृत्तचन्द्रवचनम्।)

कशेरु स्त्री, (क जलं शालं वा शृणाति। क+शृ+उणादित्वात् उ। एरुच् धात्वादेशः।) कशेरुका। केशुर इति भाषा। इति रत्नमाला।

राजनिर्घण्टे दन्त्यसकारवान् पुंलिङ्गोऽप्ययं शब्दः। ("कशेरु द्विविधं तत्र महद्राजकशेरुकम्। मुस्ताकृतिलघु स्यात् यत् तच्चिचोटमिति स्मृतम्"। इति वैद्यकम्।)

कशेरु, पुं, (क+शृ+उ+एरुच।) जम्बुद्वीपस्य खण्डविशेष। इति शब्दमाला।

कशेरुक, स्त्री, (कशेरु+स्वार्थे कन्।) कन्दविशेष। केशुर इति भाषा। अस्य गुणाः। गुरुत्वम्। विष्टम्भकारित्वम्। शीतलत्वम्। इति राजवल्लभः। ("तद्वद्विसशालूककौशारुकशेरुकम्। श्रृङ्गाटक कशेरुकं च गुरु विष्टम्भि शीतलम्"। इति चरके सूत्रस्थाने २७ अध्याये।)

कशेरुका स्त्री, (कशेरु+स्वार्थे कन् टाप् च।) पृष्ठास्थि। इति रत्नमाला। पिठेर दाँड़ा इति भाषा।

कशेरू, स्त्री (क+शृ+"केश एरुचास्य। उणा १।९०। इति ऊः। एरुच्धात्वादेशः।) कन्दविशेषः इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। केशुर इति भाषा।

कश्चन, अ, (किम्+चन इति मुग्धबोधमतम्। पाणिनिमते पृथक्पदमिति भेदः।) कश्चित्। इति व्याकरणम्। कोन। केह इति च भाषा। (यथा माघे १६।१।

"रमणीयतरैव कश्चन
प्रतिशिष्टः प्रतिभानवान् अथ"।)

कश्चित्, अ (किम्+चित्। पाणिनिमते पृथक्पदम्।) कश्चन। इति व्याकरणम्। (यथा मेघदूते १।

'कश्चित्कान्ता विरहगुरुणा स्वाधिकारप्रमत्तः')

कश्मल, क्ली (कश गतिशासनयोः+कल। "कुटिकशिकौतिभ्य प्रत्ययस्य मुट्"। उणा १।१०८ इति मुट।) मूर्च्छा। इत्यमरः।२।८।१०९। (मोहः। यथा, गीतायाम् २।२।

"कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम्"।)

मापम्। इति शब्दमाला। मलिने त्रि। इति हेमचन्द्र।

कश्मीर, पुं, (कश+"कशेर्मुट् च। उणा ४।३० इति ईरन् मुट् च।) काश्मीरदेश। इति त्रिकाण्डशेष। (अस्य सीमादि यथा,—शक्तिसङ्गमतन्त्रे ७ पटले।

"शारदामठमारभ्य कुङ्कुमादितटान्तक। तावत् कश्मीरदेश स्यात् पञ्चाशद्योजनात्मक"।)

कश्मीरजन्मा, [न्] पुं, (कश्मीरे काश्मीरदेशे जन्म यस्य।) काश्मीरजन्मा। कुङ्कुमम्। इत्यमरटीकायां रायमुकुट।

कश्य, क्ली, (कशां अर्हतीति। कशा+दण्डादित्वात्। ५।१।६६। यत्।) अश्वमध्यभाग। (कशति अनेन। कश+बाहुलकात् करणे यत्।) मद्यम्। यथा,—मार्कण्डेयपुराणे १०४।३।

"ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुत। कश्यपस्तस्य पुत्त्रोऽभूत् कश्यपानात् स काश्यप"।

कशार्हे त्रि। इत्यमरः।३।१।४४।

कश्यपः, पुं (कश्य सोमरसादिजनितं मद्यं पिबतीति। कश्य+पा+क। अस्य नामनिरुक्ति यथा मार्कण्डेयपुराणे। १०४।३।

"ब्रह्मणस्तनयो योऽभूत् मरीचिरिति विश्रुतः। कश्यपस्तस्य पुत्त्रोऽभूत् कश्यपानात् स कश्यप"।) मुनिभेद। कलागर्भजो मरीचिमुनेरौरस पुत्त्र। अस्य भार्या दक्षस्य त्रयोदशकन्या। तासां तत्सन्तानाश्च नामानि यथा। अदितेर्देवाः १ दितेर्दैत्याः २ दनोर्दानवाः ३ काष्ठाया अश्वादयः ४ अरिष्टाया गन्धर्वाः ५ सुरसाया राक्षसाः ६ इलाया वृक्षाः ७ मुनेरप्सरोगणाः ८ क्रोधवशायाः सर्पाः ९ ताम्राया श्येनगृध्रादय १० सुरभेर्गो-महिषा ११ सरमाया श्वापदा १२ तिमेर्यादोगणा १३ विनताया गरुडारुणौ १४ कद्रोर्नागा १५ पतङ्ग्याः पतङ्गाः १६ यामिन्याः शलभाः १७। इति श्रीभागवतम्। ०।

(मार्कण्डेयपुराणमते अस्य त्रयोदशभार्याः। यदुक्तं तत्रैव १०४ अध्याये। अदितिः १ दितिः २ दनुः ३ विनता ४ खसा ५ कद्रुः ६ मुनिः ७ क्रोधा ८ रिष्टा ९ इरा १० ताम्रा ११ इला १२ प्रधा १३। महाभारतमतेऽपि अस्य त्रयोदश भार्याः। यदुक्तं तत्रैव १।६५।११—१३।

"मरीचेः कश्यपः पुत्त्रः कश्यपात्तु इमाः प्रजाः। प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश। अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा। क्रोधा प्राधा च विश्वा च विनता कपिला मुनिः। कद्रुश्च मनुजव्याघ्र! दक्षकन्यैव भारत"।)

परमेश्वरस्यैव कश्यप इति नामान्तरम्। यथा "तेनेमाः सर्वाः प्रजाः उत्पादितास्तस्मात् सर्वा इमाः प्रजाः काश्यप्य इत्युच्यन्ते। काश्यपः कश्यात् पश्यको भवतीति निरुक्त्या पश्यतीति पश्यः सर्वज्ञः यः सकलं जगद्विजानाति स पश्यः। पश्य एव निभ्रमतयातिसूक्ष्ममपि वस्तु यथार्थं जानात्येवातः पश्यक इति। आद्यन्ताक्षरविपर्ययात् सिद्धेः सिंह इत्यादिकुटिल्यादिवत् कश्यप इति हयवरट इत्येतस्योपरि महाभाष्यप्रमाणेन पदं सिध्यति"। इति दयानन्दकृताया वेदभाष्योपक्रमणिकाया २९१ सङ्ख्यकपत्रे। कश्य कश्यान अविद्यामित्यर्थ। तत्पिबति शोषयति नाशयति। यद्वा कश्य विद्याधनम् पाति रक्षति स्वात्मनीति। परब्रह्म। तथा च तापनिश्रुति २।११।

"सा होवाच गान्धर्वी मदपि वै दुर्वासस कोऽयं महान्। या एतस्य प्रजालोकस्य पालयिता भर्ता वा जगतः। सहोवाच तत्त्ववित् प्रवरो महान् दुर्वासा। तदेव ब्रह्म वा आत्मा एतस्य पाता हर्ता प्रभावो गोप्ता वावद् कश्यपो ह योऽयम् ज्ञानमोक्षा गान्धर्वि"।

कच्छप। तथा च शतपथब्राह्मणे—

"स यत् कूर्मो नाम। प्रजापति प्रजा असृजत यदसृजताकरोत्तद्यदकरोत्तस्मात् कूर्मः कश्यपो वै कूर्मस्तस्मादाहुः सर्वाः प्रजाः काश्यप्य"। यथा यजुर्वेदे २४।३७।

"अथामुश्मो मासां कश्यप"। "कश्यप कच्छप"। इति वेददीधितिः। कश्य मद्यं पिबतीति। कश्य+पा+क। "सुराप श्यावदन्तः स्यात्"। इति वचनात्तथात्वम्। श्यावदन्ते त्रि यथा, कात्यायनश्रौतसूत्रे १०।२।३५।

"प्रत्येत्याग्नीध्रात् काण्वकश्यपयाचमानवर्ज्जम्"।) मृगविशेष। इति मेदिनी। मत्स्यभेदः। इति विश्व।

कश्यपनन्दन, पुं, (कश्यपस्य नन्दन।) गरुड। इति हलायुध। (देवासुरादयोऽपि।)

कष वधे। इति कविकल्पद्रुम। (भ्वा-पर-सकं-सेट्।) कषति। अयमुभयपदीति चतुर्भुजमुखौ। रमानाथरामौ तु इमं परस्मैपदिनं मत्वा उभयपदिनं तालव्यान्तं कश मन्येते। इति दुर्गादास।

कष, पुं, (कषत्यत्र अनेन वा। कष्+अच्।) कषपट्टिका। कष्टिपाथर इति भाषा। तत्पर्याय। शाण २ निकष ३। इत्यमरः।२।१०।३२।

कषण, त्रि (कष्यते विनाश्यते। कष्+कर्मणि ल्युट्।) अपक्व। इति शब्दचन्द्रिका। (पुं, कषत्यत्र। अधिकरणे ल्युट्। निकषोपलम्। यथा, आर्य्यासप्तशती ४१८।

'भुवनानां मनत सखि। कषणविशुद्धस्य जातकपस्य"। भावे ल्युट्। क्ली, कण्डूयनम्। यथा किराते ५।४७।

"कषणकम्पनिरस्तमहाहिभि
क्षणविमत्तमतङ्गजवर्जितैः।

"इत्यादौ कषणेन कण्डूयनेन ये कम्पास्तैर्निरस्ता महाहयो येभ्य"। इति तट्टीकायां मल्लिनाथः।)

कषा, स्त्री (कष्यते ताड्यते अनया। कष्+बाहुलकात् करणे अप्। ततष्टाप्।) कशा। इत्यमरटीकायां रमानाथ। चाबुक इति भाषा। (यथा नैषधे ६।९१।

'उष्ट्रान् हयान् खरान् नागान् भग्नदंष्ट्रकषाङ्कुशैः')

कषाकु, पुं (कष्+आकु।) सूर्य्यः। अग्निः। इत्युणादिकोषः॥

कषाय, पुं क्ली, (कषति कण्ठम्। कष्+आय।) रसविशेषः। कषा इति भाषा। पृथिव्यनिलगुणबाहुल्यात्तस्योत्पत्तिः। इति शिवदासः॥ (यथा, मनुः ११। १५३।

'शुक्तानि च कषायांश्च पीत्वामेध्यान्यपि द्विजः'॥) तत्पर्य्यायः। तुवरः २ तद्युक्ते त्रि। इत्यमरः। १।५।९। तुवर २ तूवर ३। इति तट्टीका॥ अस्य गुणाः। रक्तादिदोषनाशनम्। ग्राहित्वम्। शोषणत्वम्। वायुकोपकारित्वञ्च। अधिकसेवनात् तस्य गुणाः। मलमूत्रप्रश्वासरोधपक्वाशयपीडाक्षेपणादिरोगकारित्वम्। अन्यच्च।

"कषायः शोषणः स्तम्भी व्रणमांसविशोधनः।
कफशोणितपित्तघ्नो रूक्षः शीतो गुरुस्तथा"॥

इति राजवल्लभः॥ अपि च।

"कषायनामा नियतं हि शोषं
वक्त्रान्तरोर्द्धीयनपायनञ्च।
सदाप्रपद्योऽसौ शिथिलत्वकारी
निषेवितः पाण्डु करोति मानम्"॥

इति राजनिर्घण्टः॥ *॥ पाचनादिः। तस्य पूर्ब्बं चीर्णं पञ्चभेदा तिष्ठति। तत्पर्य्यायः। क्वाथः २ निर्य्यूहः ३। स तु पञ्चविधो यथा। स्वरसः १ कल्कः २ शृतः ३ शीतः ४ फाण्टम् ५। इति वैद्यकपरिभाषा॥ *॥

("जिह्वां कण्ठं ग्रसति नितरां याति कण्ठातिसारं
शैत्याद्यैर्वपक्षमकरः श्वासकासावसक्तः।
जिह्वां शूलं हरति नितरां शोधनं स्याद्व्रणानां
प्रोक्तश्चायं समधिकगुणो नाम श्रेष्ठः कषायः"॥

इति हारीते प्रथम स्थाने ७ अध्याये।

"कषायो जडयेज्जिह्वां कण्ठस्रोतो विबन्धकृत्"॥

"कषायः पित्तकफहा गुरुरस्रविशोधनः।
पीडनो रोपणः शीतः क्लेदमेदोविशोषणः।
आमसंस्तम्भनो ग्राही रूक्षोऽतित्वक्प्रसादनः।
करोति शीलितः सोऽति विष्टम्भाध्मानहृद्रुजः।
तृट्कार्श्यपौरुषभ्रंशस्रोतोरोधमलग्रहान्"॥

इति वाग्भटे सूत्रस्थाने १० अध्याये।

"कषायो रस संशमनः संग्राही सन्धानकरः पीडनो रोपणः शोषणः स्तम्भनः श्लेष्मरक्तपित्तप्रशमनः शरीरक्लेदस्योपयोक्ता रूक्षः शीतो गुरुश्च।

स एवं गुणोऽप्येक एवात्यर्थमुपयुज्यमान आस्यं शोषयति, हृदयं पीडयति, उदरमाध्मापयति, वाचं निगृह्णाति, स्रोतांस्यवबध्नाति, श्यावत्वमापादयति, पुंस्त्वमुपहन्ति, विष्टभ्य जरां गच्छति वातमूत्रपुरीषरेतांस्यवगृह्णाति, कर्षयति, ग्लपयति, तर्षयति, स्तम्भयति खरविशदरूक्षत्वात् पक्षवधग्रहापतानकार्दितप्रभृतींश्च वातविकारानुपजनयतीति'।

तैलपाकप्रसङ्गेऽपि रसस्य शोधनेऽदत्ते।

"पवनपृथिवीव्यतिरेकात् कषायः"।

इति चरके सूत्रस्थाने २६ अध्याये॥) निर्य्यासः। (यथा, महाभारते अनुशासनपर्ब्बणि।

'दृष्टो वटकषायेण अनुलिप्तः प्रियङ्गुणा।
क्षारेण मल्लिकान् मुक्ता सव्यपापैः प्रमुच्यते'॥)

विलेपनम्। (यथा कुमारे ७। १७।

"कर्पूरिता लोध्रकषायरूक्षे
गोरोचनाक्षेपनितान्तगौरे"॥
"लोध्रस्य द्रव्यविशेषस्य कषायेण विलेपनेन"।

इति मल्लिनाथः॥) अङ्गरागः। इति मेदिनी॥

कषाय, पुं, (कष्+आय।) श्योनाकवृक्षः। इति धरणी॥ रागः। इत्यमरटीकायां स्वामी॥ (यथा छान्दोग्योपनिषदि।

"आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः। स्मृतिलम्भे सर्व्वग्रन्थीनां विप्रमोक्षस्तस्मै मृदितकषायाय तमसः पारं दर्शयति"।

'तस्मै मृदितकषायाय वार्क्षादिरिव कषायो रागद्वेषादिदोषः सत्त्वस्य रञ्जनरूपत्वात् स ज्ञानवैराग्याभ्यासरूपक्षारेण क्षालितो मृदितो विनाशितो यस्य नारदस्य तस्मै"। इति भाष्यम्॥) कलियुगम्। इत्यमरटीकायां सारसुन्दरी॥ (निर्व्विकल्पसमाधिविघ्नभेदः। यथा, वेदान्तसारे समाधिकल्पे ८९।

"लयविक्षेपाभावेऽपि चित्तवृत्तेरागादिवासनया स्तब्धीभावात् अखण्डवस्त्ववलम्बनम्"। तत्रानेकजन्मार्ज्जितबाह्याभ्यन्तररागाद्यनुभवजनितसंस्कारैः कलुषीकृतं चित्तं कथञ्चित् अवस्थादियत्नेनाखण्डमपि चैतन्यं प्रत्यक्षसामर्थ्याभावात् मध्य एव स्तब्धीभवति यथा राजदर्शनाय सम्यक्प्रतिगत्य, राजमन्दिरं प्रविष्टः कश्चित् पुरुषस्तु द्वारपालनिरोधेन स्तब्धीभावः तथा परित्यक्तबाह्यविषयस्य अखण्डवस्तुप्रत्यक्षप्रवृत्तस्योद्बुद्धरागादिसंस्कारैः स्तब्धीभावादखण्डवस्त्वग्रहणं कषायः॥)

कषाय, त्रि, (कष+आय।) सुरभिः। (यथा मेघदूते ३१।

"प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः"॥)

लोहितः। इति मेदिनी॥ (यथा कुमारे १। ११।

"भूतानुगस्तादकषायकण्ठः
पुंस्कोकिलो यन्मधुरं चुकूज"॥)

रक्तपीतमिश्रितवर्णः। इत्यमरटीकायां स्वामी॥ शाकवृक्षः। इति राजनिर्घण्टः॥

कषायकृत्, पुं, (कषायं कषायरसं करोति इति। कषाय+कृ+क्विप् तुगागमश्च।) रक्तलोध्रः। इति जटाधरः॥

कषाययावनाल, पुं, (कषायः रक्तवर्णः यावनालः।) तुवरयावनालधान्यम्। इति राजनिर्घण्टः॥

कषाया, स्त्री, (कष+आय टाप् च।) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥ (अस्याः पर्य्यायो यथा,—भावप्रकाशस्य पूर्ब्बखण्डे १ भागे।

'यासोऽयवासो दुःस्पर्शो धन्वयासः कुनाशकः।
दुरालभा दुरालम्भा समुद्रान्ता च रोदिनी॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा'॥)

कषायित, त्रि, (कषायो रक्तपीतवर्णादिर्जातोऽस्य। कषाय+तारकादित्वात् इतच्।) कृतलोहितः। (यथा कुमारे ४। ३४।

"अमुनैव कषायितस्तनी
सुभगेन प्रियगात्रभस्मना"॥)

कषायी, [न्] पुं, (कषायो विद्यते यस्य। कषाय+इनि।) शालवृक्षः। इति जटाधरः॥ लकुचवृक्षः। खर्ज्जूरीवृक्षः। इति राजनिर्घण्टः॥

कषि, त्रि, (कषति हिनस्ति यः। कष+"कषि कषि" इत्यादिना इः। उणां ४। ११९।) हिंसकः। इत्युणादिकोषः॥

कषीका, स्त्री, (कषतीति। कष+"कषि दूषिभ्यां ईकन्"। उणां ४। १६। इति ईकन्+टाप् च।) पक्षिजातिः। यदुक्तमुणादिकोषे।

"कषीका पक्षिजातिः स्यात् दूषिका नेत्रयोर्म्मले"॥

कषेरुका, स्त्री, (कष+एरुक्+तत उः। स्वार्थे कन् टाप् च।) कशेरुका। पृष्ठास्थि। इत्यमरटीकायां रायमुकुटः॥

कष्ट, क्ली, (कष्यते इति। कष्+भावे क्तः। "क्षुब्धस्वान्तध्वान्तलग्नम्लिष्ट..." ७। २। १८। इति नेट्।) पीडासाधनम्। तत्पर्य्यायः। पीडा २ बाधा ३ व्यथा ४ दुःखम् ५ आमनस्यम् ६ प्रसूतिजम् ७ कृच्छ्रम् ८ आभीलम् ९। इत्यमरः। १। ९। ३। आबाधा १० वेदना ११ दुःखम् १२ आमनस्यम् १३। इति तट्टीकायां भरतः॥ अभ्यककम् १४। इति वाचस्पतिः॥ अर्त्तिः १५ आर्त्तिः १६ पीडनम् १७ बाधनम् १८ आमनस्यम् १९ विबाधनम् २० विहेठनम् २१ विबाधकम् २२ पीडितम् २३। इति शब्दरत्नावली॥ क्लेशः २४ कश्मलम् २५। इति जटाधरः॥ (यथा महानिर्व्वाणतन्त्रे।

"कुर्व्वीत सततं कर्म्म कृत्वा कष्टशतान्यपि।
तावन्न लभते मोक्षं यावज्ज्ञानं न जायते"॥)

कष्ट, त्रि (कष्यतेऽसौ। कष+कर्म्मणि+क्तः।) पीडायुक्तः। गहनः। इत्यमरमेदिनीकरौ॥ (यथा मनुः १२। ७८।

"जन्मानि च कष्टानि परमैष्यत्येव च"॥)

अतिकष्टकरम्। विषवादौ प्रयोक्तव्यम्। यथा, महाभारते १। १। २१५।

"कष्टं युद्धे दशशेषाः श्रुता मे।
त्रयोऽस्माकं पाण्डवानाञ्च सप्त"॥)

कष्टकारक, पुं, (कष्टं करोति उत्पादयति मनस्यापि। कष्ट+कृ+कर्त्तरि ण्वुल्। तस्य अक्। कष्टकारीति। कृ+ण्वुल् वा। कष्टस्य कारको वा।) संसारः। इति त्रिकाण्डशेषः॥ पीडाकरे त्रि॥

कष्टस्थान, क्ली, (कष्टकरं स्थानम्।) दुःखजनकस्थानम्। इति धारावली॥

कस गतौ। इति कविकल्पद्रुमः। (भ्वां-पर-सकं-सेट्-अयादिः।) स कसति। विपूर्व्वोऽयं प्रफुल्लीभावे। तथा च।

"प्रफुल्लोत्फुल्लसंफुल्लव्याकोचविकचस्फुटाः।
फुल्लश्चैते विकसिते" इत्यमरः। ३। १। ५८।

विकसितं पङ्कजकलिका। इति दुर्गादासः॥

कस इ न ङ ध्वंसे। गतौ। इति कविकल्पद्रुमः॥ शासे च। (अदा-आत्म-सक-सेट्। इदित्।) इ कस्यते। न ङ कसे क्षरिः कसम्। चकारात् गतौ च। शात इह ध्वसना। इति दुर्गादासः॥

कस ल ङ ध्वंसे। गतौ। इति कविकल्पद्रुमः॥ (अदां-शासे च। आत्म-सक-सेट्।) ल ङ कस्ते हरिः कसम्। चकारात् गतौ च। शात इह ध्वसना। इति दुर्गादासः॥

कष, पुं, (कषति विकसतीति। कस+अच्। कसति विकसति सुखादिरत्र वा। कस+आधारे अच्।) कच। इत्यमरटीकायां भरतः॥ कष्टिपातर इति भाषा। पुंस्त्रीलिङ्गधातुर्योऽप्यत्र॥ (यथा नैषधे २। ६९।

"कसपाषाणभिमे रूमलले"॥)

कसनोत्पाटन, पुं, (उत्पाटयतीति उत्पाटनः। उत्+पाटि+ल्युः। कसनस्य कासरोगस्य उत्पाटनः नाशकः।) वासकवृक्षः। इति शब्दचन्द्रिका॥

कसिपु, पुं, (कशात् प्राप्तिं दुःखम्। कश गतिशासनयोः निपातनात् सिद्धम्।) कशिपु। अन्नम्। इति जटाधरः॥

कसेरु, पुं, (क इव स्फायतीति भूमिहिंसायां वाहुलका दुप्रत्यये प्रकृतेरेरडादेशः। निपातनात् शस्य सत्वम्।) कशेरु। केशुर इति भाषा। तत्पर्यायः। गुण्डकन्द २ सुगन्धमुस्ता ३ कसेरुका ४ शूकरेष्ट ५ सुगन्धि ६ सुकन्द ७ कसेरुक ८। अस्य गुणाः। कषायत्वम्। अन्यमधुरत्वम्। अस्विवृद्धत्वम्। रक्तपित्तप्रशमनत्वम्। शीतत्वम्। दाहश्रमापहत्वञ्च। इति राजनिर्घण्टः॥

कसेरुका स्त्री, (कसेरुरेव। स्वार्थे कन् स्त्रियां टाप्।) कसेरु। एकास्थि। इति राजनिर्घण्टः॥

कस्तीर, क्ली, रङ्गम्। इति हेमचन्द्रः॥ (अस्य पर्यायो यथा,—वैद्यकरत्नमालायाम्।

"रङ्ग वङ्गञ्च कस्तीर मृदङ्ग पुत्तपिच्चटम्"॥)

कस्तुरिका, स्त्री, (कसति गन्धोऽस्या दूरतः। कस+उर। तुट् च। स्वार्थे कन् टाप् च पृषोदरादित्वात् साधुः।) कस्तूरी। इति भूरिप्रयोगः॥

कस्तूरिका, स्त्री, (कस्तूरी+स्वार्थे कन् टाप् पृषोदरादित्वात् साधुः।) कस्तूरी। इति रत्नमाला॥ (यथा, माघे। ४। ६१।

"कस्तूरिकामृगविमर्द्दसुगन्धिरेति"॥

अस्या गुणादयः कस्तूरीशब्दे ज्ञातव्याः। वैद्यकरसेन्द्रसारसंग्रहे हृद्ज्वरचूडामणिरसे अस्याः प्रयोगो यथा "कस्तूरिकाविद्रुमरौप्यकौघ"। इत्यादि।)

कस्तूरी, स्त्री, (कसति गन्धोऽस्याः। कस+बाहुलकात् उर। ङीप् तुट् पृषोदरादित्वात् साधुः।) मृगस्य नाभीजातसुगन्धिद्रव्यम्। तत्पर्यायः। मृगनाभि १ मृगमद २। इत्यमरः। २। ६। १२९। मृग ४ मृगी ५ नाभि ६ मद ७। इति भरतः॥ वातामोद ८ योजनगन्धिका ९। इति रत्नमाला॥ सहस्री १० गन्धकेलिका ११ वेधमुख्या १२ मार्जारी १३ सुभगा १४ बहुगन्धदा १५ सहस्रवेधी १६ श्यामा १७ कामान्धा १८ मृगाण्डजा १९ कुरङ्गनाभि २० ललिता २१ श्यामला २२ मोदिनी २३ कस्तूरिका २४ कस्तुरिका २५ नाभी २६ लता २७ योजनगन्धा २८ मार्गं २९ गन्धबोधिका ३० काश्मीरी ३१ धूम्रसाची ३२ मिश्रा ३३ गन्धशिखाचिका ३४ इति शब्दरत्नावली॥ अस्या गुणाः। सुरभित्वम्। तिक्तत्वम्। चक्षुर्हितत्वम्। मुखरोगकिलासकफदौर्गन्ध्यवातालक्ष्मीमलापहत्वञ्च। इति राजनिर्घण्टः॥ रक्तपित्तवृद्धिमाद्यित्वम्। इति राजवल्लभः॥ तद्भेदाः। खरिका १ तिलका २ कुलत्था ३ पिण्डा ४ नायिका ५। अपि च।

"कपिला पिङ्गला कृष्णा कस्तूरी त्रिविधा क्रमात्।
नेपालेऽपि च काश्मीरे कामरूपेऽपि जायते॥
कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत्।
काश्मीरदेशसम्भूता कस्तूरी ह्यधमा स्मृता"॥

इति राजनिर्घण्टः॥ (अस्याः पर्याया गुणा उत्पत्तिश्च यथा—भावप्रकाशस्य पूर्व्वखण्डे १ भागे।

"मृगनाभिर्मृगमदः कथितस्तु सहस्रभित्।
कस्तूरिका च कस्तूरी वेधमुख्या च सा स्मृता॥
कामरीकपिलच्छाया कस्तूरी त्रिविधा स्मृता।
कामरूपोद्भवा श्रेष्ठा नैपाली मध्यमा भवेत्॥
कामरूपोद्भवा कृष्णा नैपाली नीलवर्णयुक्।
काश्मीरदेशसम्भूता कस्तूरी ह्यधमा मता॥
कस्तूरिका कटुस्तिक्ता क्षारोष्णा शुक्रला गुरुः।
कफवातविषच्छर्दिशीतदौर्गन्ध्यशोषहृत्"॥)

कस्तूरीमल्लिका, स्त्री, (कस्तूरीगन्धयुक्ता मल्लिका।) मृगमदवासा। इति राजनिर्घण्टः॥

कह्लाक, स्त्री, (कश गतिशासनयोः+कल+सट च। निपातनात् शस्य हः।) कह्लनम्। मोहः। इत्यमरटीकायां रायमुकुटः॥

कह्लार, क्ली, (कस्य जलस्य ह्लार इव कं जले ह्लादते वा इति। क+ह्लाद+पचाद्यच् पृषोदरादित्वात् साधु।) श्वेतोत्पलम्। सुदि इति भाषा। तत्पर्य्यायः। सौगन्धिकम् २। इत्यमरः १। १०। ३६॥ (कल्हारम् ३। गन्धकम् ४। इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे। यथा भागवते ४। ६। १८।

"कुमुदोत्पलकह्लारशतपत्रवनर्द्धिभिः"॥)

तत्पुष्पगुणाः। कषायत्वम्। मधुरत्वम्। शीतलत्वम्। पित्तकफरक्तनाशित्वञ्च। इति राजवल्लभः॥

कङ्क, पुं, (के जले क्रयति शब्दायते स्पन्दते वा। क+क्रै+कः।) बकपक्षी। इत्यमरः॥ २। ५। २२॥

कांसीय, क्ली, (कंसस्य विकारः इति छः।) कांस्यम्। इति राजनिर्घण्टः॥

कांस्य, क्ली, (कंसाय पानपात्राय हितं कंसीयं तस्य विकारः इति। "कंसीयपरशव्ययोर्यञ्लुक् च"। ४। ३। १६८ इत्यञ् छस्य लुक् च। यद्वा कंसमेव इति स्वार्थे ष्यञ् प्रत्ययः।) ताम्ररङ्गमिश्रितधातुः। कांसा इति भाषा। तत्पर्य्यायः। कंसम् २ कंसास्थि ३ ताम्रार्द्धम् ४। इति त्रिकाण्डशेषः॥ सौराष्ट्रकम् ५ घोषम् ६ कांसीयम् ७ वह्निलोहकम् ८ दीप्तिलोहम् ९ घोरपुष्पम् १० दीप्तिकांस्यम् ११ कांस्यम् १२। अस्य गुणाः तिक्तत्वम्। उष्णत्वम्। चक्षुर्हितकारित्वम्। वातकफविकारनाशित्वम्। रूक्षत्वम्। कषायत्वम् रुचिकारित्वम्। लघुत्वम्। दीपनत्वम्। पाचनत्वम्। पथ्यत्वञ्च। इति राजनिर्घण्टः॥ रूक्षत्वम्। विशदत्वम्। लेखनत्वम्। सारकत्वम्। पित्तनाशित्वम् इति राजवल्लभः॥ दृढदेहायवृद्धिकारित्वम्। इति सुखबोधः॥

("उपधातुर्भवेत् कांस्यं द्वयोस्तरणिरङ्गयोः।
कांस्यस्य तु गुणा ज्ञेयाः स्वयोनिसदृशा जनैः।
संयोगजप्रभावेण तस्यान्येऽपि गुणाः स्मृताः॥
कांस्यं कषायं तिक्तोष्णं लेखनं विशदं सरम्।
गुरुनेत्रहितं रूक्षं कफपित्तहरम्परम्"॥

इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥)

तच्छोधनमारणमाह।

"अनेनैव विधानेन कांस्यं विडगन्धलेपितम्।
मारयेद्बुद्धिमान् वैद्यो मृतं भवति भूस्ववत्"॥

अन्यच्च।

दिवाकरं पत्रकलं सप्तधाक्षेन भावयेत्।
कांस्यारकूटपत्राणि तेन कल्केन लेपयेत्।
बद्धा गजपुटे पश्चाच्छुद्धिमायाति नान्यथा॥

अन्यच्च।

ताम्रवच्छोधनं कृत्वा ताम्रवन्मारयेद्बुधः॥

अन्यच्च।

"कज्जलीं तत्समां दत्त्वा मर्द्दयेन्निम्बुकाम्बुना।
एवं पुटत्रयेणैव निरुत्थं भस्म जायते"॥

इति सुखबोधः॥

कांस्यकार, पुं, (कांस्यं तत्पात्रं करोतीति। कांस्य+कृ+अण्।) कंसकारः। इति जटाधरः॥ कांसारि इति भाषा॥

कांस्यनील, पुं, (कांस्येन कृतं नीलं।) अञ्जनभेदः। नीलतुत्थम्। तत्पर्य्यायः। मयूरतुत्थम् २ हेमतारम् ३ वितुन्नकम् ४ इति हेमचन्द्रः॥ (कांस्योद्भवाञ्जनवर्णीय इति विग्रहे वाच्यलिङ्गत्वम्। यथा, श्रीरामायणे ४। ३९। २३।

"कांस्यनीलो हरिर्नीलैः कोटिभिर्दशभिर्वृतः"॥

क्वचित् काञ्चनील इति पाठः॥)

काक, क्ली, समूहः। (काकस्य समूह इति समूहार्थे अण्।) काकसमूहः। इति मेदिनी॥ (ईषदर्थे कुशब्दस्य कादेशः। ईषज्जलम्। इति व्याकरणम्॥)

काक, पुं, (कायते शब्दायते। कै शब्दे "इण्भीकापाशल्यतिमर्च्चिभ्यः कन्"। उणा ३। ४३। इति कन्।) स्वनामख्यातपक्षिविशेषः। काग् इति भाषा। तत्पर्य्यायः। करट २ अरिष्ट ३ बलिपुष्ट ४ सकृत्प्रज ५ ध्वाङ्क्ष ६ आत्मघोष ७ परभृत् ८ बलिभुक् ९ वायस १०। इत्यमरः॥ २। ५। २०॥ चिरजीवी ११ एकदृष्टिः १२ मौकुलिः १३ धूलिजङ्घः १४ प्राणवल्लभः ...

जटाधर । काकः २१ धूलिजङ्घ २२ निमित्त ज्ञत २३ कौशिकारि २४ चिरायुः २५ मुखरः २६ स्वर २७ महालोल २८ चिरञ्जीवी २९ ध्वाङ्क्ष ३० करट ३१ मायावीरक ३२ मातृमैथुनः ३३ सुराक्षः ३४ आयक ३५ रत स्वरः ३६ । इति शब्दरत्नावली ॥ * ॥ अस्य शाकुनं काकचरितम् । तद्यथा ।

"अथोच्यते काकरुत बलानां
शुद्धिं स्थितं शाकुनभाषितानाम् ।
अचिन्तितावेदितकार्यसिद्धि
पूर्वादिकाष्ठाप्रहरप्रभेदैः ॥
ये ब्राह्मणक्षत्रियवैश्यशूद्रा
काका भवन्त्यत्र च पञ्चमास्ते ।
वर्णाकृतिभ्या कृतिभावितात्या
सदाभियुक्तैरपलक्षणीया ॥
स्थूलप्रमाणो गुरुदीर्घतुण्डो
दृढस्वर क्षाम्यतु स विप्रः ।
पिङ्गाक्षनीलाक्षविमिश्रवर्ण
स्यात् क्षत्रियस्तीव्ररवोऽतिशूरः ॥
यः पाण्डनील सितनीलचञ्चु
र्नाथयन्त्री दढितस्वैश्य ।
सम्पृक्तविश्रंस्विस्वारशब्द
शूद्र एषाद्भुयपानी निकृष्टः ॥
विकृष्टशब्दाग्यतनुर्विषण्णो
यः कन्धराद्दीमस्व विभर्ति ।
स्थिरारवः स्त्रैण्यकमेलबुद्धि
काकोऽन्यजातिः खलु पञ्चमोऽयम् ॥
होमाभिधः शाम्बपुरवो यो
ग्राह्यः स काकः खलु मुख्यरूपा ।
तस्मादृते ग्रामगतो निरीक्ष्य
श्चैतच्च नियोऽनुतद्गमोऽसौ ॥
विप्रः स्फुटे वदति इष्टकामाने
न्यत तत्र इन्द्रियगातिरा ।
काम्यानिधीशस्थमिवासनन
ब्रवीति शूद्रो बलिदानकोपात् ॥
प्रत्र हन्त करोति इच्छय
मदा समस्त विहगोऽन्यच ति ।
सदर्शितमादृष्टमायच्छे
यथापि काका मन्त्रा भवेत् ॥
शान्ते प्रदीप्ते च रटन् विहङ्ग
शुभप्रदो दोषकरोऽन्यदा स्यात् ।
न चान्यि रौति इतिक्षयमला
मन्त्र ग्रस्ता मनुष्य यात ॥
रौति स्थितो यः प्रवरस्वरेण
विरौति दीनाभिमुख च कामम् ।
निध्याद निर्माल्य च सम्प
ग्नीलोक्य शमनदो हि सिद्धैः ॥
तस्माद्दीनाभिमुखो विघात
दन्त्य प्रविलाप पुन ब्रवीति ।
यो रौति काको मधुरस्वरेण
कृत्वा निवृत्त स ददाति सिद्धिम् ॥
निधाय दीनाभिमुखो विराय
मत प्रयाणाभिमुखो विरौति ।
यो वायसोऽसौ विनिहन्त्यमङ्गल्
कार्याणि सर्वाणि पुनः करोति ॥
सूर्योदये पूर्वदिशि प्रशस्त
स्थाने स्थितो योऽभिमुखं विरौति ।
साध्य दिगोश्चिन्तितकार्यसिद्धि
स्त्रीरत्नलाभं स करोति काकः ॥
आग्नेः प्रभाते यदि वह्निभागे
विरौति तिष्ठन् रमणीयदेशे ।
प्रभूत् प्रवाह्यधिराद्दिग्रह
प्रयाति योषित्प्रमवाप्यते सत् ॥
यत्र प्रभाते दिशि दक्षिणस्या
काकः समावेदयतेऽतिदः सम् ।
रोगाभिभव प्रबलस्वरेण
क्लेश पीडागमयोषिदाग्निम् ॥
नैरृत्यभागे यदि च प्रभाते
करोति काकः सभृता विरावम् ।
क्रूरं तत कर्म समभ्युपैति
दूतागमो मध्यमिका च सिद्धिः ॥
प्रात प्रतीच्यां यदि रौति काको
भुवं सदा वर्षति वारिवाहः ।
स्त्रीवस्त्रभूरत्नसुधागमश्च
कलिः कलत्रेण समं सदा स्यात् ॥
प्रातस्तु प्रान्ते पवनाश्रयस्थे
वस्त्राद्ययानाभिनवागमाः स्युः ।
धान्यागमः प्राकृतदक्षिणाद्यः
स्यादन्यदेशे गमनं कदाचित् ॥
दिग्युत्तरस्थो सुरवः प्रभाते
निरीक्षमाणो भनिशुभं नराणाम् ।
ददाति दुःखं भुजगाच भीति
दरिद्रतां मद्ध्यनेकुलाभम् ॥
दिशीश्वरस्थो यदि रौति काक
श्चागाच्चाशङ्कितलाभजाती ।
व्याधेर्निमित्तं प्रियपद्मलाभो
भवेत्तदा राजकुलावसानम् ॥
प्रव्रजदर्शी स्थितपात्रनागो
प्रभातकाले मधुरस्वरेण ।
अभीप्सितार्थागमनं ध्रुवं स्यात
स्तात्त्रियवादी दयितस्य नाश" ॥
इति वसन्तराजे दिक्प्रहरे सूर्योदयः ॥ * ॥

"पूर्वस्य यामे प्रथमे यथान्द
काको मनेचिन्तितकार्यसिद्धौ ।
अभीष्टलोकागमनं तथाग्य
महाद्यशाभो नियत नराणाम् ॥
आग्नेयभागे यदि वायसोऽपि
स्त्रीलाभविद्वेषविरोधौ भयेत्यम् ।
कृतान्तभागे यदि शुभ विराव
स्त्रीलाभलोकावितस्पृहकारी ॥
नैरृत्यकोणे प्रियलोकविरा त
मिष्टान्न मिष्टादि चिन्तितोऽयं ।
दिशि प्रतीच्यां विरुते भवेता
मन्दर्बलीपानसमान्वदो ॥
वायव्यकोणे करटः शुभः स्याव
त्पथप्रसादोऽध्वगमागम च ।
सौम्येन नीलकण्ठोऽलवाला
सौम्या च वार्ता धनलाभवार्ता ॥
ईशानदेशेऽभिमतेन भक्ष
लाभो ऊनतान्नाद् प्रशूनीकरणम् ।
मध्यप्रदेशे सुतकामभोग
सम्मानसम्पन्नरिपाकसिद्धिः" ॥
इति प्रथम प्रहरः ॥ * ॥

"प्राच्या द्वितीये प्रहरे विराव
आगम्य कश्चित् प्रथिकोऽभ्युपैति ।
चौराद्भय व्याकुलता च वह्नि
भावेन कामिन्यरती च प्राच्ये ॥
कृतान्तदेशे नियतं कलिः स्यात्
प्रियाङ्गनाकर्षणयोर्विरोधे ।
याम्ये तु यापत्रतो च भौति
प्रियस्य चैतस्य समागमः स्यात् ॥
रक्षोदिशि प्रान्तगत सदा च
स्त्रीभोजनलाभाक्षिप्तकप्रसाधाः ।
भवेत् प्रतीच्यां प्रबलावगानि
योषागमो वह्नि कुतश्चनश्च ॥
समीरभागे प्रथमोरुतज्ञो
दूतागमस्त्रीपितृमित्रलाभाः ।
सौम्ये गवेहागमन अयश्च
एषे शृणे चौरभय स्वरज्ञो ॥
महेश्वराद्याश्रितधन्वा
चौराभिघातावधिसत्वशाली ।
ब्रवीति यदीहतमेवमन्ते
सदाद्यमद्यगमन अयश्च ॥
मध्यप्रदेशे प्रहरे द्वितीये
काकः सुशब्दो नृपतिप्रसादम् ।
मिष्टान्नभोज्यश्च ददाति पुंसां
कदाचनो चौरभय कुरुते" ॥
इति द्वितीयप्रहरः ॥ * ॥

"ऐन्द्र्यां विरुद्धः प्रहरे तृतीये
वह्निं तथा चौरभयं ब्रवीति ।
तथाग्निदाहागमनं भयञ्च
करोति याम्यो शुभकार्यसिद्धिम् ॥
धर्मे यमाशेऽधिभय कलिश्च
विद्धवाचा विपदा च यात्रा ।
भवेदिह नैरृत्यदिशाभिरावे
महाद्विवादो च अशिवरुद्धि ॥
वारुण्यवासी कुरुतेऽतिरुष्ट
रौति तदागमनं विरुद्धः ।
शुभानि कार्याणि च यानि सिद्धि
वस्त्राणि तस्यालस्य नराणाम् ॥
कदाचिदीदृक् नयनागमः स्या
मिष्टान्नपानो नियतं भवति ।
गृहागमा वामिवित्तवार्ता
भवन्ति दत्ताश्च काञ्चनादेः ॥
स्यात् पश्चिमे करटकस्य भयो
दूराध्वजाते समुदायमश्च ।

योषागमोऽभीष्टजयादिवार्त्ता
याम्यासु रम्ये रटितेऽर्थसिद्धिः ।
वातालये दुर्दिनमेव वार्त्ता
चौराभिनष्टार्थसमागमश्च ।
सन्तोषवार्त्ता वरयोषिदाप्ति
याम्या रवे स्यान्मधुरे प्रयाता ॥
याम्ये तृतीये विरुवन्युरीष्यां
कार्य्यार्थलाभो नृपसेवकानाम् ।
भोज्यप्रदश्चेत् शुभदा च वार्त्ता
प्रयाणकं वैरिसमागमश्च ॥
दिशम्यकारे कुरुते सुशब्द
भोज्यं नयं स्वामिकली कुशब्दम् ।
ब्रह्मप्रदेशे सिततण्डुलाभ्यां
भोज्यं च ताम्बूलफलं ददाति” ॥
इति तृतीयप्रहरः ॥ * ॥
ऐन्द्र्यां तुरीयप्रहरेऽर्थलाभो
भूमीशपूजाभयवृद्धिरोगाः ।
वह्नेर्विभागे भयरोगमृत्यु-
च्छिद्रागमो वायसरासितेन ॥
याम्ये रवे तस्करवैरिभीती
स्यातां विषच्छिद्रागमरोगमृत्यु ।
स्यात् यातुधान्यां महती प्रवृद्धि-
रभीष्टसिद्धिः पथि चौरदुःखम् ।
दिशि प्रतीच्यां प्रहरे चतुर्थे
दिनातिरम्येति सतोऽर्थलाभ ।
आयाति योषिद्विजयाम्बुवृष्टिः
सिद्धिः प्रयाणे नृपतेर्भयञ्च ।
वायव्यभागे करटस्य शब्दै-
रायाति योषित् प्रियमानिनी या ।
ध्रुवं प्रवासी दिनसप्तकेन
स्त्रीप्रागमः स्यात् गमने क्षते च ।
कुबेरभागे पथिकोऽभ्युपैति
ताम्बूललाभः कुशलस्य वार्त्ता ।
ऐशाङ्गणाभिसुरगादिदृष्टा
वार्त्ताविरुद्धे म्रियते च रोगी ॥
स्थाणौ स्थितश्चेद् बलिभुग् विरौति
सर्व्ववार्त्ता भवतो विनाशः ।
ब्रह्मप्रदेशे प्रहरे चतुर्थे
वार्त्ता भवेन्मध्यमिका च सिद्धिः” ॥
इति चतुर्थप्रहरः ॥ * ॥
“चक्राभित शाकुनिकैर्व्विमिश्र-
शुभाशुभं दिक्प्रहरक्रमेण ।
तथाशुभं यच्छति दीप्तशब्द-
श्रेयस्करः शान्तरवश्च काकः ॥
रम्यं रवं दीप्तदिशि प्रशमन्
शान्तां दिशं भूरि फलं ददाति ।
तदेव तुच्छं विरुवन्नसौ वै
दीप्तस्थितः प्रयाति दीप्तकाष्ठाम् ॥
यथोपदिष्टं फलमत्र दुष्ट-
तयैव तद्दीप्तदिशि स्थितः सन् ।
शान्तोऽधिरूढो विरुवन् करोति
निरीक्षमाणः ककुभं प्रदीप्ताम् ॥

काकः प्रशान्ताभिमुखोऽतितुच्छं
दीप्ताश्रितो दुष्टफलं ददाति ।
शाखाश्रितः शान्तदिगीक्षणेन
रुक्षस्वरोऽल्पं कथयत्यनिष्टम् ।
शान्तस्वरः शान्तककुप्प्रदेशे
तिष्ठन् प्रदीप्तां ककुभञ्च पश्यन् ।
ददात्यभीष्टं फलमेवमस्य
दीप्तः स पश्यंस्तु तदेव तुच्छम् ॥
आकारचेष्टारवभागविद्या
चत्वारि काष्ठादिनयोः क्रमेण ।
सदाभियुक्ताश्च निरूपयन्ति
यथा च ते काकरुतं मनुष्याः” ॥
इति काकरुते दिक्चक्रप्रकरणम् ॥ * ॥
“यथाकालमधिष्ठाय किञ्च
प्रोच्यते बलिभुजो यथाक्रमात् ।
काकपाण्डकविचारसुन्दरं
शाकुनं सकलशाकुनोत्तमम् ॥
वैशाखमासे निरपद्रवेषु
द्रुमेषु काकस्य शुभाय नीड़म् ।
निन्द्येषु शुष्केषु सकण्टकेषु
द्रुमेषु दुर्भिक्षभयाय हेतुः ॥
प्रशस्तवृक्षे यदि पूर्व्वशाखा-
माश्रित्य काकेन कृतं कुलायम् ।
तद्वृष्टिरिष्टा शकुनप्रमोदो
नीरोगता स्याद्विजयश्च राज्ञः ॥
आग्नेयशाखारचिते च नीड़े
स्यादृष्टिरिष्टाप्ति भयं कचिच्च ।
दुर्भिक्षचक्रध्वदेशभङ्गौ
भवन्ति रोगाश्च चतुष्पदानाम् ॥
याम्यासु शाखासु च वायसेन
नीड़े कृतेऽल्पं जलपातमाहुः ।
व्याधिप्रकोपं मरकं समन्ता-
द्दस्युञ्च प्रभुविरोधिताञ्च ॥
नैर्ऋत्यशाखारचिते च नीड़े
यथाप्यनैवर्षति वर्षकाले ।
पीड़ा प्रजानां विषचौरभीति-
र्दुर्भिक्षयुद्धानि भवन्त्यवश्यम् ॥
नीड़े कृते पश्चिमदिक्षु शाखा-
माश्रित्य काकैः कथिता च वृष्टिः ।
नीरोगताक्षेमसुभिक्षवृद्धि-
स्सम्पत्प्रमोदाश्च भवन्ति लोके ॥
वायव्यशाखासु कृते च नीड़े
प्रभूतवाताल्पजलाश्च मेघाः ।
स्युर्मूषिकोपद्रवशस्यनाश-
पक्षद्वयोद्वेगमहाविरोधाः ॥
कौबेरशाखामधिकृत्य नीड़े
कृते भवेत् प्रावृषि वृष्टिरिष्टा ।
भवन्ति च क्षेमसुभिक्षसौख्य-
नीरोगतावृद्धिसमृद्धयोऽस्मिन् ॥
ईशानशाखासु च वृष्टिरस्या
वैरं प्रजानामुपसर्गदोषः ।
स्याद्वान्धवानां कलहप्रवृत्ति-

र्म्मर्यादया हीयत एव लोकः ॥
वृक्षाग्रनीड़े सति वर्षकाले
मध्ये पुनर्मध्यमतोयमानम् ।
तुच्छापि वृष्टिः प्रवदत्यधस्ता-
त्स्फुटं दिशोक्तं न दिशः स्फुटत्वम् ॥
चौरारिरोगादिभयादिवृद्धि-
र्विधाय भूमौ बलिभुक्कुलाये ।
शुष्के च वृक्षे डमरान्ननाशौ
प्राकाररन्ध्रेषु भयं प्रभूतम् ॥
निम्नप्रदेशे तरुकोटरे वा
वल्मीकरन्ध्रे प्रतलिष्वपीह ।
काकस्य नीड़े समवस्थितेषु
भवन्ति शून्या नियमेन देशाः” ॥
इति वसन्तराजे काकरुतप्रकरणम् ॥ * ॥
अथ काकाण्डविचारः ।
“एकं भवेदाश्रयमग्रिमञ्च
द्वितीयकं मासलकं तृतीयम् ।
ऐन्द्रं तथा नाम चतुर्थमेव
अण्डानि काक्याः परिकीर्त्तितानि ॥
काक्या भवेदाश्रयमण्डकं चेत्
पृथ्वी तदा नन्दति सस्यशस्यैः ।
मन्दप्रवर्षोऽमलसञ्ज्ञकेऽण्डे
भोगस्य वीजस्य भवेत् प्ररोहः ॥
जातानि शस्यानि समीरणेऽण्डे
खादन्ति कीटाः शलभाः शुकाद्याः ।
क्षेमं सुभिक्षं सुखिता धरित्री
स्यादैन्द्रकेऽण्डेऽभिमता च सिद्धिः” ॥
इत्यण्डप्रकरणम् ॥ * ॥
“यात्रा निमित्तानि च कीर्त्तयाम
सङ्क्षेपजानां शकुनानि तानि ।
विज्ञाय यानि प्रणयात्मनर्था-
नर्थांश्च सर्व्वान् कुरुतेऽध्वनीनः ॥
भुङ्क्ते बलिं पक्षिषु मन्त्रपूत-
स्त्वं प्राणिषु प्राणिषि वचनक्षम् ।
गुणेन च स्वर्गी भवसे नमोऽस्तु
तुभ्यं खगेन्द्राय महाप्रभाय ॥
विलोक्य काकं विनिवेद्य तस्मै
भक्त्येव पूजां दधिभक्तयुक्ताम् ।
उदीर्य कार्यं नियमध्वगेन
विलोकनीयं शकुनं तदर्थम् ॥
वामेन शब्दं मधुरं विमुञ्चन्
व्रजन्त्यवामेन करोति काकः ।
सर्व्वार्थसिद्धिं पुनरागमञ्च
शुभप्रदेशे तु सदप्यकस्य ॥
प्रदक्षिणं सव्यविधाय गाङ्गं
वामेन काको विनिवर्त्ततेऽग्रौ ।
यातुः करोत्यहितमर्थसिद्धिं
क्षेमञ्च शीघ्रं पुनरागमञ्च ॥
वामे स्वनं रौद्रमुखोऽसहायो
यो वादतोऽग्रौ यवकार्यसिद्धौ ।
स्यातां क्रमाद्दक्षिणवाममध्यौ
सिद्धी विरुद्धौ विपरीतभूतौ ॥

पृष्ठे विराव मधुर विमुञ्च
प्रनुव्रजयामि मतो हिताय ।
प्रायेण दातारमनुव्रजन्त
सर्व्वेऽपि काके कथिता विहङ्गाः ॥
हृत्वा यव च पुरतः प्रयाति
उपस्थितो यो मुदमादधाति ।
आकूयते च स्थिरोऽङ्घ्रिपाशो
पुंसां तदाभीष्टफल ददाति ॥
कुम्भे गजानां नियत गजाप्ति
गवेऽधिरूढ़ पृथिवीपतित्वम् ।
तुरङ्गमे वाहनभूमिलाभ
करोति काको विजय ध्वजेन ॥
प्रयच्छाम विजय च कूपे
स्थित नदीरोधसि कार्य्यसिद्धिम् ।
पूर्णे घटेन्द्रे च धनाप्तिवृद्धि
शाखोऽधिरूढ़ः कुरुते सशब्द ।
प्रासादधाम्नोन्नतपक्षमाण्ड
निष्पन्नसस्यावनिशाद्वलादौ ।
शाखोऽधिरूढ़ो धनसाधनाय
रौति प्रियं यच्छति यन्मरावः ॥
पृष्ठे पुनर्वा यदि गोमयस्थो
तथा कटाग्रेषु तदन्नपीठ ।
स्थितो वदन् भोजनधाममिष्ट
विष्ठां च कुर्व्वन् वितरत्यवश्यम् ॥
धान्याग्रविष्ठापक्वफलपुष्प
गव्यादिभिः पूर्णमुखः सदैव ।
सदृश्यमानोऽभिमतार्थसिद्धि
मिष्टान्नभोज्याय सदैव काकः ॥
नारीशिरःपूर्णघटस्थितस्य
काकस्य शब्देर्व्वनिताधनाप्तिः ।
शय्याधिरूढ़स्य च तस्य शब्दैः
समागमः स्यात् सुजनेन सार्द्धम् ॥
गोपृष्ठदूर्व्वातृणगोमयेषु
तुरङ्गानि सर्व्वदवर्णीकितायै ।
आहारमन्यस्य तथा ददानो
ददाति भोज्य बहुधाभिषिक्तम् ॥
धान्य यव वा दधि वापि चान्य
करोति पदातिविधानकारी ।
करोति चञ्चू पुरतः स दृष्टो
ददाति वर्त्तं धनमप्यभीष्टम् ॥
कक्षेषु रम्याङ्कुरपत्रपुष्प
च्छायाफलाढ्येषु महत्स्वगेषु ।
शब्देन स्निग्धमधुरस्वराणां
सदैव सर्व्वार्थ समीहितानि ॥
प्रशान्तनादः स्थिरदेहचेष्टो
लीलार्थचेष्टः करटोऽभिधत्ते ।
धान्यादिकूटेषु तथाम्भसो वा
भीषणी गोर्वनितामयानिम् ॥
देशे विपक्षे करटस्य पृष्ठे
सरश्च पृष्ठेऽरिमय ददाति ।
कोटस्य पृष्ठे वपनार्थकाम
रुतेन पृष्ठे वपनार्थमाहुः ॥

सद्यो ज्वरः नैऋतभद्रसाक्षी
मृताङ्गसंस्थो मरण करोति ।
कार्य्यस्यति विप्रघटस्य सद्य
काकः करोति कालमधिष्ठितश्च ।
यो दक्षिणे कूजति दक्षिणेन
प्रयाति यत्राभिमुखोऽभ्युपैति ।
यो याति पृष्ठे प्रतिलोमगत्या
कृतारवः पातयते स राज्यम् ॥
वामे रवो दक्षिणतस्ततो य
सोऽनर्थहेतुर्व्व्यभिभोजनस्य ।
वामप्रदेशे प्रतिलोमयान
विधाय वामो गृह एव तेन ॥
प्रयाति पृष्ठे यदि दक्षिणेन
कृतारवस्तद्रुधिरः पुरः स्यात् ।
वल्मीकरन्ध्रादि च यो मुखोत्था
प्रदक्षिणं याति स सर्व्वभीत्यै ॥
गोपुच्छवल्मीकशवाश्रयश्च
वदन् भवेत् सर्व्वविलोकनाय ।
स्यान्मृत्यवेऽङ्गारविताभ्रिसंस्थः
काकः प्रकुर्व्वन् कटकर्व्वच च ॥
वदन् पुरो दक्षिणतो करोति
मृत्यु पुनर्निष्ठुरशब्दशब्द ।
प्रसार्य्य शिरो वदन च व्याप्ते
सर्व्वेन निम्नो बहिभोजनोऽसौ ।
वामोऽप्यनुष्ठानमदः स्वति वा
सताड़यित्वा रत्नचर्म्मोत्तमम् ।
वल्लाक्षिमक्षु प्रवमक्षिमक्षु
वन्धे वध भव्यति युध्यमानः ॥
वामोऽपि रोग कुरुते विमुञ्चे
स्थितोऽपि पृष्ठे कलिकार्य्यगामी ।
पक्षौ विधुन्वन् विवशश्च रूक्ष
सकण्टके स्वमुपाददाति ॥
वधो भवेद्भूतसमप्रयाते
वन्धो लताभिः परिवेष्टिते स्यात् ।
दग्धे नगे काण्टकयुक्तवृक्षे
सदा भवेत्ता कलिकार्य्यसिद्धी ॥
कृमाधिरूढ़ो न रवेण यायात्
प्रयाति चेत् स्यात् खलु रक्तपात ।
अवस्कर भूम्यस्थिकाष्ठक्रूर
भस्मादिसंस्थो विनिहन्ति कादन ॥
वल्मीकरन्ध्रकपुच्छकाष्ठ
धर्म्मास्थिनीडाभिमुखस्थानि ।
अङ्गारकोपास्तवर्म्मराशि
कृत्यानि चेत् काकमुखे सदाभीम् ॥
पुरस्तात् पापसमागमश्च
मध्वन्य रोगविवृद्धन्य ।
वन्धौ वध सम्पदमावहाय
हस्तादिकं स्यात् यदि मन्दिरे च ॥
ऊर्द्ध्वानलश्ववनयदूष्म
काक कुर्व्वतो विदधाति मृत्युम् ।
काकन्दुधश्चकटाक्षिधाम
वादिवचाद्यादिवश्चकाकि ॥

मङ्गोपिनैकाङ्क्षिपपेतविप्रो
दीप्रस्वरो भास्करमीक्षते च ।
काष्ठादिक भुङ्क्तेऽथवा यो
युद्धाधिकानपक्षक सर्गोऽसौ ॥
मुखेन दिक्षु विलिखन् रवेण
यो रौति पूर्व्वं निरीक्षते कम् ।
एकेन पादेन सचोपविष्टो
मूत्रे स यन्त्र पुरतो जनस्य ॥
विष्टोमयौ न्यस्यति यस्य मूर्द्ध्नि
तस्यागमन्नासदृशो भवेताम् ।
यम्यास्थितत्र विच्छसयौ तु
प्रयाति पूर्व्वं नगरं जनस्य ।
मध्यप्रदेशे विवदन् विपासो
जलमदोष मनयश्रयम् ।
मनुष्यमात्रकृतुरङ्गमाणा
शिरोऽधिरूढ़ो निधनाय तेषाम् ॥
नदीतटे वाथ रटन्नटन्वा
खरस्वरो भाग्यमयाय मृत्युः ।
नैवातुरः वापि मतो हिताय
न दुष्टचेष्टो वितनोति शान्तिम् ॥
याम्योपमे मैन्यवधाय काको
दृष्टो रवे धाममस्तकेषु ।
आयाति यत्राभिमुखो वदस्य
युद्धोद्यमे तस्य पराभवः स्यात् ॥
धाममकूके कटके न्यपसत्
काकैः प्रविष्टैः शिबिरे विनाशि ।
सहूयमानैरिभि रणस्था
आवापवः सन्धिरुपागमानैः ॥
विधुव्यपक्षमस्तकाधिरोहः
समुपल मनुषष प्रपयम् ।
काको मय मस्यति भूमिपानो
कृताभिः शिरो च काक ॥
गतिस्वरौ वामयमयुक्तौ
प्राप्तो यथायोदितवैपरीत्यात् ।
यत्र मनोऽप्यापरति प्रसूतौ
यथोदित तत्र तथागमार्थम् ॥
दिग्यानमच्छेऽपि शुभाशुभानि
फलानि यानि प्रतिपादितानि ।
प्रतिष्ठमानस्य भवन्ति यानि
तथाविधानीति वदन्ति तज्ज्ञाः ॥"
इति वसन्तराजशाकुनम् ॥ * ॥
"सामस्तितानो वदन्ति काका
चेष्टाविशेषैश्च शुभाशुभानि ।
यथोपदिष्टा मानवकर्मणि
तत्तत्प्रकार विदधे प्रयत्नः ॥
निम्नासम मद्रन्तिता स्वनो
ग्रामेऽप्रमापाय भवन्ति काकाः ।
रोधप चक्राद्धृतो वदन्ति
तथागताद्धमदाङ्कुरुषा ।
विप्रानमाहक्षत्रदृष्टा
रात्रौ वदन्तो भयमानिनादम् ।
बोधम मधुमध्येमस्त

उद्वेगयन्स परचक्रवृद्धिम् ॥
यः खाति धूल्यान्तु विलोक्य रौति
वृष्टिं समाशंसति वायसोऽसौ ।
जलस्थलप्रान्तविपर्ययेण
वर्षासु वृष्टिं भयमन्यदा तु ॥
मध्ये दिने वेश्मनि यस्य काको
विरौति रौद्रं विधुनोति पक्षौ ।
हरन्ति चौरा द्रविणानि तस्य
ध्रुवं तथान्यो भवति प्रमादः ॥
स्वमदलक्ष्णपूर्वकाक्षो
ललाटभीतिं करटः करोति ।
स्यात् प्रस्थितस्याप्यथवा स्थितस्य
दुःखं प्रभूतं दिवसत्रयेण ॥
कायार्थलाभं भुवि भूमिलाभं
विघ्नं गले यावधि कार्य्यनाशम् ।
करोति काको विरुवन्नरस्य
प्रस्थायिनः स्थानगतस्य वापि ॥
द्वारप्रदेशे रुधिरानुलिप्तो
विरौति काकः स्वजनाशनाय ।
पक्षौ विधुन्वन् विरुवंश्च रूक्षं
शान्ते च दीप्ते भवने न शस्तः ॥
भूपालयोर्द्ध्वं प्रविधाय पक्षौ
काकः कुनादं प्रलयं करोति ।
काकोऽधिरूढः करटान्तरस्थ
रोगेण मृत्युं कुरुते नराणाम् ॥
दग्धे हते चापहृते खगेन
विनाशमाशावपि तादृशस्य ।
रक्तस्य पीते रजतस्य शुक्ले
चौलस्य कार्पासमये भवेताम् ॥
पत्रे हृते रोगविनाशबुद्ध्या
दद्याच्च रोगं स्वरवं प्रदीप्ते ।
शान्ते प्रदेशे करटस्थिरेण
बद्धारवो रोगमपाकरोति ॥
पत्रे शुभे शान्तदिगाश्रयस्थः
शान्तस्वरो यः शुभमादधाति ।
यो वायसस्तु शुभदं वदन्ति
तद्धस्तये चाक्षयहेतुवाक्यम् ॥
विरौति कुम्भे मणिकेऽथवा यः
स गर्भवत्याः सुतजन्महेतुः ।
चञ्चूयते काष्ठकिमीव शाखा
मादाय दारागमनाय काकाः ॥
चक्रादिविष्ठापिच्छिवादिभिर्यं
पूर्व्वागमोऽभीष्टफलप्रदोऽसौ ।
भस्मादिभिर्यो मणिमादिलाभे
शस्तो विवाहादिविधौ च काकः ॥
स्वार्थदोऽस्थ्यादिकवाहनस्य
श्वभादिवस्त्राशुभदानकारी ।
बध्वासनं जल्पति सोरगस्थो
दुःखार्थदो बन्धनवर्जितश्च ॥
वायसः कुरुकुरुध्वनिं यदा
आचरेद्भुवनसम्मुखं तदा ।
अभ्युपैति पथिकस्तदा ध्वनि

सर्व्वकार्य्यशुभदं वदत्यसौ ॥
इदं लिङ्गोत्पातयुगं पृथिव्यां
महाभयं शाकुनिका वदन्ति ।
यद्वायसो मैथुनसन्निविष्टो
दृश्येत यद्वा धवलः कदाचित् ॥
उद्वेगविद्वेषभयप्रवास
धनक्षयव्याधिभयप्रहाराः ।
बुद्धिप्रणाशाकुलताप्रवादा
दृष्टो भवन्त्यद्भुतदर्शनेन ॥
शमाय सत्सूचितदुःखराशेः
स्नानं बहिस्तत्क्षणमेव कुर्य्यात् ।
आत्मीयशक्त्या च सदक्षिणानि
द्विजाय दद्यात् वसनानि तानि ॥
जपेदहःशेषमपुण्यहान्यै
शयीत भूमावसताममत्तः ।
हविष्यभोजी न भजेच्च नारीं
दिनानि सप्त त्रिगुणानि यावत् ॥
अकाकघातव्रतमादधीत
बलिं च दद्याद्बलिभोजनेभ्यः ।
स्नात्वा प्रभाते विदधीत शान्तिं
दद्यात् स्वशक्त्या द्रविणं गुरुभ्यः ॥
देशे तु यत्राद्भुतमेतदुग्र
मालोक्यते तत्र समापतन्ति ।
अवृष्टिदुर्भिक्षभयोपसर्ग
चौराग्निभूभृद्वधमर्म्मनाशाः ॥
कर्म्माणि तस्योपशमाय राज्ञा
प्रवर्त्तयेत् शान्तिकपौष्टिकानि ।
अन्नाश्वगोभूमिवसूनि दद्यात्
युद्धं विदध्यान्न च यावदब्दम्" ॥
इति काकरुते स्थानस्थितप्रकरणं पञ्चमम् ॥ * ॥

अथ स्वरविचारः ।

"क्रकामिति क्षेमविधौ विराव
केकामितीष्टाशनयानहेतुः ।
करोति कू कूमिति चायलाभ
का का ध्वनिं कानललाभमाह ॥
कें केमिति स्त्रीवरयोषिदाप्त्यै
भोगाय कां कामिति शब्दितः स्यात् ।
अपत्यलाभः कु कु इत्यनेन
गन्तुः पथः केकव इत्यनेन ॥
कौं कौमितीदं शुभलाभकारि
कु कु निनादः प्रियसङ्गमाय ।
कां कूमिति क्रामिति च यथोऽमी
क्रां क्रामिति द्वौ च रवौ रणाय ॥
कां कामिति कौमिति च द्विकस्य
क्रूं कूमिति कौ कुकु कू इतीयम् ।
बलं प्रदिष्टं मरणाय पुंसां
गन्तुः प्रवासं कुरुते खगाख्यः ।
क्रीं क्रीमितीष्टार्थविनाशनाय
स्वचलन्स्वदेशाभिमयाय शब्दः ।
क्रीक्रीति कोकाविति यः कथञ्चित्
मुकमुङः स्यात् स मतो वधाय ।
स्यात् का इतीदं विफलं सदैव

मिष्टाशये स्यात् क इतीष्टभक्ष्यः ।
काका इतीदं तु विषादकारि
करोति काको वदति स्वमुष्टौ ॥
आहारदोषाय च काकटीति
स्याद्राकुलः कुक्कुनिभं रवाय ।
केकेध्वनिष्काकुटि कि टिकीति
भयं लिदं स्यात पुरदूषणाय ॥
यत का इति निस्वदनुस्वरेण
शब्दश्च स्यान्महते रवाय ।
कामित्यथ वाहननाशनश्च
ददाति हर्षं कुकुकुर्व्वितीदम् ॥
यत्का इतीदं विफलं सदीघ
स्वरस्वरैरोचरिते प्रमादात् ।
उत्साहहीनः श्रमदैन्ययुक्तः
स वायसः कार्य्यविनाशनाय ॥
सामिषं वकवकेति भोजये
द्दारयेत् कलिकलीति रासनम् ।
अभ्युपैति स्वरवत्समायिते
प्रोषितः प्रवशवारवे प्रव ॥
स्यात् कलिः कवकवध्वनौ तथा
जायते कलकलाध्वनौ स्वरः ।
आव्रजेत् कुलुकुलुध्वनौ प्रियः
सौदनं कटकटध्वनौ दधि ॥
एवं प्रकारा बहवोऽपरेऽपि
प्रशान्तदीप्ताविभिन्नगानाम् ।
भवन्ति शब्दाः खलु तेषु केचि
दस्माभिरुक्ताः खलु लक्षणीयाः" ॥
इति काकरुते स्वरप्रकरणं षष्ठम् ॥ * ॥
"हितं नरेभ्यो मुनिभिः पुराणैः
स्नानं यदुक्तं बलिभिर्युक्तया ।
तदुच्यते सम्प्रति येन काका
वदन्ति नित्यं बलिलाभतुष्टाः ॥
यदग्निकोण्यां दिशि यत्र काकै
र्युक्तो भवेत् क्षीरतरुः प्रभूतः ।
गत्वा निरुक्तेऽहनि तत्र काका
निमन्त्रणीया बलिपिण्डभाण्डे ॥
प्रातस्ततः क्षीरतरोरधस्ता
द्विशोध्य लिम्पेत् धवं गोमयेन ।
भूमिप्रदेशे चतुरस्रमस्य
मध्येऽर्चयेत ब्रह्मपुरारिभानून् ॥
इन्द्राग्निवैवस्वतयातुधान
जलेशवायुद्रविणेशशम्भून् ।
अभ्यर्चयेदष्टसु दिक्षु भक्त्या
क्रमेण चाष्टावपि लोकपालान् ॥
नमोऽन्तैः स्वप्रणवैश्च सम्यक्
स्त्रिणाभिधानैः प्रयतो मनुष्यः ।
अथासनाशेषसुपुष्पधूप
नैवेद्यदीपाक्षतदक्षिणाभिः ॥
आनद्धपालाशदलप्रविष्टा
बाध्याय तस्मान्नमनस्ययुक्ता ।
ततस्तदग्रे बलिमात्मचिह्नं
मन्त्रेण दद्यात् दधिपिण्डमन्नम्" ॥

मन्त्र। इन्द्राय यमाय वरुणाय धनदाय भूताय
साय बलि गृह्णन्तु मे स्वाहा।
"उदीच्यं काष्ठं समयाय्यतश्च
ततः प्रदेशे करटस्य चेष्टा
सुप्रीलताद्यानि शुभाशुभार्थे
समादयेत्रियमपाविपादः।
पूर्वेण खादन् सुखविसृष्टि
करोति वह्नेर्दिशि वह्निभीतिम्।
काकोऽर्थनाशं दिशि दक्षिणस्यां
नैर्ऋत्यगो विग्रहकृत्यदिष्टः।
जलेप्रदेशेऽभिमतार्थसिद्धिं
व्योमादिकीर्ति प्रमदाप्रवृत्तिः।
सौम्ये सुखारोग्यसमीहिताय
मीशानदेशे वितरत्यभीष्टम्।
बलौ विलुप्ते करट समन्तात्
काम्यं विनिश्च प्रविभावनीयम्।
बलिं विकीर्यापि न भक्षयन्ति
काकास्तदानीं भयदा भवन्ति।
क्षीरद्रुमारामचतुष्पदेषु
सरित्समीपे भिदशान्तरेषु।
देयो बलिर्भूतदिगाष्टमीषु
कुलामदृष्टोदनतण्डुलाद्यैः"।
इति काकरुते पिण्डप्रकरणं समाप्तम्। *।
"पिण्डत्रयस्याथ विधानमेतत्
दाख्यायते यत् किल नारदाद्यैः।
इह मुनीन्द्रैरशुभं शुभञ्च
यथावदस्मिन् कथयन्ति काकाः।
गत्वा शुभेऽह्नि प्रहरे चतुर्थे
देशेषु पूर्वप्रतिपादितेषु।
नरैस्त्रिपिण्डत्रयभोजनार्थं
काकाः प्रयत्नेन निमन्त्रणीयाः।
ततः प्रभाते प्रापणिय भूमिं
तस्याथ पूर्वादिसमाप्तयत्ना।
प्रत्यापुतेश्चाप्यतिनिर्भयार्था
काकाय दूरी भ्रमतोऽर्थभीताः।
दध्योदनाद्यैरुचितं प्रवेश्य
पिण्डत्रये मण्डलकस्य मध्ये।
सम्यर्थयेदन्नपुष्पधूपैः
मंत्रोक्तदैव्यपरो मनुष्यः।
तेषु क्षिपेत् प्राक्तिरगुरुभेदं
पिण्डेषु शेषप्रथमे द्वितीये।
तृण्य तदा चोत्तर तृतीये
दैवाय कुर्व्यादविधिवत्सुबुद्धम्।
चिन्तयतश्चो त्रिनिवेश्य पिण्डे
पिण्डा विवेद्या बलिभोजनेभ्यः।
सम्मोदमाशाद्दनतोषितेभ्यः
काम्यं विचार्यावनरेश्वतथ"।
मन्त्र। ॐ ध्रिवि टिमि हिटि काकधाराय
स्वाहा। इति पिण्डाभिमन्त्रणार्थम्। ॐ ह्रद्राये
विश्वाय काकपतराणाय स्वाहा। काकाह्वानमन्त्र।
"काकेन भुक्ते प्रथमेऽपि पिण्डे
श्रेयं भवेदोपमसीमकार्यम्।

भुक्ते सकृद्ये त्वनु मध्यमं स्याद्
भुक्ते यान्तिके लघुम प्रदिष्टम्।
विवादकार्यानृणविग्रहवृद्धि
क्षेमाय विद्या ह्यभिमोऽर्थलोगाः।
सद्यामसेवाद्यधकाम्यदेशा
इत्यादयोऽस्मिन् परिभावनीयाः।
चेष्टामवाप्तां विदधाति याति
प्रदक्षिणं दक्षिणपक्षपुच्छे।
यीर्णा तयोर्णा कुरुते भयञ्च
स्वाम मनोर्थं व्रजति द्रुमञ्च।
एवंविधां यो विदधाति चेष्टां
पिण्ड समादाय शुभ स्वगोऽसौ।
काभीष्टकाद्यप्यधिकं करोति
चेष्टाविपर्यासतयान्यथात्वम्।
पिण्ड समादाय यदि प्रयाति
प्राच्यां दिशं गच्छति काकपक्षी।
पूर्व फल तत् कुरुते नराणां
चिकीर्षिते वस्तुनि यत्र तत्र।
काको गृहीत्वा यदि मुख्यपिण्डं
प्रयाति दीप्तां ककुभं तदानीम्।
कथयत्यम कार्यफलं प्रनष्टं
तत्र समस्तं विनिवृत्त्यवश्यम्।
द्वितीयकं वायव्यपिण्डं
भुङ्क्ते विश्वास्तादिशाश्वयेव।
फल तदानीं शुभदं नराणाम्
याप्य स्थली गच्छति कार्यजातम्।
काके समादाय तथान्यपिण्डं
याते प्रदीप्तां ककुभं वदन्ति।
काम्यं भयादधिकं भवन्ति
स्वाम्यास्य मध्यमपिण्डभागे।
इति वसन्तराजे पिण्डत्रयप्रकरणमष्टमम्। *।
"अथर्वसो वायसाकुलस्य
वदन्ति साराद्यपि सारभूतम्।
पिण्डार्थं यत्नेन्द्रियमेतत्
दाख्यायते काम्यविनिश्चयार्थम्।
शुभेऽह्नि काकानधिपस्य धाय
पिण्डाष्टकं भोजनाय प्रभाते।
तत्राकयोन्यानि समानवन्
स्वादाय वायार्थविलक्ष्य।
दक्षाणदेशे नवपाम्प्रमौ
मध्ये तथान्यास्तुष्टयविलेवायाम्।
समूषयाप्येव समुद्भिवायाः
सौम्योपचारैविधिशोभितायाम्।
विधाय पूजां कुरुदैवताना
मध्ये तत्तोऽयमपि पिण्डमेकम्।
मध्ये च भपिवैधिनिविनेन
पिण्डाष्टकं प्राश्नयमुमेव।
यवीग्रदकाष्टकदलानपेहस्
पिण्डं विनिहितमन्तरं भवेदम्।
पूर्वादिकाशाभयोनिशेषु
भवेत् क्रमात्तदा पिण्डमेव।
मनोद्धैनाद् प्रहरस्य रूप्यो

मनोऽद्यदेवाधिकमासस्वर्मै।
बध्याथवालेपनपुष्पधूपै
नैवेद्यदीपाद्युपहारिताभि।
बध्यार्चितेभ्यो विधिनोदितेन
पिण्डाष्टकं तत् ददत् द्विजेभ्यः।
मन्त्रेण समस्य निवेदनार्थं
काम्यं विविच्यायमरेव ज्ञेयम्"।
अथ मन्त्रः। ॐ नमः खगपतये प्रवर-
गोत्राय पक्षिराजाय स्वाहा।
"मोजादकाम पिण्ड गृह्णाय समव्रतितः।
यथाइष्टं निविश च कथयस्वाद्य मे स्फुटम्।
काकेन पिण्डे प्रथमे गृहीते
निश्चयं भवेत् यत्र भवेत् सुतार्थः।
उद्वेगशोको विपदा प्रयासो
हानिः कनिष्ठो भवति द्वितीये।
यान्ये समागमूदम्भवति स्व
पिण्डे चतुर्थे विजयो रणेषु।
स्यादैश्यदेशेऽभिष्टसकलार्थ
भवेत् प्रवासो विपदश्च षष्ठे।
नानीय सम्भावयमेव काम्यं
भुक्ते न यत् सिध्यति सौम्यपिण्डे।
चलापयोको विपदा च याता
पिण्डेऽष्टमे वायसभक्षिते च।
पिण्ड न गृह्णात्यथवा न भुङ्क्ते
चञ्च्वेलिर्निक्षिपति दिशो वा।
काम्ये च सर्वे स च न यायी
भवीति घोरं समरं स पुंसाम्"।
इति वसन्तराजे काकरुते पिण्डाष्टकप्रकरणं
नवमम्। *।
"काच यथा तत्ता प्रोक्ता सर्वोदिव्यकालमीदिताम्।
काकान्यपरीक्षा च द्वितीये दशभिःस्मृतिः।
तृतीये भिन्नस्थं च काकास्वकर्मविस्तरम्।
दायतारिद्रता सर्वोपाता तूर्ये प्रकीर्तिता।
दशानि निश्चितयोऽपि स्वार्थं सार्थे च पञ्चम।
सप्तकस्य पष्ठ वर्ण्यादयभिस्थितः।
एकादशभिरामान बलिप्रदय सप्तमम्।
पिण्डत्रयविधानाय चतुर्दशभिरष्टमम्।
पिण्डाष्टकविधानाय नवमे षड्दशम्।
धनयप्रवरद एव इत्यादिकास्यैव तु।
वसन्तराजशाकुने सद्यामायप्रोक्ते।
समस्तशकुनेऽपि विचारितोऽपि वायस"। *।
समुदायेन १७८ द्रष्टानि। इति वसन्तराजशाकु-
नान्तर्गतवायसशाकुनकाकचरित्र समाप्तम्।
काकमांसगुणाः। दोषपायवत्त्वम्। बलहानिमम्।
दीप्तनम्। बलपुष्टितारितम्। ~ घनम्।
दीपनरणम्। इति राजनिर्घण्टः।
["काका योनिभगम्बारकस्य सरो
ह्रायाचरो मधुरा
काका योनमचो बलपलदृष्टो
दे चाम्लता स्वर्या।
सद्गुरुस्य नदीपरार्कपवा
दन्ता अभिप्राय ये

कोकः शारसशारिका शुक इमे
भक्ष्या न प्रस्तालयः ॥
मद्गुघटकमकोरा काकनायाश्च श्येना
पिकशुकविषग्रङ्कीमङ्गदात्यूहकाख्याः ।
जलकारटकपोता पोतकी खञ्जरीटा
कलविङ्कमयकाख्या यूकपिङ्गारयोऽन्ये ॥
एते भक्ष्या नैव भक्ष्या न पेया
ये चाप्यन्येऽप्यात्ममांसाशनाश्च ।
अन्ये चापि श्वापदा ये च निन्द्या
एते चाखाद्या वर्ज्जितास्याश्च सर्व्वे ॥"
इति हारीते प्रथमस्थाने । ११ अ ।
"काकककुररचाषभासशशघ्नधाम्युलूकचिल्लिश्ये
नगृध्रप्रभृतयः प्रसहाः ।
"एते सिंहादिभिः सर्व्वे समाना वायसादयः ।
रसवीर्य्यविपाकेषु विशेषाच्छोषिणे हिताः" ॥
इति सुश्रुते सूत्रस्थाने । ४६ अ ॥) पीठसर्पी ।
खोँड़ा इति भाषा ॥ द्वीपविशेषः ।परिमाणभेदः ।
वृक्षविशेषः । शिरोऽवक्षालनम् । इति हेमचन्द्र
मेदिनीकारौ ॥ तिलकः । अतिदृष्टः । इति शब्द
रत्नावली ॥

काककङ्गु, स्त्री, (काकप्रिय कङ्गुः ।) चीनकः । इति
हेमचन्द्रः ॥

काककला, स्त्री, (काकस्य कला चञ्चुः शङ्खावयव
सदृक् यस्याः ।) काकजङ्घावृक्षः । इति
जटाधरः ॥

काकघ्नी, स्त्री, (काकं हन्तीति । काक + हन् + टः
टित्वात् ङीप् ।) महाकरञ्जः । इति राज
निर्घण्टः ॥

काकचिञ्चा, स्त्री, (काकवर्णः अग्रप्रान्तभागः फले
यस्याः । पृषोदरादित्वात् साधुः ।) गुञ्जा । इति
शब्दरत्नावली । कुँच इति भाषा । (गुञ्जाशब्दे
ऽस्या विवरणं बोद्धव्यम् ॥)

काकचिञ्चि, स्त्री, (काकवर्णः अग्रप्रान्तभागः फले
यस्याः । पृषोदरादित्वात् साधुः ।) गुञ्जा । इति
शब्दरत्नावली ॥

काकचिञ्ची, स्त्री, (काकचिञ्चि + वा ङीप् ।) गुञ्जा ।
इत्यमरः । २ । ४ । ९८ ॥ (अस्याः पर्य्यायो भाव
प्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । यथा,—
"श्वेता रक्तोच्चटा प्रोक्ता कृष्णला चापि सा स्मृता ।
रक्ता सा काकचिञ्ची स्यात् काकाननी च रक्तिका ।
काकादनी काकपीलुः सा स्मृता काकवल्लरी" ।
गुञ्जाशब्दे विवरणान्तरं ज्ञेयम् ॥)

काकच्छद, पुं, (काकस्य छदः पक्ष इव छदो यस्य ।)
खञ्जनपक्षी । इति शब्दरत्नावली ॥

काकच्छदि, पुं, खञ्जनपक्षी । इति त्रिकाण्डशेषः ॥
(खञ्जरीटशब्देऽस्य विवृतिर्ज्ञेया ॥)

काकजङ्घा, स्त्री, (काकस्य जङ्घेवाकृतिर्यस्याः ।)
स्वनामख्यातवृक्षविशेषः । केउया ठेङ्गा इति
भाषा । तत्पर्य्यायः । काकाङ्गी २ काकाह्वा ३ काक
नासिका ४ । इति शब्दरत्नावली ॥ ध्वाङ्क्षजङ्घा । इति
रत्नमाला । नाड़ीजङ्घा ६ काकाङ्गा ७ सुलोमशा
८ पारावतपदी ९ दासी १० नदीकान्ता ११ ।
अस्या गुणाः । तिक्तत्वम् । उष्णत्वम् । कृमिकफ
कफवाधिर्य्यशीर्षशैत्यविषमज्वरनाशित्वञ्च । इति
राजनिर्घण्टः ॥
("काकजङ्घा वचा श्यामा ब्रह्मदण्डी कृताञ्जलिः ।
पृश्निपर्णी त्वपामार्गस्तथा भृङ्गरजोऽष्टमः ।
एषामन्यतमं मूलं पुष्येणोद्धृत्य यत्नतः ।
रक्तसूत्रेण संवेष्ट्य बद्धमैकाहिकं जयेत्" ॥
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥
मसीति लोके । अस्याः पर्य्याया गुणाश्च यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता ॥
काकजङ्घा हिमा तिक्ता कषाया कफपित्तजित् ।
निहन्ति ज्वरपित्तास्रज्वरकण्डूविषक्रिमीन्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गुञ्जा । इति रत्नमाला ॥

काकजम्बु, स्त्री, (काकवर्णा जम्बुः ।) भूमिजम्बुः ।
क्षुद्रजम्बुः । इति शब्दमाला । बनजाम् इति
भाषा ॥

काकजम्बू, स्त्री (कं जलं अकति आश्रयत्वेन व्याप्नो
तीति । क + अक + अण् + टाप् च । काका
जम्बूः । यद्वा काकवर्णा जम्बूः ।) जम्बूप्रभेदः ।
तत्पर्य्यायः । काकफला २ नादेयी ३ काकवल्लभा
४ भृङ्गेष्टा ५ काकनीला ६ ध्वाङ्क्षजम्बूः ७ धन
प्रिया ८ । अस्या गुणाः । कषायत्वम् । अम्लत्वम् ।
पाके मधुरत्वम् । गुरुत्वम् । दाहश्रमातिसार
नाशित्वम् । वीर्य्यवृद्धिबलप्रदत्वञ्च । इति राज
निर्घण्टः ॥

काकणः, क्ली, (कु ईषत् कणति निमीलति इति ।
अच् काकणं गुञ्जाफलं तद्वदाकृतिरस्यास्तीति
तत्सादृश्यचिह्नितत्वादस्य तथात्वम् ।) कुष्ठविशेषः ।
तस्य लक्षणम् । यथा,—
"यत् काकणन्तिकावर्णमपाकं तीव्रवेदनम् ।
त्रिदोषलिङ्गं तत्कुष्ठं काकणं नैव सिध्यति" ॥
इति माधवकरः ॥ ("काकणं तीव्रदाहरुक् ॥
"पूर्व्वं रक्तञ्च कृष्णञ्च काकणन्तीफलोपमम् ।
कुष्ठलिङ्गैर्युतं सर्व्वैर्नैकवर्णं ततो भवेत् ।
दोषभेदीयविहितैरादिशेल्लिङ्गकर्म्मभिः" ॥
इति वाभटे निदानस्थाने १४ अ ।
"काकणन्तिका वर्णान्यादौ पचात् सर्व्वकुष्ठ
लिङ्गसमन्वितानि पापीयसा सर्व्वकुष्ठलिङ्गसम्भवे
नानेकवर्णानि काकणानीति विद्यात् ।
इति निदानस्थाने ५ अ । चरकेणोक्तम् ॥)

काकणन्तिका, स्त्री, (कु ईषत् कणन्ती निमीलन्ती ।
कण् निमीलने शतृ ङीप कोः कादेशः । ततः कन्
टाप् च पृषोदरादित्वात् साधुः ।) गुञ्जा । इति
रत्नमाला । कुँच इति भाषा ॥
("यत्काकणन्तिकावर्णमपाकं तीव्रवेदनम्" ।
इति चरके चिकित्सास्थाने ७ अ ॥)

काकतिक्ता, स्त्री, (काकमांसवत् तिक्ता इति मध्यपद
लोपि समासः ।) काकचिञ्चा । इति रत्नमाला ।
कुँच इति भाषा । (अस्याः पर्य्यायो यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

काकतिन्दुकः, पुं, (कं जलं अकति इत्यच् । काक
तिन्दुकः काकवर्णो वा तिन्दुकः काकप्रियस्तिन्दुको
वा ।) वृक्षविशेषः । गाकड़ा केन्दु । माकड़ो
गाव । काकतेँदु इति च भाषा । तत्पर्य्यायः । का
केन्दुः २ कुलकः ३ काकपीलुकः ४ । इत्यमरः
। २ । ४ । ९८ ॥ काकपीलुः ५ काकाण्डः ६ काक
स्फूर्जः ७ काकाण्डः ८ काकबीजकः ९ । अस्य
गुणाः । कषायत्वम् । अम्लत्वम् । गुरुत्वम् ।
वातविकारनाशित्वञ्च । पक्कस्य तस्य गुणाः ।
मधुरत्वम् । श्लिष्टत्वप्रकारित्वम् । वान्तिपित्त
नाशित्वञ्च । इति राजनिर्घण्टः ॥ (काकाण्डशब्दे
ऽस्य विवरणं ज्ञेयम् ॥)

काकतुण्ड, पुं (काकतुण्डस्येव वर्णोऽस्त्यस्य । अर्श
आदित्वात् अच् ।) कालागुरु । इति हेमचन्द्रः ॥

काकतुण्डिका, स्त्री, (काकतुण्डस्येव वर्णः फलाग्रेऽस्याः
इति ठन् । स्त्रियां टाप् च ।) काकचिञ्चा । गुञ्जा ।
इति हलायुधः ॥

काकतुण्डी स्त्री, (काकं ईषद्दुःखं तुण्डते नाशयतीति ।
तुडि ङ वधे + अण् । गौरादित्वात् ङीप् ।)
राजरीतिः । राजपित्तल इति भाषा । इति राज
निर्घण्टः ॥ (काकतुण्डस्येवाकृतिर्विद्यते ऽस्याः ।
अर्श आदित्वादच् । गौरादित्वात् ङीप् ।) वृक्ष
विशेषः । कौआठोंठी । इति हिन्दी भाषा ।
तत्पर्य्यायः । काकादनी १ काकपीलुः ३ काक
शिम्बी ४ रक्तला ५ ध्वाङ्क्षादनी ६ वक्रशल्या ७
दुर्म्मोहा ८ वायसादनी ९ ध्वाङ्क्षनखी १० वायसी
११ काकदन्तिका १२ ध्वाङ्क्षदन्ती १३ । अस्य
गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । द्रव
त्वम् । रसायनत्वम् । वातदोषहारित्वम् । रुचि
कारित्वम् । पलितस्तम्भित्वञ्च । इति राज
निर्घण्टः ॥

काकध्वज, पुं, (काकमीयज्ञलम् वाडवं ध्वज इवास्य ।)
वाडवाग्निः । इति त्रिकाण्डशेषः ॥

काकनामा, [न्] पुं, (काकस्य नाम नाम यस्य ।)
वकवृक्षः । इति रत्नमाला ॥ (काकनीलशब्दे
ऽस्य विवरणं बोध्यम् ॥)

काकनास, पुं (काकस्य नासाया वर्ण इव फले यस्य ।)
विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

काकनासा, स्त्री, (काकस्य नासा इव फलमस्याः ।)
काकजङ्घावृक्षः । इति जटाधरः । (अस्याः पर्य्याया
गुणाश्च यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
' काकनासा तु काकाङ्गी काकतुण्डफला च सा ।
काकनासा कषायोष्णा कटुका रसपाकयोः ।
कफघ्नी वामनी तिक्ता शोफार्शःश्वित्रकुष्ठहृत्" ॥

काकनासिका, स्त्री, (काकनासा ततः स्वार्थे कन्
टाप् अत इत्वम् ।) काकजङ्घावृक्षः । इत्यमरः ।
२ । ४ । ११८ ॥ रक्तत्रिवृत् । इति राजनिर्घण्टः ।

काकपक्षः, पुं, (काकस्य पक्ष इव आकारोऽस्त्यस्य ।
काकपक्ष + अच् ।) मस्तकपार्श्वद्वये केशरचना
विशेषः । काकपाटा

रिका ।) काकोडुम्बरिका । काकडुमुर इति भाषा । अस्याः पर्य्यायः । ध्वाङ्क्षोडुम्बरिका २ फल्गुवाटिका ... कुष्ठघ्नी ६ फल्गुवाटिका ७ अजाक्षी ८ चम्पुनी ९ मलपू १० चित्रभेषजा ११ ध्वाङ्क्षनाशी १२ । अस्या गुणाः । शीतलत्वम् । कषायत्वम् । व्रणनाशित्वम् । गर्भस्रावहितत्वम् । स्तम्भनत्वञ्च । इति राजनिर्घण्टः ॥

काकोल, स्त्री (काकयति लोकयति दुःखम्बलात् । कक लौल्ये + णिच् + अोल । काकेन उच्चार्य्यते म त्यते अत्र वा आधारे घञर्थे क पृषोदरादित्वात् साधुः ।) नरकविशेषः । इति मेदिनी ॥ (यथा, मनुः ।

"महानरककाकोलं सञ्जीवनमहापथम्" ॥)

काकोल, पुं स्त्री, (कु कुत्सितं कोलति यथा स्यात् तथा कोलति कौट्यति विकलीकरोति वा गुणेन कारके घञ् ।) स्थावरस्थावरविषविशेषः । इत्यमरः । १ । ८ । १० ।

"काकोलमुद्धतेन स्यात् प्रभावद्विषमद्दाविषम्" ।

इति वैद्यकम् । (अस्य पर्य्यायो यथा,—

"काकोलो गरलक्ष्वेडो वत्सनाभः प्रदीपनः ।

शौक्लिकेयो ब्रह्मपुत्रो विषं स्यान्नवधा विषः" ॥

इति वैद्यकरत्नमाला ॥)

काकोल, पुं, (क सत्यमाकोलति सम्यायतीति । आ + कुल सम्याने + अच् ।) कुलालः । (कक लौल्ये स्वार्थे णिच् + बाहुलकात् ओल ।) द्रोणकाकः । इति मेदिनी । (यथा, मनुः ५ । १४ ।

"बकञ्चैव बलाकाञ्च काकोलं खञ्जरीटकम् ।

मत्स्यादान् विड्वराहांश्च मत्स्यानेव च सर्व्वशः" ॥)

सर्पः । शूकरभेदः । इति शब्दरत्नावली । काकोली नामक्यातौषधिविशेषः । इति भरतः ॥

काकोली, स्त्री, (काकोल + गौरादित्वात् ङीष् ।) अष्टवर्गप्रसिद्धौषधिविशेषः । तत्पर्य्यायः । मधुरा २ काकी ३ काम्बिका ४ वायसोली ५ वीरा ६ ध्वाङ्क्षिका ७ वीरा ८ शुक्ला ९ धीरा १० मेदुरा ११ ध्वाङ्क्षोली १२ ध्वाङ्क्षनाशी १३ वयस्या १४ जीवनी १५ शुक्लक्षीरा १६ पयस्विनी १७ । इति राजनिर्घण्टः ॥ पयस्या १८ क्षीरकाकोली १९ । इति रत्नमाला । अस्या गुणाः । शीतत्वम् । मधुरत्वम् । रक्तपित्तानिलास्रदाहज्वरनाशित्वम् । शुक्रवृंहणत्वञ्च । इति राजनिर्घण्टः ॥

(क्षीरकाकोलीशब्देऽस्या विशेषविवरणं ज्ञातव्यम् । काकोल्यादिगणो यथा "काकोली क्षीरकाकोलीजीवकर्षभकमुद्गपर्णीमाषपर्णीमेदा महामेदाच्छिन्नरुहाकर्कटशृङ्गीतुगाक्षीरीपद्मक प्रपौण्डरीकर्द्धिवृद्धिमृद्वीकाजीवन्त्यो मधुकञ्चेति" ।

"काकोल्यादिरयं पित्तशोणितानिलनाशनः ।

जीवनो बृंहणो वृष्यः स्तन्यश्लेष्मकरस्तथा" ॥

इति सुश्रुते सूत्रस्थाने । ३८ अध्याये ।)

काकोदुम्बरिका, स्त्री, (काकस्य उदुम्बर इव उदुम्बरो फलं यस्याः । ततो गौरे ङीष् स्त्रियां टाप् च ।) काकोदुम्बरिका । इति शब्दरत्नावली ।

काच ३ काङ्क्षे । आकाङ्क्षायामिति यावत् । इति कविकल्पद्रुमः । (भ्वा०-पर०-सक०-सेट्-इदित ।) ३ काञ्चति अत्र लोपः । नमश्चपाठेनैवेष्टसिद्धे इदनुबन्धो वैदेशूचारणभेदाय । इति दुर्गादासः ॥

काच, पुं, (कु कुत्सितम् अक्ष अक्षि । "का पथ्यक्षयोः" ६ । ३ । १०४ । इति कोः कादेशः ।) कटाक्षः । इति हेमचन्द्रः ॥ (यथा, भट्टिः । ८ । २४ ।

"आलोकमालोकगतो दूरात् काक्षेणाक्षादवेक्षित" ॥)

काक्षी, स्त्री, (कक्षे कच्छे भवः । "तत्र भव" । ४ । ३ । ५३ । इत्यण् ततो ङीप् च ।) सुरभिका । फटकिरि इति भाषा । सौराष्ट्रमृत्तिका । इति मेदिनी ॥

काक्षीव, पुं, (कु ईषत् क्षीवयति । क्षीव + णिच् + अच् । कोः कादेशः ।) शोभाञ्जनवृक्षः इत्यमरः । (गौतमात् शूद्रायामौशीनर्य्यां जात पुरुषविशेषः । यथा महाभारते २ पर्व्वणि ।

"शूद्रायां गौतमो यत्र महात्मा संशितव्रतः ।

औशीनर्य्यामजनयत् काक्षीवाद्यान् सुतान्मुनिः" ॥)

काक्षीवक, पुं (काक्षीव + स्वार्थे कन् । यद्वा ईषत् क्षीवयतीति । ण्वुल ।) शोभाञ्जनः । इति शब्दरत्नावली ॥

काग, पुं, (का इति शब्दं गायतीति । का + गै + कः ।) काकः । इति जटाधरः ॥

कागद, स्त्री, (कागः काकस्य गत्यादिर्दीयते यत्र इति । काग + दा + घञर्थे आधारे कः । कदल विस्तरत आदौ विस्तारितमायतनम् यत्र वा ।) लिखन पत्रविशेषः । कागज इति भाषा । यथा,

"भूर्ज्जे वा वसने गन्धे धौते वा तालपत्रके ।

कागदे चाष्टगन्धेन पञ्चगन्धेन वा पुनः ॥

चित्रञ्चैतद्यथैवेन विलिख्य धारयेन्नरः ।

यत्र तत्र विशेषेण धारितं कवचं शुभम्" ॥

इति श्रीधरानन्ददासविरचितमन्त्रकल्पद्रुमे कवचमन्तवचनम् ।

काङ्क्षा, स्त्री, (कुत्सित अङ्क्षं यस्याः । काङ्क्ष + टाप् ।) वचा । इति शब्दचन्द्रिका ।

काच, स्त्री, (कच्यते बध्यते अनेन इति । कच बन्धने + घञ् न कुत्वम् । तस्य बन्धनहेतुत्वात् तथात्वम् ।) शिक्यम् । सीम इति भाषा । (काचः क्षार मृत्तिकादुत्पन्नत्वात् अनेन इति घञ् ।) काचलवणम् । इति राजनिर्घण्टः ॥

काच, पुं, (कच दीप्तौ + णिच् + घञ ।) मणिविशेषः । काँच इति भाषा । तत्पर्य्यायः । क्षारः २ । इत्यमरः । २ । ९ । ९९ । अस्य गुणाः । क्षार स्रावत्वम् । ऊर्द्ध्वगत्वम् । अक्षसात् दृष्टिदोषादि नाश । इति राजवल्लभः । शिक्यम् । शिका इति भाषा । नेत्ररोगविशेषः । (यथा,

"काचरे पटलप्राप्ते पश्य काचमतो वुधः" ।

इत्युद्भट ।) मेघजलविशेष । इति मेदिनी । तस्य लक्षणम् ।

"अविशुद्धि तमोभूते वातरुद्धे महाकटे ।

घनादिवर्णे जलघारापातैषेव वितुदः ।

विमलानपि च देवांश्च अभिस्रुतीव पश्यति ।

स एव लिङ्गनाशस्तु नीलिकाव्यपदेशितः" ॥

इति भावप्रकाश ।

("प्राप्नोति काचतां दोषे तृतीयपटलाश्रिते ।

तेनोर्द्ध्वमीक्षते नाधस्तनुचेलावृतोपमम् ॥

यथावर्णञ्च रज्येत दृष्टिर्हीयेत च क्रमात् ।

तथाप्युपेक्षमाणस्य चतुर्थं पटलं गतः ॥

लिङ्गनाशं मलः कुर्व्वन् छादयेद्दृष्टिमण्डलम् ।

तत्र वातेन तिमिरे व्याविद्धमिव पश्यति ॥

चलाविलारुणाभास प्रसन्नञ्चेक्षते मुहुः ।

जालानि केशान् मशकान् रश्मीश्चोपेक्षितेऽत्र च ॥

काचीभूते दृगरुणा पश्यत्यास्यमनासिकम् ।

चन्द्रदीपाद्यनेकत्व वक्रमृज्वपि मन्यते ॥

वृद्धः काचो दृशं कुर्य्याद्रजोधूमवृतामिव ।

स्पष्टारुणाभां विस्तीर्णां सूक्ष्मां वा हतदर्शनाम् ॥

स लिङ्गनाशो वाते तु संकोचयति दृक्सिराः ।

दृङ्मण्डल विशत्यन्तर्गम्भीरा दृगसौ स्मृता ॥

पित्तजे तिमिरे विद्युत् खद्योतोद्योतदीपितम् ।

शिखितित्तिरिपिच्छाभं प्रायो नीलञ्च पश्यति ॥

काचे दृक् काचनीलाभा तादृगेव च पश्यति ।

अर्केन्दुपरिवेषाग्निमरीचीन्द्रधनूंषि च ॥

भृङ्गनीला निरालोका दृक् स्निग्धा लिङ्गनाशतः ।

दृष्टिः पित्तेन ह्रस्वाख्या सा ह्रस्वा ह्रस्वदर्शना ॥

भवेत् पित्तविदग्धाख्या पीता पीताभदर्शना ।

कफेन तिमिरे प्रायः स्निग्धं श्वेतञ्च पश्यति ॥

शङ्खेन्दुकुन्दकुसुमैः कुमुदैरिव चाचितम् ।

काचे तु निष्प्रभेन्द्वर्कप्रदीपाद्यैरिवाचितम् ॥

सिताभा सा च दृष्टिः स्याल्लिङ्गनाशे तु लक्ष्यते ।

मूर्त्तः कफो दृष्टिगतः स्निग्धो दर्शननाशनः ॥

बिन्दुर्जलस्येव चलः पद्मिनीपुटसंस्थितः ।

उष्णे सङ्कोचमायाति छायायां परिसर्पति ॥

शङ्खकुन्देन्दुकुमुदस्फटिकोपमशुक्लिमा ।

रक्तेन तिमिरे रक्तं तमोभूतञ्च पश्यति ।

काचेन रक्ता कृष्णा वा दृष्टिस्तादृक् च पश्यति" ॥

इति वाभटे उत्तरस्थाने । १२ अध्याये ।

विस्तृतविवरणमस्य नेत्ररोगशब्दे ज्ञातव्यम् ।)

काचन, स्त्री, (कचबन्धने + स्वार्थे णिच् + भावे ल्युट् ।) पत्रनिबन्धनम् । इति त्रिकाण्डशेषः ॥ काचेन इत्यपि पाठो दृष्टः । (मुग्धबोधमते "स्त्रियां स्त्र्यादि वती" इति । का + चनप्रत्ययेन) स्त्रीलिङ्गत्वम् । कुत्सार्थे च । इति व्याकरणम् ॥ (यथा, प्रबोधचन्द्रोदये । "कूटा काचन कन्यका सम्भवा तेनासि वाताधिव" ॥)

काचनक, स्त्री, काच्यते बध्यते निबध्यते पत्र (कच + णिच् + ल्युट् । ततः स्वार्थे कन् ।) पत्रनिबन्धनम् इति शब्दरत्नावली ॥

काचनकी, [न्] पुं, (काचनक + अस्त्यर्थे इनिः ।) लिपिः । तत्पर्य्यायः । अर्द्धवृत्ता २ अभिधानं ३ पत्रं ४ वाचिकप्रायः ५ वाचिकं ६ । इति जटाधरः ॥

काचभाजन, स्त्री, (काचनिर्म्मितं भाजनम् ।) काचपात्रम् । कॉँचेर बासन इति भाषा । तत्पर्य्यायः । हैमाम्भः २ । इति त्रिकाण्डशेषः ॥

काचमलं, क्ली, (काचस्य क्षारमृत्तिकाया मलमिव ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचलवण, क्ली, (काचात् क्षारमृत्तिकाया जातं लवणम् ।) लवणविशेषः । कालानुन इति भाषा । तत्पर्य्यायः । नीलम् २ काचोद्भवम् ३ काचम् ४ गोजकम् ५ काचसम्भवम् ६ काचसौवर्च्चलम् ७ कृत्यालवणम् ८ पाक्यजम् ९ काचोत्थम् १० हृद्यगन्धम् ११ कालशवलम् १२ कुरुविन्दम् १३ काचमलम् १४ कृत्रिमम् १५ । अस्य गुणाः । रुचिकारित्वम् । ईषत्क्षारत्वम् । पित्तवृद्धिकारित्वम् । दाहदायित्वम् । कफवातगुल्मशूलनाशित्वम् । अग्निदीपनत्वञ्च । इति राजनिर्घण्टः ॥

काचसम्भव, क्ली, (सम्भवत्यस्मादिति सम्भवः । काचः क्षारमृत्तिका सम्भवः उत्पत्तिस्थानमस्य ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचसौवर्च्चल, क्ली, (काचस्थानिकं सौवर्च्चलं लवणम् ।) काचलवणम् । इति राजनिर्घण्टः ॥

काचस्थाली, स्त्री, (काचस्य क्षारस्य स्थालीव ।) पाटलावृक्षः । पारुल गाछ इति भाषा । इत्यमरः । २ । ४ । ५४ ॥ (अस्याः पर्य्याया यथा—
"पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
कृष्णवृन्ता कुबेराक्षी कालस्थाल्यलिवल्लभा ॥
ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता ।
मुष्कको मोक्षको घण्टा पाटलिः काष्ठपाटला" ॥
कालस्थालीत्यत्र काचस्थालीत्येके ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणादयोऽस्याः पाटलिशब्दे ज्ञेयाः । काचनिर्म्मिता स्थाली ।) काचपात्रम् ॥

काचिघ, पुं, (कचते दीप्यते इति बाहुलकात् इन् । काचिं कान्तिं हन्ति गच्छति । हन गतौ + ड । पृषोदरादित्वात् हस्य घ ।) काञ्चनम् । हिमस्रुः । हिमङ्रा । इति भाषा । सूचिकः । इति मेदिनी ॥

काचित्, अ (पाणिनिमते पदद्वयमेतत् । मुग्धबोधमते "किम श्च्याश्चिचनौ" इति का + चित्प्रत्ययः ।) काचन । कापि स्त्री । इति व्याकरणम् । (यथा, पदाङ्कदूते २ ।
'गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकबरी निःश्वसन्ती विशालम्' ॥)

काचित त्रि, (कच्यते बध्यतेऽसौ । कच + णिच् + कर्म्मणि क्तः ।) शिक्यितम् । शिक्याधारोपितवस्तु । इत्यमरः । ३ । १ । ८९ ॥ शिकाय तोला द्रव्य इति भाषा ॥

काचिम, पुं (कच बन्धे + णिच् + इमन् ।) देवकुलोद्भववृक्षः । तत्पर्य्यायः । भल्लवः २ । इति त्रिकाण्डशेषः ।

काञ्चन, क्ली, (काञ्चते दीप्यते इति । कचि स दीप्तौ + ल्युः ।) स्वर्णम् । इत्यमरः । २ । ९ । ९५ ॥ (यथा मनुः । २ । २३९ ।
"अमेध्यादपि कनकममेध्यादपि काञ्चनम्" ॥) पद्मकेशरम् । इति मेदिनी ॥ धनम् । नागकेशरपुष्पम् । इति राजनिर्घण्टः ॥ (भावे ल्युट् । दीप्तिः । बन्धनमदे त्रि, यथा, मनुः । ५ । ११२ ।
"निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति" ॥)

॥ ॥

काञ्चन, पुं, (काञ्चते दीप्यते इति कर्त्तरि ल्युः ।) स्वनामख्यातपुष्पवृक्षविशेषः । रक्तश्वेतभेदेन स द्विविधः । आद्यस्य पर्य्यायः । रक्तपुष्पः २ कोविदारः ३ युगपत्रः ४ कुद्दालः ५ ॥ द्वितीयस्य पर्य्यायः । काञ्चनालः २ कम्बुदारः ३ पाकारिः ४ । इति रत्नमाला ॥ अस्य राजनिघण्टोक्तगुणपर्य्यायौ कोविदारशब्दे द्रष्टव्यौ ॥ * ॥ चम्पकः । नागकेशरः । उदुम्बरः । धुस्तूरः । इति मेदिनी ॥ (पुरूरवसो वंश्य उद्भवस्य भीमस्य पुत्रः । यथा, भागवते । ९ । १५ । ३ ।
"भीमस्तु विजयस्याथ काञ्चनो होत्रकस्ततः" ॥)

काञ्चनक, क्ली, (काञ्चन + संज्ञायां कन् ।) हरितालम् । इति राजनिर्घण्टः ॥

काञ्चनक, पुं, (काञ्चन + स्वार्थे कन् ।) कोविदारवृक्षः । इति वैद्यकम् ॥ ("काञ्चनारः काञ्चनको गण्डारिः शोणपुष्पकः" । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणादयोऽस्य कोविदारशब्दे ज्ञेयाः ॥)

काञ्चनकदली, स्त्री (काञ्चनवर्णा कदली ।) सुवर्णकदली । इति राजनिर्घण्टः । चाँपाकला इति भाषा ॥

काञ्चनकारिणी, स्त्री (काञ्चनं गण्डमूलेन बन्धनं करोति । काञ्चन + कृ + णिनि । स्त्रियां ङीप् ।) शतमूली । इति शब्दचन्द्रिका । (शतावरी शब्देऽस्या विवरणं बोद्धव्यम् ॥)

काञ्चनक्षीरी, स्त्री, (काञ्चनमिव क्षीरमस्याः । गौरादित्वात् ङीष् । काञ्चनस्य क्षीरमिव क्षीरमस्य वा ।) क्षीरिणीलता । इति राजनिर्घण्टः ॥

काञ्चनगिरि, पुं, (काञ्चनमयो गिरिः । शाकपार्थिवादित्वात् समासः ।) सुमेरुपर्व्वतः । इति हेमचन्द्रः । (यथा भागवते । ५ । १६ । २८ ।
"जठरदेवकूटौ मेरुं पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुतुङ्गौ भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ एवमुत्तरतस्त्रिशृङ्गमकरौ अष्टाभिरेतैः परिसृतोऽग्निरिव परितश्चकास्ति काञ्चनगिरिः" ॥ दानाय कृतः सुवर्णपर्व्वतः ॥)

काञ्चनपुष्पक, क्ली, (काञ्चनमिव पीतं पुष्पं यस्य । काञ्चनपुष्प + कप् ।) आढक्यवृक्षः । इति राजनिर्घण्टः ॥

काञ्चनपुष्पी, स्त्री, (काञ्चनमिव पुष्पं यस्याः ङीप् ।) गणिकारीवृक्षः । इति राजनिर्घण्टः ॥ (गणिकारिका शब्दे ऽस्या विशेषो ज्ञातव्यः ॥)

काञ्चनार, पुं, (काञ्चनं तद्वर्णं ऋच्छति पुष्पैः । काञ्चन + ऋ + अण् ।) कोविदारवृक्षः । इति राजनिर्घण्टः । कचनार इति हिन्दी भाषा । ("काञ्चनारः काञ्चनक इत्यादि पर्य्यायाः काञ्चनकशब्दे गुणाश्च कोविदारशब्दे ज्ञातव्याः । अवस्थाविशेषे तद्यथा,—
'काञ्चनारत्वचं ग्राह्यं तण्डुलोदकेन पेषयेत् ।
गण्डमालापहाराय पीतैव बलकारिका' ।
इति मध्यखण्डे ९ अः शार्ङ्गधरेणोक्तम् ॥)

काञ्चनाल, पुं, (काञ्चनं काञ्चनवर्णं अलति । काञ्चन + अल + अण् ।) कोविदारवृक्षः । इति शब्दरत्नावली ॥ (काञ्चनारशब्देऽस्य गुणादयो ज्ञेयाः । अस्य विवृतिः कोविदारशब्दे द्रष्टव्या ॥)

काञ्चनाह्वय, पुं, (काञ्चनं स्वर्णं आह्वयते स्पर्द्धते स्वभासा । आ + ह्वे + क । काञ्चन इत्याह्वयो नाम यस्य वा ।) नागकेशरवृक्षः । इत्यमरः । २ । ४ । ६५ ॥

काञ्चनी, स्त्री, (काञ्चते दीप्यते अनया । करणे ल्युट् ङीप् ।) हरिद्रा । इति मेदिनी ॥ स्वर्णक्षीरीवृक्षः । गोरोचना । इति राजनिर्घण्टः ॥

काञ्चनीया, स्त्री, (काञ्चनाय हिता । काञ्चन + छ टाप् च ।) गोरोचना । इति राजनिर्घण्टः ॥

काञ्चि, स्त्री, (काञ्चते इति "सर्व्वधातुभ्य इन्" । उणा ४ । ११७ । इति इन् ।) काञ्ची । इत्युणादिकोषः ॥ (यथा आर्य्यासप्तशत्यां ६९३ ।
'हतकाञ्चिबद्धिवन्धोत्तरजघनादपरभोगमुक्तायाः ।
उल्लसति रोमराजिः स्तनशम्भोर्गरलरेखेव" ॥)

काञ्चिक, स्त्री, (काञ्चि + संज्ञायां कन् ।) काञ्जिकम् । इति हेमचन्द्रः ॥

काञ्ची, स्त्री, (काञ्चि, "कृदिकारादक्तिनः" वा ङीष् ।) स्त्रीकट्याभरणम् । चन्द्रहार गोट् इत्यादि भाषा । तत्पर्य्यायः । मेखला २ सप्तकी ३ रसना ४ सारसनम् ५ । इत्यमरः । २ । ६ । १०८ ॥ काञ्चि ६ रशना ७ कक्षा ८ कक्ष्या ९ सप्तका १० सारशनम् ११ रसनम् १२ बन्धनम् १३ । इति शब्दरत्नावली ॥
('वीचिक्षोभस्तनितविहगश्रेणिकाञ्चीगुणायाः" ॥ इति मेघदूते । ३० ॥) केचित्तु
"एकयष्टिर्भवेत् काञ्ची मेखला त्वष्टयष्टिका ।
रसना षोडश ज्ञेया कलापः पञ्चविंशकः" ॥
इति पठन्ति इह लक्षणभेदात् पर्य्यायता । इति तट्टीका । मोक्षदसप्तपुर्य्यन्तर्गतपुरीविशेषः । इति मेदिनी । (यदुक्तम् ।
"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः" ।
इयं हि कूर्म्मविभागे दक्षिणस्यां दिशि स्थिते द्राविडदेशे अनुमीयते ॥) गुञ्जा । इति विश्वः ॥

काञ्चीपद, क्ली, (काञ्च्याः पदं स्थानम् ।) जघनम् । इति हलायुधहेमचन्द्रौ ॥

काञ्जिक, क्ली, (कञ्ज + धात्वर्थनिर्द्देशे ण्वुल् + टाप् पृषोदरादित्वात् इत्वञ्च । कञ्जिका । कु कुत्सिता अञ्जिका कञ्जिका अञ्जिदम्न को कादेशः ।) वारिसम्भुतशाकाम्लमन्नम् । काञ्जी इति भाषा । तत्पर्य्यायः । आरनालकम् २ सौवीरम् ३ कुल्माषम् ४ अभिषुतम् ५ अवन्तिसोमम् ६ धान्याम्लम् ७ कुञ्जलम् ८ । इत्यमरः । २ । ९ । ३९ ॥ कुल्माषम् ९ कुल्माषाभिषुतम् १० आचितम् ११ काञ्जीकम् १२ काञ्जिका १३ कञ्जिकम् १४ काञ्जी १५ महारादि १६ धान्यमूलम् १७ धान्यसौवीरम् १८ गुच्छम् १९ । इति तट्टीका । उष्णारम् २०

महारसम् २१ । इति रत्नमाला ॥ तुषोदकम् २२ सुरम् २३ सुकम् २४ धान्याम्लम् २५ उन्नाहम् २६ रसाम्लम् २७ कुल्माषाभिषवम् २८ सुवीराम्लम् २८ । इति हेमचन्द्रः ॥ वीरम् ३० अभिषवम् ३१ अवन्ति सारकम् ३२ । अस्य गुणाः । वातश्लेष्मपित्तज्वर दाहमूर्च्छाशूलाध्मानविबन्धनाशित्वम् ।
"काञ्जिकं दधि तैलन्तु यवीपल्लिनाशनम् ।
दाहकं गात्रशैथिल्य कम्पं मन्तपतं परम्" ॥
मद्यनाश च भक्ष्यणात् । इति राजनिर्घण्टः ॥ अपि च । भेदकत्वम् । तीक्ष्णत्वम् । उष्णत्वम् । पित्तविषविनिसुक्षमिवृद्धिकारित्वम् । स्पर्शे शीतलत्वम् । श्रमक्लमनाशित्वञ्च । पुरातनस्य तस्य गुणः । हृत्पाण्डुजिज्ञगनाशित्वम् । रुचिवृद्धिकारित्वञ्च । इति राजवल्लभः ॥ * ॥
"कुल्माषधान्यमण्डेन सन्धयेत् काञ्जिकं भवेत् ॥
यावल्लवादिसुधौ भाण्डे स गुडचीदकाञ्जिकम् ।
धान्यराशौ निधातव्य शुक्रं शुभं तदुच्यते ॥
इति वैद्यकपरिभाषा ॥
काञ्जिकवटकः पुं, (काञ्जिकयोगेन कृतो वटकः ।) वटकविशेषः । काँजि बड़ा इति भाषा । तस्य पाकप्रकारो यथा,—
"मज्जनी शुभगा धार्या कटुतैलेन लेपिता ।
निर्मलेनाम्बुना पूर्य तस्याश्चूर्णं विनिक्षिपेत् ॥
राजिकाजीरकलवणहिङ्गुशुण्ठीनिशादिकम् ।
निक्षिपेद्वटकांस्तत्र भाण्डस्यास्यञ्च मुद्रयेत् ॥
ततो दिनत्रयादूर्द्ध्वमम्ला स्युर्वटका ध्रुवम्" ॥
अस्य गुणाः ।
"काञ्जिकवटको रुच्यो वातघ्नः शैत्यकारकः शीतः ।
दाहशूलमजीर्णं हरते नेत्रामयघ्नश्च" ॥
इति भावप्रकाशः ॥
काञ्जिका, स्त्री, (कुत्सिता ईषदा अञ्जिका ।) जीवन्ती लता । पलाशीलता । इति राजनिर्घण्टः ॥
काञ्ची स्त्री (कं शब्दं अञ्चति । क + अञ्च + अच् + ङीष् । गौरादित्वात् ङीष् ।) मेखलाकलापः । इति राजनिर्घण्टः ॥ काञ्चिकम् । इत्यमरटीका ॥
("गुञ्जाबीजं मौञ्जिकं काञ्चीपिष्टं गुडीकृतम् ।
वर्त्तिकां मुखे न्यस्य धिमासेन ध्रुवम्" ॥
इति तु काञ्चिकार्थे चेदम् । इति वैद्यकचक्रपाणि सङ्ग्रहे कर्णरोगाधिकारे ।)
काठः, पु, (कठते मज्यते इति । कठ + कर्म्मणि घञ् ।) पाषाणः । इति त्रिकाण्डशेषः ॥
काठिन्य स्त्री, (कठिनस्य भावः । कठिन + ष्यञ् ।) कठिनता । यथा । "धात्रे मा कुरु मानमद्य मृदुता काठिन्यमङ्गीकृतम्" । इत्युद्भटः ॥
(यथा च कुमारे । ६ । ७३ ।
"काठिन्यं स्थावरे काये भवता सर्व्वमर्पितम्" ॥)
काठिन्यफलः, पुं, (काठिन्यं फले यस्य ।) कपित्थवृक्षः । इति राजनिर्घण्टः ॥ (कपित्थशब्देऽस्य गुणादयो ज्ञातव्याः ।)
काण, पुं (कणति इत्यादौ...मीलतीति । अस्य भावे कर्त्तरि घञ् ।) काक । इति मेदिनी ॥
काण, त्रि, (कणति एकचक्षुषा सम्यग् पश्यति । कण +

घञ् ।) एकचक्षुः । इति मेदिनी ॥ काना इति भाषा । (यथा, मनुः । ३ । २४२ ।
"खञ्जो वा यदि वा काणो दातुः प्रेष्योऽपि वा भवेत्" ॥)
काणूकः, पु, (कणति शब्दायते । कण शब्दे + "सृण्विकाम्यूकोकणोः" । उणा ४ । १८ । इत्यूकण् ।) काकः । इत्युणादिकोषः ॥
काण्ड, स्त्री, (कणतीति । कण शब्दे + डः । बाहुलकात् दीर्घः ।) सन्धिविच्छिन्नैकखण्डास्थि । यथा ।
"भग्नं समासाद्द्विविधं कृशाग्र
काण्डे च सन्धौ च हि तत्र सन्धौ ।
उत्पिष्टविश्लिष्टविवर्त्तितञ्च
तिर्य्यग्गतं क्षिप्तमधश्च षट् च" ॥
इति रोगविनिश्चयः ॥ सन्धिविच्छिन्नमेकखण्डास्थि काण्डम् । काण्डेन च नलकप्रभृतीन्यस्थीनि काण्डं प्रत्ययम् । तत्र भग्नं काण्डभग्नम् । इति तट्टीकायां मधुकोषः ॥
काण्ड, पुं क्ली, (कनि दीप्तौ + कमनात् डः । कादिभ्यः कित् अनुनासिकस्येति दीर्घः ।) दण्डः । (यथा, कात्यायनश्रौतसूत्रे ८ । ७ । २७ ।
"एषणा शरकाण्डेनाहन्ति" ।
"शरकाण्डेन वप्रदण्डेन" । इति कर्कः ॥)
नालम् । बाणः । (यथा महाभारते १२ । ५ । २ ।
"निमये भाण्डिराजस्य यामाग्निश्चन्द्र सुस्थितः ।
क्षत्रिय काण्डमादाय स्मयमानो वै स्मरम्" ॥)
कारदण्डः । अम्बा । कुत्सित । वर्गः । (वर्गश्च एक जातीयसमवायः । यथा, भागवते । ४ । २४ । ८ ।
'क्रियाकाण्डेषु निष्णातो योगेषु च कुरूद्वह ॥)
परिच्छेदः । (यथा, अथर्व्ववेदे १२ । ३ । ४५ ।
"इदं प्रापमुत्तमं काण्डमस्य यस्माल्लोकात् परमेष्ठी समाप" ॥) अवसरः । प्रस्तावः । वारि । जलम् । इत्यमरः । ३ । ३ । ४७ । (यथा, रे रामायणे २ । ५८ । १८ ।
"तासु तता पदं सौरमवरोध्य च त नृगम् ।
निहता काण्डविभाजि विपणे दारुधनुभिः" ॥
"क्रीडार्थं काण्डविभाजि काण्डे मधे विभाजि विपणमानि बहूनाम् क्षिप्ते क्षेपयै" ॥
इति तट्टीका ॥) स्तम्भः । (यथा, अमरशतके ८५ ।
"उदस्य मरुदत्त बरनाग काण्डौ
मघवद् वेदिरपुल काण्डकुम्भयाः" ॥)
स्कन्धादिमूलम् । (यथा भट्टिः ५ । १८ ।
"कुल्याकाण्डमिव ऊतायां सरोजमरिमद्राणा" ॥)
वृक्षकाण्डः । गुँडि इति भाषा । (यथा, रामायणे ।
"कदलीकाण्डमिवोरु भाति" ॥ अश्वत्थो शाखा । यथा मनुः १ । ४६ ।
"उद्भिज्जाः स्थावराः सर्वे बीजकाण्डप्ररोहिणः" ।
"बीजकाण्डरुहाः शाखा ये रोहिता ककारा दर्शिताः" ।
इति तट्टीका ॥) रूपम् । समूहः । रहः । निन्दा ग्लान्तम् । इति मेदिनी ॥ श्लाघा । इति हेमचन्द्रः ॥ धर्मीदाम् । इति शरदिः ॥
काण्डकटुकः पुं, (काण्डे स्कन्धे कटुकरसविशेषः कटुक निम्बः ।) कारवेल्लः । इति राजनिर्घण्टः ॥ (कारवेल्लशब्देऽस्य विवरणं ज्ञेयम् ॥)

काण्डकाण्डकः, पुं, (काण्डस्य शरदण्डस्य काण्डमिव काण्डं यस्य । काण्डकाण्ड + कप् ।) काशतृणम् । इति राजनिर्घण्टः ॥
काण्डकार, स्त्री, (काण्डं स्कन्धं किरति दीर्घतया उत्क्षिपति । काण्ड + कॄ + अण् ।) गुवाकः । इति शब्दमाला ॥ (इति तु काण्डं बाणं करोति इति काण्डकारः । बाणकारकः ॥)
काण्डकीलकः, पुं, (काण्डे स्कन्धे कीलकमिव यस्य । काण्डकील + कप् ।) लोध्रः । इति राजनिर्घण्टः ॥ लोधकाठ इति भाषा ॥
काण्डगुण्डः, पुं (काण्डेन गुण्डेन गुण्डयति वेष्टयति भूमिम् । काण्ड + गुडि वेष्टने + अण् ।) गुण्डतृणम् । इति राजनिर्घण्टः ॥
काण्डगोचरः, पुं, (काण्डस्य बाणस्य गोचर इव गोचरो यस्य ।) नाराचः । लौहमयबाणः । इति त्रिकाण्डशेषः ॥
काण्डधी, स्त्री, (काण्डेन बाणेन धीयतेऽसौ काण्डे नयति बाणमाल वा । काण्ड + धी + क्विप् । एषो दरादित्वात् साधुः ।) सूक्ष्मवल्ला । रामदूती इति ख्याता । इति शब्दचन्द्रिका ॥
काण्डतिक्त, पुं (काण्डे स्कन्धे तिक्तः ।) भूनिम्बः । इति राजनिर्घण्टः ॥ (अस्य पर्यायो यथा,—
"किरातनिम्बः कैराता कटुतिक्तः किरातकः ।
काण्डतिक्तो नार्य्यतिक्तो भूनिम्बो रामसेनकः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणा दयोऽस्य किराततिक्तशब्दे ज्ञेया ॥)
काण्डतिक्तक, पुं (काण्डतिक्त + स्वार्थे कन् ।) भूनिम्बः । इति शब्दचन्द्रिका । चिरता इति भाषा ॥
काण्डनील पुं (काण्डे स्कन्धे नीलः ।) लोध्रः । इति राजनिर्घण्टः ॥
काण्डपट, पुं, (काण्डे काण्डादिनिर्म्मितस्तम्भे आवरणार्थं स्थितः पटः ।) यवनी । तिरस्करिणी । इति हेमचन्द्रः । कानात् इति भाषा ॥
काण्डपृष्ठा, स्त्री, (काण्डस्य बाणस्य पृष्ठ इव पृष्ठो यस्याः ।) शरपृष्ठा । इति राजनिर्घण्टः ॥
काण्डपुष्प, क्ली, (काण्डात् स्कन्धं काण्डं पुष्पं यस्य ।) पुष्पविशेषः । इति शब्दचन्द्रिका । दोणा इति भाषा ॥
काण्डरुहा, स्त्री, (काण्डे तरुकाण्ड इव रूपं यस्य ।) कटुकी । इति महाभारतम् ॥
काण्डस्पृष्ट त्रि, (काण्डं बाणः स्पृष्टं येन ।) काण्डस्पृष्टः । इत्यागमः । इत्यमरटीकायां भरतः ॥
("तीव्रयुग्मौ काण्डस्पृष्टान् दारणौ भरतर्षभ ।
यथा काण्डस्पृष्टं काण्डे वादितं वैशम्" ॥
इति महाभारते । ५ । ७२ । २२ ॥) वैश्यवृत्ती द्विः । इति दायधर्मः ॥
काण्डवारिणी, स्त्री, (काण्डम् सन्धानार्थं वारयति काण्डादीन् निवारयतीति । काण्ड + वृ + णिच् + णिनि ।) दुर्गा । यथा —
"मधुकैटभदैत्यघ्नी महिषासुरघातिनी ।
कालरात्रिः काली च या काण्डवारिणी" ॥
इति देवीपुराणे देवीनिरुक्ताख्ये ४५ अध्यायः ॥

काण्डरुहा, स्त्री, (काण्डात् छिन्नस्कन्धात् रोहतीति। काण्ड+रुह+क टाप् च।) कटुकी। इति रत्नमाला॥ (अस्याः पर्य्यायो यथा,—
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी।
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ अस्याः गुणाः कटुकाशब्दे ज्ञेयाः॥)

काण्डर्षिः, पुं, (काण्डस्य वेदविभागस्य ऋषिः। यद्वा काण्डेषु एकजातीयक्रियादिसमवायेषु ऋषिर्विचारकः।) वेदकाण्डविशेषाध्यापकमुनिभेदः। स तु जैमिन्यादिः। इति त्रिकाण्डशेषः॥ (जैमिनिस्तु पूर्व्वमीमांसाशास्त्रप्रणयनेन क्रियाकाण्डस्य विचारकः। तथा वेदव्यासः उत्तरमीमांसारूपवेदान्तशास्त्रप्रणयनेन ज्ञानकाण्डस्य विचारकः। इत्यादि सूरिभिर्निरुक्तम्॥)

काण्डवान्, [त्] त्रि, (काण्डः शरः प्रहरणत्वेनास्यास्तीति। काण्ड+मतुप्। मस्य व।) काण्डीरः। इत्यमरः। २। ८। ६९। तीरन्दाज इति भाषा॥

काण्डसन्धि, पुं, (काण्डस्य स्कन्धस्य सन्धिर्मेलनस्थानम्।) ग्रन्थि। इति राजनिर्घण्टः॥ पाब्गाँट इति च भाषा॥

काण्डस्पृष्टः, त्रि, (स्पृष्टं गृहीतं काण्डं येन निष्ठान्तत्वात् परनिपातः।) काण्डपृष्ठः। शस्त्राजीवी। इत्यमरः। २। ८। ६७॥

काण्डहीन, क्ली, (काण्डेन स्कन्धेन हीनम्।) भद्रमुस्तकम्। इति शब्दचन्द्रिका॥

काण्डिका, स्त्री, (काण्डं गुच्छं प्राधान्येन अस्ति अस्याः। काण्ड+ठन्+टाप्।) लङ्कानामकधान्यविशेषः। वालुकीनामककर्कटीभेदः। इति राजनिर्घण्टः॥

काण्डीरः, त्रि, (काण्डः वाणः अस्त्यस्य। काण्ड+"काण्डाण्डादीरन्नीरचौ"। ५। २। १११। इति ईरन्।) काण्डवान्। इत्यमरः। २। ८। ६९। तीरन्दाज इति भाषा॥ (यथा भट्टिः ४। १०।
"काण्डीरं खाङ्गिकं शार्ङ्गी रक्षन् विघ्नतनुत्रवान्"॥)

काण्डीरः, पुं, (काण्डः स्तम्बः अस्यास्तीति। काण्ड+"काण्डाण्डादीरन्नीरचौ"। ५। २। १११। इति ईरन्।) अपामार्गवृक्षः। लताप्रभेदः। काण्डवेल इति ख्यातः। तत्पर्य्यायः। काण्डकटुकः २ नासासंवेदनः ३ पटुः ४ मण्डकाण्डः ५ सोमवल्ली ६ चारवल्ली ७ सुकाण्डिका ८। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। सारकत्वम्। दुष्टव्रणशूलगुल्मोदरप्लीहमूलमन्दाग्निनाशित्वञ्च। इति राजनिर्घण्टः॥

काण्डीरी, स्त्री, (काण्डीर+गौरादित्वात् ङीष्।) मञ्जिष्ठा। इति रत्नमाला॥ काण्डीरा इत्यपि पाठः॥ (मञ्जिष्ठाशब्देऽस्या गुणादयो ज्ञातव्याः॥)

काण्डेक्षु, पुं, (काण्डे इक्षुरिव।) कोकिलाक्षवृक्षः। इत्यमरः। २। ४। १०४॥ कुलिया खाड़ा इति भाषा॥ (अस्य पर्य्यायाः। यथा भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥
"कोकिलाक्षस्तु काकेक्षुरिक्षुरः क्षुरकः क्षुरः।
भिक्षुः काण्डेक्षुरप्युक्त इक्षुगन्धेक्षुवालिका"॥
गुणाश्चास्य क्षुरकशब्दे ज्ञेयाः॥) काशतृणम्। इति राजनिर्घण्टः॥

काण्डेरी, स्त्री, (काण्डवाणाकारं पुष्पं ईर्त्ते। काण्ड+ईरड गतौ+अण्। गौरादेराकृतिगणत्वात् ङीष्।) नागदन्तीवृक्षः। इति रत्नमाला॥

काण्डेरुहा, स्त्री, (काण्डे रोहति इति क टाप्। सप्तम्या अलुक्।) कटुकी। इति रत्नमाला॥ (कटुकीशब्देऽस्या विशेषो बोध्यः॥)

कातरः, त्रि, (कु कष्टेन तरतीति। कु+तॄ+अच्। कोः कादेशः।) व्यसनाकुलचित्तः। व्याकुलः। तत्पर्य्यायः। अधीरः २। इत्यमरः। ३। १। २६॥ (यथा रघुः ११। ७८।
"कातरोऽसि यदि वोद्गतार्च्चिषा
तर्ज्जितः परशुधारया मम"॥)

कातरः, पुं, (कं जलं आतरति। क+आ+तॄ+अच्।) कातलमत्स्यः। इति शब्दरत्नावली॥

कातल, पुं, (कातर एव रस्य लः। अयं हि रोहितादिवत् न तेजस्वी अतोऽस्य तथात्वम्। यद्वा, कस्य जलस्य तलं स्पृश्यत्वेन अस्ति अस्य। अर्श आदित्वादच्।) मत्स्यविशेषः। कात्ला इति भाषा। तस्य गुणाः। उष्णत्वम्। मधुरत्वम्। गुरुपाकित्वम्। त्रिदोषकारित्वञ्च। इति राजवल्लभः॥ (यथा, वैद्यके।
"कातलो मधुरश्चोष्णो गुरुपाकी त्रिदोषकृत्"॥)

कातृण, क्ली, (कुत्सितं तृणं क्षुद्रं तृणं वा। कोः कादेशः।) रोहिषतृणम्। इति राजनिर्घण्टः॥

कात्यः, पुं, (कतस्य ऋषेर्गोत्रापत्यं। कत+"गर्गादिभ्यो यञ्"। ४।१।१०५। इति यञ्।) कात्यायनमुनिः। इति त्रिकाण्डशेषः॥

कात्यायनः, पुं, (कतस्य गोत्रापत्यम्। गर्गादित्वात् यञ् यञन्तत्वात् फक्।) धर्म्मशास्त्रकृन्मुनिविशेषः। (यथोक्तं याज्ञवल्क्ये १। ४। ५।
"मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः।
यमापस्तम्बसम्वर्त्ताः कात्यायनबृहस्पती।
पराशरव्यासशङ्खलिखिता दक्षगौतमौ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः"॥)
वररुचिः। इति मेदिनी॥

कात्यायनी, स्त्री, (कतस्यापत्यं स्त्री। "गर्गादिभ्यो यञ्"। ४। १। १०५। इति यञ्। "सर्व्वत्र लोहितादिकतन्तेभ्यः"। ४। १। १८। इति ष्फः। षित्वात् ङीष्।) दुर्गा। (यथा मार्कण्डेये ९१। २३।
"एतत्ते वदनं सौम्यं लोचनत्रयभूषितम्।
पातु नः सर्व्वभूतेभ्यः कात्यायनि नमोऽस्तु ते"॥)
अर्द्धवृद्धा काषायवसना विधवा। इत्यमरः। २। ६। १७॥ (याज्ञवल्क्यमुनेः पत्न्यन्यतमा पत्नी। यदुक्तं बृहदारण्यकोपनिषदि। "याज्ञवल्क्यस्य ह द्वे भार्य्ये बभूवतुर्मैत्रेयी कात्यायनी च। तयोर्ह मैत्रेयी ब्रह्मवादिनी बभूव स्त्रीप्रज्ञैव तर्हि कात्यायनी"॥ पत्न्यां ङीष्। कात्यायनस्य गोत्रे पत्नी च॥)

कादम्ब, पुं, (कदम्बे समूहे भवः। कदम्ब+अण्।) कलहंसः। वालि हाँस इति भाषा। इत्यमरः। २। ५। २३। (यथा रघुः। १३। ५५।
"क्वचित् खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पङ्क्तिः"॥)
अस्य मांसस्य गुणाः। वायुरक्तपित्तनाशित्वम्। मेदकत्वम्। शुक्रकारित्वम्। शीतत्वञ्च। इति राजवल्लभः॥ (कदम्ब एव। स्वार्थे अण्।) कदम्बवृक्षः। इत्यमरटीकायां भरतः॥ (कदम्बस्येदमिति व्युत्पत्त्या अण्। कदम्बसम्बन्धिनि, त्रि। कदम्बकुसुमम्। यथा रघुः १३। २७।
"गन्धश्च धाराहतपल्वलानां
कादम्बमर्द्धोद्गतकेशरञ्च"॥)
वाणः। इति मेदिनी॥

कादम्बकः, पुं, (कादम्ब+स्वार्थे कन्।) वाणः। इति हारावली॥

कादम्बर, क्ली, (कादम्बम् कदम्बोद्भवं रसं आति गृह्णातीति। कदम्ब आ+क। लस्य रः।) कदम्बपुष्पोद्भवमद्यम्। इति मेदिनी॥
(यथा, माघे।
"निषेव्य मधु माधवाः सरसमत्र कादम्बरम्"॥)
दधिसारः। इति हेमचन्द्रः॥ शीधु। इति विश्वः॥ (इक्षुजातगुडादि। इति मल्लिनाथः॥)

कादम्बर, पुं, (कादम्ब कदम्बरसवत् आति गृह्णातीति। आ+क। लस्य रत्वम्।) दध्यग्रम्। दधिसरः। इति मेदिनी॥

कादम्बरी, स्त्री, (कु ईषदवर्णं नीलवर्णमित्यर्थं अम्बरं वस्त्रं यस्य। कोः कादेशः। कादम्बरो बलरामस्तस्य प्रिया। कादम्बर+अण् ततः स्त्रियां ङीप्। यद्वा कदम्बे जातो रसः कादम्बः। "तत्र जातः"। ४। ३। २५। इत्यण्। कादम्बं राति ददातीति। रा दाने+"आतोऽनुपसर्गे कः"। ३। २। ३। इति कः। गौरादित्वात् ङीष्।) मदिरा। इति मेदिनी॥ (यथा —
"कादम्बरीमदविघूर्णितलोचनस्य
युक्तं हि लाङ्गलभृतः पतनं पृथिव्याम्"॥
इत्युद्भटः॥) कोकिला। सरस्वती। शारिकापक्षिणी। इति मेदिनी॥ (वाणभट्टविरचितकाव्यविशेषः। तन्नायिकानाम्नैव प्रसिद्धोऽयं ग्रन्थः। इयं कादम्बरी तु वाणभट्टेनारब्धापि तत्पुत्रस्य पुलिनेन समाप्तिं नीता॥ नायिकाविशेषः। सा तु हंसस्य अप्सरोगणसम्भूतायां मदिरायां गन्धर्व्वपत्न्यां अस्याः ज्येष्ठस्य चित्ररथस्य इवारब्धप्रसिद्धस्य गन्धर्व्वस्य कन्या। अस्या जननी गौरमयूखसम्भवाप्सरसां कुले जाता गौरीति नाम्ना प्रसिद्धा। अस्या चन्द्रापीडस्तु कादम्बर्य्या इष्टः पतिः॥)

कादम्बर्य्यबीज क्ली, (कादम्बर्य्याः बीजं कारणम्।) सुराबीजम्। इति रत्नमाला॥

कादम्बर्य्य, पुं (कादम्बर्य्यै हितः इति यत्।) करम्बवृक्षः। इति जटाधरः॥

कादम्बा, स्त्री, (कादम्ब इव आचरति। कादम्ब+आचारे क्विप्+अच्+टाप्) ।

इति शब्दचन्द्रिका । गुञ्जिरी इति भाषा ।

कादम्बिनी, स्त्री, (कादम्बाः कलहंसाः सन्ति अस्याः । कादम्ब + इनि ङीप् ।) मेघमाला । मेघपङ्क्तिः । इत्यमरः । १ । ३ । ८ ।

कादाचित्क, त्रि, कदाचिद्भवम् । इति मुग्धबोधव्याकरणम् ७ । १५ । (यथा, साहित्यदर्पणे १ । २० ।
"यद्यपि रसानिष्टतया पर्य्यवसानमपि न काव्यत्व तथापि तस्य कादाचित्कतया उपचरितेन काव्यत्वेन काव्यत्वमुपपद्यते" ।)

काद्रवेय, पुं, (कद्र्वाः अपत्यं पुमान् । कद्रु + "स्त्रीभ्यो ढक्" । ४ । १ । १२० । इति ढक् । 'ढे लोपो ऽकद्र्वाः' । ६ । ४ । १४७ । इति न लोपः ।) कद्रुसन्तानः । नागः । इत्यमरः । १ । ८ । ४ ।
(यथा, महाभारते १ । ६५ । ४१ ।
"शेषोऽनन्तो वासुकिश्च तक्षकश्च भुजङ्गमः ।
कूर्म्मश्च कुलिकश्चैव काद्रवेयाः प्रकीर्त्तिताः" ।)

कानक, क्ली, (कनक वर्णमिव उच्च वर्ण अस्य । कनक + अण् ।) जयपालबीजम् । अस्य गुणाः । तीक्ष्णत्वम् । उष्णत्वम् । भारकत्वम् । उत्क्लेदकारित्वञ्च । इति राजवल्लभः । (वैद्यकपरिभाषायामस्य शुद्धिरेचनायाम्बुणो व्यवहारोऽस्य यथा ।
"अष्टक कानकबीजं सिद्धं सम्पूर्णं निष्क्षिपेत् ।
ततो मात्रद्वयं जग्ध्वा पिबेतोष्णादिकम्" ।)

कानन, क्ली, (क ब्रह्म आननं जीवनमस्य । यद्वा काननयति दीपयति । कनदीप्तौ + णिच् + ल्युट् ।) वनम् । (यथा, मेघदूते ४४ ।
"धीरो याहि पश्चिमदिशा काननोदुम्बराणाम् ।
कस्य अस्याः आननं मुखम् ।) ब्रह्मणो मुखम् । गृहम् । इति मेदिनी ।

काननारि, पुं, (काननस्य अरिरिव । शमीगर्भस्थिताग्निना काननस्य दहनात् तथात्वम् ।) शमीवृक्षः । इति शब्दचन्द्रिका । (अस्य गुणादयः शमीशब्दे ज्ञेयाः ।)

कानीन, पुं स्त्री, (कन्यायां अनूढायां जातः कन्याया जातो वा । कन्या + "कन्यायाः कनीन च" । ४ । १ । ११६ । इति अण् कनीनादेशश्च ।) अनूढापुत्त्रः । तत्पर्य्यायः । कन्याजातः २ । इत्यमरः । २ । ६ । २४ । या कन्या अनूढा पितृगृहे एव तिष्ठति तदा तत्पुत्त्रो मातामहस्यैव यथा,—
"कानीनः कन्यकाजातो मातामहसुतो मतः" ।
इति याज्ञवल्क्यः । यद्यूढा स्यात् वोढुरेव यथा,—
"पितृवेश्मनि कन्या तु यं पुत्त्रं जनयेद्रहः ।
तं कानीनं वदेन्नाम्ना वोढुः कन्यासमुद्भवम्" ।
इति मनुः । व्यासे कर्णे च पुं । इति मेदिनी ।

कान्त, क्ली, (कमते काम्यते इति । कम + कर्म्मणि क्त ।) कुङ्कुमम् । इति राजनिर्घण्टः । लौहविशेषः । तस्य लक्षणं यथा,—
"भ्राजते सर्वदिग्भिश्च कान्तलौहं तदुच्यते ।
कान्तलौहस्य हृदयं वश्येद्रसायनविधेः" ।
तस्य परीक्षा । यथा ।
"यस्मिन् पात्रे विसर्पति जले तैलविन्दुर्निशिता
हिङ्गुर्गन्धं विजहाति निम्बकल्को निम्बकल्कः ।

पाके दुग्धं भवति शिखराकारतां नैति भूमौ
कान्तं लौहं तदिदमुदितं लक्षणोक्तं न चान्यत्" ।
इति सुखबोधः । अपि च ।
"यत्पात्रे न प्रसरति जले तैलविन्दुर्निषिक्तो
हिङ्गुर्गन्धं त्यजति भजते तिक्ततां निम्बकल्कः ।
पाच्यं दुग्धं भवति शिखराकारकं नैति भूमौ
कृष्णाङ्गं स्यात् सजलचणकं कान्तलौहं वदन्ति" ।
इति वैद्यकम् । (वैद्यकरसेन्द्रसारसंग्रहे कान्तलौहस्य परीक्षाविधिः । अस्य व्यवहारो यथा,—
"पारदं गन्धकं शुद्धं ताम्रमभ्रं माक्षिकम् ।
हिरण्यं तारतालञ्च कणमेकं पृथक् पृथक् ।
भस्म कान्तं तथा देयं सर्व्वमेकीकृतं शुभम्" ।)

कान्त, त्रि, (काम्यते इति । कम + कर्म्मणि क्त "यस्य विभाषा" । ७ । २ । १५ । इति नेट् । अनुनासिकस्येति दीर्घः ।) मनोरमः । शोभनः । इत्यमरमेदिनीकरौ । (यथा,
"मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति
न मनसि यविनस्य स्याच्यस्य धाति" ।
इति शाकुन्तले १ अङ्के ।)

कान्त, पुं, (कम + क्त ।) श्रीकृष्णः । चन्द्रः । इति शब्दरत्नावली । पतिः । (यथा मेघदूते । १०१ ।
'कान्तोदन्तः सुहृदुपनतः सङ्गमात् किञ्चिदूनः' ।)
वसन्तऋतुः । कान्तायां विशेषः । यथा । चन्द्रकान्तः । सूर्य्यकान्तः । अयस्कान्तादयः । इति मेदिनी । हिज्जलवृक्षः । वसन्तऋतुः । इति राजनिर्घण्टः ।
(विष्णुः । यथा, महाभारते १३ । १४९ । ८५ ।
'कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः' ।
शिवः । यथा तत्रैव १३ । १७ । १४८ ।
"गुहः कान्तो निजः सर्गः पवित्रः सर्व्वपावनः" ।
कार्त्तिकेयः । यथा, तत्रैव ३ । २३१ । ७ ।
"कामजित् कामदः कान्तः सत्यवाग्भुवनेश्वरः" ।)

कान्तपक्षी, [न्] पुं, (कान्तस्य कार्त्तिकेयस्य पक्षी । मयूरस्य कार्त्तिकवाहनत्वात्तथात्वम् ।) मयूरः । इति शब्दचन्द्रिका ।

कान्तपुष्प, पुं (कान्तानि मनोरमाणि पुष्पाण्यस्य ।) कोविदारवृक्षः । इति राजनिर्घण्टः ।

कान्तलक, पुं, (कान्तं लक्यते आस्वाद्यते । कान्त + लक आस्वादने + घञर्थे क । यद्वा कान्यते इति "मति बुद्धिपूजार्थेभ्यश्च" ३ । २ । १८८ । इति क्त । कान्तः । ततः अलतीति । अल + अच् । कान्तश्चासौ अलकश्चेति ।) नन्दीवृक्षः । इत्यमरः । २ । ४ । २४ ।
तुंद इति भाषा ।

कान्तलौह, क्ली, (कान्तं लौहमिदमन्यात् कमनीयं लौहम् ।) कान्तलौहः । इति राजनिर्घण्टः । (अस्य लौहादिवत् मारणादि कर्त्तव्यम् । अस्य विकारो यथा, ।
"मुक्ता प्रवालं हाटकं ताम्रं रजतं वङ्गम् ।
तथैव च कान्तलौहं चपलं काचम् ।
तालकं तथा शीशं माक्षिकं तालकमनःशिले ।
काश्मीरजं तथा गन्धं टङ्कणं हिङ्गुलम् ।
शिलाजतुं तथा हेमं मर्त्त्यगन्धं तथा कृष्णम् ।
रसजारणकर्म्मणि लौहे सर्व्वत्र यत्नतः ।

सौम्य शुद्ध कान्तलौह निवह मादरे भरम्"
"तत कोटिपर्दरीभ्यां कान्तभाई गवाङ्गनम्" ।
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराद्यधिकारे ।)

कान्ता, स्त्री, (काम्यते असौ । कम + णिङ् + कर्म्मणि क्त + टाप् ।) नारी । (यथा शृङ्गारतिलके ६ ।
"झटिति प्रविश गेहं मा बहिस्तिष्ठ कान्ते ।
ग्रहणसमयवेला वर्त्तते शीतरश्मेः ।
अपि ! सुविमलमतिः वीक्ष्य नूनं स राहु-
र्ग्रसति तव मुखेन्दुं पूर्णचन्द्रं विहाय" ।) प्रियङ्गुः । इति मेदिनी । वर्म्मादृगन्धी स्त्री । इत्यमरः । २ । ४ । ३ ।
(यथा, काशीखण्डे २९ । ४१ ।
"कृष्टया कलया कान्ता कुम्भसंस्था कलावती" ।)
बृहदेला । रेणुका । नागरमुस्ता । इति राजनिर्घण्टः ।

कान्ताङ्घ्रिदोहद, पुं, (कान्तायाः अङ्घ्रिः चरणाघातः एव दोहदं पुष्पोद्गमो यस्य । "पादाघाताद-शोको विकसति" इति कविप्रौढोक्तिमवलम्ब्य ।) अशोकवृक्षः । इति त्रिकाण्डशेषः ।

कान्ताचरणदोहद, पुं, (कान्तायाः चरणेन पदाघातेन स्पर्शेन दोहदः पुष्पोद्गमो यस्य । "पादाघातादशोको विकसति" । इति कविप्रौढोक्तिमवलम्ब्य ।) अशोकवृक्षः । इति भूरिप्रयोगः ।

कान्तायस, क्ली, (अयः इव आयसम् । कान्तं च तत् आयसम् ।) कान्तलौहः । इति राजनिर्घण्टः ।

कान्तार, क्ली, (कान्ता सुगम्या अपि या अर्त्ति गच्छति यत्र । कान्त + ऋ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) उपसर्गादि । (कान्तः शोभनः अरति प्राप्नोतीति । कर्म्मण्यण् ।) वनम् । (यथा, श्रीरामायणे ७ । ९८ । ५ ।
"सीते विमुक्तगात्रा वनवासगता मतिः ।
वज्रकीर्णं हि कान्तार मनोभिर्निर्मितं" ।)
महाबिलम् । इति हेमचन्द्रः ।

कान्तार, पुं (कान्तं मनोज्ञं रसं अर्च्छति प्राप्नोति । कान्त + ऋ + अण् ।) इक्षुविशेषः । कतारि इति हिन्दी भाषा । (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।
"कान्तार तापसाविक्षुवंशकाद्याश्च ये मताः" ।)
तस्य गुणाः । गुरुत्वम् । गुल्मोदरविकारित्वम् । श्लेष्मलत्वम् । वातघ्नत्वम् । इति भावप्रकाशः । कोविदारवृक्षः । वंशः । इति राजनिर्घण्टः ।

कान्तार, पुं क्ली, (कस्य सुखस्य अन्तं अर्च्छति यत्र । क्लिष्टगमनत्वात् । कान्त + ऋ + कर्म्मणि अण् ।) महारण्यम् । (यथा, श्रीरामायणे । ४ । ४१ । ११ ।
"तं देशमुन्नतशीर्षाम् कान्तारशिरसश्च वै ।
निरिक्षन्तो वानरा दृष्ट्वा गच्छन्ति पर्व्वतं विशन्" ।)
दुर्गमपथः । इत्यमरः । २ । १ । १७ । (यथा—
'सिंहद्रुमग्रौदृढगर्ज्जितमुखानि यस्मान्मुक्ता गणम् कान्तारे ददृशुःपतङ्गाननावृतरूपाः भुजङ्गाः' इति ।) विवरम् । छिद्रम् । इति मेदिनी ।

कान्तारकः, पुं, (कान्तार + स्वार्थे कन् ।) इक्षुविशेषः । इत्यमरः । २ । ४ । १६३ ॥ काजुले आक् इति भाषा ॥

कान्तारी, स्त्री, (कान्तार + गौरादित्वात् ङीष् ।) इक्षुभेदः । काजुले आक् इति भाषा । अस्या गुणाः । मधुरत्वम् । लघुत्वम् । क्षारत्वम् । कफवातकारित्वञ्च । इति राजवल्लभः ॥

कान्तिः, स्त्री, (कमु कान्तौ कन् दीप्तौ वा + भावे क्तिन् ।) दीप्तिः । तत्पर्य्यायः । शोभा २ द्युतिः ३ छविः ४ । इत्यमरः । १ । ३ । १७ ॥ सुषमा ५ दीप्तिः ६ भा ७ श्रीः ८ भासा ९ भा १० । इति शब्दरत्नावली ॥ अभिख्या ११ । इति जटाधरः ॥ ० ॥ (यथा, विष्णुपुराणे १ मांशे ८ । २३ ।
"शशाङ्कः श्रीधरः कान्तिः श्रीस्तस्यैवानपायिनी" ॥)
कान्तिकारकपर्य्याया यथा । रश्मि १ उग्रसि २ वेति ३ वेनति ४ वेसति ५ वाञ्छति ६ वष्टि ७ वनोति ७ जुषते ९ हर्य्यति १० आचके ११ उशिक १२ मन्यते १३ छन्तयत् १४ चाकमत् १५ चक माम १६ कमति १७ कानिषत १८ इत्यष्टादश कान्तिकर्म्माणः । इति वेदनिघण्टौ २ अध्यायः ॥ स्त्रीशोभा । इति हेमचन्द्रः ॥ (यथा साहित्यदर्पणे ।
"रूपयौवनलालित्य भोगाद्यैरङ्गभूषणम् ।
शोभा प्रोक्ता सैव कान्तिर्मन्मथाप्यायिता द्युतिः" ॥)
इच्छा । स्पृहार्थकमधातोर्भावे क्तिन् प्रत्ययः । दुर्गा । यथा,—देवीपुराणे देवीनिरुक्तनाम ४५ अध्याये ॥
"कान्तिः सिद्धिरिति ख्याता क्रिया समयमाश्च या । कर्म्मीर्वा वस्ना वापि क्रमात् सा कान्तिरुच्यते" ॥ (गङ्गा । यथा, काशीखण्डे गङ्गास्तोत्रे २९ । ४ ।
"कुमुद्वती कमलिनी कान्तिः कल्पितदायिनी" ।
"कान्तिश्चन्द्रतेजोरूपा" । इति तट्टीका ॥)

कान्तिदं, क्ली, (कान्तिं द्यति नाशयतीति । कान्ति + दो + क ।) पित्तम् । इति शब्दचन्द्रिका ॥ (कान्तिं ददातीति । कान्ति + दा + क ।) शोभादायके त्रि ॥

कान्तिदा, स्त्री (कान्तिद + टाप् ।) वाकुचीवृक्षः । सोमराजी इति ख्याता । इति राजनिर्घण्टः ॥

कान्तिदायकं, क्ली, (कान्तिं ददातीति । कान्ति + दा + ण्वुल् ।) कालीयकवृक्षः । इति जटाधरः ॥ शोभादायके त्रि ॥

कान्दविकः, त्रि, (कन्दौ संस्कृतं कान्दवम् । कन्दु + अण् । कान्दवं पण्यं अस्य "तदस्य पण्यम्" । ४ । ४ । ५१ । इति ठक् ।) आपूपिकः । पूपविक्रयकर्त्ता । इत्यमरः । २ । ९ । २८ ।

कान्दिशीकः, त्रि, (कां दिशं गच्छामि इत्याकुलीभूतः । कान्दिश + भू + कर्त्तरि क्त ।) भयेन पलायितः । इति पुराणम् ॥

कान्दिशीकः, त्रि, (कां दिशं यामि इत्याह । तदा ऐति मा शब्दादिभ्य उपसङ्ख्यानमिति ठक् एषो दरादित्वात् साधुः ।) भयद्रुतः । भयेन पलायितः । इत्यमरः । ३ । १ । ४२ ॥

कान्यकुब्जं, क्ली, (कन्याः कुब्जाः कुब्जीकृताः वायुना यत्र । ततः स्वार्थे अण् ।) गङ्गातीरस्थनगरविशेषः । कनज इति भाषा । तत्पर्य्यायः । महोदयम् २ कन्याकुब्जम् ३ गाधिपुरम् ४ कौशम् ५ कुशस्थलम् ६ । इति हेमचन्द्रः ॥ (यथा, महाभारते ३ । ११५ । १९ ।
"एतस्मिन्नेव काले तु पृथिव्यां पृथिवीपतिः ।
कान्यकुब्जे महानासीत् पार्थिवः सुमहाबलः ।
गाधीति विश्रुतो लोके वनवासं जगाम ह" ॥
एतन्नगरविवरणं कन्याकुब्जशब्दे द्रष्टव्यम् ॥)

कान्यजा, स्त्री, (कात् जलात् अन्यस्मिन् जायते । कान्य + जन + ड + टाप् ।) नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

कापटिकः पुं, (कपटेन चरति इति ठक् ।) छात्रः । अन्यमर्म्मज्ञः । ("तत्र परमर्म्मज्ञः प्रगल्भश्छात्रः कपटव्यवहारित्वात् कापटिकः । स ह्यर्थमानाभ्यामुपगृह्य रहसि राज्ञा ब्रूयात् यस्य दुर्वृत्तं पश्यसि तत् तदानीमेव मयि वक्तव्यम् । इति मनुसंहितायां ७ । १५४ । श्लोकस्य टीकायां कुल्लूकभट्टः ।) शठे त्रि । इति मेदिनी ॥

कापट्यं, क्ली (कपटस्य कार्य्यं भावो वा । कपट + ष्यञ् ।) कपटता । शठता । कपटशब्दात् भावार्थे ष्यप्रत्ययः । इति मुग्धबोधव्याकरणम् ।

कापथः, पुं (कुत्सितः पन्थाः । कु + पथिन् + अच् । "कापथ्यक्षयोः" । ६ । ३ । १०४ । इति कादेशः ।) कुत्सितपथः । तत्पर्य्यायः । अध्वः २ दुरध्वः ३ विपथः ४ कदध्वा ५ । इत्यमरः । २ । १ । १६ ॥ कुपथः ६ असत्पथः ७ कुत्सितवर्त्म ८ । इति शब्दरत्नावली ॥ ("शास्त्रात् कापथं दुःखविषमम् बङ्कचरकम्" । इति हे रामायणे । २ । १ ८ । ७ ॥)

कापालं, क्ली (कपालमेव कपालस्येदं वा । कपाल + अण् ।) अष्टादशकुष्ठान्तर्गतवातिककुष्ठम् । इति माधवकरः । अस्य निदानं कपालशब्दे द्रष्टव्यम् ॥

कापालः, पुं, (कपाल + अण् ।) ककाटा । इति शब्दचन्द्रिका रत्नमाला च ॥ कालिया कड़ा इति भाषा ॥

कापालिकः पुं, (कपालेन नृकपालेन चरति भक्ष्याहारादिकं करोतीति । कपाल + ठञ् ।) वर्णसङ्करजातिविशेषः । इति तन्त्रसारः ॥ कपालि इति भाषा । वामाचारिविशेषः । यथा,—
"अथ तीर्थंकरायणोः प्रसक्ते
कापालिकजालक विजेतुम्" ।
इति शङ्करविजयः ॥ (योगिविशेषः । यथा हठयोगदीपिकायां १ । ८ ।
"भानुकी नारदेवश्च खण्डः कापालिकस्तथा" ॥
तत्सम्प्रदायश्च यथा तत्रैव ३ । ९६ ।
'निर्गत्य ते शीतलमध्यधारा
कापालिके खण्डमते ऽमरोली" ॥
"कापालिकम्नाय कापालिकस्तस्मिन् कापालिके खण्डकापालिकसम्प्रदाये इत्यर्थः" ॥ इति तट्टीका ॥)

कापाली, स्त्री, (कपाल + ङीष् ।) विडङ्गा । इति राजनिर्घण्टः ॥ (शिवः । यथा महाभारते । १३ । १७ । १०२ ।
"अजैकपाच्च कापाली त्रिशङ्कुरजितः शिवः" ॥)

कापिलं, पुं, (कपिलेन प्रोक्तं शास्त्रं वेत्ति अधीते वा इति अण् ।) साङ्ख्यशास्त्रज्ञः । इति हेमचन्द्रः ॥ (कपिलमधिष्ठाय कृतो यज्ञः । अण् । कपिलाधिकारेण कृत उपपुराणभेदः । यथा कूर्म्मपुराणे ।
"कापिलं मानवञ्चैव तथैवोशनसेरितम्" ॥)
पिङ्गलवर्णः । तद्वति त्रि । इत्यमरटीकायां भरतः ॥

कापिशं, क्ली, (कापिशा माधवी तत्पुष्पमधूद्भवम् । कपिशा + अण् ।) मद्यम् । इति हेमचन्द्रः ।

कापिशायनं, क्ली, (कपिशैव स्वार्थे अण् । तत्र जातम् । "कापिश्याः ष्फक्" । ४ । २ । ९९ । इति ष्फक् ।) मद्यम् । इति जटाधरः ॥ देवता । इति धरणी ॥

कापिशेयः, पुं, (कपिशायाः अपत्यम् । ढक् ।) पिशाचः । इति त्रिकाण्डशेषः ॥

कापुरुषः, पुं, (कुत्सितः पुरुषः । "विभाषा पुरुषे" । ६ । ३ । १०६ । इति कोः कादेशः ।) कुपुरुषः । कुत्सितपुरुषः । इति व्याकरणम् ॥ यथा हितोपदेशे ।
"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति" ॥

कापेयः, त्रि, (कपेर्भावः कर्म्म वा । कपि + ढक् ।) कपिसम्बन्धी । इति हलायुधः ॥ (स्त्रियां ङीप् । यथा, गोः रामायणे । ६ । १११ । १९ ।
"कच्चिन्नु खलु कापेयी सेव ते चलचित्तता" ॥)

कापोतं, क्ली, (कपोतानां समूहः । अञ् ।) कपोतगणः । इत्यमरः २ । ५ । ४७ । पायरार झाँक् इति भाषा ॥ (कपोतस्येदम् । "तस्येदम्" । ४ । ३ । १२० । इत्यण् । यथा भागवते । ९ । १८ । २५ ।
"दुष्मना भगवान् काव्यः पौरहित्यं विगर्हयन् ।
वृत्तम् वर्त्ति च कापोतीं दुहित्रा स ययौ पुरात्" ॥
कापोतीं कपोतसम्बन्धिनीं वृत्तिं परस्वमुपभीवितमित्यर्थः ॥) सौवीराञ्जनम् । इति राजनिर्घण्टः ॥

कापोतः, पुं, (कपोत + अण् ।) सर्ज्जिकाक्षारः । इत्यमरः । २ । ९ । १०९ ॥ वर्णः । इति मेदिनी । कपोताभवर्णः । तद्वति त्रि । इति हेमचन्द्रः ॥

कापोताञ्जनं क्ली, (कापोतश्च तत् अञ्जनञ्चेति ।) सौवीराञ्जनम् । स्रोतोञ्जनम् । इत्यमरः । २ । ९ । १० ॥

काप्यकरः, पुं, (कुत्सितं आप्यं काप्यं पापं करोतीति । काप्य + कृ + ताच्छील्यादौ ट ।) स्वयं कृत पापं चित्ते आधाय यः प्रवदति सः । इति शब्दरत्नावली ॥

काप्यकारः, पुं, (काप्यं करोतीति । काप्य + कृ + अण् । चित्ते पापं आधाय यः प्रवदति सः । इति त्रिकाण्डशेषः ॥ स्वपापवक्ता । इति शब्दरत्नावली ॥

कापथः, पुं (कुत्सितः पथः यस्य । कोः कादेशः ।) षट्पदः । इति शब्दरत्नावली ॥

काम, व्य, अभ्यनुज्ञा । इति विश्वः ॥

कामं, क्ली, (कामाय हितम् । कम + अण् ।) रेतः । निकामम् । काम्यम् । इति मेदिनी ॥ कामम् । अनुमतिः । इति हेमचन्द्रः ॥ (यथा माघे २ । ४२ ।
"भवानवष्टब्धा वा काम स्वाम्यस्तु वः श्रमी)" ॥

कामः पुं, (काम्यते असौ कर्म्मणि घञ् ।) काम्य

इच्छा । इति हेमचन्द्रः ॥ (यथा मनुः २ । ९४ ।
"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" ॥)
कामस्तु मधवो मदयाश्चास । यथा ।
"यदि कामो भवेत् क्रोधो लोभश्चाधोऽरक्ष्यत्" ।
इति श्रीभागवतम् ॥ (काम्यते इति । कर्म्मणि घञ् ।) वरः । यथा रघुः २ । ६५ ।
"सन्तानकामाय तथेति कामं
राज्ञे प्रतिश्रुत्य पयस्विनी सा" ॥
कामं वरं प्रतिश्रुत्य प्रतिज्ञाय इत्यर्थः ॥ मनोरथः । यथा तत्रैव ३ । ६७ ।
"तथेति कामं प्रतिशुश्रुवान्
रघोर्यथागतं मातलिसारथिर्ययौ" ॥
महादेवः । यथा महाभारते । १३ । १७ । ४६ ।
"गन्धचारी गन्धपतिर्दिग्वासाः काम एव च" ॥
विष्णुः । यथा तत्रैव १३ । १४९ । ४५ ।
"कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" ॥)
बलदेवः । इति शब्दरत्नावली ॥ प्रद्युम्नपुत्रः । इति शब्दनिर्घण्टः ॥ कामदेवः । (यथा कुमारे ३ । ६४ ।
"कामस्तु बाणावसरं प्रतीक्ष्य
पतङ्गवद्वह्निमुखं विविक्षुः" ॥)
स तु श्रीकृष्णपुत्रः । तत्पर्य्यायः । मदनः २ मन्मथः ३ मारः ४ प्रद्युम्नः ५ मीनकेतनः ६ कन्दर्पः ७ दर्पकः ८ अनङ्गः ९ पञ्चशरः १० स्मरः ११ शम्बरारिः १२ मनसिजः १३ कुसुमेषुः १४ अनन्यजः १५ पुष्पधन्वा १६ रतिपतिः १७ मकरध्वजः १८ आत्मभूः १९ ब्रह्मसूः २० विश्वकेतुः २१ । इत्यमरः १ । १ । २६-२८ ॥ * ॥ स तु पञ्चाशद्विधो यथा । कामः १ कामदः २ कान्तः ३ कान्तिमान् ४ कामगः ५ कामचारः ६ कामी ७ कामुकः ८ कामवर्द्धनः ९ रामः १० रमः ११ रमणः १२ रतिनाथः १३ रतिप्रियः १४ रात्रिनाथः १५ रमाकान्तः १६ रममाणः १७ निशाचरः १८ नन्दकः १९ नन्दनः २० नन्दी २१ नन्दयिता २२ पञ्चबाणः २३ रतिसखः २४ पुष्पधन्वा २५ महाधनुः २६ भ्रामणः २७ भ्रमणः २८ भ्रममाणः २९ भ्रमोऽपरः ३० भ्रान्तः ३१ भ्रामकः ३२ भृङ्गः ३३ भ्रान्तचारः ३४ भ्रमावहः ३५ मोहनः ३६ मोहकः ३७ मोहः ३८ मोहवर्द्धनः ३९ मदनः ४० मन्मथः ४१ मातङ्गः ४२ भृङ्गनायकः ४३ गायनः ४४ गीतिजः ४५ नर्त्तकः ४६ खेलकः ४७ उन्मत्तोन्मत्तकः ४८ विलासः ४९ लोभवर्द्धनः ५० ।
"चार्व्वङ्गीकुसुमासाय बाणाढ्यं प्रक्षिपन्मुदा ।
शोभा [illegible] सर्व्वे दृष्ट्वा [illegible] ।
[illegible] कामा मदनादयिताः" ॥
इति शारदातिलकटीकायां राघवभट्टः ॥ तेषां ध्यानादिकं तत्र द्रष्टव्यम् ॥ * ॥
तस्य स्थानानि यथा ।
"पादे गुल्फे तथा जानौ च ऊरौ नाभौ कुचे हृदि ।
कक्षे कण्ठे च ओष्ठे च गण्डे नेत्रे ललाटके ।
मूर्द्ध्नि केशेषु कामस्य निर्द्दिष्टमात् ॥
दक्षे दृशां स्त्रिया वामे शुक्ले कृष्णे विपर्य्ययः ॥
पादाङ्गुष्ठे प्रतिपदि द्वितीयायाञ्च गुल्फके ।
ऊरौ च तृतीयायां चतुर्थ्यां भगदेशतः ॥
नाभिस्थाने च पञ्चम्यां षष्ठ्यान्तु कुचमण्डले ।
सप्तम्यां हृदये चैव अष्टम्यां कक्षदेशतः ॥
नवम्यां कण्ठदेशे च दशम्यां ओष्ठदेशतः ।
एकादश्यां गण्डदेशे द्वादश्यां नयने तथा ॥
श्रवणे च त्रयोदश्यां चतुर्द्दश्यां ललाटके ।
पौर्णमास्यां शिखायाञ्च ज्ञातव्य इति क्रमात् ॥
यत्र स्थाने वसेत् कामस्तत्रैव स्पर्शचुम्बनम् ।
मर्द्दनादिना कर्त्तव्यं ज्ञातव्यं रतिकोविदैः" ॥
इति स्मरदीपिका ॥ समरस्तु प्रलयादिमविन्दुम [illegible] रूपः ॥ उत्पन्नमात्रयोरेव कामस्यानुत्पत्ति कारणं यथा । मार्कण्डेय उवाच ।
"अथापि तस्यां सन्ध्यां दृष्ट्वा पूर्व्वरूपात्मन ।
कामाद्याश्च मनस्यस्य ध्याता सा च युवतीति वै ॥
तस्याश्च चलितं चित्तं कामबाणविलोकितम् ।
स्वधीयां पेशलां तेषां मानसानां महात्मनाम् ॥
मनसश्च चपलं स्वधा सोपहासा विधिं प्रति ।
धामधर्म्मपिताच मनस्यन्तर्दधीत् प्रति ॥
कामस्य तादृशं भाव मुनिमोहकरं मुहुः ।
दृष्ट्वा सन्ध्या चाय तत्र चपामात्रातिदुःखिता ॥
ततस्तु महता [illegible] मदने तदनन्तरम् ।
अस्ताङ्गते विधौ भानौ गते चापि निशान्तरे ॥
[illegible] सन्ध्या [illegible] ।
ध्यायन्ती [illegible] मनस्विनी ॥
इदं विमर्शे सन्ध्या तच्चिन्तं कार्य्यं यथोदितम् ।
उत्पन्नमात्रां मां दृष्ट्वा युवतीं मदनार्दिताः ॥
अकार्षीत्वानुरागोऽयमभिलाषं पितामहः ।
दृष्ट्वैव मानसास्तेऽथ सकाममभवन् [illegible] ॥
ममापि मथितं चित्तं मदनेन दुरात्मना ।
येन दृष्ट्वा मुनीन् सर्व्वान् [illegible] ॥
[illegible] तस्य वामस्य गरलं फलमात्मनात् ।
यत्र दृष्ट्वा कुपितं शम्भोरासे दिगम्बरः ॥
मनोभित्तं पञ्चबाणमात्मनिन्दार्थं आख्यतम् ।
दग्धां पिता भ्रातरश्च सकामा [illegible] ॥
दृष्ट्वा [illegible] तत्काल मनः चापि [illegible] ।
ममापि कामभावाश्च [illegible] ॥
पञ्चाशिव [illegible] ।
[illegible] ॥
[illegible] वेदमार्गानुसारतः ।
[illegible] मर्य्यादामिव भूतले ॥
उत्पन्नमात्रा न यथा सकामाः स्युः शरीरिणः ।
[illegible] ॥
[illegible] ॥
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ।
[illegible] ॥
तथा स [illegible] समधिष्ठितः सन्
शौर्य्यवीर्य्यादिमनुप्रमाथता ।
मोहेन सन्ध्याशमपोदितेन
यथोदयाद्रिर्निर्हरोन सन्ध्य" ॥
इति कालिकापुराणे १८ अध्यायः ॥ * ॥
मार्कण्डेय उवाच ।
"अथ तस्याः शरीरन्तु वन्हिनाभिततुतत्वम् ।
परिक्षीय सदाशान्तः पवित्रं बुद्धि राजितम् ॥
हिमानीतश्चितामोदकहर्षं वरनं तदा ।
निरीक्ष्य कृपयाविष्टो हरिः प्रोवाच तामिदम्" ॥
श्रीभगवानुवाच ।
"प्रीतोऽस्मि तपसा भद्रे भवत्याः परमेण वै ।
त्वयैव च शुभे प्राप्ते वरं वरय वाञ्छितम् ॥
येन ते विद्यते कार्य्यं वरेणास्मि मनोगतम् ।
तम् करिष्ये च भद्र ते प्रसन्नोऽहं तव व्रतैः" ॥
सन्ध्योवाच ।
"यदि देव प्रसन्नोऽसि तपसा मम सर्व्वति ।
वृतस्तदायं प्रथमं वरो मम विधीयताम् ॥
उत्पन्नमात्रा देवेश प्राणिनोऽस्मिन् शुभाकृते ।
न भवन्तु तथैवैते सकामाः सम्भवन्तु वै" ॥
श्रीभगवानुवाच ।
"प्रथमं शैशवो भावः कौमाराख्यो द्वितीयकः ।
तृतीयो यौवनो भावश्चतुर्थो वार्द्धकं तथा ॥
तृतीयेऽथ संप्राप्ते वयोभागे शरीरिणः ।
सकामाः स्युर्द्वितीयान्ते भविष्यन्ति क्वचित् क्वचित् ॥
तपसा तव मर्य्यादा जगति स्थापिता मया ।
उत्पन्नमात्रा न यथा सकामाः स्युः शरीरिणः" ॥
इत्यादि श्रीकालिकापुराणे १९ अध्यायः ॥ * ॥
अभिलाषः । तस्य रजोगुणादुत्पत्तिर्यथा,—
"काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्" ॥
इति श्रीभगवद्गीतायां ३ । ३७ ॥
कामकला, स्त्री, (कामस्य कला स्त्री ।) रतिः । कामदेवपत्नी । इति शब्दरत्नावली ॥ चन्द्रस्य षोडशकलावत् कामकला ॥
कामकूटः, पुं (काम एव कूटं प्रधानं यस्य ।) वेश्याप्रियः । वेश्याविभ्रमः । इति मेदिनी ॥
कामकेलिः, त्रि (कामे कन्दर्पे केलिर्यस्य ।) विटः । इति त्रिकाण्डशेषः ॥ (कामविलास केलिः ।) सुरते पुं । इति हेमचन्द्रः ॥
कामकुण्डला स्त्री, (काम कामनीयं कुण्डं इव यस्य सर्व्वं यस्याः ।) कर्द्दमभेदः । इति राजनिर्घण्टः ॥
कामगामी [न्] त्रि, (काम यदेष्ट गन्तुं शीलमस्य कुर्व्वन्निव वा गच्छतीति । काम + गम + णिनि ।) कामचारी । स्वेच्छागमनशीलः । इत्यमरटीका ॥
कामगुणः, पुं, (कामजातो गुणः ।) रागः । विषयामोदः । इति मेदिनी ॥
कामचारी [न्] त्रि (कामं स्वच्छन्दं चरतीति । चर + णिनि । कामस्य स्वतन्त्रता ।) स्वेच्छाचार शीलः । कामचारः । कामचारीव २ । इत्यमरः ॥ २ । ८ । ७६ ॥
कामचारि [न्] त्रि, (कामेन स्वेच्छया चरति ।

काम + चर + णिनि ।) कामुकः । (यथा
"पुरन्दरं च जानीते परस्त्रीकामचारिणम्" ॥
इति महाभारतम् ।) स्वच्छन्दः । कलविङ्कः । इति
मेदिनी ॥
कामचारी, [न्] पुं, (कामेन इच्छानुसारेण चरति
विहरति । काम + चर + णिनि ।) गरुडः ।
इति शब्दरत्नावली ॥
कामजानः, पुं, (कामं जनयति कुहूध्वनिना । काम
+ जन + णिच् + अच् । निपातनात् न ह्रस्वः ।
यद्वा कामजं कन्दर्पभावं आनयति । कामज +
आ + नी + ड ।) कोकिलः । इति शब्दरत्ना
वली । कामजनिः इति च पाठः ॥
कामतालः, पुं, (कामं तालयति प्रतिष्ठापयति ।
काम + तल प्रतिष्ठायां + णिच् + अण् ।) को
किलः । इति त्रिकाण्डशेषः ॥
कामदः, त्रि, (कामं अभिलाषं ददाति । काम + दा +
क ।) कामदाता । अभिलाषदः । इति मेदिनी ॥
(यथा, रामायणे २ । १२ । ७ ।
"ऐश्वर्य्यस्य रक्षन् सन् कामानामिव कामदः" ॥
कामं कामस्य रूपं स्वसौन्दर्य्येण द्यति अवखण्ड
यतीति । यद्वा कामं मदनं द्यति नाशयतीति ।
उद्धरेदित्यादस्य तथात्वम् । काम + दो + क ।
कार्त्तिकेयः । यथा, महाभारते ३ । २३१ । ४ ।
"कामजित् कामदः कान्तः सत्यवाग्भुवनेश्वरः" ॥)
कामदा, स्त्री, (कामं अभीष्टं ददाति या । काम + दा
+ कः + टाप् ।) कामधेनुः । इति मेदिनी ॥
कामदुघा, स्त्री, (कामं दोग्धि । काम + दुह +
"इगुपधज्ञाप्रीकिरः कः" । ३ । १ । १३५ । इति
कः । ततष्टाप् ।) कामधेनुः । इति मुग्धबोधव्या
करणम् ॥ (यथा, भागवते १ । १० । ४ ।
"कामं ववर्ष पर्जन्यः सर्व्वकामदुघा मही" ॥)
कामदूतिका, स्त्री, (कामस्य उद्दीपकत्वात् दूतिकेव ।)
नागदन्तीवृक्षः । इति रत्नमाला ॥
कामदूती, स्त्री, (कामस्य दूतीव कामोद्दीपकत्वात् ।)
पाटलावृक्षः । इति शब्दरत्नावली ॥
कामधरः, पुं, (कामरूपं कामस्य सत्तां वा धरति
धारयति वा । काम + धृ + अच् ।) कामरूपस्थ
महाभगपर्व्वतस्थसरोवरः । यथा,—
"मणिकूटाचलात् पूर्व्वे मतङ्गभगनाचलः ।
तिष्ठति यत्र मदनो हरनेत्राग्निना पुरा ॥
शरीरं प्राप्य तपसा समाराध्य वृषध्वजम् ।
तत्र मत्स्यध्वजस्तु कामदेवेन रक्षितः ॥
अधित्यकायां पृथिवी नीलसमात् समन्ततः ।
तदा तु शाश्वतो नाम तत्रास्ते दक्षिणावधा ॥
सरः कामधरो नाम तस्मिन् शैले व्यवस्थितः ।
तस्याम्भो विधिवत् स्नात्वा पीत्वा कामधराम्भसि ।
विमुक्तपापः शुद्धात्मा शिवलोके महीयते" ॥
इति श्रीकालिकापुराणे ८२ अध्यायः ॥
कामधेनुः, स्त्री, (कामप्रतिपादिका धेनुः ।) स्वनाम
ख्यातगौः । तस्या उत्पत्तिर्यथा,—
"दक्षस्य तनया ह्यासीत् सुरभिर्नाम नामतः ।
गवां माता महाभागा सर्व्वलोकोपकारिणी" ॥
तस्यास्तु तनया जज्ञे कश्यपात्तु प्रजापतेः ।
नाम्ना सा रोहिणी शुभ्रा सर्व्वकामदुघा स्मृता ॥
तस्या जज्ञे शूरसेनाद्वसोरतितपोज्ज्वलात् ।
कामधेनुरिति ख्याता सर्व्वलक्षणसंयुता" ॥
"तस्या जज्ञे सुत शैलाम्बुनेरतितमोऽम्पलात्" ।
इति पुस्तकान्तरे पाठः ॥
"सा सिताभ्रप्रतीकाशा चतुर्व्वेदचतुष्पदा ।
स्तनैश्चतुर्भिर्धर्म्मार्थकामामृतवकारिणी" ॥ * ॥
तस्या गर्भे शिववाहनवृषोत्पत्तिर्यथा —
"सा स्वयम्भूशरीरात्तु कालेन महता सती ।
निर्म्माणं यौवनं कामधेनुराप मनोहरम् ॥
तां चरन्तीं मेरुपृष्ठे चारुरूपां मनोहराम् ।
ददर्श स तु वेतालः कामुकश्चाभ्यपद्यत ॥
तं कामुकन्तु वेतालं विदित्वा कामधेनुका ।
चतुर्धमात्व स्वयं भेजे तं पुत्र प्रशभक्तुतः ॥
सोऽवाप तस्या परमामामोदं शङ्करात्मजः ।
सा चापि परमं तस्मिन् मदनात् प्रतिहर्षिता ॥
तयोः प्रवृत्ते सुरते तस्या गर्भोऽभवत्तदा ।
काले प्राप्ते तु सुषुवे कामधेनुर्महावृषम् ॥
सोऽचिरेणैव कालेन समहान् वृषभोऽभवत् ।
महाककुदसंयुक्तश्चारुशृङ्गद्वयान्वितः ॥
उत्क्षिप्तविपुलस्कन्धयुगलो दीर्घवालधिः ।
ककुदेन च शृङ्गाभ्यां कर्णाभ्यां स सिताम्बवत् ॥
विचरन् ददृशे देवैः शृङ्गैरिव हिमाचलः ।
वेतालश्चकरोत्तस्य नाम भृङ्ग इति द्विजाः ! ॥
स तु भृङ्गो महाभागो समाराधयदीश्वरम् ।
सोऽपि तुष्टो वरं तस्मै ददाविष्टं महेश्वरः ॥
तमेव वाहनं चक्रे कृत्वा देवस्तु वृषभम् ।
स चिरायुश्च बलवान् पृथिवीधरणक्षमः ॥
भृङ्गो नाम महातेजाः केतुश्चाप्यभवत् पतेः ।
भृङ्गोऽभूद्वाहनो यस्माच्छङ्करस्य महात्मनः ॥
ततो भृङ्गिरिति ख्यातिं स च प्राप महेश्वरात्" ॥
इति श्रीकालिकापुराणे ८१ अध्यायः ॥ * ॥
अभीष्टप्रदा धेनुः । तद्दानफलं यथा,—
"वर्षो हरिः सर्व्व एव पवित्र
स्तत्रापि वर्षे शरदेव शुद्धा ।
तस्यां शुभः कार्त्तिको नाम मास
स्तत्रापि शुक्लो हि बभूव दर्शः ॥
तस्मिन् हरौ शयनादिरुद्धा
उरःस्थलं प्राप्य रमा समेते ।
लक्ष्मी सुराद्यापि विनिर्म्मिता वै
कामप्रदा धेनुरेव यत्र ॥
यद्गुणे यत्र दिने समस्ता
सुधेनवो भूमितले भ्रमन्ति ।
शृङ्गे न यस्मिन् कथयन्ति धीरा
दानं च्छन्दन च प्रणयो मे ॥
तस्मात्तमस्मैव च कामधेनुं
दद्यात् समुद्दिश्य तु केशवस्य ।
विधाय वै सर्व्वगुणोपपन्नां
दत्त्वा नरः कुङ्कुमतो हरेत्स ॥
सम्यक् प्रदत्तेषु गवां सहस्रे
ष्वत्रैव लोके सचितेन येषां ।
फले फलं यल्लभते मनुष्यो
न कामधेनोश्च समं द्विजेन्द्र ॥
कन्यारथानां करिवाजियुक्तैः
शते सहस्रे सततं द्विजेभ्यः ।
दत्ते फलं यल्लभते मनुष्य
स्समं तथा स्यात्तु कामधेनोः" ॥ * ॥
तद्भेदा तद्दानविधिश्च यथा,—
"नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा
निर्गता मथ्यमानेऽब्धौ जय खाल शुभप्रदम् ॥
तत्र स्नात्वा समभ्यर्च्य धेनुं पूज्य प्रयत्नतः ।
गोदानफलमाप्नोति नरो विगतकल्मषः ॥
एकादश्यामुपोष्याथ नरो दिनचतुष्टयम् ।
घृतेन स्नापयेद्विष्णुं गव्येन पयसापि वा ॥
महार्घ्यैः गोरसैर्हव्यैः पूजयेन्मधुसूदनम् ।
गन्धपुष्पैः सुनैवेद्यैर्वस्त्राभरणकुण्डलैः ॥
शङ्खासिचक्रोद्यतबाडविष्णो
गेहाजहस्तस्य तु शङ्खपाणेः ।
अर्घं प्रयच्छामि जनार्द्दनस्य
श्रिया युतस्यापि धराधरस्य ॥
श्रियः पतिं श्रीधरमेव कान्तं
श्रियाः सखाय हि श्रियोऽधिमूलम् ।
नमाम्यहं श्रीधर श्रीनिवास
समर्च्चितो मे प्रददातु कामान् ॥
एवं पूज्य विधानेन श्रिया युक्तन्तु नामभिः ।
पृथक् जागरणं कुर्य्यात् श्रिया सार्द्धं जगत्पते ॥
या देवी नागवं भेजे कृष्णं सर्व्वत्र पूजिता ।
आयातु सा मह नन्दा सुप्रीता वरदा मम ॥
याङ्गिरसश्च सा देवी सुनन्दा प्रत्युपस्थिता ।
आयातु मे गृहे सा तु सुप्रीता वरदा सती ॥
सुरभी या भरद्वाजं कामधेनुः सुकामदा ।
सदाभवद्गृहे सा च ममायातु सुरार्च्चिता ॥
सुशीला कश्यपं या तु भेजे सर्व्वत्र कामदा ।
सा मे भवतु सुप्रीता कामधेनुर्गृहे सदा ॥
सुमना या वशिष्ठन्तु समाप्य सुमुदे शुभा ।
सा मे गृहे सदायातु कामदा देवपूजिता ॥
एवं पूज्य विधानेन प्रभाते विमले शुभे ।
शुक्लाम्बरधरः स्नातः शुक्लमाल्यानुलेपनः ॥
कृतनित्यक्रियो हृष्टः कुण्डलाङ्गदभूषितः ।
अनुलिप्ते महीपृष्ठे कृष्णाजिनसमस्तृते ॥
तिलप्रस्थेन चाकीर्णे चतुरस्रविभूषिते ।
क्षौमवस्त्रान्विते शुभ्रे मध्वाज्यपात्रसंयुते ॥
शुभवत्सां समायुक्तां सर्व्वरत्नैरलङ्कृताम् ।
सुवर्णशृङ्गीं सुखुरां चतुःस्तनीं मनोरमाम् ॥
क्षीराब्धिपयसोपेतां धेनुं मन्त्रैः प्रपूजयेत् ।
या धेनुः सर्व्वदेवानां त्रयीया भावितात्मनाम् ॥
क्षीराब्धेर्निःसृता या च सा मे भवतु सुस्थिरा ।
दुग्धक्षीराभिषेकञ्च कृत्वा विष्णोः प्रयत्नतः ॥
सम्पूज्य यथान्यायं गन्धपुष्पादिभिः क्रमात् ।
गावो ममाग्रतः सन्तु गावः पार्श्वे च पृष्ठतः ॥
गावो मे हृदये नित्यं गवां मध्ये वसाम्यहम् ।
प्राङ्मुखोदङ्मुखो वापि सितदक्षोपवीतिनाम् ॥
इमां त्वं प्रतिगृह्णीष्व देवदेव । जगत्पते ॥

यथ्याकृता धेनु गोविन्द ! प्रीयतामिति ।
एवं विधाय तां दद्यात् तथा चैव प्रदक्षिणम् ।
अनुव्रजेच्च गच्छन्तं यदान्यत्ते नराधिप ! ॥
अनेन विधिना यस्तु कामधेनुं प्रयच्छति ।
सर्व्वकामसमृद्धाय स्वर्गलोकञ्च गच्छति ॥
किं दत्तं गतपार्थेन्तु राहुग्रस्ते दिवाकरे ।
तत्फलं प्राप्यते राजन् कामधेन्वा प्रदानतः" ॥
इत्याद्ये वह्निपुराणे कामधेनुप्रदाननामाध्यायः ॥*॥
अन्यत् वाल्मीकीयरामायणे बालकाण्डे ५१ सर्गे महाभारते १ । १७५ अध्याये च द्रष्टव्यम् ॥*॥

अथ कामधेनुमहादानम् ।

"अथातः सम्प्रवक्ष्यामि कामधेनुविधिं परम् ।
सर्व्वकामप्रदं नृणां महापातकनाशनम् ॥
लोकेशावाहनं तद्वद्धोमकर्म्माधिवासनम् ।
तुलापुरुषवत्कुर्य्यात् कुण्डमण्डपवेदिकम् ॥
स्वल्पे त्वेकाग्निवत् कुर्य्यात् गुरुरेकः समाहितः ।
काञ्चनस्यातिशुद्धस्य धेनुं वत्सञ्च कारयेत्" ॥
धेनुं वत्सदेयनेन धेन्वर्थोपायसदृशेनैव ते-ष्वपि वत्सकल्पनमुक्तम् ॥
"उत्तमा पलसाहस्री तदर्द्धेन तु मध्यमा ।
कनीयसी तदर्द्धेन कामधेनुः प्रकीर्त्तिता ॥
शक्तितस्त्रिशतादूर्द्ध्वमशक्तोऽपीह कारयेत् ।
वेद्यां कृष्णाजिनं न्यस्य गुडप्रस्थसमन्वितम् ॥
न्यसेदुपरि तां धेनुं महारत्नैरलङ्कृताम् ।
कुम्भाष्टकसमोपेतां नानाफलसमन्विताम्" ॥
महारत्नैर्वज्रादिभिः ॥
"तथाष्टादश धान्यानि समन्तात् परिकल्पयेत् ।
इक्षुदण्डाष्टकञ्च नानाफलसमन्वितम् ।
भाजनञ्चासनं तद्वत्ताम्रदोहनकं तथा ॥

कौशेयवस्त्रद्वयसम्प्रयुक्तां
दीपातपत्राभरणाभिरामाम् ।
सचामरां कुण्डलिनीं सघण्टां
सुविभिषा चन्द्रकांस्यपादाम्" ॥

अविन्थिका कलमाला ।

"रत्नैश्च सर्व्वैः सुरतोऽभियुक्तां
हरिद्रया पुष्पफलैरनेकैः ।
अजाजिकुस्तुम्बुरुशर्कराभि-
स्त्रिशालकापरि पटवस्त्रम्" ।

सर्व्वैः सर्व्वैरिति वज्रादिभिः नवभिः । अजाजी जीरकः । कुस्तुम्बुरु धन्याकम् ॥

"स्नानन्ततो मङ्गलवेदघोषैः
प्रदक्षिणीकृत्य सपुष्पहस्तः ।
आवाहयेत्तां गुरुधेनुमन्त्रै-
र्द्विजाय दद्यादथ दर्भपाणिः" ॥

सकलकामदुघापदकमेव गुडधेनुमन्त्रैरिति पाठदर्शनात् गुडधेनुमन्त्रा कर्दीर्ण्यो?दिमन्त्र पाठवाच कथ्यते । द्विजाय दद्यादिति वचनेनैव कामधेनुर्द्देवे देवा नाभिमन्त्य इति गम्यते ॥

"त्वं सर्व्वदेवगणमन्दिरभूता
विश्वेश्वरित्रिपथगोदधिपर्व्वतानाम् ।
त्वद्दानशस्त्रदलितावधकी?(?)

प्राप्तोऽस्मि निर्वृतिमतीव परां नमामि ।
लोके यदीप्सितफलार्थविधायिनीं त्वा-
मासाद्य को हि भवदुःखमुपैति मर्त्यः ।
संसारदुःखशमनाय यतस्व काम
त्वां कामधेनुमिति वेदविदो वदन्ति ॥
आमन्त्र्य शीलकुलरूपगुणान्विताय
विप्राय यः कनकधेनुमिमां प्रदद्यात् ।
प्राप्नोति धाम स पुरन्दरदेवजुष्टं
कन्यागणैः परिवृतः पदमिन्दुमौलेः" ॥*॥

अथ दानमात्रसमुपयातकामधेनुमहादानेष्व-तुलापुरुषविधिवृत्तं सकृद्दानमदान्दमहादानतुला पुरुषस्थापनीयवदि प्रतिमानतानाकारतुलाप्रसभा नप्रतिमावद्धिःसम्बद्धभारमधिकत्वेन सुवर्णपल-सहस्रनिर्म्मितामुत्तमां सुवर्णपलपञ्चशतनिर्म्मितां मध्यमां सुवर्णसार्द्धपञ्चशतद्वयनिर्म्मितां कनीयसीं कृत्वा पञ्चपादूर्द्ध्व यदायस्तुपात्रयुक्तं घटितामुखपृष्ठरप्रमाणकृतां सवत्सां धेनुम् । धेन्व वध्यामध्ये कृष्णाजिनं गुडप्रस्थञ्च धेन्वग्रतः स्थाप्य यथेष्टकाञ्चनघटितवत्कृतिरत्नकवाटपट्टिकायुक्ता नपुमद्वपटारौप्यस्वर्णतुरुष्ककाटिकासमालापा मरावि । धेन्वाच्छादनार्थं कौशेयवस्त्रयुगम् । धेनु पाश्वस्थापनार्थं कुम्भाष्टकाति मधुरविविधफला द्यष्टधान्येक्षुदण्डाष्टकाम्रपात्रासनताम्रदोह नदीपवातमयीं छत्रपादुकायुगानि । धेन्वग्रतः स्था पनार्थं मधुरादिद्रव्यं कर्पूरादिनानाविधपुष्प माल्यचन्दनादीनि शर्करां जीरकं धान्याकं पोषयेत् । ततस्तुलापुरुषोक्तविधानामन्यदानमपि पूर्व्वदिने गुरुलिङ्गादिसमानवाचकानुष्ठानमविधिमोत नादिवर्षं कृत्वा निवेदनद्रव्याणि घृतकुम्भाद्वय पञ्चमे हिरण्यकामधेनुवद् प्रविश्य विधिवत् सङ्कल्प कुर्य्यात् । अपरदिने च यजमानस्नान मङ्गलगीतिवादित्राद्यघोषादिसहितैर्दानार्थं गो विन्दाद्यम्बर्धनमाप्यभूमादानस्य यथोक्तकारा दिमाचमनस्वस्तिवाचनेषु तुलापुरुषवत्स्थाने हिरण्य कामधेनुवद् प्रविश्य कुर्य्यात् । ततो गुरुलिङ्ग यजमानस्नानाद्यं उपवसेत् । अपरदिने च स्नान विधानानुष्ठानपूर्व्वसमर्थितशुचिसमाचारनिवेश नाम कर्म्म यथायथ कुर्य्यात् । ततश्च सम्यगाद्य कावलाग्न कम्म तुलापुरुषप्रकरणतुल्यापानुष्ठा तव्यम् । तत्र अधिष्ठापदवतीं धेनु सपादपञ्चं पञ्चपलिलयवहमति इक्षुदण्डमाल्योदकं गडुर्थं गुडपर्वतं निधाय तदारोप्य पूर्व्वोक्तमहारत्नैरलङ्कृत्य कौशेयवस्त्रयुग्मेनाच्छाद्य धेनुवत्सौ कलशकुम्भाष्टक नानाविधफलानि अष्टादशधान्यानि इक्षुदण्डाष्टकं च ताम्रपात्रञ्च दीपमाल्यवस्त्रताम्बूलपात्रान्वितौ सुवर्णपादान्तन्वपादुकायुगान्वितां योजयेत् । धेन्वग्रतः मधुरादिकसप्तकपूरादिविविधपुष्पचन्दनादि कीरकधान्याकशर्करादीनि मधुपर्के तथाच त्रिवर्णेण कञ्चुकसन्निवेशनकरबर्णोपवेशक कर्णभरणादिधेनुविधिवन्मन्त्रैरभ्यर्च्य पूजयेत् । ततो यजमानः शुक्लाम्बरधरः पुष्पाञ्जलि गृहीत्वा पुष्पाञ्जलिपूर्व्वकं कामधेनुं पर

त्रिलोचनस्य या लक्ष्मीरित्यादि देवान्या मन्त्री मन्त्र पठित्वा कामधेनुं पुच्छग्राहिता गन्धपुष्प गुरवे दद्यात् । तत्पुरतः, अथ यथामुकगोत्रायामुकशर्म्मणे गुरवेऽमुकगोत्रायामुकदेवशर्म्मणे तुभ्य मम्प्रदानेऽमुकहिरण्यकामधेनुमहादानमहामहोपात्ति कामोऽहं एतां कृष्णाजिनस्थगुडप्रस्थोपरि उपस्करणीयसवत्सां निस्तृतवस्त्रकुम्भाष्टक धान्येक्षुदण्डकाष्टिकासनताम्रदोहनकदीपतं धेनुवत्सद्वयाच्छादितां पूर्व्वकुम्भाष्टकमालाभरणां सपाधान्यकपरिहितपुष्पपात्राक्षतकाञ्चनपात्रादनताम-स्रोतसधीदक्षपादुकायुग्मञ्चदक्षिणान्वितां निधकुम्भसमन्वितामक्षयस्वर्गकामनयाहं ददे । विप्रानकसहितां सपादां हिरण्यकामधेनुं ददे । गुरुः स्वस्त्युक्ता सावित्रीं पठित्वा हिरण्यकामधेनुरियं विष्णुदैवतेति उक्त्वा यथा शाक्तं कामस्तुतिं पठेत् । ततो गुरुर्नियुक्तो दक्षिणान्दद्यात् । ततो यज्ञ कृतिश्रद्धानन्दपूर्व्वकमिमां उत्तमर्त्विगभ्यः पुनर्नियताधि च इमानि ददे । स्वस्तीति गायत्र्या मुचः । गुरवस्तु कलश मार्दं धेनुपृष्ठे प्रक्षीपात् । ततो यजमानस्तुला पुरुषवत्पात्रकेभ्यो दक्षिणां दत्त्वा दीनानाथान्धे भ्योऽर्पयित्वा शाक्तानामनय कृत्वा स्वयं गुरवे कामधेनुं प्रतिपादयेत् । पञ्चगव्याद्यनं यथाशक्ति स्वस्त्ययनदानदाने तु गुरवे सम्प्रोक्तविधिना सर्व्वं समाप्तवत् कुर्य्यात् । इति हिरण्यकाम धेनुमहादानं समाप्तम् । इति दानसागरः ॥

कामध्वंसी, [न्] पुं, (कामं कन्दर्पं ध्वंसयतीति । काम + ध्वन्स + णिच् + णिनिः ।) शिवः । इति ह लायुधः ॥

कामन, त्रि, (कामयते इति । कम् + णिङ् + युच् ।) कामुकः । इत्यमरः । ३ । १ । २० ॥

कामना, स्त्री, (कम + कमुदादेर्णिङिति णिङ्भावे युच् टाप् च ।) इच्छा । इति हलायुधः ॥

कामन्धमी, [न्] पुं, (कामं यथेष्टं धमति । काम + ध्मा + णिनिः । काम्यन्धाम् धमादेशः । निपातनात् मुमि कप्पुः ।) कांस्यकारः । इति जटाधरः ॥

कामपत्नी, स्त्री, (कामस्य पत्नी ।) रतिः । इति शब्दरत्नावली ॥

कामपाल, पुं, (कामान् पालयति । काम + पाल + अण् ।) बलदेवः । इत्यमरः । १ । १ । २४ ॥

कामप्रद, पुं, (कामं कामकान्तिमेवं प्रददाति । काम + प्र + दा + कः ।) रतिबन्धविशेषः । यथा,—
"यो नारी करतलयोर्भुवी स्थिता क्लिष्टं पश्चात् भवेत् ।
कामदेव् कामुकः रीता यत्र कामप्रदो हि सः" ॥
इति रतिमञ्जरी । (कामनां अभीष्टं प्रद दातीति दाता । विष्णुः । यथा महाभारते । १३ । १४९ । ६५ ।
"कामहा कामकृत् कान्तः कामः कामप्रदः प्रभुः" ॥)

कामबन्धु, पुं (कर्म्मे ८८८ वसन्तः ।) महाराज प्रदत्तः । इति शब्दरत्नावली ॥

कामम्, अव्य, (कमि + णिङ् + अम् ।) स्वाच्छन्द्यानुमतौ । इत्यमरः । (३ । ४ । ३) (यथा, शाकुन्तले ३ ५ ।)

"महामाया काम नरपतिरभिन्नस्थितिरसौ
न कश्चिद्वर्णानामपथमपकृष्टोऽपि भजते"।)
अनुमतिः। प्रकामम्। अव्ययम्। अनुगमनम्।
इति मेदिनीकरहेमचन्द्रौ।

काममहः, पुं, (कामस्य महः उत्सवो यत्र।) चैत्री पूर्णिमा। इति त्रिकाण्डशेषः।

कामयिता, [ऋ] त्रि, (कामयते। कम्+णिच्+तृच्।) कामुकः। इत्यमरः। ३।१।२४।

कामरूपः, पुं, (मूलप्रकृतिर्भगवती कामरूपिणी सती यत्र देशे विराजमाना स देशस्तन्नाम्ना एव उच्यते।) स्वनामख्यातदेशः। तत्पर्य्यायः। प्राग्ज्योतिषः २। इति त्रिकाण्डशेषः। तत्र कामगिरौ योनिपीठे कामाख्या देवी वर्त्तते। यथा।
"योनिपीठं कामगिरौ कामाख्या तत्र देवता"।
"सर्व्वत्र विरला चाहं कामरूपे गृहे गृहे"।
इति तन्त्रचूडामणौ पीठमाला। (अयं हि गणेशगिरिशिखरस्थो देशः। यदुक्तं तन्त्रे।
"कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतम्।
कामरूपाभिधो देशो गणेशगिरिमूर्द्धनि"।
कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वत यावत्।
अयं खलु वङ्गदेशस्य ईशानभागे आसामप्रदेशस्य पश्चिमभागे वर्त्तते।)

कामरूपः, त्रि, (काम काम्यं मनोहरं रूपं यस्य।) मनोज्ञरूपः। स्वेच्छारूपः। (यथा महाभारते। १। सम्भवपर्व्वणि ९३।६।
"कामरूपः कामगमः कामवीर्य्यो विहङ्गमः"।)
यथा च। मेघदूते ६।
"जातं वंशे भुवनविदिते पुष्करावर्त्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः"।

कामरूपिणी, स्त्री, (काम मनोज्ञं रूपं अस्त्यस्याः। कामरूप+इनि+ङीप्।) अश्वगन्धावृक्षः। इति राजनिर्घण्टः।

कामरूपी, [न्] पुं, (काम कमनीयं रूपमस्यास्तीति। कामरूप+इनि।) विद्याधरः। इति त्रिकाण्डशेषः। जाहकजन्तुः। इति राजनिर्घण्टः। (कामेन स्वेच्छया रूपं धार्य्यत्वेनास्त्यस्य इनि।) मनोज्ञरूपिणि स्वेच्छारूपिणि च त्रि। यथा,—
"सर्व्वमासु विचेतव्य हरिभिः कामरूपिभिः"।
इति रामायणम्।

कामरेखा, स्त्री, (कामानां कामयायायां रेखा चिह्नमत्र राजिर्वा यत्र।) वेश्या। इति शब्दमाला।

कामलः, पुं, स्त्री, (कम+णिच्+कलच्।) रोगविशेषः। काबोल कामला इति च प्रसिद्धिः। इति मेदिनी। तस्य निदानसम्प्राप्ती यथा —
"पाण्डुरोगी च योऽत्यर्थं पित्तलानि निषेवते।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते"।
तस्य लक्षणम्।
"हारिद्रनेत्रः सुभृशं हारिद्रत्वङ्नखाननः।
रक्तपीतशकृन्मूत्रो भेकवर्णो हतेन्द्रियः।
दाहाविपाकदौर्ब्बल्यसदनारुचिकर्षितः।
कामला बहुपित्तैषा कोष्ठशाखाश्रया मता।
कालान्तरात् खरीभूता कृच्छ्रा स्यात्कुम्भकामला"।

तस्यारिष्टलक्षणम्।
"कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः।
सरक्ताक्षिमुखच्छर्द्दिर्विण्मूत्रो यश्च ताम्यति।
दाहारुचितृडानाहतन्द्रामोहसमन्वितः।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली"।
इति माधवकरः।

कामलः, पु, (कामयते अभीष्टमस्मिन्। काम+अधिकरणे+कलच्।) वसन्तकालः। मरुभूमिः। (काम लाति गृह्णातीति। काम+ला+क।) कामुके त्रि इति मेदिनी।

कामलता, स्त्री, (कामस्य लतेव।) शिश्नः। इति हेमचन्द्रः।

कामला, स्त्री पु, (कामल+टाप्।) स्वनामख्यातरोगः। अथ पाण्डुरोगभेदस्य कामलाया निदानपूर्व्विका सम्प्राप्तिमाह।
"पाण्डुरोगी तु योऽत्यर्थं पित्तलानि निषेवते।
तस्य पित्तमसृङ्मांसं दग्ध्वा रोगाय कल्पते"।
पित्त कर्त्तृ। दग्ध्वा सदूष्य। रोगाय कामलाख्याय। पाण्डुरोगिणः स्वातिशयितपित्तलसेवया कामला भवति। नायं नियमः। किन्तु कामला स्वतन्त्रापि भवति। यथा राजयक्ष्मा कासादुपेक्षिताद्भवति। नायं नियमः। किन्तु राजयक्ष्मा स्वतन्त्रापि भवति। तद्वदेषापि।०।
कामलाया लक्षणमाह।
"हारिद्रनेत्रः सुभृशं हारिद्रत्वङ्नखाननः।
पीतरक्तशकृन्मूत्रो भेकवर्णो हतेन्द्रियः।
दाहाविपाकदौर्ब्बल्यसदनारुचिकर्षितः"।
हारिद्र हरिद्रावर्णम्। पीतरक्तशकृन्मूत्रः। पीते रक्ते वा शकृन्मूत्रे यस्य सः। भेकवर्णः स्वर्द्ध्रुकवर्णः। तस्या भेदावाह। "कामला बहुपित्तैषा कोष्ठशाखाश्रया मता"। एषा कोष्ठाश्रया अपरा शाखाश्रया। तत्र कोष्ठकामलामाह। "कालान्तरात् खरीभूता कृच्छ्रा स्यात् कुम्भकामला"। कालान्तरात् खरीभूता अतिरूक्षीभूतसर्व्वधातुः। कुम्भकामला कोष्ठकामलेत्यर्थः। सा कृच्छ्रा कष्टसाध्या।०। कुम्भकामलिनोऽरिष्टलक्षणमाह।
"छर्द्यरोचकहृल्लासज्वरक्लमनिपीडितः।
नश्यति श्वासकासार्त्तो विड्भेदी कुम्भकामली"।
उभयोरपि कामलयोररिष्टलक्षणमाह।
"कृष्णपीतशकृन्मूत्रो भृशं शूनश्च मानवः।
सरक्ताक्षिमुखच्छर्द्दिर्विण्मूत्रो यश्च ताम्यति।
दाहारुचितृडानाहतन्द्रामोहसमन्वितः।
नष्टाग्निसंज्ञः क्षिप्रं हि कामलावान् विपद्यते"।०।
अथ कामलाचिकित्सा।
"त्रिफलाया गुडूच्या वा दार्व्या निम्बस्य वा रसः।
प्रातर्म्माक्षिकसंयुक्तः शीतलः कामलापहः।
अञ्जने कामलार्त्तानां द्रोणीपुष्पीरसो हितः।
गुडूचीपत्रकल्कं वा पिबेत्तक्रेण कामली।
धात्रीलोहरजोव्योषनिशाक्षौद्राज्यशर्कराः।
लीढ़ा निवारयन्त्याशु कामलामुद्धतामपि।
कुम्भाख्यकामलायान्तु हितः कार्म्मिको विधिः।
गोमूत्रेण पिबेत् कुम्भकामलावान् शिलाजतु।
दग्ध्वाक्षकाष्ठैर्मलमायसन्तु
गोमूत्रनिर्व्वापितमष्टवारान्।
विचूर्ण्य लीढ़ं मधुनाचिरेण
कुम्भाह्वय पाण्डुगदं निहन्ति"।
इति भावप्रकाशः।०।
"मरीचतिलपुष्पाभ्यामञ्जनं कामलापहम्"।
इति गारुडे १८७ अध्यायः।
"तण्डुलीयकगोक्षुरमूलं पीतं पयोऽन्वितम्।
कामलादिहरं प्रोक्तं मूत्ररोगहरं तथा"।
इति तत्रैव १८८ अध्यायः।

कामवती, स्त्री, (कामः कमनीयता अस्त्यस्याः। काम+मतुप्। मस्य वः। ङीप् च।) दारुहरिद्रा। इति राजनिर्घण्टः। (कामः कन्दर्पभावः अस्त्यस्याः। मैथुनानुरागयुक्ता स्त्री। यथा महाभारते १। शान्तनूपाख्याने ९७।५।
'त्यागं कामवतीनां हि स्त्रीणां सद्भिर्विगर्हितं"।)

कामवल्लभ, पु, (कामं कमनीयं स्पृहणीयं इत्यर्थः अत एव वल्लभं प्रियं। यद्वा कामस्य कन्दर्पस्य वल्लभः। कन्दर्पप्रियवसन्तकालोद्भवत्वात् तथात्वम्।) आम्रः। इति राजनिर्घण्टः।

कामवल्लभा, स्त्री, (कामस्य कन्दर्पस्य वल्लभा प्रिया। कामोद्दीपकत्वात् तथात्वम्।) ज्योत्स्ना। इति राजनिर्घण्टः।

कामवृद्धि, पुं, (कामस्य वृद्धिर्यस्मात्।) क्षुपविशेषः। कामज इति कर्णाटके प्रसिद्धः। तत्पर्य्यायः। स्मरवृद्धिसमः २ मनोजवृद्धिः ३ मदनायुधः ४ कन्दर्पजीवः ५ जितेन्द्रियाह्वः ६ कामजीवः ७ जीवसञ्ज्ञः ८। अस्य गुणाः। मधुरत्वम्। बलवर्द्धनत्वम्। कामवृद्धिविधायित्वम्। सर्व्वेन्द्रियवृद्धिकरत्वं च। इति राजनिर्घण्टः।

कामवृन्ता, स्त्री, (काम कमनीयं वृन्तं यस्याः।) पाटलावृक्षः। इति शब्दमाला।

कामवृक्षः, पुं, (कामं यथेष्टं बीजाद्यनपेक्षतया उत्पन्नो वृक्षः।) वन्दाकः। इति राजनिर्घण्टः।

कामशरः, पुं, (कामस्य कन्दर्पस्य शर इव कामोद्दीपकत्वात्।) आम्रः। इति राजनिर्घण्टः।

कामसखः, पुं (कामस्य सखा। "राजाहःसखिभ्यष्टच्"। ५।४।९१। इति टच्।) वसन्तकालः। इति राजनिर्घण्टः।

कामसुतः, पुं, (कामस्य सुतः।) अनिरुद्धः। इति हेमचन्द्रः।

कामाख्या, स्त्री, (कामदो भाजनां कामं पूरयति यद्वा मह्येः साधकैः काम्यतेऽसौ इति कामा। कामा आख्या यस्याः।) देवीविशेषः। तन्नामकारणं यथा।

श्रीभगवानुवाच।
"कामार्थमागता यस्मान्मया सार्द्धं महागिरौ।
कामाख्या प्रोच्यते देवी नीलकूटे रहोगता।
कामदा कामिनी कामा कान्ता कामाङ्गदायिनी।
कामाङ्गनाशिनी यस्मात् कामाख्या तेन चोच्यते"।०।
तारीकल्पस्य यथा,—
"अथ वक्ष्ये [illegible] [illegible] प्रावित्रन्दने।

कामाख्या

यच्छ्रौ दक्षतनया मायार्थेऽह बभूव ताम् ॥
सा मेऽभूत् प्रियपत्नी भार्य्यं प्रदाय तमर्थं पितुः ।
अनिष्टकारी सपितुः स्याः प्राणांस्तत्यजे तदा स्वयम् ।
ततो यमे गतवांस्तु स च यत्र चराचरम् ।
न सा नापि सती यत्र तदन्विष्टाप्यभूत्तु सा ॥
ततो मोहसमापन्नस्तामादाय महासतीम् ।
भ्रान्तः पीठवरं तत्तु भ्रममाण इतस्ततः ॥
तस्याश्चाङ्गानि पर्य्यायात् पतितानि यतो यतः ।
तत्तत् पुण्यतमं जातं सर्व्वसिद्धिप्रभावत ॥
तस्मिन् कुब्जिकापीठे सत्याश्च योनिमण्डलम् ।
पतितं तत्र सा देवी महामाया व्यलीयत ॥
लीनायां योगनिद्रायां मयि पर्व्वतरूपिणि ।
स नीलवर्णः शैलोऽभूत् पतिते योनिमण्डले ॥
स तु शैलो महातुङ्गः पातालतलमाविशत् ।
तस्या भारवशादार्द्रं ततः सुद्विजोऽभ्यधात् ॥
स तु पूर्व्वं ब्रह्मशिलाभिन्ना धनुश्चतुर्युतः ।
शैलरूपोऽभवत्तेन शैलरूपेण मामधात् ॥
ब्रह्मा पञ्चरूपेण मयि पर्व्वतरूपिणि ।
तदास्थोऽधोऽगमत्तद्वत् मायाकान्तो मायया विभुः ॥
ततो वराहरूपस्थो मयि सां च तु माधवः ।
शैलरूपं शैलरूपं धनु समुपयत्नमे ॥
सोऽप्यधोऽप्यागमत् यत्र तत्र पञ्चरूपिधा ।
आराध्य देवीं यदिनौ स्थितो भुवि नियातकः ॥
ब्रह्म शैल योन्याख्यां तुङ्गाख्योद्भिन्नकदम् ।
तदाख्याना महादेवा सर्व्वमेव च्युतोऽगतम् ॥
कोटिमात्रे स्थित तुङ्गे पञ्च सप्तितमस्य तु ।
अस्या समस्तजगतां प्रसूतिः सा सतानता ॥
अष्टविधाद्रिर्वेदैर्दैवता सा महती प्रभुः ।
तत्र पूर्व्वा महादेव ह्नेव दृश्यते सुधी ॥
मद्यधारी शैलस्य नील दृश्यते तथा ।
स तु मध्यगत शैलश्चिकोणोद्रूपलाकृतिः ॥
विमानमानः सानमध्ये सपरराशयो ।
वराह शैलरूपो स स शिव इति कथ्यते ॥
स सर्व्वेषां स्थित पश्चात् दीर्घः सर्व्वेश्च एव तु ।
शैलाख्यो योऽभवत् कूर्म्मः शैलरूपो महाद्युतिः ॥
मणिकूटः स नाम्ना तु नामतो देवैर्विश्रुतः ।
योऽभ्यन्तरः शैलस्य मायया समवस्थितः ॥
गणिकाचतुर्वक्त्रोऽसौ ब्रह्मा माधवप्रिया ।
महामायाभिरक्षत देवाभौ नमस्कृत ॥
स रत्नमाहेन्द्रो माया ब्रह्मरा प्रहृदयिद ।
वराहरूपमथवे यत्र शिवो महाप्रभो ॥
स्थिता तत्र चण्डा द्वामनाप हरि स्तव ।
मद्यद्भिर्नृत्यवाहाम्य पूर्व्वधारी तु माधवः ॥
तत्र सम्भवोऽहं स तु महाचक्रम् ।
सर्व्वं प्रयान्ते पीठे कुब्जिकापीठमध्यके ॥
नीलकूटे महा तत्र देवी रहति सर्व्विदा ।
तत्रान्वे वरिष्ठ तत्र विशीर्णे योनिमण्डलम् ॥
शिलामयमत्तल शैले कामाख्या तत्र संस्थिता ।
स्पृष्ट्वा तां शिलां मर्त्यो ह्यमरत्वमवाप्नुयात् ॥
अमरो ब्रह्मसदनं स्पृष्टो मोक्षमवाप्नुयात् ।
तस्याः शिलायाः माहात्म्यं तत्र कामेश्वरी स्थिता ॥
सम्पूर्व्वं सहदशिलां तु यत्र यया मि ततम् ।

कामाख्या

सा चापि प्रत्यहं तत्र पद्मपुष्पधरा भवेत् ॥
भोगार्थं सर्व्वलोकानां तस्मादि प्रीतये शिवा ।
अत्र पद्मपुरेणापि यत्र भागे व्यवस्थितः ॥
ऐशान्ये पूर्व्वभागस्य कामेश्वरा प्रधानतः ।
ऐशान्यां वै मनुजशो दुघोरस्त्वन्य सन्निधौ ॥
सद्योजातोऽप्य वायव्यां वामदेवस्तु नैरृत ।
देव्याचापि तत्सेव्य पञ्चरूपाणि भैरव ॥
अस्तु वै तान् गुह्यानि देवैरपि महेश हि ।
कामाख्या त्रिपुरा चैव तथा कामेश्वरी शिवा ॥
शारदाथ महोत्साहा कामरूपगुणैर्युता ।
मयि लिङ्गत्वमापन्ने शिलाया योनिमण्डले ॥
सर्व्वे शिवाभवत्तत्र शैलरूपाच्च निर्म्मला ।
यदाह निजरूपेण रेमे वै चाहं कामया ॥
शिवाशरीरतिष्ठ्यवाकाम्य सम्यक् देवता ।
शिवाजगत्प्रतिष्ठया श्रीभे शैलं व्यवस्थिता ॥
रक्तो च शालरूपेण शिव रहयि संयुता ।
ब्रह्माविष्णुरहाश्चान्ये दिक्पालाः सर्व्व एव ते ॥
अन्येऽप्यत्र स्थिता देवाः सानुकूलाः सदा मयि ।
उपासितुं सदा देवीं कामाख्यां कामरूपिणीम् ॥
पीठशैलस्थिकोणस्तु मध्ये शिवः सदाशिवः ।
तन्मध्ये महत्पत्र चाव महिमालिङ्गमव्ययम् ॥
गुहा मनोभवा तत्र मनोभवविनिर्म्मिता ।
योनिमण्डलं शिलायान्तु शिलारूपा मनोहरा ॥
विलसिमाचविलोला एकविंशाङ्गुलायता ।
सन्धिविस्तीर्णायमत्सर्व्वैकानुगामिनी ॥
सिन्दूरकुङ्कुमारक्ता सर्व्वकामप्रदायिनी ।
तस्यां योनौ रक्तरूपा नित्यं तिष्ठति कामिनी ॥
महामाया जगद्धात्री मूलभूता सनातनी ।
तत्राष्टौ योगिन्योनित्यं मूलभूताः सनातनी ॥
पूर्व्वांशा चैकमलाख्या स्थिता देवा समन्ततः ।
तासान्तु पीठनामानि शृणु चैकम भैरव ॥
गुप्तकामा च श्रीकामा तथा च विन्ध्यवासिनी ।
कोटीश्वरी धनस्था तु पादतुर्गा तथाऽपरा ॥
दीर्घेश्वरी तथा देव प्रकटा भुवनेश्वरी ।
सदोक्तिका पीठनाम्ना स्याता षष्ठी च देवता ॥
मत्स्योदर्यापि चैकम् … भैरव ॥
स्थितापि माया योनाख्या … मादिहयन्तरा ॥
विन्ध्यस्य तीरे तस्या च नाम्ना कमल इत्युत ।
कामुकानाम् … कामाख्यान्तर्नलिताः ॥
… करतारी देवी देवाः … व्यवस्थिते ।
अदितिनाम्नाऽक्षशाकम्भरी तु वरुणी ॥
महाद्रव पूर्व्वभागे तस्य शैलाग्र संस्थिता ।
स्थिता स नाम्ना विख्यातो चापि देवाधिप सम ॥
… निर्म्मिते …
भूताग्रधर्म्मवाहाशैले स्थिते देवा …
वराहः पादपादौ … ।
…
तन्मध्ये महत्पुत्र … ।
…
…
… ॥
… ।

कामाख्या

तथैवास्तकुब्जान्तु सुधामगमदूरितम् ।
मम प्रियायनिर्द्देव प्रापित सह निस्तरी ।
वामदेवाङ्कद शीर्षे श्रीकामेश्वरदक्षकम् ॥
कामकूट महाद्रुष्ट स्याताग्रे व्यवस्थितम् ।
भैरवाचरमादक्ष पश्च मध्यम सिद्धकामदा ॥
पीठे चतुष्कदाम द्वावाख्यपादक तु तत् ।
तस्यावह शैलपाती गुप्तकामाकृदा तु सा ॥
गुप्तकुण्डस्य मध्यस्था कामेशशालि सङ्गता ।
कामेश्वरदिग्नाम्ना कामाख्याखण्डिता सदा ॥
पूर्व्वभागेन सम्भूता योनेस्तु परमात्मनः ।
कामकामाख्ययोर्म्मध्ये कामराजिश्वरीस्थिता ॥
पीठे दोर्घेश्वरी नाम्ना सोमाभागे प्रवर्त्तिका ।
कामाख्या प्रतरमान्ते कुण्डाख्या नाम योगिनी ॥
पीठे कोटीश्वरी नाम्ना योनिरूपेण संस्थिता ।
दक्षाघोराख्य शीर्षे तत् कामाख्याद्दक्षिणे ॥
पीठे भैरवनाम्ना तु सौधले परमार्थिनि ।
वायुपार्श्वे भैरवी नाम्ना भैरवाख्यव्यवस्थिता ॥
नादिका कामदा मध्ये चण्डमुण्डामाहिनी ।
कामाभैरवयोर्म्मध्ये तत्र देवी सुरायता ॥
विनाद सर्व्वभूतानां देवानां प्रीतये स्थिता ।
सद्योजाताख्य शीर्षे पीठे स्वामावबेश्वरम् ॥
भैरवाख्ये ततो तु स्थित दक्षिणेऽविवम् ।
विद्धि तथैव कुमाख्या नादिका योगरूपिणीम् ॥
सिद्धकामेश्वरी नाम्ना ख्याता देवेषु निष्कला ।
अघोरेश्वर सम्भाद्यो कन्यकाच तु वंसिन ॥
आख्याविव कल्पदः कल्पवृक्षोपसमन्विता ।
पीठे तु विद्याद्धान्या तत्र गङ्गा समुद्भवा ॥
कामाख्यकाद निकटे मम प्रीतिविवर्द्धये ।
कुण्डराजस्तु तत् येन पीठे स्वामाभकरम् ॥
शैलाख्यो तत्पुरुषाख्य मम शीर्षे व्यवस्थितम् ।
भुवनेश्वरनाम्ना तु पीठे स्यातय भैरव ॥
मकर गुप्तमहत् पुण्यमान्द्यमकम् ।
तस्याग्रे तु सदशि शिवाख्यपेण संस्थिता ॥
कामधेनुरिति ख्याता पीठे कामप्रदायिनी ।
योऽसौ तरभस्ततस्य मध्यस्थपा प्रचक्षते ॥
महाभैरवनामभूत् कोटिलिङ्गात्मकस्तु सः ।
मूर्त्तिभिः सर्व्वभिः पञ्चभागश्च समाश्रिता ॥
अत्र यथार्तनिर्दिया भैरवाख्य स्थितोऽसदे ।
महागौरी तु या देवी दाक्षिणी विख्यातिका ॥
सा ब्रह्मदक्षे यानि स्थितरूपेव चाङ्गता ।
कालीतत्त्वसमन्वया नाम्ना सा पुनर्श्वरी ॥
तत्र ब्रह्मा तु कल्पो मेऽद्य सम्पञ्चविध ।
कल्पवृक्षी तु स्याता नाम्ना सा तपराश्रिता ॥
कामधेनोरधुना पूर्व्वभागे महेश्वरी ।
श्रीकामाख्या योनिरूपा कलिका सानुयोगिनी ॥
वर्द्धमानं विन्दु तां नाम्ना सर्व्वकामप्रदा शुभम् ।
योनिनी चक्रात्मना पीठेऽभूत् विन्ध्यवासिनी ॥
देवानी सम्भवा सर्व्वपीठेऽस्मदेवमयनी ।
कामाख्या प्रियनामा पादमूर्त्तिर्महते ॥
भैरवा नीलकेशाद्य इन्द्रे सा संस्थिता शिवा ।
देवानां सर्व्वलोक च तु सर्व्वकामप्रदा ॥
कीर्त्तित इतिवृत्ताति चतुर्भुज पीठमध्ये" ॥ ।

श्रीभैरव उवाच ।
"इति तस्य वचः श्रुत्वा शम्भोरमिततेजसः ।
भैरवस्तु पप्रच्छ वेतालोऽपि समुत्सुकः" ॥
श्रीवेतालभैरवावूचतुः ।
"श्रुतं पीठक्रमस्तात देव्याः पूजाक्रमस्तथा ।
श्रोतुमिच्छामि मूर्त्तीनां पञ्चानामपि शङ्कर ! ॥
रूपाणि पञ्चमूर्त्तीनां मन्त्रांश्च समन्ततः ।
तथा यन्त्राणि तन्त्राणि वद नो वृषभध्वज ।" ॥
ईश्वर उवाच ।
"शृणु वक्ष्यामि वेताल मन्त्रं तन्त्रं पृथक् पृथक् ।
कामाख्यापञ्चमूर्त्तीनां रूपं कल्पञ्च भैरव ! ॥
कामस्य काममध्यस्थं कामदेवपुटीकृतम् ।
कामेन कामयेत् कामी कामं कामे नियोजयेत् ॥
क्येऽन्तु व्यञ्जनं मध्ये न परं शान्त उच्यते ।
प्रथमं क्रमतः कुर्य्यात् तत्सवर्णं सुधामयम् ॥
प्रजापतिस्तथा शक्रबीजसस्वादिसंयुतम् ।
चन्द्रार्द्धसहितं बीजं कामाख्यायाः प्रपद्यते ॥
इदं धर्म्मप्रदं काममोक्षार्थानां प्रदायकम् ।
इदं रहस्यं परममन्यच्च तु सुदुर्लभम् ॥
श्रोत्रेणेदं य शृणुयाद्वक्त्रज्ञानरोत्तम ।
स कामानखिलान् प्राप्य शिवलोके महीयते ॥*॥
"सुललितकलितसारं देवकण्ठौघहारं
सकलकलुषहारि श्रीधरामन्त्रकारि ।
सुनयशुभयशोभिर्य्योजयेद्यस्तु गीभि-
स्त्वदिह शिवसमस्तं विघ्नधर्म्माङ्किलास्त्रम् ॥
गदनकलितकारि ध्यानिनां दत्तपारि
प्रणयसुनयसख्यं दैवमत्यादिकस्थम् ।
परमपदविशीर्षे शुद्धसौभाग्यशीर्ष
स्तवं शिवपदरूपं कामदेव्याः स्वरूपम् ॥
अवयवगतमाचाम्मार्गित यस्य नाम
प्रभवति बहुभूत्यै नीतिमार्गैकधाम ।
सुरगणगणमध्या कुण्डली यस्य शक्ति-
स्तदिह परमरूपं चिन्तनीयं सतीशैः ॥
रविशशियुतकर्णा कुङ्कुमापीतवर्णा
मणिकनकविचित्रा लोलकर्णा त्रिनेत्रा ।
अभयवरदहस्ता साक्षसूत्रप्रहस्ता
प्रणतसुरनरेशा सिद्धकामेश्वरी सा ॥
अरुणकमलसंस्था रक्तपद्मासनस्था
नवतरुणशरीरा मुक्तकेशी सुहारा ।
शवहृदि पृथुतुङ्गस्तन्ययुग्मा मनोज्ञा
शिशुरविसमवस्त्रा सिद्धकामेश्वरी सा ॥
विपुलविभवदात्री स्मेरवक्त्रा सुकेशी
दलितकरकदन्ता सामिचन्द्रावतंसा ।
मनसिजदृशदिस्था योनिमुद्रां लसन्ती
पवनगगनसक्ता संश्रुतस्थानभागा ॥
चिन्त्या चैवं दीप्यदग्निप्रकाशा
धर्म्मार्थाद्यैः साधिता वाञ्छितार्थैः ।
कल्पं तन्त्रं प्रोगिदं सम्यगर्थे
वेतालश्च भैरवश्च प्रतिष्ठम् ।
तस्मिन्नाद्ये तन्त्रं विद्धि पश्चात्
कामे तद्वै चन्द्रे पुष्पमध्ये ।
तत्पर्य्यांशे वेष्टने पूर्व्वमुक्तो
देवीतन्त्रे सोऽत्र पूर्व्वं विधेयः" ॥
इति श्रीकालिकापुराणे ६१ अध्यायः ॥

कामाग्निसन्दीपनमोदक, क्ली, (सन्दीप्यते अनेनेति सन्दीपनम् । कामाग्नेः सन्दीपनमुद्दीपकम् । कामाग्निसन्दीपनञ्च तत् मोदकञ्चेति ।) औषधविशेषः । यथा,—
"कर्षो रसो गन्धकमभ्रकञ्च
द्विक्षारचित्रे लवणानि पञ्च ।
शटी यमानीद्वयजीरकाणि
तालीशपत्राण्यपरं द्विकर्षम् ॥
जीरं चतुर्जातलवङ्गजाती-
फलञ्च कर्षत्रयमेवमन्यत् ।
सदेवदारु कटुकत्रयञ्च
तथा चतुःकर्षमितं निबोध ॥
धन्याकयष्टीमधुककणा च
कर्षाः पृथक् पञ्च वरी विदारी ।
वरीभकर्णाभनवात्मगुप्ता
बीजं तथा गोक्षुरबीजयुक्तम् ॥
सबीजपत्रेन्द्रजसमानं
समा सिता क्षौद्रघृतञ्च तुल्यम् ।
कर्षैकमिन्दोरयमोदकं तत्
कामाग्निसन्दीपनमेतदुक्तम्" ॥ * ॥
'क्षणं तदपरतरं रतं न दृष्टं
येन नियोज्य मनुजः प्रमदाशतञ्च ।
गच्छन् लिङ्गशिथिलत्वमवाप्नुयाच्च
नागाधिपं विजयते बलतः प्रमत्तः ॥
कान्त्या जलागमनमपि स्वरतो मयूरान्
तार्क्ष्यं च येन नयनेन महाविहङ्गम् ।
वातानशीतिमथ पित्तगदं समस्तं
श्लेष्मोत्थविंशतिरुजं परमग्निमान्द्यम् ॥
दुर्नामकामलभगन्दरपाण्डुरोग-
मेहातिसारक्रिमिहृद्ग्रहणीप्रदोषान् ।
कासज्वरश्वसनपीनसपार्श्वशूल-
शूलाम्लपित्तसहितांश्चिरजान् समस्तान् ॥
हत्वा गदानपि च तत् पुनरपत्यकारि
सम्यक्पुमर्थमथ सर्व्वसुखप्रदायि ।
वृष्यं बलीपलितहारि रसायनं स्यात्
श्रीमूलदेवकथितं परमं प्रशस्तम्" ॥
इति भैषज्यरत्नावली ॥

कामाङ्कुश, पुं, (कामे कामोद्दीपने अङ्कुश इव । नखाघातेन कामोद्दीपनादस्य तथात्वम् ।) नखः । इति त्रिकाण्डशेषः ॥ (कामस्य अङ्कुश इव ।) शिश्नः । इति जटाधरः ॥

कामाङ्ग, पुं, (कामं कामोद्दीपकं अङ्गं मुकुलं यस्य ।) आम्रवृक्षः । इति जटाधरः ॥

कामातुर, त्रि, (कामेन आतुरः ।) कामार्त्तः । यथा ।
"दर्पोत्थितासवमुष्कितो विगत कामातुरो कान्त-मम्" ॥ इति नवरत्नमध्ये धन्वन्तरिः ॥

कामान्ध, पुं, (कामेन अन्धयति निजध्वनिजनितमदनोद्दीपनेन अन्धतां करोतीति । काम+अन्ध+णिच्+अच् ।) कोकिलः । इति राजनिर्घण्टः ॥ (कामेन अन्धः । स्मरान्धः । कामवेगेन कर्त्तव्यताज्ञानशून्यः ॥)

कामान्धा, स्त्री, (कामं यथेष्टं अन्धयति । अन्ध+णिच्+अच्+टाप् ।) कस्तूरी । इति राजनिर्घण्टः ॥ (स्मरेण अन्धा । कर्त्तव्यज्ञानशून्या । प्रगल्भानायिकाविशेषः । यथा, साहित्यदर्पणे ३ । ७ ।
"स्मरान्धा गाढतारुण्या समस्तरतकोविदा ।
भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायका" ॥
अस्या उदाहरणं यथा तत्रैव ।
"धन्यासि या कथयसि प्रियसङ्गमेऽपि
विश्रब्धचाटुकशतानि रतान्तरेषु ।
नीवीं प्रति प्रणिहिते तु करे प्रियेण
सख्यः शपामि यदि किञ्चिदपि स्मरामि" ॥)

कामायु [स्] पुं, (कामं यथेष्टं आयुर्यस्य ।) गरुडः । इति त्रिकाण्डशेषः ॥

कामायुध, पुं, (कामस्य आयुधमिव मुकुले आकारो अस्ति अस्य । अर्श आदित्वात् अच् ।) महाराजचूतः । आम्रः । इति राजनिर्घण्टः ॥ कामदेवास्त्रे क्ली ॥

कामारण्य क्ली (कामं मनोहरं अरण्यम् ।) मनोज्ञवनम् । इति शब्दमाला ॥
(कामस्य अरण्यमिति विग्रहे कन्दर्पवनम् ॥)

कामारि, पुं, (कामस्य अरिः ।) विटमाक्षिकधातुः । इति हेमचन्द्रः ॥ महादेवः कन्दर्पनाशकत्वात् ॥

कामार्त्त, त्रि, (कामेन ऋतः ।) कामपीडितः । कामातुरः । यथा, मेघदूते ५ ।
"कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु" ॥

कामालु, पुं, (कामं यथेष्टं अलति पुष्पविकाशेन पर्य्याप्नोतीति । अल पर्य्याप्तौ+उण् ।) रक्तकाञ्चनवृक्षः । इति शब्दचन्द्रिका ॥

कामावसायिता, स्त्री, (कामेन स्वेच्छया अवसाययति सत्त्वानि अविद्यावासनाजालानि । काम+अव+सो+णिच् णिनि ततो भावार्थे तल् ।) कामान् स्वेच्छया अवसाययितुं शीलमस्य कामावसायी तस्य भावः । इति सारसुन्दरी ॥ शिवस्याणिमाद्यष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः । इत्यमरः शब्दरत्नावली च ॥ सा तु सत्यसङ्कल्पता ॥ (अष्टैश्वर्य्याणि यथा,
"अणिमा लघिमा प्राप्तिः प्राकाम्यं महिमा तथा ।
ईशित्वञ्च वशित्वञ्च तथा कामावसायिता" ॥)

कामावसायित्व, क्ली (कामावसायिनो भावः । त्व प्रत्ययः ।) कामावसायिता । इति हेमचन्द्रः ॥

कामि, पुं, (कामयते इति । कम्+णिङ्+इन् ।) कामुकः । स्त्रियां स्त्री । इति मेदिनी ॥

कामिक, पुं, (कामं अर्हत्यस्य ठञ् ।) कारण्डवपक्षी । इति शब्दरत्नावली ॥ (कामेन निर्वृत्तम् । ठञ् । काम्यनिर्वृत्तमपि क्ली । यथा, महाभारते अनुशासनपर्व्वणि ।
"देवताश्चास्य तुष्यन्ति कामिकं तस्य सिध्यति" ॥)

कामिनी स्त्री, (अतिशयेन कामः अस्त्या अस्ति इति । काम+इनि+ङीप् ।) अतिशयकामयुक्ता नारी । इत्यमरः । २ । ६ । ३ ॥ (यथा, मनुः ८ । ११२ ।
"कामिनीषु विवाहेषु गवां भक्ष्ये तथेन्धने ।

माधवाभ्युपपत्तौ च प्रददे मालि दामकम्' ॥) भीरुश्री। वन्ध्या। इति मेदिनी ॥ दारुहरिद्रा। मदिरा। श्वेतामाल्यम्। इति राजनिर्घण्टः ॥ (यथा, आर्यासप्तशती २७० ।

"कर्थं इव कामिनीनां न गौरवे निर्भरः प्रेमा ॥)

कामिनीश, पुं, (कामिन्या: कामिनीप्रियाप्रसवस्य ईशः तत्साधनत्वात् ।) श्रीमाषपनस । इति शब्दचन्द्रिका ॥

कामी, [न्] पुं, (अतिशयेन कामयते। कम + णिच + णिनि ।) चक्रवाकः। पारावतः। कामुकः। इति मेदिनी ॥ (यथा, मेघदूते। ७४।

"सम्भूमस्त्वं परिहृतभयोः कामिजनैकगोचे" ॥)

चटका। इति शब्दरत्नावली ॥ चन्द्र। इति त्रि-काण्डशेष ॥ ऋषभौषधिः। सारसपक्षी। इति राजनिर्घण्टः ॥ (कमलाकामत्वात् विष्णुः। यथा, महाभारते १३।१४९।८२।

"कामदेवः कामपालः कामी कान्तः कृतागमः" ॥)

कामीन, पुं, (कामकामयते इति यः। पृषोदरादित्वात् साधुः।) रामपूगवाकः। इति त्रिकाण्डशेषः ॥ (कामीन इत्यपि दृश्यते ॥)

कामुक, त्रि, (कामयते इति। "लषपतपदेत्यादिना" । ३।२।१५४। उकञ्।) कामी। तत्पर्यायः। कमिता १ अनुकः २ कम्रः ३ कामयिता ४ अभीकः ५ कमनः ६ कामन ७ अभिक ८। इत्यमरः। ३।१।२०॥ (यथा, भागवते ९। २१।१७।

"दुष्यन्तः स मृगयां प्रविष्टो गान्दकामुक" ॥)

कामुक, पुं, (कम + उकञ्।) अशोकवृक्षः। अति-मुक्तवृक्षः। इति मेदिनी ॥ चटकः। इति राजनिर्घण्टः ॥

कामुककान्ता, स्त्री, (कामुकानां कान्ता प्रिया ।) अतिमुक्तलता। इति राजनिर्घण्टः ॥

कामुका, स्त्री, (कम + उकञ् + स्त्रियां टाप्। न ङीप् ।) धनादीच्छाविशिष्टा। तत्पर्यायः। इच्छावती २। इत्यमरः। ३।१।८॥

कामुकी, स्त्री, (कम + उकञ् + "लषपतपदेति" ।३।२।१५४। ङीष् ।) मैथुनेच्छावती। तत्पर्यायः। वृषस्यन्ती २। इत्यमरः। ३।१।८॥ (यथा, नैषधे १८।१०।

"अभिमतमहतामाहारयिते स्म शम्भु कामुकी
तमधिगम्य प्रसूनमापन्नसहसरितरा" ॥)

कामेश्वरी, स्त्री, (कामस्य ईश्वरी इति कामा विषयासक्तौ ईश्वरी ईश्वरत्वेन रूपा ।) कामाख्यादेव्या मूर्त्तिविशेषः। यथा,—

"देव्याश्चापि शरीरे तु यत्र कामांति भैरव ।
यत्र नैसाप। ईत्तानि नरीरिदि कन्दे दि ॥
कामाख्या स्थिरता यत्र तदा न नेतरी स्थिता।
कामदाय महोत्साहा मानमहिषा मुदेता' ।
इति कालिकापुराणे ६१ अध्यायः ॥
कामाख्या यथा, श्रीकालिकापुराणे।
"भैरवा कामेश्वरी स्मृति यद्य सम्यगिति भैरव ।
स्थाने भजगमादेव न यो मर्त्यः भजेत् ॥

सम्यक् सम्यक्प्रसन्नो वृषभाम्बोरम्।
तां पूजयेन् सर्वे सामाद्वेदमागैरवः ॥
प्रजापतिश्चैव वनितेश्चरीत तत् परम् ।
पूजाचन्द्रहस्तहितं सपुष्पमन्यतम् ।
इदं कामेश्वरीमन्त्र सर्वकामार्थसाधनम् ' ॥ ७ ॥

तस्या ध्यानं यथा —

"ध्यायन्तु चिन्तयेदेव्याः कामेश्वर्यां मनोहरम् ।
धनिमाङ्गवसनाढ्यां श्रीकण्ठस्थितिरोचनाम् ।
चतुर्भुजां शरमयीं स्फाटिकमयीचर्णाम् ।
प्रवेश चतुर्णां शोभेषु पद्माक्षवरदां वराम् ।
सर्विशालदिपाञ्चितदक्षां साक्षामुद्रमवाप्ते ।
दक्षे च विभ्रती त्रिकं वरदां पञ्चमशिवाम् ।
दुकूल विशदवस्त्र पद्मालङ्कृतं तथा ।
सहस्र प्रभितं रूपके विभ्रतीं वशिनीः करैः ।
अनल्पाभां गदापद्म कोदण्डशरमव तथा ।
वामे दधाना पिनाकञ्च बिभ्रतीं वामपाणिभिः ।
शुक्लं रक्तञ्च पीतञ्च हरितं श्याममेव च ।
त्रिविधं क्रमतः श्रीभैरवाञ्च्या पुष्पमेव च ।
दक्षिणं पश्चिमञ्चैव तथैवोत्तरपूर्वकम् ।
माधवेति महाभाग ! क्रमात् श्रीरपि वर्णनः ।
श्रम कामेश्वरीवक्त्रं कामाख्यायाः प्रयुज्यते ।
विश्वरूपेशकामं धारयाञ्चित तथा ।
ध्यायेन् कामेश्वरीमङ्गं पद्मासनविनिर्गते ।
धनिष्ठवदनञ्च प्रतिभावं प्रदीपितम् ।
विचारपरितिरूपेश तप्तजाम्बूनदप्रभम् ।
कामेश्वरी स्थिता तत्र रत्नसिंहासनेश्वरा ।
विविधाभरणश्रीका आप्रपदाम्बरा तथा ।
एवं कामेश्वरीं ध्यायेत् सर्वकामार्थसिद्धये" ॥
इत्यादि कालिकापुराणे ६१ अध्यायः ॥

कामोदकं, क्ली, (कामेन शौचया वा उदकम् ।) स्वेच्छया शौचजा दत्तोदकम्। इति मिताक्षरा ॥

कामोदा, स्त्री (कुत्सितो मोदो कामोदो यस्याः । तद्वददगन्धविशेषाभावात् ।) रागिणीविशेषः । इति सङ्गीतः ॥

काम्पिल, पुं, (कम्पिल नदीविशेषः तस्य अदूरे भवः कल ।) काम्पिल्यदेशः। इति शब्दरत्नावली ॥ (अयन्तु पाञ्चाल दक्षिणादि दर्शने। इति हरिवंशे ॥)

काम्पिल्य, पुं, (कम्पिल + चातुरर्थिके ण्य ।) द्रुपद-राजधानीसंयुक्तनगरम्। इत्यमरटीकायां भरतः । (कम्पिलस्य अदूरे भवः इति सङ्काशादित्वात् ण्यः ।) उत्तरदेशविशेषः। इति शब्दरत्नावली ॥ (यथा, महाभारते। १।१३८।७४।

"माकन्दीमथ गङ्गायास्तीरे जनपदायुताम् ।
सोऽध्यावसद्दीनमनाः काम्पिल्यञ्च पुरोत्तमम् ।
दक्षिणांश्चापि पञ्चालान् यावच्चर्मण्वती नदी" ॥)

काम्पिल्ल, पुं (कम्पिल + अच् स्वार्थे अण् ।) गुण्डारोचनी। कमलागुण्डी इति भाषा। तत्पर्यायः । ३।१।१३९। ।। तस्य गुण्डारोचनी कम्पिल्लः। कर्कश। कम्पिल्ल। काम्पिल्य। इति भरतः ॥

काम्पिल्लक, पुं, (काम्पिल्ल + स्वार्थे कन् इत्य च ॥)

काम्पिल्ल । इति जटाधरः ॥ (इति क ...
...दि भवति । यथा सुश्रुते सूत्रस्थाने ४६ अ...
"मूत्रे काम्पिल्लकं चापि सदीप गुटिकास्थमन...

काम्पील, पु (काम्पिल + अण् निपातनात् साधुः) काम्पिल्ल । इति शब्दरत्नावली । ("रेचनी ...मपि काम्पिलीम्" । इति चतुर्भेद ॥)

काम्पीलक पुं, (काम्पील + स्वार्थे कन् ।) काम्पिल्ल इति रत्नमाला ॥

काम्बल, पुं, (कम्बलेनावृतः । कम्बल + अण् ।) कम्बलावृतरथः। इत्यमरः। २।८।५३ ॥

काम्बविक, पुं, (कम्बु शङ्खं शुक्तत्वेन शिल्पम् अस्य ठक् ।) शङ्खकारः । इत्यमरः। २।१०।... शाँखारी इति भाषा ।

काम्बुका, स्त्री, (कुत्सित अम्बु यस्याः सा। ... स्वार्थे कन् ।) अश्वगन्धा। इति रत्नमाला ॥

काम्बोज,पुं (कम्बोजदेशे भवः इति। अण् ।) अश्वविशेषः। रक्तस्फोटकः। इत्यमरः। २।८।४५। ... पुन्नागः। हस्ती। इति मेदिनी ॥ (कम्बोजः अभिजनो यस्य सिन्ध्वादित्वात् अण् ।) क्षत्रजातिविशेषः। स तु सगरेण ... शिरो मुण्डनं कृतम्। यथा। हरिवंशे।

"अर्द्धं शकानां शिरसो मुण्डयित्वा व्यसर्जयत् ।
यवनानां शिरः सर्वं काम्बोजानां तथैव च" ।

काम्बोजी, स्त्री (कम्बोजे भवा गौरादित्वात् ङीप् ।) माषपर्णी । माषाणी इति भाषा। ... भेदः। इति मेदिनी ॥ चाकुलिया इति भाषा । गुञ्जा। ... इति भाषा। काकुची। काकुच इति भाषा ... इति राजनिर्घण्टः ॥

काम्य, त्रि, (काम्यते इति। कम् + णिच् + कर्मणि यत् ।) कमनीयम्। सुन्दरम्। इति हेमचन्द्रः (“काम्यो यस्य यत्र... दोषवान् तथैव च।
अतो कामं नैमित्तिकं प्रायश्चित्तमिति त्रिधा" इति मात्स्ये ॥) कामनापूर्वकः। कर्मणि ... यथा पुत्रेष्ट्यादिकर्मकाम्यकर्म ...

"यत् किञ्चित् कामनायुक्तं ...
स्मिनेर्कर्मणि तद् काम्यं ... कीर्तितम्" ॥

काम्यदान,क्ली (काम्यस्य यत् दानमिति ।) कर्णीकर्म अश्वो वर्मोश्वारादिभिः दानं कामनया वा दान इति भरतः ॥ तत्पर्यायः। प्रवारणम् २। इत्य... ३। २। ९ ॥ (यथा महापुराणे।

"कामार्थमद्भिर्यः सम्प्रदीयते ।
दान तत् काम्यमाख्यातं ऋषिभिर्धर्मचिन्तकैः" ॥)

काय, पुं, मनुष्यतीर्थम्। इति मेदिनी ॥ (क: ब्रह्मा देवतास्य । "कस्येत्" । ४। २। २५। इत्यमरः... इत्यादेशश्च ...) माया... ... तद् कायाख्यम्। ... ... अभिरुचितार्थस्य ... इति ... इत्यमरः । (यथा मनु २। ५९ ।

"अङ्गुष्ठमूलस्य तले ब्राह्मं तीर्थं प्रचक्षते ।
कायमङ्गुलिमूलेऽग्रे दैवं पित्र्यं तयोरधः" ॥)

कायः पुं, (चीयते अस्मिन् ... "नश्च" । ३ । ३ ।

२५ । इत्यत्र । इदमादेश्च । यस्येतिलोपात् पर
स्यादादिर्वाड् अदेवतम् । स तु प्राङ्मतीर्थम् ।
(कायति प्रकाशते इति अच् ।) मूर्त्तिः ।
("काय सन्निहितापायाः सम्पदः पदमापदाम् ।
समागमाः सापगमाः सर्व्वमुत्पादि भङ्गुरम्" ॥
इति हितोपदेशे ॥) सङ्घः । लक्ष्यम् । स्वभावः ।
इति मेदिनी ॥ प्राजापत्यविवाहः । इति स्मृतिः ।
(यथा मनुः ३ । ३८ ।
"आर्षोढाजः सुतस्त्रींस्त्रीन्
षट् षट् कायोढजः सुतः" ॥)
अस्य लक्षणं उद्वाहशब्दे द्रष्टव्यम् ॥ मूलधनम् ।
यथा,—नारदः ।
"कायाविरोधिनी शश्वत् पणार्द्धाद्या तु कायिका" ॥

कायमान, क्ली, (कायस्य मानमिव मानमस्य ।) तृण
कुटीरः । इति त्रिकाण्डशेषः ॥

कायवलन, क्ली, (कायो वल्यते आच्छाद्यते अनेन ।
वलसंवरणे करणे ल्युट् ।) कवचम् । इति हारा
वली । ७३ ॥

कायस्थ, पुं, (कायेषु सर्व्वभूतशरीरेषु अन्तर्यामि
तया तिष्ठतीति । काय+स्था+क ।) पर
मात्मा । (यथा उत्तरगीतायाम् ।
"कायस्थोऽपि न कायस्थः कायस्थोऽपि न जायते ।
कायस्थोऽपि न भुञ्जानः कायस्थोऽपि न बध्यते" ॥)
काये ब्रह्मकाये तिष्ठतीति । काय+स्था+क ।)
नरजातिविशेषः । इति मेदिनी ॥ तत्पर्य्यायः ।
कूटकृत् २ पत्त्रीकरः ३ । इति त्रिकाण्डशेषः ॥
करणः ४ पञ्जिकारकः ५ । इति जटाधरः ॥
तस्योत्पत्त्यादिर्यथा* ।

श्रीहर उवाच ।
"भूयश्चाहं प्रवक्ष्यामि वगलेति मनूत्तमम् ।
यस्य श्रवणमात्रेण कायस्थो विप्रसेवकः ॥
पार्व्वत्युवाच ।
अतीव चित्रं शम्भो ! त्वमुक्तवानावयोरथ ।
शूद्रात् कनीयसी जातिरभवद्विप्रसेवकः ॥
श्रोष्याम्यहं हि कायस्थवृत्तान्तं ब्रूहि विस्तरात् ।
कायस्थः क्षत्रविट्शूद्रात्ते विप्रार्थक कथम् ॥
केन प्रकारेण च वा वगलेति गृहीतवान् ।
ततश्च सिद्धविद्याया वगलाया महेश्वर ! ॥
श्रोष्यामि महिमानञ्च साधनं त्वत्त एव हि ॥
हर उवाच ।
ब्रह्मपादाश्रतो जन्म जातः कायस्थनामकः ।
ककारं ब्राह्मणं विद्यादाकारं नित्यसम्भवम् ॥
आयन्तु निकटं चैव तच्च काये हि तिष्ठति ।
कायस्थोऽत समाख्यातो मसीशः प्रोक्तवांश्च यम् ॥
जीवेद्यो म्लानमदे जन्मत्वात् शोभना प्रिये ।
शठश्च शूरता किञ्चिदनेकमतिपाक्षवत् ॥
जन्मावधि द्विजार्थाया मतिरेव निरन्तरम् ।
कुशासनादि सकलं गृहीत्वा मस्तकोपरि ।
अनुगच्छामि सततमिति चिन्तामनाः सदा ।
शठत्वाच्चतुरत्वाच्च विप्रसेवामनुत्तमम् ॥
वाञ्छत्येव मसीशः स सदोद्देमौलिमावहन् ।
ब्राह्मणं चेश्वरं ज्ञात्वा भक्त्या स्तौति पुटाञ्जलिः ।
य य गच्छति विप्रश्च मसीशस्तानुगच्छति ।
नद्यादौ गत्वा चेद्विप्रः स्नात्वा कुर्य्यात्तपोऽपि च ।
यावत्तावच्च तिष्ठेत् स क्षुधया पीडितोऽपि च ।
तथापि नासनं याति शिरे धर्त्तुं, द्विजोऽपि च ।

मसीशायादीक्षिताय क्षत्रवैश्योपमाय च ।
अशूद्रायेति वोद्धुं न दद्यात् वेदासनादिकम् ॥
पार्व्वत्युवाच ।
चित्रं ब्रवीषि हे नाथ कायस्थोऽशूद्र एव किम् ।
जाने शूद्रकनिष्ठं त शूद्रतुल्य कथं स न ॥
क्षत्रवैश्योपमो ब्रूहि त्वयैव कथमीश्वर ! ॥
हर उवाच ।
ब्रह्मपादाश्रतः शूद्रमसीशौ द्वौ बभूवतुः ।
शूद्रात् परः कनिष्ठः स जातः कालि ! ततश्च सत् ॥
किन्तु शामादिवेदान् हि क्षत्त्रो विट् शूद्र एव हि ।
गृहीतवान् तत् किञ्चिन्मसीशोऽग्रतः प्रिये ! ॥
अतो यज्ञोपवीती न ते हि यज्ञोपवीतिनः ।
एते सर्व्ववैदिकाचारा मसीशो हि स्वभावतः ॥
मस्या सह तु लेखन्या सर्व्वं लेखितुमीश्वरः ।
लेखितु नैव शक्नोति वैदिकं किञ्चित किल ॥
अतो यदि विद्यार्थाय खेदेन विप्रमीश्वरम् ।
ज्ञात्वा भक्त्यानुगच्छेद्धि यत्र याति धरासुरः ॥
तत्रैवाज्ञापरेषु गतेष्वपि मसीशकः ।
तदपि व्यक्तवाशैव दृढ़ा भक्तिर्द्विजेषु च ।
ततो हि कृपया विप्रः कायस्थमनुगृह्य हि ।
साधनं प्रददद्विद्यां वगलेति तव प्रिये ! ॥
यतो दीक्षामात्रमेव पवित्रः कार्य्यसिद्धिता ।
ततः कुशासनादींश्च वोढुं प्रादात् शिरोपरि ।
एवं प्रकारेण कालि ! विप्राणामनुगा कलौ ॥
कायस्थाः कालिके ! देवि ! पुनस्तद्विमच शृणु ॥
कलिप्रथमतो राजा हस्तिनायां महाबलः ।
जयत्ननामा गोमेधमखमारब्धवान् प्रिये ॥
आहूतवांश्च सर्व्वान् स चतुर्वर्णजनमध्यत ।

---

* कायस्थोत्पत्त्यादौ अन्यान्यपि राज्ञा पालि प्रमाणानि
सङ्गृहीतानि मद्विराज्ञाधुना प्राप्तानि । कतिपयप्रमाणप्र
माणप्रमाणान्यत्राङ्कितानीति । तद् यथा —
'अथ ध्यानस्थितस्यास्य सर्व्वकायाद्विनिर्गतः ।
दिव्यरूपः पुमान् हस्ते मसीपात्रञ्च लेखनी ॥
चित्रगुप्त इति ख्यातो धर्म्मराजसमीपतः ।
प्राणिनां सदसत्कर्म्मलेखाय स निरूपितः ॥
ब्रह्मणातीन्द्रियज्ञानी देवैर्यज्ञभुजा स वै ।
भोजनञ्च सदा तस्मादाहुतिर्दीयते द्विजैः ॥
ब्रह्मकायोद्भवो यस्मात् कायस्थो वर्ण उच्यते ।
नानागोत्राश्च तद्वंश्याः कायस्था भुवि सन्ति वै ॥
इति पद्मपुराणे सृष्टिखण्डम् ॥ * ॥
दत्तात्रेय उवाच ।
चित्रगुप्तं महाप्राज्ञ पुत्रस्यमुनिपुङ्गवम् ।
उपधृत्य पप्रच्छ भीष्मः सुरसत्तमास्वरं ॥
अनुजानपि पर्वेतामामान्यभावा नवैव च ।
एवञ्च सहपादीनां भूतो विस्तरतो मया ॥
कायस्थोत्पत्तयो भीष्मेनाख्यातामेव महामते ।
भूय एव महाप्राज्ञ । श्रोतुमिच्छामि तत्त्वतः ॥
वैश्यस्य दानशीलस्य पितृश्राद्धपरायणः ।
सुचिरं धर्म्ममार्गेषु कायाशुद्धारबोधकः ॥
वैदाङ्गे निश्चयो यो ब्राह्मणानां विशेषतः ।
तामेव श्रोतुमिच्छामि कथयस्व महामुने ॥
तस्य सर्व्वं विप्र ! सकलं वंशरोचनम् ।
इति वचो मुनिश्रेष्ठ आद्य ! शृणु तत्त्वतः ॥
पराशर उवाच ।
शृणु भीष्म ! वक्ष्यामि कायस्थोत्पत्तिकारणम् ।

न श्रुतं यत् मया पूर्व्वं तन्मे कथयतः शृणु ॥
येनेदं सकलं विश्वं स्थावरं जङ्गमं तथा ।
उत्पाद्य पालयते भूयो निधनाय प्रकल्पते ॥
अव्यक्तः पुरुषः शान्तो ब्रह्मा लोकपितामहः ।
यथाऽसृजत् पुरा विश्वं कथयामि तव प्रभो" ॥
"मुखतोऽस्य द्विजा जाता बाहुभ्यां क्षत्रियास्तथा ।
ऊरुभ्याञ्च तथा वैश्याः पद्भ्यां शूद्रा समुद्गताः ॥
द्विपदं चतुष्पदादींश्च जनयन्सरीसृपान् ।
एककालेऽसृजत् सर्व्वं चन्द्रसूर्य्यग्रहांस्तथा ॥
एवं बहुविधानेन विश्वमुत्पाद्य भारत ! ।
चकार स सुतं ज्येष्ठं कश्यपं नामिवेत्यसम् ॥
प्रतिपक्षेण भोः पत्र भवत् पालय सुव्रत ! ।
इत्याज्ञाप्य सुतं ज्येष्ठं अविषयवृत्तेः ॥
ततस्तु ब्रह्मणा येन यत् कृतं तन्निबोध मे" ॥
"इन्द्रश्चन्द्रश्चापि इत्यर्यमतापि च ।
समाधिस्थोऽभवत् ब्रह्मा ध्यानस्य शान्तमानसः ॥
ततः समाधिगमनैर्बहून् तद्वदापि वै ।
तस्य शरीरात् ब्रह्माण्डात् श्यामः कमललोचनः ॥
कम्बुग्रीवो गूढशिराः पूर्णचन्द्रनिभाननः ।
लेखनीच्छेदनीहस्तो मसीभाजनसंयुतः ॥
निःसृतः सर्व्वतो यस्मात् ब्रह्मणोऽव्यक्तजन्मनः ।
उत्तमः सुविचित्राङ्गः ध्यानस्तिमितलोचनः ॥
त्यक्ता समाधिं ब्रह्मेव ! न ददर्श पितामहः ।
पश्चात्तस्माच्छरीरात्तु पुरुषश्च पुनः स्थितः ॥
नामधेयं हि मे तात ! वक्तुमर्हसि तत्परम् ।
यथोचितञ्च यत् कर्म्म तत् मे तात ममासज" ॥
पुरुषस्य उवाच ।

' इत्याकर्ण्य ततो ब्रह्मा पुरुषं स्वशरीरजम् ।
प्रहस्य मधुवाचैतमामन्त्रितमतिः पुनः ॥
स्थिरचित्तं समाधाय ध्यानस्थमतिसुन्दरम् ।
मच्छरीरात् समुद्भूतस्तस्मात् कायस्थसंज्ञकः ॥
चित्रगुप्तेति नाम्ना वै ख्यातो भुवि भविष्यसि ।
धर्म्माधर्म्मविवेकार्थं धर्म्मराजपुरे सदा ॥
स्थितिर्भवतु ते वत्स ! ममाज्ञां प्राप्य निश्चलाम् ।
क्षत्रवर्णोचितो धर्म्मः पालनीयो यथाविधि ॥
प्रजाः सृजस्व भोः पुत्र भुवि भारसमन्विताः ।
तस्मै दत्त्वा वरं ब्रह्मा तत्रैवान्तरधीयत ॥
पराशर उवाच ।
"चित्रगुप्तान्वये जाता शृणु नाम कथयामि ते ।
श्रीमन्ना माथुरा गौराः श्रीवत्सकेन माथुराः ॥
अहिष्ठा सौरसेना शैवसेनाश्चैव च ।
कर्णारुद्रनवैव अम्बष्ठाश्च सत्तमः ॥
अथ तेषाञ्च कर्म्माणि कुरुश्रेष्ठविवेकतः ! ।
पुत्राश्च वै चापपाशाश्च चित्रगुप्तो महौजसे ॥
धर्म्माधर्म्मविवेकश्चित्रगुप्तो महामतिः ।
कृष्णार्जुनं शैवधर्माणां धर्म्मधाममनुत्तमम् ॥
पूजनं देवतानाञ्च पितृणां यज्ञसाधनम् ।
वर्णानां ब्राह्मणानाञ्च धर्म्मदानविधिसम् ॥
प्रजाश्च करुणाढ्याश्च धर्म्माधर्म्मविवेचनम् ।
कर्णेषु हि प्रयत्नेन पुत्राः कुरुश्व कामदा ॥
या माया प्रकृतिः शक्तिरूपा चण्डमर्दिनी ।
तस्यास्तु पूजनं कार्य्यं सिद्धिं प्राप्य दिवं व्रजः ॥
कर्णोऽधिकारमासाद्य यतो यज्ञभुजः सदा ।
अतोऽपि वा सदा पूज्या चण्डिका चण्डमर्दिनी ॥
कश्यपे विहिता नित्यं पूज्या या तु चण्डिका ।

मात्स्यवान् मार्गितवान केवल सातवर्षे दिवा ।
प्रासादमविशन् यावो वृष्ट्वा द्वादश दिवा ।
यत्र शिरस्त्रवतो दर्पितश्च कार्त्तिके ॥
हे मालिकाः सर्वो मूर्ति कृता माङ्गलवान् मते ।
केवल तत्र मालिन्ये गतमोपि न शोभते ॥

सुतपा उवाच ।

कान्ते ! मबीमि विभावो तत् कथय प्रथम वत
यावामात्र वदमम कादुलक न चाधिकम् ।
विद्यावेदिता दासया कापि नाम्नाति चरेत् ।
मूर्छयेत् केवला सन्ध्या कदेयाम्न प्रदयता ॥
प्रिये नेन च मद्यमनन्तमेवापिदम्वपि ।
विवेद सतत कार्य वेदमारभिकस तत् ।
यतो मन्येय त्वां कान्ता मुदा कान्त्य यानयेत् ।
कार्यो कामादिक यादि कदेहिमो निरन्तरम् ॥
याय सभागतो मया चत्वारीनां प्रिये वध ।
मद्धद येन यज्ञांश्च विप्रवाविन तात्ताः ॥

कान्तस्वाच ।

प्रमाणुवत्स मे कान्त ! प्रविशस्व तत ! स्वयि ।
तिष्ठन्वेव चिरं पिय तिष्ठन्तौ मे मरण प्रियम् ।
कासाव्यवरन्दो दर्पिणौ मे मतावधि ॥

सुतपा उवाच ।

प्रिये ते द्युना तीर्थ यमाका वदर्थ सदा ।
विना निमन्त्रितेनापि मत्वा चानीयते धनम् ॥
द्युम्ना सुतय, कान्ता मता राजसभा प्रिये ॥
राज्ञ सुदन मदम मोवाच गच्छति विभ ।
रे सुतय ! विनाऽज्ञानैराज्ञ न गमामयम् ।
विभामा वदध राजन् ! चानिरात्रं तथैव च ॥
कृत तदपि मन्ये ते तथा वृद्धः सादरम् ।

मत्तो मत्तः ते यत्र चोत्र यातु ससागरम् ।
श्रुत्वैतद्वचा सुतपाताम्रो दयसद्धा धनात् ।
विप्रो नि एतवान् राजा भीतेन मनसाऽब्रवीत् ।
हे पुरोहित ! हे विप्र ! केऽपि योऽसौ कृत मक ।
रे दुष्टाः सभामध्ये कपाल्या मद विस्तरात् ॥
तथायता पानिपाने पट्टादिप्रमाणकुलम् ।
सर्वाङ्गानिकर्मापि चान्येऽपि गतवान् हि च ।
कोपमन्दिरमालोक्य राजानिकमयान ॥
द्रष्टुमवोच राजान पिपवो कोपमन्दिरे ।
किञ्चिच्च वसु हस्ते न दृष्ट मनसादिकम् ।
चान्वेतत् विज्ञापो गाथाऽब्रवीत्तनत् पुरोहितम् ।
हे पुरोहित ! विप्र ! न कृतवान् त्वया भुक्त तत् ।
कोऽपराधोऽस्ति मे विप्र कथय शक्ता रसा प्रभो ॥
कोपमन्दिरपालमवान दक्षवानयम् ॥
कोपे मालि यात किञ्चित् सर्वै मनसादिकम् ।
कुस्तेतदङ्गिरा मूढे सुतपा यत्र तत्पट ॥
ततो दूरं च राजा च गृह गतकुठारकम् ।
तथै सखा हिमकुर्वेऽन्तवान् सुतपोऽप्नियम् ॥
चाङ्गिरादिदिशा सर्वे तथाग सुतपोहितम् ।
स्तुतिदक्ष स राजा च दूरस्थो भक्तितोऽस्तवीत् ॥

चाङ्गिर प्रस्तव ऊचु ।

धरामरवर ! प्राज्ञ ! नो दरम्व धरातले ।
शरणं प्रिय नो मान सद्दायामब उमेशवत् ॥
देवर्ष देवतामन्त पत्तिनाशाय सम्प्रति ।
दयालो ! नो दयस्व च ! समस्ते सत्तो वर ॥
मन्त्रा मन्त्रम यत्र त्वं मालिकेश्वर मानव ॥
शरणं प्रिय नो मान सद्दायामब उमेशवत् ॥

सुतपास उवाच ।

हे नाथ ! हे परेशैव ! पञ्चकमविभावय ॥
सर्वेश्वर ! सत्पुरुष वरे न चरवाम्यम ॥
हे मद्यपदेव ! हे नाथ हे धराधर हे प्रभो ॥
कृपां कुरु रमणुधे दयमानमि यद् नः ।
नाह मानामि ते पूजां नाह जानामि ते स्तुतिम् ।
नाह जानामि हे मत्त सुदृढं दयया दय ॥

सुतपा उवाच ।

किमर्थं कुप हे विप्र किमर्थं लौमि हे यथा ।
स्पष्ट सात मत स्य सुतैन सवर्ष कुरु ॥
अमौति सुतपोवाक्यं सदयः सुतमानसः ।
कृताञ्जलिपुटो राजा चाब्रवीदिदमुत्तमम् ॥

राजोवाच ।

निगमदस्तु निन्द्य ! मोहस्य दयकोपनम् ।
गन्धमरामहत्तं सन्मम मे कृपां कुरु ।
चदमायद्धपालि कृतवानहमद्य ॥
मद्य मद्यामतो मुदामहं मां क्षमो कुरु ।
मन्यमाना किमा रुद्रे पोषुः चाविकारङ्गनम् ।
सुवाच ते मद्यविधान् समाधे प्रयमानसा ।
चागन नाथ ! मे देयमेव प्रयोगद वर ।
मत्कमाश्रो मुधः कोऽपि न भीति विरामय ॥
चानयति सविधानस्य के भक्तितो हिजान् ।
चार्थिदत्त्वीति मया मे वध्य सरसं निवत् ॥
श्रुत्वैतद् सुतपा विप्रोऽब्रवीत वाददो नृपम् ॥

सुतपा उवाच ।

हे राजन् नयवेद ! माध्वान्तिमिदो नयः ।
पानीयान विप्रमभ्यासमानामादितिरोऽगात् ॥
पत्नीदरकवादेने मनिनन्नि विभावेशाः ।
काता मनीषा मादया प्रयाणे परमात्मना ॥

[illegible]

महाविद्योपासकाश्च शूद्रत क्षत्रियोपमाः ।
कलौ हि क्षत्रियाभावात् वैश्याभावाच्च सुव्रत ॥
एते भक्ता भविष्यन्ति विप्राणामसहिष्णव ।
विप्रप्रिया विप्रभक्ता विप्रमानप्रदा यतः ॥
महाविद्याश्रितश्चैते क्षत्रकर्म्मरत कलौ ।
मस्या एवेश इत्यस्मात् मसीशोऽसौ निगद्यते ॥
ब्रह्मणो विप्रमूर्त्तेस्तु पादाग्रे सम्भवन्ति तत् ।
कायस्था इति सञ्ज्ञां स्युः सुयज्ञैषां शिवा मति ॥
श्रुत्वैतत् सकलं राजा वृत्तान्तं सुतपोमुखात् ।
प्रेमाश्रुभिन्नवक्त्रारी कृताञ्जलिपुटोऽब्रवीत् ॥

राजोवाच ।

इतः परम्भवेऽहञ्चेत् म्रिये तदपि मच्छिवम् ।
श्रुत यज्ञव जातीनां क्षत्रधर्म्मिणकलौ सुखम् ॥
ततोऽतिहृष्टः सुतपा उवाच मधरं स्वपम् ।
सुयज्ञ ! सुमतिस्त्वं हि स्वत्तो विप्रप्रियो न हि ।
मानेन ब्राह्मणानां हि वरञ्च मरणं नये ॥

सुयज्ञोवाच ।

हे नाथ सुतपो विप्र ! श्रुतं यन्मेऽद्य त्वन्मुखात् ।
कृपया शृणु तत् सत्यं ते जातेर्महिमानमु ॥
ब्राह्मणो ब्रह्म जानाति नान्यजातिरिति श्रुतिः ।
ब्रह्मज्ञानी सदा विप्रो न चेद्ब्राह्मणसञ्ज्ञकः ॥
विना प्रत्युक्ति यो विप्र उपकारी स्वयं भवेत् ।
आशीः करोति ब्रूते च क्षत्रादीनां शिवं वच ॥
स एव साक्षाद्ब्रह्मेति विप्राणां जातिलक्षणम् ।
ब्राह्मणाश्रयणो ये न गृह्णन्ति पालयन्ति च ॥
गुर्व्वाज्ञालङ्घनं पापं स्पृशत्येषां शरीरतः ।
चित्रेति सकलं चोक्तं ते च सन्दिग्धजातय ॥
वशीकारादि सकलं सृष्टिस्थितिविलयञ्च यत् ।
प्रकुर्वन्ति हि कर्त्तुं ते विप्रा चित्रेति चोक्तसु ॥
विनायासैर्मुदा यो यत् विप्राय प्रक्षिपो ददत ।
मुदा तदेव गृह्णाति विप्राणामिति लक्षणम् ॥
केषामपि न कापथ्यं कुरुते ब्राह्मणः क्वचित ।
विनापराधैर्नं प्रपेदिति तज्जातिलक्षणम् ॥
छिन्ने भवति छिन्नः स शठे शाठ्यं समाचरेत् ।
श्चार्ज्जवञ्चेन्द्रियग्रामान् स्ववशे स्थापयेच्चिरम् ॥
दयालुश्च सदा विप्र इति पुत्त्र हृदि स्मरन् ।
भीत्या भक्त्या सदा पूज्य पितेति मृतवाच मे ॥
कटूक्त्या यदि गृह्णाति श्रद्धा दुःखेन राति चेत् ।
तद्विप्रो दुःखमश्नते दातुर्नैव शिवं क्वचित ॥
वित्तभाज्य स्वस्थभाज्य काव्य शोभयतः क्वचित् ।
इत्यप्यात्मज विप्राश्च शृणु शासनसम्मतम् ॥
शृणु पुत्र प्रवक्ष्यामि सावधान समाचर ।
प्रन्त मङ्गप्रपन्नं वा नैव द्रुह्यति भूसुरम् ॥
सुतपो नाथ मे पित्रा यद्यदुक्तं तदुक्तवान् ।
तस्यापि ब्राह्मण ब्रह्म यथारुचि तथा कुरु ॥
श्रुत्वैतत् सुतपा विप्र उवाच परमादरम् ।
राजन् वरं वृणु वृणु यत्ते मनसि वाञ्छितम् ॥

सुयज्ञ उवाच ।

ऋषे ! वरेण ते नैक उपकारं इहाधुना ।
यज्ञे समाप्तो मे मत्क्लेशहर्ता रामो भविष्यति ॥

सुतपा उवाच ।

यज्ञं समाप्य सुखतः प्रगच्छेर्विन्ध्यनैर्ऋतिम् ॥
तत्र वै स्वर्णदानद्या मध्ये द्वीपोऽस्ति सुन्दर ॥
द्वादशक्रोशमानो हि तद्गत्वा वसतिं कुरु ।
यदा परशुरामस्ते कश्चिच्छेत्ता भविष्यति ॥
भविष्यति च काम्य स मया ते वाञ्छितं वरम् ।
सत पुत्र कृते राजन् जम्बूद्वीपेश्वरो भवान् ॥
भविष्यतीति त्वं वीजरूपेण तिष्ठ तत्र हि ।
वरं ते वाञ्छितं गृह्ण तुष्टोऽहं भक्तितस्तव ॥
इत्युक्त परतो यद्यत् परमानन्दमुत्तमम् ॥

सुयज्ञराजोवाच ।

नाथ ! नाहं वरं याचे याचे केवलमङ्घ्रि ते ।
चिरं मम मतिस्तिष्ठेदिति देहि वरोत्तमम् ॥
तेऽङ्घ्रौ पवित्रे परमे सर्व्वत्र सुखदे शिव ।
तदेवास्तु इति प्रोच्य सुतपा गतवान् गृहम् ॥
राजापि च मखं कृत्वा विप्रेभ्यो दक्षिणां ददत् ।
परिवारयुतोऽगच्छद्द्वीपे काञ्चनदान्तरे ॥
वसति परत प्राप्ता चतुर्द्दिक्षु जलप्लुताम् ।
स्वनद्या प्रापटन् विप्रा पण्डिता स्वस्ववासभूम् ॥
एको मसीशः सर्व्वाख्यः सर्व्वार्थीहृदयद्विजात् ।
कुलप्रदीप क्षीयानां जातीनां पूततास्पृहः ॥
बगलेति महाविद्यां गृहीत्वा साधयन् मुदा ।
सर्व्वार्थीहृदयाख्यस्य पण्डितस्य प्रसादत ॥
वरं याचितवान् भक्त्या त्रिलोकाधिपतिं गुरो ! ॥
कृपया कुरु मां नाथ ! त्वमेव शरणं मम ॥
गुरुस्त्वपि वरं दत्तो राज्यं भुक्त्वा पुनर्भवन् ।
त्रिलोकाधिपतिर्भूय मुदा तत्र सुखिष्यसि ॥
गुर्व्वाज्ञया मसीशः स राज्यभोगी द्विजार्चित ।
विहाय देहं भूयश्च चित्रार्यो बभूव ह ॥
चित्रगुप्तश्चित्रसेनश्चित्राङ्गद इति त्रय ।
स्वर्गे मर्त्ये च पाताले राजते चिरमुत्तमः ॥
चित्रगुप्तो महाविद्यां प्राप्य कुल्लाख्यविप्रतः ।
पुत्रान् याचितवान्नैव गुरोर्देवत्वमावहन् ॥
यमान्तिकस्थो बभूवापि स्वर्गाद्यधोविवेचकः ।
चिरं शुभाशुभं कर्म्म विविच्य शमनान्तिके ॥
यद्वदेत् सकलानां तु तदेवाभोजयेत् यमः ।
चित्रसेनो महाविद्यां बगलेति गुरोर्नयन् ॥
अस्मा सतोष्य पुत्रादीन् याचित्वा प्राप्य सत्वत ।
राज्यं चकार भुव्यच्चित्राङ्गद चाधोगत ॥
चाधोगतस्य हेतुं त्वं बगले शृणु कालिके ! ॥
बगलेति मनुं प्राप्य चित्रोऽस्मि इति वाञ्छया ॥
तपश्चकार वर्षान्द नाग्र किञ्चित गृहीतवान् ।
फलमूलादिकं किञ्चित खादमस्ति यथा मिलेत् ॥
विहाय विप्रस्य गुरोरपि पूजाश्च पार्व्वति ! ॥
जपेन्नित्यं हि बगलामन्यविप्रश्च नैच्छयम् ॥
श्रान्तेति ब्राह्मणाः सर्व्वे ऊचुश्चित्राङ्गदं क्षुधा ।
वचो हि मधुरं किञ्चित् प्रियाद्भक्ताय सुन्दरि ! ॥
रे चित्राङ्ग ! चाद्य त्वं वत्स विप्रत्वमिच्छसि ।
कदाप्युपानन्दम्भस्त्वो नैषति न हि बुध्यसि ॥
वत्स ! शीघ्रमधो गच्छ चिरं कुरु तपो मुदा ।
तत शुश्रेति श्राप स भक्त्यातिश्रयमापसः ॥
कृताञ्जलिपुटो ब्रूते चित्राङ्गद इतीश्वरि ! ॥

नित्यं यमक्षमादिश्च सर्व्वकामार्थसिद्धिदम् ।
दानानि दापयेद्यस्तु भक्तिश्च च विशेषतः ॥
काले मम च सम्पूज्य चित्रगुप्तं लेखकम्
चित्रैश्च चित्रपुष्पैश्च रक्तचन्दनमिश्रितैः ॥
नैवेद्यं दीयते तस्मै मोदकं गुडमिश्रितम् ॥
भीष्मोक्तप्रार्थना यथा —
"उत्पत्तौ प्रलये चैव भोग्ये दाने सनातने ।
लेखकर्म्म सदा कौमौ चित्रगुप्त नमोऽस्तु ते ॥
चित्र सह समुत्पन्न समुद्रमथनोद्भव ।
चित्रगुप्त महाबाहो ममाद्य वरदो भव ॥"
चित्रगुप्तस्तु सन्तुष्टो भीष्माय च वरं ददौ ।
मत्प्रसादाद्भवान् भीष्म सत्सुखेन भविष्यति ॥
करिष्यसि यदा मृत्यु तदा मृत्युर्भविष्यति ।
इति तस्मै वरं दत्वा चित्रगुप्तो दिवं ययौ ॥
अनेन विधिना यस्तु चित्रगुप्तस्य पूजनम् ।
करिष्यति नरादेवे तस्य पुण्यफलं शृणु ॥
इहैव चिरकालं भोगान् भुक्त्वा सर्व्वान् मनोरथान् ।
अन्ते च विष्णुलोके नरो याति न संशयः ॥
चित्रगुप्तकथा दिव्या कायस्थोत्पत्तिकारकम् ।
भक्तिपुत्रेण सततं ये स्मरन्ति नरोत्तमा ॥
दीर्घायुषो भविष्यन्ति सर्व्वव्याधिविवर्जिताः ।
सर्व्वे विष्णुपदं यान्ति यत्र गच्छन्ति महात्मनः" ॥
इति भविष्यपुराणे चित्रगुप्ताद्युत्पत्तिमाहात्म्यं समाप्तम् ॥ * ॥
"एवं समाकुलं राम सर्व्वं निःक्षत्रियं कृतम् ।
तत्र यत्र ययौ चन्द्रं सम्भाव्यैवानुराम चरान ॥
केचित् ब्रह्मणमाश्रित्य केचित् पर्वतकन्दरम् ।
कश्चित् चन्द्रसेनस्य भार्य्या दाल्भ्याश्रमं ययौ" ॥
"ततो रामः समायातो दाल्भ्यस्याश्रममुत्तमम् ।
पूजितो मुनिना तत्र पाद्यार्घ्यादिभिः ॥
दत्तो मध्याह्नसमये तस्मै भोजनमादरात् ।
रामस्तु याचयामास हृदिस्थं स्वमनोरथम् ॥
याचयामास रामाय कामं दाल्भ्यो महामुनिः ।
ततो वरप्रीतो भोजनं चकार मुदा ॥
भोजनानन्तरं दाल्भ्यः पप्रच्छ भार्गवं प्रति ।
तत्त्वदा प्रार्थितं देव तत् त्वं देहि महामते ॥
राम उवाच ।
तवाश्रमे महाभाग सगर्भा या समागता ।
चन्द्रसेनस्य राजर्षेः क्षत्रियस्य महात्मनः ॥
गर्भे न दर्शितं देहि दिदेशं तां महात्मने ।
ततो दाल्भ्यः प्रतुष्टश्च ददामि तव वाञ्छितम् ॥
दाल्भ्य उवाच ।
शिशो गर्भस्थं ममास्य त्वं दातुमर्हसि ।
ततो रामोऽब्रवीद्दाल्भ्यं यदर्थमहमागतः ॥
अभिवाञ्छितमर्थं तत् मत् याचितवानसि ।
क्षत्रियोऽयं सदा विप्र ! कायस्थोऽयं भवेत् सदा ॥
तस्मात् कायस्थ एतस्मात् भविष्यति शिशोः शुभः ॥
एवं रामो महाबाहुर्विना तं गर्भमुत्तमम् ।
निःक्षत्रियां तदा चक्रे कश्चिन्मनुजर्षभ" ॥
"कायस्थ एव उत्पन्नः क्षत्रियात्मना ।
रामाज्ञया स दाल्भ्येन क्षत्रधर्माद्बहिष्कृतः ॥
कायस्थधर्म्मोऽस्मै दत्तश्चित्रगुप्तस्य यः स्मृतः ।
गोत्रोऽस्य कायस्थो दाल्भ्यो दत्तश्च विधानतः ॥
दाल्भ्यप्रसादाद्धि शैलस्य धर्मविदि ।
चन्द्रसेनसुतो विप्र ! दत्तश्चाप्रतिमः ।
देवद्विजगुरूणां च भक्तिमान् स बभूव ह" ॥
इति स्कान्दे रेणुकामाहात्म्यम् ॥ * ॥

यम सर्वे न जानीमो विप्राणां कीदृशं वणौ ।
इति तेषां वचः श्रुत्वा चिन्ताकुलो महीपतिः ।
किं करोमि क्व गच्छामि चिन्तयन् पुनः पुनः ।
कान्यकुब्जात् समानीतान् दूतैः द्विजपञ्चकान् ।
वेदशास्त्रेष्वभिज्ञान् शास्त्रे च विशारदान् ।
मेधातिथ्यादिविप्रान् विप्रान् सद्धर्मादिनिर्दिष्टान् ।
परिवेष्ट्यान् समाचोद्य विचारो जायते यदि ।
यमज्ञा जायते राज इति ख्याता द्विजोत्तमाः ।
काशीमातायनिर्भीका मङ्गलाद्योऽपि क्षितम् ।
तदा जात सभीव स्यात् मयमाज्ञसमुदयम् ।
इति श्रुत्वा नृपश्रेष्ठान् कम्पान्वितशरीरतः ।
कोपश्च बहुधा तेषामकरोत् स नृपोत्तमः ।
आसन शायमानीय ददौ विप्रपूजनम् ।
उपविष्टा द्विजाः पञ्च तथा च शूद्रपञ्चकाः ।
राजके कुब्ज सर्वे योद्धुमेवमवदत् स तान् ।
अद्य मे सफलं जन्म जीवितञ्च सुजीवितम् ।
गृहञ्च सफलं जातं युष्माकं गमनं यतः ।
ययश्च द्विजवे जीव एतान्यत् शूद्रपञ्चके ।
गुणाश्च जीवमानस्य च द्विजदं वा द्विजाः यत ।
तत् सर्वं श्रोतुमिच्छामि भूत भो शूद्रपुङ्गवाः ।
इति राज्ञो वचः श्रुत्वा कथयन् नाममात्रके ।
काश्यपे चैव गोत्रे च दशनामा महामतिः ।
तस्य दासो गौतमस्य गोत्रे दत्तपो वदः ।
शाण्डिल्यगोत्रे सम्भूतो भट्टनारायणः कृती ।
गौतालिन्य दासोऽयं घोषः सोमवान्तक ।
भरद्वाजेषु विख्यातः श्रीहर्षो मुनिसत्तम ।
दासस्तस्य विराटाख्यो गुहकः काश्यप गुरु ।
काश्यगोत्रनिर्दिष्टो वदगर्भमुनिस्तदम् ।
तस्य दासो मित्रवरो विश्वामित्रस्य मोचक ।
कालिदास इति ख्यातः शूद्रवत्समन्वितः ।
वात्स्यगोत्रेषु सम्भूतस्तत्रखेति कल्पितः ।
मौद्गल्यगोत्रजो दत्तः शुद्धोत्तमसाधकः ।
एतेषां दासदानादि ज्ञातानोऽपि तत्क्षणे ।
इति कथा श्रुत्वा नृपः सम्यक् प्रणतस्ततः ।
विचार्य च निश्चयं कृत्वा धर्मसंस्थितम् ।
ग्राम दत्त्वैव सर्वेषां वस्त्राणि विविधानि च ।
दत्त्वा विप्रान् विसर्ज्य च दासान् स नृपोत्तम ।
अथ देवे कन्याकाला सर्वे च द्विजपुङ्गवाः ।
ययस्य प्राप्य जाताः ये वादिदविनदिन " ॥ * ॥

अथ बङ्गजकायस्थविशेषाः ।

"अथ बङ्गजकुलस्य कायस्थकुलस्य ।
कुलेऽप्यत्र चैव कुलानामप्युदयम् ।
मौद्गल्याद्यतिशयिनः शूद्रदेवं ददावत् ।
एतेषां बन्धनं नृपः मानत् न चिन्त्यते ।
अथ तत्र द्विजाः द्विजानां ग्रामे नियोजिताः ।
देवीवसुः मित्रेषु तत्र वारेन्द्रदक्षिणम् ।
तथैव द्विजश्च घोषः गुहश्च कविनोत्तमे ।
शुद्धाय पालश्च दत्तश्च देवः तथा ।
बन्धु दित्याद्यः स नन्दादेश्वरो नदः ।
इति कथितं मया । कुलानां देवेन कायस्थानाम् ।
कुल कर्तुं महद्देवाः कायस्थे देवे बङ्गजेभ्यः" ॥ * ॥

अथ बङ्गजकायस्थविशेषः ।

"अथ महेन्द्र ये प्रतिनियाः द्विजैरपुरा ।
तेषां निर्वन्धनायत्ते कुलदेव विदेशान् ।
वसवशे च सुन्दो दो नाना सम्बन्धवौ ।
गोत्रेषु च समास्थाताः नृपमाश्चाहभौ ।
गुहे दशरथश्चैव मित्रे नारायणिकाचयः ।
दत्ते नारायणश्चैव दत्ते च बङ्गजाः स्मृताः" ।

अपरन्तु ।

"नागे दशरथश्चैव महानन्दस्तु नायकः ।
चन्द्रशेखरदासश्च सर्वे शुद्धाधरस्तथा ।
दामोदरश्च स्यातो दामकृष्णादिनिर्णयः ।
पालिते नन्दनः स्यात् चन्द्रे नारायणस्तथा ।
पाठे चापि समाख्यातो दासाश्चैव च हरकः ।
भद्रे दिकम्बरश्चैव धरे तु याज्ञवल्क्य ।
प्रभाकरस्तु नन्दी स्यात् केशवो देवदत्तकः ।
कर्णीपतिरिति ख्यातः कुण्डश्चैव प्रकीर्तितः ।
सोमे धराधरश्चैव सिंहे रत्नाकरस्तथा ।
नारायणः समाख्यातो रक्षिते च तथापरे ।
वेदगर्भश्च रश्चैव देवादिविष्णुसायक ।
आढ्ये शिवोऽपि च स्यातो मन्दन च उमापति ।
दत्ते बहुपतिर्निर्दिष्टा धर्मात्म गङ्गादत्ता ।
अन्योऽपि भूता विख्याताश्च देवादिनायकाः ।
ते बङ्गजाः समाख्याताः बङ्गेषु प्रतिष्ठिताः" ॥ * ॥

अथ बङ्गजकुलीनादिनिरूपणम् ।

"कुलीन इति नाम स्यात् मध्यमश्च तथापरः ।
महापात्रास्तथैव इति संख्याक्रमसुदयम्" ।

तद्यथा ।

"वसुर्घोषो गुहो मित्रः दत्तो नाग नागकः ।
दासः देवः करो नागः पालितश्चन्द्रमाधवौ ।
राहो भद्रो धरो नन्दो देवः कुण्डश्च सोमकः ।
रक्षिताङ्कुरसिंहाश्च विष्णुराढ्यश्च नन्दनः ।
अनादोऽयं ततो मया महापात्राः यदि तथा ।
समविप्रता भृत्याः वक्ष्यामि प्रदर्शिता" ॥ * ॥
इति कुलीनमध्यममहापात्राः । अथान्यत् वक्ष्यामि ।
"चोद्रथ कारकश्चैव भरद्वाजः क्रमेण च ।
आद्यः सेनश्चैव दामश्च महाविष्णुकौ ।
गुहश्च वन्दोपौ च दमनः वसुः च भूमिश्च ।
अर्जुन दत्तश्चैव दत्तादिषो च सैनश्च ।
त्रिपथ गुणसागरो च वसुश्च शाण्डिल्यश्च ।
देवश्च दामकुन्तश्च दत्तरक्षितश्चासुर ।
शाकारकारकनामा ग्रामा ग्रामश्च सोमश्च ।
देवश्च करदेवो च गुणवत्सरसुतः ।
वन्दश्च शाक्तिकधौ च वैश्यो वर्धमानः ।
देवश्च वन्दनश्चैव भुञ्जः श्रीश्च वैश्यः ।
वसुदेवो दत्तश्चैव सर्वोऽपि च दर्शकः ।
आदित्य दास मुक्तिश्च दत्तो नन्दस्तथा ।
पौराणश्च सोमश्चैव कारवश्च कर्षण च ।
देवश्च गुणश्चापि द्विजनामदशा स्मृता" ।
इत्येते पञ्चपुत्रकाश्च कुलीनाः भट्टदास
मध्ये नारदे ॥ * ॥ इति बङ्गजकायस्थानाम्
कुलीनाकुलनिर्णयः ।

कायस्था, स्त्री, (कायं तिष्ठतीति । क + स्था +
कर्मणि क ।) हरीतकी । इति वैद्यकी । आमल-

दन्तः । इति भरतः । काकोली । इक्ष-
टीकायां भरतः । तामलकम् । शूक्ष्मैला । इति
रत्नमाला । कायस्थस्त्री । कायस्थजातीय-
स्त्रीशरीरम् ।

कायिक, त्रि, (कायेन निर्वर्तितः निवृत्तो वा
कायेन निवृत्त इति वा । काय + ठञ् ।) शा-
रीरिकं । कायनिष्पन्नं । यथा ।
"मानसिकमनुभावार्थं त्रिधा धीर्वाभिसान्यः ।
यदरोधमेव च कायिकं त्रिविधं स्मृतम्" ॥
इति तिथ्यादितत्त्वम् । (स्त्री शरीरकृषिणी
वस्त्रशुद्धिः । यथा मनुः ८ । १११ ।
"चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या" ॥)

कायिकावृद्धि, स्त्री, (दोहनीवाहनीयां कायरूप-
ममताध्या या वृद्धिः ।) गवादिदोहनवाहनादिकर्म-
जाता वृद्धिः । यथा ।
"दोहवाहनकर्मोत्था कायिका समुदाहृता" ।
इति कात्यायनः । मूलधनाविरोधिनी प्रत्यहंदेया
तदंशादिरूपा वृद्धिः । यथा ।
"कायाविरोधिनी शश्वत् पणपादादि तु कायिका" ।
इति व्यासः । पणायुधस्तु पणपादादा इत्य
पणपादेति पठित्वा पणस्य मूलधनस्य दशम
भागं सार्धम् प्रत्यहं वर्धनं इत्यपि उपमर्देन वा
आदाने प्राप्यते या कायिकेति व्याख्यातवान्
तथाच मौर्यपादाकालेन पणपा च तत्रैव
इति मिश्रा । इति विवादचिन्तामणिः ।

कार, पुं (कृ विक्षेपे + भावे घञ्) वधः । निश्चयः ।
(धातूनामनेकार्थत्वात् अत्र निश्चयार्थोऽपि) बलं तत्र
सम्बद्धेन । क + अ + कार्ये + घञ् ।) यत्नः ।
दानं । पतिः । (क सृत निर्वर्त्य क्रम्यतेऽनेन । क
+ आ + कर्मणि घञ् ।) यमः । इति हेमचन्द्रः ।
करः । (स्वं निष्पन्नशस्यमाह्वयतीति ।) तुषारशैलः ।
इति मेदिनीकरशेखरौ ॥ कर्मणिपदे करणार्थ
च । यथा कुम्भकारः स्वर्णकारः इत्यादि । इति
कारकाः । त्रि । यथा कर्त्रा कारः क्रिया ।
इति मागधकादीना । (कदाचने भवतः
कारयः । यथा कृतकारः । क + अ + कारः ।)

कारक, क्ली, (क्रियां करोतीति इति । कर्मणि कृ
करोति क्रियां निर्वर्तयति । क + ण्वुल् (कर्म ।))
क्रियाजनकं नोचेन निष्पन्नम् । इति दुर्गादासः ।
षडिधाश्चैते ते, यथा कर्तृ च कर्मणः
कारकाः । करणं अधिकरणं । कर्तृ १, कर्म २
कर्म । करणं ३ तत्र तेने दितो कृतः ।
कर्ता ३ यथा करोति, इत्यः । सम्प्रदानम् ४
यथा यति स्नाति हुतं ददाति । अपादानम् ५
यथा निर्गच्छति पादस्थापि । अधिकरणम् ६ यथा
देवा इत्यादि योगितः । इति वोपदेवः । अपि
कोऽपि शब्दम् । इति शब्दचिन्तामणिः ।

कारका त्रि, (करोतीति कर्त्ता क्रियाम् । कृ + ण्वुल्
श्रीः । १ । ३ । १३३ । इति ण्वुल् ।) कर्त्ता
इति मेदिनी । (यथा मनुः ७ । ४०३ ।
"कारकान्नदेवताचात्तप दिवसान्" ॥)

कारुक, त्र, पुं, (कृ + उकञ् + ण्य ।) कार्यरूपः ।

(तत्र भव अण् बहुषु तस्य लुक् ।) तद्देशीयजने बहुवचनान्त । इति हेमचन्द्र ।

कारण, क्ली, (कार्य्यतेऽनेन । णिजन्तात् करणे ल्युट् ।) येन विना यन्न भवति तत । तत्पर्य्याय । हेतु २ बीजम् ३ । इत्यमरः । १ । ४ । २८ । निमित्तम् ४ प्रत्ययः ५ । इति जटाधर । (यथा, विष्णु पुराणे । १ । १७ । ३० ।

"यत प्रधानपुरुषौ यतश्चैतत चराचरम् ।
कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु' ।)

कारणत्वमाह । अन्यथासिद्धिशून्यत्वे सति नियत पूर्व्ववर्त्तित्वम् । तत्त्रिविधम् । समवायिकारणत्वम् १ असमवायिकारणत्वम् २ निमित्तकारणत्वम् ३ परमाणुपरिमाणभिन्नाना कारणत्वम् । इति भाषापरिच्छेद ।१६ १७ । अणुपरिमाणन्तु न कस्यापि कारणम् । इति सिद्धान्तमुक्तावली (यथा, हे रामायणे । १ । ६४ । ११ ।

"बहुभि कारणैर्देव । विश्वामित्रो महामुनि ।
लोभित क्रोधितश्चैव तपसा चाभिवर्द्धते" ।)

करणम् । (कृ वधे+स्वार्थे णिच भावे ल्युट ।) वधः । इति मेदिनी । (आदिः । मूलम् । यथा, मनु । ११ । ८४ ।

"ब्राह्मणः सम्भवेनैव देवानामपि दैवतम् ।
प्रमाणञ्चैव लोकस्य ब्रह्मात्रैव हि कारणम्" ।

प्रमाणम् । यथा, मनु । ८ । २०० ।

"सम्भोगो दृश्यते यत्र न दृश्येतागम क्वचित ।
आगमः कारणं तत्र न सम्भोग इति स्थितिः" ।)

इन्द्रियम् । (यथा, गीतायाम् । १३ । २० ।

"कार्य्यकारणकर्त्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुष सुखदुःखाना भोक्तृत्वे हेतुरुच्यते" ।

"कार्य्यं शरीरं कारणानि सुखदुःखसाधनानी न्द्रियाणि तेषां कर्त्तृत्वे तदाकारपरिणामे" ।

इति तट्टीकायां श्रीधरस्वामी ।) देह । (यथा, शाङ्करात्मबोधे । १३ ।

"अनाद्यविद्याऽनिर्व्वाच्या कारणोपाधिरुच्यते ।
उपाधित्रितयादन्यमात्मानमवधारयेत" ।)

साधनम् । (करणमेव स्वार्थे अण ।) कर्म्म । (यथा, चाणक्ये । २३ ।

"न कश्चित्कस्यचिन्मित्र न कश्चित्कस्यचित् रिपु ।
कारणेन हि जानाति मित्राणि च रिपूस्तथा" ।)

कायस्थ । (करणशब्देऽस्य विशेषो ज्ञेय ।) वाद्य प्रभेद । गीतप्रभेद । इति भरतधृतरत्नकोषः । (आदिकारणत्वात् विष्णु । यथा महाभारते । १३ । १४९ । ५१ ।

"करण कारण कर्त्ता विकर्त्ता गहनो गुह" ।

शिव । यथा शङ्करकृते वेदसारशिवस्तवे ७ ।

"अज शाश्वत कारण कारणानाम्
शिव केवल भासक भासकानाम्' ।)

कारणगुणोद्भवगुण, पुं, (कारणगुणं उद्भवो यस्य । स चासौ गुणश्चेति कर्म्मधारय ।) कारणगुण पूर्व्वकगुणा । तद्यथा । रूपम् १ रस २ गन्ध ३ अपाकजस्पर्शः ४ द्रवत्वम् ५ स्नेह ६ वेगः ७ गुरु त्वम् ८ एकत्वम् ९ पृथक्त्वम् १० परिमाणम् ११ स्थितिस्थापकसंस्कार १२ । इति भाषा परिच्छेदे । ९६ ।

कारणशरीर, क्ली, (कारणं अविद्या सैव शरी रम् । अनाद्यविद्याऽनिर्व्वचनीय शरीरद्वयकारण मात्रम् । सत्स्वरूपाज्ञान यदस्ति तत्कारण शरीरमित्याह ।) सत्त्वप्रधानमज्ञानम् । (किन्तु शीभावस्थायां सूक्ष्मवृत्तित्वात् विषयव्यापाररहि तस्यान्तःकरणस्य सुतरां सुखस्वरूपेणानुभूयतेऽसौ दशा ।) तत्पर्य्यायः । आनन्दमयकोष २ सुषुप्ति ३ । (यदुक्त वेदान्तसारे । १६ ।

"अस्यापीयमहङ्कारादिकारणत्वात कारणश रीरं आनन्दप्रचुरत्वात कोषवदाच्छादकत्वाच्च आनन्दमयकोष सर्व्वोपरमत्वात सुषुप्तिः अत एव स्थूलसूक्ष्मशरीरलयस्थानमिति चोच्यते" । अत्र सुबोधिनी यथा ।

"प्रलयकाले हिरण्यगर्भादिप्रपञ्चोत्पादकेश्वर गतमूलप्रकृतिवत सुषुप्तिकाले अहङ्कारादिशरी रोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि कारणशरीरत्व इन्द्रियतद्विषयाभावे आत्मज्ञा भावादानन्दबाहुल्यादानन्दमयत्व आच्छादकत्वा त्कोषत्वञ्च युक्तमितिभाव । ननु स्थूलसूक्ष्मशरीर लयस्थानस्य कथ सुषुप्तिशब्दवाच्यत्वमित्याशङ्क्य पूर्व्ववत् सञ्ज्ञाभेद इति वक्तुं तत्र युक्तिमाह सर्व्वो परमत्वादिति । पञ्चीकृतस्थूलशरीरस्य व्यावहारि कस्य स्वाप्नप्रपञ्चस्य स्वकारणेऽज्ञाने लीनत्वात् सर्व्वोपरतिरित्यर्थः । तथा चोक्तम् ।

"लये फेनस्य तद्धर्म्मा द्रवाद्याः स्युस्तरङ्गके ।
तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा ।
व्यवहारिक देहस्य लय स्यात् प्रतिभासिके ।
तल्लये सच्चिदानन्दाः पर्य्यवस्यन्ति साक्षिणि" ।)

कारणा, स्त्री, (कृ हिंसायाम । णिजन्तात् ततो "ण्यासश्रन्थेति" । ३ । ३ । १०७ । युच् तत टाप ।) यातना । गाढवेदना । इत्यमरः । १ । ९ । ३ । नरकव्यथा यमयातना । इति केचित् । इति भरत ।

कारणिक, त्रि (करणे कारणैर्वा चरति । "चर तीति" । ४ । ४ । ८ । ठक् ।) परीक्षकः । इत्य मरः । ३ । १ । ७ ।

कारणोत्तर, क्ली, (कारणेन उत्तरम् ।) प्रथम खन्डनम् । सत्यत्वेनाङ्गीकृत्य तत्प्रतिकूलरूप कारणं ब्रूयात् यदा तदुत्तरम् । तत्त्रिविधम् । बलवत् १ तुल्यबलम् २ दुर्ब्बलम् ३ । आद्य यथा मया त्वत्त शत गृहीतमिति सत्य किन्तु तत परिशोधितम् । द्वितीय यथा मदीयेय भूमिः क्रमागतत्वादिति वादुक्ते प्रतिवादिनोऽपि तथो त्तरम् । तृतीय यथा ममैव भूमिः क्रमागतत्वात् इति वादुक्ते ममैव भूमिः दशवर्षोपभुक्तमात्रत्वात् इति प्रत्युत्तरम् । इति व्यवहारतत्त्वम् ।

कारण्ड, पुं स्त्री, (जलकाकक इति रमेश । रण्ड । ईषत् रण्ड । "ईषदर्थे" ६ । ३ । १०५ । इति कोः कादेशः । कारण्डं कायति । कै शब्दे + "आतोऽनुपसर्गे क" । ३ । २ । ३ । क । कारण्डस्य तदाकार वाति वा ।) हंसविशेष । इत्यमर । २ । ५ । ३४ । राङ्हाँस इति भाषा । (यथा ऋतुसंहारे । शरद्वर्णने ८ ।

"कारण्डवाननविघट्टितवीचिमाला
कादम्बसारसकुलाकुलतीरदेशा" ।)

कारण्डव्यूह, पुं, बुद्धभेद । इति त्रिकाण्डशेष । (बौद्धशास्त्रविशेष ।)

कारन्धमी, [न्] पु, (कर एव कारस्तं धमतीति । ध्मा + इनि । पृषोदरादित्वात् साधु ।) कांस्यकारः । धातुवादरत इति मेदिनी ।

कारम्भा, स्त्री, (ईषत् रम्भा । कोः कादेशः ।) प्रिय ङ्गुवृक्ष । इत्यमरः । २ । ४ । ५६ ।

कारव, पुं, (का इति रवो यस्य । कुत्सितो वो यस्येति वा ।) काक । इति त्रिकाण्डशेष ।

कारवल्ली, स्त्री, (कारा इतस्ततो विक्षिप्ता वल्ली यस्या । यद्वा कुत्सित आरो गतिर्यस्या । सा चासौ वल्ली चेति ।) कारवेल्ल । काण्डीरः । इति राजनिर्घण्ट ।

कारवी, स्त्री, (कार याति । वा + क । के जलोप लक्षितवर्षाकाले रवो यस्य । कारवः केकारवो मयूरस्तस्य पुच्छमिवाकारोऽस्त्यस्य अच् । यद्वा कृ हिंसाया स्वार्थे णिच्ततः क्विप् । कारमवति । कर्म्म ण्यण । गौरादित्वात् ङीष् ।) मधुरा । मौरी इति भाषा । दीप्यः । मयूरशिखा । यमजटा इति भाषा । छोपयमानिका इति केचित । सरवी । केले जीरा इति भाषा । हिङ्गुपत्री । हिङ्गेर पाता इति भाषा । इत्यमरभरतौ । क्षुद्रकारवेल्ली । इति राजनिर्घण्ट । छोट करला इति भाषा ।

कारवेल्ल, क्ली, (कार वेल्लति । वेल्ल चलने कर्म्म ण्यण् । यद्वा कारेण वातगमनेन वेल्लति चलति गच्छति वा वेल्ल चलने अच् ।) कठिल्लकम् । करला इति भाषा । तत्पर्य्यायगुणाः ।

"कारवेल्ल कठिल्ल स्यात कारवेल्ली ततो लघु ।
कारवेल्ल हिम भेदि लघु तिक्तमवातलम् ।
ज्वरपित्तकफास्र पाण्डुमेहकृमीन् हरेत् ।
तद्गुणा कारवेल्ली स्याद्विशेषाद्दीपनी लघु" ।

इति भावप्रकाश । अमरे पुंलिङ्गोऽयम् ।

कारवेल्ल, पुं, (कारेण वायुवत् गत्या वेल्लति चल तीति । कार + वेल्ल + अच् ।) लताविशेष । करला इति भाषा । तत्पर्य्याय । कठिल्ल २ सुषवी ३ । इत्यमरः । २ । ४ । १५४ । सुषवी ४ सुषवी ५ । इति तट्टीका । कटरः ६ कारवल्ल्यु ७ सुकाण्ड ८ उग्रकाण्डः ९ कठिल्ल १० नाना कन्दरः ११ पटु १२ । इति शब्दरत्नावली । तद्गुणाः । दीपनत्वम् । रक्तदोषनाशित्वम् । लघुत्व । तिक्तत्व । पित्तकफादिनाशित्वम् । वह्निकरत्वञ्च । इति राजवल्लभ ।

कारवेल्लक, पुं, (कारवेल्ल इव । स्वार्थे कन् ।) कार वेल्ल । इति रत्नमाला । (क्लीवत्वमपि दृश्यते । यथा सुश्रुते सूत्रस्थाने ४६ अध्याये ।

"तद्वत् कर्कोटकं प्रोक्तं कारवेल्लकमेव च" ।)

कारवेल्ली, स्त्री, (कारवेल्ल + अल्पार्थे ङीष् ।) क्षुद्र

अथ सर्व्वे च ग्रामीणा विप्रागमे कौतुकाद्गताः ।
इति तेषां वचः श्रुत्वा चिन्ताकुलो महीपतिः ।
किं करोमि क्व गच्छामि विललाप पुनः पुनः ॥
कान्यकुब्जात् समानीतान् दूतेन द्विजपञ्चकान् ।
वेदशास्त्रेष्ववगतान् सर्व्वाङ्गे च विशारदान् ॥
गोयानारोहितान् विप्रान् खड्गचर्म्मादिभिर्युतान् ।
क्षत्रवेशान् समालोक्य विषादो जायते हृदि ॥
अश्रद्धा जायते राज्ञ इति ज्ञात्वा द्विजोत्तमाः ।
आशीर्व्वादार्थनिर्म्माल्यं मल्लकाष्ठोपरि स्थितम् ॥
तदा काष्ठं सजीवं स्यात् फलपल्लवसंयुतम् ।
इति दृष्ट्वा नृपस्तस्मिन् कम्पान्वितकलेवरः ॥
स्तोत्रञ्च बहुधा तेषामकरोत् स नृपोत्तमः ।
आसनं पाद्यमानीय ददौ विनयपूर्व्वकम् ।
उपविष्टा द्विजाः पञ्च तथा च शूद्रपञ्चकाः ॥
राजस्ते कुशलं सर्व्वं प्रोचुश्चेत्यवदत् स तान् ।
अद्य मे सफलं जन्म जीवितञ्च सुजीवितम् ॥
पूतञ्च भवनं जातं युष्माकं गमनं यतः ।
एवञ्च क्रियते स्तोत्रं ह्यन्यान्यत् शूद्रपञ्चके ॥
युष्माकं गोत्रमाख्या च किमर्थं वा द्विजैः सह ।
तत् सर्व्वं श्रोतुमिच्छामि ब्रूत भोः शूद्रपुङ्गवाः ॥
इति राज्ञो वचः श्रुत्वा कथयन् नामगोत्रके ।
काश्यपे चैव गोत्रे च दक्षनामा महामतिः ॥
तस्य दासो गौतमस्य गोत्रे दशरथो वसुः ।
शाण्डिल्यगोत्रे सम्भूतो भट्टनारायणः सुधीः ॥
सौकालिनश्च दासोऽयं घोषः श्रीमकरन्दकः ।
भरद्वाजेन विख्यातः श्रीहर्षो मुनिसत्तम ॥
दासस्तस्य विराटाख्यो गुहकः काश्यपः स्मृतः ।
सावर्ण्यगोत्रनिर्द्दिष्टो वेदगर्भमुनिस्त्वयम् ॥
तस्य दासो मित्रवरो विश्वामित्रश्च गोत्रकः ।
कालिदास इति ख्यातः शूद्रवंशसमुद्भवः ॥
वात्स्यगोत्रेषु सम्भूतश्छान्दडश्चेति चक्रिवः ।
मौद्गल्यगोत्रजो दत्तः पुरुषोत्तमसाह्वकः ॥
एतेषां रक्षणार्थाय आगतोऽस्मि तवालये ।
इति श्रुत्वा नृपश्रेष्ठ मनसा हर्षमागतः ॥
विधानेनैव निवसन् क्रतुञ्च धर्म्मसञ्चितम् ।
ग्रामं सुवर्णं गाश्चैव वस्त्राणि विविधानि च ॥
दक्षिणार्थं द्विजातिभ्यः प्रददौ स नृपोत्तमः ।
अथ देशे कृतावासाः सर्व्वे च द्विजशूद्रकाः ॥
बहवश्च प्रजा जाता नानादेशनिवासिनः" ॥ * ॥

अथ वल्लालकृतश्रेणिविभागः ।

"अथ वल्लालभूपश्च अम्बष्ठकुलनन्दनः ।
कुरुतेऽतिप्रयत्नेन कुलशास्त्रनिरूपणम् ॥
आदिशूरानीतविप्रान् शूद्रांश्चैव तथापरान् ।
एतेषां सन्ततीः सर्व्वा आनयत् स निजालये ॥
यत्र यत्र स्थिता विप्रास्तत्र ग्रामे निरोपिताः ।
श्रेणीद्वयन्तु निर्णीतं राढीवारेन्द्रसञ्ज्ञितम् ॥
तथैव द्विविधं प्रोक्तं कुलञ्च सद्द्विजोत्तमे ।
शूद्रस्यापि कुलञ्चैव तथैव श्रेणयः कृताः ॥
वङ्गदक्षिणराढौ च वङ्गवारेन्द्रकौ तथा ।
इति चतस्रः श्रेण्यः स्थानदेशनिवासतः ॥
कुलं चतुर्व्विधं तेषां श्रेणीश्रेणीविशेषतः" ॥ * ॥

अथ वङ्गजकायस्थश्रेणिनिर्णयः ।

"तत्र वङ्गेषु यैः शूद्रैर्निवासः क्रियतेऽधुना ।
तेषां निर्णयमाचक्षे कुलस्यैव विशेषतः ॥
वसुवंशे च मुख्यौ द्वौ नाथा गन्धर्व्वपूषणौ ।
घोषेषु च समाख्यातश्चतुर्भुजमहाकृती ॥
गुहे दशरथश्चैव मित्रे नारायणस्तथा ।
दत्ते नारायणश्चैव एते च वङ्गजाः स्मृताः" ॥

अपरन्तु ।

"नागे दशरथश्चैव महानन्दस्तु नाथकः ।
चन्द्रशेखरदासस्तु सेने गङ्गाधरस्तथा ॥
दामोदरकरः ख्यातो रामकृष्णपलितस्तथा ।
पालिते भवदत्तः स्यात् भद्रे नारायणाख्यकः ॥
पाले श्याम समाख्यातो राहावद्दे च श्यामकः ।
भद्रे दिगम्बरश्चैव धरे तु व्यासवल्लभः ॥
प्रभाकरस्तु नन्दी स्यात् केशवो देववंशजः ।
शचीपतिरिति ख्यातः कुण्डवंशे प्रकीर्त्तितः ॥
सोमे गदाधरश्चैव सिंहे रत्नाकरस्तथा ।
नारायणः समाख्यातो रक्षिते च तथापरे ॥
वेदगर्भाङ्कुरश्चैव दत्यारिर्व्विष्णुसत्तमः ।
आढ्ये त्रिलोचनः ख्यातो नन्दने च उमापतिः ॥
एते वङ्गजनिर्द्दिष्टा वल्लालेन महात्मना ।
अन्येऽपि शूद्रा विख्यातास्तत्र देशनिवासिनः ॥
ते वङ्गजाः समाख्याताः करणेषु प्रतिष्ठिताः" ॥ * ॥

अथ वङ्गजकुलीनादिनिरूपणम् ।

"कुलीन इति सञ्ज्ञा स्यात् मध्यल्यश्च तथापरः ।
महापात्रोऽपरश्चैव इति सञ्ज्ञाचतुष्टयम्" ॥

तद्यथा ।

"वसुर्घोषो गुहो मित्रो दत्तो नागश्च नाथकः ।
दास सेन करो दाम पालितश्चन्द्रभानकौ ॥
राहो भद्रो धरो नन्दी देव कुण्डश्च सोमकः ।
रक्षिताङ्कुरसिंहाश्च विष्णुराढ्यश्च नन्दनः ॥
बलारोऽग्रनालयो मध्या महापात्राः परे तथा ।
सप्तविंशति शूद्राणां वल्लालेन प्रकाशिताः" ॥ * ॥

इति कुलीनमध्यल्यमहापात्राः । अपरान् वदामि ।

"चोडश्च आरकश्चैव धरणीधर एव च ।
आदय मैत्रश्चैव शानश्च भद्रविन्दुकौ ॥
गुहश्च वलघोषी च धन्वा वर्म्मा च भूमिकः ।
रुद्रश्च वर्द्धकश्चैव रायादित्यौ च मीलकः ॥
खिलश्च गुप्तपाणी च वन्धुश्च शान्तिसञ्ज्ञकः ।
हेमश्च समतुर्गाङ्गो राणाराङ्कुतदाहकाः ॥
दानामयापमानाज्ञाः श्यामः शीलश्च तोषकः ।
वैद्यापि हरवेदौ च भूतालम्बवनद्धकाः ॥
इन्द्रश्च शक्तिवन्तौ च क्षेमादौ वर्द्धनस्तथा ।
हेमश्च मन्धकश्चैव भुञ्जिः कीर्त्तिश्च शीलकः ॥
घनुर्गुप्तौ दयश्चैव मनोरीतिश्च दाडिकः ।
चाकिश्च श्याम पूर्णिश्च गणकौ नादकस्तथा ॥
रोहश्च शोमकश्चैव चाशकस्तथैव च ।
ढोलश्च दुतकश्चेति द्विसप्ततिमता स्मृताः' ॥
एतेषां प्रतिपुरुषक्रमेण कुलार्पणात् महापात्रभावो जायते ॥ * ॥ इति वङ्गजघटकरामानन्दशर्म्मकृतकुलदीपिका ॥

कायस्था, स्त्री, (कायं तिष्ठत्यस्याम् । काय + स्था + घञर्थे क ।) हरीतकी । इति मेदिनी ॥ धात्रीवृक्षः । इति जटाधरः ॥ काकोली । इत्यमरटीकायां भरतः ॥ एलाद्वयम् । तुलसी । इति राजनिर्घण्टः ॥ कायस्थस्त्रीजातिः । कायस्थपत्नी कायस्थी ॥

कायिकः, त्रि, (कायेन निष्पादितः निष्पन्नो वा कायेन निर्वृत्त इति वा । काय + ठञ् ।) शारीरिकः । कायनिष्पन्नः । यथा ।
"अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम्" ॥
इति तिथ्यादितत्त्वम् ॥ (स्त्री, शरीरसम्बन्धिनी चक्रवृद्धि । यथा मनुः ८ । १५३ ।
"चक्रवृद्धिं कालवृद्धिं कारिता कायिका च या" ॥)

कायिकावृद्धि, स्त्री, (गोमहीवर्द्दादीनां कायपरिश्रमसाध्या या वृद्धिः ।) गवादिवलीवर्द्दादिकर्म्मयुता वृद्धिः । यथा ।
"दोह्यवाह्यकर्म्मयुता कायिका समुदाहृता" ॥
इति व्यासः ॥ मूलधनाविरोधिनी प्रत्यब्ददेयपण तदर्द्धादिरूपा वृद्धिः । यथा ।
"कायाविरोधिनी शश्वत् पणार्द्धाद्या तु कायिका" ॥
इति नारदः ॥ पणादधस्तु पणाङ्गाद्या इत्यत्र पणपादेति पठित्वा पणस्य मूलधनस्य यावद्व्यर्थं तावत् शश्वत् प्रतिदिवसमपि उत्तमर्णेन या वाह्यते प्राप्यते सा कायिकेति व्याख्यातवान् तन्माद्या भोगलाभान्तर्गता अपरा च तद्भिन्ना इति मिश्राः । इति विवादार्णवसेतुः ॥

कारः, पुं, (कृ हिंसायां + भावे घञ् ।) वधः । निश्चयः । (धातूनामनेकार्थत्वात् अत्र निश्चयार्थेऽपि ।) कं सुखं छ्यत्यनेन । क + छट + करणे + घञ् ।) बलिः । यत्नः । यतिः । (कं सुखं निरुति छ्यतीति । क + छट + कर्त्तरि अच् ।) पतिः । इति शब्दरत्नावली ॥ (क निश्चन्दनमर्च्छतीति ।) तुषाराद्रिः । इति मेदिनीकरहेमचन्द्रौ ॥ कर्म्मोपपदे कर्तृवाच्यः । यथा कुम्भकारः स्वर्णकारः इत्यादि । इति व्याकरणम् ॥ क्रिया । यथा करण कार क्रिया । इति रामतर्कवागीशः ॥ (अक्षरान्ते तदक्षरवाचकः । यथा ककारः । मकारः । इत्यादिः ।)

कारकं, क्ली, (क्रियाभिरन्वित इति । भाष्यमते तु करोति क्रियां निर्वर्त्तयतीति । कृ + कर्त्तरि ण्वुल् ।) क्रियानिमित्तं लोकवत् सिद्धम् । इति दुर्गसिंहः ॥ फक्षिभाष्यमते पुं यथा भविष्णुः स प्रयोज्यः कारकः । तत्तु षड्विधम् । कर्म्म १ यथा रामं नमति । करणम् २ यथा नेत्रैः शिवो दृष्टः । कर्त्ता ३ यथा भर्गे शिवो दृष्टः । सम्प्रदानम् ४ यथा हरिः शक्राः सुखं ददातु । अपादानम् ५ यथा विभीमश्च पदाम्भस्त । अधिकरणम् ६ यथा देवे वसदि गोविन्दः । इति वोपदेवः ॥ वर्णाम्बोद्भव भस्म । इति राजनिर्घण्टः ॥

कारकः, त्रि, (करोति कर्म्मादिकम् । कृ + "ण्वुल्तृचौ" । ३ । १ । १३३ । इति ण्वुल् ।) कर्त्ता । इति मेदिनी ॥ (यथा मनुः ७ । २०४ ।
"आदानमप्रियकरं दानञ्च प्रियकारकम्" ॥)

कारकुक्षीयः, पुं, (कारकुक्षि + छ ।) शाल्वदेशः ।

(तत्र भवः अण् बह्वच् तस्य लुक् ।) तद्देशीयजने बहुवचनान्तः । इति हेमचन्द्रः ॥

कारण, क्ली, (कार्य्यतेऽनेन । णिजन्तात् करणे ल्युट् ।) येन विना यन्न भवति तत् । तत्पर्य्यायः । हेतुः २ बीजम् ३ । इत्यमरः । १ । ४ । २८ ॥ निमित्तम् ४ प्रत्ययः ५ । इति जटाधरः ॥ (यथा, विष्णुपुराणे । १ । १७ । १० ।
"यतः प्रधानपुरुषौ यतश्चैतत् चराचरम् ।
कारणं सकलस्यास्य स नो विष्णुः प्रसीदतु ॥")
कारणत्वमाह । अन्यथासिद्धिशून्यत्वे सति नियतपूर्व्ववर्त्तित्वम् । तत्त्रिविधम् । समवायिकारणत्वम् १ असमवायिकारणत्वम् २ निमित्तकारणत्वम् ३ परमाणुपरिमाणभिन्नानां कारणत्वम् । इति भाषापरिच्छेदः । १६ । १७ ॥ अणुपरिमाणन्तु न कस्यापि कारणम् । इति सिद्धान्तमुक्तावली ॥ (यथा, रामायणे । १ । ६४ । ११ ।
"बहुभिः कारणैर्देव ! विश्वामित्रो महामुनिः ।
लोभितः क्रोधितश्चैव तपसा चाभिवर्द्धते ॥")
करणम् । (कृ वधे + स्वार्थे णिच् भावे ल्युट् ।) वधः । इति मेदिनी ॥ (आदिः । मूलम् । यथा, मनुः । ११ । ८४ ।
"ब्राह्मणः सम्भवेनैव देवानामपि दैवतम् ।
प्रमाणञ्चैव लोकस्य ब्रह्मात्रैव हि कारणम् ॥"
प्रमाणम् । यथा, मनुः । ८ । २०० ।
"सम्भोगो दृश्यते यत्र न दृश्येतागमः क्वचित् ।
आगमः कारणं तत्र न सम्भोग इति स्थितिः ॥")
इन्द्रियम् । (यथा, गीतायाम् । १३ । २० ।
"कार्य्यकारणकर्त्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥"
"कार्य्यं शरीरं कारणानि सुखदुःखसाधनानीन्द्रियाणि तेषां कर्त्तृत्वे तदाकारपरिणामे" । इति तट्टीकायां श्रीधरस्वामी ॥) देहः । (यथा, शाङ्करात्मबोधे । १४ ।
"अनाद्यविद्याऽनिर्व्वाच्या कारणोपाधिरुच्यते ।
उपाधित्रितयादन्यमात्मानमवधारयेत् ॥")
साधनम् । (करणमेव स्वार्थे अण् ।) कर्म्म । (यथा, चाणक्ये । २३ ।
"न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचित् रिपुः ।
कारणेन हि जानाति मित्राणि च रिपूंस्तथा ॥")
कायस्थः । (करणशब्देऽस्य विशेषो ज्ञेयः ।) वाद्यप्रभेदः । गीतप्रभेदः । इति भरतधृतरत्नकोषः ॥ (आदिकारणत्वात् विष्णुः । यथा महाभारते । १३ । १४९ । ५४ ।
"करणं कारणं कर्त्ता विकर्त्ता गहनो गुहः ॥"
शिवः । यथा शङ्करकृते वेदसारशिवस्तवे ७ ।
"भव शाम्भव कारण कारणानाम्
शिव केवल भासक भासकानाम् ॥")

कारणगुणोद्भवगुणः, पुं, (कारणगुणे उद्भवो यस्य । स चासौ गुणश्चेति कर्म्मधारयः ।) कारणगुणपूर्व्वकगुणः । तद्यथा । रूपम् १ रसः २ गन्धः ३ अपाकजस्पर्शः ४ द्रवत्वम् ५ स्नेहः ६ वेगः ७ गुरुत्वम् ८ एकत्वम् ९ पृथक्त्वम् १० परिमाणम् ११ स्थितिस्थापकसंस्कारः १२ । इति भाषापरिच्छेदे । ९६ ॥

कारणशरीर, क्ली, (कारणं अविद्या सैव शरीरम् । अनाद्यविद्याऽनिर्व्वचनीयं शरीरद्वयकारणमात्रम् । सत्स्वरूपाज्ञानं यदस्ति तत्कारणशरीरमित्याहुः ।) सत्त्वप्रधानमज्ञानम् । (किन्तु लीनावस्थायां सूक्ष्मवृत्तित्वात् विषयव्यापाररहितत्वात् तस्यान्तःकरणस्य सुतरां सुखस्वरूपेणानुभूयतेऽसौ सत्ता ।) तत्पर्य्यायः । आनन्दमयकोषः २ सुषुप्तिः ३ । (यदुक्तं वेदान्तसारे । १९ ।
"अस्याशेषमहङ्कारादिकारणत्वात् कारणशरीरं आनन्दप्रचुरत्वात् कोषवदाच्छादकत्वाच्च आनन्दमयकोषः सर्व्वोपरमत्वात् सुषुप्तिः अत एव स्थूलसूक्ष्मशरीरप्रपञ्चलयस्थानमिति चोच्यते" । अत्र सुबोधिनी यथा ।
"प्रलयकाले हिरण्यगर्भादिप्रपञ्चोत्पादकेश्वरगतमूलप्रकृतिवत् सुषुप्तिकाले अहङ्कारादिशरीरोत्पादकसंस्कारमात्रावशिष्टजीवगताज्ञानस्यापि कारणशरीरत्वं इन्द्रियतद्विषयाभावे व्यासङ्गाभावादानन्दबाहुल्यादानन्दमयत्वं आच्छादकत्वात् कोषत्वञ्च युक्तमिति भावः । ननु स्थूलसूक्ष्मशरीरलयस्थानस्य कथं सुषुप्तिशब्दवाच्यत्वमित्याशङ्क्य पूर्व्ववत् सप्तमी इति वक्तुं तत्र युक्तिमाह सर्व्वोपरमत्वादिति । यद्यप्युक्तस्थूलशरीरस्य व्यावहारिकस्य स्वाप्नप्रपञ्चस्य स्वकारणेऽज्ञाने लीनत्वात् सर्व्वोपरतिरित्यर्थः । तथा चोक्तम् ।
"लये फेनस्य तद्धर्म्मा द्रवाद्याः स्युस्तरङ्गके ।
तस्यापि विलये नीरे तिष्ठन्त्येते यथा पुरा ॥
व्यावहारिकदेहस्य लये स्यात् प्रातिभासिके ।
तल्लये सच्चिदानन्दाः पर्य्यवस्यन्ति साक्षिणि ॥")

कारणा, स्त्री, (कृ हिंसायाम् । णिजन्तात् कृणो "ण्यासश्रन्थो युच्" । ३ । ३ । १०७ । युच् ततः टाप् ।) यातना । गाढवेदना । इत्यमरः । १ । ९ । ३ ॥ नरकयातना यमयातना । इति केचित् । इति भरतः ॥

कारणिक, त्रि, (करणे कारणैर्वा चरति । "चरति" । ४ । ४ । ८ । ठक् ।) परीक्षकः । इत्यमरः । ३ । १ । ७ ॥

कारणोत्तर, क्ली, (कारणेन उत्तरम् ।) प्रथमस्कन्दनम् । सत्यत्वेनाङ्गीकृत्य तत्प्रतिकूलरूपकारणं ब्रूयात् तदा तदुत्तरम् । तत्त्रिविधम् । बलवत् १ तुल्यबलम् २ दुर्ब्बलम् ३ । आद्यं यथा मया रूपकशतं धृतं प्रत्यर्पितमिति सत्यं किन्तु तत् परिशोधितम् । द्वितीयं यथा मदीयेयं भूमिः क्रमागतत्वादिति वादिनोक्ते प्रतिवादिनोऽपि तथोत्तरम् । तृतीयं यथा ममेयं भूमिः क्रमागतत्वात् इति वाद्युक्ते ममेयं भूमिः दशवर्षोपभुज्यमानत्वात् इति प्रत्युत्तरम् । इति व्यवहारतत्त्वम् ॥

कारण्डव, पुं स्त्री, (जम्बालादय इति रमेशः । रण्ड । इवत् रण्ड । "इवरच" ४ । ० । १ ५ । इति कोः कादेशः । कारण्ड वाति । वा गतौ + "आतोऽनुपसर्गे" । ३ । २ । ३ । कः । करण्डमेव कारण्ड तदाकारं वाति वा ।) हंसविशेषः । इत्यमरः । २ । ५ । ३४ ॥ खडहाँस इति भाषा । (यथा ऋतुसंहारे । शरद्वर्णने ८ ।
"कारण्डवाननविघट्टितवीचिमाला
कादम्बसारसकुलाकुलतीरदेशा ॥")

कारण्डव्यूह, पुं, बुद्धभेदः । इति त्रिकाण्डशेषः । (बौद्धशास्त्रविशेषः ॥)

कारन्धमी, [न्] पुं, (कार एव कारं धमतीति । ध्मा + इनिः । पृषोदरादित्वात् साधुः ।) कांस्यकारः । धातुवादरतः इति मेदिनी ॥

कारम्भा, स्त्री, (ईषत् रम्भा । कोः कादेशः ।) प्रियङ्गुवृक्षः । इत्यमरः । २ । ४ । ५६ ॥

कारव, पुं, (का इति रवो यस्य । कुत्सितो रवो यस्येति वा ।) काकः । इति त्रिकाण्डशेषः ॥

कारवल्ली, स्त्री, (कारा इव तस्तौ विच्छिन्ना वल्ली यस्याः । यद्वा कुत्सितं आरो गतिर्यस्याः । सा चासौ वल्ली चेति ।) कारवेल्लः । काण्डीरः । इति राजनिर्घण्टः ॥

कारवी, स्त्री, (कारं वाति । वा + कः । के जलोपलक्षितवर्षाकाले रवो यस्य । कारवः केकावरो मयूरकस्य पुच्छमिवाकारोऽस्त्यस्य अण् । यद्वा कृ हिंसायां स्वार्थे णिच् ततः क्विप् । कारमवति । कर्म्मण्यण् । गौरादित्वात् ङीष् ।) मधुरा । मौरी इति भाषा । दीप्यः । मयूरशिखा । बनमटा इति भाषा । क्षेमयमानिका इति केचित् । सवबी । केचे जीरा इति भाषा । हिङ्गुपत्री । हिङ्गेर पाता इति भाषा । इत्यमरभरतौ ॥ क्षुद्रकारवेल्ली । इति राजनिर्घण्टः । छोट करला इति भाषा ॥

कारवेल्ल, क्ली, (कारं वेल्लति । वेल्ल चलने कर्म्मण्यण् । यद्वा कारेण वातगमनेन वेल्लति चलति गच्छति वा वेल्ल चलने अच् ।) कठिल्लकम् । करला इति भाषा । तत्पर्य्यायगुणाः ।
"कारवेल्लं कठिल्लं स्यात् कारवेल्ली ततो लघुः ।
कारवेल्लं हिमं भेदि लघु तिक्तमवातलम् ।
ज्वरपित्तकफास्रघ्नं पाण्डुमेहकृमीन् हरेत् ।
तद्गुणा कारवेल्ली स्याद्विशेषाद्दीपनी लघुः ॥"
इति भावप्रकाशः ॥ अमरे पुंलिङ्गोऽयम् ॥

कारवेल्ल, पुं, (कारेण वायुवत् गत्या वेल्लति चलतीति । कार + वेल्ल + अच् ।) लताविशेषः । करला इति भाषा । तत्पर्य्यायः । कठिल्लकः २ सुषवी ३ । इत्यमरः । २ । ४ । १५४ ॥ सुषवी ४ सुसवी ५ । इति तट्टीका ॥ कटुरः ६ काण्डकटुकः ७ सुकाण्डः ८ उग्रकाण्डः ९ कठिल्लः १० मासमेदकः ११ पटुः १२ । इति राजनिर्घण्टः ॥ तत्पर्य्यायः । धारकत्वम् । रक्तपित्तनाशित्वम् । लघुत्वम् । शुक्रकफपित्तनाशित्वम् । रुचिकरत्वञ्च । इति राजवल्लभः ॥

कारवेल्लक, पुं, (कारवेल्ल एव । स्वार्थे कन् ।) कारवेल्लः । इति रत्नमाला ॥ (क्लीबमपि दृश्यते । यथा सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"तद्वत् कर्कोटकं प्रोक्तं कारवेल्लकमेव च ॥")

कारवेल्ली, स्त्री, (कारवेल्ल + स्त्रियां ङीष् ।) क्षुद्र

कारवेल्लम् । करैलो इति हिन्दी भाषा । उच्छे इति वङ्गभाषा । (यदुक्तं पाकराजेश्वरे ।
"कारवेल्लीफलं तक्रे स्वेदितं हिङ्गुमर्द्दितम् ।
भर्ज्जितं नवनीतेन सैन्धवेन समन्वितम् ॥
विदलितमुकुलमीषत् कारवेल्लीकठोरं
पुलकितमिव तैले साधितं रामठेन ।
रचितमरिचचूर्णं सैन्धवेनातिपूर्णं
सुललितरसनाय श्रोकता मातनोति" ॥
अन्यत् कारवेल्लशब्दे द्रष्टव्यम् ॥)

कारमिहिका, स्त्री, (कारस्य तुषारशैलस्य मिहिका नीहार इव ।) कर्पूरम् । इति राजनिर्घण्टः ॥

कारस्करः, पुं, (कारं वधं करोतीति । कृ + "कृञो हेतुताच्छील्यानुलोम्येषु" । ३ । २ । २० । इति ट निपातनात् सुट् ।) वृक्षविशेषः । तत्पर्य्यायः । किम्पाकः २ विषतिन्दुः ३ कारद्रुमः ४ रम्यफलः ५ कुपीलुः ६ कालकूटः ७ । (यथा महाभारते २ । द्यूतपर्व्वणि ४९ । ७१ ।
"आवर्ज्जिता इवाभान्ति नीपाश्चित्रककौकुराः ।
कारस्करा लोहजङ्घा युधिष्ठिरनिवेशने" ॥)
अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । कुष्ठवातामयास्रकण्डूतिकफार्शोव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

कारस्करटिका, स्त्री, (कारस्कर इव अटति । अट + ण्वुल् टाप् अत इत्वञ्च ।) कर्णजलौका । इति त्रिकाण्डशेषः ॥ केन्नो केन्नुइ इति च भाषा ॥

कारा, स्त्री, (कीर्य्यते क्षिप्यते दण्डार्हो यस्याम् । कॄ विक्षेपे भिदादित्वात् अङ् । "ऋदृशोऽङि गुणः" ७ । ४ । १६ । गुणे दीर्घत्वं निपात्यते ।) कारागारम् । तत्पर्य्यायः । बन्धनालयः २ इत्यमरः । २ । ८ । ११८ ॥ दूती । प्रसेवकः । सुवर्णकारिका । बन्धनम् । इति मेदिनी ॥ पीडा । इति त्रिकाण्डशेषः ॥

कारागारं, क्ली, (कारैव आगारं कारायै बन्धनाय आगारं वा ।) बन्धनगृहम् । यथा । "रिपुः कारागारं कलयति न स केलिकलया" । इति अनर्घराघवे श्यामालोकम् ॥

कारागुप्तः, त्रि, (कारायां बन्धनागारे गुप्तः बद्धः रक्षितो वा ।) कारागारस्थः । इति हेमचन्द्रः । कयेदी इति भाषा ॥

काराधिका, स्त्री, (कं जलं आराति आदत्ते प्रचुरतया आगततया इति यावत् । आ + रा + ण्वुल् टाप् इत्वञ्च ।) बलाका । इति जटाधरः ॥

कारावेश्म, [न्] क्ली, (कारैव कारायै वा वेश्म सद्म ।) कारागारम् । तत्पर्य्यायः । दयाकुलम् २ । इति त्रिकाण्डशेषः ॥

कारिः, स्त्री, (क्रियतेऽसौ । कृ + "विभाषाख्यानपरिप्रश्नयोरिञ् च" । ३ । ३ । ११० । इति इञ् ।) क्रिया । (यदुक्तं सिद्धान्तकौमुद्यां । "कां त्वं कारिमकार्षीः । सर्व्वां कारिमकार्षम्" ॥) करोतीति कृ + "कृञ उदीचां कारुषु" उणां । ४ । १२८ । इति इञ् ।) शिल्पिनि त्रि । इति मेदिनी ॥

कारिका, स्त्री, (धात्वर्थे निर्द्देशे करोतेर्ण्वुल् स्त्रियामित्युक्तिः । यद्वा करोतीति ण्वुल् प्रत्ययस्थादिति इत्वम् ।) नटस्त्री । वृत्तिः । विवरणश्लोकः । (यथा, महाभारते । २ । ११ । ३३ ।
"नाटका विविधाः काव्याः कथाख्यायिककारिकाः" ॥)
शिल्पम् । यातना । इति मेदिनी ॥ वृद्धिः । इत्यमरटीकायां रमानाथः । सुद इति भाषा ॥ स्वल्पाक्षरसत्त्वे बह्वर्थप्रकाशिका कविता । यथा,—
"कारिका तु स्वल्पवृत्तौ बह्वर्थस्य सूचनी" ।
इति हेमचन्द्रः ॥

कारित, त्रि, (कृ + णिच् + कर्म्मणि क्त ।) कुर्व्वन् प्रेरितः । कराण इति भाषा । यथा, मार्कण्डेये । देवीमाहात्म्ये ८१ । ६५ ।
"विष्णुः शरीरग्रहणमहमीशान एव च ।
कारितास्ते यतोऽतस्त्वां कः स्तोतुं शक्तिमान् भवेत्" ॥

कारिता, स्त्री, (कारित + टाप् ।) ऋणिकेन या स्वकार्य्यसाधकतया स्वप्रतिश्रुतमासादिकृतादितोऽधिका वृद्धिर्व्यवस्थापिता सा । अधिक सूद इति भाषा । यथा, विवादार्णवसेतौ कात्यायनः ॥
"ऋणिकेन तु या वृद्धिरधिका सम्प्रकीर्त्तिता ।
आपत्कालकृता नित्यं दातव्या सा तु कारिता" ॥
(तथा च मनुः ८ । १५३ ।
"नाति सांवत्सरीं वृद्धिं न चादृष्टां पुनर्हरेत् ।
चक्रवृद्धिः कालवृद्धिः कारिता कायिका च या" ॥)
तत्पर्य्यायः । कारिका २ कारितावृद्धिः ३ । इति मिताक्षरा ॥

कारी, स्त्री, (कायति हिनस्ति कण्टकैः । कै हिंसायां + इन् ततो ङीष् ।) क्षुपविशेषः । कण्टकारी आकर्षकारीभेदा द्विधा । तत्पर्य्यायः । कारिका २ काम्या ३ गिरिजा ४ कटुपत्रिका ५ । अस्या गुणाः । कषायत्वम् । मधुरत्वम् । पित्तनाशित्वम् । दीपनत्वम् । ग्राहित्वम् । रुचिकण्ठशोधकारित्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

कारीष, क्ली, (करीषाणां समूहः । भिदादित्वात् अण् ।) करीषसमूहः । इत्यमरः । २ । ९ । ५२ ॥ घुटेर राशि इति भाषा । (यथा, हरिवंशे ।
"कारीषेषु प्रसुप्तेषु दीप्यमानेषु सर्व्वशः" ॥)

कारु, पुं, (करोति इति । "कृवापाजिमीति" । उणां १ । १ । उण् ।) विश्वकर्म्मा । इति मेदिनी ॥ (भावे उण् ।) शिल्पम् । इति हेमचन्द्रः ॥

कारु, त्रि, (करोतीति । कृ + उण् उणां । १ । १ ।) कारकः । (यथा, भट्टिः ७ । २८ ।
"राघवस्य ततः कार्य्यं कारुर्व्वानरपुङ्गवः ।
सर्व्ववानरसेनानामाश्वागमनमादिशत्" ॥)
शिल्पी । इति मेदिनी ॥ (यथा कूर्म्मपुराणे ।
"कारुशिल्पी तु कर्म्माणि कारु यत्नात् प्रचरयेत्" ॥)

कारुक, त्रि, (कारु + स्वार्थे कन् ।) शिल्पी । (यथा मनुः । ४ । २१९ ।
"कारुकान्नं प्रजां हन्ति बलं निर्णेजकस्य च ।
गणान्नं गणिकान्नञ्च लोकेभ्यः परिकृन्तति" ॥)

कारुज, पुं, (कं जलं आरुजति । आ + रुज + कः ।) करभः । फेनः । वल्मीकः । नागकेशरः । गैरिकम् ॥ (कारौ कारुतो जायते । कारु + जन + डः ।) शिल्पिनां चित्रम् । स्वयं जातमिति । इति हेमचन्द्रः ॥

कारुणिकः, त्रि, (करुणया शीलमस्य । शीलमिति ठक् ।) दयालुः । इत्यमरः । ३ । १ । १५ ॥ (यथा, रघुः । १४ । ७१ ।
"कवि कारुणिको वव्रे सीतायाः सम्परिग्रहम्" ॥)

कारुण्डी, स्त्री, (कुत्सिता ईषत् वा अण्डी मूर्खवीरा इव ।) जलौका । इति शब्दचन्द्रिका ॥ कारुविका इति च पाठः ॥

कारुण्यं, क्ली, (करुणा करुणावान् । तस्य भावः । करुणैव वा ष्यञ् ।) करुणा । इत्यमरः । १ । ७ । १८ ॥ (यथा गौः रामायणे १ । २ । १५ ।
"मुने शिष्यसहायस्य कारुण्यं समजायत" ॥)

कारूषः, पुं, (करूषो अभिजनः अस्मात् । भर्गादित्वात् अण् अस्य बहुषु न तस्य लुक् ।) करूषदेशवासिनः । तत्पर्य्यायः । वङ्करा २ । इति हेमचन्द्रः ॥ बहुवचनान्तोऽयं शब्दः ॥ (यथा, विष्णुपुराणे २ । ३ । १६ ।
"कारूषा माणवास्तेन पारियात्रनिवासिनः" ॥)

कारोत्तमः, पुं, (कारेषु सुरागालनेषु उत्तमः । मद्यस्य उत्तमतया तथात्वम् ।) कारोत्तरः । इत्यमरटीकायां स्वामी ॥

कारोत्तरः, पुं, (कारेण सुरागालनक्रियया उत्तरति । उत् + तॄ + अच् ।) सुराया मण्डः । तत्पर्य्यायः । सुरामण्डः २ । इत्यमरः । २ । १० । ४२ ॥ कूपः । इति हारावली ॥

कार्कश्यं, क्ली, (कर्कशस्य भावः । कर्कश + ष्यञ् ।) कर्कशता । (यथा, अमरुशतके २४ ।
"कार्कश्यं गमितेऽपि चेतसि तनू रोमाञ्चमालम्बते" ॥)

कार्त्तवीर्य्यः, पुं, (कृतवीर्य्यस्य अपत्यं अण् ।) चन्द्रवंशीयकृतवीर्य्यराजपुत्रः । तत्पर्य्यायः । हैहयः २ दोःसहस्रभृत् ३ अर्ज्जुनः ४ । (यथा, भागवते ९ । २३ । २४ ।
"न नूनं कार्त्तवीर्य्यस्य गतिं यास्यन्ति पार्थिवाः ।
यज्ञदानतपोयोगश्रुतवीर्य्यदयादिभिः" ॥

अस्य खलु माहिष्मती नाम पुरी राजधान्यासीत् । भगवद्दत्तात्रेयाय सप्तद्वीपां धरामजयत् । दत्तात्रेययोगात् बाहुसहस्रप्रभावं अलभत् । दिग्विजये आगतो रावणोऽनेन पराजितो नियुद्धे बद्ध पितामहेन पुलस्त्यमुनिना ततो मोचितः । अयन्तु जमदग्नेराश्रमं गत्वा बलात् सवत्सां होमधेनुं जहार । ततः क्रुद्धेन जामदग्न्येन सबलोऽपि हतोऽसौ कार्त्तवीर्य्यः । अथ वैरशुद्धिं चिकीर्षुभिः दुरात्मभिः कार्त्तवीर्य्यपुत्रैरागत्य स्वाश्रमे ध्यानस्थो जमदग्निर्निपातितः । ततोऽनेन पितृवधामर्षात् जातक्रोधेन परशुरामेण सर्व्वे हैहयाः निपातिताः ।) भैमरथचक्रवर्त्तिविशेषः । तत्पर्य्यायः । सम्भूमः २ । इति हेमचन्द्रः ॥

कार्त्तस्वरं, क्ली, (कृतस्वरे आकरभेदे भवम् अण् । अथवा पठिता स्वरा यस्य स कृतस्वरः सामगानकर्त्ता तस्मै दक्षिणात्वेन देयं वा । "ग्रीष्मे" । ४ । २

६९ इत्यत्र ।) खर्व्वम् । (यथा, माघे १ । २० ।
"स तप्तकार्त्तस्वरभास्वराम्बरः" ।)
धत्तूरः । इत्यमरः । २ । ४ । ७७ ॥

कार्त्तान्तिकः, पुं, (कृतान्तं वेत्ति । "क्रतूक्थादि सूत्रान्ताट्ठक्" । ४ । २ । ६० । इति ठक् ।) ज्योतिर्व्वित् । दैवज्ञः । इत्यमरः । २ । ८ । १४ ॥

कार्त्तिकः, पुं, (कृत्तिकानक्षत्रयुक्ता पौर्णमासी यत्र मासे इति पाणिन्यौ अण् ।) वैशाखादिद्वादशमासान्तर्गतसप्तममासः । कृत्तिकानक्षत्रयुक्ता पौर्णमासी यत्र मासे सः । अथ तुलास्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तरूपमुख्यचान्द्रः । सौरस्तु तुलाराशिस्थरविककालः । इति स्मृतिः ॥ तत्पर्य्यायः । बाहुलः २ ऊर्ज्जः ३ कार्त्तिकिकः ४ । इत्यमरः । १ । ४ । १७ ॥ कौमुदः ५ । इति शब्दरत्नावली ॥ * ॥

अथ कार्त्तिककृत्यम् ।

पद्मपुराणे ।

"तुलामकरमेषेषु प्रातःस्नानं विधीयते" ।

तत्र सङ्कल्पः अरुणोदयकाले मज्जनं कृत्वाचम्य ॐ तत्सदद्य कार्त्तिके मासि अमुकपक्षे अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रः श्री अमुकदेवशर्म्मा श्रीविष्णुप्रीतिकामः प्रातःस्नानमहं करिष्ये इति सङ्कल्प्य यथोक्तविधिना इतिकर्त्तव्यतां विधाय—

"ॐ कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्द्दन ! ।
प्रीत्यर्थं तव देवेश ! दामोदर ! मया सह" ॥

इति स्नायात् । मया लक्ष्म्या । प्रतिदिनसङ्कल्पे तु आरभ्य तुलास्थरविं यावत् प्रत्यहं इति न वक्तव्यम् । किन्तु मासीयमन्तरं तुलास्थरवाविव्यधिक वक्तव्यम् । चान्द्रस्नानवाक्यन्तु वैशाखप्रकरणे अनुसन्धेयम् । तथा वायुपुराणे ।

"यदीच्छेद्विपुलान् भोगान् चन्द्रसूर्य्यग्रहोपमान् ।
कार्त्तिकं सकलं व्याप्य प्रातःस्नायी भवेन्नरः" ॥ * ॥

तथा च गारुडे ।

"गवामयुतदानेन यत् फलं लभते खग ! ।
तुलसीपत्रमेकेन तत् फलं कार्त्तिके स्मृतम्" ॥

ॐ अद्येत्यादि तुलसीपत्रैकैकसमस्तायुतधेनुदानजन्यफलसमफलप्राप्तिकामः एतानि तुलसीपत्राणि श्रीविष्णवेऽहं ददे । इत्यभिधाय एतानि तुलसीपत्राणि श्रीविष्णवे नमः । इत्यनेन दद्यात् ॥ * ॥

ब्रह्माण्डपुराणे ।

"विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः ॥
ॐ दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपन्ते प्रयच्छामि नमोऽनन्ताय वेधसे" ॥

लोलया लक्ष्म्या ।

"दिवि मन्त्रेण यो दद्यात् प्रदीपं सर्पिरादिना ।
आकाशे मण्डपे वापि स चाक्षयफलं लभेत्" ॥

आचम्य । ॐ अद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्मा अक्षयदीपदानफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा आकाशे मण्डपे वापि श्रीविष्णवे दीपदानमहं करिष्ये । इति सङ्कल्प्य दामोदरायेत्यादिना दद्यात् । द्वितीयादिदिने ॐ दामोदरायेत्यनेनेति विशेषः । विष्णुगृहे तु । ॐ अद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्माग्निष्टोमसहस्रजन्यफलसमफलप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा श्रीविष्णुवेश्मनि श्रीविष्णवे दीपदानमहं करिष्ये । इति सङ्कल्प्य ॐ दामोदरायेत्यादिना दद्यात् । द्वितीयादिदिने ॐ दामोदरायेत्यनेनेति विशेषः ॥ * ॥

हविष्यान्नादौ तु ब्रह्मपुराणे ।

"व्रतोपवासनियमैः कार्त्तिको यस्य गच्छति ।
देवो वैमानिको भूत्वा स याति परमं पदम्" ॥

तत्र अद्येत्यादि अमुकतिथावारभ्य तुलास्थरविं यावत् प्रत्यहं अमुकगोत्रोऽमुकदेवशर्म्मा वैमानिकदेवत्वभवनपूर्व्वकपरमपदप्राप्तिकामः श्रीविष्णुप्रीतिकामो वा हविष्येतरभोजननिवृत्तिमहं करिष्ये । इत्यादिवाक्ये विशेषः । एवं फलाहारादावपि ॥ * ॥ हविष्यद्रव्याणि च ।

"हैमन्तिकं सितास्विन्नं धान्यं मुद्गास्तिला यवाः ।
कलायकङ्गुनीवारा वास्तूकं हिलमोचिका ॥
षष्टिका कालशाकञ्च मूलकं केमुकेतरत् ।
लवणे सैन्धवसामुद्रे गव्ये च दधिसर्पिषी ॥
पयोऽनुद्धृतसारञ्च पनसाम्रहरीतकी ।
तिन्तिडी जीरकञ्चैव नागरङ्गञ्च पिप्पली ॥
कदली लवली धात्री फलान्यगुडमैक्षवम् ।
अतैलपक्वं मुनयो हविष्यान्नं विदुर्बुधाः" ॥

हैमन्तिकमित्यभिधायागस्त्यसंहितायाम् ।

"नारिकेलफलञ्चैव कदलीं लवलीं तथा ।
आम्रमामलकञ्चैव पनसञ्च हरीतकीम् ॥
व्रतान्तरप्रशस्तञ्च हविष्यं मन्यते बुधाः" ।

अत्र च आरब्धव्रतोपवासादौ फलजलादिभक्षणे अष्टाङ्गतुल्ययोगपरत्वौ बौधायनी ।

"अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्व्वचनमौषधम्" ॥ * ॥

फलाहारादावपि तुलसीरहिते दोषमाह ।

"तुलसीं विना या क्रियते न पूजा
स्नानं न तद्यत् तुलसीं विना कृतम् ।
भुक्तं न तद्यत् तुलसीविवर्ज्जितं
पीतं न तद्यत्तुलसीविवर्ज्जितम्" ॥ * ॥

नारदीये ।

"न मात्स्यं भक्षयेन्मांसं न कौर्म्मं नान्यदेव हि ।
चण्डालो जायते राजन् कार्त्तिके मांसभक्षणात्" ॥

तथा च महाभारते ।

"कौमुदन्तु विशेषेण शुक्लपक्षे नराधिप ! ।
वर्ज्जयेत् सर्व्वमांसानि धर्म्मो ह्यत्र विधीयते" ॥

कौमुदं कार्त्तिकम् । कार्त्तिकमधिकृत्य ब्रह्मपुराणम् ।

"एकादश्यादिषु तथा तासु पञ्चसु रात्रिषु ।
दिने दिने च स्नातव्यं प्रोक्ष्याद्यं नदीषु च ।
वर्ज्जितव्या तथा हिंसा मांसभोजनमेव च" ॥

तत्र मांसभोजननिषेधे कार्त्तिकमासशुक्लपक्षैकादश्यादिपञ्चदिनानि शक्ताशक्तभेदात् पाक्षतारतम्याद्वा निषिद्धानि ।

"कार्त्तिके शौकरं मांसं यस्तु भुङ्क्ते स दुर्म्मतिः ।
षष्टिवर्षसहस्राणि रौरवे परिपच्यते" ॥ चोलपटोलकरम्बकनाककांस्यसन्धिगानि वर्ज्जयेत् ।

"पटोलानि कदम्बानि छत्राकसहितानि च ।
भुञ्जानं कार्त्तिके मासि यावदाहूतनारकी" ॥ * ॥

भूतचतुर्द्दशीकृत्यं तत्शब्दे द्रष्टव्यम् । तत्र दीपदाने विशेषो यथा,—

"ततः प्रदोषसमये दीपान्दद्यात् प्रयत्नतः ।
ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु च ।
कूटागारेषु चैत्येषु गृहासु च नदीषु च" ॥

दीपदानमन्त्रः ।

"ॐ नमः पितृभ्यः प्रेतेभ्यो नमो धर्म्माय विष्णवे ।
नमो धर्म्माय रुद्राय कान्तारपतये नमः" ॥ * ॥

दीपान्विताकृत्यं तत्शब्दे द्रष्टव्यम् । तत्र विशेषो यथा । तत्र बालातुरवृद्धव्यतिरेकेण दिवा न भोक्तव्यम् । तत्र पार्व्वणश्राद्धं कृत्वा प्रदोषे प्राचीनावीती दक्षिणामुखो ज्वलदुल्काम् ।

"ॐ अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ।
उज्ज्वलज्योतिषा देहं दहेयं व्योमवह्निना" ॥

इत्यनेन गृह्णीयात् ।

"ॐ अग्निदग्धाश्च ये जीवा येऽप्यदग्धाः कुले मम ।
उज्ज्वलज्योतिषा दग्धास्ते यान्तु परमां गतिम्" ॥

इत्यनेन भूमौ स्थापयेत् ।

"ॐ यमलोकं परित्यज्य आगता ये महालये ।
उज्ज्वलज्योतिषा वर्त्म प्रपश्यन्तो व्रजन्तु ते" ॥

इत्यनेन पितॄन् विसर्ज्जयेत् । यद्येव पूर्व्वदिन एव प्रदोषव्यापिन्यमावास्या तदा पूर्व्वदिन एव श्राद्धं कृत्वापि उल्कादानं कर्त्तव्यम् । आचारात् पञ्चभूतोपाख्यानञ्च श्रोतव्यम् । उभयतः प्रदोषव्याप्तौ परदिन एव युग्मात् । उभयतः प्रदोषाप्राप्तावपि उल्कादानं परदिने पार्व्वणानुरोधात् । अथैव पूर्व्वदिने लक्ष्मी रात्रौ पूज्या ।

"अमावस्या यदा रात्रौ दिवाभागे चतुर्द्दशी ।
पूजनीया तदा लक्ष्मीर्व्विज्ञेया सुखरात्रिका" ॥

इति वचनात् । लक्ष्मीपूजाविषयेऽप्येवं व्यवस्था । ततो गृहमध्ये उत्तराभिमुखो लक्ष्मीं पूजयेत् । ततः स्वस्तिवाचनपूर्व्वकं ॐ सूर्य्यः सोम इति ॐ तद्विष्णोरिति च पठित्वा तिलपुष्पजलान्यादाय ॐ तत्सदित्युच्चार्य्य ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्म्मा परमविभूतिकामकामो लक्ष्मीपूजनमहं करिष्ये । इति सङ्कल्प्य शालग्रामे घटादिस्थापिते वा भूतशुद्ध्यादिकं कृत्वा लक्ष्मीं पूजयेत् । तद्यथा । ॐ पाशाक्षमालिकाम्भोज इत्यादिना ध्यात्वा । ॐ भूर्भुवः स्वर्महालक्ष्मि ! इहागच्छ इत्यावाहनं कृत्वा ॐ लक्ष्म्यै नमः । एवमर्घ्यपाद्याचमनीयगन्धपुष्पधूपदीपनैवेद्यपुनराचमनीयताम्बूलादि प्रत्येकं दद्यात् ।

"ॐ नमस्ते सर्व्वदेवानां वरदासि हरिप्रिये ! ।
या गतिस्त्वत्प्रपन्नानां सा मे भूयात्त्वदर्च्चनात्" ॥

इत्यनेन पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् ।

ॐ विष्णुरूपस्य भार्य्यासि पद्मे पद्मालये । शुभे ! ।
सर्व्वतः पाहि मां देवि महालक्ष्मि ! नमोऽस्तु ते' ॥
ततः । "सुखरात्र्याः प्रदोषे तु कुवेरं पूजयन्ति ये" ।
इति ब्रह्मवचनात् । कुवेरमपि पाद्यादिभिः
पूजयेत् ।
"ॐ धनदाय नमस्तुभ्यं निधिपद्माधिपाय च ।
भवन्तु त्वत्प्रसादान्मे धनधान्यादिसम्पदः" ॥
इति पठित्वा । ॐ कुवेराय नमः इति त्रिः पूज
येत् । ततो गृहादिषु दीपान्दद्यात् । तत्र मन्त्रः ।
ॐ अग्निर्ज्योती रविर्ज्योतिश्चन्द्रज्योतिस्तथैव च ।
उत्तमः सर्व्वज्योतीषां दीपोऽयं प्रतिगृह्यताम् ॥
ततो ब्राह्मणान् बन्धूंश्च भोजयित्वा स्वयं भुञ्जीत ।
तत्र प्रत्यूषे भविष्योक्तं कर्म्म कर्त्तव्यम् । गोरोचना
सिन्दूरधारया प्रदीपवन्दनं कृत्वा लक्ष्मीं त्रिः पूज
येत् । तत्र मन्त्रः ।
"ॐ विष्णुरूपस्य भार्य्यासि पद्मे पद्मालये ! शुभे ! ।
महालक्ष्मि ! नमस्तुभ्यं सुखरात्रिं कुरुष्व मे ।
वर्षाकाले महाघोरे यन्मया दुष्कृतं कृतम् ।
सुखरात्रि ! प्रभातेऽद्य तन्मे लक्ष्मीर्व्यपोहतु ॥
या रात्रिः सर्व्वभूतानां या च देवेष्ववस्थिता ।
संवत्सरप्रिया या च सा ममास्तु सुमङ्गला ॥
माता त्वं सर्व्वलोकानां देवानां दृष्टिसम्भवा ।
आख्याता भूतले देवि ! सुखरात्रि ! नमोऽस्तु ते" ॥
ॐ लक्ष्म्यै नमः इति त्रिः पूजयेत् ॥ अन्यत् सुख
रात्रिशब्दे द्रष्टव्यम् । * ।

अथ द्यूतप्रतिपत् । तत्र प्रभाते अक्षक्रीडादिकं
कार्य्यम् । तत्र जयेनर्षे शुभम् । पराजये वत्सरं
अशुभम् । ततः सङ्कल्प्य ग्रामग्रामे जले वा स्वस्त्
प्राग् ॐ बलये नमः । इत्यादि सम्पूज्य ।
"ॐ बलिराज ! नमस्तुभ्यं विरोचनसुत प्रभो ! ।
भविष्येन्द्र सुराराते ! पूजेयं प्रतिगृह्यताम्" ॥
अनेन पुष्पाञ्जलित्रयं दद्यात् ।
"यो यो यादृग्भावेन तिष्ठत्यस्यां युधिष्ठिर ! ।
हर्षदैन्यादिना तेन तस्य वर्षं प्रयाति हि" ।

तथा ।

"महापुण्या तिथिरियं बलिराज्यविवर्द्धिनी ।
स्नानं दानं व्रतञ्चैव कात्तिकेऽस्यां तिथौ भवेत्" ॥

अथ भ्रातृद्वितीया । तत्राह्नधाविभक्तदिनपञ्चम
भागाह्नव्यापिन्यां द्वितीयायां उभयदिने तथा
चेत्परदिने कार्य्यं यमस्य । तत ॐ तत्सदि
त्युच्चार्य्य ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्म्मा
संवत्सरकामो यमादिपूजनमहं करिष्ये । इति
सङ्कल्प्य ग्रामग्रामे घटादिजले वा पूजयेत् ।
स्वस्त्यात्रं ॐ यमाय नमः । एवं मन्त्रेण सम्पूज्य ।

"एह्येहि मार्त्तण्डज ! पाशहस्त ।
यमान्तकालोकधरामरेश ! ।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते" ॥

इत्यर्घ्यं ॐ यमाय नमः ततः चामन्त्रितादिकं
दत्त्वा प्रणमेत् ।
'ॐ धर्म्मराज ! नमस्तुभ्यं नमस्ते यमुनाग्रज ! ।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्र ! नमोऽस्तु ते" ।
ततः ॐ चित्रगुप्ताय नमः । इत्यनेन पूजयेत् । ततः
ॐ यमदूतेभ्यो नमः । इत्यनेन पाद्यादिभिः
पूजयेत् । यमुनाञ्च पाद्यादिभिः सम्पूज्य प्रणमेत् ।
"ॐ यमस्वसर्नमस्तेऽस्तु यमुने ! लोकपूजिते ।
वरदा भव मे नित्यं सूर्य्यपुत्रि ! नमोऽस्तु ते" ॥
ततो भ्रातृभोजनकाले वस्त्रादिकं दत्त्वा भगिनी
पठेत् ।
"भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं शुभम् ।
प्रीतये यमराजस्य यमुनाया विशेषतः" ॥
ज्येष्ठा चेत् तवाग्रजाताहमिति वदेत् । ततः
पुष्टिकामो भ्राता भुञ्जीत । "यस्तेन भगिनीह
स्तात् भोक्तव्यं पुष्टिवर्द्धनं" इति वचनात् । * ।

विष्णूत्थानं उत्थानैकादशीशब्दे द्रष्टव्यम् । तत्र
कार्त्तिकशुक्लैकादश्यादितिथिपञ्चके बकपञ्चकम्
'बकोऽपि तत्र नाश्नीयान्मत्स्यस्यैव कदाचन" ।
इति वचनात् । कार्त्तिक्यां गोदानादौ फलाधि
क्यम् । "कार्त्तिक्यां गोप्रदो भवेत्" । इति वच
नात् । इति कृत्यतत्त्वम् । * । * । अपि च ।
अथ कार्त्तिकव्रतनित्यता । स्कान्दे ब्रह्मनारदसंवादे ।
'दुष्प्राप्यं प्राप्य मानुष्यं कार्त्तिकोक्तं चरेन्न हि ।
धर्म्मं धर्म्मभृतां श्रेष्ठ । स मातापितृघातकः ॥
अव्रतेन क्षिपेद्यस्तु मासं दामोदरप्रियम् ।
तिर्य्यग्योनिमवाप्नोति सर्व्वधर्म्मबहिष्कृतः ॥
स ब्रह्महा स गोघ्नश्च स्वर्णस्तेयी सदानृती ।
न करोति मुनिश्रेष्ठ । यो नरः कार्त्तिके व्रतम् ॥
विधवा च विशेषेण व्रतं यदि न कार्त्तिके ।
करोति मुनिशार्दूल ! नरकं याति सा ध्रुवम् ॥
व्रतन्तु कार्त्तिके मासि यदा न कुरुते गृही ।
इष्टापूर्त्तं वृथा तस्य यावदाभूतनारकी ॥
यथाहि कार्त्तिके मासे द्विजो व्रतपराङ्मुखः ।
भवन्ति विमुखाः सर्व्वे तस्य देवाः सवासवाः ॥
इष्ट्वा च बहुभिर्यज्ञैः कृत्वा श्राद्धशतानि च ।
स्वर्गं नाप्नोति विप्रेन्द्र ! अकृत्वा कार्त्तिके व्रतम् ॥
यतिश्च विधवा चैव विशेषेण वनाश्रमी ।
कार्त्तिके नरकं यान्ति अकृत्वा वैष्णवं व्रतम् ॥
वेदैरधीतैः किं तस्य पुराणपठनैश्च किम् ।
कृतं यदि न विप्रेन्द्र ! कार्त्तिके वैष्णवं व्रतम् ॥
जन्मप्रभृति यत्पुण्यं विधिवत्समुपार्ज्जितम् ।
भस्मी भवति तत्सर्व्वमकृत्वा कार्त्तिके व्रतम् ॥
यद्दत्तञ्च परं भक्त्या हुतञ्च सुमहत्तपः ।
सर्व्वं विफलतामेति अकृत्वा कार्त्तिके व्रतम् ॥
सप्तजन्मार्ज्जितं पुण्यं वृथा भवति नारद ! ।
अकृत्वा कार्त्तिके मासि वैष्णवं व्रतमुत्तमम् ॥
पापभूतास्तु ते ज्ञेया लोके सर्व्वे महामुने ! ।
वैष्णवाख्यं व्रतं यैस्तु न कृतं कार्त्तिके शुभम्' ॥

किञ्च ।

"अकृत्वा नियमं विष्णोः कार्त्तिकं यः क्षिपेन्नरः ।
जन्मार्ज्जितस्य पुण्यस्य फलं नाप्नोति नारद !" ॥

किञ्च ।

"नियमेन विना चैव यो नयेत् कार्त्तिकं मुने ! ।
चातुर्म्मास्यं तथा चैव ब्रह्महा स कुलाधमः" ॥

किञ्च ।

"पिण्डदानं पितृश्राद्धं पितृपक्षे न वै कृतम् ।
व्रतं न कार्त्तिके मासि श्रावण्यामर्पितं न च ॥
चैत्रे नान्दोलितो विष्णुर्माघस्नानं न सम्भवे ।
न कृता भद्रकी पुण्ये श्रावणे रोहिणाष्टमी ॥
मङ्गले न कृता येन द्वादशी श्रवणान्विता ।
क्व तु यास्यन्ति ते मूढा नाहं जानामि नारद !" ॥
पाद्मे च । श्रीसौनकादिमुनिगणसंवादे ।
"मानुषः कर्म्मभूमौ यः कार्त्तिकं नयते सुधीः
चिन्तामणिं करे प्राप्य क्षिपते कर्द्दमाम्बुनि ॥
नियमेन विना विप्राः कार्त्तिकं यः क्षिपेन्नरः ।
तस्य पराङ्मुखस्तस्य यक्षाद्दूर्व्वोऽस्य वल्लभः" ॥ * ॥
तत्र विशेषेण स्नानदानादिसत्कर्म्मनित्यता ।

स्कान्दे तत्रैव ।

"यैर्न्न दत्तं हुतं जप्तं न स्नानं न हरेर्न्नतम् ।
न कृतं कार्त्तिके पुत्र ! विज्ञास्ते वै नराधमाः" ।

किञ्च ।

'यैर्न्न दत्तं हुतं जप्तं कार्त्तिके न व्रतं कृतम् ।
तेनात्मा चालितो जन्म न प्राप्तं प्रार्थितं फलम्" ।

किञ्च ।

"सम्प्राप्ते कार्त्तिके मासि ये रता न जनार्द्दने ।
तेषां सौरिपुरे वासः पितृभिः सह नारद" ॥

किञ्च ।

"कार्त्तिके नार्च्चितो यैस्तु भक्तिभावेन केशवः ।
नरकं ते गमिष्यन्ति यमदूतैस्तु यन्त्रिताः ॥
जन्मकोटिसहस्रैस्तु मानुष्यं प्राप्य दुर्ल्लभम् ।
कार्त्तिके नार्च्चितो विष्णुर्हारितं तेन जन्म वै ॥
विष्णोः पूजा कथा विष्णोर्वैष्णवानाञ्च दर्शनम् ।
न भवेत् कार्त्तिके यस्य हन्ति पुण्यं दशाब्दिकम्" ॥

अथ कार्त्तिकमाहात्म्यम् । स्कान्दे ।

"कार्त्तिकस्य तु माहात्म्यं प्रायः सामान्येन लिख्यते ।
ततो विशेषतस्तत्र कर्म्म देशादिभेदतः" ॥

अथ सामान्यतः स्कान्दे तत्रैव ।

'कार्त्तिकस्य तु मासस्य कोट्यंशेनापि नार्हति ।
सर्व्वतीर्थेषु यत् स्नानं सर्व्वदानेषु यत् फलम् ॥
एकतः सर्व्वतीर्थानि सर्व्वे यज्ञाः सदक्षिणाः ।
एकतः पुष्करे वासः कुरुक्षेत्रे हिमाचले ॥
मेरुतुल्यसुवर्णानि सर्व्वदानानि चैकतः ।
एकतः कार्त्तिको वत्स ! सर्व्वदा केशवप्रियः ॥
यत् किञ्चित् क्रियते पुण्यं विष्णुमुद्दिश्य कार्त्तिके ।
तदक्षयं भवेत्सर्व्वं सत्योक्तं मम नारद ! ॥
कार्त्तिकः खलु वै मासः सर्व्वमासेषु चोत्तमम् ।
पुण्यानां परमं पुण्यं पावनानाञ्च पावनम् ॥
यथा नदीनां विप्रेन्द्र शैलानाञ्चैव नारद ! ।
उदधीनाञ्च विप्रर्षे ! क्षयो नैवोपपद्यते ॥
पुण्यं कार्त्तिकमासे तु यत् किञ्चित् क्रियते मुने ! ।
न तस्यास्ति क्षयो ब्रह्मन् पापस्यापि तथैव च ॥
न कार्त्तिकसमो मासो न कृतेन समं युगम् ।
न वेदसदृशं शास्त्रं न तीर्थं गङ्गया समम् ॥
कार्त्तिकः प्रवरो मासो वैष्णवानां प्रियः सदा ।
कार्त्तिकं सकलं यस्तु भक्त्या सेवेत वैष्णवः ॥
पितृनुद्धरते सर्व्वान् नरकस्थान् महामुने" ॥

माघे च तत्रैव ।

"द्वादशस्वपि मासेषु कार्त्तिकः कृष्णवल्लभः ।
तस्मिन् सम्पूजितो विष्णुरल्पकैरप्युपायनैः ॥
ददाति वैष्णवं लोकमित्येवं निश्चितं मया ।
यथा दामोदरो भक्तवत्सलो विदितो जनैः ॥
तस्यायन्तादृशो मासः स्वल्पमप्युरुकारकः ।
दुर्लभो मानुषो देहो देहिनां क्षणभङ्गुरः ।
तथापि दुर्लभः कालः कार्त्तिको हरिवल्लभः ।
दीपेनापि हि यत्रासौ प्रीयते हरिरीश्वरः ।
सुगतिञ्च ददात्येव परदीपप्रबोधनात्" ॥ • ॥
अथ व्रतमाहात्म्यं स्कान्दे तत्रैव ।
"व्रतानामिह सर्व्वेषामेकजन्मानुगं फलम् ।
कार्त्तिके तु व्रतस्योक्तं फलं जन्मशतानुगम् ॥
अक्रूरतीर्थे विप्रेन्द्र ! कार्त्तिक्यां समुपोष्य च ।
स्नात्वा यत् फलमाप्नोति तत्फलं वैष्णवं व्रतम् ॥
वाराणस्यां कुरुक्षेत्रे नैमिषे पुष्करेऽर्व्वुदे ।
गत्वा यत् फलमाप्नोति व्रतं कृत्वा तु कार्त्तिके ॥
अग्निहोत्रञ्च सदा यज्ञैर्न कृत्वा पितृभिः सधाम् ।
व्रतेन कार्त्तिके मासि वैष्णवन्तु पदं व्रजेत् ॥
यतीनाञ्च भस्यानां कार्त्तिके नियमे कृते ।
अवश्यं कृष्णरूपत्वं प्राप्यते मुक्तिदं शुभम्" ॥
किञ्च ।
"ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वा मुनिसत्तम ! ।
वियोनिं न व्रजत्येव व्रतं कृत्वा तु कार्त्तिके" ॥
किञ्च ।
"कार्त्तिके मुनिशार्दूल ! स्वशक्त्या वैष्णवं व्रतम् ।
यः करोति यथोक्तन्तु मुक्तिस्तस्य करे स्थिता ॥
सुपुण्ये कार्त्तिके मासि देवर्षिपितृसेविते ।
क्रियमाणे व्रते नृणां स्वल्पेऽपि स्यान्महाफलम्" ॥ • ॥
अथ कर्म्मविशेषमाहात्म्यम् । स्कान्दे तत्रैव ।
"दानं दत्तं हुतं जप्तं तपश्चैव तथा कृतम् ।
तदक्षयफलं प्रोक्तं कार्त्तिके च द्विजोत्तम" ॥
किञ्च ।
"यत् किञ्चित् कार्त्तिके दत्तं विष्णुमुद्दिश्य मानवैः ।
तदक्षयं लभ्यते वै अन्नदानं विशेषतः" ॥
किञ्च ।
"यस्तु सम्वत्सरं पूर्णमग्निहोत्रमुपासते ।
कार्त्तिके स्वस्तिकं कृत्वा सममेतन्न संशयः ॥
कार्त्तिके या करोत्येव केशवालयमण्डनम् ।
स्वर्गस्था शोभते सा तु कपोती पक्षिणी यथा ॥
यः करोति नरो नित्यं कार्त्तिके पत्रभोजनम् ।
न स दुर्गतिमाप्नोति यावदिन्द्राश्चतुर्दश ॥
जन्मप्रभृति यत्पापं मानवेन कृतं भवेत् ।
तत्सर्व्वं नाशमाप्नोति ब्रह्मपत्रेषु भोजनात् ॥
सर्व्वकामफलं तस्य सर्व्वतीर्थफलं लभेत् ।
न चापि नरकं पश्येत् ब्रह्मपत्रेषु भोजनात् ॥
ब्रह्मा चैव स्मृतः साक्षात् पलाशः सर्व्वकामदः ।
मध्यमं वर्ज्जितं पत्रं शूद्रस्य मुनिसत्तम ! ॥
भुङ्क्ते नरकमाप्नोति यावदिन्द्राश्चतुर्दश ।
तिलदानं नदीस्नानं सततं साधुसेवनम् ।
भोजनं ब्रह्मपत्रेषु कार्त्तिके मुक्तिदायकम् ।
जागरं कार्त्तिके मासि यः करोत्यरुणोदये ।
दामोदराग्रे विप्रेन्द्र ! गोसहस्रफलं लभेत् ॥

जागरं पश्चिमे यामे यः करोति महामुने ! ॥
कार्त्तिके सन्निधौ विष्णोस्तत्पदं करसंस्थितम् ।
साधुसेवा गवां ग्रासः कथा विष्णोरथार्च्चनम् ।
जागरः पश्चिमे यामे दुर्लभः कार्त्तिके कलौ" ॥
किञ्च ।
"कपिलाधेनुसहस्रञ्च ग्रहसंस्थे दिवाकरे ।
तोयं दत्त्वा यदाप्नोति स्नानं कृत्वा तु कार्त्तिके ॥
सन्निहत्यां कुरुक्षेत्रे राहुग्रस्ते दिवाकरे ।
सूर्य्यवारेण यत्स्नानं तदेकाहेन कार्त्तिके ॥
पितॄनुद्दिश्य यद्दत्तं कार्त्तिके कृष्णवल्लभे ।
अन्नोदकं मुनिश्रेष्ठ ! अक्षयं जायते नृणाम्" ॥ • ॥
किञ्च ।
"गीतशास्त्रविनोदेन कार्त्तिकं यो नयेन्नरः ।
न तस्य पुनरावृत्तिर्मया दृष्टा कलिप्रिय !" ॥
किञ्च ।
"प्रदक्षिणञ्च यः कुर्य्यात् कार्त्तिके विष्णुसद्मनि ।
पदे पदेऽश्वमेधस्य फलभागी भवेन्नरः ॥
गीतं वाद्यञ्च नृत्यञ्च कार्त्तिके पुरतो हरेः ।
यः करोति नरो भक्त्या लभते चाक्षयं फलम् ॥
हरेर्नामसहस्राख्यं गजेन्द्रस्य च मोक्षणम् ।
कार्त्तिके पठते यस्तु पुनर्जन्म न विद्यते ॥
कार्त्तिके पश्चिमे यामे स्तवं गानं करोति यः ।
वसते श्वेतद्वीपे तु पितृभिः सह नारद ! ॥
नैवेद्यदानेन तु हरेः कार्त्तिके यवसङ्ख्यया ।
युगानि वसते स्वर्गे तावन्ति मुनिसत्तम ! ॥
अगुरुन्तु सकर्पूरं यो दहेत् केशवाग्रतः ।
कार्त्तिके तु मुनिश्रेष्ठ ! युगान्ते न पुनर्भवः" ॥
किञ्च ।
"नियमेन कथां विष्णोर्ये शृण्वन्ति च मानवाः ।
श्लोकार्द्धं श्लोकपादं वा कार्त्तिके गोशतं फलम् ॥
सर्व्वधर्म्मान् परित्यज्य कार्त्तिके केशवाग्रतः ।
शास्त्रस्योच्चारणं पुण्यं श्रोतव्यञ्च महामुने ! ॥
श्रेयसा लोभबुद्ध्या वा यः करोति हरेः कथाम् ।
कार्त्तिके मुनिशार्दूल ! कुलानां तारयेच्छतम् ॥
नित्यं शास्त्रविनोदेन कार्त्तिकं यः क्षिपेन्नरः ।
निर्द्दहेत् सर्व्वपापानि यज्ञायुतफलं लभेत् ॥
न तथा तुष्यते दानैर्न यज्ञैर्गोगजादिभिः ।
यथा शास्त्रकथालापैः कार्त्तिके मधुसूदनः ॥
कार्त्तिके मुनिशार्दूल ! यः शृणोति हरेः कथाम् ।
स निस्तरति दुर्गाणि जन्मकोटिशतानि च ॥
यः पठेत् प्रयतो नित्यं श्लोकं भागवतं मुने ! ।
अष्टादशपुराणानां कार्त्तिके फलमाप्नुयात्" ॥
किञ्च ।
"सर्व्वान् धर्म्मान् परित्यज्य इष्टापूर्त्तादिकान्नरः ।
कार्त्तिके परया भक्त्या वैष्णवैः सह संवसेत्" ॥
पाद्मे च तत्रैव ।
"कार्त्तिके भूमिशायी यो ब्रह्मचारी हविष्यभुक् ।
पलाशपत्रे भुञ्जानो दामोदरमथार्च्चयेत् ॥
स सर्व्वपातकं हित्वा वैकुण्ठे हरिसन्निधौ ।
मोदते विष्णुवत्पूज्यो जन्मानन्दनिर्वृतः" ॥
किञ्च ।
"कार्त्तिकं सकलं मासं प्रातःस्नायी जितेन्द्रियः ।

जपन् हविष्यभुक् दान्तः सर्व्वपापैः प्रमुच्यते ॥
कार्त्तिकन्तु नरो मासं यः कुर्य्यादेकभोजनम् ।
शूरश्च बहुवीर्य्यश्च कीर्त्तिमांश्च स जायते" ॥
किञ्च ।
"पलाशपत्रभोजी च कार्त्तिके पुरुषो नरः ।
निष्पापः स्यात्तु नैवेद्यं हरेर्भुक्त्वा विमुच्यते ॥
मध्यमं मैथुनं पत्रं वर्जयेद्ब्राह्मणेतरः" ।
किञ्च ।
"अपराधसहस्राणि पातकानि महान्त्यपि ।
क्षमतेऽस्य हरिर्देवः पूजितः कार्त्तिके प्रभुः ॥
नैवेद्यं पायसं विष्णोः प्रियं खण्डघृतान्वितम् ।
निभक्ष्य तच्च भुञ्जानो यज्ञसाम्यं दिने दिने" ॥
तत्रैव श्रीब्रह्मसत्या संवादे ।
"स्नानं जागरणं दीपं तुलसीवनपालनम् ।
कार्त्तिके ये प्रकुर्व्वन्ति ते नरा विष्णुमूर्त्तयः ॥
इत्थं दिनत्रयमपि कार्त्तिके ये प्रकुर्व्वते ।
देवानामपि ते वन्द्याः किं यैराजन्म तत् कृतम्" ॥ • ॥
तत्रैव कार्त्तिकव्रताङ्गानि ।
"हरिजागरणं प्रातःस्नानं तुलसिसेवनम् ।
उद्यापनं दीपदानं व्रतान्येतानि कार्त्तिके" ॥
किञ्च ।
"पञ्चभिर्व्रतकैरेभिः सम्पूर्णं कार्त्तिके व्रती ।
फलमाप्नोति तत् प्रोक्तं भुक्तिमुक्तिफलप्रदम् ॥
विष्णोः शिवस्य वा कुर्य्यादालये हरिजागरम् ।
कुर्य्यादश्वत्थमूले वा तुलसीनां वनेषु च ॥
आपद्गतो यदाप्यम्भो न लभेत् स्नानाय सः ।
व्याधितो वा पुनः कुर्य्याद्विष्णोर्नाम्नापमार्ज्जनम् ॥
उद्यापनविधिं कर्त्तुमशक्तो यो व्रते स्थितः ।
ब्राह्मणान् भोजयेच्छक्त्या व्रतसम्पूर्णहेतवे ॥
अशक्तो दीपदानस्य परदीपान् प्रबोधयेत् ।
तेषां वा रक्षणं कुर्य्याद्वातादिभ्यः प्रयत्नतः ॥
अभावे तुलसीनाञ्च पूजयेद्वैष्णवं द्विजम् ।
सर्व्वाभावे व्रती कुर्य्याद्ब्राह्मणानां गवामपि ।
सेवां वा बोधिवटयोर्व्रतसम्पूर्णहेतवे ॥ • ॥
अथ दीपदानमाहात्म्यम् । स्कान्दे तत्रैव ।
"कृत्वा कोटिसहस्राणि पातकानि बहून्यपि ।
निमेषार्द्धेन दीपस्य विलयं यान्ति कार्त्तिके" ॥
किञ्च ।
"शृणु दीपस्य माहात्म्यं कार्त्तिके केशवप्रियम् ।
दीपदानेन विप्रेन्द्र ! न पुनर्जायते भुवि ॥
रविग्रहे कुरुक्षेत्रे नर्म्मदायां शशिग्रहे ।
तत् फलं कोटिगुणितं दीपदानेन कार्त्तिके ॥
घृतेन दीपको यस्य तिलतैलेन वा पुनः ।
ज्वलते मुनिशार्दूल ! अश्वमेधेन तस्य किम् ॥
मन्त्रहीनं क्रियाहीनं शौचहीनं जनार्द्दने ।
सर्व्वं सम्पूर्णतां याति कार्त्तिके दीपदानतः ॥
तेनेष्टं क्रतुभिः सर्व्वैः कृतं तीर्थावगाहनम् ।
दीपदानं कृतं येन कार्त्तिके केशवाग्रतः ॥
तावद्गर्ज्जन्ति पुण्यानि स्वर्गे मर्त्ये रसातले ।
यावन्न ज्वलते ज्योतिः कार्त्तिके केशवाग्रतः ॥
शृणुते चापि पितृभिर्गाथा गीता पुरा द्विज ! ।
भविष्यति कुलेऽस्माकं पितृभक्तः सुतो भुवि ॥

कार्त्तिके दीपदानेन यस्तोषयति केशवम् ।
मुक्तिं प्राप्स्यामहे नूनं प्रसादाच्चक्रपाणिनः" ॥

किञ्च ।

"मेरुमन्दरमात्राणि कृत्वा पापान्यशेषतः ।
दह्यते नात्र सन्देहो दीपदानात्तु कार्त्तिके ॥
गृहे वायतने वापि दीपं दद्याच्च कार्त्तिके ।
पुरतो वासुदेवस्य महापुण्यविधायिनः ॥
स जातो मानुषो लोके स धन्यः स च कीर्त्तिमान् ।
प्रदत्तः कार्त्तिके मासि दीपो वै मधुघातिनः ॥
निमिषार्द्धार्द्धमात्रेण दीपदानेन कार्त्तिके ।
न तत् क्रतुशतैः प्राप्य फलं तीर्थशतैरपि ॥
सर्व्वाशुद्धानवीनोऽपि सर्व्वपापरतोऽपि सन् ।
पूयते नात्र सन्देहो दीपं दत्त्वा तु कार्त्तिके ॥
नहास्ति पातकं किञ्चित् त्रिषु लोकेषु नारद ! ।
यत्र शोधयते दीपः कार्त्तिके केशवाग्रतः ॥
पुरतो वासुदेवस्य दीपं दत्त्वा तु कार्त्तिके ।
प्राप्नोति शाश्वतं स्थानं सर्व्वाबाधाविवर्ज्जितम् ॥
यः कुर्य्यात् कार्त्तिके मासि कर्पूरेण तु दीपकम् ।
द्वादश्याञ्च विशेषेण तस्य पुण्यं वदामि ते ॥
कुले तस्य प्रसूता ये ये भविष्यन्ति नारद ! ।
समतीताश्च ये केचिद् येषां सङ्ख्या न विद्यते ॥
क्रीडित्वा सुचिरं कालं देवलोके यदृच्छया ।
ते सर्व्वे मुक्तिमायान्ति प्रसादाच्चक्रपाणिनः" ॥

किञ्च ।

"घृतवातेन विप्रेन्द्र ! कार्त्तिके केशवालयम् ।
द्योतयेद् यो महाभाग ! पुनात्यासप्तमं कुलम् ॥
कार्त्तिके दीपदानन्तु कुर्य्याद् यो वैष्णवालये ।
धनं पुत्रो यशः कीर्त्तिर्भवेत्तस्य च सम्पदा ॥
यथा च मथनाद्वह्निः सर्व्वकाष्ठेषु दृश्यते ।
तथा च दृश्यते धर्म्मो दीपदाने न संशयः" ॥

किञ्च ।

"निर्द्धनेनापि विप्रेन्द्र ! कृत्वा चैवात्मविक्रयम् ।
कर्त्तव्यं दीपदानन्तु यावत् कार्त्तिकपूर्णिमा ॥
वैष्णवो न स मन्तव्यः सम्प्राप्ते कार्त्तिके शुभे ! ।
यो न यच्छति मूढात्मा दीपं केशवसद्मनि" ॥

नारदीये श्रीरुक्माङ्गदमोहिनीसंवादे ।

"एकतः सर्व्वदानानि दीपदानानि चैकतः ।
कार्त्तिके न समं प्रोक्तं दीपदो ह्यधिकः स्मृतः" ॥

पाद्मे च तत्रैव ।

"कार्त्तिके खण्डदीपं यो ददाति हरिसन्निधौ ।
दिव्यकान्तिविमानाग्रे रमते स हरेः पुरे" ॥ * ॥

अथ तत्र परदीपप्रबोधनमाहात्म्यम् ।

स्कान्दे तत्रैव ।

"विप्रमध्येऽन्नदानेन स्नेहमात्रे च वारिणा ।
कार्त्तिके यत् फलं प्रोक्तं परदीपप्रबोधनात् ॥
बोधनात् परदीपस्य वैष्णवानाञ्च सेवनात् ।
कार्त्तिके फलमाप्नोति राजसूयाश्वमेधयोः ॥
दीप्यमानन्तु ये दीपं बोधयन्ति हरेर्गृहे ।
परेण यमदूतैस्ते ! निस्तीर्य्या यमयातना ॥
न तत्तुल्यति विप्रेन्द्र ! दत्तैरपि महामखैः ।
कार्त्तिके यत् फलं प्रोक्तं परदीपप्रबोधनात् ॥
एकादश्यां परेण तु दीपं प्रज्वाल्य मूषिका ।
मानुष्यं दुर्लभं प्राप्य परां गतिमवाप सा" ॥ * ॥

अथ शिखरदीपमाहात्म्यम् ।

स्कान्दे तत्रैव ।

"यदा यदा भासयते दीपकः कलसोपरि ।
तदा तदा मुनिश्रेष्ठ ! द्रवते पापसञ्चयः ॥
यो ददाति द्विजातिभ्यो महीमुदधिमेखलाम् ।
हरेः शिखरदीपस्य कलां नार्हति षोड़शीम् ॥
यो ददाति गवां कोटिं सवत्सां क्षीरसंयुताम् ।
हरेः शिखरदीपस्य कलां नार्हति षोड़शीम् ॥
सर्व्वस्वदानं कुरुते वैष्णवानां महामुने ! ।
शिखरोपरि दीपस्य कलां नार्हति षोड़शीम्" ॥

किञ्च ।

"यः करोति परं दीपं मूल्येनापि महामुने ! ।
शिखरोपरि मध्ये च कुलानां धारयेच्छतम् ॥
विमानं ज्योतिषा दीप्तं ये निरीक्षन्ति कार्त्तिके ।
केशवस्य महाभक्त्या कुले तेषां न नारकी ॥
दिवि देवा निरीक्षन्ते विष्णुदीपप्रदं नरम् ।
कदा भविष्यत्यस्माकं सङ्गमः पुण्यकर्म्मणा ॥
कार्त्तिके कार्त्तिकीं यावत् प्रासादोपरि दीपकम् ।
यो ददाति मुनिश्रेष्ठ ! तस्येन्द्रत्वं न दुर्लभम्" ॥ * ॥

अथ तत्र दीपमालामाहात्म्यम् ।

स्कान्दे तत्रैव ।

"दीपपङ्क्तेश्च रचनां बाह्याभ्यन्तरे हरेः ।
विष्णोर्विमाने कुरुते स नरः शङ्खचक्रधृक् ॥
दीपपङ्क्तेश्च रचनां कुरुते केशवालये ।
तत्कुलोत्पद्यमानानां पङ्क्तीनां नरको न हि ॥
विष्णोर्व्विमानं दीपाढ्यं बाह्याभ्यन्तरे मुने ! ।
दीपोद्योतकरे मार्गे तेन प्राप्तं परं पदम्" ॥

भविष्ये च ।

"यः कुर्य्यात् कार्त्तिके मासि शोभनां दीपमालिकाम् ।
प्रबोधे चैव द्वादश्यामेकादश्यां विशेषतः ॥
सूर्य्यायुतप्रकाशस्तु तेजसा भासयन् दिशः ।
तेजोराशिविमानस्थो जगदुद्योतयन्निमाः ॥
यावत्प्रदीपसङ्ख्या तु घृतेनापूर्य्य बोधिता ।
तावद्वर्षसहस्राणि विष्णुलोके महीयते" ॥ * ॥

अथ आकाशादिदीपमाहात्म्यम् ।

पाद्मे तत्रैव ।

"उच्चैः प्रदीपमाकाशे यो दद्यात् कार्त्तिके नरः ।
सर्व्वं कुलं समुद्धृत्य विष्णुलोकमवाप्नुयात् ॥
विष्णुकेशवमुद्दिश्य दीपं दद्यात्तु कार्त्तिके ।
आकाशस्थं जलस्थञ्च रथ्यां तत्रापि यत्फलम् ॥
धनं धान्यं समृद्धिश्च पुत्रवानीश्वरो गृहे ।
लोचने च शुभे तस्य विद्वानपि च जायते" ॥

किञ्च ।

"विप्रवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
अग्निष्टोमफलं तस्य प्रवदन्ति मनीषिणः ॥
चतुष्पथेषु रथ्यासु ब्राह्मणावसथेषु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारे गहनेषु च ॥
दीपदानाद्धि सर्व्वत्र महाफलमवाप्नुयात्" ॥ *

आकाशदीपदानमन्त्रः । तत्रैव ।

"दामोदराय नभसि तुलायां लोलया सह ।
प्रदीपन्ते प्रयच्छामि नमोऽनन्ताय वेधसे" ॥

अथ देशविशेषे कार्त्तिकमाहात्म्यविशेषः ।

पाद्मे तत्रैव ।

"यत्र कुत्रापि देशेऽपि कार्त्तिके स्नानदानतः ।
अग्निहोत्रसमं फलं पूजायाञ्च विशेषतः ॥
कुरुक्षेत्रे कोटिगुणो गङ्गायाञ्चापि तत्समः ।
ततोऽधिकः पुष्करे स्याद्द्वारकायाञ्च भार्गव ! ॥
कृष्णसालोक्यदो मासः पूजास्नानैश्च कार्त्तिकः ।
अन्याः पुर्य्यस्तत्समाना मुनयो मथुरां विना ॥
दामोदरत्वं हि हरेस्तत्रैवासीद्यतः किल ।
मथुरायां ततश्चोर्ज्जो वैकुण्ठप्रीतिवर्द्धनः ॥
कार्त्तिको मथुरायां वै परमावधिरिष्यते ।
यथा माघे प्रयागः स्याद्वैशाखे जाह्नवी यथा ॥
कार्त्तिके मथुरा सेव्या ततोत्कर्षं परो न हि ।
मथुरायां नरैरूर्ज्जे स्नात्वा दामोदरोऽर्च्चितः ।
कृष्णरूपा हि ते ज्ञेया नात्र कार्य्या विचारणा ॥
दुर्लभः कार्त्तिको विप्र ! मथुरायां नृणामिह ।
यत्रार्च्चितः स्वकं रूपं भक्तेभ्यः सम्प्रयच्छति ॥
भुक्तिं मुक्तिं हरिर्द्दद्यादर्च्चितोऽन्यत्र सेविनाम् ।
भक्तिञ्च न ददात्येव यतो वश्यकरी हरेः ॥
सा त्वञ्जसा हरेर्भक्तिर्लभ्यते कार्त्तिके नरैः ।
मथुरायां सकृदपि श्रीदामोदरपूजनात् ॥
मन्त्रद्रव्यविहीनञ्च विधिहीनञ्च पूजनम् ।
मन्यते कार्त्तिके देवो मथुरायां मदर्च्चनम् ॥
यस्य पापस्य युक्तेन मरणान्ता हि निष्कृतिः ।
तच्छुद्ध्यर्थमिदं प्रोक्तं प्रायश्चित्तं सुनिश्चितम् ।
कार्त्तिके मथुरायां वै श्रीदामोदरपूजनम् ॥
कार्त्तिके मथुरायां मे पूजनाद्यन्न भुवः ।
शीघ्रं सम्प्राप्यतां स्थानं दुर्लभं योगतत्परैः ॥
सुलभा मथुरा भूमौ प्रत्यब्दं कार्त्तिकस्तथा ।
तथापि संसरन्तीह नरा मूढा भवाम्बुधौ ॥
किं यज्ञैः किं तपोभिश्च तीर्थैरन्यैश्च सेवितैः ।
कार्त्तिके मथुरायाञ्चेदर्च्च्यते राधिकाप्रियः ॥
यानि सर्व्वाणि तीर्थानि नदा नद्यः सरांसि च ।
कार्त्तिके निवसन्त्यत्र माथुरे सर्व्वमण्डले ॥
कार्त्तिके जन्मसदने केशवस्य च ये नराः ।
सकृत्प्रविष्टाः श्रीकृष्णं ते यान्ति परमव्ययम् ॥
परोपहासमुद्दिश्य कार्त्तिके हरिपूजया ।
मथुरायां लभेन्मुक्तिं किं पुनः श्रद्धया नरः" ॥ इति ।
"इत्थं कार्त्तिककृत्यानि व्याख्यान्येव स्तोऽभवन् ।
तत्र किञ्चिद्विशेषेण तद्विधिर्लिख्यतेऽधुना" ॥ * ॥

अथ कार्त्तिकव्रतविधिः । तत्रोपक्रमकालश्चोक्तः

श्रीकृष्णसत्यभामासंवादीयकार्त्तिकमाहात्म्ये ।

"आश्विनस्य तु मासस्य या शुक्लैकादशी भवेत् ।
कार्त्तिकस्य व्रतानीह तस्यां कुर्य्यादतन्द्रितः ॥
नित्यं जागरणायान्ते यामे रात्रेः समुत्थितः ।
शुचिर्भूत्वा प्रबोध्याथ स्तोत्रैर्नीराजयेत् प्रभुम् ॥
निरीक्ष्य वैष्णवान् धर्म्मान् वैष्णवैः सह हर्षितः ।
कृत्वा गीतादिकं प्रातर्देवं नीराजयेत् पुनः ॥
नद्यादौ च ततो गत्वाचम्य सङ्कल्पमाचरेत् ।
प्रार्थ्य प्रार्थ्याथ तस्मै च दद्यादर्घ्यं यथाविधि ॥

तत्र सङ्कल्पमन्त्रः ।

"कार्त्तिकेऽहं करिष्यामि प्रातःस्नानं जनार्दन ! ।

प्रीत्यर्थं तव देवेश दामोदर ! मया सह "।
प्रार्थनमन्त्रस्तु ।
"तव ध्यानेन देवेश ! जलेऽस्मिन् स्नातुमुद्यत ।
तत्प्रसादाच्च मे पापं दामोदर ! विनश्यतु" ॥
अर्घ्यमन्त्र ।
"व्रतिन कार्त्तिके मासि स्नातस्य विधिवन्मम" ।
अर्घ्यं गृहाण देवेश ! नमामि त्वां सुरेश्वर !" ॥
काशीखण्डे ।
"व्रतिनः कार्त्तिके मासि स्नातस्य विधिवन्मम ।
दामोदर ! गृहाणार्घ्यं दनुजेन्द्रनिसूदन ! ॥
नित्ये नैमित्तिके कृत्स्ने कार्त्तिके पापशोषणे ।
गृहाणार्घ्यं मया दत्तं राधया सहितो हरे !" ॥ * ॥
"तिर्थेराजिय देह स नामोच्चारणपूर्व्वकम् ।
स्नात्वा स विधिना सन्ध्यामुपास्य गृहमाव्रजेत् ॥
उपलिप्याथ देवाग्रे निर्म्माय स्वस्तिकं प्रभुम् ।
तुलसीमालतीपद्मागस्त्यपुष्पादिनार्च्चयेत् ॥
नित्यं वैष्णवसङ्गत्या सेवेत भगवत्कथाम् ।
सर्पिषाहर्निशं दीपं तिलतैलेन चार्च्चयेत् ॥
विशेषतश्च नैवेद्यान्यर्पयेदादरेस्तथा ।
यथाशक्ति यथाश्रद्धा एकभक्तादिकं व्रतम्" ॥
तथा च पाद्मे तत्रैव ।
"प्रातरुत्थाय शौचादि कृत्वा गत्वा जलाशये ।
स्नात्वा च विधिवत् स्नानं ततो दामोदरार्च्चनम्" ॥
किञ्च ।
"मौनेन भोजनं कार्य्यं कार्त्तिके व्रतधारिणा ।
घृतेन दीपदानं स्यात्तिलतैलेन वा पुनः ॥
दिनञ्च सत्कथया वैष्णवानाञ्च सङ्गमे ।
नीयतां कार्त्तिके मासि सङ्कल्प्यव्रतपालनम् ॥
आश्विने शुक्लपक्षस्य प्रारम्भो हरिवासरे ।
अथ वा पौर्णमासीत सङ्क्रान्तौ वा तुलागमे ॥
दीपदानमखण्डञ्च दद्यादै विष्णुसन्निधौ ।
देवालये तुलस्यां वा आकाशे वा तदुत्तमम्" ॥
किञ्च ।
"रजतं कनकं दीपान् मणिमुक्ताफलादिकम् ।
दामोदरस्य प्रीत्यर्थं प्रदद्यात् कार्त्तिके नरः" ॥
स्कान्दे च श्रीरुक्माङ्गदमोहिनीसंवादे ।
"न गृहे कार्त्तिके कुर्य्याद्विशेषेण तु कार्त्तिकीम् ।
तीर्थे तु कार्त्तिकीं कुर्य्यात् सर्व्वयत्नेन भाविनि !" ॥ * ॥
अथ कार्त्तिके वर्ज्यानि ।
तत्रैव ब्रह्मनारदसंवादे ।
"कार्त्तिके तु विशेषेण राजमाषांश्च भक्षयन् ।
निष्पावान् मुनिशार्दूल ! यावदाहूतनारकी ॥
कलिङ्गानि पटोलानि वृन्ताकं सन्धितानि च ।
न त्यजेत् कार्त्तिके मासि यावदाहूतनारकी ॥
कार्त्तिके मासि धर्म्मात्मा मत्स्यमांसं न भक्षयेत् ।
तत्रैव शशकञ्चापि मायकं शौकरं तथा" ॥
किञ्च ।
"परान्नं परशय्याञ्च परदारं पराङ्गनाम् ।
सर्व्वदा वर्ज्जयेत् प्राज्ञो विशेषेण तु कार्त्तिके ॥
तैलाभ्यङ्गं तथा शय्यां परान्नं कांस्यभोजनम् ।
कार्त्तिके वर्ज्जयेद्यस्तु परिपूर्णव्रती भवेत् ॥
सधर्मं कार्त्तिकं दृष्ट्वा परान्नं यस्तु वर्ज्जयेत् ।
दिने दिने तु कृच्छ्रस्य फलं प्राप्नोति मानवः" ॥
तत्रैव श्रीरुक्माङ्गदमोहिनीसंवादे ।
"कार्त्तिके वर्ज्जयेत्तैलं कार्त्तिके वर्ज्जयेन्मधु ।
कार्त्तिके वर्ज्जयेत् कांस्यं कार्त्तिके शुक्तसन्धितम् ॥
न मात्स्यं भक्षयेन्मांसं न कौर्म्मं नान्यदेव हि ।
चाण्डालः स भवेत् सुभ्रु ! कार्त्तिके मांसभक्षणात्" ॥
अथ श्रीराधादामोदरपूजाविधि । पाद्मे तत्रैव ।
"ततः प्रियतमा विष्णो राधिका गोपिकासु च ।
कार्त्तिके पूजनीया च श्रीदामोदरसन्निधौ ॥
द्विज दामोदरं कृत्वा तत्पत्नीं राधिकां तथा ।
कार्त्तिके पूजनीयौ तौ वासोऽलङ्कारभोजनैः ॥
राधिकाप्रतिमां विप्राः पूजयेत् कार्त्तिके तु यः ।
तस्य तुष्यति तत्प्रीत्यै श्रीमान् दामोदरो हरिः" ॥
"दामोदराष्टकं नाम स्तोत्रं दामोदरार्च्चने ।
नित्यं दामोदराकर्षि पठेत् सत्यव्रतोदितम्" ॥ * ॥
अथ श्रीदामोदराष्टकम् । तत्रैव ।
"नमामीश्वरं सच्चिदानन्दरूपं
लसत्कुण्डलं गोकुले भ्राजमानम् ।
यशोदाभियोलूखलाद्धावमानं
परामृष्टमत्यन्ततो द्रुत्य गोप्या ॥
रुदन्तं मुहुर्न्नेत्रयुग्मं मृजन्तं
कराम्भोजयुग्मेन सातङ्कनेत्रम् ।
मुहुः श्वासकम्पत्रिरेखाङ्ककण्ठ-
स्थितग्रैवदामोदरं भक्तिबद्धम् ॥
इतीदृक् स्वलीलाभिरानन्दकुण्डे
स्वघोषं निमज्जन्तमाख्यापयन्तम् ।
तदीयेशितज्ञेषु भक्तैर्ज्जितत्वं
पुनः प्रेमतस्तं शतावृत्ति वन्दे ॥
वरं देव मोक्षं न मोक्षावधिं वा
न चान्यं वृणेऽहं वरेशादपीह ।
इदन्ते वपुर्नाथ गोपालबालं
सदा मे मनस्याविरास्तां किमन्यैः ॥
इदन्ते मुखाम्भोजमत्यन्तनीलै-
र्वृतं कुन्तलैः स्निग्धरक्तैश्च गोप्या ।
मुहुश्चुम्बितं बिम्बरक्ताधरं मे
मनस्याविरास्तामलं लक्षलाभैः ॥
नमो देव ! दामोदरानन्त ! विष्णो !
प्रसीद प्रभो ! दुःखजालाब्धिमग्नम् ।
कृपादृष्टिवृष्ट्यातिदीनं बतानु-
गृहाणेश मामज्ञमेध्यक्षिदृश्यः ॥
कुवेरात्मजौ बद्धमूर्त्त्यैव यद्वत्
त्वया मोचितौ भक्तिभाजौ कृतौ च ।
तथा प्रेमभक्तिं स्वकां मे प्रयच्छ
न मोक्षे ग्रहो मेऽस्ति दामोदरेह ॥
नमस्तेऽस्तु दाम्ने स्फुरद्दीप्तिधाम्ने
त्वदीयोदरायाथ विश्वस्य धाम्ने ।
नमो राधिकायै त्वदीयप्रियायै
नमोऽनन्तलीलाय देवाय तुभ्यम्" ॥ * ॥
अथ तत्र श्रीकृष्णाष्टमीकृत्यम् ।
पाद्मे तत्रैव ।
"गोवर्द्धने गिरौ रम्ये राधाकुण्डं प्रियं हरेः ।
कार्त्तिके बहुलाष्टम्यां तत्र स्नात्वा हरेः प्रियः ॥
नरो भक्तो भवेद्विप्रास्तद्धि तस्य प्रतोषणम् ।
यथा राधा प्रिया विष्णोस्तस्याः कुण्डं प्रियं तथा ।
सर्व्वगोपीषु सैवैका विष्णोरत्यन्तवल्लभा" ॥
किञ्च । तत्रैव श्रीराधिकोपाख्यानान्ते ।
"वृन्दावनाधिपत्यञ्च दत्तं तस्याः प्रतुष्यता ।
कृष्णेनान्यत्र देवी तु राधा वृन्दावने वने ॥
तत्कुण्डे कार्त्तिकाष्टम्यां स्नात्वा पूज्यो जनार्द्दनः ।
सुबोधन्यां यथा प्रीतस्तथा प्रीतस्ततो भवेत्" ॥ * ॥
अथ तत्र कृष्णत्रयोदशीकृत्यम् ।
पाद्मे च तत्रैव ।
कार्त्तिके कृष्णपक्षे तु त्रयोदश्यां निशामुखे ।
यमदीपं बहिर्द्द्यादपमृत्युर्विनश्यति" ॥
तत्र मन्त्रः ।
"मृत्युना पाशदण्डाभ्यां कालः श्यामलया सह ।
त्रयोदश्यां दीपदानात् सूर्य्यजः प्रीयतामिति" ॥ * ॥
अथ कृष्णचतुर्दशीकृत्यम् । तत्रैव ।
"चतुर्द्दश्यां धर्म्मराजपूजा कार्य्या प्रयत्नतः ।
स्नानमावश्यकं कार्य्यं नरैर्नरकभीरुभिः ॥
अरुणोदयतोऽन्यत्र रिक्तायां स्नाति यो नरः ।
तस्याब्दिकभवो धर्म्मो नश्यत्येव न संशय" ॥
स्कान्दे च तत्रैव ।
"कार्त्तिके कृष्णपक्षे तु चतुर्द्दश्या विधूदये ।
अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिः" ॥
किञ्च । पाद्मे तत्रैव ।
"ततश्च तर्पणं कार्य्यं धर्म्मराजस्य नामभिः ।
जीवत्पिता न कुर्व्वीत तर्पणं यमभीष्मयोः ॥
यज्ञोपवीतिना कार्य्यं प्राचीनावीतिना तथा ।
देवत्वञ्च पितृत्वञ्च यमस्यास्ते द्विरूपता ॥
नक्तं यमचतुर्द्दश्यां यः कुर्य्याच्छिवसन्निधौ ।
न तत् क्रतुशतेनापि प्राप्यते पुण्यमीदृशम् ॥
कुमारीवटुकान् पूज्य तथा शैवतपोधनान् ।
राजसूयफलं तेन प्राप्यते नात्र संशयः ॥
कार्त्तिके भौमवारेण चित्रा कृष्णा चतुर्द्दशी ।
तस्यां भूतेशमभ्यर्च्य गच्छेच्छिवपुरं नरः" ॥
किञ्च ।
"अमावस्याचतुर्द्दश्योः प्रदोषे दीपदानतः ।
यममार्गान्धकारेभ्यो मुच्यते कार्त्तिके नरः" ॥ * ॥
अथामावास्याकृत्यम् । पाद्मे तत्रैव ।
"दिवा तत्र न भोक्तव्यं विना बालातुरान् जनान् ।
प्रदोषसमये लक्ष्मीं पूजयेच्च यथाक्रमम्" ॥
किञ्च ।
"प्रदोषसमये विप्रा कर्त्तव्या दीपमालिका ।
दीपदानात् ततः पश्चाल्लक्ष्मीं सुप्तां प्रबोधयेत् ॥
त्वं ज्योतिः श्रीरविश्चन्द्रो विद्युत् सौवर्णतारकाः ।
सर्व्वेषां ज्योतिषां ज्योतिर्दीपज्योतिः स्थिते नमः ॥
प्रबोधनेन कमलां दीपदत्ताः स्त्रियो द्विजाः ।
देवीं प्रबोधयेयुश्च ततः कुर्य्युश्च भोजनम् ॥
प्रदोषसमये लक्ष्मीं भोजयित्वा भुञ्जन्ति ये ।
दुग्गान् सवत्सरं यावत् लक्ष्मीस्तं नैव मुञ्चति" ॥ * ॥
अथामावास्याविषयः । दत्ता विक्रमादित ।
उपवासादिषमावास्या प्रतिपद्युतैव ग्राह्या
तदुक्तम् ।

"अमावास्या तृतीया च सा उभौ पक्षसमन्विता" ॥
इति । चतुर्द्दशीविद्धानिषेधस्तु निगमे ।
"भूतविद्धा त्वमावास्या नियमस्नानदानयोः" ।
स्कान्देऽपि ।
"भूतविद्धा त्वमावास्या न ग्राह्या मुनिपुङ्गव" ॥
अथ शुक्लप्रतिपत्कृत्यम् । स्कान्दे ।
"प्रातर्गोवर्द्धनं पूज्य द्यूतञ्चैव समाचरेत् ।
भूषणीयास्तथा गावः पूज्याश्च दोहवाहनाः ॥
गोवर्द्धनधराधार गोकुलत्राणकारक ।
शुक्लप्रतिपदि प्रातः कार्त्तिके योऽर्च्च्येत्ततः ॥
'प्रातर्गोवर्द्धनं पूज्य रात्रौ जागरणं चरेत्'। इति
क्वचित् पाठः । तस्मादिदं कर्म्म गोवर्द्धनप्राधा-
न्येन गोप्राधान्येन च स्नातमर्थ्यमेव ज्ञेयम् ।
अत्र दिननिर्णयः । तदाह देवलः ।
"प्रतिपद्दर्शसंयोगे क्रीडनन्तु गवां मतम् ।
परविद्धान्तु यः कुर्य्यात् पुत्रदारधनक्षयः" ॥
निर्णयामृतधृतब्रह्मवैवर्त्तवचनम् ।
"या कुहूः प्रतिपन्मिश्रा तत्र गाः पूजयेन्नृप ।
पूजनाभावे वर्द्धन्ते प्रजा गावो महीपते" ॥
तत्र प्रातर्गोवर्द्धनं पूज्येति पूर्व्वोक्ततात्पर्य्यकम् ।
द्वितीयासमये तु सर्व्वथा निषिद्धम् ।
तत्रैव । तथाहि ।
"नन्दायां दर्शने रक्षाबलिदानदशासु च ।
भद्रायां गोकुलक्रीडा देशनाशाय जायते" ॥
पुराणसमुच्चये तु सम्भावितचन्द्रोदयद्वितीयायां
योग एव निषिध्यते ।
"गवां क्रीडादिने यत्र रात्रौ दृश्येत चन्द्रमाः ।
सोमो राजा पशून् हन्ति सुरभीपूजकांस्तथा" ॥
तदुदयसम्भावनञ्च निर्णयामृते निर्णीतम् ।
प्रतिपद्यापराह्णिकत्रिमुहूर्त्तव्यापिन्यां द्वितीयायां
चन्द्रदर्शनं सम्भाव्यते । तदुक्तमपराह्णविषये
सुब्रह्मण्यपाठेन ।
"द्वितीया त्रिमुहूर्त्ता चेत् प्रतिपद्यापराह्णिकी ।
अन्नाधानचतुर्द्दश्यां परतः सोमदर्शनात्" ॥ इति
अपराह्णश्च पञ्चधाविभक्तस्याह्नश्चतुर्थो भागः ।
ततश्च यत्र प्रतिपदि मन्मुहूर्त्तव्यापिनी द्वितीया
तत्र चन्द्रदर्शनसम्भावनामिति । अयदा मूलदेव
प्रतिपत्तत्र ग्राह्या । तथैव पुराणसमुच्चये ।
"वर्द्धमानतिथौ नन्दा यदा सार्द्धत्रियामिका ।
द्वितीयावृद्धिगामित्वादुत्तरा तत्र चोच्यते" ॥
किञ्च । यदा पञ्चप्रतिपत् परत्र च निष्क्रामति
तदापरत्रैव कार्य्या । तथोक्तं भविष्योत्तरे ।
"त्वया दानवभिन्नाशिमौषो दत्तो मतिल्प्रभ ।
तदैवाहोरात्रिदत्ता तिथि प्रौष्ठो मतिप्रभ ॥
यदा मतिप्रभ पूर्व्वा मासो निर्व्वाणदायकः ।
व्याप्त्या तिथिस्तथा दर्शो ग्राह्या चैव तपोधनाः" ॥
इति निर्णयामृतमतम् । किन्तु बहुशोऽप्याधिक्येन
दर्शैर्य गन्तु प्रदातुं । तदन्यापि देवलादि वचन
प्रामाण्यमन्नीति ॥ * ॥
अथ गोवर्द्धनपूजाविधिः । पाद्मे तत्रैव ।
'मथुरायां यथान्वेव कृत्वा गोवर्द्धनं गिरिम् ।
गोमयेन महाभाग तत्र पूज्यो गिरिस्तथा ॥
मथुरायां तथा साक्षात् कृत्वा चैव प्रदक्षिणम् ।
वैष्णवं धाम सम्प्राप्य मोदते हरिसन्निधौ" ॥
पूजामन्त्रः ।
"गोवर्द्धनधराधार गोकुलत्राणकारक ।
विष्णुबाहुकृतोच्छ्राय गवां कोटिप्रदो भव" ॥ इति
गोपूजामन्त्रः । स्कान्दे तत्रैव ।
"लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता ।
घृतं वहति यज्ञार्थे मम पापं व्यपोहतु ॥
अग्रतः सन्तु मे गावो गावो मे सन्तु पृष्ठतः ।
गावो मे पार्श्वतः सन्तु गवां मध्ये वसाम्यहम्" ॥
अथ गोक्रीडा तत्रैव ।
"क्रीडापयेद्धावयेच्च गोमहिष्यादिकं ततः ।
वृषान् कर्षापयेद्दोपैर्वलिमत्पुत्रिवादनैः" ॥
पाद्मे च तत्रैव ।
"महिष्यादेस्तथा भूषा क्रीडनं चारयन्तथा" ।
तन्माहात्म्यञ्च तत्रैव ।
"एवं गोवर्द्धनं शश्वत् पूजनीयो विधानतः ।
गोवर्द्धनमखो रम्यः कृष्णसन्तोषकारकः" ॥ * ॥
अथ श्रीबलिदैत्यराजपूजा ।
"लिखित्वा श्रीबलिं पट्टे विन्ध्यावल्यान्वितं मुदा ।
प्रदोषे तत्प्रतिपदो भगवद्भक्तमर्च्चयेत्" ॥
तथा च स्कान्दे ।
"बलिमालिख्य दैत्येन्द्रं वर्णकैः पञ्चरङ्गकैः ।
सर्व्वाभरणसम्पूर्णं विन्ध्यावल्या सहासितम् ।
कूष्माण्डमयजम्भोरुमुरमानवसंवृतम् ।
सम्पूर्णहृष्टवदनं किरीटोत्कटकुण्डलम् ।
द्विभुजं दैत्यराजानं कारयित्वार्च्चयेन्नृप !" ।
तत्पूजामन्त्रम् । पाद्मे तत्रैव ।
"यथापि देहमनेन विष्णवे
भीतेन मिथ्यावचसो महात्मना ।
दैत्येन तेनाथ कठोरचेष्टया
बद्धो बलिर्व्वामनमूर्त्तिना यतः ॥
बद्धोऽपि नीतोऽथ पाताले विमना विश्वभावनः ।
नाभ्यपूजयद्धरिं दैत्यस्तस्मात्स्वमतः सुधीः ॥
तस्मै वरं ददौ प्रीतस्तस्मै दैत्याय माधवः ॥
अक्षौहिणी दशसहस्रक युत
सात्त्वं तथा व्यवधिया कनेन यत् ।
मध्योऽन्त्यशुक्लप्रतिपद्दिनेन तु
नामधेयेनातुष्ट सवासु ॥
इति तस्मै वरो दत्तो हरिणा दिविजाय च ।
ततोऽद्यापि प्रपूज्योऽसौ बलिराजदिने मुदा ।
बलिराजदिनं चापि पूजनीयः प्रयत्नतः" ॥ * ॥
अथ बलिपूजाविधिः । स्कान्दे तत्रैव ।
"गृहस्य मध्ये शालायां विशालायां ततोऽर्च्चयेत् ।
भ्रातृमातृजनैः सार्द्धं सन्तुष्टो बन्धुभिस्तथा ॥
कमलैः कुमुदैः पुष्पैः कह्लारै रक्तकोत्पलैः ।
गन्धपुष्पान्ननैवेद्यैः सक्षीरैर्गुडपूपकैः" ॥
अथ पूजामन्त्रः ।
'बलिराज ! नमस्तुभ्यं विरोचनसुतप्रभो ! ।
भविष्येन्द्र सुराराते ! पूजेयं प्रतिगृह्यताम् ॥
दीपोत्सवैर्निमित्तं च जनप्रमोदैः
कुर्व्वन्ति ये सुमनसो बलिराजपूजाम् ।
दानोपभोगसुखवृद्धिशताकुलानां
नृत्यं प्रयाति सकलं प्रमुदैव वर्षम्" ॥
अथ यमद्वितीयाकृत्यम् । स्कान्दे पाद्मे च ।
"ऊर्ज्जे शुक्लद्वितीयायां मध्याह्ने यममर्च्चयेत् ।
स्नानं कृत्वा भानुजायां यमलोकं न पश्यति" ॥
किञ्च ।
"तस्यां निजगृहे विप्र ! न भोक्तव्यं ततो बुधैः ।
स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ॥
दानानि च प्रदेयानि भगिनीभ्यो विधानतः ।
सर्व्वा भगिन्यः सम्पूज्या अभावे प्रतिपन्नकाः" ॥
किञ्च ।
"यस्यां तिथौ यमुनया यमराजदेवः
सम्भोजितः प्रतिपदस्त्वसौहृदेन ।
तस्यां स्वसुः करतलादिह यो भुनक्ति
प्राप्नोति वित्तसुभगं धनमुत्तमं सः" ॥ * ॥
अथ शुक्लाष्टमीकृत्यम् ।
पाद्मे तत्रैव कूर्म्मपुराणे च ।
"कार्त्तिके शुक्लपक्षे तु स्मृता गोपाष्टमी बुधैः ।
तद्दिने वासुदेवोऽभूद्गोपः पूर्व्वन्तु वत्सपः ।
तत्र कुर्य्याद्गवां पूजां गोग्रासं गोप्रदक्षिणम् ।
गवानुगमनं कार्य्यं सर्व्वान् कामानभीप्सता ॥'
प्रबोधनीकृत्यं तत्प्रबन्धे द्रष्टव्यम् । इति श्रीगो-
पालभट्टविलिखिते लिखिते भगवद्भक्तिविलासे
श्रीदामोदरप्रियो नाम १६ षोडशविलासः ॥
तत्र जातस्य फलम् ।
"दक्षः क्रये विक्रयणे धनाढ्यः
स्याद्दानदक्षोऽखिलकौशलज्ञः ।
यः कार्त्तिके कार्त्तिकरूपधारी
जातो भवेद्युद्धविशारदश्च" ॥
इति कोष्ठीप्रदीपः ॥ वर्षविशेषः । स च शनि-
कालोदित्योदितरस्मिन् वत्सरे तच्छोदयैकतर
सम्बन्धे भवति । इति मलमासतत्त्वम् । कार्त्तिकेय
यथा,—अश्वत्थे नवसे मनोयमध्यम ॥
'दृष्ट्वा तान् कृत्तिकाः सर्व्वा भयविक्लवमानसाः ।
कार्त्तिकं कथयामासुर्ज्ज्वलन्तं महावेगतः" ॥
कार्त्तिकिकः, पुं (कार्त्तिकी पौर्णमासी यस्मिन्
मासे इति ।"विभाषा फाल्गुनीश्रवणाकार्त्तिकी
चैत्रीभ्यः" । ४ । २ । २३ । इति ठक् ।) कार्त्तिक-
मासः । इत्यमरः । १ । ४ । १८ ॥
कार्त्तिकेयः, पुं, (कृत्तिकानामपत्यम् । "स्त्रीभ्यो ढक्" ।
४ । १ । १२० । इति ढक् ।) शिवपुत्रः । यथा,—
"सा मधुरं रहः क्रीडा पार्व्वतीशिवयोः पुरा ।
हरस्य च सुरैः शम्भोर्वीर्य्यं भूमौ पपात ह ॥
भूमिर्न्यक्षिपत् वह्नौ वह्निश्च शरकानने ।
तत्र शरवणे कृत्तिकाभिरधुना जातः स बालकः ॥
तवाभिषेकं विष्णुश्च कारयिष्यति सुरैः सह ।
हनिष्यति तारकाख्यं गमनं कर्मिष्यति ॥
पुत्रस्ते विश्वसंहर्त्ता गोप्तुमानाम इमा ।
जाति मास, तथास्याः मुख्यं च फलोटरे" ॥
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥ * ॥
स एव कल्पभेदे दक्षिणः । यथा,—
"कुमारश्चाभवत् तत्र तदाश्चर्य्यमद्भुतः ।

अङ्कितेजोभवः श्रीमान् गङ्गाकुक्षिपरिच्युतः ।
स कुमारं ततो जातं दृष्ट्वा सेन्द्रा मरुद्गणाः ।
तदा क्षीरप्रदानार्थं कृत्तिकाः समयोजयन् ॥
ताः क्षीरं तस्य देवस्य समयेन ददुस्तदा ।
स्कन्दमाकमय पुत्रः स्यातो नाबेति राघव ॥
अन्योन्यं विस्तरस्तासां तनयस्य मुखानि षट् ।
समभूवन् महाबाहो । षण्मुखस्तेन विश्रुतः ॥
ततस्ता देवता ऊचुः कार्त्तिकेय इति प्रभुः ।
पुत्रोऽयं जगति स्यातो भविष्यति न संशयः” ॥
इति वाल्मीकीयरामायणम् ॥ *॥ तत्पर्य्यायः महासेन २ शरजन्मा ३ षडानन ४ पार्व्वतीनन्दन ५ स्कन्दः ६ सेनानीः ७ अग्निभूः ८ गुहः ९ बाहुलेयः १० तारकजित् ११ विशाख १२ शिखिवाहन १३ षाण्मातुर १४ शक्तिधरः १५ कुमारः १६ क्रौञ्चदारणः १७ । इत्यमरः ।१।१।४१ ४२॥ आग्नेय १८ दीप्तकीर्त्ति १९ अनामयः २० मयूरकेतु २१ धर्म्मात्मा २२ भूतेशः २३ महिषमर्द्दन २४ कामजित् २५ कामदः २६ कान्त २७ सत्यवाक् २८ भुवनेश्वरः २९ शिशुः ३० शीघ्रः ३१ शुचि ३२ चण्ड ३३ दीप्तवर्णः ३४ शुभाननः ३५ अमोघ ३६ अनघः ३७ रौद्रः ३८ प्रिय ३९ चन्द्राननः ४० दीप्तशक्ति ४१ प्रशान्तात्मा ४२ भद्रकृत् ४३ कूटमोहनः ४४ षष्ठीप्रिय ४५ पवित्र ४६ मातृवत्सलः ४७ कन्याभर्त्ता ४८ विभक्तः ४९ स्वाहेयः ५० रेवतीसुतः ५१ प्रभुः ५२ नेता ५३ नैगमेय ५४ सुदुश्चरः ५५ सुव्रत ५६ ललित ५७ बालक्रीडनकप्रिय ५८ खचारी ५९ ब्रह्मचारी ६० शूरः ६१ शरवणोद्भवः ६२ विश्वामित्रप्रिय ६३ देवसेनाप्रिय ६४ वासुदेवप्रियः ६५ प्रियकृत् ६६ इति वनपर्व्व ॥ नाक ६७ स्वामी ६८ द्वादशलोचन ६९ । इति जटाधरः ॥ सिद्धसेन ७० अग्निसुत ७१ देवसेनापति ७२ बालचर्य्य ७३ कुक्कुटध्वज ७४ महाबाहुः ७५ गुहक ७६ शिखिध्वजः ७७ । इति शब्दरत्नावली ॥ (पावकात्मजः ७८ । रुद्रसुतः ७९ । षट्शिराः ८० । दितिजान्तकः ८१ । इति महाभारतम् ॥ *॥)

अस्य ध्यानम् । यथा ।
“कार्त्तिकेय महाभाग मयूरोपरिसंस्थितम् ।
तप्तकाञ्चनवर्णाभं शक्तिहस्तं वरप्रदम् ॥
द्विभुजं शत्रुहन्तारं नानालङ्कारभूषितम् ।
प्रसन्नवदनं देवं सर्व्वसेनासमावृतम्” ॥
इति कार्त्तिकेयपूजापद्धतिः ॥

कार्त्तिकेयप्रसूः, स्त्री, (कार्त्तिकेयं प्रसूते या । प्र+सू+क्विप् । कार्त्तिकेयस्य प्रसूर्वा ।) दुर्गा । इति शब्दरत्नावली ॥

कार्त्तिकोत्सव, पुं, (कार्त्तिक्यां कार्त्तिकीपौर्णमास्यां भव उत्सवः । तत्सम्बन्धी तत्कृतश्च उत्सवो वा ।) कौमुदी । कार्त्तिकी पूर्णिमा । इति त्रिकाण्डशेषः ॥

कार्पटः, पुं (कर्पट इव आकारोऽस्यास्ति । कर्पट+अण् ।) जतु । लाह इति भाषा । कार्प्पी । इति हेमचन्द्रः ॥ दरवारी उमेदोवार इत्यादि पारस्य भाषा ॥ (कर्पट एव । स्वार्थे अण् । जीर्णवस्त्रखण्डम् ॥)

कार्पटिकः, पुं, (कार्पट अन्तःसत्त्वं वेत्ति इति कर्पटेन चरति इति वा । ठक् । कार्पटोऽस्त्यस्य वा ठन् ।) मर्म्मवेत्ता । इति त्रिकाण्डशेषः । तीर्थसेवी । इति काशीखण्डम् ॥
(“ आय च तथैव वहि उज्जुटुम्बान्तरोत्पन्नैः ।
समावसत कार्पटिकैः सोऽन्यदेशागतैः सह” ।
इति कथासरित्सागरे ॥)

कार्पण्य, क्ली, (कृपणस्य भावः । कृपण+ष्यञ् ।) कृपणता । तत्पर्य्यायः । दैन्यम् २ । इति हेमचन्द्रः ॥ (यथा, भगवद्गीतायाम् २ । ७ ।
“कार्पण्यदोषोपहतस्वभावः
पृच्छामि त्वां धर्म्मसम्मूढचेताः” ॥)

कार्पास, पुं, क्ली,(कर्पास एव । स्वार्थे अण् ।) कर्पासवृक्षः । कापास इति भाषा ॥ (अस्य पत्रादिना सर्पदष्टः पुरुषो नीरोगो भवति । इदानीं पत्रादीनां व्यवहारक्रम उच्यते ।
दशनानन्तरमेव दष्टं पुरुषं सार्द्धद्वितोलकपरिमितः कार्पासपत्ररसः पाययितव्यः । अथ क्षतप्रदेशं विधौतं परिष्कृतञ्च विधाय तत्र पत्ररसः प्रदेयः । क्षतस्थानोपरि च कार्पासपत्रैः प्रलेपो दातव्यः । एवं कृतेऽपि यदि शरीरस्य कश्चिदंशः स्फीतो भवेत् तदा तत्रैव एतत्पत्ररसेन पेषयितव्यम् । आसन्ध्यात् प्रतिसपाददण्डमेव कृते सर्पदष्टः पुरुषः सुस्थो भविष्यतीति निश्चयः ॥)

कार्पास, त्रि, (कर्पासस्य विकारे अवयवे वा अण् बिल्वादित्वात् वा ।) कार्पासजातवस्त्रादि । तत्पर्य्यायः । फालम् २ बादरम् ३ । इत्यमरः । २ । ६ । १११ ॥ (यथा, महाभारते २ । ५० । २४ ।
“श्लक्ष्णं वस्त्रमकार्पासमाविकं मृदु चाजिनम्” ॥)

कार्पासधेनु, स्त्री, (दानार्थं कल्पिता कार्पासवस्त्रनिर्म्मिता धेनुः ।) दानार्थकार्पासादिनिर्म्मित धेनुः । यथा ।

होतोवाच ।
“अथातः सम्प्रवक्ष्यामि धेनुं कार्पासिकीं शुभाम् ।
यत्प्रदानान्नरा यान्ति ऐन्द्रलोकमनुत्तमम् ॥
विषुवे त्वयने पुण्ये युगादिप्रभवे तथा ।
ग्रहपीडासु चोग्रासु दुःस्वप्नारिष्टदर्शने ॥
पुण्ये ह्यायतने राजन् शुचिदेशे मया गते ।
गोमयेनोपलिप्तायां दर्भानास्तीर्य्य वै तिलान् ॥
तन्मध्ये स्थापयेत् धेनुं वस्त्रमाल्यानुलेपनैः ।
नैवेद्यधूपदीपाद्यैः पूजयेच्च विमत्सरः ॥
उत्तमा चतुर्भिर्भारैस्तदर्द्धेन तु मध्यमा ।
भारेण चाधमा प्रोक्ता वित्तशाठ्यं विवर्जयेत् ।
चतुर्थांशेन वत्सं वै वत्सन्तु परिकल्पयेत् ।
कृत्वा स्वर्णमयैः शृङ्गैः रौप्यखुरसंयुता ॥
नानाफलमया दन्ता रत्नगर्भसमन्विता ।
इक्षुदण्डमयैः पादैः ब्रह्माणमभिधाय च ॥
आवाहयेत्ततो कार्पासधेनुं मन्त्रैर्विधानतः ।
इदामेष रक्षपालः प्रदत्त सवत्साम्बित ।
पूर्व्वोक्तेन विधिं कार्य्यो दानमन्त्रपुरःसरः” ॥
पूर्व्वोक्तविधि लवणधेनूक्तविधि ।
“यथा देवगणः सर्व्वस्त्वया हीनो न वर्त्तते ।
तथा मामुद्धरेद्देवि । पाहि संसारसागरात्” ॥
इत्यादि वराहपुराणे श्वेतोपाख्याने कार्पासधेनुमाहात्म्यम् ॥

कार्पासनासिका, स्त्री, (कार्पासस्य नासिका इव ।) तर्कुः । इति शब्दरत्नावली । टेको इति भाषा ॥

कार्पासिका, स्त्री, (कार्पासी+कन् । ततष्टाप् ।) कार्पासी । इति शब्दरत्नावली ॥ (त्रि, कार्पासजात । कार्पासनिर्म्मितम् । यथा गो रामायणे । ५ । ४९ । ५ ।
“ अवेष्टयन्त लाङ्गूलं जीर्णैः कार्पासिकैः पटैः ” ॥)

कार्पासी, स्त्री, (कार्पास+जातित्वात् ङीष् । यद्वा कर्पासोऽस्त्यस्याः प्रज्ञाद्यण् ततो ङीप ।) कार्पासवृक्षः । कापास इति भाषा । तत्पर्य्यायः । बदरा २ तुण्डिकेरी ३ समुद्रान्ता ४ । इत्यमरः । २ । ४ । ११६ ॥ पटद ५ । इति रत्नमाला ॥ सारिणी ६ चव्या ७ तूला ८ गुणः ९ तुण्डकेरिका १० मरुद्भवा ११ पिचुः १२ बादर १३ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । स्तन्यदुग्धकारित्वम् । पित्तकफतृष्णादाहश्रमभ्रान्तिमूर्च्छानाशित्वम् । बलकारित्वञ्च । इति राजनिर्घण्टः ॥ तत्फलगुणाः । वायुनाशित्वम् । रक्तकारित्वम् । मूत्रवर्द्धकत्वम् । कर्णपिडिकानादपूयास्रावनाशित्वञ्च । तद्बीजगुणाः । स्तन्यदत्वम् । वृष्यत्वम् । स्निग्धत्वम् । कफकरत्वम् । गुरुत्वञ्च । इति भावप्रकाशः ॥

कार्म्म, त्रि, (कर्म्म शीलं यस्य । छत्रादित्वात् ण । “कर्म्मणो ण्णो” ।’ । ६ । ४ । १७२ । इति सूत्रानुसारेण नियातनात् टिलोपः ; अत्र मन पेक्ष कर्म्मसु प्रवृत्तः ।) कर्म्मशीलः । इत्यमरः । ३ । १ । १८ ॥

कार्म्मण क्ली, (कर्म्मैव इति । कर्म्मन्+“तद्युक्तात् कर्म्मणोऽण्” । ५ । ४ । ३६ । इति अण् । कर्म्मणे हितमिति अण् वा ।) मूलकर्म्म । इत्यमरः । ३ । २ । ४ । औषध्यादिमूलेन यत् उच्चाटनवशीकरणादिकर्म्म तत् । इति भरतः ॥ (यथा माघे । १० । ३७ ।
‘पातु चाहितकसम्भ्रममाद्यौ
कार्म्मणत्वमगमन् रमणेषु” ।
तथा च, काशीखण्डे ४५ । ८ ।
“कापि कार्म्मणवत्त्वा कापि नूमोहितक्रियिका”॥)
मन्त्रतन्त्रादियोजनम् । (कर्म्म साध्यत्वेन अस्त्यस्य इति अण् ।) कर्म्मठे त्रि । इति मेदिनी ॥

कार्म्मिक, त्रि, (कर्म्मणा निर्वृत्तम् । निवृत्त्यर्थे ठञ् ।) चित्रवस्त्रादि । (“कार्म्मिकं कर्म्मणा चित्रेण निर्म्मितं यत्र चित्राणि पटे वस्त्रखचितानि दृश्यन्ते क्रियते तत्कार्म्मिकमित्युच्यते” ॥) इति मिताक्षरा । (तथा च याज्ञवल्क्ये । २ । १८३ ।
‘ कार्म्मिके रोमबद्धे च त्रिंशद्भागक्षयो मतः ” ॥)

कार्म्मुक क्ली, (कर्म्मणे प्रभवतीति । ‘कर्म्मण

उकञ्" । ५ । १ । १०२ । इति उकञ् ।) धनुः । इत्यमरः । २ । ८ । ८३ । धनुक् इति भाषा ॥ (यथा, माघे । २ । ९७ ।
"कार्म्मुकेणैव गुणिना बाणः सन्धानमेष्यति" ॥)

कार्म्मुक, पुं, (कार्म्मुकं धनुः साधनत्वेनास्त्यस्य इति अच् ।) वंशः । बाँश इति भाषा । (कर्म्मणे कार्य्याय प्रभवतीति । कर्म्मन् + उकञ् ।) कर्म्मक्षमे त्रि । इति मेदिनी ॥ श्वेतखदिरः । हिज्जलः । महानिम्बः । इति राजनिर्घण्टः ॥

कार्य्य, क्ली, (क्रियते यत् तत् । कृ + "विभाषा कृवृषोः" । ३ । १ । १२० । इति क्यपभावे "ऋहलोर्ण्यत्" । ३ । १ । १२४ । इति ण्यत् । ततो वृद्धिः ।) क्रियते यत् । इति व्याकरणम् । काज इति भाषा । ("कार्य्यन्तु तद्यदभिनिर्वृत्तिमभिसन्धाय प्रवर्त्तते कर्त्ता" । इति चरके विमानस्थाने । ८ अध्यायः ॥ तथा मनुः । ९ । २९९ ।
"आरभेत तत कार्य्यं सञ्चिन्त्य गुरुलाघवम्" ॥
कारणम् । यथा तत्रैव । ३ । ८ ।
"आशासते कुटुम्बिभ्यस्तेभ्यः कार्य्यं विजानता" ॥) तत्रेति कारणम् त्रिविधम् । समवायिकारणम् १ यथा घटकार्य्यं प्रति कपालम् । असमवायिकारणम् २ यथा घटकार्य्यं प्रति कपालसंयोगादि । निमित्तकारणम् ३ यथा घटं प्रति दण्डचक्रादि । इति तर्कशास्त्रम् ॥ हेतुः । प्रयोजनम् । इति मेदिनी ॥ ऋणादिविवादः यथा,—
"यस्मात् कार्य्यसमारम्भश्चिरकालेन निश्चितः ।
तस्मान्न लभते वादमभियुक्तस्य कालभाक्" ॥
इति व्यवहारतत्त्वे कात्यायनः ॥
(तथा च मनुः । ८ । ४३ ।
"नोत्पादयेत् स्वयं कार्य्यं राजा नाप्यस्य पूरुषः" ॥)
अपूर्व्वम् । यथा —
"विधिप्रत्ययस्य कार्य्यं शक्तिरिति मीमांसकाः" ।
व्याकरणमते आदेशप्रत्ययागमाः । इति दुर्गादासः ॥ (त्रि, करणीयम् । कर्त्तव्यम् । यथा मनुः । ९ । २४८ ।
"अहविद्धक्रियायान्तु कृतायामस्य धर्म्मतः ।
अनयैवावृता कार्य्यं पिण्डनिर्व्वपणं सुतैः" ॥)

कार्य्यकुशल, त्रि, (कार्य्ये कर्म्मणि कुशलः निपुणः ।) कर्म्मठः । इति भूरिप्रयोगः ॥

कार्य्यपुट, पुं, (कार्य्ये क्रियायां न पुटति । कार्य्य + पुट् संश्लेषणे + कः ।) क्षपणः । उन्मत्तः । अनर्थकरः । इति विश्वमेदिन्यौ ॥

कार्य्यप्रद्वेष, पुं, (कार्य्ये प्रद्वेष्टि अनेन । प्र + द्विष् + करणे घञ् ।) आलस्यम् । इति राजनिर्घण्टः ॥

कार्य्या, स्त्री, (कृ + ण्यत् । टाप् ।) कारीरकः । इति राजनिर्घण्टः ॥

कार्य्यी, [न्] पुं, (कार्य्यं अस्त्यस्य इति इनिः ।) यस्य निष्पाद्यते कार्य्यं सः । इति दुर्गादासः ॥ अर्थी । इति कार्पटशब्दार्थे हेमचन्द्रः । (यथा मनुः । ८ । २ ।
"विनीतवेशाभरणः पश्येत् कार्य्याणि कार्य्यिणाम्" ॥)

कार्श्मरी, स्त्री, (कृश + स्वार्थे णिच् भावे मनिन् कार्श्म तत् राति । रा + क गौरादित्वात् ङीष् ।) काश्मरी । गम्भारीवृक्षः । इत्यमरटीकायां भरतः ॥

कार्श्य, पुं, (कृश् + स्वार्थे ष्यञ् ।) कार्श्यः । शालवृक्षः । इत्यमरटीकायां भरतः ॥ कचूर । गञ्जुष । इति राजनिर्घण्टः ॥ (कृशस्य भावः । "वर्णदृढादिभ्यः ष्यञ् च" । ५ । १ । १२३ । इति ष्यञ् ।) कृशतायां क्ली ॥ (यथा, मेघदूते ३१ ।
"सौभाग्यन्ते सुभग ! विरहावस्थया व्यञ्जयन्ती
कार्श्यं येन त्यजति विधिना स त्वयैवोपपाद्यः" ॥)

कार्षक, पुं, (कर्षति इति । कृष + "कृषेर्वृद्धिश्चोदीचाम्" । उणा । २ । ३८ । इति क्वुन् । यद्वा कृषिः भौमनस्य कृष्यादित्वात् अः स्वार्थे कन् ।) कर्षकः । इत्यमरटीकायां रायमुकुटः ॥

कार्षापण, पुं क्ली, (कर्षस्यायं "तस्येदम्" । ४ । ३ । १२० । इत्यण् । नित्य पणः परिमाणे इत्यप् गोचर सञ्चरेति घो वा कार्षस्य कार्षेण वा आपण व्यवहारो यत्र । यद्वा कर्षस्येदं स्वार्थे वा अण् तेन आपण्यते । आ + पण कर्म्मणि घ ।) कार्षिकः । षोडशपणाः । इति मेदिनी ॥ रूप्यकर्षकृतव्यवहारद्रव्यम् । लोके तु तन्मूल्ये षोडशपणसमुदाये कार्षापणस्योपचारेण प्रवृत्तिः । तथा हि प्राञ्चीयो रजतमाषो हिरण्यवत् । द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः । इति मनुः ॥ आदौ कृतयुगे रजतकृष्णलयोः प्रायशः मूल्यमिति प्राञ्चिप्रतः कृष्णलाभी रजतकर्षस्य षोडशपणा एव मूल्यम् । पुराणशब्दस्तत्र कार्षिकपुराणश्च कार्षापण इति गोपालितः । इत्यमरटीकायां भरतः ॥ (यथा, मनुः । ८ । १३६ ।
"कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः" ॥)

कार्षिक, पुं (कर्ष + स्वार्थे ठञ् ।) कार्षापणः । इत्यमरः । २ । ९ । ८८ ॥ (यथा याज्ञवल्क्ये । १ । ३६५ ।
"निष्कः सुवर्णाश्चत्वारः कार्षिकस्ताम्रिकः पणः" ॥
कर्षः कामस्य भौमस्य । कर्ष + ठक् ।) कृषकः । इति हेमचन्द्रः ॥ (कर्षस्यायम् । कर्ष + ठञ् । पलचतुर्थभागः । कर्षः परिमाणमस्य ठञ् । कर्षपरिमितद्रव्यम् । कर्षेण क्रीतः । ठञ् । कर्षक्रीतः ॥)

कार्ष्णि, पुं, (कृष्णस्यापत्यम् । अत इञ् ।) कामदेवः । इति त्रिकाण्डशेषः । (यथा हरिवंशे । १६२ । १८ ।
"तामायतन्तीं मायान्तु कार्ष्णिः कमललोचनः" ।
गन्धर्व्वविशेषः । यथा महाभारते । १ । १२३ । ५२ ।
"सुपर्णश्चैव कार्ष्णिश्च नन्दिश्चित्ररथस्तथा" ॥)

कार्ष्णी, स्त्री, (कार्ष्ण + ङीप् ।) शतावरी । इति राजनिर्घण्टः ॥ (शतावरीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

कार्ष्ण्य, क्ली, (कृष्ण + "गुणवचनेति" ५ । १ । १२४ । इति ष्यञ् । चतुर्वर्णादित्वात् स्वार्थे ष्यञ् ।) कालवर्णः । इत्यमरः । २ । ५ । ४४ ॥ (अस्य पर्य्यायो यथा ।
"श्यामन्तु कृष्णकार्ष्ण्यादिकालमञ्जम्" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

काल ऋ क कालोपदेशे । इति कविकल्पद्रुमः । (अदन्तचुरां-पर-सक-सेट् ।) यद्वा यथा कालयति कालमियत्तया गणकः । एतावती वेलेति कथितवानित्यर्थः । इति दुर्गादासः ॥

काल, क्ली, (ईषत् अम्लत्वं लाति मद्यादिति । आ + ला + कः । धातुषु कुत्सितरूपतया अलति वा । अल + अच् । कोः कादेशः ।) लौहम् । इति वाचस्पतिरित्यमरटीकायां भरतः ॥ कक्कोलकम् । इति राजनिर्घण्टः ॥ कालीयकम् । इति शब्दचन्द्रिका ॥

काल, पुं, (कलयति आयुः । कल् सङ्ख्याने पचाद्यच् ततः प्रज्ञाद्यण् । यद्वा कालयति सर्व्वाणि भूतानि । कल् प्रेरणे ण्यन्तात् पचाद्यच् ।) क्षणदण्डमुहूर्त्तप्रहरदिनरात्रिपक्षमासायनवत्सरादिः । इति दुर्गादासः ॥ तत्पर्य्यायः । दिष्टः २ अनेहा ३ समयः ४ । इत्यमरः । १ । ४ । १ ॥ "जन्यानां जनकः कालो जगतामाश्रयो मतः । परापरत्वधीहेतुः क्षणादिः स्यादुपाधितः" ॥ (यथा विष्णुपुराणे । १ । २ । १४ ।
"परस्य ब्रह्मणो रूपं पुरुषः प्रथमं द्विज ! ।
व्यक्ताव्यक्ते तथैवान्ये रूपे कालस्तथा परम्" ॥)
अस्य गुणाः । सङ्ख्या १ परिमितिः २ पृथक्त्वम् ३ संयोगः ४ विभागः ५ । इति भाषापरिच्छेदः ॥
"अनादिनिधनः कालो रुद्रः सङ्कर्षणः स्मृतः ।
कलनात् सर्व्वभूतानां स कालः परिकीर्त्तितः" ॥
इति तिथ्यादितत्त्वम् ॥ * ॥
("कालस्त्रिविधो ज्ञेयोऽतीतोऽनागत एव च ।
वर्त्तमानस्तृतीयस्तु वक्ष्यामि शृणु लक्षणम् ॥
काल कलयते लोकं कालः कलयते जगत् ।
कालः कलयते विश्वं तेन कालोऽभिधीयते ॥
कालस्य वशगाः सर्व्वे देवर्षिसिद्धकिन्नराः ।
कालो हि भगवान्देवः स साक्षात्परमेश्वरः ॥
सर्गपालनसंहर्त्ता स कालः सर्व्वतः समः ।
कालेन कल्प्यते विश्वं तेन कालोऽभिधीयते ॥
येनोत्पत्तिश्च जायेत येन वै कल्प्यते कला ।
सोऽन्तकश्च भवेत्कालो जगदुत्पत्तिकारकः ॥
यः कर्म्मणि प्रवर्त्तेत प्रकर्षे वर्त्तमानके ।
सोऽपि प्रवर्त्तको ज्ञेयः कालः स्यात् प्रतिपालकः ॥
येन मृत्युवशं याति कृतं येन लयं व्रजेत् ।
संहर्त्ता सोऽपि विज्ञेयः कालः स्यात् कलनापरः ॥
कालः सृजति भूतानि कालः संहरते प्रजाः ।
कालः स्वपिति जागर्त्ति कालो हि दुरतिक्रमः ॥
काले देवा विनश्यन्ति काले चासुरपन्नगाः ।
नरेन्द्राः सर्व्वजीवाश्च काले सर्व्वं विनश्यति ॥
त्रिकालात् परतो ज्ञेयः कालस्तु गतचेष्टकः ।
तथा सदा द्विमोऽद्याख्याः स्वदः काला इमे मताः ॥
तथा सप्तोऽन्योऽपि भेदा उदासमाङ्काद्विकः ।
सर्व्वोऽपि सर्व्वगः स वै व्यक्ताव्यक्ततरः शुभः" ॥
इति प्रथमस्थाने ४ अः । हारीतेनोक्तम् ॥)
यमः । (यथा गोः रामायणे । ३ । ३५ । ३९ ।
"आपतन्तीं च तां दृष्ट्वा कालदण्डोपमां गदाम्" ॥)
कृष्णवर्णः । तद्वति त्रि । इत्यमरः । १ । ५ । १४,१६ । (यथा गोः रामायणे । ६ । ६० । २ ।
"उदयादयनिरिक्षाद रवौ च कालमङ्गुले ।
कान्तावशुष्के गच्छति क्षिप्रः कालालाकोपमः" ॥)
मद्गुः । (यथा भागवते । ८ । ८ । २ ।

"दिलीपस्तत्सुतस्तद्वद्भ्रात्रा कालमेयिवान्।
भगीरथस्तस्य सुतस्तेपे स सुमहत् तपः" ॥)
महाकालः। इति मेदिनी॥ शनिः। इति दीपिका॥ कासमर्द्दः। रक्तचित्रकः। रालः। कोकिलः। इति राजनिघण्टः॥ (सर्व्वकलनात् शिवः। यथा महाभारते।१३।१७।४७।
"गजहा दैत्यहा कालो लोकधाता गुणाकरः"॥
कालनियन्तृत्वात् विष्णुः। यथा महाभारते।१३।१।१४९।५८।
"ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः"॥
पर्व्वतविशेषः। यथा गौ रामायणे।४।४४।२१।
"ततो महाश्रमं गत्वा देवगन्धर्व्वसेवितम्।
कालं नाम सदा शान्तं गमिष्यथ शिलोच्चयम्"॥)
कालक क्ली, (काल+स्वार्थे कन्। यद्वा, कलयति नोदयति रक्तताम्। कल नोदने+ण्वुल्।) कालशाकम्। इति भावप्रकाशः॥ (कालशाकशब्देऽस्य गुणादिकं बोध्यम्।) यकृत्। इति हेमचन्द्रः॥
कालक, पुं, (कालयतीति। कलत्वात्क्षेपे+"ण्वुल्तृचौ" ३।१।१३३ इति ण्वुल्।) जतुकः। इत्यमरः। २।४।४९॥ जडुल इति भाषा॥ ("वर्णे चानित्ये"। "रक्ते"। "कालाच्च"।५।४।३१,३३ इति कन्। कालकः पटः। कालिका शाटी। कालकं मुखं इति सिद्धान्तकौमुदी॥) जलगर्द्दः सर्पः। इति शब्दरत्नावली॥ (राक्षसविशेषः। यथा गौ रामायणे ३।२९।३०।
"दुर्ज्जय कालकाख्यश्च परश्च कालिकामुखः"॥)
कालकटङ्कट, पुं, (कालस्य कटङ्कटः।) शिवः। कालकटङ्कटोऽपि पाठः। इति दानधर्म्मे शिवसहस्रनामसु पठितः॥ (यथा, महाभारते १३। शिवसहस्रनामकथने।१७।५७।
"वैशवी पथवी तालो खली कालकटङ्कटः"॥)
कालकण्ठ, पुं, (कालः श्यामवर्णः नीलो वा कण्ठो यस्य।) शिवः। नीलकण्ठः। मयूरः। खञ्जनः। कलविङ्कः। दात्यूहपक्षी। इति मेदिनी॥
कालकण्ठक, पुं, (कालः श्यामः कण्ठोऽस्य। ततः स्वार्थे कन् वा।) दात्यूहपक्षी। इत्यमरः।२।५।२१॥ (दात्यूहशब्देऽस्य गुणपर्य्याया वक्तव्याः॥)
कालकन्दक, पुं, (कालः श्यामसर्पः कन्दति स्फुरते यद्वा कालं सन् कन्दते वैकल्यं गच्छति। काल+कदि+अच्। स्वार्थे कन्।) जलसर्पः। इति शब्दरत्नावली॥
कालकर्णिका, स्त्री,(कालस्य कर्णिका इव।) अलक्ष्मीः। इति हेमचन्द्रः॥
कालकर्णी, स्त्री, (कालः कर्णोऽस्याः। अथ ततः स्त्रियां ङीप्।) अलक्ष्मीः। इति शब्दरत्नावली॥
कालका, स्त्री, (कालकेयाख्यासुराणां माता काला एव कन्। बाहुलकात् न इत्वम्।) कालकेयनामासुरगणमाता। इति जटाधरः॥ (सा च वैश्वानरकन्या। यथा, भागवते ६।६।३२।
"वैश्वानरसुता याश्च चतस्रश्चारुदर्शनाः।
उपदानवी हयशिरा पुलोमा कालका तथा"॥)
कालकील, पुं, (काल प्रशस्तकालोपयुक्तः सन् प्रशस्ता दिकः कीलयति व्याप्नोति नाशयति वा। काल+कील+अण्। कोलाहलस्य सत्कार्यादिभञ्जकत्वात् तथात्वम्।) कोलाहलः। इति शब्दरत्नावली॥
कालकुण्ठ, पुं, (कालेन कालरूपिणा परमेश्वरेण कुण्ठ्यते असौ। कुण्ठ+कर्म्मणि घञ्।) यमः। इति शब्दमाला॥
कालकुष्ठं क्ली, (कालात् श्यामपर्व्वतात् कुष्यते निष्काश्यते। कुष्+कर्म्मणि क्त।) कङ्कुष्ठम्। पर्व्वतीयमृत्तिकाविशेषः। इति राजनिघण्टः॥
कालकूट, क्ली, (कालं शिवमपि कूटयति अवसादयति यद्वा कालस्य मृत्योः कूटं कार्य्येण समष्टिः इव इव वा।) वोलम्। विषम्। इति राजनिघण्टः॥ (यथा, भागवते ८।६।२५।
"नमेतस्य कालकूटात् विषाज्जन्मभिसम्भवात्"॥)
कालकूट, पुं क्ली, (कालस्य मृत्योः कूटं कूटदूत इव।) स्थावरविषभेदः। इत्यमरः॥१।८।१०।
(यथा भागवते ३।२।२३।
"अहो बकी यं स्तनकालकूटं
जिघांसयाऽपाययदप्यसाध्वी"॥
अस्य स्वरूपं यथा,—
"देवासुररणे देवैर्हतस्य पृथुमालिनः।
दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः॥
निर्य्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः
सो हि क्षेत्रे शृङ्गवेरे कोङ्कणे मलये भवेत्"।
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे शोधनमारणाधिकारे।०॥
देशविशेषः। यथा, महाभारते २।२०।२६।
"कुरुभ्यः प्रस्थितास्ते तु मध्येन कुरुजाङ्गलम्।
रम्यं पद्मसरो गत्वा कालकूटमतीत्य च"॥)
कालकूटक, पुं, (कालस्य कूटमिव कायति प्रकाशते। कै+क।) कारस्करवृक्षः। इति राजनिघण्टः॥
(यथा, महाभारते।१।१२८।४४।
"ततो दुर्य्योधनः पापस्तद्भक्ष्ये कालकूटकम्।
विषं प्रक्षेपयामास भीमसेनजिघांसया"॥
कारस्करशब्देऽस्य गुणपर्य्याया ज्ञेयाः॥)
कालकृत् पुं (कालं करोतीति। कालस्य परिमाणम् उदयास्ताभ्यां दण्डपलादिकमेव सम्पादयतीति। कृ+क्विप् तुगागमश्च।) सूर्य्यः। इति त्रिकाण्डशेषः॥
कालकृतः, पुं, (कालेन परमेश्वरेण कृतः सृष्टः। यद्वा कालं काष्ठाकलादिमानं कृतं कर्त्ता। कृ+कर्त्तरि+क्त।) सूर्य्यः। इति शब्दरत्नावली॥ कालजाते, त्रि। यथा, पुराणे,—
"सर्व्वं कालकृतं मन्ये कालो हि बलवत्तरः"॥
कालखञ्जन क्ली (कालेन कालान्तरेण खञ्जति विकृतिं गच्छतीति। काल+खञ्ज+ल्युट्।) यकृत्। इति हेमचन्द्रः॥
कालखण्ड, क्ली, (कालं कृष्णं खण्डम्।) यकृत्। दक्षिणकुक्षिस्थमांसखण्डम्। इत्यमरः।२।६।६६॥ (यकृतशब्देऽस्य विशेषो ज्ञातव्यः॥)
कालग्रन्थि, पुं, (कालस्य ग्रन्थिरिव।) वत्सरः। इति त्रिकाण्डशेषः॥
कालङ्कत, पुं, (कुत्सितोऽपि अलङ्कृत इवेदलङ्कृतो वा। कोः कादेशः।) वृक्षविशेषः। कालकासुन्दे इति भाषा। तत्पर्य्यायः। अरिमर्द्दः २ कासमर्द्दः ३ कर्कशः ४। इति रत्नमाला॥
कालचक्र, क्ली, (कालस्य कालगतेश्चक्रमिव।) कालरूपचक्रम्। यथाह—हेमचन्द्रः॥
"कालो द्विविधोऽवसर्पिण्युत्सर्पिणीभेदतः।
सागरकोटिकोटीनां विंशत्या स समाप्यते॥
अवसर्पिण्यां षडरा उत्सर्पिण्यां त एव विपरीताः।
एवं द्वादशभिररैर्विवर्त्तते कालचक्रमिदम्"॥
ज्योतिश्चक्रविशेषः। यथा,—
"त्रिनाभिमति पञ्चारे षण्नेमिन्यक्षयात्मके।
सम्वत्सरमये कृत्स्नं कालचक्रं प्रतिष्ठितम्"॥
इति विष्णुपुराणे २।८।४। चक्रमेवोपासनार्थं विशिनष्टि त्रिनाभिमतीति। नाभिः स्तम्भः यत्राक्षः प्रोतः स च त्रिमेखलः। अक्षश्चात्र नाभित्वेनोपास्यत्वात् मेखलात्मकाभिस्त्रयो नाभयः पूर्व्वाह्णमध्याह्नापराह्णास्तद्यस्मिन्। पञ्चारे यत्र सम्वत्सरपरिवत्सरादयो वक्ष्यमाणा अराः शलाका यस्य स तस्मिन्। षण्णेमिनि षट् ऋतवो नेमयः प्रान्तवलयानि यद्रुते। कालात्मकत्वादक्षयात्मके। सम्वत्सरमये सम्वत्सरावयवमासारम्भकत्वात् सम्वत्सरत्वेनोपास्यत्वाच्च तन्मयम्। तदुक्तं मात्स्ये।
"यस्त्रिनाभिः सूर्य्यस्य रथचक्रस्य वै स्मृतम्।
अराः सम्वत्सरा पञ्च नेम्यः षड़् ऋतवः स्मृताः"॥
इति। तस्मिन् कालचक्रे कालोपलक्षणभूतं कृत्स्नं ज्योतिश्चक्रं प्रतिष्ठितं आश्रितम्। सूर्य्यगत्यधीनत्वात् कालचक्रस्य। इति तट्टीकायां श्रीधरस्वामी॥ ("स एव निमेषादियुगपर्य्यन्तः कालश्चक्रवत् परिवर्त्तमानः कालचक्रमुच्यते इत्येके"। इति सुश्रुते सूत्रस्थाने ६ अध्याये॥)
कालज्ञ, पुं (कालं कालानुयायिकर्त्तव्यादिकं कालगतिं वा जानातीति। काल+ज्ञा+क।) कुक्कुटः। इति राजनिघण्टः॥ (कालवेत्तरि त्रि, यथा, मनु ७।२१७।
"तत्रात्मभूतैः कालज्ञैरहार्य्यैः परिचारकैः"॥)
कालञ्जर, पुं, (कालं जरयति। काल+जॄ+णिच्+अच्। बाहुलकात् मुम्।) योगिचक्रमेलकम्। (कालं मृत्युं जरयतीति।) भैरवः। (कालेन जीर्य्यति। जॄ+अच्।) पर्व्वतविशेषः। इति मेदिनी॥ (यथा, महाभारते ३। तीर्थयात्रापर्व्वणि ८५।५६।
"तत्र कालञ्जरं नाम पर्व्वतं लोकविश्रुतम्।
तत्र देवह्रदे स्नात्वा गोसहस्रफलं लभेत्"॥)
देशविशेषः। इति धरणी॥
कालञ्जरी, स्त्री, (कालं जरयति। काल+जॄ+णिच्+अच्। मकारागमः तस्य पत्नी ङीप्।) चण्डी। इति धरणी॥ (अग्रेऽपि कालं जरयतीति बुत्पत्त्या टाबेव।) तदा कालञ्जरा इति जमाधरम्॥
कालतान, पुं (कालतादिश्च्छन्दात् यन्ति पर्णानि इति। कालता+तन+अच्।) तमालवृक्षः।

इति राजनिर्घण्टः । (अस्य गुणादिकन्तमालशब्दे ज्ञेयम् ।)

कालधर्म्म, पु, (कालस्य धर्म्मः । अथवा परिणाम काले पञ्चत्वप्राप्तिरूपो धर्म्मः ।) मृत्युः । इत्यमरः । २ । ८ । ११६ ॥ समयस्य स्वभावः । (यथा, रामायणे । २ । ७२ । ३७ ।
"कालधर्म्मपरिक्षिप्तः पाशैरिव महागजः" ।)

कालनिर्य्यास, पुं, (कालः कृष्णवर्णो निर्य्यासः ।) गुग्गुलुः । इति रत्नमाला ॥

कालनेमि, पुं, (कालस्य मृत्योः नेमिरिव चक्रवत् ।) स्वनामख्यातराक्षसः । स च लङ्कापते रावणस्य मातुलः । यथा,—
"कालनेमिं दुराधर्षं रक्षःपरमदुर्जयम् ।
चतुरास्यं चतुर्हस्तमष्टनेत्रं भयावहम्" ॥
इति गौः रामायणे ६ । ८२ । ६४ ॥ दैत्यविशेषः । यथा,—श्रीभागवते ।
"आत्मानमिह सञ्जातं जानन् प्राग्विष्णुना हतम् ।
महासुरं कालनेमिं यदुभिः स व्यरुध्यत" ॥
स तु हिरण्यकशिपुपुत्रः । इति हरिवंशः ॥ (कालयवनः ।)

कालनेमिरिपुः, पु, (कालनेमेः कालनेमिनाम्नका सुरस्य रिपुः हन्ता ।) विष्णुः । इति शब्दरत्नावली ॥ (कालनेमेः रावणमातुलस्य रिपुः हन्ता । हनुमान् । इति शब्दविभक्तिलक्ष्योऽयं ।)

कालनेमिहा, [न्] पुं, (कालनेमिं तन्नामानं असुरं हतवान् । हन् + क्विप् ।) विष्णुः । इति त्रिकाण्डशेषः ॥ (यदुक्तं महाभारते १३ । १४९ । ८२ ।
"कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः" ॥
कालनेमिं स्वनामख्यातरावणमातुलं हतवानिति व्युत्पत्त्या हनूमान् ।)

कालनेमी, [न्] पुं, (कालस्येव नेमिरन्तस्य शोभा देरादिलिङ्गयत्वात् इनिः ।) कालनेमिः । इति हिरूपकोषः ॥

कालनेम्यरिः, पुं, (कालनेमेः अरिः शत्रुः ।) विष्णुः । इति त्रिकाण्डशेषः ॥

कालपत्र, पुं (कालं कृष्णं पत्रं पत्रं यस्य ।) तगरवृक्षः । इति शब्दरत्नावली ॥

कालपालक, क्ली, (कालं कृष्णवर्णं पालयति धारयतीति । काल + पाल + ण्वुल् ।) कङ्गुष्ठमृत्तिका । इति राजनिर्घण्टः ॥

कालपीलुकः, पुं, (कालः कृष्णः पीलुः । स्वार्थे कन् ।) कुपीलुः । इति भावप्रकाशः ॥ (गुणाः पर्य्याया चास्य कुपीलुशब्दे बोद्धव्याः ।)

कालपुरुषः पुं, (कालः कालचक्रं पुरुष इव ।) यम सहायः । इति जटाधरः ॥ ज्योतिःशास्त्रम् । यथा
"विलग्नस्य कालपुरुषस्यमहाशयस्य
मध्येन् कराविरचिमिननशापि परम्" ॥
कालपुरुष स चास्यां नाम मध्यात् तस्य ज्योतिःशास्त्रविज्ञोर्ज्ञसमुदायः । इति भट्टोत्पलः ॥ ॥ वराहं शुभाशुभज्ञानाय अश्वयमादिराशिकल्पितपुरुषाकारः । यथा,—
'शीर्षमुखबाहुहृदयोदराणि कटिवस्तिगुह्यसञ्ज्ञ

कानि । ऊरू जानुकजङ्घेचरणाविति च राशयो ऽजाद्याः" ॥ इति दीपिका ॥ ॥ नराणां शुभाशुभज्ञानाय जन्मलग्नादिराशिद्वादशघटितपुरुषाकारः । यथा "क दृक्श्रोत्रनसाकपोलहनवो वक्त्रं च होरादयस्ते कण्ठांसकबाहुपार्श्वहृदयक्रोडानि नाभिस्ततः । वस्तिः शिश्नगुदे ततश्च वृषणौ ऊरू ततो जानुनी जङ्घे चाङ्घ्रिरिति उभयत्र वाममुदितै द्रेक्काणभागैस्त्रिधा" ॥ इति "कालनरस्याङ्गे सद् सन्न्यशुभयोगत । पुंसामपि तदङ्गेषु शुभाशुभफलं वदेत्" ॥ इति वृहज्जातकम् ॥

कालपृष्ठ, क्ली, (कालं कृष्णं पृष्ठं यस्य ।) कर्णधनुः । धनुर्मात्रम् । इति हेमचन्द्रः ॥

कालपृष्ठ, पु, (कालं कृष्णवर्णं पृष्ठं पृष्ठभागो यस्य ।) कङ्कपक्षी । मृगविशेषः । इति हेमचन्द्रः ॥

कालपेषी, स्त्री, (पिष्यतेऽसौ । पिष + कर्म्मणि घञ् । पेषः । कालः पेषः । ततः स्त्रियां ङीप् ।) श्यामालता । इति रत्नमाला ॥ (अस्याः पर्य्याया यथा ॥
"कालपेषी महाश्यामा सुमनोवृषणप्रादिका ।
नीलमूला च पालिन्दीमसूरविदला च सा" ॥)

कालप्रभात, क्ली, (कालः कृष्णः प्रभातं यत्र ।) शरदृतुः । शरत्कालः । इति त्रिकाण्डशेषः ॥

कालभाण्डिका, स्त्री, (कालभाण्डं कृष्णप्रभाण्डं चरति उत्पद्यति । चर + ण्वुल् टाप् इत्वञ्च ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥

कालमान, पुं, (कालो मन्यते यः कर्णैरितिशेषः । काल + मन + कर्म्मणि घञ् ।) कृष्णार्जकः । इति रत्नमाला ॥ कालतुलसी इति भाषा । राजनिर्घण्टे कालमालशब्दोऽयम् ॥ (सकारान्तस्यास्य व्यवहारो यत्र तद्यथा ॥ सुश्रुते सूत्रस्थाने । ३८ अः ॥
"सुरसा श्वेतसुरसा फणिज्झककार्ज्जक भूस्तृण सुगन्धक सुमुख कालमाल कासमर्द-क्षवक-खरपुष्पा विडङ्ग-कट्फल सुरसीनादय, सुरसादिर्गणः ।)

कालमुष्कक, पुं, (कालो मुष्क इव कायति प्रकाशते । कै + कः ।) घण्टापारलिवृक्षः । इति रत्नमाला ॥ (यत्रिमस्य व्यवहारस्तद्यथा,—
'प्रक्लेऽहनि नक्षत्रे कृत्तमप्रापपूर्व्वकम् ।
कालमुष्ककमाहृत्य दग्ध्वा भस्म समाहरेत्" ॥
इति वैद्यकचक्रपाणिसंग्रहे अर्शोऽधिकारे कुल वित्तुण्डाटनामकौषधे ।)

कालमूलः, पुं, (कालं मूलं यस्य ।) रक्तचित्रकवृक्षः । इति राजनिर्घण्टः ॥

कालमेशिका, स्त्री, (कालं मिश्यते कालोऽयमिति कथ्यते कर्णैरिति शेषः । मिश + कर्म्मणि घञ् गौरादित्वात् ङीष् ततः कन् टाप् ह्रस्वश्च ।) कालमेषिका । इत्यमरटीकायां रायमुकुटः ॥

कालमेषी, स्त्री, (कालमेष + ङीष्) कालमेषिका । इत्यमरटीकायां भरतः ॥

कालमेषिका, स्त्री, (कालं मिषति स्पर्द्धते स्वकान्तिना । मिष + अण् । गौरादित्वात् ङीष् स्वार्थे कन् टाप् ह्रस्वश्च ।) मञ्जिष्ठा । श्यामलता । इत्यमरः २ । ४ । १०८ ॥ अस्या पर्य्याया यथा —
"विकसाद्धमालकुलन्ना च भाण्डिनी च सुवेषिका ।

मसूरविदला कोलकैषिका कालमेषिका" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥)

कालमेषी, स्त्री, (कालमेष + ङीष् ।) सोमराजी । इत्यमरः । २ । ४ । ९६ ॥ (अस्याः पर्य्यायो यथा,—
"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
शशिलेखा कृष्णफला सोमा पूतिफलीति च" ॥
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणा अस्या वाकुचीशब्दे ज्ञेयाः ।) मञ्जिष्ठा । इति शब्दरत्नावली ॥ त्रिवृत् । इति राजनिर्घण्टः ॥

कालरात्रि, स्त्री, (कालः कालरूपा महैकदिने चतुर्दशमनूनामधिकारावसाने ब्रह्मणः प्रलयरूपा रात्रिः ।) रात्रिविशेषः । सा तु कालसंहारः । मरणं तदुपलक्षिता रात्रिः कल्पान्तरात्रिरित्यर्थः । इति देवीमाहात्म्यटीकायां विद्याविनोदः ॥ भीमरथी । इति हारावली ॥ दुर्गायाः शक्तिविशेषः । यथा,—
"सा दुर्गा शक्तिभिः सार्द्धं काली रक्षति कर्त्तृता ।
सा प्रथमेव सम्पूज्या कालरात्रिर्मुला मही" ॥
इति कालीतन्त्रम् ॥ (दीपावली । यथा,—
"दीपावली तु या प्रोक्ता कालरात्रिश्च सा मता" ।
इत्यागमवचनात् ।
क्रियायोग्यकालविशेषः । यदुक्तं दीपिकायाम् ।
"रवौ षष्ठ विधौ मन्द कुजवारे द्वितीयकम् ।
बुधे सप्त गुरौ पञ्च भृगुवारे तृतीयकम् ॥
शनावाद्यं तथा चान्त्यं रात्रौ काल विवर्ज्जयेत्" ।)

कालवदः, पुं, (कालः कालस्य सर्व्वसंहारको वदः ।) कालाधिवदः । यथा, देवीपुराणे,—
"येषु कः कालवदस्य नामाख्योत्सवत्त्वका ।
विधिनाह्यम्बिकाख्या दुर्ग्गे ज्ञेयस्तु ॥
सा यत्र कालवदस्य तनुरूपेण संस्थिता" ॥

कालवर्ण, क्ली, (कालं कृष्णवर्णं लवणम् ।) विड्लवणम् । इति रत्नमाला ॥
("न कालवर्णे गन्धः सौवर्च्चलगुणास्तु ते" ॥
इति चरके सूत्रस्थाने २७ अः ।)

काललोह, क्ली, (कालं कृष्णं लोहं आयसमित्यर्थः ।) कालायसम् । तिखा इति भाषा । तत्पर्य्यायः । शस्त्रायसम् २ अश्मम् ३ तीक्ष्णम् ४ । इति रत्नमाला ॥ (कालायसशब्देऽस्य विवरणं ज्ञातव्यम् ।)

कालवञ्चन, क्ली, (कलयति उपभुङ्क्ते विषयं । कल + क्विप् + अच् । काल्यते प्रेर्य्यतेऽसौ कालेन वा विव कर्म्मणि घञ् । कालः कालं तस्य वञ्चनं कालवञ्चनम् । वञ्च गत्यर्थे + करणे ल्युट् ।) धर्म्मः । इति त्रिकाण्डशेषः ॥ कालवञ्चनमिति वायुपादः ॥

कालवृन्त, पुं, (कालं वृन्तं यस्य ।) कुलत्थकः । इति रत्नमाला ॥

कालवृन्ती स्त्री (कालवृन्त + गौरादित्वात् ङीष् ।) पाटलावृक्षः । इति राजनिर्घण्टः ॥

कालवेला, स्त्री, (कालस्य वेला ।) दिवाप्रहरार्द्धादि रूप । सा तु रव्यादिवारे कालस्य दुर्न्नेत्वात् नामार्द्धवेला । यथा । रवौ दिवा पञ्चमार्द्धयामार्द्धं चतुर्थयामार्द्धम् । सोमे दिवा द्वितीययामार्द्धं

गतः चतुर्थयामार्द्धम्। कुजे दिवा षष्ठयामार्द्धं गतः सप्तमयामार्द्धम्। बुधे दिवा तृतीय यामार्द्धं गतं सप्तमयामार्द्धम्। गुरौ दिवा सप्तमयामार्द्धं गतं पञ्चमयामार्द्धम्। शुक्रे दिवा चतुर्थयामार्द्धं गतः तृतीययामार्द्धम्। शनौ दिवा प्रथमाष्टम यामार्द्धं गतः तदेव। इति दीपिका॥

कालशाक, क्ली, (काल कृष्णं शाकम्।) स्वनामख्यात शाकम्। नरचा इति हिन्दी भाषा। तत्पर्य्याय। कालिकम् २ श्राद्धशाकम् ३ कालकम् ४। अस्य गुणाः। सारकत्वम्। रुचिवायुबलकारित्वम्। कफशोथरक्तपित्तनाशित्वम्। मेध्यत्वम्। हिम त्वञ्च। इति भावप्रकाशः॥ तिक्तपूतिका। कुलत्थ शाक इति केचित्। अस्य गुणाः। कटुत्वम्। अग्निदीपनत्वम्। गुरुत्वम्। शोधनाशित्वञ्च। इति राजवल्लभः॥ (यथा च वाग्भटे सूत्रस्थाने। ६ अध्याये।

"वर्षाभ्वी कालशाकञ्च सक्षार कटुतिक्तकम्।
दीपन भेदन हन्ति गरशोफकफानिलान्" ॥)

कालशालि, पुं, (काल कृष्णः शालिः उत्कृष्टधान्य विशेषः।) कृष्णशालि। इति राजनिर्घण्टः॥

कालशेय, क्ली, (कलश्या भवम्। कलशी+ढक।) कालसेयम्। घोलम्। इत्यमरटीकायां भरतः॥

कालसंरोध, पु, (कालस्य संरोधः।) चिरकालाव स्थानम्। इति मिताक्षरा॥ यथा।

"न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः"। इति याज्ञवल्क्यः॥

कालसर्प, पुं (कालः कृष्णः सर्पः।) कृष्णसर्पः। तत्पर्य्यायः। अलगर्द्द २ महाविष ३। इति त्रिकाण्डशेषः॥ (यथा काशीखण्डे १० अध्याये।

"स दष्टः कालसर्पेण न दष्टो मृत्युना स्फुटम्।
न मुष्टस्तु दिवसे विश्वेशो यत्र नेक्षितः" ॥)

कालसार, क्ली (कालः सारः प्रधानं यस्य।) पीत चन्दनम्। इति भावप्रकाशः॥ (कालीयकशब्देऽस्य गुणादयो बोद्धव्याः ॥)

कालसारः, पुं, (कालः सारः प्रधानं यस्य।) स्वनाम ख्यातहरिणः। तत्पर्य्यायः। कृष्णसारः २। इति शब्दरत्नावली॥

कालसूत्र, क्ली, (कालस्य यमस्य बन्धनहेतुकतया सूत्रमिव।) नरकविशेषः। इत्यमरः। १। ८। २॥ तत्तु गुणाच्छेदकसूक्ष्मच्छेदनरूपम्। इति मनुः॥ (यथा मार्कण्डेये १४। ८९।

'कालसूत्रे तथाच्छेदमनेकाब्देव यातना।
प्राप्य निष्कृतिमेतस्मात् न वेद्मि कथमेष्यति' ॥)

कालसेय, क्ली, (कलश्यां भवम्। कलशी+ढक।) घोलम्। इत्यमरः। २। ९। ५३॥

कालस्कन्ध पुं (कालः कृष्णः स्कन्धो यस्य।) तमाल वृक्षः। तिन्दुकवृक्षः। जीवकद्रुमः। इति मेदिनी॥ दुष्खदिरः। उदुम्बरः। इति राजनिर्घण्टः॥ (अस्य व्यवहारो यथा,—सुश्रुते सूत्रस्थाने। ३८ अध्याये सालसारादिवर्गे॥

"सालसाराजकर्णखदिरकदरकालस्कन्धक्रमुकभूर्ज मेषशृङ्ग्यादिय ॥)

काला, स्त्री, (कालो वर्णोऽस्त्यस्य अर्श आदित्वात् अच् टाप् च। अत्र वर्णस्यानिवक्षाया नानपदेति न ङीप्। अत्र अजाद्यन्तात् न ङीप् इत्यपि।) नीलिनी। कृष्णत्रिवृता। कृष्णजीरक। इत्यमरः। २। ४। ९४॥ मञ्जिष्ठा इति मेदिनी॥ कुल्क वृक्षः। कालियाकडा इति भाषा। इति रत्नमाला॥ अश्वगन्धावृक्षः। इति राजनिर्घण्टः॥ पाटलावृक्षः। इति भावप्रकाशः॥ (दक्षकन्या विशेषः। सा तु कश्यपपत्नी। यथा महाभारते १। सम्भवपर्व्वणि ६५। १२।

"अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा" ॥)

कालागुरु क्ली, (कालं कृष्णं अगुरु।) कृष्णागुरु। इत्यमरः। २। ६। १२०॥ (यथा रघुः ४। ८१।

'चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः' ॥
कृष्णागुरुशब्देऽस्य पर्य्याय गुणादयो ज्ञेयाः ॥)

कालाग्नि, पु (कालः सर्व्वसंहारकः अग्निः। प्रल याग्निः। यथा महाभारते १। ५४। २५।

"ब्रह्मदण्डं महाघोरं कालाग्निसमतेजसम्।
नाशयिष्यामि माऽत्र त्वं भयं कार्षीः कथञ्चन"॥
सर्द्धियाष्टरुद्रदेवस्य प्रियत्वात् पञ्चमुखरुद्राक्षोऽपि कालाग्निनाम्नाख्यायते।) पञ्चमुखरुद्राक्षः। यथा स्कान्दे।

'पञ्चवक्त्रः स्वयं रुद्रः कालाग्निर्नाम नामतः।
अगम्यागमनाच्चैव अभक्ष्यस्य च भक्षणात्।
मुच्यते सर्व्वपापेभ्यः पञ्चवक्त्रस्य धारणात्' ॥
इति तिथ्यादितत्त्वम्॥

कालाग्निरुद्र, पुं, (कालः संहारकः अग्निः सम्वर्त्ताग्निरित्यर्थः। तस्याधिष्ठाता रुद्रः। कालाग्नि रिव रुद्रो वा।) संहारकारिरुद्रः। यथा। कालाग्निरुद्र ऋषिरित्यादि वैदिकसन्ध्यायां रुद्रो पस्थानम्॥ *॥ तद्विवरणं यथा —

शक्र उवाच।
"भगवंस्तव वाक्यानां न तृप्तिर्भवते मम।
कालाग्निराधिव मान श्रोतुमिच्छामि तत्त्वतः"॥
भगवानुवाच।
"न हि पार्थिवद्वीपेषु मेरुपृष्ठेऽपि वासव!।
भोगाकारकरा भूया तथा पाताळवासिषु॥
येषु न कालरुद्रस्य नागाज्जोघसघकुला।
विचित्रहर्म्यविन्यासा कुतस्ते मेरुपृष्ठतः॥
सा एव कालरुद्रस्य तनुरूपेण संस्थिता।
सा पराशिवभावेन परमापददायिका॥
तस्या दक्षुमह तेजो ब्रह्माग्नेर्यो दयं वरम्।
तं विद्धि कालरुद्रेति लोकस्य सदाशिवम्॥
कालाग्निश्चतत्र लक्ष योजनानां प्रमाणतः।
अर्द्धेनोच्छ्रयतस्तस्य पादाः पादेन वासव!॥
सिंहरूपा महाघोरा महात्मका महाबला।
कालाग्निरुद्ररूपी यो वज्ररूपसमावृतः॥
अनन्तपद्मरूपञ्च धातारं कारणेश्वरम्।
दावश्चाग्निं यदव समदन्ता समासकः॥
लोहितं सुतेजाख्या सनो वृद्धिवाहकः।
विद्युतश्चलशोभश्च प्रसन्न शान्तसौम्यकः॥
सर्व्वज्ञो विविधो बुद्धो द्युतिमान् दीप्तिसुप्रभः।
एते रुद्रा महात्मानः कालिकाग्निसुरेश्वराः॥
संहरन्ति समस्तेदं ब्रह्माण्डं सचराचरम्।
कालाग्निभुवनेशोऽयं रुद्रकोटिभिरावृतः॥
तस्याः पुरस्य विस्तारः शतकोटिसुवर्त्तुला।
देवगन्धर्व्वसिद्धानां तत्र भोगाः सुदुर्लभाः॥
पूर्व्वोत्तरपरा पश्चिमोत्तरस्थिता परा।
अनलानिलपरा च नैरृतीशानगापरा॥
एतेषां मध्यतो राजन् कालरुद्रस्तु शोभते।
पद्माकारे पुरे सर्व्वं कटकं तस्य संस्थितम्॥
समन्ताद्वेष्टितं प्राकाराट्टालगोपुरैः।
वज्रेन्द्रनीलवैदूर्य्यैः प्राकारैः सर्व्वतोऽन्वितम्॥
कालाग्निनरकान्ते तु पुरं कालस्य संस्थितम्।
पञ्चाशल्लक्षविस्तारं समन्तात् परिवर्त्तुलम्॥
जाम्बूनदमयैर्हैमैः खचितं रत्नधातुभिः।
प्रमदाजनसङ्कुष्टं नानावाद्यसमाकुलम्॥
कामोन्मत्तप्रमत्तञ्च सङ्गातिं जनसङ्कुलम्।
कालस्य भुवनं दिव्यं वृत्ताकारं मनोहरम्॥
वेष्टितं हेमप्राकारैर्योजनायुतमुच्छ्रितम्।
प्राकारावच्छिद्रव्याप्तं अन्तरं योजनावृतम्॥
अग्निज्वालैश्च विविधैर्भयदैः किंशुकप्रभैः।
हरितालनिभा ज्वाला सिन्दूरगैरिकाप्रभा॥
अत ऊर्द्ध्वं प्रजन्याग्नं वातोद्धूताग्निभास्वरा।
वीचितरङ्गकल्लोलज्वालामालाकुलाम्बरा॥
मरुताक्ता प्रमाणेन योजनद्वयकोटयः।
अष्टाविंशतिलक्षाणि ज्वाला ऊर्द्ध्वन्तु शिखा॥
वज्रभूता तस्य तत्र तस्य तेजोनियामिका।
चत्वारि कोटिमानेन कारणेन तु स्थापिता॥
तस्यार्द्धेन भवेत् किञ्चित कोट्यश्चत्वारि वासव!।
एवं कालाग्निरुद्रस्य माहात्म्यं कीर्त्तितं मया॥
श्रवणात् सर्व्वपापानि शाम्यन्ति कालजान्यपि' ॥
इत्याद्ये देवीपुराणे कालाग्निरुद्रपुरकथनम्॥

(कृष्णयजुर्व्वेदगतोपनिषद्विशेषः। यथा, मुक्ति कोपनिषदि।

"कालाग्निरुद्रमैत्रेयी सुबालक्षुरिमन्त्रिका"॥
वटिकौषधविशेषः। यथा,—
"मृतकान्ताभ्रलौहानां भस्ममाक्षिकगन्धकम्।
भूधरास्ये पुटे पक्वाहिनैक तद्विपाचयेत्।
दशमांशं विषं योज्य माषमात्रञ्च भक्षयेत्।
एष कालाग्निरुद्रोऽयं रसाह्वेन विनिर्मितम्' ॥
कालाग्निरुद्रोरसः॥
इति रसेन्द्रसारसंग्रहे श्लीपदाधिकारे ॥*॥)

कालाञ्जनी, स्त्री, (अज्यतेऽनया। अनूज+करणे ल्युट्+ङीप्। काली अञ्जनी तत् पुंवद्भावः।) क्षुपविशेषः। कालिकासिकिनी इति भाषा। तत्पर्य्यायः। अञ्जनी २ रेचनी ३ शिलाञ्जनी ४ नीलाञ्जनी ५ कृष्णाभा ६ काली ७ कृष्णाञ्जनी ८। अस्या गुणाः। कटुत्वम्। उष्णत्वम्। अमलत्वम्। कृमिरोधनत्वम्। कफानाहत्वम्। वातरक्त सदान्वितत्वम्। इति राजनिर्घण्टः॥

कालानुसारी, [न्] पुं (कालं कृष्णवर्णं अनुसरति

ध्वनि । स ध्वनुनदतीति । अनु + नद् + णिनि ।) कोकिलः । भ्रमरः । कलविङ्कः । चटा इति भाषा । कपिञ्जलः । चातकपक्षी । इति मेदिनी ॥

कालानुसारिवा, स्त्री, (कालेन कृष्णवर्णेन अनुसृता सारिवा ।) तगरपादिकम् । तगरमूल इति भाषा । शीतलीजटा । इति रत्नमाला । शीउली-झाप इति भाषा ॥ (तगरशब्देऽस्या गुणादयो बोध्याः ॥)

कालानुसारक, क्ली, (काल कृष्णवर्णं मृगमदं अनुसरति गन्धेन । अनु + सृ + ण्वुल् ।) तगरम् । इति राजनिर्घण्टः ॥ पीतचन्दनम् । इति भावप्रकाशः ॥

कालानुसारि पुं (काल कृष्णवर्णं मृगमदं अनुसरतीति । काल + अनु + सृ + इञ् ।) शैलेयम् । शैलजनामगन्धद्रव्यम् । इति शब्दरत्नावली ॥

कालानुसार्य्य, क्ली, (कालेन मृगमदेनानुस्रियते । अनु + सृ गतौ + "ऋहलोर्ण्यत्" ।३।१।१२४ । इति ण्यत् ।) शैलेयम् । शैलज इति भाषा । कालीयकम् । कालीयाख्यपीतवर्णसुगन्धिकाष्ठम् । इत्यमरः । २ । ४ । १२७ ॥ शिंशपावृक्षः । इति मेदिनी । शिशु इति भाषा ॥ तगरम् । इति भावप्रकाशः ॥

कालानुसार्य्यक क्ली, (कालानुसार्य्य + कप् ।) शैलेयम् । इति राजनिर्घण्टः ॥

कालान्तरविषः, पुं, (कालान्तरे दंशनादन्यस्मिन् काले विषं विकृतिकारि यस्य ।) मूषिकादि । इति हेमचन्द्रः ॥

कालापः, पुं, (कालः मृत्युराप्यते यस्मात् । काल + आप् + अपादाने घञ् ।) सर्पभोगः । राक्षसः । इति धरणी । (कलाप समाम्नायात व्याकरणं वेत्तीति । अण् ।) कलापव्याकरणवेत्तरि त्रि । (ऋषिविशेषः । यथा महाभारते । २ । ४ । १० ।
"कुक्कुरो वेणुजङ्घोऽथ कालापः कठ एव च ।
मुनयो धर्म्मविद्वांसो धृतात्मानो जितेन्द्रियाः" ॥)

कालायस, क्ली, (कालञ्च तत् अयश्चेति । "अनो ऽश्मायः सरसां जातिसंज्ञयोः" । ५ । ४ । ९४ । इति टच् ।) लौहम् । इत्यमरः । २ । ९ । ९८ । (यथा, रामायणे । ५ । ४९ । ३२ ।
"इदञ्च शैलमासाद्य परिघं तोरणाश्रयम् ।
समादाय महाबाहुः कालायसमयं दृढम्" ॥
अस्य पर्य्याया यथा,—
"लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी" ।
अस्य स्वदोषा यथा,—
'गुरुता दृढताक्लेदः कश्मलं दाहकारिता ।
अश्मदोषः सुदुर्गन्धो दोषाः सप्तायसस्य तु' ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

कालिक,क्ली, (कालः कृष्णा वर्णोऽस्त्यस्य इति ठन् ।) कृष्णचन्दनम् । तत्पर्य्यायः । कालीयम् २ कालानुकम् ३ हरिप्रियम् ४ । इति शब्दचन्द्रिका ॥ (काले भवम् ठञ् । कालेन निवृत्तं ठञ् वा ।) कालभवे त्रि । (यथा, मायापरिच्छेदे १७२ ।
"दैहिकं कालिकञ्चापि मूल एव तु दैहिकम्" ॥)

कालिकः, पुं, (काले वर्षाकाले चरति ठञ् । के जले अनति प्राणिति । अन् + बाहुलकात् इकन् वा ।) क्रौञ्चः । इति शब्दरत्नावली ॥

कालिका, स्त्री, (कालो वर्णोऽस्त्यस्याः इति ठन् इति ठन् । यद्वा, काल + आनपदात् ङीष् स्वार्थे कन् ह्रस्वः । चण्डिकाभेदः । काली । तन्नामकारणं यथा,
"सर्व्वे सुरगणा देवेन्द्राद्या गत्वा हिमाचलम् ।
गङ्गावतारनिकटे महामायां तुष्टुवुः ॥
अनेकसम्भुता देवी तदा सब्बामरोत्तरैः ।
मातङ्गवनिकामूर्त्तिर्भूत्वा देवानपृच्छत ॥
युष्माभिरमरैरत्र स्तूयते का च भाविनी ।
किमर्थमागता यूयं मातङ्ग्याश्रम प्रति ।
एवं ब्रुवन्त्या मातङ्ग्याः कायकोषतः ।
समुद्भवाभवद्देवी मां स्तुवन्ति सुरा इति ॥
शुम्भो निशुम्भो ह्यसुरौ बाधेते सकलान् सुरान् ।
तस्मात्तयोर्व्वधायाद्य स्तूयेऽहं सकलैः सुरैः ॥
विनिःसृतायां देव्यान्तु मातङ्ग्याः कायतस्तदा ।
भिन्नाञ्जनसमा कृष्णा साभूत् गौरी क्षणादपि ॥
कालिकाख्याऽभवत्सापि हिमाचलकृताश्रया ।
तामुग्रतारां ऋषयो वदन्तीह मनीषिणः ।
उग्रादपि भयात्त्राति यस्माद्भक्तान् सदाम्बिका ॥
एतस्याः प्रथमं बीजं कथितं मन्त्रमेव च ।
एषैवैकजटा ख्याता यस्मात्तस्या जटैकिका ।
अङ्गुतं चिन्तनं चास्याः सम्प्रवेतास्य भैरवौ ॥
यथा ध्याता महादेवी भक्त प्राप्नोत्यभीप्सितम् ।
चतुर्भुजां कृष्णवर्णां मुण्डमालाविभूषिताम् ॥
खड्गं दक्षिणपाणिभ्यां बिभ्रतीन्दीवरं तथा ।
कर्त्तृञ्च खर्परञ्चैव क्रमाद्वामेन बिभ्रतीम् ॥
द्यां लिखन्तीं जटामेकां बिभ्रतीं शिरसा स्वयम् ।
मुण्डमालाधरां शीर्षे ग्रीवायामपि सर्व्वदा ॥
वक्षसा नागहारन्तु बिभ्रतीं रक्तलोचनाम् ।
कृष्णवस्त्रधरां कट्यां व्याघ्राजिनसमन्विताम् ॥
वामपादं शवहृदि संस्थाप्य दक्षिणं पदम् ।
विन्यस्य सिंहपृष्ठे तु लेलिहानासवं स्वयम् ॥
साट्टहासमहाघोररावयुक्तातिभीषणाम् ।
चिन्तयेदुग्रतारां सततं भक्तिमद्भिः सुरैर्भृशम् ॥
एतस्याः सम्प्रवक्ष्यामि या अष्टौ योगिनीस्तु ताः ।
महाकाली च रुद्राणी उग्रा भीमा तथैव च ॥
घोरा च भ्रामरी चैव महारात्रिश्च सप्तमी ।
भैरवी चाष्टमी प्रोक्ता योगिन्येताः प्रपूजयेत्" ॥
इति कालिकापुराणे उत्तरतन्त्रे ६० अध्यायः ।
कामाख्या । दक्षिणपवनः । कलदेवकतूलम् ।
धूमरी । नवमेघः । घटोलप्रबाला । रोमाली ।
मसी । काकी । शिवा । मेघावलिः । इति मेदिनी । (यथा रघु ११ । १५ ।
"ताडका चलकपालकुण्डला
कालिकेव निबिडा बलाकिनी" ॥)
क्षमदेषः । इति जटाधरः । क्षीरकीटः । इति शारावली । मषी । इति शब्दरत्नावली । काकोली । ग्रामपक्षी । इति राजनिर्घण्टः । प्रति मासोदा बुद्धिः । यथा —
"प्रतिमासं वर्द्धते या वृद्धिः सा कालिका मता" ।
इति निवादार्थपरीक्षा नारदः । तथा । इति हेमचन्द्रः । कुञ्झटिका । रायमुकुटीकायां भरत
हिमाचलभवा शिशिरा रूढीवकः । चा
योगरूढ्यो प्रमाणा । इति राजवल्लभः । (नदी विशेषः । यथा महाभारते ३ । ८४ । १५९ ।
"कालिकासङ्गमे स्नात्वा कौशिक्यारुणयोर्य्यतः ।
त्रिरात्रोपषितो विद्वान् सर्व्वपापैः प्रमुच्यते" ॥)

कालिकाव्रत, क्ली, (कालिकायाः प्रीतये यद्व्रतं विहितनियमादिकम् ।) अमावास्यायां स्त्रीकर्त्तव्य व्रतविशेषः । यथा,—

युधिष्ठिर उवाच ।
"कालिकाव्रतमाहात्म्यं वद वेदविदाम्बर ! ।
किमेतस्य फलं देव ! को वा तद्विधिरेव च ॥
कस्माद्व्रतमिदं भूमौ मर्त्त्ये केन प्रकाशितम् ।
तत्सर्व्वं श्रोतुमिच्छामि तत्त्वं ब्रूहि केशव ! " ॥

श्रीकृष्ण उवाच ।
"पुरा भविष्यमाख्येषु यदुक्तं धर्म्मसंहितम् ।
तत्सर्व्वं शृणु राजेन्द्र ! कालिकाव्रतमुत्तमम् ॥
स्वर्गे पुरन्दरस्यासीत्तस्यैव राजसद्मनि ।
यद्वृत्तान्तमभूत्तत्र तच्छृणुष्व युधिष्ठिर ! ॥
सभायां संस्थितो राजा न्यायाध्यक्षो हि नित्यशः ।
दिनैकस्य च कलावो श्रुत्वा हृष्टो बभूव सः ॥
अन्यामोद समन्वेत पुष्पवाटिरसुतदा ।
पुरन्दरः स्वयं प्राप्य पारिजातं गृहीतवान् ॥
प्रातः राज्ञा सदा पुष्पं प्रदत्तं तद्दिनात्यये ।
लक्षितो ब्राह्मणः सोऽपि मालग्रीवोऽभवत्तदा ॥
क्रोधेन महताविष्टः शप्तुं कामसमन्वितः ।
स्वयं विमृश्य चेन्द्राय प्राप्तो दत्तः सुदारुणः ॥
त्वमागमेषु मार्ज्जारो दारुणाद्यं भविष्यसि ।
तेन कर्म्मविपाकेन सहसा सो विधेयकः ॥
प्राप्तमार्ज्जारदेहोऽसौ राजा विपिनमाश्रितः ।
पत्नी तस्य च तत्रासीत् पत्युर्मार्ज्जारिकाकृतिः ॥
ततो व्याधरूपे राज्ञा मार्ज्जारीभूय तिष्ठति ।
तत पुरन्दरपुरं राजशून्यमभूत्तदा ॥
शची तु चिन्तयामास कश्यपान्तं विहाय सा ।
उपवासं समारभ्य मासमेकन्तु तिष्ठति ॥
ततो देवगणाः सर्व्वे चिन्तया व्याकुलेन्द्रियाः ।
दृष्ट्वा तु राजरामं व्याकुलां तां विलोक्य च ॥
विमृश्य चामराः सर्व्वे शचीं वाक्यमुदाहरन् ।
शचि ! त्वं राजभार्य्यापि कथमेतत् करोषि च ॥
मासमेकमनाहारा कृत्वा तिष्ठसि शङ्कते ! ।
किं वा त्वदीप्सितं देवि ! सत्येन वद मन्दिरे ॥
तच्छ्रुत्वा तु तदा शची कृताञ्जलिरभाषत ।
यूयमेव ममाशायाः कर्त्तव्यस्य न कारकाः ॥
अन्तो मम भर्त्ता च तत्र जानामि कथनाम् ।
परिचिन्त्यामराः सर्व्वे ध्यानमास्थाय संस्थिताः ॥
मार्ज्जारत्वं गतस्यास्य शीघ्रं भावयमानते ।
कथयन्ति जगुर्यां च वेपमाना मुहुर्मुहुः ॥
उवाच कृतयं प्राप्य नाथार्थं किं करोम्यहम् ।
एतद्यथा निमोक्षः स्यात् तत्कुरुष्व सुराङ्गनाः ॥
तच्छ्रुत्वामराः सर्व्वे यान्ति त्वं हिमवत्प्रियम् ।
समाख्य मधुरं प्रश्नं हिमशैलं समाचर ।
हिमगिरिं समासाद्य हिमशैलाद्यकाभवत् ॥

स तया प्रियकार्य्येण सन्तुष्टो द्विजसत्तमः ।
हिंसाद्रोहविमुक्तश्च नित्यहोमपरायणः ।
शान्तो दान्तः क्षमायुक्तः सदा मधुरभाषितः ॥
सर्व्वप्राणिहितार्थी च लोभमोहविवर्ज्जितः ।
जितेन्द्रियो जितक्रोधो वृद्धोऽसौ ब्राह्मणोत्तमः ।
राजपत्न्याः सुसेवाभिः प्रीतोऽसौ द्विजसत्तमः ।
प्रत्युवाच स तां प्रीत्या शचि ! त्वं चातिदुर्लभे ।
किं वा त्वदीप्सितं देवि ! सत्येन वद पण्डिते” ॥
शच्युवाच ।
“पापं यज्ज्ञानतो भर्त्रा समस्तं कर्म्मणा कृतम् ।
तत् क्षमस्व महाभाग ! रक्षस्व सुरपालकम् ।
वासवस्तव शापेन मार्ज्जारत्वमुपागतः ।
इन्द्रो व्याधमस्ते देव ! विद्यते हि न संशयः ।
पुरन्दरस्य शापान्तः केनोपायेन सिध्यति” ॥
ब्राह्मण उवाच ।
“शचि ! त्वं पतिभक्तासि मद्वाक्यमवधारय ।
पतिव्रते ! महाभागे ! कालिकाव्रतमाचर ॥
दारुणं यत् कृतं तेन व्रतेनैव विमुच्यते ।
कोपात् शापो मया दत्तो तन्मोक्षं कुरु सुव्रते ।'॥
शच्युवाच ।
“विधानं ब्रूहि मे ब्रह्मन् कालिकाया व्रतस्य च ।
तदा तव प्रसादेन करोमि तद्व्रतं द्विज !” ॥
ब्राह्मण उवाच ।
“अश्वत्थवटमूलेऽस्ति वटको नाम द्विजकः ।
तस्यैव भवनं गच्छ शापान्मोक्षं च कारय ॥
पत्नी सुभद्रा तस्यास्ति पतिशुश्रूषणे रता ।
तस्याः कुरुष्व कर्म्माणि तत्परा भव शोभने ।
ततश्च प्राञ्जलीभूय गता सा तस्य मन्दिरम् ॥
दृष्ट्वा चाथ शचीं देवीं प्रत्युवाच सुभद्रिकाम् ।
आयान्तीयं शची देवी तस्याः सम्भाषणं कुरु ॥
इति तस्य वचः श्रुत्वा सुभद्रा हृष्टमानसा ।
तस्याः सम्भाषणायन्तु सुभद्रा चागता बहिः ।
तां च दृष्ट्वा शचीं देवीं सार्घ्यपाद्यादिकं ददौ ॥
शचि ! त्वं राजभार्य्यासि कस्मादागमनं तव ।
किं कार्य्यं कथय त्वं हि इत्युवाच शचीं प्रति ॥
प्रत्युवाच शची तान्तु भर्त्ता मे सुरपालकः ।
स च ब्राह्मणशापेन मार्ज्जारश्चाभवद्द्रुतम् ॥
क्व गतः पाकशासनोऽद्यापीति चिन्तयाम्यनिशम् ।
ज्ञात्वा केनाप्युपायेन प्राप्ता च भवतीमहम् ॥
इत्युक्ता राजपत्न्या च वृद्धो मार्ज्जारकस्तदा ।
सा ज्ञात्वा न प्रियं शक्रं चिन्तां प्राप्ता दुरत्ययाम् ॥
दृष्ट्वा मार्ज्जारतां प्राप्तं विललापाकुलेन्द्रिया ।
विलपन्तीं शचीं दृष्ट्वा सुभद्रा प्रत्युवाच ताम् ।
पतिव्रते महाभागे ! त्वमेव राजगेहिनी ।
त्वं दुःखेन विलिमासि सन्देहो नास्ति तत्र वै ॥
किञ्च तस्याप्युपायोऽस्ति कालिकाव्रतमाचर ।
अतिप्रत्यक्षरूपा सा अस्माकं कुलदेवता ॥
कालिका सा महादेवी सुप्रसन्नातिदायिनी ।
व्रतस्यास्य प्रभावेन साफल्यमुपजायते ' ॥
शच्युवाच ।
“विधानं चास्य मे ब्रूहि कालिकाया व्रतस्य च ।
ममोपदिष्टमात्रेव तद्व्रतं करोम्यहम् ॥

शुक्लकाले समारभ्य कृष्णपक्षे चतुर्द्दशीम् ।
सङ्कल्प्य विधिना पूर्व्वममावास्यां व्रतं चरेत् ।
समारभ्य शुचैकेन द्विगुणं परिशोधयेत् ॥
न रात्रौ भोजनं कार्य्यं वामहस्ते भुजिक्रिया ।
सिद्धमन्नं रात्रिकाले दग्धमीनञ्च सर्व्वदा ॥
वर्ज्जयेत् पिष्टकं किञ्चित् रक्तशाकञ्च चाम्लकम् ।
द्विपटका विप्रजायाश्च सधवा भोजयेत्ततः ॥
एवं क्रमेण कृत्वा तु कतिकालं नयेद्व्रतम् ।
ततः शुद्धदिने प्राप्ते भौमाहे मन्दवासरे ॥
यथाशक्त्युपचारैश्च पूजां कुर्य्याद्विधानतः ।
तथापराह्णकाले तु सन्ध्योपसमये तथा ॥
रात्रौ तु कदलीकाण्डैर्मण्डपं निर्म्माय प्राङ्गणे ।
तस्य मध्ये समारोप्य कालिकां पूजयेत् सदा ॥
पाद्यार्घ्याचमनीयैश्च गन्धपुष्पादिभिस्तथा ।
धूपैर्दिव्यप्रदीपैश्च नैवेद्यैर्विविधैस्तथा ॥
पिष्टकं चैव सिद्धान्नं व्यञ्जनं दग्धमीनकम् ।
निवेद्य सकलं देव्यै बलिं दत्त्वा प्रणम्य च ॥
तदन्नं व्यञ्जनं सर्व्वं नैवेद्यादिकमन्नि तथा ।
महारण्ये प्रदातव्यं कृत्वैतत् व्रतमुत्तमम् ॥
वैधवे कदलीमूले या कुर्य्यात् कालिकाव्रतम् ।
कार्य्यसिद्धिर्भवेत् तस्याः भविता गतिरुत्तमा ॥
एतद्व्रतविधानन्तु कृत्वा सिद्धिर्भविष्यति ।
एतद्व्रतमिदं भद्रे कुरु गत्वा निजालयम् ॥
तस्यास्तद्वचनं श्रुत्वा सा शची हर्षमानसा ।
स्वगृहमागत्य सा तस्या वाचिकं व्रतमाचरत् ॥
गन्धपुष्पैर्धूपदीपैर्नैवेद्यैरुत्तमैस्तथा ।
कृत्वा चाम्रमयीं देवीं पूजयेत् भक्तिसंयुता ॥
नानासुगन्धिपुष्पाद्यैः दिव्यरत्नाद्यलङ्कृताम् ।
सिद्धान्नं पायसञ्चैव प्रकारान्वितपिष्टकम् ॥
अम्लतायुतहावश्च दीयते च प्रयत्नतः ।
तुलापञ्चाशमेषादिकमपि दत्त्वा प्रभूतकम् ॥
नानावाद्योद्यमैर्गीतैः प्रणिपत्य पुनः पुनः ।
कृताञ्जलिपुटा स्तोत्रं भक्तिनम्रा चकार सा ॥
तुष्टा प्राह महाकाली वरं वृणु शुभानने ! ।
तत् श्रुत्वा राजपत्नी सा वमाये च मुदान्विता ।
मत्प्रभुराखुभुक् भूतस्तन्मोक्षं कुरु चेश्वरि ! ।
वरं दत्त्वा हैमवती बभूवान्तर्हिता तदा ' ।
द्वादशाब्दाच्च तत्शापान्मोचितो वत्सरे तदा ।
मार्ज्जारत्वं सन्त्यज्य स गतोऽप्यमरावतीम् ।
पुष्पवृष्टिश्च दुन्दुभ्या नादो देवगणैः कृतम् ।
कालिकायाः प्रसादेन गतः शक्रो निजालयम् ॥
अनेनैव विधानेन या कुर्य्यात् कालिकाव्रतम् ।
सत्वरं कार्य्यसिद्धिः स्यात्तस्याः अत्र न संशयः ' ॥
इति भविष्यपुराणे कालिकाव्रतकथा समाप्ता ।

कालिङ्गं, क्ली, (केन जलेन आलिङ्ग्यतेऽसौ । क+आ+लिगि+कर्म्मणि घञ् ।) फलविशेषः । तरमुज् इति ख्यातम् । तत्पर्य्यायः । कालिन्दकम् २ कृष्णबीजम् ३ कर्व्वुरपुष्पम् ४ । अस्य गुणाः । शीतलत्वम् । ग्राहित्वम् । स्वादुपाकरसत्वम् । गुरुत्वम् । विष्टम्भित्वम् । स्निग्धत्वम् । दृक्शुक्रपित्तनाशित्वम् । कफवातकारित्वम् । पक्वस्य तस्य गुणाः । पित्तवृद्धिकारित्वम् । उष्णत्वम् । क्षारत्वम् । कफवातनाशित्वञ्च । तत्पत्रगुणौ । बधिरत्वापनत्वम् । तिक्तत्वञ्च । इति पथ्यापथ्यविवेकः ॥

कालिङ्गः, पुं, (केन जलेनालिङ्ग्यते इति । क+आ+लिगि+कर्म्मणि घञ् ।) भूमिकर्क्कारुः । (कं जलमालिङ्गति । आ+लिगि+कर्म्मण्यण् ।) हस्ती । (कं वातं आलिङ्गति गृह्णाति अश्नाति इत्यर्थः ।) सर्पः । इति मेदिनी ॥ (कुत्सितं लिङ्गं अङ्गादि चिह्नं यस्येति कौ कादेशः ।) कौटभेरः । अस्य लक्षणम् । “कालिङ्गो लिङ्गवान् यः स्यान्न सूत्राङ्को मतः” । इति सुखबोधः ॥ (कलिङ्गे भवः । अण् । कलिङ्गदेशोद्भवः । यथा महाभारते ८ । कर्णशल्यसंवादे ४५ । १४ ।
“कुरवः सहपाञ्चालाः शाल्वा मत्स्याः सनैमिषाः ।
कोसलाः काशयोऽङ्गाश्च कालिङ्गा मागधास्तथा' ॥
कलिङ्गदेशस्य राजा । अण् । कलिङ्गराजः ।
यथा रघुः ४ । ४० ।
“प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्व्वतः” ॥)

कालिङ्गिका, स्त्री, (कालिङ्ग+गौरादित्वात् ङीष् । स्वार्थे संज्ञायां वा कन् टाप् ह्रस्वश्च ।) त्रिवृत् । इति राजनिर्घण्टः ॥

कालिङ्गी, स्त्री, (कालिङ्ग+गौरादित्वात् ङीष् ।) राजकर्कटी । इति मेदिनी ॥ (कालिङ्गदेशोद्भवा । यथा महाभारते १ । ९५ । २२ ।
“अक्रोधनस्तु कालिङ्गीं करम्भां नामोपयेमे” ॥)

कालिदासः, पुं, (काल्याः दासः । संज्ञायां ह्रस्वः ।) स्वनामख्यातकविः । तत्पर्य्यायः । रघुकारः २ मेधारुद्रः ३ कोटिजित् ४ । इति त्रिकाण्डशेषः ॥ स तु रघुकुमारसम्भवश्रुतबोधमेघदूताभिज्ञानशकुन्तलनलोदयशृङ्गारतिलकादिग्रन्थकर्त्ता विक्रमादित्यराजसभास्थनवरत्नमध्ये सप्तमरत्नश्च ॥ (यदुक्तम् ।
“धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य” ॥)

कालिदासकः, पुं, (कालिदास+स्वार्थे कन् ।) कालिदासः । इति शब्दरत्नावली ॥

कालिनी, स्त्री, (कालः शिवः अधिष्ठातृतया । यद्वा कालः पुरुषाकारः आकाशस्थो पुरुषः अधिष्ठातृत्वेन अस्त्यस्याः ।) आर्द्रानक्षत्रम् । इति हेमचन्द्रः ॥

कालिन्दकं, क्ली, (कालिं जलराशिं ददातीति । दा+कः । स्वार्थे कन् ।) कालिङ्गम् । इति राजनिर्घण्टः ॥

कालिन्दी, स्त्री, (कलिन्दात् पर्व्वतात् तत्प्रसिद्धदेशे वा जाता । कलिन्दात् निर्गता वा ' तत्र भव ' । ४ । ३ । ५३ । इति अण् ततो ङीप् ।) यमुना नदी । इत्यमरः । १ । १० । ३२ ॥ (यथा रघु १५ । २८ ।
“उपकूलं स कालिन्द्याः पुरीं पौरुषभूषणः ।
निर्म्मे निर्म्ममोऽर्थेषु मथुरां मधुराकृतिः” ॥)
रक्ततिवृत् । इति राजनिर्घण्टः ॥

कालिन्दीकर्षणः, पुं, (कालिन्दीं कर्षति यः । कृष+कर्त्तरि ल्युः । कालिन्द्याः कर्षको वा ।) बलदेवः । इति हलायुधः ॥

(कालिन्दीभङ्गवंशकथा हरिवंशे १०२ अध्याये उक्ता। तद्यथा —
"रामस्तु यमुनामाह यातुमिच्छे महानदि ।
एहि मामभिगच्छस्व रूपिणी सागरङ्गमे ॥
सङ्कर्षणस्य मत्तस्य भारतीं परिभूय सा ।
नाभ्यवर्त्तत तं देशं स्त्रीस्वभावेन मोहिता ॥
ततश्चुक्रोध बलवान् रामो मदसमीरितः ।
चकार स हलं हस्ते कर्षणाधोमुखं बली ॥
तस्यामुपरि मेदिन्याः पेतुस्तामरसस्रजः ।
मुमुचुः पुष्पकोशैश्च पुष्परेणुस्रजं जलम् ॥
स हलेनानताग्रेण कूले गृह्य महानदीम् ।
चकर्ष यमुनां रामो व्युत्थितां वनितामिव ॥
सा विह्वलजलस्रोता ह्रदप्रस्थितसञ्चया ।
व्यावर्त्तत नदी भीता हलमार्गानुसारिणी ॥
लाङ्गलादिष्टमार्गा सा वेगगा वक्रगामिनी ।
सङ्कर्षणभयत्रस्ता योषेवाकुलतां गता ॥
पुलिनश्रोणिबिम्बोष्ठी मर्दितैस्तोयताडितैः ।
फेनमेखलसूत्रैश्च वेगगाम्बुगामिनी ॥
तरङ्गविषमापीडा चक्रवाकोन्नतस्तनी ।
वेगगम्भीरवक्राङ्गी त्रस्तमीनविभूषणा ॥
सितहंसेक्षणापाङ्गी काशक्षौमोच्छ्रितांशुका ।
तीरजोद्धूतकेशान्ता जलस्खलितगामिनी ॥
लाङ्गलोल्लिखितापाङ्गी क्षुभिता सागरङ्गमा ।
मत्तेव कुटिला नारी राजमार्गेण गच्छती ॥
कृष्यते सा स्म वेगेन स्रोतस्स्खलितगामिनी ।
उन्मार्गा नीतमार्गा सा येन वृन्दावनं वनम् ॥
वृन्दावनस्य मध्येन सा नीता यमुना नदी ।
कीर्त्यमानेव विहगैरन्विता तीरवासिभिः ॥
सा यदा समभिक्रान्ता नदी वृन्दावनं वनम् ।
तदा स्त्रीरूपिणी भूत्वा यमुना राममब्रवीत् ॥
प्रसीद नाथ ! भीतास्मि प्रतिलोमेन कर्म्मणा ।
विपरीतमिदं रूपं तोयञ्च मम जायते ॥
असत्यास्मि नदीमध्ये रौहिणेय ! त्वया कृता ।
कर्षणेन महाबाहो स्वमार्गव्यभिचारिणी ॥
प्राप्तां मां सागरे गत्वा सपत्न्यो वेगगर्व्विताः ।
फेनहासैर्हसिष्यन्ति तोयव्याहतगामिनीम् ॥
प्रसादं कुरु मे वीर ! याचे त्वां कृष्णपूर्वज ! ।
सुप्रसन्नमना नित्यं भव त्वं सुरसत्तम ! ॥
कर्षणायुधकृष्टास्मि रोषोऽद्य विनिवर्त्यताम् ।
गच्छामि चरणौ मूर्ध्ना गत्वैषा लाङ्गलायुध ! ॥
मार्गमादिष्टमिच्छामि क्व गच्छामि महाभुज !"॥)

कालिन्दीभेदनः, पुं, (कालिन्दीं भिनत्ति। भिद् + कर्त्तरि ल्युः। कालिन्द्या भेदनो वा।) बलदेवः। इत्यमरः ।१।१।२४। ("कालिन्दीभेदनो हलाति प्रहारणम् ॥)

कालिन्दीसूः, स्त्री (सूते इति। सू + क्विप्। कालिन्द्याः यमुनायाः सूः माता सूर्य्यपत्नीत्वात्। कालिन्दीं सूते सुतवती वा।) सूर्य्यपत्नी। यमुनामाता। इति त्रिकाण्डशेषः ॥

कालिन्दीसोदरः, पुं, (कालिन्द्याः सोदरः सहोदरः।) यमः। इति हेमचन्द्रः॥

काली, स्त्री, (काल इत्यस्य वर्णोऽस्त्यस्याः। काल + "जानपदकुण्डगोणस्थलभाजनागकालेत्यादिना" । ४।१।४२। ङीष्।) क्षान्तसुराजपत्नी। इति त्रिकाण्डशेषः॥ (काल शिव। तस्य पत्नीति ङीष्।) कालिका। अम्बिकाललाटनिष्क्रान्ता देवी। यथा,
"ततः कोपं चकारोच्चैरम्बिका तानरीन् प्रति।
कोपेन चास्या वदनं मसीवर्णमभूत्तदा ॥
भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी" ॥
इति मार्कण्डेयपुराणे ८७।५।६। अन्यच्च।
"देव्या ललाटनिष्क्रान्ता या कालीति च विश्रुता।
तस्याः कल्पं प्रवक्ष्यामि कामदं शृणु भैरव ! ॥
समासनस्थिता देव प्रान्तपक्षात् पुरःसरः ।
पञ्चसप्ताभिबिन्दुभिर्लक्षिता मादिदेव च ॥
कालीतन्त्रमिति प्रोक्तं धर्म्मकामार्थदायकम् ।
एतन्मूर्त्तिं प्रवक्ष्यामि तन्मे कथयतः शृणु ॥
नीलोत्पलदलश्यामा चतुर्बाहुसमन्विता ।
खट्वाङ्गं चन्द्रहासञ्च बिभ्रती दक्षिणे करे ॥
वामे चर्म्म च पाशञ्च ऊर्द्ध्वाधो भावतः पुनः ।
दधती मुण्डमालाञ्च व्याघ्रचर्म्माम्बरावृता ॥
कृशाङ्गी दीर्घदंष्ट्रा च अतिदीर्घातिभीषणा ।
लोलजिह्वा निम्नरक्तनयना नादभैरवा ॥
कबन्धवाहना पीनविस्तारश्रवणानना ।
एषा ताराह्वया देवी चामुण्डेति च कथ्यते ॥
एतस्या योगिनीश्चाष्टौ पूजयेच्चिन्तयेदपि ।
त्रिपुरा भीषणा चण्डी कर्त्री हन्त्री विधायिनी ॥
कराला शूलिनी चेति अष्टौ ताः परिकीर्त्तिताः ।
ख्यातिकामस्य देवी आशुफलतिकरी सदा ॥
एतस्याः सदृशी काचित् कामदा न हि विद्यते" ॥
इति श्रीकालिकापुराणे उत्तरतन्त्रे ६ अध्यायः। क्षीरकीटः। मातृभेदः। उमा। नवमेघसमूहः। परीवादः। इति हेमचन्द्रः॥ काकामुगी। गुडी। त्रिवृत्। रात्रिः। इति राजनिर्घण्टः॥ अग्निजिह्वाभेदः। इति जटाधरः॥ (यथा, मुण्डकोपनिषदि १।२।४।
"काली कराली च मनोजवा च
सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुची च देवी
लेलायमाना इति सप्त जिह्वाः" ॥
वृश्चिकालीवृक्षः। इति रत्नमाला। (कालिया विछाटी इति भाषा॥) मसी। यथा वैद्यके।
"सप्तपत्रया काली गुडूची त्रिवृन्महङ्कम" ॥
भीमसेनस्य पत्नीभेदः। यथा, भागवते ९।२२।३१।
"युधिष्ठिरात् पौरवत्यां देवकोऽथ घटोत्कचः ।
भीमसेनाद्धिडिम्बायां, काल्यां सर्वगतस्ततः" ॥
नाटकाख्यानं चामुण्डाशब्दे द्रष्टव्यम्। कालिकायाः ध्यानं लिख्यते यथा—
"करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ।
कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम् ॥
सद्यश्छिन्नशिरःखड्गवामाधोर्द्ध्वकराम्बुजाम् ।
अभयं वरदञ्चैव दक्षिणोर्द्ध्वाधःपाणिकाम् ॥
महामेघप्रभां श्यामां तथा चैव दिगम्बरीम् ।
कण्ठावसक्तमुण्डालीगलद्रुधिरचर्च्चिताम् ॥
कर्णावतंसतानीतशवयुग्मभयानकाम् ।
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम् ॥
शवानां करसङ्घातैः कृतकाञ्चीं हसन्मुखीम् ।
सृक्कद्वयगलद्रक्तधाराविस्फुरिताननाम् ॥
घोररावां महारौद्रीं श्मशानालयवासिनीम् ।
बालार्कमण्डलाकारलोचनत्रितयान्विताम् ॥
दन्तुरां दक्षिणव्यापिमुक्तालम्बिकचोच्चयाम् ।
शवरूपमहादेवहृदयोपरिसंस्थिताम् ॥
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम् ।
महाकालेन च समं विपरीतरतातुराम् ॥
सुखप्रसन्नवदनां स्मेराननसरोरुहाम् ।
एवं सञ्चिन्तयेत् कालीं सर्व्वकामार्थसिद्धिदाम्" ॥
इति तन्त्रसारधृतकालीतन्त्रम् ॥
(कालशक्त्या सर्व्वमिदं जगत् परिचालयति सैव काली प्रकीर्त्तिता। यद्वा कालयति बलयति वा उत्पादयति पालयति प्रलये पुनराकर्षत्येव शिवा पत्नीति काली आद्या मूलप्रकृतिः महत्तत्त्वादिदेवतत्त्वनिलयादीनामाधारभूता। कलिषु वा गर्भेषु रितिं बालधातुं बन्धनबोधिनी कल्पत सद्वत् सकाशात् नानाविधनानाविधचिन्निर्माणात् समया कुक्षिरूपा महाशक्तिरेव प्रकृतिः कालीति कथया प्रकाश्यते। एतत् प्रबोधनाय समासतः कतिपयवचनान्यत्रोद्धृतानि यथायथं द्रष्टव्यानि। तथाहि शास्त्रसङ्कलितत्वे। भागवते च।
"सा माया पालिनीशक्तिः सृष्टिसंहारकारिणी ।
सा वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका ॥
माया नाम महाभाग ! ययेदं निर्म्ममे विभुः" ।
एषैव परमेश्वरी मूलशक्तिः सर्व्वाधिकारिणी गुणाधारा लोकस्थितये तन्त्रादिशास्त्रेषु कालीश्यामा तारादिविविधनामरूपैः कल्पिता ॥
यथा,—
"या देवी सर्व्वभूतेषु विष्णुमायेति शब्दिता" ।
चितिरूपेण या कृत्स्नमेतद्व्याप्य स्थिता जगदिति" ॥
इति मार्कण्डेयपुराणीयदेवीमाहात्म्ये देवकृत देव्याः स्तुतौ। ८५।१७,८४। तथा च महानिर्वाणे ४र्थ उल्लासे। देवीं प्रति शम्भोरुक्तिः।
"त्वं परा प्रकृतिः साक्षात् ब्रह्मणः परमात्मनः ।
महदाद्यणुभूतान्तं त्वया सृष्टमिदं जगत् ॥
निमित्तमात्रं तद्ब्रह्म सर्व्वकारणकारणम् ।
तस्येच्छामात्रमालम्ब्य त्वं महायोगिनी परा ॥
करोषि पासि हंस्यन्ते जगदेतच्चराचरम् ।
कलनात् सर्व्वभूतानां महाकालः प्रकीर्त्तितः ।
महाकालस्य कलनात् त्वमाद्या कालिका परा ॥
कालस्यादिभूतत्वादाद्या कालीति गीयते ॥
[illegible] द्विविधं [illegible] ।
[illegible] तव [illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible]' ॥
[illegible]

कल्पनादिकमिति जिज्ञासितवतीं पार्ब्बतीं प्रति भगवतः शिवस्योत्तरदानं तत्रैव १३ उल्लासे ।
"उपासकानां कार्य्याय पुरैव कथितं प्रिये ।
गुणक्रियानुसारेण रूपं देव्याः प्रकल्पितम् ॥
श्वेतपीतादिको वर्णो यथा कृष्णे विलीयते ।
प्रविशन्ति तथा काल्यां सर्व्वभूतानि शैलजे ॥
अतस्तस्याः कालशक्तेर्निर्गुणाया निराकृतेः ।
हिताया प्राप्तयोगानां वर्णः कृष्णो निरूपितः ॥
नित्यायाः कालरूपाया अव्ययायाः शिवात्मनः ।
अमृतत्वाल्ललाटेऽस्याः शशिचिह्नं निरूपितम् ॥
शशिसूर्य्याग्निभिर्नित्यैरखिलं कालिकं जगत् ।
सम्पश्यति यतस्तस्मात् कल्पितं नयनत्रयम्' ॥
तस्याः स्वरूपध्यानं यथा तत्रैव ५म उल्लासे ।
"मेघाङ्गीं शशिशेखरां त्रिनयनां रक्ताम्बरं बिभ्रतीं पाणिभ्यामभयं वरञ्च विलसद्रक्तारविन्दस्थिताम् ॥
मेघाङ्गीमिति वर्णनेनास्याः कृष्णवर्णत्वं सूचितं परं अरूपाया निराकृतेः कालशक्तेरेव श्यामा सर्व्वगतया व्यापकत्वमिति यावत् ।
शशिशेखरेत्युक्त्या शशी चन्द्रः जीवसमष्टिः सर्व्वजीवबीजस्वरूपो हिरण्यगर्भो ब्रह्मा एव चन्द्रनाम्नाख्यायते अतएवास्या देव्या ललाटे ऊर्द्ध्वदेशे इति निर्द्देशात् समस्तजडशक्तिभ्य एथक् तत्ता जीवशक्तेरुत्कर्षं बोधयति यथा,—
"भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च ।
अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम् ।
जीवभूतां महाबाहो ! ययेदं धार्य्यते जगत्" ॥
अतोऽस्या जीवशक्त्याधायकतया सैव परमात्मरूपिणी चिदानन्दमयीति प्रबोध्यते । यदि च स्थानभेदे क्वचित् परब्रह्मणः सकाशादस्याः पार्थक्यं दृश्यते तत्र केवलमद्भानां क्रियाविशेषबोधनायैव स्वरूपतः अभेदादित्वाभावात् सर्व्वत्रैव ब्रह्मशक्त्योरभेदः प्रतिपादितः । त्रिनयनमित्युक्त्या सर्व्वज्योतिःपदार्थानां प्रधानभूताश्चन्द्रसूर्य्याग्नयः प्रकाशशक्तेराधिक्यात् तैरेवास्या देव्या नयनत्रितयत्वेन प्रकल्पितं वस्तुतः सर्व्वप्रकाशकानां सूर्य्यादीनां सेवाम्यत्वामितयाधिष्ठात्रीदेवतास्वरूपिणीति बोध्यम् ।
रक्ताम्बरं बिभ्रतीं इति सृष्टिकरणार्थं सैव परमात्मरूपिणी रजोगुणोद्रेकस्वरूपमम्बरं वस्त्रमावरणं शक्तिमिति भावः बिभ्रतीं धारिणीं । पाणिभ्याममयं वरञ्च इति भक्तसाधकानां रक्षार्थं कुशला परमदयामयत्वेन भवत्याविर्भावस्य पाणिद्वयत्वेन कल्पितं रक्तारविन्दस्थितामिति रजोगुणसमुद्भवाया इच्छाशक्तेरेवारविन्दत्वेन प्रकल्पनं कृतमिति बोध्यम् । अपि च स्वरूपध्यानादीनां यदिमानातत्स्वरूपदृष्ट्या नामरूपादियुक्तभावो लक्ष्यते परं सर्व्वमेव तेषां सूक्ष्मापरूपपरमात्मन्येव गूढ़ताम्पर्य्याय प्रतिपत्तव्येन विज्ञानदृष्टिरेव तत्सर्व्वं तोपातुं शक्यते । न चैतदस्माकं केवलं स्वकपोलकल्पनामात्रं श्रीमद्भगवद्गीताप्रभृतितत्त्वज्ञान-प्रतिपादकशास्त्रेषु विशेषतोनिश्चितं किञ्च प्रकृतिपुरुषयोरपि तत्तच्छास्त्रे भूयोभूयोऽविनश्वरत्वमनादित्वं चाङ्गीकृतम् ।
"प्रकृतिं पुरुषञ्चैव विद्ध्यनादी उभावपीत्यादि" । भूरिभूरि प्रमाणानि सन्ति बाहुल्यभिया नैवास्माभिस्तान्युद्धृतानि ॥)

कालीक पु, (के जले अलति पर्य्याप्नोति प्रभवतीत्यर्थः । अल+इकन् पृषोदरादित्वात् दीर्घः । यद्वा के जले+अलीकः मत्स्यनाशाय कपटध्यानमूर्त्तिरिव।) क्रौञ्चः । इति शब्दरत्नावली ॥

कालीची स्त्री (काल्या यमभगिन्या चीयतेऽत्र । चिञ्+बाहुलकात् अधिकरणे ड । गौरादित्वात् ङीष् ।) यमविचारभूमि । इति त्रिकाण्डशेषः ॥

कालीतनयः, पुं, (काल्या यमरूपाया यमभगिन्याः यमत्वशक्तेर्वा तनय इव यमवाहनत्वात्तथात्वम् । यद्वा, कालीं इतः प्राप्तः अन् बलिदानाय आत्मानं नयति प्रापयति । नी+अच् । कालीं प्रति उद्दिश्य वा इतः प्राप्तः उपस्थितः इत्यर्थः आत्मनो नयः प्रापणं यस्य । महिषस्य कालीसन्निधाने बलिदानाय नीयमानतया तथात्वम् ।) महिषः । इति हेमचन्द्रः ॥

कालीय क्ली, (कालस्य कृष्णवर्णस्याय कालस्थाने भवं वा 'वृद्धाच्छः' । ४ । २ । ११४ । इति छः ।) कृष्णचन्दनम् । इति शब्दचन्द्रिका ॥ (अस्य व्यवहारो यथा, वैद्यकचक्रपाणिसंग्रहे एकादशप्रतिकप्रसारणीतैले । "कालीयोत्पलपद्मकाक्य-निशेत्यादि" ॥)

कालीयक, क्ली, (कालीय+स्वार्थे कन् । कालीयमिव कायति वा । कै+क ।) कालिया इति ख्यात पीतवर्णसुगन्धिकाष्ठम् । इत्यमरटीकासारसुन्दरी ॥ (यथा, महाभारते २ । ५१ । १ ।
"चन्दनागुरुकाष्ठानां भारान् कालीयकस्य च ।
चर्म्मरत्नसुवर्णानां गन्धानाञ्चैव राशयः" ॥)
तत्पर्य्यायः । जापकः २ कालानुसार्य्यं ३ । इत्यमरः । २ । ६ । १२६ ॥ जापकम् ४ । इति टीकासर्व्वस्वम् ॥ कालेयम् ५ वर्णकम् ६ कान्तिदायकम् ७ । इति भरतधृतहारावली ॥ राजनिघण्टौ तु गुणपर्य्यायौ पीतचन्दनशब्दे द्रष्टव्यौ ॥ कृष्णचन्दनम् । तत्पर्य्यायः । कालीयम् २ कालिकम् ३ हरिप्रियम् ४ । इति शब्दचन्द्रिका ॥ दारुहरिद्रा । इति राजनिर्घण्टः । (अस्य व्यवहारो यत्र तद्यथा, "शालसाराजकर्णखदिरकदरकालस्कन्धक्रमुकभूर्जमेषशृङ्गीतिनिशचन्दनकुचन्दनशिंशपाशिरीषासनधवार्ज्जुनतालशाकनक्तमालपूतीकाश्वकर्णागुरूणि कालीयकञ्चेति" । इति सुश्रुते । सूत्रस्थाने । ३८ अध्यायः ॥)

कालीयकः, पुं, (कालीय+संज्ञायां स्वार्थे वा कन् ।) दारुहरिद्रा । इति शब्दरत्नावली ॥ (अस्य पर्य्यायो यथा —
'दार्व्वी दारुहरिद्रा च पर्ज्जन्या पर्ज्जनीति च ।
कटङ्कटेरी पीता च भवेत् सैव पचम्पचा ।
सैव कालीयकः प्रोक्तस्तथा कालेयकोऽपि च ।
पीतद्रुश्च हरिद्रुश्च पीतदारुकपीतकम्' ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कालेय, क्ली, (क सुखं आलेयं आदेयं यस्मात् ।) कालियानामपीतवर्णसुगन्धिकाष्ठम् । इति व्याडिः रमानाथश्च ॥ (यथा, कुमारे ७ । ९ ।
"तां लोध्रकल्केन हृताङ्गतैलाम्
आश्यानकालेयकृताङ्गरागाम्" ॥
कलये रक्तधारिण्यै हितं इति ढक् ।) काल-खण्डम् । यकृत् इति यावत् इति मेदिनी ॥

कालेय, पुं, (कालाया अपत्यं ढक् ।) दैत्यभेदः । इति मेदिनी ॥ (यथा, महाभारते १ । ६५ । ३४ ।
"कालाया प्रथिता पुत्राः कालकल्पाः प्रहारिणः ।
प्रविख्याता महावीर्य्या दानवेषु परन्तपाः ॥
विनाशनश्च क्रोधश्च क्रोधहन्ता तथैव च ।
क्रोधशत्रुस्तथैवान्यः कालेया इति विश्रुताः" ॥)

कालेयक, क्ली, (कालेय+स्वार्थे कन् ।) कालीयकम् । कालियानाम पीतवर्णसुगन्धिकाष्ठम् । इत्यमरटीका । ("मधुकरकुलकलङ्ककालीकृतकालेयककुसुमकुड्मलेषु" । इति कादम्बरी ॥)

कालेयकः, पुं (कालेय+संज्ञायां स्वार्थे वा कन् ।) दारुहरिद्रा । इत्यमरः २।४।१०२ ॥ (यथा, सुश्रुते सूत्रस्थाने ३८ अध्यायः । "कालेयकागुरुतिलपर्णी कुष्ठहरिद्रेति" ॥ कालीयकशब्देऽस्य विवरणं ज्ञातव्यम् ॥ कलये विवादाय साधु । कल+ढक्+संज्ञायां कन् । कुक्कुराणां हि अन्योन्यकलहपरत्वं प्रसिद्धम् ।) कुक्कुरः । इति राजनिर्घण्टः ॥

काल्य, पुं (कल्पे विधौ भवः । "तत्र भवः" ४ । ३ । ५३ । इति अण् ।) हरिद्राविशेषः । काँचा हलुद इति भाषा । तत्पर्य्यायः । कर्च्चूरः २ द्राविडकः ३ द्राविकभूतिकः ४ । इति शब्दरत्नावली ॥

काल्पकः, पुं, (कल्पे विधौ भवः । "तत्र भवः" । ४।३।५३। इत्यणन्तात् संज्ञायां स्वार्थे वा कन् ।) कर्च्चूरकः । इत्यमरः २।४।१२५ ॥ काँचा हलुद इति भाषा ॥

काल्पनिक त्रि, (कल्पनायाः आगतः । ठञ् ।) कल्पनामयः । कल्पितः । यथा । "इतः कायते इति काल्पनिकं भेरुगीतम्य कम्मकार्त्तरि का प्रयोगः" । इति साहित्यदर्पणम् ॥

काल्य, क्ली, (कलयति चेष्टाम् । अघ्न्यादयश्चेति कर्त्तरि यत् । ततः प्रज्ञाद्यण् ।) प्रत्यूषः । इति हेमचन्द्रः ॥ (यथा रामायणे २ । ६४ । ६० ।
"तथितः सर्व्वधर्म्मज्ञ काल्ये कार्य्यविधानि" ॥)

काल्यकः, पुं, (काले साधुः । तत्र साधुरिति यत् । स्वार्थे कन् ।) कल्पकः । इति शब्दरत्नावली ॥

काल्या, स्त्री, (कालः प्राप्तोऽस्याः । कालाद्यत् । टाप् च ।) प्रजनयप्राप्तकाला अनुमती गौः । तत्पर्य्यायः । उपसर्य्या २ । इत्यमरः । २ । ९ । ७१ ॥ ("उपसर्य्या काल्या प्रजने" । इति पाणिनिः । ३ । १ । १०४ ॥)

काविचि क्ली, (कपयिनो समूहः । 'टञ् च' विवक्षा । ४ । २ । ४१ । इति अञ् ।) कवचिनां

गता । कवचधारियोद्धृसमूहः । इत्यमरः । २ । ८ । ६६ ।

कावारं, क्ली, (कं जलं आवृणोतीति । आ + वृ + अण् ।) शैवलं । इति त्रिकाण्डशेषः ॥

कावारी, स्त्री, (कावार + ङीष्) छत्रादिच्छत्रम् । तत्पर्य्यायः । अङ्गमकुटी २ भ्रमलटी ३ । इति त्रिकाण्डशेषः ॥

कावृक, पुं (कुत्सितः वृक इव ईषत् वृक इव वा । कोः कादेशः ।) कुक्कुटः । चक्रवाकः । पीतमस्तक पक्षी । इति विश्वमेदिन्यौ ॥

कावेरं, क्ली, (कस्य सूर्य्यस्येव आ ईषत् वेरं अङ्गं यस्य । ज्योतिर्मयत्वात् तथात्वम् ।) कुङ्कुमम् । इति जटाधरः ॥ (कुङ्कुमशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कावेरी, स्त्री, (कं जलमेव वेरं शरीरं । तदस्त्यस्याम् । "अर्श आद्यच्" । ५।२।१२७ । इति अच् । ङीष् ।) नदीविशेषः । इत्यमरः । १ । १० । ३५ ॥ (यथा, महाभारते ३ । ८५ । २२ ।

"ततो गच्छेत कावेरीं वृतामप्सरसां गणैः ।
तत्र स्नात्वा नरो राजन् गोसहस्रफलं लभेत्" ॥

इयं हि सह्याद्रेः सत्यपर्व्वतस्य च सानुसम्भि कन्या । इति केचित् ॥ कुत्सितं अपवित्रं वेरं शरीरं यस्याः । कोः कादेशः ।) वेश्या । हरिद्रा । इति मेदिनी ॥

काव्य, क्ली, (कवेरिदं कर्म्म भावो वा । ष्यञ् ।) ग्रन्थः । इति मेदिनी ॥ रसयुक्तवाक्यम् । यथा —

"वाक्यं रसात्मकं काव्यं दोषास्तस्यापकर्षकाः ।
उत्कर्षहेतवः प्रोक्ता गुणालङ्काररीतयः" ॥

एषां प्रत्येकं लक्षणानि निरूप्यन्ते । तत्रादौ वाक्यलक्षणं यथा —

"वाक्यं स्याद्योग्यताकाङ्क्षासत्तियुक्तः पदोच्चयः" ॥

रसलक्षणं यथा,—

"विभावेनानुभावेन व्यक्तः सञ्चारिणा तथा ।
रसतामेति रत्यादिः स्थायी भावः सचेतसाम्" ॥

दोषलक्षणं यथा,—

"रसापकर्षका दोषास्ते पुनः पञ्चधा मताः ।
पदे तदंशे वाक्यार्थे सम्भवन्ति रसेऽपि यत्" ॥

गुणलक्षणं यथा,—

"रसस्याङ्गित्वमाप्तस्य धर्म्माः शौर्य्यादयो यथा ।
गुणा माधुर्य्यमोजोऽथ प्रसाद इति ते त्रिधा" ॥

अलङ्कारलक्षणं यथा,—

"शब्दार्थयोरस्थिरा ये धर्म्माः शोभातिशायिनः ।
रसादीनुपकुर्व्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्" ॥

रीतिलक्षणं यथा,—

"पदसङ्घटना रीतिरङ्गसंस्थाविशेषवत् ।
उपकर्त्री रसादीनां सा पुनः स्याच्चतुर्व्विधा ।
वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा" ॥

इति साहित्यदर्पणम् ॥ * ॥ तत् काव्यं त्रिविधं ध्वनिगुणीभूतव्यङ्ग्यचित्रभेदेन । तत्राद्यस्य लक्षणम्

"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः कथितः" । द्वितीयस्य लक्षणम् ।

"अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम्" ॥

तृतीयस्य लक्षणम् ।

"शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम्" ।

इति काव्यप्रकाशः ॥

"एतेषां विवरणानि तत्तच्छब्दे द्रष्टव्यानि" ॥

काव्यः, पुं (कवेः भृगोरपत्यं पुमान् इति "कुर्व्वादिभ्यो ण्यः" ४।१।१५१ । इति ण्यः । यत् इति केचित् ।) शुक्राचार्य्यः । इति मेदिनी ॥ (यथा, महाभारते १ । सम्भवपर्व्वणि ७६ । ६ ।

"जिगीषया ततो देवा वव्रिरेऽङ्गिरसं मुनिम् ।
पौरोहित्येन याज्यार्थे काव्यन्तूशनसं परे" ॥

तामससम्बन्धीयऋषिविशेषः । यथा, मार्कण्डेये ७४ । ५८ ।

"ज्योतिर्धामा पृथुः काव्यश्चैत्रोऽग्निर्बलकस्तथा ।
पीवरश्च तथा ब्रह्मन् सप्त सप्तर्षयोऽभवन्" ॥)

काव्यचौरः, पुं (काव्यस्य चौर इव । अन्यरचितकाव्यस्य स्वकीयत्वेन प्रख्यापकत्वात् तस्य तथात्वं बोध्यम् ।) चन्द्रगोः । इति त्रिकाण्डशेषः ॥

काव्या, स्त्री, (कवगत स्तुतिमार्गे च । काङ्क्षा दित्वात् ण्यत् । टाप् च । मृतमाया हि बाल विलापविन्यासादिना नारीणां सती मोहयित्वा ताभ्यो विश्वमाकृष्य गायकावितया तथात्वं बोध्यम् ।) पूतना । बुद्धिः । इति मेदिनी ॥

काश ऋ ङ दीप्तौ । कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट् ।) ऋ अचकाशत् । ङ काशते चन्द्रः । दन्त्यान्त इति केचित् । इति दुर्गादासः ॥

काश य उ ऋ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (दिवा०-आत्म०-अक०-सेट् ।) य ङ काश्यते । उ काशित्वा काष्ट्वा । ऋ अचकाशत् । इति दुर्गादासः ॥

काश, पुं स्त्री, (काशते दीप्यते शोभते इति यावत् । काशृ ङ दीप्तौ + पचाद्यच् ।) तृणभेदः । केशे इति भाषा । इति मेदिनी ॥ (यथा रघुः ४ । १७ ।

"पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम्" ॥)

तत्पर्य्यायः । इक्षुगन्धा २ पोटगलः ३ । इत्यमरः । २ । ४ । १६२ ॥ काशः ४ । इति भरतः ॥ काशी ५ । इति मुकुटादयः ॥ काशा ६ । इति नयनानन्दः ॥ वायसेक्षुः ७ काशेक्षुः ८ अमरपुष्पकः ९ । इति रत्नमाला ॥ काशकः १० वनहासकः ११ । इति शब्दरत्नावली ॥ इक्षारिः १२ काकेक्षुः १३ इक्षुरः १४ इक्षुकाण्डः १५ शारदः १६ सितपुष्पकः १७ नादेयः १८ दर्भपत्रः १९ [illegible] २० काण्डकाण्डकः २१ इक्षुकाण्डकः २२ । अस्य गुणाः । मधुरत्वम् । तिक्तत्वम् । शीतलत्वम् । रुचिकारित्वम् । पित्तदाहनाशित्वम् । क्षीणबलशुक्रकारित्वम् । श्रमशोषक्षयापहत्वञ्च । इति राजनिर्घण्टः ॥ [illegible] । इति शब्दचन्द्रिका ॥ तत्पर्य्यायगुणाः ।

'काशः काशेक्षुरुदितः स स्यादिक्षुरसस्तथा ।
इक्षुगन्धेक्षुवल्ली च तथा पोटगलः स्मृतः ॥
काशः स्यान्मधुरस्तिक्तः स्वादुपाके हिमः सरः ।
मूत्रकृच्छ्राश्मदाहास्रक्षयपित्तजनार्त्तिनुत्" ॥

इति भावप्रकाशः ॥

काश, पुं, (किम् अस्य काष्ठकेन [illegible] काश्यते इव । क + काश + अधिकरणे घञ् ।) खनम् । इति शब्दरत्नावली ॥ तन्नामस्थानरोगविशेषः । काशी इति भाषा । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । क्षवथुः २ कासिका ३ । इति शब्दरत्नावली ॥ कासः ४ । इत्यमरः । २ । ६ । ५१ ॥ काशयति कुत्सितशब्दं कारयति इति । काश शब्दे णिच् पचाद्यच् काशो दन्त्यान्तः । कश शब्दे इत्यस्मात् ण्यन्तात् पचाद्यचि काशस्तालव्यान्तः । शालुकाशप्रकाशस्य इत्यभेदे दन्त्यतालव्यान्तमध्ये पाठात् ।

"वाराणस्यां भवेत् काशी क्षवथौ ना द्वयोः सिता" ।

इति तालव्यान्तेषु रभसः । इति अमरटीकायां भरतः ॥ * ॥ तस्य निदानं यथा,—

धन्वन्तरिरुवाच ।

"प्राणवायुर्यदा कासः स एवात प्रवर्त्तते ।
पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ॥
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम् ।
तेषां भविष्यतां पूर्व्वं कण्ठे कण्डूररोचकः ॥
शूकपूर्णाभकण्ठत्वं तथास्ये विगुणोऽपि च ।
ऊर्द्ध्वं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च सक्तवान् ।
शिरःस्रोतांसि सम्पूर्य्य ततोऽङ्गान्युत्क्षिपन्निव ।
क्षिपन् विरुद्धमिव पृष्ठमुरः पार्श्वे च पीडयन् ।
प्रवर्त्तते स वक्त्रेण भिन्नकांस्योपमध्वनिः ।
हतुमान्यैरितिरस्मुखमोहक्षोभस्वरक्षयान् ।
करोति शुष्ककासं च महावेगरुजास्वनम् ।
सोऽङ्गहर्षी कफं शुष्कं कृच्छ्रान्मुक्तोऽल्पतां व्रजेत् ।
पित्तात् पीताक्षिकफता तिक्तास्यत्वं ज्वरो भ्रमः ।
पित्तासृग्वमनं तृष्णा वैस्वर्य्यं धूमको मदः ।
प्रततं कासवेगेन ज्योतिषामिव दर्शनम् ।
कफादुरोऽल्परुङ्मूर्द्धहृदयं स्तिमितं गुरु ।
कण्ठे प्रलेपवदनं पीनसच्छर्द्यरोचकाः ।
रोमहर्षघनस्निग्धश्वेतश्लेष्मप्रवर्त्तनम् ।
युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम् ।
उरस्यन्तःक्षते वायुः पित्तेनानुगतो बली ।
कुपितः कुरुते कासं कफं तेन सशोणितम् ।
पीतश्यावञ्च शुष्कञ्च ग्रथितं क्वथितं बहु ।
ष्ठीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा ।
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यकम्पवान् ।
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च ।
क्रमाद्वीर्य्यं रुचिः पक्तिर्बलं वर्णश्च हीयते ।
क्षीणस्य सासृङ्मूत्रत्वं स्याच्च पृष्ठकटीग्रहः ।
वायुप्रधानाः कुपिता धातवो राजयक्ष्मिणः ।
कुर्व्वन्ति यक्ष्मायतनैः कासं ष्ठीवेत् कफं ततः ।
पूतिपूयोपमं पीतं विस्रं हरितलोहितम् ।
लुप्यते पार्श्वं हृदयं पतनीव च ।
अकस्मादुष्णशीतेच्छा बहाशित्वं बलक्षयः ।
स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्दर्शननेत्रता ।
ततोऽस्य क्षयरूपाणि सर्व्वाण्याविर्भवन्ति च ।
इत्येष क्षयजः कासः क्षीणानां देहनाशनः ।
याप्यो वा बलिनां तद्वत् क्षतजोऽपि नवौ च तौ ।
सिध्येतामपि दाक्षाल्यात् साध्या दोषपृथक्कृताः ।
मिश्रायाप्यास्तु ते सर्व्वे जरसा स्थविरस्य च ।

कासश्वासक्षयच्छर्द्दिस्वरसादादयो गदाः ।
भवन्त्युपेक्षया यस्मात् तस्मात् त्वरया जयेत् ।
इति गारुडे कासरोगनिदानं १५४ अध्यायः ॥ * ॥

अथ कासस्य चिकित्सा ।

तत्र वातकासस्य चिकित्सा ।
"वार्त्ताकी वायसीशाकं मूलकं सुनिषण्णकम् ।
स्नेहास्तैलादयो भक्ष्याः क्षीरेक्षुरसगौडिकाः ॥
दध्यारनालाम्लफलं प्रसन्नापानमेव च ।
शस्यते वातकासेषु स्वाद्वम्ललवणानि च ॥"
वायसी काकमाची कवइ इति लोके । सुनिषण्णक सिसुयारि इति लोके शाकविशेषः । चाङ्गेरी स्वल्पचतुष्पत्रा सजलदेशे भवति । चौपति इति लोके ॥
"ग्राम्यानूपौदकैः शालियवगोधूमषष्टिकान् ।
रसैर्माषात्मगुप्तानां यूषैर्वा भोजयेद्धितान्" ॥
ग्राम्यानूपौदकैः रसैरित्यन्वयः । आत्मगुप्ता कि वाछ इति लोके ॥
"दशमूलीशृतं कासश्वासहिक्काक्षयापहा ।
यवागूर्दीपनी पथ्या वातरोगविनाशिनी ॥
रसं कर्कटकानां वा घृतभृष्टं सनागरम् ।
वातकासप्रशमनं शृङ्गिमत्स्यरसं वा पुनः" ॥ * ॥

अथ पित्तकासस्य चिकित्सा ।
"कण्टकारीयुगद्राक्षावासाकर्चूरवालकैः ।
नागरेण च पिप्पल्या क्वथितं सलिलं पिबेत् ॥
शर्करामधुसंयुक्तं पित्तकासहरं परम्" ॥ * ॥

अथ कफकासस्य चिकित्सा ।
"पिप्पली कट्फलं शुण्ठी शृङ्गी भार्गी तथैव च ।
कारवी कण्टकारी च सिन्धुवारो यवानिका ॥
चित्रको वासकश्चैषां कषायं विधिवत् कृतम् ।
कफकासविनाशाय पिबेत् क्षारसंयुतम्" ॥
पिप्पल्यादिक्वाथः ॥ * ॥

अथ क्षतजकासस्य चिकित्सा ।
"इक्षुरालिकापद्मस्नालोत्पलचन्दनम् ।
मधुकं पिप्पली द्राक्षा लाक्षा शृङ्गी शतावरी ॥
द्विगुणा च तुगाक्षीरी सिता सर्व्वचतुर्गुणा ।
लिह्यात् सक्षौद्रसर्पिर्भ्यां क्षतकासनिवृत्तये" ॥
इक्षुरालिका इक्षुभेदः । उक्क इति लोके । पद्म पद्मकाष्ठम् । मृणालं बिशम् । उत्पलं कमलम् । चन्दनं श्वेतम् । चूर्णत्वात् । शृङ्गी कर्कटशृङ्गी । तुगाक्षीरी वंशरोचना । सा चेत्तोदि गुणा ॥ * ॥ अथ क्षयकासचिकित्सा । 'चूर्णं ककुभत्वचः बासकरसभावितं बहून् वारान् । मधुघृतसितोपलाभिर्लेह्यं क्षयकासरक्तपित्तहरम्' ॥ ककुभचूर्णं ककुभत्वक्चूर्णम् ॥ * ॥

अथ कासस्य सामान्यतश्चिकित्सा ।
'ताम्बूलस्य कासेन नासास्रावे स्वरे जडे ।
अरुचौ गन्धनाशे च धूमपानं प्रयोजयेत् ॥
मनःशिलामरिचमांसीमुस्तेङ्गुदैः पिबेत् ।
धूमं पश्चाच्च तस्यानु पयश्च सगुडं पिबेत् ॥
एवं कासान् पृथक् द्वन्द्वसर्व्वदोषसमुद्भवान् ।
एतैरपि प्रयोगैश्च कासान् साधयेद् ध्रुवम्" ॥
काच हरितालम् । इङ्गुदमिव इङ्गुदीफलम् ।

"बदरीदलमालिप्तं शिलायां तत्र शोषितम् ।
तद्धूमपानं सक्षीरं महाकासनिवारणम् ॥
कण्टकारिकृतक्वाथः सकृष्णः सर्व्वकासहा ।
कण्टकार्य्याः कषायस्य चूर्णं समधु कासहृत् ॥
लवङ्गजातीफलपिप्पलीनां
भागान् प्रकल्प्याक्षसमानमीषाम् ।
पलार्द्धमानं मरिचं प्रदेयं
पलानि चत्वारि महौषधस्य ॥
सितासमस्तेन समान्य चूर्णं
रोगानिमानाशु बलान्निहन्ति ।
कासज्वरारोचकमेहगुल्म-
श्वासाग्निमान्द्यग्रहणीविकारान्' ॥
समशर्करचूर्णं वटिका वा ॥
"कुलटीसैन्धवव्योषविडङ्गामयहिङ्गुभिः ।
लेहः साज्यमधुः कासश्वासहिक्कानिवारणः" ॥ * ॥
'हरीतकीकणा शुण्ठी मरिचं गुडसंयुतम् ।
कासघ्नो मोदकः प्रोक्तः परं वह्निप्रदीपनः" ॥ * ॥
"कर्षः कर्षांशौ पलं पलद्वयं स्यात्ततोऽर्द्धकर्षश्च ।
मरिचस्य पिप्पलीनां दाडिमगुडयावशूकानाम्" ॥
सर्व्वौषधैरसाध्याः कासा ये वैद्यनिर्मुक्ताः ।
अपि पूयं छर्दयतां तेषामिदमौषधम्" ॥
पथ्यम् ॥ वङ्गसेनस्तु कर्षांश इति पाठे कर्षांश कर्षार्द्धमिति व्याचष्टे ॥
"मरिचं कर्षमात्रं स्यात् पिप्पली कर्षसम्मिता ।
अर्द्धकर्षो यवक्षारः कर्षयुग्मञ्च दाडिमम् ॥
एतच्चूर्णीकृतं युञ्ज्यादष्टकर्षगुडेन हि ।
शाणप्रमाणां गुटिकां कृत्वा वक्त्रे विधारयेत् ॥
अस्याः प्रभावात् सर्व्वेऽपि कासा यान्त्येव संक्षयम्" ॥
दाडिमं दाडिमफलवल्कलं ग्राह्यम् । मरिचादि वटिका ॥ * ॥
"समूलपत्त्रस्य च कण्टकार्य्याः
तुलां ततो द्रोणमिते जलञ्च ।
हरीतकीनां शतमेकपात्रे
विपच्य कुर्य्याच्चरणावशेषम् ॥
तस्मिन् कषाये तनुवस्त्रपूते
हरीतकीभिः सहितो गुडस्य ।
तुलां विनिःक्षिप्य पचेत् सुपक्व-
मेतत् समुत्तार्य्य सुशीतले च ॥
पलं पलञ्चापि कटुत्रयस्य
तथा चतुर्जातकतः विचूर्ण्य ।
पलानि षट् पुष्परसस्य चापि
विनिःक्षिपेत्तत्र विमिश्रयेच्च ॥
प्रयुज्यमानो विधिवत् स लेहो
यथाबलञ्चापि यथानलञ्च ।
वातात्मकं पित्तकृतं कफोत्थं
द्विदोषजं सान्निपातञ्च तीव्रम् ॥
क्षतोद्भवं क्षयजञ्च कासं
श्वासञ्च हन्यात् सह पीनसेन ।
तथा प्रमेहादिकसम्भवञ्च
हरीतकीयं भृगुणोपदिष्टा' ॥
पुष्परसो मधु । चतुर्जातं त्वगेलापत्त्रनागकेशराः ॥
भृगुहरीतकी ॥ * ॥

'कण्टकारीतुला नीरद्रोणे पक्त्वा कषायकम् ।
पादशेषं गृहीत्वा च तत्र चूर्णानि दापयेत् ॥
पृथक् पलांशान्येतानि गुडूचीचव्यचित्रकाः ।
मुस्तं कर्कटशृङ्गी च त्र्यूषणं धन्वयासकः ॥
भार्गी रास्ना शटी चैव शर्करा पञ्चविंशतिः ।
प्रत्येकञ्च पलान्यष्टौ प्रदद्यात् घृततैलयोः ॥
पक्त्वा लेहत्वमानीय शीते मधुपलाष्टकम् ।
चतुष्पलं तुगाक्षीर्य्याः पिप्पलीश्च चतुष्पलाम् ॥
क्षिप्त्वा निदध्यात् सुदृढे मृण्मये भाजने शुभे ।
लेहोऽयं हन्ति हिक्कातिकासश्वासानशेषतः" ॥
कण्टकार्य्यावलेहः । इति कासाधिकारः । इति भावप्रकाशः ॥ * ॥ अपि च ।
"हरीतकीकणा शुण्ठी मरिचं गुडसंयुतम् ।
कासघ्नो मोदकः प्रोक्तस्तृष्णारोचकनाशनः ॥
कण्टकारीगुडूचीभ्यां पृथक् त्रिंशत्पलाद्रसे ।
प्रस्थसिद्धो घृताद्वातकासनुद्वह्निदीपनः" ॥
इति गारुडे १७४ अध्यायः ॥
"मनःशिला बलामूलं काकपर्णश्च गुग्गुलुम् ।
जातिपत्त्रं कोशिपत्त्रं तथा चैव मनःशिला ॥
एभिरेव कृता वर्त्तिर्वदरामौ महेश्वर ! ।
धूमपानं कासहरं नात्र कार्य्या विचारणा' ॥
इति च गारुडे १९४ अध्यायः ॥
'कनकस्य फलं शङ्खं सैन्धवं त्र्यूषणं वचा ।
गोरोचनाञ्जनं क्षौद्रं विडङ्गानि मनःशिला ।
एषा वर्त्तिर्हन्ति कासं तिमिरं पटलं यथा' ॥
इति तत्रैव १९८ अध्यायः ॥
"अभयामलकं द्राक्षा पिप्पली कण्टकारिका ।
शृङ्गी पुनर्नवा शुण्ठी लेहाः कासं निहन्ति वै" ॥
इति च तत्रैव १९९ अध्यायः ॥

कासक, पुं, (कास्यते दीप्यते इति । कास + कर्म्मणि ण्वुल् ।) कासः । इति शब्दरत्नावली ॥ केशा इति भाषा ॥

कासमर्द्द, पुं, (कासं मृद्नाति उपशमयति नाशयति वा । मृद् + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) कासमर्द्दवृक्षः । इत्यमरटीकायां रायमुकुटः ॥ (कासमर्द्दशब्देऽस्य गुणाः पर्य्यायाश्च ज्ञेयाः ॥)

कासा, स्त्री, (कास्यते इति । कास + अच् + टाप् ।) कासरोगः । इत्यमरटीकायां भरतः ॥

कासाञ्जलि, स्त्री, (कृतमिता शाल्मलि । को कादेशः ।) कूटशाल्मलिः । इति जटाधरः ॥

काशि, स्त्री, (काश् + "सर्व्वधातुभ्य इन्" । उणा० ४ । ११७ । इति इन् ।) काशी । इत्युणादिकोषः ॥ (यथा हेः रामायणे १ । १३ । २३ ।
"तथा काशिपतिं स्निग्धं सततं प्रियवादिनम् ।
सद्वृत्तं देवसङ्काशं स्वयमेवानयस्व हि ॥")
काशिष्मरोपद्रविते जनपदे पुंभूमि ।
यथा महाभारते ६ । ९ । ६१ ।
"कान उङ्ग जनपदाश्चिराध कन्तो मम ।
'गोधा मद्रा कलिङ्गाश्च काशयो परकाशयः" ॥
मुष्टिः । इति निरुक्तिः । यथा ऋ०-१० । १ ॥
। ८ । 'काश इव वाजिना जनयोः' कलाद्यका

अत इन्द्र याग्रा" । "काशिका मुक्तिका" इति
भाष्यम् ।) सूर्य्ये पुं । इति अमरव्याकरणम् ॥
काशिका, स्त्री, (काशि + स्वार्थे कन् टाप् । यद्वा
काशयति ज्ञानं भक्तानां इति । काश + णिच्
+ ण्वुल् टाप् अत इत्वम् ।) काशी । इति शब्द
रत्नावली ॥ (पारिभाषिककाशिकाया अस्याः
गुणः यथा शङ्कराचार्य्येण ।
"मनोनिवृत्तिः परमोपशान्तिः
सा तीर्थवर्य्या मणिकर्णिका च ।
ज्ञानप्रवाहा विमला हि गङ्गा
सा काशिकाहं निजबोधरूपा" ॥ ० ॥
वामनकृता पाणिनिवृत्तिः ।)
काशिकाप्रियः, पुं, (काशिका प्रिया यस्य । काशि
कायाः प्रियो वा ।) दिवोदासः । इति शब्दरत्ना
वली ॥
काशिराजः, पुं, (काश्याः राजा । "राजाहःसखि
भ्यष्टच्" । ५ । ४ । ९१ इति टच् ।) वाराणसी
राजः । तत्पर्य्यायः । धन्वन्तरिः २ दिवोदासः
३ सुधोद्भवः ४ । इति त्रिकाण्डशेषः ॥
(यदि च क्रमान्वयेन तत्र बहवो राजान आसन् ।
तथापि तत्प्रख्यानाधिकारित्वात् यदा योऽधि
कारी स एव काशिराज इत्यतो भाषाप्रयोग
इति मन्यामहे । "अथ खलु भगवन्तममरवर
मृषिगणपरिवृतमाश्रमस्थं काशिराजं दिवोदासं
धन्वन्तरिमौपधेनव वैतरणौरभ्रपौष्कलावतकर
वीर्य्यगोपुररक्षितसुश्रुतप्रभृतय ऊचुः" ।
इति सुश्रुते सूत्रस्थाने १ अः ॥)
काशी, स्त्री, (काशते शिवत्रिशूलोपरि । काशृ
दीप्तौ + अच् गौरादित्वात् ङीष् । काश +
इन् ङीप् वा । अथवा काशयति प्रकाशयतीश
ब्रह्म या । काश् + णिच् अच् गौरादित्वात्
ङीप् ।) स्वनामख्याततीर्थम् । शिवपुरी । तत्
पर्य्यायः । वाराणसी २ शिवराजी ३ तपःस्थली ४ ।
इति जटाधरः । काशिका ५ । इति शब्दरत्ना
वली । काशिः ६ । इत्युणादिकोषः ॥
अविमुक्तम् ७ आनन्दवनम् ८ आनन्दकाननम् ९
अपुनर्भवभूमिः १० रुद्रावासः ११ महाश्मशानम्
१२ । तस्या उत्पत्तिर्यथा,—
"तत्रैकदेशेनापि चेद् विहरता मया ।
शक्तिः सृष्टा तदा स्वस्मात् अशरीरानपायिनी ।
प्रधानं प्रकृतिं तां तु मायां गुणवतीं पराम् ।
बुद्धितत्त्वस्य जननीमाहुर्विकृतिवर्ज्जिताम् ॥
युगपच्च तदा शक्त्या साकं कालस्वरूपिणा ।
मयाप्य पुरुषेणैतत् क्षेत्रमपि विनिर्म्मितम्" ॥
स्कन्द उवाच ।
का शक्तिः प्रकृतिः प्रोक्ता क पुमानीश्वरः परः ।
तत्त्वार्थं रसभावाख्यो भविन् छिन्धि घटोद्भव ॥
परमानन्दरूपाख्यो परमानन्दरूपिणि ।
पञ्चक्रोशपरीमाणे पादातलविनिर्म्मिते ॥
मुने प्रलयकालेऽपि न तत् क्षेत्रं कदाचन ।
विमुक्तं स्याच्छिवाभ्यां यदविमुक्तं ततो विदुः ॥
न यदा भूमिवलयं न यदापां समुद्भवः ।
तदा विहर्त्तुमीशेन क्षेत्रमेतत् विनिर्म्मितम् ॥
इति काशीखण्डम् ॥ तत्र काशीयात्राविधानं
यथा,—
सूत उवाच ।
"यात्रापरिक्रमं ब्रूहि जनानां हितकाम्यया ।
यथावत् सिद्धिकामानां सत्यवत्याः सुतोत्तम ॥
व्यास उवाच ।
निशामय महाप्राज्ञ लोमहर्षण ! वच्मि ते ।
यथा प्रथमतो यात्रा कर्त्तव्या यात्रिकैर्मुदा ॥
सचैलमादौ स्नात्वाथ चक्रपुष्करिणीजले ।
सन्तर्प्य देवान् सपितॄन् ब्राह्मणांश्च तथार्थिनः ॥
आदित्यं द्रौपदीं विष्णुं दण्डपाणिं महेश्वरम् ।
नमस्कृत्य ततो गच्छेत् द्रष्टुं ढुण्ढिविनायकम् ॥
ज्ञानवापीमुपस्पृश्य नन्दिकेशं ततोऽर्च्चयेत् ।
तारकेशं ततोऽभ्यर्च्च्य महाकालेश्वरं ततः ॥
ततः पुनर्दण्डपाणिमित्येषा पञ्चतीर्थिका ।
दैनन्दिनी विधातव्या महाफलमभीप्सुभिः" ॥ * ॥
"ततो वैश्वेश्वरी यात्रा कार्य्या सर्व्वार्थसिद्धये ।
दिवसायतनानाञ्च कार्य्या यात्रा प्रयत्नतः ॥
शुक्लां प्रतिपदं प्राप्य भूतावधि यथाविधि ।
अथवा प्रतिभूतञ्च क्षेत्रशुद्धिमभीप्सुभिः ॥
तत्तत्तीर्थकृतस्नानस्तत्तल्लिङ्गकृतार्च्चनः ।
मौनेन यात्रां कुर्व्वाणः फलं प्राप्नोति यात्रिकः ॥
ओङ्कारं प्रथमं पश्येन्मत्स्योदर्य्यां कृतोदकः ।
त्रिविष्टपं महादेवं ततो वै कृत्तिवाससम् ॥
रत्नेशञ्चाथ चन्द्रेशं केदारञ्च ततो व्रजेत् ।
धर्म्मेश्वरञ्च वीरेशं गच्छेत् कामेश्वरं ततः ॥
विश्वकर्म्मेश्वरञ्चाथ मणिकर्णीश्वरं ततः ।
अविमुक्तेश्वरं दृष्ट्वा ततो विश्वेशमर्च्चयेत् ॥
एषा यात्रा प्रयत्नेन कर्त्तव्या क्षेत्रवासिभिः ।
वसन् क्षेत्रमुनिर्वापि नैतां यात्रां समाचरेत् ॥
विघ्नास्तस्योपजायन्ते क्षेत्रोच्चाटनसूचकाः" ॥ * ॥
"अष्टायतनयात्रान्या कर्त्तव्या विघ्नशान्तये ।
दक्षेशः पार्व्वतीशश्च तथा पशुपतीश्वरः ।
गङ्गेशो नर्म्मदेशश्च गभस्तीशः सतीश्वरः ॥
अष्टमस्तारकेशश्च प्रत्यष्टमि विशेषतः ।
दृष्टव्यैतानि लिङ्गानि महापापोपशान्तये" ॥ * ॥
"अपरापि शुभा यात्रा योगक्षेमकरी सदा ।
सर्व्वविघ्नोपशान्त्यै च कर्त्तव्या क्षेत्रवासिभिः ॥
शैलेशं प्रथमं वीक्ष्य वरणाचामपूर्व्वकम् ।
आगत्य सङ्गमे स्नात्वा द्रष्टव्यः सङ्गमेश्वरः ॥
स्वर्लीनतीर्थे स्नातव्यं पश्येत् स्वर्लीनमीश्वरम् ।
स्नात्वा मन्दाकिनीतीर्थे द्रष्टव्यो मध्यमेश्वरः ॥
पश्येद्धिरण्यगर्भेशं तत्र तीर्थकृतोदकः ।
मणिकुण्डे स्नात्वा ज्येष्ठस्थानं ततोऽर्च्चयेत् ॥
चतुःसमुद्रकूपे तु स्नात्वा देवं ततोऽर्च्चयेत् ।
देवखाते तु वा वापी तत्रोपस्पर्शने कृते ॥
शुक्रेश्वरं ततः पश्येत् तत्कूपविहितोदकः ।
दण्डखाते नरः स्नात्वा व्याघ्रेशं पूजयेत्ततः ॥
शौनकेश्वरकुण्डे तु स्नानं कृत्वा ततोऽर्च्चयेत् ।
जम्बुकेशं महालिङ्गं कृत्वा यात्रामिमां नरः ॥
इह न जायते भूयः संसारे दुःखसागरे ॥
समारभ्य प्रतिपदं यावत्कृष्णां चतुर्दशीम् ।
एतल्लिङ्गानि कर्त्तव्याण्येतान्यायतनानि वै ।
इमां यात्रां नरः कृत्वा न भूयोऽप्यभिजायते" ॥ * ॥
"अन्या यात्रा प्रकर्त्तव्येकादशायतनोद्भवा ।
अग्नीध्रकुण्डे स्नात्वा पश्येदग्नीध्रमीश्वरम् ।
उर्व्वशीशं ततो गच्छेत् ततस्तु नकुलेश्वरम् ।
आषाढीशं ततो दृष्ट्वा भारभूतेश्वरं ततः ।
लाङ्गलीशमथालोक्य ततस्तु त्रिपुरान्तकम् ।
ततो मनःप्रकामेशं प्रीतिकेशमथो व्रजेत् ।
मदालसेश्वरं तस्मात् तिलपर्णेश्वरं ततः ।
यान्येकादशलिङ्गानामेषा कार्य्या प्रयत्नतः ।
इमां यात्रां प्रकुर्व्वाणो रुद्रत्वं प्राप्नुयान्नरः" ॥ * ॥
"अतः परं प्रवक्ष्यामि गौरीयात्रामनुत्तमाम् ।
शुक्लपक्षतृतीयायां या यात्रा विश्ववृद्धिदा ।
गोप्रेक्षतीर्थे स्नात्वाथ मुखनिर्म्मालिकां व्रजेत् ।
ज्येष्ठवाप्यां नरः स्नात्वा ज्येष्ठां गौरीं समर्च्चयेत् ।
सौभाग्यगौरी सम्पूज्या ज्ञानवाप्यां कृतोदकैः ।
ततः शृङ्गारगौरीञ्च तत्रैव च कृतोदकः ।
स्नात्वा विशालगङ्गायां विशालाक्षीं ततो व्रजेत् ।
सुस्नातो ललितातीर्थे ललितां पूजयेत्ततः ।
स्नात्वा भवानीतीर्थे तु भवानीं परिपूजयेत् ।
मङ्गला च ततोऽभ्यर्च्या बिन्दुतीर्थकृतोदकैः ।
ततो गच्छेन्महालक्ष्मीं स्थिरलक्ष्मीसमृद्धये ।
इमां यात्रां नरः कृत्वा क्षेत्रेऽस्मिन् मुक्तिजन्मनि ।
न दुःखैरभिभूयेत इहामुत्रापि कुत्रचित् ।
कुर्य्याद् प्रतिचतुर्थीञ्च पूजां विघ्नविभोः सदा ।
नाशयेदन्यदुर्द्देशाद्येषा वै मोक्षदा मुदे" ॥ * ॥
"भौमे भैरवयात्रा च कार्य्या पातकहारिणी ।
रविवारे रवेर्यात्रा षष्ठ्यां वा रविसंयुजि ।
तथैव रविसप्तम्यां सर्व्वविघ्नोपशान्तये ।
नवम्यामथवा षष्ठ्यां चण्डीयात्रा शुभावहा" ॥ * ॥
"अन्तर्गृहस्य यात्रा वै कर्त्तव्या प्रतिवासरम् ।
प्रातः स्नात्वा विधानेन गत्वा पञ्चविनायकान् ।
नमस्कृत्याथ विश्वेशं स्थित्वा निर्व्वाणमण्डपे ।
अन्तर्गृहस्य यात्रां हि करिष्येऽघौघनाशिनीम् ।
सङ्कल्प्य नियमं कृत्वा गत्वाथ मणिकर्णिकाम् ।
स्नात्वा मौनेन चागत्य मणिकर्णीशमर्च्चयेत् ।
कम्बलाश्वतरौ नत्वा वासुकीशं प्रणम्य च ।
पर्व्वतेशं ततो दृष्ट्वा गङ्गाकेशवमप्यथ ।
ततस्तु ललितां दृष्ट्वा जरासन्धेश्वरं ततः ।
ततो वै सोमनाथञ्च वराहञ्च ततो व्रजेत् ।
ब्रह्मेश्वरं ततो नत्वा अगस्तीश्वरं ततः ।
कश्यपेशं नमस्कृत्य हरिकेशवनं ततः ।
वैद्यनाथं ततो नत्वा ध्रुवेश्वरमपीह च ।
गोकर्णेशं ततोऽभ्यर्च्च्य हाटकेशमथो व्रजेत् ।
अस्थिक्षेपतडागे च दृष्ट्वा वै कीकसेश्वरम् ।
भारभूतं ततो नत्वा चित्रगुप्तेश्वरं ततः ।
चित्रघण्टां प्रणम्याथ तत्र पशुपतीश्वरम् ।
पितामहेश्वरं गत्वा ततस्तु कलशेश्वरम् ।
चन्द्रेशञ्चाथ वीरेशं विद्येशोऽग्नीश एव च ।
नागेश्वरो हरिश्चन्द्रश्चिन्तामणिविनायकः ।
सेनाविनायकश्चाथ नत्वा सर्व्वविनायकम् ।

वशिष्ठवामदेवौ च मुक्तिमण्डपसंस्थितौ ।
इत्थौ यत्नत काश्यां महाविघ्नविनाशनौ ।
भीमाविनायकं नाथ करुणेशं ततो व्रजेत् ॥
त्रिसन्ध्येशो विशालाक्षी,धर्म्मेशो विश्वबाहुका ।
आशाविनायकश्चाथ वृद्धादित्यस्तत पुन ॥
चतुर्व्वक्त्रेश्वर लिङ्ग ब्राह्मीशन्तु तत परम् ।
ततो मन प्रकामेश ईशानेशस्तत परम् ।
चण्डीचण्डेश्वरौ दृष्ट्वा भवानीशङ्करौ तत ।
ढुण्ढि प्रणम्य च ततो राजराजेशमर्चयेत ॥
लाङ्गलीशस्ततोऽभ्यर्च्य ततस्तु नकुलीश्वरम् ।
पराङ्गेशमथो नत्वा परद्रव्येश्वर तत ॥
प्रतिग्रहेश्वरञ्चापि निष्कलङ्केशमेव च ।
मार्कण्डेयेशमभ्यर्च्य ततश्चाप्सरसेश्वरम् ॥
गङ्गेशोऽर्च्चितस्ततो ज्ञानवाप्यां स्नान समाचरेत ।
नन्दिकेश तारकेश महाकालेश्वर तत ॥
दण्डपाणि महेशञ्च मोक्षेशं प्रणमेत्तत ।
वीरभद्रेश्वर नत्वा अविमुक्तेश्वर तत ॥
विनायकांस्तत पञ्च विश्वनाथ ततो व्रजेत् ।
तता मौन विसृज्याथ मन्त्रमेनमुदीरयेत ॥
अन्तर्गृहस्य यात्रेय यथावत् या मया कृता ।
न्यनातिरिक्तया शम्भ प्रीयतामनया विभु ॥
इति मन्त्रं समुच्चार्य्य क्षण वै मुक्तिमण्डपे ।
विश्राम्य यायात् भवन निष्पाप पुण्यवान नर' ॥*
"सप्राप्य वासर विष्णोर्व्विष्णुतीर्थेष सर्व्वत ।
काश्या यात्रा प्रयत्नेन महापुण्यसमृद्धये ॥
भमस्यपक्षदशाष्टं कुर्वाणम्भ समर्च्चयेत ।
दुरा यदपिशाचत्व न भवेदस्य पूर्णमात ॥
अष्टायुश्चमिता यात्रा कर्त्तव्या क्षेत्रवासिभि ।
पञ्चसपि विशेषेण काश्या यात्राश्च सर्व्वत ॥
न वन्थ दिवस कुर्य्याद्विना यात्रां क्वचित कृती ।
यात्राहय प्रयत्नेन कर्त्तव्य प्रतिवासरम् ॥
आदौ स्वर्गतरङ्गिण्यास्ततो विश्वेशितुर्भुवम् ।
दस्य बन्ध दिन यात काश्यां निवसत सत ॥
निराशा पितरस्तस्य तस्मिन्नेव दिने भवेत ।
स दष्ट कालसर्पेण स दष्टो मृत्युना स्फुटम् ॥
स मुष्टश्च दिवसे विश्वेशो यत्र नेक्षित ।
सर्व्वतीर्थेषु सस्नौ स कलयात्रा यथात् स च ॥
भक्तिश्रद्धान्तु य स्नातो यो विश्वेश निरैक्षत ।
शाघ सत्य पुन सत्य सत्य सत्य पुन पुन ॥
दृष्टो विश्वेश्वरो नित्य धालया मणिकर्णिका ॥
इति श्रीस्कन्दपुराणे काशीखण्डे १० अध्याय ॥
(चिच्छक्ति । सुषुम्नाख्या नाडी च । अस्या नाडी चिद्रूपया सन्ततमाभासिता सती प्रकाशते अतएव इय हि महाप्रकाशरूपिणी चिन्मयी ध्यानप्रकाशकतया अस्यास्तथात्व वेदतन्त्रादि शास्त्रविशास्त्रमात्रेषु सुषुम्ना एव ब्रह्मनाडीत्व प्रतिपादित तथा सर्व्वप्रकाशकतया चिच्छक्तेरेव सर्व्वप्रकाशीत्व विभाव्यते यथा,—
"यदेद काशते सर्व्वं सा काशी परिकीर्त्तिते ।
यदि चिच्छक्तिरेव काशी सर्व्वार्थावाचिका तर्हि सर्व्वा वाराणसीनामधेया काशीतिरिति शास्त्रदर्शनेन् ततोऽप्यधीयताम् ।

"तदिद मन्ये देवानां देवयजन सर्व्वेषां भूतानां ब्रह्मसदन अत्र हि जन्तो प्राणेषूत्क्रममाणेषु रुद्रस्तारक ब्रह्म व्याचष्टे येनासावमृतीभूत्वा मोक्षी भवति तस्मादविमुक्तमेव निषेवेत अविमुक्त न विमुञ्चेदेवमेवैतद्याज्ञवल्क्य । अथ हैनमत्रि पप्रच्छ याज्ञवल्क्य । य एषोऽनन्तोऽव्यक्त आत्मा तमहमिम विजानीयामिति सोऽविमुक्त उपास्य इति सोऽविमुक्त कस्मिन प्रतिष्ठित इति वरणा यामस्याञ्च प्रतिष्ठित इति का च वरणा भवति का चाभिर्भवति । सर्व्वान इन्द्रियकृतान् दोषान् वारयति तेन वरणा भवति सर्व्वाणि इन्द्रियकृतानि पापानि नाशयति तेनासि भवति कतममस्य स्थान भवति इति भ्रुवोर्घ्राणस्योभयसन्धि स द्यौ र्लोकस्य परस्य च सन्धिर्भवति । एतमेवैतं सन्धि सन्ध्यां ब्रह्मविद उपासते कोऽसौ रुद्र इति रुद्र स्तापत्रयात्मक ससारदु ख तद्द्रावयति तत्सर्व्वं द्राव यति शरणागतानामुपासकानामिति अतएव चिच्छक्तिमय सर्व्वज्ञ परमेश्वर एव रुद्र । तथा हि "एको रुद्रो न द्वितीयायावतस्थे" । इति श्रीश्री मद्भगवत्पूज्यपादपरमहंसपरिव्राजकाचार्य्यसुरेश्वरसूरिप्रणीतकाशीमुक्तिविवेक ॥)

काशकृत्याम् । इत्यमरटीकायां भरत । (मुक्ति । इति निरुक्ति ॥)

काशी, [न्] त्रि, (काशोऽस्यास्ति इति । इनि ।) काशरोगयुक्त । इति राजवल्लभ ॥ (काशते इति काश + णिनि । प्रकाशशील ॥)

काशीनाथ, पुं, (काश्या नाथ ।) शिव । इति शब्दरत्नावली ॥ (यथा काशीखण्डे,—
"काशीनाथ समाश्रित्य कुत कालभय स्मृताम्" ॥)

काशीराज, पु (काश्या काशीप्रदेशस्य राजा । 'राजाह सखिभ्यष्टच्'। ५ । ४ । ९१ । इति टच् ।) दिवोदास । इति शब्दरत्नावली ॥ (अथ हि योगरूढ्यर्थ । यौगिकार्थेन तु सर्व्वस्मिन्नेव काशीदेशाधिकारिणि प्रयोगो दृश्यते ।
यथा गीतायाम् १ । ५ ।
"धृष्टकेतुश्चेकितान काशीराजश्च वीर्य्यवान्" ॥)

काशीश, क्ली, (कुत्सित ईषत् वा शीशमिव । को कादेश । काशि दीप्ति इष्टे इति केचित् । ईश् + क ।) उपधातुविशेष । हिराकशी इति भाषा । तत् द्विविधम् । धातुकाशीशम् १ । तत् चान्दिदर्शं लोहितञ्च । पुष्पकाशीशम् २ । तत् शुक्लवर्णं कृष्णञ्च । इति रत्नमाला ॥
(अस्य पर्य्याया गुणाश्च यथा,—
"काशीश धातुकाशीश पांशुकाशीशमित्यपि ।
तदेव किञ्चित् पीतन्तु पुष्पकाशीशमुच्यते ॥
काशीशमम्लमुष्णञ्च तिक्तञ्च तुवरन्तथा ।
वातश्लेष्महरञ्चापि नेत्रकण्डूविषप्रणुत् ॥
मूत्रकृच्छ्राश्मरीश्वित्रनाशन परिकीर्त्तितम्' ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
हिरन्तकाशीशोऽपि पाठ । (काशीदेशाधिपतौ शिवे च पु ॥)

काश्मरी स्त्री (काश्यते इति । "धनेभ्योऽपि" । १ । २ । ७५ । इति वणिच "दणोरच" । ४ । १ । ७ । इति ङीष् । पृषोदरात् वस्य मत्वम् ।) गम्भारी वृक्ष । इत्यमर । २ । ४ । ३५ ॥ (अस्या पर्य्याया यथा,—
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ।
काश्मीरी काश्मरी हीरा काश्मर्य्य पीतरोहिणी ।
कृष्णवृन्ता मधुरसा महाकुसुमिकापि च" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणा अस्या यथाचैव ॥
"काश्मरी तु वरा तिक्ता वीर्य्योष्णा मधुरा गुरु ।
दीपनी पाचनी मेध्या भेदिनी भ्रमशोषजित् ॥
दोषतृष्णाऽमशूलार्शोविषदाहज्वरापहा ।
तत्फल वृंहण वृष्य गुरुकेश्य रसायनम् ॥
वातपित्ततृषारक्तक्षयमूत्रविबन्धनुत ।
स्वादु पाके हिम स्निग्ध तुवराम्लविशुद्धिकृत् ॥
हन्याद्दाहतृषावातरक्तपित्तक्षयान् तथा" ॥ * ॥
यथा, महाभारते ३ । १५८ । ४४ ।
"बिल्वान् कपित्थान् जम्बूश्च काश्मरीर्बदरीस्तथा' ॥)

काश्मर्य्य,पुं (काश्मरीति शब्दोऽप्यस्य अस्मिन् वा । अन्येभ्योऽपीति यत् । स्वार्थे ष्यञ् इति केचित ।) गम्भारी । इत्यमर । २ । ४ । ३६ ॥ क्लीवलिङ्गोऽप्ययम् । इति भरत ॥
("हन्ध मूत्रविबन्धघ्न पित्तास्र्ग्वातनाशनम् ।
केश्य रसायन मेध्य काश्मर्य्यं फलमुच्यते" ॥
इति सुश्रुते सूत्रस्थाने । ४६ अध्याय ॥)

काश्मीर, क्ली, (कश्मीरे काश्मीरे वा भव "कच्छादिभ्यश्च" । ४ । २ । १३३ । इति अण् ।) पुष्कर मूलम् । इत्यमर । २ । ४ । १४५ ॥ टङ्क । कुङ्कुमम । इति मेदिनी ॥ (शोधनमस्य यथा —
"काश्मीरञ्चापि सर्पिषा" ।
इति वैद्यकचक्रपाणिसंग्रहे वातव्याध्यधिकारे ॥)

काश्मीर, पुं, (कश्मीर एव स्वार्थे अण् । काश्मीर इति नाम्नाख्यायते वा ।) स्वनामख्यातदेश । इति जटाधर । (उक्तञ्च शक्तिसङ्गमतन्त्रे ।
'शारदामठमारभ्य कुङ्कुमाद्रितटान्तकम् ।
तावत्काश्मीरदेश स्यात्पञ्चाशत्योजनात्मक' ॥
अत्र कपिलेश्वरनामा महादेवो वर्त्तते शिवनामकीर्त्तने "काश्मीरे कपिलेश्वर" ॥ इति वचनात् ॥ (यथा रामायणे ४ । ४३ । २२ ।
"काश्मीरमण्डल चैव शमीपीलुवनानि च ।
सुराणि च रम्यान् विधिवन्तु सनौकस ॥
तद्देशवासिनि त्रि । यथा, महाभारते ६ । ९ । ५३ ।
'काश्मीरा सिन्धुसौवीरा गन्धारा दर्शकास्तथा ॥)

काश्मीरज, क्ली, (काश्मीरे जायते । जन + "सप्तम्यां जनेर्ड' । ३ । २ । ९७ । इति ड ।) कुष्ठम् । कुङ्कुमम् । इति मेदिनी ॥ पुष्करमूलम् । इति विश्व । (अस्य पर्य्यायाश्च कुङ्कुमशब्दे कुष्ठशब्दे च ज्ञातव्या ॥)

काश्मीरजन्म [न्] क्ली, (काश्मीरे जन्म यस्य तत् ।) कुङ्कुमम् । इत्यमर । २ । ६ । १२४ ॥

काश्मीरा, स्त्री,(काश्मीरे भव । "तत्र भव" । ४ । ३ । ५३ । इत्यण् । काश्मीरदेश उत्पत्तिस्थानमस्या

न्ति अस्याः । अच टाप् च इति केचित् ।) अतिविषा । इति मेदिनी । कपिलद्राक्षा । इति राजनिर्घण्टः ॥

काश्मीरी, स्त्री, (काश्मीरदेशे भवः । "तत्र भव" । ४ । ३ । ५३ । इत्यण् । स्त्रियां ङीप् ।) गम्भारी । इति भावप्रकाशः । (अस्या पर्य्यायगुणा काश्मरीशब्दे ज्ञेयाः ॥)

काश्य, क्ली (कुत्सितं आश्यं यत्र । कं सुखं आश्यं वा यत्र ।) (मद्यम् । इति राजनिर्घण्टः ॥) नृपविशेषे पुं । यथा महाभारते १ । १०२ । ४८ ।

"ततः स्वयंवरात्तेन सम्भेऽसाध्यपराक्रम । आनयामास काश्यस्य सुता सागरगासुत" ॥)

काश्यप, क्ली, (काश्यं मद्यं पिबन्त्यत्र । पा + घञर्थे क । मांसस्य हि मद्यपानानुकूलत्वेन प्रसिद्धत्वात्तथात्वम् ।) मांसम् । इति हेमचन्द्रः ॥

काश्यप, पुं, (कश्यपस्य गोत्रापत्यम् । बिदादिभ्यः ।) कणादमुनिः । इति त्रिकाण्डशेषः । मृगभेदः । इति मेदिनी । गोत्रविशेषः । तत्प्रवर्त्तकमुनिविशेषः । इति स्मृतिः । कश्यपस्यापत्यमात्रम् । (विभाण्डकमुन्यर्थे यथा, महाभारते ३ । १११ । २० ।

"स्वाध्यायवान् धर्म्मपरो महर्षे विभाण्डकः काश्यप प्रादुरासीत्" ॥ ॥

सर्पमन्त्रज्ञो द्विजविशेषः । अयं हि विषविद्यापारदर्शी । अस्य विवरणमुच्यते ।

यदा शमीकपुत्त्रेण शृङ्गिणा 'स कौरवाधमः सप्तमेऽहनि मद्वाक्येन तक्षकेण दष्टो यमसदनं गमिष्यतीति' शप्तः परीक्षित्, तदा राजानमेतस्माद्विपत्सागरात्सम्रुद्धर्त्तुं काश्यपो नाम ब्राह्मणो राजानं परीक्षितं तक्षकविषात् रक्षितुं धनार्थी हस्तिनापुरमुद्दिश्य प्रस्थितः । गच्छन्नेव पथि तक्षकेण दृष्टो जिज्ञासितश्च को भवान् क्व वा गच्छति । अथ तक्षकेनैव स्वदोषेणाश्वत्थवृक्षो दष्टः काश्यपः पुनः जीवयामास । एवंप्रकारेण तु काश्यपे तक्षकस्य विषप्रभावं विदूरीकर्त्तुं सामर्थ्यमनेकं प्रत्यक्षं प्रदर्शयत् । ततो तक्षकः प्रचण्डविषत्वेन प्रत्यक्षं भस्मीभवन् । एवमुक्तोऽसौ काश्यपः स्वविद्याप्रभावं विना परीक्षितं ... अद्यापि दृष्ट्वा ... महाराजस्य नृपस्य ... धनमादाय तस्मात् । अथ नागराजस्तक्षक ... प्रभूतधनं दत्त्वा विसर्जयामास । एतद्विवरणन्तु महाभारते १ । ४३ । अध्याये द्रष्टव्यम् ॥)

काश्यपि पुं (कश्यपस्यापत्यं बाह्वादित्वात् इञ ।) अरुणः । "काश्यपिरुरुसादरो" । इत्यमरः १ । ३ । ३२ । गरुडः । इति हेमचन्द्रः । (महाभारते १ पर्व्वणि तदीयोत्पत्तिविवरणम् । यथा,—

"प्रजापतेस्तु द्वे कन्ये तु देवी दाक्षायणी तथा । विनता नाम कल्याणी पुत्रकामा मनस्विनी ॥ तदकालं तदा ताभ्यां दर्शयन् हुविः । उपचचार भर्त्तारं तासुभाभ्यां काश्यपः ॥ ताभ्यां वरं ददौ प्रीतः कश्यपो धर्म्मचारिणीम् । वरातिसर्गं श्रुत्वा हि मोदे विपुलमुत्तमाम् ।

तथा वालिखिल्यानां मम प्रसन्नौ तथा" ॥)

काश्यपी, स्त्री, (कश्यपस्येयं । "तस्येदम्" । ४ । ३ । १२० । इत्यण् स्त्रियां ङीप् ।) पृथिवी । इत्यमरः । २ । १ । २ ॥

("अथागम्य महाराज ! नमस्कृत्य च कश्यपम् । पृथिवी काश्यपी जज्ञे सुता तस्य महात्मनः" ॥ इति महाभारते । दानधर्म्मे । १३ । १५४ । ७ ॥ प्रभा । एतद्विषयकप्रमाणं कूर्म्मशब्दे द्रष्टव्यम् ॥)

काश्यपेय, पुं, (कश्यपस्येदम् । कश्यप + अण् ङीप् च काश्यपी कश्यपपत्नी अदितिः । तत्र भव इति ढक् ।) सूर्य्यः । इति शब्दरत्नावली ॥ (यथा,

"जवाकुसुमसङ्काशं काश्यपेयं महाद्युतिम् । ध्वान्तारिं सर्व्वपापघ्नं प्रणतोऽस्मि दिवाकरम्" ॥ इति सूर्य्यप्रणामः ॥ देवमात्रः । काश्यपीसुतत्वात् ॥)

काश्वरी स्त्री (काश + वनिप् "वनोरच" । ४ । १ । ७ इति ङीप् रश्च । गाशौ ङीप् वा ।) काश्मरी । इति भरतो द्विरूपकोषश्च ॥

काष्ठ, क्ली, (काशते दीप्यते काश्यतेऽनेन वा । काश + "हनिकुषीत्यादिना" उणा । २ । २ । क्थन् । अशेति अस्य निपातनेति केट् ।) दारु । इत्यमरः । २ । ४ । १३ ॥ काठ् इति भाषा । (उदाहरणम् ।

"सभायामतिक्रुद्धो यत् मुखितस्थो गमिष्यति । तत्काष्ठं काष्ठमित्याहुः सर्वादिसमुद्भवम्" ॥)

काष्ठक, क्ली, (काष्ठं समुत्कायति । काष्ठ + कै + कः केचित्तु काष्ठं विषयतेऽस्य नद्यादित्वात् कः कुक् च विषकादित्वात् अल्पार्थस्य भुक् । प्रशस्तकाष्ठत्वात् अस्य तथात्वम् ।) अगुरु । इति राजनिर्घण्टः ॥

काष्ठकदली, स्त्री, (काष्ठवत् कठिना कदली ।) कदलीभेदः । काठकला इति भाषा । तत्पर्य्यायः । सुकाष्ठा १ वनकदली २ काष्ठिका ३ शिलारम्भा ४ दारुकदली ५ फलाढ्या ६ वनमोचा ७ अश्मकदली ८ । अस्या गुणाः । रुचिकारित्वम् । रक्तपित्तनाशित्वम् । हिमत्वम् । गुरुत्वम् । मन्दाग्निजनकत्वम् । दुर्जरत्वम् । मधुरत्वम् । विलत्वम् । इति राजनिर्घण्टः ॥

काष्ठकीट पुं, (काष्ठे जातः कीटः । काष्ठस्थितः कीटो वा ।) घुणः । इति हेमचन्द्रः ॥

काष्ठकुट्ट, पुं (काष्ठं कुट्टयतीति । कुट्ट + अण् ।) पक्षिविशेषः । काठठोकरा इति भाषा । तत्पर्य्यायः । शतच्छदः ॥ । इति त्रिकाण्डशेषः ॥

काष्ठकुद्दाल, पुं (कु भूमिं उद्दालयति विदारयति निपातनात् साधुः । काष्ठस्य कुद्दालः काष्ठेन निर्म्मितः काष्ठमयः कुद्दालो वा ।) नौकादिगतजलसेचनाय काष्ठघटितकुद्दालः । तत्पर्य्यायः । सेकपात्रम् । इत्यमरः ॥

काष्ठजम्बू, स्त्री (काष्ठप्रधाना जम्बूः ।) भूमिजम्बूः । इति राजनिर्घण्टः ॥

काष्ठतक्षक, पुं (काष्ठं तक्ष्णोति । काष्ठ + तक्ष + ण्वुल् ।) काष्ठतट् । इति शब्दरत्नावली ॥

काष्ठतट् [क्ष] पुं (काष्ठं तक्ष्णोति । क्विप् तक्षकवत् सिद्धम् ।) वर्द्धकिः । छुतार इति भाषा । तत्पर्य्यायः । तक्षा २ वर्द्धकिः ३ त्वष्टा ४ रथकारः ५ । इत्यमरः । २ । १० । ९ ॥

काष्ठतन्तु, पुं, (काष्ठे तन्तुरिव स्थितः ।) काष्ठकृमिः । तत्पर्य्यायः । कीटकारः १ । इति हारावली ॥

काष्ठदारु, पुं (काष्ठं दारु यस्य । काष्ठप्रधानो दारुरिति केचित् ।) देवदारु । इति राजनिर्घण्टः ॥

काष्ठद्रु, पुं, (काष्ठप्रधानो द्रुः वृक्षः ।) पलाशवृक्षः । इति राजनिर्घण्टः ॥

काष्ठधात्रीफल, क्ली, (काष्ठमिव शुष्कं धात्रीफलम् ।) आमलकम् । इति राजनिर्घण्टः ॥

काष्ठपाटला, स्त्री, (काष्ठवत् कठिना पाटला ।) सितपाटलिका । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा । "अपरा स्थाल्पपाटला सिता । मुष्ककी मोक्षको घण्टा पाटली काष्ठपाटला" । इति भावप्रकाशस्य पूर्व्वखण्डे १म भागे ॥)

काष्ठमठी, स्त्री, (काष्ठरचिता मठीव ।) चिता । इति त्रिकाण्डशेषः ॥

काष्ठमल्ल, पुं, (काष्ठं मल्लः धारकः इव यत्र ।) शवयानम् । इति हारावली ॥

काष्ठलेखक, पुं, (काष्ठं लिखति । अत्यन्तं लेखनं करोतीति । लिख + ण्वुल् ।) घुणः । इति हारावली ॥

काष्ठलोही, [न्] पुं, (काष्ठेन युक्तं लोहं विद्यते यस्य । यद्वा काष्ठं च लोहं च ते स्तोऽस्य । इनि ।) लौहयुक्तमुद्गरः । तत्पर्य्यायः । मातङ्गः २ । इति त्रिकाण्डशेषः ॥

काष्ठवल्लिका, स्त्री, (काष्ठवत् शुष्का वल्लिका ।) कटुका । इति वैद्यकम् । (कटुकीशब्देऽस्या गुणा दयो ज्ञेयाः ॥)

काष्ठशारिवा, स्त्री, (काष्ठमिव शुष्का शारिवा ।) शारिवा । इति राजनिर्घण्टः । अनन्तमूल इति भाषा ॥

काष्ठा, स्त्री, (काशते प्रकाशते । काश् दीप्तौ । "हनिकुषिनीरमिकाशिभ्यः क्थन्" । उणा ४ । २ । इति क्थन् । अशेति अस्य गतः टाप् ।) दिक् । (यथा, माघे ११ । १२ ।

"कुरुते विशदकीर्त्ता पूर्व्वकाष्ठानुरागः ॥) स्थितिः । सीमा । उत्कर्षः । (यथा, कठवल्ल्याम् ।

"इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥ महतः परमव्यक्तमव्यक्तात् पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः" ॥) अष्टादशनिमेषात्मककालः । इत्यमरः । १ । ४ । ११ ॥ (यथा मनुः १ । ६४ ।

"निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कला" ।) त्रिंशद्द्वादशगते पञ्चदशनिमेषात्मक काल । सुश्रुते, सूत्रे ६ । ३ । ७ ।

"काष्ठा पञ्चदश ख्याता निमेषा मुनिसत्तम ॥) दारुहरिद्रा । इति मेदिनी । (कश्यपपत्नीभेदे । यथा, भागवते ६ । ६ । २५ ।

"अदितिर्दितिर्दनुः काष्ठा अरिष्टा सुरसा इला" ॥)

काष्ठाम्बुवाहिनी, स्त्री, (अम्बूनां वहना इति

अम्बुवाहिनी । काष्ठेन निर्मिता काष्ठस्य वा अम्बुवाहिनी ।) काष्ठादिरचितच्छिद्रमयनौकाजलसेचनी । सेंथोत् इति भाषा । तत्पर्य्याय । द्रोणी २ । इत्यमरः । १ । १० । ११ ॥

काष्ठील, पुं, (काष्ठिना इल्यते क्षिप्यते इति । काष्ठि + इल क्षेपणे + कर्म्मणि घञ् ।) राजार्क । इति राजनिर्घण्टः ॥

काष्ठीला, स्त्री, (कुत्सिता ईषद्वा अष्ठीलेव । क्षुद्रा ष्ठीलेव इति वा ।) कदलीवृक्षः । इत्यमरः । २ । ४ । ११३ ॥

कास, ऋ ङ कुशब्दे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-सेट्-ऋदित् ।) कुशब्द इह रोगहेतुककुत्सितशब्दः । ऋ अचकासत् । ङ कासते रुग्णः । इति दुर्गादासः ॥

कास, पुं, (कासतेऽनेन । कास शब्दकुत्सनयोः । "हलश्च" ३ । ३ । १२१ । इति घञ् ।) रोगविशेषः । काशी इति भाषा । तत्पर्य्यायः । क्षवथु २ । इत्यमरः । २ । ६ । ५२ ॥ तस्य निदानं यथा,—

"धूमोपघातादजसस्तथैव
व्यायामरूक्षान्ननिषेवणाच्च ।
विमार्गगत्वाच्च हि भोजनस्य
वेगावरोधात् क्षवथोस्तथैव" ॥

सम्प्राप्तिर्यथा । "प्राणो ह्युदानानुगतः प्रदुष्टः" ॥

लक्षणं यथा ।

"सम्भिन्नकांस्यस्वनतुल्यघोषः ।
निरेति वक्त्रात् सहसा सदोषो
मनीषिभिः कास इति प्रदिष्टः" ॥

स च पञ्चविधो यथा,—

"पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ।
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्" ॥

तेषां पूर्व्वरूपं यथा,—

"पूर्व्वरूपं भवेत्तेषां शूकपूर्णगलास्यता ।
कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते" ॥

वातिको यथा,—

"हृच्छङ्खमूर्द्धोदरपार्श्वशूली
क्षामाननः क्षीणबलस्वरौजाः ।
प्रसक्तवेगस्तु समीरणेन
भिन्नस्वरः कासति शुष्कमेव" ॥

पैत्तिको यथा—

"उरोविदाहज्वरवक्त्रशोषै-
रभ्यर्द्दितस्तिक्तमुखस्तृषार्त्तः ।
पित्तेन पीतानि वमेत् कटूनि
कासेत् स पाण्डुः परिदह्यमानः" ॥

श्लैष्मिको यथा,—

"प्रलिप्यमानेन मुखेन सीदन्
शिरोरुजार्त्तः कफपूर्णदेहः ।
अभक्तरुग्गौरवकण्डुयुक्तः
कासेद्भृशं सान्द्रकफं कफेन" ॥

क्षतजो यथा,—

"अतिव्यवायभाराध्वयुद्धाश्वगजविग्रहैः ।
रूक्षस्योरः क्षतं वायुर्गृहीत्वा कासमावहेत् ।
स पूर्व्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम् ।
कण्ठेन रुजताऽत्यर्थं विरुग्णेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
दुःखस्पर्शेन शूलेन भेदपीडाभितापिना ॥
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीडितः ।
पारावत इवाकूजन् कासवेगात् क्षतोद्भवात्" ॥

क्षयजो यथा,—

"विषमासात्म्यभोज्यातिव्यवायाद्वेगनिग्रहात् ।
घृणिनां शोचतां नृणां व्यापन्नेऽग्नौ त्रयो मलाः ।
कुपिताः क्षयजं कासं कुर्य्युर्देहक्षयप्रदम् ॥
सगात्रशूलज्वरदाहमोहान्
प्राणक्षयञ्चोपलभेत कासी ॥
शुष्यन् विनिष्ठीवति दुर्ब्बलस्तु
प्रक्षीणमांसो रुधिरं सपूयम् ।
तं सर्व्वलिङ्गं भृशदुश्चिकित्स्यं
चिकित्सितज्ञाः क्षयजं वदन्ति ॥
इत्येष क्षयजः कासः क्षीणानां देहनाशनः ।
साध्यो बलवतां वा स्याद्याप्यस्त्वेवं क्षतोत्थितः ॥
नवौ कदाचित् सिध्येतामपि पादगुणान्वितौ ।
स्थविराणां जराकासः सर्व्वो याप्यः प्रकीर्त्तितः ।
त्रीन् पूर्व्वान् साधयेत् साध्यान् पथ्यैर्याप्यांस्तु यापयेत्" । इति माधवकरः ॥ * ॥

("आशुकारी यतः कासस्तमेवातः प्रवक्ष्यति" ।
अस्य प्राग्रूपसहितासम्प्राप्ती रूपाणि च यथा ।
"तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः ।
शूकपूर्णाभकण्ठत्वं, तत्राधो विहतोऽनिलः ।
ऊर्द्ध्वं प्रवृत्तः प्राप्योरस्तस्मिन् कण्ठे च सक्तवान् ॥
शिरःस्रोतांसि सम्पूर्य्य ततोऽङ्गान्युत्क्षिपन्निव ।
क्षिपन्निवाक्षिणी पृष्ठमुरः पार्श्वे च पीडयन् ॥
प्रवर्त्तते सवक्त्रेण भिन्नकांस्योपमध्वनिः ।
हेतुभेदात् प्रतीघातभेदो वायोः सरंहसः ॥
यद्रुजा शब्दवैषम्यं कासानां जायते ततः ।
कुपितो वातलैर्वातः शुष्कोरःकण्ठवक्त्रताम् ॥
हृत्पार्श्वोरःशिरःशूलं मोहक्षोभस्वरक्षयान् ।
करोति शुष्कं कासञ्च महावेगरुजास्वनम् ॥
सोऽङ्गहर्षी कफं शुष्कं कृच्छ्रान्मुक्त्वाल्पतां व्रजेत् ।
पित्तात् पीताक्षिकफता तिक्तास्यत्वं ज्वरो भ्रमः ।
पित्तासृग्वमनं तृष्णा वैस्वर्य्यं धूमको मदः ।
प्रततं कासवेगेन ज्योतिषामिव दर्शनम् ॥
कफादुरोऽल्पसङ्मूर्द्ध हृदयं स्तिमितं गुरु ।
कण्ठोपलेपः सदनं पीनसच्छर्द्यरोचकाः ।
रोमहर्षोघनस्निग्धश्वेतश्लेष्मप्रवर्त्तनम् ।
युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम् ॥
उरस्यन्तः क्षते वायुः पित्तेनानुगतो बली ।
कुपितः कुरुते कासं कफं तेन सशोणितम् ॥
पीतं श्यामञ्च शुष्कञ्च ग्रथितं कुथितं बहु ।
ष्ठीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा ॥
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यकम्पवान् ॥
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च ।
क्रमाद्वीर्य्यं रुचिः पक्तिर्बलं वर्णश्च हीयते ।
क्षीणस्य सासृङ्मूत्रत्वं स्याच्च पृष्ठकटीग्रहः ।
वायुप्रधानाः कुपिता धातवो राजयक्ष्मिणः ।
कुर्व्वन्ति यक्ष्मायतनं कासं ष्ठीवेत् कफं ततः ।
पूतिपूयोपमं पीतं विस्रं हरितलोहितम् ॥
लुप्येते इव पार्श्वे च हृदयं पततीव च ।
अकस्मादुष्णशीतेच्छा बह्वाशित्वं बलक्षयः ॥
स्निग्धप्रसन्नवक्त्रत्वं श्रीमद्दर्शननेत्रता ।
ततोऽस्य क्षयरूपाणि सर्व्वाण्याविर्भवन्ति च ॥
इत्येषः क्षयजः कासः क्षीणानां देहनाशनः ।
याप्यो वा बलिनां तद्वत् क्षतजोऽभिनवौ तु तौ ॥
सिध्येतामपि सानाथ्यात् साध्यो दोषैः पृथक्त्रयः ।
मिश्रा याप्या द्वयात् सर्व्वे जरसा स्थविरस्य च ॥
कासाच्छ्वासक्षयच्छर्द्दिस्वरसादादयो गदाः ।
भवन्त्युपेक्षया यस्मात् तस्मात्तं त्वरया जयेत्" ॥
इति वाभटे निदानस्थाने । ३ अध्याये ॥ * ॥

अथ कासस्य चिकित्सा यथा ।

"केवलानिलजं कासं स्नेहैरादावुपाचरेत् ।
वातघ्नसिद्धैः स्निग्धैश्च पेयायूषरसादिभिः ॥
लेहैर्धूमैस्तथाभ्यङ्गैः स्वेदसेकावगाहनैः ।
वस्तिभिर्बद्धविड्वातं सपित्तं तूर्द्ध्वभक्तिकैः ।
घृतैः क्षीरैश्च सकफं जयेत् स्नेहविरेचनैः ।
गुडूचीकण्टकारीभ्यां पृथक्त्रिंशत्पलाद्रसे ॥
प्रस्थः सिद्धो घृताद्वातकासनुत् वह्निदीपनः ।
क्षाररास्नावचाहिङ्गुपाठायष्ट्याह्वधान्यकैः ।
द्विशाणैः सर्पिषः प्रस्थं पञ्चकोलयुतैः पचेत् ।
दशमूलस्य निर्यूहे पीतो मण्डानुपायिना ॥
सकासश्वासहृत्पार्श्वग्रहणीरोगगुल्मनुत् ।
द्रोणेऽपां साधयेद्रास्ना दशमूलशतावरी ॥
पलोन्मिता द्विकुडवं कुलत्थं बदरं यवम् ।
तुलार्द्धञ्चाजमांसस्य तेन साध्यं घृताढकम् ॥
समक्षीरं पलांशैश्च जीवनीयैः समीक्ष्य तत् ।
प्रयुक्तं वातरोगेषु पाननावनवस्तिभिः ॥
पञ्चकासान् शिरःकम्पयोनिवङ्क्षणवेदनाम् ।
सर्व्वाङ्गैकाङ्गरोगांश्च सप्लीहोर्द्ध्वानिलान् जयेत्" ॥ * ॥

"दुरालभां शृङ्गवेरं शठीं द्राक्षां सितोपलाम् ।
लिह्यात् कर्कटशृङ्गीञ्च कासे तैलेन वातजे ।
दुस्पर्शां पिप्पलीं मुस्तां भार्गीं कर्कटकं शठीम् ॥
पुराणगुडतैलाभ्यां चूर्णितान्यवलेहयेत् ।
तद्वत् सहिङ्ग्वां शुण्ठीञ्च समार्गीं तद्वदेव च ॥
पिबेच्च कृष्णां कोष्णेन सलिलेन ससैन्धवाम् ।
कल्कं सघृतां शुण्ठीं दध्ना वा बदरैर्युताम् ।
पिबेदरसजञ्चा वा मदिरां दधिमस्तु वा ।
अथवा पिप्पलीकल्कं घृतभृष्टं ससैन्धवम् ॥
कासी सपीनसो धूमं स्नैहिकं विधिना पिबेत्" ।
"हिध्माश्वासोक्तधूमाश्च बिल्वमध्यादिनिर्म्मितैः ।
रास्नाजमोदाशृङ्गवेरपलाशशठीपौष्करैः ।
सिद्धां स्निग्धाम्लकट्वीं पेयामनिलजे पिबेत् ।
कण्टकारीपृश्निपर्णीशालपर्णीबलाकपित्थकाः' ।
पित्तकासे तनुकफे त्रिवृतां मधुरैर्युताम् ।
घनश्लेष्मणि लिहिते तिक्तैः ...
[illegible]

शटीकाईतत त्रिफलापिप्पली शर्करामयम् ।
सिद्धमेतन्मधना गोव्या क्षीरपक्वं रसाञ्जनम् ।
त्रिगोधाश्चीवन्दीत्रापिप्पलीमूलचौत्रकैः ।
नागमुस्ता शटीराष्ठा धात्रीमल्लविभीतकैः ।
शर्कराम्भोऽम्लसर्पिर्भिर्मिश्रो लवोऽनुकासहा ।
मधुशैलेयकमर्तपथ्यामाक्षकोलका ।
मुद्गादिवर्षे माक्षिक त्रिफला माक्षिका स्थिता ।
घनदेवादि लेयाच्य निरूहामयरुक्ता ।
शालया यवमनुकपे मलिकाश्च रसादिभिः ।
गुकाम्भोऽनुपानार्थ हारोत्पलरसा चा ।
काकोली बृहतीमेदाद्वये स क्षयमार्दे ।
पित्तकासे रसक्षीरपेयादूधान प्रकल्पयेत् ।
"तुगमधा त्रिशाटिका खर्जूरमसहाम्लता ।
पटोलवृहतीपत्रिफलकरसैः पय सर्पीः ।
घृत निकटमा च सिद्धमुपयुज्य सज्जायते ।
न कासविषमज्वरक्षयगुदाङ्कुरेभ्यो भयम्" ॥ * ॥
"दशमूल सयष्टिमा शल्लकप्पली शटी बलाम् ।
कुलित्थपिप्पल्यामलकपिप्पलीमूलचित्रकान ।
भार्गी पुष्करमूलस्य द्विपलांशान् यवाढकम् ।
हरीतकीशतयुक्तं जलद्रोणे पचेत ।
यवस्विन्ने कषाय त पूतं तच्चाभयाशतम ।
पचेद्गुडतुला दत्त्वा कुडवञ्च पृथग्घृतात् ।
तैलात् सपिप्पलीचूर्णात् सिद्धशीते च माक्षिकात् ।
लेह द्वे चाभये नित्यमतः खादेद्रसायनात् ।
तद्वलीपलित हन्याद्वर्णायुर्बलवर्द्धनम् ।
पञ्चकासान् क्षय श्वास सहिक्का विषमज्वरान् ।
मेहगुल्मग्रहण्यर्शोहृद्रोगारुचिपीनसान् ।
अगस्त्यविहित धन्यमिदं श्रेष्ठं रसायनम्" ।

इति अगस्त्यरसायनम् । * ।

"विधिवद्वमनैविरिक्तो यथावस्थं न्ते हित ।
निरूहं घातदोषे तु कफे शुद्धे उर शिरः ।
दाल्लातै कासिभो यस्य सधूमामापिबेत्पिमान् ।
त्रिमेदा द्विवलायष्टीकल्कैः क्षौमे सुभाविते ।
वर्त्ति कृत्वा पिबेद्धूमं क्षीरमेवानुपानतः ।
मनःशिला पलाशाजगन्धात्वक्क्षीरीनागरैः ।
तद्वच्चैवानुपानन्तु सुखोष्णगुडोदकम् ।
पिष्ट्वा मनःशिलां तुल्या सार्द्रया वटपत्रया ।
ससर्पिष्कं पिबेद्धूमं तित्तिरिप्रतिभोजनम् ।
क्षयजे बृंहणं पूर्वं कुर्यादग्नेश्च वर्द्धनम् ।
बहुदोषाय सस्नेह मृदु दद्याद्विरेचनम् ।
शम्याकेन त्रिवृतया मृद्वीकारसयुक्तया ।
तिल्वकस्य कषायेण विदारीस्वरसेन च ।
सर्पिः सिद्ध पिबेद्युक्त्या क्षीणदेहो विशोधनम् ।
पित्ते कफे धातुषु च क्षीणेषु क्षयकासवान् ।
घृत कर्कटकीक्षीरद्विबलासाधितं पिबेत् ।
विदारीभिः कदम्बैर्वा तालसस्यैश्च साधितम् ।
घृत पयश्च मूत्रस्य वैवर्ण्ये कृच्छ्रनिर्गमे ।
शूने सवेदने मेढ्रे पायौ सश्रोणिवङ्क्षणे ।
घृतमण्डेन लघुनानुवास्यो मिश्रकेण वा ।
जाङ्गलैः प्रतिभुक्तस्य वर्त्तकाद्या विलेशयाः ।
क्रमशः प्रसहास्तद्वत् प्रयोज्याः पिशिताशिनः ।
औष्ण्यात्तीक्ष्णाभिष्यन्दित्वात् स्रोतोविवरणानिते ।

कफ गुड़ैश्च सप्रिष्ठं कुर्याद्धृतपयवान् रसः ।
पथ्याग्निफलाभार्गीं दशमूल स चित्रकैः ।
कुलत्थपिप्पलीमूलपाठाकोलयवैर्जले ।
घृतेनाग्नरटुकषायं पिप्पलीप्रतिवीर्यकैः ।
लिहेः कर्कटशृङ्गी च समे सर्पिर्विपाचयेत् ।
सिद्धेऽस्मिश्चूर्णितौ क्षारौ द्वौ पञ्च लवणानि च ।
दत्त्वा युक्तया पिबेन्मात्रां क्षयकासनिपीडित ।
कासमर्दाभयामुस्तापाठाकट्फलनागरैः ।
पिप्पल्या कटुरोहिण्या काश्मर्या स्वरसेन च ।
अक्षमात्रैर्घृतप्रस्थ क्षीरद्राक्षा रसाढके ।
पचेच्छोषज्वरप्लीहसर्वकासहरं शिवम्" ॥ * ॥
"वृषशाखी गुडूचीनां पत्रमूलफलाङ्कुरान् ।
रसकल्कैर्घृतं पक्वं हन्ति कासज्वरारुचीः" ।
"द्विगुणे दाडिमरसे सिद्धं वा व्योषसंयुतम् ।
सर्पिर्वातकफोद्भूतं हिक्काश्वासविनाशनम्" ।
पचेत् सप्तपलं सर्पिः शशाङ्कविल्वपिप्पलीम् ।
पिप्पल्या द्विपलं कर्षं मनोह्वाया रसाञ्जनात् ।
द्रव्याद्राक्षा पचेद्बद्ध सर्वेष श्वासकासनुत्" ।
"तद्वत्सर्जिकचूर्णं वा सघृतक्षौद्रशर्करम् ।
पथ्याशुण्ठी घनगुडैर्गुटिका धारयेन्मुखे ।
सर्वेषु श्वासकासेषु केवलं वा बिभीतकम् ।
पत्रकल्कं घृतभ्रष्टं तिल्वकस्य सशर्करम् ।
पेयावोत्कारिका च्छर्दितृट्श्वासामातिसारनुत् ।
काण्डकार्या रसे सिद्धो मुद्गयूष सुसंस्कृतः ।
स गौरामलकः साम्लः सर्वकासभिषग्जितम् ।
वातघ्नौषधनिःक्वाथे क्षीरं यूषान् रसानपि ।
वैष्किरान् प्रातुदान् बैलान् दापयेत् क्षयकासिने ।
क्षतकासे च ये धूमाः सानुपानानि दर्शिताः ।
क्षयकासेऽपि ते योज्या वक्ष्यते यच्च यक्ष्मणि ।
बृंहणं दीपनञ्चाग्नेः स्रोतसाञ्च विशोधनम् ।
व्यत्यासात् क्षयकासिभ्यो बल्यं सर्वं प्रशस्यते ।
सन्निपातोद्भवो घोरः क्षयकासो यतस्ततः ।
यथादोषबलं तस्य सन्निपातहितं हितम्" ।
इति वाग्भटे चिकित्सास्थाने ३ अध्याये ॥ * ॥

अस्य शब्दारम्भसमानिक अस्यार्थं चिकित्सितञ्च यथा,—
"तमका प्रतमका क्षुद्रा छिन्ना च महताश्रिताः ।
श्वासेषु कासमालम्बं सिद्धं प्राह चिकित्सितम् ।
वातादिभिस्तु ये च जाता क्षयजास्तथा ।
पञ्चैते सुरवा कासा वर्त्तमाना क्षयप्रदा" ।
"अधःप्रतिहतो वायुरूर्द्ध्वस्रोत समाश्रितः ।
उदानभावमापन्नः कण्ठे सक्तस्तथोरसि ।
आविश्य शिरसः खानि सर्वाणि प्रति पूरयन् ।
आभञ्जन्नाक्षिपन्देहं हनुमन्ये तथाक्षिणी ।
नेत्रे पृष्ठमुरः पार्श्वे निर्भज्य स्तम्भयस्ततः ।
शुष्को वा सकफो वापि कसनात् कास उच्यते ।
प्रतिघातविशेषेण तस्य वायोः स्वरस्तथा ।
वेदनाशब्दवैषम्यं कासानामुपजायते ।
कफाद्यैश्चरणाद्यश्च निकामस्य जिज्ञ ।
पञ्चधाररुणमातनो मनोकासमतथा ।
शुष्कोऽसौ शिर स्वभवमभेदकारी महाम् ।
अक्षीरमन्दत्रिकमुरण्डकोष्ठ महास्य ।

निर्घोषीलक्षणो दैन्यदौर्बल्यक्षोभमोहकृत् ।
शुष्ककासः कफ शुष्कं कृच्छ्रान्मुक्त्वाल्पतां व्रजेत् ।
स्निग्धाम्ललवणोष्णैश्च भुक्तमात्रे प्रशाम्यति ।
ऊर्द्ध्ववातस्य जीर्णेऽन्ने वेगवाश्च भवेच्च ।
कटुकोष्णविदाह्यम्लक्षाराणामतिसेवनात् ।
पित्तकासकर क्रोध सन्तापश्चाग्निसूर्यज ।
पीतनिष्ठीवनमक्षिणि तिक्तास्यत्वं स्वरामयः ।
उरो धूमायनं तृष्णा दाहो मोहोऽरुचिर्भ्रमः ।
प्रतत कासमानश्च ज्योतींषीव च पश्यति ।
श्लेष्माणं पित्तसंसृष्टं निष्ठीवति च पित्तिके ।
गुर्वभिष्यन्दिमधुरस्निग्धस्वप्नाविचेष्टनैः ।
वृद्धः श्लेष्मानिलं रुद्धा कफकासं करोति हि ।
मन्दाग्नित्वारुचिच्छर्दिपीनसोत्क्लेशगौरवैः ।
लोमहर्षास्यमाधुर्यक्लेदसंसदनैर्युतम् ।
बहलं मधुरं स्निग्धं निष्ठीवति घनं कफम् ।
कासमानोऽतिव्याप्तो सम्पूर्णमिव मन्यते" ।
"दुर्गन्धं हरितं रक्तं ष्ठीवेत् पूयोपमं कफम् ।
स्थानादुत्कासमानश्च हृदयं मन्यते च्युतम् ।
अकस्मादुष्णशीतार्त्तो बह्वाशीदुर्बलः कृशः ।
स्निग्धाच्छमुखवर्णत्वक् श्रीमद्दर्शननेत्रवान् ।
पाणिपादतलौ श्लक्ष्णौ सततासूयकोद्वदः ।
ज्वरो मिश्राकृतिस्तस्य पार्श्वरुक् पीनसोऽरुचिः ।
भिन्नसङ्घातवर्चस्त्वं स्वरभेदोऽनिमित्ततः ।
इत्येषः क्षयजः कासः क्षीणानां देहनाशन" ।
"कफवातात्मकं कास वातिकं वा समाचरेत् ।
सर्पिर्भिर्बस्तिभि पेयायूषक्षीररसादिभिः ।
वातघ्नसिद्धैः स्नेहाद्यैर्धूमैर्लेहैश्च युक्तितः ।
अभ्यङ्गैः परिषेकैश्च स्निग्धैः स्वेदैश्च बुद्धिमान् ।
बस्तिभिर्बद्धविड्वात शुष्कोर्द्ध्वं चोर्द्ध्वभक्तिकैः ।
घृतैः सपित्त सकफ जयेत् स्नेहविरेचनैः" ।
"पिप्पली पिप्पलीमूलचव्यचित्रकनागरैः ।
धान्यपाठावचारास्ना यवक्षाराग्निबिन्दुभिः ।
सौवर्च्चलपथ्याद्भिमूर्वी रसाञ्जनैः ।
सिद्धं चतुर्गुणे क्षीरे यथामात्रं पिबेन्नरः ।
तत्कासश्वासहृत्पार्श्वशूलदोषाग्निमान्द्यनुत्" ।
"भूयश्च त्रिफला द्राक्षा कासमर्दिष्टधन्वयव ।
द्वे पाटे बृहती व्याघ्री सुरसा भिषक सर्षप ।
माषी तामलकी मेदा काकनासा शतावरी ।
स्थिरकण्टकी विदारी च पिष्ट्वा कर्षसमं घृतात् ।
प्रस्थं चतुर्गुणे क्षीरे सिद्धं कासहरं पिबेत् ।
ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत् ।
कामलार्शोऽनिलाष्ठीला क्षतशोषक्षयापहम् ।
घृतच नाम विख्यातमेतद्घृतमनुत्तमम्" ।

इति घृतच्याशं घृतम् । * ।

सैन्धवं द्रोणपुष्पी मधुकं बृहती हता ।
पलिका साधिता तोय कुडवान् जलद्रोणके ।
गुडार्द्धप्रस्थमाधाय पादशेषेण तेन च ।
घृताढक समक्षीर क्षीर्णानि समीक्षितम् ।
सिद्ध तद्वदिभिः कल्के सप्तसार्द्धकाद्यैः ।
कर्षोन्मानशोष्मेषु यथावत्सा प्रयोजयेत् ।
पव कासान् हिक्कासं शूलं गुल्मोनिलज ।
सर्वामृत कामलाप्रमेह सर्वरोगेऽपि च ॥

"दशमूलीं स्वयङ्गुप्तां शङ्खपुष्पीं शठीं बलाम् ।
हस्तिपिप्पल्यपामार्गपिप्पलीमूलचित्रकान् ॥
भार्गीं पुष्करमूलञ्च द्विपलांशं यवाढकम् ।
हरीतकीशतञ्चैकं जलपञ्चाढके पचेत् ॥
यवैः स्विन्नैः कषायन्तम्पूतन्तच्चाभयाशतम् ।
पचेत् गुडतुलां दत्त्वा कुडवञ्च पृथग् घृतात् ॥
तैलात् सपिप्पलीचूर्णात् सिद्धशीते च माक्षिकात् ।
लेहाद्द्वे चाभये नित्यमतः खादेद्रसायनात् ॥
वलीपलितं हन्ति वर्णायुर्बलवर्द्धनम् ।
पञ्च कासान् क्षयं श्वासं हिक्कां सविषमज्वराम् ॥
हन्यात्तथार्शांस्यग्रहणीहृद्रोगारुचिपीनसान् ।
अगस्त्यविहितं श्रेष्ठं रसायनमिदं शुभम्" ॥
इत्यगस्त्यहरीतकी ॥ * ॥
"शिरसः सदने स्रावे नासाया हृदि ताम्यति ।
कासप्रतिश्यायरसे धूमं वैद्यः प्रयोजयेत् ॥
दशाङ्गुलोन्मितां नाडीं अथवाष्टाङ्गुलोन्मिताम् ।
शरावसम्पुटच्छिद्रे कृत्वाऽध्मातां विचक्षणः ॥
वैरेचनं मुखेनैव कासवान् धूममापिबेत् ।
तमुरः केवलं प्राप्तं मुखेनैवोद्वमेत् पुनः ॥
सद्यश्च तैलगाद्रिदिप्ता ह्नेष्माणमुरसि स्थितम् ।
निष्कृष्य प्रमथ्य कासं वातजं समुद्भवम्' ॥
मनःशिलालमधुकमांसीमुस्तेङ्गुदैः पिबेत् ।
धूमं तस्यानु च क्षीरं सुखोष्णं सगुडं पिबेत् ॥
एष कासान् पृथग्दोषसन्निपातोद्भवान् जयेत् ।
प्रसह्य पञ्चभिः सिद्धानन्यैर्योगशतैरपि' ॥
"मनःशिलालमरिचत्वाराक्षनकुटन्नटैः ।
वमलेपनमेवालक्षौमलक्तकरोहिषैः ॥
पूर्ववत् धूमोऽयं सानुपानो विधीयते ।
प्राक् मनःशिला तद्वत् पिप्पलीनागरं च ॥
सर्वेष्वेवोर्ध्वगौ द्वे तालमूलं मनःशिला ।
कार्पासास्थ्यश्वगन्धा च धूमः कासविनाशनः' ॥
'वैत्तिके स कफे कासे वमनं सर्पिषा हितम् ।
तथा मदनकाश्मर्यमधुककथितैर्जलैः ॥
यष्ट्याह्वफलकल्कैर्वा विदारीक्षुरसाप्लुतैः ।
घृतदोषवलं ज्ञात्वा मधुरैश्च क्रमं भजेत् ॥
पैत्ते तनुकफे कासे त्रिवृतां मधुरैर्युताम् ।
दद्याद् घनकफे तिक्तैर्विरेकार्थं युतां भिषक् ॥
'शर्करां चन्दनद्राक्षां मधुधात्रीफलोत्पलैः ।
पैत्तिकमुस्तमरिचं सकफे सघृतोऽविले ॥
मदोकाढकं तत् पिबेत् पिप्पलीमुस्तचन्दनम् ।
लेहयेन्मधुना लीढ्वा क्षीरस्य वाण्डकम्' ॥
'वक्ष्यन् वमनेरादौ शोधयेत् कफकासिनम् ।
दद्याद्वै कटुकक्षौद्रै वपन्नेयाप्यमाचरेत् ॥
पिप्पल्यादिकैर्यूषं कौलत्थं मूलकस्य च ।
लघून्यन्नानि भुञ्जीत रसैर्वा कटुकान्वितैः' ॥
कासमहाश्विस्थितश्चाप्यनेनैवास्य रसः ।
कषायो मधुकासदशा सुरसस्वासिनाय च ॥
'क्षतकासाभिभूतानां वृत्तिः स्यात् पित्तकासिकी ।
क्षीरसर्पिर्मधुप्राया संसर्गे तु विशेषणम् ॥
वातपित्तादिदोषाणां ज्ञात्वा भेदमतेरितम् ।
सैन्धवादिचूर्णं दीप्यमानं च वायुना ॥
घृताद्याशियान पाने स्यात्तो जीवनीयस्य सर्पिषः ।

सदाह कासिनो रक्तं ष्ठीवतः सबलेऽग्निके ।
मांसोचितेभ्यः कासिभ्यो लावादीनां रसा हिताः ॥
"भिन्ने क्षतदोषे तु कफे शुद्ध उरः शिरः ।
दाल्यते कासिनो यस्य सधूमान्नापिबेदिमान् ॥
द्वे मेदे मधुकं द्वे च बले ते क्षौमसक्तुके ।
वर्तिभिर्धूममापीय जीवनीयघृतं पिबेत्" ॥
"सम्पूर्णरूपं क्षयजं दुर्बलस्य विवर्जयेत् ।
नवोत्थितं बलवतः प्रत्याख्यायाचरेत् क्रियाम् ॥
"पित्ते कफे च संक्षीणे परिक्षीणेषु धातुषु ।
घृतं कर्कटकीक्षीरद्विबलासाधितं पिबेत्' ॥
"क्षतकासे च ये धूमाः सानुपाना निदर्शिताः ।
क्षयकासेऽपि तानेव यथावस्थं प्रयोजयेत्' ॥
'सन्निपातभवोऽप्येष क्षयकासः सुदारुणः ।
सन्निपातहितं तस्मात् सदा कार्यं भिषग्जितम् ॥
दोषानुबन्धयोगाच्च हरेद्रोगबलाबलम् ।
कासेष्वेषु गरीयांसं जानीयादुत्तरोत्तरम्" ॥
इति चिकित्सास्थाने २२ अध्याये चरके
क्षोक्तम् ॥ * ॥
कासस्य निदानसम्प्राप्तिलक्षणसहित प्रायश
चिकित्सितञ्च यथा —
'उक्ता ये हेतवो नृणां रोगयोः श्वासहिक्कयोः ।
कासस्यापि च ते ज्ञेयास्तत्र वोत्पत्तिहेतवः" ॥
'स वातपित्तप्रभवः कफाच्च
क्षताक्षयाच्च क्षयजोऽपरश्च ।
पञ्चप्रकारः कथितो भिषग्भिः
विवर्द्धितो यक्ष्मविकारहेतुः ॥
भविष्यतस्तस्य तु कण्ठकण्डू
र्भोज्योपरोधो गलतालुलेपः ।
स्वशब्दवैषम्यमरोचकोऽग्नि
सादश्च लिङ्गानि भवन्त्यमूनि' ॥
'हृद्रलमासाद्य भवन्ति वै
याप्यन्तनाऽभिभवन्तु कासम् ॥
हृङ्गीवचा कटफलकट्फलाब्द
धान्याभयामाग्यमराङ्गविश्वम् ।
उष्णाम्बुना हिङ्गुयुतं तु पीत्वा
शक्राग्यमप्याशु जहाति कासम् ॥
पञ्चविकव्याषविडङ्गश्रृङ्गी
रास्नावचामद्धकदेवकाष्ठैः ।
लेहः समैः क्षौद्रसिताहृताज्य
कासं निहन्यादचिराद्दुरोत्थम् ॥
पथ्या सितामागधिकाणि शृङ्गी
समागधीयामि विपूरं प्रयोगम् ।
रुपिमधुभ्यां विनिर्हतिकासी
स सैन्धवां सौवर्चलचूर्णम् ॥
खादेत्सुगुडं शार्ङ्गपिप्पलीभ्यां
द्राक्षाञ्च सर्पिर्मधुनाऽवलिह्यात् ।
द्राक्षा सिता मागधिका च तुल्याम्
सशृङ्गवेरं मधुकं तुगां च ॥
लिह्याद्घृतेन क्षौद्रयुतां समांशां
सिनोपलां वा मरिचान्वितां ताम् ।
धात्रीफलानि सितोपलाञ्च
कल्यामपि च दिवेच दद्यात् ।

हरेणुका मागधिकाश्च तुल्याम्
दध्ना पिबेत् कासगदाभिभूतः" ॥
'पिबेच्च सीधुं मरिचान्वितं वा
तेनाशु कासं प्रशमं ह्युपैति ।
द्राक्षाम्बुमञ्जिष्ठपुराङ्गशाभि
क्षीरं श्रुतं माक्षिकसम्प्रयुक्तम् ॥
निदिग्धिकानागरपिप्पलीभि
खादेच्च मुद्गान् मधुना सुसिद्धान् ।
उत्कारिकां सर्पिषि नागराढ्याम्
पक्वां समूलैर्घुटिकोपपन्नैः ॥
एभिर्निषेवेत कृताञ्च पेयाम्
तन्वीं सुशीतां मधुना विमिश्राम् ।
एतल्लीढं सर्पिर्विहितं च कृत्स्नम्
नवालकासं शमयति प्रसह्य ॥
विदारिगन्धादिकृतं घृतं वा
रसेन वा वासकजेन पक्वम् ।
विरेचनं चैत्तिकमत्र योक्तं
मात्राप्रमाणाद्गुणाह्वयं च ॥
धूमं पिबेत् चैत्तिकमप्यमत्रं
पिबेत् सुखोष्णं घृतमेव चात्र ।
हिता यवान्नञ्च रसेषु सिद्धा
यथाक्रमं लेह्या स घृतान्यथैव ॥
प्रच्छर्दनं कायशिरो विरेकाः
कायनधूमाः कवलग्रहाश्च ।
उष्णाश्च लेहाः कटुकानि चम्नु
कफे विशेषेण विशोधनं वा" ॥
'शम्बूरभार्गीमगधाप्रियाल
मधूलिकैर्नागरकैः समांशैः ।
चूर्णं सिताक्षौद्रघृतप्रगाढं
लीढं हन्ति कासानुपद्रुतमान' ॥
"प्रस्थद्वयेद्राक्षककोलमल
गुडस्य दत्त्वाऽर्धतुलां गुडस्य ॥
चूर्णीकृतैर्ग्रन्थिकपथ्याभार
कोषिकणा च प्रमाणकर्दे ।
हिङ्गुत्रिकत्रिफलादमानी
पाठाद्विधार्कविषुप्रमाढः ॥
दशा निदग्धप्रशनानि चाद्या
कर्षौ च तैलस्य पचेन्यथावत् ।
तस्मात्प्रदेद्दत्वाद्प्रमाढम्
दयेद्यथेष्टं निहन्ति यक्ष्मम् ॥
कासं गर्भं श्वयथुं विवरा
स ज्वरमकासरजेन्द्रमोषा ।
शाम्यन्ति चाद्य विरेचनाद्ये
तस्य पुंस्त्वं च वर्द्धितेन ॥
आवाहं बन्ध्यामपत्याद् स्यात्
कल्याणको नाम गुडः प्रतीतः" ॥
इति कल्याणको गुडः ॥ * ॥
"कुलीरशृङ्गी कटफलदशाला
द्विक्षारं वरमधौ श्लक्ष्णैः ॥
पचेद्घृतं तत् निवेद्यमानम्
कफं तु षन्तीति स्यात् कासान् ॥
इति सुश्रुते उत्तरतन्त्रे ५२ अध्याये ॥ * ॥

"पारदं गन्धकं शुद्धं मृतलौहञ्च टङ्गणम् ।
रास्ना विडङ्गं त्रिफला देवदारु कटुत्रिकम् ।
अमृता पद्मकं क्षौद्रं विषञ्चैव विचूर्णयेत् ।
त्रिगुणं पत्रकाणि च मैरयेन्मलाम्बुभिः' ॥
इति अमृतार्णवो रसः ॥ * ॥
"भस्मताराभ्रकान्तानां कासमात्रवटो रसैः ।
मुनिर्वैद्यतयायेन सिद्धं सर्वं प्रयत्नतः ॥
निष्कार्द्धं पित्तकासार्त्तो भक्षयेद्दिनसप्तकम् ।
पानकासादिमान्द्यञ्च ज्वरकासं निहन्ति तत्" ॥
इति पित्तकासान्तको रसः ॥ * ॥
"समुद्धं पारदं गन्धं प्रत्येकं शुक्तिसम्मितम् ।
ततः कज्जलिकां कृत्वा मर्द्दयेच्च पृथक् पृथक् ।
चित्रामिमज्जयष्टीमधुकाम्भोभिः पाटला तथा ।
मुस्ता पुनर्नवा धात्री हस्तिशुण्डी च चव्यकम् ॥
विदारी वज्रवल्ली च तथा कासमर्दः पृथक् ।
एषां रसेन तासां प्रत्येकं शाणमानकम् ॥
पलमानन्तु कुर्य्याच्च तदन्नस्तु दिनाष्टकम् ।
जातीकोषञ्च मांसी तालीशैला लवङ्गकम् ।
प्रत्येकं कोलमानन्तु चापारीरैर्विमर्द्दयेत् ।
शोधयित्वा ततः पश्चाद्विदारी रसमर्द्दितः ॥
निष्कार्द्धां वटीं खादेत्त्रिफलां मधुसंयुताम् ।
नाम्ना नित्योदयश्चायं रसो विष्णुविनिर्म्मितः ॥
पञ्च कासान्निहन्त्याशु पित्तोत्थमसमुद्भवम् ।
राजयक्ष्मामयमेहादि बहवो गुणाः" ॥
इति नित्योदयो रसः ॥ * ॥
'शुद्धं कृत्वाभ्रचूर्णं द्विगुणपरिमितं
प्राज्यमात्रं सदन्नं
कर्पूरं जातिकोषं गजकणिमिलिता
तेजपत्रं लवङ्गम् ।
मांसीतालीशचोचं प्रशकसुमगद
धान्यकोषैति तुल्यम्
पथ्याधात्री बिभीतं त्रिकटुरपि पृथक्
स्वक्षमात्रं दिशाक्षम् ॥
एषां मानीषमार्द्धं स्थितितरविधिना
शुद्धमत्रात्र कोलम्
कासार्द्धं पारदस्य प्रतिपदविहित
पिष्टमेतच्च नित्यम् ।
सार्द्धं दैवक्षाख्या परिमलपथश्च
सिद्धमुक्ताय बद्धा
प्रातःप्राशायनश्च ददन्नु मधु क्रियते
मद्वचैर्गवयम ॥
सादृश्य पीनसर्वं भ्रमसदृशदि
सिद्धमेतान् विकारान्
कासे दुष्टानिकानान् सन्मुददहन
प्राज्यसमस्तक ।
कासं श्वासं क्षयोपं बदरदरिमर्द
मैत्रमेत्र विकारान्
कण्ठाशमार्द्धनौदाय बबवागवगान्
दिव्यैरीमं विदधात् ॥
पञ्चोत्पाद्य योगमदनकरश्च
स्मार्त्तमयम्
सर्वं रोगेषु पूर्वसमधिपूर्वम्
गन्धदुग्धञ्च मृदु ।
भीतो मौक्त्यं यदेतत् क्षपितमनव्यथा
दीपमानो सम्मतः
गुञ्जाशाम्बुक्षणासौ पुनविजलप्रता
भोगेषोगारतुष्टं ।
सर्व्वं प्राकाशकादौ नच कतिपयचित्
सेवनं भोज्यमानं" ॥
इति शृङ्गाराभ्रम् ॥ * ॥
"जीर्णे सुवर्णं शौद्धं वा यत्नेनैव प्रदीयते ।
तदायं स्वर्णलोहाख्यो धात्रीभीमो न संशयः" ॥
इति धात्रीभीमो रसः ॥ * ॥
"त्रिकटु त्रिफलाधान्यं चव्यं चित्रकसैन्धवम् ।
दिव्यौषधिफलञ्चापि सम्यक्चूर्णञ्च योजयेत् ।
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वाम्बिकेश्वरीम् ।
एकैकां वटिकां खादेत् रक्तोत्पन्नरसायनाम् ।
शीतोदकेनैवापि कुलत्थस्य रसेन वा ।
निहन्ति त्रिविधं कासं दोषत्रयसमुद्भवम् ।
वातिकं पैत्तिकञ्चैव गदश्लेष्मसमुद्भवम् ।
सरक्तमथवा दुष्टं कासश्वाससमन्वितम् ॥
हृद्वायुपाण्डुरोगघ्नी तथा वह्निप्रदीपनी ।
बलवर्णकरी तथा शीतज्वरविनाशिनी ॥
इयं चन्द्रामृता नाम्ना चन्द्रनाथेन निर्म्मिता ।
वातार्त्तवर्ज्जिता नार्य्यौ मुक्ताश्च कण्टकादिका ।
भोजनाद्यैः प्रकर्त्तव्या वटिका कासशान्तये' ॥
इति श्रीचन्द्रामृता वटी । चन्द्रामृत लौहमित्यपि पाठः ॥ * ॥
'हिङ्गुलगन्धकताम्रं प्रत्येकं कार्षिकं क्षिपेत् ।
टङ्कणस्य पलं दत्त्वा मरिचस्य पलाष्टकम् ॥
त्रिकटुत्रिफलाचव्यं जातीफलसैन्धवम् ।
प्रत्येकं तोलकं ग्राह्यं छागीदुग्धेन पेषयेत् ॥
नवगुञ्जाप्रमाणेन वटिकां कारयेद्भिषक् ।
प्रातःकाले शुचिर्भूत्वा चिन्तयित्वाम्बिकेश्वरीम् ।
एकैकां वटिकां खादेत् रक्तोत्पन्नरसायनाम् ।
शीतोदकेनैवापि कुलत्थस्य रसेन वा ।
निहन्ति त्रिविधं कासं वातश्लेष्मोद्भवम् ।
सरक्तमथवा दुष्टं ज्वरश्वाससमन्वितम् ।
शूलञ्च पार्श्वशूलञ्च शीतज्वरविनाशनम् ।
चन्द्रामृतरसो नाम चन्द्रनाथेन भाषितम्" ॥
इति बृहच्चन्द्रामृतो रसः ॥ * ॥
इति वैद्यकरसेन्द्रसारसंग्रहे कासरोगाधिकारे ॥ * ॥ * ॥
अथ कासपथ्यम् ॥
"स्वेदो विरेचनं वमनं धूमपानं समाचरेत् ।
शालिषष्टिकगोधूमश्यामाकयवकोद्रवाः ॥
वास्तूकं मांसमुद्गकुलत्थानां रसाः पृथक् ।
छागीदुग्धघृतान्यांशानि विविधानि च ।
सुरा सुखोष्णं शीतवारि मधु गव्यं घृतम् ।
वास्तूकं वायसी शाकं वार्त्ताकुं बालमूलकम् ।
कण्टकारी कासमर्द्दो जीवन्ती तण्डुलीयकम् ।
द्राक्षा बिभी मातुलुङ्गं पौष्करं लशुनं हिते ।
नागरं गुडः पटोलं ... दध्याम्लं ।
शाका द्विविधनिरा च मधूकप्राणि शानि च ।
पथ्यमेतद्यथा दोषमुक्तं कासगदातुरे ॥
अथापथ्यमाह ।
"वस्तिं नस्यमसृक्स्रावं व्यायामं दन्तघर्षणम् ।
आतपं दुष्टपवनं रूक्षान्नानि निषेवणम् ।
निष्पावानि विदाहीनि रूक्षाणि विविधानि च ।
मलमूत्रोद्गारकासवमिवेगविधारणम् ।
मत्स्यं कन्दं सर्षपञ्च तुम्बीफलमुपोदिकाम् ।
दुष्टाम्बु आमपानञ्च विदाहान्यशनानि च ।
गुरूणि शीतलान्यन्न कासरोगी परित्यजेत्" ॥
इति वैद्यकपथ्यापथ्यविधौ कासरोगाधिकारः ॥*)
कासघ्नम् । इत्यमरटीकायां भरतः । शोभाञ्जन ।
इति शब्दचन्द्रिका ॥

कासकन्द, पुं, (कासहेतुः कन्दः ।) कासालुः । इति राजनिर्घण्टः ॥

कासघ्नी, स्त्री, (कासं हन्ति । कास+हन्+टक् । स्त्रियां ङीप् ।) कण्टकारी । इति शब्दचन्द्रिका ॥ (कण्टकारीशब्देऽस्या गुणादिर्विज्ञेयः ॥)

कासजित्, स्त्री, (कासं जयतीति । कास+जि+क्विप् ।) भार्गी । इति राजनिर्घण्टः ॥

कासनाशिनी स्त्री, (कासं नाशयतीति । कास+नश+णिच+णिनि ।) कर्कटशृङ्गी । इति रत्नमाला ॥

कासन्दीवटिका स्त्री, (कासं द्यति नाशयतीति । दो+क ततो ङीप् । कासन्दी वटति वेष्टि तमाशा प्रकाशते इत्यर्थः । वट+ण्वुल् । टाप् अत इत्वम् । कासन्दीवटिका इति पारिभाषिक नाम्ना ख्यायते वा ।) वेसवारविशेषः । ओला कासुन्दि इति भाषा । अस्या गुणाः । रुच्यत्वम् । वातश्लेष्मारोचकनाशित्वम् । दीपनकारित्वम् । वायुमलानुलोमकारित्वञ्च । इति राजवल्लभः ॥

कासमर्द्दः, पुं, (कासं मर्द्दयति । कास+मृद्+"कर्म्मण्यण् ।३।२।१। इति अण् ।) चेञ्जिकाख्यशिम्बिकक्षुपविशेषः । इति भावप्रकाशः । कासुन्दी इति ख्यात । गुल्मभेदे । इत्यमरटीका । कासकासुन्दा इति भाषा । तस्य पर्य्यायः । अरिमर्द्दः २ कासारिः ३ कासमर्द्दकः ४ कासः ५ कर्कशः ६ जरणः ७ दीपनः ८ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । मधुरत्वम् । कफवातश्लीर्षकासपित्तनाशित्वम् । पाचनत्वम् । कण्ठशोधनत्वम् । इति राजनिर्घण्टः ॥ अपिच । वृष्यत्वम् । लघुत्वम् । इति राजवल्लभः ॥ अस्य पत्र गुणाः । रुचिकारित्वम् । वृष्यत्वम् । कफवातविनाशित्वम् । लघुत्वम् । पाचनत्वम् । कण्ठशोधनत्वम् । विशेषतः कासघ्नत्वम् । ग्राहकत्वम् । इति राजनिर्घण्टः ॥

कासमर्द्दन पुं (कासं मर्द्दयति । कास+मृद्+णिच्+ल्युः । कासमर्द्दो वा ।) पटोलः । इति राजनिर्घण्टः ॥

कासरः, पुं, (के जले आसरति । क+आ+सृ+अच् । अलुक्समासः ।) महिषः । इत्यमरः । २।९।६१ ॥ (यथा काव्यप्रकाशे ११ ।

"आरोप्य मानिन्याः प्रमोदेन कासारकलमभूमे ।
वद्धमलि च नलिन्याः प्रभातसन्ध्यापसारयति" ॥)

कासार,पुं, (कास + "तुषारादयश्च" उणां ३।१३९ इति आरन् प्रत्ययः । कस्य जलस्य आसारो यत्र वा । अथवा कास शब्दं ऋच्छति प्राप्नोति जल गमनपतनादिकाले । ऋ + 'कर्म्मण्यण् ।३।२।१। इति अण् ।) सपद्मो निष्पद्मो वा महाजलाशयः । सरोवरः । इत्यमरः । १ । १० । २८ । (यथा — गीतगोविन्दे २ । २० ।
"दुरालोकस्तोकस्तवकनवकाशोकलतिका
विकाशः कासारोपवनपवनोऽपि व्यथयति" ॥)

कासारि, पुं (कासस्य अरिः नाशकः ।) कासमर्द । इति राजनिर्घण्टः ॥

कासालु, पुं, (कासहेतुः कासजनको वा आलुः) कन्दविशेषः । कोङ्कणदेशे प्रसिद्ध आलुविशेषः । तत्पर्य्यायः । कासकन्द २ कन्दालु ३ आलुक ४ आलु ५ विशालपत्र ६ महालु ७ । अस्य गुणाः । उष्णत्वम् । कटुवातश्लेष्मामयारोचकनाशित्वम् । स्वादुत्वम् । पथ्यत्वम् । अग्निदीपनत्वञ्च । इति राजनिर्घण्टः ॥

कासीस,क्ली, (कासं क्षुद्रकासं स्यति नाशयतीति । सो + क ।) उपधातुविशेषः । हिराकसी इति भाषा । (यथा सुश्रुते सूत्रे ३६ अध्याये ।
"कासीसकटुरोहिण्योर्गौरीकन्दश्चरिष्टयो" ॥)
तत्पर्य्यायः । धातुकासीसम् २ खेचरम् ३ धातुशेखरम् ४ । इति हेमचन्द्रः ॥ केसरम् ५ हंसलोमशम् ६ शोधनम् ७ पांशुकासीसम् ८ शुभ्रम् ९ । अस्य गुणाः । कषायत्वम् । शिशिरत्वम् । विषकुष्ठकमिरुग्मूत्रग्रहनाशित्वम् । चक्षुर्हितत्वम् । कान्तिवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ (विस्तृत विवरणमस्य काशीशशब्दे ज्ञेयम् ॥)

कासू, स्त्री, (कशति कुत्सितशब्दं गच्छतीति । कश गतौ + "गृत् कशिपद्यर्ते" ।उणां १ । ८७ । इति ऊ पृषोदरादित्वात् सत्वम् ।) विकलवाक् । शक्तिः । इति मेदिनी ॥ (कासते प्रकाशते इति कास + ऊ ।) दीप्तिः । भाला । इति शब्दरत्नावली ॥ रोगः । बुद्धिः । इति हेमचन्द्रः ॥

काहला, स्त्री, (काहला इति । पृषोदरादित्वात् अस्य कः ।) काहलावाद्यम् । इति त्रिकाण्डशेषः ॥

काहल, क्ली, (कुत्सितं अपरसमक्षं हल वाक्यं ध्वनिर्वा यत्र । विलेखनार्थकस्यापि हलधातो रन्यधातूनामनेकार्थत्वात् तथात्वम् ।) अव्यक्तवाक्यम् । इति हेमचन्द्रः ॥

काहल, पुं, (कुत्सितं यथा स्यात् तथा हलति । लिखति नखैर्भूमिमिति यावत् । हल + अच् । कोः कादेशः ।) कुक्कुटः । शब्दमात्रम् । इति मेदिनी ॥ विडालः । इति शब्दमाला ॥ ढक्का । तत्पर्य्यायः । महानादः २ । इति शब्दरत्नावली ॥

काहल, त्रि (केन जलेन आहल आरब्ध ।) शुष्कः । भृशम् । खलः । इति मेदिनी ॥

काहला, स्त्री, (कुत्सितं यथा स्यात् तथा हलति शब्दं करोति । हल + अच् टाप् च ।) वाद्यभाण्डभेदः । (ईषदपि न हलः कुत्सितः शब्दो यस्याः । कोः का देशः ।) अप्सरोविशेषः । इति मेदिनी ॥

काहलापुष्प, पुं, (काहलाकृतिरिव पुष्पमस्य ।) धुस्तूरः । इति शब्दमाला ॥

काहली,स्त्री, (कं सुखं आहलति ददातीति । आ + हल + इन् । ततो ङीप् ।) तरुणी । युवती । इति मेदिनी ॥

काहारक, पुं, (कुत्सितं शिविकादिकमाल्म्बा भीवनयाशामाहरति । आ + हृ + ण्वुल् ।) शिविकावाहकजातिः । काहार इति वेहारा इति च भाषा । यथा,—
"तथा गारुडिका वीराः क्षुरकर्म्मोपजीवकाः ।
व्याधाः काहारका दुष्टाः शय्या सवाहयन्ति ये" ॥
इति जैमिनिभारते आश्वमेधिके पर्व्वणि १ अध्यायः ॥

काही, स्त्री, (केन वायुना आहन्यते । आ + हन् + ड ङीप् । यद्वा कं सुखं आहन्ति ददाति प्रायशः इति । आ + हन + अन्तर्भावितण्यन्तात् ड । ङीप् च ।) कुटजवृक्षः । इति राजनिर्घण्टः ॥

कि र जि ज्ञाने । इति कविकल्पद्रुमः ॥ (क्रादि परं सकं सेट् ।) र वैदिकः । जि चिकेति । इति दुर्गादासः ॥

कि, व्य किम् । इति मेदिनी ॥ (यथा विष्णुपुराणे १ मांशे १७ । २४ ।
"न केवलं तात ! मम प्रजानां
स ब्रह्मभूतो भवतश्च विष्णुः ।
धाता विधाता परमेश्वरश्च
प्रसीद कोपं कुरुषे किमर्थम्" ॥)

कि, [म्] त्रि, जिज्ञासार्थम् । कि इति भाषा । सर्व्वनामकिम्शब्दस्य क्लीवलिङ्गे रूपमिदम् । इति व्याकरणम् ॥ अस्यार्थान्तराणि किम्शब्दे द्रष्टव्यानि ॥ (सर्व्वशब्दसदृशात् विद्धि । यथा, महाभारते १३ । १४८ । ८१ ।
"एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्" ॥)

किंवन्ति, स्त्री (किं + वद + भिच् ।) किंवदन्ती । इत्यमरटीकायां भरतः ॥

किंवदन्ती,स्त्री,(किम + वद + भिच् ङीप् च ।) जनश्रुतिः । सत्यमसत्यं वा लोकवादः । इत्यमरः । १ । ६ । ७ ॥ ("अस्ति किमेषा किंवदन्ती अस्माकं कुले कालरात्रिकल्पा विद्या नाम राक्षसी समुत्पत्स्यते" । इति प्रबोधचन्द्रोदयनाटकम् ॥)

किंवा, अव्य, (किम् च वा च । इति द्वन्द्वसमासः ।) विकल्पः । अथवा । तत्पर्य्यायः । उताहो २ यदि वा ३ यद्वा ४ नतु ५ । इति त्रिकाण्डशेषः ॥

किंशारु, पुं (किं किञ्चित् कुत्सितं वा शृणातीति । शॄ हिंसायां + 'किंजरयोः श्रिणः' । उणां १ । ४ । इति ञुण् ।) धान्यशूकम् । शुं । इति भाषा । इत्यमरः । २ । ९ । २१ ॥ वाणः । कङ्कपक्षी । इति मेदिनी ॥

किंशुक, पुं (किञ्चित् अल्पदेशेन शुक इव शुकतुण्डाभपुष्पत्वात् तथात्वमिति बोध्यम् ।) पलाशवृक्षः । इत्यमरः । २ । ४ । २९ ॥ (अस्य पर्य्याया यथा — भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः ।
क्षारश्रेष्ठो वातपोथो ब्रह्मवृक्षः समिद्वरः" ॥
यथा च रामायणे ६ । ६८ । ३१ ।
'ततो हतप्रभौ देहौ शुशुभाते महात्मना ।
पुष्पिताविव निष्पत्रौ यथा शाल्मलिकिंशुकौ' ॥
तत्पुष्पादयोऽपि । यथा माघके ७ ।
"रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः" ॥)
विवरणमस्यान्यत पलाशशब्दे ज्ञातव्यम् । गन्धावृक्षः । इति राजनिर्घण्टः ॥

किंशुलुक, पुं, (किंशुक + निपातनात् साधुः ।) पलाशवृक्षविशेषः । इति शब्दरत्नावली ॥

किकि, पुं (कक + इन् । पृषोदरादित्वात् आदेरित्वम् ।) किकीदिविः । इति शब्दमाला । नारिकेलः । इति राजनिर्घण्टः ॥

किकिदिवि, पुं (किकीति अस्फुटनादेन दीव्यतीति । दिव + इन् ।) चाषपक्षी । इति शब्दमाला ॥

किकीदिव पुं, (किकीति अव्यक्तशब्देन दीव्यति । दिव + क ।) चाषपक्षी । इति शब्दमाला ॥

किकीदिवि, पुं (किकी इति अस्फुटनादं कुर्व्वन् दीव्यति । "कविघृष्विच्छविस्थविकिकीदिवि" । उणां ४ । ५६ इति विन् निपातनात् सिद्धम् ।) सर्पघातकः । सोयाचडा इति भाषा । नीलकण्ठ इति ख्यातः स्यात् । इति भरतः ॥ तत्पर्य्यायः । चाष २ । इत्यमरः । २ । ५ । १६ ॥ चाष ३ किकीदीवि ४ । इति भरतः ॥ किकी ५ दिवि ६ । इति स्वामी ॥ किकि ७ किकिदिव ८ किकिदीवि ९ । इति शब्दमाला ॥ किकादिव १० स्वस्तिक ११ इति जटाधरः ॥

किकीदीवि, पुं (किकी इत्यव्यक्तशब्देन दीव्यति क्रीडति । निपातनात् दीर्घत्वे साधुः ।) चाषपक्षी । इति शब्दमाला ॥

किखि, स्त्री, (खदति हिनस्ति । खद हिंसायां निपातनात् साधुः ।) लघुशृगालः । इति हेमचन्द्रः ॥ खेँकशियालि इति भाषा ॥

किखि, पुं (किखिरिति कुत्सितशब्दं करोति इ ।) कपिः । इति भूरिप्रयोगः ॥

किङ्कर त्रि, (किं करोति । दिवाविभानिशा कि यत्तद्बहुसियत्र् ।) दासः । इत्यमरः । २ । १० । १७ । (पद्मपुराणे ।
"विप्रस्य किङ्करो भूपो वैश्यो भूपस्य भूमिप ।
सर्व्वेषां किङ्कराः शूद्रा ब्राह्मणस्य विशेषतः" ॥)

किङ्किणी स्त्री (किमपि किञ्चित् वा कणति । कण शब्दे + इन + टाप् च । पृषोदरात् साधु ।) क्षुद्रघण्टिका । घुङ्गुर इति भाषा । तत्पर्य्यायः । क्षुद्रघण्टिका २ । इत्यमरः । २ । ६ । ११ ॥ घर्घरी ३ । इति भरत ॥ किङ्किणिका ४ किङ्किणि ५ । इति शब्दरत्नावली ॥ रसना ६ प्रतिसरा ७ किङ्किणीका ८ क्षुद्रिका ९ कंकण १० । इति शब्दरत्नावली ॥ [illegible]

धरः । (यथा, महाभारते १२ । ५२ । ३१ ।
"किङ्किरातकर्णिकारो पुन्नागोऽथ कदम्बकः ।")
विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥

किङ्किरं, क्ली, (किं कुत्सितं शब्दादि किरति विक्षिपति । कॄ + क ।) गजकुम्भः । इति सारसुन्दरी ॥

किङ्किरः, पुं, (किमपि अनिर्वचनीयं मधुरास्फुटं किरति गायति । किञ्चित् किरति क्षिपति चित्तं विक्षिपति वा ।) कोकिलः । भ्रमरः । घोटकः । कामदेवः । इति शब्दमाला ॥

किङ्किरा, स्त्री, (किञ्चित् कुत्सितं वा किरति शरीरात् निःसरति । किं + कॄ + क टाप् च ।) रक्तम् । इति शब्दमाला ॥

किङ्किरातः, पुं, (किङ्किरं रक्तवर्णं अतति पुष्पकाले निरन्तरं प्राप्नोति । अत + अच् ।) अशोकवृक्षः । कामदेवः । शुकपक्षी । कोकिलः । इति शब्दमाला । रक्ताम्लानः । राङ्गा झाँटी इति भाषा । इति जटाधरः ॥ पुष्पवृक्षविशेषः । तत्पर्य्यायः । हेमगौरः २ पीतकः ३ पीतभद्रकः ४ विप्रशाखी ५ पीताम्लानः ६ षट्पदानन्दः ७ । अस्य गुणाः । कषायत्वम् । उष्णत्वम् । तिक्तत्वम् । अग्निदीपनत्वम् । कफवातशूलाध्मानशोथदाहनाशित्वम् । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः ।
'किङ्किराते हेमगौरः पीतकः पीतभद्रकः ।
किङ्किरातो हिमस्निग्धः कषायश्च सरो लघुः ।
कफपित्तपिपासास्रदाहशोथवमिक्रिमीन् ॥'
इति भावप्रकाशः ॥

किङ्किराणः, पुं, (किङ्किराय रक्तत्वाय अणति पर्य्याप्नोति । अण + अच् । किङ्किरेण रक्तत्वेनाणति वा ।) कर्म्मवृक्षः । इति वैद्यकम् ॥

किङ्किरी, [न्] पुं, (किङ्किरं रक्तवर्णपत्रमस्त्यस्य अस्य वा । किङ्किर + इनि ।) विकङ्कतवृक्षः । इति जटाधरः । बइँचि इति भाषा । (विकङ्कतशब्देऽस्य गुणादिकं ज्ञेयम् ॥)

किञ्च, अ, (किम् च, च च । द्वन्द्वसमासः ।) आरम्भः । साकल्यम् । इति मेदिनी ॥ अवान्तरम् । इति जटाधरः ॥

किञ्चन, अ, (किम् च चन च । मुग्धबोधमते तु "किमः शब्दात् चिन् चनौ ।" इति चनप्रत्ययः ।) अल्पाल्पम् । अल्पार्थम् । इत्यमरः । ३ । ४ । ३ ॥

किञ्चन, पुं, (किम् + चन् + अच् ।) [illegible] । इति शब्दरत्नावली ॥

किञ्चित्, अ, (किम् च चित् च । द्वन्द्वसमासः । मुग्धबोधमते तु "किमः शब्दात् चिन् चनौ ।" इति चित्प्रत्ययः ।) अल्पम् । ईषदर्थः । इत्यमरः २ मनाक् ३ । अल्पार्थकम् । यथा । अल्पाल्पे तु किञ्चन । इत्यमरः । ३ । ४ । ३ ।
(यथा रघुवंशे ११ ।
'किमस्य न्यूनमेव कर्म्म न तु कर्म्मप्रयोजनम् ।
दर्शितं रामचरितं किञ्चित् कौशिकेन तत् ॥')

किञ्चुलुकः, पुं, (किञ्चित् चुलुम्पति । चुलुम्प इति सौत्रधातुः । ड प्रत्ययः कन् । पृषोदरादित्वात् उप च लोपः ।) किञ्चुलुकः । इत्यमरटीका ॥

किञ्चुलुकः, पुं, (किञ्चित् चुलुम्पति । चुलुम्प् + कु + स्वार्थे कन् ।) कीटविशेषः । केंचो इति भाषा । तत्पर्य्यायः । गण्डोलः २ गण्डूपदः ३ । इत्यमरः । १ । १० । २२ । ('बाह्या दृश्याः प्रतिदिनं किञ्चुलुकाद्या यथा नराः ' । इति हारीते चिकित्सित स्थाने ५ अध्याये ॥)

किञ्जः, स्त्री, (किञ्जिद्भिः यस्य । पृषोदरादित्वात् नकारे साधु ।) किञ्जल्कम् । इति राजनिर्घण्टः ॥

किञ्जलः, पुं, (किञ्चित् जलं यत्र ।) किञ्जल्कः । इति शब्दरत्नावली ॥

किञ्जल्कः, स्त्री, (किञ्चित् जलति । जल् अपवारणे + बाहुलकात् क ।) नागकेशरपुष्पम् । पद्मभगाकारस्य कलाकाश करबाटकवकम् । केशर इति ख्यातम् । (यथा रघु १५ । ५२ ।
"स पद्मं हिमक्लिष्टकिञ्जल्कमिव पङ्कजम् ।
ज्योतिष्मच्छावमानानि बालानामपहारस्य' ॥)
तत्पर्य्यायः । मकरन्दम् २ केशरम् ३ पद्मकेशरम् ४ किञ्जम् ५ पीतपरागम् ६ गुञ्जम् ७ चाम्पेयकम् ८ । अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । कटुत्वम् । आस्यक्षतापहत्वम् । शिशिरत्वम् । कफत्वम् । विस्फोटकदाहविनाशित्वम् । इति राजनिर्घण्टः ।

किञ्जल्कः, पुं, (किम् + जल + बाहुलकात् क ।) केशरः । इत्यमरः । २ । १० । ४७ ॥ पद्मकेशरः । तत्पर्य्यायगुणाः ।
"किञ्जल्कः केशरः प्रोक्तस्तथेवस्यापि च स्मृतः ।
किञ्जल्कः शीतलो रूक्षः कषायो ग्राहकोऽपि च ।
कफपित्तदाहतृष्णार्शोविषशोथविनाशनः ।"
इति भावप्रकाशः । (वैद्यकपारिभाषिके रक्त पित्ताधिकारे दुष्टाप्रबाहे व्यवहारो यथा —
"दूर्व्वोत्पलकिञ्जल्कैः सिद्धमेतदधिपुर्तम् ।")

किट गतौ । भयभेदः । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-धातुः-सेट् ।) भीषार्थकं भयोत्पादकम् । केटति जनो व्याघ्रः जन भीषयतीत्यर्थः । इति दुर्गादासः ॥

किटिः, पुं, (केटति भयेन अति यस्य गच्छति मनाम् वा । किट्-गतौ इन् इगुपधात् कित् च ।) शूकरः । इत्यमरः । २ । ५ । २ ॥

किटिभः, पुं, (किटिरिव भाति । भा + क ।) केशकीटः । इति हेमचन्द्रः । उकुण इति भाषा ॥

किट्टं, क्ली, (केटति गच्छति धाम्यस्थानात् निर्गच्छति । क्तः इडभावः । बाहुलकात् अत्र निर्गमाद्यर्थः ।) मलः । इत्यमरः । ३ । २ । ६१ ॥
(यद्युक्तं चिकित्सायाम्
"प्रायमानस्य कायस्य सर्व मध्यापुनर्भवेत् ।
रक्तादयः षडेते तु धातवः किट्टमपि तु ॥"
अन्य कर्म्मादि बहुतरम् । यथा,—
"कल्पवारस्य इव स्यात् मासत्र्यम् मण्डरम् ।
किं पित्तकल्पं वैधं बलिशुक्रस्य शुक्रम् ।
यत्र किट्टम् वसन्त वासेन विरूयते ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

किट्टवर्ज्जम्, क्ली, (किट्टं मलं वर्ज्जयति ।)

शुल्कम् । इति हेमचन्द्रः ॥

किट्टालः, पुं, (किट्टेन मलेन अलति पर्य्याप्नोति । अल + अच् ।) ताम्रकलशः । लौहमलम् इति मेदिनी ॥

कितवः, पुं, (कित् गतौ + अच् । पृषोदरादित्वात् अत इत्वम् ।) मानमर्दयिः । निर्देशकदत्ता चिरम् । इति त्रिकाण्डशेषे कामदेवः । धुस्तूरः । शठः । इति भाषा । (यथा रघुवंशे । १९ । ३१ ।
'तदेतदाजानुविलम्बिना ते
ज्याघातरेखाकिणलाञ्छनेन ।
भुजेन रक्षापरिघेण भूमे
रपैतु योग्यं प्रमदाननेन' ॥
यथा च—वाग्भटे उत्तरस्थाने ३७ अध्याये ।
"राजकोशातकी मूलं कितवो वा मधिनोद्भवः" ॥)
धूर्तः । इति हारावली ॥

किणि, स्त्री, (किणाय तन्निवृत्तये प्रभवति । बाहुलकात् इन् ।) अपामार्गः । इति शब्दरत्नावली । (अपामार्गशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

किणिही, स्त्री, (किणं अस्त्यस्मिन् अस्य वा इति इनि । किणिना प्रकारेण हन्ति । हन् + ड । गौरादित्वात् ङीष् ।) अपामार्गवृक्षः । इत्यमरः । २ । ४ । ८८ । (अस्याः पर्य्यायान्तरं यथा —
'एतद्गिरिलाः किणिही चापि मदनकेन्द्रम्' ॥
इति वाग्भटे चिकित्सास्थाने २१ अध्याये ।
अस्याः पर्य्यायाः यथा,—
"अपामार्गश्च शिखरी ह्यधःशल्यो मयूरकः ।
मर्कटी दुरभिग्रहा चापि किणिही खरमञ्जरी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

किण्वं, क्ली, (कण + "उल्वादयश्च" । उणा ४ । ९५ ।
इति साधुः । यद्वा "कनिपदि भडीनि" । उणा २ । १५१ । इति वन् बहुलवचनादित्वम् ।) सुराबीजम् । (यथा मनुः । ८ । ३२६ ।
"सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च" ।)
पापम् । इति मेदिनी ॥

किण्वः, पुं क्ली, (कण + "कनिपदि भडीनि" उणा १ । १५१ । इति वन् बहुलवचनादित्वम् ।) सुराबीजम् । इति वाचस्पतिरविमलटीकायां भरतः ।

कित सङ्कल्पे । इच्छायाम् । वासे । व्याधौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-अक-सेट् ।) चिकित्सति गदं शल्यं इत्यत्र । अदीपि चिकित्स्यते वैद्यः । इच्छा वासाभावेन करोति वाञ्छत । तत्र निवासाय न प्रयुज्यते । इति रमानाथः । इति न अनिवासितो वर्णुभेदे विचिकित्सते । इति युधिष्ठिरप्रश्नोत्तरे शत कर्णे इत्यवसानक्रिया दर्शिता विचित्रम् । इति दुर्गादासः ॥

कित ट नि वासे । इति कविकल्पद्रुमः ॥ (जुहो-पर-सक-सेट् ।) ट तेकि । नि चिकेति । इति दुर्गादासः ॥

कितवः, पुं, (कितं वाञ्छितं कितं वाति वा । कित + वा + क ।) द्यूतकारः । (यथा मनुः । ९ । २२५ ।
'कितवान् कुशीलवान् क्रूरान् पाषण्डस्थांश्च मानवान्' ।

याचयन्ति च ये मूर्खांस्तांश्च श्राद्धे न भोजयेत्")। धूर्त्तः। इत्यमरः। २। ४। ७१॥ ("कितवाडशर्यावीर्त नागरं मदरीतकम्। चूर्णमिंत्यार्द्रकरसै" ॥ इति वैद्यकचायसंग्रहे कासाधिकारे शाम्भरीगुडिकायाम्।) मत्तः। वञ्चकः। इति मेदिनी॥ (यथा, भागवते। ८। २०। ३।

"स चाह वित्तलोभेन प्रत्याचष्टे कथं द्विजम्।
प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा"॥

धूर्त्तः। यथा, आर्य्यासप्तशती ३३।
'अस्थिरराग कितवो मानी चपलो विदूषकस्त्वमसि। मम सख्याः पतसि करे पश्यामि यथा ऋजुर्भवसि'।) खलः। इति शब्दरत्नावली। (यथा महाभारते। १। १। १५६।

"यदाश्रौषं वाससां तत्र राशिं
समाक्षिपत् कितवो मन्दबुद्धिः")

गोधूमनामगन्धद्रव्यम्। इति जटाधरः राजनिर्घण्टश्च॥

किन्तनु, पुं, (किं कुत्सिता तनुरस्य।) षट्पादः। इति त्रिकाण्डशेषः। माकडसा इति भाषा॥

किन्तमाम्, अ, (कुत्सितार्थे किम्। बहूनां मध्ये एकस्य अतिशये तमप्। "किमेत्तिङव्ययघेति"। ५। ४। ११। इति आमु।) एषैकतमम्। इति शब्दरत्नावली॥ इदमेषामतिशयेन किम्। इति व्याकरणम्॥

किन्तरां, अ, (द्वयोर्मध्ये एकस्यातिशये तरप् आमुश्च।) एषैकतरम्। इति शब्दरत्नावली॥ इदमनयो रतिशयेन किम्। किम् शब्दोऽत्र कुत्सार्थं। अतिकुत्सित रूपमित्यर्थः। इति मुग्धबोध टीकायां दुर्गादासः॥

किन्तु, अ, (किं च तु च इति द्वन्द्वसमासः।) किम्पुनः। प्रागुक्तविरुद्धार्थम्। यथा,—
"भ्रत्याभावे भवति मरणं किन्तु सम्भावितानाम्"। इति प्राचीनाः॥

किन्तुघ्न, पुं चतुर्थकरणान्तर्गतशेषकरणम्। इति दीपिका॥ तत्र जातफलम्।

"मित्रामित्रे नैव किञ्चित् विशेषो
धर्म्माधर्म्मौ तुल्यता मानवस्य।
लोके वादे सर्व्वदा प्रीतियुक्तः
किन्तुघ्नाख्ये यस्य जन्म जनिः स्यात्"॥

इति कोष्ठीप्रदीपः॥

किन्धी, [न्] पुं, (किं कुत्सिता धीरस्त्यस्य। इनि।) अश्वः। इति त्रिकाण्डशेषः॥

किन्नरः, पुं स्त्री (किं कुत्सितो नरः। अश्वमुखत्वात्।) स्वनामख्यातदेवयोनिः। स च अश्वमुखत्वात् कुत्सितनरः गायनश्च कुबेरस्य भवति। तत्पर्य्यायः। किम्पुरुषः २ तुरङ्गवदनः ३ मयुः ४। इत्यमरः। १। १। ७४॥ अश्वमुखः ५ गीतमोदी ६ हरिणनर्त्तकः ७। इति शब्दरत्नावली। (यथा —

"राक्षसाश्च पुलस्त्यस्य वानराः किन्नरास्तथा।
यक्षाश्च मनुजव्याघ्र! पुत्त्रास्तस्य च धीमतः"॥

इति महाभारते। १। ६६। ७॥)
अर्हद्‌पासकविशेषः। इति हेमचन्द्रः॥

किन्नरेशः, पुं, (किन्नराणां ईशो राजा।) कुबेरः। इत्यमरः। १। १। ७२॥

किन्नरेश्वरः, पुं (किन्नराणां ईश्वरः।) कुबेरः। इति हलायुधः॥

किन्नु, अ (किं च नु च। इति द्वन्द्वसमासः।) प्रश्नः। (यथा रामायणे। २। ७४। ३।
"किन्न तेऽदूषयद्राजा रामो वा भृशधार्म्मिकः।
ययोर्मृत्युर्विवासश्च त्वत्कृते तुल्यमागतौ"॥)
वितर्कः। (यथा शकुन्तलायां १ अङ्के।
"किन्नु खलु यथा वयमस्यामेवमियमस्मान् प्रति स्यात्"॥) स्थानम्। सादृश्यम्। करणम्। इति जटाधरः॥

किम, अ (कु+बाहुलकात् डिम्।) कुत्सा। (यथा गो रामायणे। १। २२। २१।
"देवदानवगन्धर्व्वा यक्षाः पतगपन्नगाः।
न शक्ता रावणं सोढुं किं पुनर्मानवा युधि"॥)
वितर्कः। (यथा हितोपदेशे।
"किमनुरक्तो विरक्तो वा मयि स्वामीति ज्ञास्यामि तावत्"॥) निषेधः। प्रश्नः। इति मेदिनी॥

किम त्रि क्षेपः। वितर्कः। निन्दा। परिप्रश्नः। इति मेदिनी॥ (यथा, मनु ११। १९५।
"प्रयत परिष्टच्छेत् साम्य सौम्येच्छसीति किम्"॥)
किमपि अनिर्व्वचनीयम्। यथा विष्णुपुराणे १। १९। ७५।

"तस्माच्च सूक्ष्मादिविशेषणानां
अगोचरे यत् परमात्मरूपम्।
किमप्यचिन्त्यं तव रूपमस्ति
तस्मै नमस्ते पुरुषोत्तमाय"॥)

किमिच्छकः, पुं, (किमिच्छसीति प्रश्नेन दानार्थं क्रियते व्रतं इत्यर्थे क्वन्। निपातनात् साधुः।) व्रतविशेषः। तद्विवरणं यथा —

मार्कण्डेय उवाच।
"अथ साऽब्रवीत्तिता माता वीरा वीरप्रजावती।
पुत्त्रेऽह्नि समाहूय प्राह पुत्त्रमवीक्षितम्॥
पुत्रानुगभ्यनुज्ञाता तव पित्रा महात्मना।
उपवासं करिष्यामि दुष्करोऽयं किमिच्छकः॥
स चायत्तस्तव पितुस्त्वया साध्यो मयापि वा।
प्रतिज्ञाते त्वया पुत्र! ततस्तत्र यताम्यहम्॥
इत्यस्याश्च महाकोषात् तव दास्याम्यहं पितुः।
धनं तं पितुरायत्तमनुज्ञातास्मि तेन च॥
क्लेशसाध्यो समारम्भः स हि स्वैरो भविष्यति।
साध्यो भविष्यो यदि ते कश्चिद्बलपराक्रमैः॥
स ते साध्योऽन्यथा वापि दुःसाध्यो भविष्यति।
तस्य प्रतिज्ञा कुरुषे यदि पुत्राच वै व्रते॥
तदेतदनुमारप्स्ये करुणा दमन तव।
अवीक्षिदुवाच।
वित्तं मे पितुरायत्तं ममदाम न तत्र वै।
दमच्छरीरनिष्पाद्यं तत् करिष्ये त्वयोदितम्॥
किमिच्छक व्रत मातर्निर्विश युक्ताः किं मां।
राज्ञा पित्राभ्यनुज्ञातः यदि ॥

मार्कण्डेय उवाच।
ततः सा राजमहिषी तद्व्रतं समुपोषिता।
यथोक्तं साऽकरोत् पूजां राजराजस्य भक्तिता॥
निधीनामप्यशेषाणां निधिपालगणस्य च।
लक्ष्म्याश्च परया भक्त्या यतवाक्कायमानसा॥
विविक्ते तु गृहान्तस्थः सोऽथ राजा करन्धमः।
आसीन उक्तः सचिवैर्नीतिशास्त्रविशारदैः॥

सचिवा ऊचुः।
राजन् वय परिणत सर्व्वं शासतो महीम्।
एकस्ते तनयोऽवीक्षित् व्यक्तदारपरिग्रहः॥
अपुत्र स वने निष्ठां यदा भूप! गमिष्यति।
तदारिपक्ष पृथिवी निश्चितं तव यास्यति॥
वंशस्त्वयस्ते भविता पिण्डपिण्डोदकक्षयः।
पितरश्च ते विवरं क्रिया चान्या भविष्यति॥
तस्मात् कुरु तथा भूप! यथा ते तनयः पुनः।
करोति सततं बुद्धिं पितृणामुपकारिणीम्॥

श्रीमार्कण्डेय उवाच।
एतस्मिन्नन्तरे शब्दं शुश्राव जगतीपतिः।
पुरोहितस्य वीराया गदतोऽर्थिजनं प्रति॥
कः किमिच्छति दुःसाध्यं कस्य किं साध्यतामिति।
करन्धमस्य महिषी किमिच्छकमुपोषिता॥
राजपुत्रोऽप्यवीक्षित्तु श्रुत्वा पौरोहितं वचः।
प्रत्युवाचार्थिनं सर्व्वान् राजद्वारमुपागतान्॥
मया साध्यं शरीरेण यस्य किञ्चित् भवोत् सः।
मम माता महाभागा किमिच्छकमुपोषिता॥
शृण्वन्तु मेऽर्थिनः सर्व्वं प्रतिज्ञातं मयात्र च।
किमिच्छथ ददाम्येव क्रियमाणे किमिच्छके॥

मार्कण्डेय उवाच।
ततो राजा निशम्यैतत् वाक्यं पुत्त्रमुखाच्च्युतम्।
समुपेत्याब्रवीत् पुत्रमहमर्थी प्रयच्छ मे॥

अवीक्षिदुवाच।
दातव्यं यन्मया तात! भवते तद्ब्रवीहि माम्।
सकाय्यं दुष्करं वा ते साध्यं दुःसाध्यमेव च॥

राजोवाच।
यदि सत्यप्रतिज्ञस्त्वं ददासि च किमिच्छकम्।
पौत्रस्य दर्शय मुखं ममोत्सङ्गगतस्य तत्॥

अवीक्षिदुवाच।
अहं तवैव तनयो ब्रह्मचर्य्यश्च मे नृप।।
न मे पुत्रोऽस्ति पौत्रस्य दर्शयामि कथं मुखम्॥

राजोवाच।
पापाय ब्रह्मचर्य्यं ते यदिदं भाषसे तदा।
तस्मात्त्वं मोचयात्मानं मम पौत्रं प्रदर्शय॥

अवीक्षिदुवाच।
विरमाज्ञाम्यहारात! यन्न्यायात् समर्थ च।
वैराग्यं मया तात! योषित्सङ्गो गतार्चता रता॥

राजोवाच।
बहुभिर्दुःखमावल्य न हृतो वै किमिच्छया।
तथापि यदि वैराग्यमुपैषि तदचिन्तयन्॥
किं वा नो बहुनोक्तेन ब्रह्मचर्य्यं परित्यज।
मातुरत्न किमिच्छका बहुपौत्रं मम दर्शय॥

मार्कण्डेय उवाच।
यदा स बहुशस्तेन प्रोक्तः पुत्रो

शाम्यत प्राप्यते किञ्चित् सदा प्रसोऽभोत् पुन ।
"व्या किङ्किङ्कर स्व प्राप्तोऽद्य तात । मद्गृहम् ।
तत् करिष्यामि निःक्षोभ्या दारपरिग्रहम् ।
किन्तु समस्त विज्ञित पतितो धरणीतले ।
स्वापत्निर्जिता भूपकालीनतिदक्षरम् ।
तथापि किं करोम्यद्य मनसापाशसङ्कुलः ।
करिष्यामि यथायुक्त त्व मुच्यतां नित्यशासनम् "।
इति श्रीमाकण्डेयपुराणे मार्कण्डेयविवदामा
ध्याय ।

किमु, ध (किम् च उच इति द्वन्द्वसमासः ।) सम्भा
वना । विमर्श । इति मेदिनी । (यथा —
"निस्वादयौषे किमुतैकनाम" इति शिशोक्ति ।)

किमुत, अ, (किम् च उत् च इति द्वन्द्वसमासः ।)
प्रश्न । वितर्क । विकल्प । अतिशय । इति
मेदिनी ।

किम्पचा, त्रि, (किं कुत्सितं अतिथ्यादिभ्योऽप्रदाय
केवल मोदरमात्रपूरणाय पचति । किम् +
पच + अच ।) किम्पचान । इत्यमरटीकायां राय
मुकुट ।

किम्पचान, त्रि, (किं कुत्सित कर्मैव किञ्चिदपि न दत्वा
केवल आत्मार्थ पचति । पच + शानच ।)
कृपण । इत्यमर । ३ । १ । ४८ ।

किम्पाक, त्रि, (किं कदर्थोऽपि पाक ज्ञानपरिणामो
यस्य ।) अज्ञानितः । इति जटाधर ।

किम्पाक, पु, (कुत्सित पाक परिणामो यस्य ।)
महाकालफल । इति रत्नमाला । माकाल इति
भाषा । (यथा, रामायणे २ । ६६ । ६ ।
"न नूनं नृपते रामात् किम्पाकमिव भक्षणम्" ।
महाकालशब्देऽस्य विवरण ज्ञातव्यम् ।)

किम्पुरुष, पु, (कुत्सित पुरुष ।) किन्नर । इत्य
मर । १ । १ । ७४ । (यथा कुमारे १ । १४ ।
"युषाससामुत्कलितम्बहानि
विद्यास्य किम्पुरुषसुन्दरीणाम्" ।)
लोकभेद । इति मेदिनी । (अविपुत्रस्य नवपुत्रा
णामेक । यथा, विष्णुपुराणे २ । १ । १८ १९ ।
"जम्बुद्वीपेश्वरो यस्तु आग्नीध्रो मुनिसत्तम ।
तस्य पुत्रा बभूवुस्ते प्रजापतिसमा नव ।
नाभि किम्पुरुषश्चैव हरिवर्ष इलावृत " ।
हेमकूटं ददौ तस्य किम्पुरुषाय सः ।)
किम्पुरुष इति नाम यस्य वर्षस्य ।) जम्बूद्वीपस्य नव
वर्षान्तर्गत हिमालयहेमकूटयोर्मध्यवर्ति वर्षम् ।
इति कालीदासम् । कुत्सितपुरुष । इति मुग्ध
बोधटीका ।

किम्पुरुषेश्वर, पु, (किम्पुरुषाणां ईश्वर स्वामी
राजा वा ।) कुबेर । इति हेमचन्द्र ।

किम्प्रभु, पु, (किंप्रभुः कुत्सित प्रभु ।)
किम्पुरुषाणाम् । इति त्रिकाण्डशेष ।

किम्मत, स्त्री, (किञ्चित् विमति । किम् + मन +
क्त ।) कर्मीभावकारणम् । इति शब्दचन्द्रिका ।

किय, त्रि, किं परिमाणमस्य (किमिदम्भ्यां व घ"
सूत्र ४० इति वतुप् । किम क्यादेश । वस्य घ ।)
किञ्चित् परिमाण यस्य । कत इति भाषा ।

("रम्भाद्यास्ति कियदिष्यमपरं सुयत्ना" ।
इति साहित्यदर्पणम् ।)

कियद्देतिका, स्त्री, उत्साह । उद्योग । इति
हेमचन्द्र ।

कियाहः, पु, (कियान् रक्तवर्ण इव । पृषोद
रादित्वात् निपातनात् साधु ।) रक्तवर्णघोटक ।
इति हेमचन्द्र ।

किरः, पु, (किरति विक्षिपति मृत्तोपरिस्थितद्रव्यम् ।
कृ + क ।) शूकरः । इत्यमरः । २ । ५ । २ ।

किरक, पु, (किरति लिखतीति । कृ + ण्वुल् ।)
लेखक । इति त्रिकाण्डशेष ।

किरण, पु (कीर्य्यते विक्षिप्यते रश्मि अस्मात्
"कृपृवृजिमन्दिनिधाञ्भ्यः क्यु" । उणां २ । ८१ ।
इति क्यु ।) सूर्य । इति हेमचन्द्र । (कीर्य्यते
परितः क्षिप्यतेऽसौ । कॄ + कर्मणि क्यु ।) सूर्य्य
रश्मिरिति भानुरमाधवौ । चन्द्रसूर्याग्निरश्मि
रिति रायमुकुटः । रश्मिमात्रे तत्प्रयोगो
गान् सामान्यरश्मि । तथा च भट्टि । १ । ६ ।
"उद्गच्छमानमतिभिया" । इति मञ्जरी ।
इत्यमरटीकासारसुन्दरी । तत्पर्याय । अंशु २
रश्मि ३ वसु ४ गभस्ति ५ घृणि ६ धृष्णि ७
भानु ८ कर ९ मरीचि १० दीधिति ११ ।
इत्यमर । १ । ३ । ३३ । त्विट् १२ द्युति १३ आभा
१४ प्रभा १५ विभा १६ रुक् १७ रुचि १८ भा
१९ छवि २० दीप्ति २१ रश्मि २२ प्रकाश २३
मह २४ ज्योति २५ शोच २६ शोचि २७
अर्चि २८ शिखा २९ द्युम्न ३० प्रकाश ३१
आतप ३२ धाम ३३ । इति शब्दरत्नावली ।
पाद ३४ आलोक ३५ वसु ३६ घृणि ३७
भास ३८ द्युम्न ३९ त्विष ४० अर्चि ४१ भान
४२ दीधिति ४३ हेति ४४ धाम ४५ वध ४६
शुष्म ४७ तप ४८ ओजस ४९ । इति जटाधर ।
(यथा, रघुवंशे ५ । ७४ ।
"भवति विरलभक्तिर्म्लानपुष्पोपहारः
स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः" ।)

किरणमाली, [न्] पु (किरणानां माला अस्त्यस्य ।
किरणमाला + इनि ।) सूर्य । इति हारावली ।

किरात, पु, (किरं पर्वतप्रान्तादिनिम्नोच्चस्थानभूमि
अतति सतत गच्छतीति । अत + अच् । यद्वा
किर शूकरादिक अतति हिनस्तीति । अच ।)
म्लेच्छभेद । (निषाद । यथा, किराते १२ । ५१ ।
"कथ्यहासि सुरमर्दितो निधाय सेना
सन्दीता न कतिपयै किरातवर्यै " ।)
भूनिम्ब । (यथा, सुश्रुते मध्यमस्य च ।
१० दाके ।
"द्राक्षाभयारग्वधकिरातैः क्वाथित कथम् ।
द्राक्षादमिद क्षेत्रं वातपित्तज्वरापहम् ।")
अल्पतनु । इति मेदिनी । घोटकरक्षक ।
इति शारदा ।

किरातक, पु, (किरात इव । स्वार्थे कन् ।) भूनिम्ब ।
इति रत्नविमल ।

किरातनिक्त, पु (किरात भूनिम्बवत् तिक्त ।)
तृणविशेष । चिराता इति भाषा । तत्पर्याय
भूनिम्ब २ अनार्यतिक्त ३ । इत्यमर । २ । ४ ।
१४३ । कैरातम् ४ काण्डतिक्तक ५ । इति रत्न
माला । किरातक ६ इति जटाधर । चिरतिक्त
७ चिरात्तिक्त ८ तिक्तक ९ सुतिक्तक १० ।
इति शब्दरत्नावली । कटुतिक्त ११ रामसेनक
१२ । अस्य गुणा । वातश्लेष्मापित्तत्वम् । कफश्वास
कासपित्तास्रदाहशोथघ्न । इति राजवल्लभ ।
"किरातको ज्ञेयो भूनिम्ब कासतिक्तो ज्वरान्तक ।
किराता सारको रूक्ष शीतस्तिक्तो लघुः ।
सन्निपातज्वरश्वासकफपित्तास्रदाहनुत् ।
कासशोथतृषाकुष्ठज्वरव्रणकृमिप्रणुत्" ।
इति भावप्रकाश । तस्य विस्तारितगुणादयो
भूनिम्बशब्दे द्रष्टव्यो ।
("किराततिक्तमस्तमे द्राक्षामामलकी शटी ।
निम्बार्द्धं पिप्पलीमूले क्वाथं वा मधुना पिबेत्" ।
इति चक्रपाणिसंग्रहे ज्वराधिकारे ।)

किराताशी, [न्] पु, (किरातान् निषादान् च
अश्नातीति । अश भोजने + णिनि ।) गरुड ।
इति शब्दरत्नावली । (अस्य विवरण यथा महा
भारते १ । २८ अध्याये ।
"इत्युक्तो गरुड सर्वज्ञो मातरमब्रवीत् ।
गच्छाम्यमृतमाहर्तुं भक्ष्यमिच्छामि वेदितुम् ।
विनतोवाच ।
समुद्रकुक्षावेकान्ते निषादालयमुत्तमम् ।
निषादानां सहस्राणि तान् भुक्त्वामृतमानय ।
न च ते ब्राह्मण हन्तुं कार्या बुद्धि कथञ्चन" ।)

किराति, स्त्री, (किरे कन्दरात् अवनिदेश अटति
गच्छतीति । अत + इन् ।) गङ्गा । इति जटाधर ।

किराती, स्त्री, (किरातवेशे उपाधिधारिणी
स्त्रीया । इति । ङीप् ।) जटामांसी । इति
शब्दरत्नावली । (जटामांसीशब्देऽस्या गुणादि
ज्ञेय ।)

किरातिनी, स्त्री (किराति + वा ङीष् ।) दुर्गा । वरा
कुट्टिनी । इति मेदिनी । चामरग्राहिणी । इति
शब्दमाला ।

किरि, पु, (किरति भूमिमिति । "कृगृशृपृकुटिभिदिच्छिदिभ्यश्च" । उणां ४ । १४२ । इति
इन्प्रत्ययः ।) शूकर । इत्यमर । २ । ५ । २ ।

किरिटि, स्त्री (किरिणा शूकरेण टकति निःसरति
। टक बन्धने + डि ।) हिन्तालवृक्षम् । इति
त्रिकाण्डशेष ।

किरीट, पु क्ली, (किरति कीर्यते वा "कृतॄकृपिभ्य कीटन्" । उणां ४ । १८४ । इति
कीटन् ।) मुकुट । इत्यमर । २ । ६ । १ । ?

किरीटी, [न्] पु (किरीटोऽस्त्यस्य । किरीट +
इनि ।) अर्जुन । इति त्रिकाण्डशेष ।
(यथा, महाभारते ४ । ४४ । १५ ।
"पुरा शक्रेण मे दत्त युध्यतो दानवै सह ।
किरीटं मूर्ध्नि सूर्य्याभं तेनाहुर्मां किरीटिनम्" ।)
किरीटयुक्ते त्रि । (यथा, महाभारते १ । १४ ।
"किरीटिनं गदिनं चक्रिणञ्च तेजोराशिं सर्वतो"

दीप्तिमन्तम् । प्रज्वलितं त्वां दुर्निरीक्ष्यं समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम्" ॥)

किर्म्मी, स्त्री, (कृ + मि + निपातनात् मुट् । ततो ङीप् ।) पलाशः । गृहम् । स्वर्णपुत्तलिका । इति मेदिनी । लौहपुत्तलिका । इति विश्वः ॥

किर्म्मीरः, पुं, (कृ + गम्भीरादित्वात् ईरन् निपातनात् साधु ।) नागरङ्गवृक्षः । राक्षसविशेषः । (यथा महाभारते ३ । ११ । २२ ।
"प्रत्युवाच ततश्चो धर्म्मराजं युधिष्ठिरम् ।
अहं वकस्य वै भ्राता किर्म्मीर इति विश्रुतः" ॥)
कर्व्वुरवर्णः । इति मेदिनी ॥ तद्वर्णयुक्ते त्रि । इत्यमरः । १ । ५ । १७ ॥

किर्म्मीरजित्, पुं, (किर्म्मीरं जितवान् । जि + भूते क्विप् ।) भीमसेनः । इति त्रिकाण्डशेषः ॥ (किर्म्मीरवधकथा महाभारते ३ । ११ अध्याये उक्ता । तद्यथा,—
"प्रत्युवाच ततश्चो धर्म्मराजं युधिष्ठिरम् ।
अहं वकस्य वै भ्राता किर्म्मीर इति विश्रुतः ।
वनेऽस्मिन् काम्यके शून्ये निवसामि गतज्वरः ।
युधि निर्जित्य पुरुषानाहारं नित्यमाचरन् ॥
के यूयमभिसम्प्राप्ता भक्ष्यभूता ममान्तिकम् ।
युधि निर्जित्य वः सर्व्वान् भक्षयिष्ये गतज्वरः" ॥
वैशम्पायन उवाच ।
"युधिष्ठिरस्तु तच्छ्रुत्वा वचस्तस्य दुरात्मनः ।
आचचक्षे ततः सर्व्वं गोत्रनामादि भारत ।" ॥
"किर्म्मीरस्त्वब्रवीदेनं दिष्ट्या देवैरिदं मम ।
उपपादितमद्येह चिरकालान्मनोगतम् ॥
भीमसेनवधार्थं हि नित्यमभ्युद्यतायुधः ।
चरामि पृथिवीं कृत्स्नां नैनमासादयाम्यहम् ॥
सोऽयमासादितो दिष्ट्या भ्रातृहा काङ्क्षितश्चिरम् ।
अनेन हि मम भ्राता वको विनिहतः प्रियः ॥
वेत्रकीयगृहे राजन् ! ब्राह्मणच्छद्मरूपिणा ।
विद्याबलमुपाश्रित्य न ह्यस्त्यस्यौरसं बलम्" ॥
"यदि तेन पुरा मुक्तो भीमसेनो वकेन वै ।
अद्यैनं भक्षयिष्यामि पश्यतस्ते युधिष्ठिर !" ॥
"एवमुक्तस्तु धर्म्मात्मा सत्यसन्धो युधिष्ठिरः ।
नैतदस्तीति सक्रुद्धो भर्त्सयामास राक्षसम् ॥
ततो भीमो महाबाहुरारुज्य तरसा द्रुमम् ।
दशव्याममथोद्विद्धं निष्पत्रमकरोत्तदा" ॥
"किर्म्मीरश्चापि अहसा वृक्षमुत्पाट्य पाण्डवम् ।
दण्डपाणिरिव क्रुद्धः समरे प्रत्यधावत" ॥
"तावन्योन्यं समाश्लिष्य प्रकर्षन्तौ परस्परम् ।
उभावपि चकाशेते प्रबद्धौ वृषभाविव ॥
तयोरासीत्सुतुमुलः सम्प्रहारः सुदारुणः ।
नखदंष्ट्रायुधवतोर्व्याघ्रयोरिव दीप्तयोः" ॥
"तयोर्भुजविनिष्पेषादुभयोर्बलिनोस्तदा ।
शब्दः समभवद्घोरो वेणुस्फोटसमो युधि ॥
अथैनमाक्षिप्य बलाद्गृह्य मध्ये वृकोदरः ।
धूनयामास वेगेन वायुश्चण्ड इव द्रुमम् ॥
स भीमेन परामृष्टो दुर्ब्बलो बलिना रणे ।
व्यस्पन्दत यथा प्राणं विचकर्ष च पाण्डवम् ॥
तत एनं परिश्रान्तमुपलक्ष्य वृकोदरः ।
योक्त्रयामास बाहुभ्यां पशुं रशनया यथा ।
विनदन्तं महानादं भिन्नभेरीसमस्वनम् ।
भ्रामयामास सुचिरं विस्फुरन्तमचेतसम् ॥
तं विषीदन्तमाज्ञाय राक्षसं पाण्डुनन्दनः ।
प्रगृह्य तरसा दोर्भ्यां पशुमारममारयत् ॥
अथ जर्जरसर्व्वाङ्गं व्याविद्धनयनाम्बरम् ।
भूतले भ्रामयामास वाक्यञ्चेदमुवाच ह ।
हिडिम्बवकयोः पाप ! न त्वमश्रुप्रमार्जनम् ।
करिष्यसि गतश्चापि यमस्य सदनं प्रति ॥
इत्येवमुक्त्वा पुरुषप्रवीर-
स्तं राक्षसं क्रोधपरीतचेताः ।
विस्रस्तवस्त्राभरणं स्फुरन्त-
मुद्भ्रान्तचित्तं व्यसुमुत्ससर्ज" ॥ * ॥)

किर्म्मीरत्वक् [च्] स्त्री, (किर्म्मीरा चित्रा त्वक् यस्य ।) नारङ्गवृक्षः । इति त्रिकाण्डशेषः ॥ (नारङ्गनागरङ्गशब्दयोरस्या गुणादयो बोध्याः ॥)

किर्म्मीरभित् [द्] पुं, (किर्म्मीरं राक्षसविशेषं भिन्नवान् । भिद् + क्विप् भूते ।) भीमसेनः । इति भूरिप्रयोगः ॥ (अस्य विवरणं किर्म्मीरजित् शब्दे द्रष्टव्यम् ॥)

किर्म्मीरसूदन, पुं, (किर्म्मीरं सूदयति हन्तीति । सूद + णिच् + ल्युः । कर्त्तृविवक्षावशात् क्वचिद् भूतार्थे वा ।) भीमसेनः । इति हेमचन्द्रः ॥ (अस्य विवरणं किर्म्मीरजिच्छब्दे द्रष्टव्यम् ॥)

किल क क्षुदौ । इति कविकल्पद्रुमः ॥ (चुरा-पर-सक-सेट् ।) क केलयति । लुदिरिति गुर औप् प्रेरणे इत्यस्य चौरादिककिप्रत्यये रूपम् । इति दुर्गादासः ॥

किल श श्वैत्ये । क्रीडे । इति कविकल्पद्रुमः ॥ (तुदां-परं-अक-सेट् ।) श किलति प्रासादः शिशुर्व्वा । केलिता । इति दुर्गादासः ॥

किल, अ, (किल + कः ।) वार्त्ता । सम्भाव्यम् । इत्यमरः । ३ । ३ । २५१ ॥ निश्चयः । इति तट्टीका सारसुन्दरी ॥ (यथा शाकुन्तले १म अङ्के दुष्मन्तोक्तिः ।
"इदं किलाव्याजमनोहरं वपु-
स्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति" ॥)
अनुनयार्थम् । इति मेदिनी ॥

किलकिञ्चित, क्ली (किल अलीकेन किं इयत् चित रचितम् ।) हावः । शृङ्गारभावजा क्रिया । इति जटाधरः ॥ तस्य लक्षणम् ।
यथा, अलङ्कारकौस्तुभे ।
"गर्व्वाऽभिलाषरुदितस्मितासूयाभयक्रुधाम् ।
सङ्करीकरणं यत् स्यादुच्यते किलकिञ्चितम्" ॥
(तथा च साहित्यदर्पणे ३ । १ ८ ।
"स्मितशुष्करुदितहसितत्रासक्रोधश्रमादीनाम् ।
साङ्कर्य्यं किलकिञ्चितमभीष्टतमसङ्गमादिजाद्धर्षात्" ॥
उदाहरणं तत्रैव यथा —
"पाणिरोधमविरोधितवाञ्छं
भर्त्सनाश्च मधुरस्मितगर्भाः ।
कामिनः स्म कुरुते करभोरु-
र्हारि शुष्करुदितञ्च सुखेऽपि" ॥)

किलकिला, स्त्री, (किल + कः । प्रकारे वीप्सायां वा द्वित्वम् । स्त्रियां टाप् ।) हर्षध्वनिः । किलकिल शब्द इति यावत् । तत्पर्य्यायः । हर्षस्वनः २ । इति त्रिकाण्डशेषः ॥
("आसीत् किलकिलाशब्दस्तस्मिन् गच्छति पार्थिवे" । इति महाभारते १ । ६८ । ६ ॥)

किलाट, पुं क्षीरविकृतिः । इति जटाधरः ॥ दधिकूर्च्चिकातक्रकूर्च्चिकयोः पिण्डः । अस्य गुणाः । शीतत्वम् । स्निग्धत्वम् । गुरुत्वम् । गौल्यत्वम् । रुच्यत्वम् । पित्तापहत्वञ्च । इति राजनिर्घण्टः ॥
("नष्टदुग्धस्य पक्वस्य पिण्डः प्रोक्तः किलाटकः" । इति भावप्रकाशः । तथा चरके सूत्रस्थाने । २७ अध्याये ।
"पीयूषो मोरटश्चैव किलाटा विविधाश्च ये ।
दीप्ताग्नीनामनिद्राणां सर्व्व एते सुखप्रदाः ।
गुरवस्तर्पणा वृष्या वृंहणा पवनापहाः" ॥
अस्योत्पत्तिविवरणं यथा । भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ किलाटकः शिशिरी इति लोके ।
"अपक्वमेव यत् क्षीरशाकं हि तत्पयः" ।
क्षीरशाकं छुचिमरा इति लोके ।
"दध्ना तक्रेण वा नष्टं दुग्धं बद्धं सुवाससा ।
द्रवभावेन सहितं तक्रपिण्डः स उच्यते ॥
नष्टदुग्धभवं नीरं मोरटञ्चात्रकोऽब्रवीत् ।
पेयूषञ्च किलाटञ्च क्षीरशाकं तथैव च ।
तक्रपिण्ड इमे वृष्या वृंहणा बलवर्द्धनाः ।
गुरवः श्लेष्मला हृद्या वातपित्तविनाशनाः ।
दीप्ताग्नीनां विनिद्राणां विदग्धौ चाभिपूजिताः ।
मुखशोषभ्रमदाहक्षतपित्तज्वरप्रणुत्" ॥)

किलाटी, स्त्री, (किलाट + गौरादित्वात् ङीष् ।) क्षीरविकृतिः । तत्पर्य्यायः । कूर्च्चिका २ । इति हेमचन्द्रः ॥ (कूर्च्चिकाशब्देऽस्या गुणपर्य्याया ज्ञातव्याः ॥)

किलाटी, [न्] पुं (किलतीति । किल + कः । अट + णिनि । ततः । किलश्चासौ आटी चेति कर्म्मधारयः । यद्वा किलमटतीति ।) वंशः । इति धारावली ॥ बाँश् इति भाषा ॥

किलास, क्ली, (किल वर्णं अस्यति क्षिपति विकृतिं करोति इति यावत् । किल + अस + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) रोगविशेषः । कुष्ठ इति भाषा । तत्पर्य्यायः । सिध्म २ । इत्यमरः । २ । ६ । ५३ ॥ सिध्मम् ३ । इति भरतः ॥ सकुष्ठकम् ४ त्वक्पुष्पी ५ । इति हेमचन्द्रः ॥
("कुष्ठैकसम्भवं श्वित्रं किलासं दारुणं तत् ।
निर्द्दिष्टमपरिस्रावि त्रिधातूद्भवसंश्रयम् ॥
वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत् ।
सदाहं रोमविध्वंसि कफाच्छ्वेतं घनं गुरु ॥
सकण्डु च क्रमाद्रक्तमांसमेदःसु चादिशेत् ।
वर्णेनैवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरम् ॥
अशुक्लरोमाबहुलमसंसृष्टं मिथो नवम् ।
अनग्निदग्धजं साध्यं श्वित्रं वर्ज्ज्यमतोऽन्यथा" ॥

इति वाभटे निदानस्थाने १४ अध्याये ।
अस्यौषधं यथा ।
"कुष्ठं समाक्ष्य गदिम समन त्रिफ सकाष्ठीगम् ।
मैदेन पुनर्नवचित्र समाह भागे सार्धे ।
तेनाग्निर् विश्व समाहाहेति विषको वर्म्मे ।
माषाद्य किलास मान सुरा विसृहतमो" ।
इति चिकित्सेय ।०।
"किलासहमा सुनाग्धावमृतानि माषा च ।
गोपितमव्रते दे पिबन्त्य कासरोपरजः" ।
इति चिन्ये प्रबेप ।
"दारणं चारुष श्विम किलास नामभिस्त्रिभिः ।
विज्ञेय त्रिविध तच्च त्रिदोषं प्रायशश्च तत् ।
मेषे रक्ताश्रिते रक्तं ताम्रं मांससमाश्रिते ।
श्वेत मेद श्रिते श्विमं गुरुता चोत्तरोत्तरम्" ।
असाध्यसाध्यत्वमस्य यथा,—
"गत्परस्परतो भिन्न बहु यद्रक्तलोमवत् ।
यच्च वर्षगणोत्पन्न तच्चित्र नैव सिध्यति" ।
अस्य निदानं यथा,—
"वचांस्यतथ्यानि कृतघ्नभावो
निन्दा सुराणां गुरुधर्षणञ्च ।
पापक्रिया पूर्व्वकृतञ्च कर्म्म
हेतुः किलासस्य विरोधिचान्नम्" ।
इति चरके चिकित्सास्थाने ९ अध्याये ।)

किलासघ्नः, पुं, (किलास हन्तीति । हन् + टक् ।) क्षुपविशेषः । कांकरोल इति भाषा । तत्पर्य्याय । कर्कोटकः २ तिक्तपत्र ३ सुगन्धक ४ । इति हेमचन्द्रः । (कर्कोटकशब्देऽस्य गुणपर्य्यायादा ज्ञेयाः ।)

किलासी, [न्] त्रि, (किलास मस्त्यस्येति इनिः ।) किलासरोगयुक्तः । तत्पर्य्यायः । सिध्मलः २ । इत्यमरः । २ । ६ । ६१ ।

किलिच, स्त्री, (किलतीति । किल + इन् । किलि चिनोतीति । चि + डः । पृषोदरात् साधुः ।) सूक्ष्मदारु । इति जटाधरः । किलिञ्जमिति च पाठः ।

किलिञ्ज, पुं, (किलिनो जायते । जन + ड । पृषोदरादित्वात् मुमन्तः ।) सूक्ष्मदारु । इति त्रिकाण्डशेषः । (क्वचित् सकटकत्वमपि दृश्यते ।)

किलिञ्जक, पुं, ((किलिञ्ज + स्वार्थे कः ।) कटादि रज्जुः । देश कुटुम्ब वेष्टते कुटुम्बस्य महाविदिरिति टीकान्तरम् । इत्यरविन्दाञ्चे इति भरत इत्यमरटीकायां भरत ३ । तत्पर्य्याय । कटः २ । इत्यमरः । २ । ८ । २६ ।

किलिम, क्ली, (किल + इमन् ।) देवदारु । इति शब्दरत्नावली राजनिर्घण्टश्च ।
("सरिच विम्बीमूल मधुमार्कण्डिसमप्ती ।
शरक किलिम त्रिवृ मार्कतिमौषधीयमी" ।
इति चरके कल्पस्थाने ७ अध्याये ।)

किल्विष, क्ली, ("किलेर्बुक् च" । उणां १ । ५१ इति टिषच् बुगागमश्च ।) पापम् । अपराधः । इत्यमरः । ३ । ३ । २२२ । (यथा गीतायाम् ३ । १३ ।
"यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्व्वकिल्विषैः" ।)
रोगः । इति मेदिनी ।

किल्वी, [न्] पुं, (किल् + मत्वर्थे इन् सन्धेरुत्पर्थे वाहुलकात् विनिः ।) घोटकः । इति त्रिकाण्डशेषः ।

किशर, क्ली पुं, (किञ्चित् शृणाति । शृ हिंसने क्वौ वा + अच् पृषोदरादित्वात् साधुः ।) पण्यम् । इति शब्दरत्नावली ।

किशरक, क्ली पुं, (किञ्चित् शृणाति । शृ हिंसने + वाहुलकात् अकन् प्रत्ययः पृषोदरात् साधुः ।) पण्यम् । इति शब्दरत्नावली ।
("कृत्याम्भोजिनि वनमपर्यै प्राक्तिनी धौतमूला भिन्नो रागः किशलयरुचामाज्यधूमोद्गमेन" ।
इति शाकुन्तले १माङ्के । अत्र केचित् दन्त्यमध्या रमपि पठन्ति ।)

किशोर, पुं, (किञ्चित् शृणाति । शृ हिंसायाम् । "किशोरादयश्च" । उणाम् । १ । ६६ । इति ओरन् । निपातनात् साधुः ।) अश्वशिशुः । ("किशोरं वडवा यथा" । इति महाभारतम् ।) तैलपर्णौषधि । सूर्य्यः । वयस्थावस्था । सा तु दशा दशवर्षावधिपञ्चदशवर्षपर्य्यन्तावस्था । इति मेदिनी । कैशोरावस्थायुक्ते चाल्वकिञ्चित्तोऽपि ।
(यथा, श्रीभागवतटीकायां शृङ्गारिकपादधृतवचनम् ।
"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि ।
कैशोरमापञ्चदशात् यौवनञ्च ततः परम्" ।)

किष्क क ष वधे । इति कविकल्पद्रुमः । (चुरां-आत्म-सक-सेट् ।) मूर्द्धन्योपधः । क ष किष्कयते । इति दुर्गादासः ।

किष्किन्धः, पुं, (कि कि दधाति । धा + क । पारस्करादित्वात् पूर्व्वस्य किभो मलोप सुट् षत्वञ्च निपातनात् ।) कोङ्कदेशस्थपर्व्वतविशेषः । तत्स्यगुहा च । इति शब्दरत्नावली ।

किष्किन्धी, स्त्री, (किष्किन्ध + गौरादित्वात् ङीष् ।) किष्किन्धपर्व्वतगुहा । इति शब्दरत्नावली ।

किष्किन्ध्य, पुं, (किं कि दधातीति वा पारस्करादि सुट् मूर्द्धन्यत्वे च स्वार्थे यत् प्रत्ययेन निपातनात् साधुः ।) पर्व्वतविशेषपर्व्वतः । इति शब्दरत्नावली ।

किष्किन्ध्या स्त्री, (किष्किन्ध्य + टाप् ।) किष्किन्ध्यपर्व्वतगुहा । इति शब्दरत्नावली । सा तु पुरा वालिनामवानरराजधान्यासीत् श्रीरामचन्द्रेण हत्वा सुग्रीवाय प्रदायकर्मां दत्ताम् । इति रामायणम् ।

किष्किन्ध्याधिप, पुं, (किष्किन्ध्याया अधिप ।) वालिनामवानरराज । इति जटाधरः । (सुग्रीवः । इति रामायणम् ।)

किष्कु, पुं स्त्री, (के + सन्तापादित्वात् कुः । पार स्करादित्वात् सुट् षत्वे च निपातनात् साधुः ।) वितस्तिः । द्वादशाङ्गुलपरिमाणम् । प्रकोष्ठः । कफोणेरधोमणिबन्धपर्य्यन्तः । हस्तः । इति मेदिनी । (यथा महाभारते ७ । १ । १८ ।
"सर्व्वैर्गुणधनस्त्यां दिवसैः सप्तभिर्महान् ।
दशकिष्कुसहस्राणि रूपवानगमद् क्षणात्" ।)
कुत्सिते त्रि । इति त्रिको हैमचन्द्रश्च ।

किष्कुपर्व्वा, [न्] पुं, (किष्कुर्मितं किष्कुमितं पर्व्व यस्य वा पर्व्व यस्य ।) इक्षुः । वेणुः । कोट

गन्ध । इति मेदिनी । नल इति भाषा ।

कीचक, क्ली पुं, (कीचीयत् शब्दति । कच शब्दे + अच । पृषोदरादित्वात् मत्वे निपातनात् साधुः ।) किचकदम् । इति शब्दरत्नावली भरतश्च ।

कीचक, क्ली पुं, (किञ्चित् ईषद् वा चकति । चक + वाहुलकात् अदन् । पृषोदरात् मत्वे साधुः ।) पञ्चवः । इत्यमरः । २ । ४ । १६ । ये तु मरुतपाति पूर्णास्ते स्वनपर्णीरा कीचकास्त इति भरतः । इति भरतः । (यथा रघौ रामायणे । ४ । ५० । ६० ।
"शब्दायिताःकृताशाम् रन्ध्रैः किचकरेणुताम् ।
कालनरमदेवापि कर्ह्नि मन्थरशब्दपे" ।)

कीकट, पुं (की ईषद्गत्या वा कटति गच्छति आरपि । की + कट् + अच् ।) घोटकः । देशभेदः । इति त्रिका । (यथा शक्तिसङ्गमतन्त्रे ।
"चरणाद्रि समारभ्य गृध्रकूटान्तकं शिवे ।
तावत् कीकटदेशः स्यात् तदन्तर्मगधो भवेत्" ।
वेहार इति ख्यातः । अत्र बुद्ध सम्भवि । इति भागवतम् । १ । ३ । २४ । अस्य कीकट इति पुरातननाम आसीत् ततो जरासन्धेन मगध इत्याख्या घृता । समानमस्तन बृहत् पुरा । यथा, भागवते ६ । ६ । ६ ।
"ऋषभ सदनाम्ना कीकटतनयो यतः" ।)

कीकट, त्रि (की कुत्सित धनाभावात् कटति गच्छति । की + कट् + अच् ।) निर्धनः । (की कुत्सितं कटति वर्षति ददाति धर्धने कार्पण्यात् इति ।) कृपण । इति मेदिनी ।

कीकटा, पुं, (की कुत्सितं इदम् वा कटति वर्षति येन इदम् । इत्यवधेतया तद्देशानां बहुत्वम् । की + कट + अधिकरणे अच् ।) देशविशेषः । बहुवचनान्तशब्दोऽयम् । इति मेदिनी । वेहार इति ख्यातः । इति केचित् । (यथा, भागवते ९ । ३ । २४ ।
"ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् ।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति" ।
देशोऽयं कृपणभावादपवित्रः । यथा, भागवते । ७ । १० । १८ ।
"यत्र यत्र च मद्भक्ताः प्रशान्ताः समदर्शिनः ।
साधवः समुदाचारास्ते पूयन्त्यपि कीकटाः" ।)

कीकस, क्ली, (की कुत्सितेन रक्तादिना दैवाच्छन्नं कसति उत्पद्यते । की + कस + अच ।) अस्थि । इत्यमरः । २ । ६ । ६८ । (अस्थिशब्देऽस्य विवरणं ज्ञातव्यम् ।)

कीकस, पुं, (की कुत्सितः यथा स्यात् तथा कसति । कस गतौ + अच् ।) कृमिजातिः । इति मेदिनी । कठिने त्रि । इति शब्दरत्नावली ।

कीकसास्य, पुं (कीकसं अस्थि आस्ये यस्य ।) पक्षी । इति हारावली ।

कीकि, पुं (कीति शब्दं करोति । कै + बाहुलकात् डिः ।) किकिः । चाषपक्षी । इत्यमरटीका ।

कीचक, पुं, (चीकयति शब्दायते । चीक शब्दे "चीकयतेराद्यन्तविपर्य्ययश्च" । उणां ४ । ३४ इति वुन् आद्यन्तविपर्य्ययश्च ।) वंशविशेष । शब्दायमानवंशः । इत्यमरः । २ । ४ । १६१ । सः

ग्रूकवद्ध । (यथा,कुमारे १ । ८ ।
"यः पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थेन समीरणेन" ।)
राक्षसविशेषः । इति शब्दरत्नावली । दैत्यभेदः । वृक्षविशेषः । इति विश्वः । नलः । इति राजनिर्घण्टः । केकयराजपुत्रः । स च विराटराजस्य श्यालः सेनापतिश्च । (यथा महाभारते ४ । कीचकवधपर्व्वणि १४ । ५ ।
"सेनापतिर्विराटस्य ददर्श द्रुपदात्मजाम् ।
तां दृष्ट्वा देवगर्भाभां चरन्तीं देवतामिव ।
कीचकः कामयामास कामबाणप्रपीडितः" ॥
अयन्तु छद्मवेशधारिणा विराटभवनस्थेन भीमसेनेन हतः । अस्य विवरणं महाभारते ४ पर्व्वणि १४ अध्यायमारभ्य द्रष्टव्यम् । देशविशेषः । तत्र भवजनाम्नोऽयम् । यथा,महाभारते १।१५७।१९।
"मत्स्यान् त्रिगर्त्तान् पाञ्चालान्कीचकानन्तरेण च ।
रमणीयान्वनोद्देशान् प्रेक्षमाणा सरांसि च" ।)

कीचकजित्, पुं (कीचकं जितवान् । जि + भूते क्विप् तुक् च ।) भीमसेनः । इति त्रिकाण्डशेषः । (पुराकिल दुष्टात्मा कीचकः विराटभवनस्थां सैरिन्ध्रीरूपधारिणीं द्रौपदीमकामयत । द्रौपदी तु तस्य कामुकस्य दुरभिसन्धिं विधाय तं बहुश कटूक्त्या निर्भर्त्सयामास । अथ कीचकः एवमपमानितः क्रुधा तां पदा ताडितवान् । अथ सा मानिनी द्रौपदी निजदुःखं भीमं निवेदयामास । भीमस्तु एतदाकर्ण्य सञ्जातरोषः कीचकं हन्तुं मनो दधे । अथ सुबुद्धिर्भीमो द्रौपदीमुपदिदेश श्वो निशायां यथा स दुरात्मा राजश्यालकः मत्स्यराजपुत्रीनर्त्तनशालायां त्वत्प्रलोभेन समुपतिष्ठेत तथाऽऽस्यास्त्वं समयो विधीयताम् । तत्सङ्केतेन तत्र सङ्गतोऽहमेनं कामार्त्तं दुरात्मानं यमं अनुभावयामि । एवं स्थिरीकृते द्रौपदी पूर्व्वोक्तमसिलं स्थानं कीचकं विज्ञापितवती । अथ निशायां मूढबुद्धिः कामुकवेशधारी तत्रैव गतः प्रच्छन्नोपविष्टेन बलीयसा भीमेन पशुमारं निपातितः । एतद्विस्तृतिस्तु महाभारते ४ । २१ अध्याये द्रष्टव्या ।)

कीचकनिसूदनः, पुं, (कीचकं निसूदयतीति । नि + सूद + णिच् ल्यु ।) भीमसेनः । इति हेमचन्द्रः । (अस्य विवरणं कीचकजिच्छब्दे द्रष्टव्यम् ।)

कीचकभित्, पुं, (कीचकं भिन्नवान् । भिद + क्विप् ।) भीमसेनः । इति भूरिप्रयोगः । (अस्य विवरणं कीचकजिच्छब्दे द्रष्टव्यम् ।)

कीट, श बन्धे । वर्णे । इति कविकल्पद्रुमः । (चुरा०-पर०-सक०-सेट् ।) श कीटयति कीटः । बन्ध केचिन्नमन्यते । इति दुर्गादासः ।

कीटः, पुं, (कीट् + अच् ।) कृमिजातिः । इति शब्दरत्नावली । (यथा मनुः १ । ४० ।
"कृमिकीटपतङ्गाश्च यूकामक्षिकमत्कुणम्" ।
"सर्पाणामेव विण्मूत्रशुक्राण्डशववीर्यजाः ।
दोषैरन्ते समस्तैश्च युक्ताः कीटाश्चतुर्विधाः ।
दृष्ट्वा कीटैर्वायव्यैस्तीव्रोद्वेगोत्थम ।
आग्नेयैरल्पसन्तापो दाहरागविसर्पवान् ।
पक्वपीलुफलप्रख्यं खर्ज्जूरसदृशोऽथवा ।
कणाधिकैर्मन्दरुजं पक्वोदुम्बरसन्निभम् ।
स्रावाढ्यः सर्व्वलिङ्गस्तु विवर्णः सान्निपातिके ।
वेगाश्च सर्पवच्छोफो वह्निर्विसर्परक्तता ।
शिरोऽक्षि गौरव मूर्च्छाभ्रम श्वासोऽतिवेदना ।
सर्व्वेषां कर्णिकाशोफो ज्वर कच्छूररोचक" ।
अस्य चिकित्सा यथा ।
"अर्कस्य दुग्धेन शिरीषबीज
त्रिर्भावितं पिप्पलीचूर्णमिश्रम् ।
एषो गदो हन्ति विषाणि कीट
भुजङ्गलूतोन्दुरवृश्चिकानाम्" ।
इति च वाभटे उत्तरतन्त्रे ३७ अध्याये ।
अस्यौषधं यथा ।
"जतुसेव्यपत्रगुग्गुलुभल्लातककुसुमपुष्पसर्ज्जरसाः ।
श्वेता एव धूम उरगाखुकीटवस्त्रक्रमिनुदाः" ।
"शीरिषत्वगवलेपः शुद्धः कीटविषापहः" ।
इति चरके चिकित्सास्थाने २५ अध्याये ।
"सर्पाणां शुक्रविण्मूत्रशवपूत्यण्डसम्भवाः ।
वाय्वग्न्यम्बुप्रकृतयः कीटास्तु विविधाः स्मृताः ।
सर्व्वदोषप्रकृतिभिर्युक्तास्तापरिणामतः ।
कीटास्तेऽपि सघोरास्ते सर्व्वे एव चतुर्व्विधाः ।
कुम्भीनसस्तुण्डिकेरी शृङ्गीशतकुलीरकः ।
उच्चिटिङ्गोऽग्निनामा च चिच्चिटिङ्गो मयूरिका ।
आवर्त्तकस्तथोरभ्रसारिका मुखवैदलौ ।
शरावकुर्द्दोऽभीराजी परुषश्चित्रशीर्षकः ।
शतबाहुश्च यश्चापि रक्तराजिः प्रकीर्त्तितः ।
अष्टादशेति वायव्याः कीटाः पवनकोपनाः ।
तैर्भवन्तीह दष्टानां रोगा वातनिमित्तजाः ॥ * ॥
कौण्डिन्यकः कणभको वरटी पत्रवृश्चिकः ।
विनासिका ब्रह्मणिका बिन्दुलो भ्रमरस्तथा ।
बाह्यकी पिच्चिटः कुम्भी वर्च्चःकीटोऽरिमेदकः ।
पद्मकीटो दुन्दुभिको मकरः शतपादकः ।
पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी ।
क्लीतकृमिसरारी च यश्चाप्युत्क्लेशकः स्मृतः ।
एते ह्यग्निप्रकृतयश्चतुर्व्विंशः प्रकीर्त्तिताः ।
तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः ॥ * ॥
"विश्वम्भरः पञ्चशुक्लः पञ्चकृष्णोऽथ कोकिलः ।
सैरेयकः प्रचलाको वलभः किटिभस्तथा ।
सूचीमुखः कृष्णगोधा यश्च काषायवासिकः ।
कीटगर्द्दभकश्चैव तथा त्रोटक एव च ।
त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपणाः ।
तैर्भवन्तीह दष्टानां रोगाः कफनिमित्तजाः ॥ * ॥
तुङ्गीनासो विचिलकस्तालको वाहकस्तथा ।
कोष्ठागारी क्रिमिकरो यश्च मण्डलपुच्छकः ।
तुङ्गनाभः सर्षपिकोऽवल्गुली शम्बुकस्तथा ।
अग्निकीटश्च घोराः स्युर्द्वादश प्राणनाशनाः ।
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत् ।
तांस्ताश्च वेदनास्तीव्रा रोगा वै सान्निपातिकाः ।
"क्षाराग्निदग्धवद्दंशो रक्तपीतसितारुणः ।
ज्वराङ्गमर्दरोमाञ्चवेदनाभिः समन्वितः ।
छर्द्यतीसारतृष्णा च दाहो मोहविजृम्भिका ।
वेपथुश्वासहिक्काश्च दाहः शीतञ्च दारुणम् ।
पिडकोपचयः शोफो ग्रन्थयो मण्डलानि च ।
ददवः कर्णिकाश्चैव विसर्पाः किटिभानि च ।
तैर्भवन्तीह दष्टानां यथास्वञ्चाप्युपद्रवाः ।
देऽन्ये तेषां विशेषास्तु पूर्व्वं तेषां समादिशेत् ।
एकजातीनतस्तूर्द्ध्वं कीटान् वक्ष्यामि भेदतः ।
सामान्यतो दष्टलिङ्गं साध्यासाध्यक्रमेण च ।
त्रिकण्टकः कुणी चापि हस्तिकक्षोऽपराजितः ।
चत्वार एते कणभा व्याख्याता तीव्रवेदनाः ।
तैर्दष्टस्य श्वयथुरङ्गमर्दो गुरुता गात्राणां दंशः कृष्णश्च भवति ।
"प्रतिसूर्य्यं पिङ्गभासो बहुवर्णो महाशिराः ।
तथा निरुपमश्चापि पञ्चगौधेरका स्मृताः ।
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत् ।
रुजश्च विविधास्तीव्रा ग्रन्थयश्च सुदारुणाः ।
गलगोली श्वेतकृष्णा रक्तराजी रक्तमण्डला सर्व्वश्वेता सर्षपिकेत्येवं षट् ताभिर्दष्टे सर्षपिकावर्णे दाहशोफक्लेदा भवन्ति । सर्षपिकया हृदयपीडातिसारश्च ।
शतपदस्तु परुषा कृष्णा चित्रा कपिलिका पीतिका रक्ता श्वेता अग्निप्रभा इत्यष्टौ ताभिर्दष्टे शोफो वेदना दाहश्च हृदये । श्वेताग्निप्रभाभ्यामेतदेव दाहो मूर्च्छा चातिमात्रं श्वेतपिडकोत्पत्तिश्च ।
मण्डूकाः कृष्णः सारः कुहको हरितो रक्तो यववर्णाभो भृकुटी कोटिकश्चेत्यष्टौ तैर्दष्टस्य दंशः कण्डूर्भवति पीतफेनागमश्च वक्त्रात् । भृकुटी कोटिकाभ्यामेतदेव दाहश्छर्दिर्मूर्च्छा चातिमात्रम् ।
विश्वम्भराभिर्दष्टे दंशः सर्षपाकाराभिः पिडकाभिश्चीयते शीतज्वरार्त्तश्च पुरुषो भवति ।
अहिण्डुकाभिर्दष्टे तोददाहकण्डूश्वयथवो मोहश्च । कण्डूमकाभिर्दष्टे पीताङ्गश्छर्द्यतीसारज्वरादिभिरभिहन्यते । शूकवृन्तादिभिर्दष्टे कण्डूः कोठाः प्रवर्द्धन्ते शूकञ्चात्र दृश्यते ।
पिपीलिका स्थूलशीर्षा संवाहिका ब्राह्मणिकाऽङ्गुलिका कपिलिका चित्रवर्णेति षट् ताभिर्दष्टे दंशे श्वयथुरग्निस्पर्शवद्दाहशोफौ भवतः ।
मक्षिकाः कान्तारिका कृष्णा पिङ्गलिका मधूलिका काषायी स्थालिकेत्येवं षट् ताभिर्दष्टस्य दाहशोफौ भवतः स्थालिकाकाषायीभ्यामेतदेव पिडकाश्चोपद्रवा भवन्ति ।
मशकाः सामुद्रः परिमण्डलो हस्तिमशकः कृष्णः पार्व्वतीय इति पञ्च तैर्दष्टस्य तीव्रकण्डूर्दंशशोफश्च पार्व्वतीयस्तु कीटैः प्राणहरैस्तुल्यलक्षणः । नखावकृष्टेऽथ पिडका सदाहपाका भवन्ति । अथौषधो दंशसदृशः चिकित्सितश्च ।
भवन्ति चात्र ।
त्रिभिरेका स्थालिका च ये च श्वेताग्निवर्णके ।
भृकुटी कोटिकश्चैव न सिध्यन्त्येकरन्ध्रकः ।
दंशमध्ये तु यत्कृष्णं श्यावं वा जालकावृतम् ।
दग्धाकृति भृशं पाकि क्लेदशोथज्वरान्वितम् ।
दूषीविषाभिदष्टस्य तच्चासाध्यं प्रचक्षते ।
अन्यथा दंशदेशस्य हस्तपादोरसञ्चितम् ।

इति वाभटे निदानस्थाने १४ अध्याये ।
बालनैषधे यथा ।
"कृष्णसमानवर्णं मलिनं समल तिल धराधीशम् ।
कैडेन दाम्भमिव समाहु भाजने माये ।
तेनापि किञ्च यथायथेति विद्वतो वर्णे ।
माषाद्धर किलास नाम मुखा विमुद्धतनो" ।
इति सिद्धान्ते ।०।
'किलासदग्धा मृणालदारगुञ्जानि काला च ।
गोविलगाढ़ने दे पित्तस्य कामलोपरञ्जः" ।
इति श्विते प्रतेय ।
"दारुणं चारुणं श्वित्रं किलासं नामभिस्त्रिभिः ।
विज्ञेयं त्रिविधं तच्च त्रिदोषं प्रायशश्च तत् ॥
दोषे रक्ताश्रिते रक्तं ताम्रं मांससमाश्रिते ।
श्वेतं मेदःश्रिते श्वित्रं गुरुता चोत्तरोत्तरम्" ।
असाध्यलक्षणमस्य यथा,—
"यच्छुक्लरक्तौ मिथो बद्ध बहुलोमसम् ।
यच्च संसृष्टमण्डलं श्वित्रं नैव सिध्यति" ।
अस्य निदानं यथा —
"वचांस्यतथ्यानि कृतघ्नभावो
निन्दा सुराणां गुरुधर्षणञ्च ।
पापक्रिया पूर्वकृतञ्च कर्म
हेतुः किलासस्य विरोधि चान्नम्" ।
इति चरके चिकित्सास्थाने ७ अध्याये ।)
किलासघ्नः, पुं (किलासं हन्तीति । हन् + टक ।) क्षुपविशेषः । काँकरोल इति भाषा । तत्पर्यायः । कर्कोटकः २ तिक्तकः ३ सुगन्धकः ४ । इति वैद्यकम् । (कर्कोटकशब्देऽस्य गुणादयो ज्ञेयाः ।)
किलासी, [न्] त्रि, (किलासमस्यास्तीति इनि ।) किलासरोगयुक्तः । तत्पर्यायः । सिध्मलः २ । इत्यमरः । २ । ६ । ६१ ।
किलिञ्ज, स्त्री, (किल्यतेऽनेन । किल् + इन् । किलि विशेषोऽस्ति । चि + डः । पृषोदरात् साधुः ।) सूक्ष्म दारु । इति जटाधरः । किलिञ्ज इति च पाठः ।
किलिञ्ज, पुं, (किलिनो जायते । जन + ड । पृषो दरादित्वात् गुणश्च ।) सूक्ष्मदारु । इति त्रिकाण्ड शेषः । (क्वचित् नपुंसकत्वमपि दृश्यते ।)
किलिञ्जक, पुं, (किलिञ्ज + स्वार्थे कन् ।) कटादि रचनं । येन कुट्टाद्यं वेष्ट्यते कुट्टनमात्र गहादिविदित टीकाकारस् । दरमिलाटटी इति ख्यात कुरुते । इत्यमरटीकायां भरत । तत्पर्यायः । कटः ॥ । इत्यमरः । २ । ८ । २६ ।
किलिम, क्ली, (किल + इमन् ।) देवदारु । इति शब्दरत्नावली राजनिर्घण्टश्च ।
("सरलं च किलिमं वृत्त सरलादानमिवाह्वयी ।
सरलं किलिमं शिलुः मार्गदितिजनाशोभनो ।
इति चरके कल्पस्थाने ७ अध्याये ।)
किल्बिषं, क्ली ("किलेर्बुक् च" । उणा १ । ५१ इति टिषच् बुक् आगमः ।) पापम् । अपराधः । इत्यमरः । ३ । ३ । २२२ । (यथा रघौ १ । ६६ । "तदागृह्य किलामहन्तो कृष्णिव कामविविधे " ।) रोगः । इति मेदिनी ।
किष्की, [न्] पुं (किष्क् + भावे क्विप् ततोऽस्त्यर्थे इनि वा ।) घोटकः । इति त्रिकाण्डशेषः ।
किष्कं, क्ली पुं (किञ्चित् कषति । कुष चलने गतौ वा + घञ् पृषोदरादित्वात् साधुः ।) हस्तः । इति शब्दरत्नावली ।
किष्कुप, क्ली पुं, (किञ्चित् कुपति । कुप चलने + बाहुलकात् कपन् प्रत्ययः पृषोदरात् सकोपि साधु ।) हस्तः । इति शब्दरत्नावली ।
("कुल्याभोभिः पवनचपलैः शाकिनो धौतमूला भिन्नो राग्यः किसलयरुचामाज्यधूमोद्गमेन" ।
इति शाकुन्तले १मांके । अत्र केचित् इस्वकका रमपि पठन्ति ।)
किशोर, पुं, (किञ्चित् शृणाति । शॄ हिंसायाम् । "किशोरादयश्च" । उणा । १ । ६६ । इति ओरन् । निपातनात् साधुः ।) अश्वशिशुः । ("किशोरं बकुरा यथा" । इति महाभारतम् ।) तैल पर्णौषधिः । सूर्यः । तरुणावस्थ । स तु दशा दशवर्षावधिपञ्चदशवर्षपर्यन्तवयस्कः । इति मेदिनी । कैशोरावस्थायुक्ते वाच्यलिङ्गोऽपि ।
(यथा, श्रीभागवतटीकायां धृतपिताश्वनवचनम् ।
"कौमारं पञ्चमाब्दान्तं पौगण्डं दशमावधि ।
कैशोरमापञ्चदशात् यौवनञ्च ततः परम्" ।)
किष्क क स वधे । इति कविकल्पद्रुमः । (चुरा०-आत्म०-सक०-सेट् ।) मूर्द्धन्योपध । क स किष्कयते । इति दुर्गादासः ।
किष्किन्धः, पुं (कि कि दधाति । धा + कः । पार स्करादित्वात् पूर्वस्य किमो मलोपः सुट् तस्य निपातनात् ।) ओड्रदेशस्थपर्वतविशेषः । तत्र स्थगुहा च । इति शब्दरत्नावली ।
किष्किन्धी, स्त्री, (किष्किन्ध + गौरादित्वात् ङीष् ।) किष्किन्धपर्वतगुहा । इति शब्दरत्नावली ।
किष्किन्ध्य, पुं,(किं कि दधातीति वा पारस्करादि सुट् पूर्वमलोपे च स्वार्थे यत् प्रत्ययेन नि पातनात् साधुः ।) नगविशेषदानपर्वतः । इति शब्दरत्नावली ।
किष्किन्ध्या, स्त्री (किष्किन्ध्य + टाप् ।) किष्किन्ध्य पर्वतगुहा । इति शब्दरत्नावली । सा तु पुरा वालिनामवानरराजस्यासीत् श्रीरामचन्द्रक र्त्तृकं सुग्रीवाय तत्प्राप्तौ दत्तवान् । इति रामायणम् ।
किष्किन्ध्याधिपः, पुं, (किष्किन्ध्यायाः अधिपः ।) वालिनामवानरराजः । इति जटाधरः । (सुग्रीवः । इति रामायणम् ।)
किष्कु, पुं स्त्री, (कै + बाहुलकात् कु । पार स्करादित्वात् सुट् षत्वं च निपातनात् साधुः ।) वितस्तिः । हस्तात् द्विवितस्तिमानम् । प्रकोष्ठः । कफोणेरधोमणिबन्धपर्यन्तः । हस्तः । इति मे दिनी । (यथा रघौ १ । १ । १८ ।
'सम्भूते गुरुरत्नमानसे निश्चलया मनोरमाम् ।
तारकिष्कुद्वयं सा मायया माय वल्कलम्" ।)
कुत्सिते त्रि । इति हेमचन्द्रः ।
किष्कुपर्वा, [न्] पुं, (किष्कुमितं किष्कुमित पर्वग्रन्थि वा यस्य यस्य ।) इक्षुः । वेणुः । पोट गलः । इति मेदिनी । नल इति भाषा ।
कीचक, स्त्री पुं, (कीदृक् चकति । चक तृप्तौ + अच् । पृषोदरादित्वात् मकोपि निपातनात् साधुः ।) कीचकदन् । इति शब्दरत्नावली भरतश्च ।
कीचक, स्त्री पुं, (किञ्चित् ईषत् वा चकति । चक + बाहुलकात् कपन् । पृषोदरात् मकोपि साधुः ।) पद्मकः । इत्यमरः । २ । ४ । १६ । स तु मरुत्पूरित सुषिरत्वादध्वनिसहितवंशः इति मधु । इति भरतः । (यथा रघौ रामायणे । ४ । १० । १७ ।
"तदद्यादिमदक्षाराणां राशौ किचकपर्वताम् ।
जातकम्पदेवादि भरद्विर्मन्दकन्दरे" ।)
कीकट,पुं, (को प्रत्नेहुंस वा कट गच्छति धावति । की + कट् + अच् ।) घोटकः । देशभेदः । इति विश्वः । (यथा मन्त्रिपक्षगतम्भे ।
"चरणादि समारभ्य गृध्रकूटान्तकं शिवे ।
तावत् कीकटदेशः स्यात् तदन्तर्मगधो भवेत्" ।
बेहार इति ख्यातः । अत्र बुद्धः सम्भवति । इति भागवतम् । १ । ३ । २४ । अतः कीकट इति पुरातननाम आसीत् ततो जरासन्धेन मगध इत्याख्या प्रदत्ता । अनार्य्यज्ञातप्रबल बहुलता । यथा, भागवते ६ । ६ । ६ ।
"वस्तुभ शाकटकाय कीकटश्चावतो यत" ।)
कीकट, त्रि, (को कुत्सितं धनाभावात् कटति पश्य ति । को + कट + अच् ।) निःस्वः । (को कुत्सितं कटति वर्षति ददाति ऋचिने कामदान् इति ।) कृपणः । इति मेदिनी ।
कीकटाः, पुं, (को कुत्सितं ईषत् वा कटति वर्षति येन इत्यः । इत्यत्वया नहुषानां तथात्वम् । को + कट् + अधिकरणे अच् ।) देशविशेषः । बहुवचनान्तश्चायम् । इति मेदिनी । बेहार इति ख्यातः । इति केचित् । (यथा, भागवते १ । ३ । २४ ।
"ततः कलौ सम्प्रवृत्ते सम्मोहाय सुरद्विषाम् ।
बुद्धो नाम्नाञ्जनसुतः कीकटेषु भविष्यति" ।
देशोऽयं कुत्सिताचारपरिपूर्णः । यथा, भाग० ७ । १० । १८ ।
"यत्र तत्र कमुदाचारान्ते पुनरत्यपि कीकटाः" ।)
कीकस, क्ली, (को कुत्सितेन रक्तादिना देहान्तरे कसति उत्पद्यते । की + कस + अच् ।) अस्थि । इत्यमरः । २ । ६ । ६८ । (अस्थिशब्देऽस्य विवरणं ज्ञातव्यम् ।)
कीकस, पुं (को कुत्सितं यथा स्यात् तथा कसति । कस गतौ + अच् ।) कृमिजातिः । इति हेमचन्द्रः । कठिने त्रि । इति शब्दरत्नावली ।
कीकसास्य, पुं, (कीकसं अस्थि आस्ये यस्य ।) पक्षी । इति त्रिकाण्डशेषः ।
कीकि, पुं (कीति शब्दं करोति । कि + बाहुलकात् किः ।) किकिः । चासपक्षी । इत्यमरटीका ।
कीचक, पुं, (चीकयति शब्दायते । चीक अर्थे "चीकयतेराद्यन्तविपर्ययश्च" । उणा ५ । ३६ इति वुन् आद्यन्तविपर्ययश्च ।) अनिलोद्धूत शब्दायमानवंशः । इत्यमरः । २ । ४ । १६१ । स तु

स्वकपद्मः । (यथा, कुमारे १ । ८ ।
"यः पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थेन समीरणेन" ॥)
राक्षसविशेषः । इति शब्दरत्नावली । दैत्यभेदः । दत्यविशेषः । इति विश्वः । नखः । इति राजनिर्घण्टः । केकयराजपुत्रः । स च विराटराजस्य श्यालः सेनापतिश्च । (यथा महाभारते ४ । कीचकवधपर्व्वणि १४ । ५ ।
"सेनापतिर्विराटस्य ददर्श द्रुपदात्मजाम् ।
तां दृष्ट्वा देवगर्भाभां चरन्तीं देवतामिव ।
कीचकः कामयामास कामवाणप्रपीडितः" ॥
अयन्तु छद्मवेशधारिणा विराटभवनस्थेन भीमसेनेन हतः । अस्य विवरणं महाभारते ४ पर्व्वणि १४ अध्यायमारभ्य द्रष्टव्यम् । देशविशेषः । तत्र गङ्गवचनान्तोऽयम् । यथा, महाभारते १।१५७।२।
"मत्स्यान् त्रिगर्त्तान् पाञ्चालान्कीचकानन्तरेण च ।
रमणीयान्वनोद्देशान् प्रेक्षमाणाः सरांसि च" ॥)

कीचकजित्, पुं (कीचकं जितवान् । जि + भूते क्विप् तुक् च ।) भीमसेनः । इति त्रिकाण्डशेषः । (पुराकिल दुष्टात्मा कीचकः विराटभवनस्था सैरिन्ध्रीरूपधारिणीं द्रौपदीमकामयत । द्रौपदी तु तस्य कामुकस्य दुरभिसन्धिं विज्ञाय तं बहुशः कटूक्त्या निर्भर्त्सयामास । अथ कीचकः एवमपमानितः क्रुधा तां पदा ताडितवान् । अथ सा मानिनी द्रौपदी निजदुःखं भीमं निवेदयामास । भीमस्तु एतदाकर्ण्य सञ्जातरोषः कीचकं हन्तुं मनो दधे । अथ सुबुद्धिर्भीमो द्रौपदीमुपदिदेश श्वो निशायां यथा स दुरात्मा राजश्यालकः मत्स्यराजकृतान्तकन्यानर्त्तनशालायां त्वदुद्देशेन समुपतिष्ठेत तथाऽस्याः समयो विधीयताम् । तत्स्थले त्वद्वेशेन स्थितः सङ्कृतोऽहमेनं कामार्त्तं दुष्टात्मानं यमं प्रापयिष्यामि । एवं शिक्षिता द्रौपदी पूर्व्वोक्तमपि स्थानं कीचकं विज्ञापितवती । अथ निशायां मूढबुद्धिः कामुकवेशधारी तत्रैव गतः प्रच्छन्नोपविष्टेन बलीयसा भीमेन पशुमारं निपातितः । एतद्विस्तृतिस्तु महाभारते ४ । २१ अध्याये द्रष्टव्या ॥)

कीचकनिषूदनः, पुं, (कीचकं निषूदयतीति । नि + सूद + णिच् ल्युः ।) भीमसेनः । इति हेमचन्द्रः ॥ (अस्य विवरणं कीचकजिच्छब्दे द्रष्टव्यम् ॥)

कीचकभित् पुं, (कीचकं भिन्नवान् । भिद् + क्विप् ।) भीमसेनः । इति भूरिप्रयोगः ॥ (अस्य विवरणं कीचकजिच्छब्दे द्रष्टव्यम् ॥)

कीट, ऋ बन्धे । वर्णे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं-सेट् ।) ऋ कीटयति कीटः । वर्णे भेदिप्रमन्यते । इति दुर्गादासः ॥

कीटः, पुं, (कीट् + अच् ।) कृमिजातिः । इति शब्दरत्नावली ॥ (यथा मनुः १ । ४० ।
"कृमिकीटपतङ्गाश्च यूकामक्षिकमत्कुणम्" ॥
"सर्पाणामेव विण्मूत्रशुक्राण्डशवकोथजाः ।
दोषैर्व्यस्तैः समस्तैश्च युक्ताः कीटाश्चतुर्विधाः ॥
दंशस्य कीटैर्वायव्यैरस्मरोदकमोत्कर ।
पामेयैरल्पसत्त्वाभो दाहरागविसर्पवान् ।
पक्वपीलुफलप्रख्यः खर्ज्जूरसदृशोऽथवा ।
कफाधिकैर्मन्दरुजः पक्वोदुम्बरसन्निभः ।
स्रावाढ्यः सर्व्वलिङ्गस्तु विवर्णः सान्निपातिके ।
वेगाश्च सर्पवत्कोपो वर्द्धिष्णुर्विषरक्तता ।
शिरोऽक्षि गौरव मूर्च्छा भ्रम श्वासोऽतिवेदना ।
सर्व्वथा कर्णिकाशोफो ज्वर कण्डूररोचक" ॥

अस्य चिकित्सा यथा ।

"अर्कस्य दुग्धेन शिरीषबीज
स्त्रिर्भावितं पिप्पलीचूर्णमिश्रम् ।
एषो गदो हन्ति विषाणि कीट
भुजङ्गलूतोन्दुरवृश्चिकानाम्" ॥

इति च वाभटे उत्तरतन्त्रे ३७ अध्याये ।

अस्यौषधं यथा ।

"अतुषेध्यपञ्चगुग्गुलुभल्लातककुसुमपुष्पकर्ज्जरसा ।
श्वेता एव धूम उरगाखुकीटवल्कलमिनुदमा" ॥
"क्षीरिवृक्षत्वगालेपः शुद्धः कीटविषापहः" ।
इति चरके चिकित्सास्थाने २५ अध्याये ॥
"सर्पाणां शुक्रविण्मूत्रशवपूत्यण्डसम्भवाः ।
वाय्वग्न्यम्बुप्रकृतयः कीटास्तु विविधाः स्मृताः ।
सर्व्वदोषप्रकृतिभिर्युक्तास्तापरिणामतः ।
कीटास्तेऽपि सुघोरास्ते सर्व्व एव चतुर्व्विधाः ॥
कुम्भीनसस्तुण्डिकेरी शृङ्गी शतकुलीरकः ।
उच्चिटिङ्गोऽग्निनामा च चिच्चिटिङ्गो मयूरिका ॥
आवर्त्तकस्तथोरभ्रः सारिका मुखवैदली ।
शरावकुर्द्दोऽभीराजी परुषश्चित्रशीर्षकः ॥
शतबाहुश्च यश्चापि रक्तराजिः प्रकीर्त्तितः ।
अष्टादशेति वायव्याः कीटाः पवनकोपनाः ॥
तैर्भवन्तीह दष्टानां रोगा वातनिमित्तजाः ॥ * ॥
कौण्डिन्यकः कणभको वरटी पत्रवृश्चिकः ।
विनासिका ब्रह्मणिका बिन्दुलो भ्रमरस्तथा ॥
वाह्यकी पिच्चिटः कुम्भी वर्च्चःकीटोऽरिमेदकः ।
पद्मकीटो दुन्दुभिको मकरः शतपादकः ॥
पञ्चालकः पाकमत्स्यः कृष्णतुण्डोऽथ गर्द्दभी ।
क्लीतः कृमिसरारी च यश्चाप्युत्क्लेशकः स्मृतः ॥
एते ह्यग्निप्रकृतयश्चतुर्व्विंशतिः प्रकीर्त्तिताः ।
तैर्भवन्तीह दष्टानां रोगाः पित्तनिमित्तजाः ॥ * ॥
"विश्वम्भरः पञ्चशुक्लः पञ्चकृष्णोऽथ कोकिलः ।
सैरेयकः प्रचलको वलभः किटिभस्तथा ॥
सूचीमुखः कृष्णगोधा यश्च काषायवासिकः ।
कीटगर्द्दभकश्चैव तथा त्रोटक एव च ॥
त्रयोदशैते सौम्याः स्युः कीटाः श्लेष्मप्रकोपणाः ।
तैर्भवन्तीह दष्टानां रोगाः कफनिमित्तजाः ॥ * ॥
तुङ्गीनासो विचिलकस्तालको वाहकस्तथा ।
कोष्ठागारी क्रिमिकरो यश्च मण्डलपुच्छकः ॥
तुङ्गनाभः सर्षपिकोऽवल्गुली शम्बुकस्तथा ।
अग्निकीटश्च घोराः स्युर्द्वादश प्राणनाशनाः ॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत् ।
तापाश्च वेदनास्तीव्रा रोगा वै सान्निपातिकाः" ॥
"क्षाराग्निदग्धवद्दंशो रक्तपीतसितारुणः ।
ज्वराङ्गमर्द !
कृष्णतीसारतृष्णा च ८ ।
वेपथुश्वासहिक्काश्च दाहः शीतश्च दारुणम् ।
पिडकोपचयः शोफो ग्रन्थयो मण्डलानि च ।
ददवः कर्णिकाश्चैव विसर्पाः किटिभानि च ॥
तैर्भवन्तीह दष्टानां यथास्वञ्चाप्युपद्रवाः ।
येऽन्ये तेषां विशेषास्तु सूत्रे तेषां समादिशेत् ॥
एकमासीनवक्त्रं कीटान् वक्ष्यामि भेदतः ।
सामान्यतो दर्शलिङ्गं साध्यासाध्यक्रमेव च ॥
त्रिकण्टकः कुणी चापि हस्तिकक्षोऽपराजितः ।
चत्वार एते कणभा व्याख्यातास्तीव्रवेदनाः ॥
तैर्दष्टस्य श्वयथुरङ्गमर्द्दोगुरुता गात्राणां दंशः कृष्णश्च भवति ।
"प्रतिसूर्य्यः पिङ्गभासो बहुवर्णो महाशिराः ।
तथा निरुपमश्चापि पञ्चगौधेरकाः स्मृताः ॥
तैर्भवन्तीह दष्टानां वेगज्ञानानि सर्पवत् ।
रुजश्च विविधाकारा ग्रन्थयश्च सुदारुणाः ॥

गलगोली श्वेतकृष्णा रक्तराजी रक्तमण्डला सर्व्वश्वेता सर्षपिकेत्येवं षट् ताभिर्दष्टे सर्षपिकावर्ज्जं दाहशोफक्लेदा भवन्ति । सर्षपिकया हृदयपीडातिसारश्च ॥

शतपदास्तु परुषा कृष्णा चित्रा कपिलिका पीतिका रक्ता श्वेता अग्निप्रभा इत्यष्टौ ताभिर्दष्टे शोफो वेदना दाहश्च हृदये । श्वेताग्निप्रभाभ्यामेतदेव दाहो मूर्च्छा चातिमात्रं श्वेतपिडकोत्पत्तिश्च ॥

मण्डूका कृष्णः सारः कुहको हरितो रक्तो यववर्णाभो भृकुटी कोटिकश्चेत्यष्टौ तैर्दष्टस्य दंशकण्डूर्भवति पीतफेनागमश्च वक्त्रात् । भृकुटीकोटिकाभ्यामेतदेव दाहश्छर्दिर्मूर्च्छा चातिमात्रम् ॥

विश्वम्भराभिर्दष्टे दंशः सर्षपाकाराभिः पिडकाभिश्चीयते शीतज्वरार्त्तश्च पुरुषो भवति ॥

अहिण्डुकाभिर्दष्टे तोददाहकण्डूश्वयथवो मोहश्च । कण्डूमकाभिर्दष्टे पीताङ्गश्छर्द्यतीसार-ज्वरादिभिरभिभूयते । शूकवृन्तादिभिर्दष्टे कण्डूः कोठाः प्रवर्द्धन्ते शूकञ्चात्र लक्ष्यते ॥

पिपीलिकाः स्थूलशीर्षा संवाहिका ब्रह्मणिकाङ्गुलिका कपिलिका चित्रवर्णेति षट् ताभिर्दष्टे दंशे श्वयथुरग्निस्पर्शवद्दाहशोफौ भवतः ॥

मक्षिका कान्तारिका कृष्णा पिङ्गलिका मधूलिका काषायी स्थालिकेत्येवं षट् ताभिर्दष्टस्य दाहशोफौ भवतः स्थालिकाकाषायीभ्यामेतदेव पिडकाश्चोपद्रवा भवन्ति ॥

मशकाः सामुद्रः परिमण्डलो हस्तिमशकः कृष्णः पार्व्वतीय इति पञ्च तैर्दष्टस्य तीव्रकण्डूर्दंशशोफश्च पार्व्वतीयस्तु कीटैः प्राणहरैस्तुल्यलक्षणः । नखावकृष्टेऽन्यत्र पिडकाः शदाहपाका भवन्ति । अजौषधी दृष्टव्रणकुत् चिकित्सितं ॥

भवन्ति चात्र ।

गौधेरकः स्थालिका च ये च श्वेताग्निवर्च्चसौ ।
भृकुटी कोटिकश्चैव न सिध्यन्ति कथञ्चन ॥
एतैर्दष्टमुपेक्षेत हरेद्वैद्यमतन्द्रितः ।
स्मरेद्दाहं कीटकं
दष्टे तु लक्षणं मर्म

दिवसविहितचिह्नान् मघा द्यवभारदेत।
भावस्य यथोक्तमन्तिमदम्भरकम्।
कदाचौ विपरीतान्ति कीटदष्टसुबाधकम्॥
कीटदंष्ट्रानुपविषे सम्यक् समुपाचरेत्"।
इति सुश्रुते कल्पस्थाने ८ अध्यायः॥)

कीटक, पुं, (कीट + संज्ञायां स्वार्थे वा कन्।) मागधजाति। इति धरणी। कठिनजातिः। निष्ठुरे त्रि। इति मेदिनी॥

कीटघ्न, पुं, (कीटं हन्ति। हन् + टक्।) गन्धकः। इति राजनिर्घण्टः। (गन्धकशब्देऽस्य गुणाद्यो बोद्धव्याः॥)

कीटजा, स्त्री, (कीटेभ्यो जायते। जन् + डः। टाप्।) लाक्षा। इति रत्नमाला। (लाक्षाशब्देऽस्या गुणादिकं ज्ञेयम्॥ कीटसम्भवे, त्रि,।
यथा महाभारते २।५१।२९।
"कीटजं पट्टजञ्चैव पट्टजं कीटजन्तथा"॥)

कीटपादिका, स्त्री, (कीटा पादे मूलेऽस्याः। कीट पाद + कप्। अत इत्वं टापि।) हंसपदीलता। इति राजनिर्घण्टः॥

कीटमाता, स्त्री, (कीटानां माता इव। मूलदेशात् बहुकीटोत्पत्तिसम्भवात्।) हंसपदीलता, इति भावप्रकाशः। (हंसपदीशब्देऽस्या गुणप्रभावा बोद्धव्याः॥)

कीटमारी, स्त्री, (कीटं मारयति। मृ + णिच् + अण्। उपपद समासः। गौरादित्वात् ङीष्।) हंसपदीलता। इति राजनिर्घण्टः॥

कीटेरा, पुं, (कील + एरक्। लस्य टः।) मरुस्थीय शाकः। इति भावप्रकाशः॥

कीदृक्, [श्] त्रि, (कमिव पश्यमसौ य इव दृश्यते इत्यादि वा। किम् + दृश् + क्विन्। "इदं किमोरीश्की" ६।३।९०। इति कीादेशः।) किम्प्रकारः। इति व्याकरणम्॥ (यथा नैषधे १।१३०।
"विलोकयन्त्या वरमीदृशमपि
प्रिये न कीदृक् भविता तव क्षणः"॥)

कीदृश, त्रि, (क इव दृश्यते असौ कमिव वा पश्यत्यसौ। किम् + दृश् + कञ्।) किम्प्रकारः। इति व्याकरणम्॥ (यथा महाभारतम्॥)
"कीदृशः सारथिर्विना ब्रह्मदत्त महायशाः।
कीदृशास्त्वां सौप्तिके तस्यै नृपति निशामय।"॥)

कीनाश, पुं, (क्लिश्नाति। क्लिश् विबाधने वधे वा। "क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम् च"। उणा० ५।५६। इति कन् उपधाया ईत्वं ललोपो नामागमश्च।) यमः। इत्यमरः १।१।५९॥ ("विधेरिव कीनाशनिकेतमातिथि।" माघः। १।४२॥) वानरविशेषः। इति शब्दरत्नावली॥

कीनाश, त्रि, (क्लिश्नाति। क्लिशुविबाधने वधे च। "क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम च"। उणा० ५।५६। इति कन् उपधाया ईत्वं ललोपो नामागमश्च।) कर्षकः। (यथा मनुः ८।१५०।
"अर्द्ध सन्दो ह्यत्र दाम्यः कुहारश्च चरन्नपि।
[illegible]"॥)

क्षुद्र। कदर्य्यशाली। इति मेदिनीहरहेमचन्द्रौ॥

कीर, क्ली, (कीरति बध्नाति शरीरम्। कील + अच्। लस्य रः।) मांसम्। इति राजनिर्घण्टः॥

कीर, पुं, (कीति अव्यक्तं ईरयतीति। ईर + णिच् + अण्।) शुकपक्षी। इत्यमरः २।५।२१॥ (यथा, नैषधे २।१५। "समवापिर इयतोऽपि कि न मुदं याचति कीरगीरिव"॥)

कीरक, पुं, (कीर + संज्ञायां कन्।) कण्ठभेदः। दयनकः। मापकम्। इति धरणी। (शुकपक्षी। इति व्याचार्य्याः॥)

कीरवर्णक, क्ली, (कीरस्येव वर्णो यस्य। बहु + कप्।) स्थौणेयकनामसुगन्धिद्रव्यम्। इति राजनिर्घण्टः। (स्थौणेयकशब्दे विवरणमस्य ज्ञातव्यम्॥)

कीराः, पुं (क + ईर + णिच् + अच पृषोदरात् साधु।) काश्मीरदेशाः। तद्देशवासिनः। बहुवचनान्तोऽयं शब्दः। इति मेदिनीत्रिकाण्डशेषौ॥

कीरेष्ट, पुं, (कीरस्य शुकस्य इष्टः प्रियः।) आम्रवृक्षः। आक्रोटवृक्षः। जलमधूकवृक्षः। इति राजनिर्घण्टः॥

कीर्ण, त्रि, (कीर्य्यते स्म। कॄ + कर्म्मणि क्त।) आच्छन्नः। क्षिप्तः। (यथा, शाकुन्तले १माङ्के।
"शीघ्रमभिरामसक्तानुपतति स्यन्दने दत्त दृष्टिः पश्चार्द्धेन प्रविष्टः शरपतनभयात् भूयसा पूर्व्वकायम्। दर्भैरर्द्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतत्वात् वियति बहुतरं स्तोकमुर्व्व्यां प्रयाति"॥) हिंसितः। इति मेदिनी॥

कीर्त्तन, क्ली (कॄत् + भावे ल्युट्।) कथनम्। वर्णनम्। इति जटाधरः॥ (यथा, मार्कण्डेये ९२।९२।
"रक्षां करोति भूतेभ्यो जन्मनां कीर्त्तनं मम"॥)

कीर्त्तना, स्त्री (कॄत् + कर्म्मणि युच् टाप् च।) यशः। इति शब्दरत्नावली॥

कीर्त्ति, स्त्री, (कॄत् + क्तिन्। यद्वा, कॄ धातवे "कृविविदभ्यां क्तिः" उणा० ४।११८। इत्यादि कार्य्यं इत्।) सुख्यातिः। तत्पर्य्यायः। यशः २। इत्यमरः १।६।११॥ समाज्ञा ३ समाख्या ४ अभिख्या ५। इति हलायुधः। समज्ञा ६ आख्या ७ श्लोकः ८ वर्णः ९। इति जटाधरः॥ कीर्त्तना १०। इति शब्दरत्नावली॥
"दानादिप्रभवा कीर्त्तिः शौर्य्यादिप्रभवं यशः"। इति माधवी। तत्र च यशःकीर्त्त्योर्भेदाभ्युपगमात् "यशःकीर्त्तिस्तावको नीरदपि न कीर्त्तिः" इति कर्णाटिम् प्रयोगः। [illegible] विवेको व्यापकः प्रायः कीर्त्तिरिति केचित् तत्र "कीर्त्तिर्यशो ह्यपकीर्त्तिरेति" इत्यादौ प्रसिद्धम्। इति भरतः॥ प्रसादः। इति मेदिनी॥ प्रसादः दीप्तिः। मातृकाविशेषः। इति शब्दरत्नावली॥ विस्तारः। कर्द्दमः। इति विश्वः॥

कीर्त्तित, त्रि (कॄत् + क्तः।) कथितः। यथा,—भागवते॥
"कुशस्थली तु भर यादौ कथ्यते कीर्त्तिता"॥

कीर्त्तिभाज, [ज्] पुं, (कीर्त्तिं भजते। भज + णिव्।)

द्रोणाचार्य्यः। इति शब्दरत्नावली॥ कीर्त्तिभाजि त्रि, यथा,—महाभारते १।८३।१९।
"राज्यमादृत न भवेद्भवत्। प्रमादात् कीर्त्तिभाक् सदा"॥)

कीर्त्तिमत्[त्] पुं, (कीर्त्तिरस्यास्तीति मतुप्।) वसुदेवज्येष्ठपुत्रः। (यथा भागवते ९।२४।५३।
"वसुदेवस्तु देवक्यां अष्टपुत्रानजीजनत्।
कीर्त्तिमन्तं सुषेणञ्च भद्रसेनमुदारधीः।
ऋजुं सम्मर्द्दनं भद्रं सङ्कर्षणमहीश्वरम्"॥)
कीर्त्तिविशिष्टे त्रि॥ (यथा, रघुः रामायणे १।३।११।
"उदारवाक्यार्थविवेकसम्भवे
कदापि रामस्य चकार कीर्त्तिमान्।
समाहितैः सद्भिरभूदविक्रवं
चकार काव्यं गुणवर्द्धनं"॥)

कीर्त्तिशेष, पुं (कीर्त्तिः शेषो यस्य।) मरणम्। इति जटाधरः॥

कील, बन्धे। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) अनुस्वारी। कीलति। इति दुर्गादासः॥

कील, पुं स्त्री, (कील्यते बध्यतेऽसौ अनेन वा। कील बन्धे + कर्म्मणि करणेऽधिकरणे च घञ् । [illegible] इति कीला।) अग्निशिखा। इत्यमरः ३।३।१९९॥ (यथा, महाभारते १।१५।१५।
"परितापाय कीलाभ्यां कीलैः सुविहिताः कृताः"।
तथा च आर्य्यासप्तशती ४०४।
"दाम शुभकीलभाजं बाला हृदि बंहिरं दमति"॥) स्तम्भः। शिखा। कफोणिः। इति मेदिनी॥ लवो। [illegible]। इति विश्वः॥ (मूढगर्भस्य प्रकारभेदः। यथा। 'तत्र ऊर्द्ध्वबाहुशिराः पादाभ्यां द्वारं निरुणद्धि कील इव स कीलः'।
इति सुश्रुते निदानस्थाने ८ अध्याये॥)

कीलक, पुं, (कीलति बध्नाति अनेन। कील + स्वार्थे कः।) कील। [illegible] मन्त्रः। तन्त्रोक्तमन्त्राङ्गविशेषः। इति स्मृतिः। कन्दरखलादि काष्ठम्। इति वैद्यम्। पशुबन्धनम्। इति वैदिकम्। ज्योतिःशास्त्रोक्त [illegible]। इत्यमरः ३।८।२९॥

कीलसंयुक्त, पुं, (कीलं संयुक्तं। सम् + युज + क्त।) [illegible]। इति शब्दचन्द्रिका॥ इति भाषा॥

कीला स्त्री पुं, (कील + टाप्।) कीलः। इत्यमरटीकायां [illegible]॥

कीलाल, क्ली (कील बन्धं आलाति आदत्ते [illegible]। कील + अल + अण्॥) [illegible] "कीलाल" इति [illegible]। अमृतम्। (यथा [illegible] हरिवंशे [illegible]।
"[illegible]"

विधाकोशादकल्पितकालामरी कुथलकीलाल पोषमनमाः")) रक्तम्। इत्यमरः२।३।१६८॥ (कीलामे कीलं आलाति। आला+क।) अमृतम्। मधु। इति शब्दरत्नावली॥ (पु कीलाय बन्धाय अलति पर्य्याप्नोतीति। पशुः॥)

कीलालधि, पुं, (कीलालं जलं धीयतेऽस्मिन्। धा+किः।) समुद्रः। इति शब्दरत्नावली॥

कीलालप, पुं, (कीलालं रुधिरं पिबति। पा+ "आतोऽनुपसर्गे कः"।३।२।३। इति कः।) राक्षसः। इति शब्दरत्नावली॥

कीलित त्रि, (कील्यतेऽसौ। कील+कर्म्मणि क्तः।) बद्धः। इत्यमरः।३।१।४१॥ (यथा, राजेन्द्रकर्णपूरे ३।

"किं वान्यत्तव देव! वेल्लति यदि भ्रूवल्लरीपल्लव
श्रीऽपि श्यामकपोलकीलितकरः श्रक्रन्दनः क्रन्दति"॥)

कीश, पुं, (की इति शब्दं इष्टे। ईश्+क। यद्वा कस्य वायोरपत्यं अंश इव। किः हनुमान् ईशो यस्य।) वानरः। इत्यमरः२।५।३॥ (यथा, काशीखण्डे ४२।३१।

"रासभे करभे कीशे श्येनेऽश्वतरे वृके"॥

के आकाशे ईष्टे प्रभवतीति। क+ईश्+क।) सूर्य्यः। पक्षी। इति शब्दरत्नावली। नग्ने त्रि। इति मेदिनी॥

कीशपर्ण, पुं, (कीशः वानरः तस्य लोमेव पर्णं यस्य।) अपामार्गः। इति शब्दरत्नावली॥

कीशपर्णी, स्त्री, (कीशपर्ण+जातौ ङीष्।) अपामार्गः। इत्यमरः।२।४।८८॥

कु ङ शब्दे। इति कविकल्पद्रुमः। (भ्वा० आत्म० अक० सेट्।) ङ कवते इति दुर्गादासः॥

कु श शब्दे। इति कविकल्पद्रुमः। (अदा० पर० अक० सेट्।) श कौति। इति दुर्गादासः॥

कु ङि ङ आर्त्तस्वरे। इति कविकल्पद्रुमः। (तुदा० आत्म० अक० सेट्।) ङि ङ कुवते अकुत। इति दुर्गादासः॥

कु, अ, (कु+डुः।) पापम्। कुत्सा। ईषदर्थः। निवारणम्। इति मेदिनी॥

कु, स्त्री, (कु+मितादित्वात् डुः।) पृथिवी। इत्यमरः।२।१।२॥

कुक, ङ आदाने। इति कविकल्पद्रुमः। (भ्वा० आत्म० सक० सेट्।) ङ कोकते। इति दुर्गादासः॥

कुकभ, क्ली (कुकेन आदानेन पानेनेत्यर्थः भातीति। भा+क।) मद्यम्। इति शब्दचन्द्रिका॥

कुकर, त्रि (कुत्सितः करो यस्य।) कुत्सितहस्तः। रोगादिना कुत्सितकरः। तत्पर्य्यायः। कुणिः १। इत्यमरः।२।६।४८॥ कूणिः २ कोणिः ३। इति तट्टीका॥

कुकील, पुं, (कोः पृथिव्याः तस्याः कील इव।) पर्व्वतः। इति त्रिकाण्डशेषः॥

कुकुट, पुं (कु ईषत् कुत्सितं यथा स्यात्तथा वा कुटतीति। कुट्+कः।) शितावरः। इति राजनिर्घण्टः॥ सुषुणि शाक इति भाषा॥ (अस्य पर्य्याया यथा भावप्रकाशस्य पूर्व्वखण्डे १ भागे।

"शितिवार शितिवरः स्वस्तिकः सुनिषण्णकः।
श्रीवारकः सूचिपत्रः पर्णकः कुकुटः शिखी"॥
गुणाश्चास्य सुनिषण्णकशब्दे ज्ञेयाः॥)

कुकुद, पुं, (कुकु इत्यव्ययम् अलङ्कृता कन्या। तां सत्कृत्य पात्राय ददाति यः।) कूकुदः। सत्कारपूर्व्वकालङ्कृतकन्यादानकर्त्ता। इत्यमरटीकायां रायमुकुटः॥

कुकुन्दर, क्ली (स्कुन्द्यते कामिनाऽत्र। स्कुदि आप्रवणे मद्गुरादयश्चेति निपातनात् साधुः।) नितम्बस्थकूपकद्वयम्। पृष्ठवंशादधोभागद्वयम्। इत्यमरः।२।६।७६॥ कुकुन्दरे इति द्विवचनान्तोऽपि प्रयोगः॥ (यथा सुश्रुते शारीरस्थाने। ६ अः॥

"पार्श्वजघनबहिर्भागे पृष्ठवंशमुभयतो नातिनिम्ने कुकुन्दरे नाम मर्म्मणी तत्र स्पर्शाज्ञानमधःकाये चेष्टोपघातश्च"॥)

कुकुन्दर, पुं, (कुं भूमिं दरयति दारयति वा अन्तर्भूतण्यन्तात् दॄ अच् निपातनात् दकारागमेन साधुः। कु ईषत् कुत्सितं वा कुन्दरमत्र।) कुकुरद्रुः। कुकुरौंदा इति हिन्दी भाषा। तत्पर्य्यायगुणाः यथा भावप्रकाशे।

"कुकुन्दरस्ताम्रचूड़ः सूक्ष्मपत्रो मृदुच्छदः।
कुकुन्दरः कटुस्तिक्तो ज्वररक्तकफापहः॥
तन्मूलमार्द्रं निक्षिप्तं वदने मुखशोषहृत्"॥

(पुंलिङ्गोऽयं शब्दोऽपि नितम्बस्थकूपकद्वये वर्त्तते यथा॥

"पृष्ठवंशं उभयतो यौ सन्धी कटिपार्श्वयोः।
जघनस्य बहिर्भागे मर्म्मणी तौ कुकुन्दरौ"॥

इति वाग्भटे शारीरस्थाने। ४ अध्याये॥)

कुकुभा, स्त्री, (कु ईषत् कुः पृथ्व्याधिष्ठात्री देवता इव भा यस्याः।) रागिणीविशेषः। इति हलायुधः॥

कुकुर, पुं (कु कुत्सितं कुरति शब्दायते। कुर्+अच्।) कुक्कुरः। (कुं पृथिवीं कुरति स्वामित्वेन आदृतवान्। कुर+कः। यद्वा—कुकधातोः "मद्गुरादयश्च"। उणां १।४२। इति साधुः।) क्षत्रियविशेषः। इत्युणादिकोषः। स तु यदुवंशी अन्धकराजपुत्रः। इति श्रीभागवतम्। (यथा माघे १२।१६।

"परिप्लुतसप्तजलनिका परस्परम्
परिरेभिरे कुकुरकौरवस्त्रियः"॥)

[illegible]। इति त्रिकाण्डशेषः॥

कुकुरा, पुं, (कुकुराः तन्नामख्याताः क्षत्रियाः तेषां जनपदः।) देशविशेषः। तद्देशवासीकश्च। तत्पर्य्यायः। दरदः १ दशार्हाः २ सात्वताः ३। बहुवचनान्तोऽयं शब्दः। इति त्रिकाण्डशेषः॥

कुकूटी, पुं, (कोः पृथिव्याः कूटोऽस्त्यस्याः। अच् गौरादित्वात् ङीष्।) शाल्मलिवृक्षः। इति राजनिर्घण्टः॥ (शाल्मलिशब्देऽस्य विवरणं ज्ञेयम्॥)

कुकूल, क्ली, (कोः भूमेः कूलम्। कुत्सितं कूलं वा।) शङ्कुभिः सङ्कीर्णश्वभ्रः। इत्यमरः।२।८।२०२। तनुत्रम्। इति हारावली॥

कुकूल, पुं (कु+ऊलच् कुमारमत्र।) तुषानलः। इत्यमरः।१।१।२२।

("शिरीषादपि मृद्वङ्गी क्केयमायतलोचना
अयं क्व च कुकूलाग्निकर्कशो मदनानलः"। इति उद्भटः। केचित्तु "कुकूलाग्नि कर्कशो मदनानल" इत्येवमाहुः॥)

कुकोल, क्ली, (कुत्सितं कोलति। कुल+अच्।) कोलिफलम्। इति शब्दचन्द्रिका॥

कुक्कुट, पुं स्त्री, (कुक्+सम्पदादित्वात् क्विप्। कुका आदानेन कुटतीति। कुट+कः।) पक्षिविशेषः। कुकुड़ा इति भाषा। तत्पर्य्यायः। कृकवाकुः २ ताम्रचूडः ३ चरणायुधः ४। इत्यमरः।२।५।१७॥ कालज्ञः ५ नियोद्धा ६ विष्किरः ७ नखरायुधः ८ ताम्रशिखी ९। इति जटाधरः॥ रात्रिवेदः १० उषाकरः ११ शताङ्गः १२ काहलः १३। इति शब्दरत्नावली॥ दक्षः १४ यामनादी १५ शिखण्डिकः १६। तन्मांसगुणाः। (यथा भावप्रकाशे।

"कुक्कुटो बृंहणः स्निग्धो वीर्य्योष्णोऽनिलहृद्गुरुः।
चक्षुष्यः शुक्रकफकृद्बल्यो वृष्यः कषायकः॥
आरण्यकुक्कुटः स्निग्धो बृंहणः श्लेष्मलो गुरुः।
वातपित्तक्षयवमिविषमज्वरनाशनः"॥

आरण्यकुक्कुटमांसगुणाः। बृंहणत्वम्। श्लेष्मकरत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥ रुच्यत्वम्। कषायत्वम्। स्वादुत्वम्। शीतलत्वञ्च। इति राजवल्लभः॥ ग्राम्यकुक्कुटमांसगुणाः। स्निग्धत्वम्। वातहरत्वम्। दीपनत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥ बलकारित्वम्। उष्णत्वम्। मधुरत्वञ्च। इति राजवल्लभः॥ *॥ निषादपुत्रः। शूद्रपुत्रः। उल्का। कुक्कुभपक्षी। इति मेदिनी॥ वह्निकणः। इति हेमचन्द्रः॥ (आसनविशेषः। यथा हठयोगदीपिकायाम्।१।२३।

"पद्मासनन्तु संस्थाप्य जानूर्वोरन्तरे करौ।
निवेश्य भूमौ संस्थाप्य व्योमस्थं कुक्कुटासनम्"॥)

कुक्कुटक पुं (कुक्कुट+स्वार्थे कन्।) कुक्कुभपक्षी। इति शब्दरत्नावली॥ स्वार्थे कन् प्रत्यये कुक्कुटशब्दार्थोऽप्यत्र॥)

कुक्कुटव्रत, क्ली, (कुक्कुट इत्याख्यं व्रतम्।) सन्तानार्थे [illegible]। इति शब्दमाला॥ कुक्कुटीव्रतमपि पाठः। ललितासप्तमीव्रतमिदम्। यथा—

"मासि मासि सिते पक्षे सप्तम्यां नियमेन या।
स्नात्वा शिवं वेष्टयित्वा यजते च सदाम्बिकाम्।
पूजयेच्च तदा तस्याः दुःखाय नैव विद्यते"॥

इति तिथ्यादितत्त्वे भविष्यपुराणम्॥

कुक्कुटमण्डप पुं, मुक्तिमण्डपः। यथा काशीखण्डे।

"ततो भोजनमारभ्य कदाचिदपि सत्तम।
मुक्तिमण्डपनाम्नैव कुक्कुटमण्डपः"॥

कुक्कुटमस्तक, क्ली, (कुक्कुटस्येव मस्तकं शिरो यस्य।) चव्यम्। इति राजनिर्घण्टः। चैइ इति भाषा॥ (अस्य शब्दस्य गुणादयो ज्ञेयाः॥)

कुक्कुटशिख, पुं (कुक्कुटस्य शिखेव शिखा यस्य।) कुसुम्भवृक्षः। इति शब्दचन्द्रिका॥

कुक्कुटाभ, पुं (कुक्कुट इव आभाति। आ+भा+कः।) [illegible] सर्पविशेषः। तत्पर्य्यायः।

कुक्कुटाहि २ । इति हेमचन्द्रः ॥

कुक्कुटाहिः, पुं, (कुक्कुटः सवर्ण इव अहिः सर्पः ।) कुक्कुटामस्तकः । इति हेमचन्द्रः ॥

कुक्कुटिः, स्त्री, (कुक्कुट इव आचरति । आचारे क्विप् इन ।) दम्भचर्या । इति हेमचन्द्रः ॥

कुक्कुटी, स्त्री, (कुक्कुटि + वा ङीष् ।) कुक्कुटस्त्री । इति मेदिनी ॥ क्रोडी । इति शब्दरत्नावली ॥ टिक् टिकि इति भाषा गृहगोधिका । इति जटाधरः । (यथा, सुश्रुते उत्तरतन्त्रे । ६० अ० ।) "कुक्कुटी सर्पगन्धाच तथाकाकादनीफले" । ओषधिविशेषः । इति चिन्तामणिः ।)

कुक्कुटीव्रतं, क्ली, (कुक्कुटी इति संज्ञकं व्रतं । नित्यकर्मविशेषः ।) भाद्रशुक्लसप्तमीकर्त्तव्यनियमविशेषः । तद्विवरणं ललितासप्तमीशब्दे द्रष्टव्यम् ॥

कुक्कुभ, पुं, (कुत्सितं भाषते । भाष + बाहुलकात् डः । यद्वा कुकं ग्रहणस्य कौति शब्दायते । कु + बाहुलकात् भक् ।) पक्षिविशेषः । इत्यमरः । २ । ५ । ३५ । भान्दुका इति भाषा ॥

कुक्कुरं क्ली, ग्रन्थिपर्णम् । इत्यमरः । २ । ४ । १२२ । गाँठियाला इति भाषा । (अस्य पर्य्याया यथा —
"स्थौणेयकं बर्हिवर्हं शुकबर्हञ्च कुक्कुरम् ।
ग्रन्थिपर्णं शुकपुष्पं शुकच्छदम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे । गुणा अस्य स्थौणेयकशब्दे ज्ञेयाः ।)

कुक्कुरः, पुं, (कोकते आदत्ते इति । कुक + उरच् । कुक पक्षिविशेषमपि ग्रहणाय कुरति शब्दायते । कुर + कः ।) पशुविशेषः । कुकुर इति भाषा । तत्पर्य्यायः । कौलेयकः २ सारमेयः ३ मृगदंशकः ४ शुनकः ५ भषकः ६ श्वा ७ । इत्यमरः । २ । १० । २१ ॥ कुक्कुरः ८ शुनः ९ कुर्कुरः १० श्वानः ११ । इति तट्टीका ॥ भषणः १२ भषाकः १३ वक्रलाङ्गूलः १४ कपालिः १५ रात्रिजागरः १६ कालेयकः १७ रात्रिचरः १८ मृगारिः १९ सूरः २० कृतज्ञः २१ । इति राजनिर्घण्टः ॥

अस्य गुणाः ।
"वज्राशी सल्लनखः सुविदः शोषभेदन ।
मधुमांसश्च सूरश्च यत्नेन च शुनो गुणाः" ॥
इति वाहटम् । अस्य परीक्षा यथा ।
"अमदर्पौ लाङ्गूलाधो श्रोत्रकर्णिमसीदिता ।
श्वानः श्वेतालनकलम्बक बद्धानि कम्बलम् ॥
दृढकादिश्वेतैरिव शुभो भेरी प्रवेशकः" । तद्यथा ।
"जातिश्च राजधानीव तामसाश्च विप्रामताः ॥
कपाला चन्दसिंदीका दक्षिणा कालमौलिन ।
श्वाश्चे जातिश्च दोषा दृष्टश्च दक्षिणाश्रिताः ॥
जटा वक्रमुखो दीर्घा दृढस्वरसमुद्भवा ।
भाङ्कुरका वर्द्धितका श्वानके शासका मता ॥ १ ॥
कम्बलवेश्म के कावर कर्णकार्द्धा दृढवरः ।
श्वानस्ते तामसा क्षेत्रा तन्मन्दराश्रयाश्च ॥ २ ॥
कन्यादिरूपविशेषेण कवुका कस्य इव हि ।
कन्द दीर्घा कठनदा कनकश्च कदुरमः ।
कुसुमकरवलच्च श्वानको प्रकाशन ॥ ३ ॥
एकाङ्कश्वकुमोदय: कर्णकुण्डलधराः ॥

दीर्घौ दीर्घा महारङ्गा श्वानके सप्तमाननः । ४
दे पीतवर्णा महाराज्यकुम्भीमान एव च ॥
मुखा मुखा कर्णकिञ्जाले श्वानो वैश्यगालदः ॥ ५
लम्बवक्त्रमुखा दीर्घरोमाड एव च ।
शूद्राः श्वानसमूहास्ते श्वान शूद्रजातयः ॥ ६ ॥

कपिलमाधाल गुरुन्धरा दे
देवमध्यमका कुञ्जराकाश ।
मदहद्दृष्टा कपुत्रुण्डरला
क्षेमास्यका कुक्कुरजातयः स्मृ ॥ ७ ॥

द्विजातिचिह्नसयाति द्विजातिःस्वा भदावहा ।
मध्यमश्वसमन्वात चिह्नातिर्धनदायकः ॥
मोक्षोऽपि ।
द्विजातिश्चो चिह्नातिश्चो द्विजातिःश्वा गजोत्तमान् ।
भय भक्ष्य मोक्ष विदधाति यथाक्रमम् ॥
इति भोजराजकृतयुक्तिकल्पतरुः । (मुनिविशेषः । यथा महाभारते । २ । ४ । १० ।
"कुक्कुरो वेणुजङ्घोऽथ कालाप कठ एव च ।
मुनयो धर्म्मविदांसो धृतात्मानो जितेन्द्रियाः" ॥)

कुक्कुरद्रुः पुं (कुक्कुरः कुक्कुरगन्धोपलक्षितः द्रुः ।) वृक्षविशेषः । कुकुरसोंका इति भाषा । तत्पर्य्यायः । ताम्रचूडः २ सूक्ष्मपत्रः ३ मृदुच्छदः ४ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । ज्वरास्रकफानिलत्वम् । इति मदनविनोदः ॥
"तन्मूलमार्द्रं निहितं वदने मुखशोषहृत्" ।
इति भावप्रकाशः ॥

कुक्कुरी स्त्री, (कुक्कुर + स्त्रियां जातित्वात् ङीष् ।) कुक्कुरस्त्री । कुत्ती इति भाषा । तत्पर्य्यायः । सरमा २ शुनी ३ सारमेयी ४ शुनी ५ भषी ६ । इति शब्दरत्नावली ॥

कुक्कुवाच, पुं, (कुक्कुरस्य वाक् शब्द इव शब्दो यस्य ।) सारङ्गमृगः । इति राजनिर्घण्टः ॥

कुक्षः, पुं (कुष निष्कर्षे + "प्लुषिकुषिशुषिभ्यः क्सः" । उणा० ३ । ६८ । इति सः किच्च ।) कुक्षिः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कुक्षिः, पुं (कुष निष्कर्षे + "प्लुषिकुषिशुषिभ्यः क्सिः" । उणा० ३ । १५५ इति क्सिः ।) उदरम् । इत्यमरः । २ । ६ । ७७ ॥ (यथा, महाभारते १ । ७० । १९ ।
"दायादिनी विरुद्धाक्षि । तथा चन्द्रनिभानने ।
तथाऽकुक्षिणी मम कुक्षौ कारय मा चिरम्" ॥)
दानवविशेषः । यथा महाभारते १ । ६५ । २७ ।
"कुक्षिस्तु राजन् विख्यातो दानवानां महासुरः" ॥)

कुक्षिम्भरिः, त्रि (कुक्षिं बिभर्त्ति । कुक्षि + भृ + खच् मुम् च ।) आत्मम्भरिः । स्वोदरपूरकः । इत्यमरः । ३ । १ । २१ ॥

कुक्षिरन्ध्रः, पुं, (कुक्षौ रन्ध्रं छिद्रं यस्य ।) नलः । इति त्रिकाण्डः ।

कुङ्कुम, क्ली, (कुकम् इति दक्षोऽर्थः ... वर्णं अव्ययम् । यद्वा कुकते आदत्ते कान्तिम् । कुक आदाने उमक् विकल्पात् मुम् ।) सर्व्वगन्धद्रव्यम् । कुङ्कुम इति जाफरान् इति भाषा । (यथा ऋतौ ११ । ९ ।
"कुम्भकर्णविमर्दः कुङ्कुमेन लिप्तिम्
मन्दरवरगोमिभ्ंदनम् पश्चिमायाम" ॥)
तत्पर्य्यायः । काश्मीरजन्म २ अग्निशिखम् ३ वरम् ४ बाह्लीकम् ५ पीतनम् ६ रक्तम् ७ सङ्कोचम् ८ पिशुनम् ९ धीरम् १० लोहितचन्दनम् ११ । इत्यमरः । २ । ६ । १२४ । वर १२ वह्निशिखम् १३ वराह्लीकम् १४ रक्तचन्दनम् १५ । इति तट्टीका । असृग्दिग्धम् १६ अरुण १७ काश्मीरजम् १८ पीतकम् १९ वाह्लीकम् २० वर्णम् २१ शठम् २२ लोहितम् २३ घुसृणम् २४ वरेण्यम् २५ चारुम् २६ कावेरम् २७ जागुडम् २८ कान्तम् २९ वह्निशिखम् ३० कालेयकम् ३१ गौरम् ३२ मेघम् ३३ वर्णचन्दनम् ३४ लघुम् ३५ रक्तम् ३६ दीपनम् ३७ कौसुम्भम् ३८ कौसुमम् ३९ चन्दनम् ४० । इति शब्दरत्नावली । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातकफकण्ठरोगकृमिशिरोव्रणदोषनाशित्वम् । रुच्यत्वम् । वर्णकारित्वम् । इति राजनिर्घण्टः ॥ स्निग्धत्वम् । विषव्रणशिरोरोगनाशित्वम् । इति राजवल्लभः । शिरोव्रणकण्डूदोषवमनव्यङ्गनाशित्वम् । वर्ण्यत्वम् । इति भावप्रकाशः । व्यङ्गदोषनाशित्वम् । इति रत्नावली तत्कल्पिका च ॥ देशभेदे तत् त्रिविधम् । यथा,—
"काश्मीरदेशजे क्षेत्रे कुङ्कुमं यद्भवेद्धि तत् ।
सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम् ॥ १ ॥
बाह्लीकदेशसञ्जातं कुङ्कुमं पाण्डुरं भवेत् ।
केतकीगन्धयुक्तं तन्मध्यमं सूक्ष्मकेशरम् ॥ २ ॥
कुङ्कुमं पारसीकेयं मधुगन्धि तदीरितम् ।
ईषत्पाण्डुरवर्णं तदधमं स्थूलकेशरम्" ॥ ३ ॥
इति भावप्रकाशः ॥

कुङ्गी, स्त्री (कुङ्गं रसगन्धोऽस्त्यस्याः । अच् । गौरादित्वात् ङीष् । तत [illegible] ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (कुङ् गौति केचित् ।)

कुच, श संपर्चनकौटिल्यप्रतिष्टम्भविलेखने । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) श, कोचः कुचः । रोचः विलेखनः कर्षणं इत्यादि । कौटिल्यं एव भावो वर्त्तते । कोचति कुन्दैते यदि तदा वक्रीकरोति सिन्धौ । एवं शब्दः । इति दुर्गादासः ॥

कुच, शि शब्दे । इति कविकल्पद्रुमः ॥ (तुदा०-पर०-अक०-सेट् ।) शि, [illegible] । किं तनुर्वाच कुचेत् गुरोः । इति दुर्गादासः ॥

कुच, न सङ्कोचे । अवेक्षणम् इति भावः । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) कोचति दृष्ट्या । कुञ्चनात्मादौ कुञ्चे न कोचति इति मनायति । मतान्तरे तालव्यदन्त्यः । कोचति नासिका विकटधीकरः । इति दुर्गादासः ॥

कुच पुं, (कुचति सङ्कुचति । कुच् सङ्कोचे + "इगुपधेति" ३ । १ । १३५ । कः ।) स्तनः । इत्यमरः । २ । ६ । ७७ ॥ (यथा श्रीमद्भागवते ५ । १९ । १८ ।

"अन्या वक्षसि चान्यस्यास्तस्यास्त्वप्यपरा कुचे ।
उरूपार्श्वकटीपृष्ठमन्योन्यं समुपाश्रिताः" ॥
स्त्रीणां यौवने कुचपरिवृद्धिर्भवति ।
यथाह भावप्रकाशे ।
"पुष्पाणां मुकुले गन्धो यथा सन्नपि नाप्यते ।
तेषां सदपि तारुण्ये पुष्टत्वात् व्यक्तिमेति हि ॥
कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा ।
रोमराज्यादय एषां नारीणामपि यौवने ॥
जायते ऽत्र च यो भेदो ज्ञेयो व्याख्यानतः स च" ॥
व्याख्यानं यथा,—
"पुंसां रोमराजिश्मश्रुप्रभृतय
नारीणान्तु रोमराजी स्तनास्तवादय" ॥)

कुचण्डिका, स्त्री, (कुत्सिता चण्डिका कोपना इव । विकृतिकारितया तथात्वम् ।) मूर्व्वालता । इति शब्दचन्द्रिका ॥

कुचन्दनम्, क्ली, (कुत्सितं गन्धहीनतया यच्चन्दनं यद्वा कौ पृथिव्यां चन्दनमिव ।) रक्तचन्दनम् । इत्यमरः । २ । ६ । १३२ ॥ पत्राङ्गम् । बकम काठ् इति भाषा । वृक्षभेदः । इति मेदिनी ॥ कुङ्कुमम् । इति शब्दचन्द्रिका । (अस्य पर्य्याया यथा,—वैद्यकरत्नमालायाम् ।
"पत्रङ्गं रञ्जनं रक्तं पत्राङ्गञ्च कुचन्दनम्" ॥)

कुचफल, पुं, (कुच इव फलं यस्य । कुचसदृशत्वात् तथात्वम् ।) दाड़िमवृक्षः । इति राजनिर्घण्टः ॥ (गुणपर्य्याया दाड़िमशब्देऽस्य ज्ञातव्याः ॥)

कुचर, त्रि, (कुत्सितं चरतीति । कु + चर् + अच् ।) कुचारः । परदोषकथनशीलः । इत्यमरः । ३ । १ । ४७ ॥ (दुर्गमदेशगन्ता । यथा, ऋग्वेदे ।१।१५४।२।
"प्र तद्विष्णुः स्तवते वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः" ॥ कुत्स्थाने चरतीति । कान्तारादि पर्य्यटकः । कौ पृथ्व्यां चरतीति । भूमिचरः ॥ यथा महाभारते । १४ । ३८ । १३,१४ ।
"दृष्टा त्वादित्यमुद्यन्तं कुचराणां भयं भवेत् ।
अध्वगाः परितप्येयुरुष्णतो दुःखभागिनः ॥
आदित्यः सत्त्वमुद्रिक्तं कुचरास्तु तथा तमः ।
परितापोऽध्वगानाञ्च राजसो गुण उच्यते" ॥)

कुचाग्रं, क्ली, (कुचस्य कुचयोर्वा अग्रम् ।) स्तनाग्रभागः । तत्पर्य्यायः । चूचुकम् २ इत्यमरः । २ । ६ । ७७ ॥ चुचुकम् ३ । इति तट्टीका ॥

कुचाण्डेरी, स्त्री, (कुत्सिता चाण्डेरी ।) इति रत्नमाला ॥ चुक्रिका । चुकापालङ् इति भाषा ॥

कुचिक, पुं स्त्री, (कुच + बाहुलकात् इकन् ।) मत्स्यविशेषः । इति सिद्धान्तकौमुदी । कुचिया इति भाषा ॥

कुचेल, त्रि, (कुत्सितं चेलं वस्त्रं यस्य ।) कुवासाः । परिहितकुत्सितवस्त्रो जनः । इति मेदिनी ॥ (कुत्सितं चेलमिति विग्रहे, क्ली, जीर्णवस्त्रम् । यथा, मनुः ६ । ४४ ।
"कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्" ॥)

कुचेला, स्त्री, (कुत्सिता चेला इव भूमिः स्थिता वा यस्याः ।) विद्धकर्णी । इति मेदिनी (यथा, भैषज्य रत्नावल्याम् ।
"कुचेला कुलका राजिर्म्मेघनामा च ग्रन्थिका" ॥
अस्याः पर्य्याया यथा ।
"अम्बष्ठाम्बष्ठकीपाठा कुचेला पापचेलिका ।
एकाष्ठीला वरा तिक्ता प्राचीनौकाश्रिवाशुका" ॥
इति वैद्यकरत्नमालायाम् ॥)

कुचेली, स्त्री, (कुचेल + गौरादित्वात् ङीष् ।) अम्बष्ठा । इति रत्नमाला ॥ आकनादि इति भाषा ॥

कुच्छं, क्ली, (कौ पृथिव्यां दुःखं छ्यति दशनाद्याया दिवा कुमातीति । कु + छो + क ।) कुमुदम् । इति शब्दचन्द्रिका ॥ (कुमुदशब्देऽस्य गुणपर्य्याया बोद्धव्याः ॥)

कुज उ स्तेये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) उ कोजित्वा कुक्त्वा । स्तेयं चौर्य्यम् । इति दुर्गादासः ॥

कुज, इ अव्यक्तशब्दे । इति चन्द्रः । (भ्वा-पर-अक-सेट्-इदित ।) कुञ्जति कुञ्जरः । इति दुर्गादासः ॥

कुज, पुं, (कोः पृथिव्याः जायते । कु + जन् + ड ।) मङ्गलग्रहः । (यथा, मङ्गलस्तुतौ । "अङ्गारकः कुजो भौम" इति ।) नरकासुरः । (यथा,—
"तत्राहृतास्ता नरदेवकन्या
कुजेन दृष्ट्वा हरिमात्तबन्धुम्" ॥
श्रीमद्भागवते ३।३।८ ॥) वृक्षः । इति हेमचन्द्रः ॥

कुजम्भल, त्रि, (कौ पृथिव्यां कौ वा जम्भते भित्त्यादिखननेन सन्धिचौरः ।) चौरविशेषः । इति धारावली । सिँदेल चोर इति भाषा ॥

कुजम्भिल, त्रि, (कुजम्भोऽस्यास्तीति । इलच् ।) कुजम्भलः । इति शब्दरत्नावली ॥

कुजा, स्त्री, (कुजा पृथिवीजा वृक्षाः आश्रयत्वेन सन्ति अस्याः इति अच् ततष्टाप् । यथा,—
"कदली दाड़िमी धान्य हरिद्रा मानकस्तथा ।
बिल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका" ॥
इति नवपत्रिकासु "तव स्थानमिदं मर्त्ये" इत्यादि निर्देशेन चास्याः आश्रयत्वात् तथात्वम् ।) कात्यायनी देवी । इति मेदिनी ॥ (कोः पृथिव्याः जायते । जन + डः टाप् च । सीता देवी भूमेः तदुत्पत्तिकथा कालिकापुराणे २० अध्याये ।
"तत पुरोधस राजा गौतमं मुनिसत्तमम् ।
शतानन्द शतानन्द पुरोधायाकरोत्तदा ॥
द्वौ पुत्रौ तस्य सञ्जातौ दक्षभूमौ वरौ सुतौ ।
एका च दुहिता साध्वी भूपङ्कजगता शुभा" ॥)

कुजिङ्ग, पुं मत्स्यभेदः । अस्य गुणाः । मधुरत्वम् । हृद्यत्वम् । कषायत्वम् । दीपनत्वम् । बल्यकारित्वम् । स्निग्धत्वम् । गुरुत्वम् । ग्राहित्वम् । वाते हितत्वम् । रोचनत्वञ्च । इति राजनिर्घण्टः ॥

कुज्झटि, स्त्री, (कौ झटति अपसरति सूक्ष्मधारम् । कुञ्झ + क्विप् न कुञ्झ । झट् सङ्घाते इन् । तत कर्म्मधारयः ।) कुज्झटिका । कुहा । कुयाशा इति च भाषा । तत्पर्य्यायः । धूममहिषी २ रत्नाभी ३ कुहेलिका ४ धूमिका ५ नभोरेणु ६ । इति त्रिकाण्डशेषः । अस्य गुणाः । रूक्षत्वम् । तमोगुणकारित्वम् । कफपित्तकारित्वञ्च । इति राजवल्लभः ॥

कुज्झटिका, स्त्री, (कुज्झटि + स्वार्थे कन् टाप् ।) कुज्झटि । इति शब्दरत्नावली ॥

कुज्झटी, स्त्री, (कुज्झटि + स्त्रियां वा ङीप् ।) कुज्झटिः । इति शब्दरत्नावली ॥

कुञ्चन, क्ली, (कुञ्चति अनेन । कुञ्च + करणे ल्युट् ।) नेत्ररोगविशेषः । तस्य लक्षणं यथा,—
"वाताद्या वर्त्मसङ्कोचं जनयन्ति यदा मलाः ।
तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः" ॥
इति माधवकरः ॥ (भावे ल्युट् । सङ्कोचः । यथा सुश्रुते ।
"कुर्य्यात् शिरागतं मूत्रशिरा कुञ्चनपूरणम्" ॥)

कुञ्चफला, स्त्री (कुञ्च कुञ्चितं फलं यस्याः ।) कुष्माण्डी । इति राजनिर्घण्टः ॥

कुञ्चि, पुं, (कुञ्च + इन् ।) अष्टमुष्टिपरिमाणम् । यथा, स्मृतिः ।
"अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्" ॥

कुञ्चिका, स्त्री, (कुञ्च + ण्वुल् + टाप् इत्वञ्च ।) गुञ्जा । कुँच इति भाषा । वंशशाखा । कञ्चि इति भाषा । इति शब्दचन्द्रिका ॥ कृष्णजीरकः । इति जटाधरः ॥
(अस्याः व्यवहारो यथा मरिचाद्यचूर्णे ।
"मरिचं कुञ्चिकाम्बष्ठा वत्सकाख्या कुङ्कुमः एषकः" ॥
इत्यादिषु द्रष्टव्यम् । इति चरके चिकित्सास्थाने । १९ अः ॥) कूञ्चिका । कुँजि चावि इति च भाषा । इति हेमचन्द्रः ॥ मेथिका । इति राजनिर्घण्टः ॥ मत्स्यभेदः । कुँचे इति भाषा । यथा । "कुञ्चिकयैव विकाशयति नाशयति" । इति मुग्धबोधम् ॥

कुञ्चित, त्रि, (कुञ्च + क्त ।) वक्रम् । इत्यमरः । ३ । १ । ७१ ॥ (यथा, नैषधे २ । १ ।
"आकुञ्चिताभ्यामथ पक्षतिभ्यां
नभोविभागात्तरसावतीर्य्य" ॥)
तगरपुष्पे क्ली । इति राजनिर्घण्टः ॥

कुञ्ज, पुं क्ली, (कौ जायते जन + ड । पृषोदरादित्वात् मुमि साधुः ।) पर्व्वतादेर्लतापल्लवादिभिः समन्तादाच्छादितगर्भो गह्वरादिदेशः । इति मधुप्रभृतयः ॥ उपरि चतुर्दिक्षु च लतादिभिराच्छादितस्य स्थानस्य मध्ये शून्यदेशः । इत्यन्ये । इति भरतः ॥ तत्पर्य्यायः । निकुञ्जः । इत्यमरः । २ । ३ । ८ ॥ (यथा, पदाङ्कदूते १ ।
"गोपीभर्त्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकबरी निःश्वसन्ती विशालम् ।
त्वद्वैवासे मुररिपुरिति भ्रान्तिदूतीकृताया
यद्वा भेदं झटिति यमुना मञ्जुकुञ्जं जगाम" ॥)
हनुः । हस्तिदन्तः । इति मेदिनी ॥

कुञ्जर, पुं, (प्रशस्तः कुञ्जः हनुर्दन्तौ वा अस्त्यस्य । कुञ्ज + "रमरतस्मे समुद्रकुञ्जेभ्य उपसंख्यानम्" । वार्त्तिकं इति रः ।) हस्ती । (यथा, महाभारते १ । देवयानीप्रवेशे ७६ । १५ ।
"कुञ्जरस्येव ग्रामे परिक्षिप्ताकुभयम्यम्" ॥)
उत्तरपदे श्रेष्ठवाचकः । यथा पुरुषकुञ्जर इत्यादि । इत्यमरः । ३ । ८ । १० ॥ (जनविशेषः । यथा, महाभारते । ६ । ९ ।

कुक्कुटाहिः २ । इति हेमचन्द्रः ॥

कुक्कुटाहिः, पुं, (कुक्कुट तद्वर्णत्वात् इव अहिः सर्पः ।) कुक्कुटाभसर्पः । इति हेमचन्द्रः ॥

कुक्कुटि, स्त्री, (कुक्कुट इव आचरति । आचारे क्विपि इन् ।) दम्भचर्य्या । इति हेमचन्द्रः ॥

कुक्कुटी, स्त्री, (कुक्कुटि + वा ङीप् ।) दम्भचर्य्या । इति मेदिनी ॥ ज्येष्ठी । इति शब्दरत्नावली ॥ टिक्टिकि इति भाषा शाल्मलीवृक्षः । इति जटाधरः । (यथा, सुश्रुते उत्तरतन्त्रे । ६० अः ।) "कुक्कुटी सर्पगन्धा च तथाकाकविषाणिके" ॥ योनिविशेषः । इति चिन्तामणिः ॥)

कुक्कुटीव्रत, क्ली, (कुक्कुटी इति संज्ञकं व्रतं नियमविशेषः ।) भाद्रशुक्लसप्तमीकर्त्तव्यनियमविशेषः । तद्विवरणं ललितासप्तमीशब्दे द्रष्टव्यम् ॥

कुक्कुभः, पुं, (कुक्कुशब्दं भाषते । भाष + बाहुलकात् डः । यद्वा कुक् इत्यव्यक्तं कौति शब्दायते । कु + बाहुलकात् भक् ।) पक्षिविशेषः । इत्यमरः । २ । ५ । ३५ । पालकुमा इति भाषा ॥

कुक्कुर क्ली, ग्रन्थिपर्णम् । इत्यमरः । २ । ४ । १२२ । गाँठियाला इति भाषा ॥ (अस्य पर्य्याया यथा,— "स्थौणेयकं बर्हिबर्ह शुकबर्हञ्च कुक्कुरम् । स्थौणेयकं शुकवापि शुकपुष्पं शुकच्छदम्" ॥ इति भावप्रकाशस्य पूर्ब्बखण्डे १ भागे ॥ गुणा अस्य स्थौणेयकशब्दे ज्ञेयाः ।)

कुक्कुरः, पुं, (कोकते आदत्ते इति । कुक + उरच् । कुत्र यत्किञ्चिदपि भक्ष्यं जनं दृष्ट्वा कुरति शब्दायते । कुर + कः ।) जन्तुविशेषः । कुकुर इति भाषा ॥ तत्पर्य्यायः । कौलेयकः २ सारमेयः ३ मृगदंशकः ४ शुनकः ५ भषकः ६ श्वा ७ । इत्यमरः । २ । १० । २१ ॥ कुक्कुरः ८ शुनः ९ शुनिः १० श्वानः ११ । इति तट्टीका ॥ भषकः १२ मण्डूक १३ वक्रलाङ्गूलः १४ श्वकारिः १५ रात्रिजागरः १६ कालेयकः १७ ग्राम्यमृगः १८ मृगारिः १९ शूरः २० शयालुः २१ । इति राजनिर्घण्टः ॥

तस्य गुणाः ।

"कृतज्ञो स्वल्पसन्तुष्टः सनिद्रः शीघ्रचेतन ।
प्रभुभक्तश्च शूरश्च षडेते च शुनो गुणाः" ॥

इति चाणक्यम् ॥ तस्य परीक्षा यथा,

"मृगयार्थं शाकुनार्थं कौतुकार्थञ्च पोषिताः ।
श्वानः पोष्यास्तत्स्तेषामथ वक्ष्यामि लक्षणम् ॥
गुणजातिप्रभेदेन शुनो भेदो ह्यनेकधा" । तद्यथा ।
"सात्त्विका राजसाश्चैव तामसाश्च त्रिधा मताः ॥
श्वानास्ता अपरिक्लीबाः पवित्राः सत्त्वभोजिनः ।
श्वानस्ते सात्त्विकाः प्रोक्ता हासन्ते न कदाचित् कचित् ॥ १
तुङ्गा वज्रमुखा दीर्घा गुरवस्तनूदराः ।
लाङ्गूलाग्रा गाढकाश्च श्वानस्ते राजसा मताः ॥ २
स्वल्पप्रमेया ये श्वाना चलज्जिह्वा गुरूदराः ।
श्वानस्ते तामसा ज्ञेयाः सन्ध्यावनमभाजया ॥ ३
महादिजातिभेदेन चतुर्द्धा श्वा एव हि ।
शुभ्रा दीर्घा लम्बकर्णा लघुपुच्छास्तनूदराः ॥
शुभ्रास्तरदनाश्च श्वानस्ते ब्रह्मजातयः ॥ १
रक्ताङ्गाल्लघुलोमानो बलवन्तोऽल्पनूदराः ॥

दीर्घा दीर्घा नखरदाः श्वानस्ते क्षत्रजातयः ॥ २
ये पीतवर्णा मृदवस्तनुलोमान एव च ॥
मृद्वा मृद्वा चलज्जिह्वाश्च श्वानो वैश्यजातयः ॥ ३
कृष्णवर्णास्तनुमुखा दीर्घरोमाण एव च ॥
स्थूलाङ्गाः श्रमयुक्ताश्च ते श्वानः शूद्रजातयः ॥ ४

लघुप्रमाणास्तु गुरूदरा ये
येऽमेध्यभक्षा मङ्गुलकाश्च ।
प्रचण्डपुच्छा बहुसुप्तरक्ता
नीचान्ययाः कुक्कुरजातयः स्युः ॥ ५ ॥

द्विजातिमिश्रससर्गात् द्विजाति श्वा भयावहः ।
सद्गुणान्वयधर्म्मत्वात् त्रिजातिधननाशनः ॥

भोजोऽपि ।

द्विजातिर्वा त्रिजातिर्वा चिजातिः श्वा महीभुजाम् ।
भय धनक्षय शोक विदधाति यथाक्रमम् ॥

इति भोजराजकृतयुक्तिकल्पतरुः ॥ (मुनिविशेषः । यथा महाभारते । २ । ४ । १७ ।

"कुक्कुरो वेणुजङ्घोऽथ कालाप कठ एव च ।
मुनयो धर्म्मविद्वांसो धृतात्मानो जितेन्द्रियाः" ॥)

कुक्कुरद्रुः, पुं, (कुक्कुरः कुक्कुरगन्धोपलक्षितः द्रुर्वृक्षः ।) क्षुपविशेषः । कुकुरसोंका इति भाषा । तत्पर्य्यायः । ताम्रचूडः २ सूक्ष्मपत्रः ३ मृदुच्छदः ४ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । ज्वररक्तकफनाशित्वञ्च । इति मदनविनोदः ॥

"तन्मूलमादं निक्षिप वदने मुखशोषमपनुद्" ॥

इति भावप्रकाशः ॥

कुक्कुरी, स्त्री, (कुक्कुर + स्त्रियां जातित्वात् ङीष् ।) कुक्कुरस्त्री । कुत्ती इति भाषा । तत्पर्य्यायः । सरमा २ श्वानी ३ सारमेयी ४ शुनी ५ भषी ६ । इति शब्दरत्नावली ॥

कुक्कुवाक, पुं, (कुक्कुरस्य वाक शब्द इव शब्दो यस्य ।) सारङ्गमृगः । इति राजनिर्घण्टः ॥

कुक्षः, पुं, (कुषनिष्कर्षे + "उन्दिगुधिकुषिभ्यश्च" । उणां ३ । ६८ । इति सः, किच्च ।) कुक्षिः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

कुक्षि, पुं, (कुषनिष्कर्षे + "प्लुषिकुषिशुषिभ्यः क्सिः" । उणां ३ । १५५ इति क्सिः ।) उदरम् । इत्यमरः । २ । ६ । ७७ ॥ (यथा, महाभारते १ । ७१ । १२ ।

"यायोचित विप्रवाचि । त्वया चन्द्रनिभानने ।
तथाहमुषितो भद्रे कुक्षौ काव्यस्य भाविनि ।" ॥

दानवविशेषः । यथा महाभारते १ । ६७ । ५७ ।

"कुक्षिस्तु राजन् विख्यातो दानवानां महाबल" ॥)

कुक्षिम्भरि, त्रि, (कुक्षि बिभर्त्तीति । भृ + खः + मुम् च ।) आत्मम्भरिः । स्वोदरपूरकः । इत्यमरः ३ । १ । २१ ।

कुक्षिरन्ध्रः, पुं, (कुक्षौ रन्ध्रं छिद्रं यस्य ।) मत्स्यः । इति निघण्टः ।

कुङ्कुम, क्ली, (कुमकुम् इति शब्दोऽस्ति वाचकत्वेनास्य अर्श आद्यच् । यद्वा कुक्यते आदीयतेऽसौ । कुक आदाने उमक् निपतनात् मुम् ।) स्वनामख्यात गन्धद्रव्यम् । कुमकुम् इति केशर इति भाषा । (यथा माघे ११ । १४ ।

"क्षतधवविमर्दैः कुङ्कुमेनेव किञ्चित्
मलयजरजोभिर्भूषयन् पश्चिमाशाम्" ॥)

तत्पर्य्यायः । काश्मीरजन्म २ अग्निशिखम् ३ वरम् ४ बाह्लीकम् ५ पीतनम् ६ रक्तम् ७ सङ्कोचम् ८ पिशुनम् ९ धीरम् १० लोहित चन्दनम् ११ । इत्यमरः । २ । ६ । १२४ । चारु १२ वाह्निकम् १३ वरवाह्लीकम् १४ रक्तचन्दनम् १५ । इति तट्टीका ॥ अग्निशेखरम् १६ चक्र १७ काश्मीरजम् १८ पीतकम् १९ काश्मीरम् २० रुधिरम् २१ शठम् २२ शोणितम् २३ घुसृणम् २४ वरेण्यम् २५ असृक् २६ कालेयकम् २७ जागुडम् २८ कान्तम् २९ वह्निशिखम् ३० मेघवरम् ३१ गौरम् ३२ केसरम् ३३ हरिचन्दनम् ३४ रुचम् ३५ रक्तम् ३६ दीपकम् ३७ लोहितम् ३८ सौरभम् ३९ चन्दनम् ४ । इति शब्दरत्नावली ॥ अस्य गुणाः । सुरभित्वम् । तिक्तत्वम् । कटुत्वम् उष्णत्वम् । कासवातकफ कण्ठरोगमूर्द्धशूलविषदोषनाशित्वम् । रोचनत्वम् । तनुकान्तिकरत्वञ्च । इति राजनिर्घण्टः ॥ वैवर्ण्यत्वम् विवर्णताव्रणनाशित्वञ्च । इति राजवल्लभः ॥ स्निग्धत्वम् । शिरोरोगव्रणजन्तुवमिव्यङ्गदोषत्रयापहत्वम् । वर्ण्यत्वञ्च । इति भावप्रकाशः ॥ त्वग्दोषनाशित्वम् । इति रत्नावली राजचन्द्रिका च ॥ देशभेदे तत् त्रिविधम् । यथा,—

"काश्मीरदेशजे क्षेत्रे कुङ्कुमम् यद्भवेद्धि तत् ।
सूक्ष्मकेशरमारक्तं पद्मगन्धि तदुत्तमम् ॥ १ ॥
वाह्लीकदेशसञ्जातं कुङ्कुमं पाण्डुरं भवेत् ।
केतकीगन्धयुक्तं तन्मध्यमं सूक्ष्मकेशरम् ॥ २ ॥
कुङ्कुमं पारसीकेयं मधुगन्धि तदीरितम् ।
ईषत्पाण्डुरवर्णं तदधमं स्थूलकेशरम्" ॥ ३ ॥

इति भावप्रकाशः ॥

कुङ्कुमी स्त्री, (कुङ्कुमवर्णोऽस्त्यस्याः । अच् गौरादित्वात् ङीष् । ततः पृषोदरादित्वात् साधुः ।) महाज्योतिष्मती । इति राजनिर्घण्टः ॥ (कुम्भीति केचित् ।)

कुच, ज रोधनकौटिल्यरेखने । इति कविकल्पद्रुमः ॥ (भ्वां परं सकं, अकं च सेट्-ज्वलां ।) ज कोचः कुचः । रोध क्रियारोधः अड्गीभाव इत्यर्थः । अस्मिन्नर्थे एव प्रायो वर्त्तते । कश्चित् मनुदिते रात्रि तमः सङ्कोचति चिरौ । पर्वं सम्यक्तः । इति दुर्गादासः ॥

कुच, श्रि सङ्कोचे । इति कविकल्पद्रुमः ॥ (तुदां परं अकं,सेट् ।) प्रायः सम्पूर्व्वस्य प्रयोगः । श्रि सङ्कुचति असङ्कुचीत् चुकोच । इति दुर्गादासः ॥

कुच, तारशब्दे । उच्चैःशब्द इति यावत् । इति कविकल्पद्रुमः ॥ (भ्वां पर-अकं सेट् ।) कोचति दक्षः । भट्टमल्लस्तु तारे शब्दे च कोचति इति पाठं पठति । तन्मते तारं विक्षिप्तता । कोचति काकः वर्णिका विलक्षणवदतीत्यर्थः । इति दुर्गादासः ॥

कुचः पुं (कुचति सङ्कुचतीति । कुच् सङ्कोचे । "इगुपधेति" । ३ । १ । १३५ । कः ।) स्तनः । इत्यमरः । २ । ६ । ७७ । (यथा गोः रामायणे । ५ । ११ । ५७ ।

"अन्या वक्षसि चान्यस्याः कक्ष्यास्वाप्यपरा कुचे।
उरुपार्श्वकटीपृष्ठमन्योन्यं समुपाश्रिताः" ॥
स्त्रीणां यौवने कुचपरिवृद्धिर्भवति ।
यथाह भावप्रकाशे ।
"पुष्पाणां मुकुले गन्धो यथा सन्नपि नाप्यते ।
तेषां तदपि तारुण्ये पुरुषात् व्यक्तिमेति हि ॥
कुसुमानां प्रफुल्लानां गन्धः प्रादुर्भवेद्यथा ।
रोमराज्यादयः पुंसां नारीणामपि यौवने ॥
जायते ऽन च यो भेदो ज्ञेया व्याख्यानतः स च" ॥
व्याख्यानं यथा,—
"पुंसां रोमराजिश्मश्रुप्रभृतयः
नारीणान्तु रोमराजी स्तनार्त्तवादय" ॥)

कुचण्डिका, स्त्री, (कुत्सिता चण्डिका कोपना इव । विकृतिकारितया तथात्वम् ।) मूर्व्वालता । इति शब्दचन्द्रिका ॥

कुचन्दनम्, क्ली, (कुत्सितं गन्धहीनतया यच्चन्दनं यद्वा कौ पृथिव्यां चन्दनमिव ।) रक्तचन्दनम् । इत्यमरः । २ । ६ । १३२ ॥ पत्राङ्गम् । वकम काठ इति भाषा । वृक्षभेदः । इति मेदिनी । कुङ्कुमम् । इति शब्दचन्द्रिका । (अस्य पर्य्याया यथा,—वैद्यकरत्नमालायाम् ।
"पत्राङ्गं रञ्जनं रक्तं पत्राङ्गञ्च कुचन्दनम्" ॥)

कुचफलः, पुं, (कुच इव फलं यस्य । कुचसदृशफलत्वात्तथात्वम् ।) दाडिमवृक्षः । इति राजनिर्घण्टः ॥ (गुणपर्य्याया दाडिमशब्देऽस्य ज्ञातव्याः ॥)

कुचरः, त्रि, (कुत्सितं चरतीति । कु + चर + अच् ।) कुचारः । परदोषकथनशीलः । इत्यमरः । ३ । १ । ४७ । (दुर्गमदेशगन्ता । यथा, ऋग्वेदे । १ । १५४ । २ ।
"प्र तद्विष्णुः स्तवते वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः" । कुत्स्थाने चरतीति । कान्तारादिपर्य्यटकः । कौ पृथ्व्यां चरतीति । भूमिचरः । यथा महाभारते । १४ । २८ । १३, १४ ।
"दृष्ट्वा त्वादित्यमुद्यन्तं कुचराणां भयं भवेत् ।
अध्वगाः परितप्येयुस्तृष्यन्तो दुःखभागिनः ॥
आदित्यः सत्यमुद्दिष्टं कुचराश्च तथा तमः ।
परितापोऽध्वगानाञ्च रजसो गुण उच्यते" ॥)

कुचाग्रम्, क्ली, (कुचस्य कुचयोर्वा अग्रम् ।) स्तनाग्रभागः । तत्पर्य्यायः । चूचुकम् २ इत्यमरः । २ । ६ । ७७ । चुचुकम् ३ । इति तट्टीका ॥

कुचाण्डेरी, स्त्री, (कुत्सिता चाण्डेरी ।) इति रत्नमाला ॥ चुक्रिका । चुकापालं इति भाषा ॥

कुचिकः, पुं स्त्री, (कुच + बाहुलकात् इकन् ।) मत्स्यविशेषः । इति त्रिकाण्डशेषः । कुं इति भाषा ॥

कुचेलः, त्रि, (कुत्सितं चेलं वस्त्रं यस्य ।) कुवासाः । परिहितकुत्सितवस्त्रो जनः । इति मेदिनी ॥ (कुत्सितं चेलमिति विग्रहे । क्ली, जीर्णवस्त्रम् । यथा, मनुः । ६ । ४४ ।
"कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्" ॥)

कुचेला, स्त्री, (कुत्सितं चेलमिव पत्रं यस्याः । इति विग्रहे ।) विद्धकर्णी । इति मेदिनी ॥ (यथा, वैद्यकरत्नावल्याम् ।
"कुचेला कुलका पाठा निर्मेघनामा च यष्टिका" ॥
अस्याः पर्य्याया यथा ।
"अम्बष्ठाम्बष्ठकी पाठा कुचेला प्राचीनिका ।
एकाष्ठीला वरा तिक्ता प्राचीनौकाऽविवाहुका" ॥
इति वैद्यकरत्नमालायाम् ॥)

कुचेली, स्त्री, (कुचेल + गौरादित्वात् ङीष् ।) अम्बष्ठा । इति रत्नमाला ॥ आकनादि इति भाषा ॥

कुच्छम्, क्ली, (कौ पृथिव्याः दुःखं छ्यति छिनत्ति चन्द्रालोकादिना सुखायतीति । कु + छो + क ।) कुमुदम् । इति शब्दचन्द्रिका ॥ (कुमुदशब्देऽस्य गुणपर्य्याया बोद्धव्याः ॥)

कुज उ स्तेये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) उ कोजित्वा कुक्ता । स्तेयं चौर्य्यम् । इति दुर्गादासः ॥

कुज, इ अव्यक्तशब्दे । इति चन्द्रः ॥ (भ्वा-पर-अक-सेट्-इदित् ।) कुञ्जति कुञ्जरः । इति दुर्गादासः ॥

कुजः, पुं (कौ पृथिव्यां जायते । कु + जन् + ड ।) मङ्गलग्रहः । (यथा, मङ्गलस्य स्तुतौ । "अङ्गारक कुजो भौम" इति ।) नरकासुरः । (यथा,—
"तत्राहृतास्ता नरदेवकन्याः
कुजेन दृष्ट्वा हरिमार्त्तबन्धुम्" ॥
श्रीमद्भागवते १० । ३ । ८ ॥) वृक्षः । इति हेमचन्द्रः ॥

कुजम्भलः, त्रि (कौ पृथिव्यां कौ वा जम्भलः भित्तिकादिखननेन सन्धिचौरः ।) चौरविशेषः । इति हारावली । सिंदेल चोर इति भाषा ॥

कुजम्भिलः, त्रि, (कुजम्भोऽस्यास्तीति । इलच् ।) कुजम्भलः । इति शब्दरत्नावली ॥

कुजा, स्त्री, (कुजाः पृथिवीजाः सत्त्वाः आश्रयत्वेन सन्ति अस्याः इति अच् ततष्टाप् । यथा,—
"कदली दाडिमी धान्यं हरिद्रा मानकं कचुः ।
बिल्वाशोकौ जयन्ती च विज्ञेया नवपत्रिका" ॥
इति नवोक्तनवपत्रिकासु "तव स्थानमिदं मातः" इत्यादि निर्द्देशेन चाम्याः आश्रयत्वात् तथात्वम् ।) कात्यायनी देवी । इति मेदिनी ॥ (कौ पृथिव्यां जायते । जन + ड टाप् च । सीता देवी भूमेस्तदुत्पत्तिकथा कालिकापुराणे ३७ अध्याये ।
"तत्र पुरोधसं राजा गौतमं मुनिसत्तमम् ।
तताऽन्वः प्रतान्तः पुरोधाद्वाकरोत्कृतम् ॥
द्वौ पुत्रौ तस्य सञ्जातौ दक्षभूमौ परौ स्मृतौ ।
एका च दुहिता साध्वी भूम्यन्तरगता शुभा" ॥)

कुञ्चिकः, पुं मत्स्यभेदः । अस्य गुणाः । मधुरत्वम् । पुष्टत्वम् । बलावहत्वम् । दीपनत्वम् । बलकारित्वम् । स्निग्धत्वम् । गुरुत्वम् । ग्राहित्वम् । वाते हितत्वम् । रोचकत्वञ्च । इति राजनिर्घण्टः ॥

कुञ्झटि स्त्री, (कौ जटति आवृणोति सूर्य्यप्रकाशम् । कुञ्झ + किप् न कुत्वम् । झट् सङ्घाते इन् । तत्र कर्म्मधारयः ।) कुज्झटिका । कुहा । कुयाषा इति च भाषा । तत्पर्य्यायः । धूममहिषी २ रसाज्ञी ३ कुहेलिका ४ धूमिका ५ धूमरेखा ६ । इति त्रिकाण्डशेषः । अस्य गुणाः । प्रावृत्वम् । कफपित्तकारित्वम् ।

कुञ्झटिका, स्त्री, (कुञ्झटि + स्वार्थे कन् टाप् ।) कुञ्झटि । इति शब्दरत्नावली ॥

कुञ्झटी, स्त्री, (कुञ्झटि + स्त्रियां वा ङीप् ।) कुञ्झटि । इति शब्दरत्नावली ॥

कुञ्चनः, क्ली, (कुञ्चति अनेन । कुञ्च + करणे ल्युट् ।) नेत्ररोगविशेषः । तस्य लक्षणं यथा,—
"वाताद्या वर्त्मसङ्कोचं जनयन्ति यदा मलाः ।
तदा द्रष्टुं न शक्नोति कुञ्चनं नाम तद्विदुः" ॥
इति माधवकरः ॥ (भावे ल्युट् । सङ्कोचः । यथा सुश्रुते ।
"कुञ्चनात् शिरायता मूर्द्धशिरा कुञ्चनपूरणम्" ॥)

कुञ्चफला, स्त्री, (कुञ्च कुञ्चितं फलं यस्याः ।) कुष्माण्डी । इति राजनिर्घण्टः ॥

कुञ्चिः, पुं, (कुञ्च + इन् ।) अष्टमुष्टिपरिमाणम् । यथा, स्मृतिः ।
"अष्टमुष्टिर्भवेत् कुञ्चिः कुञ्चयोऽष्टौ च पुष्कलम्" ।

कुञ्चिका, स्त्री, (कुञ्च + ण्वुल् + टाप् इत्वञ्च ।) गुञ्जा । कुंच इति भाषा । वंशशाखा । कञ्चि इति भाषा । इति शब्दचन्द्रिका । कृष्णजीरकः । इति जटाधरः ॥
(अस्या व्यवहारो यथा मरिचाद्यपूर्णे ।
"मरिचः कुञ्चिकामस्ता अजाजी कुठवाः पृथक्" ।
इत्यादिषु द्रष्टव्यम् । इति चरके चिकित्सास्थाने । १९ अः ॥) कुञ्चिका । कुंजि चावि इति च भाषा । इति हेमचन्द्रः ॥ मेथिका । इति राजनिर्घण्टः ॥ मत्स्यभेदः । कुंचे इति भाषा । यथा । "कुञ्चिकयैव विक्षाययति मायदर्ति" । इति मुग्धबोधम् ॥

कुञ्चितः, त्रि, (कुञ्च + क्त ।) वक्रम् । इत्यमरः । ३ । १ । ७२ ॥ (यथा, नैषधे ३ । १ ।
"आकुञ्चिताभ्यामथ पक्षतिभ्यां
नभोविभागात्तरसावतीर्य्य" ॥)
तगरपुष्पे क्ली । इति राजनिर्घण्टः ॥

कुञ्जः, पुं क्ली, (कौ जायते जन + ड । पृषोदरादित्वात् मुमि साधुः ।) पर्व्वतादेस्तलप्रदेशादिभिः समन्ताच्छादितगर्भो गह्वरादिदेशः । इति मधुप्रभृतयः । उपरि चतुर्दिक्षु च लतादिभिराच्छादितस्य स्थानस्य मध्ये शून्यदेशः । इत्यन्ये । इति भरत ॥ तत्पर्य्यायः । निकुञ्जः । इत्यमरः । २ । ३ । ८ ॥ (यथा, गीतगोविन्दे १ ।
"मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमै-
र्नक्तं भीरुरयं त्वमेव तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं
राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः" ॥)
दन्तः । हस्तिदन्तः । इति मेदिनी ॥

कुञ्जरः, पुं, (प्रशस्तः कुञ्जः अतिशयेन कुञ्जवान् वा अस्यास्ति । कुञ्ज + "रप्रकरणे खमुखकुञ्जेभ्य उपसंख्यानम्" । वार्त्तिकं इति रः ।) हस्ती । (यथा महाभारते ३ । वैवस्वतपर्व्वणि ४६ । १५ ।
"कुञ्जरमेव समरे परिहृत्य कुञ्जरान्" ॥)
उत्तरपदे श्रेष्ठवाचकः । यथा पुरुषकुञ्जरः इत्यादि । इत्यमरः । ३ । ८ । ११ ॥ (अर्थविशेषे ।
महाभारते । १५ । १९ ।

"कुठरः कुञ्जरश्चैव तथा नाग प्रभाकरः" ।) केशः । इति मेदिनी ॥ देशभेदः । इति शब्दरत्नावली ॥ (पर्व्वतविशेषः । यथा रामायणे ४ । ४१ । ५० ।
"तत्र शङ्खध्वजाकारः कुञ्जरो नाम पर्व्वतः ।
अगस्त्यभवनं तत्र निर्म्मितं विश्वकर्म्मणा" ॥)

कुञ्जरपिप्पली, स्त्री, (कुञ्जरनाम्नी पिप्पली ।) गजपिप्पली । इति शब्दमाला ॥ (गजपिप्पलीशब्देऽस्या विवृतिर्ज्ञेया ॥)

कुञ्जरक्षारमूल, क्ली, (कुञ्जरपिप्पल्या इव क्षारं उग्रं मूलमस्य ।) मूलकम् । इति राजनिर्घण्टः ॥

कुञ्जरा, स्त्री, (कुञ्जः हस्तिदन्त इव पुष्पं अस्त्यस्याः । रप्रत्यये अत् तत अजादित्वात् टाप् ।) धातकी । धाइफुल इति भाषा । (अस्याः पर्य्याया यथा,—
"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा ।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणा अस्या धातकीशब्दे ज्ञातव्याः ॥) पाटलावृक्षः । इति मेदिनी ॥ (कुञ्जर + टाप् ।) हस्तिनी । इति शब्दचन्द्रिका ॥

कुञ्जराराति, पुं, (कुञ्जरस्य अरातिः शत्रुः ।) शरभः इति हेमचन्द्रः ॥ (सिंहः । इति व्युत्पत्तिलभ्योऽर्थः ॥)

कुञ्जरालुक, क्ली, (कुञ्जरस्य भक्ष्यं आलुकम् ।) आलुकविशेषः । हस्त्यालु । इति शब्दचन्द्रिका ॥

कुञ्जराशन पुं, (कुञ्जरेण अश्यते । अश भोजने + कर्म्मणि ल्युट् ।) अश्वत्थवृक्षः । इत्यमरः । २ । ४ । २० ॥ (अश्वत्थशब्देऽस्य विवरणं ज्ञेयम् ॥)

कुञ्जरी, स्त्री (कुञ्जर + जातित्वात् ङीष् ।) हस्तिनी । इति शब्दचन्द्रिका ॥

कुञ्जल, क्ली, (कुत्सितं जलमिव जलं यत्र । पृषोदरात् साधुः ।) काञ्जिकम् । इत्यमरः । २ । ९ । ३९ ॥

कुञ्जवल्लरी, स्त्री (कुञ्जाकृतिरिव कुञ्जाकारा वा वल्लरी ।) निकुञ्जिकाम्लावृक्षः । इति राजनिर्घण्टः ॥

कुञ्जिका, स्त्री, (कुञ्ज + स्वुन् + टाप् इत्वं च ।) कृष्णजीरकः । कुचिका इति क्वचित् पाठः । इति जटाधरः ॥ निकुञ्जिकाम्लावृक्षः । इति राजनिर्घण्टः ॥

कुट इ वैकल्ये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सकं-सेट् । इदित् ।) पञ्चमस्वरी । इ कुण्ट्यते । वैकल्यमिह विकलीकरणम् । कुण्टति जनं शोकः । इति दुर्गादासः ॥

कुट छि कौटिल्ये । इति कविकल्पद्रुमः ॥ (तुदां-पर-अकं सकं-सेट ।) छि कुटति अकुटीत् चुकोट कौटिल्यमिह कुटिलीभावः कुटिलीकरणञ्च । इति दुर्गादासः ॥

कुट क ञ प्रतापने । इति कविकल्पद्रुमः । (चुरां-आत्म-अकं-सेट् ।) पञ्चमस्वरी । क ञ कोटयते । यशोऽन्येन मन्यते । इति दुर्गादासः ॥

कुट, पुं स्त्री, (कुट + कः ।) कलसः । इत्यमरः । २ । ९ । ३१ ॥

कुट, पुं, (कुट + कः ।) कोटः । इति मेदिनी । गड इत्यादि भाषा ॥ शिलाकुट्टम् । पाथरभाङ्गा हातुडी इति भाषा । वृक्षः । इति हेमचन्द्रः ॥ पर्व्वतः । इति धरावली ॥ (कुटिले त्रि, यथा, ऋग्वेदे १ । ४६ । ४ । "हविषा जारो अपां पिपर्त्ति पपुरिर्नरा । पिता कुटस्य चर्षणिः" ॥)

कुटङ्क, पुं, (कुं पृथ्वीं टङ्कते आच्छाद्यतेऽनेन । कु + टकि आच्छादने । करणे घञ् ।) गृहाच्छादनम् । इति शब्दमाला ॥ चाल इति ख्यातः ॥

कुटङ्गक, पुं (कुटस्याङ्गमिव । शकन्ध्वादित्वात् साधुः ।) वृक्षलतागृहम् । छदिः । चाल इति भाषा । गृहभेदः । इत्यमरटीकायां मुकुटादयः ॥ कुडे इति भाषा ॥

कुटच, पुं, (कुटे गिरौ चीयते उत्पद्यते । चि + डः ।) कुटजवृक्षः । इति शब्दचन्द्रिका ॥ (कुटजशब्दे गुणादयोऽस्य ज्ञेयाः ॥)

कुटज, पुं, (कुटे पर्व्वते जायते । जन् + डः ।) पुष्पवृक्षविशेषः । अस्य फलं इन्द्रयवः । कुड़ची इति भाषा ॥ (यथा, माघे ६ । २१ ।
"कुटजपुष्पपरागकणाः स्फुट
विदधिरे दधिरेणुविडम्बनाम्" ॥)
तत्पर्य्यायः । शक्रः २ वत्सकः ३ गिरिमल्लिका ४ । इत्यमरः । २ । ४ । ६६ ॥ कौटजः ५ । इति तट्टीका ॥ वृक्षकः ६ शक्रपर्य्यायः ७ । इति रत्नमाला ॥ कुटजः ८ कोटी ९ कालिङ्गः १० मल्लिकापुष्पः ११ प्रावृष्यः १२ शक्रपादपः १३ वरतिक्तः १४ यवफलः १५ संग्राही १६ पाण्डुरद्रुमः १७ प्रावृषेण्यः १८ महागन्धः १९ पाण्डुरः २० । इति शब्दरत्नावली ॥ अपि च ।
"कुटजः कूटजः कौटो वत्सको गिरिमल्लिका ।
कालिङ्गः शक्रशाखी च मल्लिकापुष्प इत्यपि ॥
इन्द्रो यवफलः प्रोक्तो वृक्षकः पाण्डुरद्रुमः ।
कुटजः कटुको रूक्षो दीपनस्तुवरो हिमः" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । अतिसारनाशित्वञ्च । अतिसारस्य सद्य गुणः । रक्तपित्तकफदोषार्शोनाशित्वम् । इति राजनिर्घण्टः ॥ कफनाशकत्वम् । इति राजवल्लभः ॥
("कुटजत्वक्कृतः क्वाथो घनीभूतः सुशीतलः ।
लेह्वितोऽतिविषायुक्तः सर्व्वातीसारनुद्भवेत्" ॥
"कुटजस्य पलं ग्राह्यमष्टभागजले शृतम् ।
तस्मिन् विपचेद्भूयो दाडिमोदकसंयुतम् ॥
यावच्चैवदर्व्वीलेपं घनं तमुपकल्पयेत् ।
तस्यार्द्धकर्षमात्रेण पिबेत्तक्रातिसारवान् ॥
अवश्यमरणीयोऽपि मृत्योर्याति न गोचरम्" ।
इति वैद्यकचक्रपाणिसंग्रहेऽतिसाराधिकारे ॥) अगस्त्यमुनिः । द्रोणाचार्य्यः । इति मेदिनी ॥

कुटन्नट, क्ली, (कुटम् वक्रीभवन् सन् नटति । नट स्पन्दने + पचाद्यच् ।) कैवर्त्तीमुस्तकम् । इत्यमरः । २ । ४ । १२१ ॥ केउटिया मुता इति ख्यातम् । केशुर इति श्रीपौतिः । इति तट्टीका ॥
(अस्य व्यवहारो यथा ।
"मधुकं भद्रदारुञ्च पाठां मूर्व्वां कुटन्नटम्" ॥
इति वाभटे चिकित्सास्थाने १० अध्याये ।
अस्य पर्य्याया यथा ।
"कुटन्नटं पुनः वन्यं मुस्ताभञ्च परीसवम्" ॥
इति वैद्यकरत्नमालायाम् ॥
कोसची मोथा । गुड़तजी इति च । इयन्तु वितुन्नकनाम्नो वृक्षस्य त्वक् मुस्ताकृतिः ॥
पर्य्यायाश्च यथा ।
"कुटन्नटं दाशपुरं वानेयं परिपेलवम् ।
प्लवगोपुरगोनर्द्दकैवर्त्तीमुस्तकानि च ।
मुस्तावत् पेलवपुटं शुक्लाभं स्याद्वितुन्नकम्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे । गुणा अस्य वितुन्नकशब्दे ज्ञातव्याः ॥)

कुटन्नट, पुं (कुटन् सन् नटति । नट् + अच् ।) श्योनाकवृक्षः । इत्यमरः । २ । ४ । ५७ ॥
(अस्य पर्य्याया यथा ।
"श्योनाकः शोषणश्च स्यान्नटकट्वङ्गटुण्टुकाः ।
मण्डूकपर्णपत्रोर्णशुकनासकुटन्नटाः ।
दीर्घवृन्तोऽरलुश्चापि पृथुशिम्बः कटम्भरः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ श्योनाकशब्देऽस्य गुणाश्च ज्ञेयाः ॥)

कुटप, पुं, (कुटात् निपक्वाशयात् पाति रक्षति । कुट + पा + कः ।) मुनिः । निष्कुटः । गृहसमीपोपवनम् । (कुट + "उषिकुटिदलीति" । उणां ३ । १४० । इति कपन् ।) मानभेदः । स तु कुडवपरिमाणम् । इति हेमचन्द्रः ॥ कमले क्ली । इति राजनिर्घण्टः ॥

कुटर, पुं, (कुट + बाहुलकात् अरन् ।) कुठरः मन्थानदण्डबन्धनस्तम्भः । इत्यमरटीकायां नीलकण्ठः ॥

कुटल पुं, (कुट + "कुटः किच" । उणां ४ । ८० । इत्यल किच ।) वस्त्रगृहम् । इत्युणादिकोषः । कानात् ताव इति भाषा ॥

कुटलता, स्त्री (कुटेषु वृक्षेषु लता । शकन्ध्वादित्वात् साधुः ।) त्रिवृता । इति रत्नमाला । तेउड़ी इति भाषा ॥

कुटल, क्ली, (कुटति आच्छादयत्यनेन । कुट + करणे कलच् ।) पटलम् । इति शब्दावली ॥ चाल छाद इति भाषा ॥

कुटहारिका, स्त्री, (कुटं कलसं हरति जलानयनार्थं गृह्णाति या । कुट + हृ + ण्वुल् टाप् इत्वं च ।) दासी । इति हेमचन्द्रः ॥

कुटि, स्त्री, (कुट्यते वाध्यते शस्त्रादिभिः असौ । कुट् + "कॄ गॄ शॄ पॄ कुटीति" । उणां ४ । १४२ । इति इः स च कित् ।) मठम् । इत्यमरटीकायां भरतः ॥

कुटि, पुं, (कुट्यते छिद्यते असौ । कुट छेदने + "कुटिकम्प्योर्नलोपश्च" । उणां ४ । १४२ । इति इः । स च कित् । धातोर्नलोपश्च ।) वृक्षः । इति शब्दरत्नावली ॥ शरीरम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (पर्व्वतः । इत्युज्ज्वलदत्तः । ४ । १४३ ॥)

कुटिचर, पुं, (कुटि कुटिलं यथा चरतीति । कुटि +

चर+ट ।) अश्वसूकरः । इति शब्दरत्नावली ॥ शुयुक इति भाषा ॥

कुटिल, त्रि, (कुट कौटिल्यं जातमस्य । कुट्+इतच् किच ।) कुटिलम् । इत्युणादिकोष ॥

कुटिर, क्ली, (कुट्यते निर्म्मीयते यत्र । कुट+इरन् ।) कुटीरम् । लघुकुटी । इत्यमरटीकायां भरत ॥

कुटिल, त्रि, (कुट् वक्रीभावे + बाहुलकात् इलच् ।) वक्रम् । बाँका इति भाषा । तत्पर्य्यायः । अरालम् २ वृजिनम् ३ जिह्मम् ४ ऊर्म्मिमत् ५ कुञ्चितम् ६ नतम् ७ आविद्धम् ८ भुग्नम् ९ वेल्लितम् १० वक्रम् ११ । इत्यमरः । ३ । १ । ७१ ॥ भङ्गुरम् १२ । इति हेमचन्द्रः ॥ वेङ्कु १३ विनतम् १४ उन्दुरम् १५ । इति शब्दरत्नावली ॥ (यथा, विष्णुपुराणे १ । ९ । २३ ।

"ज्वलज्जटाकलापस्य भ्रुकुटीकुटिलं मुखम् । निरीक्ष्य कस्त्रिभुवने मम यो न गतो भयम्" ॥) तगरपुष्पे क्ली । इति राजनिर्घण्टः ॥ (अस्य पर्य्याया यथा,—

"कालानुसार्य्यं वक्रं तगरं कुटिलं शठम् । महोरगं नतं जिह्मं दीनं तगरपादिकम्" ॥

इति वैद्यकरत्नमालायाम् ॥ क्ली, छन्दोभेदः ॥)

कुटिला, स्त्री, (कुटति वक्रं गच्छतीति । कुट्+इलच् +स्त्रियां टाप् ।) नदीविशेषः । इति मेदिनी ॥ सरस्वती नदी । स्पृक्कानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ (राधिकाभर्त्तृभगिनी ॥ त्रि, वक्रत्वम् ॥)

कुटी, स्त्री पुं, (कुटि+वा ङीप् ।) कुटः । गृहम् । इत्यमरः । २ । २ । ६ ॥ (यथा मनुः । ११ । ७२ ।

"ब्रह्महा द्वादश समाः कुटीं कृत्वा वने वसेत्" ॥)

कुटी, स्त्री, कुम्भदासी । कुटिनी इति भाषा । सुरा नामगन्धद्रव्यम् । चित्रगुच्छः । इति मेदिनी ॥

कुटीचक, पुं, (कुट्या स्वीयेन पुत्रान्नेन चकते तृप्नोति । कुटी+चक+अच् ।) पुत्रान्नजीवी । तत्पर्य्यायः । पुत्रान्नादः २ । इति त्रिकाण्डशेषः ॥ (कुट्यां पर्णकुटीरे चकते तृप्नोति वसतीति । संन्यासिभेदः । स च कर्म्मनिष्ठः । यथा,—महाभारते १३ । १४ अध्याये ।

"चतुर्व्विधा भिक्षवस्ते कुटीचकबहूदकौ । हंसः परमहंसश्च योऽत्र पश्चात् स उत्तमः" ॥)

कुटीचरकः, पुं, (कुट्यां चरति । कुटी+चर+ट स्वार्थे कन् ।) यतिविशेषः । इति यतिधर्म्मसंग्रहः ॥

कुटीर, पुं, (कुटी+ह्रस्वार्थे रः ।) क्षुद्रगृहम् । कुँड़े इति भाषा । तत्पर्य्यायः । खलपेशम् २ । इति जटाधरः ॥ (यथा, गीतगोविन्दे । १ । २८ ।

"ललितलवङ्गलतापरिशीलनकोमलमलय समीरे । मधुकरनिकरकरम्बितकोकिलकूजित कुञ्जकुटीरे" ॥)

कुटुङ्गक, पुं, (कुटुङ्ग+स्वार्थे कन् ।) लताच्छादित गृहम् । चिट । ढोल इति भाषा । छदिः । चाल इति भाषा । इत्यमरटीकायां भरतः ॥ वल्लरी । गृहभेदः । इत्यमरटीकासारसुन्दरी ॥ कुँड़े इति भाषा ॥

कुटुम्ब, क उ धृत्याम् । इति कविकल्पद्रुमः । (चुरां आत्म चक्र सेट ।) ओष्ठवर्ग्गशेषोपधः । क उ कुटुम्बयते । अयं केश्चिन्न मन्यते । इति दुर्गादासः ॥

कुटुम्ब, पुं, (कुटुम्बयते पालयति । कुटुम्ब+अच् । यद्वा कुटुम्ब्यते पाल्यते सम्बध्यते वा । कुटुम्ब+कर्म्मणि घञ् ।) नाम । ज्ञातिः । बान्धवः । सन्ततिः । इति शब्दरत्नावली ॥ पोष्यवर्गः । इत्यमरमाला ॥ (यथा, मनुः । ११ । २२ ।

"तस्य भृत्यजनं ज्ञात्वा स्वकुटुम्बान्महीपतिः । श्रुतशीले च विज्ञाय वृत्तिं धर्म्म्यां प्रकल्पयेत्" ॥)

कुटुम्बव्यापृत, त्रि, (कुटुम्बभरणाय व्यापृतः नियुक्तः ।) कुटुम्बपोषणासक्तः । तत्पर्य्यायः । अभ्यागारिकः २ उपाधिः ३ । इत्यमरः । ३ । १ । ११ ॥ (कुटुम्बेन पुत्रदारादिपोष्यवर्गेण व्यापृतः संयुक्तः । बहुपरिवारविशिष्टः पुरुषः ॥)

कुटुम्बिनी, स्त्री, (कुटुम्ब अतिशयेन अस्त्यस्याः । अस्त्यर्थे इनि । ततो ङीप् ।) कुटुम्बविशिष्टा । पतिपुत्रदुहित्रादिमती प्रतिष्ठिता स्त्री । तत्पर्य्यायः । पुरन्ध्री २ । इत्यमरः । २ । ६ । ६ ॥ पुरन्ध्रिः ३ । इति भरतः ॥ पुरन्ध्रिका ४ । इति शब्दरत्नावली ॥ (यथा रघुवंशे । ८ । ८६ ।

"अथ शोकमनाः कुटुम्बिनीमनुरक्तोऽभ्य निवारयन्तिभिः" ॥) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पयस्या २ क्षीरिणी ३ जलकामुका ४ वक्रशल्या ५ दुराधर्षा ६ क्रूरकर्म्मा ७ सिरिटिका ८ शीता ९ मधुरकुटुम्बी १० शीतला ११ जलेचरा १२ । अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । कफपित्तश्वासरक्तदोषकृच्छ्रनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

कुटुम्बी, [न्] पुं, (कुटुम्ब अस्त्यस्य । अस्त्यर्थे इनि ।) गार्हस्थ्याश्रमविशिष्टः । तत्पर्य्यायः । गृही २ गृहमेधी ३ गृहस्थः ४ । इति जटाधरः ॥ (यथा, कुमारे । ६ । ८५ ।

"भूयः सम्पूर्णकामोऽपि मेनामुखमुदैक्षत । प्रायेण गृहिणीनेत्राः कन्यार्थेषु कुटुम्बिनः" ॥)

कुटुम्बी [न्], त्रि, (कुटुम्ब पोष्यवर्गो ऽस्त्यस्य अस्त्यर्थे इनि ।) कृषकः । इति शब्दचन्द्रिका ॥ कुटुम्बविशिष्टश्च ॥

कुटुम्बौक, [स्] क्ली, (कुटुम्बानां ज्ञातिबान्धवानां दारपुत्रादीनां ओकः वासस्थानम् ।) कुटुम्बवासस्थानम् । इति जटाधरः ॥

कुट्ट, क कुत्सायाम् । छिदि । इति कविकल्पद्रुमः ॥ (चुरां पर सक सेट ।) क कुट्टयति । इति दुर्गादासः ॥

कुट्ट क उ प्रतापने । इति कविकल्पद्रुमः ॥ (चुरां-आत्म-सक-सेट ।) पञ्चमस्वरी । टवर्गान्तः । क उ कुट्टयते । स्वरोऽयमेव मन्यते । इति दुर्गादासः ॥

कुट्टक, पुं (कुट्टक आच्छादने+अच्) वा अङ्कविशेषः । तस्य रूपं यथा

"भाज्यो हारः क्षेपकश्चापवर्त्त्य केनाप्यादौ सम्भवे कुट्टकार्थम् । येन च्छिन्नौ भाज्यहारौ न तेन

क्षेपश्चैतद्दुष्टमुद्दिष्टमेव" ॥

उदाहरणं यथा ।

"एकविंशतियुतं शतद्वयं यद्गुणं गणक पञ्चषष्टियुक् । पञ्चवर्जितशतद्वयोद्धृतं शुद्धिमेति गुणकं वदाशु तम्" ॥

इति लीलावती ॥ (कुट्टयति उपलदन्तादिभिर्भिनत्ति छिनत्ति चूर्णयति वा । कुट्ट छेदे+ण्वुल् । छेदके, त्रि । यथा, याज्ञवल्क्ये । ३ । ४९ ।

"दन्तोलूखलिकः कालपक्वाशी वाश्मकुट्टकः" ॥)

कुट्टन, क्ली, (कुट्टते इति । कुट्ट छेदने+भावे ल्युट् ।) छेदनम् । कोटा इति भाषा । कुत्सनम् । प्रतापनम् ॥

कुट्टनी, स्त्री, (कुट्टयति छिनत्ति नाशयति स्त्रीणां कुलमनया । कुट्ट+स्वार्थे णिच् ततः ल्युट् ङीप् । यद्वा कुट्ट्यते छिद्यते स्त्रीणां कुलं अनया । कुट्ट छेदने+करणे ल्युट् ङीप् च ।) पुरुषेण सह परस्त्रीयोगकर्त्री । कुट्नी इति भाषा । तत्पर्य्यायः । शम्भली २ । इत्यमरः । २ । ६ । १९ ॥ कुट्टिनी ३ सम्भली ४ । इति तट्टीका ॥ माधवी ५ रङ्गमाता ६ अर्ज्जुनी ७ । इति जटाधरः ॥ कुम्भदासी ८ वयोवृद्धा ९ । इति शब्दरत्नावली ॥ (यथा, हितोपदेशे । १ । २४३ ।

"तदालिङ्गनमवलोक्य समीपवर्त्तिनी कुट्टन्यचिन्तयत्" ॥)

कुट्टमित, क्ली, स्त्रीणां दशधास्वभावशृङ्गारचेष्टान्तर्गत चेष्टाविशेषः । स्त्रीणां स्वाभाविकदशशृङ्गारान्तर्गतमिदम् । इति हेमचन्द्रः ॥ तस्य लक्षणं यथा, साहित्यदर्पणे । ३ । १११ ।

'केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात् । प्राहुः कुट्टमितं नाम शिरःकरविधूननम्' ॥

कुट्टार, क्ली, (कुट्ट+आरन् ।) केवलम् । रतिः । इति मेदिनी ॥ कम्बलम् । इति विश्वः ॥

कुट्टार पुं, (कुट्टते भिद्यते हन्यते वाऽशनिम् पवनेनाति शेष । कुट्ट+आरन् ।) पर्व्वतः । इति त्रिकाण्डशेषः ॥

कुट्टिम, पुं क्ली, (कुट्ट+भावे घञ् । तेन निर्वृत्तः निर्म्मितः इत्यर्थे इमप् ।) मणिभूः । इत्यमरटीकायां भरतः । (यथा रघु ११ । ९ ।

"मञ्जुलं मणिकुट्टिमोचितौ मातृपार्श्वपरिवर्त्तिनाविव" ॥)

सुधाघटितभूतलम् । इति सुभूतिः ॥ कुटीरः । इति मधुरानाथः ॥ दाडिमफलम् । इति राजनिर्घण्टः ॥

कुट्टिहारिका, स्त्री (कुट्टते दत् । कुट्ट+इन् । कुट्टि मत्स्यमांसादिकं हरति । कुट्टि+हृ+ण्वुल् टाप् अत इत्वं च ।) दासी । इति त्रिकाण्डशेषः ॥

कुट्टीर पुं, (कुट्टते ऽस्मिन् । कुट्ट+ईरन् ।) पर्व्वतः । इति हारावली ॥

कुड्मल, क्ली (कुट्टते मार्दवान्नो ज्वलनेन दीयते दलम् । कुट+"कलम्प"रन्यात्" । उणा १ । १०८ । इति कलन् मल् मुट् च ।) रक्तकोषः । इति मेदिनी ॥ इष

रज्जुभिः पीडनम्। इति मनुः॥

कुड्मलः पुं,क्ली,(कुडति ईषत् विकासोन्मुखीभवतीति। कुडि+"कुषादिभ्यश्चित्"। उणां १।१०८। इति कलच्।) विकासोन्मुखप्रौढकलिका। ईषद्विकसिता कलिका। तत्पर्य्यायः। मुकुलः २। इत्यमरः॥ कोषः ३। इति जटाधरः॥ (यथा, माघे।२।७। "द्योतितान्तः सभैः कुन्दकुड्मलाग्रदतः स्मितैः"॥)

कुठ छिदि। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट्।) कुठेरः कुठारः कुठाकुः। इति दुर्गादासः॥

कुठि इ खोटने। वैकल्ये। आलस्ये। इति कविकल्पद्रुमः॥ (भ्वां-पर-अक-सेट् इदित्।) पञ्चमस्वरी। कर्म्मणि इ कुण्ठ्यते। वैकल्यं विकलीभावः। आलस्यं मन्दीभावः। कुण्ठति खड्गः शौर्य्योत्तीर्णः छात्रो वा। इति दुर्गादासः॥

कुठः, पुं (कुठ्यते छिद्यतेऽसौ। कुठ छेदने+कर्म्मणि घञर्थे क।) वृक्षः। इत्यमरः। २।४।५॥

कुठरः, पुं, (कुट+बाहुलकात् करन्।) मन्थानदण्डबन्धनस्तम्भः। तत्पर्य्यायः। दण्डविष्कम्भः २। इत्यमरः। २।९।७४॥ (नागविशेषः। (यथा, महाभारते १।३५।१५।
"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः"॥

कुठाकुः, पुं, (कोठति आहन्ति भिनत्ति काष्ठम्। कुठ छेदने+आकुन् किच्च।) पक्षिविशेषः। इत्युणादिकोषः। काठ्ठोक्रा इति भाषा॥

कुठारट्टः, पुं स्त्री, (कुठारस्य रट्ट इव। पृषोदरादित्वात् रलोपे साधुः।) कुठारः। इति जटाधरः।

कुठारः, पुं स्त्री (कोठतीत्यनेन। कुठ+करणे आरन्।) अस्त्रविशेषः। कुड़ाल इति भाषा। तत्पर्य्यायः। स्वधितिः २ परशुः ३ परश्वधः ४। इत्यमरः। २।८।९२॥ कुठारी ५ पर्शुः ६ परस्वधः ७ पर्श्वधः ८। इति तट्टीका॥ कुठारट्टः ९ कुवधः १०। इति जटाधरः। (यथा, श्रीमद्भागवते ९।१५।१२।
"स धावमानश्च शरस्य धनुश्च
समुद्यतः साहसतो कुठारम्"॥)

कुठारः, पुं (कुठ्यते छिद्यतेऽसौ। कुठ+कर्म्मणि आरन्।) वृक्षः। इति शब्दरत्नावली॥

कुठारुः, पुं, (कुठ+आरु।) वृक्षः। वानरः। इति मेदिनी॥ शस्त्रकारः। इति शब्दरत्नावली॥

कुठिः, पुं, (कुठ+"कुठिकम्प्योर्नलोपश्च"। उणां ४।१४१। इति इन् किच्च।) पर्व्वतः। वृक्षः। इत्युणादिकोषः॥

कुठिकः, पुं, (कुठ+इकन् किच्च।) कुष्ठम्। इति हारावली। कुड़ इति भाषा॥

कुठेरः, पुं (कुण्ठति नाशयति वैकल्यं करोति वा। कुठि खोटने वैकल्ये आलस्ये च+"शतिकठि कुठीति"। उणां १।५९। इति एरक् बाहुलकात् नुमोऽभावः।) अर्जकः। इति शब्दमाला॥ पर्णी। इत्युणादिकोषः॥ अर्ज्जकः। इति राजनिर्घण्टः॥ बबरी इति ख्यातः।
(यथा, गो रामायणे २।१०।१०।
"दाड़िमान् करवीरांश्च अशोकांस्तिलकांस्तथा।
अङ्कोटांश्च कुठेरांश्च नीलाशोकांश्च सर्व्वशः"॥)

कुठेरकः, पुं, (कुठेर इव कायति प्रकाशते। कै+क।) पर्णासः। इत्यमरः। २।४।७९॥ तुलसी इति ख्यातः। श्वेतच्छदः। इति शब्दचन्द्रिका॥ श्वेततुलसी बाबुइ तुलसी इति च ख्यातः। (अस्य पर्य्यायाः।
"अर्ज्जकः श्वेतपर्णासो गन्धपुष्पः कुठेरकः"।
इति वैद्यकरत्नमालायाम्। बर्व्वरी। एतदर्थे ऽस्य पर्य्याया यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।
"बर्व्वरी तुवरी तुङ्गी खरपुष्पाजगन्धिका।
पर्णासस्तत्र कृष्णे तु कठिञ्जरकुठेरकौ"॥
गुणाश्चास्य बर्व्वरीशब्दे ज्ञेयाः॥) नन्दीवृक्षः। इति राजनिर्घण्टः॥

कुठेरजः, पुं, (कुठेर इव जायते। जन+ड।) कुठेरकः। श्वेततुलसी। इति शब्दरत्नावली॥

कुठेवः, पुं, (कुठ+एवक्।) धामरवातः। धाम देर बातास इति भाषा। तत्पर्य्यायः। मन्थः २। इति त्रिकाण्डशेषः॥

कुड ञि बाल्ये। अदने। इति कविकल्पद्रुमः॥ (तुदां-पर-अक-सक च सेट्।) ञ्यदाद्यावलादः पञ्चमस्वरी। बाल्यमिह शिशुव्यापारः। ञि कुड़ति अकुड़ीत् चिताम्भि शिशुः। इति दुर्गादासः॥

कुड इ वैकल्ये। इति कविकल्पद्रुमः॥ (भ्वां-पर-सकं-सेट् इदित्।) इ कर्म्मणि कुण्ड्यते। कुण्डति जनं देवः विकलं करोतीत्यर्थः। इति दुर्गादासः॥

कुड इ ङ दाहे। इति कविकल्पद्रुमः। (भ्वां-आत्म-सकं-सेट् इदित्।) इ कर्म्मणि कुण्ड्यते। ङ कुण्डते इति दुर्गादासः॥

कुड इ क रक्षे। इति कविकल्पद्रुमः॥ (चुरां पर-सक-सेट् इदित्।) इ क कुण्डयति। इति दुर्गादासः॥

कुडपः, पुं, (कुड+कपन्।) कुडवपरिमाणम्। इत्यमरटीकायां स्वामी॥

कुड़वः, पुं, (कुड़ति परिमाति अनेनास्मिन् वा। कुड़+कवन्।) परिमाणविशेषः। (यथा, आर्य्यासप्तशत्याम्। १६०। "उपनीय कलमकुड़वं कथयति समयश्चिकितसके चन्द्रिका"॥) स तु प्रस्थचतुर्थांशः। इति लीलावती॥ वैद्यकमते विंशद्वपरिमाणम्। द्वात्रिंशत्तोलकमिति यावत्। तत्पर्य्यायः। अञ्जलिः २ अष्टमानम् ३ शरावार्द्धम् ४। इति परिभाषा॥ (यदुक्तं वैद्यकपरिभाषायाम्।
"हस्तिकादिषु मानेषु यावच्च कुड़वो भवेत्।
शुष्कद्रवार्द्रयोश्चापि तुल्यमानं प्रकीर्त्तितम्"॥
"मृत्तिकामन्दश्च ति न्यास् कुड़वोऽर्द्धशरावकः।
अष्टमानञ्च स ज्ञेयः"। इति शार्ङ्गधरस्य पूर्व्वखण्डे। १ अः॥)

कुड्डली, स्त्री, (कुडी कुत्रा ऊर्ध्वी कारवेल्ली।) क्षुद्रकारवेल्ली। इति राजनिर्घण्टः॥

कुडिः, पुं, (कुड्यते दह्यते इति। कुडि दाहे+इन्।) शरीरम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कुडिशः, पुं, (कुड्यते भक्ष्यतेऽसौ। कुड अदने+बाहुलकात् श तत इट्।) मत्स्यविशेषः। कुड़िश माछ इति भाषा। अस्य गुणाः। मधुरत्वम्। गुरुत्वम्। कषायत्वम्। अग्निदीप्तत्वम्। लघुत्वम्। स्निग्धत्वम्। वातरोगे पथ्यत्वम्। रोचनत्वम्। बलकौष्ठवतकारित्वञ्च। इति राजवल्लभः॥

कुड्मलः, पुं, (कुड बाल्ये+"कुषादिभ्यश्चित्"। उणां १।१०८। इति कलच् कुडेरपि। मुट् च।) कुड्मलः। इत्यमरटीका सिद्धान्तकौमुदी च॥

कुड्यं क्ली, (कुडि+तत्र साधुरिति यत्। कौवे रुङ्गारदित्वात् यक् कुडागमश्च इत्युज्ज्वलदत्तादयः।) भित्तिः। भित् देयाल इत्यादि भाषा। इत्यमरः। २।२।४॥ (यथा, महाभारते १।१४५।१०।
"सर्पिस्तैलवसाभिश्च लाक्षया चाप्यनल्पया।
मृत्तिकां मिश्रयित्वा त्वं लेपं कुड्येषु दापय"॥)
विलेपनम्। इति मेदिनी॥ कौतूहलम्। इति शब्दरत्नावली॥

कुड्यका, स्त्री, (कुड्य+स्वार्थे कन्।) कुड्यम्। भित्तिः। इति शब्दरत्नावली॥

कुड्यच्छेदी, [न्] पुं, (कुड्यं भित्तिं छिनत्ति विदारयतीति। कुड्य+छिद्+णिनि।) चौरविशेषः। इति शब्दरत्नावली॥ सिँदेल चोर इति भाषा॥

कुड्यच्छेद्य, क्ली, (कुड्यमिव कुड्यस्य वा छेद्यम्।) खानिकम्। इति त्रिकाण्डशेषः॥ देयालेर गर्त्त इति भाषा॥

कुड्यमत्सी, स्त्री, (कुड्ये मत्सी इव। मत्स्य+जातित्वात् ङीष् यलोपश्च।) गृहगोधिका। इति शब्दरत्नावली॥

कुड्यमत्स्यः, पुं, (कुड्ये मत्स्य इव।) गृहगोधिका। इति हेमचन्द्रः॥

कुण त् क आमन्त्रणे। मन्त्रे। इति कविकल्पद्रुमः॥ (अदन्त-चुरां पर-सक-सेट्।) ऋतो गुणाभावः। कुणयति। मन्त्रोऽभिमुखीकरणम्। गुणोक्तिरित्येके। इति दुर्गादासः॥

कुण श उपकरणे। शब्दे। इति कविकल्पद्रुमः॥ (तुदां-पर-सक-सेट्।) उपकरणं दानादिना पोषणम्। श कुणति दीनं दयालुः। कोकिलः। इति दुर्गादासः॥

कुणञ्जरः, पुं, (कुणं शब्दादिकं जरयति। कुण+जॄ+बाहुलकात् खच्।) शाकविशेषः। बनबेतुया इति भाषा। तत्पर्य्यायः। कुञ्जरा २ लवणा ३ अरण्यवास्तूकः ४। अस्य गुणाः। मधुरत्वम्। रुचिकारित्वम्। दीपनत्वम्। पाचनत्वम्। हितत्वञ्च। एतच्छाकगुणाः। त्रिदोषनाशित्वम्। मधुरत्वम्। रुचिकारित्वम्। दीपनत्वम्। ईषत्कषायत्वम्। पथ्याहितत्वम्। पित्तश्लेष्महरत्वम्। लघुत्वञ्च। इति राजनिर्घण्टः॥

कुणपः, पुं (क्वणेः+कपन् सम्प्रसारणञ्च।) शवम्। मृतशरीरम्। इत्यमरः। २।८।११८॥ (यथा, महाभारते १३।९।२२।
नारद उवाच।
"उपायेन विभज्य स धर्म्ममीति यथाक्रमम्
वाराणस्यां महाराज दग्धेकुणपेश्वरम्॥

तस्मात् द्वार समासाद्य न्यसेधा कुणपं क्वचित्।
स बुद्धा यो निवर्त्तेत स सम्बर्त्तो महीपते।” ॥)

एतदर्थे नपुंसकलिङ्गोऽपीति नयनानन्दः॥ पूतिगन्धि। इति मेदिनी॥ अस्त्रविशेषः। बर्छा इति भाषा। इत्यमरटीकायां रायमुकुटः॥ पूतिगन्धो त्रिलिङ्गोऽपि यथा,—

“कुणपं मस्तुलुङ्गाभं सगन्धं क्वथितं बहु”॥

इति माधवकरः॥ (रोगविशेषः। यथा॥ “कुणपं मलावपित्ताभ्याम्”। इति शार्ङ्गधरे मध्यखण्डे। १ अध्याय॥)

कुणपी, स्त्री, (कुणप+गौरादित्वात् ङीष्।) विट्सारिका। इति मेदिनी॥ गुयेशालिक इति भाषा॥

कुणाल, पु, (कण+“पीयुकणिभ्यामिति” उणां ३। ७९। इति। कालन्। सम्प्रसारणञ्च।) देशभेदः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (अशोकराजपुत्रविशेषः। स च बौद्धः॥)

कुणि पुं, (कुण+इन्।) तुन्नवृक्षः। इत्यमरमेदिनीकरौ॥ तुंद इति भाषा। (शरीरस्य स्थानविशेषः।

“कक्षान्तमध्ये कक्षाख्यः कुणिस्तत्र जायते”॥

इति वाग्भटे शारीरस्थाने ४ अध्याये॥)

कुणि, त्रि, (कुण+इन्।) कुकरः। इति मेदिनी॥ कोंमा इति भाषा॥ (यथा, सुश्रुते।

“गर्भवातप्रकोपेण दोहदे चावमानिते।
भवेत् कुब्जः कुणिः पङ्गुः” इति॥)

कुणिन्द, पुं (कुण शब्दे+“कुणिपुल्योः किन्दच्”। उणां ४। ८५। इति किन्दच्।) शब्दः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

कुण्टक, त्रि, (कुटि+ण्वुल्।) स्थूलः। इति शब्दमाला। मोटा इति भाषा॥

कुण्ठ, त्रि, (कुण्ठति क्रियासु मन्दीभूतो भवति। कुठि+अच्।) क्रियासु मन्दः। अकर्म्मण्यः। इत्यमरः। ३। १। १७॥

(यथा, शङ्करविरचिते विष्णुस्तोत्रे ३॥।

“वैकुण्ठोऽयं स्वकण्ठे वसतु मम मतिः कुण्ठभावं विहाय”॥) मूर्खः। इति मेदिनी॥

कुण्ठक, त्रि, (कुण्ठति कुण्ठयति वा आत्मानं भक्तीभूतं करोति। कुठि+ण्वुल्।) मूर्खः। इति शब्दमाला॥

कुण्ठित, त्रि, (कुठि+कर्त्तरि क्तः।) अकुण्ठित। यथा। “दशवदनशराणां कुण्ठिता यत्र शक्तिः”। इति महानाटकम्॥

कुण्ड, स्त्री, (कुणतीति। “अमन्तात डः”। उणां १। ११४। इति डः।) मानभेदः। (कुण्ड्यते रक्ष्यते जलं यत्र। कुडि+अधिकरणे घञ्।) देवजलाशयः। इति मेदिनी॥ जलाधारविशेषः। चौवाचा इति भाषा॥

तज्जलगुणाः। अग्निदीपकारित्वम्। रूक्षत्वम्। मधुरत्वम्। कटुत्वम्। इति राजनिघण्टुः॥ कफलघुत्वम्। इति राजवल्लभः॥ *॥ (पात्रविशेषः। यथा रघौ १। ८४।

“दुग्धचोद्धेव कुण्डोध्नी मेध्येणावभृतादपि”॥)

होमीयाग्न्यालयः। तस्य प्रमाणचतुर्हस्तमितं भवति तस्य विधिः। तत्र मत्स्यपुराणम्।

“प्रागुदक्प्लवनां भूमिं कारयेद्यत्नतो नरः”॥

प्रागुदक्प्लवनां पूर्व्वनीचां उत्तरनीचां वा॥ तत्र वशिष्ठपञ्चरात्रे विद्यामणिसारायाम्।

“सर्व्वाधिकारिकं कुण्डं चतुरस्रन्तु सर्व्वदम्”।

चतुरस्रं चतुष्कोणम्॥ भविष्योत्तरम्।

“सहस्रे स्वयं होतव्ये कुर्य्यात् कुण्डं कराप्रकम्।
द्विहस्तमयुते तच्च लक्षहोमे चतुष्करम्”॥

द्विहस्तादिके यामलः।

‘पूर्व्वपूर्व्वस्य कुण्डस्य कोणसूत्रेण निर्म्मितम्।
उत्तरोत्तरकुण्डानां मानं तत्परिकीर्त्तितम्’॥

पूर्व्वपूर्व्वस्य कुण्डस्य हस्तद्विहस्तादिमितस्य कोणसूत्रेण ईशानाग्निकोणदत्तसूत्रेण परिमितं यन्मानं उत्तरोत्तरकुण्डानां तदेव पारिभाषिकं द्विहस्तादिमानं न तु प्रकृतहस्तद्वैगुण्यादिमितम्। तथात्वे द्विहस्तादिमितस्य चतुर्हस्तपरिमाणपक्षे। खनकाय भूमेः परिमाणत्वम्॥

वशिष्ठपञ्चरात्रे।

“यावान् कुण्डस्य विस्तारः खननं तावदिष्यते।
एकैकमेखलास्तिस्रो वेदाग्निनयनाङ्गुलाः॥
कुण्डे द्विहस्ते ता ज्ञेया रसवेदगुणाङ्गुलाः।
चतुर्हस्ते तु कुण्डे वा वसुतर्कयुगाङ्गुलाः”॥

मेखलाः ब्रह्मचारिमेखलावत् कुण्डवेष्टिताः मृत्तिकाः। ताश्च खातदेशाद्बाह्ये एकाङ्गुलरूपं कण्ठं परित्यज्य उच्चायेन विस्तारेण चेत्यादिक्रमेण वेदाद्यङ्गुला। एतद्विपरीतक्रमान्तरोक्ता यत्र द्वारविवक्षा। वेदाश्चत्वारः अग्नयस्त्रयः नयने द्वे रसाः षट् गुणास्त्रयः वसुतर्कयुगानि अष्टषट्चत्वारि॥ पिङ्गलामते।

“खातादेकाङ्गुलं त्यक्त्वा मेखलानां विधिर्भवेत्”॥

एककुण्डस्य पश्चिमदिक्कर्त्तव्यतामाह महादानिर्णये वशिष्ठपञ्चरात्रम्।

“शुक्तौ मुक्तौ तथा पुष्टौ भोगोद्धारे तथैव च।
सदा होमे सदा शान्तिके वारुणदिग्गतम्”॥

शारदातिलके।

“होतुश्च योनिराख्यामुपर्य्यश्वत्थपत्रवत्।
मुष्टिरत्निकहस्तानां कुण्डानां योनिरीरिता॥
षट्चतुर्द्व्यङ्गुलायामविस्तारोन्नतिशालिनी।
एकाङ्गुलन्तु योन्यग्रं कुर्य्यादीषदधोमुखम्॥
एकैकाङ्गुलतो योनिं कुण्डेष्वन्येषु वर्द्धयेत्।
यवद्वयमेवैव योन्यग्रमपि वर्द्धयेत्॥
स्वातादारभ्य मानं स्याद्योन्या मध्ये सरन्ध्रकम्”॥

आद्यां मेखलायां अश्वत्थपत्रवदित्यनेन चतुरङ्गुलविस्तृतमूलात् यथोक्तक्रमेण एकाङ्गुलान्तं सङ्कुचितविस्तारा। यामले।

“नाभिमेखलयोर्मध्ये परिधिं स्थापयेत् च।
एवं कुर्य्यात्तथा विद्वान् द्वितीयमेखलोपरि”॥

परिधौ विशिष्टमाह छन्दोगपरिशिष्टे।

“बाहुमात्राः परिधय ऋजवः सत्वचोऽव्रणाः।
पञ्च भवन्त्यशीर्णाग्रा एकेषान्तु चतुर्दिशम्॥
पूर्व्वयाम्याग्निताः पश्चात्रयमर्द्धामरम्।

न्यसेत् परिधिमन्यञ्चेदुदगग्रं स पूर्व्वतः”॥

अथवा त्रिद्वारदिशा अग्नितोऽग्रे पार्श्वद्वये दक्षिणत उत्तरतः पश्चात् पश्चिमे उदगग्रं उत्तराग्रम्॥ त्रैलोक्यसारेऽपि।

“कुम्भद्वयसमायुक्ता अश्वत्थदलसन्निभा।
अङ्गुष्ठमेखलायुक्ता मध्ये स्यान्नालिकेतिथा”॥

कुम्भद्वयसमायुक्ता गजकुम्भाकारमूलदेशयुक्ता नता नम्रा अङ्गुष्ठमितमहात्मेखलावेष्टनयुक्ता तथात्वे हस्तगर्त्तितात्स्वल्पिता कुण्डे तत्पातो भवतीत्यर्थः॥ पञ्चरात्रे।

“कल्पयेदन्तरे नाभिं कुण्डस्याम्बुजसन्निभाम्।
मुष्टिरत्निकहस्तानां नाभिरुत्सेधविस्तृता॥
नेत्रवेदाङ्गुलोपेता कुण्डेष्वन्येषु वर्द्धयेत्।
यवद्वयक्रमेणैव नाभिं एषाञ्चहारधी॥
नाभिदैर्घ्यं त्रिधा कृत्वा मध्ये कुर्व्वीत कर्णिकाम्।
बहिरंशद्वये नाभौ पत्राणि परिकल्पयेत्”॥

तत्र कुण्डस्य दोषानाह विश्वकर्म्मा।

“खाताधिके भवेद्रोगी हीने धेनुधनक्षयः।
वक्रकुण्डे च सन्तापो मरणं छिन्नमेखले॥
मेखलारहिते शोकः अधिके वित्तसंक्षयः।
भार्य्याविनाशकं कुण्डं प्रोक्तं योन्या विना कृतम्॥
अपत्यध्वंसनं प्रोक्तं कुण्डं यत् कण्ठवर्जितम्”॥

अत एव वशिष्ठसंहितायाम्।

“तस्मात् सम्यक् परीक्ष्यैव कर्त्तव्यं शुभमिच्छता।
हस्तमात्रं स्थण्डिलं वा संस्थिते होमकर्म्मणि”॥

इति तिथ्यादितत्त्वम्॥

कुण्ड, क्ली स्त्री, (कुण्ड्यते रक्ष्यते जलादि यस्मिन् कुडि रक्षणे+घञ्।) स्थाली। इत्यमरभरतौ॥

कुण्ड, पुं (कुण्ड्यते दह्यते कुलं अनेन। कुडि दाहे+करणे घञ्।) अमृते भर्त्तरि जारजः। जीवति भर्त्तरि उपपतिजात। इत्यमरः। २। ६। ३६॥ स्वामी जीवित्वा स्त्रीमिमे उपपतिजात विश्वम्भरनाम इति भाषा॥ (यथा मनुः ३। १७४।

“पत्यौ जीवति कुण्डः स्यान्मृते भर्त्तरि गोलकः”॥)

सर्पविशेषः। यथा महाभारते। १। १५३। १८।

“कुण्डधाराय कुण्डाय तक्षकाय महोरगः”॥)

कुण्डकीट, पुं, (कुण्डे जारकुण्डे स्थितः कीट इव चार्व्वाकधर्म्मत्वात्।) चार्व्वाकमताभिज्ञपुरुषः। पतितब्राह्मणीपुत्रः॥ (कुण्डे योनिकुण्डे कीट इव।) दासीकामुकः। इति मेदिनी॥

कुण्डगोलक, क्ली, (कुण्डे पात्रविशेषे गोल गोलाकार इव जायते) काञ्जिकम्। इति हेमचन्द्रः॥ (काञ्जी इति भाषा॥ *॥ कुण्डश्च गोलकश्च इति द्वन्द्वेऽपि कुण्डगोलकौ। यथा मनुः। ३। १७४।

“परदारेषु जायेते द्वौ सुतौ कुण्डगोलकौ।
पत्यौ जीवति कुण्डः स्यात् मृते भर्त्तरि गोलकः”॥)

कुण्डल, पुं, (कुण्ड वलाकारं दन्दशूकं। कल+बाहुलकात् अ डिच।) कुण्डम्। सव्यव्यापि ख्यापनम्। इति हैमचन्द्रः।

कुण्डपाय्य, पुं, (कुण्डेन पानमत्र दीयते+सुत्रवाप। कुण्ड+पा+अधिकरणे यत् युडागमश्च निपात्यते।) क्रतुः। इति मुग्धबोधम्॥

कुण्डल, क्ली, (कुण्ड्यते रक्ष्यते इति कुडि रक्षायां + वृषादित्वात् कलच्। यद्वा कुण्डं तदाकारं लाति गृह्णातीति। ला + कः।) स्वनामख्यात कर्णभूषणम्। (यथा विष्णुध्याने।
"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः।
केयूरवान् कनककुण्डलवान् किरीटी" ॥)
तत्पर्य्यायः। कर्णवेष्टनम् २। इत्यमरः।२।६।१०३। पाशः। वलयः। इति मेदिनी॥ (पुं, कौरव्यकुलज सर्पविशेषः। यथा महाभारते १।५७।१२।
"सरकः कुण्डलो वेणी वेणीस्कन्धः कुमारकः।
बाहुकः शृङ्गवेरश्च धूर्त्तकः प्रातरातकौ।
कौरव्यकुलजास्त्वेते प्रविष्टा हव्यवाहनम्" ॥
पुंलिङ्गेऽस्य शाल्मलिवृक्षवाचकता उक्ता। यथा, वैद्यकरत्नमालायाम्।
"रक्तपुष्पः कोविदारो युग्मपत्रस्तु कुण्डलः" ॥)

कुण्डलिनी, स्त्री (कुण्डलिन् + स्त्रियां ङीप्।) कुलकुण्डलिनी शक्तिः। यथा —
"ध्यायेत् कुण्डलिनीं सूक्ष्मां मूलाधारनिवासिनीम्।
तामिष्टदेवतारूपां सार्द्धत्रिवलयान्विताम्॥
कोटिसौदामिनीभासां स्वयम्भूलिङ्गवेष्टिनीम्।
तामुत्थाप्य महादेवीं प्रणवेन तु साधकः॥
उद्दिग्णकरोद्योता यावल्लोक्य दृढासनः।
अथोपायमथाप्यथ समाहितमनाश्चिरम्।
मन्त्रभावदलस्थाने शरीरमपि चिन्तयेत्" ॥
इति तन्त्रसारः ॥ * ॥
गुडूची। इति राजनिर्घण्टः॥ मिष्टान्नविशेषः। जिलिपी इति भाषा। तस्य पाकप्रकारो यथा।
"नूतनं घटमानीय तस्यान्तः कुशलो जनः।
प्रस्थार्द्धपरिमाणेन दध्नाम्लेन प्रलेपयेत्॥
द्विप्रस्थां समितां तत्र दध्यम्लं प्रस्थसम्मितम्।
घृतमर्द्धशरावञ्च घोलयित्वा घटे क्षिपेत्॥
आतपे स्थापयेत्तावद्यावद्याति तदम्लताम्।
तां सम्यक् घृतमानीता सितापाके नियुञ्जते॥
कर्पूरादिसुगन्धे च स्थापयित्वोद्धरेत्ततः" ॥
अस्या गुणाः।
"यथा कुण्डलिनी नाम्ना पुष्टिकान्तिबलप्रदा।
धातुवृद्धिकरी वृष्या रुच्या चेन्द्रियतर्पणी" ॥
इति भावप्रकाशः॥

कुण्डली, स्त्री, (कुण्डल + जातौ ङीष्।) मिष्टान्नविशेषः। जिलिपी इति भाषा। इति पाकराजेश्वरः॥ * ॥ कुलकुण्डलिनी शक्तिः। यथा —
"त्रिकोणं तस्य विश्लेष शक्तिपीठं मनोहरम्।
तत्कुण्डे कामवायुर्वै विसर्पोऽतिचञ्चलः॥
अधोमुखस्तत्र लिङ्गः स्वयम्भुस्तेन चाल्यते॥
नीवारसूक्ष्मतन्वी कुण्डली परदेवता॥
यस्तु कुण्डलिनी देवी सार्द्धत्रिवलयान्विता।
मुखेनाच्छाद्य ब्रह्मास्यं तथा संवेष्टितं प्रभुम्॥
वाहिनी तत्र वसति दारुणी सर्पिका।
य साधकोऽत्र रमते स दिव्यो नैव मानुषः" ॥
इति गन्धर्व्वतन्त्रम्॥ (अस्याः पर्य्याया यथा, हठयोगप्रदीपिकायाम्।३।१०४। कुटिलाङ्गी २ कुण्डलिनी ३ भुजङ्गी ४ शक्तिः ५ ईश्वरी ६ अरुन्धती ७॥) गुडूची। काञ्चनारवृक्षः। इति मेदिनी। (अस्याः पर्य्याया यथा,—
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।
कुण्डली ताम्रपुष्पश्च अश्मन्तकः स्वल्पकेशरी" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे॥) कपिकच्छुः। सर्पिणीवृक्षः। इति राजनिर्घण्टः॥

कुण्डली, [न्] पुं, (कुण्डलं अस्त्यस्य इति इनि। कुण्डलाकारेण स्थितिरस्य तथात्वम्।) सर्पः। इत्यमरः।१।८।७॥ वरुणः। (कुण्डलं कुण्डलवदाकारः शरीरे अस्त्यस्य।) मयूरः। इति मेदिनी॥ चित्रमृगः। इत्यजयपालः। (विष्णुः। यथा, महाभारते १३।१४९।११०।
"अरौद्रः कुण्डली चक्री विक्रम्यूर्ज्जितशासनः" ॥)
कुण्डलयुक्ते, त्रि। इति मेदिनी। (यथा गो रामायणे।३।८।११।
"इमे च पुरुषा दिव्या यान्त्यस्य रथमन्तिकात्।
परःशता कुण्डलिनो युवानः खड्गपाणयः" ॥)

कुण्डाशी, [न्] त्रि, (कुण्डं योनिकुण्डं तद्रूप लक्षीकृत्य अश्नाति जीवनयात्रां यापयतीति। कुण्ड + अश् + णिनि।) भगभक्षकः। कोटना इति भाषा। इति महाभारते दानधर्मः। (कुण्डस्य जारजातस्य अन्नं अश्नातीति।) कुण्डान्नभोजी। तस्य नरको यथा,—
"रङ्गोपजीवी कैवर्त्तः कुण्डाशी गरदस्तथा।
सूची माहिषिकश्चैव पर्व्वकारी च यो द्विजः॥
आगारदाही मित्रघ्नः शाकुनिग्रामयाजकः।
रुधिरान्धे पतन्त्येते सोमं विक्रीणते च ये" ॥
इति विष्णुपुराणे।२।६।२०,२१॥ "रङ्गोपजीवी नटमल्लादिरूपः। कैवर्त्तो धीवरवृत्तिः। मत्स्यो जीवति जारजातः कुण्डः तदन्नभोजी कुण्डाशी। सूची पिशुनः। माहिषो महिषीपोषी। यद्वा।
'महिषीत्युच्यते भार्य्या भगेनोपार्ज्जितं धनम्।
उपजीवति यस्तस्याः स वै माहिषिकः स्मृतः' ॥
इति स्मृतिपोक्तः। पर्व्वकारी धनादिलोभेन पर्व्वसु अमावस्यादिक्रियाप्रवर्त्तकः। पर्व्वगामीति पाठे पर्व्वसु स्त्रीगामी। शाकुनिः पक्षिजीवी। शुभनिमित्तशकुनोपजीवी वा। ग्रामयाजकः ग्रामार्थे यष्टा' । इति तट्टीकायां श्रीधरस्वामी॥ (धृतराष्ट्रपुत्रः। यथा महाभारते।१।११७।१३।
"कुण्डाशी विरजाश्चैव दुःशला च शताधिका" ॥)

कुण्डिका, स्त्री, (कुण्ड + स्वार्थे कन् टाप् अत इत्वञ्च।) कमण्डलुः। इति हेमचन्द्रः॥ पिठरः। इति शब्दचन्द्रिका। कुडि इति भाषा॥ (ताम्रकुण्डम्। स्थाली। सामवेदान्तर्गत उपनिषद्विशेषः। यथा मुक्तिकोपनिषदि।
"अव्यक्तैकाक्षरं पूर्णा सूर्य्याक्ष्यध्यात्मकुण्डिका" ॥)

कुण्डिन, क्ली, विदर्भनगरम्। इति हेमचन्द्रः। (यथा, हरिवंशे।
"कुण्डिने नगरे राज्ञो भीष्मकस्य प्रशासनात्" ॥)

कुण्डिन, पुं, (कुडि रक्षायां दाहे च "अजगमनम चापि"। उणा।२।४६। इति इनच्॥) मुनिविशेषः। इत्युणादिकोषः। (यथा, आश्वलायने।
"कुण्डिनाना वासिष्ठमैत्रावरुणकौण्डिन्येति"॥
कुरुवंशीयनृपभेदः। स च धृतराष्ट्रस्य पुत्रः। यथा महाभारते १।६७।९६।
"हस्ती वितर्क्कः क्राथश्च कुण्डिनश्चापि मस्न"॥)

कुण्डी, स्त्री, (कुडि + इन्। ततो वा ङीप्। कुण्ड + अल्पार्थे वा ङीप्।) कमण्डलुः। इत्यमरः।२।७।४६॥ स्थाली। इत्यमरटीकायां भरतः॥

कुण्डीर, पुं, (कुण्ड्यते रक्ष्यते स्वदारादयस्तेन। कुडि + ईरन्।) मनुष्यः। (कुण्ड्यते रक्ष्यते दुर्बलो येन।) बलवति त्रि। इति धरणी॥

कुत् आप्तृतौ। सौत्रधातुरयम्। इति कविकल्पद्रुमः॥ (भ्वां परं सक सेट्।) कुतपः। इति दुर्गादासः॥ कुत् अपस्य कुतपः कालविशेषः। इति रचितवेदपाठः। इति केचित्॥

कुत, [स्] अ, प्रश्नः। पञ्चम्यर्थः। निन्दा। इति विश्वः। (यथा, विष्णुपुराणे।१।१९।१७।
"सर्व्वभूतात्मके तात। जगन्नाथे जगन्मये।
परमात्मनि गोविन्दे मित्रामित्रकथा कुतः" ॥)

कुतनु, पुं (कुत्सिता तनुर्यस्य। पिङ्गलनेत्रत्वात् तथात्वम्।) कुबेरः। इति त्रिकाण्डशेषः॥ (त्रि, कुत्सितशरीरः। इति व्युत्पत्तिलब्धोऽर्थः॥)

कुतप, पुं क्ली, अह्नोऽष्टमोऽंशः। दिवसस्याष्टमो मुहूर्त्तः। यथा,—
"अह्नो मुहूर्त्ता विख्याता दश पञ्च च सर्व्वदा।
तत्राष्टमो मुहूर्त्तो यः स कालः कुतपः स्मृतः" ॥
इति श्राद्धतत्त्वे मत्स्यपुराणवचनम्॥ * ॥ अपि मापिककुतपा यथा,—
"मध्याह्नः खड्गपात्रञ्च तथा नेपालकम्बलः।
रौप्यं दर्भास्तिला गावो दौहित्रश्चाष्टमः स्मृतः॥
पापं कुत्सितमित्याहुस्तस्य सन्तापकारिणः।
अष्टावेते यतस्तस्मात् कुतपा इति विश्रुताः" ॥
इति मिताक्षरायामाचाराध्यायः॥ स च दिवसस्य पञ्चदशभागे द्वितीयप्रहरशेषदण्डावधि तृतीयप्रहरप्रथमदण्डपर्य्यन्तकालः। इत्यमरः।३।४।२१॥ स तु एकोद्दिष्टश्राद्धारम्भकालः। यथा,—
"आरभ्य कुतपे श्राद्धं कुर्य्यादारौहिणं बुधः।
विधिज्ञो विधिमास्थाय रौहिणन्तु न लङ्घयेत्" ॥
इति श्राद्धतत्त्वम्॥
'दिवसस्याष्टमे भागे मन्दीभवति भास्करः।
स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम्" ॥
इति शातातपः॥ * ॥ दौहित्रः। वाद्यम्। छागलोमजकम्बलम्। कुशतृणम्। इति मेदिनी॥

कुतपः, पुं, (कुत्सितं पापं तपति कुभुवि तपति वा। तप + अच्। कुत् + अपच् वा।) सूर्य्यः। वैश्वानरः। द्विजन्मा। अतिथिः। गौः। भागिनेयः। इति हेमचन्द्रः॥

कुतुक, क्ली, (कुत् + बाहुलकात् उकञ्।) कौतुकम्। इत्यमरः।१।७।३१॥ (यथा, कथितोपदेशप्रकरणे।१।०२।
"कुतुकाय कोविदानां मुदमतीनां मनोरमाय

निर्माल्यबिन्दुमाति प्रतीपदेशमवन्ध्यममुम्" ॥)

कुतुप, क्ली पुं, (कुतप+पृषोदरादित्वात् साधुः ।) कुतप । दिनस्याष्टममुहूर्त्त । इति शब्दरत्नावली ॥

कुतुप, पुं, (कृत्वा कुतुः ततो डुप् च । तत पृषोदरात् अकारागमे साधुः ।) चर्म्मनिर्म्मितास्नेहपात्रम् । इत्यमरः । २ । ९ । ३३ ॥ छोट कुपो इति भाषा ॥

कुतूः, स्त्री, (कुत्सितं तन्यते । तन् बाहुलकात् कूः । टिलोपश्च ।) चर्म्मनिर्म्मितस्नेहपात्रम् । इत्यमरः । २ । ९ । ३३ ॥ मसक इति कुपो इति च भाषा ॥

कुकूणकः, पुं, (कु ईषत् कूणयति सङ्कोचयति चक्षुः यः । कु+कूण सङ्कोचे+ण्वुल् ।) बालरोगविशेषः । स तु नेत्ररोगः । कतुया इति भाषा । तस्य लक्षणम् ॥

"कुकूणकः क्षीरदोषाच्छिशूनामेव वर्त्मनि ।
जायते तेन तच्चक्षुः कण्डूरञ्च स्रवेन्मुहुः ॥
शिशुः कुर्य्याल्ललाटाक्षिकूटनासावघर्षणम् ।
शक्तो नार्कप्रभां द्रष्टुं न वर्त्मोन्मीलनक्षमः" ॥

इति माधवकरः ॥ कुकूणक इत्यपि पाठः ॥ (यथा,—

"कुकूणकः शिशोरेव दन्तोत्पत्तिनिमित्तजः ।
स्यात्तेन शिशुरक्ष्णाक्षिकूटनासाक्षिवीक्षणाक्षमः ।
स वर्त्मशूलपैच्छिल्यकर्णनासाक्षिमर्द्दनः" ॥

इत्युत्तरतन्त्रे ८ अध्याये वाग्भटेनोक्तम् ॥ * ॥

चिकित्सा यथा ॥

"शुण्ठी भृङ्गनिशाकल्कः पुटपाकः ससैन्धवः ।
कुकूणकेऽक्षिरोगेषु भद्रमाश्चोतनं हितम् ॥
क्रिमिघ्नाशशिलादार्व्वी लाक्षालाक्षिकगैरिकैः ।
चूर्णाञ्जनं कुकूणे स्याच्छिशूनां पोथकीषु च ।
एरण्डमूलचूर्णाद्वा स्यात् कुकूणके" ॥

इति वैद्यकचक्रपाणिसंग्रहे बालरोगाधिकारे ॥)

कुतूहल, क्ली, (कुतू चर्म्मपात्रं तैलादिपात्रवत् अन्तः हलति लोलुकं करोति । हल+अच् ।) अपूर्ववस्त्वादिदृष्ट्याद्यतिशयः । तत्पर्य्यायः । कौतूहलम् २ कौतुकम् ३ कुतुकम् ४ । इत्यमरः । १ । ७ । ३१ ॥ चित्रम् ५ । इति शब्दरत्नावली । (यथा, नैषधे । १ । ११९ ।

"प्रियावियोगाद्विधुरोऽपि निर्भरं
कुतूहलाक्रान्तमना मनागभूत्" ॥

नायिकालङ्कारविशेषः । तल्लक्षणं यथा साहित्यदर्पणे । ३ । ११९ ।

"रम्यवस्तुसमालोके लोलता स्यात् कुतूहलम्" ॥)

कुतूहल, त्रि, प्रशस्त । उद्भट । इति मेदिनी ॥

कुदव, स्त्री, (कुत्सितं द्रव्यमिव ।) कुम्भी । इति शब्दरत्नावली । पाना इति भाषा । (कुम्भिकाशब्देऽस्य विवृतिर्ज्ञेया ।)

कुत्र, अव्य, ("सप्तम्यास्त्रल्" । ५ । ३ । १० । इति त्रल् ।) कस्मिन् इति व्याकरणम् । कोथाय इति भाषा । (यथा, महानाटके ।

"हा ! सीता केन नीता मम हृदयगता केन वा कुत्र दृष्टा" ॥)

कुत्रचित्, अव्य, (कुत्र च चित् च इति द्वन्द्वसमासः । मुग्धबोधमते "किमः सन्ताचिचनौ" । इति चित् ।) कोनखाने इति भाषा । इति व्याकरणम् । (यथा महाभारते । ३ । १४२ । ५३ ।

"असुरेभ्यो भयं नास्ति युष्माकं कुत्रचित् क्वचित्" ॥)

कुत्स उ क न अवक्षेपे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-उभ० सक०-सेट् ।) पद्ममञ्जरी । दन्त्यवर्गाद्योपधः । अवक्षेपो निन्दा । उ क यो न कुत्सयते कुत्स्यमिति हलायुधः ॥ न, कुत्सयति कुत्सयते । अयमात्मनेपदीत्यन्ये । कदाचित् परस्मैपदार्थो अकारः । इति दुर्गादासः ॥

कुत्सन, क्ली, (कुत्स्+भावे ल्युट् ।) निन्दनम् । इति शब्दरत्नावली ॥ (यथा मनौ ४ । १६३ ।

"नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम्" ॥

कुत्स्यते निन्द्यतेऽनेन । करणे ल्युट् । निन्दासाधनधर्म्मः । त्रि कुत्सायुक्त ॥)

कुत्सला, स्त्री (कुत्सं क्रयविक्रययोर्निषिद्धतया निन्दां लाति । ला+क+टाप् ।) नीलीवृक्षः । इति शब्दचन्द्रिका ॥

कुत्सा, स्त्री, (कुत्स निन्दने+भावे अ-टाप् च ।) कुत्सनम् । तत्पर्य्यायः । अवर्णः २ आक्षेपः ३ निर्व्वादः ४ परीवादः ५ अपवादः ६ उपक्रोशः ७ जुगुप्सा ८ निन्दा ९ गर्हणम् १० । इत्यमरः । १ । ६ । १३ ॥ गर्हा ११ निन्दनम् १२ कुत्सनम् १३ परिवादः १४ जुगुप्सनम् १५ अपक्रोशः १६ भर्त्सनम् १७ अपवादः १८ । इति शब्दरत्नावली । उपरागः १९ अवध्वंसः २० घृणा २१ धिक् २२ साचि २३ । इति जटाधरः ॥

कुत्सित, क्ली, (कुत्स+कर्म्मणि क्त ।) कुष्ठनामौषधम् । इति राजनिर्घण्टः ॥ (कुड़ इति भाषा ।)

कुत्सित, त्रि, (कुत्स्+क्त ।) निन्दितः । तत्पर्य्यायः । निकृष्टः २ प्रतिकृष्टः ३ अर्व्वा ४ रेफः ५ याप्यः ६ । अवमः ७ अधमः ८ कुपूयः ९ अवद्यः १० खेटः ११ गर्ह्यः १२ अणकः १३ इत्यमरः । ३ । १ । ५४ ॥ रेपः १४ चरमः १५ आणकः १६ अनकः १७ । इति तट्टीका ॥ कुप्रियः १८ । इति जटाधरः ॥ आखेटः १९ रेपसः २० काण्डः २१ गर्हितः २२ अपकृष्टकः २३ । इति शब्दरत्नावली ॥

कुथ इ क्लेशे । बधे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सक०-सेट् इदित् ।) पद्ममञ्जरी । इ कर्म्मणि कुन्थ्यते । क्लेश इह दुःखानुभवः । शीतात्तत्र न कुन्थतीति हलायुधः । इति दुर्गादासः ॥

कुथ श पूतिभावे । इति कविकल्पद्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) पूतित्वं दुर्गन्धिभावः । श कुथ्यति मीनो दुर्गन्धः स्यादित्यर्थः । अकोथीत् । इति दुर्गादासः ॥

कुथ, पुं स्त्री (कुथ्यन्ति अत्र लोमानि कीटा वा । कुथ इ हिंसायां वा अच् । आसनविशेषत्वेन बाहुल्यात् न नुमागमः ।) हस्तिपृष्ठस्थचित्रकम्बलम् । [illegible] भूल इति भाषा । तत्पर्य्यायः । प्रवेणी २ आस्तरणम् ३ वर्णः ४ परिस्तोमः ५ । इत्यमरः । २ । ८ । ४२ ॥ प्रवेणिः ६ परिस्तोमः ७ कुथा ८ कुथम् ९ । इति तट्टीका ॥ बोड १० आस्तरः ११ । इति शब्दरत्नावली ॥ (यथा शब्दार्थचिन्तामणौ ।

"कुथा कन्था समाख्याता कुथः स्यात् करिकम्बलम् ।
कुथः कुशः कुथः कीटः प्राणघाती द्विजः कुथः" ॥

यथा महाभारते २ । ५१ । ३६ ।

"शतशश्च कुथांस्तत्र सिंहलाः समुपाहरन्" ॥)

कुथ, पुं (कुथ+अच् ।) कुशास्तरणम् । इत्यमरः । २ । ४ । १६६ ॥ (यथा रामायणे । २ । ३ । १४ ।

"प्राङ्क्षेषु यदा प्रिये वनान्ते वनगोचरः ।
कुथास्तरणतल्पेषु किं स्यात् सुखतरं ततः" ॥)

कुथोदरी, स्त्री, (कुथ इवात्मकमुदरं यस्याः सा ।) निकुम्भदुहिता । कुम्भकर्णपौत्री । सा च कल्किदेवेन हता । यथा ।

मुनय ऊचुः ।

"हत्वा विशसनं पुत्रा । कुम्भकर्णात्मजात्मजा ।
कुथोदरीति विख्याता गगनार्द्धसमुत्थिता ॥
कालकञ्जस्य महिषी विकञ्जजननी च सा ।
हिमालये शिरः कृत्वा पादौ च निषधाचले ॥
शेते स्तनं पाययन्ती विकञ्जं प्रसुतकाली ।
तस्या निश्वासवातेन विवशा वयमागताः ॥
दैवेनैव समानीताः प्राणाकृत पदाम्बुजम् ।
मुनयो रक्षणीयास्ते रक्षणे च विपत्सु च ॥
इति तेषां वचः श्रुत्वा कल्किः परपुरञ्जयः ।
सेनाभिः परिवृतो जगाम हिमवद्गिरिम्" ॥

इत्यादि ॥

"सा कुथोत्थाय सहसा ननर्द परमाद्भुतम् ।
तेन नादेन महता विमूढाश्चाभवन् जनाः ।
निपेतुः सैनिकाः सर्व्वे मूर्च्छिता धरणीतले ॥
सा रथांश्च गजांश्चापि विहायास्या भयानका ।
जघास प्रश्वासवातैः समानीय कुथोदरी ।
सेनाग्र्या उदरं प्रविष्टा कल्किना सह ।
यथा मुखवातेन प्रविशन्ति पिपीलिकाः ।
तद्दृष्ट्वा देवगन्धर्व्वा हाहाकारं प्रचक्रिरे ।
तत्रस्था मुनयः शेपुर्दुःखार्त्ते महद्भयात् ।
निपेतुरन्ये दुःखार्त्ता ब्राह्मणा ब्रह्मवादिनः ।
वसवः एकयोधा ये गरुड़र्क्षिमाचराः ।
[illegible] ।
कल्किः शमनकधारी सुराणामपि दुर्जयः ।
बाणाभि पैनद्यर्म्भिन्दा कल्किचरणदायकैः ।
प्रभ्राम्योदरमध्येन करवाल समाददे ।
तेन खड्गेन महता कुक्षिं निर्भिद्य वर्म्मभिः ।
बलिभिर्द्धाविर्भिन्नाङ्गैः ब्रह्मास्त्रपाणिभिः ।
बहिरभूत् सर्व्वैः कल्किः पर्व्वतविदारणः ।
सहसा मया कल्किः दुर्भेदा ।
योनिरन्ध्रान्निरगाद् ... बहिः ।
शालिवाहनविवरात् केऽपि तस्या विनिर्गताः ।
ते निर्गतास्तस्या सैनिकाः परोदिताः ।
तां विदार्य्य निपन्नौ तथा चरणौ करौ ।
स्मारं सा निहता भिन्न ... ।
नान्यस्मि [illegible] ।
इति कल्किपुराणे १६ अध्यायः ॥

कुदाल, पुं (कुं भूमिं दालयति विदारयति । कु+

दल विदारणे + णिच् + अण् ।) कुद्दाल । इत्यमरटीकायां रमानाथः ॥

कुद्दार, पुं, (कुं पृथ्वीं दारयति विदारयति । कु + दॄ + णिच् + कर्म्मण्यण् । पृषोदरात् साधुः ।) कुद्दाल । इति जटाधरः ॥ (काञ्चनद्रुः । रक्तामाम् । भूविदारणेन समुत्थितत्वात् ॥)

कुद्दाल, पुं, (कुं भूमिं दालयति । कु + दल + णिच् + अण् । पृषोदरात् डिले साधुः ।) कोविदारवृक्षः । इत्यमरः ।२।४।२२॥ (यथास्य पर्य्यायाः ।
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुण्डलीताम्रपुष्पश्च स्मन्तकः स्वल्पकेशरी" ।
इति भावप्रकाशस्य पूर्व्वखण्डे १ भागे ॥ गुणाश्चास्य काञ्चनारशब्दे उक्ताः ॥) भूमिदारणास्त्रम् । इति मेदिनी ॥ कोदाल इति भाषा । (यथा महाभारते । १ । १०७ । ३९ ।
"समासाद्य विलं तच्चाप्यखनन् खगरात्मजाः ।
कुद्दालैर्ह्रषकैश्चैव समुद्रं यत्नमास्थिताः" ॥)

कुद्य क्ली, (कुद् + यत् ।) कुड्यम् । भित्तिः । इत्यमरटीका ॥

कुद्र, इ क मिथ्योक्तौ । इति कविकल्पद्रुमः ॥ (चुरां परं सक० सेट । इदित् ।) पञ्चमस्वरी । दन्त्यवर्गतृतीयोपधः । इ क कुन्द्रयति मोघ । मिथ्या वदतीत्यर्थः । कुन्द्र इत्यनेनैवेष्टसिद्धे इदनुबन्धो वैदेशुद्वारणभेदाय । इति दुर्गादासः ॥

कुद्रङ्ग,पुं, (कुद् मिथ्यैव कायते अनित्यत्वात् नश्वरत्वात् । कै + क । निपातनात् साधुः ।) गृहविशेषः । मञ्चोपरिमण्डपः । तत्पर्य्यायः । उद्घाट १ पिठर २ । इति त्रिकाण्डशेषः ॥

कुद्रङ्ग, पुं, (कु ईषत् उद्गतो रङ्गः रञ्जनं यत्र अनित्यत्वात् । कु + उत् + रञ्ज + अधिकरणे घञ् । पृषोदरादित्वात् साधुः ।) मञ्चमण्डपः । इति हारावली ॥

कुद्रव, पु (कुं भूमिं द्रावयति । कु + द्रु + अन्तर्णिच् + अच् ।) कोद्रवः । इत्यमरटीकायां भरतः ॥ (कोदधान् इति भाषा ॥)

कुध्र, पु (कुं पृथ्वीं भूमिं धारयति । कु + धृ + मूलविभुजादित्वात् क ।) पर्व्वतः । इति हलायुधः ॥ (यथा कालिदासोक्तौ ।
"वार्षरेखश्च गधगद्दगेत्वधिपति कुध्रेड्गनागिनागेड
गौराहाद्द्रड्गस्त्रिड्गड्गस्त्रैवेयकश्चाडकम् ।
उड्डीयन्दनरकार्मिर्मिलिष्टगिभेड्रग्रालिनाच्छच्छवि
स खान्मुगन्मुनांगिरन्मड्गन्वो मुदे वो मृड" ॥)

कुनख पुं, (कुत्सितो नखो यत्र ।) क्षुद्ररोगविशेषः । तस्य लक्षणं यथा ।
"नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम् ।
कुर्व्वाते दाहपाकौ च तं व्याधिं चिप्पमादिशेत् ॥
तदेवाक्षतरोगं च भवेत् कुनखं वदेत् ॥
इति माधवकरः ॥
(अस्य चिकित्सा यथा ॥
"चिप्पे दुष्टव्रणाक्रान्तौ मुक्तैषो मतप्रदः" ।
इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे ॥ तथाच सुश्रुते ।
"अभिघातात् प्रदुष्टो यो नखो रूक्षोऽसितः खरः ।
भवेत्तु कुनखं विद्यात् कुलीनमिति संज्ञितम्" ॥
अयं हि रोगः जन्मान्तरीयसुवर्णापहरणाकृतप्रायश्चित्तस्य सुरापुरुषमहापातकस्य चिह्नरूपः । यथा विष्णुसंहितायाम् ।
"नरकानुभूतदुःखानां तिर्य्यक्त्वमुत्तीर्णानां मानुष्येष्वपि लक्षणानि भवन्ति । कुष्ठातिपातकी ब्रह्महा यक्ष्मी सुरापः श्यावदन्तकः सुवर्णहारी कुनखी गुरुतल्पगो दुश्चर्म्मा" ॥) कुत्सितनखयुक्ते, त्रि ॥

कुनखी [न्] त्रि, (कुनख इति ख्यातनामविश्रुतरोगो ऽस्यास्तीति ।) कुनखरोगयुक्तः । स दुश्चित्तनखः । यथा । "सुवर्णहारी कुनखी । कुनखी श्यावदन्तश्च द्वादशरात्रं व्रतं चरित्वा तद्दन्तनखावुद्धरेयाताम्" ॥ इति शुद्धितत्त्वम् ॥

कुनट पुं, (कुत्सितं नटतीति । कु + नट् + अच् ।) श्योनाकप्रभेदः । इति राजनिर्घण्टः ॥ (कुत्सितो नट इति विग्रहे नटाधम ॥ श्योनाकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

कुनटी, स्त्री, (कुनट + गौरादित्वात् ङीष् ।) मनःशिला । इत्यमरः ।२।९।१०८॥
(अस्याः पर्य्यायाः ॥
"मनःशिला मनोगुप्ता च नेपाली कुनटी शिला" ।
इति वैद्यकरत्नमालायाम् ॥
अस्याविवरणमस्य मनःशिलाशब्दे ज्ञातव्यम् ॥) धन्याकम् । इति राजनिर्घण्टः ॥
(पर्य्याया यथा ॥
"धान्यकं धानकं धन्यं धानाधानेयकस्तथा ।
कुनटी धेनुकाच्छत्रा कुस्तुम्बुरुवितुन्नकम्" ॥
गुणाश्चास्य धन्याकशब्दे ज्ञातव्याः ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) नेपालदेशजमनःशिला । इति केचित् । इति भरतः ॥(कुत्सिता नर्त्तकी । अनिपुणा नर्त्तकी ॥)

कुनन्दी, [न्] पुं, (कुत्सितं द्रवद् वा नन्दोऽस्यास्तीति इनिः ।) वकवृक्षः । इति त्रिकाण्डशेषः ॥

कुनाभि, पुं, (ईषत् नाभिरिव आवर्त्तत्वात् ।) वातमण्डली । इति त्रिकाण्डशेषः ॥ घूर्णवातास इति भाषा ॥ निधिः । इति हेमचन्द्रः ॥

कुनाशक ,पु,(ईषत् नाशयति स्वप्रनेन । कु + नश + णिच् + ण्वुल् ।) यवासः । इत्यमरः ।२।४।९१ ।
(दुरालभा । आल्कुशीति भाषा ॥
अस्य पर्य्याया यथा ॥
"यासोयवासो दुःस्पर्शो धन्वयासः कुनाशकः ।
दुरालभा दुरालम्भा समुद्रान्ता च रोदिनी ॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा" ।
इति भावप्रकाशस्य पूर्व्वखण्डे १ म भागे ॥)

कुन्च ग्रहणे । कौटिल्ये । इति कविकल्पद्रुमः ॥ (भ्वां परं-अक-सक-सेट् ।) पञ्चमस्वरी । वक्रमिति वक्रं करोतीति क्रौ वक्रं करोतीति क्रौ च रूपम् । तेन कुटिलीभावः कुटिलीकरणञ्च । कौटिल्यमल्पीभावः अल्पीकरणञ्च । कुञ्चति खल्वः कुटिलोऽल्पो वा स्यादित्यर्थः । कुञ्चति खलो वायुः कुटिलमल्पं वा करोतीत्यर्थः । इति दुर्गादासः ॥

कुन्त, पुं, (कुं भूमिं उनत्ति क्लेदयति । कुं शरीरं उनत्ति भेदयति दारयति वा धातूनामनेकार्थत्वात् उन्द + बाहुलकात् त । शकन्ध्वादिवत् साधुः ।) गवेधुका । प्रासास्त्रम् । इति मेदिनी ॥ (भल्लास्त्रम् । भाला इति भाषा । यथा कथासरित्सागरे ।
"कुन्तहस्ता कथं कुर्य्यात् राक्षसीव प्रिया प्रियम्" ॥) चण्डभावः । क्षुद्रजन्तुः । इति विश्वः ॥ क्षुद्रकीटः । उत्कुणम् । (उकुन् इति भाषा ॥)

कुन्तल, पुं, (कुन्तं उत्कुणं लाति गृह्णाति । ला + क ।) केशः । (यथा साहित्यदर्पणे ३।१२४।
"कापि कुन्तलसंव्यानसंयमव्यपदेशतः ।
बाहुमूलं स्तनौ नाभिपङ्कजं दर्शयेत् स्फुटम्" ॥) ह्रीवेरम् । इत्यमरः २ । ६ । ९५ ॥ चषकः । यवः । इति मेदिनी ॥ (कुन्तस्य प्रासाकारमिव लाति ।) लाङ्गलः । इति विश्वः ॥ ध्रुवकभेदः । यथा,—
"वर्णैः षोडशभिः कार्य्यः कुन्तलो लघुशेखरे ।
शृङ्गारे च रसे प्रोक्तमानन्दप्रवरायणः" ॥
इति सङ्गीतदामोदरः ॥ (दाक्षिणात्यजनपदविशेषः । तदधिष्ठाता राजा च यथा महाभारते २ । राजसूयिकपर्व्वणि ३४ । ११ ।
"आकर्षः कुन्तलश्चैव मालवाश्चान्ध्रकास्तथा ।
द्राविड़ाः सिंहलाश्चैव राजा काश्मीरकस्तथा" ॥)

कुन्तलवर्द्धन , पुं, (कुन्तलान् केशान् भृशमेव वर्द्धयति । वृध् + णिच् + ल्युः ।) भृङ्गराजवृक्षः । इति राजनिर्घण्टः ॥

कुन्तला, पुं, (कुन्ताः अस्त्रविशेषाः क्षीयन्ते प्रदर्श्यन्ते यत्र । ला + घञर्थे क ।) देशविशेषः । नकारान्तशब्दोऽयम् । इति मेदिनी ॥ (स च दाक्षिणात्यदेशः प्रयुज्यते । यथा महाभारते ६।९।५६ ।
"भिक्षिकाः कुन्तलाश्चैव सौहृदा नलकाननाः ।
कोकुट्टकास्तथा चोलाः कोङ्कणा मालवा नराः" ॥)

कुन्तलिका, स्त्री, (कुन्तलस्य आकृतिराकार इव विद्यतेऽस्याः इति ठन् । टाप् अत इत्त्वं च ।) दध्यादिच्छेदनी । दइकाटा छुरी इति भाषा । तत्पर्य्यायः । मार्ज्जिका १ । इति हारावली ॥ (कायाकामौषधम् । यथा सुश्रुते ।
"कुन्तलिका कुरण्टिका मयूरीनीलपुष्पक्य ॥
अस्याः गुणाश्चैवोक्ताः ।
"स्वादुपाकरसाः शीताः कफघ्नाः पित्तविनाशनाः ।
अवग्राहकरा ह्रद्याः कषाया वातलाः सराः" ॥
स्वादुतिक्ता कुन्तलिका" ॥)

कुन्तलोशीर, क्ली, (कुन्तल इव उशीरम् ।) वालकम् । इति राजनिर्घण्टः ॥ वाला इति भाषा ॥

कुन्ती, स्त्री, (राज्ञा कुन्तिभोजेन अपालनात् पालिता सती एषा वसुदेवभगिनी कुन्तीति नाम्ना विख्याता । यथा, हरिवंशे ३० । ३१-३२ ।
'पृथां दुहितरं चक्रे कुन्तिस्तु कुरुनन्दन ! ।
शूरः पूज्याय वृद्धाय कुन्तिभोजाय तां ददौ ॥
तस्मात् कुन्तीति विख्याता कुन्तिभोजात्मजा पृथा' ॥) पाण्डुराजभार्य्या । सा च शूरसेनराजकन्या पृथा

नाम्ना ख्याता। नत्पिता शूरसेन ना राज्ञे कुन्ति भोजाय दत्तवान्। इयं हि कन्यावस्थायां मुनिदत्त विद्यापरीक्षार्थं मन्त्रवशाहूतात् सूर्य्यात् कर्णं प्रासोष्ट। विवाहात् परञ्च सा मृगोभूतस्य मुने शापात् स्त्रीसङ्गमवर्ज्जितस्य स्वामिनो महाराज पाण्डोराज्ञया धर्म्माद्युधिष्ठिरं पवनाद्भीमं इन्द्रा दर्ज्जुनं सुषुवे। इति महाभारते १।१११ अध्याय। इयञ्च परमसाध्वीतया भगवद्वादरायणादिमह र्षिगणवरप्रभावेण प्रात स्मरणीया रमणी। यदुक्तम्,—

"अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा। पञ्चकन्याः स्मरेन्नित्यं महापातकनाशनम्"।)

गुग्गुलुवृक्षः। शल्लकी। इति विश्वमेदिन्यौ। आढकी। इति जटाधरः।

कुथ ग श्लिषि। श्लिषि। इति कविकल्पद्रुमः। (क्र्यां पर सक धक च सेट।) पञ्चमस्वरी। श्लिषि दुःखालिङ्गने। ग कुथ्नाति वुभुक्षात्त। इति हला युध। सुकुथ्य। इति दुर्गादासः।

कुन्थु, पुं, (कुथ्नाति दुःखसहनक्षमो भवति। कुन्थ + उन्।) बौद्धविशेषः। जिनचक्रवर्त्तिविशेषः। इति हेमचन्द्रः।

कुन्द, पुं क्ली, (कु कुत्सितं दुर्गन्धादिजनितक्लेशं द्यति नाशयति। कु + दो छेदने + क। पृषोद राद् नुम्। यद्वा कौतीति। 'कुन्दादयश्च"। उणां ४। ९८। इति निपातनात् सिद्धम्।) पुष्पवृक्षविशेषः। कुन्दफुलेर गाछ इति भाषा। तत्पर्य्यायः। माध्यम् २। इत्यमरः।२।४।७२। शुक्लपुष्पः ३। इति रत्नमाला। मकरन्दः ४ महामोदः ५ मनोहरः ६ मुक्तापुष्पः ७ सदापुष्पः ८ तारपुष्पः ९ अट्टहासकः १० दमनः ११ वन हासः १२ मनोज्ञः १३ वीरटम् १४ वरटम् १५। इति शब्दरत्नावली। (यथा, नवग्रहस्तोत्रे शुक्रस्तुति।

"ॐ हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम्। सर्व्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम्" ।)

अपि च। भावप्रकाशे।

"कुन्दन्तु कथितं माध्यं सदापुष्पञ्च तत् स्मृतम्। कुन्दशीतं लघु श्लेष्मशिरोऽर्त्तिविषपित्तहृत्"।

अस्य गुणाः। अतिमधुरत्वम्। शीतत्वम्। कषा यत्वम्। सौरभ्यमावनत्वम्। कफपित्तहरत्वम्। सारकत्वम्। दीपनत्वम्। पाचनत्वञ्च। इति राज निर्घण्टः। तत्पुष्पगुणाः। श्लेष्मनाशित्वम्। शाहि त्वञ्च। इति राजवल्लभः।

कुन्द,पुं,कुन्दुरुनामगन्धद्रव्यम्। (अस्य पर्य्याया यथा। "कुन्दरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि"। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।) भ्रमियन्त्रम्। कुन्द इति भाषा। कुबेरस्य निधि विशेषः। इति मेदिनी। करवीरवृक्षः। इति राजनिर्घण्टः। (कुन्दपुष्पवर्णं इव श्वेतवर्णा भरणादि यस्यावतारत्वात्। विष्णुः। यथा महा भारते १३।१४९।१०।

"कुमुदः कुन्दरः कुन्दः पर्ज्जन्यः पवनोऽनिलः"।

यद्वा कु पृथ्वीं काश्यपाय दत्तवान्। दा + क। द्वितीयाया अलुक्। परशुरामावतारे क्षत्रिय हत्यापापशुद्ध्यर्थं मारीचाय कश्यपाय अश्वमेधयज्ञे महा दानस्य दक्षिणास्वरूपवसुन्धरादानादस्य तथा त्वम्। तत्कथा यथा हरिवंशे।

'सर्व्वपापविशुद्ध्यर्थं वाजिमेधेन चेष्टवान्। तस्मिन् यज्ञे महादाने दक्षिणां भृगुनन्दनः। मारीचाय ददौ प्रीतः काश्यपाय वसुन्धराम्' ।)

कुन्दक पुं, (कुन्द + संज्ञायां कन्।) कुन्दुरुकः। इति राजनिर्घण्टः।

कुन्दमः, पुं, (अनिष्टकारित्वात् कुत्सितं उन्दुरादिकं दमयति नाशयतीति। दम + णिच् + अच् पृषो दरात् नुम् साधुः। यद्वा कुन्देन मीयते प्रायेण शुभ्रवर्णत्वात्। कुन्द + मा + घञर्थे क।) वि डालः। इति त्रिकाण्डशेषः।

कुन्दरः, पुं, (कु भूमिं दारयति। अन्तर्भूतण्यर्थे दृ + अच् पृषोदरात् नुम् साधुः।) तृणभेदः। कुन्दरा इति कलिङ्गे ख्यातः। तत्पर्य्यायः। कङ्गुरः २ भिरटी ३ दीर्घपत्रः ४ खरच्छदा ५ रसालः ६ क्षेत्रसम्भूतः ७ सुरसा ८ मृगवल्लभः ९। अस्य मूलगुणाः। शैत्यत्वम्। शीतत्वम्। पित्ता तिसारनाशित्वम्। गोधनानां पथ्यत्वम्। बल पुष्टिविवर्द्धनत्वञ्च। इति राजनिर्घण्टः। (कुन्दवत् निर्म्मलानि धर्म्मानुबन्धीनि फलानि राति ददाति। कुन्द + रा + क। यद्वा कु पृथ्वीं, हिरण्याक्षदैत्यं हन्तुकामो भगवान् विष्णुः वराहरूपेण दार यति। दृ + णिच + अच पृषोदरात् नुम् साधुः। विष्णुः। यथा महाभारते १३।१४९।१०।

"कुमुदः कुन्दरः कुन्दः पर्ज्जन्यः पवनोऽनिलः"।)

कुन्दिनी, स्त्री, (कुन्दानां पद्मानां समूहः। खला दित्वात् इनिः। स्त्रियां ङीप्।) पद्मिनी। पद्म समूहः। इति त्रिकाण्डशेषः।

कुन्दु, स्त्री, (कु भूमिं द्रवतीति। कु + द्रु + बाहु लकात् डुः।) कुन्दुरुनामगन्धद्रव्यम्। इति शब्द माला अमरटीका च। (कुन्दशब्दे ऽस्या विव रणं ज्ञातव्यम्।) मूषिके पुं। इति शब्दरत्ना वली।

कुन्दुरः, पुं, (कु भूमिं दारयति। दॄ विदारे + उरन्।) कुन्दुरुनामगन्धद्रव्यम्। इत्यमरटीकायां भरतः।

कुन्दुरु, पुं, स्त्री, (कु भूमिं उनत्ति। उन्द् + मृगय्वा दित्वात् निपातनात् साधुः।) स्वनामख्यातसुग न्धिद्रव्यम्। यस्य निर्य्यासे कुन्दुरुखोटि इति ख्यातिः। तत्पर्य्यायः। पालङ्का २ मुकुन्दः ३ कुन्दः ४। इत्यमरः।२।४।१२१। पालङ्की ५ मुकुन्दु ६ कुन्दु ७ कुन्दुरः ८। इति तट्टीकायां भरतः। कुन्दुरुकः ९ सौराष्ट्रः १० शिखरी ११ कुन्दकः १२ भीषणः १३ मोदकः १४ बहुगन्धः १५ पालिन्दः १६ भीषणः १७ सौराष्ट्रका १८ कुन्दुरुकी १९। इति जटाधरः। अपि च।

"कुन्दरुस्तु मुकुन्दः स्यात् सुगन्धः कुन्द इत्यपि। कुन्दुरुर्मधुरस्तिक्तस्तीक्ष्णस्त्वच्यः कटुर्हरेत्।

ज्वरस्वेदग्रहालक्ष्मीमुखरोगकफानिलान्'।

इति भावप्रकाशः। अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। कफपित्तातिदाहनाशित्वञ्च। अस्य मार्ज्जनयोगञ्च। शिशिरत्वम्। प्रदरामयशान्ति कारित्वञ्च। इति राजनिर्घण्टः। अस्य गोरत्नो ज्वरनाशित्वम्। इति राजवल्लभः।

(अस्य व्यवहारो यथा वैद्यकचक्रपाणि सङ्ग्रहे ऽष्टादशशतिकप्रसारणी तैले।

"कर्पूर कुन्दुरुनिशालवङ्गध्यामचन्दनम्"।*।)

कुन्दुरुक, पुं स्त्री, (कुन्दुरु + स्वार्थे कन्।) कुन्दुरुनाम सुगन्धिद्रव्यम्। इति राजनिर्घण्टः।

कुन्दुरुकी, स्त्री, (कुन्दुरुक + जातित्वात् ङीष्।) शल्लकीवृक्षः। इत्यमरः।२।४।१२४।

कुप इ कि द्युतौ। इति कविकल्पद्रुमः। (चुरा पर सक सेट् इदित।) पञ्चमस्वरी। इ कुम्प्यते। कि कुम्पयति कुम्पति। द्युतिरत्र भासनम्। इति दुर्गादासः।

कुप, क भासे। इति कविकल्पद्रुमः। (चुरा परं अक सेट्।) क कोपयति। इति दुर्गादासः।

कुप य इर् कोपे। इति कविकल्पद्रुमः। (दिवा पर-अक-सेट इरित्।) कोपो नेत्ररौक्ष्यादि हेतुश्चित्तविकारः। य, कुप्यति माता शिशवे। इर अकुपत् अकोपीत्। अस्मात् शुभादित्वाभिन्न ष इत्यन्ये। "कदाचित् कुप्यते माता नोदरस्था हरीतकी"। इति तु कुप्यतीति कुप् ततः क इवाचरतीति किः साध्यम्। इति दुर्गादासः।

कुपथ, पुं, कुत्सितः पन्थाः। (पाणिनिमते कापथ इति नित्यं स्यात्। वोपदेवमते तु "पथि पुरुषे वा"। इति सूत्रेण विभाषया को कादेशः।) का पथ। इति शब्दरत्नावली। (यथा, श्रीमद्भागवते ५।६।१०। "लब्धमपथमकुतोभयमपहाय कुपथपाखण्डमसमञ्जसं निजमनीषया मन्दः प्रवर्त्त यिष्यति"।)

कुपथः मेदविशेषस्य। अत्र आदित्वात् अच्। कुपथगामिनि, त्रि। यथा महाभारते ५।१२७।२८।

"कुपथस्य महाबोधः श्रीमान् राजन्! महासुरः। सुपाश्व इति विख्यातः क्षितौ जज्ञे महीपतिः"।)

कुपाणिः, त्रि, (कुत्सितः पाणिरस्य।) वक्रहस्तः। इति जटाधरः। कोना इति भाषा।

कुपिनी, [न्] पुं, (कुपिनी मत्स्यधानी अस्यास्तीति। व्रीह्यादित्वात् इनिः।) कैवर्त्तः। इति त्रिकाण्ड शेषः। जालिया इति भाषा।

कुपिनी, स्त्री, (कुप्यते रक्ष्यते मत्स्योऽत्र। कुप इ कि द्युतौ अधिकरणे बाहुलकात् इनिः। किञ्च नुम् पृषोदरादित्वात् साधुः।) मत्स्यधानी। इति शब्दरत्नावली। खालुइ इति भाषा।

कुविन्दः, पुं, (कुम्पयति विस्तारयति सूत्राणि। कुप इ कि द्युतौ + 'कुपेर्वा वश्च'। उणां ४। ८६। इति किन्दच्।) तन्तुवायः। इत्यमरटीका।

कुपीलु, पुं, (कुत्सितः पीलुः।) कारस्कराख्य विषवृक्षविशेषः। मकरतेन्दु मार्कण्ड इति च भाषा। तत्पर्य्यायः। कुचेलः २ तिन्दुकः ३ कुलकः।

४ काकतिन्दुक ५ काकपीलुक ६ काकेन्दु ७ विषतिन्दु ८ मर्कटतिन्दुक ९। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। वातमदकारित्वम्। लघुत्वम्। ग्राहकत्वम्। ग्राहित्वम्। कफपित्तास्रनाशित्वञ्च। इति भावप्रकाशः॥

कुपूय, त्रि, (कुत्सितं पूयते। पूयीङ् विशरणे + पचाद्यच्।) कुत्सितः। आचाराचारादिनिन्दितः। इत्यमरभरतौ॥

कुप्य, क्ली, (गुप्यते रक्ष्यते दस्यादिभ्यः। गुपू रक्षणे। "राजसूयसूर्य्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः"। ३।१।११४। इति क्यबन्तो निपातितः। गुपेरादेः कत्वञ्च संज्ञायाम्।) स्वर्णरूप्यभिन्नधातुः। इत्यमरः। २।९।९१॥ (यथा, महाभारते। १५। ६। ११।
"भूमिरल्पफला देया विपरीतस्य भारत!।
हिरण्यं कुप्यभूयिष्ठं मित्रं क्षीणमथो बलम्॥")
दस्ता इति ख्यातधातुः। इत्यष्टधातुमध्ये वैद्यकम्॥

कुप्यशाला, स्त्री, (कुप्यानां स्वर्णरूप्याभ्यामन्येषां भाजनादीनां शाला गृहम्।) स्वर्णरूप्यभिन्नधातुपात्रादिनिर्म्माणादिगृहम्। कांसारिर दोकान इति भाषा। तत्पर्य्यायः। सन्धानी २। इति हेमचन्द्रः॥

कुप्रिय, त्रि (कुत्सितं प्रीणातीति। कु + प्री + "इगुपधज्ञाप्रीकिरः कः"। ३।१।१३५। कः।) अधन्यः। इति हलायुधः॥ (बहुव्रीहौ तु कुत्सितप्रियः॥)

कुब इ कि स्तृतौ। इति कविकल्पद्रुमः। (चुरां पक्षे भ्वां परं सकं सेट्।) पञ्चमस्वरी। इ कुम्ब्यते। कि कुम्बयति कुम्बति। स्तृतिराच्छादनम्। इति दुर्गादासः॥

कुबे(वे)र, पुं (कुम्बतीति। कुबि इ कि आच्छादने "कुम्बेर्नलोपश्च"। उणां १। ६०। इति एरक्। नलोपश्च। यद्वा कुत्सितं वेरं शरीरं यस्य। त्रिपादनेत्रत्वात्तथात्वम्।) यक्षराजः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ (स च विश्रवस ऋषेः इलविलायां जातः। स तु पितामहात् धनदत्वं अलकाराजत्वञ्च। यथा, वायुपुराणे।
"कुत्सायां क्वितिशब्दोऽयं शरीरं वेरमुच्यते।
कुवेरः कुशरीरत्वात् नाम्ना तेनैव सोऽङ्कितः"॥
तथा मार्कण्डेये देवीवाक्यमाशौचौ च।
"कुवेरो भव नाथस्त्वं मम कर्णेन्द्रया धन!"॥)

कुब्ज, त्रि, (कु ईषत् उब्जं आर्ज्जवमस्य। उब्ज आर्ज्जवे घञ् शकन्ध्वादिवल्लोपः।) वायुनोन्नतहृदयः। उन्नतपृष्ठश्च। कुजा इति भाषा। तत्पर्य्यायः। न्युब्ज २ गडुल ३ इत्यमरः॥ गुड ४ गडर ५ इति शब्दरत्नावली॥ तस्य लक्षणमाह।
"हृदयं यदि वा पृष्ठमुन्नतं क्रमशः सरुक्।
क्रुद्धो वायुर्यदा कुर्य्यात्तदा तं कुब्जमादिशेत्"॥
इति माधवकरः॥ यदेतदुक्तं यदि चेति विकल्पार्थेन न पुनर्व्वाच्यं। अभ्यन्तरायामात् कोऽन्तरो भवति बहिरायामात् पृष्ठान्तरो भवति तस्मादनयोर्भेदः। उच्यते। अन्तरायामबहिरायामयोः प्रणतत्वमेवात्र शरीरस्य बहिः शरीरस्य वा आयमनं तु हृदयं पृष्ठं वा शरीराद्वहिर्भवतीति भेदः॥ *॥

अथ चिकित्सा।
"बाह्यायामेऽन्तरायामे धनुस्तम्भे च कुब्जके।
वाक्यं यथार्दितोक्तं तेन सेवा शमो भवेत्॥
वातव्याधिषु सामान्या या क्रिया कथिता पुरा।
कर्त्तव्या एव सा सर्व्वास्वेतेषु विशेषतः"॥
इति भावप्रकाशः॥ (यथा, हरिवंशे ८३। ३४।
"तां तु कुब्जां स्त्रीमध्ये अङ्गुल्येनाग्रपाणिना।
शनैः सन्तोलयामास कृष्णो लीलाविधानवित्"॥
रोगविशेषस्यास्य चिकित्सार्थं वटिकौषधं यथा। *।
"रसो गन्धो समौ शुद्धौ ताम्रकाभ्रकं तथा।
विषं व्योषञ्च कटुकी वीजं जैपालकं समौ"॥
"भृङ्गराजरसैर्मर्द्द्यं मुण्डकस्य रसैस्तथा।
गुञ्जाद्वयं प्रदातव्यं रसः कुब्जविनोदकः॥
आमवाताढ्यवातादीन् कटीशूलञ्च नाशयेत्।
अग्निञ्च कुरुते दीप्तं सौख्यानां साधनं परम्"॥

कुब्जविनोदो रसः॥

इति वैद्यकरसेन्द्रसारसंग्रहे वातरोगाधिकारे॥ *॥)

कुब्ज, पुं, (कु ईषत् उब्जं आर्ज्जवमस्य। शकन्ध्वादित्वात् साधुः।) अपामार्गः। इति राजनिर्घण्टः॥ खड्गः। इति शब्दमाला॥

कुब्जक, पुं (कौ पृथिव्यां उब्जति। उब्ज + ण्वुल्। शकन्ध्वादित्वात् उलोपे साधुः।) पुष्पवृक्षविशेषः। कुजा इति ख्यातः। (यथा, शब्दार्थचिन्तामणिधृतनृसिंहपुराणे।
"चम्पकात् पुष्पशतकादशोकं पुष्पमुत्तमम्।
अशोकात् पुष्पसाहस्रात् सेवतीपुष्पमुत्तमम्।
सेवतीपुष्पसाहस्रात् कुब्जकं पुष्पमुत्तमम्"॥)
तत्पर्य्यायः। भद्रतरुणी १ वृत्तपुष्प २ अतिकेशरः ३ महासहः ४ कण्टकाढ्य ५ खर्व्वः ६ अलिकुलसङ्कुल ७ वारिकण्टक ८। इति त्रिकाण्डशेषः॥ अपि च।
"कुब्जको भद्रतरुणिर्वृत्तपुष्पोऽतिकेशरः।
महासहा कण्टकाढ्या नीलालिकुलसङ्कुला"॥
राजनिर्घण्टे महासहेत्यादिशब्दाः स्त्रीलिङ्गाः।

अस्य गुणाः।
"कुब्जकः सुरभिः स्वादुः कषायानुरसः सरः।
त्रिदोषशमनो बल्यः शीतवर्ण्यश्च स स्मृतः"॥
इति भावप्रकाशः॥ सरभित्वम्। रक्तपित्तकफनाशित्वञ्च। तत्पुष्पस्य गुणाः। शीतलत्वम्। वर्ण्यकारित्वम्। दाहवातपित्तनाशित्वञ्च। इति राजनिर्घण्टः॥

कुब्जकण्टक, पुं, (कुब्जः कण्टकोऽस्य।) श्वेतखदिरः। इति राजनिर्घण्टः॥

कुभ्र(न्)क्ली,(कुभि आच्छादने + 'अन्येभ्योऽपि दृश्यते'। उणां १। २८। इति निपातनात् रन्।) नभः। इत्युणादिकोषः॥ कुभम्। कुभकम्। तन्तुः। अम्बरम्। स्फटम्। इति सङ्क्षिप्तसारे उणादिवृत्तिः॥

कुमार, त् क क्रीडौ। इति कविकल्पद्रुमः॥ (चुरां परं अक सेट्।) ह्रस्वी। अचुकुमारत्। इति दुर्गादासः॥

कुमार, स्त्री, (कुमारयति नन्दति अत्र यस्मिन् सती अर्थे।) नायकाश्रयणम्। इति मेदिनी॥ ठोटि सोता इति भाषा॥

कुमार, पुं, (कुत्सितो मारः कन्दर्पो यस्मात्।) कार्त्तिकेयः तदुत्पत्तिविवरणन्तु कार्त्तिकेयशब्दे द्रष्टव्यम्॥
(तथा महाभारते। १। ६६। २३-२४।
"अग्नेः पुत्त्रः कुमारस्तु श्रीमान् शरवणालयः।
तस्य शाखो विशाखश्च नैगमेयश्च पृष्ठजः।
कृत्तिकाभ्युपपत्तेश्च कार्त्तिकेय इति स्मृतः"॥)
कौ पृथिव्यां मारयति दुष्टान्। कु + मृ + णिच् + अच्।) भावोक्तौ युवराजः। इत्यमरः॥ (राजकुमारः। यथा, रघौ ७। ६१।
"तत प्रियोपात्तरसेऽधरोष्ठे
निवेश्य दध्मौ जलजं कुमारः"॥)
शुकः। अश्ववारकः। (कुमारयति क्रीडतीति। कुमार त् क क्रीडने + अच्।) पञ्चवर्षीयबालकः। (यथा मनौ ७। १०५।
"कन्यानां सम्प्रदानञ्च कुमाराणाञ्च रक्षणम्"॥

"तस्यास्तु खल्वाप्रसवायाः प्रसवनार्थे कर्म्मणि क्रियमाणे जातमात्रे एवैष कुमारस्य कार्य्याण्येतानि कर्म्माणि भवन्ति तद्यथा अश्मनोः सङ्घट्टनं कर्णयोर्मूले शीतोदकेनोष्णोदकेन वा मुखपरिषेकः। तथा स क्लेशविहतान् प्राणान् पुनर्लभेत कृष्णकपालिका शूर्पेण चैनमभिनिष्पुणीयात् यदि चेष्टेत यावत् प्राणानां प्रत्यागमनं तावत् सम्यगेव कुर्य्यात्। ततः प्रत्यागतप्राणं प्रकृतिभूतमभिसमीक्ष्य स्नानोदकग्रहणाभ्यामुपपादयेत्। अथास्य ताल्वोष्ठकण्ठजिह्वाप्रमार्जनमारभेताङ्गुल्या सुपरिलिखितनखया सुप्रक्षालितोपधानकार्पासपिचुमत्या प्रथमं प्रमार्जितास्यस्य चास्य शिरस्तालु कार्पासपिचुना स्नेहगर्भेण प्रतिसञ्छादयेत्। ततोऽस्यानन्तरं कार्य्यं सैन्धवोपहितेन सर्पिषा प्रच्छर्दनम्"।

"दशम्यां निवृत्तायां सपुत्त्रा स्त्री सर्व्वगन्धौषधैर्गौरसर्षपलोध्रैश्च स्नाता लघ्वहतवस्त्रं परिधाय पवित्रेष्टलघुविचित्रभूषणवती च संस्पृश्य मङ्गलान्युचितामर्च्चयित्वा च देवतां शिखिनः शुक्लवाससोऽव्यङ्गांश्च ब्राह्मणान् स्वस्ति वाचयित्वा कुमारमहतेन वाससाच्छादयेत्। प्राक्शिरसमुदक्शिरसं वा संवेश्य देवतापूर्व्वं द्विजातिभ्यः प्रणमतीत्युक्त्वा कुमारस्य पिता द्वे नामनी कारयेत् नाक्षत्रिकं नामाभिप्रायिकञ्च"।

"एवञ्च नामकर्म्मणि कृते कुमारं परीक्षितुमुपक्रामेदायुषः प्रमाणज्ञानहेतोः। तत्रेमान्यायुष्मतां कुमाराणां लक्षणानि भवन्ति तद्यथा—एकैकजा मृदवोऽल्पाः स्निग्धाः सुबद्धमूलाः कृष्णाः केशाः प्रशस्यन्ते। स्थिरा बहला त्वक् प्रकृतिसम्पन्नमीषत्प्रमाणातिवृत्तमनुरूपमातप

पद्मोपमं शिरः प्रशस्यते। व्यूढं दृढं समं सुश्लिष्टशङ्खसन्ध्यूर्द्ध्वव्यञ्जनसम्पन्नमुपचितं वलितमर्द्धचन्द्राकृतिललाटं बहलौ विपुलसमपीठौ समौ नीचैर्वृद्धौ पृष्ठतोऽवनतौ सुश्लिष्टकर्णपुत्रकौ महाच्छिद्रौ कर्णौ। ईषत् प्रलम्बिन्यावसङ्गते समे संहते महत्यौ भ्रुवौ। समे समाहितदर्शने व्यक्तभागविभागे बलवती तेजसोपपन्ने स्वङ्गापाङ्गे चक्षुषी। ऋज्वी महोच्छ्वासावंशसम्पन्नेषदवनताग्रा नासिका। महदृजु सुनिविष्टदन्तमास्यम्। आयामविस्तारोपपन्ना श्लक्ष्णा तन्वी प्रकृतियुक्ता पाटलवर्णा जिह्वा। श्लक्ष्णं युक्तोपचयमूष्मोपपन्नं रक्तं तालु। महानदीनः स्निग्धोऽनुनादी गम्भीरसमुत्थो धीरस्वरः। नातिस्थूलौ नातिकृशौ विस्तारोपपन्नावास्यप्रच्छादनौ रक्तावोष्ठौ। महत्यौ हनुवृत्तौ। नातिमहती ग्रीवा। व्यूढमुपचितमुरो गूढं जत्रु पृष्ठवंशश्च। विप्रकृष्टान्तरौ स्तनौ, असम्पातिनी स्थिरे पार्श्वे, वृत्तपरिपूर्णायतौ बाहू, सक्थिनी अङ्गुल्यश्च। महदुपचितं पाणिपादम्। स्थिरावृत्ता स्निग्धास्ताम्रास्तुङ्गाः कूर्माकाराः करजाः, प्रदक्षिणावर्त्ता सोत्सङ्गा च नाभिः। नाभ्युरस्त्रिभागहीना समा समुपचितमांसा कटी। वृत्तौ स्थिरोपचितमांसौ नात्युन्नतौ नात्यवनतौ स्फिचावनुपूर्व्ववृत्तौ उपचययुक्तावूरू। नात्युपचिते नात्यपचिते एणीपदे प्रगूढसिरास्थिसन्धी जङ्घे। नात्युपचितौ नात्यपचितौ गुल्फौ पूर्व्वोपदिष्टगुणौ पादौ कूर्म्माकारौ। प्रकृतियुक्तानि वातमूत्रपुरीषगुह्यानि तथा स्वप्नजागरणायासस्मितरुदितस्तनग्रहणानि। यच्च किञ्चिदन्यदपि अनुक्तमस्ति तदपि सर्व्वं प्रकृतिसम्पन्नमिष्टं विपरीतं पुनरनिष्टमिति दीर्घायुर्लक्षणानि"॥ *॥

अतोऽनन्तरं कुमारागारविधिमनुव्याख्यास्यामः॥

"वास्तुविद्याकुशलः प्रशस्तं रम्यमतमस्कं निवातं प्रवातैकदेशं दृढमपगतश्वापदपशुदंष्ट्रिमूषिकपतङ्गं सुविभक्तसलिलोदूखलमूत्रवर्च्चःस्थानस्नानभूमिमहानसमृतुसुखं यथर्त्तुशयनासनास्तरणसम्पन्नं कुर्य्यात्। तथा सुविहितरक्षाविधानबलिमङ्गलहोमप्रायश्चित्तं शुचिवृद्धवैद्यानुरक्तजनसम्पूर्णमिति कुमारागारविधिः।

शयनास्तरणप्रावरणानि कुमारस्य मृदुलघुशुचिसुगन्धीनि स्युः। स्वेदमलजन्तुमन्ति मूत्रपुरीषोपसृष्टानि च वर्ज्यानि स्युः।

असति सम्भवेऽन्येषां तान्येव च सुप्रक्षालितोपधानानि सुधूपितानि शुद्धशुष्काण्युपयोगं गच्छेयुः।

धूपनानि पुनर्वाससां रक्षणार्थमपास्यतरवसर्षपातसीहिङ्गुगुग्गुलुवचाचोरकवयःस्थागोलोमीजटिलापलङ्कषाशोकरोहिणीसर्पनिर्म्मोकाणि घृतयुक्तानि स्युः।

मणयश्च धारणीयाः कुमारस्य खड्गरुरुगवयवृषभाणां जीवतामेव दक्षिणेभ्यो विषाणेभ्योऽग्राणि गृहीतानि स्युः। मन्त्राद्याश्चौषधयो जीवकर्षभकौ यान्यन्यान्यपि महर्षयः प्रशंसेयुः।

क्रीडनकानि खलु तु विचित्राणि घोषवन्त्यभिरामाणि चागुरूण्यतीक्ष्णाग्राणि चानास्यप्रवेशीनि चाप्राणहराणि चावित्रासनानि स्युः।

नह्यस्य वित्रासनं साधु तस्मात्तस्मिन् रुदत्यभुञ्जाने वान्यत्र विधेयतामगच्छति राक्षसपिशाचपूतनाद्यानां नामान्याह्वयता कुमारस्य वित्रासनार्थं नामग्रहणं न कार्य्यं स्यात्।

यदि त्वातुर्य्यं किञ्चित् कुमारमागच्छेत् तत्प्रकृतिनिमित्तपूर्व्वरूपलिङ्गोपशयविशेषैस्तत्त्वतोऽनुबुध्य सर्व्वविशेषानातुरौषधदेशकालाश्रयापेक्षी चिकित्सितुमारभेतैनं मधुरमृदुलघुसुरभिशीतशङ्करं कर्म्मप्रवर्त्तयन्नेव सात्म्या हि कुमारा भवन्ति तथा ते प्रशमं लभन्ते चिराय रोगास्ते ऽरोगस्त्वमाविष्टेत् देहकालात्मगुणविपर्य्ययेण वर्त्तमानः।

क्रमेणासात्म्यानि परिवर्ज्योपयुक्तान् सर्व्वांश्चाहितानि वर्जयेत्तथा बलवर्णशरीरायुषां सम्पदमवाप्नोतीति।

एवमेनं कुमारमायौवनप्राप्तेर्धर्म्मार्थकुशलागमनाच्चानुपालयेदिति श्रुतादिषा सम्यक्कर कर्म्म व्याख्यातम्। तदाचरन् यथोक्तैर्विधिभिः पूजां यथेष्टं लभतेऽनसूयक इति"।

इति शारीरस्थानेऽष्टमेऽध्याये चरकेणोक्तम्। *।

"अथ कुमारं शीताभिरद्भिराश्वास्य जातकर्म्मणि कृते मधुसर्पिरनन्ताचूर्णमङ्गुल्यानामिकया लेहयेत्ततो बलातैलेनाभ्यज्य क्षीरवृक्षकषायेण सर्व्वगन्धोदकेन वा रूप्यहेमप्रतप्तेन वा वारिणा स्नापयेदेनं कपित्थपत्रकषायेण वा कोष्णेन यथाकालं यथादोषं यथाविभवञ्च।

क्षीरसात्म्याय सर्पिः पाययेत् सिद्धार्थकवचामांसीपयस्यापामार्गशतावरीसारिवाब्राह्मीपिप्पलीहरिद्राकुष्ठसैन्धवसिद्धं क्षीरान्नमादाय मधुकवचापिप्पलीचित्रकत्रिफलासिद्धमन्नमादाय द्विमासमूर्ध्वक्षीरान्नाय मधु त्रिफलाद्या त्रिफलासिद्धम्। तेनारोग्यबलमेधायूंषि शिशोर्भवन्ति।

बालं पुनर्गात्रसुखं गृह्णीयात् नचैनं तर्जयेत् सहसा न प्रतिबोधयेत् वित्रासभयात् सहसा नापहरेदुत्क्षिपेद्वा वातादिविघातभयात् नोपवेशयेत् कौब्ज्यभयात् नित्यञ्चैनमनुवर्त्तेत प्रियशतैरजिघांसुः। एवमनभिहतमनास्त्वभिवर्द्धते नित्यमुदग्रसत्त्वसम्पन्नो नीरोगः सुप्रसन्नमनाश्च भवति। वातातपविद्युत्प्रभापादपलताशून्यागारनिम्नस्थानगृहच्छायादिभ्यो दुर्ग्रहोपसर्गतश्च बालं रक्षेत्।

"नाशुचौ विसृजेद्बालं नाकाशे विषमे न च।
नोष्णमारुतवर्षेषु रजोधूमोदकेषु च॥
क्षीरसात्म्यतया क्षीरमाजं गव्यमथापि वा।
दद्यादास्तन्यपर्य्याप्तेर्बालानां वीक्ष्य मात्रया॥

षण्मासञ्चैनमन्नं प्राशयेल्लघु हितञ्च। नित्यमगाररोधस्तस्य स्यात् कृतरक्ष उपसर्गभयात्। प्रयत्नतश्च ग्रहोपसर्गेभ्यो रक्ष्या बाला भवन्ति॥

अथ कुमार उद्विजते त्रस्यति रोदिति नष्टसंज्ञो भवति नखदशनैर्धात्रीमात्मानञ्च परितुदति दन्तान् खादति। कूजति जृम्भते भ्रुवौ विक्षिपत्यूर्द्ध्वं निरीक्षते फेनमुद्वमति सन्दष्टोष्ठः क्रूरो भिन्नामवर्च्चा दीनार्त्तस्वरो निशि जागर्त्ति दुर्ब्बलो म्लानाङ्गो मत्स्यच्छुच्छुन्दरिमत्कुणगन्धो यथा पुरा धात्र्याः स्तन्यमभिलषति तथा नाभिलषतीति सामान्येन ग्रहोपसृष्टलक्षणमुक्तं विस्तरेणोत्तरे वक्ष्यामः"॥

इति सुश्रुते शारीरस्थाने १० अध्याये उक्तम्॥)

वरुणवृक्षः। इति मेदिनी॥ अश्वपालकविशेषः। इति हेमचन्द्रः॥ सिन्धुनदः। इति शब्दरत्नावली॥ (सनकसनातनसनत्कुमारसनन्दा एते चत्वारोऽदि वात्यन्त एव ब्रह्मचारित्वात् कुमारा इत्युच्यन्ते॥ त इव ये च कौमारतो ब्रह्मचारिणस्तेऽपि विवेदाः। यथा, मनौ। ५। १५९।

"अनेकानि सहस्राणि कुमारब्रह्मचारिणाम्।
दिवं गतानि विप्राणामकृत्वा कुलसन्ततिम्"॥

मङ्गलग्रहः। यथा, नवग्रहस्तोत्रे।

"धरणीगर्भसम्भूतं विद्युत्पुञ्जसमप्रभम्।
कुमारं शक्तिहस्तञ्च लोहिताङ्गं नमाम्यहम्"॥

शुक्तिमत्पर्व्वतोद्भूतऋषिकुल्याविशेषः।
यथा, विष्णुपुराणे।

"ऋषिकुल्या कुमाराद्याः शुक्तिमत्पादसम्भवाः"॥

शाकद्वीपाधिपतेर्भव्यस्य पुत्रविशेषः। तन्नाम्ना तद्वर्षमपि तथा च।

यथा, विष्णुपुराणे २। ४। ५८-६०।

"शाकद्वीपेश्वरस्यापि भव्यस्य सुमहात्मनः।
सप्तैव तनयास्तेषां ददौ वर्षाणि सप्त सः॥
जलदश्च कुमारश्च सुकुमारो मणीचकः।
कुसुमोदश्च मौदाकिः सप्तमश्च महाद्रुमः।
तत्संज्ञान्येव तत्रापि सप्तवर्षाण्यनुक्रमात्"॥

भक्तविशेषः। यथा, तन्त्रसारधृतविश्वसारवचनम्।

"कृतवीर्य्यश्च भीमश्च प्रभञ्जनो बालकः शुचः।
कुमारश्च युवा प्रौढो वृद्धो निर्व्वाणदायका"॥

[illegible]। बालोपद्रवभेदः। यथा, सुश्रुते उत्तरतन्त्रे २७ अः।

"स्कन्दः सृष्टो भगवता देवेन त्रिपुरारिणा।
बिभर्त्ति चापरां संज्ञां कुमार इति स ग्रहः"॥

शि, स्कन्दः॥)

कुमारक, पुं (कुमार + स्वार्थे वा कन्॥) वरुणवृक्षः। इत्यमरः। २। ४। २५॥ बालकः॥ इति हेमचन्द्रः॥ (यथा, महाभारते। १। १२८। २९।

"कुमारकैर्यान्नियता द्रुमा क्षार्द्रहाटक।
दशधा प्रवदन्ति यस्य कुल यशसा कुमारकाः"॥

राजकुमारः। यथा महाभारते। १। १३१। ७।

"ते च वृद्धा महात्मानस्सुरवस्य कुमारकाः।
नभोदारविदिग्ध्नन्तो ब्राह्मणं प्रदरानन्दम्"॥)

कौरव्यवंशोद्भवो नागविशेषः । यथा, महाभारते १ । आस्तीकपर्व्वणि ५७ । १२ ।
'एरकः कुण्डलो वेणी वेणीस्कन्धः कुमारकः ।
बाहुकः शृङ्गवेरश्च धूर्त्तकः प्रातरातकौ ।
कौरव्यकुलजास्त्वेते प्रविष्टा हव्यवाहनम्' ॥)

कुमारजीव, पुं, (कुमारं जीवयतीति । जीव + णिच् + अण् ।) पुत्रञ्जीववृक्षः । इति रत्नमाला । जीयापुता इति भाषा ॥

कुमारपाल, पुं, (कुमारं पालयति । पाल् + णिच् + अण् ।) शालिवाहनराजः । इति हेमचन्द्रः ॥ (शिशुपालके, त्रि ।)

कुमारभृत्या, स्त्री, (कुमारस्य गर्भस्य निर्व्विघ्नप्रसवार्थं गर्भचिकित्साकुशलैः भिषग्भिः धात्र्या वा भृत्या पालनम् ।) गर्भिण्याः परिचर्य्या । इति हारावली ॥ तत्पर्य्यायः । नाकवन्नम् २ गर्भिण्यवेक्षणम् ३ । इति त्रिकाण्डशेषः ॥
(यथा, रघुः । ३ । १२ ।
"कुमारभृत्याकुशलैरनुष्ठिते
भिषग्भिराप्तैरथ गर्भभर्म्मणि ।
पतिः प्रतीतः प्रसवोन्मुखीं प्रियां
ददर्श काले दिवमभ्रितामिव" ॥)

कुमारयु, पुं, (कुमारं कौमारं याति । मितद्र्वादित्वात् डु । निपातनात् साधुः ।) युवराजः । इत्युणादिकोषः ॥

कुमारवाही, [न्] पुं, (कुमारं कार्त्तिकेयं वहति । वह + णिनि ।) मयूरः । इति शब्दरत्नावली ॥

कुमारसू, स्त्री, (कुमारं कार्त्तिकेयं सूते । सू + क्विप् ।) गङ्गा । इति हेमचन्द्रः ॥ दुर्गा । इति व्युत्पत्तिलभ्यार्थः ॥ (पुं वह्निः । यथा, महाभारते । २ । सहदेवदिग्विजये ३१ । ४२ ।
"वैश्वानरस्त्वं पिङ्गेशः प्लवङ्गो भूरितेजसः ।
कुमारसूस्त्वं भगवान् रुद्रगर्भो हिरण्यकृत्" ॥)

कुमारिका, स्त्री, (कुमारयति बाल्येन क्रीडति । कुमार + णिच् + ण्वुल् + टाप् अत इत्वम् ।) कुमारी । इति शब्दरत्नावली ॥ नवमल्लिका । इति रत्नमाला ॥ भारतवर्षस्य खण्डविशेषः । यथा,—
"वर्षव्यवस्थितिरिहैव कुमारिकाख्ये
क्षेत्रेषु चान्यजनता निवसन्ति सर्व्वे" ॥
इति सिद्धान्तशिरोमणौ गोलाध्याये ॥ स्थूलैला । इति राजनिर्घण्टः ॥ (ओषधिविशेषः । घृतकुमारी इति ख्याता । अस्या व्यवहारो यथा चैतन्यचिन्तामणिरसे द्रष्टव्यः ।
"रुक्मे द्रवेणैव कुमारिकायाः" ।
इति रसेन्द्रसारसंग्रहे बालरोगाधिकारे ।
नेत्रमध्यकृष्णभागप्रतिबिम्बविशेषः । यथा,—
"दृष्टा दृशा विज्ञानीयात् प्रत्यक्षां कुमारिकाम् ।
प्रतिच्छायामयीमन्यो नैमित्तिकैर्विविक्षितुम्" ॥
इति चरके इन्द्रियस्थाने ७ अध्याये ॥)

कुमारी, स्त्री, (कुमार + प्रथमवयोवचनत्वात् स्त्रियां ङीप् ।) द्वादशवर्षीया कन्या । यथा,—
"अष्टवर्षा भवेद्गौरी दशवर्षा च कन्यका ।
सम्प्राप्ते द्वादशे वर्षे कुमारीत्यभिधीयते" ॥
इति स्मृतौ भेदः । इत्यभेदोपचारात् कन्या कुमारीत्यमरः ॥ इति भरतः ॥ आगमे तु कुमारीपूजने अभावपक्षे चेत् तदा षोडशवर्षपर्य्यन्तवयस्का । तस्या वयोभेदेन नामभेदाः । यथा,—
"एकवर्षा भवेत् सन्ध्या द्विवर्षा च सरस्वती ।
त्रिवर्षा तु त्रिधामूर्त्तिश्चतुर्वर्षा तु कालिका ॥
सुभगा पञ्चवर्षा च षड्वर्षा च उमा भवेत् ।
सप्तभिर्म्मालिनी साक्षादष्टवर्षा च कुब्जिका ॥
नवभिः कालसङ्कर्षा दशभिश्चापराजिता ।
एकादशे तु रुद्राणी द्वादशाब्दे तु भैरवी ॥
त्रयोदशे महालक्ष्मीर्द्विसप्ता पीठनायिका ।
क्षेत्रज्ञा पञ्चदशभिः षोडशे चाम्बिका मता ॥
एवं क्रमेण सम्पूज्या यावत् पुष्पं न जायते ।
पुष्पितापि च सम्पूज्या तत्पुष्पादानकर्म्मणि" ॥*॥
तत्पूजाविधिर्यथा ।
"अथान्यत् साधनं वक्ष्ये महायोगप्रमोद्भवम् ।
येनानुष्ठितमात्रेण शीघ्रं देवी प्रसीदति ॥
अष्टम्याञ्च चतुर्द्दश्यां कुहौ वा रविसंक्रमे ।
कुमारीपूजनं कुर्य्याद्यथा विभवमात्मनः ॥
वस्त्रालङ्करणाद्यैश्च भक्ष्यैर्भोज्यैः सुविस्तरैः ।
पञ्चतत्त्वादिभिः सम्यग्देवीबुद्ध्या तु साधकः' ॥
इत्यमराकल्पः ॥ * ॥ (स्वनामख्याता परीक्षित्पुत्रस्य भीमसेनस्य पत्नी । यथा,—महाभारते १ । पूरुवंशानुकीर्त्तने ९५ । ४३ ।
"भीमसेनः खलु कैकेयीमुपयेमे कुमारीं नाम तस्यामस्य जज्ञे प्रतिश्रवा नाम' ॥)
पार्व्वती । नवमल्लिका । नदीविशेषः । (इयं हि भारतवर्षान्तर्गतसप्तनदीमध्येका ।
यथा, विष्णुपुराणे २ । ४ । ६५ ।
"महानद्यो महापुण्याः सर्व्वपापभयापहाः ।
सुकुमारी कुमारी च नलिनी धेनुका च या" ॥)
सीता । घृतकुमारी इति ख्याता । अपराजिता । जम्बूद्वीपः । इति मेदिनी ॥ सीता । इति हेमचन्द्रः ॥ वन्ध्याकर्कोटकी । स्थूलैला । मोदिनी । पुष्पम् । तरुणीपुष्पम् । श्यामापक्षी । इति राजनिर्घण्टः ॥

कुमाल स् क केलौ । इति कविकल्पद्रुमः ॥ (अदन्त चुरां-परं-सकं-सेट् ।) क्रीडति । अचुकुमालत् । इति दुर्गादासः ॥

कुमालकः, पुं, (कुमाल + संज्ञायां कन् । कुमाल यत् केलौ + ण्वुल् वा ।) सौवीरदेशः । इति हेमचन्द्रः ॥

कुमुत्, [द्] स्त्री, (कौ पृथिव्यां मोदते इति । कु + मुद + क्विप् ।) कुमुदम् । इति मेदिनी ॥ सुँदी इति भाषा । रक्तोत्पलम् । इति त्रिकाण्डशेषः ॥
(यथा, भागवते ३ । २१ । ४० ।
"क्वणात उत्पलकुमुत्कह्लारनायीत्र
स्वारसिताख्य हंसोपवितमञ्च" ॥
कुमुदस्य गन्धविशेषः । शालुक इति यस्य ख्यातिः । अस्य पर्य्याया यथा,—
"कैरवं चन्द्रकान्तञ्च गर्द्दभं कुमुदं कुमुत्" ।
इति वैद्यकरत्नमालायाम् ॥)

कुमुद्, [द्] त्रि, (कुत्सिते विषये मुत् हर्षो यस्य कुत्सिता मुद् यस्य वा ।) कृपणः । इति मेदिनी ॥ अधीरः । इति शब्दरत्नावली ॥

कुमुद, क्ली, (कौ मोदते । मुद "हर्षे" । ३ । १ । १३५ । कः ।) श्वेतोत्पलम् । सुँदि इत्यादि भाषा ॥ (यथा, रामायणे ५ । ५५ । १ ।
"सचन्द्रकुमुदं रम्यं सार्क्कारण्डवं शुभम् ।
पुष्यश्रवणकादम्बमभ्रशैवलशाड्वलम्" ॥)
तत्पर्य्यायः । कैरवम् २ । इत्यमरः । १ । १० । ३७ । चन्द्रकान्तम् ३ गर्द्दभम् ४ कुमुत् ५ । इति रत्नमाला ॥ शशोत्पलम् ६ कजारम् ७ चन्द्रकम् ८ शशिकान्तम् ९ इन्दुकमलम् १० चन्द्रिकाम्बुजम् ११ गन्धसोमम् १२ । इति शब्दरत्नावली ॥ अपि च ।
"श्वेतं कुवलयं प्रोक्तं कुमुदं कैरवं तथा ।
कुमुदं पिच्छिलं स्निग्धं मधुरं ह्लादि शीतलम्" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । शीतलत्वम् । स्वादुत्वम् । पाके तिक्तत्वम् । कफरक्तदोषदाहश्रमपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥ रक्तपद्मम् । इति मेदिनी ॥ रूप्यम् । इति हेमचन्द्रः ॥

कुमुदः, पुं, (कुत्सिते नैरृतकोणे मोदते इति । कु + मुद + कः ।) नैरृतकोणस्थदिग्गजः । इत्यमरः । १ । ३ । ३ ॥ वानरविशेषः । (अयं तु रामचन्द्रस्य सेनापतिवानराणां रत्नम् ।
यथा, रामायणे । ६ । २ । २८ ।
"नाम्ना सङ्कोचनो नाम नानानगयुतो गिरिः ।
तत्र राज्यं प्रशास्त्येष कुमुदो नाम यूथपः ।
योऽसौ शतसहस्राणि सहस्रं परिकर्षति" ॥)
नागविशेषः । (यथा, महाभारते । १ । ३५ । १५ ।
"कुठरः कुञ्जरश्चैव तथा नागः प्रभाकरः ।
कुमुदः कुमुदाक्षश्च तित्तिरिर्हलिकस्तथा" ॥)
दैत्यभेदः । पितोत्पलम् । इति हेमचन्द्रः ॥ कर्पूरः । इति राजनिर्घण्टः ॥ तुरगभेदः । यथा,—
"एकादिविंशतिमितोऽपि भवेत् कराटे यस्य
कुमुदोऽभिध एव ताभ्यो तुरगाधिपानाम्" ॥
इति [illegible] ॥ (कु पृथ्वीं भूमिं वा मोदयति । अन्तर्भूतणिजन्तात् मुदः कः । विष्णुः । यथा, महाभारते । १३ । १४९ । ७६ ।
"स्वक्षः शान्तिदः स्रष्टा कुमुदः कुवलेशयः" ॥
विष्णुपार्षदः । यथा, भागवते । ८ । २१ । १७ ।
"कुमुदः कुमुदाक्षश्च विष्वक्सेनः पतत्त्रिराट्" ॥
मेरोरवष्टम्भपर्व्वतविशेषः । स चोत्तरदिक्स्थः । यथा, भागवते ५ । १६ । १२ ।
"मन्दरो मेरुमन्दरः सुपार्श्वः कुमुद इति । अयुतयोजनविस्तारोन्नाहा मेरोश्चतुर्दिशमवष्टम्भगिरय उपक्लृप्ताः" ॥ भारतवर्षान्तर्गतपर्व्वतः । यथा, विष्णुपुराणे २ । ४ । २६ ।
"कुमुदश्चोन्नतश्चैव तृतीयश्च बलाहकः" ॥
आयुधजीविविशेषः । यथा,—
"कुलमारकसंजाताः कुमुदाद्याश्च विश्रुताः ।

आनूपाख्येषु विज्ञेया श्लेष्मला वातकोपना" ।
इति हारीते प्रथमेऽस्थाने ११ अध्यायः ।)

कुमुदबान्धवः, पुं (कुमुदस्य बान्धवः ।) चन्द्रः । कर्पूरः । इत्यमरः । १ । ३ । १३ ॥

कुमुदवती, स्त्री, (कुमुदानि सन्त्यस्यां इति । मतुप् मस्य वः ङीप् ।) कुमुदती । कुमुदसमूहः । इत्यमरटीकायां भरतः ॥

कुमुदा, स्त्री, (कुत्सितं मोदते । कु+मुद्+कः । टाप् च ।) कुम्भिका । पाना इति भाषा । गम्भारीवृक्षः । इति मेदिनीकरहेमचन्द्रौ ॥
(अस्याः पर्य्याया यथा,—
"श्रीपर्णी काश्मरी भद्रा गम्भारी गोपभद्रिका ।
कुमुदा च सदा भद्रा कटफला ह्यग्निमन्थिका" ।
इति वैद्यकरत्नमालायाम् ।) प्राश्नपर्णीवृक्षः । धातकीवृक्षः । कट्फलः । इति राजनिर्घण्टः ॥

कुमुदावासः, पुं, (कुमुदानां आवासः । कुमुदानि आवसन्त्यत्र वा । आ+वस्+अधिकरणे घञ् ।) कुमुदप्रायदेशः । इति हेमचन्द्रः ॥

कुमुदिका, स्त्री, (कौ भूमौ मोदते इति । मुद्+कर्त्तरि ण्वुल् टाप् अत इत्वञ्च ।) कट्फलः । इत्यमरः । २ । ४ । ४० ॥ (अस्याः पर्य्याया यथा,—
"कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्राभद्रवतीति च" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणा अस्य कट्फलशब्दे ज्ञातव्याः ।)

कुमुदिनी, स्त्री, (कुमुदानि सन्त्यस्याम् । कुमुद+इनि ङीप् ।) कुमुदयुक्तपुष्करिण्यादिः । कुमुदसमूहः । कुमुदलता । इति भरतः ॥
(यथा भ्रमराष्टके । ७ ।
"अलिरसौ नलिनीवनवल्लभः
कुमुदिनीकुलकेलिकलारसः ।
विधिवशेन विदेशमुपागतः
कुटजपुष्परसं बहु मन्यते" ।)
तत्पर्य्यायः । कुमुद्वती २ । इत्यमरः । १ । १० । ३८ । उत्पलिनी । इति राजनिर्घण्टः ॥ सुँदि इति भाषा ॥

कुमुदिनीपतिः, पुं, (कुमुदिन्याः पतिः वल्लभः ।) चन्द्रः । इति हेमचन्द्रः ॥

कुमुदी, स्त्री, (कुमुद+स्त्रियां ङीष् ।) कट्फला । इति शब्दरत्नावली ॥
(अस्या गुणादयः कट्फलशब्दे ज्ञातव्याः ।)

कुमुदेशः, पुं, (कुमुदानां ईशः ।) चन्द्रः । इति शब्दरत्नावली ॥

कुमुद्वती, स्त्री, (कुमुद+"कुमुदनडवेतसेभ्यो ड्मतुप्" । ४ । २ । ८७ । इति ड्मतुप् 'मादुपधायाश्च' । ८ । २ । ९ । इति मस्य वः । उगितश्चेति ङीप् ।) कुमुदिनी । इत्यमरः । १ । १० । ३८ ।
(यथा, भट्टिकाव्ये । २ । ६ ।
'प्रभातवाताहतिकम्पिताकृतिः
कुमुद्वतीरेणुपिशङ्गविग्रहम् ।
निरास भृङ्गं कुपितेव पद्मिनी
न मानिनीसंसहतेऽन्यसङ्गमम्" ।
अस्याः पर्य्याया यथा,—
"कुमुद्वती कैरविणी तथा कुमुदिनीति च" ।
गुणाश्चास्याः कुमुदिनीशब्दे ज्ञेयाः । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
कुमुदाख्यनागराजस्य यवीयसी स्वसा सा तु रामचन्द्रपुत्त्रस्य कुशस्य पत्नी ।
यथा, रघु १७ । ६ ।
"तं स्वसा नागराजस्य कुमुदस्य कुमुद्वती ।
अन्वगात् कुमुदानन्दं शशाङ्कमिव कौमुदी" ।
क्रौञ्चद्वीपान्तर्गतानां सप्तनदीनामेका नदी ।
यथा, विष्णुपुराणे २ । ४ । ५५ ।
"गौरी कुमुद्वती चैव सन्ध्या रात्रिर्मनोजवा ।
क्षान्तिश्च पुण्डरीका च सप्तैता वर्षनिम्नगाः" ।)

कुमुद्वान्, त्रि, (कुमुद+"कुमुदनडवेतसेभ्यः" । ४ । २ । ८७ । इति ड्मतुप मस्य वः ।) कुमुदबहुलदेशः । इत्यमरः । २ । १ । ९ ॥
(यथा रघुवंशे ४ । १९ ।
"प्रससादोदयादम्भः कुम्भयोनेर्महौजसः ।
रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः" ॥
"हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।
विभूतयस्तदीयानां पर्य्यस्ता यशसामिव" ।)

कुमोदकः, पुं, (कुं पृथ्वीं मोदयति । कु+मुद्+णिच्+ण्वुल् । पृथिव्या भारावतारणादिलीलाकर्म्मभिः सर्व्वेषामानन्दकारकत्वात् तस्य तथात्वम् ।) विष्णुः । इति हेमचन्द्रः ॥

कुम्पः, त्रि, (कुम्पति कुम्पयति वा । कुपि वेष्टने+अच् इदित्वात् नुम् ।) वातकुण्ठः । इति जटाधरः । कोपा इति भाषा ॥

कुम्बा, स्त्री, (कुबि वेष्टने+अच् टाप् च ।) सुगहनावृतिः । यज्ञभूम्यादिरक्षणार्थाय वेष्टनम् । इत्यमरः । २ । ७ । १८ ॥ (यथा तैत्तिरीयसंहितायाम् । "तस्मिन्सुवर्णकुम्बा याम्यो निदधाति" ॥ तथा भट्टकविकृते चम्पाष्टके । ७ ।
"कुम्बावतीसमविजृम्भा शशेन नवकुम्बामयीश्च विधा भ्र बाङ्केयपर्य्यविम्बाभिरामसुखसम्बाधिसरूपमरा" । इति ।)

कुम्भ, स्त्री, (कुं भूमिं उम्भति ग्रन्थेन पूरयति । कु+उम्भ पूरणे+अच् ।। शकन्ध्वादित्वात् साधुः ।) गुग्गुलुः । इत्यमरः । २ । ४ । १२३ ॥ त्रिवृत् । इति हेमचन्द्रः ॥

कुम्भः, पुं, (कुं भूमिं उम्भति कर्षेण । उम्भ+अच् । शकन्ध्वादित्वात् साधुः ।) घटः । अस्य परिमाणं कलसशब्दे द्रष्टव्यम् । गजकुम्भः । हस्तिशिरःपिण्डद्वयम् । इत्यमरः । ३ । ३ । १३४ ॥
(यथा महानाटके,—"तैः कि मत्तकरीन्द्रकुम्भकुहरे रारोपणीया शराः" ।) कुम्भकर्णपुत्त्रः ।
(यथा, श्रीरामायणे । ६ । ७९ । १६ ।
ततोऽस्य कुम्भकर्णस्य कुम्भः परमकोपनः ।
अबधीत् परमक्रुद्धो राक्षस-लोकरावणम्" ।)
वेश्यापतिः । इति त्रिकाण्डशेषः । कर्मविशेषः ।
प्राणायामाङ्गकुम्भक इति यावत् । इति धरणी ।
(प्रह्लादपुत्त्रः । यथा महाभारते १ । ६५ । १९ ।
"प्रह्लादस्य च सुताः ख्याताः सर्व्व भारत ।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत ।" ।)
विष्णुः । यथा महाभारते १३ । १४९ । ८२ ।
"अनिवर्त्ती निवृत्तात्मा विशुद्धात्मा विशोधनः" ।)
द्रोणद्वयपरिमाणम् । ६४ सेर इति भाषा ।
तत्पर्य्यायः । शूर्पः २ । इति वैद्यकपरिभाषा ॥
मेषादिद्वादशराश्यन्तर्गतैकादशराशिः । तस्य पर्य्यायः । घटः २ । इति दीपिका ॥ स च धनिष्ठाशेषार्द्धशतभिषापूर्व्वभाद्रपदाप्रथमपादत्रयेण भवति । अस्याधिष्ठात्री देवता कलसधारी पुरुषः । स तु शीर्षोदयः । परस्य रहितः । मध्यसन्तानः । मध्यमस्त्रीवक्ष्यः । कर्बुरवर्णः । वनचारी । वायुराशिः । स्थिरः । उग्रः । अल्पसङ्गः । वातपित्तकफप्रकृतिः । शूद्रवर्णः । पश्चिमदिक्स्वामी । ह्रस्वाङ्गः । तत्र जातफलम् ।
"मेधावी कपिशोटकश्रमेश्वरो दन्तपीडायुक्त खेदमूच्छ" । इति ज्योतिषम् । जन्मकालीनचन्द्राश्रितैतद्राशिफलम् ।
"अलसतावचितोऽन्यसतप्रिय
कुपथताकलितोऽतिविचक्षणः ।
कलसभामिनि प्रीतकरे नरः
क्वचिदपि सज्जनमानसरोधनः" ।
इति कोष्ठीप्रदीपः । तद्योगे नवांशकजन्म भवति । तस्य गर्भितफलपरिमाण यथा । दशाङ्कुलाधिकः पञ्चाङ्कुलप्रभे देहे वक्तव्यो निर्विशसनांशे प्रत्यङ्गाधिकनिर्दिष्टाः । इति ज्योतिषम् । तत्र जातफलम् ।
"कुम्भांशे समुत्पन्नश्चपलोऽतिशौण्डः ।
परदाररतो नित्यं सत्तकायो महासुखी" ।
इति कोष्ठीप्रदीपः ।

कुम्भकः, पुं (कुम्भ इव कायति प्रकाशते निश्चलत्वात् । कै+क । यद्वा कुम्भ+स्वार्थे कः ।) दक्षिणहस्तेन नासापुटद्वयं धृत्वा प्राणायामाङ्ग वायुस्तम्भनम् । इति तन्त्रम् । (पातञ्जलदर्शनव्याख्यादौ तु ।
"कुम्भकः पूरको रेचः प्राणायामस्त्रिलक्षणः ।
पूरकः पूरणं वायोः कुम्भकः स्थापनं स्थितम् ।
बहिर्निःसारणं तस्य रेचकः परिकीर्त्तितः ।
दक्षिणे रेचयेद्वायुं वामेन पूरितोदरः ।
कुम्भेन धारयेन्नित्यं प्राणायाम विदुर्बुधाः ।
अङ्गुष्ठेन पुटं धृत्वा नासायाः दक्षिणं पुनः ।
कनिष्ठानामिकाभ्यां वामं नासस्य संस्पृशेत् ।
अङ्गुष्ठकनीयोऽध्यात्म मध्यमे रामसाधन ।
अङ्गुष्ठानामिकाभ्यां तु नासा सर्व्वदर्शने" ।)
(तथा च, हठयोगप्रदीपिकायाम् । २ । ४४ ।
"सहितसूर्यभेदनोज्जायीशीतली तथा ।
भस्त्रिका भ्रामरी मूर्च्छा प्लाविनीत्यष्टकुम्भकाः" ।
"सहितद्वये प्रोक्तकुम्भविधौ" । इति स
टीका । अत्र भेदः यथा तत्रैव २ । ४४ ।
' सूर्य्यभेदनमुज्जायी शीत्कारी शीतली तथा ।
भस्त्रिका भ्रामरी मूर्च्छा प्लाविनीत्यष्टकुम्भकाः " ।
तथा दक्षस्मृतौ २ । ४९ ।
"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भक ।

सहितः केवलश्चेति कुम्भको द्विविधो मतः” ॥०॥)

कुम्भकारः, पुं, (कुम्भं करोति । कुम्भ + कृ + “कर्म्मण्यण्” । ३ । २ । १ । इति अण् ।) जातिविशेषः । कुमोर इति भाषा । स तु शूद्रागर्भे विश्वकर्म्मौरसाज्जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । कुलालः २ । इत्यमरः । २ । १० । ६ ॥ चक्री ३ । इति जटाधरः ॥ (एतज्जातिविषये तु पुराणभेदेन मतभेदो दृश्यते । यथा ।
“वैश्यायां विप्रतश्चौरात् कुम्भकारः स उच्यते” ॥
“मालाकारात् कर्म्मकार्य्यां कुम्भकारो व्यजायत” ॥
“पट्टिकाराच्च तैलिक्यां कुम्भकारो बभूव ह” ॥
इत्यादि बहुमतमस्ति बाहुल्यभिया नात्राभिलिख्यते ॥) कुक्कुभपक्षी । इति हेमचन्द्रः ॥

कुम्भकारिका, स्त्री, (कुम्भस्येव कार आकारो यस्याः । कुम्भकार + कप् + टाप् अत इत्वञ्च ।) कुलत्था । इति राजनिर्घण्टः ॥ (कुम्भं करोतीति । कुम्भ + कृ + ण्वुल् स्त्रियां टाप् अत इत्वम् । कुम्भकारस्त्री । इति व्युत्पत्तिलब्धोऽर्थः ।)

कुम्भकारी, स्त्री, (कुम्भस्येव कार आकारो यस्याः । गौरादित्वात् ङीष् ।) कुलत्थाञ्जनम् । कुलत्थिका । इति राजनिर्घण्टः ॥ मनःशिला । इति जटाधरः ॥ (कुम्भकारस्य पत्नीति ङीष् ।) कुम्भकारभार्य्या ॥

कुम्भतुम्बी, स्त्री, (कुम्भ इव तुम्बी ।) वर्त्तुलालाबुभेदः । गोल लाउ इति भाषा । तत्पर्य्यायः । कुम्भालाबुः २ गोलकतुम्बी ३ गोरक्षी ४ महालाबुः ५ घटाभिधा ६ घटालाबुः ७ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । पित्तश्वासकफास्रज्वरकासघ्नत्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥

कुम्भदासी, स्त्री, (कुम्भस्य वेश्यापतेर्दासी ।) कुट्टनी । इति शब्दरत्नावली ॥

कुम्भयोनिः, पुं, (कुम्भः योनिर्जन्मस्थानं यस्य ।) अगस्त्यमुनिः । (यथा रघुः ४ । २१ ।
“प्रससादोदयादम्भः कुम्भयोनेर्महौजसः” ॥)
वशिष्ठमुनिः ।(एतयोर्मुनिसत्तमयोरुत्पत्तिविवरणन्तु उर्व्वशीदर्शनात् कन्दर्पपीडितयोर्मित्रावरुणयोः स्खलितेन रेतसा कुम्भे वसतीवरीसहिते घटिता यथा तत् रामायणोत्तरकाण्डे ५६—५७ सर्गे विशेषतो द्रष्टव्यम् ।) द्रोणाचार्य्यः । इति मेदिनी ॥ (अस्य उत्पत्तिकथा यथा महाभारते १ । १२१ । ८—१४ ।
“गङ्गाद्वारं प्रति महान् बभूव भगवानृषिः ।
भरद्वाज इति ख्यातः सततं शंसितव्रतः ॥
सोऽभिषेक्तुं ततो गङ्गां पूर्व्वमेवागमन्नदीम् ।
महर्षिभिर्भरद्वाजो हविर्द्धाने चरन् पुरा ॥
ददर्शाप्सरसं साक्षाद् घृताचीमाप्लुतामृषिः ।
रूपयौवनसम्पन्नां मदृप्तां मदालसाम् ॥
तस्याः पुनर्नदीतीरे वसनं पर्य्यवर्त्तत ।
व्यपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे ततः ॥
तत्र संसक्तमनसो भरद्वाजस्य धीमतः ।
ततोऽस्य रेतश्चस्कन्द तदृषिर्द्रोण आदधे ॥
ततः समभवद्द्रोणः कलशे तस्य धीमतः ।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्व्वशः ॥)
द्रोणकलसः । इति राजनिर्घण्टः ॥ (स्त्री, यथा

योनिविशेषः । यथा महाभारते । ९ । ४६ । ३० ।
“गोपाली सहजन्या च कुम्भयोनिः प्रजागरा ।
चित्रसेना चित्ररेखा रम्भा च मधुरस्वरा” ॥)

कुम्भला, स्त्री, (कुम्भं कुम्भाकारं लाति आदत्ते । कुम्भ + ला आदाने + क टाप् च ।) मुण्डितिका । इति रत्नमाला ॥ मुण्डिरी इति भाषा ॥ (मुण्डी शब्दे विवृतिरस्या ज्ञेया ॥)

कुम्भबीजकः, पुं, (कुम्भ इव बीजं यस्य । ततः स्वार्थे कः ।) रीठाकरञ्जः । इति राजनिर्घण्टः ॥

कुम्भशाला, स्त्री, (कुम्भाय कुम्भनिर्म्माणार्थं या शाला ।) कुम्भनिर्म्माणादिस्थानम् । तत्पर्य्यायः । पाकपुटी २ । इति हेमचन्द्रः ॥

कुम्भसन्धिः, पुं, (कुम्भयोः सन्धिर्मिलनम् ।) हस्तिकुम्भद्वयमध्यस्थानम् । तत्पर्य्यायः । वारकः २ । इति त्रिकाण्डशेषः ॥

कुम्भसम्भवः, पुं, (कुम्भः सम्भव उत्पत्तिस्थानं यस्य ।) अगस्त्यमुनिः । इत्यमरः । १ । ३ । २० ॥
(यथा राजेन्द्रकर्णपूरे ७१ ।
“सम्पूर्णं ननु कुम्भसम्भव ! भवत् प्रभावस्य तेन यत् धाम धाम तिरोदधिरवधिर्विन्ध्योऽपि यस्याः हताः” ॥ वशिष्ठः । द्रोणः । एतयोरपि कुम्भोत्पत्तिकथात्वम् । एतद्विवरणन्तु कुम्भयोनिशब्दे द्रष्टव्यम् ॥)

कुम्भा, स्त्री, (कु कुत्सितया निन्दितरूपेण उम्भा पूर्त्तिर्दुर्गन्धादिभिर्यस्याः । शकन्ध्वादित्वात् साधुः ।) वेश्या । इति शब्दमाला ॥

कुम्भाण्डः, पुं, (कुम्भ इव अण्डं यस्य ।) बाणासुरस्य मन्त्रिविशेषः । इति श्रीभागवतम् ॥
(यथा, हरिवंशे १७५ । १६६ ।
“कुम्भाण्डवचनैरेव बाणेन्द्र प्रचोदित ।
वाच क्रुद्धामतिक्रुद्धः प्रोवाच वदताम्बर” ॥
अयञ्च बाणपराजयान्ते श्रीकृष्णप्रसादात् तदा कृतार्थी बभूव ॥ तदुक्तं तत्रैव १८३ । ९०— ९८ ।

श्रीकृष्ण उवाच ।

“कुम्भाण्ड ! मन्त्रिणां श्रेष्ठ ! प्रीतोऽस्मि तव सुव्रत ! ।
राजानन्ते विजानामि राज्ञिकोऽत्र भवानिह ॥
सम्पातिपक्षः राजस्त्री निरतोऽस्तु भवानिह ।
राज्यञ्च ते मया दत्तं चिरं जीव समाश्रयात्” ॥)
कुष्माण्डम् । कुम्भाण्डमित्यपि कुष्माण्डोदर्शनात् ॥

कुम्भाण्डी, स्त्री, (कुम्भाण्ड + स्त्रियां जातित्वात् ङीष् ।) कुष्माण्डी । इति राजनिर्घण्टः ॥

कुम्भिका, स्त्री, (कु कुत्सितरूपेण उम्भति पूरयति या आच्छादयति वारि पुष्करिण्यादेः । शकन्ध्वादित्वात् साधुः ।) जलजवृक्षविशेषः । पाना इति भाषा । तत्पर्य्यायः । वारिपर्णी २ । इत्यमरः । १ । १० । ३८ ॥ शैवलमर्दा ३ जलकुम्भी ४ पानीयपृष्ठज ५ । इति रत्नमाला ॥ आकाशमूली ६ कुम्भम् ७ कन्दरवणम् ८ । इति शब्दावली ॥ वारिमूली ९ तनुन्निका १० मर्दी ११ पर्णी १२ जलमूली १३ जलसूचि १४ वर्णच्छिन्ना १५ । इति शब्दरत्नावली ॥ कुमुदा १६ स्थलाङ्का १७ । इति जटाधरः । अस्य

गुणा वारिपर्णीशब्दे द्रष्टव्याः । पाटलवृक्षः । गोलतुम्बी । इति राजनिर्घण्टः ॥ नेत्ररोगविशेषः ।
तस्य लक्षणं यथा,—
“वर्त्मान्ते पिडकाध्माता भिद्यन्ते च स्रवन्ति च ।
कुम्भीकबीजप्रतिमाः कुम्भिका सन्निपातजा” ॥
इति माधवकरः ॥ (कुम्भा + स्वार्थे कन् टाप् इत्वञ्च ।) वेश्या । इति शब्दमाला । कट्फलम् । भावप्रकाशे अस्याः पर्य्याया यथा,—
“कट्फलः सोमवल्कश्च कैटर्य्यः कुम्भिकापि च ।
श्रीपर्णिका कुमुदिका भद्रा भद्रवतीति च” ॥
गुणाश्चास्याः कट्फलशब्दे बोद्धव्याः ॥)

कुम्भीबीज, क्ली, (कुम्भिकायाः बीजम् ।) जयपालः । इति राजनिर्घण्टः ॥

कुम्भिपाकी, स्त्री, (कुम्भिना पाकोऽस्याः । गौरादित्वात् ङीष् ।) कट्फलम् । इति भावप्रकाशः ॥

कुम्भिमदः, पुं, (कुम्भोऽस्त्यस्य कुम्भी हस्ती तस्य मदः ।) हस्तिमदः । इति राजनिर्घण्टः ॥ (गन्धद्रव्यविशेषः ॥)

कुम्भिलः, पुं, (कुम्भ + इलच् ।) चोरः । शालमत्स्यः । श्लोकार्थचोरः । श्यालकः । इति हेमचन्द्रः ॥

कुम्भी, [न्] पुं, (कुम्भोऽस्यास्तीति । इनिः ।) हस्ती । कुम्भीरः । इति हेमचन्द्रः ॥ गुग्गुलुः । इति जटाधरः ॥ (अग्निप्रकृतिविषकीटविशेषः । यथा, “वाहको पिच्चिटः कुम्भी” । इति सुश्रुते कल्पस्थाने ८ अध्याये ॥)

कुम्भी, स्त्री, (कुम्भ + अल्पार्थे ङीष् । क्षुद्रकुम्भः ।) उखा पाटलावृक्षः । वारिपर्णी । कट्फलः । इति हेमचन्द्रः ॥ वृक्षविशेषः । कुम्भीवृक्ष इति लोके प्रसिद्धा । तत्पर्य्यायः । रोमालुविटपी २ रोमशः ३ कटद्रुमः ४ । अस्य गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । ग्राहित्वम् । वातकफामयहरत्वम् । दन्तीरुक्त्वम् । इति राजनिर्घण्टः ॥

कुम्भीकः, पुं, (कुम्भीव कायते प्रकाशते । कै + कः ।) पुन्नागवृक्षः । इति रत्नमाला ॥ (यथा, सुश्रुते ।
“प्रियङ्गुमधुकधातकीपुन्नागनागबलाचन्दनचन्दनमोचरसराजादनकुम्भीकस्रोतोऽञ्जनपद्मकेसरयोजनवल्ल्यो दीर्घमूलाचेति” ॥) कुम्भिका । यथा,—
“दुग्धाक्षपूतीककुम्भीककच्छपरम्” ।
इति चक्रपाणिदत्तः ॥ (विकृतगर्भविशेषः । यथा,
“पुंस्त्वदोषात् मदेर्न प्रोक्ता कुम्भीका स्मृताः ।
चाहेऽस्यैव कुम्भीकः धर्मीत्वमवलम्बितः” ॥
इति शार्ङ्गधरेण पूर्व्वखण्डे सप्तमेऽध्याये उक्तम् ॥
“ये कुम्भीकाख्याः स्त्रीषु पुंवत् प्रवर्त्तते ।
कुम्भीकः स च विज्ञेयः” । इति सुश्रुते शारीरस्थाने २ अध्याये ॥)

कुम्भीनसः, पुं (कुम्भीव नसा नासा यस्य ।) क्रूरसर्पः । इति मेदिनी ॥ (वायुप्रकृतिकविषकीटविशेषः । यथा । “कुम्भीनसस्तुण्डिकेरी” । इति सुश्रुते कल्पस्थाने ८ अध्याये उक्तम् ॥)

कुम्भीनसी, स्त्री, (कुम्भीनस + स्त्रियां ङीष् ।) लवणासुरमाता । इति मेदिनी ॥ (यथा, रामायणे । ७ । ३० । १८ ।
“मातामहात् धर्म्मविच्छेनायामा मीना वरानुजा ।

स्नामविहाय मधुना राजन् कुम्भीनसी सुता" ।)

कुम्भीपाक, पुं, (कुम्भ्यां उखायां पाक इव पाको यत्र ।) नरकविशेषः । इति जटाधरः । तत्पर्य्यायः । सम्प्रतापन २ । इति मनुः । "य इह पशून् पक्षिणो वा प्राणतो रन्धयति स परत्र यमदूता स्तप्ततैले रन्धयन्ति यत्र । इति श्रीभागवते । ५ । २६ । १३ ।

कुम्भीर, पुं, (कुम्भिनं हस्तिनमपि ईरयति । ईर + "कर्म्मण्यण्" । ३ । २ । १ ।) जलजन्तुविशेषः । कुमीर इति भाषा । तत्पर्य्यायः । नक्र २ । इत्य मरः । १ । १० । २१ । कुम्भीलः ३ । इति तट्टीका । शिशुमारः ४ महामुखः ५ । इति राजनिर्घण्टः । वार्मटः ६ ग्राहकिरातः ७ अम्बुकण्टकः ८ । इति शब्दरत्नावली ।

(यथा, महाभारते । १३ । १११ । ५८ ।

"गर्द्दभस्तु समाप्य दशवर्षाणि जीवति ।

संवत्सरन्तु कुम्भीरस्ततो जायेत मानवः" ॥)

कुम्भीरमक्षिका, स्त्री, (कुम्भीर इत्याख्या मक्षिका । यद्वा कुम्भीरोपमदंशुका मक्षिका ।) मक्षिका विशेषः । कुमीरा पोका इति भाषा । तत्पर्य्यायः । कला २ । इति हारावली ।

कुम्भील, पुं, (कुम्भीर + रस्य लः ।) कुम्भीरः । इत्य मरटीका ।

कुम्भीबीज, क्ली, (कुम्भ्या बीजम् ।) जयपालः । इति राजनिर्घण्टः । (जयपालशब्देऽस्य गुणादिकं ज्ञेयम् ।)

कुर श शब्दे । इति कविकल्पद्रुमः । (तुदां-पर-अक-सेट् ।) श कुरति कोकिलः । इति दुर्गादासः ।

कुरका, स्त्री, (कुर + कः । कुरः शब्द कायति प्रकाशतेऽस्मिन् । कै + क ।) शल्लकीवृक्षः । इति राजनिर्घण्टः ।

कुरकुर, पुं, (कुरमित्यव्यक्तशब्दं करोति । कुरम् + कृ + टः ।) सारसपक्षी । इति हेमचन्द्रः ।

कुरकुर, पुं, (कुर इत्यस्फुटशब्दं कुरति । कुर + कः ।) सारसपक्षी । इति हारावली ।

कुरङ्ग, पुं, (कौ पृथिव्यां भूमौ वा रङ्गति । रगि + अच् । यद्वा, "विडादिभ्य कित्" । उणां १ । १२० इति अङ्गच् बाहुलकात् उत्वं रपरत्वञ्च । कुरङ्ग विशिष्टाश्शक्तम्बे लिपात्यते । इति वा ।) हरिणः । इत्यमरः । २ । ५ । ८ । कुलङ्गोऽपि ।

(यथा, भागवतटीकायां स्वामिना धोक्तम् ।

"कुरङ्गमातङ्गपतङ्गभृङ्ग

मीना हता पञ्चभिरेव पञ्च" ।

अस्य गुणा यथा,—

"कुरङ्गो हरिणो बल्यः शीतलो विशदस्तुवरः ।

मधुरो वातपित्तघ्नो लिङ्गिचपलकरः स्मृतः" ।

इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ।*।

अस्य लक्षणं यथा,—

"च ताम्रो न च ताम्रश्च कुरङ्गः सोऽभिधीयते ।

इति सुश्रुते सूत्रस्थाने षट्चत्वारिंशेऽध्याये उक्तं धोक्तम् ।)

कुरङ्गनयना, स्त्री, (कुरङ्गस्य नयने इव नयने यस्याः ।) मृगनयना नारी । इति राजनिर्घण्टः । (उदाहृत, "किन्त्वेकायमुना कुरङ्गनयना नेत्राम्बुभिर्वर्द्धते" ।)

कुरङ्गनाभि, पुं, (कुरङ्गस्य नाभिः ।) कस्तूरी । इति राजनिर्घण्टः । (कस्तूरीशब्दे ऽस्य गुणादयो ज्ञेयाः ।)

कुरङ्गम, पुं, (कौ भूमौ रङ्गं मिमीते । मा + डः ।) हरिणविशेषः । तत्पर्य्यायः । एणः २ ऋष्यः ३ रिष्यः ४ पाण्डुरोचनः ५ । इति त्रिकाण्डशेषः ।

कुरङ्गिका, स्त्री (कौ रङ्गोऽस्या अस्तीति । ठन् टाप् च ।) मुद्गपर्णी । इति राजनिर्घण्टः ।

कुरचिल्ल, पुं, (कुरे शब्दे चिल्लति । चिल्ल शैथिल्ये + अच् ।) कर्कटः । इति हेमचन्द्रः ।

कुरट, पुं, (कुर् + अटन् कित् । कु कुत्सितस्य रटति जीवति देहयात्रां सम्पादयति वा । रट + अच ।) चर्म्मकारः । इति त्रिकाण्डशेषः ।

कुरण्टक, पुं, (कुर्य्यते शब्द्यते इति । कुर् + कर्म्मणि बाहुलकात् अण्टक् स्वार्थे कन् ।) पीतामलानः । पीतझिण्टी । इति राजनिर्घण्टः । (अस्य पर्य्याय लक्षणगुणा यथा,—

"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका ।

सहाचरः सहचरः स च भिण्टिरपि कथ्यते ।

कुरण्टकोऽत्र पीते स्यात्सक्ते कुरवकः स्मृतः ।

नीले बाणाह्वयोक्तो दासी चार्त्तगलश्च सः ।

सैरेयः कुष्ठवातास्रकफकण्डूविषापहः ।

तिक्तोष्णो मधुरोऽनम्लः सुस्निग्धः केशरञ्जनः" ।

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।

"शिशुक कफपित्तघ्नं तद्वदेव कुरण्टकम्" ।

इति सुश्रुते सूत्रस्थाने ४६ अः । अस्याः सर्व्वं सकलं ग्राह्यते ।)

कुरण्ड, पुं (कुर + अण्डच् ।) मुष्कवृद्धिरोगः । कोरण्ड इति भाषा । तत्पर्य्यायः । वृद्धि २ अण्डवृद्धिः ३ । इति हेमचन्द्रः । तस्य सम्प्राप्ति पूर्व्वक लक्षणं यथा,—

"क्रुद्धोऽधूर्द्ध्वगतिर्वायुः शोथशूलकरश्चरन् ।

मुष्कौ वङ्क्षणतः प्राप्य फलकोषाभिवाहिनीः ।

प्रपीड्य धमनीर्वृद्धिं करोति फलकोषयोः ।

दोषास्रमेदोमूत्रान्त्रैः स वृद्धिः सप्तधा मता ।

मूत्रान्त्रजावप्यनिलाद्धेतुभेदस्तु केवलम् ।

वातपूर्णदृतिस्पर्शो रूक्षो वातादहेतुरुक् ।

पक्वोदुम्बरसङ्काशः पित्ताद्दाहोष्मपाकवान् ।

कफाच्छीतो गुरुः स्निग्धः कण्डूमान्कठिनोऽल्परुक् ।

कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गश्च रक्तजः ।

कफवन्मेदसा वृद्धिर्मृदुस्तालफलोपमः ।

मूत्रधारणशीलस्य मूत्रजः स तु गच्छतः ।

अम्भोभिः पूर्णदृतिवत् क्षोभं याति सरुङ्मृदुः ।

मूत्रकृच्छ्रमधस्ताच्च चालयन् फलकोषयोः ।

वातकोपिभिराहारैः शीततोयावगाहनैः ।

धारणेरणभाराध्वविषमाङ्गप्रवर्त्तनैः ।

क्षोभणैः क्षुभितोऽन्यैश्च क्षुद्रान्त्रावयवं यदा ।

पवनो विगुणीकृत्य स्वनिवेशादधो नयेत् ।

कुर्य्याद्वङ्क्षणसन्धिस्थो ग्रन्थ्याभं श्वयथुं तदा ।

उपेक्ष्यमाणस्य च मुष्कवृद्धि

माध्मानरुक्स्तम्भवतीं स वायुः ।

प्रपीडितोऽन्तः स्वनवान् प्रयाति

प्रध्मापयन्नेति पुनश्च मुक्तः ।

अन्त्रवृद्धिरसाध्योऽयं वातवृद्धिसमाकृतिः" ।

इति वृद्धिनिदानम् । इति माधवकरः ।*।

तस्यौषधं यथा,—

"द्विजयष्ट्याश्च वै मूलं पिष्टं तण्डुलवारिणा ।

गव्यमाज्यं प्रलेपात् कुरण्डगणनाशनम् ।

रसाञ्जनं हरीतक्याश्चूर्णं तेनैव गुण्ठनात् ।

नश्येद्वै पुत्रपथापि नाम वाच्यं विचारणा" ।

इति गारुडे १९० अध्यायः ।*। अन्यच्च ।

"गव्यं घृतं सैन्धवसम्प्रयुक्तं

शम्बूकमध्ये निहितं तदेव ।

धमायमानं दिवसैस्त्रिभिस्तत्

धन्यात् कुरण्डं चिरजं प्रवृद्धम्" ।

गव्यघृत कर्षं १ । सैन्धव मा ४ । शम्बूकमध्ये कृत्वा सप्तदिनं यावत् रौद्रे भावयेत् तेन कुरण्ड नाशनम् ।

"सैन्धवं मृताम्बुद्रं ताम्रभाजनं आतपे ।

प्रतप्तमूर्च्छया युक्तं तच्चैव समाहरेत् ।

कुरण्डं भक्षयेत्तेन स निर्व्विघ्नं दिवानिशम् ।

कुरण्डं तेन नश्यति नाडीव्रणं पुनर्भवः ।

ताम्रभाजने घृतं सैन्धवं दत्त्वा रौद्रे तत् कृत्वा मेषलोमगुडिकया घृतं मर्द्दयेत् कृत्वा तेन मर्द्दयेत् ।

वङ्गारस्य बीजं च पिष्ट्वा तथार्द्रकं घृतम् ।

कुरण्डं नाशयेद्धूमे क्षेपणात् घर्षणम् ।

एतैर्वीजैश्च मूलं पिष्ट्वा लिम्पेत् कुरण्डकम् ।

अथवा लेपनं कुर्य्यात् सर्व्वकुरण्डनाशनम्" ।

इति वैद्यकरत्नावली ।*। अन्यच्च ।

"गुग्गुलुं रुवुतैलेन वा गोमूत्रेण पिबेन्नरः ।

वातवृद्धिं निहन्त्याशु चिरकालानुबन्धिनीम् ।

सक्षीरं वा पिबेत्तैलं मासमेरण्डसम्भवम् ।

गुग्गुलुर्वापि वा तैलं गवां मूत्रेण यः पिबेत् ।

पाने वस्तौ प्रलेपेन पेयं वा रक्तजाम्भसा ।

अन्धं मधुरं पक्वगुडं शीतमुत्तमम् ।

क्षीरपिष्टैः प्रदेहः स्यात्तद्वाहशोथवेदनापहः ।

सर्व्वं स्वल्पं भक्षणेन पयसैव पटोलकम् ।

जन्ते पित्तहरं कार्य्यं रक्तजे रक्तमोक्षणम् ।

श्लेष्मवृद्धिं मूत्रजोष्णैः पिष्टैः प्रलेपयेत् ।

पीतदारुकषायञ्च पिबेन्मूत्रेण संयुतम् ।

शिरां भेदसमुत्थां तु शोधयेत् सुरसादिना ।

शिरोविरेकदन्त्या धूमो मूत्रवर्द्धने ।

स्वेदं मूत्रमयो वस्त्रपट्टेन बन्धयेत् ।

सेवन्या पार्श्वतोऽप्येकाडम्बेश्यौ विमुखेन वै ।

वङ्क्षणोपरि च कपाले यथा भेषजमादरात् ।

अन्त्रवृद्धौ शिरां विध्येदण्डवृद्धिनिवृत्तये ।

अङ्गुष्ठमध्ये त्वक् छित्त्वा दहेदङ्गविपर्य्यये ।

दाहं दद्यान्मतिमान् दोषोत्क्लिष्टकारिणः ।

वातोऽन्त्रवृद्धिं हन्त्याशु रसोनेन निषेवितः ।

ईरण्डतैलं पीत्वा च कटुतिक्तकषायकम् ।

च दशमूलकषायेण मधुरादि च दद्यात् ।

हरीतकीं मूत्रसिद्धां सतैललवणान्विताम् ।
प्रातः प्रातश्च सेवेत कफवातामयापहाम् ॥
गोमूत्रसिद्धां रुबुतैलभृष्टां
हरीतकीं सैन्धवचूर्णयुक्ताम् ।
खादेन्नरः कोष्णजलानुपानां
निहन्ति वृद्धिं चिरजां प्रवृद्धाम् ॥
त्रिफलाक्वाथगोमूत्रं पिबेत् प्रातरतन्द्रितः ।
कफवातोद्भवं हन्ति श्वयथुं वृषणोत्थितम् ॥
सरलागुरुकुष्ठानि देवदारु महौषधम् ।
मूत्रारनालसम्पिष्टं शोथघ्नं कफवातनुत् ॥
त्रिफलाक्वाथगोमूत्रं कल्कं पथ्यासमुद्भवम् ।
कृष्णासैन्धवसंयुक्तं वृद्धिरोगहरं परम् ॥
गव्यं घृतं सैन्धवसम्प्रयुक्तं
सुम्बूकभाण्डे निहितं प्रयत्नात् ।
सप्ताहमादित्यकरैर्विपक्वं
निहन्ति कुरण्डमतिप्रवृद्धम् ॥
ऐन्द्रीमूलमथ चूर्णं रुबुतैलेन मर्द्दितम् ।
अथाङ्गीपयसा पीतं सर्व्ववृद्धिनिवारणम् ॥
कदम्बटमूलशिग्रु करञ्जकृष्णाभिर्वा ।
वृद्धा वृद्धिः प्रशमं याति चिरजापि न संशयः ॥
निर्गुण्डीमारनालेन हस्तिकामूलवल्कलम् ।
लेपो वृद्धिमरं हन्ति बद्धमूलमपि दृढम् ॥
वचासर्षपकल्केन लेपो वृद्धिविनाशनः ।
ज्योतिष्मतीफलाभ्यान्तु लेपो वृद्धिहरः परः” ॥ * ॥
“मूत्रं विश्वकमिश्रयोरक्षकाश्यासैन्धवयोर्द्वयोः
श्यामापूतिकरञ्जशिग्रुकतरोर्बिल्वाग्निमथाब्दकम् ।
कृष्णापञ्चिकवल्कपञ्चकवचा स्वाराजमोदान्वित
मीतङ्गाग्निकवोष्णतोयगपितैश्चूर्णितं प्रयुञ्ज्यात् ॥
अथ क्षीरेण गोधूमकल्कं कुन्दुरुकस्य वा ।
प्रलेपनं सुखोष्णं स्यात् सद्यःशूलहरं परम् ॥
अलाभे तु वै वामोदरे तत्र प्रवेशयेत् ।
अथ मुहूर्त्ते मेधावी तारस्वारकमी भवेत् ॥
यवानी मधुना कुष्ठं गोधूमं बन्दाकं च ।
काञ्जिकेन सम पिष्ट्वा कुर्य्याद्वृद्धिप्रलेपनम् ।
सैन्धवं मदनं कुष्ठं शताह्वां निचुलं वचाम् ।
ह्रीवेरं मधुकं भार्गीं देवदारु नतागरम् ।
कट्फलं गौरसर्षपं मेदां पाटलां चित्रकं शटीम् ।
विडङ्गातिविषे श्यामां रेणुकां नीलिनीं स्थिराम्
बिल्वाजमोदां कृष्णाञ्च दन्तीं रास्नां प्रपिष्य च ।
साध्यमेरण्डजं तैलं तैलं वा कफवातनुत् ।
अभ्योदराद्यष्मारघ्नं प्रलेपनेऽभ्यङ्गमारुतान् ।
वातवृद्धिमारवृद्धिश्च हन्यात्तद्गुणानान्” ॥
वृद्धावैद्यकात् तैलम् ।
“सौरेश्वरस्य योग्य सर्व्ववृद्धिविकारजे” ॥
इति वृद्धधिकारे । इति भावप्रकाशः ॥
(अस्य सनिदानं मूलं कुरण्डसंवृद्धिरस्य सम्यक्
निर्वचनं यथा। “वातपित्तश्लेष्मशोणितमेदो मूत्रान्त्र
निमित्ताः सप्त वृद्धयः । तासां मूत्रान्त्रनिमित्ते
वृद्धी वातसमुत्थे केवलमुत्पत्तिहेतुरन्यतमः । अधः
प्रकुपितोऽन्यतमो हि दोषः फलकोषवाहिनी
रभिप्रपद्य धमनीः फलकोषयोर्वृद्धिं जनयति तां
वृद्धिमित्याचक्षते । तासां भविष्यतीनां पूर्व्व-
रूपाणि वस्तिकटीमुष्कमेढ्रेषु वेदना मारुत
निग्रहः फलकोषशोफश्चेति ।
तत्रानिलपरिपूर्णां वस्तिमिवाततां परुषा
मनिमित्तानिलरुजां वातवृद्धिमाचक्षते, पक्वोदु
म्बरसङ्काशां ज्वरदाहोष्मवतीं चाशुसमुत्थानपाकां
पित्तवृद्धिं कठिनामल्पवेदनां शीतां कण्डूमतीं
श्लेष्मवृद्धिं कृष्णस्फोटावृतां पित्तवृद्धिलिङ्गां रक्त
वृद्धिं मृदुस्निग्धां कण्डूमतीमल्पवेदनां तालफल
प्रकाशां मेदोवृद्धिम् । मूत्रसन्धारणशीलस्य मूत्र
वृद्धिर्भवति सा गच्छतोऽम्बुपूर्णा दृतिरिव क्षुभ्यति
मूत्रकृच्छ्रवेदनां वृषणयोः श्वयथुं कोषयोश्चापाद
यति तां मूत्रवृद्धिं विद्यात् । भारहरणबलवद्
विग्रहवृक्षप्रपतनादिभिरायासविशेषैर्वायुरतिप्रवृद्ध
प्रकुपितश्च स्थूलान्त्रस्येतरस्य चैकदेशं द्विगुणमा
दायाधोगत्वा वङ्क्षणसन्धिमुपेत्य ग्रन्थिरूपेण स्थि
त्वाऽप्रतिक्रियमाणे च कालान्तरेण फलकोषं प्र
विश्य मुष्कशोफमापादयत्याध्मातो वस्तिरिवातत
प्रदीर्घः शोफो भवति सशब्दमवपीडितश्चोर्द्धमुपैति
विमुक्तश्च पुनराध्मायति तामन्त्रवृद्धिमसाध्या
माचक्षते” ॥ * ॥ इति सुश्रुते निदानस्थाने ।
१९ अध्याये ॥
चिकित्सितमस्य यथा,—
“अन्त्रवृद्धिं विना सप्त या वृद्धयस्ताश्च वर्ज्जयेत् ।
अश्वादियानं व्यायामं मैथुनं वेगनिग्रहम् ।
अभ्यासमुपभुक्तमुपवासं गुरूणि च ।
तत्रादितो वातवृद्धौ त्रैवृतस्निग्धमातुरम् ।
स्निग्धेन यथान्याय पाययेत विरेचनम् ।
क्षीराम्लतिक्तकैरण्डतैलानि वा नरम् ।
सक्षीरं वा पिबेन्मासं तैलमेरण्डसम्भवम् ।
ततः कामेऽग्निमार्गं ज्ञात्वैः कल्केन बुद्धिमान् ।
निरूहयेत्तिरुद्य मधुना च गुडोदकम् ।
यष्टीमधुकसिद्धेन तैलेनानुवासयेत् ।
स्वेदोपनाहौ कुर्व्वीत प्रदेहांश्चानिलापहान् ।
विरेचनं पाचयित्वा वा वेदनां परिवर्ज्जयेत् ।
निम्बादत्त भिषग्वर्यो यथोक्तं कर्म्म माचरेत् ।
द्वितीयायामवस्थायां पित्तवृद्धिनिवर्हितः ।
यद्वा वा भेदयेद्विद्वान् शोधयेत् क्षौद्रसर्पिषा ।
शुद्धायाञ्च भिषग्दद्यात् तैलं कल्कञ्च रोपणम् ।
रक्तजायां जलौकोभिः शोणितं निर्हरेद्भिषक् ।
पित्तग्रन्थिविधानेन यापि सर्व्वाश्च सर्व्वदा ।
विषवृक्षक्रम कुर्य्यादामे पक्वे च सर्व्वदा ।
वृद्धिं कपालिकामुष्णैश्च मधुरैः प्रलेपयेत् ।
पीत्वा च कषायं पिबेन्मूत्रेण गुग्गुलुम् ।
विम्लापनात् कुर्य्यात् यदि वा प्रसन्दनात् शोफतः ।
पक्वाश्च विभिन्नायां तैलं शोधनमिष्यते ।
सुमनारुष्करारिष्टप्रियङ्गुवचसाधितम् ।
मेदःसमुत्था संस्वेद्य लेपयेत् सुरसादिना ।
शिरोविरेकद्रव्यैश्च सुखोष्णैर्मूत्रसंयुतैः ।
स्विन्नमापाट्य मदृष्ट्वा समाप्नुयात् तु मारवम् ।
दद्यात् पक्वे शेषमीषद् कापिदग्नेन दारयेत् ।
मेदसतः समुद्धृत्य स्नायुकापोलसंयतम् ।
ततः कृत्वा पर्य्योष्य ग्रहणं निवेदयाथ दापयत् ।
मन्दं स्निग्धं तु बद्धा वृद्धिमान्त्रकरेषु च ।
मूत्रजां स्वेदयित्वा तु वस्त्रपट्टेन वेष्टयेत् ।
सेवन्या पार्श्वतोऽधस्ताद् विध्येद्व्रीहिमुखेन तु ।
अथास्य निष्ठां नाडीं दत्त्वा विस्रावयेद्भिषक् ।
मूत्रनाडीमथोद्धृत्य स्थगिकावन्धमाचरेत् ।
शुद्धाया रोपणं दद्याद्दत्त्वा च व्रणरोपणीम् ।
अप्राप्तफलकोषायां वातवृद्धिसमो विधिः ।
तत्र या वङ्क्षणस्था तां दहेदर्द्धेन्दुवक्त्रया ।
सम्यगमार्गविरोधार्थं कौशलादपि च बर्द्धयेत् ।
स्तम्भिताङ्गुष्ठमध्ये दहेदङ्गविपर्य्ययात् ।
अनेनैव विधानेन दहेद्वा वामदक्षिणे ।
प्रदहेत् प्रयतः किन्तु वायुश्चेदोऽधिकस्ततः ।
मध्योपरि च कर्णान्ते शलाकां यत्नेन सेवनीम् ।
पश्चात् नाडी शिरो विध्येदन्त्रवृद्धिनिवृत्तये” ॥
इति सुश्रुते चिकित्सितस्थाने १९ अः ॥ * ॥)
भावप्रकाशोक्तचिकित्सादि अन्त्रवृद्धिशब्दे द्रष्टव्यं ।
वाकवल्कनः । इति राजनिर्घण्टः ।

कुरण्डकः, पुं, (कुण्यते हन्यते इति । कुर + बाहुल
कात् अण्डच् । पृषोदरात् साधुः । ततः स्वार्थे
कन् ।) कुरण्टकवृक्षः । इत्यमरटीकायां रायमु
कुटः ॥ (कुरण्टशब्देऽस्य विवरणं ज्ञातव्यम् ।)

कुररः, पुं, (कुर् शब्दे + “कुरः क्ररच्” । उणां
२ । १२१ । इति क्ररच् प्रत्ययः ।) उत्क्रोशपक्षी ।
तत्पर्य्यायः । उत्क्रोशः २ । इत्यमरः । २ । ५ । २२ ॥
खरशब्दः ३ क्रौञ्चः ४ मत्स्यनाशः ५ शरः ६ । इति
राजनिर्घण्टः ॥ (यथा महाभारते १ गन्धोपाख्यान
पर्व्वणि । ६३ । ११० ।
“घोरघुष्टां कौशकुररैश्चक्रवाकोपकूजिताम्” ॥
अस्य मांसगुणादयस्त्वशिशिष्टः । यथा,—
“कुररचक्रचकोरवकपुष्कराह्वकादम्बकारम्बाः ।
काकतुण्डचण्डकोटकमित्राटिट्टिभाद्याः ।
नन्दीमुखः सितपक्षो भासकाः खञ्जरीटकाः ।
इत्येते जलजाः प्रोक्ताः” । इति हारीते प्रथम
स्थाने ११ अध्याये ॥)

कुरराङ्घ्रिः, पुं, (कुररस्य अङ्घ्रिरिव ।) देवधान्यम् ।
इति राजनिर्घण्टः ॥

कुररी, स्त्री, (कुरर + स्त्रियां जातित्वात् ङीष् ।)
मेषी । इति हेमचन्द्रः । कुररपक्षिणी । इत्य
मरः ॥ (यथा, महाभारते । १ । ६ । १९ ।
“ततो मामशरणा क्रोशन्तीं कुररीमिव” ॥)

कुरकः, पुं, (कुरर इति शब्दं कायति । कै + कः ।) कुरवपक्षी ।
कूजकुनामा । इति धरणी ॥

कुरवः, पुं (कु ईषत् रवः गुञ्जनध्वनिर्भ्रमराणां
सत्त्वमधुतया यत्र ।) रक्तमन्दारः । इति राज
निर्घण्टः ॥ कुरवकः । रक्तझिण्टी । इति शब्द
रत्नावली ॥ पीतझिण्टी । इति हेमचन्द्रः ॥
(कुत्सितो रवः इति कर्म्मधारयः ।) कुत्सितशब्दः ।
(कुत्सितो रवो यस्य ।) कुत्सितशब्दकारिणि त्रि ॥

कुरवकः, पुं (कुरव + स्वार्थे कन् ।) रक्तझिण्टिः ।
रक्तझिण्टी । इति राजनिर्घण्टः ॥ (यथा रघौ
ऋतुसंहारे ६५ ।
“कुरवकमुकुलावलीकतोन्मदभ्रमरसमालोकपट्ट कर्णू पुष्पकयो

अभ्यावस्थितकुसुमे कुरवके निर्वाप्य मन्यद्विषैः"। तस्य पुष्पादिरपि। यथा कुमारटीकायां मल्लिनाथः। "आलोकित कुरबकः कुरुते विकासम्"। अस्य पर्य्याया भावप्रकाशे यथा।
"सैरेयकः श्वेतपुष्पः सैरेयः कटसारिका।
सहाचरः सहचरः स च भिण्टिरपि कथ्यते।
कुरण्टकोऽत्र पीते स्यान्नीले कुरवकः स्मृतः"।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।) कुत्सितरवे त्रि।

कुरसः, पुं, (कुत्सितो रसो यत्र।) मद्यभेदः। इति शब्दावली। कर्म्मधारये कुत्सितरसः। बहुव्रीहौ कुत्सितरसयुक्ते त्रि।

कुरसा, स्त्री, (कुत्सितः ईषत् वा रसो यस्याः।) गोजिह्वा लता। इति शब्दचन्द्रिका।

कुराहः, पुं, कुलाहः। ईषत्पाण्डु कृष्णजानुर्घोटकः। इति हेमचन्द्रः।

करी, स्त्री, (कुं भूमिं राति ददाति। कु+रा+कः। ततो गौरादित्वात् ङीष्।) क्षुद्रधान्यभेदः। इति राजनिर्घण्टः।

कुरीर, क्ली, ("कृञ उच्च"। उणा ४। ३३। इति ईरन् उकारादेशश्च।) मैथुनम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः।

कुरुः, पुं, (कृ+"कृग्रोरुच्च"। उणा १। २५। इति कुः उच्च।) आग्नीध्रराजपुत्रः। स तु प्रियव्रतराजपौत्रः। (स्वायम्भुवमनोः प्रपौत्रः उत्तरकुरुवर्षस्य प्रभुश्च। तस्य पत्नी च भद्रेति नाम्ना विश्रुता। यथा विष्णुपुराणे। २। १। १६ २२।
"जम्बुद्वीपेश्वरो यस्तु आग्नीध्रो मुनिसत्तम।।
तस्य पुत्रा बभूवुस्ते प्रजापतिसमा नव।
नाभिः किम्पुरुषश्चैव हरिवर्ष इलावृतः।
रम्यो हिरण्वान् षष्ठश्च कुरुर्भद्राश्व एव च।
केतुमालस्तथैवान्यः साधुचेष्टो नृपोऽभवत्।
जम्बुद्वीपविभागांश्च तेषां विप्र! निशामय।
पित्रा दत्तं हिमाह्वन्तु वर्षं नाभेस्तु दक्षिणम्।
हेमकूटं तथा वर्षं ददौ किम्पुरुषाय सः।
तृतीयं नैषधं वर्षं हरिवर्षाय दत्तवान्।
इलावृताय प्रददौ मेरुर्यत्र तु मध्यमः।
नीलाचलाश्रितं वर्षं रम्याय प्रददौ पिता।
श्वेतं तदुत्तरं वर्षं पित्रा दत्तं हिरण्वते।
यदुत्तरं शृङ्गवतो वर्षं तत्कुरवे ददौ।
मेरोः पूर्व्वेण यद्वर्षं भद्राश्वाय प्रदत्तवान्"।
चन्द्रवंशीयसम्बरणपुत्रराजविशेषः। स तु सम्बरणराजभार्य्यायां सूर्य्यकन्यायां तपत्यां जातः। अयमेव कुरुक्षेत्रपतिः। धार्त्तराष्ट्रपाण्डवानां पूर्व्वपुरुषः। यथा,—
"योऽसावीडसुतस्तस्य यस्मात् संवरणात्मजः।
तपत्यां सूर्य्यकन्यायां कुरुक्षेत्रपतिः कुरुः।
परीक्षित् सुधनुर्जह्नुर्निषधाश्च कुरोः सुताः"।
इति श्रीभागवते। ९। २२। ४।) भक्तम्। देशविशेषः। इति मेदिनी। स तु जम्बुद्वीपस्य नववर्षान्तर्गतवर्षविशेषः। इति ज्योतिषम्। तद्देशवासी। तस्य अपत्यमात्रम्। (यथा गीतायाम् १। २५।

"उवाच पार्थ! पश्यैतान् समवेतान् कुरूनिति"।) कण्टकारिका। इति शब्दचन्द्रिका।

कुरुकन्दक, क्ली, (कुरुः इव विस्तीर्णः कन्दो यस्य। कप्।) मूलकम्। इति शब्दमाला।

कुरुक्षेत्र, क्ली, (कुरुणा चन्द्रवंशोद्भवेन राजविशेषेण भूरितपसोपार्ज्जितं धर्म्मक्षेत्रनाम्ना प्रसिद्धं कुरुदेशान्तर्गतं क्षेत्रम्। शाकपार्थिवादित्वात् मध्यपदलोपः।) देशविशेषः। तत्तु धर्म्मक्षेत्रम्। (किञ्चास्मिन्नेव क्षेत्रे क्षत्रियकुलारण्यकुठारेण भृगुवंशधुरन्धरेण भगवता जामदग्न्यरामेण क्षत्रियशोणितैः पञ्च ह्रदाः कृताः तदारभ्य च क्षेत्रमेतत् समन्तपञ्चकनाम्नोच्यते। निरुद्धामेवात्र युध्यतां क्षत्रियाणां शरीरविसर्ज्जनेन पुण्यप्राचुर्य्यात् वैकुण्ठप्राप्तिः। तत्र हवात्र कुरुपाण्डवानां समरः युद्धं निष्पन्नम्। एतद्विवरणं महाभारतीये १२। ४८ अध्याये श्रीकृष्णयुधिष्ठिरसंवादे द्रष्टव्यम्। यथा भगवद्गीतायाम् १। १।
"धर्म्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्व्वत सञ्जय।"।
एतत्क्षेत्रस्य सीमानिर्देशे बहूनि मतानि चलन्ति दिङ्मात्रमुदाहृतमत्र। यथा, हेमचन्द्रः।
"धर्म्मक्षेत्रं कुरुक्षेत्रं द्वादशयोजनावधि"।
तथा त्रिकाण्डशेषेऽपि।
"कुरुक्षेत्रं प्रयागश्च हिमाद्रिविन्ध्यमध्यगः"।
एष हि ब्रह्मर्षिदेशः। यथा, मनौ। २। १९।
"कुरुक्षेत्रञ्च मत्स्याश्च पञ्चालाः शूरसेनकाः।
एष ब्रह्मर्षिदेशो वै ब्रह्मावर्त्तादनन्तरः"।)

कुरुक्षेत्रीयोगः, पुं एकस्मिन् श्रावणदिने तिथित्रय नक्षत्रत्रयोगयाभावे सति। इति स्मृतिः। कुरुक्षेत्रे स्नानयोगः। यथा,—
"पद्मप्रयुते भानौ श्रवणेन व्यतीपातौ।
सौम्यक्षेत्रगते सोमे कुरुक्षेत्रे मतिर्भवेत्"।
इति भावप्रकाशसंग्रहे योगाध्याय।

कुरुटः, पुं, (कुत्सितं रोटते दीप्यते प्रतिहन्ति वा। रुट दीप्तौ प्रतिघातादिषु च+ "इगुपधेति" ३। १। १३५। कः।) चित्रावरशाकः। इति राजनिर्घण्टः।

कुरुण्टः, पुं, (कुत्सितं दुर्गन्धादिकं रुण्टति लुण्ठतीति। कु+रुटि स्तेये+अच्।) पीतझिण्टी। पीताम्लानः। इति मेदिनी। (कुरण्टकशब्देऽस्य विवृतिर्ज्ञेया।)

कुरुण्टकः, पुं, (कुरुण्ट+स्वार्थे कन्।) पीताम्लानः। पीतझिण्टी। तत्पर्य्यायः। सहचरी २ सहचरः ३। इत्यमरः। २। ४। ७५। सहाचरः ४ कुरण्टकः। इति भरतः।
("नीलः सहचरः पीतश्चासौ दासीकुरण्टकः"।
इति वैद्यकरत्नमालायाम्। अस्य विवरणं यथा, सुश्रुते सूत्रस्थाने ३८ अध्याये आरग्वधादिवर्गे। "आरग्वधमदनगोपघोण्टा कुटजपाठा कण्टकीपाटला मूर्व्वेन्द्रयवसप्तपर्णनिम्बकुरुण्टकदासीकुरण्टक" ॥)

कुरुपट्टी, स्त्री, (कुं पृथिवीं रुण्टति अवसादयति। कु+रुटि+अच्। गौरादित्वात् ङीष्।) शालदक्षिका। इति मेदिनी। (कुं कुत्सितं पापं रुण्टति नाशयति यद्वा पञ्चधा परिच्छिद्य।) मातुली। इति जटाधरः।

कुरुम्ब, क्ली, (कुर्+बाहुलकात् उम्बच्।) कूपपानकम्। इति शब्दचन्द्रिका। कमलालेबु इति भाषा।

कुरुम्बा, स्त्री, (कुरुम्ब+स्त्रियां टाप्।) द्रोणपुष्पी। इति राजनिर्घण्टः। (द्रोणपुष्पीशब्देऽस्या गुणा रसो ज्ञेयाः।)

कुरुम्बिका, स्त्री, (कुरुम्बा+स्वार्थे कः टाप् ह्रस्वश्च।) द्रोणपुष्पी। इति राजनिर्घण्टः।

कुरुम्बी, स्त्री, (कुरुम्ब+स्त्रियां गौरादित्वात् ङीष्।) सैन्धवलवणः। इति राजनिर्घण्टः।

कुरुराट्[ज्] पुं, (कुरुषु राजते। राज्+क्विप्।) दुर्य्योधनः। इति त्रिकाण्डशेषः।

कुरुलः, पुं, (कुर्+उलच्।) भालस्थितचूर्णकुन्तलः। तत्पर्य्यायः। भ्रमरकः २ भ्रमरालकः ३। इति हेमचन्द्रः।

कुरुवकः, पुं, (रौतीति रवः भ्रमरः। कुत्सितः अल्पमधुत्वात् विरलो रवो यत्र। अल्पमधुत्वादस्य तथात्वम्।) रक्तझिण्टी। रक्ताम्लानः। इत्यमरः। २। ४। ७४। पीतझिण्टी। इति हेमचन्द्रः। (कुरबकशब्दे पीतझिण्टीशब्दे च अस्य विवृतिर्ज्ञातव्या।)

कुरुविन्द, क्ली, (कुरुम् विन्दति+विद्लृ लाभे "अनुपसर्गात् लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च। ३। १। १३८। इति शः मुचादित्वात् नुम् च।) काचलवणम्। माणिक्यम्। इति राजनिर्घण्टः। कुरुविन्दरत्नम्। कुल्माषधान्यम्। इति मेदिनी। (रुविन्दस्य पुंलिङ्गत्वमपि दृश्यते। यथा, सुश्रुते सूत्रस्थाने ४६ अः।
"काचीयसैन्धव विद्यात् कुरुविन्दो मरुत्प्रिया"।)

कुरुविन्दः, पुं, (कुरु+विद्+शः नुम् च।) मुस्तकम्। इत्यमरः। २। ४। १५९। माषः। इति राजनिर्घण्टः। (अस्य पर्य्याया यथा,—
"मुस्तकं न स्त्रियां मुस्तं त्रिषु वारिदनामकम्।
कुरुविन्दश्च सङ्घातो भद्रमुस्तो गुन्द्रकः।
भद्रमुस्तश्च गुन्द्रा च तथा नागरमुस्तकः"।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।)

कुरुविल्वः, पुं, (कुरुः बिल्व इव।) पद्मरागमणिः। इति त्रिकाण्डशेषः।

कुरुविल्वक पुं (कुरुविल्व+स्वार्थे कन्।) कुल्माषः। चणकः। इति रत्नमाला। (गुणा अस्य कुल्माषशब्दे ज्ञेयाः।)

कुरुविस्त, पुं, (कुरुः विस्तार विस्त।) पलपरिमाणम्। इत्यमरः। २। ९। ८६। चारि तोला इति भाषा।

कुरुव्य क्ली (कु इषत् अर्द्धमिव। कन्दवत् मूल ...) रक्तम्। इति राजनिर्घण्टः।

कुरुरः, पुं स्त्री, (कुर् इत्यव्यक्तं शब्दं कुरति शब्दायते। कुर्+कुर्+कः।) कुक्कुरः। इत्यमरटीकायां रायमुकुटः।

कुरुवः, पुं, कुरुवकः। इति राजनिर्घण्टः।

कुर्द ङ क्रीडायाम्। इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-सेट्।) पञ्चमस्वरी। दीर्घस्य पृथक् पाठ सामर्थ्यात् पूर्वस्य पञ्चमस्वरयोगेऽपि दीर्घो न स्यात्। ङ कुर्दते। इति दुर्गादासः ॥

कुर्दन, क्ली, (कुर्द + भावे ल्युट्।) क्रीडा। इत्यमरटीकायां स्वामी ॥

कुर्पर, पुं, (कुर् + क्विप् कुः। पिपर्त्ति। पृ + अच् परः। ततः कर्म्मधारयः।) कफोणिः। जानु। इति मेदिनीकरहेमचन्द्रौ। (कूर्परशब्देऽस्य विवरणं ज्ञातव्यम्।)

कुर्पास, पुं, (कूर्परे अस्यते क्षिप्यते वा। अस, असु वा + घञ् ततः पृषोदरात् साधुः।) अङ्गरक्षः। इति हारावली ॥

कुर्पासक, पुं, (कुर्पास + स्वार्थे कन्।) कञ्चुलिका। इत्यमरः ॥ काँचुलि इति भाषा। (यथा रत्नावलीनाटके। "मणिमयकुर्पासकपीडितस्तनी"।)

कुर्व्वत्, त्रि, (करोति इति। कृ + शतृ।) कर्म्मकारः। भृत्यः। इति विश्वः ॥

कुल न बन्धौ। सन्तौ। इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-सकच सेट्। ज्वलादिः।) न कोला कुलः। कोलति कुलीनः सर्व्वैर्बन्धुत्वादिकार्यं। चरतीति राजीकारणमिति चतुर्भुजः। केचित्तु सचतिस्थाने सन्त्यानं पठित्वा कोलति कुलान सन्तनति इत्याहुः इत्याहुः। सन्त्यानं पठित्वा सन्त्यानं उपचय। इति रामः। अन्ये तु मन्मुखं भाविनं वसंसानोऽप्य यथास्य न प्रयोगः। सङ्गि शब्दे इति विदित्वाङ्गः। इति दुर्गादासः ॥

कुल, क्ली, (कुल + "इगुपधेति"। ३। १। १३५। कः।) वंशः। (यथा, रघौ। १६। ८६।

"इत्थं द्विजेन पुनरपि मङ्गलं

प्राप्तो मयात् सतश्च इत्थमुभयरूपम्।

सयोभयो विधिवदाश समेत बन्धु

बन्धामयेन कुमुदं कुलभूषणेन" ॥

तस्य लक्षणं यथा, शिष्टोक्तौ।

"आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम्।

निष्ठा वृत्तिस्तपो दानं नवधा कुललक्षणम्" ॥)

तत्प्राप्तिकारणं यथा।

"गोभिश्च दैवतैर्विप्रभक्त्या राजोपसेवया।

कुलान्यकुलतां यान्ति यानि हीनानि कर्म्मतः ॥

कुविवाहैः क्रियालोपैर्वेदानध्ययनेन च।

कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण वै ॥

अनृतात् पारदार्य्याच्च तथाऽभक्ष्यस्य भक्षणात्।

अश्रौतधर्म्माचरणात् क्षिप्रं नश्यति वै कुलम् ॥

अश्रोत्रिये वै वेदानां वृषलेषु तथैव च।

विहिताचारहीनेषु क्षिप्रं नश्यति वै कुलम्" ॥

इति कौर्म्मे उपविभागे १५ अध्यायः ॥ सजातीयगणः। इत्यमरः। ३। ३। १। (कु पृथ्वीं कालि मलाति। ला + कः।) जनपदः। गृहम्। (कौ भूमौ लीयते। अन्येभ्योऽपीति डः।) शरीरम्। इति मेदिनी ॥ भवनम्। इति महाभारतम् ॥ (प्रथम इत्यर्थेन द्वादशी भूमिं लभते तावती भूमिः। यथा, मनुः। ७। ११९।

"दशी कुलन्तु भुञ्जीत विंशी पञ्चकुलानि च" ॥)

कुल, पुं, (कुल + कः।) कुलिकः। शिल्पिकुलप्रधानः। इत्यमरटीकायां भरतः ॥

कुलक, क्ली, (कौ भूमौ लीयते। कु + ली + डः। स्वार्थे कन्।) पटोलमूलम्। अम्बष्ठादिगणपूर्वः। इति मेदिनी ॥ (यथा, साहित्यदर्पणे ६। ३०७।

"श्लोकैश्चतुर्भिश्च तदूर्द्ध्वं कुलकं मतम्" ॥

पटोलार्थे यथा,— "कारीरं कुलकं नन्दी" इति वाग्भटे सूत्रस्थाने। ६ अः। कुलकः पटोलभेदः। तिक्तपत्रा इति ख्यातम् ॥ इति तट्टीका ॥)

कुलक, पुं, (कुल + संज्ञायां कन्।) काकेन्दुः। इत्यमरः। २। ४। ३८ ॥ वल्मीकः। कुलश्रेष्ठः। इति मेदिनी ॥ मरुबकः। इति रत्नमाला ॥ हरितसर्पः। इति राजनिर्घण्टः ॥ कुपीलुः। इति भावप्रकाशः ॥ शिल्पिकुलप्रधानः। इत्यमरटीकायां भरतः ॥

कुलकर्कटी स्त्री, (कुला कर्कटी इति नित्यकर्म्मधारयः।) चीनाककर्कटी। इति राजनिर्घण्टः ॥

कुलकुण्डलिनी } स्त्री, (कुले कुलपद्मे पृथिवीतत्त्व

कुलकुण्डली } रूपे मूलाधारे कुण्डलाकारा सार्द्ध

त्रिवलयाकारेण स्वयम्भुलिङ्गं वेष्टयित्वा तिष्ठतीति। कुल + कुण्डलिन् + ङीप्। कुण्डल + ङीप्। यद्वा कौ पृथिवीतत्त्वाधारे मूलाधारे कुण्डली तिष्ठतीति। कु + ली + अन्येभ्योऽपीति डः। ततः कर्म्मधारयः।) मूलाधारपद्मस्थितशक्तिविशेषः। यथा। पूर्णानन्दकृतषट्चक्रप्रकाशः।

"कूजन्ती कुलकुण्डली च मधुरं मत्तालिमालास्फुट वाचः कोमलकाव्यबन्धरचनाभेदातिभेदक्रमैः।

श्वासोच्छ्वासविवर्त्तनेन जगतां जीवो यया धार्य्यते सा मूलाम्बुजगह्वरे विलसति प्रोद्दामदीप्तावली" ॥

कूजन्तीति। सा मूलाम्बुजगह्वरे इत्यादि सा स्पष्टम्। कीदृशी कोमलकाव्यबन्धरचनाभेदातिभेदक्रमैः कोमला कमनीयत्वविशिष्टा या काव्य बन्धरचना तस्या भेदातिभेदक्रमैः भेदातिशयभेद क्रमैर्विशिष्टा वाच मत्तालिमालास्फुट मत्ता या अलिमाला भ्रमरसमूहस्तद्वत् स्फुट यथा स्यात् तथा मधुरं यथा स्यात् तथा कूजन्ती अव्यक्त मधुरध्वनिं कुर्व्वन्तीत्यर्थः। या का इत्याकाङ्क्षायामाह यया कुलकुण्डलिन्या श्वासोच्छ्वासविवर्त्तनेन श्वासोच्छ्वासयोः परिवर्त्तनेन गमनागमनेन जगतां लोकानां जीवः प्राणो धार्य्यते। पुनः कीदृशी प्रोद्दामदीप्तावली प्रकृष्टोत्कृष्टदीप्ति श्रेणीस्वरूपा। तथा च मूलाधारपद्मे यथाकार सार्द्धत्रिवलयविशिष्टा विद्युत्समूहरूपा कुलकुण्डलिनी तिष्ठतीत्यर्थे। इति तट्टीका ॥ * ॥ अस्याः कथा शब्दे मूलाधारशब्दे षट्चक्रशब्दे च द्रष्टव्यम् ॥

कुलक्षा, पुं, (कु + लक्ष + भावे घञ्।) रक्ताम्लानः। तत्पर्य्यायः। लाक्षणिकः २। इति हारावली ॥

कुलगण्डा, स्त्री, (कुलस्य मूलस्य विकृतपत्रवालाद्य वा ततो यस्याः।) गृहकन्निनी। इति शब्दच न्द्रिका ॥

कुलघ्न, पुं, (कुले सन्तकुले जायते। जन् + डः।) कुलीनः। सत्कुलोद्भवः। इति शब्दरत्नावली। (यथा, मनुः ८। १७९।

"कुलजे वृत्तसम्पन्ने धर्म्मज्ञे सत्यवादिनि।

महापक्षे धनिन्यार्य्ये निक्षेपं निक्षिपेद्बुधः" ॥)

कुलञ्ज, पुं, (कुं पृथिवीं रञ्जयति। रञ्ज + णिच् + अच् रस्य लः।) कुलञ्जनवृक्षः। इति राजनिर्घण्टः ॥

कुलञ्जन, पुं, (कु + रञ्ज + णिच् + ल्युः। रस्य लः।) स्वनामख्यातवृक्षः। तत्पर्य्यायः। कुलञ्जः २ गन्धमूलः ३ कुलञ्जः ४। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। दीपनत्वम्। मुखशोधकत्वम्। इति राजनिर्घण्टः ॥

कुलटा, स्त्री, (कुलात् अभिचारार्थं कुलान्तरं अटति गच्छतीति। कुल + अट् + अच्। शकन्ध्वादित्वात् साधुः।) व्यभिचारिणी। असती। (यथाह, आर्य्यासप्तशती १८६।

"परपतिनिद्रयकुलटाप्रोषितपति। नैर्ध्यानकोपेन। दम्पत्यवोदनन्ता रोदिमि तव तान्वं दीना" ॥) तत्पर्य्यायः। पुंश्चली २ धर्षिणी ३ बन्धकी ४ असती ५ इत्वरी ६ स्वैरिणी ७ पांशुला ८। इत्यमरः। २। ६। १०॥ चर्षणी ९ पांशुरा १०। इति तट्टीका ॥ स्वैरा ११ दुष्टा १२ धर्षिता १३। इति शब्दरत्नावली ॥ अश्वा १४ निशाचरी १५ अविनीता १६। इति जटाधरः ॥ ० ॥ परकीयान्तर्गत नायिकाविशेषः। यथा,—

"इते वारिकणान् किरन्ति पुरुषान् वर्षन्ति नाम्भोधराः शैलाः शाद्वलमुद्वमन्ति न फलं वृक्षाः पुनर्नीलकान्। दिशान्ये तरलः स्तनानि हरते नैवाम्बुधौ प्लावाः। कातरतापमाभि कुलटाकेवलकपा कि हतम्" ॥ इति रसमञ्जरी ॥ ० ॥ अस्याः स्वभोगमार्गविषये परकीयाशब्दे अन्यो न्यायमध्यमकरणे द्रष्टव्यम् ॥

कुलटी, स्त्री, (कुत्सित रटते। रट भाषणे + मूलविभुजादित्वात् कः। गौरादित्वात् ङीष् रस्य लः।) मनःशिला। इति रत्नमाला अमरटीका च ॥ (अस्या गुणादयो मनःशिलाशब्दे बोद्धव्याः ॥)

कुलतिथि, स्त्री पुं, (कुला तिथिः।) चतुर्थ्यष्टमी द्वादशी चतुर्दशी। यथा तन्त्रसारे।

"द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम्।

विषमाश्चाकुलाः सर्व्वे शेषाश्च तिथयः कुलाः" ॥

कुलत्थ, पुं, (कुले पृथिव्यां तिष्ठति। कुल + स्था + क। पृषोदरात् साधुः।) शस्यभेदः। कुल त्थकलाइ इति भाषा। (यथा, मार्कण्डेये। ३१। ०।

"मासदर्शे तिलाम्भामाषमुद्गान्तमायानाम्" ॥) तत्पर्य्यायः। ताम्रवृन्त २ ताम्रबीजः ३ कुल त्थिका ४। इति रत्नमाला ॥ ताम्रवृन्तः ५। इति त्रिकाण्डशेषः ॥ ताम्रबीजः ६ सितेतरः ७। इति राजनिर्घण्टः ॥ अस्य गुणाः। कफवातगुल्म शुक्राश्मरीमेदःश्वासकासप्रमेहनाशित्वम्। कटुत्वम्। उष्णत्वम्। कटुत्वम्। रक्तपित्तकारित्वम्। इति राजवल्लभः ॥ कषायत्वम्। लघुत्वम्। रक्तपित्त कारित्वम्। ज्वरनाशित्वम्। वातघ्नत्वम्। वात

शर्कराश्मरीनाशित्वम् । इति राजनिर्घण्टः ॥
(अस्य अपरे पर्य्यायगुणा यथा,—
"कुलत्थिका कुलत्थश्च कथ्यन्ते तद्गुणा अथ ।
कुलत्थः कटुकः पाके कषायः पित्तरक्तकृत् ।
लघुर्विदाही वीर्य्योष्णः श्वासकासकफानिलान् ।
हन्ति हिक्काश्मरीशुक्रदाहानाहान् सपीनसान् ।
स्वेदसंग्राहको मेदोज्वरक्रिमिहरः परः" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ * ॥
"उष्णः कुलत्थो रसतः कषायः
कटुर्विपाके कफमारुतघ्नः ।
शुक्राश्मरीगुल्मनिषूदनश्च
संग्राहकः पीनसकासहारी ॥
आनाहमेदोगुदकीलहिक्का
श्वासापहः शोणितपित्तकृच्च ।
कफस्य हन्ता नयनामयघ्नो
विशेषतो वन्यकुलत्थ उक्तः" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥ * ॥)

कुलत्था, स्त्री, (कुलत्थ + स्त्रियां टाप् ।) वनकुलत्थ । तत्पर्य्यायः । दृक्प्रसादा २ अरण्यकुलत्थिका ३ कुम्भाली ४ शीतवल्लिका ५ चक्षुष्या ६ कुम्भकारिका ७ कुलत्थिका ८ । इति राजनिर्घण्टः ॥ कुल्माष ९ कुलथिका १० । इति रत्नमाला ॥ अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । चक्षुःशूलनाशित्वम् । विषव्रणाद्यामयशमनत्वम् । चक्षुर्हितत्वम् । प्रस्वेदोपशमनत्वम् । कुलत्थाञ्जनम् । अस्य पर्य्यायः पूर्व्ववत्तदर्धश्चान्तु । कुम्भकारी १ प्रभाप्रभा २ । अस्य गुणाः । चक्षुर्हितत्वम् । कषायत्वम् । कटुत्वम् । हिमत्वम् । विषविस्फोटकण्डूव्रणदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

कुलत्थिका, स्त्री, (कुलत्था स्वार्थे संज्ञायां वा कन् अत इत्वम् ।) कुलत्थाकाराश्मप्रस्तरविशेषः इत्यमरः ।२।९।१०२। अस्य गुणपर्य्यायौ कुलत्थाशब्दे द्रष्टव्यौ । वनकुलत्थ । इति राजनिर्घण्टः ॥

कुलधर्म्मः, पुं, (कुलस्य कुले वा आचरितो धर्म्मः ।) वंशानुगतधर्म्मः । कुलाचारः । यथा,—
"उत्सन्नकुलधर्म्माणां मनुष्याणां जनार्द्दन ! ।
नरके नियतं वासो भवतीत्यनुशुश्रुम" ॥
इति श्रीभगवद्गीतायाम् । १ । ४४ ।

कुलधारकः, पुं, (कुलं धारयति रक्षति यः । कुल + धृ + णिच् + ण्वुल् ।) पुत्रः । इति त्रिकाण्डशेषः ।

कुलनायिका, स्त्री, (कुले कुलाचारसम्बन्धे पूज्या वा नायिका ।) तन्त्रमतानुसारेण पूज्या स्त्री । यथा,—
"रूपमात्रेण युक्तेन राजद्रव्यविभूषिता ।
यथोपचारयुक्तेन पूजयेत् कुलनायिकाम्" ॥
सा नवविधा यथा —
"नटी कापालिकी वेश्या रजकी नापिताङ्गना ।
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका ।
मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः" ।
इति तन्त्रसारः ।

कुलनन्दिनी, स्त्री, (कुलवारोद्भवादिभोक्तिकलाप कुल
धन् नन्दयति वा प्रतिपदम् ।) पार्व्वतीरोहिणी

कुलश्रेष्ठमद्योत्तरपदशक्तिशिवाविद्यालाभेदाः पूर्व्वोक्ताः काव्यकोत्तरमाद्यपद । यथा,—
"वारवारादिभिर्ज्ञेयं कुलाकुलमुदाहृतम् ।
कुलानि समधिष्ण्यानि शेषाण्याकुलानि च" ।
इति तन्त्रसारः ॥

कुलनाशः, पुं, (कुलं भूमिष्ठं न अश्नाति । न + अश् + अच् । मयूरव्यंसकादित्वात् समासः । उष्ट्रस्य हि उन्नतकन्धरत्वात् भूमिस्थतृणादिभक्षणाक्षमतया तथात्वम् ।) उष्ट्रः । इति हेमचन्द्रः । (कुलस्य नाशः ध्वंसः ।) कुलध्वंसः ॥

कुलपतिः, पुं, (कुलस्य वंशस्य गोत्रस्य वा पतिः स्वामी ।) कुलस्वामी । गोत्रप्रधानः । कुलश्रेष्ठः । यथा । "अथ सिन्धुसौवीरपतेरहूगणस्य व्रजत इक्षुमत्यास्तटे तत्कुलपतिना शिबिकावाहपुरुषान्वेषणसमये दैवेनोपसादितः स द्विजवर उपलब्धः" । इति श्रीभागवते ५ । १० । १ । (कुलस्य छात्रवर्गस्य पतिः पालकः । अन्नदानपोषणपूर्व्वकाध्यापको मुनिविशेषः । उक्तञ्च ।
"मुनीनां दशसाहस्रं योऽन्नदानादिपोषणात् ।
अध्यापयति विप्रर्षिः स वै कुलपतिः स्मृतः" ॥)

कुलपत्रः, पुं, (कुलं भूलग्नं पत्रं पर्णमस्य ।) दमनकवृक्षः । इति राजनिर्घण्टः ॥

कुलपालकं, क्ली, (कुलं समूहं पालयतीति । पालि + ण्वुल् । मञ्जलोत्पिण्डकादित्वम् ।) कुलस्थम् । कमलानेवु इति भाषा । इति शब्दचन्द्रिका । (कुलं वंशं पालयति । पाल + णिच् + ण्वुल् ।) वंशप्रतिपालके, त्रि ।

कुलपालिः, स्त्री, (कुलं पालयति या । पालि + इन् ।) कुलवती । इति शब्दमाला ॥

कुलपालिका, स्त्री, (कुलं पालयति । पालि + ण्वुल् टाप् इत्वम् । यद्वा कुलपालि + स्वार्थे कन् टाप् ।) कुलस्त्री । इत्यमरः । २ । ६ । ७ ॥

कुलभ्रष्टा, स्त्री, (कुलं वंशमर्य्यादां भ्रष्टा भरणम् । कुल + भ्रंश + भावे क्त ।) गर्भिण्युपमर्दकवासना । इति जटाधरः । (कुलस्य भ्रष्टा । वंशभरणम् ।)

कुलम्भरः, पुं, (कुलं गृहं भरति धनेन सन्धिकर्त्तनादिना इति । कुल + भृ + खच् । निपातनात् मुम् अस्य रः ।) कुलम्भलः । चौरः । इति शब्दावली ।

कुलवर्त्मा, स्त्री, (कुलेषु निषकुलेषु वर्त्म वर्त्तनं शुभकथनं यस्याः ।) शालिञ्चम् । इति राजनिर्घण्टः ॥

कुलवारः, पुं, (कुलसंज्ञकस्तदाख्यया प्रसिद्धो वारः ।) मङ्गलशुक्रवारौ । यथा ।
"रविचन्द्रौ गुरुः सौरिश्चत्वारश्चाकुला इमे ।
भौमशुक्रौ कुलाख्यौ च बुधवारः कुलाकुलः" ॥
इति तन्त्रसारः ॥

कुलविप्रः, पुं, (कुलपरम्परायाता कुलहिताद विप्रो वा विप्रः ।) कुलपुरोहितः । इत्यमरटीकायां भरतः ॥

कुलश्रेष्ठी, [न्] त्रि, (कुलेषु शिल्पिकुलेषु श्रेष्ठी ।) शिल्पिकुलप्रधानः । तत्पर्य्यायः । कुलिकः २ । इत्यमरः । २ । १० । ५ ॥ कुलकः ३ कुलः ४ श्रेष्ठी ५ ।

इति भट्टीकायां भरतः ॥

कुलसम्भवः, पुं, (कुले कस्यचित् वंशे सम्भव उत्पत्तिरस्य ।) यस्य कस्यचित् कुले जातः । तत्पर्य्यायः । बीजः २ । इत्यमरः । २ । ७ । २ ॥

कुलसौरभं, क्ली, (कुलं श्रेष्ठं सौरभं यस्य ।) मरुवकवृक्षः । इति शब्दमाला ॥

कुलस्त्री, स्त्री, (कुले कुलश्रेष्ठा स्त्री ।) कुलपालिका । अनन्यगामिनी कुलस्त्रियः स्त्री । इत्यमरः । २ । ६ । ७ ॥ (यथा च शाकुन्तले ।
"यास्यत्युद्य हिमा मदा सन्तुष्टा इव पार्थिवाः ।
यान्त्या गणिका मदा निर्लज्जाश्च कुलस्त्रियः" ॥
कुले कुलचक्रे मूलाधारे विराजते या स्त्री । कुलकुण्डलिनीशक्तिः । यथा, कुलार्णवे ।
"कुलस्त्रीध्यानमात्रेण जीवन्मुक्तो भवेन्नरः" ॥)

कुलहण्डकः, पुं, (कुलाय समाय ऊह्यते । ऊहि सचे + ण्वुल् । पृषोदरादित्वात् उकारलोपः ।) आवर्त्तः । इति हारावली ॥

कुलाकुलतिथिः, पुं स्त्री, (तन्त्रोक्तकुलाकुलनाम्ना प्रसिद्धा तिथिः ।) द्वितीयाषष्ठीदशम्यः । यथा ।
"द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम्" ॥
इति तन्त्रसारः ॥

कुलाकुलनक्षत्रं, क्ली, (तन्त्रोक्तकुलाकुलसंज्ञकं नक्षत्रम् ।) आर्द्रामूलाभिजिच्छतभिषाख्यानि । यथा, तन्त्रसारे ।
"वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम्" ॥

कुलाकुलवारः, पुं, (तन्त्रोक्तकुलाकुलनामा वारः ।) बुधवारः । यथा, तन्त्रसारे ।
"भौमशुक्रौ कुलाख्यौ च बुधवारः कुलाकुलः" ॥

कुलाचलः, पुं, (कुलस्य श्रेष्ठः अचलः पर्व्वतः । शाकपार्थिवादिवत् मध्यपदलोपः ।) कुलपर्व्वतः । यथा ।
"अथ कुलाचलकलशमुखा
जलधरोदरविवरवराः ।
न ते मरुतः कापि कोऽपि
कार्य्यपि विमर्द्दक्रियते लोके" ॥
इति मोहमुद्गरे ७ । स्वकुलधर्म्मता यथा ।
"तत्र येऽस्मिन् महाधर्म्मे विपुलाः कुलपर्व्वताः ।
माहेन्द्रो मलयः सह्यः शुक्तिमानृक्षवानपि ।
विन्ध्यश्च पारियात्रश्च इत्येते कुलपर्व्वताः" ।
इति मार्कण्डेये ५७ अध्याये ॥

कुलाचार्य्यः, पुं, (कुलस्य वंशस्य आचार्य्यः वंशपरम्परागतगुरुः । कुलगुरुः ।) कुलगुरुः । कुलीनतादिपरीक्षकः । घटकः इति भाषा । अस्य विवरणं घटकशब्दे द्रष्टव्यम् ।

कुलाटः, पुं, (कुलेन सङ्घेन अटतीति । अट् + अच् ।) क्षुद्रमत्स्यभेदः । इति शब्दमाला ॥

कुलादिः, पुं, (कुलनाशक लोमरहितश्च ।) कुलाचलः । इति सिद्धान्तशिरोमणिः ॥

कुलाधारकः, पुं, (कुलस्य वंशस्य आधारकः प्रतिपालकः ।) पुत्रः । इति शब्दरत्नावली ॥

कुलाय, स्त्री, (कौ पृथिव्यां आयो लयो यस्य ।) शरीरम् । इति हारावली ॥

कुलायः, पुं, (कुलानि पक्षिसमूहाः अयन्ति गच्छन्त्यत्र ।

स्थानम् ।) नीडः । (यथा, माघे ।
"लताकुलायकुलायनिलायिनाम्" ॥)
स्थानमात्रम् । इति मेदिनी ॥

कुलायस्थः, पुं, (कुलाये नीडे तिष्ठति । स्था + कः ।) पक्षी । इति शब्दचन्द्रिका ॥

कुलायिका, स्त्री, (कुलायः पक्षिवासस्थानं विद्यते ऽस्याम् । ठन् ।) पक्षिशाला । इति त्रिकाण्डशेषः ॥

कुलालः पुं (कुलं घटादिनिर्म्माणोपयोगिमृदादिपुरादानम् आलाति सम्यगादत्ते । आ + ला + कः । कुलं घटादिसमूहं वा अलति पर्य्याप्नोति वा अल् + कर्म्मण्यण् । कुल् + "तमिविशिविडीति" उणां १ । ११७ । इति कालन् वा ।) कुम्भकारः । इत्यमरः । २ । १० । ६ ॥ तस्योत्पत्तिर्यथा ।
"मालाकारात् कर्म्मकार्य्यां कुम्भकारो बभूव ह" ।
इति पराशरसंहिता ॥
"पट्टिकारात्त तैलिक्यां कुम्भकारो बभूव ह" ।
इति पराशरपद्धतिः । ब्रह्मवैवर्त्तोक्ता च कुम्भकारशब्दे द्रष्टव्या ॥ कुक्कुभपक्षी । इति मेदिनी ॥

कुलाली, स्त्री, (कुलं पर्व्वतकुलं कलापकुलं वा अलति परियर्द्दति । अल + अण् । ङीप् ।) कुलत्थाकाराञ्जनप्रकारविशेषः । कुलत्थाञ्जनमिति ख्याता । इत्यमरः । २ । ९ । १०२ ॥ अस्याः कुलालिका वन कुलत्थकलाइ इति भाषा । इति राजनिर्घण्टः ॥ (कुलाल + स्त्रियां ङीष् ।) कुलालभार्य्या ॥

कुलाहः, पुं, (कुलं पालककुलं स्वकुलं वा आहन्ति । आ + हन् + डः ।) ईषत्पीतवर्णः कृष्णजानुर्घोटकः । इति हेमचन्द्रः ॥

कुलाहकः पुं, (कुलाह + स्वार्थे कन् ।) कृकलासः । इति शब्दमाला । क्षुपविशेषः । रात्रा कुचे स्वाका इति भाषा । अस्य गुणः । वातवात-रक्तरोगनाशित्वम् । इति राजवल्लभः ॥

कुलाहलः, पुं (कुलं आहलति स्पृशति स्पर्द्धते वा । आ + हल विलेखने + अच् ।) क्षुद्रक्षुपविशेषः । कोकसीमा इति भाषा । तत्पर्य्यायः । अवमुखः २ गोच्छाधः ३ भूबन्धः ४ । इति रत्नमाला ॥

कुलि, पुं, (कुल् + इन् किच्च ।) हस्तः । इति त्रिकाण्डशेषः ॥

कुलि, स्त्री, (कुल इन् किच्च ।) कण्टकारी । इति शब्दरत्नावली ॥

कुलिकः, त्रि, (कुलं आधीनतया प्राधान्यतया वा अस्त्यस्य । इति ठन् ।) शिल्पिकुलप्रधानः । इत्यमरः । २ । १० । ५ ॥ कुलश्रेष्ठः इति मेदिनी ॥

कुलिकः, पुं, अष्टमहानागान्तर्गतनागविशेषः ।
(यथा, भागवते । ५ । २४ । ३१ ।
"ततोऽधस्तात् पाताले नागलोकपतयो वासुकिप्रमुखाः शङ्खकुलिकमहाशङ्खश्वेतधनञ्जयधृतराष्ट्र शङ्खचूडकम्बलाश्वतरदेवदत्तादयो महाभोगिनो महामर्षा निवसन्ति" ॥
अस्य लक्षणमुक्तं पैङ्गले यथा ।
"कुलिकोऽर्द्धचन्द्रमौलिर्ज्वालाधूमसमप्रभः" ॥)
कण्टकविशेषः । इति मेदिनी । वैंचिका इति भाषा ॥

कुलिकवेला, स्त्री, रव्यादिवारेषु क्रमशस्तु निषिद्ध-कालविशेषः । यथा । रवौ सप्तमयामार्द्धम् सोमे षष्ठयामार्द्धम् । मङ्गले पञ्चमयामार्द्धम् । बुधे चतुर्थयामार्द्धम् । गुरौ तृतीययामार्द्धम् शुक्रे द्वितीययामार्द्धम् । शनौ प्रथमयामार्द्धम् । राघवभट्टमते तु पूर्व्वोक्तयामार्द्धानां द्वितीय भागः । रात्रौ प्रथमभागः । इति ज्योतिस्तत्त्वम् ॥

कुलिङ्गः, पुं, (कौ पृथिव्यां लिङ्गति गच्छतीति । कु + लिगि + अच् + इदित्वात् नुम् । यद्वा कुत्सितं शब्दरूपं लिङ्गं यस्य ।) पक्षिविशेषः । फिङ्गा इति भाषा । तत्पर्य्यायः । कलिङ्गः २ धूम्याटः ३ भिङ्गकः ४ । इति शब्दमाला ॥ भृङ्गः ५ । इत्यमरः ॥ अस्य मांसगुणाः । मधुरत्वम् । स्निग्धत्वम् । कफपित्तकारित्वञ्च । इति राजवल्लभः ॥

कुलिङ्गकः, पुं, (कुलिङ्ग + स्वार्थे कन् ।) चटकपक्षी । इति हेमचन्द्रः ॥

कुलिङ्गाक्षी, स्त्री, (कुलिङ्गस्य अक्षिवत् पर्णं यस्य ।) पेटिकालता । इति रत्नमाला । पेटारी इति भाषा ॥

कुलिङ्गी, स्त्री, (कुलिङ्ग + स्त्रियां गौरादित्वात् ङीष् ।) कर्कटशृङ्गीवृक्षः । इति रत्नमाला ॥

कुलिरः, पुं, (कुल् + बाहुलकात् इरन् किच्च ।) कर्कटः । इति शब्दरत्नावली ॥

कुलिशः स्त्री,पुं, (कुलौ हस्ते शेते अवतिष्ठते । कुल + शी + डः । यद्वा कुलिनः पर्व्वतान् श्यति दारयतीति । शो + डः । "आतोऽनुपसर्गे कः" । ३ । २ । ३ । इति को वा ।) वज्रम् । इत्यमरभरतौ ॥
(यथा, कुमारे । २ । २० ।
"कुण्ठोऽपि पद्मच्छिदि स्वप्रभा
वरेण्यनाथ कुलिशस्य भासाम्" ॥
कु ईषत् कुत्सितं वा शिशति । कु + शिश अल्पीभावे गतौ च + कः ।) मत्स्यविशेषः । तत्पर्य्यायः । वज्रकाष्ठीव २ । इति त्रिकाण्डशेषः ॥
(यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"तिमितिमिङ्गिलकुलिशपाकमत्स्यनिरालकनन्दिवारलमकरगर्गरकचन्द्रकमहामीनराजीवप्रभृतयः सामुद्राः" ॥ कौ भूमौ शिशति अल्पीभवति कुभूमि शिशति गच्छति क्रमतया प्राप्नोति वा ।) अस्थिसंहारवृक्षः । इति रत्नमाला ॥

कुलिशनायकः, पुं, (कुलिशवत् नायको यस्मिन् ।) रतिबन्धविशेषः । तस्य लक्षणम् ।
"स्त्रीपादद्वयमाकृष्य विस्तृतमुक्तौ लिङ्गञ्च ।
योनिञ्च पीडयेत् कामी बन्धः कुलिशनायकः" ॥
इति रतिमञ्जरी ॥

कुलिशाङ्कुशा, स्त्री, (कुलिशेनाङ्कुशेन चैव चिह्नमते करो यथा । यद्वा कुलिशवत् दृढमङ्कुशं यस्याः ।) बौद्धानां विद्यादेवीविशेषः । इति हेमचन्द्रः ॥

कुलिशासनः, पुं (कुलिशं वज्रं तद्वत् दृढमासनमस्य ।) शाक्यमुनिः । इति त्रिकाण्डशेषः ॥

कुली, स्त्री, (कुलि + कृदिकारादक्तिनः वा ङीष् ।) कण्टकारी । इत्यमरः । २ । ४ । ९३ ॥ पत्नीज्येष्ठभगिनी । इति हेमचन्द्रः ॥ बृहती । इति राजनिर्घण्टः ॥

कुलीनः, पुं, (कुले महाकुले जातः । "कुलात् खः" । ४ । १ । १३९ । इति खः ।) अश्वरोटकः । तत्पर्य्यायः । आजानेयः २ । इत्यमरः । अश्वभेदः ३ । इति तट्टीका । आजानेयः ४ आर्यः ५ वाजाश्वः ६ । इति शब्दरत्नावली ॥ (तत्र शाखोटकपादपतले स्थितः कौशः ।) उत्तमकुलोद्भवे, त्रि । तत्पर्य्यायः । महाकुलः १ आर्य्यः २ सभ्यः ३ सज्जनः ४ साधुः ५ । इत्यमरः । २ । ७ । ३ ॥ अथाधुनिककुलीनलक्षणम् । कुल उत्कर्षविशेषवाचकः । इति सङ्केतम् । अथवा अर्थं तस्यापत्यमित्यर्थे कुलशब्दादीनप्रत्ययेन कुलीन इति पदसिद्धिरिति केचित् । अर्थात् कुलीनशब्देन उत्कर्षविशेषवत्प्रजातजनस्यैवेति । तथा च कथ्यम् । उत्कर्षविशेषयोगाविच्छिन्नप्रवाह काले सति तद्वत्त्वं कुलीनत्वमिति । उत्कर्षविशेषस्तु नवधा गुणाः । ते च यथा ।
"आचारो विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् ।
निष्ठाऽऽवृत्तिस्तपो दानं नवधा कुललक्षणम्" ॥
अत एव उत्कर्षविशेषाक्रान्तनवधागुणविशिष्टत्व कुलीनत्वम् । अतएव इदानीं साधारणजनानाम् यदि नवधा गुणाः वर्त्तन्ते तदा तेऽपि कुलीनाः स्युरिति । अथवच्छिन्नपर्य्यायेन कुलीनत्वम् प्रमाणं यथा,—
"तपस्यार्थं समायाता दानग्रहणमुत्तमम् ।
कन्याऽभावे कुलध्वंसः प्रतिज्ञा वा परस्परम्" ॥
तथा च ।
"कुलीनस्य सुतां लब्ध्वा कुलीनाय सुतां ददौ ।
पर्य्यायक्रमतश्चैव स एव कुलदीपकः" ॥
तथा च ।
"आदानञ्च प्रदानञ्च कुशत्यागस्तथैव च ।
प्रतिज्ञा घटकाग्रे च कुलकर्म्म चतुर्विधम्" ॥
इति कुलदीपिका ॥ * ॥ अथ बल्लालसेनराजकृता पञ्चगोत्रवराढीयब्राह्मणानां ग्रामविशिष्टमुख्य गौणभेदेन द्वात्रिंशत्कुलीना यथा । शाण्डिल्य गोत्रे भट्टनारायणवंश्य आदिवराहबन्द्यो च मुख्यः । रामवटुक निपकोसाखोषी गुँडी कुसमी बटु दिर्घाटिः वैकुण्ठपारिहालाः एते पञ्च गौणाः । काश्यपगोत्रे दक्षवंशज चट्टोपाध्यायो मुख्यः । अम्बुज धीरगुडः कामदीर्घसङ्गी एते षट् गौणाः । भरद्वाजगोत्रे श्रीहर्षवंशज मुखुटीत च मुख्यः । डिनायकडिण्डीसाधी प्रभ-अराधी एतौ द्वौ गौणौ । वात्स्यगोत्रे वेदगर्भ वंशज घोषलपाकडी एष घोषालमुख्यः एतौ द्वौ मुख्यौ । वीरधुरन्धरकोटेश्वरः एष गौणः । सावर्णगोत्रे छान्दडवंशज गाङ्गुलिभट्टाचार्यः पण्डिताग्निशाखा दधिपूतिकाद्यः एते मुख्याः । भाग्वोटसिद्धौ पतिताशुभवङ्गिदा शममाधिनिम्बर्णी एते गौणाः । अधुना वर्त्तमाने मुख्या अष्टौ कुलीना गौणा चतुर्दशकोटिकाः । अन्येऽपि पञ्चगोत्रजाताः सन्ति । ततो बल्लालसेनेन मुख्यकुलीनो न निर्द्धारितास्ते कुलीनत्वं कृतम् । अत एतेषां मतानुसारेण देवीवरेण

पुत्रिया खड्दहबल्लवीसर्व्वानन्दी इत्याद्याः षट् त्रिंशन्मेलाः कृताः। ततो मानयूथपाख इति तिष्ठः संज्ञा जाता कुलाचार्य्यग्रन्थात् ज्ञेया ॥ *॥

अथ वारेन्द्रब्राह्मणकुलीनाः।

"आदौ मैत्रस्ततो भीमो रुद्रः सन्यामिनिस्तथा। लाहिड़िर्भादुड़िः साधुभादड़ाः पञ्चपूरकाः" ॥

एषां भावादोषदर्शनात् कुलाचार्य्येण अष्टौ पटी इति संज्ञा कृता। तद्यथा। निरावित्रा १ रोहिला २ भूषा ३ आलडाणी ४ कुतमछाणी ५ बेणी ६ बोनारी ७ भवानीपुर ८। एतेषां कुलाधातात् काप इति संज्ञा जाता ॥ *॥

अथ वैद्यजातिकुलीनाः।

धन्वन्तरिगोत्रे विनायकसेन। मौद्गल्यगोत्रे षस्य दासः। काश्यपे आयुगुप्तः। वल्लालसेनेनैषां कुल महामध्यमकनिष्ठकुलभेदेन त्रिधा कृतम्। तत्र महाकुलीनाः पञ्च। यथा। कृष्णसेनखान १ हरि हरसेनखान २ षष्ठीवरदासः ३ गणपतिदासः ४ दुर्गादासः ५। अधुनैषां कुलस्य ह्रासवृद्धि भङ्गा न सन्ति ॥ *॥

अथ दक्षिणराढीयकायस्थकुलीनाः।

तस्मादिशूरराजेन कान्यकुब्जदेशादानीतैर्ब्राह्मणैः पञ्चभिः सह घोषवसुमित्रदत्तगुहाः पञ्चागताः आदिकुलीनाः यथा। सौकालीनगोत्रे मकरन्द घोष १। गौतमे दशरथवसुः २। विश्वामित्रे कालिदासमित्र ३। काश्यपगोत्रे दशरथगुहः आवङ्गदेशसमाश्रितो वङ्गे गतः ४। भरद्वाज गोत्रे पुरुषोत्तमदत्त चित्तयशीनतो निष्कुल ५। पञ्चकुलाचार्य्यग्रन्थे स एव मौद्गल्यगोत्रः ॥ *॥

अथ वल्लालसेनकृतसमाजादय।

तस्याधस्य यष्ठपुरुषयोर्निशापतिप्रभाकरघोष योर्वासस्थाने क्रमेण बालीआकनास्यौ ग्रामौ। द्वितीयस्य पञ्चमपुरुषयोः शक्तिमुक्तिवसोर्वासस्थाने क्रमेण बागाण्डमाहिनगराख्यौ ग्रामौ। तृतीय स्याष्टमपुरुषयोः धुंइ गुंइ मित्रयोर्वासस्थाने क्रमेण बड़िशाटेकाभामग्रामौ। अपरेषुत्तरस्य समाजास्तुपगतौ कुलाभावात् न लिखिता ॥ *॥ तेषां कुलन्तु नवविधम्। मुख्य १। कनिष्ठ २ छभाया ३ मध्यांश ४ तेषोज ५ एतानि प्रधा नानि। कनिष्ठद्वितीयपुत्र ६ छभायाद्वितीयपुत्र ७ मध्यांशद्वितीयपुत्र ८ तेषोजद्वितीयपुत्र इति च ९। नवरङ्गकुलीनास छभायाद्यज्येष्ठपुत्रस्य मध्यमेष्ठ इति संज्ञा जाता ॥ *॥

अथ कुलानां विवरणम्।

मुख्यकुलीनस्य प्रथमपुत्रः पितृतुल्यः द्वितीयः कनिष्ठनामकुलविशिष्टः तृतीयो मध्यांशनामकुल युक्तः चतुर्थः तेषोजनामकुलान्वितः पञ्चमादियाव त्पुत्राः मध्यांशद्वितीयपुत्रनामकुलयुक्ता भवन्ति। कनिष्ठकुलीनस्य ज्येष्ठपुत्रः छभायानामकुलयुक्तः तस्य ज्येष्ठपुत्रः मध्यमेष्ठनामकुलयुक्तः तस्य ज्येष्ठ पुत्रः मध्यांशनामकुलविशिष्टः स एव अपरेण मध्यमरभायामध्यांश इति व्यवहारमुच्छ ॥ *॥ एवां सम्बन्धा दृश्यन्ता। मुख्यकुलीनस्य द्वितीय तृतीयपुत्रयोः कुलस्य वाड़िमुख्य इति संज्ञा चतुर्थपञ्चमषष्ठपुत्राणां कुलस्य वाड़िकनिष्ठ इति संज्ञा सप्तमाष्टमनवमपुत्राणां कुलस्य वाड़िम ध्यांश इति संज्ञा दशमैकादशद्वादशपुत्राणां कुलस्य वाड़ितेषोज इति संज्ञा भवति। कनिष्ठ नामकुलीनस्य द्वितीयपुत्रस्य कुलस्य तेषोज इति संज्ञा भवति। मुख्यकुलीनस्य तृतीयपुत्रस्य द्वितीयपुत्रस्य कुलस्य तेषोज इति संज्ञा। मध्यां शद्वितीयपुत्र इति यत्र कुल मुख्यकनिष्ठछभाया मध्यमेष्ठमध्यांश इति कुलपञ्चकाय भवति ॥ *॥ मुख्यकुलन्तु त्रिविधं यथा। प्रकृतम् १ सहजम् २ कोमलम् ३। आदौ षट्समाजे षट् प्रकृतमुख्या अभूवन्। ततस्तेषां द्वितीयतृतीयपुत्रयोः कुलस्य संज्ञा क्रमेण सहजकोमल इति संज्ञा जाता। प्रकृतमुख्यकुले दानग्रहणाभ्यां सहज इति संज्ञा कोमलमुख्यकुले दानग्रहणाभ्यां कोमल इति संज्ञा भवति। सहजः सहजेन कोमलः कोमले नापि कुलं कृत्वा तत्तद्भावापन्नौ भवतः। पितृकु लानुसारेण ज्येष्ठपुत्राणां कुलस्य जन्ममुख्यजन्म कनिष्ठादिसंज्ञा ॥ *॥ प्रकृतमुख्यकुलस्य ह्रास वृद्धी न भवतः। सहजमुख्यकुलस्य ह्रासवृद्धी भवतः। कोमलमुख्यकुलस्यापि ह्रासवृद्धी न भवतः। कनिष्ठकुलस्य मुख्यत्वं छभायाकुलस्य कनिष्ठत्वं भवति। मध्यांशकुलस्य स्थिरतरत्वम्। कनिष्ठद्वितीयपुत्रः वाड़ितेषोज इति संज्ञां प्राप्नोति। मुख्यतृतीयपुत्रस्य द्वितीयपुत्रः तेषोज इति संज्ञामपि प्राप्तुमर्हति। छभायाद्वितीयपुत्र मध्यांशद्वितीयपुत्रयोः कुले ह्रासवृद्धी न स्तः। सर्व्वे कुलीनाः कुलनाशात् वंशजभावापन्ना भवन्ति ॥ *॥ आदौ यदि पितृपर्य्यायाय अथवा मौलिकाय कन्यां दद्यात् तद्दान प्रमादिकसंज्ञं भवति। पश्चात् कुलकर्मीकरणम्। तद्यथा। मुख्यस्य कन्यायाः प्रदाने तस्याः छिद्र संज्ञा यावत् कन्यावधि गरच्छेद इति संज्ञा भवति। अन्य कुलानां ज्येष्ठकन्यायाः प्रदाने तस्या आकृतिरिति संज्ञा तदनन्तर यावत्कन्यानां प्रदाने तासां क्रमेण प्रतिसारश्री अथवा इति संज्ञादय भवति ॥ आत्मसमकुलीनाय आकृतिनामकन्यादाने कुलस्य श्रेष्ठत्वम्। अनुरूपकन्याग्रहणे तु कुलह्रासो भवति। मुख्यस्य गरच्छेद इति नाम्नी कन्या अन्यकुलीनस्य प्रतिसारश्रीव कन्या मौलिको यद्यप्य गृह्णीतु भवति। उत्तममध्यमाधमकर्म्मभिः मौर्य्यसमा वेशनिन्दा इति सर्व्वं कुलग्रन्थमर्म्मं ॥ *॥ पूर्व्वं विपर्य्यये विवाहो जातः। पुरन्दरवसुनैषां बहो दयश्रयादावधिमेलीपर्य्यायदशमसमकुलीनत्वे इति। यथा।

"विपर्य्यये कुलं नास्ति न कुलं दशमिच्छतो" ॥ *॥

अथ मुख्येतरकुलीनानां नामिनोरावा।

"देवी नन्दा तथा गौरी भैरवी भास्वती तथा।
कराली चन्द्रिरानी च कीर्त्ते कुलकन्यका॥
अपि च।
"कोलाको कौमरी चित्तरानी शङ्कर दत्त च।
कन्दर्पी च सदानन्दी बङ्केते कुलकन्यका" ॥

इति कुलाचार्य्यकारिका ॥ *॥

अथ मुख्यकुलीनस्य कार्य्यम्। स च आत्मेष्ट अपरादिमां कन्यां आत्मतुल्याय द्वितीयां कनि ष्ठकुलीनाय तृतीयां छभायानामकुलयुक्ताय चतुर्थीं मध्यमेष्ठनामकुलविशिष्टाय अथवा मुख्यतृतीय पुत्रमध्यांशकुलीनाय पञ्चमीं तेषोजनामकुल युक्ताय दद्यात्। तदनन्तरजातानां गरच्छेद इति संज्ञा ता मौलिकमध्यांशद्वितीयपुत्रमुख्यकुली नेभ्यो दातुमर्हति। स एवादौ मुख्यकुलीनस्या दिमां कन्यां ततः कनिष्ठकुलीनस्य कन्यां ततो मध्यांश इति नामकुलयुक्तस्य कन्यां ततो ऽन्य तेषोज इतिनामकुलविशिष्टस्य कन्यां गृह्णी यात् ॥ *॥ अथ कनिष्ठकुलीनस्य कार्य्यम्। स प्रथमां कन्यां आत्मतुल्यकुलीनाय द्वितीयां तेषोज इति नामकुलयुक्ताय दद्यात्। मुख्यतृती यपुत्राय मध्यांशनामकुलयुक्ताय अथवा मुख्य द्वितीयपुत्राय कन्यां दातुमर्हति। मुख्यकुलीनस्य द्वितीयां कन्यां अथवा कनिष्ठकुलीनस्य प्रथमां गृह्णीयात्। ततो मुख्यकुलीनस्य तृतीयपुत्रस्य मध्यांशनामकुलयुक्तस्य कन्यां गृह्णीयात् ॥ *॥ अथ छभायाकुलीनस्य कार्य्यम्। स मध्यांशनाम कुलविशिष्टाय प्रथमां कन्यां मध्यांश इतिकुल युक्तानुजाय अथवा वाड़ितेषोजनामकुलविशि ष्टाय द्वितीयां दद्यात्। मुख्यकुलीनस्य तृतीय कन्यां अथवा कनिष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात् ॥ *॥ अथ मुख्यतृतीयपुत्रस्य मध्यां शनामकुलीनस्य कार्य्यम्। स प्रथमकन्यां अन्यतेषोजनामकुलविशिष्टाय द्वितीयां मध्यांशकुल विशिष्टस्य द्वितीयपुत्राय दद्यात्। कनिष्ठस्य प्रथमां कन्यां तन्मतेषोजकुलयुक्तस्य प्रथमां कन्यां तन्मतेषोजानुजकुलीनस्य प्रथमां कन्यां गृह्णीयात् मुख्यस्य तृतीयकन्यायाश्च तस्य गरच्छेद मर्म्मं ॥ *॥ अथ अन्यतेषोजनामकुलीनस्य कार्य्यम्। स प्रथमां कन्यां मुख्यकुलीनस्य चतुर्थपुत्राय अथवा मध्यांशनामकुलविशिष्टस्य द्वितीयपुत्राय द्वितीयां तेषोजनामकुलविशिष्टस्य द्वितीयपुत्राय दद्यात्। मुख्यकुलीनस्य पञ्चमकन्यां अथवा मध्यांशनामकु लीनस्य प्रथमकन्यां गृह्णीयात् ॥ *॥ अथ कनिष्ठ- कुलीनस्य द्वितीयपुत्रस्य कार्य्यम्। स आत्म तुल्याय अथवा तेषोजनामकुलविशिष्टद्वितीय पुत्राय प्रथमां कन्यां दद्यात्। मुख्यचतुर्थपुत्र अन्यतेषोजनामकुलयुक्तस्य प्रथमां अथवा कनि ष्ठनामकुलीनस्य द्वितीयां कन्यां गृह्णीयात् ॥ *॥ अथ छभायानामकुलीनस्य द्वितीयपुत्रस्य कार्य्यम्। स आत्मतुल्याय अथवा तेषोजनामकुलविशिष्ट द्वितीयपुत्राय प्रथमां कन्यां दद्यात्। तेषोज- नामकुलविशिष्टस्य प्रथमां कन्यां अथवा छभाया- नामकुलयुक्तस्य द्वितीयां गृह्णीयात् ॥ *॥ अथ मध्यांशनामकुलीनस्य द्वितीयपुत्रस्य कार्य्यम्। स आत्मतुल्याय अथवा तेषोजनामकुलविशिष्ट द्वितीयपुत्राय प्रथमां कन्यां दद्यात्। तेषोज

नामकुलविशिष्टस्य प्रथमां अथवा अन्यकुलीनानां मध्यांशनामकुलविशिष्टस्य वा द्वितीयां कन्यां गृह्णीयात् ॥ * ॥ अथ तेषोजनामकुलीनस्य द्वितीयपुत्रस्य कार्य्यम् । स आत्मतुल्याय अथवा वंशजाय प्रथमां कन्यां दद्यात् । मध्यांशनामकुलविशिष्टस्य द्वितीयपुत्रस्य प्रथमां कन्यां अथवा तेषोजनामकुलविशिष्टस्य द्वितीयां गृह्णीयात् ॥ * ॥ अथ मध्यमेष्ठनामकुलीनस्य कार्य्यम् । स मध्यमेष्ठपुत्रवारमायामध्यांशनामकुलीनाय प्रथमां मध्यांशकुलविशिष्टस्य द्वितीयपुत्राय तेषोजनामकुलीनाय द्वितीयां कन्यां दद्यात् । मुख्यकुलीनस्य चतुर्थीं कन्यां अथवा कनिष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात् । तत्र तेषोजनामकुलविशिष्टस्य प्रथमां कन्यां गृह्णीयात् । ततः तेषोजनामकुलीनस्य अधिमां कन्यां गृह्णीयात् ॥ * ॥ अथ मध्यमेष्ठपुत्रवारमायामध्यांशनामकुलीनस्य कार्य्यम् । स तेषोजनामकुलपुत्राय प्रथमां कन्यां दद्यात् । कनिष्ठकुलविशिष्टस्य अथवा कुभायानामकुलजातस्य किंवा मध्यमेष्ठकुलीनस्य प्रथमां कन्यां गृह्णीयात् ॥ * ॥ अथ चतुस्त्रिंशदधिकसप्तशताधिकशकाब्दे मतिना तावत्कुलीनकुलाचार्य्यमतेन मुख्यकुलीनस्य द्वितीयतृतीययोः कन्ययोः क्रमेण यथेष्टेन तदभावे श्रोत्रियकुले दानेन समानकुले यथेष्टेन च कनिष्ठकुभायानामकुलयोः पुत्रयोः पुत्रकन्याया स्थिरतरत्वं निर्णीतम् । तद्यथा,—

'कनिष्ठकुलेष्वपि प्रथम केऽपि केऽप्यपेक्षया परेऽपि पुत्रमथवाऽन्यनेन दोषेऽपि काम ।
निषेधमिह नेच्छते क्वापि तत्र गतूक्तजः सुत विदधत कथ जनन्तो हि न प्राप्नुयात् ॥
श्राद्धे प्रशस्तविशदवसुधातले वरेण्ये तदा पश्यति परिपूरिते हि विषमे धन्ये क्वचिद्वियुक्ते ।
गोपीमोहनदेवप्रतिकर्मेणापूर्वक कोमला नियति यदपीह तत्र घटके सर्वे कुलीनैर्मतम् ॥

कनिष्ठपक्षभावकुलस्य सदा
सप्तदिशायामिन्येव मुख्यम् ।
आदानत पितृपदस्य भावो
कुलेऽजलभावः पुत्रकस्य ॥

षष्ठिकायाम्भास्य दानयेत् प्रथमं भवेत् ।
पञ्चमस्य समानस्य सद्भावादपि तिष्ठति ॥
श्रोत्रिये भिन्ना समानेऽप्यधिकोऽप्यत्र कुलस्य वै तस्य भङ्गो न हि भवेद्यक्तो रक्षित च हि ॥
अत्र तदन्यथाभावो भवेदपि यथाविधि ।
समानेन यदि तदा चाविर्भविष्यति ॥

सर्वे कुलेषु कुलीनवर्गे
गोष्ठीपतीनां पुरतः सदैव ।
इदं हि तत्र विधिनं तथात्
निर्णीत मम प्रबलमिष्यतीति" ॥ * ॥

अथ वङ्गकुलीनाः ।

'बल्लालं च मुनी द्वौ नाना गङ्गापूर्वकौ ।
घोषेषु च समानानत्र पुत्रगणशालिनी ॥
दशमो गुहश्चैव मित्रन्यायातिष्ठताः" ॥
एतेषामादिपुरुषविकल्पो ददा । गौतमगोत्रे सर्व्वादौ दशरथवसुदशौ काश्यपगोत्रे मकरवसुकौ काश्यपसरदक्षिणराढ़े ख्यातस्तस्य सुत मकवसुस्तत्सुतः कुशवसुस्तत्सुता मुक्तिमुक्तश्रृङ्गारवसुकाः । श्रृङ्गारवसुः राढ़ात् वङ्गे गतः तस्य वङ्गे कुलशालिनीता तस्य सुतः मधुवसुः तत्सुतः गुणाकरवसुः तत्सुता अननादयः । दशरथसुतः परमवसुस्तत्सुतौ काश्यपस्वसुपूर्णवसुकौ वङ्गे ख्यातौ । सौकालीनगोत्रे मकरन्दघोषसुतौ भवनाथघोष-समाधिवधोषौ भवनाथघोषो दक्षिणराढ़े ख्यातः समाधितघोषो वङ्गे ख्यातः तस्य सुतचतुर्भुजघोष । विश्वामित्रगोत्रे सर्व्वादौ कालिदासमित्रसुतौ अश्वपतिमित्रश्रीधरमित्रौ श्रीधरमित्रो दक्षिणराढ़े ख्यात अश्वपतिमित्रो वङ्गे ख्यातस्तस्य सुतधारापतिमित्र" । इति वङ्गकुलाचार्य्यग्रन्था कुलदीपिका ॥

कुलीनकः, पुं, (कुलीन + सञ्ज्ञायां कन् ।) वनमुद्गः । इति हेमचन्द्रः ॥

कुलीनसं, क्ली, (कौ लीनं भूलग्नं मत्स्यादिकं स्यतीति । सो + कः ।) जलम् । इति हेमचन्द्रः ॥

कुलीरः, पुं, (कुल् सम्स्त्याने + ईरन् किच्च ।) कर्कटः । इत्यमरः । १ । १० । २१ ॥ काँकड़ा इति भाषा । ("अथ कुलीरप्रभृतयो जलजन्तवस्तन्मध्ये पेयं प्रोक्तः" । इति द्विवीपद्मः ॥) कर्कटराशिः इति ज्योतिषम् ॥

कुलीरशृङ्गी स्त्री, (कुलीरावयव इव शृङ्गं यस्याः । कुलीरशृङ्ग + गौरादित्वात् ङीष् ।) कर्कटशृङ्गी । इति रत्नमाला ॥

कुलीराद् [द्] पुं, (कुलीरं अत्तीति । अद् + क्विप् । उत्पत्तिमात्रेणैवात्मप्रसूतिभक्षणादस्य तथात्वम् ।) कर्कटशिशुः । तत्पर्य्यायः । स्यात् २ । इति त्रिकाण्डशेषः ॥

कुलीशं, पुं क्ली, (कुलिश + पृषोदरादात् दीर्घः ।) कुलिशम् । इत्यमरटीकायां रायमुकुटः ॥

कुलुक, क्ली, (कुल् + बाहुलकात् उकञ् किच्च निपातनाय कस्य वा ।) जिह्वामलम् । इति हेमचन्द्रः ॥

कुलुञ्जगुञ्जा, स्त्री, (कौ भूमौ गुञ्जा गुञ्जा गुञ्जा इव ।) उल्कादि । इति हारावली ॥

कुलेश्वरः, पुं, (कुलस्य जगन्मनुष्यस्य कुलधर्मस्य वा ईश्वरः ।) शिवः । (कुलस्य वंशस्य ईश्वरः नेता भर्त्ता वा ।) कुलपतिः । इति शब्दमाला ॥

कुलोत्कटः पुं (कुले कुलेन वा उत्कटः उन्नितः उच्चो वा ।) कुलीनाश्वः । इति शब्दचन्द्रिका ॥ उत्कट कुलोद्भूते त्रि ।

कुल्माषः, पुं क्ली, (कल संख्याने "कलिस्तलिभ्यां मा स्वच" । उणां ५ । ९६ । इति कल धातोः उप ।) यावः । इत्ते पुं इत्यन्ये शब्दकोषः । (यथा, छान्दोग्ये १ । १० । २ । "इतिहाससमृद्धमिवः स इन कुल्माषान् खादन्तं विभिक्षे" ।)

कुल्माष क्ली (कुल् मिश्रणे "कुलेश्च" । उणां ३ । १७७ । इति कल्पम् क्षकस्य ।) कान्तम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । (यथा ऋग्वेदे २ । १० । २ । "तत्र मे गच्छतादथ हल्य इव कुल्माष यथा" ।)

कुल्माषं, स्त्री, (कोलतीति । कुल् + क्विप् । ततः कुलं माशमिव्यक्तजलं ज्ञापयति । मर्षन्तं परिमाणे + अण् पृषोदरात् सत्वम् ।) काञ्जिकम् । इत्यमरः । २ । ९ । ३८ ॥

कुल्माषः, पुं, (कोलति इति । कुल + क्विप् । कुलं कलत्रिमो माषोऽस्मिन् ।) यावकः । इत्यमरः । २ । ८ । १८ ॥

(यथा, सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"कुल्माषा वातला रूक्षा गुरवो भिन्नवर्च्चसः" ।)
बोरवधान्यम् । कुलत्थ इत्यन्ये । माषाहविषम् । काश्मीरेषु कुलत्थी इति ख्याता इति सुभूतिः । इति भरत । रात्रमाष इत्यन्ये । इति भरतचन्द्रः । माषादिभिरर्द्धसिद्धमाषम् । खिचड़ी इति ख्यातम् । इति सिद्धान्तिसर्वटीकायां भरत । वाचितमाषादिरिति भीमः । इति सारसुन्दरी । अर्द्धसिद्धगोधूमचणकादयः । (यथा शब्दार्थचिन्तामणौ ।
"अर्द्धस्विन्नाश्च गोधूमा अन्येऽपि चणकादयः ।
कुल्माषा इति कथ्यन्ते शब्दशास्त्रेषु पण्डितैः" ।)
अस्य गुणाः । गुरुत्वम् । रूक्षत्वम् । वातकारित्वम् । भग्नभेदित्वञ्च । इति भावप्रकाशः । रोगविशेष । इति शब्दरत्नावली । वनमुद्गः । इति रत्नमाला ॥

कुल्माषाभिषुतं, क्ली, (कुल्माषैर्यवादिभिरर्द्धसिद्धैरभिषूयते स्म इति । अभि + सु + क्त ।) काञ्जिकम् । इत्यमरटीकायां स्वामी ॥

कुल्माषं, क्ली, (कोलतीति कुल् माषमिवाव्यक्तम् । तत् मस्यति परिणामयतीति अण् ।) कुल्माषम् । इत्यमरटीकायां भरतः ॥

कुल्या, स्त्री, (कुल बन्धे + क्यप् ।) अस्थि । इत्यमरः । २ । ६ । ४८ ॥ अष्टद्रोणपरिमाणम् । धर्मः । आमिषम् । इति मेदिनी ॥

कुल्यः, त्रि, (कुलस्यापत्यम् । "अपूर्वपदादन्यतरस्यां यड्ढकञौ" । ४ । १ । १४० । इति यत् । यद्वा कुले भवः कुलाय हितः कुले भाषा वा दिगादित्वात् तत्र साधुरिति वा यत् ।) कुलोद्भवः । कुलहितः । (यथा, भागवते ७ । ६ । १६ ।
"प्रहाण मनोचीवयरिन्यदाय कलीव कुल्याः कल्पयन्ती ।" ।)
मान्ये पुं इति । मेदिनी ॥

कुल्या स्त्री (कुल प्राप्तियते वाग्लाय ताय दिति यत् ।) कृत्रिमा सरित् नदी । इत्यमरः । १ । १० । ३४ ॥ (यथा, माघकाव्ये ६ सर्गे ।
"कुल्याम्भोभिः पवनचपलैः शालिनो धौतमूलाः" ।)
कन्दप्रणाली । पयनाला इति भाषा । भैरवीजीवन्ति । जलमार्गम् । इति मेदिनी ॥
(यथा महाभारते १ पर्व्वणि ।
"देवदारुवनाद्वापी कुल्यानां कुल रक्षकम्" ।)
कुलस्त्री । इति धरणिः । कुलयोषित् । इति रत्नमाला ॥

कुवल, क्ली, (कौ पृथिव्यां वलते मधुरकषायगुण्यावय वेन संवृणोतीव । वल संवरणे अन्येभ्योऽपीति ड । यद्वा कु भूमिं वाति । कु+वा+क ।) उत्पलम् । जलमध्यमानम् । इति हेमचन्द्रः ।

कुवलालुका, स्त्री, (कुवमिव कायते प्रकाशते । कुव+कै+कः । कुवका आलुका इव ।) घोषी शाकम् । इति राजनिर्घण्टः ।

कुवङ्ग, क्ली, (कुत्सितं वङ्गमिव गुणे ।) सीसकम् । इति राजनिर्घण्टः ।

कुवच, त्रि, (कुत्सितं वचो यस्य ।) कुवादः । पर दोषकथनशीलः । इत्यमरः ।

कुवचक, स्त्री, (कु ईषत् वचा चीरकमिव कायते । कै+कः ।) वैक्रान्तमणिः । इति राजनिर्घण्टः ।

कुवर, पुं, (कुत्सितं यथा स्यात् तथा व्रियते । वृ + अप् । यद्वा कुत्सितं रसं वृणोति गृह्णाति । कु + वृ+अच् ।) तुवरः । इत्यमरटीकायां रायमुकुटः ।

कुवल, क्ली, (कौ वलते । वल+पचाद्यच् ।) उत्पलम् । मुक्ताफलम् । बदरीफलम् । इति मेदिनी ।

कुवलय, क्ली, (कौ पृथिव्या भूमेर्वा वलयमिव शोभा कारकत्वात् ।) उत्पलम् । इत्यमरः । १ । १० । ३७ । नीलोत्पलम् । इति राजनिर्घण्टः ।

(यथा,—मेघदूते ४६ ।

"ज्योतिर्लेखावलयिगलितं यस्य बर्हं भवानी ।

पुत्रप्रेम्णा कुवलयदलप्रापि कर्णे करोति" ।)

कुवलयापीड, पुं, (कुवलय उत्पलं तत् सम्यक् पीडयति । कुवलयं सर्वं भूवलयं आपीडयति वा आ +पीड्+अण् ।) कंसस्य हस्तिरूपो दैत्य विशेषः । इति श्रीभागवतम् । (यथा हरिवंशे १०५ । २६ २७ ।

"शकुनिं केशिनञ्चैव यमलार्जुनकावपि ।

नागं कुवलयापीडं चाणूरं मुष्टिकं तथा ।

कंसञ्च बलिनां श्रेष्ठं सगणं देवकीसुतः ।

निहत्य गोपवेशेन श्रीकृष्णमास केशव" ।

कुवलयं नीलोत्पलं आपीडः भूषणं यस्य इति व्युत्पत्त्या नीलोत्पलालङ्कृतो जनः ।)

कुवलयिनी, स्त्री, (कुवलयानां समूहः तत् समूहादि त्वात् इनिः । यद्वा कुवलयानि सन्त्यस्याः इति इनिः ङीप् ।) उत्पलिनी । इति राजनिर्घण्टः ।

कुवलाश्व, पुं, (कौ पृथिव्यां वलते विचरणसमर्थो भवति यद्वा कुं भूमिं पृथिवीं वा वलते आप्नोतीव । वल+अच् । कुवलः वेगगमनेन भूवलयव्यापकगमन शीलो अश्वो यस्य ।) धुन्धुमारराजः । इति हेम चन्द्रः । (यथा, विष्णुपुराणे ४ । २ । १२ । "अथ तस्य बृहदश्वस्यापि कुवलाश्वः योऽसावतुल्य महर्षेरुत्तङ्कस्य धुन्धुनामानमसुरं वैष्णवेन तेज साऽऽप्यायितः पुत्रसहस्रैरेकविंशतिभिः परिवृतो जघान धुन्धुमारसंज्ञामवाप च" । अन्यैव कुवल याश्व इति नामापि दिश्यते ।)

कुवली, स्त्री, (कुवल+स्त्रियां गौरादित्वात् ङीष् ।) कोलिवृक्षः । इति रत्नमाला ।

कुवाद, त्रि, (कुत्सितो वादः वाक्यं यस्य ।) कुवच । परदोषकथनशीलः । इत्यमरः । ३ । १ । ३७ ।

कुवाहल, पुं, (कुत्सितं वहतीति । कु+वह+ उलच् ।) उष्ट्रः । इति शब्दचन्द्रिका ।

कुविन्द, पुं, (कुत्सितं मसृणादिरहितवस्त्रादिकं कुवि तत्तया वा जीविकां विन्दतीति ।) तन्तुवायः । स तु शूद्रागर्भे विश्वकर्मणा जातः । इति ब्रह्म वैवर्त्तपुराणम् ।

कुवृत्तिकृत्, पुं, (कुवृत्तिं ईषदावरणरूपं वरणं करोति कुत्सितैः कण्टकादिभिर्वा वृत्तिं आव रणं करोति आत्मानमिति शेषः । कुवृत्ति+ कृ+क्विप् तुगागमश्च ।) पूतिकः । इति शब्द चन्द्रिका । काँटा करञ्ज इति भाषा । (कुत्सि तां वृत्तिं व्यवहारं करोतीति असद्व्यवहार कारी ।)

कुवेणी, स्त्री (कु ईषत् वेण्यो गच्छन्ति मत्स्या अस्याम् । कु+वेण्+इन् । ततः कृदिकारान्ता दिति वा ङीप् ।) मत्स्यधानी इत्यमरः । २ । १० । १६ । खालुइ इति भाषा । कुत्सिता वेणी यस्याः । निन्दितवेणी नारी च ।

कुवेर, पुं (कुत्सितं वेरं शरीरमस्य ।) तथा च वायु मार्कण्डेयपुराणे ।

"कुत्सायां क्विति शब्दोऽयं शरीरं वेरमुच्यते ।

कुवेरः कुशरीरत्वात् नाम्ना तेनैव सोऽङ्कितः" ।

इत्यमरटीकायां भरतः । देवताविशेषः । स तु विश्रवोमुनेरिडविडाभार्य्यायां जातः । धनपत्यो- त्तरदिशां पतिश्च । इति श्रीभागवतम् । शिव स्योऽष्टदिक्पालः । तत्पर्य्यायः । त्र्यम्बकसखः २ यक्षराट् ३ गुह्यकेश्वरः ४ मनुष्यधर्म्मा ५ धनदः ६ राजराजः ७ धनाधिपः ८ किन्नरेशः ९ वैश्र वणः १० पौलस्त्यः ११ नरवाहनः १२ यक्षः १३ एकपिङ्गः १४ ऐलविलः १५ श्रीदः १६ पुण्य जनेश्वरः १७ । इत्यमरः । १ । १ । ७१—७३ । यक्षः १८ धनकाधिपः १९ । इति जटाधरः ॥ * ॥ नन्दीवृक्षः । इति मेदिनी । षड्वृक्षपालशविशेषः । इति हेमचन्द्रः ।

कुवेर, त्रि, (कुत्सितं वेरं देहस्य रागादयो गति र्वा यस्य ।) मन्दः । इति धरणी । (कुत्सितं वेरं शरीरं यस्य ।) कुशरीरः । इति त्रिकाण्डशेषः ।

कुवेरक, पुं, (कुवेर+संज्ञायां कन् ।) नन्दीवृक्षः । इत्यमरः । २ । ४ । १२० ।

कुवेराक्षी, स्त्री, (कुवेरस्य अक्षीव पिङ्गलं पुष्प मस्याः ।) पाटलावृक्षः । इत्यमरः । २ । ४ । ५५ । लताकरञ्जः । सितपाटलिकावृक्षः । इति राज निर्घण्टः ।

कुवेराचल, पुं, (कुवेरस्य अचलः ।) कैलासपर्व्वतः । इति त्रिकाण्डशेषः ।

कुवेराद्रि, पुं, (कुवेरस्य अद्रिः पर्व्वतः ।) कैलास पर्व्वतः । इति जटाधरः ।

कुवेल, क्ली, (कुवेषु जलजपुष्पेषु मध्ये इः शोभां आदि ग्रहणातीति । ला+क ।) कुवलयम् । इति हेम चन्द्रः ।

कुश ई शि द्युतौ । इति कविकल्पद्रुमः । (चुरा० पक्षे भ्वा०-पर० सक० सेट् इदित् ।) कुंशयति । कुंशति । इति दुर्गादासः ।

कुश श इर् श्लिषि । आलिङ्गन इति यावत् । इति कविकल्पद्रुमः । (दिवा० पर०-सक० सेट् ।) श कुश्यति माला कान्तम् । इर्, अकुशत् अकोशीत् । अशकाव् पुषादित्वाद्विधेश्च इत्यन्ये । इति दुर्गादासः ।

कुश, क्ली पुं, (कु पापं श्यति नाशयति । कु+शो +कः । यद्वा कौ भूमौ शेते शाम्यते शोभते इत्यर्थः ।) स्वनामख्यातद्रव्यम् । तत्पर्य्यायः । कुथः २ दर्भः ३ पवित्रम् ४ । इत्यमरः । २ । ४ । १६६ । याज्ञिकः ५ कुशगर्भः ६ बर्हिः ७ कुतुपः ८ । इति शब्दरत्नावली । अपि च ।

"कुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः ।

ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च" ।

तस्योत्पत्तिर्यथा,—

"वर्हिष्मती नाम पुरी सर्व्वसम्पत्समन्विता ।

न्यपतन् यत्र रोमाणि यज्ञस्याङ्गं विधुन्वतः ।

कुशकाशास्त एवासन् शश्वद्धरितवर्च्चसः ।

ऋषयो यैः पराभाव्य यज्ञघ्नान् यज्ञमीजिरे" ।

इति श्रीभागवतम् । अस्य गुणाः ।

"दर्भद्वयं त्रिदोषघ्नं मधुरं तुवरं हिमम् ।

मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुक्प्रदरास्रजित्" ।

इति भावप्रकाशः ॥ * ॥ तस्य धारणविधिस्तत् प्रतिनिधिश्च यथा,—

"पूजाकाले सर्व्वदैव कुशहस्तो भवेच्छुचिः ।

कुशेन रहिता पूजा विफला कथिता मया ।

तत्त्वस्य रजतं धार्य्यं स्वर्णं धार्य्यमनामया ।

कुशकार्य्यकरं यस्मात् तु वन्याः कुशाः कुशाः ।

नास्त्यस्य रजतं स्वर्णं धार्य्यं हि निष्कमन्तुतः" ।

इति वरदातन्त्रे १ पटलः ॥ * ॥

अथवाचाकवदध्यगनिषेधो यथा,—

"न स्पृशेत्तिलदर्भांश्च सधवा तु कदाचन" ।

इति कूलाद्यवकृतमाधवसर्व्वस्वम् । अन्यत् दर्भ शब्दे द्रष्टव्यम् ।

कुशं, क्ली, (कौ पृथिव्यां भूमौ शेते । भूम्यगतात् तथात्वम् ।) जलम् । इति मेदिनी ।

कुश, पुं (कु पापं श्यति नाशयति विहितराजधर्म्म पालनेन । कु+शो+कः । अथवा कुशनिर्मितः यथा, रामायणे ।

"यस्तयोः पूर्व्वजो जातः स कुशैर्मन्त्रसंस्कृतैः ।

निर्म्मार्जनीयस्तु तदा कुश इत्यस्य नाम तत्" ।)

रामपुत्रः । (यथा, रघु १६ । ४० ।

"अथ कुमुद्वतीरेवाधिगम्य रामः

कुमाय राज्ञे कन्यां दिदेश ।

तस्याः श्रेयामरणं विभूषा

र्रक्षागतात् सचिवैर्मनस्वी" ।)

योक्त्रम् । इति मेदिनी । द्वापरोत्पन्नकौरवेषु दीप्यैकः । स तु ब्रह्मसुतेक्ष्वाकुः । अस्य देश विश्वकौशिकपुत्रः कुशनामोऽभूत् । (स च कुश सौर इति संज्ञया विख्यातः ।) तदधिप तिः ब्रह्मापुत्रो हिरण्यरेता महीपः विख्यातः

पुत्रेभ्यो दत्तवान्। तेषां नामानि यथा। वसु १ वसुदानः २ दृढरुचि ३ नाभिगुप्त ४ स्तुत्यव्रतः ५ विविक्तनामा ६ देवनामा ७। तथा वर्षेषु सप्त सीमागिरयः। यथा। चक्र १ चतुःशृङ्ग २ कपिल ३ चित्रकूट ४ देवानीक ५ ऊर्द्ध्वरोमा ६ द्रविण ७। सप्त नद्यश्च यथा। रसकुल्या १ मित्रविन्दा २ श्रुतविन्दा ३ देवगर्भा ४ घृतच्युता ५ मधु ६ माला ७। तत्र स्थिताः कुशलकोविदाभियुक्तकुलकसंज्ञाः क्रमेण ब्राह्मणक्षत्रियवैश्यशूद्राः भगवन्तमग्निरूपिणं यजन्ति नदीनां पयोभिर्यजन्ते। इति श्रीभागवतम्॥ (विष्णुपुराणे तु ज्योतिष्मानधिपते स्तत्पुत्राणां गिरीणां नदीनाञ्च नामान्तराणि दृश्यन्ते। यथा २। ४। ३६—४४।

"ज्योतिष्मतः कुशद्वीपे सप्त पुत्रा महात्मनः।
उद्भिदो वेणुमांश्चैव वैरथो लम्बनो धृतिः॥
प्रभाकरोऽथ कपिलस्तन्नामा वर्षपद्धतिः।
तस्मिन् वसन्ति मनुजाः सह दैतेयदानवैः॥
तथैव देवगन्धर्व्वयक्षकिम्पुरुषादयः।
वर्णास्तत्रापि चत्वारो निजानुष्ठानतत्पराः॥
दमिनः शुष्मिणः स्नेहा मन्देहाश्च महामुने।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चानुक्रमोदिताः॥
यथोक्तकर्म्मकर्त्तृत्वात् स्वाधिकारक्षयाय ते।
तत्रैव तं कुशद्वीपे ब्रह्मरूपं जनार्द्दनम्॥
यजन्तः क्षपयन्त्युग्रमधिकारफलप्रदम्।
विद्रुमो हेमशैलश्च द्युतिमान् पुष्पवांस्तथा॥
कुशेशयो हरिश्चैव सप्तमो मन्दराचलः।
वर्षाचलास्तु सप्तैते तत्र द्वीपे महामुने॥
नद्यस्तु सप्त तासान्तु शृणु नामान्यनुक्रमात्।
धूतपापा शिवा चैव पवित्रा सम्मतिस्तथा॥
विद्युदम्भा मही चान्या सर्व्वपापहरास्त्विमाः।
अन्याः सहस्रशस्तत्र क्षुद्रनद्यस्तथाचलाः॥
कुशद्वीपे कुशस्तम्बः संज्ञया तस्य तत् स्मृतम्।
तत्प्रमाणेन स द्वीपो घृतोदेन समावृतः॥")

कुशट, त्रि, (कु कुत्सिते कर्म्मणि पीठे अवतिष्ठते। कु+स्था+क।) पापिष्ठः। (कुत्सिते मदक्ष्मायां स्थिते इति।) मत्तः। इति मेदिनी॥

कुशण्डिका, स्त्री, (कुशैः कण्डिका इव। कुशकण्डिका पृषोदरात् वस्य लोपः।) सर्व्वहोमाधारभूता क्रियाविशेषः। तत्र सर्व्वेषामाकृतिदुर्ब्बोधत्वात् कुशण्डिकायाः पूर्व्वाभिधातृत्वात् सैव प्रथममभिधीयते। तत्र हस्तप्रमाणं चतुरस्रं स्थण्डिलं शर्कराङ्गारादिकेशतुषादिरहितं पूर्व्वोत्तरप्रवणं तत्र वा बालुकास्तरं रचयित्वा गोमयेनोपलिप्य जलेन कुशैः कुशा प्रादेशप्रमाणं कुशत्रयं गृहीत्वा उत्तरतो विष्णुपदादौ कुशकुसुमसहितजलपात्रं निधाय दक्षिणं जानु भूमौ पातयित्वा उत्तराग्रकुशोपरि सव्यहस्तमादेशमुत्तान दक्षिणमध्यस्तं भूमौ निधाय दक्षिणहस्तानामिकाङ्गुष्ठमूलेन स्थण्डिलदक्षिणभागे प्रादेशप्रमाणां रेखामुल्लिख्य रेखेयं पृथ्वीदेवताका पीतवर्णा इति ध्यायेत्। तन्मूलात् प्रवर्त्तितां प्रादेशप्रमाणां उत्तराभिमुखीं रेखा-

मुल्लिख्य रेखेयं अग्निदेवताका लोहितवर्णा इति ध्यायेत्। ततः प्रथमरेखायाः उत्तरतः षडङ्गुलान्तरितां प्रादेशप्रमाणां पूर्व्वाभिमुखीं रेखामुल्लिख्य रेखेयं प्रजापतिदेवताका कृष्णवर्णा इति ध्यायेत्। ततः षडङ्गुलान्तरितां प्रादेशप्रमाणां पूर्व्वाभिमुखीं रेखामुल्लिख्य रेखेयं इन्द्रदेवताका नीलवर्णा इति ध्यायेत्। ततोऽपि षडङ्गुलान्तरितां प्रादेशप्रमाणां पूर्व्वाभिमुखीं रेखामुल्लिख्य रेखेयं सोमदेवताका शुक्लवर्णा इति ध्यायेत्। ततः क्रमेण दक्षिणहस्ताङ्गुष्ठानामिकाभ्यां रेखाद्धूलिं गृहीत्वा प्रजापतिर्ऋषिर्विराट्छन्दोऽग्निर्देवता रेखाद्धूलिनिरसने विनियोगः। ॐ निरस्तः परावसुरित्यैशान्यां दिशि अरत्निमात्रान्तरिते देशे प्रक्षिपेत्। ततः पूर्व्वस्थापितजलेन रेखा अभ्युक्ष्य कृत्वा दक्षिणदिक्स्थकांस्यपात्रस्थाग्नेरेव क्रव्यादांशमग्निं गृहीत्वा प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः अग्निर्देवता क्रव्यादांशत्यागे विनियोगः। ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः। अनेन दक्षिणपश्चिमकोणे प्रक्षिपेत्। ततोऽपरमग्निं गृहीत्वा प्रजापतिर्ऋषिर्बृहतीच्छन्दः प्रजापतिर्देवता अग्निस्थापने विनियोगः। ॐ भूर्भुवः स्वरोम्। इत्यनेनाग्निमात्माभिमुखं तृतीयरेखोपरि स्थापयेत्। ततो वामहस्तमुत्तानं कृताञ्जलिं बद्धा पठेत्। प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवताग्निस्थापने विनियोगः। ॐ इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्। ततोऽग्नेः। त्वं विश्वरूप नामासि इति नाम कृत्वा ध्यात्वाऽवाह्य विश्वरूपाय अग्नये नमः इति पाद्यादिनाभ्यर्च्य। ॐ सर्व्वतः पाणिपादान्तः सर्व्वतोऽक्षिशिरोमुखः। विश्वरूपो महानग्निः प्रणीतः सर्व्वकर्म्मसु॥ इति पठेत्। ततः प्रादेशप्रमाणां दलाग्रां समिधं तूष्णीमग्नौ दत्त्वा ब्रह्मस्थापनं कुर्य्यात्। तत्र यथासम्भवं पञ्चाशत्कुशघटितं ब्रह्माणं वा अधीतवेदं ब्राह्मणं वा कृतमुपनयनं वा कमण्डलुं वा ब्रह्मस्थाने परिक्रम्य जलसहितमुदकपात्रं गृहीत्वा अग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन दक्षिणदेशे गत्वा अरत्निमात्रान्तरिते देशे पूर्व्वाभिमुखीं पादिप्रायां दत्त्वा तदुपरि ब्राह्मणं कुशासनाय पश्चिमाभिमुखोऽपर्य्युपविशेत्। वामहस्तानामिकाङ्गुष्ठाभ्यामासनोर्द्ध्वं कुशमेकं गृहीत्वा प्रजापतिर्ऋषिरनुष्टुप्छन्दोऽग्निर्देवता तृणनिरसने विनियोगः। ॐ निरस्तः परावसुरित्यनेन दक्षिणपश्चिमकोणे प्रक्षिपेत्। ततोऽग्नेः उदङ्मुख दक्षिणपादेन सकृत्प्रमाणकं उत्तराभिमुखोभूय ब्राह्मणं कुशासनमुपवेशयेत् प्रजापतिर्ऋषिरनुष्टुप्छन्दः अग्निर्देवता ब्रह्मोपवेशने विनियोगः। ॐ आवसोः सदने सीद इति। ब्राह्मणपक्षे तु ब्राह्मणः सद सीदामीति ब्रूयात्। अनेन कुशोपरि ब्राह्मणं कुशब्राह्मणं कमण्डलुपक्षे तु उत्तराभिमुखं स्थापयित्वा तदुपरि कुशान् दत्त्वा अग्नेरुत्तरतः कुशमुष्टि

रक्षयेत्। ततस्तेनैव यथा प्रजापतिकासने पूर्व्वाभिमुख उपविष्टो भूमिजपादिकं कुर्य्यात्। यदि तु ब्रह्मणोऽभावे ब्राह्मणः उपवेशयितव्यः सदा इमं मन्त्रं जपेत्। प्रजापतिर्ऋषिर्गायत्री छन्दो विष्णुर्देवता कमण्डलुब्रह्मपरिकल्पने विनियोगः। ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पांशुरे। इति जपेत्। कुशादि ब्रह्मपक्षे तु कर्म्मकर्त्तैव स्वात्मन्येवाभिधाय कार्य्यकरणादयमीयवागबन्धनिमित्त च इदं जपेत्। यदि प्रमादेन कश्चित् ब्रह्मणोऽपि तदा अग्निमेव अभये पद जपयित्वा तदुपरि इद दत्वा अग्नेरुत्तरतः कुशोपरि संस्थाप्य भूमिजपादिकं कुर्य्यात्। दक्षिणजानु भूमौ पातयित्वा दक्षिणहस्तोपरिभागेन अधोमुखौ हस्तौ भूमौ निधाय। परमेष्ठी ऋषिरनुष्टुप्छन्दो भूमिर्देवता भूमिजपे विनियोगः। ॐ इदं भूमेर्भजामहे इदं भद्रं सुमङ्गलम्। परा सपत्नान् बाधस्वान्येषां विन्दते धनम्। इति मन्त्रं रात्रौ चेत् जपे तदा धनमिति स्थाने वसिति प्रयोगम्। ततो दक्षिणहस्तेन कुशान् गृहीत्वा अग्नेरुत्तरतः प्रभृति दक्षिणावर्त्तेन प्रागादिक्रमेण सम्यग् परिशोधयेत्। प्रजापतिर्ऋषिर्जगतीच्छन्दोऽग्निर्देवता कौत्सऋषिर्जगतीच्छन्दोऽग्निर्देवता एतस्य षड्ऋचस्य षष्ठेऽष्टम्यभिमाते अग्नेः परिसमूहने विनियोगः। ॐ इमं स्तोममर्हते जातवेदसे रथमिव सम्महेमा मनीषया। भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयन्तव। ॐ भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्व्वणा पर्व्वणा वयम्। जीवातवे प्रतरां साधया धियोऽग्ने सख्ये मा रिषामा वयन्तव। ॐ शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतम्। त्वमादित्याँ आवह तान् ह्युश्मस्यग्ने सख्ये मा रिषामा वयन्तव। ततस्तान् कुशान् ऐशान्यां दिशि प्रक्षिपेत्। ततोऽग्नेः पूर्व्वतः उत्तराग्रान् दक्षिणतः उपरिकृतानुत्तरादिक्रमेण पूर्व्वाग्रान् कुशान् अग्नेः मूलमाच्छादयन् पारम्पर्य्येण देव। एवं दक्षिणतः पूर्व्वाग्रान् पश्चिमान्तं यावत्। प्रतीच्याञ्च दक्षिणादुत्तरान्तं यावत्। एवं उत्तरतो पश्चिमान्तात् पूर्व्वान्तं यावत् क्रमेणास्तरेत्। ततो इतामुखनिर्माणम् यथादिशं पूर्व्वादिक्रमेण दद्यात्। ॐ इन्द्राय लोकपालाय स्वाहा। एवं अग्नये इत्यादि। ततः प्रादेशप्रमाणौ अनखच्छिन्नावगर्भौ समाग्रौ कुशपत्रौ गृहीत्वा प्रजापतिर्ऋषिः पवित्रच्छेदने विनियोगः। ॐ पवित्रे स्थो वैष्णव्यौ इति मन्त्रेण प्रादेशप्रमाणं कृत्वा कुशान्तरेण छेदयित्वा प्रजापतिर्ऋषिर्गायत्री छन्दः पवित्रे देवते पवित्रसम्मार्जने विनियोगः। ॐ विष्णोर्मनसा पूते स्थः इत्यनेन परिमार्ज्य अप्सु प्रक्षालयेत्

निधाय तत्र होमार्थं घृतं निक्षिपेत्। ततस्तत्कुशपत्रद्वयमध्ये दक्षिणहस्तानामिकाङ्गुष्ठाभ्यां मूले च वामहस्तानामिकाङ्गुष्ठाभ्यां गृहीत्वा दक्षिणहस्तोपरिभावेनाधोमुखव्यस्तभावेन प्रजापतिऋषिर्विराड् देवता आज्योत्पवने विनियोगः। ॐ देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः स्वाहा। इत्यनेन कुशपत्रद्वयमध्येन घृतमग्नौ सकृज्जुहुयात्। तूष्णीं वारद्वयम्। ततस्तत्कुशपत्रद्वयमद्भिरभ्युक्ष्याग्नौ निक्षिपेत्। ततस्तदाज्यपात्रस्योदकेनाभ्युक्ष्याग्निमपि तदुपरि निधाय उत्तरस्यां दिश्यवतारणं इत्यनेन वारत्रयं सकुर्यात् इत्याज्यसंस्कारः। ततो यवखदिरपलाशोदुम्बराणामन्यतमस्य अरत्निमात्रं अनिताङ्गुष्ठपर्व्वविर्स्तारं आग्रमध्यस्थितमर्यादं स्रुव इत्यनेन वारत्रयं सकुर्यादिति। स्रुवसंस्कारः। एवं स्रुक्संस्कारमपि कुर्यात्। ततो दक्षिणजानु भूमौ पातयित्वा उदकाञ्जलिं गृहीत्वा प्रजापतिऋषिरदितिर्देवता उदकाञ्जलिसेके विनियोगः। ॐ अदितेऽनुमन्यस्व इत्यनेनाग्नेर्दक्षिणतः पश्चिमान्तात् पूर्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः प्रजापतिऋषिरनुमतिर्देवता उदकाञ्जलिसेके विनियोगः। ॐ अनुमतेऽनुमन्यस्व इत्यनेनाग्नेः पश्चिमतो दक्षिणान्तादुत्तरान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः प्रजापतिऋषिः सरस्वती देवता उदकाञ्जलिसेके विनियोगः। ॐ सरस्वत्यनुमन्यस्व इत्यनेनाग्नेरुत्तरतः पश्चिमान्तात् पूर्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। ततः प्रजापतिऋषिः सविता देवता अग्निपर्युक्षणे विनियोगः। ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्व्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु इत्यनेनोदकाञ्जलिना प्रदक्षिणावर्त्तेनाग्निं वेष्टयेत्। ततो दक्षिणं जानूत्थाप्य उपयमनकुशान् वाममुष्टिभ्यां पञ्चपञ्चकुशान् गृहीत्वा विरूपाक्षजपं कुर्यात्। परमेष्ठी ऋषी रुद्ररूपोऽग्निर्देवता विरूपाक्षजपे विनियोगः। ॐ भूर्भुवः स्वरोम् महान्तमात्मानं प्रपद्ये विरूपाक्षोऽसि दन्ताञ्जिस्तस्य ते शय्या पर्णे गृहा अन्तरिक्षे विमितं हिरण्मयं तद्देवानां हृदयान्ययस्मये कुम्भेऽन्तः सन्निहितानि तानि बलभृच्च बलसाच्च रक्षतोऽप्रमत्तौ अनिमिषतः सत्यं यत्ते द्वादश पुत्रास्ते त्वा संवत्सरे संवत्सरे कामप्रेण यज्ञेन याजयित्वा पुनर्ब्रह्मचर्य्यमुपयन्ति त्वं देवेषु ब्राह्मणोऽस्यहं मनुष्येषु ब्राह्मणो वै ब्राह्मणमुपधावत्युपधावामि जपन्तं मा मा प्रतिजापीर्जुह्वन्तं मा मा प्रतिहौषीः कुर्वन्तं मा मा प्रतिकार्षीः त्वां प्रपद्ये त्वया प्रसूत इदं कर्म करिष्यामि तन्मे राध्यतां तन्मे समृध्यतां तन्म उपपद्यतां समुद्रो मा विश्वव्यचा ब्रह्मानुजानातु तुथो मा विश्ववेदा ब्रह्मणः पुत्रोऽनुजानातु श्वात्रो मा प्रचेता मैत्रावरुणोऽनुजानातु तस्मै विरूपाक्षाय दन्ताञ्जये समुद्राय विश्वव्यचसे तुथाय विश्ववेदसे श्वात्राय प्रचेतसे सह

स्राक्षाय ब्रह्मणः पुत्राय नमः। इति जपित्वा गृहीतकुशान् प्रागुदीच्यां दिशि क्षिपेत्। फल पुष्पे ब्रह्मणे निवेदयेत्। ०। अथ काम्यकर्म्मार्थ कुशण्डिका यदा क्रियते तदा प्रथमं पुटाञ्जलिः। ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्च सत्त्वञ्च वाक् च मन आत्मा च ब्रह्म च तानि प्रपद्ये तानि मामवन्तु। इति जपित्वा पश्चात् विरूपाक्षजपं कुर्यात्। इति सामवेदिनां सर्व्वसाधारणी कुशण्डिका समाप्ता। इति भवदेवभट्टः। ०। अन्यत् रघुनन्दनभट्टाचार्यकृतसंस्कारतत्त्वे द्रष्टव्यम्। यजुर्वेदिनां कुशण्डिका पशुपतिकृतदशकर्म्मपद्धतौ ऋग्वेदिनां कुशण्डिका कालेशिकृतदशकर्म्मपद्धतौ च द्रष्टव्या। ०। *। अथ कुशण्डिकानन्तरं प्रकृतकर्म्म कर्त्तव्यम्। तत्र प्रथमं प्रादेशप्रमाणां घृताक्तां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमं कुर्यात्। प्रजापतिऋषिर्गायत्रीच्छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भूः स्वाहा। प्रजापतिऋषिरुष्णिक्छन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भुवः स्वाहा। प्रजापतिऋषिरनुष्टुप्छन्दः सूर्यो देवता महाव्याहृतिहोमे विनियोगः। ॐ स्वः स्वाहा। इति सर्व्वे आज्याहुतिं दद्यात्। यदि प्रकृते कर्म्मणि चरुहोमोऽस्ति तदा आज्यतन्त्रोपक्रमविहितत्वात् महाव्याहृतिहोमस्य प्रथमं महाव्याहृतिहोमो न कर्त्तव्योऽन्ते तु कर्त्तव्य एव विहितत्वात्। ततः प्रकृतकर्म्म समाप्य पुनर्महाव्याहृतिहोमं कृत्वा प्रादेशप्रमाणां समिधं तूष्णीमग्नौ हुत्वा प्रायश्चित्तहोमादिवामदेव्यगानान्तं उदीच्यसाधारणं कर्म्म कुर्वीत। तदभिधीयते। तत्र प्रथमं ॐ अद्येत्यादि अमुककर्म्मणि यत्किञ्चिद्वैगुण्यं जातं तद्दोषप्रशमनाय प्रायश्चित्तहोममहं कुर्वीय इति सङ्कल्पं कृत्वा अग्ने त्वं विधुनामासि इति नाम कृत्वा संपूज्य पुनर्घृताक्तां प्रादेशप्रमाणां समिधं तूष्णीमग्नौ हुत्वा महाव्याहृतिहोमञ्च पूर्ववत् कृत्वा प्रायश्चित्तहोमं कुर्यात्। प्रजापतिऋषिरग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ पाहि नो अग्न एनसे स्वाहा। प्रजापतिऋषिर्विश्वेदेवा देवताः प्रायश्चित्तहोमे विनियोगः। ॐ पाहि नो विश्ववेदसे स्वाहा। प्रजापतिऋषिर्विभावसुर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ यज्ञं पाहि विभावसो स्वाहा। प्रजापतिऋषिः शतक्रतुर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ सर्व्वं पाहि शतक्रतो स्वाहा। प्रजापतिऋषिः ककुप्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ पाहि नो अग्न एकया पाह्युत द्वितीयया पाहि गीर्भिस्तिसृभिरूर्जाम्पते पाहि चतसृभिर्वसो स्वाहा। प्रजापतिऋषिर्बृहतीछन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ पुनरूर्जा निवर्त्तस्व पुनरग्न इषायुषा पुनर्नः पाह्यंहसः स्वाहा। प्रजापतिऋषिर्विराट्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ सहरय्या

निवर्त्तस्वाग्ने पिन्वस्व धारया विश्वप्स्न्या विश्वतस्परि स्वाहा। प्रजापतिऋषिरनुष्टुप्छन्दोऽग्निर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ अज्ञातं यदनाज्ञातं यज्ञस्य क्रियते मिथु अग्ने तदस्य कल्पय त्वं हि वेत्थ यथायथं स्वाहा। प्रजापतिऋषिः पङ्क्तिच्छन्दः प्रजापतिर्देवता प्रायश्चित्तहोमे विनियोगः। ॐ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव। यत्कामास्ते जुहुमस्तन्नोऽस्तु वयं स्याम पतयो रयीणां स्वाहा। ततः पूर्व्ववदेव महाव्याहृतिहोमं कुर्यात्। यथा। प्रजापतिऋषिर्गायत्रीच्छन्दोऽग्निर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भूः स्वाहा। प्रजापतिऋषिरुष्णिक्छन्दो वायुर्देवता महाव्याहृतिहोमे विनियोगः। ॐ भुवः स्वाहा। प्रजापतिऋषिरनुष्टुप्छन्दः सूर्यो देवता महाव्याहृतिहोमे विनियोगः ॐ स्वः स्वाहा। *। ततो नवग्रहहोमः। ॐ आकृष्णेन रजसा वर्त्तमानो निवेशयन्नमृतं मर्त्यञ्च हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् स्वाहा। ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं भवा वाजस्य सङ्गथे स्वाहा। ॐ अग्निर्मूर्द्धा दिवः ककुत् पतिः पृथिव्या अयम् अपां रेतांसि जिन्वति स्वाहा। ॐ अग्ने विवस्वदुषसश्चित्रं राधो अमर्त्य आ दाशुषे जातवेदो वहा त्वमद्या देवाँ उषर्बुधः स्वाहा। ॐ बृहस्पते परिदीया रथेन रक्षोहाऽमित्राँ अपबाधमानः प्रभञ्जन् सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानां स्वाहा। ॐ शुक्रं तेऽन्यद्यजतं तेऽन्यद्विषुरूपे अहनी द्यौरिवासि। विश्वा हि माया अवसि स्वधावन् भद्रा ते पूषन्निह रातिरस्तु स्वाहा। ॐ शन्नो देवीरभिष्टये शन्नो भवन्तु पीतये। शंयोरभिस्रवन्तु नः स्वाहा। ॐ कयानश्चित्र आभुवदूती सदावृधः सखा कया शचिष्ठया वृता स्वाहा। ॐ केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे समुषद्भिरजायथाः स्वाहा। *। ततः इन्द्रादिदशदिक्पालहोमं प्रकृतदेवताहोमञ्च कृत्वा घृताक्तां प्रादेशप्रमाणां समिधं तूष्णीमग्नौ हुत्वा उदकाञ्जलिसेकं कुर्यात्। प्रजापतिऋषिः सविता देवताग्निपर्युक्षणे विनियोगः। ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्व्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु। अनेनोदकाञ्जलिना दक्षिणावर्त्तेनाग्निं वेष्टयेत्। प्रजापतिऋषिरदितिर्देवता उदकाञ्जलिसेके विनियोगः। ॐ अदितेऽन्वमंस्था इत्यनेनाग्नेर्दक्षिणतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। प्रजापतिऋषिरनुमतिर्देवता उदकाञ्जलिसेके विनियोगः। ॐ अनुमतेऽन्वमंस्था इत्यनेनाग्नेः पश्चिमतो दक्षिणान्तादुत्तरान्तं यावदुदकाञ्जलिना सिञ्चेत्। प्रजापतिऋषिः सरस्वती देवता उदकाञ्जलिसेके विनियोगः। ॐ सरस्वत्यन्वमंस्थाः। इत्यनेनाग्नेरुत्तरतः पश्चिमान्तात् पूर्व्वान्तं यावदुदकाञ्जलिना सिञ्चेत्। तत [illegible]

कुशान् स्तृणीत प्रजापतिऋषिर्लयो देवता दर्भ स्तरणे विनियोगः । ॐ अस्त रिता आयत्तु वय । अनेनाग्रमध्यमूलानि प्रत्नेनाच्छनक्षि वार त्रय सकलत्र वारत्रयमेव पठनीयं । ततस्तान् कुशानङ्गिरश्रुस्या प्रजापतिऋषिरनुष्टुप्छन्दो यद् रूपोऽग्निर्देवता दर्भमुष्टिशाखोमे विनियोगः । ॐ यः पशूनामधिपती वदतलिकवरो हव । पशूनस्माकं मा हिंसीरेतदस्तु हुतमव स्वाहा । अनेनाग्नौ क्षिपेत् । तत अग्ने त महिमामासीति नाम कृत्वा गन्धमाल्ययवक्षतान्यूर्वैरपिमभ्यर्च्य प्रजापतिऋषिर्विराट्छन्द इन्द्रो देवता यक्षसा मस्य दम्नीयप्रयोगे विनियोगः । ॐ पूर्णहोम यशसे जुहोमि योऽस्मै जुहोति वरमस्मै ददाति वर इमे यशसा भामि लोके स्वाहा । अनेन पूर्णाहुतिं दद्यात् । ततो ब्रह्मणे पूर्णपात्रादि दक्षिणां दत्त्वा सोमदक्षिणा कुर्य्यात् । ततः भद क्षिणेन दक्षिण देश गत्वा मध्यमग्नि गुह्या प्रया रुयासने पुनरुपविश्य कुशकुसुमसहितजलपात्रे दर्भं निधाय मन्त्रामदेव ऋषिर्विराड्गायत्रीच्छन्द इन्द्रो देवता शान्तिकर्म्मणि जपे विनि योगः । ॐ कया न चित्र आभुवदूती सदा वृध सखा कया सचिष्ठया वृता । ॐ कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः दृढाचिदारुजे वसु । ॐ अभीषुण सखीनामविता जरितृणां शतम्भवास्यूतये । ॐ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्योऽरिष्ट नेमिः स्वस्ति नो बृहस्पतिर्दधातु । "एता अयो तोन्त्वा शान्ति कुर्य्यात् । मानाभावे एता मत्र मात्रच्छिरात्मजा पठेदिति । ततो दक्षिणां दत्त्वा अच्छिद्रावधारणं कुर्य्यात् । इति सर्व्वकर्म्मसा धारणमुदीच्य कर्म समाप्तम् ॥

कुशय, पुं, (कुश् च सश्लेषे + बाहुलकात् अयन् ।) पानपात्रम् । इत्युणादिकोषः ॥

कुशपर्ण्ण, क्लो, (कुशाकारं पर्णमस्य ।) ग्रन्थिपर्णम् । इति रत्नमाला । गोंठियाला इति भाषा ॥

कुशल, क्ली, (कुश् + वृषादित्वात् कलन् । यद्वा कु पाप तस्मात् श्यति गच्छति पृथक् प्राप्नोतीत्यर्थः । कु + शल् + अच् ।) कल्याणम् । (यथा, रघुः १ । ५८ ।

"अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते" ॥)

ब्राह्मणे विहिते कुशलमनामयमक्षत्रियस्य च सामवयस्कमनभिवादकमपि माहात्म्यं कुशलमिति प्रत्यभिवादकेनैव अनामयं पृच्छेत् । स दुक्त मनौ २ । १२७ ।

"ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् । वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च" ॥)

पर्य्याप्तिः । दक्षम् । (तद्वति, त्रि । यथा, गीतायाम् १८ । १० ।

"न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते" ॥

कौ पृथिव्यां शलति शलं प्राप्नोतीति । शल + अच् ।) शिक्षिते, त्रि । इत्यमरः । ३ । १ । २०३ ॥ (यथा, मनुः ८ । १८७ ।

"अपुत्रस्तत्सुता देवत्रादायदारिकः ।

स्वापयन्ति तु या अग्नि सा तथाधिपतं प्रति" ॥

कुश वाति प्राप्नोति । कुश + वा + क । कुश ग्राहक । इति व्युत्पत्तिलब्धोऽर्थः ॥)

कुशध्वजौ, पुं, (पुष्पवतीरिव एकालया तयोरेव बोधकत्वम् कुशध्वजयोरिव कुशश्च ध्वजश्च तौ कुशी अश्वौ मिथ्याचक्षणात्मिथ्यादिवत् विशेषम् ।) एकयोगेन रामपुत्रौ । इति हेमचन्द्रः । तयोर्नामकारणं यथा,—

"यस्तयोः प्रथमं जातः स कुशैर्मन्त्रसंस्कृतैः । निर्मार्जनीयो नाम्ना हि भविता कुश इत्यसौ ॥ यश्चावरो लवेनासीद्वृद्धयेन समाहितः । निर्मार्जनीयो वृद्धाभिर्नाम्ना स भविता लवः ॥ एवं कुशलवौ नाम्ना यमौ तौ सम्बभूवतुः । मत्कृताभ्यां च नामाभ्यां ख्यातिमायास्यतश्च तौ" ॥ इति रामायणम् ॥

कुशकण्ड, पुं (कुशस्य गुच्छ प्रन्थ ।) कुशकण्डिकाख्या । तत्पर्य्यायः । कौशवी २ । इति त्रिकाण्डशेषः ॥

कुशवी, स्त्री, (कुश इव चीयते । ची + डः गौरादि त्वात् ङीष् ।) चमसरवरः । क्षुद्राश्रिका । इति वैद्यकम् ॥

कुशली, [न्] त्रि (कुशलं अस्त्यस्य । कुशल + इनि ।) मङ्गलान्विता । (यथा, रघौ ५ । ४ ।

"अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे । कुशली गुरुस्ते" ॥)

कुशस्थल, क्ली, (कुशप्रधान स्थलम् ।) कान्यकुब्ज देशः । इति हेमचन्द्रः ॥ (यथा, वेणीसंहारे ।

"कुशस्थलं वृकस्थलं माकन्दं वारणावतम् । देहि मे चतुरो ग्रामान् कञ्चिदेकञ्च पञ्चमम्" ॥)

कुशस्थली, स्त्री, (कुशस्थल + क्षितौ ङीष् ।) द्वारिका । इति जटाधरः ॥ (यथा,—महाभारते २ । सभापर्व्वणि १४ । ४८ ।

"इति संचिन्त्य सर्व्वे स्म प्रतीचीं दिशमाश्रिताः । कुशस्थलीं पुरीं रम्यां रैवतेनोपशोभिताम्" ॥ पूर्व्वं तु पुरी रैवतराजा वैवस्वत् नरपतिना निर्म्मिता आनर्त्तपात् रामकेतादिना आनर्त्ता आसीद्भूलाऽऽसीत् ततो देवगुरुदेवैः सङ्कृता सती दैवतैव वासवृत्तिरासीत् ॥)

कुशा, स्त्री, (कुश् च सश्लेषे + क टाप् च ।) रज्जुः । इति मेदिनी । अनुबन्धटिका । इति शब्द चन्द्रिका ॥ वल्गा । इति हेमचन्द्रः ॥ (इन्दोमा सोमौधातटमार्गोदुम्बरात् च्युत् कुशा इति नामवत्सिन । इति विश्वामित्रिः ।)

कुशाकर पुं (कुशैराकीर्यते समन्तात् कटैश्च मूलादाच्छादनं यज्ञेऽस्य । आ + कृ + अधिक रणे अप् । कुशादिवत् धमने कुशैर्देवनात् तथा त्वम् ।) अग्निः । इति शब्दमाला ॥ (कुशां रज्जु करोतीति व्युत्पत्त्या रज्जुकारकः ।)

कुशाग्र, पुं, (कुश इव वस्तु सूक्ष्मदर्शनः अग्रि वस्य । समासे अच् ।) वामनः । इति शब्दमाला ॥

कुशाग्रीयमति, त्रि, (कुशाग्रीया कुशाग्रं भवत् सूक्ष्मा मतिर्यस्य ।) तीक्ष्णबुद्धिः । (यथा किरातेः ।

"प्रकृत्य मामकाङ्क्ष कुशाग्रीयधियाश्रयौ ।

नैव शास्त्रानुयो भाट विनाशो नरपुङ्गव" ॥)

तत्पर्य्यायः । सत्पर्य्यी २ तत्पर्य्यी । ३ दशुद्ध मति ४ । इति हेमचन्द्रः । तत्पर्यायो कुशी कथं धारयतस्य स्त्री ॥

कुशारणि, पुं, (कुश वायुदानार्थे अथ अरणिरिव यस्य ।) दुर्व्वासा । इति त्रिकाण्डशेषः ॥

कुशाल्मलि, पुं, (कुत्सिता शाल्मलिः ।) रोहित वृक्षः । इति राजनिर्घण्टः ॥

कुशिंशपा, स्त्री, (कुत्सिता शिंशपा ।) कपिलशि शपा । इति राजनिर्घण्टः ॥

कुशिक, पुं, (कुशः कुशवंशजातो गाधीराजो अयत्ये नास्त्यस्य । कुश + ठन् ।) गाधिराजस्य पिता । (स तु विश्वामित्रपितामहः गाधेः पिता । एत द्विवरणन्तु महाभारते १३ । आनुशासनिके पर्व्वणि ४९ अध्यायमारभ्य द्रष्टव्यम् ।) मालः । धवैकः । विभीतकवृक्षः । इति हेमचन्द्रः ॥ अश्वकर्णवृक्षः । इति राजनिर्घण्टः ॥ तैलशेषः । इति त्रिकः । केकरे त्रि । इति शब्दमाला ॥

कुशिम, त्रि, (कुश + इमप् । यद्वा कुश सश्लेषे + इ इट् च ।) अवमिश्रितम् । इत्युणादिकोषः ॥

कुशी, स्त्री, (कुश + जातिविवक्षायां "जानपदेति" ४ । १ । ४२ । इति ङीष् ।) फाल । इति मेदिनी ॥

कुशी, [न्] पुं (कुशाः सन्त्यस्य । रामायणोल्लेखनार्थं यत्नेषु कुशोत्पत्तेराख्यानम् ।) वाल्मीकिमुनिः । इति हेमचन्द्रः ॥ (कुशविशिष्टे, त्रि । यथा, महा भारते १३ । भीष्मोपाख्याने १० । १०३ ।

"दिनेऽष्टमे तु विप्रेन्द्र दीक्षितोऽस्मि यथाविधि । दण्डी मुण्डी कुशी चीरी घृताक्तो मेखलीकृतः" ॥)

कुशीद, क्ली (कुशीद + पृषोदरात् अस्य हान् ।) वृद्धिजीविका । इत्यमरटीकायां भरत ॥ रक्त चन्दनम् । इति मुकुटमालाजनम् ॥

कुशीलव, पुं, (कुत्सितं शीलं यस्य इति कुशीलः । कुत्सितशीलाय अभ्याति इ इति वा । यद्वा कुशीलं वाति गच्छति प्राप्नोतीति यावत् । वा + कः ।) चारणः । इत्यमरः । २ । १० । १२ ॥ नटविशेषः । वाल्मीकिः । इत्यन्ये । देशान्तर कीर्त्तिं प्रचारदर्शि वा नटः । इत्यन्ये । गीतिः मराः । (यस्मै हि अप्रयुक्तेन उपस्करणीयस्याः । यथा मनुः ३ । १५५ ।

"कुशीलवोऽवकीर्णी च वृषलीपतिरेव च" ॥ कुशीलवस्वरूपे भाद्रपादाचपारकणात् वर्णो विप्रर्षिः ॥)

कुशीलवौ पुं, (कुशश्च लवश्च तौ कुशीलवौ ।) एक योगेन रामपुत्रौ । इति हेमचन्द्रः ॥ (यथा, रामायणे ७ । १०७ सर्गः ।

"अभिषिच्य महात्मानावुभौ रामः कुशीलवौ" ॥)

कुशेशय, पुं, (कुशीव कुशरात् अस्य शेते जले यो अभिशेते इति । शी + अच् ।) वाल्मीकिमुनिः । इति त्रिकाण्डशेषः ॥

कुशूल, पुं, (कुश + ऊलच् पृषोदरात् साधुः ।) कुसूलः । इति जटाधरः ॥ धान्यागारम् । तत्पर्य्यायः । कोष्ठः २ । इति हेमचन्द्रः । मोहनार ३ ।

इति त्रिकाण्डशेषः ॥ (यथा, मनुः ४ । ७ ।
"कुशूलधान्यको वा स्यात् कुम्भीधान्यक एव वा ।
त्र्यैहिको वापि भवेदश्वस्तनिक एव वा" ॥)

कुशेशय, क्ली, (कुशे जले शेते । कुश + शी + अच् । अलुक् समासः ।) पद्मम् । (यथा, रघुः ६ । १८ ।
"कुशेशयाताम्रतलेन कश्चित् करेण रेखाध्वजलाञ्छनेन" ॥) सारसपक्षी । इत्यमरः । १ । १० । ४० ॥

कुशेशय, पुं, (कुशेशयं पद्ममिव आकृतिर्विद्यतेऽस्य । अर्श आद्यच् ।) कर्णिकारवृक्षः । इति शब्दचन्द्रिका ॥ (कुशद्वीपस्थपर्व्वतविशेषः । इति विष्णुपुराणे । २ । ४ । ३६ ॥)

कुष ग निष्कर्षे । इति कविकल्पद्रुमः ॥ (क्र्या-पर-सक-सेट् ।) ग कुष्णाति चुकोष । निष्कर्ष इयत्तापरिच्छेदः । कुष्णैरककुष्णातीति वोपदेवः । निष्कर्षोऽन्तःप्रकाशनमिति गोविन्दभट्टः । "ततो ऽकुष्णाद् दशग्रीवः कुक्षिं मायाम् वनौकसाम्" । इति भट्टौ अनेकार्थत्वान्निष्कोषणार्थः । इति दुर्गादासः ॥

कुषाकु, त्रि, (कुष् + बाहुलकात् आकुः ।) कुषाकुः । इत्यमरटीकायां भरतः ॥

कुषाकु, पुं, (कुष + "सटिकुषिभ्यां काकु" । उणा ३ । ७७ । इति काकुः ।) अग्निः । सूर्य्यः । अन्यः । परोपतापिनि, त्रि । इति मेदिनी ॥

कुषित, त्रि, (कुष निष्कर्षे + क्तः ।) जलमिश्रितः । इत्युणादिकोषः ॥

कुषीद, क्ली, (कुसीद + पृषोदरात् षत्वम् ।) कुसीदम् । इत्यमरटीकायां भरतः ॥

कुष्ठ, क्ली, (कुष्णाति रोगम् । कुष + "हनि कुषीति" । उणा २ । २ । इति क्थन् ।) विषभेदः । इति हेमचन्द्रः ॥ औषधविशेषः । कुड् इति भाषा । तत्पर्य्यायः । व्याधि २ पारिभद्यम् ३ वाप्यम् ४ पाकलम् ५ उत्पलम् ६ । इत्यमरः । २ । ४ । १२६ ॥ आप्यम् ७ । इति तट्टीका ॥ जरणम् ८ । इति रत्नमाला ॥ रुजा ९ गदः १० आमय ११ पारिभद्रकम् १२ रामम् १३ वानीरजम् १४ पावनम् १५ कुत्सितम् १६ पद्मकम् १७ भरा-ङ्कम् १८ महाङ्गम् १९ कौबेरम् २० भाण्ड-रम् २१ । इति शब्दरत्नावली ॥ व्याकणम् २२ शोकनम् २३ । इति जटाधरः ॥

"कुष्ठं रोगाह्वयं वाप्यं पारिभव्यं तथोत्पलम् ।
कुष्ठमुष्णं कटु स्वादु शुक्रलं तिक्तकं लघु ।
हन्ति वातास्रवीसर्पकासकुष्ठमरुत्कफान्" ॥ * ॥

अथ कुष्ठभेदपुष्करमूलम् ।
"उक्तं पुष्करमूलन्तु पुष्करं पौष्करञ्च तत् ।
पद्मपत्रञ्च काश्मीरं कुष्ठभेदमिदं जगुः ।
पौष्करं कटुकं तिक्तमुष्णं वातकफज्वरान् ।
हन्ति शोथारुचिश्वासान् विशेषात् पार्श्वशूलनुत्" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । कफवातकुष्ठरोगविसर्प-विषकण्डूखर्जुनाशित्वम् । कान्तिकारित्वञ्च । इति राजनिर्घण्टः ॥ श्वासकासज्वरहिक्कारोग-नाशित्वम् । इति राजवल्लभः ॥ * ॥ त्वगामयरोगः । कुष्ठ इति भाषा । तत्पर्य्यायः । श्वित्रम् २ । इत्यमरः । २ । ६ । ५४ ॥ श्वेतम् ३ श्वैत्रम् ४ । इति तट्टीका ।

तस्य निदानपूर्व्विका सम्प्राप्तिर्यथा ।
"विरोधीन्यन्नपानानि द्रवस्निग्धगुरूणि च ।
भजतामागतां छर्द्दिं वेगांश्चान्यान् प्रतिघ्नताम् ॥
व्यायाममतिसन्तापमतिभुक्त्वा निषेविणाम् ।
शीतोष्णलङ्घनाहारान् क्रमं मुक्त्वा निषेविणाम् ॥
घर्म्मश्रमभयार्त्तानां द्रुतं शीताम्बुसेविनाम् ।
अजीर्णाध्यशिनाञ्चैव पञ्चकर्म्मापचारिणाम् ॥
नवान्नदधिमत्स्यातिलवणाम्लनिषेविणाम् ।
माषमूलकपिष्टान्नतिलक्षीरगुडाशिनाम् ॥
व्यवायञ्चाप्यजीर्णेऽन्ने निद्राञ्च भजतां दिवा ।
विप्रान् गुरून् धर्षयतां पापं कर्म्म च कुर्व्वताम् ॥
वातादयस्त्रयो दुष्टास्त्वग्रक्तं मांसमम्बु च ।
दूषयन्ति स कुष्ठानां सप्तको द्रव्यसंग्रहः ॥
अतः कुष्ठानि जायन्ते सप्त चैकादशैव तु ।
कुष्ठानि सप्तधा दोषैः पृथग्द्वन्द्वैः समागतैः ॥
सर्व्वेष्वपि त्रिदोषेषु व्यपदेशोऽधिकत्वतः" ॥ * ॥

तस्य पूर्व्वरूपं यथा ।
"अतिश्लक्ष्णं खरः स्पर्शः स्वेदास्वेदौ विवर्णता ।
दाहः कण्डूस्त्वचि स्वापस्तोदः कोठोन्नतिः श्रमः ॥
व्रणानामधिकं शूलं शीघ्रोत्पत्तिश्चिरस्थितिः ।
रूढानामपि रूक्षत्वं निमित्तेऽल्पेऽपि कोपनम् ॥
रोमहर्षोऽसृजः कार्ष्ण्यं कुष्ठलक्षणमग्रजम्" ॥ * ॥

तच्च वातादिभेदेन अष्टादशप्रकारम् ।
तत्र सप्त महाकुष्ठानि यथा ।
"कृष्णारुणकपालाभं यद्रूक्षं परुषं तनु ।
कापालं तोदबहुलं तत्कुष्ठं विषमं स्मृतम् ॥ १ ॥
सदाहरागमत्पूर्ण परीतं रोमपिञ्जरम् ।
उडुम्बरफलाभासं कुष्ठमौडुम्बरं वदेत् ॥ २ ॥
श्वेतं रक्तं स्थिरं स्त्यानं स्निग्धमुत्सन्नमण्डलम् ।
कृच्छ्रमन्योन्यसंयुक्तं कुष्ठं मण्डलमुच्यते ॥ ३ ॥
कर्कशं रक्तपर्य्यन्तमन्तः श्यावं सवेदनम् ।
यदृष्यजिह्वासंस्थानमृष्यजिह्वं तदुच्यते ॥ ४ ॥
सश्वेतं रक्तपर्य्यन्तं पुण्डरीकदलोपमम् ।
सोत्सेधञ्च सरागञ्च पुण्डरीकं प्रचक्षते ॥ ५ ॥
श्वेतं ताम्रं तनु च यद्रजो घृष्टं विमुञ्चति ।
प्रायश्चोरसि तत् सिध्ममलाबुकुसुमोपमम् ॥ ६ ॥
यत् काकणन्तिकावर्णमपाकं तीव्रवेदनम् ।
त्रिदोषलिङ्गं तत्कुष्ठं काकणं नैव सिध्यति" ॥ ७ ॥

एकादश क्षुद्रकुष्ठानि यथा ।
"अस्वेदनं महावास्तु यन्मत्स्यशकलोपमम् ।
तदेककुष्ठं चर्म्माख्यं बहुलं हस्तिचर्म्मवत् ॥ १ ॥
श्यावं किणखरस्पर्शं परुषं किटिभं स्मृतम् ॥ २ ॥
वैपादिकं पाणिपादस्फुटनं तीव्रवेदनम् ॥ ३ ॥
कण्डूमद्भिः सरागैश्च गण्डैरलसकं चितम् ॥ ४ ॥
सकण्डूरागपिडकं दद्रुमण्डलमुद्गतम् ॥ ५ ॥
रक्तं सशूलं कण्डूमत् सस्फोटं यद्दलत्यपि ।
तच्चर्म्मदलमाख्यातं पाणिपादेषु दृश्यते ॥ ६ ॥
सूक्ष्मा बह्व्यः पिडकाः स्रावमत्यः
पामेत्युक्ताः कण्डूमत्यः सदाहाः ॥ ७ ॥
सैव स्फोटैस्तीव्रदाहैरुपेता
स्फोटा श्यावारुणा भासा विस्फोटाः स्युस्तनुत्वचः ॥ ८ ॥
रक्तं श्यावं सदाहार्त्ति शतारुः स्याद्बहुव्रणम् ॥ १० ॥
सकण्डुपिडका श्यावा बहुस्रावा विचर्च्चिका" ॥ ११ ॥
इति माधवकरः ॥

कुष्ठ, पुं, (कुष्णाति शरीरस्थशोणितं निष्कर्षति इति । निष्कर्षोपकस्य कुषधातोरन्तर्विभावितण्यर्थत्वं धातूनामनेकार्थत्वात् । कुष निष्कर्षे + "हनिकुषीति" । उणा २ । २ । इति क्थन् ।) त्वगामयरोगः ।

तस्य निदानं पूर्व्वलिखितम् । औषधं यथा ।
"सर्व्वकुष्ठेषु वमनं रेचनं रक्तमोक्षणम् ।
वचावासापटोलानां निम्बस्य फलिनीत्वचः ॥
कषायो मधुना पीतो वान्तिकृन्मदनान्वितः ।
विरेचनं प्रयोक्तव्यं त्रिवृद्दन्तीफलत्रिकैः ॥
मन्त्रिणा मरीचानि तैलपाकं ततो हरेत् ।
सर्व्वकुष्ठानुलेपोऽयं शिवा परगुरोदनम् ॥
आरग्वधादि कुष्ठं गोमूत्रेण प्रलेपतः ।
करवीरोदरांशच सैन्धवेश तु कुष्ठहृत् ॥
हरिद्रामलयं रात्रौ गोमूत्रेणाप्लुतम् ।
आरग्वधः करञ्जश्च लेपः कुष्ठहरः परः ॥
मनःशिला त्रिकटूनि बाकुची सर्षपाश्च ।
करञ्जो मूत्रपिष्टोऽयं लेपः कुष्ठहरोऽर्व्वतः ॥
त्रिकटुकण्टकाकुष्ठत्रिफलासिन्धुसर्षपैः ।
मूत्राम्बुपिष्टो लेपोऽयं दद्रुकुष्ठविनाशनः ॥
भल्लातकबीजानि धात्री बब्बरश्च चूर्णी ।
कौबेरमिदं दद्रुनाशेन तद्दद्रुहरणं परम् ॥
आरग्वधस्य पत्राणि आरनालेन पेषयेत् ।
दद्रुकिटिभकुष्ठानि हन्ति सिध्मानमेव च ॥
उष्णा पीता बाकुची च कुष्ठनित् क्षीरभोजिनः ।
त्रिफलाव्योषविडङ्गौरखौषमल्लातकान्वितः ॥
एषः क्वाथवरो मेध्यः कुष्ठहा कामचारिणः ।
त्रिकटुत्रिफलात्वकचूर्णं पीतं समाक्षिकम् ॥
हन्ति कुष्ठं हरीतक्या चाद्धैकृष्णवरम्बरम् ।
यः खादेदमलात्रिफलामलकानि तथा निशा ॥
न भवेत् सर्व्वकुष्ठानि मासार्द्धेन न संशयः ।
दशमासानुगतः कुम्भे भूमौ खदिराङ्कुरः ।
बाकुचीबीजाम्बुचन्दन इन्यात् कुष्ठं सचन्दनम् ।
भाङ्गीभिरिन्द्रयवैः क्वाथः पीतश्चामृतकषायम् ॥
पञ्चतुषभव त्रिषु हन्ति कुर्व्वं च दाहकः ।
पीता भल्लातकं तैलं सर्व्वव्याधिं भवेन्नरः ॥
सेवित खादिरं वारि पानाद्यैः कुष्ठनाशकरम् ।
दग्धा गुडूची त्रिफला पटोलञ्च करञ्जकम् ॥
निम्बार्क हरिद्रेण कामदकेन लेपनम् ।
कम्प नरदेश कुष्ठ हन सर्व्वाणि सर्व्वं ॥
खादिरेण च दूर्व्वाया पीतैर्व्वा वातुलम् ।
कन्दुर्व्वचर्च्चिका कामा कफपुरादेव नाशति ।
दुःसरकण्डूरूर्णिं कारवांश्च मूत्रयेत् ।
क्षीरेण शिवा त्रिपञ्चैर्दिवसैरेवं कुष्ठघातिनम्" ॥
इति गारुडे १७५ अध्यायः ॥
"कुष्ठेन्द्रवर्णिगादर्शिका दूर्व्वा च कुष्ठघ्नम्" ॥
इति तत्रैव १७९ अध्यायः ॥

"करवीर स्नुहीराज कल्पं कुष्ठमर्द्दनम् ।
चतुर्थ्येन मूत्रेण भयेकेन वरेण तत् ।
पादौ विचर्चिका कुष्ठमभ्यङ्गाद्धि नशाति वै" ।
"सैन्धवञ्च विडङ्गानि सोमराजी तु सर्षपाः ।
रजनी द्वे पिबाच्चैव गोमूत्रेण च पेषयेत् ।
कुष्ठनाशाय तल्लेपात् क्षिप्रमेव नाशयेत्" ।
इति च गारुडे १७० अध्याय ।
"सप्तकाण्डमूलं वा वाकुचीमूलमेव वा ।
काञ्जिकेन च वाकुच्या मूलं वै कुष्ठरोगनुत्" ।
इति गारुडे १८८ अध्याय ।
"पीतं वर्चिकमूलं च मधुसिक्तसमेन वै ।
माहिं विनाशयेद्वाक्यमेव परमेश्वर । ।
भिल्लातकाश्चैव सद्यः भवेद्वैकाचिकादिनुत् ।
एतत् सकाञ्जिकं पीतं वातकुष्ठक्षयादिनुत्" ।
इति गारुडे १८६ अध्यायः ।
"निम्बं निम्बदलानाञ्च चूर्णमामलकस्य च ।
प्रत्यूषे भक्षयेच्चैव तस्य कुष्ठं विनश्यति ।
हरीतकी विडङ्गञ्च हरिद्रा सितसर्षपाः ।
सोमराजस्य बीजानि करञ्जस्य च सैन्धवम् ।
गोमूत्रपिष्टान्येतानि कुष्ठरोगहराणि च" ।
बीजानि स्थाने मूलानि वा पाठ ।
इति तत्रैव १८४ अध्यायः ।
"चन्दनं कुङ्कुमं मांसी कर्पूरो जातिमञ्जिका ।
मालतीकक्कोलपूगानां कल्कश्च पत्राणि च ।
यष्टीमधुरीमूलं कुष्ठं तगरमालिका ।
गोरोचना प्रियङ्गुश्च बीजं मदनकं फलम् ।
सरलं सम्भवञ्च लाक्षा चामलकी तथा ।
कर्पूरकः मण्डूकश्च सर्वैस्तैल प्रसाधितम् ।
पर्वदिनस्य रोगम्लानस्य कुष्ठहरं परम्" ।
इति गारुडे १६८ अध्याय । * ।
अथ वैद्यकमते कुष्ठचिकित्सामाह ।
"वातोत्तरेषु सर्पिर्वमनं श्लेष्मोत्तरेषु कुष्ठेषु ।
पित्तोत्तरेषु मोक्षो रक्तस्य विरेचनं श्रेष्ठम् ।
प्रच्छन्नमाल्पानि च लाङ्गलानि
स्थानानि मूढाश्च घटीजलूकाः ।
बहदन्त्याश्च हिता प्रदाना
स्रुतानि शास्त्राणि च तीक्ष्णानि" ।
तन्त्रान्तरे ।
"पुराणाः शालिगोधूममुद्गाद्याः कुलित्थो हिताः ।
तिक्तशाकं भल्लातकं दाडिमी खदिरोदकम् ।
ये भेदाः कुष्ठानां सन्त्यन्ये विषमायुदीर्णाणाम् ।
तद्दोषित्रयाद्वानां मेदाः विश्वमपक्वानाम् ।
कुष्ठाश्रयपादैन्यरक्षमर्
कुठेरकाः काञ्जिकनारविद्या ।
वह्निः प्रलेपैरपि वङ्गमूर्त्ता
कल्पश्च दद्रूश्च विनाशयन्ति ।
तुत्थो रस दारुहरिद्राभेद
रक्तकमर्दोऽध्यक्षणकिमिव ।
सामीदग्धेन रक्तपित्ते
लेपाः कृतो बहुमतैर्विदिताः ।
विडङ्गैरपाकुष्ठविनाशिन्यूत्सवर्णैः ।
आचार्यनिर्दिष्टैर्योऽयं दद्रुकुष्ठविनाशकः ।
एडगजकुष्ठसैन्धवसौवीरसर्षपैः क्रिमिघ्नैः ।
क्रिमिविषदद्रुमण्डलकुष्ठानां नाशनो लेपः ।
पत्राणि पिष्ट्वा चतुरङ्गुलस्य
तक्रेण पत्राण्यथ काकमाच्याः ।
तैलाक्तगात्रस्य नरस्य कुष्ठा-
न्युद्वर्त्तयेदश्वगन्धकैश्च । ५ ।
विडङ्गसैन्धवशिलामनःशिलैडा
एडगजकरञ्जरजनीभिरपि ।
गोजलपिष्टो लेपः
कुष्ठहरो दिवसनाथसमः । ६ ।
आरग्वधमूलस्य काञ्जिकेन प्रपेषितम् ।
दद्रुकिटिभकुष्ठानि जयेदेतत्प्रलेपनात् । ७ ।
आरग्वधस्य पत्राणि आरनालेन पेषयेत् ।
दद्रुकिटिभकुष्ठानि हन्ति सिध्मानमेव च । ८ ।
भल्लातकं स्नुहीक्षीरं भावितं मुस्तचन्दनम् ।
हरिताल हि किणिभ लेपन किट्टिभापहम् । ९ ।
मिलतीरसेन सपिष्टं मूलकबीजं प्रलेपतः सिध्म ।
क्षारेण वा कदल्या रजनीमिश्रेण नाशयति ।१०।
।११।
शकार्त्तं न्यक्ष लेपात् कटुतैलेन सिध्मनिन् ।
वासमदनबीजानि मूलकानां तथैव च ।१२।१३।
गन्धाश्मचूर्णमिश्राणि सिध्मानां परमौषधम् ।
अपदेशात् काञ्जिकनिर्दिष्टेन । १४ ।
गन्धपाषाणचूर्णेन यवक्षारेण लेपितम् ।
सिध्मनाशं मनःशिला कटुतैलयुतेन च ।
इति धम कटुतैलेन लेपः । १५ ।
कुष्ठ मूलकबीजं प्रियङ्गुः सर्षपास्तथा रजनी ।
एतत् केशरबद्धं निहन्ति बहुवार्षिकं सिध्म ।१६।
बीजकुक्कुटलापश्चैत्यग्निः पावनमतिवक्त्राः ।
निर्मोकक्षारबीजेन पिष्टैस्तैः सिध्मनाशाय ।१७।
रक्तमशाविलसर्षपकुष्ठं मासविकारवयमदमञ्जु ।
पूतिकार्कं दिवसचमेतद्धन्ति विचर्चिकदद्रुककुष्ठम्
।१८।
सिन्दूरमरिचचूर्णं महिषीनवनीतसद्रुलवक्षाः ।
लेपाद्विहन्ति पामां तैलं करवीरसिद्धं वा ।१९।२०।
पारदं गन्धकमथ शिलापारदलावली ।
मधुयष्टिकच सर्वाण्येव नारायणकुष्ठी ।
उमरहावली, रामारकपत्रं इति स्याता ।
मञ्जार्तं मधुपूर्णं मुनिद्रुमा सुरीच ।
सारिवन्दं गुडः क्षौद्रं वाकुचीबीजयुक्तकम् ।
गोमूत्रेणारनालेन पिष्ट्वा लेपं कारयेत् ।
दद्रुमण्डलकण्डूश्च विचर्चिकां विनाशयेत् । २१ ।
मनःशिलाले मरिचं तैलं
मार्के पयः कुष्ठहरः प्रदेप । २२ ।
शिरीषकाश्मरीबिल्वकाकाणधूम
मनःशिलावलोधकैश्च सपुष्पैः ।
हन्ति दद्रुविनाशनात् कुष्ठनाशैश्चैवम् ।
कुविन्दमिव सर्वाणामर्कपरिमुक्तम् ।
अथ धवलप्रलेपः । २३ ।
महाशया योगि शुभार्कमूल
शुमाषकल्पकरहरूपम् ।
तुम्ब कदुरु अपामार्ग तथ

मालेऽपि वाकुचिकाच गदा ।
मुद्गपंचम तस्मादनल्पं
गणालया सहितधीत लेपम् ।
कुष्ठे किलासे तिलकालके च
चर्मदलं गोमयचर्मवीजे ।
महारका योनि विनाशं तत्क्षणम् ।
एतौ समभागचूर्णं त्रिफलारौ क्षीरे दत्त्वा
विधिवत् पाकं कुर्य्यात् । अथ वा क्षीरस्य चतु
र्गुणं चूर्णं पादिकं लेपयोग्यं पाकं कुर्य्यात् । प्रथ
अमा कुष्ठस्थाने दद्यात् । २४ ।
"शुष्ककायप्रभृति रम्भा मन्दधूम सहितम् ।
अवलेपं तैलपृष्ठं लेपाद्धन्ति विचर्चिकाम्" ।
त्रिफलवके सैन्धवशङ्खचूर्णं समभागं मधुना काञ्जि
क्षवारे छत्रा शरावेण पिधाय रम्भा क्षिप्त
कटुतैलेन लेपः । २५ ।
"शुक्लाम्ले सर्षपात् कल्का कुक्कुरास्तथाविद ।
लेपाद्विचर्चिकां हन्ति रागवेग इव धाराम्" ।
त्रिफलवके रक्तचन्दनं मधूकं कुष्ठकोरयामौ
दत्त्वा कटुतैलेन लेपः । २६ ।
"नारिकेलोदरे न्यस्तालक्तकुष्ठं पूतियौ यतः ।
लेपाद्विपादिकां हन्ति चिरजातामपिध्रुवम् ।२७
तिलकुष्ठमधुमसौन्यकटुतैलं बीजमायके कथा ।
शोधितमथमयूरं पारदरसटक विहन्ति लेपेन" ।२८
"उन्मत्तकस्य बीजेन माणकक्षारमारिवा ।
कटुतैल विपक्वस्य योगं हन्ति विपादिकाम्" ।
कटुतैल शं । माणमादमनारी क्षार मव ६०
भग ह ६० शेष ह १६ कल्कं धुस्तूरबीज रव
८ । उन्मत्ततैलम् । ४९ ।
"धवस्नुचं भासगर्द्दं चक्रमर्द्दं विनाशनम् ।
मालिमसाच गुडूची मधुकाञ्जिकपेशितम् ।
कण्डू कच्छू मसूरी शिरः सम गलोगगादू ।१०
सोमिवल्लिकाद्वचञ्च भवित्र धरणीधरेण चिरम् ।
विषदयवेन नियतं शमयति कच्छू विलेपनात् ।११
"नागकेशरमकुष्ठदध्नाभिगुञ्जिका सदा ।
दत्तमूत्रेण सपिष्टा लेपान्विचर्चिकापहा" ।
धम्मामपूर्णं शालमूलेन पिष्ट्वा गुडिका मार्गी ।
तेनैव लेपः । १२ ।
"पूतिकार्कबुकवहेदन्तुमरको
मूर्धा पिष्ट्वा मद्वका सोमवाच ।
लेपाद्विच हन्ति दद्रुकाच
कुष्ठान्यशोग्रपदर्शितश्च" ।
सोमवा वाकुचीपत्री । रक्तैः मधुना गोमूत्रेण
पिष्ट्वा लेपो देयः । १३ ।
"कनकविषपत्रपर्णसपीतनरविदेदनात् ।
श्वित्रं नाशं ब्रजेत् किं वा पूतिकीटविलेपनम्" ।
धनवर्णं विषदोमदापनस्य अन्योन्यपा मद्
लेपनं देयः । अथवा वाकुचिकाबीजं पिष्ट्वा लेपः
१७ । १६ । "कुष्ठोऽशपृष्ठकबीजाद् हरिताल
मद्रुमाद्यशिला । अर्कगूलेन पिष्टा कारक
करतः धवलं श्वित्रं" । आदुर्मदरादैव ।
"कुष्ठो वाकुचीबीजान् हरितालकर्णिका ।
अर्कमूलेन हन्त्यनेन प्रयोगः विचमकरा ।१८

धात्रीखदिरयोः क्वाथं पीत्वा च मधुसंयुतम् ।
शङ्खकुन्देन्दुधवलं जयेच्छ्वित्रं न संशयः ॥ ३७ ॥
धात्रीखदिरयोः क्वाथमवल्गुजरजोऽन्वितम् ।
पीत्वा शङ्खेन्दुकुन्दाभं हन्ति श्वित्रं न संशयः ॥ ३८ ॥
क्षारे सुदग्धे गजलण्डजे च
गजस्य मूत्रेण बहुश्रुते च ।
द्रोणप्रमाणं दशभागयुक्तं
दत्त्वा पचेद्वीजमवल्गुजस्य ॥
एतद्यदा चिक्कणतामुपैति
तदा ह्यमुं वै गुडिकां प्रकुर्यात् ।
श्वित्रं प्रलिम्पेदथ तेन घृष्टं
तदा व्रजत्याशु सवर्णभावम् ॥ ३९ ॥
श्वेतजयन्तीमूलं पीतं पिष्टञ्च पयसैव ।
श्वित्रं निहन्ति नियतं रविवारे वैद्यनाथाज्ञा ॥ ४० ॥
गुञ्जाफलाग्निभूलञ्च लेपितं श्वेतकुष्ठनुत् ।
शिलापामार्गभस्मापि लिप्तं श्वित्रं विनाशयेत् ॥
४१ ॥ ४२ ॥
हरिद्रातुलसीबीजं बाकुची चक्रमर्दकम् ।
तिलकोयातकोवीजं लम्पाकोठस्य बीजकम् ॥
गोमूत्रदधिदुग्धैश्च पचेदयाजमूत्रकैः ।
ततश्च दत्वा शिला कासी पथ्या कुष्ठं विडङ्गकम् ।
कटुतैलं तल्लेपाद्भूयः घृष्ट्वा विलेपनैः ।
पञ्चाननमिदं तैलं श्वेतकुष्ठकुलान्तकम्” ॥
कटुतैल श ४ हरिद्रादिबीजादीनां मिलित्वा श
२ कल्कशिलाकासीसादीनां मिलित्वा श १ ।
इति श्वित्रे पञ्चाननतैलम् ॥ ४३ ॥
“आरग्वधं धवं कुष्ठं हरितालं मनःशिला ।
रजनीद्वयसंयुक्तं पचेत्तैलं विधानवित् ॥
एतेनाभ्यङ्गमात्रेण क्षिप्रं श्वित्रं विनश्यति” ॥
तिलतैल श ४ धा श १६ कल्कमिलित श १ ।
इति आरग्वधाद्यं तैलम् ॥ ४४ ॥
“शुद्धसूतं समं गन्धं त्रिफला भल्लबाकुची ।
महातक्रं तिलाः कृष्णा निम्बबीजं समं समम् ।
मर्द्दयेद्भृङ्गजद्रावैः शोष्यं पेष्यं पुनः पुनः ।
इत्थं कुर्य्याच्छिलायाश्च रसः श्वेतारिको भवेत् ।
मध्वाज्यैर्निष्कमात्रन्तु खादेत् श्वेतं विनाशयेत्” ॥
इति श्वेतारिः ॥ ४५ ॥
“पिबति सकटुतैलं गन्धपाषाणचूर्णं
रविकिरणसुतप्तं मासमेकं च पक्षार्द्धम् ।
त्रिदिनमपि गुडिकां क्षीरभोजी च शीघ्रं
भवति कनकदीप्तिः कामरूपी मनुष्यः” ॥ ४६ ॥
“तीव्रेण कुष्ठेन परीतदेहो
यः सोमराजीं नियमेन खादेत् ।
संवत्सरं कृष्णतिलद्वितीयां
स सोमराजीं वपुषातिशेते ॥ ४७ ॥
धर्म्मसेवी कटुस्नेहं वारिणा बाकुचीं पिबेत् ।
क्षीरभोजी च सप्ताहात् कुष्ठी कुष्ठं व्यपोहति ॥ ४८
अवल्गुजबीजकर्षं पीत्वा कोष्णेन वारिणा ।
भोजनं सर्पिषा कार्य्यं सर्व्वकुष्ठविनाशनम् ॥ ४९ ॥
त्रिफला खादिरो वापि सेव्यमानो यथाक्रमम् ।
जीर्णे घृतेन भुञ्जीत मुद्गयूषौदनेन च ॥
वर्षं दूषितदेहोऽपि दिव्यरूपी भवेन्नरः ॥ ५० ॥

यः खादेदभयारिष्टमरिष्टामलकानि वा ।
स जयेत् सर्व्वकुष्ठानि मासादूर्द्ध्वं न संशयः ॥ ५१ ॥ ५२ ॥
निम्बस्य पत्रमूलानि त्वक्पुष्पफलानि च ।
चूर्णितानि घृतक्षौद्रसंयुतानि दिने दिने ॥
लिह्याद्वा पिबेद्वा मूत्रेण सगुडाम्बुदरेण वा ।
मदिरामण्डतोयेन पयसा वा यथाबलम् ॥
भुञ्जीत घृतयूषाद्यैः शाल्यन्नं पयसापि वा ।
सर्व्वकुष्ठविसर्पांश्च नाडीदुष्टव्रणानपि ॥
कामलाश्च गदानन्यांश्च तथा पित्तकफात्मकान् ।
संवत्सरप्रयोगेण सर्व्वरुक्व्याधिवर्ज्जितः ॥
जयत्येतत् पञ्चनिम्बं रसायनमनुत्तमम्” ।
इति पञ्चनिम्बम् ॥ ५३ ॥
“पुष्पकाले च पुष्पाणि फलकाले फलानि च ।
सम्पूर्णं पिचुमर्दस्य त्वङ्मूलानि दलानि च ॥
शिराणि समाहृत्य भागिकानि प्रकल्पयेत् ।
त्रिफला त्र्यूषणं ब्राह्मी श्वदंष्ट्रारुष्करामृता ॥
विडङ्गसारवाराहीलौहचूर्णाश्च ताः समाः ।
हरिद्राद्वयावल्गुजव्याधिघाताः सशर्कराः ॥
कुष्ठेन्द्रयवपाठाश्च हत्वा चूर्णं सुसंयुतम् ।
खदिरासननिम्बानां घनक्वाथेन भावयेत् ॥
सप्तधा पञ्चनिम्बं च भाकरराजरसेन च ।
स्निग्धशुद्धतनुर्धीमान् योजयेत् शुभे दिने ॥
मधुना तिक्तहविषा खदिरासनवारिणा ।
लेह्यमुष्णाम्बुना वापि कोलवृद्ध्या पलं पिबेत् ॥
तिक्तहविषा वत्समात्रपञ्चतिक्तघृतेन ।
जीर्णे च भोजनं कार्य्यं स्निग्धं लघु हितञ्च यत् ॥
विचर्च्चिकोदुम्बरपुण्डरीक-
कपालदद्रूकिटिमालसादि ।
शतारुविस्फोटविसर्पपामा-
कुष्ठप्रकोपं विविधं किलासम् ॥
भगन्दरं श्लीपदवातरक्तं
जड़ान्ध्यनाडीव्रणशीर्षरोगान् ।
सर्व्वप्रमेहान् प्रदरांश्च सर्व्वान्
दंष्ट्राविषं मूलविषं निहन्ति ॥
स्थूलोदरः सिंहपराक्रमश्च
सुस्निग्धमस्निग्धमतोपयोगात् ।
तमोपयोगादपि ये दहन्ति
कर्णादयो यान्ति विनाशमाशु ॥
जीवेच्चिरं व्याधिजराविमुक्तः
शुभे रतश्चन्द्रसमानकान्तिः” ॥
इति पञ्चनिम्बम् ॥ ५४ ॥
“अमृताया पलशतं दशमूलाल्लथा शतम् ।
पाठामूर्व्वापटोलानि निदिग्धिकाः ॥
एषां दशपलान् भागान् विभीतक्या शतं हरेत् ।
द्वे शते च हरीतक्या आमलक्याश्च सा शतम् ।
जलद्रोणद्वये पक्त्वा चतुर्भागावशेषितम् ।
ततः शुभ्रमाक्षिकं प्रमाणेन घृतं पचेत् ॥
भार्गीविडङ्गौ दन्तीञ्च मुस्ताञ्च यवानीं च ।
पलकं तदा गुग्गुलं पिप्पल्याश्च कर्षकम् ॥
ततो मात्रां प्रयुञ्जीत ज्ञात्वा दोषबलाबलम् ।
कण्डूषु कुष्ठेषु रक्तपिडकादिषु च ॥
आमजं वामवातञ्च अग्निमान्द्यं भगन्दरम् ।

भीमवत्त प्रतिश्याय श्रोथामपुदरं तथा ॥
एतान् रोगान्निहन्त्याशु भास्करस्तिमिरं यथा” ॥
अमृताद्यगुग्गुलु । अथ वातरक्ते प्रयुक्तः ॥ ५५ ॥
“निम्बामृतावृषपटोलनिदिग्धिकानां
भागान् पृथग्दशपलान् विपचेद्घटेऽपाम् ।
अष्टांशशेषितरसेन सुनिश्चितेन
प्रस्थं घृतस्य विपचेत् पिचुभागकल्कैः ॥
पाठाविडङ्गसुरदारुगजोपकुल्या
द्विक्षारनागरनिशामिसिचव्यकुष्ठैः ।
तेजोवतीमरिचवत्सकदीप्यकाग्नि-
रोहिण्यरुष्करवचाकणमूलयुक्तैः ॥
मञ्जिष्ठयातिविषया वरया यवान्या
संशुद्धगुग्गुलुपलैरपि पञ्चसङ्ख्यैः ।
तत् सेवितं विधमति प्रबलं समीरं
सन्ध्यस्थिमज्जगतमप्यथ कुष्ठमीदृक् ॥
नाडीव्रणार्बुदभगन्दरगण्डमाला-
जत्रूर्द्ध्वसर्व्वगदगुल्मगुदोत्थमेहान् ।
यक्ष्मारुचिश्वसनपीनसकासशोथ-
हृत्पाण्डुरोगमदविद्रधिवातरक्तम्” ॥
इति पञ्चतिक्तघृतगुग्गुलु ॥ ५६ ॥ ५ ॥
“श्वेतकरवीरमूलं विषाग्रञ्च साधितं गोमूत्रे ।
चर्मदलसिध्मपामाविस्फोटक्रिमिकिटिमजित्तैलम्” ॥
तिलतैल ४ सेर, गोमूत्र १६ सेर, श्वेतकरवीर
मूल ४ पल, विष ४ पल । करवीरतैलम् ॥ ५७ ॥
“भृतस्य कृष्णसर्पस्य शिरःपुच्छान्तवर्ज्जितम् ।
अन्तर्धूमं कृतं भस्म बाकुचीतैलमिश्रितम् ।
एतेन मर्दनादेव मण्डलं विनश्यति” ॥
इति कृष्णसर्पतैलम् ॥ ५८ ॥
“सूतकं गन्धकं कुष्ठं शम्पाकं चित्रकम् ।
सिन्दूरं रसोनं च हरितालमवल्गुजम् ॥
आरग्वधस्य बीजानि नीलतामं मनःशिला ।
प्रत्येकं कर्षमेतेषां कटुतैलं पलाष्टकम् ॥
तापयेत् सूर्य्यतापेन सर्व्वकुष्ठविनाशनम् ।
श्विममौदुम्बरं कच्छूं मांसवृद्धिं भगन्दरम् ॥
विस्फोटकञ्च वामाञ्च वातरक्तं सुदारुणम् ।
नाडीव्रणं गण्डमालां नाशयेत् दद्रुमण्डलम् ॥
कुष्ठराक्षसनामेदं तैलमेकरसं परम् ।
अश्विभ्यां निर्म्मितं ह्येतत् लोकानुग्रहहेतवे” ॥
इति कुष्ठराक्षसतैलम् ॥ ५९ ॥
“सूतं गन्धं शिला ताम्रं काञ्जिकेमर्द्दयेद्दिनम् ।
तद्गोलं ताम्रपात्रस्थं तैलाक्तां न्यासदेशतः ॥
क्षिप्तं पात्रे पचेत्तैलं मर्दितं लेपयेन्मुहुः ।
कुष्ठनाशं विधत्ते च सर्व्वकुष्ठहरं परम् ।
इदं नाम्ना तैलं बाकुचे महौषधम्” ॥
“सूतं गन्धं काञ्जिकं सर्व्वं त्रिगुणं त्रिफलैः ।
कन्या बन्धे तथा मर्द्दयेत् वर्त्तिं कुर्य्यात् तां
तैलाक्तां सन्दंशेन ज्वालयित्वा अधः तैलं
दत्त्वा ततः पतितं तैलं काचपात्रे गृह्णीयात् ततः
कुष्ठार्त्ताय दद्यात्” ॥
इति कुष्ठकालानलतैलम् ॥ ६० ॥
“सिन्दूराम्रतालसौवीरकनागकेशरमूलकैः
हस्तिनागरगोधादरवमसद्रजरूपैर्दत्ता ।

शाकीनस्पर्शविद्रुमि परिमिते श्वसना पचेत् सार्द्धं
तैलं प्रशमनि हृतस्य कुष्ठव पाम दद्याद्दद्रुकम्"।
सुत्पोबाद्य मनःशिला।
"गोमूत्रस्य तथा चित्रीय शकल पूत प्रस्त रोहित
दद्यात् कुष्ठविचर्चिकादिषु भिषक् मात्रा तु यद्
विन्दुकम्"। इति मञ्जिष्ठादितैलम्। ६१।
"सप्तकुष्ठे सर्व्वदा सर्व्वेष मर्दिते घाते।
मनःशिला हरिद्रे द्वे चव्यं तगरमेव च।
करवीरवचाकुष्ठ आस्फोता रक्तचन्दनम्।
मालती सिन्धुवारश्च मञ्जिष्ठा सप्तपर्णकम्।
एषामर्द्धपलान् भागान् विषस्य द्विपलं तथा।
चतुर्गुणे गवां मूत्रे तैलप्रस्थं विपाचयेत्।
श्वित्रविस्फोटकिटिभकीटलूताविचर्चिकाः।
कच्छूकण्डूरिकाद्याश्च ये चान्ये विषदूषिताः।
ते सर्व्वे नाशमायान्ति तमः सूर्य्योदये यथा।
विषतैलमिदं नाम्ना सर्व्वत्वग्दोषनाशनम्"।
इति विषतैलम्। ६२।
'सोमराजी हरिद्रे द्वे सर्षपाः कुष्ठमेव च।
करञ्जैडगजाबीजं सर्व्वाश्चारग्वधस्य च।
विपचेत् सार्षपं तैलं नाडीदुष्टव्रणापहम्।
अनेनाशु प्रशाम्यन्ति कुष्ठान्यष्टादशैव तु।
नीलिका पिडका व्यङ्गा गम्भीरं वातशोणितम्।
कण्डूकच्छूप्रशमन दद्रुपामाविनाशनम्"।
इति सोमराजीतैलम्। ६३।
"सोमराजीतुलाकाथे तथा दद्रुघ्नस्य च।
गोमूत्रस्य तथा पात्रे कल्कं दत्त्वा विचक्षणः।
विपचेत् सार्षपं तैलं कटुतैलाढकं भिषक्।
चित्रकं वाकुचान्यां च नागरं कुष्ठमेव च।
हरिद्रा गन्धपाषाण हरितालं मनःशिला।
आस्फोतार्ककरवीरं सप्तपर्णं गोमयम्।
खदिरो निम्बपत्रञ्च मरिचं कासमर्द्दकम्।
एतानि समभागानि कल्कं दत्त्वा विपाचयेत्।
हन्ति सर्व्वाणि कुष्ठानि श्लीपदश्लीपदानि च।
किटिभं दद्रुपामां च नाडीव्रणमेव च।
विशीर्णपर्व्वनासादिदह्यमानश्च दुःसहम्।
वातरोगं तथा कण्डूं विसर्पं हन्ति दारुणम्।
ये चान्ये त्वगता रोगास्तान् शीघ्रं नाशयति"।
इति बृहत्सोमराजीतैलम्। ६४।
"मरिचार्कप्रसवाश्वमारकविषाश्च च्छिन्नग्रन्थिरजम्।
शाक्रजविशालातरुक विशालकपिवल्लीः।
कटुतैलात् पचेत् सार्द्धं सर्व्वैर्वेष्यकाञ्चनैः।
गोमूत्रैः कल्कचक्रभूरिसृश्चिविनाशनम्।
सर्व्वैष्वपि च कुष्ठेषु तैलमेतत् प्रशस्यते"।
इति मरिचाद्यं तैलम्। ६५।
"मरिच त्रिवृता दन्ती क्षीरमार्कं शकृद्रसः।
देवदारु हरिद्रे द्वे मांसी कुष्ठं सचन्दनम्।
विशाला करवीरञ्च हरितालं मनःशिला।
चित्रकं लाङ्गलाख्या च विडङ्गं चक्रमर्द्दकम्।
शिरीषं कुटजो निम्बः सप्तपर्णः स्नुगर्कयोः।
सुधा गुडूची सम्पाकः खदिरः पिप्पली वचा।
ज्योतिष्मती च पलिका विषस्य द्विपलं भवेत्।
आढकं कटुतैलस्य गोमूत्रं चतुर्गुणम्।
मृत्पात्रे लौहपात्रे वा शनैर्मृद्वग्निना पचेत्।
पक्वा तैलवरं ह्येतद्म्रक्षयेत् कुष्ठवान् नरात्।
पामाविचर्चिकादद्रुकण्डूविस्फोटकानि च।
वलयः पलितं छाया नीली व्यङ्गं तथैव च।
अभ्यङ्गेन प्रणश्यन्ति सौकुमार्यञ्च जायते।
प्रथमे वयसि स्त्रीणां यासं नस्यन्तु दीयते।
पराम्परपि जरां प्राप्य न स्तना यान्ति नम्रताम्।
बलीवर्द्दस्तुरङ्गो वा गजो वा वायुपीडितः।
त्रिभिरेवाभ्यङ्गैर्गाढ़ं भवेन्मारुतविक्रमः"।
कटुतैल १६ सेर, गोमूत्र ६४ सेर, कल्कार्थं मरिचादीनां प्रत्येक १ पल, विष २ पल।
इति बृहन्मरिचाद्यं तैलम्। ६६।
"सप्तच्छदा कारी गुडूची चित्रमन्त्रम्।
शिरीषञ्च महातिक्ता वचा शुण्ठी मनाशिला"।
कारी कालिका कला।
"निम्बादसप्तपलान् भागान् मसदेशे विपाचयेत्।
तैलप्रस्थं समादाय गोमूत्रं चतुर्गुणम्।
आरग्वधो भल्लातको चायामूषकराजयः।
इन्द्रावारुणिवल्ली गोमयाकपुत्रेश्वरम्।
तैलतुल्यं प्रदातव्यं स्वरसं पृथक् पृथक्।
मधुश्यामवचा मन्दी दुग्धिकायुक्तिका।
कुष्ठेषु कुष्ठका राधिनाशनानां च सर्षिका।
सर्व्वत्वकमहीरस काएलेश्वरमूलकम्"।
काएलेश्वरमूलम्। काएलेश्वरमहत्वमिति व्यचित्पाठ तस्मात् इन्द्रमूलस्थाने अपामार्गमूलम्।
"अम्बु निद्री महातिक्ता विशाला कपिपर्णकम्।
मुषिकाचैर मूर्व्वा च सप्तपर्ण शिरीषकम्"।
कपिपर्णक विषातिमत्रम्।
"कुटज निम्बमर्दश्च भृङ्गाणिस्तथैव च।
गुडूची चन्द्ररेखा च सोमराज चक्रमर्द्दकम्।
तुम्बरुद्रुमदारुचन्दन कटुरोहिणी।
पटोलपर्णी चित्रक पञ्चतिक्तागुरुस्तम्भम्।
कर्पूरं कस्तूरी मांसी गुरैलाटवासकम्।
एतेषां कार्षिको भागं कल्कं तस्य उच्यते।
अष्टादशविध कुष्ठं मञ्जिष्ठागुण तथा।
रक्तवाताकृतिरुपान्तिभग्नाः सर्व्वगात्रेषु।
अधिकानि च नाशयति द्रव्य मात्रे भविष्यति।
नासाकर्णास्यदेवस्य देवासनपुष्करम्।
श्वेत रक्त तथा कृष्ण नानावर्णं विनाशनम्।
श्वित्र कुष्ठविसर्पाश्च वातासृग्विनमेव च।
कपालं किटिभं कुष्ठं कण्डूदद्रुविचर्चिकाम्।
पामाविस्फोटकानीति किष्मद्रुकं तथैव च।
कटीषु मधुरोग कीटस्य ढक्काग्लम्।
कुष्ठमौदुम्बरं चर्मं महापद्मं तथैव च।
स्थूलारुष्कं दुश्चर्म्माणि मद्रकम्।
वातजं पित्तजञ्चैव श्लेष्मजं सन्निपातजम्।
कपोलञ्च दुश्चर्म कुष्ठं हन्यात् समचा"।
इति बृहत्सर्वस्वरतैलम्। ६७।
"अष्टानकायो रक्तोद्गता
दलानुरापद्धरादव्यस्यात्।
तथेदकापूर्वकर्मविदया
प्रपानाधिका विनाशयेत् प्रयाते।
शुष्कद्रुमकाष्ठदग्धोत्था
प्रतः पचेत्सु चतुर्गुणाम्।
तत्पादशेष परिपूतहीनम्
क्षीरेण तुल्येन पुनः पचेत्।
तदर्द्धता स्थिरता विशीर्णे
तत उद्वेगोऽर्पित निधाय।
सत् शरदामाद्युपावलीर्षे
सुधारसादप्यधिकत्वमेति।
प्रातर्विबुद्धः शतदेवदार्थ्या
मात्राश्च खादेत् समवीक्ष्ययोग्याम्।
न चात्रपाने परिहार्यमस्ति
न चातपे चाध्वनि मैथुने च।
षडेकवेलो विधिनोपयोगात्
कुष्ठेभ्यः कायवरातिगौरः।
अनन्यमेधा बलसिद्धदेहा
सर्व्वेन्द्रियो व्याहतबुद्धिसत्त्वः।
पनाश्च शीघ्रा पुनरङ्कुराणि
केशाश्च दन्ताः पुनरेव दिव्याः।
नीलाश्मनीलप्रतिमा भवन्ति
त्वचो विवर्णाः पुनरेव दिव्याः।
विशीर्णकर्णाङ्गुलिनासिकोऽपि
छिन्नाद्रितो भिन्नकोऽपि कुष्ठी।
सोऽपि क्षमाद्युक्तितायप्रयोग
काश्यपेषा भाति नभोऽमृतांशुः।
उष्णान् मयूरान् भवति क्षणेन
बलेन नागस्तुरगो जवेन।
रसायनस्यास्य गदाः प्रभावा-
द्दुष्टस्वरैरप्यधिकोऽपि युक्ता।
यस्मात् विपाकात् दशविंशरोगान्
मज्जानि शीघ्रं न च भज्यते तु।
कुर्व्वन्ति कल्पमनन्यबुद्धि
र्नित्यशो सर्व्वकृतानि यत्र।
राजा स्वयं सर्व्वरसायनानां
चकार सोम भगवानमस्या"।
इति अमृतभल्लातकम्। ६८।
"निम्ब सोमराजी कटुकी पाचनी विषमा समम्।
पञ्चटाएकमात्रमानेनायावदिवसम्"।
पारस्कर नाकुलीलिम्।
"पाठा शुण्ठी घटी भार्गी वासा भूनिम्बसल्कम्।
मानेन्द्रवारुणी मूर्व्वा विडङ्गेन्द्रविनाशनम्।
हरिद्रयामलका देवा पटोलं रक्तरोहितम्।
करञ्जचक्रधान्यकाक्ष्यापुटाचकम्"।
देवा मधुविम्बम्। ककारधा प्रोक्तविधि भवन्ति।
"गुडूच दशमूलैव निम्बी स्तम्भमूर्व्वा।
विडङ्गपत्रा च दैत्यों सरस्वती श्रीरसपारी।
यथा विधानात् भागान् जलेनैव विपाचयेत्।
अष्टमांशरद्धेषु कुशस्वरसतरवेत्।
महत्तमपञ्चयोगि सौरा छिन्नाभ्याश्च वाजि।
चतुर्मानाच्चकेषु कलादसपादयेत्।
तो दशरी समाहाय वञ्चूतो च कारयेत्।

गुडस्य तु तुला सार्द्धा कषाये विपचेद्भिषक् ।
भल्लातकसहस्राणां सम्यक् तत्र दापयेत् ।
त्रिकटुत्रिफलामुस्तसैन्धवानां पलं पलम् ।
दीप्यकस्य पलञ्चैव चातुर्जातं पलाधिकम् ।
सम्यक् प्रक्षिपेदत्र कन्दकस्य चतुष्पलम् ।
स्निग्धभाण्डे विनिक्षिप्य स्थापयेत् कुशलो भिषक् ।
महाभल्लातको ह्येष महादेवेन निर्म्मितः ।
ममतस्तु हितार्थाय नयेच्छीघ्रं न संशयः ।
चित्रमौदुम्बरं दद्रुमरुष्यजिह्वं सकाकणम् ।
पुण्डरीकञ्च चर्म्माख्यं विस्फोटं मण्डलं तथा ।
कच्छुं कपालं कण्डुञ्च पामानं सविपादिकम् ।
वातरक्तमुदावर्त्तं पाण्डुरोगं सकृमिकम् ।
अर्शांसि षट्प्रकाराणि कासं श्वासं भगन्दरम् ।
अस्याभ्यासेन पलितमामवातं सुदुस्तरम् ।
अनुपाने प्रयोक्तव्यं छिन्नाक्वाथं पयोऽथवा ।
भोजने च सदा भोज्यमुष्णं वाम्लं विवर्जितम्” ।
इति महाभल्लातकगुडः । ६९ ।
“शुद्धसूतसमं गन्धं पलमेकं रसस्य वै ।
पलं लौहस्य ताम्रस्य पलं भल्लातकस्य च ।
तन्मध्ये पलमेकञ्च अभ्रकस्य च गुग्गुलोः ।
हरीतकीविभीतक्योश्चूर्णं काकदयं द्वयोः ।
षट्माषाधिकं तत्र धात्र्याः पालितानि षट् ।
एतत् सर्व्वं लौहात् दापयित्वा त्रिफलाजलम् ।
एकत्र कृत्वा पचेत् पात्रे लौहे च विधिपूर्व्वकम् ।
पाकमेतस्य जानीयात् कुशलो लौहपाकवित् ।
विधुरः पातकस्याय गुरुदेवद्विजार्च्चकः ।
रक्तिकादिक्रमेणैव एतन्मात्रमर्द्दितम् ।
लौहे लौहस्य दण्डेन कुर्य्यादेतद्रसायनम् ।
अनुपानञ्च कुर्व्वीत नारिकेलोदकं पयः ।
सर्व्वकुष्ठहरं श्रेष्ठं वलीपलितनाशनम् ।
पाण्डुमेहामवातघ्नं वातरक्तकफापहम् ।
क्रिमिशोथामदोषघ्नं दुर्नामवातरोगनुत् ।
अयं हन्ति महाव्याधिमत्यर्थं शुभदर्शनम् ।
अभिलक्षणं यथा कामधायकनकक्षितत् ।

> चिरम्प्रं दाताधमति क्षिपञ्च
> देहो दृढो बाहुकजाविकानाम् ।
> मात्वोदनं सक्तुभाज्यमुद्ग
> मौषं गुडं क्षीरमिह क्रियायाम् ।
> माक्षिकं गुर्व्वादिदग्धदत्त
> क्रियानतु शोद्धल पदञ्च ।
> वर्जयेत् मन्मतो विदग्ध
> मपूपान् दुर्बलदेवधातुः ।
> सम्यक् पक्वस्य सिते तु पक्षे
> विषमरोगेष्व यथा प्रयोगः” ।

फलश्रुतिः यथा,—
“दद्रूविस्फोटिकाः पामा सुप्तता कक्षा दद्रूः ।
चतुर्थं जायते बाहौ न निर्गच्छति वर्ज्जिमि ।
न च प्रस्तायते बद्धो यदा त्रिदिवं विनिर्द्दिशेत्” ।
इति अमृताङ्कुरलौहम् । ७० ।
“अन्नेनैव समं सार्द्धं पलमात्रं समुद्धरेत् ।
उपर्य्युपरि दत्त्वा तु क्षारमल्पं दिनाधिकम् ।
तानि कुष्ठे शुद्धरसायनस्य योजयेत् ।
गलिते स्फुटिते चैव विपुले मण्डले तथा ।
विचर्च्चिकादद्रुपामाश्वित्रकुष्ठप्रशान्तये” ।
इति उदयभास्करः । ७१ ।
“तालकं शतपत्राख्यं कूष्माण्डसलिले क्षिपेत् ।
सतयां वा चिञ्चां वापि दशाङ्गेन तथैव च ।
शोधयित्वा पुनः शुष्कं चूर्णयेत् सक्तुनाकृतिः ।
ततः शरावके पश्चात् स्थापयेत् कुशलो भिषक् ।
बदरीपल्लवोत्थेन लेपनं कारयेत् ततः ।
यद्यामनमसंमार्ग सविरक्ताचा प्रदीयते ।
स्वाङ्गशीतं समुद्धृत्य भाविताभो भवेद्रसः ।
एतद्रसोदिनं समधं खादयेद्रक्तिकाद्वयम् ।
सम्पूज्य देवदेवेशं कुष्ठरोगाद्विमुच्यते ।
स्फुटितं गलितं कुष्ठं वातरक्तं भगन्दरम् ।
नाडीव्रणं व्रणं दुष्टमुपदंशं विचर्च्चिकाम् । [त्वाम् ।
वातासृक्सम्भवान् रोगान् द्यतान् हन्यात् तथाव
पुण्डरीकञ्च चर्म्माख्यं विस्फोटं मण्डलं तथा” ।
इति रसमाणिक्यम् । ७२ ।
“कूष्माण्डक्षिपशालैककन्याकाञ्चिकभावितम् ।
तालकं तुल्यगन्धं स्यादर्द्धपारदमर्द्दितम् ।
अजाक्षीरेण निम्बूककन्यातोयैर्द्दिनत्रयम् ।
प्रत्येकं भावयेत् शुष्कं चक्रिकाकारतां गतम् ।
विपचेत् हण्डिकामध्ये पचापक्षारमध्यगम् ।
यामान् द्वादश शीतेऽस्मिन् प्रयोज्यं रक्तिकाद्वयम् ।
कुष्ठकण्डादिकुष्ठानि रोमविध्वंसनं तथा ।
द्विविधं वातरक्तञ्च नाडीदुष्टव्रणानि च” ।
इति तालकेश्वरः । ७३ ।
“दद्रुघ्नवायसाद्भिस्त्र दत्त्वा तालं सुमूर्च्छितम् ।
पुनः पुनश्च समधं शुष्कं कृत्वा पुटे दहेत्” ।
वाताहृभिस्त्र शरदुग्धपत्ररसम् ।
दण्डाल्यां घृत ष्ठार पालाशत्वाग्रमर्द्धः ।
ततो ज्वाला प्रदातव्या दिनरात्रे मृतं भवेत् ।
शुक्लवर्णो यदा च स्यादग्नौ दत्ते न धूमकम् ।
तदा जातं मृतं तालं सर्व्वकुष्ठविनाशनम् ।
गलत् कुष्ठं वातरक्तं आमवातभयावहम् ।
शीतपित्तमवाद्गुल्मक्ष्वेडज्वरविनाशनम् ।
पथ्यं मसूरचणकं मुद्गयूषं यथेच्छया” ।
इति तालकेश्वरः । ७४ । अतिदृष्टफलोऽयम् ।
“समर्द्धं तालकं शुष्कं शतपत्रास्यमुच्यते ।
कूष्माण्डनीरे सप्ताहं निदिनं शोधयेत् पुनः ।
एतत्कन्यादवैर्भूयो भावयेच्च दिनत्रयम् ।
संमर्द्य काञ्चिकेनैव दशांशेन विमर्द्दयेत् ।
समधं चूर्णसलिले दत्त्वा भावयेत् पुनः ।
त्रिदिनं मर्द्दयित्वा तु कारयेत् वटिकाकृतिम् ।
स्थाल्यां दृढतरायान्तु पलाशक्षाराचर्दनम् ।
उपर्य्यधस्तन्मध्ये क्षारं दत्त्वा प्रयत्नतः ।
पिधाय लेपयेत् सम्यक् पूरयेत् क्षारभस्मना ।
पुनरर्द्धं दहनेन लेपयेत्तत् दृढं ततः ।
द्वाविंशद्यामपर्य्यन्तं वह्निज्वाला प्रदीयते ।
रत्न त्रितयेन तादेन मध्वनुपानेन सेवयेत् ।
दद्रोर्नाश्यं शीतमार्गे वातुकारन्ध्रं पचेत् ।
यत्र हन्ति दद्रौ गज यत परमदुर्धर ।
कुष्ठकादश कुष्ठादि वातरोगविनाशकः ।
गलन्मण्डलमनुपम स्फुटितं गलितं तथा ।
मण्डलञ्च सर्व्वजातं नाग्न्येदर्विकारत ।
दुष्टमथञ्च वीसर्पं स्याद्दोषञ्च विनाशयेत् ।
दृष्टो वारसहस्रञ्च रोगवारणकेशरी” ।
इति महातालकेश्वरः । ७५ ।
“कूष्माण्डक्षिपशालैककन्याकाञ्चिकभावितम् ।
तालकं तुल्यगन्धं स्यादर्द्धपारदमर्द्दितम् ।
अजाक्षीरेण निम्बूककन्यातोयैर्द्दिनत्रयम् ।
प्रत्येकं भावयेच्छुष्कं चक्रिकाकारतां गतम् ।
विपचेत् हण्डिकामध्ये पचापक्षारमध्यगम् ।
यामान् द्वादश शीतेऽस्मिन् प्रयोज्यं रक्तिकाद्वयम् ।
कुष्ठकण्डादिकुष्ठानि रोमविध्वंसनादिकम्” ।
इति तालकेश्वरः । ७६ ।
इति गोविन्दविशारदकृतभैषज्यरत्नावल्यां कुष्ठचिकित्सा समाप्ता ।

कुष्ठकेतु, पुं, (कुष्ठनाशाय केतुरिव ।) भूम्याडक्य । इति राजनिर्घण्टः ।

कुष्ठगन्धि, क्ली, (कुष्ठस्येव गन्धोऽस्य । समासे इत् ।) एलवालुकम् । इति राजनिर्घण्टः ।

कुष्ठघ्न, पुं, (कुष्ठं हन्ति इति । हन् + टक् ।) हिलमोची । इति राजनिर्घण्टः ।

कुष्ठघ्नी, स्त्री, (कुष्ठघ्न + स्त्रियां टित्वात् ङीप् ।) काकोदुम्बरिका । इति राजनिर्घण्टः ।
(बाकुची । अस्याः पर्य्याया यथा ।
“अवल्गुजो बाकुची स्यात् सोमराजी सुपर्णिका ।
शशिलेखा कृष्णफला सोमापुष्पी फलीति च ।
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता” ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
अस्या व्यवहारो यथा—
“कुटजामिनिम्बपत्रमर्गैरावतश्यामदलविचूर्णे ।
सिद्धा मधुघृतयुक्ता कुष्ठघ्नीमक्षयेद्दन्ता ।
इति चरके चिकित्सास्थाने १८ अध्याये ।)

कुष्ठनाशन, पुं, (कुष्ठं नाशयतीति । नश् + णिच् + ल्यु ।) वाराहीकन्दः । भारमथ । इति राजनिर्घण्टः । श्वेतसर्षपः । इति रत्नमाला ।

कुष्ठनाशिनी, स्त्री, (कुष्ठं नाशयतीति । नश + णिच् णिनि । स्त्रियां नान्तत्वात् ङीप् ।) सोमराजिः । इति रत्नमाला ।

कुष्ठल, क्ली, (कु कुत्सितं स्थलम् । कम्बलादित्वात् पत्वम् ।) कुत्सितस्थलम् । इति सिद्धान्तकौमुद्याम् ।

कुष्ठसूदन, पुं, (कुष्ठं सूदयति नाशयतीति । सूदि + ल्यु ।) आरग्वधः । इति राजनिर्घण्टः ।
(आरग्वधशब्देऽस्य गुणपर्य्यायाः ज्ञातव्याः ।)

कुष्ठहन्ता, [ऋ] पुं (कुष्ठं हन्ति इति । कुष्ठ + हन् + तृच् ।) हस्तिकन्दः । इति राजनिर्घण्टः ।

कुष्ठहन्त्री, स्त्री (कुष्ठहन् + स्त्रियां ऋन्नेभ्यो ङीप् ।) बाकुची । इति राजनिर्घण्टः । बाकुच इति भाषा ।

कुष्ठहृत्, पुं, (कुष्ठं हरतीति । कुष्ठ + हृ + क्विप् तुगागमश्च ।) खदिरवृक्षः । इति शब्दचन्द्रिका ।

कुष्ठारि, पुं, (कुष्ठस्य अरिः शत्रुः ।)

इति च । "कु तिहोः" । ७ । २ । १०४ । इति किमः कुः ।) कुह । वैदिकप्रयोगोऽयम् । इति व्याकरणम् । (यथा, ऋग्वेदे २ । १२ । ५ । "यं स्मा पृच्छन्ति कुह सेति घोरमुतेमाहुर्नैषो अस्तीत्येनम्" ।)

कुहः, पुं, (कुहयति विस्मापयति ऐश्वर्य्यप्रभावेण यः । कुह + णिच् + अच् ।) कुबेरः । इति हेमचन्द्रः ॥ (स्त्री, माया । कुहकम् । यथा, रामायणे २ । १०८ । १७ ।
सम्प्रत्युपगतस्तु लोकयात्रां प्रवाहये ।
"अकुहः श्रद्धधानः सन् कार्य्याकार्य्यविचक्षणः" ।)

कुहकं, क्ली, (कुह + "क्वुन्शिल्पिसंज्ञयोरपि" । उणां २ । ३२ इति क्वुन् ।) माया ।
(यथा, भागवते । १ । १ । १ ।
"जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत् सूरयः । तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि" ।) तत्पर्य्यायः । इन्द्रजालम् २ मायम् ३ कुहकम् ४ । तद्युक्ते त्रि । तत्पर्य्यायः । धूर्त्तः २ वञ्चकः ३ व्यंसकः ४ दाम्भिकः ५ मायी ६ जालिकः ७ । इति हेमचन्द्रः ॥ दाम्भिकः । इन्द्रजालिकोऽपि । (सर्पविशेषः । यथा, विष्णुपुराणे १ । १० । १८ ।
"इत्युक्तास्तेन ते सर्व्वे कुहकास्तत्पराश्रयाः ।
अद्यापि तत्कुले तु नाभिप्रवर्त्तिविशेषतः" ।)

कुहकजीवी, [न्] त्रि, (कुहकेन इन्द्रजालविद्यया जीवति जीवनयात्रां सम्पादयतीति । कुहक + जीव् + णिनिः ।) मायाजीवी । इति महाभारतम् ॥ बाजिकर इति भाषा ॥ (उपजीवि । इति मूल टिकायोऽर्थः । वाजिकर इति भाषा ।)

कुहकस्वन, पुं, (कुहकः विस्मापकः स्वनः शब्दो यस्य ।) कुक्कुटपक्षी । इति हेमचन्द्रः ॥

कुहकस्वर, पुं, (कुहकः विस्मापकः स्वरो यस्य ।) कुक्कुटः । इति शब्दरत्नावली ॥

कुहकार, पुं, तालभेदः । यथा, सङ्गीतदामोदरे ।
"हृतबन्ध चतुर्वर्णं ताले कुहकसंज्ञके" ॥

कुहन, स्त्री, (कु ईषत् उपयोगेन हन्यते इति । हन् + कर्म्मणि अप् ।) मृद्भाण्डविशेषः । काचभाजनम् । (कुत्सितव्यापारेण हन्तीति । हन् + अच् ।) पुं मत्सरी त्रि । इति मेदिनी ॥

कुहनः, पुं, (कु कुत्सितं भूमिं वा हन्ति गच्छतीति । हन् + अच् ।) मूषिकः । (कौ पृथिव्यां कुत्सितं वा हन्ति दशतीति । हन् + अच् ।) सर्पः । इति हेमचन्द्रः ॥

कुहना, स्त्री, (कुह + "ब्यापच्छेदे च" । ३ । ३ । १०० । इति युच् ।) दम्भचर्य्या । इति मेदिनी ॥ लोभात्मिथ्येर्य्यापथकल्पना । इत्यमरः । ३ । २ । ४२ । अर्थलिप्सया मिथ्या ईर्य्यापथस्य ध्यानमौनादेः कल्पना । दम्भचर्य्या । अर्थलिप्सया ध्यानादिः । इति भरतः ॥

कुहनिका स्त्री, (कुह + युच् स्वार्थे कः टाप् अत इत्वम् ।) कुहना । इति शब्दरत्नावली ॥

कुहर, क्ली, (कु भूमिं हरतीति । कु + हृ + अच् ।) गह्वरम् । छिद्रम् । इति मेदिनी ॥ (यथा, प्रसन्नराघवे ।
"तैः किं मत्तकरीन्द्रकुम्भकुहरे नारोपयीत्ता करा" ।) कर्णः कण्ठध्वनिः । गलः । अन्तिकम् । इत्यजय भावः ॥

कुहरः, पुं, (कुह विस्मापने + करः । कुह विस्मापनं भयविस्मयं राति ददाति भयं जनयतीति भावः । रा + क ।) नागविशेषः । इति मेदिनी ॥

कुहरितं, क्ली, (कुहरयति कण्ठध्वनिं करोति । कुहर + तत्करोति णिच् + भावे क्त ।) पिकालापः । रतिध्वनिः । इति मेदिनी ॥ रटितम् । इति विश्वः ॥

कुहलि, पुं, (कु + हलि + इन् ।) पूगपर्णिका । इति त्रिकाण्डशेषः । पान इति भाषा ॥

कुहा, स्त्री, (कुह + कः टाप् च ।) कटुकी । इति शब्दचन्द्रिका ॥
(वदरी । इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणाश्चास्य वदरशब्दे ज्ञेयाः ।)

कुहु, स्त्री, (कुह + मृगय्वादित्वात् कु ।) कुहूः । इति हेमचन्द्रः ॥ (यथा, महाभारते ।
"कोकिलानां कुहुरवैः शुभैः श्रुतिमनोहरैः" ।)

कुहूः, स्त्री, (कुह + बाहुलकात् ऊप्रत्ययः ।) नष्टेन्दुकलामावास्या । इत्यमरः । १ । ४ । ८ ।
(यथा, श्रुतौ । "द्वे वा वा अमावास्ये या पूर्व्वामावास्या सिनीवाली योत्तरा सा कुहूरिति" ।
आश्वलायनश्रौतमाधवीये व्याख्या ।
"दृष्टचन्द्रा सिनीवाली नष्टचन्द्रा कुहूर्म्मता" ।
मतान्तरे तु ।
"तिथिक्षये सिनीवाली नष्टचन्द्रा कुहूर्म्मता ।
नाशश्चेति कुहूर्ज्ञेया वेदवेदान्तवेदिभिः" ।
एवं व्याख्यायिकादिभेदमाह । यथा, नारदः ।
"चतुर्द्दशयुतामायी यदि दृश्यविपिनये ।
आदित्योदये सिनीवाली निरोधार्थे कुहूर्म्मता" ।
आदिशब्दात् अतीतमाश्चोरपि सङ्गमे प्रयाण कोशादिः ।
"सिनीवाली दिने चार्द्धं व्यापिने दिनकर्म्मणि ।
कीर्त्ति सूरैः कुहू यार्द्धा तथा चापरिवर्त्तिनैः" ।
तदधिष्ठात्री देवता । यथा, निरुक्ते ।
"सिनीवाली कुहूरिति देवपत्न्याविति" ।
एषा च अङ्गिरसः सुता । यथाह भागवते ४ । १ । ३४ ।
"श्रद्धा त्वङ्गिरसः पत्नी चतस्रोऽसूत कन्यकाः ।
सिनीवाली कुहू राका चतुर्थ्यनुमतिस्तथा" ।)
कोकिलध्वनिः । इति मेदिनी ॥ (यथा, आर्य्यासप्तशती ४१० ।
"देवानापि विचारो कुहू रितावेदन शब्द" ।)

कुहूकण्ठः, पुं, (कुहूरिति शब्दः कण्ठे यस्य ।) कोकिलः । इति शब्दरत्नावली ॥

कुहूमुखः, पुं, (कुहूरिति शब्दः मुखे यस्य ।) कोकिलः इति त्रिकाण्डशेषः ॥

कुहूरवः, पुं, (कुहूरिति रवो यस्य ।) कोकिलः । इति राजनिर्घण्टः ॥ (रटुतम् ।
"दिक्षु दिक्षु शृणु अत्र मम समयमपि यस्य विरोधिकुहूरव" ।)

कुहर्थ, क्ली, (कुह + उन्प्रत्ययः ।) कण्टकाड्ढकम् । इति जटाधरः ॥

कुहेडिका, स्त्री, (कु ईषत् हेडति वेष्टते नेत्रदृष्टिरोधं करोतीति । हेड् वेष्टने + ण्वुल् ततः स्वार्थे कन् ततः टाप् ।) कुज्झटिका । इति मुकुटधोषः ॥

कुहेडी, स्त्री, (कु ईषत् हेडति वेष्टते नेत्रदृष्टिरोधं करोतीति । हेड् वेष्टने + "सर्व्वधातुभ्य इन्" उणां ४ । ११७ । इति इन् । ततः कृदिकारादक्तिन इति वा ङीष् ।) कुहेडिका । इति शब्दमाला ॥

कुहेलिका, स्त्री, (कु ईषत् हेडति वेष्टते नेत्रदृष्टिरोधं करोतीति । हेड् वेष्टने + इन् । ततः स्वार्थे कन् । टाप् । डस्य लत्वम् ।) कुज्झटिः । इति त्रिकाण्डशेषः ॥

कू ङ ङ आर्त्तस्वरे । इति कविकल्पद्रुमः ॥ (तुदां-आत्मं-अकं-सेट ।) ङ ङ कुवते आर्त्तो आकुविष्ट । इति दुर्गादासः ॥

कू ञ श शब्दे । इति कविकल्पद्रुमः ॥ (क्र्यां-उभं-अकं-सेट ।) ञ श कूनाति कूनीते । अकावीत् अकविष्ट । प्रवादिगणीयोऽयम् । मतान्तरे रहितो ज्यादान इति रमानाथः । दीर्घान्त इति गोविन्दः । इति दुर्गादासः ॥

कूः, स्त्री, (कूनाति शब्दायते इति । कू + क्विप् ।) पिशाची । इति शब्दमाला ॥

कूकुदः, त्रि, (कू शब्दे भावे क्विप् । कुवा शब्दस्य कीर्त्तेर्निमित्तं कु भूमिं आभरणबस्त्राणि वा ददातीति । कूकु + दा + क ।) सम्पूर्णालङ्कृतां कन्यां यो ददाति सः । इत्यमरः । २ । ७ । ९ ॥

कूचः, पुं, (कु शब्दे "कुवट दीर्घश्च" । उणां ४ । ९९ । इति चट् दीर्घश्च ।) स्तनः । इत्युणादिकोषः ॥

कूचिका, स्त्री (कूच + टिठन् ङीप् । स्वार्थे कन् ।) कूचिका । इति हेमचन्द्रः ॥

कूज अव्यक्ते शब्दे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-सेट ।) दीर्घी । विहङ्गमध्वनिः । कूजति कोकिलः । इति दुर्गादासः ॥

कूजितं, क्ली (कूज + भावे क्त ।) पक्षिध्वनिः । इति हेमचन्द्रः ॥ (यथा गीतगोविन्दे १ । ३ । ३ ।
"ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे ।
मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे" ।)

कूट श ञ अप्रदाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-अकं सेट् ।) अप्रदानं दानाभावः । श ञ कूटयते धनं कृपणः । अप्रदाने न करोति विदिन ददाति इत्यर्थः । इति दुर्गादासः ॥

कूट इ ष दाहे । मन्त्रे । इति कविकल्पद्रुमः ॥ (चुरां-पर-अकं-सेट ।) दीर्घी । अचुकूटत् । इति दुर्गादासः ॥

कूटः, पुं, (कूटयति दाहं करोति शत्रुबलसहनेन वा दाहयति इति । कूट दाहे + णिच् + अच् ।) अगस्त्यमुनिः । इति शब्दरत्नावली ॥

कूटः, पुं, स्त्री, (कूट्यते दातुं न शक्यते स्थावरत्वादिति। कूट अप्रदाने + कर्म्मणि घञ्।) गृहम्। इति शब्दरत्नावली।

कूटः, पुं, क्ली, (कूट् + घञ्।) निश्चलः। राशिः। (यथा, रामायणे। १।१४।२५।
"अभ्रकूटाश्च दृश्यन्ते बहवः पर्व्वतोपमाः"।)
लौहमुद्गरः। (यथा, भागवते। ४।२५।८।
"एते त्वां सम्प्रतीक्षन्ते स्मरन्तो वैशसं तव।
सम्परेतमयःकूटैश्छिन्दन्त्युत्थितमन्यवः"।)
माया। (यथा, महाभारते वनपर्व्वणि।
"नैव धर्म्मेण तद्राज्यं नार्ज्जवेन न चौजसा।
अक्षकूटमधिष्ठाय हृतं दुर्य्योधनेन वै"।)
पर्व्वतशृङ्गम्। (यथा, महाभारते आनुशासनिके।
"नदीनामिव कूटानि भानुमन्ति शेरते"।)
गुहः। सीरावयवः। यन्त्रम्। फाँद इति भाषा।
(यथा, रामायणे।
"वागुराभिश्च पाशैश्च कूटैश्च विविधैस्तथा"।)
अनृतम्। इति मेदिनी। अयोघनम्। इति हेमचन्द्रः। कैतवम्। इत्यमरः। ३।३।२६।
(यथा, भागवते। ६।५।१०।
"नाथः कूटस्तु देवर्षे अथ विमत्सरधिया"।
तद्वति त्रि। यथा, मनुः। ७।९०।
"न कूटैरायुधैर्हन्यात् युध्यमानो रणे रिपून्"।
मिथ्याभूते त्रि। यथा, याज्ञवल्क्यः।
"द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्व्वसाक्षिणः"।
पुरद्वारम्। यथा, महाभारते। ३।५।१४।
"इदं कूटे मनुष्येन्द्र! मनने भवती मणी।
भीमघाता दुरारोहा शमानस्य समीपतः"।
अत्र कूटशब्दस्तु टीकाकृन्मतभेदेन पर्य्यायान्तरे ऽपि वर्त्तते। अग्रभागमात्रम्। यथा, रामायणे।
"किरीटकूटैर्ज्वलितं शृङ्गारं दीप्तकुण्डलम्"।
भागवते च। ३।१३।२८।
　　"स्वयमकूटाङ्गविनाशयेन
　　विशीर्णकुक्षिः स्तनयन्नुदन्वान्।
　　खाद्वत्तिरोभिर्मिहुनैर्वियोत
　　पुनोति वर्ष्मेश्वर! पाहि मेति"।)

कूटकं, क्ली, (कूट् + स्वार्थे कन्।) फालम्। इत्यमरः। २।९।१३।

कूटकः, पुं, (कूट् + ण्वुल्।) बदरी। इति त्रिकाण्डशेषः। पुराणाक्तमाक्ष्यम्। इति शब्दमाला। (पर्व्वतविशेषः। यथा भागवते। ५।१९।१६।
"भारते ऽप्यस्मिन् वर्षे सरिच्छैलाः सन्ति बहवः"।
"विकूट ऋषभः कूटकः कोल्वः सह्यः" इति।)

कूटकृत्, पुं, (कूटं करोतीति। कूट + कृ + क्विप् तुगागमश्च।) शिवः। कायस्थः। इति त्रिकाण्डशेषः। कितवे, त्रि। (तुलाकर्म्मणि कैतवकारी। यथा याज्ञवल्क्यः। २।२४१।
"तुलाशासनमानानां कूटकृन्नाणकस्य च"।)

कूटजः, पुं, (कूटे दक्षते इव जायते। जन + डः।) कुटजवृक्षः। इति राजनिर्घण्टः। (कुटजशब्दे ऽस्य गुणादयो ज्ञेयाः।)

कूटपूर्ब्बः, पुं, हस्तिनां शिरोदकज्वरः। इति निशारदशेषः। कूटपर्य्यो ऽपि क्वचित्पाठः।

कूटपालकः, पुं, (कूट स्वतुल्येन पालयतीति। पालि + ण्वुल्।) कुलालस्य पचनम्। कुमारेर पोयान् इति भाषा। पित्तज्वरः। इति हारावली।

कूटयन्त्रं, क्ली, (कूटं कैतववत् यन्त्रम्।) आमिषं दत्त्वा मृगपक्षिबन्धनार्थं यत् सन्धानयन्त्रं निवेश्यते तत्। फाँद इति भाषा। तत्पर्य्यायः। उन्माथः २। इत्यमरः। २।१०।२६।

कूटशाल्मलिः, पुं, (कूट शाल्मलिः।) शाल्मलिविशेषः। काण्डिमाषा इति ख्यातः। कुत्सितशाल्मलिः अल्पतशाल्मलिर्वा। इत्यन्ये। इति भरतः। तत्पर्य्यायः। रोचनः २। इत्यमरः। २।४।४०।
(क्वचित् स्त्रीलिङ्गे ऽपि दृश्यते। कूटशाल्मलिरिव इति व्युत्पत्त्या यमस्य गदाया मौर्वी स्त्रमा। यथा, रघौ १२।९५।
"अथ मदगुचितां रक्षः प्रतिपक्षमथ प्रत्नवे।
धृतां वैवस्वतस्येव कूटशाल्मलिमक्षिपत्"।
नरकस्थाः कण्टकाधिकाः शाल्मलिवृक्षविशेषः। स च दुरारोहः। यथा, महाभारते १८।२।४।
"मातृहन्तृ च तालव दारुणाः पापकर्म्मिणाम्।
नदी वैतरणी चैव कूटशाल्मलिना सह"।)
राजनिर्घण्टोक्तगुणपर्य्यायौ रोहितकशब्दे द्रष्टव्यौ।

कूटसक्रान्तिः, स्त्री अर्द्धरात्रातीते सूर्य्यस्य राश्यन्तरगमनम्। यथा,—
"सक्रान्तिद्विविधा यत्र पूर्व्वं तत्र परित्यजेत्।
कलास्य कूटसक्रान्तौ वामदानतपोव्रतम्।
अर्द्धरात्रव्यतीते तु यदा सङ्क्रमते रविः।
सा ज्ञेया कूटसक्रान्तिर्मुनिभिः परिकीर्त्तिता"।
इति विद्यानिधिकृतज्योतिःसारसंग्रहवचनम्। *। अपि च।
"अर्द्धरात्रे व्यतीते तु सक्रान्तिर्यदि सम्भवेत्।
पूर्व्वं प्रवाहिकं कुर्य्यात् परेद्यु स्नानदानयोः।
इति भीमपराक्रमीयम्। स्नानदानयोरित्यत्र कर्म्मणोर्निर्द्देशात् परदिवसीयस्नानदानविनिमित्तकपूर्व्वदिने उपवाससंयमनक्षत्रव्रतादिकं कुर्य्यादित्यर्थः। इति तिथ्यादितत्त्वम्।

कूटस्थः, त्रि, (कूटे मायायां तिष्ठतीति। यद्वा, कूटवत् निर्व्विकारेण स्थितः सन् तिष्ठतीति। कूट + स्था + कः।) एकरूपतया तु कालव्यापी यः। इत्यमरः। (परमात्मा। यथा, पञ्चदश्यां ६।२२-२७।
"अधिष्ठानतया देहद्वयावच्छिन्नचेतनः।
कूटवन्निर्व्विकारेण स्थितः कूटस्थ उच्यते।
कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्रतिबिम्बकः।
प्राणानां धारणाज्जीवः संसारेण स युज्यते।
जलव्योम्ना घटाकाशो यथा सर्व्वस्तिरोहितः।
तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते।
अयं जीवो न कूटस्थं विविनक्ति कदाचन।
अनादिरविवेकोऽयं मूलाविद्येति गम्यताम्।
विक्षेपावृतिरूपाभ्यां द्विधा ऽविद्या प्रकल्पिता।
न भाति नास्ति कूटस्थ इत्यापादनमावृतिः।
अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते।
न भाति नास्ति कूटस्थ इति बुद्धा वदत्यपि"।
कूटस्थचैतन्यस्य अविद्याध्यस्ततयैव जीवत्वं नतु स्वरूपतः निरस्तं तस्मादपि निरस्यमानत्वात् निष्प्रपञ्चसच्चिदानन्दस्वरूपस्यास्य पुरुषोत्तमः परमात्मेत्युच्यते। यथा, गीतायां १५।१६-१७।
"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते।
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः।
यो लोकत्रयमाविश्य बिभर्त्त्यव्यय ईश्वरः"।)
एकेनैव स्वभावेन निरवधिकालस्य व्यापको यः स्थाकाशादि। इति भरतः। (कूटे भयाशङ्के तिष्ठति यः। स्था + कः।) व्याघ्रनखः। इति राजनिर्घण्टः। (व्याघ्रनख इति भाषा।)

कूटस्था, स्त्री, (कूटस्थ इव प्रकाशते यत्। अप्रत्यादेरप्।) व्याघ्रनखाख्यगन्धद्रव्यम्। इति जटाधरः।

कूटसाक्षी, [न्] त्रि, (कूटः मायावी मिथ्यावादी कपटीत्यर्थः साक्षी।) मिथ्यासाक्षी इति व्यवहारतत्त्वम्। (याज्ञवल्क्ये कूटसाक्षिलक्षणम्। यथा,—
"द्विगुणा वान्यथा ब्रूयुः कूटाः स्युः पूर्व्वसाक्षिणः"।
ते तु गुरुदण्डार्हाः। अतः मायविज्ञाः रौरवाख्यनरकं व्रजेयुः। यो हि ज्ञानमपि साक्ष्यं न ददाति स कूटसाक्षितुल्यः। तथा च तत्रैव।
"न ददाति तु यः साक्ष्यं जानन्नपि नराधमः।
स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि"।)

कूटागारं, क्ली, (कूटं आगारं गृहम्।) वलभी। तत्पर्य्यायः। चन्द्रशालिका २। इति त्रिकाण्डशेषः। क्रीडा क्रीडागारम्। इत्यादिकाष्टटीका।

कूटार्थभाषिता, स्त्री, (कूटार्थस्य दुर्ज्ञेयार्थस्य कल्पितार्थस्य वा या भाषिता।) प्रगल्भकथालापः। इति शब्दरत्नावली। कथकता इति भाषा।

कूड, भि घाने। भक्षे। इति कविकल्पद्रुमः। (तुदां परं-अक-सकं सेट्।) घ्रदन्ती। अत्रायमनुबन्धस्य कूडादौ पाठः प्राधान्यमनुरोधात्। प्रायोऽपि शान्तवक्तापादिम कूडादौ पठितव्यता। त्रि, कूडती कूडन्ती। घास अत्तीमावः। कूडति दुग्धं पक्षिशावाद्। कूडमक्ष चोकः। इति दुर्गादासः।

कूड, स्त्री, (कूडति दुर्भीभवति भक्षादिना। कूड + अच्।) भित्तिः। इति शब्दरत्नावली। देवाल इति भाषा।

कूण, णु क सङ्कोचे। इति कविकल्पद्रुमः। (चुरा-परं-सकं सेट्।) दीर्घी। मूर्द्धन्योपधः अचूकुणत्। कर्णुचिमभूदित्यर्थः। इति दुर्गादासः।

कूण, ङ क अङ्कते। इति कविकल्पद्रुमः। (चुरां आत्मं-सकं सेट्।) एकवृत्तः। क व, कूणयते वस्तु वस्तुचितः पञ्चविधी। भूतमभिवेद। इति दुर्गादासः।

कूणि, त्रि, (कूणति कुष्ठितो भवति रोगैरिति। कूण सङ्कोचे "सर्व्वधातुभ्य इन्"। उणा० ४।११७। इति इन्।) कुणिः। रोगविशेष

कुपितकर । इत्यमरटीकायां भरतः ॥

कूपिका, स्त्री, (कूप + स्वार्थे कन् टाप् अत इत्वम् ।) मज्जनम् । नौकामूलस्थप्रस्तरः । तत्पर्य्यायः । कलिका २ । इति हेमचन्द्रः ॥

कूदर, पुं, (कुत्सितम् उदरं यस्य । कुत्सितार्थे शकन्ध्वादित्वात् साधुः ।) जातिविशेषः । यथा,— ब्रह्मवैवर्त्तपुराणे ।
"ब्राह्मण्यामपि वैश्यात्तु जातो ग्रामपवादके ।
कुत्सिते चोदरे जातः कूदरस्तेन कीर्त्तितः ।
तद्ग्रीव विमुत्सृज्य पतितो दुष्टदोषतः ।
स च कोटकसङ्गादिषमो भवतीतरे" ॥

कूद्दाल, पुं, (कुद्दाल + पृषोदरात् दीर्घत्वे साधुः ।) कुद्दालवृक्षः । इत्यमरटीकायां रमानाथः ॥

कूण, न क दीप्तौ । (अदन्तचुरा०-पर०-अक०-सेट् ।) अयं मन्दस्वरी । इति सिद्धान्तः ॥ सम्मन्दस्वरी । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥

कूप, पुं, (कु ईषत् आपो यत्र । "ऋक्पूरब्धूः" । ५ । ४ । ७४ । इत्यप्रत्ययेन दीर्घनिर्देशादत्वम् । पुनरित्येति वा । यद्वा कुवन्ति मण्डूका अत्र । "कुयु भावे" । उणां ३ । २७ इति पो दीर्घश्च ।) खनित्वाग्रे जलाधारः । कुया इति पातकुया इति च भाषा । तत्पर्य्यायः । अन्धुः २ प्रहिः ३ उदपानम् ४ । इत्यमरः । १ । १० । २६ ॥ अवट ५ कोट्टार ६ । इति जटाधरः ॥ काट ७ कूपा ८ खलः ९ काटः १० खाता ११ अवतः १२ किविः १३ सूदः १४ उत्स १५ ऋष्यदात् १६ कारोतरात् १७ कुशेषः १८ केवटः १९ । इति वेदनिघण्टौ ३ अध्याये अथोदककूपनामानि ॥ तस्य जलस्य गुणाः यथा,—
"भूमौ खातोऽल्पविस्तारो गम्भीरो मण्डलाकृतिः ।
बद्धोऽबद्धो स कूपः स्यात्तदम्भः कौपमुच्यते" ॥
इति भावप्रकाशः ॥ तज्जलगुणाः । वातकफनाशित्वम् । अग्निदीपनत्वम् । लघुत्वम् । पित्तवर्द्धनत्वम् । क्षारत्वम् । शीतकाले उष्णत्वम् । उष्णकाले शीतत्वम् । वर्षाकाले पथ्यत्वम् । इति राजवल्लभः ॥

("कूप जलम् स्वच्छामलकम्
सन्दोषम् विसर्पं कण्डूघ्नम् ।
कूपोदकं वातहरं मन्दिदं
पित्तं न हन्ति प्रदरो करोति" ॥
इति हारीते प्रथमस्थाने ७ अध्याये ॥

कूपादिखननफलादिकं जलाशयोत्सर्गतत्त्वादिषु द्रष्टव्यम् । यथा,—
"सेतुबन्धरता ये च तीर्थशौचरताश्च ये ।
तडागकूपकर्त्तारो मुच्यन्ते ते तृषाभयात्" ॥
विष्णौ च । "अथ कूपकर्त्तुस्तत्प्रवृत्ते पानीये दुष्कृतार्द्धं विनश्यति" । तस्मात् कूपखननं कुर्य्यादिति ॥ विष्णुधर्म्मोत्तरे च ।
"कूपारामतडागानां कर्त्ता स्वर्गं प्रयाति च ।
अपो दानवतां श्रेष्ठ सर्वदानाधिकं स्मृतम्" ॥
तथा, नन्दिकेश्वरपुराणे ।
"यो खानयति कूपं वै वैदिकेष्वपि ।

शामयेत् स दिव याति दिव्यौ विद्यौ इत ऋषा" ॥ तत्कूपकारकस्तुरपि अधमपुत्रो विद्यौ । यथा,—
"कूपारामतडागेषु देवतायतनेषु च ।
पुनः संस्कारकर्त्ता च लभते मौलिकं फलम्" ।
पर अधःपूज्यदेवालयाने एव प्रतिष्ठा न तु पञ्चो आरम्भे । "अशक्ते अधमुत्पाद्य" इति वचनात् ।) गर्त्तः । गुहाच्छिद्रः । नदीमध्यस्थितो वृक्षः प्रस्तरो वा । इत्युणादिकोषः । कूपकः । कूपा इति भाषा । मस्तूलम् । इति मेदिनी ॥

कूपक, पुं, (कूपे गर्त्ते कायते प्रकाशते इति । कै + क ।) नौकागुणवृक्षबन्धनकाष्ठम् । इत्यमरः । १ । १० । १२ । मास्तुल इति भाषा । तैलपात्रम् । कूपा इति भाषा । कुकुन्दरम् । उदपानम् । चिता । इति मेदिनी ॥ (कुण्डनपाटो भपार्श्वे कूपो गर्त्तः । इत्यमरः । १ । १० । १० ।)

कूपाङ्क, पुं, (कूपाकार अङ्कः अस्मिन् ।) रोमाञ्चः । इति शब्दरत्नावली ॥ कूपाङ्गोऽपि पाठः ॥

कूपार, पुं, (कु पृथिवीं पिपर्त्ति पूरयति । पृ + अण् पृषोदरात् उकारस्य दीर्घः ।) अकूपारः । इत्यमरटीका ॥ कूवारोऽपि पाठः ॥

कूपिका, स्त्री, (कूप + स्वार्थे कन् ततष्टाप् अत इत्वम् ।) जलमध्यस्थितपाषाणम् । जलमध्यस्थितवृक्षं तादि । इति मेदिनी ॥

कूपी, स्त्री, (कूप + ङीप् ततो ङीष् ।) पात्रविशेषः । यथा, कर्णोद्धयचिकित्सायां भावप्रकाशः ।
"भावयेत् समस्तत्रिफलाक्वाथरसेन च ।
ततः संशोष्य चूर्णं तत् कूपीमध्ये निधापयेत्" ॥

कूम, स्त्री, (कौ पृथिव्याः भूमेर्वा उमा कान्तिः यस्मात् ।) सरोवरः । इति जटाधरः ॥

कूर, पुं, (केन सुखेन + भावे क्विप् उः । कौ भूमौ सर्वं वदन् याति प्रकाशतीति । का + कः । अच् टः ।) भक्तम् । इति हलायुधः ॥

कूर्च्च, स्त्री, (कूर्च्च्यते इति कुर् शब्दे बाहुलकात् चट् किद्वा सनात् दीर्घ ।) मस्तकस्य केशादिमुष्टिः । कुचि इति भाषा । यथा,—नारसिंहपुराणे ।
"ततः समर्पयेत् कूर्च्चं कुशैरादिविनिर्म्मितम् ।
मन्त्रपञ्चकादपि योगरूपमनुत्तमम्" ॥
विष्णुधर्म्मोत्तरे च ।
"उशीरकूर्च्चेन यथा सम्मार्ज्य प्रमुच्यते ।
तथा जीरकनं कूर्च्चं स्पर्शनात् समाचरेत् ।
तथा चामरकं कूर्च्चं विशेषाद्विप्रयुताम्" ॥
इति श्रीहरिभक्तिविलासस्य १ विलासे ४५ श्लोकः ॥

कूर्च्च, पुं, स्त्री, (कुर् + चट् निपातनात् दीर्घः ।) भ्रूयोर्मध्यम् । भूवयमध्यस्थानम् । इत्यमरः । २ । ६ । ९२ ॥ मयूरपुच्छमुष्टिः । कुशमुष्टिः । इति भरतस्य शब्दरत्नटीकायां नीलकण्ठः । कठिनम् । अन्तःश्मश्रुकेशम् । इति मेदिनी ॥ विकत्थनम् । दम्भः । शिरोवरिष्ठाः । न तु श्मश्रु । विशेषस्य उपरिभागः । इति हेमचन्द्रः । बीजम् । इति तन्त्रम् ॥ (यथा, कर्पूरस्तोत्रे "वरदे वर्णविधाय विधुरान्वर्त्तिनं सकर्णं कूर्च्चमुग्मम्" ।) यथा, भैरवनाथे ।

"वाणीबीजद्वयं देवि । बीजं हृत्पद्मैव च ।
पञ्चमो वा महाविद्या कालिका कालिका स्मृता" ॥)

कूर्च्च, पुं, (कुर् + बाहुलकात् चट् निपातनात् दीर्घः ।) सौवर्णम् । इति भरतः ॥

कूर्च्चशिरः, [स्] क्ली, (कूर्च्चस्य शिरः इव शिरो यस्य ।) नारिकेलः । इति हेमचन्द्रः । मस्तकः । इति भाषा ॥ ("गुल्फसन्धेरुभयतः कूर्च्चशिरो नाम तत्र रुजा शोफौ" । "द्वे कूर्च्चशिरसी च" । इति सुश्रुते शारीरस्थाने ६ अध्याये ।)

कूर्च्चशीर्ष, पुं, (कूर्च्चे भ्रूमध्ये तद्वत् शीर्षं यस्य ।) जीवकवृक्षः । न तु कूर्च्चशीर्षकपठितोऽयम् । इत्यमरः । २ । ४ । १४२ ॥ (जीवकशब्दे उस्य गुणादयो ज्ञातव्याः ।)

कूर्च्चशीर्षक, पुं, (कूर्च्चे भ्रूमध्ये तद्वत् शीर्षं यस्य । कप् ।) जीवकः । इति राजनिर्घण्टः । (नारिकेलवृक्षः । इति चिन्तामणिः ।)

कूर्च्चशेखर, पुं, (कूर्च्चमिव शेखरमस्य ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥

कूर्च्चिका, स्त्री, (कूर्च्चाकारोऽस्त्यस्याः । कूर्च्च + ठन् ।) क्षीरविकृतिः । छीरसा इति भाषा । इत्यमरः । २ । ९ । ४४ ॥ सा द्विधा यथा,—
"दध्ना सह पयः पक्वं यत् तत् क्षीरं सा दधिकूर्च्चिका ।
तक्रेण पक्वं यत् क्षीरं सा भवेत्तक्रकूर्च्चिका" ॥
इति भरतः ॥
("कूर्च्चिका विष्टम्भा शाखा गुरवो नातिपित्तला" । इति सुश्रुते सूत्रस्थाने ४६ अध्याये ।)
सूचिका । सूंच इति भाषा । कुञ्चिका । कुञ्ची इति भाषा । कुट्मलः । कुंडि इति भाषा । तूलिका । तुलि इति भाषा । इति हेमचन्द्रो मेदिनी च ।

कूर्द्द च क्रीडायाम् । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-अक०-सेट् ।) मन्दस्वरी । च, कूर्द्दते । इति दुर्गादासः ।

कूर्द्दन, क्ली, (कूर्द्द + भावे ल्युट् ।) क्रीडा । खेलः । इत्यमरः । १ । ७ । ३२ ॥

कूर्द्दनी स्त्री, (अन्नादेऽस्याम् । कूर्द्द + अधिकरणे ल्युट् ततो ङीप् ।) चैत्रीपूर्णिमा । सा तु काम देवोत्सवतिथिः । इति त्रिकाण्डशेषः ॥

कूर्प्प, क्ली, (कुर्प्पं याति । या + कः ।) भ्रूमध्यम् । इति हेमचन्द्रः ॥

कूर्प्पर, पुं (कुरं शरीरे रुणाति वा । कुर + पृ + अच् । पृषोदरात् रलोपः पूर्ब्बदीर्घश्च ।) जानु । कफोणि । इति हेमचन्द्रः । (कार्ष्णे अस्य प्रवेशाद्यापादक यथा, माघे । ५ । २९ ।
"दन्तैरस्थिभिरर्द्धदैर्विवशमङ्गं
कूर्परस्य कुम्भवदनुविदारणौ" ॥)

कूर्म्म, पुं, (कुत्सित ऊर्म्मिर्वेगो यस्य । को जले ऊर्म्मिर्वेगो यस्य वा पृषोदरात् साधुः ।) कच्छपः । कासिम इति भाषा । (यथा, हरिवंशे । २ । ९५ ।
"यदा संहरते कामान् कूर्म्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता" ॥)
तत्पर्य्यायः । कमठः २ कच्छपः ३ दुलिः ४ एव

गुप्तः । पीवरः ६ कमठः ७ जलगुल्मः ८ । इति जटाधरः ॥ अस्य मांसादिगुणाः पर्य्यायान्तरे कच्छपशब्दे द्रष्टव्याः ॥ * ॥ (तल्लक्षणं यथा,— वृहत्संहितायाम् ६४ अध्याये ।

"स्फटिकरजतवर्णो नीलराजीव चित्र
कलशसदृशमूर्त्तिश्चारुवंशश्च कूर्म्मः ।
अरुणसमवपुर्व्वा सर्षपाकारचित्रः
सकलनृपमहत्त्वं मन्दिरस्थः करोति ॥
अञ्जनभृङ्गश्यामवपुर्व्वा बिन्दुविचित्रोऽव्यङ्गशरीरः ।
सर्पशिरा वा स्थूलगलो यः सोऽपि नृपाणां राष्ट्रविवृद्ध्यै ॥
वैदूर्य्यत्विट् स्थूलकण्ठस्त्रिकोणो
गूढच्छिद्रश्चारुवंशश्च शस्तः ।
क्रीडावाप्यां तोयपूर्णे मणौ वा
कार्य्यः कूर्म्मो मङ्गलार्थं नरेन्द्रैः" ॥

परमेश्वरः । यथाह ऋग्वेदभाष्योपक्रमणिकायां दयानन्दः ।
"परमेश्वरेणेदं सकलं जगत् क्रियते तस्मात् तस्य कूर्म्म इति संज्ञा" ॥ प्रजापतेरवतारविशेषः । यथा, शतपथब्राह्मणे । ७ । ५ । १ । ५ ।
"स यत् कूर्म्मो नाम एतद्वै रूपं कृत्वा प्रजापतिः प्रजा असृजत यदसृजताकरोत्तद् यदकरोत् तस्मात् कूर्म्मः कश्यपो वै कूर्म्मस्तस्मादाहुः सर्व्वाः प्रजाः काश्यप्य इति । स यः स कूर्म्मोऽसौ स आदित्यः" ॥ इति ॥ * ॥)
देहस्थवायुविशेषः । यथा,—
"उन्मीलने स्मृतः कूर्म्मो भिन्नाञ्जनसमप्रभः" ॥
इति भारतशान्तिकटीका ॥ * ॥ मुद्राविशेषः । यथा,—
"वामहस्तस्य तर्ज्जन्यां दक्षिणस्य कनिष्ठया ।
तथा दक्षिणतर्ज्जन्या वामाङ्गुष्ठेन योजयेत् ॥
उन्नतं दक्षिणाङ्गुष्ठं वामस्य मध्यमादिकाः ।
अङ्गुलीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च ॥
वामस्य पितृतीर्थेन मध्यमानामिके तथा ।
अधोमुखे च ते कुर्य्याद्दक्षिणस्य करस्य च ॥
कूर्म्मपृष्ठसमं कुर्य्याद्दक्षपाणिञ्च सर्व्वतः ।
कूर्म्ममुद्रेयमाख्याता देवताध्यानकर्म्मणि" ॥
इति तन्त्रसारः ॥ * ॥ (आसनविशेषः । यथा हठयोगदीपिकायाम् । १ । २२ ।
"गुदं निरुध्य गुल्फाभ्यां व्युत्क्रमेण समाहितः ।
कूर्म्मासनं भवेदेतदिति योगविदो विदुः" ॥)
सत्ययुगे समुद्रमन्थनकाले मन्दरपर्व्वतधारणार्थं कच्छपरूपभगवदवतारविशेषः । यथा,—
"क्षीरोदमध्ये भगवान् कूर्म्मरूपी स्वयं हरिः" ।
इति पद्मपुराणम् ॥ अपि च ।

"विलोक्य विघ्नेशविधिं तदेश्वरो
दुरन्तवीर्य्योऽवितथोऽभिसन्धिः ।
कृत्वा वपुः काच्छपमद्भुतं महत्
प्रविश्य तोयं गिरिमुज्जहार" ॥

इति श्रीभागवतम् ॥ * ॥ ("कश्यपप्रजापतेः कद्र्वां जातेषु पुत्रेषु एकः । स च नागविशेषः । यथा, महाभारते । १ । ३५ । ११ ।
"हेलोऽनलो वार्षिकश्च तरलश्च सुमङ्गलः ।
कूर्म्मश्च कुलिकश्चैव काद्रवेयाः प्रकीर्त्तिताः" ॥)

कूर्म्मचक्र, क्ली (कूर्म्माकारं चक्रम् । मध्यपदलोपी कर्म्मधारयः ।) ज्योतिषोक्तकूर्म्माकारचक्रम् । तस्याकारो यथा,—
"प्राङ्मुखो भगवान् देवः कूर्म्मरूपी व्यवस्थितः ।
आक्रम्य भारतं वर्षं नवभेदं यथाक्रमम्" ॥
तत्र नक्षत्रन्यासक्रमः ।
"मध्यप्रागग्नियाम्यादिदिक्स्थितिकादित्रयत्रयैः ।
कूर्म्मदेशयुतैस्तैस्तु पीड्यन्ते तन्निवासिनः" ॥
तत्र वेधो यथा,—
"पूर्व्वापरे भवेद्वेधो वेधश्चोत्तरदक्षिणे ।
ईशाने राक्षसे वेधो वेध आग्नेयमारुते ।
ताराचक्राश्रितं तत्र सौरिं यत्नेन चिन्तयेत्" ॥
तत्र वेधादिजन्यदोषाः ।
"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः ।
स्वचक्रं परचक्रञ्च षडेते सम्भवन्ति च ॥
एवं देशश्च ग्रामश्च नगरञ्च ततो वदेत् ।
तथा च यत्र नक्षत्रे विष्वपार्थिवनामताः ॥
दृश्यन्ते समभोत्पाताः सा दिक् तत्र पीडयेत् ।
सौरिर्वक्राधिपो दुष्टः स्वल्पवीर्य्यः शुभावहः ॥
एकदा पीडयेद्यत्र मानुषं कूर्म्मचक्रके ।
तत्र स्थाने महाविघ्नो जायते नात्र संशयः ॥
दुष्टस्थाने गते चन्द्रे कर्त्तव्यं शान्तिपौष्टिकम्" ।
तच्चक्रमध्यस्था देशाः ।
"मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः ।
पञ्चालाः साल्वमाण्डव्यकुरुक्षेत्रगजाह्वयाः ॥
मरवैमिषविन्ध्यादिपाञ्चालघोषाः सयामुनाः ।
काश्यपोध्याः प्रयागश्च गयाः वैदेहकादयः" ॥
तत्र पूर्व्वस्थदेशाः ।
"प्राच्यां मागधशोणौ च वारेन्द्रगौडराढकाः ।
वङ्गमालतमोलिप्तप्राग्ज्योतिषोदयादयः" ॥
तत्राग्निकोणस्थदेशाः ।
"आग्नेय्यामङ्गवङ्गोपवङ्गत्रैपुरकोशलाः ।
कलिङ्गौड्रान्ध्रकिष्किन्ध्याविदर्भशबरादयः" ॥
तत्र दक्षिणस्थदेशाः ।
"दक्षिणेऽवन्तिमाहेन्द्रमलया ऋष्यमूकवाः ।
चित्रकूटमहारण्यकाञ्चीसिंहलकोङ्कणाः ।
कावेरी ताम्रपर्णी च कर्णात्रिकूटकादयः" ।
तत्र नैरृतकोणस्थदेशाः ।
"नैरृते द्रविडाभीरमहाराष्ट्राश्च रैवताः ।
यवनाः पह्लवाः सिन्धुपारसीकादयो मताः" ॥
तत्र पश्चिमस्थदेशाः ।
"पश्चिमे हैहयाऽऽनादिम्लेच्छवासवकादयः" ॥
तत्र वायुकोणस्थदेशाः ।
"वायव्ये गुर्ज्जराटश्च माटवालखरादयः" ॥
तत्र उत्तरस्थदेशाः ।
"उत्तरे चीनमद्रार्जुनकेकयमन्दराः ।
गान्धारस्त्रिगर्त्तौषधमाद्रमालवाः ।
कैलासमद्राश्चैन्द्रदेशाः सतारकाः" ॥
तथैशानकोणस्थदेशाः ।
"ऐशाने सर्व्वभौमञ्च कश्मीरकटङ्कणाः ।
बाल्हीकमद्राङ्गकीराता दरदादयः" ॥
इति ज्योतिस्तत्त्वम् ॥ * ॥ जपयज्ञकर्म्मोक्तकमठाकारचक्रम् । तस्य लिखनक्रमः ।
"चतुरस्रां भुवं भित्त्वा कोष्ठानां नवकं लिखेत् ।
पूर्व्वकोष्ठादि विलिखेत् अकारादीननुक्रमात् ॥
अन्तमोघे मध्यकोष्ठे स्वरान् द्वन्द्वक्रमाल्लिखेत् ।
दिक्षु पूर्व्वादितो यत्र क्षेत्राद्यक्षरसंस्थितिः ॥
मुखं तत्तस्य जानीयात् कलावमयतः स्थितौ ।
कोष्ठे कुक्षी उभे पादौ द्वे स्थितं पुच्छमीरितम् ।
क्रमेणानेन विभजेन्मध्यस्थमपि मानवः" ॥ * ॥
तस्याङ्गविशेषे स्थितस्य जपादौ गुणदोषा यथा ।
"मुखस्थो लभते सिद्धिं करस्थः स्वल्पजीवनः ।
उदासीनः कुक्षिसंस्थः पादस्थो दुःखमाप्नुयात् ।
पुच्छस्थः पीड्यते मन्त्री बन्धनोच्चाटनादिभिः ।
कूर्म्मचक्रमिदं प्रोक्तं मन्त्रिणां सिद्धिदायकम्" ॥ * ॥
तदज्ञाने दोषो यथा, पिङ्गलायाम् ।
"कूर्म्मचक्रमविज्ञाय यः कुर्य्यात् जपयज्ञकम् ।
तस्य यज्ञफलं नास्ति सम्यगर्थाय कल्पते" ॥
इति तन्त्रसारः ॥ (तन्त्रोक्तपञ्चायतनगृहादिस्थापककूर्म्माकारचक्रविशेषः । तत्स्वरूपादि वङ्गयामले उक्तम् । यथा ।
"कूर्म्मचक्रं प्रवक्ष्यामि शुभाशुभफलात्मकम् ।
यज्ज्ञात्वा सर्व्वकार्य्याणि जानाति पण्डितोत्तमः ॥
अमेद्य भेदकं चक्रं प्रश्नपादरपूर्व्वकम् ।
कूर्म्माकारं महाचक्रं चतुष्पादसमावृतम् ॥
मुखे स्वरान्, दक्षपादे कवर्गं, वामपादके ।
चवर्गं, कीर्त्तितं पश्चात् अधःपादे टवर्गकम् ॥
तदधस्तु तवर्गः स्यादुदरे च पवर्गकम् ।
यवान्तं हृदये प्रोक्तं शषान्तं पुच्छमध्यके ॥
लाङ्गूले क्षवीजञ्च हकारं लिङ्गमध्यके ।
लिखित्वा ग्रामदेशाद्यौ चक्राकारं महापदम् ॥
स्वरे नाम कवर्गे श्रीरथवा विवेकदः ।
टवर्गे रागवती तवर्गे धनवान् भवेत् ॥
उदरे सर्व्वनाशः स्यात् हृदये बहुदुःखभाक् ।
पुच्छे च सर्व्वसन्तापः लाङ्गूले मरणं ध्रुवम् ॥
वैभवे एकदेशे तु दुःखश्च वामपादके ।
विवाहदरलाभे तु न कुर्य्यात्तद्विचारणम् ॥
विवादे धर्म्मनाशो दुष्टदोषे च मारणम् ।
यत्र देवालयश्चास्ति तत्र पीडितवर्द्धनम् ॥
विवाहस्य समेवञ्च मध्यमर्त्थं विचारयेत् ।
एकत्र वामे यदि भवेत् सर्व्वमान्यो नरेश्वरः ॥
यदि तत्रैव भावः स्यात् तत्रैव चापि कल्पयेत् ।
त्रिविधभेदे दोषश्चेत् शुभमत्र समर्पयेत् ॥
इति ते कथितं देव । कूर्म्मचक्रमनुत्तमम् ।
ये प्रोद्धरन्ति चक्रेऽस्मिन् सर्व्वसिद्धिप्रदं शुभम्" ॥ * ॥
कूर्म्मद्वादशी स्त्री, केन रूपेण विराजते तद्वृत्तान्तविस्तरञ्च वराहपुराणे ५० अध्याये उक्तम् । तद्यथा । दुर्व्वासा उवाच ।
"भद्रम् । वर्णितं सम्यक् भवता भारत मम ।
श्रुतिः स्मृता देवा द्वे च तत्र वर्णिते च ।
विष्णुः कूर्म्मरूपः पूर्व्वं भारते मन्दरं धृतः ।
वर्णितस्तत्र संक्षेपं कोऽनुशिष्यन्ते देवता ।
यच्च त्वया कथितो देवः कूर्म्मरूपी जनार्द्दनः ॥

शुभाशुभं मनुष्याणां कथ्यते च ततः कथम् ।
यथावत् कथयाद्यन्तं तद्गुरुर्मेऽखिलं ॥
मार्कण्डेय उवाच ।
प्राङ्मुखो भगवान् देवः कूर्म्मरूपी व्यवस्थितः ।
आक्रम्य भारतं वर्षं नवभेदमिदं द्विज ॥
नवधा संस्थितान्यस्य नक्षत्राणि समन्ततः ।
विषयाश्च द्विजश्रेष्ठ ये सम्यक् तान्निबोध मे ॥
वेदमन्त्रा विमाण्डव्याः शाल्वनीपास्तथा शकाः ।
उज्जिहानास्तथा वत्सा घोषसंख्यास्तथा खसाः ॥
मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः ।
धर्म्मारण्या ज्योतिषिका गौरग्रीवा गुडाश्मकाः ॥
वैदेहकाः सपाञ्चालाः सङ्केताः कङ्कमारुताः ।
कालकोटिसपाषण्डाः पारियात्रनिवासिनः ॥
कापिञ्जलाः कुरूर्वाह्यास्तथैवोदुम्बरा जनाः ।
गजाह्वयाश्च कूर्म्मस्य मध्यमध्यनिवासिनः ॥
कृत्तिका रोहिणी सौम्या एतेषां मध्यवासिनाम् ।
नक्षत्रत्रितयं विप्र शुभाशुभविपाककम् ॥
वृषध्वजोऽञ्जनश्चैव जम्बाख्यो मानवाचलः ।
शूर्पकर्णो व्याघ्रमुखः खर्म्मकः कर्वटाशनः ॥
तथा चन्द्रेश्वराश्चैव खशाश्च मगधास्तथा ।
गिरयो मैथिलाः शुभ्रास्तथा वदनदन्तुराः ॥
प्राग्ज्योतिषाः सलौहित्याः सामुद्राः पुरुषादकाः ।
पूर्णोत्कटो भद्रगौरस्तथोदयगिरिर्द्विज ॥
काशाया मेखलामुष्टास्ताम्रलिप्तैकपादपाः ।
वर्द्धमानाः कोशलाश्च मुखे कूर्म्मस्य संस्थिताः ॥
रौद्रः पुनर्वसुः पुष्यो नक्षत्रत्रितयं मुखे ।
पादे तु दक्षिणे देशाः श्रोतके वदतः शृणु ॥
कलिङ्गवङ्गजठराः कोशला मूषिकास्तथा ।
चेदयश्चोर्द्ध्वकर्णाश्च मत्स्याद्या विन्ध्यवासिनः ॥
विदर्भा नारिकेलाश्च धर्म्मद्वीपास्तथैलिकाः ।
व्याघ्रग्रीवा महाग्रीवास्त्रैपुराः श्मश्रुधारिणः ॥
कैष्किन्ध्या हैमकूटाश्च निषधाः कटकस्थलाः ।
दशार्णा हारिका नग्ना निषादाः काकुलालकाः ॥
तथैव पर्णशबराः पादे वै पूर्व्वदक्षिणे ।
आश्लेषर्क्षं तथा पैत्र्यं फाल्गुनी प्रथमा तथा ॥
नक्षत्रत्रितयं पादमाश्रितं पूर्व्वदक्षिणम् ।
लङ्का कालाजिनाश्चैव शैलिका निकटास्तथा ॥
महेन्द्रमलयाद्री च दर्दुरे च वसन्ति ये ।
कर्क्कोटकवने ये च भृगुकच्छाः सकोङ्कणाः ॥
सर्व्वाश्चैव तथाभीरा वेण्णातीरनिवासिनः ।
अवन्तयो दासपुरास्तथैवाकणिनो जनाः ॥
महाराष्ट्राः सकर्णाटा गोनर्द्दाश्चित्रकूटकाः ।
चोलाः कोलगिराश्चैव क्रौञ्चद्वीपजटाधराः ॥
कावेरी ऋष्यमूकस्था नासिक्याश्चैव ये जनाः ।
शङ्खशुक्त्यादिवैदूर्य्यशैलप्रान्तचराश्च ये ॥
तथा वारिचराः कोलाः चर्म्मपट्टनिवासिनः ।
गणवाह्याः परा कृष्णद्वीपवासिनः ॥
सूर्य्याद्रौ कुमुदाद्रौ च ये वसन्ति तथा जनाः ।
औलूखलाः सपिशिका ये तथा कर्म्मनायकाः ॥
दक्षिणाः कौरुषा ये च ऋषिकास्तापसाश्रमाः ।
ऋषभाः सिंहलाश्चैव तथा काञ्चीनिवासिनः ॥
तिलङ्गाः कुञ्जरदरीकच्छवासाश्च ये जनाः ।
ताम्रपर्णी तथा कुक्षिरिति कूर्म्मस्य दक्षिणे ।
फाल्गुन्यश्चोत्तरा हस्ता चित्रा नक्षत्रत्रय द्विज ॥
कूर्म्मस्य दक्षिणे कुक्षौ बाह्यपादस्तथापरम् ।
काम्बोजाः पह्लवाश्चैव तथैव वडवामुखाः ।
तथा च सिन्धुसौवीराः आनर्त्ता वनितामुखाः ॥
द्रावणाः सार्गिगाः शूद्राः कर्णप्रावेयवर्वराः ।
किराताः पारदाः पाण्ड्यास्तथा पारशवाः कलाः ॥
धूर्त्तका हैमगिरिकाः सिन्धुकालकवैरताः ।
सौराष्ट्रा दरदाश्चैव द्राविडाश्च महार्णवाः ॥
एते जनपदाः पादे स्थिता वै दक्षिणेऽपरे ।
स्वात्यो विशाखा मैत्रञ्च नक्षत्रत्रयमेव च ॥
मणिमेघः क्षुराद्रिश्च खञ्जनोऽस्तगिरिस्तथा ।
अपरान्तिका हैहयाश्च शान्तिका विप्रशस्तकाः ॥
कोङ्कणाः पञ्चनदका वमना ह्यवरास्तथा ।
तारक्षुरा अङ्गतकाः शर्कराः शाल्मवेश्मकाः ॥
गुरुस्वराः फाल्गुनका वेणुमत्याश्च ये जनाः ।
तथा फल्गुलुका घोरा गुरुहाश्च कलास्तथा ॥
एकेक्षणा वाजिकेशा दीर्घग्रीवाः सचूलिकाः ।
अश्वकेशास्तथा पुच्छे जनाः कूर्म्मस्य संस्थिताः ॥
ऐन्द्रं मूलं तथाषाढा नक्षत्रत्रयमेव च ।
माण्डव्याश्चण्डखाराश्च अश्वकालनतास्तथा ॥
कुन्यतालडहाश्चैव स्त्रीबाह्या बालिकास्तथा ।
नृसिंहा वेणुमत्याश्च बलावस्थास्तथापरे ॥
धर्म्मबद्धास्तथालूका उरुकर्म्मस्थिता जनाः ।
वामपादे जनाः पार्श्वे स्थिताः कूर्म्मस्य भागुरे ॥
आषाढाश्रवणे चैव धनिष्ठा यत्र संस्थिता ।
कैलासो हिमवांश्चैव धनुष्मान् वसुमांस्तथा ॥
क्रौञ्चाः कुरवकाश्चैव क्षुद्रवीणाश्च ये जनाः ।
रसालयाः सकैकेया भोगप्रस्थाः सयामुनाः ॥
अन्तर्द्वीपास्त्रिगर्त्ताश्च अग्नीज्याः सार्द्दना जनाः ।
तथैवाश्वमुखाः प्राप्ताश्चिविडाः केशधारिणः ॥
दासेरका वाटधानाः शवधानास्तथैव च ।
पुष्कलाधमकैराताः तथा तक्षशिलाश्रयाः ॥
अम्बाला मालवा मद्रा वेणुकाः सवदन्तिकाः ।
पिङ्गला मानकलहा हूणाः कोहलकास्तथा ॥
माण्डव्या भूतियुवकाः शातका हेमतारकाः ।
यशोमत्याः सगान्धाराः खरसागरराशयः ॥
यौधेया दासमेयाश्च राजन्याः श्यामकास्तथा ।
क्षेमधूर्त्ताश्च कूर्म्मस्य वामकुक्षिमुपाश्रिताः ॥
वारुणञ्चात्र नक्षत्रं तत्र प्रौष्ठपदद्वयम् ।
देव किन्नरराज्यञ्च पशुपालं सकीचकम् ॥
काश्मीरकं तथा राष्ट्रमभिसारजनास्तथा ।
दरदास्त्वङ्गणाश्चैव कुलटा वनराष्ट्रकाः ॥
सैरिष्ठा ब्रह्मपुरकास्तथैव वनवाह्यकाः ।
किराताः कौशिकाख्याश्च जना वहवकोलजाः ॥
पार्व्वता मरुकाश्चैव कुनटाश्चाग्रराष्ट्रकाः ।
पङ्कभारास्तथा चीनाः अन्नभौमाश्च दक्षाः ॥
गणा यवना हिङ्गुचीरप्रावराश्च ये ।
त्रिनेत्राः पौरवाश्चैव गन्धर्व्वाश्च द्विजोत्तम ॥
पूर्व्वोत्तरान्तु कूर्म्मस्य पादमेते समाश्रिताः ।
रेवत्यश्विन्यथ याम्यं नक्षत्रत्रितयं तथा ॥
तत्र पाके समाख्यातं पाकाय मुनिसत्तम ॥
देशेष्वेतेषु चैतानि नक्षत्राणि वै द्विज ।
यतः पीडा अमी देशाः पीड्यन्ते क्रमोदिताः ।
यान्ति चाभ्युदयं विप्र ! ग्रहैः सम्यगवस्थितैः ॥
यस्यर्क्षस्य पतिर्यो वै ग्रहस्तद्भाविनो भयम् ।
तद्देशस्य मुनिश्रेष्ठ तदुत्कर्षे शुभागमः ।
प्रत्येकं देशसामान्यं नक्षत्रग्रहसम्भवम् ॥
भयं श्रीमतां भवति श्रेयसं वा द्विजोत्तम ।
सर्व्वैर्व्योमचरैश्चापि साधारणमिति स्थितिम् ।
यद्यैवमति पीडोत्थमल्पायासमथोभयम् ॥
तथैव सौम्या याति दुःस्थितैश्च तथा ग्रहैः ।
अल्पोपकाराय भवेद् देशदैवाश्रयो बुधैः ।
स्वर्क्षे गोष्ठेऽथ मर्त्येषु सुहृत्सु तनयेषु वा ।
भार्य्यायाञ्च ग्रहे दुःस्थे भयं पुण्यवतां नृणाम् ।
आत्मन्यपापस्पृष्टानां स्वपक्षेऽतिपापिनाम् ।
नैकत्रापि ह्यपापानां भवन्ति भयादयः ॥
दिग्देशजनसामान्यं नृपसामान्यमात्मजम् ।
नक्षत्रग्रहसामान्यं नरो भुङ्क्ते शुभाशुभम् ॥
परस्पराभिरक्षा च ग्रहदौष्ट्येन जायते ।
क्षतेभ्य एव द्विजेन्द्र ! शुभदाविनश्यते ॥
यदेतत् कूर्म्मरूपं नक्षत्रेषु मयोदितम् ।
एतत् तु देशसामान्यमशुभं शुभमेव च ॥
तस्मात् विज्ञाय देशर्क्षं ग्रहपीडामथात्मनः ।
कुर्व्वीत शान्तिं मेधावी लोकवादाञ्च सत्तम ॥
आकाशाद्देवतानाञ्च दैत्यानाञ्च दोषजाः ।
एवं पतन्ति ते लोके लोकवादा इति श्रुताः ।
तांस्तथैव बुधः कुर्य्यात् लोकवादान्न हापयेत् ।
तेषां तु वदताञ्चैव दुष्कृतं क्षयमेव च ।
शुभोदयं प्रशान्तिञ्च जायते द्विजसत्तम ॥
प्रज्ञाहानिं प्रकुर्व्वन्ति हर्षादीनाञ्च कुर्व्वते ।
तस्मान्नादिकरः प्राज्ञो लोकवादरतस्तथा ।
लोकवादांश्च शान्त्यर्थं यत्नतोऽद्य कारयेत् ॥
यागोपवासपाठांश्च तत्र चैकादिकर्म्मकम् ।
जपं होमं तथा दानं स्नानं कोपादिवर्ज्जनम् ॥
अद्रोहः सर्व्वभूतेषु मैत्री कुर्व्वीत पण्डितः ।
असद्देवमतिं वर्ज्जेदतिवादोक्तयश्च ये ।
ग्रहपूजाञ्च कुर्व्वीत सर्व्वपीडासु मानवः ॥
एवं शाम्यन्त्यशेषाणि घोराणि द्विजसत्तम ।
प्रत्यक्षाणि मनुष्याणां ग्रहर्क्षोत्थानि दैवतः ॥
एष कूर्म्मो मया ख्यातो भारते भगवान् विभुः ।
नारायणो ह्यचिन्त्यात्मा यत्र सर्व्वं प्रतिष्ठितम् ।
तत्र देवाः स्थिताः सर्व्वे प्रतिनक्षत्रसंश्रयाः ।
तथा मध्ये हुतवहः पृथ्वी सोमश्च वै द्विज ॥
मेषाद्यराशयो मध्ये मुखे द्वौ मिथुनादिकौ ।
प्राग्दक्षिणे तथा पादे कर्किसिंहौ व्यवस्थितौ ।
सिंहकन्यातुलाश्चैव कुक्षौ राशित्रयं स्थितम् ।
तुला च वृश्चिकश्चोभौ पादे दक्षिणपश्चिमे ।
पृष्ठे च वृश्चिकेनैव सह धन्वी व्यवस्थितः ।
वायव्ये चान्य वै पादे मकरादित्रयं परम् ।
कुम्भमीनौ तथैवास्य उत्तरां कुक्षिमाश्रितौ ।
मीनमेषौ द्विजश्रेष्ठ ! पादे पूर्व्वोत्तरे स्थितौ ।
कूर्म्मे देशास्तथर्क्षाणि देशेष्वेषु वै द्विज ॥
राशयश्च तथर्क्षेषु ग्रहा राशिव्यवस्थिताः ।

तस्मात्पत्रस्पर्शौ देयपीठौ विनिर्दिशेत् ।
तत्र स्नात्वा प्रकुर्वीत दानहोमादिकं विधिम् ।
स एव वैष्णवः पादो यस्मा मध्ये प्रदृश्यते" ॥ *॥
विष्णुः । स एव काश्यपस्तथा परिकीर्त्यते तत्प्रमा
णादिकं यथा,—शतपथब्राह्मणे । ७ । ५ । १ । ५ ।
"स यत्कूर्म्मो नाम । प्रजापतिः प्रजा असृजत
यदसृजताकरोत् तद् यदकरोत् तस्मात् कूर्म्मः
कश्यपो वै कूर्म्मस्तस्मादाहुः सर्व्वाः प्रजाः का
श्यप्य" इति । अत्र स्वामिदयानन्दकृतभाष्यम् ।
स यत् कूर्म्म इति । "परमेश्वरेणेदं सकलं जगत्
क्रियते तस्मात्तस्य कूर्म्म इति संज्ञा । कश्यपो वै
कूर्म्म इत्यनेन परमेश्वरस्यैव कश्यपनामास्ति ।
तेनैव इमाः सर्व्वाः प्रजा उत्पादितास्तस्मात्
सर्व्वा इमाः प्रजाः काश्यप्य इत्युच्यन्ते । कश्यप
कस्मात् पश्यको भवतीति निरुक्त्या पश्यतीति
पश्यः सर्व्वज्ञतया सकलं जगत् विजानाति स पश्य
कस्य एव निर्म्मलतयातिसूक्ष्ममपि वस्तु यथार्थं जा
नात्येव अतः पश्यक इति । आद्यन्ताक्षरविपर्य्यया
त्सिद्धे सिंहः कृतेस्तर्कुरित्यादिवत् काश्यप इति शब्द
वरट् हयेतस्योपरि महाभाष्यप्रमाणेन पद सिध्य
ति अतः पुरा विज्ञायते काश्यप्यः प्रजा इति" ॥ *॥)

कूर्म्मपृष्ठ, पुं, (कूर्म्मस्य पृष्ठमिव । कठोरत्वात् तथा
त्वम् ।) अधीनस्थः । इति शब्दचन्द्रिका ॥ कच्छ
पस्य पृष्ठदेशः ॥ (यथा, महाभारते ३ । ४६ । ११ ।
"गूढ़गुल्फशिरौ पादौ ताम्रायततलाङ्गुली ।
कूर्म्मपृष्ठोन्नतौ चापि शोभेते किङ्किणीचितौ" ॥)

कूर्म्मपृष्ठकं, क्ली, (कूर्म्मपृष्ठमिव कायते प्रकाशते
इति । कै+क ।) शरावम् । इति शब्दचन्द्रिका ।
सरा इति भाषा ॥

कूर्म्मराज, पुं (कूर्म्मरूपेण कूर्म्मेषु वा राजते यः ।
राज्+अच् ।) कच्छपराजः । तत्पर्य्यायः । अकू
पारः २ परीवर्त्तः ३ । इति जटाधरः । तथाहि ।
"पृथ्वि ! स्थिरा भव भुजङ्गम ! धारयैनां
त्वं कूर्म्मराज ! तदिदं द्वितयं दधीथाः ।
दिक्कुञ्जराः कुरुत तत्त्रितये दिधीर्षां
रामः करोतु हरकार्म्मुकमाततज्यम्" ॥
इति महानाटकम् ॥ स एवादिकच्छपः । यथा ।
"क्षिरोदे विप्रियविधि मरेश्वरो
दुरन्तवीर्य्योऽवितथोऽभिसन्धिः ।
कृत्वा वपुः काच्छपमद्भुतं महत्
प्रविश्य तोयं गिरिमुज्जहार ॥
सुरासुरैरिन्द्रभुजङ्गवेष्टित
परिभ्रमन्तं गिरिमङ्ग ! पृष्ठतः ।
बिभ्रत्तदावर्त्तनमादिकच्छपो
मेनेऽङ्गकण्डूयनमप्रमेयः" ॥
इति श्रीभागवते । ८ । ७ । ८,१० ।

कूल, आवृतौ । इति कविकल्पद्रुमः । (भ्वा-पर-
सक-सेट ।) कलावती । कूलति वाटी प्राचीरम् ।
इति दुर्गादासः ॥

कूल, क्ली, (कूलति जलप्रवाहं आवृणोतीति । कूल
+अच् ।) नद्या जलसमीपस्थानम् ।
(यथा, रघुः । १६ । २१ ।
"इत्थं जनितरागासु बोधिनीरन्ते
कूलं समासाद्य कुशः सरय्वाः" ॥)
तत्पर्य्यायः । रोधः २ तीरम् ३ प्रतीरम् ४ तटम्
५ तटः ६ तटी ७ । इत्यमरः । १ । १० । ७ ।
रोधम् ८ । इति शब्दरत्नावली । वेला ९ । इति
जटाधरः ॥ (कूल्यते आव्रियतेऽसौ । कूल+घञर्थे
क ।) स्तूपः । सैन्यपृष्ठम् । तडागः । इति विश्वः ॥

कूलक, क्ली, पुं, (कूल+स्वार्थे संज्ञायां वा कन् ।)
स्तूपः । इति मेदिनी । तीरम् । इति विश्वः ॥

कूलकः, पुं, (कूल+संज्ञायां कन् ।) वल्मीकः ।
इति मेदिनी । उइर ढिपि इति भाषा ॥

कूलङ्कष, पुं, (कूलं तीरं कषति भिनत्तीति । कष+
खच् मुम् च ।) समुद्रः । इति त्रिकाण्डशेषः ॥

कूलङ्कषा, स्त्री, (कूलङ्कष+टाप् ।) नदी । इति
हलायुधः ॥ (यथा, शाकुन्तले ५ माङ्के ।
"व्यपदेशमाविलयितुं किमीहसे मां च नाम पात
यितुम् । कूलङ्कषेव सिन्धुः प्रसन्नमोघं तटतरुञ्च" ॥)

कूलभूः, स्त्री, (कूलस्य तीरस्य भूः भूमिः ।) तीर
भूमिः । इति हेमचन्द्रः ॥

कूलवती, स्त्री, (कूलं तटं अस्त्यस्याः । अस्त्यर्थे
मतुप् मस्य वः । ततो ङीप् ।) नदी । इति राज
निर्घण्टः ॥

कूलहुण्डक, पुं, (कूले तडागादौ ऊह्यते सम्भव
तीति । ऊहि सन्धे+ण्वुल् इतित्वात् नुम् च ।
पृषोदरात् उकारलोपः ।) जलावर्त्तः । इति
त्रिकाण्डशेषः ॥

कूवर, पुं, क्ली, (कू शब्दे+वरच् ।) युगन्धरः ।
यत्र रथस्य यूपकाष्ठमासज्यते तत् । इत्यम
रभरतौ निघण्टौ । (यथा, रामायणे ३ । २८ । १० ।
"हेमचक्रमसम्बाधं वैदूर्य्यमयकूवरम्" ॥
रथमित्यर्थः ।)

कूवर, पुं, (कू+वरच् ।) कुब्जः । कुँजा इति
भाषा । मनोज्ञे, त्रि । इति मेदिनी ॥

कूवरी, स्त्री, (कूवर+गौरादित्वात् ङीष् ।) कम्ब
लाच्छादितरथः । इति हलायुधः ॥

कूष्माण्ड, पुं (कु ईषत् उष्मा अण्डेषु बीजेषु यस्य ।)
कर्कारुः । रुद्रदेवताविशेषः । इति हेमचन्द्रः ॥
(कूष्माण्डाकारत्वात् पिशाचोऽपि तत्संज्ञयाऽभिधी
यते । यथा, भागवते २ । ६ । ४२ । "अन्ये च ये
प्रेतपिशाचभूतकूष्माण्डयादोमृगपक्ष्यधीशाः" ॥
ऋषिविशेषः । यथा, याज्ञवल्क्ये ।
"कूष्माण्डो राजपुत्रश्चेत्यत्र स्नातः समन्वितः" ॥
यजुर्व्वेदिकमन्त्रविशेषः । यथा मनुः ८ । १०६ ।
"कूष्माण्डैर्वापि जुहुयात् घृतमग्नौ यथाविधि" ॥
"कूष्माण्डमन्त्रा यजुर्व्वेदिका यदेवा देवहेलनमित्ये
वमादयः । तैः मन्त्रैरग्नौ घृतमग्नौ जुहुयात्" ॥
इति तट्टीकायां कुल्लूकभट्टः ॥)

कूष्माण्डक, पुं, (कूष्माण्ड+स्वार्थे कन् ।) कूष्माण्डः ।
इत्यमरटीकायां भरतः ॥

कूष्माण्डी, स्त्री, (कूष्माण्ड+गौरादित्वात् जातित्वात्
वा ङीष् ।) कोषाण्डी । अम्बिका । इति हेमचन्द्रः ॥
ब्राह्मी दत्तात्रयात्मीति। अवरात् सुवर्णरम्भो मधुरो कृतिनि सुखं ॥) कोकिल। इति त्रिकः। काक। इति मेदिनी। वसन्तः। इति हलायुधः। कर्मविशेष। कालवशः। पर्यायादि। भोग १ कोविन २ ग्राम ३ बाल ४ ग्रामण ५ मेचक ६ बकुल ७ रामा ८ विनि ९० इति जटाधरः। यथवि, त्रि। इन्द्रमदः। (कश्चित् बाणादि ग्रहमालनामो बाहुबलात् तुर्वेक यश विवादि गावय। इदकुः। यथा, पौराणिको मायावाम।

"इन्दोति मधुर नाम यस्य इति दानवि।

मञ्जीमर्याति राजेन्द्र। महाभारतकोटयः" ॥

अदत्ताभवायामादिवर्णदवर्ण दिवाकर मतिरताद्विद्यामाववर्धयतिमान्त मा कनोति॥ यथा, शिशुपाले १९।

"वलवर्दिता सुधा इन्द्रानन्दयामायण" ॥

इन्द्रावतारयः। यथा, महाभारते १। १३० १९।

"मधुना सार पुत्रा यथा इन्द्रानिरादि च" ॥

छन्दस्यमं। वेदेनात्यरनिकेषा। अवस्था इदेव अवसो निवता। अनिविदिता। भावस्थ कालीपत बाहुमानमाव ५५—८८ इत्यादि, यथा उदम यादव ३३—३९ इत्यादि धर्मविचारणा। बाल्य वेदशतदोर्विमादिदय। यथा सूर्यस्तोत्र विहि। "वेदावतरदण्डकादसी छन्दोभेदा वस्तावेदाखाचनन्दरखा अव विदत्ता मद उर्दिनि इति सूर्यान्त" ॥

छन्दस्य, म, (छन्दः इन्दाख अस्य इदम्) सज्ञो गत। इति त्रिकाण्डशेषः।

छन्दस्कृत्, [त्] त्रि (छन्द करोति। कर्म कृत्। भागधारपदर्ता। भावाधारदपा भवधाद। निर्दिष्ट ४।२१ मता। ३।१।२६। (देविलुमिश्रादि विवर्धे दराव विशेषेषेतरपू एक यो एक च इति निर्दिष्टम। अपि नु भाषायामीं इति यपि। आश्रय निम्नादभाद् गुरु वर्णाद कश्य बर्णा गुरुवर्णा स्वर्ण। इति कावमी। इति भरतः।

"त्रिविदाला इन्दस्या मुरुवर्णिव वागविन्", इति जटाधरः। स्त्री, स्वाल् छन्दवभावदे विशारिदक। यथा, उत्तोली "अद दक्षीष नमा अदमीगुरुवस्य दाववस्वीरात्रमोन्द अनम छन्दस्थाविरेखा" । इति॥)

छन्दस्वति, स्त्री, (छन्दसा पूजा इव वर्णा वर्णिता यथा।) अवान्तराचुचनता। तत्र इत्या इदयमुचीवदावदुर्विधिपूता इच दत्ताच्युत इत्यादिगति। तत्र इत्य मेत्रवक्तीयताद्वाक विभिन्नदत्तम् मददेवशमय बलतन्त्रकतम पदवादे प्रचदति। तत्र दीप इत्यमीचिन्तुम द्रुम वर्णवाचे गुरवा वर्णवाचे प्रचुर वर्ण। स्त्रुत्सविवरात सूनसी वीतरम। इति भोज प्रतिष्ठा। अन्य। विद्यवसुबादिवा हवमोदमे भवति इति वेदवमु।

छन्दपाट, स्त्री (छन्द पाठे यस्य।) काकगुच। इति राजनिर्घण्टः। (अनुवादन्दे इस विवदो भावना।)

छन्दवेलि, स्त्री, (छन्दाद वेलि वीरा वर्णे पूजा इव दुबवलिका यस्याः।) अवपालवी पुष्पवदा। (अस्याः अवर्त्तितं छन्दवर्त्तने प्रयत्नम्।)

छन्दोभङ्ग, पुं, (छन्दसाय भुक्तिदावक यत्र विवर्ण भाति बहुजानाति। भा+क।) मुकुद। इति त्रिकाण्डशेषः।

छन्दमया, स्त्री (छन्द मयी अमो यस्याः।) इदैवा हम। इति राजनिर्घण्टः।

("अमाध्नीयरातु बमावमदेवें द्विर्वासा। इति छन्दस्या च निषुणा मदरूपा। दिवेव यतीनता मुनिविदिकनया। छन्दस्या यतीनां शुद्धिका च पीवरी"। इति ब्रह्मे पुराणार्थ १ अध्यायेः॥

छन्दरम, पुं (छन्दः इत्यादयो यस्य अमृतरवो यदा।) मदाय। इति राजनिर्घण्टः।

छन्दवच, पुं (छन्द अवावः। सया बदू। अवण। इति राजनिर्घण्टः।

(असवमोनि विराजमना वाल्पेदम।)

छन्दसुदी, स्त्री, (छन्दा सन्दसवनादि अनुदर्दी।) छन्दस्यविसुदाकी। अगमदेव। मूर्ख च। इति त्रिकाण्डशेषः।

छन्दस, पुं, (छन्दसा धाण्डमा अभ्य वद।) सवर्ण सुरदूर्वा इव १। इति धूर्वादयम।

छन्दपुर, स्त्री, (छन्दाद पुरेव छन्दपुरा इन्द्रा १) मन्दमदान्नदाववदुदाक्षर। अप वर्ण दृष्

कृष्णचूडावृक्षस्य पुष्पं पीतरक्तवर्णं उपरस्थ-सूक्ष्मपत्रमध्ये दीर्घवृन्तं दीर्घकेसरमध्यपद्मवत् जायते। तत्फलं शिम्बीसदृशं पुष्पं सर्वकाले सुलभं वर्षाकाले प्रचुरं भवति। तदुत्पत्तिस्तस्य मूलतो बीजाच्च भवति इति लोकप्रसिद्धम्।

कृष्णचूडिका, स्त्री, (कृष्णा चूडा अग्रं यस्याः। ततः कप्। टापि अत इत्वम्।) गुञ्जा। इति राजनिर्घण्टः। (कुँचफल इति भाषा।)

कृष्णचूर्णं, क्ली, (कृष्णस्य लोहस्य चूर्णम्। दग्धाक्षो हानि हतकीट्टमित्यर्थः।) लौहमलम्। इति राजनिर्घण्टः।

कृष्णजटा, स्त्री, (कृष्णा कृष्णवर्णा जटा यस्याः।) जटामांसी। इति रत्नमाला।

कृष्णजीरकः, पुं, (कृष्णः कृष्णवर्णो जीरकः।) कृष्णवर्णजीरकः। केलेजीरा इति भाषा। तत्पर्य्यायः। सुषवी २ कारवी ३ पृथ्वी ४ पृथुः ५ काला ६ उपकुञ्चिका ७। इत्यमरः। सुषवी ८ कुञ्चिका ९। इति तट्टीकायां भरतानन्दः। उपकुञ्चि १०। इति रत्नमाला। कृष्णा ११ भरता १२ कालो १३ बहुगन्धा १४। पृथुका १५ पृथिवी १६ मेधज्ञम् १७। इति शब्दरत्नावली। अपि च।

"कृष्णजीरः सुगन्धश्च तथैवोद्गारशोधनः।
कालाजाजी तु सुषवी कालिका चोपकालिका।
पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका।
उपकुञ्ची च कुञ्ची च कृष्णजीरक इत्यपि।
जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु।
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्।
ज्वरघ्नं पाचनं वृष्यं बल्यं रुच्यं कफापहम्।
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत्।"

इति भावप्रकाशः। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफशोथघ्नीवृत्त्वरवारित्वम्। रुचिवर्णहितकारित्वम्। ग्राहित्वञ्च। इति राजनिर्घण्टः। स तु कृष्णजीरकभेदेन द्विधा।

कृष्णतण्डुला, स्त्री, (कृष्णः तण्डुलो बीजं यस्याः।) कचोटाख्या। इति राजनिर्घण्टः।

कृष्णताम्रं, क्ली, (कृष्णं ताम्रम्। "वर्णो वर्णेन"। २।१। ६९। इति कर्म्मधारयः।) गोशीर्षचन्दनम्। इति शब्दमाला।

कृष्णतारः, पुं, (कृष्णा तारा यस्य।) हरिणः। इति राजनिर्घण्टः।

कृष्णत्रिवृता, स्त्री, (कृष्णा त्रिवृता।) कृष्णवर्णत्रिवृत्। काल तेउड़ी इति भाषा। तत्पर्य्यायः। श्यामा २ मालिन्दी ३ कालमेषिका ४ काला ५ मसूरविदला ६ अर्द्धचन्द्रा ७ सुषेणिका ८। इति जटाधरः। (अस्या गुणा यथा,
कषायत्वम्। मधुरत्वम्। रूक्षत्वम्। विपाकेकटुत्वम्। कफपित्तहरत्वादित्वम्। कटुत्वात् वातकोपकत्वम्। इति चरके सूत्रस्थाने ७ अध्याये।)

कृष्णदन्ता, स्त्री, (कृष्णः कृष्णवर्णो दन्ता फलसदृशो यस्याः।) काश्मरीवृक्षः। इति राजनिर्घण्टः।

(कृष्णदन्तविशिष्टे, त्रि। दन्ताश्च नयपानादिना कृष्णत्वं प्राप्नोति।)

कृष्णदेहः, पुं,(कृष्णः कृष्णवर्णो देहो यस्य।) भ्रमरः। इति सारस्वतः। कृष्णवर्णशरीरे, त्रि।

कृष्णद्वैपायनः, पुं (द्वीपे भवः इत्यणः। यद्वा द्वीपमयनं उत्पत्तिस्थानं यस्य। प्रज्ञादण्। कृष्णश्चासौ द्वैपायनश्चेति।) वेदव्यासः। इति त्रिकाण्डशेषः। (यथा, महाभारते १। १०५। ११।
"ततस्तस्मिन् प्रतिज्ञाते भीष्मेण कुरुनन्दन।
कृष्णद्वैपायनं काली चिन्तयामास वै मुनिम्"।
अस्य यमुनाद्वीपोत्पत्तिकथा यथा तत्रैव १। १०५। ७—१४।
"धर्म्मयुक्तस्य धर्म्मार्थं पितुरासीत्तरी मम।
सा कदाचिदहं तत्र गता प्रथमयौवने।
अथ धर्म्मविदां श्रेष्ठः परमर्षिः पराशरः।
आजगाम तरीं धीमांस्तरिष्यन् यमुनां नदीम्।
स तार्य्यमाणो यमुनां मामुपेत्याब्रवीत्तदा।
सान्त्वपूर्ब्बं मुनिश्रेष्ठः कामार्त्तो मधुरं वचः।
तमहं शापभीता च पितुर्भीता च भारत।
वरैरसुलभैरुक्ता न प्रत्याख्यातुमुत्सहे।
अभिभूय स मां बालां तेजसा वशमानयत्।
तमसा लोकमावृत्य नौगतामेव भारत।
मत्स्यगन्धो महानासीत् पुरा मम जुगुप्सितः।
तमपास्य शुभं गन्धमिमं प्रादात् स मे मुनिः।
ततो मामाह स मुनिर्गर्भमुत्सृज्य मामकम्।
द्वीपेऽस्या एव सरितः कन्यैव त्वं भविष्यसि।
पाराशर्य्यो महायोगी स बभूव महानृषिः।
कन्यापुत्त्रो मम पुरा द्वैपायन इति श्रुतः"।
अन्यत् विवरणादिकमस्य व्यासशब्दे द्रष्टव्यम्।)

कृष्णधत्तूरकः पुं, (कृष्णवर्णो धत्तूरकः।) कृष्णवर्णधुस्तूरः। कालधुतुरा इति भाषा। तत्पर्य्यायः। शिवः २ कनकः ३ मदनः ४ शिवः ५ कृष्णपुष्पः ६ विषारातिः ७ धूर्त्तः ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कान्तिकारित्वम्। वात-जित्त्वं पित्तकुष्ठज्वरभ्रमकारित्वञ्च। "सितनीलकृष्णलोहितपीतप्रसवाश्च सन्ति धत्तूराः। सामान्यगुणोपेतास्तेषु गुणाढ्यस्तु कृष्णकुसुमः स्यात्"। इति राजनिर्घण्टः।

कृष्णपर्णी, स्त्री, (कृष्णवर्णानि पर्णानि यस्याः।) कालतुलसी। इति रत्नमाला।

कृष्णपक्षः, पुं, (कृष्णवर्णः पक्षः।) असितपक्षः। स तु प्रतिपदादिअमावास्यान्तानि पञ्चदश दिनानि। यथा, तिथ्यादितत्त्वम्।
"तत्र पक्षावुभौ मासे शुक्लकृष्णौ क्रमेण हि।
चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः।
पक्षद्वयात्तु विज्ञेयः क्रमात् प्रवृत्तः सदा।
दर्शान्तः कृष्णपक्षः स्यात् पूर्णिमान्तश्च शुक्लकः"।

कृष्णपाकः, पुं, (कृष्णोऽसौ। पच + घञ्। कृष्णः पाकः। कृष्णः पाकः फलं यस्य।) करमर्दः। इति शब्दरत्नावली।

कृष्णपाकफलः, पुं (कृष्णः पाकफलं यस्य।) करमर्दः। इत्यमरः। २। ४। ६९।

कृष्णपिङ्गला, स्त्री, ("वर्णो वर्णेन"। २। १। ६९। इति कर्म्मधारयः।) दुर्गा। इति त्रिकाण्डशेषः। (कृष्णपिङ्गलवर्णयुक्ते, त्रि।
ॐ "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्द्ध्वलिङ्गं विरूपाक्षं विश्वरूपं नमो नमः"।)

कृष्णपिण्डीतकः, पुं (कृष्णः पिण्डीतकः। नित्यकर्म्मधारयः।) वृक्षविशेषः। तत्पर्य्यायः। वराहः २ कृष्णपिण्डीरः ३। इति रत्नमाला।

कृष्णपिण्डीरः, पुं, (कृष्णः पिण्डीरः।) कृष्णपिण्डीतकवृक्षः। इति रत्नमाला।

कृष्णपिपीली स्त्री, (कृष्णा पिपीली।) कृष्णवर्णपिपीलिका। कालपिपीडा इति भाषा। तत्पर्य्यायः। सूक्ष्मा २ कृष्णवर्णा ३। इति राजनिर्घण्टः।

कृष्णपुष्पः, पुं (कृष्णं पुष्पं यस्य।) कृष्णधत्तूरकः। इति राजनिर्घण्टः। (कृष्णधत्तूरशब्दे गुणा ज्ञेयाः।)

कृष्णपुष्पी, स्त्री, (कृष्णपुष्प + जातित्वात् ङीष्।) पिङ्गलकः। इति शब्दचन्द्रिका।

कृष्णफलः, पुं (कृष्णम् उग्रं कुत्सितं वा फलं यस्य।) करमर्दकः। इत्यमरटीकायां भरतः।

कृष्णफलपाकः पुं (कृष्णः फलस्येव पाको यस्य।) करमर्दकः। इति त्रिकाण्डशेषः।

कृष्णफला स्त्री, (कृष्णं फलं यस्याः।) सोमराजी। इत्यमरः। २। ४। ९६। (कालजिरी। बाकुची इति भाषा। छोट काम इति भाषा। अस्याः पर्य्याया यथा।
"शुक्लकृष्णफला स्यात् सौम्या च मध्यमा"।
इति वैद्यकरत्नमालायाम्। कोलविम्बा। दुधिया फेशि इति भाषा। अस्याः पर्य्यायाः।
यथा —
"कोलशिम्बि कृष्णफला तथा पर्णपट्टिका"।
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।)

कृष्णभूमः, पुं (कृष्णा कृष्णवर्णा भूमिर्यत्र यस्य देशे। समासे अच्।) कृष्णवर्णविशिष्टभूमिदेशः। इति हेमचन्द्रः।

कृष्णभूमिजा स्त्री (कृष्णायां भूमौ जायते इति। जन + डः। ततष्टाप्।) गोमूत्रिकावृक्षः। इति राजनिर्घण्टः।

कृष्णभेदा, स्त्री, (कृष्णवर्णेन भेदो यस्याः।) कटुका। इति राजनिर्घण्टः।
(अस्याः पर्य्याया यथा।
"कटुका तु कटुः तिक्ता कृष्णभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी।
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी"।
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे।)

कृष्णभेदी स्त्री, (कृष्णेन वर्णेन भेदो यस्याः। गौरादित्वात् ङीष्।) कटुकी। इत्यमरः। २। ४। ८६। (कटुकीशब्दे गुणादयो ज्ञेयाः।)

कृष्णमुद्गः, पुं (कृष्णः कृष्णवर्णः मुद्गः यद्वा कृष्णवर्णः।) मुद्गविशेषः। काल मुग इति भाषा। तत्पर्य्यायः। २ कृष्ण ३ माषकः ४ हरितः ५। अस्य गुणाः। त्रिदोषशमनत्वम्। मधुरत्वम्। लघुत्वम्। दीपनत्वम्। पाचनत्वम्। बल

सत्यभामा ३ कालिन्दी ४ मित्रविन्दा ५ नाग्नजिती ६ भद्रा ७ लक्ष्मणा ८ एताः प्रधानाः । अन्या अपि शताधिकषोडशसहस्राणि स्त्रियः । इति श्रीभागवतम् ॥ * ॥ व्रजस्थितस्यास्य सखायश्चतुर्व्विधाः । तत्र किञ्चिद्वयसाधिकाः सुहृदो यथा । सुभद्रः १ मण्डलीभद्रः २ भद्रवर्द्धनः ३ गोभटः ४ यक्षेन्द्रभटः ५ भद्राङ्गः ६ वीरभद्रः ७ महागुणः ८ विजयः ९ बलभद्रः १० इत्याद्याः । वयसा न्यूनाः सखायो यथा । विशालः १ वृषभः २ ओजस्वी ३ देवप्रस्थः ४ वरूथपः ५ मणिबन्धः ६ करन्धमः ७ इत्याद्याः । वयसा तुल्याः प्रियसखायो यथा । श्रीदामा १ सुदामा २ वसुदामकः ३ किङ्किणी ४ स्तोककृष्णः ५ अंशुः ६ भद्रसेनः ७ विलासी ८ पुण्डरीकविटङ्काक्षः ९ कलविङ्कः १० इत्याद्याः । एभ्यः श्रेष्ठा आत्यन्तिकरहस्येषु युक्ताः भावविशेषविशिष्टाः प्रियनर्म्मसखायो यथा । सुबलः १ अर्ज्जुनः २ गन्धर्व्वः ३ वसन्तः ४ उज्ज्वलः ५ इत्याद्याः । इति भक्तिरसामृतसिन्धुः ॥ * ॥ वृन्दावनस्थितस्य अस्य सख्यः शतकोटयः । तत्र वेदमुनिदेवस्त्रियोऽपि कृष्णाराधनार्थं गोपाङ्गनारूपेण जाताः । तत्रै अस्य नित्यप्रिया यथा । राधा १ चन्द्रावली २ विशाखा ३ ललिता ४ श्यामा ५ पद्मा ६ शैव्या ७ भद्रिका ८ तारा ९ विचित्रा १० गोपाली ११ धनिष्ठा १२ पालिका १३ खञ्जनाक्षी १४ मनोरमा १५ मङ्गला १६ विमला १७ लीला १८ कृष्णा १९ शारी २० विशारदा २१ तारावली २२ चकोराक्षी २३ शङ्करी २४ कुङ्कुमादयः २५ । एतासां मध्ये *विशाखा ललिता पद्मा शैव्या एतास्तस्य सख्यः* । अन्या यूथाधिपाः । तासां मध्ये राधादयोऽष्टौ मुख्याः । तासां राधाचन्द्रावल्यौ श्रेष्ठे । अनयोरपि राधाधिका । इत्युज्ज्वलनीलमणिः ॥ * ॥ अपि च । चन्द्रावली १ सुशीला २ *अस्याः सह*चर्य्यः चतुर्द्दशसहस्राणि । शशिकला ३ अस्याः सहचर्य्यः षोडशसहस्राणि । चन्द्रमुखी ४ अस्याः सहचर्य्यः षोडशसहस्राणि । माधवी ५ अस्याः सहचर्य्यः एकादशसहस्राणि । कदम्बमाला ६ अस्याः सहचर्य्यः त्रयोदशसहस्राणि । कुन्ती ७ अस्याः सहचर्य्यः दशसहस्राणि । यमुना ८ अस्याः सहचर्य्यः चतुर्दशसहस्राणि । जाह्नवी ९ अस्याः सहचर्य्यः नवसहस्राणि । पद्ममुखी १० अस्याः सहचर्य्यः नवसहस्राणि । सावित्री ११ अस्याः सहचर्य्यः पञ्चदशसहस्राणि । सुधामुखी १२ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि । शुभा १३ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि । पद्मा १४ अस्याः सहचर्य्यः चतुर्दशसहस्राणि । गौरी १५ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि । सर्व्वमङ्गला १६ अस्याः सहचर्य्यः षोडशसहस्राणि । सरस्वती १७ अस्याः सहचर्य्यः त्रयोदशसहस्राणि । भारती १८ अस्याः सहचर्य्यः दशसहस्राणि । अपर्णा १९ अस्याः सहचर्य्यः चतुर्दशसहस्राणि । रतिः २० अस्याः सहचर्य्यः दशसहस्राणि । गङ्गा २१ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि । अम्बिका २२ अस्याः सहचर्य्यः षोडशसहस्राणि । सती २३ अस्याः सहचर्य्यः त्रयोदशसहस्राणि । नन्दिनी २४ अस्याः सहचर्य्यः दशसहस्राणि । सुन्दरी २५ अस्याः सहचर्य्यः त्रयोदशसहस्राणि । कृष्णप्रिया २६ अस्याः सहचर्य्यः षोडशसहस्राणि । मधुमती २७ अस्याः सहचर्य्यः चतुर्द्दशसहस्राणि । चम्पा २८ अस्याः सहचर्य्यः त्रयोदशसहस्राणि । चन्दना २९ अस्याः सहचर्य्यः चतुर्दशसहस्राणि । इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥ (महादेवः । यथा, महाभारते १३ । १७ । ४४ ।

"दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च" ॥)

व्यासः । (अयन्तु द्वैपायन व्यासः सत्यवत्यां महर्षेः पराशराज्जातः कृष्णवर्णत्वात् कृष्णद्वीपावतीर्णत्वाद् वा कृष्ण इत्यभिधीयते ।

यथा, महाभारते १ । १०५ । १४ ।

"यो व्यस्य वेदांश्चतुरस्तपसा भगवानृषिः ।
लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च" ॥)

अर्ज्जुनः । (अयन्तु तृतीयपाण्डवः । अस्य दशनाम स्वन्यतम नाम । यथा, महाभारते ४ । ४२ । २१ ।

"कृष्ण इत्येव दशमं नाम चक्रे पिता मम ।
कृष्णावदातस्य सतः प्रियत्वाद् बालकस्य वै" ॥

कृष्णो वर्णोऽस्यास्तीति । अगन्ताद् गुणवचनेभ्यो मतुपो लुगिति लुक् ।) कोकिलः । इति विश्वः ॥ काकः । इति मेदिनी ॥ करमर्द्दकः । इति शब्दरत्नावली ॥ वर्णविशेषः । कालवर्णः । तत्पर्य्यायः । नील १ असित २ श्याम ३ काल ४ श्यामल ५ मेचक ६ ७ राम ८ शितिः ९ । इति जटाधरः ॥ तद्वति, त्रि । इत्यमरः ॥ (कर्षति पापानि शरणागतानां मङ्गलकारत्वात् कृष्णेन वर्ण्यं विनापि नाशय । परब्रह्म । यथा, पौराणिकी गाथायाम् ।

"कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते ।
भस्मीभवन्ति राजेन्द्र ! महापातककोटयः" ॥

चन्द्रकलाक्षयकरप्रथमादिपञ्चदशकलाक्रियासम्प्रतिपदादिदर्शान्तकपञ्चदशतिथ्यात्मकः कालभेदोऽर्द्धमासः । यथा, तिथितत्त्वे ३६ ।

"चन्द्रवृद्धिकरः शुक्लः कृष्णश्चन्द्रक्षयात्मकः" ॥

कृष्णपक्षाभिमानिदेवताविशेषः । यथा, गीतायाम् ।

"धूमो रात्रिस्तथा कृष्णः षण्मासा दक्षिणायनम्" ॥

कृष्णसारमृगः । यथा महाभारते १ । १३ । १५ ।

"धनुश्च सशरं गृह्य तथा कृष्णाजिनानि च" ॥

असुरभेदः । देवोत्पातविशेषः । अयन्तु इन्द्रेण समरे निहतः । ऋषिविशेषः । अयन्तु ऋग्वेदस्य अष्टममण्डलस्य ८५—८७ सूक्तानि, तथा दशममण्डलस्य ४२—४४ सूक्तानि च प्रणिनाय । अपरञ्च वेदान्तगतोपनिषद्विशेषः । यथा, मुक्तिकोपनिषदि । "सीतारामतापनकृष्णहयग्रीवदत्तात्रेयगारुडानामथर्व्वणगतानामेकत्रिंशत्संख्यकानां उपनिषदां भव कर्म्मभिरिति भाषितं" ॥)

कृष्णकन्द, क्ली, (कृष्णः कृष्णवर्णः कन्दो यस्य ।) रक्तोत्पलम् । इति त्रिकाण्डशेषः ॥

कृष्णकर्म्मा, [न्] त्रि (कृष्णं अशुभं कर्म्म यस्य ।) पापाचारयुक्तः । तत्पर्य्यायः । श्विश्विदानः १ । इत्यमरः । ३ । १ । ४६ ॥ (श्वेतितुमिच्छति श्वितावर्णे इत्यस्य श्वितेर्दावेत्यागम् दाव सनी लक्ष च इति श्विश्विदानः । केचित्तु अशुक्लकर्म्मा इति पठन्ति । अशुक्लं निष्पापत्वात् शुक्लं कर्म्मास्य अशुक्लकर्म्मा शुक्लकर्म्मा इत्यर्थः । इति व्याचष्टे । इति भरतः ॥

"श्विश्विदानः कृष्णकर्म्मा शुक्लकर्म्मेति कश्चित्" ।

इति जटाधरः ॥ क्ली, मरणाशौचकर्म्मादि क्रियाविशेषः । यथा, स्मृतौ "अथ मलस्यो वक्ष्या भवन्तीत्युपक्रम्य दाहकर्म्मेत्यादिकर्म्मादि कर्म्म कृष्णकर्म्मोपादानकं' । इति ॥)

कृष्णकलि, स्त्री, (कृष्णस्य पूजा इव कलिः कलिका यस्याः ।) स्वनामख्यातपुष्पवृक्षः । अस्य शाखा रक्ताङ्गुलीयमालवद्ग्रन्थियुक्ता पत्र सुदृढाम्बूरवद्भवति । तस्य पुष्पं श्वेतरक्तपीतपाटलादिमिलितपञ्चदलं षट्कोणरमध्यं स्वल्पवृन्तमपराह्णे प्रस्फुटति । तस्य बीजं कृष्णमरिचतुल्यं पुष्पं स्वल्पकाले सुगन्ध वर्षाकाले प्रचुरं भवति । तदुत्पत्तिकालस्य, मूलतो बीजतश्च । इति लोकप्रसिद्धम् । अस्याः पिष्टपत्रमूलादिना व्रणशोषो भवति इति वैद्यकम् ॥

कृष्णकाष्ठ, क्ली, (कृष्णं काष्ठं यस्य ।) कालागुरु । इति राजनिर्घण्टः ॥ (अगुरुशब्देऽस्य विवृतो ज्ञातव्यः ।)

कृष्णकेलि, स्त्री, (कृष्णस्य केलिः क्रीडा यत्र, पूजा इव पुष्पकलिका यस्याः ।) स्वनामख्यातपुष्पवृक्षः । (अस्याः अन्यद्विवरणं कृष्णकलिशब्दे द्रष्टव्यम् ।)

कृष्णकोहल, पुं, (कृष्णकस्य कुत्सितकर्म्मणः जयवितर्कं जाति प्रकाशतीति । का + का ।) द्यूतकृत् । इति त्रिकाण्डशेषः ॥

कृष्णगन्धा स्त्री, (कृष्णः उग्रो गन्धो यस्याः ।) शोभाञ्जनः । इति राजनिर्घण्टः ॥

('इमांश्चीनपरान् च्यवनाद्ययैर्भो विरोचनः ।
पूतिकः कृष्णगन्धा च तिल्वकश्च तथारुकः ।
विरेचने प्रयोक्तव्याः पूतिकस्तिल्वकस्तथा ।
कृष्णगन्धा परीसर्पे शोथेष्वर्शःसु चोच्यते" ॥

इति चरके सूत्रस्थाने १ अध्याये ॥

कृष्णगर्भ, पुं, (कृष्णः कृष्णवर्णो गर्भः अभ्यन्तरदेशो यस्य ।) कट्फलः । इति राजनिर्घण्टः ॥

कृष्णचञ्चुक, पुं (कृष्णा चञ्चुरस्य । ततः कप् ।) चणकः । इति राजनिर्घण्टः ॥ (चणकशब्दे विवरणमस्य ज्ञातव्यम् ।)

कृष्णचतुर्द्दशी, स्त्री (कृष्णा कृष्णपक्षसम्बन्धिनी चतुर्दशी ।) कृष्णपक्षीयचतुर्दशी । तत्पर्य्यायः । भूत २ । इति त्रिकाण्डशेषः ॥

कृष्णचर, त्रि, (कृष्णस्य भूतपूर्व्वो चरः ।) कार्ष्णस्य भूतपूर्व्वः गवादिः । इति मुग्धबोधम् ॥

कृष्णचूडा, स्त्री, (कृष्णस्य चूडेव कृष्णचूडा यस्याः ।) स्वनामख्यातपुष्पवृक्षः । अस्य पर्य्यायः

रूपदलवद्भवति। तस्य पुष्पं पीतरक्तवर्णं उपर्य्युर्ध्व कृष्णवर्णदलं दीर्घवृन्तं दलदीर्घकेशरमध्य केसरद्वययुक्तञ्च जायते। तत्फलं शिम्बीसदृशं पुष्पं सर्व्वकाले सुलभं वर्षाकाले प्रचुरं भवति। तदुत्पत्तिस्तस्य मूलतो बीजाच्च भवति इति लोकप्रसिद्धम्॥

कृष्णचूडिका, स्त्री, (कृष्णा चूडा अग्रं यस्याः। ततः कप् ततष्टाप् अत इत्वम्।) गुञ्जा। इति राजनिर्घण्टः। (कुँचफल इति भाषा॥)

कृष्णचूर्णं, क्ली, (कृष्णस्य लोहस्य चूर्णम्। दग्धाङ्गारो द्वाभिहतकोट्टमित्यर्थः।) लौहमलम्। इति राजनिर्घण्टः॥

कृष्णजटा, स्त्री, (कृष्णा कृष्णवर्णा जटा यस्याः।) जटामांसी। इति रत्नमाला॥

कृष्णजीरक, पुं, (कृष्णः कृष्णवर्णो जीरकः।) कृष्णवर्णकृष्णजीरकः। कालजीरा इति भाषा। तत्पर्य्यायः। सुषवी २ कारवी ३ पृथ्वी ४ पृथु ५ काला ६ उपकुञ्चिका ७। इत्यमरः॥ सुषवी ८ कुञ्चिका ९। इति तट्टीकायां भरतानन्दः॥ उपकुञ्चि १०। इति रत्नमाला॥ कृष्णा ११ जरणा १२ भाणी १३ बहुगन्धा १४। पृथुका १५ पृथिवी १६ मेघजम् १७। इति शब्दरत्नावली॥ अपि च।

"कृष्णजीरं सुगन्धञ्च तथैवोद्गारशोधनम्।
कणाजाजी तु सुषवी कालिका चोपकालिका॥
पृथ्वीका कारवी पृथ्वी पृथुः कृष्णोपकुञ्चिका।
उपकुञ्ची च कुञ्ची च बृहज्जीरक इत्यपि॥
जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु।
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्॥
ज्वरघ्नं पाचनं बल्यं वृष्यं रुच्यं कफापहम्।
चक्षुष्यं पवनाध्मानगुल्मच्छर्द्यतिसारहृत्"॥
इति भावप्रकाशः॥ अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कफशोफशीतज्वरनाशित्वम्। रुचि वह्निहितकारित्वम्। ग्राहित्वञ्च। इति राजनिर्घण्टः। स तु [illegible]मेदेन द्विधा॥

कृष्णत[illegible]का, स्त्री, (कृष्णा तण्डुलो बीजं यस्याः।) कलम्बोटाख्या। इति राजनिर्घण्टः॥

कृष्णताम्र, क्ली, (कृष्णं ताम्रम्। "वर्णो वर्णेन"। २।१। ६९। इति कर्म्मधारयः।) गोशीर्षचन्दनम्। इति शब्दमाला॥

कृष्णतारः, पुं, (कृष्णा तारा यस्य।) हरिणः। इति राजनिर्घण्टः॥

कृष्णत्रिवृता, स्त्री, (कृष्णा त्रिवृता।) कृष्णवर्णा त्रिवृत्। काल तेउडी इति भाषा। तत्पर्य्यायः। श्यामा २ पालिन्दी ३ कालमेषिका ४ काला ५ मसूरविदला ६ अर्द्धचन्द्रा ७ सुषेणिका ८। इति जटाधरः। (अस्या गुणा यथा,
रेचनत्वम्। मधुरत्वम्। रूक्षत्वम्। विदाहिकटुत्वम्। वातपित्तकफज्वरशोफहारित्वम्। कफवातात् पान श्रेयस्त्वञ्च। इति चरके सूत्रस्थाने ७ अध्याये।)

कृष्णदन्ता, स्त्री, (कृष्णा कृष्णवर्णाः दन्ताः छिन्नदेशो यस्याः।) काश्मरीवृक्षः। इति राजनिर्घण्टः॥

(कृष्णदन्तविशिष्टे, त्रि। दन्ताश्च मद्यपानादिना कृष्णत्वं प्राप्नोति॥)

कृष्णदेह, पुं, (कृष्णः कृष्णवर्णो देहो यस्य।) भ्रमरः। इति सारस्वतः॥ कृष्णवर्णशरीरे, त्रि॥

कृष्णद्वैपायन, पुं, (द्वीपे भव इत्यर्थे। यद्वा द्वीपं अयनं उत्पत्तिस्थानं यस्य। प्रज्ञादण्। कृष्णश्चासौ द्वैपायनश्चेति।) वेदव्यासः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते १। १०५। १२।
"ततस्तस्मिन् प्रतिज्ञाते भीष्मेण कुरुनन्दन।
कृष्णद्वैपायनं काली चिन्तयामास वै मुनिम्"॥
अस्य यमुनाद्वीपोत्पत्तिकथा यथा तत्रैव १। १०५। ७—१४।
"धर्म्मयुक्तस्य धर्म्मार्थं पितुरासीत्तरी मम।
सा कदाचिदहं तत्र गता प्रथमयौवने॥
अथ धर्म्मविदां श्रेष्ठः परमर्षिः पराशरः।
आजगाम तरीं धीमांस्तरिष्यन् यमुनां नदीम्॥
स तार्य्यमाणो यमुनां मामुपेत्याब्रवीत्तदा।
सान्त्वपूर्ब्बं मुनिश्रेष्ठः कामार्त्तो मधुरं वचः॥
तमहं शापभीता च पितुर्भीता च भारत।
वरैरसुलभैरुक्ता न प्रत्याख्यातुमुत्सहे॥
अभिभूय स मां बालां तेजसा वशमानयत्।
तमसा लोकमावृत्य नौगतामेव भारत॥
मत्स्यगन्धो महानासीत् पुरा मम जुगुप्सितः।
तमपास्य शुभं गन्धमिमं प्रादात् स मे मुनिः॥
ततो मामाह स मुनिर्गर्भमुत्सृज्य मामकम्।
द्वीपेऽस्या एव सरितः कन्यैव त्वं भविष्यसि॥
पाराशर्य्यो महायोगी स बभूव महानृषिः।
कन्यापुत्त्रो मम पुरा द्वैपायन इति श्रुतः"॥
अन्यत् विवरणादिकमस्य व्यासशब्दे द्रष्टव्यम्॥)

कृष्णधत्तूरक, पुं, (कृष्णवर्णो धत्तूरकः।) कृष्णवर्ण धुस्तूरः। कालधुतुरा इति भाषा। तत्पर्य्यायः। शिवः २ कनकः ३ मधिरः ४ शिवः ५ कृष्णपुष्पः ६ विषाराति ७ खर्ज्जूघ्नः ८। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। कान्तिकारित्वम्। व्रणा[illegible]शोषकण्डूज्वरकुष्ठत्वग्दोषनाशित्वम्। 'सि तपीतकृष्णनीलरक्तपुष्पभेदात् सन्ति धत्तूराः। सामान्यगुणोपेतास्तेषु गुणाढ्यः कृष्णकुसुमः स्यात्'। इति राजनिर्घण्टः॥

कृष्णपर्णी, स्त्री, (कृष्णवर्णानि पर्णानि यस्याः।) कालतुलसी। इति रत्नमाला॥

कृष्णपक्ष, पुं, (कृष्णतमसावृतचन्द्रप्रकाशक पक्षः।) पक्षविशेषः। स तु प्रतिपदादामावास्यान्तानि पञ्चदश दिनानि। यथा, तिथ्यादितत्त्वम्।
"तत्र दशाहमी भागे शुक्लाद्यो क्रमेण वै।
चन्द्रमण्डलतः शुक्लः कृष्णपक्षप्रकाशकः॥
पञ्चादाद्यान् तिथीन् क्रमात् प्रपद्यते सुराः।
दशमांशः कृष्णपक्षे तां पूर्व्वमानां च शुक्लके"॥

कृष्णपाक, पुं, (कृष्णेऽगे। पच + घञ्। पाक पचनम्। कृष्ण कृष्णवर्णः पाक यत्र यस्य।) करमर्द्दः। इति शब्दरत्नावली॥

कृष्णपाकफल, पुं (कृष्णः पाकेन फलं यस्य।) करमर्द्दः। इत्यमरः। २। ४। ६७॥

कृष्णपिङ्गला, स्त्री ("वर्णो वर्णेन"। २। १। ६९। इति कर्म्मधारयः।) दुर्गा। इति त्रिकाण्डशेषः। (कृष्णपिङ्गलवर्णयुक्ते, त्रि।
ॐ "ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम्।
ऊर्द्धलिङ्गं विरूपाक्षं विश्वरूपं नमो नमः"॥)

कृष्णपिण्डीतक, पुं, (कृष्णः पिण्डीतकः। निष्कर्म्मधारयः।) वृक्षविशेषः। तत्पर्य्यायः। वराहः २ कृष्णपिण्डीरः ३। इति रत्नमाला॥

कृष्णपिण्डीरः, पुं, (कृष्णः पिण्डीरः।) कृष्णपिण्डीतकवृक्षः। इति रत्नमाला॥

कृष्णपिपीली स्त्री, (कृष्णा पिपीली।) कृष्णवर्णपिपीलिका। कालपिपीडा इति भाषा। तत्पर्य्यायः। श्यामा २ कृष्णवर्णा ३। इति राजनिर्घण्टः॥

कृष्णपुष्प, पुं, (कृष्णं पुष्पं यस्य।) कृष्णधत्तूरकः। इति राजनिर्घण्टः॥ (कृष्णधत्तूरकशब्देऽस्य पर्य्याया ज्ञेयाः॥)

कृष्णपुष्पी, स्त्री, (कृष्णपुष्प + जातित्वात् ङीष्।) प्रियङ्गुवृक्षः। इति शब्दचन्द्रिका॥

कृष्णफल, पुं (कृष्णं उग्रं कुत्सितं वा फलं यस्य।) करमर्द्दकः। इत्यमरटीकायां भरतः॥

कृष्णफलपाक, पुं, (कृष्णं फलरूपेण पाको यस्य।) करमर्दकः। इति हिकन्यकोषः॥

कृष्णफला स्त्री, (कृष्णं फलं यस्याः।) सोमराजी। इत्यमरः। २। ४। ९६। (सोमराजी। बाकुची इति भाषा। छोट आम इति भाषा। अस्याः पर्य्याया यथा॥
"सुक्ष्मशल्यबन्धा च दीर्घफला च मध्यमा"॥
इति वैद्यकरत्नमालायाम्॥ सोमराजि। सुवर्णा जेठि इति भाषा॥ अस्याः पर्य्याया।
यथा —
"सोमराजि कृष्णफला तथा मध्यप्रपत्रिका"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

कृष्णभूम, पुं (कृष्णा कृष्णवर्णा भूमिर्यत्र देशे। समासे अच्।) कृष्णवर्णमृत्तिकायुक्तो देशः। इति हेमचन्द्रः॥

कृष्णभूमिजा,स्त्री (कृष्णायां भूमौ जायते इति। जन + डः। ततष्टाप्।) गोमूत्रिकातृणम्। इति राजनिर्घण्टः॥

कृष्णभेदा, स्त्री, (कृष्णवर्णेन भेदनेऽस्त्या।) कटुका। इति राजनिर्घण्टः।
(अस्या गुणा यथा॥
"कट्वी तु कटुका तिक्ता कृष्णभेदा कटुम्भरा।
अशोका मत्स्यशकला चक्राङ्गी शकुलादनी॥
मत्स्यपित्ता काण्डरुहा रोहिणी कटुरोहिणी"॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

कृष्णभेदी स्त्री (कृष्णेन वर्णेन भेदोऽस्याः। गौरादित्वात् ङीष्।) कटुकी। इत्यमरः। २। ४। ८८॥ (कटुकीशब्देऽस्या गुणादयो ज्ञेयाः॥)

कृष्णमृद्गर, पुं (कृष्णः कृष्णवर्णः मिश्रितो वा मुद्गरः कालत्वात्।) मुद्गरः। कालमुद्गर इति भाषा। तत्पर्य्यायः। २ [illegible] ३ माधवः ४ [illegible] ५। अस्य गुणाः। शिशिरत्वम्। मधुरत्वम्। [illegible]। [illegible]।

वीर्य्याङ्कपुष्टिदाश्च । इति राजनिघण्टः ॥
(यथाह भावप्रकाशः ।
"मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरो हिमः ।
स्वादुरल्पानिलो नेत्र्यो ज्वरघ्नो वनजस्तथा ॥
मुद्गो बहुविधः श्यामो हरितः पीतकस्तथा ।
श्वेतो रक्तश्च तेषान्तु पूर्व्वः पूर्व्वो लघुः स्मृतः ॥
सुश्रुतेन पुनः प्रोक्तो हरितः प्रवरो गुणैः ।
चरकादिभिरप्युक्तः स एव गुणाधिकः" ॥)

कृष्णमुद्गी, स्त्री, (कृष्णः मुद्गः अस्याः । स्त्रियां ङीप् ।) शारिवाविशेषः । इति राजनिघण्टः ॥

कृष्णमृत्, स्त्री, (कृष्णा मृत् मृत्तिका ।) कालमृत्तिका । तत्पर्य्यायः । कृष्णभूमिः २ । अस्या गुणाः । दाहरक्तप्रदरश्लेष्मपित्तहरत्वम् । इति राजनिघण्टः ॥

कृष्णमृत्तिक, पुं, (कृष्णा मृत्तिका भूमिर्यत्र ।) कृष्णभूमः । इति हेमचन्द्रः ॥

कृष्णवहा, स्त्री, (कृष्णां सतीं वहतीति । वह + अच् ।) मधुका लता । इति राजनिर्घण्टः ॥

कृष्णरूप्य, त्रि, (कृष्णस्य भूतपूर्व्वा यो भूतपूर्व्वे रूप्य । कृष्णचर । कृष्णस्य भूतपूर्व्वा गवादिः । इति मुग्धबोधव्याकरणम् ॥

कृष्णलक, पुं, (कृष्णो वर्णोऽस्त्यस्याग्रभागे सिध्मादित्वात् लच् । ततः स्वार्थे कन् ।) गुञ्जा । परिमाणविशेषः । यथा, मनुः । ८ । १० ।
"पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश" ॥

कृष्णलवण, क्ली, (कृष्णं लवणम् ।) सौवर्च्चलवणम् । काचलवणम् । इति राजनिघण्टः ॥ (यथा, मार्कण्डे १८४ अध्याये ।
"सैन्धवं कृष्णलवणं सौवीरं मागधिकम्" ।
अस्य पर्य्याया यथा । वैद्यकरत्नमालायाम् ।
"रुचकं कृष्णलवणमक्षं सौवर्च्चलञ्च तत्" ॥)

कृष्णला, स्त्री, (कृष्णल + टाप् ।) गुञ्जा । इत्यमरः । २ । ४ । ९८ ॥ (स्त्री, परिमाणविशेषः ।
यथा मनुः । ८ । १३४ ।
"सर्षपाः षट् यवो मध्यस्त्रियवन्त्वेककृष्णलम् ।
पञ्चकृष्णलको माषस्ते सुवर्णस्तु षोडश" ॥
अस्य टीकायां कुल्लूकभट्टेन व्याख्यातं तद्यथा । "गौरसर्षपाः षट् मध्यो न स्थूलो नापि सूक्ष्मो यवो भवति । त्रिभिर्यवैः कृष्णलं रक्तिकेति प्रसिद्धं पञ्चभिः कृष्णलैर्माषः षोडशमाषाः सुवर्णः स्यात्" ॥
अस्याः पर्य्याया यथा ।
"काकुष्टा कृष्णला गुञ्जा रक्तिका काकचिञ्चिका ।
काकादनी काकतिक्ता काकणन्ती शिखण्डिनी" ॥
इति वैद्यकरत्नमालायाम् ॥)

कृष्णलोह, क्ली, (कृष्णं लोहम् ।) अयस्कान्तः । इति राजनिघण्टः ॥
("त्रपुसीसताम्ररजतकृष्णलोहसुवर्णानि लोहभस्मानि ॥ इति सुश्रुते सूत्रस्थाने ३६ अध्याये ॥)

कृष्णलोहित पुं (कृष्णश्च लोहितश्च । 'वर्णो वर्णेन' २ । १ । ६९ । इति समासः ।) कृष्णलोहितवर्णः । धूम्रवर्णः । तद्वति त्रि । इत्यमरः । १ । ५ । १६ ॥

कृष्णवक्त्र, पुं, (कृष्णं कृष्णवर्णं वक्त्रं मुखं यस्य ।) वानरः । इति हलायुधः ॥

कृष्णवर्त्मा, [न्] पुं, (कृष्णं कृष्णवर्णं वर्त्म यस्य । वायुप्रसारितधूमपथाभ्यन्तर एव गतिरस्येति भावः ।) वह्निः । (यथा, महाभारते १ । ८५ । १२ ।
"हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" ॥) चित्रकवृक्षः । इत्यमरः ॥ (कृष्णं पापविशिष्टं कर्म्म आचरणं वर्त्म यस्य ।) दुराचारः । राहुः । इति मेदिनी ॥ (कृष्णो वासुदेवः वर्त्म आश्रयः वर्त्मगतिर्यस्य । धर्म्मनिरतपुरुषः । इति व्युत्पत्तिलभ्योऽर्थः ॥)

कृष्णवल्ली, स्त्री, (कृष्णा वल्ली ।) कृष्णार्ज्जकः । इति शब्दचन्द्रिका ॥ शारिवाविशेषः । इति राजनिघण्टः ॥ (अस्याः पर्य्याया यथा ।
"कृष्णार्ज्जकः कृष्णवल्ली कालमाला करालकः" ॥
इति वैद्यकरत्नमालायाम् ॥)

कृष्णवल्लिका, स्त्री, (कृष्णा वल्लिका ।) मधुका लता । इति राजनिर्घण्टः ॥

कृष्णवर्व्वरक, क्ली, (कृष्णं वर्व्वरकम् ।) वर्व्वरचन्दनम् । इति राजनिघण्टः ॥
(वर्व्वरशब्देऽस्य विवृतिर्ज्ञेया ॥)

कृष्णवानर, पुं, (कृष्णो वानरः ।) कालवानरः । तत्पर्य्यायः । गोलाङ्गूलः २ गोवाल्यः ३ कपिः ४ कृष्णमुखः ५ । इति राजनिघण्टः ॥

कृष्णवीज, क्ली (कृष्णं वीजं यस्य ।) कालिङ्गम् । इति राजनिघण्टः ॥ (कालिन्द तरवूज इति लोके । अस्य पर्य्याया गुणाश्च यथा ।
"कालिन्दं कृष्णवीजं स्यात् कालिङ्गञ्च सुवर्त्तुलम् ।
कालिन्दं ग्राहि दृक्पित्तशुक्रहृच्छीतलं गुरु ।
पक्वन्तु सोष्णं सक्षारं पित्तलं कफवातजित्" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णवीज, पुं, (कृष्णम् उप्तं वीजं यस्य ।) रक्तशिग्रुवृक्षः । इति जटाधरः ॥

कृष्णवृन्ता, स्त्री, (कृष्णं वृन्तं यस्याः ।) पाटलावृक्षः । इत्यमरः । २ । ४ । ५५ ॥ (अस्याः पर्य्याया यथा ।
"पाटलिः पाटला मोघा मधुदूती फलेरुहा ।
कृष्णवृन्ता कुबेराक्षी कालस्थाल्यलिवल्लभा ॥
ताम्रपुष्पी च कथिता परा स्यात् पाटला सिता" ॥
इति च तस्य पूर्व्वखण्डे प्रथमे भागे ॥)
माषपर्णी । इति मेदिनी ॥ (अस्याः पर्य्याया यथा ।
"सिंहपुच्छी ऋषिप्रोक्ता माषपर्णी महासहा ।
कृष्णवृन्ता च काम्बोजी पाण्डुलोमशपर्णिका" ॥
इति वैद्यकरत्नमालायाम् ॥ * ॥ गम्भारीवृक्षः ।
अस्य पर्य्याया यथा ।
"गम्भारी भद्रपर्णी च श्रीपर्णी मधुपर्णिका ॥
काश्मीरी काश्मरी हीरा काश्मर्य्यः पीतरोहिणी ।
कृष्णवृन्ता मधुरसा महाकुसुमिकाऽपि च" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
गुणाश्चास्याः पाटलामाषपर्णिगम्भारीशब्देषु ज्ञातव्याः ॥)

कृष्णवृन्तिका, स्त्री, (कृष्णं वृन्तं यस्याः स्त्रियां कन् टापि अत इत्वञ्च ।) गम्भारीवृक्षः । पाटलावृक्षः । इति रत्नमाला ॥

कृष्णशार, पुं (कृष्णः शारः शबलश्च ।) कृष्णसारमृगः । इत्यमरटीकायां रमानाथः ॥

कृष्णशालि, पुं, (कृष्णः शालिधान्यविशेषः ।) काल धान इति भाषा । तत्पर्य्यायः । कालशालिः २ श्यामशालिः ३ मेचकः ४ । अस्य गुणाः । त्रिदोषशमनाशित्वम् । मधुरत्वम् । पुष्टिवीर्य्यबलप्रदत्वम् । बलकान्तिबलकारित्वञ्च । इति राजनिघण्टः ॥

कृष्णशिग्रु, पुं (कृष्णः कृष्णवर्णयुक्तः शिग्रुः ।) शोभाञ्जनवृक्षः । इति राजनिघण्टः ॥

कृष्णशिम्बिका स्त्री, (कृष्णा कृष्णवर्णा शिम्बिः कुत्सिता शिम्बिका वा ।) कृष्णवर्णशिम्बी । काल शिम इति भाषा । तत्पर्य्यायः । काकाण्डी २ । इति रत्नमाला ।
(अस्या गुणा गाम्भारीशब्दे ज्ञातव्याः ॥
"सितासिताः पीतकरक्तवर्णा
भवन्ति येऽनेकविधास्तु शिम्ब्याः ।
यथोदितास्ते गुरवः प्रधाना
ज्ञेया कटूष्णा रसपाकयोश्च" ॥
इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥)

कृष्णशृङ्ग, पुं (कृष्णं शृङ्गं विषाणं यस्य ।) महिषः । इति हेमचन्द्रः ॥

कृष्णसख, पुं, कृष्णस्य सखा । ("राजाहःसखिभ्यष्टच्" । ५ । ४ । ९१ । इति टच् ।) अर्ज्जुनः । इति मुग्धबोधव्याकरणम् ॥ (अर्ज्जुनशब्दे ॥)

कृष्णसखी, स्त्री (कृष्णस्य सखी ।) द्रौपदी । सा तु यज्ञयागाग्निमध्यतो यज्ञसेनराजदुहिता । कृष्णस्य सखी सहचरी इव कृष्णवर्णत्वात् ।) जीरकः । इति शब्दचन्द्रिका ॥

कृष्णसर्षप पुं, (कृष्णः कृष्णवर्णः सर्षपः ।) राजसर्षपः । इति राजनिघण्टः ॥ (अस्य पर्य्याया ।
"क्षवः क्षताभिजनकः क्षुत् कृष्णसर्षपः" ॥
अस्य गुणाश्च ।
"अति तीक्ष्णा विशेषेण तद्वत् कृष्णापि राजिका" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णसार, पुं, (कृष्णः सारो यस्य ।) हरिणभेदः । इत्यमरः । २ । ५ । १० ॥ कालसार इति भाषा । (यथा, मनौ २ । २३ ।
"कृष्णसारस्तु चरति मृगो यत्र स्वभावतः ।
स ज्ञेयो यज्ञियो देशो म्लेच्छदेशस्ततः परः" ॥)
अस्य मांसगुणाः । ग्राहित्वम् । रुचिवर्द्धकारित्वम् । ज्वरनाशित्वञ्च । इति राजवल्लभः ॥ सेहुण्डवृक्षः । शिंशपावृक्षः । इति मेदिनी ॥ खदिरवृक्षः । इति शब्दरत्नावली ॥

कृष्णसारङ्ग पुं, कृष्णश्च सारङ्गो मृगः ।) कृष्णसारः । (यथा, कात्यायनश्रौतसूत्रे । ७ । ८ । २१ ।
"कृष्णसारङ्ग मैध्यमसारे भावितसारङ्गम्" ।
तथा, शतपथब्राह्मणे । ३ । २ । ६ । १६ । "कृष्णसारङ्ग्यामिन्द्राय यदि कृष्णसारङ्गं न विन्देत् अपि लोहितसारङ्गम्" । "कृष्णसारङ्गः कृष्णमृगः" । इति भाष्यम् । मनेऽपरत्र । तथा, "कृष्ण" ...

यदि चेत् न विन्देत लभेत तदा अपि तर्हि लोहितसारङ्ग तद्गुणमाव उपाददीत इत्यर्थः ।)

कृष्णसारथि, पुं, अर्ज्जुनवृक्षः । इति राजनिर्घण्टः ॥ (कृष्णः सारथिः युद्धे सहायोऽस्य इति विग्रहे ।) पार्थः । (स तु तृतीयपाण्डवः । भारतीयमहायुद्धे पार्थप्रार्थनया श्रीकृष्णस्य तत्सारथ्याङ्गीकारः । यथा, महाभारते । ५ । ७ । ३५-३८ ।

अर्ज्जुन उवाच ।

"भवान् समर्थस्तान् सर्व्वान् निहन्तुं नात्र संशयः ।
निहन्तुमहमप्येकः समर्थः पुरुषर्षभ ॥
भवांस्तु कीर्त्तिमान् लोके तद्यशस्त्वां गमिष्यति ।
यशसा चाहमप्यर्थी तस्मादसि मया वृतः ॥
सारथ्यन्तु त्वया कार्य्यं इति मे मानसं सदा ।
चिररात्रेप्सितं कामं तद्भवान् कर्त्तुमर्हति ॥

वासुदेव उवाच ।

उपपन्नमिदं पार्थ ! यत् स्पर्द्धेथा मया सह ।
सारथ्यं ते करिष्यामि कामः सम्पद्यतां तव' ॥)

कृष्णसारा, स्त्री, (कृष्णसार + अजादित्वात् टाप् ।) शिंशपावृक्षः । इति रत्नमाला ॥ (अस्याः पर्य्यायाः यथा,

"शिंशपा पिच्छिला श्यामा कृष्णसारा च सा गुरुः ।
कपिला सैव मुनिभिर्भस्मगर्भेति कीर्त्तिता" ॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

कृष्णस्कन्ध, पुं, (कृष्णः कृष्णवर्णः स्कन्धो यस्य ।) तमालस्कन्ध । तमालवृक्षः । इत्यमरटीकायां भरतः ॥

कृष्णा, स्त्री, (कृषे नक तत टाप् ।) द्रौपदी । (सा तु पञ्चपाण्डवपत्नी । कृष्णवर्णत्वादेव अस्याः नाम तथा जातम् । यथा, महाभारते १ । १६८ । ४४ ।

"कृष्णेत्येवाब्रुवन् कृष्णां कृष्णाभूत् सा हि वर्णतः ।
तथा तन्मिथुनं जज्ञे द्रुपदस्य महामखे' ॥)

नीलीवृक्षः । पिप्पली । (अस्याः पर्य्याया यथा ।

'पिप्पली चपला शौण्डी वैदेही मागधी कणा ।
कृष्णोपकुल्या मगधी कोला स्यात्तिक्ततण्डुला' ॥

इति वैद्यकरत्नमालायाम् ॥) द्राक्षा । इति मेदिनी ॥ नीलपुनर्नवा । कृष्णजीरकः । गम्भारी । कटुका । सारिवाविशेषः । राजसर्षपः । इति राजनिर्घण्टः ॥ पर्पटी । इति भावप्रकाशः ॥ काकोली । सोमराजी । इति जटाधरः ॥ (अग्नेः सप्तप्रकारायां जिह्वानां मध्ये अनिष्टकारीजलौकोजिह्वेषः । तस्य लक्षणं यथा ।

"वासप्रसूनवर्णा धूम्रप्रभा कृष्णा" ॥

इति सुश्रुते उत्तरतन्त्रे १२ अध्याये ॥)

कृष्णागुरु, क्ली, (कृष्णं कृष्णवर्णं अगुरु ।) कृष्णवर्णं एकचित्रकाष्ठविशेषः । तत्पर्य्यायः । अगुरु १ वंशिकम् २ विश्वधूपकम् ३ लौहम् ४ कालागुरु ५ वंशकम् ६ योगजम् ७ कृष्णकाष्ठम् ८ धूपार्हम् ९ प्रवरम् १० शिशिरम् ११ [illegible] १२ । (यथा, महाभारते चामरतत्त्वादौ ।

"विविधः कृष्णागुरुवास वासेश्च कलितः" ॥)

अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । लेपे शीतलत्वम् । पाने पित्तहरत्वम् । केषाञ्चित् मते त्रिदोषघ्नत्वम् । इति राजनिर्घण्टः ॥ तत्पर्य्यायगुणाः । अथ अगुरु कृष्णागुरु ।

"अगुरुप्रवरं लोहं राजार्हं योगजं तथा ।
वंशिकं कृमिजं चापि कृमिजग्धमनार्य्यकम् ॥
अगुरूष्णं कटु त्वच्यं तिक्तं तीक्ष्णञ्च पित्तलम् ।
लघु कर्णाक्षिरोगघ्नं शीतवातकफप्रणुत् ॥
कृष्णं गुणाधिकं तत्तु लौहवद्वारि मज्जति ।
अगुरुप्रवरं ज्ञेयं कृष्णागुरुसमः स्मृतः" ॥

इति भावप्रकाशः ॥

कृष्णाचल, पुं, (कृष्णस्य प्रियः अचलः पर्व्वतः । तद्वसतेस्तत्त्वात् ।) रैवतपर्व्वतः । इति जटाधरः ॥ (अस्मिन्नेव गिरौ भगवतः कृष्णस्य द्वारकाधाम । इति पुराणप्रसिद्धम् ॥)

कृष्णाञ्जनी स्त्री, (अज्यतेऽनया इति । अन्ज + करणे ल्युट् ततो ङीप् । कृष्णा कृष्णवर्णा अञ्जनी ।) कालाञ्जनीवृक्षः । इति राजनिर्घण्टः ॥

कृष्णानदी, स्त्री (कृष्णा इत्याख्याता नदी ।) नदीभेदः । तत्पर्य्यायः । कृष्णसमुद्भवा २ कृष्णवेण्या ३ कृष्णगङ्गा ४ । (यथा, महाभारते ६ । ९ । ३२ ।

"तदा निरामयां कृष्णां मन्दगां मन्दवाहिनीम्" ॥

अस्य जलगुणाः । स्वच्छत्वम् । रुच्यत्वम् । दीपनत्वम् । पाचनत्वञ्च । इति राजनिर्घण्टः ॥

कृष्णाभा, स्त्री, (कृष्णा सती आभाति । आ + भा + क । ततष्टाप् ।) कालाञ्जनी । इति राजनिर्घण्टः ॥

कृष्णामिष, क्ली, (कृष्णं कृष्णेन इत्यर्थः आमिषति स्पृशति वर्णेन । आ + मिष् + क ।) कृष्णायसम् । इति हेमचन्द्रः ॥

कृष्णायस, क्ली, (कृष्णं कालं आयसम् । स्वार्थे अच् ।) कृष्णवर्णलौहम् । इति रत्नमाला ॥

कृष्णार्चि [स्] पुं (कृष्णं कृष्णवर्णं अर्चिरस्य कृष्णवर्त्मधूमेन सह अर्चिर्यस्येति वा ।) अग्निः । इति भूरिप्रयोगः ॥

कृष्णार्जक, पुं (कृष्णः अर्जकः वर्णसादृश्यात् ।) कालतुलसी । तत्पर्य्यायः । कालमालः २ मालुकः ३ कृष्णमालुकः ४ कृष्णमल्लिका ५ [illegible] ६ वनवर्व्वरः ७ वर्व्वरी ८ कालिः ९ । (अन्ये पर्य्याया यथा, वैद्यकरत्नमालायाम् ।

'कृष्णार्जकः कृष्णमल्ली कालमालः करालकः' ॥)

अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातामयनाशित्वम् । रुचिप्रदत्वम् । [illegible] । इति राजनिर्घण्टः ॥

कृष्णाक्षु, पुं (कृष्णं कृष्णवर्णं अक्षु ।) [illegible] । इति राजनिर्घण्टः ॥

कृष्णावास, पुं (कृष्णस्य आवासः इति । कृष्ण + आ + वस + अधिकरणे घञ् । कृष्णस्य आवासः ।) अश्वत्थवृक्षः । इति हेमचन्द्रः ॥ ([illegible] इति भारते । [illegible] ॥)

कृष्णि [illegible], त्रि (कृष्ण [illegible]) [illegible] । इति मुग्धबोधम् ॥

कृष्णिका, स्त्री, (कृष्णैव इति । कृष्ण + स्वार्थे कन् टाप् अत इत्वम् । यद्वा, कृष्णवर्णो भूषाऽस्यास्ति इति ठन् टाप् च ।) राजिका । इत्यमरः । २ । ९ । १९ । राइ सर्षा इति भाषा ॥ ("कृष्णिका राजिकाक्षुरी कुष्ठघ्नी गात्रमर्षण" ॥ इति वैद्यकरत्नमालायाम् ॥) श्यामापक्षिणी । तस्या नामानि यथा,

"श्यामा वराही शकुनी कुमारी
दुर्गा च देवी घटिका सपोमा ।
त्वं मोलकी पाकलिका त्वमेव
त्वं कृष्णिका त्वं मितवर्णिनी च ॥
त्वं भद्रपुत्री शकुनैकदेवी
धनुर्द्धरी पाशसमूहमाला ।
प्रचण्डरूपा भगवत्यशीमा
नमोऽस्तु तुभ्यं कुरु मेऽर्थसिद्धिम्" ॥

इति वसन्तराजशाकुनम् ॥

कृष्णेक्षु, पुं, (कृष्णः कृष्णवर्णः इक्षुः ।) इक्षुभेदः । काजली आक् इति भाषा । तत्पर्य्यायः । श्यामेक्षुः २ कोकिलेक्षुः ३ कोकिलाक्षः ४ कान्तारकः ५ । इत्यमरः ॥ अस्य गुणाः । तिक्तत्वम् । पाके मधुरत्वम् । स्वादुत्वम् । सुस्वादुत्वम् । कटुत्वम् । रसाढ्यत्वम् । त्रिदोषहारित्वम् । तस्य वीर्य्यं बलवीर्य्यवर्द्धनञ्च । इति राजनिर्घण्टः ॥ अस्य भावप्रकाशोक्तगुणाः कान्तारशब्दे द्रष्टव्याः ॥

कृष्णोदुम्बरिका, स्त्री, (कृष्णस्य काकस्य प्रिया उदुम्बरिका । यद्वा कृष्णा कृष्णवर्णा उदुम्बरिका ।) काकोदुम्बरिका । इति राजनिर्घण्टः ॥

कृसर पुं (कृ + "कृधूमादिभ्यः कित्" । उणां ३ । ७३ । इति सरन् कित् । [illegible] ।) कृशरः । इति जटाधरः ॥ (यथा छन्दोगपरिशिष्टे—

'तिलतण्डुलमाषैस्तु कृसरः सोऽभिधीयते" ॥

खिचुड़ी इति भाषा । यथा च मनौ ५ । ७ ।

"वृथा कृसरसंयावं पायसापूपमेव च ।
अनुपाकृतमांसानि देवान्नानि हवींषि च' ॥)

कॄ, ञ विक्षेपे । इति कविकल्पद्रुमः । (तुदां-परं-सकं-सेट् ।) ञ, किरति । [illegible] इति । [illegible] इति दुर्गादासः ॥

कॄ ञ हिंसे । इति कविकल्पद्रुमः ॥ (क्र्यां-उभं-सकं-सेट् ।) ञ [illegible] । [illegible] इति दुर्गादासः ॥

कॄ ञ विज्ञाने । इति कविकल्पद्रुमः ॥ (चुरां-आत्मं-सकं-सेट् ।) [illegible] । इति दुर्गादासः ॥

कॄत ञ शब्दे । इति कविकल्पद्रुमः ॥ (चुरां-परं-अकं-सेट् ।) [illegible] । [illegible]

गोष्ठीषु यद्गुणानमरीगणः । कौशांदेशस्य नि त्यत्वेऽपि कृतयात कौशांदेशस्य व्यभिचारत्वप्राप्त तेन व्यधीष्ठत-न्ति सिद्धम् । इति दुर्गादास ॥

क्रुम, त्रि, कम्पनार्थक्रमधातो कर्मणि क्ते क्रुमादेश । विचल । कृतकम्पन । कम्पन सामर्थ्य तद्विशिष्टः । यथा, "अश्वयस्मृताभिः पञ्चतत्वचत्वरत्नादितचन्द्रमावधिक्षमाधिकरणताव्यक्तिभिरचोभयत्री"। इति जगदीश । (यथा, मनौ । ११ । २७ ।
"इष्टि वैश्वानरी नित्य निर्वपेदब्दपर्य्यये ।
क्लृप्तानां पशुसोमानां निष्कृत्यर्थमसम्भवे" ॥)

क्रमकीला, स्त्री, (क्रमं कीलयति । कील+"कर्म ण्यण्" । ३ । २ । १ । इति अण ।) अश्वस्थापत्रम् । तत्पर्य्याय । पट्टोलिका २ । इति त्रिकाण्डशेष ॥

क्रमधूप, पु, (क्रमः कृत धूपो येन गन्धद्रव्यविशेषेण ।) सिल्हकः । इति जटाधरः । (क्रमधासौ धूपश्चेति विग्रहे कृत्रिमो धूप ॥)

क्रमिक, त्रि, (क्रमं मूल्यदानेन तस्य देयत्वेनास्त्यस्य । क्रम+ठन् ।) क्रीतः । इति हलायुधः ॥

केकय, पु, (केकयतराख्यया प्रसिद्ध प्रदेशो राज्यत्वेनास्त्यस्य ।) सूर्य्यवंशीयराजविशेष । इति श्रीभागवतम् । (स तु केकयेष्वाधीश्वर दशरथश्वशुरश्च । यथा, रामायणे १ । १९ । २२ ।
"तथा केकयराजानं वृद्धं परमधार्म्मिकम् ।
श्वशुरं राजसिंहस्य सपुत्त्रन्तमिहानय" ॥
जनपदवाचे तु बहुवचनान्त । यथा, महाभारते । ६ । जम्बूखण्डविनिर्म्माणपर्व्वणि ९ । ४८ ।
"उपावृत्तास्तथावृत्ता सुराष्ट्रा केकयास्तथा" ॥)

केकयी, स्त्री, (केकयस्यापत्य स्त्री । सन्धौ च माना भावात् केकयात्यन्यलक्ष्णमार्ग्योऽपि प्रयोग इति प्रयोगसाराख्याया ङीष् ।) दशरथराजपत्नी । सा तु केकयराजपुत्री भरतमाता च । इति शब्दरत्नावली ॥ (यथा, रामायणे ।
"रात्यन्तु केकयीपुत्रं केकयी धनमादिशत" ॥)

केकर, त्रि, (के शिरसि मुद्धि इत्यथ कनु मेत्र तारा योऽस्य । "हलो देतुताच्छील्यानुलोम्येषु" । ३।२।२०। इति ट । "हलन्तात सप्तम्या सञ्ज्ञायाम्" ६।३।९। इत्यलुक ।) वक्रीर । इत्यमरः । ३ । ६ । ४९ । टेंगा इति भाषा । (यथा, मनौ ।
"पिशा विश्रमावध केकरी मध्यमन्थरा" ॥
चतुर्वर्गाक्षमन्त । यथा विश्वप्रकाशे । "चतुर्वर्गस्तु केकर" ॥)

केका, स्त्री, (के मूर्द्धि कायति । कै+का टाप । अलुक् समास । यद्वा, कन्वेषाऽपीति बाहुल्ये ३ । "हलन्तात् सप्तम्या सञ्ज्ञायाम्" । ६ । ३ । ९ । इत्यलुक ।) मयूरवाणी । इत्यमरः । २ । ५ । ३१ । (यथा, रघौ १ । ३९ ।
"षड्जसंवादिनीः केका द्विधा भिन्ना शिखण्डिभिः" ॥)

केकावल, पु, (केका ध्वनिविशेष वलते स्यातीति । केका+वल+अच । यद्वा, केका+अस्त्यर्थे बाहुलकात् वलच प्रत्यय ।) मयूर । इति शब्दचन्द्रिका ॥

केकी, [न्] पु, (केका ध्वनिभेद अस्यास्तीति । व्रीह्यादित्वेति इनि ।) मयूरः । इत्यमरः २ । ५ । ३० । (यथा, कादम्बर्य्याम् । ३ । ७१ ।
"केकी केका यदि यत्नेन मौन तिष्ठति सद्रुयात् ।
चकोरश्चन्द्रिकाभोक्ता मन्मथतमिवाश्रित" ॥)

कैकेयी, स्त्री, (कैकेयी पृषोदरात् एकारागम ।) केकयी । इति शब्दरत्नावली ॥

केचन, अ, (पाणिनिमते पदद्वयम् । मुग्धबोधमते "किम सन्ताश्चिचनौ" । इति चनप्रत्यय ।) केचित् । इति व्याकरणम् ॥
(यथा, पञ्चदश्याम् । ६ । ५९ ।
"पूर्व्वापरपरामर्शविकलास्तत्र केचन" ॥)

केचित्, अ, (पाणिनिमते पदद्वयम् । मुग्धबोधमते तु "किम सन्ताश्चिचनौ"। इति चित प्रत्यय ।) केचन । इति व्याकरणम् । कोन व्यक्तिरा इति भाषा ॥ (यथा, रामगीतायाम् । १४ । "केचिद् वदन्तीति वितर्कवादिन"। केचित्क्षणप्रकाशिदा इति रामतत्त्ववागीश ॥)

केणुक, स्त्री, (कणु+स्वार्थे कन । पृषोदरात् एत्वे साधु ।) वत्सु । इति त्रिकाण्डशेष ॥

केणिका, स्त्री, (के शिरसि कुत्सितो वा अणक तत टाप् अत इत्वम् । स्त्रीत्व लौकिकम् ।) पटकुटी । इति हेमचन्द्र । कानात् इति भाषा ॥

केत, तृ क मन्त्रणे । निमन्त्रणे । इति कविकल्पद्रुम । (अदन्तचुरा०-पर सक सेट् । मन्त्रणे निमन्त्रणे । अचिकेतत । निमन्त्रय सम्पोष्टा पक्षम् । इति दुर्गादास ॥

केतक, पु, (कित निवासे+ण्वुल ।) केतकीवृक्षः । इति त्रिकाण्डशेष ॥ (यथा, रघु ६ । १७ ।
"विनाभिनीविभ्रमदक्षपन
मपादुर्यं केतकबर्हमन्य" ॥
अस्य पर्य्याया गुणाश्च यथा,—
"केतक सूचिकापुष्पो जम्बुकः क्रकचच्छद" ॥
"केतकः कटुक स्वादुलघुस्तिक्तः कफापहः" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

केतकी, स्त्री, (केतक+गौरादित्वात् ङीष् ।) पुष्पवृक्षविशेष । केया इति भाषा ॥
(यथा, भ्रमराष्टके । २ ।
"गन्धाढ्यासौ भुवनविदिता केतकी स्वर्णवर्णा
पद्मभ्रान्त्या क्षुधितमधुप पुष्पमध्ये पपात" ॥)
तत्पर्य्याय । सूचीपुष्प २ कृतीन ३ जम्बुक ४ । इति रत्नमाला । केतक ५ सूचिकापुष्प ६ जम्बुक ७ क्रकचच्छद ८ । इति भावप्रकाश ॥ तीक्ष्णपुष्पा ९ विफला १० धूलिपुष्पिका ११ मेध्या १२ कण्टकिनी १३ शिवद्विष्टा १४ नृपप्रिया १५ स्थिरा १६ दीर्घपत्रा १७ स्थिरगन्धा १८ गन्धपुष्पा १९ इन्दुकलिका २० दलपुष्पा २१ सुगन्धिनी २२ । अस्या गुणा । मधुरत्वम् । तिक्तत्वम् । कफनाशित्वम् । कटुत्वम् । लघुत्वम् । तद्गुणाः । वर्ण्यत्वम् । केशदौर्गन्ध्यनाशित्वम् । हेमाभाया गुणा । मदोन्मादकत्वम् । चक्षुष्यत्वम् । सौख्यकारित्वम् । तस्या गुणा । अति शिशिरत्वम् । कटुत्वम् । पित्तकफापहत्वम् । रसायनत्वम् । वर्णदेहदार्ढ्यकारित्वम् । इति राजनिर्घण्टः ॥

केतन, क्ली, (कित् निवासादौ+णिच्+कर्म्मभावकरणाधिकरणादिषु यथायथ ल्युट् ।) ध्वज । (यथा, रघुवंशे ९ । ३९ ।
"अमतुमारतया विकदमभै
सुरतसङ्गपरिश्रमनोदिभि ।
कुसुमचापमतेजयदंशुभि
र्हिमकरो मकरोर्जितकेतनम्" ॥)
आह्वानम् । निमन्त्रणम् । इत्यमरः । ३ । ३ । ११६ । (यथा, मनु । ४ । ११० ।
"प्रतिगृह्य द्विजो विद्वान् एकोद्दिष्टस्य केतनम् ।
त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके" ॥)
चिह्नम् । कृत्यम् । इति हेमचन्द्र । (यथा, रामायणे १ । ७४ । ८ ।
"स त्व धर्म्मपरो भूत्वा काश्यपाय महात्मने ।
दत्त्वा वसुमतीमस्य महेन्द्रकृतकेतन" ॥)
स्थानम् । इति शब्दरत्नावली ॥
(यथा, विष्णुपुराणे १ । ११ । ९ ।
"पतमाशासर्न सर्व्वभूतस्याप्यकेतनम्" ॥)

केतु, पु, नवग्रहान्तर्गतग्रहविशेष । स तु राहोः शरीरम् । तत्पर्य्याय । शिखी २ । इति दीपिका ॥ अयं पापग्रह । यथा,—
"बर्हा नेन्दुकसौरास्ताः पापाः सौम्यास्तथापरे ।
मासभुक्तो बुध पापो राहुकेतू च पापदौ" ॥ इति ।
अयन्तु जन्मराश्यपेक्षया षष्ठत्रिदशमैकादश स्थानस्थितश्चेत् शुभ । यथा,—
"केतुचन्द्रभौममन्दगताः षष्ठत्रिसंस्था शुभा
श्चन्द्राकाँऽपि ते च तौ च दशमौ चन्द्र पुनः सप्तम ।
जीव सप्तनवद्विपञ्चमगतो दुष्टेव सोमात्मज
शुक्रः षड्दशसप्तवर्जितगतो सर्व्वेऽप्युपान्त्ये शुभा" ॥
इति ॥ * ॥ अस्य त्रिकोण उपचयश्च प्रशुभत्व समनीषा यथा,—
"त्रिकोणकोण यतुर्थचत्वर
मीनो मय श्रवणो विषपौ ।
कन्यारचन्द्रः सुदत्त समानौ
जीवेन्दुजौ षट् शिखिन परौस्मा " ॥ इति ।
"सोमावन मनस मीने प्रायवृश्चिके निरीक्षणम् ॥
इति ॥ * ॥ अस्य तिथियथा,—
"केतुर्येक्षिण्योऽप्युदिगन्विक्षित् प्रदपते भक्त ।
रौद्रे सर्पमुहूर्त्ते वा प्राणैः सम्पते यातु" ॥
इति च ज्योतिस्तत्त्वम् ॥ * ॥ अस्य उत्पत्ति केतकीनामग्रन्थे द्रष्टव्यम् ॥ * ॥ पद्मान् सपूर्वा राक्षसो व्याख्यायते । तथाद्वैष्णवमहाधिन्नाथमाह ।
"गार्गीय त्रिशिखार भरामगितदेवनृत्त ।
आन्ताय बद्धस्था त्रिपत्तीश्वम कृतवार" ॥
गार्गीयमतपौत्र केतुं चार तन् पराशरेण प्रच लितमायान्यीय तन देवनिरचित इत्यत्र केतुचारान् अवलोक्य तथाऽन्यानपि ज्ञातव्यात् ततः दुःखनात्नवज्ञादिरनिराम् बहुन दृष्ट्वा मया अर्थ

अनाकुलो निःसन्देहः केतुचारः क्रियते ॥ * ॥

अथोदयास्तमयलक्षणमाह ।

"दर्शनमस्तमयो वा न गणितविधिनास्य शक्यते ज्ञातुम् । दिव्यान्तरीक्षभौमास्त्रिविधाः स्युः केतवो यस्मात्" ॥

अस्य केतोर्दर्शनम् उदयः अस्तमयोऽदर्शनं गणितविधानेन ज्ञातुं न शक्यते । यस्मात् केतवस्त्रिविधास्त्रिप्रकाराः । दिवि आकाशे भवा दिव्याः । अन्तरीक्षे भवा आन्तरीक्षाः । ग्रहनक्षत्राणां विमानान्यत्र आकाशे ये दृश्यन्ते ते आन्तरीक्षाः । भूमौ भवा भौमाः । इति त्रैलोक्यव्यापित्वात् एषामुदयास्तमयौ न ज्ञायेते इति ॥ * ॥

अथ केतूनां दिव्यवर्ज्जितानां अन्येषां स्वरूपमाह ।

"अहुताशेऽनलरूपं यस्मिंस्तत् केतुरूपमेवोक्तम् । खद्योतपिशाचालयमणिरत्नादीन् परित्यज्य" ॥

अहुताशे अनलवर्ज्जिते यस्मिन् देशे अनलरूपमग्निरूपं दृश्यते यत् तदेव केतुरूपमुक्तम् । किन्तु खद्योत इन्द्रगोपकस्तमिविशेष । पिशाचालय श्मशानम् । मणयश्चन्द्रकान्तप्रभृतयः । रत्नानि मरकतप्रभृतीनि । आदिग्रहणादन्यान्यपि काष्ठप्रभृतीनि तेजोरूपाणि गतान् त्यक्त्वा । यत एषां स्वभावादेवानलरूपमहुताशे दृश्यते अतो न तत् केतुरूपमिति ॥ * ॥

अथ दिव्यान्तरीक्षभौमानां केतूनां लक्षणमाह ।

"ध्वजशस्त्रभवनतरुतुरगकुञ्जराद्येष्वथान्तरीक्षास्ते । दिव्या नक्षत्रस्था भौमाः स्युरतोऽन्यथा शिखिनः" ॥

ध्वजश्चिह्नम् । शस्त्रमायुधादि । भवनं गृहम् । तरवो वृक्षाः । तुरगोऽश्वः । कुञ्जरो हस्ती । आदिग्रहणादन्येषु चतुष्पदेषु ये दृश्यन्ते ते आन्तरीक्षाः । दिव्या नक्षत्रस्थाः । अतोऽस्मादुक्तादन्यथा भूमौ ये दृश्यन्ते ते भौमाः । शिखिनः केतवः इति ॥ * ॥

अथ केतूनां सङ्ख्यानं मतान्तरेणाह ।

"शतमेकाधिकमेके सहस्रमपरे वदन्ति केतूनाम् । बहुरूपमेकमेव प्राह मुनिर्नारदः केतुम्" ॥

एके पराशरादय एकाधिकं शतं केतूनां वदन्ति । तथा च पराशरः । "शतमेकोत्तरं केतूनां भवन्ति तेषां षोडश मृत्युनिश्वासजाः । द्वादश दिनकरभवाः । दश दक्षमखविलयने रुद्रकोपजाः । सप्त पैतामहाः । चतुर्दश कौबेरीहाधिकल्पजाताः । नारदस्य सप्तविंशतिप्रभवाटजाः । एक एव परिधर्मजाः । अष्टौ विभावसुजाः । धूमोऽस्यार्थेन । चतुर्दश ब्रह्मणोऽमृते घोषेण ताह समुत्थाः । एकस्तु मृत्युकोपजः" इति ॥ * ॥ अपरे गर्गादय सहस्रं केतूनां वदन्ति ।

तथा च गर्गः ।

"अपिशोदयचाराणामनुमानाच्च दर्शनम् । अन्तर्भूतं सहस्रं स्यात् प्रबादो नारदस्य मे" ॥

बहुरूपमेकमेवेति नारदाख्यो मुनिरेकमेव केतुं बहुरूपं प्राह । तथाहि एक एव केतुरुत्पद्य सर्वाणि रूपाणि दिव्यान्तरीक्षभौमरूपः ॥

तथा च नारदः ।

"दिव्यान्तरीक्षभौमाख्या एक एव केतुः प्रकीर्त्तितः ।

शुभाशुभफलं लोके दद्यादस्तमयोदये" इति ॥ * ॥

एवं मतान्तराण्युक्त्वा स्वसिद्धान्तमाह ।

"यद्येको यदि बहव किमनेन फलन्तु सर्वथा वाच्यम् । उदयास्तमयैः स्थानैः स्पर्शैराधूमनैर्वर्णैः" ॥

यद्येक एव केतुः यदि वा बहवः केतवः किमनेन । सर्वथा तेषामुदयास्तमयैः स्थानैः स्पर्शैः धूमनैर्वर्णैश्च शुभाशुभफलं प्रवक्तव्यम् । उदयः कस्यां दिश्युदितः । अस्तमयः कस्यामेवास्तमितः । स्थानं यथा अश्विन्याद्याश्रमभागे कस्य नक्षत्रस्य वा समीपे उदितोऽस्तमितश्च । स्पर्शनं कतमेन ग्रहेण नक्षत्रेण वा स्पृष्टम् । आधूमनं कोऽपि धिष्ण्यमभिधूमितम् । वर्णाः सितरक्तपीतकृष्णादिकाः । एवमादिभिस्तस्य फलं वाच्यं तस्मादेको बहवो वा भवन्तु का नः क्षतिरिति ॥ * ॥

अथ केतुचारे येषां केतूनामभिदृष्टानां कियत्कालं यावत् फलपाको भवति तेषां फलपाकनियमार्थमाह ।

"यावन्त्यहानि दृश्यो मासास्तावन्त एव फलपाकः । मासैरब्दांश्च वदेत् प्रथमात् पक्षत्रयात् परतः" ॥

दृश्य केतुरिति सम्बध्यते । फलस्य पाकः फलपाकः । य केतुर्यावन्त्यहानि दृश्यो भवति तस्य तावन्तो मासास्तस्य केतोस्तावतो मासान् फलपाको ब्रूयात् । यावत्सङ्ख्यानि दिनानि दृष्टो भवति तत्तुल्यान् मासान् तस्य फलपाको वदेत् । मासैस्तु पुनरब्दान् वत्सरान् ब्रूयात् । मासस्सङ्ख्यादर्शने मासतुल्यानि वर्षाणि च वदेत् । यावत् सङ्ख्यान्मासान् दृष्टो भवति तावत्सङ्ख्यानि वर्षाणि तस्य फलपाको वदेत् । कस्मात् कालात् प्रभृतीत्यत आह प्रथमात् पक्षत्रयात् परतः । सर्व्वेषां केतूनां दिनमानमेतम् । यावन्ति दिनानि दृश्य केतुस्तस्माद्दर्शनादूर्द्धं प्रथम पक्षत्रय यत् चत्वारिंशद्दिनानि यावत् दिनसङ्ख्यानि तस्मात् पक्षत्रयात् परतः तावतो मासान् फलपाकं । अथ मासान् दृश्यते तदा तस्मादेव दर्शनात् परतः पक्षत्रयमतिक्रम्य मासतुल्यानि वर्षाणि वदेत् । प्रथमात् पक्षत्रयात् परतः तत्र फलपाकं यावद्दिनसङ्ख्या मन्यते । पक्षत्रयादूर्द्धं यदा दृश्यते केतुस्तदा मासतुल्यानि वर्षाणि वदेत् । अत्र सन्देहनिरासार्थं गर्गेण नियममभिधीयते ।

तथा च गर्गः ।

"यावन्त्यहानि दृश्येत तावन्मासान् फलं वदेत् । मासैश्च यावद्दृश्येत तावन्त्यब्दान् विनिर्दिशेत् ॥ त्रिपक्षात् परतः सर्वं फलेत्तस्य शुभाशुभम् । यदि दृश्यतिरे केतौ फलं नेतरदिष्यते" ॥

तथा वज्रः ।

"यावतो दिवसान् केतुर्दृश्यते तावतो मासान् विनिर्द्दिशेत् । त्रिपक्षात् परतश्चापि फलं केतो प्रपच्यते ॥ तस्मात् कालात् पर मुख्यम् फलति शुभाशुभम् । यदि दृश्यतरे केतौ फलं नेतरदिष्यते" ॥

यदैव तदा दिनैर्दिवसादर्शनम् न दृष्टे पक्षत्रयात् परतः इति । तदा पक्षत्रयात् परतः दर्शनात् ऊर्द्ध्वं पक्षत्रयं यदा दृश्यते

पक्षत्रयात् परतः फलपाकस्य कालसङ्ख्या प्रवर्त्तते तस्मादुक्तं यदिदमुदये केतो फलं नेतरदिदमेव इति । यदुक्तं मासैरब्दांश्च वदेत् तदेकदेशेनापि प्रतिमासमेकदिनदिनप्रमाणेन मासाः सङ्ख्या लभ्यत एवेत्यर्थः । सर्वथा दिनैर्नैवाकाशस्थितदिनसङ्ख्येन । दिवसैः पक्षत्रयात् परतो मासान् वदेत् । मासैस्तस्मादेव पक्षत्रयात् परतोऽब्दान् वदेत् । मासात् परतो दिनाधिक्ये दृष्टेऽपि तदनुपातात् वाच्यम् । यथा यदि दिनत्रितयेन वर्षं लभ्यते तद्दृष्टा दिनैकेन नास्तिकमिति ।

तथा च समाससंहितायाम् ।

"केचित् केतुसहस्रं शतमेकसमन्वितं वदन्त्येके । नारदमतमेकोऽयं विश्वरूपसमुद्भवो विविधरूप ॥ दिव्या नक्षत्रस्थाः कृता भौमाः । प्रासादध्वजादिषु चान्तरीक्षा न चाप्यशुभा ॥ उदयास्तमयाधूमनस्पर्शाकारमार्गदिग्वर्णैः । फलानि दिवसैर्मासान् मासैस्तु वर्षाणि निर्दिशेत् केतौ" ॥ * ॥

अथ शुभस्य केतोर्लक्षणमाह ।

"हस्वतनुः प्रसन्नः स्निग्ध ऋजुरचिरसंस्थितः शुक्लः । उदितो वाप्यभिवृष्टः सुभिक्षसौख्यावह केतुः" ॥

ऋजुरकुटिलः । अचिरसंस्थित शीघ्रमेवादर्शनं याति । शुक्लः श्वेतः । उदितो वाप्यभिवृष्टः अथवोदित एवाभिवृष्टस्मिन् उदितमात्रे वृष्टिर्भवति तदा शुभः । अन्यथा अशुभः ॥

अशुभस्य केतोर्लक्षणमाह ।

"उक्तविपरीतरूपो न शुभकरो धूमकेतुरुत्पन्नः । इन्द्रायुधानुकारी विशेषतो द्वित्रिचूलो वा" ॥

ह्रस्वतनुः प्रसन्न इत्यस्मादुक्तात् यो विपरीतरूपः केतुरुत्पन्नः स धूमकेतुः । स च न शुभकरः पापं करोतीत्यर्थः । इन्द्रधनुस्तुल्यो न शुभकरः एव । तथा द्विशिखस्त्रिशिखश्च विशेषत पापफलः ।

तथा च समाससंहितायाम् ।

"अचिरस्थितोऽभिवृष्टः स्निग्ध स्निग्धमूर्त्तिश्चास्तमुदितः । ह्रस्वतनुः प्रसन्नः केतुर्वा शस्तः प्रभावात् ॥ न शुभो विपरीतो विशेषतः शक्रचापकाकारः । द्विशिखस्त्रिचूलो वा दक्षिणस्थश्च यमकरः" ॥ * ॥

अधुना केतुस्वभावस्य विस्तरेणाचार्येण सविस्तरं वर्षविंशति केतवो भवन्ति । तेषां लक्षणमाह ।

"हारमणिहेमरूपाः किरणाख्या पञ्चविंशति सशिखाः । प्रागपरदिशोर्दृश्या नृपतिविरोधकरा रविजाः" ॥ हारो मुक्ताहारः । मणय पद्मरागकान्तप्रभृतयः । हेम सुवर्णम् । तत्समरूपकाः ये केतवो किरणाख्याः किरणसंज्ञाः । सशिखाः सचूलाः । ते च पञ्चविंशतौ रविजा सूर्यपुत्राः प्रागपरदिशोः पूर्व्वापरयोर्दिशोः दृश्यन्ते । एतेषां अन्यत्र एव एव दृश्यते न अन्यत्र इत्यर्थः । नृपविरोधकरा । ते च नृपाणां परस्परं विरोधं कलहं कुर्वन्ति इत्यर्थः ।

तथा च वज्रः ।

"शुक्लवर्णाः रवेः सुता महावक्रतनवः" ।

मुक्ताहाररजतवर्णाभा अग्निखा पञ्चविंशतिः ।
किरणाख्या रवेः पुत्रा दृश्यन्ते प्राग्दिशि स्थिताः ।
तथा च परभागस्था नृपतेर्भयदाश्च ते" ॥ * ॥

अथाग्निपुत्रांस्तावन्त आह ।

"शुकदहनबन्धुजीवकलाक्षाक्षतजोपमा हुताशसुताः ।
आग्नेय्यां दृश्यन्ते तावन्तस्तेऽपि शिखिनो भयदाः" ॥

शुकपक्ष नीलपीतवर्ण । दहनोऽग्निः । बन्धुजीवक पुष्पविशेषोऽतिलोहित । लाक्षा वृक्षनिर्यास । क्षतज रक्तम् । तदुपमास्तत्तुल्यवर्णाः । ते च तावन्त पञ्चविंशति आग्नेय्यां दिशि दृश्यन्ते । ते च हुताशसुता अग्निपुत्रा अग्निभयदाः ।

तथा च गर्गः ।

"नानावर्णाग्निसङ्काशा दीप्तिमन्तोऽपि वह्निनः ।
दृश्यन्त्यग्निनिवाकाशात् सर्व्वज्योतिषनाशनाः ।
तेऽग्निपुत्रा इह ज्ञेया लोकेऽग्निभयवेदिनः ।
आग्नेय्यां दिशि दृश्यन्ते पञ्चविंशाः प्रकीर्त्तिताः" ॥

अथ मृत्युसुतांस्तावन्त एवाह ।

"वक्रशिखा मृत्युसुता रूक्षाः कृष्णाश्च तेऽपि तावन्तः ।
दृश्यन्ते याम्यायां जनमरकावेदिनस्ते च" ॥

वक्रशिखा वक्रचूडाः । ते च रूक्षा अस्निग्धास्तेऽपि पञ्चविंशतिरेव । ते च मृत्योः पुत्रा दक्षिणस्यां दिशि दृश्यन्ते । ते च जनानां मरकमावेदयन्ति ।

तथा च गर्गः ।

"कृष्णा रूक्षा वक्रशिखा दृश्यन्ते याम्यदिक्स्थिताः ।
पञ्चविंशा मृत्युसुताः प्रजाक्षयकराः स्मृताः" ॥

अथ भूपुत्रान् द्वाविंशतिमेवाह ।

"दर्पणवृत्ताकारा विशिखाः किरणान्विता धरातनयाः । क्षुद्भयदा द्वाविंशतिरैशान्यामम्बुतैलनिभाः" ॥ दर्पणवत् वृत्त वर्त्तुल आकारो येषां ते विशिखा विपुला रश्मियुक्ता भूमेः पुत्राः । ते च द्वाविंशतिरैशान्यां दृश्यन्ते । जलस्य तैलस्य च सदृशकान्तयः । एते दृष्टा दुर्भिक्षं ददति ।

तथा च गर्गः ।

"समन्तवृत्ता विशिखा रश्मिभिः परिवारिताः ।
अम्बुतैलप्रतीकाशा द्वाविंशा भूसुताः स्मृताः ।
ऐशान्यां दिशि दृश्यन्ते दुर्भिक्षभयदाश्च ते" ॥ * ॥

अथ चन्द्रसुतांस्त्रय आह । "शशिकिरणरजतहिमकुमुदकुन्दकुसुमोपमाः सुताः शशिनः । उत्तरतो दृश्यन्ते त्रयः सुभिक्षावहाः शिखिनः" ॥ एते सौम्यायां दिशि दृश्यन्ते । ते च सुभिक्षं कुर्व्वन्ति ।

तथा च गर्गः ।

"चन्द्ररश्मिसवर्णाभा हिमकुन्देन्दुसुप्रभाः ।
त्रयस्ते शशिनः पुत्राः सौम्याशास्थाः शुभावहाः" ॥

अथ ब्रह्मदण्डाख्यम् एकमाह ।

"ब्रह्मसुत एक एव त्रिशिखो वर्णैस्त्रिभिर्युगान्तकरः ।
अनियतदिक्सम्प्रभवो विज्ञेयो ब्रह्मदण्डाख्यः" ॥

ब्रह्मपुत्र एक एव । स च त्रिचूडः । वर्णैः सितादिभिस्त्रिभिरुपलक्षितः । स तु ब्रह्मदण्डसञ्ज्ञो ज्ञेयः । अनियतायां अनिश्चितायां दिशि सम्भव उत्पद्यते सर्व्वासु दिक्षु द्रष्टव्य इत्यर्थः । स तु युगान्तं करोति सर्व्वक्षयकर इत्यर्थः ।

तथा च गर्गः ।

"एको ब्रह्मसुतः क्रूरस्त्रिवर्णस्त्रिशिखान्वितः ।
सर्व्वाशास्वाशु दृश्यः स्यात् ब्रह्मदण्डः क्षयावहः" ॥

एकाधिकशतं कथितम् अन्यानि नवशतान्येकोनानि कथनीयानि इत्यत आह ।

"शतमभिहितमेकसमेतमेकाधिकाच्छतात्परतः ।
एकोनानि नवशतानि केतूनां स्पष्टैश्चिह्नैः कथयिष्ये" ॥

शतमभिहितमेकसमेतम् एकेनाधिकं केतूनां शतमभिहितमुक्तम् । तस्मादेकाधिकाच्छतात् परतः एकोनानि एकेन विरहितानि नवशतानि केतूनां स्पष्टैश्चिह्नैर्लक्षणैः कथयिष्ये ॥

अथ शुक्रपुत्रांश्चतुरशीतिसङ्ख्याकानाह ।

"शुक्रसुता विसर्पकाः सौम्यैशान्योरुदये यान्ति चतुरशीत्याख्याः । विपुलसिततारकास्ते स्निग्धाश्च भवन्ति तीव्रफलाः" ॥ सौम्या उत्तरा । ऐशानी ईशानदिक् । तयोरुदयं दर्शनं गच्छन्ति । ते च विपुला विस्तीर्णाः सिताः शुक्लाः तारका येषाम् । स्निग्धाः स्निग्धदेहाः ते च तीव्रफला अनिष्टफला इति ।

तथा च गर्गः ।

"स्निग्धैकतारकाः श्वेताः स्नेहवन्तश्च सुप्रभाः ।
अर्च्चिष्मन्तः प्रसन्नाश्च तीक्ष्णेन च सुखान्विताः ।
एते विसर्पका नाम शुक्रपुत्राः प्रदारुणाः ।
अशीतिश्चतुरश्चैव लोकक्षयकराः स्मृताः" ॥ * ॥

अथ षष्टिं शनैश्चरपुत्रानाह ।

"स्निग्धाः प्रभासमेता द्विशिखाः षष्टिः शनैश्चराङ्गरुहाः । अतिकष्टफला दृश्याः सर्व्वत्रैते कनकसञ्ज्ञाः" ॥ ईदृशाः षष्टिः शनैश्चरपुत्राः कनकनामानः सर्व्वत्र सर्व्वासु दिक्षु दृष्टा अत्यशुभफलाश्च ते ।

तथा च गर्गः ।

"सुस्निग्धा रश्मिमन्तो द्विशिखाः सिततारकाः ।
षष्टिस्ते कनका घोराः शनैश्चरसुता ग्रहाः" ॥ * ॥

अथ गुरुसुतान् पञ्चषष्टिमाह ।

"विकचा नाम गुरुसुताः सितैकताराः शिखापरित्यक्ताः । षष्टिः पञ्चभिरधिकाः स्निग्धा याम्याश्रिताः पापाः" ॥

पञ्चषष्टिः केतवो विकचा नाम बृहस्पतिपुत्राः । ते च सिताः श्वेताः एकतारका येषां शिखारहिताः । ते च दक्षिणस्यां दृश्यन्ते पापा अनिष्टफलदा इत्यर्थः ।

तथा च गर्गः ।

"स्निग्धाः शुक्लाः प्रभावन्तो महारूपाः प्रभान्विताः ।
एकतारा वपुष्मन्तो विशिखा रश्मिभिर्वृताः ।
एते बृहस्पतेः पुत्राः पापदा दक्षिणाश्रयाः ।
नामतो विकचा घोराः पञ्चषष्टिभयावहाः" ॥

अथैकपञ्चाशद्बुधपुत्रानाह ।

"नातिव्यक्ताः सूक्ष्मा दीर्घाः शुक्ला यथेष्टदिक्प्रभवाः ।
बुधजास्तस्करसंज्ञाः पापफलाश्चैकपञ्चाशत्" ॥

तस्करनामानः एकपञ्चाशत् केतवो बुधस्य पुत्राः । नातिव्यक्ता अस्पष्टाः यथेष्टायां दिशि प्रभवः उत्पत्तिर्येषां सर्व्वासु दिक्षु दृश्यन्त इत्यर्थः । ते चानिष्टफलाः ।

तथा च गर्गः ।

"अव्यक्तसमा धूम्राः केचिच्चैकतारकाः ।
पाण्डुवर्णाः सुदीर्घाश्च स्थूला रश्मिभिरावृताः ।
एते बुधात्मजा ज्ञेयास्तस्कराख्या भयावहाः ।
एकाधिकास्ते पञ्चाशदथोऽथ परा ग्रहाः" ॥ * ॥

अथ षष्टिं भौमपुत्रानाह ।

"क्षतजानलानुरूपास्त्रिचूलताराः कुजात्मजाः षष्टिः । नाम्ना च कौङ्कुमास्ते सौम्याशासंस्थिताः पापाः" ॥ कौङ्कुमनामानः षष्टिः केतवो मङ्गलसुताः रक्तवह्निसदृशाः लोहिता इत्यर्थः । त्रिचूलाः शिखाकारा येषां ते च उत्तरस्यां दृश्यन्ते पापफलाश्च ।

तथा च गर्गः ।

"त्रिशिखाश्च सिताराश्च रक्तलोहितरश्मयः ।
प्रायश्चोत्तरामाशां सेवन्ते नियमेन ते ।
लोहिताङ्गात्मजा ज्ञेया ग्रहाः षष्टिः समासतः ।
नामतः कौङ्कुमा ज्ञेया रौद्राः सङ्ग्रामकारकाः" ॥ * ॥

अथ त्रयस्त्रिंशद्राहुपुत्रानाह ।

"त्रिंशत् त्र्यधिका राहोस्ते तामसकीलका इति ख्याताः । रविशशिगा दृश्यन्ते तेषां फलमर्कचारोक्तम्" ॥

त्र्यधिकत्रिंशत् स्वर्भानुपुत्रास्ते च नामतः तामसकीलका इति प्रसिद्धाः । ते च अर्कचन्द्रमण्डलगा दृश्यन्ते तेषाञ्च फलं सूर्य्यचारे कथितं तामसकीलकवशा राजहता इति ।

तथा च गर्गः ।

"कृष्णाभाः कृष्णपर्य्यन्ताः सकुलाः कृष्णरश्मयः ।
राहुपुत्रास्त्रयस्त्रिंशत् कीलकास्तेऽतिदारुणाः ।
रविमण्डलगाश्चैते दृश्यन्ते चन्द्रगास्तथा" ॥

तथा च पराशरः ।

"अर्कमण्डल एव दृश्यन्ते छिद्रा काककीलकाः ।
रवेरिवाङ्गिरामध्ये शुभयोः काककीलकौ ।
छिद्रा गरयो वापि दृश्यते पुरमालतिः ।
काकः कालानलनिर्मोक्षिकोष्ठो वाथ जायते ।
मण्डल कीलको मध्ये मण्डलस्याश्रितो यदा ।
महाजनविरोधाय प्रजानां तस्य शब्दद" इति ॥ * ॥

अथ विंशत्यधिकं शतमग्निपुत्रानाह ।

"विंशत्यधिकमन्यच्छतमग्नेर्विश्वरूपसंज्ञानाम् ।
तीव्रानलभयदानां ज्वालामालाकुलतनूनाम्" ॥

अन्यत् अपरं शतं विंशत्यधिकं केतूनामग्नेः सुतानां विश्वरूपनाम्नां ज्वालामालाकुला मूर्त्तयो येषाम् । तथा तीव्रं घोरमग्निभयं ददति ।

तथा च गर्गः ।

"नानावर्णा ज्वालाभा दीप्तिमन्तो विस्फुलिङ्गाः ।
दृश्यन्त्यग्निनिवाकाशे सर्व्वज्योतिर्विनाशनाः ।
तेऽग्निपुत्रा ग्रहा ज्ञेया लोकेऽग्निभयवेदिनः ।
विंशं शतञ्च घोरं विश्वरूपेति विश्रुतम्" ॥ * ॥

अथ सप्तसप्ततिं वायुपुत्रानाह ।

"श्यामारुणा वितारा चामररूपा विकीर्णदीधितयः ।
अरुणाख्या वायोः सप्तसप्ततिः पापदाः परुषाः" ॥

अरुणकाख्या वायोः पुत्राः सप्तसप्ततिः श्यामारुणवर्णाः तारकवर्ज्जिताश्चामराकारा विकीर्णदीधितयः

आदित्यरश्मय उक्ता दुष्टफलप्रदाः। अथ येषां दिङ्नियमो नास्ति तेऽनियतदर्शना सर्व्वास्वपि दिक्षु दृश्यन्ते।

तथा च गर्गः।

“अतारकप्रतिमा श्यावरक्तसुवर्णिनः।
बालरूपा रवाभान्ति शुक्लविस्तीर्णरश्मयः॥
सहस्रमति चैवान्ये वायोः पुत्राः प्रचक्षते।
लोकविभ्रमदा ह्येता नामतस्तस्करा ग्रहाः”॥*॥

अथाष्टौ प्रजापतिसुता द्वे च शते चतुरधिके ब्रह्मसुतांश्चाह।

“तारापुञ्जनिकाशा गणका नाम प्रजापतेरष्टौ।
द्वे च शते चतुरधिके चतुरस्रा ब्रह्मसन्तानाः॥
अष्टौ केतवो गणका नाम प्रजापतेः सुताः”।

ते च ताराणां नक्षत्राणां पुञ्जः समूहस्तदाकाराः। ते च पापफलदायिनः। तथा च। द्वे शते चतुरधिके केतूनां ते च चतुरस्रसंस्थाः चतुरस्राकृतयस्ते च ब्रह्मणः पुत्राः पापफला एव ज्ञेयाः ते चाग्नेयदिग्भवाः। तथा च गर्गः।

“तारापुञ्जप्रतीकाशा व्योमनक्षत्रसन्निभाः।
प्राजापत्या ग्रहास्त्वष्टौ गणका भयवर्द्धिनः॥
ब्रह्मजाश्चतुरस्रा ये सहितास्ते श्वेतरश्मयः।
द्वे शते चतुरश्चैव ब्रह्मजा भयदाश्च ते”॥*॥

अथ द्वात्रिंशद्वरुणसुतानाह।

“कङ्का नाम वरुणजा द्वात्रिंशद् गुल्मसंस्थानाः।
शशिवत्प्रभासमेतास्तीव्रफलाः केतवः प्रोक्ताः”॥

ते वरुणसुता वंशगुल्मवत् संस्थानमाकृतिर्यथा। गुल्म एकमूलजो लतासमूहः। शशिवत् चन्द्रवत् प्रभया कान्त्या समेतास्ते च तीव्रफला कष्टफलाः प्रोक्ताः कथितास्ते चानियतदिक्प्रभवाः। तथा च गर्गः।

“वंशगुल्मप्रतीकाशा महान्तः पूर्णरश्मयः।
काकतुण्डनिभाश्चापि रश्मिभिः केचिदावृताः॥
मयूखानुन्मुञ्चन्तीव स्निग्धत्वात् सौम्यदर्शनाः।
एते कष्टफला कङ्का द्वात्रिंशद्वारुणा ग्रहाः”॥*॥

अथ षण्णवतिकालसुतानाह।

“षण्णवतिः कालसुताः कबन्धसंज्ञाः कबन्धसंस्थानाः।
पुण्ड्रभयप्रदाः स्युर्विरूपतारास्ते शिखिनः”॥

कालसुताः कबन्धसंज्ञा षण्णवतिः। कबन्धः शिरोरहितशरीरकवत् संस्थानमाकृतिर्येषां ते च विरूपा अस्फुटाकारका येषां ते शिखिनः केतवः पुण्ड्रा नाम जनपदास्तेषां भयकरा भ॰। अन्यच्च एवंविधास्ते चानियतदिक्प्रभवाः।

तथा च गर्गः।

“तारापुञ्जविरूपाश्च कबन्धाकृतिसंस्थिताः।
नीलरक्ता नवांशाश्च भयावहपुरःसराः॥
कालपुत्राः कबन्धाख्या भवन्ति षट् प्रकीर्त्तिताः।
घोरारौद्रतरा घोरा पुण्ड्राणामभयप्रदाः”॥*॥

अथ नवविदिक्पुत्राः सर्व्वेषां संस्थानमेवाह तत्संख्यां केतूनाह।

“शुक्लैकतारा नवतिर्विदिशो केतवः समुत्पन्नाः।
एते केतुगणाः स्युर्विपदभेदास्तो वक्ष्ये”॥

विदिशो विदिक्प्रपाताद् नव केतवः कान्त्या विदिक्पुत्रा इत्यर्थः। किम्भूताः शुक्लः श्वेतवर्णो विपुलो विस्तीर्ण एकतारो येषां ते विदिक्केतवो दृश्यन्ते दृष्टाश्च पापफला।

तथा च गर्गः।

‘शुक्लैकतारा विपुला विदिक्पुत्रा नवग्रहाः।
विदिक्षु सस्थिता एव दृश्यन्ते भयदायकाः”॥

एव केतुसहस्रमिति। एवं केतूनां सहस्रं उक्त एषामेव विशेषलक्षणं वक्ष्ये। एषां मध्यात् केचित् दृश्यन्ते न सर्व्व एव। तत्र ये दृश्यन्ते तेषां लक्षणं वसुकामन्त्रपादादेव केतोर्लक्षणमाह॥*॥

“उद्गायतो महान् स्निग्धमूर्त्तिरपरोदयी वक्रः केतुः। यद्य करोति मरकं सुभिक्षमप्युत्तमं कुरुते”। उद्गायत उत्तरस्यां दिश्यायतो दीर्घो महानतिस्थूलः स्निग्धतनुः अपरोदयी पश्चिमायां दिश्युदयं याति। स च नाम्ना वसाकेतुर्वक्तव्य सद्य एव तस्मिन्ननि मरकं करोति। उत्तममपि प्रधानं सुभिक्षं कुरुते॥*॥

अथास्थिकेतोः शस्त्राख्यस्य च लक्षणमाह।

“तल्लक्षणोऽस्थिकेतुः स तु रूक्षः क्षुद्भयावहः प्रोक्तः।
स्निग्धस्तादृक् प्राच्यां शस्त्राख्यो डमरमरकाय”॥

तदित्यनेन वसाकेतोः परामर्शः। अस्थिकेतुश्च तल्लक्षणो वसाकेतुसदृश एव। उद्गायत इत्यादि विशेषणविशिष्टः स तु रूक्षः केवलं विशेषः। स च क्षुद्भयावहः कथितः। स्निग्धस्तादृगिति तादृश वसाकेतुसदृशोऽन्यः स्निग्धो निम्नकदेशः प्राच्यां दृश्यते। स तु शस्त्रनामा केतुर्डमरं डमरं कलहं मरकं करोति। तथा च पराशरः।

“इमि मर्त्त्यविंशतिवर्षं पश्चमावेदयन्ति।
तन्नामतो रूपतः फलतः कान्तोऽभिधास्याम”॥

तत्र मार्त्तिकावश्च उदयं यान्ति। पश्चैकशो वसास्थिशस्त्रकेतुभ्या। तत्र वसाकेतुः स्निग्धो महानुदगायतशिरःस्थितश्चमस्थः प्रोच्य नक्षत्रे पूर्वे पश्चिमोदितः सद्यो मरकप्रदः सौभिक्षकरः। रूक्षोऽस्थिकेतुः सौभिक्षकरस्तुल्यवसाकेतुलक्षणः पूर्व्वेण स्निग्ध एव शस्त्रकेतुरापरिरोधमरकयकः समोदयः॥*॥

अथ कपालकेतोर्लक्षणमाह।

‘दृश्योऽमावास्यायां कपालकेतुः सधूम्ररश्मिशिखः।
प्राङ्नभसोऽर्द्धविचारी क्षुन्मरकावृष्टिरोगकरः”॥

कपालकेतुर्नाम अमावास्यायां दृश्यते पूर्व्वदिशि उदयं याति। कीदृशः सधूम्रा रश्मिशिखा यस्य विरक्तां शिखां भर्त्त्यविहाय। नभस आकाशस्य अर्द्धे चार्द्धविचरति। स च दुर्भिक्षमरकावृष्टिरोगकरः।

तथा च पराशरः।

“दर्शविभ्रमाणो कपालकेतुरुदयते अमावास्यायां पूर्व्वस्यां दिशि सधूम्रार्च्चिशिखो नभसो विचारी याति पूर्व्वते। स विंशतिवर्षाणि प्रोच्य पञ्च दशाङ्ग कतिपयकृदुरकेतोश्चरत्यैव पूर्व एव। दुर्भिक्षमनावृष्टिरोगाधिकं षट्पञ्चदश् करोति। यावतो दिवसान् दृश्यते तावत्समा मासान्

त्वरान् पक्षमस्य सर्व्वाधान्यस्यार्द्धं कृत्वा दन्ता-मेकमुपपद्यते”॥

अथ रौद्रकेतोर्लक्षणमाह।

“प्राग्वैश्वानरमार्गे शूलाग्रः श्यावरूक्षताम्रार्च्चिः।
नभसस्त्रिभागगामी रौद्र इति कपालतुल्यफलः”॥

रौद्रनामा केतुः पूर्व्वस्यां दिशि वैश्वानरमार्गे दक्षिणवीथ्यां दृश्यते। पूर्व्वाषाढ़ोत्तराषाढ्यो समीप इत्यर्थः। कीदृशः शूलाग्रः शूलाकृतिरग्र यस्य केतोः स शूलाग्रः शिखाग्र इत्यर्थः। तस्यैव विशेषणं श्यावरूक्षताम्रार्च्चिः श्यावरूक्षताम्रा अर्च्चिर्येषां यस्य स श्यावरूक्षताम्रार्च्चिः। नभस आकाशस्य त्रिभागगामी। स च कपाल-केतोः समफलः। एतदुक्तं भवति क्षुन्मरकावृष्टिरोगफलत्। वाचार्य्येण शूलाकारो वैश्वानरमार्गप्रदर्शित एव आषाढ़ाद्वय इति।

तथा च पराशरः।

“अथ दशवर्षे कतमोधोमूर्त्त्व कालकेतुस्त्रीणि वर्षशतानि नव च मासान् प्रोष्य उदयते। पूर्व्वेण वैश्वानरमार्गे दृश्यमतमदस्य नक्षिकेतोश्चारोऽभि श्यावरूक्षताम्रार्च्चिः शूलाकारस्तद्वर्णो शिखा कृता नभसस्त्रिभागचारी स क्षुन्मरकरोगदुर्भि-क्षावृष्टिमरकैर्दोषैश्चाशान् दृश्यते तावन्ति त्रिभागशेषां प्रजां कृत्वा’। मारदेशान्यस्यादृक् मर्द्दं कृत्वा चान्तं गच्छति।

तथा च ब्रह्मगर्गः।

“ज्येष्ठामूलमनुराधा या वीथी सम्प्रकीर्त्तिता।
ताञ्च वीथीं समारुह्य केतुश्चेत् क्रीड़ते भृशम्॥
दक्षिणाभिमतां कृत्वा शिखां घोरां भयङ्करीम्।
शूलाग्ररूपां तीक्ष्णां श्यावताम्रारुणप्रभाम्॥
पूर्व्वेण उदितश्चैव नभस्त्रिभागमुपाश्रयेत्।
घोरं प्रजाघ्नं कुरुते पञ्च मासे चतोदये॥
त्रिभागं लभते शस्त्रं ततो मध्यमवर्त्तनम्।
यावतो दिवसानिष्ठेत् तावन्मासांश्च तद्भयम्॥
शस्त्राग्निभयरोगैश्च दुर्भिक्षमरकैस्तथा।
क्षुत्पिपासाः प्रजाः सर्व्वा विशन्ति दिशो दश”॥*॥

अथ चलकेतोर्लक्षणमाह।

“अपरस्यां चलकेतुः शिखया याम्याग्रयाङ्गुलोच्छ्रितया। गच्छेद् यथा यथोदक् तथा तथा दैर्घ्यमायाति॥ सप्तमुनीन् संस्पृश्य ध्रुवमभिजितमेव प्रतिनिवृत्तः। नभसोऽर्द्धमात्रमित्वा याम्येनास्तमुपयाति॥ हन्यात् प्रयागकूलाद् यावदवन्तीञ्च पुष्करारण्यम्। उदगपि च देविकामपि भूयिष्ठं मध्यदेशाख्यम्॥ अन्यानपि च स देशान् क्वचित् क्वचिद्धन्ति रोगदुर्भिक्षैः। दश मासान् फलपाको ह्यस्मिंस्त्वष्टादश प्रोक्तः”॥

अपरस्यामिति पश्चिमायां दिशि चलकेतुर्नाम केतुरुदेति। स च कीदृक् दक्षिणस्यां दिशि अग्र यस्य शिखया अङ्गुलमात्रोच्छ्रितया यथा यथा उदक् गच्छेत् उत्तरस्यां दिशि [illegible] तथा तथैव दैर्घ्यं [illegible] सप्तमुनीन् संस्पृश्य तथा ध्रुवं [illegible] प्रतिनिवृत्तः नभसोऽर्द्धमात्रं [illegible]

गतः नभस आकाशस्य त्र्यंशभागमितः गत्वा प्राच्य याम्येन दक्षिणस्यां दिशि अदर्शनं याति। स एष चलकेतुः प्रयागकूलादारभ्य यावदवन्तीं पुष्करारण्यनामस्थानं तावत् नाशयेत्। उदगपि चोत्तरस्यां दिश्यपि च यावत् देविका नदीं ताव हन्यात्। मध्यदेशाश्च मध्यदेशं भूयिष्ठमतिशयेन हन्यात्। अन्यानपि च स देशानिति। स चलकेतुः अन्यान् अपरान् देशानपि रोगदुर्भिक्षैः क्वचित् क्वचित नाशयति न सर्व्वत्र। अस्य केतो दशमासान् यावत् फलपाकः। अपरशास्त्र मिष्टात् परतो यावद्दश मासास्तावदशुभ फल ददाति। केचिदन्यैर्गर्गादिभिरष्टादश मासान् यावत् फलपाकः प्रोक्तः। तथा च पराशरः।

'अथ पैतामहश्चलकेतुः पञ्चदशवर्षशतं प्रोष्य उदितः पश्चिमेनाङ्गुलिपर्व्वमात्रां शिखां दक्षिणाभिनतां कृत्वा धनकेतुश्चारान्ते नभसस्त्रिभागमनुचरन् यथा यथोत्तरां व्रजति तथा तथा शूलाग्राकारां शिखां दर्शयन् ब्राह्मं नक्षत्रमुपसृत्य मनाक् ध्रुवं ब्रह्मराशिं सप्तर्षीन् संस्पृश्य नभसो ऽर्द्धमात्रं दक्षिणमनुपरिक्रम्य अस्तं व्रजति। स सर्व्वं दावयन्नम्ना सगर्भाशिनीत्यादेव सत्त्वानभिनिघ्नन्ति लोकमपि च। भूमिं कम्पयित्वा दश मासान् मध्यदेशे भूयिष्ठं जनपदमवशेषं कुरुते। तेष्वपि च क्वचित् क्वचित् शस्त्रदुर्भिक्षमरकव्याधिभयैः क्षिप्त्वाष्टादशमासानिति॥

तथा च गर्गः।

"क्षुच्छस्त्रमरकव्याधिभये संपीडयेत् प्रजाः।
मासान् दश तथाष्टौ च चलकेतुः सुदारुणः"॥*॥

तत श्वेतकेतोर्लक्षणमाह।

"प्रागर्द्धरात्रदृश्यो याम्याग्रः श्वेतकेतुरन्यश्च।
क इति युगाकृतिरपरे युगपत्तौ सप्तदिनदृश्यौ॥
स्निग्धौ सुभिक्षशिवदौ अथाधिकं दृश्यते कनामा
य। दशवर्षाण्युपतापं जनयति शस्त्रप्रकोपकृतम्॥
प्रागर्द्धरात्रदृश्य इति। श्वेतकेतुनामा केतुः प्राक् पूर्व्वस्यां दिशि अर्द्धरात्रकाले दृश्यते याम्याग्रो दक्षिणशिखः अन्यश्च द्वितीयः क इति कनामा केतुरपरे पश्चिमायां दिशि दृश्यते। युगाकृति युगसंस्थानाकारः तौ द्वावपि युगपत्तुल्यकालं सप्त दिवसान् दृश्येते। तौ च द्वावपि स्निग्धावति निम्नलौ दृश्यौ च सुभिक्षशिवदौ। अथ यः कनामा स यदि सप्तभ्योऽधिकं दृश्यते तदा शस्त्रप्रकोपजं उपतापमनुपतापं जनयति।

तथा च पराशरः।

"अथौद्दालकः श्वेतकेतुरुत्तरार्द्धे वर्षशतं प्रोष्य भटकेतोश्चारान्ते पूर्व्वस्यां दक्षिणाभिनतशिखो ऽर्द्धरात्रकाले दृश्यते तत्र द्वितीयः कः प्रजापतिसुतः। पश्चिमेन सप्तकेतुः युगप्रमाणो दशवर्षदृश्यते। तत्काश्यपौ क्षुत्तरावपहृता दश वर्षाणि प्रजाः पीडयेते। कः प्रजापतिसुतो यदा स्निग्धं दृश्यते तदा दारुणतरं प्रजानां शस्त्रकोपं कुर्य्यात्। तथैव श्वेतकाश्यपौ क्षेमारोग्यसुभिक्षदौ भवत"॥

अथ श्वेतस्य लक्षणमाह।

"श्वेत इति जटाकारो रूक्षः श्यावो वियत्त्रिभाग गति। विनिवर्त्ततेऽपसव्यं त्रिभागशेषाः प्रजाः कुरुते"॥

श्वेतनामा केतुः जटाकारो जटासदृशः श्याव कृष्णवर्णं वियदाकाशे त्रिभाग यावद्गच्छति ततोऽपसव्यं प्रदक्षिणं वामभागे निवर्त्तते ततोऽसौ त्रिभागशेषाः प्रजाः कुरुते।

तथा च पराशरः।

"अथ काश्यप श्वेतकेतुः पञ्चदशवर्षशतं प्रोष्य सोमपुत्रस्य चलकेतोश्चारान्ते श्यावरूक्षो नभसस्त्रिभागमाक्रम्यापसव्यं निवृत्योदक् प्रदक्षिणं जटाकारशिखः स यावन्मासान् दृश्यते तावद्वर्षाणि सुभिक्षमावहति। मध्यदेशे चार्य्याणां नाभदो नामोदीच्यैर्भूयिष्ठत्रिभागशेषाः प्रजाः करिष्यति"॥*॥

अथ रश्मिकेतोर्लक्षणमाह।

"आधूम्रयातिशिखया दर्शनमायाति कृत्तिका संस्थः। ज्ञेयः स रश्मिकेतुः श्वेतसमानं फलं धत्ते"॥ य केतुराधूम्रवर्णया शिखयोपलक्षितः कृत्तिकासंस्थः कृत्तिकानां समीपे दर्शनं गच्छति स रश्मिकेतुः श्वेतकेतोः सदृशं फलं धत्ते।

तथा च पराशरः।

"अथ रश्मिकेतुर्व्विभावसुजः प्रोष्य वर्षशतं मावर्त्तकेतोः। उदितश्चारान्ते कृत्तिकासु धूम्रकेतु"॥*॥

ध्रुवकेतोर्लक्षणमाह।

"ध्रुवकेतुरनियतगतिः प्रमाणवर्णाकृतिर्भवति। विष्वक् दिव्यान्तरीक्षभौमो भवत्ययं स्निग्ध इष्टफलः। सेनाङ्गेषु स्थाणौ गृहवृक्षशैलेषु चापि देशानाम्। गृहिणामुपस्करेषु च विनाशिनां दर्शनं याति"॥

ध्रुवेति। अनियता अनिश्चिता गतिर्गमनं प्रमाणं स्थूलसूक्ष्ममध्यमदैर्घ्यमाकृति आकारो यस्य स तथाभूतः। स च विष्वक् समन्ततो भवति सर्व्वासु दिक्ष्वित्यर्थः। स च दिव्यान्तरीक्षभौमस्त्रिविधो भवति। क्वचिद्द्विविधो नानाकारो भवति। स च स्निग्धो विशेषशरीरं इष्टफलः। स्वयं च स्व विधानां विनाशिनां मुमूर्षूणां दर्शनमुदयं याति। स्थाणौ विनाशिनां सेनाङ्गेषु सोमकरणेषु स्थाणौ शतोरणादिषु दर्शनं याति। देशानां विनाशिनां गृहवृक्षपर्व्वतेषु च दृश्यते। तथा गृहिणामुपस्करेषु उपकरणेषु दर्व्वीकुम्भमार्ज्जन्यादिषु गृहवर्षीषु विनाशिनामेव दर्शनं याति।

तथा च पराशरः।

"अथानियतदिक्चारवर्णप्रमाणसंस्थानो धूमकेतुः सदा भविष्यतां देशानां राज्ञां जनपदानाञ्च वृक्षकरपर्व्वतवेश्मशयनासनाम्बर स्नायुधावरकरचक्षोभूषणमयनासनमार्गेषु च दृश्यते। स एव दिवि स्निग्धो विमलः प्रदक्षिणशिखो मन्दगतिः सौम्यानुसारेण व्रजन् सुभिक्षक्षेमारोग्यं चावहति। दशैकविंशतिदिवसान् तथा वा दर्शनमिच्छन्ति गुणतो धूमकेतोश्चास्य प्रागुदयादिनिमित्तान्येवाशीतिसम्मताः प्रभा भवत्यग्रधूम्र दिशो शीतोष्णविपर्यय इतिकीर्णि नाडवाभवत"॥*॥

अथ कुमुदकेतोर्लक्षणमाह।

"कुमुद इति कुमुदकान्तिर्व्वारुण्यां प्राक्शिखो निशामेकाम्। दृष्टः सुभिक्षमतुलं दश किल वर्षाणि स करोति"॥ कुमुद इति श्वेतवर्ण इत्यर्थः पश्चिमायां प्राक्शिखः पूर्व्वाग्रो निशामेकां दृश्यते। किलेत्यागमसूचने। स च दृष्टो दश वर्षाण्यतुलमसमं सुभिक्षं करोति। तथा च पराशरः। "अथामृतजः कुमुदो मणिर्केतो भवः पञ्चात् अवर्त्तः सम्वर्त्तः प्राग्दिशि स्निग्धो रूक्षः कुमुदं शुभं विसर्पश्च शीतश्चेति। तत्र कुमुदकेतुर्व्वारुण्यां आर्द्रसमाप्तो वारुण्यां दशमुपैति। गोक्षीर विमलस्निग्धप्रभो पूर्व्वाभिनतां शिखां कृत्वैक रात्रिमपरः स दृष्ट एव सुभिक्षमतुलं करोति दश वर्षाणि प्रजानामविरोधश्च। प्रतीच्यानाञ्च मुख रोगारोचकप्रतिश्यायपाण्डुरोगज्वरैः प्रजानां बाधते इति"॥*॥

अथ मणिकेतोर्लक्षणमाह।

"संदृश्यामेकयाम सूक्ष्मतारः पश्चिमेन मणिकेतुः। ऋज्वी शिखाऽस्य शुक्ला स्तनोद्गता क्षीरधारेव॥ उदयन्नेव सुभिक्षं चतुरो मासान् करोत्यसौ सार्द्धान्। प्रादुर्भावं प्रायः करोति च क्षुद्रजन्तूनाम्"॥ संदृश्यामिति। मणिकेतुः स च पश्चिमायां दिशि सूक्ष्मतारोऽल्पतारक सर्व्वैक यामैकयाममृत्याः यामशब्देन रात्रिचतुर्भागः। अस्य केतोरर्ज्वी सरला शिखा शुक्ला श्वेतवर्णा दृश्यते। कीदृशी स्तनोत्था क्षीरधारेव स्तनात् निःसृता क्षीरधारा यथा दृश्यते तद्वत्स्निग्धा। उदयन्नेवेति। असौ केतुरुदयमेवोदितमात्र एव चतुरः सार्द्धानेकांश्चतुरो मासान् सुभिक्षं क्षेमसुभिक्षं ददाति। प्रायो बाहुल्येन क्षुद्रजन्तूनां मकुणादीनां प्रादुर्भावमुत्पत्तिं करोति।

तथा च पराशरः।

मणिकेतुरपि कश्यपकेतोरवसाने प्रतीच्यामुदय याति। स तु सूक्ष्मतारकः श्वेतवर्णया क्षीरप्रवेकया पूर्व्वाभिनतया शिखया प्रहर्य्यामेकयाम दृष्टः। स उदयात् प्रभृति पञ्च मासान् सार्द्धं सुभिक्षमुत्पादयति। क्षुद्रजन्तूनां प्रादुर्भावं करोति ऽतिमात्रकावृष्टः"॥*॥

अथ जलकेतोर्लक्षणमाह।

"जलकेतुरपि च पश्चात् स्निग्धः शिखयाऽपरेण चोन्नतया। नव मासान् सुभिक्षं करोति क्षेमं प्रशान्तिञ्च लोकस्य"॥ पश्चात् पश्चिमायां दिशि दृश्यते अपरेण पश्चिमेन चोन्नतया उच्चया शिखया युक्तः। स च दृष्टः नवमासपर्य्यन्तं सुभिक्षं करोति लोकस्य क्षेमं च। तथा च पराशरः। "अथ जलकेतुः पैतामहः शतं जलकेतोर्नवमासावधिके कस्मिंश्चि कृते प्रवर्त्तते। पश्चिमेनोदितः स्निग्धः शुक्लोऽग्रपश्चिमाभिनतः। स च स्निग्धो नव मासानतः क्षेमसुभिक्षारोग्याणि प्रजानां धत्ते।

अन्यग्रहस्तानां शुभानां घातायेति" ॥ ०॥

अथ भवकेतोर्लक्षणमाह।

"भवकेतुरेकरात्रं दृश्यः प्राक् सूक्ष्मतारकः स्निग्धः। हरिलाङ्गूलोपमया प्रदक्षिणावर्त्तया शिखया। यावदेव मुहूर्त्तान् दर्शनमायाति निर्द्दिष्टं तावत्सु मासेषु सुभिक्षं रूक्षे प्राणान्तिकान् रोगान्"। भवकेतुः पूर्व्वस्यां दिशि एकां निशां दृश्यः सूक्ष्मोऽल्पः तारको यस्य स्निग्धो निर्म्मलदेहः शिखयोपलक्षितः। कीदृश्या हरिः सिंहस्तस्य लाङ्गूलं पुच्छं तदुपमया तदाकारया प्रदक्षिणावर्त्ता यस्याः तथाभूतया स च यावतः सङ्ख्यान् क्षणान् दृश्यते तावन्मासान् तत्र सुभिक्षं निर्द्दिशेत् यदि स्निग्धः। रूक्षे तु पुनः प्राणान्तिकान् रोगान् वदेत्। तथा च पराशरः। "अथ भवकेतौ कम्मसमाप्ता धूम्रा दयः शीतांशुः षष्ठो प्रादुर्भवन्ति। तत्र भवकेतुः स्तनुरत्नादयवयामवत् दृश्यते। सुभिक्षा क्षेम्या स्निग्धया विपरीता क्षुदन्तकाय वधाय तेषां महतां कर्म्मणामिति भवकेतुर्द्दृश्यते। पूर्व्वलोक प्राग्यावत् क्षणिकामनन्तरतो वा नक्षत्रमात्रया स्निग्धयाविष्यामया सिंहलाङ्गूलसंस्थानया प्रदक्षिणावर्त्तया शिखयोदितः। स यावन्मुहूर्त्तान् दृश्यते तावन्मासान् भवन्तीव सुभिक्षाय। रूक्षः प्राणहराय रोगाय प्रादुर्भावायेति" ॥ ०॥

अथ पद्मकेतोर्लक्षणमाह।

"अपरेण पद्मकेतुर्म्मृणालगौरो भवेन्निशामेकाम्। सप्त करोति सुभिक्षं वर्षाण्यतिहर्षयुक्तानि"॥

पद्मकेतुः पश्चिमायां दिशि रात्रिमेकां दृश्यते कीदृशः मृणालवत् गौरः श्वेत इत्यर्थः। एष सप्तवर्षाणि अतिहर्षयुक्तानि सुभिक्षं करोति। तथा च पराशरः।

"सप्तवर्षाण्युत्सृज्य हर्षमावहति जगतः" ॥ ०॥

अथावर्त्तकेतोर्लक्षणमाह।

"आवर्त्त इति निशार्द्धेऽसव्यशिखोऽरुणनिभोऽपरे स्निग्धः। यावत्क्षणान् स दृश्यस्तावन्मासान् सुभिक्षकरः"। निशार्द्धे पश्चिमायां दिशि दक्षिणाभिमुखशिखः स्निग्धो विमलमूर्त्तिर्दृश्यते स तु यावत्सङ्ख्यान् मुहूर्त्तान् दृश्यते तावदेव मासान् सुभिक्षं करोति।

तथा च पराशरः।

"अथावर्त्तकेतुः श्वेतकेतोः कर्म्मण्यतीतेऽपरे ऽर्द्धरात्रेऽरुणोदितावर्त्तमया प्रदक्षिणेन तावत् स्निग्धोदितः। स यावन्मुहूर्त्तान् दृश्यते तावन्मासान् क्षेमं सुभिक्षं निरुपद्रवश्च जगत्" ॥ ०॥

अथ संवर्त्तकेतोर्लक्षणमाह।

"पश्चात् सन्ध्याकाले संवर्त्तो नाम धूम्रताम्रशिखः। आक्रम्य वियत्त्र्यंशं शूलाग्रावस्थितो रौद्रः"॥

यावत एव मुहूर्त्तान् दृश्यो वर्षाणि हन्ति तावन्ति। भूपांश्च शस्त्रनिपातैरुदये चास्य ऋक्षं पीडयति। पश्चिमायां दिशि सायं सन्ध्यायां मुहूर्त्तं दृश्यमानः स्वशिखया त्रिभागं गगनस्य व्याप्य तिष्ठति तावन्ति वर्षाणि भूपान् शस्त्रनिपातैर्हन्ति। यस्मिन् नक्षत्रे उदितो दृश्यते तच्च पीडयति। तथा च पराशरः। "अथ संवर्त्तको वर्षसहस्रमष्टोत्तरं प्रोष्य पश्चिमेनास्तं गते सवितरि सन्ध्यायां दृश्यते तन्वीं ताम्ररूपां शूलाभां धूम विमुञ्चतीं रौद्रां शिखां कृत्वा नभस्त्रिभागमाक्रम्य यावन्मुहूर्त्तान् दिवि तिष्ठति तावद्वर्षाणि हन्ति परस्परं शस्त्रौघमपि पार्थिवाः। यानि नक्षत्राणि समाक्रमति यत्र चोदेति तानि दारुणतरं पीडयति तदाश्रितांश्च देशानिति"।

तथा च गर्गः।

'येषां नक्षत्रविषये रूक्षः स व्याधिलोहितः। दृश्यते वक्रमूर्त्तिश्च तेषां विद्यात् महाभयम्॥ अवयवास्त्रप्रावृत्कोपं दुर्भिक्षमेव च। कुर्य्यान्नृपतिपीडाञ्च भयकृपराचकम्॥ यत्र तिष्ठति नक्षत्रे प्रवास यत्र गच्छति। धूपयेद्वा स्पृशेद्वापि हन्याद्देशांश्च यान्नृपान्॥ यस्याभिषेकनक्षत्रं जन्मभं कर्म्मभं तथा। देशर्क्षं पीडयेद्वापि स प्राणिपरमो भवेत्॥ स्निग्धः प्रसन्नो विमलः प्रदक्षिणशिखस्तथा। दृश्यते येषु देशेषु शिवं तेषु विनिर्द्दिशेत्"॥

अथ शुभान् केतून् व्यवच्छिद्याशुभानां नक्षत्रस्पर्शनाधूपनादुत्फलं वक्ष्यन्नाह।

"ये शस्तास्तान् हित्वा केतुभिराधूपितेऽथवा स्पृष्टे। नक्षत्रे भवति वधो येषां राज्ञां प्रवक्ष्ये तान्"॥

ये केचन शस्ता प्रशस्तफलदास्तान् त्यक्त्वा केतुभिः नक्षत्रे धूपिते अथवा स्पृष्टे येषां राज्ञां वधो मरणं भवति तान् नृपान् प्रवक्ष्ये तांश्चाधुनाह। "अश्विन्यामश्मकपं भरण्यामपि किरातपतिं हन्यात्। बहुलासु कलिङ्गेशं रोहिण्यां शूरसेनपतिम्"॥ अश्विन्यामभिधूपितायां स्पृष्टायां वा केतुना अश्मकानां जनानामधिपतिं नाशयेत् एवमन्यत्र। अन्येष्वाह। "उशीनरमपि सार्प्पे जलदस्युपमाप्ये। आर्द्रे दशकाधिपतिं भौजङ्गे अश्विकेशम्। मघासु अङ्गाधिपं पूर्व्वफल्गुन्यां पाण्ड्यनाथम्"। सार्प्पे पूर्व्वफल्गुन्यां उशीनरम्। आर्य्यम्णे उत्तरफल्गुन्यां उज्जयिनीपतिम्। सावित्रे हस्तायां दण्डकारण्यनाथम्। भौजङ्गे अश्लेषायां अश्मकं जनाश्चौमीश्वरम्।

अन्येष्वाह।

"चित्रासु कुरुक्षेत्राधिपस्य मरणं समादिशेत्। स्वाती काश्मीरकाम्बोजौ नृपती प्राभञ्जने न स्तः"॥

चित्रासु केतुनाभिधूपितासु स्पृष्टासु च कुरुक्षेत्राधिपस्य मरणं वध इत्युपचारतः समादिशेत्। प्राभञ्जने स्वात्यां काश्मीरकाम्बोजाधिपौ न स्तः न भवतः। अन्येष्वाह। "इक्ष्वाकुरलकनाथश्च हन्येते यदि भवेद्विशाखास्थः। मैत्रे पुण्ड्राधिपतिर्ज्येष्ठासु च सार्व्वभौमनाशाय कुरुक्षेत्राधिपश्च"। विशाखासु यदि केतुस्थितो भवेत् तदा इक्ष्वाकुः कुलापौऽलकनाथश्च हन्यते। इक्ष्वाकवो नृपाः अलका नगरी। अनुराधायां पुण्ड्राधिपतिः हन्यात्। ज्येष्ठायां च सार्व्वभौमस्य राज्ञो वधः कान्यकुब्जाधिपश्च वधः। अन्येष्वाह। "मूले मद्रकपती मान्द्रे काशिपो मरणमेति। यौधेयकार्ज्जुनायनशिविचैद्यान् वैश्वदेवे च"। मूले केतुनाभिधूपिते स्पृष्टे वा नश्यति मद्रकपतिश्च हन्ति। आप्ये पूर्व्वाषाढ़ायां काशिपतिर्मरणमेति। वैश्वदेवे उत्तराषाढ़ायां यौधेयकार्ज्जुनायनशिविचैद्यान् नृपतीन् हन्ति। अन्येष्वप्याह। "हन्यात् कैकयनाथं पाञ्चनदं सिंहलाधिपं वङ्गपम्। नैमिषनृपं किरातं श्रवणादिषु षट्सु अश्विमान् क्रमशः"। षट्सु श्रवणादिषु ऋक्षेषु अश्विमान् नृपान् क्रमतः क्रमेण हन्यात्। तद्यथा।

श्रवणे हते कैकयनाथम्। धनिष्ठायां पञ्चनदाधिपतिम्। शतभिषायां सिंहलाधिपतिम्। पूर्व्वभाद्रपदायां वङ्गाधिपतिम्। उत्तरासु नैमिषनृपम्। रेवत्यां किराताधिपं हन्यात् ॥ ०॥

अथ केतोश्छिद्रलक्षणमाह।

"उल्काभिताड़ितशिखः शिखी शिवः शिव तरोऽभिहतः। अशुभः स एव चोलाफगणहुणचीनानाम्"॥ यः शिखी केतुः उल्कयाभिहतेन ताड़िता हता शिखा चूड़ा यस्य स शिवः क्षेमकरः सोऽभिहृष्ट उदितमात्र एव हृष्टः स शिवतरः अतिशयेन शुभप्रदः केतुरेव विधचोलानां बहूनां गिरीणां हुणानां चीनानां अशुभः। चोलादयो जना एव मताः ॥ ०॥

अन्यदप्येवमाह।

"नभसः स्थितिमनिमित्तात्मिकेतुः दलो वा दर्शयन् तस्य समुद्रादपि सम्बुद्धितांश्च देशान्। क्षुभ्रमाक्रम्य रतान् स यथा गदकान् गृहे गतो नरपतिं परमोपभोगान्"॥

यतो यस्यां दिशि स्निग्धा शिखा केतुशिखा नभसा सह यत्र ये देशा यतो वा अन्तु पवनाः अथ यदि यस्तु नक्षत्र यान्मूर्त्ति तत्सहिताश्च देशान् यस्यां दिशि शिखा नभसा तत्र च ये देशाः सर्व्वथा ताल्वादिनान् नरपतीन् राजा गतो गृहे करोति। कीदृशान् दिव्यान्नादिवस्त्र प्रभावेण परामर्शेन विहितान् निःसृतान् कोट्टान् च रत्नैर्भूषितान्निःशेषान् भोगान् सामाप्तान् अथ स राजा गृहे यथा रत्नान् भवनं दिव समानमिव परमोपभोगान् गृहे यात उत्सवं ये भोगिनः सर्व्वलोके भोगाः परोपान्तं पूर्णं च तान् तथा देव प्रकारेण तदा।

तथा च पराशरः।

"यस्यां दिशि समुत्तिष्ठेत् तां दिशं नाशयेत् देन। तेन शिखा यतो धूमायते तत्रोद्ध्यवधिप। दर्शनोऽसौ तत्र बन्धुता कार्त्तिकं व्याधि। सामान्यं राजकुलमाहद्धिक्ष्वपि"।

इति बृहत्संहितायां अद्भुतसागरे च केतुचाराध्यायः ॥ ०॥

अन्यच्च।

"भवनापतितं वा भवनागमनेऽस्तमितम्। गृहतुल्यमाकारे राज्ञो निरयाः। कृष्णसर्पोपमं कोटि नरपतितं रहति"।

केतु

नानारूपमनेकञ्चाप्येकमेवाह नारदः ।
दिव्या महत्तमा भौमा केतवस्त्रिविधा मताः ।
शुक्लो ह्रस्वतनुः स्निग्ध ऋजुश्चाचिरदर्शित ।
उदितोऽप्यतिवृष्टिः स्यात् सुभिक्षसुखकृच्छिखी ।
विपरीतमहद्यस्तु धूमकेतुर्न शोभनः ।
इन्द्रायुधानुकारी च द्विचूडो वा त्रिचूडक ।
ऐन्द्र्यां शस्त्राकुलं कुर्य्यात्क्षोभितनृपतिं भयम् ।
दारुण पीतकः कुर्य्यात् शस्त्री रोगमयोल्वणम् ।
शकटाकारो विनाशाय सुखाय कुशलाकृति ।
दीर्घः शस्त्राः खड्गायैव कृश शूलो विनाशकृत् ।
भल्लवसुवर्णाभा शिखाभ्यां शिखान्विता ।
प्राक् पश्चिमदिशोर्दृश्या अपरञ्चाप तेऽर्थभा ।
वर्णिताः शुक्लवर्णाश्च काचाभन्मूर्धसामभाः ।
चामीक्षा दिशि दृश्यन्ते ते च वह्निभयप्रदाः ।
छाया वक्रशिखा रूक्षा मनुजा पश्चिमाश्रिताः ।
याम्यायां ते च दृश्यन्ते धाता मरकसूचकाः ।
धारस्मृकाहतयो विशिखा दितिसम्भवा ।
साम्रवल्लीनताभाभा ऐशान्यां क्षुद्रभयप्रदाः ।
चन्द्रजा हिमकुन्देन्दुकुमुदाभाश्च तैजसाः ।
मध्यमाश्चापदे दृश्याः केतवस्ते सुभिक्षदाः ।
त्रिवर्णास्त्रिशिखैश्चैको ब्रह्मणोऽन्यो युगान्तकृत् ।
स चानियतदिग्दृश्यो ब्रह्मदण्डः स उच्यते ।
एकदा दक्षिणा मध्यादुत्पन्ने तत्समुद्भवा (२४) ।
श्वेतमा जातिमद्भ्यश्च(२२) अथान्ये ब्रह्मजोऽप्यय ।
प्रकाश्यन्त एते धूमकेत्वथ कङ्कौः ।
शुक्रात्मजास्तथाख्या विपुला सितसारकाः ।
स्निग्धास्तीक्ष्णा चेया धामना दिविखाः परे ।
धोर्ध्वा शनिसुताश्चेऽतिमलधूमप्रदा ।
सर्व्वत्र कनकोद्दीप्ता विकचा नाम नामना ।
त्रितकाराश्च विशिखाः पाण्डा मध्याश्रिताश्च ते ।
कान्दिन्दना सुखदीप्ता शुभा बुधसमुद्भवा ।
मायन्नाजन्नरायस्य दयोष्टदिक्समन्विताः ।
मिथुनाधाः चाखा नामान्दाः कुजात्मजाः ।
कोमारा हि त याम्य दिक्स्था पापभयप्रदाः ।
त्रिशिखाश्च सिताराश्च राहुकोटिसमुद्भवाः ।
[illegible] ।
तामसा कीलकाख्याश्च राहुजाः सूर्यविम्बगाः ।
दृष्टाः शुभफलाश्चैव चन्द्रस्थाः पापदायिनः ।
[illegible] ।
हताभाः [illegible] सैन्यदायकाः ।
[illegible] ।
[illegible] ।
[illegible] पीयते [illegible] ।
[illegible] ।
[illegible] ।
दृश्यते यत्र तत्रापि भूमिपालो विनश्यति ।
[illegible] ।
दुर्भिक्षनिधनव्याधिशस्त्रचौराग्निपीड़नम् ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।

केतु

पश्चाच्च विमलश्चैव स्यादाप्यन्यच प्रभाद्युतः ।
एको दुर्भिक्षदाश्चान्योपनाशनमयप्रदः ।
सितरश्मिर्वृत्तश्चैव द्विशिखो हि नमशादिशा ।
वह्निजा बिम्बरूपाख्या ज्वालामालाकुला मतम् ।
श्यामेषवस्ता विताराश्च विकोष्ठासिरसन्निभाः ।
ताराशुक्लनिभा रूक्षा वायुजा समसप्तति ।
प्रजापत्युद्भवाश्चैते वैराधिवाससद्वयम् ।
ऋचिमन्द प्रभ्राभ्यां कश्चाख्या वर्षोद्भवाः ।
प्रभाख्या प्रशिवस्ते च श्रेयान्नौद्गगणप्रदाः ।
विरूपताराचिता वा त्रिशिखस्तेऽशुभप्रदा ।
सर्व्वदिक्षमथा शुक्ला केतवो भयदायिन ।
एवं केतुसमस्तश्च तद्विशेषश्च वक्ष्यते" । * ।
"उत्तरायणसंश्लिष्टो महान् पश्चात्प्रदोदयी ।
करोति मरकं घरः सुभिक्षश्च तयोत्तमम् ।
रूक्षोऽग्निकेतु सूक्ष्मार्थे प्राच्यां स्निग्धोऽप्युपद्रव ।
अपालकेतुर्या दृश्यो सधूमाग्रशिखो भवेत् ।
प्राग्रश्मिधारी नभसः कुमाराहतिकारकः ।
प्रागभिरागोऽस्तूनायो रुद्र स्यामकतामयत् ।
त्रिभागधारी नभसो रौद्रास्य शूलवत् फलम् ।
अपरस्यां चलकेतुः शिखया दक्षिणाग्रया ।
अङ्गुलोच्छ्रायया गच्छेदुत्तराशां यथा यथा ।
तथा दैर्घ्यं समायाति मुनीन् संस्पृश्य तान् च ।
ध्रुवं प्रतिनिवृत्तोऽभिजितं नमसोऽग्रकम् ।
गत्वाऽन्त धाधि याम्येन च प्रयागकुलावधि ।
अवन्तीं पुष्करारण्यं यावद्वन्यास्तथापरान् ।
देशान् क्वचित् क्षधिरोगदुर्भिक्षैः परिपीड़ितान् ।
श्वेताख्यस्तु जटाकारो श्यामो व्योमत्रिभागगः ।
त्रिंशवर्षेऽष्टवर्षेण त्रिभागी कुरुते प्रजा ।
धाधून शिखया दृश्य कृत्तिकासत्रितोऽपरः ।
रश्मिकेतुरिति ख्यातस्त्रिभागी कुरुते प्रजा ।
पश्चात् धन्यास्तु सम्पर्को धूमताम्रशिखो वियत् ।
अवगाह्य शूलाग्रार्द्धातो रौद्रनाश ।
कुर्व्वन्त् धावतो दशकाष्टशाधि हन्ति च ।
भूपश्चक्रनिपातार्थं वदयत्तो निपीड़येत्" । * ।
"पैत्रवैष्णवरोहण्यौ आर्द्रेऽप्य विनिर्दिशेत् ।
उभिक्षायु धचेदोर्निषच्छिलैर्भृङ्गतोरणै ।
पतिमाधवा तथ पूर्व्वे च वसुन्धरा ।
ध्रौवं चैव तथाषाढे वायुव्रताश्च निर्दिशेत् ।
[illegible] ।
[illegible] विनिर्दिशेत् ।
[illegible] ।
[illegible] भवन्ति च ।
[illegible] विनिर्दिशेत् ।
ततो दर्शयति [illegible] दिवाकरः ।
[illegible] ।
[illegible] विनिर्दिशेत् ।
[illegible] भवति दुर्भिक्षं [illegible] ।
[illegible] विनिर्दिशेत् ।
[illegible] ।
[illegible] मध्यगुप्तये ।
[illegible] ।
[illegible] भवेत् ।

केतु

स्निग्धोदिता प्रजा सम्यक् भवन्ति हि न संशयः ।
सुवर्णसुतया पृथ्वी दक्षिणाः पूर्वमुच्यते ।
केतवो यत्र दृश्यन्ते रौद्राश्लेष्याभिधानिता ।
यदा रौद्रा प्रदृश्यन्ते दुर्भिक्षं निर्दिशेत्तदा ।
पूर्वेणे च प्रजा सर्व्वा मृत्युश्चोपपीड़िता ।
अश्लेषाविन्यमाप्यानि विशाखिन्दिसूचन ।
केतवो यत्र दृश्यन्ते श्रीहार्नवित्ता रुद्र ।
सुभिक्षं क्षेममारोग्य सुवृष्टिः प्रावसम्पदः ।
आर्य्यमाग्नेयेन च पीड़ि विशाखिकभासव ।
केतवो यत्र दृश्यन्ते कामप्रेयाचतुर्थ ।
अनावृष्टिभय घोर प्रजानामतिदारुणम् ।
स्वाती विशाखा मित्र भागो दक्षिणपश्चिम ।
केतवो यत्र दृश्यन्ते चलारो भयसम्भवा ।
दुर्भिक्षं मरकं घोरमनावृष्टिश्चैव च ।
उपद्रवञ्च भूतानां तदा भवति दारुण ।
ज्येष्ठा मूलमषाढ़ा भाग उत्तरपश्चिम ।
केतवो यत्र दृश्यन्ते भयदो रोगसम्भवा ।
सुभिक्षञ्च सुवृष्टिश्च मही चोत्सवाकुला ।
उत्तरा श्रवणा चैव नक्षत्र वसुदैवतम् ।
केतवो यत्र दृश्यन्ते माहेया पश्चिमोत्तरे ।
माहेयेषु च दृष्टेषु लोकानां क्षयो ध्रुवम् ।
तदा राजप्रचारा मही पिबति शोणितम् ।
वासवश्चैव नक्षत्र तथा भाद्रपदद्वयम् ।
केतवो यत्र दृश्यन्ते वासवाख्य एव ते" । * ।
'ऊर्म्मिकेतु श्वेतकेतुर्धूमकेतुरुलीयका ।
ऊर्म्मिकेतुर्यदा दृष्टो प्राप्तेशस्त्रबाज भयम् ।
श्वेतकेतुर्यदा दृश्येत् श्वेतानि कुरुते महीम् ।
तदा मानुषमांसानि भक्षयन्तीह मानुषा ।
लुद्रुवासैं भयात् कार्य्यं चक्रद्भ्रमते तदा ।
धूमकेतुर्यदा दृश्येत्तदा वर्षाणि कष्टम् ।
स हन्ति शिखया योधान् राजान भक्षिय जनान् ।
दैवश्वासुन्दैव नक्षत्र यमदैवतम् ।
केतवो यत्र दृश्यन्ते मघशतासयोदय ।
यमप्रजेषु दृष्टेषु लोकानां क्षयो ध्रुवम् ।
चतुर्विधानां भूतानां क्षयो जायते महान्" । * ।
"अपरे विविधा सन्ति रूक्षयश्चादिकेतवः ।
रूपरेशविनाशाय दुर्भिक्षभयदायकाः ।
कुमुदाभस्तु कुमुदो वारुणा प्राङ्मुखो निशाम् ।
एकां दृष्टः सुभिक्षाय दशवर्षाणि सौहृदः ।
पश्चिमाभ्युदितोऽन्यस्तु कुर्व्वन्ति भक्षणात् जनान् ।
पाण्डुरोग पतिरार्थं जनको रागोषकम् ।
शौर्य्यादैव युगमा न्यक्षो दुर्भिक्षत्र शिखा ।
वह्निद्युतिसदृशाभो मकरस्तु सुभिक्षदा ।
मन्दकेतुस्तु दः पश्चात् शिखया मनया चरे ।
सुभिक्ष कुरुते शान्ति प्रजानां भयमागत ।
भवकेतुश्चैवरात्र दृष्टा प्राक् सूक्ष्मतारका ।
दक्षिणावर्त्तशिखया ह्रस्वाङ्गुष्ठप्रमाणया ।
मुहूर्त्तान् यावती दृष्टस्तावन्मासान् सुभिक्षदः ।
स एव रूक्षो दृश्येत प्राणान्तकारकम् ।
पद्मकेतुर्मृणालाभो निशामेकां प्रदृश्यते ।
सप्त मासान् सुभिक्षं कृ करोत्यनवरात ।
आवर्त्त नर्व [illegible] विनाशकः ।

स्निग्धो यावतश्च दिनान् दृश्यस्तावन्मासान् सुभिक्षदः।
ध्रुवकेतुरनियतगतिवर्णाकृतिर्भवेद् ।
दिव्यान्तरीक्षभौमोऽयं स्निग्ध इष्टः स नान्यथा।
सेनाङ्गेषु महीन्द्राणां देशस्य गिरिशाखिषु।
उपस्करेषु गृहिणां दृश्यते च विनाशकृत् ।
हन्यादुल्का यदागस्त्यं केतुर्व्वाप्युपधूपयेत् ।
दुर्भिक्षं मरकश्चैव तदा जगति जायते ।
यदा तु भार्गवं प्राप्य धूमकेतुः प्रधूपयेत् ।
तदा सैन्यानि वध्यन्ते यत्नोद्युक्ता नराधिपाः ।
यात्रागताश्च ये नाथा वसुमन्तश्च ये नगाः ।
तथा चारगणाः सर्व्वे भयमृच्छन्ति दारुणम् ।
यदा प्रधूपयेत् केतुः सप्तर्षीन् ध्रुवमेव च ।
तदा लोकाः क्षयं यान्ति सलिलञ्चापि शुष्यति ।
धूमकेतुर्यदा राज्ञो दृश्यते विषये क्वचित् ।
सराष्ट्रः सपुरो राजा क्षिप्रमेव प्रणश्यति ।
यावन्त्यहानि दृश्यन्ते तावन्मासान् भयप्रदः ।
मासैरब्दान् विजानीयात् प्रथमे तु त्रिपक्षतः” ॥*॥
“केतूत्पाते तु सर्व्वस्मिन् समये समुपस्थिते ।
महाशान्तिं प्रकुर्व्वीत विविधां भूरिदक्षिणाम् ।
अन्न वा सर्व्वमुत्सृज्य महीमुर्व्वीश बन्धनात् ।
यथाहि पृथिवीं सर्व्वां राजा शान्तिं नियच्छति ।
धनकाद्दृश्यते केतुरुदयेऽस्तमयेऽपि वा ।
नित्यमन्तःपुरे राज्ञो ज्वरः पित्तोद्भवो भवेत् ।
दधिमधुघृताक्तानां पुष्पाणामयुतं ततः ।
जुहुयादिन्द्रनीलस्य केतुं दद्याद्द्विजातये ।
भूमिं हेमरत्नोपेतां सम्पद्यते शुभम्” ।
इति मयूरचार्यविद्याकरकृतलघुगद्यामृते केतूत्पाताः समाप्ताः । केतुग्रहः कुशद्वीपजातः जैमिनि मुनेः सगोत्रः अडङ्गुलः धूम्रवर्णः ध्वजवाहनः शूद्रवर्णः निहतासनः सूर्याभिमुखः द्विभुजः धूम्रवसनः वरदः गदाधरश्च । तस्याधिदेवता चित्रगुप्तः प्रत्यधिदेवता ब्रह्मा । इति ग्रहयागतत्त्वम् ॥ अस्य स्वरूपं शनिराहुवत् । स च शिखावान् अनेकरूपः । इति जातकम् ॥ * ॥
ध्वजः । पताका । (यथा, रघौ ७ । ४५ ।
“यशोच्छ्रितैस्तेन शिलीमुखाग्रै-
र्निषेधिताः केतुषु पार्थिवानाम्” ॥)
उत्पातः । (यथा, मनुः १ । ३८ ।
“उल्कानिर्घातकेतूंश्च ज्योतींष्युच्चावचानि च” ॥)
चिह्नम् । इति मेदिनी । (यथा, रघुः २ । ११ ।
“तमाप्यमत्ता नियमोपयेतु
मंगुष्टवाचा प्रभुवक्रकेतुम् ।
विशालवत्त्म विशिखतमाकर्णी
विशोदकाश निनाद सिंह” ॥)
दीप्तिः । इति हेमचन्द्रः । (ध्वजः । यथा, ऋग्वेदे १० । ८ । १ । “प्रकेतुना बृहता यात्यग्निः” । तथैव । १ । २४ । ० “आरोचयन् मरुते केतु मज्ञाम्” । रश्मिः । यथा, ॐ उदु त्यं जातवेदसं देवं वहन्ति केतवः दृशे विश्वाय सूर्य्यम्” ॥)
केतुमः, पुं, (केतुरिव भातीति । भा + कः ।) मेघः । इति शब्दमाला ॥
केतुमाल स्त्री, जम्बूद्वीपस्य नवखण्डान्तर्गत

विशेषः । इति त्रिकाण्डशेषः । (क्वचित् पुंलिङ्गो ऽपि दृश्यते । यथा, महाभारते ६ । ६ । ३२ ।
“मेरोस्तु पश्चिमे पार्श्वे केतुमालो महीपते ।
जम्बूखण्डे च तत्रैव महाजनपदो नृप” ॥
आग्नीध्रराजपुत्रः स्वायम्भुवमनोः प्रपौत्रश्च । यथा, भागवते ५ । २ । २० ।
“तस्यामु ह वा आत्मजान् स राजवर आग्नीध्रो नाभिकिम्पुरुषहरिवर्षेलावृतरम्यकहिरण्मयकुरुभद्राश्वकेतुमालसंज्ञान् नवपुत्रानजनयत” ॥
स्त्री, नदी । यथा, महाभारते । ३ । ८८ । २४ ।
“तत्र पुण्यतमा राजन् ! सततं तापसैर्युता ।
केतुमाला च मेध्या च गङ्गारण्यञ्च भूमिप !” ॥)
केतुरत्न, क्ली, (केतोः रत्नं केतुभिः रश्मिभिः युक्तं वा रत्नम् ।) वैदूर्य्यमणिः । इति राजनिर्घण्टः ॥
केदरः, पुं, (के मस्तके दृणाति । दॄ + अच् । केन दीर्य्यते वा । दॄ + अप् कर्म्मणि ।) वृक्षविशेषः । इति त्रिकाण्डशेषे अमरः । टेरके त्रि । इति शब्दरत्नावली ॥
केदारः, पुं, (के जले दारः आदरो यस्य । यद्वा केन जलेन दीर्यते आद्रियते इति । निपातनात् साधुम् ।) क्षेत्रम् । क्षेत् इति भाषा । इत्यमरः । २ । ९ । ११ ॥ (यथा, मनौ ९ । ३८ ।
“भूमावप्येककेदारे कालोप्तानि कृषीवलैः ।
नानारूपाणि जायन्ते बीजानीह स्वभावतः” ॥
क्षेत्रस्थकुल्याजलाधारविशेषः । यथा, रामायणे २ । २९ । १८ ।
“कः पिबति केदारे निम्नाशाकुलित मदः” ॥)
केदारजशालिः । मधुरत्वम् । विपाके गुरुत्वम् । दोषवत्वम् । “तदेव बद्धमूलत्वं विशेषाद्दोषदं भवेत्” । इति राजनिर्घण्टः ॥ (के मस्तके शिखरदेशे दारः प्रभवत्यादिकारणरूपनिर्देशस्थानं अस्य ।) पर्व्वतविशेषः । (के मस्तके शिरःस्थित जटाभ्यन्तरे गङ्गारूपिणी दारा पत्नी यस्य सः । सर्व्वत्र निपातनात् साधुः ।) शिवः । भूमिभेदः । आलवालम् । इति मेदिनी । (भूमध्यस्थानविशेषः । यथा, हठयोगदीपिकायाम् । ३ । २४ ।
“कालपाशमहाबन्धविमोचनविचक्षणः ।
त्रिवेणीसङ्गमं धत्ते केदारं प्रापयेन्मनः” ॥
“केदारम्भ्रूमध्ये शिवस्थानं केदारशब्दवाच्यं तत्र मनः स्वान्तं प्रापयेत्” । इति तट्टीका ।) तीर्थविशेषः । यथा महाभारते । ३ । ८३ । ७२ ।
“केदारे चैव राजेन्द्र ! कपिलस्य महात्मनः ।
ब्रह्माणमभिगत्वा च शुचिः प्रयतमानसः ।
कल्पपापविशुद्धात्मा ब्रह्मलोकं प्रपद्यते” ॥ * ॥
केदारश्चैतन्यलिङ्गभेदः । स तु लिङ्गमूर्त्या कालक्रमाविर्भावात् तत्रत्य स्थानस्थित तदिदम् यथा, काशीखण्डे । ७७ अध्याये ।
श्रीपार्व्वत्युवाच ।
“ब्रूहि मे देवदेवेश ! प्रकमस्त्वदर्चिते ।
यद् केदारमन्ताख्यं महात्मानमुपागमम् ।
लिङ्गेषु लिङ्गे यत्र दीप्तिमत्र चन्द्रात्मसुधया ।
प्रभूताच कदा लिङ्गं देवदेव ! महेश्वर ।

श्रीदेवदेव उवाच ।
शृणु सर्व्वेऽभिधास्यामि केदारेश्वरसत्कथाम् ।
यस्याकर्ण्णापि यो पापी सोऽप्यपापो जायते क्षणात् ।
केदारं यातुकामस्य पुंसो निश्चितचेतसः ।
आजन्मसञ्चितं पापं तत्क्षणादेव नश्यति ।
गृहाद्विनिर्गते पुंसि केदारं प्रतिनिश्चिते ।
जन्मद्वयार्ज्जितं पापं शरीरादपि निर्गमेत् ।
मध्येमार्गं प्रपन्नस्य त्रिजन्मार्ज्जितमघम् ।
देहगेहाद्विनिःसृत्य निराशं याति निश्चितम् ।
कार्य्यं केदार केदार केदारेति निरन्तरम् ।
गेहेऽपि निवसन्नूनं यात्राफलमवाप्नुयात् ।
दृष्ट्वा केदारशिखरं पीत्वा तत्रत्यमम्बु च ।
सप्तजन्मकृतात् पापात् मुच्यते नात्र संशयः ।
हरपापह्रदे स्नात्वा केदारेशं प्रपूज्य च ।
कोटिजन्मार्ज्जितैर्नोऽभिमुच्यते नात्र संशयः ।
सहायकस्य केदारं हरपापह्रदोदकैः ।
स्नाप्य लिङ्गं पुनर्भोक्ते मात्रा मोक्षं गमिष्यति ।
हरपापह्रदे श्राद्धं श्रद्धया यः करिष्यति ।
उद्धृत्य सप्त पुरुषान् स मे लोके गमिष्यति ।
पुरा रथन्तरे कल्पे यद्भूतं तत् शृणु ।
अपर्णे रत्नकुर्वा तं कथयामि तवानघे ।
एको ब्राह्मणदायाद उत्पादितः हि जायतः ।
कृतोपनयनः पित्रा प्रयत्नतो शिवः ।
स्नात्वा पाशुपतीं काशीं च विलोक्य समन्ततः ।
दिने पाशुपतैः श्रीर्वा जटामुकुटधारिभिः ।
कृतलिङ्गसमर्च्चैश्च भूतिभूषितवर्ष्मभिः ।
भिक्षाकृताशनमुठैः पञ्चगङ्गोदकाप्लुतैः ।
वभूवानन्दितमना व्रतं जग्राह चोत्तमम् ।
हिरण्यगर्भाचार्य्याद्भव्यात् पाशुपताभिधम् ।
स च शिष्यो वशिष्ठोऽभूत् सत्यपाशुपतोत्तमः ।
स्नात्वा ह्रदे हरपापे नित्यं मात्रा समुत्थितः ।
त्रिभूत्याहरको याति विघ्नार्थं लिङ्गमेव च ।
मातरं स विभाजति निर्व्विघ्ने गुरौ तदा ।
स वारद्वादशवर्षीयो वशिष्ठो गुरुणा सह ।
ययौ केदारयात्रायै गिरिं गौरीगुरोर्द्रुतम् ।
तत्र गत्वा च पोतवति किंचित् कथारिका क्वचित् ।
पाशोज्ञ्च लिङ्गं च लिङ्गरूपमनन्तरम् ।
अधिगत्य गिरिं प्राप्य वशिष्ठस्तु समस्थिताः ।
गुरुर्हिरण्यगर्भोऽस्य ददर्श ममतां तदा ।
यमदूता नायकाश्च विमाने सार्व्वकामिके ।
आरोप्य तं वाहिताः किंचनकगणाद् कुतः ।
तत्र केदारमुद्दिश्य नैहाविरदशेऽप्यतौ ।
ददाति रक्तमेत् प्राणान् पैताले स चिर वसेत् ।
तत्पश्चात् समालोक्य स वशिष्ठस्तपोधन ।
केदारमेव लिङ्गेषु वसन्तं दर्शितम् ।
अथ हस्ते स केदारो दाता नाराकटीमहम् ।
अपराधिकम पादि ददाति चामरेण मम ।
दर्शयेच्च तदा देवं दातारमिव मत्तम् ।
दिव्योर्दिव्ये केदारं प्रभवदाकाशी हरिम् ।
देवदेव। तदा समज्ञ वशिष्ठ विदिताभिरो मुनिः ।
कान्तवान् निर्व्वस्य हस्तात् मनुजावित्ता ।
दत्तोऽसि स दे सर्व्वो स्त्रैत्रिप्रतः कृतेः ।

परमोत्साहसम्पन्नः पञ्चिकाकलितोऽप्ययम् ।
तपोधनैस्तथैवाद्य शङ्कमानैर्निवारितः ॥
नारायणप्रमुखैरन्यैरपि च वह्निभिः ।
ततोऽपि न तदुत्साहभङ्गोऽभूद्दृढचेतसः ॥
मध्ये मार्गे प्रवसापि गुरोरिव गतिर्मम ।
इति निश्चितचेतस्के वशिष्ठे तापसे शुचौ ॥
चमत्कारपदीप्तस्ते तुष्टोऽहं चन्द्रिकेऽभवम् ।
स्वप्ने मया स सम्प्रोक्तो वशिष्ठस्तापसोत्तमः ।
हे द्विज ! प्रसन्नोऽस्मि केदारं विद्धि मामिह ।
अधीश्व वरं मत्तः प्रार्थयस्वाविचारितम् ।
इत्युक्तवत्यपि मयि स्वप्नो मिथ्येति सोऽब्रवीत् ।
ततोऽपि च मया प्रोक्तः स्वप्नो मिथ्या न चिन्त्यताम् ।
भवादृशामभिध्यैव स्वाध्यायवशवर्तिनाम् ।
वरं ब्रूहि प्रसन्नोऽस्मि सम्प्रश्नं त्यज द्विज ! ।
तव सत्त्ववतः किञ्चित् मयाऽदेयं न किञ्चन ।
इत्युक्ते मे समाकर्ण्य वरयामास मामिति ।
शिष्यो हिरण्यगर्भस्य तपस्विजनसत्तमः ।
यदि प्रसन्नो देवेश ! तदा मे सानुगा इमे ।
सर्व्वे सुनिष्ठगुणाढ्या यान्तु यत्र वरो मम ।
देवि ! समाकर्ण्य परोपकृतिशालिनः ।
वचनं निरतं प्रीतस्तथेति समुवाच ह ।
इत्थं परोपकरणात् तपसोऽपि गुरीयसम् ।
तेन पुण्येन स मया पुनः प्रोक्तो वरं वृणु ।
स वशिष्ठो महाप्राज्ञो हृद्यामुपवचनः ।
देवि ! मे प्रार्थयामास हिमशैलादिह स्थितिम् ।
सततं तपसा तुष्टः कृपामात्रेण सम्पदि ।
हिमशैले स्थितश्चाहं सर्व्वभावेन सुस्थितः ।
ततः प्रभाते सञ्जाते सर्व्वेषां पश्यतामहम् ।
हिमाद्रेः प्रस्थितः प्राप्तः स्तूयमानः सुरर्षिभिः ।
वशिष्ठं पुरतः कृत्वा सम्यगाप्तसमायुतम् ।
हरपापह्रदे तीर्थे स्थितोऽहं तदनुग्रहात् ।
नापरिग्रहतः सर्व्वे हरपापे कृतोदकाः ।
आराध्य मामनेनैव वपुषा सिद्धिमागताः ।
तदाप्रभृति लिङ्गेऽस्मिन् स्थितः साधकसिद्धये ।
कलिसुते परे क्षेत्रे कलिकाले विशेषतः ।
तुषारादिं समासाद्य केदारं वीक्ष्य यत् फलम् ।
तत् फलं सप्तगुणितं काश्यां केदारदर्शने ।
गौरीकुण्डं यथा तत्र हंसतीर्थञ्च निर्म्मलम् ।
यथा मधुश्रवा गङ्गा काश्यां सदसि तथा ।
इदं तीर्थं हरपापं सप्तजन्माघनाशनम् ।
गङ्गायां निर्म्मितं यत्नाज्जन्मकोटिशताघहम्" ॥
केदारास्यः पर्व्वतश्च तीर्थयात्रिभिः प्रायेण
चैत्रादिमासात् कार्त्तिकमासपर्य्यन्तं गम्यः ॥ * ॥)
केदारकटुका, स्त्री, (केदारस्य शैलस्य कटुका इव ।)
कटुका । इति राजनिर्घण्टः । कटकी इति भाषा ॥
(कटुकाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)
केदारज, क्ली, (केदारात् जायते इति । जन् + डः ।)
पद्मकाष्ठम् । इति राजनिर्घण्टः ॥
केदारेशः, पुं, (केदार एव ईशः ईश्वरः तस्य च ईश
लिङ्गरूपो महादेवः । यद्वा, केदारस्य ईशः ।)
काशीस्थशिवविशेषः । यथा,—
"हरपापह्रदे स्नात्वा केदारेशं प्रपूज्य च ।
कोटिजन्मार्ज्जितैर्मोक्षैर्मुच्यते पद्मयान्वितः" ॥
इति स्कान्दे काशीखण्डे ७७ अध्यायः ॥
केदारेश्वरः, पुं, (केदाराख्य ईश्वरः । केदारपर्व्वतस्य
ईश्वरो वा ।) काशीस्थशिवविशेषः । यथा,—
"इत्थमन्यदभिधास्यामि केदारेश्वरसत्कथाम् ।
समाकर्ण्यापि यां पापोऽप्यपापो जायते क्षणात्" ॥
इति स्कान्दे काशीखण्डे ७७ अध्यायः ॥
केनारः, पुं, (के मूर्द्ध्नि नारः । अलुक्समासः ।)
कुम्भीनरकः । इति हेमचन्द्रः । शिरः । कपोलः ।
सन्धिः । इति मेदिनी ॥
केनिपातः, पुं, (के जले निपात्यतेऽसौ । नि + पत्
+ णिच् + घञ् ।) अरित्रम् । इति शब्दरत्ना-
वली । हालि इति भाषा ॥
केनिपातकः, पुं, (केनिपात + स्वार्थे कन् ।) केनि-
पातः । इत्यमरः । १ । १० । १३ ॥
केन्दुः, पुं, (कु ईषत् इन्दुरिव । कोः कादेशः ।)
तिन्दुकवृक्षः । इति शब्दरत्नावली ॥
केन्दुकः, पुं (केन्दु + संज्ञायां कन् ।) गाणवृक्षः ।
इति शब्दचन्द्रिका । गाब् इति भाषा ॥ तास-
विशेषः । यथा । "अधुद्वय विरामान्तवासे केन्दुक
संज्ञके" । अधुद्वय स्थाने द्रुतद्वयमिति च पाठः ।
अपरं नियम विना । इति सङ्गीतदामोदरः ॥
केन्द्रं, क्ली, ग्रहम् । लग्नात् चतुर्थसप्तमदशम-
स्थानानि । तत्पर्य्यायः । कण्टकम् २ । यथा,—
"लग्नाम्बुद्यूनकर्म्माणि केन्द्रमुक्तञ्च कण्टकम् ।
चतुरस्रञ्च लिटौ बली चापे विशेषतः" ॥
इति नीलकण्ठकृततन्त्राख्यजातकम् ॥ स्पष्ट-
ग्रहानयनार्थं शीघ्रमन्दसम्बन्धाङ्कद्वयम् । यथा,—
"मृदूच्चेन हीनो ग्रहो मन्दकेन्द्रं
चलोच्च ग्रहाख्यो भवेच्छीघ्रकेन्द्रम्" ॥
इति भास्करीयसिद्धान्तशिरोमणौ स्पष्टाधिकारः ॥
ग्रह स्पष्टीकृत्य मन्दोच्चात् तथा शीघ्रात् विशोध्य
च शिष्टं केन्द्रम् । इति सूर्य्यसिद्धान्तः ॥ गोलस्य
मध्यस्थानम् । यथा,—
"कुगस्य मध्यं किल केन्द्रमुक्तम्
केन्द्रं ग्रहो यान्तरसम्पदेऽसः ।
यतोऽन्तरे तावति वृत्तरेखा
शीघ्रोच्चमार्गं सदैव केन्द्रम्" ॥
इति सिद्धान्तशिरोमणौ गोलाध्यायः ॥ (यस्य
योगविशेषः यथा, शब्दार्थचिन्तामणिधृतवचने ।
"आपोक्लिमगते चन्द्रे केन्द्रस्थे सुरपूजिते ।
योगः केन्द्र इति ख्यातो धनुर्विद्यार्थविग्रहः" ॥
प्रान्तसीमा । यथा, योगशास्त्रे ।
"पृथिव्या उभयोः केन्द्रयोः स्थितौ ताभ्यां योगिनौ ।
एकच नाभिर्मध्यस्थितयुग् नाभिकर्म्मस्थिता इव वा
अन्योन्यमानयति" ॥)
केप, ऋ ङ कम्पे । गतौ । इति कविकल्पद्रुमः ।
(भ्वा-आत्म-सक-सेट्-ऋदित् ।) ऋ, केपते । ऋ,
अचिकेपत् । इति दुर्गादासः ॥
केमद्रुमः, पुं जन्मकालीनग्रहयोगविशेषः । यथा ।
"रविवर्ज्जं द्वादशगैरनफा
उभयस्थितैर्दुरुधरा केमद्रुमः ..."

अनफादियोगः । सञ्जीव विषयसुखान्वित प्रभु-
ख्यातियशोमलधनानाम् । सुनफायां शीघ्रकीर्त्ति
युक्तमार्जितैश्वर्य्यश्च ॥ ... दुरुधरायाम्
सुखिमर्यादिसमपि दौरधुरे । मलक दुःखितमधम
जातः केमद्रुमे विद्यात् ॥ अनफादिफलम् । इति
ज्योतिस्तत्त्वम् ॥ (केमद्रुमयोगे जातस्य फलं यथा,
जातकाभरणे ।
"कृपतेर्वंशजातोऽपि केमद्रुमभवो नरः ।
मलिनो दुःखितो नीचो निःस्वो दासो भवेत् खलः" ॥
तद्भङ्गस्तु यथैव । "चन्द्रे केन्द्रगतेऽथवा ग्रहयुते
सर्व्वैश्च दृष्टे विधौ सर्व्वे कण्टकसंस्थितैश्च ग्रहवे
केमद्रुमो नेष्यते । अमात्र विधावेव वा हरिकौ शुभे
सर्व्वं शुभं फलं । शाम्यां मध्य तथैकेनापि वेशाभि
हरिद्रवा" ॥)
केमुकः, पुं, (के शिरोवच्छेदे कमयतीति । कम् रोगे
+ उक प्रत्ययः ।) कन्दविशेषः । केँउ इति भाषा ।
तत्पर्य्यायः । पेमुकः २ पेमनी ३ पेमुः ४ देविका
५ दुग्धसारिणी ६ केमुकः ७ । इति रत्नमाला ॥
अस्य गुणाः । कफपित्तनाशित्वम् । गोष-
नत्वम् । अग्निदीपनत्वञ्च । इति राजवल्लभः ॥
कटुत्वम् । पाके तिक्तत्वम् । ग्राहित्वम् । हिमत्वम् ।
लघुत्वम् । पाचनत्वम् । रुच्यत्वम् । ज्वरकुष्ठकास-
प्रमेहाश्वनाशित्वम् । वातलत्वम् । पटुत्वञ्च । इति
भावप्रकाशः ॥ (एतत् पर्ण्णं चविश्व पर्णीदम् ।
क्ली, कन्दशाकविशेषः ॥)
केयूरं, क्ली, (के बाहुशिरसि भूषयत्वो याति । या
गतौ + ऊरः । अलुक् समासः ।) अलङ्कार-
विशेषः । ताड इति भाषा । तत्पर्य्यायः । अङ्गदम्
२ । इत्यमरः । २ । ६ । १०७ ॥ (यथा, महा-
भारते । ६ । ६० । २१ ।
"पातालं भुवनाथ केयूराणाञ्च सर्व्वशः ।
रामपश्चात् दृश्यन्ते भीष्मभीमसमागमे" ॥)
केयूरः, पुं, रतिबन्धविशेषः । यथा,—
"स्त्रीनितम्बे चैव सम्पीड्य दोर्भ्यामाश्लिष्य सुन्दरीम् ।
कारयेत् स्थापन कामी बन्धः केयूरसंज्ञकः" ॥
इति स्मरदीपिका । अपि च ।
"स्त्रीनो महान्तरावेष्टो गाढमालिङ्ग्य सुन्दरीम् ।
कामयेदिदिव कामी बन्धः केयूरसंज्ञकः" ॥
इति रतिमञ्जरी ॥
केरलः, पुं, देशभेदः । मालेयोवार इति भाषा ।
यथा । अजाः केरलपर्य्यायाः । इति हेमचन्द्रः ॥
केरलासानधिकारिमातृधारिष्टविशेषा । इरैते
ख्यातया ख्याता सामरैषा धर्म्मा नाहित
देशान्तरस्य कृतम् । यथा,—
"निःसाध्यायवषट्काराः शूद्रान्निव महाजनाः ।
शूद्रा यवनकाम्बोजाः पारदाः पह्लवाकथाः ।
कौलिसर्पा माहिषकाः दर्व्वाश्चोलाः सकेरलाः ।
सर्व्वे ते क्षत्रियास्तात । धर्म्मस्तेषां निराकृतः" ॥
इति हरिवंशः । (तथा च रघुवंशे । ४ । ५४ ।
... केरलीविनाम् ।
अन्वर्णं ...
...
... ।)

ज्योतिर्ग्रन्थविशेषः । होरा । इति शब्दरत्नावली ॥ (केरलज्योतिर्विद्यायां सङ्केतविशेषो दिङ्मात्र प्रदर्श्यते गर्गसंहितायां यथा,—

"वर्गवर्णप्रमाणस्तु अक्षरं ताड़ितं मिथः ।
पिण्डसंज्ञा भवेत्तस्य यथाभागैस्तु कल्पना" ॥

अस्यार्थः अ क च ट त प य शा इत्यष्टौ वर्गाः एतैरेव प्रश्नादयो यथायथं साङ्केतिकक्रम माश्रित्य निरूप्यन्ते ॥ केरलदेशोद्भवा स्त्री । यथा, राजेन्द्रकर्णपूरे । ६ ।

"चौड़ी चूड़ामरकतहरया कौर्यकाश्चीस्तथा:
कर्णाटीनां मुषितमुरली केरलीहारमौला:" ॥)

केल, ऋ चाले । गतौ । इति कविकल्पद्रुमः ॥ (भ्वां पर० अक०-गमने सक० सेट् ऋदित् ।) ऋ, अचि केलत् । चाल: कम्पः । चाल स्वैविक्र मन्यते । इति दुर्गादासः ॥

केलक:, पुं, (केल+कर्त्तरि ण्वुल् ।) खड्गधारादिनर्त्तकः । तत्पर्य्यायः । प्रवकः २ । इति त्रिकाण्डशेषः ॥

केलि:, पुं स्त्री, (केल्+इन् ।) परीहासः । तत्पर्य्यायः । द्रवः २ क्रीड़ा ३ लीला ४ नर्म्म ५ । इत्यमरः । १ । ७ । ३२ ॥ (नायिकालङ्कारविशेषः । यथा, एतल्लक्षणं साहित्यदर्पणे । ३ । १२२ ।

"विहारे सह कान्तेन क्रीड़ितं केलिरुच्यते" ॥

यथा, अमरुशतके । ४ ।

"मालत्याः कुसुमेषु येन सततं केलि ज्ञाता हेलया" ॥)

केलि:, स्त्री, (केलति चरा गच्छतीति । "सर्व्वधातुभ्य इन्" । इति इन् ।) पृथिवी । इति शब्दमाला ॥

केलिक:, पुं, (केलिर्विलासः प्रयोजनमस्य इति ठन् ।) अशोकवृक्षः । इति राजनिर्घण्टः ॥ (विवृतिरस्याशोकशब्दे ज्ञेया ॥)

केलिकला, स्त्री, (केलिरूपा कला । शाकपार्थिवादिवत् मध्यपदलोपिसमासः ।) सरस्वतीवीणा । इति शब्दरत्नावली ॥ (केलि: क्रीड़ा तस्याः कला अंशविशेषः । यथा, अमरुशतके । ७ ।

"अविरतौ भवितोऽनवद्यभा
कुसुमिताकुलकेलिकलारसा" ॥)

केलिकिला, पुं, (केलिना क्रीड़या किलतीति । किल क्रीड़ायां + कः ।) कुम्भादिकः । स तु शिवस्यानुचरः । नाट्ये नायकवयस्यः । तत्पर्य्यायः । विदूषकः २ वासन्तिकः ३ वैहासिकः ४ प्रहासी ५ प्रीतिदः ६ । इति हेमचन्द्रः ॥ (केलिना परीहासेन किलतीति विग्रहे नायिकापि । यथा, हरिवंशे ।

"न तु केलिकिलो विप्रो भेदशीलश्च नारदः" ॥)

केलिकिला, स्त्री, (केलिना विहारेण किलतीति किल+कः । ततः टाप् ।) रतिः । सा तु कामदेवपत्नी । इति त्रिकाण्डशेषः ॥

केलिकोष:, पुं, (केलिनिमित्तकः कोषोऽस्य ।) नटः । इति हेमचन्द्रः ॥

केलिकुञ्चिका, स्त्री, (केलीनां कुञ्चिका इव । स्त्री लिङ्गः ।) इति त्रिकाण्डशेषः । शाली इति भाषा ॥

केलिकोष:, पुं, (केलीनां क्रीड़ानां क्रीड़ानटोवास

दीनां वा कोष आधार इव ।) नटः । इति शब्दरत्नावली ॥

केलिनागर:, पुं, (केलिनिपुणः प्रधानको वा नागरः ।) सम्भोगवान् । इति जटाधरः ॥

केलिमुख:, पुं, (केलि: मुखं प्रधानमस्य ।) परीहासः । इति त्रिकाण्डशेषः ॥

केलिवृक्ष:, पुं (केलिनिमित्तको वृक्षः ।) कदम्बविशेषः । इति शब्दरत्नावली ॥ केलिकदम्ब इति ख्यातः ॥

केलिसचिव:, पुं, (केलौ क्रीड़ाविषये सचिव: सहायः ।) नर्म्मदः । क्रीड़ाविषयकमन्त्री । इति शब्दमाला ॥

केव, ऋ ङ सेवने । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्-ऋदित् ।) ङ, केवते । ऋ, अचिकेवत् । इति दुर्गादासः ॥

केवर्त्त:, पुं, (के जले वर्त्तते । वृत्+अच् । अलुक् समासः ।) कैवर्त्तजातिः । इति त्रिकाण्डशेषः ॥ (यथोऽन्यजगूढ़ः । यथा ब्रह्मवैवर्त्तपुराणे ।

"इक्षुकारश्चक्रकारश्च नटो बरुड़ एव च ।
केवर्त्तो मेदभिल्लश्च षड़ेते अन्त्यजाः स्मृताः" ॥)

केवल, क्ली, (केव ङ सेवने + वृषादित्वात् कलच् । यद्वा, के शिरसि मूर्द्धावच्छेदे वलयति । वल्+अच् । अलुक् समासः ।) निर्णीतम् । इत्यमरमेदिनीकारौ । ज्ञानभेदः । इति विश्वो हेमचन्द्रश्च । (साङ्ख्यकारिकायां यथा,—"अविपर्य्ययात् विशुद्धं केवलमुत्पद्यते ज्ञानम्" ॥)

मुख्यम् । (यथा, रघौ २ । ६१ ।

"न केवलानां पयसां प्रसूति-
मवेहि मां कामदुघां प्रसन्नाम्" ॥)

कृत्स्नम् । (यथा, रघुवंशे १० । २८ ।

'केवलं स्मरणेनैव पुनासि पुरुषं यतः ।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि" ॥)

अवधारणम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (अद्वितीयः । यथा, कुमारे ६ । ८३ ।

"न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक्" ॥)

केवल:, पुं, कुहकः । इति मेदिनी । (कुम्भकविशेषः । यथा, घटयोगदीपिकायाम् । २ । ७१ ।

"प्राणायामस्त्रिधा प्रोक्तो रेचपूरककुम्भकैः ।
सहितः केवलश्चेति कुम्भको द्विविधो मतः" ॥)

केवल, त्रि, एक: । (यथा, रघुवंशे । ११ । १८ ।

"तामभिद्रुवतो निरीक्षणी
सा अयावनमुवः न केवलान् ।
निज्ञमरशरासनवियो
राघवन्विनयमपि वमस्पसत्" ॥)

कृत्स्नः । इत्यमरमेदिनीकारौ । (यथा, रघु १० । २८ ।

"केवलं स्मरणेनैव पुनासि पुरुषं यतः ।
अनेन वृत्तयः शेषा निवेदितफलास्त्वयि" ॥)

केवलव्यतिरेकी, [न्] पुं, (केवलं मुख्यं व्यतिरेकोऽस्त्यस्येति । इनिः ।) अनुमानविशेषः । इति हेमचन्द्रः ॥

केवलव्य, क्ली, (केवलं भवम् ।) अनैश्वर्य्यम् । इति शब्दचन्द्रिका ॥

केवली, स्त्री, (केवल+ङीष् ।) ज्ञानभेदः । इति मेदिनी । प्रश्नविशेषः । इति हेमचन्द्रः ॥

केवली, [न्] पुं, (केवलं शुद्धं ज्ञानमस्त्यस्येति । इनिः ।) जिनविशेषः । इति हलायुधः ॥

केविका, स्त्री, (केव गतिशोषणयोः + ण्वुल् + टाप् अत इत्वम् ।) पुष्पविशेषः । केवेर इति भाषा कोङ्कणे प्रसिद्धा । तत्पर्य्यायः । कविका २ केवी ३ भृङ्गारिः ४ भृङ्गभवा ५ भृङ्गमारी ६ भद्रामन्ना ७ राजकन्या ८ अलिशाहिनी ९ । अस्या गुणाः । मधुरत्वम् । शीतलत्वम् । वातपित्तश्लेष्मकफशमनत्वं विलम्बित्वश्च । इति राजनिर्घण्टः ॥

केश:, पुं, (के मस्तके शेते । शी + अच् । अलुक् समासः ।) मनुष्यजातिपशुधातुविशेषः । चुल इति भाषा । स तु प्रमच्छवाचकस्य अस्थिमाने जायते । इति मुग्धबोधः । (केशादयस्तु पितृजाः । यथा, सुश्रुते शारीरस्थाने तृतीये ऽध्याये । "तत्र केशश्मश्रुलोमास्थिनखदन्तशिरास्नायुधमनीरेतःप्रभृतीनि स्थिराणि पितृजानि" ॥ भावप्रकाशे च ।

"केशश्मश्रु च लोमानि नखा दन्ताः शिरास्तथा ।
धमन्यः स्नायवः शुक्रमेतानि पितृजानि हि" ॥)

तत्पर्य्यायः । चिकुरः २ कुन्तलः ३ बालः ४ कचः ५ शिरोरुहः ६ । इत्यमरः । २ । ६ । ९५ ॥ शिरसिजः ७ मूर्द्धजः ८ अस्त्रः ९ वृजिनः १० । इति जटाधरः । (रोमविशेषेषास्योत्पाटनात्मकस्य मुद्रोपायः । यथा,—

"वटारोहेशरीनिम्बोषपुष्पैरादिचिकितम् ।
गुडूचीकटेतैलमन्वक्तप्रालेपोरोहणम्" ॥

इति चरिविधाकगुडूचीतैलम् ॥ ७ ॥

"मधुकेन्दीवरमूर्व्वा तिलाज्यगोक्षीरभृङ्गरसैः ।
अभिराद्यवर्त्ति नवकेशा दृढ़मूलाश्चाप्रजायन्ते" ॥

"चन्दनं मधुकं मूर्व्वा त्रिफला नीलमुत्पलम् ।
कान्ताराजटमरोहश्च दुकूलीविसमेव च ।
लौहचूर्णं तथा केशी सारिवे द्वे तथैव च ।
मार्कवस्वरसेनैव तैलं मृदग्निना पचेत् ।
शिरस्यभ्यञ्जितं केशा जायन्ते घनकुञ्चिताः ।
दृढ़मूलाश्च स्निग्धाश्च तथा भ्रमरसन्निभाः ।
नस्येनाकालपलितं निहन्यात्तैलमुत्तमम्" ॥

इति चन्दनाद्यं तैलम् ॥ ७ ॥

"नैव पश्यति मनुष्यो यौवने पलितं यदा ।
यदि स्यात्तद्विधेः केशान् प्रयुञ्ज्यात् वाञ्छितः" ॥

इन्द्रलुप्तसमाख्याते वृद्धेषु त्वेके कपोलस्थिता यथा,—

"त्रिफलाचूर्णसंयुक्तं लौहचूर्णं विनिःक्षिपेत् ।
ईषत्पक्वे नारिकेले भृङ्गराजरसान्विते ।
मासमेकन्तु निःक्षिप्य पश्चाद्घृष्ट्वा प्रलेपयेत् ।
तेन शिरो मुण्डयित्वा वेष्टं दद्यात् पुनः पुनः ।
सप्ताहं चरणे ह्येतन्मौलिवेदनाशं दिने ।
कृष्णकेशास्तथा स्निग्धा भवन्त्येव न संशयः ।
कृष्णकुञ्चितकेशाः स्युर्भृङ्गराजप्रलेपनम्" ॥

"अपामार्गस्य तु क्षारं गवां मूत्रेण भावयेत् ।
कैलासं भावयेत्तेन लौहभस्म विलेपयेत्" ॥

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे ।) तत्समूहार्थवाचका शब्दा यथा, —
"पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" ।
इति हेमचन्द्रः ॥ * ॥ (कस्य जलस्य ईशः ।) वरुणः । कौवेरम् । इति मेदिनी ॥ (अस्य पर्य्याया यथा,—
"वालं कौवेरवर्हिष्ठोदीच्यं केशाम्बुनाम च" ॥
इति वैद्यकरत्नमालायाम् ॥) दैत्यविशेषः । इति हेमचन्द्रः ॥ (कश्च अश्च ईशश्च । के जले शेते वा ।) विष्णुः । इति शब्दरत्नावली । (काशते प्रकाशते लोकान् लोकं काशयति वा । काश + अच् पृषोदरादित्वात् साधुः । सूर्य्यादिप्रशस्तरश्मिः ।
"मम विष्णुश्च सर्व्वाः शक्तयः केशसंज्ञिताः" ।
इति भागवतोक्ते परब्रह्मशक्तिः । ब्रह्मा ।
"केशो योनौ तथा भावे रावणावण्ययोरपि ।
जम्पटे पुष्पे चैव प्रमदायां विशेषतः" ॥
"प्रजापतौ च चैव केशशब्दः प्रकीर्त्यते" ।
इति महाभारतटीकायां नीलकण्ठः ॥)

केशकलापः, पुं, (केशानां कलापः समूहः ।) केशपाशः । केशसमूहः । इति हेमचन्द्रः ॥

केशकारः, पुं, (केश केशवत् केशाकृतिं वा करोति अग्रभागे केशाकारेण वर्द्धयति इति भावः । केश + कृ + "कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) इक्षुभेदः । करिया कुशियार इति हिन्दी भाषा । अस्य गुणाः । गुरुत्वम् । शीतलत्वम् । रक्तपित्त क्षयापहत्वञ्च । इति भावप्रकाशः ॥

केशगर्भकः, पुं, (केशो गर्भे अभ्यन्तरेऽस्य । कप् ।) कबरी । इति त्रिकाण्डशेषः ॥

केशघ्न, क्ली, (केशं हन्ति नाशयतीति । हन् + टक् ।) इन्द्रलुप्तकम् । इति हेमचन्द्रः ॥

केशच्छिद्, [द्] पुं, केशं छिनत्ति । छिद् + क्विप् ।) नापितः । इति शब्दमाला ॥

केशटः, पुं, (कः ब्रह्मा ईशः महादेवः तौ अटतः गच्छतः प्रलये यत्र । महाप्रलये शून्यविशेषात् तथात्वम् । यद्वा ब्रह्मशिवाभ्यां अटति गच्छति य सः । तयोरात्मत्वात् ।) विष्णुः । (केशेषु काश्यादि इत्यनातेषु अटति चरतीति । अट + अच् । शकन्ध्वादित्वात् साधुः ।) छागः । (केशेषु मूर्द्धजेषु अटतीति । अट + अच् शकन्ध्वादित्वात् अभावे साधुः ।) कोटः । इति मेदिनी । भ्राता । इति शब्दरत्नावली । (केशेषु कामार्त्तजनशरीरेषु अटति । अट् + अच् ।) कामदेवस्य शोषणवाणः । इति विश्वः । (केश इव प्रतिमासु मदनवाणादिषु च अटति तत्सादृश्येनेति यावत् ।) शोषणवृक्षः । इति त्रिकाण्डशेषः ॥

केशधृक् पुं (केशमिव धरति । धृ + क्विप् ।) भूत केशनामवृक्षभेदः । इति शब्दचन्द्रिका ॥

केशनाम, [न्] क्ली, (केशस्येव नाम यस्य ।) वालम् । इत्यमरः ॥ वाला इति भाषा ॥

केशपक्षः, पुं, (केशानां पक्षः समूहः । पाठान्तरात् पक्षार्थको वा ।) केशपाशः इत्यमरः । २ । ६ । ९८ ॥ (यथा, महाभारते । ४ । ३६ । ४१ ।
"उत्सृज्य प्रधावन्तमनुद्रुत्य धनञ्जयः ।
गत्वा शतपदं तूर्णं केशपक्षे परामृशत्" ॥)

केशपर्णी, स्त्री, (केश इव पर्णान्यस्याः । जातित्वात् ङीष् ।) अपामार्गः । इति शब्दरत्नावली ॥

केशपाशः, पुं, (केशानां पाशः समूहः ।) केशसमूहः । यथा,—
"पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" ॥
इत्यमरः । २ । ६ । ९८ ॥ (यथा, कुमारे । १ । ४८ ।
"तं केशपाशं प्रसमीक्ष्य कुर्य्यु-
र्वालप्रियत्वं शिथिलं चमर्य्यः" ॥)

केशपाशी, स्त्री, (केशपाश + स्वाङ्गात् ङीप् ।) शिरोमध्यस्थशिखा । चूडा । इत्यमरः । २ । ६ । ९७ ॥

केशभूः, पुं, (केशानां भूरुत्पत्तिस्थानम् ।) शिरः । इति राजनिर्घण्टः ॥

केशमथनी, स्त्री, (केशा मथ्यन्तेऽनया । मन्थ विलोडने + करणे ल्युट् ततो ङीप् । अस्याः कण्टकैः समीपं गन्तुः केशोत्पाटनात् तथात्वम् ।) शमीवृक्षः । इति राजनिर्घण्टः ॥

केशमार्जक, क्ली, (केशं मार्ष्टि । मृज शोधने + कर्त्तरि ण्वुल् ।) कङ्कतिका । इति जटाधरः । चिरुणी इति भाषा ॥

केशमार्जन, क्ली, (केशो मृज्यतेऽनेन । मृज् + करणे ल्युट् यद्वा ।) कङ्कतिका । इति हेमचन्द्रः । केशशुद्धिश्च । (भावे ल्युट् । केशशोधनक्रियामात्रम् ।)

केशमुष्टि, पुं, (केशानां मुष्टिरिव ।) विषमुष्टिवृक्षः । महानिम्बः । इति राजनिर्घण्टः ॥

केशरः, पुं क्ली, (के जले शिरसि वा । शर तीति । शॄ + अच् । पृषोदरात् सत्वम् । यद्वा केश इव केशाकारं अस्त्यस्येति । केश + रः ।) किञ्जल्कः । इत्यमरः । २ । १० । ४३ ॥

केशरः, पुं, (केश इव केशाकृतिपदार्थः अस्त्यस्येति मत्वर्थीये रः ।) नागकेशरवृक्षः ।
(यथा,—गीतगोविन्दे । १ । ३१ । "मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकाशे" ।) बकुलवृक्षः । (यथा, कुमारे । ३ । ५५ ।
"स्रस्तां नितम्बादवलम्बमाना
पुनः पुनः केशरदामकाञ्चीम्" ॥)
पुन्नागवृक्षः । (यथा, महाभारते । २ । १२५ । ३ ।
"पद्मैर्मिश्रैश्च चम्पकैः पारिभद्रकैः ।
कर्णिकारैरशोकैश्च केशरैरतिमुक्तकैः" ॥)
सिंहजटा । इति मेदिनी ॥ (यथा, कादम्बर्य्याम्
"मृगपतिरिव स्कन्धावलम्बितकेशरभारः" ॥)
हिङ्गुवृक्षः । इत्यमरटीकायां भरतः ॥ नीपः । कोविदारश्च इति भाषा । यथा, मेघदूते । २२ ।
"नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढैः" ॥)

केशरञ्जनः, पुं, (केशान् रञ्जयति । रञ्ज + णिच् + ल्युः ।) भृङ्गराजवृक्षः । इति राजनिर्घण्टः । भीमराज इति भाषा ॥

केशराजः, पुं, (केशो राजतेऽनेन । राज + करणे अच् ।) शाकभेदः । केशुटे इति भाषा । तत्पर्य्यायः । भृङ्गराज २ भृङ्गः ३ मार्कवः ४ मार्कवः ५ । इति रत्नमाला । मार्कवः ६ । इत्यमरः । मार्कः ७ पतङ्गः ८ भृङ्गरोटः ९ । इति त्रिकाण्डशेषः । केशरञ्जनः १० केश्यः ११ । कुन्तलवर्द्धनः १२ । इति वैद्यकम् । अङ्गारकः १३ एकरजः १४ करञ्जकः १५ भृङ्गरजः १६ भृङ्गारः १७ । इति जटाधरः । अवनाः १८ भृङ्गरजाः १९ मकरः २० । इति शब्दरत्नावली । अपि च ।
"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
अङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातनुत् ।
केश्यस्त्वच्यः कृमिश्वासकासशोथामपाण्डुनुत् ॥
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्तिजित्" ।
इति भावप्रकाशः ॥ अस्य गुणाः । कफिकारित्वम् । केशकुञ्चितत्वम् । पाण्डुकफापहत्वम् । रसायनत्वञ्च । इति राजवल्लभः ॥

केशराम्ल, पुं, (केशरे तदवच्छेदे अम्लरसो यस्य ।) मातुलुङ्गवृक्षः । इति जटाधरः ॥

केशरी, [न्] पुं, (केशराः सन्त्यस्य इति इनि ।) सिंहः । इत्यमरः । १ । ५ । १ ॥ (यथा, रघुवंशे २ । २९ ।
"स पाटलायां गवि तस्थिवांसं
धनुर्धरः केशरिणं ददर्श" ॥)
घोटकः । पुन्नागवृक्षः । नागकेशरवृक्षः । इति मेदिनी ॥ बीजपूरकवृक्षः । इति जटाधरः ॥

केशरुहा, स्त्री, (केश इव रोहति यत्र । केशरुह + "इगुपधेति" । ३ । १ । १३५ । इति कः ।) महेन्द्रवारुणीवृक्षः । इति राजनिर्घण्टः ॥

केशरूपा, स्त्री, (केशस्य रूपमस्याः ।) वन्दाकवृक्षः । इति राजनिर्घण्टः । (परगाछा इति भाषा ।)

केशवः, पुं (कोऽब्रह्मा ईशः रुद्रः तौ वाति गमयति प्रलये उपाधिं संमूलितात्मा मुक्ता एकमात्र परमात्मस्वरूपेणावतिष्ठते इति । यथा, भागवते २ अध्याये चतुःश्लोकाम् ।
"अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ॥
ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्व्वत्र सर्व्वदा ॥
एतन्मतं समातिष्ठ परमेण समाधिना ।
भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित्" ॥
तथा, केशं केशिनं वाति हन्ति । केश + वा + क । यथा, हरिवंशे । ८० । ९६ ।
"यस्मात्त्वया हतः केशी तस्मान्मच्छासनं शृणु ।
केशवो नाम नाम्ना त्वं ख्यातो लोके भविष्यसि" ॥
यद्वा, के जले शवः शवं यस्य सः । प्रलये क्षीरोदशायित्वात् तथात्वम् । यद्वा प्रशस्ता केशा अस्य सन्ति ते केशा ब्रह्मविष्णुरुद्राः शिवाख्याः शक्तयः । यद्वा, केशः अंशवः प्रकाशकत्वेन सन्ति अस्य । "केशाद्वोऽन्यतरस्याम्" । ५ । २ । १०९ ।

इति वप्रत्ययः। अथवा वाति गच्छति तद्गतया। वा+कः। सूक्ष्मतत्त्वेषां भेदाभावादपि वासुदेवे सर्व्वात्मनि परमेश्वरेऽस्य वृत्तिः। अतो विष्णुवशिमायाम्।
"नरसिंहवपुः श्रीमान् केशवः पुरुषोत्तम"।
किञ्च।
"त्रिलोकात्मा त्रिलोकेश केशव केशिहा हरिः"।
पूज्यपादैर्भाष्यकृद्भिरपि केशवशब्दस्य निरुक्तिद्वयमवलम्ब्य नामद्वयं समर्पितं तयोराद्ये। अभिरूपाः केशा यस्य स केशवः। कस्य अस्य ईशस्य केशास्त्रिमूर्त्तयस्ते वशे वर्त्तन्ते यस्य सः। केशिदानवहननाद्वा केशव।
"यस्मात् त्वयैव दुष्टात्मा हतः केशी जनार्द्दन।
तस्मात् केशवनाम्ना त्वं लोके ख्यातो भविष्यसीति"।
भागवतादिषु। द्वितीये। केशसञ्ज्ञिता सूर्य्यादिसक्ताश्च अंशव तद्वत्त्वेन केशवो वा।
"अंशवो ये प्रकाशन्ते मम ते केशसञ्ज्ञिताः।
सर्व्वज्ञाः केशव तस्मात् प्राहुर्म्मां द्विजसत्तमा"।
इति महाभारतम्। "क्व केशिनः"। इति श्रुतेश्च ब्रह्मविष्णुशिवाख्या हि शक्तयः केशसञ्ज्ञिताः। "मत्केशा वसुधातले" इति भागवते च। यथा, हरिवंशोक्तौ,—
"को ब्रह्मेति समाख्यात ईशोऽहं सर्व्वदेहिनाम्।
आवां तवांशसम्भूतौ तस्मात् केशवनामवान्"।
तेनास्य बहुधा निरुक्तिः।) विष्णुः। इत्यमरः। १।१।१८। प्रशस्तकेशः। (केशाः प्रशस्ता सन्त्यस्य। "केशाद्वोऽन्यतरस्याम्"।५।२।१०९। इति वः।) केशवति त्रि। इति मेदिनी। (शवः शवदेह। यथा, विदग्धमुखमण्डनम्।
"केशव पतितं दृष्ट्वा द्रोणो हर्षमुपागतः।
रुदन्ति माधवाः सर्व्वे हा! हा! केशव! केशव!"।
के जले शवं पतितं दृष्ट्वा द्रोणः काकः हर्षं प्राप्तवान् माधवाः मत्स्याः रुदन्ति चीत्कारं कुर्व्वन्तीत्यर्थः।)
केशवर्द्धिनी, स्त्री, (केशान् वर्द्धयत्यनया। केश+वृध्+करणे ल्युट् टित्वात् ङीप्।) सहदेवी लता। इति राजनिर्घण्टः।
केशवायुध, (केशवस्य विष्णोरायुधाकारं मुकुलं यस्य।) आम्रवृक्षः। इति शब्दमाला। (केशवस्य विष्णोः आयुधं क्लीवम्। इति विग्रहे पुं, विष्णोरस्त्रे, क्ली।)
केशवालय, पुं (केशवस्य आलयः वासस्थानम्।) अश्वत्थवृक्षः। इति त्रिकाण्डशेषः।
केशवावास, पुं, (आवसत्यस्मिन् इति। आ+वस्+अधिकरणे घञ्।) केशवस्य आवासः अश्वत्थवृक्षः। इति जटाधरः।
केशवेश, पुं, (केशाय कुन्तलस्य वेशः वन्धनप्रकारविशेषः केशादिभिर्भिन्नाद इति यावत्।) कवरी। इत्यमरः। कुन्तलवेश इति भाषा। (यथा, आश्वलायनगृह्ये। १।१०।१०। "कुलधर्म्मे केशवेशान् कारयेत्। "कपर्द्दिनः शिखण्डिनो वा" इति बौधायन। "दूर्द्धशिखाः शिखिनः" इति कुलधर्म्मा। "येषु यो यस्य कुलधर्म्मस्तेन तस्य केशसन्निवेशान् कारयेत्" इति नारायणोक्तिः।)
केशहन्त्री, स्त्री, (केशस्य हन्त्री नाशिनी। यद्वा केशान् हन्ति या। केश+हन्+तृच् ततो ङीप्।) शमीवृक्षः। इति राजनिर्घण्टः।
केशहस्त, पुं (केशानां केशस्य वा हस्त समूहः। हस्तादयश्च केशात् समूहार्थे।) केशसमूह। इत्यमरः।
केशाकेशि स्त्री, केशेषु केशेषु गृहीत्वा प्रवृत्त युद्धम्। ("तत्र तेनेदमिति सरूपे"।२।२।२७। इति कर्म्मव्यतिहारे इच् समासे पूर्व्वदीर्घः।) अन्योन्य केशग्रहणपूर्व्वकप्रवृत्तयुद्धम्। इति व्याकरणम्। चुलाचुलि इति भाषा।
(यथा, महाभारते। ३।२८३।३७।
"केशाकेश्यभवद्युद्धं रक्षसां वानरैः सह"।)
केशाम्बुना, स्त्री, (केशा आरोहन्त्यनया। आ+रुह+करणे सम्पदे च।) सहदेवीलता। इति राजनिर्घण्टः।
केशार्हा, स्त्री, (केश केशवर्द्धं अर्हति इति। केश+अर्ह+"कर्म्मण्यण्"।३।२।१। इति अण्।) महानीली। इति राजनिर्घण्टः।
केशिक, त्रि, (प्रशस्ताः केशाः अस्यास्तीति ठन्।) प्रशस्तकेशयुक्तः। इत्यमरः।२।६।४५।
केशिका, स्त्री, (केशीव कायति प्रकाशते। केशिन् कै+क।) शतावरी। इति राजनिर्घण्टः।
केशिनिषूदन, पुं, (केशीत्याख्यं दानवं कंसासुर चरं निषूदयति हन्ति। नि+सूद+कर्त्तरि ल्यु।) श्रीकृष्णः। (यथा, गीतायां १८।१।
"सन्न्यासस्य महाबाहो! तत्त्वमिच्छामि वेदितुम्।
त्यागस्य च हृषीकेश! पृथक् केशिनिषूदन!"।
केशिदानववधविवरणं हरिवंशे ८० अध्याये द्रष्टव्यम्।)
केशिनी, स्त्री, (केशाकारा सन्त्यस्याः।) जटामांसी। इति राजनिर्घण्टः। चोरपुष्पी। प्रशस्तकेशविशिष्टा। इत्यमरः।२।६।४५।
केशिसूदन, पुं, (केशिनं तदाख्यदानवं प्रसिद्धं दैत्यं सूदयतीति। केशिन्+सूद+कर्त्तरि ल्यु।) श्रीकृष्णः। इति त्रिकाण्डशेषः। (केशिदानववध विवरणं हरिवंशे ८० अध्याये द्रष्टव्यम्।)
केशिहा, [न्] पुं, (केशिनं हतवान्। हन्+क्विप्) श्रीकृष्णः। इति हेमचन्द्रः।
केशी, [न्] त्रि, (प्रशस्ताः केशाः सन्त्यस्य।) प्रशस्तकेशयुक्तः। इत्यमरः।२।६।४५।
केशी, [न्] पुं (केशः प्रशस्ता अतिशयेनास्त्यस्येति।) सिंहः। इति त्रिकाण्डशेषः। दैत्यभेदः। इति मेदिनी। (यथा, हरिवंशे।८०।६३।
"दानवश्च हतः केशी तस्मात् मम्वात्मन यत्नतः।
केशवो नाम नाम्ना त्वं ख्यातो लोके भविष्यसि"।
केशाः केसराः सन्त्यस्य।) सिंहः। इति शब्दरत्नावली।
केशी स्त्री (केश+णिनि। गौरादित्वात् ङीष्।) नीली। इति राजनिर्घण्टः। चूडालिकेशः। अश्वबालमाकृतिः। इति रत्नमाला।
केशोच्चय, पुं, (केशानां उच्चयः समूहः।) केशसमूहः। इति हेमचन्द्रः।
केश्य, क्ली, (केशाय हितं इति यत्।) कृष्णागुरु। भृङ्गराजे, पुं। इति राजनिर्घण्टः। (केशहितकारके, त्रि।)
केसर, क्ली, (के जले सरतीति। सृ+अच्।) हिङ्गु इति हेमचन्द्रः। नागकेशरपुष्पम्। काशीशम्। स्वर्णम्। इति राजनिर्घण्टः।
केसर, पुं, (के मस्तकशिरोऽवच्छेदे उच्छ्रितदेशे इत्यर्थः सरति। सृ+अच्।) नागकेशरवृक्षः। तुरङ्गस्कन्धकेशः। (यथा, रघुवंशे।४।६७।
"विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः।
दुधुवुर्वाजिनः स्कन्धान् लग्नकुङ्कुमकेसरान्"।)
सिंहस्कन्धकेशः। (यथा, पञ्चतन्त्रे।१।२०४।
"धावीतकेसरकराम्बुदा मृगेन्द्रा
नागाश्च भूरि मदराजि विराजमानाः"।)
बकुलवृक्षः। (यथा, रघुवंशे।९।३६।
"ललितविभ्रमबन्धविचक्षणं
सुरभिगन्धपराजितकेसरम्"।)
पुन्नागवृक्षः। किञ्जल्कः। इति हेमचन्द्रः।
केसर, पुं क्ली, (के जले सरतीति। सृ+पचाद्यच्। हलदन्तादिति अलुक्समासः।) किञ्जल्कः। ह्रस्व, पुं स्त्री। इति भरतः।
केसरवरं, क्ली, (केसरेषु वरं श्रेष्ठ गुणाधिक्यात्। यद्वा, केसरैः किञ्जल्कैः वृणोतीति। वृ+अच्।) कुङ्कुमम्। इति राजनिर्घण्टः।
केसराम्ल, पुं, (के जलनिमित्तक सरः अम्लः रसो यस्य।) बीजपूरः। इति राजनिर्घण्टः।
केसरिका, स्त्री, (के जले सरति आप्लवतया साधुकारितया वा। युन्। अलुक्समासः। ततष्टाप्। अत इत्वम्।) सहदेवीलता। इति राजनिर्घण्टः।
केसरिसुत, पुं, (केसरी वानरभेदः तस्य सुतः पुत्रः।) हनुमान्। इति हेमचन्द्रः। (यथा महाभारते।३।१५०।२०।
"अहं केसरिणः क्षेत्रे वायुना जगदायुषा।
जातः कमलपत्राक्ष! हनुमान् नाम वानरः"।)
केसरी, [न्] पुं, (केसराः सटाः सन्त्यस्य। केसर+इनि।) सिंहः। घोटकः। पुन्नागः। नागकेसरः। इति मेदिनी। रक्तशिग्रुः। इति राजनिर्घण्टः। वानरविशेषः। स तु हनुमत्पिता। (यथा, रामायणे।७।३५।१९।
"सुमेरुर्नाम शैलेन्द्रः सुवर्णमयोऽस्ति यत्र।
तत्र राज्यं प्रशास्त्यस्य केसरी नाम वै पिता"।)
कै, शब्दे। इति कविकल्पद्रुमः। (भ्वा-पर-अक-अनिट्।) कायति। [illegible] कायतेः किञ्चिद्विशेषोऽस्ति। [illegible] [illegible] [illegible]

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे ।) सत्समूहार्थवाचकाः शब्दा यथा,—
"पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे ।
ह्रस पद्य कलापस्य केशभूयस्त्ववाचकाः" ॥
इति हेमचन्द्रः ॥ * ॥ (कस्य जलस्य ईशः ।) वरुणः । क्रौवेरम् । इति मेदिनी ॥ (अस्य पर्य्याया यथा,—
"बालं क्रौवेरवर्हिष्ठोदीच्यं केशाम्बुनाम च" ॥
इति वैद्यकरत्नमालायाम् ॥) दैत्यविशेषः । इति हेमचन्द्रः ॥ (कस्य ब्रह्मणोऽपि ईशः । के जले शेते वा ।) विष्णुः । इति शब्दरत्नावली । (काशते प्रकाशते लोके लोकं काशयति वा । काश्+अच् पृषोदरात् शले साधु । सूर्य्याभिप्रश्नतिरश्मि ।
"ब्रह्म विष्णु शिव सखा ब्रह्मर्षि केशवर्णिता" ॥
इति भागवतोक्ते परब्रह्मशक्तिः । ब्रह्मा ।
"केशो योनौ तथा भावे छावलावण्ययोरपि ।
सम्पदे पुरुषे चैव समदाया विशेषतः" ॥
"प्रजापतौ रवौ चैव केशशब्दः प्रकीर्त्तितः" ॥
इति महाभारतटीकायां नीलकण्ठः ॥)

केशकलापः, पुं, (केशानां कलापः समूहः ।) केशपाशः । केशसमूहः । इति हेमचन्द्रः ॥

केशकारः, पुं, (केशं केशवत् केशाकृति वा करोति आत्मानं केशाकारेण वर्द्धयति इति भावः । केश+कृ+"कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) इक्षुभेदः । करिया कुशियार इति हिन्दी भाषा । अस्य गुणाः । गुरुत्वम् । शीतलत्वम् । रक्तपित्तक्षयापहत्वञ्च । इति भावप्रकाशः ॥

केशगर्भः, पुं, (केशो गर्भे अभ्यन्तरेऽस्य । कप् ।) कबरी । इति त्रिकाण्डशेषः ॥

केशघ्नं, क्ली, (केशं हन्ति नाशयतीति । हन्+टक् ।) इन्द्रलुप्तकम् । इति हेमचन्द्रः ॥

केशच्छिद्, [द्] पुं, केशं छिनत्ति । छिद्+क्विप् ।) नापितः । इति शब्दमाला ॥

केशटः, पुं, (को ब्रह्मा ईशः महादेवः तौ अटतः गच्छतः प्रलये यं । महाप्रलये मूलविशेषात् तथात्वम् । यद्वा ब्रह्मशिवाभ्यां अटति गच्छति यः सः । तयोरात्मैकात्मत्वात् ।) विष्णुः । (केशेषु काशादिरूपज्ञानेषु अटति चरतीति । अट्+अच् । शकन्ध्वादित्वात् साधुः ।) छागः । (केशेषु मूर्द्धजेषु अटतीति । अट्+अच् शकन्ध्वादित्वात् अलोपे साधुः ।) यूकाः । इति मेदिनी । माला । इति शब्दरत्नावली ॥ (केशेषु कामाधुरतनारीषु अटति । अट्+अच् ।) कामदेवस्य शोषणवाणः । इति विश्वः । (केश इव प्रतिमासु गटचित्रादिषु अटति गमनेनेति यावत् ।) शोषकवृक्षः । इति त्रिकाण्डशेषः ॥

केशधृत् पुं (केशमिव धरति । धृ+क्विप् ।) भूतकेशनामकवृक्षभेदः । इति शब्दचन्द्रिका ॥

केशनाम, [न्] क्ली,(केशनामैव नाम यस्य ।) बालकम् । इत्यमरः ॥ बाला इति भाषा ॥

केशपक्षः, पुं, (केशानां पक्षः समूहः । बाहुलकात् पक्षादेशो वा ।) केशपाशः इत्यमरः ।२।६।९८॥ (यथा, महाभारते । ४ । २६ । ४१ ।
"उत्तरन्तु प्रधावन्तमनुद्रुत्य धनञ्जयः ।
गत्वा शतपदं तूर्णं केशपक्षे परामृशत्" ॥)

केशपर्णी, स्त्री, (केश इव पर्णान्यस्याः । जातित्वात् ङीष् ।) अपामार्गः । इति शब्दरत्नावली ॥

केशपाशः,पुं,(केशानां पाशः समूहः ।) केशसमूहः । यथा,—
"पाशः पक्षश्च हस्तश्च कलापार्थाः कचात् परे" ।
इत्यमरः । २ । ६ । ९८ ॥ (यथा, कुमारे । १ । ४८ ।
"तं केशपाशं प्रसमीक्ष्य कुर्य्यु-
र्वालप्रियत्वं शिथिलं चमर्य्यः" ॥)

केशपाशी, स्त्री, (केशपाश+स्वाङ्गात् ङीष् ।) शिरोमध्यस्थशिखा । चूडा । इत्यमरः । २ । ६ । ९७ ॥

केशभूः, पुं, (केशानां भूरुत्पत्तिस्थानम् ।) शिरः । इति राजनिर्घण्टः ॥

केशमथनी, स्त्री, (केशा मथ्यन्तेऽनया । मथ विलोडने+करणे ल्युट् ततो ङीप् । अस्याः कण्टकैः समीपे गन्तुः केशोत्पाटनात् तथात्वम् ।) शमीवृक्षः । इति राजनिर्घण्टः ॥

केशमार्जक, क्ली, (केशं मार्ष्टि । मृज् शोधने+कर्त्तरि ण्वुल् ।) कङ्कतिका । इति जटाधरः । चिरुणी इति भाषा ॥

केशमार्जनं, क्ली, (केशो मृज्यतेऽनेन । मृज्+करणे ल्युट् वृद्धिश्च ।) कङ्कतिका । इति हेमचन्द्रः । केशशुद्धिश्च । (भावे ल्युट् । केशशोधनक्रियामात्रम् ।)

केशमुष्टि, पुं, (केशानां मुष्टिरिव ।) विषमुष्टिवृक्षः । महानिम्बः । इति राजनिर्घण्टः ॥

केशरं, पुं क्ली, (के जले शिरसि वा । शरति । शॄ+अच् । पृषोदरात् अलुक् । यद्वा केश इव केशाकारः अस्त्यस्येति । केश+र ।) किञ्जल्कः । इत्यमरः । १ । १० । ४२ ॥

केशरः, पुं, (केश इव केशाकृतिपदार्थः अस्त्यस्येति मत्वर्थीयो रः ।) नागकेशरवृक्षः ।
(यथा,—गीतगोविन्दे । १ । ३१ । "मदनमहीपतिकनकदण्डरुचिकेशरकुसुमविकाशे" ॥ बकुलवृक्षः । (यथा, कुमारे । ३ । ५५ ।
"स्रस्तां नितम्बादवलम्बमाना
पुनः पुनः केशरदामकाञ्चीम्" ॥)
पुन्नागवृक्षः । (यथा, महाभारते । १ । १२५ । ३ ।
"चम्पकैस्तिलकैश्चूतैश्चम्पकैः पारिभद्रकैः ।
कर्णिकारैरशोकैश्च केशरैरतिमुक्तकैः" ॥)
सिंहजटा । इति मेदिनी ॥ (यथा, कादम्बर्य्याम् "मृगपतिरिव स्कन्धावलम्बितकेशरमालः" ॥) हिङ्गुवृक्षः । इत्यमरटीकायां भरतः ॥ नीपः । केलिकदम्ब इति भाषा । यथा, मेघदूते । २१ ।
"नीपं दृष्ट्वा हरितकपिशं केशरैरर्द्धरूढैः" ॥)

केशरञ्जन, पुं, (केशान् रञ्जयति । रञ्ज+णिच्+ल्यु ।) भृङ्गराजवृक्षः । इति राजनिर्घण्टः । भीमराज इति भाषा ॥

केशराज, पुं, (केशो राजतेऽनेन । राज+करणे घञ् ।) शाकभेदः । केशुरे इति भाषा । तत्पर्य्यायः । भृङ्गराजः २ भृङ्गः ३ मार्कवः ४ मार्कवः ५ । इति रत्नमाला ॥ मार्कवः ६ । इत्यमरः ॥ नागमारः ७ पवनः ८ भृङ्गसोदरः ९ । इति त्रिकाण्डशेषः ॥ केशरञ्जनः १० केशः ११ कुन्तलवर्द्धनः १२ । इति वैद्यकम् ॥ भृङ्गारकः १३ एकरजः १४ करञ्जकः १५ भृङ्गरजः १६ भृङ्गारः १७ । इति जटाधरः ॥ अङ्गारः १८ भृङ्गरजा १९ मकरः २० । इति शब्दरत्नावली ॥ अपि च ।
"भृङ्गराजो भृङ्गरजो मार्कवो भृङ्ग एव च ।
भृङ्गारकः केशराजो भृङ्गारः केशरञ्जनः ॥
भृङ्गराजः कटुस्तिक्तो रूक्षोष्णः कफवातनुत् ।
केश्यस्त्वच्यः कृमिश्वासकासशोथामयापहः ॥
दन्त्यो रसायनो बल्यः कुष्ठनेत्रशिरोऽर्त्तिजित्" ॥
इति भावप्रकाशः ॥ अस्य गुणाः । अविदाहित्वम् । केश्यत्वम् । पाण्डुकफापहत्वम् । रक्तापहत्वञ्च । इति राजवल्लभः ॥

केशराम्ल, पुं, (केशरे तदवच्छेदे अम्लरसो यस्य ।) मातुलुङ्गवृक्षः । इति जटाधरः ॥

केशरी,[न्]पुं,(केशराः सन्त्यस्य इति इनिः ।) सिंहः । इत्यमरः । १ । ५ । १ ॥ (यथा, रघुवंशे २ । २९ ।
"स पाटलायां गवि तस्थिवांसं
धनुर्द्धरः केशरिणं ददर्श" ॥)
घोटकः । पुन्नागवृक्षः । नागकेशरवृक्षः । इति मेदिनी । बीजपूरकवृक्षः । इति जटाधरः ॥

केशरुहा, स्त्री, (केश इव रोहति यत् । केशरुह+"इगुपधेति" । ३ । १ । १३५ । इति कः ।) महाशतावरी । इति राजनिर्घण्टः ॥

केशरूपा, स्त्री, (केशवद्रूपमस्याः ।) वन्दाकवृक्षः । इति राजनिर्घण्टः । (परगाछा इति भाषा ॥)

केशवः, पुं, (को ब्रह्मा ईशः रुद्रः तौ आत्मनि स्वरूपे वयति प्रलये उपाधिरूपमूर्त्तित्रयं मुक्त्वा एकमात्रं परमात्मस्वरूपेणावतिष्ठते इति । यथा, भागवते २ अध्याये चतुःश्लोक्याम् ।
"अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ।
ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः ॥
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ॥
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत् स्यात् सर्व्वत्र सर्व्वदा ॥
एतन्मतं समातिष्ठ परमेण समाधिना ।
भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित्" ॥
तथा, केशं केशिनं वाति हन्ति । केश+वा+कः ।
यथा, हरिवंशे । ८० । ६६ ।
"यस्मात्त्वया हतः केशी तस्मान्मच्छासनं शृणु ।
केशवो नाम नाम्ना त्वं ख्यातो लोके भविष्यसि" ॥
यद्वा, के जले शवस्य मातीति । प्रलयकाले क्षीरोदशायितया तथात्वम् । यद्वा प्रशस्ता ये केशा ब्रह्मविष्णुशिवाः विद्यन्तेऽस्य । यद्वा, कश्च ईशश्च तौ केशौ ब्रह्मरुद्रौ तौ वरतौ स्तः । "केशाद्वोऽन्यतरस्याम्" । ५ । २ । १०९ ।

इति वप्रत्ययः। अथवा वाति गच्छति तद्वत्तया। वा+कः। स्वरूपतस्तयो र्भेदाभावादपि वासुदेवे सर्व्वात्मनि परमेश्वरेऽस्य वृत्तिः। अतो विष्णुवचितायाम्।
"नरसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः"।
किञ्च।
"त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः"।
पूज्यपादैर्भाष्यकृद्भिरपि केशवशब्दस्य निरुक्तिद्वयमवलम्ब्य नामद्वयं समर्थितं तयोराद्ये। अभिरूपाः केशा यस्य स केशवः। कश्च अश्च ईशश्च केशास्त्रिमूर्त्तयस्ते वशे वर्त्तन्ते यस्य सः। केशिदानवहननाद्वा केशवः।
"यस्मात् त्वयैव दुष्टात्मा हतः केशी जनार्द्दन।
तस्मात् केशवनाम्ना त्वं लोके ख्यातो भविष्यसीति"।
भागवतादिषु। द्वितीये। केशसंज्ञिताः सूर्य्यादिरश्मयः अस्य सन्ति तद्योगेन केशवो वा।
'अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः।
सर्व्वज्ञाः केशवं तस्मात् प्राहुर्म्मां द्विजसत्तमाः"।
इति महाभारतम्। "कद्रः केशिनः"। इति श्रुतेश्च ब्रह्मविष्णुशिवाख्या हि शक्तयः केशसंज्ञिताः। "सत्केशाः वद्धधातवे" इति भागवते च। यथा, हरिवंशोक्तौ,—
"को ब्रह्मेति समाख्यातः ईशोऽहं सर्व्वदेहिनाम्।
आवां तवांशसम्भूतौ तस्मात् केशवनामवान्"।
तेनास्य बहुधा निरुक्तिः।) विष्णुः। इत्यमरः। १।१।१८। प्रशस्तकचः। (केशाः प्रशस्ताः सन्त्यस्य। "केशाद्वोऽन्यतरस्याम्"। ५।२।१०९। इति वः।) केशवति त्रि। इति मेदिनी। (शवशब्दे च। यथा, विदग्धमुखमण्डनम्।
"केशवं पतितं दृष्ट्वा द्रोणो हर्षमुपागतः।
रुदन्ति पाण्डवाः सर्व्वे हा! हा! केशव! केशव!"।
के जले शवं पतितं दृष्ट्वा द्रोणः काकः हर्षं प्राप्तवान् पाण्डवाः शृगालाः रुदन्ति चीत्कारं कुर्व्वन्तीत्यर्थः।)
केशवर्द्धिनी, स्त्री, (केशा वर्द्धन्तेऽनया। केश+वृध्+करणे ल्युट् टित्वात् ङीप्।) सहदेवीलता। इति राजनिर्घण्टः।
केशवायुधः, (केशवस्य विष्णोरायुधाकारं कुसुमं यस्य।) आम्रवृक्षः। इति शब्दमाला। (केशवस्य विष्णोः आयुधं अस्त्रम्। इति विग्रहे पुं, तिष्ठोरस्त्रे क्ली।)
केशवालयः, पुं, (केशवस्य आलयः वासस्थानम्।) अश्वत्थवृक्षः। इति त्रिकाण्डशेषः।
केशवावासः पुं, (आवसत्यस्मिन् इति। आ+वस+अधिकरणे घञ्।) केशवस्य आवासः अश्वत्थवृक्षः। इति जटाधरः।
केशवेशः, पुं, (केशस्य कुन्तलस्य वेशः रचनासंस्कारः वेष्टनादिभिर्विन्यास इति यावत्।) कबरी। इत्यमरः। कुन्तलरचना इति भाषा। (यथा, आश्वलायनगृह्ये। १।१७।१७। "कुलधर्म्मं केशवेशान् कारयेत्"। "शिखाशिखासहिता वा मुण्डिता वा" इति गोभिलः। "मूर्द्धनि कर्त्तव्यम्" इति कुलधर्म्मा। "तेषु यो यस्य कुलधर्म्मस्तेन तस्य केशवेशान् कारयेत्" इति नारायणवृत्तिः।)
केशहन्त्री, स्त्री, (केशस्य हन्त्री नाशिनी। यद्वा केशान् हन्ति या। केश+हन्+तृच् ततो ङीप्।) शमीवृक्षः। इति राजनिर्घण्टः।
केशहस्तः, पुं (केशानां केशस्य वा हस्तः समूहः। हस्तादयश्च केशात् समूहार्थे।) केशसमूहः। इत्यमरः।
केशाकेशि, अव्य, केशेषु केशेषु गृहीत्वा प्रवृत्तं युद्धम्। ("तत्र तेनेदमिति सरूपे"। २।२।२७। इति कर्म्मव्यतिहारे इच् समासे पूर्व्वदीर्घः।) अन्योन्यकेशग्रहणपूर्व्वकप्रवृत्तयुद्धम्। इति व्याकरणम्। चुलाचुलि इति भाषा।
(यथा, महाभारते। ३। २८३। ३७।
"केशाकेश्यभवद्युद्धं रक्षसां वानरैः सह"।)
केशारुहा, स्त्री, (केशाः आरोहन्त्यनया। आ+रुह+करणे अप् अर्थे क।) सहदेवीलता। इति राजनिर्घण्टः।
केशार्हा, स्त्री, (केशं केशवर्द्धनं अर्हति इति। केश+अर्ह+"कर्म्मण्यण्"। ३।२।१। इति अण्।) महानीली। इति राजनिर्घण्टः।
केशिकः, त्रि, (प्रशस्ताः केशाः अस्यास्तीति ठन्।) प्रशस्तकेशयुक्तः। इत्यमरः। २।६।४५।
केशिका स्त्री, (केशीव कायति प्रकाशते। केशिन्कै+कः।) शतावरी। इति राजनिर्घण्टः।
केशिनिसूदनः, पुं, (केशीत्याख्यं दानवं कंसासुरचरं निसूदयति हन्ति। नि+सूद+कर्त्तरि ल्युः।) श्रीकृष्णः। (यथा, गीतायां १८।१।
"सन्न्यासस्य महाबाहो! तत्त्वमिच्छामि वेदितुम्।
त्यागस्य च हृषीकेश! पृथक् केशिनिसूदन"।
केशिदानवबधविवरणं हरिवंशे ८० अध्याये द्रष्टव्यम्।)
केशिनी, स्त्री, (केशाकाराः सन्त्यस्याः।) जटामांसी। इति राजनिर्घण्टः। चोरपुष्पी। प्रशस्तकेशविशिष्टा। इत्यमरः। २।६।४५।
केशिमथनः, पुं, (केशिनं तदाख्यं प्रसिद्धं दैत्यं मथ्नातीति। केशिन्+मथ्+कर्त्तरि ल्युः।) श्रीकृष्णः। इति त्रिकाण्डशेषः। (केशिदानववधविवरणं हरिवंशे ८० अध्याये द्रष्टव्यम्।)
केशिहा, [न्] पुं, (केशिनं हतवान्। हन्+क्विप्।) श्रीकृष्णः। इति हेमचन्द्रः।
केशी, [न्] त्रि, (प्रशस्ताः केशाः सन्त्यस्य।) प्रशस्तकेशयुक्तः। इत्यमरः। २।६।४५।
केशी, [न्] पुं, (केशाः सन्त्यस्य प्राशस्त्येनास्त्यस्यास्तीति।) विष्णुः। इति त्रिकाण्डशेषः। दैत्यभेदः। इति मेदिनी। (यथा, हरिवंशे। ८०। ६३।
"तस्मात्त्वया हतः केशी तस्मात् मच्छासनं शृणु।
केशवो नाम नाम्ना त्वं ख्यातो लोके भविष्यसि"।
केशाः केशरा सन्त्यस्य।) सिंहः। इति शब्दरत्नावली।
केशी, स्त्री, (केश+स्त्रियां जातित्वात् ङीष्।) चूडा। इति राजनिर्घण्टः। भूतकेशी।
अजलोमा वृक्षः। इति रत्नमाला।
केशोच्चयः, पुं, (केशानां उच्चयः समूहः।) केशसमूहः। इति हेमचन्द्रः।
केश्यम्, क्ली, (केशाय हितं इति यत्।) कृष्णागुरु। भृङ्गराजे, पुं। इति राजनिर्घण्टः। (केशहितकारके, त्रि।)
केसर, क्ली, (के जले सरतीति। सृ+अच्।) हिङ्गु इति हेमचन्द्रः। नागकेसरपुष्पम्। कासीसम्। स्वर्णम्। इति राजनिर्घण्टः।
केसरः, पुं, (के शिरसि अलुक्समासे उच्छितदेशे इत्यर्थः सरति। सृ+अच्।) नागकेसरवृक्षः। तुरङ्गस्कन्धकेशः। (यथा, रघुवंशे। ४। ६७।
"विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः।
दुधुवुर्वाजिनः स्कन्धान् लग्नकुङ्कुमकेसरान्"।)
सिंहस्कन्धकेशः। (यथा, पञ्चतन्त्रे। १। २०४।
"आकीर्णकेसरकरालमुखा मृगेन्द्राः
नागाश्च भूरि मदराजि विराजमानाः"।)
बकुलवृक्षः। (यथा, रघुवंशे। ९। ३६।
"ललितविभ्रमबन्धविचक्षणं
सुरभिगन्धपराजितकेसरम्"।)
पुन्नागवृक्षः। किञ्जल्कः। इति हेमचन्द्रः।
केसरः, पुं क्ली, (के जले सरतीति। सृ+पचाद्यच्। हलदन्तादिति अलुक्समासः।) किञ्जल्कः। किञ्जल्कः, पुं क्ली। इत्यमरः।
केसरवरं, क्ली, (केसरेषु वरं श्रेष्ठं गुणाधिक्यात्। यद्वा, केसरेषु किञ्जल्केन वृणोतीति। वृ+अच्।) कुङ्कुमम्। इति राजनिर्घण्टः।
केसराम्लः, पुं (के जलनिमित्तं सरः अम्लः तद्वा यस्य।) बीजपूरः। इति राजनिर्घण्टः।
केसरिका, स्त्री, (के जले सरति नादयता वायुकारिणता वा। सृ+ण्वुल्। अलुक्समासः। स्वार्थे कन् इत्यम्।) सहदेवीलता। इति राजनिर्घण्टः।
केसरिसुतः, पुं (केसरी तन्नामख्यातो वानरभेदः तस्य सुतः पुत्रः।) हनूमान्। इति हेमचन्द्रः। (यथा, महाभारते ३। १४७। ७०।
"अहं केसरिणः क्षेत्रे वायुना जगदायुषा।
जातः कमलपत्राक्ष! हनूमान् नाम वानरः"।)
केसरी, [न्] पुं, (केसराः सटाः सन्त्यस्य। केसर+इनि।) सिंहः। घोटकः। पुन्नागः। नागकेसरः। इति मेदिनी। रक्तशिग्रुः। इति राजनिर्घण्टः। वानरविशेषः। स तु हनूमत्पिता।
(यथा, रामायणे। ७। ४। १८।
"सुमेरुनामा वरदो मुनिर्वाम प्रवर्त्तते।
यत्र राज्यं प्रशास्त्यस्य केसरी नाम वै पिता"।)
कै, शब्दे। इति कविकल्पद्रुमः। (भ्वा-पर-अक-अनिट्।) कायति। इकारान्तकर्त्तृत्वे दीर्घो नास्ति। इत्येके भाषाविहितमात्मने पदं इत्यन्ये वदन्ति तत्र अर्थमपि कायति। तेन कायकः, ण्वुल् इत्यादिकं भवति कैं च धातोः। इति इकारस्य इतो अर्द्धीकारे तथा करणे च इति। तस्य कैवल्याद्वैतम्। अनुपजाते सकाररूपेण च परे नैर्गुण्यं इति विधानम्। प्रत्याख्यात

मेदार्थौ भासौ पाठ इति केचित्। इति दुर्गादासः।

कैकयी, स्त्री, (जनपदात् क्षत्त्रियात् अञ्। यद्वा केकय + स्वार्थे अण्। केकय + वाञ्ञ्कात् न यादेरियादेशः। तस्यापत्यं स्त्री ङीप्।) कैकयी। इति शब्दरत्नावली॥

कैकेयी, स्त्री, (केकेयः केकयराजः तस्यापत्यं स्त्री ङीप्।) केकयी। सा तु केकयराजकन्या दशरथराजपत्नी च। इति शब्दरत्नावली॥
(यथा, रघौ १२।२।
'स कथमूलमागत्य रामे श्रीर्न्यस्यतामिति।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा'॥)

कैङ्कर्य्यं, क्ली, (किङ्करस्य भावः किङ्करस्येदं किङ्करस्य कर्म्म वा। किङ्कर + ष्यञ्।) किङ्करत्वम्। दासत्वम्॥ (यथा, भागवते। ३।२।२२।
"सत् तस्य कैङ्कर्य्यमलं भृतान् नो
विग्लापयत्यङ्ग! यदुग्रसेनम्"॥)

कैटज, पुं, (कुटज एव स्वार्थे अण् वृद्धिः। पृषोदरात् उकारस्य ऐकारत्वम्।) कुटजवृक्षः। इति भावप्रकाशः॥

कैटभ पुं, स्वनामख्यातो दैत्यविशेषः। (अयन्तु विष्णोः कर्णमलोद्भूतयोरसुरयोरन्यतरः। पाद्मकल्पे जात अत्र महार्णवे योगनिद्रया स्थितस्य भगवतो नाभिपद्मादाविर्भूतं चतुराननं ब्रह्माणं यदा हन्तुमुद्यतः तदा योगनिद्रां विहाय समुत्थितेन भगवता जघनोपरि समुत्थाप्य निहतोऽयं दुर्दान्तोऽसुरः।) यथा,— मार्कण्डेयपुराणम्।
"योगनिद्रां यदा विष्णुर्जगत्येकार्णवीकृते।
आस्तीर्य्य शेषमभजत् कल्पान्ते भगवान् प्रभुः।
तदा द्वावसुरौ घोरौ विख्यातौ मधुकैटभौ।
विष्णुकर्णमलोद्भूतौ हन्तुं ब्रह्माणमुद्यतौ"॥
(एतस्योत्पत्त्यादिकं सविस्तरं हरिवंशे ५२ अध्याये द्रष्टव्यम्॥)

कैटभजित् पुं, (कैटभं स्वनामख्यातमसुरं जितवान्। जि + भूते क्विप्। तुगागमश्च।) विष्णुः। इत्यमरः॥ (अस्य विवरणं हरिवंशे ५२ अध्याये द्रष्टव्यम्॥)

कैटभहा, [न्] पुं (कैटभं स्वनामख्यातं महासुरं हन्ति हतवान् वा। हन् + क्विप् भूते।) विष्णुः। इति हेमचन्द्रः॥ (स च सर्व्वशक्तिमान् भगवान् स्वरूपतो निर्गुणोऽपि सृष्ट्यादिकार्य्यसम्पादनाय गुणाधिष्ठातृत्वमभ्युपैति, तत्र तु यदा जीवादृष्टवशात् यद्यद्गुणोद्रेकात्मिका क्रियाप्रवृत्तिरुपतिष्ठते नितरां गुणाधिष्ठातृतया भगवानपि तदा तत्तद्गुणोपयोगिक्रियावानिव प्रतिभाति। पर देहाभिमानवतां जीवानामिव तस्य प्रकृतेरपि स्वरूपे मनो न स्पृशतीति सर्व्वोत्कर्षात् गुणनियन्तृत्वादिरूपदेहाभिमानराहित्याच्च। अत एव स कैटभजिन्मधुजिदित्याद्युपाधिभिरभिधीयते वस्तुतस्तु जीवैरेव किञ्चित् क्रियते तत् सर्व्वमेव तदर्पणमेवेति मन्यते। ईश्वरस्तु सत्या इव रम्या एवाधीनाः सन्तः यदृच्छयैव क्रियामुत्पादयन्ति सम्पादयन्ति च॥)

कैटभा, स्त्री, (कुटा गृहास्तत्राश्रयं दृश्यादिकं कैटं। कुट + अण् वृद्धिः पृषोदरात् औकारस्य ऐकारत्वं। तेन तैर्वा भाति प्रकाशते वा। भा + क्विप्।) दुर्गा। इति त्रिकाण्डशेषः॥

कैटभारिः, पुं, (कैटभस्य स्वनामख्यातस्यासुरभेदस्य अरिः शत्रुः। पक्षे कैटभस्य तमस अरिर्दमयिता। सगुणावस्थायामपि ईश्वरस्य विष्णोः सत्त्वगुणप्राधान्यात् तथात्वम्।) विष्णुः। इति हलायुधः॥

कैटभी, स्त्री, (कैटभ तदाख्यया प्रसिद्ध असुरः प्रतिपक्षः हननक्रियाकर्म्मतेन प्रकाशोऽस्याः।) यद्वा, कुटं तमःप्रधानमानमधिष्ठाय तामसी प्रकृतिरिति विष्णुना देवकार्य्यसाधनानुरोधात् सदात्वया भातीति। कुट + अण् वृद्धौ कौटं पृषोदरात् औकारस्य ऐकारत्वं कैटं भा + कः। ततो ङीप् कैटभी तामसीत्यर्थः॥) दुर्गा। इति त्रिकाण्डशेषः। (मधुकैटभभीतब्रह्मणा स्तुत्या प्रसादितया तामस्या विमोहितौ तौ दुर्दान्तावसुरौ विष्णुना निहतौ। यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ८१ अध्याये।
"एवं स्तुता तदा देवी तामसी तत्र वेधसा।
विष्णोः प्रबोधनार्थाय निहन्तुं मधुकैटभौ।
नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथोरसः।
निर्गम्य दर्शने तस्थौ ब्रह्मणोऽव्यक्तजन्मनः"॥
इत्युपक्रम्य।
"समुत्थाय ततस्ताभ्यां युयुधे भगवान् हरिः।
पञ्चवर्षसहस्राणि बाहुप्रहरणो विभुः॥
तावप्यतिबलोन्मत्तौ महामायाविमोहितौ।
उक्तवन्तौ वरोऽस्मत्तो व्रियतामिति केशवम्"॥)

कैटभेश्वरी, स्त्री, (कैटभस्य कैटभपुर्य्या ईश्वरी कर्त्री। पक्षे कैटभस्य तमोगुणस्य ईश्वरी नियन्त्री।) दुर्गा। यथा।
"कैटभन्तु वशं कृत्वा गृहीता तत्पुरी यथा।
तेन सा गीयते देवी पुराणे कैटभेश्वरी"॥
इति देवीपुराणे ४५ अध्यायः॥

कैटर्य्यः, पुं, (किट् त्रासे + भावे घञ्। केटं त्रासं राति ददाति तिक्तादीनामाधिक्यात्। रा दाने + कः। ततः स्वार्थे ष्यञ्।) कट्फलः। इत्यमरः। २।४।४०॥ निम्बः। महानिम्बः। इति रत्नमाला॥ मदनवृक्षः। इति राजनिर्घण्टः॥

कैडर्य्यः, पुं, (कैटर्य्य + पृषोदरात् टस्य डः साधुः।) कट्फलः। पूतिकरञ्जः। कटभीदृक्षः। इति राजनिर्घण्टः॥

कैतक, क्ली, (केतक्या इदं "तस्येदम्"।४।३।१२०। इत्यण्) केतकीपुष्पम्। यथा। कैतकं तिक्तकटुकमिति राजवल्लभः॥

कैतव, क्ली, (कितव + स्वार्थे अण्।) कपटः। (कितवस्य भावः कर्म्म वा। युवादित्वादण्।) द्यूतम्। इत्यमरः।२।१०।४५॥ वैदूर्य्यमणिः। इति राजनिर्घण्टः॥ (कितवस्य भावः। शठता। यथा, भागवते १।१।२। "धर्म्मः प्रोज्झितकैतवोऽत्र परमो निर्म्मत्सराणां सतां वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्"॥)

कैदार, क्ली, (केदाराणां क्षेत्राणां समूहः। इति अण्।) क्षेत्रसमूहः। इत्यमरटीकायां भरतः॥ (केदारे क्षेत्रे प्रयत्नेनाभीतं धान्यं तत्कैदारम् तण्डुलादिकमुक्तं भावप्रकाशे यथा—
"केदार क्षेत्रमुद्दिष्टं कैदारं तत्र सम्भवम्।
कैदारं वाय्यभिष्यन्दि मधुरं गुरुदोषकृत्"॥)

कैदारः, पुं, (केदारे क्षेत्रे भवः इत्यण्।) शालिधान्यम्। इति राजनिर्घण्टः॥ (केदारसम्भविनो ये व्रीहयः कैदारा इत्यर्थः। यथा, भावप्रकाशे।
"कैदारा वातपित्तघ्ना गुरवः कफशुक्रदाः।
कषाया अल्पवर्च्चस्का मेध्याश्चैव बलावहाः"॥)

कैदारकं, क्ली, (केदाराणां समूहः केदारस्य इदं वा केदार + वुञ्।) केदारसमूहः। क्षेत्रगणः। इत्यमरः। २।९।११॥

कैदारिकं, क्ली, (केदाराणां समूहः केदारे भवः तस्येदं वा। केदार + ठञ्।) कैदारकम्। इत्यमरः। २।९।११॥

कैदार्य्यं, क्ली, (केदाराणां समूहः। केदार + ष्यञ्।) क्षेत्रम्। क्षेत्रसमूहः। इत्यमरः। २।९।११॥

कैमुतिकः, पुं, (किमुत इत्यस्य तस्मात् आगतः। ठञ्।) न्यायविशेषः। तथा च छन्दोगपरिशिष्टम्।
'वेदाश्छन्दांसि सर्व्वाणि ब्रह्माद्याश्च दिवौकसः।
जलार्थिनोऽथ पितरो मरीच्याद्यास्तथर्षयः।
उपाकर्म्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः।
पिपासवोऽनुगच्छन्ति संहृष्टाः स्वशरीरिणः॥
समवायश्च यत्रैषां तत्राश्रुचवो मलाः।
नूनं सर्व्वे क्षयं यान्ति किमुतैकं नदीरजः"॥
इति प्रायश्चित्ततत्त्वम्॥

कैरव, क्ली, (के जले रौति शब्दायते शोभते वा। क + रु + अच् केरवः हंसः तत्प्रिये शशीव शुक्लं प्रियमित्यर्थः।) कुमुदम्। श्वेतोत्पलम्। इत्यमरः। १।१०।३७॥ (यथा, महाभारते १।१।८९।
"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः।
नृबुद्धिकैरवाणाञ्च कृतमेतत् प्रकाशनम्"॥)

कैरवः, पुं, (कुत्सितो रवो यस्य स एव स्वार्थे अण्। पृषोदरात् औकारस्य ऐकारत्वम्।) धूर्त्तः। कितवः। इति मेदिनी॥

कैरविणी, स्त्री, (कैरव पुष्कराद्वित्वात् इनिः। ततो ङीप्।) कुमुदिनी। इति शब्दरत्नावली॥ (कैरवाणि सन्त्यस्याम् इति इनि ङीप् च। कुमुदवती पुष्करिणी॥)

कैरवी, स्त्री, (कैरवस्य प्रिया इत्यण् ङीप् वा) चन्द्रिका। इति मेदिनी॥ मेथिका। इति राजनिर्घण्टः॥

कैरवी, [न्] पुं, (कैरव प्रियत्वेन अस्त्यस्येति वा अस्त्यस्य इति इनिः।) चन्द्रः। इति शब्दमाला॥

कैराटकः, पुं, (किर मर्म्मभूमि चरमावस्थां वा इत्याभिव्यक्तं अटति प्राप्नोति यस्मात्। किर + अट् + अच्। ततः स्वार्थे कन् अण् च।) स्थावरविषभेदः। इति हेमचन्द्रः॥

[कैरा]त, क्ली, (किराते पर्य्यन्तभूमौ भव इत्यण् ।) भूनिम्ब । इति शब्दचन्द्रिका । श्वेतचन्दनम् । इति राजनिर्घण्टः ॥

[कै]रात, पुं, (किराते पर्य्यन्तभूमौ भवः । इत्यण् ।) भूनिम्बः । इति राजनिर्घण्टः ॥ (किरात इव शूर इत्यर्थे अण् ।) बलवान् पुरुषः । तत्पर्य्यायः । शोभाञ्जनः २ काम्बः ३ । इति शब्दावली ॥ (किरातस्य वेश इव वेशो यस्य । अर्श आद्यच् तत स्वार्थे अण् । किरातवेशधारिणि, त्रि ।

यथा, महाभारते ३ । ३ । ३० ।
"ईश्वरार्ज्जुनयोर्युद्धं पश्य कैरातसञ्ज्ञितम्" ॥
तथा, मनसाध्याने । 'कैराती वरदाभयोद्यतकरा देवी त्रिनेत्रा भजे" ॥)

कैराव, क्ली, (किर पर्य्यन्तभूमि अवति पर्य्यन्तप्रोतीति । अव्+"कर्म्मण्यण्" इत्यण् । तत स्वार्थे अण् ।) विट्लवणम् इति वैद्यकम् ॥

कैरावी, स्त्री, (कैराव + स्त्रियां गौरादित्वात् ङीष् ।) विष्णुक्रान्ता । इति राजनिर्घण्टः ॥

कैलास, पुं, (के जले लासो लसनं दीप्तिरस्य । "अधिकरणे घञ्" ॥ ६ । ३ । ९ । इति अलुक् केलासः स्फटिकमणिः तद्वत् शुभ्रः इत्यण् । यद्वा केलीनां समूहः । केल । "तस्य समूहः" ४ । २ । ३७ । इत्यण् ततः स्वार्थे ष्यञ् । केलीनामासमन्तात् लासः । अस्+अधिकरणे घञ् ।) सुमेरुसमीपस्थपर्व्वतः । इत्यमरः । १ । १ । ७१ ॥ स च शिवकुवेरयो स्थानम् । तस्य परिमाणं यथा । "जठरदेवकूटौ मेरोः पूर्व्वेणाष्टादशयोजनसहस्रमुदगायतौ द्विसहस्रं पृथुत्वौ भवतः । एवमपरेण पवनपारियात्रौ दक्षिणेन कैलासकरवीरौ प्रागायतौ" । इति श्रीभागवतम् ॥ (अयं हि कैलास हिमालयस्य उत्तरस्थामुक्तः ॥)

कैलासनिकेतन, पुं, (कैलासः निकेतनं यस्य ।) शिवः । इति शब्दरत्नावली ॥

कैलासौकाः, [स्] पुं, (कैलास ओकः स्थानं यस्य बहुव्रीहौ ।) कुवेरः । इति हेमचन्द्रः ॥

कैवर्त्त, पुं (के जले वर्त्तते । वृत्+अच् अलुक् समासः । ततः स्वार्थे अण् ।) वर्णसङ्करजातिविशेषः । स तु वैश्यागर्भे क्षत्रियवीर्य्यजातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । दाशः २ धीवरः ३ । इत्यमरः । २ । १० । १५ ॥ दाशेरकः ४ जालिकः ५ । इति जटाधरः ॥ (यथा, मनुः । १० । ३४ ।
"निषादो मार्गवं सूते दाशं नौकर्म्मजीविनम् ।
कैवर्त्तमिति यं प्राहुरार्य्यावर्त्तनिवासिनः" ॥
अस्य टीकायां कुल्लूकभट्टेन धृतम् तद्यथा ।
"मार्गवो निषादो जातो निषादः मार्गवः दाशनामानमेवमन्यं मार्गवं दाशापरनामानं नौकर्म्मजीविनं जनयति । यमार्य्यावर्त्तदेशवासिनः कैवर्त्तमित्येव कीर्त्तयन्ति" ॥)

कैवर्त्तमुस्त, क्ली, (के जले जलप्रायभूमौ वर्त्तते जायते इति केवर्त्तं ततः स्वार्थे अण् । कैवर्त्तं च तत् मुस्तञ्चेति कर्म्मधारयः ।) कैवर्त्तमुस्तकम् । इति शब्दार्णवः ॥

कैवर्त्तमुस्तक, क्ली, (कैवर्त्तमुस्त + स्वार्थे कन् । यद्वा कैवर्त्तस्य प्रिय मुस्तकम् ।) कैवर्त्तीमुस्तकम् । इत्यमरटीकायां भरतः ॥

कैवर्त्तिका, स्त्री, (कैवर्त्ती जलस्था इव । इवार्थे कन् ततो ह्रस्व ।) मालवे प्रसिद्धो लताविशेषः । तत्पर्य्यायः । सुरङ्गा २ रसा ३ वल्ली ४ दयावती ५ रङ्गिणी ६ बहुरङ्गा ७ सुभगा ८ । अस्या गुणाः । लघुत्वम् । हृद्यत्वम् । कषायत्वम् । कफ कासश्वासमन्दाग्निदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥

कैवर्त्तिमुस्तक, स्त्री, (कैवर्त्त्याः कैवर्त्तपत्न्याः प्रियं मुस्तकम् । सञ्ज्ञायां "ङ्यापोः" ६ । ३ । ६३ । इति वा ह्रस्वः ।) कैवर्त्तीमुस्तकम् । इत्यमरटीका ॥

कैवर्त्ती, स्त्री, (के जले वर्त्तते इति । वृत्+अच् । केवर्त्ता जलस्था सा एव इति स्वार्थे अण् ततो ङीप् ।) परिपेलम् । इति वैद्यकम् ॥ कैवर्त्तपत्नी च ।

कैवर्त्तीमुस्तक, स्त्री, (कैवर्त्ता कैवर्त्तपत्न्याः प्रिय मुस्तकम् । सञ्ज्ञायां "ङ्यापोः" । ६ । ३ । ६३ । इति विकल्पे ह्रस्वविधेरत्र ह्रस्वाभाव ।) मुस्ताभेदः । इति भरत ॥ केवोटमुथा इति भाषा । केसुर इति लोकोक्तिः । केसुरिया मुथा । इति सारसुन्दरी । तत्पर्य्यायः । कुटन्नटम् २ दाशपुरम् ३ वानेयम् ४ परिपेलवम् ५ प्लवम् ६ गोपुरम् ७ गोनर्द्दम् ८ इत्यमरः । २ । ४ । १३१ ॥ दाशपुरम् ९ दाशपूरम् १० दाशपुरम् ११ दशपूरम् १२ परिपेलम् १३ पारिपेलम् १४ कैवर्त्तमुस्तकम् १५ कैवर्त्तिमुस्तकम् १६ । इति तट्टीका ॥ वनसम्भवम् १७ । इति रत्नकोषः ॥ श्राद्धम् १८ शीतपुष्पम् १९ कोषपुष्पकम् २० मन्दम् २१ विषपुष्पम् २२ । इति जटाधरः ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातज्वरदाहागमूत्रकृच्छ्रनाशित्वञ्च । इति राजनिर्घण्टः ॥ हिमत्वम् । तिक्तत्वम् । कषायत्वम् । कान्तिदत्वम् । पित्तविसर्पकुष्ठकण्डूविषनाशित्वञ्च । इदन्तु विशु प्रकाशादौ कदाच लघु मुस्तास्तीति । इति भाव प्रकाशः ॥

कैवल, क्ली, (कं शिरो ऽवच्छेदे वलते भक्षयतीति केवारि रतिसौरभकरत्वात् के जले वलते गुणाधिक्यात् वर्त्तते वा । वल+अच् ततः स्वार्थे अण् ।) विट्लवणम् । इति रत्नमाला ॥ (केवलस्य भावः इति केवलशब्दात् प्रज्ञादित्वात् अण् ।)

कैवल्यं, क्ली (केवलस्य कर्म्मोपाधिवर्ज्जितस्य भावः इति । केवल+ष्यञ् ।) मुक्तिः । इत्यमरः ।१।५।६।
(तथा च पातञ्जले कैवल्यपादे १ सूत्र यथा,
"निमित्तमप्रयोजकं प्रकृतीनां
वरणभेदस्तु ततः क्षेत्रिकवत्" ।
निमित्त धर्म्मादि तत्तत्प्रकृतीनामपरिणामेन प्रयोजकं न हि कार्य्येण कारणं प्रवर्त्यते । वरण भेदस्तत्ता क्षेत्रिकवत् तत्त्वप्रत्ययकस्मात् धर्म्मात् वरणमावरणं अधर्म्म तस्य भेदः विरो धित्वात् भेदः यद्वत् क्षेत्रे तत्फलनिष्पत्तये प्रतिबन्धं अपनयति [illegible] । क्षेत्र

कवत । यथा, क्षेत्रिकः कृषीवलः केदारात् केदारान्तरं जलं निनीषुः समनिम्नताप्रदेशस्थं स्वयमेव करोति । तस्मिन् भिन्ने जलं स्वयमेव प्रसरद्रूप परिणामं गृह्णाति न तु जलप्रसरणे तस्य कश्चित् प्रयत्नः । यावत् तावत् योगादिसमाधेः अधर्म्मो प्रावरकभेदो न भवेत् तावत् कुशलकर्म्मादि विषयसम्यग्ज्ञानप्रभावात् कर्म्म तावत न च नास्ति यावत् कदैव कैवल्यादीति ध्येयम् । तथा च तत्रैव । ११ ।
"हेतुफलाश्रयालम्बनैः सङ्गृहीतत्वादेषामभावे तदभावः" ॥
वासनानामनन्तरानुभवो हेतुरनुभवस्य रागादयस्तेषामविद्यादि साक्षात् पारम्पर्य्येण च हेतुः । फलं शरीरादि स्मृत्यादि च । आश्रयो बुद्धिसत्त्वं सदैवानुभवस्य तदेव वासनानामाश्रयः हेतुफलाश्रयालम्बनकानामपि वासनाना सम्बन्धिनामेषां हेतुनामभावे वासनाभावः ज्ञानवैराग्यकल्ले विहिते निर्म्मूलत्वात् वासनाः प्ररोहं न यान्ति न वा कार्य्यमारभन्त इति तात्पर्य्यार्थः ॥ अथ भगवद्गीतायाम् । ४ । ३७ ।
"यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्ज्जुन ।
ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात् कुरुते तथा" ॥
अतएव सत्त्वादिषु गुणेषु समाप्तेषु भोगापवर्गादिषु पुरुषार्थेषु समाप्तेषु कैवल्यमिदैव कारणितानतात्वम् । यथा, पातञ्जले । ३४ ।
"पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति" ।
समाप्तभोगापवर्गलक्षणपुरुषार्थानां गुणानां यः प्रतिप्रसवः प्रतिलोमस्य परिणामस्य समाप्तौ विकारानुत्पादे यदि वा चितिशक्तेर्वृत्तिसारूप्य निवृत्तौ स्वरूपमात्रेऽवस्थानं तत् कैवल्यमुच्यते । इत्थं सर्व्वमेव रहस्यमधिकाराणि विचार्य्य शास्त्रं फलोपसम्पादकम् । अधिकारश्च विदुषो नष्टत्वात् कैवल्यमेव चिद्रूपतया सदैव चिष्ठति तदेव मोक्षाख्यो भवति इदं पैतन्याधिकारिता तदेव स्वरूपाख्यानदोषः भवति । यस्य सति निष्पत्तात् प्रधानस्य व्यापारनिवृत्तौ यदात्मनः कैवल्यम् एतासिकस्य अविद्यायां संसारात् नाश्या भवितव्यतारितरमेव प्रकृतेः यत्प्रकाशविशेषव्यात्मरूपे प्रतिष्ठा चितिशक्तेः कैवल्यम् । यथा,
"प्रबलैः कर्म्मभुक्तः विषयाविष ... कारविषयविषुषता दुःखस्तावे प्रत्ययमुत्पत्तः कैवल्यमनुभवः कर्म्मस्य मुख्यैः स्वर्गेण दीक्षितो योगिभिध्यानार्तिः सर्व्वदा ... कैवल्यपद निर्दिशम्" । इदं ... कर्म्मणिश्चयात् ... हेतुरेव ... वादतदन्यसाधन कैवल्योदय । इत्युक्तवटौ ... ... क्षेत्रे ... कैवल्य ... नृप ...
... कैवल्यं त्रिवेदे
... ...

कृष्णयजुर्वेदान्तर्गतोपनिषद्विशेषः। यथा, मुक्तिकोपनिषदि। "कठवल्लीतैत्तिरीयकब्रह्मकैवल्यश्वेताश्वतरगर्भनारायण कृष्णयजुर्वेदगतानां द्वात्रिंशत्संख्यकानामुपनिषदां सहनाववतिति शान्तिः"॥)

कैशिक, क्ली, (केशानां समूहः। "केशाश्वाभ्यां यञ्छावन्यतरस्याम्"। ४। २। ४८। इति पक्षे ठक्।) केशसमूहः। इत्यमरः। २। ६। ९९॥

कैशिकः, पुं, (केशेषु केशविन्यासादौ साधुः। केश+ठक्।) शृङ्गाररसः। इति शब्दरत्नावली जटाधरश्च॥

कैशिकी, स्त्री, (कैशिक+स्त्रियां ङीप्।) नाटकवृत्तिविशेषः। यथा। "भारती सात्त्वती कैशिक्या रभटी च वृत्तयः"। इति हेमचन्द्रः॥

कैशोर, क्ली, (किशोरस्य भावः। किशोर+अण्।) किशोरावस्था। इति शब्दरत्नावली॥ सा तु दशमवर्षात्पञ्चदशवर्षावधि। इति स्मृतिः॥

कैश्य, क्ली, (केशानां समूहः। इति ष्यञ्।) केशसमूहः। इत्यमरः। २। ६। ९९॥

कोकः, पुं, (कोकते आदत्ते चञ्चुधामिति। कुक आदाने+पचाद्यच्।) चक्रवाकः। (यथा, गीतगोविन्दे ५। १७। "कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना"॥) वृकः। (यथा, रामायणे। ५। ३६। ८। "वने वृषपरिस्पृष्टा स्त्री कोकैरिवार्दिता"॥) ज्योष्ठी। खर्जूरीवृक्षः। भेकः। इति मेदिनी॥ विष्णुः। इति त्रिकाण्डशेषः॥

कोकड़, पुं, (कोकं कोकरवं शब्दध्वनिवत् ध्वनिभिरयः भाति प्रकाशतीति। भा+क। अस्य रूपम्।) विलेशयजन्तुविशेषः। तत्पर्य्यायः। कविकः २ कोकवाच ३ विलेशयः ४ चमरपुच्छः ५ कोमश ६ भूम्यवधक ७। तन्मांसगुणाः। श्वासानिलकासहरत्वम्। पित्तदाहकरत्वञ्च। इति राजनिघण्टः॥

कोकदेव, पुं, (कोकश्चक्रवाक स इव दीव्यति क्रीडतीति। दिव्+अच्।) कपोतः। इति राजनिर्घण्टः॥

कोकनद, क्ली, (कोकान् चक्रवाकान् नदति नादयति धामविकाशेन। कोक+नद+णिच्+अण् ततोऽच मूलविभुजादित्वात् को वा।) रक्तकुमुदम्। रक्तपद्मम्। इति मेदिनी॥ (यथा, गीतगोविन्दे। १०। ५। 'नीलनलिनाभमपि तन्वि। तव लोचनं धारयति कोकनदरूपम्'॥ अस्य पर्य्याया यथा,— 'रक्त कोकनदं पद्ममरुणमब्दलोहितम्"॥ इति वैद्यकरत्नमालायाम्॥)

कोकनदच्छवि, पुं (कोकनदस्य रक्तोत्पलस्य छविरिव छविर्यस्य।) रक्तवर्णः। तद्वति त्रि। इत्यमरः॥

कोकबन्धु, पुं, (कोकयोः चक्रवाकयुग्मयोर्दिवसमयदा सङ्गमकारितया बन्धुरिव।) सूर्य्यः। इति शब्दचन्द्रिका॥

कोकाक्षः, पुं, (कोक इव अक्षिणी यस्य इत्यमरस्वामीकोऽस्य।)

शमच्छिरच्छदः। इति राजनिर्घण्टः॥

कोकाहः, पुं, (कोक इव आहन्ति वेगेन गच्छतीति। आ+हन्+ड।) श्वेतघोटकः। तत्पर्य्यायः। कर्कः २। इति हेमचन्द्रः॥ क्वचित् पुस्तके कोकाह इति पाठः॥

कोकिल, पुं, (कुक् आदाने+"सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्"। उणां १। ५५। इति इलच्।) स्वनामख्यातकृष्णवर्णमधुरस्वरपक्षी। (यथा, रामायणे। २। ५२। २। "भास्करोदयकालोऽयं गता भगवती निशा। असौ सुकृष्णविहगः कोकिलस्तात। कूजति"॥) तत्पर्य्यायः। वनप्रियः २ परभृत ३ पिक ४। इत्यमरः। २। ५। १९॥ परपुष्टः ५ काल ६ वसन्तदूतः ७ ताम्राक्षः ८ गन्धर्व्वः ९ मधुगायनः १० वासन्तः ११ कलकण्ठः १२ कामान्धः १३ काकलीरवः १४ कुहूरवः १५ अन्यपुष्टः १६ मत्तः १७ मदनपाठकः १८। इति राजनिर्घण्टः॥ (अस्य गुणा यथा,—हारीते १ स्थाने ११ अध्याये। "कोकिलः श्लेष्मणो जेयः पित्तवध्वंसनक्षमः"॥ मूषिकजातस्यान्तर्गतमुक्तविष जातीयविशेषः। तद्दंशनजनितलक्षणानि यथा,— "ग्रन्थयः कोकिलेनाथा ज्वरो दाहश्च दारुणः"॥ इति सुश्रुतेन कल्पस्थाने षष्ठाध्याये उक्तम्॥) अङ्गारः। इति त्रिकाण्डशेषः। (छन्दोविशेषः। इति वृत्तरत्नाकरः॥)

कोकिलनयनः, पुं, (कोकिलस्य नयनमिव रक्तवर्णं पुष्पमस्य।) कोकिलाक्षवृक्षः। इत्यमरटीकायां रमानाथः॥ (कोकिलाक्षशब्देऽस्य विवृतिर्ज्ञेया॥)

कोकिलाक्ष, पुं, (कोकिलस्याक्षीव रक्तं पुष्पमस्य। "अक्ष्णोऽदर्शनात्"। ५। ४। ७६। इति अच्।) वृक्षविशेषः। कुलियाखाड़ा इति भाषा। तालमखाना इति हिन्दी भाषा॥ तत्पर्य्यायः। इक्षुगन्धा २ काण्डेक्षु ३ इक्षुरः ४ क्षुरः ५। इत्यमरः। २। ४। १०४॥ शृगाली ६ इक्षुली ७ क्षुरका ८ शृगालघण्टी ९ वज्रास्थि १० इक्षुका ११ वज्रकण्टः १२ इक्षु १३ इक्षुरक १४ वज्रः १५ शृङ्खलिका १६ पिच्छिला १७ पिच्छिका १८। इति राजनिर्घण्टः॥ श्वेतस्य तस्य पर्य्यायः। वीरतरः २ चित्रुरः ३ क्षुरका ४ शुक्लपुष्पा ५। रक्तस्य तस्य पर्य्यायः॥ छत्रका २ अतिच्छत्रः ३। इति रत्नमाला॥ सामान्यस्य तस्य गुणाः। आमवातवातरक्तशोथनाशित्वम्। इति राजवल्लभः॥ मधुरत्वम्। शीतत्वम्। पित्तातिसारनाशित्वम्। शुक्रवर्द्धकत्वं विदाहित्वम्। बलपदत्वञ्च। इति राजनिघण्टः॥ (श्वेतकोकिलाक्षमूलं छागीदुग्धेन पिष्ट्वा मधु मिश्रितं सायन्तेन भावयेत्। यदुक्तं भावके १९६ अध्याये। "श्वेतकोकिलाक्षमूलं छागीक्षीरेण संयुतम्। निशमात्रेण वै पीतं रक्तरोगं क्षयं नयेत्"॥)

कोकिलाक्षक, पुं (कोकिलाक्ष+स्वार्थे कन्।) कोकिलाक्षवृक्षः। इत्यमरटीकायां स्वामी॥ (वङ्गिकस्य कल्पान्तरयथा,—

"कोकिलाक्षकनिर्य्यूहः पीतस्तच्छाकभोजिना। कृपाभ्यास इव क्रोधं वातरक्तं नियच्छति"। इति वाग्भटे चिकित्सास्थाने २२ अध्याये॥)

कोकिलावासः, पुं, (आवसत्यस्मिन् इति। आ+वस+अधिकरणे घञ्। कोकिलानां आवासः।) आम्रवृक्षः। इति राजनिर्घण्टः॥

कोकिलेष्टः, पुं, (कोकिल इव इक्षार्थे इष्टः।) स्वर्णेक्षुः। इति राजनिर्घण्टः॥

कोकिलेष्टा, स्त्री, (कोकिलस्य इष्टा प्रिया।) महाजम्बूः। इति राजनिघण्टः॥

कोकिलोत्सव, पुं, (कोकिलानां उत्सवोऽत्र।) आम्रवृक्षः। इति राजनिघण्टः॥

कोङ्कण, क्ली, (कोङ्कणे भव कोङ्कणदेशस्थै कर्मकारैः निर्मितमिति भावः। "तत्र भवः"। ४। ३। ५३। इत्यण् तस्य लुक्।) शस्त्रभेदः। इति हेमचन्द्रः॥

कोङ्कणः, पुं, देशविशेषः। इति मेदिनी। कोङ्कण इति भाषा॥ (यथा, आगमे। "आपाण्डु समारभ्य कटिदेशस्य मध्यगे। समुद्रप्रान्तदेशो हि कोङ्कणः परिकीर्त्तितः"॥ देशोऽयं कूर्मविभागे दक्षिणस्यां दिशि वर्त्तते। यथा, महाभारते। ६। ९। ५९। "अथापरे जनपदा दक्षिणा भरतर्षभ"॥ "कौकुट्टकास्तथा चोलाः कोङ्कणा मालवा नराः"॥ क्वचिदेकवचनान्तमपि दृश्यते। यथा, स्मृतिसारे। "मालवे गौडदेशे च सिन्धुदेशे च कोङ्कणे। मत्स्यं शूद्रो विवाहश्च वर्ज्जयेत् मथुरे गुरौ"॥)

कोङ्कणासुत, पुं, (कोङ्कणे तदाख्यप्रदेशे भवा। अच्। तस्य लुक् च। कोङ्कणा रेणुका तस्याः सुतः पुत्रः।) परशुरामः। इति शब्दमाला॥

कोच, पुं, (कुच्+पचादित्वात् कर्त्तरि अच्।) जातिविशेषः। स तु म्लेच्छेदिगन्तरे तीवरस्त्रियां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥

कोजागरः, पुं, (को जागर्त्ति अस्यां पौर्णमासीनिशायां इति कथया देव्या लक्ष्म्याः समये। पृषोदरादित्वात् साधु।) आश्विनी पूर्णिमा। तत्पर्य्यायः। शारदी २ द्यूतपूर्णिमा ३ भद्रवृष्ट ४ कौमुदी ५। इति त्रिकाण्डशेषः॥ अथ कोजागरकृत्यानि। तत्र ब्रह्मपुराणम्। "आश्वयुज्यां पौर्णमास्यां निकुम्भो दानवाधिपः। आयाति सेनया सार्द्धं हन्तुं पुत्रं दशाननम्॥ तस्मात् तत्र नरैर्मार्गाः कर्त्तव्याः समीपगाः। शोधिताश्च प्रयत्नेन भूषितश्च सज्जने॥ द्यूतार्थेन च धूलीच्छन्नं चक्रे चत्वरम्। वेश्मानि भूषितानि नानावर्णैर्विशेषतः॥ दशानि तु भूषितैश्च नरैर्माल्यैश्च लाजकैः। दिवा तत्र न भोक्तव्यं मनुष्यैश्च विचक्षणैः॥ कौमार्यकेसूतैश्च भोज्यैः पूजितैः सुरैः। पूजाञ्च सर्व्वेऽपि चैक्या द्वारोर्द्ध्वमिष्टकैः॥ द्वारोपान्ते प्रदीपेन हनुम्यो श्वयाचनं। यथाज्ञातानि पश्नपैतिकतुल्यैव समाचरेत्॥

सम्पूजितश्च पूर्णेन्दुः पयसा पायसेन च ।
तथा समाप्यः स्कन्दश्च तथा नन्दीश्वरो मुनिः ।
गोभिर्हि सुरभिः पूज्या छागवह्निर्हुताशनः ।
उरभ्रवह्निर्वरुणो गजवह्निर्विनायकः ।
पूज्य स्वान्यैश्च देवन्तो यथाविभवविस्तरैः ।
तत पूज्यो निकुम्भोऽपि समायैश्छिन्नखण्डकैः ।
सुगन्धिभिर्घृतोपेतैः शर्कराद्यैश्च भूरिभिः ।
ब्राह्मणान् भोजयित्वा तु भोज्यञ्च मांसवर्जितम् ।
वह्निप्राङ्गणगैर्नैवा दृष्टा क्रीडा प्रयत्निधा" ॥ * ॥
लिङ्गपुराणे यथा —
"आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि ।
कौमुदी सा समाख्याता कार्य्या लोकविभूतये ।
कौमुद्यां पूजयेल्लक्ष्मीमिन्द्रमैरावतस्थितम् ।
सुगन्धिनिशि सद्वेशस्त्वक्षैर्जागरणञ्चरेत् ।
निशीथे वरदा लक्ष्मीः को जागर्त्तीति भाषिणी ।
तस्मै वित्तं प्रयच्छामि अक्षैः क्रीडां करोति यः ।
नारिकेलैश्चिपिटकैः पितॄन् देवान् समर्चयेत् ।
बन्धूंश्च प्रीणयेत्तेन स्वयं तदशनो भवेत्" ।
इति तिथ्यादितत्त्वम् । (अत्र निशायां बन्धुभिरक्षैः क्रीडित्वा लक्ष्मीप्रसादात् धनभाग्भवेत् । अस्य कोजागरव्रतस्य चतुर्वर्गसम्बन्धे द्रष्टव्यम् ।)

कोट, पुं, (कुट्यते प्रताप्यते शत्रुरनेन अनेन वा । दुर्गं माश्रित्य प्रबलविपक्षमपि प्रतापयितुं शक्यते इत्यर्थः । कुट प्रतापने + अधिकरणे कर्म्मणि वा घञ् ।) दुर्गम् । इति कुटशब्दार्थे मेदिनी । गड़ केल्ला इति च भाषा । (कुट् + भावे घञ् । कौटिल्यम् प्रतापनम् ।)

कोटक पुं, (कुट् + कर्त्तरि ण्वुल् ।) गृहकारकः । घरामि इति भाषा । स तु कुम्भकाराद्गर्भे अट्टालिकाकारस्यौरसजातः । इति ब्रह्मवैवर्त्तपुराणम् ।

कोटर, क्ली पुं (कोट कौटिल्याकारं स्थानं तरूणामिति यावत् । राति । रा + क ।) वृक्षच्छिद्रम् । गाछेर खोँडल इति भाषा । तत्पर्य्यायः । निष्कुहः २ । इत्यमरः । २ । ४ । १३ । निष्कुट ३ कोटरः ४ । इति शब्दरत्नावली ॥ मालारम् ५ । तरुविवरम् ६ । इति जटाधरः । (कोटरस्थात् चतुरस्रं कपाटादित्वात् रा । दो ४ । २ । ८ । इत्यादिक्षितरेखादी, त्रि ।)

कोटरावण, क्ली (कोटराणि नाशी तरवो वनम् । पुष्करादित्वात् णत्वम् ।) सकोटरवृक्षयुक्तवनम् । इति मुग्धबोधटीकायां दुर्गादासः ।

कोटवी, स्त्री, (कोट कौटिल्यं दीव्यति श्लथतीति । दीव्यतौ + ङीप् ।) नग्ना स्त्री । इत्यमरः । २ । ६ । १० । (कोट कुटिलभावं [illegible] दिवं शीलादि चनि । वी + ङीप् ।) चण्डिका । इत्यमरटीका ।

कोटरी, स्त्री (कोट कौटिल्य [illegible] राति ददाति त । कोट + रा [illegible] "कान्तो [illegible]" । १ । ३ । १ । इति [illegible] । तस्यै [illegible] हरिवंश [illegible] ।) [illegible] । इत्यमरटीका । (कोट [illegible] इति [illegible] ।)

दुर्गा' इति धरणी ।

कोटि, स्त्री, (कोट्यते छिद्यतेऽनया । कुट छेदे । "सर्व्वधातुभ्य इन्" । उणा । ४ । ११७ । इति इन् । बाहुलकात् गुणः ।) अस्त्रादेः कोटः । (यथा, रघुवंशे । ७ । ४६ ।
"प्रतान्यपि क्षोणनखाग्रकोटि
व्यासक्तकेशानि चिरेण पेतुः" ।)
उत्कर्षः । शतलक्षसंख्या । क्रोर इति भाषा । (यदुक्तं भास्कराचार्येण ।
"एक दश शतमेव सहस्रमयुतन्तथा ।
लक्षञ्च नियुतञ्चैव कोटिरर्ब्बुदमेव च ।)
धनुरग्रम् । इत्यमरमेदिनीकरौ ।
(यथा, महाभारते । १ । ४ । ७२ ।
"तस्य स्कन्धे मृतं सर्पं क्रुद्धो राजा समासजत् ।
समुत्क्षिप्य धनुष्कोट्या स चैव समुपैक्षत" ।)
(रेखा । यथा, कुमारे । २ । ७६ ।
"आवर्जितजटामौलिविलम्बिशशिकोटयः ।
रुद्राणामपि मूर्द्धानः क्षतहुङ्कारशंसिनः" ।
वादविचारः । संशयनिरासाय पूर्व्वपक्षः । यथा गादाधरीसप्रपञ्चेतुक्ति ।
"विप्रतिपत्तिवाक्यजन्यकोट्युपस्थितिः" ।
आयतस्य [illegible] देशावयवरेखाभेदः । यथा,
"इष्टाद्दोर्ज्यायाः [illegible] दिग्दोरेखाग्रम् ।
इष्टे चतुरस्रे वा सा कोटिः कीर्त्तिता तज्ज्ञैः" ।
सिद्धान्तशिरोमणिगोलाध्यायस्य टीकायाम् । यथा,
"त्रिभुजे भुजयोर्योगस्तदन्तरगुणो भुवा हृतो लब्ध्या ।
द्विस्था भूरूनयुता दलिता [illegible] तदाबाधे" ।
[illegible] भुजाभुजकोटिकर्णाः' । इत्यादि
विस्तरार्थं [illegible] देशावयवरेखाविशेषः ।
यथा सिद्धान्तशिरोमणौ ।
'दिक्चक्रवत्पातकरण्य मध्ये
ज्यापापपूर्व्वापरसूत्रमध्यम् ।
दोर्द्दिः प्रभा चरविदो न्मूल
कोटिस्तथा प्राग्परा कुतः स्यात्' ॥ * ॥
"दिक्साम्यावलम्ब [illegible] यत्र भवति तत्र पूर्व्वापरसूत्रम् च भवति तत कोटिरुच्यते । दो [illegible] पूर्व्वापरा कोटिः' । इति ।
[illegible] । यथा, तत्रैव "योऽयो [illegible] न विधो [illegible] कोटिः" । [illegible] कोटिर्मेति । तथा [illegible] ।
"[illegible] ।
[illegible] ।" [illegible]

[illegible] कोटिरित्युच्यते । यथा तत्र [illegible] मर्कोटिर्भवति तदा कोटिर्भवितव्यम् । [illegible] यथा भवति तदा कल्पम् । किञ्च, उदया [illegible] विशेषः । तत्रैव यथा —
"उत्तराद्रिशा [illegible]
याम्याः [illegible] कुजोर्द्धे ।
[illegible] सौम्या निहि सौम्यभक्तात्
[illegible] निरुक्तम् ।
सौम्यापमायान्नतवच्छि याम्यं
याम्यापमायात पुनरेव याम्यम् ।
तदन्तरैक्यं समवृत्तशेट
मध्याप्रभोर्वा युवि बाहुसाटः ।
[illegible] कोटि
पूर्व्वापरा [illegible] मूलम्' ।
"[illegible] सूत्रम्
[illegible] । [illegible] तत्र
तत्र उदयास्तसूत्रात् दक्षिणतो भवति । यतः
[illegible] मतम् ।
[illegible] उत्तरतो मतम् । [illegible] उत्तर
[illegible] । [illegible] उच्यते । [illegible]
[illegible] याम्यम् । [illegible] बाहुभवति ।
बाहुर्भवति [illegible] । [illegible]
[illegible] तदा [illegible] दक्षिण
[illegible] स्यात् । [illegible]
दक्षिणगोले तु यदा याम्या [illegible] याम्य
[illegible] स्यात् [illegible]
[illegible] । [illegible]
[illegible] पूर्व्वापरा कोटि' ।)
एका । इत्यमरः । विंड्ड [illegible] इति भाषा ।

कोटिक, पुं, (कोट्या अग्रभागेन [illegible] इति । कै + क ।) इन्द्रगोपनामकीटः । इति जटाधरः ।

कोटिजित् पुं (कोटिं [illegible] कोटिदरिमिव [illegible] जितवान् । कोटि + जि + क्विप् [illegible] ।) कालिदासः । इति त्रिकाण्डशेषः । (नियामकः इति [illegible] ।)

कोटिपात्र, पुं, (कोटिर [illegible] ।) [illegible] । इति हेमचन्द्रः । [illegible] इति भाषा ।

कोटिर, पुं, (कोटिं [illegible] । रा + क ।) [illegible] । इति [illegible] ।

कोटिवर्षा स्त्री (कोटि [illegible] । कोटि + वृष + अच् ।) [illegible] । इति [illegible] ।

कोटिवर्ष, क्ली (कोटि [illegible] कोटि + वृष + अच् । [illegible] ।) [illegible] । [illegible] इति भाषा ।

(अस्याः पर्यायाः यथा ।
"सुकाष्टक् श्रामयी देवी महामाला सता लघुः ।
कुसुमान्ता वधूः कोटिवषा सर्व्वोपिकेत्यपि" ॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
गणाख्यास्या सुकाशब्दे ज्ञेयाः ॥)

कोटिश, पु, (कोट्या अग्रेण श्यति नाशयति चूर्णीकरोतीत्यर्थः । कोटि+शो+क ।) लोष्ट भङ्गसाधनमुद्गर । इति भरतः । मइ इति ख्यात इति केचित् । तत्पर्य्यायः । लेष्टुभेदनः २ । इत्यमरः ।२।९।१२ । लोष्टघ्नः ३ कोटीशः ४ । इति रत्नकोषः । लोष्टभेदी ५ मुर्गदण्ड ६ लोष्टभञ्जकमुद्गरः ७ । इति शब्दरत्नावली । कोटघ्नः ८ । इति जटाधरः ॥ (कोटिरस्यास्तीति लोमादित्वात् शः । कोटियुक्ते, त्रि । वासुकीवंशीय नागविशेषः । यथा, महाभारते । १ । ५७ । ५ ।
"कोटिशो मानसः पूर्णः शलः पालो हलीमकः" ॥)

कोटिशः, [स्] व्य, (कोटि+वारार्थे शस् ।) कोटि कोटि । इति व्याकरणम् ।
(यथा, रघौ । २ । ४९ ।
"गाः कोटिशः स्पर्शयता घटोध्नीः" ॥)

कोटी, स्त्री, (कुट्+"सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इतीन् ततो वा ङीप् ।) खड्गादेः अग्रभागः । इत्यमरटीका । एकाग्रकम् । इति शब्दरत्नावली । कोटिसङ्ख्या । इति सिद्धादि सङ्ग्रहटीकायां भरतः । (यथा, महाभारते । ७। जयद्रथवधपर्व्वणि । ८७ । ३० ।
"प्रतोदैश्चापकोटीभिर्हुङ्कारैः साधु वाहितैः ।
कशापार्ष्णिभिघातैश्च वाग्भिरुग्राभिरेव च" ॥)

कोटीरः, पु, (कोटीभिः ईरयति प्रेरयति । कोटी+ईर्+णिच् अच् ।) जटा । इति त्रिकाण्डशेषः । (यथा आनन्दलहर्य्याम् । ३ ।
'किरीटं वैरञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम्" ॥)
किरीटम् । इति हेमचन्द्रः ।

कोटीवर्ष, स्त्री, (कोटीसङ्ख्यकानि शास्त्राणि विपक्षान् प्रति वर्षति अत्र । कोटी+वृष+अप् ।) बाणपुरम् । इति त्रिकाण्डशेषः । (इदानी देवीकोट इत्याख्ययाख्यायते ।)

कोटीवर्षा, स्त्री, (कोटीं कोटीशं वर्षति माधुर्य्यादिना इव । वृष्+अच्+टाप् ।) कोटिवर्षा । इति शब्दरत्नावली । पिड्ङ्गि शाक इति भाषा ॥

कोटीशः, पु (कोटीं लोष्टादीनां कोटीसंख्यां श्यति सूक्ष्मयतीति । कोटी+शो+कः ।) कोटिशः । इत्यमरटीकायां भरतः ॥

कोट्ट, स्त्री, (कुट्टन्ते विपक्षोऽस्मिन् अत्र वा । कुट्ट+अधिकरणे घञ् । निपातनात् गुणः ।) दुर्गम् । इति हेमचन्द्रः । कक्षा गड इत्यादि भाषा ॥

कोट्ट, पुं (कुट्टन्ते शत्रवोऽत्र । कुट्ट छेदे+घञ् । निपातनात् गुणः ।) दुर्गपुरम् । इति सिद्धादि सङ्ग्रहे भरतः ।

कोट्टवी स्त्री, नग्ना । इति त्रिकाण्डशेषः । नग्ना स्त्री । इति शब्दरत्नावली ॥ नग्नमुक्तकेशी नारी ।
"या स्त्रैणा मुक्तकेशी कोट्टवी नग्निका च सा" ।
इति जटाधरः । (कोट्ट कुट्टनं छेदनं स्वपुत्रस्येति यावत् वाति हिनस्ति निवारयतीत्यर्थः । यद्वा, कोट्टे कुट्टने समागमे स्वसुतस्य रक्षार्थं वाति गच्छतीति । कोट्ट+वा गमनहिंसयोः+कः गौरादित्वात् ङीष् ।) नग्ना स्त्रीरूपिणीदुर्गा ।
'तन्माता कोट्टवी नाम नग्ना मुक्तशिरोरुहा ।
पुरोऽवतस्थे कृष्णस्य पुत्रप्राणरिरक्षया' ॥
इति भागवते । १० । ६३ । २ ॥
(नग्नीय स्वमायाप्रतिरूपिणी दुर्गा विन्ध्या नाम्न्याष्टमो भागः । यथा हरिवंश बाण युद्धे १८७ अध्याये २२ २३ ।
"आविध्यमाने चक्रे तु द्युतिमत्यमितौजसा ।
कुमाररक्षणार्थाय बिभ्रती सुतनु तदा ॥
दिग्वासा दैवयोगात् प्रादुरभून्न कोट्टवी ॥
लम्बा नाम महामाया भागो देव्यास्त्वथाष्टमः ।
पिनाकबकशक्तिस्तु सा च नग्ना स्थितान्तरे" ॥)

कोट्टवीपुर, स्त्री, (कोट्टव्या पुरम् ।) शोणपुरम् । इति शब्दरत्नावली ॥

कोट्टार, पुं, (कुट्ट+आरक्प्रत्ययः । पृषोदरात् साधुः । कोट्ट कोटं दुर्गमित्यर्थः आच्छति प्राप्नोति । कोट्ट+ऋ+"कर्म्मण्यण्" । इति अण् ।) नागरः । कूपः । पुष्करिण्याः पाटकः । इति मेदिनी ॥ दुर्गपुरम् । इति सिद्धादिसङ्ग्रहटीकायां भरतः ॥

कोठ, पुं (कुठि+अच् निपातनात् गणोऽपि साधु ।) मण्डलाकारकुष्ठरोगः । तत्पर्य्यायः । मण्डलकम् २ । इत्यमरः । २ । ६ । ५४ । दुःखम्मा ३ त्वग्दोषः ४ चर्म्मदूषिका ५ । इति राजनिर्घण्टः ॥ तस्य लक्षणं यथाह माधवकरः ।
"असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः ।
मण्डलानि सकण्डूनि रागवन्ति बहूनि च ।
उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयते' ॥
अन्यच्च । "वरटीदष्टसंस्थानः कण्डूमान् लोहितो ज्वरकफपित्तात् । क्षणिकोत्पादविनाशः कोठ इति निगद्यते तज्ज्ञैः ॥ इति रक्षितः ॥
(अस्य चिकित्सा यथा, वैद्यकचक्रपाणिसङ्ग्रहे शीतपित्तोदर्दाद्यधिकारे ।
"अभिमन्थभवं मूलं पिष्टं पीतञ्च सर्पिषा ।
शीतपित्तोदर्दकोठान् सप्ताहादेव नाशयेत् ॥
उदर्दोक्तां क्रियाञ्चापि कोठरोगे समाचरेत् ।
सपि पीत्वा महातिक्तं कार्य्यं शोणितमोक्षणम्" ॥)

कोटर, पुं, (कुट्यते छिद्यतेऽसौ । कुट+अरन् ।) वृक्षकोटरः । इति शब्दरत्नावली ॥ कोटर इति भाषा ॥

कोठपुष्पी, स्त्री, (कोठरस्य पुष्पमिव पुष्पमस्याः । कोठरपुष्प+ङीप् ।) वृद्धदारकः । इति राजनिर्घण्टः ॥ (वृद्धदारकशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

कोण, पुं (कुणति शब्दायतेऽनेन कुणति शब्दयतीति वा । कुण शब्दे+करणे घञ् । कणति+अच् वा ।) वीणादिवादनम् । मेदिन्यां हलधारादेः वार काठी इति भाषा ॥ (यथा, रामायणे २ । ७१ । २८ ।
"भेरीमृदङ्गवीणानां कोणसङ्घट्टितः पुनः" ॥)
अस्त्रादेरग्रभागः । तत्पर्य्यायः । पालिः २ अश्रिः ३ कोटिः ४ । इत्यमरः । २ । ८ । ९३ ॥ (यथा, कादम्बर्य्याम् । "कनककोणैरभिहन्यमान" ॥)
वाद्यप्रभेदः । गृहादेरेकदेशः । (यथा, कथासरित्सागरे । १९ । ३३ ।
"सम्प्रहृष्टस्याङ्गने तेन पलाशाः सर्व्वपूरिताः ।
कुम्भाश्चतुर्षु कोणेषु निगूढा स्थापिता भुवि" ॥)
लगुडः । इति मेदिनी । मङ्गलग्रहः । इति हेमचन्द्रः ॥ शनिः । इति विश्वः ॥ दशोदिशोऽन्तर्भागः । इति राजनिर्घण्टः ॥ अस्य विवरणं विदिक्शब्दे द्रष्टव्यम् ॥ (कोणमानम् । यथा, समरसारे ।
"विन्दुत्रिकोणवसुकोणदशारयुग्मम्" ॥)

कोणकुण, पुं, (कोणे मत्कुणैकदेशभागे कुणति विचरतीति । कुण+अच् ।) उत्कुणः । इति हेमचन्द्रः । उकुण इति भाषा । (मत्कुणः । छारपोका इति भाषा । खटमल इति हिन्दी भाषा ॥)

कोथि, त्रि, (कुथ+"सर्व्वधातुभ्य इन्" । उणां ४ । ११७ । इति इन् बाहुलकात् गुणः ।) कुथितः । इत्यमरटीका ॥ कोमा इति भाषा ॥

कोथ, पुं, (कुथ्यते पूतिश्च गम्यते अनेन । कुथ पूतिभावे+करणे घञ् ।) नेत्ररोगभेदः कथो इति भाषा । (कुथ्यति गुदं छिनत्तीति । कुथ कर्त्तरि अच् । गुह्यप्रदेशजातभगन्दररोगविशेषः । यथा, सुश्रुते ।
"मूढेन मांसलुब्धेन यदस्थिशल्यमन्नेन सहाभ्यवहृतं यदा यदाऽपानेनाधः प्रेरितमसम्यगागतं गुदं क्षिणोति तत्र क्षतनिमित्तं कोथ उपजायते ।" भावे घञ् । मथनम् । यथा, तत्रैव ।
'तस्मिन् क्षते पूयरुधिरावकीर्णमांसकोथे भूमाविव जलसिक्तायां क्रमयो जायन्ते" ॥)
घटिते मथिते च त्रि । इति मेदिनीकर हेमचन्द्रौ ॥

कोदण्ड, स्त्री (कु शब्दे+विच् । कोः शब्दायमानो दण्डोऽस्य ।) धनुः । इत्यमरः । २ । ८ । ८३ ।
(यथा, भागवते ४ । २१ । २२ ।
"विस्फूर्जयन्नजगवं कोदण्डं रथेन चापधरः" ॥)

कोदण्ड, पुं, (कोदण्ड धनुः तत्सदृशमाकारो विद्यते अस्य । अर्श आदित्वादच् ।) भ्रूः । जनपदविशेषः । इति मेदिनी ॥

कोद्रव, पुं (कु+विच् । कोः सन् द्रवतीति । द्रु+अच् । द्रवः । कौ द्रव इति कर्म्मधारयः । देव शाक्ता द्रवति वा पृषोदरात् पूर्व्वस्य कोभावो दीर्घ साधु ।) धान्यविशेषः । कोदो इति भाषा ॥ तत्पर्य्यायः । कोरदूषः २ । इत्यमरः ।२।९।१६ । कुद्रव ३ । इति भट्टीका । कुद्दालः ४ मदनाग्रकः ५ कार्दवः ६ कोरदूषक ७ । इति शब्दरत्नावली ।

(यथा श्रुतौ।"अयज्ञिया वै कोद्रवा")। अपि च।
"कोद्रवः कोरदूषः स्यादुद्दालो वनकोद्रवः।
कोद्रवो वातलो ग्राही हिमः पित्तकफापहः।
उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम्"।
इति भावप्रकाशः॥ अस्य गुणाः। मधुरत्वम्। तिक्तत्वम्। व्रणिनां पथ्यकारकत्वम्। कफपित्तहरत्वम्। रूक्षत्वम्। मोहकारित्वम्। नूतनस्य तु गुरुत्वञ्च। इति राजनिर्घण्टः॥ परमग्राहित्वम्। वातलत्वम्। इति राजवल्लभः॥

कोप, पुं, (कुप्यते इति। कुप् + भावे घञ्।) क्रोधः। इत्यमरः। १।७।२६॥ (यथा, विष्णुपुराणे १।११।१२।
"राजा न कोपहेतुस्ते कथं त्वां नाभिनन्दति"॥)

कोपक्रम, क्ली, (उपक्रम्यते आरभ्यते यत्र तत् उपक्रमं कटादिकम्। उप + क्रम् + कर्म्मणि घञ्। कस्य मस्तकस्य उपक्रमः इति।) मस्तकवृद्धिः। इत्यमरटीकायां रायमुकुटः॥ (कोपेन क्रम्यते इति। यद्वा, कोपस्य क्रमः उद्योगोऽस्य।) कोपयुक्ते, त्रि॥

कोपन, त्रि, (कुप + युच्।) कोपविशिष्टः। इति जटाधरः॥ (यथा, महाभारते १।२८।१९।
"आसीद्विभावसुर्नाम महर्षिः कोपनो भृशम्"॥
पुं, बलिवंशीय कोपनो नामासुरः।
यथा, हरिवंशे। ४१।८४।
"शरभः शलभश्चैव कुपनः कोपनः क्रथः"।
क्ली, कुप् + णिच् भावे ल्युट्। दोषविकारकारक आहारविशेषकोपनिष्पादनम्। यथा, महाभारते अनुगीतायाम्।१४।१७।१९।
"सदोषकोपनाद्रोगं लभते मरणान्तिकम्।
अपि चोद्बन्धनादीनि परीतानि व्यवस्यति"॥)

कोपनक, पुं, (कोपन कोपशील इव कायति प्रकाशते। कै + क।) चोरकनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

कोपना, स्त्री, (कुप्यतीति। कुप + ताच्छील्ये युच् + टाप्।) कोपवती। तत्पर्य्यायः। भामिनी २। इत्यमरः। २।६।४॥ चण्डी ३। इति जटाधरः॥ भीमा ४। इति शब्दरत्नावली॥ (यथा, कुमारे। ४।८।
"कृतवानसि विप्रियं न मे
प्रतिकूलं न च ते मया कृतम्।
किमकारणमेव दर्शनं
विलपन्त्यै रतये न दीयते"॥)

कोपलता स्त्री (कोपहेतुर्लता।) कर्णस्फोटालता। इति राजनिर्घण्टः॥

कोपी [न्] त्रि, (अल्पेऽपि कुप्यति इति ताच्छील्ये णिनिः।) क्रोधनः। इत्यमरः। ३।१।३१॥ (यथा, मार्कण्डेये ७८।१८।
"मत्तमातङ्गगमनो ...
..."॥)
जलपारावतः, पुं। इति राजनिर्घण्टः॥

कोमल क्ली (कोमति इत्यन्तः...) ...
... कुम्राधातोः ...

च। बाहुलकात् गुणः।) जलम्। इति मेदिनी॥

कोमल, त्रि, (कमु कान्तौ + बाहुलकात् कलच् अत उत्वं गुणश्च।) अकठिनः। नरम इति भाषा। तत्पर्य्यायः। सुकुमारः २ मृदुलः ३ मृदुः ४। इत्यमरः। ३।१।७८। पेलवः ५। इति जटाधरः॥ मनोज्ञः। इति शब्दरत्नावली॥ (यथा, रघुः। ८।४१।
"क्षतिमुपगमवर्त्मगीतया
कुसुमकोमलदन्तवतो वपुः।
उपवनान्तलताः पवनाहतैः
किसलयैः सलयैरिव पाणिभिः"॥)

कोमलक, क्ली, (कोमल + संज्ञायां कन्।) मृणालम्। इति शब्दचन्द्रिका॥ (स्वार्थे कन्। अकठिनम्।)

कोमला, स्त्री, (कोमल + स्त्रियां टाप्।) क्षीरिका। इति शब्दचन्द्रिका॥ (खण्डपुष्पाक्षवटवृक्षविशेषः। क्षीरिकाशब्देऽस्य विवरणं ज्ञेयम्॥)

कोमासिका स्त्री, (कु ईषत् उमा अतसीपुष्पमिव आस्ते। आस् + ण्वुल् + टाप् अत इत्वम्। को कादेशः।) आलिका। इति शब्दरत्नावली॥ थरेर आलि इति भाषा॥

कोयष्टि, पुं (को जले यष्टिरिवास्य पृषोदरादित्वात् अत उत्वे गुणत्वे च साधुः।) जलकुक्कुभपक्षी। इति त्रिकाण्डशेषः॥ (यथा, रघौ। ४।१२।
"प्रसुप्तान् आमपाशांश्च कोयष्टिं श्वविच्छिरान्"॥)

कोयष्टिक, पुं (कोयष्टि + स्वार्थे कन्।) पक्षिभेदः। कोडापक्षी इति भाषा। इत्यमरः। २।५।३४॥

कोरक, पुं, (कुर शब्दाने + क्वुन्। अस्य रत्वम्।) कलिका। इत्यमरः। २।४।१६॥ ("कलिका कोरकः पुमान्" इत्यमरवाक्यप्रामाणिका मिमांसेऽयं इति भाष्यम्। तत्र "हारक कुड्मलेऽपि स्यात् कक्कोलकमृणालयोरिति" "कोरकोऽस्त्री कुड्मले स्यादिति" च विश्वमेदिनीवाक्यप्रामाणम्।) क्ली, (कुर् + क्वुन्। क्लीबत्वं वा।) पुष्पम्। (यथा, माघे। ७।२८।
"मदनविदिद्धो रसोदरपुष्प
समुपहरन् विकचार कोरकाणि"॥)
कक्कोलकम्। मृणालम्। इति मेदिनी॥ चोरनामगन्धद्रव्यम्। इति जटाधरः॥

कोरङ्गी, स्त्री, (कुरति शब्दायते अङ्गमस्या इति कुर + अङ्गच् गौरादित्वात् ङीष्।) सूक्ष्मैला। इत्यमरः। २।४।१२५॥ (यथा, सुश्रुते वा
"सूक्ष्मैला कुरङ्गी तुत्था कोरङ्गी द्राविडी त्रुटिः"।
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे॥) पिप्पली। इति राजनिर्घण्टः॥

कोरदूष, पुं (कोरं ...द्रुषयति। दुष + णिच् "कर्म्मण्यण्"। ३।२।१। इत्यण्। वाहुलकात्।) कोद्रवः। इत्यमरः। २।९।२६॥ (यथा, महाभारते। ३।१५।१८—१९।
"अपूपान् ... ...
... कोरदूषकः।
... ... "॥)

अस्य गुणा यथा,—
"स कोरदूषः श्यामाकः कषायमधुरो लघुः।
वातलः कफपित्तघ्नः शीतसंग्राहि शोषणः"॥
इति सुश्रुतस्थाने सप्तविंशोऽध्याये चरकेणोक्तम्॥)

कोल, क्ली, (कुल् + अच् गौरादित्वात् ङीष्। कोली तस्याः फलमित्यण् तस्य लुक् "फले लुक्"। ४।३।१६३। इति सूत्रेण लुक्।) बदरीफलम्। तत्पर्य्यायः। कुवलम् २ फेनिलम् ३ सौवीरम् ४ बदरम् ५ घोण्टा ६। इत्यमरः। २।४।३६॥ पिच्छिलम् ७ स्वादुफलम् ८ बदरीफलम् ९। इति शब्दरत्नावली॥ कोलिकम् १०। इति जटाधरः॥ अपि च।
"पुंसि स्त्रियाञ्च कर्कन्धूर्बदरी कोलमित्यपि।
फेनिलं कुवलं घोण्टा सौवीरं बदरं महत्॥
अजाप्रिया कुहा कोलिर्विषमो भयकण्टकः॥
अथ बदरविशेषाणां लक्षणानि गुणाश्च।
"पक्वमाम्रं सुमधुरं सौवीरं बदरं महत्।
सौवीरं बदरं शीतं भेदनं गुरु शुक्रलम्॥
वृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम्।
सौवीराञ्च लघु मधुरं कोलमुच्यते॥
कोलन्तु बदरं ग्राहि रुच्यमुष्णञ्च वातहृत्।
कफपित्तकरं चापि गुरु सारकमीरितम्॥
कर्कन्धुः क्षुद्रबदरं कथितं पूर्वसूरिभिः।
अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक्॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम्।
शुष्कं भेदि अग्निकृत् सर्व्वं लघु तृष्णाक्लमास्रजित्"॥
इति भावप्रकाशः॥ बदरादिवत् प्रमाणकोषौ। बदरीसदृशा घोण्टा शृगालकोलिः। यदुक्तम्।
"बदरीसदृशाकारा वन्या सूक्ष्मफला भवेत्।
अटव्यामेव सा घोण्टा लोमकोटेति चोच्यते"॥
इति साभूतिः॥
"ऋलिकोलिर्लिङ्गघोण्टा घोण्टा च बदरीफलः।
शृगालकोलि कथ्यते" इति। रत्नकोषः॥ कश्चित्तु कोलादित्रय बदरीपदे सौवीरादित्रयं प्रकाशकोलविशेषाः॥ बालोऽपि "कर्कन्धुर्बदरी कोलि घोण्टा कुवलफेनिली। सौवीरं बदरं कोलम्"॥ इति पठति। तथाप्यस्यां घोण्टा पदे घोण्टा सुपारीवृक्षिति व्याख्यते। "सौवीरं बदरं कोलं बदरीणां फलं मतम्"। इति कोषान्तरम्। इति भरतः॥ ०॥ अस्य गुणाः। अम्लत्वम्। वातकफादिनाशित्वम्। पक्वस्य मधुरत्वम्। ... स्निग्धत्वम्। सुमधुरत्वम्। सारकत्वम्॥ शुष्कस्यास्य तु लघुत्वम्। कफवातघ्नत्वम्। ... ... भेदकत्वम्। कषायत्वम्। अस्य मज्जायाः मधुरत्वम्। ... ... इति राजवल्लभः॥ ०॥ ...। इति मेदिनी॥ (यथा चरके सूत्रस्थाने २७ अः।
"... ... ..."॥)
... इति राजनिर्घण्टः॥ ...। इति मेदिनी॥

कोल पुं (कोलति ... ... इति ... कुल + अच्।) शूकरः। (...

(अस्या मध्याया यथा ।
"सुकृत्यष्ट्र मायायी देवी महामाया सना लघु ।
समुद्धान्ता वधूः कोटिवर्षा भट्टोपिकेत्यपि" ।
इति मावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
गत्याख्यास्य स्पृक्काशब्दे ज्ञेया ।)

कोटिशः, पुं, (कोट्या अग्रेण श्यति तनूकरोति चूर्णीकरोतीत्यर्थः । कोटि+शो+क ।) लोष्टभञ्जनसाधनमुद्गरः । इति भरतः ॥ मई इति ख्यात इति केचित् । तत्पर्य्यायः । लेष्टुभेदनः २ । इत्यमरः । २ । ९ । १२ ॥ लेष्टुघ्नः ३ कोटीशः ४ । इति रत्नकोषः ॥ लेष्टुभेदी ५ मृद्दरः ६ लोष्टभञ्जमुद्गरः ७ । इति शब्दरत्नावली ॥ लोष्टघ्नः ८ । इति जटाधरः ॥ (कोटिरस्यास्तीति लोमादित्वात् शः । कोटियुक्ते, त्रि ॥ वाद्यविशेषभागविशेषः । यथा, महाभारते । १ । ५७ । ५ ।
"कोटिशो मानसं पूर्व्वं ध्यानं प्राणो यशोमकः" ॥)

कोटिशः, [स्] व्य, (कोटि+वारार्थे शस् ।) कोटिः कोटि । इति व्याकरणम् ।
(यथा, रघौ । ७ । ४९ ।
"गाः कोटिशः स्पर्शयता घटोध्नीः" ॥)

कोटी, स्त्री, (कुट+"सर्व्वधातुभ्य इन्" । उणा० ४ । ११७ । इतीन् ततो वा ङीप् ।) खड्गादेरग्रभागः । इत्यमरटीका ॥ एकाग्राकम् । इति शब्दरत्नावली । कोटिसंख्या । इति सिद्धान्तकौमुद्यां टीकायां भरतः ॥ (यथा, महाभारते । ७। जयद्रथवधपर्व्वणि । ८७ । ३ ।
"प्रतोदैश्चापकोटीभिर्हुङ्कारैः साधु वाहितैः ।
कशापार्ष्णिनिघातैश्च वाग्भिरुग्राभिरेव च ॥)

कोटीरः, पुं, (कोटीमग्रं ईरयति प्रेरयति । कोटी+ईर्+णिच् अण् ।) जटा । इति त्रिकाण्डशेषः ॥ (यथा, आनन्दलहर्य्याम् । १० ।
"किरीटं वैरिञ्चं परिहर पुरः कैटभभिदः
कठोरे कोटीरे स्खलसि जहि जम्भारिमुकुटम्" ॥)
किरीटम् । इति हेमचन्द्रः ॥

कोटीवर्ष स्त्री, (कोटीसङ्ख्यानि वाणादास्त्राणि विपक्षान् प्रति वर्षन्ति अत्र । कोटी+वृष्+अप् ।) वाणपुरम् । इति त्रिकाण्डशेषः ॥ (इदानी देवीकोट इत्याख्ययाख्यायते ॥)

कोटीवर्षा, स्त्री, (कोटीं कोटीर्वा वर्षति माधुर्य्यादि भारम् । वृष्+अच+टाप् ।) कोटिवर्षा । इति शब्दरत्नावली । पिडिङ्गशाक इति भाषा ॥

कोटीशः, पुं (कोटीं अग्रादीनां कोटीशत्यो श्यति चूर्णयतीति । कोटी+शो+क ।) कोटिशः । इत्यमरटीकायां भरतः ॥

कोट्ट, स्त्री, (कुट्टते विपक्षोऽस्मिन् अत्र वा । कुट्ट+अधिकरणे घञ् । निपातनात् गुणः ।) दुर्गम् । इति हेमचन्द्रः । केल्ला गड़ इत्यादि भाषा ॥

कोट्ट, पुं, (कुट्टान्ते शत्रवोऽत्र । कुट्ट छेदे+घञ् । निपातनात् गुणः ।) दुर्गपुरम् । इति सिद्धान्त-कौमुद्यां अमरः ॥

कोट्टवी स्त्री, नग्ना । इति त्रिकाण्डशेषः ॥ नग्ना स्त्री । इति शब्दरत्नावली ॥ नग्नमुक्तकेशी नारी ।
"या भवाना मुक्तकेशी कोट्टवी नग्निका च सा" ।
इति जटाधरः ॥ (कोट्टं कुट्टनं छेदनं सयुद्धस्येति यावत् वाति हिनस्ति निवारयतीत्यर्थः । यद्वा कोट्टे कुट्टने संग्रामे सयुद्धस्य रक्षार्थं वाति गच्छतीति । कोट्ट+वा गमनहिंसयोः +क गौरादित्वात् ङीष् ।) नग्ना स्त्रीरूपिणी दुर्गा ।
"तन्माता कोट्टवी नाम नग्ना मुक्तशिरोरुहा ।
पुरोऽवतस्थे कृष्णस्य पुत्त्रप्राणरिरक्षया" ॥
इति भागवते । १० । ६३ । २० ।
(नदीय सप्तमाद्याशक्तिरूपिणी दुर्गा तिन्नस्या सप्तमस्त्रोऽष्टमो भागः । यथा, हरिवंशे बाण-कथायुद्धे १८२ अध्याये २२ २३ ।
"व्याविध्यमाने चक्रे तु तस्मिन्नाप्रतिमौजसा ।
कुमारस्त्राणार्थाय विभ्रती सुतनुं तदा ॥
दिग्वासा देववचनात् प्रातिष्ठत्तत्र कोट्टवी ॥
लम्बा नाम महाभागा भागो देव्यास्तथाष्टमः ।
चित्राकनकभूषितगुः सा च नग्ना स्थिताऽन्तरे" ॥)

कोट्टवीपुरं, स्त्री, (कोट्टव्याः पुरम् ।) वाणपुरम् । इति शब्दरत्नावली ॥

कोट्टारः, पुं, (कुट्ट+आरक्प्रत्यय । पृषोदरात् साधुः । कोट्टं कोटं दुर्गमिवाम्भ ऋच्छति प्राप्नोति । कोट्ट+ऋ+"कर्म्मण्यण्" । इति अण् ।) नागरः । कूपः । पुष्करिण्याः पाटकः । इति मेदिनी ॥ दुर्गं पुरम् । इति सिद्धान्तकौमुद्यां टीकायां भरतः ॥

कोठः, पुं, (कुठि+घञ् निपातनात् नलोपे साधुः ।) महाकासकुष्ठरोगः । तत्पर्य्यायः । मण्डलकम् २ । इत्यमरः । २ । ६ । ५४ ॥ दुश्चर्म्मा ३ त्वग्दोषः ४ चर्म्मदूषिका ५ । इति राजनिर्घण्टः ॥ तस्य लक्षणं यथाह माधवकरः ।
"असम्यग्वमनोदीर्णपित्तश्लेष्मान्ननिग्रहैः ।
मण्डलानि सकण्डूनि रागवन्ति बहूनि च ।
उत्कोठः सानुबन्धश्च कोठ इत्यभिधीयते" ॥
अन्यच्च । "वरटीदष्टसंस्थानः कण्डूमान् लोहितो ऽसकृत्पित्तात् । क्षणिकोत्पत्तिविनाशः कोठ इति निगद्यते तज्ज्ञैः" ॥ इति रक्षितः ॥
(अस्य चिकित्सा यथा, वैद्यकचक्रपाणिसंग्रहे शीतपित्तोदर्द्दाद्यधिकारे ।
"अमिमन्थभव मूलं पिष्टं पीतञ्च सर्पिषा ।
शीतपित्तोदर्द्दकोठान् सप्ताहादेव नाशयेत् ॥
उत्कोठेर्त्त्रिंशता पि कोठरागी शमाप्तः ।
सपिपीता महातिक्तं कार्य्यं शोणितमोक्षणम् ॥)

कोठरः, पुं (कुण्ठते छिद्यतेऽसौ । कुठ+अरप्रत्यय ।) अङ्कोठवृक्षः । इति राजनिर्घण्टः ॥ आँकोड इति भाषा ॥

कोठरपुष्पी, स्त्री, (कोठरस्य पुष्पमिव पुष्पमस्याः । कोठरपुष्प+ङीप् ।) वृद्धदारकः । इति राजनिर्घण्टः ॥ (वृद्धदारकशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

कोणः, पुं (कुणति वादयत्यनेन कुणति वाद्यतीति वा । कुण शब्दे+करणे घञ् । कणति+अच् वा ।) वीणादिवादनदण्डः । मेदिनीमते वक्रधारक वार काठी इति भाषा । (यथा, रामायणे २ । ७१ । २८ ।
"भेरीमृदङ्गवीणानां कोणसङ्घट्टितः पुनः" ॥)
खड्गादेरग्रभागः । तत्पर्य्यायः । पालिः २ अश्रिः ३ कोटिः ४ । इत्यमरः । २ । ८ । ९३ ॥ (यथा, कादम्बर्य्याम् । "कनककोणैरभिहन्यमान" ॥)
वाद्यप्रभेदः । गृहादेरेकदेशः । (यथा, कथासरित्सागरे । १९ । ३३ ।
"गत्वैकस्याङ्गने तेन चत्वारः स्वर्णपूरिताः ।
कुम्भाश्चतुर्षु कोणेषु निगूढाः स्थापिता भुवि" ॥)
लगुडः । इति मेदिनी ॥ मङ्गलग्रहः । इति हेमचन्द्रः ॥ शनिः । इति विश्वः ॥ ज्योतिःशास्त्रभागः । इति राजनिर्घण्टः ॥ अस्य विवरणं विदिक्शब्दे द्रष्टव्यम् ॥ (कोणमात्रम् । यथा, तन्त्रसारे ।
"विन्दुत्रिकोणवसुकोणदशारयुग्मम्" ॥)

कोणकुणः, पुं, (कोणे गृहैकदेशभागे कुणति विचरतीति । कुण्+अच् ।) उत्कुणः । इति हेमचन्द्रः ॥ उकुण इति भाषा । (मत्कुणम् । छारपोका इति भाषा । खटमल इति हिन्दी भाषा ॥)

कोणि, त्रि, (कुण+"सर्व्वधातुभ्य इन्" । उणा० ४ । ११७ । इति इन् बाहुलकात् गुणः ।) कुणिः । इत्यमरटीका ॥ कोणा इति भाषा ।

कोथ, पुं, (कुथ्यते पूतिर्भवत्यनेन । कुथ् पूतिभावे+करणे घञ् ।) नेत्ररोगभेदः कठो इति भाषा । (कुथ्यति गुदं क्लिश्नाति । कुथ् क्लेशे अच् । गुदक्षतकारकभगन्दररोगविशेषः । यथा, सुश्रुते ।
"मूढेन मांसलुब्धेन यदस्थि भक्ष्यमन्नेन सहाभ्यवहृतं यदापानगतं तिर्य्यङ्मिश्रमपानेनाधः प्रेरितमसम्यगागतं गुदं क्षिणोति तत्र क्षतनिमित्तः कोथ उपजायते" । भावे घञ् ।) मथनम् । यथा, तत्रैव ।
"तस्मिन् क्षते पूयरुधिरावकीर्णमांसकोथे भूमाविव जलक्लिन्नायां क्रमयो जायन्ते" ॥)
शटिते मथिते च त्रि । इति मेदिनीकर हेमचन्द्रौ ॥

कोदण्डं, स्त्री, (कु शब्दे+विच् । कौ शब्दायमानो दण्डोऽस्य ।) धनुः । इत्यमरः । २ । ८ । ८३ ॥ (यथा, भागवते ७ । ८१ । ५९ ।
"विस्फूर्ज्जयन्नुग्रकोदण्डं रुद्रेण चापमग्रसात्" ॥)

कोन्दः, पुं (कोन्दः धनुः तत्सदृशमाकारो विद्यते यस्य । अत्र आदित्वादच् ।) भ्रूः । अमरसिंहः । इति मेदिनी ॥

कोद्रवः, पुं (कु+विच् । कौ अनु द्रवतीति । द्रु+अच् । इव । कौ द्रव इति कथोपाख्यानम् । केन वायुना द्रवति वा पृषोदरादित्वात् गुणस्य ओकारादेशे साधुः ।) धान्यविशेषः । कोदो इति भाषा । तत्पर्य्यायः । कोरदूषः २ । इत्यमरः । २।९।२१ ॥ कुद्दालः ३ । इति तट्टीका ॥ कुद्दालः ४ मदनाग्रः ५ कोद्रवः ६ कोरदूषक ७ । इति शब्दरत्नावली ।

(यथा श्रुतौ।"अयज्ञिया वै कोद्रवा")) अपि च।
"कोद्रव कोरदूष स्यादुद्दालो वनकोद्रव ।
कोद्रवो वातलो ग्राही हिमः पित्तकफापहः ।
उद्दालस्तु भवेदुष्णो ग्राही वातकरो भृशम्" ।
इति भावप्रकाशः ॥ अस्य गुणाः । मधुरत्वम् ।
तिक्तत्वम् । व्रणिनां पथ्यकारकत्वम् । कफपित्त
हरत्वम् । रूक्षत्वम् । मोहकारित्वम् नूतनस्य
तु गुरुत्वञ्च । इति राजनिर्घण्टः ॥ परमग्राहि
त्वम् । वातलत्वम् । इति राजवल्लभः ॥

कोप, पु, (कुप्यते इति । कुप्+भावे घञ् ।)
क्रोधः । इत्यमरः । १ । ७ । २६ ॥
(यथा, विष्णुपुराणे १ । ११ । १३ ।
"तात! क कोपहेतुस्ते कश्च त्वां नाभिनन्दति"॥)

कोपक्रम, स्त्री, (उपक्रम्यते आरभ्यते यत् तत्
उपक्रम घटादिकम् । उप+क्रम्+कर्म्मणि
घञ् । कस्य ब्रह्मण उपक्रम इति ।) ब्रह्माण्ड
इति । इत्यमरटीकायां रायमुकुटः ॥ (कोपेन
क्रम्यते इति । यद्वा, कोपस्य क्रम उद्योगोऽस्य ।)
कोपयुक्ते, त्रि ॥

कोपन, त्रि, (कुप्+युच ।) कोपविशिष्टः । इति
जटाधरः ॥ (यथा, महाभारते १ । २८ । १६ ।
"आसीद्विभावसुर्नाम महर्षिः कोपनो भृशम्" ॥
पु, बलिवंशीय कोपनो नामासुरः ।
यथा, हरिवंशे । ४१ । ८१ ।
"शरभः शलभश्चैव कुपनः कोपनः क्रथः" ।
स्त्री, कुप्+णिच् भावे ल्युट् । दोषविकारकारक
व्यापारविशेषकोपनिष्पादनम् । यथा, महा
भारते अनुगीतायाम् । १४ । १७ । १३ ।
"सदोषकोपनाद्दोषान् लभते मरणान्तिकम् ।
अपि चोद्बन्धनादीनि परीतानि व्यवस्यति" ॥)

कोपनक, पुं (कोपन कोपशील इव कायति
प्रकाशते । कै+कः ।) चोरकनामगन्धद्रव्यम् ।
इति राजनिर्घण्टः ॥

कोपना, स्त्री, (कुप्यतीति । कुप+ताच्छील्ये युच+
टाप् ।) कोपवती । तत्पर्य्यायः । भामिनी २ ।
इत्यमरः । २ । ६ । ४ ॥ चण्डी ३ । इति जटा
धरः ॥ भीमा ४ । इति शब्दरत्नावली ॥ (यथा,
कुमारे । ३ । ८ ।
"कयासि कामिन् सुरतापराधात्
पादानतः कोपनयावधूतः ।
तस्याः करिष्यामि दृढानुतापं
प्रवालशय्याशरणं शरीरम् ॥)

कोपलता, स्त्री (कोपहेतुर्लता ।) कर्णस्फोटालता ।
इति राजनिर्घण्टः ॥

कोपी [न्] त्रि, (कुप्यति इति ताच्छील्ये
णिनि ।) कोपनः । इत्यमरः । ३ । १ । ३१ ।
(यथा मार्कण्डेये ८८ । २८ ।
"[illegible]
[illegible] ॥)
[illegible] । इति राजनिर्घण्टः ॥

कोमल, स्त्री (कौति [illegible]
[illegible] । कु [illegible]
च । बाहुलकात् गुणः ।) जलम् । इति मेदिनी ।

कोमल, त्रि (कमु कान्तौ+बाहुलकात् कलच्
अत उत्वं गुणश्च ।) अकठिनः । नरम इति भाषा ।
तत्पर्य्यायः । सुकुमारः २ मृदुलः ३ मृदुः ४ ।
इत्यमरः । ३ । १ । ७८ । मसृणः ५ । इति जटा
धरः ॥ मनोज्ञः । इति शब्दरत्नावली ॥
(यथा, रघुः । ९ । ३५ ।
"व्रतिसुरभ्रमरव्रततीतरु
कुसुमकोमलदन्तरुचो वभुः ।
उपवनान्तलताः पवनाहतैः
किसलयैः सलयैरिव पाणिभिः ॥)

कोमलक, क्ली (कोमल+संज्ञायां कन् ।) मृणालम् ।
इति शब्दचन्द्रिका ॥ (स्वार्थे कन् । कमलम् ।)

कोमला, स्त्री, (कोमल+स्त्रियां टाप ।) क्षीरिका ।
इति शब्दचन्द्रिका ॥ (छन्दःप्रासषट्कवर्णभेदः ।
क्षीरिकाशब्देऽस्य विवरणं ज्ञेयम् ॥)

कोमासिका स्त्री, (कु ईषत् उमा [illegible] म
इव आस्ते । आस+ण्वुल्+टाप् अत इत्वम् ।
को कादेशः ।) फलिका । इति हारावली ॥
मटेर नालि इति भाषा ॥

कोयष्टि, पु (क जलं यष्टिरिवास्य पृषोदरात् अत
उत्वे गुणत्वे च साधुः ।) जलकुक्कुभपक्षी । इति
त्रिकाण्डशेषः ॥ (यथा, मनौ । ५ । १२ ।
"प्रतुदान् जालपादांश्च कोयष्टिनखविष्किरान्" ॥)

कोयष्टिका, पु, (कोयष्टि+स्वार्थे कन् ।) पक्षि
भेदः । कोंडापक्षी इति भाषा । इत्यमरः । २ ।
५ । ३५ ॥

कोरक, पुं, (कुर शब्दे+बाहुलकात् ण्वुल् । कस्य
रवम् ।) कलिका । इत्यमरः । २ । ४ । १६ ॥
("कलिका कोरकः पुमान्" इत्यमरवाक्यप्राधान्या
भिप्रायेण इति बोध्यम् । तथा "कोरकः कुड्मलेऽपि
स्यात् कक्कोलकमृणालयोरिति" "कोरकोऽस्त्री
कुड्मले स्यादिति" च त्रिकाण्डमेदिनीहारावल्यनुसारम् ।)

कोरक, पुं क्ली, (कुर्+ण्वुल् । अस्य रः ।) मुकुलम् ।
(यथा, माघे । ७ । २६ ।
"मधुरकविरुतं रजोऽवधूय
समुपहरन् विचकार कोरकाणि" ॥)
कक्कोलकम् । मृणालम् । इति मेदिनी ॥ चोर
नामगन्धद्रव्यम् । इति जटाधरः ॥

कोरङ्गी, स्त्री, (कुरति कोरङ्गशब्दं कुर्वतीति
कुर्+अङ्गच् गौरादित्वात् ङीष् ।) सूक्ष्मैला । इत्य
मरः । २ । ४ । १२५ ॥ (अस्याः पर्य्यायः यथा
"सूक्ष्मोपकुञ्चिकातुत्था कोरङ्गी द्राविडी त्रुटिः ।
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
पिप्पली । इति राजनिर्घण्टः ॥

कोरदूष, पु (कुत्सितं यथा तथा रूषयति । कु+रुष
[illegible] । [illegible])
कोद्रवः । इत्यमरः । २ । ९ । २६ ॥ (यथा महा
भारते । ३ । १९२ । १८—१९ ।
"[illegible]
[illegible] ,
[illegible] ॥

अस्य गुणा यथा,—
"स कोरदूषः श्यामाकः कषायमधुरो लघुः ।
वातलः कफपित्तघ्नः शीतसंग्राहि शोषणः ॥
इति सुश्रुते सूत्रस्थाने धान्यविभागाध्याये षडविंशोऽध्यायः ॥)

कोल, क्ली, (कुल् अच् गौरादित्वात् ङीष् । कोली तस्या
फलमिदम् तस्य लुक् "लुक्तद्धितलुकि" । १ । २ ।
४९ । इति ङीपो लुक् ।) बदरीफलम् । तत्पर्य्यायः ।
कुवलम् २ फेनिलम् ३ सौवीरम् ४ बदरम् ५ घोण्टा
६ । इत्यमरः । २ । ४ । ३६ ॥ पिच्छिलम् ७ गुड
फलम् ८ बदरीफलम् ९ । इति शब्दरत्नावली ।
कोलिफलम् १० । इति जटाधरः ॥ अपि च ।
"पुंसि स्त्रियाञ्च कर्कन्धुर्बदरीकोलमित्यपि ।
फेनिलं कुवलं घोण्टा सौवीरं बदरं महत् ।
अजाप्रिया कुहा कोलिर्विषमो भयकण्टकः" ॥
अथ बदरविशेषाणां नामानि गुणाश्च ।
"पक्वमाम्रं सुमधुरं सौवीरं बदरं महत् ।
सौवीरं बदरं शीतं भेदनं गुरु शुक्रलम् ॥
बृंहणं पित्तदाहास्रक्षयतृष्णानिवारणम् ।
सौवीराल्लघु सम्पक्वं मधुरं कोलमुच्यते ।
कोलन्तु बदरं ग्राहि रुच्यमुष्णञ्च वातलम् ।
कफपित्तकरं चापि गुरु सारकमीरितम् ॥
कर्कन्धुः क्षुद्रबदरं कथितं पूर्वसूरिभिः ।
अम्लं स्यात् क्षुद्रबदरं कषायं मधुरं मनाक् ॥
स्निग्धं गुरु च तिक्तञ्च वातपित्तापहं स्मृतम् ।
शुष्कं भेदाग्निकृत् सर्व्वं लघु तृष्णाक्लमास्रजित्" ॥
इति भावप्रकाशः ॥ बदरादित्रय क्रमात्सौवीरे ।
बदरीबदरं घोण्टा कर्कन्धुः कोलि । बृहत्तरम् ।
'बदरीबदराकारा बृहत् [illegible] भवेत् ।
अरण्यजैव या घोण्टा घोण्टाकोलेति चोच्यते' ॥
इति सुश्रुतिः ॥
'[illegible] घोण्टा च बदरीफला ।
[illegible] इति । रत्नकोषः ॥ कश्चित्तु
कोलादिषु बदरीषु सौवीरादिषु प्रकार
कोलादिकाद्य ॥ [illegible] "[illegible] कोलि
[illegible] । सौवीरं बदरं कोलम्" ॥
इति पठति । [illegible]
घोण्टा [illegible] इति व्याचष्टे । "सौवीरं बदरं
कोलं [illegible]" । इति बोपालितः ।
इति भरतः ॥ [illegible] । अस्य गुणाः । [illegible] । बात
कफनाशित्वम् । [illegible] गुणाः । ग्राहित्व
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] । इति राज
वल्लभः ॥ [illegible] । इति वैद्यक
परिभाषा ॥ (यथा, [illegible] १० । ८ ।
"[illegible]" ॥)
[illegible] । इति राजनिर्घण्टः ॥ [illegible] । इति
वैद्यक ॥

कोल, पु (कोलति [illegible]
[illegible] । कुल+अच् ।) शूकरः । (कोलति [illegible]

अरे इति।) प्लव। इत्यमरः।१।१०।११॥ भेला माड इत्यादि भाषा। अङ्कमाल्पि। क्रमिः। चित्रम्। चिता इति भाषा। (कालगि आलिङ्गनं ह्रान्यत्र। कुल+अधिकरणे कृतधोति मज्।) क्रोडम्। इति मेदिनी। देशविशेषः। इति शब्दरत्नावली॥ अश्वभेद। इति धरणी॥ वर्णसङ्करजातिविशेषः। (यथा, हरिवंशे। ९२।१२३।

"पाण्ड्यश्च केरलश्चैव कोलश्चोलश्च पार्थिवः।

तेषां जनपदाः ख्याताः पाण्ड्याश्चोलाः सकेरलाः"॥)

स तु क्षेटात् तीवरकन्यायां जातः। इति ब्रह्मवैवर्त्तपुराणम्॥ म्लेच्छधारिम्लेच्छजातिविशेषः। स च पूर्व्वं क्षत्रिय आसीत् सगरराजेनाधो वेदपाठादावनधिकारी कृतः। एतद्विवरणं हरिवंशे १४ अध्याये द्रष्टव्यम्॥

(अयन्तु कोल ययातिवंशीयस्य राज्ञो दुष्मन्तस्य पौत्रेन्द्रवंशजः। इदानीं पार्व्वतः असभ्यजातिविशेषः। उत्कलदेशादुत्तरभागे प्रायः वसति। इयन्तु कोलजाति सत्यप्रिया सरलप्रकृति अतिथिसत्कारप्रिया चेति उच्यते।)

कोलकं, क्ली, (कोल+संज्ञायां कन्। कुल+वुन्नादित्वात् वुन् वा।) गन्धद्रव्यविशेषः। काँकला इति भाषा। मरिचम्। इत्यमरः।२।९।३६॥

कोलक, पुं, (कुल+क्वचित् एवुल् शास्त्रादित्वात् वुन् वा।) अङ्कोठवृक्षः। इति राजनिर्घण्टः॥ बकुलवृक्षः। इति जटाधरः॥

कोलकन्दः, पुं (कोल इव कन्दोऽस्य।) महाकन्दविशेषः। तत्पर्य्यायः। क्रमिघ्न २ पङ्कज ३ वलपाल ४ प्रटालु ५ सपुट ६ पुटकन्द ७। अस्य गुणाः। कटुत्वम्। उष्णत्वम्। क्रमिदोषनाशित्वम्। वान्तिविषहृदिशमनत्वम्। विषदोषनिवारणत्वम्। इति राजनिर्घण्टः॥

कोलकर्कटिका, स्त्री, (कोल इव कर्कटिका।) मधुखर्ज्जूरिका। इति राजनिर्घण्टः॥

कोलखण्ड, क्ली, (कोल खण्डीव तदनुरूपमस्य।) नखीनामगन्धद्रव्यम्। इत्यमरः।२।४।१२०॥ (नखीशब्देऽस्य गुणादयो ज्ञातव्याः।)

कोलनासिका, स्त्री, (कोलस्य शूकरस्य नासिका नासिकेव। नस+ण्वुल् टाप् अत इत्वम्।) वन्यकोलक। इति धारावली॥

कोलपुच्छ, पुं, (कोलस्य शूकरस्य पुच्छ इव पुच्छोऽस्य।) कङ्कपक्षी। इति धारावली।

कोलमूल, क्ली, (कोलस्य वदरीफलस्य मूलवत् मूलमस्य। यद्वा, कोल वदरीफलमिव मूलमस्य।) पिप्पलीमूलम्। इति राजनिर्घण्टः॥

कोलम्बक, पुं, (कुल्+बाहुलकात् अम्बच्। ततः स्वार्थे कन्।) वीणाया कायः। इत्यमरः।१।७।७॥ स तु तन्त्रीरहितादिसमुदाय शरीरम्। अलाबुरहितकुम्भसमुदायशरीरेण इत्यन्ये। इति भरतः॥

कोलवल्ली, स्त्री, (कोलो वराह तत्प्रियत्वात् वल्ली। तदाकारत्वात् तथात्वम्।) गज पिप्पली। इत्यमरः।२।४।९७॥ चव्यम्। इति राजनिर्घण्टः॥ (अस्या पर्य्याया यथा,—

"चविकायाः फलं प्राज्ञैः कथिता गजपिप्पली।

कपिवल्ली कोलवल्ली श्रेयसीवशिरश्च सा"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

कोलशिम्बी, स्त्री, (कोलस्य शूकरस्य पादाकारा शिम्बिरस्याः। ततो वा ङीष्।) लताविशेषः। आलकुसी इति भाषा। तत्पर्य्यायः। कृतपर्णा २ खड्गा ३ शूकरपादिका ४ काकाण्डोला ५ दधिपुष्पा ६ काकाण्डा ७ पर्यङ्कपादिका ८। अस्या गुणाः। वातनाशित्वम्। गुरुत्वम्। उष्णत्वम्। कफपित्तकारित्वञ्च। इति राजनिर्घण्टः॥ (तत्पर्य्यायगुणा। यथा, भावप्रकाशे।

"कोलशिम्बी कृष्णफला मता पर्यङ्कपादिका।

कोलशिम्बी समीरघ्नी गुर्व्वी कफवातघृत्।

रुक्षा पित्ता दाहहृत्या वर्णकृत् बलविद्गुरुः"॥)

कोला, स्त्री, (कुल्+ज्वलादित्वात् णः ततष्टाप्।) कोलिवृक्षः। इति शब्दरत्नावली॥ पिप्पली। (अस्याः पर्य्याया यथा,—

"पिप्पली चपला शौण्डी वैदेही मागधी कणा।

उषणोपकुल्या मगधी कोला स्यात्तिक्ततण्डुला"॥)

चव्यम्। इति मेदिनी॥ (अस्याः पर्य्याया यथा,—

"चव्य तेजोवती कोला नाकुली च विकोषया"।

इति वैद्यकरत्नमालायाम्॥)

कोलाख्य पुं, देशविशेषः। इति शब्दरत्नावली॥ तत्र पुर कोलपुरम्॥

कोलाहल, पुं (कोल एकीभूताश्रयाशब्दविशेषः त आहलति व्याप्नोतीति। हल् विलेखने+अच्।) बहुविधदूरगाम्याशब्दः। तत्पर्य्यायः। कलकलः २। इत्यमरः।१।६।२४॥ कालकीलः ३। इति शब्दरत्नावली॥ (यथा, रामायणे।२।११।४१।

"ततो हलहलाशब्द एव कोलाहलो महान्।

महान् राक्षसनादश्च पुनलुप्तरवो महान्"॥)

कोलि पुं स्त्री, (कुल्+"सर्व्वधातुभ्य इन्"। उणा ४।११७। इतीन्।) वृक्षविशेषः। कुलगाछ इति भाषा। तत्पर्य्यायः। कर्कन्धु २ बदरी ३। इत्यमरः।२।४।३६॥ कर्कन्धूः ४ बदरः ५ कोली ६ कोला ७ कुवली ८। इति तट्टीकायां भरतः॥ कोल ९। इति तट्टीका सारसुन्दरी॥ (यथा, गारुडे १९४ अध्याये।

"जातीपत्र कोलिपत्रं तथैव मनःशिला।

दन्तिश्चैव क्षता वशिकन्यादी महेश्वर॥

धूमपानं कासहर भाव कार्य्या विचारणा"॥)

कोली, स्त्री, (कोलति धीमतेन आपने सर्व्वत्र वा। कुल्+अच्+गौरादित्वात् ङीष्। यद्वा, कोलि+वा ङीष्।) कोलिवृक्षः इत्यमरटीकायां भरतः॥ (अस्याः पर्य्याया यथा,—

"पुंसि स्त्रियाम् कर्कन्धूर्वदरी कोलमित्यपि।

सौवीरं कुवल घोंटा सौवीरं वदर महत्।

अजप्रिया कुहा कोली विषमोभयकण्टका"॥

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे।

न्यग्रोधादिगणे चव्यार्थेऽस्य यथा,—

"कोली कदम्बविरला मधुकं मधूकम्"॥

इति सूत्रस्थाने पञ्चदशेऽध्याये वाग्भटेनोक्तम्॥)

कोल्या स्त्री, (कोलमर्हतीति यत्।) पिप्पली। इति रत्नमाला॥

कोविदः त्रि, (कुड शब्दे विप् कौ वेद त वेत्ति जानातीति। विद्+"इगुपधेति"।३।१।१३५। इति कः।) पण्डितः। इत्यमरः।३।७।५॥ (यथा, भागवते।१।१९।२९।

"इति राम उपादिश्य विप्रा शास्त्रकोविदाः।

शश्वोपविलयः सर्व्वे प्रतिजग्मु स्वकान् गृहान्"॥)

कोविदारः, पुं, (कु कुत्सित विदारयति विदारयति भूमि विदार्य्योद्भवतीत्यर्थः। दृ+"कर्म्मण्यण्"।३।२।१। इति अण्। अत पृषोदरात् साधु।) रक्तकाञ्चनवृक्षः। तत्पर्य्यायः। चमरिकः २ कुद्दाल ३ युगपत्रक ४। इत्यमरः।२।४।२२॥ काञ्चनारः ५ कनकारकः ६ कान्तपुष्प ७ काञ्चन ८ कान्तारः ९ यमलच्छदः १० काञ्चनाभ ११ ताम्रपुष्प १२ कुञ्जार १३ रक्तकाञ्चनः १४। इति जटाधरः॥ विदलः १५। इति शब्दरत्नावली॥ अपि च।

"काञ्चनाः काञ्चनको गण्डारिः शोणपुष्पकः"।

अथ काञ्चनारभेदः।

"कोविदारश्चमरिकः कुद्दालो युगपत्रकः।

कुण्डली ताम्रपुष्पश्चाश्मान्तकः स्वल्पकेसरी।

काञ्चनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत्।

क्रमिकुष्ठगुदभ्रंशगण्डमालाव्रणापहः॥

कोविदारोऽपि तद्वत्स्यात् तयोः पुष्पं लघु स्मृतम्।

रूक्षं संग्राहि पित्तास्रप्रदरक्षयकासनुत्"॥

इति भावप्रकाशः॥ अस्य गुणाः। कषायत्वम्। संग्राहित्वम्। व्रणरोपणत्वम्। दीपनत्वम्। कफवातमूत्रकृच्छ्रनाशित्वञ्च। इति राजनिर्घण्टः॥ तत्पुष्पगुणाः। धारकत्वम्। रुचिकारित्वम्। रक्तपित्तरोगे पथ्यत्वञ्च। इति राजवल्लभः॥ (यथा, माघकाव्ये।

"कोविदारकलिकातिकोमला

नखचिह्नविलोलपातिता।

चिह्नमाधवकृतावपाटिता

वेदनाकुलितातिकोमला"॥)

पारिजात। हरिवंशे कोविदारस्य वृक्षस्य कथने एतद्विवृतिर्यथा।१२४।७०—७१।

"कोऽप्ययं दारवीभूतः करवानको मतो नृप।

कोविदार इति ख्यातस्तस्य च गुणवत्तरः॥

मन्दारः कोविदारश्च पारिजातश्च नामभिः।

स एको भाषते दिव्यो वर्णेतत् कुसुमोत्तमम्"॥)

कोशः, पुं (कुश्यते संश्लिष्यते। कुश संश्लेषणे+अकर्त्तरि चेति अधिकरणादौ घञ्।) अण्डम्। इति शब्दरत्नावली॥ कुश्यन्ते आच्छाद्यन्ते आत्मानोऽभ्यः कोशः। कुश श लिष्यते घञ् कोशो मूर्द्धन्यान्तः तालव्यान्तः इत्यन्ये। इति भरतः। कुड्मलम् पिधानम्। तत्पर्य्यायः। सिध्मन् २। इत्यमरः।२।८।९१॥ कुड्मल वैन

ह्यपश्च मिलित प्रत्येकञ्च कोषाद्दिद्वयवाच्यम् । सुतमावर्त्तित अशतमाकरोत्य सूर्व घटितास्य टितमिति स्वामी । सुतसमावर्त्तोत्तम अश्रव पुष्पादिरूपमाकरोत्यमिति केचित् । (आवरण विशेष । यथा, भागवते । २ । १ । ३४ ।

"अव्यक्तमाहुर्हृदयं मनश्च
स चन्द्रमाः सर्व्वविकारकोषः" ।

मुकुलम् । यथा, रघौ । ३ । ८ ।

"तिरश्चकार भ्रमराभिलीनयो
सुजातयो पङ्कजकोषयो श्रियम्" ।)

कोषकारः, पुं, (कोषं करोति लालयादिभिरात्मानमाच्छादयति । कोष + कृ + अण् ।) इक्षुः । इति शब्दरत्नावली ॥ मूर्द्धन्यमध्योऽप्ययम् । (कोषं करोति स्वमुखलालाजन्यतन्तुभिरात्मानमावृणोतीति । कीटविशेषः । गुटिपोका इति भाषा । यथा, भागवते । ६ । १ । ५२ ।

"कोषकार इवात्मानं कर्म्मणाच्छाद्य मुह्यति" ।)

कोषफल, क्ली, (कोषे फलं बीजं यस्य ।) कक्कोलकम् । इत्यमरः । २ । ६ । १३० । (कक्कोलकशब्देऽस्य विवरणं ज्ञेयम् ।)

कोषफला, स्त्री, (कोषे फलं यस्याः ।) महाकोषातकी । चञ्चुकी । इति राजनिर्घण्टः ॥

कोषल, पुं स्त्री, (कुश् + "वृषादिभ्यश्च" उणां । १ । १०८ । कल । बाहुलकात् गुणः ।) अयोध्यानगरी । इति शब्दमाला उणादिकोषश्च । मूर्द्धन्यमध्योऽप्ययम् । (यथा, रामायणे । १ । ५ । ५ ।

"कोषलो नाम मुदितः स्फीतो जनपदो महान् ।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्" ।)

कोषलात्मजा, स्त्री, (कोषलस्य कोषलदेशपतेरात्मजा दुहिता ।) कौशल्या । सा तु श्रीराममाता दशरथराजपत्नी च । इति शब्दरत्नावली ।

कोषचिक, स्त्री, (कुत्सनाय कर्णाय स्थितजनककार्यं शिखार्थमिति भावः दीयते यत् । कुषक + उक् निपातनात् मूर्द्धन्य कोकारत्वम् ।) उत्कोचः । इति हेमचन्द्रः । घुष इति भाषा । मूर्द्धन्यमध्योऽप्ययम् ॥

कोषाङ्ग, क्ली, (कोष इव अङ्गमस्य ।) इत्कटः । इति हारावली । कोकड़ा इति भाषा । मूर्द्धन्यमध्योऽप्ययम् ॥

कोषातक, पुं, (कोषं शिराकोषं अतति रक्षति सातत्येन प्राप्नोतीति । अत + क्वुन् ।) केशः । इति विश्वमेदिन्यौ ॥ (कोषं वैराग्यकमाकरमतति प्राप्नोतीति वाच्ये । यजुर्व्वेदशाखाविशेषः । कठशाखी उपनिषद् ।)

कोषातकी, स्त्री, (कोषं अतनीति । अत + क्वुन् । ततः कोषातक + गौरादित्वात् ङीष् ।) पटोली । घोषका । इति मेदिनी । लताविशेषः । झिङ्गा इति भाषा । तत्पर्य्यायः । कृतच्छिद्रा २ जालिनी ३ कृतवेधना ४ क्ष्वेडा ५ सुषवी ६ धामार्गवः ७ मृदङ्गफलिनी ८ कर्कोटकः ९ । अस्या गुणाः । शिशिरत्वम् । कटुत्वम् । कषायत्वम् । पित्तश्लेष्मवर्णविनाशित्वम् । श्वासज्वरादिदोषनाशित्वम् । इति राजनिर्घण्टः । मूर्द्धन्यमध्योऽप्य-

दम् । महाकोषातकी । राजकोषातकी । यथा ।

अथ नेनुका ।

"महाकोषातकी प्रोक्ता हस्तिघोषा महाफला ।
धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ॥
महाकोषातकी स्निग्धा रक्ता पित्ताविलापहा" ।

अथ तोरई ।

"धामार्गवो पीतपुष्पो जालिनी कृतवेधना ।
राजकोषातकी चेति तथोक्ता राजिमत्फला ॥
राजकोषातकी शीता मधुरा कफवातला ।
पित्तघ्नी दीपनी श्वासज्वरकासकृमिप्रणुत्" ॥

इति भावप्रकाशः ॥ (अस्या गुणा यथा,—

"कोषातकी फलं स्वादु मधुरं वातपित्तनुत् ।
विपाके च कफं हन्ति ज्वरे पथ्यं प्रदिश्यते" ॥

इति हारीते प्रथमस्थाने १० अध्याये ॥)

कोषातकी,[न्] पुं (कोषातकोऽस्यास्तीति । इनि ।) वाणिज्यम् । वणिक् । वाड़वाग्निः । इति विश्वः ।

कोषाम्र, पुं (कोषे + आम्र इव फलमस्य ।) फलवृक्षविशेषः । कोषाम इति भाषा । तत्पर्य्यायः । क्षुद्राम्रः २ सुकोशकः ३ । इति भावप्रकाशः ॥ घनस्कन्धः ४ वनाम्रः ५ जन्तुपादपः ६ क्षुद्रफलः ७ रक्ताम्रः ८ लाक्षावृक्षः ९ सुरक्तकः १० । अस्य गुणाः । कुष्ठशोथास्रपित्तव्रणकफापहत्वम् । तत्फलगुणाः । ग्राहित्वम् । वातघ्नत्वम् । अम्लत्वम् । उष्णत्वम् । गुरुत्वम् । पित्तदत्वञ्च । इति भावप्रकाशः ॥ कफानिलहरत्वम् । विदाहित्वम् विशेषकारित्वञ्च । पक्वस्य तस्य गुणाः । मधुरत्वम् । अम्लत्वञ्च । पक्वादिफलस्य तस्य गुणाः । दीपनत्वम् । रुचिसुश्लेष्मकारित्वञ्च । तत्तैलस्य गुणाः । सारकत्वम् । कृमिकुष्ठकफापहत्वम् । व्रणामयहरत्वम् । वह्वत्वम् । पथ्यत्वम् । गौल्यत्वम् । पाचनत्वञ्च । इति राजनिर्घण्टः ॥ (रोगविशेषेऽस्य व्यवहारो यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये ॥

"कारञ्जं वा सार्षपं वा सतैलं
कोषाम्रं तैलं प्रियुकोषाम्रदोषी ।")

कोषिका, स्त्री, (कोषः कोष इव पदार्थो वा अस्याः अस्तीति । कोष + त्रिह्यादित्वात् ठन् ।) शुक्तिः? पर्णी । इति राजनिर्घण्टः ॥

कोष्ठी, स्त्री, (कुष् संश्लेषे + अच् गौरादित्वात् ङीष् ।) उपानत् । जुता मोजा इति च भाषा । तत्पर्य्यायः । पादुका २ पादरक्षिका ३ पादत्राणम् ४ । इति हारावली ॥ उपानत् । इति हेमचन्द्रः । भा-ष्यादिर जुता इति भाषा ॥

कोष, पुं क्ली, (कुष्यते आकृष्यते धनेच्छोभिः धनमस्मादिति कोषः । कुष निष्कर्षे + घञ् करणे अधिकरणे वा ।) कुड्मलः । कुँड़ि इति भाषा । अण्डकोषः । अण्ड इति भाषा । (यथा, महाभारते । ३ । ३० । १९ ।

"कण्टाद विन्ध्य गतो ...... मर्द्दनम् ।
वेशत्रदण्डलक्षणो वैकारी दण्डनायका ॥
काद दशरथो कोषं हास्यो कर्म्मयोगः ।
[illegible] ॥
[illegible]" ।

निश्रिशोऽस्य गुरुः पीनं दैवं परमनिश्चलः" ॥)

अपसन्नूषः । (यथा रघौ । ५ । १ ।

"तमध्वरे विश्वजिति क्षितीशं
निःशेषविश्राणितकोषजातम्" ।)

दिव्यम् । (यथा, रामायणे? राजतरङ्गिण्याम् । ५ । १२५ ।
'ततो निःशिष्य बन्धं नक्षत्रे मेयमन्नि ।
कोषं पयतुरत्यन्तोऽस्य वासवो अन्वयामरौ" ।)

अस्त्रम् । कराटक खेमशल्यम् । इत्यमरः । २ । ८ । ९१ अस्य विवरणं तामच्यासे दष्टव्यम् । पात्रम् । जातीकोषः । जायफल इति भाषा । (जातीपत्री । जयित्री वर्णे व्यवहारो । यथा, गर्भचिन्तामणिग्रन्थे ।

"एवं तावत्तदा शौचं प्रत्येकं बलमात्रकम् ।
कथञ्चदपावस्य कर्पूरं चन्दनात्मकम् ॥
जातीफलं तदा कोषं गोस्तनं प्रतारयीम् ।
कस्तूरिकायोर्मूलं प्रत्येकं गोत्वं शुभम् ॥
वाटिका वटिका कार्या द्विगुञ्जा प्रमाणतः ।
भक्षिता निहन्त्याशु श्लेष्माणं विशेषतः ।
गर्भिण्या ज्वरदाहघ्नं परं गुलिकामयम्" ।

इति वैद्यकभैषज्यरत्नावल्यां स्त्रीरोगाधिकारे ।) शब्दादिनिचयः । इति मेदिनी । (यथा, अमरकोषः ।) भाण्डागारम् । पानपात्रकम् । योनिः । शिम्बा । इति हेमचन्द्रः । दिव्यादिचव शपथः । इति धरणी । शब्दाभिधानग्रन्थे भेदश्च वाचकः । यथा शब्दकोषः मेदकोष इत्यादि । इत्यमरटीकायां स्वामी । घनस्थितिः । इति जटाधरः । (यथा, मार्कण्डेयपुराणे देवीमाहात्म्ये ।
"कोषो बलञ्चाप्यहृत तथापि स्वपुरे मतः" ।)

तस्य गुणाः ।

"कोषो मद्योन्नतिर्भिन्नो न तु प्रायाः कथञ्चन ।
दश हि राजा भूपस्य च अत्रोदितमिति स्थितिः ॥
धर्म्मदेशो सुरार्थाय सर्व्वाशी मरणाय च ।
आपदर्थे च दत्तः कोषः कोषवता सदा ॥
धनात् कुलं प्रभवति धनाद्धर्म्मः प्रवर्त्तते ।
नाधनस्य भवेद्धर्म्मः न प्रभुः न कथञ्चन ॥
कथंचिदपि धनं कुलीनश्च मन्यते वरैः ।
अर्थं प्राप्य प्राप्ताः सन्ति लोके हस्तिवाजिनः ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
सिद्धा च राजकोषस्य कोषवृद्धिः करोति ॥
[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ।
[illegible] ॥
[illegible] ।

एकस्यां गुणहीनायां छविमन्यच्च कारयेत्" ।
इति प्रतिष्ठातत्त्वम् ॥ *॥ (वेदान्तशास्त्रोक्तस्थूलसूक्ष्मादिभेदेन शरीरत्रयावच्छिन्न अन्नमय प्राणमयः मनोमय विज्ञानमय आनन्दमयश्च इत्येते पञ्च कोषवदाच्छादकत्वादात्मनः कोषतयोच्यन्ते । यथा, पञ्चदश्याम् । १ । ३३ ।
"गुहाहितं ब्रह्म यत्तत् पञ्चकोषविवेकतः ।
बोद्धुं शक्यं ततः कोषपञ्चकं प्रविविच्यते ॥
देहादभ्यन्तरः प्राणः प्राणादभ्यन्तरं मनः ।
ततः कर्त्ता ततो भोक्ता गुहा सेयं परम्परा ॥
पितृभुक्तान्नजाद्वीर्य्याज्जातोऽन्नेनैव वर्द्धते ।
देहः सोऽन्नमयो नात्मा प्राक्चोर्द्ध्वं तदभावतः ॥
पूर्व्वजन्मन्यसत्त्वे तज्जन्म सम्पादयेत् कथम् ।
भाविजन्मन्यसत्कर्म्म न भुञ्जीतेह सञ्चितम् ॥
पूर्णो देहे बलं यच्छन्नक्षाणां यः प्रवर्त्तकः ।
वायुः प्राणमयो नासावात्मा चैतन्यवर्ज्जनात् ॥
अहन्तां ममतां देहे गेहादौ च करोति यः ।
कामाद्यवस्थया भ्रान्तो नासावात्मा मनोमयः ॥
लीना सुप्तौ वपुर्बोधे व्याप्नुयादानखाग्रगा ।
चिच्छायोपेतधीर्नात्मा विज्ञानमयशब्दभाक् ॥
कर्त्तृत्वकरणत्वाभ्यां विक्रियेतान्तरिन्द्रियम् ।
विज्ञानमनसी अन्तर्बहिश्चैते परस्परम् ॥
काचिदन्तर्मुखा वृत्तिरानन्दप्रतिबिम्बभाक् ।
पुण्यभोगे भोगशान्तौ निद्रारूपेण लीयते ॥
कादाचित्कत्वतो नात्मा स्यादानन्दमयोऽप्ययम् ।
बिम्बभूतो य आनन्द आत्माऽसौ सर्व्वदा स्थितेः ॥
ननु देहमुपक्रम्य निद्रानन्दान्तवस्तुषु ।
मामूदात्मत्वमन्यत्तु न किञ्चिदनुभूयते" ॥)

कोषकः, पुं, (कोष इव । कोष+स्वार्थे कन् ।) अण्डम् । अण्डकोषः । इति शब्दरत्नावली ॥

कोषकारः, पुं, (कोषं करोति स्वमुखलालादिभिरात्मानं छादयति । कोष+कृ+"कर्म्मण्यण्" । ३ । २ । १ । इति अण् ।) इक्षुः । इति शब्दरत्नावली ॥ इक्षुविशेषः । कुशारि इति भाषा । अस्य गुणाः । गुरुत्वम् । शीतत्वम् । रक्तपित्तक्षयापहत्वञ्च । इति राजवल्लभः ॥ (कोषं स्ववेष्टनं स्वमुखनिःसृतलालाभिरात्मनुमि करोतीति । कृ+अण् ।) कीटविशेषः । गुटिपोका इति भाषा । तत्पर्य्यायः । तन्तुकीटः २ । इति जटाधरः ॥ (यथा महाभारते । १२ । ३२९ । २९ ।
"बहु सञ्चिन्त्यमानोऽपि दोषवान् हि परिग्रहः ।
कृमिर्हि कोषकारस्तु बध्यते स्वपरिग्रहात्" ॥
कोषं अर्थैः सह शब्दसमूहरूपग्रन्थविशेषं करोतीति ।) अभिधानकर्त्ता च । तत्पर्य्यायः उत्पलम् ॥

कोषचञ्चुः, पुं, (कोषः मधुकोष इव चञ्चुरस्य ।) सारसपक्षी । इति शब्दमाला ॥

कोषपानं, क्ली, (सत्यपरीक्षार्थे कोषजलस्य पानम् ।) तत्तद्देवतास्नानजलपानरूपदिव्यपरीक्षाविशेषः । यथा,—
अथ कोषविधिः । नारदः ।
"उग्रान् सोपवासस्य आर्द्रपटाय च ।
मलूचकाश्रमविनोः कोषपानं विधीयते ॥
इच्छतः श्रद्दधानस्य देवब्राह्मणसन्निधौ ।
मद्यपस्त्रीव्यसनिनां कितवानां तथैव च ॥
कोषः प्राज्ञैर्न दातव्यो ये च नास्तिकवृत्तयः ।
महापराधे निर्द्धर्म्मे कृतघ्ने क्लीवकुत्सिते ॥
नास्तिकव्रात्यदासेषु कोषपानं विवर्ज्जयेत् ।
समाहूयाभिशस्तं तु मण्डलाभ्यन्तरे स्थितम् ॥
आदित्याभिमुखं कृत्वा पाययेत् प्रसृतित्रयम् ।
ऊर्द्ध्वं यस्य द्विसप्ताहाद्दैवतन्तु न चाद्रवेत् ॥
नाभियोज्यः स विदुषा कृतकालव्यतिक्रमात्" ॥
सत्यप्रश्न आस्तिक इति मिताक्षरा ॥ महापराधी महापातकी । निर्द्धर्म्मा वर्णाश्रमरहितः । कुत्सितः प्रतिलोमजः । दासः कैवर्त्तः । मण्डलाभ्यन्तरे गोमयकृतमण्डलाभ्यन्तरे । दैवतं रोगादि । महदात्ययम् । तस्य दैविकात्ययपरिहार्य्यत्वात् ।
तदाह कात्यायनः ।
"अथ दैवविसम्वादे त्रिसप्ताहन्तु दापयेत् ।
अभियुक्तः प्रयत्नेन तमर्थं दण्डमेव च ॥
तस्यैकस्य न सर्व्वस्य जनस्य यदि तद्भवेत् ।
रोगोऽग्निर्ज्ञातिमरणमृणं दाप्यो दमञ्च सः ॥
ज्वरातिसारविस्फोटगूढास्थिपरिपीडनम् ।
नेत्ररुक् गलरोगश्च तथोन्मादः प्रजायते ॥
शिरोरुग्भुजभङ्गश्च दैविका व्याधयो नृणाम्" ॥
गलरोग इत्यत्र शूलरोग इति क्वचित् पाठः । द्विसप्ताहन्तु महाभियोगभवविषयम् । महाभियोगेष्वेतानीति प्रस्तुत्य चतुर्द्दशकान्ते इति याज्ञवल्क्याभिधानात् । मिताक्षरायामेवम् । तत्तु
"त्रिरात्रात् सप्तरात्राद्वा द्वादशाहात् द्विसप्तकात् ।
वैकृतं यस्य दृश्येत पापकृत् स उदाहृतः" ॥
इति पितामहोक्तं तन्महाभियोगात् स्वल्पाल्पाभियोगेन त्रिधा विभज्य त्रिरात्रादिपक्षत्रयव्यवस्थापनीयमिति मिताक्षरा । तथा ।
"भक्तो यो यस्य देवस्य पाययेत्तस्य तज्जलम् ।
समभावे तु देवानामादित्यस्य तु पाययेत् ॥
दुर्गायाः पाययेच्चौरान् ये च शस्त्रोपजीविनः ।
भास्करस्य तु यत्तोयं ब्राह्मणं तन्न पाययेत् ॥
दुर्गायाः स्नापयेच्छूलमादित्यस्य च मण्डलम् ।
अन्येषामपि देवानां स्नापयेदायुधानि च ॥
अथ, स्वल्पापराधे देवानां स्नापयित्वायुधोदकम् ।
पाय्यो विकारे पापाद्धा निःशङ्कः शुचिरन्यथा ॥
इति कात्यायनोक्तविशेषात्स्वल्पापराधे देवस्नानोदकमिति विवादभेदः । रत्नाकरोऽप्येवम् । मदनपालोऽप्येवमिति व्यवहारदीपिका । तथा विष्णुः । उग्रान् देवान् समभ्यर्च्य तत्स्नानोदकप्रसृतित्रयं पिबेत् । इदं मया न कृतमिति व्याहरन् देवतामुख इति । एतदनुसारादेवास्य प्रतिज्ञा मानुषी । तत्र क्रमः । प्राड्विवाको गोमयकृतमण्डलाभ्यन्तरे धर्म्मावाहनादिकमादित्यदेवतापूजां कृत्वा स्त्रियश्च दत्त्वा समभ्यर्च्य प्रतिज्ञापत्रं शोध्यशिरसि निधाय यथाविहितं देवं सम्पूज्य तस्याग्रेऽवस्थापयेत् ।
"ॐ तोय त्वं प्राड्विवाकः सदेहात्रम् निर्मितम् ।
शुद्धेश्च कारणं शोध्य मन्यत्वं हिनाश्चया ।
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे" ॥
इत्यावाह्य तन्निमज्ज्य गोमयकृतमण्डलाभ्यन्तरे स्थितं सोपवासं स्नातमार्द्रवाससमादित्याभिमुखं ॐ सत्येन माभिरक्ष त्वं वरुणेत्यनेन शोध्यं पठित्वा न मिथ्यैतत् प्रसृतित्रयं जलं पाययेत् । ततः यदि अवधिकालाभ्यन्तरे रोगपीडा न भवति तदा शुद्ध इति । ततो दक्षिणा देया । इति दिव्यतत्त्वम् ॥

कोषफलं, क्ली, (कोषे फलमस्य ।) कक्कोलम् । तच्च कर्पूरतुल्यगन्धद्रव्यविशेषः । इत्यमरटीकायां रमानाथः सारसुन्दरी च ॥

कोषफलः, पुं, (कोषे फलमस्य ।) घोषकलता । इति जटाधरः ॥

कोषफला, स्त्री (कोषफल+अजादित्वात् टाप् ।) पीतघोषा । इति रत्नमाला ॥ तत्पर्य्यायस्तथाघोषम् (घोषकशब्देऽस्या विवरणं ज्ञेयम् ॥)

कोसला, स्त्री, (कुश्+वृषादित्वात् कलप्रत्ययः बाहुलकात् गुणः पृषोदरात् शकारस्य सकारादेशः ।) अयोध्या । इति शब्दरत्नावली ॥ (सा च सरयूतटस्था राजधानी । यथा, मार्कण्डेये । ८ । १०९ ।
"मच्छोकमग्नमनसः कोसलानगरे जनाः ।
तिष्ठन्ति तापेनाख्याय कथं दास्याम्यहं दिवम्" ॥
परन्तु कोसलदेशः द्विविधः । प्राच्योत्तरभेदेन । तत्रायोध्यादक्षिणदेशयोः कोसलत्वम् । यथा, रघुः । ९ । १ ।
"पितुरनन्तरमुत्तरकोसलान्
समधिगम्य समाधिजितेन्द्रियः ।
दशरथः प्रशशास महारथो
यमवतामवतां च धुरि स्थितः" ॥
प्राक्कोसलस्य राममातामहस्य । तत्र राजा नग्नजित् वा यस्य कन्या सत्या तस्य सुता । तद्देशाधिपतिः । यथा, महाभारते । २ । ३१ । १३ ।
"स विजित्य दुराधर्षं भीष्मकं माद्रिनन्दन ।
कोसलाधिपतिञ्चैव तथा वेणातटाधिपम् ।
कान्तारकांश्च समरे तथा प्राक्कोसलान् नृपान्" ॥)

कोषवृद्धिः, स्त्री (कोषस्य अण्डकोषस्य वृद्धिः ।) कुरण्डः । इति शब्दरत्नावली ॥ (कोषस्य वृद्धिरिति विग्रहे अण्डवृद्धिः ॥)

कोषशायिका स्त्री, (कोषे पिधानमध्ये शेते तिष्ठतीत्यर्थः । कोष+शी+कर्त्तरि ण्वुल् ततष्टाप् अत इत्वम् ।) क्षुरिका । इति जटाधरः ॥

कोषाङ्गः, पुं (कोषाकारं अङ्गति प्राप्नोतीति । कोष+अङ्ग+अण् ।) केशः । इति जटाधरः । (कोषं गच्छति प्राप्नोति आत्मानमावरणम् । वरकलशालिविशेषः ॥)

कोषातकी, स्त्री, (कोषाङ्ग+गौरादित्वात् ङीष्) घोषकलता । अस्याः पर्य्यायः । कर्कोटकादिवत् । पद्मशृङ्गा । कफवातादिजित् ॥ इति राजवल्लभः ॥ (इयमेव क्वचित् राजपूजा कोषातकीति च ख्याता । यथा, भावप्रकाशे ।
"धामार्गवः पीतपुष्पो जालिनी कृतवेधना ।
राजकोषातकी चेति तथोक्ता राजिमत्फला ॥

राजकोषातकी शीता मधुरा कफवातला ।
पित्तघ्नी दीपनी श्वासज्वरकासकृमिप्रणुत्” ॥
अस्या व्यवहारो यत्र तद्यथा,—
“कोषातकीनां स्वरसेन नस्य
मुष्मात्तु वा पिप्पलिसयुतेन ।
तैलेन वारिष्टभवेन कुर्य्या
दपोपकुर्ये सह नालिकेय” ॥
इति वैद्यकचक्रपाणिसंग्रहे गलगण्डाद्यधिकारे ।)
ज्योत्स्निका । झिङ्गा इति भाषा । ज्योत्स्नावती
राधि । इत्यमरभरतौ ॥ तालव्यमध्यापीयम् ॥

कोषाम्र, क्ली, (कोषे आम्रफलमिव ।) फलविशेषः ।
केयोड़ा इति भाषा । अस्य गुणाः । कफवायुना
शित्वम् । अग्निदीपनत्वम् । मलबद्धताकारित्वञ्च ।
इति राजवल्लभः ॥ (क्वचित् पुंलिङ्गोऽपि दृश्यते ।
यथा, भावप्रकाशे ।
“कोषाम्रः कुष्ठशोथास्रपित्तव्रणकफापहः ।
तत्फलं ग्राहि वातघ्नमम्लोष्णं गुरु पित्तलम् ।
मज्जास्य दीपनं रुच्यं लघु कफवातहृत् ॥”)
तालव्यमध्यमपीदम् ॥

कोषी, स्त्री, (कुष्+अच् । गौरादित्वात् ङीष् ।)
पादुका । इति शब्दरत्नावली ॥ शुङ्गा । इति
तालव्यान्ते हेमचन्द्रः ॥ शस्येर शुया इति भाषा ॥

कोषी, [न्] पुं, (कोषोऽस्त्यस्य इति इनि ।) आम्र
वृक्षः । इति शब्दमाला ॥

कोष्ठः पुं, (कुष् निष्कर्षे+“उषिकुषिगातिभ्यस्थन्”।
उणां । २ । ४ । इति थन् ।) कुशूलः । (यथा,
महाभारते । २ । ५ । ६८ ।
“कच्चित् कोषश्च कोष्ठञ्च वाहनं द्वारमायुधम् ।
आयश्च कृतकल्याणैस्तव भक्तैरनुष्ठितः” ॥)
मध्यमध्यम् । (यथा, भागवते । ८ । १० । १० ।
“श्री वामदेवकलशाद्यविचारकोष्ठ
कोष्ठाद्गोपुरसदोमणिभाविटङ्का ॥”)
कुक्षिमध्यम् । यथा, वैद्यके ।
“स्थानान्यामाग्निपक्वानां मूत्रस्य रुधिरस्य च ।
हृदुण्डुकः फुप्फुसश्च कोष्ठ इत्यभिधीयते ॥
“कोष्ठः प्रपद्यते महास्रोत शरीरमध्य महा
निम्नमामपक्वाशयेति पर्य्यायशब्दैस्तन्त्रे शरीर
माम कर्म्मणाः” ॥ “शीलदन्तपदमूत्रशौ विर
ष्मादद कोष्ठगामानुसारिणा भवन्ति रोगाः ॥
इति चरके सूत्रस्थाने ११ अध्याय ॥ कोष्ठाङ्गानि
यथा —
“तत्राधाराः रसादीनां क्रमात् परे ।
कफामपित्तपक्वानां वायोर्मूत्रस्य च स्मृताः ॥
गर्भाशयोऽष्टमः स्त्रीणां पित्तपक्वाशयान्तरे ।
कोष्ठाङ्गानि स्थितान्येषु हृदयं क्लोम फुप्फुसः” ।
इति च वाग्भटे शारीरस्थाने ३ अ ॥ तथाच
कोष्ठाङ्गानि तद्यथा ‘नाभिश्च हृदयं क्लोम च
यकृत् प्लीहा च वृक्कौ च वस्तिश्च पुरीषाधारं
च आमाशयश्च पक्वाशयश्चोत्तरगुदञ्च अधरगुदञ्च
क्षुद्रान्त्रञ्च स्थूलान्त्रञ्च वपावहनञ्चेति” । इति च
चरके शारीरस्थाने ७ अध्याये ॥
उदरम् । यथा भागवते । ६ । १८ । ११ ।
“पति भार्य्योपतिष्ठेत ध्यायेत् कोष्ठगतञ्च तम्” ॥
नाभेरधःस्थितमग्निपूरणपद्मम् । यथा, तत्रैव ।
४ । ७१ । १४ ।
“अधीत्य पार्ष्णिभ्यां पायुमुत्थाप्य प्राणैः ।
नाभ्यां कोष्ठेष्ववस्थाप्य हृदुरःकण्ठशीर्षणि” ॥
प्राकार । यथा, भागवते । ४ । २८ । ५६ ।
“पञ्चारामं नवद्वारमेकपालं त्रिकोष्ठकम् ।
षट्कुलं पञ्चविपणं पञ्चप्रकृति स्त्रीधवम्” ॥
अत्र टीका पुर्य्यां त्रिकोष्ठकं त्रिप्राकारमित्याह ।
तन्त्रोक्तमण्डलनिर्माणप्रकरणे अङ्कपद्मादिचक्रचतु
पार्श्वस्थितरेखाचतुष्कवृतस्थानभेदः ।) आत्मीये
त्रि । इति मेदिनी ॥

कोष्ण, क्ली, (कु ईषत् उष्णम् । को कादेशः ।)
ईषदुष्णम् । तत्पर्य्यायः । कवोष्णम् २ मन्दोष्णम् ३
कदुष्णम् ४ । तद्वति त्रि । इत्यमरः । १ । ४ । ३५ ॥
(यथा, रघौ । १ । ८४ ।
“भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि ।
प्रस्रवेणाभिवर्षन्ती वत्सालोकप्रवर्त्तिना ॥”)

कोहल पुं, (कोहलति विकाशयतीति । कुहल
विकाशने+बाहुलकात् कलच् । पृषोदरात्
गुणः ।) मद्यभेदः । इति हेमचन्द्रः ॥
(अस्य गुणा यथा,—
‘त्रिदोषो भेदनश्चैव कोहलो बलवर्द्धनः” ॥
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ॥ ॥ को
पृथिव्यां मानवकोष्णाच्चेण सह दर्शनं एवात
पृषोदरात् ओत्वं ।) वाद्यभेदः । नाट्यशास्त्रप्रणेता
मुनिविशेषः । इति मेदिनी ॥ (अयमेव वायवने
शारस्य कारणोत् । यथा, महाभारते । १ । ४१ । ८ ।
“कौहलो देवकस्थाय श्रीकृष्णः समकौरम” ॥)

कौकत्य, क्ली (कुत्सितं कृताकृतं इति कारणम्,
तस्मात् भवमित्यर्थे ।) अनुतापः । (स्वार्थे ष्यञ् ।)
अपलक्षणम् । इति मेदिनी ॥

कौक्कुटिक, पुं, (कुक्कुटवद्धर्मेण विचरति । यद्वा
कुक्कुटी माया कामक्रोधादिका वा पादविक्षेपस्थानं
पश्यति इति । “पश्यति” इत्यादिकुक्कुटी पश्यति’ ।
४ । ४ । ४६ । इति ठक् ।) दाम्भिकः । अदूरे
निहितदृक् । कौटादिवधभीत्या संवृतचक्षुः पाद
विक्षेपदेशदर्शी भिक्षुः । इत्यमरभरतौ ॥ अदूर
दृग्दर्शीक । इति सारसुन्दरी ॥

कौक्कुटिकन्द पुं (कुक्कुटः वक्षिर्व्विकन्दुकाल
इति इण् कौक्कुटिः । कौक्कुटिं अन्नेन कन्दौ
यस्य । अन्नादित्वात् कन्दुकं अन्नाद्यस्य स कौक्कुटी
अन्नन्दितम् अर्ककान्तिमानम ।) कन्द
विशेषः । ष कामाय इति भाषा । तत्पर्य्यायः ।
भाजुकन्दः २ । इति त्रिकाण्डशेषः ॥

कौक्षेय, पुं (कुक्षौ भवः इति ढञ् ।)
खड्गः । इत्यमरः । २ । ८ । ९८ ॥

कौङ्कः पुं (कोङ्क+स्वार्थे अण् ।) देशविशेषः । इति
शब्दरत्नावली । कोङ्कण इति भाषा ॥

कौङ्कण, पुं (कोङ्कण+स्वार्थे अण् । अत्र पृषोदरा
दित्वात् ...) कोङ्कणदेशः । इति शब्द
रत्नावली ॥

कौच, पुं, (कुच इव स्वार्थे अण् । पृषोदरात् रूपसिद्धिः ।)
कौञ्चपर्व्वतः । इति त्रिकाण्डशेषः ॥

कौञ्जायन, पुं (कुञ्जस्य युवापत्यम् । “गोत्रे कुञ्जादिभ्यश्च
फञ्” । ४ । १ । ९८ । इति फञ् ।) कुञ्जस्य
युवादि । इति । व्याकरणम् ॥

कौञ्जायनी, स्त्री, (कुञ्जस्यापत्यं स्त्री । “गोत्रे कुञ्जा
दिभ्यश्च फञ्” । ४।१।९८। इति फञ् । तत षित्त्वात्
ङीष् ।) चाण्डाली । इति जटाधरः ॥ कुञ्जस्य स्त्र्याप
त्यम् । इति मुग्धबोधम् ॥

कौञ्जायन्य, पुं (“गोत्रे कुञ्जादिभ्यश्च फञ्” । ४ । १ ।
९८ । इति फञ् । ततः स्वार्थे ञ्यः प्रत्ययः ।) कुञ्जस्य
युवापत्यम् । इति मुग्धबोधम् ॥

कौट, पुं, (कुटे गिरौ भवः । “तत्र भवः” । ४ ।
३ । ५३ । इत्यण् ।) कुटजवृक्षः । इति भाव
प्रकाशः ॥ (अस्य गुणादयः कुटजशब्दे द्रष्टव्याः ॥
कूटे मायायां भवः अण् । कपटसाक्षी ॥ कुटी
शरीरकमायायां भवः इत्यण् । स्वाधीनतया ॥
इति व्युत्पत्तिरत्नदीपः ॥)

कौटकिक त्रि, (कूटमेव इति स्वार्थे अण् । कूटं
मांसं पण्यमस्य इति ठक् ।) मांसिकः । मांस
विक्रेता । इति शब्दरत्नावली ॥

कौटज, पुं (कुटजेव कौटं स्वार्थे अण् । तत्र जायते
इति । “सप्तम्यां जनेर्डः”, इति डः ।) कुटजवृक्षः ।
इत्यमरटीकायां रायमुकुटः ॥ (अस्य गुणादयः
कुटजशब्दे ज्ञेयाः ॥)

कौटतक्ष, पुं (कौट स्वाधीनः सन् तक्षति इति
कर्मधारयः । “ग्रामकौटाभ्याञ्च तक्ष्णः” । ५ । ४ ।
९५ । इति टच् ।) स्वकर्मोपजीवी स्वतन्त्रशिल्पी
ऽनधीनस्तक्षा । इत्यमरः । २ । १० । ९ । स्वाधीन
कुतर इति भाषा ॥

कौटस्थ पुं (कुटे पर्व्वताग्रे कुटन्तः कुट
मानाः तेषामयं कौटस्थः । इत्यादिना ।)
कण्डकमुनिः । इति हेमचन्द्रः ॥

कौटसाक्षी [न्] पुं कूटमेव कौटं स्वार्थे अण्,
तादृशः साक्षी ।) मिथ्यासाक्षी इति जटाधरः ॥

कौटिक, त्रि, (कूटेन मृगादिबन्धनयन्त्रेण चरति ।
“चरति” । ४ । ४ । ८ । इति ठक् ।) मांस
विक्रेता । बधक इति भाषा । तत्पर्य्यायः । वैत
सिकः ३ मांसिकः ३ । इत्यमरः । २ । १० । १४ ॥

कौटिल्य पुं (कुटिलिका व्याधानां कौटिलिका
कर्म्मकारविशेषिता ... कुटिलिकया
चरति ... “अण् कुटिलिकायाः” ।
४ । ४ । १८ । इत्यण् ।) व्याधः । कर्म्मकारः । इति
सिद्धान्तकौमुदी ॥

कौटिल्य क्ली (कुटिलस्य भावः इति ष्यञ् ।
...) कुटिलता । इति ... । पुं चाणक्यः ।
यथा । “कौटिल्यः कौटिल्यकर्म्मकारिभिः ...
... कौटिल्यः कुटिलमतिः ...
...” । इति च ...

कौटुम्बिक पुं कुटुम्बे कुटुम्बभरणे प्रसृतः ...
... । कुटुम्ब+ठञ् ।) कुटुम्बी । कुटुम्ब
पालकः । कुटुम्बासक्तः ... । इति

मुग्धबोधमतम्। (यथा, श्रीमद्भागवते।४।१३।८।
"परे परेऽप्यस्तरवज्रिमाहिते
कौटुम्बिकं कुप्यति वै जनाय" ।)
कौडविक, त्रि, (कुडवस्य वापः। "तस्य वापः"। ५।१।४५। इति ठञ्।) कुडवपरिमितवीजवपनयोग्यक्षेत्रम्। इत्यमरटीकायां रायमुकुटः ॥
कौणप, पुं, (कुणपं शवधातुकं शरीरं शवो वा तं भक्षयितुं शीलमस्य। इत्यण्।) राक्षसः। इत्यमरः। १।१।६२॥ (यथा, महाभारते।१।१०१।१०।
"न कौणपाः शृङ्गिणो वा न च देवाः न गन्धर्वाः"॥
वासुकिवंशोद्भवः सर्पविशेषः। यथा, महाभारते।१।५७।५।
"पिच्छलः कौणपश्चक्रः कालवेगः प्रकालनः।
हिरण्यबाहुः शरणः कक्षकः कालदन्तकः।
एते वासुकिजा नागाः प्रविष्टा हव्यवाहनम्" ॥)
कौणपदन्तः, पुं, (कौणपस्य दन्ता इव दन्ता यस्य।) भीष्मः। इति त्रिकाण्डशेषः॥
कौण्डिन्यः, पुं, (कुण्डिनस्य तन्नामख्यातमुनिविशेषस्य गोत्रापत्यं इति। गर्गादित्वात् यञ्।) कुण्डिनमुनिपुत्रः। तत्पर्यायः। विष्णुगुप्तः २। इति त्रिकाण्डशेषः॥
कौतुकं, क्ली, (कुतुक+प्रज्ञादित्वात् स्वार्थे अण्। कुतुकस्य भाव इति युवादित्वात् अण् वा।) कुतूहलम्। इत्यमरः।१।७।३१॥ (यथा, राजतरङ्गिण्याम्।४।३६७।
"अथातु कौतुकोद्भीर्णां सभां विस्मापितामिव ॥)
अभिलाषः। (यथा, कथासरित्सागरे।
"यज्ञस्थार्थं नृप तस्याः कन्यायाः कौतुकयोरपि।
अभूदन्योन्यसंदर्शे रमयन्त्यो मतामयम्" ॥)
उत्सवः। (यथा, भागवते।४।३।१३।
"कथं सुतायाः पितृगेहकौतुकं
निशम्य देहः सुरवर्य! नेङ्गते" ॥)
नर्म। हर्षः। (यथा, भागवते।१।१०।२५।
"इयञ्च भूमिर्भगवता न्यासितोरुभरा सती।
श्रीमच्चितालङ्कृतासौ सम्यक् हतकौतुका" ॥)
परम्परायातमङ्गलम्। विवाहसूत्रम्। (यथा, कुमारे।७।२।
"वैवाहिकैः कौतुकसंविधानै-
र्गृहे गृहे व्यग्रपुरन्ध्रिवर्गम्" ॥)
गीतादिभोगः। इति मेदिनी॥ गीतादि। भोगकालः। इति हेमचन्द्रः॥
कौतूहलं, क्ली, (कुतूहलस्य भावः कर्म्म वा युवादित्वात् अण्। यद्वा कुतूहलमेव इति प्रज्ञाद्यण्।) कुतूहलम्। अपूर्ववस्तुदिदृक्षादिविषयकः। इत्यमरः।१।७।३१॥ (यथा, मार्कण्डेये।८।१।
"भवद्भिरितिमाख्यातं यथावज्जगतुरुक्रमात्।
महन्मे कौतूहलं भेदुर्मित हरिश्चन्द्रकथां प्रति" ॥)
कौद्दालिकः, पुं, (कु भूमिं दारयतीति। कुदालः। तेन व्यवहरतीति ठक्। यद्वा कुदालस्य इदम् इत्यण्।) वर्णसङ्करजातिविशेषः। स तु रजक्यां तीवरात्जातः।

इति ब्रह्मवैवर्त्तपुराणम्॥
कौद्रविकं, क्ली, (कोद्रव तत् निमित्तमस्य इति ठञ्।) सौवर्च्चललवणम्। इति राजनिर्घण्टः॥
कौद्रवीणं, त्रि, (कुत्सितं यथा तथा द्रवति इति। पृषोदरात् सिद्धे कोद्रवः कुत्सितधान्यभेदः तस्य भवनं उत्पत्तिस्थानं। "धान्यानां भवने क्षेत्रे खञ्"। ५।२।१। इति खञ्।) कोद्रवधान्योद्भवयोग्यक्षेत्रम्। इत्यमरः।२।९।८। कोदार क्षेत इति भाषा॥
कौन्तिकः, पुं, (कुन्तास्त्रेण प्रासेन युध्यते। कुन्तः प्रहरणमस्येति वा। ठञ्।) प्रासिकः। प्रासास्त्रधारी योद्धा। इत्यमरः।२।८।७०॥
कौन्ती, स्त्री, (कुन्तिषु देशविशेषेषु भवा। "तत्र भवः"। ४।३।५३। इति अण्। ततो ङीप्।) रेणुका नामगन्धद्रव्यम्। इत्यमरः।२।४।१२०॥
(अस्याः पर्य्याया यथा,—
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा।
भस्मगन्धा पाण्डुपुत्री स्मृता कौन्ती हरेणुका"॥
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमभागे॥
पर्य्यायान्तरञ्च यथा,—
"हरेणु रेणुका कौन्ती माधवी हैमवत्यपि"॥
इति वैद्यकरत्नमालायाम्। गुणाद्यस्या रेणुका शब्दे ज्ञेयाः॥)
कौन्तेय, पुं, (कुन्त्या अपत्यं इति ढक्।) कुन्तीपुत्रः। स तु युधिष्ठिरादिः। इति महाभारतम्।
(यथा भगवद्गीतायाम्।२।३।
"मा क्लैव्यं गच्छ कौन्तेय! नैतत्त्वय्युपपद्यते" ॥)
अर्ज्जुनवृक्षः। इति राजनिर्घण्टः॥
कौपं, क्ली, (कूपे भवं कूपस्येदं वा इत्यण्।) कूपोदकम्। अस्य गुणा यथा,—
"कौपं पयो यदि स्वादु त्रिदोषघ्नं हितं लघु।
तत्क्षारं कफवातघ्नं दीपनं पित्तकृत् परम्"॥
इति भावप्रकाशः। (सुश्रुतोक्ता गुणा यथा,—
"सक्षारं पित्तलं कौपं श्लेष्मघ्नं दीपनं लघु"॥
कौपस्त्रिनसेवने कालनिर्द्देशः। यथा, तत्रैव।
"वसन्ते कौपं प्राश्रवणं वा सौद्भिदं वा" ॥)
कौपीनं, क्ली, (कूपपतनमर्हतीति। "छेदादिभ्यो नित्यम्" ... "अप्रत्यक्षादयः सञ्ज्ञायाम्" इति साधु।) पापम्। तत्तु पापहेतुत्वात् गर्हणीयत्वात् पुरुषलिङ्गमपि। तत्सम्बन्धात् तदाच्छादनमपि। इति सिद्धान्तकौमुदी। अकार्य्यम्। गुह्यदेशः। इत्यमरः॥ चीरम्। इति मेदिनी॥ तत्तु मेखलाबद्धपरिधेयवस्त्रखण्डम्। कपिनी इति भाषा। तत्पर्य्यायः। कच्छा २ कच्छटिका ३ कक्षा ४ धटी ५। इति त्रिकाण्डशेषः॥ (यथा भागवते।७।१३।२।
"बिभृयाद्यद्यसौ वासः कौपीनाच्छादनं परम्" ॥)
कौमोदकी स्त्री, (कौमोदकी इति पृषोदरादित्वात् साधु पक्षम्।) कौमोदकी। इति भरतो द्विरूपकोषः॥
कौमारं, क्ली, (कुमारस्य कर्म्म भावो वा। वयोवचनत्वात् अञ्।) कुमारावस्था।
("कन्या तु पितरं वृणुयात् कामदेवं तत् कुमारकाः।
इति प्रमाणतो विधि कौमारं प्रथमकालतः" ॥

इत्युक्तस्मृतिधृते "कौमारं पञ्चमाब्दान्तं"। इत्युक्ते वयोवस्थाभेदे। सा तु जन्मावधिपञ्चमवर्षपर्य्यन्ता। इत्यर्थः।) तन्मते षोडशवर्षपर्य्यन्ता। (यथा, भगवद्गीतायाम्।२।१३।
"देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति"॥)
पुं, कुमारस्य सनत्कुमारस्य इदं मतं सृष्टिभेदः। यथा, "कौमारं व्याख्यः प्राजापत्यो मानव इत्यादि सर्गाः"। इति श्रीधरः। तथा च भागवते।१।३।६।
"स एव प्रथमं देवः कौमारं सर्गमास्थितः।
चचार दुश्चरं ब्रह्मा ब्रह्मचर्य्यमखण्डितम्" ॥)
तद्वति पुं, स्त्री। इति शब्दमाला। अपूर्ब्बपतिं कुमारीं पतिरुपपन्न "कौमारापूर्ब्बवचने"।४।२।१३। इति निपातनात् अपूर्ब्बकर्त्तृत्वस्य लेश साधु। अपूर्ब्बपतिकुमारीपतिः। इति सिद्धान्तकौमुदी॥)
कौमारी, स्त्री, मातृकाविशेषः। सा तु कार्त्तिकेयशक्तिः। इति शब्दमाला। यथा,—
"कौमारी शक्तिहस्ता च मयूरवरवाहना।
योद्धुमभ्याययौ दैत्यानम्बिका गुहरूपिणी"॥
इति मार्कण्डेयपुराणे देवीमाहात्म्ये।८।१६।
(अपूर्ब्बपतिः कुमारी पतिमुपपन्ना। "कौमारापूर्ब्बवचने"।४।२।१३। इति कार्य्ये अण् प्रत्ययेन साधुः ततो ङीप्। अपूर्ब्बभार्य्याकुमारपत्नी। यथा, भट्टौ।७।९०।
"उपलभ्यास्ययास्तव कौमारीं पततामरः"॥
प्रथमवर्षीया बालिका। कौमारी अवस्था। यथा, भागवते।३।२।२८।
"कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसाम्" ॥)
वाराहीकन्दः। इति राजनिर्घण्टः॥
कौमुदः, पुं, (कौ पृथिव्यां मोदन्ते जना यस्मिन्। मुद+कः। सप्तम्या अलुक्।) कार्त्तिकमासः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते।
"एतेनैव राजेन्द्रो पुरा मासं न भक्षितम्।
शारदं कौमुदं मासं ततस्ते स्वर्गमाप्नुयुः॥
कौमुदस्तु विशेषेण शुक्लपक्षे नराधिप।
वर्जयेत् सर्व्वमांसानि धर्म्मो ह्यत्र विधीयते" ॥)
कौमुदिका, स्त्री, (कौमुदी+स्वार्थे कन् इत्वे ह्रस्वः टाप् च।) उमायाः सखीविशेषः। इति शब्दमाला॥ (स्वार्थे कन् ह्रस्व टाप् च। ज्योत्स्ना। त्रि, कुमुदादिभ्यः कुमुदादित्वात् ठञ्। कौमुदिका। कुमुदाख्यपक्ष्यादिप्रचुरदेशविशेषः ॥)
कौमुदी स्त्री, (कुमुदस्य इयं प्रकाशकत्वात् "तस्येदम्"। ४।३।१२०। इत्यण् ततो ङीप्।) ज्योत्स्ना। इत्यमरः।१।३।१६। (यथा, कुमारे।४।३३।
"शशिना सह याति कौमुदी
सह मेघेन तडित् प्रलीयते।
प्रमदाः पतिवर्त्मगा इति
प्रतिपन्नं हि विचेतनैरपि" ॥)
उत्सवः। इति धरणी। (यथा, महाभारते।११
पर्व्वणि।

"यत्नात्कौमुदीचैव चक्रतु शाम्बकार्त्तिकीम्"।
कौमुदस्य कार्त्तिकमासस्य इयं "तस्येदम्"। ४। ३। १२०। इति अण्। ततो ङीप्। यदुक्तम्।
"कुशब्देन मही ज्ञेया मुद हर्षे ततो द्वयम्। धातुज्ञैर्नियमैश्चैव तेन सा कौमुदी स्मृता"॥)
कार्त्तिकोत्सवः। स तु कार्त्तिकीपूर्णिमायां कर्त्तव्यः। इति त्रिकाण्डशेषः। कार्त्तिकीपूर्णिमा॥
आश्विनीपूर्णिमा। इति शब्दरत्नावली। (यथा,—
"आश्विने पौर्णमास्यान्तु चरेज्जागरणं निशि। कौमुदी सा समाख्याता कार्य्या लोकविभूतये"॥
दीपोत्सवतिथिः। यथा, रघुप्रभृतिटीकाकृन्मल्लिनाथधृतभविष्योत्तरवचनम्।
"कौ मोदन्ते जना यस्यां तेनासौ कौमुदी स्मृता"॥
कुमुदान्येव कौमुदी। स्त्री वा स्वार्थे इति भाषा।)

कौमुदीचार, पुं स्त्री, (कौमुद्या ज्योत्स्नाया चारः प्रचारोऽत्र समये।) कोजागरपूर्णिमा। इति त्रिकाण्डशेषः॥

कौमुदीपति, पुं, (कौमुद्याः ज्योत्स्नाया पतिः।) चन्द्रः। इति हेमचन्द्रः॥

कौमुदीवृक्ष, पुं, (कौमुद्या इव प्रकाशिकाया दीपशिखाया वृक्ष इवाधारः।) दीपवृक्षः। इति हारावली। दीपगाछा पिलसुज इत्यादि भाषा॥

कौमोदकी स्त्री, (कोः पृथिव्याः पालकत्वात् मोदकः। कुमोदको विष्णुः। तस्येयं इत्यण् ततो ङीप्।) विष्णुगदा। इत्यमरः। १। १। २०॥ (यथा, भागवते। ८। ४। १९।
"श्रीवत्सं कौस्तुभं मालां गदां कौमोदकीं मम"॥)

कौमोदी, स्त्री, (कु पृथ्वीं मोदयति आनन्दयतीति। कुमोदः विष्णुः तस्येयं इति अण् ततो ङीप्।) विष्णुगदा। इति शब्दरत्नावली॥

कौरव, पुं स्त्री, (कुरोरपत्यमिति अण्। कुरोरयं इति कच्छादित्वादण् वा।) कुरुराजसन्ततिः। इति महाभारतम्। (यथा, महाभारते। १। दूपदशासन १९८। १९।
"तमुद्यत दृष्ट्वैकमायुधकारिदमाहवे। अनेकमिव सन्त्रासान्मेनिरे तत्र कौरवाः"॥
कुरुपाञ्चालदेशः। यथा, मेघदूते। ५१।
"क्षेत्रं क्षत्रप्रधनपिशुनं कौरवं तद्भजेथाः"॥
स्त्रियां ङीप् कौरवी कुरुराजस्त्रियोऽपत्यं। यथा, महाभारते। १। ११२। १५।
"कुन्ती कौरवान् श्रुत्वा प्रापारात ममकाः। दरबाहेन महता मोदयन् कौरवीं चमूम्"॥)

कौरव्य, पुं, (कुरोरपत्यम्। "कुर्वादिभ्यो ण्यः"। ४। १। १५१। इति ण्यः।) कौरवः। (यथा, महाभारते। १। १३२। ५४।
"अर्जुनादी शिक्षादाय सहाभ्यां दुर्नयामतो। आचार्य्यकौरव्याणां वाचिरनुस्वय मे"॥
कौरव्या नागपाः कुलनामचन्त्यौ नन्दन इन्द्रस्य। तत्तु "कुर्वादिभ्यो ण्यः"। ४। १। १५१। इति ण्ये दृष्टे यथाक्रमं कारु देवे कार्त्तिकार्त्तिकेयौ कुरुवंशे भूमि कुरव इति बोध्यम्।

नागविशेषः। यथा, महाभारते। १। ३५। १२१०।
"कौरव्यो धृतराष्ट्रश्च शङ्खपिण्डश्च वीर्य्यवान्। विरजाश्च सुबाहुश्च शालिपिण्डश्च वीर्य्यवान्"॥)

कौप्य, पुं, वृश्चिकराशिः। यथा दीपिकायाम्।
"क्रियतावुरिजितुमकुलीरलेयपाथेयजूककौप्याख्याः। तौक्षिक आकोकेरो हृद्रोगश्चान्त्यभं चेत्थम्"॥)

कौल, त्रि, (कुले सत्कुले भव इत्यण्।) सत्कुलोद्भवः। तत्पर्य्यायः। आन्वयिकः २। इति त्रिकाण्डशेषः॥ (कुले कुलाचारे रतः कुलं कुलतत्त्वं वेत्ति वा इत्यण्।) दिव्यवीरपशुभावत्रयान्तर्गतदिव्यभावरतः। स तु मद्यपायी। तद्यथा,—
"दिव्यभावरताः कौलाः सर्व्वत्र समदर्शनाः"।
इति कुलार्णवतन्त्रम्॥
"पशोर्वै ज्ञानसम्पन्नाः पशुरेव न संशयः। वीराज्ज्ञानमनुप्राप्य कौलाय प्रतिविद्धयेत्"। इति महानीलतन्त्रम्॥ (कुलमधिकृत्य कृतो ग्रन्थः। कुलाचारतत्त्वविधिप्रतिषेधोपदेशसाध्यसाधनाचारविशिष्टकुलोपनिषदादितन्त्रविशेषः॥)

कौलकेय त्रि, (कुले सत्कुले भव इति ढक् कुक् च।) सत्कुलोद्भवः। (कुलटाया अपत्यं इति ढक्। पृषोदरात् तस्य कत्वं।) असतीसुते, पुं। इति शब्दरत्नावली॥

कौलटिनेय, पुं स्त्री, (कुलटाया अपत्यं। "कुलटाया वा"। ४। १। १२७। इति। इनङ्। स्त्रीभ्यो ढक्।) असतीसुतः। तत्पर्य्यायः। कौलटेयः २। इत्यमरः। कौलटेरः ३। इति भट्टोजिदीक्षितधृत सुभूतिः। २। ६। २७। सती या भिक्षार्थं कुलानि सर्वाणि अटति न तु जारार्थं सापि कुलटा तत्सुतोऽपि॥

कौलटेय, पुं, स्त्री, (कुलटायाः असत्या अपत्यं इति ढक्।) कौलटिनेयः। असतीसुतः। इत्यमरः। २। ६। २६॥ (कुलानि सर्व्वाणि भिक्षार्थं अटति या सती सापि कुलटा। तस्या अपत्येऽपि इति कश्चित्। स्त्रियां ङीप् कौलटेयी॥)

कौलटेर, पुं स्त्री, (कुलानि सर्व्वाणि अभिचारार्थे अटति या कुलटा। तस्याः असत्या अपत्यम्। "क्षुद्राभ्यो वा"। ४। १। १३१। इति ढ्रक्।) असतीसुतः। इत्यमरः। २। ६। २६॥ कौलटिनेयः। इति भरतधृता। (कुलानि सर्वाणि भिक्षार्थं अटति या सती सापि कुलटा तस्या अपत्येऽपि। इति कश्चित्। स्त्रियां ङीप् कौलटेरी॥)

कौलत्थीन त्रि, (कुलत्थानां कुलत्थान्नभवनयोग्यं क्षेत्रं वा इति। "धान्यानां भवने क्षेत्रे खञ्"। ५। २। १। इति खञ्।) कुलत्थभवनयोग्यक्षेत्रम्। इत्यमरटीकायां भरतः॥

कौलव, पुं, बवादिकरणान्तर्गततृतीयकरणम्। तत्र जातस्य फलं यथा,—
"शास्त्री विनीतो विनयी धनाढ्यः
ढकप्रसक्तो मधुरो मनोज्ञः।
सुकर्म्मकृत् कीर्त्तियुतो नरः स्यात्
यो कौलवाख्ये करणे प्रसूतः"॥
इति कोष्ठीप्रदीपः॥

कौलिक, पुं, (कुलं सूत्रादिकं वयति वस्त्रनिर्म्माणादिकं आचरतीति। ठक्।) तन्तुवायः। इति शब्दमाला॥ (कु कुत्सितं अधर्म्माचारं जानातीति। कुलं दुःशील तत्र साधुः ठक्।) पाषण्डः। इति त्रिकाण्डशेषः। (कुलादागतमिति ठक्।) कुलपरम्परागते, त्रि। (यथा, रघुवंशे।
"वर्णंदत् कौलिकाचारं मिव प्राप्तवरो वराः"।
कुले कुलागमे कुलतन्त्रे विशेषतायुक्ते इति याचय सिद्धः इति ठक्। कुलतन्त्रज्ञः। कौलं कुलधर्मं प्रवर्त्तयति तत्त्वज्ञानं शिष्यपरम्परोपदेशेन विज्ञापयति इति ठक्। कुलधर्म्मप्रवर्त्तकः शिवः। कुलं कुलाचारः प्रयोजनमस्य इति ठक्। शक्तितान्त्रिकः। यथा, मनौ। "इन्द्र कौलिक"॥)

कौलीन, क्ली, (कौ पृथिव्यां लीनम्। भूलीनपदार्थाणामिव एतेषामप्रकाश्यतया तथात्वम्।) गुह्यम्। जन्यम्। कुकर्म्म। (कुलीनस्य भावः। युवादित्वात् अण्।) कुलीनत्वम्। (यथा रामायणे।
"तस्य इव मर्य्यादा कौलीनं नाम्यवर्त्तत"॥)
पश्वहिपक्षिणां युद्धम्। इति मेदिनी। कौलेयकः। इति विश्वः॥ (कौ भावे क्तः तस्य नलम्। कौलं अद। कौ पृथिव्यां कोलं अदो दन्तात्। कुलीनभूमिसम्भवतीति अण् वा।) लोकवादः। इत्यमरः। १। ६। ११६॥
(यथा, रघौ। १४। ८४।
"कौलीनभीतेन गृहान्निरस्ता
न तेन वैदेहसुता मनस्तः"॥
निन्दा। यथा, तत्रैव। १४। ३६।
"कौलीनमात्माश्रयमाचचक्षे
तेभ्यः पुनश्चेदमुवाच वाक्यम्"॥)

कौलीरा, स्त्री, (कुलीरः कर्कटः तच्छृङ्गाकारो ऽस्त्यस्या इत्यण्। ततष्टाप्।) कर्कटशृङ्गी। इति राजनिर्घण्टः। (कर्कटशृङ्गीशब्देऽस्या विवृतिर्ज्ञेया॥)

कौलीन त्रि, (कुले सत्कुले भवः इति बाहुलकात् खञ्।) कुलीनः। इति भरतो द्विरूपकोषः॥

कौलेयक, पुं, (कुले भवः। "कुलकुक्षिग्रीवाभ्यः श्वास्यलङ्कारेषु"। ४। २। ९६। इति ढकञ्।) कुक्कुरः। इत्यमरः। २। १०। २१॥ (कुलस्यापत्यम्। "कुल्याः क्षत्रयादिभ्यो"। ४। १। १४०। इति ढकञ्।) कुलीने त्रि। इति मेदिनी॥

कौशाम्बोर्मि त्रि, (कुशाम्बायाः अदूरभवा नगरी इति मत्वर्थे जञ्।) वत्सराजाख्योदयनदेशः। इत्यमरटीकायां रायमुकुटः॥

कौक्ष, त्रि, (कुक्षौ कर्त्ते भवः बाहुलकात् अण्।) कुक्षीयः। इति भरतो द्विरूपकोषः॥

कौवर्ण, क्ली, (कुवर्णमेव इति। स्वार्थे अण् वा।) कुवर्णम्। कौवर्णकम्। इति भरतो द्विरूपकोषः॥

कौवेर, क्ली, (कुवेरो अधिष्ठात्री देवतास्य इत्यण्।) कुष्ठम्। कुड् इति भाषा। इति शब्दचन्द्रिका॥ (कुवेरस्य इदं इत्यण्।) कुवेरसम्बन्धिनि कुवेरीये त्रि। यथा रघुवंशे। ५। २८।

"कौबेरमथ याम्यञ्च प्रमाते वरुणस्य च" ।
कौबेरी, स्त्री, (कुबेर अधिष्ठात्री देवता अस्या इत्यण् । ततो ङीप् ।) उत्तरा दिक् । यथा,—
"दिग्विभागे तु कौबेरी दिक् शिवा प्रीतिदायिनी"।
इति तिथ्यादितत्त्वम् । कुबेरशक्तिश्च ।
कौश, क्ली, (कुशा प्राचुर्य्येण भूम्ना वा सन्त्यत्र इत्यण् ।) कान्यकुब्जदेशः । इति हेमचन्द्रः । (कुश + स्वार्थे अण् । कुशद्वीपः । यथा, सिद्धान्तशिरोमणौ ।
"शाकं ततः शाल्मलमत्र कौशम्" ।
कोशे भवम् । कृमिकोशोद्भवं पट्टवस्त्रम् । यथा, भागवते । ३ । ४ । ७ ।
"दोर्भिश्चतुर्भिर्विदितं पीतकौशाम्बरेण च" ।
एतद्रूपमस्मिन्न क्वचित् पाठान्तरमित्यवधेयम् ।
कुशस्येदं तद्विकारो वा अण् । कुशमयम् । कुश सम्बन्धि वा । यथा, महाभारते । १३ । १८ । २८ ।
"तत्र वासाय शयनं कौशं कुशमुशस्य च" ।
स्त्रियां ङीप् । कौशी । तत्रैव । १३ । ५४ । ३१ ।
"कौशीं शय्यां समासीनं जपमानं महाव्रतम्" ।)
कौशल, क्ली, (कुशलस्य भावः कर्म्म वा इति । युवादित्वात् अण् ।) कुशलता । यथा,—
"क्व चातिकर्कशं धाम क्व चातिललितं शुचि । एकत्र कार्ये व्याख्यातुरावयोः कौशलं कथं" ।
इति अमरशतकटीका । (नैपुण्यम् । यथा, भागवते । १ । १६ । २७ ।
"स्वातन्त्र्यं कौशलं कान्तिधैर्य्यं मार्द्दवमेव च" ।
कुशलमेव इति । स्वार्थे अण् । मङ्गलम् । यथा, तत्रैव । ३ । २ । १२ ।
"स एष दोषः पुरुषद्विडास्ते
गृहान् प्रविष्टो यमपत्यमत्या ।
पुष्णासि कृष्णाद्विमुखो गतश्रीः
त्यजाश्वशैवं कुलकौशलाय" ।
चातुर्य्यम् । यथा, भगवद्गीतायाम् । २ । ५० ।
"तस्माद्योगाय युज्यस्व योगः कर्म्मसु कौशलम्" ।)
कौशलिका, स्त्री, (कुशलाय मङ्गलाय हिता । इति ठक् टाप् च ।) प्राभृतकम् । इति धारावली । भेट इति भाषा । (कुशलस्य प्रश्नः इति ठक् टाप् च । कुशलप्रश्नः ।)
कौशली, स्त्री, (कुशलस्य प्रश्नः कुशलाय दीयते वा । अण् ततो ङीप् ।) कुशलप्रश्नः । प्राभृतम् । इति त्रिकाण्डशेषः ।
कौशलेय, पुं, (कौशल्यायाः अपत्यं पुमान् इति ढक् । यलोपश्च ।) श्रीरामः । इति शब्दरत्नावली । (यथा, रामायणे ।
"उक्तवान् चिरं देवो धनं नु निकषात्मजम् ।
श्रीमान् दाशरथिर्वीरः कौशलेयः प्रतापवान्" ।)
कौशल्या, स्त्री (कोशलस्य राज्ञोऽपत्यं स्त्री । कोशल + ष्यङ् । ततः कुर्वादित्वात् स्वार्थे ष्यञ् ।) श्रीराममाता । सा तु कोशलराजकन्या दशरथपत्नी च । इति शब्दरत्नावली । (यथा रामायणे १ । १६ । २६ ।
"स तु तत् प्रददौ कौशल्यामिदमब्रवीत्" ।
कोशले भवा । कृष्टेऽशासिन्धवो वा । कोशल देशीया । यथा बहुवचनम् ।
यथा, महाभारते । ६ । ८ । ४० ।
"मत्स्याः कुशट्टाः कौशल्याः कुन्तयः कान्तिकोशलाः" ।
कुशलस्य भावः कर्म्म वा कुशलमेव वा इति ब्राह्मणादित्वात् ष्यञ् । कुशलत्वे, क्ली । यथा, महाभारते । ३ । ४४ । ३० ।
"पृष्ट्वा कौशल्यमन्योन्यं रथेष्वेवावतस्थिरे" ।)
कौशल्यानन्दन, पुं, (कौशल्यायाः दशरथपत्न्याः नन्दनः पुत्रः ।) श्रीरामः । इति शब्दरत्नावली ।
कौशल्यायनि, पुं, (कौशल्याया अपत्यं । "कौशल्य कार्म्मार्य्याभ्याञ्च" । ४ । १ । १५५ । इति फिञ् । आयनादेशः ।) श्रीरामः । इति त्रिकाण्डशेषः । (यथा, भट्टौ । ७ । ८ ।
"निवासवृक्षेषु न गच्छाम कौशल्यायनिवल्लभाम् । उपलभ्यामपश्यन्तः कौमार्य्यौ मततां वरः ।")
कौशाम्बी, स्त्री (राज्ञः कुशस्य पुत्रेण कुशाम्बेन निर्वृत्ता या । "तेन निर्वृत्तम्" । ४ । २ । ६८ । इति अण् ततो ङीप् ।) देशविशेषः । तत्पर्य्यायः । वत्सपत्तनम् २ । इति हेमचन्द्रः । (यथा, रामायणे । १ । ३२ । ५ ।
("कुशाम्बस्तु महातेजाः कौशाम्बीमकरोत्पुरीम्" ।
सा तु गौडदेशान्तर्गतमगधराजभूमिगता नगरी तत्र धायकेन चन्द्रगुप्तादिसमये कुसुमपुरी आख्या प्रख्या इदानीं सैव पुरी पाटलीपुत्रनगरी पाटना इति भाषया प्रसिद्धा जाता । यथा, कथासरित्सागरे । "अस्ति वत्स इति ख्यातो देशः । इत्युक्तस्य कौशाम्बी नाम तत्रास्ति मध्यभागे महापुरी" इत्युक्तम् ।)
कौशिक, पुं (कुशिकस्यापत्यम् अण् । कुशिके तद्गोत्रे भवो वा इत्यण् ।) इन्द्रः । (अयं हि तप स्विनः कुशिकराजस्य प्रभावं विचार्य आगत तत्पुत्रतामङ्गीचकार ।
यथा हरिवंशे । ३० । १३ १६ ।
"कुशिकस्तु तपस्तेपे पुत्रमिन्द्रसमं विभुम् ।
लभेयमिति तं शक्रस्त्रासादभ्येत्य जज्ञिवान् ॥
पूर्णे वर्षसहस्रे वै तत्तु शक्रो ह्यपश्यत ।
अत्युग्रतपसं दृष्ट्वा सहस्राक्षः पुरन्दरः ।
समर्थः पुत्रजनने स्वमेवांशमवासयत् ।
पुत्रत्वे कल्पयामास स देवेन्द्रः सुरोत्तमः ।
स गाधिरभवद्राजा मघवान् कौशिकः स्वयम्" ।
यत्तु देवेन्द्रस्य कुशिकत्वे कुशाङ्कितत्वात् कौशि कत्वमिति । कुशेन कृत इति ठञ् ।
यथा, हरिवंशे । २१८ । २—३ ।
"स वज्री अयतो जिष्णुर्दिशामभिवषिवान् ।
स्तुतैः सहायो धृतिमान् यथा कोऽप्यधुनिः स्तुतः ।
आत्मवान् भगवान् यदिवा न सुरेश्वरः ।
तदाप्रभृति देवेशः कौशिकत्वमुपागतः" ।)
गुग्गुलु । उलूकः । व्यासपाढी । इत्यमरः । २ । ४ । ४१ । नकुलः । कोषज्ञः । (मगधराजजरासन्धस्य सेनापतिर्हंसनामा नरपतिरपि कौशिकनाम्ना विश्रुत आसीत् । यथा महाभारते । २ । जरासन्धवधपर्व्वणि । २२ । ३१ ३२ ।
"स तु सेनापतिं राजा सस्मार भरतर्षभ ।
कौशिकं चित्रसेनञ्च तस्मिन् युद्धे उपस्थिते ।
ययोस्ते नामनी राजन् ! हंसेति डिम्भकेति च । पूर्व्वं सङ्कथिते पुंभिर्नृलोके लोकसत्कृते" ।
कुशिकस्य गोत्रापत्यं इति विग्रहः । कुशिकस्य पुत्रो गाधिस्तत्पुत्रो विश्वामित्रोऽपि कुशिकवंश जातत्वात् कौशिकः । (विश्वामित्रमुनिः । इति मेदिनी । (यथा, रामायणे । १ । ३१ । १ ।
"तच्छ्रुत्वा वचनं तस्य येऽप्यन्ये कुशानन्दनम् ।
समेत्य कौशिको वाक्यं प्रत्युवाच महीपतिम्" ।)
युवनाश्वीयक्षत्रविशेषः । यथा, हरिवंशे ।
"प्रतिष्ठायाश्च द्वौ पुत्रौ चैद्यश्चापि च कौशिकः" ।
कोशं करोतीति । कोश + ठञ् ठन् वा बाहुल कात् ।) कोषकारः । इति शब्दरत्नावली । शृङ्गार रसः । इति त्रिकाण्डशेषः । मज्जा । इति हेम चन्द्रः । अश्वकर्णवृक्षः । इति राजनिर्घण्टः । (कोशात् कृमिकोशाज्जातम् । कृमिकोषोद्भवे, त्रि । यथा, महाभारते । ३ । २० । १३ ।
"या त्वां कौशिकैर्वस्त्रैः शुभैराच्छादितं पुरा । दृष्टवत्यस्मि राजेन्द्र ! सा त्वां पश्यामि कौशिकम्" ।)
कौशिकप्रिय, पुं, (कौशिकस्य कुशिकवंशभव राजर्षेः विश्वामित्रस्य प्रियः ।) श्रीरामः । इति शब्दरत्नावली ।
कौशिकफल, पुं, (कौशिकं कोषजं फलमस्य ।) नारिकेलवृक्षः । इति शब्दरत्नावली ।
कौशिका स्त्री, (कोश एव स्वार्थे क ततोऽत इत् टाप् अत इत्वञ्च ।) चषकम् । पानभाजनम् । इति हेमचन्द्रः ।
कौशिकात्मज, पुं (कौशिकस्य इन्द्रस्य आत्मजः । तनयः । पाण्डुराजपत्न्यां कुन्त्यामिन्द्रौरसजातत्वात् अर्ज्जुनस्यापि तथात्वम् ।) अर्ज्जुनः । इति शब्द माला । (अस्य जन्मविवरणं यथा महाभारते । १ । १२३ । ३२ ।
"एवमुक्ता ततः कुन्ती शक्रमाजुहाव यशस्विनी ।
अथाजगाम देवेन्द्रो जनयामास चार्ज्जुनम्" ।
कौशिकस्य विश्वामित्रस्य आत्मजः । इति विग्रहे विश्वामित्रपुत्रः सुनःशेपादिः ।)
कौशिकायुध, क्ली (कौशिकस्य इन्द्रस्य आयुधम् ।) इन्द्रधनुः । इति शब्दरत्नावली ।
कौशिकाराति, पुं (कौशिकस्य पेचकस्य अराति शत्रुः ।) काकः । इति राजनिर्घण्टः ।
कौशिकारि, पुं (कौशिकस्य उलूकस्य अरिः शत्रुः ।) काकः । इति राजनिर्घण्टः ।
कौशिकी, स्त्री, (कौशिकस्य गोत्रापत्यम् । कुशिक + अण् + ङीप् । सुरराजस्य इन्द्रस्य कुशिक नृपतेः सकाशात् पुत्रत्वेनोत्पन्नत्वात् कौशि काभिधानप्राप्तेस्तस्येन्द्रस्य भगिनी वा कौशिकीत्याख्यानम् ।) चण्डिका । (यथा, हरिवंशे । ५७ । ४८ ।
"तत्रैव त्वां भगिन्यर्थे ग्रहीष्यति स वासवः । कुशिकस्य तु गोत्रेण कौशिकी त्वं भविष्यसि" ।
तत्रैवान्यत्र । ५८ । ३ ।
"आर्य्या कात्यायनी देवी कौशिकी ब्रह्मचारिणी ।

जननी सिद्धसेनस्य उग्रचारी महातपा” ।
कुशिकस्य गाधाख्यस्य इति विग्रहः । कुशि-
कात्मजस्य पौत्री गाधिराजस्य कन्या विश्वा-
मित्रस्य भगिनी ऋचीकमुनिपत्नी । कुशिकवंश-
जातत्वात् तस्यास्तथात्वम् ।) नदीविशेषः । इति
मेदिनी ॥ (यथा, रामायणे । १ । ३४ । ६–११ ।
“स पिता मम काकुत्स्थ ! गाधिः परमधार्म्मिकः ।
कुशवंशप्रसूतोऽस्मि कौशिको रघुनन्दन ! ॥
पूर्व्वजा भगिनी चापि मम राघव ! सुव्रता ।
नाम्ना सत्यवती नाम ऋचीके प्रतिपादिता ॥
सशरीरा गता स्वर्गं भर्त्तारमनुवर्त्तिनी ।
कौशिकी परमोदारा प्रवृत्ता च महानदी ॥
दिव्या पुण्योदका रम्या हिमवन्तमुपाश्रिता ।
लोकस्य हितकार्य्यार्थं प्रवृत्ता भगिनी मम ॥
ततोऽहं हिमवत्पार्श्वे वसामि नियतः सुखम् ।
भगिन्यां स्नेहसंयुक्तः कौशिक्यां रघुनन्दन ! ॥
सा तु सत्यवती पुण्या सत्ये धर्म्मे प्रतिष्ठिता ।
पतिव्रता महाभागा कौशिकी सरितां वरा” ॥
“कौशिकी सरितां श्रेष्ठा कुलोद्द्योतकरी तव ” ।२१
अधुनैषेदानीं कुशी नदीति ख्याता । इयन्तु नेपाल-
राज्यान्तर्गताया हिमवच्छाखाया निःसृता सती
१६६ क्रोशान्तं गता गङ्गया सङ्गता ॥)
कौशिकीज, पुं, (कौशिक्या इव तीव्र ओजो यस्य ।
पृषोदरात् साधुः ।) श्वाखोटवृक्षः । इति राज-
निर्घण्टः । श्याओड़ा इति भाषा ॥
कौषीतकी, स्त्री, (कुषीतकस्यापत्यम् । ऋष्यण् ततो
ङीप् ।) अगस्त्यपत्नी । इति त्रिकाण्डशेषः ॥ (कु-
षीतकेनाधीता प्रोक्ता वा या शाखा सा कौषी-
तकी । ऋगामरण्यकवेदान्तर्गतशाखाविशेषः ॥
(ऋग्वेदान्तर्गत उपनिषद्विशेषः । यदुक्तं मुक्ति-
कोपनिषदि ।
‘ऐतरेयी कौषी(षो)तकी वह्नृचावाच्यतापनी’॥)
कौषेय, त्रि, (कोषे भवम् । इति ढञ् ।) कृमिकोषो-
त्थवस्त्रादि । इत्यमरः । २ । ६ । १११ ॥ सूत्रस्य
भावश्च । (यथा, माघे । ८ । ६ ।
“कौषेयं व्रजदपि गाढतामजस्रम् ।
सस्रंसे विगलितनीविनीरजाक्ष्याः” ॥)
कौशिक, पुं, (कौशिक+पृषोदरात् षकारादेशः ।)
कौशिकः । इति मेदिनी ॥
कौशिकी, स्त्री (कौशिकी+पृषोदरात् षकारा-
देशः ।) कौशिकी । इति मेदिनी ॥ कालिका-
कायकोषनिःसृतदेवीविशेषः । यथा,—
“कायकोषान्निःसृता या कालिकायाश्च भैरव ! ।
सा कौषिकीति विख्याता चारुरूपा मनोहरा ॥
निःसृता सुरकार्य्यार्थं स्वकायात्ज कालिका ।
स्मरन्ती सहसा मूर्त्ता चारुरूपेण विष्ठिते ॥
विषु लोकेषु कल्यो वा मात्मान्यत्ता भविष्यति ।
लोकविद्या महामाया वा मूलप्रकृति ख्यता ॥
तस्याः प्रकृतरूपेण देवी सा कौषिकी स्मृता ।
षड्दोषं बदेतस्या योषणु परिवेष्टितम् ।
शुक्लमध्या परायामि कृष्णवामतर प्रभान् ।
सर्वासि ताम्रकनकमु कठ्ठदांदिविमुखा ।
षट्कोणेषु स्वयंदृष्टो विन्दुना समलङ्कृत ।
कौषिकीतन्त्रमन्त्रोऽयं धर्म्मकामार्थदायकः ।
एतस्याः सकलस्यापि मूर्त्तिरूपञ्च भैरव ! ।
षड्भुजैकमुखा भूत्वा आह्लादकारकम् ॥
धम्मिल्लसंयतकचा विधोरर्द्धामुखी कलाम् ।
केशान्ते तिलकस्योर्द्धे दधती सुमनोहरा ॥
मणिकुण्डलसद्रत्नगण्डा मुकुटमण्डिता ।
सन्योति नवपूराष्टौ कण्ठमापूर्य सङ्गता ॥
सुवर्णमणिमाणिक्यनागहारविराजिता ।
सदा सुगन्धिभिः पुष्पैरम्लानैरतिसुन्दरी ॥
मालां बिभर्त्ति ग्रीवायां रत्नकेयूरधारिणी ।
मृणालायतवृत्तेषु बाहुषु कोमलेषु च ॥
राजन्ती कञ्चुकोपेतपीनोन्नतपयोधरा ।
क्षीणमध्या पीतवस्त्रा त्रिवलीपरिभूषिता ॥
शूलं वज्रञ्च बाणञ्च खड्गं शक्तिं तथैव च ।
दक्षिणैः पाणिभिर्देवी मनोज्ञाभिर्विराजिता ॥
गदां घण्टाञ्च चापञ्च चर्म्म शङ्खं तथैव च ।
ऊर्द्धादिक्रमतो देवी दधती वामपाणिभिः ॥
सिंहस्योपरि तिष्ठन्ती व्याघ्रचर्म्मणि कौषिकी ।
बिभ्रती रूपमतुलं सुरासुरमनोहरम् ॥
एतस्याः शृणु वत्स ! त्वं या पूज्या अष्टयोगिनी ।
ता पूजिताश्च कुर्व्वन्ति चतुर्व्वर्गं सदा नृणां ॥
ब्रह्माणी प्रथमा प्रोक्ता ततो माहेश्वरी परा ।
कौमारी वैष्णवी चैव वाराही पञ्चमी तथा ॥
नारसिंही तथैवैन्द्री शिवदूती तथाष्टमी ।
एताः पूज्या महाभागा योगिन्यः कामदायिनीः” ।
इति कालिकापुराणे उत्तरतन्त्रे ६० अध्यायः ॥ ॥
अन्यच्च ।
“शरीरकोषतश्चास्याः समुद्भूताब्रवीच्छिवा ।
स्तोत्रं ममैतत् क्रियते शुम्भदैत्यनिराकृतैः ॥
देवैः समेतैः समरे निशुम्भेन पराजितैः ।
शरीरकोषाद्यत्तस्याः पार्व्वत्या निःसृताम्बिका ।
कौषिकीति समस्तेषु ततो लोकेषु गीयते ” ॥
इति मार्कण्डेयपुराणे देवीमाहात्म्ये ५ अध्यायः ॥
अपरा व्युत्पत्तिर्यथा,—
“अस्यैवैषोपकारेण स्वकोषे प्रतिपदा ।
कौषेयधारणादापि सम्प्रापद्याय कौषिकी” ॥
इति देवीपुराणे देवीनिरुक्ताध्यायः ४५ ॥
कौषेय, त्रि (कौशेय+पृषोदरात् षकारादेशः ।)
कृमिकोषोत्थवस्त्रादि । रेशमी कापड़ इति
भाषा । इत्यमरटीकायां भरतः ॥ (यथा, गर्गसंहिते
पुराणे । १६ । २७ ।
“कौषकं च कौषेयं दुग्धं वर्त्तेऽभिजायते” ॥)
कौषीद, क्ली, (कुत्सितं सीदति अस्मिन् इति ।
सीद+अ । तत स्वार्थे ष्यञ् ।) व्यवहारम् । कलहः ।
इति हेमचन्द्रः । (कुसीदस्य कर्म्म भावः वा ।
इति ष्यञ् ।) कुसीदवृत्तम् ॥
कौसुम, क्ली (कुसुमेन निर्वृत्तम् । इत्यण् ।) पुष्पा-
ञ्जनम् । पुष्पाञ्जनम् । इति राजनिर्घण्टः ॥ (कुसुम-
स्येदम् । तस्येदमित्यण् । कुसुमसम्बन्धि कुसुमोत्पन्नम् ।
कुसुमेषु भवम् । यथा) रघौ । ७ । ५७ ।
“निर्वर्त्त्य वरयो रजः कौसुमम्

प्रचयिनि । कौसुममाश्वाभिषेच” ॥)
कौसुम्भ, पुं (कुसुम्भ+स्वार्थे अण् ।) अरण्यकुसुम्भः ।
इति राजनिर्घण्टः ॥ (शाकविशेषः । यथा,—
“कौसुम्भं कोमलं शाकं कासमर्द्दविमर्द्दितम् ।
पाचितं तप्तसर्पिषि माक्षिकसुविमिश्रितम्” ॥
इति शब्दार्थचिन्तामणिः ॥ कुसुम्भेन रक्तम् ।
“तेन रक्तं रागात्” । ४ । २ । १ । इत्यण् ।) कुसुम्भ-
पुष्परागरक्ते त्रि । इत्यमरटीकायां रायमुकुटः ।
(यथा, माघे ।
‘कौसुम्भं पृथुकुचकुम्भसङ्गिवासः’ ॥
कुसुम्भस्येदं तस्येदमित्यण् । कुसुम्भसम्बन्धि कु-
सुमम् । यथा, माघे । ११ । ५० ।
दिनकरकरसङ्गव्यक्तकौसुम्भकान्ति” ॥)
कौसृतिक, त्रि (कुसृत्या कुटिलतया चरति इति
ठक् ।) मायाकारः । इति जटाधरः ॥
कौस्तुभ, पुं, (कुः पृथ्वी स्तुभ्नाति व्याप्नोति इति । कुस्तुभः
सागरः तत्र भवः इत्यण् । यद्वा, कुं भूमिं अल-
ङ्कारतया स्तुभते व्याप्नोति सर्व्वमात्मना तिष्ठतीति
भावः । कुस्तुभो विष्णुः तस्याय मणिरित्यण् ।)
समुद्रमन्थनोत्थो विष्णुवक्षःस्थो मणिः । इत्यमरः ।
१ । १ । ३० ॥ (यथा, भारवे । ८ । ८ । ९ ।
“कौस्तुभाख्यमपृथक् पदरागो गतोदये ।
तस्मिन् हरिः स्पृहां चक्रे वक्षोऽलङ्करणे मणौ” ॥
“कौस्तुभस्तु महातेजा कोटिसूर्य्यसमप्रभः ।
इह विष्णुः स्वहृदि प्रदीप्तं प्रिमानिति ” ॥
इति मात्स्यतन्त्रम् ॥ मुद्राविशेषः । यथा,—
“अनामाङ्गुष्ठकनिष्ठे दक्षिणस्य कनिष्ठिका ।
कनिष्ठयान्यया बद्धा तर्ज्जन्या दक्षया तथा ॥
वामानामाञ्च बध्नीयात् दक्षिणाङ्गुष्ठमूलके ।
अङ्गुष्ठमध्यमे भूयः संयोज्य सरला पराः ।
चतस्रोऽप्यग्रलग्नाः स्युः मुद्रा कौस्तुभसंज्ञिका” ॥
इति तन्त्रसारः ॥
कौस्तुभवक्षा, [स्] पुं, (कौस्तुभः वक्षसि उरसि
यस्य ।) विष्णुः । इति शब्दरत्नावली ॥
क्रथ, वि क वधे । इति कविकल्पद्रुमः ॥ (चुरा०-पक्षे
भ्वा०-पर०-सक०-सेट् ।) वि क, क्रथयति । इति
दुर्गादासः ॥
क्नस, उ क व ङ्कुसी । भासने । इति कविकल्प-
द्रुमः ॥ (दिवा०-पर०-अक०-सेट् ।) उक इत्यस्य
कारत्वात् । उ क्नसित्वा क्नस्त्वा । क, क्नस्यति
कन्यका प्रकाशते । व, क्नस्यति तया पुंस्त्वो
मार्दवत्वम् । ङ्कुसीति वृत्तिदर्शनम् । इति दुर्गा-
दासः ॥
क्नथ इ कि मारणे । इति कविकल्पद्रुमः ॥ (चुरा०
पक्षे भ्वा०-पर०-सक०-सेट् ।) इ क्नन्थ्यते । कि
क्नन्थयति क्नथति । अ क्नथीति । इति दुर्गा-
दासः ॥
क्नूय ई ङ दुर्गन्धे । स्रावे । शब्दे । इति कविकल्प-
द्रुमः ॥ (स्वदन्तानादिधातुः दीर्घी । (भ्वा०-आत्म०-
अक०-सेट्-ई-इत्वात् क्तान्तनिष्ठा ।) ङ, क्नूयते । क्नूतो
व्रणः इति मैत्रेयश्च इदं ये मैत्रेयस्य मैत्रेयरक्षितः ।
इति क्नूयपूर्णोऽयं च मैत्रेयरक्षितः । ई, क्नूतः । ऊ

कूयते मत्स्य दुर्गन्ध स्यादित्यर्थः। कूयते वस्त्र गम्भसा। इति दुर्गादास ॥

क्रर, कौटिल्ये। इति कविकल्पद्रुमः॥ (भ्वा-पर-अक-सेट।) ओष्ठ्यवर्गशेषयुक्तः। क्वरति खल कुटिलः स्यादित्यर्थः। इति दुर्गादास ॥

क्रकच, पुं क्ली, ग्रन्थिलवृक्षः। इति मेदिनी ॥ (ज्योतिषोक्तयोगभेदः। तस्य लक्षणं यथा,—

"सप्तादितिथयो मन्दाद् विलोमं क्रकचं स्मृताः"।

अस्य विवृतिर्यथा।

"शनौ षष्ठी, शुक्रे सप्तमी, गुरौ अष्टमी, बुधे नवमी, भौमे दशमी, सोमे एकादशी, रवौ द्वादशी, एते योगाः क्रकचाख्या विज्ञेयाः"। यथा, नारदोक्तिः।

"तयोर्दशम्युर्मिलने सङ्ख्ययोस्तिथिवारयोः।

क्रकचो नाम योगोऽयं मङ्गलेष्वतिगर्हितः" ॥क्री

क इति कृत्वा कचति शब्दायते। कच शब्दे+पचाद्यच्।) करपत्रम्। काष्ठविदारणास्त्रविशेषः। करात् इति भाषा। इत्यमरः। २। १०। ३५ ॥ (यथा, महाभारते ३। २२। ३४।

"मध्येन पाटयामास क्रकचो दार्व्विवोच्छ्रितम्"॥)

"अथ क्रकचव्यवहारे करणसूत्रं वृत्तम्। पिण्डयोगदलमग्रमूलयोर्दैर्घ्यसङ्गुणितमङ्गुलात्मकम्। दारुदारणपथैः समाहतं षट्स्वरेषु विहृतं करात्मकम्॥ उदाहरणम्।

मूले नखाङ्गुलमितोऽथ नृपाङ्गुलोऽग्रे

पिण्डः शताङ्गुलमितं किल यस्य दैर्घ्यम्।

तद्दारुदारणपथेषु चतुर्षु किं स्यात्

हस्तात्मकं वद सखे गणितं द्रुतं मे ॥



पिण्डयोगदलम्। १८। दैर्घ्येण। १००। सङ्गुणितम्। १८ । दारुदारणपथैः। ४। गुणितम्। ७२००। षट्स्वरेषु। ५७६। विहृतं जातं करात्मकं गणितम्। ²⁵⁄₂ ॥ क्रकचाकारे करव्यवहार सार्द्धहस्तम्। छिद्यते तु यदि तिर्य्यगुक्तवत् पिण्डविस्तृतिहते पथ तदा। इष्टिकाचितिदृषच्चितिखातक्राकच व्यवहृतौ खलु मूल्यम्। कर्म्मकारजनसम्प्रति पत्त्या तन्मृदुत्वकठिनत्ववशेन॥ उदाहरणम्।

दारुस्तिर्य्यक्दलमितानाङ्गुलानि

पिण्डस्तथा षोडश यस्य कोष्ठे।

छेदेषु तिर्य्यङ्नवसु प्रचक्ष्व

किं स्यात् फलं हस्तक्रकचात्मके मे॥



विस्तृतिहति। ५१०। दारुदारणमार्ग। ९। प्ता। ४५९०। षट्स्वरेषु। ५७६। विहृतं जातं यत्र फलम्। ८। इति लीलावत्यां क्रकचव्यवहारः।॥

क्रकचच्छद, पुं (क्रकचं करपत्रमिव छदः पत्राणि यस्य।) केतकीवृक्षः। इति त्रिकाण्डशेषः ॥

क्रकचपत्र, पुं, (क्रकचवत् पत्रं यस्य।) शाकवृक्षः। इति राजनिर्घण्टः ॥ (केतकीवृक्षः॥)

क्रकचपाद् [द्] पुं (क्रकच इव पादो यस्य। अन्त्यलोपः।) कृकलासः। इति त्रिकाण्डशेषः॥

क्रकचपाद, पुं, (क्रकचमिव पादो यस्य।) कृकलासः। इति हारावली ॥

क्रकचपृष्ठी, स्त्री, (क्रकचवत् दृढं पृष्ठदेशो यस्याः। इति ङीप्।) कवयी मत्स्यः। इति शब्दरत्नावली ॥

क्रकचा, स्त्री, (क्रकचस्याकारोऽस्त्यस्याः। अर्श आदित्वात् अच् ततष्टाप्।) केतकी इति रत्नमाला ॥

क्रकण, पुं, (क इति कणति शब्दायते। कण शब्दे+ अच्। आवित्वात् स्त्रियां ङीष्।) पक्षिविशेषः। इत्यमरः। कयार इति भाषा॥

क्रकर, पुं (क इति शब्दं करोति शीलमस्य इति। क+ ताच्छील्ये टः।) करीरवृक्षः। उटकाटार इति भाषा। क्रकचपृष्ठी। इत्यमरः। २। ५। १९। करार इति करकरा इति च भाषा। (यथा,— महाभारते १३। १११। १०२।

"पक्षोणि चोरयित्वा तु क्रकरत्व नियच्छति"॥)

अस्य मांसस्य गुणाः। मधुरत्वम्। शुचत्वम्। इति राजनिर्घण्टः। (यथा सुश्रुते।

"चकोरकलविङ्कमयूरक्रकर इत्यादुपक्रम्य

लवः क्रकरा प्रधानया वैशेषकाः"।

इत्यग्निगोपसम्पाताः॥) दीनः। क्रकचः। इति मेदिनी ॥

क्रतु, पुं (क्रियतेऽसौ इति। कृ+"कृञः कतुः"। उणां १। ७८। इति कर्म्मणि कतु प्रत्ययः।) यज्ञः। इत्यमरः॥ अश्वमेधयज्ञमाद्याः ज्ञानमुनिविशेषः। इति मेदिनी। अयन्तु ब्रह्मणः कराग्जातः। (यथा, महाभारते। १। ६५। १०।

"ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः।

मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः"॥)

एतस्य भार्य्या प्रजापतेः कर्द्दमस्य कन्या क्रिया। पुत्राः बालखिल्याख्यामहर्षयोऽङ्गुष्ठमात्रा षष्टिसहस्रम्।

(यथा,—भारवते। ४। १। ३९।

"क्रतोरपि क्रिया भार्य्या वालखिल्यानसूयत।

अषीन् षष्टिसहस्राणि ज्वलतो ब्रह्मतेजसा"।)

विश्वेदेवविशेषः। यथा, हरिवंशे।

"आत्मार्थे पाकमपचान् लोकस्य तु पितामह॥

विश्वे प्रजानां पतयो देवो लोके विनिःसृताः"॥

तत उक्तं "दक्षो मरीचिमत्रिञ्च पुलस्त्यं पुलहं क्रतुम्। वसिष्ठं गौतमञ्चैव भृगुमङ्गिरसं मनुम्"। इत्याद्युपक्रम्य।

"अथवाभूता इत्येते ख्याताश्चैव महर्षयः।

मरीचिमुख्या येषां ब्रह्मा वै समतिष्ठत"॥

जटाधरेण तु "विश्वेदेवा दशस्मृताः"। इत्युक्तं तत्सङ्ख्याभेदादविरुद्धम्॥

यथा, शतपथब्राह्मणे १०। ६। ३। १।

"यावत् क्रतुरयमस्माल्लोकात् प्रैति एवं क्रतुरमुं लोकं प्रेत्य सम्भवति"॥

यूपसहित सोमसाध्यो यज्ञः। विष्णुः। यथा, विष्णुसंहितायाम्।

"यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः"।

अस्य भाष्यं यथा,—

"कस्य सर्व्वयज्ञरूपत्वात् यतः यूपसहितो यज्ञः क्रतुरिति"। अतएव विष्णोः सर्व्वयज्ञमयत्वात् यज्ञार्थं क्रतुशब्दस्यापि यूपसहितयज्ञबोधकत्वं प्रसिद्धम्। तद्यामे शतपथब्राह्मणोक्ता वृक्षखिता यूपविशेषा। यथा, तत्र सोमयागे यागाश्च यथा क्रतव। तथाहि श्रुतौ "यौ क्रतून्वाधायाग्येयमुपस्यमास्थितम्"। सङ्कल्पः। स तु इच्छा कामनाधीनचित्तवृत्तिविशेषः। उक्तञ्च "कामः क्रतुः कर्म्म भक्तेयेनमेषां क्रमो भवेत्"। पुंसो या विषयापेक्षा स काम इति कथ्यते। स एव यज्ञमानस्येन् क्रतुत्वं प्रतिपद्यते॥ अध्यवसायः। यथा,—

"क्रतोरतिगत कामे विषये क्रतुरीयते"।

ज्ञानार्थकम। यथा, ऋग्वेदे। ४। ३१। १०।

"पुरुवृत्त। क्रत्वा नः सखि"। "क्रत्वा कर्मणा स्तुत्यादिरूपेण"। इति भाष्यम्॥

प्रज्ञा। यथा, छान्दोग्योपनिषदि। "अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिन् लोके पुरुषो भवति। तथेतः प्रेत्य भवति स क्रतुं कुर्व्वीत"॥ अस्य भाष्यं यथा,—

"अथमुपासीत। स क्रतुं कुर्व्वीत क्रतुर्निश्चयोऽध्यवसाय एवमेव नान्यथेति अविचलः प्रत्ययः क्रतुं कुर्व्वीतोपासीत इत्यनेन व्यवहितेन सम्बन्धः। किं पुनः क्रतुकरणेन कर्त्तव्यं प्रयोजनम्? कथं वा क्रतुः कर्त्तव्यः? क्रतुकरणं चाभिप्रेतार्थसाधनम् ? इत्यस्यार्थस्य प्रतिपादनार्थमुत्तरा ग्रन्थः। अथ खल्विति हेत्वर्थः। यस्मात् क्रतुमयः क्रतुप्रायोऽध्यवसायात्मकः पुरुषो जीवः। यथा क्रतुर्यादृक्क्रतुरस्मिन् लोके जीवन् पुरुषो भवति यथाध्यवसायस्वभाव इह लोके पुरुषो भवति। तथेतोऽस्माद्देहात् प्रेत्य मृत्वा भवति। क्रतुनुरूपफलात्मको भवतीत्यर्थः। एवं ह्येतच्छास्त्रतो दृष्टम्। 'यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरमित्यादि'। एवं एव वस्तात् क्रतुं

दक्षाऽऽत्मा स एवं जानन् क्रतुं कुर्व्वीत यादृशं क्रतुं वक्ष्यामस्तम्। यत एवं शास्त्रप्रामाण्यादुपपद्यते तत्त्वनुरूपं फलमतः स कर्त्तव्यः क्रतुः”। आषाढ़मासः। अस्मिन्नेव मासे चातुर्मास्यादियागप्राचुर्य्यात् तस्य तथात्वम्। यथा, यजुर्व्वेदे। १८। २८।

“वाजाय स्वाहा, प्रसवाय स्वाहा, अपिजाय स्वाहा, क्रतवे स्वाहा, वसवे स्वाहा”। इति। “क्रतवे याग रूपाय चातुर्मास्यादियागप्राचुर्य्यात् क्रतुराषाढ़”। इति वेददीपिका। अश्वमेधयज्ञः। यथा, मनौ। ७। ७९।

“यजेत राजा क्रतुभिर्विविधैराप्तदक्षिणैः।
धर्म्मार्थञ्चैव विप्रेभ्यो दद्याद्भोगान् धनानि च”॥)

क्रतुद्विट्, [ष] पुं, (क्रतुं यज्ञं द्वेष्टीति। द्विष + “सत्सूद्विषेति”। ३। २। ६१। क्विप्।) असुरः। इति त्रिकाण्डशेषः॥

क्रतुद्रुह्, [ह] पुं, (क्रतवे यज्ञाय द्रुह्यति द्रोहमाचरतीति। द्रुह + क्विप्।) असुरः। इति जटाधरः॥ अस्य रूपान्तराणि। क्रतुध्रुग्। क्रतुध्रुट्। क्रतुध्रुक्॥

क्रतुध्वंसी, [न्] पुं, (क्रतुं दक्षयज्ञं ध्वंसयतीति। ध्वन्स + णिनि। स्वजटोत्पादितवीरभद्रेण क्रतुध्वंसकारित्वादस्य तथात्वम्।) शिवः। इत्यमरः॥ (यथाहि अनेन दक्षयज्ञध्वंसः कृतस्तथा तद्विवरणं श्रूयते। पुरा किल कोमपरमपो दक्ष वैरनिया तथाच शिवरहितयज्ञं चिकीर्षुस्तत्र सर्व्वान् देवान् देवर्षीन् महर्षीन् आहूतवान्। अथ मत्युर्भ्राता ज्ञात्वा समागताहमसह्यमाना भवानी सती दक्ष्यदक्षो पितुरपरस्य यज्ञ द्रष्टुमनाहूतापि दक्षयज्ञ समाययौ। दक्षस्तु तां शिवा दृष्ट्वा मोहान्धकारप्रेरितः शिवनिन्दया सतीं तिरश्चकार। सा तु शिवनिन्दामाकर्ण्य समाधियोगानिना शरीरं परित्याज। एतच्छ्रुत्वा वहरूपी देवदेवः स्वजटातः वीरभद्रमुत्पादयन् दक्षयज्ञमध्वंसयीत्। एतद्विवरणन्तु काशीखण्डे ८८ अध्याये तथा श्रीमद्भागवतप्रभृतिग्रन्थे च विस्तरशो द्रष्टव्यम्॥)

क्रतुपशु, पुं, (क्रतोरश्वमेधादेर्यज्ञस्य पशुविशेषः पशुः।) अश्वः। इति हारावली॥

क्रतुपुरुष, पुं, (क्रतुः यज्ञः तत्प्रदः तदधिष्ठाता वा पुरुषः।) विष्णुः। इति त्रिकाण्डशेषः॥ (अथ हि वराहरूपिणं विष्णुं स्तुवद्भिः ब्रह्मादिभिः। भागवते। ३। १३। ३५—३६।

“रूपं तवैतन्ननु दुष्कृतात्मनां दुर्दर्शनं देव! यदध्वरात्मकम्।
छन्दांसि यस्य त्वचि बर्हिरोमस्वाज्यं दृशि त्वङ्घ्रिषु चातुर्होत्रम्॥
स्रुक् तुण्ड आसीत् स्रुव ईश! नासयोरिडोदरे चमसाः कर्णरन्ध्रे।
प्राशित्रमास्ये ग्रसने ग्रहास्तु ते यच्चर्व्वणन्ते भगवन्नग्निहोत्रम्॥
दीक्षानुजन्मोपसदः शिरोधरं त्वं प्रायणीयोदयनीयदंष्ट्रः।
जिह्वा प्रवर्ग्यस्तव शीर्षकं क्रतोः सभ्यावसथ्यं चितयोऽसवो हि ते॥
सोमस्तु रेतः सवनान्यवस्थितिः संस्थाविभेदास्तव देव! धातवः।
सत्राणि सर्व्वाणि शरीरसन्धिस्त्वं सर्व्वयज्ञक्रतुरिष्टिबन्धनः”॥

अत्र श्रीधरस्वामिना व्याख्यातं तद्यथा,

“यज्ञात्मना प्रपञ्चयन् स्तुवन्ति रूपमित्यादि चतुर्भिः। छन्दांसि गायत्र्यादीनि यज्ञाङ्गभूतछन्दआद्यनुवादेन भगवदवयवता विधीयते बर्हिः दर्भे दीक्षामात्रं आज्यं। दृशि चक्षुषि चातुर्होत्रं होत्रादिचतुष्टयकर्म्म। स्रुक् तुण्डः मुखाग्रे। स्रुवो नासिकयोः। इडा भक्षणपात्रं चमसाः यज्ञाङ्गं सोमपात्राणि। प्राशित्रं ब्रह्मभागपात्रम्। ग्रस्यतेऽनेनेति ग्रसनं मुखान्तर्बिलं तत्र ग्रहाः। दीक्षा दीक्षणीयेष्टिः अनुजन्म वारंवारं अभिव्यक्तिः। उपसदः त्रय इष्टयः शिरोधरं ग्रीवा। प्रायणीया दीक्षान्तरेष्टिः। उदयनीया समाप्तीष्टिः ते एव दंष्ट्रे यस्य। प्रवर्ग्यो महावीरः प्रत्युपसदं पूर्व्वं क्रियते। सभ्यो होमरहितोऽग्निः। आवसथ्यं औपासनाग्निः तयोः द्वन्द्वेन क्रतुर्यज्ञस्य शीर्षं शिरः। चितयः इष्टकाचयनानि। असवः प्राणाः। धातवः सप्त दीर्घीकृत्य आरम्भिकेण वाऽप्यारम्भा वा। अग्निष्टोमो ह्यतिरिक्तोऽपि उक्थः षोडशी वाजपेयोऽतिरात्रः अप्तोर्यामः इति सप्तसंस्थाभिरेतः सप्त। सत्राणि द्वादशाहादीनि बहूनि अहीनसत्रात्मकानि। क्रतवः सोमेष्टयः इष्टयः पशुबन्धनरूपाश्च एतैः स्वस्वरूपैः अथवा तदेवतान्यानि यज्ञ क्रतु॥)

क्रतुभुक् [ज्] पुं, (क्रतौ यज्ञे देयं चरुपुरोडाशादिकं भुङ्क्ते। क्रतु + भुज + क्विप्।) देवता। इत्यमरः। १। १। ८।

क्रतुराज, पुं, (क्रतुषु यज्ञेषु राजते इति। राज + अच्। यद्वा, क्रतूनां राजा। राजन् + टच्।) राजसूययज्ञः। इति हलायुधः॥ (क्रतुराट्। अश्वमेधयज्ञः। यथा मनौ ११। २६०।

“यथाश्वमेधः क्रतुराट् सर्व्वपापापनोदनः।
तथाघमर्षणं सूक्तं सर्व्वपापापनोदनम्”॥)

क्रतूत्तम, पुं, (क्रतुषु यज्ञेषु उत्तमः।) राजसूययज्ञः। इति त्रिकाण्डशेषः॥

क्रथ श वधे। इति कविकल्पद्रुमः। (भ्वा-पर-अक-सेट्। घटादि।) क्रथति। अक्रथीत्। चक्राथ।

क्रप, ङ प्रतिक्षेपे। इति कविकल्पद्रुमः। (चुरा-पर-सक-सेट्।) रेफयुक्तः। प्रतिक्षेपः पुनः पुनर्दण्डोत्क्षेपणम्। ङ, क्रपयति शिशुं दोलाः पुनःपुनरुत्क्षिपतीत्यर्थः। इति दुर्गादासः॥

क्रप, शि वधे। इति कविकल्पद्रुमः। (चुरा-पक्षे भ्वा-पर-सक-सेट्।) रेफयुक्तः। शि, क्रापयति क्रपति। इति दुर्गादासः॥

क्रप, शि म वधे। इति कविकल्पद्रुमः। (चुरा-पक्षे भ्वा-पर-सक-सेट्।) रेफयुक्तः। चुरादिपाठात् पूर्व्वो न मित्। शि म, क्रपयति। इति दुर्गादासः॥

क्रपण, क्ली, (क्रप्यते इति। क्रप वधे + भावे ल्युट्।) मारणम्। इत्यमरः। २। ८। ११५। (खड्गादिः। इति शब्दार्थचिन्तामणिः।) पुं, देवयोनिविशेषः। यथा, महाभारते। १। ६५। ६८।

“अयवन्तेन कोरेण रेणुकेन च पार्थिवाः।
क्रथनेन च शूरेण तपनेन च भीरवः।
मथनेन च यत्नेन प्रहारं प्रलिनेन च”॥

दानवविशेषः। यथा महाभारते। १। ६७। ४८।
“क्रथनस्तु महावीर्य्यः श्रीमान् राजन् महासुरः”॥)

क्रपणक, क्ली, (क्रपण + स्वार्थे कन्।) शिलाजुः। इति शब्दचन्द्रिका। (पुं, क्रपणे दण्डकारक कण्टकाद्यैः [illegible] कन्। उष्ट्रः। इति शब्दरत्नावली॥)

क्रन्द, इ रोदने। आह्वाने। इति कविकल्पद्रुमः॥ (भ्वा-पर-अकं-आह्वाने सकं-सेट्। इदित्।) इ, क्रन्द्यते। ततोऽक्रन्दीदरयोरिति। क्रन्दति भक्तारमित्याभिधानम्। दुर्गादासमते तु क्रन्दतु सर्व्वी। यथा, क, क्रन्दा। ऋ, क्रन्दति। ऋ, क्रन्दते। इति॥

क्रन्द ल ऋ ष वैक्लव्यविकलत्वयोः। इति कविकल्पद्रुमः। (भ्वा-आत्म-अक-सेट्-घटादि।) ल, क्रन्दि। ऋ, क्रन्दति। ष क्रन्दते। इति दुर्गादासः॥

क्रन्द क इत्यसातत्ये। इति कविकल्पद्रुमः। (चुरा-पर-अक-सेट्।) रेफयुक्तः। क, आक्रन्दयति। इत्यसातत्यं निरन्तरं क्रन्दितम्। इति दुर्गादासः॥

क्रन्दन क्ली (क्रदि + भावे ल्युट्।) रोदनम् [illegible] इत्यमरः॥ क्रन्दनम् इति भाषा। तत्पर्य्यायः। क्रन्दनम् १ रोदितम् २ रुदितम् ३ रोदनम् ४। इति शब्दरत्नावली॥ (यथा, देवीभा ५। ३१।

“तं क्रन्दनं मया [illegible] [illegible]”॥)

योधनादः। आह्वानम्। इत्यमरः। ३। ३। १०८॥

क्रन्दन, पुं (क्रन्दति [illegible] [illegible] [illegible]) बिडालः। इति शब्दमाला॥

क्रन्दित क्ली (क्रदि + क्त।) रोदनम्। इत्यमरः। १। ७। ३३। [illegible] इति हेमचन्द्रः। दीर्घक्रन्दनम्। इति शब्दरत्नावली॥

क्रम उ श म ष पदक्षेपे। इति कविकल्पद्रुमः। (भ्वा-आत्म-अक-सेट्।) [illegible] [illegible] [illegible]

णात् रेफस्य णकारः । अ, क्रमयति । ए, क्रमते दयानुदन्तम् । इति दुर्गादासः ॥

क्रम, उ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) उ, क्रमित्वा क्रान्त्वा क्रन्त्वा । क्रामति । वारिपूर्णा नदीं कृत्वा यजात् सङ्क्रमते गुरु रिति मध्वव्दस्योपसर्गप्रतिरूपकत्वे वागेरिव्या त्मनेपदम् । वृत्त्युत्साहेत्यात्मनेपदस्यानित्यत्वाज्ज्ञापकात्मनेपदमिति प्रदर्शयेव । सङ्क्रामन्तीत्यादि तु सङ्क्रमणं करोतीति प्रथमात् णौ साध्यम् । अन्यथा असन्तत्वाङ्ग स्यात् । हरेरिदं क्रामि पदैकेन खमिति तु धातुपारायणमते चुरादि विवक्षया सिद्धम् । तन्मतन्तु परिभाषायां लिखि तम् । अथवा आक्रमेति कर्मणोऽध्याहारे णेरवे णौ साध्यम् । हरे पद आक्राम यत् स क्रामया मास । इत्यर्थः । इति दुर्गादासः ॥

क्रम, य गतौ । इति कविकल्पद्रुमः ॥ (दिवा पर सक सेट् ।) य, क्राम्यति । गोविन्दभट्टकामदीश्वरौ तु दीर्घं विधाय । क्राम्यतीत्याहतुः । तथा च । "दृश्यते यानि दीधत्व दाक्षिणात्यवैदिभिः । तेन क्राम्यति कौमारे श्यनीत्यस्योपलक्षणात्" ॥ इति दुर्गादासः ॥

क्रमः, पुं, (क्रम्यते प्राप्यते पाठभेदोऽनेन । क्रम + घञ् । "नोदात्तोपदेशस्येति" । ७ । ३ । ३४ । इति न वृद्धिः ।) वैदिकविधानम् । तत्पर्यायः । कल्पः २ विधिः ३ । इत्यमरः । २ । ७ । ४० ॥ (क्रम + भावे घञ् ।) अनुक्रमः ।

(यथा, रघुः । ११ । २४ ।

"कोऽक्रमप्यनमसात् क्रमोदितो रश्मिभि प्रतिदिवाकरादिव" ॥)

शक्तिः । आक्रमणम् । इति मेदिनी ॥ (क्रा मत्यनेन घञ् न वृद्धिः ।) चरणः । इति हेम चन्द्रः ॥ (सन्नामस्यातो बलप्रयोगः ।

यथा, मार्कण्डेये ११८ । २ ।

"तस्य तस्यां प्रवन्दायां सुता यादश नर्मिदे । प्रांशुः प्रवीरः सूरश्च प्रतापी विक्रमाः क्रमः" ॥

सर्वाक्रमणात् हरः ।

यथा, महाभारते । १३ । १७ । १२८ ।

"क्रम सर्वाचो विख्यातो लोकः सर्वाश्रय क्रमः" ॥

निपादेन सर्वाक्रमणात् विष्णुः ।

यथा, तत्रैव १३ । १४९ । २२ ।

"ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः" ॥)

क्रमकः, पुं, (क्रमं वेदपाठभेदं अधीते वेत्ति वा । "क्रमादिभ्यो वुन्" । ४ । २ । ६१ । इति वुन् ।) क्रमज्ञः । इति मुग्धबोधम् ॥

क्रमणः, पुं, (क्रामत्यनेन करणे ल्युट् ।) चरणः । इति हेमचन्द्रः ॥ (पदक्षेपेपर्यायोऽयम् । यथा हरिवंशे ।

'हरिण क्रमणैश्च पुष्ट गदा प्ररूपयाः' ॥

क्ली । भावे ल्युट् । पादविक्षेपः । यथा, भागवते ८ । १० । २१ ।

'एकेनान्ध क्रमणेन सत्यम्' ॥)

क्रमपूरकः, पुं, (क्रमश पूरयति शीघ्रम् । पूर + णिच्

ण्वुल् । पुष्पस्तनौ क्रमेणास्य बीजपूरकत्वात् तथा त्वम् ।) बकवृक्षः । इति राजनिर्घण्टः ॥

क्रमशः, [स्] अ, (कारकार्थकात् क्रमात् + वीप्सायां शस् ।) क्रमेण क्रमेण । क्रमेक्रमे इति भाषा । यथा । "भवति विज्ञतमः क्रमशो जन" । इति प्राचीनाः ॥ (तथा च मनौ । १ । २२ ।

"अवस्थाऽपि दिशातीनां प्रशस्ता दारकर्मणि । कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः" ॥)

क्रमागत, त्रि, (क्रमेणागत आयातम् ।) क्रमायातम् । पितृपितामहादिक्रमेण प्राप्तम् । यथा,—

"असतस्याः स्त्रियः सर्वाः पुत्रदासपरिग्रहाः । असतन्त्रस्तत्र गृही यत्र तत् स्यात् क्रमागतम्" ॥

इति व्यवहारतत्त्वे नारदः ॥ (तथा च मनुः । २ । १८ ।

"तस्मिन् देशे य आचारः पारम्पर्यक्रमागतः । वर्णानां सान्तरालानां स सदाचार उच्यते" ॥)

क्रमायातः, त्रि, (क्रमेणायातः आगतः ।) क्रमागत । इति मिताक्षरा ॥

क्रमिः, पुं (क्रम् + इन् ।) कृमिः । इति भरतो द्विरूपकोषः ॥ रोगविशेषः । तच्चिकित्सा यथा,

"विडङ्गचूर्णयवक्षारमधमद्य मिश्रेन्द्रः । दीपन क्रिमिनाशाय जठराग्निविवर्द्धये ॥ प्रत्यह कटुकं तिक्त भोज्य कफनाशनम् । क्रिमीणां नाशन श्रेयो अग्निसन्दीपन परम् ॥ विडङ्गस्तपानीयं विडङ्गेनावघूर्णितम् । पीत क्रिमिघ्न दृष्ट क्रिमिनाश गदाम् जयेत् ॥ निम्बादिकल्कचूर्णं वा मधुना क्रिमिनाशनम् । पलाशबीजस्य रसं पिबेन्माक्षिकसंयुतम् ॥ पिबेत्तद्बीजकल्कं वा तक्रेण क्रिमिनाशनम् । काम्पिल्लपुष्पकमाषं गुडेन सह भक्षितम् ॥ पातयेत क्रिमीन् सर्वानुदरस्थान सशय । विडङ्ग कीटज बीज तथा बीज पलाशजम् ॥ सपूगं खादेत् मद्येन क्रिमीन्नाशयितुं नरः । निम्बपत्रमधुयुक्तं रसं क्षौद्रयुत पिबेत् ॥ भूकदम्बपत्र वापि क्रिमिनाशनमुत्तमम् । रसेन्द्रेण समायुक्तो रसो धुस्तूरपत्रजः ॥ ताम्बूलपत्रजो वापि लेपात् यूकाविनाशनः । धुस्तूरस्य कलेन तत्ररसेनैव भावितम् ॥ तैलमभ्यङ्गमात्रेण यूकानाशयति ध्रुवम् ॥ क्रिमीणां विट्कपोतानामेतद्युक्त चिकित्सितम् । दन्तजानान्तु संस्कारं कुर्यात् कुशकचिकित्सया ॥

क्षीराणि मांसानि घृतानि चापि दधीनि शाकानि च पर्णवन्ति । समासतो मिष्टरसान् विशेषात् क्रिमीन् जिघांसुः परिवर्जयेत्तु" ॥

इति क्रिम्यधिकारः । इति भावप्रकाशः ॥

क्रमिकण्टक, क्ली, (क्रमौ क्रमिनाशे कण्टकमिव । तस्य नाशकत्वात्तथात्वम् ।) चित्राङ्गः । विडङ्गम् । उडुम्बरः । इति मेदिनी ॥

क्रमिघ्न, क्ली, (क्रमिं हन्ति । हन् + टक् ।) विडङ्गम् । इति रत्नमाला ॥

क्रमिज, क्ली, (क्रमेः क्रमिभ्यो वा जायत इति । जन + डः ।) अगुरु । इत्यमरः ॥

क्रमिजा, स्त्री, (क्रमिज + टाप् ।) लाक्षा । इति इति रत्नमाला ॥

क्रमिशत्रुः, पुं, (क्रमेः क्रमीणां वा शत्रुरिव नाशकत्वात् ।) विडङ्ग । इति रत्नमाला ॥

क्रमुः, पुं, (क्रमु + बाहुलकात् उः ।) गुवाकः । इति भरतो द्विरूपकोषः ॥

क्रमुकः, पुं, (क्रमु + संज्ञायां कन् ।) पट्टिकाख्यः । गुवाकवृक्षः । भद्रमुस्तकः । इत्यमरः । २ । ४ । ४१ ॥ भद्रमुस्तकम् । कार्पासिकाफलम् । इति मेदिनी ।

क्रमुकफल, क्ली, (क्रमुक इव फलम् । क्रमुक गुवाकादिवृक्षस्य फल वा ।) गुवाकम् । इति राजनिर्घण्टः ॥ (यथा, माघे ।

"आस्वादितार्द्रक्रमुकाः समुद्रात्" ॥

क्रमुकाः क्रमुकफलानीत्यर्थ ।) अस्य गुणादयो गुवाकशब्दे द्रष्टव्याः ॥

क्रमुकी, स्त्री, (क्रमुक + स्त्रियां गौरादित्वात् ङीष् ।) गुवाकः । इति शब्दरत्नावली ॥

क्रमेल, पुं, (क्रममाणस्य एलति गच्छतीति । इल + अच् ।) उष्ट्र । इत्युणादिकोषः ॥

क्रमेलकः, पुं, (क्रममाणस्य एलति गच्छति । इल गतौ + ण्वुल् । यद्वा, क्रमेल + स्वार्थे कन् ।) उष्ट्रः । इत्यमरः २ । ९ । ७५ ॥ (यथा पञ्चतन्त्रे । १ । ३१३ ।

'भो समायोऽपि क्रमेलकहृदयं मयापितं अधुना मम मुखागतमाकर्षसि' ॥)

क्रमोद्वेगः, पुं (क्रमेण उद्वेगः उत्कर्षो वा यस्य ।) वृष । इति भूरिप्रयोगः ॥

क्रय, पुं, (क्री + भावे अच् ।) मूल्यादिकं दत्त्वा द्रव्यग्रहणं क्रयः । स्वत्वापादनार्थ विनिमयः । मूल्येन ग्रहणम् । केना इति भाषा । यथा,—

"प्रकाश वा क्रय कुर्यात् मूल्य वापि समर्पयेत्" ॥ इति प्रायश्चित्ततत्त्वे बृहस्पतिः ॥

क्रयलेख्य, क्ली, (क्रयस्य क्रये क्रयमधिकृत्य वा लेख्यम् ।) भूम्यादिक्रयलिपिः । कवाला इति भाषा । यथा,

"गृह क्षेत्रादिकं क्रीत्वा तुल्यमूल्याक्षरान्वितम् । पत्रं कारयते यत्तु क्रयलेख्य तदुच्यते" ॥

इति प्रायश्चित्ततत्त्वे बृहस्पतिः ॥

क्रयविक्रय, पुं, (क्रयेण सह विक्रयः ।) वाणिज्यम् । केना बेचा इति भाषा । यथा —

"द्रव्यदानं तथादान वस्त्रन्तु क्रयविक्रयम् । न कुर्यात् गुरुणा सार्द्धं शिष्यो भूत्वा कदाचन" ॥

इति तन्त्रसारः ॥

(केचित्तु स्त्रीं द्विवचनान्तमिच्छन्ति । तत्र उक्त यथा, मनौ विक्रयश्च तौ क्रयविक्रयौ । गवादीं मनुष्याणाम् ।

'आसन निशं स्थानं तथा बुद्धिप्रकाशनम् । विभाज्य यथाशक्त्या अर्पयेत् क्रयविक्रयौ । दशरात्रे दशरात्रे वसौ वसौ उदरा नरौ ।

कुर्व्वीत चैषां प्रत्यक्षमर्थसंस्थापनं नृप ”॥
क्रयविक्रयानुशय, पुं, (क्रये विक्रये च क्रयविक्रययोर्वा अनुशयः पश्चात्तापः ।) अष्टादशविवादान्तर्गतविवादविशेषः । यथा ।
“वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः ” ॥
अस्य विवरणम् । यथा, मनौ ।
“क्रीत्वा विक्रीय वा किञ्चित् यस्येहानुशयो भवेत् ।
सोऽन्तर्दशाहात्तद्द्रव्यं दद्याच्चैवाददीत वा ” ॥
क्रयविक्रयिक, पुं, (क्रयविक्रयाभ्यां जीवतीति । “वस्नक्रयविक्रयात् ठन्” ।४।४।१३। इति ठन् ।) वणिक् । इत्यमरः ।२।९।७८ ॥
क्रयशीर्ष, क्ली, (कपिशीर्ष+पृषोदरात् साधुः ।) कपिशीर्षम् । इति त्रिकाण्डशेषः ॥
क्रयारोह, पुं, (क्रय+आ+रुह+अधिकरणे घञ् । क्रयार्थं आरोहः समारोहोऽत्र ।) हट्टः । इति त्रिकाण्डशेषः ॥
क्रयिकः पुं (क्रयः प्रयोजनमस्य इति ठन् ।) क्रेता । तत्पर्य्यायः । क्रायकः २ । इत्यमरः ॥ क्रयी ३ । इति हेमचन्द्रः ॥ (यथा, महाभारते ।१३।
“धनेन क्रयिको हन्ति खादकश्चोपभोगतः ” ॥
क्रयेण जीवतीति । “वस्नक्रयविक्रयात् ठन्” । ४।४।१३। इति सूत्रादपि ठन्) क्रयजीवी । वणिक् । इत्यमरटीकायां भरतः ॥ (यथा, माघे ।
“पण्यापणान् क्रयिकलोकसमग्रपण्या” ॥)
क्रयी [न्] त्रि, (क्रयोऽस्त्यस्य इति । क्रय+इनि ।) क्रयकर्त्ता । इति हेमचन्द्रः ॥
क्रय्य, त्रि, (क्रीञ् द्रव्यविनिमये+“अचो यत्” ।३।१।९७। ‘क्रय्यस्तदर्थे’ ६।१।८२ । इति साधुः ।) क्रये प्रसारितम् । क्रयनिमित्तं हट्टादौ न्यस्तं पण्यम् । इत्यमरः ॥ (यथा, शतपथब्राह्मणे ।३।३।३।१। ‘क्रय्यस्ते सोमो राजा इति क्रय्य इत्याह सोमविक्रयी’ ॥)
क्रव्य, क्ली, (क्रव+यत् । अस्य रक्तम् ।) मांसम् । इत्यमरः ॥ (यथा, भागवते । ४ । १८ । २४ ।
“क्रव्यादाः प्राणिनः क्रव्यं दुदुहुः स्वे कलेवरे ।
सुपर्णवत्सा विहगाश्चरं चाचरमेव च ” ॥)
क्रव्यघातन, पुं (क्रव्याय क्रव्यार्थं वा घात्यतेऽसौ । हन् +णिच्+कर्म्मणि ल्युट् ।) मृगः । इति शब्दचन्द्रिका ॥
क्रव्याद्, पुं, (क्रव्यं मांसं अत्तीति । “क्रव्ये च विट्” ।३।२।६९। इति ।) राक्षसः । इत्यमरः ॥ मांसाशिनि त्रि । इति मेदिनी । (सिंहादिमांसभुक् पक्षिविशेषादिः । यथा रघौ ।१५।१६।
“धूमधूम्रो वसागन्धी ज्वालाबभ्रुशिरोरुहः ॥
क्रव्याद्गणपरीवारश्चिताग्निरिव जङ्गमः ” ॥
“क्रव्यादगणाः क्रव्यादो मांसादः । इति मल्लि नाथः । क्रव्यादिविशेषस्तु ।
यथा मनुः ५।१३१ ।
“श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत् ।
क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः ” ॥
“क्रव्याद्भिर्व्याघ्रादिभिः” । कुल्लूकभट्टः ॥

ग्राम्यक्रव्यादो मार्ज्जाराद्यः ।
यथा, मनौ ।११।१५६ ।
“श्वशृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च” ।
“ग्राम्यैः क्रव्याद्भिर्ग्रामवासिभिर्मार्ज्जारादिभिः” ।
इति कुल्लूकभट्टः ॥ गुरुपत्नीगामिनां नरकभोगावसाने क्रव्यादा आममांसादिनां योनिप्राप्तिर्भवति ।
यथा, तत्रैव ।१२।५८ ।
“तृणगुल्मलतानाञ्च क्रव्यादां दंष्ट्रिणामपि ।
क्रूरकर्म्मकृतां चैव शतशो गुरुतल्पगः ” ॥
शवदाहकाग्निभेदः । यथा, शतपथब्राह्मणे ।१।२।१।४।
“अथाग्ने ! अभिमामाद जहि निष्क्रव्याद सेध इत्यय वा आमाद् येनेदं मनुष्याः पक्त्वाऽश्नन्ति अथ येन पुरुषं दहन्ति स क्रव्याद् एतावेवैतदुभावतोऽपहन्ति” । ‘हे अग्ने ! गार्हपत्य ! आमादमग्निमपजहि परित्यज तथा,—
“क्रव्यादमग्निं निःसेधनिःसेध दूरे गमय” ।
इति भाष्यम् ॥ ऋग्वेदे च ।१०।१६।१०।
“योऽग्निः क्रव्यात् प्रविवेश वो गृहम्” ॥)
क्रव्याद, पुं (क्रव्यं मांसमत्ति । अद् उपपदे “कर्म्मण्यण्” ।३।२।१। इति अण् । यत्र चिता तत्रैव पुनश्चितायाः शवं पचति भुङ्क्ते इति व्युत्पत्त्या पक्वशब्दस्य पृषोदरात् क्रव्यादेशः । इति काशिका ।) राक्षसः । इत्यमरः ॥ सिंहः । श्येनः । इति राजनिर्घण्टः ॥ शवभक्षकाग्निः । यथा, “क्रव्यादो मृतभक्षणे” । इति तिथ्यादितत्त्वम् ॥ मांसाशिनि त्रि । इति धरणी ॥ (पुरा किल केन चिदपराधेन भगवतो भृगोः शापेन विदितेनैवापहृतायामस्य पत्न्यां भृगुभार्य्यायां [illegible] पुलोम्ना [illegible] भविष्यसीति तस्मै चक्रुधे शापं प्रददौ तेन हि तस्य क्रव्यादत्व प्रसिद्धम् । तत एतेनापि तत्रापि देवानां [illegible] यज्ञभागानपहाय परित्यक्तुकामेन [illegible] [illegible] देवादीनां मुखं भविष्यामीति [illegible] [illegible] [illegible] । पितामहस्तु देवादिभिरनुरुद्धो [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible] १।६–७ अध्यायेषु [illegible] । तद्यथा,
भृगुरुवाच ।
[illegible] [illegible] [illegible] [illegible] ।
न हि [illegible] [illegible] [illegible] [illegible] ॥
[illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] ॥
[illegible] ।
[illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] ॥
[illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] ॥
[illegible] उवाच ।
इति [illegible] [illegible] [illegible] [illegible] ।
[illegible] [illegible] [illegible] [illegible] ॥

“सत्यं भगवता वह्ने क्रुद्धो वाक्यमुदाहृतः ।
किमिदं साहसं ब्रह्मन् कृतवानसि मां प्रति ” ॥
“अमावास्यायां पितरः पौर्णमास्यां च देवताः ।
मन्मुखेनैव हूयन्ते भुञ्जते च हुतं हविः ॥
सर्व्वभक्षः कथं तेषां भविष्यामि मुखं त्वहम् ” ॥
“निश्चिन्त्य ततो वह्निश्चक्रे संहारमात्मनः ।
द्विजानामग्निहोत्रेषु यज्ञसत्रक्रियासु च ॥
निरोङ्कारवषट्कारा स्वधास्वाहाविवर्ज्जिताः ।
विनाग्निना प्रजाः सर्व्वास्तत आसन् सुदुःखिताः ॥
अथर्षयः समुद्विग्ना देवान् गत्वाब्रुवन् वचः ।
अग्निप्रणाशात् क्रियाभ्रंशाद् भ्रान्ता लोकास्त्रयोऽनघाः ।
विदध्वमत्र यत्कार्य्यं न स्यात् कालात्ययो यथा ।
अथर्षयश्च देवाश्च ब्रह्माणमुपगम्य तु ।
अग्नेरावेदयञ्छापं क्रियासंहारमेव च ।
भृगुणा वै महाभाग ! शप्तोऽग्निः कारणान्तरे ॥
कथं देवमुखो भूत्वा यज्ञभागाग्रभुक् तथा ।
हुतभुक् सर्व्वभूतेषु सर्व्वभक्षत्वमेष्यति ॥
श्रुत्वा तु तद्वचस्तेषामग्निमाहूय विश्वकृत् ।
उवाच वचनं श्लक्ष्णं भूतभावनमव्ययम् ॥
लोकानामिह सर्व्वेषां त्वं कर्त्ता चान्त एव च ।
त्वं धारयसि लोकांस्त्रीन् क्रियाणाञ्च प्रवर्त्तकः ॥
स तथा कुरु लोकेश ! नोच्छिद्येरन् क्रिया यथा ।
कस्मादेवं विमूढस्त्वमीश्वरः सन् हुताशन ! ॥
त्वं पवित्रं सदा लोके सर्व्वभूतगतिश्च ह ।
न त्वं सर्व्वशरीरेण सर्व्वभक्षत्वमेष्यसि ॥
अपाने ह्यर्च्चिषो यास्ते सर्व्वं भक्ष्यन्ति ताः शिखिन् ।
क्रव्यादा च तनुर्या ते सा सर्व्वं भक्षयिष्यति ॥
यथा सूर्य्यांशुभिः स्पृष्टं सर्व्वं शुचि विभाव्यते ।
तथा त्वदर्च्चिर्निर्दग्धं सर्व्वं शुचि भविष्यति ॥
तदग्ने ! परमं तेजः स्वप्रभावाद्विनिर्गतम् ।
स्वतेजसैव तं शापं कुरु सत्यमृषेर्विभो ! ॥
देवानाञ्चात्मनो भागं गृहाण त्वं मुखे हुतम्” ।
“एवमस्त्विति तं वह्निः प्रत्युवाच पितामहम् ।
जगाम शासनं कर्त्तुं देवस्य परमेष्ठिनः” ॥ ० ॥
[illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] ।
यथा, ऋग्वेदे ।१०।१६।९।
“क्रव्यादमग्निं प्रहिणोमि दूरं
यमराज्ञो गच्छतु रिप्रवाहः ।
इहैवायमितरो जातवेदा
देवेभ्यो हव्यं वहतु प्रजानन्” ॥
“अहं क्रव्यादमग्निं [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] । [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
“क्रव्यादम्” इति क्रव्य+अद ।[illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] । [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible] [illegible] [illegible]
[illegible] [illegible] [illegible] [illegible]” । इति [illegible] ॥
[illegible] [illegible] [illegible] । क्रव्+अद [illegible] “[illegible]” ।
३।२।६९ । [illegible] । [illegible] [illegible] ।
यथा, भागवते ।६।१८।११ ।

इति वैद्यकनिक्रिमिरोगपथ्यापथ्यविधिग्रन्थे ।)

क्रिमिकण्टक, क्ली, (क्रिमौ कण्टकमिव ।) उमि कण्टकम् । इति मेदिनी ॥

क्रिमिघ्नः, पुं (क्रिमिं हन्ति नाशयतीति । "अमनुष्यकर्तृके च" । ३ । २ । ५३ । इति टक् । मूलविभुजादित्वात् सिद्धम् । अत् पूर्व्वस्येति निपातनात् णत्वम् ।) कृमिघ्नः । विडङ्गः । इत्यमरटीकायां रमानाथः । (क्रिमिरोगनाशकौषधविशेषः ।
"क्रिमिघ्नं क्रिमिकारि त्रिवीजं सदयसकम् ।
अन्यदपद्यासुपर्णैर्दद्यै "क्रिमिविनाशनम्" ॥
इति क्रिमिघ्नो रसः ॥
इति वैद्यकरसेन्द्रसारसंग्रहे क्रिम्यधिकारे ।)

क्रिमिघ्नी, स्त्री, (क्रिमिघ्न + टित्वात् स्त्रियां ङीप् ।) सोमराजी । इति शब्दचन्द्रिका ॥

क्रिमिज, क्ली (क्रिमिभ्यो जायते इति । "पञ्चम्यामजातौ" ।३।२।९८। इति डः ।) अगुरु । इत्यमरः ॥

क्रिमिजा, स्त्री, (क्रिमिज + स्त्रियां टाप् ।) लाक्षा । इति रत्नमाला ॥

क्रिमिशत्रुः, पुं (क्रिमेः शत्रुरिव नाशकत्वात् ।) रक्तपुष्पकः । इति शब्दचन्द्रिका । मादिलाबादार इति भाषा ॥

क्रिमिशाम्भवः, पुं, (शम्भु + स्वार्थे अण् शाम्भवः । क्रिमेः शाम्भव इव तन्नाशकत्वात् ।) विट्खदिरः । इति रत्नचन्द्रिका ॥

क्रिमिशैलः पुं, (क्रिमिभिर्निर्मितः शैल इव ।) वल्मीकः । इति त्रिकाण्डशेषः ॥

क्रियः, पुं, (क्रिया यज्ञाद्यनुष्ठानादिक्रिया विद्यते अत्र अर्शआदित्वात् अच् ।) मेषराशिः । इति दीपिका ॥

क्रिया, स्त्री, (क्रियते अनया अस्यां अस्मिन् इति वा । डुकृञ् करणे करणकर्म्माधिकरणादौ च यथायथं श प्रत्ययः । "रिङ् शयग्लिङ्क्षु" । ७ । ४ । २८ । इति रिङादेशः । "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" । ६ । ४ । ७७ । इति इयङ् ।) आरम्भः । निष्कृतिः । शिक्षा । पूजनम् । सम्प्रधारणम् । उपायः । कर्म्म । समर निश्चम् । यथा,—
"आरम्भो निष्कृतिः शिक्षा पूजनं सम्प्रधारणम् ।
उपायः कर्म्म चेष्टा च चिकित्सा च नव क्रिया" ॥
इति भावप्रकाशः ॥ चेष्टा । चिकित्सा । इत्यमरः । २ । ९ । १९६ ॥ आरम्भः । इति हेमचन्द्रः । आह्वनम् । इत्यमरटीकायां स्वामी ॥ शौचम् । इति शब्दरत्नावली ॥ धात्वर्थः करोत्यर्थो वा । इति वैयाकरणाः ॥ क्रिया साधनरूपा तल्लक्षणं पाकादयः स्व हि अधिश्रयणादय अवश्यकादिः फूत्कारादिभूतौ व्यापारकलापा मानादिरूपस्यात्र । इति शास्त्रिदर्पणम् ॥ अनुप्रहारव्यवहारव्यवहारधारविशेषः । सा द्विधा मानुषी दैविकी च । तत्राद्या साक्षिलेख्यानुमानभेदेन त्रिधा । द्वितीया घटाग्न्युदकविषकोशतप्तमाषकफालधर्म्मभेदेन नवधा दिव्यानि । यथा,—
"द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी तथा ।
साक्षिलेख्यानुमानञ्च मानुषी त्रिविधा स्मृता ।
घटाद्या धर्म्मजान्ताश्च दैविकी नवधा स्मृता" ॥
इति व्यवहारतत्त्वे बृहस्पतिः ॥ (चिकित्साकार्य्ये यथा,—चरके सूत्रस्थाने १६ अध्याये ॥
"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः ।
सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम् ॥
कथं शरीरे धातूनां वैषम्यं न भवेदिति ।
समानाञ्चानुबन्धः स्यादित्यर्थं क्रियते क्रिया" ॥
"याऽऽयुदार्ढ्यं शमयति नान्यं व्याधिं करोति च ।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्" ॥
प्राते श्लीषमतीकार उद्योगोऽनिवारणम् ।
धाराकुल्यात् क्रियामात्रां क्रियाकाले न हापयेत्" ॥
इति च सुश्रुते सूत्रस्थाने ३१ अध्याये ॥)

क्रियाकारः, पुं, (क्रियां शिक्षारम्भं करोतीति । कृ + उपपदे "कर्म्मण्यण्" ३ । २ । १ । इत्यण् ।) नवच्छात्रः । नूतन पडुया इति भाषा । इति त्रिकाण्डशेषः ॥ कर्म्मकारके त्रि ॥

क्रियाद्वेषी, [न्] पुं (क्रिया व्यवहाराङ्गसाधनं साक्षिलेख्यादिकं द्वेष्टि । द्विष + णिनिः ।) साक्षिलिखितभुक्तिदूषितप्रपञ्चदोषा । स च व्यवहारविषये पञ्चधा । हीनान्यतमहीनविशेषः । यथाह,—व्यवहारतत्त्वे नारदः ।
"अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः" ॥
(तल्लक्षणं यथा । तत्रैव कात्यायनवचनम् ।
"लिखितं साक्षिणश्चैव क्रिया ज्ञेया मनीषिभिः ।
तां क्रियां द्वेष्टि यो मोहात् क्रियाद्वेषी स उच्यते" ॥)
कर्म्मद्वेष्टरि त्रि ॥

क्रियापादः, पुं, (क्रिया विवादसाधनं पाद इव ।) चतुष्पाद्व्यवहारस्य तृतीयपादः । यथा —
"पूर्व्वपक्षः स्मृतः पादो द्वितीयश्चोत्तरः स्मृतः ।
क्रियापादस्तथा चान्यश्चतुर्थो निर्णयः स्मृतः" ॥
इति बृहस्पतिः ॥ स च साक्षिलिखितभुक्तिदिव्यरूपः । इति व्यवहारतत्त्वम् ॥

क्रियाभ्युपगमः, पुं, (क्रियायाः कर्षणादिविषयस्य अभ्युपगमः स्वीकारः ।) परस्परमिथःस्वीकारः । द्वयोः पुरुषयोः कस्मिंश्चिद्विषये परस्पराङ्गीकारेण अनुमतिः । यथा,—
"क्रियाभ्युपगमात् क्षेत्रं बीजार्थं यत् प्रदीयते ।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च" ॥
इति मनुः ॥ अस्यार्थः । "उत्पन्नमपत्यमावयोरुभयोरेवेति नियमेनैतत् क्षेत्रस्वामिना बीजवपनार्थं यत् क्षेत्रं दीयते तत्रोत्पन्नस्य बीजिक्षेत्रिणौ द्वावपि भागिनौ दृष्टौ" । इति कुल्लूकभट्टः ॥ उपगममेतत् ॥

क्रियायोगः, पुं (क्रियैव योगः योग उपायः ।) देवाराधनतदालयादिकरणरूपोपायः । यथा,—
नारद उवाच ।
"क्रियायोगं वद प्रोक्तवान् मे प्रपितामह ॥
तदहं श्रोतुमिच्छामि सर्वं शास्त्रं यथाक्रमम् ॥
ब्रह्मोवाच ।
ज्ञानयोगस्तु योगस्य क्रियायोगस्तु नारद ।
अतिदुष्करः शास्त्रेषु क्रियायोगश्च वर्ण्यते ।
प्रधान कारणं योगो मुक्तेर्मुनिवरोत्तम ॥
क्रियायोगस्तु योगस्य परमं साधनम् ।
सदन्तरत्र एवं तन्निर्दिष्टमत्र पृष्टः ।
येन देवालयं विष्णोः शुभं वास्तव्य कृतम् ।
कारयेन्मृण्मयं वापि तस्य मन्ये फलं शुभे ॥
अहन्यहनि योगेन यजतो यन्महाफलम् ।
प्राप्नोति तत् फलं विष्णोर्यः कारयति मन्दिरम् ।
कुलानां शतमागामि समतीतं तथा शतम् ।
कारयेद्भगवद्धाम नयत्यच्युतमन्दिरम् ।
सप्तजन्मकृतं पापं स्वल्पं वा यदि वा बहु ।
विष्णोरालयविन्यासप्रारम्भादेव नश्यति ।
पतितं पतनासन्नं तथार्द्धपतितं तथा ।
समुद्धृत्य हरेर्धाम द्विगुणं फलमाप्नुयात् ॥
"प्रतिमां लक्षणवतीं यः कुर्य्यादेव मानवः ।
केशवस्य परं लोकमक्षयं प्रतिपद्यते ।
अनुमानो मया राज्ये दत्तो राजाय विस्तरः ।
केवलं ये महाद्धाममनन्तं समुपाश्रिताः ।
भवद्भिः परित्यज्याले तेषां नालोक्य किञ्चित् ।
मम लक्ष्याक्षयाक्षया वासुदेवैकपौरिकम् ।
धर्मार्थमार्विसैद्धान्ते च व्याख्या सुदुर्लभा ।
तान् दण्डैर्यत्नमप्युक्ता दीपयामिति ।
अज्ञापुरःसरैर्नित्य ते च व्याख्या सुदुर्लभ" ॥
इत्याद्ये वह्निपुराणे वैष्णवक्रियायोगे यमानुशासनं नामाध्यायः ॥ तथा च पाद्मे ।
"तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः" ॥)

क्रियावत्, त्रि, (क्रियया अवरुद्धः ।) साक्षादिप्रमाणपराभवः । यथा,—
"सामभ्युपगमो हि न सत्यादविरोऽपि सन् ।
क्रियावत्त्वात् वादे तु यद यथावधारणम्" ॥
इति व्यवहारतत्त्वम् ॥

क्रियावान्, [त्] त्रि, (क्रिया अस्यास्तीति मतुप् । मस्य वः ।) कर्म्मोद्युक्तः । क्रियायुक्तः । इत्यमरः । ३ । १ । १८ ॥ (यथा, भट्टिः । १ । १० ।
"उदीरिता शेष सराजुषानि
राजाशि विद्वान् क्रतुषु क्रियावान्" ॥)

क्रियावादी, [न्] पुं, (क्रियां विवादसाधनं वदति । वद + णिनि ।) प्रत्यर्थी । कार्य्यवादी । हीं निजपक्षा । वादी इति भाषाभाषा ॥

क्रियेन्द्रिय स्त्री, (क्रियायाः कर्म्मणः साधनं इन्द्रियम् ।) कर्म्मेन्द्रियम् । इति हेमचन्द्रः ॥ (कर्म्म च वचनादानगमनमैथुनमलत्यागादिरूपं पञ्च प्रतिपादनेन तस्य करणं कर्म्मेन्द्रियं प्रधानम् । यथा मनौ ।
"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता" ॥)

क्री, ञ् क्र न ग्रहणे । इति कविकल्पद्रुमः । (क्र्यादिं-उभं-द्विकं-अनिट् ।) अनितः परिवर्त्त श्रीणाति अ विनिमयम् । क्रीणाति लोभी कार्य्य बणिजः । इति दुर्गादासः ॥

क्रीड, ऋ विहृतौ । इति कविकल्पद्रुमः । (भ्वा-पर-अकं-सेट् ।) ऋ, अचिक्रीडत् । क्रीडति

भाव त्रियुभि । इति दुर्गादासः ॥

क्रीड़, पुं, (क्रीड़+भावे घञ ।) परीहासः । इति शब्दरत्नावली ॥

क्रीड़न, क्ली, (क्रीड़+भावे ल्युट् ।) खेला । यथा ।
"बाल्यक्रीड़नमिन्दुभिन्नरधनुर्भङ्गावधि प्रश्रता
ताते काननसेवनावधि ततः सुग्रीवसख्यावधि" ।
इति महानाटकम् ॥

क्रीड़ा, स्त्री, (क्रीड़+भावे अप ततष्टाप् ।) परीहासः । खेला । इत्यमरः । १ । ७ । ३१ ॥
(यथा, भागवते । ९ । ३ । १५ ।
"स वै भागवतो राजा पाण्डवेयो महारथः ।
बालक्रीड़नकैः क्रीड़न् कृष्णक्रीड़ां य आददे" ॥)
अवज्ञानम् । इति मेदिनी ॥

क्रीड़ाताल, पुं, (क्रीड़ानामकस्तालः ।) तालभेदः । यथा,—
"एक एव द्रुतो यत्र क्रीड़ाताल स कथ्यते ।
अपरं नियम विना" । इति सङ्गीतदामोदरः ॥

क्रीड़ारत्नं, क्ली, (क्रीड़ायां क्रीड़ायाः वा रत्नमिव ।) रतिः । इति त्रिकाण्डशेषः ॥ [कुलायुध ॥

क्रीड़ारथ,पुं, (क्रीड़ार्थं रथः ।) क्रीड़ार्थरथः । इति

क्रीतः, पुं, (क्री+कर्म्मणि क्तः ।) क्रीतकपुत्रः । स तु द्वादशविधपुत्रान्तर्गतपुत्रभेदः । इति जटाधरः ॥ (यथाह, याज्ञवल्क्यः ।
'दद्यात् माता पिता वा यं स पुत्रो दत्तको भवेत् ।
क्रीतश्च ताभ्यां विक्रीत कृत्रिमः स्यात् स्वयंकृतः' ॥)
सत्ययुगे त्रि । केना इति भाषा । यथा,—
'दीयमानं न गृह्णाति क्रीत पशुमपि य क्रयी ।
स तस्याः भवेद्दोषो विक्रेतुर्दोऽप्यपश्यन " ।
इति प्रायश्चित्ततत्त्वे नारदः ।

क्रीतक, पुं, (क्रीत+स्वार्थे कन् ।) क्रीतपुत्रः । यथा, मनुः । ९ । १७४ ।
"क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात् ।
स क्रीतकः सुतस्तस्य सदृशोऽसदृशोऽपि वा" ॥

क्रीतानुशय, पुं, (क्रीते क्रये अनुशय पश्चात्ताप ।) अथ क्रीता पश्चात्तापः । यथा,—
"क्रीत्वा मूल्येन यः पण्यं क्रेता न बहु मन्यते ।
क्रीतानुशय इत्येतत् विवादपदमुच्यते ॥
इति याज्ञवल्क्यः ॥

क्रुञ्च,[ञ्] पुं स्त्री, (क्रुञ्चति वक्रं गच्छति [illegible] तथा [illegible] । "ऋत्विग् दधृक् स्रगिति" । ३ । २ । ५९ । इति निपातनात् साधुः ।) क्रौञ्चः । इत्यमरः । २ । ५ । २२ ॥ कोँच बक इति भाषा । (यथा, यजुर्वेदे १९ । ७३ ।
"अद्भ्यः क्षीरं व्यपिबत् क्रुङ्ङाङ्गिरसो धिया ।
ऋतेन सत्यमिन्द्रियम्" ।
[illegible]
[illegible]
[illegible]
[illegible] ।" इति भाष्यम् ।)

क्रुञ्च, पुं (क्रुञ्च+अच् ।) क्रौञ्चपक्षी । इति [illegible] । (कर्णवेधे । यथा, यजुर्वेदे २४ । २२ ।

"शाखे बलाका इन्द्राग्निभ्यां क्रुञ्चान्" ।)

क्रुधा, स्त्री, (क्रुध+क्विप् सर्वोऽयोगेपधत्वात् टाप ।) क्रुधादित्वात् टाविशेषे । कोपादेः । इति शब्दरत्नावली ॥

क्रुध्, [ध्] स्त्री, (क्रुध्+सम्पदादित्वात् क्विप् भावे ।) क्रोध । इत्यमरहेमचन्द्रौ । अस्या रूपान्तराणि । क्रुत् । क्रुद् । इति कविकल्पव्याकरणम् ॥

क्रुद्ध, त्रि, (क्रुध+कर्त्तरि क्त ।) क्रोधयुक्तः । यथा ।
"योद्धुमभ्याययौ क्रुद्धो रक्तवीजो महासुरः" ।
इति देवीमाहात्म्यम् ॥ (भावे क्त ।) क्रोधे क्ली ॥

क्रुध, क य औ कोपे । इति कविकल्पद्रुमः ॥ (दिवा पर-अक-अनिट ।) क, अक्रुधत् । य, क्रुध्यति लोकः शिष्यये । औ, क्रोद्धा । इति दुर्गादासः ॥ ० ॥ हेलते १ हेडते २ भामते ३ भदीयते ४ भीळाति ५ त्सेयति ६ रोषति ७ अस्यति ८ कुप्यते ९ भोजते १० । इति दश क्रुध्यति कर्माणः । इति वेदनिघण्टौ २ अध्यायः ।

क्रुधा,स्त्री,(क्रुध+क्विप् स्त्रियां हलन्तत्वात् वा टाप् ।) क्रोध । इत्यमरटीकायां भरतः ॥

क्रुन्थ, न्याम् । वधे । इति कविकल्पद्रुमः ॥ (भ्वा पर-सक-अक च सेट् ।) रेफयुक्तादिः पञ्चमस्वरी । क्रुन्थति । इति दुर्गादासः ॥

क्रुश, श क्लिशि । क्लिशि । इति कविकल्पद्रुमः ॥ (क्र्या पर सक सेट ।) पञ्चमस्वरी रेफयुक्तः । क्लिशि दुःखानुभवे । श, क्रुश्नाति सुखदासः । इति कलायुधः । सुखदः । इति दुर्गादासः ॥

क्रुश, ज औ रोदे । क्रुशौ । इति कविकल्पद्रुमः ॥ (भ्वा पर रोदने अक-आह्वाने सक अनिट ।) ज, क्रोशः कृष्टः । औ अक्रुक्षत् । रोदोऽत्र विक्रोशनम् । शब्दाह्वानम् । इति दुर्गादासः ॥

क्रुष्टा [न] पुं स्त्री (क्रोशति रौतीति । क्रुश+"क्रोष्टु कुशिवर्त्तीति" । उणां १ । ११० । इति तृच् ।) शृगाल । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

क्रुष्ट, क्ली, (क्रुश्+भावे क्त ।) रोदनम् । इत्यमरः । १ । ७ । ३४ ॥ रावः । इति मेदिनी ॥

क्रूर, त्रि (कृत् छेदने+"कृतेश्छः क्रू च" । उणां २ । २१ । इति रक्प्रत्यये धातोः क्रूरादेशश्च ।) पर द्रोहकारी । (यथा, मेघदूते । १०७ ।
"क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः" ॥)
[illegible] । [illegible] ८ । [illegible] २ [illegible] ३ [illegible] ॥
(यथा, भागवते । ६ । १४ । ४० ।
"[illegible] क्रूरा [illegible]" ॥
यथा, [illegible] ६ । ७ । ३८ ।
"[illegible] ॥
क्रूरे [illegible] इति [illegible] ।)
[illegible] । इत्यमरः । ३ । १ । ९० ॥
(यथा [illegible] । १७ । ४ ।
"[illegible] ।
[illegible] । इति [illegible] । (यथा, [illegible] २ । ४६ ।
"[illegible]" ॥)
[illegible] । [illegible] ।

[illegible] नमर्थादपराधात् । यथा,—
"योगोऽपि दुष्ट विषम समय
क्रूरोऽपि सौम्य शुभदोऽशुभ च ।
अरविंशराश्यन्तरकामधेनु
मेषादयोऽमी क्रमशः प्रदिष्टाः" ॥
इति दीपिका ।

क्रूर,पुं, (कृन्ततीति । "कृतेश्छः क्रू च" । उणां २ । २१ । इति रक् धातोः क्रूरादेशश्च ।) भूतांकुशवृक्षः । रक्तकरवीरवृक्षः । श्येनपक्षी । कङ्कपक्षी । इति राजनिर्घण्टः ॥

क्रूरकर्म्मा, [न्] पुं (क्रूरं कर्म्म यस्य ।) महानिम्बः । कर्म्मकर्त्तरि त्रि । (यथा, महाभारते । १ । ७ ।
"विजिज्ञा क्रूरकर्म्माणो निष्ठाश्चिन्तानुधारिणः ।
दूरतोऽपि हि पश्यन्ति राजानो भुजगा इव" ॥)
कटुतुम्बिनीवृक्षः । इति राजनिर्घण्टः ॥ (अस्य तुम्बी । अस्याः पर्य्यायाः यथा,—भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ।
"अलाबूर्भी क्रूरकर्म्मा स्वयम्भूः त्वक्तानुका" ।)

क्रूरगन्ध,पुं, (क्रूरः उग्रो गन्धोऽस्य ।) गन्धकः । इति राजनिर्घण्टः ॥

क्रूरगन्धा,स्त्री,(क्रूरः उग्रो गन्ध इव गन्धो यस्याः । स्त्रियां टाप् ।) कन्थारीवृक्षः । इति राजनिर्घण्टः ॥

क्रूरदृक्, [श्] त्रि (क्रूरा दृक् दृष्टिर्यस्य । क्रूरं यथा स्यात् तथा पश्यति वा । दृश्+क्विन् ।) पिशुन । शनैश्चरे पुं । इति मेदिनी ॥ (तथा— ज्योतिस्तत्त्वे । "भौमोऽपि क्रूरदृक् पश्येत्" ॥)

क्रूरधूर्त्तः पुं, (क्रूरः अत्यन्तधूर्त्त इव ।) क्षुद्र धतूरः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायान्तरे गुणाः धुस्तूर शब्दे ज्ञातव्याः ॥)

क्रूररावी, [न्] पुं, (क्रूरं कर्कशं उग्रं वा रौति । रु+णिनि ।) द्रोणकाकः । इति राजनिर्घण्टः ॥

क्रूरलोचन, पुं, (क्रूरे लोचने क्रूरं लोचनं वा यस्य ।) शनिः । इति हारावली ॥

क्रूराचार, त्रि, (क्रूर आचारोऽस्य ।) कर्कश आचारयुक्तः । यथा,—
"क्रूराचारा मायोपूतनपापारम्भर्" ।
इति कविकल्पलतायां [illegible] कुसुमम् ॥

क्रूरा, स्त्री, (क्रूर+स्त्रियां [illegible] टाप् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥

क्रूराकृति पुं, (क्रूरा आकृतिर्यस्य ।) रावणः । इति शब्दमाला ॥ (कठोरमूर्त्तौ त्रि ॥)

क्रेयि, पुं, (क्री+[illegible] ।) [illegible] । [illegible] ॥

क्रेतव्य त्रि (क्री+कर्म्मणि तव्यत् ।) क्रेयम् । यथा
"क्रेयं क्रेतव्यमात्रके" । इत्यमरः । ३ । ९ । ८१ ।

क्रेय [य] त्रि,(क्री+यत् ।) क्रेतव्यम् । यथा ।
"[illegible] ॥
[illegible] " ॥
इति [illegible] ॥

क्रैयं, त्रि (क्री+कर्म्मणि यत् ।) क्रेतव्यम् । इत्यमरः । ३ । ९ । ८१ । [illegible] इति भाषा ।

क्रोडदारक पुं (क्रुड+घञ् बाहुलकात्...। क्रोड मत्स्यविशेष। तस्य दारम दारक इत्यर्थं। क्रोड दारयति वा। ...+णिच्+ण्वुल् ।) कार्त्ति केयः। इत्यमरटीकायां रायमुकुट ॥

क्रोड स्त्री, क्ली, (क्रुड+घञ्।) बाहोर्मध्यम। कोल इति भाषा। तत्पर्य्याय। भुजान्तरम् २ उरः ३ वक्षम् ४ वत्स ५। इत्यमरः।२।६।७७। उत्सङ्ग ६ भोग ७ वक्षःप्राक ८। इति राजनिर्घण्ट। (यथा, ऋग्वेदे।२५।८। "इन्द्रस्य क्रोडोऽदितै भाजसम्"। कात्यायनश्रौतसूत्रे च।६।८।१२। "उपमिता मात्यामासिथ क्रोडमनस्नीनि च पाश्यति" ॥ हितोपदेशे च।
"तत्र तया निर्मितनीडक्रोडे पक्षिण सुखं वसन्ति"॥)

क्रोड, पुं (कुड+घञ्। क्रोडोऽस्यास्तीति अच् आदित्वात् अच् वा।) शूकरः। इत्यमरः।२।५।२॥ शनिः। इति मेदिनी॥ वाराहीकन्द। इति राजनिर्घण्टः॥ (यथा, महाभारते।१२।५०।२०।
"नदी हैमवतविभ्राड् ग्राहिमकृशटाधरम।
गन्दे ग्रस्तमिवाचि क्रोडवित्रैस्तापितम्'॥)

क्रोडकन्या, स्त्री, (क्रोडस्य शूकरस्य कन्या इव।) वाराहीकन्द। इति राजनिर्घण्टः॥

क्रोडचूडा स्त्री, (क्रोडे चूडा यस्याः।) महाश्रावणिकाक्षुपः। इति राजनिर्घण्टः॥ बड़ मुण्डुरि इति भाषा।

क्रोडपर्णी, स्त्री, (क्रोडे कण्टकमध्ये पर्णं यस्याः।) कण्टकारिका। इति शब्दचन्द्रिका॥ (कण्ट कारीशब्देऽस्या विवरणम् ज्ञेयम्॥)

क्रोडपाद, पुं, (क्रोडे शरीराभ्यन्तरे पादोऽस्य।) कच्छप। इति हेमचन्द्रः॥

क्रोडाङ्ग पुं, (क्रोडे अङ्गानि यस्य।) कच्छप। इति शब्दरत्नावली॥

क्रोडाङ्घ्रि, पुं, (क्रोडे अङ्घ्रिरस्य।) कच्छप। इति त्रिकाण्डशेषः॥

क्रोडी स्त्री, (क्रोड+जातित्वाभावात् गौरादित्वात् ङीष्।) वाराहीकन्द। इति राजनिर्घण्ट॥

क्रोडीकरण, क्ली, (क्रोड+च्वि+कृ+भावे ल्युट्। अभूत तद्भावे च्विः।) आलिङ्गनम्। इति हलायुध॥

क्रोडीकृति, स्त्री, (क्रोड+च्वि+कृ+भावे+क्तिन्। अभूत तद्भावे च्विः।) आलिङ्गनम्। इति हेमचन्द्रः॥

क्रोडेष्ट, पुं, (क्रोडानां शूकराणां मुस्तेव इष्टं यस्य।) गन्धतृण। मुस्ता। इति राजनिर्घण्टः॥ मथुरा इति भाषा।

क्रोडेष्टा, स्त्री (क्रोडस्य शूकरस्य इष्टा प्रिया।) मुस्ता इति राजनिर्घण्ट॥

क्रोथ, पुं, (क्रुथ् हिंसने+भावे घञ्।) हननम् इति हेमचन्द्र॥

क्रोध, पुं, (क्रुध्+भावे घञ्।) प्रतिकूले क्रुति ...प्रकाश। (यथा, भगवद्गीतायाम्।१६।२१।
"काम एष क्रोध एष रजोगुणसमुद्भवः।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम्"॥)
तत्पर्य्याय। कोप १ अमर्ष २ रोष ३ प्रतिघ ४ रुट् ५ क्रुध् ६ क्रुत् ७ ... ८। इत्यमरः।१।७।२६। भामः ९ इति तट्टीकासारसुन्दरी॥ भीम १० क्षुधा ११ हेला १२। इति शब्दरत्नावली॥ तस्य अपत्यानि मृगी भार्या शरीरग्रहश्रियोरपि तथा। इति पुराणम्॥ हेला १ हर २ हृणि ३ त्यज ४ भाम ५ एड ६ ह्वरः ७ तपुषी ८ जूर्णि ९ मन्युः १० व्यथि ११। इत्येकादश क्रोधनामानि। इति वेदनिघण्टौ २ अध्यायः॥ (वषट्कार। यथा,
'विषमस्य भवत् सर्वं व्याकुलं समुदाहृतम्।
जनानां जायते मर्म ! क्रोधे क्रोध परस्परम्" ॥
इति ज्ञानार्णवतन्त्रम्॥ स्त्रियां टाप्। दक्ष कन्याविशेष। यथा महाभारते १।६५।१२।
"क्रोधा प्राधा च विश्वा च विनता कपिला मुनि"॥)

क्रोधज, पुं (क्रोधात् जायते। जन्+ड।) मोह। यथा, भगवद्गीतायाम्।२।६२।
"सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते।
क्रोधाद्भवति सम्मोह सम्मोहात् स्मृतिविभ्रमः"॥
हिंसाव्यसनगणान्तर्गतव्यसनगण। यथा, मनु।
'पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणम्।
वाग्दण्डजञ्च पारुष्यं क्रोधजोऽपि गणोऽष्टकः" ॥

क्रोधन, त्रि (क्रुध+"क्रुधमण्डार्थेभ्यश्च"।३।२।१५१। इति युच।) क्रोधविशिष्टः। तत्पर्य्याय। अमर्षण २ कोपी ३। इत्यमरः।३।१।३२। क्रोधी ४ रोषण ५। इति हेमचन्द्र। (यथा, वैराग्यशतके हलीयाई।
"यद्रागेण हसन्नदेव कुरुते मैत्रायते क्रोधनः"॥)
कुवेरपुरीयन्यपतिविशेषः।
यथा, भागवत।९।२२।११।
"ततश्च क्रोधनस्तस्मात् देवातिथिरमुष्य च"॥
भविष्यवर्ण्यमानसोमवंशीयनरपतिभेदः। यथा तन्त्रे।
"रोगे मरणदुर्भिक्ष विरोधोत्तरलक्षणम्।
शमने विषमं सर्वं समाख्यात वरप्रिये!" ॥
भैरवभेद। यदुक्त तन्त्रे।
'रुद्रिताङ्गो रुरुश्चण्ड उन्मत्त क्रोधनस्तथा"॥)

क्रोधना स्त्री, (क्रुध्+युच्+स्त्रियां टाप्।) कोप वती। तत्पर्य्याय। भामिनी २ चण्डी ३। इति त्रिकाण्डशेषः॥ (यथा, रामायणे।२।१०।१०।
"कामकारा यथा बलो क्रोधना प्रमदा स्थिता"॥)

क्रोधमूर्च्छित, पुं (क्रोध क्रोधमद इव मूर्च्छित।) गोरक्षतण्डुल। इति शब्दरत्नावली॥ (क्रो धेन मूर्च्छित।) अतिक्रोधने त्रि॥ (यथा रामा यणे।२।१।२८।
"रक्षतां विक्षतान्याराम् सर्वथापि महत् तप।
तथा नारिणां बुद्धा राक्षसा क्रोधमूर्च्छित"॥)

क्रोधी, [न्] त्रि (क्रोधोऽस्यास्तीति इति। यद्वा क्रुध्यति इति। क्रुध्+णिनि।) क्रोधयुक्त इति हेमचन्द्र॥ महिष। इति राजनिर्घण्ट॥ (यथा भागवते। 'तत कालप्रेरितो दुष्मन्तो नामोत्तरकालीने...'... क्रोधी इत्यपर ...॥)

क्रोश, पुं (क्रोशति यत्र। क्रुश+अधिकरणे घञ्।) चतुर्हस्तसहस्रपरिमाणम्। क्रोश इति भाषा। तत्पर्य्याय। गव्यूतम् २। इति हेमचन्द्रः॥ (यथा, रघुवंशे।११।७५।
"क्रोशार्द्धं प्रकृतिपुर सरेण गत्वा
काकुत्स्थः स्तिमितजवेन पुष्पकेण"॥)
द्विसहस्रदण्डः। धनुःसहस्रद्वयपरिमाणम्। इति लीलावती॥ मुहूर्त्त। यथा —
"द्वादशे तु यदा पूजा तत्सर्वमक्षयं भवेत्।
षट्क्रोशे भवेद्यानि तत् ! सर्वमक्षयम् ॥
सप्तमक्रोशके देवि! सर्वं स्तोत्रोत्तमं भवेत्।
अष्टमक्रोशके देवि ! ह्यनुग्रं न संशय ॥
अत परं भवेद्यानि ! विफलं न संशय"॥
इति शुभसाधनतन्त्रे षष्ठ पटल॥ क्रुश्+भावे घञ्। रोदनम्। आह्वानम्॥)

क्रोशताल पुं (क्रोश व्याप्य ताल शब्दोऽस्य।) ढक्का। इति हारावली॥

क्रोशध्वनि, पुं (क्रोश व्याप्य ध्वनिरस्य।) ढक्का। इति हारावली॥

क्रोशयुग, क्ली (क्रोशस्य क्रोशपरिमितभवो युग्मम्।) क्रोशद्वयम्। तत्पर्य्याय। गव्यूति २। इत्यमर॥ गोरुतम् ३ गवा ४ गव्यूतम् ५। इति हेमचन्द्र॥

क्रोष्टा, [ष्टृ] पुं स्त्री, (क्रोशति रौतीति। क्रुश्+ 'सितनिगमिमसि...' उणा।१।७०। इति तुन्। "तृज्वत् क्रोष्टुः"।७।१।९५। इति तृज्वत्।) शृगाल। इत्यमरः।२।५।५॥ (यथा, महाभारते १।२१४।८।
"मोक्षयन्ति महाभागा चविंशीह यमुच्यते।
क्रोष्टुकत्र गृहे भूत्वा नीच क्रोष्टाभिसर्पि"॥)
यदुवंशीयो राजविशेष। यथा, हरिवंशे।३३।१।
"क्रोष्टोस्तु श्रृणु राजेन्द्र! वंशमुत्तमपौरुषम्।
यदोर्वंशधरस्यास्य यस्य वृष्णिरपि।
क्रोष्टोरपि वंश यदेन सत्वाधिप मनुष्यते"॥)

क्रोष्टुपुच्छिका, स्त्री, (क्रोष्टुकस्य शृगालस्य पुच्छ मिव आकारोऽस्याः। ठन् टाप्।) पृश्निपर्णी। चाकु लिया इति भाषा। रामप्यान्त इति ख्याता। इति केचित्। इत्यमरटीकायां भरत॥ कोकी शिम्बा। इति राजनिर्घण्ट॥

क्रोष्टुमेखला स्त्री (क्रोष्टुकस्येव मेखला कटौ यस्या माला वा...।) ...इति च टाप्।) पृश्निपर्णी। इति रत्नमाला॥

क्रोष्टुविन्ना, स्त्री, (क्रोष्टो शृगालस्य पुच्छमिव ...टाप् ...) पृश्निपर्णी। इति रत्नमाला॥

क्रोष्ट्री, स्त्री (क्रोष्टो पुच्छमिव आकारोऽस्या... "ऋन्नेभ्यो ङीप्"।४।१।५। इति ङीप्।) पृश्निपर्णी। इति शब्दरत्नावली॥

क्रोष्टुक पुं, (क्रोष्टो इव पचं यस्य ... वा।) ... इति राजनिर्घण्ट॥

क्रोष्टिका स्त्री, (क्रोष्टि ... स्वार्थे कन् टाप्।) पृश्निपर्णी। इत्यमरः।२।४।९३। इति ... इति केचित्। इति ... भरत॥ (...॥ यथा,—

"पृश्निपर्णी पृथक्पर्णी चित्रपर्ण्यङ्घ्रिपर्ण्यपि ।
क्रोष्टुविन्ना सिंहपुच्छी कलशीधावनिर्गुहा" ॥
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

क्रोष्टेक्षु, पुं, (क्रोष्टोः प्रिय इक्षुः । पृषोदरात् अकारस्य एत्वे सन्धिः ।) श्वेतेक्षुः । इति राजनिर्घण्टः ॥

क्रोष्ट्री, स्त्री, (क्रोष्टु + "तृज्वत् क्रोष्टुः" । इति सूत्रात् स्त्रियां ङीप् ।) शुक्लभूमिकुष्माण्डः । इत्यमरः । २ । ४ । ११० ॥
("विदारी स्वादुगन्धा च या तु क्रोष्ट्री सिता स्मृता" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।) शृगालिका । कृष्णविदारी । लाङ्गली । इति मेदिनी ॥

क्रौञ्च, पुं, (क्रुञ्च + प्रज्ञाद्यण् स्वार्थे ।) पक्षिभेदः । कोँच बक इति भाषा । (यथा, रामायणे । १ । २ । १५ ।
"मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम्" ॥)
तत्पर्य्यायः । क्रुङ् २ क्रुञ्च ३ क्रुञ्चा ४ क्रौञ्चा ५ । इत्यमरभरतौ ॥ कालिक ६ कालीक ७ कलिक ८ । इति शब्दरत्नावली ॥ (अस्य गुणा यथा,—
"क्रौञ्चा बल्योऽतिवृष्यश्च कफवर्द्धनः पित्तनिबर्हणः ।
देहपुष्ट्याकरो वीर्य्यो हन्ति वाममरोचकम्" ॥
इति हारीते प्रथमस्थाने ११ अध्याये ॥)
पर्व्वतविशेषः । इति मेदिनी ॥ (अयन्तु हिमवतः पौत्रः मैनाकस्य पुत्रः ।
यथा, हरिवंशे १८ । ९९१४ ।
"एतेषां मानसी कन्या मेना नाम महागिरेः ।
पत्नी हिमवतः श्रेष्ठा यस्या मैनाक उच्यते ॥
मैनाकस्य सुतः श्रीमान् क्रौञ्चो नाम महागिरिः ।
पर्व्वतप्रवरः शुभ्रो नानारत्नसमन्वितः" ॥)
कुरुरपक्षी । इति राजनिर्घण्टः ॥ द्वीपभेदः । स च दधिमण्डोदसमुद्रेणावृतः घृतसमुद्रादद्विगुणपरिमितः । (यथा विष्णुपुराणे । २ । ४ । ५०-५८ ।
"क्रौञ्चद्वीपः समुद्रेण दधिमण्डोदकेन च ।
आवृतः सर्व्वतः क्रौञ्चद्वीपतुल्येन मानतः ॥
दधिमण्डोदकश्चापि शाकद्वीपेन संवृतः ।
क्रौञ्चद्वीपस्य विस्तारात् द्विगुणेन महामुने" ॥)
तत्राधिपतिः प्रियव्रतपुत्त्रो घृतपृष्ठः । यथा, भागवते । ५ । २० । १८-२० ।
"तथा च बहिः क्रौञ्चद्वीपो द्विगुणः स्वमानेन क्षीरोदेन परीत उपक्लृप्तो वृतो यथा, कुशद्वीपो घृतोदेन । यस्मिन् क्रौञ्चो नाम पर्व्वतराजो द्वीपनामनिर्वर्त्तक आस्ते । योऽसौ गुहप्रहरणोन्मथितनितम्बकुञ्जोऽपि क्षीरोदेनासिच्यमानो भगवता वरुणेनाभिगुप्तो विभयो बभूव । तस्मिन्नपि प्रैयव्रतो घृतपृष्ठो नामाधिपतिः स्वे द्वीपे वर्षाणि सप्त विभज्य तेषु पुत्त्रनामसु सप्त रिक्थादान् वर्षपान् निवेश्य स्वयं भगवान् भगवत: परम कल्याणयश आत्मरूपस्य हरेश्चरणारविन्दमुपजगाम" । देवीविशेषः । स च महादेवस्य ... दत्तः । हरिवंशे । १८ । ९९—६४ ।
"... ... हिमवत्सुतः ॥ ... ... ॥

स शिलाजालविततः रुद्रशैलाद्रुहाविनिम् ।
पादपोत्कटकूटाग्रां कन्दराशीकराननाम् ॥
सिंहव्याघ्रगजाकीर्णां मत्तानिव द्विपैः ।
ईहामृगगणाकीर्णां पद्मपाण्डितधातुकाम् ॥
निर्म्मितां तेन शुभेषु क्रौञ्चेन दिविकामगाम् ।
प्रहृत्य पार्व्वतीं माता मरुते तामचीकरत्" ॥
अयमेवासुर: क्रौञ्चद्वीपे क्रौञ्चपर्व्वते हेमकन्दरे भगवता स्कन्देन निहतः । यथा,—महेन्द्रसंहितायाम् ।
"क्रौञ्चे क्रौञ्चो हतो दैत्यः क्रौञ्चाद्रौ हेमकन्दरे ।
स्कन्देन युद्धा सुचिरं चित्रमायी समाहितः ।
स शैलताम्य दैत्यस्य स्यातश्चापि क्रमस्य ।
केतुतामागमद्यस्य नाम्ना क्रौञ्च स उच्यते" ॥)
अयमेवासुर । राक्षसविशेषः । इति हेमचन्द्रः ॥

क्रौञ्चदारण:, पुं, (क्रौञ्च रूपमासन्नमसुरविशेषं दारयतीति । दृ + णिच् + ल्यु । क्रौञ्चस्य दारक इति केचित् ।) कार्त्तिकेयः । इत्यमरः ।१।१।४२। अस्य क्रौञ्चदारणकथा महाभारते च । मार्कण्डेयसमस्यापर्व्वणि २२४ । ३१–३६ ।
"स मृत्याय महावाक्यवच्छक्त्या च तान् भवान् ।
धनुविकम्य प्रदक्षश्रावान् श्वेते महागिरौ ॥
बिभेद स शरैः शैलं क्रौञ्चं हिमवतः सुतम् ।
तेन हंसाश्च गृध्राश्च मेरुं गच्छन्ति पर्व्वतम् ॥
स विशीर्णोऽपतच्छैलो भृशमार्त्तस्वरान् रुवन् ।
तस्मिन्निपतिते त्वन्ये नेदुः शैला भृशं तदा ॥
स तं नादं भृशार्त्तानां श्रुत्वापि बलिनां वरः ।
न प्राव्यथदमेयात्मा शक्तिमुद्यम्य चानदत् ॥
सा तदा विमला शक्तिः क्षिप्ता तेन महात्मना ।
बिभेद शिखरं घोरं श्वेतस्य तरसा गिरेः ॥
स तेनाभिहतो दीर्णो गिरिः श्वेतोऽचलैः सह ।
उत्पपात महीं त्यक्त्वा भीतः स सुमहात्मनः" ॥
क्रौञ्चं पर्व्वतविशेषं दारयति भिनत्तीति च ।
क्रौञ्चासुरवधकथा क्रौञ्चशब्दे द्रष्टव्या ॥)

क्रौञ्चा स्त्री, (क्रौञ्च + टाप् ।) क्रौञ्चमार्य्या । कोँचबकी इति भाषा । इति जटाधरः ॥ (कश्चित् टाबन्तः शब्दो क्रौञ्चमात्रमेवेच्छन्ति । यथा च रामायणे १ । २ । १४ ।
"निजघान वयमेकं क्रौञ्चीभिः बभ्रुमत्रवीत्" ॥)

क्रौञ्चादन, क्लो, (अद्यते इति । अद् + कर्म्मणि ल्युट् । क्रौञ्चानां अदनं भक्ष्यम् ।) मृणालम् । पेचुनः । पेँचु इति भाषा । चिञ्चोटक । इति मेदिनी ॥ घेँचको इति भाषा । इत्यमरटीका । इत्यमरः । ... शालिपत्रम् । इति राजनिर्घण्टः ॥ ("क्रौञ्चादनं पेँचुकिया" । इति वैद्यकपरिभाषा ।) विसग्रन्थि । इति शब्दरत्नावली ।

क्रौञ्चादनी स्त्री (क्रौञ्चादन + ङीष् ।) पद्मबीजम् । इति राजनिर्घण्टः ॥

क्रौञ्चारि:, पुं, (क्रौञ्च ... दारयतीति ...) कार्त्तिकेयः । ... इति ... ॥

क्रौञ्चारि, पुं (क्रौञ्चस्य अरिः ।) ... परशुरामः । इति हेमचन्द्रः ॥

क्रौशतालिक, पुं, (क्रोशतालं वादयति । "क्रोशतालो जनपदमोदप्रदस्य" । वार्त्तिकम् ४।४।३२ । इति ठञ् ।) ढक्कावादकः । इति व्याकरणम् ॥ (क्रोशतालादभिगमनमर्हतीति । "क्रोशेऽभिगमनमर्हति" । इति ठञ् क्रोशतालादारान्निष्पन्नः ।)

क्रोप, कि म वधे । इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वां पर सकं सेट् ।) अयं ग्लुचादिपदान्तः । क्लिन्धं कि क्लपयति । म, क्लपयति । इति दुर्गादासः ॥

क्लदि इ क्न रा दृदि । इति कविकल्पद्रुमः ॥ (भ्वां उभ आत्म च अक सेट् ।) अयमप्र इतीपदान्तः । इ क्लन्दि क्लन्द्यते । म, क्लन्दति क्लन्दते । इ, क्लन्दते । दृदि रोदने । इति दुर्गादासः ॥

क्लद, इ च म इ रोदने । आह्वाने । इति कविकल्पद्रुमः ॥ (भ्वां आत्म अक आह्वाने सक सेट ।) इ, क्लन्द्यते । म, क्लन्दा । म, क्लन्दयति । इ, क्लन्दते । इति दुर्गादास ॥

क्लन्द, श म इ वैक्लव्यविकलयोः । इति कविकल्पद्रुमः ॥ (भ्वां आत्म अक सेट ।) वैक्लव्यं विह्वलीभावः । म, क्लदा । म क्लदयति । इ, क्लदते शोकार्त्तः । इति दुर्गादास ॥

क्लम, उ म इर् ग्लानौ । इति कविकल्पद्रुमः ॥ (भ्वां पर-अक सेट् । उदित्वात् क्त्वावेट् ।) अयमप्र इतीपदान्तः । उ, क्लमित्वा क्लान्त्वा । म क्लामयति । मः, दिवादेरपि समाविष्ट "दिवादयस्माप्त" इति दीर्घश्चायनात्पम् । इर् अक्लमत् अक्लमीत् । इति दुर्गादास ॥

क्लम, शि य म ग्लानौ । इति कविकल्पद्रुमः ॥ (दिवां पर-अक सेट् ।) अयमप्र इतीपदान्तः । शि क्लाम्यति । य म क्लामयति । इति दुर्गादास ॥

क्लम, पुं (क्लम + भावे घञ् । "नोदात्तोपदेशस्य मान्तस्य" । ७ । ३ । ३४ । इति न वृद्धि ।) ग्लानिः । इत्यमरः । १ । ७ । १० ॥ (यथा माघे । ७ । ४४ ।
"तत्र गुहा एवं विश्रम्य मूढचारैः पर्य्यस्त ।
सविधिमेव दयायामपेक्षते प्रणामम्" ॥ अस्य लक्षणं यथा,—
"योऽनायासः श्रमो देहे प्रवृद्धः श्वासवर्जितः ।
क्लमः स इति विज्ञेय इन्द्रियार्थप्रबाधकः" ॥
इति सुश्रुते शारीरस्थाने चतुर्थाध्याये उक्तम् ।)

क्लमथ, पुं (क्लम + "शमिदमिभ्य क्थन्" इति अथच् ।) क्लमः । इत्यमरः । ३ । २ । १० ॥

क्लव, क्न म इ भये । इति कविकल्पद्रुमः ॥ (भ्वां आत्म अक सेट ।) क, क्लवा । म क्लवयति । इ, क्लवते । विक्लवलिभिः विक्लवा इत्यपि इति क्व ... ... क्लवन्ते इति क्रमदीश्वरः । इति दुर्गादास ॥

क्लान्त, त्रि (क्लम + कर्त्तरि क्त ।) क्लमयुक्तः । श्रान्तः । इत्यमरः ॥
"... ... ..." ॥
(रघुवंशे ३ । ६३ ।)
"... ... ..." ॥

क्लिद, इ क च इ रोदने । इ र कविकल्पद्रुमः ॥ (भ्वां उभ अक क-अक सेट् ।) अयमप्र इतीपदान्तः ।

द, कर्म्मणि क्लिन्द्यते । ण, क्लिन्दति क्लिन्दते । ङ, क्लिन्दते । कदि रोदने । इति दुर्गादासः ॥

क्लिद य उ इर क्लेदे । इति कविकल्पद्रुमः । (दिवां-पर-अक-वेट् ।) क्लेदः आर्द्रीभावः । य, क्लिद्यति वस्त्रं पयसा । उ, क्लेदिष्यति क्लेत्स्यति । इर्, अक्लिदत् अक्लेदीत् । अस्मात् पुषादित्वात् ङ इत्यन्ये । इति दुर्गादासः ॥ (यथा, नारदपञ्चरात्रे ।

"सुवेषं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतम् ।
योनिः क्लिद्यति नारीणां सत्यं सत्यं हि नारद ॥" ॥)

क्लिन्न, त्रि, (क्लिद् + कर्त्तरि क्त ।) आर्द्रम् । इत्यमरः । ३।१।१०४ ॥ भिजा इति भाषा । (यथा, रामायणे १।४२।१८ ।

"गङ्गायाः सलिलक्लिन्ने भस्मन्येषां महात्मनाम् ।
स्वर्गं गमिष्यन्त्यमलाः सर्व्वे च प्रपितामहाः ॥" ॥)

क्लिन्नाक्ष, त्रि, (रोगादिक्लेदेन क्लिन्ने क्लेदयुक्ते अक्षिणी यस्य ।) रोगादिना क्लिन्नचक्षुः । समासादि, क्लिन्नक्लेदयुक्तचक्षुष्क इत्यर्थः । तत्पर्य्यायः । चुल्लः २ चिल्लः ३ पिल्लः ४ । अमरधारयेण क्लिन्ने चक्षुषि स्त्री । इत्यमरः । २ । ६ । ६० ॥

क्लिश, य उ ङ उपतापे । इति कविकल्पद्रुमः ॥ (दिवां-उभ-अक-सकं च-सेट् । उदित्वात् क्त्वा वेट् ।) य ङ क्लिश्यति क्लिश्यते । उ, क्लिशित्वा क्लिष्ट्वा । उपताप इह उपतप्तीभावः । सकर्म्मकत्वे क्लिश्यते मम चित्तमिति हलायुधः । क्लिश्यते शयनः शयनमपीति चतुर्भुजः । अन्ये तस्मात् परस्मैपदमनभिमतमस्य क्लिश्यत्यपि हि मेधाविति । यथा सद्गुणादिष्वपि क्लेशकरक्लिश्यमानो वचनीयादि च क्लिश्य करोतीति भवभूतिवत् । अन्ये प्रयन्तानाम् । ध्यायमानो विक्लिश्यतु सखीनामिति महिम्नस्तोत्रे । कैशादिकात् समासपदे वक्ष्यम् । क्लैशादिकस्य सकर्म्मकत्वात् । इति दुर्गादासः ॥

क्लिश, ऊ श विबाधे । इति कविकल्पद्रुमः । (क्र्यां-पर-सक-वेट् ।) ऊ क्लेशितुं क्लेष्टुम् । श, "इन्द्रियाण्यनिरुद्धानि क्लिश्नाति सुबहूनपि" । इति दुर्गादासः ॥

क्लिशित, त्रि, (क्लिश् + कर्त्तरि क्त इट् वा ।) क्लिष्टः । इत्यमरः । ३ । १ । ८७ ॥

क्लिष्ट, त्रि, (क्लिश + क्त मते नेट् ।) क्लेशयुक्तः । (यथा, मेघदूते ८४ ।

"इन्दोर्दैन्यं त्वदनुसरणक्लिष्टकान्तेर्बिभर्त्ति" ॥)

तत्पर्य्यायः । क्लिशितः २ । पूर्व्वापरविरुद्धार्थे, क्ली । तत्पर्य्यायः । व्याहतम् २ परस्परपराहतम् ३ । इत्यमरः । ३ । १ । ८७ ॥ (यथा, भागवते । १ । ६ । ११ ।

"क्लिष्टं मानसं क्लिष्ट विषयैर्लोभमत्सरैः" ॥)

क्लिष्टि, स्त्री, (क्लिश् + भावे क्तिन् ।) क्लेशः । सेवा । इति भरतः ॥

क्लीतकं, क्ली (क्लीत + क । क्लीतक्रमाद् क्लीबम् । क्लीतमस्वाद्यं करोतीति । अथ क्लिन्ने + अण् कोदो दीर्घश्च ।) यष्टिमधुका । इत्यमरः । २।४।१०९ ॥ (अस्याः पर्य्याया यथा ।

"यष्ट्याह्वं मधुकं यष्टि क्लीतकं मधुयष्टिका" ।
इति वैद्यकरत्नमालायाम् ॥
"अनूपं स्थलजञ्चैव क्लीतकं द्विविधं स्मृतम्" ।
इति चरके सूत्रस्थाने प्रथमेऽध्याये ।

"श्यामा त्रिवृच्छ्यामलकी हरीतकी
माषादयो सप्तविधास्ततो च ।
एता पिबेत् क्लीतकशर्करायुक्तम्
पित्तात्मकोरी तत्कषाय च भक्षेत् ॥"

इति सुश्रुते चिकित्सितस्थाने १८ अध्याये ॥)

क्लीतकिका, स्त्री (क्लीतक स्वार्थे कन् । "अत इत्" ७ । ३ । ४४ । इति इत्त्वम् ।) नीलीवृक्षः । इत्यमरः । २ । ४ । ९४ ॥ (क्लीतक + स्वार्थे कन् टाप् अत इत्वं च । यष्टिमधुका ॥)

क्लीब, ऋ ङ अधार्ष्ट्ये । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म-अक-सेट् ।) अधार्ष्ट्यं धृष्टताभावः । यथा क्लीबमनसभीभाव । ऋ, अचिक्लीबत् । ङ, क्लीबते जनः । इति हलायुधः । ऋ, अचिक्लीबत् । इति दुर्गादासः ॥

क्लीब, ऋ ङ मान्द्ये । (भ्वां-आत्म-अक-सेट् ।) ऋ अचिक्लीबत् । ङ, क्लीबते । नामधातुरिति क्लीबस्य आचारार्थे क्विप् । इति दुर्गादासः ॥

क्लीब, पुं क्ली (क्लीबते अधार्ष्ट्यं करोतीति "इगुपधेति" ३ । १ । १३५ । इति कः ।) शोणितरहितः । तत्पर्य्यायः । षण्ढः २ नपुंसकम् ३ तृतीयाप्रकृतिः ४ शण्डः ५ । इत्यमरः । २।६।३९ ॥ तृतीयप्रकृतिः ६ पण्डः ७ षण्डः ८ शण्डः ९ । इति तट्टीका ॥ पुरुषत्वहीनः । तस्य लक्षणम् । यथा, उद्वाहतत्त्वे ।

"न मूत्रं फेनिलं यस्य विष्ठा चाप्सु निमज्जति ।
मेढ्रश्चोन्मादशुक्लाभ्यां हीनः क्लीबः स उच्यते" ॥

(यथा, पराशरसंहितायाम् ।

"नष्टे मृते प्रव्रजिते क्लीबे च पतिते पतौ ।
पञ्चस्वापत्सु नारीणां पतिरन्यो विधीयते" ॥
क्लीबस्तु चतुर्दशप्रकारः । यथाह नारदः ।
"चतुर्दशविधः शास्त्रे षण्ढो दृष्टो मनीषिभिः ।
चिकित्स्यश्चाचिकित्स्यश्च तेषामुक्तो विधिः क्रमात् ॥
निसर्गषण्ढोऽबद्धश्च पक्षषण्डस्तथैव च ।
अभिशापाद्गुरो रोगाद् देवक्रोधात् तथैव च ॥
ईर्ष्याषण्ढश्च सेव्यश्च वातरेता मुखेभगः ।
आक्षिप्तो मोघबीजश्च शालीनोऽन्यापतिस्तथा ॥
तत्राद्यावप्रतीकार्यौ पक्षाख्यो मासमाचरेत् ।
अनुक्रमात् त्रयस्यास्य कालः संवत्सरः स्मृतः ॥
ईर्ष्याषण्ढादयो येऽन्ये चत्वारः समुदाहृताः ।
त्यक्तव्यास्ते पतितवत् क्षतयोन्या अपि स्त्रियाः ॥
आक्षिप्तमोघबीजाभ्यां स्वैरेऽपि पतिरन्यतः ।
पतिरन्यः स्त्रिया ग्राह्यो वत्सरार्द्धं प्रतीक्ष्य तु ॥
शालीनस्यापि धृष्टस्त्री संयोगाद्भ्रश्यते ध्वजः ।
तं हीनवेगमन्यस्यां रतिकामोऽनुवर्त्तयेत् ॥
अन्यस्यां यो मनुष्यः स्यादमनुष्यः स्वयोषिति ।
लभेत सान्यं भर्त्तारं तस्मिन् संश्रयं प्रवर्त्तते ॥
अपत्यार्थं स्त्रियः सृष्टाः स्त्रीक्षेत्रं बीजिनो नराः ।
क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हति" ॥)
(त्रि, पि, विषयविरहितः । इत्यमरः । ३।१।११२ ।

(यथा, महाभारते १ । अनुशासनपर्व्वणि ।
"कथितान् न निर्न्निन्दन् क्लीबः श्रीर्ब्रह्म" ।
धर्म्मकार्य्यादौ निरुत्साहः । यथा, मनौ ९ । ७९ ।
"बाधमानौ क्लीबं च निर्धनं कन्यका" ॥)

क्लेद, पुं, (क्लिद् + भावे घञ् ।) आर्द्रम् । यथा,—
"परद्धिर्तना यद्यपि मनुष्यमात्रे ।
मदपुल्गन्धि कुवलय क्लेदकराम्बुभि" ॥
इत्युद्भटः ॥ (यथा च याज्ञवल्क्यसंहितायाम् ।
"रसात्तु रक्तं ततो मांसं मेदः क्लेद समारभत्" ।
अत्र मिताक्षरा । "रसाद्रक्तात् रसनमिदं धौतमण्डानां योग तिष्ठतो मद्गुणोपेतं क्लेद मार्द्दवम्" ॥)

क्लेदन, पुं, (क्लेदयति देहादिमिति । क्लिद् + णिच् + कर्त्तरि ल्यु ।) कफः । इति शब्दचन्द्रिका ॥ पञ्चप्रकारश्लेष्मान्तर्गतश्लेष्मविशेषः । इति हलायुधः ॥ (भावे + ल्युट् ।) आर्द्रीकरणम् । यथ, भारते १ । २६ । ४१ ।
"क्लेदनं विक्लम इति मातापित्रोर्दोहनम्" ॥)

क्लेदु [न्] पुं, (क्लेदयति प्रीतयुक्तिमिमम् । क्लिद् + णिच् + "अन् उद्ग् पुनर् बीजवि" । उणा १ । १५८ । इति कनिन् । न लोपे दृष्ट हीन ।) चन्द्रः । इत्युणादिकोषः ॥

क्लेदु, पुं (क्लेदयति इति । क्लिद् + "कृ मृ वि चीति" । उणा १ । ११ । इति उन् ।) चन्द्रः । इति सिद्धान्तकौमुद्यां उणादिवृत्तिः ॥

क्लेश, ङ बधे । उपतापे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म-सक उपतापार्थे अक सेट् ।) ङ क्लेशते विक्लेशते । चतुर्थीपि तु क्लेश बाधायां भावे मुक्त्यात्मो दृश्यते । क्लेशते न बलात्कार्यमिति । हलायुधोऽपि । इति दुर्गादासः ॥

क्लेश, पुं, (क्लिश् + भावे घञ् ।) दुःखम् । व्यथा । आदीनवः २ आस्रवः ३ । इत्यमरः । (यथा, भगवद्गीतायाम् । १२ । ५ ।
"क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्" ॥)
स तु पञ्चविधः । अविद्या १ अस्मिता २ रागः ३ द्वेषः ४ अभिनिवेशः ५ । इति पातञ्जलम् ॥ अविद्या १ अहङ्कारोऽस्मिता २ रागः ३ द्वेषः ४ अभिनिवेशः ५ मरणम् । इति कुसुमाञ्जलिः ॥ (तथाच पातञ्जले साधनपादे ३ । ७—६ ।
"तमोऽभिभाव्यमाना क्लेशमूलप्रधानाः । अविद्यास्मितारागद्वेषाभिनिवेशाः" ॥
"क्लेशमूलकर्म्माशये दृष्टादृष्टजन्मवेदनीयः । अविद्यादयो अस्मितादयः क्लेशाः सन्ति । क्लेशमूलकर्म्माशयो दर्शनम् । ते हि क्लेशाः ... अत्र दुःखनिवृत्तये" । इति तट्टीका ॥) कोपः । व्यवसायः । इति मेदिनी ॥

क्लेशक्षम, त्रि, (क्लेशं क्षमते । क्लेश + क्षम + अच् ।) क्लेशसहिष्णुः । यथा,—रघुवंशे ५ ।
"क्लेशक्षमो ... बृहद्भुजः" ॥

क्लैतकिक, क्ली, (क्लीतकेन यष्टिमधुकेन निर्वृत्त इति ठञ् ।) मद्यम् । इति शब्दचन्द्रिका । (विवरणमस्य मद्यशब्दे ज्ञातव्यम् ।)

क्लोम, [न्] क्ली, (क्लु गतौ + मनिन् ।) फुप्फुसम् । फाँपड़ा इति फुसफुस इति च ख्यातम् । इति भरतः ॥ तत्पर्यायः । तिलकम् २ । इत्यमरः । २ । ६ । ६५ ॥ क्लोमम् ३ क्लोमम् ४ । इति तट्टीका ॥

"नाभिस्तनयोर्मध्ये वक्ष तन्मध्ये हृदयं तत्पार्श्वे क्लोम पिपासास्थानम्" । इति वैद्यकम् ॥

("उदकवहे द्वे तयोर्मूलं तालु क्लोम च" । इति सुश्रुते शारीरस्थाने नवमाध्यायः ।)

क्व, व्य, (कस्मिन्निति "किमोऽत्" । ५ । ३ । १२ । इति अत् ततः "क्वाति" । ७ । २ । १०५ । इति क्वादेशः ।) कुत्र । कोथा इति भाषा । इति व्याकरणम् ॥ अयन्तु सामान्यतायां महति अन्तरे च प्रयुज्यते । यथा, रघुः । १ । २ ।

"क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः" ।

क्वङ्कु, पुं, (कु + अगि + उन् ।) कङ्कुः । इति हेमचन्द्रः ॥

क्वचन, व्य, (पाणिनिमते पदद्वयमेतत् । मुग्धबोधमते तु "किमः क्वमात्रिचनौ" । इति चनः ।) क्वचित् । इति व्याकरणम् ॥

क्वचित्, व्य, (पाणिनिमते पदद्वयम् । मुग्धबोधमते तु "किमः क्वमात्रिचनौ" । इति चित् ।) कस्मिंश्चित् । कुत्रचित् । कोनस्थाने इत्यादि भाषा । इति व्याकरणम् ॥

(यथा, विष्णुपुराणे १ । २२ । ६८ ।

"क्वचित् या यत् क्वचित् किञ्चित् भूत ग्रामस्य भूतम्" ।)

क्वण, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-अक०-सेट् ।) वकारयुक्तः । क्वणति वीणा । इति दुर्गादासः ॥

क्वण, पुं, (क्वण् + भावे अप् ।) कणकणि । शब्दविशेषः । इत्यमरटीकायां सारसुन्दरी ॥ वीणायाः शब्दः अन्यस्य च शब्दः । इति भरतः ॥ तत्पर्यायः । निक्वाणः २ निक्वणः ३ क्वाणः ४ क्वणनम् ५ । इत्यमरः । १ । ७ । २४ ॥

क्वणन, क्ली, (क्वण + भावे ल्युट् ।) क्वणः । इत्यमरः । १ । ७ । २४ ॥

क्वणन, पुं, (क्वणति इति । क्वण् + ल्यु ।) [illegible] । इति त्रिकाण्डशेषः ॥ घोटवाटी इति भाषा ॥

क्वथ, ष क निष्पाके । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) षकारयुक्तः । अ अक्वथीत् । ष, क्वथा । क्वथति वैद्य औषधं निष्पाकं । इति दुर्गादासः ॥

क्वथित, त्रि, (क्वथ्यते स्म इति । क्वथ + क्त ।) [illegible] । तत्पर्यायः । निष्पक्वम् २ । इत्यमरः । ३ । १ । ९४ ॥ [illegible] । इति वैद्यकपरिभाषा ॥

क्वाथ, पुं (क्वथ + भावे घञ् [illegible] ।) [illegible] । इत्यमरः । १ । ७ । २४ ॥

(यथा, गजेन्द्रमोक्षपूर्वे १७ ।

"यज्ञाते त्वयि [illegible]
[illegible] भगवती [illegible]" ।)

क्वाथ, पुं, (क्वथ् + भावे घञ् ।) दुःखम् । व्यसनम् । कषायनिष्पाकः । इति हेमचन्द्रः ॥ क्वाथनाम तोय त्रिविधम् । पादावशेषम् १ अर्द्धावशेषम् २ त्रिपादावशेषम् ३ । अस्य नाम पानीयपाकोदकम् । तत्र त्रिपादावशेषं वातनाशकम् । अर्द्धावशेषं पित्तनाशकम् । पादावशेषं कफनाशकम् । तत्तु अग्निदीपकञ्च । तेषां मध्ये त्रिपादावशेषञ्च हेमन्ते शिशिरे च प्रशस्तम् । वसन्ते पादावशेषञ्च प्रशस्तम् । शरदि ग्रीष्मे च अर्द्धावशेषजलं प्रशस्तम् । वर्षासु अष्टमांशावशेषजलं प्रशस्तम् । तत्रापि बहुदोषत्वात् । दिवापक्वजलं रात्रौ गुरु रात्रिपक्वजलं दिवा गुरु । इति राजवल्लभः ॥ तत्पाकप्रकारः ।

"पानीयं षोडशगुणं क्षुण्णे द्रव्यपले क्षिपेत् ।
मृत्पात्रे क्वाथयेद्ग्राह्यमष्टमांशावशेषितम् ॥
तज्जलं पाययेद्धीमान् कोष्णं मृद्वग्निसाधितम् ।
शृतः क्वाथः कषायश्च निर्यूहः स निगद्यते" ॥

इति शार्ङ्गधरेण मध्यखण्डे द्वितीयाध्याये उक्तम् ।)

क्वाथोद्भव, स्त्री, (क्वाथादुद्भवो यस्य । क्वाथात् उद्भवतीति वा ।) तुत्थाञ्जनम् । इत्यमरः । २ । ९ । १०२ ॥

क्वेल, ऋ चाले । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-गतौ अक०-सेट् ।) वकारयुक्तः । ऋ, अचिक्वेलत् । चालः कम्पः । चालः कैश्चिन्न मन्यते । इति दुर्गादासः ॥

क्ष अक्षरः । (अयन्तु ककारषकारयोर्योगेन जातः । अतोऽस्य पृथग् वर्णत्वेनोल्लेखो नास्त्येव ।) तन्त्रे तु [illegible] । [illegible] । [illegible] । यथा,—

"क्षकारं शृणु चार्वङ्गि [illegible] ।
[illegible] ॥
[illegible] ।
[illegible]" ॥

इति कामधेनुतन्त्रम् ॥ * ॥

अस्यैवोद्भवो यथा —

कौशिक उवाच ।

"[illegible] ।
[illegible] ।
[illegible]" ॥

इति वरदातन्त्रे १० पटलः ॥ * ॥

अस्य ध्यानं यथा —

"[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible]" ॥

इति [illegible] ॥ * ॥

[illegible] —

"[illegible] ।
[illegible]" ॥

परात्मा क्रोधसंहारी बलात्मा मेरुरुत्तमः ।
सर्वाङ्गः शाङ्करः क्षामः [illegible] ॥
[illegible] महाक्षोभो [illegible] ।
[illegible] ।
क्षयान्तकश्च सम्वर्त्तो [illegible]' ॥

इति तन्त्रान्तरे वर्णाभिधानम् ॥ * ॥ अपि च ।

"क्षकारो [illegible] ।
तव [illegible] देवि ! [illegible] ।
[illegible] कदाचन' ॥

इति श्रीरुद्रयामले [illegible] पटले मन्त्राभिधानम् ॥ * ॥

अस्य ध्यानं यथा,—

"चतुर्भुजां [illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] भवेत् ॥"

इति वर्णोद्धारतन्त्रम् ॥ अक्षरस्य ककारषकारयोर्योगेनैव केचित् पृथगक्षरत्वेन न मन्यन्ते । तेषां मते तन्त्रोक्तरूपध्यानादेर्नोपपत्तिः । [illegible] पञ्चाशद्वर्णानुपपत्तिश्च भवति । अतः पृथङ्निर्दिश्यते इति केचित् । तथा च ।

"मात्रा [illegible] ।
[illegible] समन्वगात्' ॥

इति शिक्षायाम् ॥ अपि च ।

"अकारादिक्षकारान्ता वर्णाः [illegible] ।
[illegible] ॥"

इति [illegible] ॥

क्ष, पुं, (क्षयति [illegible] प्रलये सर्व्वाणि भूतानि [illegible] ।) [illegible] । (क्षेत्रमिति [illegible] ।) राक्षसः । (क्षिणोति [illegible] ।) नरसिंहः । ([illegible] इति ।) विद्युत् । ([illegible] ।) क्षेत्रम् । क्षेत्रपालः । ([illegible] ।) [illegible] । इति [illegible] ॥

क्षज, इ क गतौ । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-[illegible] ।) [illegible] । इति दुर्गादासः ॥

क्षज [illegible] । इति कविकल्पद्रुमः ॥

क्षञ्ज, [illegible] । ([illegible] ।) [illegible] । इति दुर्गादासः ॥

क्षण [illegible] । इति कविकल्पद्रुमः । [illegible]

र्थादिभ्य तत्र। इति दुर्गादासः।

क्षण, पुं (क्षणोति हन्ति नाशयति वा कर्म्म यथा काल आरब्धमाने वा। क्षण हव युगान्ते सर्व्वं नाशयात् करोतीत्यर्थः । स सर्व्वार्थभेदेन नाना रूपो भवतीत्यर्थः ।) निमेषचतुर्भागमितकालः । स च द्वादशनिमेषमितः। (विशेषक्रियावच्छिन्नस्य कालस्य चतुर्थभागः। यथा,—

"आयुषः क्षण एकोऽपि न लभ्यः स्वर्णकोटिभिः।
स चेत् निष्फलो याति का नो हानिस्ततोऽधिका"।

इति चाणक्यनिष्यादिः। अपि च।

"क्षणिकस्य क्षणिकावतो मत्कृतः कथं क्षणे।
कामक्रोधानिवारणं प्रमादो च भयावहः"।

इति हितोपदेशः। क्षणोति दुःखं नाशयति उत्सवकाले। क्षण वधे + अच।) उत्सवः। (यथा, माघे १। ४।

"नवानधोऽधो वृहतः पयोधरान्
समूढकर्पूरपरागपाण्डुरम्।
क्षणं क्षणोत्क्षिप्तगजेन्द्रकृत्तिना
स्फुटोपमं भूतिसितेन शम्भुना"।)

निर्व्यापारस्थितिः। इत्यमरः।३।३।४७। पर्व्व। अवसरः। परतन्त्रत्वम्। मध्यम्। इति हेमचन्द्रः। (प्रशस्तमुहूर्त्तः। यथा, मनोपाख्याने। ५। १।
"अथ काले शुभे प्राप्ते तिथौ पुण्ये क्षणे तथा"।)

क्षणनु, पुं, (क्षण भावे + बाहुलकात् अनुप्रत्ययः।) व्रणः। इति हेमचन्द्रः। क्षणनुरिति च पाठः।

क्षणदं, क्ली, (क्षणं उत्सवं ददातीति। दा + क।) जलम्। इति मेदिनी।

क्षणदः, पुं, (क्षणं शुभाशुभमुहूर्त्तं ददातीति। दा + क।) गणकः। इति मेदिनी।

क्षणदा, स्त्री, (क्षणद + स्त्रियां टाप्।) रात्रिः। (यथा, माघे। ९। ५। २१।
"इति कौमुद्यां चैव रजनी सुरतैः सह।
रेमे क्षणदा रागरक्तो दम्पतीश्वरः"।)
हरिद्रा। इत्यमरः। २। ४। ६।
(हरिद्रा—शब्देऽस्या विवृतिर्ज्ञातव्या।)

क्षणनं क्ली (क्षण + भावे ल्युट्।) वधः। इत्यमरः।

क्षणनिश्वास पुं, (क्षणात् क्षणकालात् परं निःश्वासोऽस्य।) शिशुमारः। इति शब्दरत्नावली।

क्षणप्रभा, स्त्री, (क्षणं व्याप्य प्रभाऽस्याः।) विद्युत्। इत्यमरः। १। ३। ९।

क्षणभङ्गुर, त्रि (क्षणात् भङ्गुरः।) क्षणैकनाश्यः। यथा। "नहि पुरस्ती किमपि नाशमात्रमन्ति क्षिप्रदपि वस्तु स्थिर विश्वमेव क्षणभङ्गुर सर्व्वोऽपि वेदयावरेव न किमिदपि काम वेदम् न वाचाकमला किमिदपि प्रसङ्गे"। इति बौद्धाधिकारे शिरोमणिः।

क्षणरामी, [न्] पुं, (क्षणात् परं क्षणे क्षणे वा रमते इति। रम + णिनि।) पारावतः। इति शब्दमाला। (कपोतः। इति केचित्।)

क्षणिक, त्रि (क्षण क्षणकालमात्रस्थायी। ठन्।) क्षणमात्रस्थायी। यथा। "क्षणभङ्गे हि निवृत्ति रूपादि क्षणिको न वा। क्षणिकत्व साधिकरणसमयप्रागभावाधिकरणक्षणोत्पत्ति कत्वे सति वाच्यविध्वंस उत्पत्तिमत्त्वं वा। उत्पत्तिश्च साधिकरणक्षणाहत्तिप्रागभावप्रतियोगि क्षणसम्बन्धः। क्षणश्च स्वाधेयपदार्थप्रागभावाधारः समयः प्रसिद्धस्तु निमेषादिरूपकालो मान भावे परमाणौ च निषेधाय बौद्धानामपीके। साधिकरणसमयप्रागभावाधिकरणक्षणवृत्तित्व क्षणिकत्वमिति तु न्यायः"। इति बौद्धाधिकारे रघुनाथशिरोमणिः। अन्यच।

"स्यादयमनुपुष्टं स्यादपाकायत्ततीरिदाम्।
क्षणायत्तत्वं क्षणिको विशेषगुण इष्यते"।

इति भाषापरिच्छेदे ४०। "क्षणिकत्वञ्च तृतीय क्षणवृत्तिध्वंसप्रतियोगित्वम्"। इति सिद्धान्त मुक्तावली।

क्षणिका, स्त्री, (क्षणिक + स्त्रियां टाप्।) विद्युत्। इति हेमचन्द्रः। (क्षणकालमात्रस्थायिनी। यथा, हितोपदेशे। २। १५४।
"योऽस्ति यस्य यदा मांसमुपयोग प्रयोजनम्।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते"।)

क्षणिनी, स्त्री, (क्षण उत्सवोऽस्त्यस्याम्। क्षण + इनि। ङीप्।) रात्रिः। इति शब्दरत्नावली। (उत्सववति, त्रि। यथा, महाभारते। २। सभापर्व्वणि १२। ४४।
"स निशाया शुभे देशे क्षणिनं कस्यचिद्धनम्।
धर्म्मराजः समासन्नाचायत् स यथोत्तमम्"।)

क्षत, क्ली, (क्षण्यते बाध्यतेऽनेन। क्षण + करणे क्त।) शस्त्रप्रहारादि। घा इति भाषा। तत्पर्य्यायः। व्रण १ अरुः २ ईर्म्मम् ३ क्षणनुः ४। इति हेमचन्द्रः। तद्वति त्रि। *।

क्षतेन मृतस्याशौच यथा स्कान्दे।

"क्षतेन म्रियते यस्तु तस्याशौचं भवेद्दिवा।
आहताहात भिन्नाञ्च सप्तरात्रगतो मृतम्।
क्षतधाते मृहात्मा यदि कश्चित् प्रमीयते।
आशौचं प्राकृतं तत्र सर्व्वेषु निश्चयः।
अत्र अक्षतानमदं सप्तरात्रादाशौचमतः परं पाठि मासिकताशौचाभावमपि। अन्यथा क्षतं विना पतनादिमिर्निमित्तमृतानां दिवावधेऽप्यशौचः स्यात्"। इति शुद्धितत्त्वम्। *। चन्द्रसूर्य्य द्वौ तत्रीत्वाचारो यथा,—ब्रह्मपुराणे।

"चन्द्रसूर्य्यग्रहे चैव मरणात् विपुलमस्य।
महातीर्थे च संप्राप्ते क्षतदोषो न विद्यते"।

अन्यत्र तु देवला।

"रात्रौ सूतको मृतो ममोत्पादनमयम।
प्रतसमूदयत्तं यज्ञासक्तो प्रकाशन"।

इत्यत्र सर्व्वेनामाह। भागुर्व्वाक्यमप्याह।

"दशाहपर्य्यन्तं दिव मलेन दश्यते।
न तत्र सूतक कुर्य्यात् समुद्रात्ते दश।
संवत्सरेषामध्ये हवनान् सर्व्वे क्षते"।

इति प्रायश्चित्ततत्त्वम्। (रिक्तकम्।) यथा, कुमारे। ५। ७८।
"क्षतसमालीव गण्डलेखाम्"।
निपाद। यथा, रघौ। २। ५३।

"क्षतात् किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढः"।

त्रि, रासितः। विद्धः। यथा, रघुः। ११। ६।

"हयोरवद्यमसङ्गेन परितः
हरि क्षतो मार्गभिरोऽभ्यगच्छत"।

खण्डितः। यथा, कुमारे। ४। २८।

"सहायतामपि मूढात क्षतहृदायविराहित।
गीतावितेन। तस्य चिकित्सा धन्वन्तरिवचने चिकित्सितः यथा—

"धनुषायस्ततोऽत्यर्थं भारमुद्वहतो गुरुम्।
पततो विषमोच्चेभ्यो युध्यमानस्य वाजिभिः।
वृष वृषं वा धावतः दम्यं वान्यं निगृह्णतः।
शिलाकाष्ठाश्मनिर्घातान् क्षिपतो निघ्नतः परान्।
अधीयानस्य वात्युच्चैर्दूरं वा व्रजतो द्रुतम्।
महानदीं वा तरतो हयैर्वा सह धावतः।
सहसोत्पततो दूरं तूर्णं चातिप्रनृत्यतः।
तथान्यैः कर्म्मभिः क्रूरैर्भृशमभ्याहतस्य वा।
विक्षते वक्षसि व्याधिर्बलवान् समुदीर्य्यते।
स्त्रीषु चातिप्रसक्तस्य रूक्षाल्पप्रमिताशिनः।
उरो विरुज्यते तस्य भिद्यतेऽथ विरुज्यते।
प्रपीड्यते ततः पार्श्वे शुष्यत्यङ्गं प्रवेपते।
क्रमाद्वीर्य्यं बलं वर्णो रुचिरग्निश्च हीयते।
ज्वरो व्यथा मनोदैन्यं विड्भेदाग्निवधावपि।
दुष्टः श्यावः सुदुर्गन्धः पीतो विग्रथितो बहु।
कासमानस्य च श्लेष्मा सरक्तः सम्प्रवर्त्तते।
सक्षतः क्षीयतेऽत्यर्थं तथा शुक्रौजसः क्षयात्"।

पूर्व्वरूपं यथा—

"अव्यक्तं लक्षणं तस्य पूर्व्वरूपमिति स्मृतम्।
उरोरुक् शोणितच्छर्द्दिः कासो वैशेषिकः क्षते"।

साध्यासाध्यत्वादिकं यथा—

"अल्पलिङ्गस्य दीप्ताग्नेः साध्यो बलवतो नवः।
गतं संवत्सरं याप्यः सर्व्वलिङ्गं तु वर्ज्जयेत्"।

चिकित्सामाह यथा।

"उरोमत्वाक्षतं लाक्षां पयसा मधुसंयुताम्।
सद्य एव पिबेज्जीर्णे पयसाद्यात् सशर्करम्।
पार्श्ववस्तिरुजार्त्तश्च(?) अल्पाग्निर्(?) सुरायुताम्।
भिन्नविट्कः समुस्तातिविषां पाठां सवत्सकाम्।
लाक्षां सर्पिर्मधूच्छिष्टं जीवनीयं सितां त्वचम्।
समङ्गोशीर चन्दनं रक्तं तैलं पचेत् पिबेत्।
इत्यादिकं विद्यात् क्षतकर्म्मणि।
क्षतं यदि मधुना समं सितां पिबेत् क्षते।
श्यामा त्रिफला(?) वात(?) गोमूत्रं पयसा समम्।
क्वाथेन सिद्धं सर्पिर्वा दत्त्वा पिबेत्।
काली कृष्णा(?) तथा शुक्ली च विड्दोषप्रमाथिनि।
मधुकमधुकर्णादा मधुलीदावि(?)।
कफाल्पतः(?) दुग्धं तु सर्पिषैव वा पिबेत्।
पटोलादि वारि रक्तं वा क्षतरक्तम्।
चूर्णं पीत्वा तु दत्त्वा(?) शुक्लकरम्।
रक्तपित्ते पिबेत् पित्तं नाशाय कवलीकरे।
मधुकमधुकं पिबेत् वा मधुकरम्।
अश्वगन्धाकल्कं क्षते क्षीरेणैव दद्यात्।
दत्त्वा पिबेत् सर्पिषा क्षतं(?) भवेत्"।

वीरभाग्राह्वये मध्ये क्षीराद्धाम्बुसाधितम् ।
कल्कै कट्फलदार्व्वीत्वक्सत्वक्कलकपर्यैर्युतम् ॥
जीवकर्षभकौ वीरां जीवन्तीं नागरं शटीम् ।
चतस्रः पर्णिनीर्मेदे काकोल्यौ द्वे निदिग्धिके ॥
पुनर्नवे द्वे मधुकं आत्मगुप्तां शतावरीम् ।
ऋद्धिं परूषकं भार्गीं मृद्वीकां बृहतीं तथा ॥
शृङ्गाटकीं तामलकीं पयस्यां पिप्पलीं बलाम् ।
बदराक्षोटखर्ज्जूरवातामाभिषुकाण्यपि ॥
फलानि चैवमादीनि कल्कान् कुर्व्वीत कार्षिकान् ।
धात्रीरसविदारीक्षुच्छागमांसरसं पयः ॥
कुर्य्यात् प्रस्थोन्मितं तेन घृतप्रस्थं विपाचयेत् ।
प्रस्थार्द्धं मधुनः शीते शर्कराद्धतुलान्तथा ॥
द्विकार्षिकाणि पत्रैला हेमत्वक्मरिचानि च ।
चूर्णितानि विनीयास्माल्लिह्यान्मात्रां यथा नर ॥
अमृतप्राशमित्येतन्नराणाममृतं घृतम् ।
सुधामृतरसं प्राश्य क्षीरमांसरसाशिना ॥
नष्टशुक्रक्षतक्षीणदुर्ब्बलव्याधिकर्षितान् ।
स्त्रीप्रसक्तान् कृशान् वर्णस्वरहीनांश्च बृंहयेत् ॥
कासहिक्काज्वरश्वासदाहतृष्णास्रपित्तनुत् ।
पुत्त्रदं वमिमूर्च्छाहृद्योनिमूत्रामयापहम्” ॥
इत्यमृतप्राशघृतम् ॥
“मधुकाष्टपलं द्राक्षा प्रस्थक्वाथे घृतं पचेत् ।
पिप्पल्यष्टपले कल्के प्रस्थे सिद्धे च शीतले ॥
पृथगष्टपलं क्षौद्रशर्कराभ्यां विमिश्रयेत् ।
समं सक्तुभिरक्षोघ्नं रक्तगुल्मेषु तद्धितम्” ॥
इति सक्तुप्रयोगः ॥
“शालूकं पद्मपूलानां मध्यं क्षौद्रघृतान्वितम् ।
याचाद्रसाक्ष्यो दीप्ताग्निः क्षतः क्षीणः पिबेन्नरः” ॥
“इक्षा षोडशिका धात्र्याद्रि द्व्यावलीदयोः ।
तावद्दाडिमवृक्षाम्लहिङ्गुः सौवर्चलात्पलम् ॥
शुण्ठ्याः कर्षं दधित्थस्य मध्यात् पञ्च पलानि च ।
सचूर्ण्य षोडशपले शर्कराया विमिश्रयेत् ॥
षाड़वोऽयं प्रदेयः स्यात् सर्वेष्वेषु पूर्ववत्” ॥
इति षाड़वः ॥
“क्षयोक्तं यच्च यत्किञ्चित् कासिनां रक्तपित्तिनाम् ।
तच्च कुर्य्यादवेक्ष्याग्निं व्याधि सात्म्यबलानि च” ॥
इति चरके चिकित्सास्थाने १६ अध्याये ॥)

क्षतकास, पुं, (क्षतज कासः । मध्यपदलोपी समासः ।) पञ्चविधकासरोगान्तर्गतकासरोगविशेषः । यथा,—
‘पञ्चकासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः ।
क्षयायोपेक्षिताः सर्व्वे बलिनश्चोत्तरोत्तरम्’ ॥
तस्य पूर्व्वरूपमाह ।
“पूर्व्वरूपं भवेत्तेषां शूकपूर्णगलास्यता ।
कण्ठे कण्डूश्च भोज्यानामवरोधश्च जायते” ॥
भोज्यानामवरोधः अवगलितुमसामर्थ्यम् ।
अस्य निदानपूर्व्विकां सम्प्राप्तिमाह ।
“अतिव्यवायभाराध्वयुद्धाश्वगजनिग्रहैः ।
रूक्षस्योरःक्षतं वायुर्गृहीत्वा कासमावहेत्” ॥
अस्य रूपाणि दर्शयन् । तदाह ।
“स पूर्व्वं कासते शुष्कं ततः ष्ठीवेत् सशोणितम् ।
कण्ठेन रुजतात्यर्थं विरुग्णेनेव चोरसा ॥

सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ।
दुःखस्पर्शेन शूलेन भेदपीड़ाभितापिना ॥
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यपीड़ितः ।
पारावत इवाकूजेत् कासवेगात् क्षतो नरः’ ॥
कण्ठेऽमूलमुखयेऽपि हस्तेऽपि श्वासयोरपि ॥
तस्य चिकित्सा यथा,—
“इक्षुवालिकाविसग्रन्थिपद्मकेशरचन्दनम् ।
मधुकं पिप्पली द्राक्षा लाक्षा शृङ्गी शतावरी ॥
द्विगुणा च तुगाक्षीरी सिता सर्व्वचतुर्गुणा ।
लिह्यात् समधुसर्पिष्कं क्षतकासनिवृत्तये” ॥
इक्षुवालिका इक्षुभेदः । खड़ इति लोके । पद्म पद्मकाष्ठम् । मृणालं विसम् । उत्पल कमलम् । चन्दनमत्र श्वेतं पूर्व्वत्वात् । शृङ्गी कर्कटशृङ्गी । तुगाक्षीरी वंशरोचना । सा चेह द्विगुणा । इति भावप्रकाशः ॥
(“युद्धाद्यैः साहसैस्तैस्तैः सेवितैरयथाबलम् ।
उरस्यन्तः क्षते वायुः पित्तेनानुगतो बली ॥
कुपितः कुरुते कासं कफं तेन सशोणितम् ।
पीतं श्यावञ्च शुष्कञ्च ग्रथितं कुथितं बहु ॥
ष्ठीवेत् कण्ठेन रुजता विभिन्नेनेव चोरसा ।
सूचीभिरिव तीक्ष्णाभिस्तुद्यमानेन शूलिना ॥
पर्व्वभेदज्वरश्वासतृष्णावैस्वर्य्यकम्पवान् ।
पारावत इवाकूजन् पार्श्वशूली ततोऽस्य च ।
क्रमाद्वीर्य्यं रुचिः पक्तिर्ब्बलं वर्णश्च हीयते’ ॥
अस्य चिकित्सा यथा—
‘उरस्यन्तः क्षते सद्यो लाक्षां क्षौद्रयुतां पिबेत् ॥
क्षीरेण शालीन् जीर्णेऽद्यात् क्षीरेणैव सशर्कराम् ।
पार्श्ववस्तिसरुक् चाल्पपित्ताग्निस्तां सुरायुताम् ॥
भिन्नविट्कः समुस्तातिविषापाठां सवत्सकाम् ।
लाक्षां सर्पिर्मधूच्छिष्टं जीवनीयं गणं सिताम् ॥
त्वक्क्षीरीं समितं क्षीरे पक्त्वा दीप्तानलः पिबेत् ॥
इक्षुविकाराविषयाग्निबलस्य प्रलेपनैः ।
इक्षुबालैर्मधुरस्कन्धाग्रैः क्षतो पिबेत् ।
क्षतकासे च ये धूमा सानुपाना निदर्शिता” ।
इति वाग्भटे निदानस्थाने चिकित्सास्थाने च चतुर्थाध्याये ॥)

क्षतघ्न, पुं, (क्षतं हन्ति नाशयतीति । हन् + “अमनुष्यकर्त्तृके च । ३ । २ । ५३ । इति टक् ।) लुपविशेषः । इति शब्दचन्द्रिका । मुसुरोम इति भाषा ॥

क्षतघ्नी, स्त्री (क्षतं हन्ति । हन् + “अमनुष्यकर्त्तृके च” । ३ । २ । ५३ । इति टक् स्त्रियां ङीष् ।) लाक्षा । यथा —
“लाक्षा दुमामयो राक्षा रङ्गमाता क्रिमिजा ।
यव क्षतघ्नी द्रविणा जतुकारी तु जन्तुका” ॥
इति हेमचन्द्रः । क्षतारि इत्यपि ॥

क्षतज, क्ली (क्षतात् जायते जन् + ड ।) रक्तम् । अमरः । २ । ६ । ६४ ॥
(यथा, रघौ । ७ । ४९ ।
“स क्षितिपृष्ठे क्षतजेन रेजे
कपोल[illegible]” ॥)
पूयम् । इति अमरटीका ॥

क्षतजरक्ता, स्त्री, (क्षतजं रक्तमिव रक्तो यस्याः सा ।) महाप्रदिष्टुः [illegible] विशेषः ।
तस्या निदानपूर्व्विकां सम्प्राप्तिमाह ।
‘भङ्गाभिघात [illegible]
ऊर्द्ध्वं चिरं [illegible] ।
पित्तं प्रकोपं कुपितं शरीरं
तानुपयन्ति [illegible] ॥
स्रोतः[illegible] दूषितेषु
दोषैश्च [illegible] ।
तिस्रः [illegible]
[illegible] च ॥
[illegible]
विशेष [illegible]” ॥
[illegible] इति [illegible] । [illegible] । [illegible] कुपितः । [illegible] । न केवल [illegible] दूषिते [illegible] भवति । [illegible] । [illegible] द्वे [illegible] । [illegible] दोषः । [illegible] । [illegible] । [illegible] लाक्षोम च । [illegible] । [illegible] माह ।
“[illegible] ।
[illegible] ॥
[illegible] ।
“[illegible]
[illegible] ।
[illegible] ॥
अथ [illegible] ।
“[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।
[illegible] ।

जिह्वातालुगलक्लोमशोषे मूर्द्धनि दापयेत् ।
केशरं मातुलुङ्गस्य घृतसैन्धवसंयुतम् ।
दाडिमं बदरं लोध्रं कपित्थं बीजपूरकम् ।
पिष्ट्वा मूर्द्धनि लेपस्तु पिपासादाहनाशकः ।
वारि शीतं मधुयुतमाकण्ठाद्वा पिपासितम् ।
पाययेद्वामयेच्चापि तेन तृष्णा प्रशाम्यति ।
मातःसमर्करः पेयो हिमो धान्याकसम्भवः ।
भवेत् तृष्णा तथा दाहं भवेत् स्रोतोविशोधनम् ।
आम्रं जम्बु कुष्ठं लाजाश्च वटरोहकम् ।
कृतचूर्णस्य मधुना गुटिकां धारयेन्मुखे ।
तृष्णां प्रवृद्धां हन्त्येषा मुखशोषञ्च दारुणम् ।

क्षतोद्भवां व्रणविकारजेन
जयेत् क्षतानामसृजश्च पानैः ।
क्षयोत्थितां क्षीररसैः निहन्या-
न्मांसोदकं वा मधुकोदकं वा ।
आमोद्भवां बिल्ववचायुतानां
जयेत् कषायैरथ दीपकानाम् ।
सर्वत्र चामुं जलमेव चैष
छर्दिं विना सर्वकृतां तृष्णाम्" ।

उष्णिकाले तैलप्रयोगः । स्निग्धेऽपि सूक्ष्मे वा तृष्णा स्यात्तां गुडाम्बुना शमयेत् । अतिरोगदुर्ब्बलानां तृष्णां शमयेद्वामिषाम्बुपयः । पयोऽत्र दुग्धम् ।

"मूर्च्छाच्छर्दितृष्णादाहस्त्रीमद्यभारकर्षिताः ।
पिबेयुः शीतलं तोयं रक्तपित्ते मदात्यये ।
वातश्लेष्मभवैर्वृष्णोत्था तस्य भवेत् पुनः ।
तस्यां पित्ताशमयोऽपि व्याधिः कृच्छ्रचिकित्सितम् ।
तृष्यन् पूर्व्वामयक्षीणो न लभेत जलं यदि ।
मरणं दीर्घरोगं वा प्राप्नुयात् त्वरितं नरः ।
तृषितो मोहमायाति मोहात् प्राणान् विमुञ्चति ।
तस्मात् सर्व्वावस्थासु न क्वचिद्वारि वारयेत् ।
अन्नेनापि विना जन्तुः प्राणान् धारयते चिरम् ।
तोयाभावात् पिपासार्त्तः क्षणात् प्राणैर्विमुच्यते" ।
इति तृष्णाधिकारः । इति भावप्रकाशः ।

क्षतविध्वंसी [न्] पुं, (क्षतं व्रणं घनकर्णादिरूप विध्वंसयतीति । वि + ध्वंस + णिच् + णिनि ।) कण्टकारिका । इति शब्दचन्द्रिका ।

क्षतज, पुं (क्षतजन्यः कासः क्षतजो कासो वा ।) पञ्चप्रकारकासरोगान्तर्गतरोगविशेषः । इति भावप्रकाशः । तद्विवरणं कासशब्दे द्रष्टव्यम् ।

क्षतव्रत त्रि, (क्षतं भग्नं व्रतमस्य ।) ब्रह्मचर्य्यादि । अवकीर्णी च । इत्यमरः । २ । ७ । ५० । तथा च याज्ञवल्क्यः ।
"अवकीर्णी भवेद्गत्वा ब्रह्मचारी तु योषितम् ।
गर्दभं पशुमालभ्य नैरृतं स विशुध्यति" ।
इति प्रायश्चित्ततत्त्वम् ।

क्षतयोनि, स्त्री, (क्षता योनिः । ब + टाप् ।) क्षतयोनिः । इति शब्दचन्द्रिका ।

क्षति, स्त्री (क्षण + क्तिन् ।) अपचयः । हानिः । (यथा, महाभारते । १ । १५४ । २८ ।
"प्रमादान्न क्षतिं कार्य्यमाप्तव्यं प्रमादतः" ।)
"अस्तु कि निरवधिमिति

का क्षतिरत्रखलिनामुपकाराय ।
वैरवधवरसमग्री
भावकपत्नी समाख्यगी" ।
इत्युद्भटः ।

क्षतोदर, पुं, (क्षत शर्करादिभिर्भिन्नं उदरमत्र रोगे । अथवा क्षतात् गुदात् जात उदरं उदररोग विशेषो यत्र ।) उदररोगविशेषः । तस्य सामान्यलक्षणमाह ।
"आग्नेयं शमनैः शक्तिर्दोषस्य दुर्बलाग्निना ।
शोथो रुक्समहागमो वल्गो वातपुरीषयोः ।
दाहबन्धा च सर्वेषु जठरेषु भवन्ति हि" ।
अभिहतमिदानपूर्व्विकां संख्यामाह ।
"पृथग्दोषैः समस्तैश्च प्लीहबद्धक्षतोदकैः ।
सम्भवन्त्युदराण्यष्टौ तेषां लिङ्गं पृथक् शृणु" ।

क्षतोदरमाह ।
"शल्यं यथाशोपहितं यदन्न
भुक्तं भिनत्त्यागतमन्यथा वा ।
तस्मात् क्षतोऽस्मात् सलिलप्रकाश
स्रावः स्रवेद्वै गुदतस्तु भूयः ।
नाभेरधश्चोदरमेति वृद्धिं
निस्तुद्यते दाम्यति चातिमात्रम् ।
एतत् परिस्राव्युदरं प्रदिष्टं
दकोदरं कीर्त्तयतो निबोध" ।

शल्यं मत्स्यकण्टकादि अन्नोपहितं भक्षितञ्च भुक्तं यद् अन्नं भिनत्ति तथा अन्यथा आगतं भोजनं विना आगतं सत् यदि तदपि यदन्नं भिनत्ति एतद्द्वयमुदयम् । अन्नमनयत्नेन यन्न भिनत्ति । तत उक्तं चरके ।
"शर्कराख्यकाष्ठास्थिकण्टकैरन्नसंयुतैः ।
भिद्येतान्त्रं यदा भुक्तं जृम्भयात्यशनेन च" । इति तस्मात् भिन्नादन्नात् । गुदतस्तु भूयः अन्नात् सम्यक् प्रवृत्तः स्रवेदित्यर्थः । दाम्यति निदीर्यत इव । परिस्रावमात्रात् । तत्तु क्षतोदरं तन्नामे परिस्राव्युदरं प्रदिष्टम् ।
तस्य चिकित्सा ।
"आविष्टशल्यमोषधपक्वोऽपरमोजनम् ।
निरुद्धे रेचनं स्वेदं शस्त्रेण जठरेषु च ।
आमूत्रमोक्षं मासं प्राक् चिरत्वात् तथा ।
सायामान्त्रविनाशप्रत्यग्रानि कर्त्तयेत् ।
तत्पूर्वतस्रोतांसि निरुन्धीत मुनिश्च च ।
नातिदीर्घानि भटुई गोपयाश्च कल्पयेत् ।
उदरातु महाबलवान् पश्चात् शोधनं हितम् ।
क्षीरैरैरण्डतैलं वा विरेचनेन वा सकृत्" ।
इति भावप्रकाशः । (उदररोगशब्दे विशेषविवरणं ज्ञेयम् ।)

क्षत्ता, [ऋ] पुं, (क्षद् संवरणे । तृन्बन्धुरत्वम् ।
"क्षत्तृसौ प्रशिक्षितादिभ्योः नवाम्भो व च्यौ" ।
उणा । २ । ९४ । इति अन्तःस्थस्य न वर्णद्वित्वम् ।)
सारथिः । द्वास्थः । इत्यमरः । २ । ८ । ६१ ।
दासीपुत्रः । (यथा, महाभारते । १ । विदुरागमनपर्व्वणि २०१ । १८ ।
"तेन धीमता क्षत्ता भ्रातृस्नेह विलक्षते" ।

उवाच विदुरः क्षत्ता वचनं इति विश्रुतः" ।)
नियुक्तः । ब्रह्मा । इति मेदिनी । क्षत्रियाया शूद्रजातः । (यथा, मनुः । १० । १२ ।
"शूद्रादायोगवः क्षत्ता चाण्डालश्चाधमो नृणाम् ।
वैश्यराजन्यविप्रासु जायन्ते वर्णसङ्कराः" ॥)
मत्स्यः । इति शब्दरत्नावली ।

क्षत्र, क्ली, (क्षतः त्रायते इति । क्षत् + त्रै + क ।) शरीरम् । इत्युणादिकोषः । तगरम् । इति राजनिर्घण्टः । (क्षत्रियकुलम् । यथा, कथा रघौ ५ । ६२ । ९ ।
"अथ विग्रहिता कस्यचित्रवे परस्पा
च भावाये वसतिप्रारब्धः ।
राजान क्षत्रमहीपमाना
पुरस्कृत्य निवस राङ्गं द्यौ" ॥)

क्षत्र, पुं, (क्षद् + "गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः" । उणा ४ । १६६ । इति त्रः ।) क्षत्रियः । इत्यमरदिकोषः । (यथा, क्षतः क्षतात् त्रायते इति । त्रै + कः । यथा, रघुः । २ । ५३ ।
"क्षतात् किल त्रायत इत्युदग्रः
क्षत्रस्य शब्दो भुवनेषु रूढः" ।
"नाम्नकर्त्तादिवत् क्षेत्रजाः किल सुत्रादिवत् योगरूढ" इत्यर्थः । इति मल्लिनाथः ।)

क्षत्रबन्धु, पुं, (क्षत्रियस्य बन्धुरिव ।) निन्दितक्षत्रियः । इत्यमरटीका । (यथा, भागवते । ७ । ७ ।
"क्षत्रबन्धो ! नमेऽर्भ त्व महती गत्यवाप्तिम् ।
मन्यसे यदि तत् विष्णुं भुतः स्वं मे वदं वद" ।
क्षत्रं क्षत्रो देशो वा बन्धुर्यस्य ।) क्षत्रमात्रम् ।
(यथा, मनुः । २ । १२८ ।
"ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च" ॥)

क्षत्रवृक्ष, पुं (क्षत्रसम्बन्धिवृक्षः ।) मुचुकुन्दः । इति राजनिर्घण्टः । (अस्य पर्य्यायो यथा —
"मुचुकुन्दः क्षत्रवृक्षश्चित्रकः प्रतिविष्णुकः" ।
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे । गुणाः अस्य मुचुकुन्दशब्दे ज्ञातव्याः ।)

क्षत्रिय, पुं, (क्षत्रे राष्ट्रे साधुः । क्षत्रस्यापत्यं वा । "क्षत्राद् घः" । ४ । १ । १३८ । इति अपत्ये घः ।) क्षतादि रक्षति नाम वा प्रजाः । क्षत् नाशतो निर्गच्छति । क्षतात् त्रायते इति । सर्वाभिरिहाम् न क्षमाकल्पयामास वा क्षत्रः । क्षत्रियो विरचितः । द्विजेन्द्रवर्णेषु क्षत्र । मनितात् श्रमपर्य्याप्तम् प्रधानो मता नवं निर्गुनति वाचस्पत्यपूरीये । क्षत्र स्वर्णितो क्षत्रो दृशो अवयवः इव इत्थम् । इति भरतः ॥ ॰ ॥
तत्पर्य्यायः । मूर्द्धाभिषिक्तः । राजन्यः । बाहुजः । क्षत्रियः । विराट् । इत्यमरः । २ । ८ । १ ॥ क्षत्रः (क्षत्रियः । यथा, रघुः । ५ । ५३ ।
"क्षत्रात्मनि तु विशरते सुरत्नकवयाः ।
ब्राह्मण इव वर्णे गतस्य विनत्नम्" ।)
मूर्द्धाभिषिक्तः । इति बाहुः । विराट् २ । इत्यमरः । २ । ८ । १ ॥ क्षत्रः (विराजी । राजा ४ वर्णा ८ । इति जटाधरः । बाहुः १० ।

मूर्द्धक ११ । इति शब्दरत्नावली । पार्थिवः १२ सार्व्वभौमः १३ । इति राजनिर्घण्टः । ते च सूर्य्यचन्द्रवंशीयराजानः कलौ चन्द्रवंशपर्य्यन्तं आसन् ततः महानन्दिसुतो नन्दः शूद्रायां समुत्पन्नः क्षत्रवर्गं राज्यं चकार तदन्ते चाणक्यनामा ब्राह्मणो नन्दं तत्सुतांश्च हत्वा मुरापुत्रं चन्द्रगुप्तं राजानं कृतवान् कलौ नन्दान्तक्षत्रियवंशः । इति श्रीभागवते १२ स्कन्धे १ अध्यायात् सङ्गृहीतम् । * । प्लक्षद्वीपे क्षत्रियस्य नाम पतङ्गः । शाल्मलिद्वीपे वीर्य्यधरः । कुशद्वीपे कोविदः । क्रौञ्चद्वीपे ऋषभः । शाकद्वीपे सत्यव्रतः पुष्करद्वीपे एते एकवर्णाः । अस्य शास्त्रनिरूपितधर्म्मास्तु अध्ययनं यजनं दानञ्च । प्रजारक्षणं जीविका । ब्रह्मचर्य्याश्रमश्च । गार्हस्थ्यं ब्रह्मचर्य्यं वानप्रस्थञ्च । इति तत्रैव २० अध्यायादितः सङ्गृहीतम् । * ।

तल्लक्षणं यथा,—

"क्षतजं सेवते कर्म्म वेदाध्ययनसङ्गतः ।
दानादानरतिर्यस्तु स वै क्षत्रिय उच्यते" ॥

तस्य धर्म्मो यथा,—

नारद उवाच ।

"क्षत्रियस्यापि यो धर्म्मस्तं ते वक्ष्यामि पार्थिव ।
दद्याद्राजा न याचेत यजेत न च याजयेत् ॥
नाध्यापयेदधीयीत प्रजाश्च परिपालयेत् ।
नित्योद्युक्तो दस्युवधे रणे कुर्य्यात् पराक्रमम् ॥
ये तु क्रतुभिरीजाना श्रुतवन्तश्च पार्थिवाः ।
ये तु युद्धे विजेतारस्ते तु लोकजितो नृपाः ॥
अविक्षतशरीरो हि समराद्यो निवर्त्तते ।
क्षत्रियस्य तु तत् कर्म्म नाभिनन्दन्ति तद्विदः ॥
क्षत्रियाणामयं धर्म्मो निर्द्दिष्टो मुनिभिः परः ।
नास्य कृत्यतमं किञ्चिदन्यद्दस्युनिबर्हणात् ॥
दानमध्ययनं यज्ञो राज्ञां क्षेमोऽभिधीयते ।
तस्माद्राज्ञा महाराज ! योद्धव्यं धर्म्मयोगिना ॥
प्रजाः स्वेषु च धर्म्मेषु स्थापयेत महीपतिः ।
धर्म्मतोऽपि हि कर्म्माणि कारयेत् सततं प्रजाः ॥
परां सिद्धिमाप्नोति नृपतिः परिपालनात् ।
कुर्य्यादन्यन्न वा कुर्य्यादैन्द्रो राजन्य उच्यते" ॥

इति भारते शान्तिपर्व्वणि ६६ अध्यायः । * । अपि च ।

"राजन्यानां करादानं विना वैवाहिकस्य च ।
प्रतिग्रहश्च नित्योऽस्य धर्म्म आपत्सु नादृतः ॥
युद्धे दयानवेक्ष्यैव तथा कार्तस्वरादिषु ।
अथापन्नप्रजात्राणे धर्म्मे निरता ॥
अन्येषां धराद्यस्य ब्राह्मणानामनादरः ।
अभाव्यानामसम्मानं सेवा कर्म्मान्तरम् ।
अकर्म्मण्य परीवादो विविधा धर्म्मकर्म्मणाम् ॥
"राजन्यस्तु महाराज ! दयाक्षममनर्थप्रदात् ।
तत् प्रथमं तपस्यापि धर्म्मनन्दनतरः ॥
वैराग्यौच धर्म्मेण राज्यत्यागादि च यत् ॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

स्थापयित्वा प्रजापालं पुत्रं राज्ये च पार्थिव ।
अन्यगोत्रं प्रशस्तं वा क्षत्रियं क्षत्रियर्षभ ॥
अर्च्चयित्वा पितॄन् सम्यक् पितृयज्ञैर्यथाविधि ।
देवान् यज्ञैर्ऋषीन् वेदैरर्च्चयित्वा प्रयत्नतः ॥
अन्तकाले च सम्प्राप्ते य इच्छेदाश्रमान्तरम् ।
सोऽनुपूर्व्व्याश्रमान् राजन् गत्वा सिद्धिमवाप्नुयात् ॥
राजर्षित्वेन राजेन्द्र ! भैक्ष्यचर्य्याश्रसेवया ।
अपेतगृहधर्म्मोऽपि चरेज्जीवितकाम्यया ॥
न चैतन्नैष्ठिकं कर्म्म त्रयाणां भूरिदक्षिणम् ।
चतुर्णां राजशार्दूल ! प्राहुराश्रमवासिनाम् ॥

क्षात्रायत्ताः क्षत्रियैर्मानवानां
लोकश्रेष्ठा धर्म्ममासेवमानैः ।
सर्व्वे धर्म्माः सोपधर्म्मास्त्रयाणां
राज्ञो धर्म्मादिति वेदात् शृणोमि ॥
एवं धर्म्मान् राजधर्म्मेषु सर्व्वान्
सर्व्वावस्थं सम्प्रलीनान्निबोध ।
उत्सृज्य धर्म्मान् प्रवदन्ति
धर्म्माधर्म्मान् वेदविदो मनुष्याः ॥
महाश्रमं बहुकल्याणरूपं
क्षात्रं धर्म्मं नेतरं प्राहुरार्य्याः ।
सर्व्वे धर्म्मा राजधर्म्मप्रधानाः
सर्व्वे धर्म्माः पाल्यमानाश्चरन्ति ॥
सर्व्वत्यागो राजधर्म्मेषु राजन्
त्यागं धर्म्मं चाहुरग्र्यं पुराणम् ।
मज्जेत्त्रयी दण्डनीतौ हतायां
सर्व्वे धर्म्माः प्रक्षयेयुर्व्विबद्धाः ॥
सर्व्वे धर्म्माश्चाश्रमाणां हताः स्युः
क्षात्रे त्यक्ते राजधर्म्मे पुराणे ।
सर्व्वे त्यागा राजधर्म्मेषु दृष्टाः
सर्व्वा दीक्षा राजधर्म्मेषु युक्ताः ॥
सर्व्वे लोका राजधर्म्मे प्रविष्टाः
यदा लोका मात्स्यन्यायाभिभूताः ।
धर्म्महेतावनुपश्यन्ति सर्व्वाः
सर्व्वे धर्म्मा राजधर्म्मैर्व्वियुक्ताः ॥
क्षत्रियस्य तादृशो नाधर्म्मः ॥

चातुराश्रम्यधर्म्माश्च यतिधर्म्माश्च पार्थिव ।
लोकपालोत्तरादैव क्षात्रे धर्म्मे समाहिताः ॥
धर्म्मात्मनाऽपि धर्म्मेषु क्षात्रो राजन्यजन्मनः ।
अपवर्गः सर्व्वाः धर्म्मस्य राज्यसमाश्रितः ।
क्षात्रेदैव हि धर्म्मेण प्रकाश विद्यते जय" ॥

इति भारते शान्तिपर्व्वणि ६४ अध्यायः । * । अपि च ।

"द्विजानां क्षत्रियाणां तथा नारायणात्मज ।
राजन्यो धर्म्मदेव रक्षि [illegible] ।
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]

रक्षेत् यो वा सनेत् मानात् तस्य स्वर्गो दुरासदः" ।

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८३ अध्यायः । * ।

अथ सूर्य्यवंशीयक्षत्रियविवरणम् ।

खट्विका शुक्लसम्भूता शुक्ररक्ताधिताम्बरा ॥"
इति युक्तिकल्पतरौ खड्गकोषोद्देशः ॥

खड इ ष मथि । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सक-सेट् । इदित् ।) मथि मन्थने मन्थनपूर्व्वक भञ्जनम् । इ, खण्डते । ष, खण्डते दण्डेन भाण्डं लोकः । इति दुर्गादासः ॥

खड, क भेदे । इति कविकल्पद्रुमः ॥ (चुरां परं सक-सेट् ।) क, खाडयति । इति दुर्गादासः ॥

खड्, स्त्री, पु, (खड्यते छिद्यते धान्यं यस्मै यत् इति । खड्+कर्म्मणि घञ् ।) लघुध्यम् । इति शब्दरत्नावली । खड इति भाषा ॥

खड, पुं (खड+भावकर्म्मादौ यथायथं घञ् ।) भागाभरणम् । भेदः । इति मेदिनी । डे । ८ ॥ खड्यूषो यथा शाकदत्ते ।
"तक्रं कपित्थचाङ्गेरीमरिचाजाजिचित्रकैः ।
सुपक्वः खड्यूषोऽयमथ काम्बलिकोऽपरः ॥"

खडक्किका, स्त्री, (खडक इत्यव्यक्तशब्दं करोतीति । क+बाहुलकात् ड, ततो गौरादित्वात् ङीष् । ततः स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) पक्षद्वारम् । इति हारावली ॥ खडकिद्वार इति भाषा ॥

खडुः, पुं (खड+उन्प्रत्ययः ।) बाहुभूषा-भरणम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

खडिका, स्त्री, (खड+अच्+गौरादित्वात् ङीष् । ततः स्वार्थे कन् पूर्व्वह्रस्वः ।) कठिनी । इति जटाधरः ॥

खडी, स्त्री, (खड+अच्+ततो ङीष् ।) कठिनी । खटिकानामश्वेतवर्णमृत्तिकाविशेषः । इति शब्दचन्द्रिका ॥ अस्याः गुणपर्य्यायौ कठिनीशब्दे खटीशब्दे च द्रष्टव्यौ ॥

खडूः, स्त्री (खड+"खडेरूः ।" उणां ।१।८४। इति ऊः ।) वलयम् । (बाहुभूषाभरणम् । इङ्गलकाः ॥)

खडगा स्त्री, (खड भेदे+ "छापूखडिभ्य कित् ।" उणां ।१।१२३। इति गन् प्रत्ययः ।) लोहम् । इति राजनिर्घण्टः ॥

खड्गः, पुं, (खडति भिनत्तीति । खड+"छापू खडिभ्यः कित् ।" उणां ।१।१२३। इति गन् ।) गण्डकः । गण्डार इति भाषा ॥ (यथा, मनुः । ३ । २७२ ।
"कालशाकं महाशल्काः खड्गलोहामिषं मधु ।
आनन्त्यायैव कल्पन्ते मुन्यन्नानि च सर्व्वशः ॥"
"खड्गो गण्डकः लोहो लोहितवर्णश्छाग एव ।"
इति कुल्लूकभट्टः ॥) गण्डकशृङ्गम् । खाग इति भाषा । बुद्धभेदः । इति मेदिनी ॥ चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ अस्त्रविशेषः । खाडा तरवाल इत्यादि भाषा ॥ (यथा, महाभारते । ४ । ४१ । २५ ।
"यश्चैष विपुलः खड्गो गव्ये कोषे समर्पितः ।
सहदेवस्य विद्ध्येनं सर्व्वभारसहं दृढम् ॥")
तत्पर्य्यायः । निस्त्रिंशः २ चन्द्रहासः ३ असिः ४ रिष्टिः ५ कौक्षेयकः ६ मण्डलाग्रः ७ करवालः ८ कृपाणः ९ । इत्यमरः ।२।८।८९। ऋष्टिः १० करपालः ११ । इति तट्टीका ॥ विशसनः १२ तीक्ष्णधारः १३ दुरासदः १४ श्रीगर्भः १५ विजयः १६ धर्म्मपालः १७ कौक्षेयः १८ तरवारिः १९ तरवालः २० कृपाणकः २१ कृपाणी २२ खड्गः २३ । इति शब्दरत्नावली ॥ * ॥ तस्योत्पत्तिप्रकारो यथा,—
"विचार्य्यासि तथाभूतस्तस्थिते श्रूयते तदा ।
नीलोत्पलसवर्णाभं तीक्ष्णदंष्ट्रं कृशोदरम् ॥
प्रांशुं सुदुर्दर्शं तथैव ज्वलितानलम् ।
ततस्तद्रूपमुत्सृज्य बभौ निस्त्रिंश एव सः ॥
विमलस्तीक्ष्णधारश्च कालान्तक इवोद्यतः ।
ततः स शितिकण्ठाय रुद्रायर्षभकेतवे ॥
ब्रह्मा ददावसिं तीक्ष्णमधर्म्मप्रतिवारणम् ।
ततः स भगवान् रुद्रो दानवशतमोचितम् ॥
असिं धर्म्मस्य गोप्तारं ददौ सत्कृत्य विष्णवे ।
विष्णुर्मरीचये च महर्षिभ्यः स इन्द्राय स लोकपालेभ्यः स मनवे क्षुपुत्राय च क्षुपाय च इक्ष्वाकवे च पुरूरवसे च आयवे च नहुषाय च ययातये च पूरवे च अमूर्त्तरयसे च भूमिशयाय च भरताय च ऐडविडाय च धुन्धुमाराय च काम्बोजाय च मुचुकुन्दाय च मरुत्ताय च रैवताय च युवनाश्वाय च रघवे च हरिणाश्वाय च शुनकाय च उशीनराय च भोजाय च शिबये च प्रतर्द्दनाय च अष्टकाय च पृषदश्वाय च भरद्वाजाय च द्रोणाय च कृपाय च पाण्डवेभ्यो दत्तवान् ॥ * ॥ अथ खड्गविषयकमन्त्रोद्य विधानस्य यथा, महाभारते ।
"नकुलाचरितं खड्गमाश्रयं श्रावयाम्यहम् ।
तदेव बाहुशाल्यस्य कृतहस्तस्य भारत ॥
भ्रामणं यस्य यत्नेन खड्गमध्ये विहङ्गमे ।
सर्व्वयुद्धप्रधानस्य साधनं तदिदं शृणु ॥
दृष्टोदात्तमथाचाय गतस्याघूर्णं गतम् ।
खड्गस्यास्थेय तद्देवधर्मेण भवत मतम् ॥
वर्षयित्वा रिपौ शस्त्रपातनं गदित स्मृतम् ।
परित्यज्य भवेत् शत्रोर्वामदक्षिणतो गति ॥
यथात यदापसरस्य निरस्य सम्प्रचक्षते ।
अन्योऽन्यताडनं प्राहुः सम्पातमुभयोरपि ॥
आधिक्यमात्मनो यत्र तत् समुदीक्षमुदीरितम् ।
अङ्गप्रत्यङ्गदर्शेषु भ्रामश्च भारत स्मृतम् ॥
विविधखड्गसम्पातदर्शनं कौशिकं स्मृतम् ।
निलीय चर्म्मणि चापो यदसि खाखत दि तत ॥"
तस्य परीक्षा तरवारिशब्दे द्रष्टव्या ॥ (अस्य लक्षणादिकं यथा, बृहत्संहितायां ५०अध्याये ।
"अङ्गुलशतार्द्धमुत्तम ऊनः स्यात् पञ्चविंशतिः खड्गः ।
अङ्गुलमानाज्ज्ञेयो व्रणोऽशुभो विषमपर्व्वस्थः ॥
श्रीवृक्षवर्द्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम् ।
सदृशा व्रणाः प्रशस्ता ध्वजायुधस्वस्तिकाभाश्च ॥
कृकलासकाककङ्ककव्यादकबन्धवृश्चिकाकृतयः ।
खड्गे व्रणा न शुभदा वंशानुगताः प्रभूताश्च ॥
स्फुटितो ह्रस्वः कुण्ठो वंशच्छिन्नो न दृङ्मनो
ऽनुगतः ।
अस्वन इति चानिष्टः प्रोक्तविपर्य्यस्त इष्टफलः ॥
क्वणितं मरणायोक्तं पराजयाय प्रवर्त्तनं कोशात् ।
स्वयमुद्गीर्णे युद्धं ज्वलिते विजयो भवति खड्गे ॥
नाकारणं विवृणुयान्न विघट्टयेच्च
पश्येन्न तत्र वदनं न वदेच्च मूल्यम् ।
देशं न चास्य कथयेत् प्रतिमानयेच्च
नैव स्पृशेन्नृपतिरप्रयतोऽसियष्टिम् ॥
गोजिह्वासंस्थानो नीलोत्पलवंशपत्रसदृशश्च ।
करवीरपत्रशूलाग्रमण्डलाग्राः प्रशस्ताः स्युः ॥
निष्पन्नो न च्छेद्यो निकषैः कार्य्यः प्रमाणयुक्तः सः ।
मूले म्रियते स्वामी जननी तस्याप्यतश्छिन्ने ॥
यस्मिन् स्थाने निम्नो भवेद्व्रणस्तद्वदेव खड्गस्य ।
वनितानामिव तिलकं गुह्ये वाच्यो मुखे दृष्टः ॥
अथवा स्पृशति यदङ्गं प्रष्टा निस्त्रिंशभृत्तद-
ङ्गस्थे ।
कोशस्थस्यादेश्यो व्रणोऽसिवेदी विनिर्द्दिष्टम् ॥
शिरसि स्पृष्टे प्रथमेऽङ्गुले द्वितीये ललाटस्पर्शे ।
भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे ॥
नासौष्ठकपोलहनुश्रवणग्रीवांसकेषु पञ्चाद्या ।
उरसि द्वादश्यांस्तु कक्षयोर्द्दशे चायु ॥
स्तनहृदयोदरकुक्षीनाभीषु चतुर्दशादयो ज्ञेया ।
नाभीमूले कट्यां गुह्ये चैकोनविंशतिका ॥
ऊर्व्वोर्विंशे ज्ञेया ऊरुमध्ये त्वथ जानुनोर्विंशे ।
जान्वोश्च चतुर्विंशे जङ्घायां पञ्चविंशे च ॥
जङ्घामध्ये गुल्फे पादौ पादे अङ्गुष्ठेऽन्त्ये च ।
खड्गे विषमस्थाने व्रणाः समे ... ॥
... ॥
... ॥
... ॥
... ॥

"खट्टाङ्गी चीरवासा वा भस्मधूली विजने वने ।
प्राणायाम चरेत् कष्टमन्दमेक समाहित ॥")

खट्टारूढ, त्रि, (खट्टामारूढः । "खट्टा क्षेपे ।" २।१।२६ । इति निन्दायां द्वितीयान्तस्य क्तान्तेन नित्यसमास ।) अविनीत । प्रमादवान् । इति सिद्धान्तकौमुदी(?)प्रयोगौ ॥ (यथा, भट्टौ ।५।१०।
"इतस्त पार्श्वमिते खट्टारूढ प्रमादवान् ।
पानशौण्ड इव नैसा नात्यर्थमलंस्तु काना ॥"
'खट्टारूढ उत्पथस्थित । खट्टा क्षेपे इति द्वितीया ।" इति जयमङ्गलटीका ॥) खट्टारूढो वरो जाल्म । इति कलापव्याकरणम् ॥ (वेद-व्रतानि च समाप्य समावर्त्तनेन हि खट्टा रोढ्या ब्रह्मचर्य एव भूमिशयनशीलोऽपि य खट्टामारोहति स जाल्म । रूढ्याय तेन खट्टामारोहतु मा वा विहितावहेलनपर सर्व्वोऽपि खट्टारूढ उच्यते। इति शब्दार्थचिन्तामणि ॥) खट्टोपरिस्थितश्च ॥

खट्टिका, स्त्री, (अल्पा खट्टा । अल्पार्थे कन् । अत इत्वञ्च ।) क्षुद्रखट्टा । इति जटाधर ॥ खट्टाविशेष । तद्युक्तियथा,—
"अष्टषष्टियवैश्चाप्यां चतु षड्दलकोणिका ।
खट्टिका सुखसम्भूता सुखरक्ताचितामरा ॥"
इति युक्तिकल्पतरौ खट्टिकोद्देश ॥

खड ङ ड मथि । इति कविकल्पद्रुम ॥ (भ्वा-आत्म सक-सेट । इदित ।) मथि मन्थने मन्थनपेषण भञ्जनम् । ङ, खण्डते । ड खण्ड्यते दण्डेन भाण्ड लोक । इति दुर्गादास ॥

खड, क भेदे । इति कविकल्पद्रुम ॥ (चुरा-पर-सक सेट ।) क, खाडयति । इति दुर्गादास ॥

खड्, स्त्री, पु, (खण्ड्यते छिद्यते धान्यं यस्मै यति इति । खड्+कर्म्मणि घञ ।) लघुलवणम् । इति शब्दरत्नावली । खड इति भाषा ॥

खड, पुं (खड+भावकर्म्मादौ यथायथ अच ।) धान्यान्तरम् । भेद । इति मेदिनी । डे । ८ ॥ खड्यूषो यथा सूकरसे ।
"तक्रं कपित्थचाङ्गेरीमरिचाजाजिचित्रकै ।
सुपक्व खड्यूषोऽयमथ काम्बलिकोऽपर ॥"

खड्डिका स्त्री,(खड्क इत्यव्यक्तशब्द करोतीति । क+बाहुलकात् ड ततो गौरादित्वात् ङीष् । तत स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) पक्षद्वारम्। इति हारावली । खडकिद्वार इति भाषा ॥

खड्, पुं (खड्+अतृप्रत्यय ।) बाहुभूषण भरणम् । इति सिद्धान्तसारे उणादिवृत्ति ॥

खटिका, स्त्री (खट् +अच+गौरादित्वात् ङीष्। तत स्वार्थे कन् पूर्व्वह्रस्व ।) कठिनी । इति जटाधर ॥

खटी, स्त्री, (खट्+अच्+ततो ङीष् ।) कठिनी। लेखनार्थ(?)विशेष । इति शब्द-चन्द्रिका ॥ अस्या गुणपर्य्यायौ कठिनीशब्दे खटीशब्दे च द्रष्टव्यौ ॥

खड् स्त्री (खड्+"अदिभ्य(?) ।" उणा ।१।८४। इति कु ।) अतद्या । (बाहुभूषणाभरणम् । इत्युज्ज्वल ॥)

खड्गा स्त्री, (खड भेदे+ 'छापूखडिभ्य कित ।" उणा ।१।१२३ । इति गन् प्रत्यय ।) लोहम् । इति राजनिघण्ट ॥

खड्ग, पुं, (खडति भिनत्तीति । खड+"छापू खडिभ्य कित ।" उणा ।१।१२३ । इति गन् ।) गण्डक । गण्डार इति भाषा ॥ (यथा, मनु । ३ । २७२ ।
"कालशाक महाशल्का खड्गलोहामिषं मधु ।
आनन्त्यायैव कल्प्यन्ते मुन्यन्नानि च सर्व्वश ॥"
"खड्गो गण्डक लोहो लोहितवर्णश्छाग एव ।"
इति कुल्लूकभट्ट ॥) गण्डकशृङ्गम् । खाग इति भाषा । बुद्धभेद । इति मेदिनी ॥ चोरकनाम-गन्धद्रव्यम् । इति राजनिर्घण्ट ॥ अस्त्रविशेष । खाड़ा तरवाल इत्यादि भाषा ॥ (यथा, महा भारते । ४ । ४१ । २५ ।
"यस्तय विपुल खड्गो गव्ये कोषे समर्पित ।
सहदेवस्य विद्ध्येन सर्व्वभारसह दृढम ॥")
तत्पर्य्याय । निस्त्रिंश २ चन्द्रहास ३ असि ४ रिष्टि ५ कौक्षेयक ६ मण्डलाग्र ७ करवाल ८ कृपाण ९ । इत्यमर ।२।८।८९ ॥ कृष्टि १० कर-पाल ११ । इति तट्टीका ॥ विशसन १२ तीक्ष्णधार १३ दुरासद १४ श्रीगर्भ १५ विजय १६ धर्म्मपाल १७ कौक्षेय १८ तरवारि १९ रावराज २० कृपाणक २१ कृपाणी २२ भुजङ्ग २३ । इति शब्दरत्नावली ॥ ● ॥ तस्योत्-पत्तिप्रकारो यत्रार्थो यथा,—
"विकीर्य्यापि तथाभूतस्तस्थित सूयते तदा ।
नीलोत्पलसवर्णाभ तीक्ष्णदंष्ट्र कृशोदरम् ॥
प्रांशु सुदर्शनतर तथैव ह्यमितौजसम् ।
ततस्तद्रूपसंवृत्तस्य बभौ निस्त्रिंश एव स ॥
विमलस्तीक्ष्णधारश्च कालान्तक इवोद्यत ।
तत स शितिकण्ठाय रुद्रायवृषकेतवे ॥
ब्रह्मा ददावसिं तीक्ष्णमधर्म्मप्रतिवारणम् ।
तत स भगवान् रुद्रो दानवक्षतशोणितम् ॥
असिं धर्म्मस्य गोप्तार ददौ सत्कृत्य विष्णवे ।
विष्णुर्मरीचये स महर्षिभ्य स इन्द्राय स लोक पालेभ्य स मनवे क्षुपाय स सुपाय स इक्ष्वाकवे स पुरूरवसे स आयवे स नहुषाय स ययातये स पूरवे स अमूर्त्तरयसे स भूमिशयाय स भरताय स ऐडविडाय स धुन्धुमाराय स काम्बोजाय स मुचुकुन्दाय स मरुत्ताय स रैवताय स युवनाश्वाय स रघवे स हरिणाश्वाय स शुनकाय स उशीनराय स भोजाय स शिबये स प्रतर्दनाय स अष्टकाय स पृषदश्वाय स भरद्वाजाय स द्रोणाय स कृपाय स पाण्डवेभ्यो दत्तवान् ॥ ● ॥ अथ खड्गविवेककथयोदय विशेषवत्य यथा, महाभारते ।
"भक्तलाकारेण खड्गश्चाकल्प आलक्ष्यते ।
लदर बाहुदाढ्य ततन्तभाक्रमोदितम् ॥
धामस मद परित खड्गस्यासीदयते ।
भरवग्नुकस्थाय मारदाद ॥
इन्दोराजमदाय ततुमाहुर्त मनम् ।
खड्गस्यापि महेश्वरोर्ग प्रन्त मतम् ॥
सर्व्वयित्वा रिपौ खड्गपातनं गदित सुतम् ।
परिहत्य भवेत प्रशोषामर्दनिघ्नतो गति ॥
पश्चात महायमस्य निशस्य सम्पद्यते ।
अन्योऽन्यताडनं प्राहु सम्पातमुभयोरपि ॥
आधिक्यमात्मनो यत् तत सम्प्रदीकमुदीरितम् ।
अङ्गप्रत्यङ्गदेशेषु भ्रामण भारत स्मृतम ॥
विचित्रखड्गसञ्चारदर्शनं कौशिकं स्मृतम् ।
निलीय चर्म्मणि क्षेपो यदसे आखात दि सत् ॥"
तस्य परीक्षा नरवारिशब्दे द्रष्टव्या ॥ (अस्य लक्षणादिकं यथा, बृहत्संहितायां ५ अध्याये ।
"अङ्गुलशतार्द्धमुत्तम ऊन स्यात्पञ्चविंशति खड्ग ।
अङ्गुलमानाद्विज्ञेयो व्रणोऽशुभो विषमपर्वस्थ ॥
श्रीवृक्षवर्द्धमानातपत्रशिवलिङ्गकुण्डलाब्जानाम् ।
सदृशा व्रणा प्रशस्ता ध्वजायुधस्वस्तिकानाञ्च ॥
कृकलासकाककङ्ककक्रव्यादकबन्धवृश्चिकाकृतय ।
खड्गे व्रणा न शुभदा वंशानुगा प्रभूताश्च ॥
स्फुटितो ह्रस्व कुण्ठो वंशच्छिन्नो न दृक्मनो
ऽनुगत ।
अस्वन इति चानिष्ट प्रोक्तविपर्य्यस्त इष्टफल ॥
क्वणित मरणायोक्त पराजयाय प्रवर्त्तन कोषात् ।
स्वयमुद्गीर्णे युद्ध ज्वलिते विजयो भवति खड्गे ॥
नाकारणं विवृणुयान्न विघट्टयेच्च
पश्येन्न तत्र वदनं न वदेच्च मूल्यम् ।
देशं न चास्य कथयेत् प्रतिमानयेच्च
नैव स्पृशेन्नृपतिरप्रयतोऽसियष्टिम् ॥
गोजिह्वासंस्थानो नीलोत्पलवंशपत्रसदृशश्च ।
करवीरपत्रशूलाग्रमण्डलाग्रा प्रशस्ता स्यु ॥
निष्पन्नो न च्छेद्यो निकषै कार्य्य प्रमाणयुक्त स ।
मूले म्रियते स्वामी जननी तस्याग्रतश्छिन्ने ॥
यस्मिन् तत्प्रदेशे व्रणो भवेत्तद्वदन खड्गस्य ।
वनितानामिव तिलको गुह्ये वाच्यो मुखे दृष्ट्वा ॥
अथवा स्पृशति यदङ्ग प्रष्टा निस्त्रिंशभृद्व्रण-
स्तस्मिन् ।
कोशस्थस्यादेश्यो व्रणोऽसि धाता विनिर्दिष्टम् ॥
शिरसि स्पृष्टे प्रथमेऽङ्गुले द्वितीये ललाटसंस्पर्शे ।
भ्रूमध्ये च तृतीये नेत्रे स्पृष्टे चतुर्थे ॥
नासोष्ठकपोलहनुश्रवणग्रीवांसवेश्म पञ्चाद्या ।
उरसि द्वादश त्रयोदशे कक्षयोर्ज्ञेय ॥
स्तनहृदयोदरकुक्षीनाभीषु चतुर्दशाद्यो ज्ञेय ।
नाभीमूले कट्यां गुह्ये विंशतिपर्यन्तम् ॥
ऊर्वोर्द्वाविंशे स्यात् ऊर्वोर्मध्ये त्रयोविंशे ।
जानुनि च चतुर्विंशे जङ्घायां पञ्चविंशे च ॥
जङ्घामध्ये गुल्फे पार्ष्ण्यां पादे तथाङ्गुलीषु च ।
खड्ग विभागविभाजितदेशे व्रणस्य फलम् ॥
पुत्रमरण धनाप्तिर्धनहानि सम्पदश्च बन्धश्च ।
एकाद्युत्तरसंख्यैर्व्रणस्य निर्देशक्रमश ॥
सुतलाभ कलहो हस्तिलाभ पुत्रमृति
धनलाभौ ।
इन्द्रो विनाशवनितालाभान्नमानसं परिक्लेश ॥
लाभाप्तिरत्रसंख्या ग्राम्यस्त्रीलब्धिरपि ।
वैरं शत्रुभयं स्वं ददाति खड्गो विनाशं यात ॥

[illegible]

[illegible]

[illegible]

खण्डाभ्र, क्ली, (खण्डं अभ्रं मेघः ।) अभ्रलेशः । छेंडा मेघ इति भाषा । दन्तक्षतविशेषः । इति मेदिनी ॥

खण्डिक, पुं, (खण्डोऽस्त्यास्यास्तीति । ठन् ।) कलायः । कड़ाइ इति भाषा । इत्यमरः ॥ (अस्य पर्य्याया यथा,— [अथ ॥"
"त्रिपुटः खण्डिकोऽपि स्यात् कथ्यन्ते तद्गुणा
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ गुणाश्चास्य त्रिपुटशब्दे ज्ञातव्याः ॥) काक्षः । इति हेमचन्द्रः ॥ वगल इति भाषा ॥

खण्डितं, त्रि (खडि + क्त ।) खण्डीकृतम् । तत्पर्य्यायः । छिन्नम् २ लूनम् ३ छितम् ४ दितम् ५ छेदितम् ६ वृक्णम् ७ कृत्तम् ८ । इति हेमचन्द्रः ॥ (यथाह शब्दार्थचिन्तामणिः ।

"चन्द्रे कलङ्कः सुजने दरिद्रता
विकाशलक्ष्मीः कमलेषु चञ्चला ।
सुखेऽप्रसादः सघनेषु सर्व्वदा
यशो विधातुः कथयन्ति खण्डितम् ॥"

खण्डिताङ्गः । खण्डिताङ्गत्व दुष्टवपनकर्म्मविपाक । यथाह शातातपः । ३ अध्याये ।
"दुष्टवादी खण्डितः स्यात् स वै दद्यात् द्विजातये । रूप्यं पलद्वयं दुग्धं घटद्वयसमन्वितम् ॥")

खण्डिता, स्त्री (खण्डित + टाप् ।) स्वीयान्यनायिकाया भेदः । अस्याः लक्षणम् । अन्योपभोगचिह्नितः पतिः प्रातरागच्छति यस्याः सा । अस्याश्चेष्टा । "अस्फुटालापचिन्तासन्तापनिःश्वासतूष्णीम्भावाश्रुपातादयः ।" इति रसमञ्जरी ॥ (साहित्यदर्पणोक्तलक्षणं यथा तत्रैव । ३ । ८३ ।
"पार्श्वमेति प्रियो यस्या अन्यसम्भोगचिह्नितः । सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता ॥"
उदाहरणं यथा, तत्रैव ।

"तदवितथमवादीर्यन्मम त्वं प्रियेति
प्रियजनपरिभुक्तं यद्दुकूलं दधानः ।
मदधिवसतिमागाः कामिनां मण्डनश्री-
र्व्रजति हि सफलत्वं वल्लभालोकनेन ॥")

खण्डिनी स्त्री (खण्डोऽस्त्यस्याः इति । खण्ड + इनि । स्त्रियां ङीप् । यद्वा खण्डयति आत्मानं द्वीपपर्व्वतसमुद्रादिव्यवच्छेदेनेति शेषः । खडि + णिनि ।) पृथ्वी । इति शब्दरत्नावली ॥

खण्डी, [न्] पुं (खण्डयति आत्मानं छिद्रजलस्येन इति । खडि + णिनि ।) वनमुद्गः । इति हेमचन्द्रः ॥

खण्डीरः, पुं, (खण्डी + मुस्तादित्वात् रः ।) मारषः । इति हेमचन्द्रः ॥

खतमालः पुं (खे आकाशे तमाल इव तमालः इव । तत्सवर्णत्वात्तथात्वम् ।) धूमः । मेघः । इति मेदिनी ॥

खद, स्थैर्य्ये । वधे । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सकं-स्थैर्य्ये तु अकं सेट् ।) खदति । इति दुर्गादासः ॥

खदिका, स्त्री, (खे भर्जनपात्रादूर्द्ध्वाकाशे दीयते खण्डायते इति । खं + दो अवखण्डने + घञर्थे क । ततः सञ्ज्ञायां कन् टाप् अत इत्वञ्च ।) लाजा । इति त्रिकाण्डशेषः ॥ खइ इति भाषा ॥

खदिरः, पुं, (खद स्थैर्य्यहिंसयोः + "अजिरशिशिरशिथिलेति ।" उणां । १ । ५४ । इति किरच् ।) वृक्षविशेषः । खयेरगाछ इति भाषा । तत्पर्य्यायः । गायत्री २ बालतनयः ३ दन्तधावनः ४ । इत्यमरः । २ । ४ । ४९ ॥ तिक्तसारः ५ कण्टकीद्रुमः ६ । इति रत्नमाला ॥ बालपत्रः ७ खद्रपत्री ८ क्षितिक्षमः ९ सुशल्यः १० वक्रकण्टः ११ यज्ञाङ्गः १२ जिह्मशल्यः १३ कण्टी १४ सारद्रुमः १५ कुष्ठारिः १६ बहुसारः १७ मेध्यः १८ बालपुत्रः १९ रक्तसारः २० कर्कटी २१ जिह्मशल्यः २२ । इति जटाधरः ॥ कुष्ठहृत् २३ बालपत्रकम् २४ यूपद्रुमः २५ । इति शब्दरत्नावली ॥ अपि च भावप्रकाशे ।
"खदिरो रक्तसारश्च गायत्री दन्तधावनः ।
कण्टकी बालपत्रश्च बहुशल्यश्च याज्ञिकः ॥
खदिरः शीतलो दन्त्यः कण्डूकासारुचिप्रणुत् ।
तिक्तः कषायो मेदोघ्नः कृमिमेहज्वरव्रणान् ।
श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् हरेत् ॥"
अस्य गुणाः । तिक्तरसत्वम् । शीतत्वम् । पित्तकफकुष्ठकासरक्तशोधकण्डूव्रणनाशित्वं । पाचनत्वञ्च । इति राजनिर्घण्टः ॥ विसर्पदद्रुकामेहमेदोनाशित्वम् । इति राजवल्लभः ॥ (अथ श्वेतखदिरः । सफेद खयेर इति भाषा ॥
"खदिरः श्वेतसारोऽन्यः कदरः सोमवल्कलः ।
कदरो विशदो वर्ण्यो मुखरोगकफास्रजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे च ॥
खदति हन्ति शत्रून् इति । खद + किरच् ।) इन्द्रः । इति त्रिकाण्डशेषः ॥ (खे आकाशे दीयते यस्मात् चन्द्रलोकादिप्राप्तिकारकयज्ञादिकर्म्मभिः । दो + बाहुलकात् अपादाने किरच् । इष्टापूर्त्तादिकर्म्मिणो हि आरब्धाम्नायदक्षिणमार्गेण चन्द्रमण्डलात् आकाशे पतन्ति तथात्वम् ।) चन्द्रः । इति मेदिनी ॥ (तथा च सायणभाष्ये । 'येन कर्म्महेतुना चन्द्रमण्डलमारूढाः फलाय भोगाय तस्मिन् उपभोगेन क्षयिते तेषां चन्द्रमसि शरीरं चन्द्रमस्युपभोगायारब्धं तदुपभोगनिमित्तशोकाग्निसम्पर्क्कात् प्रविलीयते सविशेषसम्पर्क्कात् हिमकरका इव घृतकाठिन्यमिव च घृतकाठिन्यम् । तत् शतावये तत्र इष्टादि कर्म्मिणः फलोपभोगनिमित्ते ऽवति [illegible] ।")

खदिरपत्रिका स्त्री,(खदिरस्य पत्रमिव पत्रमस्याः । कप् कापि अत इत्वम् ।) अरिमेदः । लज्जालुलता । इति राजनिर्घण्टः ॥

खदिरपत्री, स्त्री (खदिरस्य पत्रमिव पत्रमस्याः ।) लज्जालुलता । इति वैद्यकम् ॥

खदिरा, स्त्री, (खदिरस्य पत्राकारो अस्त्यस्याः । अच् टाप् च ।) लज्जालुलता । इति राजनिर्घण्टः ॥

खदिरिका, स्त्री, (खदिरेव खदिरवर्णेन कायो इव ऽस्त्यस्याः । अस्त्यर्थे + ठन् ततः टाप् ।) लाजा । इति राजनिर्घण्टः ॥

खदिरी, स्त्री, (खद + किरच् । गौरादित्वात् ङीष् ।) खदिराकारम् । लाजालु इति ख्याता । इति केचित् । किन्तु रभसेन वराहक्रान्ता लज्जालुः समङ्गा जलकारिकेति खदिरिकायां षट्कोषपर्णी लज्जालुरिति लज्जालुकायां पठितम् । इति भरतः ॥ तत्पर्य्यायः । नमस्कारी २ गण्डकाली ३ समङ्गा ४ । इत्यमरः । २ । ४ । १४१ ॥ (क्वचित् खदिरेति पाठो दृश्यते ॥) गण्डकारी ५ । इति भरतः ॥ शमीपत्रा ६ रक्तपदी ७ अञ्जलिकारिका ८ रावा ॥ इति जटाधरः ॥
("गण्डकाली नमस्कारी समङ्गा खदिरी कथिता ।"
इति वैद्यकरत्नमालायाम् ॥)

खदिरोपम क्ली,(खदिरेण उपमीयते इति । खदिर उपमा अस्य वा ।) कदरः । इति रत्नमाला ॥ कांटा वावला इति भाषा ॥

खदूरवासिनी, स्त्री, (खे शून्ये दूरे च वसतीति । वस + णिनि । ततो ङीप् ।) बुद्धशक्तिविशेषः । इति त्रिकाण्डशेषः ॥

खद्योत, पुं, (खं आकाशं द्योतयतीति । द्युत दीप्तौ + णिच् + "कर्म्मण्यण् ।" ३ । २ । १ । इति अण् ।) सूर्य्यः । इति जटाधरः ॥ (यथा, भागवते । ४ । २९ । १० ।
"खद्योताविर्मुखी चात्र नेत्रे एकत्र निर्म्मिते । रूपं विभ्राजितं ताभ्यां विचष्टे चक्षुषेश्वरः ॥"
नेत्रस्य हि सूर्य्याधिष्ठातृतया तदभिन्नत्वमिति प्रसिद्धेस्तथात्वम् ॥ खे आकाशे द्योतते इति । द्युत् + अच् ।) कीटविशेषः । जोनाक पोका इति भाषा । तत्पर्य्यायः । ज्योतिरिङ्गणः २ । इत्यमरः । २ । ५ । २८ ॥ खज्योतिः ३ प्रभाकीटः ४ उपसूर्य्यकः ५ । इति राजनिर्घण्टः ॥ ध्वान्तोन्मेषः ६ तमोमणिः ७ दृष्टिबन्धुः ८ तमोज्योतिः ९ ज्योतिरिङ्गः १० निमेषकः ११ । इति शब्दरत्नावली ॥ (यथा, किरातार्ज्जुनीये । ५ । १६ । ४६ ।
"दिविसदनगरहा
सर [illegible] वनेचरवारितम् ।
विवाद्य परमगुरो
क्रियदिव [illegible] खद्योतैः ॥")

खद्योतनः, पुं (द्योतयतीति । द्युत + णिच् + ल्युट् । ततः खस्य आकाशस्य द्योतनः प्रकाशकः ।) सूर्य्यः । इति जटाधरः ॥

खधूपः, पुं (खं आकाशं धूपयति । खे धूप इव धूप्यते वा । धूप + "कर्म्मण्यण् ।" । ३ । २ । १ । इति अण् ।) अग्निक्रीडाविशेषः । हाउइ इति भाषा । यथा भट्टिः । १ । १ ।
"उत्पातधूमकुसुमस्य [illegible]
[illegible] ॥"

खन अ ज न विदारे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) अ, खनिता कातन्त्र । न

[illegible]

[illegible]

[illegible]

खरघातन, पु, (खर उग्र रोगविशेषं घातयतीति। हन्+स्वार्थे णिच्+कर्त्तरि ल्यु।) नागकेशरः। इति शब्दचन्द्रिका॥ (खर एतन्नाम्ना प्रसिद्ध राक्षस घातयतीति। श्रीरामचन्द्रः। इति युक्तिकल्पतरौ॥)

खरच्छद पु, (खरस्तीक्ष्णः छदः पत्रमस्य।) उलूकम्। उलुखड़ इति भाषा॥ इत्कटः। ओकड़ा इति भाषा। इति रत्नमाला॥ क्षुद्ररक्तणम्। इति राजनिघण्टः॥

खरणस, त्रि, (खरा तीक्ष्णा नासिका यस्य। "खुरखराभ्यां वा नस्।" इति वार्त्तिं मते 'अच् नासिकायाः।" ५।४।११८। इत्यच नसादेशश्च। तत "पूर्व्वपदात् संज्ञायामगः।"८।४।३। इति णत्वम्।) तीक्ष्णनासिकः। तत्पर्य्यायः। खरणाः २। इत्यमरः।२।६।४६॥

खरणा, [स्] त्रि (खरा तीक्ष्णा नासिका यस्य। "खुरखराभ्यां वा नस्।" वार्त्तिं इति नसादेशः। "पूर्व्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) तीक्ष्णनासिकः। इत्यमरः। २।६।४६॥

खरत्वक् स्त्री (खरा तीक्ष्णा त्वक् यस्याः।) अलम्बुषा। लज्जालुप्रभेदः। इति भावप्रकाशः॥

खरदण्ड क्ली (खरः कर्कशः दण्डो मृणाल यस्य कण्टकाढ्यत्वादिति भावः।) पद्मम्। इति धरणी॥

खरदला स्त्री (खर कर्कश दल पत्रमस्याः।) घोमाघणा। इति शब्दचन्द्रिका॥ सुसर इति भाषा॥

खरदूषण, पुं (खरं उग्र दूषणं मारकताणनकदोषो यत्र।) धुस्तूरः। इति शब्दचन्द्रिका॥ खरेण राक्षसेन सह दूषणश्च॥ (त्रि बहुत्रीहिः॥)

खरध्वंसी [न्] पुं (खरं स्वनामविश्रुत राक्षसं ध्वंसयतीति। ध्वन्स+णिच्+णिनिः।) श्रीरामः। इति शब्दरत्नावली॥ (खरं कर्कशं दैत्यं ध्वंसयतीति। कृष्णः। इति युक्तिकल्पतरौ॥)

खरनादिनी स्त्री (खर कर्कश नदतीति। नद+णिनि। तत स्त्रियां ङीप्।) रेणुकानामगन्धद्रव्यम्। इति शब्दचन्द्रिका॥

खरपत्र पुं (खर पत्रमस्य।) मुद्गपर्णतुलसी। शाकोटवृक्षः। इति रत्नमाला॥ पारणाल मरः। इक्षुदर्भः। मरुवक। इति राजनिघण्टः॥

खरपत्रक पुं (खरपत्र+कप् संज्ञायां कन् वा।) तिलकवृक्षः। इति शब्दचन्द्रिका॥

खरपत्री स्त्री (खरपत्र+गौरादित्वात् ङीष्।) गोजिह्वावृक्षः। काकोडुम्बरिका। इति राजनिघण्टः॥

खरपार्श्व क्ली (खर कठोर कठिन वा पार्श्वम्।) लौहपात्रम्। इति त्रिकाण्डशेषः॥

खरपादाढ्य, पुं (खरै कठि पादैमूलैराढ्य।) कपित्थवृक्षः। इति शब्दचन्द्रिका॥

खरपुष्प, पु (खर पुष्पमस्य।) मरुवकवृक्षः। इति रत्नमाला॥

खरपुष्पा स्त्री (खर पुष्प खराणि पुष्पाणि वा यस्याः।) बर्ब्बरा। इत्यमरः।२।४।१३६॥ बाबुइ तुलसी इति भाषा॥ (यथास्याः पर्य्यायाः। "बर्ब्बरी तुवरी तुङ्गी खरपुष्पाजगन्धिका॥" इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे। व्यवहारोऽस्या यथा चरके विमानस्थानेऽष्टमेऽध्याये कटुकस्कन्धे। "एला कुष्ठ भल्लातकास्थि-हिङ्गु किलिम मूलक सर्षप-लसुन करञ्ज शिग्रुक मधुशिग्रुक खरपुष्पा" इत्यादिषु॥)

खरप्रिय पु (खल धान्यकलायादिमर्द्दनस्थान प्रियोऽस्य। लस्य रत्वम्।) पारावतः। इति शब्दमाला॥

खरमञ्जरी स्त्री (खरा मञ्जरी यस्याः।) अपामार्गः। इत्यमरः।२।४।८९॥ (स्वर्ज्जिकाद्यतैलेऽस्या व्यवहारो यथा,—

"स्वर्ज्जिकासिन्धुरस्थबिल्वमिषानलनीलिका।
खरमञ्जरीबीजेषु तैल गोमूत्रपाचितम्।
दुष्टव्रणप्रशमन कफनाड़ीव्रणापहम्॥"

इति वैद्यकचक्रपाणिसङ्ग्रहे नाड़ीव्रणाधिकारे॥)

खररोमा [न्,] पुं (खर रोम यस्य।) नागभेदः। इति जटाधरः॥

खरवल्लिका स्त्री (खरा मञ्जरी तत स्वार्थे कन् टाप् च इकारस्य ह्रस्वत्व रस्य लत्वञ्च।) नागबला। इति रत्नमाला॥ गोरक्षचाउलिया इति भाषा॥

खरशब्द पु (खर उग्र शब्दोऽस्य।) कुररपक्षी। इति राजनिघण्टः॥

खरशाक पुं (खर शाकमस्य।) भार्गी। इति भावप्रकाशः॥ बामनहाटी इति भाषा॥

खरस्कन्ध पुं (खरः स्कन्धोऽस्य।) प्रियालवृक्षः। इति राजनिर्घण्टः॥

खरस्कन्धा, स्त्री (खर स्कन्धोऽस्याः।) खर्ज्जूरी। इति राजनिर्घण्टः॥

खरस्वरा स्त्री (खर रौद्र स्वरति नाशयतीति। स्वृ+अच्।) वनमल्लिका। इति रत्नमाला॥

खरा स्त्री (ख आकाश राति गृह्णातीति। रा+क। तस्य रत्वम्।) देवताडवृक्षः। इत्यमरः।२।४।१६०॥

खरांशुः, पुं (खरा कर्कशा अंशवो रश्मयो यस्य।) सूर्य्य। इति त्रिकाण्डशेषः॥

खरामरी स्त्री, (खरं आमृणातीति। आ+मृ+अच्। ततो गौरादित्वात् ङीष्।) देवताडवृक्षः। इत्यमरटीकायां रायमुकुटः॥ (पर्य्यायोऽस्या यथा वैद्यकरत्नमालायाम्।

"वक्री जीमूतकश्चासुविरावित्याभदत्वर।
खरामरी करमश सुहृको दन्ताङ्कः॥")

खराब्दाङ्कुरक क्ली (खराब्दात तीक्ष्णमेघात अङ्कुरयतीति। अङ्कुर+ण्वुल्। अत्र हि मेघगर्जनश्रवणेनैवाङ्कुरोत्पत्तेस्तथात्वम्।) वैदूर्य्यमणिः। इति राजनिघण्टः॥

खराश्वा स्त्री (खरैरश्यते भुज्यतेऽसौ। अश भोजने+"उल्वादयश्च।" उणा।४।९५। इति व।) मयूरशिखा। वनलटा इति ख्याता। चेक्षपमाणिका इति केचित्। इत्यमरभरतौ॥ (यथास्या गुणाः।

"खराश्वा कफवातघ्नी बस्तिरोगरुजापहा॥"

इति चरके सूत्रस्थाने सप्तविंशेऽध्याये॥)

खराह्वा स्त्री (खर तीव्रगन्ध आह्वयतीति। ह्वे+क। स्त्रियां टाप्।) अजमोदा। इति राजनिर्घण्टः॥ (पर्य्यायोऽस्या यथा—

"अजगन्धाजमोदाख्या खराह्वा कारवी च सा॥"

इति वैद्यकरत्नमालायाम्॥)

खरिका स्त्री (खात शून्यात गन्धविशेष रातीति। रा+क तत संज्ञायां कन् टाप् अत इत्वञ्च।) कस्तूरीभेदः। सा तु चूर्णाकृतिः। इति राजनिघण्टः॥

खर्ज्ज, पु (खन्+"खर्जपिञ्जादिभ्य ऊरोलचौ।" उणा।१।९०। इति कुः रश्चान्तादेश।) शिवः। चय। दय। दन्तः। इति मेदिनी। रे।२१॥ कामदेवः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ सूर्य्यः। इति हेमचन्द्रः॥

खर्ज्ज त्रि (खन्+"खर्जपिञ्जादिभ्य ऊरोलचौ।" उणा १।९०। इति कुः रश्चान्तादेशः।) श्वेत। इति मेदिनी। र।२१। निर्बुद्धिकरवे। इति हेमचन्द्रः॥ निर्बोधः। क्रूरः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ तीक्ष्णः। इति संक्षिप्तसारे उणादिवृत्तिः॥

खर्ज्जं व्यथायाम्। इति कविकल्पद्रुमः॥ (भ्वां पर अक सेट।) खर्ज्जति। अट माज्जनम्। इति दुर्गादासः॥

खर्ज्जिका स्त्री (खर्ज्ज+ण्वुल्+स्त्रियां टाप् अत इत्वञ्च।) अवदंशः। इति शब्दचन्द्रिका॥

खर्ज्जु पुं (खर्ज्ज+उन्।) खर्ज्जूरी। कण्डूः। कीटः। इति हेमचन्द्रः॥

खर्ज्जुर क्ली (खर्ज्ज+उरच्।) रौप्यम्। इत्यमरटीकायां रमानाथः॥

खर्ज्जू स्त्री (खर्ज्ज व्यथने+"कृषि चमितनीति।" उणा।१।८२। इति ऊ।) कण्डूः। कीटः। इत्युणादिकोषः॥

खर्ज्जूघ्न पुं (खर्ज्जू कण्डूयनं हन्तीति। हन्+टक्।) चक्रमर्दः। धुस्तूरः। अर्कवृक्षः। इति राजनिर्घण्टः॥

खर्ज्जूर क्ली (खर्ज्जूरस्य फलम्। फले [illegible] तस्याणो लुप्।) खर्ज्जूरफलम्। अस्य गुणाः। मधुरत्वम्। शीतलत्वम्। गुरुत्वम्। [illegible] [illegible] हितत्वम्। [illegible]। [illegible] इति राजवल्लभः॥ ("[illegible] [illegible]। [illegible]॥" इति [illegible] [illegible]। [illegible]। "मधुर [illegible] खर्ज्जूर गुरु शीतलम्।

खलाधारा, स्त्री (खल आधारो यस्याः ।) तैलपायिका । इति जटाधरः ॥ आरसुला इति भाषा ॥

खलि, पुं (खल+इन ।) तैलकिट्टम् । इति राजनिर्घण्टः ॥ (यथा भारतरत्नाकरे । ७।६८ ।
"खाल्यां पैटूर्यमयी पचति तिलगलित चन्दमे दिव्यनीधे ॥")

खलिन, पुं स्त्री (खे अश्वमुखच्छिद्रे लीनं पृषोदरादित्वात् वा ह्रस्वः ।) खलीनः । इत्यमरटीकायां रायमुकुटः ॥ (यथा, कादम्बर्य्याम् "उभयत खलिनकनककटकावलम्बाभ्यां पदे पदे हसाकुञ्चनप्रयत्नाभ्यां पुरुषाभ्यामवकृष्यमाणम्।" अश्वमित्यर्थः ॥)

खलिनी, स्त्री (खलानां समूहः ।"इनि चकट्यचः ।" ४ । २ । ५१ । इति इनिः । ततो ङीप् ।) खलसमूहः । धानेर अनेक गामार इति भाषा ॥ तत्पर्य्यायः । खल्या २ । इत्यमरः । ३ । २ । ४२ ॥ खलमलो । इति रत्नमाला ॥

खलिशः, पुं (खे जलाद्दूराकाशे लिशति ईषद्दूरं गच्छतीति । यद्वा, खे जलाभ्यन्तरे छिद्रादौ लिशति सर्पीभावेन तिष्ठतीति । लिश्+क ।) खगामख्यातमत्स्यः । खलिशागाछ इति भाषा ॥ तत्पर्य्यायः । कङ्कोटः २ खलेशयः ३ । इति शब्दरत्नावली ॥ अस्य गुणाः । वाह्निलम् । कफाध्मम । वायुकोपनत्वम । रूक्षत्वम् । लघुत्वम् । शुक्लत्वम । किञ्चिदामविनाशित्वञ्च । इति राजवल्लभः ॥ खलिशोऽपि पाठः ॥

खलीकारः, पुं (खल+कृ+घञ । अभूततद्भावे च्वि ।) अपकारः । इति जटाधरः ॥ (निभतनम् । इति चिन्तामणिः ॥)

खलीनः, पुं क्ली, (खे अश्वमुखच्छिद्रे लीनः ।) कविका । इत्यमरः ।२।८।४९ ॥ कडियालि इति भाषा ॥ (यथा, महाभारते । १ । १६९ । १५ ।
"शत रथानां वरहेममालिनां
चतुर्युजां हेमखलीनमालिनाम् ॥")

खलु, अ, (खल+बाहुलकात् उन् ।) निषेधः । वाक्यालङ्कारः । (यथा, माघे । २ । ७० ।
'सम्पदामपि पञ्चमहती सम्पदायिका ।
विहारितोऽपि सैवेन खलता खलु वाचिकम ॥'
"अभावाटसम्पदां प्रतिषेधार्थे द्वितीयः वाक्यालङ्कारे॥" इति तट्टीकायां मल्लिनाथः ॥) जिज्ञासा । (यथा, रघुवंशे । "स खल्वधीनो वेदम् ।") अनुनयः । इत्यमरः । ३ । ४ । १८ ॥ (यथा, गम्यते । "न खलु न खलु सुग्धे । साहसं कार्य्यमेतत्" ॥) निश्चितम । (यथा, कुमारे । ४ । २८ ।
"दयितास्वनवस्थितं नृणां
न खलु प्रेम चलं सुहृज्जने ॥')
पदपादपूरणम् । (यथा रामायणे । १ । ३१ । ६ ।
"कथा खलु न घटन्ते चरितप्रियवत्सल ॥
ये सायुधप्रमादेन न विरमन्ति धर्म्मतः ॥")
वीप्सा । इति शब्दरत्नावली ॥ (यथा,—
आकुन्तले १ मे अङ्के ।
"न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ॥')

खलुक [च] पु (ख इन्द्रियं दशनेन्द्रियं लुञ्चयति छिनत्तीति । ख+लुञ्च+क्विप ।) अन्धकार । इति त्रिकाण्डशेषः ॥

खलुरेच, पुं (खलुरिष्यते वध्यतेऽसौ । खलु+रिच+कर्म्मणि घञ ।) मृगभेदः । इति शब्दचन्द्रिका ॥

खलूरिका, स्त्री, (खलु+रिच+निपातनात् साधु ।) शस्त्राभ्यासभूमिः । इति हेमचन्द्रः ॥

खलेधानी, स्त्री, (खले धीयन्ते वृषभा अस्मिन् । धा+अधिकरणे ल्युट ततो ङीप ।) मेथिः । खलेपशुबन्धनस्तम्भः । इति जटाधरः ॥

खलेवाली, स्त्री, (खले वाल्यन्ते चाल्यन्तेऽत्र वृषभा इति । वल+अधिकरणे घञ गौरादित्वात् ङीष् ।) खले गोबन्धनदारु । इति हेमचन्द्रः ॥ मेर काठ इति भाषा ॥ (यथा, कात्यायनश्रौतसूत्रे । २२ । ३ । ४८ ।
"खलेवालीयूपो लाङ्गलेषा ।')

खलेश, पु (खे जलाद्दूराकाशे गमनकाले लिशति संश्लिष्यतीति । लिश+अच ।) खलिशमत्स्यः । इति हारावली ॥

खलेशयः पुं, (खलेशः जलाद्दूरस्थाकाशः स इव शेते ।) खलिशमत्स्यः । इति शब्दरत्नावली ॥

खल्या, स्त्री, (खलानां समूहः । यत ।) खलिनी । इत्यमरः । २ । ३ । ४२ ॥ धानमाड़ार अनेक खामार इति भाषा ॥

खल्लः, पुं, (खलतीति क्विप खल तं लातीति । ला आदाने+क ।) वस्त्रभेदः । गर्त्तः । चर्म्म । चातकपक्षी । इति मेदिनी ॥ इति । इति हेमचन्द्रः ॥ मसक इति भाषा । औषधमर्द्दनपात्रम । खल इति भाषा । इति वैद्यकम् ॥ ("अजाशकृत्तुषाग्निञ्च भूगर्भे विहितं स्थितम् । तस्योपरिस्थित खल्ल सप्तखल्लमिति स्मृतम् ॥" इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ॥)

खल्लिका, स्त्री, (खल्ल+स्वार्थे कन् ततष्टाप्, कापि अत इत्वम् ।) अपीठम । पिष्टकादिभर्ज्जनपात्रम् । इति शब्दचन्द्रिका ॥

खल्लिट, त्रि, (खल्ल+इन् । खल्लिरिव टलतीति । टल+ड ।) खलतिः । इति शब्दरत्नावली ॥

खल्ली, स्त्री, (खल्ल+गौरादित्वात् ङीष ।) हस्तपादावमर्द्दनाख्यरोगः । इति मेदिनी ॥ तस्य लक्षणं यथा, माधवकरः ।
"खल्ली तु पादजङ्घोरुकरमूलावमोटनी ॥"
तच्चिकित्सा यथा, भावप्रकाशे ।
"कुष्ठसैन्धवयो कल्कश्चुक्रतैलसमन्वितः ।
सुखोष्णो मर्द्दने योज्यः खल्लीशूलनिवारणे ॥"
अपि च भैषज्यरत्नावल्याम् ।
"खल्लीं निवारयत्याशु चिरोत्थामपि दारुणाम्॥"

खल्लीट, त्रि, (खल्लीर इव टलतीति । टल+बाहुलकात् क ।) खलतिः । इति त्रिकाण्डशेषः ॥ (तच्चिकित्सा यथा गारुडे ।१८१।
"खल्लीटस्य कथा शुभा ।
दग्धहस्तिदन्तलेपात् खल्लीटस्य कचोद्गमः ॥")

खव, ग भृतिपूर्त्योरुत्पत्तौ । इति कविकल्पद्रुमः ॥ (क्र्यां-परं-अकं-सेट ।) भृतिः सम्पत्तिः पूर्त्तिः पवित्रता तयोरुत्पत्तिः प्रादुर्भाव ॥

खवल्ली, स्त्री, (खे आकाशे स्थिता वल्ली ।) आकाशवल्ली । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्याया गुणाश्च । अथ आकाशवल्ली । अमरवेलि इति च भाषा ।
"आकाशवल्ली तु बुधैः कथितामरवल्लरी ।
खवल्ली ग्राहिणी तिक्ता पिच्छिला ह्यामयापहा ।
तुवरा पित्तरी हृद्या पित्तश्लेष्मामदाहिनी ॥'
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

खवारि, क्ली, (खे आकाशे स्थितं वारि उदकम् । खात् आगतं वारि वा ।) दिव्योदकम । इति राजनिर्घण्टः ॥

खवाष्पः, पु, (खे आकाशे ऊर्द्ध्वं स्थितो वाष्पः ।) हिमम । इति हारावली ॥

खशः, पु, देशविशेषः । इति त्रिकाण्डशेषः ॥ (तद्देशवासिनि तद्देशस्य च बहुषु अस्यो लुक ।) तथा हि मनुः । १० । ४४ ।
"पौण्ड्रकाश्चौड्रद्रविड़ा काम्बोजा यवनाः शकाः ।
पारदा पह्नवाश्चीनाः किराता दरदाः खशाः ॥")

खशा, स्त्री, सुराणामगन्धद्रव्यम । इति शब्दचन्द्रिका । (कश्यपस्य पत्नी दक्षकन्या प्रजापतिकन्या सा भार्य्या तद्गर्भे कन्याद्वयमुत्पन्नम्... इति । ख+शी+ड ततष्टाप ।) दक्षकन्या । सा च काश्यपपत्नी । यथा,—
"धर्म्मपत्न्यः समाख्याता कश्यपस्य वदाम्यहम् ।
अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा खशा ।
सुरभिर्विनता चैव ताम्रा क्रोधवशा इरा ।
कद्रूर्मुनिश्च लोकेषु पत्न्यस्त्वेताश्च कश्यपे ॥'
"इरा वृक्षलतावल्लीस्तृणजातीश्च सर्व्वशः ।
खसा च यक्षरक्षांसि मुनिरप्सरसस्तथा ॥'
इति गारुडे ६ अध्याय ॥

खशिट, पुं, (खं शिटति इति । शिट अनादरे अच् । अस्य गमनसमये तत्स्थानादरलेन नास्ति दोषस्तस्मादस्य ... ।) खलिशमत्स्यः । इति त्रिकाण्डशेषः ॥

खश्वासः, पुं (खस्य आकाशस्य श्वास इव ।) वायुः । इति त्रिकाण्डशेषः ॥

खष, बधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट ।) खषति । इति दुर्गादासः ॥

खसू, स्त्री, (खन्+"कषिदिकुत्यादिभ्यः ।" उणा १ । ९८ । इति बाहुलकात् किप्र ।) क्रोध । बलात्कारः । इत्युणादिकोषः ॥

खसः पुं (खं इन्द्रियाणि स्यति ... ।) पामा । खोस इति भाषा । तत्पर्य्यायः । पामा २ कच्छुः ३ विचर्च्चिका ४ । इति हेमचन्द्रः ॥ (... खर्जुरम् ॥)

[illegible]

অথ [illegible]।

[illegible]

অথ [illegible]।

[illegible]

ইতি [illegible]।

[illegible] পুং (…) [illegible]। ইতি [illegible]। ইতি ভাষা।

[illegible]

खातवत्र

येषां वाञ्छास्ति लोकानां मद्दाव्यगमने पुनः ।
पाराणसीं ते गच्छन्तु मयैव प्रतिपालिताम् ।
ततस्तस्य वचः श्रुत्वा जनाः केचिन्निजं पदम् ।
जग्मुर्वाराणसीं केचिद्विजयेनाभिपालिताम् ।
ततो धनानां सारांश्चैव रत्नानाञ्च पृथक् पृथक् ।
वाससां कनकानाञ्च कुप्यानां विजयस्तदा ।
पौरैर्न्नाययामास पुरीं वाराणसीं प्रति ।
गन्धर्व्वाणाञ्च देवानां यदासीत् पठात् पुरा ।
रत्नदानादिकं यत्तु विजय तत् प्रयादाच्च ।
तैस्तैर्नीतन्तु खाण्डव्याः स्वस्थानं प्रति हर्षितैः ।
विंशद्योजनविस्तीर्णां शतयोजनमायताम् ।
तां पुरीं विजयश्चक्रे न चिरादेव वै वनम् ।
तस्मिन् शक्रस्य सम्मत्या तक्षकः संस्थितो गत्वे ।
उवास सुचिरं तत्र ततोऽभूत्त्रिदशं वनम् ।
तत्र देवाः सगन्धर्व्वाः क्रीडन्तोऽप्सरसो गताः ।
आश्रयञ्च विजय रत्नेषु विजयाग्रजम् ।”*।
“अष्टाविंशतिमे प्राप्ते युगे द्वापरसंज्ञिते ।
वह्निर्ब्राह्मणरूपेण भिक्षां जिष्णुमयाचत ।
दातुमङ्गीकृते भिक्षां तस्मै पाण्डुसुतेन वै ।
वह्निः स्वरूपमास्थाय जिष्णुं वचनमब्रवीत् ।
अहमग्निः पाण्डुपुत्र । यज्ञभागातिभोजनात् ।
व्याधितोऽस्मि ततो व्याधिं मम त्वं नाशयाधुना ।
खाण्डवं नाम विपिनं वर्त्तते शक्ररक्षितम् ।
यदि त्वं मां भोजयितुं शक्नोषि श्वेतवाहन ।।
तदा ममापथ्यो व्याधिरपयास्यति नोऽचिरात ।
पुरा तु विजयो राजा खाण्डवीं नाम तां पुरीम् ।
भङ्क्त्वा वनं सतश्चक्रे तेन तत् खाण्डवं वनम् ।
तदर्थं देवविहितं वनं तक्षकसेवितम् ।।
विरोधात्तु शक्रस्य न स्वयं भोक्तुमुत्सहे ।
त्वत्तो मास्ति महाभाग ! वने तस्मिन्नियोजय ।
यथाहं सकलं भोक्तुं प्राप्नोमि त्वत्प्रसादतः ।
तस्य तद्वचनं श्रुत्वा सव्यसाची महाबलः ।
दाहयामास विपिनं सत सर्व्वं प्राणिसंकुलम् ।
दैवकौतवधेनासौ वासुदेवेन पालितः ।
खाण्डवं दाहयामास ज्वलनस्य हिते रतः ।”
“प्रीतः प्रददौ तस्मान्न्यनाप महात्मने ।
वह्निर्वरुणं गाण्डीवं चापञ्च देवनिर्म्मितम् ।
अक्षयाविषुधी द्वौ च रथञ्चाभ्युदरं तथा ।
हनूमताधिष्ठितञ्च महाभा वानरध्वजम् ।
सद्देयञ्च त्रिदिवं सौदर्यं स्वयं च वचसापिने ।
मौरोदधामसद्दिशाकृष्णतदा विष्णुप्रसादतः ।
तैर्मार्वैसैन धनुषा तेन खड्गेन केतुना ।
शरप्रवक्ष्मेनापि त्रिवियोँ पालगुणो रणे ।
एवं भैरवर्गेषु संजातो विजयो नृपः ।
खाण्डवं नाम विपिनं चकार सुमहाद्युती ।”
इति शीतलिकापुराणे ८ अध्यायः ।
(खाण्डवं दग्धुमवादेनिवार स्थानम् । गुडादिविकारविशेषमादन्दम् । यथा, महाभारते । १३। ११ । १८ ।
[पान ।”)
“इत्थापूपकादिनिवान मोदकानथ खाण्ड
खाण्डवी, स्त्री (विश्वकर्म्मनिर्म्मितं इन्द्रप्रस्थाख्या सभाप्रमोदेन राजा पुरन्दरेण
निर्म्मिता या पुरी सा ।) धर्म्मप्रमीयस्सुद
र्यंनराजनस्तद्विजयनपम्नतनिकटस्थपुरीविशेषः ।
तद्विवरणं खाण्डवशब्दे द्रष्टव्यम् ।

खाण्डिकः पुं (खण्डं मोदकादिकं शिल्पमस्य । इति ठञ् ।) खण्डपाल । मोदकः । इति हारावली । मयरा इति भाषा । (क्लीबे तु खण्डिकानां समूहः “खण्डिकादिभ्यश्च ।” ४ । २ । ४५ । इत्यण् । खण्डिकसमूहः ।)

खात क्ली (खन्यते इति । खन + कर्म्मणि क्तः ।) पुष्करिणी । इत्यमरः । १ । १० । २७ । तस्य परिमाणं यथा,—शतेन धनुर्भिः पुष्करिणी त्रिभिः शतैर्दीर्घिकाचतुर्भिर्द्रोणः पञ्चभिस्तडागः दशभिस्तु वापीति ।
“चतुर्विंशाङ्गुलो हस्तो धनुस्ताच्चतुष्करः ।
शतधन्वन्तरश्चैव तावत् पुष्करिणी शुभा ।
एतत्पञ्चगुणः प्रोक्तस्तडाग इति निर्णयः ।”
इति मत्स्यपुराणधृतो वशिष्ठः ।

खातक स्त्री (खात + संज्ञायां कन् ।) परिखा । इति हेमचन्द्रः । खाना गडार इत्यादि भाषा ।

खातकः पुं अधमर्णः । धारी । ऋणी । यथा —
“उत्तमर्णो धनस्वामी अधमर्णस्तु खातकः ।”
इति स्मृतिसारटीकायां गोपीचन्द्रः ।
(परसैन्यविदारकः । यथा, महाभारते । १२ । ११८ । ११ ।
“खातकं व्यूहतत्त्वज्ञं बलहर्षणकोविदम् ।”
‘खातकं परसैन्यविदारकम् ।” इति तट्टीकायां नीलकण्ठः ।)

खातभूः, स्त्री, (खातयुक्ता भूः भूमिः ।) प्रतिकूपः । परिखा । इति हारावली ।

खातव्यवहारः, पुं (खातस्य पुष्करिण्यादेर्व्यवहारः परिमाणम् ।) पुष्करिण्यादिपरिमाणम् । पुकुरे कालीति भाषा ।
“अथ खातव्यवहारे करणसूत्रं सार्द्धवृत्तम् ।
गणयित्वा विस्तारं बहुषु स्थानेषु तद्युतिर्भाज्या ।
स्थानकमित्या सममितिरेवं दैर्घ्ये च वेधे च ।
क्षेत्रफलं वेधगुणं खाते घनहस्तसंख्या स्यात् ।
उदाहरणम् ।
भुजवक्रतया दैर्घ्यं दशेशार्ककरैर्मितम् ।
त्रिषु स्थानेषु षट्पञ्चसप्तहस्ता च विस्तृतिः ।
यस्य खातस्य वेधोऽपि द्विचतुस्त्रिकरः सखे ।।
तत्र खाते कियन्तः स्युर्घनहस्ताः प्रचक्ष्व मे ।”



अत्र सममितिकरणेन विस्तारे हस्ताः । ६ । दैर्घ्ये । ११ । वेधे । ३ । सममितिदर्शनं यथा —



यथोक्तकरणेन लब्धा घनहस्तसंख्या । १९८ ।
खातान्तरे करणसूत्रं सार्द्धवृत्तम् ।
मुखजतलजतद्युतिजक्षेत्रफलैक्यं हृतं षड्भिः ।
क्षेत्रफलं सममेवं वेधगुणं घनफलं स्पष्टम् ।
समखातफलत्र्यंशः सूचीखाते फलं भवति ।
उदाहरणम् ।
मुखे दशद्वादशहस्ततुल्यं
विस्तारदैर्घ्यन्तु तले तदर्द्धम् ।
यस्याः सखे सप्तकरश्च वेधः
का खातसंख्या वद तत्र वाप्याम् ।



मुखजं क्षेत्रफलम् । १२० । तलजम् । ३० । तद्युतिजम् । २७० । एषामैक्यम् । ४२० । षड्भिः । ६ । हृतं जातं समफलम् । ७० । वेध-७ हतं जातं खातजं घनहस्ताः । ४९० ।
द्वितीयोदाहरणम् ।
खातेऽथ तिग्मकरतुल्यचतुर्भुजे च
किं स्यात् फलं नवमितः किल यत्र वेधः ।
सूचीं तथैव दशविस्तृतिमष्टवेधे
सूचीफलं वद तथैव पृथक् पृथक् मे ।



क्षेत्र । १२ । वेध । ९ । अत्रं करणोक्तकरणेन खातफलं घनहस्ताः । १०८ । सूचीफलम् । ३० ।



'गोर्भूलामुरसी लिमा बदन्ती कदय विभो ।" खिरविह्वी, स्त्री मधासमङ्गा। इति राज निर्घण्टः ॥

खिल, त्रि, (खिल + क ।) कर्षणादिना ऋष्टभूमिः । खिल भूइ इति भाषा ॥ तत्पर्य्यायः । अप्रहतम् २ । इत्यमरः । २ । १ । ५ ॥ सारसंग्रहे मैथसि च पुं। इति मेदिनी ॥
"खिली नारायण भोक्तृ इयवरूपया स्मृता ।" इति खिलेषु हरिवंशे इत्यत्र नीलकण्ठटीका ॥

खु, ङ ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म अकं अनिट् ।) ङ, खवते । इति दुर्गादासः ॥

खुङ्गाहः पुं (खु इत्यव्यक्तशब्दं कुर्वन् गाहते रणस्थलं विलोडयतीति । गाह + अच ।) कृष्ण-वर्णघोटकः । इति हेमचन्द्रः ॥

खुज, उ स्तेये । इति कविकल्पद्रुमः ॥ (भ्वां-पर सक सेट् । उदित्त्वात् क्त्वा वेट् ।) उ, खोजित्वा खुक्त्वा । स्तेयं चौर्य्यम् । इति दुर्गादासः ॥

खुज्जाकः, पुं, (खुज + आक निपातनात् जस्य द्वित्वम् ।) देवताड़वृक्षः । इति रत्नमाला ॥ खुञ्जाक इति क्वचित् पाठः ॥

खुड ड स्रुसे । इति कविकल्पद्रुमः ॥ (भ्वा आत्म अकं सेट् इदित ।) मधमञ्जरी । खुञ्ज सोऽयम् । ङ, कर्म्मणि खुड्यते । ङ, खुण्डते खोडः । इति दुर्गादासः ॥

खुड क } भेदे । इति कविकल्पद्रुमः ॥
खुड इ क } (चुरां पर-सक सेट् । मालिक इदित ।) क्री मधममरियौ । क, खोडयति । द्वितीय आदावसरीति कातन्त्राद्धा । स्वमते तु द्वितीयस्यादावसरिति पूर्व्वादिपौन्नुबन्ध स्यात । पश्चमसरिति तु स्वजातीयस्य पुनःपाठात् पूर्व्वो गैरदृश्यः । खुड्यति । खुडयतीति प्रयोगस्तु सहि इ अयोगसात् यजि स्वर करोतीति वो बाध्यम् । तस्य भेदवाचित्वन्तु धातूनामनेकार्थत्वात् । इति दुर्गादासः ॥

खुर ञ विलेखने । छेदने । इति कविकल्पद्रुमः ॥ (तुदां पर सक सेट् ।) ञ खुरति भूमि छगो वा लोकः । खोरिता । खुरः शफम् । इति दुर्गादासः ॥

खुरः पुं (खुर छिन्ने + क । यद्वा "क्षुरेणेव चर्व्वति ।" उणा । २ । ७८ । इति रन् गुणा भावोऽकलोपश्च ।) शफम् । गवादीनां पादाग्रम् । (यथा मनुः । ४ । ६७ ।
"न भिन्नशृङ्गाक्षिखुरैर्न वालधिविरूपितैः ॥")
कोलदलम् । नखाख्यगन्धद्रव्यम् । इति मेदिनी ॥ छिन्नखुः । नापितस्य खुरः । इति शब्दरत्नावली ॥ खट्वादीनां पादकम् । इति धरणी ॥ खुरा इति भाषा ॥

खुरकः, पुं (खुर + संज्ञायां कन । खुरो नमनय विशेष स इव कायति वा । कै + क ।) तिल वृक्षः । इति शब्दचन्द्रिका ॥ (तिलशब्देऽस्य गुणाद्यो बोध्याः ॥)

खुरणस् त्रि । (खुर इव नासिका यस्य "खुर

खिकाया इति ।" ५ । ४ । ११८ । इति अच् नसादेशश्च "पूर्व्वपदात् संज्ञायामगः ।" ८।४।३। इति णत्वम् ।) चिपिटनासिकः । इत्यमरः । २ । ६ । ४७ ॥ चेप्टानाककयुक्त इति भाषा ॥

खुरणाः त्रि (खुर इव नासिका यस्य "खुरखराभ्यां वा नस् ।" इति नसादेशः "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।) खुरणस । इत्यमरः । २ । ६ । ४७ ॥ चिपिटानासिकायुक्त इति भाषा ॥

खुरप्रः पुं (खुर इव प्राति पूरयति खुराकारवत् कार्य्यं पूरयतीत्यर्थः । खुर + प्रा + क ।) वाणविशेषः । इत्यमरटीकायां स्वामी ॥ खुरपा इति भाषा ॥

खुरली, स्त्री, (खुरे अत्र विविधानि अस्त्रादीनि लाति पौनःपुन्येन शिक्षार्थमत्र । ला अदर्शे + रन् + वा ङीष् ।) युद्धाभ्यासः । इति हेमचन्द्रः ॥

खुराकः, पुं (खुर + आकन ।) मधु । इत्युणादिकोषः ॥

खुरालकः, पुं (खुर इव अलति पर्याप्नोतीति । अल + ण्वुल ।) लौहमयवाणः । इति शब्दमाला ॥

खुरालिकः, पुं (खुरानां आलिभिः कायति प्रकाशते । कै + क ।) नाराचः । नापित भाण्डम् । नापिते भाण्ड इति भाषा । नाराचः । उपधानम् । इति मेदिनी ॥ खरालिकोऽपि पाठः ॥

खुर्द ङ क्रीडायाम् । इति कविकल्पद्रुमः (भ्वां आत्म अक सेट् ।) पद्ममञ्जरी । दीर्घिया एयकमाडात पूर्व्वस्य न दीर्घ । ङ, खुर्द्दते । इति दुर्गादासः ॥

खुल्ल स्त्री, (क्षुद + सम्पदादित्वात् क्विप् । क्षुत लातीति । ला + क । पृषोदरात् साधु ।) नखीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ क्षुद्रे नीचे च त्रि ॥

खुल्लकः त्रि, (खुल्ल + स्वार्थे कन् ।) स्वल्पः । नीचः ॥ कनिष्ठः । दरिद्रः । निष्ठुरः खलः । इत्यमरटीका ॥

खुल्लतातः, पुं, (खुल्लः कनिष्ठः तातस्य पितुरिति पूर्व्वनिपातः ।) पितृकनिष्ठभ्राता । इति शब्द-रत्नावली ॥ खुड़ा इति भाषा ॥

खुल्लमः, पुं, (खुल्लेन नीयते इति । मा + घञर्थे क ।) पन्थाः । इति त्रिकाण्डशेषः ॥

खेट ङ क्रीडायाम् । इति कविकल्पद्रुमः । (भ्वां-आत्म-अक सेट ।) मधुपारी । ङ, खेटते । इति दुर्गादासः ॥

खेगामिकः, पुं (खे आकाशे गामिक इव गच्छतीति ।) गरुडः । इति शब्दरत्नावली ॥

खेचरः पुं (खे आकाशे चरति ।) खग-चारी । इति शब्दमाला ॥

खेचरः पुं (खे चरतीति । चर + "चरेष्टः ।" ३ । २ । १६ । इति टः । अलुक् समासः ।) शिवः । इति शब्दरत्नावली । विद्याधरः । इति पारदः । इति राजनिर्घण्टः ॥ आकाशचारिणि त्रि ॥

("इतो यक्षि जरायाधि सर्व्वरोगविनाशकः । बद्धः खेचरतां यात कोटिशः सुमतां तथाकरः ॥" इति वैद्यकरसेन्द्रसारसंग्रहे जारमारणाधिकारः ॥
मेषादिराशि । यथा ज्योतिषतत्त्वे —"खेचराश्च सर्व्वे ॥")

खेचरान्नम्, क्ली (खेचर क्विदलाग्निमिश्रित अन्नम् ।) क्विदलादिमिश्रितपक्वतण्डुलम् । खिचड़ीति भाषा ॥ इति पाकराजेश्वरः ॥

खेट, त क भक्षणे । इति कविकल्पद्रुमः ॥ (चुरां परं सक-सेट् ।) अचिखेटत । इति दुर्गादासः ॥

खेट, क्ली (खे + अट + अच ।) तृणम् । इति शब्दरत्नावली ॥ खेटमपि पाठः ॥

खेटः पुं, (खे आकाशे अटति । अट + अच् ।) ग्रहः । यथा, भावविवेके ।
"यस्मिन् राशौ स्थित खेटस्तेन स परिपूर्य्यते ॥"

खेट, त्रि,(खिट + अच । खेट + क वा ।) अधमः । इत्यमरः ।३।१।५४ ॥ घोटकः । इति शब्दरत्नावली ॥ मृगिन्दकः । इति विश्वः ॥ मृगन्दक इति पाठे बलरामस्य नाम इति कश्चित् ॥

खेटः पुं क्ली (खिद्यते भयमुत्पद्यते अस्मात् एनेन वा । खिट + अपादाने करणे वा घञ ।) ग्रामः । इत्यमरमेदिन्यौ ॥ कफः । (खिद्यते भयोपयोगिद्रव्यान्निना उपजीव्यते अस्मात् ।) ग्रामभेदः । स तु कर्षकग्रामः । (तथा च भागवते । १ । ६ । ११ ।
"खेटखर्व्वटवाटीश्च वनान्युपवनानि च ।"
"खेटो कर्षकग्रामः ।" इति श्रीधरस्वामी ॥)
चर्म्म । इति मेदिनीशब्दरत्नावल्यौ ॥

खेटकः, पुं, (खेट + स्वार्थे कन् ।) ग्रामभेदः । चामार गा इति भाषा । इति जटाधरः ॥ फलकम् । इति हेमचन्द्रः । "खेटकं बलभद्रके ।" इति तारापालः । बलभद्रको बलदेवनामा । इति शब्दरत्नावली ॥ बलदेवस्य नाम इति कश्चित् ॥

खेट } पुं (खेटन्ति भयमुत्पद्यतेऽनेन । खिट
खेटक } + करणे घञ । खेट + स्वार्थे कन् ।) चर्म । यथा —
"परिक्रमेत् खेटं । खड्गाघातवारक । दधाति कालिको नित्य मम हस्ते खड्गं च ॥"
इति कालिकापुराणे कवचे ॥
"खेटक कुण्डलयुक्त मण्डलसमेत च ॥"
इति च तत्र एवंप्रकारा दुर्गाया ध्यानम् ॥

खेटितालः, पुं (खे आटितं ताल इव । खिट + क वा । खेटि तालो यस्य ।) वैतालिकः । इति शब्दमाला ॥

खेटी [न्] पुं (खेट + इनि ।) नागरः । कामी । इति शब्दमाला ॥

खेड ज क भक्षणे । इति कविकल्पद्रुमः ॥ (चुरां पर सक-सेट् ।) अचिखेडत् । इति दुर्गादासः ॥

[illegible]

[illegible]

[illegible]

ग

ग, गकारः । स तु व्यञ्जनतृतीयवर्णः । अस्यो-च्चारणस्थानं कण्ठः । (यथा, "अ कु ह-विसर्जनीयानां कण्ठः ।") इति व्याकरणम् ॥ * ॥
"गकारं परमेशानि ! पञ्चदेवात्मकं सदा ।
त्रिगुणं त्रिगुणोपेतं निरीहं निर्मलं सदा ॥
पञ्चप्राणमयं वर्णं सर्व्वशक्त्यात्मकं प्रिये ! ।
अरुणादित्यसङ्काशं कुण्डलीं प्रणमाम्यहम् ॥"
इति कामधेनुतन्त्रम् ॥ * ॥
"सवर्गः प्रेरितः कण्ठे वायुना कादिभीरवेन ।
पराश्रयंसमावेश्य क स्वरसाभ्नात्तु रम् ।
घोषगम्भीरसम्प्राप्तवो इत्य वर्णितम् ॥'
इति प्रपञ्चसारः ॥ * ॥
(वङ्गाक्षरैरस्य लेखनप्रकारादिर्यथा,—
"अधःकुञ्चितरेखा या गायत्री सा प्रकीर्त्तिता ।
मतो दक्षगता या तु कमला तत्र संस्थिता ।
अधोगता ततो या तु तस्यामीश समं वसेत् ॥"
अधोमुखेन गता पुनरुद्धेमुखेनापीशीयम् ॥ * ॥
तस्य ध्यानं यथा —
"ध्यानमस्य प्रवक्ष्यामि शृणुष्व वरवर्णिनि ! ।
दाडिमीपुष्पसङ्काशां चतुर्ब्बाहुसमन्विताम् ॥
रक्ताम्बरधरां नित्यां रत्नालङ्कारभूषिताम् ।
एवं ध्यात्वा गकाररूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
तस्य नामानि यथा,—
"गोगौरी गौरवो गङ्गा गणेशो गोकुलेश्वरः ।
शार्ङ्गी पञ्चान्तको गाथा गन्धर्व्वः सर्व्वगः स्मृतिः ॥
सर्व्वसिद्धिः प्रभा शुक्रा त्रिनेत्रः शिवदर्शनः ।
विश्वात्मा गौः एपगरूपा बालवद्धिलोचनः ॥
गीतं सरस्वती विद्या भोगिनी नन्दनो धरा ।
भोगवती च हृदयं ज्ञानं जालन्धरो लयः ॥"
इति नानातन्त्राद्धृतनामानि ॥
ग स्त्री, (गीयते इति । गै गाने + भावे बाहु-लकात् डः ।) गीतम् । इत्येकाक्षरकोषः ॥
ग, पुं, (गच्छति सर्व्वं जानाति इच्छामात्रेण अभिलषितं सर्व्वं प्राप्नोति वा सर्व्वगतत्वात् प्राप्त-सर्व्वार्थत्वाच्च । गम् + डः ।) गणेशः । (गायति इति । गै + कः ।) गन्धर्व्वः । इत्येकाक्षरकोषः ॥
(गुरुः । अक्षरार्थे पत्तु छन्दसी रगणविशेषः । यथा, छन्दोमञ्जर्य्यां १ मे स्तबके ।
"गरलनभुगैलान्तैः गिरिभिरन्वितैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥"
"गुरुरेको गकारस्तु लकारो लघुरेककः ॥"
वाच्यलिङ्गे तु उपपदरहित कर्म्मोपपदश्च स्यात् । तत्र "गापोष्टक् ।" ३ । २ । ८ । इति टक् । यथा, साम गायतीति सामगः । तथा च मनुः । ३ । १८५ ।
"यज्ञाभिः पूयते विप्र पङ्क्त्यामित्तु भूमिप ! ।
वेदोद्धि मातितासिद्धु मूढ सहाभि
एनाय ॥")

गगन, क्ली (ग गमनं शब्दात्मकः गुणः गच्छति यद्वा गकारः भूतेषु प्रथमभूतत्वात् प्राधान्य गच्छति । यद्वा गच्छन्त्यस्मिन् देवादयः इति । "अमेगश्च ।" उणां । २ । ७७ । इति युच् गश्चान्तादेशः ।) आकाशम् । इत्यमरः ।१।२।१॥ (यथा मेघदूते । ४८ ।
"तिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी-रेक मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलम् ॥")
तत्पर्य्यायः । अमरोक्तपर्य्याया आकाशशब्दे द्रष्टव्याः ॥ (तेभ्य परम ।) वर्त्म १९ धन्व २० व्यापः २१ पृथिवी २२ भूः २३ स्वयम्भू २४ अध्वा २५ मरुः २६ समुद्रः २७ अम्बरं २८ । इति वैश्निघण्टौ १ अध्याय ॥ * ॥
'आकाशं प्रथमं भूतं श्रोत्रमध्यात्ममुच्यते ।
अधिभूतं तथा शब्दो दिशस्तत्राधिदैवतम् ॥"
इत्याश्वमेधिकपर्व्व ॥
तस्य गुणाः । शब्दः १ व्यापकत्वम् २ छिद्रता ३ अनाश्रयम् ४ अनालम्बम् ५ आश्रयान्तरशून्यम् । अव्यक्तम् ६ रूपरसगन्धस्पर्शशून्यत्वात् । अविकारिता ७ दयानिरपेक्षत्वम् । अप्रतीघातिता ८ अनन्तत्वम् ९ श्रोत्रेन्द्रियोपादानत्वात् । विभक्तानि १ इदमत्रागतच्छिद्राणि । तद्यथा,—
"आकाशस्य गुणः शब्दो व्यापित्वं छिद्रतैव च ।
अनाश्रयमनालम्बमव्यक्तमविकारिता ॥
अप्रतीघातिता चैव भूतत्वं विकृतानि च ।
गुणाः पञ्चाशतः प्रोक्ताः पञ्चभूतात्मभूतता ॥"
पञ्चानां भूतानां याता प्राणि एक इह तत्र वर्णिता । इति मोक्षधर्म्मे ॥ (गगनात् पतिताम्बुगुणविशेषो यथा,—
"गगनाम्बु त्रिदोषघ्नं गृहीतं यत् सुभाजने ।
बल्यं रसायनं मेध्यं पात्रापेक्षि ततः परम् ॥
रक्तोष्णं शीतलं ह्लादि ज्वरदाहविषापहम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्यायः ॥)
गगनध्वज, पुं, (गगने गगनस्य वा ध्वज इव ।) मेघः । इति धारावली ॥ सूर्य्यः । इति हेम-चन्द्रः ॥
गगनाध्वगः पुं, (गगनरूपाध्वना आकाशपथेन गच्छतीति यद्वा गगनाध्वानं व्याप्य गच्छति । अनन्तगगनरूपमहाध्वानं व्याप्य सर्व्वत्र तिष्ठ-तीति प्रसरतामन्वयः । गम + डः ।) सूर्य्यः । इति हेमचन्द्रः ॥
गगनेचर, पुं, (गगने चरतीति । "चरेष्टः ।" ३ । २ । १६ । इति टः । अलुक् समासः ।) ग्रहः । नक्षत्रम् । इति सिद्धान्तशिरोमणिः ॥ (गगन-चारिणि त्रि । यथा, महाभारते । १ । २० । १५ ।
'तांश्चापि ददृशे माता काद्रवेयान् गगनेचरः ॥")
गगनोल्मुक, पुं, (गगने गगनस्य वा उल्मुक इव । मङ्गलग्रहस्य रक्तवर्णत्वात् तथात्वम् ।) मङ्गलग्रहः । इति धारावली ॥
गगध, क्रव्ये । इति कविकल्पद्रुमः ॥ (भ्वां-पर०-अक०-सेट् ।) कच्छगोग्रोपधयः । गगधति । इति दुर्गादासः ॥

गङ्गका, स्त्री, (गङ्गा + अज्ञातार्थे कः । ततो ह्रस्वः । "केऽणः ।" ७ । ४ । १३ । इति पक्षे ह्रस्वाभावः ।) गङ्गा । इति मुग्धबोधम् ॥
गङ्गा, स्त्री, (गमयति प्रापयति ज्ञापयति वा भगवत्पदं या शक्तिः यद्वा गम्यते प्राप्यते ज्ञाप्यते मोक्षार्थिभिर्या । गम गतौ + "गन् गम्यद्योः ।" उणां । १ । १२२ । इति गन् तत-ष्टाप् ।) स्वनामख्यातनदी । तदधिष्ठात्री देवता च । तत्पर्य्यायः । विष्णुपदी २ जह्नुतनया ३ सुरनिम्नगा ४ भागीरथी ५ त्रिपथगा ६ त्रिस्रोता ७ भीष्मसूः ८ । इत्यमरः । १ । १० । ३१ ॥ अर्घ्यतीर्थम् ९ तीर्थराज १० । इति पद्मपुराणम् ॥ त्रिदशदीर्घिका ११ कुमारसूः १२ सरिद्वरा १३ सिद्धापगा १४ स्वरापगा १५ स्वर्व्वापी १६ खापगा १७ ऋषिकुल्या १८ हैमवती १९ सर्व्वापी २० हरशेखरा २१ । इति हेमचन्द्रः ॥ सुरापगा २२ धर्म्मद्रवी २३ सुधा २४ जह्नु-कन्या २५ गान्दिनी २६ रुद्रशेखरा २७ नन्दिनी २८ अलकनन्दा २९ सितसिन्धुः ३० । इति जटाधरः ॥ अध्वगा ३१ उग्रशेखरा ३२ सिद्धसिन्धुः ३३ । इति त्रिकाण्डशेषः ॥ स्वर्ग-सरिद्वरा ३४ मन्दाकिनी ३५ जाह्नवी ३६ पुण्या ३७ समुद्रसुभगा ३८ स्वर्नदी ३९ सुर-दीर्घिका ४० सुरनदी ४१ स्वर्धुनी ४२ ज्येष्ठा ४३ जह्नुसुता ४४ भीष्मजननी ४५ शुभ्रा ४६ शैल-सुता ४७ भवायना ४८ । इति शब्दरत्ना-वली ॥ अस्या जलस्य गुणाः । शीतत्वम् । स्वादु-त्वम् । स्वच्छत्वम् । अत्यन्तपथ्यत्वम् । पथ्यत्वम् । पावनत्वम् । पापहारित्वम् । तृष्णामोहध्वंस-त्वम् । दीपनत्वम् । प्रज्ञाधारित्वञ्च । इति राज-निघण्टुः ॥ * ॥
("गङ्गा सरस्वती सीता यमुना सरयू शची ।
वेणा इरावती गौला उत्तराख्या पुष्पवाहिनी ॥
हिमवत्प्रभवा श्वेता हिमपर्व्वतशोभिता ।
सप्त सर्व्वगुरेवद्यो वातपिप्रदरा इमाम् ॥
आपो नवसमेतुक्ता गङ्गा पुष्पगुहया ॥"
इति चारके सूत्रस्थाने सप्तविंशाध्याये ॥)
अस्या उत्पत्तिस्तु हिमालयात् सुमेरु-दुहितरि मनोरमायाम् । हिमालय प्राप्ति-मत् इव इमां इत्यवत् । तां सीता इयं सर्व्वे गतवन्तः ॥ * ॥ एतद्विषये अत्र तदुपाख्यानम् । इन्द्रादयः सुराः कश्चित् दानवं धर्म्मविघ्नकारकं भगीरथाय दृष्टवन्तः गङ्गामन्वेषयं नयन्ते । ततो ब्रह्मा सुरकार्य्ये स वर इमां गङ्गाधारणाय नियम्य वर्णं कमलं सुरनाथ । स प्रियं मध्ये शिवम् । द्वितीयेऽपि हिमालयकन्या सत्या मही त्रिलोक ददर्श महादेवेन । सा शम्भोः पत्नी उमा सर्व्वलोकवन्द्या । तच ह्रिया मन्येन्दुवदना वदतीमां आत्मनो व्याकरणम् । सा "ध्वो" एतद्व्याप्य भगीरथं सर्व्वाम्बुधि यथा प्रकाशयत् । स सुरकृतं सम्पूर्णं जलं सोमवद्गतम् ।

[illegible]

[illegible]

[illegible]

कथनीयं न चान्यस्य कस्यचित् केनचित् क्वचित्।
इदं रहस्यं परमं महापातकनाशनम् ।
महाश्रेयस्करं पुण्यं मनोरथकरं परम् ।
द्युनदीप्रीतिजनकं शिवसन्तोषसन्तति ।
नाम्नां सहस्रं गङ्गायाः स्तवराजेषु शोभनम् ।
जप्यानां परमं जप्यं वेदोपनिषदां सारम् ।
जपनीयं प्रयत्नेन मौनिना वाचकं विना ।
शुचिस्थानेषु शुचिना सुस्पष्टाक्षरमेव च ।

स्कन्द उवाच। ओं नमो गङ्गादेव्यै।

ओंकाररूपिण्यजराऽतुलाऽनन्ताऽमृतस्रवा ।
अत्युदाराऽभयाऽशोकाऽलकनन्दाऽमृताऽमला ।
अनाथवत्सलाऽमोघाऽपां योनिरमृतप्रदा ।
अव्यक्तलक्षणाऽक्षोभ्याऽनवच्छिन्नाऽपराजिता ।
अनाथनाथाऽभीष्टार्थसिद्धिदाऽनङ्गवर्द्धिनी ।
अणिमादिगुणाधाराऽग्रगण्याऽलीकहारिणी ।
अचिन्त्यशक्तिरनघाऽद्भुतरूपाऽघहारिणी ।
अद्रिराजसुताऽष्टाङ्गयोगसिद्धिप्रदाऽच्युता ॥२ ॥
अक्षुण्णशक्तिरसुदाऽनन्ततीर्थाऽमृतोदका ।
अनन्तमहिमाऽपाराऽनन्तसौख्यप्रदाऽन्नदा ।
अशेषदेवतामूर्त्तिरघोराऽमृतरूपिणी ।
अविद्याजालशमनी ह्यप्रतर्क्यगतिप्रदा ।
अशेषविघ्नसंहर्त्री त्वशेषगुणगुम्फिता ।
अज्ञानतिमिरज्योतिरनुग्रहपरायणा ।
अभिरामाऽनवद्याङ्ग्यनन्तसाराऽकलङ्किनी ।
आरोग्यदाऽऽनन्दवल्ली त्वापन्नार्त्तिविनाशिनी ।
आश्चर्यमूर्त्तिरायुष्या ह्याढ्याऽऽद्याऽऽप्राऽऽर्यसेविता ।
आप्यायिन्याप्तविद्याख्या त्वानन्दाऽऽश्वासदायिनी ।
आलस्यघ्न्यापदां हन्त्री ह्यानन्दामृतवर्षिणी ।
इरावतीष्टदात्रीष्टा त्विष्टापूर्त्तफलप्रदा ।
इतिहासश्रुतीड्यार्था त्विहामुत्र शुभप्रदा ।
इज्याशीलसमिज्येष्ठा त्विन्द्रादिपरिवन्दिता ।
इलालङ्कारमालेद्धा त्विन्दिरा रम्यमन्दिरा ।
इदिन्दिरादिसंसेव्या त्वीश्वरीश्वरवल्लभा ।
ईतिभीतिहरेड्या च त्वीडनीयचरित्रभृत् ।
उत्कृष्टशक्तिरुत्कृष्टोडुपमण्डलचारिणी ।
उदिताम्बरमार्गास्रोरगलोकविहारिणी ।
उक्षोर्वरोत्पलोत्कुम्भा उपेन्द्रचरणद्रवा ॥३ ॥
उदन्वत्पूर्त्तिहेतुश्चोदारोत्साहप्रवर्द्धिनी ।
उद्वेगघ्न्युष्णशमनी ह्युष्णरश्मिसुताप्रिया ।
उत्पत्तिस्थितिसंहारकारिण्युपरिचारिणी ।
ऊर्जं वहन्त्यूर्जधरोर्जावती चोर्मिमालिनी ।
ऊर्ध्वरेतःप्रियोर्ध्वाध्वा ह्यूर्मिलोर्ध्वगतिप्रदा ।
ऋषिवृन्दस्तुतर्द्धिश्च ऋणत्रयविनाशिनी ।
ऋतम्भरर्द्धिदात्री च ऋक्स्वरूपा ऋजुप्रिया ।
ऋक्षमार्गवहर्क्षार्चिरृजुमार्गप्रदर्शिनी ।
एधिताखिलधर्मार्था त्वेकैकामृतदायिनी ।
एधनीयस्वभावैज्या त्वेजिताशेषपातका ।
ऐश्वर्यदैश्वर्यरूपा ह्यैतिह्यं ह्यैन्दवीद्युतिः ।
ओजस्विन्योषधीक्षेत्रमोजोदौदनदायिनी ।
ओष्ठामृतौन्नत्यदात्री त्वौषधं भवरोगिणाम् ।
औदार्यचञ्चुरौपेन्द्री त्वौग्री ह्यौमेयरूपिणी ।
अम्बराध्ववहाऽम्बष्ठाऽम्बरमालाऽम्बुजेक्षणा ।

अम्बिकाऽम्बुमहायोनिरन्धोदाऽन्धकहारिणी ।
अंशुमाला ह्यंशुमती त्वङ्गीकृतषडानना ।
अन्धतामिस्रहन्त्र्यन्धुरञ्जना ह्यञ्जनावती ।
कल्याणकारिणी काम्या कमलोत्पलगन्धिनी ।
कुमुद्वती कमलिनी कान्तिः कल्पितदायिनी ।
काञ्चनाक्षी कामधेनुः कीर्त्तिकृत् क्लेशनाशिनी ।
क्रतुश्रेष्ठा क्रतुफला कर्मबन्धविभेदिनी ॥४॥
कमलाक्षी क्लमहरा कृशानुतपनद्युतिः ।
करुणार्द्रा च कल्याणी कलिकल्मषनाशिनी ।
कामरूपा क्रियाशक्तिः कमलोत्पलमालिनी ।
कूटस्था करुणा कान्ता कूर्मयाना कलावती ।
कमला कल्पलतिका काली कलुषवैरिणी ।
कमनीयजला कम्रा कपर्दिसुकपर्दगा ।
कालकूटप्रशमनी कदम्बकुसुमप्रिया ।
कालिन्दी केलिललिता कलकल्लोलमालिका ।
क्रान्तलोकत्रया कण्डूः कण्डूतनयवत्सला ।
खड्गिनी खड्गधाराभा खगा खण्डेन्दुधारिणी ।
खे खेलगामिनी खस्था खण्डेन्दुतिलकप्रिया ।
खेचरी खेचरीवन्द्या ख्यातिः ख्यातिप्रदायिनी ।
खण्डितप्रणताघौघा खलबुद्धिविनाशिनी ।
खातैनःकन्दसन्दोहा खड्गखट्वाङ्गखेटिनी ।
खरसन्तापशमनी खनिः पीयूषपाथसाम् ।
गङ्गा गन्धवती गौरी गन्धर्वनगरप्रिया ।
गम्भीराङ्गी गुणमयी गतातङ्का गतिप्रिया ।
गणनाथाम्बिका गीता गद्यपद्यपरिष्टुता ॥५ ॥
गान्धारी गर्भशमनी गतिभ्रष्टगतिप्रदा ।
गोमती गुह्यविद्या गौर्गोप्त्री गगनगामिनी ।
गोत्रप्रवर्द्धिनी गुण्या गुणातीता गुणाग्रणीः ।
गुहाम्बिका गिरिसुता गोविन्दाङ्घ्रिसमुद्भवा ।
गुणनीयचरित्रा च गायत्री गिरिशप्रिया ।
गूढरूपा गुणवती गुर्वी गौरववर्द्धिनी ।
ग्रहपीडाहरा गुन्द्रा गरघ्नी गानवत्सला ।
घर्महन्त्री घृतवती घृततुष्टिप्रदायिनी ।
घण्टारवप्रिया घोराऽघौघविध्वंसकारिणी ।
घ्राणतुष्टिकरी घोषा घनानन्दा घनप्रिया ।
घातुका घूर्णितजला घृष्टपातकसन्ततिः ।
घटकोटिप्रपीतापा घटिताशेषमङ्गला ।
घृणावती घृणिनिधिर्घस्मरा घूकनादिनी ।
घुसृणापिञ्जरतनुर्घर्घरा घर्घरस्वना ।
चन्द्रिका चन्द्रकान्ताम्बुश्चञ्चदापा चलद्युतिः ।
चिन्मयी चितिरूपा च चन्द्रायुतशतानना ।
चाम्पेयलोचना चारुश्चार्वङ्गी चारुगामिनी ।
चार्या चारित्रनिलया चित्रकृच्चित्ररूपिणी ।
चम्पूश्चन्दनशुच्यम्बुश्चर्चनीया चिरस्थिरा ।
चारुचम्पकमालाढ्या चमिताशेषदुष्कृता ॥६ ॥
चिदाकाशवहा चिन्त्या चञ्चच्चामरवीजिता ।
चोरिताशेषवृजिना चरिताशेषमण्डला ।
छेदिताखिलपापौघा छद्मघ्नी छलहारिणी ।
छन्नत्रिविष्टपतला छोटिताशेषबन्धना ।
छुरितामृतधारौघा छिन्नैना छन्दगामिनी ।
छत्रीकृतमरालौघा छटीकृतनिजामृता ।

जया जनार्दनप्रीता जुषणीया जगद्धिता ।
जीवनं जीवनप्राणा जगज्ज्येष्ठा जगन्मयी ।
जीवजीवातुलतिका जन्मिजन्मनिबर्हिणी ।
जाड्यविध्वंसनकरी जगद्योनिर्जलाविला ।
जगदानन्दजननी जलजा जलजेक्षणा ।
जनलोचनपीयूषा जटातटविहारिणी ।
जयन्ती जञ्जपूकघ्नी जनितज्ञानविग्रहा ।
झल्लरीवाद्यकुशला झलज्झालजलावृता ।
झिण्टीशवन्द्या झङ्कारकारिणी झर्झरावती ।
टीकिताशेषपाताला टङ्किकैनोऽद्रिपाटने ।
टङ्कारनृत्यत्कल्लोला टीकनीयमहातटा ।
डम्बरप्रवहा डीनराजहंसकुलाकुला ।
डमड्डमरुहस्ता च डामरोक्तमहाण्डका ॥७ ॥
ढौकिताशेषनिर्वाणा ढक्कानादचलज्जला ।
ढुण्ढिविघ्नेशजननी ढणड्ढुणितपातका ।
तर्पणी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी ।
त्रिलोकगोप्त्री तोयेशी त्रैलोक्यपरिवन्दिता ।
तापत्रितयसंहर्त्री तेजोबलविवर्द्धिनी ।
त्रिलक्ष्या तारणी तारा तारापतिकरार्चिता ।
त्रैलोक्यपावनी पुण्या तुष्टिदा तुष्टिरूपिणी ।
तृष्णाच्छेत्री तीर्थमाता त्रिविक्रमपदोद्भवा ।
तपोमयी तपोरूपा तपःस्तोमफलप्रदा ।
त्रैलोक्यव्यापिनी तृप्तिस्तृप्तिकृत्तत्त्वरूपिणी ।
श्रीचैतन्यदेवः । इत्यनन्तसंहिता ॥ (मृगविशेषः । यथा, भागवते । ३ । १ । २२ ।

"खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून् ॥")

गौर, त्रि, विशुद्धः । इति मेदिनी । रे । २७ ॥

गौरचन्द्र, पुं (गौरेण तप्तहेमवर्णेन चन्दयति आह्लादयतीति । चदि आह्लादे+णिच्+रन् ।) श्रीचैतन्यदेवः । यथा,—

"तप्तहेमसमगौराङ्गो गौरचन्द्रः शचीसुतः ।
महागौरो गौरहरिर्नामानि भक्तिदानि मे ॥"

इत्यनन्तसंहिता ॥

गौरजीरक, पुं (गौरः शुभ्रवर्णो जीरकः ।) शुक्लजीरकः । शादा जीरा इति भाषा ॥ तत्पर्य्यायः । अजाजी २ श्वेतजीरकः ३ कणाह्वा ४ कणजीरः ५ कणा ६ दीर्घकणा ७ दीपकजा ८ निशाचाजी ९ गौराजाजी १० । अस्य गुणाः । हिमत्वम् । रुचिकारित्वम् । कटुत्वम् । मधुरत्वम् । दीपनत्वम् । ध्मानिविषाध्मानकारित्वम् । चक्षुष्यत्वञ्च । इति राजनिर्घण्टः ॥

गौरत्वच्, पुं (गौरी शुभ्रवर्णा त्वक् यस्य ।) इङ्गुदीवृक्षः । इति राजनिर्घण्टः ॥

गौरव, क्ली, (गौरव धायत्वेनाध्वस्य । "अप्रे आदिभ्योऽण् ।" ५ । २ । १२७ । इत्यण् ।) अभ्युत्थानम् । इति हेमचन्द्रः । ३ । १६४ ॥ (गुरोर्भावः । गुरु+"इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इत्यण् ।) गुरुत्वम् । इति मुग्धबोधम् ॥ (यथा महाभारते । १ । १६१ । १८ ।

"शरीरगौरवादस्य श्रिया नाभैर्विघूर्णिता ॥"

उत्कर्षः । यथा रघुः । १४ । १८ ।

"कृपावलम्बेन प्रभवादिहन्त
स्वविक्रमे गौरवमादधानम् ॥"

आदरः । यथा, कुमारे । ३ । १ ।

"प्रयोजनापेक्षितया प्रभूणां
प्रायश्चलं गौरवमाश्रितेषु ॥")

गौरवित, त्रि, (गौरवं सञ्जातमस्येति तार-कादित्वादितच् ।) श्लाघ्यः । तत्पर्य्यायः । श्लाघ-नीयः २ । इति त्रिकाण्डशेषः ॥

गौरशाक, पुं, (गौरः गौरस्य शाकोऽर्थेति ।) मधूकवृक्षविशेषः । इति जटाधरः ॥

गौरसर्षप, पुं (गौरश्चासौ सर्षपश्चेति कर्म्म-धारयः ।) श्वेतसर्षपः । (यथा

"रक्षोघ्न सर्षप श्वेत सिद्धार्थो गौरसर्षपः ।"

इति वैद्यकरत्नमालायाम् ॥)

तत्पर्य्यायः । अमरः १ सिद्धार्थः २ भूतनाशनः ३

स योगी यदि भार्यायां विचक्षणैरमयात् सुतम्।"
"यदि सम्बद्धो भार्यायाम्।" इति कश्चित् पाठः।)

गौ, [गो] पुं, स्त्री, (गच्छति गावो यान्ति यत्र [illegible] गम् + "गमेर्डोः।" उणां। २। ६३। इति कर्म्मणि डो। स्वर्ग आनन्दात् [illegible] तथा [illegible]।) सोमः। (गच्छति [illegible] कर्त्तरि डो। [illegible]।) [illegible]। इत्यादि गौशब्दो [illegible]॥

गौग्गिक पुं, (गुग्गुलुः परिमाणविशेषः [illegible] प्रीतिमाणः। यद्वा गुग्गुलुः गुग्गुलुधूपस्तस्य यदि माणार्थे [illegible] विद्यते यस्य। गुग्गुल + ठञ्।) [illegible]। इति त्रिकाण्डशेषः॥

गौड़, पुं, [illegible]देशः। (यथा, प्रबोधचन्द्रोदये। २। ७।
"गौड़ं राष्ट्रमनुत्तमं निरुपमा तत्रापि राढ़ा पुरी।
भूरिश्रेष्ठिकनाम धाम परमं तत्रोत्तमो नः पिता॥")
तद्देशस्थे पुं भूम्नि। इति शब्दरत्नावली॥ तद्देशः गौडा यथा, [illegible]।
"वङ्गदेशं समारभ्य भुवनेशान्तगं शिवे।
गौड़देशः समाख्यातः सर्व्वविद्याविशारदः॥"
(तद्यौऽर्थे इत्यपूर्व्वदिशायां कूर्म्मविभागे पूर्व्वस्याम् उक्तः। यथा, तत्रैव। १४। १, ७।
"अथ पूर्व्वभागम्।" इत्युक्त्वा
"उदयगिरि भद्रगौड़क
पौण्ड्रोत्कलकाशिमेकलाम्बष्ठाः॥"
इत्युक्तम्॥)
पञ्च गौड़ा यथा, स्कन्दपुराणे।
"सारस्वताः कान्यकुब्जा गौड़मैथिलकोत्कलाः।
पञ्च गौड़ा इति ख्याता विन्ध्यस्योत्तरवासिनः॥"
(गुड़स्य विकारः। गुड़ + अण्। गुड़जाते त्रिषु स्त्री च। अस्य गुणा यथा,—
"[illegible] गौड़मपरं रोचनम्॥"
इति [illegible]॥
"[illegible] गौड़ं [illegible]।
[illegible]॥"
इति च चरके [illegible]॥)

गौड़मालक, पुं, (गौड़ं गौड़देशं मालयति [illegible]।) [illegible]। इति राजनिर्घण्टः॥ ([illegible])

गौड़िक्षु, स्त्री, (गौड़ गुड़विकारस्य [illegible]। "अण् इत्यिकः।" ४। २। ११६। इति ठञ्।) इक्षुविशेषः। यथा "[illegible] गौड़िक [illegible] मार्गे सुरापाने [illegible]॥" इति प्रायश्चित्तविवेके [illegible]॥ ([illegible] गुड़े साधु। "गुड़ादिभ्यष्ठञ्।" ४। ४। १०३। इति ठञ्। [illegible]। इति सिद्धान्तकौमुदी॥)

गौड़ी, स्त्री, (गुड़स्य विकारः गुड़विकारस्य [illegible]। गुड़ + अण्। ङीप्।) गुड़ादिकृता सुरा। गुड़ेर मद इति भाषा॥ (यथा, मनुः। ११। ९४।
"गौड़ी पैष्टी च माध्वी च विज्ञेया त्रिविधा सुरा॥")
तत्पर्य्यायः। वारुणी २। इति त्रिकाण्डशेषः॥ अस्या गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। मधुरत्वम्। वातनाशित्वम्। पित्तश्लेष्मकारित्वम्। दीपनत्वम्। पथ्यत्वम्। इति राजनिर्घण्टः॥ (यथा च हारीते प्रथमे स्थाने ११ अध्याये।
"गौड़ी कषाया मधुराम्लतीक्ष्णा
सन्दीपनी शूलहृत्पाचनी।
हृद्या [illegible] ग्रहणी प्रवृत्ते
पाण्डुगदांश्च शमयेन्नितरां॥")
रागिणीविशेषः। सा तु मेघरागस्य भार्य्या। इति सङ्गीतदामोदरः॥ (गौड़ानां गौड़देशवासिनां प्रिया।) काव्यरीतिविशेषः। यथा,—
"ओजः प्रसादमाधुर्य्य गुणत्रितयभेदतः।
गौड़वैदर्भपाञ्चाला रीतयः परिकीर्त्तिताः॥"
इति कामधेनुः॥
(यथा च साहित्यदर्पणे। ९। ३।
"ओजः प्रकाशकैर्व्वर्णैर्ब्बन्ध आडम्बरः पुनः।
समासबहुला गौड़ी——————॥"
उदाहरणं यथा, तत्रैव ष्टतो वैणीसंहारश्लोकः।
"चञ्चद्भुजभ्रमितचण्डगदाभिघात
सञ्चूर्णितोरुयुगलस्य सुयोधनस्य।
पुरुषोत्तमस्याद्य।
[illegible] गौड़ीया।
रीतिरत्नाकर[illegible]॥")

गौण, पुं (गुणादागता गौणी। तथा [illegible] प्रतिपादित। गौणी + अण्।) गौणवृत्तिबोधितः। यथा 'प्रबलस्य आद्यन्तकस्य [illegible] गुणः सम्बन्धी या सादृश्यम् सा गौणी तद्युक्तत्वात् गौणः।" इति न्यायवाक्यार्थेषु वैशेषिकदर्पणः॥ (अप्रधाने त्रि। यथा महाभारते। १२। ३३१। ९।
"यानि नाम नामानि गौणानि कीर्त्तितानि महर्षिभिः।
गौणानि तत्र नामानि कर्म्मजानि च कानि चित्॥")

गौणकाल पुं (गौणो गुणस्य कालः।) मुख्यकालोत्तरकालः। [illegible]। यथा—
'यदूक्तानां क्रियाणां मुख्यकालव्यतिक्रमात्।
[illegible]॥
[illegible] मुख्यकालस्यापि गौणकालत्वम्। [illegible] गौणकाल इत्यर्थः।" इति मलमास तत्त्वम्॥

गौणचान्द्र, पुं (गौणो प्रधानश्चान्द्रमासः।) कृष्णप्रतिपदादिपौर्णमास्यन्तमासः। स तु प्रायः पश्चिमदेशीयानां व्यवहारे।

'[illegible] मासः [illegible]॥'
अपि च [illegible]।
"चान्द्रोऽपि द्विविधः गौणो मुख्यश्चैव [illegible]।
गौणः कृष्णप्रतिपदादिपौर्णमास्यन्त ईरितः॥"

गौणी, स्त्री (गुणः सादृश्यादिकम् अस्याः। गुण + अण् + ङीप्।) [illegible]लक्षणाविशेषः। यथा—
"[illegible] गुणाभ्यां [illegible]।
[illegible] गौणलक्षणैव गौण्याः [illegible]॥"
("सा पूर्णाभ्यां [illegible]। [illegible]। सा [illegible] 'गौणी सारोपा [illegible]। [illegible] गौणी यथा 'एतानि तैलानि हेमन्ते सुखानि' [illegible]। प्रयोजने यथा, [illegible] 'एते राजकुमारा गच्छन्ति'। [illegible] गौणी यथा 'तैलानि हेमन्ते सुखानि'। प्रयोजने यथा, 'राजकुमारा गच्छन्ति'। [illegible] गौणी यथा 'राजा गौड़ेश्वरः शासनं प्रेषयति'। प्रयोजने यथा, गौर्वाहीकः। [illegible] गौणी यथा, 'राजा शासनं प्रेषयति'। प्रयोजने यथा, 'गौरेवायम्'।

अत्र [illegible] गोशब्दवाहीकयोः [illegible] तैलत्वाभावात् [illegible]। [illegible] गोशब्दार्थमात्रगोपनाय [illegible]। [illegible] [illegible]। [illegible] गुणा एव [illegible]। [illegible]। [illegible]। [illegible]। प्रथमः। [illegible]। द्वितीयः। [illegible]। [illegible]। [illegible] च प्रतीयते [illegible]। गोशब्दो मुख्यया वृत्त्या [illegible]। [illegible]। [illegible]। इत्थम् मुख्येनार्थेन [illegible]। [illegible]। [illegible] गौणवृत्तिरिति [illegible]। [illegible] सम्भवति।" [illegible]।

इति साहित्यदर्पणे । २ । १३ ।) अस्यास्तु सर्व्वं लक्षणाशब्दे द्रष्टव्यम् ॥

गौतम, पुं (गोतमस्य ऋषेर्गोत्रापत्यमिति । "ऋष्यन्धकेति ।" ४ । १ । ११४ । इत्यण् ।) मुनिविशेषः । स तु शतानन्दः । इति हेमचन्द्रः ॥ शाक्यवंशावतीर्णबुद्धमुनिविशेषः । तत्पर्य्यायः । शाक्यमुनिः २ शाक्यसिंहः ३ सर्व्वार्थसिद्धः ४ शौद्धोदनिः ५ अर्कबन्धुः ६ मायादेवीसुतः ७ । इत्यमरः । १ । १ । १५ ॥ सर्व्वजित् ८ श्वेतकेतुः ९ धर्म्मकेतुः १० महामुनिः ११ पञ्चज्ञानः १२ सर्व्वदर्शी १३ महाबोधिः १४ महाबलः १५ बहुधनः १६ विमुक्तिः १७ सिद्धार्थः १८ शक्रः १९ । इति शब्दरत्नावली ॥ (अस्य हि गौतमीपुत्रत्वे प्रमाणं यथा, ललितविस्तरे १५ अध्याये । "हे आत्मवर्द्धिर्मृगपक्षे । आत्मार्थेर्हि मृगयमाणा च पश्यन्ति त्वा । महाप्रजावत्यपि गौतमी यदि देवमाता गच्छतीव परिष्वजते स्म राजानं शुद्धोदनमेवाह । प्रिय मां महाराज । पुत्रेण सङ्गमी कुरुष्वेति ।" वैवस्वतमन्वन्तरे सप्तर्षीणामन्यतमः । यदुक्तं हरिवंशे ७ । १४—१५ ।

"अत्रिर्वसिष्ठो भगवान् कश्यपश्च महानृषिः ।
गौतमश्च भरद्वाजो विश्वामित्रस्तथैव च ।
तथैव पुत्रो भगवान् ऋचीकस्य महात्मनः ।
सप्तमो जमदग्निश्च ऋषयः साम्प्रतं दिवि ॥"

अयमेव तु विंशतितमे द्वापरयुगे वेदव्यासो बभूव । यथा देवीभागवते । १ । ३ । ३१

"अन्तरीक्षोऽथ विंशेऽथ गौतमस्तु ततः परम् ॥"

कुरुकुलवृद्धराजपाण्डुसुतानामाचार्य्यः कृपः । गौतमवंशोद्भवत्वादेवास्य तथात्वम् । यथा, हरिवंशे ३२ । ७५—७६ ।

"अवस्कन्नं शरस्तम्बे मिथुनं समपद्यत ।
कृपया तच्च जग्राह शान्तनुर्मृगयां गतः ॥
कृपः स्मृतः स वै तस्मात् गौतमी च कृपी तथा ।
एते शारद्वताः प्रोक्ता एते ते गौतमाः स्मृताः ॥"

मुनिभेदः । स तु एकतद्वितादिऋषीणां पिता । यथा, महाभारते । ९ । ३६ । ७—९ ।

"आसन् पूर्व्वयुगे राजन् ! मुनयो भ्रातरस्त्रयः ।
एकतश्च द्वितश्चैव त्रितश्चादित्यसन्निभाः ।
सर्व्वे प्रजापतिसमाः प्रजावन्तस्तथैव च ।
ब्रह्मलोकजितः सर्व्वे तपसा ब्रह्मवादिनः ।
तेषान्तु तपसा प्रीतो नियमेन दमेन च ।
अभवद्गौतमो नित्यं पिता धर्म्मरतः सदा ॥"

न्यायदर्शनभेदः । इति हेमचन्द्रः । ४ । २६५ ॥)

गौतमप्रभवा, स्त्री, (गौतमः प्रभवो यस्याः । यद्वा, गौतमात् प्रभवतीति । प्र+भू+अच् ।) गोदावरी नदी । इति राजनिर्घण्टः ॥

गौतमी, स्त्री (गोतमस्य इयम् । तस्येदमित्यण् ततः स्त्रियां ङीप् ।) दुर्गा । इति मेदिनी । मे । ४३ ॥ (यथा, हरिवंशे । १७६ । ७ ।
'गौतमी कंसहन्त्री च योगाद्याऽनन्दवर्द्धिनी ॥")
रोचनाविशेषः । इति शब्दरत्नावली ॥ गोदावरी नदी । (यथा, गौ रामायणे । ५ । २ । २७ ।

"योऽगदोगौतमीं रम्यां गिरिं पर्णेति चार्ब्बुदम् ॥"

तथा च हारीते प्रथमस्थाने सप्तमेऽध्याये ।

"पश्चिमाद्रिसमुद्भूता गौतमी पुण्यभावना ।
अस्याः शीतं जलं चापि कफवातविकारहृत् ॥
पित्तप्रशमनं वर्ण्यं सर्व्वदोषविकारहृत् ।
पुण्या पयस्विनी वेगा प्रसौरा च वरानना ॥
गोदा गोपवती ख्याता गौतम्यानुगता इमाः ।
आसां जलं मतं नातिवातश्लेष्मविकारकृत् ॥")

गोरोचना । इति राजनिर्घण्टः ॥ (गोतमस्यापत्यं स्त्री । गोतमवंशीयशरद्वत्कन्या आद्रव्याद्धत्यात्वम् । कृपी । सा तु द्रोणस्य भार्य्या अश्वत्थाम्नो माता च । यथा, महाभारते । १ । १३१ । ४६ ।

"अलभत् गौतमी पुत्रमश्वत्थामानमेव च ॥"

गायत्रीरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ४ ।

"गौतमी गामिनी गाथा गन्धर्व्वाप्सरसेविता ॥")

गौधार, पुं, (गोधाया अपत्यम् । "आरगुदीचाम् ।" ४ । १ । १३ । इति आरक् ।) गोधिकात्मजः । इत्यमरः । २ । ५ । ६ ॥ गोधा इति ख्यातः ॥

गौधेय पुं, (गोधाया अपत्यम् । "शुभ्रादिभ्यश्च ।" ४ । १ । १२३ । इति ढक् ।) गोधिकात्मजः । इत्यमरः । २ । ५ । ६ ॥

गौधेर, पुं, (गोधाया अपत्यम् । "गोधाया ढ्रक् ।" ४ । १ । १२९ । इति ढ्रक् ।) गोधिकात्मजः । इत्यमरः । २ । ५ । ६ ॥

गौर स्त्री, (गुरते चित्तं यत्र । गुर इ ङ उद्यमे + "हलश्चेति घञ् । तत स्वार्थे अण् । यद्वा, गवते इति । गुङ् शब्दे + "ऋज्रेन्द्रेति ।" उणां । २ । २८ इति रन्प्रत्ययेन निपातनात् साधुः ।) पद्मकेशरः । इति मेदिनी । रे २८ ॥ (मध्यकेशरप्रान्तेऽस्य विशेषतयापि ।) कुङ्कुमम् । स्वर्णम् । इति राजनिर्घण्टः ॥

गौर, पुं, (गवते अव्यक्तं शब्दयतीति । गुङ् शब्दे + "ऋज्रेन्द्रेति ।" उणां । २ । २८ । रन्प्रत्ययेन निपातनात् सिद्धम् ।) श्वेतसर्षपः ।
("गौरस्तु सर्षपः प्राज्ञैः सिद्धार्थ इति कथ्यते ।
सर्षपस्तु रसे पाके कटुस्निग्धः सतिक्तकः ॥
तीक्ष्णोष्णः कफवातघ्नो रक्तपित्ताग्निवर्द्धनः ।
रक्षोहरो जयेत् कण्डूं कुष्ठ कोष्ठकृमिग्रहान् ॥
यथा रक्तस्तथा गौरः किन्तु गौरो वरो मतः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।) चन्द्रः । इति मेदिनी । रे । २८ ॥ धवद्रुमः । इति राजनिर्घण्टः ॥ पीतवर्णः । गोरो इति भाषा । तद्युक्तरशौषधं यथा —

"ब्रह्माक्षनालपारस्तु गन्धकश्च तथैव च ।
सतभिदा हरिता च शिला सम्द्रावणेन द्वि ॥
माहिषिक पुरीषेण मर्दिता इयभस्मकः ।
अस्य ब्रह्मवर्द्धं कुम्भाण्डगौरमीश्वर ॥"
इति गारुडे १९४ अध्यायः ।

श्वेतदुः । अरुणवर्णः । तद्वति त्रि । इत्यमरः ॥ (यथा, रामायणे । ४ । ३९ । १४ ।

"तरुणादित्यवर्णैश्च शशगौरैश्च वानरैः ॥"

यथा च रघुः । २ । ३५ ।

"कैलासगौरं वृषमारुरुक्षोः
पादार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम् ॥")

श्रीचैतन्यदेवः । इत्यनन्तसंहिता ॥ (मृगविशेषः । यथा, भागवते । ३ । १ । २२ ।

"शरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा ।
एते चैकशफाः क्षत्तः शृणु पञ्चनखान् पशून् ॥")

गौर, त्रि, विशुद्धः । इति मेदिनी । रे । २७ ॥

गौरचन्द्र, पुं (गौरेण तप्तहेमवर्णेन चन्द्रयति आह्लादयतीति । चदि आह्लादे + णिच् + रक् ।) श्रीचैतन्यदेवः । यथा,—

"लक्ष्मीश्च गौराङ्गी गौरचन्द्रः शचीसुतः ।
मधुगौरो गौरहरिर्नामानि भवितानि मे ॥"
इत्यनन्तसंहिता ॥

गौरजीरक, पुं (गौरः शुक्लवर्णो जीरकः ।) शुक्लजीरकः । शादा जीरा इति भाषा ॥ तत्पर्य्यायः । अजाजी २ श्वेतजीरकः ३ कणाह्वा ४ कणजीरः ५ कणा ६ गिरिशीर्षा ७ दीर्घकणा ८ सिताजाजी ९ गौराजाजी १० । अस्य गुणाः । हिमत्वम् । रुचिकारित्वम् । कटुत्वम् । मधुरत्वम् । दीपनत्वम् । कृमिविषाध्मानघ्नत्वम् । चक्षुर्हितत्वञ्च । इति राजनिर्घण्टः ॥

गौरत्वक, पुं (गौरी शुक्लवर्णा त्वक् यस्य ।) इङ्गुदीवृक्षः । इति राजनिर्घण्टः ॥

गौरव, क्ली, (गौरव सामर्थ्यविनाशस्य । "प्रथ्व्यादिभ्योऽण् ।" ५ । २ । १२७ । इत्यण् ।) अभ्युत्थानम् । इति हेमचन्द्रः । ६ । १६४ ॥ (गुरोर्भावः । गुरु + "इगन्ताच्च लघुपूर्व्वात् ।" ५ । १ । १३१ । इत्यण् ।) गुरुत्वम् । इति मुग्धबोधम् ॥ (यथा महाभारते । १ । १६३ । १८ ।

"शरीरगौरवादस्य भिन्ना नागैर्विघूर्णिता ॥"

उत्कर्षः । यथा रघुः । १४ । १८ ।

"शुश्राव सेव्यः प्रभवान्वितस्य
भविष्यते गौरवमादधानम् ॥"

आदरः । यथा, कुमारे । ३ । १ ।

"प्रयोजनापेक्षितया प्रभूणां
प्रायश्चलं गौरवमाश्रितेषु ॥")

गौरवित, त्रि, (गौरवं सञ्जातमस्येति तारकादित्वादितच् ।) श्लाघ्यः । तत्पर्य्यायः । आढ्य मिश्र २ । इति त्रिकाण्डशेषः ॥

गौरशाक, पुं, (गौरं गौरवर्णं शाकोऽस्येति ।) मधुकवृक्षविशेषः । इति जटाधरः ॥

गौरसर्षप पुं (गौरश्चासौ सर्षपश्चेति कर्म्मधारयः ।) श्वेतसर्षपः । (यथा

"इन्दोः षष्ठोऽथ श्वेत सिद्धार्थो गौरसर्षपः ।"
इति वैद्यकरत्नमालायाम् ॥)

तत्पर्य्यायः । कदम्बकः १ सिद्धार्थः २ भूतनाशनः ३

कटुचिचिं ५ चपल ६ कफघ्न ७ राजिका म्न ८ तीक्ष्णक ९ दुरावर्ष १० रक्षोघ्न ११ पुत्रसर्षप १२ सिद्धप्रयोजन १३ सिद्धसाधन १४ सितसर्षप १५। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। उष्णत्वम्। वातरक्तग्रहदोषविषभूतनाशित्वम्। बलप्रद। इति राजनिर्घण्टः॥ कटुत्वम्। तीक्ष्णत्वम्। कफरक्तकण्डूकुष्ठकीटग्रहविनाशित्वम्। रक्तपित्ताग्निवर्द्धनत्व। इति भावप्रकाशः॥ (परिमाणविशेषः। यथा, मनुः। ८। १३३।

"सर्षपाः षट् यवो मध्यस्त्रियवं त्वेककृष्णलम्।
ता राजसर्षपस्तिस्रस्ते त्रयो गौरसर्षपः॥")

गौरसुवर्ण, क्ली, (गौरं शुभ्रं सुवर्णमिव शोभनो वर्णो यस्य।) शाकविशेषः। तत्तु मिथिलादेशे प्रसिद्धम्। तत्पर्यायः। स्वर्णम् २ सुगन्धिकम् ३ मूलकम् ४ वारिजम् ५ हयम् ६ गन्धशाकम् ७ कटुशाकम् ८ पूर्णशाकम् ९। अस्य गुणाः। शिशिरत्वम्। कफपित्तज्वरदाहशमनत्वम्। ... इति राजनिर्घण्टः॥

गौरा, स्त्री, (गौरान्निजभर्त्तुर्वर्णात् गौरी गौरशब्दस्य षित्वात् अत्र विशुद्धत्वेपरत्वे टाप्।) गौरी। इति त्रिकाण्डशेषः॥

गौराङ्ग, पुं, (गौरं तप्तकाञ्चनवर्णम् अङ्गं कलेवरं यस्य।) श्रीचैतन्यदेवः। यथा —

"गौराङ्गं गौरदीप्ताङ्गं पठेत् स्तोत्रं कृताञ्जलिः।
नन्दगोपसुतस्यैव नमस्यामि गदाग्रजम्॥"

इति ब्रह्मयामले चैतन्यकल्पे चैतन्यस्तवः॥

अपि च ब्रह्मयामले।

"गौराङ्गो गौरगम्भीरः स्वनामामृतनामकः॥"

गौराद्रक, पुं, (गौरवर्णं आर्द्रक इव।) स्थावरविषभेदः। इति हेमचन्द्रः। ४। २६४॥

गौरास्य, पुं, (गौरं शुक्लवर्णं आस्यं मुखं यस्य।) कृष्णवानरः। इति राजनिर्घण्टः॥

गौरिका, स्त्री, (गौर्य्येव। गौरी + स्वार्थे कन्। ह्रस्वः।) अष्टवर्षीया कन्या। इति शब्दरत्नावली॥

गौरिल, पुं, (गौरवर्णोऽस्यास्तीति। गौर + काशादित्वात् इलच्।) श्वेतसर्षपः। लौहचूर्णम्। इति मेदिनी। ८७॥

गौरी, स्त्री, (गौर + "षिद्गौरादिभ्यश्च।" ४। १। ४१। इति ङीष्।) पार्व्वती। (यथा, रघुः। २। २६।

"गौरीगुरोर्गह्वरमाविवेश॥")

पार्व्वती किल गौरीरूपेण मेनकागर्भे कान्यकुब्जे जाता। यथा, देवीभागवते। ७। ३८।

"गौरी तीर्था कान्यकुब्जे रम्भा तु मलयाचले॥")

अष्टवर्षा कन्या। (सा तु अष्टवर्षवयस्का कन्या। यदुक्तं स्मृतौ।

"अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी॥"

तथा च महाभारते। १। २२९। ४०।

"गौर्य्या भवं गौरास्या सहस्रांशुसमप्रभम्॥")

हरिद्रा। दारुहरिद्रा। गोरोचना। प्रियङ्गुवृक्षः। वसुधा। नदीविशेषः। (यथा, महाभारते। ६। ९। २५।

"वस्त्रं सुवर्णां गौरीञ्च किम्पुनां धवलां तथा॥"

गङ्गा। यथा, काशीखण्डे। २९। ४९।

"गङ्गा गन्धवती गौरी गन्धर्व्वनगरप्रिया॥")

वरुणभार्य्या। इति मेदिनी। रे। २८—२९॥ धर्म्मवंशीयप्रसेनजिद्राजभार्य्या। यथा,—

"द्वेभे प्रसेनजिद्भार्य्ये गौरी नाम पतिव्रताम्।
अभिशप्ता तु सा भर्त्रा नदी वै बाहुदाभवत्॥"

इति हरिवंशः॥

गुल्मलताविशेषः। इति हेमचन्द्रः॥ मल्लिका। शितदूर्व्वा। मल्लिका। तुलसी। सुवर्णकदली। आकाशमांसी। इति राजनिर्घण्टः॥ रागिणीविशेषः। सा तु मालवरागपत्नी। तस्या रूपं यथा सङ्गीतदामोदरे।

"आरामभध्यगता कुमारका शारदेन्दुमुख-
लक्ष्मीः।
रक्ता दाडिमबीजं दधती गौराननेऽगौरी॥"

(केषाञ्चिन्मते तु इयं कौशिकरागस्य पत्नी। यदुक्तं सङ्गीतदर्पणे रागाध्याये। ३३।

"तोड़ी खम्बावती गौरी गुणक्री ककुभा तथा।
रागिण्यो रागराजस्य कौशिकस्य वराङ्गनाः॥"

केषाञ्चित् मते इयं श्रीरागस्य पत्नी। यदुक्तं तत्रैव रागाध्याये। ३४।

"मालश्री त्रिवणी गौरी केदारी मधुमाधवी।
ततः पाहाड़िका ज्ञेया श्रीरागस्य वराङ्गनाः॥"

अस्या रागिण्या अतीतपहरात् परं गानसमयो ज्ञेयः॥)

गौरीज, क्ली, (गौर्य्यां जायते इति। जन् + डः।) अभ्रकम्। इति राजनिर्घण्टः॥

गौरीपुत्र, पुं, (गौर्य्याः पुत्रः।) कार्त्तिकेयः। इति हलायुधः॥

गौरीपुष्प, पुं, (गौरीप्रियं पुष्पमस्य।) प्रियङ्गुवृक्षः। इति राजनिर्घण्टः॥

गौरीललित, क्ली, (गौर्य्याः हरिद्राया इव ललितम्। पीतवर्णत्वादस्य तथात्वम्।) हरितालम्। इति राजनिर्घण्टः॥

गौरशिख, पुं, (गुरवः पण्डिताः शिखास्य। "तस्य मित्रादिभ्यः।" ...) गुरुवंशीयाः। इति सम्प्रदायः॥

गौल्मिक, पुं, (गुल्मे साधुः। गुल्म + ठक्। यद्वा गौल्मम्।) गुल्मरक्षकः। इति राजनिर्घण्टः॥

गौड़, क्ली, (गुड़स्य भावः। गुड़ + ष्यञ्। ... लत्वम्।) मधुरम्। इति राजनिर्घण्टः॥

गौष्ठिक, त्रि, (गोष्ठं तत्स्वाम्यत्वेन। गोष्ठ + "एकगोपूर्व्वात् ठञ् नित्यम्।" ५। २। ११८। इति ठञ्।) गोष्ठस्वामी। इति व्याकरणम्। याञ्चा इत्थं प्रसङ्गात् आहिः इति भाषा॥

गौष्ठीन, क्ली, (पूर्व्वं भूतं गोष्ठम्। गोष्ठ + "गोष्ठात् खञ् भूतपूर्व्वे।" ५। २। १८। इति खञ्।) भूतपूर्व्वगोस्थानम्। इत्यमरः। ३। १। १३॥ पूर्व्वेर गोठ इति भाषा। (यथा, भट्टिः। ४। ३२।

"सान्द्रताय च गौष्ठीने वने च्छायाश्रयेऽबहौ॥")

ग्रथ, इ ङ कौटिल्ये। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) इदित्। (ग्रन्थ्यते। ङ, ग्रन्थते काष्ठं कुटिलं करोतीत्यर्थः। ग्रन्थते शास्त्रं कुटिलीकरोति। ... इति दुर्गादासः॥

ग्रथित, त्रि, (ग्रथ्यते स्म इति। ग्रथ + क्तः। नलोपः।) ग्रन्थयुक्तम्। गाथा इति भाषा। तत्पर्य्यायः। सन्दितम् २ दृब्धम् ३। इत्यमरः। ३। १। ८६॥ गुम्फितम् ४। (यथा, रघुः। ८। ३४।

"कुसुमैर्ग्रथितामपार्थिवै-
र्स्रजमातोद्य शिरोनिवेशिताम्॥")

आक्रान्तम्। हिंसितम्। इति मेदिनी। ते। १०६॥

ग्रन्थ, क्रि श हर्षे। इति कविकल्पद्रुमः॥ (क्र्यां-परं-सकं-सेट्।) वैदर्भाः। हर्षो ग्रन्थनम्। क्रि, ग्रन्थाति ग्रथ्नाति। श, ग्रथ्नाति मालां मालिकः। ग्रन्थिकुर्य्यादित्यर्थः। इति माधवीयधातुवृत्तिः। इति दुर्गादासः॥

ग्रन्थ, पुं, (ग्रन्थ हर्षे + भावे घञ्।) द्रव्यग्रन्थनम्। धनम्। (ग्रथ्यते विरच्यते इति। ग्रन्थ + कर्म्मणि घञ्।) शास्त्रम्। (यथा, महाभारते। १। १। ८१।

"ग्रन्थग्रन्थिं तदा चक्रे मुनिर्गूढं कुतूहलात्॥")

द्वात्रिंशदक्षरनिर्म्मितिः। अनुष्टुप्छन्दः श्लोकः। इति हेमचन्द्रः॥

ग्रन्थकर्त्तृ [र] त्रि ग्रन्थं करोतीति। कृ + तृच्। प्रत्ययः। ग्रन्थकारः। पुस्तककारकः। शास्त्रकृत्।

ग्रन्थकुटी स्त्री, (ग्रन्थस्य कुटी गृहमिव।) लेखनस्थानम्। इति त्रिकाण्डशेषः॥

ग्रन्थन, क्ली, (ग्रन्थ + भावे ल्युट्।) गुम्फनम्। ग्रथना। तत्पर्य्यायः। सन्दर्भः २ रचना ३ गुम्फः ४ श्रन्थनम् ५। इति हेमचन्द्रः। ६। ११४॥

ग्रन्थना, स्त्री, (ग्रन्थ + भावे युच्। स्त्रियां टाप्।) ग्रन्थनम्। इति शब्दरत्नावली॥

ग्रन्थि, पुं, (ग्रन्थ्यते इति। ग्रन्थ + "सर्व्वधातुभ्य इन्।" उणां। ४। ११८। इति इन्।) वंशादिपर्व्व। ... इति भावप्रकाशे ... ग्रन्थिः गांठि इति भाषा। तत्पर्य्यायः। पर्व्व २ परुः ३। इत्यमरः। २। ४। १६२॥ ... (यथा, शाकुन्तले। ...

"... ...॥")

भद्रमुस्ता। पिण्डालुः। पिप्पलीमूलम्। इति राजनिर्घण्टः॥ (रोगविशेषः। ... यथा, भागवते। ६। २। ४१।

"भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः ।")
कौटिल्यम् । ग्रन्थिपर्व्वरोग । (यथा, चरके सूत्रस्थाने तृतीयेऽध्याये ।

"मनःशिला लकुचकात् सकुष्ठं
सलोमशं सैन्धवजं करञ्जं ।
ग्रन्थिश भौर्जे करवीरमूल-
चूर्णानि साध्यानि तुषोदकेन ।")

बन्धनम् । रुग्भेदः । इति मेदिनी । थे । ६ ।
तस्य निदानपूर्व्वकं यथाह माधवकरः ।

"वातादयो मांसमसृक्प्रदुष्टा
सन्दूष्य मेदश्च तथा शिराश्च ।
वृत्तोन्नतं विग्रथितन्तु शोथं
कुर्व्वन्त्यतो ग्रन्थिरिति प्रदिष्ट ।"

तस्य वातिकरूपं यथा —

"आयम्यते वृश्च्यति तुद्यते च
प्रत्यस्यते मथ्यति भिद्यते च ।
कृष्णो मृदुर्व्वस्तिरिवाततश्च
भिन्नः स्रवेच्चानिलजोऽस्रमच्छम् ।"

पैत्तिकस्य यथा,—

"दन्दह्यते धूप्यति चूष्यते च
पापच्यते प्रज्वलतीव चापि ।
रक्तः सपीतोऽप्यथवापि पित्ताद्
भिन्नः स्रवेदुष्णमतीव चास्रम् ।"

श्लैष्मिकस्य यथा —

"शीतो विवर्णोऽल्परुजोऽतिकण्डूः
पाषाणवत् संहननोपपन्नः ।
चिराभिवृद्धिश्च कफप्रकोपा-
द्भिन्नः स्रवेच्छुक्लघनञ्च पूयम् ।"

(अपास्य सकलग्रन्थिलक्षणं यथा,—
"कफप्रधानाः कुर्व्वन्ति मेदोमांसासृगाश्रिताः ।
वृत्तोन्नतं यं श्वयथुं स ग्रन्थिर्ग्रथनात् स्मृतः ।
दोषास्रमांसमेदोऽस्थिशिराव्रणभवा नव ।
ते तत्र वातादायामतोदभेदान्वितोऽसितः ।
स्थानात् स्थानान्तरगतिरकस्माद्धानिवृद्धिमान् ।
मृदुर्व्वस्तिरिवानद्धो विभिन्नोऽच्छस्रवत्यसृक् ।
पित्तात् सदाहः पीताभो रक्तो वा पच्यते द्रुतम् ।
भिन्नोऽस्रमुष्णं स्रवति श्लेष्मणा नीरुजो घनः ।
शीतः सवर्णः कण्डूमान् पक्वः पूयं स्रवेद्घनम् ।
दोषैर्दुष्टेऽसृजि ग्रन्थिर्भवेन्मूर्च्छत्सु जन्तुषु ।
शिरामांसञ्च संश्रित्य सस्वापः पित्तलक्षणः ।
मांसलैर्दूषितं मांसमाहारैर्ग्रन्थिमावहेत् ।
स्निग्धं महान्तं कठिनं शिरानद्धं कफाकृतिम् ।
प्रवृद्धं मेदुरैर्मेदो नीतं मांसेऽथवा त्वचि ।
वायुना कुरुते ग्रन्थिं भृशं स्निग्धं मृदुं चलम् ।
श्लेष्मतुल्याकृतिं देहक्षयवृद्धिक्षयोदयम् ।
स विभिन्नो घनं मेदस्ताम्रासितसितं स्रवेत् ।
अस्थिभङ्गाभिघाताभ्यामुन्नतावनतन्तु यत् ।
सोऽस्थिग्रन्थिः पदाक्रान्ते सहसाम्भस्यवगाहनात् ।
व्यायामाद्वा प्रतान्तस्य शिराजालं सशोणितम् ।
वायुः सम्पीड्य सङ्कोच्य वक्रीकृत्य विशोष्य च ।
निष्फुरं नीरुजं ग्रन्थिं कुरुते स शिराह्वयः ।
असाध्ये दुश्चिकित्स्यः स्यात् मर्म्मस्थाश्च ।

सार्द्रे वा बन्धरहिते गात्रेऽश्माभिहतेऽथवा ।
मांसासृगसृजा दुष्टं संशोष्य ग्रथितं व्रणम् ।
कुर्य्यात् सदाहः कण्डूमान् व्रणग्रन्थिरयं स्मृतः ।
साध्या दोषास्रमेदोजा न तु स्थूलखरा चलाः ।
मर्म्मकण्ठोदरस्थाश्च——————।"
इति वाभटेनोत्तरस्थाने २९ अध्याये उक्तम् ।)

तस्य चिकित्सा यथा,—
"सर्ज्जिकामूलकक्षारैः शङ्खचूर्णसमन्वितः ।
एतैर्न विहितो लेपो हन्ति ग्रन्थिं तथार्ब्बुदम् ।
ग्रन्थिर्न यो नश्यति भेषजेन
निष्कास्य तं शस्त्रचिकित्सकेन ।
जात्यादिपक्वेन घृतेन वैद्यो
व्रणेन चाग्नेन च संचिकित्सेत् ।
ग्रन्थीनुद्धृत्य पश्चात्तु व्रणोक्तं क्रममाचरेत् ।
शिराग्रन्थिं विहायान्ये येषि शस्त्रं प्रयुञ्जते ।
अन्ये चाचार्य्याः ।" इति भावप्रकाशः ।
("ग्रन्थिष्वामेषु कर्त्तव्या यथास्वं शोफवत् क्रिया ।
वृहतीचित्रकव्याघ्रीकणासिद्धेन सर्पिषा ।
संशोध्योर्द्ध्वमधश्चापि तीक्ष्णैः शस्तञ्च लेपनम् ।
अस्वेदं वातजं ग्रन्थिं विमृद्गीयात् पुनः पुनः ।
एष वाते विधिर्व्वेद्यः क्रमः पित्तात्मके पुनः ।
जलौकसो हिमं सर्व्वं कफजे वातिको विधिः ।
तथाप्यपक्वं छित्वैनं स्थिते रक्तेऽग्निना दहेत् ।
साध्यशेषं यतः शेषोऽपि पुनराप्यायते ध्रुवम् ।
मांसव्रणोद्भवौ ग्रन्थी पाटयेदेवमेव च ।
कार्य्यं मेदोभवेऽप्येतत् तप्तैः फालादिभिश्च तम् ।
मृद्गीयात्तिलदिग्धेन च्छन्नं द्विगुणवाससा ।
शस्त्रेण पाटयित्वा वा दहेन्मेदसि सङ्कृते ।
शिराग्रन्थौ नवे पेयं तैलं साहचरं तथा ।
उपनाहोऽनिलघ्नैर्व्वस्तिकर्म्मशिराव्यधः ।
अहिंसकैर्येऽल्पबिलादिभिः स्यात्
स्वल्पधारैः स्फुरत्सु शिराभिः ।
ग्रन्थिर्मनुष्यस्य भवन्त्यनल्पा
मेदोभवः स्विन्नतमश्च यस्य ।
स शोधितः स्निग्धतमस्य काष्ठै-
स्स्वङ्गुलीभिर्मर्द्दयेत्प्रयत्नम् ।
विपाट्य चोद्धृत्य भिषक् सकोषं
शस्त्रेण दग्ध्वा व्रणवच्चिकित्सेत् ।
यदल्पशेषं परिशोधितञ्च
प्रयाति भूयोऽपि पुनर्व्विवृद्धिम् ।
तस्मादशेषं कुशलः समस्तं
छेद्यो भवेद्रोगमशेषमान् ।
शोथे हते पाकगते च शोधनम्
मृगाः पतनेत्रा यमसेवितेषु ।
उपदर्शं न प्रतिवारयेच्च
मैर्म्मिणे पूर्व्वतरैर्यथोक्तैः ।
ततः क्रमेणास्य यथाविधानं
व्रणं व्रणज्ञस्तरया चिकित्सेत् ।"
इति चरके चिकित्सास्थाने १० अध्यायः ।
अपरा चिकित्सा च यथा —
"ग्रन्थिष्वपामेषु भिषगन्विध्या-
च्छोफक्रियायाः विहितं विधिञ्च ।

रक्तेऽप्यथापि चरत्ययं भिषक्
सर्व्वैव वाधिवर्त्तं विदधीत ।
तैलं पिबेत् सर्पिरथो द्वयं वा
दत्वा वसां वा विदुषां विदध्यात् ।
अपेहि वातादयमूर्च्छासिद्धं
मेदश्च तु श्लेष्मभवो द्वयं वा ।
हिमाय रोहिण्यमृतास भार्गी
श्योनाकविल्वागुरुकृष्णगन्धाः ।
गोजी च पिष्टा सह तालपत्र्या
ग्रन्थौ विधेयोऽनिलजे प्रलेपः ।
स्वेदोपनाहान् विविधांश्च कुर्य्यात्
तथा प्रविद्धाग्नपरांश्च लेपान् ।
विदार्य्य वा पक्वमपोह्य पूयं
प्रक्षाल्य विल्वार्कनरेन्द्रतोयैः ।
तिलैः सपञ्चाङ्गुलपत्रमिश्रैः
संशोधयेत् सैन्धवसंप्रयुक्तैः ।
शुद्धं व्रणं चाप्युपरोपयेत्तु
तैलेन रास्ना सुरसान्वितेन ।
विडङ्गयष्टीमधुकान्वताभिः
सिद्धेन वाचीरसमन्वितेन ।
जलौकसः पित्तकृते हितास्तु
क्षीरोदकाभ्यां परिषेचनञ्च ।
काकोलिवर्गस्य च शीतलानि
पिबेत् कषायाणि सशर्कराणि ।
द्राक्षारसेनेक्षुरसेन चापि
चूर्णं पिबेच्चापि हरीतकीनाम् ।
मधूकजम्ब्वर्ज्जुनवेतसानां
त्वग्भिः प्रदेहानवचारयेत ।
सशर्करैर्वा सह मूलवन्दै-
र्द्विहारभीरुष्च मधुद्रवैर्वा ।
विदार्य्य वा पक्वमपोह्य पूयं
धावेत् कषायैः वकलस्य शोणैः ।
तिलैः सयष्टीमधुकैर्विशोध्य
दधि प्रयोज्य मधुरैर्व्विपक्वम् ।
घृतेन दोषेषु यथानुपूर्व्वं
ग्रन्थौ भिषक् श्लेष्मकृते तु ।
विम्लापनस्य विम्लापनमेव कृत्वा
दद्रूघ्नलोहितशालपत्रैः ।
विकङ्कतारग्वधकाकदन्ती
काकादनी तापसवृक्षमूलैः ।
आलेपयेत् पिण्डकाकमाचीं
करञ्जकालामृतकैश्च विद्वान् ।
अप्रम्याप्त प्रशमप्रयात-
मपक्वमेवापहरेद्विदार्य्य ।
दहेत् स्थिते चास्रजि पित्तकल्पा
सद्यः पतीतश्च विधिं विदध्यात् ।
या मांसकल्पः कठिना द्रवश्च
तामेव योज्यश्च विधिर्व्विधिज्ञैः ।
शस्त्रेण चापाद्य तु मध्यमाशु
प्रक्षालयेत् पक्वतमे कषाये ।
संशोधनैश्च विशोधयेत्तु
क्षारोदके चोत्तमकाष्ठे ।

कुर्ष्टे च तैल मवचारबीय
विडङ्गपाठारजनीविपक्वम् ।
मद्ये यथार्थे तिलकल्कदिग्ध
दग्धोमसिक्ताद्विगुणं पटान्तम् ।
कृताग्रमग्नेन सुपू प्रगम्य
क्षौद्रेण धीमान् दहनं दिनाय ।
प्रलिप्य दार्व्वादिघ वाण्यया वा
प्रवमया गोदनमप्य वाम्यम् ।
निपात्य वा ग्रथमपौद्य मेदा
दहेत् शयकन्मयया विनार्ग्यम् ।
प्रयाय मधुना तिले शुपिष्टे
शरधिकाद्वैरितालमिश्रैः ।
पयोऽर्थे यौद्रयवयगाढे
चारोत्तरैरेवमभिप्रयोद्य ।”

इति सुश्रुते चिकित्सितस्थाने अष्टादशेऽध्याये ।)

ग्रन्थिकं, क्ली, (ग्रन्थिभिः कायति प्रकाशते इति । कै + क ।) पिप्पलीमूलम् । (अस्य पर्य्याया यथा, “ग्रन्थिकं पिप्पलीमूलमूषणं चटकाशिरः ।” इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।) ग्रन्थिपर्णम् । गुग्गुलुः । इति मेदिनी । के । ६ ।

ग्रन्थिकः पुं, (ग्रन्थिभिः पर्व्वभिः कायतीति । ग्रन्थि + कै + क ।) करीरः । (ग्रन्थिना कौटिल्येन कायतीति । कै + क । यद्वा ग्रन्थं ग्रन्थिकाख्यमस्तीति ठन् ।) दैवज्ञः । (यथा, महाभारते । १४ । ७० । ७ ।
“तत्र मत्ता महार्थैव ग्रन्थिका यौतप्रायिका ।
ब्राह्मणादयस्तु यदेषां भवाद्विनम् ।”)
माद्रेयनकुलः । इति मेदिनी । के । ८६ ।
(नकुलस्य । इयमाख्या तु यदानेन ह्यज्ञातचर्य्या विराटपुरे वासः कृतस्तदेव जाता । यथा, महाभारते । ४ । १ । २ ।
नकुल उवाच ।
“अश्वबन्धो भविष्यामि विराटनृपतेरहम् ।
ग्रन्थिको नाम नाम्नाहं कर्म्मैतत् सुप्रियं मम ।”)

ग्रन्थितं, त्रि (ग्रथ्यते स्म इति । ग्रथि + क्त ।) ग्रथितम् । इत्यमरः । ३ । १ । ८६ ।

ग्रन्थिदला, स्त्री, (ग्रन्थिर्दलेषु पर्व्वसु यस्याः ।) मालाकन्दः । इति राजनिर्घण्टः ।

ग्रन्थिदूर्व्वा, स्त्री, (ग्रन्थियुक्ता दूर्व्वा । शाकपार्थिवादिवत् समासः ।) मालादूर्व्वा । इति राजनिर्घण्टः ।

ग्रन्थिपर्णं क्ली, (ग्रन्थिषु पर्णानि यस्य । ग्रन्थिवत् पर्णानि यस्येति वा ।) गन्धद्रव्यविशेषः । गठियाला इति भाषा । तत्पर्य्यायः । शुकम् २ बर्हिपुष्पम् ३ स्थौणेयम् ४ कुक्कुरम् ५ । इत्यमरः । २ । ४ । १२७ । बर्हि पुष्पम् ६ बर्हः ७ पुष्पकुष्ठम् ८ शुकच्छदम् १० । इति तट्टीका । स्थौणेयकम् ११ कुक्कुरपुष्पम् १२ शुकवर्हम् १३ । इति रत्नमाला । विश्वीवाह्यम् १४ गन्धाग्र पुष्पकम् १५ बर्हिः १६ शुकपुष्पम् १७ शुकच्छदम् १८ । इति शब्दरत्नावली । मान्यकम् १९ वाक्पुष्पम् २० नीलपुष्पम् २१ शुकाह्वम् २२ शैलपर्णकम् २३ । अस्य गुणाः । तिक्तत्वम् । तीक्ष्णत्वम् । कटुत्वम् । उष्णत्वम् । दीपनत्वम् । लघुत्वम् । कफवातविषश्वासकण्डूदौर्गन्ध्यनाशित्वञ्च । इति भावप्रकाशः ॥ अस्य क्षेमकगुणाः । कफवातापस्मारज्वरनाशित्वम् । इति राजवल्लभः ।

ग्रन्थिपर्णः, पुं (ग्रन्थिः पर्व्व तद्युक्तपर्णानि यस्य ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः । (चोरकशब्देऽस्य गुणादयो ज्ञेयाः ।)

ग्रन्थिपर्णी, स्त्री, (ग्रन्थिपर्ण + टाप् ।) शतुकालता । इति राजनिर्घण्टः ।

ग्रन्थिपर्णी, स्त्री, (ग्रन्थिपर्ण + गौरादित्वात् ङीष् ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ।

ग्रन्थिफल, पुं, (ग्रन्थियुक्तं फलमस्य ।) शाकुरुट वृक्षः । कपित्थवृक्षः । मदनवृक्षः । इति राजनिर्घण्टः ।

ग्रन्थिमत्फल, पुं (ग्रन्थिरस्यास्तीति मतुप् । ग्रन्थिमत् पर्व्वविशिष्टं फलं यस्य ।) लकुचः । इति राजनिर्घण्टः ।

ग्रन्थिमान्, [त्] पुं (ग्रन्थिरस्यास्तीति मतुप् वा । ग्रन्थि + मतुप् ।) अस्थिसंहारकवृक्षः । हाड़भाङ्गा इति हाड़जोड़ा इति च भाषा । तत्पर्य्यायः । अस्थिसंहारी २ वज्राङ्गी ३ अस्थिशृङ्खला ४ । अस्य गुणाः । वातश्लेष्मनिवृहनाशित्वम् । अस्थियोजकत्वम् । उष्णत्वम् । गात्रकत्वम् । कफरोगपित्तकारित्वम् । रूक्षत्वम् । स्वादुत्वम् । लघुत्वम् । वृष्यत्वम् । पाचनत्वञ्च । इति भावप्रकाशः ॥ एतत्पत्रोक्तपर्य्यायाः राजनिर्घण्टोक्तगुणाश्चास्थिसंहारशब्दे द्रष्टव्याः । (ग्रन्थियुक्ते, त्रि । यथा कुमारे । १ । ४६ ।
“कुक्कुरप्रभावाद्विशेषवीर्य्या
हृदयार्थं ग्रन्थिमतीं दधानम् ।”)

ग्रन्थिमूल, क्ली, (ग्रन्थिर्मूले यस्य ।) गृञ्जनम् । इति राजनिर्घण्टः ।

ग्रन्थिमूला स्त्री, (ग्रन्थियुक्तं मूलं यस्याः । शाकपार्थिवादित्वात् समासः ।) मालादूर्व्वा । इति राजनिर्घण्टः ।

ग्रन्थिलं, क्ली (ग्रन्थिर्विद्यतेऽस्य । ग्रन्थि + “पिच्छादिभ्यश्च ।” ५ । २ । १०० । इति लच् ।) पिप्पलीमूलम् । इति राजनिर्घण्टः । आर्द्रकम् । इति शब्दचन्द्रिका ।

ग्रन्थिलः, पुं (ग्रन्थिरस्यास्तीति । “पिच्छादिभ्यश्च ।” ५ । २ । १०० । इति लच् ।) विकङ्कतवृक्षः । बइँचि इति भाषा । (पर्य्यायोऽस्य यथा,—
“विकङ्कतः स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः ।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।) करीरवृक्षः । इत्यमरः । २ । ४ । ७०, ७१ । तथा आलुकम् । पिण्डालुकम् । तथा विकङ्कतः । चोरकनामगन्धद्रव्यम् । विकङ्कतवृक्षः । इति राजनिर्घण्टः । ग्रन्थियुक्ते त्रि । इति मेदिनी । ले । ७४ ।

(यथा, आर्य्यासप्तशत्याम् । ९०० ।
“रोषितैव मया हसि । सकोऽपि सन्न्यस्तरोषे
कर्गतोऽपि ।
प्रणयिताननीयताय यद सौरव ३४ ३३ ।”)

ग्रन्थिला, स्त्री, (ग्रन्थिल + टाप् ।) भद्रमुस्ता । (भद्रमुस्ताशब्देऽस्या गुणादिर्ज्ञातव्यः ।) मालादूर्व्वा । गण्डदूर्व्वा । इति राजनिर्घण्टः ।

ग्रन्थिवर्हीं [न्] पुं, (ग्रन्थिमिर्बर्हति वर्द्धते इति । वर्ह वृद्धौ + णिनि ।) ग्रन्थिपर्णवृक्षः । इति शब्दचन्द्रिका ।

ग्रन्थिहरः, पुं, (ग्रन्थिं कौटिल्यं हरति दूरीकरोति ग्रन्थिमतां कार्य्यभञ्जिकतां वा निर्विरोधे । ग्रन्थि + हृ + अच् ।) अमात्यः । मन्त्री । इति त्रिकाण्डशेषः ।

ग्रन्थीकं, क्ली, (ग्रन्थिभिः कायतीति । ग्रन्थि + कै + क । निपातनात् दीर्घत्वम् ।) ग्रन्थिकम् । पिप्पलीमूलम् । इति हेमचन्द्रः ।

ग्रप, ऋ ङ भक्षणे । इति कविकल्पद्रुमः । (भ्वा०-आत्म०-सक०-सेट् ।) दैवगुणः । ऋ, अजग्रपत् । ङ, ग्रपते । हिमांशुमाशु ग्रसते । इति माघः । इति दुर्गादासः ।

ग्रस, कि भासे । इति कविकल्पद्रुमः । (चुरा०-पर०-अक०-सेट् ।) दैवगुणः । कि ग्रासयति पर्णं छागः । ग्रसति सम हरीन्दुः पूर्ण बन्धं विभाय । इमो ग्रहणौ मर्त्यमानिनीः । इति दुर्गादासः ।

ग्रस्त त्रि (ग्रस्यते स्म इति । ग्रस + क्त । “क्त विभाषा ।” ७ । २ । १५ । इति इडभावः ।) शुभवर्धमरस् । अवबद्धोत्कारण । इत्यमरः । (यथा, रामायणे । ४ । ३२ । ११ ।
“राहुग्रस्ताननो हर्ष्यं पशुलोऽशुनी यथा ।”)
खादितम् । इत्यमरः । ३ । ४ । ९० । (अस्तनम् । यथा, माघकाव्ये । २ । ५११ ।
“दोषमीशमयपक्ष साधक मामधानि वा ।”)

ग्रह ग्र न ग्रहणे । इति कविकल्पद्रुमः । (क्र्या०-उभ०-सक०-सेट् ।) ग्र न, गृह्णाति गृह्णीते । इति दुर्गादासः ।

ग्रह ऋ कि आदाने । इति कविकल्पद्रुमः । (चुरा० पक्षे भ्वा० पर० सक० सेट् ।) ऋ, अजग्राहत् । कि, ग्राहयति ग्रहति । इत्यन्ये । इति दुर्गादासः ।

ग्रहः पुं (गृह्णाति गतिविशेषानिति ग्रहः, गृह्णाति फलदातृत्वेन जीवानिति । ग्रह + “विभाषा ग्रहः ।” ३ । १ । १४३ । इति णः पक्षे अच् ।) सूर्य्यादिनवः । यथा । रविश्चन्द्रः कुजो बुधो गुरुः शुक्रः शनिः राहुः केतुश्च । (यथा,—
“सूर्य्यश्चन्द्रो मङ्गलश्च बुधश्चापि बृहस्पतिः ।
शुक्रः शनैश्चरो राहुः केतुश्चेति नव ग्रहाः ।”
“कोऽपवादीश्च ग्रहास् पापहृत् सौम्य
ग्रहाणि ।
कस्मिन् ग्रह महाराज महति तस्मिन् ग्रहे ।”

इत्यनेन पद्मायां यत् सम्यक्सुक्तं तत् वराह मताशुसारेणैवावधेयम् । एतेन राहुकेत्वोर्ग्रहत्वं सर्व्वैर्नाद्रियन्ते इति सूचितम् ।) तेषामष्टधा गतिर्यथा । वक्रा १ अतिवक्रा २ कुटिला ३ मन्दा ४ मन्दतरा ५ समा ६ शीघ्रा ७ शीघ्रतरा ८ । इति ज्योतिषम् । तेषां ध्यानानि यथा ।

तत्र सूर्य्यस्य ध्यानम् ।

"क्षत्रियं काश्यपं रक्तं कालिङ्गं द्वादशाङ्गुलम् ।
पद्महस्तद्वयं पूर्व्वाननं सप्ताश्ववाहनम् ।
शिवाधिदैवतं सूर्य्यं वह्निप्रत्यधिदैवतम् ॥" १ ॥

सोमस्य ध्यानम् ।

"साग्निं वैश्यमात्रेयं चतुरस्रं सिताम्बरम् ।
श्वेतं द्विबाहुं वरदं दक्षिणे सगदेतरम् ॥
दशाश्वं श्वेतपद्मस्थं चिन्तयेदुमाधिदैवतम् ।
जलप्रत्यधिदैवञ्च सूर्य्याभिमुखमाह्वयेत्तथा ॥" २ ॥

मङ्गलस्य ध्यानम् ।

"आवन्त्यं क्षत्रियं रक्तं मेषगं चतुरङ्गुलम् ।
आरक्तमाल्यवसनं भारद्वाजं चतुर्भुजम् ।
दक्षिणोर्द्ध्वक्रमाच्छक्तिवराभयगदाकरम् ।
आदित्याभिमुखं देवं तद्वदेव समाह्वयेत् ॥
स्कन्दाधिदैवतं भौमं क्षितिप्रत्यधिदैवतम् ॥" ३ ॥

बुधस्य ध्यानम् ।

"मागधं द्व्यङ्गुलाभं च वैश्यं पीतं चतुर्भुजम् ।
वामोर्द्ध्वक्रमतश्चर्म्मगदावरदखड्गिनम् ॥
सूर्य्यास्यं सिंहगं सौम्यं पीतवस्त्रं तथाह्वयेत् ।
नारायणाधिदैवञ्च विष्णुप्रत्यधिदैवतम् ॥" ४ ॥

बृहस्पतेर्ध्यानम् ।

"द्विजमाङ्गिरसं पीतं सैन्धवञ्च षडङ्गुलम् ।
ध्यात्वा पीताम्बरं जीवं सरोजस्थं चतुर्भुजम् ॥
दण्डोदाद्यवरदकरकादक्षमाह्वयेत् ।
ब्रह्माधिदैवं सूर्य्यास्यमिन्द्रप्रत्यधिदैवतम् ॥" ५ ॥

शुक्रस्य ध्यानम् ।

"शुक्रं भोजकटं विप्रं भार्गवञ्च नवाङ्गुलम् ।
पद्मस्थमाह्वयेत् सूर्य्यमुखं श्वेतं चतुर्भुजम् ॥
वराभयवराक्षस्रकदण्डहस्तं सिताम्बरम् ।
शक्राधिदैवतं ध्यायेत् शचीप्रत्यधिदैवतम् ॥" ६ ॥

शनेर्ध्यानम् ।

"सौराष्ट्रं काश्यपं शूद्रं सूर्य्यास्यं चतुरङ्गुलम् ।
कृष्णं कृष्णाम्बरं गृध्रगं सौरिं चतुर्भुजम् ॥
तद्वद्वाणवरं शूलधनुर्हस्तं समाह्वयेत् ।
यमाधिदैवतं प्रजापतिप्रत्यधिदैवतम् ॥" ७ ॥

राहोर्ध्यानम् ।

"राहुं मलयजं शूद्रं पैठीनं द्वादशाङ्गुलम् ।
कृष्णं कृष्णाम्बरं सिंहासनं ध्यात्वा तथाह्वयेत् ॥
चतुर्ब्बाहुं खड्गवरशूलचर्म्मकरं तथा ।
कालाधिदैवं सूर्य्यास्यं सर्पप्रत्यधिदैवतम् ॥" ८ ॥

केतूनां ध्यानम् ।

'कौशद्वीपं केतुगणं जैमिनीयं षडङ्गुलम् ।
धूम्रं धूम्रावृतं गृध्रमाह्वयेद्दक्षिणाननम् ॥
सूर्य्यास्यं धूम्रवर्णं वरदं गदिनं तथा ।
चित्रगुप्ताधिदैवञ्च ब्रह्मप्रत्यधिदैवतम् ॥"

इति पद्मपुराणम् ॥

तेषां कामरूपे स्थानानि ध्यानमन्त्रादिञ्च यथा,

"पूर्व्वे सुमन्नायास्तु नवशैलस्य पश्चिमे ।
महाश्मेन यत्र देव आदित्यः सततं स्थितः ॥
भैरवस्य द्वितीयांशे यदा सर्व्वे सुराः स्थिताः ।
कामरूपे महापीठे महेन्द्रवरुणादयः ॥
तदा तत्राह्वये शैले शौर्य्योऽपि व्यवस्थितः ।
त्रिस्रोता नाम तत्रास्ति नदी पूर्व्वदिशि स्थिता ॥
कापोतं करवं पश्चाद्यस्य कुण्डद्वयं स्थितम् ।
कापोतकुण्डे विधिवत् स्नात्वा करवकुण्डके ॥
तत्राचलं समारुह्य सम्पूज्य च दिवाकरम् ।
सकृदेव नरो याति भास्करस्य गृहं प्रति ॥
सूर्य्यरश्मिसमुद्भूत । कापोत । करवाम्बुज ।
पुण्यतोय । महाघोर पाप कापोत मे हर ॥
इत्यनेन तु मन्त्रेण स्नात्वा कापोतपुष्करे ।
करवं समुपस्पृश्य तत्राद्रौ च रविं यजेत् ॥
त्रिविधं मन्त्रबीजन्तु सहस्रपरमन्ततः ।
रामयेति चतुर्थ्यन्तं देवतायाः शुभेक्षण ॥
अग्निबीजमिदं प्रोक्तमादित्यस्यातिकामदम् ॥"

ध्यानं यथा,—

"पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः ।
सप्ताश्वः सप्तरज्जुश्च द्विभुजो भास्करः सदा ॥
चतुरस्रं मण्डलं चास्य अष्टपत्रसमन्वितम् ।
अङ्गुष्ठाद्यङ्गुलीनान्तु हृदादीनां तथा च षट् ॥
अङ्गमन्त्रैश्च षडङ्गं उभाभ्यां वह्निसंयुतः ।
सर्व्वव्यापी समुद्दिष्टो मन्त्रः सर्व्वफलप्रदः ॥
हृच्छिरस्तु शिखावक्त्रनेत्रास्त्रोदरपृष्ठतः ।
बाह्वोः पार्श्वोर्जङ्घयोस्तु पादयोश्चापि विन्यसेत् ॥
जघने तु समस्तानि क्रमान्मन्त्राक्षराणि तु ।
क्रमशोऽत्तरतन्त्रोक्तः पूर्व्वमेव प्रकीर्त्तितः ॥
विष्वक्सेनं तथैशान्यां विद्याद्या दलमध्यतः ।
निर्म्माल्यधृगुपपन्नो माठराद्यास्तु पार्श्वयः ॥
बीजमुत्तरतन्त्रस्य पूर्व्वतः प्रतिपादितम् ।
अनेन विधिना तत्र पूजयित्वा सुरोत्तमम् ।
स कामानखिलान् प्राप्य इह लोके स उत्तमः ।
सुखी दिवि ततो गच्छेद्भास्करस्यालयं प्रति ॥१॥"

इति कालिकापुराणे ८० अध्यायः ॥

"पूर्व्वे वायुगिरेः शैलश्चन्द्रकूट इति स्मृतः ।
त्रिकोणस्थानसंकाशादूर्द्ध्वे चन्द्रमण्डलम् ॥
द्वितीयवर्गस्याद्यन्तु बिन्द्विन्दुभ्यामलङ्कृतम् ।
चन्द्रबीजमिति प्रोक्तं तेन चन्द्रं प्रपूजयेत् ॥
यदापि प्रतिदर्शे तु पर्व्वन्ते त विशांपतिः ।
प्रदक्षिणीकरोत्येव दशभिर्वाजिभिर्युतः ॥
तस्यैव पूर्व्वभागे तु सोमकुण्डाह्वयं सरः ।
तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते ॥
खगादवभ्रस्तचन्द्रः कामाख्याविपिने यतः ।
तत्र तद्विमहातनिःपतासोमराघय ॥
तैलोयैर्व्वापिनः कुण्डमकरोदिन्द्रसन्निधौ ।
मध्ये पुण्यतमस्थाने नाम ब्रह्मशिलोपरि ॥
चन्द्ररश्मिसमुद्भूतपङ्कजाक्ष महोर्म्मे ।
सुधासमय चाह्लाद त्वं चन्द्र कलुषं हर ॥
इत्यनेन तु मन्त्रेण स्नात्वा चन्द्रावधि ।
चन्द्रकूटं समारुह्य पूजयेद्यस्तु स नरः ॥
अविच्छिन्ना सन्ततिस्तु सुकान्ता तस्य जायते ।
परञ्च चन्द्रभवनं भित्त्वा याति परं पदम् ॥"

ध्यानं यथा,—

"श्वेतः श्वेताम्बरधरो दशाश्वो श्वेतभूषितः ।
गदापाणिर्द्विबाहुश्च कर्त्तव्यो वरदः शशी ॥२॥
पूर्व्वस्यां कपटाख्यास्तु शैलाश्चित्र इति स्मृतः ।
यः पूर्व्वभागपान्तोऽभूद्दिश्याग्नेय्यां व्यवस्थितः ॥
पीठस्य चाग्नेयस्तु अर्व्वाक् पर्व्वत उच्यते ।
तस्मिन् वसन्ति सततं ग्रहा राजन् । यथेच्छया ॥
तत्र तान् पूजयेद्यस्तु स नाप्नोत्यापदं क्वचित् ।
रूपं मन्त्रश्च सूर्य्यस्य चन्द्रस्य प्रतिपादितम् ।
ग्रहाणामितरेषान्तु मन्त्रं रूपं शृणुष्व मे ॥
रक्ताम्बरधरः शूली शक्तिमांश्च गदाधरः ।
चतुर्भुजो मेषगो वरदो मङ्गलो मतः ॥३॥
पीताम्बरधरः शूली पीतमाल्यानुलेपनः ।
खड्गचर्म्मगदापाणिः सिंहस्थो वरदो बुधः ॥४॥
सुगौरः पीतवासाः स्वकपङ्कजसंस्थितः ।
मालां कमण्डलुं दण्डं वामेन वरदायकम् ।
चतुर्भुजं सुसन्नद्धं चिन्तयेद्देवतोषकम् ।
सर्व्वैर्देवगणैर्नित्यं नम्यमानं मनोहरम् ॥५॥
शुक्लवस्त्रः शुक्लवर्णः शुक्लनागोपरिस्थितः ।
चतुर्भुजः साक्षमालां पुस्तकञ्च वराभये ॥
क्रमाद्दक्षिणवामाभ्यां धत्ते दैत्यगुरुः सदा ॥६॥
इन्द्रनीलनिभः शूली वरदो गृध्रवाहनः ।
पाशबाणासनधरो ध्यातव्योऽर्कसुतः सदा ॥७॥
कामदेवस्य बीजन्तु मन्त्रं भौमस्य कीर्त्तितम् । मं ।
दुर्गाया नेत्रबीजस्य यत्तु मध्याक्षरं शुभम् ।
तन्मन्त्रं शशिपुत्रस्य सर्व्वकामफलप्रदम् । बु ।
मकारपञ्चमो यस्तु चतुर्थस्वरसंयुतः ।
गणेशबीजं तदिदं गुरोर्मन्त्रं प्रकीर्त्तितम् । बृ ।
बिन्द्विन्दुसंयुतश्चापि पूर्व्ववर्णोऽपि यः पुनः ।
षष्ठस्वरसंयुक्तो भकारस्यादिरक्षरम् ।
प्रान्तवर्गाद्यक्षरन्तु बिन्द्विन्दुभ्यां समन्वितम् ।
भवेच्छुक्रस्य बीजन्तु सर्व्वकामसमृद्धिदम् । शु ।
प्रान्तवर्गाद्यक्षरन्तु चन्द्रबिन्दुसमन्वितम् ।
आद्यमन्त्यस्वरोपेतं तदेवेन्द्राग्निसंयुतम् ।
शनैश्चरस्य मन्त्रोऽयं सर्व्वदोषविनाशकः । श ।
बिन्दुचन्द्रसमायुक्तं नामाद्यक्षर एव वा ।
तेषां मन्त्रप्रकाशो वै मन्त्रसङ्घः प्रकीर्त्तितः ।
शान्तिके पौष्टिके क्रूरे एभिर्मन्त्रैर्ग्रहानिमान् ।
पूजयेत सर्व्वदा धीरो भूतिकामो महामतिः ॥
वरदाभयहस्तश्च खड्गचर्म्मधरस्तथा ।
सिंहासनगतः कृष्णो राहुर्धीरैः प्रचक्ष्यते ॥८॥
धूम्रवर्णो विशालाक्षः पुच्छरूपी चतुर्भुजः ।
खड्गचर्म्मगदाबाणपाणिः केतुः प्रभाजनः ॥९॥
उमात्मान्तादिदाद्येन स्वरेण सहिता पुनः ।
छायापञ्चमेनेन्दुबिन्दुभ्यां सहितावुभौ ॥
मन्त्रोऽयन्तु क्रमाद्राहोः केतोर्विलोमतः ।
आद्याक्षरं बिन्दुमद्वा मन्त्रहृन्तं तयोस्तयोः ॥ रा । के
एवं चित्रे शैलवरे पूजयित्वा नवग्रहान् ।
अभीष्टान् लभते कामान् शान्तिं तथोत्तमाम् ॥"

इति कालिकापुराणे ८१ अध्यायः ॥ * ॥

(अथ ग्रहयुद्धाधिकारो यथा,—
"ताराग्रहाणामन्योन्य स्याता युद्धसमागमौ ।
समागमः शशाङ्केन सूर्य्येणास्तमनं सह ॥
शीघ्रे मन्दाधिकेऽतीत संयोगो भवितान्यथा ।
द्वयोः प्राग्याथिनोरेवं वक्रिणोस्तु विपर्य्ययात् ॥
प्राग्यायिन्यधिकेऽतीतो वक्रिण्येष्यः समागमः ॥
ग्रहान्तरकलाः स्वस्वभुक्तिलिप्ताप्रमाहताः ।
भुक्त्यन्तरेण विभजेदनुलोमविलोमयोः ॥
द्वयोर्वक्रिण्यथैकस्मिन् भुक्तियोगेन भाजयेत् ॥
लब्धं लिप्तादिकं शोध्यं गते देयं भविष्यति ।
विपर्य्ययाद्वक्रगत्योरेकस्मिंस्तु धनक्षयौ ॥
समलिप्तौ भवेतां तौ ग्रहौ भगणसंस्थितौ ।
विवरं तद्वदुद्धृत्य दिनादि फलमिष्यते ॥
यथा दिग्ग्रहणामार्ग तथा विक्षेपलिप्तिका ।
नतोन्नतं साधयित्वा स्वकात् स्फुटग्रहात्तयोः ॥
विषुवच्छायया भक्ताद्विभेदाद्द्वादशोद्धृतात् ।
फलं प्रागतशाद्धौऽत्र सदिवार्द्धविभाजितम् ॥
लब्धं प्राच्यस्य सौम्याद्विक्षेपात् पश्चिमे धनम् ।
दक्षिणे प्राक्कपाले स्वं पश्चिमे तु तथा क्षयः ॥
सविमर्द्दकलाकान्तिमानार्द्धा क्षेपलिप्तिका ।
विश्लेषाः सदृशं कान्तिक्षेपयोर्भिन्नतुल्ययोः ॥
भवेतद्द्वयोर्योगे यथाक्रोदयसाधने ।
ग्रहोन्नती तु चन्द्रस्य शृङ्गोन्नत्यादिकं स्मृतम् ॥
तत्कालिकौ पुनः कार्य्यौ विक्षेपौ च तथाहतः ।
दिक्तुल्ये त्वन्तरं भेदे योगः स्फुटमथान्तरम् ॥
कुर्य्यात्क्षेपान्तरे स्यातां विग्रहद्वौ वहिता ।
विम्बमानार्द्धकलायां भगो ग्रहविवरागता ॥
भिन्नतुल्यधुमानार्द्धे विम्बार्द्धलिप्तया हृता ।
स्फुटाः स्वकर्णलिप्तास्ता भवेयुर्मानलिप्तिका ॥
छायाभूमौ विपर्य्यस्ते स्वच्छायाग्रे तु दर्शयेत् ।
ग्रहः प्रदर्श्यालक्ष्य ग्रहसूर्य्ये सम्प्रदातौ ॥
अथ दक्षोविकृतौ ग्रहूः पयादिम्मसर्वसिद्धौ ।
ग्रहान्तरेण विदित्वाथो यथाविप्रान्तगौ ॥
छायाकर्णौ ततो दद्याच्छायाग्रात्कर्णमध्यगौ ।
छायाकर्णाग्रसंयोगे संस्थितस्य प्रदर्शयेत् ॥
स्वशृङ्गाद्ग्रहौ सोऽपि ग्रहौ दृक्तुल्यतामितौ ।
उल्लेखं तारकायुद्धमिदं भेदः प्रकीर्त्तितः ॥
युद्धमंशुविमर्द्दाख्यमंशुयोगे परस्परम् ।
अंशादूनेऽपसव्याख्यं युद्धमेकोऽत्र चेदणुः ॥
समागमोऽशादधिके भवतश्चेद्बलान्वितौ ।
अपसव्ये जितो युद्धे पिहितोऽणुरदीप्तिमान् ॥
रूक्षो विवर्णो विध्वस्तो विजितो दक्षिणाश्रितः ।
उदक्स्थो दीप्तिमान् स्थूलो जयी याम्ये ऽपि यो
बली ॥
आसन्नावप्युभौ दीप्तौ भवतश्चेत् समागमः ।
स्वल्पौ द्वावपि विध्वस्तौ भवेतां कूटविग्रहौ ॥
उदक्स्थो दक्षिणस्थो वा भार्गवः प्रायशो जयी ।
शशाङ्केनैवमेतेषां कुर्य्यात् संयोगसाधनम् ॥
भावाभावाय लोकानां कल्पनेयं प्रदर्शिता ।
स्वमार्गगाः प्रयान्त्येते दूरमन्योन्यमाश्रिताः ॥"
इति सूर्य्यसिद्धान्ते ग्रहयुद्धाधिकारः ।
अथ ग्रहाणां दाशाधिपत्यकथनं ग्रहमाहात्म्ये

यथा,—
"मेषवृश्चिकयोर्भौमः शुक्रो वृषतुलाधिपः ।
बुधः कन्यामिथुनयोः प्रोक्तः कर्कस्य चन्द्रमाः ॥
स्यान्मीनधनुषोर्जीवः शनिर्मकरकुम्भयोः ।
सिंहस्याधिपतिः सूर्य्यः कथितो गणकोत्तमैः ॥"
अथ ग्रहाणामुच्चनीचस्थलकथनं तत्रैव यथा,—
"रवेर्मेषतुले प्रोक्ते चन्द्रस्य वृषवृश्चिकौ ।
भौमस्य मकरकर्कौ च कन्यामीनौ बुधस्य तु ॥
जीवस्य कर्कमकरौ मीनकन्ये सितस्य च ।
तुलामेषौ च मन्दस्य उच्चनीचावुदाहृतौ ॥"
अथ ग्रहाणामन्योन्यं मित्रशत्रुत्वमाह तत्रैव ।
"रवीन्दुभौमगुरवो ग्रहराजमित्रराजः ।
शशिनः मित्राणि भवन्ति परेषां शत्रवः
स्मृताः ॥
राहुरवी परं वैरं गुरुभार्गवयोरपि ।
मित्रौ बुधशनी वैरं विकमलात्मयोरपि ॥"
अथ ग्रहाणां प्रभातादिकालबलमाह तत्रैव
"प्रभातमिन्दुगुरू मध्याह्ने रविभूमिजौ ।
अपराह्णे भार्गवेन्दू सन्ध्या मन्दशशाङ्कौ ॥"
अथ ग्रहाणां दृष्टिकथनं तत्रैव यथा,—
"तिर्य्यग्दृशौ बुधसितौ भौमार्कौ चोर्द्ध्वदर्शिनौ ।
जीवेन्दू समदृष्टी च शनिराहू च्याधोदृशौ ॥"
अथ ग्रहाणां विचरणस्थानानि तत्रैव यथा,—
"भार्गवेन्दू जलचरौ जीवौ ग्रामचारिणौ ।
राहुशिखिमन्दाकाशं सुपर्तीऽरण्यचारिणः ॥"
अथ ग्रहाणां मितादिपातुबलनमाह तत्रैव
"पित्ते प्रभाकरभौमौ शैष्मा भार्गवशीतगू ।
वायुः मन्दराहू च पवनौ राहुमन्दगौ ॥"
अथ ग्रहाणां रसाख्यानमाह तत्रैव ।
"कुमारौ कटुकौ भौमौ लावणाम्लौ बुधः ।
मधुरौ चन्द्रगुरू तीक्ष्णौ समाकन्दमौ ॥"
अथ ग्रहाणां धातुमूलादिचिन्ताख्यानमाह ।
"मन्दिरधराभौमा धुर्य्याः शशिभार्गवौ ।
मूलं जीवबुधौ जीवं धातुर्मन्दादयः ॥"
अथ ग्रहाणां पदाख्यानमाह तत्रैव ।
"द्विपदौ भार्गवगुरू भूसुतार्कौ चतुष्पदौ ।
पक्षिणौ बुधराहुदौ च चन्द्रराहू सरीसृपौ ॥"
अथ ग्रहाणां जातिविशेषमाह ।
"विप्रौ शुक्रगुरू क्षत्रौ भौमार्कौ शूद्र इन्दुजः ।
इन्दुर्वैश्यः शनी म्लेच्छौ भैरवदृशवर्णौ ॥"
अथ ग्रहाणां देवतान्यासमाह ।
"शुक्र इन्द्रः शिवा ब्रह्मा पशुपतौ कुजो भगुः ।
वर्द्धनौ सोमविष्णु रौद्रौ शनिमुक्ताम्ब्यौ ॥"
अथ ग्रहाणां वस्त्रवर्णमाह तत्रैव ।
"रक्तस्य कृष्णः पीतो विचित्रः कनकद्युतिः ।
शुक्लविम्बाम्बः सौम्यो भौरजातिः नीलस्तथा ॥
मन्दादयोऽत्रैवपुष्य धमधूम्रमिदुमयाः ।
कविमुख्या पयसा ग्रहा सत्र प्रतिकृपा ॥"
ग्रहाणां धातुविज्ञानमाह तत्रैव ।
"कुक्षे गर्भे मरकतं बुधे स्वर्णं रौप्यम् ।
गुरौ रजतं हैम सूर्य्ये तानिकान्तौ ॥
भौमे वज्रं शनौ लौहं राहुन्यासि सीसकम् ।

धातोर्विनिश्चये ज्ञाते विधेय प्रत्युपाहृतम् ।
गुरौ चर्म्म धनाधारौ दैवात्तकलिकौ ।
रवौ मधुम्बरमाधवमिश्रशान्तिमयी वशौ ।
भानौ स्वामी बुधे पीतं शनिराहू च राहुद्युः ।
भानौभिर्ह्रे गुरुज्ञानं गरमुपि विनासयेत् ॥"
अथ ग्रहाणां लिङ्गावमाह तत्रैव ।
"सौमप्रवृत्तमार्त्तण्डगुरवस्तु पुरुषाः स्फुटाः ।
सोमसोमसमन्दा हि नपुंसकाः शनिः ॥"
अथ ग्रहाणां वयोवस्थामाह तत्रैव ।
"युवा कुजः शिशुः सौम्य ग्रहिश्चन्द्रौ च मध्यमौ ।
सप्तमार्कन्दर्देभ्यश्चविचः स्थविरा ग्रहाः ॥"
अथ ग्रहाणां प्रवासिस्थानमाह तत्रैव ।
"भौममन्दाः गौणिता प्रबला शुक्राश्चकाः ।
बृहस्पतेश्चिरकालिका गुरुराहुः स्मृताः ॥"
अथ ग्रहाणां दशाभोगकालविषये मतद्वैधं
ज्योतिषे ।
"रविमाहं निबद्धा च बहुविधविषादवम् ।
पक्षश्च भृगोश्च बुधाद्द्वादशसमानाह ॥
चयेषु गुरामामेवामविपाकः शुः ।
शनि चार्द्धं वर्षं समागु चार्द्धसमाम् ॥"
ग्रहाणां सूक्ष्मादिकम् कल्पद्रुमे द्रष्टव्यम् ॥
देवी दशा नक्षत्रादि च दशायामे द्रष्टव्यम्
पुराणे ६० अध्याये च द्रष्टव्यम् ॥ ० ॥
अथ नवग्रहयागविधानादि यथा,—
याज्ञवल्क्य उवाच ।
"श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत्
ततः ।
वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन् पुनः ।
सूर्य्यः सोमो महीपुत्रः सोमपुत्रो बृहस्पतिः ॥
शुक्रः शनैश्चरो राहुः केतुश्चेति ग्रहाः स्मृताः ॥
ताम्रकात् स्फटिकाद्रक्तचन्दनात् स्वर्णकादुभौ ।
रजतादयसः सीसात् कांस्यात् कार्य्या ग्रहाः क्रमात् ॥
स्वैः स्वैर्वर्णैर्वा पटे लेख्या गन्धैर्मण्डलकेषु वा ।
यथावर्णं प्रदेयानि वासांसि कुसुमानि च ॥
गन्धाश्च बलयश्चैव धूपो देयश्च गुग्गुलुः ।
कर्त्तव्यास्तत्र मन्त्रैश्च चरवः प्रतिदैवतम् ॥
आकृष्णेन इमं देवा अग्निर्मूर्द्धा दिवः ककुत् ।
उद्बुध्यस्वेति च ऋचो यथासंख्यं प्रकीर्त्तिताः ॥
बृहस्पते अति यदर्य्यस्तथैवान्नात् परिस्रुतः ।
शन्नो देवीस्तथा काण्डात् केतुं कृण्वन्निमास्तथा ॥
अर्कः पलाशः खदिरस्त्वपामार्गोऽथ पिप्पलः ।
उदुम्बरः शमी दूर्व्वा कुशाश्च समिधः क्रमात् ॥
एकैका अष्टशतं होतव्या मधुसर्पिषा ।
दध्ना चैव समायुक्ता समिधश्चरुमेव च ॥
गुडौदनं पायसञ्च हविष्यं क्षीरषाष्टिकम् ।
दध्योदनं हविः पूपान्मांसं चित्रान्नमेव च ॥
दद्याद्ग्रहक्रमादेवं द्विजेभ्यो भोजनं बुधः ।
शक्तितो वा यथालाभं सत्कृत्य विधिपूर्व्वकम् ॥
धेनुः शङ्खस्तथानड्वान् हेम वासो हयस्तथा ।
कृष्णा गौरायसश्छाग एता वै दक्षिणाः क्रमात् ॥
यश्च यस्य यदा दुःस्थः स तं यत्नेन पूजयेत् ।"
इति याज्ञवल्क्ये १ अध्यायः ।

अथ वेदभेदे ग्रहादीनां मन्त्रभेदाः क्रमशः प्रदर्श्यन्ते ।

	ऋग्वेदिनाम्	यजुर्वेदिनाम्	सामवेदिनाम्	अथर्ववेदिनाम्
सूर्यस्य	आ कृष्णेन रजसा ।१।३५।२	आ कृष्णेन रजसा। वा ३३।४३	उदु त्यं जातवेदसम् १।१।१।३।११*	विषासहिं सहमानम् १७।१।१
सोमस्य	आ प्यायस्व समेतु ते १।९१।१६	इमं देवा असपत्नम्। वा ९।४	सन्ते पयांसि । वा १२।११३†	प्रक्षुभ मन्त्रयामि ६।१२८।२
मङ्गलस्य	अग्निमूर्द्धा दिवः ८।४४।१६	अग्निर्मूर्द्धा दिव । वा १५।२०	अग्निर्मूर्द्धा दिवः १।१।१।३।७	त्वया मन्यो सरथम् ४।३१।१
बुधस्य	अग्ने विवस्वत १।४४।१	उद्बुध्यस्वाग्ने। वा १५।५४	अग्ने विवस्वत १।१।१।४।६	यज्ञायज्ञो विभजन्त ३।२८।१
बृहस्पतेः	बृहस्पते परि दीया १०।१ ३।४	बृहस्पते अतियदर्य । वा २६।३	बृहस्पते परि दीया २।९।३।२।११‡	बृहस्पतिर्नः परिपातु ७।५१।१
शुक्रस्य	शुक्रं ते अन्यत ६।५८।१	अन्नात् परिस्रुत । वा १९।७५	शुक्रं ते अन्यत् १।१।२।३।३	हिरण्यवर्णाः शुचयः १।३३।१
शनैश्चरस्य	शन्नोदेवीरभीष्टये १०।९।४	शन्नो देवीरभीष्टये। वा ३६।१२	शन्नो देवीरभीष्टये १।१।१।३।१३	सहस्रबाहुः पुरुषः १९।६।१
राहोः	कया नश्चित्र ४।३१।१	काण्डात् काण्डात्। वा १३।२	कया नश्चित्र १।२।२।३।५	दिवं चित्रमृतुथा
केतोः	केतुं कृण्वन्नकेतवे १।६।३	केतुं कृण्वन्नकेतवे। वा २९।३७	केतुं कृण्वन्नकेतवे २।६।३।१२।३	यस्ते पृथु स्तनयित्नु ७।११।१
सूर्यादिदेवेश्वरस्य	आ वो राजानम् ४।३।१	त्र्यम्बकं यजामहे। वा ३।६०	आ वो राजानम् १।१।५।२।७	मा नो विदन् विव्याधिनः १।१९।१
सोमाधिदेवो-मायाः	गौरीर्मिमाय १।१६४।४१	श्रीश्च ते लक्ष्मीश्च। वा ३१।२२	आपो हि ष्ठा २।९।२।१०।१	आपो हि ष्ठा १।५।१
कुजाधिदेव स्कन्दस्य	कुमारं माता ५।२।१	यदक्रन्दः प्रथमम्। वा २९।१२	स्योना पृथिवि। वा ३५।२१	अग्निरिव मन्यो त्विषितः ४।३१।२
बुधाधिदेवहरेः	इदं विष्णुर्विचक्रमे १।२२।१७	विष्णोरराटमसि। वा ५।२१	इदं विष्णुर्विचक्रमे १।३।१।३।८	प्र तद्विष्णु स्तवते ७।२६।२
जीवाधिदेव ब्रह्मणः	त्वमित सप्रथा ८।६ ।५	आ ब्रह्मन् ब्राह्मणः। वा २२।२२	त्वमित् सप्रथाः १।१।१।४।८	ब्रह्म जज्ञानम् ४।१।१
शुक्राधिदेवेन्द्रस्य	इन्द्र यो विश्वत १।७।१०	सजोषा इन्द्र। वा ७।३७	इन्द्रमिद् देवतातये १।३।२।१।७	इन्द्रेम प्रतरम् ६।५।२
शन्यधिदेवयमस्य	यमाय सोमं सुनुत १ ।१४।१३	यमाय त्वाङ्गिरस्वते। वा ३८।९	आयं गौः पृश्नि २।६।१।१।११	यः प्रथमः प्रवतमाससाद १८।२८।३
राह्वधिदेव कालस्य	ब्रह्म जज्ञानम्। वा ।१३।३	कार्षिरसि समुद्रस्य। वा ६।२८	ब्रह्म जज्ञानम्। १।४।१।३।८	रोहितः काल १९।५।३८
केत्वधिदेव चित्रगुप्तस्य	उषो वाज हि १।४८।११	चित्रावसो स्वस्ति। वा ३।१८	चित्र इच्छिशो १।१।२।२।९।	आमाव यदनामासम्
सूर्यप्रत्यधि-देवाग्नेः	अग्निं दूतं वृणीमहे १।१२।१	अग्ने दूत पुरोऽग्ने। वा २२।१७	अग्निं दूतं वृणीमहे १।१।१।१।३	समास्त्वाग्न ऋतवः २।६।१
सोमप्रत्यधि-देवजलस्य	अप्सु मे सोमः १।२३।२	आपो हि ष्ठा। वा ११।५	उदुत्तमं वरुण पाशम्। वा १२।१२	शन्नो देवीरभीष्टये। वा ३६।१२
कुजप्रत्यधि देवभूमेः	स्योना पृथिवि १।२२।१५	स्योना पृथिवि। वा ३५।२१	पृथिव्यन्तरीक्षम्। तै आ ७।७।३	भूमे मातर्निधेहि १२।१।६३
बुधप्रत्यधि-देवविष्णोः	सहस्रशीर्षा पुरुषः १ ।९ ।१	इदं विष्णुर्विचक्रमे। वा ५।१५	सहस्रशीर्षा पुरुषः। वा ३१।१	इदं विष्णुर्विचक्रमे ७।२६।४
जीवप्रत्यधि देवेन्द्रस्य	इन्द्रायेन्दो मरुत्वते ९।६४।२२	इन्द्र आसां नेता। वा १७।४०	इन्द्रायेन्दो १।५।२।४।६	इन्द्र जुषस्व प्र वहा २।५।१
शुक्रप्रत्यधि-देवशच्याः	उतायर्थौ शुभगे १ ।१४५।२	अदित्यै रास्नासि। वा ११।३०	शकाश्यका तपसी। अ ३।१ ।१२	प्रेत पादौ १३७।४
शनिप्रत्यधि देवप्रजापतेः	प्रजापते न त्वद् १०।१२१।१	प्रजापते न त्वद्। वा १ ।२०	प्रजापते न त्वद्। वा १ ।२०	[illegible] ११।४।१
राहुप्रत्यधि-देवसर्पाणाम्	आयं गौः पृश्नि १०।१८९।१	नमोऽस्तु सर्पेभ्यः। वा १३।६	[illegible] १।३।२।३।८	तिरश्चिरक्षित ३।२७।१
केतुप्रत्यधि-देवब्रह्मणः	ब्रह्म जज्ञानम्। वा १३।३	ब्रह्म जज्ञानम्। वा १३।३	सुत ब्रह्मा प्र वलिश १।५।२।१।२	[illegible] ४।४ ।८

पाठान्तराणि प्रदर्श्यन्ते —

* बभ्राड्वाध्यधि १।१।५।४।४ † सोमं राजानम् १।१।२।५।१ ‡ बृहद्यो हि १।१।१।२।४।८

(गृह्यते अनुग्रहाति अम्यमयत्यी इति । ग्रह+ 'ग्रहवृदृनिश्चिगमश्च ।" ३ । ३ । ५८ । इति अप् ।) अनुग्रह । निर्बन्ध । (यथा, आर्यासप्तशत्याम् । ३३५ ।
"ग्रहति यदि निहित कुसुमं बहु स्मार्यतो बहुश ।
बकुलस्यापि ग्रहेष्वर इव भाति । दुष्पयो दयित ॥"
"दुष्टो ग्रह आग्रहो यस्य यथे दुष्टवायो ग्रहचेति विग्रह ।" इति तट्टीका ।) ग्रहणम् । (यथा, भागवते । ३ । १५ । ३५ ।
"मन्त्रादिभिरनुग्रहाद् विभ्रतुलान्-
मादिमधावमतलामनिकालरम ।")
रणोद्यम । पूतनाम्य । स तु बालग्रहः । (एतेषां भामानि विवरणञ्च बालग्रहशब्दे द्रष्टव्यानि ॥४॥) नैर्बन्ध्य । (यथा रघु । १२ । २८ ।
"सम्राजकस्मिन्नासौ विराधो नाम राक्षस ।
अतिष्ठन्मार्गमावृत्य रामस्येन्दोरिव ग्रह ॥")
उपराग । स तु चन्द्रसूर्ययोर्ग्रहणम् । इति मेदिनी । ह । ३ । (यदुक्तं तिथितत्त्वे ।
"अश्विनादासते राहौ कन्याया भानितो रवि ।
चतुर्थ्यामस्तरे चन्द्रसदा सम्भाव्यते ग्रह ॥"
ग्रहाणां नवत्वात् नवग्रहशब्दोऽपि नवसंख्यावाचक । यथा देवीभागवते । २ । १ । १ ।
"चतुर्दशमहस्रस्य मासक्रमात् प्रकीर्तितम् ।
अथा ग्रहसहस्रस्तु मार्कण्डेय महाद्भुतम् ॥"
महादेव । यथा, महाभारते । १३ । १७ । ४० ।
"चन्द्र सूर्य शनि केतुर्ग्रहो ग्रहपतिर्वर ॥")
ग्रहकल्लोल पुं, (ग्रहस्य चन्द्रस्य कल्लोल इव विग्रहक इव ।) राहु । इति त्रिकाण्डशेष ।
ग्रहण, क्ली (ग्रहणं इति । ग्रह+भावे ल्युट ।) स्वीकार । (यथा च रामायणे । १ । ६ । १६ ।
'नहि कश्चित् तत्र ग्रहणशीलनरोऽपि वा ।"
ज्ञान । कर । उपराग । (यथा रघु । ३ । २८ ।
"स वृत्तचूलश्चलकाकपक्षै-
रमात्यपुत्रै सवयोभिरन्वित ।
लिपेर्यथावद्ग्रहणेन वाङ्मयं
नदीमुखेनेव समुद्रमाविशत् ॥")
मस्त्री । उपराग । इति मेदिनी । णे ३४ ।
(गृह्यते स्वविषयो येन । ग्रह+करणे ल्युट ।) इन्द्रियम् । इति राजनिर्घण्ट । ग्रन्थ । इति शब्दार्णव ॥ अथ ग्रहणचन्द्रग्रहणकाले यथा —
'अश्विनादाश्वराशौ स्थिते भानि स्थिते रवौ ।
चतुर्थ्यादाश्वराशौ अभावे ग्रहणं ग्रह ।
... ...
पूर्णिमायां निरन्तरौ राहुणा ग्रस्यते ग्रही ।
... ...
... ... राहुणा ग्रस्यते रवि ॥"४।
ग्रहणकालीनविहितकर्मविशेषा ...
... यथा —
' रविभौमवारे तु निरये ... ॥

कुम्भमीनरविभोगे तु मासिक ... ।
सूर्योदयक्रमाधावा दृश्यते ग्रहनाशक ।
प्रतिग्रहकर्तुर्वीर्ये तु माहेश्वरस्य ग्रहणलग्न ।
अम्बुधारकभूतौ सौम्ये कारितामयौ ॥"४।
राशीवर्णविशेषे शुभाशुभ यथा, (बृहत्संहितायाम् । ५ । ४३ ५८ ।)
"मेषे क्षेमसुभिक्ष ...
निर्दिशेदाशी ।
... ... पीडा च ... ।
... रोगोत्पत्ता ... विभ्रम ।
... ... दुर्भिक्षम् ।
... दुर्भिक्ष ... पीडा ।
... ... ।
... ... विनिर्दिशेत् ।
... ... ।
... ... भवेत् सुभिक्षाय ।
... ... च युद्धानि ।
... ... विनिर्दिशेत् कम ।
... ... राहु ॥"
ग्रहणनिषेधो यथा —
"स्नानदानजपादिषु चतुर्थे दशमे तथा ।
नवमे च तथा चन्द्रे न कुर्यात् ग्रहदर्शनम् ॥
जन्मराशौ जन्मराशौ च अष्टमराशौ तथा ।
चतुर्थे द्वादशे चन्द्रे न कुर्यात् ग्रहदर्शनम् ॥
... ... ।
... ... ॥
विपत्करप्रभवति ...
... ... कथा ।
सर्वं कृत्वा निष्कर्मैव ...
... न ... ॥"
तत्र कर्तव्य कर्म यथा —
"चन्द्रसूर्योपरागे राहु ग्रस्ता ... ।
पुण्यमाप्नोति स्नाता च ... विधानत ॥
... ... ।
... ... ॥
... ... ।
... ... ॥
... ... राहुग्रासे ।
... ... ।
... ... तथा ।
... ... ॥
... ... ।
... ... तथा ।
... ... ।
... ... ॥
... ... ।
... ... ।
... ... ।
... ... ॥
... ... ।
... ... ।

... ... पूर्वहराणि ।
... ... समाहित ।
अनन्तर ... ।
... ... ।
... ... ।
... ... ।
... ... ।
... ... ॥"४।
... ... ।
यथा,—
"... ... ।
... ... ।
... ... ।
... ... ।
... ...
... ॥"
... ... ।
"... ... ।
... ... ।
... ... ।
... ... ॥
... ... ।
तत्र भोजनादिनिषेधो यथा —
"... ... ।
... ... ।
... ... ।
... ... ।
... ... ।
... ... ।
... ... ।
... ... ॥"
तत्राधीयं यथा —
"... ... राहुग्रस्ते ।
... ... ।
... ... ।
... ... ॥"
इति तिथ्यादितत्त्वम् ॥४॥
अथ ज्योतिषोक्त ग्रहणस्य कथा ।
... ... ।
... ... ।
... ... ॥४॥
अथ ग्रहणप्रभावना । ... ।
... ... ।
... ... ।
... ... ।
... ... ।
... ... ॥४॥ ...
... ... ।
... ...

समसप्तराश्यादिस्थौ रविचन्द्रौ कल्प्यौ। मध्य राहुराश्यादिभिर्युक्तं स्फुटराश्यादिस्थो रविश्च कार्यः। अस्मिन् राहुयुक्तरवौ षड्राश्यधिके सति षड्राशीन् त्यक्त्वा चिह्नता पूरितं सन् यदि नवतिभागाधिको भवति तदाशीत्युत्तरशत-भागेभ्यो हीनं कार्यं। अवशिष्टांशो द्विस्थाप्य एकस्मात् द्वाभ्यां द्वादशेनापरो युक्त अत शरो भवति। राहुरव्योर्योगे कृते मेषादिराशि षट्के सति स शरः सौम्यसञ्ज्ञक तुलादिषट्के सति याम्यसञ्ज्ञकः स्यात्। * । चन्द्रराहुमान-ज्ञानम्। मध्यन्निशद्विकलाधिकनवगुणरसभक्त-कलामितमध्यचन्द्रभुक्तिः ७८ । ३५ । सा च स्फुटकर्मणा किञ्चित् कलाभिन्यूनाधिका वा भवति। तस्याः स्फुटेन्दुभुक्त्याः सप्तायात द्व-चत्वारिंशदधिकशतेन १४२ हरणाल्लब्धं चन्द्रस्य मानं स्यात्। पञ्चगुणितचन्द्रमानात् द्वाभ्यां हरणाल्लब्धं राहुमानं भवति। * ।

अथ चन्द्रग्रहणम्।

राहुचन्द्रयोर्मानं मिलितं शरेण हीनकरणात् यदवशिष्टं तत् ग्रासो भवेत् शरे शून्ये सति राहुचन्द्रयोर्मिलितमानद्वयं ग्रासो भवेत्। शरेऽधिके ग्रासो न स्यात्। * ।

चन्द्रग्रहणारम्भादिकालज्ञानं यथा। षड् गुणितग्रासाङ्कात् चतुर्भिर्भक्तग्रासाङ्केन लब्ध दण्डादिकं स्थितिदण्डादेरर्द्धं भवति। तत् पौर्ण-मासीदण्डादिषु हीनं तत् स्पर्शकालः। युक्तं सत् मुक्तिकालः द्विगुणितं सत् स्थितिदण्डादि कालः स्यात्। * ।

चन्द्रमण्डलस्य स्पर्शादिदिग्ज्ञानम्।

पूर्व्वोक्तशरे याम्ये सति आकाशे चन्द्रमण्डलस्य अग्निकोणे स्पर्शो नैरृतकोणे मुक्तिश्च स्यात्। शरे सौम्ये सति ईशानकोणे स्पर्शः वायुकोणे मोक्षः। इति चन्द्रग्रहणम्। * ।

सूर्य्यग्रहणे अक्षो यथा। स्वदेशविषुवच्छाया द्विः स्थाप्या। एकस्याः षड्गुणितेनान्या युक्ता सती भागादिरक्षश्च स्यात्। * । अथ ग्रहणोपयोगिनतमाह। दिवार्द्धमावस्ययो-र्दण्डादीनां यदन्तरं तत् अंशादिकं नतनामकं स्यात्। * । सूर्य्यग्रहणोपयोगि लम्बनं यथा। द्विगुणनतसप्तदशाङ्कलब्धो ग्रासः स्वान्तर-गुणितशेषात् षष्टिलब्धयुक्तं सत् स्फुटलम्बन अंशादिकं भवति। * । सूर्य्यग्रहणे फलं यथा। दिनपूर्व्वपराह्णक्रमेण षड्गुणितनतयुक्तलम्बन-सहितस्फुटरवौ षड्राश्यधिके षड्राशीन् त्यक्त्वा चिह्नता गुणितो यदि नवत्या अधिको भवति तदाशीत्युत्तरशतात् हीनं कार्यं। त्रिगु-णितदशलब्धं सप्तो ग्रासः स्वान्तरगुणित शेषात् दशलब्धयुक्तं सत् फलं भवति। * । सूर्य्यग्रहणे नतिर्यथा। अक्षफलयोर्योगो नतिः स्यात् षड्राश्यूने अक्षफलान्तरं नतिः अत्र फले अधिके सति याम्या अक्षे अधिके सति याम्या भवति। * । सूर्य्यग्रहणे शरो यथा। मध्य राहुसहित स्फुटरविद्विगुणितलम्बनखण्डात नवरसतोयादिभिर्दिनपूर्व्वार्द्धे रहितं दिनपरार्द्धे सहितं कार्यं एतावत्सस्कृतरवौ षड्राश्यधिके षड्राशीन् त्यक्त्वा इत्यादि चन्द्रग्रहणोक्तवत् शरं कार्यं। एष स्फुटशरः उभयोः शरनत्योरेकदिक्त्वे तयोर्नत्या सह युक्तो द्विदि भेदे रहितः कार्यः अन्तरे कार्ये सति यदधिक तस्य दिशा शरस्य दिक् वक्तव्या। * । रविमानं यथा। एकत्रिंशत्पलाष्टविपलाधिकोनषष्टि कलामितरविमध्यभुक्तिः । ५९ । ८ । १ सा च स्फुटकर्मणि किञ्चित् कलाभिन्यूनाधिका वा भवति। तस्याः त्रिगुणितस्फुटरविभुक्तेर्द्विभिर्भक्ता लब्धं रविमानं स्यात्। * ।

अथ सूर्य्यग्रहणम्।

पूर्व्वोक्तचन्द्रमानं रविमानं मिलितं शरेण हीनं सत् ग्रासो भवेत्। * । सूर्य्यग्रहणस्य आरम्भादिकालज्ञानम्। चतुर्गुणितग्रासाङ्कात् द्विगुणग्रासाङ्केन लब्धं दण्डादिकं स्थितिनाडि कार्द्धं भवति। तदमावस्याया दण्डादिषु हीनं स्पर्शकालः युक्तं मुक्तिकालः स्यात्। * । स्पर्शादिदिग्ज्ञानम्। शरे याम्ये सति अर्क-मण्डलस्य नैरृतकोणे स्पर्शोऽग्निकोणे मोक्षः स्यात्। सौम्ये शरे सति वायुकोणे स्पर्श ईशानकोणे मुक्तिर्भवेत् द्विगुणितं सत् स्थिति-दण्डादि स्यात्। * । दिवारात्र्योः परार्द्धे यदि ग्रहणं भवति तदा अमावस्यापौर्णमास्यो र्दण्डादिः स्फुटलम्बनयुक्तं कार्यं। गणितागत-कालात् हीनातिरिक्ते काले यदि ग्रहणं स्यात् तत् औत्पातिकं भवेत्। * । ग्रहणे मण्डलस्य सामान्यवर्णा यथा। विम्बस्य वैवर्ण्यं धूम्रतानि तमोऽति सञ्जनमत्स्यता वा शुक्लारुणत्वात्। अल्पे पीतपित्ते घटाद्ये रोघ इव वर्णं वा भवति। * । अपर्वेष्व ग्रहणं इत्यापशान्तिकारि स्यात् तदा दिग्दाहा विरूपा स्युः। * । ग्रासाङ्गुलि मानज्ञानम्। दशगुणितग्रासाङ्कात् मानद्वया-हृतेन लब्धं चन्द्रसूर्य्ययोर्ग्रासस्य ग्रासाङ्गुलादि भवति। सूर्य्यस्य चाङ्गुलमपि ग्रासोऽधिको भवति। चन्द्रस्य साङ्गाङ्गुलं दृश्यं यदि षोड़-शाङ्गुलाधिको भवति तदा सर्व्वग्रासः। * । ग्रहणे मण्डलवर्णो यथा। अर्द्धे ग्रहणे धूम्राभ समग्रे कपिलं अर्द्धे कृष्णाभम्। इति सूर्य्य-ग्रहणम्। इति सिद्धान्तमञ्जरीसम्मतम्।

(अधुना सूर्य्यसिद्धान्तमतमुच्यते तत्र चन्द्र ग्रहणाधिकारो यथा —

"षाड्गीन रटचक्रसाधि भास्करानि विवस्वतः। विष्कम्भो मण्डलस्येन्दोः सहाशीत्या चतुःशतम्। स्फुटस्वभुक्त्या गुणितौ मध्यभुक्त्योद्धृतौ स्फुटौ। रवेः स्वभगणाभ्यस्तः शशाङ्कभगणोद्धृतः। शशाङ्ककक्षागुणितो भाजितो वार्ककक्षया। विष्कम्भश्चन्द्रकक्षायां तिथ्याप्ता मानलिप्तिका। स्फुटेन्दुभुक्तिर्भूव्यासगुणिता मध्ययोद्धृता। लब्धं सूची महीव्यासस्फुटार्कश्रवणान्तरम्। मध्येन्दुव्यासगुणितं मध्यार्कव्यासभाजितम्। विशोध्य लब्धं सूच्या तु तमो लिप्तास्तु पूर्व्ववत्। भानोर्भार्द्धे महीच्छाया तत्तुल्येऽर्कसमेऽपि वा। शशाङ्कपाते ग्रहणं कियद्भागाधिकोनके। तुल्यौ राश्यादिभिः स्यातामम्बास्यान्तकालिकौ। सूर्य्येन्दू पौर्णमास्यन्ते भार्द्धे भागादिकौ समौ। गतैष्यपर्व्वनाडीनां स्वफलेनोनसंयुतौ। समलिप्तौ भवेतां तौ पातस्तात्कालिकोऽन्यथा। छादको भास्करस्येन्दुरधःस्थो घनवद्भवेत्। भूच्छायां प्राङ्मुखश्चन्द्रो विशत्यस्य भवेदसौ। तात्कालिकेन्दुविक्षेपं छाद्यच्छादकमानयोः। योगार्द्धात् प्रोज्झ्य यच्छेषं तावच्छन्नं तदुच्यते। यद्ग्राह्यमधिके तस्मिन् सकलं न्यूनमन्यथा। योगार्द्धादधिके न स्याद्विक्षेपे ग्राससम्भवः। ग्राह्यग्राहकसंयोगवियोगौ दलितौ पृथक्। विक्षेपवर्गहीनाभ्यां तद्वर्गाभ्यामुभे पदे। षष्ट्या सङ्गुण्य सूर्य्येन्द्वोर्भुक्त्यन्तरविभाजिते। स्यातां स्थितिविमर्द्दार्द्धे नाड़िकादिफले तयोः। स्थित्यर्द्धनाड़िकाभ्यस्ता गतयः षष्टिभाजिताः। लिप्तादि प्रग्रहे शोध्य मोक्षे देयं पुनः पुनः। तद्विक्षेपैः स्थितिदलं विमर्द्दार्द्धं तथासकृत्। संसाध्यमन्यथा पाते तल्लिप्तादिफलं स्वकम्। स्फुटतिथ्यवसाने तु मध्यग्रहणमादिशेत्। स्थित्यर्द्धनाड़िकाहीने ग्रासो मोक्षस्तु संयुते। तद्वदेव विमर्द्दार्द्धनाड़िकाहीनसंयुते। निमीलनोन्मीलनाख्ये भवतः सकलग्रहे। इष्टनाडीविहीनेन स्थित्यर्द्धेनार्कचन्द्रयोः। भुक्त्यन्तरं समाहन्यात् षष्ट्याप्ताः कोटिलिप्तिकाः। भानोर्ग्रहे कोटिलिप्ता मध्यस्थित्यर्द्धसङ्गुणाः। स्फुटस्थित्यर्द्धसम्भक्ताः स्फुटाः कोटिकलाः स्मृताः। क्षेपो भुजस्तयोर्वर्गयुतेर्मूलं श्रवस्तु तत्। मानयोगार्द्धतः प्रोज्झ्य ग्रासस्तात्कालिको भवेत्। मध्यग्रहणतश्चोर्द्धमिष्टनाडीर्विशोधयेत्। स्थित्यर्द्धान्मौलिकाच्छेषं प्राग्वच्छेषं तु मौलिके। ग्राह्यग्राहकयोगार्द्धाच्छोध्याः स्वच्छन्नलिप्तिकाः। तद्वर्गात् प्रोज्झ्य तत्कालविक्षेपस्य कृतिं पदम्। कोटिलिप्ता रवेः स्पष्टस्थित्यर्द्धेनाहता हृताः। मध्येन लिप्तास्तन्मानात् स्थितिवद् ग्रासनाड़िकाः। नतज्याघ्नाक्षभाभ्यस्ता त्रिज्याप्ता तस्य कार्मुकम्। वलनांशाः सौम्ययाम्याः पूर्व्वापरकपालयोः। राशित्रययुताद् ग्राह्यात् क्रान्त्यंशैर्दिक्समैर्युता। भेदेऽन्तराज्ज्या वलना सप्तत्यङ्गुलभाजिता। स्पष्ट दिनमध्यार्द्धं दिवार्द्धाप्तं फलेन तु। छिन्द्यात् स्थितिमानानि तान्यथाङ्गुलानि तु।

इति सूर्य्यसिद्धान्ते चन्द्रग्रहणाधिकारः।

अथ सूर्य्यग्रहणाधिकारः।

"मध्यलग्नसमे भानौ हरिजस्य न सम्भवः। अक्षोदङ्मध्यभक्रान्तिसाम्ये नावनतेरपि। देशकालविशेषेण यथावनतिसम्भवः। लम्बनस्यापि पूर्व्वान्यदिग्वशाच्च तथोच्यते। सम पर्व्वान्तकालोत्थौ कुर्य्यात् लोकरसाद्रिभिः। तत्कालायनसम्पातौ लग्नप्रागर्यामिकौ।

तत्र चाग्नेर्बलेनैव मध्यस्थश्च यथोदितम् ।
नराणामामाशयो यो दिवसान्ते नरसम्भवा ।
येन तत्राग्नावीर्णमध्यस्था सामिधीयते ।
मध्यान्हस्थमायधका विन्दामा दर्शित मलम् ।
स्थानसमविदित दकचैव ग्रेयत पदम् ।
तथिस्थानसमविश्रेमाकल ग्रहु न द्रुमाति ।
नराणाग्नाकृतोटिस्थि स्फुटं वकचेपदम्ततौ ।
दकस्य स्थानतश्चा सम्ब द्रमनिश्चोयया ।
स्थानमावर्णविद्देयण्या विदन विमाविमा ।
दशोदोषेमत ग्रेय प्राकपश्चादुपस्थिकान्तिकम् ।
मध्यस्थायिके भावा निधमान प्रतिशोधयत ।
न्वसमेनोयकत् काम याया सर्वं सिपीभोप ।
दकचेव भौतगिम्नोदारंभ्युमालरावत ।
विधिमविश्चयया भक्ता तत्र भानननिभक्त ।
दकचेवा ग्रमन्निद्रुताहवेष्ट्रवगति फलम् ।
अथवा त्रिमध्यया गल्लाः ग्रहम्भकमदुवात ।
ग्रथमानं न्विमानम भा च विमेया न्विगीतरा ।
ग्रस्थिन्विपन्निकमार्णे पुक्ता विधिविल्लावधया ।
तथा विवितिविमद्राईयामाद्य तु यथोदितम् ।
प्रमाणं बलवाभोश्यामादि विमरवितत् ।
विवक्ष्याधिकात् मानव विपक्षाहमर्थ पुव ।
माघमाणीद्वर्ष नाथ नवाथदविश्वासरम् ।
प्राक्षाद्येधिकमध्यादरेवत प्राण प्रश्रम यदि ।
मौतक लभत स्त्रीम भक्तार्थं तु विपर्जय ।
तत्र दाघापि न्वे देयं प्रयतथि यथा ।
हरिद्रामरक दोष यशैतत् कराद्रिमध्य ।
यतदुतं कमाणेके तद्दिद सम्वेदना ।
मे रा स्थितिदशैयोष्मा विमराङ्गनि चोत्तरम् ।'
इति सुश्रुतसिद्धान्ते ग्रहणदधाधिकार ।)

ग्रहणि, स्त्री, (गृह्णाति धारयति उदरस्थमाहारादि करणे वाहोविषेयावस्थित शरीरमिति । ग्रह ग्रहणे + "अर्त्तिसृधृ—" इत्यनि । उणा । ५ । ६० । इति अनि ङीप् च ।) ग्रहणीरोग । इत्यमरटीकायां रामसुकुट ।

ग्रहणी स्त्री (ग्रहणि + "कृदिकारादक्तिन ।" इति ङीष् ।) अग्न्यधिष्ठानभाडी । तस्याम-स्थात्तरोग । तस्य निदानमत्राह यथा,—
"अतीसारे निवृत्तेऽपि मन्दाग्नेरहिताशन ।
भूयः सन्दूषितो वह्निर्ग्रहणीमभिदूषयेत् ।
एकैकश सर्वशश्च दोषैरत्यर्थमूर्च्छितै ।
सा दुष्टा बहुशो भुक्तमाममेव विमुञ्चति ।
पक्वं वा सरुजं पूति मुहुर्बद्धं मुहुर्द्रवम् ।
ग्रहणीरोगमाहुस्तमायुर्वेदविदो जना ।"
तस्य पूर्वरूपं यथा,—
"पूर्वरूपन्तु तस्येदं तृष्णालस्यं बलक्षय ।
विदाहोऽन्नस्य पाकश्च चिरात् कायस्य गौरवम् ।"
तस्य वातिकस्य निदानरूपे ।
"कटुतिक्तकषायातिरूक्षशीतलभोजनै ।
प्रमितानशनात्यध्ववेगनिग्रहमैथुनै ।
मारुत कुपितो वह्निं सञ्छाद्य कुरुते गदान् ।
तस्यान्नं पच्यते दुःखं शुक्तपाकं खराङ्गता ।
कण्ठास्यशोष क्षुत्तृष्णा तिमिरं कर्णयो स्वन ।

पार्श्वोरुवङ्क्षणग्रीवारुजाभीक्ष्णं विसूचिका ।
हृत्पीडा कार्श्यदौर्बल्यं वैरस्यं परिकर्तिका ।
गृद्धि सर्वरसानाञ्च मनस सदनं तथा ।
जीर्णे जीर्यति चाध्मानं भुक्ते स्वास्थ्यमुपैति च ।
स वातगुल्महृद्रोगप्लीहाशङ्की च मानव ।
चिराद्दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत् ।
पुन पुन सृजेद्वर्च कासश्वासार्दितोऽनिलात् ।"
पैत्तिकस्य तस्य निदानरूपे ।
"कट्वजीर्णविदाह्यम्लक्षाराद्यै पित्तमुल्वणम् ।
आप्लावयद्धन्त्यनलं जलं तप्तमिवानलम् ।
सोऽजीर्णं नीलपीताभं पीताभ सार्यते द्रवम् ।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृडर्दित ।"
श्लैष्मिकस्य तस्य निदानरूपे ।
"गुर्वतिस्निग्धशीतादिभोजनादतिभोजनात् ।
भुक्तमात्रस्य च स्वप्नाद्धन्त्यग्निं कुपित कफ ।
तस्यान्नं पच्यते दुःखं हृल्लासच्छर्द्यरोचका ।
आस्योपदेहमाधुर्यकासष्ठीवनपीनसा ।
हृदयं मन्यते स्त्यानमुदरं स्तिमितं गुरु ।
दुष्टो मधुर उद्गार सदन स्त्रीष्वहर्षणम् ।
भिन्नामश्लेष्मसंसृष्टगुरुवर्च प्रवर्त्तनम् ।
अकृशस्यापि दौर्बल्यमालस्यञ्च कफात्मके ।
पृथग्वातादिनिर्दिष्टहेतुलिङ्गसमागमे ।
त्रिदोषं निर्दिशेदेवं तेषां वक्ष्यामि भेषजम् ।"
तस्यासाध्यस्य लक्षणं यथा —
"लिङ्गैरसाध्यो ग्रहणीविकारो
यैस्तैरतीसारगदो न सिध्येत् ।
वृद्धस्य नूनं ग्रहणीविकारो
हत्वा तनुं नैव निवर्त्तते च ।"
इति माधवकर ।
तस्य चिकित्सा यथा, गारुडे १७४ अध्याये ।
"चित्रकस्य कषायेण ग्रहणी नाशमाप्नुयात् ।
चित्रकक्वाथकल्काभ्यां ग्रहणीघ्नं घृतं पिबेत् ।" *।
अपि चान्यत्र ।
"मरीचं मधुरेण कुटजत्वचमेव च ।
पानाच्च ग्रहणी गच्छेत् प्रमाद्रुतमतीसार ।"
इति तत्रैव १८३ अध्याय ।
"मन्दोदरानलस्याप्ति नित्यं तक्रस्य सेविका ।
सर्वाम्भोधारणे यो वा पीत्वा हरति भूतले ।
गदीचकुष्ठाङ्कुटजत्वककणाशुण्ठी गुडान्विताम् ।
क्रमात्तत् द्विगुणं पीतं ग्रहणीनाशनम् ।"
इति तत्रैव १८८ अध्याय । *।
अथ वातग्रहणीरोगस्य चिकित्सा ।
"ग्रहणीमाश्रितं रोगमशेषं रसवैद्यवित् ।
लङ्घनैर्दीपनीयैश्च सर्वातीसारभेषजै ।
दोषं सामं निरामञ्च विद्यादत्रातिसारवत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ।
पेयादिपट्टपञ्चकोलादिभिर्युतम् ।
दीपनानि च तक्रञ्च ग्रहण्यां योजयेद्भिषक् ।
अभयादिरसाङ्गैस्तैर्ज्ञानिर्जरिता ।
वचन्तू माधवमतं घृतं संचयम् ।"
चक्रदत्ते दृष्टव्यानि । * ।
अथ तक्रम् । तत्र मार्कण्डेयपुराणम् ।

"तक्रं हन्याच्च बल्यं पाके स्वादु च दीपनम् ।
मधुरं रोचनं स्निग्धं पुष्टिदं बलवर्द्धनम् ।
तक्रं प्रशमयेत्तापं मध्ये त्वक् गुल्मार्शसम् ।"
अथ मथितस्य गुणा ।
"माथितं तद्धि वातघ्नं प्रोक्तं वातविनाशनम् ।
वातश्लेष्मातिसारघ्नं ग्रहणीशूलजं ज्वरम् ।"
अथ तक्रस्य गुणा ।
"मातं दधिगतं चाहि लघु दीपनपाचनम् ।
प्रस्नेहं वातकफयो श्लेष्मघ्नं दीपनम् ।"
उदकं मध्यमं चेति रसेन ।
अथ तक्रस्य भेदा ।
"तक्रन्तु त्रिविधं प्रोक्तं दधिप्रमथनेरितम् ।
मुद्गसहितं च अनुद्धृतं परिकीर्तितम् ।
मधुरं विपाके वीर्य्यं मधिरात्यधरोदकम् ।
तक्रं पादजलं प्रोक्तं जिह्वार्द्धवारिकम् ।
वातपित्तहरं ज्ञेयं मधिरं कफपित्तजित् ।
उदश्वित् कफदं बल्यं श्रमघ्नं परमं मतम् ।"
अथ तक्रस्य गुणा ।
"तक्रं ग्राहि कषायाम्लं मधुरं दीपनं लघु ।
वीर्योष्णं बलदं हृद्यं प्रीणनं वातनाशनम् ।
ग्रहण्यादि रोगिणां पथ्यं तक्रं संग्राहि लाघवात् ।
मधुराम्लतया तक्रं पित्तं नाप्रकोपयेत् ।
वातश्लेष्मप्रशमनात् शस्तं तक्रं शीते च ।
किञ्च स्यात् विपाके लघु च पित्तकोपकृत् ।
कषायाम्ल विपाकोष्णो रूक्षत्वात् कफनाशनम् ।
अमृतमिव तक्रं तद्गुणा हि तक्रस्य गुणा ।"
"शरद्ग्रीष्मे तक्रं पथ्यं लघु विदितम् ।
शोथोदरार्शोग्रहणीदोषमूत्रग्रहारुचौ ।
प्लीहगुल्मघृतव्यापद्गरपाण्ड्वामयेषु च ।"
अथ दोषविशेषे तक्रविधिः ।
"वातेऽम्लं सैन्धवोपेतं पित्ते स्वादु सशर्करम् ।
पिबेत्तक्रं कफे चापि व्योषक्षारसमन्वितम् ।
हिङ्गुजीरयुतं घोलं सैन्धवेनावचूर्णितम् ।
भवेदत्यन्तवातघ्नमर्शोऽतीसारहृत् परम् ।
रोचनं पुष्टिदं बल्यं वस्तिशूलविनाशनम् ।"
अथाग्रिमतक्रगुणा ।
"तक्रमामं कफं कोष्ठे हन्ति कण्ठे करोति च ।
पीनसश्वासकासादौ पक्वमेव विशिष्यते ।" *।
अथ तक्रस्य निषेधः ।
"नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले ।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके ।" *।
अथ तक्रस्य गुणोत्कर्षः ।
"न तक्रसेवी व्यथते कदाचि-
न्न तक्रदग्धाः प्रभवन्ति रोगाः ।
यथा सुराणाममृतं सुखाय
तथा नराणां भुवि तक्रमाहुः ।" * ।
"ग्रहणे दर्शं तक्र धान्यकोदर्यञ्चूर्णम् ।
सैन्धवेनान्वितं दद्यात् चक्रदत्तेऽपि कीर्तितम् ।
दर्श लघु पाचि रोचनकरम् । इति चक्रदत्त ।
"कपि ग्रन्थि वातरोगे कुर्याच्चूर्णं चक्रौ ।
पाचं ग्रहणीके प्रचलवर्त्म गाढं कर्तुं हरे ।
मधु दिने च जीरकमिष्टं कर्त्तुमर्हति

खादेदिदमिति प्रशमितग्रहणीविकारस्य विरुक्षेन च ॥"
इति लघुलाईचूर्णम् ॥ * ॥
"त्रिकटु त्रिफला चैव विडङ्ग जीरकद्वयम् ।
भल्लातक यमानी च हिङ्गु लवणपञ्चकम् ॥
गृहधूमवचाकुष्ठ रसगन्धकअभ्रकम् ।
क्षारत्रयाजमोदा च चित्रक गजपिप्पली ॥
मुस्ता मोचरस पाठा लवङ्ग जातिपत्रकम् ।
समभागानसर्व्वेषां चूर्णं ग्रह्य विनिर्म्मितम् ॥
शक्राशनस्य चूर्णन्तु चूर्णतुल्य प्रदापयेत् ॥
मन्दाग्निकासदुर्नामप्लीहपाण्डुरचिज्वरान् ।
विष्टम्भ सग्रह शूल छर्द्यानाहातिसारजित् ॥
आमवातापह बल्य सूतिकादोषनाशनम् ।
वर्ज्जनीय माषमद्य स्नान पिशितभोजनम् ॥
मद्य काञ्जिकमन्नादि दधि तक्रमथापि वा ।
इहलाईचूर्ण मिदं शाईभाषितमुत्तमम् ॥"
इति इहलाईचूर्णम् ॥ * ॥
"जातीफललवङ्गैलापत्रत्वङ्नागकेशरैः ।
कर्पूरचन्दनतिलत्वक्क्षीरीतगरामलैः ॥
तालीसपिप्पलीपथ्यास्थूलजीरकचित्रकैः ।
शुण्ठीविडङ्गमरिचैः समभागविचूर्णितैः ॥
यावन्त्येतानि सर्व्वाणि दद्याद्भङ्गां च तावतीम् ।
सर्व्वचूर्णसमा शुभ्रा प्रदेया शुभ्रशर्करा ॥
कर्षमात्रमिदं खादेन्मधुनाप्लावितं नरः ।
नाशयेत् ग्रहणीं कास क्षय श्वासमरोचकम् ॥"
इति जातीफलादिचूर्णम् ॥ * ॥
"चित्रक पिप्पलीमूल क्षारौ लवणपञ्चकम् ।
व्योष हिङ्ग्वजमोदाञ्च चव्य चैकत्र चूर्णयेत् ॥
वटिका मातुलुङ्गस्य रसैर्व्वा दाडिमस्य वा ।
कृता विपाचयत्याम प्रदीपयति चानलम् ॥"
क्षारौ स्वर्जिका यवक्षारश्च । लवणपञ्चकमिति
सैन्धवं रुचक चैव विड सामुद्रिकं गड्कमिति ।
व्योष शुण्ठीपिप्पलीमरिचानि । अजमोदात्र
यवानिका । मातुलुङ्ग बीजपूरकम् । इति
चित्रकादिवटिका ॥ * ॥ [सगुड ।
"श्रीफलशलाटु कल्को नागरचूर्णेन मिश्रित
ग्रहणीगदमत्युग्र तक्रभुजा शीलितो जयति ॥"
श्रीफलशलाटु बिल्वस्याम फलम् । गुडस्याच
भागद्वयम् । इति बिल्वकल्क ॥ * ॥
"वस्तुमूल सुधाकाण्ड चित्रक लवणत्रयम् ।
वार्त्ताकौ कुडवपार्केमूलाद्बिल्वे तथानलात् ॥
दग्धा ददेत वार्त्ताकीगुटिका भोजनोत्तरम् ।
भुक्ता भुक्त पचत्याशु नाशयेद्ग्रहणीगदम् ॥
कास श्वास तथार्शांसि विसूचीं हृदामयम् ॥"
इति वार्त्ताकुगुटिका ॥ * ॥
"सुतकातिविषाबिल्वकौटज सद्विचूर्णितम् ।
मधुना च समालीढ़ ग्रहणीं सर्व्वजां जयेत् ॥"
कौटज इन्द्रयव । इति सुतकादिचूर्णम् ॥ * ॥
"श्वेतो वा यदि वा रक्तः सपक्वो ग्रहणीगदः ।
गुक्रनाशिसचूर्णेन भक्षितेनाशु नश्यति ॥"
रक्त दाद इति लोके । इति सज्जरसचूर्णम् ॥ * ॥
"विश्वाम्बरशुक्रवसवासककीचविद्ध
साम पत्र पचति यो दिवसत्रयेण ।
सोऽतिप्रवृद्धचिरजग्रहणीविकार
नाम पयोऽश्चितमसाध्यमपि छिनोति ॥"
मोचो मोचरस । छिनोति हन्ति ।
"प्रस्थद्वये ह्यामलकीरसस्य
शुद्धस्य दत्त्वार्द्धतुलां गुडस्य ।
चूर्णीकृतैर्ग्रन्थिकजीरचव्य-
व्योषेभकृष्णाहपुषाजमोदैः ॥
विडङ्गसिन्धुत्रिफलायवानी-
पाठाग्निधान्यैश्च पलप्रमाणैः ।
दत्त्वा त्रिवृच्चूर्णपलानि चाष्टौ
अष्टौ च तैलस्य पचेद्यथावत् ॥
त भक्षयेदक्षफलप्रमाण
यथेष्टचेष्टस्त्रिसुगन्धियुक्तम् ।
अनेन सर्व्वे ग्रहणीविकाराः
सश्वासकासस्वरभेदशोथाः ॥
शाम्यन्ति चायं चिरमन्तराग्ने-
र्हतस्य पुंस्त्वस्य च वृद्धिहेतुः ।
स्त्रीणाञ्च वन्ध्यामयनाशनः स्यात्
कल्याणको नाम गुडः प्रसिद्धः ॥
तैले मनाक् विदग्धे च त्रिसुगन्धि पल पलम् ।
सिद्धे निधेयमत्रैव गुडे कल्याणपूर्व्वके ॥"
इति कल्याणगुडः ॥ * ॥
"पिप्पली पिप्पलीमूल चित्रक गजपिप्पली ।
त्रिफला चाजमोदा च नलिनी जीरकस्तथा ।
सैन्धव रोमकञ्चापि सामुद्र रुचक विडम् ॥
आरग्वधश्च लवणञ्च सच्चौला चोपकुञ्चिका ।
शुण्ठीशुक्रयवाश्चैव प्रत्येक कर्षसम्मिताः ॥
रदीकाया पलान्यत्र चत्वारि कथितानि हि ।
त्रिवृतायाः पलान्यष्टौ गुडस्यार्द्धतुला तथा ।
तिलतैलपलान्यष्टावामलक्या रसस्य तु ।
प्रस्थत्रयमिद सर्व्वं शनैर्मृद्वग्निना पचेत् ॥
औडुम्बरं चामलक बादर वा यथाफलम् ।
सावकाशमिद खादेदर्पयेद् वा यथानलम् ॥
निखिलान् ग्रहणीरोगान् प्रमेहांश्चैव विंशतिम् ।
उरोघात प्रतिश्याय दौर्ब्बल्य वह्निसञ्चयम् ॥
ज्वरानपि हरेत् सर्व्वान् कुर्य्यात् कान्ति मति
स्वरम् ।
विषपाठान्यथाहन्ति रक्तपित्तञ्च विषमम् ॥
धातुक्षीणो वय क्षीण स्त्रीषु क्षीण च यो नर ।
तेभ्यो हितश्च वन्ध्यायै महाकल्याणको गुडः ॥"
इति महाकल्याणकगुडः ॥ * ॥
"कुष्माण्डानां सुपक्वानां छिन्नानां निष्कुल
त्वचाम् ।
सर्पिः प्रस्थे पलशत ताम्रपात्रे शनै पचेत् ॥
पिप्पली पिप्पलीमूल चित्रक गजपिप्पली ।
धान्यकानि विडङ्गानि नागर मरिचानि च ॥
त्रिफला चाजमोदा च कलिङ्गाजाजिसैन्धवम् ।
एकैकस्य पल चैक त्रिवृतोऽष्टौ पलानि च ॥
तैलस्य च पलान्यष्टौ गुडात् पञ्चाशदेव तु ।
[illegible] गीरितम् ॥
तावत् पाक प्रकुर्व्वीत मृदुना वह्निना भिषक् ।
यावत् दर्व्वीप्रलेपः स्यात्तदैनमवतारयेत् ॥
औडुम्बर चामलक बादर वा यथाफलम् ।
तावन्मात्रमिद खादेद्भक्षयेद्वा यथानलम् ॥
अनेनैव विधानेन प्रयुक्तश्च दिने दिने ।
निहन्ति ग्रहणीरोगान् कुष्ठान्यर्शोभगन्दरान् ॥
ज्वरमानाहहृद्रोगगुल्मोदरविसूचिका ।
कामलां पाण्डुरोगञ्च प्रमेहांश्चैव विंशतिम् ॥
वातशोणितवीसर्पदद्रुचर्म्मदलीमकान् ।
वातपित्तकफान् सर्व्वान् द्वन्द्वान् शुद्धान् समा
चरेत् ॥
व्याधिक्षीणा वय क्षीणा स्त्रीषु क्षीणाश्च ये
नराः ।
तेभ्यो हितो गुडोऽय स्यात् वन्ध्यानामपि पुत्रदः ॥
हृद्यो बल्यो बृंहणश्च वयस स्थापन परः ॥"
इति कुष्माण्डकल्याणकगुड ॥ * ॥
अतीसाराधिकारलिखित बिल्वतैल चात्र
हितम् । इति ग्रहणीरोगाधिकारः । इति
भावप्रकाशः ॥ (अथनिदानलक्षणादिक चिकित
सितञ्चास्य यथा —
"साम सानमजीर्णेऽन्ने जीर्णे पक्वन्तु नैव वा ।
अकस्माद्वा मुहुर्बद्धमकस्माच्छिथिल मुहु ॥
चिरकृद्ग्रहणीदोष सञ्चयाच्चोपलक्षयेत् ।
स चतुर्द्धा पृथग् दोषै सन्निपाताच्च जायते ॥
प्राग्रूप तस्य सदन चिरात् पचनमम्लक ।
प्रसेको वक्त्रवैरस्य मरुचिस्तृट्क्लमो भ्रम ॥
आनद्धोऽन्त्रता छर्द्दि कर्णक्ष्वेडोऽन्त्रकूजनम् ।
सामान्य लक्षण कार्श्य धूमकस्तमको ज्वर ॥
मूर्च्छा शिरोरुग्विष्टम्भ श्वयथु करपादयो ।
तत्रानिलात् तालुशोषस्तिमिर कर्णयो स्वन ॥
पार्श्वोरुवङ्क्षणग्रीवारुजाऽभीक्ष्ण विसूचिका ।
रसेषु गृद्धि सर्व्वेषु तृष्णा परिकर्त्तिका ॥
जीर्णे जीर्य्यति चाध्मान भुक्ते स्वास्थ्य समश्नुते ।
वातहृद्रोगगुल्मार्श प्लीहपाण्डुत्वशङ्कित ॥
चिराद्दुःख द्रव शुष्क तन्वाम शब्दफेनवत् ।
पुन पुन सृजेद्वर्च्च पायुरुक् श्वासकासवान् ॥
पित्तेन नील पीताभ पीताभ सृजति द्रवम् ।
पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृडर्द्दित ॥
श्लेष्मणा पच्यते दुःखमन्न छर्द्दिररोचक ।
आस्योपदेहनिष्ठीवकासहृल्लासपीनसा ॥
हृदय मन्यते स्त्यानमुदर स्तिमित गुरु ।
उद्गारो दुष्टमधुर सदन स्त्रीष्वहर्षणम् ॥
भिन्नामश्लेष्मसंसृष्टगुरुवर्च्च प्रवर्त्तनम् ।
अकृशस्यापि दौर्ब्बल्य सर्व्वजे सर्व्वसङ्कर ॥
विभागेऽस्य ये प्रोक्ता विषमाद्यास्त्रयोऽग्नय ।
तेऽपि स्युर्ग्रहणीदोषा समस्तु स्वास्थ्यकारणम् ॥
वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दरा ।
अर्शांसि ग्रहणीत्यष्टौ महारोगा सुदुस्तरा ॥'
इति वाभटे निदानस्थानेऽष्टमोऽध्याये ॥
चिकित्सितञ्चास्या यथा —
"— ग्रहणीमाश्रित दोषमजीर्णवदुपाचरेत् ।
अतीसारोक्तविधिना तस्यामञ्च विपाचयेत् ॥
अन्नकाले यवाग्वादि पञ्चकोलादिभिर्युतम् ।
वितरेत् पटुपञ्च पुनर्योगांश्च दीपनान् ॥'

दद्यात् शान्तिविधौ विप्राणामेव भोज्यं यथाक्रमम् ।
भागानिमान् विदित्वा तु वारितास्तु सुरादि च ॥
ग्रहणीगोऽपि भो तत्र दीपनस्यादि लावणम् ।
यथा मधुरपाकित्वात् च पित्तप्रकूपणम् ॥
कषायोष्णविशाधित्वादन्नलाभ कवि हितम् ।
दाविमाहत्वयाम्लत्वात् मदात्ययविनाशि तत् ॥”
“शोणितानमशरीरस्य दीपनं क्षेदसंयुतम् ।
दीपनं बहुपित्तस्य तिक्तैर्मधुरकैर्युतम् ॥
क्षेदोऽश्मनपरैर्युक्तो बहुवातस्य शस्यते ।
स्नेहमेव परं विद्यात् दुर्बलानलदीपनम् ॥
नाल क्षेपनमिद्धस्य प्रसादाल गुरुणपि ।
यो स्वपाकित्वात् कपि योद्धि सर्वं पक्षमपि स्वयम् ॥
सुरैरुष्णदीपयुतं च पिबत्यपो हितम् ।
तेन समानमानीत स्वकर्मापि नियोजितः ॥
समानो नौयपग्निसमीपे सम्यगयतो हि सः ।
पुरीष यथा लक्षेत्र काठिन्याच्छिरधारितं ॥
न एव लवणेर्युक्त गरोऽमारब्ध पिबेत् ।
दीप्तामान्दोग्नये सर्पिषा वा नीमये पिबेत् ॥
भाषाणुकामवादिदाम् मध्ये वेगातिपातन ।
उदावर्त्तात प्रयोक्तव्या निरूहस्नेहबस्तयः ॥
दोषातिवृद्धा मन्देऽग्नौ संशुद्धोऽभिविधिपरेत ।
व्याधियुक्तस्य मन्देऽग्नौ सर्पिरेव तु दीपनम् ॥
उपवासपरामर्शे यवाग्वा पाचयेद्घृतम् ।
अन्नावमौक्षित बल्य दीपनं बृंहणञ्च तत् ॥
दीर्घकालप्रसङ्गात् क्षामक्षीणकृशान्नरान् ।
प्रसहानां रसैः साम्लैर्भोजयेत् पिशिताशिनाम् ॥
लघूष्णकटुशोधित्वाद्दीपयन्त्याशु तेऽनलम् ।
मांसोपचितमांसत्वात् परञ्च बलवर्द्धनम् ॥
स्नेहासवसुरारिष्टचूर्णक्वाथहिताशनैः ।
सम्यक्प्रयुक्तैर्देहस्य बलमग्नेश्च वर्द्धते ॥
दीप्तो यथैव स्थाणुश्च बाह्योऽग्निः सारदारुभिः ।
सस्नेहैर्जायते तद्वदाहारैः कोष्ठगोऽनलः ॥
न भोजनेन कायाग्निर्दीप्यते नातिभोजनात् ।
यथा निरिन्धनो वह्निरल्पो वातीन्धनान्वितः ॥
यदा क्षीणे कफे पित्तं स्वस्थाने पवनानुगम् ।
प्रवृद्धं वर्द्धयत्यग्निं तदासौ सानिलोऽनलः ॥”
इति चरके चिकित्सितस्थाने पञ्चदशेऽध्यायः ॥
अपरं भावप्रकाशोक्तविधिरपि यथा,—
‘ दुष्यन्ति ग्रहणी यस्मादतोऽस्मिन्वेदनाभिः ।
अतिसारे निवृत्तेऽपि मन्दाग्नेरहिताशिनः ॥
भूयः सन्दूषितो वह्निर्ग्रहणीमभिदूषयेत् ।
तस्मात् कार्यः परीहारश्चातीसारे विरिक्तवत् ॥
यावन्न प्रकृतिस्थः स्याद्दोषतः प्राणतस्तथा ।
षष्ठी पित्तधरा नाम या कला परिकीर्त्तिता ॥
पक्वामाशयमध्यस्था ग्रहणी सा प्रकीर्त्तिता ।
ग्रहण्या बलमग्निर्हि स चापि ग्रहणीं श्रितः ॥
तस्मात् सन्दूषिते वह्नौ ग्रहणी सम्प्रदुष्यति ।
अत्र ग्रहणी चिन्तायाम् अग्निरत्र ग्रहणी समा ॥
अग्न्यधिष्ठाना च वाग्घ तस्माद्ग्रहणीगदं ।
चतुर्विधा स भवत्येव दूषयत्यदः पृथक्पृथक् ।
त्रिदोषजः तृतीयश्च सङ्ग्रहग्रहणी तथा ।
ताभ्यां चतुर्विधमित्याहुरेके पञ्चमम् ॥

प्रत्येकमुदरकैरन्ध तक्रमथ्वितोद्धित ।
बालाख्यूनाधिके पाण्डुयत्पायोदरमहाकेः ।
पिबेत् मद्यारिष्टैरपि कषायैरभिमिश्रितैः ।
दीपनपाचनैस्तैलघृतैस्तद्वत्पक्वामवाणैः ॥
मृदुमात्रा रसाल्लाभे चौद्धामृद्धी च मावकः ।
यथा दोषोच्छ्रयमस्य विमृद्यस्य यथाक्रमम् ।
पिबानि विदध्यात् मथ्यमभिसर्पणपत्रम् ।
तत पाचनमथापि दीपनीयानवनम् ।
पिबेत् प्रातः सुरारिष्टमासवयुक्तानुभिः ।
तक्रेण वाप तक्र वा केवल हितमुच्यते ।
हंमित्युक्तोऽग्नि नीरोगी क्रियाताभारयारयेत् ।
एष हिङ्ग्वादिपाथ घृत वा भोजनाग्रतः ।
तक्रेण मथ्यादथ पाण्डुरोगरमेव वा ।
पञ्चयोग एवा च सुरा सिद्ध हित भवेत् ।
परस्या दीपन सर्वं ग्रहणीरोगिणां हितम् ।
ज्वरादीनविरोधाथ सामयेन प्रविचिकित्सितं ॥”
इति सुश्रुते उत्तरतन्त्रे चत्वारिंशत्तमोऽध्यायः ॥)

ग्रहणीरुक्, [ज्] स्त्री (ग्रहण्या रुक् ।) ग्रहणी रोग । तत्पर्य्याय । प्रवाहिका २ । इत्य मरः । २।६।५५ ॥ वाहिनी ३ । इति तट्टीका ॥

ग्रहणीहर, क्ली (ग्रहणीं हरतीति । हृ+अच् ।) लवङ्गम् । इति शब्दचन्द्रिका ॥ (ग्रहणी नाशके त्रि ॥)

ग्रहद्रुम, पुं, (ग्रहाख्यो द्रुम वृक्षविशेष ।) शाक वृक्षः । इति राजनिर्घण्टः ॥

ग्रहनाशक, पुं (नश्यतीति । नश्+णिच् । ततो ग्रहाणां नाशक ।) ग्रन्थि । इति शब्दरत्ना वली । तद्धर्म्म ॥

ग्रहनाशन पुं, (ग्रहाति ग्रस्ति मन्यमिति शेष । कोटरोपरिकृत्तग्रह्निर्विशेष रागविरागो भास शाय ग्रति । नश्+णिच्+ल्यु ।) सर्पविशेष । इति शब्दरत्नावली ॥ छातियान इति भाषा ॥

ग्रहनाशन, पुं (ग्रह रोगविशेष नाशयतीति । नश्+णिच्+ल्यु ।) ग्रहनाशक । इति शब्दरत्नावली तदमाला च ॥

ग्रहनेमि पुं, (ग्रहाणां ग्रहकक्षाणां परिधिर्वा नेमि रिव । ग्रहकक्षाया क्षितयाऽस्य नेमिसादृश्य मिति बोध्यम् ।) चन्द्र । इति शब्दरत्नावली ॥

ग्रहपति, पु, (ग्रहाणां पति ।) सूर्य्य । (यथा महाभारते । १३।१६।४६ । [दिव ॥”]
‘ तत्र निवसन्ति शक्र स्थापुत्रा ग्रहपती- ष्वाथ्य । इत्यागम । १ । ३ । १० ॥ (शिव । यथा, महाभारते । १३ । १७ । ३७ ।
“वाम्य स्म्य ग्रहि कैतुमद्यो ग्रहपतिवरः ॥”
ग्रहमाला । यथा महाभारते ।१३।८७।११७।
“एष चक्रवर्त्ति दिव ज्वर ग्रहपतिवरः ।
मौन पुष्करमासवदभि नल नभिस मेंघयः ॥”)

ग्रहपुष्प पुं, (ग्रहाद् ग्रहात् सर्व्वान् दुष्टान् आविशेषपी ।) दम । इति हैमचन्द्र ॥

ग्रहभोजिन्, [न्] पुं (ग्रहभोजि ग्रसतीति । भुज्+णिन् ।) भौक्षाधानमलदमम् । इति राजनिर्घण्टः ॥

ग्रहयाग, पुं (ग्रहाणां ग्रहादीनां याग । ग्रहार्थो यागः । तस्य विधानं ग्रहयज्ञः पठितानि ग्रहरत्नाकर ऋषि कर्मणां पौष्टिकेषु प्रयोगः । अस्य प्रयोगो यथा । मत्स्यपुराणे ग्रहमूर्त्ति प्रतिमा देवी कुम्भकर्णे उत्तरस्थ वा । भाग्यवान् महिलायाः स्वगृहे प्रवसुत श्वेतवर्णैश्च चित्रकरानुरूपार्थं स्थापि चिन्तोद्भवभावक्रियापूजार्थं ग्रहदेवताः कृत्वा सर्वं करणानामष्टौ ग्रहाणां स्वरूप । ततो ग्रहणीयतां सूर्यादि निर्देशप्रकारा चित्रयुक्तानां उपस्थापनां देवी ग्रह वस्त्रादिना सर्वं वर्णेन सूर्य्य आदिशत् मध्ये मध्ये परिधानं कोणे दक्षिण दिशोत्तर मध्ये दैत्यानां यज्ञ मधुरादीना वृष वर्णयेत् पीत चतुराकारं गुरु पश्चा चैत बुधस्य शुक्लं प्रवीण्यां यथा प्रयातावृत्ति चैत्र ग्राम मकराकारं राहुं वायव्यां धूम्रवर्णं मरकतादिम केतुं विचित्र ग्रहे नैर्ऋत्ये ईशानादिद्वितीयाभागयज्ञेश्वरी रविं तत् यज्ञमध्ये लिखितानाङ्गादीन प्रकटे यज्ञ पात्रं वीरो गायत्र्यादिवाचनाथवाभ्यां पूर्वे गन्धैर्विधिना स्नानाय रक्तचन्दन च,प्रत्ये मध्ये मन्त्रेण कुङ्कुम पुष्पाय भगवान् दिव्य सम्भ्रमेण निमित्तानि रक्तवर्णानि पुष्पमात्राणि प्रसाद श्वेतवस्त्रं धूपेन कस्तूरी राहवे सप्तकाष्ठ केतवस्य वस्त्र दद्यात् । धूपे विशेष । रवेः गुग्गुलुं सोमाय सर्जं मङ्गलाय देवदारु बुधाय सर्पिः देवदारु दत्वा चन्द्रमसे धूपं मुण्डे गुरवे शौक्रे कालागुरु राहवे गुग्गुलं केतवे मधुसितसिल्लिकुष्ठं दद्यात् । तथा नैवेद्य ग्रहाधिदेवता पूजयेत् । तथा च दद्यात् सूर्याय गुडौदनं सोमाय घृतपायसं मङ्गलाय यवपक्वसंयावं बुधाय क्षीरषष्टिकौदनं गुरवे दध्योदनं शुक्राय घृतौदनं शनैश्चराय कृसरं तदुत्तापक्वं राहवे छागमांसं केतवे चित्रौदनं दद्याद्विधिना ग्रहदेवताभ्यो शाल्युदक निवेदनम् । ततश्च पार्श्वे तत् सुरक्षितां कारयेत् दध्योदनं च कलसे पुत्राणां । तथा यथावलि ग्रहवस्त्रादीनि दत्वा मण्डलस्थान् कोणस्थकलश वा मधुरानि तानि सम्भारैर्बलिं तर्पयेत् दीक्षितो पूर्व्वं सम्पूज्य ।
“सर्वे ग्रहाः सादितमाश्रमाश्रयिता विदु ।
अक्षुमर ग्रहो दूर्वा कुशाय वर्त्तिनः ॥”
तत उदीर्य कर्म समाप्य दक्षिणां दद्यात् ।
दक्षिणा यथा ।
“ धेनु शङ्खश्चानडुद्वान् हेम वासो हयस्तथा ।
कृष्णा गौरायसश्छाग एता वै दक्षिणाः क्रमात् ॥”
(अस्य मात्स्य प्रकारे यथा, मत्स्य पुराणे
“ग्रहाणां पूजां ग्रहयज्ञ, तथा कोटि होम
ग्रहयज्ञं प्रवक्ष्यामि दक्षिणाप्रमाणतः ॥”

दीपिकायाञ्च । यथा —
"शुभग्रहार्कवारेषु जन्मधिष्ण्येषु च ।
शुभराशिविलग्नेषु शुभं शान्तिकपौष्टिकम् ॥
मृदुगणः चित्रानुराधान्त्यमृगशिरोरेवत्यः । क्षिप्रगणो लघुगणः पुष्याश्विहस्ताः । ध्रुवगणः रोहिण्युत्तरात्रयम् ॥)
"गोचरे वा विलग्ने वा ये ग्रहा रिष्टसूचकाः ।
पूजयेत्तान् प्रयत्नेन पूजिताः स्युः शुभावहाः ॥'
इति ग्रहयागतत्त्वम् ॥
(मात्स्योक्तम् । यथा,—
"श्रीकामः शान्तिकामो वा ग्रहयज्ञं समाचरेत् ।
वृष्ट्यायुःपुष्टिकामो वा तथैवाभिचरन् पुनः ॥
येन ब्रह्मन् । विधानेन तन्मे निगदतः शृणु ।
सर्व्वशास्त्राण्यनुक्रम्य संक्षिप्य ग्रन्थविस्तरम् ॥
ग्रहशान्तिं प्रवक्ष्यामि पुराणश्रुतिनोदिताम् ।
पुण्येऽह्नि विप्रकथिते कृत्वा ब्राह्मणवाचनम् ॥
ग्रहान् ग्रहादिदेवांश्च स्थाप्य होमं समारभेत् ।
ग्रहयज्ञस्त्रिधा प्रोक्तः पुराणश्रुतिकोविदैः ॥
प्रथमोऽयुतहोमः स्याल्लक्षहोमस्ततः परम् ।
तृतीयः कोटिहोमस्तु सर्व्वकामफलप्रदः ॥
अयुतेनाहुतीनाञ्च नवग्रहमखः स्मृतः ।
तस्य तावद्विधिं वक्ष्ये पुराणश्रुतिभाषितम् ॥'
ग्रहवेदिनियमः । यथा,—
"गृहस्योत्तरपूर्व्वेण वितस्तिद्वयविस्तृताम् ।
वप्रद्वयावृतां वेदिं वितस्त्युच्छ्रयसम्मिताम् ॥
संस्थापनाय देवानां चतुरस्रामुदङ्मुखाम् ।
अग्निप्रणयनं कृत्वा तस्यामावाहयेत् सुरान् ॥
देवतानां ततः स्थाप्या विंशतिर्द्वादशाधिका ।
सूर्य्यः सोमस्तथा भौमो बुधजीवसिताः शनिः ॥
राहुः केतुरिति प्रोक्ता ग्रहा लोकहितावहाः ॥"
मण्डले स्थानम् । यथा —
"मध्ये तु भास्करं विद्याल्लोहितं दक्षिणेन तु ।
उत्तरेण गुरुं विद्याद् बुधं पूर्व्वोत्तरेण तु ॥
पूर्व्वेण भार्गवं विद्यात् सोमं दक्षिणपूर्व्वके ।
पश्चिमेन शनिं विद्याद्राहुं पश्चिमदक्षिणे ॥
पश्चिमोत्तरतः केतुं स्थापयेच्छुक्लतण्डुलैः ॥"
अधिदेवताः । यथा,—
"भास्करस्येश्वरं विद्यादुमाञ्च शशिनस्तथा ।
स्कन्दमङ्गारकस्यापि बुधस्य च तथा हरिम् ॥
ब्रह्माणञ्च गुरोर्विद्याच्छुक्रस्यापि शचीपतिम् ।
शनैश्चरस्य तु यमं राहोः कालन्तथैव च ॥
केतोर्वै चित्रगुप्तञ्च सर्व्वेषामधिदेवताः ॥'
प्रत्यधिदेवताः । यथा,—
"अग्निरापः क्षितिर्विष्णुरिन्द्र ऐन्द्री च देवता ।
प्रजापतिश्च सर्पाश्च ब्रह्मा प्रत्यधिदेवताः ॥"
पञ्च लोकपालाः । यथा,—
"विनायकं तथा दुर्गां वायुमाकाशमेव च ।
आवाहयेद्व्याहृतिभिस्तथैवाश्विकुमारकौ ॥"
ग्रहवर्णः । यथा —
'रक्तदेवमादित्यमङ्गारकसमन्वितम् ।
सोमशुक्रौ तथा श्वेतौ बुधजीवौ च पिङ्गलौ ।
मन्दराहू तथा कृष्णौ धूम्रं केतुगणं विदुः ॥"

"ग्रहवर्णानि देयानि वासांसि कुसुमानि च ।
धूपामोदोऽत्र सुरभिरुपरिष्टाद्वितानकम् ॥
शोभनं स्थापयेत् प्राज्ञः फलपुष्पसमन्वितम् ॥"
अन्यद्विस्तरणन्तु ग्रहयागतत्त्वे द्रष्टव्यम् ॥)

ग्रहराजः, पुं, (ग्रहाणां राजा इति । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) सूर्य्यः । चन्द्रः । इति मेदिनी । जे । ३२ ॥ वृहस्पतिः । इति शब्दरत्नावली ॥

ग्रहाधारः, पुं, (ग्रहाणां आधारः आश्रयः । मेधीव एतच्चक्रमाश्रित्य भ्रमच्छिशुमारस्य ग्रहाणां परिभ्रमणात्तथात्वम् ।) ध्रुवनक्षत्रम् । इति शब्दरत्नावली ॥

ग्रहामयः, पुं, (ग्रहः उपदेवविशेषस्तज्जन्य आमयः रोगभेदः ।) आवेशः । स तु भूतादिना जातरोगः । इति राजनिर्घण्टः ॥

ग्रहाशी, [न्] पुं, (ग्रहं ग्रहजन्यदोषं अश्नाति दूरीकरोतीति । अश् + णिनि । स्कन्दग्रहदोषप्रशान्तिके ।) ग्रहनाशवृक्षः । इति शब्दरत्नावली ॥

ग्रहाह्वयः, पुं, (ग्रहाणामशुभदेवानामाह्वयः आख्या संज्ञा यस्य । ग्रहान् आह्वयति आकारयति तज्जनितदोषनाशायेति भावः । आ + ह्वे + श । इत्येके ।) भूताङ्कुशवृक्षः । इति राजनिर्घण्टः ॥

ग्रहीता, [ऋ] त्रि, (गृह्णातीति । ग्रह + तृच् ।) ग्रहणकर्त्ता । तत्पर्य्यायः । ग्राहकः २ । इत्यमरः । ३ । १ । २७ ॥ (यथा श्वेताश्वतरोपनिषदि ।
"अपाणिपादो जवनो ग्रहीता
पश्यत्यचक्षुः स शृणोत्यकर्णः ।"
तथा च मनुः । ८ । १६६ ।
"ग्रहीता यदि नष्टः स्यात् कुटुम्बार्थे कृतो व्ययः ।")

ग्रामः, पुं, (ग्रस + "ग्रसेरात् ।" उणां । १ । १४२ । इति मन् धातोराकारान्तादेशश्च ।) विप्रादिवर्णप्राया प्राकारपरिखादिरहिता बहुजनवसतिः । इति भरतः ॥ तत्पर्य्यायः । संवसथः २ । इत्यमरः । २ । २ । १९ ॥ "शूद्रादिभूयिष्ठवसतिः ।" इति श्रीधरस्वामी ॥ यथा मार्कण्डेयपुराणे ।
"तथा शूद्रजनप्राया सुसमृद्धकृषीवला ।
क्षेत्रोपयोगभूमध्ये वसतिर्ग्रामसंज्ञिका ॥"
(तथा च मनुः । १ । ५४ ।
"ध्रुवमेषां पराधीनं देयं स्याच्छिन्नभाजने ।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च ॥")
शब्दादिपूर्व्वकश्चेत् समूहार्थः । इति विश्वः ॥ यथा शब्दग्रामः भूतग्रामः गुणग्रामः इत्यादि ॥ (यथा मनुः । २ । २१५ ।
"बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ॥"
शिवः । यथा महाभारते । १३ । १७ । ११३ ।
"गोपालिर्गोपतिर्ग्रामो गोचर्म्मवसनो हरिः ॥")
स्वरभेदः । यथा —
"षड्जमध्यमगान्धारास्त्रयो ग्रामाः मता इह ।
षड्जग्रामो भवेदत्र मध्यमग्राम एव च ।
स्वर्लोके च गान्धारो ग्रामः प्रचरति ध्रुवम् ॥"

इत्यन्तौ षड्जग्रामस्य मूर्च्छना क्रियन्ते । मूर्च्छना प्रस्तार इत्यर्थः । स रि ग म प ध नि । इति षड्जस्य । म पौ ध नी स रि ग । इति मध्यमस्य । रि गौ म पौ ध नी सेऽन्ये । इति गान्धारस्य मूर्च्छना । स रि ग म प ध नि स्व । नि सौ रि ग म पाश्च ध । ध नि स रि ग म पोऽन्ते । प-धौ नि सौ रि गौ म इ । म पौ ध नी स रि ग । ग म प ध नि स रि । रि-गौ म पौ ध नी गान्ते । मूर्च्छना सप्त षड्जजाः ॥
"आद्ये द्वित्रिचतुःपञ्चषट्सप्तस्वपि क्रमे मताः ।
मध्यमो मो यत्र तेषु मध्यमग्राममूर्च्छना ॥
आदौ गकारो यत्रास्ति गान्धारग्राममूर्च्छना ॥"
तत्र षड्जग्रामप्रस्तारस्याथ क्रमः ।
"षड्जादिधान्तं नेयान्तं धान्तं पान्तमिष्यते ।
मान्तान्तं मध्यमाद्यन्तं गादिरभान्तमिष्यते ॥
ऋषभान्तं शान्तमित्याहुः षड्जग्रामस्य मूर्च्छना ।
मध्यमग्रामजाश्चैव मूर्च्छनाः परिकीर्त्तिताः ॥
मकारादिक्रमेणैव गकारान्तास्तु ता मताः ।
तारो मन्द्रश्च आवश्च इति ग्रामनिरूपणा ॥
षड्जग्राममूर्च्छनायाः सप्त कोष्ठानि ।
ब्रह्मविष्णुशिवैरुक्तास्त्रयो ग्रामा मनोहराः ॥"
इति सङ्गीतदामोदरः ॥

ग्रामकूटः, पुं, (ग्रामे ग्रामस्थो ग्रामस्य वा कूट इव तस्य प्राधान्यात्तथात्वम् ।) शूद्रः । इति त्रिकाण्डशेषः ॥

ग्रामजनिष्पावी, स्त्री, (ग्रामे ग्रामसन्निकर्षे वा जायते इति । जन + ड । ग्रामजा निष्पावीति कर्म्मधारयः ।) मत्तनिष्पावी । इति राजनिर्घण्टः ॥

ग्रामणीः, पुं, (ग्रामाः जीवसमूहाः नीयन्ते यस्य दानेन प्रतिपाल्यतेऽनेन । यद्वा ग्रामान् जीवसमूहान् नयति प्रापयति चेतयतीत्यर्थः । नी + क्विप् ततो णत्वम् ।) विष्णुः । यथा महाभारते । १३ । १४९ । ३७ ।
"अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः ॥"
यक्षः । यथा विष्णुपुराणे २ । १० । २ ।
"स रथोऽधिष्ठितो देवैरादित्यैर्ऋषिभिस्तथा ।
गन्धर्व्वैरप्सरोभिश्च ग्रामणीसर्पराक्षसैः ॥"
"देवैरादित्यैः आदित्या एव देवाः । ग्रामण्यो यक्षाः ।" इति तट्टीका ॥ नापितः । इत्यमरः । ३ । ३ । ४८ ॥

ग्रामणीः, त्रि, (ग्रामं समूहं तत्रस्थान् जनान् नयति दोषगुणविचारादिभिः परिचालयति प्रेरयति वा क्विप् ।) प्रधानः । अधिपतिः । इति मेदिनी । णे । ४५ ॥ (यथा ऋग्वेदे । १ ।
१०७ । ५ ।
"दक्षिणावान् प्रथमो हूत एति
दक्षिणावान् ग्रामणीरग्रमेति ॥"
तथा च महाभारते सभापर्व्वणि ८ ।
"[illegible]
[illegible]

ग्रामेण ग्राम्येण भोग्येनैव व्याप्नोति व्यय नीति। ग्रामान् भोग्यवस्तूनि नयति प्रापयतीति वा।) भोगिकः। इति हेमचन्द्रः॥

ग्रामणी, स्त्री (ग्रामेण जनसमूहेनैवार्थे भोग्यत्वेन नरान् यद्वा ग्रामेण ग्राम्यधर्मेण केवलं मैथुनाभिलाषिणं नयति कामं प्रापयतीति। नी+क्विप्।) वेश्या। ग्रामेया। भोगिका। इति हेमचन्द्रः॥

ग्रामतक्ष, पुं, (ग्रामस्य ग्रामपरतन्त्रो वा तक्षा। "ग्रामकौटाभ्यां च तक्ष्णः।" ५।४।९५। इति टच्।) ग्रामाधीनः काष्ठतट्। ग्रामायत्ततक्षा। इत्यमरः। २।१०।९। गेये कुमार इति भाषा॥

ग्रामता, स्त्री (ग्रामाणां समूहः। "ग्रामजनबन्धुभ्यस्तल्।" ४।२।४३। इति तल्।) ग्रामसमूहः। इत्यमरः। २।२।१९। (ग्रामस्य भावः। "तस्य भावस्त्वतलौ।" ५।१।११९। इति तल्।) ग्रामत्वम्॥

ग्रामभृत, पुं, (ग्रामे ग्रामस्य वा भृतः भरणीय मासावच्छिन्नवेतनेति यावत्।) ग्रामप्रेष्यः। स तु चाण्डालेषु प्रथमो भाण्डः। इत्यादिकालभेदम्। (यथाह प्रामाणिकः।

"प्रमाणवान्स्तु षट् प्रोक्ता ऋत्विजः सर्ववेदिनः।
आद्यो राजभृतश्चैव द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतश्चैव ग्रामस्य नगरस्य च॥
अनादिष्टास्तु ये पूर्वे पाणिग्राहेण पश्चिमाम्।
सोपनीतस्ति सन्ध्यां न भवेच्छान्दसः स्मृतः॥")

ग्राममद्गुरिका, स्त्री (ग्रामस्य मनुष्यस्य मेषु वा मद्गुरिकेव। क्षुद्रमद्गुर इत्यर्थः।) ग्रामीणमत्स्यः। ग्रामग्रहम्। इति मेदिनी। के। २०४॥

ग्राममुख, पुं (ग्रामस्य मुखमिव यो भिन्न। यद्वा ग्रामो ग्रामवासिनो सुखमिव प्रधानकारणत्वेन यस्य। ग्रामस्य मनसाकलादृकस्य तथात्वम्।) हट्टः। इति शब्दरत्नावली॥

ग्रामयाङ्ग, पुं (ग्रामस्य मृग इव। यद्वा ग्रामे स्थितो मृगः पशुः।) कुक्कुरः। इति शब्दरत्नावली॥

ग्रामयाजक, पुं (ग्रामस्य याजको यागकर्ता।) ग्रामस्थानां नानावर्णानां पुरोहितः। स तु चतुर्थो ब्राह्मणः। यथाह प्रामाणिकः।

"प्रमाणवान्स्तु षट् प्रोक्ता ऋत्विजः सर्ववेदिनः।
आद्यो राजभृतश्चैव द्वितीयः क्रयविक्रयी॥
तृतीयो बहुयाज्यः स्यात् चतुर्थो ग्रामयाजकः।
पञ्चमस्तु भृतश्चैव ग्रामस्य नगरस्य च॥
अनादिष्टास्तु ये पूर्वे पाणिग्राहेण पश्चिमाम्।
सोपनीतस्ति सन्ध्यां न भवेच्छान्दसः स्मृतः॥"
(तस्मै द्रव्यं दानादिकं निष्फलं भवति। यथाह महाभारते। ७।१९९।७।
"कदर्य्ये क्लीबे राज्ञि वार्द्धुषिके तथा।
गरो जनापशिके चाथ कृतघ्ने ग्रामयाजके॥")

ग्रामहा, त्रि ग्रामहा। ग्राम शिष्यति व एकमेवं शब्दार्थ॥

ग्रामहारक, पुं (ग्रामात् ग्रामवासिनः अनुरागात् भयमाश्रयात् वा हारयतीति। हृ+णिच्+ण्वुल्।) भगिनीपतिः। इति शब्दरत्नावली॥

ग्रामाधान, क्ली, (आधीयते उपजीविका यत्र तत्। आ+धा+ल्युट्। ततो ग्रामस्य अनुगमकस्य आधानं पोषकम्।) मृगया। इति हलायुधः॥

ग्रामान्त, क्ली (ग्रामस्य अन्तं समीपम्।) ग्रामसमीपम्। तत्पर्य्यायः। उपशल्यम् २। इत्यमरः। २।३।२०॥ ग्रामान्तिकम् ३। इति जटाधरः॥

ग्रामिणी, स्त्री, (ग्राम उत्पत्तिस्थानत्वेन अस्ति अस्याः। अत इनि। स्त्रियां ङीप्।) नीलीवृक्षः। इति जटाधरः॥

ग्रामी [न्] त्रि, (ग्राम अधिकारित्वेनास्त्यस्य। अत इनिः।) ग्रामविशिष्टः। गाँर इति भाषा। यथा आह्निकतत्त्वधृतकारिकायाम्।
"रामो गङ्गाग्रामी निज ईश्वरकोलितः।
ईश्वरकोलीति ख्यातो ग्रामी ग्रामजनाश्रयः॥"
(ग्रामी ग्राम्यधर्मो मैथुनं अस्त्यस्येति। ग्राम्यधर्म्मविशिष्टः। यथा भागवते। ४।२८।१४।
"आसुरी मेढ्रमर्वाग्द्वारं व्यवायो ग्रामिणां रतिः।
उपस्थो दुर्मदः प्रोक्तो निर्ऋतिर्गुद उच्यते॥")

ग्रामीण, पुं (ग्रामे भवः। ग्राम+"ग्रामाद्यखञौ।" ४।२।९४। इति खञ्।) ग्राम्यशूकरः। इति राजनिर्घण्टः॥ कुक्कुरः। काकः। ग्रामोद्भवे त्रि। इति मेदिनी। णे। ४६॥ (यथा शतपथब्राह्मणे। ७८।
"ग्रामीणस्य प्रथमतः मन्त्रतो गवादिकम्।
शाखास्वन्यगोवादीनां वा स्यात् वा कारणं शतम्॥")

ग्रामीणा, स्त्री, (ग्रामीण+स्त्रियां टाप्।) नीलीवृक्षः। इति मेदिनी॥ (अस्याः पर्य्याया यथा
"नीली तु नीलिनी तूली कालदोला च नीलिका।
रञ्जनी श्रीफली तुत्था ग्रामीणा मधुपर्णिका॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे। गुणाश्चास्या नीलिनीशब्दे ज्ञातव्याः॥) पालङ्क्यशाकम्। इति राजनिर्घण्टः॥

ग्रामेयक, त्रि, (ग्रामे भवः। ग्राम+"कत्र्यादिभ्यो ढकञ्।" ४।२।९५। इति ढकञ्।) ग्राम्यः। इति हेमचन्द्रः। ३।१६५॥

ग्रामेया, स्त्री, (ग्रामे भवा। ग्राम+ढक्।) ग्राम्यनारी। इति ग्रामणीशब्दार्थे हेमचन्द्रः॥

ग्रामेशः, त्रि (ग्रामस्य ईशः।) ग्रामेश्वरः। ग्रामाधिपतिः। यथा याज्ञवल्क्ये। २१।
"ग्रामं जनपदं पुरवासं सन्तमपारामसत्यापदम्।
क्षेत्रादि भक्ष्यसमृद्धि महद्वा दरोऽन्नाकरम्॥"

ग्राम्य, त्रि (ग्रामे भवः। ग्राम+"ग्रामाद्यखञौ।" ४।२।९४। इति यः।) ग्रामोद्भवः। तत्पर्य्यायः। प्राकृतः २। ग्रामीणः ३। इति हेमचन्द्रः। ३।१६६॥ (यथा, मनुः। ११।१६६।
"भक्ष्यभोज्यापहरणे यानशय्यासनस्य च॥"

तथा मनौ। १२।४७।
"ग्राम्यारण्यानां पशूनां हिंस्रादिः।"
मूढः। प्राकृतः। यथा रघौ। ११।४१।
"ग्राम्यभावमसङ्कटमुत्सृज्य
योगमार्गगतिमगमन्नृपः।")
अश्लीलविशेषः। "ग्राम्यमश्लीलार्थं देश्यम्।" इति ग्राम्ये भवो ग्राम्यम्।" इति मदनः। तत्पर्य्यायः। अश्लीलम् २। इत्यमरः। १।६।१९। (काव्यदोषविशेषः। स च ग्राम्यत्वं काव्यादर्शोक्तम्। तस्य ग्राम्यो यथा, साहित्यदर्पणे। ७।१।
"दुःश्रवत्रिविधाश्लीलानुचितार्थाप्रयुक्तताः।
ग्राम्योऽप्रतीतसन्दिग्धनेयार्थनिहतार्थताः॥"
अस्य उदाहरणं यथा तत्रैव। "कटिस्ते हरते मनः। अत्र कटिशब्दो ग्राम्यः।" अपरः यथा तत्रैव। ७।५।
"अनुकूलमयाम्यादातुर्दारोऽस्तकरणः॥"
उदाहरणं यथा तत्रैव। "स्वपिति हि भवे" अपिबन्धबाधया प्रिय॥ अपरो ग्राम्यः॥")

ग्राम्यकन्द, पुं (ग्राम्यः ग्रामजातः कन्दः।) ग्राम्यकोलः। मरकोल इति भाषा। तत्पर्य्यायः। ग्रामकन्दः २। इति रत्नमाला॥ स तु रक्तः इति राजवल्लभः॥

ग्राम्यकर्कटी, स्त्री (ग्राम्या ग्रामजाता कर्कटी।) कुष्माण्डः। इति शिक्षाध्याये॥

ग्राम्यकुङ्कुम, क्ली, (ग्राम्यं ग्रामजातं कुङ्कुमम्।) कुसुम्भम्। इति शिक्षाकल्पद्रुमः॥

ग्राम्यधर्म्म, पुं, (ग्राम्यस्य इतरादेर्धर्म्मः।) मैथुनम्। इत्यमरः। २।७।६१॥ (यथा, महाभारते। १।३८।६।
"प्रसक्तो ग्राम्यधर्म्मेषु मत्ताक्ष्यां कान्तिवर्षम्।
तस्य पुत्रः सुगम्भीरः दयितो कामविद्भ्यः॥")

ग्राम्यपशु, पुं (ग्राम्यः ग्रामवासी पशुः।) ग्रामपशुः। (यथा, भागवते। ३।१०।२१।
"तथाद्द्रुतो ग्राम्यपशोर्भवेत् अनुष्ठानस्य।
अन्यः तथापि मम च प्रार्थनीयाः॥"
ते तु सप्तविधा यथा। गौः १ अजः २ मेषः ३
मनुष्यः ४ अश्वः ५ अश्वतरः ६ गर्दभः ७।
इति तिथ्यादितत्त्वम्॥ (यदुक्तं वैद्यके।
"ग्राम्यारण्यवानूपेषु। मौलिकमांसेन
सह गर्भो मनुष्यश्लेष्मादि॥ अत्र
कार्य्यं ग्रामस्यैतदनुपशयार्थेन अत्र
इत्थम्॥" सुश्रुते सूत्रस्थाने
प्रपुत्र तथा सुखलाभः॥ अपि च।
"अश्वाश्वतरगोखरोष्ट्रवस्तोरभ्रमेदपुच्छकाद्याः
ग्राम्याः॥")

ग्राम्यमर्कटिका, स्त्री (ग्राम्या ग्रामजाता मर्कटिका।) अश्वगन्धा। इति राजनिर्घण्टः॥

ग्राम्यमृग, पुं, (ग्राम्यो ग्रामवासी मृगः इव।) कुक्कुरः। इति शब्दरत्नावली॥

ग्राम्यवल्लभा, स्त्री (ग्राम्यानां वल्लभा।) पालङ्क्या। इत्यमरः॥ इति राजनिर्घण्टः॥

ग्राम्यवल्लभा, स्त्री, (ग्राम्याणां ग्रामस्थजनानां वल्लभा प्रिया। पल्लीग्रामस्थजनप्रियत्वादेवास्यास्तथात्वम्।) पालङ्क्यशाकम्। इति राजनिर्घण्टः॥ (ग्राम्य अश्लील वल्लभ प्रिय यस्याः इति विग्रहे वेश्या। इति व्युत्पत्तिलभ्योऽर्थः॥)

ग्राम्यशूकरः, पुं स्त्री, (ग्राम्यः शूकरः।) ग्रामोत्पन्नवराहः। तत्पर्य्यायः। विड्वराहः २ ग्रामीणः ३ ग्रामक्रोडः ४ ग्रामकोलः ५ विष्कलः ६ दारकः ७। तस्य मांसस्य गुणाः। वनवराहमांसाद्गुरुत्वम्। मेदोबलवीर्य्यवृद्धिकारित्वञ्च। इति राजनिर्घण्टः॥

ग्राम्या, स्त्री (ग्रामे भवा। ग्राम+"ग्रामाद्यखञौ।" ४।२।९४। इति य। स्त्रियां टाप्।) नीली। निव्यायी। इति राजनिर्घण्टः॥ (तुलसी। इति चिन्तामणिः॥)

ग्राम्याश्वः, पुं (ग्राम्यः ग्रामजातोऽश्वः।) गर्द्दभः। इति त्रिकाण्डशेषः॥

ग्रावा, [न्] पुं (ग्रसते इति ग्रः। ग्रस+"अन्येभ्योऽपीति दृश्यते" इति ड। आवनति शब्दायते इति। आ+वन शब्दे+विच्। ततो ग्रश्चासौ आवा चेति।) प्रस्तरः। (यथा, भागवते। ४।५।१८।
'तर्ज्ज एवत्विषो दृष्ट्वा सदस्याः सदिवौकसः।
तैरर्द्यमाना सुभृशं ग्रावभिर्नैकधाऽद्रवन्॥")
पर्व्वतः। इत्यमरः। २।३।१॥ (यथा,—
"पृथ्वी तावत् त्रिकोणा विपिननदनदीग्रावयद्धं सदङ्गम्॥"
रुद्रटः॥)
मेघः। इति विश्वः॥ दृढे त्रि। इति शब्दरत्नावली॥

ग्रासः, पुं (ग्रस्यते अद्यते इति। ग्रस+कर्म्मणि घञ्।) सुखपूरणमात्रादि। यथा,—
"कुक्कुटाण्डप्रमाणन्तु यावद्वा प्रविशेन्मुखम्।
एतं ग्रासं विजानीयात् शुद्ध्यर्थं कायशोधनम्॥"
इति प्रायश्चित्तप्रकरणे पराशरः॥
(यथा च मनुः। ११।२१३।
"एकैकं ग्रासमश्नीयात् त्र्यहाणि त्रीणि पूर्व्ववत्॥")
तत्पर्य्यायः। कवलः २। इत्यमरः। २।९।५४॥ गुडेरकः ३ पिण्डः ४ गल्लोलः ५ कवकः ६ गुडः ७। इति हेमचन्द्रः। ३।८८॥ (दशौषधकालान्तर्गतकालविशेषः। "तत्र निर्भक्तं प्राग्भक्तमधोभक्तं मध्येभक्तमन्तराभक्तं सभक्तं सामुद्गं मुहुर्मुहुर्ग्रासं ग्रासान्तरञ्चेति दशौषधकालाः।" इत्युत्तरतन्त्रे चतुःषष्टितमेऽध्याये सुश्रुतेनोक्तम्॥)

ग्राहः, पुं (गृह्यते इति। ग्रह उपादाने+भावे घञ्।) ग्रहणम्। (गृह्णातीति। ग्रह+"विभाषा ग्रहः।" ३।१।१४३। इति णः व्यवस्थितविभाषया च।) जलजन्तुविशेषः। हाङ्गर इति भाषा। जलहस्ती इति केचित्। तत्पर्य्यायः। अवहारः २। इत्यमरभरतौ॥ (यथा, महाभारते। १।२१।५।
"भीमैर्विकृतैरश्वैर्घोरैर्व्यञ्जनरैस्तथा।
पर्व्वैर्विक्रमहाऽवश्य कूर्म्मग्राहसमाकुलम्॥")

शिशुकः। इति राजनिर्घण्टः॥ (आग्रहः। यथा गीतायाम्। १७।१९।
"मूढग्राहेणात्मनो यत् पीडया क्रियते तपः।"
"मूढग्राहेणाविवेककृतेन दुराग्रहेण।" इति श्रीधरस्वामी॥)

ग्राहकः, पुं, (गृह्णातीति। ग्रह+ण्वुल्।) सितावरशाकम्। इति राजनिर्घण्टः॥ हिलमची। ग्रहणकर्त्तरि त्रि। इति शब्दरत्नावली॥ (ग्रह+णिच्+ण्वुल्। ग्रापकः। यथा महाभारते। ३।२१।१३।
"यथास्य ग्राहकाण्येषां शब्दादीनामिमानि तु॥")

ग्राहिणी, स्त्री (गृह्णाति अशेषगुणानिति। ग्रह उपादाने+"नन्दिग्रहीति।" ३।१।१३४। इति णिनि ङीप्।) क्षुद्रदुरालभा। इति राजनिर्घण्टः॥ ताम्रमूलाक्षुप। इति रत्नमाला॥ चिरट इति भाषा॥

ग्राहिफलः, पुं (ग्राहि धारकं मलबन्धकमित्यर्थः फलं यस्य।) कपित्थवृक्षः। इति राजनिर्घण्टः॥

ग्राही, [न्] पुं, (गृह्णातीति। ग्रह+णिनि।) कपित्थः। इति शब्दचन्द्रिका॥

ग्राही, [न्] त्रि, (गृह्णातीति। ग्रह+णिनि।) मलबन्धकः। धारकः। इति वैद्यकम्॥ (यथा, भावप्रकाशे।
"काशमारी हिमा ग्राही तुवरः श्लेष्मपित्तनुत्॥")
ग्रहणकर्त्ता। इति व्याकरणम्॥ (यथा, कथासरित्सागरे। २५।४९।
"तत्र तस्यैव कौषर्म्मपतेः सत्यव्रतस्य सः।
अपरप्राहिभिर्बद्धे प्राप्य दैवादयव्रत॥"
प्रतिकूलः। यथा, भट्टिः। ५।९३।
"मास्म भूग्राहिणी भीरु! गच्छ सुतग्राहिणी भव॥"
"हे भीरु। मास्म भूग्राहिणी प्रतिकूला मा भूः।"
इति जयमङ्गलः॥)

ग्रीवा, स्त्री, (गीर्य्यतेऽनया। गॄ निगरणे+"शेवायह्वजिह्वाग्रीवाप्वामीवाः।" उणां। १।१५४। इति वन्प्रत्ययेन निपातनात् साधुः।) गलघाटादिसहशिरा। इति भरतः॥ (यथा अभिज्ञानशकुन्तले १ मे अङ्के। [इति।]")
"ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्त..." सा तु गर्भे मासमात्रेण भवति। इति सुखबोधः॥ तत्पर्य्यायः। शिरोधिः २ कन्धरा ३। इत्यमरः। २।६।८८॥ कन्धिः ४ शिरोधरा ५। इति राजनिर्घण्टः॥ कन्धराशिरा। इति मेदिनी। वे। ६॥

ग्रीवी, [न्] पुं स्त्री, (ग्रीवा विद्यते यस्य। ग्रीवा+इनि। दीर्घग्रीवावत्त्वया एव अस्य तथात्वम्।) उष्ट्रः। इति जटाधरः॥ प्रशस्तग्रीवायुक्ते त्रि॥

ग्रीष्मः, पुं, (ग्रसते रसान् इति। ग्रस अदने+"ग्रीष्मः।" उणां। १।१४९। इति मक् ग्रीभावश्च धातोः सुगागमश्च निपात्यते।) ऋतुविशेषः। (यथा मनुः। ६।२३।
"ग्रीष्मे पञ्चतपास्तु स्याद्वर्षास्वभ्रावकाशिकः॥")
स तु ज्यैष्ठाषाढौ। तत्पर्य्यायः। उष्णकः २ निदाघः ३ उष्णोपगमः ४ उष्णः ५ ऊष्मागमः ६ तपः ७। इत्यमरः। १।४।१९॥ घर्म्मः ८ तापनः ९ उष्मागमः १० उष्णकालः ११।
"ग्रीष्मकल्पनभिस्यन्दि चलमिदंव निश्चय॥"
इति राजनिर्घण्टः॥
("दीर्घवासरके तीव्र ज्वालामालाकुले रवौ।
दिशि ग्रीष्मे जगद्धात्री तीव्राः सुर्य्यगभस्तिभिः॥
नैऋते मारुतो रूक्षः ग्रीष्मपर्णो महीरुहाः।
दग्धं दवाग्निकारण्यं तावाग्निश्च दिशो दश॥
एवं लक्षणके ग्रीष्मे पित्तरक्तमुदीर्य्यते।
तस्मात् क्रियाप्रतीकारं कुर्य्यात् स प्रशमं भिषक्॥
जलक्रीडा दिवानिद्रा सेवनं सुखसाधनम्।
प्रासादारामारतं शस्तं कुञ्जकिञ्जल्कशीतलम्॥
नीलनालदलोपेतः सम्भ्रमो जलमारुतः।
केतकीमोदकुसुमचन्दनोशीरशीतलैः॥
सेवनं शीतलं सान्द्रं धारागाराश्रयं पुनः।
एवं क्रियासमापन्नो ग्रीष्मे च सुखसङ्गमः॥"
इति ग्रीष्मोपचारः॥
इति हारीते प्रथमे स्थाने पञ्चमेऽध्याये॥
"तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे सङ्क्षिपतीव यत्।
प्रत्यहं क्षीयते श्लेष्मा तेन वायुश्च वर्द्धते॥
अतोऽस्मिन् पटुकट्वम्लव्यायामार्ककरांस्त्यजेत्।
भजेन्मधुरमेवान्नं लघु स्निग्धं हिमं द्रवम्॥
सुशीततोयसिक्ताङ्गो लिह्यात् शक्तून् सशर्करान्।
मद्यं न पेयं पेयं वा स्वल्पं सुबहुवारि वा॥
अन्यथा शोषशैथिल्यदाहमोहान् करोति तत्।
कुन्देन्दुधवलं शालिमश्नीयाज्जाङ्गलैः पलैः॥
पिबेद्रसं नातिघनं रसालां रागखाण्डवौ।
पानकं पञ्चसारं वा नवमृद्भाजनस्थितम्॥
मोचचोचदलैर्युक्तं साम्लं मृण्मयशुक्तिभिः।
पाटलावासितं चाम्भः सकर्पूरं सुशीतलम्॥
शशाङ्ककिरणान् भक्ष्यान् रजन्यां भक्षयन् पिबेत्।
ससितं माहिषं क्षीरं चन्द्रनक्षत्रशीतलम्॥
अभ्रङ्कषमहाशालतालरुद्धोष्णरश्मिषु।
वनेषु माधवीश्लिष्टद्राक्षास्तवकशालिषु॥
सुगन्धिहिमपानीयसिच्यमानपटालिके।
कायमाने चिते चूतप्रवालफललुम्बिभिः॥
कदलीदलकह्लारमृणालकमलोत्पलैः।
कल्पिते कोमले तल्पे हसत्कुसुमपल्लवे॥
मध्यन्दिनेऽर्कतापार्त्तः स्वप्याद्धारागृहेऽथवा।
पुस्तस्त्रीस्तनहस्तास्यप्रवृत्तोशीरवारिणि॥
निशाकरकराकीर्णे सौधपृष्ठे निशासु च।
आसना स्वस्थचित्तस्य चन्दनार्द्रस्य मालिनः॥
निवृत्तकामतन्त्रस्य सुसूक्ष्मतनुवाससः।
जलार्द्रास्तालवृन्तानि विस्तृताः पद्मिनीपुटाः॥
उत्क्षेपाश्च मृदूत्क्षेपा जलवर्षिहिमानिलाः।
कर्पूरमल्लिकामाला हाराः सहरिचन्दनाः॥
मनोहरकलालापाः शिशवः सारिकाः शुकाः।
मृणालवलया कान्ता प्रोत्फुल्लकमलोज्ज्वला॥
जङ्गमा इव पद्मिन्यो हरन्ति दयिता क्लमम्॥"
इति वाभटे सूत्रस्थाने तृतीयेऽध्याये॥

"मौढ्ये पुनर्भूमौष्मोपहतत्वात् शरीरमप्युपचय भवति । उपचायारम्भमाणानिद्रिदिष्ट- प्रथमप्रविनीवराय मेदस पुन गच्छति मार्ग- मुखमभावमुच्चामुनमनात्स्पातनममापदने । तमात्तया सयोगे संयोगमतियोगायोग पतते शरीर मिथ्योपचयाय ।" इति चरके विमानस्थाने एकोऽध्याये ॥
"अपूरेतमतः मारं मौढ्यं पिपीयति इति ।
चातुर्मीत दर्वं विभमतमाप तदा हितम् ।
हान समर्कर मन्थ आगुलाग्नमपचिर ।
प्रत मय च ग्रीष्मात भजन् मौढ्यं न पीदति ।
गतमस्य न वा पियमपवा सुवकुन्कम् ।
कदलन्वकल्पानि पायामपात्र वर्षयेत् ।
दिवा शीतगृह निद्रां निशि चन्द्रांशुशीतलम् ।
अनिलस्पर्शनिर्धार्य भजति कमलाकरे ।
दक्षमे मालिनस्पर्शं चन्द्रोन्मदशीतले ।
शिक्षमाणो मन्दरास्ते मुक्तामणिविभूषित ।
काननानि च शीतानि जलानि कुसुमानि च ।
मौढ्यकाले निषेवेत मैथुनाद्विरतो नरः ।"
इति च सुश्रुते षष्ठोऽध्याये चरकोक्तम् ।)
तत्र जातपक्ष यथा, कोटीमदीपे ।
"मौढ्योद्भवो भोगवागुरक्तो
यता सुशीलो जलकेलिशील ।
विज्ञायते सर्वमयोगनोद्रो
धन्वी सुवेश परदारचित्त ।"
उक्ष । इति मेदिनी । मे । २ । गदृति इति तात् इति च भाषा । तद्वति त्रि ॥

मौढ़का, स्त्री, (मौढ़ात् मौढ़्यभावात् मौढ़्यं मौढ़्य काले वा कायते या इति । कै+क । तत- टाप् च ।) लवली । इति शब्दचन्द्रिका । मोमा इति भाषा । (मौढ़जातमात्रे, त्रि ।)

मौढ़पुष्पी, स्त्री (मौढ़्ये मौढ़काले पुष्पं यस्याः । नाम्नी सङ्ज्ञायां वा ङीप् ।) कदमीपुष्पक । इति राजनिर्घण्टः ।

मौढ़भवा, स्त्री, (मौढ़्ये मौढ़समये मौढ़्यनाम्नि ऋतौ भवति उत्पद्यते या । भू+अच् । टाप् ।) नवमल्लिका । इति रत्नमाला ।
("कुमारिका मौढ़्यभवा सुगन्धा ।"
इति वैद्यकरत्नमालायाम् ।)

मौढ़सुन्दरक, पुं (मौढ़्ये सुन्दर इव कायति शोभते इति । कै+क । मौढ़सुन्दर+स्वार्थे कन् वा ।) शाकविशेष । तिमर इति भाषा । तस्य गुणा । तिक्तत्वम् । लघुत्वम् । कफपित्त दाहनाशित्वम् । वह्निकारित्व । इति राज वल्लभ ।

मौढ़वार्ष्ठ स्त्री, (मौढ़्ये मौढ़समये जाता प्रकाश उत्पत्तिर्यस्य मौढ़्यकाले यस्य ।) इन्द्रसुरसम् । दानविशापदेव । कुन्द इति भाषा ।

मौढ़ी, स्त्री (मौढ़्य मौढ़समय उत्पत्तिकाल- श्रेष्ठावस्था । "षड् धर्मादिभ्यो च ।" ४।१।४१। इत्यत्र गतौ ङीष् ।) नवमल्लिका । इति राज निर्घण्टः ।

मौढ़ोद्भवा, स्त्री, (उद्भवतीति । उद्+भू+अच् । मौढ़्ये उद्भवो यस्या मौढ़्ये उद्भवतीति वा ।) नवमल्लिका । इति राजनिर्घण्टः ।

म्रुच दह् उ चौर्ये । गतौ । इति कविकल्पद्रुमः । (भ्वा पर सकं सेट उदित्वात् क्त्वा वेट ।) रेफ युक्त । पञ्चमस्वरी । दह, अम्रुचत् अम्रो चीत् । उ म्रोचित्वा म्रुक्त्वा । इति दुर्गा दास ॥

मौर्वं, क्ली, (मूर्वाया भवम् । "मौर्वाणोरण च ।" ४।३।१४०। इति अण् ।) ज्याभूषणम् । इति शब्दरत्नावली । (यथा, रघु । ४ । ४८ ।
"भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।
नात्रसत् करिणां मौर्वं त्रिपदीच्छेदिनामपि ।")

मौर्वम्, क्ली (मूर्वाया भवम् । "तस्य विकारः ।" "पलाशादिभ्यो वा ।" ४ । ३ । १४१ । इत्यस्य सुपदस्य वार्त्तिकोक्त्या वकारात् ढञ् ।) कक्ष भूषणम् । इति शब्दरत्नावली । (यथा महा भारते । ७ । ११ । ३३ ।
"पुनहितात् हिमरोहात् वैजयन्तकुमध्यमात् ।
मूर्द्धगौरप्यपां कथात् मौर्व्याण्यन्यकमलात् ।")

मौर्वदण्डं, स्त्री (मूर्वाया भवतीति । "कुम कुदितोरपा ज्वालतहुरेषु ।" ४ । ३ । ८६ । इति ढकञ् ।) कक्ष्याभूषा । इत्यमरः । ३ । ६ । ११ ।
(यथा, मार्कण्डेयपुराणे । ८२ । २१ ।
"नूपुरौ विमलौ तद्वत् मौर्वेयकमनुत्तमम् ।")

मौर्वी, स्त्री (मौर्व भवति । "मयि वैलादृत- भवमौ्र्व्योश्च ।" ४।३।१४। इति अण् ततो ङीप् । "मये वालय ङीप ।" इति व्यवहारे ।) नव मल्लिका । इति शिवाकोष । मौढ़कर्णाविरि चि भाषा ।

म्यक्ष, उ ङ सङ्घाते । इति कविकल्पद्रुमः । (भ्वा आत्मं सकं सेट उदित्वात् क्त्वा वेट् ।) दन्त्य स- कारोपयुक्त । उ, म्यक्षित्वा म्यक्त्वा । ङ, म्यक्षते । इति दुर्गादास ।

म्रक्ष त्रि, (म्रक्ष्+कर्म्मणि क्त ।) प्रक्षित । इत्यमरः । ३ । १ । ११२ ।

म्रद, ङ मि मर्दने । इति कविकल्पद्रुमः । (चुरा पक्षे भ्वा पर सकं सेट ।) चवर्गतृतीयोप युक्त । ङ अमर्दिष्ट अमम्रदत् । मि, म्रद यति म्रदति । दन्त्य वेदिष्य मर्दने इति दुर्गादास । (यथा, महाभारते । २ । ६० । १८ ।
"दर्पोऽपि नेत पूर्वं विषवीतमलोय
रौद्रोऽमदिश्यपरदानिवात ।")

म्रदः पुं (म्रद+"घञर्थे कः ।" ३।३।८० । यत्र्यन्त्येव दैवत मदति तत्र यत् म्रदक्षेत्र माद्दे तत्र म्रद इति विज्ञाते । इति वार्त्ति कोक्त्या च विद्यान्ताम तथाम् ।) पम्प कोद्रव दश । इत्यमरः । २ । १० । ३२ । चात् इत्यपादि इति च भाषा । (यथा महा भारते । २ । ५० । ६ ।
"प्राचानस्य इत्यस्य सर्वमिति
सभामध्ये भी चैत्रोद्यात्रेव ।")

म्लात, [क्ल] त्रि, (म्लायति म्लानिवृत्ताः क्षि- यतीति । म्लै+क्त ।) म्लानियुक्त । इति शब्दा र्थम् ।

म्लान त्रि (म्लै+कर्त्तरि क्त ।) रोगेण क्षीण देहः । तत्पर्य्याय । ग्लानः २ । ग्लस्नः ३ । ३ । १ । १८ । रोगी । इति राजनिर्घण्टः ।

म्लानि, स्त्री, (म्लायते अनेनेति क्तिन् वा । म्लै- "ग्लाज्यादिभ्युहस्त्वादादेशित्यो निः ।" उणा०, ३ । ५१ । इति नि ।) मलीनता । इति हेम चन्द्रः । २ । २३६ । (यथा, गीतायाम् । ४ । ७ ।
"यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत ।")
रोग । इति शब्दचन्द्रिका । (यथा कथा सरित्सागरे । ५ । ७३ । ११ । "दक्षे मन्दरे नैमतम् समायानिवृत्ति म्लानिरमयस्य भवति ।")

म्लायु, त्रि, (म्लायतीति । म्लै+"क्षिमूषि स्वदि ।" ३ । २ । १३८ । इति कु ।) म्लान । इत्यमरः । ३ । १ । ९८ । (यथा, मनुः । ७ । ५
"यत्र मान्यत्रेति म्लाय रात्रौ विभुरपहृतः ।")

म्लुच दह् उ चौर्ये गतौ । इति कविकल्पद्रुम । (भ्वा पर सकं सेट । उदित्वात् क्त्वा वेट् ।) दन्त्य लादिरोपयुक्त । पञ्चमस्वरी । दह अम्लु चत् अम्लोचीत् । उ म्लोचित्वा म्लुक्त्वा । इति दुर्गादास ।

म्लुच, उ दह गतौ । इति कविकल्पद्रुम । (भ्वा पर-सकं सेट ।) उदित्वात् क्त्वा वेट् । दन्त्य लादोपयुक्तादि । पञ्चमस्वरी । उ, म्लुचित्वा म्लुक्त्वा । दह, अम्लुचत् अम्लोचीत् । इति दुर्गादास ।

म्लेछ, च ङ दैन्ये । गतौ । वाचि । इति कविकल्प द्रुम । (भ्वा आत्म सकं अकं च सेट ।) दन्त्य लादोपयुक्त । ङ म्लेछते विमेव वदा । च अविस्पष्टम् । इति दुर्गादास ।

म्लेच्छ त्रि, (म्लेच्छयतीति । म्लेच्छ+क ।) अस्पष्ट भाषी । इति व्याकरणम् ।

म्लेव, च ङ सेवे । इति कविकल्पद्रुम । (भ्वा आत्म सकं सेट ।) दन्त्य लादोपयुक्त । च, अविस्पष्टम् । ङ म्लेवते । इति दुर्गादास ।

म्लेव ज्व ङ सन्वे । इति कविकल्पद्रुम । (भ्वा आत्म सकं सेट ।) दन्त्य लादोपयुक्त । च अविस्पष्टम् । ङ म्लेवते म्लिवेते । अमेध्य वाक्यम् । म्लेवते च वर्णा मन्वोरिति सु- द्रुम । इति दुर्गादास ।

म्लै, क्षये । इति कविकल्पद्रुम । (भ्वा पर अकं अनिट ।) दन्त्य लादोपयुक्त । क्षये हर्ष ह्रद । म्लायति मोद मिया । अस्य म्लानौ ज्ञाने व्यवहारे प्रकाशे । म्लाति अन्यग्लानि । ओष्ठ्य तु प्रयोग न । इति दुर्गादास । (यथा भट्टि ।
"मुखा मुद्रा च ह्रदा च ग्रामग्ला च च्योर ।
न भुवनैर म्लानिर्मा व प्रदेशो विमर्शन ।"

म्लौ, पुं, (म्लायति म्लानिं प्राप्नोति इत्यर्थः इति भाव । म्लै+"म्लाइत्याउ डौ ।" उणा ।

२ । ६४ । इति टौ ।) चन्द्र । (यथा, अथर्व्व संहितायाम् । ६ । ८३ । २ ।
"ग्लौरित प्रपतिष्यति स गलुन्तो नशिष्यति ।")
कर्प्पर । इत्यमर । १ । ३ । १४ ।

घ

घ, घकार । स तु व्यञ्जनचतुर्थवर्णः । अस्यो च्चारणस्थानं कण्ठः । इति व्याकरणम् । (एतत्तु मुग्धबोधमतम् । यथा, "अ आ ह क ख ग घ ङाः कण्ठ्याः ।" पाणिनीये तु एष कण्ठ्यो जिह्वामूलीयश्च । यथा, "अकुहविसर्जनीयानां कण्ठः ।" इत्युक्ता पुनः शिक्षायाम् ।
"जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः ।")
अस्य स्वरूपं यथा कामधेनुतन्त्रे ।
"घकारं चञ्चलापाङ्गि । चतुष्कोणात्मकं सदा ।
पञ्चदेवमयं वर्णं रक्तादित्यसमप्रभम् ॥
निर्गुणं त्रिगुणोपेतं सदा त्रिगुणसंयुतम् ।
सर्व्वगं सर्व्वदं शान्तं घकारं प्रणमाम्यहम् ॥"
अस्योत्पत्तिर्गौतमीये द्रष्टव्या । वर्णोद्धारतन्त्रे केवलप्रकारादियथा,—
'दक्षिणरूपा वामरेखा किञ्चिदाकुञ्चिता ततः ।
कुण्डलीरूपमास्थाय ततोऽधोगत्य दक्षतः ॥
अत ऊर्द्ध्वं गता रेखा शम्भुनारायणात्मिका ।
कमलरूपिणी देवि । मात्राशक्तिः प्रकीर्त्तिता ॥'
अस्य ध्यानं यथा,—
"मालतीपुष्पवर्णाभां षड्भुजां रक्तलोचनाम् ।
शुक्लाम्बरपरीधानां शुक्लमाल्यविभूषिताम् ॥
सदा स्मेरमुखीं रम्यां लोचनत्रयराजिताम् ।
एवं ध्यात्वा घकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
तन्त्रशास्त्रे यथा, वर्णोद्धारतन्त्रे ।
"निर्गुणं त्रिगुणोपेतं सदा त्रिगोलसंयुतम् ।
सर्व्वगं सर्व्वदा शान्तं घकारं प्रणमाम्यहम् ॥"
तस्य नामानि यथा, नानातन्त्रेषु ।
"घः सङ्गो घुर्घुरो घण्टी घण्टीशस्त्रिपुरान्तकः ।
नादः शिवोत्तमः खला किङ्किणी घोरनायकः ॥
मरीचिर्मेदको मेधा कालरूपी च नामिकः ।
लम्बोदरा ज्वालमुखी मन्देशो हननं ध्वनिः ।
त्रैलोक्यविद्या सहसा कामाख्यमलघासयः ॥'
घ, पुं, (घट्टयति शब्देन शोभते घटयति घर्घं राशिमन्दं वा । घटि दुतौ घट चेष्टायां च + बाहुलकात् ड ।) घण्टा । घर्घरशब्दः । इति मेदिनी । घे । १ ।
घग्घ, हसने । इति कविकल्पद्रुमः । (भ्वा-पर अकं सेट ।) कण्ठ्यवर्गान्तोपधः । घग्घति । इति दुर्गादासः ।
घट क छिदि । संघाते । दुतौ । इति कविकल्पद्रुमः । (चुरा पर सकं अकं च सेट ।) क घाटयति कपाटं द्वारि जनः संयोजयतीत्यर्थः । इति दुर्गादासः ।
घट, इ कि दुतौ । इति कविकल्पद्रुमः । (चुरा-पक्षे भ्वा-पर अकं सेट ।) इ भावे घण्ट्यते । कि, घण्टयति घण्टति । दुतिर्दीप्तिः । दुत्यर्थत्वेन पाणिकपुरादित्वे सिद्धे कि करणमर्थान्तरेऽपि णाणिकपुरादित्वार्थम् । तथाच —
"क्रियावाचित्वमाख्यातु मसिद्धोऽर्थः प्रदर्शितः ।
प्रयोगतोऽन्ये मन्तव्या अनेकार्था हि धातवः ॥"
इति बोपदेवः ।
घृणिः पुं, (जिघर्त्ति दीप्यते इति । घृ + "घृणिपृश्निपार्ष्णिचूर्णिभूर्णि ।" उणा । ४ । ५२ । इति निप्रत्ययेन निपातनात् साधुः ।) किरणः । इत्यमरः । १ । ३ । ३३ ॥ सूर्य्यः । (घरति सिञ्चतीति । घृ सेके + निः गुणाभावश्च ।) जलम् । इति मेदिनी ॥ (जिघर्त्ति दीप्यते इति अनुपतप्ता दीप्तिशालिनि, त्रि । यथा, भागवते । ७ । २ । ७ ।
"तस्य त्यक्तस्वभावस्य घृणेर्मायावनौकसः ।")

घृत, पुं क्ली, (जिघर्त्ति क्षरतीति । घृ + "अञ्जिघृसिभ्यः क्तः ।" उणा । ३ । ८९ । इति क्तः ।) पक्वनवनीतम् । घि इति भाषा ॥ तत्पर्य्यायः । आज्यम् २ हविः ३ सर्पिः ४ । इत्यमरः । २ । ९ । ५२ ॥ पवित्रम् ५ नवनीतकम् ६ अमृतम् ७ अभिघारः ८ होम्यम् ९ आयुः १० तैजसम् ११ । इति राजनिर्घण्टः ॥ आज्यम् १२ । यथा —
"घृतोऽस्त्री आज्यमाज्यञ्च सर्पिः स्यादमृतं हविः ।"
इति जटाधरः ॥

तस्य गुणाः । बुद्ध्यग्निशुक्रौजोमेधास्मृतिकफकारित्वम् । वातपित्तविषोन्मादरोगशोषालक्ष्मीज्वरनाशित्वम् । सौम्यादिगुणयुक्तत्वञ्च । इति राजवल्लभः ॥ रसायनत्वम् । स्वादुत्वम् । चक्षुर्हितत्वम् । शीतवीर्य्यत्वम् । पापनाशित्वम् । अल्पाभिष्यन्दित्वम् । कान्तितेजोलावण्यस्वराग्निहितबलकारित्वम् । पवित्रत्वम् । गुरुत्वम् । उदावर्त्तशूलानाहज्वरक्षयवीसर्परक्तनाशित्वम् । स्निग्धत्वम् । कफलत्वञ्च । इति भावप्रकाशः ॥ * ॥ अथ गव्यघृतस्य गुणाः । विशेषेण चक्षुष्यत्वम् । शीतलत्वम् । वातपित्तकफालक्ष्मीपापरक्षोनाशित्वम् । शुक्राग्निस्वादुपाकमेधालावण्यकान्त्योजस्तेजोवृद्धिवयःस्थितिबलायुर्हितकारित्वम् । गुरुत्वम् । पवित्रत्वम् । सुमङ्गल्यत्वम् । रसायनत्वम् । सुगन्धित्वम् । रोचनत्वम् । चारुत्वम् । सर्व्वाज्येषु गुणाधिकत्वञ्च । इति भावप्रकाशः ॥ बुद्धिस्मृतिपुष्टिवपुःस्थैर्य्यकारित्वम् । अशेषशमनत्वम् । हृद्यतमत्वम् । बहुगुणत्वञ्च ॥ * ॥ माहिषघृतगुणाः । उत्तमत्वम् । धृतिसौख्यकान्तिबलवर्णचक्षुर्हितकारित्वम् । वातश्लेष्मगुल्मगुदजशोथविकारनाशित्वम् । मन्दानलोद्दीपनत्वम् । नवमथितं परमहृद्यत्वम् । मनोहारित्वञ्च । इति राजनिर्घण्टः ॥ स्वादुत्वम् । पित्तरक्तनाशित्वम् । शीतत्वम् । श्लेष्मशुक्रवृद्धिकारित्वम् । गुरुत्वम् । स्वादुपाकित्वञ्च ॥ * ॥ छागीघृतगुणाः । अग्निचक्षुर्हितबलकारित्वम् । कासश्वासक्षयेषु हितत्वम् । कटुपाकित्वञ्च । इति भावप्रकाशः ॥ कफनाशित्वम् । इति राजनिर्घण्टः ॥ * ॥ मेषीघृतगुणाः । पित्तमेदस्कारित्वम् । योनिदोषे शोषे कफे अनिले च प्रशस्तत्वम् । रूक्षत्वम् । दुर्नामोन्मादनाशित्वञ्च । इति राजवल्लभः ॥ पाके लघुत्वम् । पित्तकोपाकारित्वम् । शोषे कम्पे च हितत्वञ्च ॥ * ॥ औष्ट्रघृतगुणाः । अतिसारेषु शुक्रमारदहितत्वम् । बुद्धिपाटवकरत्वम् । बलकारित्वम् । सुधा मधुरो विस्रगन्धकारित्वञ्च ॥ * ॥ हस्तिनीघृतगुणाः । कफपित्तविषकृमिनाशित्वम् । कषायत्वम् । लघुत्वम् । विष्टम्भित्वम् । तिक्तत्वम् । वह्निकरत्वञ्च ॥ * ॥ अश्वाघृतगुणाः । कटुत्वम् । मधुरत्वम् । कषायत्वम् । दृढवह्निदीपनत्वम् । वातशमनत्वम् । मूर्च्छादाहहारित्वम् । गुरुत्वञ्च ॥ * ॥ गर्द्दभीघृतगुणाः । अग्निबलकारित्वम् । मूत्रशोधककफनाशित्वम् । पाके लघुत्वम् । कषायत्वम् । उष्णवीर्य्यत्वञ्च ॥ * ॥ उष्ट्रीघृतगुणाः । मधुरत्वम् । विपाके कटुत्वम् । शीतलत्वम् । कुष्ठकृमिविषवातकफगुल्मोदरनाशित्वञ्च । इति राजनिर्घण्टः ॥ शोथनाशित्वम् । इति राजवल्लभः ॥ * ॥ नारीघृतगुणाः । चक्षुर्हितरुचिकारित्वम् । पथ्यत्वम् । मन्दाग्निदीपनत्वम् । पाके लघुत्वम् । सर्व्वामयविषनाशित्वञ्च । इति राजनिर्घण्टः ॥ प्रमेहनाशित्वम् । इति राजवल्लभः ॥ * ॥ दुग्धभवघृतगुणाः । ग्राहित्वम् । शीतलत्वम् । नेत्ररोगकारित्वम् । पित्तदाहश्रममूर्च्छाभ्रमानिलनाशित्वञ्च ॥ * ॥ ह्यस्तनघृतं तदेव हैयङ्गवीनम् । तस्य गुणाः । चक्षुर्हितत्वम् । दीपनत्वम् । रुचिबलकारित्वम् । हृद्यत्वम् । वृष्यत्वम् । विशेषात् ज्वरनाशित्वञ्च ॥ * ॥ वर्षं पुराणस्य तस्य गुणाः । त्रिदोषमूर्च्छाकुष्ठविषोन्मादापस्मारतिमिरनाशित्वम् । इति भावप्रकाशः ॥ मद्यशिरःकम्पादिजरोगभ्रान्तिनाशित्वम् । व्रणस्य शोधनत्वम् । रोपणत्वञ्च । आयुर्वृद्धिशरीरदृढतासौकुमार्य्यकान्तिस्मृतिबलकारित्वम् । बाल्ये तरुणे वार्द्धके चातिबल्यत्वम् । पथ्यत्वञ्च । इति राजनिर्घण्टः ॥ प्रतिश्यायकासश्वासशोषज्वरसर्व्वरोगनाशित्वम् । श्रेष्ठत्वम् । धातुसाम्यकारित्वञ्च ॥ * ॥ तस्य लक्षणम् ।
"उपगन्धं पुराणं स्याद्दशवर्षस्थितं घृतम् ।
लाक्षारसनिभं शीतं प्रपुराणमतः परम् ।
यथा यथा भवेज्जीर्णं गुणवत् स्यात्तथा तथा ॥"
शीतपाके दशदिनस्थितं घृतं ग्राम्यम् । इति राजवल्लभः ॥ औषधघटितपक्वघृतस्य पूर्णवीर्य्यं वत्सरपर्य्यन्तं तिष्ठति । इति वैद्यकपरिभाषा ॥
("घृतं धीस्मृतिमेधाग्निबलायुःशुक्रचक्षुषाम् ।
बालवृद्धप्रजाकान्तिसौकुमार्य्यस्वरार्थिनाम् ॥
क्षतक्षीणपरीसर्पशस्त्राग्निग्लपितात्मनाम् ।
वातपित्तविषोन्मादशोषालक्ष्मीज्वरापहम् ॥
स्नेहानामुत्तमं शीतं वयसः स्थापनं परम् ।
सहस्रवीर्य्यं विधिभिर्घृतं कर्म्मसहस्रकृत् ॥"
इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरेणोक्तम् ।)
"विपाके मधुरं हृद्यं वातपित्तकफापहम् ।
चक्षुष्यं बलकृन्मेध्यं गव्यं सर्पिर्गुणोत्तरम् ॥"
इति गव्यघृतम् ॥
"आजमग्निदीपनीयञ्च चक्षुष्यं बलवर्द्धनम् ।
कासे श्वासे क्षयेऽपथ्यं लघुपाके कफापहम् ॥"
इत्याजघृतम् ॥
"वातपित्तशमं सर्व्वं सुशीतं माहिषं घृतम् ।
मधुरं गुरु विष्टम्भि भवत्यल्पगुणात्मकम् ॥"
इति माहिषघृतम् ॥
"औष्ट्रं कटु घृतं पाके शोषकृमिविषापहम् ।
दीपनं कफवातघ्नं कुष्ठगुल्मोदरापहम् ॥"
इत्यौष्ट्रघृतम् ॥
"पाके लघ्वाविकं सर्पिः सर्व्वरोगविनाशनम् ।
वृद्धिं करोति चास्थ्नाञ्च वातरोगकफापहम् ॥"
इत्याविकं घृतम् ॥
"वृद्धिं करोति देहाग्न्योर्लघु पाके विषापहम् ।
चक्षुष्यं दीपनञ्चापि शीतदोषनिवारणम् ।
वृद्धिं करोति चाग्नीनां ततु प्रोक्तञ्च विषापहम् ॥"
इत्यश्वीघृतम् ॥
"कफेऽनिले योनिदोषे शोषे पित्ते च तद्धितम् ।
मातृस्तन्यञ्च चक्षुष्यं सर्पिः स्यादमृतोपमम् ॥'
इति नारीघृतगुणाः ।
"तर्पणं नेत्ररोगघ्नं दाहहृत् पयसो घृतम् ॥"
इति क्षीरोद्भवघृतम् ॥
"दीपनञ्च वह्निसन्धुक्षणञ्च
मूर्च्छादिकोन्मादकराग्निमूढे ।
शोफार्शसोर्योनिदोषे प्रयुक्तं
घृतं सपित्तमेव गुर्वी स्यात् ॥
उपगन्धं पुराणं स्याद्दशवर्षस्थितं घृतम् ।
यथा यथा जरां याति गुणवत् स्यात्तथा तथा ॥"
इति जीर्णघृतगुणाः ।
इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये ।
"स्मृतिबुद्ध्यग्निशुक्रौजःकफमेदोविवर्द्धनम् ।
वातपित्तविषोन्मादशोषालक्ष्मीज्वरापहम् ॥
सर्व्वस्नेहोत्तमं शीतं मधुरं रसपाकयोः ।
सहस्रवीर्य्यं विधिभिर्घृतं कर्म्मसहस्रकृत् ॥
मदापस्मारमूर्च्छायशोषोन्मादगरज्वरान् ।
योनिकर्णशिरःशूलं घृतं जीर्णमपोहति ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ।
"विशेषतः पुराणञ्च घृतं तत् पाययेद्भिषक् ।
त्रिदोषघ्नं पवित्रत्वात् विशेषाद्ग्रहमोचनम् ॥
गुणकर्म्माधिकं स्यात्तदास्वादात् कटुतिक्तकम् ।
उपगन्धं पुराणं स्याद्दशवर्षस्थितं घृतम् ॥
लाक्षारसनिभं शीतं तद्धि सर्व्वग्रहापहम् ।
मेध्यं विरेचनेष्वग्र्यं प्रपुराणमतः परम् ॥
नासाध्यं नाम तस्यास्ति यत् स्याद्वर्षशतस्थितम् ।
दृष्टं स्पृष्टमथाघ्रातं तद्धि सर्व्वग्रहापहम् ।
अपस्मारग्रहोन्मादवतां शस्तं विशेषतः ॥'
इति चरके चिकित्सास्थाने चतुर्द्दशेऽध्याये ।
"घृतन्तु सौम्यं शीतवीर्य्यं मृदु मधुरमल्पाभिष्यन्दि स्नेहनमुदावर्त्तोन्मादापस्मारशूलज्वरानाहवातपित्तप्रशमनमग्निदीपनं स्मृतिमतिमेधाकान्तिस्वरलावण्यसौकुमार्य्यौजस्तेजोबलकरमायुष्यं वृष्यं मेध्यं वयःस्थापनं गुरु चक्षुष्यं श्लेष्माभिवर्द्धनं पाप्मालक्ष्मीप्रशमनं विषहरं रक्षोघ्नञ्च ।
विपाके मधुरं शीतं वातपित्तविषापहम् ।
चक्षुष्यमग्र्यं बल्यञ्च गव्यं सर्पिर्गुणोत्तरम् ।
आजं घृतं दीपनीयं चक्षुष्यं बलवर्द्धनम् ।

[illegible]

घृतकुमारी, स्त्री, (घृतेन घृतवदेव कुमारी सुन्दरी। यद्वा कुमारी कन्येव। [illegible]) [illegible] इति भाषा। [illegible]

[illegible]

घृतकरञ्जः, पुं [illegible]

[illegible]

घृतकुमारिका स्त्री (घृतेन [illegible] कुमारिका [illegible]) [illegible]

[illegible]

घृतपूरः, पुं (घृतेन पूर्यते [illegible]) [illegible]

[illegible]

चान्नणी यथा —
"मक्ष्यावस्थ घृते नम्रे रसस्वनलपिष्टित ।
शुद्धशर्करया योज्यो घृतपूरो यदृच्छया ॥
क्षीरमाद्य खरूप हि स्वक्ष पूथ सतः सुतम् ।
योजिते यो विशेषोऽत्र सदाप्योऽस्वयशस्मित ॥
घृतपूरो गुरुर्हृंष्यो हृद्य पित्तानिलापहः ।
सद्य प्राणप्रदो बल्य सुरुच्योऽग्निप्रदीपन ॥
शृङ्गाटकसुसानामप्येवं स्यात घृतपूरकः ।
विधायं वस्तुसयोग तद्गुणानपि चादरेत् ॥")

घृतपूरक, पुं, (घृतेन पूर्ण इव कायतीति । कै+क ।) घारस्रव । इति त्रिकाण्डशेषः ॥

घृतमण्डलिका स्त्री (घृतस्य मण्डल समूह । तदिव निम्नास अस्या अस्यां वा अस्तीति । घृतमण्डल+"अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) हंसपदीवृक्ष । इति राजनिघण्टः ॥

घृतमण्डा, स्त्री, (घृतमण्डवत निर्यासोऽस्त्यस्याः । "अर्श आदिभ्योऽच ।" ५ । २ । १२७ । इत्यच् ।) वायसोलीवृक्ष । इति शब्दचन्द्रिका ॥ माकडछाता इति भाषा ॥

घृतवर, पुं, (घृतमेव वर बाहुल्यात प्रधान यत्र ।) घृतपूरः । इति हेमचन्द्रः । ३ । ६४ ॥

घृता स्त्री, (घृतवत् निर्यासोऽस्त्यस्या । "अर्श आदिभ्योऽच ।" ५ । २ । १२७ । इत्यच ।) घृतमण्डा । इति शब्दचन्द्रिका ॥

घृताची, स्त्री (घृतेन अन्नतेन अञ्चति इति गच्छतीति । अञ्च+क्विप् । नलोपे स्त्रियां ङीप् । सर्व्वथा मनुष्याहारवर्ज्जितानां देवजातीनां घृतमयभोजनं महाभारतपुराणादिप्रसिद्धम् ।) अप्सरोविशेषः । इति हलायुधः ॥ (यथा विष्णुपुराणे । १ । ९ । १ १ ।
"घृताचीप्रमुखा मन्त्रन् नत्तुधाप्सरोगणा ।"
गायत्रीस्वरूपा महादेवी । यथा, देवीभागवते । १२ । ६ । ४६ ।
"घृतारिमण्डला पूर्वा घृताची गगनेगिनी ॥")

घृताचीगर्भसम्भवा, स्त्री, स्थूलैला । इति राजनिर्घण्टः ॥

घृताक, पुं, (घृतस्य आक्रा आख्या यस्य । यद्वा, घृतेन आह्वयते स्पर्द्धते स्वगन्धेन इति । आ+ह्वे+क ।) सरलद्रव । इति त्रिकाण्डशेषः ॥

घृतेली, स्त्री (घृते इलति तद्भक्षणाय तत्र गच्छतीति । इल गतौ+अच । गौरादित्वात् ङीष ।) कीटविशेषः । तैलपायिका इति कश्चित् ॥ तत्पर्य्यायः । पिङ्गकपिशा २ । इति हेमचन्द्रः । ४ । २७३ ॥

घृतोदः पुं, (घृतमिव स्वादु आस्वाद्य शुभ्र वा उदकं यस्य । उदकस्योदादेश ।) घृतसमुद्र । यथा,
"एवं सुरोदाद्बहिस्तद्द्विगुण समानेन घृतोदेन यथा पूर्व्वं कुशद्वीप ।" इति श्रीभागवते । ५ । २० ।

घृष, उ घर्षे । इति कविकल्पद्रुम ॥ (भ्वा पर सक सेट । उदित्वात् क्त्वावेट ।) उ घर्षित्वा घृष्ट्वा । घर्षति चन्दनं लोकः । इति दुर्गादास ।

घृष्टः, त्रि (घृष+कर्म्मणि क्त ।) घर्षित । घषा इति भाषा ॥ यथा । घृष्टो मलयजो गन्ध । इति शुद्धितत्त्वम् ॥ (यथाच काशीखण्डे । १९ । ५९ ।
"धातुका धूपितजला घृष्टपातकसन्ततिः ॥")

घृष्टिः स्त्री, (घृष्यतेऽसौ । घृष+कर्म्मणि क्तिच ।) वाराही । चामर आलु इति भाषा । इत्यमरः । २ । ४ । १५१ ॥ (घृष+भावे क्तिन् ।) घर्षणम् । स्पर्द्धा । अपराजिता । (घर्षतीति । घृष्+कर्त्तरि क्तिच ।) शूकरे पु, । इति मेदिनी । टे । १६ ॥

घृष्टिला स्त्री (घृष्टि घर्षण लातीति । ला+क ।) चित्रपर्णिका । पृश्निपर्णी । इति रत्नमाला ॥

घृष्वि पु स्त्री, (घर्षति इति । घृष घर्षे+"हृषिघृषिभ्यश्चेति ।" उणा । ४ । ५६ । इति क्विन्प्रत्ययेन निपातनात सिद्ध ।) शूकरः । इति सिद्धान्तकौमुद्यामुणादिवृत्ति ॥ (भावे+क्विन् । घर्षणम् । यथा ऋग्वेदे । १ । ३७ । ४ ।
"प्र व शर्द्धाय घृष्वये ।" "घृष्वये शत्रुघर्षण युक्ताय ।" इति भाष्यम् ॥)

घेघुलिका, स्त्री, क्रौञ्चादनम् । इति रत्नमाला ॥ घे घु इति भाषा ॥ (यथा वैद्यकरत्नमालायाम् ।
"क्रौञ्चादन घेघुलिका ॥")

घोट, पुं स्त्री, (घोटते परिवर्त्तते इति । घुट परिवर्त्तने+पचाद्यच ।) घोटक । इति राजनिघण्टः ॥

घोटक पुं स्त्री, (घोटते गत्या प्रत्यागच्छतीति । घुट परिवर्त्तने+ण्वुल ।) पशुविशेष । घोड़ा इति भाषा ॥ तत्पर्य्याय । घोटि २ तुरग ३ तुरङ्ग ४ अश्व ५ तुरङ्गम ६ वाजी ७ वाह ८ अर्व्वा ९ गन्धर्व्व १० हय ११ सैन्धव १२ सप्ति १३ । इत्यमर । २ । ८ । ४४ ॥ घोट १४ पीती १५ पीथि १६ । इति भरत ॥ तार्क्ष्य १७ हरि १८ वीती १९ । इति हेमचन्द्र ॥ शुक्रभोजी २० घारट २१ जवन २२ चित्तन २३ अवीर २४ वाहनश्रेष्ठ २५ शीघ्रगन्ता २६ अन्तशोदर २७ । सुपर्ण २८ शालिहोत्र २९ लक्ष्मीपुत्र ३० चक्रोणक ३१ । इति जटाधर ॥ वातायन ३२ श्रीपुत्र ३३ चामरी ३४ देवी ३५ शालिहोत्री ३६ मरुद्रथ ३७ वाजस्कन्ध ३८ हरिद्राक्ष ३९ एकशफ ४० किन्धी ४१ जलासम् ४२ विमानक ४३ । इति शब्दरत्नावली ॥ अत्य ४४ वह्नि ४५ दधिका ४६ दधिक्रावा ४७ एतग्व ४८ एतश ४९ पैद्व ५० दौर्गह ५१ उच्चैःश्रवस ५२ आशु ५३ ब्रध्न ५४ अरुष ५५ मांश्चत्व ५६ अव्यथय ५७ श्येनास ५८ सुपर्णा ५९ पतङ्ग ६० नर ६१ ह्वार्य्याणाम् ६२ हंसास ६३ । इति वेदनिघण्टौ १ अध्याय ॥ हरी इन्द्रस्य १ रोहित अग्ने २ हरित आदित्यस्य ३ रासभौ अश्विनो ४ अजा पूष्ण ५ पृषत्यो मरुताम् ६ अरुण्यो गाव उषसाम् ७ श्यावा सवितुः ८ विश्वरूपा बृहस्पते ९ नियुतो वायो १० । इति दश-दिष्टोपयोजनानि । इति च वेदनिघण्टौ १ अध्याय ॥ अस्य मांसगुणा । उष्णत्वम् । वातनाशित्वम् । लघुगुरुत्वम् । अतिसेवनात् पित्तदाहप्रदत्वञ्च । इति राजनिर्घण्टः ॥ अग्निकरबलकारित्वम् । हृद्यत्वम् । चक्षुर्हितत्वम् । मधुरत्वञ्च । इति भावप्रकाश ॥ ● ॥

अथाश्वपरीक्षा ।
"सपक्षा वाजिन पूर्व्वं सञ्जाता व्योमचारिण ।
गन्धर्व्वैर्भ्यो यथाकाम गच्छन्ति च समन्विता ॥
इन्द्रादेशाच्छालिहोत्रस्तेषां पक्षमथाच्छिनत् ।
तत प्रभृति निष्पक्षास्तुरङ्गा धरणीं गता ॥
उत्तमा मध्यमा नीचा कनीयांसस्तथापरे ।
चतुर्द्धा वाजिनो भूमौ जायन्ते देशसंश्रयात् ॥
ताजिका खुरशालाश्च तुषाराश्चोत्तमा हया ।
गोजिकाणाश्च केकाणा पौढ़ाहाराश्च मध्यमा ।
गाड़्जा उत्तमाश्चापि वाल्हजाश्च मध्यमा ।
गव्हरा साध्ववासाश्च सिन्धुपारा कनीयस ॥
अन्यदेशोद्भवा ये च ते वै नीचा प्रकीर्त्तिता ।
वाजिनो जलजा केचिद्वह्निजातास्तथापरे ॥
समीरप्रभवाश्चान्ये तुरगा व्योमजा परे ।
जलोद्भवा हिमा ज्ञेया चञ्चला वह्निसम्भवा ॥
प्रभञ्जनभवा वेगात् व्योमजा मृदुचालक ।
पुष्पगन्धिर्भवेद्विप्र क्षत्रियोऽगुरुगन्धिक ॥
घृतगन्धो भवेद्वैश्यो मीनामोदी च शूद्रक ।
विवेकी सघृणो विप्रस्तेजस्वी क्षत्रियो बली ॥
क्रोधभावो भवेद्वैश्य शूद्रो नि सत्त्वको भवेत ।
विप्राद्या वाहना सर्व्वे यथा भूमिपते क्रमात् ॥
शूद्रजाति तुरङ्गन्तु न स्पृशन्ति नरेश्वरा ॥"
इत्युत्पत्ति ॥ ● ॥

अथाङ्गुल्याङ्गविभाग ।
"यवविंशाङ्गुलिभिस्तु मानं विधीयते ।
कर्णौ षडङ्गुलौ प्रोक्तौ भालञ्च चतुरङ्गुलम् ।
चत्वारिंशच्च समाख्याता स्कन्धः संपरिकीर्त्तित ।
पृष्ठवंशश्चतुर्व्विंशः सर्व्वविंशा तथा कटी ॥
इति स्कन्धं तथा शिरः प्रतिपुच्छं द्वयाधिकम् ।
लिङ्गं षडप्रमाणन्तु वृषणौ चतुरङ्गुलौ ॥
मध्यस्थानं चतुर्व्विंशं हृदयं षोड़शात्मकम् ।
कटिकुक्ष्यन्तरं प्रोक्तं चत्वारिंशत् प्रमाणत ॥
मणिबन्धद्वयश्चैव सुराच चतुरङ्गुला ।
अष्टाङ्गुलिका पादा दीर्घा विंशाधिका मता ।"
इत्यङ्गुलिविभाग ॥ ● ॥

अथ वयोविभाग ।
"दन्तैस्तु लक्षणं यस्तैव वयो यथाक्रम ॥"
तद्यथा,—
"कालिका हरिणी शुक्ला काचा मक्षिका तथा ।
शङ्खो मुसलकश्चैव दन्तानां चलता तथा ।
दशैते चाष्टमाण्डाहूरयेषां वयस प्रक्ष ।
चतुर्भिर्वत्सरैरेतामष्टमाय परिकीर्त्तिता ।
प्रथमेऽथ द्विवर्षे जायन्ते ताश्च कालिका ॥
षडे समदशे प्राप्ते कालिकान्ता भवेन्ति हि ।
तथाऽन्ये षष्ठे वर्षे चतुर्थी कालिका भवेत् ॥
अष्टमे नवमे प्राप्ते आवर्त्ते वर्णकालिका ।

अण्डयोरथ पादेषु पार्श्वयोरुभयोरपि ।
एताश्चाः सुविज्ञेया वाजिनां भिषगुत्तमैः ॥
अन्ये सप्तदशाप्याहुः सिराद्वाराणि वाजिनः ।
येषु रक्तं हृतं सद्यः प्रकरोति ततः सुखम् ।
गुल्फे गले तथा मेढ्रे कक्षान्ते चैव पचके ।
गुदे पुच्छेऽथ पश्चौ च जङ्घयोः सर्व्वसन्धिषु ।
जिह्वायां चाधरे चौष्ठे नेत्रयोरुभयोरपि ॥
कर्णमूले मणौ गण्डे रुधिरं स्रावयेद्भिषक् ।
सौश्रुतमार्गपथेन स्राव्यं रक्तं तुरङ्गमाणाम् ॥"
तद्यथा,—
"मूलं घातं मुखे स्राव्यं कर्णयोश्चैकमेव च ।
शताङ्गं नेत्रदेशाच्च मेढ्रदेशात्तथैव च ॥
गण्डयोरण्डयोश्चैव स्रावयेत् पञ्चविंशतिम् ।
द्वादशैव गुदे प्राहुरश्वशास्त्रविचक्षणाः ॥
पैत्तिकं कालिकं विद्याद्वासे विद्यात् सफेनिलम् ।
पिच्छिलं श्लेष्मलं प्राहुः कषायोदकवच्च यत् ॥"*

अथ ऋतुचर्य्या ।

"न प्रायो वाहयेदश्वान् प्रावृट्काले कथञ्चन ।
यदीच्छेदृतस्तस्य वाहनं दशमासिकम् ॥
क्षुमोदकं कटुकतैलनिवासगेह
प्राप्तं यवादिलवणं दिवसान्तरेषु ।
तथान्यथा यदि सुखामयवीर्य्यहानि-
मुख्यैर्मलैर्विरहितस्तु वयो विनश्यति ॥
शरदि गुडघृतं पयः प्रशस्तं
शरदि सितापलप्रमाणमच्छम् ।
मधुरमथ जलं सरोवरोत्थं
घृतयुतभोजनमुद्गकाश्च भोज्याः ॥
हेमन्तकाले घृततैलमाषा
निर्व्वातसंस्था च पयो यथेच्छम् ।
प्रगे प्रनैर्वाहनकर्म्म कुर्य्याद्
यवांश्च पक्वान् वितरेद्विधिज्ञः ॥
शिशिरे तैलपलाष्टकं कटिस्थं
दिवसत्रयावधि पाययेत्तुरङ्गान् ।
तदनु प्रातर्भोजयेद्यवांश्च
यवयवसाश्च तथान्यतलस्पृशा ॥
यस्य कृता यथा भोज्यं शिशिरे समुपस्थिते ।
वहत्यपि क्रियाः सर्व्वाः स एव सुखमृच्छति ॥
वसन्ते सम्प्राप्ते निशितुषयवाद्वाहय हयान्
घृतं तैलं प्रस्थं सकलविधियुक्तोऽपि च मतः ।
पयो द्राक्षासक्तं नवयवमथो वाहनविधि
भृशं योग्यस्थानेष्वपि सुरभिमिच्छेद्धयवरः ॥
वसन्तसमये योऽश्वः स्थाने तिष्ठति बन्धने ।
तस्योत्पाद्य प्रबलित वातस्य जायते वपुः ॥
ग्रीष्मे घृतं सितजलोच्चयधर्म्मशान्ति-
सुच्छायबन्धनमिमदनशीतलोयम् ।
दूर्व्वा तृणं लघु च कोमलमन्नदत्त-
मन्यत्किञ्चिदवश्यमुपयुक्तमिदं वदन्ति ॥"* ॥

भोजे तु हयलक्षणमन्यथा —

स्निग्धाङ्गो लघुतररोमकस्तु पुच्छो
दीर्घाग्रास्थितघनकेशदण्डकश्च ।
रक्तोष्ठः पृथुकपिलप्रभाररन्ध्रा
राजार्हो भवति तुरङ्गमः प्रशस्तः ॥

नाभिरारभ्य देहस्तु द्विधा पूर्व्वापरक्रमात् ।
पूर्व्वकायस्थिता रक्ताः शुभाय हयसंस्थिताः ॥
अथ काये स्थिता रक्ता अधमत्वप्रकाशिकाः ।
शुक्तीनां वैपरीत्येन प्रशस्तफलमादिशेत् ॥"* ॥
जातयस्तु ।
"ब्रह्मादिजातिभेदेन हयजातिश्चतुर्व्विधा ।"
तद्यथा,—

"ये शुक्लाः सुविमलपुष्पगन्धा ये वा
शुद्धाङ्गाः सहृदयसद्व्रतभोजिनो वा ।
अक्रुद्धाः समरगता भृशञ्च पुष्टा-
स्ते विप्राः क्षितिपतिवाहनेऽतियोग्याः ॥
ये रक्ताः सदगुरुगन्धयोऽहता वा
सदृढाः बहुतरभोजिनो बलाढ्याः ।
अभ्रान्ताः सकलगुणप्रदाः प्रवीणा
विज्ञेया विधिकरखातजातयस्ते ॥
ये पीताः खलु घृतगन्धयोऽपि ये वा
येऽक्रुद्धाः कथमपि रोषशालिनो ये ।
मद्दा वा बहुतरनादघोषणा वा
विज्ञेया नृपवर ! वैश्यजातयस्ते ॥
ये कृष्णाः सदशामगन्धयोऽपि ये वा
अन्यथा बहुतरसारुणैरपीमे ।
क्षीणाङ्गा लघुसत्त्वोऽपि येऽप्रहीणा-
स्ते शूद्राः क्षितिपतिना भृशं विहेयाः ॥"

एतत्तु एकैकमेव लक्षणं न सामुदायिकम् ॥
"लक्षणद्वयसम्बन्धात् द्विजातिः स्यात्तुरङ्गमः ।
चतुर्लक्षणयुक्तस्तु दूरे त्याज्यो हयाधमः ॥"* ॥
अन्यच्च ।
"सात्त्विका राजसाश्चैति तामसाश्चेति ते हयाः ॥

ये शुद्धवर्णा भृशवेगयुक्ता
अत्यग्निभाजो बहुभोगिनश्च ।
अक्रोधशीलाः समरेऽतिरक्ता-
स्ते सात्त्विका भूप ! तुरङ्गमाः स्युः ॥
ये रक्तवर्णा गुरुवर्णरोषाः
कशाभिघातं न हि ये सहन्ते ।
येऽभी बलाढ्याः खलु दीर्घदेहा-
स्ते राजसा भूप ! तुरङ्गमाः स्युः ॥
ये कृष्णवर्णा लघुरोषवेगा
अल्पाग्निनो लघुबलान्विताश्च ।
ये दुर्व्वलाः सर्व्वगुणैर्विहीना-
स्ते तामसा भूप ! तुरङ्गमाधमाः ॥

द्वयोर्लक्षणसम्बन्धात् द्विगुणो वाजिमध्यमः ।
त्रयाणां गुणसम्बन्धात् त्रिगुणो वाजिनिन्दितः ॥"
पराशरसंहितायान्तु ।
"पृथिव्यम्बुवायुतेजांसि पञ्चभिस्तुरगाश्रिते ।
उक्तास्ते पञ्चधा भेदाः पराशरमता यथा ॥

ये स्थूलाः समघनदेहरूपभाज-
श्चाक्रान्ता बहुतरभोजनाश्च दीर्घाः ।
अक्रुद्धाः समरगतास्तु रोषभाजो
भौमास्ते घनगुरुघर्घरस्वरास्तु ॥

ये चपाङ्गावाङ्मुखाः समांसलकलेवराः ।
अक्रोधवेगाः सघना आप्यास्ते तुरगाधमाः ॥

ये वातवेगप्रतिमोग्रवेगाः
शुष्का भृशं नीचकलेवराश्च ।
अत्याग्निभाजो बहुदूरगाश्च
ते वायवा वाजिवराः प्रदिष्टाः ॥
ये क्रोधशीला भृशवेगयुक्ता
रक्ता दिवा तु क्रोधयुता व्रजन्ति ।
ते तैजसाः पुण्यवतां प्रदेशे
भवन्ति पुण्यैरपि ते मिलन्ति ॥
एको यत्र तैजससत्त्वकोऽश्वः
किं कार्य्यमन्यैस्तुरगाधमैस्तु ।
शुद्धं यदा हीरकखण्डमेकं
किं कार्य्यमन्यैर्मणिभिर्विचित्रैः ॥
उत्प्लुत्य ये वाजिवरा व्रजन्ति
क्षुधा भृशं वेगसमन्विताश्च ।
ये लङ्घयन्ति परिखामपारां
ते गागना पुण्यतमाः प्रदिष्टाः ॥

द्वयोर्लक्षणसम्बन्धात्तुरगः स्यात् द्विभौतिकः ।
समानगुणभूतानां हयानां वाहनं शुभम् ॥
शालिहोत्रादिविज्ञानात्तद्विज्ञेयं यथोत्तरम् ।
अश्वभावे हि दुष्टांश्च वाहयेन्निति वैतदा ॥
तिलं सकाञ्चनं दद्यात्तत्र वा गुडान्वितम् ।
रेवन्तं पूजयेच्चापि नित्यं निर्मन्थयेत्तदा ॥
दद्यात्ताम्रपलं वापि अभावे सर्व्वकर्म्मणः ॥"
एवमन्यत्रापि ।
"काञ्चनं रजतं ताम्रं लौहमेतद्यथाक्रमम् ।
ब्रह्मादिजातिदोषाणां देयमेतत् प्रशान्तये ॥
अभावेऽपि च सर्व्वेषां ताम्रेण स्यात् प्रति-
क्रिया ।"

इति हयपरीक्षा ।*।

इति भोजराजकृतयुक्तिकल्पतरुः ।

("देव श्रावयतां हिमाचलतटच्छायासु
विक्रीडितम्
यः ख्यातो हिमपुष्पवासशिशिरे गङ्गाजले पावने ।
रेमे यस्तु तुरङ्गयूथनिलये नानाविधैर्हेषिते
माद्यद्यः स तुरङ्गपोषतनयः श्रीशालिहोत्रो
मुनिः ॥
जयति च पाण्डवनाथो धर्म्मसनाथो युधिष्ठिरो
नृपतिः ।
भीमार्ज्जुनयमदेवाजदेव च ये वाजिशास्त्रतत्त्वज्ञाः ॥
दृष्ट्वा धन्यवकुलं प्राज्ञं शान्तं च शालि-
होत्रीयम् ।
पृष्टे प्राञ्जलमनस्कास्तत्र समासेन ॥

प्रश्नो जातिषु समावर्णदन्ता
कर्णं चैषां वाहनं धातुरूपम् ।
कालो यस्य विक्रमाप्य स्वभाव
प्राप्तौ चेष्टा वाजिभावेन वर्णः ।

यथा वाजिनः सर्व्वे सञ्जाता व्योमचारिणः ।
गन्धर्व्वेभ्यो यथाकामं गच्छन्ति च समन्ततः ॥
तान् दृष्ट्वा बलसम्पन्नानवध्याश्वाधमोचितान् ।
इन्द्रः पौराणं पाण्डवं शालिहोत्रं तपोधनम् ॥
वाक्यमाह मुने ! किञ्चिद्वदस्व मे ।
तदाशु कुरु त्वं वाहनानां पक्षच्छेदनम् ।

[illegible]

[illegible]

[illegible]

त्रिकयाख्याबुभौ ज्ञेयौ युद्धकाले जयप्रदौ ।
नासामध्ये यदावर्त्त एको वा यदि वा त्रयः
चक्रवर्त्ती स विज्ञेयो वाजी भूपालपूजितः ॥
कण्ठे यस्य महावर्त्त एकोऽश्वस्य प्रजायते ।
चिन्तामणिः स विज्ञेयश्चिन्तितार्थविवर्द्धनः ॥
स्कन्धे पार्श्वे यदावर्त्तः स भवेत् पद्मलक्षणः ।
करोति विविधान् भोगान् स्वामिनः सततं सुखम् ॥
शुक्लाख्यौ जानुकाभ्यस्यावावर्त्तौ कीर्त्तिवर्द्धनौ ।
हयस्य स्वामियुक्तस्य सदैव सुखसावहौ ॥
एकावर्त्तो भवेद्यस्य कट्यान्ते वाजिनो यदा ।
स दुष्टो मृत्युमाप्नोति द्वौ च स्वामिविनाशनौ ॥
जानुदेशे यदावर्त्तो वाजिनः सम्प्रदृश्यते ।
प्रवासं सततं ब्रूते स्वभर्त्तुः क्लेशसंयुतम् ॥
वाजी मेढ्रतलावर्त्तो वर्जनीयो महीभुजाम् ।
स करोति हरेन्नाशं परदारसमुद्भवम् ॥
त्रिवलिस्थो यदावर्त्तस्त्रिवलाख्यः प्रणाशकः ।
वाजिगण्डे परिज्ञेयाः स्त्रीपार्श्वस्था भयप्रदाः ॥
पुच्छदेशे यदावर्त्तो वाजिनः सम्प्रदृश्यते ।
धूमकेतुरिति ख्यातः स त्याज्यो दूरतो नृपैः ॥
गुह्ये पुच्छे यतौ यस्य भवन्त्यावर्त्तकास्त्रयः ।
स कृतान्तस्वरूपेण वर्जनीयस्तुरङ्गमः ॥
अथ ऊर्द्ध्वं यदा वाजी सम्पुटं न स्पृशेत् क्वचित् ।
यमदूतः स विज्ञेयो वर्जनीयः प्रयत्नतः ॥
श्रीवत्सोऽधिदन्तश्च करालो कृष्णतालुकः ।
सुशली च तथा शृङ्गी षडेते स्वामिघातकाः ॥
एकाण्डश्वासहीनाण्डो हीनाङ्गोऽप्यधिकाङ्गकः ।
परित्याज्यः स वाञ्छद्भिरन्विष्य परमं यशः ॥
घण्टी वदनको वाम्मी शृङ्गी चैव चतुरुपकः ।
वर्जनीयाः प्रयत्नेन सर्व्वे ते पापलक्षणाः ॥
घण्टी च स्वामिनं हन्ति वम्बी स्वजनसञ्चयम् ।
अन्तःपुरं तथा वाली शृङ्गी राष्ट्रविनाशनः ॥
षट्पदाभो भवेद्यश्च कृष्णतालुर्न दुष्यति ।
ब्रह्मपान्हसो यस्तु आवर्त्तैः कुलजैरपि ।
न दुष्यति सदावर्त्तः शालिहोत्रमतं यथा ॥
इति श्रीनकुलविरचितेऽश्वचिकित्सिते
आवर्त्ताध्यायश्चतुर्थः ॥

अथ दन्ताः ।

दन्तोद्भेदं प्रवक्ष्यामि वाजिनामायुलक्षणम् ।
येन विज्ञातमात्रेण आयुर्ज्ञानं प्रजायते ॥
अश्वस्तु सदुभिर्दन्तैः पौरदन्त इति स्मृतः ।
तथा बालकभिः कोष्ठो न्यद्विद्वादशमासिकः ॥
त्रिपञ्चाब्दोद्भवाः सर्व्वे धवलाः परिकीर्त्तिताः ।
द्वौ स्यातां द्वौ च न स्यातां सर्व्वोपरि यथाक्रमम् ॥
चतुर्भिर्वत्सरैर्दन्ताः कालिकाख्या भवन्ति च ।
तथान्ये सप्तमे वर्षे चतुर्थे कालिको भवेत् ॥
अष्टमे वत्सरे प्राप्ते प्राप्ताः स्युः सार्व्वकालिकाः ।
नवमे त्वथवा रेखा पीतलाः प्रभवन्ति च ॥
तथाप्येकादशे वर्षे तावत् पीतलमागताः ।
त्रिरश्मि दशनास्तेषां वाजिनामब्दसंख्यया ॥
तत श्वेताः प्रदृश्यन्ते यावद्वर्ष[illegible] पुनः ।
तत [illegible]प्रभाः सम्यक् यावत् [illegible]कम् ॥
[illegible]नापूर्णं यावद्वर्ष[illegible] विद्यति ।

मक्षिकाभा दशैतेषां यावद्वर्षत्रयं पुनः ॥
तस्माद्दूरत्वं भ्रामाच्चालनं वर्षत्रयं पुनः ।
प्रकम्पश्च समागम्य पश्चात् पातः समाश्रयम् ॥
द्वात्रिंशद्वत्सरैरेव वाजी निधनमाप्नुयात् ।
दृष्ट्वा चतुष्टयं श्वेतं चक्रेण परमायुषि ॥
अश्वानामेव सर्व्वेषां दन्ता द्वादश कीर्त्तिताः ।
कालिका हारिणी शुक्ला काचा चाप्यथ मक्षिका ॥
शङ्खोदूखलकश्चैव दन्तानाञ्चलनं तथा ।
ततस्तु पतनं विद्यादेवं चाष्टकमष्टकम् ॥
चतुर्विंशतयो दन्ताः शालिहोत्रमतं तथा ।
एवं दन्तविशेषेण सर्व्वेषामिह वाजिनाम् ।
विज्ञेया चायुषः संख्या वाजिपोषणतत्परैः ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते दन्तोद्भेदो
नाम पञ्चमोऽध्यायः ॥

अथ अवयवप्रमाणम् ।

दीर्घच्छविमोचास्या ये भवन्ति तुरङ्गमाः ।
ते प्रशस्ताः पार्थिवेन्द्रस्य यानवाहनकर्म्मणि ॥
स्कन्धमभ्युन्नतं दीर्घं वक्त्रयोर्न विशेषतः ।
चमराणां तुल्यं सम्यक् लोकपालकसम्मितम् ॥
येषां पृष्ठं तु वर्षं स्याद्विपुलं मध्यवलितम् ।
किञ्चिन्मध्ये भवेन्निम्नं राजार्हास्ते तुरङ्गमाः ॥
स्निग्धरोमा सुवृत्ता च सुस्थूला विपुला कटी ।
घनिताः सुदृढा रम्या भुजा मांसप्रपूरिताः ॥
पादा निर्म्मांसला वक्राश्चक्राकारखुरान्विताः ।
अप्रमाणं तथा चक्षुः कर्णौ लघुतरौ स्मृतौ ॥
पार्श्वौ समुन्नतौ प्रोक्तौ सरसस्निग्धतालुकम् ।
दन्ताश्च शिखराकारा विपुलाश्चन्द्रवर्च्चसः ॥
सप्तविंशप्रमाणेन मुखमश्वस्य शस्यते ।
कर्णौ षडङ्गुलौ प्रोक्तौ तालुकं चतुरङ्गुलम् ॥
चत्वारिंशच्च सप्ताढ्याः स्कन्धाः सम्यक् प्रकी-
र्त्तिताः ।
पृष्ठवंशश्चतुर्विंशः षट्त्रिंशा तथा कटी ॥
चतिरुश्च तथा निम्नं पुच्छं हस्तद्वयायतम् ।
लिङ्गं हस्तप्रमाणञ्च तथाण्डौ चतुरङ्गुलौ ॥
मार्गेण्यास चतुर्व्विंशं हृदयं षोडशाङ्गुलम् ।
कटिकर्णान्तरश्चोक्तं चत्वारिंशत् प्रमाणतः ॥
मणिबन्धद्वयं चैव खुराश्च चतुरङ्गुलाः ।
अशीत्यङ्गुल उत्सेधो दैर्घ्यञ्च द्व्यधिकं शतम् ।
एवं क्रमेण गात्रस्य प्रमाणं वाजिनां मतम् ॥

दीर्घाणि चत्वारि तथोन्नतानि
चत्वारि ह्रस्वानि च रुक्षकाणि ।
ह्रस्वानि चत्वार्यथ चायतानि
भूयश्च चत्वार्यथ मन्दकानि ॥

ज्ञानिवत् क्रमशोऽप्यङ्गकचयानि तथोत्तराः ।
तान्यहं कीर्त्तयिष्यामि वाजिनाञ्च पृथक्
पृथक् ।

आस्यं भुजौ केशलकादिकाश्च
दीर्घं चतुष्कं तुरगस्य शस्तम् ।
तथोन्नतं ह्यस्फुटं ललाटं
प्रघाय तत्त्वाक्षरौ वदन्ति ॥
आसौ च [illegible]स्थानं च तालुकञ्च
मेढ्रं [illegible] शुभं [illegible] ।

लघूनि चत्वारि तथैव कोष्ठं
श्रोत्राणि सर्व्वाणि तथैव पुच्छम् ॥
कर्णान्तरं कर्णसमन्वितञ्च
दैर्घ्यं तथा ह्रस्वतरं प्रशस्तम् ।
वक्रं सुखं कन्धराजानुनी च
पादौ च सर्व्वे शुभदं प्रदिष्टम् ॥
कक्षान्तरं चोदरमध्यमञ्च
निम्ना कटी तानि सुखावहानि ।
वक्षःप्रपोथं घनस्थलञ्च
चतुष्टयमेतत् पृथुलं प्रदिष्टम् ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते सर्व्वावयव-
प्रमाणो नाम षष्ठोऽध्यायः ॥

अथ वर्णाः ।

गुणानामिह सर्व्वेषां गुणो वेगमयोऽधिकः ।
अश्वानां प्रशस्यते सज्जैरश्वज्ञानविचक्षणैः ॥
स वाहनविधानेन प्रकाशं यात्यसंशयम् ।
तस्मात् सर्व्वप्रयत्नेन वेगो ज्ञेयश्च वाजिनाम् ॥
अवाहिता विनश्यन्ति विनश्यन्त्यतिवाहिताः ।
अश्वानां वाहनं यत्र सानुरागश्च मोचयम् ॥
अधमा मध्यमास्ते स्युर्मध्यमाश्च तथोत्तमाः ।
उत्तमाश्चोत्तमा भूयो वाह्यमानास्तुरङ्गमाः ॥
रूढमन्तविनां श्रेष्ठं रूढे सर्व्वं प्रतिष्ठितम् ।
रूढेन तु विहीनस्य लक्षणं चाप्यलक्षणम् ॥
रूपावर्त्तगतिच्छायाद्यलक्षणवयोबलम् ।
रूढहीनस्य वाहस्य सर्व्वमेव निरर्थकम् ॥
गतेरभ्यन्तरौ वर्णौ वर्णादभ्यन्तरः स्वरः ।
स्वरादभ्यन्तरं सत्त्वं सर्व्वं सत्त्वे प्रतिष्ठितम् ॥
लक्षणं भाग्यदोषेण मिष्टान्नेनेव जायते ।
दौष्ट्यं स्वामिन्येव स्वदोषो नास्ति वाजिनाम् ॥

जवो हि सप्तेः परमं विभूषणं
त्रपाङ्गनायाः कृशता तपस्विनः ।
द्विजस्य विद्यैव मुनेरपि क्षमा
पराक्रमः शस्त्रबलोपजीविनः ॥

आकर्षन्निव गां वमन्निव खरौ भक्षाष्टशृण्वन्निव
स्त्रीकुर्व्वन्निव खं पिबन्निव दिशो वायुं समश्नन्निव ।
धाङ्गारप्रकरान् सृजन्निव महीं छायाममर्षन्निव
चञ्चच्चामरवीज्यमानवदनः श्रीमान् हयो धावति ॥
अलङ्घितगतागतैर्बहुमुखैः कटाक्षैरिव
यथानुगमनोतनैः प्रलयकेलिकोपैरिव ।
धुरन्धमध्योत्तरैर्बहुधाहरावैरिव
त्वदीयतुरगैरयं धरणिचक्रमाक्रम्यते ॥
ग्रैवा दीर्घशिरोन्नमानि नयनान्युद्धाटितं सन्निभ
ग्रीवा ग्रावनिभा विभाति च समा भारश्च
सुरोपमा ॥
वेगो वायुरिवास्य वानरसमः स्त्वाहारकर्म्मद्वितं
प्रकटौ चञ्चलौ [illegible] ।
वक्षो यो हरिकादिमप्रतिभा आवोर्नमो
बाहुभिः
आवर्त्तोऽसौ शुभे प्रशस्तकुलता सुनिश्चय-
प्रभाः ।
उद्दाम्ना त्रिमदप्रमाण शुभगा आक्ष
सुगम्येव ये

[illegible]

[illegible]

[illegible]

धावन्ति घातैश्च न चोद्विजन्ते
भयावहास्ते समरे नृपाणाम् ॥
शोकः शीलं भयं लज्जामालस्यं चैवमादिषु ।
सुकुलं तं विजानीयाद्दलं पर्य्याणवारणे ॥
स्यात्कण्टकाष्टमैश्च सुधाखदिरकण्टके ।
स्वामिघाताय चादर्शे तेषां रूपमिदं मया ॥
वानरोलूकमार्जारखरसुगन्धलोचना ।
गलिता असुरैस्तुल्याः स्थूलमेद्रूशिरान्विताः ॥
लम्बौष्ठकर्णनासाश्च हतसत्त्वाधिकद्विजाः ।
विच्छिन्नशोथगण्डा ये भृकुटीचित्रमेहनाः ॥
एते दोषास्त्वयाप्येऽपि सुकुलान्वयसम्भवाः ।
खलानामिव राजेन्द्र । वक्तुं शक्या न मादृशैः ॥
सत्त्वं प्रधानमित्येके चान्ये लक्षणमाश्रिताः ।
लक्षणत्रयमेतेषां तेनेदं दुष्करं विदुः ॥
अथाभिरक्षितश्चेपादतिथाभिश्च विस्तरात् ।
सुनीनामेकवाक्यत्वात् सूयामः श्यितिदुष्करा ॥
सत्त्वच्छायागतिच्छायास्वरस्थानगतिः कुलम् ।
पुष्पं पुण्ड्रकनामानि न्येव वा जवलक्षणम् ॥
एव सत्त्वसंयुक्तं ह्यश्वं शूररथे ।
सत्त्वेन विहीना ये निर्दोषास्तु प्रधाविताः ॥
हयरोहस्य का चिन्ता सत्त्वे शुभनिन्दिते ।
तस्माच्च न कृतोऽस्माभिर्हयलक्षणविस्तरः ॥
हयवाहनविधानं कौतुकाहितहृदयः ।
श्रमायासेन यच्छन्ति परं हृष्टा इमे जनाः ॥
चलासन कथा रागाः पार्ष्णिघातप्रतोदनम् ।
पन्प्रघातश्चानि दोषो येरूपजायते ॥
कामात् कोपाद्भयान्मोहाद्दर्पाद्वैव मन्यजयात् ।
मर्य्यादादोषदोषाच्च दुष्यन्त्यश्वा नियमतः ॥
श्रीयुक्तधामन्तनरेन्द्रवन्दितं
रथे हयारोहवराभिनन्दितम् ।
धर्म्मार्थकामादिषु प्रधान-
मित्थं कृतं वाहनशास्त्रविस्तरम् ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते वाहनाध्यायो नवमः ॥

अथ धातुपरीक्षा ।

अथातः सम्प्रवक्ष्यामि धातूनां लक्षणं परम् ।
येन विज्ञानमात्रेण ज्ञायन्ते रोगसम्भवाः ॥
ततः शुद्धशरीरोऽयं रक्तमोक्षणमाप्नुयात् ।
रक्तदोषात्तदा वाजी प्राणानेव महाप्नुयात् ।
तस्मात् सम्प्रयत्नेन रक्तं चैव विचक्षणैः ।
आषाढ़श्रावणे मासे शिरामोक्षेण लङ्घनम् ॥
तत्र संशोध्यते रक्तं वाजिनां दोषसम्भवम् ।
ततः शुद्धशरीरोऽयं पित्तादीन् वशीकृतः ॥
सायन्ते श्रम्यमाणाद्य वत्सवत् सुदृढ़ो भवेत् ।
यदि रक्ताधिको वाजी श्रमयस्यानि कर्हिचित् ॥
रक्तात् सञ्जायते पित्तं ततो नाशमवाप्नुयात् ।
रक्ताधिकस्त्वाश्वपुष्टः स्नेहाद्वै श्रमसमस्ति चेत् ॥
सम्प्राप्य स्नेहमर्द्दिताद्भयो नाशमवाप्नुयात् ।
हीनरक्तो यदा हय कृशोऽभाति तुरङ्गमः ॥
तत्र वायुं परं प्राप्य सद्यो नाशमवाप्नुयात् ।
तस्मिन्द् कथयं प्रोक्तं रक्तकोपसमुद्भवम् ॥
धातूनामपि सर्वेषां चेष्टयेद्विषं विचक्षणैः ।
पित्तरक्तप्रकोपेण यत्र सम्पीड्यते हयः ॥
तदा कण्डूतिमासाद्य कषते सततं वपुः ।
छायां वाञ्छति यत्नेन विशेषेण जलाश्रयम् ॥
मुहुर्वाञ्छति पानीयमाहारञ्च विशेषतः ।
एवं वातोत्थरक्तेन ज्ञात्वा सम्पीड़ितं ततः ॥
शिरामोक्षं विधायैव दद्यात् सकटुकं गुड़म् ।
ततः शुद्धिमवाप्नोति नीरोगः सम्प्रपद्यते ॥
पित्तासृग्दूषितो वाजी यदि चाश्रूणि मुञ्चति ।
नेत्रान्ते पाण्डुरत्वञ्च सद्यो मृत्युमवाप्नुयात् ॥
नेत्रयोः कथया प्रोक्तं पित्तरक्तसमुद्भवम् ।
श्लेष्मरक्तप्रकोपेण यदा सम्पीड्यते हयः ॥
अधोवक्त्रो भयनित्यं कासते च मुहुर्मुहुः ।
आहारं न च गृह्णाति नोत्तमाह कुरुते क्वचित् ॥
न विन्दति कशाघातं न च पार्ष्णिं न चासनम् ।
गात्रारेण क्षिपेत्तोयं वह्निधर्ममथ वाञ्छति ॥
तस्यापि शोधयित्वासृग् दद्यात्सुखोष्णं युतं गुड़म् ।
सर्वं रक्तं ततः शुद्धं निःशेषं समवाप्नुयात् ॥
वाजिनः श्लेष्मरक्ताभ्यां दूषितस्य यदा भवेत् ।
नेत्रान्ते बिन्दुकाकारकण्डूस्तस्य तथोदरे ॥
तत्र मृत्युमवाप्नोति पक्षमासाभ्यन्तरे ध्रुवम् ॥
शुण्ठ्याम्ना गोक्षुरकं चनञ्च
श्यामावचाहिङ्गुयुता च यष्टिः ।
कफप्रणाशाय विनिर्मितोऽयं
पिण्डः प्रसिद्धश्च कषायकश्च ॥
नीलेन्द्रपाति गुरुगाढ़ा सैन्धवं मध्यमाग्रतः ।
वायुरक्तप्रकोपेण पीड़ितस्तु तुरङ्गमः ॥
कुक्षिद्वये हयक्षीणं तनुं श्वासं प्रमुञ्चति ।
नैकत्र मन्यते स्थातुं हेषते च निरन्तरम् ॥
एवं वातोद्भवं ज्ञात्वा रक्तन्दिं हयस्य च ।
शोधयित्वाथ सन्दद्यात् ह्यष्टमगल्पकम् ।
तत्र शुद्धिमवाप्नोति परां पुष्टिञ्च गच्छति ॥
उतथाहं कुरुते मार्गे सर्व्वदोषविवर्ज्जितः ।
वातरक्तप्रकोपेन लोचनान्ते हयस्य च ॥
यत्र स्याता सिते रक्ते काषः कण्डूलथानने ।
तत्र तस्य भवन्मृत्युर्यदि नायाति चामिषम् ॥
अश्वकाम्य सुगन्धा माहिषेण विभागमे ।
सन्निपातेऽथ रक्तेन यत्र सम्पीड्यते हयः ॥
यदा वेपथुमाप्नोति कायति च निरन्तरम् ।
निद्रालस्याविमन्दत्वं यत्नं मलनिबन्धनम् ॥
कषायो मातरश्चैव यक्तालालाविमोक्षणम् ।
तथापि शोधयेद्रक्तं ततो लङ्घनमर्हति ॥
यावद्दोषस्य निर्यासं स्तोकोन्मूलकालाद्यनः ।
क्वचिदुष्णं क्वचिच्छीतं क्वचिद्द्वैगुणयुक्तम् ॥
प्रदेयं मुलितल्कौवारि चाम्यं न कुत्रचित् ।
यवक्षा चाम्लता चैव कटुका च यथा तथा ॥
ग्रामवेदनमध्यादथ त्रिधातुकुपितं ज्वरम् ।
शिरोत्र दीपनस्यैव वेतनस्यैव वृद्धिभाक् ॥
सम्पादिते मनोभावो कुरुते भयसादरम् ।
मधुकं मधुजातञ्च माधुर्य्यं कथितं समितम् ॥
शिरोत्र सुन्दरं स्यात् कारयित्वा विभागतः ।
यत्नेन सन्निपाताय वाजिनः सम्प्रदीयते ॥
तस्य तथा समायाति शमं रुक्षौच्चे यथा ।
कस्यचिदपि हि नेत्रान्ते स्याता नीलं च वाजिनः ।
गन्धश्च सदृशः चोग्या तत्र मृत्युर्द्विमासिकः ।
नीले पीतेऽथ नेत्रान्ते स्यातां चेद्वाजिनः क्वचित् ।
स निर्व्वाणमवाप्नोति त्रिभिर्मासैरसंशयम् ॥
यस्य नेत्रान्तरे रेखा बहुवर्णा प्रजायते ।
विशेषात् स्वरभेदः स्यात्तस्यायुः पाञ्चमासिकम् ॥
शिक्षायां जायते बिन्दुरकस्माद्यस्य वाजिनः ।
तच्छ्रुत्वा जीवते मासं स वाजी नात्र संशयः ॥
पीतो मारुद्भयेनेव सर्प्पेन्ध्रेव प्रयच्छति ।
त्रिभिर्मासैस्तथारक्तश्चतुर्भिश्च विचिन्तितः ॥
पञ्चभिर्नीलवर्णश्च षड्भिश्च समाहृतिः ।
सप्तभिः पाटलाकारचम्पकाभस्तथापरैः ॥
नवभिश्च हरिद्राभो दशभिश्चमुकोपमः ।
एकादशभिर्दूर्व्वाभो वत्सरेण हिमद्युतिः ॥
यस्य श्वासो भवेदुष्णः शरीरं पुलकाङ्कितम् ।
जिह्वा हिमकराकारा मासषट्कं स जीवति ॥
पीतायां पिडिका यस्य जायते च तथाधरे ।
मूत्रं करोति रक्ताभं मासषट्कं स जीवति ॥
सर्व्वः श्वेतो यत्र यस्य नेत्रयोश्च प्रजायते ।
दशमासान् समासाद्य पित्तार्त्तो न स जीवति ।
यस्य नीलप्रभः स्यातां नेत्रे वाताहितस्य तु ।
मासत्रयञ्च कृच्छ्रेण य सप्ति स न जीवति ॥
श्लेष्मयुक्तस्य वा रक्ते यदि स्यातां विलोचने ।
वक्त्रगन्धः सुरातुल्यो दश मासान् स जीवति ॥
यस्य नेत्रे हरिद्राभे स्यातां पित्ताहितस्य च ।
तस्यायुः सप्तमासाख्यं मुनिभिः परिकीर्त्तितम् ॥
बहुवर्णे घने नेत्रे स्यातां धातुसमागमे ।
तस्य सप्तभिर्व्विश्त्यु सप्तरात्रेष्वसंशयम् ॥
यस्यैकं लोचनं नीलं द्वितीयं रक्तसन्निभम् ।
हयस्य स च विज्ञेयः पित्ताढ्यो मासजीवकः ॥
यस्य शिश्नप्रसक्तस्य काले नीरन्ध्रशर्पणि ।
हयस्य जीवितं तावद्दिनानि त्रीणि पञ्च च ॥
एवं रक्तविकाराणां ज्ञात्वा धातुं तुरङ्गमे ।
ततः प्रतिक्रिया कार्य्या उक्ता या कार्त्तिता मया ॥
भयादपीतपानीयश्रीर्गनिग्गीपुतस्य च ।
आर्त्तापि सान्त्वितोऽश्वर्य्यं तिर्य्यग्भिन्नो यदापि वा ॥
समाद्ग्ररोधबन्धाद्वा गात्रे वा विषमस्थिते ।
जीवमोक्षितमांसस्य शिरावेधः प्रशस्यते ॥
इति श्रीनकुलकृतेऽश्वचिकित्सिते धातुपरीक्षाध्यायो दशमः ॥

अथ ऋतुचर्य्या ।

द्वावश्वमासौ षडृतवः प्रोक्ता हि भवन्ति च ।
वाजिनामिह सर्वेषां वायुरक्तं व्यवस्थितम् ॥
ताभ्यां निर्म्मोचनायाय ह्यारोग्यं वै यथाक्रमम् ।
येयाति कुपितं रक्तं वसन्ते हयसम्भवम् ॥
कण्ठे वक्षसि तालौ च नाययोस्तु तथा ।
चक्षुषोरथ पार्श्वे पादयोरुभयोरपि ॥
काले वसन्ते विज्ञाय वाजिनां भिषगुत्तमः ।
शिरामोक्षं प्रकुर्व्वीत स्थानेष्वेतेषु पण्डितः ॥
अश्वे धमन्यां प्राहुः शिराश्चाशीति वाजिनः ।
विज्ञायैतत् परं सम्यग्ज्ञानं भवेत् ॥
एवं सर्व्वा यत्र पूर्व्वं वृद्धिं नयति वाजिनाम् ।

[illegible]

इति भाषा । तत्पर्य्यायः । बदरः २ गोप घोण्टा ३ शृगालकोलिः ४ कपिकोलिः ५ । इति कश्चित् रत्नमाला ॥ हस्तिकोलिः ६ वन्दी च्छदा ७ कर्कन्धुः । इति रत्नकोषः ॥ पूगवृक्षः । इति मेदिनी । टे । २४ ॥ (यथा उत्तरस्थाने त्रिंशेऽध्याये वाभटेनोक्तम् ।

'घोण्टाफलत्वग्नवण मलाञ्च
शूकस्य भज वनितापयश्च ।
मृगकटुघान्वित यव कल्को
यत्ताकतो हस्त्यचिरेण माढीम् ॥")

घोणस पु, (गोनस + पृषोदरादित्वात् साधुः ।) गोनसः । तिलित्सपः । इति हेमचन्द्रः । ४ । ३६२ ॥ (क्वचित् मद्गन्थमध्येऽपि दृश्यते ॥)

घोर, क्ली, (हन्यते बध्यतेऽनेनेति । हन + "हन्तेरच घुर च ।" उणा । ५ । ६४ । इति अच धातोर्घरादेशश्च ।) विषम । इति राजनिघण्टः ॥

घोर, पुं, (घोरयति भयानकरसनिमित्तीभवतीति । घुर + अच । यद्वा, हन्ति विनाशयति रुद्ररूपेण इति । हन बधे + "हन्तेरच घुर च ।" उणा । ५ । ६४ । इति अच धातोर्घुरादेशश्च ।) शिवः । भयानके त्रि । इति हेमचन्द्रः ॥ (यथा, मनुः । १२ । ५४ । [त्रयात् ।

"बहून् वर्षगणान् घोरान्नरकान् प्राप्य तत् संसारान् प्रतिपद्यन्ते महापातकिनस्त्विमान् ॥")

घोरदर्शन पु स्त्री (घोरं भयानकं दर्शनं यस्य ।) उलूकः । इति राजनिर्घण्टः ॥ भयानकरूपे त्रि ॥ (यथा, रामायणे । १ । १ । ५५ ।

'मायामाणो वने सीतां राक्षसं सन्ददर्श ह ।
कबन्धं नाम रूपेण विकृतं घोरदर्शनम् ॥")

घोरपुष्प, क्ली, कांस्यम् । इति राजनिर्घण्टः ॥ घोरपुष्पमपि पाठः ॥

घोररासन पु, (घोरं भयानकं रासनं शब्दो यस्य ।) शृगालः । इति शब्दरत्नावली ॥

घोरवासी [न्] पुं, (घोरं यथा तथा रसति शब्दं करोतीति । रस शब्दे + णिनि ।) शृगालः । इति हेमचन्द्रः । ४ । ३५६ ॥

घोरा स्त्री, (घोरति भयानकरसनिमित्तीभवतीति । घुर + अच + टाप् च ।) रात्रिः । इति त्रिकाण्डशेषः ॥ देवताडी लता । इति राजनिघण्टः ॥ (गङ्गा । यथा, काशीखण्डे । २९ । ५२ ।

'घण्टारवप्रिया घोराऽघौघविध्वंसकारिणी ॥")

रविसंक्रान्तिविशेषः । इति ज्योतिषम् ॥ यथा, तिथितत्त्वे रविसंक्रान्तिप्रकरणे ।

"मन्दा मन्दाकिनी ध्वाङ्क्षी घोरा चैव महोदरी ।
राक्षसी मिश्रिता प्रोक्ता संक्रान्तिः सप्तधा नृप ॥
मन्दा ध्रुवे विशेषा स्यात् मृदौ मन्दाकिनी तथा ।
क्षिप्रे ध्वाङ्क्षी विजानीयात् उग्रे घोरा प्रकीर्त्तिता ॥")

भयानका ॥ (यथा कालीध्याने ।

करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ॥)

घोल क्ली, (घूर्णते आलोड्यते यत् । घुट + अच । पृषोदरादित्वात् साधुः ।) सवारि निर्जलं मथितदधि । (यथा, सुश्रुते सूत्रस्थाने ४५ अध्याये ।

"यत्तु सस्नेहमजलं मथितं घोलमुच्यते ॥")

तत्पर्य्यायः । दण्डाहतम् २ कालशेयम् ३ अरिष्टम् ४ गोरसः ५ घलम् ६ मलिनम् ७ केवलम् ८ भयसन्धिकम् ९ । तस्य भेदः ।

"तक्रं ह्युदश्विन्मथितं पादाम्ब्वर्द्धाम्बुनिर्जलम् ।
ससारं यद्भवेत्तक्रं कट्वरं तत् प्रकीर्त्तितम् ॥"

इति शब्दचन्द्रिका ॥

अस्य विशेषः तक्रशब्दे द्रष्टव्यः ॥

घोली स्त्री पत्रशाकविशेषः । तत्पर्य्यायः । घोलिका २ घोलिः ३ कलम्बुः ४ क्षुपकाम्लिका ५ । क्षेत्रजातायाः अस्याः गुणाः । लवणत्वम् । रुचिकारित्वम् । अम्लत्वम् । वातकफनाशित्वञ्च ॥ आरामघोलिकागुणाः । अम्लत्वम् । रूक्षत्वम् । रुच्यत्वम् । वायुनाशित्वम् । पित्तश्लेष्मकारित्वञ्च । स्वल्पायाः जीर्णज्वरनाशित्वम् । इति राजनिर्घण्टः ॥

घोष क्ली, (घोषति शब्दायते इति । घुष विशब्दने + अच ।) कांस्यम् । इति राजनिघण्टः ॥

घोष पु, (घोषन्ति शब्दायन्ते गावो यस्मिन् । घुषिर विशब्दने + "हलश्च ।" ३ । ३ । १२१ । इति घञ् ।) आभीरपल्ली । (यथा रघुः । १ । ४५ ।

"हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥"

घोषति शब्दायते इति । घुष + कर्त्तरि अच् ।) गोपालः । (घुष + भावे घञ् ।) ध्वनिः । (यथा मनुः । ७ । २२५ ।

'तत्र भुक्त्वा पुनः किञ्चित् तूर्य्यघोषैः प्रहर्षितः ।
संविशेत्तु यथाकालमुत्तिष्ठेच्च गतक्लमः ॥")

घोषकलता । कांस्यम् । मेघशब्दः । इति मेदिनी । षे । ११ ॥ मशकः । इति त्रिकाण्डशेषः ॥ (वर्णोच्चारणबाह्यप्रयत्नविशेषः । यदुक्तं शिक्षायाम् । २ ।

"संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् ।
घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः ॥")

कायस्थानां पद्धतिविशेषः । (यथा, कुलदीपिकायाम् ।

"वसुवंशे च मुख्यौ द्वौ नाम्ना लक्ष्मणपूषणौ ।
घोषेषु च समाख्यातश्चतुर्भुजमहाकृती ॥")

घोषक पुं (घोष इव । घोष + सञ्ज्ञायां कन् ।) घोषालता । तत्पर्य्यायः । धामार्गवः २ । इत्यमरः । २ । ४ । ११० ॥ घोषकाकृतिः ३ आराली ४ दद्गनी ५ सुरङ्गकः ६ घोषः ७ घोषामला ८ । इति शब्दरत्नावली ॥ कोषकालः ९ । इति जटाधरः ॥ मतान्तरे हस्तिघोषातकी ॥ * ॥ पीतघोषायाः पर्य्यायः । धामार्गवः १ पीतघोषा २ राजघोषातकी ३ कर्कोटकी ४ महाजाली ५ घेद्रः ६ वायसम्मा ७ कोषातकी ८ । इति च जटाधरः ॥ * ॥ श्वेतघोषायाः पर्य्यायः । घोषातकी १ स्वादुफली २ जालिनी ३ कृतवेधकः ४ श्वेतपुष्पा ५ आकलिपद्मा ६ ज्योत्स्निका ७ इति रत्नमाला ॥

घोषकाकृति पु (घोषकस्य घोषलतायाः आकृतिरिवाकृतिर्यस्य ।) घामकः । इति रत्नमाला ॥

घोषणा, स्त्री (घुषिर विशब्दने + "ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति युच् ।) उच्चैःशब्दः । लोकविज्ञापनार्थोच्चैःशब्दनम् । (यथा कथासरित्सागरे । २४ । ५० ।

"गच्छ भ्रमय तत्सद्योऽत्र पुरे पटहघोषणाम् ॥")

तत्पर्य्यायः । उच्चैर्घुष्टम् २ । इत्यमरः । १ । ६ । २० ॥ निघुष्टम् ३ घुष्टघोषणम् ४ । इति शब्दरत्नावली ॥

घोषयित्नु, पुं (घोषयतीति । घुष + णिच् + बाहुलकात् इत्नुच् ।) ब्राह्मणः । कोकिलः । वन्दी । इति शब्दरत्नावली ॥

घोषवती, स्त्री, (घोषो विद्यतेऽस्याः । घोष + मतुप् मस्य वः । स्त्रियां ङीप् ।) वीणा । इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । ११ । ५ ।

'स बभूव शनै राजा सुखैकान्तरतत्परः ।
सदा सिषेवे मृगयां वीणां घोषवतीञ्च ताम् ।
दत्तां वासुकिना पूर्व्वं नक्तं स्निग्धमवादयत् ॥"

तथाच तत्रैव । १० । ३२ ।

"अङ्के घोषवती तस्य कण्ठे गीतश्रुतिस्तथा ॥")

शब्दविशिष्टे त्रि ॥ (यथा, महाभारते । १ । २५ । ११ ।

'स घनमतुलं घोरं घोषवन्तो बलाहकाः ॥')

घोषा स्त्री, (घोष्यन्ते मधुकरा यया । घुष + णिच् + घञ् ।) मधुरिकौषधिः । मौरी इति भाषा । इति मेदिनी ॥ (यथा, गारुडे १९ अध्याये ।

"घोषाफलं सैन्धवञ्च तक्रेणाद्य मदान्वयाः ॥")

कर्कटशृङ्गी । इति राजनिर्घण्टः ॥ (गङ्गा । यथा, काशीखण्डे । २९ । ५५ ।

'ग्रामसुरिष्टिकरी घोषा घनानन्दा घनप्रिया ॥"

गायत्रीरूपा भगवती । यथा, देवीभागवते । १२ । ६ । ४४ ।

"हरिमन्त्रमयी घोषा घनसम्पातनादिनी ॥")

घोषातकी स्त्री श्वेतघोषा । इति रत्नमाला ॥ (पर्य्यायोऽस्या यथा वैद्यकरत्नमालायाम् ।

"घोषातकी स्वादुफली स्याज्जालिनी कृतवेधना ।
श्वेतपुष्पा कृतच्छद्मा ज्योत्स्निकाकोषातकी
इत्यपि ॥")

घ्रा, गन्धोपादाने । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-अनिट् ।) जिघ्रति पुष्पं लोकः । इति दुर्गादासः ॥

घ्राण, क्ली (जिघ्रत्यनेनेति । घ्रा + करणे ल्युट् । यद्वा घ्रा + क्त "नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् ।" ८ । २ । ५६ । इति निष्ठातस्य नो वा ।) नासिका । इत्यमरः । २ । ६ । ८९ ॥ (यथा रघुः । १९ । ११ ।

"घ्राणकान्तमधुगन्धकर्षिणी
पानभूमिरचना प्रियासखी ॥")

आघ्रातः घ्राणेन्द्रियग्राह्यगन्धत्वात् । (घ्रा-भावे ल्युट् ।) आघ्राणम् । यथा श्रीभागवते । १ । १४ । २४ ।

"घ्राणिनः सुखुखाय मद्दिः मम भवार च ॥")

घ्राते त्रि । इति मेदिनी । णे । ११ ॥

घ्राणतर्पणः, पुं, (घ्राणमिन्द्रियविशेषं तर्पयतीति । तृप + णिच् + ल्युः ।) सुगन्धिः । इत्यमरः । ३।५।११ ॥ (यथा रामायणे । २ । ९४ । १४ ।
"घ्राणतर्पणमभ्येत्य कं नरं न प्रहर्षयेत् ॥")

घ्राणदुःखदा, स्त्री, (घ्राणस्य दुःखं ददातीति । दा + कः । स्त्रियां टाप् ।) छिक्कनी । इति भावप्रकाशः ॥

घ्रातः, त्रि, (घ्रा + क्तः । "नुदविदेति ।" ८ । २ । ५६ । इति पाणिनौ नत्वाभावः ।) गृहीतगन्धपुष्पादिः । घ्राय कर्म्मणीया इति घो वा इति च भाषा । तत्पर्य्यायः । घ्राणः २ । इत्यमरः । ३ । १ । ९ ॥ शिङ्घितः ३ । इति भरत-शब्दरत्नावल्यौ ॥ (यथा, मनुः । ५ । १२५ ।
"पक्षिजग्धं गवा घ्रातमवधूतमवक्षुतम् ।
दूषितं केशकीटैश्च मृत्प्रक्षेपेण शुध्यति ॥")

घ्रातिः, स्त्री, (जिघ्रत्यनया । घ्रा + करणे क्तिन् ।) नासिका । इति शब्दचन्द्रिका ॥ (भावे क्तिन् । घ्राणम् । यथा मनुः । ११ । ६७ ।
"ब्राह्मणस्य रुजः कृत्या घ्रातिरघ्रेयमद्ययोः ॥")

ङ

ङ ङकारः । स तु व्यञ्जनपञ्चमवर्णः । अस्योच्चारणस्थानं नासिकाकण्ठः । इति व्याकरणम् ॥ ("जिह्वामूलं तु कुः प्रोक्तः ।" इति ।
"अनुस्वारयमानाञ्च नासिकास्थानमुच्यते ॥"
इति च शिक्षोक्तिदर्शनम् ॥)
अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"ङकारं परमेशानि ! स्वयं परमकुण्डली ।
सर्व्वदेवमयं वर्णं त्रिगुणं लोललोचने ! ॥
पञ्चप्राणमयं वर्णं ङकारं प्रणमाम्यहम् ॥"
अपि च ।
"ऊर्द्ध्वाधःक्रमतो रेखा त्रिविधाकुञ्चिता ततः ।
अधोगता कुण्डली तु मात्रा शक्तिस्वरूपिणी ॥
रेखास्वेषु ब्रह्मविष्णुशिवाश्च देवताः ॥
ध्यानं यथा, वर्णोद्धारतन्त्रे ।
"धूम्रवर्णां महाघोरां करालिकां चतुर्भुजाम् ।
पीताम्बरपरीधानां साधकाभीष्टसिद्धिदाम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
तस्य नामानि यथा —
"ङ शङ्खी भैरवश्चण्डो बिन्दूत्तंसः शशिप्रभः ।
एकरुद्रो दमनश्च खर्परो विषयस्पृहा ॥
कान्तिः श्वेताङ्गको धीरो द्विजात्मा ज्वालिनी वियत् ।
मन्त्रशक्तिश्च मदनो विघ्नेशी चात्मनायकः ।
एकनेत्रो महानन्दो दुर्द्धरश्चन्द्रमा यतिः ।
शिवयोगी नीलकण्ठः कामेशी च महामुखी ॥"
इति नानातन्त्राणि ॥
(मातृकान्यासे अस्य दक्षिणकराङ्गुल्यग्रे न्यस्यता ॥)

ङः, पुं, (ङयति यत्र इन्द्रियैरिति । ङु + बाहुलकात् डः ।) विषयः । विषयस्पृहा । इति मेदिनी । ङे । १ ॥ भैरवः । इत्येकाक्षरकोषः ॥ (यथा स्तुतिपद्यम् ।
"ङयन्दिते ! ङलिखिते ! ङकारवर्णरूपिणि ! ॥")

ङु ङ ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-अनिट् ।) ङ, ङवते । इति दुर्गादासः ॥

च

च चकारः । स तु व्यञ्जनवर्णः । (द्वितीयवर्गे स्याद्यवर्णश्च ।) अस्योच्चारणस्थानं तालु । इति व्याकरणम् ॥ (यदुक्तं सिद्धान्तकौमुद्याम् । "इचु-यशानां तालु ।" इति । तथा च शिक्षायाम् । "कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ॥")
अस्य स्वरूपं यथा कामधेनुतन्त्रे ।
"चवर्णं शृणु सुश्रोणि ! चतुर्वर्गप्रदायकम् ।
कुण्डलीसहितं देवि ! स्वयं परमकुण्डली ॥
सततं कुण्डलीयुक्तं पञ्चदेवमयं सदा ।
पञ्चप्राणमयं वर्णं पञ्चप्राणात्मकं सदा ॥
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं प्रिये ! ॥"
अपि च ।
"वामाकुञ्चितशाखाद कण्ठाध क्रमतो गत ।
रेखाद्वयेषु चन्द्रार्कवह्निमीलितकान्ति निश्चयः ।
शक्तिमाता तु विज्ञेया ध्यानमस्य प्रचक्ष्यते ॥"
तस्य ध्यानं यथा, वर्णोद्धारतन्त्रे
"तुषारकुन्दपुष्पाभां नानालङ्कारभूषिताम् ।
सदा षोडशवर्षीयां वराभयकरां पराम् ॥
शुक्लपट्टाम्बरधरां शुक्लचोत्तरीयिणीम् ।
वरदां शोभनां रम्यामष्टबाहुसमन्विताम् ॥
एवं ध्यात्वा चकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
तस्य नामानि यथा, नानातन्त्रेषु ।
"चः पुष्करा चली वाणी चालशक्तिः सुदर्शनः ।
चर्मसुण्डधरो भूता मध्यमाचारसम्मितो ॥
एकरूपो रवि कूर्मश्चाङ्गुष्ठा दीर्घबाहुक
वामबाहुमूलमाया चतुर्भिरस्त्रचिन्ह ॥
द्वितीयश्च द्विनेत्रश्च लज्जालिक्तलोचनः ।
चन्द्रः चन्द्रमा देवचेतनो हस्तिनो बुधः ॥
देवी कीटमुखी चात्मा कौमारी पूर्वफाल्गुनी ।
अनङ्गमेखला वायुर्मेदिनी च प्रकाशनी ॥"
(मातृकान्यासे वामबाहुमूले एवास्य न्यासः ॥)

च, व्य (चयति चिनोतीति वा । चय शब्दे चिञ्‌ चिञो वा+"अन्येभ्योऽपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) अन्वाचयः । यत्र एकस्य प्राधान्येनापरस्य गौणत्वेनाश्रयणं सोऽन्वाचयः । यथा । भो बटो । भिक्षामट गाञ्चानय । भिक्षा-मटनमेव प्रधानं तत्र कुम्भाद्यो यदि गां पश्यसि तदा तामप्यानयेति भो चेत् भिक्षामेवाटेति । समाहारस्तिरोहिताभेदः इतरेतर उद्रिक्ताभेदः । अतएव चार्थे द्वन्द्व इति सूत्रं विहाय चार्थोऽत्र समाहार इतरेतरश्चेति व्याख्याय समाहारे अनभिव्यक्तावयवत्वात् एकवचनम् । इतरेतरयोगे चैकवचनमनप्राप्तत्वात् द्विवहुवचनम् । यथा । "पाणिपादम् अश्वरथौ वा" । समुच्चयः । (यथा) शब्दार्थयोरेकत्र समुच्चय प्राधान्येन कस्यचित् क्रिया विषयेऽनेकस्य चोपयोगता । यथा । ईश्वरं गुरुञ्च भजस्व । इति भरतः । समाहारः । अन्योन्याथ । समुच्चयः । (यथा मनुः । २ । ८३ ।
"इह चामुत्र वा काम्यं प्रवर्त्तं कर्म कीर्त्यते ॥")

पक्षान्तरम् । (यथा हितोपदेशे ।
"मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः ।
तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ॥"
तथा च प्रबुद्धमालायां १ मे अङ्के ।
"प्रातर्भिरनायमनयं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र ॥")
पादपूरणम् । (यथा, रामायणे । १ । २ । १८ ।
"तेन सचोदितौ तौ तु राघवौ च महायशौ ।
मारीचश्च सुबाहुश्च यज्ञविघ्नं करिष्यतः ॥")
अवधारणम् । इति मेदिनी । चे । १७ ॥ हेतुः । इति त्रिकाण्डशेषः ॥

चः, पुं (चयति शब्दायते इति । चय शब्दे+"अन्येष्वपि दृश्यते ।" ३ । २ । १०१ । इति डः ।) चर्वणः । (चिनोति व्याघ्रान् सङ्कोचय-तीति । चि+डः ।) कच्छपः । (चीयते उप-चीयते क्रमशः कलाभिः प्रतिपदादिमारभ्ये-त्यर्थः ।) चन्द्रः । (चिनोति सञ्चिनोति परधनानि इति ।) चौरः । इति मेदिनी ॥ चे । १ ॥ निर्बीजे दुर्जने च त्रि । इति शब्दरत्ना-वली ॥

चक, इ भ्रान्तौ । तौ भ्वादी धातुद्वयम् । इति कवि-कल्पद्रुमः ॥ (भ्वा परं अक सेट ।) इ चङ्क्यते । इति दुर्गादासः ॥

चक ञ इ म प्रतिघाते । तृप्तौ । इति कविकल्प-द्रुमः ॥ (भ्वा उभ आत्मपदे सक चकच सेट ।) ञ चकति चकते खलः साधुम् । इ, चकते जनस्तृप्तीत्यर्थः । म चकयति । इति दुर्गा-दासः ॥

चकास ऋ च लु दीप्तौ । इति कविकल्पद्रुमः ॥ (अदां परं अक-सेट ।) ऋ, अचीचकासत् अच-चकासत् । अनेकस्वरत्वात् अम्द्वायविकल्पः । च, चकास्ति । लु, चकास्ति । इति दुर्गादासः ॥

चकितं त्रि (चक भ्रान्तौ+क्तः ।) भीतम् । इति त्रिकाण्डशेषः ॥ (यथा कलाविलासे । २ । ८ ।
"दृष्ट्वा दिशि दिशि दृष्टिः याचकचकितोऽव-गुण्ठनं कृत्वा ।
चौर इव कुटिलचारी पलायते निकटदृष्ट्याभिः ॥"
क्लीं भावे क्तः । भयम् । नायिकालङ्कारविशेषः । तल्लक्षणं यदुक्तं साहित्यदर्पणे । ३ । १२१ ।
"कुतोऽपि दयितस्याग्रे चकितं भयसम्भ्रमः ॥")
"प्रियाग्रे चकितं भीतेरस्थानेऽपि भयं महत् ।" इत्युज्ज्वलनीलमणिः ॥
(स्त्री छन्दोविशेषः । यथा छन्दोमञ्जर्याम् ।
"भात् सभतनगैरष्टच्छेदे रसाद्रिश्च चकिता ॥")

चकोरः, पुं स्त्री (चकति चन्द्रकिरणैरेव तृप्यतीति । चक तृप्तौ+"कठिचकिभ्यामोरन् ।" उणा । १ । ६४ । इति ओरन् ।) पक्षिविशेषः । (यथा भागवते । ६ । २१ । ३१ ।
"काद्रवेयचक्रवाकैश्च चकोरैर्वल्गुकूजितम् ॥")
तत्पर्य्यायः । चन्द्रिकापायी २ कौमुदीजीवनः ३ । अस्य मांसगुणाः । यथा राजनिर्घण्टे ।
"चटकं शीतलं रुच्यं हृद्यं कामिप्रलापिनम् ।
तद्वच्चकोरजं मांसं हृद्यञ्च बलपुष्टिदम् ॥"
("वातश्लेष्माधिको ज्ञेयः शीतलः शुक्रवर्द्धनः ।
अष्ठीलां हन्ति विष्टम्भी मलरुद्ग्राहकश्चः ॥
चकोरः शुकशारी च समदोषा गुणागुणे ॥"
इति हारीते प्रथमस्थाने एकादशेऽध्याये ॥
अस्य डिम्बगुणा यथा सुश्रुते सूत्रस्थाने ४७ अः ।
"चार्मरजश्चकोराणां दम्भानां शिखिनामपि ।
चटकानाञ्च यानि स्युरण्डानि च हितानि च ॥
रेतःक्षीणेषु कासेषु हृद्रोगेषु क्षतेषु च ।
मधुराण्यविपाकीनि सद्यो बलकराणि च ॥")

चकोरकः, पुं स्त्री, (चकोर एव । चकोर+स्वार्थे कन् ।) चकोरपक्षी । इत्यमरः । २ । ५ । ३५ ॥

चक्क, क व्यथे । इति कविकल्पद्रुमः ॥ (चुरां-परं-सकं सेट ।) कोपधः । आत्मनस्पदोऽयं । अनि-शोऽयम् । क, चक्कयति शत्रुं शूरः । इति दुर्गा-दासः ॥

चक्रं, क्ली, (क्रियतेऽनेनेति । कृ+घञर्थे कः । कृञादीनामिति द्वित्वं ।) सैन्यम् । राष्ट्रम् । (यथा, याज्ञवल्क्ये । १ । ३५१ ।
"यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ॥")
रथाङ्गम् । दम्भविशेषः । कुम्भकारोपकरणम् । कुमारेर चाक इति भाषा । (यथा याज्ञ-वल्क्ये । ३ । १४६ ।
"मृद्दण्डचक्रसंयोगात् कुम्भकारो यथा घटम् ।
करोति तृणमृत्काष्ठैर्गृहं वा गृहकारकः ॥")
अस्त्रविशेषः । (यथा रघुः । ७ । ४६ ।
"आधोरणानां गजसन्निपाते
शिरांसि चक्रैर्निशितैः क्षुराग्रैः ॥")
जलावर्त्तः । इति मेदिनी ॥ भगवत्सुदर्शन-चक्रम् । (यथा महाभारते । १ । १९ । ६ ।
"ततो भगवता तस्य शिरश्छिन्नमलङ्कृतम् ।
चक्रायुधेन चक्रेण पिबतोऽमृतमोजसा ॥")
तस्य भगवन्मन्दिरे स्थापनविधिर्यथा, श्रीभाग-वते । ६ । १ । २१ ।
"सम्पादि चैव हिमदेवदेवे
लतानि नानायननानि विष्णोः ।
प्रभग्नमुखाद्भुतमन्दिराणि
यद्दर्शनात् तक्षमनुस्मरन्ति ॥"
"हिमदरे ऋषिभिर्देवैश्च कृतानि चक्राङ्गप्रति-र्वर्णकानि इति प्रसिद्धान्यायुधानि तेषु मुख्यं चक्रं तेनाङ्कितानि गृहान्यथैमन्तर्भूय चिह्नितानि मन्दिराणि येषु तानि नानाविधानि विष्णो-रायतनानि देवानि तीर्थानि च पानिषिद्धे । येषां चक्राङ्कितमन्दिराणां दर्शनात् चैतन्य-क्षरण भवन्ति ।" इति तट्टीकायां श्रीधरस्वामी ॥०
अथ चक्रलक्षणम् ।
"द्वारमारभ्य मद्भोष्ठ चतुरश्रमवस्थितम् ।
चक्र शालग्रामशिलायां मन्त्रैः पूजयेत् ॥"
इति वीरमित्रोदयवाराहे ॥ विचारः ॥

नामशालम् । इति त्रिकाण्डशेषः ॥ तगरपुष्पम् । इति राजनिर्घण्टः ॥ व्यूहविशेषः । (अस्य लक्षणं यथा,—

"अष्टारं चक्राकारं व्यूहचक्रं त्रिनाडिकम् ।
दण्डचतुष्टयं चाक्षे कीलकञ्च चतुर्द्दिशम् ॥
पूर्व्वदण्डाग्रतो ह्यस्य द्विभागं समवृत्तकम् ।
प्रवेशे निर्गमे चैव भौमिं भौमि प्रदक्षिणे ॥
अश्विन्यादयस्तु मध्ये तत्राष्टौ भानुभूचकम् ।
तृतीये राहुर्भञ्च केतुर्दण्डचतुष्टये ॥
रन्ध्रे विजयो लाभः स्वर्थर्क्षे मध्यमं फलम् ।
राहुर्धिष्ण्यादके विप्र मृत्युः केतुचतुष्टये ॥
एवमुक्तं चक्रं ध्याने यद्दिने यस्य नामभम् ।
तद्दिने तु फलं तस्य सर्व्वकार्य्येषु सर्व्वदा ॥"

रणचक्रन्तु भगवता द्रोणाचार्य्येण अभिमन्युवधार्थमभिकल्पितम् । तत्र व्यूहमध्ये निर्माणप्रणाल्याः कः क्रम आसीदिति प्रश्नेऽयमुत्तरमाह ।

"चक्रव्यूहो महाराज ! आचार्य्येणाभिकल्पितः ।
तत्र शक्रोपमाः सर्व्वे राजानो विनिवेशिताः ॥
अरस्थानेषु विन्यस्ताः कुमाराः सूर्य्यवर्च्चसः ।
सङ्घातो राजपुत्राणां सर्व्वेषामभवत्तदा ॥
कृताभिसमयाः सर्व्वे सुवर्णविकृतध्वजाः ।
रक्ताम्बरधराः सर्व्वे सर्व्वे रक्तविभूषणाः ॥
सर्व्वे रक्तपताकाश्च सर्व्वे वै हेममालिनः ।
चन्दनागुरुदिग्धाङ्गाः स्रग्विणः सूक्ष्मवाससः ॥
सहिताः पर्य्यधावन्त कार्ष्णिं प्रति युयुत्सवः ।
तेषां दशसहस्राणि बभूवुर्दृढधन्विनाम् ॥
पौत्रं तव पुरस्कृत्य लक्ष्मणं प्रियदर्शनम् ।
अन्योन्यसमदुःखास्ते अन्योन्यसमसाहसाः ॥
अन्योन्यं स्पर्द्धमानाश्च अन्योन्यस्य हिते रताः ।
दुर्य्योधनस्तु राजेन्द्र ! सैन्यमध्ये व्यवस्थितः ॥
कर्णदुःशासनकृपैर्वृतो राजा महारथैः ।
देवराजोपमः श्रीमान् श्वेतच्छत्राभिसंवृतः ॥
चामरव्यजनाक्षेपैरुदयन्निव भास्करः ।
प्रमुखे तस्य सैन्यस्य द्रोणोऽवस्थितनायकः ॥
सिन्धुराजस्तथातिष्ठत् श्रीमान् मेरुरिवाचलः ।
सिन्धुराजस्य पार्श्वस्था अश्वत्थामपुरोगमाः ॥
सुतास्तव महाराज ! त्रिंशत्त्रिदशसन्निभाः ।
गान्धारराजः कितवः शल्यो भूरिश्रवास्तथा ।
पार्श्वतः सिन्धुराजस्य व्यराजन्त महारथाः ॥
ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ।
तावकानां परेषाञ्च मृत्युं कृत्वा निवर्त्तनम् ॥"

इति महाभारते । ७ । ३५ । १६—२४ ।) सैन्यम् । इत्यमरटीकायां स्वामी ॥ (यथा आभ्यासनप्रयाणम् । ५८२ । [कारस्य ।"

'धृष्टमयान् मोक्षयत शिर्षे धर्म्मांशि तैन कालज्ञापकयन्त्रविशेषः । यथा, गोलाध्याये ।

"चक्रं चक्रांशाङ्कं परिधौ प्रथमं भगणादिकाशारेः ।
धार्य्यं द्विजमाधारात् कल्प्या भार्द्धेन लम्बज्या ॥
तस्मिंश्छिद्रार्द्धं स्थिराकाभिमुखनेमिकं धार्य्यम् ।
भूमेर्मध्यभागात् प्रभाच्छिद्रान्ना भूस्य ॥ [जिनु ।
नतखार्द्धान्तरगता उन्नतभर्द्धांशुभिर्वा दुर्ग-
रस्रोन्नतांशैर्भक्तं नाथः छाया परि प्रोक्ता ॥"

धारमर्द्धं हारमय या अक्ष चाप कृत्वा तस्मिन् प्रभृत्यादिराशयः शिथिल काष्ठ । चक्रमध्ये छिद्रं सुषिरमाधारात् शशिपरीयगामिनी लम्बसूत्ररेखा कार्य्या । लम्बस्योपरि तिर्य्यग्रेखा चाप्य कार्य्या । तच्च परिधौ भगणांशैरङ्कं चिह्नाधारात् क्षिप इति नवतिभागान्तरे तिर्य्यग्रेखा तत्परिधियाग्रे यातो चिति चाप्या । भार्द्धेनार्द्धरेखानेमिश्चम्याग्रे राशिं कल्प्यम् । सुषिरे कृत्वा शलाका प्रदातव्या । सा चाक्षर्द्धा । तच्चक्रमकाभिमुखनेमिकं यथा भवति तथाधारे धार्य्यम् । तथा कृतेऽस्य छाया परिधौ यत्र पतति ततश्चाधचिह्नयोरन्तरे ये भागास्ते रवेर्नतांशाः । ये छायाखार्द्धयोरन्तरे ते नतांशा ज्ञेयाः । एवमेव नतोन्नतांशज्ञानमेव भवति । अतोऽन्येऽपि टीका व्याख्या कीर्ता । तद्यथा, नक्षिन् दिने शशिनि मध्याह्ने नोन्नतांशात् दिवार्द्धमान्य भागानुपात कार्य्यः । यदि मध्याह्नोन्नतांशैर्दिनार्द्धनाड्यो लभ्यन्ते तदेभिः किमित्येवमागता घटिकाः स्युः । अथ विशेषयन्त्रमाह ।

'यैश्चपुष्पासितमयारपागा
न्यग्दह भिमिता यथा स्यात् ।
दूरेऽन्तरेऽन्येषु भवेयरौ घा
तथाश्च यत्र सुषिरा प्रधानम् ॥
नेमिस्तदाश्रयगत धपन्त्रेत्
खेटश्च विच्यास्य च योगतारम् ।
नैश्यश्चयारश्युकास्य मध्ये
वेऽथ धा स्थिता भ्रुवको युनक्ते ॥
मध्यकस्थिते भेऽन्द पुर स्थिते से
दौनो ध्रुवः स्यात् खचरस्य भुक्तम् ॥"

अत्र यन्त्रस्याधो निम्ना हाटि छत्वोर्ध्वैनेम्यारात्र च्छायां मध्ये भङ्गिसय युगपन्निमिता यथा स्यात् तथा यस्य भ्रमर भ्रा नेम्यो विच्छायोरेवदर स्यागभङ्गस्य । ततोऽन्ये एवतौ था हरि चालथिमा पच निधेत् । अत्र प्रायोऽयमती दृश्यते । अयन्तस्य ध्रुवस्य चाभर ग्रीवे यष्ट्यावधि अवगत नम्या यत्र तत्र दृश्यते तत् ज्यायाममच्छ्रम् । अथ भयकाङ्कयोमध्ये ये शाधर्भ्रुवो युत स्फुटपदो भवति यदा यदातु पश्चिमर्घ्य नक्षत्र । यदा पुनश्च नक्षत्र तदा भ्रुवो दीन स्फुटपदो भवति । अपयाप्यर्धं नक्षत्र दोर्ज्याद्य ततो दूरेऽन्तरे यदा नक्षत्रा तावेव विद्ध्या प्रोतश्चद् पञ्चमानम् । इति चक्रयन्त्रम् ॥ शरीरस्थषट्चक्राणि यथा । मूलाधारम् १ स्वाधिष्ठानम् २ मणिपूरम् ३ अनाहतम् ४ विशुद्धम् ५ आज्ञाख्यम् ६ । तद्यथा —

"मूलाधारं त्रिकोणाख्यं इच्छाज्ञानक्रियात्मकम् ।
मध्ये स्वयम्भुलिङ्गन्तु कोटिसूर्य्यसमप्रभम् ॥
तदूर्द्ध्वे कामबीजन्तु कलाशान्तीन्दुनायकम् ।
तदूर्द्ध्वे तु शिखाकारा कुण्डली ब्रह्मविग्रहा ॥
तद्वाह्ये हेमवर्णाभं वसवर्णचतुर्दलम् ।
द्रुतहेमसमप्रख्यं पद्मं तत्र विभावयेत् ॥
तदूर्द्ध्वेऽग्निसमप्रख्यं षड्दलं हीरकप्रभम् ।
वादिलान्तषड्वर्णेन युक्ताधिष्ठानसंज्ञकम् ॥
मूलमाधारषट्कानां मूलाधारं ततो विदुः ।
स्वशब्देन परं लिङ्गं स्वाधिष्ठानं ततो विदुः ॥
तदूर्द्ध्वे नाभिदेशे तु मणिपूरं महाप्रभम् ।
मेघाभं विद्युदाभञ्च बहुतेजोमयं ततः ॥
मणिवद्भिन्नं तत्पद्मं मणिपूरं तथोच्यते ।
दशभिश्च दलैर्युक्तं डादिफान्ताक्षरान्वितम् ॥
शिवेनाधिष्ठितं पद्मं विश्वालोकनकारणम् ।
तदूर्द्ध्वेऽनाहतं पद्ममुद्यदादित्यसन्निभम् ॥
कादिठान्ताक्षरैरर्कपत्रैश्च समधिष्ठितम् ।
तन्मध्ये बाणलिङ्गन्तु सूर्य्यायुतसमप्रभम् ॥
शब्दब्रह्ममयं शब्दोऽनाहतस्तत्र दृश्यते ।
तेनाहताख्यं पद्मन्तु मुनिभिः परिकीर्त्तितम् ॥
आनन्दसदनं तत्तु पुरुषाधिष्ठितं परम् ।
तदूर्द्ध्वन्तु विशुद्धाख्यं दलषोडशपङ्कजम् ॥
स्वरैः षोडशकैर्युक्तं धूम्रवर्णं महाप्रभम् ।
विशुद्धिं तनुते यस्मात् जीवस्य हंसलोकनात् ॥
विशुद्धं पद्ममाख्यातमाकाशाख्यं महाद्भुतम् ।
आज्ञाचक्रं तदूर्द्ध्वे तु आत्मनाधिष्ठितं परम् ॥
आज्ञासंक्रमणं तत्र गुरोराज्ञेति कीर्त्तितम् ।
कैलासाख्यं तदूर्द्ध्वे तु बोधिनी तु तदूर्द्ध्वतः ॥
एवञ्च शिवचक्राणि प्रोक्तानि तव सुव्रते ॥"

मतान्तरे आधारषट्चक्राणि यथा । कुलाकुलचक्रम् १ राशिचक्रम् २ नक्षत्रचक्रम् ३ अकथहचक्रम् ४ अकडमचक्रम् ५ ऋणिधनिचक्रम् ६ । तद्यथा —

"कुलाकुलस्य भेदं हि वक्ष्यामि मन्त्रिणामिह ।
वायुवह्निभूजलाकाशाः पञ्चाशल्लिपयः क्रमात् ॥
पञ्चह्रस्वाः पञ्चदीर्घा बिन्दुन्ता सन्धिसम्भवाः ।
कादयः पञ्चशः प य श ल क्ष श्च प्रकीर्त्तिताः ॥
तथा च ।
अ आ ए क च ट त प य षा मारुताः ।
इ ई ऐ ख छ ठ थ फ र क्षा आग्नेयाः ।
उ ऊ ओ ग ज ड द ब ला पार्थिवाः ।
ऋ ॠ औ घ झ ढ ध भ व सा वारुणाः ।
ऌ ॡ अं ङ ञ ण न म श हा नाभसाः ।
साध्यसाधकयोः पूर्व्वं मन्त्रस्यापि तदक्षरम् ।
यद्येकभूतदैवत्यं आग्नेयात् परकृत्य हि तत् ।
भौमस्य वारुणं मित्रमाग्नेयस्यापि मारुतः ।
मारुतः पार्थिवश्चाथ शत्रुराग्नेयसम्भवाः ।
नाभसं सर्व्वमित्रं स्यात् आद्यक्षरं नैव दूषयेत् ॥"

अथ राशिचक्रम् ।

"रेखात्रयं पूर्व्वपराग्रतः स्यात्
याम्योत्तरं चापि पुनस्तथैव ।
एकैककोष्ठान्तरकोणरेखे
कुर्य्याद्बुधो वह्निनिकेतनोऽयम् ॥
पैत्र्यक्षिवक्षिस्थमलन्धधातिसक्तात्
प्रत्येकमाद्यरपचतुरधात्रिः ।
मेषादिम प्रविलिखेत् सकलांस्तु राशीन्
वन्द्यायताम प्रविलिखेद् दारिद्र्यान् ।

तत्र अ आ इ ई मेषः। उ ऊ ऋ वृषः। ॠ ऌ ॡ मिथुनम्। ए ऐ कर्कटः। ओ औ सिंहः। अं अः श ष स ह ल क्ष कन्या। कवर्गस्तुला। चवर्गो वृश्चिकः। टवर्गो धनुः। तवर्गो मकरः। पवर्गः कुम्भः। यवर्गो मीनः।
स्वराशीनामनुकूलं मन्त्रं भजेत्।
राशीनां शुद्धता ज्ञेया स्वनेत्र मन्तुं ज्ञाति यथम्।
स्वराशिर्मन्त्रराशिश्च गणनीय विचक्षणैः॥
यदा तु स्वराशेरज्ञानं तदा साधकानामाद्याक्षरसम्बन्धिनं राशिं गृहीत्वा गणयेत्॥ *॥

अथ नक्षत्रचक्रम्।

"अ आ अश्विनी देवगणः। इ भरणी मानुषः। ई उ ऊ कृत्तिका राक्षसः। ऋ ॠ ऌ ॡ रोहिणी मानुषः। ए मृगशिरो देवः। ऐ आर्द्रा मानुषः। ओ औ पुनर्वसुर्देवः। क पुष्यो देवः। ख ग अश्लेषा राक्षसः। घ ङ मघा राक्षसः। च पूर्वफल्गुनी मानुषः। छ ज उत्तरफल्गुनी मानुषः। झ ञ हस्ता देवः। ट ठ चित्रा राक्षसः। ड स्वाती देवः। ढ ण विशाखा राक्षसः। त थ द अनुराधा देवः। ध ज्येष्ठा राक्षसः। न प फ मूला राक्षसः। ब पूर्व्वाषाढ़ा मानुषः। भ उत्तराषाढ़ा मानुषः। म श्रवणा देवः। य र धनिष्ठा राक्षसः। ल शतभिषा राक्षसः। व श पूर्व्वभाद्रपदा मानुषः। ष स ह उत्तरभाद्रपदा मानुषः। क्ष अं अः ळ रेवती देवः॥ तथा च।
"अश्विन्यादिक्रमेणैव विलिखेत्तारकाः पुनः।
वक्ष्यमाणविधानेन तन्मध्ये चाक्षरान् लिखेत्॥
उत्तराद्दक्षिणायान्तु रेखां कुर्य्याच्चतुर्दशीम्।
दश रेखाः पश्चिमाया कर्त्तव्या धीरवन्दिते॥
अकारादिक्षकारान्तान् द्विचन्द्रवह्निनेत्रकान्।
भूमीन्द्रनेत्रचन्द्रांश्च अङ्केनाक्षरगौ प्रिये॥
द्विभूनेत्रनेत्रयुग्मांश्चेन्दुनेत्राग्निचन्द्रकान्।
मघादिज्येष्ठपर्य्यन्तं द्वितीयं पत्रतारकम्॥
वह्निभूमीन्दुचन्द्रांश्च युगेन्दुनेत्रवह्निकान्।
वेदेन मिलिता वर्णा देवप्रगता क्रमात्॥
पूर्व्वोत्तरात्रयञ्चैव भरण्यार्द्रा च रोहिणी।
इमानि मानुषाण्याहुर्नक्षत्राणि मनीषिणः॥
ज्येष्ठाशतभिषामूलाश्लेषाकृत्तिकाश्चैव तारिका।
चित्रामघाविशाखा स्युस्तारा राक्षसदेवताः॥
अश्विनी रेवती पुष्यः स्वाती हस्ता पुनर्व्वसुः।
अनुराधा मृगशिरः श्रवणा देवतारकाः॥
स्वजातौ परमा प्रीतिर्मध्यमा भिन्नजातिषु।
रक्षोमानुषयोर्नाशो वैरं दानवदेवयोः॥
अत्र सम्पदिष्टं क्षेमं प्रयाति साधको यदि।
मित्रं परमं मित्रञ्च अकारादीनि पुनः पुनः॥"
अत्रापि नवचक्राणि तन्त्रान्तरीयाणि सन्ति च।
स्वनक्षत्रादारभ्य गणनीयम्। स्वनक्षत्राज्ञाने स्वनामाद्यक्षरसम्बन्धिनक्षत्रात् गणनीयम्॥ *॥

अथाकथहचक्रम्।

"चतुरस्रं लिखेत् कोष्ठं चतुष्कोष्ठसमन्वितम्।
पुनश्चतुष्क एतानि लिखेदेव पुनः क्रमेण तु॥
इन्द्रभिस्मरनवनेत्रयुगाक्षरादिषु
षड्दश्योदशचतुर्दशगीतिषु॥
मायात्मयवदन्वह्निरिमांश्चमोष्ठे
सर्व्वान् लिखेत् लिपिभवान् क्रमशस्तु धीमान्॥
नामाद्यक्षरमारभ्य यावन्मन्त्रादिमाक्षरम्।
चतुर्भिः कोष्ठैरेकैकमिति कोष्ठचतुष्टयम्॥
पुनः कोष्ठककोष्ठेषु गणयेत् तान् प्रदक्षिणः।
सिद्धः साध्यः सुसिद्धोऽरिः क्रमाज्ज्ञेया मनौ विधिः॥
सिद्धः सिध्यति कालेन साध्यस्तु जपहोमतः।
सुसिद्धो ग्रहमात्रेण रिपुर्मूलं निकृन्तति॥" *॥

अथाकडमचक्रम्।

"रेखाद्वयं पूर्व्वपरेण कुर्य्यात्
तन्मध्यतो याम्यकुवेरभेदात्।
महेशरक्षोऽनिलवह्निक्रमेण
तिर्य्यक् तथा चापि कृताङ्कनेन॥
आकारादिहकारान्तान् क्लीबहीनान् लिखेत् ततः।
तथा अ क ड वर्णद्वयं इ ङ त्र त्वष्टि क्लीबं प्रपद्यते॥
एकैकक्रमतो लेख्यान् मेषादिषु क्रमात्तकान्।
गणयेत् क्रमशो भद्रे नामादिमन्त्रकादिमान्॥
मेषादिसंज्ञ मीनान्तं गणयेत् क्रमशः सुधीः।
अमुं स्वनामतो मन्त्रे यावन्मन्त्रादिमाक्षरम्॥
सिद्धसाध्यसुसिद्धारीन् पुनः सिद्धान्य पुनः।
नवैकपञ्चमे सिद्धः साध्यः षड्दशयुग्मके॥
सुसिद्धस्त्रिसप्तैकादशे वेदाष्टद्वादशे रिपुः।
एतत्ते कथितं देवि! अकडमादिकमुत्तमम्॥
ताराशुद्धिर्विचारार्थं कोष्ठशुद्धिं शिवस्य च।
राशिशुद्धिस्तुपुरे च गोपायेदकडमः स्मृतः॥"

अथ ऋणिधनिचक्रम्।

"कोष्ठान्येकादशान्येव चतुष्पुरितानि च।
अकारादिक्षकारान्तं लिखेत् कोष्ठेषु तत्त्ववित्॥
प्रथम पञ्चकोष्ठेषु ह्रस्वदीर्घक्रमेण तु।
द्वय द्वय लिखेत्तत्र त्रिवारं खलु साधकः॥
षष्ठमेकैकशो वर्णांन् क्रमशस्तु लिखेत् सुधीः॥
द्वौ द्वौ स्वरौ प्रथम कोष्ठकेषु
वेदान् शरान् षट्सु षडङ्कमेकम्।
कादीन् स्वरेशान् विलिखेत्ततोऽर्णा-
नेकैकमेकान्तरतः लिखेद्वा॥
षट्कालकालविमिश्रितमनन्त-
साध्याङ्गुल्यदना स्तु साध्यवर्णाः।
दुर्गादिपर्य्यायदमरद्विजप्रयाङ्क-
योगान्वितेद्वयमिति खलु साधकार्णाः॥
नामाद्यकारवर्णादवर्णक्रमेण
मन्त्रोऽभयार्द्धमिति कथितेन ऋणं धनं स्यात्।
मन्त्रो यद्यधिकाङ्कः स्यात् तदा मन्त्रं जपेत् सुधीः।
समेऽपि च जपेन्मन्त्रं न जपेत् ऋणाधिके।
शून्ये मृत्युं विजानीयात् तस्माच्छून्यं विवर्जयेत्॥"
इति तन्त्रसारः॥ *॥

अन्यतन्त्रान्तरमते यथा,—
"अंशे ध्वरे दिनकर इयर्द्धदशशतांशके दश करोति

यस्मिन् गृहे तदपि मरणभयकरः शून्यकोऽपि स्यात्।
तत् पञ्चादारभ्य शून्ये निविषभयकरः शून्यवाञ्छितलाभः
यत्र स्यात् शून्यमध्ये भवति च नियतं सिद्ध नामक्रमेण॥"

केतुचक्रं यथा —
"कर्णे हृदि निभृतौ क्रतुमानवाभौ
कटपृष्ठभ चयकर धनद करे चिः।
नाभे चतुर्षु च वक्ष मदयोः कपाटौ
क्रोधी भयञ्च नितरामिह केतुचक्रम्॥" *॥

अहिचक्रं यथा,—
"अथाहिचक्रं वक्ष्यामि विधानं मध्यमस्तयोः।
ऊर्द्धरेखाष्टकं लेख्यं तिर्य्यक् च पञ्चरेखिका॥
स्थानचक्ररहस्यं चक्रमष्टाविंशतिकोष्ठकम्।
तत्र धौम्याश्विन्याग्नेयकृत्तिकामघभाम्यभम्॥
उत्तराफल्गुनी लेख्या पूर्व्वमरण्यौ भक्षकम्।
अहिमध्योऽथ पादं तु प्रथम नाडयपैभम्॥
पुष्य हस्त समालेख्य द्वितीया पश्चिमाश्रितम्।
अभिजिद्धिश्रुवष्वस्व सौम्य रौद्र पुनर्व्वसुम्॥
चित्रमञ्च तृतीयायां मध्ये पित्र्यान्य सप्तकम्।
विश्वर्क्षं सोमभ मूलां ज्येष्ठामेनविशाखभम्॥
स्वातीं मध्ये शिक्ष्यान्तु कर्त्तव्यं प्रयत्नतः।
द्वारभाद्रे मघा याम्ये द्वारस्था कृत्तिका तत॥
अश्वीयपूर्व्वाषाढ़ादिनिकायचक्रमुच्यम्।
रेवती पूर्व्वभाद्रस्थौ भानि धीमान् भास्करः॥
उदयादिगता नाडी भग्ना मध्याभिषेचके।
दिनेन्दुधर्म्मयुग्मोऽसौ भवतुश्चाप्यचक्रकाः॥
चन्द्रवत्सुधायेत् सर्व्वं चक्रमेकादिकम्।
चन्द्रं मध्ये यन्त्रकेन्द्रं तदाख्य निखिलं निधिः।
भानु मध्ये स्थितौ तौ चेत्तदा मृत्युश्च संशयः।
खलसी दिवस श्रेय नास्ति सिध्यादिपर्य्ययेः॥
सिद्ध न लभ्यते तत्र चक्रे क्रूरग्रहान्विते।
पुष्टे चन्द्रे भवेत्सुधा सौम्ये चन्द्रेऽर्कोऽपि सिद्धिः।
भेदतारेषु तात्कारे रत्न कोश तदा वपुः।
नागे चन्द्रे निवारणीयात् द्वादशराशिषट्स्थिते।
मित्रैर्मित्रं भवेत्तत्र शून्य इतिनिर्वजिते।
भेदतारेषु तात्कारे यावत् चक्रमायकम्।
सर्व्वान्विताश्च चन्द्रे दलभागे प्रकाशने।
सुखरात्रप्रमाणेन भूनाद प्रदक्षिणयेत्।
सौम्ये द्विस परे सौर मलपापो भवेन्निधिः।
लोकच्च पूर्णं तत्र कर्णाद्यक्रमेण च।
परमोऽपि भवेत्तुष्टि निश्चितमत्वर्त्तं क्रमे।
अविन्ये भवेद्दुःख यत्र चन्द्रो दशान्वितः॥" *॥

कुलाकुलचक्रं यथा,—
"द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम्।
विषमा चाकुला ज्ञेया दैवाश्च निधनः कुला।
रविचन्द्रौ कुलः प्रोक्तौ रविवारोऽकुलश्च भवेत्।
भौमशुक्रौ कुलाख्यौ च बुधवारः कुलाकुलः।
वह्न्यादीनि निःकुलं कुलाकुलमुदाहृतम्।
कुर्य्यात् सर्व्वकार्य्याणि दिवाचतुष्कुलेऽपि च।
तिथौ वारे च नक्षत्रे चकुलं वापि सदा वच।

"दृशियो मारुत चैञ्चचञ्चुर्यो मतवह्निमः॥")

चञ्चुल्या स्त्री, (चञ्चुल्य+टाप् ।) कुम्भिका । सुभगा । इति मेदिनी । ये । ८२ । अभ्यमञ्जरी । अरण्यकुलत्थिका । इति राजनिर्घण्टः ॥

चञ्च न भाषणे । इति कविकल्पद्रुमः । (भ्वां पर मक-सेट् ।) न चञ्चति । इति दुर्गादासः ॥

चञ्चुर स्त्री, (चञ्चति हृष्टाञ्चलेन । चञ्च+उरच् । इति सिद्धान्तकौमुदी ।) पामभाग्यम् । तत्पर्य्यायः । घोरत्वम् २ । इति त्रिकाण्डशेषः ॥

चञ्चुर, पुं, (चञ्चति कम्पतेऽनेन । चञ्च+उरच् ।) इति सिद्धान्तकौमुदी ।) रथः । हस्तः । इति मेदिनी । रे । १५३ ॥

चङ्क्रमण, क्ली, (पुनःपुनरतिशयेन वा क्राम्यतीति । चङ्क्रम+भावे ल्युट् ।) पुनःपुनर्भ्रमणम् । (यथा भागवते । ३ । २१ । ५ ।

"नूनं चङ्क्रमणं देव । सतां संरक्षणाय ते । वधाय चासतां यस्त्वं हरे शक्तिर्हि पालिनी ॥")

अतिशयभ्रमणम् । इति व्याकरणम् । (यथा सुश्रुते सूत्रस्थाने १९ अध्याये ।

"स्थानासन चङ्क्रमण यानयानातिभाषणम् ॥")

अनतिदेहपीडाकारकचङ्क्रमणस्य गुणाः । आयुर्बलमेधाग्निप्रदिकारित्वम् । सदोपानहंदिव पादचङ्क्रमणदोषाः । अनारोग्यत्वम् । अनायुष्यत्वम् । इन्द्रियदृष्टिनाशित्वञ्च । इति राजवल्लभः ॥

चङ्ग त्रि, शोभनः । दक्षः । इति मेदिनी । गे । ७ ॥ (पुं, रागभक्तिविशेषः । यथा राजतरङ्गिण्याम् ।

"अभरद्वाच पाञ्चाला येऽभूवंस्तस्य मन्त्रिणः । ते क्षौद्रायितमाध्वी चङ्गे प्रत्याक्तिरपि ॥")

चचेण्डा, स्त्री, (चि+बाहुलकात् ड । च उपमीयमानं अवयवत् फलं यस्याः ततो निपातनात् साधुः ।) फललताविशेषः । चिचिण्डा इति भाषा । तत्पर्य्यायः । पीतफला २ श्वेतराजी ३ हस्तिफल ४ । अस्या गुणाः । पटोलगुणात् किञ्चिन्न्यूनत्वम् । विशेषतः शोषिपथ्यत्वञ्च । इति मदनविनोदः ॥

चच्चत्पुट, पुं, (चच्चत् गुरुलघुनी लघुविशेषाणां पुटं द्रुतं यत्र ।) तालभेदः । यथा,—

"ताले चच्चत्पुटे ज्ञेयं गुरुद्वन्द्वं लघु प्लुतम् ॥"

इति सङ्गीतदामोदरः ॥

चञ्चत्पुटोऽपि क्वचित् पाठः ।

चञ्चरी, स्त्री, पुं (चञ्च्यते पुनः पुनरतिशयेन वा चरति भ्राम्यतीति । चर+यङ् लुक् ततो टक् टित्वात् ङीप् च ।) भ्रमरी । यथा —

"करी वरी भरीति चेद्दिशं करी वरीति चाम् । किरी वरी करीति चञ्च चञ्चरीति चञ्चरी ॥"

इत्युद्भटः ॥

चञ्चरीक पुं, (चरति पुनःपुनरिति "चर्च्चरीकाश्च ।" उणां । ४ । २० । इति ईकन् प्रत्ययेन साधु ।) भ्रमरः । इति त्रिकाण्डशेषः ॥

चञ्चल त्रि (चञ्च गतिं लातीति । ला+क ।) अस्थिरम् । (यथा, हरिवंशे । ६४ । ७ ।

"एवं वसमानं पालयन्तौ प्राञ्जमानौ मधाङ्गनम् ।

चचूर्यन्तौ रमन्तौ च किशोराविव चञ्चलौ ॥")

तत्पर्य्यायः । चलनम् २ कम्पनम् ३ कम्प्रम् ४ चलम् ५ लोलम् ६ चलाचलम् ७ तरलम् ८ पारिप्लवम् ९ परिप्लवम् १० । इत्यमरः । ३ । १ । ७५ ॥ चपलम् ११ चटुलम् १२ । इति तट्टीका ॥ वायौ पुं । इति मेदिनी । ले । ९ ॥

चञ्चला स्त्री (चञ्च लाति । ला+क टाप् च । यद्वा चञ्चलं चाञ्चल्यं अस्त्यस्या इति अच् ।) लक्ष्मीः । विद्युत् । इति मेदिनी । ले । ९ ॥ पिप्पली । इति शब्दचन्द्रिका ॥ (वृत्तविशेषः । यथा, शब्दार्थचिन्तामणिः ।

"नूपुरालमधिराजमेवहारनायकेन । चामरध्वजेन चापि मल्लिका सुपर्णकेन ॥ भूषितातिसुन्दरेव मातङ्गेन्द्रपिङ्गलेन । चञ्चला चकोरचारुलोचने शुभाङ्गकेन ॥")

चञ्चा, स्त्री (चञ्च+अच्+टाप् ।) तृणनिर्म्मिता । चाच इति भाषा । (चञ्चेव मनुष्यः । इति इवार्थे कन् ततः "लुम्मनुष्ये ।" ५ । ३ । ९८ । इति कनो लुप् ।) तृणनिर्म्मितपुरुषः । इति मेदिनी । चे । ५ ॥

चञ्चु, पुं (चञ्च+बाहुलकात् उः ।) गौराङ्गः । स तु नाडीचशाकः । एरण्डवृक्षः । इति मेदिनी । चे । ५ ॥ मृगः । इति शब्दरत्नावली ॥ रक्तैरण्डः । चुञ्चुपुरुषः । इति राजनिर्घण्टः ॥

चञ्चु, स्त्री, (चञ्चति प्राप्नोति खादति भक्ष्यमनया ।) पक्षिमुखम् । चोट इति भाषा । (यथा, चातकाष्टके । ६ ।

[शार्दूलविक्रीडिते

"भ्रातश्चातक । चातकं किमपि ते चञ्चुं न यत्नोऽस्ति पतन्ति चञ्चुपुटकं दित्सा पयो विन्दवः ॥")

तत्पर्य्यायः । त्रोटिः २ । इत्यमरः । २ । ५ । ३६ ॥ चञ्चूः ३ त्रोटी ४ चञ्चुका ५ । इति शब्दरत्नावली । सृपाटिका ६ । इति हेमचन्द्रः ॥ पत्रशाकविशेषः । तत्पर्य्यायः । विजला २ चञ्चूः ३ कलभी ४ चीरपत्रिका ५ चञ्चुरः ६ चञ्चुपत्रः ७ सुशाकः ८ क्षेत्रसम्भवः ९ । अस्या गुणाः । मधुरत्वम् । तीक्ष्णत्वम् । कषायत्वम् । मलशोधनत्वम् । गुल्मोदरविबन्धार्शोविषघ्नत्वञ्च ।

"चिञ्चञ्चुश्चिञ्चुकी च दीर्घपत्रा सतिक्तिका । चञ्चुः शीता सरा रुच्या स्वाद्वी दोषत्रयापहा । धातुपुष्टिकरी बल्या मेध्या पिच्छिलिका स्मृता ॥"

इति भावप्रकाशः ॥

तस्या बीजस्य गुणाः । कटुत्वम् । उष्णत्वम् । गुल्मशूलोदररोगविषघ्नत्वम् । वृक्कशूलघ्नत्वञ्च । इति राजनिर्घण्टः ॥ (व्यवहारोऽस्य यथा,

"शाके पदिके यस्तु विक्रममतिसार्य्यते । कटूनमिश्रमद्यात्तु वहुशः शमवास्तिकम् ॥ तं मूलकानां यूषेण वदराणामथापि वा । उपोदिकाया चाङ्गेर्य्या यवान्या वास्तुकस्य वा ॥ सुवर्चलायाश्चञ्चोर्वा शाकेनावद्गुहस्य वा ॥"

इति चरके चिकित्सास्थाने दशमेऽध्याये ।)

चञ्चुका स्त्री, (चञ्चु+स्वार्थे कन् टाप् च ।) चञ्चुः । पक्षिमुखम् । इति शब्दरत्नावली ॥

चञ्चुपत्र, पुं, (चञ्चाकारं पत्रमस्य) चञ्चुशाकः । इति राजनिर्घण्टः ॥

चञ्चुभृत पुं, स्त्री (चञ्चुं बिभर्त्तीति । भृ+क्विप् ।) पक्षी । इति त्रिकाण्डशेषः ॥

चञ्चुमान्, [त्] पुं, स्त्री, (चञ्चुरस्त्यस्येति । नित्य योगे मतुप् ।) पक्षी । इति हारावली ॥

चञ्चुर पुं, (चञ्चति चञ्चुवदाकृति गच्छतीति । चञ्च गतौ+बाहुलकात् उरच् ।) चञ्चुशाकः । इति राजनिर्घण्टः । (दक्षः । यथा काशीखण्डे । १० । ४६ ।

"विज्ञातास्त्रिलशास्त्रार्थो लौकिकाचारचञ्चुरः । कदाचिच्चिन्तयामास हृदिध्याता महेश्वरम् ॥")

चञ्चुसूचि, पुं, (चञ्चुः सूचिरिव यस्य ।) कारण्डवपक्षी । तत्पर्य्यायः । सुचक्षुः २ सौचिकः ३ । इति त्रिकाण्डशेषः । मरुकः ४ चञ्चुसूचिकः ५ । इति हेमचन्द्रः । ४ । ४ ७ ॥

चञ्चुसूचिक पुं स्त्री, (चञ्चुसूचि+स्वार्थे कन् यद्वा चञ्चुः सूचिरिव यस्य इति कप् ।) चञ्चुसूचिः पक्षी । इति हेमचन्द्रः । ४ । ४ ७ ।

चञ्चू, स्त्री (चञ्चु+"ऊङुतः ।" ४ । १ । ६६ । इत्यस्य "अप्राणिजातेश्चारज्ज्वादीनामुपसंख्यानम् ।" इति वार्त्तिकोक्त्या ऊङ् ।) चञ्चुः । इति हेमचन्द्रः ॥

चट, भेदे । इति कविकल्पद्रुमः । (भ्वां पर सक सेट् ।) चटति । इति दुर्गादासः ॥

चट, क वधे । भेदे । इति कविकल्पद्रुमः । (चुरां पर सक सेट् ।) क, चाटयति । इति दुर्गादासः ॥

चटक पुं, (चटति भिनत्ति धान्यादिकं चञ्चुपुटेनेति । चट भेदे+"गन्दिवदीति ।" ३ । १ । १३४ । इति पचादित्वात् अच् ततः स्वार्थे कन् ।) पक्षिविशेषः । चटा इति भाषा ॥ (यथा, श्रीभागवते । १ । ३ । ८ ।

"नीत्या प्रेमाप्लुत तत्र चापि चन्द्रकपोलकः । चाटविकाशसुरः कामं समया मर्मचिन्तया ॥")

तत्पर्य्यायः । कलविङ्कः २ । इत्यमरः । २ । ५ । १८ ॥ चित्रपृष्ठः ३ गृहनीडः ४ वृषायणः ५ । इति हारावली । कामुकः ६ नीलकण्ठकः ७ कालकण्ठकः ८ कामचारी ९ । इति जटाधरः । कलाविकलः १० इति शब्दरत्नावली । तन्मांसगुणाः । शीतलत्वम् । लघुत्वम् । शुक्रबलप्रदत्वम् । सन्निपातघ्नत्वम् । चटकञ्च लघु अथ मधुरम् ।

इति राजनिर्घण्टः ॥

("चटका श्रेष्ठा स्निग्धा वातघ्ना शुक्रला परम् ।

गुरूष्णास्निग्धमधुरा वात्याशी बलोत्तमः ॥"

इति वाग्भटे सूत्रस्थाने षष्ठेऽध्याये ।

"चटका मधुरा स्निग्धा बलशुक्रविवर्द्धनाः । सन्निपातप्रशमनाः शमना मारुतस्य च ॥"

इति चरके सूत्रस्थाने २७ अः ॥

चटकका, स्त्री, (चटका+स्वार्थे कन्। "उदीचामात स्थाने यकपूर्व्वाया।" ७। ३। ४६। इति पक्षे इत्वादेशाभाव।) चटका। इति मुग्धबोधव्याकरणम्॥

चटका स्त्री, (चटक+टाप।) चटकपक्षी। (चटकस्य चटकाया वा स्त्र्यपत्यम्। चटका+ऐरक। स्त्रियामपत्ये लुक वक्तव्य। तत्र टाबन्तात सहिते लुप्ते "लुक तद्धितलुकि।"१।२।४९। इति टापो लुकि पुन अजाद्यतष्टाप्। स च वार्त्तिकवचनोऽपि बाधक।) चटकस्त्र्यपत्यम्। चटी इति भाषा॥ इत्यमर। २। ५। १८॥ पिप्पलीमूलम्। इत्यमरटीकायां नारायणचक्रवर्त्ती॥ श्यामापक्षी। इति राजनिघण्ट॥

चटकाशिर [स्] क्ली (चटकाया शिर इव।) पिप्पलीमूलम्। इति हेमचन्द्र॥

चटकिका, स्त्री, (चटका+स्वार्थे कन्। "उदीचामात स्थाने यकपूर्व्वाया।" ७। ३। ४६। इति इत्वादेश।) चटका। इति मुग्धबोधव्याकरणम्।

चटिका स्त्री (चटति भिनत्ति रोगादिक नाशयतीत्यर्थे। चट+बाहुलकात् इकन्।) पिप्पलीमूलम्। (चटति भिनत्ति धान्यादिकं स्वचञ्चुपुटेनेति।) चटका। इति हलायुध॥

चटिकाशिर, [स्] क्ली, (चटिकाया चटकपक्षा मस्तकमिव आकृतिरस्य।) पिप्पलीमूलम्। इत्यमर। २। ९। ११०॥

चटिकाशिर, पु, ("सर्व्वे सान्ता अदन्ता स्यु।" इत्युक्ते पृषोदरादित्वात् सलोप।) पिप्पलीमूलम्। इत्यमरटीकायां भरत॥ (अस्य पर्य्याया यथा वैद्यकरत्नमालायाम्।
"ग्रन्थिक पिप्पलीमूल षडग्रन्थिश्चटिकाशिर॥")

चटु, पुं, (चटति शोकसन्तापादिकं भिनत्तीति। चट भेदे+"मृगय्वादयश्च।" उणां। १। ३७। इति कु।) प्रियवाक्यम्। (यथा माघे। ४। ६।
"छायां निजस्त्रीचटुलालसानां
मदेन किञ्चित् चटुलालसानाम्॥")
उदरम्। व्रतिनामासनभेद। इति मेदिनी। टे। १४॥ प्रियभाषणे स्त्रीबलिङ्गोऽपि। इति वाचस्पत्यादौ उणादिवृत्ति॥

चटुल, त्रि, (चटतीति। चट+बाहुलकादुलच। यद्वा, चटु+"सिध्मादिभ्यश्च।" ५। २। ९७। इति मत्वर्थे लच।) चञ्चल। इति हेमचन्द्र। ६। ९१॥ (यथा, रघु। ९। ५८।
"लघयितुमिव चटुले प्रपते सुनेत्रे
शीघ्रमिथानयननिष्कम्पचेष्टितानि॥")
सुन्दर। इत्युणादिकोष॥

चटुला स्त्री, (चटुल+"अजाद्यतष्टाप।" ४। १। ४। इति टाप्।) विद्युत्। इति जटाधर॥ (मातृभेदस्या भगवती। यथा, देवीभागवते। १२। ६। ४७।
"चटुला चण्डिकाचित्रा चित्रमाल्यविभूषिता।")

चटुलोल, त्रि, (चटुलश्चञ्चल लोलश्च। अति चञ्चलत्वात्तथात्वम्। निपातनादलोपे साधु।) चाटुलोल। सुचञ्चल। इति हारावली। २१९॥

चड, इ क रोषे। इति कविकल्पद्रुम॥ (चुरां-पर च्यक सेट।) इ क चण्डयति। इति दुर्गादास॥

चड, इ ङ रोषे। इति कविकल्पद्रुम॥ (भ्वां-आत्म अकं सेट।) इ, कर्म्मणि चण्ड्यते। ङ, चण्डते। इति दुर्गादास॥

चण, शब्दे। इति कविकल्पद्रुम॥ (भ्वां परं-अकं सेट।) चणति। इति दुर्गादास॥

चण, म दाने। इति कविकल्पद्रुम॥ (भ्वां पर-सक सेट।) म, चणयति। इति दुर्गादास॥

चण, मि गतौ। हिंसे। इति कविकल्पद्रुम॥ (भ्वां पर-सक सेट।) मि, चणयति चाणयति। इति दुर्गादास॥

चणक, पुं (चणति वेदोच्चारणादिभ्यभिना शब्दायते इति। चण शब्दे+क्वुन्।) मुनिविशेष। इति शब्दरत्नावली॥ (चण्यते दीयते इति। चण दाने+क्वुन्।) शस्यविशेष। छोला बुट इति च भाषा। तत्पर्य्याय। हरिमन्थक २। इत्यमर। २। ९। १८। हरिमन्थज ३। इति तट्टीका। चण ४ हरिमन्थ ५ सुगन्ध ६ कञ्चुक ७ वाजिभोज्य ८ वाजिमन्थ ९ कञ्चुकी १०। अस्य गुणा। मधुरत्वम्। रूक्षत्वम्। मेहवान्तकफपित्तनाशित्वम्। दीपनत्वम्। बलवर्णाध्मानकारित्वञ्च॥ आमस्य तस्य गुणा। शीतलत्वम्। रुच्यत्वम्। सन्तर्पणत्वम्। दाहतृष्णापहरोगशोषनाशित्वम्। शैत्यत्वम्। कषायत्वम्। इतकृशवीर्य्यकारित्वञ्च॥ भृष्टस्य तस्य गुणा। रुच्यत्वम्। वातनाशित्वम्। रक्तदोषकारित्वम्। उष्णवीर्य्यत्वम्। लघुत्वम्। खेदशैत्यहरत्वञ्च॥ तस्य यूषस्य गुणा। मधुरत्वम्। कषायत्वम्। कफवातविकारश्वासोद्वकासक्षमयोग्यनाशित्वम्। बलवीर्य्यत्वञ्च॥ भातसव्ययमानगुणा। चन्द्रमरीचिवत् शीतलत्वम्। पित्तरोगनाशित्वम्। पुष्टिप्रदत्वम्। पाके नैवगुरुत्वम्। सन्तर्पणत्वम्। मृदुत्वम्। मधुरत्वञ्च। इति राजनिर्घण्ट॥ तस्य आदभ्रटस्य गुणा। बलकारित्वम्। रोचनत्वञ्च॥ सिद्धस्य तस्य गुणा। पित्तकफनाशित्वम्॥ तत्पक्व चोभकर॥ तस्य शाकस्य गुणा। रुच्यत्वम्। दुर्जरत्वम्। कफवातकारित्वम्। अम्लत्वम्। विष्टम्भजनकत्वम्। पित्तदन्तशोथनाशित्वञ्च। इति भावप्रकाश॥

चणकात्मज, पुं, (चणकस्य मुनिविशेषस्य आत्मज।) चाणक्यमुनि। इति हेमचन्द्र। ३। ५१७॥

चणकाम्ल, क्ली, (चणकस्याम्लम्। तत स्वार्थे कन्।) चणकाम्लकम्। तस्य गुणा। अत्यम्लत्वम्। दीपनत्वम्। दन्तहर्षकत्वम्। लवणाजीर्णघ्नत्वम्। रुच्यत्वम्। शूलाजीर्णविबन्धनाशित्वञ्च। इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥

चणकाम्बया, [र] स्त्री, (चणकाम्लस्य चणकक्षेत्रस्य वार जलम्।) क्षेत्रस्थलवणक पत्रशिशिरवारि। इति रत्नावली॥

चणद्रुम पुं, (चणश्चणक इव द्रुमो वृक्ष।) क्षुद्रगोक्षुर इति राजनिर्घण्ट॥ चणोद्रुमोऽपि पाठ॥

चणपत्री स्त्री, (चणश्चणकस्तस्य पत्रमिव पर्णं यस्या। स्त्रियां ङीप।) रुदन्तीवृक्ष। इति राजनिर्घण्ट॥

चणिका, स्त्री, (चणति दुग्धमाधुर्यं ददातीति। चण दाने+क्वुन्। टाप् अत इत्वञ्च।) तृणविशेष। तत्पर्य्याय। गोदुग्धा २ सुनीला ३ क्षेमका ४ क्षमा ५। अस्या गुणा। गोक्षीरगुण्यत्वम्। बल्यत्वम्। अतिमधुरत्वञ्च। गवां पयोवृद्धिकृत्वम्। इति राजनिर्घण्ट॥

चण्ड, स्त्री (चण्डते इति। चडि+पचाद्यच्।) तीक्ष्णम्। इति शब्दरत्नावली॥

चण्ड पुं, (चणति चणयति वा अत्युग्रं ददातीति। चण+"अमन्तात् ड।" उणां। १। ११४। इति ड।) तिन्तिडीवृक्ष। चण्डते कुप्यतीति। चडि+अच।) यमकिङ्कर। दैत्यविशेष। इति मेदिनी। डे। ११। (अयं हि शुम्भासुरसेनानी। कदाचिदयं हिमाचलस्थां भगवतीं दृष्ट्वा शुम्भाय कथितवान्। तत शुम्भार्थं भगवतीमानयनाय गतो ऽसौ तल्ललाटफलकनिर्गतया चामुण्डया निहत। एतद्विवरणं मार्कण्डेयपुराणे द्रष्टव्यम्।) कार्त्तिकेय यथा, महाभारते। ३। २३१। ४।
"शिशु शीघ्र शुभिश्चण्डो दीप्तवर्ण शुभानन।")

चण्ड, त्रि, (चण्डते रुष्टो भवतीति। चडि+पचाद्यच।) अत्यन्तकोपन। इत्यमर। ३। १। ३२॥ (यथा, महाभारते। ९। २३३। ११।
"चण्डाय शीघ्राय महाजवाय
घोराय दुष्टाचपलाय रुक्मी॥")
तीक्ष्णतापविशिष्ट। इति शब्दरत्नावली॥ (यथा, महाभारते। १। ३२। २३।
"इक्ष्वाकुमिव तीक्ष्णांशु चण्डवायुसमीरितम्॥")

चण्डता, स्त्री, (चण्डस्य भाव। चण्ड+तल।) उग्रता। इति हेमचन्द्र। २। २१२॥

चण्डनायिका, स्त्री, (चण्डी कोपना नायिका।) दुर्गा। इति शब्दरत्नावली॥ अष्टनायिकान्तर्गतनायिकाविशेष। (यथा, दुर्गाध्याने।
"उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका।
चण्डा चण्डवती चैव चामुण्डा चण्डिका तथा॥
आभि शक्तिभिरष्टाभि सतत परिवेष्टिताम्।
चिन्तयेत् सतत दुर्गां धर्म्मकामार्थमोक्षदाम्॥")
तस्या ध्यानं यथा, देवीपुराणोक्तदुर्गोत्सवपद्धतौ।
"चण्डनायिकां रौप्यवर्णां लोकमङ्गलाम्।
कपाल खेटकं घण्टां दर्पणञ्च धनुर्ध्वजम्।
पाशञ्च डमरुं दक्षिणे वामहस्तेन बिभ्रतीम्।
सुदर्शनं मुषलञ्च अङ्कुशञ्चैव तथाङ्कुशम्।
दर्पं चक्र शङ्खाकार दधिमेव च बिभ्रतीम्॥"

चण्डनिका, स्त्री (चण्ड प्रचण्ड इव चण्डाल-तयाख्यता। चण्डनर+"मन इन्दनी।"

५। २। ११५। इति टन्। स्त्रियां टाप्। यद्वा प्रचण्डदन्तौ गन्धशक्तिविशेषः। ततः स्वार्थे कन्। टापि पूर्व्वह्रस्वः।) विद्याविशेषः। इति शब्दरत्नावली॥

चण्डवती, स्त्री, (चण्ड+“अमन्ताड्डः।” उणा। १। ११४। इति डः। चडि+अच् वा। चण्ड उग्रतया विद्यतेऽस्याम्। यद्वा, चण्डः रुद्रांशो भैरवविशेषो रक्षकतया विद्यतेऽस्याः। मतुप् मस्य वत्वम्।) दुर्गा। इति शब्दरत्नावली॥ अष्टनायिकान्तर्गतनायिकाविशेषः। अस्या ध्यानं यथा। चण्डवती धूम्रवर्णा षोडशभुजामित्यादि शेषं चण्डनायिकाध्यानवत्। इति देवीपुराणोक्तदुर्गोत्सवपद्धतिः॥

चण्डा, स्त्री, (चण् चण वा+डः। चडि+अच् वा। ततष्टाप्।) अष्टनायिकान्तर्गतनायिकाविशेषः। (यथा देवीपुराणे।
“चण्डा चण्डवती चण्डनायिकाप्यतिचण्डिका॥”)
अस्या ध्यानं यथा। चण्डा शुक्लवर्णा षोडशभुजामित्यादि शेषं चण्डनायिकाध्यानवत्। इति देवीपुराणोक्तदुर्गोत्सवपद्धतिः॥ जिनानां शासनदेवताविशेषः। इति हेमचन्द्रः॥ चोरनामगन्धद्रव्यम्। इत्यमरः। २।४।१२८॥ (यथा, चरके सूत्रस्थाने तृतीयेऽध्याये।

“कुष्ठं हरिद्रे सुरसं पटोलं
निम्बाश्वगन्धे सुरदारुशिग्रू।
ससर्षपं तुम्बुरुधान्यवन्यं
चण्डाञ्च चूर्णानि समानि कुर्य्यात्॥”)

शङ्खपुष्पी। इति मेदिनी। डे। १२॥ (यथा सुश्रुते सूत्रस्थाने ३८ अध्याये॥ “एलातगरकुष्ठमांसीध्यामककत्वकपत्रनागपुष्पप्रियङ्गुहरेणुकाव्याघ्रनखशुक्तिचण्डास्थौणेयकश्रीवेष्टकचोचचोरकवालकगुग्गुलुसर्ज्जरसतुरुष्ककुन्दुरुकागुरुस्पृक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरञ्चेति।” लिङ्गिनीलता। कपिकच्छुः। आखुकर्णी। श्वेतदूर्व्वा। इति राजनिर्घण्टः॥ नदीविशेषः। इति शब्दरत्नावली॥

चण्डांशुः, पुं, (चण्डाः प्रखरास्तीक्ष्णा वा अंशवो रश्मयोऽस्य।) सूर्य्यः। यथा महानाटके।
“चण्डांशोर्गिरिमिव का कथा रघुपते चन्द्रोऽपि सुज्भते।”
(यथाच राजतरङ्गिण्याम्। ४। ४१।
“भ्रातरौ तौ समासाद्य राज्यं नैव चराजत।
हेमन्तशिशिरौ प्राप्य चण्डांशोरिव मण्डलम्॥”)

चण्डातः, पुं, (चण्डं चण्डत्वं तीव्रत्वं अतति निरन्तरं प्राप्नोतीति। अत+अच्।) करवीरः। इत्यमरः। २। ४। ७६॥ (पर्य्यायोऽस्य यथा —
द्वितीयो रक्तपुष्पश्च चण्डातो लगुडस्तथा।”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥ गुणाश्चास्य करवीरशब्दे ज्ञातव्याः॥)

चण्डातकं, क्ली, (चण्डां स्त्रियं अतति सततं गच्छति प्राप्नोतीत्यर्थः। अत+ण्वुल्।) अर्द्धोरुकम्। वरस्त्रीणामर्द्धोरुपर्य्यन्तं वासः। इत्यमरः। २। ६। ११८॥ पुंस्काण्डे चौपालितधृतात् पुलिङ्गोऽपि॥

चण्डालः, पुं, (चण्डते कुप्यतीति। चडि कोपे+“मदिचण्डिभ्यामालच्।” उणा। १। ११६। इत्यालच्। यद्वा, चण्ड विकटं अलं पर्य्याप्तं आरो यस्य इत्यनुकूलत्वं।) वर्णसङ्करजातिविशेषः। चाण्डाल इति भाषा। स तु ब्राह्मणीगर्भे शूद्रौरसाज्जातः। इति पराशरपद्धतिः॥ तत्पर्य्यायः। प्लव २ मातङ्ग ३ दिवाकीर्त्ति ४ जनङ्गम ५ निषाद ६ श्वपच ७ अन्तेवासी ८ चाण्डाल ९ पुक्कस १०। इत्यमरः। २। १०। १९॥ जनङ्गम ११ निषाद १२ श्वपक १३ पुक्कश १४ पुक्कस १५। इति तट्टीका॥ निष्ठ्य १६। इति त्रिकाण्डशेषः॥ तस्याकृतिर्यथा, रामायणे।
“अथ रात्र्यां व्यतीतायां तस्यां राजा बभूव ह।
चण्डालसदृशो राम। सद्य एव दुराकृतिः॥
नीलपीताम्बरधरो रक्ताम्बरतनोधरः।
संरब्धताम्रघोराक्षः करालो हरिपिङ्गलः॥
व्यसनचर्म्मनिवासी च लौहाभरणभूषितः॥”
अस्य चण्डालस्य निवासकर्म्मादि यथा —
“चण्डालश्वपचानान्तु बहिर्ग्रामात् प्रतिश्रयः।
अपपात्राश्च कर्त्तव्या धनमेषां श्वगर्द्दभम्॥
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम्।
कार्ष्णायसमलङ्कारः परिव्रज्या च नित्यशः॥
न तैः समयमन्विच्छेत् पुरुषो धर्म्ममाचरन्।
व्यवहारो मिथस्तेषां विवाहः सदृशैः सह॥
अन्नमेषां पराधीनं देयं स्याद्भिन्नभाजने।
रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च॥
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः।
अबान्धवं शवञ्चैव निर्हरेयुरिति स्थितिः॥
वध्यांश्च हन्युः सततं यथाशास्त्रं नृपाज्ञया।
वध्यवासांसि गृह्णीयुः शय्याश्चाभरणानि च॥”
(एतैर्हतस्य पश्वादेर्मांसशुचिमाह मनुः। ५। १३१।
“श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत्।
क्रव्याद्भिश्च हतस्यान्यैश्चण्डालाद्यैश्च दस्युभिः॥”)
क्रूरकर्म्मा। इति संक्षिप्तसारे उणादिवृत्तिः॥ (स्त्रियां ङीष्। मन्त्रोक्तशक्तिविशेषः॥)

चण्डालकन्दः, पुं, (चण्डालप्रियः कन्दः।) कन्दविशेषः। तस्य गुणाः। मधुरत्वम्। कफपित्तास्रदोषविषभूतादिदोषनाशित्वम्। रसायनत्वञ्च। तस्य भेदाः। एकपत्र द्विपत्र त्रिपत्र चतुष्पत्र पञ्चपत्रः। इति राजनिर्घण्टः॥

चण्डालवल्लकी, स्त्री, (चण्डालप्रियत्वात् तैर्वाद्यमाना वल्लकी वीणा।) चण्डालवीणा। इत्यमरः। २। १०। २०॥ अस्याः पर्य्यायः। कण्डोलवीणाशब्दे द्रष्टव्यः॥

चण्डालिका, स्त्री, (चण्डालं प्रान्तकालेनात्यस्याः। चण्डाल+ठन् टाप् च।) चण्डालवल्लकी। उमा। (चण्डं प्रचण्डभावं अलतीति। अल+ण्वुल् टापि अत इत्वम्।) ओषधीभेदः। इति मेदिनीकरहेमचन्द्रौ॥

चण्डिः, स्त्री, (चडि कोपे+इन्।) चण्डी। इत्यमरटीकायां भरतः॥

चण्डिका, स्त्री, (चण्डी+स्वार्थे कन् टापि पूर्व्वह्रस्वः। चण्डि+कन् वा।) दुर्गा। इत्यमरः। १। १। ३९॥ (यथा मार्कण्डेये। ८२। ३९।
“इत्युक्ता सा भगवती चण्डिका चण्डविक्रमा।”
इयमेव अमरकण्टके पीठशक्तिरूपेण विराजते। यथा देवीभागवते। ७। ३०। ७३।
“छागलण्डे प्रचण्डा तु चण्डिकामरकण्टके।”
गायत्रीरूपा देवी। यथा, देवीभागवते। १२। ६। ४७।
“चटुला चण्डिका चित्रा चित्रमाल्यविभूषिता॥”)

चण्डिलः, पुं, (चण्डते कोपयुक्तो भवतीति। चडि कोपे+इलच्। चण्ड+मत्वर्थे इलच् वा।) रुद्रः। नापितः। वास्तूकम्। इति हेमचन्द्रः॥

चण्डिला, स्त्री (चण्डिल+स्त्रियां टाप्।) नदीभेदः। इत्युणादिकोषः॥

चण्डी, स्त्री, (चण्डि+“षिद्गौरादिभ्यश्च।” ४। १। ४१। इति वा ङीष्।) दुर्गा। (यथा, तिथितत्त्वे दुर्गोत्सवबोधनप्रकरणे।
“चण्डीमावाहयेद्विद्वान् मानवश्चण्डीपूजने क्रिया॥”)
हिंस्रा। कोपना। इति मेदिनी। डे। १२॥ (यथा रघुवंशे। १२। ५।
‘सा किलाश्वासिता चण्डी भर्त्रा तत्संश्रुतौ वरौ॥’)
अस्या रूपान्तराणि। चण्डिः चण्डा चण्डिका। इत्यमरटीकायां भरतः॥ * ॥ मार्कण्डेयपुराणोक्तदेवीमाहात्म्यम्। तस्य पाठक्रमो यथा, —
“अर्गलं कीलकञ्चादौ पठित्वा कवचं पठेत्।
जपेत् सप्तशतीं पश्चात् क्रम एष शिवोदितः॥
अर्गलं दुरितं हन्ति कीलकं फलदं तथा।
कवचं रक्षयेन्नित्यं चण्डिका त्रितयं तथा॥”
इति तन्त्रम्॥

अपि च।
“नारायणं नमस्कृत्य नरञ्चैव नरोत्तमम्।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत्॥
आदौ च प्रणवं जप्त्वा श्लोकं वा संहितां पठेत्।
अन्ते च प्रणवं दद्यादित्युवाचादिपूरुषः॥
यत्र पाठे विरोधो ह्यन्यथा विफलं भवेत्।
शुद्धेनानन्यचित्तेन पठितव्यं प्रयत्नतः॥
न कार्य्यासक्तमनसा कार्य्यं स्तोत्रस्य वाचनम्।
आधारे स्थापयित्वा तु पुस्तकं वाचयेत् सुधीः॥
हस्तसंस्थापनादेव यस्मात् स्वल्पफलं भवेत्।
स्वयञ्च लिखितं यत्तु ब्राह्मणा लिखितं न यत्॥
अब्राह्मणेन लिखितं तथापि विफलं भवेत्।
अविच्छन्नात्मिकं यस्तु पठेत् स्तोत्रं विचक्षणः॥
स्तोत्रे न दृश्यते यत्र प्रयत्नात्तत्समाचरेत्।
सङ्कल्पितं स्तोत्रपाठे यस्मात् सत्त्वा पठेत् सुधीः॥
अध्यायं प्राप्य विरमेत्तु मध्ये कदाचन।
कृते विरामे मध्ये तु अध्यायादि पठेत् पुनः॥
आत्मनः वाचकं विद्याद्वाचयञ्चसमादरात्।
सुधीरध्यापकं जाप्यञ्च वाचकाभावे भवेत्॥
स्वयं निर्मितवस्त्राणि वाचकायोपकल्पयेत्।
पश्चिम शिथिलं कुर्य्यात्तावत्क्रमात् प्रयत्नतः॥
पुनर्भवति तत्र नव न तस्मात् धारयेत् सुधीः॥

विंशत्यक्षरयुक्तं जपेत् सप्ताक्षरपरस्परया ।
कलाक्षरसमायुक्तं रसभावसमन्वितम् ।
बुध्यमानः सदर्थं वै यस्यार्थं ज्ञानवान् नृप ।
आश्वयादिषु सर्व्वेषु यस्यार्थेष्वर्पयेन्नृप ।।
य एवं वाचयेदक्षरम् । स विप्रो व्यास उच्यते ।
सप्ताक्षरसमायुक्तं काले काले विधास्यति ।
प्रदर्शयन् रसान् सर्व्वान् वाचयेद्वाचको नृप ॥"
तस्य फलं यथा,—
"चण्डीपाठफलं देवि । शृणुष्व गदतो मम ।
एकावृत्त्यादिपाठानां यथावत् कथयामि ते ॥
सङ्कल्प्य पूर्व्वं सम्पूज्य चण्ड्याद्यैर्मनून् सहस्रम् ।
पाठाद्बलिप्रदानाद्धि सिद्धिमाप्नोति मानवः ॥
उपसर्गोपशान्त्यर्थं त्रिरावृत्तं पठेन्नरः ।
ग्रहोपशान्त्यै कर्त्तव्यं पञ्चावृत्तं वरानने ॥
महाभये समुत्पन्ने सप्तावृत्तमुदीरयेत् ।
नवावृत्त्या भवेच्छान्तिर्वाजपेयफलं लभेत् ॥
राजवश्याय भूत्यै च रुद्रावृत्तमुदीरयेत् ।
अर्कावृत्त्या काम्यसिद्धिर्वैरिहानिश्च जायते ॥
मन्वावृत्त्या रिपुर्वश्यस्तथा स्त्रीवश्यतामियात् ।
सौख्यं पञ्चदशावृत्त्या श्रियमाप्नोति मानवः ॥
कलावृत्त्या पुत्त्रपौत्त्रधनधान्यागमं विदुः ।
राज्ञां भीतिविमोक्षाय वैरस्योच्चाटनाय च ॥
कुर्य्यात् सप्तदशावृत्तं तथाष्टादशकं प्रिये ।।
महाव्रणविमोक्षाय विंशावृत्तं पठेत् सुधीः ॥
पञ्चविंशावर्त्तनात्तु भवेद्बन्धविमोक्षणम् ।
सङ्कटे समनुप्राप्ते दुश्चिकित्स्यामये तथा ॥
जातिध्वंसे कुलोच्छेदे आयुषो नाश आगते ।
वैरिवृद्धौ व्याधिवृद्धौ धननाशे तथा क्षये ।
तथैव त्रिविधोत्पाते तथा चैवातिपातके ।
कुर्य्याद्यत्नात् शतावृत्तिं ततः सम्पद्यते शुभम् ॥
श्रियो वृद्धिः शतावृत्त्या राज्यवृद्धिस्तथापरे ।
मनसा चिन्तितं देवि । सिद्ध्येदष्टोत्तराच्छतात् ॥
शताश्वमेधयज्ञानां फलमाप्नोति सुव्रते ।।
सहस्रावर्त्तनाल्लक्ष्मीरावृणोति स्वयं स्थिरा ।
भुक्त्वा मनोरथान् कामान् नरो मोक्षमवाप्नुयात् ।
यथाश्वमेधः क्रतुराट् देवानाञ्च यथा हरिः ॥
स्तवानामपि सर्व्वेषां तथा सप्तशतीस्तवः ॥
अथवा बहुनोक्तेन किमेतेन वरानने ।।
चण्ड्याः शतावृत्तपाठात् सर्व्वाः सिध्यन्ति
सिद्धयः ॥"

इति सिद्धादितन्त्रम् ॥ * ॥

अथ प्रथमचरितस्य ब्रह्मर्षिर्महाकाली देवता गायत्त्री छन्दो नन्दा शक्ती रक्तदन्तिका बीजम् अग्निस्तत्त्वम् । तत्र महाकाल्या ध्यानं यथा —
"दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ।
विशालया राजमाना त्रिंशल्लोचनमालया ॥
स्फुरद्दशनदंष्ट्राभा भीमरूपापि भूमिप ।
रूपसौभाग्यकान्तीनां सा प्रतिष्ठा महाश्रियः ॥
खड्गबाणगदाशूलशङ्खचक्रभुशुण्डिभृत् ।
परिघं कार्म्मुकं शीर्षं निश्च्योतद्रुधिरं दधौ ।
एषा सा वैष्णवी माया महाकाली दुरत्यया ।
मधुकैटभयोर्युद्धे ध्येया सा तामसी शिवा ॥"

मध्यमचरितस्य विष्णुर्ऋषिर्महालक्ष्मीर्देवता उष्णिक् छन्दः शाकम्भरी शक्तिर्दुर्गा बीजं वायुस्तत्त्वम् । तत्र महालक्ष्म्या ध्यानं यथा —
"श्वेतानना नीलभुजा सुश्वेतस्तनमण्डला ।
रक्तमध्या रक्तपादा नीलजङ्घोरुरुन्मदा ॥
सुचित्रजघना चित्रमाल्याम्बरविभूषणा ।
चित्रानुलेपना कान्ता सर्व्वसौभाग्यशालिनी ।
अष्टादशभुजा पूज्या सा सहस्रभुजा सती ।
आयुधान्यत्र वक्ष्यन्ते दक्षिणाधःकरक्रमात् ।
अक्षमाला च कमलं वाणोऽसिः कुलिशं गदा ॥
चक्रं त्रिशूलं परशुः शङ्खो घण्टा च पाशकम् ।
शक्तिर्दण्डश्चर्म्म चापं पानपात्रं कमण्डलुः ॥
अलङ्कृतभुजामेभिरायुधैः परमेश्वरीम् ।
आसीना स्तुतिकालादौ महिषासुरमर्द्दिनी ॥
इत्येषा राजसी शक्तिः सर्व्वदेवमयी मता ।
यां ध्यात्वा मानवो नित्यं लभेतेप्सितमात्मनः ॥"

उत्तरचरितस्य रुद्र ऋषिः सरस्वती देवता अनुष्टुप् छन्दो भीमा शक्तिर्भ्रामरी बीजं सूर्य्यस्तत्त्वम् । तत्र सरस्वत्या ध्यानं यथा —
"गौरीदेहसमुत्पन्ना या सत्त्वैकगुणाश्रया ।
साक्षात् सरस्वती प्रोक्ता शुम्भासुरनिबर्हिणी ॥
दधौ चाष्टभुजा बाणं मुषलं शूलचक्रकम् ।
शङ्खं घण्टां लाङ्गलञ्च कार्म्मुकञ्च तथा परम् ॥
ध्येया सा स्तुतिकालादौ वधे शुम्भनिशुम्भयोः ॥"

इति कात्यायनीतन्त्रम् ॥

(छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
"सगुमलघुयुगलगैरिति चण्डी ॥")

चण्डीकुसुमं, पुं, (चण्डीप्रीतिजनकं कुसुमं यस्य ।) रक्तकरवीरवृक्षः । इति राजनिर्घण्टः ॥ (विवृतिरस्य करवीरशब्दे बोद्धव्या ॥)

चण्डुः, पुं (चडि + बाहुलकात् उः ।) उन्दुरः । इति शब्दचन्द्रिका ॥

चत, ए ञ याचे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-द्विकं-सेट् ।) ए, अचतीत् । ञ, चतति चतते । इति दुर्गादासः ॥

चतुः, [र्] व्य, चतुर्व्वारम् । इति व्याकरणम् ॥

चतुष्पत्री, स्त्री, (चत्वारि चत्वारि पत्त्राण्यस्याः ।) क्षुद्रपाषाणभेदी । इति राजनिर्घण्टः ॥

चतुष्पर्णी, स्त्री (चत्वारि चत्वारि पर्णानि यस्याः ।) क्षुद्राम्लिका । इति राजनिर्घण्टः ॥

चतुष्फला, स्त्री (चत्वारि फलानि यस्यां यस्या वा ।) नागबला । इति राजनिर्घण्टः ॥

चतुष्पुङ्खः, पुं (चत्वारि पुङ्खानीव यस्य ।) शिखावृक्षः । इति राजनिर्घण्टः ॥

चतुःशालं, क्ली स्त्री (चतसृणां शालानां समाहारः ।) परस्पराभिमुखशालाचतुष्टयम् । चक मिलनवाड़ी इति भाषा । इत्यमरः । २ । २ । ६ ॥ (यथा महाभारते । १ । १४५ । ८ ।
'तत्र गत्वा चतुःशालं गृहं परमसंवृतम् ।")

चतुःशालकं, क्ली (चतुःशाल + स्वार्थे कन् ।) चतुःशालम् । इति शब्दरत्नावली ॥

चतुःषष्टिः, स्त्री, (चतुरधिका षष्टिः ।) चतुरधिकषष्टिसंख्या । चौषट्ट इति भाषा । तत्संख्याका उपविद्या । (चतुःषष्टिकलाभिज्ञा मागधाः ।

"चतुःषष्टिकलानाञ्च विद्यानां पारदृश्वनः ।
कथं हृष्याद्भगवतः कः क्षमो देवमायया ॥")
आगमः । इति मेदिनी । टे । १२ ॥

चतुरः, त्रि, (चत्यते याच्यते इति । चत + "मन्दिवाशिमथिचतिचङ्क्यङ्किभ्य उरच् ।" उणां । १ । ३८ । इत्युरच् ।) कार्य्यक्षमः । निरालस्यः । तत्पर्य्यायः । दक्षः २ पेशलः ३ पटुः ४ उत्थानम् ५ उष्णः ६ । इत्यमरः । ३ । १ । १९ ॥ पेशलः ७ पेयलः ८ इति तट्टीका । निपुणः । इति राजनिर्घण्टः ॥ (यथा, देवीभागवते । १ । १७ । ४४ ।
"चतुरो नैव सङ्कोते मम स्वर्न्नेव सद्भ्ति ॥")
तस्य लक्षणं यथा । चाकचेट्याक्षसमागमः । तत्र चचनस्य समागमो यथा, रसमञ्जर्य्याम् ।
"तमोमटाले हरिदन्तराले
काले निशायामपि निर्गतायाः ।
तटे नदीनां निकटे वनानां
घटेत नालीहदकेन घटाय ॥"
चेष्टायुक्तसमागमो यथा —
"कान्ते कनककाश्मीरं करे कमपि कुर्व्वति ।
अगारलिखिते भानौ विन्दुमिन्दुमुखी ददौ ॥"
(उपभोगक्षमः । यथा, रघुः । ९ । ४७ ।
"श्रयत मानमलं वत विग्रहै
र्न पुनरेति गतं चतुरं वयः ॥"
"चतुरं उपभोगक्षमम् ।" इति तट्टीकायां मल्लिनाथः ॥) नेत्रगोचरः । इति हेमचन्द्रः ॥

चतुरः, पुं, (चत + उरच् ।) चक्राङ्कः । हस्तिशाला । इति हेमचन्द्रः ॥

चतुरक्रमः, पुं, (चतुरः चातुर्य्यान्वितः क्रमः प्रकारो यत्र ।) समधात्यकालगतलक्षकभेदः । यथा—
"द्रुतद्वन्द्वं द्रुतद्वन्द्वं तथा प्रान्ते गुरुभवेत् ।
तालविशारदैरुक्तः प्रकारे चतुरक्रमः ॥"
इति सङ्गीतदामोदरः ॥

चतुरङ्गं, क्ली, (चत्वारि अङ्गानि यस्य ।) हस्त्यश्वरथपदातिरूपं सैन्यम् । यथा रामायणे ।
"चतुरङ्गमपि बलं सुमहत् प्रकल्पयामास ।"
अक्षक्रीडाविशेषः । चौरसेलौ इति भाषा ॥
यथा,—

युधिष्ठिर उवाच ।
"अष्टकोष्ठगता या क्रीडा तां मे ब्रूहि तपोधन ।।
प्रकर्षेणेव मे नाथ चतुरङ्गो यथा भवेत् ॥
व्यास उवाच ।
चतुरो कोष्ठान् समालिख्य प्रदर्शितकमन्तु ।
अरुणं पूर्ब्बतः कृत्वा दक्षिणे हरितं बलम् ॥
पार्श्वे पश्चिमतः पीतमुत्तरे श्यामलं बलम् ।
राज्ञो वामे गजं कुर्य्यात् तदग्रे च तुरङ्गमम् ॥
कुर्य्यात् कौणेऽप्यं पुरतो वुर्ट्टं पतिचतुष्टयम् ।
कोष्ठे नौका द्वितीयेऽश्वस्तृतीये तु गजो भवेत् ॥
तुरीये च स्वर्णमाला वटिका पुरतः स्थिताः ॥
यथदेव घटो राजा चतुष्कोष्ठे कुञ्जरः ॥
तिरश्च तु चरेदश्वः नावः । नौका दिशि तु ॥
कोष्ठैकैकं विसर्ज्जयन् क्रमतो याति भूपतिः ॥

अग्र एव बटी याति बल एकपदकोष्ठकम् ।
यथेष्टं कुञ्जरो याति चतुर्दिक्षु महीपते ॥
तिर्य्यक् तुरङ्गमो याति लङ्घयित्वा त्रिकोष्ठकम् ।
कोणकोष्ठद्वयं लङ्घ्य प्रयाति नौका युधिष्ठिर ॥
सिंहासनं चतूराजी प्राप्नुयात्तु षट्पदम् ।
काककाष्ठं द्वयं नौका नौकालब्धप्रकारकम् ॥
घाताघाते घटी नौका बल हन्ति युधिष्ठिर ।
राजा गजो हयश्चापि भवा घाते निहन्ति च ॥
आक्रम्य स बलं रक्षेत् स राजा बलमुत्तमम् ।
अल्पसारतया पार्थ ! हन्तव्यं बलमुत्तमम् ॥
नौकायाश्चत्वारि पदानि अश्वस्याष्टौ पदानि इत्यादिक्रमश्च ॥
मतङ्गजस्य गर्व्वेण राजा कौतुकं निर्भरम् ।
तस्मात् सर्व्वबलं रक्ष्यं रक्ष कौन्तेय ! कुञ्जरम् ॥
सिंहासनं चतूराजी यदवाप्नोति भवेत् ।
सर्व्वैर्योगैर्बलैरपि रक्षितव्यो महीपते ॥
अप्यनाक्रम्य राजा यदाक्रामति युधिष्ठिर ।
तदा सिंहासनं तस्य भवतीति नृपसत्तम ॥
राजा च नृपतिं हत्वा कुर्य्यात्तु सिंहासनं यदा ।
द्विगुणं दापयेत् पणमप्येकगुणं भवेत् ॥
द्विगुणं पणं दातव्यं तेन प्रापयेत् ॥
मित्रसिंहासनं पार्थ यदारोहति भूपतिः ।
तदा सिंहासनं नाम सर्व्वं भवति तद्वनम् ॥
यदा सिंहासनं कर्त्तुं राजा सप्तपदान्वितः ।
तदा घातेऽपि हन्तव्यो बलेनापि सुरक्षितः ॥
विद्यमाने नृपे यत्र स्वकीये च नृपद्वयम् ।
प्राप्नोति च तदा तस्य चतूराजी यदा भवेत् ॥
नृपस्यैव नृपं हत्वा चतूराजी यदा भवेत् ।
द्विगुणं दापयेत् पणमप्येकगुणं भवेत् ॥
कुपथस्य यदा राजा राजानं हन्ति पार्थिव ।
चतुरङ्गे तदा भूप ! दापयेच्च चतुर्गुणम् ॥
यदा सिंहासने काले चतूराजी समुत्थिता ।
चतूराजी भवत्येव न तु सिंहासनं नृप ! ॥
अयमेव बीज उभयथा नयेऽपि परसिंहासनाधिकारात् परराजवधे प्रौर्य्याधिक्यनिष्कण्टकत्व दर्शनात् । नौकायामपि तथा कल्पते ॥ ● ॥
राजद्वयं यदा हस्ते आत्मनो राज्ञि संस्थिते ।
परेण शङ्कयैकौ वधेनाप्यपहार्य्यते ॥
राजद्वयं यदा हस्ते न स्यादन्यकरे परः ।
तदा राजा हि राजानं घातेऽपि न हनिष्यति ॥
कृपाकष्टे यदा राजा गमिष्यति युधिष्ठिर ।
घाताघातेऽपि हन्तव्यो राजा तत्र न रक्षकः ॥
कोणं राजपदं प्राप्ता घटिकाले यदा भवेत् ।
घटी भवेत् पदे नाम तदा कोष्ठक च घटः ॥
यदि तस्य भवेत् पाय । चतूराजी च घटपदम् ।
तथापि च चतूराजी भवत्येव न संशयः ॥
पदाति घतपदं विद्धि राजा वा हस्तिना तथा ।
घटपदं न भवेत्तस्य स्थयम स्मृत पार्थिव ॥
समस्ते कोष्ठके या स्यात् घटिका दर्शन वै ।
तदाप्येषस्य नतथा सुराय दुर्म्मल वणम् ॥
त्रिघटीकास्य कौन्तेय । पुरुषस्य कदाचन ।
इदम् न भवतीद इति गौतमभाषितम् ॥

नौकैषा घटिका यस्य विद्यते खेलने यदि ।
गाढाघटीति विख्याता पदं तस्य न दुष्यति ॥
गाढाघाख्यापदं राजपदं कोणपदस्थ तत् ।
हस्ते रङ्गे बल नास्ति काककाष्ठं तदा भवेत् ॥
पदन्ति राजसाः सर्व्वे तस्य न क्वो जयाजयौ ।
प्राथिते प्रथमे राज्ञि हतवश्चाप घटपदे ॥
यथैव स्यात्तथा राजन् ! चलित्वा चालित परम् ।
द्विरावृत्त्या गतौ तस्मादन्यात् परबल जयी ॥
सिंहासनं भवत्येव काककाष्ठं न भण्यते ॥
उपविष्ट यत् स्थान तस्योपरि चतुष्टये ।
नौकाचतुष्टयं यत्र क्रियते यस्य नौकया ॥
नौकाचतुष्टयं तत्र वृहन्नौकेति भण्यते ।
न कुर्य्यादेकदा राजन् ! गजस्याभिमुखं गमम् ॥
यदि कुर्व्वीत धर्म्मज्ञ ! पापयुक्तो भविष्यति ।
स्थानाभावे यदा पार्थ ! हस्तिनं हस्तिसम्मुखम् ॥
करिष्यति तदा राजन्निति गौतमभाषितम् ।
प्रागे गजद्वये राजन् ! दक्षिणो वामतो गजः ॥”
इति तिथ्यादितत्त्वे चतुरङ्गक्रीडनम् ॥

चतुरङ्गा, स्त्री (चत्वारि अङ्गानि यस्याः ।) घोटिकाश्वः । इति राजनिर्घण्टः ॥

चतुरङ्गिणी, स्त्री, (चत्वारि अङ्गानि हस्त्यश्वरथपदातयः सन्त्यस्यामिति । चतुरङ्ग + इनि ।) चतुरङ्गसेना । इति रामायणम् ॥ (यथा, महाभारते । १ । ७१ । २ ।
“निवर्त्तयिष्ये सवाधाय वाहिनीं चतुरङ्गिणीम् ॥”)

चतुरङ्गुल, पुं, (चतस्रः अङ्गुलयः परिमाणमस्य । समासे अच् ।) आरग्वधवृक्षः । इत्यमरः । २ । ४ । २१ ॥ (यथा सुश्रुते सूत्रस्थाने ४४ अध्याये ।
“विरेचनानि सर्व्वाणि विधिवाच्चतुरङ्गुलात् ॥”)
चतुरङ्गुलिपरिमिते त्रि ॥ (यथा, शतपथब्राह्मणे । १० । २ । २ । १ ।
“स चतुरङ्गुलमेवोभयतोऽन्तत उपगूहति ॥”)

चतुरम्ल क्ली, (चतुर्णां अम्लानां समाहारः ।) चतुर्व्विधाम्लद्रव्यम् । यथा, भावप्रकाशे ।
“अम्लवेतसवृक्षाम्लबृहज्जम्बीरनिम्बुकैः ।
चतुरम्लं हि पञ्चाम्लं बीजपूरयुतैर्भवेत् ॥”

चतुरस्र, त्रि, (चतस्रोऽश्रयोऽस्य । “अचतुरविचतुर” इत्यादिनेति । ” ५ । ४ । ७७ । इति अच्प्रत्ययेन निपातितः ।) चतुष्कोणः । यथा —
“चतुरस्रं त्रिकोणं वा वर्त्तुलं चार्द्धचन्द्रकम् ।
कर्त्तव्यमानुपूर्व्व्येण ब्राह्मणादिषु मण्डलम् ॥”
इत्याह्निकतत्त्वे बौधायनः ॥
तस्याश्चतुर्थोऽष्टलक्षणम् । इति दीपिका ॥

चतुराश्रम पुं (चत्वारि आश्रमाणि सुखानि यस्य ।) ब्रह्मा । इत्यमरः । १ । १ । १६ ॥ तस्य चतुराननत्वे कारणं यथा,—
“ततः स चाम्भोरुहकर्णिकाया-
मवस्थितो लोकमपश्यमानः ।
परिक्रमन् व्योम्नि विवृत्तनेत्र-
श्चत्वारि लेभेऽनुदिशं मुखानि ॥”

इति श्रीभागवते । ३ । ८ । १५ ॥ (यथा,—
“इतरतापशतानि यथेच्छया
वितर तानि सहे चतुरानन ! ।
अरसिकेषु रसस्य निवेदनं
शिरसि मा लिख मा लिख मा लिख ॥”
इत्युद्भटः ॥)

चतुरूषण क्ली (चतुर्णां ऊषणानां समाहारः ।) पिप्पलीमूलसहितत्रिकटु । यथा भावप्रकाशे ।
“त्र्यूषणं सकणामूलं कथितं चतुरूषणम् ।
व्योषस्येव गुणाः प्रोक्ता अधिकाश्चतुरूषणे ॥”

चतुर्गति, पुं, (चतुर्भिर्गतिरस्य ।) कच्छपः । इति हेमचन्द्रः । ४ । ४१५ ॥ (चतुर्णां आश्रमाणां वर्णानां ब्राह्मणादीनां यथोक्तकारिणां गतिराश्रयः । विष्णुः । यथा, महाभारते । १३ । १४९ । ९५ ।
“चतुर्मूर्त्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ॥”)

चतुर्थ त्रि, चतुर्णां पूरणः । (“तस्य पूरणे डट् ।” ५ । २ । ४८ । इति डट् । ततः “षट्कतिकतिपयचतुरां थुक् ।” ५ । २ । ५१ । इति थुक् ।) चतुःसंख्यापूरणः । इति मुग्धबोधम् । चौठा इत्यादि भाषा ॥

चतुर्थांश, पुं, (चतुर्थं अंशः ।) चतुर्भागैकभागः । तत्पर्य्यायः । तुरीयः २ पादः ३ । इति राजनिर्घण्टः ॥ (चतुर्थः अंशो यस्य । चतुर्थांशभागिनि त्रि । यथा, मनुः । ८ । २१० ।
“तृतीयिनस्तृतीयांशाश्चतुर्थांशाश्च पादिनः ॥”)

चतुर्थिका, स्त्री, पलपरिमाणम् । इति वैद्यकपरिभाषा ॥

चतुर्थी स्त्री, (चतुर्णां पूरणी । “तस्य पूरणे डट् ।” ५ । २ । ४८ । इति डट् । ततः “षट्कतिकतिपयचतुरां थुक् ।” ५ । २ । ५१ । इति थुक् । ततष्टित्त्वात् ङीप् ।) तिथिविशेषः । सा तु चन्द्रस्य चतुर्थकलाक्रियारूपा । इति स्मृतिः । (चतुर्थी तु पञ्चमीयुता ग्राह्या । “युग्माग्नि-कृतभूतानि ।” इति युग्मवचनात् तथा,—
“एकादश्यष्टमी षष्ठी अमावास्या चतुर्थिका ।
उपोष्याः परसंयुक्ता नराः पूर्व्वेण संयुताः ॥”
इत्यग्निपुराणवचनात् ॥
भविष्ये,—
“अमा वै सोमवारेण रविवारेण सप्तमी ।
चतुर्थी भौमवारेण अक्षयादपि चाक्षया ॥
यत्तु —
‘चतुर्थीसंयुता कार्य्या तृतीया च चतुर्थिका ।
तृतीयया युता नैव पञ्चम्या कारयेत् क्वचित् ॥’
इति ब्रह्मवैवर्त्तवचनं पञ्चमीयुतानिषेधकं तद् विनायकव्रतपरमिति युक्तम् । तृतीयायुता विहितकर्म्म क्वचिदिच्छुपवासे कर्म्मणैव पञ्चमीयुताया ग्रहणात् । वारस्यादिवचनेऽस्मात् ।
‘कर्य्योदशावतुर्थीष द्रवन्मा द्वादश्योरपि ।
प्रदोषेऽध्ययन धीमान् न कुर्व्वीत यथाक्रमम् ।
आरभ्यते ग्रामयत श्रौतम् वैध्यवत्या ॥
प्रदोषश्चन्द्रोऽत्र प्रथमप्रहर इति स्मार्त्तः ।

रात्रिपरं इति निर्णयामृतकृद्भोजदेवः ।
'शुक्लपक्षे चतुर्थ्यान्तु सिंहे चन्द्रस्य दर्शनम् ।
मिथ्याभिशापं कुरुते न पश्येत्तत्र तं ततः ॥
चतुर्थ्यां दर्शननिषेधात् तत्रोदितस्य चन्द्रस्य पञ्चम्यां दर्शने तु न दोषः । अतः,—
'पञ्चाननगते भानौ पक्षयोरुभयोरपि ।
चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन ॥
दैवात् प्रमादाद्वा दर्शने तु ।
"सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक ! मा रोदीस्तव ह्येष स्यमन्तकः ॥"
अनेन मन्त्रेणाभिमन्त्रितं जलं पेयं श्रावणात् स्यमन्तकोपाख्यानञ्च श्रोतव्यम् । माघमासस्य शुक्लचतुर्थ्यां गौरी पूजनीया । यथा, भविष्योत्तरे माघशुक्लपक्षमधिकृत्य,—
"चतुर्थी वरदा नाम तस्यां गौरी सुपूजिता ।
सौभाग्यमतुलं कुर्य्यात् पञ्चम्यां श्रीरपि श्रियम् ॥"
इति तिथ्यादितत्त्वम् ॥)
तत्र जातस्य फलं यथा कोष्ठीप्रदीपे ।
"शत्रुप्रमित्रप्रमदाप्रमोदी
द्यूताभिलाषी तपसा समेतः ।
विवादशीलो विजयी विवादे
भवेच्चतुर्थीप्रभवः कठोरः ॥"
चतुर्द्दन्त, पुं, (चत्वारो दन्ता यस्य ।) ऐरावतहस्ती । इति हेमचन्द्रः । २ । ८९ ॥ (स्वनामख्यातः पञ्चतन्त्रोक्तगजविशेषः । यथा पञ्चतन्त्रे । ३ । ८ । "कस्मिंश्चिद्वनोद्देशे चतुर्द्दन्तो नाम महागजो यूथाधिपः प्रतिवसति स्म ॥")
चतुर्द्दश, [न्] त्रि, चतुरधिका दश । चौद्द इति भाषा । इति ज्योतिषम् ॥ (यथा, नैषधे । १ । ४ ।
"अधीतिबोधाचरणप्रचारणै-
र्दशाश्चतस्रः प्रणयन्नुपाधिभिः ।
चतुर्द्दशत्वं कृतवान् कुतः स्वयं
न वेद्मि विद्यासु चतुर्द्दशस्वयम् ॥"
चतुर्द्दशानां पूरणः । "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् ।) पूरणार्थे अकारान्तोऽयं शब्दः ॥ (यथा श्रीरामायणे । २ । ११२ । २५ ।
"चतुर्द्दशे हि सम्पूर्णे वर्षेऽहनि रघूत्तम ! ।
न द्रक्ष्यामि यदि त्वान्तु प्रवेक्ष्यामि हुताशनम् ॥")
तद्वाचकानि । विद्या १ यम २ मनु ३ इन्द्र ४ भुवनम् ५ ध्रुवतारकम् ६ । इति कविकल्पलता ॥
चतुर्द्दशी, स्त्री, (चतुर्द्दश + टित्वात् ङीप् ।) तिथिविशेषः । सा तु चन्द्रस्य चतुर्द्दशकलाक्रियारूपा । तत्पर्य्यायः । भूता २ । इति तिथ्यादितत्त्वम् ॥ ("सा च शुक्ला पूर्व्वविद्धा ग्राह्या कृष्णा तु परविद्धा पूर्व्वयुता ।
"शुक्लपक्षेऽष्टमी चैव शुक्लपक्षे चतुर्द्दशी ।
पूर्व्वविद्धैव कर्त्तव्या परविद्धा न कुत्रचित् ।
उपवासादिकार्य्येषु एष धर्म्मः सनातनः ॥
इति निगमवचनात् अपराह्णव्यापित्वे तु शुक्लचतुर्द्दश्यपि पूर्व्वविद्धा ग्राह्या
'चतुर्द्दशी तु कर्त्तव्या त्रयोदश्या युता विभो ! ।
मम भक्तैर्महाबाहो ! भवेद्या पापघातिनी ।
दर्शविद्धा न कर्त्तव्या राकाविद्धा तथा मुने ॥
इति स्कन्दपुराणात मम भक्तैरिति ईश्वरोक्तिः शिवव्रतविषयम् । त्रयोदश्यां दिवातनमुहूर्त्तचतुर्द्दशीलाभे तु पद्मपुराणम् ।
'एकादश्यष्टमी षष्ठी उभे पक्षे चतुर्द्दशी ।
अमावास्या तृतीया च उपोष्याः स्युः परान्विताः ॥
एतद्विषयं च ।
'शिवा घोरा तथा प्रेता सावित्री च चतुर्द्दशी ।
कुहूयुक्तैव कर्त्तव्या कुर्य्यात्तेन हि पारणम् ॥
इति वचनम् ।" इति च तिथ्यादितत्त्वम् ॥)
तत्र जातस्य फलं यथा कोष्ठीप्रदीपे ।
"विरुद्धशीलः पुरुषः सरोषः
चौरः कठोरः परवञ्चकश्च ।
पराम्नभोक्ता परदारचित्तः
चतुर्द्दशी चेत् जननस्य काले ॥"
मासविशेषे तत्र कर्म्माणि यथा । ज्यैष्ठस्य चतुर्द्दश्यां क्षौरकर्म्मकथाविघ्नादिदेवतापूजा सावित्रीपूजा च । भाद्रशुक्लचतुर्द्दश्यां अनन्तपूजा चतुर्द्दशपिष्टकभक्षणं डोरकबन्धनञ्च । कार्त्तिककृष्णचतुर्द्दश्यां चतुर्द्दशशाकभक्षणं चतुर्द्दशदीपदानं यमतर्पणञ्च । अग्रहायणशुक्लचतुर्द्दश्यां गौरीपूजा पाषाणाकारपिष्टकभक्षणञ्च । माघकृष्णपक्षे रटन्त्याख्यचतुर्द्दश्यां कालीपूजा अरुणोदये स्नानञ्च । फाल्गुनकृष्णपक्षे शिवरात्राख्यचतुर्द्दश्यामुपवासः शिवपूजा च । चैत्रशुक्लपक्षे मदनचतुर्द्दश्यां मदनवृक्षपत्रेण कामदेवपूजा । इति स्मृतिः ॥
चतुर्द्दोल, क्ली, पुं, (चतुर्भिर्वाहकैर्दोल्यते उत्क्षिप्य नीयते उह्यते इति यावत् । दोलि + कर्म्मणि घञ् । यद्वा चतुर्भिरङ्कैरुपलक्षितं दोलं दोलायमानयानविशेषः ।) स्वनामख्यातयानविशेषः । यथा —
"राज्ञो यद्विमदं यानं विशेषात्कमलं विदुः ।
चतुर्भिरुह्यते यत्तु चतुर्द्दोलं तदुच्यते ॥
भोजस्तु ।
चतुर्भिर्वाहकैरूढं षड्भिः कुम्भैः सुशोभितम् ।
सभीरदाभिवदितं चतुर्द्दोलमनुत्तमम् ॥
तद्भेदा जयकल्याणवीरसिंहा यथाक्रमम् ।
चतुर्ण्णिधानां भूपानां चतुर्द्दोलाः प्रकाशिताः ।
भिन्नहस्तमितायामो द्विहस्तपरिणाहवान् ।
बकाङ्गयोमतः प्रोक्तश्चतुर्द्दोलो जयाह्वयः ॥
चतुर्हस्तायतो यस्तु सार्द्धहस्तद्वयः परः ।
चतुर्द्दोलः समाख्यातः कल्याणस्तारकुमतः ॥
पञ्चहस्तायतो यस्तु त्रिहस्तपरिणाहवान् ।
तावत्प्रोक्तो वीरश्चतुर्द्दोल उदाहृतः ॥
आयामपरिणाहाभ्यां चतुर्हस्तमितो हि यः ।
चतुर्द्दोलो हर्षं त्रिहस्तर्द्धैरुदितः शुभः ॥
कर्म्मणैव द्विविधः प्रोक्तः उभयदिशापि निम्नदिक्
मात् समरवनाद् परः कीर्त्तिवर्द्धये ॥
कर्म्मणाभेव काञ्चनो एकः स्यादुभयाश्रयः ।
चन्द्रकैश्चैव षड्भा वर्ण्णयातसमुच्यते ॥
लौहश्च सर्व्वदर्श्वेषु कनकं सर्व्वधातुषु ।
कुम्भश्च पद्मकोषश्च गिरिश्चेति यथाक्रमम् ॥
भेदेषु चतुर्णां महीन्द्राणां चतुर्द्दोलेषु विन्यसेत् ।
दर्पणस्याङ्कचन्द्रश्च हंसः केकी शुको गजः ।
एषां सिंहश्च तस्याग्रे आदित्यादिदिशोत्तराम् ॥
मणिनियमस्तु दण्डवत् ॥
रक्तं शुक्लञ्च पीतञ्च कृष्णञ्च नवधारकम् ।
नीलं कपिलं रक्तमुक्तं पताकानान्तु सञ्चयः ॥
चतुर्द्दोलं सपताकं शुभयानमिति स्मृतम् ।
सुक्तास्तवकैर्द्दशभिर्युक्तं स्यान्नायकेशानाम् ।
चामरदण्डैर्द्दशभिर्दिग्जयिनां चतुर्द्दोलं ॥
चामरदण्डस्य पुच्छकेण सर्व्वोपरि परिन्यसेत् ।
यात्रामिदिहरय नाम्ना चतुर्द्दोलो महीभुजाम्
सम्भवादारहितो निष्करित्तश्चतुर्द्दोलं नाम
पूर्व्ववत् ॥
स पुनर्द्विविधः प्रोक्तः सध्वजध्वजनिर्भरः ।
ध्वजाग्रं मध्यं ग्रस्तमि मङ्गलविन्यैर्मितः ॥
तेषां मानन्तु चत्वारः सार्द्धहस्तैकसम्मिताः ।
कोणेषु चतुरश्च हस्तद्वयमितौ ध्वजौ ॥
सुवर्णं रजतं शुभ्रं चिविधानां महीभुजाम् ।
मणिमामरकुम्भानां सङ्गादीनां विनिश्चयः ॥
चतुर्द्दोलध्वजे राज्ञां विशेषो नवदण्डवत् ।
निर्ध्वजे च चतुर्द्दोले मानमन्यतमं शृणु ॥
आयामपरिणाहाभ्यां चतुर्हस्तमितो हि यः ।
विजयो नाम विख्यातश्चतुर्द्दोलो महीभुजाम् ॥
विजयो मङ्गलो भव्यो वितर्द्धैकैकवर्द्धितः ।
चिविधानां महीन्द्राणां यानत्रयमुदाहृतम् ॥
अष्टाभिरुह्यते यत्तु अष्टदोलमथापि च ।
सोपानद्वितयश्चात्र विशेष शिल्पिनिर्म्मितम् ॥
भोजस्तु ।
अष्टाभिर्वाहकैरूढं षड्भिस्तु दशभिर्घटैः ।
सम्भेस्तु दशभिर्युक्तमष्टदोलं महीभुजाम् ॥
तद्भेदा जयकल्याणवीरसिंहा यथाक्रमम् ।
चतुर्णिधानां भूपानामष्टदोलाः प्रकाशिताः ॥
षड्भिर्हस्तैर्मितायामं परिणाहचतुर्भुजं ।
चतुर्द्दशोन्नतो राज्ञामष्टदोलं जयं विदुः ॥
आयामपरिणाहाभ्यां पञ्चहस्तमितो हि यः ।
कल्याणाख्योऽष्टदोलोऽयं चतुर्हस्तमितोऽपि ॥
कनकस्तापनः कार्य्ये प्रवरं पञ्चदण्डकः ।
पञ्चदोलकमतो वीरश्चाष्टदोलो महीभुजाम् ॥
आयामपरिणाहाभ्यामष्टहस्तमितो हि यः ।
सिंहाख्योऽष्टदोलोऽयं विशेषं ... रुक्मोन्नतः ॥
... द्विविधं ... ... निर्द्दिष्टः ।
काञ्चनप्रवरादीनां मणीनां चामरस्य च ।
चतुर्द्दोलवदुद्दिष्टा नियमोऽष्टाधि रारभि ।
पूर्व्ववन्निर्द्दिशमाने भज्यमाने प्रदायते ।
दशभिर्वाहकैर्यान्ती स्वामिहस्तमितोन्नता ।
पञ्चारत्ने भवो राजचतुर्हस्तमितो मतः ।
मणिचामरदण्डानां नियमो निमतावत् ।
निम्नवचादनेनो न द्विविधेति न क्षतं ।
मणिकुम्भसुधादीनां नियमो ... ।
इति युक्तिकल्पतरुः ॥

एवं द्वादशषोडशविंशतिदोलादिका कार्य्या ।
मानं वाहेद्विगुणं सार्द्धत्रिगुणमिति युक्तमेतेषाम् ॥
विमानदोलात् परतः भोजनत सम्भवेद्यानम् ।
यानं चक्रयुतोऽश्व चक्रयुगमराश्वगा वै यास ॥
भविष्योत्तरेऽपि ।
यद्युक्त हैमर यान सम भानेन यो नृप ।
स्यान कुरुते दिव स चिर सुखमश्नुते ॥
अयोगयुक्तधान्यो भोगमाप्नोति मानव ।
परयौगिकयानस्य स्वर्गमाप्नोति पुष्कलम् ॥
यो दम्भात्पवनाशानाद्यानं प्रकुरुतेऽन्यथा ।
नश्यन्ति विनश्यन्ति चायुर्विद्या यशो धनम् ॥
प्रधान यानमाचिन्त्य नियमोऽयं समाश्रित ।
नाप्रधाने नियमोऽस्ति तस्मिन्नस्तु मनोरथा ॥"
इति युक्तिकल्पतरु ॥

चतुर्धा अ, (चतु प्रकारमिति । "धाच् प्रकारे ।" इति मुग्धबोधसूत्रेण धाच ।) चतुःप्रकारम् । चारिप्रकार इति भाषा । इति व्याकरणम् ॥ (यथा, भागवते । ३ । २६ । १४ ।
"मनोबुद्धिरहङ्कारश्चित्तमित्यन्तरात्मकम् ।
चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया ॥")

चतुर्बीज, क्ली (चतुर्णां बीजानां समाहार ।) मेथिका चन्द्रशूर कालाजाजी यवानिका एत चतुष्टयं मिलितम् । तच्चूर्णं नित्यभक्षयत्युक्त । पवनामयजीर्णशूलाध्मानपार्श्वशूलकटिव्यथा-नाशित्वम् । इति भावप्रकाश ॥

चतुर्भद्र, क्ली, (चत्वारि भद्राणि यत्र द्वन्द्वे । यद्वा, चतुर्णां धर्मार्थकाममोक्षरूपकाणां भद्राणां श्रेयसां समाहार ।) सकलधर्मार्थकाममोक्षम् । इत्यमर । ३ । ५ । ५८ । अन्यताधिकशक्ति धर्मार्थकाममोक्षम् । इति तट्टीकासारसुन्दरी ॥ (तत्तच्चतुष्टयगुणयुक्ते त्रि । यथा, महाभारते । ७ । ६२ । १० ।
"स चेन्ममार सृञ्जय । चतुर्भद्रतरस्त्वया ।
पुत्रात् पुण्यतरस्तुभ्य मा पुत्रमनुतप्यथा ॥")

चतुर्भुज, पुं, (चत्वारो भुजा यस्य ।) विष्णु । इत्यमर । १ । १ । २० ॥ (यथा, देवीभागवते । १ । ७ । ५ ।
"विष्णु प्रबोधयाम्यद्य पीठे शुभ्र चतुर्भुजम् ।
चतुर्भुज महावीर्य्यं युद्धधी स भविष्यति ॥"
रसौषधविशेष । यथा,—
'रससिन्दूरस्य भागौ द्वौ भागैकं हेमभस्मकम् ।
एकभागं शिलाकर्पूरं रत्नाकरत्रमथितम् ।
रत्नशिलाकर्पूरं कस्तूरिकं रसमर्द्दितम् ।
हेमपत्रं स्वर्णपत्रं रजतपत्रं तु सर्वदा ॥
सप्ताहं तद्वत् क्षीरम् यश्चत्र दीपयेत ।
एतद्रसायनवरं त्रिफलामधुमर्द्दितम् ॥
सदूपपायिनर्श क्षारेदूबलीपलितनाशनम् ।
अपस्मारे ज्वरे कासे शोषे मन्दानले क्षये ॥
कृतकर्म्मे शिरःकम्पे गात्रकम्पे विशेषत ।
वातपित्तसमुत्थांश्च कफजं नाशयेद्ध्रुवम् ॥
सर्वौषधिप्रयोगैर्ये व्याधयो न निवर्त्तिता ।
क्रमादिः चतुर्भिरेव योगपिदम्बराश्रव ॥
चतुर्भुजो रसो नाम महेशेन प्रकाशित ।
क्रमेण ग्रन्थिल हन्ति वृक्षमिन्द्राशनिर्यथा ॥"
इति चतुर्भुजो रस ॥
इति वैद्यकरसेन्द्रसारसंग्रहे उन्मादाद्यधिकारे ॥
स्त्रियां शाखोषधा महाशक्ति । यथा, देवीभागवते । १२ । ६ । ४० ।
"चतुर्भुजा चारुन्नता चातुरी चरितप्रदा ॥"
चतुर्भुजविशिष्टे त्रि । यथा, देवीभागवते । १ । १५ । ५६ ।
'तदा प्रादुरभूद्देवी भगवती प्रादुरास चतुर्भुजा ।
शङ्खचक्रगदापद्मवरायुधधरा शिवा ॥")

चतुर्मुख पु, (चत्वारि मुखानि यस्य । यद्वा चत्वारो वेदाश्चत्वारि मुखाग्रगोचारस्य ।) ब्रह्मा । इति शब्दरत्नावली ॥ (यथा, रघु । १ । २९ ।
"चतुर्वर्गफल ज्ञान कालावस्थाश्चतुर्युगा ।
चतुर्वर्णमयो लोकस्त्वत्त सर्वं चतुर्मुखात ॥'
"सर्व चतुर्मुखात चतुर्मुखरूपिणस्त्वत्त जात मिति शेष ।" इति तट्टीकायां मल्लिनाथ ॥
शिव । यथा, महाभारते । १३ । १७ । ७६ ।
"चतुर्मुखो महालिङ्गश्चारुलिङ्गस्तथैव च ।')
औषधविशेष । यथा —
"रसगन्धकलौहाभ्रं समं सताप्ति हेम च ।
सर्व्वं चूर्णतवे शिम्बा कन्यारसविमर्द्दितम् ॥
एरण्डपत्रैरावेष्ट्य धान्यराशौ दिनत्रयम ।
संस्थाप्य तत उद्धृत्य सर्वरोगेषु योजयेत् ॥
एतद्रसायनवरं त्रिफलामधुसङ्गतम् ।
सद्रूपधातुमिश्र स्यादत् वलीपलितनाशनम् ॥
क्षयकासान्प्रविध कार्य भवविधमथा ।
कुष्ठमष्टान्प्रविध पाण्डुरोगान् प्रमेहकान् ॥
शूल श्वासञ्च हिक्काञ्च मन्दाग्नि चाम्लपित्तकम् ।
सर्वान् सर्व्वानाढवात विषम विद्रधिस्तथा ॥
अपस्मारग्रहोन्मादान् सर्वार्शांसि विनाशयेत् ।
क्रमेण शीलित हन्ति वृक्षमिन्द्राशनिर्यथा ॥
पौष्टिक बलमायुष्य पुत्रप्रसवकारणम् ।
चतुर्मुखोऽयं इत्येव लक्ष्मीकेयस्य सूचितम् ॥"
इति प्रयोगामृते चतुर्मुखरस ॥
(औषधान्तर यथा —
"स्वर्ण हूत भ्रजं स्वर्णं द्वाभ्यां तुल्या मनःशिला ।
विमर्द्दितश्च हैयत्र चालमोसमयन च ॥
तक्षोन चणसो वद्धा ग्रसयवमर्यच्चेत ।
अस्त्रपक्वकल्केन पोतायन्त्रे पाच पचेत ॥
उद्धृत्य मारयेद्रुक्तं निखास्य्मारोगहृत ॥'
इति चतुर्मुखो रस ॥
इति वैद्यकरसेन्द्रसारसंग्रहे ग्रहरोगाधिकार ॥)

चतुर्युग, क्ली चतुर्णां युगानां समाहार । इति व्याकरणसारटीका च । (चत्वारि युगानि यत्र इति विग्रहे चतुर्युगविशिष्टे, त्रि । यथा, रघौ । १ । २९ ।
"चतुर्वर्गफल ज्ञानं कालावस्थाश्चतुर्युगा ॥"
"चत्वारि युगानि कृतत्रेतादीनि यासु ता चतुर्युगा कालावस्था कालपरिमाणम् ।" इति तट्टीकायां मल्लिनाथ ॥)

चतुर्वक्त्र, पु, (चत्वारि वक्त्राणि यस्य यद्वा चत्वारो वेदा एव वक्त्राणि मुखानीवास्य ।) ब्रह्मा । इति हलायुध ॥

चतुर्वर्ग, पुं (चतुर्णां धर्मार्थकाममोक्षाणां वर्ग समूह ।) धर्मार्थकाममोक्षम् । इत्यमर । ३ । ५ । ५८ ॥ (यथा, रघौ । १ । २९ ।
"चतुर्वर्गफल ज्ञान कालावस्थाश्चतुर्युगा ।")

चतुर्विद्य पुं (चतस्रो विद्या अधीयानिति । यद्वा । ५ । १ । ३१ । इत्यस्य वचनस्य वार्त्तिकोक्त यथा, "चतुर्वेदस्याभयपदवृद्धिश्च । चतुरो वेदानधीते चतुर्वेद स एव चातुर्वेद्य । चतुर्विद्यमिति पाठान्तरम् । चतुर्विद्य एव चातुर्वैद्य ।") चतुर्वेदवेत्ता । तस्य पर्यायान्तराणि । चतुर्वेद । चातुर्वैद्य । चातुर्वेद । इति व्याकरणम् ॥

चतुल, त्रि, (चत + उलच् ।) स्थापयिता । इति संक्षिप्तसारे उणादिवृत्ति ॥

चतुष्क, क्ली (चत्वारोऽवयवा यस्य तत् कन् । चतुष्कं चतुरवयवम् । यथा मनु । ७ । ५० ।
"पानमक्षा स्त्रियश्चैव मृगया च यथाक्रमम् ।
एतत् कष्टतमं विद्याच्चतुष्कं कामजे गणे ॥"
गृहविशेष । यथा, कुमारे । ५ । ६८ ।
"चतुष्कपुष्पप्रकरावकीर्णयो
परोऽपि को नाम तवानुमन्यते ।")
चत्वर । इति शब्दरत्नावली ॥
(पुंलिङ्गस्तु राजविशेष । यथा, राजतरङ्गिण्याम् । ८ । २८९८ ।
"अथ योऽज्ञायहिर्य्याभूच्चतुष्क कोटकाश्रय ।")

चतुष्की स्त्री, (चतुष्क + स्त्रियां ङीप् ।) मशहरी । मशारि इति भाषा । पुष्करिणीभेद । इति मेदिनी । के । ८७ ॥

चतुष्टय, क्ली, चत्वरम् । इति शीलकण्ठव्याकरणम् ॥ (चत सङ्ख्या । यथा, कुमारे । ७ । १३ ।
"तस्या प्रदेशाच्च वितानवन्तं
युक्तं मणिस्तम्भचतुष्टयेन ॥"
चत्वारोऽवयवा यस्य । "संख्याया अवयवे तयप ।" ५ । २ । ४२ । इति तयप । अतो रेफस्य विसर्गो षत्वे च कृते "ह्रस्वात्तादौ तद्धिते ।" ८ । ३ । १०१ । इति षत्वम् ।) चतुरवयव त्रि । इति मुग्धबोधम् । (यथा मनु । ८ । १६ ।
"अथमपि यदा लोकानिमदोहैर्न मन्यते ।
सर्वेषु सर्वमधोक्त ग्रन्थीष चतुष्टयम् ॥"
यथा च, कुमारे । २ । १७ ।
' प्रवर्तितदीर्घकल्पानां वाणीनां चतुष्टयी ।")

चतुष्पथ क्ली, (चतुर्णां पथां समाहार । "तद्धितार्थेति ।" २ । १ । ५१ । इति समास । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति अ । "दुद्रुमधस्येति ।" ८ । ४ । ३९ । इति षत्वम् । यद्वा, चत्वारः पन्थानो यत्र इति ।) एकत्र मिलितपथचतुष्टयम् । चौमाथा पथ इति भाषा । तत्पर्याय । शृङ्गाटकम् २ । इत्य

रः । २ । १ । १७ । (यथा, मनु । ४ । ३९ ।
"मृद्गां दैवतं विप्रं घृतं मधु चतुष्पथम् ।
प्रदक्षिणानि कुर्व्वीत प्रज्ञातांश्च वनस्पतीन् ॥")

चतुष्पथः पुं (चत्वारः पन्थानो ब्रह्मचर्य्याद्या-श्रमा यस्य । "ऋक्पूरिति ।" ५ । ४ । ७४ । इति अः ।) ब्राह्मणः । इति मेदिनी । थे २७ ॥

चतुष्पदः पुं (चत्वारि पदानि यस्य ।) पशुः । (यथा बृहत्संहितायाम् । ८१ । १७ ।
"तरवश्च निरुपदष्टाङ्कुरा नरचतुष्पदा हृष्टाः ॥")
करणविशेषः । इति मेदिनी । दे । ४८ ॥ अत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"चतुष्पदभवो मर्त्यः सदाचारविवर्जितः ।
स्वल्पवित्तः क्षीणदेहश्चतुष्पाद्धनान्वितः ॥"
"मेषवृषसिंहराश्यः मकरपूर्व्वार्द्धं धनुः परार्द्धश्च ।"
इति दीपिका ॥
(चतुष्पदविशिष्टे । त्रि । यथा, महाभारते । १ । ९ । ११ ।
"चतुष्पदं द्विपदञ्चापि सर्व्वमेवं भूता गर्भभूता भवन्ति ॥"
व्याधिनिवारणोपायाः । यथा —
'वैद्यो व्याध्युपसृष्टश्च भेषजं परिचारकः ।
एते पादाश्चिकित्सायाः कर्म्मसाधनहेतवः ॥
गुणवद्भिस्त्रिभिः पादैश्चतुर्थो गुणवान् भिषक् ।
व्याधिमल्पेन कालेन महान्तमपि साधयेत् ॥
वैद्यहीनास्त्रयः पादा गुणवन्तोऽप्यपार्थकाः ।
उद्गातृहोतृब्रह्माणो यथाध्वर्य्युं विनाध्वरे ॥
वैद्यस्तु गुणवानेकस्तारयेदातुरान् सदा ।
प्लवं प्रतितरैर्हीनं कर्णधार इवाम्भसि ॥
तत्त्वाधिगतशास्त्रार्थो दृष्टकर्म्मा स्वयं कृती ।
लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः ॥
प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः ।
सत्यधर्म्मपरो यश्च स भिषक् पाद उच्यते ॥
आयुष्मान् सत्त्ववान् साध्यो द्रव्यवानात्मवानपि ।
आस्तिको वैद्यवाक्यस्थो व्याधितः पाद उच्यते ॥
प्रशस्तदेशसम्भूतं प्रशस्तेऽहनि चोद्धृतम् ।
युक्तमात्रं मनस्कान्तं गन्धवर्णरसान्वितम् ॥
दोषघ्नमग्लानिकरमविकारि विपर्य्यये ।
समीक्ष्य दत्तं काले च भेषजं पाद उच्यते ॥
स्निग्धोऽजुगुप्सुर्ब्बलवान् युक्तो व्याधितरक्षणे ।
वैद्यवाक्यकृदश्रान्तः पादः परिचरः स्मृतः ॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्यायः ॥)

चतुष्पदी, स्त्री, (चत्वारः पादा यस्याः । "सङ्ख्यासु-पूर्व्वस्य ।" ५ । ४ । १४० । इति अन्त्यलोपे । 'पादोऽन्यतरस्याम् ।' ४ । १ । ८ । इति ङीपि । "पादः पत् ।" ६ । ४ । १३० । इति पदादेशः ।) पद्यम् । इति मेदिनी । द । ४८ ॥ चौपदी इति भाषा ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । १ अध्याये ।
"यज्ञ चतुष्पदी तस्य इत आसीदिति द्विधा ॥")

चतुष्पाटी, स्त्री, (चतस्रः दिशः पाटयति भिन-त्तीति । पाटि+अण्+स्त्रियां ङीप् ।) नदी । इति शब्दमाला ॥

चतुष्पाठी, स्त्री चतुर्णां वेदानां पाठो यस्यां सा । छात्राध्ययनस्थानम् । चौपाठी इति भाषा । इति लोकप्रसिद्धिः ॥

चतुष्पाणिः पुं, (चत्वारः पाणयो हस्ता यस्य ।) विष्णुः । इति हारावली । ९ ॥ (चतुर्हस्त-विशिष्टे, त्रि ।)

चतुःसमं, क्ली (चतुर्णां चन्दनागुरुकस्तूरी-कुङ्कुमानां समः समभागो यत्र । यद्वा चतुर्भि-श्चन्दनादिभिः समं एकत्र सहावस्थानं यत्र ।) मिलितचन्दनागुरुकस्तूरीकुङ्कुमरूपम् । इति हेमचन्द्रः । ३ । ३ ३ ॥ औषधविशेषः । यथा सुखबोधे ।
"लवङ्गं सैन्धवं पथ्या यमानी च चतुःसमम् ।
आमशूलविबन्धघ्नं पाचनं भेदि दीपनम् ॥"
अन्यच्च ।
"जातीफलं चित्रकपुष्पसमन्वितञ्च
जीरञ्च टङ्कणयुतं चरकेण चोक्तम् ।
चूर्णानि माक्षिकघृतेन सहितानि लीढ्वा
आमातिसारमखिलं युध हन्ति शूलम् ॥"

चतुस्त्रिंशत्, स्त्री, चतुरधिका त्रिंशत् । चौंतिश इति भाषा ॥ इति ज्योतिषम् ॥ (यथा ऋग्वेदे । १ । १६२ । १८ ।
"चतुस्त्रिंशद्वाजिनो देवबन्धो-
र्वङ्क्रीरश्वस्य स्वधितिः समेति ॥")

चतुस्त्रिंशज्जातकज्ञः पुं (चतुस्त्रिंशज्जातकान् जानातीति । ज्ञा+"आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) बुद्धभेदः । इति हेमचन्द्रः । २ । १४७ ॥

चतूराजी, स्त्री (चतुर्भिरङ्गैः राजते दीप्यते इति । राज+"कर्म्मण्यण् ।" ३ । २ । १ । इति अण् । स्त्रियां ङीप् ।) चतुरङ्गक्रीडा-विशेषः । इति तिथ्यादितत्त्वम् ॥

चत्वरं, क्ली, (चत्यते स्वीक्रियते इति । चत+"कॄ गॄ शॄ वृ चतिभ्यः ष्वरच् ।" उणां । २ । १२१ । इति ष्वरच् ।) स्थण्डिलम् । होमाद्यर्थपरिष्कृता भूमिः । अङ्गनम् । इत्यमरः । २ । ७ । ८ ॥ उठान चाताल इति च भाषा ॥ (चतसृणां रथ्यानां सङ्गमः । इति शब्दार्थचिन्तामणिः ॥ यथा, महाभारते । ३ । १५ । २० ।
"अट्टालकेषु सर्व्वेषु चत्वरेषु च कौरव । ।
बभ बभूव राजेन्द्र । प्रभूताक्षयाणिमम् ॥"
नानाजनपदेभ्यः समागतानां वासस्थानम् । मठ इति भाषा ॥ यथा कथासरित्सागरे । ६ । ३१ ।
"हत्वा लोकत्रकान् विप्रान् यक्षोऽसौ चत्वरस्थिताम् ।
अतिष्ठ चत्वरे तस्मिन् तस्मिन् नगरान्तरे ॥")

चत्वारः त्रि (चतुरशब्दस्य प्रथमाविभक्तिबहु-वचनेन निर्द्दिष्टमिदम् ।) चतुःसङ्ख्या । चारि इति भाषा । इति व्याकरणम् ॥ तद्वाचकानि । वेदः १ ब्रह्मास्यम् २ वर्णः ३ युगम् ४ हरिबाहुः ५ सन्निवेशः ६ सेनाङ्गम् ७ उपायः ८ दामः ९ गुणम् १० आश्रमम् ११ इत्यादि १२ । इति कविकल्पलता ॥ चतुर्थ्यत्वारि द्विः त्रि, इत्यमरः ॥

चत्वारिंशत् स्त्री, (चत्वारो दशतः परिमाण-मस्याः । "पङ्क्तिविंशतीति ।" ५ । १ । ५९ । इति निपातनात् साधुः ।) सङ्ख्याविशेषः । इति ज्योतिषम् ॥ चल्लिश इति भाषा ॥ (यथा, भागवते । ४ । १ । ६० ।
"तेभ्योऽग्नयः समभवन् चत्वारिंशच्च पञ्च च ॥")

चत्वालः पुं (चत्यते प्रार्थ्यते स्वीक्रियते होमार्थेति । चत+"सानसिवर्णसीति ।" चालन् न वृद्धिः ।) होमकुण्डम् । दर्भः । इति मेदिनी । ले । ८९ ॥ गर्भः । इति विश्वहेमचन्द्रौ ॥

चद ऋ ञ याचे । इति कविकल्पद्रुमः ॥ (भ्वां-उभं द्विकं सेट् ।) ऋ, अचचदत् । ञ, चदति चदते । इति दुर्गादासः ॥

चदि इ आह्लादे । दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां परं अकं सेट् ।) इ कर्म्मणि चन्द्यते । आह्लादे दीप्ते । इति दुर्गादासः ॥

चदिरः पुं (चन्दति दीप्यते स्वशरीरादिना इति । चदि+बाहुलकात् किरच् निपातनात् नस्य लोपः ।) हस्ती । सर्पः । कर्पूरम् । शशाङ्कः । इति सर्व्वसारे उणादिवृत्तिः ॥

चन, शब्दे । इति कविकल्पद्रुमः ॥ (भ्वां परं अकं सेट् ।) चनति । इति दुर्गादासः ॥

चन, म हिंसे । इति कविकल्पद्रुमः ॥ (भ्वां पर-सकं सेट् ।) म, चनयति । इति दुर्गादासः ॥

चन च अभावकल्पम् । अकार्त्स्न्यम् । यथा । किञ्चन । इत्यमरभरतौ ॥ ("किमः सकाशात् चित्चनौ ।" इति सूत्रेण ।) प्रयोगोऽयं किम-शब्दादसमुत्पन्नादनन्तरे भवति । इति मुग्धबोधम् ॥

चनस, उ हते । इति कविकल्पद्रुमः ॥ (भ्वां पर-सकं सेट् । उदित्त्वात् क्त्वावेट् ।) उ, चनित्वा चन्त्वा । हतिर्गतिः । इति दुर्गादासः ॥

चन्द्रः पुं (चन्दयति आह्लादयति यद्वा चन्दति दीप्यते इति । चदि वा चन्द्+पचाद्यच् ।) चन्द्रः । इति भरतधृतशब्दार्णवः ॥

चन्दकः पुं, (चन्दयति आह्लादयति लोकानिति । चदि आह्लादे+णिच्+"ण्वुल्तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) मत्स्यविशेषः । चाँदा इति भाषा ॥ तस्य गुणाः । रुचिकारित्वम् । अन-भिष्यन्दित्वञ्च । इति राजवल्लभः ॥ चन्द्रकोऽपि पाठः ॥ (चन्द्रकशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

चन्दनः पुं, क्ली (चन्दयति आह्लादयतीति । चदि आह्लादे+णिच्+ल्युः ।) स्वनामख्यातवृक्षः । (यथा, श्रीरामायणे । ५ । ७४ । १ ।
"चन्दनादिवनकोपूगानर्कोचान् किंशुकांस्तथा ॥"
तथा च पञ्चतन्त्रे । १ । ४२ ।
"विना मलयमन्यत्र चन्दनं न प्ररोहति ॥")
तत्पर्य्यायः । गन्धसारः १ मलयजः २ भद्रश्रीः ३ ।
इत्यमरः । २ । ६ । १३१ ॥ तैलपर्णिकम् ४ गन्धा-ढ्यम् ५ श्रीखण्डम् ६ चन्दनम् ७ रोहिणम् ८ तिल-पर्णम् ९ मङ्गल्यम् १० कुम्भजातम् ११ मलय-राजः १२ शुभ्रकम् १३ सर्पावासम् १४ शीत-लम् १५ मलयजम् १६ भोगिवल्लभम् १७ शुभ्र

नम् १८ शीतगन्ध १९। इति राजनिघण्टः॥ तैलपर्णिकः २० चन्द्रद्युतिः २१। इति भाव-प्रकाशः॥ भद्रश्रियम् २२ हितम् २३ हिमम् २४। इति रत्नमाला॥ पटीरः २५ वर्णकः २६ भद्राश्रयः २७ सेव्यः २८ रौहिणः २९। इति शब्दरत्नावली॥ याम्यः ३० मैलयजः ३१। इति जटाधरः॥ अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। शीतलत्वम्। स्वादे किञ्चित्कषाय-त्वम्। पित्तश्रान्तिवमिज्वरक्रिमितृषासन्ताप-शान्तिकारित्वम्। वृष्यत्वम्। वक्त्ररोगनाशित्वम्। शरीरकान्तिवृद्धिकारित्वम्। लेपने कामवृद्धि-कारित्वम्। अतिसौरभ्यत्वञ्च। इति राज-निघण्टः॥ रूक्षत्वम्। तिक्तत्वम्। आह्लादन-त्वम्। लघुत्वम्। श्रमशोषरोगविषश्लेष्मतृष्णादाह-नाशित्वञ्च॥ *॥ श्रेष्ठचन्दनलक्षणं यथा,—

"स्वादे तिक्तं कषे पीतं छेदे रक्तं तनौ सितम्।
ग्रन्थिकोटरसंयुक्तं चन्दनं श्रेष्ठमुच्यते॥"

इति भावप्रकाशः॥

वानरविशेषः। इति हेमचन्द्रः। २। ३५५॥

चन्दनं, क्ली, (चन्दति आह्लादयति अथाह्लादनेन वा इति। चदि आह्लादे+णिच्+ल्युट्।) भद्रकाली। इति मेदिनी। ने। ६१॥

चन्दनगोपी, स्त्री, (चन्दनमपि गोपायति स्वगन्धा-दिना रक्षतीति। गुप+अण्। ततो ङीप्। यद्वा, चन्दनवद् गुप्यति दीप्यति इति। अच्।) शारिवाविशेषः। इति राजनिघण्टः॥

चन्दनधेनुः, स्त्री, (चन्दनेन अङ्किता धेनुः। मध्य-पदलोपिकर्म्मधारयः।) पतिपुत्रवत्स्त्रीमरणान्त्यो-द्देश्यकोत्सृष्टचन्दनाङ्कितवत्सतरी। तत्प्रमाण-प्रयोगौ लिख्येते।

"नत्वा श्रियं चन्दनचर्च्चितायाः
धेनोः प्रदाने सविधिप्रयोगम्।
रत्नाकरादेर्लिखितं विलोक्य
तनोति वाचस्पतिरल्पबुद्धिः॥"

अथ चन्दनधेनुदानविधिः। तत्र रत्नाकरे देवलः।
जीवद्भर्त्त्री तु या नारी पुत्रिणी म्रियते यदि।
चन्दनेनाङ्किता धेनुमाचार्य्याय प्रदापयेत्॥
पतिपुत्रवती नारी म्रियते यावदग्रतः।
वृषं न चोत्सृजेत् पुत्त्रः पिता यावच्च जीवति॥
तथा कर्म्मोपदेशिन्यां शाम्बवचनैश्च कृता
युग्मश्लोकानि वचनानि। यथा स्मृतिः।
पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः।
चन्दनेनाङ्कितां धेनुं तस्याः स्वर्गाय कल्पयेत्॥
तथा जातूकर्ण्यः।
धेनुं चन्दनमालिप्य यो दद्यान्मातृहेतवे।
यदि पापशतैर्युक्ता तथापि स्वर्गमाप्नुयात्॥
तथा वशिष्ठः।
न युक्तश्च वृषोत्सर्गो यावत् पितरि जीवति।
चन्दनेनाङ्कितां धेनुमाचार्य्याय प्रदापयेत्॥ *॥
चतुर्द्दशी भवेद्यूपी मत्स्यपक्षद्वयम्।
वस्तुन् श्रीमन्तः स्मृत्वा कर्त्तव्यो वैश्वमौलिकः॥
पितरस्य वक्तुलस्यैव कर्त्ता शुभं प्रयच्छति।
अभावे वाजपेयानि यूप कुर्य्यात्त्रियामतः॥
वृषोत्सर्गे तु वृषमौलिकः।
तरुणी रूपसम्पन्ना सुशीला च पयस्विनी।
व्याघ्राभ्यां तया यष्टे धाता देया श्रोत्रियाय गौः॥

नदीतीरे वने गोष्ठे देवतायतनेषु च।
शौण्डिकस्य कुमुदे च राजद्वारे चतुष्पथे॥

एषु वचनेषु वृषोत्सर्गनिषेधचन्दनधेनूत्सर्ग-विध्योरेकमहेकवाक्यदर्शनात् वृषोत्सर्गस्थाने प्रधानतया चन्दनधेनूत्सर्गः प्रतीयते। अतो-ऽस्य वृषोत्सर्गकार्य्यकारित्वात् तत्फलहेतुत्वं गम्यते। एकोद्दिष्टं न कुर्व्वीत व्यासिनामेव सर्व्वदा। अहन्येकादशे प्राप्ते पार्व्वणन्तु विधी-यते॥ इति श्राद्धविवेकधृतोशनोवचने त्रिदण्ड-सन्यासिनां एकोद्दिष्टनिषेधपार्व्वणविध्योर्युग-पदुपदेशदर्शनात् एकोद्दिष्टस्थाने पार्व्वणमिव। यद्वा पतिपुत्रवतीरूपमृतविशेषाधिकारत्वे न चोत्सृजेदिति निषेधचन्दनधेनूत्सर्गविधिभ्यां प्रेतमात्राधिकारसामान्यवृषोत्सर्गविध्यवगतफल-भावनाकरणीभूतवृषकर्म्मकत्यागमनूद्य तत्कर्म्मी-भूतवृषमपहाय तत्स्थाने धेनुमात्रगुणविधि-लाघवादवगम्यते। पशुयागे सामान्यविध्यव-गताग्नेः प्रणयनीयाधिकरणीभूतचमसस्थाने गो-दोहनेन प्रणयेदिति विशेषविधिना गोदोह-गुणविधिवत्। नालाभेऽपि प्रवेशिनीम्। ज्योति-ष्टोमे तत्र चयो ग्रहाणां मारणमित्यत्र एका-दशीरूपनिमित्तस्थाने द्वादशीमात्रगुणविधि-वत्। अन्यथा धेनुनयनस्य पृथक्कर्म्मत्वे फल-भावना तत्करणनियोज्यानां पृथक्कल्पने गौरवं स्यात्। उक्तनिषेधविध्योरुपदेशदर्शनमेव च स्यात्। ततश्च करणत्वात् फलैक्यमिति। चन्दनधेनूत्सर्गेऽपि प्रेतत्वविमुक्तिपूर्व्वकस्वर्ग-प्राप्तिः फलम्। एवं कपिलसम्भवपायसवचनम-मस्तकप्राधान्यापि तथैव तात्पर्य्यम्। तथा जातूकर्ण्यवचनस्थपापस्वर्गपदयोरपि तथैव तात्-पर्य्यं बोध्यम्। भूतानां विधिशेषितयैव चोभि-न्युक्तप्रामाण्येन प्रशस्ते सिद्धे विधिशेषित्वं लाघ-वात्। पापिष्ठमपि शुद्धेन शुद्धं पापकृतापि वेति कात्यायनवचनस्थपापपदस्य प्रेतत्वे एव तात्-पर्य्यदर्शनाच्च। अथ यद्यपि पतिपुत्रवतीत्यत्र पतिपुत्रवत्त्वस्य विशेषणीभूतसम्बन्धिमरणान्वयि-त्वेन न विशेषणत्वं किन्तूपलक्षणत्वमेव ततश्च काकपक्षो देवदत्तस्य यद्वा इतिवत् कार्य्यान्वितत्वे सङ्कतामादायापि पतिपुत्रवतीतिप्रयोग उप-पद्यते। तथापि अयतन्त्रयोर्भर्त्तुरग्रत इत्याभ्यां मरणकालिकी पतिपुत्रवत्ता गम्यते। नार्थो गौरव इतिवत्। अथवा यज्ञार्थान्वयेन धेनुं सर्वकालिकीति। जपापुत्रिणा त्वया कार्य्यन्तु तस्या धेनुर्विंशाहिता। इति कपिलवचने अपुत्रिणताया पुत्रकर्त्तृकधेनूत्सर्गनियोग्याप्रसक्ततया सपत्नीपुत्रकर्त्तृकधेनूत्सर्गविषय प्राप्तौ तद्वदवा पतिपुत्रवतीत्यत्र सपत्नीपुत्र-वतीपरत्वं अपत्रम् वाच्यम्। तदेकवाक्यतया पुत्रिणीत्यत्रापि तथात्वमिति वाच्यम्। अपुत्रिणीति कपिलवाक्यस्य प्रशस्तिपूर्व्वकमार्थं पतिपुत्रवत् निस्तारकत्वाया धेनुसत्वविधिः शार्थत्वात् गत्यां सत्यां लक्षणाया औचित्याभावात्। प्रतियोगिध्वंसप्रागभावयोरपि अत्यन्ताभाव-विरोधित्वमते तु अजातपुत्त्रस्त्रीपरत्वं वा भवतु तथाचोऽपि तस्या धेनुर्विंशाहितेति अपत्रकाः-पीति अपुत्त्रिताधेनुदाननिन्दा पतिपुत्रवत्या-श्चन्दनधेनुदानस्तुतिपरा। यथा अरुणाय मौक्षवेश्येयः शिप्तेन प्रतिपद्य यो निमौद प्रवक्ष्यामि निन्दा एकादशाद्यादिषौकेमाश्वम-पञ्चके रेवत्यनामादयोगविधिस्तुतिपरा। यथा वा वेदनामे यो गिरा गिरेति भयात् स व्याप्यार्थं गिरेत् रक्षपक्षनिन्दा ऐरं कृत्वा अर गिरेदिति विधेः स्तुतिपरा। अतएव उक्तं शाबरभाष्ये। न हि निन्दा निन्द्यं निन्दितुं प्रवर्त्तते अपि मर्हौतरत् स्तोतुमिति। स्तुतौ हि प्रसिद्धगुणदोषारोपणदोषाय। न चात्र काम्य-स्यैव कार्य्यमादिवृषोत्सर्गस्य स्थाने धेनुदानं विधीयते इति वाच्यम्। तत्कालपरत्वे मात्रा-भावात्। प्रत्युत म्रियत इति वर्त्तमानार्थक-विभक्त्या वर्त्तमानसामीप्येनाचिरप्रमीतोप-स्थितेश्च। ये तु बह्वीनामेकपत्नीनामेका चेत् पुत्त्रिणी भवेत्। सर्व्वास्तास्तेन पुत्त्रेण प्राह पुत्त्र-वतीर्मनुरिति मनुना पुत्रवतीत्वाभिधानादेव पतिपुत्रवतीत्यत्र सपत्नीपुत्रवती प्रतीयते इति ब्रुवते तेऽप्रौढवादिनः। पुत्रवतीति पदस्यावश्य तथा मनुना परिपदस्याश्रये तदसमावेशे॥ यत्र वृषभवयो वर्णो वृषः स्यादृषिणा द्विजाः। वृषोत्सर्गे तथा पुष्टां स्त्रीयां स्त्रीगोर्विधिस्मृता। इति भविष्यवचनात् धेनुदानमिदं पतिपुत्रवत्या वृषोत्सर्गे दक्षिणादानस्य विशेषरूपम्। न तु प्रधानकर्म्मान्तरं गौरवात्। न च दक्षिणाया अङ्गत्वेन फलाश्रुतिः। यद्वा पद्ममयो वृषो भवति न स पापशोकं प्रक्षीणौ स्वपितृवत्य-रिति चेत् न। वृषोत्सर्गेऽविधानाद्धन्ता-ङ्कितधेनुदानस्य प्रकरणात् स्थानन्यायेन प्रकरणा-न्तरन्यायतः प्रधानत्वसिद्धेः। वृषोत्सर्गस्थानीय-त्वेनानुवर्त्तमानश्रितत्वात्। धेनूनां वृषस्य वृषोत्सर्गविधिप्राप्तत्वाच्च। कपिलपञ्चरात्रे चन्दनधेनुदानस्यापीति कर्त्तव्यताया उक्तत्वात् दक्षिणादानविधानाच्च॥ *॥

यथा कपिल उवाच।
अतः परं प्रवक्ष्यामि धेनुदानमनुत्तमम्।
पतिपुत्रवती नारी म्रियते भर्त्तुरग्रतः॥
चन्दनेनाङ्कितां धेनुमाचार्य्याय निवेदयेत्।
तथा।
जीवद्भर्त्त्री तु या नारी पुत्रिणी म्रियते यदि।
चन्दनेनाङ्कितां धेनुमाचार्य्याय निवेदयेत्॥
साध्वी पतिव्रता नारी म्रियते यावदग्रतः।
वृषं नैवोत्सृजेत पुत्रो यावत् पितरि जीवति॥

मृतपुत्रा च या नारी मृतवत्सा तु या भवेत् ।
तया धेनुर्न दातव्या वृषोत्सर्गो विधीयते ॥
अपुत्रिणी गता काचित्तस्या धेनुर्विधीयते ।
दत्ताश्च सुतो ज्येष्ठः कनिष्ठो वृषमुत्सृजेत् ॥
द्वयोः सोदरयोरेको भवेत् ज्येष्ठः प्रधानतः ।
त्रयाणां द्वौ सुतौ ज्येष्ठौ चतुर्णाञ्च त्रयः स्मृताः ॥
पञ्चानां सोदराणाञ्च त्रयो ज्येष्ठाः प्रकीर्त्तिताः ।
ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानतः ॥
हेमशृङ्गीं खुरै रूप्यैः सुशीलां वस्त्रसंयुताम् ।
कांस्योदरीं ताम्रपृष्ठां घण्टाचामरभूषिताम् ॥
प्रवालमालिकां दद्यात् कण्ठयोरुभयोरपि ।
चन्दनेनाङ्कितां धेनुमाचार्य्याय निवेदयेत् ॥
ब्रह्मलोकमवाप्नोति दिवि देवैश्च मोदते ।
चन्दनेनाङ्कितां धेनुं दत्त्वा गच्छेत् सुरालयम् ॥
तावत्तिष्ठति स्वर्लोके यावदाभूतसम्प्लवम् ।
न चोत्सर्गो वृषस्यात्र वत्सवत्सान्वितस्य च ॥
वृषोत्सर्गविधानेन कर्त्तव्यं सर्व्वकर्म्म च ।
मा नस्तोकेति मन्त्रेण दक्षे वृषाय्यसीति च ।
धेनोश्च दक्षिणे देशे तु त्रिशूलाङ्कं समालिखेत् ।
वामभागे विशेषोऽयं दद्याच्चक्रं समालिखेत् ॥
तथाप्यदूषयेद्विप्राचार्य्यस्तु विधानवित् ।
ततो वै सलिखेच्चक्रं पञ्चाङ्गुलप्रमाणकम् ॥
शूलं षडङ्गुलं कार्य्यं दक्षे वामे यथाविधि ।
पूर्व्वाग्राभिमुखीं धेनुं यजमानोत्तराननः ॥
मस्तकादिक्रमेणैव प्रतिमन्त्रैः प्रपूजयेत् ॥" ॥

शिरसि ओं ब्रह्मणे नमः । ललाटे ओं वृषभध्वजाय नमः । कर्णयोः ओम् अश्विनीकुमाराभ्यां नमः । चक्षुषोः ओं शशिभास्कराभ्यां नमः । जिह्वायां ओं सरस्वत्यै नमः । दन्तेषु ओं मरुद्भ्यो नमः । ओष्ठयोः ओं सन्ध्यायै नमः । ग्रीवायां ओं नीलकण्ठाय नमः । हृदि ओं स्कन्दाय नमः । रोमकूपेषु ओम् ऋषिभ्यो नमः । दक्षिणपार्श्वे ओं कुवेराय नमः । वामपार्श्वे ओं वरुणाय नमः । रोमाग्रेषु ओं रश्मिभ्यो नमः । ऊरुषु ओं धर्म्माय नमः । खुरेषु ओम् अधर्म्माय नमः । श्रोणितटे ओं पितृभ्यो नमः । खुरमध्ये ओं गन्धर्व्वेभ्यो नमः । खुराग्रे ओम् अप्सरोभ्यो नमः । लाङ्गूले ओं ब्रह्मादिभ्यो नमः । गोमये ओं महालक्ष्म्यै नमः । गोमूत्रे ओं गङ्गायै नमः । पयोधरेषु ओं चतुःसागराय नमः ।

एवमङ्गानि संपूज्य पठेन्मन्त्रं समाहितः ।
ओम् इन्द्रस्य च या लक्ष्मी विष्णोर्याचैव या स्मृता ।
चन्द्रस्य गौरी या देवी सा देवी वरदास्तु मे ॥
या या लक्ष्मीर्लोकपालानां या च देवेष्ववस्थिता ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥
या देहस्था या च रुद्राणी शङ्करस्य च या प्रिया ।
धेनुरूपेण सा देवी शान्तिं प्रयच्छतु ।
या सर्व्वदेवमयी धात्री सर्व्वलोकमयी तथा ।
धेनुरूपेण सा देवी शर्म्म प्रयच्छतु ।
यष्टीत्राणं पादुकाच्छत्रचेलामलङ्कृताम् ।
दीयते ब्राह्मणायैषा आचार्य्याय महात्मने ॥
एवंविधिरिमां धेनुं दत्त्वा सर्व्वं समाचरेत् ।
पुच्छं गृहीत्वा पितादीन् वृषोत्सर्गविधानतः ॥
ऐशान्यां स्थापयेत् किञ्चिदाचार्य्याय च दक्षिणाम् ।
वृषभञ्च ततो दद्यादाचार्य्याय गुणान्वितम् ॥
पूजयेद्ब्राह्मणांश्चैव वस्त्रमाल्यादिभिस्ततः ।
कांस्यपात्रं वस्त्रयुग्मं सुवर्णञ्च विशेषतः ॥
आचार्य्याय प्रदातव्यं ब्रह्मणे कनकं तथा ।
आगतान् पूजयेद्भक्त्या यथाशक्ति विधानतः ॥
दीनानाथजनादींश्च अन्नाद्यैः परितोषयेत् ॥"

इति कापिले धेनुदानप्रमाणम् ॥ * ॥

पुस्तकान्तरे पाठान्तरं यथा —
"एकादशाहे प्रेताय षण्मासे चाब्दिके तथा ।
त्रिपक्षे मासिके वापि दद्यात्तां चन्दनाङ्किताम् ॥
तथा वराहपुराणम् ।
अयने विषुवे चैव युगाद्यापूर्णिमासु च ।
दर्शे मन्वन्तरे चैव धेनुं दद्यात् सुपूजिताम् ॥

ननु आद्यश्राद्धे त्रिपक्षे वेत्यादिना आद्यश्राद्ध-कर्त्तव्यनित्यवृषोत्सर्गकालस्य परपरकालो गौणः । न वा सर्व्वे काला स्युः । तत्र नाद्य-त्रिपक्षादौ शिष्टाचारविरोधात् । नापि द्वितीय-त्रिपक्षादौ नित्यत्वबोधकाभावात् । वस्तुत आद्यश्राद्धे वृषोत्सर्गस्य नित्यत्वं त्रिपक्षादौ काम्यत्वम् । आद्यश्राद्धपदं अशौचान्तद्वितीयदिनपरम् । अशौचान्ताद्द्वितीयेऽह्नीत्यादिकवाक्यत्वात् । अत्र च आद्यश्राद्धस्य विप्रपतितत्वेन एकादशाहादौ क्रियमाणेऽस्मिन् वृषोत्सर्गमपि न कुर्य्यात् । आद्यश्राद्धदिने वृषोत्सर्गाकरणे त्रिपक्षाद्यन्यतमकालेऽपि वृषोत्सर्गस्याकरणे प्रेतत्वपरिहारकालेन तस्य पुनः संवत्सरमाध्यगतत्वात्तस्य नित्यत्वं कल्प्यम् । एवं धेनुदानस्यापि । अतएव पूर्व्वसंवत्सरे सम्भावनायामपि प्रागुक्तकाले कार्य्य एव इति नव्याः चक्रुः । एककर्त्तृकानेकवृषोत्सर्गोऽपि शिष्टाचार एकदिनेऽपि । तथा हि स्वर्गलोकगमनफलश्रुति काम्यस्यैव यो भूय आरभते तस्मिन् फलविशेष इति न्यायादविरोधः । ननु नैमित्तिकत्वात् कथमावृत्तिः सकृत्कृते कृतः शास्त्रार्थ इति न्यायात् । न चैकत्र क्रियाद्वयमिति वचनाच्च । अत्राय विशेषः । काम्यनैमित्तिकधर्म्मविशेषार्थं भूयः कार्य्ये नैमित्तिकमात्रं सकृदेव । किञ्च । सङ्क्रान्त्यादिनिमित्तकश्राद्धमपि पुनः पुनः स्यात् । नैवं तत्र पितृतृप्त्यादिप्रधानफलस्य सकृदेव चरितार्थत्वात् इति ॥ * ॥ यत्नोत्पादि कर्म्मास्वैतानि वचनानि तिथ्यधिकरणन्यायमूलानि । तथा हि तिथ्यधिकरणे तिथ्यकर्म्मणामुपवासादीनां सर्व्वाधिकार इति पाणिनीये उक्तम् । तत्र दैवत तिरथो दिष्टदानाद्यकविधान पक्षो प्रवर्त्तत्वात् आर्य्याद्यर्थं कर्म्मान्तर अस्यानामावश्यकत्वाच्छिष्टाचारविरोधात् नाड्-कालाभावमर्थे नैव यथा पाठार्थे अधिकारं तद्दच

अपितु पितृकृत्येषु अधिकारो न विद्यते । इति छन्दोगपरिशिष्टे अधिकाराभावश्रवणात् जीवत्पितृकश्चैतासन्ध्याञ्चेत्यर्थे इति कात्यायनसूत्रे च जीवत्पितृकस्य पितृकर्म्मनिषेधात् वृषोत्सर्गे तदङ्गभूततत्पुरुषाञ्जलिदानकतपश्च विरहात् श्राद्धकरणासामर्थ्ये वृषोत्सर्गानधिकारः । अतएव रत्नाकरेऽपि । अनुचितक्रियाकर्त्तृभूतश्राद्धेन याकवद् वृषोत्सर्गस्य बाध उक्तो वाचस्पतिमिश्रेण । पिण्डदानाङ्गतया तु प्रधानाधिकारश्रुतेः जीवत्पितृकाधिकृतविधिविधानाभावाधिकार एवाभ्युदयिकश्राद्धवत् जन्मास्युपनयनाद्यधिवसनश्च । अयन्तु सामान्यशास्त्रोपजीवित्वेन निषेधः पर्य्युदास एव । तत्तु यदि पतिपुत्रवर्ज्जिताया वृषोत्सर्गं कुर्य्यात्तदैव मातृपक्षेऽपि पुत्र इत्यादि पत्नीभागधेयत्वं स्यात् । यदि च जीवत्पितृकभिन्नो वृषोत्सर्गं कुर्य्यात् तदैव मातृपक्षेऽपि पूर्व्वभागधेयत्वं स्यात् । यदि वा पतिपुत्रवत्या जीवत्पितृकपुत्रभिन्नो वृषोत्सर्गं कुर्य्यात् तदा विशिष्टरूपस्तथापि पतिपुत्रवत्यास्त्वदुभयरहिताया जीवत्पितृकभिन्नादिना वृषोत्सर्गः स्यात् । न चायुक्त एव प्रागुक्तवचनन्यायविरोधात् । तस्मात् समुदायवचनसाधकत्वाय पतिपुत्रवर्ज्जिताया वृषोत्सर्गं कुर्य्यात् । तथा जीवत्पितृकभिन्नो वृषोत्सर्गं कुर्य्यात् इति वचनद्वयसाधनाद्वाक्यद्वयमेव सिध्यति । प्रमाणवत्तौरवस्य न्याय्यत्वात् । एवमेवौर्ध्वदेहिकयोः पदार्थात्पूर्व्ववत् । अथ षोडशलाभवचने ज्येष्ठेनैव तु कर्त्तव्यं धेनुदानं विधानतः इत्यत्र कनिष्ठेन वचनपर्य्यालोचनया कनिष्ठपुत्रवतीभिन्नपतिपुत्रवतीतरस्त्रीकर्त्तृकप्रतिप्रसवतः कनिष्ठपुत्रभिन्नजीवत्पितृकात् अन्यो यो वृषोत्सर्गं कुर्य्यात् । इति सामान्यत एव वृषोत्सर्गविधिः । तथा पतिपुत्रवत्या ज्येष्ठपुत्र एव चन्दनाङ्कितधेनुदानेऽधिकारी इति विधिश्च सिध्यति । ततश्च पतिपुत्रवत्याः कनिष्ठपुत्रस्य एव धेनु तदन्यज्येष्ठतत्पितृकेन वा वृषोत्सर्गः कार्य्यः । कनिष्ठपुत्राभावे तु न केनापि । एवं पत्न्यादिना चन्दनधेनुदानमिति । अनिषिद्धजनितान्यजीवत्पितृकेण न कस्यापि वृषोत्सर्गकार्य्यं इत्यपि च पर्य्यवसितम् । वस्तुतस्तु पतिपुत्रवत्याः वृषोत्सर्गनिषेधे तत्पुत्रस्य जीवत्पितृकस्यानधिकार एव हेतुः न तु स्त्रियाः पतिपुत्रवत्त्वं वा । अतएव मातामहादिमरणे पतिपुत्रवत्याः कनिष्ठपुत्रवत्याश्च वृषोत्सर्गाभावः । तत्पुत्रस्य पितुः मातृकृत्ये अधिकाराभावात् तदर्थे वृषोत्सर्गाभावः । न वा तद्भवत्वेन निमित्तं उत्सर्गनिषेधस्य जीवत्पितृकस्यैवोक्तं ताद्दर्शविधिमात्रे पतिपुत्रवत्याः पितृकार्य्ये विहितः । दोर्व्वाधिकविधिषु तु आद्यश्राद्धे तथा कनाद सिद्धजीवत्पितृकविधेयप्रसङ्गात् पतिपुत्रवत्या विशेषोपदेशो प्रसङ्गादेव

गौरवाच । यस्तु जीवत्पितृकस्य वृषोत्सर्गनिषेधे प्रतिप्रसवतया पृथगुपसंहारः सोऽपि तस्य पुत्रानधिकारमात्रप्रयुक्तनिषिद्धवृषोत्सर्गाभावभागित्वानुवादः । पूर्ववाक्यावगतधेनुदानस्य वृषोत्सर्गाभ्यामीयत्वज्ञापनाय एवेति प्रागपि निरूपितम् । तत्रयोक्तवचने तिथ्यधिकरणन्यायप्राप्तं जीवत्पितृकस्य वृषोत्सर्गाकर्त्तृत्वाभावमनूद्य पत्नीविज्ञाया वृषोत्सर्गस्थाने चन्दनाङ्कितधेनूत्सर्ग एव विधीयते । एतेन वृषोत्सर्गकर्त्तरि कपिलप्रतिग्रहतद्दानविकाशप्रोतत्सर्गकृतिमत् कनिष्ठपुत्राद्यजीवत्पितृकेतरत्वविशिष्टसपत्निकाया वृषोत्सर्गस्थाने स्त्रीपुंसयोरेव चन्दनाङ्कितधेनूत्सर्गमात्रञ्च लभ्यते । असौ जीवत्पितृकस्य काम्यवृषोत्सर्गं पतिते प्रव्रजिते वा पितरि जीवति पितामहादिवृषोत्सर्गोऽपि न कार्य्यः । एवं सपत्निकाया अपि पुत्रस्य कन्यायोग्यत्वे असत्त्वे वा पत्न्या कन्यादिना वा वृषोत्सर्गः कार्य्य एवेति स्थितम् । इत्थं रत्नाकरदर्पणग्रन्थकर्त्तृचूडामणिविद्याभूषणभट्टमहादेवभट्टाचार्य्यप्रभृतीनामपि सम्मतं तेषां पृथक् पृथक् पद्धतिरपि प्रचरति । कश्चिद्देशे नारायणभट्टाचार्य्यस्यापि धर्म्मपद्धतिर्दृश्यते । अतएवात्र विशेषाद्धिकाममनाचारोऽनाचार एव । अत्र भविष्योक्तप्रकारस्तु वैकल्पिक एव । स्मृतिशास्त्रे विकल्पो हि आकाङ्क्षापूरणे सतीति जैमिन्युक्तेः । तत्र वृषोत्सर्गादावप्येव विधिर्न च तल्लोक्तेः । कापिलकल्पेन वृषोत्सर्गधर्मातिदेशेन विधेर्मोक्षनिरासाच्च ॥ ॥ सम्प्रति विचारितकापिलकल्पप्रयोगोऽभिधीयते यथा । गोष्ठाग्नौ विलासयुक्ते प्रागुदक्प्लवं देशं गोमयेनोपलिप्य कृतनित्यक्रियः आचान्तः शुद्धवस्त्रो द्विराचान्तः तद्विष्णोः परमं पदं इति विष्णुं स्मृत्वा नत्वा च उदङ्मुखः ओं तत् सदित्युच्चार्य्य कुशतिलजलपूर्णताम्रपात्रमादाय विशेषानुपदेशात् मुख्यचान्द्रमासोल्लेखेन अद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रायाः प्रेतायाः अमुकायाः अशौचान्तद्वितीयेऽह्नि अमुकगोत्रायाः प्रेतायाः अमुकायाः प्रेतलोकविमुक्तस्वर्गलोकगमनकामः चन्दनाङ्कितसवत्सधेनुदानकर्माहं करिष्यामीति सङ्कल्पयेत् । ततस्तज्जन्मनेत्रास्त्री विधिना । तत्र यजुर्वेदी अनुष्ठानं पठेत् । ततः पश्चात् ब्रह्मवरणम् । तत्र उत्तराभिमुखं तत्समीपे प्राङ्मुखमासीनं प्राञ्जलिः ओं साधु भवानास्ताम् इति ओं साध्वहमासे इति प्रतिवचनं दत्त्वा तदासने उपविशति । तत्र अर्च्चयिष्यामो भवन्तं इति वदेत् । ओम् अर्च्चयेति । ततो गन्धपुष्पाद्यैः ओम् अमुकेऽपक्षेऽमुकतिथौ प्रेतायाः अमुकायाः अशौ-

चान्तद्वितीयेऽह्नि अमुकगोत्रममुकप्रवरं अमुकदेवशर्म्माणं त्वामहं चन्दनाङ्कितधेनुदानाङ्गहोमकर्म्मणि ब्रह्मकर्म्मकरणाय गन्धादिभिरभ्यर्च्य वृणे इति ब्रह्माणं वृणुयात् । ओं वृतोऽस्मीति प्रतिवचनम् । ओं यथाविहितं ब्रह्मकर्म कुरु । ओं यथाज्ञानं करवाणीति प्रतिवचनम् । स्वयं गणाध्यक्षो ब्रह्मकर्म कारयितव्यश्च ब्रह्माणं कर्म्मकरणायेति वदेत् । स्वयं होमासामर्थ्ये होतारं वृणुयात् । तत्र होतृकर्म करवाणीति विशेषः । एवं तत्तत्कार्य्याध्यक्षमपि । आचार्य्यान्तराभावे ब्रह्मैवाचार्य्यत्वेनापि वरणीयः । तत्र ब्रह्माचार्य्यकर्म्मकरणायेति विशेषः । एवं प्रागुक्तवत् सम्प्रदानमपि । वस्त्राङ्गुरीयादिमानन्तु यथासामर्थ्यमेव सर्वत्र ग्राह्यम् । ततः पुण्याहस्वस्तिऋद्धिवाचनं कृत्वा चन्दनाङ्कितधेनुदाननिमित्तकहोमीयवह्निरक्षार्थं प्रकाशो भारतनामीचारस्य कुर्य्यात् । ततो यवगाम्भीर्य्यशाला वा गायत्र्या गोमूत्रं ओं गन्धद्वारेत्यादिना गोमयं ओम् आप्यायस्वेत्यादिना दुग्धं ओं दधिक्राव्ण इत्यादिना दधि ओं तेजोऽसीत्यादिना घृतं ओं देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे इति कुशोदकञ्च ग्राहयित्वा गायत्र्या सर्व्वमेकीकृत्य तेन पञ्चगव्येन तत्र घटान् संस्थाप्य तमेव प्रदाय विष्णुञ्च सम्पूजयेत् । ततो हस्तप्रमाणं स्थण्डिलं प्रकाराङ्गारास्थिकेशतुषादिरहितं पूर्वोत्तरप्लवं समं वा गोमयेनोपलिप्य तत्र स्वगृह्योक्तविधिनाग्निं संस्थाप्य स्वस्वगृह्योक्तवृषोत्सर्गपद्धतिक्रमेण कर्म कृत्वा प्राङ्मुखीं धेनुमभिमुखीं नीत्वा ओं मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितोऽवधीर्हविष्मन्तः समित्त्वा हवामहे । इति मन्त्रेण धेनोर्वामपक्षपिण्डे चक्रं त्रिशूलं चन्दनेन अङ्गेन लिखेत् । वीरांश्च इति सामगानाम् । यजुषान्तु मा नो वीरानिति मन्त्रभागपाठः । ततः ओं इषे त्वोर्ज्जे भागुणा नुमस्त त्वा हवामहे यजमान स्तद्धूम । इति मन्त्रेण दक्षकपिलि पञ्चाङ्गुल आरस्थाने चक्रं तथैवाधार्य्यो लिखेत् । अस्ति प्रवरे अधेवरे अवतसधेनुमौलिक यूपं आरोपयेत् । ततः स्वस्वगृह्योक्तविधिना होमशेषं समापयेत् । ततः सितवाससा अन्यतमेन गन्धचन्दनपुष्पाक्षतसिन्दूरगोरोचनादिभिः गवां शृङ्गाभ्यां स्वर्णपत्रं बध्नीयात् कांस्यदोहेन ताम्रपृष्ठेन घण्टाचामराभ्याञ्च यथायोग्यं तथा सप्तधा प्रवालमालिकाभ्याञ्च धेनुं भूषयित्वा माल्यादिभिरभ्यर्च्य तत्समीपे प्रतिज्ञयाम्नायात् स्थापयित्वा च प्राङ्मुखीं धेनुं शुक्लवाससा पवित्रयेत् । ततो यजमान उत्तराभिमुखो धेनोर्मस्तकाद्यङ्गेषु तत्तत्स्थले पूजयेद्यथा । शिरसि ओं ब्रह्मणे नमः । एवं ललाटे वृषभध्वजाय नमः । कर्णयोः अश्विनीकुमाराभ्याम् । चक्षुषोः

शशिभास्कराभ्याम् । जिह्वायां सरस्वत्यै । दन्तेषु मरुद्भ्यः । ओष्ठयोः सन्ध्यायै । ग्रीवायां नीलकण्ठाय । हृदि स्कन्दाय । रोमकूपेषु ऋषिभ्यः । दक्षपार्श्वे कुबेराय । वामपार्श्वे वरुणाय । रोमसु रश्मिभ्यः । ककुदि धर्माय । लाङ्गूले अनन्ताय । श्रोणीतटे पितृभ्यः । खुरमध्ये गन्धर्वेभ्यः । खुराग्रेषु अप्सरोभ्यः । लाङ्गूले [illegible] । गोमये महालक्ष्म्यै । गोमूत्रे गङ्गायै । [illegible] सागराय । एवं सम्पूज्य पठेत् ।

ओम् इन्द्रस्य च शचीन्द्राणी विष्णोर्लक्ष्मीश्च या
स्मृता ।
रुद्रस्य दयिता या गौरी सा देवी वरदास्तु मे ।
ओं या लक्ष्मीर्लोकपालानां या च देवेषु
संस्थिता ।
धेनुरूपेण सा देवी मम पापं व्यपोहतु ।
ओं देहस्था या च रुद्राणी शङ्करस्य सदा
प्रिया ।
धेनुरूपेण सा देवी मम शान्तिं प्रयच्छतु ।
ओं सर्व्वदेवमयी दोग्ध्री सर्वलोकमयी तथा ।
धेनुरूपेण सा देवी तस्याः स्वर्गं प्रयच्छतु ।

ततः ओम् आचाम्याय नमः इत्यनेनोदकं सम्प्रदानकाय माल्याभिः सम्पूज्य एवं ओं ब्रह्मणे नमः इति तद्देवताः सम्पूज्य ओं चन्दनाङ्कितधेनुसहिताय नमः इत्यनेन माल्याम्बरभोजनगन्धपुष्पधूपैर्धेनुं सम्पूज्य संपोष्य च ताम्रपात्रे जलं दत्त्वा कुशतिलजलान्यादाय ओं तत् सदद्यामुके मासि अमुके पक्षे अमुकतिथौ अमुकगोत्रायाः प्रेतायाः अमुकायाः अशौचान्तद्वितीयेऽह्नि अमुकगोत्रायाः प्रेतायाः अमुकायाः प्रेतलोकविमुक्तस्वर्गलोकगमनकामोऽहं इमां सालङ्कारां चन्दनाङ्कितसवत्सधेनुं रुद्रदैवतां अमुकगोत्राय श्रीअमुकदेवशर्म्मणे ब्राह्मणाय तुभ्यं ददामीति ब्राह्मणहस्ते जलं दद्यात् । ततः सम्प्रदानाख्य पुच्छं गृहीत्वा ओं स्वस्तीत्युक्त्वा प्रतिगृह्य सावित्रीं कामस्तुतिं च पठेत् । ततो धेनुरियं रुद्रदैवताकेति वदेत् । यथाशाखं कामस्तुतिं पठेत् । यथा सामवेदे । ओं क इदं कस्मा अदात् कामः कामाय अदात् कामो दाता कामः प्रतिग्रहीता कामं समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि कामैतत्ते । यजुर्वेदे तु । ओं द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु कोऽदात् कस्मा अदात् काम कामायादात् कामो दाता कामः प्रतिग्रहीता कामैतत्ते इत्यन्तम् । ऋग्वेदे तु । सामगानामिव । ओं द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु इत्यधिकम् । ततो यजमानः आचार्य्याय दक्षिणां दद्यात् । चन्दनाङ्कितसवत्सधेनुदानकर्म्मणः साङ्गतार्थं दक्षिणामिदं तन्मूल्यं विष्णुदैवतं अमुकगोत्राय श्रीअमुकदेवशर्म्मणे आचार्य्याय तुभ्यमहं ददानीति आचार्य्याय दद्यात् । आचार्य्यस्तु ओमिति गृहीत्वा

स्वस्तीति पठेत्। ततो श्वेतसर्गंवनुमन्त्रोदेन स्वस्त्ययनोक्तयाथादिरपि कर्म्म समापयेत्। तत सदस्यान् सिन्नां दत्त्वा आहूतान् वस्त्रमाल्यादिभिः पूजयेत्। सामगश्चेत्तान्नीं यज्ञहोत्राचार्य्यमध्यस्थेभ्यो ब्राह्मणेभ्यो दक्षिणां श्वेतगवबद्द्यात्। अन्यवेदी तु स्वस्त्ययनोक्तरीत्या यथास्थान दक्षिणां श्वेतगवबद्द्यात्। शूद्रस्तु यजुर्वेदिवत् सर्व्वं कुर्य्यात्। किन्तु मन्त्रपाठं ब्राह्मणेन कारयेत्। दीनानाथादींश्च वस्त्राद्यैस्तोषयेदिति॥"॥ इति श्रीचन्द्रशेखरवाचस्पतिभट्टाचार्य्यविरचितचन्दनाङ्कितधेनुदानसविधिप्रयोगः समाप्तः॥

चन्दनपुष्प, क्ली, (चन्दनमिव सुगन्धि पुष्पं यस्य।) लवङ्गम्। इति राजनिर्घण्टः॥

चन्दनशारिवा स्त्री (चन्दनगोपी शारिवा। शाकपार्थिवादिवत् समासः।) शारिवाविशेषः। इति राजनिर्घण्टः॥

चन्दनसारः, पुं (चन्दनस्येव सारो यस्य।) वज्रक्षारम्। इति राजनिर्घण्टः॥

चन्दना, स्त्री, (चन्दयति आह्लादयति स्वगन्धा दिनति। चदि आह्लादे+णिच्+युच्। स्त्रियां टाप्।) शारिवाविशेषः। इति राजनिर्घण्टः॥ नदीविशेषः। सा तु मथुराख्यनगरसमीपे प्रसिद्धा॥

चन्दनाचल, पुं, (चन्दनस्य चन्दनोत्पादको वा अचलः। चन्दनाकरः पर्व्वत इत्यर्थः।) मलयपर्व्वतः। इति जटाधरः॥

चन्दनाद्रि, पुं, (चन्दनस्य चन्दनोत्पादको वा अद्रिः पर्व्वतः।) मलयपर्व्वतः। इति त्रिकाण्डशेषः॥

चन्दनी, स्त्री,(चन्दयति आह्लादयति स्नानादिनेति शेषः। चन्दन+ङीष्) नदीविशेषः। इति मेदिनी। न। ६॥ (यथा, गौः रामायणे। ४। ४। १२।
"रुचिरां कुटिलाञ्चैव चन्दनीं पावनीं तथा॥")

चन्दनीया, स्त्री, (चन्द्यते दीप्यतेऽनया। चदि+करणे अनीयर्।) गोरोचना। इति राजनिर्घण्टः॥

चन्दिरः, पुं, (चन्दन्ति तुष्यन्ति लोका येन। चदि आह्लादे+"इषिमदिमुदि।" उणां। १। ५१। इति किरच्।) चन्द्रः। हस्ती। इति मेदिनी। रे। १५२॥

चन्द्र, क्ली, (चन्दति दीप्यते इति। चदि+"स्फायितञ्चीति।" उणां। २। १३। इति रक्।) स्वर्णम्। शुक्रम्। इति राजनिर्घण्टः॥ (वृत्तविशेषः। यथा वृत्तरत्ने।
"द्विजवरमथयुगलयुगमथ परिकलय कर
रघनगणयुगलमिह समयुगमपि विरर।
अखिलभुवनभवितमिति चन्द्रमिदमिति प्रवद
सकलकविकुलहृदयमोदकरमवगतम्॥")

चन्द्र पुं (चन्दयति आह्लादयति चन्दति दीप्यते इति वा। चदि+"स्फायितञ्चीति।" उणां। २। १३। इति रक्।) देवताविशेषः। चाँद इति भाषा। तत्पर्य्यायः। हिमांशुः २ चन्द्रमाः ३ इन्दुः ४ कुमुदबान्धवः ५ विधुः ६ सुधांशुः ७ शुभ्रांशुः ८ ओषधीशः ९ निशापतिः १० अब्जः ११ जैवातृकः १२ सोमः १३ ग्लौः १४ मृगाङ्कः १५ कलानिधिः १६ द्विजराजः १७ शशधरः १८ नक्षत्रेशः १९ क्षपाकरः २०। इत्यमरः। १। ३। १३—१४॥ दोषाकरः २१ निशीथिनीनाथः २२ शर्व्वरीशः २३ एणाङ्कः २४ शीतरश्मिः २५। इति शब्दरत्नावली॥ समुद्रनवनीतः २६ सारसः २७ श्वेतवाहनः २८ नक्षत्रनेमिः २९ उडुपः ३० सुधासूतिः ३१ तिथिप्रणीः ३२ अमतिः ३३ चन्दिरः ३४ चित्राटीरः ३५ पक्षधरः ३६ अत्रिजः ३७ नभश्चमसः ३८ राजा ३९ रोहिणीशः ४० अत्रिनेत्रजः ४१ मन्मथः ४२ सिन्धुजन्मा ४३ दशाश्वः ४४ हरचूडामणिः ४५ माः ४६ तारापीडः ४७ निशामणिः ४८। इति जटाधरः॥ मृगलाञ्छनः ४९ दर्शविपत् ५० छायामृगधरः ५१ ग्रहनेमिः ५२ दाक्षायणीपतिः ५३ लक्ष्मीसहजः ५४ सुधाकरः ५५ सुधाधारः ५६ शीतभानुः ५७ तमोहरः ५८ तुषारकिरणः ५९ हरिः ६० हिमद्युतिः ६१ द्विजपतिः ६२ विश्वप्सा ६३ अमृतदीधितिः ६४ हरिणाङ्कः ६५ रोहिणीपतिः ६६ सिन्धुनन्दनः ६७ तमोनुत् ६८ एणतिलकः ६९ कुमुदेशः ७० क्षीरोदनन्दनः ७१ कान्तः ७२ कलावान् ७३ यामिनीपतिः ७४ सिप्रः ७५ मृगपिप्लुः ७६ सुधानिधिः ७७ तुङ्गी ७८ पक्षजन्मा ७९ अब्दः ८० अब्धिनवनीतकः ८१ पीयूषमहाः ८२ शीतमरीचिः ८३ शीतलः ८४। इति शब्दरत्नावली॥ त्रिनेत्रचूडामणिः ८५ अत्रिनेत्रभूः ८६ सुधाङ्गः ८७ परिज्मा ८८ वलक्षगुः ८९ सुधीपतिः ९० यज्ञनाम्पतिः ९१ पर्व्वधिः ९२ क्लेदुः ९३ जयन्तः ९४ तपसः ९५ खचमसः ९६ विकसः ९७। इति त्रिकाण्डशेषः॥ दशवाजी ९८ श्वेतवाजी ९९ अमृतसूः १०० कौमुदीपतिः १०१ कुमुदिनीपतिः १०२ भपतिः १०३ दक्षजापतिः १०४ ओषधीपतिः १०५ कलाभृत् १०६ शशभृत् १०७ एणभृत् १०८ छायाभृत् १०९ अत्रिदृग्जः ११० निशारत्नम् १११ निशाकरः ११२ अमृतः ११३ श्वेतद्युतिः ११४। इति हेमचन्द्रः। २। १९। ०॥ तस्योत्पत्तिर्यथा—
"अत्रेर्वै मानसः पुत्त्रश्चित्रधाम महातपाः।
बहुकालं प्रजा सृष्ट्वा तपस्तेपे सुदुष्करम्॥
त्रीणि वर्षसहस्राणि दिव्यानीति च नः श्रुतम्।
ऊर्द्ध्वमाचक्रमे तस्य रेतः सोमत्वमीयिवत्॥
नेत्राभ्यां तस्य सुस्राव दशधा द्योतयद्दिशः।
तं गर्भं ब्रह्मणादिष्टा दश दश्यो न्यधारयन्॥
समेत्य धारयामासुर्न च ताः समशक्नुवन्।
यदा न धारणे शक्तास्तस्य गर्भस्य ता दिशः।
ततस्ताभिः स एवाशु निपपात वसुन्धराम्।
पतितं सोममालोक्य ब्रह्मा लोकपितामहः।
रथमारोपयामास लोकानां हितकाम्यया।
स तेन रथमुख्येन सागरान्तां वसुन्धराम्॥
त्रिः सप्तकृत्वो दुहितोऽकारयत् प्रदक्षिणम्।
तस्य तत्स्रावितं तेजः पृथिवीमन्वपद्यत॥
तेनौषध्यः समुद्भूता याभिः सन्धार्य्यते जगत्।
स लब्धतेजा भगवान् ब्रह्मणा वर्द्धितः स्वयम्॥'
तस्य सोमत्वप्राप्तिकालो यथा,—
"ज्यैष्ठाष्टमीदिनादूर्द्ध्वं यावच्छुक्लाष्टमी भवेत्।
तावत्कालं शशी सोमः पूयतेऽथोपरि स्मृतः॥"
इति वह्निपुराणे ज्योतिःशास्त्रम्॥
तस्य क्षयवृद्धिकारणं यथा पाद्मे स्वर्गखण्डे।
"अभिज्ञादात्तु दक्षस्य उपयेमे सुता विधुः।
रोहिण्यामेव सततं बहुप्रेम्णा रराम ह॥
दृष्ट्वा तन्निरतास्तास्तु तथा पितरमब्रुवन्।
अस्माकं कामयन्नात्मा आमातात्र रोहिणीम्।
रमयत्येव सततं तेन तात वयं पितः॥
तत् श्रुत्वा चाप्रियं दक्षः सोममाह भजस्व भोः।
प्रेम्णा समेन सर्व्वास्त्वं दुहितॄर्मम मानद॥
अवदत्तद्वचो नैव सोमः सन्त्रेम रोहिणीम्।
तथैव रमयामास श्रुत्वा दक्षश्चुकोप ह॥
शशाप तं न भविता ह्यपत्यं त्वद्भवोऽतिना।
यक्ष्मणा च परिग्रस्तो भव त्वं चीनरेतक॥
अथ सपत्निते तस्मिन् सर्व्वास्ताः सहिताः स्त्रियः।
पितरं शरणं प्राप्ताः चोषतश्च पति पितः॥
न वयं तेन वर्त्तामो विना सुखनिराकृताः॥
उवाच दक्षस्ताः कन्याः शापो मे नान्यथा भवेत्।
मासमध्ये पक्षमेकं वर्द्धतां स क्रमेण वै॥
क्षयं क्रमेण प्राप्नोतु पक्षमेकं ममाज्ञया।
एवं शापं वरञ्चैव ददावद्धौ यशस्यया॥
तथैव राजते योऽपि चयरक्तो दयादिषु॥"
स च गौरवर्णः वायुकोणस्थो वैश्यजातिसमद्गुणककटराशिस्वाम्यप्ररोग्यशरीरोत्पन्नयमुनासुधा-मौक्तिकादिधातुसर्व्वस्यामधिपतिः। आर्द्रभूमिचारी तपस्वी अपराह्णकाले प्रबलः श्लेष्मप्रकृतिमूलो युवा शुभप्रदः सुधाभयः। इति ताजकभाग्यजाप्य॥ चन्द्राङ्कुरः शशी भावः। इति समयामृतम्॥ * ॥ कर्पूरम्। जलम्। (यथा ऋग्वेदे। १। १४१। १२।
[वचन्दरथं॥")
"उतनः सुदोत्मा जीराश्वो होता मन्द्रः ग्रक जनम। काम्पिल्लः। इति मेदिनी। रे। ११ द्वीपविशेषः। इति शब्दमाला॥ विपक्षः। इति नन्नम्॥ कान्तीयः। मेचकः। स तु बर्हचन्द्रकः। इति हेमचन्द्रः॥ रक्तरत्नम्। तत्तु शोणगुला पत्रम्। (योगोपनिषदाद्यो। यथा षट्चक्रदीपिकायाम्। २। ७।
"यद्दमदाख्यो योगी मार्गं चन्द्रेण पूरयेत्॥"
"चन्द्रेण वामनाडिकया।" इति तट्टीका॥ भूमध्यभागस्थचन्द्रकलावत्तम्। यथा, तत्रैव। १। ३९।
"चन्द्रात् प्रदर्शितस्य ज्ञानं न स्यान्मरणादनौ॥"
"चन्द्रभुवोर्मध्यभागस्थचन्द्रात् बीजात्॥"
तट्टीका॥)
काशाख्यमसरवद्दे च। इति भाषाप्रकाशः॥

चन्द्रका, स्त्री, (चन्द्र इव चन्द्रप्रभा इव कायतीति । कै+क । वर्णसादृश्यात्तथात्वम् ।) मितमरिचम् । इति राजनिर्घण्टः ॥

चन्द्रक, पु, (चन्द्र इव कायति प्रकाशते इति । कै+क ।) वर्हनेत्रम् । मयूरपुच्छेर चाद इति भाषा । तत्पर्यायः । मेचक २ । इत्यमरः । २ । ५ । ३१ ॥ (यथा, गीतगोविन्दे । २ । ३ ।
"चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम् ॥")
नखः । इति शब्दचन्द्रिका ॥ मत्स्यविशेषः । चादा माछ इति भाषा । अस्य गुणाः । अन भिष्यन्दित्वम् । मधुरत्वम् । बलवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्यायः । चन्द्रपुष्पिका २ चन्द्रशाला ३ चन्द्रिका ४ । इति शब्दरत्नावली ॥ (मण्डलम् । यथा माघे । ५ । ४ ।
"यो चन्द्रकैमदजलस्य महानदीनां
नैत्रश्रियं विकसतो विदधुर्गजेन्द्राः ॥"
"चन्द्रकैश्चन्द्राकारैर्मण्डलैर्नेत्रश्रियम् ।" इति मल्लिनाथः ।) चन्द्रशब्दात् स्वार्थे के चन्द्रश्च ॥

चन्द्रकला, स्त्री, (चन्द्रं चन्द्राकारं सुखभावं कलयतीति । कलि+अच् टाप् च ।) नखाघातम् । चापामत्स्यः । इति शब्दरत्नावली ॥ (चन्द्रस्य कला ।) चन्द्रस्य षोडशभागेषु भागः । तद्यथा,—
"पूषा यशा सुमनसा रतिः प्राप्तिसंज्ञा धृतिः ।
ऋद्धिः सौम्या मरीचिश्च तथा चैवांशुमालिनी ॥
अङ्गिरा शशिनी चैव छाया सम्पूर्णमण्डला ।
तुष्टिश्चैवामृता चेति कलाः सोमस्य षोडश ॥"
आसां प्रयोजनं तिथिभेदे स्त्रीणामङ्गविशेषे स्थितस्य कामस्य मन्त्रादिसविन्दुप्रत्येकस्वरयुक्तनमोऽन्ततत्प्रत्येककलानामध्येयमनेनैवोद्धापनम् । इति कामशास्त्रम् ॥ * ॥ तन्त्रोक्ता कला यथा
"अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः ।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ॥
पूर्णापूर्णामृताकामदायिन्यः शशिनः कलाः ।
आसां प्रयोजनं कलावतीदीक्षादौ पूजनम् ॥"
इति तन्त्रसारम् ॥
(चन्द्रः । यथा कथासरित्सागरे । १ । १८ ।
"स च दृष्टमनस्तेन शापितो मनुना मया ।
ततो जाता हिमाद्रिस्पर्शमभ्येत्य चन्द्रकला यथा ॥")

चन्द्रकान्ता, स्त्री, (चन्द्रवत् कान्तिर्वा कान्तिर्यस्य गौराङ्गा यस्य ।) श्वेतचन्दनम् । कैरवम् । इति रत्नमाला ॥

चन्द्रकान्त पुं, (चन्द्रः कान्तः प्रियो यस्य ।) कैरवम् । (चन्द्र इव कान्तः कान्तियुक्तः । चन्द्रः कान्तः अभीष्टो अधिष्ठातृदेवोऽस्येति वा ।) मणिभेदः । इति मेदिनी । ते । १८५ ॥ अस्य पर्यायाः । चन्द्रमणिः २ चान्द्रः ३ चन्द्रोपलः ४ । इति हेमचन्द्रः । ४ । १३६ ॥ इन्दुकान्तः ५ चन्द्राश्मा ६ शशिकान्तोपलः ७ शीतांशुः ८ चन्द्रिकाद्रावः ९ शशिकान्तः १० । (यथा, मधुवने । १ । ८८ ।
"यत्रोपलाः स्वचन्द्र न सन्ति दृष्टे
चान्द्रन्ति दृक्षाणि मधुद्रवाणि ।
आभीरन्ते निज चन्द्रकान्त
निर्झराट्टैश्च पयांसि सोमः ॥")
अस्य गुणाः । शिशिरत्वम् । स्निग्धत्व । अस्य राजयक्ष्मशीतापित्तत्वम् । शिवप्रीतिकरत्वम् । स्वच्छत्वञ्च ॥ * ॥ तद्धृतधारिगुणाः । विमलत्वम् । मधुरत्वम् । पित्तदाहशिरोदाहकासमदाग्निदोषरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥

चन्द्रकान्ता, स्त्री, (चन्द्रः कान्तः प्रियो यस्याः ।) रात्रिः । इति शब्दचन्द्रिका ॥ (चन्द्रस्य कान्ता ।) चन्द्रपत्नी च ॥

चन्द्रकालानल, क्ली चक्रविशेषः । यथा —
"चन्द्रकालानलं चक्र सोमाकारं लिखेद्बुधः ।
चतुर्दिक्षु त्रिशूलानि मध्यभिन्नानि कारयेत् ॥
पूर्वत्रिशूलमध्यस्था दिक् चन्द्रादि लिख्यते ।
त्रिशूले च वह्निमध्ये मध्ये वह्नित्रिशूलके ॥
स्वशुक्तिशूले भामर्क्षं मध्यमं चाहरर्क्षे ।
शेषमासमध्यस्थ नामस्य चन्द्रभं ॥
वक्ष्येऽथ प्रयतेन प्रश्नमासत्रिचक्रकम् ॥'
इति समयामृतम् ॥

चन्द्रकी पुं, स्त्री, (चन्द्रको विद्यतेऽस्येति अच् । चन्द्रक+डीप् ।) मयूरः । इति त्रिकाण्डशेषः ॥

चन्द्रकुण्ड पुं, (चन्द्रस्य कुण्डः चन्द्ररश्मिनिर्मित कुण्डो वा । चन्द्राधिष्ठातृक कुण्ड इत्यर्थः ।) कामरूपस्थसरोवरविशेषः । (यथा कालिकापुराणे कामाख्याप्रतिष्ठाय ८२ अध्याये ।
'चन्द्ररश्मिसमुद्भूत । चन्द्रकुण्ड । नमोऽस्तु ते ॥")

चन्द्रकूट पुं (चन्द्राख्य कूटं यस्य । यद्वा चन्द्रः कूटे यस्य यस्य । प्रतिदिनं चन्द्रदर्शनकरणादस्य तथात्वम् ।) कामरूपस्थपर्वतभेदः । यथा —
"पूर्वे शार्ङ्गगिरेः शैलश्चन्द्रकूट इति स्मृतः ।
त्रिकोणाकारमध्याग्रभागे तु चन्द्रमण्डलम् ॥
द्वितीयमगस्त्यात्मा विन्ध्यस्यामलकूलम् ।
चन्द्रपीठमिति प्रोक्तं तेन चन्द्रः प्रपूजयेत् ॥
अद्यापि प्रतिदर्शे तु पर्वते तं निषापति ।
मद्विमोक्षरोधैव रश्मी रश्मिभिर्वृतः ॥
तस्यैव पूर्वभागे तु सोमकुण्डाख्यं सरः ।
तत्र स्नात्वा च पीत्वा च नरः कैवल्यमाप्नुते ॥
स्वर्गादवतरेच्चन्द्र कामाख्यातिर्थे यदा ।
तदा तदमिषयाति चन्द्रानीयराशय ॥
तिलोदकेनैव कुसुमैकरादिभिर्यजे ।
मध्ये पुण्यतमस्थाने सर्वं मन्त्रमिमं पठेत् ॥
चन्द्ररश्मिसमुद्भूत । चन्द्रकुण्ड । महाहदे ॥
सुधाधरत्व । नाडार । सं चन्द्र । कुरुषे वरं ॥
इत्यनेन तु मन्त्रेण स्नात्वा चन्द्रपार्श्वे ।
चन्द्रकूटं समारुह्य पूजयेद्यस्तु तं नरः ॥
यदिन्द्रस्यतु सम्प्रीतिस्तु तथाप्ता तत्र जायते ।
मनः चन्द्राचलं त्रिदशाः यान्ति नर धन्य ॥
सौरे तु चन्द्रकूटस्य चन्द्रमो नाम मे गिरिः ।
तस्मिन् वसति शशांकस्तु कामाख्याधिष्ठिते रतः ॥
अन्यभागे समाप्तात् मनुदेवेश्वरो हरिः ।
उभितु त्रिस्त्रियागां धात यांती नरः ॥
चन्द्रकूटस्य तु गिरेश्चन्द्रस्य तथा गिरेः ।
प्रतिष्ठ्य तथा चन्द्र प्रदक्षिणमपि प्रियाः ॥
चन्द्रकुण्डाचरे स्नात्वा समाचराय सङ्गमम् ।
आराध्य चन्द्र गोविन्द महाकुमारपुत्रान् ॥"
इति कालिकापुराणे कामाख्यामाहात्म्ये ८२ अध्यायः ॥

चन्द्रगुप्त पुं '(चन्द्रेण गुप्त रक्षितः । चन्द्र इवाह्लादकजनानन्दयुक्तत्वात्तथात्वं वा ।) राजविशेषः । (यथा, भागवते । १२ । १ । ११—१२ ।
"नवनन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति ।
तेषामभावे जगतीं मौर्या भोक्ष्यन्ति वै कलौ ।
स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ॥")
चित्रगुप्तः । इति केचित ॥

चन्द्रगोलस्था, पुं (चन्द्र एव गोलः चन्द्रगोलकस्थानं चन्द्रलोक इत्यर्थः । तत्र तिष्ठन्ति ये ।) पितरः । इति त्रिकाण्डशेषः । बहुवचनान्तोऽयं शब्दः ॥

चन्द्रगोलिका, स्त्री, (चन्द्रगोल साम्यमस्त्यस्याः । इति ठन् टाप् च ।) ज्योत्स्ना । इति हेमचन्द्रः । ९ । १० ॥

चन्द्रचञ्चला, स्त्री, (चन्द्र इव चञ्चलजलचञ्चलत्वात् चञ्चला ।) चन्द्रकमत्स्यः । इति शब्दरत्नावली जटाधरश्च ॥

चन्द्रतारा, पु (चन्द्रस्य तारा यत्र ।) अश्विन्यादिनक्षत्रादि । इति शब्दार्थः । बहुवचनान्तोऽयम् ॥

चन्द्रपुष्पा, स्त्री (चन्द्र इव पुष्पमस्याः ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

चन्द्रप्रभ, पुं (चन्द्र इव प्रभा यस्य ।) जिनविशेषः । इति हेमचन्द्रः । १ । २७ ॥ (चन्द्रप्रभाविशिष्टे, त्रि । यथा महाभारते । १२ । ७ ।
"चन्द्रप्रभं श्वेतगजातपत्र
सौवर्णदण्डभाजसे चोपभाङ्गं ॥")

चन्द्रप्रभा, स्त्री, (चन्द्रवत् प्रभा यस्या अस्याः ।) वाकुची । इति राजनिर्घण्टः ॥ औषधविशेषः यथा सुश्रुते ।
"हरिद्रिपुच्छवयोगधिकाभरणचवयम्
त्रियम् ।
मागधिकां तुसीं मधुमेहमाश्रित्यैव ।
लवणपारदयापुनश्चम्मणवकदाविरिद ।
कर्षांशकान्येव समानि कृत्वा
पलाष्टकं चाश्मजनादिकात् ।
त्रिफलसुद्रस्य पुरस्य धीमान्
पचकुर्य श्रीहरणदायेन ।
विनाशयत्वाशु प्रमेहपीडा
त्रिकृच्छ्रकृच्छ्राविसर्पविद्रधम् ।
चन्द्रप्रभा गुटिका प्रयोज्या
वाचानि नित्यमिति वर्धन ॥
भगन्दरं पाण्डुरकामलाश्च
हिक्कादिकं कुरुते च दीप्तिम् ।

छन्दान्यान् पित्तकफानिलोत्था
नाड़ीगते सर्व्वगते व्रणे च ।
प्रमेहकुष्ठ विद्रधिराजयक्ष्मा-
र्शश्च भगास्य प्रवले च योन्या ।
शुक्रक्षये चाश्मरिमूत्रकृच्छ्रे
शुक्रप्रवाहेऽप्युदरामये च ।
भक्तस्य पूर्व्वं सतत प्रयोज्या
सक्राद्युपानं सह मस्तुपानम् ।
घातो रसो जाङ्गलजो रसो वा
पयोऽथवा शीतजलानुपानम् ।
यथेन नागस्तुरगो जवेन
हन्ता सुपर्णं श्रवणे वराह ।
बलीपलितनिर्म्मुक्तो वृद्धोऽपि तरुणायते ।
न पानभोज्ये परिहार्य्यमस्ति
न शीतवातातपमैथुनेषु ।
प्रभुः समभ्यर्च्य हरप्रसादे-
नाम्ना गुडी चन्द्रमय प्रसादात् ।”
(“अततुताम्रक लौह नाग वङ्ग समं समम् ।
हरिताल तथाभ्र च तालीकोषवलमाया ।
मधूकं मधुयष्टी च धात्री च समभ्रकरा ।
कर्पूरं सारिवं सार ग्रन्थिका कण्टकारिका ।
चन्दनमुस्तुस्थीरमम्बलोधोदवेन्निनम् ।
भावयेन्मधुकद्रावा च नागवल्ल्या दिने दिनम् ।
वटिकां चन्द्रप्रभाभां नाम्ना चन्द्रप्रभां पराम् ।
भक्षयेत्तीव्रमेहार्त्तं घर्म्ममेहकृशात्मकम् ।
घात्री पटोलपत्र वा कषाय वासतायुतम् ।
अथवा पाययेच्चात्र सर्व्वमेहप्रशान्तये ।’
इति चन्द्रप्रभावटी ।
इति वैद्यकरसेन्द्रसारसंग्रहे प्रमेहाधिकारे ।)
चन्द्रभाग, पुं, (भज + भावे घञ् । चन्द्रस्य भागो-विभागो यत्र इति ।) पर्व्वतविशेषः । यथा,—
मार्कण्डेय उवाच ।
“चन्द्रभागा कथ सिन्धुकल्पोत्पन्ना महागिरौ ।
कौतुक परमत्रापि इदमोहितसप्तकम् ।
कथं च पर्व्वतश्रेष्ठश्चन्द्रभागाख्योऽभवत् ।
चन्द्रभागाख्या कथमासौ जाता इदान्विका ।
एतन्मे श्रोतुमाख्यातौ जायते कौतुक महत् ।
माहात्म्य चन्द्रभागाया कथायस्व विस्तरात् ।
मार्कण्डेय उवाच ।
शृणुतो चन्द्रभागायाः उत्पत्तिञ्चिव सत्तमाः ।
गुप्ताभिचन्द्रभागस्य माहात्म्य नामकारणम् ।
हिमवद्गिरिसञ्जातयोजनविस्तृत ।
योजनत्रय उच्छ्राय कान्तेन्दुपवनो गिरिः ।
तस्मिन् गिरौ पुरा वेधाश्चन्द्र सृष्ट सुधानिधिम् ।
विभज्य कल्पयामास दर्शार्थ स पितामहः ।
विभयश्च तथा तस्य निर्विष्टवान्दयाकरम् ।
कल्पयामास जगतो हिताय कमलासनः ।
विभक्तश्चन्द्रमा यस्मात् तस्मात् पर्व्वतसत्तमे ।
अतो इहाचन्द्रभाग नाम्ना चक्रे पुरा गिरिम् ।”
इत्यादि कालिकापुराणे ७ अध्यायः ।
चन्द्रभागा, स्त्री (चन्द्रभाग पर्व्वतविशेषः स उत्पत्तिस्थानमेतस्याः । “तत आगतः” ४ । ३ । ७४ । इत्यण् ततष्टाप् । चन्द्रभागात् पर्व्वतविशेषात् जाता इति वा ।) नदीविशेषः । इत्यमरः । १ । १० । ३४ । तत्पर्य्यायः । चन्द्रभागी २ चन्द्रिका ३ । इति शब्दरत्नावली । सा तु काश्मीरान्ते प्रसिद्धा । तस्या उत्पत्तिर्यथा —
मार्कण्डेय उवाच ।
“यत्र दक्षसुता भूता शान्तौ तस्य महागिरेः ।
तत्र भार्य्या देवसृष्टौ शीताख्या भवनाश्रिया ।
स्नापयित्वा यथा चन्द्र शीतातोयैर्म्मनोहरे ।
चन्द्र पयुक्षवाक्यात् सर्व्वं ते त्रिदिवौकसः ।
तच्च शीतारूप चन्द्रस्नानयोगाच्च चाम्रतम् ।
भूत्वा निपतित तस्मिन् इदमोहितसत्तके ।
तद्विद्व तदा तोय तस्मिन् सरसि निर्म्मलम् ।
तद्दृश्य स्वय वेधा विरञ्च साधु मज्जलम् ।
तद्दृशेनाम्भसा तस्मात् दुहिता कमलोत्तमा ।
चन्द्रभागेति सन्नाम विधिश्चक्रे स्वय तत ।
भार्य्यार्थं सागरस्तस्य अयाच भक्तसमातिं ।
तच्चैवाधिष्ठित तोय नद्यामिव विधातृति ।
निभिद्य पश्चिमे पार्श्वे गिरिं तत्र प्रवाहयत् ।
ततु चान्द्रसर्ज्जं भित्त्वा इदमोहितसंज्ञकम् ।
कासार सागर जाता चन्द्रभागा नदी तु सा ।
सागरोऽपि तदा भार्य्या चन्द्रभागां महानदीम् ।
तीन तोयप्रवाहेण निनाय भवन स्वकम् ।
एवं तस्मिन् समुत्पन्ना चन्द्रभागाख्या नदी ।
चन्द्रभागे महाशैल गुह्यौङ्गासमा सदा ।’
इति कालिकापुराणे २० अध्यायः ।
अस्या जलस्य गुणः । सुशीतलत्वम् । दाहपित्त वातनाशित्वञ्च । इति राजनिर्घण्टः ।
चन्द्रभागी, स्त्री (चन्द्रभागस्य तन्नाम्नाया प्रसिद्धस्य पर्व्वतस्य इयम् । चन्द्रभागपर्व्वतप्रभवत्वात्तथा-त्वम् । चन्द्रभाग + ‘तस्येदम् ।” ४ । ३ । १२० । इत्यण् । ततः स्त्रियां “शार्ङ्गरवाद्यञो ङीन् ।” ४ । १ । ७३ । । इति ङीष् ।) चन्द्रभागानदी । इति शब्दरत्नावली ।
चन्द्रभूति क्ली (चन्द्रस्येव शुभ्रा भूतिः सम्पत् कान्तिरिति यावत् यस्य । चन्द्रवत् शुभ्रदीप्ति तयात्त्व तथात्वम् ।) रूप्यम् । इति राज निर्घण्टः ।
चन्द्रमणि पुं (चन्द्रप्रियश्चन्द्रकान्त इत्यर्थ मणिः । शाकपार्थिववत् समासः ।) चन्द्रकान्तमणिः । इति हेमचन्द्रः । ४ । १३३ ।
चन्द्रमण्डल क्ली (चन्द्रस्य मण्डलम् ।) चन्द्रबिम्बम् । चन्द्रपरिवेषः । (यथा मोः रामायणे । ५ । १५ । ४७ ।
“तस्याश्च विमल वक्त्र इन्दुः प्रसुख्येशनम् ।
यथा राहुबिहितं चमभवच्चन्द्रमण्डलम् ।”)
चन्द्रमा [स्] पुं, (चन्द्रमानन्द मिमीते इदा चन्द्र कर्पूर तत्सादृश्येन माति परिमातीति । मा + “चन्द्रे मो डित् ।” उणा । ४ । २२८ । इति असिन् स च डित् । चन्द्र इत्यत्र आह्लादन इव औदन चन्द्र इति वा औदते इति दासो भारादिवृत्त्यादन इत्यत्र ।) चन्द्रः । इत्य मरः । १ । ३ । १३ । (यथा पञ्चतन्त्रे । २ । ६८
“एकोऽपि कोऽपि सच्चो यः शीघ्रं कोऽपि पुनर्नरम् ।
चतुर्दिशं करोत्येव कुमुदचन्द्रमसं यथा ।”)
चन्द्रमौलि, पुं, (चन्द्रः मौलौ शेखरे यस्य ।) शिवः । इति शब्दावली । ८ । (यथा, कुमारे । ५ । ८६ ।
“अद्य प्रभृत्यवनताङ्गि । तवास्मि दास क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ । ”)
चन्द्ररेखा, स्त्री (चन्द्रस्य रेखा इव आकृति र्यस्याः ।) बाकुची । इति भैषज्यरत्नावली । हाकुच इति भाषा । (यथा भैषज्यरत्नावल्यां कुष्ठाधिकारे ।
“गुडूची चन्द्ररेखा च सोमराट चक्रमर्द्दकम् ।’
बाकुचीप्रभृति चिनरत्तमस्या प्रातश्च ।)
चन्द्ररेणु पुं (चन्द्र आह्लादको रेणुरिव ।) काव्यचौरः । इति त्रिकाण्डशेषः ।
चन्द्रलेखा, स्त्री, (चन्द्रस्य लेखा इव आकृति र्यस्याः ।) बाकुची । इति राजनिर्घण्टः । (अप्सरोविशेषः । यथा काशीखण्डे । ६ । ७ ।
“उर्व्वशी मेनका रम्भा चन्द्रलेखा तिलोत्तमा ।’
छन्दोविशेषः । यथा छन्दोमञ्जर्य्याम् ।
‘म्रौ म्यौ यौ चेद्गदिता चन्द्रलेखा ।”)
चन्द्रलोहक, क्ली, (चन्द्र इव शुभ्र लोहक धातु मयम् ।) रूप्यम् । इति राजनिर्घण्टः ।
चन्द्रवंश पुं (चन्द्रस्य वंश अन्ववायः ।) चन्द्र सन्तानः । यथा । ब्रह्मणः पुत्र अत्रि तस्य पुत्रश्चन्द्र तस्य बुधः तस्य वैवस्वतमनुकन्यायां इलायां भार्य्यायां पुरूरवा स प्रतिष्ठाननगरे इदानीं विठोरस्य राजचक्रवर्त्ती आसीत् । तस्योर्व्वश्यां षट् पुत्रा आयुरादयः आयुर्नहुष । तस्य पुत्रो नहुषस्तस्य ययातिश्चक्रवर्त्ती । तस्य द्वे भार्य्ये दुर्व्वन्वंशो दानवराजस्य सुता शर्म्मिष्ठा शुक्रस्य कन्या देवयानी च । इत्र भार्य्या ययातेर्द्वौ पुत्रौ यदुस्तुर्व्वसुश्च । शर्म्मिष्ठायाश्च त्रयः द्रुह्यु अनु पूरुश्च । तत्र यदुप्रभृतयश्चत्वार पितुराज्ञाविरोधेन शप्ताः पित्रा प्रजा । कनिष्ठपुत्र पूरु राजा तत स्त्रै-राजचक्रवर्त्ती अभूत् । तुर्व्वसुदुह्युवंशा अधुना मुसलानवंशा इत्याहुः अर्व्वाचीनाः अभिमानिनः । पूरुस्तु पितुराज्ञया दुष्करं कर्म्म कृत्वा पितु र्यौवनप्रिय आसीत् । ययातिः अतः तस्मै अविशिष्ट पृथ्वी राजचक्रवर्त्तित्वे कृतवान् । अन्ये दक्षिणस्यां दिशि किञ्चिद्राज्यञ्च दत्तवान् । तथा हस्ते पूर्व्वस्यां दिशि हस्ति-नापुरे सुमेधस उत्तरस्यां अवध्ये सत्यां पुरी दक्षिणस्थां । यदुराजवंशीयस्ततपुत्रे । इत्यर क्रमशान्ने वैतरणोऽमलोके । तत्रापि तर्हि राज्यप्रतिष्ठम् । (अधुना तदेवेदं उच्यते । अन्ये पुत्र अत्रि (अक्षि) नाम ऋषिस्तस्य तस्य कान्ति नेत्र उदभूत् तत्र विवस्वत नाम प्रतिष्ठम् । तत एतदेव चन्द्रमा इन्दु इति अतः चन्द्राः पुत्राः । इदं-

II

गर्भदा चन्द्रभा चन्द्रो चन्द्रपुष्पा प्रियङ्करी ।”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

चन्द्रा स्त्री (चन्दयति आह्लादयतीति । चदि+णिच्+रक । स्त्रियां टाप् ।) एला । वितानम् । इति शब्दरत्नावली ॥ गुडूची । इति केचित् ॥

चन्द्रातप पुं, (चन्द्र इव आतपति शीतल करोति छायादानेन । आ+तप+अच् ।) आच्छादन विशेषः । चाँदोया इति भाषा ॥ तत्पर्य्यायः । उल्लोचः २ वितानम् ३ चन्द्रा ४ । इति शब्दरत्नावली ॥ (चन्द्रस्य आतपः इति ।) ज्योत्स्ना । इति हेमचन्द्रः । २ । २१ ॥ (यथा, कादम्बर्य्याम् । “चन्द्रातपमिव रसतातुपेतम् ॥”)

चन्द्रापीड पुं (चन्द्रः आपीडे शिखरे यद्वा आपीडः शिरोभूषणं यस्य ।) शिवः । इति त्रिकाण्डशेषः ॥ (काश्मीरस्य राजविशेषः । यथा राजतरङ्गिण्याम् । ४ । ४५ ।
“राजपुत्रमपि श्रीमाँश्चन्द्रापीडस्ततोऽभवत् ।
पीडितैर्दुःखिता लोका यस्मिन् पीडां न चक्रिरे ॥”
कादम्बरीवर्णितनायकविशेषः । स तु राजतारापीडस्य पुत्रः । यथा कादम्बर्य्याम् । १५० ।
“अतिक्रान्ते च षष्ठीजागरे प्राप्ते दशमेऽहनि पुण्ये मुहूर्त्ते गाः सुवर्णञ्च कोटिशो ब्राह्मणसात् कृत्वा ‘मातुरस्य मया परिपूर्णमण्डलश्चन्द्रः स्वप्ने मुखकमलं प्रविशन् दृष्टः’ इति स्वप्नानुरूपमेव राजा सूनोश्चन्द्रापीड इति नाम चकार ।” अथ हि एकदा मृगयां गच्छन् किन्नरमिथुनमनुधावन् हिमालयशिखरमधिरुह्य अच्छोदसरोवरसमीपं गतवान् । तत्रस्थश्च महाश्वेतां गन्धर्व्वकुमारीमवलोक्य तन्मुखात् तस्याः सखीवृत्तान्तमाकर्ण्य च तया सह गन्धर्व्वलोकं गतवान् । तत्र गत एव गन्धर्व्वराजस्य चित्ररथस्य कादम्बरीं नाम कन्यां ददर्श । दृष्ट्वा च तां कन्दर्पबाणपीडितो बभूव । ततोऽनतिकालेन तथाविधस्यैव पितुराज्ञया स्वपुरं वैशम्पायनस्कन्धावारे न्यस्तकेन परिकल्प्य चित्रार्पितमिव शून्यमनसा जगाम । अथ गच्छति काले वैशम्पायनमानेतुं गतोऽसौ चिरवर्त्तिवैशम्पायनस्य मृत्युवार्त्तामाकर्ण्य छिन्नतरुरिव भूतले पतितः महाश्वेताश्रमस्थितः एव विदीर्णहृदयो गतासुरभूत् । ततो नैयादैवेन रक्षितशरीरोऽसौ पुनर्जीवितश्च कादम्बरीं परिणीतवान् । एतेषां सविस्तरा सविशेषा कथा कादम्बर्य्यामेव विशेषतो विज्ञेया ॥)

चन्द्रावली स्त्री गोपीविशेषः । सा तु चन्द्रभानुकन्या अत्र श्रीकृष्णस्य नित्यप्रिया राधानुगा । यथा उज्ज्वलनीलमणौ ।
“राधाचन्द्रावलीमुख्याः प्रोक्ता नित्यप्रिया व्रजे ।
कृष्णवन्नित्यसौन्दर्य्यवैदग्ध्यादिगुणाश्रयाः ॥”

चन्द्रिका स्त्री (चन्द्र आश्रयत्वेनास्त्यस्याः । ‘अत इनिठनौ ।’ ५ । २ । ११५ । इति ठन् ।) ज्योत्स्ना । इत्यमरः । १ । ३ । १६ । (यथा, रघुः । १८ । ९८ ।
“चन्द्रमुत्कम्य सुरतश्रमापहां
मेघमुक्तविशदां स चन्द्रिकाम् ॥”)

स्थूलैला । चन्द्रकमनाख्य । चन्द्रभागावधी । इति शब्दरत्नावली ॥ कर्णस्फोटा । मल्लिका । श्वेतकण्टकारी । मेथिका । स्थूलैला । इति राजनिर्घण्टः ॥ चन्द्रसूरम् । इति भावप्रकाशः ॥ (पीठस्थदेवीविशेषः । सा तु हरिश्चन्द्रे विराजति । यथा, देवीभागवते । ७ । ३ । ३० ।
“महालयमहावीरा तु हरिश्चन्द्रे तु चन्द्रिका ।”
छन्दोविशेषः । तल्लक्षणं यथा, छन्दोमञ्जर्य्याम् ।
“ननततगुरुभिश्चन्द्रिकाश्वर्त्तुभिः ॥”
चन्द्रपुष्पा । अस्याः पर्य्याया यथा,—
“चन्द्रिका चर्म्महन्त्री च पशुमेहनकारिका ।
नन्दिनी कारवी भद्रा वासपुष्पा सुवासरा ॥”
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

चन्द्रिकाद्राव, पुं (चन्द्रिकया द्रावो द्रवणं यस्य ।) चन्द्रकान्तमणिः । इति राजनिर्घण्टः ॥

चन्द्रिकापायी, [न्] पुं स्त्री, (चन्द्रिकां ज्योत्स्नां पिबतीति । पा+णिनि ।) चकोरपक्षी । इति राजनिर्घण्टः ॥

चन्द्रिकाम्बुज क्ली (चन्द्रिका इव शुभ्रमम्बुजम् ।) सितोत्पलम् । इति राजनिर्घण्टः ॥

चन्द्रिल पुं (चन्द्रो विद्यतेऽस्य । चन्द्र+बाहुलकात् अस्त्यर्थे इलच् ।) शिवः । नापितः । वास्तूकम् । इति मेदिनी । ले, ८८ ॥

चन्द्री स्त्री (चन्दयति आह्लादयतीति । चदि+णिच्+रक । गौरादित्वात् ङीष् ।) वाकुची । इति राजनिर्घण्टः ॥

चन्द्रेष्टा, स्त्री, (चन्द्रः इष्टः प्रियो यस्याः । निष्ठायाः परनिपातः ।) उत्पलिनी । इति राजनिर्घण्टः ॥

चन्द्रोदय, पुं (चन्द्रस्य उदयः ।) आकाशे चन्द्रस्य प्रकाशः । स च प्रतिदिनं सार्द्धप्रहरद्वयव्यापिनी या तिथिस्तत्तिथ्यन्तमारेण भवति । तस्य प्रमाणं यथा पुराणसमुच्चये ।
“गर्गो क्रौष्टादिके यत्र रात्रौ दृश्येत चन्द्रमाः ।
सोमो राजा बभूव यत्र सुरभीपूजनकानाया ॥
तदुदयमानवश्च निश्चयात्मके निर्णीतम् ।
प्रतिपद्यामरात्रिकविनष्टमवापिन्यां द्वितीयायां चन्द्रदर्शनं समाप्ते । तदुत्थप्रसाधारणविशेषे दृष्टप्रातातनैव ।
द्वितीया विद्धा चेतु प्रतिपद्यामराह्निकी ।
अमावास्यां चतुर्दशी परतः सोमदर्शनान्विति ।
चन्द्रराशेश्च पञ्चाविमलशान्तश्चतुर्थो भागः ।
ततश्च यत्र प्रतिपदि भक्तपूर्णकापिनी द्वितीया तत्र चन्द्रदर्शनमावश्यकमिति ।” इति श्रीहरिभक्तिविलासे १४ विलासः ॥ (चन्द्रस्य यत्र लक्षणादिरचितश्चन्द्राकृतिरानयो यत्र ।) चन्द्रातपः । औषधविशेषः । इति हेमचन्द्रः । ३ । ३८४ ॥ स तु मकरध्वजाख्यरसविशेषः । यथा,—
“अर्द्ध मधु कनकस्य दृढेन
मतादपि शोधय समग्रम् ।
घोषे सुकाचघटबले प्रबद्धे
सम्यं विमर्द्दय कुमारिकाद्भिः ॥
तत्काचकूपी निहितं सुगाढं
मृत्पकपटैर्दिवसत्रयञ्च ।
पश्चात् क्रमाग्नौ सिकताख्यकुम्भे
ततो रसं पल्लवरागरम्यम् ॥
निधाय चैतस्य पलं पलानि
चत्वारि कर्पूररजस्तथैव ।
जातीफलं शाणमितं गृहीत्वा
कस्तूरिकाया इह शाणमेकम् ॥ ० ॥
चन्द्रोदया य कश्चिद्स्य भागो
शक्तोऽशिवस्त्रीरमणक्षमो ।
महोत्कटानां प्रमदाजनानां
गर्व्वाधिकस्य प्रथयत्यकाण्डे ॥
घृतं घनीभूतमतीव दुग्धं
मृदूनि मांसानि च मसकादि ।
माषान्नपिष्टानि भवन्ति पथ्या
न्यासन्दधायौ ऋषयसि पाच ॥ ० ॥
वलीपलितनाशनमङ्गुभृतां बलकारणं
समस्तमान्ययत्न मञ्जुरवीमबद्धनम् ।
तदस्य स्मरराशय भवति यस्य चन्द्रोदयः
स पञ्चशरसन्निभो मृगदृशां भवेद्दुर्लभः ॥”
इति शार्ङ्गधरे सङ्ग्रहः ॥

चन्द्रोन्या स्त्री, (चदि आह्लादे+भावे रक । चन्द्रस्य दर्शनादिजन्याह्लादस्य उदयो यस्याः ।) नेत्ररोगघ्नौषधविशेषः । यथाह चक्रपाणिदत्तः ।
“हरीतकी वचा कुष्ठं पिप्पली मरिचानि च ।
विभीतकस्य मज्जा च शङ्खनाभिर्मनःशिला ॥
सर्व्वमेतत् समं कृत्वा छागीक्षीरेण पेषयेत् ।
नाशयेत्तिमिरं कण्डुं पटलान्यर्ब्बुदानि च ॥
अधिकानि च मांसानि यश्च रात्रौ न पश्यति ।
अपि द्विवार्षिकं पुष्पं मासेनैकेन साधयेत् ॥
वर्त्तिश्चन्द्रोन्या नाम्ना तथा हरिद्रयान्वी ॥”)

चन्द्रोपल, पुं (चन्द्रप्रभोद्भासित उपलः प्रस्तरः ।) चन्द्रकान्तमणिः । इति हेमचन्द्रः । ४ । १३१ ॥

चप, सान्त्वे । इति कविकल्पद्रुमः ॥ (भ्वां परं सकं सेट् ।) सान्त्वं प्रियवचनं उपशमो वा । चपति पुत्रं माता । इति दुर्गादासः ॥

चप क न कल्के । इति कविकल्पद्रुमः ॥ (चुरां परं सकं सेट् ।) कल्कः कल्कीकरणम् । क न, चपयति तण्डुलं स्त्रिया । इति दुर्गादासः ॥

चपट पुं (चप+पचाद्यच् । चपः सान्त्वं चूर्णीकरणं वा तस्मै अटति प्रगल्भोऽपि । अट+पचाद्यच् । तत शकन्ध्वादित्वात् साधुः ।) चपेटः । इत्यमरटीका । चड़ इति भाषा ॥

चपल क्ली, (चपे सान्त्वने लाति गृह्णातीति । ला+“आतोऽनुपसर्गे कः ।” ३ । २ । ३ । इति कः ।) शीघ्रम् । इति मेदिनी । ले, ८८ ॥ चरिवम् । इति हेमचन्द्रः ॥

चपल, पं, (चोपति मन्दं मन्दं स्पन्दते इति । कुप मन्दायां गतौ+“कुपिवचोश्चपचा ।” उणां । १ । ११३ । इति कल प्रत्ययेन चपलः ।

दिशश्च ।) पारद । (अस्य पर्य्याया यथा —
"पारदो रसधातुश्च रसेन्द्रश्च महारसः ।
चपलः शिववीर्य्यञ्च रसः सूतः शिवाह्वयः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
मीनः । चोरकः । प्रस्तरविशेषः । इति मेदिनी ।
ले ८७ ॥ चव । इति राजनिर्घण्टः ॥ (नविक
विशेषः । यथा, सुश्रुते कल्पस्थाने ६ अध्याये ।
"पूर्व्वमुक्ताः गुञ्जचिषा भल्लिका ये चमायतः ।
नामलघणभेषज्यैरन्दादश निबोध तान् ॥"
"कुलिङ्गश्चालितश्चैव चपलः कपिलस्तथा ।"
एतस्य दर्शनेन यज्जायते भवति तद्दमनमनाय
च यदौषधं तद्यथा तत्रैव,—
"चपलेन भवेच्छर्द्दिर्मूर्च्छा च सह तृष्णया ।
अभदकाष्ठं सपटी चौमेघ त्रिवर्गा लिहेत ॥")
चपल, त्रि, (चोपति मन्दं मन्दं गच्छतीति । चुप
+ कल । धातोरुकारस्याकारादेशश्च ।) तरलः ।
चञ्चलः । इति मेदिनी । ले, ८८ ॥ (यथा
आर्य्यासप्तशत्याम् । ५६० ।
"विचरसि चरित छणे रासायां रासरसचपल
नयनायाम् ।
दयिते निविड्विमर्द्दं विधिरसि विरमासि विषमेषु ॥")
दोषमनिश्चित्य यथाभ्यनादे कर्त्ता । तत्पर्य्यायः ।
चिकुरः २ । इत्यमरः । ३ । १ । ४६ ॥ चिकलः ।
इति शब्दरत्नावली ॥
चपला, स्त्री, (चपल + टाप् ।) लक्ष्मीः । (यथा,
माघे । ८ । १६ ।
"निजय श्रिय सततमेतदिति
प्रथितं यदेव जलजन्म तथा ।
दिवमाश्रयात्तदपि सुभ्रुकृतो
चपलाजन प्रति न चोदमद ॥"
"चपला चामनवती स्त्री कमला च ।" इति
तट्टीकायां मल्लिनाथः ।) विद्युत् । (यथा
आर्य्यासप्तशत्याम् । १७६ ।
"किं पुषि ! गच्छशैलम्भमेव नवनीरदस्य निशाधि ।
अनुभव चपलाविनाशितगर्व्वितदेहाभार-
धारणी ।")
पुंश्चली । पिप्पली । इति मेदिनी । ले, ८८ ॥
(अस्याः पर्य्याया यथा —
"पिप्पली मागधी कृष्णा वैदेही चपला कणा ।
उपकुल्योषणा शौण्डी कोला स्यात्तीक्ष्णतण्डुला ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
जिह्वा । इति शब्दचन्द्रिका ॥ विजया । मदिरा ।
इति राजनिर्घण्टः ॥ (आर्य्याछन्दोविशेषः ।
तल्लक्षणं यथा, वृत्तरत्नाकरे २ अध्याये ।
"उभयार्द्धयोर्जकारौ द्वितीयतुर्य्यौ गमध्यगौ
यस्याः ।
चपलेति नाम तस्याः प्रकीर्त्तितं नागराजेन ॥")
चपेटः पुं (चप + बाहुलकात् एट । चप सान्त्वना
पूर्व्वोक्तरूप वा तत्सो एटति गच्छतीति । एट
गतौ + अच् ।) विस्तृताङ्गुलिपाणिः । चड़ इति
चापड़ इति च भाषा । तत्पर्य्यायः । प्रतलः २
प्रहस्तः ३ । इत्यमरः । २ । ६ । ८३ ॥

चपेटी, स्त्री भाद्रशुक्लषष्ठी । यथा, भाद्रशुक्लषष्ठ्यां
अपत्यफलप्राप्तिकामः स्त्रीजनादिकं कुर्य्यात् ।
सन्तानकामा जलसमीपे षष्ठीं पूजयेत् । षष्ठ्यै
नम इति चरण्यषष्ठीपूजावत् । चापेटाषष्ठी
यम् । इति तत्त्वचन्द्रिकाख्यातः ॥ ७ ॥ अन्यच्च ।
"प्रकृत्या द्वादशे मासि सम्यग्जातमखद्वये ।
सुते जाते तथा षष्ठ्यां षष्ठी द्वादशरूपिणी ॥
वैशाखे चान्दनी षष्ठी ज्यैष्ठे चारण्यसंज्ञिता ।
आषाढे कार्द्दमी षष्ठी श्रावणे लुण्ठनी मता ॥
भाद्रे चपेटी विख्याता दुर्गाख्याश्वयुजे तथा ।
नाडाख्या कार्त्तिके मासि मार्गे मूलकरूपिणी ॥
पौषे मासान्नरूपा च शीतला तपसि स्मृता ।
गोरूपिणी फाल्गुने च चैत्रेऽशोका प्रकीर्त्तिता ॥"
इति स्कन्दपुराणम् ॥
मन्थानषष्ठी इति केचित् ॥
चम उ भक्षे । इति कविकल्पद्रुमः ॥ (भ्वां उभं
सर्कं सेट् । उदित्वात् क्त्वावेट् ।) चमति । उ,
चमित्वा चान्त्वा । इति दुर्गादासः ॥
चम, न र उ भक्षे । इति कविकल्पद्रुमः ॥ (स्वा-
पर-सक सेट् । उदित्वात् क्त्वावेट् ।) न, चम्नोति ।
र वैदिकः । उ, चमित्वा चान्त्वा । इति दुर्गा-
दासः ॥
चमत्कारः पुं, (चमत्करोतीति । कृ + अण् ।)
अपामार्गः । इति शब्दरत्नावली ॥ (चमत् +
कृ + भावे घञ् ।) चित्तविस्ताररूपः । तत्-
पर्य्यायः । विस्मयः २ । इति साहित्यदर्पणम् ॥
अमत् ३ । इति त्रिकाण्डशेषः ॥ लोकातीतापा-
कलनेन किमेतदिति ज्ञानधाराजनने चित्तस्य
दीर्घप्रायश्च चित्तविस्तारः । इन्द्रियेभ्योऽनभ्य-
सितप्राप्तेन वैलक्षण्यदर्शनेन मनोव्यापार एव
चित्तविस्तार इत्यपरे । इति साहित्यदर्पणटीका ॥
(यथा कथासरित्सागरे । २९ । २५० ।
"एवं सकलजगत्सहृदयचमत्कारकारि-
चरितानाम् ।
अयमद्भुतावलि यत्र कथाप्रपरम्परा मदवीम् ॥")
चामर, क्ली, (चमरस्येदम् । चमर + अण् । अत्र
न वृद्धिः ।) चामरम् । इति मेदिनी । रे, १५४ ॥
चमरः पुं, (चमति भक्षयतीति । चम + "अमि
चमिभ्यश्चिच्चरीति ।" उणां । ३ । १३२ । इति
अरच् ।) चमरगः । तत्पर्य्यायः । चमरी २
चम्पः ३ पिञ्जः ४ वालधिप्रियः ५ । इति राज-
निर्घण्टः ॥ (यथा, वै रामायणे । ५८ । ६ ।
"चमरा चमराश्चैव ये चान्ये वनचारिणः ।")
चमरपुच्छः पुं, (चमरस्य पुच्छ इव पुच्छो यस्य ।)
कोकड़ः । स तु विषेशयः । इति राज-
निर्घण्टः ॥ चामरे क्ली च ॥
चमरिकः, पुं, (चमरमिव केशरोऽस्यस्य । "अत
इनिठनौ ।" ५ । ५ । ११५ । इति ठन् ।) कोविदार-
वृक्षः । इत्यमरः । २ । ४ । २२ ॥ (पर्य्यायोऽस्य
यथा, भावप्रकाशस्य पूर्व्वखण्डे १ भागे ।
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुद्दालोऽस्त्युमपत्र काञ्चनः कोविदारी ॥")

चमरी, स्त्री, (चमरस्य स्त्रीजातिः । चमर +
स्त्रियां ङीष् ।) चमरमृगी । तत्पर्य्यायः । दीर्घ-
वाला २ गिरिप्रिया ३ । इति राजनिर्घण्टः ॥
(यथा कुमारे । १ । १३ ।
"यश्चामरैरुक्तं गिरिराजशब्द
कुर्व्वन्ति वालव्यजनैश्चमर्य्यः ॥")
मञ्जरी । इति मेदिनी । रे, १५२ ॥
चमस, पुं, क्ली (चम्यते भक्ष्यते पीयते इति यावत्
सोमोऽस्मिन्निति । चमु भक्षणे + "अत्यवि-
चमीति ।" उणां । ३ । ११७ । इति असच् ।)
यज्ञपात्रभेदः । इति मेदिनी । से २१ ॥ चमच्
इति भाषा ॥ (तल्लक्षणादिकमस्य यथा,—
"चमसानां तु वक्ष्यामि दण्डाः स्युश्चतुरङ्गुलाः ।
त्र्यङ्गुलस्तु भवेत् खातो विस्तारश्चतुरङ्गुलः ॥
विकङ्कतमयाः प्रस्थाः अनिसाश्चमसाः स्मृताः ।
अन्येभ्यो वापि वा कार्य्यास्तैषां दक्षिणतमम् ॥
होतुर्मेखल एव स्यात् मध्यश्चतुरस्रक ।
उद्गातश्चाय मालि स्याद् याजमानः पृथु
स्मृतः ॥
प्रशास्तुश्चतुर्ष्कः स्याद्ब्राह्मणो मध्यविशः ।
पोतुरपि त्रिशाली स्यान्नेष्टुः स्यात्स्थालकः ॥
अच्छावाकस्य रास्नाय आग्नीध्रस्य मधूमकः ।
इत्येते चमसाः प्रोक्ताः ऋत्विजां यज्ञकर्म्मणि ।
पलाशाद्वा वटाद्वाप्यश्वत्थाद्वा चमसाः स्मृताः ॥")
चमसः, पुं, (चम्यते भक्ष्यते इति । चम + असच् ।)
नपटः । पिष्टकः । लड्डुकः । इत्यजयपालः ॥
(ऋषभदेवस्य पुत्राणामन्यतमः । यथा भाग-
वते । ५ । ४ । ११ ।
"कविर्हविरन्तरिक्षः प्रबुद्धः पिप्पलायनः ।
आविर्होत्रोऽथ द्रुमिलश्चमसः करभाजनः ।
एते भागवतधर्म्मप्रदर्शना नव महाभागवताः ॥")
चमसी, स्त्री (चमस + गौरादित्वात् ङीष् ।)
शुक्लमसूरादिपिष्टम् । कांटरचित मदपाक
मिश्रणे । इति सिद्धान्तचन्द्रटीकायां भरतः ॥
"चूर्णं यच्छ्यामशालो चमसी सा निगद्यते ।"
इति भावप्रकाशः ॥
चमू, स्त्री, (चमन्ति भक्षयन्ति शत्रून् या यत्सैन्यम् ।
चम + "कृषिचमितनीति ।" उणां । १ । ८१ । इति
ऊः ।) सेनामात्रम् । (यथा, गीतायाम् । १ । ३ ।
"पश्यैतां पाण्डुपुत्राणामाचार्य्य महतीं चमूम् ।")
सेनाविशेषः । सा च ७२९ गजाः ७२९ रथाः
२१८७ अश्वाः ३६४५ पदातयः । गजादिभिः
७२९ त्रिगुणसंख्याविशिष्टसेना । इत्यमर-
मेदिनीकरौ ॥
चमूरुः, पुं स्त्री (चमतीति । चम + "खर्जिपिञ्जा
दिभ्य ऊरोलचौ ।" उणां । ४ । ९० । इति ऊरः ।
पृषोदरादित्वात् अत्र उत्वञ्च ।) हरिणविशेषः ।
इत्यमरः । २ । ५ । ९ ॥ (यथा, माघे । ११ । ८ ।
"अहाय चामरचमूरुकान्ता
कुंचेन कान्तिर्मृगेन्द्रराजम् ॥")
चम्पः, पुं (चम्पतीति । चम्प + अच् ।) कोवि-
दारवृक्षः । इति शब्दमाला ॥

चम्पकं क्ली (चम्पति यद्गन्धं गच्छतीति। चम्प + ण्वुल।) कदलीफलविशेषः। चापा कला इति भाषा। अस्य गुणाः। वातपित्तनाशित्वम्। गुरुत्वम्। शैत्यकारित्वम्। अतिशीतत्वम्। इति मात्रे मधुरत्वञ्च। इति राजवल्लभः। (चम्पकस्य इदम्। चम्पक + अण्। ततोऽणो लुक्।) चम्पकपुष्पम्। (श्रीहर्षाक्तोलसिद्धिः। यथा—
"आर्येण कार्यं परीक्षितमथवा तावत् अद्यापि यावद्गुरुशिष्यसङ्गपारिभिः सह न च माद्यति। भवति ग्रहदां गुरुशिष्यसङ्गपारिर्यो यदाद कार्ग माभि ग्रहसुधाभिः सा पिच्छिलचतुर्थी चम्पकमुच्यते॥")

चम्पक, पुं, (चम्पयति षट्पदान्यादिकं गच्छतीति। चम्प + ण्वुल।) वृक्षविशेषः। चापा इति भाषा। तत्पर्यायः। चाम्पेय २ हेमपुष्पकः ३। इत्यमरः। २।४।६३॥ स्वर्णपुष्प ४ शीतल च्छद ५ सुभग ६ भृङ्गमोही ७ शीतलः ८ भ्रमरातिथि ९ सुरभि १० दीपपुष्प ११ स्थिर गन्ध १२ अतिगन्धकः १३ स्थिरपुष्प १४ हेम पुष्प १५ पीतपुष्प १६ हेमाङ्गः १७ सुकुमार १८ वनदीपः १९। अस्य गुणाः। कटुत्वम्। तिक्तत्वम्। शिशिरत्वम्। दाहकुष्ठकण्डूव्रण-नाशित्वम्। गुणाढ्यो राजचम्पकः। इति राजनिर्घण्टः॥ कषायत्वम्। मधुरत्वम्। विष-कृमिकृच्छ्रकफवातास्रपित्तनाशित्वञ्च। इति भाव-प्रकाशः॥ मतस्यफलकोषिकं स्वादयनम्॥

चम्पककलिका, स्त्री, (चम्पकस्य कलिका कोरकः।) चम्पककोरकः। तत्पर्यायः। गन्धफली २ बहु-गन्धा ३ गन्धमोदिनी ४। इति राजनिर्घण्टः॥

चम्पकचतुर्दशी, स्त्री (चम्पकप्रधाना चतुर्दशी। अस्यां चम्पकैः शिवपूजनात् शिवलोकप्राप्ति-साधनत्वम्।) ज्यैष्ठशुक्लचतुर्दशी। यथा, ज्यैष्ठ माससुपक्रम्य मत्स्यसूक्ते ४५ पटलः।
"चतुर्दश्यां तु शुक्लायां चम्पकैः पूजयेत् शिवम्।
चतुर्भिर्वा सहस्रैर्वा शतैर्वा परमेश्वरि।॥
पायसञ्च बलिं दद्यात् तथैव च चरेद्व्रती।
कृष्णेन विशिष्टेन न भूयो जायते भुवि॥
त्रिसन्ध्यं चैव चम्पकैश्च सहस्रं तु कुर्यादिति।
चयञ्चैव वराम् दन्ति कृत्वा कोटाग्नि याति च॥
चम्पकचतुर्दश्यां ख्याता पूजयेद्वा सदाशिवम्।
इष्टकामान् स प्राप्नोति न संशयः॥"
अन्यच्च।
"चतुर्दश्यां शुक्लायां ज्यैष्ठे मासि महेश्वरम्।
चम्पकैः पूजयन् भक्त्या शिवलोकमवाप्नुयात्॥"
इति भविष्योत्तरे ११ पटलः॥
अपि च।
'ज्यैष्ठशुक्लचतुर्दश्यां पुष्पैश्चम्पकसम्भवैः।
अर्चयित्वा महादेवं कृतार्थः स भवेन्नरः॥'
इति मदनरत्नकौमुदीधृतभविष्यपुराणवचनम्॥

चम्पकरम्भा स्त्री (चम्पक इति नाम्ना प्रसिद्धा रम्भा। यद्वा चम्पकवद्गन्धयुक्तफलविशिष्टा रम्भा।) सुवर्णकदली। इति राजनिर्घण्टः॥

(चापा कला। इति भाषा॥ गुणादिकं चम्पक शब्दे द्रष्टव्यम्॥)

चम्पकालु, पुं (चम्पकवत् चम्पकपुष्पवर्णवत् आलु रम्भाकारपीतकोषो यस्य। यद्वा, चम्पक चम्पकवत् आलाति प्रतिगृह्णातीति। आ + ला + मितद्र्वादित्वात् डु।) पनसः। इति भूरिप्रयोगः॥

चम्पकुन्द, पुं (चम्पकवर्णवत् उनत्तीति। उन्दी क्लेदने + अच। पृषोदरादित्वात् पकारलोपः।) मत्स्यभेदः। चादकुड़ा। इति भाषा। अस्य गुणाः। गुरुत्वम्। शुक्रकारित्वम्। मधुरत्वम्। वातपित्तनाशित्वञ्च। इति राजवल्लभः॥

चम्पकोष पुं, (चम्पकस्य इव कोषो यस्य।) पनसः। इति त्रिकाण्डशेषः॥

चम्पा, स्त्री, (चम्पा नदी विद्यतेऽस्यामिति। "अर्श आदिभ्योऽच्।" ५।२।१२७। इत्यच्। यद्वा, चम्पेन राज्ञा हरिश्चन्द्रस्य प्रपौत्रेण निर्मिता या पुरी। यदुक्तं भागवते। ९।८।१।
"हरितो रोहितसुतश्चम्पस्तस्माद्विनिर्मिता। चम्पा पुरी ॥")
कर्णपुरी। अधुना भागलपुर इति ख्याता। तत्पर्यायः। मालिनी २ लोमपादपूः ३ कर्णपूः ४। इति हेमचन्द्रः। ४। ४२॥ चम्पावती ५ चम्पा पुरी ६। इति शब्दरत्नावली॥ (इयन्तु अङ्ग-देशान्तर्गता। यदुक्तं हेमचन्द्रेण। ४। २८।
"अङ्गास्तु हरिकेशीया अङ्गाश्चम्पोपलक्षिता॥"
तथा च महाभारते। १०। ५। ६—७।
"प्रीत्या दत्तौ स कर्णाय मालिनीं नगरीमथ।
अङ्गेषु नरशार्दूल स राजासीत् सपत्नजित्॥
पालयामास चम्पाञ्च कर्णः परबलार्दन।
दुर्योधनस्यानुमते तवापि विदितं तथा॥"
इयमेव पुरा राज्ञो लोमपादस्य राजधानी आसीत्। इति रामायणम्॥ अङ्गदेशशब्दे विवृतिः॥)

चम्पाधिप, पुं, (चम्पाया अधिप ईश्वरः।) कर्ण राजः। इति हेमचन्द्रः॥

चम्पापुरी, स्त्री, (चम्पा एव पुरी।) चम्पा नगरी। इति शब्दरत्नावली॥

चम्पालु, पुं, (चम्पकवर्णाकारकोषवर्णं आलाति आ + ला + डु।) पनसः। इति शब्दरत्नावली॥

चम्पावती, स्त्री (चम्पा तन्नाम्नी प्रसिद्धा नदी विद्यतेऽस्यामिति। चम्पा + मतुप्। मस्य वत्वम्।) चम्पापुरी। इति शब्दरत्नावली॥

चम्पू स्त्री, काव्यविशेषः। इति जटाधरः॥ तल्लक्षणं यथा,—
"गद्यपद्यमयी काव्यं चम्पूरित्यभिधीयते॥"
इति साहित्यदर्पणे। ६। ३२८॥

चम्पेश पुं, (चम्पाया ईशः।) कर्णराजः। इति त्रिकाण्डशेषः॥

चम्पोपलक्षित पुं, (चम्पया नगर्या नद्या वा उपलक्षितः।) अङ्गदेशः। इति हेमचन्द्रः। ४। २४। तद्देशस्थे तु भूम्नि॥

चम, गतौ। इति कविकल्पद्रुमः। (भ्वा-पर-सक-सेट्।) चमति। इति दुर्गादासः॥

चय क गतौ। इति कविकल्पद्रुमः। (भ्वा आत्म-सक-सेट्।) क चयते। इति दुर्गादासः॥

चय, पुं (चीयते इति। चि + "एरच्।" ३।३।५६। इति कर्मणि अच्।) चयनम्। इत्यमरः। २।९।१॥ तत्तु प्राकारादिगतवप्रम्। यदुपरि प्राकारो निर्मीयते स। चयार इति ख्यात इति केचित्। इति तट्टीकासारसुन्दरी। दुर्गनगरे उद्भृतमृत्तिकाकूटवत् यदुपरि प्राकारो निवेश्यते। तथाचार्यचाणक्यम्। खातद्वयखनन वप्रं कारयेत तस्योपरि प्राकारमिति। इति भरतः॥ समूहः। (यथा माघे। १।३।
"चयस्त्विषामित्यवधारितं पुरा।")
समाहतिः। इति मेदिनी। चे, २१॥ प्राकारः। (यथा महाभारते। ३। १६। १०।
"शैलाभश्च महाकायश्चयाट्टालकशोभिता।")
पीठम्। इति हेमचन्द्रः॥ (दोषाणां सञ्चयार्थे प्रथमावस्था प्रकारविशेषः। तद्यथा,—
"चीयते वायुर्ग्रीष्मे प्रावृट्काले प्रकुप्यति। वर्षासु चीयते पित्तं शरत्काले प्रकुप्यति॥ हेमन्ते चीयते श्लेष्मा वसन्ते च प्रकुप्यति। प्रायेण प्रशमं याति स्वयमेव समीरणः॥ शरत्काले वसन्ते च पित्तं प्रावृषि च कफः॥"
"चयकोपशमान् दोषा विहाराहारसेवनैः। समानैर्यान्त्यकालेऽपि विपरीतैर्विपर्ययम्॥"
इति सुश्रुतसूत्रे स्थाने एकविंशाध्याये दोषविस्तारोक्तौ । यथा,—
"अहितैर्नानिलैर्नैव तु सर्वनिर्मोक्षभवति। चयः प्राप्नोति गच्छति प्रकोपं स्पष्टतां इतम्"
इति वैद्यकचक्रपाणिदत्तपर्यायप्रयोगाधिकारे॥)

चर, गमने। भक्षणे। व्यापारे। इति कविकल्पद्रुमः॥ (भ्वा पर-सक सेट्।) चरति। इति दुर्गादासः॥

चर, क संशीत्यसंशीत्ये। इति कविकल्पद्रुमः॥ (चुरा पर-सक सेट्।) संशीति संशयः। क, विचारयति वो प्रश्नोत्तरं युक्तम्। चर असंशये। इति पाठे किन्तु संशये इति मतिया संश्लेषे शि लि रत्ना ख्यातिमात्रः। इति दुर्गादासः॥

चर, पुं, (चरति स्वपरराष्ट्रयो शुभाशुभवार्ताम् आप्नोतीति। चर + अच्।) राष्ट्रे शुभाशुभादिज्ञानार्थं राज्ञा नियोज्य विप्रकृष्टं प्रेरितः परराष्ट्रगामी अभ्यवहर्ता। तत्पर्यायः। यथार्हवर्णः २ प्रणिधिः ३ अपसर्पः ४ चारः ५ गूढपुरुषः ६ ७। इत्यमरः। २।८।११॥ अपसर्पकः ८ प्रणिध्यः ९ प्रणिधानः १० मन्त्रि ११ मन्त्रगूढः १२ हिमवद्गो १३। इति शब्दरत्नावली॥ उदासीनः १४। इति चर॥ तकारादी निःसृतादिकाभिर्निबोधितः चरः। चर चरो। चर चतुर्देशदेश भयकरः चरकः। इति भरतः १४। तत्र सर्वदर्श,

'विवस्वानिव तेजोभिरनभ्रानिव वेगतः ।
रामः चरेभ्यस्तत् सर्व्वं प्राप्नुयाल्लोकसम्मते ॥
तर्केङ्गितज्ञः स्मृतिमान् स्वीयभाषाप्रकाशकः ।
क्लेशायाससहो दक्षः सर्व्वत्र भयवर्ज्जितः ॥
सुभक्तो राजसु तथा काम्यार्थप्रतिपत्तिमान् ।
द्वयो निदर्शनाचारेण परराष्ट्रं विचक्षणः ॥
कालज्ञो मन्त्रकुशलान् सवर्णांश्चरांश्चिकित्सकान् ।
तथान्यानपि युञ्जीत समर्थान् शुद्धचेतसः ॥
अकुहांश्च तथाशुभान् दृष्टार्थान् तत्त्वभाषिणः ।
माषच्छिन्नतापसादीन् परराष्ट्रे नियोजयेत् ॥
स्वदेशपरदेशस्थान् प्रधीनान् सुविचक्षणान् ।
शाणाङ्घ्रान् बहूंश्चैव चरणो विनियोजयेत् ॥
नैकस्य वचने राजा चारस्य प्रत्ययं व्रजेत् ।
द्वयोः सम्बन्धमाज्ञाय तद्युक्तं कार्य्यमारभेत् ॥
तस्माद्राजा प्रयुञ्जीत चरान् बहुश्रुतान् बहून् ।
नीरेतोवामनाः कुब्जाः काङ्क्षिणा ये च कारवः ॥
भिक्षुण्यश्चारण्या दास्यो मालाकाराः कलाविदः ।
अन्तःपुरगतां वार्त्तां निहरेयुरलक्षिताम् ॥
प्रकाशश्चाप्रकाशश्च चरस्तु द्विविधो मतः ।
अप्रकाशोऽयमुद्दिष्टः प्रकाशो दूतसंज्ञकः ॥"
इति भोजराजकृतयुक्तिकल्पतरुः ॥ ● ॥
अम्लद्रुतभेदः । भौमः । चलः । इति मेदिनी । रे, ३ ॥ खञ्जनपक्षी । इति शब्दमाला ॥ कपर्द्दकः । इति राजनिर्घण्टः ॥ मेषकर्कटतुलामकराख्यराशि । इति ज्योतिषम् ॥ अस्थिर विभूतिमिव चलमटनसमितरन्यसमपि चरमे । इति दीपिका ॥ (यथा, तिथितत्त्वे ।
"चरलग्ने चरांशे वा स्थापनञ्च विवर्ज्जनम् ॥"
जङ्गमे, त्रि । यथा मनुः । ७ । १५ ।
"तस्य सर्व्वाणि भूतानि स्थावराणि चराणि च ।"
तथाच चरके सूत्रस्थाने २७ अध्याये ।
"चरः शरीरावयवाः स्वभावो धातवः क्रिया ।
लिङ्गं प्रमाणं संस्कारो मात्रा चास्मिन् परीक्ष्यते ॥
चरोऽनूपजलाकाशधन्वाद्यो भक्षविधिः ।
जलजानूपजाश्चैव जलानूपचराश्च ये ॥
गुरुभक्ष्याश्च ये सत्त्वाः सर्व्वे ते गुरवः स्मृताः ॥")
चरकः, पुं, (चर एव । स्वार्थे कन् ।) चारः । इत्यमरादिकोषः ॥ पर्पटः । इति राजनिर्घण्टः ॥ (चरति गच्छति वेत्ति वैद्यवेदकादीनि धर्म्मज्ञानादीनीति । चर+अच् ततः कन् च । यद्वा चर इव महीतले इतस्ततो भ्रमतः । चर+इवार्थे कन् ।) मुनिविशेषः । तत्कृततन्नामकग्रन्थः । तयोरुत्पत्तिर्यथा —
"यदा मत्स्यावतारेण हरिणा वेद उद्धृतः ।
तदा शेषश्च तत्रैव वेदं साङ्गमवाप्तवान् ॥
अथर्व्वान्तर्गतं सम्यगायुर्व्वेदञ्च लब्धवान् ।
एकदा स महीवृत्तं द्रष्टुं चर इवागतः ॥
तत्र लोकान् गदैर्ग्रस्तान् व्यथया परिपीडितान् ।
स्थलेषु बहुषु व्याप्तान् म्रियमाणांश्च दृष्टवान् ॥
तान् दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः ।
अनन्तश्चिन्तयामास रोगोपशमकारणम् ॥
सञ्चिन्त्य स स्वयं तत्र मुनेः पुत्रो बभूव ह ।
यतश्चर इवायातो न ज्ञातः केनचिद्यतः ॥
तस्माच्चरकनामासौ विख्यातः क्षितिमण्डले ।
स भाति चरकाचार्य्यो देवाचार्य्यो यथा दिवि ॥
सहस्रवदनस्यांशो येन ध्वंसो रुजां कृतः ।
आत्रेयस्य मुनेः शिष्या अग्निवेशादयोऽभवन् ॥
मुनयो बहवस्तैश्च कृतं तन्त्रं स्वकं स्वकम् ।
तेषां तन्त्राणि संस्कृत्य समाहृत्य विपश्चिता ॥
चरकेणात्मनो नाम्ना ग्रन्थोऽयं चरकः कृतः ॥"
इति भावप्रकाशः ॥
चरटः, पुं, (चरति इतस्ततो विचरतीति । चर+बाहुलकात् अटच् ।) खञ्जनपक्षी । इति शब्दमाला ॥
चरणं, क्ली (चर+भावे ल्युट् ।) गमनम् । (यथा, ऋग्वेदे । ९ । ११३ । ९ ।
"यत्रानुकामं चरणं त्रिनाके त्रिदिवे दिवः ॥")
भक्षणम् । (यथा, मनुः । २ । १८७ ।
"अकृत्वा भैक्षचरणमसमिध्य च पावकम् ।
अनातुरः सप्तरात्रमवकीर्णिव्रतं चरेत् ॥")
आचारः । इति हेमचन्द्रः । ३ । ५७ ॥ (यथा ऋग्वेदे । १ । ११६ । ६ ।
"अप्सरसां गन्धर्व्वाणां मृगाणां चरणे चरन् ॥")
चरणः, पुं क्ली, बह्वृचादि । (यथा, पञ्चतन्त्रे । ४ । २ ।
"न हर्षे चरणं गोत्रं न च विद्या कुलं न च ।
अतिथिं वैश्वदेवान्ते श्राद्धे च मनुरब्रवीत् ॥"
अपि च महाभाष्यवचनम् । यथा,—
"कठकालापनियाश्चा गोत्रं च चरणैः सह ॥"
"चरणशब्दो वेदैकदेशपाठी कठादिरूपः ।" इति मुग्धबोधटीकायां दुर्गादासः ॥) मूलम् । गोत्रम् । इति मेदिनी । णे, ४७ ॥ (चरतीति । चर+ल्युः । चर्य्यतेऽनेनेति करणे ल्युट् वा ।) अधमाङ्गम् । तत्पर्य्यायः । पादः १ पत् २ अङ्घ्रिः ३ । इत्यमरः । २ । ६ । ७१ ॥ विक्रमः ५ पदः ६ आक्रमः ७ । इति राजनिर्घण्टः ॥ क्रमणः ८ चलनः ९ क्रमः १० । इति हेमचन्द्रः । ३ । २८० ॥ पदम् ११ पाः १२ । इति जटाधरः ॥ (यथा, मनुः । ९ । २७७ ।
"अङ्गुलीर्ग्रन्थिभेदस्य छेदयेत् प्रथमे ग्रहे ।
द्वितीये हस्तचरणौ तृतीये वधमर्हति ॥"
श्लोकचतुर्थभागः । यथा वृत्तरत्नाकरे प्रथमाध्याये ।
'शेषं गाथास्त्रिभिः षड्भिश्चरणैश्चोपलक्षिताः ॥")
चरणग्रन्थिः, पुं (चरणस्य ग्रन्थिः ।) गुल्फः । इति हेमचन्द्रः । ३ । २८५ ॥
चरणव्यूहः, क्ली (चरणानां वेदशाखानां व्यूहो यत्र ।) वेदव्यासविरचितचतुर्व्वेदविवरणग्रन्थविशेषः । तत्तु देवशब्दे द्रष्टव्यम् ॥
चरणायुधः, पुं (चरणौ एवायुधं अस्त्रविशेषो यस्य ।) कुक्कुटः । इत्यमरः । २ । ५ । १७ ॥ (पर्य्यायोऽस्य यथा,—
"कुक्कुटः कृकवाकुः स्यात् चरणायुधः ।
ताम्रचूडस्तथा दक्षो यामनादी शिखण्डकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे ॥ अस्य मांसगुणादिकं कुक्कुटशब्दे द्रष्टव्यम् ॥
चरणास्त्रेऽपि । यथा, रामायणे । ३ । ५६ । ३५ ।
"मुखपक्षप्रहारैश्च जटायुश्चरणायुधः ॥")
चरमः, त्रि (चरतीति । "चरेश्च ।" उणां ५ । ६८ । इति अमच् ।) अन्तः । पश्चिमः । इत्यमरादिकोषः ॥ (यथा, मनुः । २ । १९४ ।
"उत्तिष्ठेत् प्रथमं चास्य चरमं चैव संविशेत् ॥")
चरमक्ष्माभृत्, पुं (क्ष्मां बिभर्त्तीति । भृ+क्विप् । ततः चरमश्चासौ क्ष्माभृच्चेति कर्म्मधारयः ।) अस्ताचलः । इत्यमरः । २ । ३ । २ ॥
चरमाचलः, पुं (न चलतीति पचाद्यच् अचलः पर्व्वतः । ततः चरमश्चासौ अचलश्चेति कर्म्मधारयः ।) अस्ताचलः । इति त्रिकाण्डशेषः ॥
चरमाद्रिः, पुं (चरमश्चासावद्रिश्चेति ।) अस्ताचलः । इति हेमचन्द्रः ॥
चराचरं, क्ली (चराचरयोः समाहारः ।) जगत् । इति मेदिनी । रे, २६ ॥ (तथा च मनुः । १ । ५७ ।
"एवं स जाग्रत्स्वप्नाभ्यामिदं सर्व्वं चराचरम् ।
सञ्जीवयति चाजस्रं प्रमापयति चाव्ययः ॥")
आकाशः । इति धरणी ॥ जङ्गमाजङ्गमम् । यथा, देवीमाहात्म्ये ।
"तया विसृज्यते विश्वं जगदेतच्चराचरम् ॥"
चराचरः, त्रि, (चरश्च आचरो चकार-चेरादिकौ तौ विद्येतेऽस्य ।) जङ्गमः । इत्यमरः । ३ । १ । ७४ ॥ स्थः । इति विश्वः ॥ इति हेमचन्द्रः ॥ कपर्द्दके पुं । इति राजनिर्घण्टः ॥ (चरतीति चरो जङ्गमः अचरः स्थावरः । चरेण सह अचरः । स्थावरजङ्गमः । यथा, भगवती । ३ । ६ । ८ ।
"पुरोभाग्योन्यथाकारमकार्षीत् लोकाश्चराचराः ॥")
चरिः, पुं, (चर+"सर्व्वधातुभ्य इन् ।" उणां ४ । ११७ । इति इन् ।) पशुः । इत्युणादिकोषः ॥
चरितं, क्ली (चर+भावे क्तः ।) चरित्रम् । इति शब्दरत्नावली ॥ (यथा मालत्याम् । १० । ११ ।
"कथितो वंशविस्तारो भवता सोमवंशजो ।
राज्ञामुभयवंश्यानां चरितं परमाद्भुतम् ॥")
तद्द्विविधं यथा, उज्ज्वलनीलमणौ ।
"अनुभावाश्च लीलाश्चेत्युक्तं चरितं द्विधा ।
अनुभावाः अलङ्कारास्तथोद्भास्वराख्यवाचिकाश्च । लीला त्वाख्यायिका रासकन्दुकक्रीडादिका चारुक्रीडा प्रकीर्त्तिता । नाट्ये वैदग्ध्ये गोष्ठीच पर्व्वणीहारो गोकुलनिवसता न्वितः ।' (यथा, गीतगोविन्दे । १ । २ ।
"वाग्देवताचरितचित्रितचित्तसद्मा ॥"
ज्ञाते, त्रि । चर+कर्म्मणि क्तः । ज्ञातम् । आचरितम् । यथा रामायणे । १ । १ । १ ।
"श्रुत्वा पूर्व्वं काव्यबीजं देवर्षेर्नारदात्ततः ।
लोकादन्विष्य भूयश्च चरितं चरितव्रतः ॥")
चरितार्थः, त्रि, (चरितः प्राप्तः अर्थः प्रयोजनं येन सः ।) कृतप्रयोजनः । यथा, कुमारसम्भवे । २ । १७ ।
"पुराणस्य कवेस्तस्य चतुर्म्मुखसमीरिता ।
प्रवृत्तिरासीच्छब्दानां चरितार्था चतुष्टयी ॥"

चरित्र, क्ली, (चर+“अर्त्तिलूधूसूखनसहचर इत्र ।” ३ । २ । १८४ । इति इत्र ।) स्वभावः । तत्पर्य्यायः । चरितम् २ चारित्रम् ३ चरी- त्रम् ४ । इति शब्दरत्नावली ॥ (यथा, कथा- सरित्सागरे । ४ । ८४ ।
“अचिन्त्य शीलगुप्तानां चरित्रं कुलयोषिताम् ।”)

चरित्रा, स्त्री, (चरित्र+टाप् ।) तिन्तिडी- द्रुमः । इति शब्दरत्नावली ॥

चरिष्णु, त्रि, (चरतीति । चर+“अलङ्कृञिति ।” ३ । २ । १३६ । इति इष्णुच् ।) जङ्गमः । इत्य- मरः ॥३।१।७४ ॥ (यथा भागवते । २।६।४० ।
“न्यय विकारो गुण इन्द्रियाणि
विराट् स्वराट् स्थास्नु चरिष्णु भूम्नः ।”)

चरीत्र स्त्री (चरित्र+पृषोदरादित्वात् दीर्घत्वम् ।) चरित्रम् । इति शब्दरत्नावली ॥

चरुः पुं, (चरन्ति भक्षयन्ति देवा इमं चर्य्यते भक्ष्यते अमराद्दिभिर्देवैरिति वा चरति होमादिकमनयादिश्यते । चर+“भृमृशीति ।” उणा० १ । ७ । इति उः ।) हव्यान्नम् । तत्- पाकभाण्डम् । इति मेदिनी । रे ३५ ॥
“ततश्च संस्कृते वह्नौ गोक्षीरेण चरुं पचेत् ।”
इति सारदातिलकम् ॥
तस्यानुष्ठानं यथा । अग्ने: पश्चिमभागादिधि भागयोः कुशानास्तीर्य्य तदुपरि प्रक्षालितं वायव्यमुद्गलं स्थाल भैरवस्य ऊर्द्धं वायव्य- मण्डलस्थापनपीठिस्थ संस्थाप्य मौडौपु पवान् वा सर्व्वं निधाय चरुस्थालीस्थ ओं सवित्रे त्वा जुष्टं प्रोक्षामि ओम् इन्द्राय त्वा जुष्टं प्रोक्षामि ओं भूत्वा जुष्टं प्रोक्षामि ओं भुवस्त्वा जुष्टं प्रोक्षामि ओं स्वस्त्वा जुष्टं प्रोक्षामि ओं प्रजापतये त्वा जुष्टं प्रोक्षामि इत्यूर्द्ध्वं इत्यौ वारान् प्रोक्षयेत् । तत काष्ठपात्रेण चरुस्थाल्या वा ओं सवित्रे त्वा जुष्टं निर्व्वपामि ओम् इन्द्राय त्वा जुष्टं निर्व्वपामि ओं भूत्वा जुष्टं निर्व्वपामि ओं भुवस्त्वा जुष्टं निर्व्वपामि ओं स्वस्त्वा जुष्टं निर्व्वपामि ओं प्रजापतये त्वा जुष्टं निर्व्व- पामि इति प्रत्येकं मन्त्रेण उद्धृत्य स्थापयेत् द्विराचमेत् । ततो दक्षिणहस्ततदुपरि त्वा सव्येनावहस्य पुर्व्वेण प्रस्फोटयेत् । एतमेव पात्रेण क्षत्वा चि प्रक्षालयेत् । ततश्च- मान्तरामन्त्रश्च तत्तोत्तराय पवित्र निधाय प्रक्षालितत्तण्डुल निधाय दुग्ध विनिधाय ओषु कोऽकरायक एता मनर्क्की मन्दिरयत्नानेदु नरोत्तामन्ततमस्य प्रादेशप्रमाण कर्म्म उभ यतोऽङ्गुष्ठपर्व्वरमान चतुष्कोणपुष्पक मेधम दक्षिणाग्नेण भाग्यंत्ता तथा पचेत् यथान्न कठिना वानक मागो भवति मार्दवं न भवति दाहश्च न भवति तत स्थापनकार्थ भूमौ मार्ग्गे पवमुक् दारा प्रामादिशिरविधिना वेदमन् मार्ग्गे दर्शिनयत कुशोपरि स्थापयित्वा पुन मध्ये घृतयुक्तं दद्यात् । इति भवदेवभट्टः ॥

चरुकण्ट, पुं, (चरौबिब्ब इव ।) पिष्टपूपः । इति त्रिकाण्डशेषः ॥ पिठाइ पिठा इति भाषा ॥

चर्च्च, क इहनमे । इति कविकल्पद्रुमः ॥ (चुरा- पर-अक० सेट ।) इहनम अध्ययनम् । क, चर्च्चयति वेद विप्रः । इति दुर्गादासः ॥

चर्च्च, श उक्तौ । भर्त्सने । इति कविकल्पद्रुमः ॥ (तुदा० पर सक०-सेट ।) रेफोपधः । श चर्च्चती चर्च्चन्ती । गुणस्वागरहितानां तुदादिपाठ- बलम् प्रश्नमानामादीघोरिति शतो विभाषा वेदेषु वारकभेदश्च । इति दुर्गादासः ॥

चर्च्चरी, स्त्री (चर्च्च+बाहुलकात् अरन् ततो गौरादित्वात् ङीष् ।) गीतभेदः । चर्च्चरी गीत भेदे च केशभिन्नकरयास्त्रयोरिति रुद्रः । दक्ष- कोडेति सुभूतिः । कामदिकानां साम्प्रयग बीर्थविक्रियविक्षेपे । वधनायमयक्रीडेति । रक्ष भरटीकायां भरतः । चर्च्चरीकृपाक । तत्- पर्य्यायः । चर्भटी २ । इति हेमचन्द्रः ॥ (यथा, रत्नावल्याम् । १ अङ्के । “अये । मधुरमभि- हन्यमानमृदङ्गानुगतसङ्गीतमधुरः पुरः पौराणामुच्चरति चर्च्चरीध्वनिः ।” एतद्रूपा चरच्च यथा, विक्रमोर्व्वश्याम् । ४ अङ्के । अपमारे चर्च्चरीमुद्रा —
“रक्तोन्मादितमधुकरगीतै-
र्वाद्यमाने परभृततूर्य्ये ।
प्रसरितपवनोद्वेल्लितपल्लवनिकरः
सुललितविविधप्रकारैर्नृत्यति कल्पतरुः ।”
चर्च्चरस्तालविशेषः । यथा, मन्दारचिन्तामणौ ।
“शारदशशधरकरचयविच्छुरितनिराजिता माद्यत्पुरकन्या सुपयोधरहारभूषिता । शोभिता वलयेन विभ्रमप्रकाशितपरन्दिता चर्च्चरीतालैन चेतसि चाकचीति सुभगता ।”)

चर्च्चरीक, पुं (चर्च्च+“पर्प्फरीकादयश्च ।” उणा० ४ । २० । इति ईकनप्रत्ययान्तेन निपातनात् साधुः ।) महाकालः । केशविन्यासः । शाकः । इति मेदिनी । के, १८७ ॥

चर्च्चा स्त्री (चर्च्चते विचार्य्यते देवीदासन्ताभि- तापत्रयछेदको इति । चर्च्च+णिच्+अङ् ।) दुर्गा । चिन्ता । चार्च्चिक्यम् । इति मेदिनी । चे ४ ॥ विचारणा । इत्यमरः । १ । ५ । २ ॥ (चर्च्च +भावे अङ् । लेपनम् । यथा, हन्दोमञ्ज- य्याम् । १५ । ४ ।
“मलयजतिलकसमुल्लसितभाला-” घायपीडिका महाशक्तिः । यथा, देवीभाग वते । १२ । ६ । ४६ ।
“चामुण्डात्तमयी चर्च्चा चर्च्चिता चारुहासिनी ।”)

चर्च्चिका, स्त्री (चर्च्चा+स्वार्थे कन् । कापि अत इत्वम् ।) दुर्गा । इति त्रिकाण्डशेषः ॥ चर्च्चा । इति शब्दरत्नावली ॥ (रोगविशेषः । तदुपयोगस्य तुवादपाठोयं यथा,—
“तोयार सद्धृततेन मसृणं विपाकिसूतस्य
घर्षे दोषाणां प्रशमं करोति दद्रुकं सर्व्वामयघ्नं परम् ।
कुष्ठमेदश्चर्च्चिका विचर्च्चर पामाविद्रधयश्च पीलिकाणां चाप्योरिता विलसर्पं प्रशमयेत् मानवे ।”
इति धारीरीये प्रथमे स्थाने चर्म्मरोगाधिकारे ॥
(चर्च्चा देवानिविचारणो भवति इति । टप् । वेदार्थविचारके, त्रि ॥)

चर्च्चित त्रि (चर्च्च+कर्म्मणि क्तः । चर्च्चा वैषयं सञ्जातास्य इति इतच् वा ।) चन्दनादिना लेपनम् । तत्पर्य्यायः । दिग्धम् २ लिप्तम् ३ । इति जटाधरः ॥ (यथा गीतगोविन्दे । १।४० ।
“चन्दनचर्च्चितनीलकलेवरपीतवसनवनमाली ।”)

चर्त्त्य, त्रि, (चर्त्यते इति । चृत हिंसायाम्+ “ऋदुपधाच्चाक्लृपिचृतेः । ३ । १ । ११० । इति क्यप् ।) हननीयः । इति पाणिनिव्याकरणम् ॥

चर्पट, पुं (पृथु+अटन् ।) स्फारः । विपुलः । चपेटः । पर्पटः । इति मेदिनी । टे, ४१ ॥

चर्पटा स्त्री (चर्पट+टाप् ।) भाद्रशुक्लषष्ठी । चापडायष्ठी इति भाषा ॥ अस्या विवरणं चर्पटीशब्दे द्रष्टव्यम् ॥

चर्पटी, स्त्री (चर्पट+ङीष् ।) पोली । इति त्रिकाण्डशेषः ॥

चर्ब्ब गतौ । इति कविकल्पद्रुमः ॥ (भ्वां परं सक सेट ।) चर्ब्बति । इति दुर्गादासः ॥

चर्भट, पुं, (चर+क्विप् । भटति भरति स्वशरीर दानेनेति । भट+अच् । ततः कर्म्मधारयः ।) इर्व्वारुः । इति हलायुधः ॥

चर्भटी, स्त्री, (चर्भट+ङीष् ।) चर्च्चरी । हर्ष- क्रीडाध्वनिः । इति हेमचन्द्रः ॥

चर्म्म क्ली, (चर्म्मन् शब्दस्य प्रथमान्तरूपम् अच् ।) फलकः । इत्यमरटीकायां भरतः । (यथा, मनुः । ७ । १९२ ।
“स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा । वृक्षगुल्मावृते चापैरसिचर्म्मायुधैः स्थले ।”)

चर्म्मन्, [न्] क्ली, (चर+“सर्व्वधातुभ्यो मनिन् ।” उणा० । ४ । १४५ । इति मनिन् ।) इन्द्रियविशेषः । चाम इति भाषा ॥ तत्पर्य्यायः । त्वक् १ अजिनम् २ कृत्तिः ३ असृग्धरा ४ देहभूषणः ५ रक्तधारा ६ रोमभूमिः ७ शरीरावरणम् ८ । इति राजनिर्घण्टः ॥ असृग्धरा १ । इति भरतधृतव्याडिः ॥ (यथा, भागवते ।३।६।१।
“निर्भिन्नान्यस्य चर्म्माणि लोकपालोऽनिलो विशत् ।”)
शरीरावरक अस्त्रम् । ढाल इति भाषा । तत्- पर्य्यायः । फलकः २ फलम् ३ । इत्यमरः । २ । ८ । ९० ॥ वरम् ४ चर्म्मम् ५ । इति भरतः ॥ तस्य लक्षणं यथा, युक्तिकल्पतरौ ।
“शरीरावरणं यत्तु चर्म्म तदभिधीयते । तत् द्विविधं काष्ठचर्म्मभवभेदतः ॥ शरीरावरणमात्रं स्यादुत्तमं तन्नरेश्वर । दुर्म्मदौषधिरूपेण चर्म्मणां द्वुचकम् ॥ सङ्ख्यया सुखदं चैव मृदुना सुखमर्दना । विसङ्कटकता चेति चर्म्मणां दोषवर्द्धनः ॥

सितो रक्तस्तथा पीतः कृष्णश्चाभिधान्दितः।
ब्रह्मादिजातिभेदेन चर्म्मणो वर्णनिश्चयः॥
भिन्नवर्णस्तु सर्व्वेषां सन्देहेनोपपद्यते॥" ॥
ब्रह्मचारिणामुत्तरासङ्गचर्म्म। इत्यमरः। २।७। ४७॥ (यथा, मनुः। २। ४१।
"कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिणः।")

चर्म्मकषा, स्त्री, (चर्म्मणः कषा। चर्म्म कषतीति। कष+अच् इत्येके।) पश्चिमदेशजातं गन्धद्रव्यम्। केचित्तु चामारकषा इति ख्याता इत्याहुः। इति भरतः। तत्पर्य्यायः। सप्तला २ विमला ३ सातला ४ भूरिफेना ५। इत्यमरः। २। ४। १४३॥ सातला ६ चर्म्मकषा ७। इति भरतः॥ मांसरोहिणी। इति राजनिर्घण्टः॥
("चर्म्मकषायाः कल्कं पित्तघर्म्मं माहिषं काकमदमस्य।
दत्वा कुर्य्यात् वटभौ वटुकोटकवातप्रशमनम्॥"
इति चरके चिकित्सास्थाने पञ्चविंशेऽध्याये॥)

चर्म्मकषा, स्त्री, (चर्म्मणः कषा।) चर्म्मकषा। इत्यमरटीकायां भरतः॥

चर्म्मकारः, पुं, (चर्म्म चर्म्मनिर्म्मितद्रव्याणि करोतीति। कृ+"कर्म्मण्यण्"।३।२।१। इति अण्।) वर्णसङ्करजातिविशेषः। चामार इति मुचि इति च भाषा। स तु चण्डाल्यां तीवरात् जातः। इति पराशरपद्धतिः॥ तत्पर्य्यायः। पादूकृत् २। इत्यमरः। २।१०।७॥ पादुकृत् ३ चर्म्मारः ४। इति तट्टीका॥ चर्म्मकृत् ५ पादुकाकारः ६। इति हलायुधः॥ चर्म्मरः ७ कुरटः ८। इति त्रिकाण्डशेषः॥ (यथा, मनुः। १०। ३६।
"कारावरो निषादात्तु चर्म्मकारः प्रसूयते॥")

चर्म्मकारी, स्त्री, (चर्म्म करोति बहयति उत्कर्षं करोतीति यावत्। कृ+अण्। चर्म्म किरतीति चर्म्म+कृ+अपि इत्येके। ततो ङीप्।) चर्म्मकषौषधिः। इति मेदिनी। रे २६१॥

चर्म्मकील, पुं, (चर्म्म कीलतीति। कील+अच्। चर्म्मणि गुह्यस्थचर्म्मणि कील इवेति वा।) गुह्यरोगविशेषः। बावासीर इति फारिस् इति च भाषा। तस्य निदानं यथा,—
"व्यानो गृहीत्वा श्लेष्माणं करोत्यर्शस्त्वचो बहिः।
कीलोपमं स्थिरखरं चर्म्मकीलन्तु तद्विदुः॥
वातेन तोदपारुष्यं पित्तादसितरक्तता।
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता॥"
इति माधवकरेण रोगविनिश्चयग्रन्थे अर्शो रोगाधिकारे उक्तम्। अतोऽस्य चिकित्सा अर्शोरोगचिकित्सावत्। अपि च।
"चर्म्मकीलं जतुमणिं मशकान् तिलकालकान्।
उत्कृत्य शस्त्रेण दहेत् क्षाराग्निभ्यामशेषतः॥"
इति भावप्रकाशः॥

चर्म्मकृत्, पुं, (चर्म्म करोति चर्म्मघटितपादुकादिकम् उत्पादयतीत्यर्थः। चर्म्म+कृ+क्विप्।) चर्म्मकारः। इति हलायुधः॥ (यथा, राजतरङ्गिण्याम्। ४। ६६।
"चर्म्मकृत् सोऽपि न ददाति कुटीं देवोम-[योग्यतोम्॥")

चर्म्मचटका, स्त्री, (चर्म्मणा चटकेव।) निशाचरपक्षिविशेषः। चामचिका इति भाषा। तत्पर्य्यायः। जतुका २ अजिनपत्रिका ३। इति हेमचन्द्रः॥ जतूका ४ चर्म्मचर्म्माविका ५ जतुनी ६ अजिनपत्रा ७ चार्म्मी ८ चर्म्मचटी ९। इति शब्दरत्नावली॥ चर्म्मपत्रा १०। इति जटाधरः॥ चर्म्मचटिका ११। इति केचित्॥

चर्म्मचटी, स्त्री, (चर्म्मणा चटीव। यद्वा, चर्म्म चटति भिनत्तीति। चट+अच् ङीष्।) चर्म्मचटका। इति शब्दरत्नावली॥

चर्म्मचित्रकं, क्ली, (चर्म्मणि चित्रकं चित्रितमिवेत्यर्थः। चर्म्म चित्रयतीति वा। चित्र+ण्वुल्।) श्वेतकुष्ठम्। इति राजनिर्घण्टः॥

चर्म्मजं, क्ली, (चर्म्मणो चर्म्मणि वा जायते। जन+डः।) रोम। रुधिरम्। इति राजनिर्घण्टः॥

चर्म्मण्वती, स्त्री, (चर्म्मेव उत्पत्तिहेतुत्वेनास्त्यस्याः इति मतुप् मस्य वत्वम्।) नदीविशेषः। सा तु बुन्देलखण्डान्तःस्था चम्बल इति ख्याता॥ कदली। इति मेदिनी। नै, १८६॥ (प्राचीनं किल पुरा रन्तिदेवनामा (शशबिन्दुनामा वा) कश्चित् राजचक्रवर्त्ती। तस्य यज्ञे मारिता ये गावः तेषां चर्म्मगलितरक्तक्लेदादिभ्यो जातेयं नदीति पौराणिकी गाथा। यथा, देवीभागवते। १। १८। ५४।
"चर्म्मणो पर्व्वतो जातो विन्ध्याचलसमः पुनः।
मेघाम्बुप्लावनाज्जाता नदी चर्म्मण्वती शुभा॥")

चर्म्मदण्डः, पुं (चर्म्मभिश्चर्म्मणा वा निर्म्मितो दण्डः।) कशा। इति हेमचन्द्रः॥ चाबुक इति भाषा॥
("चर्म्मदण्डाहतो विप्र प्रयागाभिमुखो ययौ॥"
इति महाभारतशान्तिपर्व्वणि॥)

चर्म्मदूषिका स्त्री, (चर्म्म दूषयति दोषयति वा। दुष+णिच्+ण्वुल्। ततष्टापि अत इत्वम्।) कोठरोगः। इति राजनिर्घण्टः॥

चर्म्मतरङ्गः, पुं (चर्म्मणां चर्म्म भिर्वा तरङ्ग इव।) बलिः। वलयश्च। इति राजनिर्घण्टः॥

चर्म्मद्रुमः, पुं, (चर्म्म त्वगतिबहुलमस्येति द्रुमः।) भूर्ज्जवृक्षः। इति राजनिर्घण्टः॥

चर्म्मपत्रा, स्त्री (चर्म्मेव पत्रं पक्षद्वयं यस्याः।) चर्म्मचटी। इति जटाधरः॥

चर्म्मपादुका, स्त्री, (चर्म्मणि भवा चर्म्ममयी वा पादुका।) उपानत्। चामडार जुता इति भाषा। यथा। "ततो ब्रह्मचारी अजिनं सर्व्वाङ्ग चर्म्मपादुकायुगलं पादौ निदध्यात्।" इति भवदेवभट्टः॥ अन्या युक्ता पादुकाशब्दे द्रष्टव्या॥

चर्म्मपुटः } पुं (चर्म्मनिर्म्मितः पुटः भाजनम्।
चर्म्मपुटकः } पक्षे स्वार्थे कन्। चर्म्ममयं पुटमत्र इति कप् इत्येके।) चर्म्मनिर्म्मितपात्रविशेषः। कुपा इति भाषा। यथा। हलितचर्म्मपुटकः। दृतिश्चर्म्मपुटे मत्स्ये इति मेदिनी॥ इति पुंलिङ्गपदटीकायां भरतः। तत्पर्य्यायः। दृतिः स्नेहचर्म्ममयौति हेमचन्द्रः॥

चर्म्मप्रभेदिका, स्त्री (चर्म्म प्रभिनत्तीति। प्र+भिद+ण्वुल्। टापि अत इत्वम्।) चर्म्मप्रभेदनास्त्रम्। इत्यमरः। २। १०। ३५॥ मोड़ इति भाषा॥

चर्म्मप्रसेवक, पुं, (चर्म्मणा प्रसीव्यते इति। सिवु तन्तुसन्ताने+"सञ्ज्ञायाम्।" ३।३।१०९। इति कर्म्मणि ण्वुल् बाहुलकात् वुन् वा।) चर्म्मप्रसेविका। इत्यमरटीकायां भरतः॥

चर्म्मप्रसेविका स्त्री, (चर्म्मप्रसेवक+टाप् अत इत्वञ्च।) अग्निसन्दीपनार्थं चर्म्मनिर्म्मितयन्त्रम्। भाती इति ख्याता इति च भाषा॥ तत्पर्य्यायः। भस्त्रा २। इत्यमरः। २।१०।३३॥

चर्म्मसुक्ता, स्त्री, (चर्म्मणः शोधरहितदेहस्येव सुचर्म्मविशिष्टाऽस्या इति। क्षिप्रचिरो धारयतीव तथात्वम्।) दुर्गा। इति हेमचन्द्रः। २।१२॥ (चर्म्मसुक्ता। इत्यपि क्वचित् पाठः॥)

चर्म्मरङ्गा, स्त्री (चर्म्मणि रङ्गो यस्याः।) आवर्त्तकीलता। इति राजनिर्घण्टः॥ (देशविशेषे पुं। स च देशः कूर्म्मविभागे पश्चिमोत्तरस्यां दिशि उक्तः। यथा, बृहत्संहितायाम्। १४। २९।
"दिशि पश्चिमोत्तरस्याम्।" इत्युपक्रम्य —
"वेणुमती फल्गुलुका
गुरुहा मरुकुच्चचर्म्मरङ्गाख्याः॥"
इत्युक्तवान्॥)

चर्म्मरः, पुं, (चर्म्म रचयतीति। रच+बाहुलकात् डः।) चर्म्मकारः। इति त्रिकाण्डशेषः॥

चर्म्मसम्भवा, स्त्री, (चर्म्मणि सम्भव उत्पत्तिर्यस्याः।) एला। इति हारावली। ६०॥

चर्म्मसारः पुं, (चर्म्मणः सारः। सुश्रुतमते रसस्य स्तनमध्ये जायमानत्वात् तथात्वम्।) रसः। इति राजनिर्घण्टः॥

चर्म्माम्भः, पुं, (चर्म्मणोऽम्भ इव। सर्व्वं धाता चरमाय।" इति न्यायात् उपरागः। क्वचित् क्लीबे चाम्भोऽपि दृश्यते।) रसः। इति राजनिर्घण्टः॥

चर्म्मारः पुं, (चर्म्म चर्म्मक्रियां ऋच्छतीति। ऋ गतौ+"कर्म्मण्यण्।" ३।२।१। इत्यण्।) चर्म्मकारः। इति जटाधरः॥

चर्म्मी [न्] पुं (चर्म्म शरीरावरकं द्रव्यविशेषोऽस्यास्ति। चर्म्म+इनि।) चर्म्मधारियोद्धा। ढाली इति भाषा। तत्पर्य्यायः। फलकपाणिः २। (यथा महाभारते। ३।२७०।११।
"प्रासं हस्तेन सन्दध्य चर्म्मिणां च धनुष्मतां।
नराश्च ते तत्र हृष्टा विचेरुः सम्पन्नु सहते॥"
चर्म्मत्वक् अस्त्यस्येति।) भूर्ज्जवृक्षः। इत्यमरः। २। ४। ४६॥ (यथा शब्दे चिकित्सितस्थाने ११ अः। "चर्म्मिकल्कैः दग्धा कौन्ती चर्म्मिकुमराश्मिका...चर्म्मरोगाः कोषके रक्ताग्निवृश्चिके वा ...योगी।) चर्म्मिकः। भूर्ज्जः। इति शब्दरत्नावली।

चर्य्या, स्त्री, (चर + "गदमदचरयमश्चानुपसर्गे ।" ३ । १ । १० । इति यत् । स्त्रियां टाप् ।) ईर्य्यापथस्थितिः । इत्यमरः । २ । ७ । ३६ । नियमापरित्यागः । ईर्य्यते गुरो प्राप्यो ध्यानतया ज्ञायते ईर्य्या सा च ध्यानमौनादि तस्याः पन्था उपायः तत्र स्थितिः सा स्थिति-रपथ्यागमपरित्यागः सा । इति भरतः ॥ (यथा, महाभारते । १ । ७ । १२६ ।
"चर्य्यायां वयसस्तुल्यः पाण्डवस्यानुगश्चरः ॥")
गमनम् । चरणम् । आचरणम् । इति मुग्धबोध-टीकायां दुर्गादासः ॥ (यथा, मनुः । ६ । ३२ ।
"वाल्ले महर्षिचर्य्याञ्च ज्ञातान्ततया गतम् ।"
सेवा । यथा च रामायणे । २ । २८ । १५ ।
"वनवासस्य शूरस्य मम चर्य्या हि रोचते ॥"
त्रि, आचरणीयः । आचरणीयः । यथा, मनुः ।३।१।
"षट्त्रिंशदाब्दिकं चर्य्यं गुरौ त्रैवेदिकं व्रतम् ॥")
चर्व्व कि अदने । इति कविकल्पद्रुमः ॥ (चुरां पक्षे भ्वां-परं-सक सेट् ।) कि, चर्व्वयति चर्व्वति अमृतं बालकः । इति दुर्गादासः ॥
चर्व्वण, क्ली, (चर्व्व + भावे ल्युट् ।) दन्तैश्चूर्णनम् । इति हेमचन्द्रः । ३ । ८८ ॥ चिवान इति भाषा ॥ (यथा, हारीते प्रथम स्थाने प्रथमेऽध्याये ।
"चर्व्वणं चित नचापि कापिता नाधिक सदा ॥")
चर्व्वा, [न्] पुं ताम्बूलताल । इति हारावली । १६० ॥
चर्व्वित, त्रि, (चर्व्व्यते स्म इति । चर्व्व + कर्म्मणि क्त ।) दन्तचर्व्वितम् । भक्षितम् । इत्यमरः । ३।२।११० ॥ (यथा भागवते । ७ । ५ । ३० ।
"अदान्तगोभिर्विशतां तमिस्रं पुनः पुनश्चर्व्वितचर्व्वणानाम् ॥")
चर्व्वितपात्रक, क्ली (चर्व्वितानां ताम्बूलादीनां आधारपात्रम् । तत स्वार्थे कन् ।) चर्व्वितताम्बूलादिनिक्षेपपात्रम् । पीकदान इति भाषा ॥ यथा, राजलीलायां पातालखण्डे ।
"ताम्बूलं दर्पणं पात्रञ्च चर्व्वितपात्रकम् ॥"
चर्व्व्य, त्रि (चर्व्व्यते दन्तैश्चूर्ण्यते इति । चर्व्व + कर्म्मणि ण्यत् ।) चर्व्वणीयम् । यथा,—
"षट्कोटि आकाशाध भोजयामास नित्यश ।
चूष्यचर्व्व्यलेह्यपेयैर्नानारसैर्दिने दिने ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥
चर्षणि, पुं, (कर्षतीति । कृष + "कृषेरादेश्च च ।" उणा । २ । १ २ । इति अनि आदेश्च च ।) जनः । यथा श्रीभागवते ।
"स चर्षणीनामुदगाच्छुचो मृजन् प्रिय प्रियाणा इव दीर्घदर्शनः ।"
मनुष्यजाति । यथा —
"चर्षणी मातृका मत्री तयोर्न्न जन्म गता ।
यत्र वै मानुषी जातिर्ब्रह्मणा चोपकल्पिता ।"
इति श्रीभागवते । ६ । ६ । ४१ । "चर्षणी मातृका" । पत्नीमिन्द्रमौ च विपरीता दासकी । अत्र येषु मानुषमानवर्षीयेषु मानुषी जातिश्चोपकल्पिता । तथा च श्रुतिः । पुरुषवर्ष चाविभागरामाभीति ।" इति तट्टीकायां श्रीधरस्वामी ॥ (अत्र उणादिवृत्तिवक्तोज्ज्वलदत्तेन तु "कृषेरादेश्च चः ।" इति पठित्वा चर्षणिरिव्यस्तीति व्याख्यातम् ॥)

चल, क भृतौ । इति कविकल्पद्रुमः ॥ (चुरां परं-सक-सेट् ।) क, चालयति । दन्त्यवकारादिरयमिति दुर्गसिंहजुमरनन्दी । भृतिरिह पोषणम् । इति दुर्गादास ॥
चल, ज गतौ । इति कविकल्पद्रुमः ॥ (भ्वां परं-सक सेट् ।) ज, चाल चल । मित्वे इति चलयाग न पठित्वा इममेव मानुबन्धं धातुं पठन्ति तद्वैयम् । तेनास्य चालयति इत्यत्र यथा । चलमानोऽपि इत्यत्र तात्कालिकं प्रत्यय । मित्वे । पूर्व्ववाच्यः । चलधातु कम्पने मानुबन्ध इत्यादिपाठः । म, चलयति लता वायुः । चलयन् भ्रूलताविलासकानिति रघुः । चालयन् सकलां पृथ्वीमिति चमत्कारात् चालं करोतीति णौ चालनम् । इति दुर्गादास ॥
चल श विलासे । इति कविकल्पद्रुमः ॥ (तुदां परं-सक सेट् ।) श, चलती चलन्ती । विलास क्रीडनम् । इति दुर्गादास ॥
चल, त्रि, (चलति गच्छतीति । चल + पचाद्यच् ।) चञ्चलम् । इत्यमरः । ३ । १ । ७४ ॥ (यथा रघु । ११ । १५ ।
"ताडका चलकपालकुण्डला कालिकेव निविडा बलाकिनी ॥"
पारद । इति हेमचन्द्रः । ४ । ११६ ॥ चलाचलत्वमिदं । यथा, वृत्तरत्नाकरे ।
"श्रीं गुणौ श्रीं धियमिह दिशत् हृष्यमिह चरे ॥")
चल, पुं, (चल + पचाद्यच् ।) कम्प । तद्युक्ते त्रि । इति मेदिनी । ले, १५ ॥ (त्रिष । यथा, महाभारते । १३ । १७ । ११६ ।
"महाकेतुर्महाधातुर्नैकशानुश्चलोऽचल ।"
विष्णु । यथा तत्रैव । १३ । १४९ । ९२ ।
"वीरहा विषम शून्यो घृताशीरचलश्चल ॥"
"वायुरपि चल ।" इति भाष्यम् ॥)
चलचञ्चु, पुं, (चला चञ्चला चञ्चुरस्य ।) चकोरपक्षी । इति हेमचन्द्रः । ४ । ४ ५ ॥
चलत्पूर्णिमा स्त्री (चलन्ती पूर्णिमा तदाभासी शुभ्रत्वं इवेति तात्पर्य्य ।) चलकमत्स्य । इति त्रिकाण्डशेष ॥
चलदङ्ग, पुं, (चलत् चञ्चलं अङ्गं यस्य ।) मत्स्यविशेष । चिङ्गा इति भाषा ॥ अस्य गुणा । वातपित्तविनाशित्वम् । वन्हे दीपनत्वम् । रोचकत्वं च । इति राजवल्लभ ॥
चलदृक्क पुं, (चलदृक् यस्य इति कप् ।) चलदृक्कमत्स्य । इति जटाधर ॥
चलदल, पुं, (चलानि दलानि पत्राणि यस्य ।) अश्वत्थवृक्ष । इत्यमरः । २ । ४ । २० ॥ (अस्य शब्देऽस्य गुणाद्यो ज्ञातव्या ॥)

चलन, क्ली, (चल + भावे ल्युट् ।) भ्रमणम् । (यथा देवीभागवते १ । १० । १८ ।
"चलनञ्च विना वायुं न भवेदिति मे मतिः ॥")
कम्पनम् । (यथा पञ्चतन्त्रे । २ । १०३ ।
"हास्ये पादाविव पौरौ शिशुलौ पक्षहर्षे । कुसुमोच्चयपादेकौ हिलौम पादपेज्ज ॥")
कम्प्र, त्रि । इति मेदिनी । ने, ६१ ॥
चलन पुं, (चलत्यनेन इति । चल + करणे ल्युट् ।) पाद । इति हेमचन्द्रः ॥ हरिण । इति जटाधर ॥
चलनक पुं (चलन + संज्ञायां कन् ।) चण्डातकम् । इति हेमचन्द्रः । ३ । ३३८ ॥
चलनी, स्त्री, (चलन + ङीप् ।) घाघरिः । चण्डातकम् । हस्तिरज्जुः । इति हेमचन्द्र ॥ घाघरा इति भाषा ॥
चलपत्र, पुं (चलानि पत्राणि यस्य ।) अश्वत्थवृक्ष । इति राजनिर्घण्टः ॥ (यथा, नैषधे ।
"अङ्गुलिं कियदपि विनतुमत्या गते यत्त्वे किं चलपत्रम् ।
नयति विशिखाभ्यास्तरवरमस्य कायात्तु कम्पस्तु कुतो भवेत ॥")
चला, स्त्री (चलतीति चल + पचाद्यच् टाप् च । नैकत्रावस्थितत्वात् तथात्वम् ।) लक्ष्मी । इति मेदिनी । ले, १५ ॥ सिल्हक । इति रत्नमाला ॥
चलाचल , त्रि, (चलतीति चल + अच् । चरिचलिपतिवदीनां वा द्वित्वमितिद्वित्वं आगागमश्च इति वार्त्तिकवचनात् द्वित्वं ।) चञ्चलम् । इत्यमरः । ३ । १ । ७४ ॥ (यथा, किरातार्ज्जुनीये ।११।३० ।
"अभिद्रोहेण भूतानामर्ज्जयन् गत्वरी श्रियः । उदन्वानिव सिन्धूनामापदामेति पात्रताम् ॥") [illegible]
काकः पुं, । इति राजनिर्घण्टः ॥
चलातङ्क, पुं, (चले चलने आतङ्को भयं यस्मात् ।) वातरोग । इति राजनिर्घण्ट ॥
चलित, त्रि, (चल + कर्त्तरि क्त ।) कम्पितम् । इत्यमरः । ३ । १ । ८० ॥ (यथा, शकुन्तलायाम् । १ । ३३ ।
"तयोविलासवलितैर्वलितापाङ्गविभ्रमैः ॥")
गतम् । यथा च तत्रातिवितर्दभरात् ॥ (यथा, गौ रामायणे । १ । ५० । २६ ।
"अचिरात् गमिष्यामि यथाज्ञापितवानसि ॥")
चलु, पुं, (चल + उन् ।) गण्डूष । इति हेमचन्द्रः । ३ । २६२ ॥
चलुकः, पुं, (चलुना कायतीति । कै + क ।) प्रसृतिः । भाजनभेदः । इति मेदिनी । के, ७ ॥
चषि, स्त्री, (चष्यत इति । चष + इन् । इगुपधात् इति इन् ।) चषिका । इति शब्दरत्नावली ॥
चषिका, स्त्री, (चषि + संज्ञायां कन् ।) चषिका । इति भरतद्विरूपकोषः ॥
चषिका, स्त्री, (चषि + स्वार्थे कन् ।) इसाइल । इति भाषा ॥ तत्पर्य्याय । चषक । इत्यमरः । २ । ३ । ४३ ॥ यथा ॥ चषिकम् ॥

चवी ५। इति भरतः। चविः ६। इति शब्द-रत्नावली। तेजोवती ७ कोला ८ नाकुली ९ उषणा १० चव्यकम् ११ वशिरः १२ गन्धनाकुली १३ वल्ली १४ कोलवल्ली १५ कोलम् १६ कुटिलधमकम् १७ तीक्ष्णम् १८ करिकरवल्ली १९ हकरः २। (यथा, सुश्रुते उत्तर-तन्त्रे ३९ अध्याये।
"सारिवाद्ययष्ट्याह्वचविकारक्तचन्दनैः।")
अस्या गुणाः। कटुत्वम्। उष्णत्वम्। लघुत्वम्। रोचनत्वम्। दीपनत्वम्। अन्तर्दिककासश्वास-शूलनाशित्वञ्च। इति राजनिर्घण्टः॥ भेद-कत्वम्। कफनाशित्वञ्च। इति राजवल्लभः॥

चवी, स्त्री, (चवि+"कृदिकारादक्तिनः।" ४।१।४५। इति ङीष्।) चविका। इति शब्दरत्नावली॥ (यथा, कथासरित्सागरे। ६।१५१।
"सम्बर्गीता चवीदत्त प्रतिश्री सा सुदुस्तराम्। पतन्ती चाक्षुषं धर्म्मं सभार्य्यायै ग्रहस्स तत्॥")

चव्य, स्त्री (चव्यते इति। चर्व्व+ण्यत्। पृषो-दरादित्वात् रलोपे साधुः।) चविका। इत्यमरः। २।४।९८॥ (यथा सुश्रुते सूत्रस्थाने ४४ अध्याये।
"चव्येन्द्रचीज त्रिफला सर्पिर्म्मांसरसाम्बुभिः॥")

चव्यक, स्त्री, (चव्यमेव। स्वार्थे कन्।) चविका। इति राजनिर्घण्टः॥

चव्यजा, स्त्री, (चव्यमिव जायते इति। जन+डः।) गजपिप्पली। इति राजनिर्घण्टः॥ (विवृतिरस्या गजपिप्पलीशब्दे ज्ञेया॥)

चव्यपर्णी स्त्री, (चव्यमिव पर्णं यस्य।) गज-पिप्पली। इति राजनिर्घण्टः॥

चव्या स्त्री (चव्य+टाप्।) चविका। इत्यमर-टीकायां भरतः॥ (यथा, सुश्रुते उत्तरतन्त्रे ४१ अध्याये।
"यविमञ्जुल्यौ त्रिकटु मलिष्ठा-चव्याविडङ्गोपहितं यवागूः।")
वचा। इति मेदिनी॥ कार्पासी। इति राज-निर्घण्टः॥

चष, वधे। इति कविकल्पद्रुमः॥ (भ्वां परं-सक-सेट्।) चषति। इति दुर्गादासः॥

चष, ल भक्षे। इति कविकल्पद्रुमः॥ (भ्वां उभ-सकं सेट्।) ल चषति चषते। इति दुर्गा-दासः॥

चषक, पुं क्ली, (चषन्ति भक्षयति पिबन्तीनेनेति। चष+"कुन् शिल्पिसंज्ञयोरपूर्व्वस्यापि।" उणां। २।३२। इति कुन्।) मद्यपानपात्रम्। तत्-पर्य्यायः। सरकः २ सरकः ३ अनुतर्षणम् ४। इति हेमचन्द्रः। ४।१०२४॥ *॥

अथ चषकोद्देशः।
"यत् पानपात्रं भूपानां तदुक्तं चषकं बुधैः। हाटकं राजतञ्चैव स्फाटिकं काचमेव च॥ हेमं स्फाटादिकोपि चतुर्धा प्रकीर्त्तितम्। रत्नादण्कमते तेषां विचारः प्रतिपाद्यते॥ सारादिकर्म्मिता रत्नैश्चषकः शर्म्मदः। मानैर्वं चाय वार्ह वा सर्व्वकामप्रदं भवेत्॥
काञ्चनं चाक्षुषं प्रोक्तं जाङ्गलादि महीभुजाम्। यज्ञस्थलीयपानादि पात्रं पूर्व्वोक्तजलं भवेत्॥"
ईदृक् तथापि नियम इति भोजस्य निश्चयः। इति युक्तिकल्पतरुः॥ *॥ सुरापात्रम्। मधु। मद्य प्रभेदः। इति मेदिनी। के, ८६॥

चषतिः, पुं, (चष भक्षे वधे वा+भावे क्तिन्।) भक्षणम्। वधः। इति सिद्धान्तकौमुद्यां-सुधादिकृत्ति॥

चषालः पुं (चष्यते भक्ष्यते क्विप्। चष+"सानसि वर्णसीति।" उणां। ४।१०७। इति आल प्रत्ययेन निपातनात् साधुः।) यूपकटकः। इत्य-मरः। २।७।१८॥ यज्ञसमाप्त्याङ्गत्र पशु-बन्धनार्थं यज्ञभूमौ यत् काष्ठमारोपितं स यूपः तस्य शिरसि वलयाकृतिकमधकाष्ठं निर्मितं चषालः काष्ठविकारः सः। यूपाग्रे विहितलोहवलयश्च। इति केचित्। इति भरतः॥ मधुस्थानम्। इति सच्चिनसारे उणादिवृत्तिः॥

चह, शाठ्ये। प्रतारण इति यावत्। इति कवि-कल्पद्रुमः॥ (भ्वां पर-सक सेट्।) चहति। इति दुर्गादासः॥

चह तु क शाठ्ये। इति कविकल्पद्रुमः॥ (अदन्त-चुरां परं सक सेट्।) चहयति खलः। इति दुर्गादासः॥

चह, क म शाठ्ये। इति कविकल्पद्रुमः॥ (चुरां पर-सक सेट्।) क म चहयति खलः साधुं प्रतारयतीत्यर्थः। इति दुर्गादासः॥

चाकचक्य क्ली, उज्ज्वलता। चकचक इति भाषा। यथा न हि लोकसिद्धघटादयो प्रातिभासिक-रजतादिपादिका किन्तु विभक्तचैव तथा हि। काचाञ्चिदोषदूषितलोचनस्य पुरोवर्त्तिरजतादयो चाकचक्यादिमाकारा चाकचक्याकारा च कस्य-चित्वरजततदिति॥" इति वेदान्तपरिभाषा॥

चाकचिका, स्त्री, भाँगवृद्धा। इति रत्नमाला॥

चाक्रिकः पुं (चक्रेण चरण्येन यन्त्रविशेषेण वा चरतीति। चक्र+"चरति।" ४।४।८। इति ठक्।) बहुभिर्म्मिलित्वा यः घोषति सः। तत्पर्य्यायः। घाण्टिकायकः २। इत्यमरः। २।८।९७॥ (यथा, माघकाव्ये। ११।१६५। "पिशुनाहृतिनीचैव तथा चाक्रिकवन्दिनाम्। एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा॥") तैलकारः। इति हेमचन्द्रः॥ शाकटिकः। इति महाभारते राजधर्म्मे॥ गाड़ोवान् इति भाषा॥

चाक्षुष, स्त्री, (चक्षुषा निर्वृत्तम्। चक्षुस्+"तेन निर्वृत्तम्।" ५।१।७९। इत्यण्।) प्रत्यक्ष-विशेषः। तत्तु चक्षुरिन्द्रियजन्यज्ञानम्। द्रव्य-चाक्षुषं प्रति चक्षुःसंयोगः कारणम्। द्रव्य-समवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः। द्रव्य-समवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेत-समवायः। इति सिद्धान्तमुक्तावली। तथा च।
"द्रव्याध्यक्षे त्वगक्षाभ्यां संयुक्तसमवायतः। द्रव्येषु समवेतानां तथा तत्समवायतः। तत्रापि समवेतानां शब्दस्य समवायतः। तद्वृत्तीनां समवेतसमवायेन तु ग्रहः॥"
इति भाषापरिच्छेदे। ५९—६०॥
(चक्षुषा गृह्यते इति। चक्षुस्+अण्। चक्षुर्ग्राह्यरूपादि। चक्षुर्ग्राह्ये, त्रि॥)

चाक्षुषः, पुं (चक्षुषः ऋषेः गोत्रापत्यं पुमान्। चक्षुस्+अण्।) षष्ठमनुः। (यथा, मार्कण्डेये। ७६।२।
"अथ षष्ठमपि नाम्ना यो मनुः परमेष्ठिनः। चाक्षुषत्वमतस्तस्य जन्मन्यत्राभिधीयते॥")
षष्ठमनुः। अस्मिन्नन्तरे अजितनामको विष्णोरवतारः। मन्त्रद्रुमः इन्द्रः। आप्याद्यो देवाः। हविष्मद्वीरकाद्याः सप्तर्षयः। पुरुपुरुषशतद्युम्नाद्यो मनुपुत्राः। इति श्रीभागवतम्॥ (अस्य अन्यद्विवरणं मन्वन्तरशब्दे द्रष्टव्यम्॥)

चाङ्गः, पुं (चीयते इति। चि+डः। चमङ्गमस्य।) चाङ्गेरी। इत्यमरटीकायां राय-मुकुटः॥

चाङ्गेरी, स्त्री (चाङ्गं ईरयतीति। ईर+अण्। ततो ङीष्।) अम्ललोणिका। इत्यमरः। २।४।१४०॥ ("यवक्षारद्धिकारतुषी भाज्या वातकफे हिता। उष्णा कषायमधुरा चाङ्गेरी चाग्निदीपनी॥" इति सुश्रुते सूत्रस्थाने ४६ अध्याये॥)

चाचपुटः, पुं तालभेदः। यथा —
"गुरुलघु प्लुतश्चैव भवेच्चाचपुटाभिधे॥" इति सङ्गीतदामोदरः॥

चाञ्चल्य, क्ली, चञ्चलस्य भावः। चञ्चल+ष्यञ्।) चञ्चलता। चापल्यम्। यथा —
"चाञ्चल्यारवि गामद्री पुराणाभागधियिरा॥" इति श्यामसङ्गमाख्यकथनम्॥

चाटः, पुं (चाट्यति भिद्यति यस्मात्। चट+घञ्। यद्वा चटति भिनत्ति विश्वासिकम्। चट+णः।) चौरः। इति मिताक्षरा॥ प्रतारकः। यथा,—
"चाटतस्करदुर्वृत्तमहासाहसिकादिभिः। पीड्यमानाः प्रजा रक्षेत् कायस्थैश्च विशेषतः॥ चाटाः प्रतारका विश्वास्य ये परधनमपहरन्ति। प्रच्छन्नापहारिणस्तस्कराः। दुर्वृत्ता दुष्टकालिक-कितवादयः। सहसा बलेन ये कर्म्म कुर्वन्ति ते साहसिकाः। तत्र महासाहसिकास्तेन नराः। अमादिप्रपञ्चेन मर्म्मस्थानेभ्यो वधादिकं कुर्वन्ति ते महासाहसिका इति भाषा। कायस्था लेखका गणकाश्च तैः पीड्यमानाः प्रजा रक्षेत्। कायस्था राजवल्लभतया अतिमायाविनश्च दुर्निवारा भवन्ति अतस्तेभ्यो विशेषतो रक्षेत्। तेषां राजवल्लभतया अतिमायावित्वान्न दुर्निवारत्वात्॥" इति मिताक्षरायां आचारा-ध्यायः॥

चाटकैरः पुं (चटकस्य चटकाया वा पुमपत्यम्। "चटकाया ऐरक्।" ४।१।१२८। इत्यैरक्। "चटकादैरक्।" शब्दम्। लिङ्ग-विशिष्टपरिभाषया स्त्रिया अपि" इति काशि-का।) चटकस्य पुमपत्यम्। इत्यमरः॥ चटार छा इति भाषा॥

चाटु, पुं, क्ली (चटति भिनत्ति मनस्तोषयामीत्यनेनेति। चट+"कृसनीति।" उणा° १।२। इति कुन्।) प्रियवाक्यम्। तत्पर्य्यायः। चटु २ प्रियप्रायम् ३। इति हेमचन्द्रः। स्फुटवादी। इति धरणिसारे उणादिवृत्तिः। मिथ्याप्रियवाक्यम्। इति महाभारतम्। खोसामोदिया कथा इति भाषा। (यथा गीतगोविन्दे। २।१२।

"श्रमजलमानवसलवाञ्छितया
चटुचाटुशतैरहकूलम्।"

चाटुवादी त्रि। यथा राजतरङ्गिण्याम्। १।२११।

"उपनिन्ये च समय प्रटकैश्चाटुवीतृणतैः।")

चाटुपटु, पुं, (चाटुषु पटुः निपुणः।) भण्डः। इति हारावली। भाँड़ इति भाषा। ("मालवपुत्री पञ्चितोऽयो यावचाटुपटुः कविः। इति नैषधम्॥")

चाटुलोल त्रि, (चाटुरेव लोल इति कर्म्मधारयः। चाटुषु लोल इत्येके।) चटुलोलः। इति हारावली।

चाटुवटु, पुं, (चाटुपटु+पृषोदरात् साधु।) चाटुपटुः। इति भूरिप्रयोगः॥

चाटूक्ति, स्त्री, (चाटुरूपा उक्तिः। चाटुना-युक्तिर्वा।) सेवा। इति हारावली। प्रियकथा च॥

चाणकीन त्रि (चणकानां भवनं क्षेत्रम्। "धान्यानां भवने क्षेत्रे खञ्।" ५।२।१। इति खञ्।) चणकोत्पत्तियोग्यक्षेत्रम्। इत्य मरटीकायां रायमुकुटः॥

चाणक्य, पुं (चणकस्य गोत्रापत्यम्। "गर्गादिभ्यो यञ्।" ४।१।१०५। इति यञ्।) मुनिविशेषः। तत्पर्य्यायः। मौलिकः २ कौटिल्यः ३। इति त्रिकाण्डशेषः॥ (अयमेव हि चन्द्रगुप्तस्य चारक्रियायोगेन योगानन्दराजं मारयन् नन्दौ वंशात् गौरकारपत्नीगर्भे जातं चन्द्रगुप्तं राज्येऽभिषेचयत्तदाभात्यमभवत्॥ एतद्विषयकं विष्णुपुराणभागवता दिषु विवृतो दृश्यते। इदञ्च कथासरित्सागरे। ५।१२१—२७।

"स चाणक्यो द्विज कापि गत्वा ब्राह्मणमध्यगः।
भद्रपीठाद्योगनन्दोऽपि दापयामास तं॥
गत्वा दिशं प्राप्य पथि वसुभागमनु।
कृत्वा भिक्षुवेषण शकटालेन तत्कृतम्।
पूर्व्वनन्दसुतं चन्द्रगुप्तं राजनि निवेशिता॥"

चाणक्येन प्रोक्तमिदम्।) मन्त्रविशेषे क्लौ। यथा तत्रैव।

"नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम्।
सर्व्वबीजमिदं ज्ञात्वा चाणक्य सारसंग्रहम्॥"

चाणक्यमूलक, क्ली, (चाणक्येन चालनं तद् अनुमतम्। इति कन् स्वार्थे कन् वा।) मूलक-प्रभेदः। चाणक्यमूलं स्यातम्। तत्पर्य्यायः। ग्रन्थिमूलकम् २ विष्णुगुप्तकम् ३ स्थूलमूलम् ४ महाकन्दम् ५ कौटिल्यम् ६ मन्यमानम् ७ ग्रामीक कटुकम् ८ मिश्रम् ९। अस्य गुणाः। उष्णत्वम्। कटुत्वम्। वह्निकारित्वम्। दीपनत्वम्। वातश्लेष्मगुल्मनाशकत्वम्। ग्राहकत्वम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥

चाणूर, पुं, कंसराजस्य मल्लविशेषः। यथा—

"तत क्रोधाभितान्ताक्ष कंस परमकोपन।
चाणूरमुष्टिकमल्लौ तत्र गोपालकम्॥"

इति महाभारते हरिवंशम्॥

(तथाच, भागवते। १०।४४।

"भगवद्गात्रनिष्पातैर्वज्रनिष्पेषनिष्ठुरैः।
चाणूरो भज्यमानाङ्गो मुहुर्ग्लानिमवाप ह॥")

चाणूरसूदन, पुं (चाणूरं सूदयतीति। सूदि+ल्युः।) श्रीकृष्णः। इति त्रिकाण्डशेषः॥ (एतस्या सुरस्य नाशवृत्तान्त हरिवंशे ८६ अध्याये द्रष्टव्यम्॥)

चाण्डाल, पुं, (चण्डति कुप्यति सततमिति। "पति चण्डिभ्यामालञ्।" उणा° १।११७। इति आलञ्। यद्वा चण्डाल+"कुलालादिभ्योऽञ्" यद्वा चण्डाल एवेति प्रज्ञादिभ्योऽण्।) चण्डालः। इत्यमरः। २।१०।१९॥ (यथा, मनुः। ४।७९।

"न संवसेच्च पतितैर्न चाण्डालैर्न पुल्कसैः।"

कर्म्मदोषतो ब्राह्मणानामपि सांविभाविकचाण्डालत्वम्। यथा महाभारते। १२।७५।

"आह्वायका देवलका नक्षत्रग्रामयाजकाः।
एते ब्राह्मणचाण्डाला महापथिकपञ्चमाः॥")

चाण्डालिका, स्त्री (चाण्डालो वादकत्वेनास्त्यस्याः। इति ठन्। चण्डालेन निवृत्ता इति ठक् वा।) चण्डालवीणा। इत्यमरः। २।१०।३९। चण्डालिकाप्यत्रापीष्यते॥ (चाण्डालेन सतीति कुलालादिभ्यो वुञ्। चाण्डालसम्बन्धिनि, त्रि॥)

चाण्डाली, स्त्री, (चाण्डाल+जातित्वात् ङीष्।) लिङ्गिनी। इति राजनिर्घण्टः॥ चाण्डालपत्नी च॥

चातक, पुं, (चतति याचते जलमम्बुदमिति। चत याचने+ण्वुल्।) स्वनामख्यातपक्षी। तत्पर्य्यायः। स्तोकक २ सारङ्ग ३ मेघजीवन ४। इति राजनिर्घण्टः। तोकक ५। इत्यमरः। २।५।१७॥ सारङ्ग ६। इति भरतः॥ (यथा, मेघदूते। ९।

"वामश्चायं नदति मधुरं चातकस्ते सगन्धः।")

तन्मांसगुणाः। लघुत्वम्। शीतत्वम्। कफरक्तपित्तनाशित्वम्। अग्निकारित्वञ्च। इति राजवल्लभः॥

चातकानन्दन, पुं, (चातकं आनन्दयतीति। आ+नन्द+णिच्+ल्युः।) वर्षाकालः। इति राजनिर्घण्टः॥

चातुर, पुं, (चतुर्भिरश्वैः वाह्यमानः शकटविशेषोऽभि धेयः। सह्यते इति। चतुर+अण्। यद्वा चतुर एव। स्वार्थे अण्।) चक्राङ्गः। इति मेदिनी॥ तोसकवालिश इति भाषा॥

चातुर, त्रि, (चतुर+स्वार्थे अण्।) नेत्रगोचरः। चाटुकारः। निपुणः। इति मेदिनी। रे, १२२॥

चातुरक त्रि, (चातुर+स्वार्थे कन्।) चत्वरः। इति हेमचन्द्रः॥

चातुराश्रम्य, क्ली, (चतुर्णां आश्रमाणां कर्म्म इति। "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च।" ५।१।१२४। इति ष्यञ्।) ब्रह्मचर्य्यगार्हस्थ्य वानप्रस्थभिक्षुरूपाश्रमचतुष्टयानां धर्म्मः। इति पुराणम्॥ (यथा, महाभारते। १२।१।२२।

"चातुर्विद्यं चातुर्होत्रं चातुराश्रम्यमेव च।
राजधर्म्मांश्च निखिलान् एकैकं पृथिवीपतेः॥"

चत्वार आश्रमा एवेति स्वार्थे ष्यञ्। चतुरो आश्रमाः॥)

चातुरिक, पुं (चातुरीं रथपरिचालनकौशलं वेत्तीति ठक्।) सारथिः। इति जटाधरः॥

चातुरी स्त्री, (चतुरस्येव "तस्येदम्।" ४।३।१२०। इत्यण्। ततो ङीप्। यद्वा चतुरस्य भावः इति ष्यञ् बिल्वात् ङीष् ततो यलोपः।) दाक्ष्यम्। चतुरता। इति मेदिनी॥ [चातुरी।"

"सा कौमुद्यमथ तत्र कुमुद्वती वा चातुरी
वक्तुमहं॥")

(गायकीरूपा महाशक्तिः। यथा, देवीभाग° वते। १२।६।४०।

"चतुर्भुजा चारुदन्ता चातुरी च चतुर्मुखा॥")

चातुर्जातक क्ली, (चतुर्जातक एव इति स्वार्थे अण्।) गुडत्वगेलापत्रनागकेसरचतुष्टयम्। इति राजनिर्घण्टः॥ (अस्य लक्षणं गुणाश्च।

"त्वगेलापत्रकैस्तुल्यैः त्रिसुगन्धि त्रिजातकम्।
नागकेशरसंयुक्तं चातुर्जातकमुच्यते॥
तद्वत् रेचनं रूक्षं तीक्ष्णोष्णं मुखगन्धहृत्।
लघुपित्ताग्निकृद्वर्ण्यं कफवातविषापहम्॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

चातुर्थक, पुं, (चतुर्थे चतुर्थेऽह्नि भव इति। चतुर्थ+वुञ्।) प्रतिचतुर्थदिवसज्वरः। तस्य लक्षणं यथा, "को ऽस्मात् ज्वरात् सम्भवति विना हाय सर्व्वधातौ पर्य्येति यदा। इति।

दुष्पाकरोत्येष ज्वरो वक्ष्यामि न संशयः।
चातुर्थको ज्वरो यत्र। नान्यः श्रेष्ठः ज्वरः क्वचित्।
नरसुपर्णं हरिद्रा च मधुसर्पि च मधुकम्।
सर्व्वज्वरोत्पन्ने पूर्व्वोऽयं वटः। चातुर्थकस्य च।"

इति गारुडे १८० अध्यायः॥

(अस्य सम्प्राप्तिचिकित्सादयोऽपि यथा—

"चातुर्थो द्विविधो ज्ञेयो वातश्लेष्मको ज्वरः।
चातुर्थको नाम गतो रक्तशोषी विषमज्वरः।
प्रौढ़क मज्जधातुर्ना श्लेष्मर्न्यूनमाद्यः।
त्रिगुणको विकारः स्याद्विषमज्वरोऽधिकः।
कुर्य्यात् चिरमेवन्तु सप्तधैव सवातकम्।
शीतदाहकरश्चाथ दृश्यते मन्दुर्ब्बलः।
स सन्निपातज्वरी विषमो विषमज्वरः।
कर्त्तुं सामर्थ्यं यन्न हि च पूर्व्वं ज्वरविकारकः।
पूर्व्वं ज्वरोत्पत्तौ कार्य्यं प्रतिपूर्व्वमतश्च।
चतुर्थ्यां वेलायां जज्ञे द्विरतो विषमज्वरः।
एवं विज्ञाय कर्त्तव्यं प्रत्यात्मं प्रतिविषम्।
देवाख्यौ रक्तजौ ज्ञेयौ कफजौ वातजौ॥

मांसगोऽपि तृतीये स्याच्चतुर्थोऽस्थिसमाश्रित ।
सर्व्वधातुगतो ज्ञेयो ज्वरो धातुचयङ्कर ॥
भूतजे भूतविद्या स्याद्धाति सन्ताडनम् ।
शापाभिचारोद्भवया नागरत्रिपला भव ॥
मधुना सयुत क्वाथश्चातुर्थकनिवारण ॥
व्याघ्रिपञ्चसयो निहन्ति
नसो च चातुर्थकरोगसञ्चयम् ।
कास श्वासमथापि शिरोरुजाश्च
विनाशयत्याशु हि सन्ततानाम् ॥"
इति हारीते चिकित्सास्थाने द्वितीयेऽध्याये ॥)

चातुर्भद्र, क्ली, (चतुर्भद्रमेवेति अण् ।) नागराति-विषामुस्ता गुडूचीति चतुष्टयम् । इति राज-निर्घण्ट ॥

चातुर्म्मास्य, क्ली, (चतुर्षु मासेषु क्रियते इति । "चतुर्म्मासाण्ण्यो यज्ञे ।" ५।१।६४। इत्यस्य सूत्रस्य वार्त्तिकोक्त्या ण्य । यागविशेष । चातुर्म्मास्ययागस्य चत्वारि पर्व्वाणि । वैश्वदेवो वरुणप्रघास शाकमेध शुनासीरीयश्चेति श्रन्दार्थचिन्तामणि ॥) आषाढ़शुक्लद्वादश्यादिचतुर्म्मासकर्त्तव्यनियमविशेष । "यथा वाराहे ।
'आषाढ़शुक्लद्वादश्यां पौर्णमास्यामथापि वा ।
चातुर्म्मास्यव्रतारम्भं कुर्य्यात् कर्कटसङ्क्रमे ॥
अभावे तु तुलार्केऽपि मन्त्रेण नियम व्रती ।
कार्त्तिके शुक्लद्वादश्यां विधिवत्तत् समापयेत् ॥
चतुर्धापि हि तच्चीर्णं चातुर्म्मास्यं व्रतं नर ।
कार्त्तिक्यां शुक्लपक्षे तु द्वादश्यां तत् समापयेत् ॥
भविष्ये ।
'चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
मधुस्वरो भवेन्नित्यं नरो गुडविवर्ज्जनात् ॥
तैलस्य वर्ज्जनादेव सुन्दराङ्ग प्रजायते ।
कटुतैलपरित्यागात् शत्रुनाश प्रजायते ॥
लभते सन्तति दीर्घां स्थालीपाकमभक्षयन् ।
सदा मुनि सदा योगी मधुमांसस्य वर्ज्जनात् ॥
निराधिर्नीरुजोऽलसी विष्णुभक्तश्च जायते ।
एकान्तरोपवासेन विष्णुलोकमवाप्नुयात् ॥
धारणान्नखलोम्नां च गङ्गास्नानं दिने दिने ।
ताम्बूलवर्ज्जनाद्भोगी रक्तकण्ठश्च जायते ।
घृतत्यागात् सुलावण्यं सर्व्वं स्निग्धवपुर्भवेत् ॥
फलत्यागात्तु मतिमान् बहुपुत्रश्च जायते ।
नमो नारायणायेति जपतोऽनशनफलम् ॥
पादाभिवन्दनाद्विष्णोर्लभेद्गोदानजं फलम् ।
एवमादिव्रतै पार्थ ! तुष्टिमायाति केशव ॥
सनत्कुमार ।
'इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नां सिद्धिमाप्नोतु प्रसन्ने त्वयि केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! यद्यपूर्णे म्रिये ह्यहम् ।
तन्मे भवतु सम्पूर्णं त्वत्प्रसादाज्जनार्द्दन ! ॥
क्षमापने च ।
इदं व्रतं मया देव ! कृतं प्रीत्यै तव प्रभो ! ।
न्यूनं सम्पूर्णतां यातु त्वत्प्रसादाज्जनार्द्दन ! ॥
अथैव पौर्णमास्य काठकगृह्यम् ।
अष्टादशे चैड्यामे नगरे दशरात्रकम् ।
पर्य्यन्तोऽन्यत्र चयात्त मासांश्च चतुरो वसेत् ॥
एतदापत्तिविषयम् । ऊर्द्ध्वं वार्षिकाभ्यां मासाभ्यां नैकस्थानवासी इति शङ्खोक्ते ।" इति तिथ्यादितत्त्वम् ॥ * ॥ अन्यच्च । तन्नियमकाल सनत्कुमारेणोक्त ।
"एकादश्यान्तु गृह्णीयात् संक्रान्तौ कर्कटस्य तु ।
आषाढ्यां वा नरो भक्त्या चातुर्म्मास्योदितं व्रतम् ॥"
तत्र मन्त्र ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
इमं करिष्ये नियमं निर्व्विघ्नं कुरु मेऽच्युत ! ॥"
अथ चातुर्म्मास्यनियमावश्यकता भविष्ये ।
"यो विना नियमं मर्त्त्यो व्रतं वा जप्यमेव वा ।
चातुर्म्मास्यं नयेन्मूर्खो जीवन्नपि मृतो हि स ॥"
अथ चातुर्म्मास्यनियमा । स्कान्दे नागरखण्डे ।
"श्रावणे वर्ज्जयेच्छाकं दधि भाद्रपदे तथा ।
दुग्धमाश्वयुजे मासि कार्त्तिके चामिषं त्यजेत् ॥"
तत्रैव श्रीब्रह्मनारदसंवादे ।
"निष्पावान् राजमाषांश्च शुभे देवे जनार्द्दने ।
यो भक्षयति विप्रेन्द्र ! श्वपचादधिको हि स ॥
कार्त्तिके तु विशेषेण राजमाषांश्च भक्षयन् ।
निष्पावान् मुनिशार्दूल ! यावच्चन्द्रतारकौ ॥
कलिङ्गानि पटोलानि वृन्ताकसहितानि च ।
एतानि भक्षयेद्यस्तु सुप्ते देवे जनार्द्दने ।
आजन्मार्ज्जितं पुण्यं हरते नात्र संशय ॥"
किञ्च ।
"रथ तत्तत्कामलब्ध फलमूलादि वर्ज्जयेत् ।
जपहोमाद्यनुष्ठानं नामसङ्कीर्त्तनं तथा ।
स्त्रीसङ्गं प्रार्थयेदेव गृहीतनियमो बुध ॥
इदं व्रतं मया देव ! गृहीतं पुरतस्तव ।
निर्व्विघ्नं सिद्धिमायातु प्रसादात्तव केशव ! ॥
गृहीतेऽस्मिन् व्रते देव ! पञ्चत्वं यदि मे भवेत् ।
तदा भवतु सम्पूर्णं प्रसादात्ते जनार्द्दन ! ॥' * ॥
अथ चातुर्म्मास्यव्रतनियममाहात्म्यम् । विष्णुरहस्ये ब्रह्मनारदसंवादे ।
"शृणु नारद ! कार्त्तिकेन चातुर्म्मास्यव्रतक्रिया ।
या निरुक्ता नरो भक्त्या प्रयाति परमां गतिम् ॥
व्रतानि वैष्णवानीह मनस्यपि चिकीर्षन ।
नरस्त्वयमाप्नोति पापं जन्मशतोद्भवम् ॥
एकभक्तो नर प्राज्ञो निशाशायी दृढव्रत ।
योऽर्थयेच्चतुरो मासान् हरि स्यात्तस्य लोकभाक् ॥
नर ! शुभे हरौ सुप्ते चितिशायी भवेन्नर ।
वार्षिकान् चतुरो मासान् लभते वैष्णवीं गतिम् ॥
यस्तु वैश्वदेवाहित्य चान्द्रायणपरायण ।
चातुर्म्मास्यं नयेद्धन्या स विष्णुलोकमाविशेत् ॥"
भविष्योत्तरे भगवद्युधिष्ठिरसंवादे ।
"चतुरो वार्षिकान् मासान् देवस्योत्थापनावधि ।
स्त्री वा नरो वा मद्भक्तो धर्म्मार्थं सुदृढव्रत ॥
गृह्णीयान्नियमानेतान् दन्तधावनपूर्व्वकम् ।
तेषां फलानि वक्ष्यामि तत्कर्त्तॄणां पृथक् पृथक् ॥
मधुरस्वरो भवेद्भक्तो गुडस्य वर्ज्जनात् ।
लभते सन्तति दीर्घां तैलस्य परिवर्ज्जनात् ।
अभ्यङ्गवर्ज्जनात् पार्थ ! सुन्दराङ्ग प्रजायते ।
कटुतैलपरित्यागाच्छत्रुनाशमवाप्नुयात् ॥
मधूकतैलत्यागेन सौभाग्यमतुलं भवेत् ।
पुष्पोपभोगत्यागेन स्वर्गे विद्याधरो भवेत् ॥
योगाभ्यासी भवेद्यस्तु स ब्रह्मपदमाप्नुयात् ।
कट्वम्लतिक्तमधुरक्षारकषायजान् रसान् ॥
यो वर्ज्जयेत स वैरूप्यं वैगन्ध्यं नाप्नुयात् क्वचित् ।
ताम्बूलवर्ज्जनाद्भोगी स्वप्नदोऽमलो भवेत् ॥
पादाभ्यङ्गशिरोऽभ्यङ्गपरित्यागाच्च पार्थिव ! ।
दीप्तिमान् दीप्तकरणो यक्षो द्रव्यपतिर्भवेत् ॥
दधिदुग्धतक्रनियमात् गोलोकं लभते नर ।
इन्द्रातिथित्वमायाति स्थालीपाकविवर्ज्जनात् ॥
लभेच्च सन्तति दीर्घां तापपक्वस्य वर्ज्जनात् ।
भूमौ प्रस्तरशायी च विष्णोरनुचरो भवेत् ॥
सदा मुनि सदा योगी मधुमांसस्य वर्ज्जनात् ।
निराधिर्नीरुजोऽलसी सुरामद्यविवर्ज्जनात् ॥
एकान्तरोपवासेन ब्रह्मलोके महीयते ।
धारणान्नखलोम्नां च गङ्गास्नानं दिने दिने ॥
मौनव्रती भवेद्यस्तु तस्याज्ञाऽस्खलिता भवेत् ।
भूमौ भुङ्क्ते सदा यस्तु स पृथिव्या पतिर्भवेत् ॥
नमो नारायणायेति जप्त्वा दानशतं फलम् ।
पादाभिवन्दनाद्विष्णोर्भवेद्गोदानजं फलम् ॥
विष्णुपादाम्बुजस्पर्शात् कृतकृत्यो भवेन्नर ।
विष्णोर्देवकुले कुर्य्यादुपलेपनमार्ज्जने ।
कल्पस्थायी भवेद्राजा स नरो नात्र संशय ॥
प्रदक्षिणशतं यस्तु करोति स्तुतिपाठक ।
हंसयुक्तविमानेन स च विष्णुपदं व्रजेत् ॥
गीतवाद्यकरो विष्णोर्गान्धर्व्वं लोकमाप्नुयात् ।
नित्यं शास्त्रविनोदेन लोकान् यस्तु प्रबोधयेत् ।
स व्यासरूपी भगवानन्ते विष्णुपुरं व्रजेत् ॥
पुष्पमालाकुलां पूजां कृत्वा विष्णोः पुरं व्रजेत् ।
कृत्वा प्रेषयित्वा नित्यं स्नानमन्वत्त लभेत् ॥
तोयाञ्जलिं ह्युत्सृजानो निर्म्मलं देहमाप्नुयात् ।
ब्रह्मचर्य्यात्तथा पार्थ ! चान्द्रायणफलं लभेत् ॥
एकभक्ताद्यनग्निपक्वाशिदोषघ्नं लभेत् ।
नक्तभोजी समश्नन्तु तीर्थयात्राफलं लभेत् ॥
अयाचितेन चाप्नोति वापीकूपसमं फलम् ।
षष्ठकालेऽन्नभोजी य स्वर्गे सर्व्वं नरो भवेत् ॥
निशाशायी नरो यस्तु नरकं स न पश्यति ।
भोजनं वर्ज्जयेद्यस्तु स चार्थं पौष्कर लभेत् ॥
पञ्चेषु यो नरो भुङ्क्ते कुरुक्षेत्रफलं लभेत् ।
शिलायां भोजनं नित्यं भवेत् प्रयागजं फलम् ॥
यामद्वयमन्यथाशास्त्रे दोषैः परिमुच्यते ।
एवमादिव्रतै पार्थ ! तुष्टिमायाति केशव ॥"
किञ्च ।
"योऽरविन्दे समायाते दिवाकरदशने सदा ।
चौरोन्मीयवीक्षयेऽतिचार सन्निधिता ॥
सन्दोत्रराणुके पुष्पैर्व्वराभरणपूजया ।
तपत्नु स्नाते च मद्भक्तो वा नरोत्तम धिति ॥
सर्व्वैर्व्वेदैः पारायणेन । नारद ।
कल्पस्थायी विष्णुलोके भवेत्तारकपञ्चक ॥

गत्वा प्रागममानौ च गौडद्वस्य प्रसादतः ।
यदन्नादादिकञ्चैव तेन तत्र कारितम् ॥
स्तुत्वाथ दण्डवद्भूमौ प्रणम्य च पुनः पुनः ।
प्राक् प्रतोऽन्नपीठे च स्वीकुर्याद्वैष्णवे मतः ॥
गीतनृत्यादिना देव परितोष्याथ वैष्णवान् ।
सम्पूज्य नरयानेन दर्वं स्वालयमानयेत् ॥
प्रभोराराधनं कृत्वा विसर्ज्य तत्र वैष्णवान् ।
निवेद्य स्वासने दर्वं धारयेत् श्रुतिं न स्मरेत् ॥
एवञ्च कुर्वतो मानावमानारो यान्ति ते सुखम् ।
अन्यथा प्रभवेद् यमनाशश्चैव जायते ॥
तथा च भविष्ये ।
निपुणो यो भक्तिमार्गो न स्नापयति यो हरिम् ।
वैष्णवे पथ सम्भूय कृतघ्नः सुतरां भवेत् ॥
किञ्च । भविष्योत्तरे ।
यो दृष्ट्वापि माधवं पश्चात् नमेन्नान्यैरेव ।
उत्थाने चापि सम्यक् स यमलोकमाप्नुयात् ॥"
इति श्रीहरिभक्तिविलासे १५ विलासः ॥

चातुर्वर्ण्यं क्ली, (चत्वारो वर्णाः । "चतुर्वर्णादीनां स्वार्थे उपसंख्यानम् ।" इति ष्यञ् ।) ब्राह्मणक्षत्रियवैश्यशूद्राः । इति हेमचन्द्रः । ३।४०२ । (यथा मनुः । १० । ४ ।
"चातुर्वर्ण्यस्य कृत्स्नोऽयमुक्तो धर्मस्त्वयानघ ।")
चतुर्वर्णधर्माश्च ॥

चातुर्वैद्य पुं (चतुरो वेदानधीते इति चतुर्वेदः । स एव । "चतुर्वर्णादिभ्य उपसंख्यानम् ।" इति ष्यञ् ।) चातुर्विद्यः । चतुर्वेदवेत्ता । इति व्याकरणम् ॥

चात्वाल क्ली पुं, (चतति याच्यते इति । चत + "ष्याचयिशिभ्यो हस्वश्चालच्चालीयस्य ।" उणा° १ । ११५ । इति बालच ।) गर्त्तः । वेदि-दक्षिणोपकरणम् । इति सिद्धान्तसारे उणादिवृत्तिः ॥ (यथा तैत्तिरीयसंहितायाम् । ६ । १ । २ । ८ ।
'योनिर्वै यज्ञस्य चात्वालम् ।")

चान्द्र क्ली (चन्द्रस्य इदम् । चन्द्र + अण् । यद्वा चन्द्राय चन्द्रलोकप्राप्तये इदम् ।) चान्द्रायणम् । इति प्रायश्चित्ततत्त्वम् ॥

चान्द्र पुं (चन्द्रस्यायम् । "तस्येदम् ।" ४।३।१२० । इत्यण् ।) चन्द्रकान्तमणिः । इति हेमचन्द्रः । ४।१३१ ॥ चान्द्रमासः । इति मुग्धबोधटीका ॥

चान्द्री स्त्री, (चान्द्रं चन्द्रकमिव कायतीति । कै + कः ।) शुक्ला । इति राजनिर्घण्टः ॥

चान्द्रास्य क्ली (चान्द्रमिवास्या संज्ञा यस्य ।) आर्द्रकम् । इति राजनिर्घण्टः ॥

चान्द्रभागा, स्त्री, (चन्द्रचन्द्रसम्बन्धी भागो यस्याम् ।) चन्द्रभागानदी । इति त्रिकाण्डशेषः ॥

चान्द्रमस, क्ली, (चन्द्रमा अस्याधिष्ठातृदेवता यस्य । चन्द्रमस + अण् ।) मृगशिरोनक्षत्रम् । इति हेमचन्द्रः । २ । ३३ ॥ (चन्द्रमस इदम् । चन्द्रमस् + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) चन्द्रसम्बन्धिनि त्रि । (यथा महाभारते । १३ । १५० । ३० ।
"चन्द्रेण सार्द्धमेति यत्पुण्यं चान्द्रमसं तदा ।")

चान्द्रमसायन, पुं (चन्द्रमसोऽपत्यं पुमान् । चन्द्रमस + फक् ।) बुधग्रहः । इति शब्दार्णवः ॥ ("तिकादिभ्यः फिञ् ।" ४ । १ । १५४ । इति फिञ् ।) चान्द्रमसायनिश्च ॥

चान्द्रमास पुं (चान्द्रः चन्द्रसम्बन्धी मासः ।) चन्द्रसम्बन्धिमासः । स तु गौणमुख्यभेदेन द्विविधः । तथाच कृष्णप्रतिपदादिपौर्णमास्यन्तः । द्वितीयः शुक्लप्रतिपदादिदर्शान्तः । मासाश्चैव प्रतिपदादयः चैत्रादयश्च ॥ तत्र मुख्यचान्द्रः कर्माणि । आब्दिकश्राद्धमाद्यश्राद्धानि मासिकसपिण्डीकरणानि चान्द्रायणमासानि दानकर्मनिष्कमणं वृषोत्सर्गादिप्रतिष्ठा साधारणतिथिविहितकर्म । गौणचान्द्रे चटकादिपाकयज्ञाः चाम्बूवाचीत्याग अन्नानिधितव्य चन्द्र कृत्यादुपवासः दुर्गोत्सवादिर्लिखितपूजा । मासाद्यन्तसंक्रान्तिकमासत्वं माधिकाग्निमासगणना । इति स्मृतिः ॥

चान्द्रायण क्ली (चान्द्रस्य चन्द्रलोकस्य अयनं प्राप्तिर्यस्मात् । "धर्मार्थं यश्चरेदेतच्चन्द्रस्यैति सलोकताम् ।" इति याज्ञवल्क्यवचनादेव तथात्वम् । यद्वा चन्द्रस्य अमावास्यामध्यपूर्व-अयनं चान्द्रयोः दिवसानां ह्रासवृद्धी यस्य व्रतस्य यत्र व्रते वा ।) व्रतविशेषः । तत्पर्य्यायः । इन्दुव्रतम् २ । इति त्रिकाण्डशेषः ॥ तत्तु चतुर्विधं पिपीलिकामध्यम् १ यवमध्यम् २ यतिचान्द्रायणम् ३ शिशुचान्द्रायणम् ४ । यथा,—
'एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्द्धयेत् ।
उपस्पृशंस्त्रिषवणमेतच्चान्द्रायणं स्मृतम् ।'
"एतदेव पिपीलिकामध्यम् ।' इति कुल्लूकभट्टः ॥
"एतमेव विधिं कृत्स्नमाचरेद्यवमध्यमे ।
शुक्लपक्षादिनियतश्चरंश्चान्द्रायणं व्रतम् ॥
अष्टावष्टौ समश्नीयात् पिण्डान् मध्यन्दिने स्थिते ।
नियतात्मा हविष्याशी यतिचान्द्रायणं चरन् ॥
चतुरः प्रातरश्नीयात् पिण्डान् विप्रः समाहितः ।
चतुरोऽस्तमिते सूर्य्ये शिशुचान्द्रायणं स्मृतम् ॥"
इति मनुः ॥
तद्विधानं यथा गारुडे १ ५ अध्याये ।
"तिथिविद्धां चरेद्बुद्ध्या शुक्ले शिख्यण्डभिताम् ।
एकैकं ह्रासयेत् कृष्णे पिण्डं चान्द्रायणं चरेत् ॥
यथाकथञ्चित् पिण्डानां चत्वारिंशच्छतद्वयम् ।
मासेनैवोपयुञ्जीत चान्द्रायणमथापरम् ॥
कुर्य्यात्त्रिषवणं स्नानं पिण्डं चान्द्रायणं चरेत् ।
पवित्राणि जपेत् पिण्डान् गायत्र्या चाभिमन्त्रयेत् ॥
अनादिष्टेषु सर्व्वेषु शुद्धिश्चान्द्रायणेन च ।
धर्म्मार्थी यश्चरेदेतत् चन्द्रस्यैति सलोकताम् ॥
कृच्छ्रकृद्धर्म्मकामस्तु महतीं श्रियमश्नुते ॥"
अपि च ।
"एकैकं वर्द्धयेत् पिण्डं शुक्ले कृष्णे च ह्रासयेत् ।
अमावास्यां न भुञ्जीत एष चान्द्रायणो विधिः ॥"
इति तत्रैव १०६ अध्यायः ॥

चाम्री स्त्री, चैत्रवल्लीकारी । (चम्नः इदम् । चम्न + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् । स्त्रियां ङीप् ।) ज्योत्स्ना । इति शब्दार्णवः ॥ (चन्द्रसम्बन्धिनि त्रि । यथा माघे । ९ । ६ ।
"गुरुकाद्यानुगं बिभ्रत्यान्ये निरविशद्दिशम् ।")

चाप क्ली पुं (चपस्य वंशविशेषस्य विकारः । "अवयवे च प्राण्योषधिवृक्षेभ्यः ।" ४।३।१३५ । इत्यण् ।) धनुः । इत्यमरः । २ । ८ । ८३ ॥ (यथा, रघुः । १२ । ४० ।
"क्रमशस्ते पुनस्तस्य चापात् कण्ठमिवोन्नतम् ॥")
धनूराशिः । यथा सिद्धान्तशिरोमणौ ।
"दृष्टौ तस्य चक्रगुणेन चाप
कोदण्डसख्य तनु कूर्मगोपम् ॥"
धनुराशिः । यथा बृहत्संहितायाम् । ४ । १० ।
"चापगतो मदीयान् कुसुमप्रभयासहायाभिः")

चापपट, पुं, (चापो धनुराकृतिः अङ्गुष्ठो पटः पत्रं यस्य ।) पियालवृक्षः । इति जटाधरः ॥

चापल, क्ली (चपलस्य भावः कर्म्म वा युवादित्वादण् ।) अनवस्थितिः । इति हेमचन्द्रः । २ । २३६ ॥ तस्य लक्षणं यथा साहित्यदर्पणे ।
"मात्सर्य्यद्वेषरागादेश्चापलं त्वनवस्थितिः ॥"
(यथा रघुः । १ । ९ ।
"तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥")

चापल्य, क्ली (चपलस्य भावः कर्म्म वा । ब्राह्मणादित्वात् ष्यञ् ।) चपलता । चापलम् । यथा
'पदन्यासे पदस्य परीवादे तथैव च ।
परीहासे गुरौ स्थाने चापल्यं विवर्जयेत् ॥"
इति चाणक्ये । १० ।

चामर, क्ली पुं (चमर्य्याः विकारः तस्याः लोमविकारः इत्यर्थः । चमरी + अण् ।) चमरीपुच्छलोमनिर्म्मितव्यजनम् । चौरी । इति भाषा ॥ तत्पर्य्यायः । प्रकीर्णकम् २ । इत्यमरः । २ । ८ । ३१ ॥ चमरम् ३ चामरा ४ चामरी ५ । इति भरतः ॥ चामरव्यजनम् ६ रोमगुच्छकम् ७ । इति शब्दरत्नावली ॥ (यथा, भगवती । १ । २६६ ।
"गृहीत्वा रागी चामरधारी
इति रुक्मिणी च महाभूपा ।
चिरं स ददर्श नन्दचामरोज्ज्वली
निमालचन्द्राभरणौ दृष्टवान् ॥")
अस्य गुणाः । आतापघ्नत्वम् । इति । मक्षिकादिदंशनिवारकत्वम् । इति राजवल्लभः ॥
अथ चामरोद्देशः ।
"चन्द्रांशुधवलं शुभ्रं पुच्छं बालसुवर्णकम् ।
हेमदण्डमणौ राज्ञां मङ्गलाय सुखाय च ।
सर्व्वचामरेषु नाशोदृत्वा अन्यायेन बलादिकम् ।
मयो भवो यत्र दीर्घः सुखं विविधं शुभम् ।
भिन्नवर्णैकदण्डस्तु द्विवर्णाभिश्च शुभम् ।
वर्णिनां राजत स्वर्णं धैर्य्यार्थी सदैव च ।
शोभयेदिति विद्वद्भिः बालदण्डकमुच्यते ।
मण्डल चामराणां दण्डेषु वर्णतः ।
पौरुषं मङ्गलाय वैदूर्य्यं यत्नेन च ।
सर्व्वत्र धेनुदण्डे प्रशस्तं रत्नकम् ॥"

शुभ्रः रक्तोऽथ पीतश्च नानावर्णो यथाक्रमम् ।
चामरो राजकृष्णस्य न सामान्यस्य भूपतेः ॥
न भद्रमाप्नुतो मन चामरं कृष्णमावहेत् ॥”

अथ चामरपरीक्षा ।

स्थलजं जलजञ्चेति चामरं द्विविधं विदुः ।
मेरौ हिमालये विन्ध्ये कैलासे मलये तथा ॥
उन्धेऽस्तगिरौ चैव गन्धमादनपर्व्वते ।
एवमेतेषु शैलेषु चामरार्थ्यौ भवन्ति हि ॥
तासां वालस्य जायेत चामरैत्यभिधा भुवि ॥
आपीताः कनकाद्रिजा हिमगिरेः शुभ्रायता विन्ध्यजा
कैलासादसिताः सिता मलयजाः शुक्लाभया पिङ्गलाः ।
आरक्ता उन्धोद्भवाश्चमरजा आनीलशुक्लत्विषः
छाया केवल गन्धमादनभवाः माञ्जुलिय-चामराः ॥
अन्येषु चापरास्तस्याश्चामरा सम्भवन्ति हि ।
ब्रह्मक्षत्रियविट्शूद्रजातयस्ताश्चतुर्व्विधाः ॥
चामर्य्यः सर्व्वतोऽप्यत्र यथापूर्व्वं गुणावहाः ।
दीर्घवालाः सुलघवः स्निग्धाङ्गाश्चापि कोमलाः ।
विरलाश्चाशुपक्वाश्चमर्य्यो ब्रह्मजातयः ॥
विना संस्कारमप्यासां चामरं विमलं भवेत् ॥
दीर्घवालाः सुगुरवः कर्कशाङ्गा भृशं घनाः ।
विज्ञेयाः क्षत्रियजातयश्चमर्य्यो वैश्यजातयः ॥
संस्कारे चाप्यसंस्कारे न स्वभावं त्यजेदिदम् ।
स्वल्पवालाः सुलघवः कोमलाङ्गा भृशं घनाः ॥
चमर्य्यश्चाशुपक्वाश्च विज्ञेयाः शूद्रजातयः ।
संस्कारेणापि मलिनमासां चामरमिष्यते ॥ * ॥
दीर्घता लघुता चैव स्वच्छता घनता तथा ।
गुणाश्चत्वार एवैते चामराणां प्रकीर्त्तिताः ॥
खर्व्वता गुरुता चैव वैवर्ण्यं मलिनाङ्गता ।
दोषाश्चत्वार एवैते चामराणां प्रकीर्त्तिताः ॥
दीर्घे दीर्घायुराप्नोति लघौ भीतिविनाशनम् ।
स्वच्छे स्यान्नृपकीर्त्तिश्च घने स्युः स्थिरसम्पदः ॥
खर्व्वे स्वल्पायुरादिष्टं गुरावुद्भयपदम् ।
वैवर्ण्ये रोगशोकौ च मलिने म्लानमादिशेत् ॥’

इति स्थलजम् ॥ * ॥

अथ जलजम् ।

“लवणेक्षुसुरासर्पिर्दधिक्षीरपयोऽम्बिधु ।
पयोनिधौ गुणवत्यश्चमर्य्यः सन्ति सर्व्वशः ॥
पुच्छानि तासां रुचिराणि जन्तुभिर्मकरादिभिः ।
कम्पादिरूपमध्ये तु तासीरे पुच्छप्रान्तिभिः ॥
लवणाब्धिसमुद्भूतं पीतं गुरु तथा लघु ।
मध्ये स्निग्धं न स्थिरं किञ्चिदधःशायिनि ॥
इक्षुसिन्धूद्भवं ताम्रं चामरं विमलं लघु ।
मदिरा मधुकाद्येव तस्मिन् पश्यति चामरे ॥
सुराब्धिभवं कृष्णं कर्बुरं गुरुकम्पनम् ।
तस्मिन्नेव मादन्ति चापि कृष्णा मनुष्यकाः ॥
सर्पिःसिन्धुभवं स्निग्धं श्वेतापीतं घनं लघु ।
पाण्डुरोगाः प्रशाम्यन्ति तस्य वीजनवायुना ॥
दधिसिन्धूद्भवं पाण्डु दीर्घं लघु घनं महत् ।
अस्य वातेन मर्त्येषु कृपा गच्छाः भवत्यलम् ॥
नारिकेल जलस्य यत्रेदं चामरं महे ।
क्षीरोदसम्भवं श्वेतं दीर्घं लघु घनं महत् ॥
अस्य चामररत्नस्य निर्द्दिष्टो गुणविस्तरः ।
नाल्पेन तपसा लभ्यो देवानामपि जायते ॥
द्वयतोऽभ्यन्तरे सिन्धोर्नाम सर्व्वासिन्धोरपि ।
एषां पूर्व्ववदस्यैव जातिभावगुणादिकम् ॥ * ॥
स्थलजे जलजे चैव भाव्यमेतद्विशेषणम् ।
स्थलजं सुखमन्त्यं हि दण्डे निधिमिवायते ॥
जलजं वह्निदुर्देहं महान्तं धमनुद्रिते ।
चामराणां समुद्दिष्टमिच्छैवं लक्षणद्वयम् ॥
एवं विलक्ष्य यो धत्ते स राजा सुखमश्नुते ॥ * ॥
जलजं चामरं राजा यो धत्ते जाह्नवीश्वरः ।
तस्याचिरात् कुलं वीर्य्यं लक्ष्मीरायुश्च नश्यति ॥
अनुपाधीश्वरो राजा यो वहेत स्थलजं तथा ।
तस्यैतानि विनश्यन्ति लक्ष्मीरायुर्यशो बलम् ॥
नाल वयद्वये तेषां शिथिय प्रित्यिना क्रमात् ।
संस्कारो वाञ्छनीयश्च मधुरसलिलादिभिः ।
सद्यःसलिलसम्पातात् क्षणिमत्र विपद्यते ॥”

इत्युपकरणयुक्तौ चामरोद्देशः । इति भोज-राजकृतयुक्तिकल्पतरुः ॥

चामरपुष्पः, पुं, (चामरवत् पुष्पमस्य ।) गुवाकः । काशः । आम्रः । केतकः । इति मेदिनी । षे ३१ ॥

चामरपुष्पकः, पुं, (चामरपुष्प + स्वार्थे कन् । चामरमिव पुष्पमस्य इति कप् वा ।) काशः । इति जटाधरः ॥ चामरपुष्पार्थोऽप्यत्र ॥

चामरा, स्त्री, (चामर + अर्शआदित्वात् टाप् ।) चामरम् । इत्यमरटीकायां भरतः ॥

चामरी, स्त्री, (चामर + स्वार्थे ङीष् ।) चामरम् । इत्यमरटीकायां भरतः ॥

चामरी [न्] पुं स्त्री, (चामर इव केशरोऽस्त्यस्य । इति इनिः ।) घोटकः । इति त्रिकाण्डशेषः ॥

चामीकर, क्ली, (चमीकरे रत्नाकरविशेषे तत्र भवमित्यण् ।) स्वर्णम् । (यथा शिवपुराणे वायुसंहितायाम् । २ । १२ ।
“ददर्श मुनयो दृष्टा देवर्षिगणसेवितम् ।
शुद्धचामीकरप्रख्यं सर्व्वाभरणभूषितम् ॥”)
धुस्तूरः । इत्यमरः । २ । ४ । ७५ ॥

चामुण्डा, स्त्री, (महासमरे चण्डमुण्डाख्यौ द्वौ शुम्भनिशुम्भसेनाध्यक्षौ अनया हतौ निहतौ अतः परितुष्टया भगवत्या कौशिक्या चामु-ण्डेति संज्ञा दत्ता । एतत् सर्व्वं चण्डीमाहात्म्ये दर्शितं द्रष्टव्यम् ।) दुर्गा । इति जटाधरः ॥ मातृकाभेदः । इति मन्त्रशास्त्रम् । तत्पर्य्यायः । चर्च्चिका २ चर्म्ममुण्डा ३ मार्ज्जारकर्णिका ४ कर्णमोटी ५ महागन्धा ६ भैरवी ७ कापालिनी ८ । इति हेमचन्द्रः ॥

अस्या ध्यानं यथा,—
“काली करालवदना विनिष्क्रान्तासिपाशिनी ।
विचित्रखट्वाङ्गधरा नरमालाविभूषणा ॥
द्वीपिचर्म्मपरीधाना शुष्कमांसातिभैरवा ।
अतिविस्तारवदना जिह्वाललनभीषणा ॥
निमग्नारक्तनयना नादापूरितदिङ्मुखा ॥”

अस्याश्चामुण्डेति नामकारणं यथा,—
“यस्माच्चण्डञ्च मुण्डञ्च गृहीत्वा त्वमुपागता ।
चामुण्डेति ततो लोके ख्याता देवि ! भविष्यसि ॥”

इति चण्डी ॥

अस्या ध्यानादिकं यथा,—
“देव्या ललाटनिष्क्रान्ता या कालीति च विश्रुता ।
तस्यास्तन्त्रं प्रवक्ष्यामि कामदं शृणु भैरव ॥
समाधिमहितो स्मरः प्राप्तवान् पुरन्दरः ।
वह्निसूर्य्यविरिञ्चिदृष्टमहितो मार्ज्जितेव च ॥
कालीतन्त्रमिति प्रोक्तं धर्म्मकामार्थदायकम् ।
एतन्मूर्त्तिं प्रवक्ष्यामि शृणुष्वैकमनाः शृणु ॥
नीलोत्पलदलश्यामा चतुर्व्वाहुसमन्विता ।
खट्वाङ्गं चन्द्रहासञ्च बिभ्रती दक्षिणे करे ॥
वामे चर्म्म कपालञ्च ऊर्द्ध्वाधोभावतः पुनः ।
दधती मुण्डमालाञ्च व्याघ्रचर्म्मधराम्बरा ॥
कृशाङ्गी दीर्घदंष्ट्रा च अतिदीर्घातिभीषणा ।
लोलजिह्वा निम्नरक्तनयना नादभैरवा ॥
कबन्धवाहना पीनविस्तारश्रवणानना ।
एषा तारारूया देवी चामुण्डेति च कथ्यते ॥
एतस्या योगिनी चाष्टौ पूजयेन्निजयेऽपि ।
त्रिपुरा भीषणा चण्डी कर्त्री हन्त्री विधायिका ॥
करालाः शूलिनी चेति अष्टौ ताः परिकीर्त्तिताः ।
एषातिकामदा देवी आशुहानिकरी सदा ॥
एतस्या सदृशी काचित् कामदा न हि विद्यते ॥”

इति कालिकापुराणे ६ अध्यायः ॥

चाम्पिला, स्त्री, (चपि + भावे घञ् । ततष्टाप् । चम्पेति चाम्पा । ततोऽस्त्यर्थे इलच् टाप् च ।) नदी । इति त्रिकाण्डशेषः ॥

चाम्पेयः, पुं, (चम्पायां नद्यां भवः इति ढक् ।) चम्पकः । इत्यमरः । २ । ४ । ६३ ॥ (यथास्य पर्य्यायाः ।
“चाम्पेयश्चम्पको प्रोक्तो हेमपुष्पश्च स स्मृतः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
नागकेशरः । (यथा—
“नागपुष्पः स्मृतो नागः केशरो नागकेशरः ।
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
राजविशेषः । यथा राजतरङ्गिण्याम् । ७ । ४ ।
“चाम्पेयो जाह्नटोऽथ चम्पकौ दशाङ्गराधिपः ।”
विश्वामित्रपुत्राणामन्यतमः । यथा महाभारते । १३ । ४ । ५० ।
“धाराधिपाश्च चैव चाम्पेयोऽम्बयश्च तथा ॥”
क्ली सुवर्णे । यथा काशीखण्डे । ४३ । १८ ।
“सर्व्वमालिक्य चाम्पेयदुकूलभासोपिधम् ॥”)

चाम्पेयकः, पुं, (चाम्पेय इव कायतीति । कै + कः । स्वार्थे कन् वा ।) किञ्जल्कः । इति शब्दचन्द्रिका ॥

चाम्यं, क्ली, (चम्यते भक्ष्यते इति । चम + कर्म्मणि ण्यत् ।) भक्ष्यम् । इति व्याकरणम् ॥

चाय, ऋ ञ निशाम्ने । अर्च्चे । इति कविकल्पद्रुमः ॥ (भ्वां उभं सकं सेट् ।) ऋ अचचायत् । ञ, चायति चायते । निशाम इति चाक्षुषज्ञानम् । न मन्त्रीयं प्रमाणवन्दर । इति माघः । इति दुर्गादासः ॥

चार, क्ली, (चर्य्यते भक्ष्यते कोमलत्वादिति। चर+कर्म्मणि घञ।) कृत्रिमविषम्। इति हेमचन्द्रः। ४। १९८॥

चारः, पुं, पियालवृक्षः। गतिः। बन्धः। अवसर्पः। इति मेदिनी। रे, ३३॥ कारागारम्। इति हेमचन्द्रः। ४। १९८॥ (चर एव इति स्वार्थे अण्।) गूढपुरुषः। चरः। तद्विवरणम् यद्युक्त वह्निपुराणे ... अध्याये।

"कृषिद्रुगाश्च वाणिज्यं रक्ष्यतां कर्य्यायनम्।
आदानं रोपणकरयोर्व्वर्म्मं गजवाजिनो॥
शून्यप्रसृतामात्य यौवन यतस जने।
प्रभावां चारसेतूनां सम्यक् नीति चाटमम्॥
एतान्यष्टौ वर्गाः चारान् सम्यक् प्रयोजयेत्।
कार्य्याकार्य्यविभागाय चारकार्य्याधिकारिणाम्॥
चाटौ चारान् नियुञ्जीयादष्टसौ च पार्थिव।
दशमष्येषु युञ्जीत प्रमत्तं प्रयत्न तानि मे॥
स्वामी सचिवराष्ट्राणि मित्र कोषो बलं तथा।
दुर्गञ्च प्रकृतेः सप्त राज्याङ्ग गुणभाषितम्॥
दुर्गयुक्तः चारवर्गे चारं चात्मनि यापयेत्।
तत्कार्य्यमानि पीडानि प्रभ चारवर्ग्गानि तु॥
गुह्याल्लेषेव पुत्रेषु स्वकुमारौ महावसे।
प्रभृतीनयाष्टेव बलाबलविनिश्चये॥
चारौ दशसु चैतेषु चारान् राजा प्रयोजयेत्।
नयात् प्रकाश आगामात् ततु चारैर्निरूपयेत्॥
निरूप्य तत्प्रतीकारमनयं छिन्नमचरेत्।
यथानियोगमेतेषां यो यो यत्रान्यथा चरत्॥
ज्ञात्वा तत्र नृपश्चारैर्दण्डयेद्वा नियोजयेत्।
चारांस्तु मन्त्रिणा सार्द्धं रहसि संस्थितो नृपः॥
प्रदोषसमये पृच्छेन्नागोनैव यापयेत्।
चतुर्भे चाप अष्टाम्ये ये तु चारा महावसे॥
नियुक्तास्तान् सम्यगाशौ पृच्छेत् यथामि मन्त्रिभिः।
एतान् चारान् स्वप प्रश्नेत् नृपतिर्मेनिशा विभा॥
चत्वारि मन्त्रिणा सार्द्धं निकृत्य प्रदिशेत मतम्।
नैकस्यापरचारो नैको नेतव्यस्तु वर्जितः॥
सस्तुतो न हि सर्वेषु जातिभेदा न बालक।
तरल न दिवाचारी न रोगी कार्य्यबुद्धिमान्॥
न विजातिभिर्वेदज्ञा न भार्य्यापुत्रवर्ज्जितः।
आयचारौ नृपतिना गुप्तलक्षविशिषयत॥
अनेकदेशभाषाज्ञम भार्य्यानुगैर्युतम्।
नष्टदेशश्चरोऽभिन्न पराभिप्रायवेदकम्॥
तद्दुमत नकुर्व्वीत चारं प्राज्ञमथावशेम्।
कार्य्यनिष्ठेन स्वयं राज्ञा लक्षिभामवशे स्वयाः॥
प्रतिपथे च नृपाग्नौ तेषु प्रज्ञाविनियोजयत्।
चलपूर्व्वे पितृसुतान् चौरान् बहून् नियो-
जयेत्॥
प्रज्ञान् प्रज्ञान् तथा बहून् स्त्रियो वा बुद्धि-
तत्परः।
महात्मवर्ण्णि पुनीयात स्त्रियौ बहु मनी-
षिणौ॥"

यथा च हस्तिकल्पतरौ।
"दृशो निरूप्यचारेण परराष्ट्र निरूपयेत्।"
(चाररिपुदुचारण। यथा, मनुः। ७।१२२॥
"उपरस्थाप्यरच्चैव चारान् सम्यग् विधाय च।"
"चारांश्च कापटिकादीन्।" इति कुल्लूकभट्टः॥
प्रचारः। यथा, रामायणे। २। ६६। २६।

"निश्चाचार सहसा गतो रवि
प्रशान्तचारा रजनी सुपस्थिता।"

"निश्चाचारः निश्चक्तिकसंचारः प्रशान्तचारा प्रशान्तसंचारा।" इति तट्टीकायां रामानुज॥ वाणिज्यादिव्यवहारः। यथा महाभारते। ५। १८। १२।
"भूर्षेवाणिज्यचारच भुवे यथेष च द्विजान्॥"
सञ्चारः। प्रवृत्तिः। यथा, दुर्गाभागवते। १। ११। २२।
"न सौ दुष्यति चारेण न विप्रो वेदकर्म्मणा।"
"चारेण दन्तचचारेण।' इति टीकाकृत्सील कण्ठः॥)

चारकः, पुं (चारयति इति। चर+णिच+ण्वुल।) अश्वादेः पालकः। सञ्चारकः। (यथा, रामायणे। २। ६६। १८।
"इम कृते भ्रातरि मे मयि वनस्थिते भविष्यति।
न चारमात्रं कुर्य्यात् ते पापं पञ्चप्रचारकः॥")
बन्धः। इति मेदिनी। के ८०। पियालवृक्षः। इति राजनिर्घण्टः॥ (चर एव स्वार्थे अण् चारः। ततः स्वार्थे कन्। गुप्तचरः। यथा महाभारते। २।५।९८। [चारकैः॥"
"त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि
चारशालेत्रि। यथा, कथासरित्सागरे। १३। ५।
"तत्र विदर्षिता नाम भवेच्चारपुरचारिकाम्॥")

चारटिका स्त्री, (चर+णिच+"शकादिभ्यो ऽटन्।" ४। ८१। उणौ। इति अटन् तत संज्ञायां कन् कापि अत इत्वम्।) नलीनाम गन्धद्रव्यम्। इति राजनिर्घण्टः॥

चारटी, स्त्री, (चर+णिच+"शकादिभ्योऽटन्।" इति अटन् ततो गौरादित्वात् ङीष।) पद्मचारिणीक्षुपः। इत्यमरः। २। ४। १४६॥ भूम्यामलकी। इति राजनिर्घण्टः॥

चारणः, पुं, (चारयति प्रचारयति भुवनेषु कीर्त्तिं चिदां तत्तत्कीर्त्तिं वा। चर+णिच्+ल्यु।) नटविशेषः। कुशीलवः। कुशीलवः। इत्यमरः। २। १०। १२॥ (यथा, मनुः। १२। ४४।
"चारणाश्च सुपर्णाश्च पुरुषाश्चैव दाम्भिकाः।
रक्षांसि च पिशाचाश्च तामसीषूत्तमा गतिः॥"
"चारणा नटादयः।" इति कुल्लूकभट्टः॥")
स्वर्गवन्दिनः। यथा —
"गन्धर्व्वाला सनी सौक पदस प्रसयोभवान्।
देवानां गायकाश्चैव चारणाः स्तुतिपाठकाः॥"
इति माघे पाण्याद्यक्षम्॥
(देवयोनिविशेषः। यथा, भागवते। २। १। ३६।
"गन्धर्व्वविद्याधरचारणाप्सरः
स्वरस्मृतीरसुरानीकवीर्य्यः॥"
चारणसंघः। यथा भागवते। ३। १६। १२।
"चरन्तीव नृणां ये सततं कर्म्माणि चारणे।
उदासीन इवाध्यक्षो वायुरात्मेव देहिनाम्॥")

चारभटः पुं (चारेषु भटेषु भटः। यद्वा चारं युद्धकौशलादिप्रचारं भटः।) वीरः। इति हेमचन्द्रः। ३। ३८॥ (यथाच भर्तृहरिः। ३। ५०।
"कपुयति कृतपुण्यो देशास्यस्मत्र सञ्चारसमर्थ।
चारभटचौरपिटकनटविटभिट्टाविलुप्तकराणाम्॥")

चारवायुः पुं (चारेण सञ्चलौदृष्टमिर्मषित पुंभिर्नो या वायुः।) निदाघवायुः। इति त्रिकाण्डशेषः॥

चारिणी, स्त्री (चारयति सगुणानिति। चर+णिच+णिनि ङीप च।) करुणौषधम्। इति राजनिर्घण्टः॥

चारित्र, क्ली, (चरित्रमेव इति। स्वार्थे अण्।) चरित्रम्। इति हेमचन्द्रः। ३। १० ॥ (यथा, रामायणे। ६। ५९। ८।
"कुलाकोऽप्यकरं लोके छिन्नत्रैचारित्रभोजनम्।"
सदाचारणमनम्। यथा, हरिवंशे। १९८। १३।
'अयोनिजास्तिवैव चारित्रं बहुमन्यते।"
चरतीति। "चरेर्वृत्ते।" ४। १०२। उणा।
इति नित्रम्। इत्युज्ज्वलः॥)

चारित्रा स्त्री, (चारित्र आश्रयत्वात् नित्ये ऽस्या इति। अच टाप।) तिन्तिडीवृक्षः। इति शब्दरत्नावली॥

चारी, स्त्री, (चारः पदविक्षेपेण गतिभेदो वा अस्त्यस्या इति। "अर्श आदिभ्योऽच्।" ५। २। १२७। इत्यच। ततो ङीष।) नृत्याङ्गविशेषः। यथा —
"न हि चारीं विना वृत्तं नृत्यताङ्ग वदन्ति।
प्रशारान्तिधानाख्या भावोद्दीपनकारिका॥
माधुर्य्यवर्णना नित्यं चारी चारुगतिर्मता॥"
अन्ये तु।
"एकपादप्रचारो यः सा चारी तु निगद्यते।
पादयोश्चारयत्र सा चारीति निगद्यते॥
करणानां समायोगः खलकः परिकीर्त्तितः।
त्रिभिः खण्डैरनुभिर्मा मण्डलं परिभाषितम्॥
समनखा नूपुरविद्धा तिर्य्यङ्मुखी चलना च।
कातरा च कुटीरा च विचित्रा स्यन्दिका॥
पार्ष्णिरेचितका लतरषिता समदण्डिका।
सराजितनया चोन्नानिताद्दृसंज्ञका॥
तलमोटनिका हरिणप्लुतिका चाररेचिता।
तलोद्धृता सङ्घट्टिता स्फुरिकापि मर्द्दन च॥
ताड़िता शङ्कुमा उरःपद मदालसा।
ऊरुविवर्त्तनिका गुल्फिता चापदृषिता॥
मकरचिह्नाभिर्नैमित्यां स्थापनात्रयोदश॥"
अन्ये तु।
"समपादक्षिता चर्चा प्रकटोत्थाने देवाविच।
विषमा ताडिता बद्धा एकपाका कीलिता तथा॥
उत्कृष्टा उन्दिमा अविनायच्छिता तथा।
पश्चिताश्लिष्टमानश्वा समोत्सारित्रमतुग्गा॥
पुष्टदिता च विजेयादं भौमे गुणिता॥"
इति नृत्यसारे॥ *॥
आकाशचारी यथा,—
"चारीचाकाशका चण्डि विद्यता भवरी यथा।
चालिताक्रिणा भ्रमरी दुरन्धिता च दण्डिका॥

अपचेपा जङ्घावर्त्ता विद्धा च हरिणप्लुता ।
ऊरुजङ्घान्दोलिता च जङ्घा अञ्चितिका तथा ॥
विद्युत्क्रान्ता भ्रमरिका दण्डपार्श्वेति षोडश ॥”
अन्ये तु ।
“विश्रान्तानिक्रान्तापक्रान्ता पार्श्वक्रान्तिका ।
ऊर्ध्वजानुर्दोलपादादूरुवृत्ता नूपुरपादिका ॥
भुजङ्गत्रासिका क्षिप्ताविद्धा ताला च सूचिका ।
विद्युत्क्रान्ता भ्रमरिका दण्डपादा तथैव च ॥
आकाशचारिका एता षोडशैव निरूपिताः ॥”
एतास्वेव भूमिचारीष्वप्यन्तरभेदोऽस्ति तिर्य्यक्-
चारी ऊर्द्ध्वचारी अधश्चारीति ता ऊहनीयाः ॥
“तैलाभ्यक्तेन गात्रेण लब्धाचारी जितश्रमः ।
स्तम्भे वा भित्तिदेशे वा प्रथमं ताः प्रयोजयेत् ॥
इच्छाचारं तथाप्येवं शुद्धां तां न समाचरेत् ।
शुद्धपादस्य विन्यासश्चारी सैवाभिधीयते ॥
अङ्गारादिरसाभावात्तु भवेद्दोषप्रकारणम् ।
माधुर्य्यो भ्रमणा नित्यं शुद्धतालत्रयान्विता ॥
नियतोऽङ्गविशेषाणां चारी सञ्चारतो भवेत् ॥”
इति सङ्गीतदामोदरोक्तचारीलक्षणम् ॥
चारु, पुं (चरति देवेषु गुरुत्वेन । चर+“दृ-
सनिजनिचरीति ।”उणां १ । ३ । इति ञुण् ।)
वृहस्पतिः । (चरति चित्ते इति ।) मनोज्ञे त्रि ।
इति मेदिनी । रे, ३३ । (यथा गीतगोविन्दे ।
१ । ८ ।   [मधिवचनचातम् ॥”
‘ इति चटुलचाटुपटुचारुमुरवैरिणो राधिका-
’) रुक्मिण्यास्य रुक्मिणीगर्भसम्भूतपुत्राणामन्यतमः ।
यथा हरिवंशे । ११७ । ३८ ।
“चारुश्च बलिनां श्रेष्ठः सुताश्चारुमती तथा ।”)
चारुक पुं (चारु+सञ्ज्ञायां कन् ।) शरबीजम् ।
अस्य गुणाः । मधुरत्वम् । रूक्षत्वम् । रक्त-
पित्तकफापहत्वम् । शीतत्वम् । लघुत्वम् ।
अरुच्यत्वम् । कषायत्वम् । वातकोपनत्वञ्च । इति
भावप्रकाशः ॥
चारुकेशरा, स्त्री, (चारूणि केशराणि अस्याः ।)
नागरमुस्ता । तरणीपुष्पम् । इति राजनिर्घण्टः ॥
चारुगर्भ पुं (चारु मनोज्ञः गर्भः अभ्यन्तर्व्वर्त्तिप्राणि-
करणादिर्यावत् यस्य । यद्वा चारुर्गर्भ उत्
पत्तिस्थानं यस्य ।) श्रीकृष्णपुत्त्रः । यथा हरि
वंशे । ११६ । ६ ।
“चारुभद्रश्चारुगर्भः सुन्दो द्रुम एव च ।”
चारुगुप्त, पुं, (चारु यथा स्यात् तथा गुप्तः । यद्वा
चारुणा इन्द्रेण रक्षितेन गुप्तः पालितः ।)
श्रीकृष्णपुत्त्रः । यथा, हरिवंशे । १६० । ६ ।
“सुषेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ।”
चारुदेष्णः पुं रुक्मिण्यां श्रीकृष्णपुत्त्रः । यथा
हरिवंशे । ११६ । ५ ।
“द्वितीयश्चारुदेष्णश्च रुक्मिणेयो महारथः ।”
चारुधारा स्त्री, (चारूणां मनोहरमेघादीनां
धारा इव श्रेणीश्चत्त्वरस्वभावाश्चायानाम् ।
चार्व्वी धारा श्रीनिदग्धहारी यस्या वा ।)
शची । इति त्रिकाण्डशेषः ॥ (चारु धाम
यस्याः ।) चारुधामा इत्यपि पाठः ॥

चारुनालक क्ली (चारु नालं यस्य कप् ।)
रक्तपद्मम् । इति पुराणम् ॥
चारुपर्णी स्त्री, (चारु मनोज्ञं पर्णं पत्रं यस्याः ।)
प्रसारणी । इति राजनिर्घण्टः ॥ गन्धभादालिया
इति भाषा ॥ (प्रसारणीशब्देऽस्या गुणादिक
ज्ञेयम् ॥)
चारुफला, स्त्री, (चारु मनोहरं फलं यस्याः ।)
द्राक्षा । इति राजनिर्घण्टः ॥
चारुबाहु, पुं, (चारू बाहू यस्य ।) श्रीकृष्ण-
पुत्त्रः । यथा, हरिवंशे । ११६ । ६ ।
“चारुबाहु कनीयांश्च कन्या चारुमती तथा ।”
चारुविन्द, पुं, (चारु चारुतां विन्दतीति ।
विद्+श ।) श्रीकृष्णपुत्त्रः । यथा, हरि-
वंशे । ११६ । ६ ।
“सुषेणश्चारुगुप्तश्च चारुविन्दश्च वीर्य्यवान् ।”
चारुमती, स्त्री, (चारु चारुता सौन्दर्य्यं अस्या
अस्तीति । मतुप् ततो ङीप् ।) रुक्मिण्यां
श्रीकृष्णस्य कन्या । यथा, हरिवंशे । ११६ । ६ ।
‘ चारुबाहु कनीयांश्च कन्या चारुमती तथा ।”
चारुलोचन, पुं,(चारुणी लोचने यस्य ।) हरिणः ।
इति त्रिकाण्डशेषः ॥ (चारुलोचनविशिष्टे त्रि ॥)
चारुवद्धना, स्त्री, (चारु चारुत्वं प्रियमित्यर्थः
वर्द्धयति स्वगुणैरिति यावत् । वृध+णिच+
युच् । कर्मणि लुट्वाँ ततष्टाप् ।) नारी । इति
राजनिर्घण्टः ॥
चारुव्रता, स्त्री, (चारु व्रतमस्याः ।) मासोप
वासिनी । इति त्रिकाण्डशेषः ॥
चारुशिला, स्त्री, (चारुश्चार्व्वी शिला इति कर्म-
धारयः ।) मणिः । इति त्रिकाण्डशेषः ॥
चार्च्चिक्य क्ली, (चर्च्चिकैव । स्वार्थे ष्यञ् ।)
चन्दनादिना देहविलेपनविशेषः । इत्यमरः ॥
तत्पर्य्यायः । चर्च्चा २ स्थासक ३ । इत्यमरः ॥
चर्च्चिक्यम् ४ । इति भरतः ॥ अपि च ।
“स्थासक स्थायकश्चर्च्चा चर्च्चिक्यञ्च चतुष्टयम् ।
कस्तूरी कुङ्कुमादीनां छटादिषु निगद्यते ॥”
इति शब्दरत्नावली ॥
चार्म्म, पुं, (चर्म्मणा परिवेष्टितः इति । चर्म्म
+अण् ।) चर्म्माच्छादितरथः । इति भरतः ॥
चर्म्माच्छन्नमये त्रि ॥
चार्म्मण क्ली, (चर्म्मणां समूहः इति । भिक्षा-
दिभ्योऽण ।” ४ । २ । ३८ । इत्यण् ।) चर्म्म
समूहः । इत्यमरटीकायां भरतः ॥
चार्म्मिक क्ली, (चर्म्मिणां चर्म्मधारिणां समूहः ।
इति अण् ।) चर्म्मिसमूहः । इत्यमरटीकायां
स्वामी ॥
चार्व्वाक, पुं, (चारु आपाततमनोरमं लोक-
चित्ताकर्षकं इति यावत् वाक वाक्यमस्य ।
तत् पृषोदरादित्वात् साधु ।) नास्तिकविशेषः ।
तत्पर्य्यायः । बार्हस्पत्यः २ नास्तिकः ३ लौकाय
तिकः ४ । इति हेमचन्द्रः ॥ स च आकाश-
भिन्नभूतचतुष्टयवादी । प्रत्यक्षमेव प्रमाणमिति
चार्व्वाकः । इति न्यायदर्शनम् ॥ (यथा च

सर्व्वदर्शनसंग्रहे ।“अथ कथं परमेश्वरस्य निःश्रेय
सप्रदत्वमभिधीयते बृहस्पतिमतानुसारिणा
नास्तिकशिरोमणिना चार्व्वाकेण दूरोत्सारित
त्वात् दुरुच्छेदं हि चार्व्वाकस्य चेष्टितम् ।’)
दुर्य्योधनसखराक्षसविशेषः । (यथा, महा
भारते । १२ । ३८ । २२—२३ ।
“निःशब्दे च स्थिते तत्र ततो विप्रजने पुनः ।
राजानं ब्राह्मणच्छद्मा चार्व्वाको राक्षसोऽब्रवीत् ॥
तत्र दुर्य्योधनसखा भिक्षुरूपेण संवृतः ।
साक्षः शिखी त्रिदण्डी च धृष्टो विगतसाध्वसः ।”)
चार्व्वी स्त्री, (चारु+गुणवचनात् ङीष् ।)
कुबेरपत्नी । ज्योत्स्ना । बुद्धिः । शोभना । इति
मेदिनी । वे ६ । दीप्तिः । इति शब्दरत्ना
वली ।
चालि, पुं, (चालयति छादयतीति । चल+णिच्
+अच् स्त्रीत्वात् । यद्वा चालयति आच्छादयत्य
नेनेति । चल+णिच+करणे घञ् ।) गृहाच्छ
आगारछादनम् । तत्पर्य्यायः । पटलम् २ ।
इति त्रिकाण्डशेषः । पटलम् ३ छदिः ४ । इत्य
मरः । २ । २ । १४ । कटलम् ५ । इति शब्द
रत्नावली । छादम् ६ । इति जटाधरः । खड़े
चूलचाली । इति भूरिप्रयोगः ।
चालक, पुं (चलति स्वेच्छयैव । चल+ण्वुल ।)
अङ्कुशदुष्टहस्ती । इति त्रिकाण्डशेषः ॥
चालन, क्ली, (चाल्यतेऽनेनेति । चल+णिच+
करणे ल्युट ।) चालनी । इत्यमरटीकायां
भरतः ॥ (यथा, कर्म्मप्रदीपे ।
“सुदरिच्छिद्रसमोपेतं चालनं तितउ स्मृतम् ॥”
भावे ल्युट । प्रेरणम् । यथा, भागवते । ३ ।
२६ । १७ ।
“चालनं व्यूहनं प्राप्तिर्नेतृत्वं द्रव्यशब्दयोः ॥”)
चालनी, स्त्री (चाल्यतेऽनयेति । चल+णिच+
करणे ल्युट ङीप् च ।) सतामसंश्लिष्टशस्यादि
चालनपात्रम् । तत्पर्य्यायः । तितउः २ । इत्य
मरः ।२।९।२६ । चालनम् ३ अङ्कुच्छिद्रा ४ ।
इति भरतः । चाचोर ५ । इति जटाधरः ॥
चाष,पुं (चषयति भक्षयति कीटादिकमिति । चष
+स्वार्थे णिच+अच । यद्वा चष्यते भक्ष्यते-
ऽसौ मांसाशिभिरिति । चष्+कर्म्मणि घञ् ।)
स्वर्णचातक । नीलाङ्गः इति ख्यातः । नील
कण्ठ इति केचित् ख्यातः । इत्यमरटीकायां
भरतः । तत्पर्य्यायः । किकीदिविः २ नीलाङ्गः ३
पुण्यदर्शनः ४ । इति राजनिर्घण्टः ॥
चाष , पुं, (चाष+पृषोदरात् साधुः ।) चाष
पक्षी । इक्षुः । इति मेदिनी । षे ३ ।
चि, ञ चिञाम् । चयने । इति कविकल्पद्रुमः ॥
(भ्वा उभ द्विक-अनिट ।) ञ चयति चयते
धन लोकः । इति दुर्गादासः ॥
चि, ञ भ चिञाम् । इति कविकल्पद्रुमः ॥ (स्वा
उभ द्विक अनिट ।) चिनोति राशीकरण
मित्यर्थः । भ च, चिनोति चिनुते । इति
दुर्गादासः ॥

चि, क मि चिन्त्याम्। इति कविकल्पद्रुमः॥ (चुरा०-पर०-द्विकं०-सेट्।) क मि, चययति चाययति। मसते तु चयति चापयतीत्यपि। इति न्यासः॥

चिकित्सक, पुं, (चिकित्सति रोगमपनयतीति। कित + "गुप्तिज्किद्भ्यः सन्।" ३।१।५। इति स्वार्थे सन् + ण्वुल्।) चिकित्साकर्त्ता। (यथा, मनुः। ३। १८०।
"चिकित्सकानां सर्व्वेषां मिथ्या प्रचरतां दमः।")
तत्पर्य्यायः। रोगहारी २ अगदङ्कारः ३ भिषक् ४ वैद्यः ५। इत्यमरः। २।६।५७॥ तस्य लक्षणं यथा चाणक्ये।
"आयुर्व्वेदकृताभ्यासः सर्व्वेषां प्रियदर्शनः।
आर्य्यशीलगुणोपेत एष वैद्यो विधीयते॥"

चिकित्सा, स्त्री, (चिकित्सनमिति। कित व्याधि-प्रतीकारे + "गुप्तिज्किद्भ्यः सन्।" ३।१।५। इति स्वार्थे सन् तत अप्रत्ययः।) रोगप्रती-कारः। तत्पर्य्यायः। रुक्प्रतिक्रिया २। इत्यमरः। २।६।५०॥ उपचारः ३ उपचर्य्या ४ निग्रहः ५ वैद्यक्रिया ६ क्रिया ७ उपक्रमः ८ शमः ९। इति राजनिर्घण्टः॥ चिकित्सितम् १० प्रतीकारः ११ भिषज्जितम् १२। इति रत्नमाला॥ रोगप्रतिकारः १३। इति शब्दरत्नावली॥ सा त्रिधा यथा, वैद्यके।
"आसुरी मानुषी दैवी चिकित्सा त्रिविधा मता।
शस्त्रप्रधाना दैवी स्यात् [illegible]कासुरी॥
मानुषी मध्यमा ज्ञेया चर्णैर्माल्यैश्च कृता।
कर्त्री चाल्पवलं [illegible] मानुषी तत्र पूजिता॥"
तस्या लक्षणं यथा,—
"याभिः क्रियाभिर्जायन्ते शरीरे धातवः समाः।
सा चिकित्सा विकाराणां कर्म्म तद्भिषजां मतम्॥
या ह्युदीर्णं शमयति नान्यं व्याधिं करोति च।
सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत्॥"
चिकित्सायोग्यपुरुषो यथा — [सि० ।
"आत्मवानपि चिकित्स्यः ख्यातास्त्वपाठ्यतया
[illegible] [illegible] विदोषः।
रोगमार्गो यथोक्तेन भवत्यनन्तरमाचरम्।
तत्र कर्म्म भिषक् पश्चात् ज्ञानपूर्व्वं समाचरेत्॥
आदौ कथमसौ शान्तो न [illegible] च पौरुषम्।
वैद्यकर्म्म च येन [illegible] राजता॥
आदावन्ते तथा मध्ये [illegible] चिकित्सक।
[illegible] [illegible] कुर्व्वीत चिकित्सितम्॥
प्रीतो [illegible] [illegible]।
तथा कुर्व्वीत [illegible] [illegible] न चाय-ध्रुम्॥
[illegible] वा क्रियाकाले [illegible] वा न क्रिया कृता।
[illegible] [illegible] [illegible] न सिध्यति॥
क्रिया [illegible] [illegible] [illegible]।
दुष्प्राप्यां [illegible] न [illegible] मतः॥"
चिकित्सकाचरणं यथा,—
"न वन्द्यः [illegible] [illegible] [illegible]।
कथाप्रसङ्गेनापि चिकित्सका शान्ति-
[illegible]॥"
चिकित्साङ्गानि यथा, भावप्रकाशे।
"रोगी दूतो भिषग्भैषज्यमायुर्वेदश्च सप्तकः।
[illegible] चिकित्साया मिद्ध्यन्ति तथा षट्॥"

चिकित्सित, क्ली, (कित + स्वार्थे सन् ततो भावे क्त।) चिकित्सा। इति रत्नमाला॥ (यथा, सुश्रुते सूत्रस्थाने ७ अः।
"बीज चिकित्सितस्यैतत् समासेन प्रकीर्त्तितम्।" [सम०।
)
पर्य्यायो अस्य यथा, वैद्यकरत्नमालायाम्।
"चिकित्सितं प्रतीकारश्चिकित्सा च भिषग्जितम्॥"
चिकित्स्यतेऽनेनेति। करणे क्त। भेषजम्। अस्य पर्य्याया यथा, चरके चिकित्सास्थाने १ अः।
"चिकित्सितं व्याधिहरं पथ्यं साधनमौषधम्।
प्रायश्चित्तं प्रशमनं प्रकृतिस्थापनं हितम्॥
विद्याद्भेषजनामानि भेषजं द्विविधञ्च तत्।
यदूर्जस्करं [illegible] भेषजं तत् चिकित्सितम्॥
चिकित्सितार्थं एतावान् विकाराणां यदौ-षधम्।"
यथा भागवते। १।५।३३।
"एतत् संसूचितं ब्रह्मंस्तापत्रयचिकित्सितम्।
यदीश्वरे भगवति कर्म्म ब्रह्मणि भावितम्॥")
रोगप्रतीकारे त्रि॥

चिक्किन, त्रि, (नि नता नासिकाऽस्य। "इनच् पिटच् चिकचि च।" ५।२।३३। इति इनच् प्रकृतेश्चिकादेशश्च।) चिपिटनासिकः। इति अमरः॥

चिक्किल, पुं, (चि + बाहुलकात् इलच् कुक् च।) पङ्कः। इति हैमचन्द्रः। ४।१५६॥

चिकीर्षा, स्त्री, (कर्त्तुमिच्छा इति। "धातोः कर्म्मणः समानकर्त्तृकादिच्छायां वा।" ३।१।७। इति सन्नन्तात् "अ प्रत्ययात्।" ३।३।१०२। इत्य।) कर्त्तुमिच्छा। इति मुग्धबोधम्॥ करिवार वाञ्छा इति भाषा। (यथा, भागवते।२।१०।४३।
"यत्रों परस्तस्य भगवत्कर्म्मचिकीर्षया॥")

चिकीर्षु, त्रि, (चिकीर्षतीति। कृ + सन् + "सनाशंसभिक्ष उः।" ३।२।१६८। इति उः।) कर्त्तुमिच्छुः। करणेच्छाविशिष्टः। इति व्याकरणम्॥

चिकुर, पुं, (चि इत्यव्यक्तशब्दं कुरतीति। कुर शब्दे + "इगुपधज्ञेति।" ३।१।१३५। इति क।) केशः। (यथा, राघवपाण्डवीयम्। ७।१०।
"चिकुरनिचये यत्र कौटिल्यं विभ्रान्त्याप वा॥")
सर्पः। (अयं हि देवनागकुलजातस्य सुमुखस्य पिता। यथा महाभारते।५।१०३।२४।
"इमञ्च हि विष्णुः आर्य्यकचिकुरो नाम नागः॥
न पिता [illegible] वैनतेयेन पञ्चत्वमुपागतः॥")
पर्व्वतः। गृहस्थितः। छुछुन्दरः। वृक्षभेदः। शरटः। इति मेदिनी। र, १११॥

चिकुर, त्रि, (चि + कुर + क।) चञ्चलः। सुजीवनविशिष्ट यथाश्रयरहितं श्वगा। इत्यमरः। ३।१।४६॥

चिकुरपक्ष, पुं, (चिकुराणां पक्ष इव समूह।) केशसमूहः। केशपाशः। इत्यमरः। २।६।९८॥

चिकुरपाश, पुं, (चिकुराणां पाशो वा समूहः।) केशसमूहः। इत्यमरः। २।६।९८॥

चिकुरहस्त, पुं, (चिकुराणां हस्त समूहः।) केशसमूहः। इत्यमरः। २।६।९८॥

चिकुल, पुं, (चिकुर + निपातनात् रस्य लः।) केशः। इति शब्दरत्नावली॥

चिक्क क व्यथे। इति कविकल्पद्रुमः॥ (चुरा०-पर०-सक०-सेट्।) क, चिक्कयति। मतान्तरे अपि चिक्कयम्। क, चिक्कयति प्रभु दुःखम्। इति दुर्गादासः॥

चिक्क, पुं, (चिक इत्यव्यक्तशब्देन कायति शब्दायते इति। चिक + कै + क।) छुछुन्दरी। इति त्रिकाण्डशेषः॥ (त्रि नता नासिकाऽस्य। "इनच् पिटच् चिकचि च।" ५।२।३३। इत्यस्य वार्त्तिके "क्लिन्नस्य चिल् पिल् लश्चास्य चक्षुषी" इति सूत्रयोर्नैरुक्तप्रत्ययः। मनाङ्नतनासि त्रि। इति सिद्धान्तकौमुदी॥)

चिक्कण, त्रि, (चिक्कत शाम्यते इति। चिक् + "चिक्कत कज कण।" उणा। ३।१५। इति कार्तिककृत कथाकलापोदयः। स्निग्धता-गुणः।) स्निग्धप्रकारादि (स्निग्धमसृणमप्रत्र गुणवद्वस्तु।) इत्यमरः। ३।१।४६॥ चिक्कन इति भाषा॥ (यथा, महाभारते। १३। १०४। २४।
"अतिचिक्कणं घनं सिक्ता मह-
स्पृशेत्।")

चिक्कण, पुं, (चिक्कणं स्निग्धत्वं विद्यते यस्य। अर्श आद्यच्।) पूगवृक्षः। तत्फले स्त्री। इति राज-निर्घण्टः॥ (स्नेहपाककल्पनावाची रोगी यथा
"पाकस्तु त्रिविधो मन्दश्चिक्कणः खरचिक्कणः।"
इति शार्ङ्गधरे मध्यमखण्डे ९अध्याये॥)

चिक्कणा, स्त्री, (चिक्कणः स्निग्धता विद्यते यस्याः। अर्श आद्यच्। अजादित्वात् टाप्।) उत्तमा गौः। तत्पर्य्यायः। नैचिकी २। इति शब्दरत्नावली॥ पूगफलम्। इति राजनिर्घण्टः॥

चिक्कणी स्त्री, (चिक्कण + गौरादित्वात् ङीष्।) पूगफलम्। इति राजनिर्घण्टः॥

चिक्कन, पुं, (चिक्कयति प्रीडयति शूकादिना इति। चिक्क + ल्युट्।) यवचूर्णम्। इति हेमचन्द्रः। ४। ६६॥

चिक्का स्त्री, (चिक इत्यव्यक्तं शब्दं कायति। चिक्क + टाप्।) पूगफलम्। इति राजनिर्घण्टः॥

चिक्कट, पुं, (चिक्क इत्यव्यक्तशब्देन अटति गच्छति। चिक्क + अट + अच्।) सूक्ष्म-जन्तुः। सप्तधान्यविशेषः। इति शब्दचन्द्रिका॥ इति भाषा। [illegible] [illegible]॥

ति द्रव्यगुणे । १८७ ॥ अस्य गुणाः । गुरुत्वम् । ग्राहित्वम् । मधुरत्वम् । बलवृद्धिकरत्वम् । मलविष्टम्भनाशित्वम् । तर्पणत्वम् । दीपनत्वम् । कफवातकारित्वञ्च । इति राजवल्लभः ॥ (अस्य पाकविधिः भक्ष्यादिपाकस्य यथा,—
"प्रात मानीयपाने मद्गर्भविमर्दित द्रव्यमेलच भाव्यात ।
मांस चौरव ग्राक मकरन्दमल्लक पिष्टक चिङ्गटच ॥"
इति वैद्यक पाकपर्यायाम ॥)

चिङ्गटी, स्त्री, (चिङ्गट + जातौ ङीष् ।) मत्स्यविशेष । घुसाचिङ्गडी इति भाषा ॥ अस्या गुणाः । मधुरत्वम् । हृद्यत्वम् । वातनाशित्वम् । श्लेष्मकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ॥

चिङ्गट , पुं, (चिङ्गट + पृषोदरादित्वात् टस्य डत्वे साधु ।) चिङ्गटमत्स्य । इति शब्दमाला ॥ (चिङ्गटमत्स्य चिङ्गटशब्दे व्याख्यातम् ॥)

चिचिण्ड पुं, फलविशेष । चिचिण्डा इति चिचिङ्गा इति च भाषा ॥ तत्पर्याय । श्वेतराजि २ सुगन्ध ३ गृहकूलक ४ । अस्य गुणाः । वातपित्तनाशित्वम् । पथ्यत्वम् । बलवीर्यकारित्वम् । शोषिणोऽतिहितत्वम् । पटोलात् किञ्चिद्गुणहीनत्वञ्च । इति भावप्रकाशः ॥ (यथा च हारीते प्रथमे स्थाने शाकवर्गाध्याये ।
'चिचिण्डो वातपित्तघ्नो बल्यः पथ्यो रुचिप्रदः ।
शोषिणोऽतिहितः किञ्चिद्गुणैर्न्यूनः पटोलतः ॥')

चिञ्चा स्त्री, (चि चयनं चिनोतीति । चि + अन्येभ्योऽपीति ड ।) तिन्तिडीवृक्ष । इत्यमरः । २ । ४ । ४३ ॥ (यथा,—
'चिञ्चाम्लकरमर्दाम्लं यच्च भ्राष्ट्रे हितम् ॥"
इति वैद्यकभैषज्यरत्नावल्यां गुल्माधिकारे ॥)

चिञ्ची स्त्री (चिञ्च + गौरादित्वात् ङीष् ।) गुञ्जा । इति शब्दचन्द्रिका ॥

चिञ्चाम्ल क्ली, (चिञ्चा तिन्तिडी तद्वत् अम्लं यत्र ।) अम्लशाक । इति राजनिर्घण्टः ॥

चिञ्चासार, पुं, (चिञ्चायास्तिन्तिड्याः सार इव सारोऽस्य यत्र ।) अम्लशाक । इति राजनिर्घण्टः ॥

चिञ्चाटक, पुं, (चिञ्चेव अटतीति । अट + ण्वुल् । पृषोदरात् साधु ।) मत्स्यविशेष । चेंचको इति च चेङ्गा इति च भाषा । तत्पर्याय । अङ्कलोष्ठ २ । इति रत्नमाला ॥ चिञ्चाटकोऽपि पाठः ॥

चिट प्रेषे । इति कविकल्पद्रुमः ॥ (भ्वा पर सकं सेट् ।) चेटति भृत्यं स्वामी । इति दुर्गादासः ॥

चिट क प्रेषे । इति कविकल्पद्रुमः ॥ (चुरा पर- सकं सेट् ॥)

चित, ई ज्ञाने । इति कविकल्पद्रुमः ॥ (भ्वा पर- सकं सेट् ।) ई चित्त । ज्ञानमिह आलोचनम् । ज्ञानञ्च अर्थस्यापि ग्रहणार्थम् अत्रैव च चेतति इत्यादि । चिन्ते रामध्यानं हनूमान् । इति दुर्गादासः ॥

चित, इ क स्मृतौ । इति कविकल्पद्रुमः ॥ (भ्वा पर-सकं सेट् ।) इ क, चिन्तयति चिन्तं सुधीः । इति दुर्गादासः ॥

चित, क ङ ज्ञाने । इति कविकल्पद्रुमः ॥ (चुरा आत्म सकं सेट् ।) क ङ, चेतयते । राक्षसस्य चेतयन्ति न । इति भट्टौ गणकृतानित्यत्वमिति रमानाथः । वस्तुतस्तु चेतयते तत्र चेत करोतीति ण्यन्ताद्रूपम् । इति दुर्गादासः ॥

चित् स्त्री (चित सञ्ज्ञाने + सम्पदादित्वात् भावे क्विप् ।) ज्ञानम् । इत्यमरः । १ । ५ । १ ॥ (यथा भागवते । ३ । ७ । २ ।
कथं भगवतश्चिन्मात्रस्याविकारिणः ।
लीलया चापि युज्येरन् निर्गुणस्य गुणाः क्रियाः ॥')

चित् अ, असाकल्यम् । इत्यमरः ॥ यथा । किञ्चित् कश्चित् इत्यादि ॥ (तत्तु प्रत्ययविशेषः । कालाद्यनिर्णये चित्प्रत्ययस्य प्रयोगो दृश्यते । 'किम सम्ताच्चिदनौ ।" इति मुग्धबोधव्याकरणप्रणेता पुण्यपादवोपदेवाचार्यः ॥)

चित त्रि, (चि + कर्म्मणि क्त ।) छन्न । इति मेदिनी । ते १८ ॥ (सञ्चयन । सञ्चित । "तद् यथेह कर्म्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितः क्षीयते ।' इति श्रुतेः ॥)

चिता स्त्री, (चीयते शवज्ञानानिरस्यां यद्वा चीयते उ चीयतेऽसौ चेतस्य परलोकशान्तये इति । चि + अधिकरणे वा कर्म्मणि क्तः ततष्टाप् ।) शवदाहाधारचुल्ली । तत्पर्याय । चित्या २ । इत्यमरः । २।८।११७ ॥ काष्ठमठी ३ चैत्यम् ४ चिताचूडकम् ५ चित्यम् ६ । इति त्रिकाण्डशेषः ॥ चितिः ७ । (यथा महाभारते । ३ । ७१८ । १७ ।
"चिताधिरूढ़ वदमास्य भयाभ्या तत्र प्रवक्ष्यते ॥") सङ्गति । इति मेदिनी । ते १८ ॥

चिताचूडक, क्ली (चितेव चूडकम् ।) चिता । इति त्रिकाण्डशेषः ॥

चिति स्त्री, (चीयतेऽस्यामग्निरिति । चि + अधिकरणे क्तिन् ।) चिता । (यथा भागवते ।८।२८।१ ।
"चिति दारुमयीं चित्वा तस्यां पत्युः कलेवरम् ।") समूह । इति मेदिनी । ते, १८ ॥ दुर्गा । यथा
"चितिश्चैतन्यभावाद्वा चेतना वा चितिः स्मृता ।
महत्त्वात् व्याप्य स्थिता सर्वं महती वा प्रकीर्त्तिता ॥"
इति देवीपुराणे ४५ अध्याय ॥ ० ॥ चितिशब्देष्टकान्यासाद्याकारविशेष । यथा चितौ करणसूत्र माहात्म्यम् ।
'उच्छ्रयेण गुणितं चितेः किल क्षेत्रसम्भवफलं घनं भवेत् ।
इष्टिकाघनहृते घने चिते रिष्टिकापरिमितिश्च लभ्यते ॥
इष्टकोच्छ्रयहृदुच्छ्रितिश्चिते स्युः स्तराश्च दृषदां चितेरपि ।

उदाहरणम् ।
अष्टाङ्गुलाङ्गुल दैर्घ्यं विस्तारो द्वादशाङ्गुलम् ।
उच्छ्रितिस्त्र्यङ्गुला यस्यामिष्टिकास्ताश्चितौ किल ॥
यद्विस्तृति पञ्चकराष्टहस्त दैर्घ्यं यदौच्यं त्रिकराभिर्तितिः ।
तस्यां चितौ किं फलमिष्टिकानां सङ्ख्या च का ब्रूहि कति स्तराश्च ॥

इष्टिकाया घनहस्तमानम् $\frac{3}{64}$ चितेः घनफलम् ४ । उच्छ्रयेण गुणितं चितिघनफलम् १२ तथा इष्टिकासङ्ख्या ७४६० । स्तरसङ्ख्या २४ । एवं पाषाणचयेऽपि । इति चितिव्यवहारः ॥ इति लीलावती ॥ (यज्ञाङ्गविशेषः । यथा माघे । १२ । ६ ।
'चितयञ्च यथा सार्नार्दिजगता यतः ॥')

चितिका, स्त्री (चितिः काञ्चीव सा इव कायतीति । कै + क ।) कटिशृङ्खला । इति हारावली । २२४ ॥

चित्त क्ली,(चेतत्यनेनेति । चित + करणे क्त ।) अन्तःकरणविशेष । इति हेमचन्द्रः ॥
"यस्तु सत्त्वगुणः स्वच्छः शान्तो भगवतः पदम् ।
यमाहुर्वासुदेवाख्यं चित्तं तन्महदात्मकम् ॥
स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः ।
वृत्तिभिर्लक्षणं प्रोक्तं यथापां प्रकृतिः परा ॥"
इति श्रीभागवतम् ॥
आत्मार्थे । "अधिभूतमत्र तस्यैव मह्यं चित्तं तत्र आनन्देन चित्त उमास्कन्देन पाद्मदर्भ अधिष्ठाता तु तस्य देवता ।" इति श्रीधरस्वामी ॥ (अनेनैव चित्तस्य प्रथमतत्त्वम् । अतएव भगवता पतञ्जलिना प्रथमसूत्रे "योगश्चित्तवृत्तिनिरोधः ।' तथा च सुश्रुते निदाने । १ । १ । ८ ।
"स्रोतांसि चित्तस्य प्रवहन्ति यस्मिन् यत्र वा पवनं संश्रितम् ।
प्राणैस्त्रिभिः मनसः प्रवाहो यस्मिन् स्थितं ब्रह्मवत् शाश्वतः ।') मनः । इत्यमरः । १ । ४ । ३१ ॥

चित्तप्रसन्नता स्त्री (चित्तस्य प्रसन्नता प्रसादः ।) हर्ष । इति हेमचन्द्रः । ५ । २२८ ॥

चित्तविकार पुं (चित्तस्य विकारो विपर्य्ययः ।) उन्मादः । इति हेमचन्द्रः । २ । ७१६ ॥

चित्तविभ्रम पुं (चित्तस्य विभ्रमः भ्रान्तिः ।) उन्मादः । इत्यमरः । १ । ७ । २६ ॥ (उन्मादरूपे विदम्भिरूपे देशः ॥)

चित्तसमुन्नति स्त्री (चित्तस्य समुन्नतिः सम्यक् उत्कर्षः उन्नतत्वं च यस्याम् ।) मानः । इत्यमरः । १ । ७ । २२ ॥

चित्राभोग, पुं (चित्रस्य आभोगः परिपूर्णता यस्य ।) एकाविंशति चित्रचित्रा पृथक् पृथक् पर्शितः । शकुपर्यायः । मकरस्य कालः । इत्यमरः । १ । ५ । ७ ॥

चित्रोद्गमि, स्त्री (चित्रस्य उद्गति उद्गमनम् ।) गन्धे । इति हेमचन्द्रः । ६ । २१ ॥

चित्र, स्त्री (चीयते इति । चि+"चित्रावि चित्रे च ।" ४ । १ । १६२ । इति कर्म्मणि य ।) निपातनात् गुणाभावे साधुः । यद्वा चयप्रत्ययेन चिति गुणाभावः ।) चिता । इति शिक्षाकल्पतरुः ॥ (तत्राते चि । यथा, रामायणे । १ । ५८ । १२ । "चित्रमाधाय इरावथ आयधाभरणोऽभवत् ॥")

चित्र, पुं, (चीयतेऽसौ इति । चि+"चित्रावि चित्रे च ।" ४ । १ । १३२ । इति कर्म्मणि य ।) अग्निः । इति मुग्धबोधम् ॥

चित्रा, स्त्री (चीयते मिलिता प्रेतस्य । चि+य निपातनात् साधुः । चय वा ।) चिता । इत्यमरः । २ । ६ । ११७ ॥

चित्र, त् क अलिकेश्वरी । लेखने दृष्टौ । इति कविकल्पद्रुमः । (चन्द्रपुरी पर्व-सर्व सेट ।) तालिके-षण कदाचिद्दर्शनम् । चित्रयति चित्रापयति राजा लोके कदाचित् पश्यतीत्यर्थः । चित्रयति प्रतिमां लोकः । इति दुर्गादासः ॥

चित्र क्ली, (चित्रयतीति । चित्र+कर्म्मणि अच् । यद्वा, चीयते इति । "अमिचिमिदिशसिभ्यः क्रः ।" उणां ४ । १६४ । इति क्रः ।) तिलकम् । आलेख्यम् । (यथा, पञ्चतन्त्रम् । ६ । ५ । "उत्तमाधमभावेन वर्त्तते पटचित्रवत् ॥") अद्भुतम् । (यथा, रामायणे । १ । १० । "चित्र पंक्तीकृतमालाला क्रीडनैर्विविधैस्तथा ।") कर्व्वुरवर्णे । (यथा, माघे । १ । ८ "अथर्वचित्रैर्गजतत्वमप्याया ॥") तद्युक्ते त्रि । इति मेदिनी । रे, २१ । (अलङ्कारविशेषः । यथा — "तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ।" गतिप्रत्यादिविशेषेण यत्र न्यस्ता वर्णाः खड्गमुरजपद्मादिकारसंस्थानवत्तांमि तच्चित्रं काव्यम् । ० । वाहिर्यथा कवीकृमाधराशिचक्रमोऽपि । तत्र सर्व्वं यथा मुग्धामिश्रणाम् । "चित्रासनीहित सन्मार्गकामरक्षणम् ।" उदाहरणं यथा,— "विद्याधरपरीक्षार्थं वेदाधारधर-सखीश्रमाद्भुतवाह्यभूषणार्थम्भूः ।। मां सन्तं गाद्यदेव । दुष्टजन्यभार । देव । ध्वस्तदुष्टनिधनेह । मां तारामि मोपदेश । ॥") आकाशः । कुष्ठविशेषः । इति हेमचन्द्रः । ६ । १३ ॥ (आश्चर्य्यान्विते, त्रि । यथा, महाभारते । १ । १ । १ । "चित्रा श्रीर्भवतानेन संविदुक्तवतीयम् ॥")

चित्र पुं (चित्रयति धात्रूणां विधाय चित्रं करोति निर्म्मिणोति । चित्र+चित्र+अच् । यद्वा चन्द्रमसि उपचीयमाने वैतनाका देव । चि+"अमिचिमिदिशसिभ्यः क्रः ।" उणां ४ । १६४ । इति क्रः ।) यमविशेषः । यथा, तिथ्यादितत्त्वे । "वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥" वर्ज्जुरवर्णे । इत्यमरटीकायां भरतः ॥ (नृपविशेषः । यथा महाभारते । २ । ८ । ८ । "उग्रश्च लोहितश्चैव मधुश्चिपच वीर्य्यवान् ॥" धृतराष्ट्र पुत्रभेदः । यथा, तत्रैव । १ । ११७ । ४ । "चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरासनः ॥") एरण्डवृक्षः । अशोकवृक्षः । चित्रकवृक्षः । इति राजनिर्घण्टः ॥

चित्रक क्ली, (चित्र+स्वार्थे कन् । यद्वा चित्र मिव कायति । कै+क ।) तिलकम् । इति मेदिनी । के ८८ । (वृक्षविशेषः । यथा गारुडे १८७ अध्याये । "त्रिफला चित्रकं चित्र तथा कटुकरोहिणी ॥")

चित्रकः, पुं, (चित्रेण चित्र इव वा कायति । कै+क ।) व्याघ्रः । इति हेमचन्द्रः । ४ । ३५१ ॥ व्याघ्रभेदः । चितावाघ इति भाषा । तत्पर्यायः । चित्रकायः २ उपव्याघ्रः ३ मृगान्तकः ४ शूरः ५ शुभमाद्भुतः ६ चित्रव्याघ्रः ७ । वृक्षविशेषः । चिता इति भाषा । तत्पर्यायः । अग्निः २ प्राकृतः ३ चित्रः ४ पाठीकटः ५ शिखी ६ शम्बरः ७ दहनः ८ व्यालः ९ ज्योतिष्कः १० पावकः ११ अनलः १२ दारुणः १३ वह्निः १४ पावकः १५ ग्रम्बरः १६ पाठी १७ द्वीपी १८ चित्राङ्ग १९ शूरः २ । अस्य गुणाः । अग्निसमत्वम् । पाके कटुत्वम् । शोथकफार्शोवातोदराग्निमान्द्यकृमिकण्डूनाशित्वञ्च । इति राजनिर्घण्टः ॥ पाके विशुद्धत्वम् । कुष्ठ नाशित्वम् । इति राजवल्लभः ॥ (यथा, चक्रपाणि चित्रामाशतवचनम् । "चित्रक कटुक पाके वह्निकृत पाचनी लघुः । कफोष्णो शोथशूलघ्नाः क्रमिकासहरम् ॥ वातश्लेष्मघ्नो ग्राही वातार्शः शोषापहम् । चित्रिम चेत्रकं पाके कायकृद्विमहितम् ॥ तस्तैर्ये सर्व्वालोके मधिनं लक्षणभूतम् ॥" ओषधिविशेषः । यथा सुश्रुते सूत्रस्थाने ३६ अध्याये । "पूतिकचित्रक पाठा विडङ्गेलाहरेणवः ॥") एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ । (चित्र+वुन् ।) चित्रकारः । इति हेमचन्द्रः । (नृपविशेषः । यथा, भागवतस्य पूर्व्वखण्डे प्रथमे भागे । नृपश्रेष्ठः वृन्दवनचित्रक प्रभिनिष्ठुकः ।" अस्य गुणः । दिव्यपीडाविनाशं अनादिकं च ।)

चित्रकण्ठ पुं (चित्र चित्रितः कण्ठोऽस्य ।) कपोतः । इति जटाधरः । (कपोतकण्ठेऽस्य चित्रिताभाता ।)

चित्रकम्बल, पुं (चित्रवर्णः कम्बलः ।) कम्बलविशेषः । दुलिचा गालिचा इत्यादि भाषा । यथा, उणादिकोषे । "कुथः कौतुकमोचित्रकम्बले पुंसि वर्ण्णने ॥"

चित्रकर पुं, (चित्रं करोतीति । कृ+ट ।) वर्णसङ्करजातिविशेषः । तद्रूपा विश्वकर्म्मा, न तु शूद्रागर्भे विश्वकर्म्मोरसजातः । इति ब्रह्मवैवर्त्तपुराणम् । तत्पर्यायः । रङ्गाजीवः २ । इत्यमरः । २ । १० । ७ ॥ रङ्गजीवकः ३ । इति शब्दरत्नावली । वर्णी ४ वर्णाटः ५ चित्रकारः ६ । इति जटाधरः । (यथा, कामन्दकीयधर्म्मशास्त्रे । ३४९ । "चित्रकरतूलिकेव सर्वा प्रतिभाति भावना ॥")

चित्रकर्म्मा [न्] पुं, (चित्रं कर्म्म अस्य ।) तिनिशवृक्षः । इति शब्दचन्द्रिका । अद्भुतं कार्य्यं कर्म्म चित्रकारश्च ॥

चित्रकाय, पुं (चित्रो नानावर्णः कायो देहो यस्य ।) व्याघ्रः । इति हेमचन्द्रः । ४ । ३५१ ॥ चित्रव्याघ्रः । इति राजनिर्घण्टः ॥

चित्रकार पुं, (चित्रं करोतीति । कृ+"कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) चित्रकरः । (यथा महाभारते । १ । १४८ । १० । "संशाखिनं सौधकारं चित्रकारं च शिल्पिनम् ॥") अस्य उत्पत्तिविवृतिर्यथा पराशरपद्धतौ । "स्थपतेरपि गान्धिक्यां चित्रकारो व्यजायत ॥"

चित्रकूट, पुं, (चित्राणि कूटानि शृङ्गाणि यस्य ।) पर्व्वतविशेषः । इति शब्दरत्नावली । रामो यत्र गत्वा प्रथमे वनवासे वासमकरोत् । (पर्व्वतोऽयं प्रयागवेणीपतिभरद्वाजाश्रमात् योजनद्वयमतीत्य पश्चिमदक्षिणस्यां दिशि स्थितो विराजते । यथा रामायणे । २ । ५४ । १० — १५ । "भरद्वाजस्तस्ये तु दीर्घमिदमथाब्रवीत् । चित्रकूटगिरिस्तात रम्यनिर्झरकाननः । उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी । पुष्पितद्रुमसञ्छन्ना रम्यपुष्पितकानना । अनन्तरं सरित्शैलं चित्रकूटञ्च पर्व्वतम् । तयोः पर्णकुटीं तात तत्र ते वसतो ध्रुवम् ॥") अधुना दुर्ज्जनस्थानस्य कामता इति ख्यातः । (अत्र हि सीतयानेन रमणम् । अत्र च भगवती सीताकरेण महार्हेण पूजिता विराजते । यथा देवीभागवते । ७ । ३० । ७ । "चित्रकूटे तथा सीता विन्ध्ये विन्ध्यनिवासिनी ।" गरुड, महापीठनिरूपणतन्त्रे । "चित्रकूटे चण्डमुण्डी योगिनी विन्ध्यमाधवः ॥")

चित्रकृत् पुं (चित्रं नानावर्णं करोतीति । कृ+क्विप् ।) तिनिशवृक्षः । इत्यमरः । २ । ४ । २४ ॥ (चित्रमाश्चर्य्यं करोतीति ।) चित्रकरः । इति दृष्टापूर्व्वः ।

चित्रकोल पुं (चित्रो विचित्रः कोलः शूकर इव ।) गृहगोधिका । इति त्रिकाण्डशेषः ।

चित्रक्षत्री स्त्री (चित्रो विचित्रः क्षत्रः सत्त्वः ।) दन्तीदानम् । इति राजनिर्घण्टः ॥

चित्रगन्ध, पुं (गुरु इन्दति+गन्धि अ । चित्रं पीतवर्णगन्धकाद्भुतम् "चित्रगन्ध" इति इत्यन्य

रञ्जक यस्मात्। यद्वा, चित्र विचित्र गुप्तं धर्म्मस्य रञ्जक यस्य।) चतुर्दशयमान्तर्गतयम । तस्य लेखक । इति मेदिनी । ते, १८८। तस्योत्पत्तिर्यथा,

"ब्रह्मणाश्चिन्तन सूक्ष्मशरीरी द्वौ बभूवतु ।
एको मदीयः धर्म्माख्यः सर्व्वाङ्गीच्छरयङ्गिनात् ॥
कुलप्रदीप ब्रीयानां चातीनां पूततापृच ।
घनवैरि महाविद्या यद्योक्ता वाधयन् सुत ॥
सर्व्वाङ्गोद्भवस्याख्यस्य पञ्चितस्य प्रसादत ।
वर याचितवान् भक्त्या त्रिलोकाधिपति, गुरो ॥
क्षमया कुरु मां नाथ । त्वमेव शरणं मम ।
गृहस्यापि यदो दत्तो राज्य भुक्त्वा पुनर्भवान् ॥
त्रिलोकाधिपतिभूत्वा सुदा तत्र सुखिष्यसि ।
गुर्व्वाज्ञया मदीयः स राज्यभोगी द्विजार्थेनात् ॥
विदाय दत्त भूयस विधाकपो बभूव च ।
चित्रगुप्तश्चित्रवंशधिमाश्रर इति मय ॥
स्वर्गे मर्त्ये च पाताले राजते चिरसत्तम ।
चित्रगुप्तो महाविद्यां प्राप्य कुलाख्यविपत ॥
पुत्रान् याचितवानेव गुरोर्देवसमापवन् ।
यमाज्ञितश्च बभुवापि यमस्यापि विवेचक ॥
चिर शुभाशुभ कर्म्मो विविच्य यमनामके ।
यद्ददेत् सकलानाञ्च तदथाभोजयेद्यम ॥"
इत्याचारनिर्णयतन्त्रम् ॥

चक्रोत्पत्तान्तर कायस्थशब्दे द्रष्टव्यम् ।

चित्रजल्प, पुं, (चित्रो मनोहरो जल्प ।) वाक्यविशेष । तल्लक्षणादिर्यथा,—

"प्रेष्ठस्य सुहृदा लोके गूढरोषाभिजृम्भित ।
भूरिभावमयो जल्पो यत्तीव्रोत्कण्ठितान्तिम ॥
प्रजल्पो दृष्टाग्रोऽथ प्रजल्प परिजल्पितम् ।
विजल्पो ह्युज्जल्पसञ्जल्पोऽभिजल्पितम् ॥
आजल्प प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तित ।
एष भ्रमरगीताख्यो दशमे प्रकटीकृत ॥
अथ द्वाभाववैचित्री चमत्कारातिदुष्कर ।
अपि वैचित्र्यजल्पोऽयं समासत तदपि कथ्यते ॥
तत्र प्रजल्प ।
असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया ।
प्रियस्याकौशलोद्गार प्रजल्प स तु कीर्त्यते ॥
यथा —
मधुप । कितवबन्धो । मा स्पृशाङ्घ्रिं सपत्न्या
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्न ।
वहतु मधुपतिस्तन्मानिनीनां प्रसाद
यदुसदसि विडम्ब्य यस्य दूतस्त्वमीदृक ॥ १ ॥
अथ परिजल्पितम् ।
प्रभोर्निर्दयताशाठ्यचापल्याद्युपपादनात् ।
स्वविचक्षणताव्यक्तिर्भङ्ग्या स्यात् परिजल्पितम् ॥
यथा,—
सकृदधरसुधां स्वां मोहिनीं पाययित्वा
सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक ।
परिचरति कथं तत्पादपद्मं नु पद्मा
अपि बत हृतचेता उत्तमश्लोकजल्पै ॥ २ ॥
अथ विजल्प ।
व्यक्तयासूयया गूढमानमुद्रान्तरालया ।

अघद्विषि कटाक्षोक्तिर्विजल्पो विदुषां मत ॥
यथा,—
किमिह बहु षडङ्घ्रे । गायसि त्वं यदूना-
मधिपतिमगृहाणामग्रतो न पुराणम् ।
विजयसखसखीनां गीयतां तत्प्रसङ्ग
क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टा ॥ ३ ॥
अथोज्जल्प ।
हरे कुहकताख्यानं गर्व्वगर्भितयेर्ष्यया ।
साक्षया तदाक्षेपो धीरैरुज्जल्प ईर्य्यते ॥
यथा,—
दिवि भुवि च रसायां का स्त्रियस्तद्दुरापा
कपटरुचिरहासभ्रूविजृम्भस्य या स्यु ।
चरणरज उपास्ते यस्य भूतिर्व्वयं का
अपि च कृपणपक्षे ह्युत्तमश्लोकशब्द ॥ ४ ॥
अथ सञ्जल्प ।
सोल्लुण्ठया गहनया कयाप्याक्षेपमुद्रया ।
तस्याकृतज्ञताद्युक्ति सञ्जल्प कथितो बुधै ॥
यथा,—
विसृज शिरसि पादं वेद्म्यहं चाटुकारै-
रनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात् ।
स्वकृत इह विसृष्टापत्यपत्यन्यलोका
व्यसृजदकृतचेता किन्नु सन्धेयमस्मिन् ॥ ५ ॥
अथावजल्प ।
हरौ काठिन्यकामित्वधौर्त्त्यादासक्त्ययोग्यता ।
यत्र सेर्ष्यभियेवोक्ता सोऽवजल्प सतां मत ॥
यथा,—
मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्म्मा
स्त्रियमकृत विरूपां स्त्रीजित कामयानाम् ।
बलिमपि बलिमत्त्वावेष्टयद्ध्वाङ्क्षवद्य
स्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थ ॥ ६ ॥
अथाभिजल्पितम् ।
भङ्ग्या त्यागौचितं तस्य खगानामपि खेदनात् ।
यत्र साभूयं प्रोक्तं तद्भवेदभिजल्पितम् ॥
यथा,—
यदनुचरितलीलाकर्णपीयूषविप्रुट्
सकृददनविधूतद्वन्द्वधर्म्मा विनष्टा ।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इव विहङ्गा भिक्षुचर्य्यां चरन्ति ॥ ७ ॥
अथ आजल्प ।
जैह्म्यं तस्यार्त्तिदत्वञ्च निर्व्वेदाद्यत्र कीर्त्तितम् ।
भङ्ग्यान्यसुखदत्वञ्च स आजल्प उदीरित ॥
यथा,—
वयमृतमिव जिह्मव्याहृतं श्रद्दधाना
कुलिकरुतमिवाज्ञा कृष्णवध्वो हरिण्य ।
ददृशुरसकृदेतत्तन्नखस्पर्शतीव्र-
स्मररुज उपमन्त्रिन् । भण्यतामन्यवार्त्ता ॥ ८ ॥
अथ प्रतिजल्प ।
दुस्त्यजद्वन्द्वभावेऽस्मिन् प्राप्तिर्नार्हेत्यनुन्नतम् ।
दूतसंमाननेनोक्तं यत्र स प्रतिजल्पक ॥
यथा,—
"प्रियसख । पुनरागा प्रेयसा प्रेषित किं
वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग ।

नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वं
सततमुरसि सौम्य । श्रीर्वधू साकमास्ते ॥ ९ ॥
अथ सुजल्प ।
यत्रार्जवात् सगाम्भीर्य्यं सदैन्यं सहचापलम् ।
सोत्कण्ठञ्च हरि पृष्ट स सुजल्पो निगद्यते ॥
यथा,—
अपि बत मधुपुर्य्यामार्य्यपुत्रोऽधुनास्ते
स्मरति स पितृगेहान् । सौम्य बन्धूंश्च गोपान् ।
क्वचिदपि स कथा न किङ्करीणां गृणीते
भुजमगुरुसुगन्धं मूर्द्ध्न्यधास्यत् कदा नु ॥" १ ॥
इत्युज्ज्वलनीलमणौ स्थायिभाव ॥

चित्रतण्डुल, क्ली (चित्रो विचित्रस्तण्डुलो यस्य ।) विडङ्गम् । इति रत्नमाला ॥

चित्रतण्डुला, स्त्री, (चित्रा नानावर्णस्तण्डुलो यस्या ।) विडङ्गम् । इत्यमर । २ । ४ । १ ६ ।
(यथास्या पर्य्याया ।
"पुंसि क्लीबे विडङ्ग स्यात् कृमिघ्नो जन्तुनाशन ।
तण्डुलश्च तथा वेल्लममोघा चित्रतण्डुला ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

चित्रत्वच, [च्] पुं, (चित्रा विचित्रा त्वक् यस्य ।) भूर्ज्जवृक्ष । इति राजनिर्घण्ट ॥

चित्रदण्डक, पुं (चित्रो विचित्रो दण्डो यस्य । इति कप ।) ओलवृक्ष । इति रत्नमाला ॥

चित्रदण्डी स्त्री (चित्र दीव्यतीति । चित्र+दिव् । गौरादित्वात् ङीष् ।) सर्व्वज्ञवादनी । इति राजनिर्घण्ट ॥

चित्रनेत्रा, स्त्री, (चित्रे मनोज्ञे नेत्रे यस्या ।) सारिकापक्षी । इति शब्दावली । ८८ ॥

चित्रपक्ष पुं, (चित्रौ विचित्रौ पक्षौ यस्य ।) तित्तिरिपक्षी । इति जटाधर ॥

चित्रपर्णिका, स्त्री, (चित्राणि विचित्राणि पर्णानि पत्राणि यस्या । कापि अत इत्वम् ।) पृश्नि-पर्णिका । इति रत्नमाला । दोषघ्नी । इति राजनिर्घण्ट ॥

चित्रपर्णी, स्त्री, (चित्राणि पर्णानि यस्या । गौरादित्वात् ङीष् ।) जलपिप्पली । इति राजनिर्घण्ट ॥

चित्रपदा, स्त्री, (चित्रं पदं यस्या ।) छन्दो-विशेष । इति छन्दोमाला । छन्दोभेद । इति छन्दोमञ्जरी । अस्य लक्षणादि छन्दःशब्दे द्रष्टव्यम् । (चित्रं पदं वस्तुविन्यासो यत्र यत्र वा इति विग्रहे विचित्रपदयुक्ते त्रि । यथा, महाभारते । ३ । २१ । १ ।
"वस्तु चित्रपदं श्लक्ष्णं याज्ञसेनि । त्वया वच । उक्तं तन् शुश्रुवासि त्वामान्दिलश्च समाजरे ।")

चित्रपर्णिका, स्त्री, (चित्राणि पर्णानि पत्राणि यस्या । कापि अत इत्वम् ।) चित्रपर्णीभेद । तत्पर्य्याय । पौष्या ४ सूक्ष्मवदिका २ चित्रवर्णा ३ चित्रपुष्पिका ४ ऐश्वर्य्या ५ अन्धपुष्पा ६ दूर्व्विका ७ । इति रत्नमाला ॥

चित्रपर्णी स्त्री, (चित्राणि पर्णानि यस्या । गौरादित्वात् ङीष् ।) पृश्निपर्णी । इत्यमर ।

चित्ताभोग, पुं (चित्तस्य आभोगः परिपूर्णता यस्मै ।) एकस्मिन् विषये मनसः पूर्णः प्रवृत्तिः । तत्पर्य्यायः । मनस्कारः २ । इत्यमरः । १ । ५ । २ ॥

चित्तोन्नतिः, स्त्री (चित्तस्य उन्नतिः उन्नयनम् ।) गर्व्वः । इति हेमचन्द्रः । २ । २३१ ॥

चित्य, क्ली (चीयते इति । चि + "चित्याग्निचित्ये च ।" ३ । १ । १३२ । इति कर्म्मणि यः । निपातनात् तुगागमे साधुः । यद्वा अपप्रत्ययेन चिति सुगागमः ।) चिता । इति त्रिकाण्डशेषः ॥ (मृतार्थे चि । यथा, रामायणे । १ । ५८ । ११ । "चित्यमाल्यानुलेपश्च आयसाभरणोऽभवत् ।")

चित्य पुं (चीयतेऽसौ इति । चि + "चित्याग्नि-चित्ये च ।" ३ । १ । १३२ । इति कर्म्मणि य ।) अग्निः । इति शब्दचन्द्रिका ॥

चित्या स्त्री (चीयते चितिरस्यां प्रेतस्य । चि + य निपातनात् साधुः । क्यप् वा ।) चिता । इत्यमरः । २ । ८ । ११७ ॥

चित्र, त् क चित्रीकरणे । कदाचिद्दर्शने । इति कविकल्पद्रुमः । (चुरा०-पर०-सक० सेट् ।) चित्रीकरणं कदाचिद्दर्शनम् । चित्रयति चित्रापयति खाद्यं काकः कदाचित् पश्यतीत्यर्थः । चित्रयति प्रतिमां लोकः । इति दुर्गादासः ॥

चित्र, क्ली, (चित्रयतीति । चित्र + कर्म्मणि अच् । यद्वा, चीयते इति । "अमिचिमिदिशसिभ्यः क्त्रः ।" उणां ४ । १६४ । इति क्त्र ।) तिलकम् । आलेख्यम् । (यथा, मघदूतम् । ६ । ५ । "उत्सङ्गे वा मलिनवसने सौम्य निक्षिप्य वीणाम् ।") अद्भुतम् । (यथा, रामायणे । १ । १० । "चित्रं संक्रीडमानाश्च क्रीडनैर्विविधैस्तथा ।") कर्बुरवर्णः । (यथा, माघे । १ । ८ "विभिन्नवर्णा गरुडाग्रजेन ।") तद्युक्ते त्रि । इति मेदिनी । रे, २२ ॥ (अलङ्कारविशेषः । यथा — "तच्चित्रं यत्र वर्णानां खड्गाद्याकृतिहेतुता ।" साहित्यदर्पणे । खड्गमुरजपद्माकारत्वमपि तच्चित्रं काव्यम् ॥ * ॥ अन्येऽपि बहवोऽलङ्काराश्चित्रभेदाः । तत्र बन्धं यथा मुरजबन्धम् । "विभावयन्नीरदर्शने यमानिवामदद्युम् ।" उदाहरणं यथा,— "विद्मालक्ष्यामपादोलक्षोभि वेदवाक्यद्रक्षकौशलाङ्कबद्धनात्युग्रसङ्कटकाङ्क ।! मां भदेव नगदेव । पुण्यश्रवार । देव । चन्द्रचूडविभद्र । मां पाहि मोददेव ।") आकाशः । कुष्ठविशेषः । इति हेमचन्द्रः ॥ (आश्चर्य्यान्विते, त्रि । यथा, महाभारते । १ । १ । ४ । "चित्राः श्रोतुं कथास्तत्र परिवव्रुस्तपस्विनः ।")

चित्र, पुं (चित्रयति मानुषस्य विचार्य चित्रं करोति चित्रगुप्तः । चित्र + चित्र + अच् । यद्वा चीयते ज्योतिर्गणैरित्यौणादिको वेद । चि + "अमिचिमिदिशसिभ्यः क्त्रः ।" उणां ४ । १६३ । इति क्त्र ।) यमविशेषः । यथा, तिथ्यादितत्त्वे । "वृकोदराय चित्राय चित्रगुप्ताय वै नमः ।" कल्पवृक्षः । इत्यमरटीकायां भरतः ॥ (अर्जुनविशेषः । यथा महाभारते । २ । ९ । ८ । "ऐरावतश्च नीलश्च सुमनश्च वीर्य्यवान् ।" धृतराष्ट्रपुत्रभेदः । यथा, तत्रैव । १ । ११७ । ४ । "चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरासनः ।") एरण्डवृक्षः । अशोकवृक्षः । चित्रकवृक्षः । इति राजनिर्घण्टः ॥

चित्रक क्ली, (चित्र + स्वार्थे कन् । यद्वा चित्रमिव आभाति । कै + क ।) तिलकम् । इति मेदिनी । के, ८८ ॥ (तृणविशेषः । यथा गारुडे १८० अध्याये । "त्रिफला चित्रकं चैव तथा कटुकरोहिणी ।")

चित्रक, पुं, (चित्रेण चित्र इव वा कायति । कै + क ।) व्याघ्रः । इति जटाधरः । ४ । ३५१ ॥ व्याघ्रभेदः । चितावाघ् इति भाषा । तस्य पर्य्यायः । चित्रकायः २ उपव्याघ्रः ३ व्याघ्राणकः ४ शूरः ५ शार्दूलः ६ चित्रव्याघ्रः ७ । वृक्षविशेषः । चिता इति भाषा । तत्पर्य्यायः । वह्निः २ पाठीनः ३ चित्रः ४ पाठीकुटः ५ शिखी ६ कृशानुः ७ दहनः ८ व्यालः ९ ज्योतिष्कः १० पालकः ११ अनलः १२ दारुणः १३ वह्निः १४ पावकः १५ द्रमरः १६ पाचनी १७ द्वीपी १८ चित्राङ्गः १९ शूरः २० । अस्य गुणाः । अग्निसमत्वम् । पाके कटुत्वम् । शोथकफानिलोदरार्शोग्रहणीकृमिकण्डूनाशित्वञ्च । इति राजनिर्घण्टः ॥ पाके चितुलत्वम् । शूलकारित्वम् । इति राजवल्लभः ॥ (यथा, सुश्रुते चिकित्सास्थानेऽष्टमेऽध्याये । "चित्रकः कटुकः पाके वह्निकृत् पाचनो लघुः । रूक्षोष्णो ग्रहणीकुष्ठशोथार्शः कृमिकासनुत् ॥ वातश्लेष्महरो ग्राही वातार्शः श्लेष्मपित्तहृत् । विविधञ्चैतकं पाके कामलाविनिवारितम् ॥ तस्यैव बद्धमेव पाचनं तन्त्रसम्भृतम् ॥" ओषधिविशेषः । यथा, सुश्रुते सूत्रस्थाने ३६ अध्याये । "पूतिकचित्रक पाठा विडङ्गैलाहरेणवः ।") एरण्डवृक्षः । इत्यमरः । २ । ४ । ५१ ॥ (चित्र + कृ ।) चित्रकारः । इति हेमचन्द्रः ॥ (शूद्रभेदः । यथा, भागवतपुराणे पूर्व्वखण्डे प्रथमे भागे । "शूद्रश्च भवत्याद्यश्चित्रकः प्रतिपद्युतः ।" चारुगुणः । (सिंहपीडाचित्राणां विद्यासाधनाप्रभवः ।)

चित्रकण्ठ, पुं (चित्रः विचित्रः कण्ठोऽस्य ।) कपोतः । इति जटाधरः ॥ (कपोतशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

चित्रकम्बल, पुं (चित्रवर्णः कम्बलोऽस्ति ।) कम्बलविशेषः । गुलिका शालिका इत्यादि भाषा । यथा, पञ्चाङ्गिकोषे । "कुथः स्त्रीषु वर्णकम्बलस्तु कुथः परिस्तोमः ।"

चित्रकर पुं, (चित्रं करोतीति । कृ + टः ।) वृक्षविशेषः । तिनिश इति भाषा । स तु शूद्रान्मर्त्ये विधवायां जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥ तत्पर्य्यायः । रङ्गाजीवः । इत्यमरः । २ । १० । ७ । चित्रकारः ४ । इति शब्दरत्नावली ॥ वर्णी ५ चित्राङ्गः ६ चित्रकारः ७ । इति जटाधरः ॥ (यथा मार्कण्डेयपुराणम् । ३३५ । "चित्रकरतूलिकेव भावा प्रतिभाति मानसेन ।")

चित्रकर्म्मा, [न्] पुं, (चित्रं कर्म्मास्य ।) तिनिशवृक्षः । इति शब्दचन्द्रिका ॥ चत्रीभूते आश्चर्यकर्म्मा चित्रकारश्च ॥

चित्रकाय, पुं (चित्रो नानावर्णयुक्तः कायो देहो यस्य ।) व्याघ्रः । इति हेमचन्द्रः । ४ । ३५१ ॥ चित्रव्याघ्रः । इति राजनिर्घण्टः ॥

चित्रकार पुं, (चित्रं करोतीति । कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) चित्रकरः । (यथा महाभारते । १ । १३८ । ३ । "संज्ञाभिर्यं चौधकारैश्चित्रकारैश्च शिल्पिभिः ।" अस्य उत्पत्तिविवृतिर्यथा पराशरपद्धतौ । "स्थपतेरपि गान्धिक्यां चित्रकारो व्यजायत ।"

चित्रकूट, पुं (चित्राणि कूटानि शृङ्गाणि यस्य ।) पर्व्वतविशेषः । इति शब्दरत्नावली । तत्र रामो वनं गत्वा प्रथमं वासमकरोत् । (पर्व्वतोऽयं प्रयागप्रदेशस्थभरद्वाजाश्रमाद्दशक्रोशाधिकयोजनद्वयमितो दूरे स्थितः । मन्दाकिन्या नामा सरितो दक्षिणतीरे वर्त्तते । यथा रामायणे । २ । ५४ । १० — १२ । "भरद्वाजाश्रमात् दशयोजनमवधि विजने । चित्रकूटगिरिस्तत्र रम्यविवरकानने । उत्तरं पार्श्वमासाद्य तस्य मन्दाकिनी नदी । पुष्पितद्रुमसञ्छन्ना रम्यपुष्पितपादपा । अनन्तरं तत्सरितश्चित्रकूटञ्च पर्व्वतम् । तयोः पर्णकुटीं तात तत्र ते वसतो ध्रुवम् ।") अद्यापि पूर्व्वोक्तस्थाने वर्त्तते इति ख्यातः । (अयं हि पीठस्थानेषु अन्यतमः । अत्र च भगवती शिवाख्यैर्महादेवस्य पूजयन्त्या विराजते । यथा, देवीभागवते । ७ । ३ । ३० । "चित्रकूटे तथा सीता विन्ध्ये विन्ध्याधिवासिनी ।" तथा, मत्स्यपुराणे । "चित्रकूटे वनभूमौ शान्तिर्विन्ध्ये ।")

चित्रकृत् पुं (चित्रं आश्चर्यं करोतीति । कृ + क्विप् ।) तिनिशवृक्षः । इत्यमरः । २ । ४ । ४४ । (चित्रमालेख्यं करोतीति ।) चित्रकरे । त्रि । इत्यायुर्वेदः ॥

चित्रकोल, पुं (चित्रः विचित्रः कोलः इव इति मतः ।) कुक्कुटिका । इति त्रिकाण्डशेषः ॥

चित्रगन्धा, स्त्री (चित्रो विचित्रो गन्धो यस्याः ।) हरितालम् । इति शब्दचन्द्रिका ॥

चित्रगु, पुं (गुः इन्द्रियं + मतौ ड । चित्राः चित्रवर्णाः गावो यस्य इत्यादिकः ...)

रञ्जयन् यस्मात्। यद्वा, चित्रं विचित्रं गुप्तं धर्म्मस्य रक्षणं यस्य।) चतुर्द्दशयमान्तर्गतयमः। तस्य लेखकः। इति मेदिनी। ते, १८८। तस्योत्पत्तिर्यथा,

"ब्रह्मपादाग्रतः शूद्रमभीष्टौ द्वौ बभूवतुः ।
एको मषीष्टः सर्व्वाख्यः सर्व्वाभीष्टदयद्विजात् ॥
कुलप्रदीपः स्वीयानां ज्ञातीनां पूततामृचः ।
यमाख्येति महाविद्यां यत्नेन साधयन् मुदा ॥
सर्व्वाभीष्टदयाख्यस्य पण्डितस्य प्रसादतः ।
वरं याचितवान् भक्त्या त्रिलोकाधिपतिं गुरोः ॥
कृपया कुरु मां नाथ । त्वमेव शरणं मम ।
गुरुणापि वरो दत्तो राज्यं भुक्त्वा पुनर्भवान् ॥
त्रिलोकाधिपतिर्भूत्वा सदा तत्र सुखिष्यसि ।
गुर्व्वाज्ञया मषीष्टः स राज्यभोगं द्विजार्थगात् ॥
विहाय देहं भूपश्च चित्राख्यो बभूव ह ।
चित्रगुप्तश्चित्रसन्धिश्चित्राङ्गद इति त्रय ॥
स्वर्गे मर्त्ये च पाताले दीव्यते चिरमुत्तमः ।
चित्रगुप्तो महाविद्यां प्राप्य कुशाख्यविप्रतः ॥
पुत्रान् याचितवानेव गुरोर्दिव्यमाचरन् ।
यमाज्ञितो बभुवापि सम्यक्धर्म्माविवेचकः ॥
चिरं शुभाशुभं कर्म्म विविच्य प्रमथाधिके ।
यद्ददेत् सकलानाञ्च सदा भोगयेद्यमः ॥"

इत्याचारनिर्णयतन्त्रम् ॥

अस्योत्पत्त्यन्तरं कायस्थशब्दे द्रष्टव्यम् ॥

चित्रजल्प, पुं (चित्रो मनोहरो जल्पः।) वाक्यविशेषः। तल्लक्षणादिर्यथा,—

"प्रेष्ठस्य सुहृदालोके गूढरोषाभिजृम्भितः ।
भूरिभावमयो जल्पो यस्तीव्रोत्कण्ठितान्तिमः ॥
चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितम् ।
विजल्पोज्जल्पसञ्जल्पा अवजल्पोऽभिजल्पितम् ॥
आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तितः ।
एष भ्रमरगीताख्यो दशमे प्रकटीकृतः ॥
असद्भावत्ववैचित्री चमत्कृतिसुदुष्करः ।
अपि वैचित्र्यमल्पोऽयं मनाक् तदपि कथ्यते ॥
तत्र प्रजल्पः ।
असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया ।
प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्त्त्यते ॥
यथा —
मधुप ! कितवबन्धो ! मा स्पृशाङ्घ्रिं सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः ।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक् ॥ १ ॥
अथ परिजल्पितम् ।
प्रभोर्निर्दयताशाठ्यचापलाद्युपपादनात् ।
स्वविचक्षणताव्यक्तिर्भङ्ग्या स्यात् परिजल्पितम् ॥
यथा,—
सकृदधरसुधां स्वां मोहिनीं पाययित्वा
सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक् ।
परिचरति कथं तत्पादपद्मन्तु पद्मा
ह्यपि बत हृतचेता उत्तमश्लोकजल्पैः ॥ २ ॥
अथ विजल्पः ।
व्यक्तयासूयया गूढमानमुद्रान्तरालया ।
अघद्विषि कटाक्षोक्तिर्विजल्पो विदुषां मतः ॥
यथा,—
किमिह बहु षडङ्घ्रे ! गायसि त्वं यदूना-
मधिपतिमगृहाणामग्रतो नः पुराणम् ।
विजयसखसखीनां गीयतां तत्प्रसङ्गः
क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः ॥ ३ ॥
अथोज्जल्पः ।
हरेः कुहकताख्यानं गर्व्वगर्भितयेर्ष्यया ।
सासूयश्च तदाक्षेपो धीरैरुज्जल्प ईर्य्यते ॥
यथा,—
दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः
कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः ।
चरणरज उपास्ते यस्य भूतिर्व्वयं का
अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः ॥ ४ ॥
अथ सञ्जल्पः ।
सोल्लुण्ठया गहनया कयाप्याक्षेपमुद्रया ।
तस्याकृतज्ञताद्युक्तिः सञ्जल्पः कथितो बुधैः ॥
यथा,—
विसृज शिरसि पादं वेद्म्यहं चाटुकारै-
रनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात् ।
स्वकृत इह विसृष्टापत्यपत्यन्यलोका
व्यसृजदकृतचेताः किन्नु सन्धेयमस्मिन् ॥ ५ ॥
अथ अवजल्पः ।
हरौ काठिन्यकामित्वधौर्त्त्यादासक्त्ययोग्यता ।
यत्र सेर्ष्यं भियेवोक्ता सोऽवजल्पः सतां मतः ॥
यथा,—
मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्म्मा
स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम् ।
बलिमपि बलिमत्त्वावेष्टयद्ध्वाङ्क्षवद्य-
स्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः ॥ ६ ॥
अथाभिजल्पितम् ।
भङ्ग्या त्यागौचिती तस्य खगानामपि खेददात् ।
यत्र सानुशयं प्रोक्तं तद्भवेदभिजल्पितम् ॥
यथा,—
यदनुचरितलीलाकर्णपीयूषविप्रुट्-
सकृददनविधूतद्वन्द्वधर्म्मा विनष्टाः ।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इव विहङ्गा भिक्षुचर्य्यां चरन्ति ॥ ७ ॥
अथ आजल्पः ।
जैह्म्यं तस्यार्त्तिदत्वञ्च निर्व्वेदाद्यत्र कीर्त्तितम् ।
भङ्ग्यान्यसुखदत्वञ्च स आजल्प उदीरितः ॥
यथा,—
वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः
कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः ।
ददृशुरसकृदेतत्तन्नखस्पर्शतीव्र-
स्मररुज उपमन्त्रिन् भण्यतामन्यवार्त्ता ॥ ८ ॥
अथ प्रतिजल्पः ।
दुस्त्यजद्वन्द्वभावेऽस्मिन् प्राप्तिर्नार्हेत्यनुद्धतम् ।
दूतसम्माननेनोक्तं यत्र स प्रतिजल्पकः ॥
यथा,—
"प्रियसख ! पुनरागाः प्रेयसा प्रेषितः किं
वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग ।
नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वं
सततमुरसि सौम्य ! श्रीर्वधूः साकमास्ते ॥ ९ ॥
अथ सुजल्पः ।
यत्रार्जवात् सगाम्भीर्य्यं सदैन्यं सहचापलम् ।
सोत्कण्ठञ्च हरिः पृष्टः स सुजल्पो निगद्यते ॥
यथा,—
अपि बत मधुपुर्य्यामार्य्यपुत्रोऽधुनास्ते
स्मरति स पितृगेहान् सौम्य बन्धूंश्च गोपान् ।
क्वचिदपि स कथा नः किङ्करीणां गृणीते
भुजमगुरुसुगन्धं मूर्द्ध्न्यधास्यत् कदा नु ॥"१ ।

इत्युज्ज्वलनीलमणौ स्थायिभावः ॥

चित्रतण्डुलं, क्ली (चित्रो विचित्रस्तण्डुलो यस्य।) विडङ्गम्। इति रत्नमाला ॥

चित्रतण्डुला, स्त्री, (चित्रो नानावर्णस्तण्डुलो यस्याः।) विडङ्गम्। इत्यमरः। २। ४। १६। (यथास्याः पर्य्यायाः।
"पुंसि क्लीबे विडङ्गः स्यात् कृमिघ्नो जन्तुनाशनः।
तण्डुलश्च तथा वेल्लममोघा चित्रतण्डुला ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

चित्रत्वक्, [च्] पुं, (चित्रा विचित्रा त्वक् यस्य।) भूर्ज्जवृक्षः। इति राजनिर्घण्टः ॥

चित्रदण्डक, पुं (चित्रो विचित्रो दण्डो यस्य। इति कप्।) ओलवृक्षः। इति रत्नमाला ॥

चित्रदेवी, स्त्री (चित्रं दीव्यतीति। दिव + अच्। गौरादित्वात् ङीष्।) महेन्द्रवारुणी। इति राजनिर्घण्टः ॥

चित्रनेत्रा, स्त्री, (चित्रे मनोज्ञे नेत्रे यस्याः।) सारिकापक्षी। इति हारावली। ८८ ॥

चित्रपक्ष, पुं, (चित्रौ विचित्रौ पक्षौ यस्य।) तित्तिरिपक्षी। इति जटाधरः ॥

चित्रपर्णिका, स्त्री, (चित्राणि विचित्राणि पर्णानि पत्राणि यस्याः। कापि अत इत्वम्।) कपित्थपर्णीवृक्षः। इति रत्नमाला। द्रोणपुष्पी। इति राजनिर्घण्टः ॥

चित्रपत्री, स्त्री, (चित्राणि पत्राणि यस्याः। गौरादित्वात् ङीष्।) जलपिप्पली। इति राजनिर्घण्टः ॥

चित्रपदा, स्त्री, (चित्रं पदं यस्याः।) मेघा-पदीलता। इति शब्दमाला। छन्दोभेदः। इति छन्दोमञ्जरी। अस्य लक्षणादि छन्दःशब्दे द्रष्टव्यम्। (चित्रं पदं चतुर्थिभागो यस्य तत्र वा इति विग्रहे त्रिलिङ्गमप्युक्तं त्रि। यथा, महाभारते। १। ३१। १।
"वस्तु चित्रपदं श्लक्ष्णं माधुर्य्यमि। शिवा वचः।
उक्तं तत् शुभसम्भाषिता वृक्षन्तु प्रमत्तकैः।")

चित्रपर्णिका, स्त्री (चित्राणि वर्णानि पर्णानि यस्याः। कापि अत इत्वम्।) चित्रपर्णी। तत्पर्य्यायः। दीर्घा २ प्रतानिका ३ चित्राङ्गी ४ सिंहपुच्छिका ५ रोमशा ६ कलशिपुच्छिका ७ पृश्निपर्णी ८। इति रत्नमाला ॥

चित्रपर्णी, स्त्री, (चित्राणि पर्णानि यस्याः। गौरादित्वात् ङीष्।) पृश्निपर्णी। इत्यमरः।

१।४।२९। कष्टस्फोटानना। अर्शघ्नी। नीलपुष्पी। इति राजनिर्घण्टः। मञ्जिष्ठा। इति रत्नमाला॥ (पर्य्यायोऽस्या यथा,
"मञ्जिष्ठा विकसा जिङ्गी काला योजनपर्ण्यपि। मण्डूकपर्णी चित्राङ्गी काश्मीरी रक्तयष्टिका॥"
इति वैद्यकरत्नमालायाम्॥)

चित्रपादा स्त्री, (चित्रौ पादौ यस्याः।) सारिका पक्षी। इति हारावली। ८८॥

चित्रपिच्छकः, पुं, (चित्राणि पिच्छानि पुच्छस्थानि यस्य। ततः कप्।) मयूरः। इति राजनिर्घण्टः॥

चित्रपुङ्खः, पुं (चित्रः पुङ्खो यस्य।) शरः। इति त्रिकाण्डशेषः॥

चित्रपुष्पी, स्त्री, (चित्राणि पुष्पाणि यस्याः। स्त्रियां ङीष्।) अम्बष्ठा। इति राजनिर्घण्टः॥ (विवरणमस्या अम्बष्ठाशब्दे ज्ञेयम्॥)

चित्रपृष्ठः पुं, (चित्रं नानावर्णं पृष्ठं यस्य।) कलविङ्कपक्षी। इति हारावली। ८९॥

चित्रफलः, पुं (चित्रं फलं [illegible]।) मत्स्यविशेषः। चितल इति भाषा॥ अस्य गुणाः। गुरुत्वम्। स्वादुत्वम्। स्निग्धत्वम्। बल्यत्वम्। कफवर्द्धनत्वञ्च। इति राजवल्लभः॥

चित्रफलकः पुं, (चित्रफल+स्वार्थे कन्।) चित्रफलमत्स्यः। इति भूरिप्रयोगः॥

चित्रफला स्त्री, (चित्राणि फलानि यस्याः।) चिर्भिटा। मृगेर्वारुः। लिङ्गिनी। महेन्द्रवारुणी। वार्त्ताकी। कण्टकारी। इति राजनिर्घण्टः॥ मत्स्यविशेषः। फलुइ इति भाषा॥ तत्पर्य्यायः। राजीवः १ फलकी २ मद्गुः ३ [illegible] ४। इति शब्दरत्नावली॥

चित्रभानुः, पुं, (चित्रा नानावर्णा भानवो रश्मयो यस्य।) अग्निः। (यथा, महाभारते।२।३१।३७।
"चित्रभानुः सुरेशश्च अनलस्त्वं विभावसो!॥")
सूर्य्यः। इति मेदिनी। ने,१८९॥ चित्रकवृक्षः। अर्कवृक्षः। वह्निर्नामक इति [illegible] भैरवः। इति शब्दरत्नावली॥ (भैरवविशेषः। यथा, [illegible]।
"[illegible] पुष्पं
[illegible] चित्रभानुं [illegible]॥")

चित्रमेखला, स्त्री, (चित्रं मेखला यस्याः।) काको दुम्बरिका। इति राजनिर्घण्टः॥

चित्रमेखलः, पुं, (चित्रा विविधा मेखला यस्य।) मयूरः। इति त्रिकाण्डशेषः॥

चित्रयोधी [न्] पुं, अर्ज्जुनवृक्षः। इति राजनिर्घण्टः॥ (चित्रं यथा स्यात् तथा युध्यतीति। युध+णिनि।) अर्ज्जुनः। (चित्रयुद्धयोधिनि, त्रि। यथा महाभारते।१।१।१८९।
"यदा श्रौषं [illegible]
[illegible] चित्रयोधी॥")

चित्ररथः, पुं (चित्रो रथो यस्य।) सूर्य्यः। गन्धर्व्वविशेषः। इति मेदिनी। थे,२५। [illegible]

पर्य्यायः। गन्धर्व्वराजः १ अङ्गारपर्णः २ कुबेरसखः ३ दग्धरथः ४। (यथा, महाभारते।१।१७१।३०—३८।
गन्धर्व्व उवाच।
"जितोऽहं पूर्व्वकं नाम मुक्त्वाहमङ्गारपर्णताम्। न च श्लाघे बलेनाद्य न नाम्ना जनसंसदि। साध्विमं लब्धवाल्लाभं योऽहं दिव्यास्त्रधारिणम्। गान्धर्व्या मायया स्पर्द्धामि संयोक्तुमिहोत्सहे॥ अस्त्राग्निना विचित्रोऽयं दग्धो मे रथ उत्तमः। सोऽहं चित्ररथो भूत्वा नाम्ना दग्धरथोऽभवम्॥")
स तु मुनिनाम्ना रथकन्यायां कश्यपरित्या जात। इति महाभारते।१।६५।४३॥

चित्रलः पुं (चित्रमाश्चर्य्यं लाति। ला+क।) अम्बुदवत्। तद्वति त्रि। इति शब्दरत्नावली॥

चित्रलता, स्त्री, (चित्रा नानावर्णा लता।) मञ्जिष्ठा। इति राजनिर्घण्टः॥

चित्रला, स्त्री (चित्रल+"अजाद्यतष्टाप्।" ४।१।४। इति टाप्।) गोरक्षीक्षुपः। इति राजनिर्घण्टः॥

चित्ररेखा, स्त्री, (चित्रा रेखा लेखनप्रक्रियया। चित्रं रेखयतीति वा। लिख+"कर्म्मण्यण्।" ३।२।१। इत्यण्। चित्ररेखा+ [illegible]।) अप्सरोविशेषः। सा कुम्भाण्डस्य कन्या। यथा, भागवते। १०।६२।२०—२१।
"उवाच सख्ये चित्रलेखा कुम्भाण्डतनया सखीम्। कुम्भाण्डस्य विद्यावती [illegible] संनिधिः। चित्रलेखा ते चित्रं [illegible]॥"
यथा, हरिवंशे।? ।१०।१६।
"साथ ताम्भो कुम्भाण्डचित्रलेखा च सा सुता। [illegible] कौतूहलसमन्विता॥"
([illegible] यथा हरिवंशे। १७४। ७—८८।
"चित्रलेखाऽब्रवीद्धास्यमाना सुमध्यमे॥"
"देवदानवयक्षाणां गन्धर्व्वोरगरक्षसाम्। ये विशिष्टा प्रमादेषु रूपेणाभिजनेन च॥ तथा प्रधानतः सर्व्वानालिख्य दर्शयिष्यामि॥ [illegible]। [illegible]। [illegible]। सा चित्रलेखा [illegible]। [illegible]। [illegible]। [illegible]। [illegible]॥")
छन्दोविशेषः। इति छन्दोमञ्जरी॥ अस्य [illegible] शब्दे द्रष्टव्यम्॥

चित्रलोचना, स्त्री, (चित्रे लोचने यस्याः।) सारिकापक्षी। इति जटाधरः भूरिप्रयोगश्च॥

चित्रवाजः पुं, ("चित्राम् वा" [illegible]। अच्+अच्+अच्।) कृत्तिम कुक्कुटः। इति [illegible]॥

चित्रशालिकः, पुं, (चित्रा विविधा शिखा [illegible] इव कायतीति। कै+क।) मरालमुक्तः। इति हेमचन्द्रः।४।४११॥

चित्रशाली, स्त्री, (चित्रा विविधा शाली [illegible]।) सूक्ष्मालि। रक्तशालि। इति राजनिर्घण्टः॥

चित्रशीर्षकः, पुं, (चित्रमाश्चर्य्यकरं शीर्षं यस्य।) रक्तेरण्डः। इति राजनिर्घण्टः॥

चित्रशिखण्डकः, पुं, (चित्राः शिखण्डाः [illegible]। कन्+क।) मयूरः। शब्दमाला।१।१।५॥

चित्रशिखण्डिप्रसूतः पुं, (चित्रशिखण्डिभ्यो [illegible] प्रसूत [illegible]।) बृहस्पतिः। इति हलायुधः॥

चित्रशिखण्डी, [न्] पुं (चित्रं शिखण्डं शिखा अस्त्यस्य। "अत इनिठनौ।" ५।२।११५। इति इनि।) मयूरः। सप्तर्षयः।१।१।[illegible] यथाह भरतः।
"मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः। वशिष्ठश्चेति सप्तैते ज्ञेयाश्चित्रशिखण्डिनः॥"
(यथाच महाभारते।१२।३३५।२८—२९।
"य एते वै सप्त [illegible] चित्रशिखण्डिनः सैकमतिमास्थाय [illegible]। वेदैश्चतुर्भिः समितं कृतं मेरौ महागिरौ। आस्यैः सप्तभिरुद्गीर्णं लोकधर्म्मम् [illegible]। मरीचिरत्र्यङ्गिरसौ पुलस्त्यः पुलहः क्रतुः। वशिष्ठश्च महातेजास्ते हि चित्रशिखण्डिनः॥")

चित्रशृङ्गः पुं, (चित्रं नानावर्णं शृङ्गं यस्य।) माषकः [illegible]। इति शब्दरत्नावली॥

चित्रसेनः, पुं गन्धर्व्वविशेषः [illegible]। [illegible]। [illegible]। यथा,—
"चित्रसेनो महावीर्य्यः [illegible]। [illegible]। [illegible]॥"
[illegible]॥
(चित्रा सेना यस्य। धृतराष्ट्रपुत्रविशेषः। यथा, महाभारते।१।११।११४।
"चित्राङ्गद [illegible] चित्रसेनोऽपि च। [illegible]॥"
धृतराष्ट्रपुत्रविशेषः। यथा, महाभारते।१।६७।९८। "[illegible] चित्रसेनो [illegible]।" [illegible]। यथा, महाभारते।१।१११।
"[illegible] चित्रसेन [illegible]॥"
शम्बरासुरस्य पुत्रविशेषः। यथा, हरिवंशे। १६२।३१।
"[illegible]॥"
[illegible]। यथा, भारते।[illegible]।
"चित्रसेनो [illegible]"

चित्रा, स्त्री (चित्रयति चित्रकर्म्म करोति सम्मुखे शोभते इति वा। चित्र + अच + टाप।) गोपालमसखीविशेषः। यथा, उज्ज्वलनीलमणौ।
"परमप्रेष्ठसख्यस्तु ललिता सविशाखिका।
सचित्रा चम्पकलता तुङ्गविद्येन्दुलेखिका।
रङ्गदेवी सुदेवी चेत्यष्टौ सर्व्वगुणाधिमाः॥"
अस्याः कृष्ण श्रीकृष्णस्य पूर्ब्बस्यां चानन्दसुन्दरी नाम। वय अष्टमासाधिकचतुर्दशवत्सरम्। वर्णो गौरः। अस्या वस्त्र जातीपुष्पतुल्यम्। कर्म्म चित्रम्। इति गोस्वामिमतम्॥ ॥ सविकपर्णी। गोडुम्बा। सुभद्रा। दन्तिका। (पर्य्याया यथा, वैद्यकरत्नमालायाम्।
"चित्रा दन्ती निकुम्भः स्याद्दुर्गचित्रा शकुलकः।
दाखायको विशल्या च तथोडुम्बरपर्ण्यपि॥")
माया। सर्पभेदः। नदीविशेषः। इति मेदिनी॥ अप्सरोविशेषः। इति हेमचन्द्रः॥ अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतचतुर्द्दशनक्षत्रम्। तत्तु मुक्तावदुज्ज्वल एकतारकामयम्। अस्य अधिष्ठात्री देवता विश्वकर्म्मा। यथा,—
"एकमौक्तिकवदुज्ज्वलप्रभे
त्वष्टृदैवदने समभागे।"
इति कालिदासः॥
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे।
"प्रतापसन्तापितशत्रुपक्षो
नयो नये चापि विचित्रवाक्यः।
प्रसूतिकाले यदि यस्य चित्रा
सुविविधचित्रा खलु तस्य माल्ये॥"
मूषिकपर्णी। (यथा, चरके सूत्रस्थाने। १९ अः।
"तिक्तः पियालाभिषुकी बिभीतकी
चित्राभयेन्द्रमधूकसप्तपा।
कुमुदचित्राद्रकम्पलकातसी
निकोठकाथोद्भवकरञ्जपिप्पली॥
घोषकायष्या स्थावरसञ्जितास्तथा
सुवर्णपुष्पी सलृक्षलया पर्य्यकः॥")
आखुपर्णी। सुलबेधी। मञ्जिष्ठा। इति राजनिर्घण्टः॥ (यथा सुश्रुते चिकित्सितस्थाने २ अध्याये।
"चित्रापञ्चितसप्तेन कषायाः हितमात्रकम्॥")
छन्दोविशेषः। इति छन्दोमञ्जरी॥ अस्य चित्ररूप छन्दःप्रभृते द्रष्टव्यम्। (मायाशक्तिरूपा महामाया। यथा, देवीभागवते।१२।६।५२।
"चञ्चलाक्षमनी चित्रा चित्रा चारुविलासिनी॥")
चित्राक्षी, स्त्री, (चित्रे अक्षिणी नेत्रे यस्याः। समासे षच् स्त्रियां ङीष्।) सारिकापक्षी। इति त्रिकाण्डशेषः॥
चित्राङ्गण, पुं (चित्रं अङ्गबन्धेन पुनः पुनः प्राप्नोति।) जीवकुक्षी। इति राजनिर्घण्टः॥
चित्राङ्गी, स्त्री, (चित्रं अङ्गं यस्याः।) चित्रकम्। हरिताळम्। इति राजनिर्घण्टः॥
चित्राङ्ग, पुं (चित्रमङ्गं यस्य।) चित्रकः। रक्तचित्रकः। सर्पः। इति राजनिर्घण्टः॥ (अपराजितरूपा।

"चित्राङ्गी वातशमनो हृद्यो बलकृत्परः।
उग्रश्च कथितो वापि दुर्ब्बलो मेदवर्द्धकः॥"
इति चारीते प्रथमे स्थाने एकादशेऽध्याये।
धृतराष्ट्रपुत्राणामन्यतमः। यथा, महाभारते। १।११७।६।
"अयोबाहुर्महाबाहुश्चित्राङ्गश्चित्रकुण्डलः॥")
चित्राङ्गद, पुं, चन्द्रवंशीयराजविशेषः। स तु शान्तनुराजपुत्रः। चित्रवीर्य्यभ्राता। (अयन्तु शान्तनुराजस्य सत्यवतीगर्भजातः राज्यं लब्ध्वा ऐश्वर्य्यवीर्य्यमदेन शूरान् सर्व्वान् तृणवदमन्यत। अथ कदाचित् गन्धर्व्वराजश्चित्ररथः युद्धायमेन मभ्ययात्। तत्र कुरुक्षेत्रमध्ये प्रवृत्ते महति युद्धे समधिकमायाबलेनापि गन्धर्व्वराजेन निहतोऽयं कौरववीरः। एतस्य कथा महाभारते।१।१०१। अध्याये द्रष्टव्या॥) गन्धर्व्वविशेषः। इति महाभारतम्॥ (यथा देवीभागवते।१।२०।२९।
"चित्राङ्गदस्तु गन्धर्व्वो दृष्ट्वा तं आगत्य नृपम्।
उत्तताराम्बिकं भूमेर्विमानवरमास्थितः॥")
मङ्गलादशमीमाहात्म्यकथायाम् चित्रगुप्तादिनिरतयात्रासंसक्तंविशेषः। स आश्वयुजोचितविदेशकः। तस्याधोगमनकारणं यथा,—
"अधोगतस्य हेतुञ्च शृणु। प्रवर काशिके!।
गतवेति सर्व्वं प्राप्य विप्रः स्वामिति वाञ्छया॥
तपश्चकार धर्म्माद्वद्यान्यत् किञ्चिदुपजीवनान्।
फलमूलादिकं किञ्चित् खादमान यथा मिचेत्॥
विहाय विप्रत्व गुरोरपि पूजाञ्च मार्म्मति!।
चरेन्निवं हि भगवामन्यविप्रञ्च भेषजम्॥
ज्ञात्वेति भाक्षणाः सर्व्वे ऊचुश्चित्राङ्गदं क्रुधा।
यतो हि मधुरं किञ्चित् प्रियाद्यथा च सुन्दरि॥
रे चित्राङ्गद! चञ्चल बृथा! विप्रत्वमिच्छसि।
कदाप्युपागतं मत्स्यो नेदेति न हि बुध्यसे॥
यतः! शीघ्रमधो गच्छ चिरं कुरु तपो सदा॥"
चित्राङ्गदः शापं श्रुत्वा ब्राह्मणात् रुदन् ततो ब्राह्मणा कल्पिताः स्वयम्भुवः।
"हे चित्राङ्गद! हे तात वत्स! त्वं शीघ्रं व्रिज। सुदर्शनां कुरु मा तात भयं ते कथयाम भोः॥
अचलपोषणेनैव सर्व्वं प्राप्स्यसि अयम्।
ब्राह्मणोऽपि विना तात! ब्राह्मणो भवितुं क्षितौ॥
इतीन्द्रराजा वैदेहिकि प्रतिज्ञायोऽपि तत्त्वतः।
वर प्राप्नोति देवत्वं ब्राह्मणत्वं तथापि च।
यथामरत्वमौषधि विना वापि च मानवैः।
जोतुमतत्वमधो गच्छ एतेन मनसा च च॥
त्वमेवं मनवमाख नागजातिरभवो भव।
तर्हि पौलोकनायकमिन्द्रसुख्यो भविष्यसि॥
राज्यं भुक्तानन्तो वैव इन्द्रलक्षेव तव।
यदा यत तत्र दिवं चित्रयानो न भीं कुरु।
याम गच्छ एत्र हर्षन् वामदाकोऽपि विहरतु।
ततः आनन्दमयः जयचित्राङ्गदस्तव॥"
इत्याषाढादिर्वैवर्त्तम्॥
(स्त्रियां टाप्। मणिपूरेश्वरस्य चित्रवाहनस्य कन्या। यथा महाभारते।१।२१४।१३।

"तस्य चित्राङ्गदा नाम दुहिता चारुदर्शना॥")
चित्राङ्गदसूः, स्त्री, (चित्राङ्गदं सूते प्रसूते इति। षू ङ प्रसवे + क्विप्।) सत्यवती। सा व्यासमाता। इति त्रिकाण्डशेषः॥
चित्राङ्गी, स्त्री, (चित्रमङ्गं यस्याः। स्त्रियां ङीष्।) मञ्जिष्ठा। कर्णजलौका। इति राजनिर्घण्टः॥
चित्राटीरः, पुं, (चित्रां नक्षत्रविशेषं अटतीति। अट गतौ + बाहुलकात् ईरन्।) चन्द्रः। (चित्रं तिलकं अटति गच्छति प्राप्नोति बलिच्छागादिबिन्दुभिरिति। अट + ईरच्।) घटाकर्णबलिच्छागादिबिन्दुभिरङ्कितभालः। इति मेदिनी। रे, २६१॥
चित्रापूप, पुं, (चित्रो विचित्रः अपूपः पिष्टकः।) पिष्टकभेदः। चितार पिठा इति भाषा॥ तत्पर्य्यायः। चक्कल २। इति त्रिकाण्डशेषः॥
चित्रायस, स्त्री, ((चित्रमायसं लोहम्।) तीक्ष्णलोहम्। इति राजनिर्घण्टः॥
चित्रिक, पुं, (चित्रा नक्षत्रविशेषः सा पौर्णमास्यामस्य। चित्रा + ठञ्।) चैत्रमासः, इति शब्दरत्नावली॥
चित्रिणी, स्त्री, (चित्रं विचित्रतास्त्यस्याः। चित्र + इनि + ङीप्।) पद्मिन्यादिचतुर्व्विधस्त्रीमध्ये स्त्रीविशेषः। सा मीनगन्धा। तस्या लक्षणं यथा। रतिमञ्जर्य्याम्। ४।
"भवति रतिरसज्ञा नातिदीर्घा न खर्व्वा
तिलकुसुमसुनासा स्निग्धनीलोत्पलाक्षी।
कठिनघनकुचाढ्या सुन्दरी बद्धशीला
सकलगुणविचित्रा चित्रिणी चित्रवक्त्रा॥"
(इयं हि मध्यजातीयपुरुषं लब्ध्वा सन्तुष्टा भवति। यदुक्तं तत्रैव। ७।
"शशके पद्मिनी तुष्टा चित्रिणी रमते मृगे।
वृषभे शङ्खिनी तुष्टा हस्तिनी रमते हये॥"
अस्याः रतिकरणप्रकारमाह तत्रैव। २८।
"शीत्कारं चुम्बनं पीडा मध्ये वक्षे च चुम्बनम्।
चर्व्वे चर्व्वे क्षणे यस्यां चित्रिणीरतिमाचरेत्॥")
चित्रोट, पुं (चित्रा नक्षत्रविशेषस्तस्या ईशः पतिः) चन्द्रः। इति शब्दचन्द्रिका॥
चित्रोक्ति, स्त्री (चित्रा आश्चर्य्यकरी उक्तिर्वाणी।) आकाशवाणी। इति त्रिकाण्डशेषः। आश्चर्य्यवचनञ्च॥
चित्रौदनं, क्ली, (चित्रमोदनम्।) हरिद्रान्नम्। इति भावप्रकाशः॥
चिदर, त्रि, कृपणः। इति भूरिप्रयोगः। (चिद् ज्ञानमेव रूप यस्य।) ज्ञानमयः। यथा। चिद्रूपे परमात्मन्येव योगिध्यानम्॥
चिन्ता, स्त्री (चिन्तनमिति। चिति स्मृत्याम् + "चिन्तिपूजिकथिकुम्बिचर्च्चश्च।" ३।३।१०५। इति अङ्।) चिन्तनम्। चिन्तनम्। तत्पर्य्यायः। स्मृतिः २। आध्यानम् ३। (इत्यमरः। १।७।२८।) ध्यानम् ४। आरम्भः ५ चिन्तितिः ६। इति शब्दरत्नावली। चिन्तिया ७। इति हेमचन्द्रः॥ (यथाह चरके।

"चिन्ता चिन्ता द्वयं मध्ये चिन्ता नाम गरीयसी।
चिता दहति निर्जीवं चिन्ता हि जीविनं तथा॥")
स्मरणमोहयोः प्रहारमारणम्। इति रघु
मञ्जरी॥ (यथा च अभिचारसिद्धिविशेषः। यथा,
माल्लिकामारुते। ३।१०।
"ध्याने चिन्ता चिन्तयामि
चिन्तामणिः पुं, (चिन्तायां मनःकामनायां मणि-
रिव। शाकपार्थिवादित्वात् समासः। यद्वा,
चिन्तया ध्यानधारणादिना मणिरिव अभीष्टप्रदे
इति। मणि+इव॥ मणिः। इति शब्दरत्ना-
वली। (चिन्ता एव मणिरिव यस्य। चिन्ता-
दीनां मणीनामिव तथात्वम्।) बुद्धविशेषः। इति
त्रिकाण्डशेषः। मणिविशेषः। यथा, भट्टिः।
"कामधेनुममृतं सम्पादयन्
चिन्तामणिं चाप्य करे बभूव॥"
ब्रह्मणः। तथा च।
"यथा चिन्तामणिं प्राप्य भुवि कामफलं भजेत।"
इति माघोत्तरखण्डम्॥
(अश्वविशेषः। यथा, शकुन्तलाधिकारे-
णी। ४।१८।
"कण्ठे यस्य महावर्णं एको वर्णः प्रकाशते।
चिन्तामणिः स विज्ञेयो चिन्तितार्थविवर्द्धनः॥")
चिन्तावेश्म [न्] क्ली (चिन्तायाः मन्त्रणादिविमर्श-
स्य वेश्म।) मन्त्रणागृहम्। तत्पर्यायः। एवम्
इमु ६। इति हारावली। १९८।
चिन्तिडी, स्त्री (तिन्तिडी। पृषोदरादित्वात्
तस्य चत्वम्।) तिन्तिडी। इति हेमचन्द्रः।
इति कश्चित्॥
चिन्तित, त्रि, (चिन्त+कर्मणि क्त।) इत्य
चिन्तनम्। यथा,—
"अचिन्तितं तदिदं दूरतरं प्रयाति
यच्चिन्तितं न तदिदं समुपैति॥"
रघुवंशः।
कर्मणि तु चिन्ताविषयः। भावे तु चिन्ता।
चिन्तिति, स्त्री (चिन्त+भावे क्तिन् इट् च।)
चिन्ता। इति शब्दरत्नावली।
चिन्त्या स्त्री, चिन्ता। इति त्रिकाण्डशेषः।
चिप्पः पुं, नखरोगविशेषः। इति शब्दचन्द्रिका।
चिप इति भाषा। (चौपमर्दे विशेषोऽस्य
ज्ञातव्यः।)
चिपिटः, पुं (चपतीति। चप+बाहुलकात्
पिटच् अ च इत्।) धान्यविशेषः। चिँड़ा।
इति भाषा। तत्पर्यायः। पृथुकः २। इति
हेमचन्द्रः। ३।६६। चिपिटकः ३। इत्यमरः।
चिपुटः ४। इति भरतः। धान्यचमसः ५।
इति त्रिकाण्डशेषः। चिपीटकः ६। इति
शब्दरत्नावली। अस्य गुणाः। गुरुत्वम्।
विष्टम्भित्वम्। बलकारित्वम्। पौष्टि-
कत्वम्। तच्च दुग्धेन। कफकारित्वम्। वातनाशि-
त्वम्। श्लेष्मवर्द्धनत्वम्। इति राजवल्लभः॥
यवकम्। प्रथुकः। तथा च यथा,
भावप्रकाशे पूर्वखण्डे द्वितीये भागे।
"शालयः सतुषा आर्द्रा भृष्टा स्फुटिताश्च ताडिताः।
कुड्यामापिडिताः शीताः पृथुकास्ते स्मृताः।"
"शाल्यो यावकानां वातपित्ताक्षपिटाः पृथुकाः॥"
इति राजनिघण्टुः॥
तस्य भक्षणविधिर्यथा,—
"हिमश्यामलं पृथुकं गुडदध्यादियोजितम्।
भाद्रमासस्य सितायां भक्षयेच्च निरन्तरम्॥
अमरत्व प्रतीकाशं निषयाम्यदारिकाम्॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम्॥
(त्रि यथा नासिका चिपिटास्य। "इक्षचपिटच-
चिकचि च।" ५।२।३३। इति चिपिटच
प्रत्ययोऽचिकादेशश्च। नतनासिके त्रि। यथा
विष्णुसहस्रनाम। १३।२।
"दियवत्तु चिपिटश्चैव यच्चान्यं सुरनरास्य॥"
इत्यस्य अणमात्र तथैव। पुनः पौरः।
"दुर्ग्रहेणैव चिपिटं पद्मपत्रं मन्यमानम्॥"
चिपिटाकारतरादौ च। यथा, काशीखण्डे।
३०।१३।
"यान्ति इतश्च चिपिटं राजगौरात्मभाजः।"
"चिपिटं चिपिटाकारं" इति तट्टीका।)
चिपिटकः, पुं (चिपिट+स्वार्थे कन्।) चिपिटः।
इत्यमरः। २।९।४७॥ (स्त्रियां टाप्। नत
नासिका।)
चिपिटा, स्त्री, गुल्मविशेषः। इति राज
निघण्टुः। (चिपिटा चिपिटाकारा इति।
चिपिट+टाप्। चिपिटनासिका। यथा, काशी
खण्डे। १०।२९। "चिपिटाभिर्मदेक्षणाभिः।")
चिपुटः, पुं, (चिपिट+पृषोदरादित्वात् साधुः।)
चिपिटकः। इति भरतधृतकोषः॥
चिप्पः, पुं, (चिक्कति पीडयति अङ्गुलिमिति। चिक
+अच्। बिभर्ति कारणे पादे साधुः।)
नखरोगविशेषः। आङ्गुलहाड़ा इति भाषा॥
तल्लक्षणं यथा,—
"नखमांसमधिष्ठाय वातः पित्तञ्च देहिनाम्।
करोति दाहपाकौ च तं व्याधिं चिप्पमादिशेत्॥"
अथ कुनखस्य लक्षणम्।
"अभिघातात् प्रदुष्टो यो नखो रूक्षोऽसितः खरः।
भवेत् कुनखं विद्यात् कुलीनं वा किमुतस्य॥"
अथ तयोश्चिकित्सा।
"चिप्पं अचिरजातेऽपि धौतशैलाम्बुनाक्षरेत्।
सुखोष्णमहिषेन तैलेन क्षारितेन।
लाक्षादि यथासंस्नेहिनं लावणेन।
कल्केनैव लेपयेत् सन्धैन चिप्पकम्।
तस्यैव दण्डिमोत्थ, पादौ तप्तम्भासोमयाम्।
मधूना सदैव बन्धेन निर्मिश्रितं पुनः पुनः।
कासीसं तद्वत् भवेत् शोभनं स्यादित्यर्थम्।
अनुष्ठितैरथ धूमै कृशतः पटोलस्य।
त्रिर्दशपत्रकीर्ण कुष्ठम् अनुलेपयेत्।
अतोऽपि भिर्वारैव दद्यात् धत्तूरम्।
कुनखं च सदा घोषं सर्जकं प्रक्षालयेत्॥"
इति भावप्रकाशे क्षुद्ररोगाधिकारः॥
(अस्य चिकित्सान्तरं यथा,—

"कुर्य्यात् त्रिगुणितं चार्थे कामं तु लवणानि
चिप्पाख्यप्राप्तसमुद्रादृतं ददम्॥"
इति वाग्भटे उत्तरस्थाने ११ अध्याये।
चिक्कणस्य यथा,—
"चिर्व्वं श्रुत्वा चिकित्सेत् वात-ऋषि उपनाहम्।
मधुक-रोचनादि यथावैद्यं कर्म्मणैव चाशयेत्॥"
चिमि, पुं, (चिनोति वर्णयति मधुरवाण्या
शब्दमिति। चि+बाहुलकात् मिक्।) शुक-
पक्षी। इति शब्दमाला॥
चिमिकः, पुं, (चिमि+स्वार्थे कन्।) शुकः।
इति शब्दरत्नावली॥
चिरं अव्य (चि+बाहुलकात् रक्।) दीर्घ-
कालः। तत्पर्यायः। चिराय चिररात्राय
चिरस्य ४। इत्यमरः। चिरेण ५ चिरात्
६ चिरे ७। इति भरतः। चिराम्। इति
शब्दरत्नावली। (यथा रघुः। ३।६।
"नैका उपश्रिताचार्य्य चिरं यशो रथैः।")
चिरकारी, [न्] त्रि, (चिरं कृत्वा करोतीति।
कृ+णिनि।) चिरक्रियः। (यथा, महाभारते।
१२।२६६।१।
"चिरकारी हि मेधावी नापराध्यति कर्म्मसु॥")
गौतमस्य पुत्रभेदः। अस्य विवरणं तु
महाभारते। १२।२६६।११।
"चिरकारी महाप्राज्ञो गौतमस्याभवत् सुतः।
चिरेण सर्वकार्य्याणि विमृश्यार्थान् प्रपद्यते।
चिरं सन्धिकालत्वात् चिरं कालम् चिरं स्वपन्।
चिरं कार्य्याभिपत्तिश्च चिरकारी तथोच्यते॥")
चिरकालः, पुं, (चिरः कालः इति कर्म्मधारयः।)
दीर्घकालः। तत्पर्य्यायः। दीर्घसूत्रः १।
इति त्रिकाण्डशेषः॥
चिरक्रिय, त्रि, (चिरं व्याप्य क्रिया यस्य।)
चिरकालेन क्रियाकारकः। तत्पर्य्यायः। दीर्घ-
सूत्रः। इत्यमरः। ३।१।१६॥
चिरजीवकः, पुं, (चिरं जीवतीति। जीव+ण्वुल्।)
जीवकवृक्षः। इति जटाधरः॥
चिरजीवी, [न्] पुं (चिरं जीवतीति। जीव+
णिनि।) विष्णुः। काकः। इति हेम-
चन्द्रः। मार्कण्डेयः। इति जटा-
धरः। शाल्मलीवृक्षः। जीवकवृक्षः। इति
राजनि०। अश्वत्थामा। बलिः। व्यासः। हनू-
मान्। विभीषणः। कृपः। परशु-
रामः। इति तिथ्यादितत्त्वम्। चिरजीवनविशि-
ष्टे त्रि। इति मेदिनी। (यथा, रामायणे। २।
३।३६।
"अद्य राज्ञा मयैव दत्तं चिरजीविनः॥")
चिरञ्जीवी, [न्] पुं, (चिरं जीवतीति। जीव
+णिनि।) विष्णुः। काकः। इति हेम-
चन्द्रः। ४।१४४। जीवकवृक्षः। शाल्मलि-
वृक्षः। इति राजनिघण्टुः। चिरजीविनि त्रि।
चिरण्टी स्त्री (चिरात् पितृगेहे अटति
गच्छति। अट+अच्। "शकन्ध्वादिषु"
६।१।९४। इति वृद्धिः। गौरादित्वात्
ङीष्।) सुवासिनी। बृहती च। इति मेदि-

गेहस्थिता कन्या । द्वितीयपक्षे स्त्री । सा च युवती । इति भरतधृतशब्दचन्द्रः ॥

चिरतिक्तः, पुं, (चिरं चिरात् वा चिरावधीत्यर्थः तिक्तः ।) वृक्षविशेषः । चिरता इति भाषा । तत्पर्य्यायः । चिरातिक्तः २ तिक्तकः ३ अनार्य्यतिक्तः ४ किरातकतिक्तः ५ भूनिम्बः ६ किराततिक्तः ७ सुतिक्तकः ८ । इति शब्दरत्नावली । (भूनिम्बशब्देऽस्य विवरणमस्य ज्ञातव्यम् ॥)

चिरत्न, त्रि, (चिर+"चिरपरुत्परारिभ्यस्त्नो वक्तव्यः ।" ४ । ३ । २३ । सूत्रस्य वार्त्तिकोक्त्या त्नप्रत्ययः ।) पुरातनः । चिरकालोत्पन्नः । इति जटाधरः ॥

चिरन्तन, त्रि, (चिरं भवं इति । "सायंचिरमिति ।" ४।३।२३ । इति ट्युल तुट् च । निपातनात् साधुः ।) पुरातनः । इत्यमरः ।३।१।७७। (यथा पञ्चतन्त्रे । १ । ८ । "अयमस्माकं चिरन्तनो मित्रपुत्रो दमनकोऽप्यागतप्रवेशः ॥" पुं, मुनिविशेषः । यथा, विद्धशालभञ्जिकायाम् ।४। ३ । १ ५ । इत्यस्य वार्त्तिके । "मान्धातेव पुरा येन चिरन्तनेन मुनिना ॥")

चिरपाकी, [न्] पुं (चिरेण पाकोऽस्यास्ति । पाक+इनिः ।) कपित्थः । इति राजनिर्घण्टः ॥

चिरपुष्प, पुं, (चिराणि पुष्पाणि यस्य ।) बकुलवृक्षः । इति राजनिर्घण्टः ॥

चिरम्, अ (चि+रमुक् ।) चिरार्थम् । दीर्घकालार्थम् । तत्पर्य्यायः । चिराय २ चिररात्राय ३ चिरस्य ४ चिरात् ५ चिरेण ६ । इति हेमचन्द्रः ।६।१६८ । (यथा, रघौ ।१।६२। "तथापि शुष्यद्धनसारसिन्धुरे विपर्य्ययाद्धे चिरमस्य तद्गुणः ॥")

चिरमेही, [न्] पुं स्त्री, (चिरेण मेहतीति । मिह+णिनि ।) गर्द्दभः । इति हेमचन्द्रः ।४।३२५।

चिरमाय, पुं (चिरं भयति कोपतीति । चिरं+भय+अच् ।) चिरः । इति त्रिकाण्डशेषः ॥

चिररात्र स्त्री, (चिरा रात्रिरिति योगविभागात् अच् समासः ।) दीर्घकालः । इति शब्दार्णवः ॥ (यथा महाभारते । १ । १६८ । ३ । "चिररात्रोषिता योऽत्र ब्राह्मणस्य निवेशने ॥")

चिररात्राय, अ, (चिररात्रं अयते इति । अय+"कर्मण्यण् ।" ३।२।१। इत्यण् ।) दीर्घकालः । इत्यमरः ।३।४।१॥ ३ (यथा, मनुः । ३ । २६६ । "हविर्यच्चिररात्राय यच्चानन्त्याय कल्पते । पितृभ्यो विधिवद्दत्तं तत् प्रवक्ष्याम्यशेषतः ॥")

चिरविल्व, पुं, (चिरं विलति आच्छादयति पत्रफलपुष्पादिभिरिति । बिल आच्छादने+क ।) करञ्जवृक्षः । इत्यमरः ।२।४।४७ । (यथा — "चिरविल्वोऽग्निको दन्ती चित्रको भयमारकः । कपोतपर्ण्यः मुद्गपर्णी हरीतकी च रावणम् ॥" इति सुश्रुते सूत्रस्थाने अष्टत्रिंशेऽध्याये ॥)

चिरसूता स्त्री, (चिरं सूता या सा ।) चिरप्रसूता गवी । केवल गाइ इति भाषा । तत्पर्य्यायः । बष्कयणी २ । इत्यमरः । २।९।७१ ।

चिरस्थायी, [न्] त्रि, (चिरं तिष्ठतीति । स्था+णिनि ।) बहुकालस्थाता ॥

चिरस्य, अ, (चिरमस्यते इति । अस्+यत । इकन्यादित्वात् साधुः ।) दीर्घकालः । इत्यमरः ।३।४।१ ॥ (यथा, हरिवंशे ।१२६।२३ । "चिरस्य खलु कालेन स श्रुतोऽसि महात्मना ॥")

चिराटिका स्त्री, (चिरं अटतीति । अट+ण्वुल कापि अत इत्वञ्च ।) श्वेतपुनर्नवा । इति रत्नमाला ॥ मालाङ्की इति भाषा । यथा, वैद्यके । "गोमूत्रयुक्तस्य पुरातनस्य मूत्रायणस्तापि चिराटिकायाः ॥"

चिरात् अ, (चिरं अततीति । अत्+क्विप्) दीर्घकालः । इति हेमचन्द्रः । ६ । १६८ ॥ (यथा, पञ्चतन्त्रे । ४ । ७८ । "भो भगिनीसुत ! किमिति चिराद्दृष्टोऽसि ॥")

चिराद, पुं (चिरं चिरेण वा अत्ति । अद्+क्विप् ।) गरुडः । इति त्रिकाण्डशेषः ॥

चिरातिक्त पुं (चिरं आतिक्तः ।) चिरतिक्तः । इति शब्दरत्नावली ॥

चिराय, अ, (चिरं अयति । अय+अच् ।) दीर्घकालः । इति हेमचन्द्रः । ६ । १६८ ॥ (यथा, महाभारते । १२ । ८४ । १ । "पुरा धर्मो वर्त्तते नैव यावत् तावद्गच्छाम सुरलोकं चिराय ॥")

चिरायु, [स्] पुं, (चिरमायुर्यस्य ।) देवता । इति त्रिकाण्डशेषः ॥ चिरजीविनि त्रि । यथा, "भवति यदि मनुष्यो दुर्म्मेधीर्न्नचिरायुः ॥" रत्नागमः ॥ (यथा च पञ्चतन्त्रे । ५ । १४ । "यदि विस्तारविस्तीर्णं तद्भवेत चिरायुषम् ॥")

चिरि इ न हिंसे । इति कविकल्पद्रुमः ॥ (स्वां परं सक सेट ।) रेफोपधः । इ वेदिकः । न चिरिणोति । इति दुर्गादासः ॥

चिरि, पुं, (चिनोति मनुष्यवाक्यादिकम् । चि+रिक ।) शुकपक्षी । इति त्रिकाण्डशेषः ॥

चिरिण्टी, स्त्री, (चिरण्टी+पृषोदरात् साधुः ।) ऊढा अनूढा वा पितृगृहस्थिता कन्या । तत्पर्य्यायः । सुवासिनी । इत्यमरः । २ । ६ । ९ ॥ चिरण्टी २ सुवासिनी ३ । इति भरतः ॥ द्वितीयपक्षे स्त्री । युवती । इति मेदिनी ॥

चिरिविल्व, पुं, (चिरविल्वः । पृषोदरादित्वात् साधुः ।) चिरविल्वः । करञ्जवृक्षः । इत्यमरटीकायां भरतः ॥

चिरु, स्त्री (चिनु चयने+डिप् । चि अन्यं पक्षवर्त्तिमस्थ राति ग्रहाति । रा+मृगय्वादयश्चेति कु । बाहुमूलपृष्ठसन्धिरेव पक्षश्च इत्यास्य तथात्वम् ।) बाहुसन्धिः । इति हेमचन्द्रः ॥

चिरे, अ चिरम् । इत्यमरटीकायां रायमुकुटः ॥

चिरेण, अ, चिरम् । इति हेमचन्द्रः ॥ (यथा, रघुः । ५ । ६४ । "माधवमोदलक्षुब्धा दयितेव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव ॥")

चिर्भटी, स्त्री, (चिरेण भटतीति । भट+अच् । गौरादित्वात् ङीष् । पृषोदरादित्वात् साधुः ।) कर्कटी । इति हेमचन्द्रः । ४ । २५५ ॥ (यथा, पञ्चतन्त्रे ।१।१६७। "यस्मो अविवेकोऽसद्भूपतेर्यः पुरोधोदुर्मेधाश्चिर्भटीभक्षणं करोति ॥")

चिर्भिटा, स्त्री कर्कटीभेदः । चिभिड़ा इति वेलसेंड इति च देशान्तरीयभाषा ॥ तत्पर्य्यायः । सुचित्रा २ चित्रफला ३ क्षेत्रचिर्भिटा ४ पाण्डुफला ५ पञ्चा ६ रोचनफला ७ चिर्भिटिका ८ ककचिर्भिटा ९ । इति राजनिर्घण्टः ॥ चिर्भिटम् १ धेनुदुग्धम् ११ गोरक्षकर्कटी १२ । अस्या गुणाः । मधुरत्वम् । रूक्षत्वम् । गुरुत्वम् । पित्तकफापहत्वम् । अनुष्णत्वम् । ग्राहित्वम् । विष्टम्भित्वञ्च । पक्वाया अस्या गुणाः । उष्णत्वम् । पित्तलत्वञ्च । इति भावप्रकाशः ॥ गौरत्वम् । दीपनत्वञ्च । बालाया अस्या गुणाः । तिक्तत्वम् । विवितत्वञ्च । शुष्कायाश्चास्या गुणाः । श्लेष्मवातारुचिजाड्यनाशित्वम् । दीपनत्वम् । रोचनत्वञ्च । इति राजनिर्घण्टः ॥ (क्वचित् पुंलिङ्गेऽपि दृश्यते ॥)

चिल, श वासे । इति कविकल्पद्रुमः ॥ (तुदां परं-सक-सेट ।) वासः परिधानम् । श, चिलति वस्त्रं लोकः परिदधातीत्यर्थः । चेलिता । इति दुर्गादासः ॥

चिलमीलिका, स्त्री, (चिरं मीलतीति । मील सङ्कोचे+ण्वुल । टापि अत इत्वम् । रस्य लत्वे साधुः ।) कण्ठीभेदः । खद्योतः । विद्युत् । इति मेदिनी । के २२८ ॥

चिलिचिम, पुं (चिलिं हिंसां चिनोतीति । चिलि+चि+मक । रस्य लत्वम् ।) मत्स्यविशेषः । चानिमाकुड़ इति ख्यातः । इत्याख रक्तेऽप्रे । इति भरत ॥ तत्पर्य्यायः । नलमीनः २ । इत्यमरः । १ । १० । १८ ॥ तन्मीनः ३ चिली चिमि ४ चिलीचिम ५ चिलिचीम ६ चिलिचीम ७ चिलीमः ८ चिलिमीलक ९ चिलिचीमि १० कवच ११ चिलीटक १२ । इति भरतधृतकोषान्तरम् ॥ ... इति ख्यातो मत्स्यः । तस्य गुणाः । लघुत्वम् । स्वादुत्वम् । अनभिष्यन्दित्वम् । वातकारित्वम् । रूक्षताभिमत्वञ्च । इति राजवल्लभः ॥

चिल्ल, ई शिथिल्ये । भावकृतौ । इति कविकल्पद्रुमः ॥ (भ्वां पर सकं-सेट ।) ईकारो ... । चिल्लति शिथिलीभवतीत्यर्थः । इति दुर्गादासः ॥

चिल्ल पुं (चिल्ल्यते शाखासु चतुर्दशी इति । चिल्ल+अच् ।) पक्षिविशेषः । चिल इति भाषा ॥ तत्पर्य्यायः । आतायी २ । इत्यमरः । २ । ५ । २१ ॥ शकुनि ३ आतापी ४ । इति हेमचन्द्रः ॥ शकुन्ति ५ कवचेषक चिरजल्प ७ । इति त्रिकाण्डशेषः ॥ (यथा, विष्णुधर्मोत्तरे ।

"पथ्यं कटु कषोष्णञ्च पक्वञ्च मधुरं स्मृतम् ।
चिल्लञ्च समचिल्लञ्च माषं माषर उच्यते ॥"
क्षिप्रे चक्षुषी यस्य । "क्लिन्नञ्च चिल्लाक्षि सचायव चक्षुषी ।" ४ । ५ । ११ । इत्यत्र वार्त्ति इति चिल्लादेशो नामश्च ।) क्लिन्नचक्षुः । क्लिन्ननेत्रयुक्ते त्रि । इति मेदिनी । ले, १६ ।

चिल्लका, स्त्री (चिल्ल इव कायतीति । कै+क ।) झिल्लिका । इति शब्दरत्नावली ॥

चिल्लभक्ता स्त्री, (चिल्लस्य भक्ता भक्षणीया ।) बहुविधाक्षिणी । इति शब्दचन्द्रिका ॥

चिल्लाभः, पुं (धनस्य हारकत्वात् चिल्ल इव आभा-तीति । आ+भा+क ।) ग्रन्थिचौरः । इति त्रिकाण्डशेषः ॥ चाल्हे चक् इति भाटिकाटा इति च भाषा ॥

चिल्ली, स्त्री (चिल्लमिव क्लिन्नं करोति क्लिन्नानेन वा । चिल्ल+इञ् । ततो वा ङीष् ।) शाक-पत्रशाकभेदः । तत्पर्यायः । चिल्लिका २ लुडी ३ वास्तूकपत्रिका ४ बहुदला ५ क्षारदला ६ क्षार-पत्रा ७ वास्तुकीट ८ मञ्चरा ९ गौडवास्तुकः १० । (यथा सुश्रुते सूत्रस्थाने ४६ अध्याये ।
"कालोये वास्तुकशुभ चिल्ली कलम्बोऽरिका ।
शाकप्रवर्णी चोचनी शाकनं मद्गुतैः ॥")
अस्य गुणाः । वास्तुकगुणत्वम् । क्षारत्वम् । श्लेष्मपित्तप्रमेहमूत्रकृच्छ्रनाशित्वम् । पथ्यत्वम् । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥
("तद्वत् चिल्ली तु विज्ञेया वातपित्तविकारिणाम् ।" इति चरके सूत्रस्थाने सप्तमेऽध्याये ॥) झिल्लिका । इति शब्दरत्नावली ॥

चिवि, पुं, (चीयते चान्द्राय मङ्गरौ इति । चीव मङ्गरौ+"सर्वधातुभ्य इन् ।" उणा ४ । ११७ । इति इन् । पृषोदरादित्वात् ह्रस्वः ।) चिवुकम् । इति जटाधरः ॥

चिविटः, पुं, (चिपिटः निपातनात् पस्य वः ।) चिपिटः । इत्यमरटीका ॥

चिंशिका, स्त्री, क्षुद्रधान्यविशेषः । तत्पर्यायः । रक्तदला २ सूक्ष्मपत्री ३ मधुमालपत्रिका ४ । अस्या गुणाः । कटुत्वम् । कषायत्वम् । चीन-कादि अतिशिशिरत्वम् । दाहशमनञ्च । इति राजनिर्घण्टः ॥

चिवुः, पुं, (चीयते आहारादिकं मुखेनाधो । चीव +"मृगय्वादयश्च ।" उणा । १ । ३७ । इति कुप्रत्ययेन साधु ।) चिवुकम् । इति भरतः ॥

चिवुकं क्ली, (चिवु+स्वार्थे कन् । अभिधानात् क्लीबत्वम् ।) अधरादधोभागः । इत्यमरः । २ । ६ । ९० ॥ पुंसि इति शाब्दि इति च भाषा । (यथा, कुमारसम्भवे । १ । ४६ ।
"अन्यत्र चिवुकं यत्स्तनयोस्तु मानं भवेत् ।")

चिरुः पुं (चिनोतीति कन्धौ च । चि+रु ।) स्कन्धसन्धिः । इति राजनिर्घण्टः ॥

चिल् वसने । (तुदा-परं-अकं-सेट् ।) चीवरधारणमिति द्वयं । स्वस्थटीकायां भरतः ॥

चिह्न क्ली, (चिह्न्यतेऽनेनेति । चिह्न लक्षणे+करणे घञ् ।) चिह्न्यते येन तत् । चिन् इति दाग इति च भाषा । तत्पर्यायः । कलङ्कः २ अङ्कः ३ लाञ्छनम् ४ लक्ष्म ५ लक्षणम् ६ लिङ्गम् ७ । इत्यमरः । ३ । ३ । १७ ॥ अभिज्ञानम् ८ । इति भरतः ॥ अभिधानम् ९ । इति जटाधरः ॥ (यथा, भागवते । ४ । १५ । ९ ।
"वैन्यस्य दक्षिणे हस्ते दृष्ट्वा चिह्नं गदाभृतः । पादयोररविन्दञ्च तं वै मेने हरेः कलाम् ॥")
पताका । इति मेदिनी । ने, ४ ॥

चिह्नकारी [न्] त्रि, (चिह्नं करोतीति । कृ+ णिनि ।) घोरदर्शनः । हिंसालुः । इति विश्वः ॥

चिह्नधारिणी स्त्री, (चिह्नं धरति धारयतीति वा । धृ+णिनि स्त्रियां ङीप् ।) श्यामालता । इति शब्दचन्द्रिका ॥

चिह्नित, त्रि, चिह्न+कर्मणि क्त । चिह्नयुक्तः । अङ्कितः । लक्षितः । (यथा मनुः । १० । ५५ ।
"दिवा चरेयुः कार्यार्थं चिह्निता राजशासनैः ॥")

चीक त्रि मर्षणे । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं सकं-सेट् ।) त्रि, चीकयति चीकति । मर्षणं क्षमा । तथा च । अन्यत्रापीतद्वा-मर्षणोपर्यपि च पदत्रयमिति स्वयासुक । चाकत मर्षण्मीकृदं । मद्गमहस्तु सर्वत्र इति माद्यन्त इत्यर्थे पठित्वा सामान्येमाह । इति दुर्गादासः ॥

चीडा, स्त्री, गन्धद्रव्यविशेषः । चीडागन्ध इति ख्याता । तत्पर्यायः । दारुगन्धा २ गन्धमधूः ३ गन्धमादनी ४ शवली ५ तारा ६ मृग-मारी ७ मङ्गल्या ८ कर्पटिनी ९ पवनीर्णिका १० । अस्या गुणाः । कटुत्वम् । काशकफनाशित्वम् । दीपनत्वम् । अत्यन्तसेवनात् पित्तरोषभ्रमाद्यवहत्वञ्च । इति राजनिर्घण्टः ॥

चीनं, क्ली (चिनोति चीनांशुकमिति । चि+ बाहुलकात् नक् दीर्घश्च ।) पताका । इति त्रिकाण्डशेषः । सीसकम् । इति रत्नमाला ॥

चीनः, पुं, (चीयते अनीयते इतस्ततः धान्यादिरोधो यत्र । चि+बाहुलकात् नक् दीर्घश्च ।) देश-विशेषः । चीना इति भाषा । यथा —
"काश्मीरञ्च समारभ्य कामरूपात् पश्चिमे । भोटान्तदेशो देवेशि । मानसेशाच दक्षिणे । मानसेशात् उत्तरे चीनदेशः प्रकीर्तितः ॥"
इति शक्तिसङ्गमतन्त्रम् ।
(तद्देशवासिषु जनेषु च बहुवचनान्तः । यथा महाभारते । २ । २६ । १९ । [ऋषभ ॥"]
"स किरातैश्च चीनैश्च वृतः प्राग्ज्योतिषो-ऽ
भूत् ॥") धान्यविशेषः । (यथा, सुश्रुतसूत्रे ४६ अध्याये, "कोरदूषश्च चीनश्च श्यामाकश्च कौरवः") मृगभेदः । तन्तुः । वस्त्रविशेषः । इति मेदिनी । ने ४ ॥

चीनकः, पुं, (चीन इव । चीन+स्वार्थे कन् ।) धान्यविशेषः । चीना इति भाषा । तत्पर्यायः । काककङ्गु २ । इति हेमचन्द्रः ॥ (यथा सुश्रुते । १ । ४६ । २१ ।
"प्रियङ्गवो कुरदाश्च कोरदूषा चीनकाः ।")
अस्य गुणाः । शीतलत्वम् । वातवर्धनत्वम् । पित्तदाहनाशित्वम् । रूक्षत्वम् । इति राज-निर्घण्टः ॥ (चीनदेशजातेषु बहुवचनान्तः । यथा महाभारते । ३ । ३ । १९ ।
"शकानाञ्च यवनानाञ्च चीनानां पुरुषैः सह ॥")

चीनकर्पूरः, पुं (चीनदेशीयः कर्पूरः ।) कर्पूर-विशेषः । चीनकर्पूर इति हिन्दुस्थानीयभाषा । तत्पर्यायः । चीनकः २ लवणः ३ शुभ्रः ४ पटुः ५ मेघसारः ६ तुषारः ७ हिमवालुकश्च । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । पिच्छलम् । दिव्यशोभनम् । अत्यन्तकृमिकोष्ठदोषदायकम् । मेध्यत्वम् । पाचकत्वम् । इति राजनिर्घण्टः ॥

चीनजं, क्ली, (चीने चीनदेशे जायते इति । जन +ड ।) लौहम् । तत् तीक्ष्णलौहम् । इति राजनिर्घण्टः ॥

चीनपिष्टं, क्ली, (चीनस्य चीनदेशस्य पिष्टं प्रस्तरं यस्य चूर्णरूपत्वात् ।) सिन्दूरम् । इति हेमचन्द्रः ॥ सीसकम् । इति राजनिर्घण्टः ॥ (यथा कथासरित्सागरे । ५५ । ७० ।
"चीनपिष्टमयो लोकशाकल्यमयो नु भूः ॥")

चीनवङ्गं, क्ली (चीनस्य वङ्गम् ।) सीसकम् । इति राजनिर्घण्टः ॥

चीनाकः, पुं, (चीनं चीनाकारमकतीति । अक +अच् ।) कर्पूरविशेषः । तद्गुणादि यथा, भावप्रकाशे ।
"चीनाकसंज्ञः कर्पूरः कफक्षयकरः स्मृतः । कुष्ठकण्डूवमिहरस्तथा तिक्तरसश्च सः ॥"

चीनाककर्कटी, स्त्री, (चीन इव कायति प्रकाशते इति । कै+क ।) कर्कटीभेदः । सा तु चिच्चिण्डकेति प्रसिद्धा । तत्पर्यायः । रक्तकर्कटी २ दृढबीजा ३ रोचनिका ४ क्षुद्रकर्कटी ५ । अस्या गुणाः । रुचकत्वम् । शिशिरत्वम् । पित्तदाहक्षोभनाशित्वम् । मधुरत्वम् । तर्पणत्वम् । गुरुत्वञ्च । इति राज-निर्घण्टः ॥

चीभ श क कत्थने । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) कत्थ श्लाघा । श, चीभ-नीभम् । क चीभते तु चीभतं दृष्ट्वा चीभन-कारादिपक्षेऽपि । इति दुर्गादासः ॥

चीव, अ भ संवरणादानयोः । (भ्वां-उभं-सकं-सेट् ।) अनुस्वारी । अ, अचीचीवत् । भ, चीवति चीवते । इति दुर्गादासः ॥

चीरं, क्ली (चिनोति आवृणोति अङ्गं चीयते इति वा । चि+"शुसिचिमीनां दीर्घश्च ।" उणा । २ । २६ । इति क्रन् दीर्घश्च ।) वस्त्रम् । (यथा रामायणे । २ । ३७ । १२ ।
"मामिव तु कन्यायाश्च वल्कलं चीरवाससम् । कुर्वन्तमनुयास्यामि गतां रामेति वेदिकाम् ॥")
गोस्तनाकारहारः । इति हेमचन्द्रः । इति मेदिनी । भ्रूजीरं चैतन्याकारम् ॥ (यथा, भागवते । ४ ।

"चीराणि किं पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन् ।")
गोस्तनः । वस्त्रभेदः । (यथा, मनुः । ११ । १०१ ।
"चीरवासा द्विजोऽरण्ये चरेद्ब्रह्महणो व्रतम् ।")
रेखाभेदः । सीसकभेदः । इति मेदिनी । चूडा ।
(यथा, महाभारते । ३ । ११ । ४८ ।
"शुक्लवस्त्रधरीभूता बद्धवसन मारिषा ।
चीराणीव मुद्रकाणि रेणुलेन महावने ।")
सीसकम् । इति हेमचन्द्रः ।
चीरक, पुं (चीर+स्वार्थे कन् ।) विक्रिया लेखः । विकारलेखनम् । इति विश्वः । (स्वार्थे कनि चीरशब्दार्थोऽप्यत्र ।)
चीरपत्रिका, स्त्री, (चीरमिव पत्त्रमस्य । तत कन् टापि अत इत्वम् ।) चञ्चुशाकः । इति राजनिर्घण्टः ।
चीरपर्णः, पुं (चीरमिव पर्णमस्य ।) शालवृक्षः । इति राजनिर्घण्टः । (विवृतिरस्य शालशब्दे विज्ञेया ।)
चीरि, स्त्री, (चि+बाहुलकात् क्रि दीर्घश्च ।) नेत्रांशुकम् । इति शब्दरत्नावली ।
चीरिका, स्त्री (चीरीति शब्दं कायति शब्दायते इति । कै+क ।) झिल्ली । इति हेमचन्द्रः ।
चीरितच्छदा, स्त्री, (चीरितः चीरमिव जातः छदः पत्रं यस्याः ।) पालङ्क्यशाकम् । इति भावप्रकाशः ।
चीरी, स्त्री (चीरि+"कृदिकारादक्तिनः ।" गा ङीष् ।) कच्छाटिका । झिल्ली । इति हेमचन्द्रः ।
चीरुक, स्त्री, (ची इति शब्दं रौति । रु+क्विप् । चीरुश्चिल्लीवत्तन्नं च इव इति इवार्थे कन् ।) फलविशेषः । खिंचर इति भाषा । अस्य गुणाः । रुचिदाहकफपित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः ।
चीर्ण, त्रि, (चर+क्त । पृषोदरात् साधुः ।) शीलितम् । इति त्रिकाण्डशेषः ।
चीर्णपर्ण पुं, (चीर्णं विदीर्णं पर्णमस्य ।) निम्बवृक्षः । खर्जूरवृक्षः । इति मेदिनी ।
चीलिका स्त्री (चीरिका+रस्य लत्वे साधुः ।) चीरिका । झिल्ली । इति शब्दरत्नावली ।
चील्लका स्त्री, (चीलिका+पृषोदरात् साधुः । चीरिति शब्देन लस्यते इति । लष+घञ् । ततः पृषोदरादित्वात् साधुः इति वा ।) झिल्ली । इति शब्दरत्नावली ।
चीव ऋ ञ ग्रहणे । सम्वृतौ । इति कविकल्पद्रुमः । (भ्वां उभं सकं सेट् ।) ऋ अचिचीवत् । ञ चीवति चीवते वल्कलं भिक्षुः । सम्वृणोति परिदधाति वेत्यर्थः । इति दुर्गादासः ।
चीव ऋ दीप्तौ । इति कविकल्पद्रुमः । (चुरां-परं सकं सेट् ।) ऋ, चीवयति । इति दुर्गादासः ।
चीवरं क्ली (चीयते सङ्गुप्यतेऽनेनेति । चि+"चिमरच्छूचरचीवरेति ।" उणा । ३ । १ । इति ष्वरच् । निपातनात् धातोर्दीर्घत्वे साधु ।) भिक्षुवस्त्रम् । इत्यमरादिकोषः । (यथा महाभारते । १ । ९१ । १२ ।
"अनग्निरनिकेतश्चाप्यगोत्रचरणो मुनिः ।
कौपीनाच्छादनं यावत्तावदिच्छेच्च चीवरम् ।")
चीवरी, [न्] पुं, (चीवर अस्त्यस्येति । इनि ।) बुद्धभिक्षुकः । इति त्रिकाण्डशेषः ।
चुक्क, क व्यथने । इति कविकल्पद्रुमः । (चुरां-परं-सक-सेट् ।) क्षोभयः पञ्चमस्वरमध्यः । व्यथि पीडनम् । क, चुक्कयति शत्रुं शूरः । इति दुर्गादासः ।
चुक्कार, पुं, (चुक्क+भावे घञ् । चुक्कं पीडनं आराति सम्यक् ददातीति । सिंहनादश्रवणेन भीतत्वात् भयजनकत्वात्तथात्वम् । आ+रा+क ।) सिंहनादः । इति त्रिकाण्डशेषः ।
चुक्र, क्ली (चकते तृप्यत्यनेन इति । चक+"चकिरम्योरुच्चोपधायाः ।" उणा । २ । १४ । इति रक उपधाया उत्व ।) अम्लद्रव्यविशेषः । महादा इति ख्यातम् । तत्पर्य्यायः । तिन्तिडीकम् २ वृक्षाम्लम् ३ । इत्यमरः । २ । ९ । ३५ । चुक्रकम् ४ । इति शब्दरत्नावली । महाम्लम् ५ । इति जटाधरः । (अम्लवृक्षकम् ६ । इति भावप्रकाशः । १ । १ ।) चणशाकविशेषः । चुक इति भाषा । तत्पर्य्यायः । चुक्रवास्तूकम् २ क्षिप्रम् ३ अम्लवास्तुकम् ४ दन्ताम्लम् ५ अम्लशाकम् ६ अम्लादि ७ हिलमोचिका ८ । अस्य गुणाः । अत्यम्लत्वम् । लघुत्वम् । उष्णत्वम् । वातगुल्मार्त्तिघ्नत्वम् । रुच्यत्वम् । पित्तकारित्वम् । पथ्यत्वम् । तत्पर्य्यायगुणाः ।
"चुक्रिका स्यात्तु पञ्चाम्ला रोचनी शतवेधिनी ।
चुक्रा स्वल्पतरा ग्राहिणी वातघ्नी कफपित्तकृत् ।
वृष्या लघुतरा पाके वृन्ताके नातिरोचनी ।"
इति भावप्रकाशः ॥ ० ॥
("चुक्रमम्लमनुष्णञ्च दीपनं पाचनं परम् ।
शूलगुल्मविबन्धामवातघ्नं ग्राहकं परम् ।
कृमिश्लेष्मकरं रक्तकुष्ठीकाग्निमान्द्यनुत् ।"
इति द्रव्यगुणचिन्तामणिसङ्कलितेद्रव्यम् ।)
काञ्जिकभेदः । तत्पर्य्यायः । सहस्रवेधम् २ रसाम्लम् ३ चुक्रवधकम् ४ शाकाम्लभेदनम् ५ चन्दम् ६ अम्लसारम् ७ चुक्रिका ८ । अस्य गुणाः । भिन्नम् । अत्यम्लम् । उष्णम् । कफपित्तानिलविकारोदरगुल्मशिरोरोगमन्दाग्निघ्नत्वम् । इति राजनिर्घण्टः ॥ अम्लरसद्रव्ये । यथा,
"अम्लवास्तिनृपौ भावे मधुकस्तीक्ष्णकाञ्जिकम् ।
माध्यरात्रौ विरामश्च तुल्यं चुक्रं तन्त्रते ।
द्विगुणं गुडमध्वारनालमस्तु प्रमाणतः ।"
इति परिभाषा ।
(अस्य अन्नार्थे यथा —
"दिवसे पञ्चिमो यस्तु लघुचक्रमभिप्रेते ।"
इति शार्ङ्गधरे मध्यखण्डे दशमेऽध्याये ।)
चुक्र पुं (चकते तृप्यत्यनेनेति । चक+रक उपधाया उत्व ।) अम्लः । अम्लवेतसः । इति विश्वः ।
चुक्रकं क्ली (चुक्र+स्वार्थे कन् ।) शाकविशेषः । चुकापालङ्ग इति भाषा । अस्य गुणाः । दुर्जरत्वम् । भेदकत्वम् । वातनाशित्वम् । पित्तकारित्वम् । गुरुत्वञ्च । इति राजवल्लभः । (चुक्रार्थे स्वार्थे कन् ।)
चुक्रफल, क्ली, (चुक्रमेव फलं यस्य । चुक्रं फलति वा । फल+अच् ।) वृक्षाम्लम् । इति राजनिर्घण्टः । (वृक्षाम्लशब्देऽस्य विशेषो ज्ञातव्यः ।)
चुक्रा स्त्री (चुक्र अम्लत्वं विद्यतेऽस्य इत्यच् टाप् च ।) चाङ्गेरी । इति मेदिनी । रे, ९५ । आमरुल इति भाषा । (अस्या गुणा यथा —
"चुक्रा स्वल्पतरा ग्राहिणी वातघ्नी कफपित्तकृत् ।
वृष्या लघुतरा पाके वृन्ताके नातिरोचनी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
तिन्तिडी । इति शब्दरत्नावली । (अथास्याः पर्य्यायाः भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"अम्लिका चुक्रिकाम्ली च चुक्रा दन्तशठापि च ।
अम्ला च चिंचिका चिञ्चा तिन्तिडीका च
तिन्तिडी ।")
चुक्राम्ल, क्ली (चुक्रमिव अम्लम् । चुक्रवदम्लोऽस्य इति वा ।) वृक्षाम्लम् । इति राजनिर्घण्टः । (वृक्षाम्लशब्दे विवृतिरस्य ज्ञेया ।)
चुक्राम्ला, स्त्री, (चुक्रमिव अम्लः अम्लरसः विद्यतेऽस्याः । अच् टाप् च ।) अम्ललोणिका । चिञ्चा । काञ्जिकभेदः । इति राजनिर्घण्टः ।
चुक्रिका स्त्री (चुक्रो विद्यतेऽस्याम् इति । ठन् टाप् च ।) अम्ललोणिका । इत्यमरः । २ । ४ । १३ । (अस्याः पर्य्याया यथा, भावप्रकाशे ।
"चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ।
अश्मन्तकस्तु शफरी कुशलो चाम्लपत्रकः ।")
कुचाङ्गेरी । इति रत्नमाला । चुकापालङ्ग इति भाषा । (यथास्याः पर्य्यायाः ।
"चुक्रिका स्यात्तु पञ्चाम्ला रोचनी शतवेधिनी ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
तिन्तिडी । तत्पर्य्याया यथा तत्रैव ।
"अम्लिका चुक्रिकाम्ली च चुक्रा दन्तशठापि च ।
अम्ला च चिंचिका चिञ्चा तिन्तिडीका च
तिन्तिडी ।")
चुचुक, क्ली (चुचु इत्यव्यक्तशब्देन कायति शब्दायते इति । कै+क ।) कुचाग्रम् । तत्पर्य्यायः । चूचुकम् २ चूचूकम् ३ । इति शब्दरत्नावली । कुचाग्रम् ४ । पुंलिङ्गोऽपि । इति रत्नकोषः । स्तनवृन्तम् ५ । इत्यमरटीकायां भरतः । (क्वचित् वैकल्पिकत्वाच्च पुं । यथा, महाभारते । १२ । ७ । ३४ ।
"ददृशुरासपर्यकान् सर्वे भरतसत्तमाः ।
कुचाः संस्पृष्टा ततश्चुचुका यस्य गाः ।")
चुचू पुं चञ्चुशाकम् । इति त्रिकाण्डशेषः ।
चुचुक स्त्री, (चुचुक+ङीषन्तात् ह्रस्वत्वे ।) चुचुकम् । इति शब्दरत्नावली ।
चुट, इ छिदे । इति कविकल्पद्रुमः । (भ्वां पर-सकं सेट् ।) तालव्यवर्गीयोऽयम् । इति

मसरी। ई, घुस। यद्दाक्षोर्यामिद्धेदे। अभिवव चार्य मन्दर्ष पौड़ष ध्वानय। इति दुर्गादासः॥

घुघु पुं कुक्कुटादि। इति धारावली। घ। (अद्भुतस्यात्तिविशेष। यथा भा०। १। ४८।
"मेदान्धूघुघूकामाप्येमन्दुभिगगम्।"
"घुघुमद्गत्व वेश्यशर्मिश्लिष्टौम, छटिन जागी घोघायमानो बाहयो।" इति मुहिकामां कुचूकमग। भावकौशतमयपदिर्विय। म ह प्रतिद्वार्थे भवति। यथा, विद्या विभो "घ्राघुघु। इति सिद्धान्तकौमुदी। स्त्री उद्भिज्जविशेष। घुघुा इति भाषा। भाटीय वत्। अस्या पर्याया गुणाश्च यथा,—
"विधा चघुचघुषी च दौर्घवर्ता वनिलका।
घुघु पीता धरा चमा माही दीपनपाचना।
धातुवृद्धिकरी वल्या मेध्यविष्ठिलका स्मृता।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे।
"घर्घरसाथा घुघोषां घौघिकाया रघोरपि।"
इति वामने भिक्षणाख्याने षट्षष्ठोऽध्याये।)

घुघुरी, स्त्री, (घुघुरिव रातीति। रा+क। स्त्रियां ङीष्।) तिलिकृमोदभूतम्। इति त्रिकाण्डशेषः। कँवरीचिर पोका इति भाषा।

घुघुली स्त्री, (घुघुरी। रस्य लत्वम्।) तिलिपोक्तामिमिर्दृगसीका। इति धारावली। ८२।

घुट, घुण्णे। इति कविकल्पद्रुमः। (भ्वा०-पर०-अक० सेट्।) मध्यमप्सरी। घुणमकस्पीमाप। घोटति वरी धौष्टि। इति दुर्गादासः।

घुट, र सुम्बने। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक० सेट्।) मध्यमप्सरी। सुम्बमानीमाय। र, घुटाते मदा धौष्टि। इति दुर्गादासः।

घुड, र क हिंसे। इति कविकल्पद्रुमः। (चुरा० पर०-सक० सेट्।) मध्यमप्सरी। र क, घुडयति वार्ष धोरा। इति दुर्गादासः।

घुट क दि छिदे। इति कविकल्पद्रुमः। (चुरा० तुदा० पर०-सक० सेट्।) क, घोटयति। दि, घुडति अघुडीत्। इति दुर्गादासः।

घुण, क सुम्बने। इति कविकल्पद्रुमः। (चुरा० पर० सक० सेट्।) सुम्बनम्। मध्यमप्सरी। एतदन्तात् इति यावत्। सुम्बनमकीमाप। क, घुणयति वरी गौष्टि। इति दुर्गादासः।

घुथ र लौल्ये। इति कविकल्पद्रुमः। (भ्वा० पर०-सक० सेट्।) र, घुथते। लौल्यमम्नी भाषा। इति दुर्गादासः।

घुथ, र क हिंसे। इति कविकल्पद्रुमः। (चुरा० पर० सक० सेट्।) र क घुथयति। इति दुर्गादासः।

घुथ, र क रोषे। (चुरा० पर० सक० सेट्।) र क, घुथयति। इति दुर्गादासः।

घुण, र क रोषे। (चुरा० पर० सक०-सेट्।) र, घुणति। क घुणयति। इति दुर्गादासः।

घुड़, भ्वा०। वाधे। इति कविकल्पद्रुमः। (भ्वा० पर०-सक० सकर्म० सेट्।) एतदन्तपदेोऽयम्।

भिदि सदोनामत्तोषि घुड। कालकारी चार करम इतियोऽर्थो इयती। अमी धाया भिया सद्गुरमोचनः। इत्यमरः। भाव एवात्र संरुद्धविकारो घुड इत्यतो। इति धातिम इर्षवम्। घुड़ति कालमपयो काल। इति दुर्गादासः॥

घुण, गि दिपि। इति कविकल्पद्रुमः। (तुदा० पर० सक० सेट्।) गि, घुणति अघुणीत् घुघोण। इति दुर्गादासः।

घुणा स्त्री, (घुणातीति भागिनि। घुण छिदे+अच्। अनिकातसनेन भावमावस्याताधानम्।) कृमि। इति त्रिकाण्डशेषः।

घुणी स्त्री, कृमि। इति त्रिकाण्डशेषः। उपकूपम्। कूप समीपे स्नानकलाधारः। इति हेमचन्द्रः।

घुण, दर गते। इति कविकल्पद्रुमः। (भ्वा० पर० सक० सेट्। मार्ग इति पैठिन।) दर, अघुणत् अघोणीत्। मार इत्र भागीचम्। घोणति मार्ग वही मणा भाधिवलीकय। इति दुर्गादासः।

घुण, पुं, (घोणति भ्रमति मध्ये विनाशकात्। घुण+अच् र्थ क।) घुणाक्षरम्। इति शब्दरत्नावली।

घुणि, स्त्री, (घोणति भ्रमति सम्मार्जितादि-र्यस्याः। घुण+"सर्वधातुभ्य इन्।" उणा० ४।११८। इति इन्।) घुणाक्षरम्। इति शब्दरत्नावली।

घुण क दुरि। इति कविकल्पद्रुमः। (चुरा० पर० सक० सेट्।) इति मैत्रेयः। क घोणयति बाध भाग। इति दुर्गादासः।

घुरक, स्त्री। वाधे। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक० अक० च सेट्।) तप्तंद्रतोपीपय। भिदि सदोनामत्तोषि घुड। कालकारी चाव करम इतियोऽर्थो इयती। अमी धाया भिया सद्गुरमोचनः। इत्यमरः। भाव एवात्र-संरुद्धविकारो घाव इत्यते। इति धातिम-इर्षवम्। घुड़ति कालमपयो काल। इति दुर्गादासः।

घुर्णी स्त्री, (घोरयति भिदयति घटयोर्मध्ये नावमकारीरिति। घुर+अच्। निपातनात् घुणा अत। तत स्त्रियां ङीष्।) कुटरी। इति हेमचन्द्रः। ३। ४१०।

काशीमिश्रस्तु कुब्जा स्याद्रामानन्दोऽर्ज्जुन सखा ।
प्रतापरुद्र ख्यातोऽथाविन्द्रद्युम्नो महीपति ॥
ठक्कुरश्च कालिदास पुलिन्दीवनचारिणी ।
शिखी च राधिका दासी मा इति ख्यातिसंयुता ॥
आचार्य्यगोपीनाथश्च रत्नावली मम प्रिया ।
श्रीरङ्गदास पद्मिनी स्यात् सर्व्वो विश्वेश्वर स्मृत ॥
भानुमती चक्रपाणी रामानन्द कलावती ।
जयश्च विजयश्चैव गोविन्दो गरुडध्वजा ॥
आचार्य्यरत्नचन्द्र स्याद्गाधो वृन्दावन स्मृत ।
शुक्लदेवो वाणपुत्रो भट्टो वल्लभ ईरित ॥
श्रियानन्दोऽभव इव दयानन्दश्च भार्गव ।
पण्डित श्रीजगन्नाथो दुर्व्वासा मुनिरुच्यते ॥
आचार्य्य श्री अनन्तश्च वशिष्ठाख्यतयैव च ।
एता गोप्यो व्रजे ख्याता ऋषयश्च इव च ॥
प्रियाश्च तु हरिदेवी धर्म्मसंस्थापने रता ।
एतेषां पुण्यनामानि ये वदन्ति दिने दिने ।
ते प्राप्नुवन्ति महाशक्ति पुनन्ति भुवनत्रयम् ।
मङ्गलान्यपि ये मर्त्या भान्ति तेषां नम क्वचित् ॥
श्रुत्वा भगवतो वाक्यं मकार कमलाननान् ।
स्तौति स देवदेवस्य मेदुरं ऋषभस्तदा ।
चतुर्गर्भमर्म्मवराह्णुपमद्युमाकरा ॥"

रसवल्लभचिन्तायां श्रीचैतन्यचरितामृते भक्त-प्रचारकनामोऽध्याय ॥ ७ ॥ अपि च ।
"य एव विश्वम्भरनामधेयो श्रीगुरुनामाभवत् चतावी महाप्रभु मयापि वर्णितोऽभूत्सर्व्वं रक्षतु ।'

य श्याम दयराम पर्य्यङ्कमनु श्यामो युगे द्वापरे
सोऽयं गौरविधुर्विभाति कलयन्नामावतार कलौ ।
नित्यानन्दो भक्तरूपो व्रजे य श्रीहलायुध ।
भक्तावतार आचार्य्योऽद्वैतो य श्रीसदाशिव ॥"
इति गौरगणोद्देश ॥

(अयमेव भगवांश्चैतन्यदेवो नवीनवैष्णवसम्प्रदायविशेषस्य प्रवर्त्तकस्तत्सम्प्रदायैश्चोपास्येष्टदेवत्वेनाधी परिगृहीतश्च । अयं एव वृन्दावन रमण-श्रीराधायाः पूर्णावतार इति केचित्, परे तु प्रामाणिकपन्थवचनादर्शनात् तत्र सम्प्रति अत एतस्मिन् विषये पण्डितानां प्रायशो मतभेदो दृश्यते ।

स तु प्रभु (१४०७) सप्ताधिकचतुर्द्दश-शतशके फाल्गुने सवितरि पौर्णमास्यां तिथौ शुक्रवारे प्रदोषसमये नवद्वीपाख्यनगर्य्यां प्रादुर्बभूव । तस्मिन्नेव महामहिमशालिनो भगवतो जन्मसमये चन्द्रदेवं प्रति सैंहिकेयोपरागो जात । एतदुपलक्ष्य गङ्गास्नानार्थं बहवो लोका नानादिग्देशादागत्य तत्र मिलिता । तदा सर्व्वेऽपि राहुणा चन्द्रमसि भक्ष्यमाणे हरे हरे बान्धवो गौरचन्द्र समवेतलोकानां हरिध्वनि सङ्कीर्त्तनमिमङ्गलाचरणं सह प्रत्यौपूर्ण्णमन्तः इदियाय । भवन्ति हि शुभलक्षणानि महता माविर्भूतानि । अतस्तदापि प्रथमा दिक् श्रीवृक्षसौगन्ध्यमाल्यादिशुभगन्धाढ्यो मलयसमीरण प्रशमनि च साधु जनमनांसि समभवन् । अस्य पिता जगन्नाथमिश्रस्तु पुरा श्रीहट्टनिवासी आसीत् । कदाचित् गङ्गास्नानार्थमेव नवद्वीप मागत्य विप्रचक्रवर्त्तिकुलतिलकस्य नीलाम्बर ब्रह्मण शचीनाम्नी कन्यां परिणीतवान् । ततो गच्छति काले अथ चैतन्यदेव शचीगर्भे पयोदधामाय यावदुदिता जगन्नाथमिश्रस्य दशमपुत्रस्तैव समभवत् । अस्य पूर्व्वजो विश्वरूपो नाम जगन्नाथमिश्रस्यापर पुत्र आसीत् । स तु यौवन एव शास्त्रेराम्यविशारदो दारपरि-ग्रहमनङ्गीकुर्व्वन् पारिव्राज्यधर्म्मं समाश्रयत ।

अथ चैतन्यदेवस्य जातकर्म्मादिसंस्कार यथा कालं क्रमशो निर्वृत्ते अस्य मातामहो नीलाम्बरचक्रवर्त्ती शुभलक्षणादिकमवलोक्य विश्वम्भर इति नाम्नैनमाजुहाव । शचीदेवी तु पुन पुन पुत्रस्नेहेन वञ्चिता प्रियतममेनं कनीयांसं कुमारं क्षितिदेवोपशोभनकामनया निमाइ इत्याख्यया गौरचन्द्रिमस्तु अस्यारूपलावण्यतया परम रमणीयत्वं गौर इत्याख्यया च आहूतवन्त । परं धर्म्मरसिकानां भक्तानां समाधौ, ध्यान श्रीकृष्ण ब्रह्मदेव इव अतः महाप्रभु इति चैतन्यदेव इति च आख्या प्रसिद्धा ।

अथ प्राप्ते काले चैतन्यदेवोऽयं व्याकरण सारस्वतपुष्पवर्षमलङ्कारादिषु महा प्रवीणताया महाराजदम्भावनावाचक प्राङ्गीतम् अत्रैव काशिक अध्यापनं (?) तारङ्ग व्यवहरत् । अस्य दुर्द्धर्षाधीनभावात्

तदा धर्म्मं यतेन देशोऽधिभूतममन्यत । अथ कदाचिदयं गङ्गास्नानार्थं गत्वा तत्र वल्लभा-चार्य्यस्य लोकातीतरूपलावण्यां लक्ष्मीं नाम कन्यामवलोक्य मोहित आसीत् । वल्लभा चार्य्यस्तु तदनुरूपम् स्वयमेव तां कन्यामस्मै सम्प्रददे । विवाहानन्तरमेवायं प्रवास आर्यावर्त्तं प्रस्थित । एतस्मिन्नेव काले सहसा निमिविरहिणा पत्नीना जाह्नवीमरणात् अस्य तत्काले समाप्तिमा भगवन्तस्य तत्र प्राप्त निरवद्य । अथापि निखिलजनैर्वाचा पूर्व्वादि स्थलीं गत्वा तत्रस्थान् पण्डितान् विमोहयन् सुविमल यश प्राप्तवान् । तस्मिन्नेव काले अस्य पूर्व्वपत्नी कालधर्म्मं प्राप्ता । चैतन्यदेवस्तु तस्या विरहेण व्याकुलितोऽपि मातुरनुरोधेनैव पुन सनातनपण्डितस्य विष्णुप्रियानाम्नीं कन्यां द्वितीयपत्नीत्वेन स्वीचकार । परं सर्व्वगुणविभू षिताया भार्य्यायाम् अनन्या इव तस्या मनसा देवासौ संसारविरक्त श्रीवासादिभिर्भक्तवर्गै-र्मिलितो हरिभक्तिरसनिमग्न एव कालं यापया मास । अथ कदाचित् पितृलोकोद्धारकामनया गयातीर्थं गत्वा भक्तचूडामणि श्रीमदीश्वरपुरि नाम्नो गोस्वामिन सकाशात् हरिनामानन्द-दीक्षां लब्धवान् तत्त्वतार्थं मत्वा च मदेवं प्रख्यापितवान् । एतस्मिन्नवसरे पावकदुराचारौ दस्युसदृशौ जगाइ माधाइ चेति प्रसिद्धौ भ्रातरौ अन्यायेन पुण्यादिव्यापिपीडिताम् मथा मानकिन मनसा हरिनामसंकीर्त्तनेन ससारसागरात् समुद्धृत्य यवनजातीयकाजि-प्रभृतीन् वैष्णवकेलि धर्म्मदीक्षया दर्शयामास । तत प्रभृत्येवासौ भक्तिरसप्रधान वैष्णवधर्म्मं प्रचारयितुमिच्छन् नित्यानन्दाद्वैताचार्य्या दिभिर्भक्तवरै सह नानाजनपदं परिभ्रमन् मधुरेण वचसा प्रेमोपदेशमकरोत् । अथ (१४३१) एकत्रिंशदधिकचतुर्द्दशशतशके उत्तरायण संक्रान्तौ संसारमायां परित्यज्य काटोयाख्य ग्रामे केशवभारतिनाम्न सकाशात् संन्यासधर्म्मं समा श्रयत् । अथ नीलाचलनामक जगन्नाथक्षेत्रं गत्वा तत्र प्रतापादिरुद्रस्य सभापण्डितेन वेदान्त भाष्यकारेण सार्व्वभौम विचारेण परास्य वैष्णवधर्म्मे प्रवर्त्तितवान् । अथ कदाचित् गोदा वरीतीरे भक्तवरं रामानन्दरायमालोक्य तेन निरूपितभक्तिसारार्थं तत्त्वज्ञानमन्वभूत् । ततो गौरचन्द्र प्रियकाशीविश्वनाथ विजय प्रभृतीन् बहून् तीर्थान् आहिण्डमाण हरिप्रेम रसेन प्लावित्वा द्वारकादीन् जनपदान् दर्शनात् । तदेवासौ 'वृन्दावन' नाम पुण्यभूमेर्दर्शन यात्रा कृतवान् । तत्र तत्र पुण्य देवालय प्रणम्य कार्य्यसेवकानां हरिप्रेमरसप्रदानेन धर्म्मं स्थापितवान् । अत्रैव हरिकीर्त्तनाय देवस्य रघुनाथादीनां सन्तु च क्रमशो दिनं विधाय दीनेभ्यो दानं च सर्व्वं तपश्च वर्द्धयामास । अथ तत्र च कश्चित् पुत्रार्थं

निजमिष्टजनैरेव यथा प्रभुः सभाजयाञ्चकार पावादीनपि हिंसकान् भक्तिप्रेमणा मादयित्वा वृन्दावनमुपगतः । तत्र श्रमक्लमदूरगः एकाकी गोपीगणभक्तिप्रणयविहारस्थानादिकमवलोक्य मधुरागुरुदितश्रमितः । तस्मात् स्थानात् प्रयागगमनकाले बहून् पाषण्डानपि यवनान् वशीभूतान् विधाय वाराणसीमुपस्थितः । तत्र कियत्कालमुषित्वा स्वधर्मं प्रचार्य च पुनर्नीलाचलमाजगाम । अनन्तरं एकाकी स्वप्रचारितवैष्णवधर्मस्य माहात्म्यं विज्ञापयितुं भक्तवृन्दाग्रगण्यान् रूपसनातनादीन् नाना तीर्थस्थानेषु प्रेषयामास । अथ स्वभक्तैर्मिलितो नानाविधमहोत्सवेन हरिसंकीर्तनादिकं विधाय भक्तिरसस्य उत्कटकोटिमभिगम्य विरहोन्मादादिप्रगाढभक्तिलक्षणैरन्वित आसीत् । तत एकाकी स्वभक्तगणान् कलियुगे हरिसंकीर्तनस्य माहात्म्यादिकं श्रावयित्वा अष्टचत्वारिंशद्वर्षपर्यन्तकालस्य दुरतिक्रमणीयत्वात् (१४५५) शकाब्दे चतुर्दशशताब्दे मानवकायं परित्यज्य अन्तर्हितवान् ॥)

चैत्यं, क्ली पुं (चित्याया इदम् । "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) आयतनम् । इत्यमरः । २ । २ । ७ । यज्ञस्थानं केचित्तु सुरसहित देवकुलादयद्यज्ञायतनं चत्वरमपि चैत्यमपि आहुः । देवायतनमात्रम् । अन्ये देवकुलम् । इति भरतः ॥ (यथा, महाभारते । २ । ३ । १२ । "यत्र यूपा मणिमयाश्चैत्याश्चापि हिरण्मयाः ।") चिता । इति त्रिकाण्डशेषः ॥

चैत्य, पुं, (चैत्ये देवायतनादिस्थाने तिष्ठतीति । चैत्य+अच् ।) बुद्धः । बिम्बः । अर्हद्भक्तः । इति मेदिनी भरतश्च ॥ ग्रामस्य पर्यायः । देवतरु २ देवावास ३ करिभ ४ कुञ्जर ५ । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १३ । ४ ।
"इमा पतन्ति चैत्याश्च ग्रामेषु नगरेषु च ॥"
देवस्य वृक्षः । यथा, भागवते । ३ । २६ । ६० ।
"आहृद्वारयोरुपधिष्ठा चैत्यस्ततोऽभवत् ॥")

चैत्यद्रु, पुं (चैत्य एव द्रुमः ।) अश्वत्थवृक्षः । इति त्रिकाण्डशेषः ॥ (अश्वत्थवृक्षस्य गुणादयो ज्ञातव्याः ॥)

चैत्यमुखः, पुं, (चैत्यं चितिसम्बन्धि विकृतमिवास्य मुखं यस्य ।) कमण्डलुः । इति त्रिकाण्डशेषः ॥

चैत्यवृक्ष, पुं (चैत्यस्थानस्थया प्रसिद्धो वृक्षः ।) अश्वत्थवृक्षः । इति रत्नमाला ॥ (यथा मनुः । ९ । २६४ ।
"चतुष्पथांश्चैत्यवृक्षाः समाजाः प्रेक्षणानि च ॥")

चैत्र, क्ली, (चीयन्ते जीवा यस्मात् स्थानात् स्थानान्तरमनेनेति । चि + बाहुलकात् करणे त्रन् । तत स्वार्थे अण् ।) यज्ञम् । देवकुलम् । इति मेदिनी । रे, १० ॥ देउल इति भाषा ॥ (यज्ञस्थानम् । यथा, महाभारते । १ । १ । ८ । १६ ।
"औदीच्य धर्मतो राजन् । धर्मेण परिरक्षिते । बभूव रमणीयश्च चैत्ययूपशताङ्कितः ॥")

चैत्र पुं (चित्रे चित्रिते कार्याद्दौ साधुः । चित्र + अण् ।) बुद्धभिक्षुकः । इति त्रिकाण्डशेषः ॥ वर्षपर्वतविशेषः । इति मेदिनी । रे, १० ॥ (यथा, वाराहपुराणम् ।
"हिमवान् हेमकूटश्च निषधो मेरुरेव च ।
चैत्रः कर्णी च शृङ्गी च सप्तैते वर्षपर्वताः ॥"
चित्रायां भवः । चित्रा + अण् ।) चित्राजातो बुधपुत्रः । स सप्तद्वीपाधिपतिः सुरथराजपितामहः । इति ब्रह्मवैवर्ते प्रकृतिखण्डम् ॥ (चित्रानक्षत्रयुक्ता पौर्णमासी यत्र सः । चित्रा + "विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः ।" ४ । २ । २३ । इति पक्षे अण् ।) मासभेदः । स तु सौरचान्द्रभेदेन द्विविधः । तत्र मीनराशिस्थरविकः सौरः मीनस्थरविप्रारब्धशुक्लप्रतिपदादिदर्शान्तश्चान्द्रः । इति मलमासतत्त्वम् ॥ तत्पर्यायः । चैत्रिकः २ मधुः ३ । इत्यमरः । १ । ४ । १५ ॥ चैत्री ४ कालादिकः ५ । इति राजनिर्घण्टः ॥ चैत्रक ६ चित्रिक ७ । इति शब्दरत्नावली ॥ ॥ तत्र जातफलम् ।

"मनुकर्मप्रवीणो विनयी शुभो
भोगी सुखी स्यान्मधुराप्रभोगी ।
सत्कर्मयुक्तो द्विजदेवभक्तो
भवेन्मनुष्यो मधुमासजन्मा ॥"

इति कोष्ठीप्रदीपः ॥ ॥

(चैत्रकृत्यानि तु वारुण्यशोकाष्टमी श्रीरामनवमी मदनत्रयोदशी मदनचतुर्दशीप्रभृतीनि । एतेषां प्रकरणादिकं तत्तच्छब्दे द्रष्टव्यम् ॥) तत्र प्रियव्रतकथनम् । यथा —
"चैत्रे मास्यथ माघे वा योऽर्चयेत् शङ्करं व्रती । करोति नर्तनं भक्त्या वेत्रपाणिर्दिवानिशम् ॥ मासं वाप्यर्द्धमासं वा दश सप्त दिनानि वा । दिनमानं युगं सोऽपि शिवलोके महीयते ॥"
इति ब्रह्मवैवर्ते प्रकृतिखण्डम् ॥
अधुनास्य मध्याय इति ख्यातम् इति च भाषा ॥

चैत्रक, पुं, (चैत्र + स्वार्थे कन् ।) चैत्रमासः । इति शब्दरत्नावली ॥

चैत्ररथ, क्ली, (चित्ररथेन गन्धर्वेण निर्वृत्तम् । "तेन निर्वृत्तम् ।" ४ । २ । ६८ । इत्यण् ।) कुबेरस्योपवनम् । तत्तु चित्ररथगन्धर्वनिर्मितम् । इत्यमरः । १ । १ । ७४ ॥ (यथा, रघुः । ५ । ६० ।
"एको ययौ चैत्ररथप्रदेशान्
सौराज्यरम्यानपरो विदर्भान् ॥"
इदन्तु पीठस्थानानामन्यतमम् । यथा, देवीभागवते । ७ । ३ । ५८ ।
"मदोत्कटा चैत्ररथे जयन्ती हस्तिनापुरे ॥"
पुं, ऋषिविशेषः । यथा महाभारते । १ । ६३ । ४५ ।
"कश्चियानमभिगम्य तथा चैत्ररथं मुनिम् । जनमेजयस्य विख्यातं पुण्याश्रममनुत्तमम् ॥")

चैत्रावली, स्त्री, (चैत्रे चैत्रमासे आ सम्यक्प्रकारेण वरमभिवक्तीति । आ + वर + क्विप् + अच् । स्त्रियां ङीष् । इत्युज्वलनम् ।) चैत्री पूर्णिमा । तत्पर्यायः । मधूषत २ सुरभिः ३ वसन्तः ४ वासन्ती ५ मधुनी ६ । इति त्रिकाण्डशेषः ॥

चैत्रिक, पुं, (चित्रानक्षत्रयुक्ता पौर्णमासी अस्मिन् अस्तीति । "विभाषा फाल्गुनीति ।" ४ । २ । २३ । इति पक्षे ठक् ।) चैत्रमासः । इत्यमरः । १ । ४ । १५ ॥

चैत्री, [न्] पुं, (चैत्री चित्रायुक्ता पौर्णमासी विद्यतेऽस्मिन् । व्रीह्यादित्वादिनिः ।) चैत्रमासः । इति राजनिर्घण्टः ॥ (चित्रा + इञ् ।) चैत्रिरिति च पाठः ॥

चैद्य, पुं (चेदीनां जनपदानां राजा । चेदि + ष्यञ् ।) शिशुपालः । स तु दमघोषसुतः । इति जटाधरः ॥ (यथा, माघे । २ । ३८ ।
"त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे ।"
चेदिराजवत् । इति पुराणम् ॥) तद्देशीये भूपे । इति त्रिकाण्डशेषः ॥

चोक्ष, त्रि (क्षायते उष्यते शोध्यते इति । चक्ष + कर्मणि घञ् । ततः पृषोदरादित्वात् साधुः ।) गीतः । शुचिः । (यथा, मनुः । ३ । २०७ ।
"अवकाशेषु चोक्षेषु नदीतीरेषु चैव हि । विविक्तेषु च तुष्यन्ति दत्तेन पितरः सदा ॥")
दक्षः । (यथा, महाभारते । १२ । ४० । ८ ।
"अनार्यैर्महद्रोहैः स्वाक्षोचः स्वादको ह्यपि ॥")
तीक्ष्णः । मनोज्ञः । इति मेदिनी । ष, ११ ॥

चोच, क्ली, (मचस्य चोच मचु सिद्धेन । "अच्छ कादिभ्योऽञ्च ।" ४ । २ । ६० । इत्यञ् ।) गुडत्वक् । इत्यमरः । २ । ६ । १३३ ॥ (तत् तु अपाचीरकस्योपमा तमालस्यैव पत्रकम्" इति भावप्रकाशे । १ । ४ ॥ तेजपत्र इति ख्यातम् । इति वैद्यके ॥ (तत्पर्यायो यथा, —
"तवक्षीरं चाप्तामृताच्चोचकं मधुरं स्मृतम् ।"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
उपरिस्थफलावधिरेव । चोचा इति भाषा । तालफलम् । इति भरतः । कदलीफलम् । इति धारासुन्दरी ॥ नारिकेलम् । इति वल्मी ॥ पनसम् । चर्म । इति धरणी ॥

चोटक, स्त्री, (चोट + स्वार्थे कन् । महता चेलेन कायतीति । कै + क ।) चेलकम् । इति शब्दरत्नावली ॥

चोटी, स्त्री, शाटी । इति हेमचन्द्रः । ३ । ३३४ ॥

चोड, पुं (चुडति संवृणोति शरीरमिति । चुड संवरणे + अच् ।) प्रावरणम् । देशविशेषः । इति मेदिनी । डे, ११ ॥

चोदना, स्त्री, (चोद्यते प्रवर्त्यतेऽनेनेति । चुद + णिच् + युच् टाप् च ।) विधिः । (यथा, गीतायाम् । १८ । १८ ।
"ज्ञानं ज्ञेयं परिज्ञाता त्रिविधा कर्मचोदना ॥")
प्रेरणा । यथा । चोदना क्रियालक्षणोऽर्थो धर्मः । इति जैमिनिसूत्रम् । स्वर्गोऽर्थादिभिः यज्ञादि चोदना । इति स्मृतिः ॥

चोदनागुड, पुं, (चोदनया प्रेरणया गुडति वा विप्रमुच्यते इति । गुड + "इगुपधेति ।" ३ । १ ।

१३५। इति क। क्रौञ्चमकार्थे कन्दुकानां जद्-श्रेयणप्रसिद्धतयास्य तथात्वम्।) कन्दुकः। इति त्रिकाण्डशेषः॥

चोद्य, क्ली, (चोदयति प्रेरयति चित्तं इत्यविरोधि अनेनेति। चुद्+णिच्+ण्यत्।) आश्चर्यम्। प्रश्नः। इति मेदिनी। ये २३॥ (यथा, महाभारते। ५। ४२। ३४।
"सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च।
अस्तेयं ब्रह्मचर्य्यञ्च तथासंग्रहमेव च॥")

चोद्य, त्रि, (चोदयितुं प्रेरयितुं योग्यः। "अर्हे कृत्यतृचश्च।" ३। ३। १६९। इति यत्।) चोदनार्हः। प्रेरणयोग्यः। इति मेदिनी। ये २३॥ (यथा, महाभारते। ५। ३८। ७।
"नीवारमूलेङ्गुदशाकवृत्तिः
सुसंयतात्मा अग्निकार्य्येषु चोद्यः।
वने वसन्नतिथिष्वप्रमत्तो
धुरन्धरः पुण्यकृदेष तापसः॥")

चोपनं, क्ली, (चुप मन्दगमने+भावे ल्युट्।) मन्दगमनम्॥

चोर, पुंस्त्री, (चोरयतीति। चुर+णिच्+पचाद्यच्।) स्तेयकर्त्ता। तत्पर्य्यायः। चौरः २ दस्युः ३ तस्करः ४ प्रतिरोधी ५ मलिम्लुचः ६ स्तेनः ७ ऐकागारिकः ८ स्तेयः ९ प्रच्छन्नजनः १० मोषकः ११ पाटच्चरः १२ परास्कन्दी १३ कुम्भिलः १४ खनकः १५ प्राकुलवर्धः १६ रात्रिकः १७। इति शब्दरत्नावली॥ प्रमुट् पुष्टः १८। इति त्रिकाण्डशेषः॥ मृषु १९ तस्करः २० दिवा २१ रिपुः २२ दिवा २३ विहरगा २४ साधु २५ परशुः २६ कुहरिकः २७ सूचीवाक् २८ मलिम्लुचः २९ अदायाद ३० वृक ३१। इति वैजयन्ती॥ ३ अध्यायः। (यथा, देवीभागवते १। १९। ६।
"चौरेषु चौरबुद्धिस्ते साधुबुद्धिस्तु तापसे।
समत्वं तवास्ति विदेहस्य कथं नृप!॥")
चणकाष्ठी। इति कामचन्द्रिकाधृतवैद्यकम्॥ गन्धद्रव्यविशेषः। यथा। चोरकपुष्परोचना। इत्युद्गम्यकायने आगमः॥

चोरक, पुं (चोरो गन्धद्रव्यविशेषस्तद्वत् कायतीति। कै+क।) चक्रा। इति रत्नमाला॥ पिङ्गृ इति भाषा। (चोर+स्वार्थे कन्।) सुगन्धिद्रव्यविशेषः। तत्पर्य्यायः। ग्रन्थिलः २ शङ्का ३ दुष्पत्रः ४ क्षेमकः ५ रिपुः ६ चपलः ७ कितवः ८ धूर्त्तः ९ पटुः १० नीचः ११ निशाचरः १२ गणहासः १३ कोपनकः १४ चोरः १५ कपटचोरकः १६ दुष्पुत्रः १७ पत्रिकः १८ सुपत्रिः १९ पर्णचोरकः २० ग्रन्थिपर्णः २१ ग्रन्थिरलः २२ ग्रन्थिपत्रः २३। (यथा, सुश्रुते कल्पस्थाने ६ अध्याये।
"चोरको वचा कुष्ठ सर्पसुगन्धा सकटुकी।")
अस्य गुणाः। तीक्ष्णत्वम्। उष्णत्वम्। तिक्तत्वम्। वातकफवान्तिहृल्लासकुष्ठचोरकक्रिमिदोषनाशित्वञ्च। इति राजनिर्घण्टः॥

चोरपुष्पिका, स्त्री (चोरपुष्पी+स्वार्थे कन्। कापि टाप् पूर्व्वह्रस्वश्च।) चोरपुष्पी। इति शब्दरत्नावली॥ ("शङ्खिनी चोरपुष्पिका।" इति वैद्यकम्॥)

चोरपुष्पी, स्त्री (चोरो गन्धद्रव्यविशेषस्तद्वत् सुगन्धि पुष्पमस्याः। "पाककर्णपर्णेति।" ४। १। ६४। इति ङीष्।) क्षुपविशेषः। चोरा इति चोरहुली इति च ख्याता इति भरतः॥ तत्पर्य्यायः। शङ्खिनी २ केशिनी ३। इत्यमरः। २। ४। १२६॥ चोरपुष्पिका ४। इति शब्दरत्नावली॥ (चोरा ५। इति शब्दचन्द्रिका॥)

चोरस्नायु, स्त्री, (चोरस्य स्नायुरिव।) काकनासालता। तस्करस्नायुरिति राजनिर्घण्टदर्शनात्॥

चोरा, स्त्री, (चोरो गन्धद्रव्यविशेषः तस्येव गन्धोऽस्त्यस्याः। अच् ततष्टाप्।) चोरपुष्पी। इति शब्दचन्द्रिका॥

चोरिका, स्त्री, (चोरस्य भावः। मनोज्ञादित्वात् वुञ्।) चौरिका। चौर्य्यम्। इत्यमरटीकायां रायमुकुटः॥

चोल, पुं, (चोलयति समुच्छ्रयति स्त्रीणां वक्षःप्रदेशं इति। चुल उन्नतौ+अच्।) कञ्चुलिका। काँचुलि इति भाषा॥ (यथा, आनन्दलहर्य्याम्। ६६।
"निजां वीणां वाणी निचुलयति चोलेन निभृतम्॥")
तत्पर्य्यायः। कूर्पासकः २। इत्यमरः। २। ६। ११८॥ कञ्चुकः ३। इति जटाधरः॥ कञ्चुली ४ कञ्चुलिका ५। इति शब्दरत्नावली॥ स्त्रीणां निचोल इति रमानाथः॥ पुंसोऽप्येतौ चोला इति ख्यातौ इति सुभूतिः॥ गौरादित्वात् चोली च। कूर्पासः कफोणिरगात्रं च तद्द्वयमस्यति क्षिपति अण् कूर्पासः पृषोदरादित्वात् नलोपः ततः स्वार्थे कः। इति भरतः॥ ०। देशविशेषः। इति शब्दरत्नावली। अधुना ताञ्जोर इति ख्यातः॥ तत्तु पाण्ड्यदेशस्यापरदिक्स्थितदेशविशेषः। सतु पूर्व्वं क्षत्रिय आसीत् सगरराजेनास्य धर्म्मनाशं वैशाख्यम् चकार। इति हरिवंशः॥

चोलकं, क्ली, (चोलयति आच्छादयतीति। चुल+णिच्+अच्+स्वार्थे कन्। यद्वा चोल इव कायति इति। कै+क।) वर्म्मकम्। इति शब्दरत्नावली॥

चोलक, पुं, (चोल इव कायति इति। कै+क।) वल्कलः। कवचम्। इति हारावली। १९०। (देशभेदः। यथा कथासरित्सागरे। १९। ८१।
"उल्लङ्घ्यमाना कावेरी येन वर्मं कारिता।
चोलकेरलवध्वीनां कालुष्यं यशसा समम्॥")

चोलकी [न्] पुं (चोलकमिवाच्छादकमस्य इति इनि।) करीरः। नारङ्गः। किष्कुः। इति मेदिनी। नै, १८४॥

चोलण्डुक पुं (चोलस्य कञ्चुक इव उरश्छदः अण्डुक इव।) शिरोवेष्टः। इति त्रिकाण्डशेषः॥

चोष, पुं, (चीयते इति। चि+क्त। ततः उष दाहे+अप्। चयाश्रौ उपचितेन।) मांसज्वाला। यथा —
"कण्डूलमौष्ण्यमतुलं ज्वलनेन पित्तात्
शूकदाहचोषबहुलं व्यथया प्रतप्तकम्।
संघातकं बहुदलं ज्वलितञ्च विद्यात्
वैगुण्यमोहजडताभिरपायरूपम्॥
चोषः पार्श्वस्थितामिवेष सन्तापः।" इति भावप्रकाशः॥ (यथाच सुश्रुते। १। ४२।
"यो गले चोषमुत्पादयति मुखवैशद्यं जनयति भक्तरुचिं चापादयति हर्षञ्च स तिक्तः॥")

चोस्क, पुं, (चन्दयति आह्लादयति। चदि+क। ततः स्कन्दति आक्रमते प्रभून् स्कुनाति आप्नोति वा। स्कन्दि स्कु वा+क। तत पृषोदरादित्वात् साधुः।) सिन्धुवारदेशीयाश्वः। इति त्रिकाण्डशेषः॥

चौक्ष, त्रि, (चोक्ष एव इति। स्वार्थे अण्।) मनोज्ञम्। इति महाभारतम्॥

चौर पुं क्ली, (चोर एव प्रज्ञादिभ्योऽण्। यद्वा चुरा शीलमस्य। "छत्रादिभ्यो णः।" ४। ४। ६२। इति णः।) चोरः। इत्यमरः। २। १०। २४॥ (यथा, देवीभागवते। १। १६। ५८।
"चौरं वा तापसं वापि समानं मन्यते नृपम्॥")
असुरविशेषः। यथा हरिवंशे। १०६। १९।
"किराती चोरवयसा चौरधीनागमस्तुताम्॥"
कविभेदः।
"कविरमरः कविरमरः कविश्चौरो मयूरकः॥"
इत्युद्भटः॥)
चोरपुष्पी। इति मेदिनी। रे, १०॥ (चोरपुष्पीशब्दे विवरणमस्य ज्ञेयम्॥) सुगन्धिद्रव्यविशेषः। इति हैमचन्द्रः॥

चौरिका, स्त्री (चोरस्य कार्य्यं भावो वा। "द्वन्द्वमनोज्ञादिभ्यश्च।" ५। १। १३३। इति वुञ्। टापि अत इत्वम्।) चौर्य्यम्। इत्यमरः। २। १०। २५॥ (यथा मनुः। १। ८२।
"चौरिकानृतमायाभिर्धर्म्मश्चापैति पादशः॥")

चौरी स्त्री, (चौर+ङीष्।) चौर्य्यम्। इति शब्दरत्नावली॥ (मायाशक्तिरूपा महाशक्तिः। यथा देवीभागवते। १२। ६। ४९।
"चण्डिका चक्रधात्री च चौरी चोरा च चञ्चला॥")

चौर्य्यं, क्ली, (चोरस्य कर्म भावो वा। "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च।" ५। १। १२४। इति ष्यञ्।) चोरकर्म्म। चोरी इति चुरी इति च भाषा। तत्पर्य्यायः। स्तैन्यम् २ स्तेयम् ३ चौरिका ४। इत्यमरः। २। १०। २५॥ चौरी ५। इति शब्दरत्नावली॥ चोरिका ६। इत्यमरटीका॥ (यथा, मनुः। ९। २७६।
"सन्धिं छित्त्वा तु ये चौर्य्यं रात्रौ कुर्व्वन्ति तस्कराः।
तेषां छित्त्वा नृपो हस्तौ तीक्ष्णशूले निवेशयेत्॥")

चौलकर्म्मन् [न्] क्ली, (चूडायाः कर्म्म। "तस्येदम्।" ४। ३। १२०। इत्यण् ततः इत्वम्।

तत्च्योतमेव कर्म्म इति कर्म्मधारयः ।) चूडा कम्म । इति स्मृतिः ॥

चौलुक्य:, पुं (चुलुकस्य गोत्रापत्यमिति । "गर्गा दिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) राजर्षिभेदः । इति हेमचन्द्रः । ३ । ७१९ ॥

च्यु, क ङ हासे । सहने । इति कविकल्पद्रुमः ॥ (चुरा० पर०-सकं० सकश्च सेट् ।) कथा स्यादौ- मध्य । क च्यावयति । इति दुर्गादासः ॥

च्यु ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म० सकं० अनिट् ।) धन स्यादौमध्य । ङ, च्यवते । इति दुर्गादासः ॥

च्युत इर क्षरणे । इति कविकल्पद्रुमः ॥ (भ्वा० पर०-सकं०-सेट् । क्वचित् अकर्म्मकश्च ।) धन स्यादि मुखः । इर्, अच्युतत् अच्योतीत् । चर इद स्यादिधनम् । च्योतति घृतं घट्टी पक्वा । आमिष सौरभ्य । इति दुर्गादासः ॥ (यथाच भट्टिः । ६ । २८ ।

"सीतां निपाहि सौमित्रे ! रावणस्यापरतां भुवम् ।
इदं सौमित्रिमच्यत सम्पदारेऽच्युतत्तयोः ॥"

"अच्युतत् गलितमकर्म्मकोऽयम् ।" इति तट्टीकायां जयमङ्गलभरतौ ॥")

च्युत, त्रि, (च्यवते स्म इति । च्यु + कर्त्तरि क्त । यद्वा च्युत् + अर्थे क ।) क्षरितम् । यथा,—

"निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।"
इति श्रीभागवतम् ॥

(भ्रष्टम् । यथा रघुः । ११ । २५ ।

"राममन्मथशरेण ताडिता दुःसहेन हृदये निशाचरी ।
गन्धवद्रुधिरचन्दनोक्षिता जीवितेशवसतिं जगाम सा ॥"

कालिका च्युतविकङ्कतस्रुचाम् ॥")

च्युति, स्त्री (च्यवते योनिमार्गादिकमनया इति । च्यु + अपादाने क्तिन् ।) भगम् । इति हेमचन्द्रः । ३ । ६ । ८ ॥ गुदद्वारम् । इति शब्दरत्नावली ॥ (च्यु + भावे क्तिन् ।) क्षरणम् । यथा —

"कच्चिन्मृगीणामनघा प्रसूतिः
कच्चिन्मनःप्रीतिरिहाप्यरण्ये ।"

इति कुमारसम्भवे । ५ । १० ॥

च्युप, पुं, (च्यवते भाषणमनेन इति । च्यु + "च्युप किच ।" उणां । ३ । २४ । इति प च स च कित् च्युधातुरत्र भाषणार्थे वर्त्तते इत्युज्ज्वलदत्तः ।) मुखम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

च्युस क हासे । इति कविकल्पद्रुमः ॥ (चुरा० पर०-सकं० सेट् ।) क्वचित् पुस्तके हासे । धन स्यादिमुखः । क, च्योसयति । इति दुर्गादासः ॥

च्योत, क्ली, (च्युत + पृषोदरादित्वात् साधुः ।) च्योतम् । घृतादिक्षरणम् । इत्यमरटीका ॥

च्यौत्न त्रि, (च्यवते इति । "अविरत्न् च्यौत ।" उणां । ४ । १०३ । इति त्नन् ।) अमनकर्त्ता । बलम् । च्यौकुल्यम् । इति सिद्धान्तकौमुद्यां उणादिवृत्तिः । बलम् । इत्युज्ज्वलदत्तः ।)

छ

छ, छकारः । स तु व्यञ्जनसप्तमवर्णः । चवर्गद्वितीय वर्णश्च । (वङ्गाक्षरे) तस्य लेखनप्रकारो यथा,

"इडाद्योगता रेखा कुञ्चिता कुण्डली मता ।
पुनश्चाधोगता तासु शक्तिरुक्ता विधिर्यथा ॥"

इति वर्णोद्धारतन्त्रम् ॥ ● ॥

अस्योच्चारणस्थानं तालु । इति व्याकरणम् ॥ ("इचुयशानां तालु ।" इति सुधाकारेणोक्तम् । "कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ।" इति शिक्षायाम् ॥)

अस्योत्पत्तिर्यथा । प्रपञ्चसारे ।

"विसर्गस्ताश्च घोषा स्युः स्पर्शाश्च महाप्राणा ।"

अघोषश्चापि वर्गस्य द्वितीयाद्यक्षरोच्चारणे श्वासप्रधानादिति श्लोकगम्भीरार्थस्योद्वितीयश्च यथास्थानमन्वेतीति तट्टीकाकारो विवरणः । अस्य ध्यानं यथा, वर्णोद्धारतन्त्रे ।

"ध्यानमस्य प्रवक्ष्यामि शृणुष्वाथ विशेषतः ।
पीताम्बरधरां नित्यां वरदां भक्तवत्सलाम् ।
एवं ध्यात्वा छकारन्तु तन्मन्त्रं दशधा जपेत् ॥"

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।

"छकारं परमाश्चर्य्यं स्वयं परमकुण्डली ।
सततं कुण्डलीयुक्तं पञ्चदेवमयं सदा ॥
पञ्चप्राणमयं वर्णं पञ्चप्राणात्मकं सदा ।
त्रिबिन्दुसहितं वर्णं सदा ईश्वरसंयुतम् ॥
पीतविद्युल्लताकारं छकारं प्रणमाम्यहम् ॥"

तस्य नामानि यथा, तन्त्रशास्त्रे ।

"छश्छन्दः सुमुखा च पशुः पशुपतिस्मृतिः ।
निर्मलं तरलं वह्निर्भूतमाता विलासिनी ॥
एकनेत्रश्च द्रवणी स्थिरा वामकूर्परः ।
मौकर्या लाङ्गली वामकामसंज्ञा सदाशिवः ॥
माया विद्याधरः पाशी वैजपं क्षितिसुन्दरः ॥"

छ, त्रि (छादयति परिच्छिनत्ति तत् इति । छो + कर्म्मणि अन्यर्थे क ।) निर्मलम् । इति मेदिनी । छे, १ । तरलम् । इत्येकाक्षरकोषः ॥

छः, पुं, (छो + भावे क अन्यर्थे को वा ।) छेदनम् । इत्येकाक्षरकोषः ॥

छग, पुं स्त्री, (छं समासे छिन्नं गच्छति प्राप्नोतीति । गम + ड ।) छागः । इति हेमचन्द्रः । ४ । १२७५ ॥

छगण, क्ली पुं, (छद + ण । छ तस्मै अपेक्षादयाशीलस्य गम्यते इति । गम + कर्म्मणि क्विप् ।) करीषः । इति हेमचन्द्रः । ३ । १२०६ ॥

छगल क्ली, (छगलिति छिनत्ति छाद्यति वा । छो + छिदि + "छो गुग् ह्रस्वश्च ।" उणां । १ । ११२ । इति कलच् प्रत्ययः धातोर्गुगागमो ह्रस्वश्च ।) नीलवस्त्रम् । इति मेदिनी । ले, १ ॥

छगल:, पुं स्त्री, (छ्यति छिनत्ति दैवोपहाराय इति । छो + कलच् गुगागमो ह्रस्वश्च ।) छागः । इति मेदिनी । ले, ८१ ॥ (यथा, सुश्रुते । १ । ४६ ।

"नातिशीतो गुरुः स्निग्धो मन्दपित्तकफः स्मृतः ।
छगलस्त्वनभिष्यन्दी तेषां पीनसनाशनः ॥")

छगलक:, पुं स्त्री, (छगल + स्वार्थे कन् ।) छागः । इत्यमरः । २ । ९ । ७६ ॥

छगलान्त्री, स्त्री, (छगलस्य अन्त्रमिवाकारोऽस्त्यस्याः । छगलान्त्र + अच् + ङीष् । छगलस्य अन्त्राणि निरुणद्धीति वा । "कर्म्मण्यण् ।" ५ । २ । १२० । इति अण् ङीप् च ।) वृद्धदारकवृक्षः । इति शब्दरत्नावली मेदिनी च ॥ (पर्य्यायोऽस्या यथा "वृद्धदारकः ऋष्यगन्धा छगलान्त्री आवेगी जुङ्गकः अन्तःकोटरपुष्पी" इति सुश्रुते । ३८ अध्याये ॥)

छगलाद्री, स्त्री, (छगलपदसदृशाकृतिः । ङीष् ।) छगलाङ्घ्री । इत्यमरटीकायां रायमुकुटः ॥

छगलाङ्घ्री, स्त्री, (छगलस्य अङ्घ्रिरिव ।) छगलाङ्घ्री । इत्यमरटीकायां रायमुकुटः । (पुंसि तु पीतक्षीरवृक्षे । यथा, देवीभागवते । ७ । ३० । ७३ ।

"छगलण्डे प्रचण्डा तु चण्डिकामरकण्टके ।")

छगलाञ्चिका, स्त्री (छगलाञ्ची + स्वार्थे कन् । टापि पूर्व्वह्रस्वः ।) छगलाञ्ची । इति शब्दरत्नावली ॥

छगलाञ्ची स्त्री (छगलस्य अन्त्रमिव ।) वृद्धदारकवृक्षः । इत्यमरः । २ । ४ । ११७ । कोः । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते कल्पस्थाने । १६ अध्याये । "ऋश्यगन्धाच्छगलाञ्च्याह्वय..." ... तथा शुष्कचीरी भेति ॥")

छगली, स्त्री (छगल + जातित्वात् ङीष् ।) छाग- माता । ब्रह्मदारकवृक्षः । इति शिवः ॥

छटा स्त्री, (छो + घटन् क्विप् ।) दीप्तिः । (यथा, राजतरङ्गिण्याम् । ४ । १०८ ।

"प्रतापोग्रच्छटाकूटे प्रदीप्ताग्नेर्मणिभिः ।
समुद्दीपितरैकैव मैत्रालम्बन सञ्चयम् ।")

समूहः । यथा, माघे । १ । ४० ।

"छटाच्छटाभिन्नघनेन बिभ्रता
नृसिंहसैंहीमतनुं तनुं त्वया ।"

(छटाच्छटाभिः सटासमूहैः ।" इति मल्लिनाथः ।)

छटाफल:, पुं (छटा इव प्रसारणशीलानि फलानि यस्य ।) गुवाकवृक्षः । इति त्रिकाण्डशेषः । (गुवाकशब्दे विवृतिरस्य ज्ञेया ॥)

छटाभा स्त्री, (छटाभिर्दीप्तिभिर्भातीति । भा + क्विप् । यद्वा । आ + भा । टाप् च ।) विद्युत् । इति हारावली । २८ ॥

छ(च)त्र, क्ली (छादयति आतपमावृणोतीति । छद + णिच् + "दाम्नीशसयुयुजस्तु..." उणां । ४ । १५८ । इति ष्ट्रन् निपातनाद् ह्रस्वश्च ।) रौद्र- निवारणवारणार्थवस्तु । छाता इति भाषा । तत्पर्य्यायः । आतपत्रम् २ । इत्यमरः । छायामिषम् ३ महोत्तमम् ४ । इति शब्दरत्नावली । आतपवारणम् ५ । राजचिह्न्- "आतपत्र तावद् इनञ्च मित्र ..."

पुण्डरीकमयो भद्रासन् राज्ञामग्र तु यत् ॥"
इति गदाधरः ॥

अपि च ग्रन्थान्तरम्।
"छत्रं कनकदण्डे तु राजहंसशलाकनम्।
नृपलक्ष्म भवेत्तत्तु यच्चत्र पृथिवीभुजाम् ॥"
तस्य गुणाः। वर्षातपधूलिवायुहिमनाशित्वम्। चक्षुर्हितकारित्वम्। शुभ्रातपत्रमङ्गलकारित्वञ्च। इति राजवल्लभः ॥ * ॥ तस्योत्पत्तिर्यथा। एकदा ज्येष्ठमासे जमदग्निमुनिर्धनुषि बाणान् सन्धाय सन्धाय प्रक्षिपेण तत्पत्नी रेणुका तान् बाणानानीयानीय तस्मै प्रादात्। सा मध्याह्नकाले रौद्रेण पीडिता वृक्षच्छायामवलम्ब्य किञ्चित् कालं स्थित्वा तानानिनाय। कथितदा क्रुद्धमाह किं चिरेणागता। सा आह सूर्य्यतेजसा मे शिरः पादौ च सन्तप्तौ तेन वृक्षच्छायामाश्रित्य स्थिता तस्मात् चिरायेतत् कृतम्। तच्छ्रुत्वा मुनिराह अद्य सूर्य्यमस्त्र पितेजसा निपातयिष्यामीत्युक्त्वा धनुषि बाणान् सन्धाय सूर्य्याभिमुखोऽतिष्ठत्। सूर्य्यस्तं दृष्ट्वा भीतो द्विजरूपेणागत्य आह सूर्य्यात् भवति दिवा निशि भवद्भिः कर्म्माणि क्रियन्ते कथमेनं हनिष्यसि एवं माकार्षीः तथापि मुनिः शमं न जगाम। अथ सूर्य्यः शिरस्त्राणं छत्रं निर्म्माय तस्मै दत्त्वा तदाप्रभृति एतत् लोके प्रचरिष्यति व्रतादिषु च अस्य दानं महाफलप्रदमित्युक्त्वा गतः ॥ * ॥ तस्य दानफलं यथा —
"छत्रं हि भरतश्रेष्ठ ! यः प्रदद्यात् द्विजातये।
शुभं शतशलाकं वै स प्रेत्य सुखमेधते ॥
स शक्रलोके वसति पूज्यमानो द्विजातिभिः।
अप्सरोभिश्च सततं देवैश्च भरतर्षभ ! ॥"
इति महाभारते दानधर्म्मः ॥

अथ छत्रयुक्तिः ।
"विशेषतश्च सामान्यं छत्रस्य द्विविधा भिदा।
राज्ञस्तत्र विशेषाख्यं सामान्यञ्चान्यदुच्यते ॥
तत्र विशेषच्छत्रोद्देशः।
सञ्चयाय भिद्यते तच्छत्रं द्विविधं बुधः।
चतुरस्रं तथा विशेषं नारवाकुञ्चनात्मकम् ॥
दण्डः कन्दः शलाकाश्च रज्जुर्वस्त्रञ्च कीलकः।
अष्टभिरेतैः सुमःश्ब्दैश्छत्रमित्यभिधीयते ॥
निर्व्रणं सतुषं दण्डो गुणकमात्।
कदम्बचन्दनपनवितस्ता कन्द उच्यते ॥
शलाकाः काष्ठीनि सप्तारि मद्दुमक्रमात्।
शलाका दण्डपत्रैर्वद्धे वर्म्मिता क्रमात् ॥
वर्णभिन्नाभिः तम शुभेषु वर्णभिर्न्नैः।
गुणेषु वर्णभि माघो रक्तिकोनरभिर्भवेत् ॥
सहायचरटत्र मेरशिभी रज्जव क्रमात्।
तत्र छत्रार्थाद्युग्मनाम्नैव दर्शितम् ॥
भानुभिम्यचवसुभिरङ्गुलीभिस्तु कीलकः।
मध्ये दण्डास्तु विलक्षणादेव भूपतेः ॥
यानेन पुरराजस्य पर्य्यङ्गस्तु तन्त्रतः ॥
एतेन रात्रा दण्डो दण्डदक्षः द्वारराजवत् तु
धर्म्मावर्त्ति तत्र।

चित्रदण्डकाण्डस्य तु दण्डकन्दौ
तथा शलाकाश्च अपि सुवर्णरूप्याः ।
रज्जुश्च रक्ता वसनञ्च रक्तं
छत्रप्रधानं नृपतेर्भवन्ति ॥
प्रतापमिति प्रतापादयम्।
नीलो दण्डश्च वस्त्रञ्च शिरः कुम्भस्तु काञ्चनः।
सौवर्णं युवराजस्य प्रतापं नाम विश्रुतम् ॥
चान्द्रनौ दण्डकन्दौ चेत् शुभ्रे रज्जुवाससी।
छत्रं मनोहरं राज्ञां स्वर्णकुम्भोपशोभितम् ॥
शुभ्राणि रज्जुवासांसि स्वर्णकुम्भालयोपरि।
दण्डं कनकजातञ्च छत्रं सर्व्वार्थसाधकम् ॥
तच्चान्द्रशलाकाश्च शुद्धस्वर्णेन निर्म्मिताः।
कीलकं स्वर्णघटितमशुक्ले रज्जुवाससी ॥
कुम्भादिरथ दण्डान्तमपरान्तञ्च यात्रकम्।
कुम्भाग्रञ्च दशाग्रे नवरत्नानि रचयेत् ॥
द्वात्रिंशन्मौक्तिकी माला द्वात्रिंशत्तत्र लम्बयेत्।
सर्व्वोपरि शलाकानां विशुद्धं हीरकं न्यसेत् ॥
दण्डाग्रे कुरुविन्दांश्च पद्मरागांश्च विन्यसेत्।
स्वामिवर्णसमानेन चामरं चित्र इष्यते ॥
इत्थं नवदण्डाख्यमवरालो महीभुजाम्।
अभिषेके विवाहे च यात्रायां प्रीतिवर्द्धनः ॥
पताका नवदण्डाख्ये राज्ञोऽत्याकुलिच मिता।
जय दिग्विजयी नाम छत्रराजो महीभुजाम् ॥"
इति भोजराजकृतयुक्तिकल्पतरुः ॥

छत्रः, पुं, (छद + णिच् + ष्ट्रन् ह्रस्वश्च।) कृष्णेन पत्रेण च यथाकारः। छातारियाचिव। छातगाचिव। गरचिव इति च भाषा। तत्पर्य्यायः। अतिच्छत्र २ छत्रा ३। इति रत्नमाला। भूतृणम्। इति राजनिर्घण्टः ॥

छत्रक, पुं, (छत्रमिव कायति इति। कै + कः।) मत्स्यरङ्गपक्षी। इति शब्दचन्द्रिका। खातिच्छत्रम्। राजा कुलेखाड़ा इति भाषा। इति रत्नमाला। इषदमदर्शिनिश। इति शब्दरत्नावली ॥

छत्रगुच्छ, पुं, (छत्रमिव गुच्छो यस्य।) गुच्छतृणम्। इति राजनिर्घण्टः ॥

छत्रचक्र, क्ली, (छत्राकृति चक्रम्।) चक्रविशेषः। यथा, स्वरोदये छत्रचक्रम्।
"अभिषेकप्रयाणादौ चक्रं छत्रचक्रकम्।
महीपानामथ दैवज्ञ रेखाणामुदयादितः ॥
आग्नेयात् नरधीशो नैव तार्क्ष्य प्रजाधिप।
एवं छत्रविभागेन ज्ञातव्यं शुभाशुभम् ॥
अम्बरे राशी नामर्क्षं यत्र छत्रे तत्र फलम्।
चामरं कुरुते वीक्षा छत्रं दण्ड धनदुमत।
आसनं वाजि रज्जुश्च मित्र प्रकीर्तिता।
यत्र छत्रे स्थितः सौरिः तस्य चित्र संस्थितः ॥
चामरं च ज्ञाना धारणार्थं प्रभावतः।
दुर्भिक्षं भवेत् घोरं प्रचण्डो न संशयः ॥
कल्पये मन्दिरं भद्रा चामरं च शुभम्।
केन्द्रेणाक्षुद्धे मुदारः "इत्यादि ॥
कर्णदत्ता मवात्मा मध्यौला च दण्डा।
दत्ता कर्णदण्डे च दिग्दले स्थिते सम्पूर्णं ॥

तत्र नरो नरेन्द्रत्वमवाप्नोति न संशयः।
आसनस्य भवेन्नाश आसनस्थे शनैश्चरे ॥
युवराजस्य क्षेत्रे च रज्जुसंस्थिते।
सौम्ययुक्तोऽतिसारस्य प्रतिबन्धकरो न हि ॥
वक्रगः क्रूरयुक्तश्च सर्व्वं क्रूरं करोति च।
प्रतिराष्ट्रकृताश्चित्या यदा जीवज्ञशुक्रकाः ॥
उत्तरापोऽथ राज्ञो वै निश्चितं छत्रभङ्गदा
क्रूरं चतुष्टयञ्चैव बुधचन्द्रौ शयुतम् ॥
पूर्व्वफल्गुनिविशाखाश्च तथा वामचतुष्टयम्।
शुक्रेन्दुसंयुते छत्रे दक्षिणे ग्रहसागमे ॥
स्वजम्येषु राष्ट्रेषु सामन्तान् प्रतापान्वितः।
यदा दृष्टान् शौरिर्मया सौम्ययुतो गुरुः ॥
भौमशौ गुरुराहू च रविचन्द्रौ वर्ण मतौ।
यदा हानिकरा नराणां सौम्याः शुभङ्कराः ॥
एतेऽपार्श्वे यदा भाग्ये पदक्रमेण भङ्गदाः।
शुभनामसभो राहुः केतुश्चापि यत्र संस्थितः ॥
छत्रभङ्गो भवत्यस्य विपदा नेम भूपतेः।
स्नानपानाशनयात्रा दुष्टदण्डनादिकम् ॥
विग्रहञ्च प्रवेशस्य छत्रमध्ये क्रूरेश्वरे।
यात्रैव प्राणिक कुम्भान् यदा तो चापत
शुभम् ॥"

छत्रधारः, त्रि, (छत्रं धरतीति। धृ + "कर्म्मण्यण्।" ३।२।१। इत्यण्।) छत्रधरः। छातिधरा इति भाषा। तत्पर्य्यायः। छत्राकरः २। इति हेमचन्द्रः। ३। ३२८। (यथा, पञ्चतन्त्रे। ३। ९०। 'अस्ति च यथा, जननी एषी कञ्चुकी मालिकः प्रधानालक्षः आधा भाग्यसौवर्णादिक भिषक् जलवाहकः तांबूल वाहकः आचार्य्यः अङ्गरक्षकः स्थानचिन्तकः छत्रधारः विलासिनी च ॥)

छत्रपत्र, क्ली, (छत्रमिव पत्रमस्य।) स्थलपद्मम्। इति त्रिकाण्डशेषः ॥

छत्रपत्रः, पुं, (छत्रमिव विस्तृतं पत्रमस्य।) भूर्ज्जपत्रः। इति रत्नमाला। (भूर्ज्जशब्देऽस्य विवृतिर्ज्ञातव्या।) मानकच्चुः। इति वैद्यकम्। सप्तच्छदः। इति च केचित् ॥

छत्रभङ्गः, पुं, (छत्रस्येव रक्षितुः स्वामिनश्छत्रस्य भङ्गो यत्र।) वैधव्यम्। स्वातन्त्र्यम्। नृपनाशः। इति मेदिनी। गे, ५६ ॥

छत्रा, स्त्री, (छत्रमिव आकृतिरस्त्यस्याः। अर्शआदित्वादच्। ततष्टाप्। यद्वा, छादयति भोगैर्विस्तारैरिति। छद + "अमिचिमिदिशसिभ्यः क्त्रः।" उणा। ४। १६३। इति क्त्रः। तत्र विशेष्यस्य स्त्रीत्वविवक्षायां टाप्।) मिश्रेया। मौरी इति भाषा। कुस्तुम्बुरु। धन्या इति भाषा। (यथा —
"सुवर्णपुष्पीबृहतीपत्रैश्चातिसुगन्धिभिः।
तैः शीतं जलं दद्याच्छत्रावर्त्तकलोचनैः।
छत्रा सम्भावितम् ।" इति भावप्रकाशः ।)
शिलीन्ध्रम्। इति मेदिनी। रे, ९८। रक्तवल्ला इति भाषा। अतिच्छत्रा। इति राजनिर्घण्टः ॥
([illegible]

कन्दपं यथा सुश्रुते चिकित्सितस्थाने ३ अः ।
"अथ यक्ष्मणस्थाने चाराछीकन्दसम्भवा ।
सकपवा मदाम्भीमा भिन्नाञ्जनसमप्रभा ।
छत्रातिच्छत्रके विद्यात् रक्षोघ्ने कन्दसम्भवे ।")

छत्राक्, स्त्री, (छत्त्रम् इव कायतीति । कै + क ।) छिन्नाकु । छत्रिका । इति प्रायश्चित्तविवेक ॥ (यथा मनुः । ५ । १९ ।
"छत्राकं विड्वराहञ्च लशुनं ग्रामकुक्कुटम् ।
पलाण्डुं गृञ्जनञ्चैव मत्या जग्ध्वा पतेद्द्विजः ॥")

छत्राक, पुं, (छत्रमिव अकति आच्छादनकार्य्यं गच्छतीति । छत्र + अक् + अच् ।) जलवव्वुरवृक्षः । इति राजनिर्घण्टः ॥

छत्राकी, स्त्री (छत्राक + गौरादित्वात् ङीष् ।) रास्ना । इत्यमरः । २ । ४ । ११५ ॥

छत्रातिच्छत्र, पुं (छत्रमतिक्रम्य छन्ति आच्छादयतीति । अति + छद् + ष्ट्रन् ।) छत्राकारसमीपस्थगन्धसुरभितृणविशेषः । तत्पर्य्यायः । छत्रातिच्छत्रा २ पालघ्न ३ अतिच्छत्रा ४ सुगन्धा ५ छत्रक ६ कटुक ७ कटु ८ । इति शब्दरत्नावली ॥

छत्राधान्य, स्त्री (छत्रा धान्यमिव ।) धन्याकम् । इति राजनिर्घण्टः ॥

छत्रिका, स्त्री (छत्रा एव । छत्रा + स्वार्थे कन् । अत इत्वम् ।) शिलीन्ध्रम् । काँकडछाता इति भाषा । तत्पर्य्यायः । गोमयच्छत्रिका २ दिनीरम् ३ शिलीन्ध्रकम् ४ उच्छ्रयम् ५ पत्रारोहम् ६ गोकाणम् ७ । इति हारावली । छत्राकम् ८ । इति स्मृतिः । उच्छिलीन्ध्रम् ९ । इति वैभाग-सम् । कालविन्दुशालालश्मीनिर्व्यूढस्थिनाया सामान्यगुणाः । शीतलम् । कषायत्वम् । स्वादु-त्वम् । पिच्छिलत्वम् । गुरुत्वम् । छर्द्यतीसार-ज्वरश्लेष्मरोगकारित्वञ्च । पलालच्छत्रिका-गुणाः । स्वादुरसत्वम् । रूक्षत्वम् । दोष-कारित्वञ्च । शुचिस्थानकाष्ठवंशगोस्थानजात-छत्रिकायाः गुणाः । अतिदोषकारित्वम् । अन्य-भूमिकाष्ठभूर्ज्जानां विगर्हिता । इति राजवल्लभः ॥

छत्त्री [न्] पुं (छत्र शीघ्रतादिभिराच्छादनकर्म विद्यतेऽस्य । छत्र + इनि ।) नापितः । इति शब्दरत्नावली । छत्रविशिष्टे, त्रि । यथा,—
"गर्भसूचारे छत्री दण्डी राजाटवीन् च ।"
इति स्मृतिः ।
(यथा च हरिवंशे । ७५३ । ५ ।
"मौञ्जी यज्ञोपवीती च छत्री दण्डी कमण्डली तथा ।
वामनो धूम्रवर्णश्च भगवान् बालरूपधृक् ॥")

छत्वर, पुं (छदति अपवारयति सर्व्वंमाच्छाद-यतीति । छद् अपवारणे + "छित्वरछत्वरेति ।" उणां । ३ । १ । इति ष्वरच् प्रत्ययेन साधुः ।) गृहम् । कुञ्जः । इति सिद्धान्तकौमुद्यामुणादि-वृत्तिः ॥

छद, ञ चु सम्वरणे । इति कविकल्पद्रुमः । (चुरां-पक्षे भ्वां उभ सक सेट ।) छादयति । इति दुर्गादासः । अक्ष्यां दृष्टि । इदि ११ ।

"छदयति सुरलोकं यो गुणैश्च शुद्धैः
सुरयुवतिविलासान्छादयन्ति मनश्च ।")

छद, ञि च संवृतौ । इति कविकल्पद्रुमः । (चुरां-पक्षे भ्वां उभ सक सेट ।) ञि च, छादयति छादयते छदति छदते दिशं मेघः । आच्छादयति इत्यर्थः । इति दुर्गादासः ॥

छद, म ञि च तर्पणे । तर्पणमत्र सौवनम् । इति कविकल्पद्रुमः । (चुरां-पक्षे भ्वां उभ-सक-सेट ।) छदयति पुत्रं पिता । जीवयति बलवन्तं करोति वा इत्यर्थः । इति दुर्गादासः ॥

छद, पुं, (छदति आच्छादयतीति । छद + अच् ।) पत्रम् । (यथा, रामायणे । ३ । ५५ । ६ ।
"ततो न्यग्रोधमासाद्य महान्तं हरितच्छदम् ।")
पक्षः । पक्षिपक्षच्छदः । तमालवृक्षः । इति मेदिनी । द, ५ ॥

छदन, क्ली, (छदति आच्छादयतीति । छद + ल्यु ।) पत्रम् । पक्षः । (यथा, महाभारते । ३ । १५८ । ६९ ।
"विमलस्फाटिकाभानि पाण्डरच्छदनैर्द्विजैः ।
कलहंसैरुपेतानि सारसाभिरुतानि च ॥"
छद + भावे ल्युट् ।) पिधानम् । इति मेदिनी । ने ६५ ॥ तमालपत्रम् । इति राजनिर्घण्टः । तेजपात इति भाषा ॥

छदपत्र, पुं (छदानि आच्छादकानि पत्राणि यस्य ।) भूर्जपत्रवृक्षः । इति कश्चित् रत्नमाला ॥

छदिः [स्] क्ली, (छादयतीति छाद्यतेऽनेन वा । छद + णिच् + "अर्च्चिशुचिहुसृपिछादि-छर्द्दिभ्य इसिः ।" उणां । २ । १०९ । इति इसिः । "इस्मन्त्रन्क्विषु च ।" ६ । ४ । ९७ । इति ह्रस्वः ।) पटलम् । इत्यमरः । २ । २ । १४ ॥ (यथा भागवते । ७ । १४ । १९ ।
"लमितिश भमानिश्राज़ कैश्च सुखद् कलेवरम् ।
क सम्यग्रतिभाष्येः कायमाला नभश्छदिः ॥")

छद्म, [न्] क्ली, (छादयति आवृणोति स्वरूपमनेनेति । छद + "सर्व्वधातुभ्यो मनिन् ।" उणां । ४ । १४४ । इति मनिन् ।) व्याजः । (यथा, रघुः । १२ । २ ।
"तं कर्णमूलमागत्य रामे श्रीर्न्यस्यतामिति ।
कैकेयीशङ्कयेवाह पलितच्छद्मना जरा ॥")
कपटः । शाठ्यम् । अपदेशः । स्वरूपाच्छादनम् । इति मेदिनी । ने ६४ ॥

छद्मतापस, पुं (छद्मना कपटेन तापसः । अप-हतनावकीलतया एकान्तं तपस्विनम् ।) एकलवणो । तत्पर्य्यायः । धर्म्माभिमानी २ वैडालव्रतिकः ३ विडालव्रती ४ । इति शब्दरत्नावली ॥

छद्मिका, स्त्री, (छद्म अस्त्यस्याः । अर्श आदि-त्वात् अच् स्वार्थे कन् टाप् च ।) गुडूची । इति राजनिर्घण्टः ॥

छन्द, पुं (छन्दयति इति । छन्द + णिच् + अच् ।) अभिप्रायः । (यथा रामायणे । २ । ९ । ७ ।
"यदि त्वहं भवेयं ते छन्दो विनाशिनम् ।
सुमित्राभिरापकः सुतो नैवस्थितिमिति ।")
वशः । इत्यमरः । ३ । ३ । ८८ ॥ अभिलाषः । इति भरतः ॥ विषम् । इति शब्दचन्द्रिका । इति मेदिनी । इत्यमरटीकासारसुन्दरी ॥

छन्दः, [स्] क्ली, (छन्दयति आह्लादयतीति छन्द्यतेऽनेन वा । चदि आह्लादे + "चन्देरादेश्च छः ।" उणां । ४ । २१८ । इति असुन् च्छश्च ।) वेदः । (यथा रघुः । १ । ११ ।
"आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ।")
स्वैराचारः । अभिलाषः । (यथा महाभारते । १२ । ७१ । १२ ।
"कामाभकाम्यन्दति कर्म्मयोगात्
एभिश्छन्दोगुण परमनुशील ।")
पद्यम् । इति मेदिनी । से २२ । तत्र छन्दो-लक्षणं यथाह गङ्गादासः ।
"पद्यं चतुष्पदी तच्च वृत्तं जातिरिति द्विधा ।
वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ।
सममर्द्धसमं वृत्तं विषमञ्चेति तत्त्रिधा ।
समं समचतुष्पादं भवत्यर्द्धसमं पुनः ।
आदिस्तृतीयवद्यस्य पादस्तुर्य्यो द्वितीयवत् ।
भिन्नचिह्नचतुष्पादं विषमं परिकीर्त्तितम् ॥"
एतन्मते । अक्षरसङ्ख्यातं अक्षरगणनया नियतं यस्य वृत्तम् । मात्राकृता मात्रागणनया नियमिता जातिश्चतुर्विंशतिका भवन्ति । सम-समचतुष्पादम् । अर्द्धसमं यस्य प्रथम-तृतीयौ पादौ तुल्यौ चतुर्थपादौ द्वितीयेन पादेन तुल्यौ । विषमं पृथक्लक्षणचतुष्पादम् । (तत्र समवृत्तानां एकाद्यक्षरपादत्रयं वा विंशतिप्रकारकम् । यदुक्तं छन्दोमञ्जर्य्याम् ।
"आरभ्यैकाक्षरात् पादादेकैकाक्षरवर्द्धितैः ।
पादैरुक्तादिसंज्ञं स्याच्छन्दः षड्विंशतिं गतम् ।
उक्थात्युक्था तथा मध्या प्रतिष्ठान्या सुप्रतिष्ठा ।
गायत्र्युष्णिगनुष्टुप् च बृहती पङ्क्तिरेव च ।
त्रिष्टुप् च जगती चैव तथातिजगती मता ।
शक्वरी सातिपूर्व्वा स्यादष्ट्यत्यष्टी ततः स्मृते ।
धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ।
विकृतिः सङ्कृतिश्चैव तथाभिकृतिरुत्कृतिः ।"
छन्दोमञ्जर्य्यामिहापि इह । यदुक्तं —
"म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥
मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ।
गुरुरेको गकारस्तु लकारो लघुरेककः ।
क्रमेण चैषां रूपाणि भण्यन्ते रचनी यथा ।"
म ऽऽऽ, न ।।।, भ ऽ।।, य ।ऽऽ, ज ।ऽ।,
र ऽ।ऽ, स ।।ऽ, त ऽऽ।, ग ऽ, ल ।)
छन्दस्तु नानाविधम् । तत्र तस्य भेदाः
निर्णीतविषयग्रन्थाः छन्दोमञ्जर्य्यादयः
आधुनिक ग्रन्थाः पेऊ छन्दःसमुद्रादयश्च
शास्त्रेष्वोक्ता लिख्यन्ते ।

छन्द, ञ चु संवरणे । इति कविकल्पद्रुमः । (चुरां-पक्षे भ्वां उभ सक सेट ।) छन्दयति । इति दुर्गादासः ॥ छन्द कविकल्पद्रुमे । १६ ।

छन्दसां इतिनामानि ।	छन्दसां लक्षणानि ।	छन्दसामुदाहरणानि ।
एकाक्षरा इति । उक्था ।		
श्रीः	गः श्रीः ऽ	श्रीर्से । पायात् ॥
द्व्यक्षरा इति । अत्युक्था ।		
स्त्री	गौ स्त्री ऽ,ऽ	गोपस्त्रीभिः । कृष्णो रेमे ॥
त्र्यक्षरा इति । मध्या ।		
नारी	मो नारी ऽऽऽ	गोपालो नारीभिः । क्रीडोऽव्यात् कृष्णो वः ॥
मृगी	रो मृगी ऽ।ऽ	सा मृगीलोचना । राधिका श्रीपतेः ॥
चतुरक्षरा इति । प्रतिष्ठा ।		
कन्या	ग्मौ चेत् कन्या ऽ,ऽऽऽ	भास्वत्कन्या सैका धन्या । यस्याः कूले कृष्णोऽखेलत् ॥
सती	नगि सती ।।।,ऽ	सुरसिपो । नव मदम् । भ्रमति या मधु सती ॥
पञ्चाक्षरा इति । सुप्रतिष्ठा ।		
पङ्क्तिः	भगौ गिति पङ्क्तिः ऽ।।,ऽ,ऽ	कृष्णसनाथा तर्णकपङ्क्तिः । यामुनकच्छे चारु चचार ॥
प्रिया	सलगैः प्रिया ।।ऽ,।,ऽ	प्रमदाभुवो विभवद्युधा । अभवत् प्रिया सुरवैरिणः ॥
षडक्षरा इति । गायत्री ।		
तनुमध्या	त्यौ चेत् तनुमध्या ऽऽ।,।ऽऽ	मणिमयमणीरवहुतल्पा । भाति मम चित्ते नित्यं तनुमध्या ॥
शशिवदना	शशिवदना न्यौ ।।।,।ऽऽ	शशिवदनानां व्रजतरुणीनाम् । अधरसुधोर्मिं मधुरिपुरैच्छत् ॥
सोमराजी	द्वियः सोमराजी ।ऽऽ,।ऽऽ	हरे । सोमराजीनिभा ते यशःश्रीः । जगन्मण्डलस्य क्षिपत्यन्धकारम् ॥
विद्युल्लेखा	विद्युल्लेखा मो मः ऽऽऽ, ऽऽऽ	
वसुमती	त्सौ चेद् वसुमती ऽऽ।,।।ऽ	
सप्ताक्षरा इति । उष्णिक् ।		
मधुमती	ननगि मधुमती ।।।,।।।,ऽ	रविदुहितृतटे नवकुसुमततिः । अधित मधुमती मधुमथनमुदम् ॥
कुमारललिता	कुमारललिता ज्सगाः ।ऽ।,।।ऽ,ऽ	मुरारितनुकाञ्जी कुमारललिता का । व्रजेन्दुवदनानां मनांसि मुमुहे ॥
मदलेखा	मसौ गः स्यात् मदलेखा ऽऽऽ,।।ऽ,ऽ	रङ्गे बाहुविलासाद्गोपीभ्रान्तविलेखा । श्यामाभ्रूरयमीन्ते कस्तूरीमदलेखा ॥
हंसमाला	सरौ गैर्हंसमाला ।।ऽ,ऽ।ऽ,ऽ	
अष्टाक्षरा इति । अनुष्टुप् ।		
चित्रपदा	चित्रपदा यदि भौ गौ ऽ।।,ऽ।।,ऽ,ऽ	यामुनसैकतदेशे गोपवधूजनकेलौ । कंसरिपोरतिलीला चित्रपदा प्रतनोतु ॥
माणवकम्	भात्तलगा माणवकम् ऽ।।,ऽऽ।,।,ऽ	चञ्चलचूडं चपलैर्वत्सकुलैः केलिपरम् । ध्याय सखे स्मेरमुखं नन्दसुतं माणवकम् ॥
माणवकक्रीडितमिति केचित् ।		
विद्युन्माला	मो मो गो गो विद्युन्माला ऽऽऽ,ऽऽऽ,ऽ,ऽ	वासो वल्ली विद्युन्माला बर्हश्रेणी शक्रश्चापम् । यस्मिन्नास्ते मायाविष्टो गोमध्यस्थः श्यामाम्भोदः ॥
समानिका	ग्लौ रजौ समानिका तु ऽ,।,ऽ।ऽ,। ।	यस्य कृष्णपादपद्ममस्ति हृत्तडागसद्म । धीः समानिका परेण नोचिताऽत्र मत्सरेण ॥
प्रमाणिका	प्रमाणिका जरौ लगौ ।ऽ।,ऽ।ऽ,।,ऽ	पुनातु भक्तिरच्युता सदाच्युताङ्घ्रिपद्मयोः । श्रुतिस्मृतिप्रमाणिका भवाम्बुराशितारिका ॥
नगस्वरूपिणी इति कुत्रापि ।		
गजगतिः	नभलगा गजगतिः ।।।,ऽ।।,।,ऽ	रविसुतापरिसरे विहरतो दृशि हरेः । व्रजवधूगजगतिर्मुदमलं व्यतनुत ॥
हंसरुतम्	म्नौ गौ हंसरुतमेतत् ऽऽऽ,।।।,ऽ,ऽ	
नाराचिका	नाराचिका तरौ लगौ ऽऽ। ऽ।ऽ,।,ऽ	
नवाक्षरा इति । बृहती ।		
भुजगशिशुभृता	भुजगशिशुभृता नौ मः ।।। ।।,ऽऽऽ	हरचरणसरसीरुहे भुजगशिशुभृता यात्रैः । सुरसरिदिव ... ॥
अन्यैश्च भुजगशिशुसृतेति च केचित् ।		

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणानि।	छन्दसामुदाहरणानि।
मणिमध्यम्	स्यान्मणिमध्यं चेद्भमसाः ऽ||,ऽऽऽ,||ऽ	कालियभोगाभोगगतस्तन्मणिमध्यस्फीततनुः। चित्रपदाभो नन्दसुतश्चारु ननर्त स्मेरमुखः॥
भुजगशिशुसृता	सन्रैर्भुजगशिशुसृता ||ऽ,|ऽ|,ऽ|ऽ	सरसा सरन्ध्रविशिखैर्वनिता गजगामिनी। मधुमत्तचारुशिखरामधरं तरुणं वरम्॥
हलमुखी	रान्नसाविह हलमुखी ऽ|ऽ,|||,||	
भद्रिका	भद्रिका भवति रौ नरौ |||,ऽ|	
दशाक्षरा वृत्तिः। पङ्क्तिः।		
रुक्मवती	रुक्मवती सा यत्र भमसगाः ऽ||,ऽऽऽ,||ऽ,ऽ	कायमनोवाक्यैः परिशुद्धैर्यस्य सदा कंसारिपदे भक्तिः। राज्यपदे रुक्मालिहृदारा रुक्मवती किं तस्य गृहे॥
रूपवती क्वचित्। चम्पकमाला इति क्वापि।		
मत्ता	ज्ञेया मत्ता मभसगयुक्ता ऽऽऽ,ऽ|| ||ऽ,ऽ	भीता मत्ता मधु मधुपाली कालिन्दीये तटवनकुञ्जे। उद्दीव्यन्तीं व्रजवनरामा कामासक्ता मधुजिति चक्रे।
त्वरितगतिः	त्वरितगतिश्च नजनगैः |||,|ऽ|,|||,ऽ	त्वरितगतिर्व्रजयुवतिस्तरणिसुताविपिनगता। सुररिपुणा रतिगुरुणा मदिरमिता प्रमदमिता॥
मनोरमा	नरजगैर्भवेन्मनोरमा |||,ऽ|ऽ,|ऽ|,ऽ	सरसिजातदृष्टिविहारिणी व्रजविलासिनी विलासतः। सुररिपोरलं प्रभातु वः सुखतयाखिला मनोरमा॥
शुद्धविराट्	म्सौ ज्गौ शुद्धविराडिदं मतम् ऽऽऽ,||ऽ,|ऽ|,ऽ	
पणवम्	म्नौ य्गौ चेति पणवनामेदम् ऽऽऽ,|||,|ऽऽ,ऽ	
मयूरसारिणी	र्जौ र्गौ मयूरसारिणी स्यात् ऽ|ऽ,|ऽ|,ऽ|ऽ,ऽ	
उपस्थिता	तो ज्जौ गुरुणेयमुपस्थिता ऽऽ|,| |,|ऽ|,ऽ	
दीपकमाला	दीपकमाला भमौ ज्गौ ऽ||,ऽऽऽ,|ऽ|,ऽ	
हंसी	ज्ञेया हंसी मभनगगुरुः ऽऽऽ,ऽ|| ||| ऽ	
एकादशाक्षरा वृत्तिः। त्रिष्टुप्।		
इन्द्रवज्रा	स्यादिन्द्रवज्रा यदि तौ जगौ गः ऽऽ|, |,|ऽ|,ऽ,ऽ	गोष्ठे गिरिं सव्यकरेण धृत्वा रुष्टेन्द्रवज्राहतिमुक्तवृष्टौ। यो गोकुलं गोपकुलस्य सुस्थं चक्रे स नो रक्षतु चक्रपाणिः।
उपेन्द्रवज्रा	उपेन्द्रवज्रा जतजास्ततो गौ |ऽ|, ऽऽ|,|ऽ|,ऽ,ऽ	उपेन्द्रवज्रादिमणिच्छटाभिर्विभूषणानां छुरितं वपुस्ते। स्मरामि गोपीभिरुपास्यमानं सुरद्रुमूले मणिमण्डपस्थम्॥
उपेन्द्रवज्रा इन्द्रवज्रयोश्चरणघटिता उपजातयः। तास्तु चतुर्दशप्रस्तारभेदाच्चतुर्दशप्रकारा भवन्ति।	अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः। इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम॥	
सुमुखी	ननजलगैर्गदिता सुमुखी |||,|ऽ|,|ऽ|,| ऽ	नरविसुगात्रकृशाङ्गदृशे वरमितिराधिकमीन्दुमुखि। निमिषमतिर्न सुखं सुमुखी हरिमनुयाहि कुरुष्व हितम्॥
शालिनी	मात्तौ गौ चेच्छालिनी वेदलोकैः ऽऽऽ,ऽऽ| ऽऽ|,ऽ,ऽ	यद्वा चैनं भ्रामरीभिर्विकीर्णं धर्मध्वान्तं कामसञ्चारहर्षम्। मुक्तिद्वारं मन्दिरोत्सवमाला दृष्टा सुश्यामा शालिनी विष्णुभक्तिः॥
अन्त्याच्चतुर्थे तत सप्तमे च यतिः।		
वातोर्मी	वातोर्मीयं गदिता म्भौ तगौ गः ऽऽऽ,ऽ||,ऽऽ|,ऽ,ऽ	भ्राता यापि यमुनाकूलकुञ्जे दृष्टो राधां मन्दिरं नन्दनस्य। कान्तारे यामिनि दुर्गं वनं दुर्गं वातोर्मीभिर्मधुमासे वसन्ते॥
भ्रमरविलसिता	म्भौ न्लौ गो भ्रमरविलसिता ऽऽऽ,ऽ,|||,|||,ऽ	सुभ्रु! मानं परिहर न चिरात्तारुण्यं ते खलु मदकरम्। पुष्पसमं भ्रमरविलसिताभं यौवनं तव लसति न हि चिरम्॥
भ्रमरविलसितमिति केचित्।		
अनुकूला	स्यादनुकूला भतनगगाश्चेत् ऽ||,ऽऽ|,|||,ऽ,ऽ	यद्यपि वृन्दा सुरतरुकुञ्जे स्वच्छमनोज्ञे गिरितटदेशे। वल्लवयोषिन्मधुरिपुरङ्गे साकमनङ्गे विलसति हृष्टा॥
रथोद्धता	रान्नराविह रथोद्धता लगौ ऽ|ऽ,|||,ऽ|ऽ,|,ऽ	राधिका दधिविलोडनस्थिता कृष्णवेणुनिनदैरथोद्धता। यामुनं तटनिकुञ्जमञ्जसा सा जगाम सलिलाहृतिच्छलात्॥
स्वागता	स्वागता रनभगैर्गुरुणा च ऽ|ऽ,|||,ऽ|| ऽ,ऽ	यस्य चेतसि सदा हरिरेकः स्वागतानि सकलानि च तस्य। तस्य भूतगणमाणवभाजां मङ्गलानि सततं हरये च॥

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणानि ।	छन्दसामुदाहरणानि ।
दोधकम्	दोधकमिच्छति भत्रितयाद्गौ ऽ।।,ऽ।।,ऽ।।,ऽ,ऽ	देव । सरोधकरमतमस्य । मीपर । सारकनामपद मे । कस्तवमसुविनिगमकार्थे स्वल्पमपि चलनेष्यति योगम् ॥
मोटनकम्	स्यान्मोटनकं तजजाश्च लगौ ऽऽ।,।ऽ।,।ऽ।,।,ऽ	रङ्गे खलु मल्लकलाकुशलचाणूरमहाभटमोटनकम् । यः केलिलवेन चकार स मे सर्वार्तिं प्रतिमोटयतु ॥
श्येनी श्येनिका इति क्वचित् ।	श्येनिकेरिता रजौ रलौ गुरुः ऽ।ऽ,।ऽ।,ऽ। ,।,ऽ	यस्य कीर्तिरिन्दुकुन्दचन्दनप्रस्थलोकपावनी सदा । याद्दवीत विश्ववन्द्यविभ्रमा तं भजामि भावगम्यमच्युतम् ॥
[illegible]	वातोर्मी स्यात् भतनगैः [illegible] ऽ।।,ऽऽ।,।।।,ऽ,ऽ	
वृत्ता	[illegible]गुरुरन्विता वृत्ता ।।।,।।।,।।ऽ,ऽ,ऽ	
भद्रिका	ननरलगुरुभिश्च भद्रिका ।।।,।।।,ऽ।ऽ,।,ऽ	
मौक्तिकमाला	मौक्तिकमाला यदि भतनात् गौ ऽ।।,ऽऽ।,।।।,ऽ,ऽ	
उपस्थितम्	उपस्थितमिदं जसौ ताद् गकारौ ।ऽ।,।।ऽ,ऽऽ।,ऽ,ऽ	
उपचित्रम्	उपचित्रमिदं सससाल्लगौ ।।ऽ,।।ऽ,।।ऽ,।,ऽ	
कुपुरुषजनिता	कुपुरुषजनिता ननौ रगौ च ।।।,।।।,ऽ।ऽ,ऽ,ऽ	
अनवसिता	अनवसिता न्यौ भगौ गुरुरन्ते ।।।,।ऽऽ,ऽ।।,ऽ,ऽ	
विम्बुमाला	विम्बुमाला भवतौ तगौ गः ऽऽ।,ऽऽ।,ऽऽ।,ऽ,ऽ	
[illegible]	[illegible] ऽ।।,ऽऽ।,।।।,ऽ,।	
प्रिसखिलतम्	प्रिसखिलतमिदं जसौ तगौ गुरुश्चेत् ।ऽ।,।।ऽ,ऽऽ।,ऽ,ऽ	
द्वादशाक्षरा वृत्तिः । जगती ।		
चन्द्रवर्त्म	चन्द्रवर्त्म निगदन्ति रनभसैः ऽ।ऽ,।।।,ऽ।।,।।ऽ	चन्द्रवर्त्मनि पिहित घनतिमिरे राजवर्त्मनि रहित जनगमने । इष्टकर्म तनुकुरु सरले । कुञ्जवसति हरिरिह कुसुमे ॥
वंशस्थविलम् वंशस्तनितमिति क्वापि ।	वदन्ति वंशस्थविलं जतौ जरौ ।ऽ।,ऽऽ।,।ऽ।,ऽ।ऽ	विलासवंशस्थविलं सुधाविले मधून्य यः पञ्चमरागमीरयन् । व्रजाङ्गनानामपि गायताम्बिकां जहार मानं स हरिः पुनातु वः ।
इन्द्रवंशा वंशस्थविलेन्द्रवंशयोरभेदर्शना चतुर्णां प्रकारोपादात्मवृत्ति[illegible] चतुर्दशप्रकारा उपजातयो भवन्ति।	स्यादिन्द्रवंशा ततजै रसंयुतैः ऽ।, ऽ।,।ऽ।, ।ऽ	दैत्येन्द्रवंशाग्निरुदीर्णदीधिति पीताम्बरोऽसौ जगतां तमोपहः । यस्मिन् ममज्जुः शलभा इव स्वयं ते कंसचाणूरमुखा मखद्विषः ।
जलोद्धतगतिः	जसौ जसयुतौ जलोद्धतगतिः ।ऽ।,।।ऽ,।ऽ। ।।ऽ	[illegible] [illegible] जलोद्धतगति । विभाति [illegible] करोतु कुशलं हरिः स भवताम् ।
भुजङ्गप्रयातम्	भुजङ्गप्रयातं चतुर्भिर्यकारैः ।ऽऽ ।ऽऽ,।ऽऽ ।ऽऽ	[illegible] विहाय [illegible] । [illegible] [illegible] ।
तोटकम्	इह तोटकमम्बुधिसैः प्रथितम् ।।ऽ,।।ऽ,।।ऽ,।।ऽ	[illegible] [illegible] । [illegible] [illegible] ।
स्रग्विणी	कीर्तितैषा चतूरेफिका स्रग्विणी ऽ।ऽ,ऽ।ऽ, ऽ।ऽ,ऽ।ऽ	[illegible] [illegible] । [illegible] [illegible] स्रग्विणी ।
वैश्वदेवी	वाणाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ऽऽऽ ऽऽऽ,। ऽऽ,।ऽऽ	[illegible] [illegible] । [illegible] [illegible] वैश्वदेवी ।

छन्दसां इति नामानि।	छन्दसां लक्षणानि।	छन्दसामुदाहरणानि।
प्रमिताक्षरा	प्रमिताक्षरा सजससैः कथिता ।।ऽ,।ऽ।,।।ऽ,।।ऽ	धन्दतस्य शीकरमिषेद्रतो रम्मौक्तिकोत्तमहरीक्षरिता। प्रमिताक्षरा सुररियामुदित- मञ्जुभुवामभिजहार मनः ॥
द्रुतविलम्बितम्	द्रुतविलम्बितमाह नभौ भरौ ।।। ऽ।।,ऽ।।,ऽ।ऽ	तरणिजापुलिने नवबल्लवी परिषदा सह केलिकुतूहलात्। द्रुतविलम्बितचारुविहारिणं हरिमहं हृदयेन सदा वहे ॥
मन्दाकिनी	ननररघटिता तु मन्दाकिनी ।।।,।।।,ऽ।ऽ,ऽ।ऽ	मणिकनकमयी सभा यमुना प्रवहमनिह यत्र मन्दाकिनी। सुरनिकरविधानुसर्वाभा हरतु जगदघं स पीताम्बरः ॥
कुसुमविचित्रा	नयसहितौ न्यौ कुसुमविचित्रा ।।।,।ऽऽ,।।।,।ऽऽ	विपिनविहारे कुसुमविचित्रा कृतकिसलयोत्तमहितचरित्रा। मुररिपुमतिमुदितसङ्गा चिरमवतानुतसङ्गतमा ॥
तामरसम्	इह वद तामरसं नजजा यः ।।।,।ऽ।,।ऽ।,।ऽऽ	स्फुरदुरुसामकरन्दमनोज्ञं व्रजनववधूनयनालिनिपीतम्। तव मुखतामरसं मुरशत्रो! हृदयतडागविकासि ममास्तु ॥
मालती यमुनेति क्वापि।	भवति नजावथ मालती जरौ ।।।,।ऽ।,।ऽ।,ऽ।ऽ	इह कलयाच्युत केलिकानने मधुरससौरभसारलोलुप। कुसुमकृताञ्जलिचारुविभ्रमा मणिरपि चुम्बति मालती शुभं ॥
मणिमाला षड्भिर्यतिः।	त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः ऽऽ।,।ऽऽ,ऽऽ।,।ऽऽ	प्रह्लादनमौली रत्नोपमहारैः बालप्रतिबिम्बा शोभा मणिमाला। गोविन्दपदाब्जे राजी नखराणां सान्द्री मम चित्ते ध्वान्तं प्रशमय्यात् ॥
जलधरमाला चतुर्भिश्चाब्धिभिर्यतिः।	म्भौ स्मौ चेज्जलधरमालाब्ध्यङ्गैः ऽऽऽ ऽ।।,।।ऽ,ऽऽऽ	या भक्तानां कलिदुरितोत्तप्तानां तापच्छेदे जलधरमाला नव्या। भव्याकारा दिनकरपुत्रीकूले केलीलोला हरि- … ॥
प्रभा प्रमुदितवदना प्रभेति मन्दाकिन्यपि। गौरीति	वसुयुगविरतिर्नौ म्रौ … ।।।,… प्रमुदितवदना भवेन्नौ च रौ ।।।,।।…	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणानि ।	छन्दसामुदाहरणानि ।
मोटकम्	मोटकनाम समकभभौरय 211,211,211,211	
सरलनयनम्	परिलघु सरलनयनमिद 1111111111	
त्रयोदशाक्षरा वृत्तिः । अतिजगती।		
प्रहर्षिणी त्रिभिर्दशभिश्च यतिः ।	त्र्याशाभिर्मनजरगा प्रहर्षिणीयम् 222,111,121,212,2	गोपीनामधरसुधारसस्य पानै रुत्तुङ्गस्तनकलशोपगूहनैश्च । आश्चर्यैरपि रतिविभ्रमैर्मुरारेः संसारे मतिरभवत् प्रहर्षिणीह ॥
रुचिरा चतुर्भिर्नवभिश्च यतिः ।	जभौ सजौ गिति रुचिरा चतुर्ग्रहैः 121,211,112,121,2	पुनातु वो हरिरनिशं वनेऽभ्रमन् परिभ्रमन् व्रजरुचिराङ्गनान्तरे । समीरणोल्लसितलताग्रहालयो यथा मरुत्तरलतमालभूरुहः ॥
मत्तमयूरः चतुर्भिर्नवभिश्च यतिः ।	वेदैरन्ध्रैर्म्तौ यसगा मत्तमयूर 222,221 122,112,2	लीलानृत्यन्मत्तमयूरध्वनिरम्यं शृङ्गारीयामोन्नियमेनाभिनरम्यम् । कामक्रीडाकृष्टमना गोपवधूभिः कंसध्वंसी निर्जगृहे वृन्दावनमाप ॥
चण्डी	नयुगलसयुगलगैरिति चण्डी 111,111,112,112,2	जयति दितिजरिपुबाहुबलीला कुमितकमलकरकालियमौलौ । चरणकमलयुगचापलचण्डी मदनसरभिविलसभोगमणिश्रीः ॥
मञ्जुभाषिणी सुनन्दिनीति प्रभाः	सजसा जगौ च यदि मञ्जुभाषिणी 112,121,112,121,2	अमलोर्मिशीतलशरीरलालय- त्तनुकान्तिचोदितविनोदनो हरे । नियत कलानिधिरवीति भक्तो सुरमध्युत वचित मञ्जुभाषिणी ॥
चन्द्रिका उत्पलिनीति क्वापि। विद्युदिति चलेति च क्वापि। सप्तभिः षड्भिश्च यतिः ।	ननततगुरुभिश्चन्द्रिकाश्वर्तुभि 111,111,221,221,2	शरदमलतचन्द्रिकाभासिते न्निकरतरमयातीरदेशे हरिः । विहरति रमणाङ्गनाभिः समं त्रिनियुक्तिभिः कोऽपि देवो यथा ॥
कलहंसः सिंहनादः क्वापि ।	सजसाः सगौ च कथितः कलहंस 112,121,112 112 2	यमुनाविहारकुतुके कलहंसो व्रजकामिनीकमलिनीनतजेता । जनचित्तहारिकलकण्ठनिनादः प्रमदं तनोतु तव नन्दतनूजः ॥
प्रबोधिता	सजसा जगौ च भवति प्रबोधिता 112,121,112 121,2	प्रथिता मया चटलमानविद्या रतिकेलिकुञ्जनिलये विलासिनी । सुरवैरिणा अन्नयुमनान्विता जितमातनाम यदि प्रबोधिता ॥
मृगेन्द्रमुखम्	भवति मृगेन्द्रमुखं नजौ जरौ गः 111,121,121,212,2	गुरुभुजवीर्यभरं हरिं मनाप्या युधि यदुदेश्च न दानवा निषेदुः । अधिगतवीन्द्रमुखं यथा उन्मत्ते न तु यतु विद्यति कोऽपि कामम् ॥
चञ्चरीकावली	यमौ रौ विख्याता चञ्चरीकावली गः 122,222 212 212,2	
चन्द्ररेखा	नयरयुगलैश्चन्द्ररेखालोके 111,122 212,212,2	
कन्दुकम्	इदं कन्दुक यत्र येभ्यश्चतुर्भिर्गः 122,122,122 122 2	
मृगेन्द्रमुखम्	भवति मृगेन्द्रमुख नजौ जरौ गः 111,121 121 212,2	
उपस्थितम्	उपस्थितमिदं जसौ तसौ यदि गुरुः स्यात् 121,112 221,112	
मञ्जुहासिनी	जतौ सजौ गो भवति मञ्जुहासिनी 121,221 112,121,2	
नन्दिनी	इह नन्दिनी सजसजैर्गुरुयुक्ते 112,121,112,112,2	

छन्दसां वृत्तिनामानि।	छन्दसां लक्षणानि।	उदाहरणानि।
कुटजगतिः	कुटजगतिर्नजौ नसगुरू गुरुः III,ISI,S S,SSI,S	
प्रभावती।	यस्याः प्रिये। प्रथमकमक्षरद्वयं तुर्यं तथा गुरु नवमं द्वयाश्रितम्। सान्त्य भवेद्दशमपि चेद्गुरुद्वयं सा लक्षणाभिमतरुचे। प्रभावती॥	
चतुर्दशाक्षरा वृत्तिः। शक्वरी। असम्बाधा पञ्चभिर्नवभिश्च यतिः।	मो मो गो गो म असम्बाधा... S,S S S,III,III,SSS	वीर्याग्नौ येन ज्वलति रणवशात् क्षिप्रे दैत्येन्द्रे जाता धरणिरियमसम्बाधा। धर्मस्थित्यर्थं प्रकटिततनुसम्बन्धः साधूनां बाधां प्रशमयतु स कंसारिः।
वसन्ततिलकम् अष्टाभिः षड्भिश्च यतिः। सिंहोन्नता चापि। सिंहोन्नता इति काश्यपः। उद्धर्षिणी इति सैतवः।	ज्ञेयं वसन्ततिलकं तभजा जगौ गः SSI,SII,ISI,ISI,S,S	फुल्लं वसन्ततिलकं तिलकं वनाल्या लीलापरं पिककुलं कलमत्र रौति। वात्येष पुष्पसुरभिर्मलयाद्रिवातो यातो हरिः स मधुरां विधिना हता हा।
अपराजिता सप्तभिर्यतिः।	ननरसलघुगैः स्वरैरपराजिता III,III,SIS,IIS,I,S	[illegible] [illegible] स्वरैरपराजिता। [illegible] स जयति [illegible]।
प्रहरणकलिका सप्तभिः सप्तभिः।	ननभनलगिति प्रहरणकलिका III,III,SII III,I,S	[illegible] कलिका प्रमदवनभवा तव धनुषि तथा। [illegible] मे प्रहरणमिव नो मधुमथन [illegible]॥
वासन्ती	मात्तो नो मो गौ यदि गदिता वासन्तीयम् SSS,SSI,III,SSS,S,S	[illegible] [illegible]। [illegible] [illegible] वासन्तीयम्॥
लोला अष्टभिः षड्भिर्यतिः।	[illegible] लोला मसौ भौ गौ [illegible] SSS,IIS,SSS SII,S,S	[illegible] लोला [illegible]। [illegible] [illegible]॥
नान्दीमुखी अष्टाभिः षड्भिर्यतिः।	[illegible] नान्दीमुखी [illegible] III,III,SI,SSI,S,S,	[illegible] [illegible]। [illegible] [illegible]॥
इन्दुवदना	इन्दुवदना भजसनैः सगुरुयुग्मैः SII ISI IIS,III,S S	
नदी सप्तभिर्यतिः।	ननतजगुरुभिः सप्तयतिर्नदी स्यात् III,III,SSI,ISI,S,S	
अलोला	[illegible] मसौ तभौ गुरुयुग्मम् SSS,IIS,SSI,SII S,S	
मणिगुणम्	[illegible] मणिगुणम् III,III,III,III S,S	
मध्यक्षामा	मध्यक्षामा [illegible] म्भौ न्यौ गौ S S,SII,III III S S	
कुटिलम्	[illegible] कुटिलं [illegible] गौ IIS,SII,III,ISS,S,S	
प्रमदा	[illegible] प्रमदा III,SII,ISI,I S	

छन्दसां वृत्तिनामानि ।	छन्दसां लक्षणानि ।	छन्दसामुदाहरणानि ।
मञ्जरी पञ्चमे नवमे च यतिः ।	सजसा यलौ गिति चरच्छैर्मञ्जरी ।।ऽ ।ऽ। ,।।ऽ,।ऽऽ,।,ऽ	
कुमारी अष्टमे नवमे च यतिः ।	नजभजगैर्गुरुश्च वसुग्रह कुमारी ।।।,।ऽ।,ऽ।।,।ऽ। ऽ,ऽ	
सुकेसरम्	नरनरैर्लगौ च रचितं सुकेसरम् ।।।,ऽ।ऽ,।।।,ऽ।ऽ,।,ऽ	
चन्द्रौरसः	म्भौ न्यौ लगौ चेदिह भवति च चन्द्रौरसः ऽऽऽ,ऽ।।,।।।,।ऽऽ । ऽ	
चक्रपदम्	चक्रपदमिह भननगनगुरुभिः ऽ।।,।।। ।।। ।।।,।,ऽ	
वासन्ती	वासन्तीयं ख्यातिह खलु मतौ न्यौ गौ चेत् ऽऽऽ,ऽऽ।,।।।,।ऽऽ,ऽ,ऽ	
पञ्चदशाक्षरा वृत्तिः । अतिशर्करी ।		
शशिकला	गुरुनिधनमनुलघुरिह शशिकला ।।।।।।।।।।।।,ऽ	मन्मथजतिलकसमुदितशशिकला प्रजयुवतिलसदलिकमलगता । सरसिजनयनहृदयसलिलनिधि व्यतनुत विततरभसपरितरलम् ॥
स्रक् अस्याः षड्भिर्नवभिश्च यतिः ।	अतियमपि च रचय रचितयति ।।।।।,।।।,।।।।।,ऽ	अयि सहचरि ! रुचिरतरगुणमयी स्मरमदधृतिरतिसततपरिमला । मधिव निवस विलसदुपमरचा सुसखि ! मुदितदनुजदलनहृदये ॥
मणिगुणनिकरः अष्टभिः सप्तभिश्च यतिः ।	वसुहयविरतिरिति मणिगुणनिकरः ।।।।।।,।,।।।।।,ऽ	नरकरिपुरवतु निखिलसुरगति- रमितमहिमभरसहजनिवसतिः । अनवधिमणिगुणनिकरपरिचित- सरिदधिपतिरिव धृततनुविभवः ॥
मालिनी अष्टभिः सप्तभिश्च यतिः ।	ननमयययुतेयं मालिनी भोगिलोकैः ।।।,।।।,ऽऽऽ,।ऽऽ ।ऽऽ	अमलदलजनयौ पीतकौशेयवासा रुचिरशिखिशिखण्डाबद्धधम्मिल्लपाशा । अमृतमितमते यमुनाकूलकल्पी कृतमुररिपुलीला मालिनी पातु राधा ॥
लीलाखेलः	एकन्यूनौ विद्युन्मालापादौ चेल्लीलाखेलः ऽऽऽ,ऽऽऽ,ऽ ऽ,ऽऽऽ,ऽऽऽ,ऽ	मायारो गोविन्दः कालिन्दीकूलच्छायाचारी रागोल्लासोत्कण्ठोद्गीभिः सार्द्धं लीलाखेलः । मन्दाकिन्यास्तीरे तस्मिन् मेरोः क्रोडाभिर्वाभो यद्वद्देवानामीशः सर्वस्वाभिः शिवमूर्तिभिः ॥
जटाला, स्त्री (जटाऽस्त्यस्या इति । जटा+“सिध्मादिभ्यश्च । ५ । २ । ९७ । इति लच् । ततो अजादित्वात् टाप् ।) जटामांसी । इति राजनिर्घण्टः । (विवरणमस्या जटामांसीशब्दे ज्ञातव्यम् ॥)

जटावती स्त्री (जटा विद्यतेऽस्याः । जटा+मतुप् । मस्य व । स्त्रियां ङीप् च ।) जटामांसी । इति राजनिर्घण्टः ॥

जटावल्ली स्त्री (जटेव वल्ली ।) रुद्रजटा । गन्धमांसी । इति राजनिर्घण्टः ॥

जटि स्त्री (जटति परस्परं सङ्घाता भवतीति । जट+“सर्वधातुभ्य इन् ।” उणां । ४ । ११७ । इति इन् ।) जटा । इति शब्दरत्नावली ॥ समूहः । संघः । इत्युणादिकोषः ॥

जटिल पुं (जटा अस्त्यस्येति । जटा+“पिच्छादिभ्य इलच् । ५ । २ । १०० । इति इलच् ।) सिंहः । इति शब्दचन्द्रिका ॥ (ब्रह्मचारी । यथा मनुः । २ । १९१ ।
“जटिलश्चानधीयानं दुर्बालं कितवं तथा ॥”
“जटिलो ब्रह्मचारी ।” इति तट्टीकायां कुल्लूकभट्टः ॥) जटायुक्ते, त्रि । इति मेदिनी । ले, ८१ ॥ (यथा, कुमारे । ५ । ३० ।
“ विवेश कश्चिज्जटिलस्तपोवनं
शरीरबद्धः प्रथमाश्रमो यथा ॥”)

जटिला, स्त्री (जटिल+अजादित्वात् टाप् ।) जटामांसी । इत्यमरः । २ । ४ । ११३ ॥ (“जटामांसी भूतजटा जटिला च तपस्विनी ।” इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥) पिप्पली । इति मेदिनी ॥ वचा । उग्रगन्धा । इति रत्नमाला । दमनकवृक्षः । इति राजनिर्घण्टः ॥ ऋषिकन्याविशेषः । यथा, महाभारते । १ । १९७ । १४ ।
“श्रूयते हि पुराणेऽपि जटिला नाम गौतमी । ऋषीनध्यासितवती सप्त धर्मभृतां वरा ॥”)

जटी स्त्री (जटि+“कृदिकारादक्तिनः ।” ४ । १ । ४५ । इत्यस्य वार्त्तिकोक्त्या वा ङीष् ।) प्लक्षवृक्षः । इति शब्दरत्नावली । जटामांसी । इति रत्नमाला ॥

जटु [न्] पुं, (जटा अस्त्यस्येति । जटा+इनि ।) जटायुः । इत्यमरः । २ । ५ । १९ । (यथा —
“जटी जटाधारी च वर्णी च शिखामणि ।” इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥) [illegible] ॥ यथा, महाभारते । ८ । ४४ । २८ ।
“[illegible] जटी [illegible]”)
[illegible] त्रि । (यथा, महाभारते । ७ । १४ ।
“[illegible]”)
जटुल पुं (जटति देहे संहतो भवतीति । जट+उलच् ।) जटुलम् । [illegible] इति भावः ॥ [illegible] इत्यमरः । २ । ६ । ४९ ॥

जठर, त्रि, (जटति बद्धीभवतीति । जट+बाहुलकादरः टस्य ठश्च । यद्वा, जायते इति । जन+“जनेररष्ठ च ।” उणां ५ । ३८ । इति अरः ठश्चान्तादेशः ।) बद्धम् । कठिनम् । इति शब्दरत्नावली ॥ (यथा मालतीमाधवे । ९ । १६ ।
“इदानीं स्थाने जठरकमठपृष्ठकठिना
कठोराश्मस्थाने किं घनविमुक्तैव पतयति ॥”)

जठर पुं क्ली (जायते गर्भोऽत्र वा जन्तुरिति । जन+“जनेररष्ठ च ।” उणां । ५ । ३८ । इति अरः ठश्चान्तादेशः ।) उदरम् । इति मेदिनी ॥ (यथा किरातार्जुनीये । २ । ११ ।
“ हरत श्रियमेतद्भिः कठरेव कुलामनम् ।
सागरे यथागारैव परमोदममानयन् ॥”
देशविशेषे, पुं । स तु कूर्मविभागे आग्नेय्यां दिशि वर्तते । यथा, बृहत्संहितायाम् । १४ । ८ ।
“आग्नेय्यां दिशि कोशलकलिङ्गवङ्गो-
पवङ्गजठराङ्गाः ॥”
तथाच महाभारते । ६ । ९ । ४० ।
“कर जठरं जनपदान् निबोध गदतो मम ।”
इत्युपक्रम्य —
“ अन्ये कुक्कुराश्चैव दशार्णाश्च भारत ॥”
इत्युक्तम् ॥
पर्वतविशेषः । यथा, भागवते । ५ । १६ । २७ ।
“जठरदेवकूटौ मेरुं पूर्वेणाष्टादशयोजनसहस्र-
मुदगायतौ द्विसहस्रपृथुतुङ्गौ भवतः ॥”
कटरोगविशेषः ।
“दाहो यस्य ज्वरोन्मादो जठरे कटरेषु तु ।”
इति चिकित्सकार्णवे ज्वरादेर्यावदे नामदेयादृशम् ।
[illegible] यथा, हरवै चिकित्सार्णवे [illegible] ।
“कोष्ठाग्नुपर्वकलसयन्त्रौ
निःसन्न पुष्टोऽधिगन्धम् ।
जय जलुनस्य यत्र समता-
द्विषमाग्नी जठरं करोति ॥”)

जठराग्नि पुं, (उदराग्निः । मुद्+अच् । तस्य अग्नीनामुदरस्य जाठराग्निर्वा जठरानलम् ।) जाठरानलः । इति शब्दचन्द्रिका ॥

जठरामय, पुं (जठरस्य आमयो रोगः ।) जलोदररोगः । इति राजनिर्घण्टः ॥ (जलोदररोगः । तत्र चिकित्सा यथा —
“शम्भान्नं श्रेष्ठं तु जलोदरेऽपि चक्रम् ।
मन्दाग्नौ मद्यपः वा हन्ते जठरामयात् ॥”
इति चरके चिकित्सास्थाने दशमेऽध्याये ॥)

जड़ं क्ली (जलति आवृणोति बुद्धिम् । जल+अच् । डलयोरैक्यात् लस्य डत्वम् ।) जलम् । हिमम् । सीसकम् । इति राजनिर्घण्टः ॥ (जलति धर्मं जलतीति ।) सीसकम् । इति राजनिर्घण्टः ॥ (अचेतनपदार्थाः प्रधानम् । यदुक्तं मनु । ६ । १२७ ।
“जडवादकस्तकः शीघ्रकार्यं जड़ं जलं जडं तथा ।”)

जड़, त्रि, (जलति धर्मं बुद्धिमिन्द्रियाणां सम्यक्प्रसरं रुणद्धीति । जल+अच् ।) हिमक्रान्तः । (शीतलः । यथा, रघौ । ५ । ५४ ।
“प्रत्यावृतः सर्वजिदेवजड़ाः
तपस्विनश्चाप्यभिभूय जाड्यम् ॥”
“जड़मथकेन हर्षविधुरेण ।” इति टीकायां मल्लिनाथः ॥) मूकः । (यथा, मनौ । ९ । २०१ ।
“क्लीबो मूकादिविकल्पाश्च ये स्युः पतितबान्धवाः ।
आजन्मान्धः ष्ठेवी जडः पङ्गुरेव च ॥”
बधिरः । यथा तत्रैव । ८ । ६४ ।
“तथैव बधिरो मूकं च न जड़े विकृतेऽपि च ।”
तथा तत्रैव । ७ । २२४ ।
“अन्धो जड़ः पीठसर्पी सप्तत्या स्थविरश्च यः ।”
“अन्धो बधिरो पङ्गु इव च नित्यशः ।” इति तट्टीकायां कुल्लूकभट्टः ॥) मूढः । इति मेदिनी । डे ११ ॥ (यथा किराते । १ । ३१ ।
“भवादृशाः शरणागता प्रयान्ति तु ज्वलिष्यन्ति ॥
जलिता
प्रभवैरिकस्य यस्य तु महता मन्दे तु मनसि ।
हेमाद्रावचलस्य यत्र तु विवशाशरश्चान्तरे
निर्मलं प्रशमेव मोहरितं यत्र तुच्छे
तु च ॥”
विषण्णः । यथा रघौ । २ । ४२ ।
“वाक्प्रतिष्ठंसमयोचितेन
स्वर्गं हृदयमिव गतं ॥”
शीतलः । यथा, तत्रैव । ८ । ४६ । [illegible]
स्वयं त्वं त्रयाय शीतल हविष्यादश हत
अभिमतं विविधाग्
इति क्लिष्टेव लितामनीषम् ॥”)

जड़क्रिय, त्रि, (जड़ा मन्दा क्रिया यस्य ।) दीर्घसूत्री । चिरक्रियः । इति हेमचन्द्रः ॥

जड़ता, स्त्री, (जड़स्य भावः । जड़+तल्+टाप् ।) जाड्यम् । मूर्खता । हेमन्तः शीतलत्वम् ॥ । इति राजनिर्घण्टः ॥ (यथा रघुः । ८ । ३६ ।
“ चतुरन्तमहीपालेन
पुष्पवती जड़तामगात् ॥”
इय [illegible] । यथा, शाकुन्तले । ३ । ११ ।
“[illegible]
[illegible]” । इति अ
[illegible] ॥

जडुल, पुं (जड़ति [illegible]) तिलकालकः । इति हारावली ॥

जडिमा [न्] पुं (जडस्य भावः । “पृथ्वादिभ्य इमनिच् वा ।” ५ । १ । १२२ । इति इमनिच् ।) जड़ता । यथा नैषधे सर्गे,—
“[illegible]”

एतेंनअवयवाभावो जडिमा सोऽभिधीयते ॥"
इत्युज्ज्वलनीलमणिः ॥

जडुल, पुं, (जटुल पृषोदरादित्वात् टस्य डत्वम् ।) देहस्थितिलकः । इति हेमचन्द्रः ॥

जतु क्ली, (जायते वृक्षादिभ्य इति । जन + "फलि-पाटिनमिमनिजनामिति ।" उणा° १ । १८ । इति उः तोऽन्तादेशश्च ।) वृक्षनिर्य्यासविशेषः । जौ इति ला इति च भाषा ॥ तत्पर्य्यायः । राक्षा २ लाक्षा ३ याव ४ अलक्त ५ द्रुमामय ६ । इत्यमरः ।२।६।१२५॥ रङ्गा ७ । इति रभसः ॥ कीटजा ८ क्रिमिजा ९ जतुका १० जन्तुका ११ गन्धाधिका १२ । इति रत्नमाला ॥ जतुकम् १३ यावक १४ अलक्तक १५ रक्त १६ । इति शब्दरत्नावली ॥ पलङ्कषा १७ क्षति १८ पलङ्किनी १९ । इति जटाधरः ॥ (यथा, महाभारते । १ । १४० । १६ ।
"जिघ्रन् सोऽस्य वसागन्धं सर्पिर्जतुविमिश्रितम् ।")

जतुक, क्ली, (जतु इव कायतीति । कै + कः ।) हिङ्गु । (जतु एव । स्वार्थे कन् ।) लाक्षा । इति मेदिनी । के ८१ ॥

जतुका, स्त्री, (जतु इव आलक्ता कायतीति । कै + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) जनीनामगन्धद्रव्यम् । इत्यमरटीकायां भरतः ॥ चर्म्मचटिका । इति शब्दरत्नावली ॥ (यथा वैद्यकचक्रपाणिसंग्रहेऽपस्माराधिकारे ।
"जतुकाशकृता तद्वद्गन्धैर्वा वस्तरोमभिः ।
अपस्मारहरो धूपो मूत्रपित्तापहो ऋषिभिः ॥")
पर्पटी । इति भावप्रकाशः ॥ लताविशेषः । सा तु भाषायां प्रसिद्धा । तस्याः पर्य्यायाः । जतुकारी २ जननी ३ चक्रवर्त्तिनी ४ तिर्य्यक्फला ५ निशान्धा ६ बहुपुत्री ७ सुपुष्पिका ८ राजवृक्षा ९ अम्बष्ठा १० कपिकच्छुफलोपमा ११ रञ्जनी १२ चर्म्मकषा १३ भ्रमरी १४ सस्यशालिका १५ विष्णुक्रान्ता १६ लम्बकर्णा १७ पत्रिपर्णी १८ सुवर्च्चिका १९ तरवली २० दीर्घफला २१ । अस्या गुणाः । शिशिरत्वम् । तिक्तत्वम् । रक्तपित्तकफदाहकुष्ठविषनाशित्वम् । रुचिकारित्वम् । दीपनत्वञ्च । इति राजनिर्घण्टः ॥ जतुकापि पाठः निदाघकालस्य बहुपोऽत्रिवन ग्रीष्मे भ्रियाद्या प्रचरत्य च पाठः । (लाक्षा । तत्पर्य्याया यथा,—
"कीटजा क्रिमिजा लाक्षा जतुका च गर्भाधिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

जतुकारी स्त्री, (जतु करोतीति । जतु + कृ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ततः स्त्रियां ङीप् ।) जतुकालता । इति राजनिर्घण्टः ॥ (तत्पर्य्यायोऽस्या जतुकाशब्दे ज्ञातव्याः ॥)

जतुकृत्, स्त्री (जतु करोति उत्पादयतीति । कृ + क्विप् । तुक् च ।) जनीनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १३३ ॥
(अस्याः पर्य्याया यथा —
"चर्म्मरी रञ्जनी शाखा जतुका जननी जनी ।
जतुकृत्चापि चक्रस्था जतुरसजननी जनी ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥)

जतुलम्बा, स्त्री, (जतु इव लम्बा ।) पर्पटी । इति भावप्रकाशः ॥

जतुनी, स्त्री, (जतु इव नयति अस्माकारेण प्राप-यति पक्षिहृदयमिति । नी + क्विप् । अथवा पृषोदरादित्वात् णत्वस्य अनुपधूपलाभावाभावम् ।) चर्म्म-चटिका । इति त्रिकाण्डशेषः ॥

जतुपुत्रक, पुं (जतुनिर्म्मितः पुत्र इव । स्वार्थे कन् ।) पाशकगुटिका । नय । इति त्रिकाण्ड-शेषः ॥

जतुमणि, पुं, क्षुद्ररोगविशेषः । (जडुल इति भाषा ॥) तस्य निदानं यथा,—
"समसुखमरक्तं मण्डलं कफरक्तजम् ।
सहजं लक्ष्म चैकेषां लक्ष्यो जतुमणिश्च सः ॥"
इति माधवकरः ॥
तच्चिकित्सा यथा—
"चर्म्मकील जतुमणिं मशकान् तिलकालकान् ।
उत्कृत्य शस्त्रेण दहेत् क्षारान्निभ्यामशेषतः ॥"
इति भावप्रकाशः ॥

जतुरस, पुं, (जतुनो रसः ।) अलक्तकः । इति राजनिर्घण्टः ॥ (विवृतिरस्यालक्तकशब्दे ज्ञातव्या ॥)

जतूका, स्त्री, (जतुका निपातनात् दीर्घं ।) जनीनामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १३३ ॥ चर्म्मचटी ।-इति शब्दरत्नावली ॥

जत्रु, क्ली, (जायते बाहुरस्मात् । जन् + "अमृ-रपश्च ।" उणा° ४ । १ ० २ । इति रत्वान्तादेशः तकारश्च ।) स्कन्धसन्धिः । इत्यमरः । २ । ६ । ७८ ॥ गाण्ठरा इति भाषा ॥ (यथा, महाभारते । ६ । १० । २२ ।
"मे स बिद्धो महाबाहुः प्रद्युम्नः समरे शिनः ।
अपुरेषि भर वीरो जत्रोधीरस्य मम ॥")

जत्रुक, क्ली, (जत्रु एव । स्वार्थे कन् ।) जत्रु । इति शब्दरत्नावली ॥

जत्वश्मज, क्ली (जतुवदश्मजम् ।) शिलाजतु । इति राजनिर्घण्टः ॥

जन ई स य ड जनी । इति कविकल्पद्रुमः ॥ (दिवां आत्म-अकं सेट ।) ई, जातः । स, जन्यति । य ड, जायते जयति । अभिव्यक्ता । प्रादुर्भावे इति प्राचः । प्रादुर्भावः स्फुटीभावः, प्रकाशे प्रादुरादि स्यादित्यमरः । श्रीशा दुर्गा जायते स्वकार्य्यादिभिरिति प्रचारते इत्यर्थः । प्रादुर्भावोऽभ्युत्पत्तिरिति कैश्चित् । घटो जायते । इति दुर्गादासः ॥

जन, श कि द जनी । इति कविकल्पद्रुमः ॥ (ह्वा पर० अक०-सेट् ।) श, जजन्ति । कि जननं । देवदिव । इति दुर्गादासः ॥

जन, पुं, (जायते इति । जन + अच् ।) लोकः । (यथा, महाभारते । १ । १४८ । ८ ।
"अय इवात्र तुरवै निरिह कुर्वे जनैः सदा ।
मर्त्त्यरोदयन् भीमं देवैः इव पुरोधसम् ॥")

महर्लोकादूर्द्ध्वलोकः । पामरः । इति मेदिनी । ने, ६ ॥ (असुरविशेषः । अस्याद्येन इति शब्द दर्शनात् ॥)

जनक, पुं, (जनयतीति । जन + णिच् + ण्वुल् ।) पिता । राजभेदः । स तु निमिवंशाधिपतिः । इति मेदिनी । के, ९० ॥ इक्ष्वाकुराजपुत्रो निमिर्वशिष्ठस्य आज्ञां यज्ञं कृतवान् वशिष्ठः प्रत्यागमनमाशय राजानं प्राह्यामास राजा तदा निद्रित आसीत् । ततस्तु कोपात् स विन्देहो भव इत्युक्त्वा समभिशशाप । यथ,—
"दृष्ट्वा विन्देह राजानमेवं यत्तं तं ते ।
तव तै याजयामासयविदेहो भवोचित ॥
नरेन्द्रस्यापि न देवमत्यग्निविधेश्च ।
सपत्नीमालोच्य गर्भेण पुत्र्यमाण शुश्रुर्तु ॥
अत्रयोऽपि महात्मानो निमिदेहं ममन्थिरे ।
अरणिन्यस्य देहात्तु मन्थनेनापि चक्रिरे ॥
मन्त्रहोमैर्महात्मानः पुत्रहेतोर्निमेस्तदा ।
अरण्यां मथ्यमानायां प्रादुर्भूतो यतश्च सः ॥
अतो मिथिरिति ख्यातो जननाज्जनकोऽभवत् ।
विदेहात्मभवत्पूर्व्वमाख्या स महातपा ॥
तस्मादिदेवा चोच्यते यन्न्ये तद्वज्ञा नृपा ।
एवं विदेहराजस्तु पूर्व्वको जनकोऽभवत् ।
मिथिर्नाम महावीर्य्यो येन सा मिथिलाभवत् ॥"
इति रामायणम् ॥
(ऋषिविशेषः । स तु वेदव्यासस्य भक्तयपत्यस्य पठिता । यथा ब्रह्मवैवर्त्ते । १ । ११ । १२
"जनकार जनको योगी वेदव्यासस्य भक्तयम् ।"
द्रुमसानुरक्तः पुत्रविशेषः । यथा, हरिवंशे । १४१ । ४४ ।
"पुत्रा तु प्रभराजाय सुताः प्रभराजे च ।
पत्नी नियुद्धं वा प्रद्युम्नयशाग्नया ॥"
राजुनकल्याण ।
"हिमवद्गिरिश्रियन पितरो जनकयत ।")
उत्पादके त्रि । (यथा ब्रह्मवैवर्त्ते ।१।१६।२७।
"जनक सर्व्वरोगाणां दुर्न्नारो दारुणो ज्वरः ।")

जनकतनया, स्त्री (जनकस्य विदेहपतेस्तनया ।) सीता । इति रामायणम् ॥ (यथा, मेघदूते । १ ।
"यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्य्याश्रमेषु ॥")

जनकनन्दिनी स्त्री, (जनकस्य नन्दिनी ।) सीता । इति रामायणम् ॥

जनकसुता स्त्री, (जनकस्य सुता ।) सीता । इति रामायणम् ॥

जनकात्मजा स्त्री (जनकस्य आत्मजा ।) सीता । इति शब्दरत्नावली ॥ (यथाह कविः ।
"हृद्गतपति ध्यायन् जनकात्मजायाः ।
दिवो दर्शयेद्दर्शं कालु कालु ।
जनाति दर्शं जनकात्मजायाः
देहान्तरेऽपि रक्षावती ॥")

जनकारी, [न्] पुं, (जनान् हिनस्ति कारयति इति करोतीति । जन आधारे + णिनि ।) अलक्तकः । इति राजनिर्घण्टः ॥

जनङ्गम, पुं (जनैर्गम्यते गच्छतीति। "गमश्च।" ३।२।४७। इति खच् मुमागमश्च।) चाण्डालः। इत्यमरः। २।१०।१९॥ (यथा माघे।१६।७५।
"अनपेक्षितगुरुस्तदेव
यदि जनङ्गमो इव मधु।
प्रथममुपनिषदुपहति न
प्रजाजनस्य विमर्शं कुर्वीत चिरात्॥")

जनता, स्त्री, (जनानां समूहः। जन + "ग्रामजनबन्धुभ्यस्तल्।" ४।२।४३। इति तल्।) जनसमूहः। इत्यमरः।२।६।४२॥ (यथा, रघौ।११।८२।
'तावुभावपि परस्परस्थितौ
वर्द्धमानपरिहीनतेजसौ।
पश्यति स्म जनता दिनात्यये
पार्वणौ शशिदिवाकराविव॥'"॥
जनस्य भावः।) जनत्वम्॥

जनन क्ली, (जननं जनिरिति। जन + भावे ल्युट्।) वंशः। (जन + भावे ल्युट्।) जन्म। इति मेदिनी। ने, ६६॥ (यथा, महानिर्वाणतन्त्रे।३।५०।
"जननमरणभीतिभ्रंशि सच्चित्स्वरूपं
सकलभुवनबीजं ब्रह्मचैतन्यमीडे॥"
उत्पत्तिः। यथा, कुमारे।१।४२।
'अन्योन्यशोभाजननाद् बभूव
साधारणो भूषणभूष्यभावः॥"
पुं जनयति उत्पादयति लोकानिति। जन + णिच् + नन्द्यादि ल्युः। विष्णुः। यथा महाभारते।१३।१४९।११२।
"जननो जनजन्मादिर्भीमो भीमपराक्रमः॥"
'जन्तून् जनयन् जननः।' इति तद्भाष्यम्॥
जनयतीति। जनि + ल्युः। उत्पादके, त्रि। यथा महाभारते।१।११।१६।
"एकत्र चिरवासो हि न प्रीतिजननो भवेत्॥")

जननि, स्त्री, (जनयति पालयतीति। जन + णिच् + बाहुलकात् अनि।) जतुकानामगन्धद्रव्यम्। इति शब्दरत्नावली॥

जननी स्त्री, (जनयतीति। जनि + बाहुलकात् अनिः। कृदिकारादिति वा ङीष्। यद्वा, जन्यतेऽनेनेति ल्युट् टिड्ढाणञिति ङीप्।) माता। (यथा रघौ।१।६६।
"विरतिमुपगतिमत्
मम जननी सम्प्रति ...।
[illegible]
[illegible]॥")
दया। इति मेदिनी। ने ६६॥ जतुकानाम गन्धद्रव्यम्। (पर्य्यायो यथा,—
"जननी रञ्जनी चक्रा जतुका जननी जनी।
जतुकृष्णा चक्रवर्त्ती जतुपर्णी च जन्तुकी॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
कटुकी। इति शब्दरत्नावली॥ मञ्जिष्ठा। इति शब्दचन्द्रिका॥ कटुका। यूथिका। चर्म्मचटका। जटामांसी। इति राजनिर्घण्टः॥

जनपद, पुं, (जनानां लोकानां पदं व्यवसायस्थानं यत्र। जनाः पद्यन्ते यस्मिन्निति वा।) देशः। (यथा चाणक्यशतके।३१।
"त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत्।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्॥"
जनपदनामानि महाभारते भीष्मपर्व्वणि नवमाध्याये कथितानि भारतवर्षशब्दे विशेषतो द्रष्टव्यानि॥)
जन। इति मेदिनी। दे, ४८॥

जनप्रवाद, पुं (जनस्य लोकेषु प्रवादो वचनम्।) लोकापवादः। तत्पर्य्यायः। कौलीनम् २ किंवदन्ती ३ जनश्रुतिः ४। इति हेमचन्द्रः।२।१८४॥ (यथा, महाभारते।५।७२।१६।
"जनप्रवादात् सुमहान् ... महाभयम्।
ह्रिया च धर्म्मसंयोगात् पार्था दूतं सियात्
पुन॥")

जनप्रिय पुं, (जनानां प्रियः।) धान्यकम्। शोभाञ्जनवृक्षः। इति राजनिर्घण्टः॥ (लोकप्रिय, त्रि॥)

जनमेजय, पुं, (जनान् शत्रुजनान् एजयति कम्पयतीति। एजृ कम्पने + णिच् + "एजेः खश्।" ३।२।२८। इति खश् ततो मुमागमः।) परीक्षितराजपुत्रः। तत्पर्य्यायः। राजर्षिः २ पारीक्षितः ३। इति त्रिकाण्डशेषः॥ (यथा देवीभागवते।२।११।६।
"पौरवाणामयं लोके वंशस्तु प्रथितः शुभः।
जनमेजयनामानं राजानमभयसुतम्॥"
कर्म्मकाण्ड इति माठोऽपि कथितः ...। तद्विवरणमन्ये यथा॥

अथ हि चतुरशीतिवर्षाणि राज्यं कृतवान्। तत्र अश्वमेधाख्ये बहुयज्ञं कृत्वा विप्रवधात् ... चकार। अथैकदा वनं ... प्राविश ... शिरस्तं ... भारतादिकं शुश्राव। इत्याख्यानं क्रमशः प्रदर्श्यते। यथा, ... पादे।
"पारीक्षितस्तदा राजा मीनिमानोऽतिभीतितः।
द्वादशी पावनामास विप्रान् ...।
कृत्वा चित्रवधान् ... शुचिभिः समम्।
... कुलानि ... ।
... ।
... तदा॥
... ।
... ।
... शुचिमान् च।
चतुरशीतिवर्षाणि कृत्वा राज्यं सुनिर्म्मलम्।
... दिवं गतः॥"
... ।
तत्कथा यथा महाभारते। १।४१।—४०।
"जनमेजयः पारिक्षितः सह भ्रातृभिः कुरुक्षेत्रे दीर्घसत्रमुपास्ते। तस्य भ्रातरस्त्रयः श्रुतसेन उग्रसेनो भीमसेन इति। तेषु तत्सत्र-मुपासीनेष्वागच्छत् सारमेयः। स जनमेजयस्य भ्रातृभिरभिहतो रोरूयमाणो मातुः समीपमुपागच्छत्। तं माता रोरूयमाणमुवाच किं रोदिषि केनास्यभिहत इति। स एवमुक्तो मातरं प्रत्युवाच जनमेजयस्य भ्रातृभिरभिहतोऽस्मीति। तं माता प्रत्युवाच व्यक्तं त्वया तत्रापराद्धं येनास्यभिहत इति। स तां पुनरुवाच नापराध्यामि किञ्चिन्नावेक्षे हवींषि नावलिह इति। तच्छ्रुत्वा तस्य माता सरमा पुत्रशोकार्त्ता तत् सत्रमुपागच्छत् यत्र स जनमेजयः सह भ्रातृभिर्दीर्घसत्रमुपास्ते। स तया क्रुद्धया तत्रोक्तोऽयं मे पुत्रो न किञ्चिदपराध्यति किमर्थमभिहत इति। यस्माच्चायमभिहतोऽनपकारी तस्माददृष्टं त्वां भयमागमिष्यतीति। जनमेजय एवमुक्तो देवशुन्या सरमया भृशं सम्भ्रान्तो विषण्णश्चासीत्। स तस्मिन् सत्रे समाप्ते हास्तिनपुरं प्रत्येत्य पुरोहितमनुरूपमन्विच्छमानः परं यत्नमकरोत्। यो मे पापकृत्यां शमयेदिति। स कदाचिन्मृगयां यातः पारीक्षितो जनमेजयः कस्मिंश्चित् स्वविषये आश्रममपश्यत्। तत्र कश्चिदृषिरासाञ्चक्रे श्रुतश्रवा नाम तस्य तपस्यभिरतः पुत्र आस्ते सोमश्रवा नाम। तस्य तं पुत्रमभिगम्य जनमेजयः पारीक्षितः पौरोहित्याय वव्रे। स नमस्कृत्य तमृषिमुवाच भगवन्नयं तव पुत्रो मम पुरोहितोऽस्त्विति। स एवमुक्तः प्रत्युवाच जनमेजयं भो जनमेजय! पुत्रोऽयं मम सर्प्प्यां जातो महातपस्वी स्वाध्यायसम्पन्नो मत्तपोवीर्य्यसम्भृतो मच्छुक्रं पीतवत्यास्तस्याः कुक्षौ संवृद्धः। समर्थोऽयं भवतः सर्व्वाः पापकृत्याः शमयितुमन्तरेण महादेवकृत्याम्। अस्य त्वेकमुपांशुव्रतं यदेनं कश्चिद्ब्राह्मणः कञ्चिदर्थमभियाचेत् तं तस्मै दद्यादयम्। यद्येतदुत्सहसे ततो नयस्वैनमिति। तेनैवमुक्तो जनमेजयस्तं प्रत्युवाच भगवंस्तथा भविष्यतीति॥" ॥
अपरं सर्पसत्रविवरणं यथा देवीभागवते।
२।११।४८—६।
"इति तस्य वचः श्रुत्वा राजा जनमेजयः।
... ।
... ।
... ।
... ।
... ।
... ।
... ।
... ।
... ।
... ।
... ।
... ।
... ।
... ।"

यज्ञस्य सर्व्वसम्भार यष्टौ यज्ञस्य विस्तृताम् ।
वर्त्तमाने तु यज्ञार्थं तस्यको मतः ।
दर्शं प्रति भयार्त्तोऽहं बादि मामिति चाब्रवीत् ॥
भयभीतं समाश्वास्य स्यावने सन्निवेश्य च ।
इदावभयमर्थ्यं [illegible] भव मत्परः ॥
शमिकप्रख्य भाग्या सुनिद् [illegible] तथा ।
उत्पन्नोऽश्वयद्दूरिम [illegible] निस्तन्यम् ॥
स्तनपानत्तदा तस्यकेन यायावरकुलोद्भव ।
आस्तीको नाम धर्म्मात्मा जरत्कारुसुतो मुनिः ॥
तस्मात्तु मुनेर्बालस्तुष्टाव जनमेजयम् ।
राजा समर्थयामास दृष्ट्वा बाल सुपण्डितम् ॥")
जनयित्री, स्त्री, (जनयितृ + ङीप् ।) माता । इत्य
मरः । २ । ६ । २८ । (यथा, रघुः । १ । ७ ।
"कैकेय्यास्तनयो जज्ञे भरतो नाम वीर्य्यवान् ।
जनयित्रीमलञ्चक्रे यः प्रश्रय इव श्रियम् ॥")
जनरव, पुं, (जनेषु लोकेषु रवः प्रवादः ।) लोक
वादः । यथाह तत्पुरुषः ।
"परीवादस्तथ्यो भवति वितथो वापि महतां
तथाप्युच्चैर्धाम्नां हरति महिमानं जनरवः ॥"
जनलोक, पुं, (जन इव लोकः ।) महर्लोको
परिस्थितम् । यथा —
"अथ स हि महर्लोकः स्वर्लोकात् परमाद्भुतः ।
कल्पायुषो यत्रस्थाः तपसा धूतकल्मषाः ॥
इत्थं कृपा कपयतो [illegible] प्रियः ॥
[illegible] विमानमण्डलोकं [illegible] ॥
निवसन्ति समता यत्र मानसा ब्रह्मणः सुताः ।
सनन्दनाद्या योगीन्द्रा मर्त्ये हि [illegible] ॥
अन्ये तु योगिनो ये वै [illegible] ।
मर्त्यस्थविनिर्मुक्तास्ते वसन्त्यत्र निर्म्मलाः ॥
महर्लोकं [illegible] ।
[illegible] जनो भूर्लोकाः जवे ॥'
इति स्कान्दे काशीखण्डम् ॥
जनवल्लभ पुं (जनानां लोकानां वल्लभः प्रियः ।)
श्वेतरोहितकः । इति राजनिर्घण्टः ॥ लोक
प्रिये, त्रि ॥
जनवाद पुं, (जनेषु लोकेषु वादोऽपवादः ।) जन
प्रवादः । इति जटाधरः ॥ (यथा, श्रीमद्भाग
वतम् । ४।१८ ।
"[illegible] विदिदे [illegible]
शुभाशिषः ।
[illegible] जनवादो [illegible] ॥")
जनश्रुति, स्त्री, (जनेषु श्रुतिः श्रवणम् ।) जन
प्रवाद वा लोकप्रवादः । तत्पर्य्यायः । किं
वदन्ती २ । इत्यमरः । १ । ६ । ७ । (यथा
आर्य्यासप्तशत्याम् । ३६५ ।
"दूती वदन सुन्दरि ! [illegible] ।
[illegible] जनश्रुतिर्मधुरो भवतु ॥")
जनस्थान स्त्री, (जनानां स्थानं भूभागः ।) दण्ड
कारण्यम् । इति शब्दरत्नावली ॥ दण्डकारण्य
स्यैकस्थानविशेषः । यथा, रामायणे अनुत्तरकाण्डे
इक्ष्वाकुवंशोद्भवस्य दण्डस्य राज्ञः [illegible]
मेधुनं [illegible] शुक्रस्य शापः

प्रस्ताव । यथा,—
"समराशिव राजान्नी [illegible] ।
[illegible] पापकर्म्मसमाचारो यस्य प्राप्नोति दुर्म्मतिः ॥
सप्तरात्राणि [illegible] जन्मानि [illegible] च ।
[illegible] पांशुवर्षेण [illegible] क्षिप्रं भविष्यति ॥
दण्डस्य विषयो यावत् तावत् समन्ततः ।
पांशुभूतमिदं [illegible] भविष्यति ॥
इत्युक्त्वा क्रोधसन्तप्तस्तदाश्रमनिवासिनम् ।
जनं जनपदस्यान्ते स्थीयतामिति चाब्रवीत् ॥
[illegible] स चापि महातेजसा ।
तस्य दण्डस्य विषयो विन्ध्यशैलस्य सानुषु ॥
तदाप्रभृति काकुत्स्थ ! दण्डकारण्यमुच्यते ।
तपस्विनः स्थिता यत्र जनस्थानमथोच्यते ॥"
इति रामायणम् ॥
(अत्र रावणस्य खरदूषणप्रभृतीनां सैन्या
वासः । यथा, रामायणे । ३ । १ । ३६ ।
"तेन तत्रैव वसता जनस्थाननिवासिनी ।
विरूपिता शूर्पणखा राक्षसी कामरूपिणी ॥"
"जनस्थानं नाम दण्डकारण्ये राक्षसबलनिवेश
स्थानम् ।" इति तट्टीकायां रामानुजः ॥)
जना, स्त्री, (जननमिति । जन + षाञ्जलकात्
अङ् ।) उत्पत्तिः । इति मुग्धबोधम् ॥
जनाश्रम, पुं, (जनस्य प्रद्युम्नस्य आश्रमः ।) दैत्यः ।
इति धनञ्जयः । चैत्य इति भाषा ॥
जनान्तिकम्, व्य, अपवार्य्य । इति त्रिकाण्ड
शेषः ॥ (एतल्लक्षणं यथा, साहित्यदर्पणे ।
'त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम् ।
अन्योन्यामन्त्रणं यत् स्यात्तज्जनान्ते जनान्तिकम् ॥'
एतत्तु दृश्योऽभिनयप्रकाशकथनम् । नाटके एव
अस्य प्रयोगो दृश्यते ॥ जनाय अन्तिकम् ।
जनसमीपञ्च ॥)
जनार्द्दन, पुं विष्णुः । इत्यमरः । १ । १ । १८ ॥
तन्नामनिरुक्तिर्यथा । "समुद्रान्तवासिनो जन
नाम्नोऽसुरान् अर्द्दनात् जनार्द्दनः । अर्द्दत
इति अर्द्दनः [illegible] । किंवा जने
[illegible] पुरुषार्थान् जनार्द्दनः ।
[illegible] कर्म्मणि अनट् । किंवा
जननं [illegible] जनार्द्दनः ।
किंवा जनात् लोकात् अर्द्दति [illegible]
[illegible] जनार्द्दनः । किंवा जनन
[illegible] लोकान् [illegible]
[illegible] यथान्यत्र । जने
[illegible] लोकान् [illegible]
[illegible] जनार्द्दनः ।
किंवा जनैः लोकैः अर्द्द्यते याच्यते [illegible]
[illegible] जनार्द्दनः ।" इत्यमर
टीकायां भरतः ॥ तन्नाम [illegible]
[illegible],—
"जनार्द्दनो [illegible] ।
[illegible] ॥

[illegible] विष्णुलोकगाः ।
[illegible] मया [illegible] जनार्द्दन ॥
[illegible] मया [illegible] प्रभो ॥
एवं [illegible] मया [illegible] जनार्द्दन ॥
[illegible] मया [illegible] ।
जनार्द्दन ! नमस्तुभ्यं [illegible] ॥
[illegible] नमस्तुभ्यं नमस्ते [illegible] ।
[illegible] जनार्द्दन ॥
तं दृष्ट्वा पुण्डरीकाक्ष [illegible] ।
नमस्ते पुण्डरीकाक्ष ! [illegible] ॥
[illegible] भव ।
[illegible] भीमो जनार्द्दनम् ॥
[illegible] ।
[illegible] च ॥
[illegible] ।
[illegible] ॥'
इति श्रीवाराहपुराणे श्वेतवाराहकल्पे गया-
माहात्म्ये ४ अध्याये ॥ ४ ॥ शालग्रामशिला
विशेष । तल्लक्षण यथा,—
"[illegible] जनार्द्दनशिलो मतः ।
[illegible] ॥"
इति [illegible] अध्यायः ॥
"[illegible] ।
[illegible] जनार्द्दनात् ॥"
इति कर्म्मलोचनम् ॥
जनाश्रम, पुं (जनानाश्राति [illegible] । अश +
[illegible] ।) [illegible] । इति हारावली ॥
जनाश्रय पुं (जनानां लोकानामाश्रयः ।) मण्डप ।
इत्यमरः । २ । २ । ९ ॥
जनि, स्त्री, (जननमिति । जन + "जनिघसि
भ्यामिण् ।" उणा° ४ । १२९ । इति इण् ।
जनिवध्योश्चेति वृद्ध्यभावः ।) उत्पत्तिः ।
इत्यमरः । १ । ४ । ६ ॥ (यथा रघु
वंशे । २ । ६४ ।
"[illegible] ।
[illegible] ॥"
जायते यस्याम् । जन + जनाधारे इन् ।) नारी ।
माता । इति शब्दरत्नावली ॥ (जायते इत
[illegible] । [illegible] ।) [illegible] ।
इत्यमरटीकायां रायमुकुटः ॥
जनित्री स्त्री, (जनयतीति [illegible] ।
[illegible] टाप् च ।) माता । इति शब्द
रत्नावली ॥ (पर्य्यायोऽस्य ॥) [illegible] ॥
जनित्वं, त्रि, (जनन [illegible] । जन + [illegible] ।)
[illegible] । यथा —
"[illegible] ।
[illegible] ॥"
[illegible] ॥
([illegible] । १० । १२ ।
"[illegible] ।
[illegible]
[illegible] ॥"

जनिता [तृ] पुं (जनयतीति। जन+णिच्+तृच्। "जनिता मन्त्रे।" ६।४।५३। इति निपातनात् णिलोपः।) पिता। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे।१।१२९।११।
"अथा हि त्वा जनिता जीजनद्वसो
रक्षोहणं त्वा जीजनद्वसो॥"
क्वचित् लौकिकेऽपि दृश्यते। यथा, पञ्चतन्त्रे।१।८।
"अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते।
जनितारमपि त्यक्त्वा निःस्वं गच्छति दूरतः॥")

जनित्री स्त्री, (जनितृ+स्त्रियां ङीप्।) माता। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे।३।४८।२।
"तं ते माता परि योषा जनित्री
महः पितुर्दम आसिञ्चदग्रे॥"
यथाच ग्रहरत्नविभूषायां ८।
"या सूते सत्त्वजालं सकलमपि सदा सन्निधानेन पुंसो
धत्ते या तत्त्वयोगाच्चरमचरमिदं भूतये भूतजातम्।
धात्री स्थात्री जनित्री प्रकृतिरविकृति विश्वशक्तिर्विधात्री
विष्णोर्विश्वात्मनस्तां विपुलगुणमयीं प्राणनाथां प्रणौमि॥")

जनित्र, पुं (जायतेऽस्मादिति। जन+"जनिदाच्युमिति।" उणां ४।१०४। इति इत्रन्।) पिता। इत्युणादिकोषः॥

जनित्या, स्त्री, (जायतेऽस्याः। जन+इत्वन्। अजादित्वात् टाप्।) माता। इत्युणादिकोषः॥

जनीनीलिका, स्त्री, (जन्या जनपदस्य नीलिका।) महानीली। इति राजनिर्घण्टः॥ (महानीली-शब्देऽस्या विवरणं ज्ञातव्यम्॥)

जनिमा [न्] पुं (जायते इति। जन+"जनि-मृङ्भ्यामिमनिन्।" उणां ४।१४८। इति इमनिन्।) जन्म। इत्युणादिकोषः॥

जनी, स्त्री (जायते सन्ततिरस्यामिति। जन+"जनिघसिभ्यामिण्।" उणां ४।१२८। इतीण्। कृदिकारादक्तिन इति ङीष्।) सीमन्तिनी। वधूः (जन+भावे इन्।) उत्पत्तिः। (जायते धाराऽस्माद्यथा, बाहुलकात् इन्।) जायापतिम्। इति मेदिनी। नेः ९। ओषधिविशेषः। जतुका २ रजनी ३ जतुकृत् ४ चक्रवर्त्तिनी ५ संस्पर्शा ६। इत्यमरः।२।४।१२१॥ जतुका ७ जनि ८ जननी ९। इति भरतः। राजनिर्घण्टोक्तगुणपर्य्यायौ जतुकाशब्दे द्रष्टव्यौ॥

जनु [स्] क्ली, (जायते इति। जन+"जनेरुसि।" उणां २।११६। इति उसि।) जन्म। इत्यमरः।१।४।३०॥ (यथा, ऋग्वेदे।३।१५।२०।
"अयं राजा भद्रो मेधसो जनिमन्तो
मातृभ्य उत्सव्ये॥")

जनू स्त्री, (जायते इति। जनेरूस्। बाहुलकात् ऊः।) जन्म। इत्युणादिकोषः॥

जनूः, स्त्री, (जनु+स्त्रियां ऊङ्।) जन्म। इति शब्दरत्नावली॥

जनेष्टः, पुं, (जनानामिष्टः प्रियः।) [illegible]। इति राजनिर्घण्टः॥

जनेष्टा, स्त्री (जनानामिष्टा प्रिया।) जतुका। वृद्धिनामौषधिः। जातीपुष्पम्। हरिद्रा। इति राजनिर्घण्टः॥

जनोदाहरणं, क्ली, (जनैरुदाह्रियते कथ्यते इति। उत्+आ+हृ+कर्म्मणि ल्युट्।) यशः। इति धनञ्जयः॥

जनौ, पुं, (जनानमतीति रमयतीति। जन+णिच्। "जनीजॄष्क्नसुरञ्जोऽमन्ताश्च।" १।४।१८। इति घटादौ पाठात् मित्त्वम् ततो वृद्धिः।) जनरञ्जकः। इति मुग्धबोधम्॥

जन्तु, पुं, (जायते उत्पद्यते इति। जन+"कमि-मनिजनि।" उणां।१।७३। इति तुः।) प्राणी। इत्यमरः।१।४।३०॥ (यथा, मनौ।४।२४०।
"एकः प्रजायते जन्तुरेक एव प्रलीयते।
एकोऽनुभुङ्क्ते सुकृतमेक एव च दुष्कृतम्॥")
मनुष्यो बहुवचनान्तः। इति निघण्टुः॥ यथा, ऋग्वेदे।१।९४।५।
"विशां गोपा अस्य चरन्ति जन्तवो
द्विपच्च यदुत चतुष्पदक्तुभिः॥"
सोमकस्य राज्ञः पुत्रविशेषः। अस्य विवरणं तु यथा, महाभारते।३।१२७—१२८ अध्याययोः।
"युधिष्ठिरासीन्नृपतिः सोमको नाम धार्मिकः।
तस्य भार्याशतं राजन्! सदृशीनामभूत्तदा॥
स वै यत्नेन महता तासु पुत्रं महीपतिः।
कञ्चिन्नासादयामास कालेन महतापि॥
कदाचित्तस्य वृद्धस्य यतमानस्य यत्नतः।
जन्तुर्नाम सुतस्तस्मिन् स्त्रीशते समजायत॥
तं जातं मातरः सर्वाः परिवार्य समासते।
सततं पृष्ठतः कृत्वा कामभोगान् विशाम्पते!॥
ततः पिपीलिका जन्तुं कदाचिददशत् स्फिचि।
स दष्टो व्यनदत् तेन दुःखेन बालकः॥
ततस्ता मातरः सर्वाः प्राक्रोशन् भृशदुःखिताः।
परिवार्य्य जन्तुं सहिताः स शब्दस्तुमुलोऽभवत्॥
तमार्त्तनादं सहसा शुश्राव स महीपतिः।
अमात्यपरिषन्मध्ये उपविष्टः सहर्त्विजा॥
ततः प्रस्थापयामास किमेतदिति पार्थिवः।
तस्मै क्षत्ता यथावृत्तमाचचक्षे सुतं प्रति॥
त्वरमाणः स चोत्थाय सोमकः सह मन्त्रिभिः।
प्रविश्यान्तःपुरं पुत्रमाश्वासयदरिन्दमः॥
सान्त्वयित्वा तु तं पुत्रं निष्क्रम्यान्तःपुरान्नृपः।
ऋत्विजा सहितो राजन्! सहामात्य उपा-
विशत्॥
सोमक उवाच।
धिगस्त्विहैकपुत्रत्वमपुत्रत्वं वरं भवेत्।
नित्योद्वेगाद्धि भूतानां शोक एवैकपुत्रता॥
इदं भार्य्याशतं ब्रह्मन्! परीक्ष्य सदृशं प्रभो॥
पुत्रार्थिना मया वोढं न तासां विद्यते प्रजा।
एकः कथञ्चिदुत्पन्नः पुत्रो जन्तुरयं मम।
यतमानासु सर्व्वासु किन्नु दुःखमतः परम्।
वयश्च समतीतं मे सभार्य्यस्य द्विजोत्तम!॥
आसां प्राणाः समायत्ता मम चात्रैकपुत्रके।
स्यान्नु कर्म्म तथा युक्तं येन पुत्रशतं भवेत्।
महता लघुना वापि कर्म्मणा दुष्करेण वा॥
ऋत्विगुवाच।
अस्ति वै तादृशं कर्म्म येन पुत्रशतं प्रभो!।
यदि शक्नोषि तत् कर्त्तुमथ वक्ष्यामि सोमक!॥
सोमक उवाच।
कार्य्यं वा यदि वाकार्य्यं येन पुत्रशतं भवेत्।
कृतमेवेति तद्विद्धि भगवान् प्रब्रवीतु मे॥
ऋत्विगुवाच।
यजस्व जन्तुना राजंस्त्वं मया वितते क्रतौ।
ततः पुत्रशतं श्रीमद्भविष्यत्यचिरेण ते॥
वपायां हूयमानायां धूममाघ्राय मातरः।
ततस्ताः सुमहावीर्य्यान् जनयिष्यन्ति ते सुतान्॥
तस्यामेव तु ते जन्तुर्भविता पुनरात्मजः।
उत्तरे चास्य सौवर्णं लक्ष्म पार्श्वे भविष्यति॥
ततः स याजयामास सोमकं तेन जन्तुना।
मातरस्तु बलात् पुत्रमपाकर्षुः कृपान्विताः॥
हा हताः स्मेति वाशन्त्यस्तीव्रशोकसमन्विताः।
रुदन्त्यः करुणं चापि गृहीत्वा दक्षिणे करे।
सव्ये पाणौ गृहीत्वा तु याजकोऽपि स्म कर्षति।
कुररीणामिवार्त्तानां समाकृष्य तु तं सुतम्।
विशस्य चैनं विधिना वपामस्य जुहाव सः।
वपायां हूयमानायां गन्धमाघ्राय मातरः।
आर्त्ता निपेतुः सहसा पृथिव्यां कुरुनन्दन!॥
सर्व्वाश्च गर्भानलभंस्ततस्ताः पार्थिवाङ्गनाः।
ततो दशसु मासेषु सोमकस्य विशाम्पते!॥
जज्ञे पुत्रशतं पूर्णं तासु सर्व्वासु भारत!॥
जन्तुर्ज्येष्ठः समभवज्जनित्र्यामेव पार्थिव॥
स तासामिष्ट एवासीन्न तथा स्वाः किलौरसाः।
तच्च लक्षणमस्यासीत् सौवर्णं पार्श्व उत्तरे।
तस्मिन् पुत्रशते चाग्र्यः स बभूव गुणैर्युतः॥")

जन्तुकम्बुः, पुं, (जन्तुकोषादिविशिष्टः कम्बुः।) शम्बूकः। इति राजनिर्घण्टः॥

जन्तुका, स्त्री, (जन्तून् कायति शब्दायते इव। कै+कः। अजादित्वात् टाप्।) नाडीहिङ्गु। लाक्षा। इति राजनिर्घण्टः॥ (यथा,—
"जन्तुका जतुका च स्यात् तथा ग्रावरक्तकः।
रञ्जनकाश्मिकाचैव राजिका चाथ रोगहृत्॥")

जन्तुघ्नं क्ली, (जन्तून् हन्तीति। हन्+"अमनुष्यकर्त्तृके च।" ३।२।५३। इति टक्।) विडङ्गम्। इति शब्दचन्द्रिका॥ (यथा भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे।
"जन्तुघ्नं क्रिमिघ्नं च विडङ्गं तण्डुलीयकम्॥")
पुष्पम्। इति रत्नमाला॥

जन्तुफलः, पुं (जन्तवः फलेषु यस्य। बहुव्रीहिः।) उदुम्बरः। इति राजनिर्घण्टः॥

जन्तुघ्नी, स्त्री, (जन्तुघ्न+टित्वात् ङीप् ।) विडङ्गम् । इति राजनिर्घण्टः ॥

जन्तुनाशन, क्ली (जन्तून् क्रिमीन् नाशयतीति । नश+णिच+ल्युः । यद्वा जन्तूनां नाशनं विनाशो यस्मादिति ।) हिङ्गु । इति राजनिर्घण्टः ॥

जन्तुपादप, पुं, (जन्तुप्रधानः पादपः ।) कोषाम्रवृक्षः । इति राजनिर्घण्टः ॥

जन्तुफल, पुं (जन्तवः कीटाः फले यस्य ।) उडुम्बरः । इत्यमरः । २ । ४ । २१ ॥ (पर्य्यायोऽस्य यथा,—
"उडुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

जन्तुमारी, स्त्री, (जन्तून् क्रिमीन् मारयतीति । जन्तु+मृ+णिच+"कर्म्मण्यण् ।" ३।२।१। इत्यण् । ततो ङीप् ।) निम्बूकः । इति राजनिर्घण्टः ॥

जन्तुला, स्त्री (जन्तून् कीटान् लाति आदत्ते इति । ला+कः ।) काशतृणम् । इति त्रिकाण्डशेषः ॥

जन्तुहन्त्री, स्त्री, (हन्तीति । हन्+तृच् स्त्रियां ङीप् । ततो जन्तूनां हन्त्री नाशिका ।) विडङ्गम् । इति राजनिर्घण्टः ॥

जन्म [न्] क्ली, (जायते इति । जन+"सर्व्वधातुभ्यो मनिन् ।" उणां । ४ । १४४ । इति मनिन् ।) उत्पत्तिः । आद्यक्षणसम्बन्धः । इति सिद्धान्तमुक्तावल्यां प्रकरणे व्याख्यातम् ॥ तथा च ।
"आद्यक्षणसंयोगस्तु संयोगो जनिर्मता ।"
इति सामान्यलक्षणप्रकरणे शिरोमणिकृतोत्पत्त्यर्थकारिका ॥ तत्पर्य्यायः । जनुः २ जननम् ३ जनिः ४ उद्भवः ५ । इत्यमरः । १।४।३० ॥ जननम् ६ जनी ७ । इति भरतः ॥ प्रभवः ८ भावः ९ भवः १० सम्भवः ११ जनुः १२ प्रजननम् १३ । इति शब्दरत्नावली ॥ जातिः १४ । इति जटाधरः ॥ तच्च शुभाशुभकर्म्मणा भवति । यथा ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।
"शुभानामशुभानाञ्च कर्म्मणां जन्म जायते ।
पुण्यक्षेत्रे च भारते सुकृतेन नृणां सदा ॥"
तस्य क्रमो यथा —
"ततो विकारे भवति योनि कमलवत् यदा ।
गर्भाशयगतं शुक्रं यदा रक्तसमन्वितम् ॥
अन्तश्च वायोः संयुक्ता योनिर्भवति माहिता ।
ततः शुक्रमतो योनौ वेति गर्भाशये ध्रुवम् ॥
कलादौ च योनिवेष्टितवेष्टना ।
भवेत्तत्र चिरेणैव ततो प्रजायते ॥
अत्युष्णे यदा शुक्र विरोधे योनिर्वलितम् ।
तदा तदाङ्गना यत्र योनौ शोणितकं स्मृतम् ।
विशेषे मासे यौवने यौव [illegible] ।
शुक्रमल्पोऽपि रक्तात् पक्वाशये प्रवर्त्तते ।
रक्तोत्साहे अङ्गानि यौव कलुषीकृतम् ।
एवं दोषाणां दर्शनं कर्मणो योनिरेण च ।
मधुरास्तदेकमासेनैवात् कललं भवेत् ।
दशरात्रेण कललं बुद्बुदाकारतां व्रजेत् ॥
बुद्बुदं सप्तरात्रेण मांसपेशी भवेत्ततः ।
द्विसप्ताहाद्भवेत् पेशी रक्तमांसान्विता दृढा ॥
बीजस्येवाङ्कुरा पेश्या पञ्चविंशतिरात्रतः ।
भवन्ति मासमात्रेण पञ्चधा जायते पुनः ॥
ग्रीवा शिरश्च स्कन्धश्च पृष्ठवंशस्तथोदरम् ।
पाणिपादं तथा पार्श्वं कटिर्गात्रं तथैव च ॥
मासद्वयेन सर्व्वाणि क्रमशः सम्भवन्ति हि ।
त्रिभिर्मासैः प्रजायन्ते सर्व्वाङ्गाङ्कुरसन्धयः ॥
मासैश्चतुर्भिरङ्गुल्यः प्रजायन्ते यथाक्रमम् ।
स्थैर्य्यं चतुर्थे त्वङ्गानां पञ्चमे शोणितोद्भवः ॥
मुखं नासा च कर्णौ च जायन्ते मासि पञ्चमे ।
षष्ठे बलस्य वर्णस्य नखलोम्नाञ्च सम्भवः ॥
दन्तपङ्क्तिस्तथा गुह्यं जायन्ते च नखाः पुनः ।
कर्णयोश्च भवेच्छिद्रं षण्मासाभ्यन्तरेण च ॥
पायुर्मेढ्रमुपस्थञ्च नाभिश्चैवोपजायते ।
सन्धयो ये च गात्रेषु जायन्ते मासि सप्तमे
मनस्तु चेतनायुक्तो नाडीभिर्धमनीवृतः ।
सप्तमे चाष्टमे चैव त्वङ्मांसस्मृतिमानपि ॥
अग्रपश्चाद्भसम्भूय शिरःकेशसमन्वितः ।
विभक्तावयवः स्पष्टः पुनर्मांसाष्टमेन च ॥
नवमे दशमे मासि प्रबलैः सूतिमारुतैः ।
निःसार्य्यते बाण इव यन्त्रच्छिद्रेण सज्वरः ॥
अवमधपतनेन यदा गर्भस्थितिर्भवेत् ।
तदा विनाशितश्चैव पापात्मा हि प्रजायते ॥
पुष्टवर्णं समासाद्य यदा वर्द्धति मारुतः ।
तदा प्रसूते पापिष्ठान् बालान् धर्म्मविवर्ज्जितान् ॥
मातुरल्पोत्तरा नारी पितुः शुक्रोत्तरो नरः ।
उभयोर्विषमासाम्ये जायते वै नपुंसकम् ॥"
अन्यच्च ।
"विषमायां निशौ पित्रा कुर्य्याद्दोषेण कन्यकाम् ।
समायां पुत्रमूर्त्तं केचिन्मातुर्मतोविदः ॥
वामाङ्गेन भवेन्नारी दक्षिणेन पुमान् भवेत् ।
रक्ताधिक्ये मातृवत्स्यात् रेतोऽधिक्ये तु पैतृकम् ॥
शुक्रशोणितसङ्घाते वायुना च द्विधा कृते ।
यमौ स्यातां त्रिधा वेति चतुर्द्धा पञ्चधापि वा ॥
ततो दोषाधिकत्वाच्च विकारमनुकारयः ।
जायन्ते सत्कुलाजाता विज्ञानाच्च योगिनः ॥"
तथा च सारदातिलकायाम् ।
"गर्भात् कोटिगुणं दुःखं योनियन्त्रनिपीडने ।
जन्मन्यां तस्य जठरान्नायमानस्य देहिनः ॥
जायमानः पुरीषासृङ्मूत्रशुक्राविलाननः ।
प्राजापत्येन वातेन पीड्यमानास्थिबन्धनः ॥
अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः ।
क्लेशान्निष्क्रान्तिमाप्नोति जठरान्मातुरातुरः ॥
तमस्त्वेवंशो माया समाक्रन्दति मोहितः ।
तथा विमोहितात्मा वै ज्ञानार्थमनुपश्यति ॥
दत्तमात्रश्च चेद्देहं नरः सूतकवातकैः ।
तैव जन्तोर्महान् मूढो मताभोग्य सवायवः ॥
बालभावे हि दुःखानि बालस्यैव परिच्छिन्नः ।
दुर्निवार्य्यान्यनेकानि बालस्य [illegible] यदा ॥
बहुदुःखान्वितोऽतीव क्लिश्यते न वा दहेत् ।
शिशुभावगतश्चैव प्रज्ञाविहीनः प्रवर्त्तते ॥
कष्टुपमोऽपि वाससा परिवर्त्तेऽप्यनीश्वरः ।
आगन्तुकाभिर्बाधाभिरवाप्नोति परेच्छया ॥
अशुचिः संस्तरे सुप्तः कीटदंशादिभिस्तथा ।
भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे ॥
केन बन्धनबद्धोऽहं कारणं किमकारणम् ।
किं कार्य्यं किमकार्य्यं वा किं वाच्यं किञ्च नोच्यते ॥
कोऽधर्म्मः कश्च वै धर्म्मः कस्मिन् वा वर्त्तते कथम् ।
किं कर्त्तव्यमकर्त्तव्यं किं वा किं गुणदोषवत् ॥
पश्वादस्य सतिभ्रष्टो मोहं स जायते पुनः ।
इति संजायते दुःखं जन्तोस्तस्यैव जन्मनि ॥
एको मूढश्च लोकोऽयमकार्य्ये सम्प्रवर्त्तते ।
दृष्टो देहं परित्यज्य नैरस्यानमवीक्षति ॥
तस्मात् कीटोऽपि जन्तूनां दुःखी जायते ध्रुवम् ।
न चात्मानं विजानाति न परं न च दैवतम् ॥
न शृणोति परं श्रेयः सति चक्षुषि नेक्षते ।
सुखी सत्यं न जानाति बुध्यमानो बुधैरपि ।
संसारे क्लिश्यते तेन रागलोभवशानुगः ॥"
इति गुरुबोधः ॥

जनी स्त्री, (जायते इति । जन+बाहुलकात् मन् ।) उत्पत्तिः । "जनन्यास्तु नाथोऽसि सप्तमे जन्म मद्भवः । जन्मजन्मान्तरमप्यनुगामि तव राजत्वं । जनी पञ्चमवर्णिनी कन्यादिदुःखमयमिति ख्यातिरिति ।" इत्यमरटीकायां भरतः ॥

जन्मकील, पुं, (जन्मनः कील इव । विष्णुर्हि जन्माभावात् तथात्वम् ।) विष्णुः । इति त्रिकाण्डशेषः ॥

जन्मद, पुं, (जन्म ददातीति । जन्म+दा+"आतो ऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) पिता । इति शब्दरत्नावली ॥

जन्मवर्त्म, [न्] क्ली, (जन्मनः उत्पत्तेर्वर्त्म पन्थाः ।) योनिः । इति त्रिकाण्डशेषः ॥

जन्मान्तर, क्ली, (अन्यत् जन्म ।) परजन्म । इति भरतः ॥ तत्पर्य्यायः । भवान्तरम् प्रेत्य २ अमुत्र ३ । इत्यमरः ॥ (यथा महाभारते । १ पर्व्वणि ।
"नूनं जन्मान्तरकृतं पापमापतितं महत् ॥"
जन्मन् जन्म । मयूरव्यंसकादित्वात् समासः । पूर्व्वजन्म । यथा, पञ्चतन्त्रे । १ । १५८ ।
"यः प्राक्तनजन्मनि च विद्या भवति ।
माता जन्मान्तरे भूयो न भवन्ति भवादृशाः ॥")

जन्माष्टमी, स्त्री, (जन्मनः श्रीकृष्णजन्मनोऽष्टमी तिथिः ।) भाद्रकृष्णाष्टमी । सा च रोहिणीयुक्ता जयन्तीति । सा तु कृष्णपक्षे भाद्रे अष्टम्यां रोहिण्यां भवति । तत्र श्रीकृष्णस्य जन्मकालो यथा, ब्रह्मपुराणे ।
"अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे ।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः ॥"
विष्णुपुराणे महारात्रौ तस्य जन्मकथनम् ।
"भाद्रपदे च मासे च कृष्णाष्टम्यां महानिशि ।
जातो देवकीजठरात् सर्व्वं जगदानन्दयन् ॥
जायते च मासे च [illegible]
[illegible]"

वह्निपुराणे ।
"रोहिणीसहिता कृष्णा मासि भाद्रपदेऽष्टमी ।
सप्तम्यामर्द्धरात्राधः कलयापि यदा भवेत् ॥
तत्र जातो जगन्नाथः कौस्तुभी हरिरीश्वरः ।
तमेवोपवसेत् कालं तत्र कुर्य्याच्च जागरम् ॥
अविद्धायाञ्च सर्क्षायां जातो देवकीनन्दनः ॥"
इति सप्तमीवेधे जन्मपदवाच्यभेदाद्विषयम् ॥
सप्तम्यादियोगस्य प्रशंसा यथा । ब्रह्मवैवर्त्ते ।
"उदये चाष्टमी किञ्चिन्नवमी सकला यदि ।
भवेत्तु बुधसंयुक्ता प्राजापत्यर्क्षसंयुता ।
अपि वर्षशतेनापि लभ्यते वा न वा प्रिये ॥"
पद्मपुराणे ।
"प्रेतयोनिगतानान्तु प्रेतत्वं नाशितन्तु तैः ।
यैः कृता श्रावणे मासि अष्टमी रोहिणीयुता ॥
किं पुनर्बुधवारेण सोमेनापि विशेषतः ।
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदा ॥"
उपवासादिफलं यथा, भविष्यपुराणे ।
"एकेनैवोपवासेन कृतेन कुरुनन्दन ।
सप्तजन्मकृतात् पापान्मुच्यते नात्र संशयः ॥"
ब्रह्मवैवर्त्ते ।
"मन्वादिदिवसे प्राप्ते यत् फलं स्नानपूजने ।
तत्फलं भाद्रपदाष्टम्यां भवेत् कोटिगुणं द्विज ॥
लक्षाधिपो वाजिमेध विमुक्तिं च प्रयच्छति ।
समासाद्य व्रतं तेन धनान्ते नात्र संशयः ॥"
उपवासाकरणे दोषो यथा, भविष्योत्तरे ।
"श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतम् ।
न करोति नरो यस्तु स भवेत् क्रूरराक्षसः ॥
वर्षे वर्षे च या नारी कृष्णजन्माष्टमीव्रतम् ।
न करोति महाक्रूरा व्याली भवति कानने ॥"
स्कान्दे ।
"न करोति यदा विष्णोर्जन्माष्टमीव्रतं जनः ।
यमस्य वशमापन्नः सहते नारकीं व्यथाम् ॥"
भविष्ये ।
"कृष्णार्थं देवकीपुत्रजन्माष्टमीव्रतं व्रतम् ।
कर्त्तव्यं विधवाभिश्च भक्त्या भक्तजनैः सदा ॥
चातुर्वर्ण्ये नरैश्चापि यावदिन्द्राश्चतुर्दश ॥"
व्रतोद्यापनं, भविष्यपुराणे ।
"पार्थ ! सांवत्सरे प्राप्ते व्रतोद्यापनपूर्व्वकम् ।
वत्सरान्ते विधानं तु सम्यगाहुर्मनीषिणः ॥
भाद्रपदे चाष्टम्यां पूर्व्वपक्षस्य सम्पदि ।
उद्यापनं करिष्यामि जन्माष्टम्यां जनार्द्दनम् ॥
अद्य जन्माष्टमीं देवीं समभ्यर्च्य विधानतः ।
प्रार्थयेद्देवदेवेशं भक्त्या प्रणम्य केशवम् ॥
कृपया मोदकाद्यैश्च महाविष्णो ! प्रियो भव ।
ततो गुरुश्च मां चापि पतिता मोक्षसागरे ॥
आचार्य्यमार्च्य चापि पूर्व्ववत् पूजनं चरेत् ।
यदृच्छया गोविन्दं प्रयोगं पूजयेन्नरम् ॥"
स्कन्दपुराणे ।
"तस्मिन् दिने महापुण्ये सर्व्वपापादिविनाशिनी ।
यत्नतो देवकी कृत्वा वसुदेवमनुव्रती ॥
साक्षाद् भगवते तस्मै ददौ पुत्रं प्रयत्नतः ।
तस्मादेव व्रतं चेदं विधिवत् क्रियते नरैः ॥

यशोदा चापि तत्रैव प्रसूता वरकन्यका ।
वसुदेवस्तथा नन्दो हृष्टो ह्यासत्तदुत्सुकः ।
एवं सपूजयेद्भक्त्या गन्धपुष्पादिभिः फलैः ।
स्थण्डिले स्थापयेद्देवीं सचन्द्रां रोहिणीं तथा ॥
देवकीं वसुदेवञ्च यशोदां नन्दमेव च ।
चण्डिकां बलदेवञ्च पूज्य माघे प्रयत्नतः ॥
अर्द्धरात्रे वसोर्धारां पातयेद्गुडसर्पिषा ।
ततो वर्द्धापनं षष्ठीं नामादि करणं मम ॥
कर्त्तव्यं तत्क्षणाद्रात्रौ प्रभाते नवमीदिने ।
यथा मम तथा कार्य्यो भगवत्या महोत्सवः ॥
ब्राह्मणान् भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ।
सुवर्णं काञ्चनं गाश्च वासांसि कुसुमानि च ॥
यद्यदिष्टतमं लोके कृष्णो मे प्रीयतामिति ।
यं देवं देवकी देवी वसुदेवादजीजनत् ॥
भौमस्य ब्रह्मणो गुप्त्यै तस्मै ब्रह्मात्मने नमः ।
सुब्रह्मण्याय देवाय गोब्राह्मणहिताय च ॥
शान्तिरस्तु शिवञ्चास्तु इत्युक्त्वा तान् विसर्ज्जयेत् ।
एवं च कुरुते देवा देवक्याः सुमहोत्सवम् ।
वर्षे वर्षे भगवतो मद्भक्तो धर्म्मनन्दन ॥
नरो वा यदि वा नारी यथोक्तफलमाप्नुयात् ।
पुत्रसन्तानमारोग्यं सौभाग्यमतुलं लभेत् ।
धर्म्मैर्वापि च कृष्णात् कथितं जन्माष्टमीव्रतम् ।
विष्णुलोकमवाप्नोति नरो नास्त्यत्र संशयः ॥"
पूजा च मध्यरात्रे माधवे ।
"तस्यामष्टम्यां रोहिण्यामर्द्धरात्रेऽर्च्चनं हरेः ॥"
व्रतपारणे कालनियमः । एकदिन जयन्ती-लाभे तत्रैवोपवासः । उभयदिने चेत्तदा परदिने । जयन्त्यलाभे तु रोहिणीयुक्ताष्टम्याम् । उभयदिने रोहिणीयुताष्टमीलाभे परदिने तदलाभे तु निशीथव्यापिन्यामष्टम्यां उभयदिने निशीथव्याप्तौ तदव्याप्तौ वा परदिने इति । उपवासपरदिने तिथिनक्षत्रयोरवसाने पारणम् । यदा महानिशायां पूर्व्वमेकतरस्य सामस्त्येऽवसानं महानिशायां तदवसानं वा तदैकतरावसाने पारणं यदा महानिशायामुभयोरनवसानं तदा उत्सवान्ते पारणम् ।" इति तिथ्यादितत्त्वम् ॥ * ॥
हरिरात्रिनिषेधकजन्माष्टमीपारणकालो यथा,—
"अष्टमी पूर्व्वविद्धा न कर्त्तव्या कदाचन ।
परविद्धैव विहिता सप्तम्यां चाष्टमी भवेत् ॥
सुराया बिन्दुना स्पृष्टं गङ्गाम्भः कलसं यथा ।
विना ऋक्षेण कर्त्तव्या नवमीसंयुताष्टमी ।
सऋक्षापि न कर्त्तव्या सप्तमीसंयुताष्टमी ।
तस्मात् सर्व्वप्रयत्नेन त्याज्यमेवाशुभं बुधैः ॥
वेधे पुण्यक्षयं यान्ति तमः सूर्य्योदये यथा ।
यत्र वेदरसारोऽशौ भोग्यं विहायोऽभवत् ।
कर्त्तव्यं तत्र रूपं वा देवनन्दन ॥"
पारणकालो यथा,—
"अष्टा तिथिनक्षत्रयोरन्ते तु पारणम् ।
अन्यथा पातकमाप्नोति दुष्टो विश्वस्य पारणम् ।
तिथिरष्टगुणं हन्ति नक्षत्रञ्च चतुर्गुणम् ।
तस्मात् प्रयत्नतः कुर्य्यात् तिथिभान्ते च पारणम् ॥"

तत्कथनं यथा,—
"एकदा श्रीकृष्णपार्श्वं नन्दिकर्णोऽपचरत् ।
राजा दिलीपः पप्रच्छ विरमावसरे हरेः ।
दिलीप उवाच ।
भाद्रे मास्यसिते पक्षे यस्यां जातो भवान् हरे ।
तत्कथां श्रोतुमिच्छामि कथयस्व मम प्रभो ॥
कथं वा भगवान् जातः कृष्णः कमलापतिः ।
देवकीजठरे विष्णुः किं कृतं तेन वै प्रभो ॥
वसिष्ठ उवाच ।
शृणु राजन् ! प्रवक्ष्यामि जन्माष्टमीव्रतं हरेः ।
पृथिव्यां विदितं बहु भक्ति कल्पतरुः ।
पुरा वसुन्धरा ह्यासीद्भाराक्रान्ता ।
दानवानां प्रभावेण कम्पिता नाविका ।
अष्टमी लक्ष्मीता चापि यशो कृष्णवेश्वरः ।
यत्र तिष्ठन्ति देवेशाः शाकम्भर्य्यां हराः ।
कर्षेण तापिता भाव ! इति तदा निवेदयत् ।
वसुधारा प्रवेशेन विष्णुमुपागमत् ।
अष्टमी तां समाश्वास्य कौन्तेय त्वदुपाश्रयः ।
उवाच महितं सर्व्वं देवदेवं जनार्द्दनम् ।
आजगाम महादेवो विष्णुं प्रति तदा ।
गत्वा क्षीरोदं सर्व्वाणि देवकर्णेनैकत् ।
उपाय कष्टं बहुनां ! भवता विष्णुना तदा ।
दिव्यं तद्वचः श्रुत्वा दर्शनं प्र गतानामप्यहम् ।
क्षीरोदं तत्र देवेश्च सुरं च स्तुवन्नपि ।
देवपद्धे भगवन् ! हरेः शिवमध्यस्थौ ।
तत्र गत्वा हरिं ध्यात्वा देवदेवेश्वरं प्रभुम् ।
तुष्टाव भगवान् ब्रह्मा स्तोत्रैर्नानाविधैस्तदा ।
नमः कमलनेत्राय वरदाय नमो नमः ।
नमस्तु भावपूर्णाय नमोऽनन्ताय ते नमः ।
नमः कमलकिञ्जल्कपीतनिर्म्मलवाससे ।
नमः पद्मनाभाय शेषशायिने महात्मने ।
नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ।
इति तेषां स्तुतिं श्रुत्वा प्रसन्नः कमलापतिः ।
दिव्यं रूपं दर्शयामास वरदानार्थमुद्यतः ।
श्रीकृष्ण उवाच ।
ब्रह्मन् देव ! महादेव ! सर्व्वदेवसमागमाः ।
कथयामि हितं देव ! श्रूयतां मौनमास्थिताः ॥
भूमिर्दानवरोदैश्च भारात्तो दुःखिता ।
तथा तापिता देव ! भवद्भिर्विनिवेदिता ।
यद् दृष्ट्वा दुराचाराणां भवद्भिर्च्चापि यत्नतः ।
भारो मे हरिष्यामि तथा करिष्यामि ते वचः ।
तत्रावतारं करिष्ये वसुदेवगृहे प्रभुः ।
देवकीजठरे जातो मम भ्राता च सङ्कर्षणः ।
भवद्भिः पृथिवी चापि प्रकटार्थं महीतले ।
गच्छन्तु देवदेवेशा ! सर्व्वे गोकुलवासिनः ।
यमुना तटे च गोपी गोपालानुरागतः ।
अहिकान्ता मथुरा चैव सर्व्वा काम्यास्तदा ।
देवकीजठरे जन्म देहि विष्णोर्ममाप्य च ।
महाराष्ट्रे तदा ज्ञेयं तु कर्त्तव्यः कथेयः ।
तत् वर्षं च विधाय कृष्णा कर्त्तव्यं तद्व्रतम् ।
मासि भाद्रपदे चैव अष्टम्यां कृष्णपक्षके ।

रोहिण्योतारकायुक्ता रजनी घनघोरिता ।
धूमयोगौ संहृद्युक्ते यानि यपति चब्द्रा ॥
तस्यां जातो जगन्नाथः कंसारिर्वसुदेवज ।
वैराटे नन्दपत्नी च यशोदाजीजनत् सुताम् ॥
पुत्र षष्ठकदं पद्मनाभ पद्मेक्षणम् ।
दृष्ट्वा चतुर्भुजं शान्तं शङ्खचक्रगदाधरम् ।
तदा कन्दितुमारेभे दृष्ट्वा चानकदुन्दुभिः ।
तथैव वाग्यमूढेणी दूतकोऽप्यागतोऽपरा ॥
पुत्रं दत्त्वा यशोदायै कन्यां तस्याः समानय ।
कंसासुरभयात्तु हि उवाच दूतको तदा ॥
वैराट गच्छ विप्रेन्द्र । सुत मत्यमिलं प्रभो ॥
पुत्रं दत्त्वा यशोदायै सुतां तस्याः समानय ॥
तां दृष्ट्वा कंसराजोऽपि सभार्यां न हनिष्यति ।
तस्य तद्वचः समाकर्ण्य वसुदेवोऽतिदुःखितः ॥
गृहीत्वा कुमारमानाय वैराटाभिमुखं ययौ ।
यमुना जलसम्पूर्णा तत्पथे सम्बभूवनी ॥
अतिभीता महावीर्या सतीर्थ्योमिभयाकुला ।
तां दृष्ट्वा तत्तटे स्थित्वा यमुनामवलोकयत् ॥
वसुदेवोऽतिदु मार्ता विलोलपेतसोऽभवत् ।
किं करोमि क गच्छामि विधिनाचापि वञ्चित ॥
कथमत्र गमिष्यामि वैराटे नन्दमन्दिरम् ।
चरित्वा तत्र यावन्तं मायया वञ्चितः पिता ॥
यावत्तत्र तटे स्थित्वा यमुनामव्यलोकयत् ।
तेन दृष्टा पुनः सापि क्षीणा चाद्भवन्नाभवत् ॥
ततः सोऽपि पुरो दृष्ट्वा धावन्तं जम्बुकम् ।
क्रोडे कृत्वा सुतं खेरं गच्छ पारं प्रचक्रमे ॥
तं दृष्ट्वा पुत्रवित्रस्तु भगवान् यमुनाजले ।
मायां कृत्वा जगन्नाथो ऋद्धात् स पतितः पितुः ॥
तं सुतं पतितं दृष्ट्वा कर्मबाचोपने हि च ।
तदा क्रन्दितुमारेभे भावे बाला कर उद्यम् ।
विधिना वेदितो ह्यत्र तु स्नितोऽर्द्धं प्रवचित ।
चाहि मां जगन्नाथ । पुत्रं देहि सुरोत्तम ॥
जनकं क्रन्दितं दृष्ट्वा कंसारिः सदयः शिशुः ।
जलक्रीडां समाचर्य पितुरङ्केऽभवत् पुनः ।
तथा तेन हि कथितो यतस्तान्नन्दमन्दिरम् ।
सुत दत्त्वा यशोदायै सुतां तस्याः समाददत् ॥
सुतामङ्के तथा सोऽपि यशोदामकुटुम्बिनः ।
विधायार्दं पुनः प्राप्य मध्ये सादरीं सुताम् ।
प्रतिबुध्य यदे जोडमाषीत् पूर्वैरन्याहतः ।
देवकी च प्रसवेति वार्तां प्राप सुरारिका ॥
आगमे प्रहितो दूतः सुतं दुहितरं च वा ।
आज्ञय कंसदूतोऽसौ सुतां मेने प्रचक्रमे ॥
समागतान् समाकर्ण्य देवकीवसुदेवयोः ।
कंसदूतो गृहीत्वा तां कथयामासतुः पुनः ।
तदा तां कंसराजोऽपि समयेऽभ्युदयाम्बरम् ।
गृहकाण्यवमोचां पूर्वं नाकटुदाभवाम् ।
दृष्ट्वा कंसो विहायसीं विद्युत्सुचिरितप्रभाम् ।
आदिदेवागुरुश्रेष्ठो वस भेजा हिमोदधि ॥
आज्ञां कमलपुराणे तु निर्वेदं तां कर्णितः ।
निद्रामवशतां मौरी जयन्त्यां मधुरानिकम् ।
जन्माष्टमी यत्र दिवा जर्म भोजनं प्रकुर्वते ।
सा कुर्वन् मौरुषे चानः पूर्वसुकृतैर्विहतः ।

सम्माति छद्मगमाय कथाहि गुरुसञ्चतन् ।
क्रीडिता भावभावेन कथयत्येते मनो दधौ ॥
प्रातिमावेश तं कंच कथाय जयदेश्वरः ।
एतत्ते कथितं राघव । लब्धपञ्चाष्टमीव्रतम् ॥
य इदं कुरुते राघव । या च नारी चरेद्व्रतम् ।
प्राप्नोत्यैश्वर्यमतुलमिह लोके यदीप्सितम् ॥
अन्तकाले हरेः स्थानं दुर्लभञ्च गमिष्यति ।
एकदेशोपवासेन व्रतेन कृतकृत्य ॥
सप्तजन्मकृतात् पापान्मुच्यते नात्र संशयः ।
पतनरत्नादिद्धं चैव यत् पुण्य वाग्यमाप्नितम् ॥
स्थितम तद्भवेत् धर्मं पुरा थाहेन भाषितम् ।
न तस्य पुत्र शोको नराणां न च योषिताम् ॥
अपन्ती न कृता येन्तु जागरादिसमन्विता ।
जायते तु विधवा यस्याशीविषुवास्त्र नरा ॥
योषितश्च न सन्देह सत्योक्तं तव गुह्यणे ॥"
इति भविष्यपुराणे यधिष्ठिरकृष्णसंवादे श्रीकृष्णजन्माष्टमीव्रतकथा समाप्ता ।
जन्मी [न्] पुं, (जन्म अस्यास्तीति । जन्मन् + "व्रीह्यादिभ्यश्च ।" ५ ।२ ।११६ । इति इनिः ।) प्राणी । इत्यमरः । १ । ४ । ३० । (यथा, भारवि । ११ । ९ ।
" अभिभोऽस्य स्थितिं विद्वान् कल्पोमिव चलाचलाम् ।
भवाम्भोध समीग्न्याय च्यायाचारो हि जायते ॥")
जन्मेजय, पुं, (जनान् शत्रून् एजयति कम्पयतीति । जन + एजि + "एजेः खश् ।" ३ । २ । २८ । इति खश् ततो मुमागमात् जनमेजय इति सिद्धे प्रकम्पादित्वात् साधुः ।) जनमेजयराजः । इति श्रीभागवतम् । (एतन्निर्वाहितयदा देवीभागवतम् । २ । ११ । ३६ टीकाटीकायाम् ।
"जनमेजयातिगुह्येण प्रभूतमित्तवान् मम ।
एतच्च कथन यानोऽहं जन्मेजय इति श्रुत ॥")
जन्य, स्त्री (जन्यते इति । जनि + "तकिशसि चतियतिजनिभ्यो यत्वाच्य ।" इति वार्त्तिकोक्त्या यत् ।) हर्ष । परीवादः । सङ्गामः । इति मेदिनी । ये ४५ । (यथा रघौ ।३।७०।
"जन जन्य रघोर्घोरं पार्वतीयैर्गणैरभूत् ।")
जन्य, पुं (जायते जनयति वा । जन + "भव गेयेति ।" ३ । ४ । ६८ । इति कर्तरि यत् ।) जनक । इति मेदिनी । ये, ४६ । (देहादिः । यथा महाभारते । १२ । १० । २६ ।
"जनेष्वेवा महान्तेषा जन्ते विषयवासिनि ।"
देहः । यथा भागवते । १ । ८ । ३१ ।
"विहृत्यभयर्थहसितिस्मिन
स्तुवन्त भर्त्य विजनन् जनाह्नम् ।"
जनस्य अन्यः । जन + "प्रगवजद्यार्थं च ।"
४ । ४ । ८० । इति यत् । जनजन्य । इति सिद्धान्तकौमुदी ।)
जन्य, त्रि (जन्यते इति । जन् + णिच् + कर्मणि यत् ।) उत्पाद्य । यथा —
"जनकस्य जनादौ हि जन्ये निर्गन्ध निर्घटक ।

यथा गोपुरद्वारादि काशीपर्व्वसमस्तके ।"
इति ब्रह्मवैवर्त्ते गौरीशकृष्णजन्मखण्डम् ।
("जन्यानां जनक कालो जगतामाश्रयो मतः ।"
इति च भाषापरिच्छेदे ४५ ।)
जनहिता । (जन्यं वधूं वहति प्रापयति वा । संज्ञायामिति साधुः ।) नवोढाज्ञातिः । नवोढा भृत्यः । वरस्य स्निग्धः । य तु जामाता जनकः । इति मेदिनी । ये २६ । (जन्याय हितः । यत् ।) जनहितः । इति व्याकरणम् ।
जन्या, स्त्री, (जायतेऽस्याम् । जन + यत् यत् वा । मातृसुखमाप्त्वा जात्याप्नयाम् ।) मातृसखी । इति मेदिनी । ये, ४६ । (यथा, रघौ ।६।१० ।
"अथाङ्गराजादवतार्य चक्षुः
याहीति जन्यामवदत् कुमारी ।")
प्रीतिः । इति हेमचन्द्रः ।
जन्यु, पुं (जायते इति । जन + "यजिमनि शुन्धिदसिजनिभ्यो युच ।" उणा ३ । २० । इति युच् ।) प्राणी । अग्निः । धाता । इति मेदिनी । ये २६ । (जठराग्निः । ब्रह्मा । यथा ऋग्वेदे । १२१ । ६८ ।
"जन्मनाया द्वितीयोऽथ जन्युर्हि मम कर्त्तृदा ।")
जप झट्कारे वाचि । इति कविकल्पद्रुमः । (भ्वां परं सकं सेट् ।) निष्ठादिषात्वपरं रहित ध्वन्यादपोञ्चारण झट्कारः । जपति मन्त्रं याचकः । इति दुर्गादासः ।
जप, पुं (जपनं इति । जप + "यमजपो रदुपयोः ।" ३ । ३ । ६१ । इति भावे अप् ।) विधानेन मन्त्रोच्चारणम् । तद्विधिर्यथा, —
"मौनेनैव च कुर्वीत इदं कुर्वीत इत्यपि ।
समाश्रितमनाःसूक्ष्मी स्मरन् वानि विनायेन ।
विधिवत्तात् जपयज्ञो विष्णो रसभितुर्ते ।
उपांशुः स्यात्तस्यात्रयुक्तः मानसो मानसः स्मृतः ।
जिह्वा स्पृशेन् नत् यत्र तत्र स्यात् विशेषणम् ।
जलमध्ये उदकम्ब्येव तत्त्वज्ञ स्मृतम् ।
सुतावशेषिदमेव समादे स्फटिकेन वा ।
अथवा सर्वदा कार्या कन्दसूत्रनिबन्धने ।
विरचयन् गर्भितमण्ड प्रवायुक्ष मयेन ।
जपयज्ञममितासे यत्नाचैतद्धे मे ।
विघ्नं यन्ति च समावेशेऽस्यैव न संशयः ।
कुम्भीपाकमयत्रक्ष पर्य्यन्तमा न विद्यते ।
इत्यभियुक्तस्य प्रदीप च पुरा भवम् ।
विदुर्म तु मयोक्तेन मानसा च न दूषणम् ।
रुद्रपक्षणस्यानेनो रक्षिष्यति हेतुना ।
दारकस्तो वर्त्तेन मालां वाड्य छन्दे वा ।"
इत्यादि पाद्मपुराणे "पत्रा कृष्णाचारादि" वचनाच्च । तत्रान्तर्गत यथा —
"तत्र संपूज्य विद्यावताऽथ प्रयाच्य ।
न दुर्लं न निम्नञ्च भौमं मनसङ्ग तरः ।
कर उपरतादापि अन्यन्येः समन्वित ।
विना वरदरक्षितौ स्वपदेद्य ऋत्वा ।
नवो दह्यते च साक्षात् न कर्त्तुम् ।
विरोधी वाक्येन विश्वेदं कर्त्तव्याचारः ।

द्विविधूतमयोगा स्यादुपांशु र्न जप स्मृतः ।
मन्त्राक्षरार्थसेवा वाचिक स जपः स्मृतः ॥
उच्चैर्जपादुविशिष्टः स्यादुपांशुर्जपमिष्टुते ।
जिह्वाजपः शतगुणः मानसो मानसः स्मृतः ।
जिह्वाजप स विज्ञेय केवलं जिह्वया बुधैः ॥"
तत्र वर्ज्यं यथा,—
"विश्वासोऽन्नगमाहारादिकृत कर्मं करोति च ।
जपार्थवान्नि धर्ममयविभं भवेत् प्रिये ॥
अभिवादनदेवादिसम्भोगप्राप्तयुत ।
यो जपेत दयशात् देवता मुनिर्मिता ॥
आगतं कर्मार्थ निर्धं पुनर्निशोधनं भवम् ।
मौनानुष्ठानेन कोपं जपकाले विवर्जयेत् ॥"
अथ करमालाजपनियमो यथा,—
"तर्जनी मध्यमानामा कनिष्ठा पीडिता क्रमात् ।
तिस्रो कुर्यात्तिस्रो मध्यमा पर्वभिका ॥
तर्जन्या मध्यमाया मेरुसेवोपकल्पयेत् ।
अनामामध्यमारभ्य कनिष्ठादित एव च ॥
तर्जनीमूलपर्यन्तं दशपर्वसु संजपेत् ।
अनामामध्यमारभ्य कनिष्ठादित एव च ।
तर्जनीमध्यपर्यन्तमष्टपर्वसु सञ्जपेत् ॥"
मन्त्रकृतम् चतोऽस्मरमादिविषयम् ।
शक्तिविषये तु ।
"अनामिकायं मध्य कनिष्ठादिविपर्ययिका ।
मध्यमायाश्च चितयं तर्जनीमध्यमर्मवि ॥
तर्जन्या तथा मध्यं यो जपेत् स तु मायकः ।
अनामाग्रमारभ्य प्रादक्षिण्यक्रमेण च ॥
तर्जन्यादिपर्यन्तमष्टपर्वसु संजपेत् ॥"
श्रीविद्याविषये तु ।
"अनामामध्यमायाश्च मध्यमाश्च द्वय क्रमम् ।
कनिष्ठामाश्च तर्जन्याश्च मध्यं मध्यं द्वारि ॥
तर्जन्यामध्यमायाश्च दिक् स्यात् त्रितय शुभम् ।
मध्यभक्षमारेदिवि । अर्गितरसुन्दरीम् ॥
अनामामध्यमारभ्य प्रादक्षिण्यक्रमेण च ।
तर्जनीमध्यपर्यन्तमष्टपर्वसु संजपेत् ॥"
दशमपि चतोऽस्मरमादिविषयम् ॥ ॥
"अङ्गुलीन वियुञ्जीत किञ्चित् कुञ्चितं तले ।
अङ्गुलीनां वियोगाच्च छिद्रे च स्रवते जपः ॥
अङ्गुल्यग्रे च यज्जप्तं यज्जप्तं मेरुलङ्घने ।
पर्वसन्धिषु यज्जप्तं तत् सर्वं निष्फलं भवेत् ॥
जपमानोपरिहाङ्गुष्ठ यो करेत्सय सम ।
यद्वन्ति हारवानां नमीत् कर्तया पुरः ॥
हृदये हस्तमाधाय तिर्यक् कृत्वा कराङ्गुलीः ।
आच्छाद्य वाससा हस्तौ दक्षिणेन सदा जपेत् ॥"
अक्षमालायां विशिष्टनियमो यथा —
"मालाशिखरपर्यन्तं न चालेत्र च पुनर्जपे ।
न लङ्घयेत् नियतः मालाश्रमम् चालयेत् ॥"
अथ नियमतमं यथा —
"मालाद्वयमालासमं मालासय चरेत्कम् ।
वृद्धिक्रमे न वर्जन्त जयत्यासु चालयेत् ॥"
अथ वर्णमालाजपनियमो यथा,—
"अनुलोम विलोमाभ्यां पयावत् जपेत् ततः ।
अकारादिक्षकारान्त बिन्दुयुक्तं विभाव्य च ॥

वर्णमाला प्रमाख्याता अनुलोमविलोमतः ।
क्षकारादिविभिन्नेन विहिता वर्णमालिका ॥
अकारादिक्षकारान्ता वर्णमाला प्रकीर्तिता ॥
मार्जे मेरुरुक्तं तत्र जपसंख्याविवर्जनम् ।
अथवा वर्णमालाया जप वर्णपरम्परा ॥"॥
तत्र फलं यथा,—
"वर्णसिद्धो विधसिद्धोऽक्षिमयजपं लभेत् ।
सर्वकामैव सपालां जायतेऽधो महामना ॥
अतो देवता शिव ध्यानमाला प्रकीर्तिता ।
प्रथमा विद्युतात् कामान् दद्यात्मुक्तिश्च
दायकीम् ॥
यथा पचनरसिद्धार्थाश्च मन्त्रा वर्णोदि भौतमा ।
जापिन भौतमप्यपि संप्रभौता वामगात्र ॥
माधवं कर्मणावा तन्न दहदाधि तमामि च ।
वर्णे ते भवभावत्व कर्मा सादन्ति सौभगीम् ॥
मायाया वान्तिकाश्चैव जपयज्ञ कीर्तितम् ।
तथाख्यातप्रयोगेषु साधकी मानव यास्य ॥"
इति तन्त्रसारः ॥
जपनं, क्ली (जप कुत्सायां + भावे ल्युट् ।) जपः ।
इत्यमरटीका ॥ (यथा, महाभारते ।१३।
१२६ । ५ ।
"सम्भाव इव वैशाखे वर्णनं जपनं प्रति ।")
जपपरायण, त्रि, (जप एव परमयनं आश्रयो
यस्य ।) जपासक्तः । जपशीलः । यथा,—
"दिवारात्रिगतं देव । पूजाजपपरायण ।
करोमि विविधकृत महाकार्यं महेश्वर ॥"
इति तिथ्यादितत्त्वम् ॥
जपा, स्त्री, (जपति ताम्रिका जपयति । जप +
अच् टाप् ।) जवापुष्पम् । इति भीम
पर्वा । ३ । ११६ । तत्र पर्यायगुणाः ।
"ओड्रपुष्पं जपा चाथ त्रिसन्ध्या चारुणा सिता ।
जपा सन्ध्यादिवौ वेदा विसन्ध्या कफवातजित् ॥"
इति भावप्रकाशः ॥
(रिविवचाला जवापुष्पे प्रमाणम् ॥)
जम्, अमन । इति कविकल्पद्रुमः । (भ्वा॰ पर॰
अक॰ सेट् ।) जमनं भैथुनम् । जमति युवा ।
इति दुर्गादास ॥
जम उ अदने । इति कविकल्पद्रुमः । (भ्वा॰ पर॰
अक॰ सेट् ।) जमनं भैथुनम् । उ, जमाती ।
इति दुर्गादास ॥
जम, ऋ क अदिं । इति कविकल्पद्रुमः । (चुरा॰
पर॰-अक॰ सेट् ।) जमीमे अभाकंसिताभ्यास-
र्षण्करते । ऋ क, अजमाम भाव अङ्गा । इति
दुर्गादास ॥
जम इ क प्रमे, मावद्दिवित इति भाव ।
इति कविकल्पद्रुमः ॥ (भ्वा॰ आत्म॰ अक॰ सेट् ।)
इ, जमते । क जमते । प्रमदनार्थे मुख-
मावसारे शरीर जाम । अविश्वसनीय । इति
प्रमदनार्थस्थानम् । इति दुर्गादास ॥
जम क नमें । इति कविकल्पद्रुमः ॥ (भ्वा॰
आत्म॰-अक॰ सेट् ।) कमा । जामयेशिलिम्पिना
न जिह्मेषु । इ, जमनी चैत्र । इह कमो-

इबौद्धश्चैव इव चाम्रवैरा जातेव जम्बीर
कामयेद्रं । इति दुर्गादासः ॥
जम उ अदने । इति कविकल्पद्रुमः । (भ्वा॰
पर॰-सेट् । उदित्त्वात् क्त्वेट् ।) उ, जमित्वा
जान्त्वा । इति दुर्गादासः ॥
जम, च, भक्षणे । इति शब्दरत्नावल्यां जम-
धातुमाचष्ट ॥
जमनी, त्रि, (जमनी प्रकृत अवन्ती तत्क्षेत्रं
इति । जम + क । पृषोदरादित्वात् सर्वत्र
जमनी । इति द्विरूपकोषः ॥
जमदग्नि, पुं, (जमत् प्रज्वलत् अग्निरिव तेजः
यस्य । तन्नामाश्रितोऽदितिः । दहति इत्यर्थे ।
पृषोदरादित्वात् साधुः ।) ऋषिविशेषः । स तु भार्गवगोत्रः
ऋचीकपुत्रः परशुरामपिता च । इति शब्दरत्नावली ।
जमदग्निरूपोऽपि महाभारते वनपर्वणि ।
११६ अध्यायेऽस्य वृत्तान्तः । अपि च सर्वानि अत्र
कारे चास्मिन् । यथा, मार्कण्डेये ।८८।१८
"ऋषिश्चैव वसिष्ठश्च कश्यपश्च महर्षिः ।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः ।
तथैव पुत्रो भगवानृचीकस्य महात्मनः ।
जमदग्निश्च सप्तैते तस्मादेते महर्षयः ॥")
जमनं क्ली (जम भक्षे + भावे ल्युट् ।) भैरवं
भोजनम् । इत्यमरटीकायां भरतः ।
जमाती, पुं, (जामा च अतिः । जामाता
अपि जामातृ जामातृशब्दस्य जकारो विसर्गः
जायापतिः । इत्यमरः । २ । ६ । ३४ । ३७ ।
जामातोऽयं प्रसः ॥
जमाल, पुं, (जम् अदने + कालन् ।
यद्वा जम + आलच् । अर्थं जमति ।
ला + क ।) पङ्कः । इत्यमरः । ३ । ३ । १६१
(यथा, शैवत्तन्त्रे । १ । ११० ।
"धरटघमालान्तेवाच
जलाढ्यानां जम्बीरविभात् ।
वरीधाद्विपथरहितो
अम्बाय वर्षमनोहरम् ॥")
हृीवेर । इति मेदिनी । ३, ४१ । वेत
पुष्प । इति शब्दरत्नावली ॥
जमालिनी, स्त्री (जमाल मैत्रेयोऽस्त्यस्या इति
जमाल + इनि ।) नदी । इति शब्दरत्नावली ॥
जुड, ङि बन्धे। इति कविकल्पद्रुमः। (तुदां-परं-सकं-सेट्।) ङि, जुडति अजुडीत्। तालव्यचवर्गादिपाठप्रसङ्गेन जुडबन्धौ। जुडोड्। इति दुर्गादासः॥

जुत, ऋ ङ दीप्तौ। इति कविकल्पद्रुमः। (भ्वां-आत्मं-अकं-सेट्।) ऋ, अजुजोतत्। ङ, जोतते। इति दुर्गादासः॥

जुन, श गतौ। इति कविकल्पद्रुमः। (तुदां-परं-सकं-सेट्।) श, जुनति वाणिजः। इति दुर्गादासः॥

जुर्व, ई बधे। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्।) जूर्वति। जूः जुरौ जुरः। ई, जूर्णः। इति दुर्गादासः॥

जुल, ञ पिषि। इति कविकल्पद्रुमः। (चुरां-उभं-सकं-सेट्।) ञ, जोलयति। पिषि चूर्णीकरणे। इति दुर्गादासः॥

जुष, कि तर्के। प्रमौ। इति कविकल्पद्रुमः। (चुरां-पक्षे भ्वां-परं-सकं-अकं च सेट्।) कि, जोषयति जोषति जनमनुष्य सुधीः। तर्कयतीत्यर्थः। इति दुर्गादासः॥

जुष, म ङ ई सि तुष्टौ। सेवे। इति कविकल्पद्रुमः। (तुदां-आत्मं-सकं-अकं च-सेट्।) प्रथम स्वरी। म ङ, जुषते। ई सि, जुष्टोऽस्ति। तुष्टि हर्षे। इति दुर्गादासः॥

जुष्टक, पुं, (जुष्ट+कन्। ततः स्वार्थे कन्।) यूषः। इति शब्दचन्द्रिका॥

जुष्ट, स्त्री, (जुष्यते स्म इति। जुष+क्त।) उच्छिष्टम्। सेवितः, त्रि। इति मेदिनी। टे, १६॥ (यथा, भट्टिः। १। ३।

"इयतो महाराजरथस्य

सम्भवता मानवधर्मवदिह।")

जुष्य, त्रि, (जुष+कर्मणि क्यप्।) सेव्यः। इति मुग्धबोधम्॥

जुहुराण, पुं, (जुहोति इति। हु+कर्मणि कानच्।) कठिनहृदयः। अग्निः। चन्द्रः। इति संक्षिप्तसारे उणादिवृत्तिः॥

जुहू, स्त्री, (जुहोत्यनया। इति हु+"हुवः श्लुवच्च।" उणां। २।६०। इति क्विप् दित्वादि च। दीर्घश्च द्वित्वं च पलाशकाष्ठनिर्मितार्द्धचन्द्राकृतियज्ञपात्रम्। जुहोत्यनया जुहूः। इत्यमरः। २।७।२५॥ (यथा, ऋग्वेदे। १।७६।१।

"अग्ने। जुह्वा जुहुता वयम्।")

जुहुराण, पुं, (जुह इति इति। "कर्मण्यण्।" ३।२।१। इत्यण्।) अग्निः। चन्द्रः। इति सिद्धान्तकौमुद्यां उणादिवृत्तिः॥

जुहुवान् [त्] पुं, (जुहुते सर्व दीपयति, देवान् तर्पयति वा। जुहु+अतृप् निपातनात् साधु।) अग्निः। इति शब्दरत्नावली॥

जू, स्त्री, (जु+"क्विब्वचिप्रच्छीति।" उणां। २। ५७। इति दीर्घश्च।) आकाशः। सरस्वती। पिशाची। वेगवान्। इति शब्दरत्नावली। अग्निः। वायुः। इति मेदिनी। जे, २॥

जूट, पुं, (जट संहतौ+घञ् निपातनात् साधु।) जटाबन्धः। इत्यमरटीकायां भरतः। जटा। इति शब्दरत्नावली॥

जूटक, क्ली, (जूट+स्वार्थे कन्।) जटाबन्धः। जटा। इति भूरिप्रयोगः॥

जूति, स्त्री, (जु वेगे+"ऊतियूतिजूतीति।" ३।३।९७। इति क्तिन् निपातनात् दीर्घश्च।) वेगः। इत्यमरः। १।१।६८॥ (यथा, ऋग्वेदे। १।२।१६।

"न यमाप्नोति जूतिभिः।")

जूतिका, स्त्री, (जूत्या कायतीति। कै+कः। टाप्।) कर्पूरभेदः। इति राजनिर्घण्टः॥

जूर, क ङ य उ ज्वारे। बधे। इति कविकल्पद्रुमः। (दिवां-आत्मं-सकं-अकं च सेट्।) दीर्घी। क य, जूर्यते। उ, जूर्त्वा। ज्वारः शोकताधूमबोधनम्। इति दुर्गादासः॥

जूर्ण, पुं, (जूर+क्त। जुर इति प्राकृत भाषा।) तृणविशेषः। तज् इति भाषा। तत्पर्यायः। धमनः २ सूक्ष्मः ३ दर्भः ४ यावनालः ५। इति रत्नमाला। जूर्णकम् ६ जूर्णम् ७। इति केचित्॥

जूर्णाह्वय, पुं, (जूर्ण इति आह्वा आख्या यस्य।) देवधान्यम्। इति हेमचन्द्रः॥

जूर्ति, स्त्री, (ज्वर+"ऊतियूतिजूतीति।" ३।३।९७। इति क्तिन्। "ज्वरत्वरेति।" ६।४।२०। इत्यूठ् च।) ज्वरः। इत्युणादिकोषः। व्याधिः। देहे क्लेशः। ज्वरः। इति वैदिककाले सम्भाषितम्॥

जूर्णि, स्त्री, (ज्वर+भावे क्तिन्। "ज्वरत्वर-श्रिव्य" इत्यूठ्।) ज्वरः। इत्यमरः। १।५।१४॥

जूष, प बधे। इति कविकल्पद्रुमः। (भ्वां-परं-सकं-सेट्।) दन्त्यमध्यः। प, जूषति जूषते। मध्योऽन्त्यवर्गान्तः। इति दुर्गादासः॥

जूर्ण, क्ली, पुं, (जुष+उणादिरक् बाहु।) तृणम्। सुमालिकाभेदः। इति सिद्धान्तकौमुद्यां उणादिवृत्तौ भरतः॥

जूकाक, स्त्री, (जूयते इति। जु+बाहु कन्।) शस्त्रविशेषः। इति शब्दचन्द्रिका। नाराच इति भाषा॥

जृ, वयोहानौ। इति कविकल्पद्रुमः। (भ्वां-परं-अकं-सेट्।) जयावरदामदायकम्। जरति रघुः जरः। इति दुर्गादासः॥

जृभ, ङ उ जृम्भे। इति कविकल्पद्रुमः। (भ्वां-आत्मं-अकं-सेट्।) मध्यस्थदृप्रदन्त्यः। ङ, जृम्भते। उ, जृम्भित्वा। इति दुर्गादासः॥

जृम्भ ङ ई जृम्भे। मात्रमैथिल इति भाषा। इति कविकल्पद्रुमः। (भ्वां-आत्मं-अकं-सेट्।) ङ, जृम्भते। ई, जृम्भः। इति दुर्गादासः॥

जृम्भ, पुं, क्ली, (जृम्भ+भावे घञ्।) मुखविदारणम्। यावत्तदिति भाषा। तत्पर्यायः। जृम्भणम् २ जृम्भा ३ जृम्भिका ४। इति शब्दरत्नावली। जम्भा ५ जम्भिका ६। इति राजनिर्घण्टः॥ (यथा, सुश्रुते। १। ४।

"निद्रालस्यं तथा जृम्भाः पूर्वरूपं विचक्षणैः।

श्रमक्लमविषादैश्च कथितं देहधारिणाम्।"

इति कर्मविपाकम्। ७।

विकासः। स्फुटितः। इति शब्दरत्नावली॥ (यथा, प्रबोधचन्द्रोदये।४।१८। "सद्यश्चैव वसुचन्द्रमसामुदयवीर्यलितयौवना जृम्भाभ्य मदविलसितसस्यदृशिमा कुसुमप्रस्वम।")

जृम्भण, क्ली, (जृम्भ+भावे ल्युट्।) जृम्भः। इत्यमरः। १।७।३३॥ (यथा, सुश्रुते। १।२।

"इन्द्रियार्थेष्वसम्प्राप्तिर्गौरवं जृम्भणं श्रमः।"

जृम्भा, स्त्री, (जृम्भ+भावे अच्। टाप्।) जृम्भः। इति शब्दरत्नावली। (यथा, देवीभागवते। १। १६। ६१।

"तुष्टिः पुष्टिः क्षमा लज्जा जृम्भा तन्द्रा च शक्तयः।")

जृम्भिका, स्त्री, (जृम्भा+स्वार्थे कन् टापि अत इत्वम्।) जृम्भा। इति शब्दरत्नावली। (विकारविशेषवतनिद्रारोगविशेषः। यथा, वामनपुराणे चतुर्थेऽध्याये।

"निद्रायां मोहमूर्च्छाविषादो जृम्भिका।

मद्दृष्ट्या तदैव मम श्रीः संचारिणि च।"

जृम्भ+णिच्+ण्वुल। टापि अत इत्वम्। जृम्भकास्त्रनोऽधिदेवता। यथा, महाभारते। ३।८।११।

"ब्रह्मास्त्राणि महाबाहुः जृम्भिका इत्यादि

दिव्यम्।")

जृम्भित, क्ली, (जृम्भ+भावे क्त।) विचेष्टितम्। प्रवृद्धम्। जृम्भा। स्फुटितम्। इति हेमचन्द्रः। (यथा, कथासरित्सागरे। ८।८८।

"अहो कि मे दारुणकर्म्मापायकमुपजृम्भितम्।")

स्फोटो करणम्। इति मेदिनी। ते, ११६॥

जृम्भिणी, स्त्री, (जृम्भ+णिनि।) स्पृक्का। इति शब्दचन्द्रिका। (सम्भावनाविशिष्टा शिशिरो ग्रीष्मः।)

जॄ, दृष् ष ञ ञ ज्यानौ। इति कविकल्पद्रुमः। (दिवां-परं-अकं-सेट्।) दृष्; अजरत् अजारीत्। ष, जरा। ञ, जरयति। ञ जीर्यति। ज्यानिर्व्योहानिः। इति दुर्गादासः॥

जॄ, नि कि ज्यानौ। इति कविकल्पद्रुमः। (क्र्यां-चुरां-पक्षे भ्वां-परं-अकं-सेट्।) नि, जृणाति जीर्णाति। कि, जारयति जरति। इति दुर्गादासः॥

जेता, [तृ] त्रि, (जयतीति। जि+तृच्।) जयशीलः। जयकर्त्ता। जिष्णुः ५। विजयी ६। इत्यमरः। ३।१।३०॥ (यथा, रघुः। १९।५३।

"अनार्य्यं योऽपरमपार्थं मातुरुद्धितस्य स्फूर्त्तुः।"

विष्णुः । यथा महाभारते । १३ । १४८ । २८ ।
"अच्युतो विजयो जेता विश्वयोनिः पुनर्वसुः ॥")

जेन्ताकः, पुं, स्वेदविशेषः । यथा, "अथ जेन्ताकं चिकीर्षुर्भूमिं परीक्षेत पूर्वस्यां दिशि उत्तरस्यां वा गुणवति प्रशस्ते भूमिभागे कृष्णमधुरमृत्तिके सुवर्णमृत्तिके वा परीवापपुष्करिण्यादीनां जलाशयानामन्यतमस्य कूले दक्षिणे पश्चिमे वा सूपतीर्थे समसुविभक्तभागे सप्त वाष्टौ वा अरत्नीरुपक्रम्य उदकात् प्राङ्मुखमुदङ्मुखं वा अभिमुखतीर्थं कूटागारं कारयेत् । उत्सेधविस्तारतः परमरत्नीः षोडश समन्तात् सुवृत्तं मृत्कर्मसम्पन्नमनेकवातायनम् । अस्मिंश्च कूटागारे समन्ततो भित्तिमरत्निविस्तारोत्सेधां पिण्डिकां कारयेदाकपाटात् मध्ये चास्य कूटागारस्य चतुष्किष्कुमात्रं पुरुषप्रमाणं मृण्मयं कन्दुसंस्थानं बहुसूक्ष्मच्छिद्रमङ्गारकोष्ठकस्तम्भं सपिधानं कारयेत् । तञ्च खादिराणामाश्वकर्णादीनां वा काष्ठानां पूरयित्वा प्रदीपयेत् । स यदा जानीयात् साधु दग्धानि काष्ठानि गतधूमानि अवतप्तं केवलमग्निना तदग्निगृहं स्वेदयोग्येन चोष्मणा युक्तमिति । तत्रैनं पुरुषं वातहराभ्यक्तगात्रं वस्त्रावच्छन्नं प्रवेशयेत् प्रवेशयंश्चैनमनुशिष्यात् सौम्य! प्रविश कल्याणायारोग्याय चेति प्रविश्य चैनां पिण्डिकामधिरुह्य पार्श्वापरपार्श्वाभ्यां यथासुखं शयीथाः । न च त्वया स्वेदमूर्च्छापरीतेनापि सता पिण्डिकैषा मोक्तव्या आप्राणोच्छ्वासात् भ्रश्यमानो ह्यतः पिण्डिकावकाशात् द्वारमनधिगच्छन् स्वेदमूर्च्छापरीततया सद्यः प्राणान् जह्याः तस्मात् पिण्डिकां न कथञ्चन मुञ्चेथाः । त्वं यदा जानीया विगताभिष्यन्दमात्मानं सम्यक्प्रस्रुतस्वेदपिच्छं सर्वस्रोतोविमुक्तं लघूभूतमपगतविबन्धस्तम्भसुप्तिवेदनागौरवमिति ततस्तां पिण्डिकामनुसरन् द्वारं प्रपद्येथाः निष्क्रम्य च न सहसा चक्षुषोः परिपालनार्थं शीततोयमुपस्पृशेथाः । अपगतसन्तापक्लमस्तु मुहूर्तात् सुखोष्णेन वारिणा यथान्यायं परिषिक्तोऽश्नीयाः ।" इति चरकः ॥

जेमनं, क्ली, (जिमु अदने + भावे ल्युट् ।) भोजनम् । इत्यमरः । २ । ९ । ५६ ॥

जेयः, त्रि, (जीयते इति । जि जये + "अचो यत् ।" ३ । १ । ९७ । इति कर्मणि यत् ।) जेतव्यम् । जयनीयम् । इत्यमरः । ३ । १ । ७४ ॥ (यथा शाकुन्तले । ७ । १ ।
"तस्मात् कामारम्भं पूर्वं देवाः पुरुषसर्वेश्वराः ।
तव वै हि अयो वाय राजा नारीति ते [illegible] ॥")

जेव ऋ ङ सेवने । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सकं-सेट् ।) ऋ, अजिजेवत् । ङ, जेवते सेवते । इति दुर्गादासः ॥

जेष, ङ ज गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-आत्मं-सकं-सेट् ।) ङ, जेषते जिजेषे । ज, अजेषिष्ट । इति दुर्गादासः ॥

जे, क्षये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अकं-अनिट् ।) जायति । इति दुर्गादासः ॥

जैत्रं, क्ली, (रोगजयात् जेत्रः । तदेव । "प्रज्ञादिभ्यश्च ।" ५ । ४ । ३८ । इत्यण् ।) औषधम् । इति राजनिर्घण्टः ॥

जैत्र, त्रि, (जेतैव । जेतृ + प्रज्ञादित्वादण् ।) जेता । इत्यमरः । ३ । १ । ७४ ॥ (यथा माघे । १ । ६१ ।
"शरीरिणा जैत्रशरेण यत्र
निःशङ्कमथौ मकरध्वजेन ॥")
पारदे, पुं । इति राजनिर्घण्टः ॥

जैत्ररथः, पुं, (जैत्रो जयशीलो रथो यस्य ।) जयशील । इति हलायुधः ॥

जैत्री, स्त्री, (जयति रोगादिनाशकतया सर्वोत्कर्षेण वर्तते इति । जि + तृच् । तत स्वार्थे अण् ततः स्त्रियां ङीप् ।) जयन्तीवृक्षः । इति शब्दरत्नावली ॥

जैनः, पुं (जिन एव । यद्वा, जिन उपास्य देवताऽस्येति । जिन् + अण् ।) जिनोपासकः । बौद्धः । इति हलायुधः । (धर्मविशेषेऽस्मिन् भारतवर्षे प्रचलितेषु विविधेषु धर्मेषु जिनधर्म एव श्रेष्ठतम इति जैना प्रवदन्ति । एषामुपास्यदेवता जिनः । ते तु श्वेताम्बरदिगम्बरभेदेन द्विविधाः । श्वेताम्बरास्तु प्रायश आगमिकाः । अधुना नानाशाखासु विभक्ता समभवन् । दिगम्बरास्तु प्रायशो विदेशाः । एतेषां मतान्तरं सर्वदर्शनसङ्ग्रहात् प्रदर्श्यते । यथा —
"ननु न कश्चित् पुरुषविशेषः सर्वज्ञपदवेदनीयः प्रमाणपद्धतिमध्यास्ते सद्भावग्राहकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भात् तथाचोक्तं तौतातितैः ।
सर्वज्ञो दृश्यते तावन्नेदानीमस्मदादिभिः ।
दृष्टो न चैकदेशोऽस्ति लिङ्गं वा योऽनुमापयेत् ॥
न चागमविधिः कश्चिन्नित्यः सर्वज्ञबोधकः ।
न च तत्रार्थवादानां तात्पर्यमपि कल्पते ॥
न चान्यार्थप्रधानैस्तैस्तदस्तित्वं विधीयते ।
न चानुवदितुं शक्यः पूर्वमन्यैरबोधितः ॥
अनादेरागमस्यार्थो न च सर्वज्ञ आदिमान् ।
कृत्रिमेण त्वसत्येन स कथं प्रतिपाद्यते ॥
अथ तद्वचनेनैव सर्वज्ञोऽन्यैः प्रतीयते ।
प्रकल्पेत कथं सिद्धिरन्योन्याश्रययोस्तयोः ॥
सर्वज्ञोक्ततया वाक्यं सत्यं तेन तदस्तिता ।
कथं तदुभयं सिध्येत् सिद्धमूलान्तरादृते ॥
असर्वज्ञप्रणीतात्तु वचनान्मूलवर्जितात् ।
सर्वज्ञमवगच्छन्तः स्ववाक्यात् किं न जानते ॥
सर्वज्ञसदृशं किञ्चिद्यदि पश्येम सम्प्रति ।
उपमानेन सर्वज्ञं जानीयाम ततो वयम् ॥
उपदेशोऽपि बुद्धस्य धर्माधर्मादिगोचरः ।
अन्यथा नोपपद्येत सार्वज्ञ्यं यदि नाभवत् ॥
इत्यादि ।
अत्र प्रतिविधीयते यदभ्यधायि सद्भावग्राहकस्य प्रमाणपञ्चकस्य तत्रानुपलम्भादिति तद-युक्तं तद्ग्राहकस्यानुमानादेः सद्भावात् । तथाहि कश्चिदात्मा सकलपदार्थसाक्षात्कारी तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययत्वात् यद्यद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययं तत्तत्साक्षात्कारि यथा अपगततिमिरादिप्रतिबन्धं लोचनविज्ञानं रूपसाक्षात्कारि । तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबन्धप्रत्ययश्च कश्चिदात्मा तस्मात् सकलपदार्थसाक्षात्कारीति । न तावदशेषार्थग्रहणस्वभावत्वमात्मनोऽसिद्धं चोदनाबलान्निखिलार्थज्ञानोत्पत्त्यन्यथानुपपत्त्या सर्वमनेकान्तात्मकं सत्त्वादिति व्याप्तिज्ञानोत्पत्तेश्च । चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवंजातीयकमर्थमवगमयतीत्येवंजातीयकैर्मीमांसागुरुभिर्विधिप्रतिषेधविचारणानिबन्धनं सकलार्थविषयज्ञानं प्रतिपद्यमानैः सकलार्थग्रहणस्वभावकत्वमात्मनोऽभ्युपगतम् । न चास्मदादीनामपि तथाभावः प्रसज्यते इति वाच्यं प्रतिबन्धकसद्भावात् तस्मात् अन्यथा सकलमपि सूक्ष्मोपदेशः सिद्धान्तः ।
आवरणप्रक्षयहेतुसद्भावे विषये विज्ञानं विशदमुत्पद्यते प्रभवतीत्युक्तं तदयुक्तं तस्य सर्वज्ञ-त्वाभावादिसम्यग्ज्ञानादिसम्पत्तिसाधनमिति चेन्न सम्यग्ज्ञानादिसाध्यत्वे सर्वज्ञोऽभ्यादिगुण-मुक्तादितरवत् सहायेच्छया च तत्कथ-मेव तदविते चाक्षाण्यभावः स्वात्माकारवत् । भवनादेः सिद्धादिकार्यस्य पराधीनत्वेऽपि कर्मत्वेन तल्लिङ्गं तथाहि सिद्धादिकं सकर्तृकं कार्य-त्वादित्यादिरिति तत्त्वतमोऽपि कार्यत्वेना-सिद्धेः । न च सावयवत्वेन तत्कार्यत्वमनुमि-मानस्य महादिदं विकल्पजालमवतरति सावयवत्वं किमवयवयोगित्वं अवयवसमवायित्वं अवयवजन्यत्वं सावयवबुद्धिविषयत्वं वा । न प्रथम आकाशादावनैकान्त्यात् । न द्वितीयः सामान्ये व्यभिचारात् । न तृतीयः साध्याविशिष्टत्वात् । न चतुर्थः विकल्पानुपपत्तेः [illegible] तत्र सावयवत्वबुद्धिविषयत्वं निरवयवत्वे वा सावयवत्वं चेदपरमेष्ठि । आद्ये आत्मन्यनैकान्तः तस्यापि गुणादिसमवायात् सावयवत्वप्रसङ्गात् । द्वितीये आकाशादौ अनेकान्तः ।

[illegible] सर्वमोदन [illegible] एकाकार [illegible] । तदुक्तं [illegible]

[illegible]

[illegible] न चेह
[illegible] न [illegible] ।
[illegible]
[illegible] । इति ।

[illegible]

[illegible] वा
[illegible] ।
[illegible]
[illegible] ॥

[illegible]

[illegible] ।

[illegible] ॥

[illegible] ।

[illegible] इति ॥

[illegible]

[illegible] ॥

[illegible] ।

[illegible] ॥

[illegible] इति ॥

[illegible]

[illegible] इति ॥

[illegible]

सामान्यानि गुणाः । तस्य द्रव्यस्योक्तरूपेण भवनमुत्पादः सद्भावः परिणामः पर्याय इति पर्यायाः यथा जीवस्य घटादिज्ञानसुखक्रोधादयः पुद्गलस्य मृत्पिण्डघटादयः धर्मादीनां गत्यादिविशेषाः अतएव षट् द्रव्याणीति प्रसिद्धिः ।

केचन पञ्च तत्त्वानीति वर्णयन्ति तदाह जीवाजीवास्रव बन्ध संवर निर्जर मोक्षास्तत्त्वानीति । तत्र जीवाजीवौ निरूपितौ आस्रवो निरूप्यते । औदारिकादिकायादिचलनद्वारेणात्मनश्चलनं योगपदवेदनीयमास्रवः यथा सलिलावगाहि द्वारं नद्यास्रवणं कारणत्वादास्रव इति निगद्यते तथा योगप्रणालिकयात्मकर्मास्रवतीति स योग आस्रवः । यथा आर्द्रं वस्त्रं समन्ताद्वातानीतं रेणुजातमुपादत्ते तथा कषायजलार्द्र आत्मा योगानीतं कर्म सर्वप्रदेशैर्गृह्णाति यथा वा निष्टप्तायःपिण्डो जले क्षिप्तोऽम्भः समन्ताद् गृह्णाति तथा कषायोष्णो जीवो योगानीतं कर्म समन्तादादत्ते । कषति हिनस्त्यात्मानं कुगतिप्रापणादिति कषायः क्रोधो मानो माया लोभश्च स द्विविधः शुभाशुभभेदात् । तत्राहिंसादिः शुभः काययोगः सत्यमितहितभाषणादिः शुभो वाग्योगः । सदेतदास्रवभेदप्रभेदजातं कायवाङ्मनःकर्मयोगः स आस्रवः शुभः पुण्यस्य अशुभः पापस्येत्यादिना सूत्रसन्दर्भेण सत्रमभाणि । अपरे त्वेवं मेनिरे आस्रवयति पुरुषं विषयेष्विन्द्रियप्रवृत्तिरास्रवः इन्द्रियद्वारा हि पौरुषं ज्योतिर्विषयान् स्पृशद्रूपादिज्ञानरूपेण परिणमत इति ।

मिथ्यादर्शनाविरतिप्रमादकषायवशाद्योगवशाच्चात्मा सूक्ष्मैकक्षेत्रावगाहिनामनन्तानन्तप्रदेशानां पुद्गलानां कर्मबन्धयोग्यानामादानमुपश्लेषणं यत् करोति स बन्धः । तदुक्तं सकषायत्वाज्जीवः कर्मभावयोग्यान् पुद्गलानादत्ते स बन्ध इति । तत्र कषायग्रहणं सर्वबन्धहेतूपलक्षणार्थम् । बन्धहेतून् पपाठ वाचकाचार्यः । मिथ्यादर्शनाविरतिप्रमादकषाया बन्धहेतव इति । मिथ्यादर्शनं द्विविधं मिथ्याकर्मोदयात् परोपदेशानपेक्षं तत्त्वाश्रद्धानं नैसर्गिकमेकम् अपरं परोपदेशजम् । पृथिव्यादिषट्कायोपादानं षडिन्द्रियासंयमनञ्च अविरतिः । पञ्च समितिगुप्तिष्वनुत्साहः प्रमादः । कषायः क्रोधादिः । तत्र कषायान्ताः स्थित्यनुभावबन्धहेतवः प्रकृतिप्रदेशबन्धहेतुर्योग इति विभागः । बन्धश्चतुर्विध इत्युक्तं प्रकृतिस्थित्यनुभावप्रदेशास्तद्विधय इति यथा निम्बगुडादेस्तिक्तमधुरत्वादिस्वभावः एवमावरणीयस्य ज्ञानदर्शनावरणत्वमादित्यप्रभोच्छेदकाम्भोधरवत् प्रदीपप्रभातिरोधायककुम्भवच्च सदसद्वेदनीयस्य सुखदुःखोत्पादकत्वमसिधारामधुलिप्तवदस्य च मोहनीयस्य तत्त्वार्थाश्रद्धानकारित्वं दुर्जनसङ्गवच्चारित्रे मोहनीयस्यासंयमहेतुत्वं मद्यमदवदायुषो देहबन्धकर्तृत्वं जलवत् नाम्नो विचित्रनामकारित्वं चित्रिकवद्गोत्रस्योच्चनीचकारित्वं कुम्भकारवद्दानादीनां विघ्ननिदानत्वमन्तरायस्य स्वभावः कोशाध्यक्षवत् । सोऽयं प्रकृतिबन्धोऽष्टविधः द्रव्यकर्मावान्तरभेदमूलप्रकृतिवेदनीयः । तथावोचदुमास्वातिवाचकाचार्यः आद्यो ज्ञानदर्शनावरणवेदनीयमोहनीयायुर्नामगोत्रान्तराया इति तद्भेदश्च स सङ्क्षेपात् पञ्चनवाष्टाविंशतिचतुर्द्विचत्वारिंशद्द्विपञ्चभेदा यथाक्रममिति । एतच्च सर्वं विद्यानन्दादिभिर्विवृतमिति विस्तरभयान्न प्रस्तूयते । यथा अजागोमहिष्यादिक्षीराणामेतावन्तमनेहसं माधुर्यस्वभावादप्रच्युतिः स्थितिः तथा ज्ञानावरणादीनां मूलप्रकृतीनामादितस्तिसृणामन्तरायस्य च त्रिंशत्सागरोपमकोटिकोट्यः परा स्थितिरित्याद्युक्तकालादूर्ध्वं यत् स्वीयस्वभावादप्रच्युतिः स्थितिः । यथा अजागोमहिष्यादिक्षीराणां तीव्रमन्दादिभावेन स्वकार्यकरणे सामर्थ्यविशेषोऽनुभावः तथा कर्मपुद्गलानां स्वकार्यकरणे सामर्थ्यविशेषोऽनुभावः । कर्मभावपरिणतपुद्गलस्कन्धानामनन्तानन्तप्रदेशानामात्मप्रदेशानुप्रवेशः प्रदेशबन्धः । आस्रवनिरोधः संवरः । येनात्मनि प्रविशत् कर्म प्रतिषिध्यते स गुप्तिसमित्यादिः संवरः । संसारकारणाद्योगादात्मनो गोपनं गुप्तिः । सा त्रिविधा कायवाङ्मनोनिग्रहभेदात् । प्राणिपीडापरिहारेण सम्यगयनं समितिः सा ईर्याभाषादिभेदात् पञ्चधा । प्रपञ्चितञ्च हैमचन्द्राचार्यैः ।

लोकातिवाहिते मार्गे चुम्बिते भास्वदंशुभिः ।
जन्तुरक्षार्थमालोक्य गतिरीर्या मता सताम् ॥
अनवद्यानृतं सर्वजनीनं मितभाषणम् ।
प्रिया वाचंयमानां सा भाषासमितिरुच्यते ॥
द्विचत्वारिंशता भिक्षादोषैर्नित्यमदूषितम् ।
मुनिर्यदन्नमादत्ते सैषणासमितिर्मता ॥
आसनादीनि संवीक्ष्य प्रतिलिख्य च यत्नतः ।
गृह्णीयान्निक्षिपेद्ध्यायेत् सादानसमितिः स्मृता ॥
कफमूत्रमलप्रायैर्निर्जन्तुजगतीतले ।
यत्नाद्यदुत्सृजेत् साधुः सोत्सर्गसमितिर्भवेत् ॥

अत एवास्रवस्रोतसो द्वारं संवृणोतीति संवर इति निराहुः । तदुक्तमभियुक्तैः ।

आस्रवो भवहेतुः स्यात् संवरो मोक्षकारणम् ।
इतीयमार्हती दृष्टिरन्यदस्याः प्रपञ्चनम् ॥

अर्जितस्य कर्मणस्तपःप्रभृतिभिर्निर्जरणं निर्जराख्यं तत्त्वं चिरकालप्ररूढकषायकलापं पुण्यपापयुग्मं सुखदुःखे च देहेन जरयति नाशयति केशोलुञ्चनादिकं तप उच्यते । सा निर्जरा द्विविधा यथाकालौपक्रमिकभेदात् तत्र प्रथमा यस्मिन् काले यत् कर्म फलप्रदत्वेनाभिमतं तस्मिन्नेव काले फलदानाद्भवन्ती निर्जरा कामादिपाकजेति च चोच्यते । यत् कर्म तपोबलात् स्वकामनयोदयावलिं प्रवेश्य प्रपद्यते तत्र कर्म निर्जरा । यदाह ।

संसारबीजभूतानां कर्मणां जरणादिह ।
निर्जरा संस्मृता द्वेधा सकामा कामनिर्जरा ॥
स्मृता सकामा यमिनामकामा त्वन्यदेहिना
मिति ।

मिथ्यादर्शनादीनां बन्धहेतूनां निरोधे अभिनवकर्माभावात् निर्जराहेतुसन्निधानेनार्जितस्य कर्मणो निरसनादात्यन्तिककर्ममोक्षणं मोक्षः बन्धहेतुभावनिर्जराभ्यां कृत्स्नकर्मविप्रमोक्षणं मोक्ष इति तदनन्तरमूर्द्ध्वं गच्छत्यालोकान्तात् यथा हस्तदण्डादिभ्रमिप्रेरितं कुलालचक्रमुपरतेऽपि तस्मिन् तद्बलादेवा संस्कारक्षयं भ्रमति तथा भवस्थेनात्मना अपवर्गप्राप्तये बहुशो यत कृतं प्रणिधानं मुक्तस्य तदभावेऽपि पूर्वसंस्कारादालोकान्तं गमनमुपपद्यते यथा वा मृत्तिकालेपकृतगौरवमलाबुद्रव्यं जलेऽधः पतति पुनरपेतमृत्तिकाबन्धमूर्द्ध्वं गच्छति तथा कर्मरहित आत्मा असङ्गत्वादूर्द्ध्वं गच्छति बन्धच्छेदादेरण्डबीजवच्चोर्द्ध्वगतिस्वभावाच्चाग्निशिखावत् । अन्योन्यं प्रदेशानुप्रवेशे सत्यविभागेनावस्थानं बन्धः परस्परप्राप्तिमात्रं सङ्गः । तदुक्तं पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथा गतिपरिणामाच्चाविद्धकुलालचक्रवद्व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावच्चेति । अतएव पठन्ति ।

गत्वा गत्वा निवर्त्तन्ते चन्द्रसूर्यादयो ग्रहाः ।
अद्यापि न निवर्त्तन्ते त्वलोकाकाशमागताः
इति ।

अन्ये तु गतसमस्तक्लेशतद्वासनस्यानावरणज्ञानस्य सुखैकतानस्यात्मन उपरिदेशावस्थानं मुक्तिरित्यास्थिषत । एवमुक्तानि सुखदुःखसाधनाभ्यां पुण्यपापाभ्यां सहितानि नव पदार्थान् केचनाङ्गीचक्रुः । तदुक्तं सिद्धान्ते जीवाजीवौ पुण्यपापयुतावास्रवः संवरो निर्जरणं बन्धो मोक्षश्च नव तत्त्वानीति । संक्षेपेण प्रकृता अस्य सुपरता स्म ।

अत्र सर्वत्र सप्तभङ्गिनयाख्यं न्यायमवतारयन्ति जैनाः स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादवक्तव्यः स्यादस्ति चावक्तव्यः स्यान्नास्ति चावक्तव्यः स्यादस्ति च नास्ति चावक्तव्य इति तत्सर्वमनन्तवीर्यः प्रत्यपीपदत् ।

तद्विधानविवक्षायां स्यादस्तीति गतिर्भवेत् ।
स्यान्नास्तीति प्रयोगः स्यात्तन्निषेधे विवक्षिते ॥
क्रमेणोभयवाञ्छायां प्रयोगः समुदायभाक् ।
युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः ॥
आद्यावाच्यविवक्षायां पञ्चमो भङ्ग इष्यते ।
अन्त्यावाच्यविवक्षायां षष्ठभङ्गसमुद्भवः ॥
समुच्चयेन युक्तश्च सप्तमो भङ्ग उच्यते इति ।

स्याच्छब्दः खल्वयं निपातस्तिङन्तप्रतिरूपकोऽनेकान्तद्योतकः । यथोक्तम् ।

वाक्येष्वनेकान्तद्योती गम्यं प्रति विशेषणम् ।
स्यान्निपातोऽर्थयोगित्वात्तिङन्तप्रतिरूपकः इति ॥

यदि पुनरेकान्तद्योतकः स्याच्छब्दोऽयं स्यात्तदा

ज्ञप ज्ञापम्। आलोको दर्शनप्रेरणम्। निशानं तीक्ष्णीकरणम्। तोषणं तुष्टीकरणम्। ज्ञपयति धर्म्मं गुरौ मारयतीत्यर्थः। ज्ञपयति रूपं कामिनी चिङ्गणं दर्शयतीत्यर्थः। ज्ञपयति खड्गं कर्म्मकारः शाणयतीत्यर्थः। ज्ञपयति गुरुं शिष्यस्तोषयतीत्यर्थः। स्तुतिं केचिन्न मन्यते। आलोको ज्ञानप्रेरणमित्यनुन्यास रक्षितौ। अतएव क्रमदीश्वरोऽपि जानाते घटादिस्थ विभाषया मन्यते। तेन ज्ञपयितुं बोधयितुमिच्छमानो ज्ञीप्समान इति पाणिनीय इत्थौ ज्ञापयिष्यापि इत्वे सति ज्ञीप्समान इति प्रसिद्धम्। एवं चिकित्सिषा मम जीप्सन्ती इत्याश्चि च विज्ञापनमभ्यर्थं। इति दुर्गादासः॥

ज्ञा, ग बोधे। इति कविकल्पद्रुमः॥ (क्र्यां पर-सकं अनिट।) ग, जानाति। "सन्दंशशुद्धि गिरो जानाति नयदेव एवेयम अनुपसगात फलवत्कर्त्तर्य्यात्मनेपदम्। यतोऽशुभम गमन सुतस्य इत्यनाशुभन्दस्योपसर्ग प्रतिरूपकत्वेना-नुपसर्गत्वात्॥" इति दुर्गादासः॥

ज्ञात, त्रि (ज्ञायते चित्यते स्मेति। ज्ञा+कर्म्मणि क्तः।) ज्ञातज्ञानम्। जाना इति भाषा। तत् पर्य्यायः। विदितम् २ बुद्धम् ३ बुधितम् ४ प्रमितम् ५ मतम् ६ प्रतीतम् ७ अवगतम् ८ मनितम् ९ अवसितम् १०। इति जटाधरः॥ (यथा पञ्चतन्त्रे। १। १४३।
"पूर्व्वमेव मया ज्ञातं पूर्व्वमेतद्धि भद्रता।")

ज्ञातव्य त्रि, (ज्ञायते यदिति। ज्ञा+तव्य।) ज्ञानीयम्। ज्ञेयम्। वेद्यम्। अवगन्तव्यम्। बोध्यम्। (यथा, महाभारते। ४। २८। ५।
"स्वराष्ट्रे परराष्ट्रे च ज्ञातव्य बलमात्मनः।")
मन्तव्यम्। इति व्याकरणम्॥

ज्ञातसिद्धान्त, पु, (ज्ञातो विदितः सिद्धान्तः शास्त्रतत्त्वार्थो येन।) शास्त्रतत्त्वज्ञः। तत्पर्य्यायः। तान्त्रिकः २। इत्यमरः। २।७।१५॥

ज्ञाता, [ऋ] त्रि, (ज्ञा+तृच्।) ज्ञानशील। तत्पर्य्यायः। विदुरः ॰ विन्दुः ३। इत्यमरः। ३। १। २ ॥ विदितः ४ ज्ञानसंगत ५। इति शब्दरत्नावली॥

ज्ञाति, पुं, जानाति हितं कुलस्थितिं च ज्ञाति कान्नोति तिक्। इत्यमरटीकायां भरतः॥ सपिण्डादिः। तत्पर्य्यायः। सगोत्रः २ बान्धवः ३ बन्धुः ४ स्वः ५ स्वजनः ६। इत्यमरः। २। ६। ३४॥ अथ दायादः ७ गन्ध ८ दायादः ९। इति त्रिकाण्डशेषः॥ सकुल्यः १० समानोदकः ११। इति जटाधरः॥ स चतुर्व्विधः। सप्तमपुरुषपर्य्यन्तं सपिण्डः। ततश्चतुर्थपुरुषपर्य्यन्तं सकुल्यः। तत एकविंशपुरुषपर्य्यन्तं समानोदकः। तदनन्तरमपि यावज्जन्मनाम ज्ञायते तावत् सगोत्रः। इति शुद्धितत्त्वम्॥ एषां विशेषस्तत्तच्छब्दे द्रष्टव्यः॥ ज्ञातिनोऽपि दोषो यथा, महाभारते। "शरीरे रोगवच्चापि ज्ञातिनश्च विरोधिनः। ज्ञातिनोऽपि यथा गम्या ज्ञातयः समवेक्षताम्॥"

ज्ञातिः पिता (ज्ञायते विश्लिष्टस्मादिति। ज्ञा+अपादाने क्तिन्।) पिता। इति मेदिनी। ते, ७॥

ज्ञातेय क्ली, (ज्ञातेर्भावः कर्म्म वा। ज्ञाति+"कपिज्ञात्योर्ढक्।" ५। १। १२७। इति ढक्।) ज्ञातित्वम्। इत्यमरः। २। ६। ३५॥

ज्ञान, क्ली, (ज्ञा+भावे ल्युट्।) विशेषेण सामान्येन चावबोधः॥
"मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः।"
इत्यमरः। १। ५। ६॥

अस्यार्थः। "मोक्षे शिल्पे शास्त्रे च या धीः सा ज्ञानं विज्ञानञ्चोच्यते यथा विशेषप्रवृत्तिः। अन्यत्र घटपटादौ या धीः सापि ज्ञानं विज्ञान-ञ्चोच्यते यथा सामान्यप्रवृत्तिः। मोक्षे धीर्ज्ञानं विज्ञानञ्च यथा ज्ञानान्मुक्तिरिति सा चाहिता च विज्ञानं शुद्धा करोति प्रयच्छति इति। अन्यत्र यथा ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे इति घटत्वप्रकारकं ज्ञानमिति ये केचित्प्राणिनो लोके सर्व्वे विज्ञानिनो मता इति। सन्ध्यो नित्यविज्ञानानन्दरूपत्वादिति अर्थं चिन्मयानं व्याकरणज्ञानं घटपटविज्ञानमित्यादिकं प्रयु-ज्यम एव। मोक्षनिमित्तं शिल्पशास्त्रयोर्ज्ञा-नमित्युच्यते तन्निमित्ततोऽन्यनिमित्ता या तयोर्धा धा विज्ञानमिति केचित्। मोक्षविषया मोक्ष-परा धीर्ज्ञानं अन्यधीर्विज्ञानं कायत इत्याह शिल्पशास्त्रयोरिति केचित्। अवबोध इत्य-ध्याहृत्य मोक्षविषये अवबोधो धीः अन्यत्र घटपटादिविज्ञानं शिल्पशास्त्रविषये विज्ञान-मिति केचित्।" इति भरतः॥ *॥ योगशास्त्र-मते तु।
"एकत्वं बुद्धिमनसोरिन्द्रियाणाञ्च सर्व्वशः।
आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमम्॥"
इति मोक्षधर्म्मः॥
'एकत्वं बुद्धिमात्रेणावस्थानं बुद्धिवृत्तिनिरोध इति यावत्।" इति तट्टीका॥ *॥
"अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम्।
आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः॥
इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च।
जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥
असक्तिरनभिष्वङ्गः पुत्त्रदारगृहादिषु।
नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु॥
मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।
विविक्तदेशसेवित्वमरतिर्जनसंसदि॥
अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।
एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा॥"
सात्त्विकराजसतामसभेदेन तत्त्रिविधम्।
सात्त्विकं यथा —
"सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते।
अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम्॥"
राजसं यथा —
"पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान्।
वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम्॥"
तामसं यथा —
"यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम्।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम्॥" ३॥
इति श्रीभगवद्गीतायाम्। १८। २०—२२॥
"सर्व्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु विभक्तेषु परस्परं व्यावृत्तेषु अविभक्तमनुस्यूतं एकमव्ययं निर्व्विकारं भावं परमात्मतत्त्वं येन ज्ञानेनेक्षते आलोचयति तज्ज्ञानं सात्त्विकं विद्धि॥ १॥
सर्व्वेषु भूतेषु नानाभावान् वस्तुत एवानेकान् देहज्ञान् पृथग्विधान् सुखिदुःखित्वाल्पज्ञत्व विलक्षणान् येन ज्ञानेन वेत्ति तज्ज्ञानं राजसं विद्धि॥ २॥
एकस्मिन् कार्य्ये देहे प्रतिमादौ वा कृत्स्नवत् परिपूर्णवत् सक्तं एतावानेव आत्मा ईश्वरो वा इत्यभिनिवेशयुक्तं अहैतुकं निरुपपत्तिकं अतत्त्वार्थवत् परमार्थालम्बनशून्यं अतएवाल्पं तुच्छं अल्पविषयत्वात् अल्पफलत्वाच्च यदेवम्भूतं ज्ञानं तत् तामसमुदाहृतम्॥" ३॥
इति तट्टीकायां श्रीधरस्वामी॥

न्यायमते तु।
"अप्रमा च प्रमा चैव ज्ञानं द्विविधमुच्यते।
तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता॥
तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः।
आद्यो देहे आत्मबुद्धिः शङ्खादौ पीतिमा मतिः॥
भवेन्निश्चयरूपा सा संशयोऽथ प्रदर्श्यते।
किं स्विन्नरो वा स्थाणुर्व्वेत्यादि बुद्धिस्तु संशयः॥
तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः।
स संशयो भवेद्या धीरेकत्राभावभावयोः॥
साधारणादिधर्म्मस्य ज्ञानं संशयकारणम्।
दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत्॥
पित्तदूरत्वादिरूपो दोषो नानाविधो मतः।
"गुणः स्यादूभ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा।
अथवा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम्॥
ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते।
तत् प्रमा न प्रमा नापि भ्रमः स्यान्निर्व्विकल्पकम्॥
प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत्॥"
इति भाषापरिच्छेदः॥
(यथा वायुपुराणे उत्तरभागे। ११। ४६।
"वैराग्याच्चापनं ज्ञानं ज्ञानाद्योगः प्रवर्त्तते।
योगज्ञः पतितो वापि तथाते ज्ञान संशयः॥"
शिवः। यथा महाभारते। १३। १७। ९१।
"धर्म्मदर्शी दिव्यकाका सर्व्वज्ञो ज्ञानमुत्तमम्।"
"ज्ञानं प्रकाशमयमनवच्छिन्नं सर्व्वस्य साधक-मिति ज्ञानमुत्तम 'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः।" इति तट्टीका॥)

ज्ञानचक्षुः पुं (ज्ञानं तदेव चक्षुर्यस्य।) पूर्व्व-जिनः। इति त्रिकाण्डशेषः॥

ज्ञानकाण्ड, पुं, (ज्ञानार्थ प्रकाशार्थमिति। ज्ञान+कर्म्मणि घञ्। ज्ञानेन योगः।) मन्वन्तर प्रारम्भः। यथा,—
"कर्म्मभूमिषु मोहिन्यो बद्धका चन्द्रिका।
इति भरतः महाभारत ॥ गकुल च भारतेषु॥

…भगवतोऽपि यतो स्यात्कारलाञ्छन स्यात् कथं-चिदस्तीत्यर्थे तु स्यादस्ति सर्वथास्तीति… स्यादवक्तव्यमित्यादि … स्याद्वादः ।

स्याद्वादः सर्वथैकान्तत्यागात् किं वृत्तचिद्विधेः ।
सप्तभङ्गनयापेक्षो हेयादेयविशेषकः ॥ इति ।

यदि वस्तुनोऽनेकान्तात्मकत्वं सर्वथा … तदा सर्वथा … कथंचित् … अनेकान्तस्य … कथंचित् … सर्वथा … इत्यादि … इति …

स्याद्वादः । सप्तभङ्गीनयः ।

…

[illegible]

इत्यादि ।

[illegible]

इति …

जैवाल, पुं, (जम्बाल एव स्वार्थे अण् ।) जम्बालः । इति त्रिकाण्डशेषः ॥

जैमिनि, पुं, मुनिविशेषः । स वेदव्यासशिष्यः उत्तरमीमांसाकर्त्ता भारतस्य प्रवक्ता च । यथा पुराणसर्वस्वम् ।

"जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च ।
पुलस्त्यः पुलहश्चैव सप्तैते वज्रवारकाः ॥"

जैवातृक, पुं, (जीवयति ओषधीरिति । जीव + णिच् + "जीवेरातृकन् ।" उणा । १ । ८३ । इति आतृकन् वृद्धिश्च ।) चन्द्रः । कर्पूरः । इत्यमरः । ३ । ३ । १३ ॥ …

जैवातृक, त्रि, (जीवतीति । जीव + आतृकन् वृद्धिश्च ।) दीर्घायुः । (यथा, …
"जैवातृक …" …)

जैह्म्य, क्ली, (जिह्मस्य भावः …) …

…

जोटिङ्ग, पुं, (…) …

जोषम्, अव्य, (जुष + अम् ।) …

…

जोष, क्ली, …

जोषिका, स्त्री, … इति हेमचन्द्रः ॥

जोषित्, स्त्री, … इति उज्ज्वलदत्तः ॥

जोषिता, स्त्री, (जोषित् + टाप् ।) योषित् । इति शब्दरत्नावली ॥

ज्ञ, पुं, (जानातीति । ज्ञा + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः ।) बुधः । … पण्डितः । …

[illegible]

ज्ञप्त, त्रि, … ॥

ज्ञप्ति, स्त्री, (ज्ञा + णिच् + क्तिन् ।) बुद्धिः । इत्यमरः । १ । ५ । १ ॥ …

ज्ञा, …

[illegible]

ज्ञाप ज्ञापम् । आलोको दृष्टनमेरणम् । निशाय तिक्ष्णीकरणम् । तोयर्थ सुदृढीकरणम् । ज्ञपयति मन्तुं गुरो मारयतीत्यर्थः । ज्ञपयति रूप कामिनी विदृशाम दर्शयतीत्यर्थः । ज्ञपयति खड्गं कर्मकारः शाणयतीत्यर्थः । ज्ञपयति गुरु प्रियाशोधयतीत्यर्थः । स्तुति केचित्तु मन्यते । आलोको ज्ञानप्रेरणमित्यनुयाय रक्षितौ । अतएव क्रमन्नीश्वरोऽपि जानाते- घटादिस्तु विभाषया मन्यते । तेन ज्ञपयितु बोधयितुमिच्छमाणो जीप्समान इति माणिनीय सूत्रौ ज्ञानप्रेरणापि दृश्ये यनि जीप्समान इति प्रसिद्धम् । यत्र विज्ञप्तिरेषा मम जीवनस्थौ इत्यादिषु च विज्ञापनमेवार्थ । इति दुर्गादासः ॥

ज्ञा, श बोधे । इति कविकल्पद्रुमः ॥ (क्र्यां पर- स्मै अनिट ।) श, जानाति । "मन्दभक्तिडि गिरो जानीते जयदेव एवेत्यत्र अनुपसर्गात् फलवत्कर्त्तर्यात्मनेपदम् । नलोऽनुज्ञा गमन सुतस्य इत्यनुशब्दस्योपसर्ग प्रतिरूपकत्वेन नुपसर्गत्वात ॥" इति दुर्गादासः ॥

ज्ञात, त्रि (ज्ञायते स्मेति सौति । ज्ञा + कर्म्मणि क्त ।) तत्ज्ञानम् । जाना इति भाषा । तत् पर्य्यायः । विदितम् २ बुद्धम् ३ बुधितम् ४ प्रमितम् ५ मतम् ६ प्रतीतम् ७ अवगतम् ८ मनितम् ९ अवधितम् १० । इति जटाधरः ॥ (यथा पञ्चतन्त्रे । १ । १२३ ।

"पूर्व्वमेव मया ज्ञातं पूर्णमेतद्धि मेऽन्धसा ॥")

ज्ञातव्य त्रि, (ज्ञायते यदिति । ज्ञा + तव्य ।) ज्ञानीयम् । ज्ञेयम् । वेद्यम् । अवगन्तव्यम् । बोध्यम् । (यथा, महाभारते । ३ । ९८ । ५ ।

"धराष्ट्रे परराष्ट्रे च ज्ञातव्य मन्त्रमात्मन ॥")

मन्तव्यम् । इति व्याकरणम् ॥

ज्ञातसिद्धान्त, पु, (ज्ञातो विदितः सिद्धान्तः शास्त्रतत्त्वार्थो येन ।) शास्त्रतत्त्वज्ञः । तत्- पर्य्यायः । तान्त्रिकः २ । इत्यमरः ।२।८।१५ ॥

ज्ञाता, [ऋ] त्रि, (ज्ञा + तृच ।) ज्ञानशील । तत्- पर्य्यायः । विदुरः २ विन्दुः ३ । इत्यमरः । ३ । १ । ३ ॥ विन्नि ४ ज्ञानसम्पन्न ५ । इति शब्दरत्नावली ॥

ज्ञाति, पुं, आजानाति कुलस्थितिमिति ज्ञाति- र्ज्ञातेः तिक । इत्यमरटीकायां भरत ॥ पित्- व्यादि । तत्पर्य्यायः । सगोत्र २ बान्धव ३ बन्धु ४ स्व ५ स्वजन ६ । इत्यमरः । ३ । ६ । ३४ ॥ अ ग्रक ७ गन्ध ८ दायाद ९ । इति त्रिकाण्ड- शेषः ॥ सकुल्य १० समानोदक ११ । इति जटाधरः । स चतुर्विधः । सप्तमपुरुषपर्य्यन्त- सपिण्डः । ततश्चतुर्दशपुरुषपर्य्यन्त सकुल्य । तत ऊर्द्ध्वपुरुषपर्य्यन्तं समानोदक । समानोदकाति- पर्य्यन्तमपि समानोदक । तत परं गोत्रज । इति शुद्धितत्त्वम् । एषां विवरणमनुक्रमे द्रष्टव्य ॥१॥ ज्ञातिमोर्हे दोषो यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे । "दाति ज्ञाति च मातरि ब्रह्महत्यादिकानि च । ज्ञातिमोहस्य मायस्य कस्मी भर्त्सना मोहनामा"

(ज्ञायते विशिष्यतेऽनेनादिति । ज्ञा + अपादाने क्तिन् ।) पिता । इति मेदिनी । ते, ७ ॥

ज्ञातेय क्ली, (ज्ञातेर्भावः कर्म्म वा । ज्ञाति + "कपिज्ञात्योर्ढक ।" ५ । १ । १२७ । इति ढक ।) ज्ञातित्वम् । इत्यमरः । २ । ८ । ३५ ॥

ज्ञान, क्ली, (ज्ञा + भावे ल्युट ।) विशेषेण सामान्येन अवबोधः ।

"मोक्षे धीर्ज्ञानमन्यत्र विज्ञानं शिल्पशास्त्रयोः ।"

इत्यमरः । १ । ५ । ६ ॥

अस्यार्थः । "मोक्षे शिल्पे शास्त्रे च या धी सा ज्ञान विज्ञानञ्चोच्यते एषा विशेषप्रवृत्ति । अन्यत्र घटपटादौ या धी सापि ज्ञान विज्ञान- ञ्चोच्यते एषा सामान्यप्रवृत्ति । मोक्षे धीर्ज्ञान विज्ञानञ्च यथाज्ञानान्मुक्तिरिति मा यात्विता च विज्ञानं तुष्टा कस्मै प्रयच्छति इति । अन्यत्र यथा ज्ञानमस्ति समस्तस्य जन्तोर्विषयगोचरे इति घटत्वप्रकारकज्ञानमिति ये केचित प्राणिनो लोके सर्व्वे विज्ञानिनो मता इति । ब्रह्मणो नित्यविज्ञानानन्दरूपत्वादिति एवं चित्रज्ञान आकरज्ञान घटपटविज्ञानमित्यादिकं प्रयु ज्यत एव । मोक्षनिमित्ता शिल्पशास्त्रयोर्धी- र्ज्ञानमुच्यते तन्निमित्तोऽन्यनिमित्त या तयोर्धी- र्या विज्ञानमिति केचित । मोक्षविषया मोक्ष फला धीर्ज्ञान अन्यधीर्विज्ञान ज्ञानवत् इत्याद शिल्पशास्त्रयोरिति केचित् । अवबोध इत्य- न्याहुस्तु मोक्षविषये अवबोधो धी अन्यत्र घटपटादिविज्ञान शिल्पशास्त्रविषये विज्ञान मिति केचित् ।" इति भरत ॥ * ॥ योगशास्त्र- मते तु ।

"एकत्व बुद्धिमनसोरिन्द्रियाणाञ्च सर्व्वश ।

आत्मनो व्यापिनस्तात ज्ञानमेतदनुत्तमम् ॥"

इति मोक्षधर्म्म ॥

"एकत्व बुद्धिमात्रेणावस्थान बुद्धिवृत्तिनिरोध इति यावत ।" इति तट्टीका ॥ * ॥

"अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्ज्जवम् ।

आचार्य्योपासनं शौचं स्थैर्य्यमात्मविनिग्रहः ॥

इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।

जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥

असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।

नित्यञ्च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥

मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।

विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥

अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।

एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥"

सात्त्विकराजसतामसभेदेन त्रिविधम् ।

सात्त्विक यथा —

"सर्व्वभूतेषु येनैकं भावमव्ययमीक्षते ।

अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकम् ॥"

राजस यथा —

"पृथक्त्वेन तु यज्ज्ञानं नानाभावान् पृथग्विधान् ।

वेत्ति सर्व्वेषु भूतेषु तज्ज्ञानं विद्धि राजसम् ॥"

तामस यथा —

"यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम् ।

अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम् ॥" ३ ॥

इति श्रीभगवद्गीतायाम् । १८ । २०—२२ ॥

"सर्व्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु विभक्तेषु परस्परं व्यावृत्तेषु अविभक्तमनुस्यूत एकमव्यय निर्व्विकार भाव परमात्मतत्त्व येन ज्ञानेनेक्षते आलोचयति तज्ज्ञानं सात्त्विकं विद्धि ॥ १ ॥ सर्व्वेषु भूतेषु नानाभावान् वस्तुत एवानेकान् क्षेत्रज्ञान् पृथग्विधान् सुखित्वदुःखित्वादिरूपेण विलक्षणान् येन ज्ञानेन वेत्ति तज्ज्ञानं राजसं विद्धि ॥ २ ॥ एकस्मिन् कार्य्ये देहे प्रतिमादौ वा कृत्स्नवत् परिपूर्णवत् सक्त एतावानेव आत्मा ईश्वरो वा इत्यभिनिवेशयुक्त अहैतुक निरुप- पत्तिक अतत्त्वार्थवत् परमार्थालम्बनशून्य अत- एवाल्प तुच्छ अल्पविषयत्वात् अल्पफलत्वाच्च यदेवम्भूतं ज्ञानं तत् तामसमुदाहृतम् ॥" ३ ॥

इति तट्टीकायां श्रीधरस्वामी ॥

न्यायमते तु ।

"अप्रमा च प्रमा चेति ज्ञानं द्विविधमुच्यते ।

तच्छून्ये तन्मतिर्या स्यादप्रमा सा निरूपिता ॥

तत्प्रपञ्चो विपर्य्यासः संशयोऽपि प्रकीर्त्तितः ।

आद्यो देहे आत्मबुद्धिः शङ्खादौ पीतिमा मतिः ॥

भवेन्निश्चयरूपा या संशयोऽथ प्रदर्श्यते ।

किं स्विन्नरो वा स्थाणुर्व्वेत्यादि बुद्धिस्तु संशयः ॥

तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः ॥

स संशयो भवेद्या धीरेकत्राभावभावयोः ।

साधारण्यादिधर्म्मस्य ज्ञानं संशयकारणम् ॥

दोषोऽप्रमाया जनकः प्रमायास्तु गुणो भवेत् ।

पित्तदूरत्वादिरूपो दोषो नानाविधो मतः ॥"

"गुणः स्याद्भ्रमभिन्नन्तु ज्ञानमत्रोच्यते प्रमा ।

अथवा तत्प्रकारं यज्ज्ञानं तद्वद्विशेष्यकम् ॥

ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते ।

तत् प्रमा न प्रमा नापि भ्रमः स्यान्निर्व्विकल्पकम् ॥

प्रकारतादिशून्यं हि सम्बन्धानवगाहि तत ॥"

इति भाषापरिच्छेदः ॥

(यथा वायुपुराणे उत्तरभागे । ११ । ३६ ।

"वैराग्याज्जायते ज्ञानं ज्ञानाद्योगः प्रवर्त्तते ।

योगज्ञः पर्य्यटो वापि मुच्यते नात्र संशयः ॥"

चित्तम् । यथा महाभारते । १३ । १४८ । ६१ ।

"सर्व्वज्ञो विरुजाकाशः सर्व्वशो ज्ञानमुत्तमम् ।"

"ज्ञानं चलदचलम्मनश्चिन्त्वं समस्त ज्ञापक मिति ज्ञानमुत्तम 'सत्य ज्ञानमनन्तं ब्रह्म इति श्रुतः ॥" इति तद्भाष्यम् ॥)

ज्ञानचक्षुः पुं, (ज्ञानं चक्षुः इव यस्य ।) पूर्व्व- ज्ञिनः । इति त्रिकाण्डशेषः ।

ज्ञानदेव, पुं, (ज्ञायते ब्रह्मतत्त्वमनेनेति । ज्ञा + करणे ल्युट । ज्ञानेन देवः ।) ब्रह्मज्ञान प्रत्ययात्मा । यथा —

"सर्व्वभूतेषु योऽविद्वान् बहुत्वेऽपि न दृश्यते ।

इति मया महामाय प्रतिज्ञा च कृतेषु ।

[illegible]

वलाधिका ७। इति शब्दरत्नावली ॥ मधा ८ चाणाक्य ९ दुर्गा १०। इति हेमचन्द्रः ॥ (यथा महाभारते । १ । २२६ । २ ।
"ज्याहं बलमास्थाय ज्यया च शुशुभे धनुः ॥")
माता । वसुधा । इति मेदिनी । ये, २ ॥

ज्यानि, स्त्री, (ज्या+"ग्लाम्लाज्याहाभ्यो निः ।" उणां ४ । ४८ । इति निः ।) जीर्णता । हानिः । तटिनी । इति शब्दरत्नावली ॥

ज्यायान्, [स्] त्रि, (अयमनयोरतिशयेन वृद्धः प्रशस्यो वा इति । वृद्ध वा प्रशस्य+ईयसुन् ज्यादेशश्च ततो "ज्यादादीयसः ।" ६।४।१६ । इत्यात्वम् ।) वृद्धतमः । ततपर्य्यायः । वर्षीयान् १ दशमी २ प्रशस्यः ३ । इत्यमरः । २ । ६ । ४२ ॥ अतिवृद्धः ५ दशमीस्थः ६ । इति जटाधरः ॥ (यथा, मनुः ।३।१३७ । [पिता ॥")
"ज्यायांसमनयोर्विद्यात् यस्य स्यात् श्रोत्रियः

ज्यु, ङ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां आत्म सकं अनिट ।) ङ, ज्यवते । इति दुर्गादासः ॥

ज्युत, इर दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां परस्मै सक सेट ।) इर अज्युतत् अज्योतीत् जुज्योत । इति दुर्गादासः ॥

ज्युत, ऋ ङ दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां आत्म -अक सेट ।) ऋत् स्यान्तियुक्तः । ऋ, अजुज्योतत् । ङ ज्योतते चन्द्रः । इति दुर्गादासः ॥

ज्येष्ठ, त्रि (अयमेषामतिशयेन वृद्धः प्रशस्यो वा इति । वृद्ध वा प्रशस्य+इष्ठन् ततो ज्यादेशः ।) अतिवृद्धः । श्रेष्ठः । (यथा, महाभारते । १२ । १४२ । ७ ।
"ज्येष्ठ धर्ममनुप्राप्य तस्मात्स्वैत वै द्विजः ॥"
ज्येष्ठानक्षत्रयुक्ता पौर्णमासीत्यत्र इति ज्येष्ठी सा अस्मिन् मासीति पुनरण अत्रापूर्वेस्य विधेरनित्यत्वात् वृद्धिः ।) ज्येष्ठमासि, पुं । इति मेदिनी । ठे, ५ ॥ अग्रजः । (यथा, रघुः । १५ । १८ ।
"इदृग्भक्तिरिति ज्येष्ठे राज्यतृष्णापराङ्मुखः ॥")
अधिकवयाः । इति भरतः ॥

ज्येष्ठतातः, पुं (तातस्य पितुर्ज्येष्ठः । राजदन्तादित्वात् पूर्वनिपाते साधुः ।) पितुरग्रजः । इति शब्दरत्नावली । ज्येठा इति भाषा ॥

ज्येष्ठवर्णः, पुं (वर्णानां ज्येष्ठः श्रेष्ठः विहारेषु तु वर्णेषु ज्येष्ठः । पूर्वनिपातः ।) ब्राह्मणः । इति शब्दरत्नावली ॥

ज्येष्ठवला, स्त्री, (ज्येष्ठाऽस्या बला ।) महाबला । इति राजनिर्घण्टः ॥

ज्येष्ठश्वश्रूः, स्त्री, (ज्येष्ठा पूज्या श्वश्रूरिव मान्यत्वात् तथात्वम् ।) पत्न्या ज्येष्ठभगिनी । बड़शाली इति भाषा । तत्पर्य्यायः । कुली २ । इति हेमचन्द्रः ॥

ज्येष्ठसाम, [न्] क्ली (ज्येष्ठं साम इति नित्यकर्मधारयः ।) सामभेदः । तदध्ययनाद्व्रतम् । इति मिताक्षरा । (यथा महाभारते ।१३।९०।३४।
"ज्येष्ठ सामाभिविद्यात ज्येष्ठसामवतो हरिः ॥")

ज्येष्ठा स्त्री, अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गताष्टादशनक्षत्रम् । सा तु शूकरदन्ताकृति तारकत्रितयात्मिका । इति कालिदासः ॥ कुण्डलाकृतिः । अस्या देवता इन्द्रः मिथगुणः । इति दीपिका ॥ अत्र जातस्य फलम् ।
"बहुभिर्मित्रपुत्रैर्विविधैः समेतो
विशान्वितोऽत्यन्तबहुप्रतापः
श्रेष्ठप्रतिष्ठो विकलस्वभावो
ज्येष्ठा भवेद्यस्य च जन्मकाले ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
(यथा, मार्कण्डेयपुराणे । ३४ । १३ ।
"कुर्व्वंस्तथानुराधासु लभन्ते चक्रवर्त्तिताम् ।
आधिपत्यञ्च ज्येष्ठासु भवेत् चारोग्यमुत्तमम् ॥")
गृहगोधिका । इति मेदिनी । ठे, ५ ॥ मध्यमाङ्गुलिः । इति हेमचन्द्रः ॥ गङ्गा । इति राजनिर्घण्टः ॥ धीरादिनायिकाभेदः । तस्या लक्षणं यथा । परिणीतत्वे सति भर्तुरधिकस्नेहा । इति रसमञ्जरी ॥ * ॥ अलक्ष्मीः । यथा भगवतीं प्रति महादेववाक्यम् ।
"मां प्रणम्य पुनर्ब्रह्मा ममज्ज क्षीरसागरम् ।
तस्मिन् प्रमथ्यमाने तु मया देवैश्च भाविनि ॥
ज्येष्ठा देवी समुत्पन्ना रक्तवस्त्रावगुण्ठिता ।
उत्पन्ना सा मया देवान् किं कर्त्तव्यं मयेति वै ॥
तामब्रुवंस्तदा देवी सर्वे देवगणा भृशम् ।
येषां गृहान्तरे नित्यं कलहः सम्प्रवर्त्तते ॥
तत्र स्थानं प्रयच्छामो वासहाय शुभान्विते ॥
यस्य गृहे कपालास्थिभस्मकेशादि चर्च्चितम् ॥
मनश्च भाषते नित्यं वदन्त्यनृतवादिनः ।
सन्ध्याकाले च ये पापा स्वपन्ति मलचेतसः ॥
तेषां वेश्मनि संतिष्ठ दुःखदारिद्र्यदायिनी ।
कपालकेशभस्मास्थितुषाङ्गाराणि यत्र तु ॥
तत्र ते सततं स्थानं भविष्यति न संशयः ।
अकृत्वा पादयोः शौचं यत्राचामन्ति दुर्म्मतिः ॥
तं भजस्व सदा देवि । वसुविलासता भृशम् ।
तुषाङ्गारकपालास्थवालुकायसचर्मभिः ॥
दन्तधावनकर्त्तारो भविष्यन्ति नराधमाः ।
वसस्व कनिष्ठे देवि । तेषां गृहेषु नित्यशः ॥
तिलपिष्टञ्च गञ्जञ्च कालिङ्गंमृपुपलक्षणम् ।
कुष्माण्डं विटवराहञ्च विल्वकोशातकीफलम् ॥
अलाबुनिम्बफलं ये वै खादयन्ति नराधमाः ।
तेषां गृहे तव स्थानं देवि । दारिद्र्यमिच्छन् ॥
इत्यादिभिः सुराः सर्वे ते ज्येष्ठां कलिवल्लभाम् ।
पुनश्च मन्थनं चक्रुः क्षीराब्धिं शुभमाश्रिताः ॥"
इति पाद्मे उत्तरखण्डम् ॥

ज्येष्ठाम्नीयः, पुं, (ज्येष्ठो मूलो वा बद्धवक्तव्यिति पौर्णमास्यामिति ठञ् ।) ज्येष्ठमासः । इति त्रिकाण्डशेषः ॥ (यथा, शब्दार्थचिन्तामणिः ।
"ज्येष्ठाम्नीयमिच्छन्ति माघमासात् पूर्व्वकम् ॥")

ज्येष्ठाम्बु, क्ली, (ज्येष्ठं विशिष्टरोगनिवारकत्वात् श्रेष्ठं अम्बु तण्डुलधौतं वर्णनमिति । नित्यकर्मधारयः ।) तण्डुलाम्बु । इति वैद्यकपरिभाषा ॥ चाउलधुआ जल इति भाषा ॥

ज्येष्ठाश्रमी, [न्] पुं, (आश्रमोऽस्यास्तीति । आश्रम+इनि । ज्येष्ठः श्रेष्ठ आश्रमी ।)
"ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽथ भिक्षुकः ।
चत्वार आश्रमाः प्रोक्ताः सर्व्वे गार्हस्थ्यमूलकाः ॥"
"यथा वायुं समाश्रित्य वर्त्तन्ते सर्व्वजन्तवः ।
तथा गार्हस्थ्यमाश्रित्य वर्त्तन्ते सर्व आश्रमाः ॥"
इति वचनाच्च गृहस्थाश्रमस्य सर्व्वाश्रमेषूत्कृष्टत्वात् तथात्वम् ।) गृहस्थः । इति हेमचन्द्रः ॥

ज्येष्ठी, स्त्री, गृहगोधा । घेठी इति टिकटिकी इति च भाषा । तत्पर्य्यायः । मुषली २ मुसली ३ कुड्यमत्स्या ४ गृहगोधिका ५ । ६ टुकटुकी ७ शकुनज्ञा ८ गृहालिका ९ । इति शब्दरत्नावली ॥ तस्याः पतनफलं यथा —
"निपतति यदि पल्ली दक्षिणाङ्गे नराणां
स्वजनधनवियोगो लाभदा वामभागे ।
उरसि शिरसि पृष्ठे कण्ठदेशे च राज्यं
करचरणयुग्मदिस्था सर्व्वसौख्यं ददाति ॥"
इति ज्योतिषम् ॥
दिनविशेषे तस्य शब्दफलम् ।
"चित्त भवति कार्य्यसिद्धिरतुला शक्रे कुताशे भयं
याम्यामप्यभयं सुरद्विषि कलिलाभः समुद्रालये ।
वायव्यां वरवस्त्रगन्धसलिलं दिव्याङ्गना चोत्तरे
ऐशान्यां मरणं ध्रुवं निगदितं दिव्यं धनं सङ्गमे ।
ज्येष्ठीरुते श्रुतेऽप्येवमूचुः केचिच्च कोविदाः ॥"
इति तिथ्यादितत्त्वम् ॥

ज्येष्ठः पुं, (ज्येष्ठानक्षत्रयुक्ता पौर्णमासीत्यण् ङीप् च । सा अस्मिन् मासि इति पुनरण् ।) मासविशेषः । ज्येष्ठानक्षत्रयुक्ता पौर्णमासी ज्येष्ठी सा यत्र मासि भवति सः । तद्दृश्यरविभारब्ध शुक्लप्रतिपदादिदर्शान्तचान्द्रः । वृषराशिस्थरविकः सौरः । इति स्मृतिः ॥ तत्पर्य्यायः । शुक्रः २ । इत्यमरः ।१।४।१६। ज्येष्ठः ३ । इति शब्दरत्नावली ॥ तत्र जातस्य फलं यथा,—
"विदग्धशीलं पुरुषं सुशीलं
धमान्वितं ख्यात सुखु दीर्घसूत्रम् ।
विचक्षबुद्धिर्निपुणं वरिष्ठो
ज्येष्ठाभिधाने जनने हि यस्य ॥"
इति कोष्ठीप्रदीपः ॥

ज्येष्ठसामा, [न्] पुं, (ज्येष्ठसाम अधीते य सः । इत्यत्र ।) ज्येष्ठसामा । ज्येष्ठसामवेदाध्येता । इति मिताक्षरा ॥

ज्येष्ठी, स्त्री, (ज्येष्ठानक्षत्रान्विता पौर्णमासीत्यण् ङीप् च ।) ज्येष्ठपूर्णिमा । इति शब्दरत्नावली ॥ (यथा तिथितत्त्वधृतभविष्यपुराणवचनम् ।
"कार्त्तिकी फाल्गुनी चैत्री ज्येष्ठी पञ्चदशी सिता ।
मन्वन्तरादयश्चैता दत्तस्याक्षयकारिकाः ॥")
ज्येष्ठी च ॥

ज्यो, ङ नियमे । व्रतादेशे । उपनीतौ । इति कविकल्पद्रुमः ॥ (भ्वां आत्म अक नियमार्थे व्रतादेशाने तु सक अनिट ।) ङ ज्यायते । इ, ज्यायते ब्राह्मणो नियमे

[illegible]

इत्यमरः । दुर्गा । यथा,—
"प्रभाप्रसादशीतत्वात् ज्योत्स्ना चन्द्रार्क-
मालिनी ।"
इति देवीपुराणे ४५ अध्यायः ॥
अपि च ।
"रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥"
इति मार्कण्डेये देवीमाहात्म्ये ५ अध्यायः ॥
(प्रभातकालः । यथा, विष्णुपुराणे । १ ।५।३६।
"ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या याऽभि-
धीयते ॥")

ज्योत्स्नाप्रियः, पुं, (ज्योत्स्ना प्रियाऽस्य ।) चकोरः ।
इति हेमचन्द्रः ॥

ज्योत्स्नावृक्षः, पुं, (ज्योत्स्नाया दीपधारस्य वृक्ष
इव ।) दीपाधारः । इति त्रिकाण्डशेषः ॥

ज्योत्स्नी स्त्री, (ज्योत्स्ना अस्त्यस्याः इत्यण् ङीप्
च । मत्वर्थीयस्य विधेरनित्यत्वान्न वृद्धिः ।)
चन्द्रिकायुक्ता रात्रिः । ज्योत्स्नारात्रिरिति
ख्याता । पटोलिका । इत्यमरः ।२।४।११८॥
झिङ्गा इति भाषा । रेणुकानाम गन्धद्रव्यम् ।
इति शब्दचन्द्रिका ॥

ज्यौतिषिकः, पुं, (ज्योतिषं ज्योतिषशास्त्रमधीते
वेद वा इति ठक् वृद्धिश्च ।) दैवज्ञः । इत्य-
मरः ।२।८।१४॥

ज्यौत्स्नः, त्रि, (ज्योत्स्नया अन्वितः । इत्यण् ।)
दीप्तः । ज्योत्स्नायुक्तः ॥

ज्यौत्स्निका, स्त्री, (ज्योत्स्ना अस्त्यस्याः इति
ठन् पुंवद्भावात् टाप् च ।) ज्योत्स्नान्विता निशा ।
इति शब्दरत्नावली ॥

ज्यौत्स्नी स्त्री (ज्योत्स्ना पूर्णचन्द्रचन्द्रिका
अस्त्यस्याः इत्यण् पुंवद्भावः ङीप् च ।) पूर्णिमा
शुक्लरात्रिः । इति हेमचन्द्रः ॥ ज्योत्स्नी । इत्य-
मरटीकायां रायमुकुटः ॥

ज्रि, अभिभवे । इति कविकल्पद्रुमः ॥ (भ्वां परं-
सकं अनिट् ।) रेफोपधः । जयति शत्रुं वली ।
इति दुर्गादासः ॥

ज्री, ङ ञि ज्याने । गतवृद्ध्योरभाव इति यावत् ।
इति कविकल्पद्रुमः ॥ (क्र्यां सुरां पचे भ्वां परं
अकं अनिट् ।) ङ, ज्रीणाति ज्रीणः ज्रीनः ।
ञि, ज्राययति ज्रयति । निकाभ्यामेव पाठेन
सुरान्तोक्ते सिद्धे ञि पाठो भ्वादित्वार्थः । इति
दुर्गादासः ॥

ज्वर, म रोगे । इति कविकल्पद्रुमः ॥ (भ्वां परं-
अकं सेट् ।) ज्वरति जनो धातुवैषम्यात् । म,
ज्वरयति । इति दुर्गादासः ॥

ज्वरः, पुं (ज्वरति जीर्णो भवत्यनेन । ज्वर +
करणे घञ् भावे घञ् वा । मत्वाधाकर्मक-
त्वात् उत्वाभावः ।) ज्वरणम् । सन्तापप्रधान-
रोगः । तत्पर्य्यायः । जूर्त्तिः २ । इत्यमरः ।२।
६।५१॥ ज्वरिः ३ आतङ्कः ४ रोगराट् ५
व्याधिराट् ६ । इति राजनिर्घण्टः ॥ तापकः ७
सन्तापः ८ । इति शब्दरत्नावली ॥ * ॥

तस्योत्पत्तिर्यथा,—
"कालाग्निरुद्रः कोपेन चिक्षेप ज्वरमुल्बणम् ।
बभूवुर्य्यादवाः सर्व्वे ज्वराक्रान्ता हरिं विना ॥
तं दृष्ट्वा भगवान् कृष्णः ससर्ज्ज वैष्णवं ज्वरम् ।
स चिक्षेप ज्वरं तत्र माहेशं रणमूर्द्धनि ॥" *॥
माहेशज्वराकारो यथा,—
"अनलः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः ।
शिवभक्तश्च योगी च स एव भिक्षवाहनः ॥
भीमस्त्रिपादस्त्रिशिरा षड्भुजो नवलोचनः
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥" *॥
तस्य भेदाः ।
"वातजः पित्तजश्चैव श्लेष्मजश्च तथैव च ।
ज्वरास्त्रयश्च विविधाश्चतुर्थश्च त्रिदोषजः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
जातिभेदे ज्वरभेदो यथा हरिवंशे ।
श्रीकृष्ण उवाच ।
"शृणुष्व ज्वर ! सन्देशं यथा लोके चरिष्यसि ।
जङ्गमस्थावराणां त्वं यथावच्छृणु मे वचः ॥
त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसि ।
चतुष्पादान् भजैकेन द्वितीयेन च स्थावरान् ॥
तृतीयो यश्च ते भागो मानुषेषूपपद्यताम् ।
त्रिधाभूतं वपुः कृत्वा पक्षिषु त्वं भव ज्वरः ॥
चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् ।
एकान्तरश्चतुर्थश्च खोरकश्च चतुर्थकः ॥
मानुषेष्वेव दोषाय यत् त्वं प्रविभज्य वै ।
आतिष्ठस्वांशभागेषु निबोध त्वं शृणुष्व मे ॥"
अस्यार्थः । "मानुषेषु यस्तृतीयो भागस्तस्य
चतुर्भागं कृत्वा एकांशेन पक्षिषु वस द्वितीयेन
एकान्तरो दैवात्तेषु वसतीयाः खोरकः चतु-
र्थांशेन मानुषेषु वस ॥"
'वृक्षेषु कीटरूपेण तथा मण्डूकजन्तुकः ।
माण्डूकस्य विख्यातः पक्षिणामभियोग एव च ॥"
धातुर्येन निर्मारता ।
"पर्व्वतेषु शिलीभूता सरितामपि चोत्तरः ।
अपां तु नीलिका विद्यात् शिरोदुःखं च पक्षिणाम् ।
गैरिकः पर्व्वतानां च मनुष्याणां भविष्यसि ।
गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि ॥
एवं विविधरूपेण भविष्यसि महीतले ।
दर्शनात् स्पर्शनाच्चैव प्राणिनां वधमेष्यसि ॥
ऋते देवमनुष्यांश्च चान्यत्र विचरिष्यसि ॥"
तस्य माधवोक्तनिदानादिर्यथा,—
धन्वन्तरिरुवाच ।
"दक्षापमानसंक्रुद्धरुद्रनिःश्वाससम्भवः ।
ज्वरो रौद्रपतिः पाप्मा रुद्रराजोऽष्टमो मतः ॥
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्द्ध्वनयनोद्भवः ।
तत्प्रभावो मोहनश्च सन्तापात्मा अपचारजः ॥
विविधैर्नामभिः क्रूरो नानायोनिषु वर्त्तते ।
पाकलो गजेष्वभितापो वाजिनामथ कुक्कुरे ।
इन्द्रमदो जलदेषु वाधिका ज्योतिरोगिषु
भृङ्गारकरो नाम ॥ * ॥
'दुग्धाश्मद्रव्यं कायः कामः क्रोधः प्रमादिषु ।
अहङ्कारो विषमकामार्त्तो रक्तः क्षयोद्भवे ।
कार्य्ये यथान्वं सर्व्वेषां प्रहारिणं स्थिरेव वा ।
निदानो ज्वरशमनो विपरीतोपशायिता ॥
अरुचिश्चाविपाकश्च स्तम्भमालस्यमेव च ।
हृद्दाहश्च विपाकश्च तन्द्रा चालस्यमेव च ॥
पक्तिविपर्य्यनिजया दोषाणामप्रवर्त्तनम् ।
लालाप्रसेको हृल्लासः क्षुन्नाशो रसदः सुरसम् ॥
यच्च स्तब्धं गुरुत्वं च गात्राणां बहुमूत्रता ।
न विजीर्णा न चाग्लानिर्ज्वरस्यामस्य लक्षणम् ॥
क्षुत्क्षामता लघुत्वं च गात्राणां ज्वरमार्द्दवम् ।
दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम् ॥ * ॥
यथासलिङ्गं मध्ये ज्वरस्य सन्ततोऽपि वा ।
शिरोऽतिमूर्च्छावमिदाहदाह-
कण्ठास्यशोषारुचिपर्व्वभेदाः ।
उन्निद्रता भ्रमरोमहर्षा
जृम्भातिवाकत्वं पचनात् समीरात् ॥ * ॥
तापप्रकर्षोऽरुचिपर्व्वशिरोरुक्-
पीनस्यश्वासकासविबन्धाः ।
शीतज्वरतिमिरभ्रमितन्द्रा
श्लेष्मानिलज्वराकृतिम् ॥ * ॥
शीतस्तम्भस्वेददाहव्यवस्था
तृष्णाकासश्लेष्मपित्तप्रवृत्तिः ।
मोहस्तन्द्रालिप्ततिक्तास्यता च
ज्ञेयं रूपं श्लेष्मपित्तज्वरस्य ॥ * ॥
सर्व्वजो लक्षणैः सर्व्वैर्दाहोऽत्र च मुहुर्मुहुः ।
तद्वच्छीतं महानिद्रा दिवा जागरणं निशि ॥
सदा वा नैव वा निद्रा महास्वेदोऽति नैव वा ।
शीतकम्पनदाहादिप्रकृतिरुक् वर्त्तनम् ॥
सास्रुणी कलुषे रक्ते भग्ने लुलितपक्ष्मणी ।
अक्षिणी पिण्डिकापार्श्वमस्तकपर्व्वशिरोभ्रमः ॥
सस्वनौ सरुजौ कर्णौ महास्वेदोऽति नैव वा ।
परिदग्धा खरा जिह्वा गुरुस्रस्ताङ्गसन्धिता ॥
रक्तपित्तकफ निष्ठीवनं शिरसोऽतिलुठनम् ।
कोठानां श्यावरक्तानां मण्डलानां च दर्शनम् ॥
हृद्व्यथा मलसंसर्गः प्रवृत्तिर्वाल्पशोऽति वा ।
स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापिता ॥
दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम् ।
सन्निपातमभिन्यासं तं ब्रूयाच्च हतौजसम् ॥
वायुना कफरुद्धेन पित्तमन्तः प्रपीडितम् ।
ज्वरातिसारौ शीताश्च बहिर्भावं प्रपद्यते ॥
तेन हारिद्रनेत्रत्वं सन्निपातोद्भवे ज्वरे ।
दोषे विरुद्धे नष्टेऽग्नौ सर्व्वसम्पूर्णलक्षणः ॥
सन्निपातज्वरो घोरः कष्टो भवत्यन्योऽन्यथा वा ।
अन्यश्च सन्निपातोत्थो यत्र पित्तं पृथक् स्थितम् ॥
त्वचि कोष्ठे च वा नाह दहत्यति पुरोऽन्तु वा ।
तद्वद्वातकफौ प्राप्य दाहादिदु दारुणौ ॥
दोषनाशो ऽत्र शिरसि कण्ठे स्यात् क्लमो हिते ।
दोषे धाम्नि स्थिते मूर्द्ध्नि क्लमको व्यासने ॥
दाहार्त्ती पूर्वजो क्रमाच्छीतोत्पत्तिमक्षमा ॥ * ॥
श्रमक्लमाभिघाताभिषङ्गशापाभिचारतः ॥
षड्भिः तु ज्वरमुन्मादादेरभिघातज ॥ * ॥
श्रमाच्च तान् दहनः प्रायो रक्तं प्रदूषयन् ।
सव्यथाशोफवैवर्ण्यं सरुजं कुरुते ज्वरम् ।

च्यवते पतितो ऽत्र ब्रह्मपङ्क्तिबहिष्कृतः । च्यवते पुत्र विप्र उपपातकीयथः । इति पुराणम् ॥

ज्योतिः, [स्] क्ली, (द्युत दीप्तौ + इसुन् । यद्वा, द्युत दीप्तौ + "द्युतेरिसिन्नादेश्च जः ।" उणा० । २ । ११० । इति इसिन् दस्य च जः ।) दृष्टिः । नक्षत्रम् । (यथा "ज्योतींष्यभिचायमानेष्वशक्तश्च नाभिवीक्षेत ।" इति चरके इन्द्रियस्थानेऽष्टमे ऽध्याये ।) प्रकाशः । इति मेदिनी । स, २३ ॥

ज्योतिः, [स्] पुं, (द्योतते इति । द्युत + बाहु- इसि । द्युत + इसिन् वा ।) अग्निः । (यथा,— "तस्मात्तेजस्तु नाभिस्तु ज्योतिः स्थानं ध्रुवं स्मृतम् । तत्र धमति वातस्तु देहस्तेनास्य पच्यते ॥" इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥) सूर्य्यः । इति मेदिनी । सि २२ । मेथिका । इति राजनिर्घण्टः ॥ (विष्णुः । यथा महाभारते १३ । १४९ । ७८ । 'स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः ॥")

ज्योतिरिङ्ग, पुं, (ज्योतिषा इङ्गति । इगि गतौ + अच् । ज्योतिरिव इङ्गतीति वा ।) खद्योतः । इति शब्दरत्नावली ॥

ज्योतिरिङ्गणः पुं, (ज्योतिरिव इङ्गतीति । इगि गतौ + ल्युः ।) कीटविशेषः । ज्योनाकपोका इति भाषा । तत्पर्य्यायः । खद्योतः २ ध्वान्तोन्मेषः ३ तमोमणिः ४ दृष्टिबन्धुः ५ तमोज्योतिः ६ ज्योतिरिङ्गः ७ निमेषकः ८ । इति शब्दरत्नावली । ज्योतिर्वीजम् ९ निशिचरकः १० । इति त्रिकाण्डशेषः ॥

ज्योतिर्वीजं, क्ली (ज्योतिर्वीजमिवास्य ज्योतिषो वीजमिव वा ।) ज्योतिरिङ्गणः । इति त्रिकाण्डशेषः ॥

ज्योतिर्हस्ता, स्त्री, (ज्योतिर्ज्योतीरूपं हस्तः शरीरं यस्याः ।) दुर्गा । अस्या नामनिरुक्तिर्यथा,— "हस्तः शरीरमित्याहुश्छन्दोगा यतः सदा । ज्योतिःस्वरूपमस्याश्च ज्योतिर्हस्ता ततः स्मृता ॥" इति देवीपुराणे देवीनिरुक्तनाम ४५ अध्यायः ॥

ज्योतिश्चक्रं क्ली (ज्योतिर्मयं चक्रम् । ज्योतिभिः समारब्धानां विरचितं चक्रं वा ।) चन्द्रसूर्य्यादिग्रहनक्षत्रमण्डलम् । राशिचक्रम् । यथा, 'ज्योतिश्चक्रं रवौ मानमहा योगाश्च कथय । भानुमत् ज्योतिषस्य सारं वदाय सर्व्वज्ञ ॥" इति गरुडपुराणम् ॥

अपि च सिद्धान्ते ।
"भवतीप्रतिभैर्ज्योतिश्चक्रं विमिलिताङ्गुलम् । मरुद्गाढो मरुद्भिर्भिवहवरगाङ्कुश ॥"

ज्योतिष, क्ली, (ज्योतिः सूर्य्यादीनां ग्रहाणां गत्यादिकं प्रतिपाद्यतया अस्त्यस्येति अच् ।) वेदाङ्गशास्त्रविशेषः । तत्तु ग्रहगत्यादिसम्यग्ज्ञानम् । इत्यमरटीकायां भरतः ॥
'ग्रहस्कन्धमितं शास्त्रं श्रीरागमितमर्थिता । कैर्त्तिः पञ्चस्कन्धं ———— ।'
इति प्रपञ्चटीका ॥१॥

अस्य सम्बन्धादि यथा,—
"अस्य शास्त्रस्य सम्बन्धो वेदाङ्गमिति धीरितः ।
अभिधेयञ्च जगतां शुभाशुभनिरूपणम् ॥
यज्ञाध्ययनसंक्रान्तिग्रहषोडशकर्म्मणाम् ।
प्रयोजनञ्च विज्ञेयं तत्तत्कालविनिर्णयः ॥"
इति नारदीयम् ॥ * ॥

अस्याध्ययनं द्विजे कर्त्तव्यम् । यथा—
'सिद्धान्तसंहिताहोरारूपस्कन्धत्रयात्मकम् ।
वेदस्य निर्म्मलं चक्षुर्ज्योतिःशास्त्रमकल्मषम् ॥
विनैतदखिलं श्रौतं स्मार्त्तं कर्म न सिध्यति ।
तस्माज्जगद्धितायेदं ब्रह्मणा निर्म्मितं पुरा ॥
अतएव द्विजैरेतदध्येतव्यं प्रयत्नतः ॥"
इति नारदः ॥ * ॥

शूद्रस्य पाठनिषेधो यथा,—
"संहिताहोरांश्च यो विप्रो ज्ञानतो-ऽपि वा ।
शूद्रायाध्यापयेच्छास्त्रं दद्यात् स नरकं व्रजेत् ॥"
इति गर्गः ॥ * ॥

अस्य प्रामाण्यं यथा—
'वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्व्या विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं
यो ज्योतिषं वेद स वेद यज्ञान् ॥
यथा शिखा मयूराणां नागानां मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणां गणितं मूर्द्ध्नि संस्थितम् ॥"
इति वेदाङ्गज्योतिषम् ॥ * ॥

अस्याध्ययनफलं यथा,—
"एवंविधस्य श्रुतिचक्षुषोऽस्य
सदध्ययनं खलु दर्शनं वै ।
निःश्रेयसं सद्युदं जनानां
यदन्तरं धर्मसुखास्पदं स्यात् ॥"
इति माण्डव्यः ॥ * ॥

अस्य ज्ञाने फलं यथा—
"ज्योतिश्चक्रे तु लोकस्य सर्व्वस्योक्तं शुभाशुभम् ।
ज्योतिर्ज्ञानन्तु यो वेद स याति परमां गतिम् ॥"
इति गर्गः ॥

ज्योतिषिकः, पुं (ज्योतिर्ज्योतिःशास्त्रं अधीते इति । क्रतूक्थादिसूत्रान्तात् ठक् ...) ज्योतिर्विद् । इत्यमरटीका । (यथा मार्कण्डेये । "धर्मारण्यस्था ज्योतिषिका गौरग्रीवा गुहात्मकाः ॥")

ज्योतिषी स्त्री, (ज्योतिरस्त्यस्या इति अच् ङीप् च ।) तारा । इति हेमचन्द्रः । ज्योतिषशास्त्रज्ञे त्रि ॥

ज्योतिष्कः, पुं (ज्योतिरिव कायतीति । कै + कः ।) चित्रकवृक्षः । गणिकारीक्षम् । इति राजनिर्घण्टः । (अस्य पर्य्यायो यथा, "ज्योतिष्क पलीयो वा चीनकः स्वल्पकः ... विदैन् ।" इति चिकित्सितस्थाने चतुर्थेऽध्याये सुश्रुतेनोक्तम् ।) गणिकारिकावृक्षः । इति रत्नमाला ॥

ज्योतिष्कः, पुं, (ज्योतिर्भिः कायतीति । कै + कः ।) ग्रहार्कधूमकेतुनक्षत्रतारकाः । इति हेमचन्द्रः । बहुवचनान्तोऽयं शब्दः ॥

ज्योतिष्का, स्त्री, (ज्योतिरिव कायतीति । कै + कः टाप् च ।) ज्योतिष्मतीलता । इत्यमरटीकायां स्वामी ॥

ज्योतिष्टोमः पुं, (ज्योतींषि त्रिवृदादयः स्तोमा यस्य । "ज्योतिरायुषः स्तोमः ।" ८ । ३ । ८३ । इति षत्वम् ।) सोमयज्ञविशेषः । तत्र द्वादशशतदक्षिणा । इति मलमासतत्त्वम् ॥ (यथा महाभारते । ३ । २२१ । ३ । "यद्भुवानिःसृतः कायाज्ज्योतिष्टोमं क्रतुर्यथा ॥")

ज्योतिष्मती, स्त्री, (ज्योतिरस्त्यस्या इति । मतुप् उगित्वात् ङीप् च ।) लताविशेषः । मालकाङ्गनी इति लताफटकरी इति च भाषा । तत्पर्य्यायः । पारावताङ्घ्रिः १ कटभी २ पिण्या ३ । इत्यमरः । २ । ४ । १५ । पारावतपदी ४ सरसा ५ स्फुटबन्धनी ६ पूतितैला ७ सुपूरी ८ । इति रत्नमाला । सर्व्वलता ९ कनकप्रभा १० ज्योतिर्लता ११ सुपिङ्गला १२ दीप्ता १३ मेध्या १४ मतिदा १५ दुर्ज्जरा १६ सरस्वती १७ अमृता १८ । अस्या गुणाः । अतितिक्तत्वम् । किञ्चित्कटुत्वम् । वातकफापहत्वञ्च । अस्याः स्नेहस्य गुणाः । दाहप्रदत्वम् । दीपनत्वम् । मेधाप्रज्ञाबुद्धिकारित्वञ्च । इति राजनिर्घण्टः ॥ तीक्ष्णत्वम् । व्रणविस्फोटनाशित्वञ्च । इति राजवल्लभः ॥ रात्रिः । इति राजनिर्घण्टः ॥ (नदीविशेषः । यथा, मात्स्ये । ११४ । २५ ।
"सरस्वती प्रभवति तथा ज्योतिष्मती तु या ।
अवगाढे ह्युभयतः समुद्रौ पूर्व्वपश्चिमौ ॥"
ज्योतिर्विशिष्टे, त्रि । यथा रघु । ६ । २२ ।
"नक्षत्रताराग्रहसङ्कुलापि
ज्योतिष्मती चन्द्रमसैव रात्रिः ॥")

ज्योतीरथः, पुं, (ज्योतिरेव रथोऽस्य सर्व्वस्य ज्योतिश्चक्रस्य रथ इव वा ज्योतिःपदार्थानां सर्व्वेषामाधारत्वात् तथात्वमिति बोध्यम् ।) ध्रुवः । इति त्रिकाण्डशेषः ॥

ज्योत्स्ना, स्त्री, (ज्योतिरस्त्यस्यामिति । "ज्योत्स्नातमिस्रेति ।" ५ । २ । ११४ । इति निपातनात् नप्रत्ययः उपधालोपश्च ।) चन्द्रज्योतिः । चाँदनी इति हिन्दी भाषा । तत्पर्य्यायः । चन्द्रिका २ कौमुदी ३ । इत्यमरः । १ । ३ । १६ ॥ चान्द्री ४ कालिका ५ चान्द्रातपः ६ चन्द्रकान्ता ७ शीता ८ चन्द्रवारशिखी ९ । (यथा, महाभारते । १ । १ । ८६ ।
"पुराणपूर्णचन्द्रेण श्रुतिज्योत्स्नाः प्रकाशिताः ॥")
ज्योत्स्नायुक्तरात्रिः । इति मेदिनी । ने, ७ ॥ पटोलिका । इत्यमरटीकायां भरतः । अस्या गुणाः । स्निग्धत्वम् । इति राजनिर्घण्टः ॥ कषायत्वम् । मधुरत्वम् । दाहरक्तपित्तनाशित्वञ्च । इति राजवल्लभः ॥ श्वेतभाषा । इति

इत्यमाला । दुर्गा । यथा,—
"प्रभाप्रसादशीलत्वात् ज्योत्स्ना चन्द्राक्र
मालिनी ।"
इति देवीपुराणे ४५ अध्यायः ॥
अपि च ।
"रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः ।
ज्योत्स्नायै चेन्दुरूपिण्यै सुखायै सततं नमः ॥"
इति मार्कण्डेये देवीमाहात्म्ये ५ अध्यायः ॥
(प्रभातकालः । यथा, विष्णुपुराणे । १ । ५ । ३६ ।
"ज्योत्स्ना समभवत् सापि प्राक्सन्ध्या याऽभि
धीयते ॥")

ज्योत्स्नाप्रियः, पुं, (ज्योत्स्ना प्रियाऽस्य ।) चकोरः ।
इति हेमचन्द्रः ॥

ज्योत्स्नावृक्षः, पुं, (ज्योत्स्नायाः दीपधारस्य वृक्ष
इव ।) दीपाधारः । इति त्रिकाण्डशेषः ॥

ज्योत्स्नी स्त्री, (ज्योत्स्ना अस्त्यस्या इत्यण् ङीप्
च । अज्ञातपूर्व्वंकस्य विधेरनित्यत्वात् वृद्धि ।)
चन्द्रिकायुक्ता रात्रिः । ज्योत्स्नाया इति
ख्याता । पटोलिका । इत्यमरः । २ । ४ । ११८ ॥
झिङ्गा इति भाषा । देवकानाम शाकद्वयम् ।
इति शब्दचन्द्रिका ॥

ज्यौतिषिकः, पुं, (ज्योतिषं ज्योतिषशास्त्रमधीते
वेद वा इति ठक् वृद्धिश्च ।) दैवज्ञः । इत्य-
मरः । २ । ८ । १४ ॥

ज्यौत्स्नः, त्रि, (ज्योत्स्नया अन्वितः । इत्यण् ।)
दीप्तः । ज्योत्स्नायुक्तः ॥

ज्यौत्स्निका, स्त्री, (ज्योत्स्ना अस्त्यस्या इति
ठक् पुंवद्भावः टाप् च ।) ज्योत्स्नान्विता निशा ।
इति शब्दरत्नावली ॥

ज्यौत्स्नी स्त्री (ज्योत्स्ना पूर्णचन्द्रचन्द्रिका
अस्त्यस्या इत्यण् पूर्ववद् वृद्धि ङीप् च ।) पूर्णिमा
युक्तरात्रिः । इति हेमचन्द्रः । ज्योत्स्नी । इत्य
मरटीकायां रायमुकुटः ॥

ज्रि, अभिभवे । इति कविकल्पद्रुमः ॥ (भ्वां पर
सकं अनिट् ।) रेफोपधः । ज्रयति शत्रुं वली ।
इति दुर्गादासः ॥

ज्री, ग कि ज्याने । गतवद्धुवयोभाव इति यावत् ।
इति कविकल्पद्रुमः ॥ (क्र्यां चुरां पक्षे भ्वां पर
सकं अनिट् ।) ग, ज्रीणाति जीर्णः ज्रीणिः ।
कि, ज्राययति ज्रयति । गिकाभ्यामेव पाक्षिक
चुरादित्वे सिद्धे कि पाठो भ्वादित्वाय । इति
दुर्गादासः ॥

ज्वर, म रोगे । इति कविकल्पद्रुमः ॥ (भ्वां पर
सक सेट ।) ज्वरति वली धातुवैषम्यात् । म,
ज्वरयति । इति दुर्गादासः ॥

ज्वरः, पुं (ज्वरति जीर्णं भवत्यनेन । ज्वर +
करणे घञ् भावे घञ् वा । अज्ञातपूर्व्वेत
त्वात् वृद्ध्यभावः ।) ज्वरणम् । तत्पर्य्यायः
रोगः । तत्पर्य्यायः । आर्त्तिः २ । इत्यमरः । १ ।
९ । ११ ॥ व्याधिः ३ आतङ्कः ४ रोगः ५
गदामयः ६ । इति राजनिर्घण्टः । तापकः ७
सन्तापः ८ । इति शब्दरत्नावली । * ।

तस्योत्पत्तिर्यथा,—
"कालाग्निरुद्रः कोपेन विदधे ज्वरमुल्बणम् ।
बभूवुर्व्याधयः सर्व्वे ज्वराक्रान्ता हरिं विना ॥
स दृष्ट्वा भगवान् कृष्णः ससर्ज्ज वैष्णवं ज्वरम् ।
स चिच्छेद ज्वरं शम्भुः माहेश्वरमचिन्तयत् ॥" * ॥
माहेशज्वराकारो यथा,—
"जनकः सर्व्वरोगाणां दुर्व्वारो दारुणो ज्वरः ।
शिवभक्तश्च योगी च स एव निष्ठुरः सति ॥
भीमस्त्रिपात्त्रिशिराः षड्भुजो नवलोचनः
भस्मप्रहरणो रौद्रः कालान्तकयमोपमः ॥" * ॥
तस्य भेदाः ।
"वातजः पित्तजश्चैव श्लेष्मजश्च तथैव च ।
ज्वरश्चास्य त्रिविधाश्चतुर्थश्च त्रिदोषजः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥ * ॥
आविर्भावे ज्वरभेदो यथा हरिवंशे ।
श्रीकृष्ण उवाच ।
"शृणुष्व ज्वर ! सन्देशं यथा लोके चरिष्यसि ।
सर्व्वजातिषु विचरन्नथवा स्थावरजङ्गमे ॥
त्रिधा विभज्य चात्मानं मत्प्रियं यदि काङ्क्षसि ।
चतुष्पादान् भजैकेन द्वितीयेन च स्थावरान् ॥
तृतीयो यश्च ते भागो मानुषेषु भविष्यति ।
त्रिधाभूतं वपुः कृत्वा पक्षिषु त्वं भव ज्वर ॥
चतुर्थो यस्तृतीयस्य भविष्यति च ते ध्रुवम् ।
एकान्तरचतुर्भागः सोऽरकश्च चतुर्थकः ॥
मानुषेष्वथ शेषांश तत्र त्वं प्रविभज्य वै ।
जातिष्वथाश्रमेषु निवस त्वं शृणुष्व मे ॥"
अस्यार्थः । "मानुषेषु यस्तृतीयो भागः तस्य
चतुर्भागं कृत्वा एकांशेन पक्षिषु चर द्वितीयेन
एकान्तरा ऐकाहिकेषु तृतीयांशः सोऽरकः चतु
र्थांशेन मानुषेषु चर ॥"
"वृक्षेषु कीटरूपश्च तथा गुल्मोपगच्छकः ।
पाण्डुपत्रश्च विख्यातः फलेष्वाद्युर्म्मेव च ॥"
चातुर्य्यं विचारतः ।
"पद्मिनीषु हिमो भूत्वा ऊषरत्वमपि चोर्व्वराः ।
अपां तु नीलिका विद्वान् शिखोद्भेदश्च बर्हिणाम् ॥
गैरिकः पर्व्वतेष्वेव मत्प्रसादाद्भविष्यसि ।
गोष्वपस्मारको भूत्वा खोरकश्च भविष्यसि ॥
एवं विविधरूपेण भविष्यसि महीतले ।
दर्शनात् स्पर्शनाच्चैव प्राणिनो वधमर्हसि ।
ऋते देवमनुष्याश्च नान्यत्र विचरिष्यसि ॥"
तस्य नाम्नोऽभिधानादि यथा,—
धन्वन्तरिरुवाच ।
"अथ ज्वरनिदानं हि सर्व्वतन्त्रविशुद्धये ।
ज्वरो रोगपतिः पाप्मा मृत्युराजोऽशनोऽन्तकः ॥
क्रोधो दक्षाध्वरध्वंसी रुद्रोर्द्ध्वनयनोद्भवः ।
जन्मान्तयोर्मोहमयः सन्तापात्मापचारजः ॥
विविधैर्नामभिः क्रूरो नानायोनिषु वर्त्तते ।
पाकलो गजेष्वभितापो वाजिष्वथ कुक्कुरे ।
इन्द्रमदो जलदेषु ज्योतिषां ज्योतिरोऽप्सु
भूम्यामूषरो नाम ॥ * ॥
"दृष्टासन्तरङ्गः कापि तृष्णा चैवं तथाऽरतिः ।
स्वेदोऽप्यत्र चांगसादश्च तथाऽरोचकेष्वपि ।

काले यथात्र तन्वीषां प्रवृत्तिर्वृद्धिरेव वा ।
निदानोक्तानुपशयो विपरीतोपशायिता ॥
अवस्थितिरविपाकश्च जृम्भाऽत्यर्थमेव च ।
हृद्व्यथा विपाकश्च तन्द्रा चालस्यमेव च ॥
सन्निविष्टांश्रिततया दोषाणामप्रवर्त्तनम् ।
लालाप्रसेको हृल्लास क्षुन्नाशो रसनं स्वरम् ॥
यच शुष्कं गुरुत्वञ्च गात्राणां बहुमूत्रता ।
न विजीर्णा न चाग्लानिर्ज्वरस्यामस्य लक्षणम् ॥
क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्दवम् ।
दोषप्रवृत्तिरष्टाहो निरामज्वरलक्षणम् ॥ * ॥
यथास्वलिङ्गं संसर्गे ज्वरसंसर्गजोऽपि वा ।
शिरोऽर्त्तिमूर्च्छावमिदाहमोह-
कण्ठास्यशोषारतिपर्व्वभेदाः ।
उन्निद्रता संभ्रमरोमहर्षा
जृम्भातिवाकत्वं पवनात् सपित्तात् ॥ * ॥
तापहान्यरुचिपर्व्वशिरोरुक्-
पीनसश्वासकासविबन्धाः ।
शीतजाड्यतिमिरभ्रमितन्द्राः
श्लेष्मवातजनितज्वरलिङ्गम् ॥ * ॥
शीतकोऽल्पेन्द्रियाङ्गदाहस्य
मुहुः कायश्लेष्मपित्तप्रवृत्तिः ।
मोहस्तन्द्रालिप्ततिक्तास्यता च
ज्ञेयं रूपं श्लेष्मपित्तज्वरस्य ॥ * ॥
सर्व्वजो लक्षणैः सर्व्वैर्दाहोऽत्र च मुहुर्मुहुः ।
तद्वच्छीतं महानिद्रा दिवा जागरणं निशि ॥
सदा वा नैव वा निद्रा महास्वेदोऽति नैव वा ।
गीतनर्त्तनहास्यादिप्रकृतीहाप्रवर्त्तनम् ॥
सास्रुणी कलुषे रक्ते भग्ने लुलितपक्ष्मणी ।
अक्षिणी पिण्डिकापार्श्वमूर्द्धपर्व्वास्थिरुग्भ्रमः ॥
सस्वनौ सरुजौ कर्णौ कण्ठः शूकैरिवावृतः ।
परिदग्धा खरा जिह्वा गुरुस्रस्ताङ्गसन्धिता ॥
रक्तपित्तकफष्ठीवो लोठनं शिरसोऽतिरुक् ।
कोठानां श्यावरक्तानां मण्डलानाञ्च दर्शनम् ॥
हृद्व्यथा मलसंसङ्गः प्रवृत्तिर्वाल्पशोऽपि वा ।
स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापिता ॥
दोषपाकश्चिरात्तन्द्रा प्रततं कण्ठकूजनम् ।
सन्निपातमभिन्यासं तं ब्रूयाच्च हृतौजसम् ॥
वायुना कफरुद्धेन पित्तञ्च त्वगतीकृतम् ।
सन्तापं चाग्निदीप्तं वा हरिद्रागात्रतां व्रजेत् ॥
तेन हारिद्रकं नाम सन्निपातोद्भवं ज्वरे ।
दोषे विरुद्धे नष्टेऽग्नौ सर्व्वसम्पूर्णलक्षणः ॥
असाध्यः सोऽन्यथा कृच्छ्रो भवेद्वैकल्यदोऽपि वा ।
अन्यच्च सन्निपातोत्थो यत्र पित्तं पृथक् स्थितम् ॥
त्वचि कोष्ठे च वा दाहं विदधाति पुरोऽनु वा ।
तद्वद्वातकफौ शीतं दाहादिर्दुस्तरस्तयोः ॥
शीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते ।
शीते शान्तेऽस्य मूर्च्छा मदस्तृष्णा च जायते ॥
दाहादौ पुनरन्ते स्युस्तन्द्राष्ठीवनवमिक्लमाः ॥ * ॥
आगन्तुरभिघाताभिषङ्गशापाभिचारजः ।
चतुर्द्धा तु कृतोऽन्त्यादादेर्भिन्नान्य ॥ * ॥
अभिघातोद्भवस्तत्र प्रायो रक्तं प्रदूषयन् ।
सदाहशोथवैवर्ण्यं सरुजं कुरुते ज्वरम् ।

ग्रहावेशौषधिविषक्रोधभीशोककामजः ।
अभिघाताद्ग्रहैणाभिषङ्ग कलासावरोदने ।
ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुः क्षवः ॥ ७॥
विषान्मूर्च्छातिसाराश्च श्यावता दाहहृद्ग्रहः ।
क्रोधात् कम्पः शिरोरुक् च प्रलापो भयशोकजे ॥
कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयः ।
ग्रहादौ सन्निपातस्य भयादौ मरुतस्त्रयोः ॥
कोपः कोपेऽपि पित्तस्य यौ तु शापाभिचारजौ ।
सन्निपातज्वरौ घोरौ तावसह्यतमौ मतौ ॥ ९॥
तत्राभिचारिकैर्मन्त्रैर्हूयमानस्य तप्यते ।
पूर्व्वं चेतस्ततो देहस्ततो विस्फोटतृड्भ्रमैः ।
सदाहमूर्च्छैर्ग्रस्तस्य प्रत्यहं वर्द्धते ज्वरः ।
इति ज्वरोऽष्टधा दृष्टः समासाद्द्विविधस्तु सः ॥
शारीरो मानसः सौम्यस्तीक्ष्णोऽन्तर्ब्बहिराश्रयः ।
प्राकृतो वैकृतः साध्योऽसाध्यः सामो निरामकः ॥
पूर्व्वं शरीरे शारीरे तापो मनसि मानसे ।
पवने योगवाहित्वाच्छीतं श्लेष्मयुते भवेत् ॥
दाहः पित्तयुते मिश्रं मिश्रेऽन्तःसंश्रये पुनः ।
ज्वरेऽधिकं विकाराः स्युरन्तःक्षोभो मलग्रहः ॥
बहिरेव बहिर्व्वेगे तापोऽपि च सुसाधितः ।
वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात् ॥
वैकृतोऽन्यः स दुःसाध्यः प्रायश्च प्राकृतोऽनिलात् ।
वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितो ज्वरम् ॥
कुर्य्यात् पित्तञ्च शरदि तस्य चानुबलं कफः ।
तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् ॥
कफो वसन्ते तमपि वातपित्तं भवेन्नु ।
बलवत्स्वल्पदोषेषु ज्वरः साध्योऽनुपद्रवः ॥
सर्व्वथा विकृतिज्ञाने प्रागसाध्य उदाहृतः ।
ज्वरोपद्रवतीक्ष्णत्वमग्लानिर्बहुमूत्रता ॥
न प्रवृत्तिर्न विड्जीर्णा न क्षुत् सामज्वराकृतिः ।
ज्वरवेगोऽधिका तृष्णा प्रलापः श्वसनं भ्रमः ॥
मलप्रवृत्तिरुत्क्लेशः पच्यमानस्य लक्षणम् ॥
जीर्णतामविपर्य्यासात् सप्तरात्रञ्च लङ्घनात् ।
ज्वरः पञ्चविधः प्रोक्तो मलकालबलाबलात् ॥
प्रायशः सन्निपातेन भूयसा तूपदिश्यते ।
सन्ततः सततोऽन्येद्युस्तृतीयकचतुर्थकौ ।
धातुमूत्रशकृद्वाहिस्रोतसां व्यापिनो मलाः ॥
तापयन्तस्तनुं सर्व्वां तुल्यदूष्यादिवर्द्धिताः ।
बलिनो गुरवस्तब्धा विशेषेण रसाश्रिताः ॥
सन्ततं निष्प्रतिद्वन्द्वा ज्वरं कुर्य्युः सुदुःसहम् ।
मलं ज्वरोष्मा धातून् वा स शीघ्रं क्षपयेत्ततः ॥
सर्व्वाकारं रसादीनां शुद्ध्याशुद्ध्यापि वा क्रमात् ।
वातपित्तकफैः सप्तदशद्वादशवासरान् ॥
प्रायो नुदति मर्य्यादां मोक्षाय च वधाय च ।
इत्यग्निवेशस्य मतं हारीतस्य पुनः स्मृतिः ॥
द्विगुणा सप्तमी या च नवम्येकादशी तथा ।
एषा त्रिदोषमर्य्यादा मोक्षाय च वधाय च ॥
शुद्ध्यशुद्धौ ज्वरः काले दीर्घमप्यनुवर्त्तते ।
कृशानां व्याधिमुक्तानां मिथ्याहारादिसेविनाम् ॥
अल्पोऽपि दोषो दुष्ट्याद्यैर्लब्ध्वान्यतमतो बलम् ।
स प्रत्यनीको विषमं यस्मात्तद्द्वेषयत्यलम् ॥
दोषोऽल्पो ज्वरं कुर्य्यात् स्वल्पकालानुबन्धि तम् ।
दोषः प्रवर्त्तते तेषां स्वे काले ज्वरयन् बली ।
निवर्त्तते पुनश्चैव प्रत्यनीकबलाबलः ।
क्षीणदोषो ज्वरः सूक्ष्मो रसादिष्वेव लीयते ॥
लीनत्वात् कार्श्यवैवर्ण्यजाड्यादीनादधाति सः ।
आसन्नविवृतास्यत्वात् स्रोतसां रसवाहिनाम् ॥
आशु सर्व्वस्य वपुषो व्याप्तिर्दोषेण जायते ।
सन्ततः सततस्तेन विपरीतो विपर्य्ययात् ॥
विषमो विषमारम्भः क्रियाकालोऽनुषङ्गवान् ।
दोषो रक्ताश्रयः प्रायः करोति सततं ज्वरम् ॥
अहोरात्रस्य स द्विः स्यात् सकृदन्येद्युराश्रितः ।
तस्मिन् मांसवहा नाड्यौ मेदोनाड्यौ तृतीयकः ॥
ग्राही पित्तानिलान्मूर्ध्नस्त्रिकस्य कफपित्ततः ।
स पृष्ठस्यानिलकफात् स चैकाहान्तरः स्मृतः ॥
चतुर्थको मलैर्मेदो मज्जास्थ्यन्यतरस्थितैः ।
मज्जास्थस्त्वेव परः प्रभावमनुदर्शयन् ॥
द्विविधः कफेन जङ्घाभ्यां स पूर्व्वं शिरसोऽनिलात् ।
अस्थिमज्जोभयगते चातुर्थकविपर्य्ययः ॥
त्रिधा त्र्यहं ज्वरयति दिनमेकन्तु मुञ्चति ।
बलाबलेन दोषाणामन्नचेष्टादिजन्मनाम् ॥
ज्वरः स्यात् मनसस्तद्वत् कर्म्मणश्च तदा तदा ।
गम्भीरधातुचारित्वात् सन्निपातेन सम्भवात् ।
युक्तौ नृपाच दोषाणां दुश्चिकित्स्यश्चतुर्थकः ॥
कुर्य्यात् सन्ततकाद्येषु दूराद्दूरतरेषु च ।
दोषा रसादिमार्गेषु शनैरल्पचिरेण यत् ।
याति दैवश्च नामेव सन्तापादीन् करोत्यतः ।
क्रमो यत्नेन विच्छिन्नः सन्तापो लक्ष्यते ज्वरः ॥
विषमो विषमारम्भः क्रियाकालानुसारवान् ।
यथोत्तरं मन्दमतिमन्दशक्तिर्यथाक्रमम् ॥
कालेनाप्नोति सञ्चारं स रसादींस्तथा तथा ।
दोषो ज्वरयति क्रुद्धश्चिराच्चिरतरेण च ॥ ० ॥
भूमौ स्थितं जले सिक्तं कालमेव प्रतीक्षते ।
अङ्कुराय यथा बीजं दोषवाश्च मसतथा ॥
स्थितं धातौ विश यद्दाश्रये भीयते बलम् ।
कुप्यत्यसबलं भूयः काले दोषविषं तथा ॥
एवं ज्वराः प्रवर्त्तन्ते विषमाः सततादयः ॥ ० ॥
उत्क्लेशो गौरवं दैन्यं भङ्गोऽङ्गानां विजृम्भणम् ।
अरोचको वमिः श्वासः सर्व्वस्मिन् रसगे ज्वरे ।
रक्तनिष्ठीवनं दाहः स्फोटोत्थः पिड़कोद्गमाः ॥
दाहरागभ्रममदप्रलापो रक्तसंश्रिते ।
तृड्ग्लानिरसृग्वर्च्चोऽन्तर्द्दाहो भ्रमस्तमः ।
दौर्गन्ध्यं गात्रविक्षेपो मांसगे मेदसि स्थिते ।
स्वेदोऽतितृष्णा वमनं दौर्गन्ध्यं चापि विच्युतिः ॥
प्रलापो ग्लानिररुचिरस्थिगे त्वस्थिभेदनम् ।
दोषप्रवृत्तिरुच्छ्वासश्वासाङ्गविक्षेपकूजनम् ॥
अन्तर्द्दाहो बहिः शैत्यं श्वासो हिक्का च मज्जगे ।
तमसो दर्शनं मर्म्मच्छेदनं स्तब्धमेढ्रता ॥
शुक्रप्रवृत्तिमृत्युश्च जायते शुक्रसंश्रये ।
उत्तरोत्तरदुःसाध्याः पञ्चार्ह्ये तु विपर्य्यये ।
प्रक्लिन्नाविव गात्राणि पैत्तिको मौरवेति च ।
मन्दज्वरः प्रलापश्च सशीतः स्यात् प्रलेपकः ।
नित्यं मन्दज्वरो रूक्षः शीतः कष्टेन गच्छति ।
स्तम्भः स्वेदोऽप्यतिनिद्रा भवेदङ्गबलासकः ॥ ० ॥
हरिद्राभेदवर्णाभस्तद्वर्णाङ्गः प्रमेहति ।
स वै हारिद्रको नाम ज्वरभेदोऽन्तकः स्मृतः ।
कफवातौ समौ यत्र हीनपित्तस्य दारुणः ।
तीक्ष्णोऽथवा निशामध्ये जायते रात्रिको
ज्वरः ॥
दिवाकरापीतबले व्यायामाच्च विशोषिते ।
शरीरे नियतश्चात्र ज्वरः स्यात् पौर्व्वरात्रिकः ।
आमाशये यदा दुष्टे श्लेष्मपित्ते व्यवस्थिते ।
तदार्द्धं शीतलं देहे चार्द्धं चोष्णं प्रजायते ॥ ० ॥
काये पित्तं यत्र दुष्टं श्लेष्मा चान्ते व्यवस्थितः ।
उष्णत्वं तेन देहस्य शीतत्वं करपादयोः ॥ ० ॥
त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे ।
अस्थिमज्जागतः श्लेष्मा पाण्डुतां च पुरा भृशम् ॥ ० ॥
विषमो ज्वरवेगार्त्तः सङ्कोच इव चोच्यते ।
सदोष मन्दश्च शक्रुत्तनं सुखमति वैभवत ॥ ० ॥

दृष्टो लघुत्वमगतभ्रममोहताम
पाको रुजो करणोहवमथयथम् ।
स्वेदः श्रमः प्रकृतिगामि मनोऽभिलाषा
कण्ठश्च शुद्धिं विगतज्वरलक्षणानि ॥

इत्यादि महापुराणे गारुडे ज्वरनिदानं
समाप्तम् । १५९ अध्यायः ॥

अथ ज्वरस्य चिकित्सा ।

धन्वन्तरिरुवाच ।

“ज्वरोऽष्टधा पृथक् द्वन्द्वसङ्घातागन्तुजः स्मृतः ।
मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः ।
शृतशीतं जलं दद्यात् पिपासाज्वरशान्तये ॥ १ ॥
नागरं देवकाष्ठञ्च धन्याकं बृहतीद्वयम् ।
दद्यात् पाचनकं पूर्व्वं ज्वरिताय ज्वरापहम् ॥ २ ॥
आरग्वधाभयाशुण्ठीतिक्ताग्रन्थिकनिर्म्मितः ।
कषायः पाचनो नाम्ना कफपित्ते च ज्वरे हितः ॥ ३ ॥
मधूकसारसिन्धूत्थवचोषणकणाः समाः ।
श्लक्ष्णा पिष्टाम्भसा नस्यं कुर्य्यात् संज्ञाप्रबोधनम् ॥ ४ ॥
निशाद्वयश्रीफलनिम्बलाकटुकारग्वधैः कृतः ।
चत्वारो भिन्नकाय यय सर्व्वज्वरापहः ॥ ५ ॥
मधौ कथयन्तामृतमन्दनौशीरधान्यकैः ।
क्वाथस्तृतीयकं हन्ति शर्करामधुयोजितः ॥ ६ ॥
अपामार्गजटा कट्यां लोहितैः सप्ततन्तुभिः ।
बद्धा वारे रवेर्नूनं ज्वरं हन्ति तृतीयकम् ॥ ७ ॥
गङ्गाया उत्तरे कूले अपुत्रस्तापसो मृतः ।
तस्मै तिलोदकं दद्यान्मुञ्चत्यैकाहिको ज्वरः ॥ ८ ॥
गुडूच्या क्वाथकल्काभ्यां त्रिफलाया घृतस्य च ।
मृद्वीकाया बलायाश्च स्निग्धाः स्युर्ज्वरिणो
हिताः ॥ ९ ॥
धात्री शिवा कणा वह्निकाथः सर्व्वज्वरापहः ॥ १० ॥
ज्वरातिसारशमनाय प्रवदाम्यथ ।
ह्रीवेरविश्वातिविषानागरोत्पलधान्यकैः ।
पाठेन्द्रयवभूनिम्बशालपर्णीका स्मृता ।
अयमप्यामसातीसारज्वरं शमयेद्भृशम् ॥ ११ ॥
नागरातिविषामुस्ताभूनिम्बामृतवत्सकैः ।
सर्व्वज्वरहरः क्वाथः सर्व्वातीसारनाशनः ॥ १२ ॥
मुस्तपर्पटकोदीच्यमञ्जिष्ठाभ्याः पञ्च ।

शालपर्णी पृश्निपर्णी बृहती कण्टकारिका ।
बलाश्वदंष्ट्राबिल्वानि पाठा नागरधान्यकम् ।
एतदाहारसंयोगे हितं सर्व्वातिसारिणाम् ॥१३
बिल्वपूताग्निमिश्रं च स्वच्छ मध्वतिसारहृत् ॥१४॥
अतीसारे हितस्तद्वत् कुटजत्वक्फलाह्वयः ॥१५॥
वत्सकातिविषाबिल्ववालकाब्दकषायकः ।
सविश्व आमशूलाढ्ये ह्यतीसारे सशोणिते ।”१६
इति गारुडे १७४ अध्यायः ।
अपि च ।
“हृज्जवह्न पञ्चमूलस्य यवागूर्मांसं वा हर ।
नम सर्व्वज्वरहर भूतप्रेतादिरुद्रवेत ॥१७॥
पीतं वृश्चिककालस्तु पर्य्युषितजलेन वै ।
शार्ङ्ग विनाशयेदाशु ज्वरञ्च परमेश्वर ॥१८॥
शिरोधायाञ्चैव सद्यश्च भवत्यैकाहिकादिषु ॥१९॥
एतत् सर्व्वाह्निक पीत रक्ताकुष्ठज्वरादिषु ।”२०
इति तत्रैव १९१ अध्यायः ।
“वचा त्रिकटुकञ्चैव करञ्जं देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ।
प्रियङ्गुनिम्बत्रिकटुगोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ।
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥२१
अभयामलकद्राक्षा पाठा चैव विभीतकम् ।
शर्करा च धनञ्चैव अग्ध ज्वरहरं भवेत् ।”२२
इति च गारुडे १९९ अध्यायः ॥ * ॥
वैद्यकमते शिवज्वरस्योत्पत्तिर्यथा,—
“दक्षापमानसंक्रुद्धरुद्रनिश्वाससम्भवः ।
ज्वरोऽष्टधा पृथग्द्वन्द्वसंघातागन्तुजः स्मृतः ।
तस्य विप्रकृष्टकारणकथनपूर्व्विका सम्प्राप्तिर्यथा
“मिथ्याहारविहारस्य दोषा ह्यामाशयाश्रयाः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरदाः स्यू रसानुगाः ।”
तस्य सामान्यलक्षणं यथा,—
“स्वेदावरोधः सन्तापः सर्व्वाङ्गग्रहणं तथा ।
युगपद्यत्र रोगे तु स ज्वरो व्यपदिश्यते ।”*।
तस्य पूर्व्वरूपं यथा,—
“श्रमोऽरतिर्विवर्णत्वं वैरस्यं नयनप्लवः ।
इच्छाद्वेषौ मुहुश्चापि शीतवातातपादिषु ।
जृम्भाङ्गमर्द्दो गुरुता रोमहर्षोऽरुचिस्तमः ।
अप्रहर्षश्च शीतञ्च भवत्युत्पत्स्यति ज्वरे ।”*।
सन्ततादिज्वराणां प्रति नियतदूष्या धातवो यथा,
“सन्ततं रसरक्तस्थः सोऽन्येद्युः पिशिताश्रितः ।
मेदोगतस्तृतीयेऽह्नि त्वस्थिमज्जगतः पुनः ।
कुर्य्याच्चातुर्थकं घोरमन्तकं रोगसङ्करम् ।
सप्ताहं वा दशाहं वा द्वादशाहमथापि वा ।
सन्तत्या योऽविसर्गी स्यात् सन्ततः स निगद्यते ।
अहोरात्रे सततको द्वौ कालावनुवर्त्तते ।
अन्येद्युष्कस्त्वहोरात्र एककालं प्रवर्त्तते ।
तृतीयकस्तृतीयेऽह्नि चतुर्थेऽह्नि चतुर्थकः ।
केचिद्भूताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ।
कफपित्तात्त्रिकग्राही पृष्ठाद्वातकफात्मकः ।
वातपित्ताच्छिरोग्राही त्रिविधः स्यात्तृतीयकः ।
चातुर्थको दर्शयति प्रभावं द्विविधं ज्वरः ।
जङ्घाभ्यां श्लैष्मिकः पूर्व्वं शिरस्तोऽनिलसम्भवः ।
विषमज्वर एवान्यश्चातुर्थकविपर्य्ययः ।
मध्ये स्वह्नी ज्वरयत्यादावन्ते च मुञ्चति ।”*।
वातबलासकज्वरो यथा,—
“नित्यं मन्दज्वरो रूक्षः शूनकस्तेन सीदति ।
स्तब्धाङ्गः श्लेष्मभूयिष्ठो नरो वातबलासकी ।”
विषमज्वरविशेषाः ।
“विदग्धेऽन्नरसे देहे श्लेष्मपित्ते व्यवस्थिते ।
तेनार्द्धं शीतलं देहे चार्द्धञ्चोष्णं प्रजायते ।”*।
शीतपूर्व्वो ज्वरो यथा —
“त्वक्स्थौ श्लेष्मानिलौ शीतमादौ जनयतो ज्वरे ।
तयोः प्रशान्तयोः पित्तमन्ते दाहं करोति च ।”
दाहपूर्व्वो ज्वरो यथा,—
“करोत्यादौ तथा पित्तं त्वक्स्थं दाहमतीव च ।
तस्मिन् प्रशान्ते त्वितरौ कुरुतः शीतमन्ततः ।
द्वावेतौ दाहशीतादी ज्वरौ संसर्गजौ स्मृतौ ।
दाहपूर्व्वस्तयोः कष्टः कृच्छ्रसाध्यतमश्च सः ।’
उक्तवातादिज्वराणां धातुविशेषदूष्यतया
अधिकलक्षणानि यथा —
“गुरुता हृदयोत्क्लेशः सदनं छर्द्यरोचकौ ।
रसस्थे तु ज्वरे लिङ्गं दैन्यञ्चास्योपजायते ॥१॥
रक्तनिष्ठीवनं दाहो मोहश्छर्द्दनविभ्रमौ ।
प्रलापः पिडका तृष्णा रक्तप्राप्ते ज्वरे नृणाम् ॥२
पिण्डिकोद्वेष्टनं तृष्णा सृष्टमूत्रपुरीषता ।
ऊष्मान्तर्दाहविक्षेपौ ग्लानिः स्यान्मांसगे ज्वरे ॥३
भृशं स्वेदस्तृषा मूर्च्छा प्रलापश्छर्द्दिरेव च ।
दौर्गन्ध्यारोचकौ ग्लानिर्मेदःस्थे चासहिष्णुता ॥४
भेदोऽस्थ्नां कूजनं श्वासो विरेकश्छर्द्दिरेव च ।
विक्षेपणञ्च गात्राणामेतदस्थिगते ज्वरे ॥५॥
तमःप्रवेशनं हिक्का कासः शैत्यं वमिस्तथा ।
अन्तर्दाहो महाश्वासो मर्म्मच्छेदश्च मज्जगे ॥६॥
मरणं प्राप्नुयात्तत्र शुक्रस्थानगते ज्वरे ।
शेफसः स्तब्धता मोक्षः शुक्रस्य तु विशेषतः ।”७
अथ वैद्यकमते सामान्यतो ज्वरस्य चिकित्सा
माह ।
“संशोध्य यत्र दोषाणां विवेक्तुं नैव शक्नुयात् ।
साधारणीं क्रियान्तत्र विदधीत चिकित्सकः ।
सामान्यतो ज्वरी पूर्व्वं निर्व्वाते निलये वसेत् ।
निर्व्वातमायुषो वृद्धिमारोग्यं कुरुते यतः ।
अथवस्यानिलकृद्भ्याम्भेदश्चाग्निमान्द्य ।
तालवृन्तभवो वातस्त्रिदोषशमनो मतः ।
वंशपत्रस्य वातो रक्तपित्तप्रकोपकः ।
चामरो वस्त्रसम्भूतो मायूरो वेत्रजस्तथा ।
एते दोषजिता वाताः स्निग्धाः शस्ता सुपूजिताः ।
नवज्वरी भवेद्यत्नाद्गुरुप्रावरणान्वितः ।
यवागूश्च पानीयं पिबेत् किञ्चिन्निवारयेत् ।
दिवापि भिषजैवापि यत्नादत्र निवर्त्तते ।
न तु मद्यं वारिश्चैव भिषग्वार्य्यो प्रदीयते ।”*।
तथा ज्वरे वर्ज्यान्याह दत्तः ।
“संस्वेदान् प्रदेहांश्च स्नेहान् संशोधनानि च ।
दिवास्वप्नं व्यवायञ्च व्यायामं शिशिरं जलम् ।
क्रोधप्रवातभोज्यानि वर्ज्जयेत्तरुणज्वरी ।”
परिषेकः स्नानादिः । प्रदेहो अनुलेपनम्
अङ्गादि । स्नेहान् पाने निषिद्धान् ॥ * ॥
निषिद्धानिषेधाद्दोषमाह ।
“शोषं छर्द्दिं मदं मूर्च्छां भ्रमं तृष्णामरोचकम् ।
प्राप्नोत्युपद्रवानेतान् परिषेकादिसेवनात् ।”
आदिशब्देन प्रदेहादयो गृह्यन्ते ॥ * ॥
हारीतेन प्रत्येक दूषणात्मकम् ।
“व्यायामाज्ज्वरसंवृद्धिर्व्यवायात् स्तम्भमूर्च्छनम् ।
स्नानाच्च स्वेदमानात्तु मूर्च्छा छर्द्दिर्मदोऽपि च ।
गुर्व्वन्नभोजनात् स्तम्भाद्धिध्मो दोषकोपनम् ।
अभिघाते शरत्काले शीतला चाग्रवर्त्तनम् ।”
स्नानिरिति व्यवायादिषु सम्बध्यते । स्तम्भात्
दिवास्वापात् ॥ * ॥ अन्यच्च वङ्गसेने ।
“तरुणे ज्वरसंज्ञो वा विरहोऽपि गुरूण्यपि च ।
अस्नान्यानपानानि विदाहीन्यशनानि च ।
व्यायाममतिचेष्टाञ्चाभ्यङ्गं स्नानञ्च वर्ज्जयेत् ।
तेन ज्वरः शमं याति न प्राणश्च पुनर्भवेत् ।
ज्वरी लङ्घनं कुर्य्यादिति चरकवाग्भटौ ।”
“आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ।”
अत्रायमर्थः । “यतो ज्वरे आमाशयस्थो दोषो
वातपित्तश्लेष्मरूपः सर्व्वेन्द्रियाणि अपि हत्वा
आच्छाद्य साम अपक्वाहाररससहितो मार्गान् रस-
मार्गान् पिधापयन् । अन्नाद्यवृत्तावपि कर्म्म
रोगम् । तेन पिण्डविशेषः । ज्वरं करोति तस्मात्
हेतोर्ज्वरी लङ्घनमाचरेदित्यर्थः ॥ * ॥
“त्रिविधं त्रिविधे दोषे तत् समीक्ष्य प्रयोजयेत् ।
दोषेऽल्पे लङ्घनं पथ्यं मध्ये लङ्घनपाचनम् ।
प्रभूते शोधनं तच्च मूलादुन्मूलनं मतम् ।”
चरकश्च ।
“तदलन्तु ज्वरः पूर्व्वं लङ्घनेनोपपादयेत् ।
आमन्तोषमलिङ्गाङ्गा लङ्घयेत् यथाविधि ।”
अन्यच्च ।
“ज्वरादौ लङ्घनं कुर्य्यात् ज्वरमध्ये तु पाचनम् ।
ज्वरान्ते रेचनं कुर्य्यात् कोष्ठशुद्धौ यथाबलम् ।
दोषपिण्डस्य पाकार्थे मधुपकाय च ।
इच्छितश्चाम्लरोगश्च यवागूपानमाचरेत् ।
शालिषष्टिकसिद्धानां यवं वा प्रथमाचरेत् ।
पयकोष्ठं अनिद्रा यवागूमल्पमश्नुते ।
अनिलादुदरं न दद्यात् तस्मै घनपर्पटं हितम् ।
मासान्तादिमगन्धरोपयान्ति शमं तथैव हि ।
तथैवार्द्ध तु कृच्छ्रं च लघुज्वरमाणनः ।”
अत्र वहुशब्देनाप्यनुपयुज्यते । यत् आह
सुश्रुतः ।
“आमहार्य्यभिदैर्विशेषतः कालमागतः ।
तावन्तमेव कुर्य्यात्तु वृहमात्रेत् ।”
आमहानिर्मतैर्दोषैर्ज्वरत्याः शमं नह ।
स्त्रीं बोधयामः दण्डयम् ॥ * ॥
यत् चरक आह ।
“चतुःप्रकारा संशुद्धिः पिपासा मारुतातपौ ।
पाचनान्युपवासश्च व्यायामश्चेति लङ्घनम् ।”
चतुःप्रकारा संशुद्धिः वमनादिरूपा ॥ * ॥

शिरोविरेचनानि । न सद्योवमनं तस्य हृद्ग्रहात् । अत्र लङ्घनं अवेक्ष्यमित्यर्थः । तथा च सुश्रुतः ।

"शरीरलाघवकरं यद्द्रव्यं कर्म्म वा पुनः ।
तल्लङ्घनमिति ज्ञेयं बृंहणन्तु पृथग्विधम् ॥
बृंहणात् शमनादन्यत् शरीरपोषकमित्यर्थः ॥*॥

ननु आमज्वरिभिर्नैव विरेचनादिपूर्व्वोक्तसंयुत वचनात् आमाशयस्थो ज्वरिणा यथाप्रबलस्य चलनं क्रियते तथा चतुष्प्रकारा संशुद्धिः इत्यादिवचनेनापि वमनादिरूपं लङ्घनं सर्व्वैर्ज्वरिभिः कथं न क्रियते । तत्रोच्यते । वमनादिकमवस्थाविशेषेणैव क्रियते न तु सर्व्वज्वरेषु । तथा च सुश्रुतः ।

"श्लेष्मोत्क्लेशे बलिने देहे वमनं श्लैष्मिके ज्वरे ।
पित्ताशये विरेकस्तु कार्य्यः प्रशिथिलाशये ॥"

प्रशिथिलाशये अत्र श्लेष्मणः वैपरीत्ये शीघ्र गदाशये इत्यर्थः ॥*॥

"सदर्दनिलये कार्य्यं योदावर्ते निरूहणम् ।
कफाभिपन्ने शिरसि कार्य्यं मूर्द्धविरेचनम् ॥"

अपि च । सर्व्वज्वरिभिः पिपासायामपेयञ्च न कार्य्यं । यत आह हारीतः ।

"तृष्णा गरीयसी घोरा सद्यः प्राणविनाशिनी ।
तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम् ॥"

अतोऽवस्थाविशेष एव पिपासावारणम् ॥*॥ ज्वरिभिर्वातसेवनञ्च न कार्य्यम् । सुश्रुतेन प्रवातसेवनस्य सर्व्वथा निषिद्धत्वात् अतो मारुतसेवनं अवस्थाविशेष एव युक्तम् । आतपसेवनमपि अवस्थाविशेष एव यद्गौणम् ॥*॥

"लङ्घनाम्बुयवाग्भिर्यदा दोषो न पच्यते ।
तदा तं मुखवैरस्यतृष्णारोचकनाशनैः ॥
क्वाथैः पाचनैर्हृद्यैः कषायैः समुपाचरेत् ॥"

इत्यत्र लङ्घनपाचनयोः स्फुट एव भेदः । आयासोऽपि न कार्य्यस्तस्यातिनिषिद्धत्वात् । अवस्थाविशेषे पुनः पादप्रक्षालनादिकम् सोऽपि कार्य्यः । तस्माच्चतुष्प्रकारा संशुद्धिरित्यादिश्लोके लङ्घनपदं शोधनपर्य्यायमिति निर्णीतम् ॥ अथ प्रशस्तस्य लङ्घनस्य गुणमाह ।

"लङ्घनेन क्षयं नीते दोषे सन्धुक्षितेऽनले ।
विज्वरत्वं लघुत्वञ्च क्षुच्चैवास्योपजायते ॥
लङ्घनेन अनशनेन दोषे प्रवृद्धे क्षयं नीते ।

यत आह ।

"आहारं पचति शिखी दोषानाहारवर्जितः ।"
पचतीति । सन्धुक्षितेऽनले अन्नाहारकदोषे संदीपिते अग्नौ सतीति । मयोक्तप्रकारेण त्रिपाकस्य विघटनात् । विज्वरत्वं शरीरस्य गौरवाभावेन लघुत्वम् । क्षुत् बुभुक्षा च जायते इत्यर्थः ॥*॥ अन्यच्चाह सुश्रुतः ।

"अनवस्थितदोषाग्नेर्लङ्घनं दोषपाचनम् ।
ज्वरघ्नं दीपनं काङ्क्षारुचिलाघवकारकम् ॥"

अनवस्थितदोषाग्नेः अनवस्थितः अव्यवस्थितः अग्नौ दोषोऽपि च यस्य तस्य ज्वरितस्य । आकाङ्क्षा अन्नाभिलाषः । अपि लङ्घनेनामपाका

नुलोमादिरूपे गुणस्य यत् प्रशस्तं चैव रुचिः शोभा । रुचिः स्त्री दीप्तौ शोभायामपि लाभयोरिति मेदिनीकारः ॥*॥ सम्प्रति प्रशस्तस्य लङ्घनस्य लक्षणमाह ।

"वातमूत्रपुरीषाणां विसर्गो गात्रलाघवे ।
हृदयोद्गारकण्ठास्यशुद्धौ तन्द्राक्लमे गते ॥
स्वेदे जाते रुचौ चापि क्षुत्पिपासासहोदये ।
कृतं लङ्घनमादेश्यं निर्व्यथे चान्तरात्मनि ॥"

हृदयस्य शुद्धिरनवरोधः । उद्गारशुद्धिः धूमाद्युद्गाराभावः । कण्ठस्य शुद्धिः कफाद्यलिप्तत्वम् । आस्यशुद्धिः मुखस्य प्रसन्नत्वम् । तन्द्राक्लमे तन्द्रया क्लमः तस्मिन् । तन्द्रा निद्रावत् । क्लमोऽत्र ग्लानिः । क्षुत्पिपासासहोदये क्षुत्पिपासाभ्यां सह युगपदुदये । अन्तरात्मनि मनसि । एतानि लक्षणानि मिलितान्येव सम्यक्कृतं लङ्घनं बोधयन्ति । न तु प्रत्येकम् ॥*॥ हीनस्य लङ्घनस्य लक्षणमाह ।

"कफोत्क्लेशः सहृल्लासः ष्ठीवनञ्च मुहुर्म्मुहुः ।
कण्ठास्यहृदयाशुद्धिस्तन्द्रा हीनेन लङ्घने ॥
कफोत्क्लेशः कफस्य वमनायोपस्थितिः ।"
हृल्लासः हृदयात् काङ्क्षानिरोधः ॥*॥
अतिप्रयुक्तस्य लङ्घनस्य लक्षणमाह ।

"पर्व्वभेदोऽङ्गमर्द्दश्च कासः शोषो मुखस्य च ।
क्षुत्प्रणाशोऽरुचिस्तृष्णा दौर्ब्बल्यं श्रोत्रनेत्रयोः ॥
मनसः संभ्रमोऽभीक्ष्णमूर्द्ध्ववातस्तमो हृदि ।
देहाग्निबलनाशश्च लङ्घनेऽति कृते भवेत् ॥
दौर्ब्बल्यं श्रोत्रनेत्रयोः स्वकर्म्मणो असिद्ध्य

सामर्थ्याभावम् । मनसः संभ्रमः भ्रान्तिः । ऊर्द्ध्ववात उद्गारबाहुल्यम् । हृदि तमः अन्धकारप्रविष्टस्येव ज्ञानम् ॥*॥ यत्र इयत् लङ्घनं कार्य्यमित्याह ।

"बलाविरोधिना चैनं लङ्घनेनोपपादयेत् ।
बलाधिष्ठानमारोग्यं यदर्थोऽयं क्रियाक्रमः ॥
अयमर्थः । एनं ज्वरिणं बलविरोधिना बलति बलक्षयकारिणा लङ्घनेन उपपादयेत् उपचरेत् । कुत इति चेत्तत्राह । यदर्थ इति । यस्मै आरोग्याय अयं क्रियाक्रमः चिकित्सोपक्रमः । तत् आरोग्यं बलाधिष्ठानं बलाश्रयमित्यर्थः ॥*॥

केषाञ्चिल्लङ्घनस्य निषेधमाह सुश्रुतः ।

तद्धि मारुतक्षुत्तृष्णामुखशोषभ्रमान्विते ।
न कार्य्यं गुर्व्विणीबालवृद्धदुर्ब्बलभीरुभिः ॥
न चाभ्यश्रमक्रोधकामशोकभिरज्वरे ।
तत् अनशन उक्तरूपलङ्घनं ज्वरिणा न कार्य्यम् । मारुतोऽत्र निरामो बोद्धव्यः । सामे तु मारुते लङ्घनं कार्य्यमेव । यत आह तन्त्रान्तरे ।
"वातप्रधान ऊर्म्मीव ज्वरो नामे समीरणे ।
लङ्घनं प्रागपाकार्थं न लङ्घनं यथा बले ॥
लङ्घनं आमपाकाद्यर्थम् । बलस्य रोधनम् ।
कफपित्ते हि धातु नश्येते लङ्घनं बहु ।
आमाशयादूर्द्ध्वगमनि काङ्क्षे भवति चाशम् ॥"*॥
आमस्य लक्षणमाह ।

"आहारस्य रसः सारो यो न पक्वोऽग्निमान्द्यतः ।

आमसंज्ञो स भवति बहुव्याधिसमाश्रयः ॥"

तन्त्रान्तरे ।

"आममन्नरसं केचित् केचित्तु मलसञ्चयम् ।
प्रथमां दोषदुष्टिं वा केचिदामं प्रचक्षते ॥"

अन्यच्च ।

"अपि पक्वमसंसृष्टं दुर्गन्धं बहुपिच्छिलम् ।
सदनं सर्व्वगात्राणामाम इत्यभिधीयते ॥
तेनामेन समायुक्ता दोषा दूष्याश्च तादृशाः ।
तदुद्भवा आमयाश्च सामा इति बुधैः स्मृताः ॥"

अथ सामस्य वातस्य लक्षणमाह ।

"वायुः सामो विबन्धाग्निसादस्तम्भान्त्रकूजनैः ।
वेदनाशोथनिस्तोदैः क्रमशोऽङ्गानि पीडयेत् ॥
विचरेद्युगपच्चापि गृह्णाति कुपितो भृशम् ।
स्नेहाद्यैर्वृद्धिमायाति मेघार्द्रोदये निशि ॥"

विचरेद्युगपत्सर्व्वगात्रमेककाले विचरेत । कुपितः सामो वायुः भृशमतिशयेन गृह्णाति इत्यर्थः ॥*॥ तस्यैव निरामस्य लक्षणमाह ।

"निरामो विशदो रूक्षो निर्व्विबन्धोऽल्पवेदनः ।
विपरीतगुणैः शान्तिं स्निग्धैर्याति विशेषतः ॥"*॥

अथ प्रसङ्गात् सामस्य पित्तस्य लक्षणमाह ।

पित्तं सामं भवेदम्लं दुर्गन्धं हरितं गुरु ।
अम्लोद्गारकण्ठहृद्दाहकरं स्थावरं तथा स्थिरम् ॥
अम्लीका अम्लजुगुप्सी इति लोके ॥*॥
तस्य निरामस्य लक्षणमाह ।

"निरामं पीतमात्यन्तमनुष्णं कटुकं सरम् ।
दुर्गन्धि रुचिकृद्वह्निबलवर्द्धनमीरितम् ॥"

अथ सामस्य कफस्य लक्षणमाह ।

"आविलस्तन्तुलस्त्यानः कण्ठदेशेऽवतिष्ठते ।
सामो बलासो दुर्गन्धः क्षुदुद्गारविघातकृत् ॥
स्यात् संहतः ॥

तस्य निरामस्य लक्षणमाह ।

"फेनवान् निरामो निर्गन्धः पिण्डीभूतोऽप्यनापि ।
भवेत् स पिच्छिलः पाण्डुरास्यवैरस्यनाशकृत् ॥"

अथ सामस्य ज्वरस्य लक्षणमाह ।

"आलस्यतन्द्राहृदयाविशुद्धि
दोषप्रवृत्त्याविनिवृत्ताभिः ।
गुरुत्वरसादविशुद्धिताभि
रामान्विता व्याधिमुदाहरन्ति ॥
आमं जयेल्लङ्घनपाचनाभ्या
मधुत्वपीदृशतिदूषे ।
विदग्धमाम्लं नवपाचनैश्च
सम्यग्घृतैर्दंसमुपाचरेच्च ॥

तद्धि मारुतक्षुत्तृष्णादिदोषे मुख्यानि निरामेव विधिना देव निरामस्यामिदेव लङ्घनं न कार्य्यम् । आमाशयस्थितायां लङ्घनं कार्य्यमेव । तथा गुर्व्विण्यादयस्तानि निरामावेव विहितानि । सामदोषे तत्रोऽपि लङ्घनं कार्य्यमेव । गुर्व्विणीबालवृद्धादिभिरपि निरामेषु लङ्घनं न कार्य्यम् । सामे पुनः तेऽपि लङ्घनं कार्य्यमेव । यत्रो यादृशो रोगस्तत्र । मारुते ज्वरे लङ्घनं न कार्य्यम् । ज्वरो लङ्घनेऽपि यत्र निर्दिशत्याह सुश्रुतः ।

क्षपितो मोहमायाति मोहात् प्राणान् विमुञ्चति।
अतः सर्व्वास्ववस्थासु न क्वचिद्वारि वारयेत् ॥
हारीतश्च ।
तृष्णा गरीयसी घोरा सद्यःप्राणविनाशिनी ।
तस्माद्देयं तृषार्त्ताय पानीयं प्राणधारणम् ॥
अयमत्र पेयमपि अल्पं ज्वरी किञ्चिद्वारयन् पिबेदुष्णम् आह सुश्रुत एव ।
जीवनं जीविनां जीवो जगत् सर्व्वन्तु तन्मयम् ।
अतोऽत्यन्ततया सर्व्वो न क्वचिद्वारि वारयेत् ॥
जीवनं जलम् ॥ किञ्चित्तु वारयेदेव । तथा च ।
ज्वरे नेत्रामये कोठे मन्देऽग्नावुदरे तथा ।
अरोचके प्रतिश्याये प्रसेके श्वयथौ क्षये ॥
मधौ च मधुमेहे च पानीयं मन्दमाचरेत् ॥
प्रसेके मुखप्रसेके । मन्दमाचरेत् अल्पं पिबेत् ।
यत आह ।
"अतियोगेन सलिलं तृष्यतोऽपि प्रयोजितम् ।
प्रयाति श्लेष्मपित्तत्वं ज्वरितस्य विशेषतः ॥"
तत्र नवज्वरे शीतलं न पिबेदित्याह सुश्रुतः ।
नवज्वरे प्रतिश्याये पार्श्वशूले गलग्रहे ।
सद्यः शुद्धौ तथाध्माने व्याधौ वातकफोद्भवे ॥
अरुचिग्रहणीगुल्मश्वासकासेषु विद्रधौ ।
हिक्कायां स्नेहपाने च शीतं वारि विवर्ज्जयेत् ॥"
अन्यच्च स एव ।
"शृतमानेन शीतेन ज्वरस्तोयेन वर्द्धते ।"
अत्र शीतं अपक्वमशृतं निषिद्धम् । तथा च क्वथितं पाक्यम् आयातम् । तत्र क्वथितस्य विधि-र्यथा च ।
"क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलञ्च यत् ।
तृतीयं क्वथितं ज्ञेयं दीपनं पाचनं लघु ॥
निर्म्मलं ग्रहे । क्वथितस्य विषयमाह सुश्रुतः ।
"वातश्लेष्मज्वरार्त्ताय हितमुष्णाम्बु तृष्यते ।
दीपनं स्यात् कफच्छेदि वातपित्तानुलोमनम् ॥
तद्धि मार्द्दवकृद्दोषस्रोतसां शीतमन्यथा ॥"
वाग्भटश्च ।
"तृष्णायां प्रागसुष्णाम्बु पिबेद्वातकफज्वरे ।
तत् कफं विलयं नीत्वा तृष्णामाशु निवर्त्तयेत् ॥
उदीर्य्य चाग्निं स्रोतांसि मृदूकृत्य विशो-धयेत् ।
वातपित्तकफस्वेदमलमूत्राणि वाहयेत् ॥" ॥
अथोष्णोदकस्य लक्षणं गुणाश्च ।
"क्वाथ्यमानन्तु निर्व्वेगं निष्फेनं निर्म्मलं तथा ।
अर्द्धावशिष्टं यत्तोयं तदुष्णोदकमुच्यते ॥
ज्वरकासकफश्वासवातपित्तामभेदनम् ।
बालघ्ने वस्तिशोधि च पथ्यमुष्णोदकं सदा ॥"
अथर्त्तुभेदे जलस्य पाकभेदः ।
निदाघेऽपि सलिलं शीतं शरदि शस्यते ।
हिमे तदेव शिशिरे तथा वर्षावसन्तयोः ॥"
अन्ये तु ।
"निदाघे अर्द्धमात्रोनं पादहीनन्तु शारदम् ।
शिशिरे च वसन्ते च हिमे चार्द्धावशेषितम् ॥
अष्टमांशावशेषन्तु वारि वर्षासु शस्यते ।
इति वैद्यबुधाः प्राहुर्व्वैद्याममरसत्तमाः ॥"

केचित्तु ।
"वसन्तग्रीष्म वार्षिषु पैदेव हिम मधयोः ।
एकभागावशेषन्तु पादस्तु वर्षादिषु क्रमात् ॥"
अत्र दोषाणां यथोत्तरतया क्षीणता वा तथा व्यवस्था कल्पनीया ॥
"तत् पादहीनं पित्तघ्नमर्द्धहीनन्तु वातहृत् ।
त्रिपादहीनं श्लेष्मघ्नं पथ्यमग्निप्रदं लघु ॥" ॥
त्रिपादहीनस्य नामान्तरं आरोग्याम्बु यथा ।
तस्य लक्षणं गुणाश्च ।
"पादशेषन्तु यत्तोयमारोग्याम्बु तदुच्यते ।
आरोग्याम्बु सदा पथ्यं श्वासकासकफापहम् ॥
सद्यो ज्वरहरं पाचि दीपनं पाचनं लघु ।
आमाशयाम्बुशूलार्शोगुल्मशोथोदरापहम् ॥"
अथर्त्तुभेदे जलस्य पथ्याय देशभेदः ।
"हेमन्ते शिशिरे चाम्बु सारसं वा तडागजम् ।
वसन्तग्रीष्मयोः कौपं चौण्ड्यं वा नैर्झरं हितम् ॥
नादेयं वारि नादेयं वर्षास्वीप्ययोम्बुधे ।
विषवत् पत्रपुष्पादिदुष्टं निर्झरयोगतः ॥
औद्भिदं चान्तरीक्षं वा कौपं प्रावृषि च स्मृतम् ।
शस्तं शरदि नादेयं नीरमंशूदकं परम् ॥
दिवा रविकरैर्जुष्टं शीतं शीतकरैर्निशि ॥
अंशूदकं नाम स्निग्धं दोषत्रयापहम् ।
अनभिष्यन्दि निर्दोषमान्तरीक्षजलोपमम् ॥
बल्यं रसायनं मेध्यं शीतं लघु सुधासमम् ॥"
अन्यच्च ।
"शरद्यागस्त्योदयाद्दलितं सलिलं हितम् ।
वङ्गसेनश्च ।
"कार्त्तिके मार्गशीर्षे च पयोमात्रं प्रशस्यते ॥"
अनृतुजमपि जलं विषयविशेषे शीतलं पिबे-दित्याह सुश्रुतः ।
"दाहातिसारपित्तासृङ्मूर्च्छामद्यविषार्त्तिषु ।
श्रमक्लमे पाण्डुरोगे तृष्णाच्छर्द्दिभ्रमेषु च ॥
मद्यपानात् समुद्भूते रोगे पित्तोत्थिते तथा ।
सन्निपातसमुत्थे च शृतं शीतं प्रशस्यते ॥"
क्वथितस्य जलस्य शीतलस्य विशेषे गुण-विशेषमाह सुश्रुतः ।
"शृताम्बु सलिलं शीतं यदम्भःस्वयशीतलम् ।
अरुजमनभिष्यन्दि सलिलं ज्वरनाशकम् ॥
धारापातेन विष्टम्भि दुर्ज्जरं पवनावृतम् ॥
अन्तर्भौमशीतलं पिच्छिलमेव शीतलम् ।
अथापरेऽपि विशेषाः ।
"दिवा शृतं पयो रात्रौ गुरुत्वमधिगच्छति ।
रात्रौ शृतं दिवा शीतं गुरुत्वमधिगच्छति ॥
तत् पर्युषितं वहिर्गुरुतरं विदोषकृत् ।
गुरुत्वपाकं विष्टम्भि धर्म्मरोगेषु निन्दितम् ॥
शृतशीतं पुनस्तप्तं तोयं विषसमं भवेत् ।
निर्दुष्टोऽपि तथा शीतं पुनस्तप्तो विशेषतः ॥"
रात्रौ शृतोदकस्य व्यवहारमाह ।
"अष्टमेनांशशेषेण चतुर्थेनार्द्धकेन वा ।
अथवा क्वथनेनैव सिद्धमुष्णोदकं वदेत् ॥"
तत्र गुणाः ।
"श्लेष्मादिवातरोगार्त्ते दीपनं वस्तिशोधनम् ।

श्वासकासज्वरहरं पीतमुष्णोदकं निशि ॥"
अन्यच्च ।
"भिनत्ति श्लेष्मसङ्घातं मारुतं चापकर्षति ।
अजीर्णं जरयत्याशु पीतमुष्णोदकं निशि ॥"
रात्रावुष्णोदकञ्च तस्मैव पिबेदित्याह ।
"उष्णं तदपि जननं लघ्वच्छं वह्निबोधनम् ।
पार्श्वरुक्पीनसाध्मानहिक्कानिलकफापहम् ॥
शस्तं हिक्काध्मानशूलेषु सद्यःशुद्धौ नवज्वरे ॥"
विषयविशेषे स्वाममेव जलं शीतलं पिबेदित्याह सुश्रुतः ।
"मूर्च्छापित्तोष्णदाहेषु विषे रक्ते मदात्यये ।
श्रमभ्रमपरीतेषु तमके वमथौ तथा ॥
धूमोद्गारेऽविदग्धेऽन्ने शोषे च मुखकण्ठयोः ।
ऊर्द्ध्वगे रक्तपित्ते च शीतमम्भः प्रशस्यते ॥"
शीतमम्भः आममेव न तु क्वथितम् । क्वथितञ्च शीतं दाहादिषु यदुक्तं तत् सज्वरेषु । विज्वरेषु तु दाहादिष्वामं शीतं प्रशस्यते इति भेदः ॥ ॥ आमादिजलानां जठराग्निना पाककालावधि-माह ।

"आमं जलं पाकमुपैति यामे
यत्र पुनः शीतलमर्द्धयामम् ।
अर्द्धं कदुष्णञ्च ततोऽर्द्धकालं
कालात्रयं शीतजलस्य पाके ।

पित्तमद्यविषोत्थेषु तिक्तकैः प्रतिशीतलम् ॥"
अर्द्धं हितमिति शिवः ॥ ॥ तिक्तानि कटुकानि तेभ्यो विशेषे योगमाह सुश्रुतः ।
"मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैः ।
शृतं शीतं जलं दद्यात् तृड्दाहज्वरशान्तये ॥"
इदमेव पानकम् । यत आह निबन्धे अत्र-नादि । कुष्ठकुद अधिकारा प्रथा क्वाथ्य विधिमभिप्रायादि । तद्यथा ।
"पाचनं दीपनं रुच्यं पाचनं स्वादुपाकि च ।
दोषत्रयहरं तापकाशज्वरप्रशमनादिकारि ॥"
चक्रदत्तवङ्गसेनदासाः तन्त्रान्तरे नागरं पठन्ति । तद्यथा,—
"मुस्तपर्पटकोशीरचन्दनोदीच्यनागरैरिति ।
नागरं कटुकमपि नाम पित्तघ्नं मधुरपाकि-त्वादिति तेषामभिप्रायः । नागरं नागरमुस्तं इति केचित् । क्वचिदेकदेशेन समुदायोऽपि गम्यते । यथा भीमो भीमसेन इति । शीतले तु नागरस्थाने पर्पटकम् ॥ ॥ एतस्य प्रक्रिया । पञ्चमेऽपि च कार्षिके ग्रहीया । तेन तुल्या-दिभिः षड्भिरम्बुभिः पचेत् अर्द्धं शृतं अवशेषं शीतं यदर्द्धशृतं स्वतःशीतलीकृतं दद्यात् । तथा च चक्रदत्तः ।
"यत्तु प्रवृशीतार्थं षडङ्गादि प्रयुज्यते ।
कर्षमात्रं ततो द्रव्यं साधयेत् प्रास्थिकेऽम्भसि ॥
अर्द्धावशेषम् । तत् देयम् । अह अधिः ।
प्रवशीताय प्रताह शिवदासः अर्द्धशृतम् ।
शीताय शीतलीकृताय । षडङ्गादि इत्यं प्र-ज्यते । आमत्रेव नागरं प्रयुज्यते । नागर-प्रदेशमात् कर्षमात्रं इव गृहीत षडङ्गादि

प्रास्थिकेऽम्भसि प्रथमाहे कषितौषधे पथ्ये
देयं पाचयेत्। अतएव षडङ्गमभिधाय षडङ्ग
पानीयमिति वङ्गसेनादिभिरुक्तम्। अस्मिन्
पथ्ये चन्दनं श्वेतं ग्राह्यं न तु रक्तम्। तत्
कषायलेपयोरेव प्रयोक्तुमुक्तम्। यत आह।
कषायलेपयो प्रायो युज्यते रक्तचन्दनमिति।
षडङ्गपानीयमित्यम्॥ ●॥ षडङ्गादि पाने तु
विधानेऽस्य प्रक्रिया भिन्ना तामाह चक्रः।
कर्षमात्रमिह द्रव्य पाचयेत् प्रास्थिकेऽम्भसि।
अर्द्धंशृत प्रयोक्तव्य पाने पेयादिसन्निधौ॥
आदिशब्देन यूषयवागूविलेपिभक्तानि गृह्यन्ते॥●
पानप्रक्रियां ग्रन्थान्तरेऽप्येवमेवाह।
क्षुण्णं द्रव्य पल साध्य चतुःषष्टिपले जले।
अर्द्धशिष्टन्तु तद्देयं पाने पेयादिसन्निधौ॥
पानप्रयोगाच्च षडङ्गसमरणात्। अस्मिन् पथ्ये
चन्दनं रक्त ग्राह्यम्। कषायलेपयोः प्रायो
युज्यते रक्तचन्दनमिति वचनात्॥●॥
अथ रक्तचन्दनस्य गुणाः।
तत्तु रक्त हिम स्वादु स्निग्धं ... पित्तजित्।
तिक्त नेत्रहितं वृष्यं ज्वरघ्नं विषापहम्॥
षडङ्गानि प्रयुज्यन्ते इत्यादिशब्देन वक्ष्यमाणा
योगा उच्यन्ते। ते यथा —
श्रीपर्णीचन्दनोशीरपरूषकमधूकजम्।
पान पित्तज्वर हन्यादिवाद्य सशर्करम्॥
अत्र श्रीपर्णीपरूषकयोः फले ग्राह्ये। मधूकस्य
तु पुष्पम्। अन्यच्च।
हन्यात् यष्टीमधुकं तथैवोत्पलपूर्वकम्।
पानं शृतं हिमं किंवा लोधपद्मकरायुतम्।
हन्यात् पित्तज्वरमिति शेषः। उत्पलमनु-
कमलमित्यादि॥
स्नानञ्च न कुर्वीत यतोऽधी लाङ्घनावह।
शीतवर्षेषु कालेषु दिवास्वापो निषिध्यते॥
उपिता हि दिवास्वापो नित्य तेषां शरीरिणाम्।
वातादयः प्रकुप्यन्ति येषामस्वपतां दिवा॥●॥
येषां दिवास्वप्न उचितस्तानाह।
व्यायामप्रमदाध्ववाहनरतान् क्लान्तानती-
सारिणः
शूलश्वासवतस्तृषापरिगतान् हिक्कामरुत्पीडि-
तान्।
क्षीणान् क्षीणकफान् शिशून् मदहतान् वृद्धान्
रसाजीर्णिनो
रात्रौ जागरितान् नरान् निरशनान् काम
दिवा स्वापयेत्॥●॥
अथ वातिकादिज्वराणां पाकावधिमाह।
वातिके सप्तरात्रेण दशरात्रेण पैत्तिकः।
श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि॥●
इमस्याभिप्रायमधिकृत्याप्ति ज्वरविकाराः।
यत आह सुश्रुतः।
मद्यप्रियस्य सन्नापे सप्तरात्रात् परं ज्वरे।
मन्दज्वरस्याप्यथवा दोषो न पच्यते॥
तस्य नं तुरसैरत्यथ्यावारोपलम्भादभवे।
कषायं पाचनं दद्यादिवप्रदो ज्वराते लघुपाचनैः॥●॥

ज्वरस्य तावत्प्रथमावस्थाया औषधैरपि।
आधप्रतापाथनत ज्वरमाहुर्मनीषिणः।
द्वादशाहमभिप्राप्य सत्य जीर्णं ततः परम्॥
आषप्रतापान्तिति। अत्राह सम्यग्ज्ञानाम्।
रात्रिशब्दो दिवसस्योपलक्षकः। तेन सप्तम-
दिवसादर्वाक् ज्वरस्य तरुणत्वं। तथा चोक्तं
तन्त्रान्तरे।
ज्वरे त्रिगते जीर्णे वदन्ति बुधैरिति।
दशरात्रात परं जीर्णमाहुरन्ये मनीषिणः।
अतएव चातुर्क। ... दशदिवस इति।
अथ ज्वरे भेषजप्रयोगसमयः।
वातिके सप्तरात्रे तु दशरात्रेण पैत्तिके।
श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजम्॥
सप्तरात्रे इत्यत्र रात्रिशब्दो दिवसस्योपलक्षकः।
अतएवोक्तम्।
मासमध्यगत सासमौषध सप्तमे दिने।
प्रलेपनाय वा दृष्ट्वा निरामं तदुपाचरेदिति॥
शार्ङ्गधरेणाप्युक्तम्।
गुडूचीपिप्पलीमुस्तनागरैः पाचनं शृतम्।
वातज्वरे तथा पेयं कालिङ्गं सप्तमेऽहनीति॥
हारीतेनाप्युक्तम्।
एतां क्रियां प्रयुञ्जीत वृष्ट्यर्थं सप्तमेऽहनि।
पिबेन्न कषायप्रयोगात् पेयां ज्वरविनाशिनीम्॥
एतां क्रियां लङ्घनादिरूपाम्। कषायप्रयोगात
कषायेण बाधिता पेयामित्यर्थः। खरनादेना-
प्युक्तम्।
इति षडात्रिक प्रोक्तो नवज्वरहरो विधिः।
ततः परं पाचनीयं शमनीयं ज्वरे हितम्॥
ततः परं सप्तमेऽहनीत्यर्थः। वाग्भटश्च।
सप्ताहादौषधं केचिदाहुरन्ये दशाहतः।
लघ्वन्नं भोजितं केचिद्देयमामोल्बणे न तु॥
सप्ताहात सप्ताहादारभ्येत्यर्थः। अत्र काय-
लोपं मतौ ति पञ्चमी। अतएव सुश्रुतः।
दशरात्रात् परं सर्पिर्दद्यात्समितिं निश्चितम्।
अतएव दशरात्रेण द्वादशाहेनेति लङ्घयता
सहैतेनैक्य। अत्र चरकोऽप्याह।
ज्वरित षडहेऽतीते लघ्वन्न प्रतिभोजितम्।
पाचन शमनीयं वा कषाय पाययेत् तम्॥
अन्यायमर्थः। ज्वरितं षडहे लङ्घनेन अतीते
सप्तमेऽहनि भोजितलघ्वन्नं अष्टमे दिने कषायं
पाययेदित्यर्थः। तथा च सुश्रुतः।
सप्तरात्रात् परं केचिन्मन्यन्ते देयमौषधम्।
दशरात्रात् परं केचित् दातव्यमिति। दीपि
चरकादय। चक्रस्तोऽपि।
सप्तरात्रेण पच्यन्ते त्वधातुगता मलाः।
निरामस्तु मलः प्रोक्तो ज्वरः प्रायोऽष्टमे दिने॥
एव सति कषायपाने सप्तमादयोऽन्यवयो
नियमः॥●॥ यथापि प्रयोक्तारमिष्टाचारैरिह
कालोऽपि न कुर्यात् भेषजमथवा दोषपाकं दृष्ट्वा
इत्यादिवाक्यं सुश्रुतः।
"दोषे वा ज्वरे इत्यनवकालसङ्गतौ।
अचिरज्वरितस्यापि भैषज्यं दोषपाकतः॥" इति।

अन्यायमर्थः। अनवकालसङ्गतौ पैत्तिके ज्वरे
दोषपाकं दृष्ट्वा भैषज्यं देयम्। न तु तत्र दश-
रात्रापेक्षा। तथा अचिरज्वरितस्यापि पैत्तिके-
तरज्वरयुक्तस्यापि दोषपाकं दृष्ट्वा भैषज्यं
देयमित्यर्थः॥●॥ दोषपाकलक्षणमाह सुश्रुतः।
लघुत्वे ज्वरे लघौ दृष्टे प्रवृत्तेषु मलेषु च।
अत्र पेत्र विज्ञानीयाज्ज्वरे देयं तदौषधमिति॥
ज्वरे लघौ लघ्वीभूते। मलेषु वातपित्तश्च
कफपुरीषेषु। प्रवृत्तेषु स्वमार्गमवाप्तिषु। पक्व
निरामम्। लौममर्तिदौर्बल्यादस्कैर्पा पक्वत्व
मम। दोषाणां दृष्टवातपित्तकफानां प्रवृत्ति
ज्वरस्य तदुपद्रवाणां शोषादनम्। तत्रा
पैत्तस्य वैपरीत्यं तस्मात् दोषपाकप्राप एदेव
मति।
क्षुत्क्षामता लघुत्वञ्च गात्राणां ज्वरमार्दवम्
दोषप्रवृत्तिरुत्साहो निरामज्वरलक्षणम्॥
दोषप्रवृत्ति दोषाणां स्वमार्गप्रचार। माधव
निदाने उत्साहस्थाने अष्टाह इति पाठः॥●॥
भेष पञ्चविध कान्ते भैषज्यपञ्चशुक्तम्।
यथायुक्ते प्रभावं स्यात् कषायेषु विधीयते॥
सुश्रुतमतानुसारी नियमस्य च ज्वरे।
तोयपेयादिभिस्ताईरिदपि तत्र भेषजम्।
सुखभेषज कायं तस्य पञ्चम्या पानम्।
यत आह।
न कषायं प्रयुञ्जीत नराणां तरुणे ज्वरे।
कषायेणाकुलीभूता दोषा यान्ति सुदुस्तराः॥
आकुलीभूता प्रवृद्धा स्वमार्गं परित्यज्य
यतस्ततो गता। अथ कषायशब्देन काथा
गृह्यते॥●॥ उक्तश्च काथस्य पर्यायाः।
शृत काथ कषायश्च निर्यूह स निगद्यते।
तोयपेयादिभिस्ताईरित्यर्थेन तत्र भेषजमिति॥
तत्र तरुणे ज्वरे भेषज सुखभेषज काथरूपम्।
तोयपेयादिभिस्ताईरिदर्थेयम्। यत आह।
न तु कल्पमुद्दिश्य कषाय प्रतिषिद्धत इति।
सत्यं तोयपेयादिकाम्यादिकम्॥●॥ यद्।
स्वरसश्च तथा कल्कः काथश्च हिमफाण्टकौ।
पञ्चैताः कषायाः स्युरेते यथापूर्व लघुयोजिताः॥
इति वचनात् स्वरसादयोऽपि कषाय न विधिस्ते।
तत्र।
यः कषायः कषाय स्यात् स वर्ज्यस्तरुणे ज्वरे।
इति।
यः कषायः कषाय स्यात् चतुर्थभागावशेष-
कारीण अष्टमभागावशेषकरणेन वा कषाय
मन कषायरस्य स्यात्। न स काथ। स
तरुणज्वरे निषिद्ध॥●॥ काथमात्रस्य अत्र
याक्षा लक्षणमाह।
पाचित कषायः स्यादयं षोडशगुणाम्भसा।
अपितो... षडङ्गादि च 'पचिता' नवज्वरे॥
अन्यायमर्थः। यः काथः षोडशगुणेन
अम्भसा क्वथितः पञ्च अथ च पाचित चतुर्थ
भागावशेष स कषायः स्यात्। तथा षड
ङ्गादिकमिह नवज्वरे न निषिद्ध। अतः कादकं

पाकाद्योत्क्लेशाभावेन कषायत्वाभावात् ॥ ७ ॥
तरुणज्वरे कषायस्य दोषमाह ।
“दोषा बद्धा कषायेण स्तम्भितास्तरुणे ज्वरे ।
स्तम्भन्ते न विपच्यन्ते कुर्व्वन्ति विषमज्वरम् ॥
कषायेण स्तम्भिताः सन्तःपाके निवारिताः ।
यत आह कषायस्य गुणान् ।
कषायः स्तम्भनः शीतो रूक्षः पित्तकफापहः ।
इत्यादि ।
स्तम्भन्ते अवधानं कुर्व्वन्ति । न विपच्यन्ते सुखेन न विपच्यन्ते दुःखेन क्लेशात् विलम्बेन विपच्यन्ते इति यावत् ॥ अन्यच्च ।
“न च्यवन्ते न पच्यन्ते कषायैः स्तम्भिता मलाः ।
तिर्य्यग्विमार्गगा याति घोरं कुर्य्युर्नवज्वरम् ॥ ० ॥
अनुपस्थितदोषाणां वमनं तरुणे ज्वरे ।
हृद्रोगं श्वासमानाहमोहञ्च कुरुते भृशम् ॥”
अस्यायमर्थः । कफादिदोषोपस्थितौ स्वयमेव चेद्वमति वमनं न तद्दोषाय । अनुपस्थितदोषाणान्तु तरुणे ज्वरे वमनं यत्नतः कृतो- गादीन् करोतीत्यर्थः । एतेन वचनेन तरुणे ज्वरे बलात् वमनं निषिद्धम् ॥ ० ॥
अवस्थाविशेषे तदपि कर्त्तव्यमित्याह ।
“सद्यो भुक्तस्य वा जाते ज्वरे सन्तर्पणोत्थिते ।
वमनं वमनार्हस्य शस्तमित्याह वाग्भटः ॥”
वमनं वेति विकल्पो लङ्घनापेक्षया वमनार्हस्ये- त्यनेन गर्भिण्यतिस्थूलातिवृद्धादिनिरासः । वाग भटोऽत्र वृद्धवाग्भटः ॥
“वमितं लङ्घयेत् प्राज्ञो लङ्घितं न तु वामयेत् ।
वमनं श्लेष्मवाहुल्याद्व्याप्तहृतकफितम् ।
न कार्य्यं गुर्व्विणीबालवृद्धदुर्ब्बलभीरुभिः ॥”
वमनमिति शेषः । अनेन वचनेन गुर्व्विण्या- दीनामप्रवमनविधानं ज्वरे सामे पाचनं निरामे शमनं पथ्यासमन्वितं च दद्यात् ॥ ० ॥
पाचनशमनयोर्लक्षणमाह ।
“यत् पचत्याममाहारं पचेदामरसञ्च यत् ।
तदप्रकाशात् पचेद्दोषांस्तद्धि पाचनमुच्यते ॥
न शोधयति यद्दोषान् समानोदीरयत्यपि ।
समीकरोति वद्धांस्तत् संशमनमुच्यते ॥”
न शोधयति नोर्द्धाधोमार्गाभ्यां पातयति, नोदीरयति न वर्द्धयति ॥ ० ॥ तयोः संप्रदान कालमाह ।
“पाचयेदातुरं सामं पाचनं सप्तमे दिने ।
शमनेनाथवा दृष्ट्वा निरामं समुपाचरेत् ॥
तस्मादामे प्रदेयन्तु पाचनं दिवसत्रयम् ।
शमनीयं प्रदेयन्तु पञ्चरात्रं ततः परम् ॥
शोधनं शोधनार्हेभ्य एकरात्रं प्रदापयेत् ॥”
इत्यभिधानात् ॥ अन्यच्च ।
“सप्ताहेनापि नोचेत् शमनीयैरुपाचरेत् ॥”
तत्र ।
‘आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधापयन् ।
सन्तापमावहेद्देहे ज्वरः सामस्ततः स्मृतः ।
क्षुत्क्षामो-लघुदेहश्च स्रस्ता सततमाद्रः ज्वरः ।
आमक्लिन्नः पित्तादि च दद्यात्तत्र भेषजम् ॥

भेषजं ह्यामदोषस्य भूयो जनयति ज्वरम् ॥”
भूयो बाहुल्येन । अन्यच्च ।
“पाचयेद्दोषतरस्य मोहादामज्वरे तु यः ।
स सुप्तं व्यालमपन्तु कराग्रेण परामृशेत् ॥”
इति वचनादामज्वरे भेषजनिषेधात् कथं सामे ज्वरे पाचनं दत्तम् । उच्यते निरुपद्रवे सामे ज्वरे पाचनं देयम् । सोपद्रवे तु सामे भेषजं निषिद्धम् । तथा च वाग्भटः ।
“सप्ताहात् परतोऽदुष्टे सामे स्यात् पाचनं ज्वरे ।
निरामे शमनं स्तब्धे सामे नौषधमाचरेत् ॥”
अदुष्टे निरुपद्रवे । स्तब्धे सोपद्रवे ॥ ० ॥ अथ सामान्यज्वरे पाचनं कषायमाह सुश्रुतः ।
“नागरं देवकाष्ठञ्च धान्यकं वृहतीद्वयम् ।
दद्यात् पाचनकं पूर्व्वं ज्वरितेभ्यो ज्वरापहम् ॥
धान्यकं धान्यम् । रामाभावाद्गौरं दद्यात् । वृहतीद्वयं वृहत्फला स्वल्पफला वृहती । क्षुद्रा वृहती चेति । कण्टकारीद्वयं वा दद्यात् ॥ कण्टकारीद्वयं शुण्ठी धान्यकं सुरदारु चेति शार्ङ्गधरेणोक्तत्वात् । नागरादिकाथः सर्व्व- ज्वरेषु ॥ ० ॥ अथ सामान्यतः संशमनीयान्याह सुश्रुतः ।
“अथ संशमनीयानि कषायाणि निबोध मे ।
सर्व्वज्वरेषु देयानि यानि वैद्येन जानता ॥
ह्रीवेरबिल्ववर्षाभूपयः शीरकमेव च ।
पचेत् क्षीरावशेषं तत् पेयं सर्व्वज्वरापहम् ॥
ह्रीवेरः श्वेतपुनर्नवा । वर्षाभू रक्तपुनर्नवा । तथाच मदनपालः ।
“पुनर्नवः श्वेतमूलो ह्रीवेरो दीर्घपत्रकः ।
पुनर्नवा परा रक्ता वर्षाभू रक्तपुष्पकः ॥”
भावप्रकारमाह ।
“क्षीरमष्टगुणं दद्यात् क्षीरात्तोयं चतुर्गुणम् ।
क्षीरावशेषं पातव्यं क्षीरपाके त्वयं विधिः ॥”
दद्यात् तत्परिमितात् ॥ अन्यच्च ।
“द्राक्षादिगुडुचीरं त्रिफलापालयैव च ।
तत् क्षीरशेषं क्वथितं पेयं सर्व्वज्वरापहम् ॥
गुडूचीधान्यकारिष्टं पद्मकं रक्तचन्दनम् ।
एषां काथः सुप्रसिद्धः सर्व्वज्वरहरः स्मृतः ॥
दीपनो दाहहृल्लासतृष्णाच्छर्द्यरुचीर्हरेत् ॥”
गुडूच्यादिकाथः ॥ ० ॥ संशोधनं तरुणज्वरिणो निषिद्धं तदाह सुश्रुतः ।
“छर्द्दि मूर्च्छा मन्दमोहं भ्रमहृद्विषमज्वरान् ।
तरुणज्वरे पानेन प्राप्नोति तरुणज्वरी ॥”
संशोधनस्य लक्षणमाह ।
“स्थानाद्बहिर्नयेदूर्द्ध्वमधो वा दोषसञ्चयम् ।
संशोधनं तदेव स्याद्देवदालीफलं यथा ॥”
निषिद्धमपि संशोधनमवस्थाविशेषे देयं यत आह ।
“दोषे शोधनकाले तु च विदाहो विदुष्यतः ।
न शमीत् भिषक् कुर्य्याद्दोषप्रयाणं भवेत् ॥”
शार्ङ्गधरमतात् रोगनाशाय ।
“अष्टौ ज्वरे विरेकार्हाः मन्दाग्निमान् तथा ।
दाहरोगे च हृद्रोगे सार्द्रे चार्द्रे च मलबद्धे ।

जीर्णज्वरे गरच्छर्द्दिगुल्मशोषोदरेषु च ।
शूले शोथे गलग्रहे कृमिरोगे विरेचयेत् ॥”
दोषदुर्ब्बलं दाहिदर्पयेत्तद्दुर्ब्बलं न तु उप वासान्निश्चयम् । अतएव समीरयति । अन्यच्च ।
“चले दोषे मृदौ कोष्ठे नैवेतान् बलं तुल्याम् ।
अवस्थापत् दुर्ब्बलस्यापि शोधनं हि तदा भवेत् ॥’
कुतो यस्य नाभिचलीयमित्याशङ्कायामाह ।
सदा सम्यामवस्थायां शोधनं दुर्ब्बलस्यापि दोष दुर्ब्बलस्यापि अवस्थापत् भवेत् । यद्गौरिवाधि- हत् न भवतीत्यर्थः ॥ ० ॥ बलवतः पुरुषस्य पक्वस्य दोषस्य स्वस्थानस्थितस्य शोधनाविधाने दोषमाह सुश्रुतः ।
“पक्वोऽप्यनिर्हृतो दोषो देहे तिष्ठन्महात्ययम् ।
विषमं वा ज्वरं कुर्य्याद्बलव्यापादमेव च ॥”
पक्वः लङ्घनतिक्ताम्बुपानपेयादिभिः । अनि हृतः अधोमार्गेणानुत्सृष्टः । महात्ययं विषम ज्वरं चातुर्थकम् । तस्यैव महाव्ययत्वादिति गदाधरः ॥ गम्भीरमिति कार्त्तिकः ॥ महा- व्ययं महाकष्टं वा । बलव्यापादं बलक्षयम् ॥ ७ ॥
संशोधनमाह ।
“आरग्वधग्रन्थिकमुस्ततिक्ता-
हरीतकीभिः क्वथितः कषायः ।
सामे सशूले कफवातपित्त-
ज्वरे हितो रेचनपाचनश्च ॥”
आरग्वधः धनबहेरा ॥ अन्यच्च ।
“पथ्यारग्वधतिक्ताभिर्निम्बामलकैः कृतं तोयम् ।
पाचनसारकयुक्तं हितमिच्छद्भिर्ज्वरे सामे ॥”
इति आरोग्यपञ्चकद्वयम् ॥ ० ॥
“अनन्ता बालकं मुस्तं नागरं कटुरोहिणीम् ।
पिष्ट्वा सुखाम्बुना सद्य पाययेत्त्वरितं ततः ॥
सद्यः सप्तेन कालेन ज्वरात् सर्व्वज्वरामयम् ।
विम्बात् कोष्ठसंशुद्धिं शीघ्रमेव कुलामयम् ॥’
अनन्ता सारिवा । इति सारिवादिकल्कः ॥ ७ ॥
संशोधन संशमनश्च येषां निषिद्धं तानाह ।
“पीताम्बुलङ्घनपीतो चोर्द्धौ भुक्तः पिपासितः ।
न पिबेन्नौषधं यस्तु संशोधनमयं परम् ॥”
पीताम्बु पीतजलकाम्बु । भुक्तः भुक्तवानित्यर्थ अनाश्रवणितादित्वात् कर्त्तरि तप्रत्ययः । इतरत् संशमनम् ॥ ० ॥
“त्रिफला रक्तचीरुम्म कण्टकारीद्वयं शटी ।
त्रिकटु ग्रन्थिकं रास्ना गुडूची धन्वयासकः ॥
कटुका पर्पटी दार्व्वी त्रायमाणा च वालुकम् ।
निम्बं पुष्करमूलञ्च मधुयष्टी च वत्सकः ॥
यवानीन्द्रयवो भार्गी शिग्रुबीजं सुराह्वया ।
वचा त्वक् पद्मकोशीरचन्दनातिविषा बला ॥
शालपर्णी पृश्निपर्णी विडङ्गं तगरं तथा ।
चित्रकं देवदारुञ्च चव्यं पत्रं पटोलकम् ॥
जीवकर्षभकौ चैव लवङ्गं वंशलोचनम् ।
पुण्डरीकञ्च काकोली पत्रकं जातिपत्रकम् ॥
तालीशपत्रमेतानि समभागानि चूर्णयेत् ।
अर्द्धांशं सर्व्वचूर्णस्य किराततिक्तं प्रयोजयेत् ॥
एतत् सुदर्शनं नाम चूर्णं दोषत्रयापहम् ।

ज्वरांश्च निखिलान् हन्यामात्र कार्य्या विचारणा।
पृथग्हन्दागमुक्तोश्च पातुमुद्यात् विषमोत्थया।
सन्निपाताद्भवांश्चापि मानसानपि नाशयेत्।
शीतादीनपि दाहान्तेन् मोहं तन्द्रीं श्रमं तृषाम्।
कासं श्वासञ्च भान्तुञ्च प्रदोर्गं कामलामपि।
त्रिकपृष्ठकटीजानुपार्श्वशूलञ्च नाशयेत्।
शीताम्बुना पिबेदेतत् सर्व्वज्वरनिवृत्तये।
सुदर्शनं यथा चक्रं दानवानां विनाशनम्।
तद्वज्ज्वराणां सर्व्वेषां चूर्णमेतत् प्रणाशनम्॥”
पुष्करमूलाभावे कुष्ठमपि दद्यात्। भार्ग्यभावे कण्टकारीमूलम्। मौरामाभावे त्रुटिकां दद्यात्। लवङ्गाभावे कुष्ठ देयम्। जीवकर्षभकयोरलाभे विदारीकन्दस्य भागद्वयं दद्यात्। पुण्डरीकं श्वेतकमलम्। काकोल्यभावे अश्वगन्धामूलं दद्यात्। तालीशपत्रकाभावे स्वर्णे ताली भवेत्सि। इति। अथवा कण्टकारीलता देया। इति सुदर्शनचूर्णम्। *।

‘घटी विश्वाह्वय शुण्ठी दारु पुष्करमूलकम्।
यला गुडूची कटुका पर्पटश्च यवासकः।
भार्गी किरातक्तिक्तश्च दशमूलं तथैव च।
क्वाथमेषां पिबेत् हन्याद्विष्णुपूर्व्वं नरः।
ज्वरान् सर्व्वान् हन्ति नात्र कार्य्या
विचारणा॥”

अष्टभूतमञ्जनमेतत्। *।
‘हरीतकीविश्वहस्तदारुकाथो पृथग्भवेत्।
पलाह्वय कथा शुण्ठी गुडूची मोचरो वटी।
मध्वदम्भो विश्वञ्च प्रत्येक मलसम्मितम्।
मधुना वटिकां कृत्वा खादेत् ज्वरमपोहति।
कार्य्यं श्वासं मन्दताञ्च वह्निमान्द्यं नियच्छति।
लाक्षा हरिद्रा अथवा मञ्जिष्ठा
सचन्दनं लोहितचन्दनञ्च।
सकर्पकं वारि मुरा समुस्ता
प्रत्येकमेतानि पलोन्मितानि।
किरातक्तिक्तत्रिकटुतापसिक्त-
ष्टताश्वगन्धापर्पटकण्टकार्य्यः।
त्रिवृद्विषाचामलकानि वाला-
दशाभिपाठावचलिम्बसारा।
एतानि द्रव्याणि पृथक् पलार्द्ध-
मानानि सर्व्वाणि च भेषजानि।
कल्काकृतीनां विदधीत मध्ये
दुग्धेन वै चार्द्धतुलामितेन।
तैलं तिलानाञ्च तुलाप्रमाणं
तेनैव कल्केन घृतं पचेत्तु।
प्रयाति ज्वरान् तैलमिदं समस्तान्
कुर्य्यादथो दीप्तिमतोऽपि पुष्टिम्।
निमद्नादाशु परिश्रमं श्रमं
धर्म्मं भवेत् सच्चयं जुति तथो।
तथा च भामज्वरसङ्ग्रहकारणपि
प्रहरेण मिलां सप्तमाज्जयेत् सुखम्॥”
अथवा मञ्जिष्ठा। वारि वाला। दशा दार्व्वी।
इति लाक्षादितैलम्। *।
‘लाक्षारसद्वयं तैलं तैलाच्चाष्टचतुर्गुणम्।

अश्वगन्धानिशादारुकौशीकुष्ठाब्दचन्दनैः।
समूर्व्वारोहिणीरास्नाशताह्वामधुकैः समैः।
सिद्धं लाक्षादिकं नाम तैलमभ्यङ्गकारिणा।
सर्व्वज्वरक्षयोन्मादश्वासापस्मारवातहृत्।
यक्षराक्षसभूतघ्नं गर्भिणीनाञ्च शस्यते॥”
मस्तु दधिजलम्। कौशी रेणुका। चन्दनमत्र श्वेतमेव न तु रक्तम्। रोहिणी कटुकी। इति च लाक्षादितैलम्। *।
“लाक्षा हरिद्रा मञ्जिष्ठा मिशिलं मधुकं वचा।
लामज्जकं चन्दनञ्च चम्पकं शीतमुत्पलम्।
प्रत्येकमेषां यत्कूटी पक्त्वा तोये चतुर्गुणे।
चतुर्भागावशेषे तु तस्मिं श्चैतत् समापयेत्।
रेणुका पद्मकञ्चैव वालकञ्च तथैव च।
मेथि चोरक कुष्ठ देवदारु मधु लचम्।
शतपुष्पा पुण्डरीकं मांसी मधुकमेव च।
दधिसम्मिते कल्के कषायेणैव पेषिते।
मस्तुशुक्तारनालानामाढकाढकमावपेत्।
चौराढकसमायुक्तं तैलमस्य विपाचयेत्।
अभ्यङ्गात्तैलमेतद्धि शीघ्र दाहमपोहति।
अपोहति तथा वातं पित्तं श्लेष्मभवं ज्वरम्।
सप्तधातुं समस्तञ्च तापशोषसमान्वितम्।
पक्षोपहता ये बाला रक्तपदूषिताश्च ये।
तेषां सर्व्वं प्रशमयेत्तैलं लाक्षादिकं महत्॥”
मेशिलं मदनम्। लामज्जकमुशीरमन् मौलवत्वपि द्रव्यविशेषः।
लामज्जकं यदा न स्यादुशीरं दीयते तदा।
चम्पकमिद्यस्य स्थाने कुत्रापि गैरिक इति पाठः।
नीलोत्पलस्यालाभे तु कुमुदं देयमिष्यते।
समापयेत् प्रक्षिपेदित्यर्थः। चोरकं ग्रन्थिपर्णस्य भेद गठिउन इति नेपालदेशे भवति। तदलाभे ग्रन्थिपर्णं देयम्। पुण्डरीकं श्वेतकमलम्। मस्तु दधिजलम्। शुक्तं सन्धानभेदः। आरनालमपि सन्धानभेदः। इति महालाक्षादितैलम्। *। अथ नवज्वरे रसाः।
“मृतो गन्धरसश्च शौनश्च
सर्व्वैस्तुल्या शर्करा मर्द्दयित्वा।
भूयो भूयो मर्द्दयेत् त्रिराव
मज्जो देयः प्रस्वेदकश्च।
तापे शीतं शीतमेवाग्रभक्तं
कृष्णाकाद्यं पथ्यमेतत् प्रदिष्टम्।
अग्नौ चोयं हन्ति नवीं ज्वरन्तु
पित्ताधिक्ये मर्द्दितं तोयञ्च दद्यात्॥”
अस्य प्रक्रिया। पारदशुद्ध भाग १ गन्धकशुद्ध भाग १ मोहागाभस्म भाग १ मरिच भाग १ शर्करा भाग ४ शङ्खनाभकलिक भाग १। सर्व्वं प्रतिदिनं सम्यं दिनत्रयं मर्द्दयेत्। रक्तिमित रक्तित्रयमितमात्रकरसेन दद्यात्। सौन्तं तक्र कृष्णाकचल मौषु दद्यात्। श्वशनादि शीतलमुपचारं कुर्य्यात्। उदकमङ्गरीरमो नवज्वरे। *। रसरत्नदीपे।
“मृतात् सर्व्वं समभागकेन
विश्वभूत्य परिरक्ष नामम्।
नवज्वरे महामृतं विषम-
मार्द्दोभ्यमाम ज्वरधूमकेतुः॥”
प्रक्रिया। पारदशुद्धगन्धकशुद्धहिङ्गुलशुद्धवत्स विषयमानं सर्व्वं सममेकमार्द्रकरसेन सम्मर्द्य रक्तिकाष्टकमितमात्रकरसेन दिनत्रयं नवज्वरे भक्षयेत्। दिनत्रयात् नवज्वरो नश्येत्। इति ज्वरधूमकेतुः। *। रसेन्द्रचिन्तामणौ।
“शुद्धः सूतो विषं गन्धः प्रत्येकं शाणसम्मितः।
धूर्त्तबीज त्रिभागञ्च सर्व्वेभ्यो द्विगुणा
भवेत्।
हेमाह्वा कारयेदेषां चूर्णं खल्वं प्रयत्नतः।
जम्बीरजीरकैर्द्देयचूर्णं गुञ्जाद्वयोन्मितम्।
आर्द्रकस्य रसेनापि ज्वरं हन्ति त्रिदोषजम्।
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम्।
विषमञ्च ज्वरं हन्यादसंशं शीतञ्च सर्व्वथा।
महाज्वराङ्कुशो नाम्ना रसोऽयं सर्व्वसम्मतः॥”
प्रक्रिया। शुद्धपारा शुद्धगन्धक शुद्धविष प्रत्येकं टङ्क १ धुस्तूरबीज टङ्क ६ चोकटङ्क १२ सर्व्वेषां चूर्णमतिसूक्ष्मं कार्य्यम्। इति महाज्वराङ्कुशः। *। सर्व्वज्वरेषु शार्ङ्गधरे।
“एको भागो रसात् शुद्धाच्चैकश्च पिप्पली द्विधा।
आखारकरभो गन्धः कटुतैलेन शोधितः।
धमाहि पीत्वाचस्याश्चतुर्भागमिता अमी।
एकत्र मर्द्दयेच्चूर्णमिन्द्रवारुणिकारसैः।
माषोन्मिता वटी कृत्वा दद्यात् सर्व्वज्वरे बुधः।
हिमाद्रिधानुपानेन ज्वरघ्नी वटिका मता॥”
शेकेय इक इति लोके। द्विशाच हरीतकी। आखारकरभ आकरकरा इति लोके। चतुर्भागमिता अमी शेषपादयः षट् चतुष्पिता भागचतुष्टयमिता। इति ज्वरघ्नीवटिका। *। शार्ङ्गधरे।
“रस गन्धश्च दरदं जैपाल क्रमवर्द्धितम्।
दन्तीरसेन संमिश्र्य वटी गुञ्जामिता कृता।
प्रयाति विलयं शाङ्गलिका शीतशारिका।
एकेन दिवसेनैव नवज्वरहरी भवेत्॥”
इति च ज्वरघ्नीवटिका। *। रसरत्नप्रदीपे।
“रसो गन्धो विषं शुण्ठी पिप्पली मरिचानि च।
मस्ता विभीतकं धात्री दन्तीबीजञ्च शोधितम्।
चूर्णमेषां समांशानां मोदयुष्योरसैः पुटेत्।
वटी माषसमा कुर्य्यात् भक्षयेन्नूतने ज्वरे॥”
इति नवज्वरेभहरीवटी। इति नवज्वरे रसाः। *।
अथ सामान्यज्वरे रसाः।
“शुद्धं सूतं विषं गन्धं धूर्त्तबीजं त्रिभिः समम्।
चतुर्णां द्विगुणं व्योषं चूर्णं गुञ्जाद्वयोन्मितम्।
आर्द्रकस्य रसे क्षिपेत् जम्बीरस्य रसेन वा।
महाज्वराङ्कुशो नाम्ना सर्व्वज्वरविनाशनः।
ऐकाहिकं द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम्।
विषमं वा त्रिदोषञ्च ज्वरं हन्ति न संशयः॥”
प्रक्रिया। शुद्धपारा टङ्क १ शुद्धविष टङ्क १ शुद्धगन्धक टङ्क १ धुस्तूरबीज टङ्क ३ शुण्ठी टङ्क ४ पिप्पली टङ्क ४ मरिच टङ्क ४। सर्व्वेषां चूर्णमेकत्र कार्य्यम्। इति महाज्वराङ्कुशः। *।

सर्व्वज्वरेषु सर्व्वरोगनाशेषु ।
"सूतं गन्धं विषञ्चैव टङ्कणञ्च मनःशिला ।
एतानि टङ्कमात्राणि मरिचं खरटङ्ककम् ॥
कटुत्रयं टङ्कषट्कं खल्ले पिष्ट्वा विचूर्णयेत् ।
रसः श्वासकुठारोऽयं श्वाससर्व्वज्वरापहः ॥"
इति श्वासकुठारो रसः ॥ ० ॥
अपि सर्व्वज्वरे रसरत्नाकरे ।
"दारुमध्यां शिखिग्रीवां रसकञ्च पृथक् पृथक् ।
टङ्कत्रयानुमानेन गृहीत्वा कनकद्रवैः ॥
मर्द्दयेत्त्रिदिनं कार्य्या वटी चणकमात्रया ।
मरिचैरेकविंशत्या सम्भिस्तृणचीदलैः ॥
खादेद्वटीद्वयं पथ्यं दुग्धभक्तं सशर्करम् ।
तद्वत् विषमं जीर्णं हन्यात् सर्व्वज्वरं ध्रुवम् ॥"
दारुमध्या दारुमत्स्ी । शिखिग्रीवा तुत्थिया । रसकं खपरिया । प्रत्येकं टङ्क ३ धुस्तूरपत्त्ररसेन मर्द्दयेत् । इति ज्वराङ्कुशः ॥ ० ॥
सर्व्वज्वरेषु ।
"नागरं कर्षमात्रं स्यात् कर्षमानञ्च टङ्कणम् ।
मरिचं चार्द्धकर्षं स्यात् तावन्मात्रं वराटकम् ॥
विषं कर्षचतुर्थांशं सर्व्वमेकत्र चूर्णयेत् ।
रसो हुताशनो नाम्ना खादो गुञ्जामितो ज्वरे ॥"
इति हुताशनो रसो ज्वरे ॥ ० ॥
"शुद्धनेपालटङ्कञ्च कर्कोटङ्कद्वयोन्मितम् ।
गैरिकं टङ्कमेकञ्च कन्यानीरेण मर्द्दयेत् ॥
कलायसदृशी कार्य्या वटिका ताञ्च भक्षयेत् ।
शीतलेन जलेनैषा वटी शीतज्वरापहा ॥"
इति ज्वरशीवटी ॥

"द्विभागतालेन हतञ्च ताम्रं
रसञ्च गन्धञ्च समीनभागम् ।
विषं समञ्च द्विगुणञ्च ताम्रं
विमर्द्दयेच्च द्विवाकराग्नौ ॥
विमर्द्दयित्वा रसेन चूर्णं
गुञ्जैकमात्रं सितया समेतम् ।
ज्वराङ्कुशोऽयं रविसुन्दराख्यो
ज्वरापहन्ताऽविशान समस्तान् ॥"

अस्य प्रक्रिया । पारा टङ्क १ गन्धक टङ्क १ विष-टङ्क १ द्विगुणतालकहततान्त्रटङ्क ४ तीक्ष्णमृत्यक पित्त १ सब एकत्र करि नवनूप्य खोर मिलि सब नीचिके पातको मरवकभावना २१ यामे मध्य देवर माला रतो एक अनुपान चेत मकरा रती ४ खाद । इति सर्व्वज्वरे रवि सुन्दरो रसः ॥ ० ॥
"शुद्धं सूतं तथा गन्धं ताम्रं गार्व्वाद्मर्द्दयेत् ।
एतन्न जायते यावत् किञ्चु कज्जलसन्निभम् ॥
एषा कज्जलिका ख्याता हन्यो सौभाद्रिनी ।
नानाऽनुपानयोगेन सर्व्वव्याधिविनाशिनी ॥"० ॥
कज्जलिकाविधानं तद्गुणश्च रसरत्नप्रदीपे ।
"जयापनवरीतायं महेन्द्रपरस्तेव च ।
भृङ्गराजरसेनापि काकमाच्या रसेन च ॥
एवं संयोज्य मन्दीन मरण दोषपङ्क्तिम् ।
भद्रराजरसे पिष्ट्वा सोऽप्यरसोऽपि ॥
कज्जलां वा पिष्टा चापि यथाशक्त्या कारयेत् ।
चूर्णयित्वा समं तेन रसेन सह मर्द्दयेत् ॥
तदेतत् यदा चूर्णं भवेत् कज्जलसन्निभम् ।
निर्धूमे बदराङ्गारे द्रवीकुर्य्यात प्रयत्नतः ॥
तच्च तु मन्दिगोमिवातस्थापिते कदलीतले ।
निःक्षिप्य तदुपर्य्यन्यत् पत्रं दत्त्वा प्रपीडयेत् ॥
शीतलत्वात् ततः पश्चात् समुद्धृत्य विचूर्णयेत् ।
एवं सिद्धा भवेद्व्याधिघातिनी रसपर्पटी ॥
ज्वरादिव्याधिभिन्नाय विश्वं दृष्ट्वा पुरा हरः ।
चकार तपसा युक्तः सुधावद्रसपर्पटीम् ॥
रक्तिकार्धमितां तावद्भृष्टजीरकसंयुताम् ।
गुञ्जाद्वैश्वदिङ्गुञ्जा भक्षयेद्रसपर्पटीम् ॥
रोगानुरूपभैषज्यै रपि तां भक्षयेद्बुधः ।
पिबेत्तदनुपानीयं शीतलं चुलुकत्रयम् ॥
प्रत्यहं वर्द्धयेत्तस्या एकैकां रक्तिकां भिषक् ।
नाधिकां दशगुञ्जातो भक्षयेत्तां कदाचन ॥
एकादशदिनारम्भात् तां तथैवापकर्षयेत् ।
एवमेतां समश्नीयान्नरो विंशतिवासरान् ॥
प्रियं गुरु तथा त्रिप्रान् पूजयित्वा प्रणम्य च ।
श्रद्धया भक्षयेदेतां क्षीरमांसरसाशनः ॥
ज्वरञ्च यक्ष्माणञ्चापि तथातीसारमेव च ।
कामलां पाण्डुरोगञ्च शूलप्लीहजलोदरम् ॥
एवमादीन् गदान् हत्वा तुष्टः पुष्टश्च वीर्य्यवान् ।
जीवेद्वर्षशतं साग्रं वलीपलितवर्ज्जितः ॥"
इति रसपर्पटी ॥ ० ॥
अथ ज्वरिणे अन्नदानसमय । तत्र चरकः ।
"सुत् सम्भवति पक्केषु रसदोषमलेषु च ।
काले वा यदि वाकाले सोऽन्नकाल उदाहृतः ॥"
अन्यच्च ।
"यामे याम गते कुर्य्यां यदा भोजनलालसा ।
भवेत् काले ह्यकाले वा सोऽन्नकाल उदाहृतः ॥"
तत्र कालमाह । ज्वरस्य पाकावस्थान्नदानकालः ज्वरस्य पाककालश्च ।
"वातिकः सप्तरात्रेण दशरात्रेण पैत्तिकः ।
श्लैष्मिको द्वादशाहेन ज्वरः पाकमुपैति हि ॥"
ज्वरस्य पाक उपशमः । ज्वरपाकेनैव रसपाके दोषपाकोऽपि कथितः । यतो दोषपाकं विना ज्वरपाको न भवति रसपाकं विना दोषपाकश्च न भवति ॥ ० ॥ ननु यथा पैत्तिको ज्वरो दशाहो रात्रेण पाकं याति । एकादशे दिनेऽन्नं दीयते । तथा श्लैष्मिको ज्वरो द्वादशाहोरात्रेण पाकं याति त्रयोदशदिवसेऽन्नं दीयते । तथा वातिको ज्वरः सप्ताहोरात्रेण पाकं याति । अष्टमे दिवसेऽन्नं कथं न दीयते । कथं सप्तम एव दिवसेऽन्नं दीयते । इति । उच्यते ।
"कफपित्ते द्रवे धातू सहेते लङ्घनं बहु ।
आमशयाद्भूतमपि वायुर्न सहते क्षयम् ॥"
इति वचनात् सप्तमाहे वायौ आहारलाभं विना वायुः क्षणमात्रमपि सोढुं न शक्नोति । न चाहुश्चार्व्विकाम् रुद्धान्दीनकारणात् विकाराः न सन्तर्पयन्ति । अतो वातिके ज्वरे पाकदिनादर्व्वाक् सप्तम एव दिने ऽन्नं दापयेत् । तथा च वाग्भटः ।

"ज्वराभिभूतं मद्दे खतीते
विपक्वदोषं हतलङ्घनादि ।
यो भिषक् खादति वैद्यमानी
निःसंशयं हन्त्यचिरात् स रोगान् ॥"
ज्वराभिभूतं वातज्वराभिभूतं । विपक्वदोषं पक्ववातं । हतलङ्घनादि आदिशब्दात् स्नानलेपनपाननिर्मातमर्दनाशगुरुत्वावगमनापारणादि । भिषजमित्यमपत्थाप्युपलक्षणम् । अतएव चरकः ।
"ज्वरितं षडहेऽतीते लघ्वन्नं प्रतिभोजितम् ।
पाचनं शमनीयं वा कषायं पाययेत्तु तमिति ॥"
ज्वरितं वातज्वरिणम् । षडहेऽतीते इत्युपलक्षणम् । पित्तज्वरिणं दशाहेऽतीते । श्लेष्मज्वरिणं द्वादशाहेऽतीते । लघ्वन्नं भोजितं ज्वरिणं पाचनं शमनीयं वा कषायं पाययेत् । पुनः स एव ।
"सर्व्वज्वरेषु ज्वरितं दिनान्ते भोजयेल्लघु ।"
दिनान्तेऽत्यन्तदोषे मध्यान्ने तेन त्रिधा विभक्तस्य दिवसस्य मध्यभागे पित्तप्राधान्यसमये । उक्तञ्च वाग्भटेन ।
"वयोऽहोरात्रिभुक्तानां तेऽन्तमध्यादिगाः क्रमा-
दिति ।"
ते वातपित्तश्लेष्माणः । पित्तकालेऽपि मध्याह्न एवाक । यत आह ।
"याममध्ये न भोक्तव्यं यामयुग्मं न लङ्घयेत् ।
याममध्ये रसोत्पत्तिर्यामयुग्माद्बलक्षयः ॥" इति ।
एतत् सुस्थपरमिति चैतन्न । यत आह ।
"श्लेष्मक्षये प्रक्लोता बलवामनलस्तदा ।
वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम् ॥"
तदा पित्तप्राधान्यसमये । अन्यथा उक्तसमयात् अन्यदा । वेगापाये जठराग्नेवेगनाशे । तत्र भोजनं ज्वरवेगाभिवर्द्धनं भवतीत्यर्थः ॥ ० ॥
अत्र विषमज्वरिणेऽन्नदाने कालविशेषमाह चरकः ।
"सर्व्वज्वरेषु सुभाग मात्रावल्लघु भोजयेत् ।
वेगापायेऽन्यथा तद्धि ज्वरवेगाभिवर्द्धनम् ॥"
सर्व्वज्वरेषु सर्व्वविषमज्वरेषु । वेगापाये ज्वरवेगापाये भोजयेत् । अन्यथा ज्वरवेगापायं विना । तत् भोजनं ज्वरवेगाभिवर्द्धनं भवतीत्यर्थः ॥ ० ॥ पथ्यापथ्यकाय स्मारमाह ।
"आहारनिहारविहारयोगाः
सदैव सद्भिर्विषमे विवर्ज्ज्याः ॥" इति ॥ ० ॥
[illegible] भोजनादौ [illegible] माह सुश्रुतः ।
"ज्वरे प्रमेहा मरणं सम्भवेदपि निश्चिते ।
निबद्ध भाजनताञ्च भोजारौ च कारयेत् ॥"
[illegible] तु [illegible]
[illegible] ॥ ० ॥ [illegible]
[illegible] ।
"यदा [illegible] ।
[illegible] ।
[illegible] च ।
[illegible] ॥

शुचे मले विगच्छल विरेकश्च शस्यते ।
मलः प्रसन्न भवति शोधनात्तिर्दोषमभवेत् ॥
ज्वरितो हितमश्नीयाद्यद्यप्यस्याऽरुचिर्भवेत् ।
अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽपि च ॥"
अयमर्थः । यद्यपि अस्य ज्वरितस्य हिते मत्ये अरुचिर्भवेत् तथापि ज्वरितो हितमेवाश्नीयादिति नियमः । यत आह सुश्रुतः ।
"गुर्वभिष्यन्द्यकालेच ज्वरी नाद्यात् कथञ्चन । न तु तस्याहितं भुक्तमायुषे वा सुखाय च ।
व्याधिक्षितिमितेर्द्यपि येषाञ्च कालमातुरः ।
तावत्प्राक् स कथमश्नीयात भविरिक्तवत् ॥"
व्याधिक्षितिमितेर्द्यौर्बे अयथेदमिश्चाह कश्च । ननु हिते वस्तुनि कथमरुचि स्यादत आह । सातत्यात् स्वाद्वभावाच्च पथ्यं द्वेष्यत्वमागतमिति। सातत्यात् एकस्यैव भक्षस्य सर्वदोपयोगात् । स्वाद्वभावाच्च भक्तानारादपि विस्वाद्युतः । पथ्य मप्रियं स्यात् तथापि तदेव ग्राम् । कल्पना-विधिभिस्तैस्तै प्रियत्वं गमयेत पुनरिति । अथ च ज्वरितोऽन्नकालेऽश्नीयादेवेति द्वितीयो नियमः । कुत इति चेत् हि यतो हितो ह्यभुञ्जान क्षीयतेऽपक्रमात्तुर्भवति ततो म्रियतेऽपि च ॥*॥ ज्वरिताय हितान्यन्नाद्यौन्याह ।
"रक्तशाल्यादयः शस्ताः पुराणाः षष्टिकैः सह । यवागूदनलाजार्थे ज्वरितानां ज्वरापहाः ॥"
तत्र रक्तशालिगुणाः ।
"रक्तशालिर्ब्रणस्तोषी चक्षुष्यो वर्ण्यस्त्रिदोषजित् । चक्षुष्यो मूत्रलः स्वर्यः शुक्रलस्तृड्ज्वरापहः ॥
विषव्रणश्वासकासदाहनुड्वह्निपुष्टिदः ।
तस्मादल्पान्तरगुणाः शालयो महदादयः ॥"
रक्तशालिर्या लोकदेशे राजदनामी इति प्रसिद्धः ।
"मुद्गान् मसूरांश्चणकान् कुलत्थान् समकुष्ट-कान् ।
यूषार्थे यूषसात्म्यानां ज्वरितानां प्रदापयेत् ॥"
तत्र मुद्गादिगुणास्तत्तच्छब्दे द्रष्टव्याः ॥*॥
"पटोलपत्र वार्त्ताकु कुलकं कारवेल्लकम् । कर्कोटकं पर्पटकं गोजिह्वां बालमूलकम् ॥
पत्रं गुडूच्याः शाकार्थे ज्वरितानां प्रदापयेत् ॥"
तत्र पटोलादिगुणास्तत्तच्छब्दे द्रष्टव्याः ॥*॥
"लावान् कपिञ्जलानेणान् हरिणान् पृषतान् शशान् ।
कुरङ्गान् कालपुच्छांश्च तथैव चकमातृकान् ॥ मांसार्थे मांससात्म्यानां ज्वरितानां प्रदापयेत् । सारसक्रौञ्चशिखिनश्चटा तित्तिरकुक्कुटान् ॥ गुरूष्णत्वात् न शंसन्ति केचिदेवं ज्वरादिताः ॥" तित्तिरिरत्र शस्यत इति । गौरतित्तिरि कपिञ्जलश्च पूर्वं द्रष्टव्यात् ॥
"ज्वरितानां प्रकामन्तु यदा भवति यक्षीरका । तदैतेऽपि हि दातव्याः मात्राकालोपपादिताः ॥ अविक्रुश इति ख्यातो योऽसेवृ गौरतित्तिरि ॥"
इति ॥*॥
"भिषक् दाडिम आमलकमर्थं प्रकाहृते । प्रदद्यात्स्वन्नयाय कालिन्दं वा पुराणकम् ॥"

यथौषधविहाया यवाया गुणाच ।
"सक्ताव्धे हिता पेया यथास्व पाचनैः कृता । दीपनी पाचनी लघ्वी ज्वरितानां ज्वरापहा ॥"
यथास्व पाचनैः कृता यथादोष पाचनैः कृता । यथा,—
"पञ्चमूल्या कषायेन्तु पाचनं वातिके ज्वरे । पयोद पैत्तिकं मुस्तकटुकेन्द्रयवैः कृतम् ॥
पिप्पल्यादिकषायेन्तु पाचनं कफजे ज्वरे । लघुना पञ्चमूलेन पिप्पल्या सह साधया ॥
मद्यया पञ्चमूल्याथ याभी दुस्पर्शगोक्षुरैः । सिद्धानि भिषगन्नानि प्रयुञ्जीत यथाक्रमम् ॥
वातपित्ते श्लेष्मपित्ते कफवाते निरन्तरे ॥"
अस्यायमर्थः । वातपित्ते लघुना पञ्चमूलेन सिद्धान्यन्नानि भिषक् प्रयुञ्जीत ।
"शालिपर्णी पृश्निपर्णी कण्टकारीद्वयं तथा । गोक्षुरः पञ्चमं प्रोक्तं पञ्चमूलमिदं लघु ॥
श्लेष्मपित्ते वातपित्ते पिप्पल्या सह साधयेत् ॥"
कफवाते महता पञ्चमूल्या ।
"श्रीफलः सर्वतोभद्रा पाटला गणिकारिका । श्योनाकः पञ्चमः प्रोक्तः पञ्चमूलमिदं महत् ॥
निरोषजे ज्वरे पेया याभी दुस्पर्शगोक्षुरैः ।
याभी कण्टकारिका । दुस्पर्शो यवासः । पेयाना रक्तशालीनां वर्तिपात्र्यविरोधजित् । षडङ्गकण्टकारीभ्यां सिद्धा ज्वरहरी भवेत् ॥
विबद्धवर्चाः यवक्षी पिप्पल्यामलकैः शृताम् । सर्पिष्मतीं पिबेत् पेयां ज्वरी दोषानुलोमनीम् ॥
काशीश्वासी च हिक्की च पञ्चमूलीश्रुतां पिबेत् ॥"
यवोऽन्नाखम् । अत्र पञ्चमूली वृहती लघ्वी च हिता । तथा अस्तां पेयां पिबेन्निद्रयम् ।
"पेया भेषजसंयोगात्तुल्याग्निदीपिका । वातमूत्रपुरीषाणां दोषाणां चानुलोमिका ॥
स्वेदनाय च माहत्वादुष्णत्वात् द्रवत्वात् च । आहारभावात् प्राणाय सरत्वाल्लाघवाय च ॥
ज्वरघ्नीं पेयामाद्या ज्वरिणांगतां पूर्वमाचरेत् ॥"
पेयमावमत्वात् पेयमो वातपित्तकफाशेषां शान्त्यात् ॥
"यवकोलकुलत्थानां मुद्गामलकयुक्कयोः ।
एकैकं मुष्टिमादाय पचेदष्टगुणे जले ॥
पञ्चमूलिक एकैव वातपित्तकफापहः ।
भूये प्रशस्यते सूर्ये काथे श्वासे च ज्वरे ॥"
मनुष्यिकयव ॥*॥
"वद्धमलपुरीषस्य गुडे यवोनि विपाचयेत् । पिप्पलीपिप्पलीमूलं चव्यमौषधशाकितम् ॥
पाययेत् यवागू वा मात्रवदनुलोमनीम् ॥"
पेयाया यवागूश्च अधिकपान्माह ।
"ज्ञायते मद्यनित्ये याऽहि तिक्तकोऽपि वा । स्तब्धे रक्तपित्ते च यवागू हिता ज्वरे ॥
दाहच्छर्दिहरं चाम विरुद्ध अम्बयाभितम् । मधुराम्लमुष्णं पाचयेज्ज्वलयेच्च ॥"
शाकमल्पमर्थं लघुकम् । तथा च मद्यार्थे ।
"दाहच्छर्दार्दितं चाम निरुद्धं शक्तयाभितम् । मधीयसे मद्यपानि सीधार्थीकृतमतुकम् ॥

प्रयत् रामपूर्वयुक्तं भावयेज्ज्वलयेकम् । ज्वरापहै फलरसैर्युक्तमम्ब हितं कदिप् ॥*॥
तत्राथमम्बपथाह चक्रपाणिः ।
"दाडिमादिकैमरस्तु रक्तदितामलकषर्वरम् । तावदूर्धं समस्वाद्य भक्तैस्तु राजसम् ॥
तावापूर्वैर्मृ) दाडिमादिकनम्रश्चैरामलामलकहित तपयतुतमिलय ॥ ताजयतुगुणाच गुणस्य ।
"लाजानां सक्तवः चोऽसितागुड़ा विधिवत । हृद्रुतौ पिबेयुः दाहविनष्टं ज्वरापहाः ॥"
चरकश्च ।
"तत्र सर्वमसपादी प्रदेय लाजसक्तवः ।
ज्वरापहै फलरसैर्युक्तं मधुसमायुक्तम् ॥"
ज्वरपाने फलान्याह चरक एव ।
"द्राक्षादाडिमखर्जूरप्रियालैः सपरूषकैः । तपथाह्मस्य दातव्य तपर्णं ज्वरनाशनम् ॥"
पिपासामात्रं दद्यात् न तन्त्रस्वातन्त्र्यात् । तथाहुः राज्ञश्चाद्विश्वरीय सहितस्य चोक्तमिदं ॥
यवीयवागादिकमसे हितो नित्यं ज्वरे इत्युक्तम् ॥
ज्वरोऽत्र भीषण्यः । तेन निम्बपोधनो ज्वरी इव । यथा युक्तमिलमेन यथाप ॥
"सुहृत्पूर्वैरतथैव हित कफवात्तिरे ।
स एव विलया युक्तः शीतपित्तज्वरे हितः ॥"
स एव सुहृत्पूतादन एव ॥
"सुदृढः दीपो न चोषत्वो जोषज्वरालित । विसर्पादहरोधश्च कृप पित्ताभिसरणः ॥
पिपासार्थे यदासश्च मयता स पुरी भवेत् ॥"
चरकश्च ।
"अजाद्यर्थं पुष्टोऽपि वातर्वं ज्वरमावके । तदन्तु च पय पीतं तरुणे हन्ति मासकम् ॥"
तरुणे ज्वरे । चरकश्च ।
"जीर्णं ज्वरे कफे क्षीणे क्षीरं स्यादमृतोपमम् । तदेव तरुणे पीतं विषवद्धन्ति मानवम् ॥"*॥
अथ ज्वरिणो नियममाह ।
"न हिरण्याम पूर्वाह्णे नाभिष्यन्दि कराचन । न नीरस न गुरुप्रायं भुञ्जीत तरुणज्वरी ॥
न जातु तर्पयेत् प्राज्ञः सहसा ज्वरकर्शितम् । तेन सम्प्रतितोऽप्यस्य पुनरेव भवेज्ज्वरः ॥"*॥
अथ ज्वरविमुक्ते पूर्वरूपमाह ।
"दाहः स्वेदो भ्रमस्तृष्णा कम्पविड्भिन्नक्षिता । कूजनं चास्ये वैवर्ण्यमामानिज्वरमोक्षणे ॥"
विड्भित् मलभङ्गः । अत्र वाग्भटादिकाड् भाव इव । कूजनं कूजनम् । वर्तते दर्शनो बालस्य । ज्वरमुक्तो भविष्यत्यादेनाप्यलं भवति ॥ यद् दोषमर्थं विना न चापिनिवर्तत । चोक्तं दोषः कथमेतेदेषिं क्षयं करिष्यति । यथाहि । कदाचित् चोक्तोऽपि दोषः विनाशकार्थे कर्मणि द्रष्टयति । यथा निर्वाणवत्सायां दीपो विद्धि यात् प्रज्वलति । तामभट्टाचार्यः ।
"भानुर्न प्रज्वलम्नदीपो नीलकाये तिथिर्न । तथा नरः नवरुड्, कुलत्, पनम् द्विष्टम पिती ॥"
न पेदते चपेदतः स्यात् ।

"त्रिदोषजे ज्वरे स्रोतस्तन्त्रेण च धातुगे ।
लङ्घनं मोक्षकाले स्यान्न्यग्निन् स्वेदप्रयतनम् ॥"
एतद्धारादिकं लङ्घनं मोक्षकाले एतस्मिन्नेव ज्वरे न स्यात् । केषु त्रिदोषजे । अन्तर्वेगे । धातुगे ज्वरे । अन्यस्मिन् स्वेदमात्रं दर्शनं भवति ॥ * ॥
अथ ज्वरमुक्तस्य लक्षणमाह ।
"दृष्टो लघुर्व्यपगतक्लममोहतापः
पाको मुखे करणसौष्ठवमव्यथत्वम् ।
स्वेदः क्षवः प्रकृतियोगिमनोऽन्नलिप्सा
कण्डूश्च मूर्ध्नि विगतज्वरलक्षणानि ॥"
सुश्रुतोऽप्याह ।
"स्वेदो लघुत्वं शिरसः कण्डूः पाको मुखस्य च ।
क्षवथुश्चान्नकाङ्क्षा च ज्वरमुक्तस्य लक्षणम् ॥"* ॥
अथ ज्वरमुक्तस्य नियमाः ।
"व्यायामञ्च व्यवायञ्च स्नानं चङ्क्रमणानि च ।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत् ॥"
चरकश्च ।
"व्यायामञ्च व्यवायञ्च स्नानं शिशिरं जलम् ।
ज्वरमुक्तो न सेवेत यावन्न बलवान् भवेत् ॥
अपि ज्वरविमुक्तस्य स्नानं कुर्यात् पुनर्ज्वरम् ।
तस्माज्ज्वरविमुक्तोऽपि स्नानं विषमिव त्यजेत् ॥
बलवत्यग्निपूर्णो यावन्न प्रकृतिर्भवेत् ।
तावज्ज्वरेण मुक्तोऽपि व्यायामादि विवर्जयेत् ॥"
अथ वातज्वराधिकारः । तत्र वातज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां सम्प्राप्तिमाह ।
"वातलाहारचेष्टाभ्यां वायुरामाशयाश्रयः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत् स्याद्रसानुगः ॥"
अथ तस्य पूर्व्वरूपमाह । जृम्भात्यर्थं समीरणादिति । समीरणात् ज्वरे उत्पत्स्यति अत्यर्थं जृम्भा स्यात् । जृम्भा च श्रमादिपूर्व्विका भवति ।
अथ वातज्वरस्य लक्षणमाह ।
"वेपथुर्विषमो वेगः कण्ठोष्ठमुखशोषणम् ।
निद्रानाशः क्षवस्तम्भो गात्राणां रौक्ष्यमेव च ॥
शिरोहृद्गात्ररुग्वक्त्रवैरस्यं बद्धविट्कता ।
शूलाध्माने जृम्भणञ्च भवन्त्यनिलजे ज्वरे ॥"
एतानि लक्षणानि प्रायो भाविमिश्रेण सुश्रुतेन निर्दिष्टानि । चकारादन्यान्यपि चरकनिदानोक्तानि बोद्धव्यानि । तान्येव श्लोकेन प्रदर्शन्ते ।
"भवन्ति विविधा वातवेदना व्यापदुत्कटा ।
पिण्डिकोद्वेष्टनं कर्णयोः शब्दकर्णनता ॥
कषायास्यता नखनयनादिषु रौक्ष्यमरुणता ।
शुष्कास्यो बलिमर्दनमिच्छत्यध समभ्यञ्जनम् ॥
अवस्थानं स्वास्थ्ये प्रतापोत्पन्नासिता ॥"
विषमो वेगः प्रवृत्तौ वान्नादिरूपो ज्वरवेगो विषमो भवतीत्यर्थः । चरकमते हृद्व्यथा अभावः । तथा च वाग्भटः ।
"सर्वो गोमाङ्गस्तोद वेपथु जम्भोरप्यत ॥" इति ।
चरकोऽपि । अवस्थारविपर्ययः । शिरो गुरुत्वक गात्रभङ्ग प्रभृति शिरोव्यथान्त प्रयोगश्च विदधीत चिन्तारोपणादः ॥ * ॥
अथ वातज्वरचिकित्सा ।
"आमाशयस्थो हत्वाग्निं सामो मार्गान्
पिधापयन् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
इति वचनात् सामान्यतो ज्वरिमात्रस्य यत्र दारोमुख्येन लङ्घनाभिधाने वातज्वरिणो लङ्घनविधौ विशेषमाह चरकः ।
"ज्वरितं षडहेऽतीते लघ्वन्नं प्रतिभोजितम् ।
पाचनं शमनीयं वा कषायं पाययेद्भिषक् ॥"
सुश्रुतोऽप्याह ।
"वातिके सप्तरात्रेण दशरात्रेण पैत्तिके ।
श्लैष्मिके द्वादशाहेन ज्वरे युञ्जीत भेषजमिति ॥"
नन्वत्र वै प्राणिनः प्राणा इति श्रुतिः तदन्नविना प्राणिनः कथं स्थास्यन्तीत्याह ।
"दोषाणामेव सा शक्तिर्लङ्घने या सहिष्णुता ।
न हि दोषक्षये कश्चित् सोढुं शक्नोति लङ्घनम् ॥
कफपित्ते द्रुते धातू सहेते लङ्घनं बहु ।
आमक्षयादूर्द्ध्वमपि वायुर्न सहते क्षणम् ॥"* ॥
भेषजमाह ।
"पिप्पल्यः सर्व्वतोभद्रा कामदूती च श्रीफलः ।
तर्क्कारी गोक्षुरः पृश्नी बृहती कण्टकारिका ॥
राज्ञा कला कणामूल कुष्ठ शुण्ठी किराततः ।
गुडूची बला बालं द्राक्षा दारु शतावरी ॥
एषां क्वाथो निहन्त्येव प्रभञ्जनकृतं ज्वरम् ।
योगत्रयमपि योगोऽयं सर्व्वयोगवरः स्मृतः ॥"
श्रीफलो विल्वः । सर्व्वतोभद्रा गम्भारी । कामदूती पाटला । श्रीफल श्रीलामाढ़ा इति लोके । तर्क्कारी गणिकारिका । कलसी पृश्निपर्णी । स्थिरा शालिपर्णी । बालं सुगन्धवाला । मार्गी यवासः । इति दशमूलादिक्वाथः ॥ * ॥
सुश्रुतस्तु ।
"पञ्चमूली कषायन्तु पाचनं वातिके ज्वरे ।" इति ।
अत्र पञ्चमूली ह्रस्वपञ्चमूली । अतएव त्रिमूती ।
"शालपर्णी तर्क्कारी पृश्निपर्णी कण्टकारिकाटरूषकैः ।
पाचनमुदितं मारुतजनितज्वरवारिदवारि
क्षपितेः ॥"
इति ह्रस्वपञ्चमूली क्वाथः ॥ * ॥
"किराताब्दामृतोदीच्यबृहतीद्वयगोक्षुरैः ।
स्थिरपर्णीकलसीविश्वैः क्वाथो वातज्वरापहः ॥"
उदीच्यं बालकम् । स्थिरपर्णी शालिपर्णी । कलसी पृश्निपर्णी । इति किरातादिक्वाथः ॥ * ॥
"गुडूचीपिप्पलीमूलनागरैः पाचनं मतम् ।
वातज्वरे तथा पेयं कलिङ्गं सगुडं हि ॥"
कलिङ्गं यत्र देवदारु मतम् ॥ * ॥
त्रिमूती ।
"विश्वामृतापर्पटकविशुद्धेर्य
मरुज्ज्वरघ्नः क्वाथः कुलोत्थम् ।
क्वाथोऽपि हृत्युग्रमुर्व्वीश्वराद
भूमीश्वरे मारुतकाञ्चनादः ॥"
विश्वं शुण्ठी । अन्य पाम्बसिति । वैद्या प्रमादतिमिरम् ।
"दशमूलीजलारग्वधाह्वकं पञ्च दुग्धरे ।
क्वाथो हृच्छोथिरं कफं पञ्चमीदं महज्ज्वरम् ॥"
पञ्चमूली बिल्वादि । इति ह्रस्वपञ्चमूल्यादिक्वाथः ॥
"कणाजमोदानलवह्निविश्वा
निदिग्धिकाविल्वकभूमिनिम्बैः ।
मधूककैरावरितः कषायो
हिमात्मिको हन्ति महाविमर्त्तु ॥
ज्वरं मरुद्धुद्विषमुद्भवं तथा
बलाक्षयश्वासमन्दताञ्च ।
कण्ठावरोधं हृदयावरोधं
छेदञ्च रोमाञ्चहृद्भ्रममोहान् ॥"
इति कणादिक्वाथः ॥ * ॥
"शुद्ध प्राज्ञरसस्य भस्तुलित मारायिनाशीरय
लाघवादिमापसिस्फुटगलालङ्कारवत्तु स्मृतम् ॥
तावन्तेव मनःशिला च विमला तावत्तथा टङ्कणं
ष्ठी श्रावणिला कथा च मरिचं द्विकमान
मध्याप्यकम् ॥
विषादि वस्तूनि शिलोपरिष्टा-
द्विपर्व्वर्षेद्वापि शोषयेच्च ।
ततस्तु राज्ञी रसगन्धको च
गुणञ्च तद्वयाप्तगुण निमग्ना ।
कम्पलकनामधेयो यथार्थनामा रस श्रेष्ठः ।
समीरणश्लेष्मणदान् चरति साध्यास गुटिका ॥
आर्द्रकेण सममेव भक्षितो
हन्ति वातकफसम्भवं ज्वरम् ।
श्वासकासमुखवैकल्यीनतां
वह्निमान्द्यविषमोच्च नाशयेत् ॥
नश्यत्येव हरति शिरोऽर्त्तिं कफवातजाम् ।
मोहं सदाभाव च प्रलापं चतुःशतम् ॥"
कम्पलकरसः । सामान्यज्वरेषु कथितो गुटिका ज्वराङ्कुशः प्रदेयोऽत्र ॥ * ॥
"विषमहौषधमागधिकोषणा
कुमरिरसकमारदकमर्दितम् ।
क्रमविवर्द्धितमुद्रितज्वर-
त्रिपुरभैरव एव रसो वरः ॥"
कुमरिः मारितं ताम्रं तस्य भागाः षट् । रसकं हिङ्गुलं तस्य भागाः षट् । दाड़िम रक्तिकाद्वयम् । त्रिपुरभैरवो रसो ज्वरे ॥ * ॥
"वातजे ज्वरे कोष्ण मधुरमात्रालिंगनिर ।
पीनस्वासवायिर्दि द्वारदिवादिपानवनिन्दृ ॥
धौतयो मार्दवं कृत्वा पीता पारम्पराद्दन्नम् ।
कृत्वा वातबलार्थं स्वेदो ज्वरमपोहति ॥
"सर्व्वदेहमर्दनविधानपञ्चकनिबद्धमुक्तानिः
प्रमथति वातकवानदमनकलापात्
दोषः ॥"
वातज्वरे हन्ति शिरोहृदयकम्पकफवाङ्
जृम्भायाम् । वातयुक्तको निर्विकाररेषी च कोष्ठे दाहप्रशमः सन्तर्पणं च ॥ * ॥
"भानुभूरथपल्लवरो घन
विभुवज्ञासिविभोरां पुरी ।
हन्ति वात्यवरोषमारभ
दोषमान्द्य कफवातजन्मम् ॥"
इति वातज्वरे वटीबहुमहादि ॥ * ॥

अन्यच ।
"शर्करादाडिमाभ्याञ्च द्राक्षाखर्ज्जूरमिश्रितया ।
कल्कं विधारयेदास्ये धौतैरत्यन्तपाकवत् ।
द्राक्षामलकयोः कल्कं घृतेन वदने विधेत् ।
तेन तृष्णा तुखशोषश्च सद्यो यत्नेन शाम्यति ।
सुरसे शायन तत्र मलिमत्वति भोजने ।" ॥
निद्रानाशस्य चिकित्सामाह ।
"सार्वं लङ्घन चिन्ता व्यायामः शोकभीक्रुधः ।
एभिरेव भवेन्निद्रानाशः श्लेष्मातिसञ्चयात् ।"
अथ चिकित्सामाह ।
"भक्तन्तु विजयायाश्च मधुना निशि भक्षयेत् ।
निद्रानाशोऽतिसारे च ग्रहण्यां पावकक्षये ।
गुडं पिप्पलीमूलस्य चूर्णेनालोड्य लिह्यन् ।
निद्रामपि च सत्वरं निद्राप्नोति मानवः ।
वायसजङ्घामूलं मूलं वा शिरसि काकमाचायाः ।
त्रिधृतं निद्राजनकं धुत्तूरं वा तथा मनुष्यम् ।"
पीतमिति शेषः ।
"मूलन्तु काकमाच्या यद्दं सूत्रेण गलके नियतम् ।
निद्राति नरस्तद्वत् भिदामान्वे निद्रामदम् ।
शालियवान्नमिक्षुः क्षीरमद्वसमान् दधि ।
व्यस्ताऽऽहतकलानमूढं यथाविषयम् ।"
इत्यत्र मांसरसम् ।
"ग्राम्यानूपजलचारिवर्जिताश्चाजानयाः ।
सतो प्रभुक्ता मिश्या काया निम्नसमन्या ।
रसो शाके च सर्वे च मधिमूयपयासु च ।
नित्यं मत्स्यमांसानि पनाम्लमपरायाणि ।"
इति मांसरसं ।
'ऐन्द्र मौलकी माषा सुरा मांसरसः पयः ।
गोधूमाश्चिममश्चाश्च निद्रां कुर्वन्ति देहिनाम् ।'
निद्रानाशे ॥ ॥
"दाह हैमवतो शुक्र यवाक्षाणिकुसुमैस्तथैव ।
लिम्पेत् शीतैर्धान्यादिभिः सूक्ष्मामसुर्षोन्नरम् ।"
हैमवती वैतवचा । दाहमल्लवैद्यः सूक्ष्मा
मणी ॥ ॥
"कटुतैलं कलायं हरिद्रा ब्राह्मणासाधितम् ।
एवं निर्दिष्टं धूलि कर्णपानेनेषु यथावत् ।"
तैल श्वासन्ने ॥ ॥
"कलायशस्त्रिधान्यद्गः यवाना च समभिसा ।
मातुलुङ्गसहिता इन्ति गुष्कशास्त सर्वे भूता ।"
गुष्कशासे ॥ ॥ अथाम्लमाह ।
यमोदकारास्मिन ।शसो नित्यं रसोदनः ।
सुरामम्भक्ष्यमन्नु मद्यविन्दाय दीयते ।"
इत्यादि विषमारम्भ ।
"रसोना रसरसाम्लाशी चंशाचामिरोचनि ।
कट्वाकारस्याश्विभ्यो नित्यं वायुनां निवत् ।
कार्जी शाली च विदो च मम युगेन्नौ
निवेत् ।"
मैर्व्विति शेषः । इति वा ज्वरादिविकारे ॥ ॥
अथ ज्वरविकारो विकारः । तत्र पित्तज्वरस्य वि-
पत्यविचारःमनमवर्तिज्ञः तथाऽन्याह ।
"त्रिफलायाश्चकाश्च विधायामायायम ।
वातोरस्य आहारर्व ज्वरकराद्धृतम् ।"

पित्तस्य मधुमाषेण कोष्ठामिदग्धा वहिर्नमु न
प्रसरति । यत आह ।
"पित्त मद्य कफः पङ्गुः पङ्गवो मलधातवः ।
वायुना यत्र नीयन्ते तत्र गच्छन्ति मेघवत् ।"
इति ।
ततोऽत्र पित्त वायुसहाय चोदयम् । यत आह ।
"द्वयमेकरसं भाति न रोगोऽप्येकदोषजः ।
एकस्तु कुपितो दोषः इतरानपि कोपयेत् ।" इति ।
अथ तस्य पूर्व्वरूपमाह । पित्तात्मयनयोर्दाह
इति । पित्तात् ज्वरे उत्पत्स्यति नेत्रदाहः स्यात् ।
स च प्रमादिपूर्व्वको भवति ॥ ॥
अथ पित्तज्वरस्य लक्षणमाह ।
"वेगस्तीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमिः ।
कण्ठौष्ठमुखनासानां पाकः स्वेदश्च जायते ।
प्रलापो वक्त्रकटुता मूर्च्छा दाहो मदस्तृषा ।
पीतविण्मूत्रनेत्रत्वं पैत्तिके भ्रम एव च ।"
अतिसारः पित्तस्य सरत्वात् सहसा प्रवर्त्तन
सर्व्वाधार एव तस्य ज्वरोपक्रमत्वात् । वमिः
यदा पित्त पायुमार्गं याति तदा वमथुः ।
प्रलापोऽनर्थकं वचः । सर्व्वाङ्गपादिदाहनम् ।
मदः पूर्व्वाक्तावस्थामध्यादिष मतता । भ्रम
चक्रारूढस्येव भ्रान्तिः । चकारात् रक्तकोष्ठा
दयो बोद्धव्याः ॥ ॥ अथ पित्तज्वरस्य चिकित्सा ।
'आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधा
यत् ।
विदधाति ज्वरं दोषस्तस्मात् कुर्य्यादलङ्घनम् ।"
इति वचनात् सामान्यतो ज्वरिमात्रस्य याव
न्नारोग्यदर्शनं लङ्घनाभिधाने पित्तज्वरिणो
लङ्घनविधानं विदधमाह सश्रुतः । पैत्तिके दश
रात्रेण ज्वरे कुर्व्वीत भेषजानि । दशरात्रेण
लङ्घनता कार्य्योऽतमेव च ॥ ॥
किञ्चिद्भेषजं तत्राह ।
'त्रिफलासुरसायर्वैः पाठाकटुफलाब्दैः कषायकम् ।
पञ्च कल्पकर पीत पाचनं पैत्तिके ज्वरे ।"
इति त्रिफलादिक्वाथः ॥ ॥
"पर्प्पटो वासकश्चैव किरातो धन्वयासकः ।
प्रियङ्गुश्च कृत क्वाथ एषां प्रकोपदा सुतः ।
सिताया योजितः पानात् पित्तज्वर हरेत् ।"
इति पर्प्पटादिक्वाथः ॥ ॥
"द्राक्षा हरीतकी मुस्ता कटुका कृतमालकः ।
पर्प्पटश्च कृत क्वाथ एषां पित्तज्वरापहः ।
तृष्णाशोषप्रलापार्त्तिदाहच्छर्दिनिवारणः ।
भिन्नाभिन्नमलानां प्रशमो पित्तजे मतः ।"
इति द्राक्षादिक्वाथः ॥ ॥
"पटोलयवधान्याकमधुकं मधुमन्वितम् ।
हन्ति पित्तज्वरं मह दाहं तालिपाकविकारम् ।"
इति पटोलादिक्वाथः ॥ ॥
"गुडूच्यामलकं मुस्तं चन्दनं चापि पद्मकम् ।
पित्तज्वरं हरेदेव पाचनीयममाक्षिकम् ।"
इति गुडूच्यादिक्वाथः ॥ ॥
"एक पर्प्पटकः श्रेष्ठः पित्तज्वरविनाशनः ।
किं पुनर्यदि युज्येत चन्दनोशीरनागरैः ।" ॥

"ह्रीवेरं चन्दनोशीरघनपर्प्पटसाधितम् ।
दद्यात् सुशीतलं वारि तृड्दाहच्छर्द्दिदाहनुत् ।"
इति ह्रीवेरादिक्वाथः ॥ ॥
"भूनिम्बातिविषापाठामुस्तकैश्चन्दनान्विता ।
नागरं धान्यकं पित्त कषायो शर्करान्वितः ।
विहन्ति नागराद्यश्चायं पित्तज्वरं हरेत् ।"
इति भूनिम्बादिक्वाथः ॥ ॥
"द्राक्षाचन्दनपद्मानि मुस्ता तिक्ताऽमृतापि च ।
धात्री बालकमुशीरञ्च लोध्रेन्द्रयवपर्प्पटाः ।
फलकं प्रियङ्गुश्च पद्मानि वासकस्तथा ।
मधूकं पुष्करं चापि किरातो धान्यकं तथा ।
एषां क्वाथो निहन्त्येव ज्वरं पित्तसमुत्थितम् ।
तृष्णां दाहं प्रलापञ्च रक्तपित्तं भ्रमं क्लमम् ।
मूर्च्छां छर्द्दिं तथा शूलं मुखशोषमरोचकम् ।
कासं श्वासञ्च कुष्ठार्त्तं नाशयेन्नात्र संशयः ।"
इति द्राक्षाचन्दनादिक्वाथः ॥ ॥
"कथितो निशि पर्य्युषितः प्रातर्धान्याकतण्डुल
क्वाथः ।
पीत ससितसविरामाद्दाह ज्वरं चैवम् ।"
इति धान्याकक्वाथः ॥ ॥
"अश्वत्थाया हिमः प्रातः पानितः पैत्तिकज्वरम् ।
नाशयत्याशु तथा कामरक्तपित्तज्वरान्वयम् ।"
"गुडूचा भूमिनिम्बञ्च बालं श्रीहृबेरकम् ।
लघु सुधं त्रिफला द्राक्षा बाला च पर्प्पटः ।
दशो द्वारो सरवेव ज्वरं पित्तजं हरम् ।
धौतमवृमपि प्रातर्नीतो मधुना यह ।"
इति गुडूच्यादिक्वाथः ॥ ॥
"नवागमे सर्व्वदा वा निमज्य कटुपत्रके ।
अवस्थिते प्रमोदाय कदम्बावभृतं ज्वरम् ॥ ॥
उत्तानसुप्तस्य गभीरताम्र
कांस्यादिपात्रे निहिते च नाभौ ।
शीताम्बुधारा बहुला पतन्ति
निहन्ति दाहं त्वरितं ज्वरञ्च ॥ ॥
धन्या मैनदयधौतैर्विलक्ष्णदाहज्वरापहः ।
काञ्चिकं पतलोमपम्लाकान् हन्ति सरीरपि ।
तैलपत्रपार्श्वेऽवयव च धातुमयपत्रेण वैवेव
चोदितापि निद्रा ॥ ॥
"शाल्मलिकाण्डपट्टेनानुगुष्ठनं दाहनाशनम् ।
कम्प गोलकश्रम शीतपीतकौशलकाशया ॥ ॥
द्राक्षामलककल्केन कवलोऽत्र हितो मतः ।
पद्मादिमधोरेवा पामाषवकन च हरित् ।"
पामाण पावकम् । इति कवलः ॥ ॥
अथाहमाह ।
"दाहवमाहिम यात निदा प्रवद्दालिनम् ।
मर्द्दरालपुथगुल पर्य्यकामाबलम्बेयम् ।"
लाकनर्येश्च नाशादमुदव स्वयम् । मल-
दलवहमनाम गामावज्वरविबिन्दुनाशम् ॥ ॥
"मृगमदोद्गो देव निगदा वैर्थ्यं करो ।
दर्श्यं सुकाथमपूर्णं रसाङ्कुरवमेव ।
मनोरहर्षविष्टं बद्धान विगदगी वा ।
हाराबली चन्दनदीपकार्त्ती
सुधमयुखावरभूषितानाम

तिलमिमीनां सुपयोधराणा-
मालिङ्गनान्याशु हरन्ति दाहम् ।
याप्यः कमलदलानिलो जलयन्त्रगृहा शुभा ।
भार्याश्चन्दनदिग्धाङ्गो दाहदैन्यहरा मता ॥"
इति पित्तज्वराधिकारः ॥ ० ॥ ० ॥

अथ श्लेष्मज्वराधिकारः । तत्र श्लेष्मज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां सम्प्राप्तिमाह ।
"श्लेष्मलाहारचेष्टाभ्यां कफ आमाशयाश्रयः ।
बहिर्निरस्य कोष्ठाग्निं ज्वरकृत् स्याद्रसानुगः ॥"
कफस्य कोष्ठाग्निनिर्गमो वह्निनयनेन पक्वान्ना-द्यामद्वारां जातायां पित्तस्यैव विद्यामो बोद्धव्यः ॥ ० ॥ अथ तस्य पूर्व्वरूपमाह । कफात् प्रायोऽभिमन्दत्वमिति । कफात् ज्वरे उत्पत्स्यति अन्नानभिलाषः स्यात् । स च श्रमादिपूर्व्वको भवति ॥ ० ॥ अथ श्लेष्मज्वरस्य लक्षणमाह ।
"स्तैमित्यं स्तिमितो वेग आलस्यं मधुरास्यता ।
शुक्लमूत्रपुरीषत्वं स्तम्भस्तृप्तिरथापि च ॥
गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता ।
प्रतिश्यायोऽरुचिः कासः कफजेऽक्ष्णोश्च

शुक्लता ॥"

स्तैमित्यं अङ्गानामार्द्रपटावगुण्ठितमिव । स्तिमितो वेगः ज्वरस्य मन्दवेगः । आलस्य समर्थस्यापि कर्म्मस्वनुत्साहः । स्तम्भः अङ्गस्तब्धता । तृप्तिः अन्नाभिलाषे सत्यपि भोजनासामर्थ्यम् । गौरवं गात्राणाम् । शीत शीत लगति । उत्क्लेदः वमनोपस्थितिरिव । अतिनिद्रता निद्राधिक्यम् । प्रतिश्यायो नासारोगविशेष । अरुचिः भोजनानिच्छा । चकारात् पिडका शीता सुरप्रसेकः हृल्लासः हृदयोपलेप उष्णाभिलाषो वह्निमान्द्यमिति । यत उक्तम् ।
"प्रसेकः पिडकाः शीताः हृल्लासोऽप्युष्णकामिता ।
कफेन लिप्तहृदयो भवेन्मन्दश्च मन्दता ॥"
अथ श्लेष्मज्वरचिकित्सा ।
"आमाशयस्थो हत्वाग्निं सामो मार्गान् पिधा-

यकम् ।
विदधाति ज्वरं दोषस्तस्माल्लङ्घनमाचरेत् ॥"
इति वचनात् सामान्यतो ज्वरे सामत्वाद् दारोन्मयान लङ्घनाभिधाने श्लेष्मज्वरे लङ्घन विधाने विधिमाह ग्रन्थः । श्लेष्मके ज्वरे दारुणे ज्वरे युञ्जीत भेषजमिति । प्रायश्चित्त लङ्घनता पाचनमेव ॥ ० ॥ किमत्रैव तदाह ।
"पिप्पल्यादिकषायन्तु कफजे परिपाचनमिति ।"
पिप्पल्यादिकमाह ।
"पिप्पली पिप्पलीमूलं मरिचं गजपिप्पली ।
नागरं चित्रकं चव्यं रेणुकैलाजमोदिका ॥
सर्षपो हिङ्गु भार्गी च पाठेन्द्रयवजीरकाः ।
महानिम्बश्च मूर्व्वा च विषा तिक्ता विडङ्गकम् ॥
पिप्पल्यादिगणो ह्येष कफमारुतनाशनः ।
गुल्मशूलज्वरहरो दीपनश्चामपाचनः ॥"
इति पिप्पल्यादिकाथः ॥

"चातुर्भद्रकल्पस्य योग श्वासकासज्वरापहः ।
चौद्रेण हन्ति हिक्काञ्च बालानामपि शस्यते ॥
पिप्पली त्रिफला चापि समभागा ज्वरी लिहन् ।
मधुना सर्पिषा चापि कासी श्वासी सुखी

भवेत् ॥ ० ॥
कट्फलं पौष्करं शृङ्गी कृष्णा च मधुना सह ।
श्वासकासज्वरहरो लेहोऽयं कफनाशनः ॥"
इति चातुर्भद्रिकावलेहः ॥ ० ॥
"कट्फलं पौष्करं शृङ्गी यवानी कारवी तथा ।
कटुत्रयञ्च सर्व्वाणि समभागानि चूर्णयेत् ॥
आर्द्रकस्य रसैर्लिह्यात् मधुना वा कफज्वरी ।
कासश्वासारुचिच्छर्द्दिहिक्काश्लेष्मानिलनिवृत्तये ॥"
इत्यवलेहोऽयम् ॥ ० ॥
"निशुवारदलक्वाथं कणाढ्यं कफजे ज्वरे ।
अनुपाने सदा धीरो वर्षे च शिशिरे पिबेत् ॥
यवानी पिप्पली वासा तथा स्वादुवचन्दनम् ।
एषां क्वाथं पिबेत् कासे श्वासे च कफजे ज्वरे ॥
पार्श्वशूलेऽस्मतक्वाथं पीनसे ज्वरकासहृत् ॥"
इति वासादिक्वाथः ॥ ० ॥
"मरिचं पिप्पलीमूलं नागरं कारवी कणा ।
चित्रकं कट्फलं कुष्ठं वचागन्धिवचा शिवा ॥
कायफलं जटा शृङ्गी यवानी शिग्रुमङ्कुक ।
एषां क्वाथो हरत्येव ज्वरं श्लेष्मभवं कफात् ॥"
इति मरिचादिक्वाथः ॥

वातज्वराधिकारोक्तकल्पतरुरसोऽपि । श्लेष्मज्वरे दातव्यस्तस्य कफवाधिकारत्वात् ॥ ० ॥
"विश्वविकटुकाभीरादैन्येव कफे हितः ॥"
कवल इति शेषः ॥ ० ॥ अथापरमाह ।
"राजपूर्वोऽसौ दोषो ज्वरे कफसमुत्थिते ॥"
इति श्लेष्मज्वराधिकारः ॥ ० ॥

अथ वातपित्तज्वराधिकारः । तत्र द्वन्द्वज्वरस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां सम्प्राप्तिमाह । तत्र वातपित्तज्वरस्य ।
"वातपित्तकरैर्वातपित्ते आमाशयाश्रये ।
बहिर्निरस्य कोष्ठाग्निं रसगौ ज्वरकारिणौ ॥"
स्यातामिति शेषः ॥ ० ॥
अथ तस्य पूर्व्वरूपमाह ।
"प्रायः स्याद्वातपित्तस्य भवतो वातपैत्तिके ॥"
ज्वर इति शेषः ॥ ० ॥
अथ वातपित्तज्वरस्य लक्षणमाह ।
"तृष्णा मूर्च्छा भ्रमो दाहो निद्रानाशः शिरो-

रुजा ।
कण्ठास्यशोषो वमथू रोमहर्षोऽरुचिस्तमः ।
पर्व्वभेदश्च जृम्भा च वातपित्तज्वराकृतिः ॥"
पर्व्वभेदः पर्व्वाणि भिद्यन्त इवेति कथितु यथा ।
अथ वातपित्तज्वरस्य चिकित्सा ।
"वातपित्तज्वरे देयमाचरेद् यत्नतोऽधिकम् ।
किराततिक्तममृतां द्राक्षामामलकीं शठीम् ॥
निष्क्वाथ्य सगुडं क्वाथं वातपित्तज्वरे पिबेत् ॥"
इति किरातादिक्वाथः ॥ ० ॥

"गुडूची पर्पटी मुस्तं किरातो विश्वभेषजम् ।
वातपित्तज्वरे देयं पञ्चभद्रमिदं शुभम् ॥"
इति पञ्चभद्रक्वाथः ॥ ० ॥
"त्रिफलाशाल्मलीरास्नाराजवृक्षाटरूषकैः ।
शृतमम्बु हरत्याशु वातपित्तभवं ज्वरम् ॥"
इति त्रिफलादिक्वाथः ॥ ० ॥
"मधुकं सारिवा द्राक्षा मधूकं चन्दनोत्पलम् ।
काश्मीर्य्यपद्मकं लोध्रं त्रिफला पद्मकेशरम् ॥
परूषकं मृणालञ्च त्रिफलं सप्तकं वारिणि ।
निशोषितं सिताक्षौद्रलाजयुक्तञ्च तत् पिबेत् ।
वातपित्तज्वरं दाहं तृष्णामूर्च्छारतिभ्रमान् ॥
शमयेद्रक्तपित्तञ्च जीमूतमिव मारुतः ॥"
अत्र मधुकादिद्रव्याणामम्ब समुदितं पलपरिमितं सलिलं पिबेत् वारिणि षट्पलपरिमिते ।
मधुकादिहिमो दाहे ॥ ० ॥
अथापरमाह ।
"मुद्गामलकयूषस्तु वातपित्तज्वरे हितः ।
सदाडिमे प्रमाणतो यूषपाककुशलस्य ॥"
दाडिमामलकमुद्गसम्भवो यूष उक्त इति वातपैत्तिके ।
"कफपित्तहरा मुद्गा कारवेल्लान्यपत्थ्यया ।
प्रायेण च देया वातपित्तोत्तरे ज्वरे ॥
एताश्च ज्वरविष्टम्भशूलोदावर्त्तकारिणः ॥"
इति वातपित्तज्वराधिकारः ॥ ० ॥

अथ वातश्लेष्मज्वराधिकारः । तेन तस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां सम्प्राप्तिमाह ।
"वातश्लेष्मकरैर्वातकफावामाशयाश्रयौ ।
बहिर्निरस्य कोष्ठाग्निं रसगौ ज्वरकारिणौ ॥"
पूर्व्वरूपमाह ।
"प्राग्रूपे वातकफयोः स्यातां वातकफज्वरे ॥"
तस्य लक्षणमाह ।
"स्तैमित्यं पर्व्वणां भेदो निद्रागौरवमेव च ।
शिरोग्रहः प्रतिश्यायः कासः स्वेदाप्रवर्त्तनम् ॥
सन्तापो मध्यवेगश्च वातश्लेष्मज्वराकृतिः ॥"
स्वेदाप्रवर्त्तन स्वेदस्य चाप्रवर्त्तनादपि प्रवृत्तिः ।
यथाह हारीतः ।
"शिरोऽर्त्तिः स्वेदमरुच कासो
ज्वरस्य लिङ्गं कफवातजस्येति ॥"
स्वेदभवः स्वेदोद्गमः ॥ ० ॥
ननु स्वेदः पित्तस्य धर्म्मः कथमत्र पित्तज्वरे कफोदयसमवायानां प्राकः स्वेदस्य भागेन रज्जुतम् । तस्मात् कथं वातश्लेष्मज्वरे स्वेदादि प्रवृत्तिः । उच्यते । विकृतिविषमसमवायारब्धत्वात् दोष इति कार्त्तिकः । मत्कृतिसमसमवायाम् विकृतिविषमसमवायम् आगमतः । प्रत्यक्षानुभूतमपि कार्य्यकारणभावं समन्वयेन प्रकृतिसमसमवाये कारणानुरूपं कार्य्यमिति यावत् । यथा पलाण्डुयोर्न्नीलयोः शुक्लयोर्वा न कदाचिदपि पटः शुक्ल एव भवति । तथा प्रकृतेरैव हेतवेव दोषेन त्रिविधेन कफेन वा कफितो ज्वरो वातपुष्टिपक्वदाहज्ञापित्त

वैभिन्नान्निर्युक्तो भवति । तिक्ततिक्तविषमज्वर
यत्तु विकृत्या वैगुण्यात् विषम ज्वरारम्भ
स्य समवाय कार्य्यस्य कारणेऽभावस्य । यथा
पयोगोमूत्रसाभ्यां हरिद्राचूर्णाभ्यां वैगुण्यात्
विषम ज्वरारम्भयोर्लोहितो वर्णो जायते ।
यथा पावक विरुद्धाभ्यां वातपित्ताभ्यां वैगु-
ण्याभ्यां विषमः कारणाभ्यां दाहसन्तापे
दृश्यते इति सिद्धान्तः ॥ ० ॥

अथ वातपित्तज्वरस्य चिकित्सा ।
"वातपित्तज्वरे प्रथमौषध यत्नेन दद्यात् ।
पिप्पली पिप्पलीमूल चव्य चित्रक नागरैः ।
दीपनीय ग्राही वर्गो वातपित्तज्वरापहः ॥
कोमलानौषधान्यग्नेः पञ्चकोलमिदं स्मृतम् ।
तीक्ष्णोष्णं पाचन श्रेष्ठ दीपन कफवातनुत् ॥
गुल्मप्लीहोदरानाहशूलघ्न पित्तकोपनम् ॥"

इति पञ्चकोलम् ॥ ० ॥

"किराततिक्तमुस्तमहौषधामृता-
कणाकणामूलरसोनसिन्धुकैः ।
कृतः कषायो विनिहन्ति मारुत
ज्वरं समीरात् सन्धात् समुत्थितम् ॥"

इति किरातादिक्वाथः ॥ ० ॥

"पिप्पल्यादिगणं क्वाथ चिरंवातकफज्वरी ।
शाखागतं किञ्चिदपि ज्वरे भिषग्सत्तमम् ॥"

इति पिप्पल्यादिक्वाथः ॥ ० ॥

"पिप्पलीपिप्पलीमूलचव्यचित्रकनागरं ।
वचा मांसिविशा तालीपत्रमपत्न्यरेणुकम् ।
किराततिक्तको मूर्वा यवसा मरिचानि च ।
कटफल पुष्करं भार्गी विडङ्ग चकटाह्वयम् ।
शतमूलं हरिद्रा द्वे मेषशृङ्गी गडूच्यपि ।
दीप्यकयाञ्चमोदा च तकाणी च वत्सका ॥
एतानि समभागानि चूर्णयेद्विंशति ।
एषां क्वाथो विनीत स्याद्वातपित्तज्वरापहः ।
हन्ति पार्श्वं तथा श्रीतं प्रलेप्समपि दीपनम् ।
प्रतापपाणिनन्धाय दीपनं दश्च तथा ॥
अग्निमान्द्यस्य च गुल्मे दमनायपि ।
पिप्पल्यादिमहाक्वाथो ज्वरे मन्दे पूजितः ॥"

इति हरगृपिप्पल्यादिक्वाथः ॥ ० ॥

"एरण्डमूलीम योग कणाद्य नवमाकम् ।
ज्वरे विधार्य विशालो पाचकस्याश्वनाशने ॥

इति एरण्डमूलीक्वाथः ॥ ० ॥

तत्र अथवो राजा वातपित्तज्वरस्योचिताः ।
"पिप्पलीभिः प्रलेपो तोयसमन्वितं कम्पनम् ।
वातपित्तज्वरं हन्ति मेहन ज्वरापहम् ॥"

इति पिप्पलीक्वाथः ॥ ० ॥

"एलकं न्यग्रोध भर्द समं मुस्तं शस्तं शतम् ।
त्रिवृद्भिः सनकादिर्यं धैर्यार्थं मुखशोधनम् ॥
लेपकं हरिद्रे भिषग् कफ सार उत्कर्षयेच्च ।
प्रलेपं एतद्गुणं श्लेष्मभारं मेहमेदृत्वम् ।
अम्लपित्तमालये रसौ गुडाद्यमित्र ।
वातिकवमनौषध वातपित्तज्वरापहः ॥"

प्रत्येकाऽपि रसा वातपित्तज्वरे श्रेष्ठतरे च ।
इत्यादयः ।

"सर्पीरकं अष्टकुस्तमस्तक
निकायकं प्रशस्तमिति सुधीरि ।
कीर्त्त प्रत्येकोऽपि तद्वातं भावय
संचारित कोदार गुणकरात् ॥
मरिच पिप्पली शुण्ठी यवा सीमग पौष्करम् ।
भूनिम्ब कटुका कुष्ठ कच्छूरी तिक्तिका शटी ॥
एतानि समभागानि सम्यक्कानि कारयेत् ।
एतच्चूर्णं श्रेष्ठ शीतोदक पिबेदिति ॥'
निम्बिका पञ्चमूलिका इति कार्ये । अत्र शटी
गन्धपत्राशटी । इति मरिचाद्यचूर्णम् ॥ ० ॥
"भूनिम्बकारवीनिशादारुवालकपत्रजं रजः ।
समाम्भुलर्ण श्रेष्ठ सम्पूर्ण रोगेषु सर्वे ॥"

इति भूनिम्बाद्यचूर्णम् ॥ ० ॥

पूर्व्वोक्तो वातपित्ते प्रयोजः समुचितः । यत
उक्तम् ।
"पीतज्वरवातप्रायं पञ्चाद्यांशविनिवर्तिनि ।
वातपित्तज्वरे सर्वे कारयेत तद्विधानवित् ॥ ० ॥
मातुलुङ्गफलकेशरो च
सिन्धुजन्मसितामिश्रो मुखे ।
हन्ति वातकफरोगमाशुना
शोषमाशु जकृतामरोचकम् ॥

इति कवलः ॥"

अथ भस्माह ।
"मद्यस्य पञ्चमूल्याद्यः क्वाथः सिद्धं पक्वकन्
सप्तमे दिवसे दद्यात् ज्वरे वातबलासके ॥"

इति वातश्लेष्मज्वराधिकारः ॥ ० ॥

अथ पित्तश्लेष्मज्वराधिकारः । तत्र तस्य
पित्तश्लेष्मजस्य कारकपचनपूर्व्विका चिकित्सा
माह ।
"पित्तश्लेष्मज्वरे पित्तकफशमाग्न्याव्यापी ।
वर्धितरस कोऽपि रसौ ज्वरकारिकौ ॥"
पूर्वमप्याह ।
"प्रायूषे पित्तकफयोः स्यातां पित्तकफे ज्वरे ॥"
अथ तस्य लक्षणमाह ।
"निर्गतितीक्ष्णता तन्द्रा मोहः कासोऽरुचिस्तृषा ।
मुहुर्दाहो मुहुः शीतं पित्तश्लेष्मज्वराकृतिः ॥"
आस्यस्य तिक्तता पित्तेन । निर्मल कफेन ।
तन्द्रा चात्र कीर्त्तितावस्था । मोहो मन्दता ॥ ० ॥
अथ पित्तश्लेष्मज्वरस्य चिकित्सा ।
"पित्तश्लेष्मज्वरे वमनौषधं प्रयोजयेत् ।
मृद्वीकनिम्बाम्बुकावस्त्र कटुरोहिणी ॥
गुडूच्यानिन्दं क्वाथं पाचनो दीपन शमः ।
कफदाहारुचिश्छर्दिपित्तश्लेष्मज्वरापहः

इति गुडूच्यादिक्वाथः । ०

"अमृतारिष्टकादिपटोल कटफलम् ।
मादनमदनपटोलमरिचादलोहितम् ॥
क्वथितं पञ्चकोष्णं पित्तश्लेष्मज्वरापहम् ।
दाहतृष्णारोचकच्छर्दिकासादिविकारहृत् ॥"

इति अमृताष्टकम् ॥ ० ॥

"पटोलधान्यका मार्गी त्रिफलामदनाम्बु
भूनिम्ब चन्दनं मुस्तं पटोल कटुरोहिणी ।
विनष्ट पाचनं क्वाथ पित्तश्लेष्मज्वरापहम् ।
शाखकाष्ठार्थिन्हृदिकाशमूत्रविकारकम् ॥"

इति कटुकाद्यान्निक्वाथः ॥ ० ॥

"नागरोशीरविश्वाम्बुधान्यमोचरसाम्बुभिः ।
कृतः क्वाथो भवेद्ग्राही पित्तश्लेष्मज्वरापहः ॥"

इति नागरादिक्वाथः ॥ ० ॥

"पद्मकेशरमद्यमार्गी कटकाङ्कोलवारिदाः ।
शीता ज्वरं नयन्त्यन्तु पित्तश्लेष्मसमुद्भवम् ॥"
अत्र पटकारा कुप्रमाणा । कृष्णराजा-
प्रभावो भाषा । पर्ण कर्णे इति पञ्चरत्न ।
नैश्चयस्यार न कटुकामूलयो समभागया
देव क्षेत्र । इति कटुकीक्वाथ ॥ ० ॥
"सप्तच्छदपर्पटकाया इव शीतनिवारितः ।
पित्तश्लेष्मज्वरं हन्ति मासनिभ कामलाम् ॥"
अथ पाचका इत्यो कटुपत्रपरिमिते इव ।
मधुमिश्रो प्रलेह इह प्रदिग्ध ॥ ० ॥
अपरमप्याह ।
'कषाय परिपीतस्तु रुग्धैःपटोलयोः ।
पित्तश्लेष्मज्वरस्योदाहकमुखरो भवेत् ॥" ० ॥
अन्यच्च ।
"पटोलप्रायमयपीडश पित्तश्लेष्मज्वरापह ॥"

इति पित्तश्लेष्माधिकारः ॥ ० ॥

अथ सन्निपातज्वराधिकारः । तत्र चिरा
वाहिचिकित्सा सन्निपातज्वरप्रकरणे द्रष्टव्या ॥ ० ॥
अथागन्तुकज्वराधिकारमाह । तत्रागन्तु-
ज्वरस्य निदानमाह ।
"अभिघाताभिचाराभ्यामभिषङ्गाभिशापतः ।
आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत् ॥"
अभिघातः शस्त्रलोष्टलगुडादिभिरभिहननम् ।
अभिषङ्गः कामशोकभयक्रोधभूतादीनामावेशः ।
अभिचारः श्येनाद्युक्तयागादिः । अभिशापः
ब्राह्मणगुरुवृद्धसिद्धादीनां शापः । तं आगन्तु
ज्वरं यथास्वं यथास्वलक्षण दोषैर्विभावयेत्
विजानीयात् ॥ ० ॥ अन्यदप्याह विदाता
माह ।
"ते पूर्वं केवलाः पश्चान्निजैर्व्यामिश्रलक्षणाः ।
हेतुवेदनावैशेष्यैस्ते समुदाहृता मता ॥"
आगन्तुज्वरान्तरेण भूतविषपानादिजन्यमहत्त्व
संसृष्टे । तेन रागाद्यौपाधिका पित्तजौ
ज्वराणामधिकार ऋ । कामशोकभयरोषैः
वातात् । तत्र कामज तथा रक्तपित्ता
त्मकादौ पित्तस्य आगन्तुरपि दोषैः
तथा चाभिघातो अभिघाताभिषङ्गाभिचारादि
कोऽपि दोषानन्तर्यं तं विजानीयादिति एवैव
प्रयोज्याः । अभिघातादिभी विदग्धकारक
मिथ्याहारविहाराभ्यामपि दोषाणां प्रकोप
कारणम् । तथा चोक्तं सुश्रुते ममाधिकरणे
ज्वरादि चाहे आगन्तुकज्वरोऽन्यथाविधायी
दोषैर्जैव प्रभेदात् । सञ्जः । आगन्तुज्वर
दोषा आरम्भकाः न किन्तु पश्चादनुबन्धिनः ॥ ०
तथा आगन्तुज्वरस्य प्रकारान्तरमाह चरके ।
आगन्तुरपि यथादोषं कार्ये प्रत्यनीकैर्दोषैः
रनुबध्यत इति ॥ ० ॥

तत्र कामशोकभयक्रोधजागन्तो ज्वरे भिन्नो दोष इत्यपेक्षाया-माह ।
"कामशोकभयाद्वायुः क्रोधात् पित्तं त्रयो मलाः ।
भूताभिषङ्गात् कुप्यन्ति भूतसामान्यलक्षणाः ॥"
कामशोकभयात् कामशोकभयजादागन्तोर्वायुः कुप्यति । क्रोधात् क्रोधजादागन्तोः पित्तं कुप्यति । भूताभिषङ्गात् भूतावेशजादागन्तोः त्रयो मला दोषाः कुप्यन्ति इत्यर्थः । भूतसामान्यलक्षणाः भूतस्य भूतलक्षणस्य सामान्यं समानता येषां तानि भूतसामान्यानि भूतसामान्यानि लक्षणानि येषां ते भूतसामान्यलक्षणाः मलाः ॥ * ॥
अथागन्तुज्वराणां हेतुभेदैर्लक्षणभेदानाह ।
"श्यावास्यता विषकृते तथातीसार एव च ।
भक्तारुचिः पिपासा च तोदश्च सह मूर्च्छया ॥"
विषकृते स्थावरजङ्गमविषभक्षणकृते ज्वरे । श्यावं मुखादुचितः श्यामो वर्णः श्यावकर्णो वा । अतीसारः स्थावरविषेणैव तस्याधोगामित्वात् । तोदः स्पर्शविषेणैव यथा ॥ *
"ओषधीगन्धजे मूर्च्छा शिरोरुग्वमथुस्तथा ।
कामजे चित्तविभ्रंशस्तन्द्रालस्यमरोचकम् ॥
हृदये वेदना चास्य गात्रञ्च परिशुष्यति ॥"
कामजे यमौदिश्रितकान्ताद्यप्राप्तिनिमित्तके ज्वरे । चकारात् वाग्भटोक्तान्यपि लक्षणानि बोद्धव्यानि । तानि यथा,—
"कामाद्भ्रमोऽरुचिर्दाहो ह्रीनिद्राधीधृतिक्षयः ।
भयात् प्रलापः शोकाच्च भवेत् कोपाच्च वेपथुः ॥"
भयात् भयजे ज्वरे प्रलापः । शोकाच्च चकारेण प्रलाप एवानुकृष्यते । कोपाच्च कोपादपि वेपथुर्भवति ॥ * ॥ ननु वेपथुर्वातस्य धर्म्मः तत् कथं कोपजे ज्वरे वेपथुः । यत उक्तम् । क्रोधात् पित्तमिति । उच्यते ।
"एकः प्रकुपितो दोषः सर्व्वानपि कोपयेत् ॥"
इति वचनात् पित्तकोपितवातजन्य एवायं वेपथुः ॥ * ॥ किञ्च क्रोधाद्वायुरपि भवति । यत उक्तं विदेहेन । क्रोधशोकौ स्पृशेतां चेत् पित्तरक्तमकोपनाविति । यत उक्तम् ।
"भूताभिषङ्गादुद्वेगो हास्यं रोदनकम्पने ।
केचित्तु ताभिषङ्गोत्थं ब्रुवते विषमज्वरम् ॥"
भूताभिषङ्गोत्थो विषमज्वरो भवति । कदाचिदपि वेगवान् कदाचिन्मन्दवेग इत्यर्थः ।
'अति दाराभिगमनाभ्यां मोहतृष्णा च जायते ॥"
शस्त्रा चेति चकारेण शरीरसादादि वाग्भटोक्तञ्च बोद्धव्यम् । तद्यथा,—
"शस्त्राभिघातादिभिरामैर्दुःखमाचरन् नाशयेत् ।
पूर्व्वं मरुतोऽसौ देहगतो विस्फोटविभ्रमे ।
तदाद्यवस्थादाग्य प्रथमं वहति ज्वर इति ॥"
अथ तेषां चिकित्सा ।
"आगन्तुजे ज्वरे नैव वरं कुर्व्वीत लङ्घनम् ॥"
तथा च वाग्भटः ।
"शुद्धवातक्षयागन्तुजीर्णज्वरिषु लङ्घनम् ॥"
नेष्यते इति शेषः । अन्यच्च ।

"तद्वन्न हितं कामशोकभयाभिघातजे ।
भयशोकाभिषङ्गक्रोधजन्यैश्च क्षते ज्वरे ॥
किन्तु शीतक्रिये तत्र स्यात्तु मांसरसौदनम् ॥
अभिघातज्वरे युञ्ज्यात् क्रियामुष्णविवर्जिताम् ॥
कषायं मधुरं स्निग्धं यथादोषमथापि वा ।
अभिघातज्वरो नश्येत् पानाभ्यङ्गेन सर्पिषः ॥
रक्तावसेकैर्मेध्यैश्च तथा मांसरसौदनैः ॥"
सेकैर्मोक्षाय दिने ॥ * ॥
'साधयन्त्रसमाश्रयभङ्गभग्नक्षतान् ।
ज्वराननुपाल्येन पूर्ब्बं क्षीरमांसरसौदनैः ॥"
वधकाइन कचादिवधो वा । भग्नान्वैरभिरादिक । भग्नो इत्यादिना पतनम् ॥ * ॥
"अभ्यङ्गान्तेषु चाभ्यङ्गं दिवास्वप्नं च वारयेत् ।
ओषधीगन्धविषजौ विषपित्तप्रसाधनैः ।
जयेत् कषायैर्मतिमान् सर्व्वगन्धकृतैर्भिषक् ॥"
सर्व्वगन्धमाह ।
"चातुर्जातककर्पूरकक्कोलागुरुकुङ्कुमम् ।
लवङ्गसहितञ्चैव सर्व्वगन्धं विनिर्दिशेत् ॥ * ॥
क्रोधजे पित्तजे कामे चाम्भः गन्धाकमेव च ।
आश्वासनैरिष्टलाभेन वायोः प्रशमनेन च ॥
हर्षणैश्च शमं यान्ति कामशोकभयज्वराः ।
कामैरपि मनोज्ञैश्च पित्तघ्नैश्चाप्युपक्रमैः ॥
सद्वाक्यैश्च शमं याति ज्वरः क्रोधसमुत्थितः ॥'
कामैः काम्यैः । मनोज्ञैः चित्ताराधिभिः भैषज्यकथनैर्वा ॥ * ॥
"कामात् क्रोधज्वरो नश्येत् क्रोधात् कामज्वरस्तथा ।
पालिताभ्यामुभाभ्याञ्च कामक्रोधज्वरश्च ॥"
पालिताभ्यामुभाभ्यां मनसि निवर्त्तिताभ्यां कामक्रोधाभ्याम् ॥ * ॥
"भूतविद्यासमुद्दिष्टैर्बन्धावेशनताडनैः ।
जयेद्भूताभिषङ्गोत्थं मनःसान्त्वैश्च मानसम् ॥"
ताडनैरित्यस्य स्थाने केचित् पूजनैरिति पठन्ति ।
"ग्रहदेवाया मूलं विधिना कण्ठे निबद्धमपहरति ।
एकाहिकचतुर्थिदिवसभूतज्वरं पुंसाम् ॥
अभिचाराभिशापोत्थौ ज्वरौ होमादिना जयेत् ।
दानस्वस्त्ययनातिथ्यैरुत्पातग्रहदुष्टिजौ ॥"
इत्यागन्तुज्वराधिकारः ॥ * ॥
अथ विषमज्वराधिकारमाह । तत्र विषमज्वरस्य निदानादिचिकित्सापर्य्यन्तं विषमज्वरशब्दे द्रष्टव्यम् ॥ * ॥
अथ जीर्णज्वराधिकारः । तस्य निदानादिकं जीर्णज्वरशब्दे द्रष्टव्यम् ॥ * ॥
अथ दुष्टज्वरविशिष्टज्वरस्य चिकित्सामाह ।
"हरीतकी पिप्पली च नागरं सैन्धवोऽभया ।
एषां चूर्णं यदा खादेत् दुष्टज्वरप्रशान्तये ॥'
इति हरीतक्यादि चूर्णम् ॥ * ॥
"षड्विंशतिसमान्यो वीजपत्रकाथ
दुरालभाकरोदनान् कल्कादिनाम् ।
क्वथितं तद्धनि पिवेत् ज्वरा-
पहरं मतद्युत्पीड़ितं कषायः ॥"
इति दुर्ग्रहाद्यम् ॥ * ॥

"विष भागद्वय दन्तकपर्द्द मरिचभागाष्ट ।
मरिच सद्भागश्च चूर्णं वस्त्रेण शोधयेत् ॥
आर्द्रकस्य रसेनाथ कुर्य्यान्मुद्गनिभां वटीम् ॥
वारिणा वटिकाद्वयं नाम मादव भक्षयेत् ॥
अथ रसो ज्वरे योग्य मासे दुष्टज्वरेऽपि च ।
अजीर्णामानविष्टम्भगुल्मेषु आमवातये ॥"
इति दुष्टज्वरनाशनो रसः ॥ * ॥
"पटोलसुराह्वनिम्बवासक
समागर धान्यकिरातगिल्लकम् ।
कषायमेषां मधुना पिवन्नरो
निवारयेत् दुष्टज्वरमुद्धतम् ॥"
इति पटोलादिक्वाथः ॥ * ॥
"किराततिक्तञ्चिरदन्तपिप्पली
विडङ्गविश्वाकटुरोहिणीरज ।
निहन्ति लीढ़ मधुनातिसत्वर
उद्धतं दुष्टदोषज ज्वरम् ॥"
इति किराततिक्तादिचूर्णम् ॥ * ॥
"भोजनादौ नरैर्भुक्तं शुण्ठीराम्भसोऽन्वितम् ।
कल्कं तु यवस निम्ब नागादश्रोत्रेण चलम् ॥
मद्यार्द्रकयवक्षारौ पीत्वा चोष्णेन वारिणा ।
नानादग्धसद्भूतवारिदोषमपोहति ॥' * ॥
अथ साध्यस्य ज्वरस्य लक्षणमाह ।
"बलवत्स्वपि दोषेषु ज्वरः साध्योऽनुपद्रवः ॥"
ज्वरस्योपद्रवानाह ।
"श्वासमूर्च्छारुचिच्छर्द्दितृष्णातीसारविड्ग्रहाः ।
हिक्काकासाङ्गभेदाश्च ज्वरस्योपद्रवा दश ॥" * ॥
प्रसङ्गादुपद्रवाणां चिकित्सायां विधिमाह ।
"तथातोपद्रवौ व्याधिस्याद्धौ न स्याद्विकित्-
सके ।
व्याधौ शान्ते प्रशाम्यन्ति हि धर्म्मोऽनुपद्रवाः ॥
अतो व्याधिं जयेत् पूर्वं प्रधानात् पूर्वं पश्चादुपद्रवम् ।
भिषगथ कुशलः शीघ्रं जयेत् पूर्वमुपद्रवम् ॥
तेष्वपि प्रबलं प्राग्वाधिदारुणकारिणम् ।
ज्वरव्याधिं जयेत् पुनः । येन यो वा भवहतौ ॥
व्याधिरोगेण वा कर्म्मादुभयोरपि च क्रियाम् ॥"
छद ज्वरे मान्य चिकित्सा ।
"निम्बो पाठा ताम्रपर्णी पटोली
रास्ना मस्ता दुष्कर रोहिणी च ।
धात्रे सटा सैन्धवकाथ तोय
पश्चं त्वचात् विहिन्यात इत्यादि ॥"
निम्बी पत्रोलिका । पाठी कटेदा । तामसनो दुरालभा । मस्ता भार्गी । रोहिको कटुकी । सैन्धवी कारिका । इति इत्यादि [illegible] ॥ * ॥
"मात्रविषमाश्वाय [illegible]
पावनीकटुकारवाविकटुक [illegible] ।
दावामाथटीचाद [illegible]
विद-
बाक्षेत्रग्मदचि [illegible]
इति ॥
[illegible]
[illegible]
[illegible]

किञ्च श्यावलताककालागुरुदन्तमधुरीमाधिवामद
न्यायातश्चमतामयादितमश्व। विरेचनमा-
गमि ।"
विधा घर्तीय । शतद्रम कलम । देवद्रुम देव
दारु । इति द्रव्यगुणप्रकाशः ॥ * ॥
"मधुना शर्कराकटफलकृष्णामञ्जिमं चूर्णम् ।
आमलके सघोर्ये शीढा मीच शत्रौ भवति ॥
वत्रोमलाभिलाषितरोचनप्राप्य मञ्जरे दाघे ।
व्यपहरति चाथाभयमर्जग्रर्यं भाषितं मुनिभिः ॥"
अथ ज्वरे गण्डूषादिचिकित्सा ।
"मार्द्रकस्य रसैर्वेत्य गण्डूषाननावरोधकः ।
मुखस्य प्रयुञ्जीत भ्रमिन्मुखिलोपयै ॥
शीतान्मसाधिवेक सुरभिर्धूप सुगन्धिपुष्पम् ।
मृदुताम्रकलता कोमलकदलीदलशयनं ॥"
अथ ज्वरे अरुचेश्चिकित्सा ।
"अरुचौ तु मञ्जरैरलचके धार्ये यथिमुखे
कवल ।
विभूपमातुलुङ्गोषणकेशरधारणं यत्ने ॥"
अन्यच्च ।
"अरुचौ मातुलुङ्गस्य केशरं साज्यसैन्धवम् ।
धात्रीद्राक्षासितानां वा कल्कमास्ये तु
धारयेत् ॥"
अथ ज्वरे छर्द्दिचिकित्सा ।
"वाया गुडूच्या समधु प्रपीतं
शीतं प्रशान्तिं वमनस्य कुर्यात् ।
विश्वशिवाभ्यां मधुनावलीढा
सचन्दना शर्करयान्विता च ॥"
अथ ज्वरे तृष्णायाश्चिकित्सा ।
"द्रव्यपटवाणपूरककाम्पिल्लमधरे धनुकमैरदनी ।
देवी भवति पिपासामथ दन्तपुटीमुखाम्लग्रा ॥
शीतं मयः क्षौद्रयुतं निपीतं
मातङ्गमाध्वीव तदुद्भवेच ।
गर्गैर्गतथ प्रशमाय यद्वै
दध्याद्रसौद्धवटायमानान् ॥" * ॥
अथ ज्वरे अतीसारस्य चिकित्सा ।
"लघुमोकं सुधाकन्धामारस्तीय मिपर्व वलित ।
मधुरौकन्धोत्थितपर्थं प्रमवति तत पाचयद्धापि च ॥
कनुमादनीवलमकर्षादिवाय
विश्वमरालिमविना वविधा ।
ज्वरातिसार शान्ति पयसि
विश्वमतानतमकमादिवाय ॥"
विश्वमरादिना भूमिम ।
"पाठामृतापर्वटमुस्तकिना-
किरातिक्तैन्द्रयवान् विपाच्य ।
पिबन् ज्वरघ्नं दूषित यमं
ज्वरातिसारान्यपि भूरिमारान् ॥" * ॥
अथ ज्वरे विड्ग्रहस्य चिकित्सा ।
"(ज्व)रादौ वातात् क्षम मुख्यं मादकीमन्यम् ।
मल पर्शजदाम् मीन्यां अ कपर्वितिमि ॥
वज्ञासनपक्षिताअमृतामलकै घृतं नीयम ।
कोमकार विश्वं रक्तादाशैव विरुमह
दाम्बैत् ॥"

अथ ज्वरे हिक्कायाश्चिकित्सा ।
"गौरैव विश्वधरचोत्तिक्तकं
मयैव धूमं विनिहन्ति हिक्काम् ।
कृष्णा शटीदुरा धितया समेता
धूमोऽथवा विहुधमुदक ॥" * ॥
अथ ज्वरे कासस्य चिकित्सा ।
"काशी कषायकषागुल वाविदुमफलं रसः ।
यविद्ग्मैवल विद्याम् मधुना वा प्रयासयम् ॥"
रस मधटम् ।
"पुष्करमूलकटुविकमञ्जीष्टवययावतकार
विकारि ।
मधुशुलिताभिरयं शम्य केस कारदिशु कथ
रोगरस्य ॥" * ॥
अथ ज्वरे दाहस्य चिकित्सा ।
"दाहाधिकारविहितं दाहे कुर्याच्चिकित्सितम् ।
परं ज्वराविरुद्धं यमुक्तो शान्तो ज्वरी मतः ॥"
अथ सुखसाध्यस्य ज्वरस्य लक्षणम् ।
"बलवानल्पदोषो मातामृतादीनाथ मार्दवम् ।
बहिर्लिङ्गस्य निद्रादि सुखसाध्यमेव च ॥"
क्षुधादीनादियन्दैगालक्षाक्षन्यानि यथा
न्माला युद्धागो । तीव्रमादवमत्वता । बहि
र्लिङ्गस्य ज्वरस्य ।
"पर्वाणिरथपाणि वातादौ प्राक्त क्रमात् ।
प्राक्त सुखसाध्यस्तु स्वगुरुरभिलम्बन ॥"
सुरभिर्लक्षणम् ॥ * ॥
अथ कष्टसाध्यस्य ज्वरस्य लक्षणमाह ।
"वैकृतोऽन्य स दुःसाध्यः प्राकृतोऽनिलोद्भवः ॥"
अन्य प्राकृतादन्य वैकृत । * । यद्यपि
ज्वर यमयतो वातादीनां विकृतावस्थापि
प्राधान्यमप्रधानमाह ।
"वर्षासु मारुतो दुष्टः पित्तश्लेष्मान्वितं ज्वरम् ।
कुर्यात् पित्तश्च शरदि तस्य चानुबलः कफः ॥"
तत्र पित्तज्वरस्य चिकित्सामाह ।
"तत्प्रकृत्या विसर्गाच्च तत्र नानशनाद्भयम् ।"
तत्प्रकृत्या तत्र पित्तस्य प्रकृत्या स्वभावेन ।
यत उक्तम् ।
"कथयित हवि भानु ज्वरै तद्वर्ग बहु ॥" इति ।
विसर्गाच्च शरदो विसर्गकालत्वाच्च । यत उक्तम् ।
बलाहकैर्मन्दा विसर्गं कालाकचोपचितबला
प्राणिना भवन्ति जगतः जलवत्वादिति । तत्र
शरदि पित्तज्वरे अनशनाद्भयं न । कफो वसन्ते
तमपि वातपित्तं भवेद्ग । वसन्ते कफज्वरोऽपि
कफप्रकृत्या लङ्घनाद्भयं न भवति । किन्तु
वसन्तस्यादानकालत्वात् निःस्नेहं न कर्त्तव्यम् ।
यत उक्तम् । शिशिरवसन्तग्रीष्मानाहादानकाला
उत्तरायणत्वात् प्राणिनो भवन्ति दुर्बला
बलवत्त्वादिति । यदीदं उक्तम् । यदीह वायुः
प्रधानं स्निग्धोष्णाद्यावश्यकानि । शरदि पित्त
प्रधानं कषायप्रधानम् । वसन्ते श्लेष्मा प्रधानं
यातनिक्तो आयुधानि । तत्र प्रधानस्य भाषा
न्तेन चिकित्सा कर्त्तव्या । का चाप्रधाना
चिकित्सा विधिना । एवं वैकृतोऽपि प्रधा

तस्य भाषान्तेन चिकित्सा कर्त्तव्या । यथा
चोक्तम् ।
"सर्वो यो रसौधान् स्वादुपक्रम्य स वै भवेत् ।
प्रिययोगविरोधिन सन्निपाते तदेव च ॥"
सर्वो दोषद्वयस्य सर्वो । रसौधान् प्रकाश ।
"बलवान्दोषोऽधिको यस्य प्रतापः स्वात् श्रम ।
सन्निपातमूलमन्धो दोषवृद्धोविनिश्चय ॥
बलाबलस्य निद्रादि कष्टसाध्यमेव च ॥"
सर्वोविनिश्चयः पुरोधावपतिः ॥ * ॥
अथासाध्यस्य ज्वरस्य लक्षणमाह ।
"ज्वरः क्षीणस्य शूनस्य गम्भीरो दैर्घ्यरात्रिकः ।
असाध्यो बलवान् यश्च केशसीमन्तकृज्ज्वरः ॥"
दैर्घ्यरात्रिक बहुरात्रानुबन्धी । केशसीमन्तकृत्
प्रभावात् केशेषु सीमन्तं च करोति । * ।
गम्भीरस्य लक्षणमाह ।
"गम्भीरस्तु ज्वरो ज्ञेयो ह्यन्तर्दाहेन तृष्णया ।
आनद्धत्वेन चात्यर्थं श्वासकासोद्गमेन च ॥"
आनद्धत्वेन विबद्धमलत्वेन । * । यानाह
ज्वरेऽपि कर्णमूलशोथस्यासाध्यादिकमाह ।
"ज्वरस्य पूर्वं ज्वरमध्यतो वा
ज्वरान्ततो वा श्रुतिमूलशोथः ।
क्रमादसाध्यः खलु कृच्छ्रसाध्यः
सुखेन साध्यो मुनिभिः प्रदिष्टः ॥" * ॥
अथारिष्टमाह । तत्रारिष्टस्य लक्षणम् ।
"रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।
तल्लक्षणमरिष्टं स्यादिष्टमप्यभिधीयते ॥
दैवमिर्भयुभिर्वाधो वस्तुभिर्वैकृतान्वय ।
ज्वर प्राणान्तकृद्यश्च शीघ्रमिन्द्रियनाशन ॥"
शीघ्रमिन्द्रियनाशन जड्गममाथ एव विकृत्
क्रमादोऽपीन्द्रियाणां चक्षुरादीनां शक्तिं यो
नाशयति ॥ * ॥ अन्यदपारिष्टमाह ।
"विसंज्ञस्ताम्यते यस्तु शेते निपतितोऽपि वा ।
शीतार्दितोऽन्तरुष्णश्च ज्वरेण म्रियते नरः ॥"
विसंज्ञ विगतज्ञान । ताम्यति ग्लायति । शेते
निपतितोऽपि वा अस्थानेऽपि स्वपन् निप-
तित एव तिष्ठति न चोत्थातुं शक्नोति तथा च
शीत एव । शीतार्दितः बहिः । अन्तरुष्ण
अन्तर्दाहवान् ॥ * ॥ अन्यच्च ।
"यो हृष्टरोमा रक्ताक्षो हृदि सङ्घातशूलवान् ।
वक्त्रेण चैवोच्छ्वसिति ज्वरस्तं हन्ति मानवम् ॥"
हृष्टरोमा रोमाञ्चवान् । हृदि सङ्घातशूलवान्
सन्निपातिकशूलवान् । वक्त्रेण चैवोच्छ्वसिति
न तु नासिकया ॥ * ॥ अन्यच्च ।
"हिक्काश्वासतृषायुक्तं मूढं विभ्रान्तलोचनम् ।
सततोच्छ्वासिनं क्षीणं नरं क्षपयति ज्वरः ॥"
सततोच्छ्वासिनं श्वासप्रदीप्तम् ॥ * ॥ अन्यच्च ।
"हतप्रभेन्द्रियं क्षाममरोचकनिपीडितम् ।
गम्भीरतीक्ष्णवेगार्त्तं ज्वरितं परिवर्जयेत् ॥"
हता प्रभा दीप्तिरिन्द्रियाणाम् । अथवा हता प्रभा
प्रतिभा विषयग्रहणशक्तिरिन्द्रियाणि तदाभिमाने च
यानि यस्य तं हतप्रभेन्द्रियम् । क्षामं कोमलं ।
गम्भीरोऽन्तर्वेगार्त्तं गम्भीर उल्वणवेग

तीक्ष्णवेग अतिदुःसहवेग ताभ्यां च्यार्त्त दुःखितम् ॥ ० ॥ अन्यच्च ।
"मद्यं प्रयुञ्जीत च शुक्रक्षयकृते ज्वरे ।
शोषस्य सम्भवो मोक्ष शुक्रस्य तु विशेषतः ॥"
व्याख्यातोऽयं श्लोकः ॥ ० ॥
विषमज्वरस्यादिदमाह ।
"आरम्भाद्विषमो यस्तु यस्य वा दैर्घ्यरात्रिकः ।
क्षीणस्य चातिरूक्षस्य गम्भीरो हन्ति यस्तु तम् ॥"
यस्य आरम्भाद्विषमः प्रथमोत्पत्तेरेव विषमः न तु ज्वरोऽत्पन्नस्य । यस्य दैर्घ्यरात्रिको वा यस्य क्षीणस्यातिरूक्षस्य च गम्भीरो भवति स विषमो दैर्घ्यरात्रिको गम्भीरश्च हन्तीत्यर्थः ॥ इति ज्वराधिकारः ॥ ० ॥ अथ ज्वरातिसाराधिकारः ।
"ज्वरातिसारयोरुक्तं निदानं यत् पृथक् पृथक् ।
तस्माज्ज्वरातिसारस्य निदानं नोदितं पुनः ॥"
अथ ज्वरातिसारस्य चिकित्सामाह ।
"ज्वरातिसारयोरुक्तं भेषजं यत् पृथक् पृथक् ।
न तन्मिलितयोः कार्य्यमन्योन्यं वर्द्धयेत् पुनः ॥"
अयमभिप्रायः । ज्वरघ्नमनुलोमनं भवति । अतीसारघ्नं स्तम्भनं भवति । अतः परस्परविरुद्धत्वात् पृथक् उक्तं भेषजं मिलितयोर्न कार्य्यम् । यत आह ।
"अनुलोमनं ज्वरघ्नं प्रायश्चातिसारकृद्भवति ।
पृथग्गुणमौषधं तज्ज्वरातिसारे विरुद्धमन्योन्यम् ॥
अतस्तौ प्रतिकुर्वीत विशेषोक्तचिकित्सितैः ।
लङ्घनमेकं मुक्त्वा न चान्यदस्तीह भेषजं बलिनः ।
समुत्थितदोषनिचयं तत् पाचयेत् तथा प्रशमयेत् ॥
लङ्घनमुभयोरुक्तं मिलिते कार्य्यं विशेषतस्तदपि ।
उत्पलषष्ठकमिह लाजमण्डादिकं सकलम् ॥"
उत्पलषष्ठकं यथा —
"पृश्निपर्णीबलाबिल्वधनिकानागरोत्पलैः ।
ज्वरातिसारी पेयां वा पिबेत् साम्लां कृतां नरः ॥"
अत्र नागराद्यपेक्षया साम्लत्वम् । अतिसारे पुरीषातिप्रवृत्त्या साम्लत्वं दाडिमरसादिना कर्त्तव्यम् । इत्युत्पलषष्ठकम् ॥ ० ॥
"कृता कलिङ्गत्वक्लामज्जायां मधुसितायुता ।
पीता ज्वरातिसारघ्नं हन्यादन्योन्य नाशनः ॥"
इति कलिङ्गादिक्वाथः ॥ ० ॥
"नागरातिविषामुस्ताभूनिम्बामृतवत्सकैः ।
क्वाथः सर्व्वज्वरहरः सर्व्वातीसारनाशनः ॥"
इति नागरादिक्वाथः ॥ ० ॥
"गुडूच्यतिविषाधान्यमुस्ताबिल्वबालकैः ।
पाठाभूनिम्बकुटजचन्दनोशीरपद्मकैः ।
पिबेत् कषायं शीतं वा ज्वरातीसारशान्तये ।
हल्लासारोचकच्छर्दितृष्णादाहनिवारणः ॥"
इति गुडूच्यादिक्वाथः ॥ ० ॥
"उत्पलं दाडिमत्वक् च पद्मकेशरमेव च ।
पिबेत्तण्डुलतोयेन ज्वरातीसारनाशनम् ॥"
इत्युत्पलादिचूर्णम् ॥ ० ॥
"बिल्वशक्राह्वयमाद्रुपाठापिप्पलीनागरैः ।
कुटजाम्बुद [illegible] ज्वरातीसारनाशनम् ॥"
इति बिल्वादिक्वाथः ॥ ० ॥
"नागरातिविषाविश्वागुडूचीबिल्ववत्सकैः ।
कषायं पाचनं प्रोक्तं ज्वरातीसारनाशनम् ॥"
इति नागरादिक्वाथः ॥ ० ॥
"ह्रस्वमूलीकषायेण विश्वामुस्तसमां पिबेत् ।
ज्वरे चैवातिसारे च सशोथे ग्रहणीगदे ॥"
इति ह्रस्वमूलीक्वाथः ॥ ० ॥
इति ज्वरातिसाराधिकारः । इति भावप्रकाशः ॥
ज्वरघ्न, पुं (ज्वरं हन्तीति । हन्+टक ।) गुडूची । वास्तुकम् । इति राजनिर्घण्टः ॥ ज्वरनाशके, त्रि । (यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"ज्वरघ्नं पाचनं बल्यं हृद्यं रुच्यं कषायकम् ॥")
ज्वरघ्नी, स्त्री (ज्वरं हन्ति या । हन्+टक ङीप् च ।) मञ्जिष्ठा । इति राजनिर्घण्टः ॥ ज्वरघ्नी च ॥
ज्वराधि, पुं, (ज्वर एवाधिः । दाहकत्वादस्य तथात्वम् ।) ज्वररूपाधिः । तत्पर्य्यायः । आधिमन्थः २, इति हारावली ॥
ज्वराङ्कुशी, स्त्री (ज्वरमङ्कति विनाशकतया प्राप्नोतीति । अङ्क गतौ+अण् । गौरादित्वात् ङीष् ।) भद्रमुस्तिका । इति राजनिर्घण्टः ॥
ज्वरान्तक, पुं, (ज्वरस्य अन्तको विनाशकः ।) नेपालनिम्बः । आरग्वधः । इति राजनिर्घण्टः ॥ ज्वरघ्नौषधविशेषः । यथा —
"भास्करो गन्धकः शुल्वं देवी विषं हतोऽभ्रकम् ।
शोधितं गगनञ्चैव पुष्पकञ्च महेश्वरम् ।
भूनिम्बादिकषायेण मधुना गुटिका कृता ।
चातुर्थिकं तृतीयञ्च ज्वरं सन्ततकं तथा ।
आमज्वरं भूतकृतं सर्व्वज्वरमपोहति ।
अत्र भास्करः ताम्रम् । शुल्वं रसः । देवी सौराष्ट्रिका । विषं सर्व्वसाधितम् । गगनं अभ्रकम् । पुष्पकं रसाञ्जनम् । महेश्वरं सुवर्णम् । अन्यत् सुगमम् । ताम्रादीनां सम भागचूर्णं भूनिम्बक्वाथेन भावयेत् । भूनिम्ब दशमूलमथापि सर्व्वसमतुल्यानि अष्टभाग परिशिष्टं क्वाथं कृत्वा दिवसं विभाव्य विशोष्य मधुना विमर्द्य चणकरूपं विदध्यात् । ज्वरान्तको रसः ।" इति भैषज्यरत्नावली ॥ ज्वरनाशक च ॥
ज्वरापहा, स्त्री, (ज्वरं अपहन्ति नाशयतीति । अप+हन+ड ।) विल्वपत्री । इति शब्दचन्द्रिका ॥ बेलशुठा इति भाषा ॥ ज्वरनाशके, त्रि ॥
ज्वरारि, पुं (ज्वरस्य अरिः शत्रुर्नाशकत्वात् ।) ज्वरघ्नौषधविशेषः । यथा —
"दरदविषलिराधा सुल्वताभ्रकाख्यौ
सुमरिचितपनाख्यां सर्व्वमेकत्र चोल्वम् ।
त्रिफलिपुरदलोत्थैर्भावयेत् प्रोक्तयत्नैः
त्रिकटुकमयसाजौ रक्तिकेकात् कुर्य्यात् ॥
एकैको भक्षयेदस्य चार्द्रक स्वरसैर्दृतम् ।
हन्यात् सर्व्वं ज्वरं घोरं ज्वरारिः स निगद्यते ।
सर्व्वशूलविनाशी च सर्व्वविषमविनाशकः ॥
[illegible] । दरदः । [illegible]
दिनं भावयित्वा गुञ्जाप्रमाणमात्रं करतल देयम् ।
ज्वरारी रसः ।" इति भैषज्यरत्नावली ॥
ज्वराग्नि, पुं, (ज्वरे अग्निरिवाग्निरिवाशोषणात् ।) ज्वरनाशकौषधविशेषः । यथा,—
"रसं गन्धं सैन्धवञ्च विषं ताम्रसमं भवेत् ।
सर्व्वचूर्णसमं लौहं तत्समं टङ्कणकम् ॥
लौहे च लौहदण्डे च निर्गुण्ड्याः स्वरसेन च ।
मर्द्दयेद्यामकं यत्नात् [illegible] ॥
पर्णेन सह चातयो रसो रक्तिकसम्मितः ।
सर्व्वज्वरहरः श्रेष्ठो ज्वराग्निरिति कीर्त्तितः ॥
कासं श्वासं महाघोरं विषमाख्यं ज्वरं जयेत् ।
वातश्लेष्मं प्रबलं दाहं ज्वरदोषं शिरोग्रहम् ॥
मस्तुलोदरशोथघ्न विनाशयेत् ।
ज्वराग्नी रसः ।" इति भैषज्यरत्नावली ॥
ज्वरित, त्रि, (ज्वरः सञ्जातोऽस्य । ज्वर + "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५ । २ । ३६ । इति इतच् ।) ज्वरी । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"मुद्गान् मसूरांश्चणकान् कुलत्थान् समकुष्ठकान् ।
आहारकाले यूषार्थं ज्वरिताय प्रदापयेत् ॥"
यथाच,—
"ज्वरितो हितमश्नीयात् यद्यप्यस्यारुचिर्भवेत् ।
अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽथवा ॥"
इति वैद्यकचक्रपाणिसंग्रहे ज्वराधिकारे ॥)
ज्वरी, [न्] त्रि, (ज्वरोऽस्त्यस्येति । ज्वर+इनि ।) ज्वरयुक्तः । (यथा सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"गुर्व्वभिष्यन्द्यकाले वा ज्वरी नाद्यात् कथञ्चन ।")
ज्वल, अ म चले । दीप्तौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक सेट ।) चकारयुक्तः । च, ज्वाल ज्वलः । म, प्रज्वलयति । मित्त्वेऽपि णौ ज्वलह्वलह्मल इत्यादिना वैकल्पिक अनुपसर्गात् मोपधत्वाच्च मित्त्वं पक्षे । ज्वालयति ज्वलयति प्रज्वलयति । लिट दीप्तिः । ज्वलति वह्निः । इति दुर्गादासः ॥ (यथाच कथितम् ।
"जागर्त्ति लोको ज्वलति प्रदीपः
सखीजनः पश्यति कौतुकेन ।
मुहूर्त्तमात्रं कुरु नाथ । धैर्य्यम्
बुभुक्षितः किं द्विकरेण भुङ्क्ते ॥")
ज्वल, पुं ज्वाला । दीप्तिः । (ज्वलतीति । ज्वल दीप्तौ+अच् ।) दीप्तिविशिष्टे त्रि । इति मुग्धबोधम् ॥
ज्वलका, स्त्री, (ज्वलतीति । ज्वल+बाहुलकात् वुन् ।) अग्निशिखा । इति हेमचन्द्रः ॥
ज्वलत, त्रि (ज्वल+शतृ ।) दीप्तिमत् । तत्पर्य्यायः । भासत् १ प्रज्वलितम् २ भ्राजमानम् ३ प्रज्वलायमानम् ४ अर्चि ५ दीप्त ६ तप्त ७ तैजस ८ दहन ९ शुचि १० प्रकाशि ११ । इत्येकादश ज्वलनस्य नामधेयानि ॥ ० ॥ भास्वी १ भासुरि २ भास्वानि ३ दीप्तिवर्षी ४ दीप्ति ५ भासुरी ६ भस्मी ७ राजती ८ ज्वालिनी ९

दीपनै १० शुभम् ११ । इत्येकादश ज्वलति-कर्म्माणः । इति वैदनिघण्टौ १ अध्यायः ॥

ज्वलन, पुं, (ज्वलतीति । ज्वल + "जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः ।" ३ । २ । १५० । इति युच् ।) अग्निः । (यथा, कथासरित्सागरे । १ । ४ ।
"यत्र चित्रपतत्पतङ्गज्वालावलीमूलभ
स्फुति ।
जीयति मानसजन्मा शशिमुखमदनकान्ति
पीयूषे ॥",
चित्रकवृक्षः । इत्यमरः । १ । १ । ५६ ॥ (ज्वल + भावे ल्युट् ।) दहने क्ली ॥

ज्वलनाश्मा, [न्] पुं (ज्वलन सूर्य्यदीप्ति-विशिष्टः अश्मा प्रस्तरः । नित्यकर्म्मधारयः ।) सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥

ज्वलित, त्रि, (ज्वल + क्तः ।) दग्धः । उज्ज्वलः । इति मेदिनी । ते, ११ ॥ (प्रदीप्तः । यथा, महाभारते । ६ । १८ । ६ ।
"काञ्चनाङ्गदिनो रेजुर्ज्वलिता इव पावकाः ॥")

ज्वलिनी, स्त्री (ज्वलो दीप्तिरस्त्यस्याः । ज्वल + इनि + ङीप् ।) मूर्व्वालता । इति राजनिर्घण्टः ॥

ज्वाल, पुं स्त्री (ज्वलतीति । ज्वल + "ज्वलितिकसन्तेभ्यो णः ।" ३ । १ । १४० । इति णः । पक्षे स्त्रियां टाप् ।) अग्निशिखा । इत्यमरः । १ । १ । ५६ ॥ (यथा, महाभारते । ३ । २१८ । ३ ।
"भीमो ज्वालैर्निकाशैरुपरैषोऽथ वीर्य्यवान् ॥")
दग्धविशिष्टे त्रि । इति मुग्धबोधम् ॥

ज्वाला, स्त्री दग्धान्नम् । इति शब्दचन्द्रिका ॥ (ज्वलतीति । ज्वल + ण + टाप् ।) अग्निशिखा । इत्यमरः । १ । १ । ५६ ॥ (यथा, विष्णुपुराणे । १ । १० । २४ ।
"धूम्रयतामस्याग्नि ज्वालामालाकुलैर्मुखैः ॥",)
तापश्च । (तक्षककन्या कन्याश्च पत्नी । यथा महाभारते । १ । ९५ । २५ ।
"ऋक्षः खलु तक्षकदुहितरमुपयेमे ज्वालां नाम । तस्यां पुत्रं मतिनारं नामोत्पादयामास ॥")

ज्वालागर्द्दभक, पुं, (ज्वालागर्द्दभ + स्वार्थे कन् । तत्र दाहवदार्त्तिमात् तथात्वम् ।) रोगविशेषः । तत्पर्य्यायः । ज्वालागर्द्दभकः १ ज्वाला-गर्द्दभः २ अहिमर्द्दः ३ । इति राजनिर्घण्टः ॥ अस्य लक्षणं जालगर्द्दभशब्दे द्रष्टव्यम् ॥

ज्वालाजिह्व, पुं (ज्वाला शिखा एव जिह्वा यस्य ।) अग्निः । इति हेमचन्द्रः । ४ । १६४ ॥ (स्कन्दस्यानुचरविशेषः । यथा, महाभारते । ९ । ४५ । ५८ ।
"ज्वालाजिह्वं करालञ्च सितकेशो चटीं कृश ॥"
दानवविशेषः । स तु यदिराजस्य सेनानी-रिति । यथा हरिवंशे । २४९ । ६ ।
"कराली ज्वालजिह्वश्च शक्रात् प्रतलीयत ॥")

ज्वालामुखी, स्त्री (ज्वालैव मुखं यस्याः तत्रत्यम् । नगरकोट्टप्रदेशे ज्वालाभिरेव पूजार्थिर्भवति देवीस्थानोऽसाधारणस्थानम् ।) पीठस्थानविशेषः । तत्र भगवत्या जिह्वा पतिता । तत्र अम्बिका देवी । उन्मत्तनामको भैरवश्च । इति पीठमाला ॥ यथाच ।
"ज्वालामुख्यां महाजिह्वा देव उन्मत्तभैरवः ।
अम्बिका सिद्धिदा नाम्नी स्तनं जालन्धरे मम ॥"
इति तन्त्रचूडामणौ पीठनिर्णयः ॥
विद्याविशेषः । यथा,—
"ज्वालामुखीक्रमं वक्ष्ये या पूज्या सर्व्वत-
स्तुभिः ॥
नित्यागता मदनान्तरा महागौरी तथापि च ।
कमला श्रीभारती च भारती महेश्वरी ।
ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डेति च पूजयेत् ।
विजया चाजिता चैव मोहिनी चापराजिता ॥
स्तम्भनी जृम्भणी पूज्या कालिका मधुराहृता ।
ज्वालामुखीक्रमं पूज्य विद्यासिद्धिर्भवेत् ॥"
इति गारुडे ज्वालामुखीविद्या २०४ अध्यायः ।

झ

झ, झकारः । स व्यञ्जनवर्णः चवर्गचतुर्थ-वर्णश्च । अस्योच्चारणस्थानं तालु । इति व्याकरणम् ॥ (यदुक्तं शिक्षायाम् । १७ ।
"कुहुरावेचुयशास्तालव्या ओष्ठजावुपू ॥")
अस्य स्वरूपं यथा,—
"विसर्गाकृतिगा शोभा च चवर्गस्य यथा तथा ॥"
इति प्रपञ्चसारः ॥
(वर्णोद्धारतन्त्रम्) अस्य वेदनप्रकारो यथा,
"त्रिकोणकुण्डलीरूपा वामरेखापयोगतः ।
क्रमप्रकारा तिरश्चीन चन्द्रस्यार्द्धाय प्रिये ॥
तस्य ऊर्द्धगता मात्रा शक्तिरूपात्परश्रितः ।
जगन्माता तदीशानी मध्ये नारायणी मता ॥"
अस्य ध्यानं यथा, वर्णोद्धारतन्त्रे ।
"ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने ॥
घनश्यामतनुं रक्ताम्बरविभूषिताम् ॥
रक्तचन्दनलिप्ताङ्गीं रक्तमाल्यविभूषिताम् ।
चतुर्भुजां देवीं रत्नहारोज्ज्वलां पराम् ॥
ध्यात्वा ब्रह्मरूपां तां तन्मन्त्रं दशधा जपेत् ॥"
अस्य नामानि यथा —
"झकारः परमेशानि ! कुब्जिनी मोक्षदायिनी ।
रक्तविद्युल्लताकारं सदा त्रिगुणसंयुतम् ॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं प्रिये ।
त्रिबिन्दुसहितं वर्णं त्रिशक्तिसहितं सदा ॥"
इति कामधेनुतन्त्रम् ॥
तस्य ११ पर्य्यायाः नामानि यथा,—
"झो झङ्कारी गुहो भस्माङ्को बकः सङ्कुलः ।
अजेशो द्राविणी नादः पाशो जिह्वा मनः
स्थितिः ॥
विरावेश्वा महेशश्च करभो वामदेव गुणः ।
दीर्घबाहुश्च स्वयम्भुः पूर्णमासः ॥
दुर्मुखो मद आकर्षः त्रिधा कुम्भतस्तथा ।
कम्बुकण्ठनिभा बाला चतुर्मुखदन्तकैष्टक ।
दण्डशाखाशाखाद्य पादाका यज्ञ हार ॥"
इति वर्णाभिधानम् ॥

झ, पुं (झटति सङ्घीभवतीति । झट सङ्घाते + बाहुलकात् ड ।) झञ्झानिलः । बृहस्पतिः । इति शब्दरत्नावली ॥ झङ्कारः । दुरधुरः । दैत्यराजः । ध्वनिः । तारकासुरः । इति मेदिनी । झे, १ ॥ नष्टे, त्रि । इति शब्दरत्नावली ॥

झगझगायमान, त्रि, (झगझगा इत्याचरतीति । झगझगा + "कर्त्तुः क्यङ् सलोपश्च ।" ३ । १ । ११ । इति क्यङ् शानच् च ।) चाकचिक्ययुक्तः । झकझकिया इति भाषा । यथा,—
"मयूरवरगामिनीं शरदमृतवर्णोत्कटां
रत्नखचितपरिष्क्रियां विहितहासिदन्तोज्ज्वलाम् ।
प्रभाविकरराजिभिर्झगझगायमानाङ्गकां
नमामि गुहजननीं निजमतसुभिक्षाप्रिमाम् ॥"
इति दशावतारे चरितं माहात्म्याध्यायः ॥

झङ्कार, पुं, (झम् + भावे घञ् कारः । झमित्यस्य शब्दस्य कारः करणं यत्र ।) भ्रमरादिशब्दः । यथाह धनञ्जयः ।
"शारश्री मधुपैर्झङ्कारणसो भङ्कारश्चोला-
स्पष्ट ॥"
(यथाच नैषधे । १ । ४२ ।
"अरण्यानीप्राणधरे दूर तमधि प्रियमोहिनी ।
धन्यानां विप्रसि स्वीये शौनकस्कारिका शुभा ॥")

झञ्झा, स्त्री, (झमिति अव्यक्तशब्देन झटति सङ्घीभवतीति । झट + बाहुलकात् क । ततष्टाप् ।) ध्वनिविशेषः । जलकणवर्षणम् । इति शब्दरत्नावली ॥

झञ्झानिल, पुं, (झञ्झायुक्तोऽनिलः ।) प्रावृष्यवातः । झञ्झावातः । इति त्रिकाण्डशेषः ॥

झञ्झावात, पुं, (झञ्झाभियुक्तो वातः ।) सजलवायुः । इति पद्मपुराणः ॥ (यथा, ब्रह्मवैवर्त्ते गणपतिखण्डे ११ अध्याये ।
"झञ्झावातेन रक्षन्ति वाताच्च दयापालनम् ॥")

झट, संहतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अक-सेट् ।) झटति केशः । परस्परं सम्बन्धं संहतिः । इति दुर्गादासः ॥

झटि, पुं, (झटति परस्परं संबद्धो भवतीति । झट संहतौ + "सर्व्वधातुभ्य इन् ।" उणां ४ । ११७ । इति इन् ।) क्षुद्रवृक्षः । इत्युणादिकोषः ॥

झण्टि, च इनम् । द्वीपम् । तत्पर्य्यायः । शाल् २ वल्लरी ३ पादपः ४ शाल ५ संज्ञा ६ । इत्यमरः । ३ । ३ । ५ ॥ (यथा, भट्टौ । ७ । १११ ।
"नाशिष्ठान्निमापश्चानार्ये विषु विवेकायाः ।
विवर्तितं च दाशोऽप्य मत्वैव काय
कपिः ॥")

झण्टी, च (झण्टीति इति शब्दस्य प्राकृतभाषायां झण्टीति इति निरुक्तम् ।) झाटिका । इति प्राकृत भाषायां झाटिका ॥

झणत्कारः, पुं (त्त + भावे घञ् कारः । झणदित्यस्य शब्दस्य कार करणं यत्र ।) अनुकरणशब्दः । कङ्कणादिध्वनिः । यथा, कालिदासः ।
"उद्वेलद्भुजवल्लिकङ्कणझणत्कारः क्षणं वाम्यताम् ।"

झम, उ भक्षे । इति कविकल्पद्रुमः । (भ्वा-पर-सक-सेट । उदित्त्वात् क्त्वावेट ।) उ झमित्वा झान्त्वा । इति दुर्गादासः ॥

झम्प, पुं (झम्फ पृषोदरादित्वात् साधुः ।) सम्पातपतनम् । झम्फः । इति जटाधरः ॥
(यथा महावीरचरिते । [ता ।")
"पुच्छास्फोटज्वलत् प्रसृमरविवरे पातालझम्पाण

झम्पारुः पुं, (झम्प लम्फ आरातिः आददातीति । आ + रा + बाहुलकात् डु ।) वानरः । इति शब्दरत्नावली ॥

झम्पाकी [न्] पुं, (झम्पेन सम्पातेन अकतीति । अक + णिनि । मनुष्यादियानस्थवाचे झम्पदानपूर्वकपतनादस्य तथात्वम् ।) मनुष्यस्य पर्यायः । इति जटाधरः ॥

झम्पी, [न्] पुं, (झम्पो लम्फो ऽस्त्यस्य । झम्प + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनि ।) वानरः । इति शब्दरत्नावली ॥

झरः, पुं, (झौर्य्यति जीर्णीभवति पतनादिस्थानमनेनेति । भृ + "ऋदोरप् ।" ३ । ३ । ५७ । इत्यप् ।) निर्झरः । पर्व्वतावतीर्णजलप्रवाहः । इत्यमरः । २ । ३ । ५ ॥ (समूहः । यथा, नैषधे ।२।६२ ।
　　"कथमि निजपितुरदृष्ट
　　निशु चक्रमिकाशितां मुखः ।
　　स तदुपकुर्वी भवन् प्रभा-
　　झरचक्रभ्रमिमातनोति यत् ॥"
'स कनक प्रभाभ्येव कान्तिसमूहेन चक्रभ्रमिं कुलालचक्रभ्रममातनोति जनयति । यद्वा प्रभाझरे कान्तिप्रवाहे चक्रभ्रमिं चक्रवाकभ्रान्तिमातनोति ।" इति तट्टीका ।)

झरा, स्त्री, (झर + टाप् ।) झरः । इत्यमरटीकायां भरतः ॥

झरी, स्त्री, (झर + ङीष् ।) झरः । इत्यमरटीकायां भरतः ॥

झर्झ, श उक्तौ । भर्त्से । इति कविकल्पद्रुमः ॥ (तुदा पर-सक-सेट ।) रेफोपधः । श, झर्झती झर्झन्ती । मूर्द्धन्यमध्योऽयमित्यन्ये तुदादिपाठपक्षम्भावनामात्रोमयोरिति मूर्द्धो निभाषा घीपेपूपारकमित्यु । भर्त्सनमवच्छन्दम् । इति दुर्गादासः ॥

झर्छ, श उक्तौ । भर्त्से । इति कविकल्पद्रुमः ॥ (तुदा परं सक सेट ।) श झर्छती झर्छन्ती । भर्त्सनमवच्छन्दम् । इति दुर्गादासः ॥

झर्म, श उक्तौ । भर्त्से । इति कविकल्पद्रुमः ॥ (तुदा पर-सक सेट ।) श, झर्मती झर्मन्ती । भर्त्सनमवच्छन्दम् । इति दुर्गादासः ॥

झर्झरः, पुं (झर्झ इत्यव्यक्तशब्दं राणोति । रा + क । यद्वा झर्झति दन्दाग्नि इति । झर्झ + बहुलवचनात् अरः ।) वाद्यविशेषः । इत्यमरः । १ । ७ । ८ ॥ चर्मपुटाच्छादितकाष्ठयानम् । इति तट्टीकायां सारसुन्दरी ॥ करड इति ख्यातः ।
"डिण्डिमो डिण्डिरी मोली झर्झरः पटहः स्मृतः ।"
　　इति भरतधृतवैकुण्ठः ॥
तत्पर्यायः । झल्लकी २ झल्ली ३ झल्लरी ४ झर्झरी ५ । इति शब्दरत्नावली ॥ (यथा, हठयोगप्रदीपिकायाम् । ४ । ८५ ।
"आदौ जलधिजीमूतभेरीझर्झरसम्भवा ॥"
झर्झति निन्दति इति । झर्झ भर्त्से + अरः ।) कलियुगम् । (झर्झरो झर्झरशब्द इवास्त्यस्येति । अच् ।) नदभेदः । इति मेदिनी । रे, १५८ । (हिरण्याक्षपुत्रविशेषः । यथा, हरिवंशे । १ । ७८ ।
"हिरण्याक्षसुता पञ्च विद्वांसः सुमहाबलाः ।
झर्झरः शकुनिश्चैव भूतसन्तापनस्तथा ।
महानाभश्च विक्रान्तः कालनाभस्तथैव च ॥")

झर्झरकः, पुं, (झर्झर + स्वार्थे कन् ।) कलियुगम् । इति त्रिकाण्डशेषः ॥

झर्झरा, स्त्री, (झर्झति निन्दति इति । झर्झ भर्त्से + बाहुलकात् अरः । ततष्टाप् ।) वेश्या । इति त्रिकाण्डशेषः ॥ (जलशब्दविशेषः । यथा काशीखण्डे । २६ । ६८ । [वती ॥")
"निर्झरीझरसन्द्रा झाङ्कारकारिणी झर्झरा

झर्झरी, स्त्री, (झर्झर + गौरादित्वात् ङीष् ।) झर्झरवाद्यम् । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । २३० । २ ।
"गोमुखाडम्बराश्चान्ये भेरीणां सुरजः सह ।
झर्झरीडिण्डिमानाञ्च वध्यन्त महास्वनाः ॥")

झर्झरीकः, पुं, (झर्झरीति । झर्झ + "चञ्चरीकादयश्च ।" उणा । ४ । २० । इति ईकन् प्रत्ययेन निपातनात् साधुः ।) शरीरम् । इत्युणादिकोषः ॥ देशः । चित्रम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

झलझला, स्त्री, (झलझल इत्यव्यक्तशब्दो ऽस्त्यस्याः । अच् ।) हस्तिकर्णास्फालनम् । इति त्रिकाण्डशेषः ॥

झलरी, स्त्री, (झल्लरी । पृषोदरादित्वात् लत्वम् ।) हुडुकः । झर्झरवाद्यम् । वालचक्रम् । विपत्पाकम् । इति मेदिनी । रे, १५६ ॥

झला, स्त्री, कन्या । आतपस्तोमः । इति मेदिनी । ले २ ॥

झल्लः, पुं वर्णसङ्करजातिविशेषः । इति जटाधरः । स व्रात्यात् क्षत्रात् सवर्णायां जातः । (यथा, मनुः । १० । २२ ।
"झल्लो मल्लश्च राजन्यात् व्रात्यान्निच्छिविरेव च ॥")
भण्डः । इति महाभारतम् । भाँड इति भाषा ॥ (स्त्री, झल्ल इवार्थम् ।)

झल्लकं, क्ली, (झल्ल + स्वार्थे कन् ।) कांस्यनिर्मितकरतालकम् । यथा तिथ्यादितत्त्वे ।
"दिवाकरे झल्लकञ्च सर्व्वकाले च शङ्खकम् ।
दुर्गागारे वंशिवाद्यं मधुरीं च न वादयेत् ॥"

झल्लकण्ठः, पुं, (झल्लो झल्लकशब्द इव कण्ठः कण्ठस्वरो यस्य ।) पारावतः । इति हारावली । ८७ ॥

झल्लरी, स्त्री, (झल्ल झल्लकशब्दं रातीति । रा + क । स्त्रियां ङीष् ।) हुडुकः । झर्झरवाद्यम् । (यथा काशीखण्डे । २६ । ६८ ।
"झल्लरीवाद्यकुशला झलझलाजलाकुला ॥")
वालचक्रम् । बालकोति ख्यातम् । इति मेदिनी । रे, १५६ ॥ शुद्धम् । खेदः । इति शब्दचन्द्रिका ॥

झल्लिका, स्त्री, (झल्लीव कायतीति । कै + क । पृषोदरादित्वात् साधुः ।) उद्वर्त्तनपटः । द्योतः । इति मेदिनी । के, ८६ ॥ उद्वर्त्तनमलम् । इति शब्दरत्नावली ॥

झल्ली, स्त्री, (झल्ल + ङीष् ।) झर्झरवाद्यम् । इति शब्दरत्नावली ॥

झल्लोलः, पुं, (झल्ल क्विप् ताडया धा लोलः । तत पृषोदरादित्वात् साधुः ।) तर्कुशाणकः इति हारावली । २१३ ॥ टेकुयार चाटुल इति भाषा ॥

झष, वधे । इति कविकल्पद्रुमः ॥ (भ्वा परं सक सेट ।) मात्वङ्गयरी । झषति । षड्गयरी चाय मिति केचित् । झूषति । इति दुर्गादासः ॥

झष ञ यहे । पिधाने । इति कविकल्पद्रुमः ॥ (भ्वा उभ सक-सेट ।) ञ, झषति झषते वस्त्रं जनो गृह्णाति परिदधाति वेत्यर्थः । चन्द्रम घरादिरयमिति पूर्णचन्द्रभिषोपदरामः । झषति झषते । इति दुर्गादासः ॥

झषं, क्ली, (झष वधे + अच् ।) विपिनम् । इति शब्दचन्द्रिका ॥

झषः, पुं (झषति वधति अपनयते शाम्यते वा । झष + "गोचरसञ्चर-" ३ । ३ । ११९ । इति घ ।) मत्स्यः । इत्यमरः । १ । १० । १७ ॥ (यथा, भगवद्गीतायाम् । १० । ३१ ।
"झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥"
मकरः । यथा, रामायणे । ४ । ११४ । ३ ।
"मीनमीनझषपाठा जलं गिरिनदीमिव ॥")
तापः । वनम् । इति मेदिनी । पे, १५ ॥ मीनराशिः । यथा —
"शाडमग्नाडपि मेषे यसाड झषे हयी ॥"
　　इति समयप्रदीपः ॥

झषकेतनः, पुं (झषो मकरो मीनो वा केतनं केतु र्यस्य ।) कन्दर्पः । इति हलायुधः ॥

झषा, स्त्री (झष् + अच् ततष्टाप् ।) नागबला । इत्यमरः । २ । ४ । ११० ॥

झषाङ्कः पुं, (झषः अङ्को यस्य ।) अनिरुद्धः । इति हेमचन्द्रः ॥ (कन्दर्पः । यथा नैषध चरिते । ११ । ७ ।
　　"मनुजता किल झषाङ्कदुर्लभम्
　　अवमानयति सदयतमापदाम् ॥")

झषाशनः, पुं (झषान् मत्स्यान् अश्नातीति । अश् भोजने + कर्त्तरि ल्युः ।) शिशुमारः । इति त्रिकाण्डशेषः ॥

झषोदरी, स्त्री, (झषो मत्स्य इव उदरं उत्पत्तिस्थानमस्याः। मत्स्य उदरं उत्पत्तिस्थानं यस्याः सा इति व्यासोत्पत्तिवाक्योक्तेः।) व्यासमाता। इति त्रिकाण्डशेषः॥

झाबुक स्त्री, (झाम् इत्यव्यक्तशब्देन शब्दं करोति यत्र ।) वनजातझाटविशेषः। इति धरणिः॥

झाट, पुं, (झट+घञ्।) निकुञ्जः। कान्तारः। यथा,—"झाटीर्णं मार्जनम्।" इति मेदिनी। टे, १६।

झाटल पुं, (झाटं लातीति। ला+क।) घण्टा-पाटलिः। इत्यमरः। २। ४। ६८॥

झाटा, स्त्री (झट+णिच्+अच् ततष्टाप् च।) भूम्यामलकी। इत्यमरः। यूथीपुष्प। इति शब्दचन्द्रिका॥

झाटिका, स्त्री, (झाटा+स्वार्थे कन्। टापि अत इत्वम्।) भूम्यामलकी। इति शब्दचन्द्रिका॥

झामक, स्त्री, (झाम्+ण्वुल्।) इष्टका। इति हारावली। २१४॥ झामा इति भाषा॥

झामर, पुं, (झाम राति। रा+क।) तर्कुशाण। इति शब्दरत्नावली। टेकुयार शाण इति भाषा॥

झार्झर, पुं स्त्री, (झर्झरवादनं शिल्पमस्य। "शिल्पम्" इत्यमरः। ४।४।५५। इति ष्णः।) झार्झरिकः। झर्झरवादकः। इति व्याकरणम्॥

झालि, स्त्री पानकविशेषः। झालि इति ख्याता। यथा, भावप्रकाशे पूर्वखण्डे २ भागे।
"आम्रमामकं पिष्टं राजिकालवणान्वितम्।
भृष्टं हिङ्गुयुतं पूतं घोलितं झालिरुच्यते॥
झालिश्चरति जिह्वायाः कुण्ठत्वं कण्ठशोधिनी।
मन्दं मन्दं निपीता वा रोचनी वह्निबोधिनी॥"
(झालिः झालिः इति पाठोऽपि कुत्रचित् दृश्यते॥)

झावु, पुं, (झा इति शब्दं वाति वाति। वा+कु।) वृक्षविशेषः। इति शब्दरत्नावली। झाउ इति भाषा॥

झावुक, पुं (झावुरेव। स्वार्थे कन्।) वृक्षविशेष। झाउ इति भाषा। तत्पर्यायः। पिचुल १ झावु २ झाबू ३। इति शब्दरत्नावली॥

झिङ्गाक, स्त्री, (झिङ्ग+आकन्। पृषोदरात् साधुः।) शाकविशेषः। झिङ्गा इति भाषा। अस्य गुणाः। शिशिरत्वम्। मधुरत्वम्। श्वास वातपित्तापहारित्वञ्च। इति राजवल्लभः॥

झिङ्गिनी, स्त्री, (झिम+झिमि। पृषोदरात् साधुः। ङीष् च।) झिङ्गिनीवृक्षः। इति भावप्रकाशः। उल्का। इति शब्दरत्नावली॥

झिङ्गी स्त्री, (झिम्+अच्। ङीष्। पृषोदरात् साधुः।) झिङ्गिकाष्ठम्। इति भावप्रकाशः॥

झिञ्झिमः, पुं, (झिम् इत्यव्यक्तशब्दं भ्रमति अपि इत्यादीन् इत्यत्राह। (भ्रम अर्थे+अच्। पृषोदरादित्वात् साधुः।) दावाग्निः। इति हारावली। २१५॥

झिञ्झिरिष्टा स्त्री, चुपर्णी। तत्पर्यायः। वत्सा २ मौनदुग्धा ३। झिञ्झिरा ४ रोमाञ्चपत्रा ५ त्वचा ६। अस्या गुणाः। कटुत्वम्। शीतलत्वम्। कषायत्वम्। रक्तातिसारनाशित्वम्। रुच्यत्वम्। वमनकारित्वम्। मधुरत्वम्। मधुमेहोदरदोषशमनत्वञ्च। इति राजनिघण्टुः॥

झिल्लरी, स्त्री, (झिम् इत्यव्यक्तशब्देनोपलक्षिता। अच् ततो ङीष् च।) झिल्ली। यथा,—
"झिल्लीरवाकलमधुरा कूजन्ती मधुरावलिः।"
इत्यागमः॥

झिण्टी, स्त्री, (झिमिति शब्दं टलतीति। टल+अच्। ङीष् च पृषोदरात् साधुः।) पुष्पवृक्षविशेषः। झाँटी इति भाषा। तत्पर्यायः। सैरेयक १। इत्यमरः। २। ४। ७४॥ कटसरैया २ सैरेयक ३ झिण्टिका ४। इति राजनिर्घण्टः॥ नीलझिण्टी पर्यायः। बाणा १ दासी २ आर्त्तगल ३। इत्यमरः। २। ४। ७३॥ नील ४ आर्त्तगल ५ इति सुभूतिः॥ वज्रपुष्प ६ नीलकुरण्टक ७। इति रत्नमाला॥ रक्तझिण्ट्याः पर्यायः। कुरबक १। इत्यमरः॥ पीतझिण्ट्याः पर्यायः। कुरण्टक १ सहचरी २। इत्यमरः॥ सह-चर ३ पीताम्लान ४। इति सुभूतिः॥ पीत १ पीतकुसुम ४ दासी ७ कुरण्टक ८। इति रत्नमाला॥ अस्या गुणाः। कटुत्वम्। तिक्त-त्वम्। दन्तामयशूलवातकफशोथकण्डूयनप्रशोथ-वातिनाशित्वञ्च। कुष्ठघ्नत्वम्। इति राजनिर्घण्टः॥

झिरिका, स्त्री, (झिरीति अव्यक्तशब्देन कायति शब्दायते इति। कै+क टाप् च।) झिल्ली। इति शब्दरत्नावली॥

झिरी स्त्री (झिर् इत्यव्यक्तशब्दो अस्त्यस्याः। अच् ङीष्।) झिल्ली। इति शब्दरत्नावली॥

झिलि, स्त्री, (झिल् इत्यव्यक्तशब्देन चिद्यतीति। चिद्+ड। डित्वम्।) वाद्यविशेष। यथा, मुद्राराक्षसनाटके।
"मुरजाखण्डपटहीभेरीझल्लरी झिल्लिरी च।
पणवौ प्रडुलौ वाद्यं देवताराधने च॥"

झिल्लिका स्त्री, (झिल् इत्यव्यक्तशब्दं विद्यतीति। झिल्+कि इत्यत्र कृते साधुः। ततः स्वार्थे कन्।) झिल्ली। (यथा, रामायणे। ४।२८।३३।
"झिल्लिकाविरुतैर्दीर्घैः स्वनन्तीव वनान्तरम्॥")
आतपरुचिः। विकृतत्वमलम्। इति हेमचन्द्रः॥ झिल्लिकाराव। उद्धर्त्तनकर्दमः। इति शब्द-रत्नावली॥ (उद्धर्त्तनकर्दम। झिल्ली। इति मेदिनी। ले ६६।)

झिल्ली स्त्री, (झिल्+अभिधानादिति वा ङीष्।) कीटविशेषः। झिञ्झिपोका इति भाषा। तत्पर्यायः। झिल्लीका २ झिल्लिका ३ झिरिका ४ झिरी ६ चीरिका ७ चीरुका ८ झिरी ९ भृङ्गारी १० चीरुका ११। इति शब्दरत्नावली। चीरी १२। इत्यमरः।१।२।२८॥ चीरुका १३। इति जटाधरः। (यथा, माघे ६।११।

"यदलम्बिझिल्लीकलकण्ठक-
उत्कूजनाभिर्विपिनान्तराला॥")
आतपरुचिः। वर्त्ती। उद्धर्त्तनकर्दमः। इति मेदिनी॥ आर्द्रीकरणवाद्यम्। इत्यजयपाल॥

झिल्लीकण्ठ पुं, (झिल्लीव कण्ठः कण्ठशब्दो यस्य।) गृहकपोत। इति त्रिकाण्डशेषः॥

झिल्लीका, स्त्री (झिल्ली+स्वार्थे कन् ततः टाप्।) झिल्लिका। इति हेमचन्द्रः॥

झीरुका स्त्री, (झिर इति शब्दाव्यक्तं रौतीति। रु+क्विप्। बाहुलकात् कन् टाप् च।) झिल्ली। इत्यमरः। १। २। २८॥

झु, द गत्याम्। (झो ष्यत सर्व-अनिट।) जुह-स्यामे भुवइ इत्यपि अपित्। द जवनी। इति दुर्गादासः॥

झुण्ट पुं, (झट घ प्रति+घञि पृषोदरात् साधुः।) स्तम्ब। अप्रकाण्डवृक्ष। इति शब्दचन्द्रिका॥

झुमरि, स्त्री, रागिणीविशेष। यथा,—
"प्रायः शृङ्गारबहुला माध्वीकमधुरा मृदुः।
एकैव झुमरिस्तस्मि वर्णादिनियमोज्झिता॥
ख्याता नायकनेता मोदसारादि विविधम्।
इह हि प्राकृतं राग यथाहैं तूपदश्यम्॥"
इति सङ्गीतदामोदरः॥

झूणि, पुं, क्रमुकवृक्ष। स्त्री शुण्ठ्याशुणि। इति मेदिनी। णि ११॥

झॄ, ष य ज्यानि। जरयति शोभाव इति यावत्। (दिवा परं सर्व-अनिट।) इति कविकल्पद्रुमः। ष, झरत। य, झीर्य्यति। इति दुर्गादासः॥

झोड, पुं, गुवाकवृक्ष। इति भूरिप्रयोगः॥

झ्यु, द गत्याम्। इति कविकल्पद्रुमः। (भ्वां आत्मं सर्व अनिट।)

—

ञ

ञ, ञकार। य अक्षरसमभवं व्यञ्जनम् वर्णश्च। (अयो तु अष्टमात्राकालीयोच्चार्य।) अस्योच्चारणस्थान तालु। इति व्याकरणम्॥ अस्योत्पत्तिर्यथा,—
"विसर्गेवाकृत्य योगा यं वचनेन शक्यः॥"
इति प्रपञ्चसारः। ७॥
(मार्त्तिकिमते तु अस्योत्पत्तिस्थानं नासिका-तालुनी। अस्योच्चारणे जिह्वामध्यं तालु स्पृष्ट्वा वायु नासिकामार्गेण। अंशत्वात् माला अक्षराणां वाद्यमयः। माहेश्वरे इव मातृकान्यासे न्यस्तव्यं स्यात्। वर्णोद्भवनात्मकः। अस्य वर्णस्य यथा,
"कुकर्मविधमाहात्म्य दयालो तारकम्।
अल्पायाधीनमा मात्रा वामन कुञ्चिता तुरु॥
निर्मल नाड निवास सर्वकर्मदा शक्ता।
कुरूपोऽस्ममया तु या माया मध्यम क्रिया॥
मङ्गलानिलम्बा या मायामय प्रधानी॥०॥
अनुभूतं भूतवाही कामादिभूषिताम्॥
घाणात्महारार्थहृत अष्टाशतवर्णजाम्॥

ईषद्धास्यमुखीं नित्यां वरदां भक्तवत्सलाम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ ० ॥

अस्य स्वरूपं यथा, कामधेनुतन्त्रे ।
"सदा ईश्वरसंयुक्तं णकारं शृणु सुन्दरि ।
रक्तविद्युल्लताकारं या स्वयं परकुण्डली ॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ॥"

तस्य २२ द्वाविंशतिर्नामानि यथा,—
"णकारो बोधनी विश्वा कुण्डली मतदो विपत् ।
कौमारी नागविज्ञानी मध्याङ्गुलनखो धकः ॥
धर्म्मैश्वर्य्यायिता तुष्टिः सर्गात्मा घर्घरध्वनिः ।
धर्म्मैकपाद् सुरज्ञो विरजा चन्द्रनेश्वरी ॥
गुण पुष्पधन्वा च रागात्मा च वराश्रियी ॥"
इति नानातन्त्रशास्त्रम् ॥

णः, पुं, गायनः । घर्घरध्वनिः । इत्येकाक्षरकोषः ॥ बलीवर्द्दः । शुक्रः । वामनतिः । इति मेदिनी । णे १ ॥ (गणपाठे धातोरुभयपदत्वविज्ञापकोऽनुबन्धविशेषः । इति वोपदेवः ॥)

णिः, पुं, प्रत्ययविशेषः । स प्रेरणार्थे भवति । तस्य इकारस्तिष्ठति । धातोरनुबन्धविशेषः । स वर्त्तमानक्तप्रत्ययबोधकः । इति वोपदेवस्वामी ॥

ण्यन्तः, पुं, (णिः प्रत्ययविशेषोऽन्ते यस्य ।) णि-प्रत्ययान्तः । यथा, "णिज्ञाणाधिवधि" इत्यादि आत्मनेपदप्रकरणीयसूत्रम् ॥ स च प्रत्ययः धातोः अन्दाच भवति । यथा, णि प्रेरणे इति वे ह्वयास्थाने णिरिति च मुग्धबोधव्याकरणम् ॥ मुग्धबोधव्याकरणस्य परिच्छेदविशेषः । यथा, इति ण्यन्तपादः ॥

—

ट

ट, टकारः । स व्यञ्जनैकादशवर्णः । टवर्गप्रथमवर्णश्च । अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (अस्योच्चारणे मूर्द्धस्थानेन जिह्वाग्रस्य स्पर्शः आभ्यन्तरप्रयत्नः । मातृकान्यासेऽस्य दक्षिणस्फिचि न्यास्यत्वम् । वर्णाभिधानमालायाम्) तस्य ध्यानप्रकारो यथा,—
"जटाधरकमलो देवा कुण्डलोद्भवधारय ।
तिष्ठन्ति तास्तु नित्यास्तु कुबेरधनदायक ॥
माया कोणगता चोह्य । तत्र रङ्गता तु या ।
या नित्या परमा शक्तिश्चतुर्वर्गप्रदायिनी ॥
ध्यानमस्य प्रवक्ष्यामि शृणुष्व वरवर्णिनि ॥
मालतीपुष्पवर्णाभां पुष्पचन्द्रविभूषिताम् ॥
रत्नवाहुमायुक्तां मणिहारोज्ज्वलभुजाम् ।
परमाप्तवरां नित्यां सदा कौरवाणीं वराम् ॥
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ ० ॥

अस्य स्वरूपं यथा —
"टकारं चञ्चलापाङ्गि । स्वयं परमकुण्डली ।
कोटिविद्युल्लताकारं पञ्चदेवमयं सदा ॥
पञ्चप्राणयुतं वर्णं गुणत्रयसमन्वितम् ।
त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा ॥"
इति कामधेनुतन्त्रम् ॥

तस्य २७ सप्तविंशतिर्नामानि यथा,—
"टङ्कारः कपाली च सोमशः खेचरी ध्वनिः ।
मुकुन्दो विनदा पृथ्वी वैष्णवी वारुणी नवः ॥
दक्षाङ्गकाङ्गचन्द्रश्च जरा भूतिः पुनर्भवः ।
बृहस्पतिर्धनुश्चित्रा प्रमोदा विमला कटिः ॥
राजा गिरिमहाधनुर्व्याला सुमुखो मनुः ॥"
इति नानातन्त्रशास्त्रम् ॥

ट, स्त्री, (टक + डः ।) करङ्कः । इति विश्वः ॥

टः, पुं, (टल + डः ।) वामनः । पादः । निखनः । इति मेदिनी । टे, १ ॥

टक, इ क बन्धे । इति कविकल्पद्रुमः ॥ (चुरां-पर-सक सेट ।) इ क, टङ्कयति । इति दुर्गादासः ॥

टक्कदेशीयः, पुं, (टक्कदेशे भव इति छः ।) वास्तूकशाकः । इति त्रिकाण्डशेषः ॥

टगरः, पुं (टः टङ्कणः क्षारविशेष इव गरः इव । सौभाग्यत्वात्तथात्वम् ।) टङ्कणक्षारः । केकाविभ्रमगोचरः । केकराक्षे च । इति मेदिनी । रे, १६ ॥

टङ्कः, पुं, (टकि + घञ् ।) कोपः । कोषः । असिः । पाषाणदारणः । इति मेदिनी । के, २४ ॥ (यथा, अनर्घराघवे । १ । ५२ ।
"स पञ्चदेवं परिलघ्य टङ्कै
ष्ट्रमोमयैस्तक्षणमुच्चकार ॥")
परिमाणविशेषः । स तु चतुर्माषकरूपचतु-र्निष्कस्तरलिकारूपो वा । जङ्घा । इति हेमचन्द्रः । ३ । ६८१ ॥ दर्पः । इति शब्दार्णवः ॥

टङ्कः, पुं स्त्री, (टकि + घञ् अच् वा ।) नील-कपित्थः । (यथा, सुश्रुते सूत्रस्थाने ४६ ।
"प्रोक्तं कषायं मधुरं टङ्कं मारुतकृद्गुरु ॥")
खनित्रम् । टङ्कणः । इति मेदिनी । के, २४ ॥ दर्पः । इति शब्दरत्नावली ॥

टङ्कक, पुं, (टङ्कति बध्नाति मन येनेति । टकि + ण्वुल् । यद्वा, टङ्कति कम्पतेऽनेन मन इति । पच । तत स्वार्थे कन् ।) रजतमुद्रा । इति रूप्याध्यक्षशब्दे अमरटीकायां सारसुन्दरी भरतश्च ॥ टाका इति भाषा ॥

टङ्कपतिः, पुं, (टङ्ककस्य पतिः रक्षकः ।) रूप्याध्यक्षः । टङ्कशालाधिकृतः । इत्यमरटीकायां सारसुन्दरी ॥ टाकशालेर अध्यक्ष इति भाषा ॥

टङ्कशाला, स्त्री, (टङ्ककस्य शाला ।) रजतमुद्रागृहम् । इत्यमरटीकायां सारसुन्दरी ॥ टाकशाल इति भाषा ॥

टङ्कटीकः पुं शिवः । इति त्रिकाण्डशेषः ॥

टङ्कणः, पुं (टङ्कि बन्धे + ल्युट् । पृषोदरादित्वात् साधुः ।) क्षारविशेषः । सोहागा इति भाषा । (यथा, सुश्रुते कल्पस्थाने ४६ अध्याये ।
"हिङ्गुल्यो हरितकः टङ्कणः चित्रकुष्ठकम् ।
अर्कपयोविदारीक्षोऽन्यतङ्कः च उच्यते ॥")
तत्पर्यायः । धातुवल्लभः २ मालतीतीरजः ३ लोहशोधनः ४ रसशोधनः ५ । इति हेमचन्द्रः । ४ । १० ॥ टङ्कक्षारः ६ रङ्गक्षारः ७ रसाधिकः ८ लोहद्रावी ९ रसघ्नः १० सुभगः ११ रङ्गदः १२ वर्तुलम् १३ कनकम् १४ क्षारम् १५ मलिनम् १६ धातुवल्लभम् १७ । इति राजनिर्घण्टः ॥ मालतीतीरसम्भवः १८ द्रावी १९ द्रावकः २० लोहशुद्धिकारकः २१ । इति भावप्रकाशः ॥ स्वर्णपाचकः २२ । इति रत्नमाला ॥ अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफस्थावरादिविषकासश्वासनाशित्वञ्च । इति राजनिर्घण्टः ॥ अग्निवातपित्तकारित्वम् । रूक्षत्वम् । इति भावप्रकाशः ॥ (देश-विशेषः । यथा, बृहत्संहितायाम् । १४ । १२ ।
"कङ्कटटङ्कणवनवासिशिविकफणिकारकोङ्कणाभीराः ॥")

टङ्का स्त्री, (टकि + अच् टाप् ।) जङ्घा । इति मेदिनी । के, २५ ॥

टङ्कानकः, पुं, (टङ्कं दर्पं कोपं वा आनयति उद्दीपयतीति । आङ् + नी + णिच् + ण्वुल् ।) श्यामदाव-वृक्षः । इति शब्दचन्द्रिका ॥

टङ्कारः, पुं (टल वैक्लव्ये + बाहुलकात् कः । टं वैक्लव्यं विस्मयं विहर्तिं करोतीति । कृ + कर्म्मण्यण् ।) विस्मयः । प्रसिद्धः । शिञ्जितध्वनिः । इति मेदिनी । रे, १६ ॥ (यथा, काशीखण्डे । २९ । ६९ ।
"टौकिताखिलपातालाटङ्कैकोऽभिपाटवे ।
टङ्कारवृन्तुकलोला टीकनीया महातटा ॥"
कृ + घञ् । कारः टं इति अव्यक्तशब्दस्य-कारः करणं यत्र । अभिमाने । यथा, माघे । १ । १७ । ८ ।
"धनुष्यमेषु सुभगो वमन्वो नष्टिमुत्तरम् ।
प्रगल्भोल्लकटङ्कारे प्रविष्टरुधिरा प्रिया ॥")

टङ्कारी, स्त्री (टङ्कं प्रक्षरतीति । ऋ + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ततो गौरादित्वात् ङीष् ।) क्षुपविशेषः । टेकारी इति भाषा । अस्य गुणाः । वातश्लेष्मोपोन्नपाचकाविरत्वम् । तिक्तत्वम् । रोचनत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥

टङ्गः, पुं स्त्री (टगि + अच् ।) खनित्रम् । खड्ग-भेदः । जङ्घा । इति मेदिनी । गे, ७ ॥

टङ्गः, पुं (टङ्क + पृषोदरात् साधुः ।) टङ्कणः । इति शब्दचन्द्रिका ॥ सोहागा इति भाषा ॥ चतुर्माषकपरिमाणम् । इति वैद्यकपरिभाषा ॥

टङ्गणः, पुं स्त्री (टङ्कण + पृषोदरात् साधुः ।) टङ्कणः । सोहागा इति भाषा । अस्य गुणः । वह्निकारकत्वम् । क्षारकत्वम् । रेचकत्वम् । उष्णत्वम् । अग्निदत्वम् । श्लेष्मघ्नत्वम् । मेदकत्वम् । बलदत्वञ्च । इति राजवल्लभः ॥

टङ्गिणी स्त्री (टङ्गि बन्धे + णिनि । ततः ङीप् । पृषोदरात् साधुः ।) पाठाविशेषः । इति शब्दचन्द्रिका । आकनादि इति भाषा ॥

टङ्की, स्त्री, (टङ् इत्यव्यक्तशब्दं करोतीति । मौ+क्विप् ।) कोष्ठी । इति त्रिकाण्डशेषः ॥

टट्टरी, स्त्री, (टट्टरित्यव्यक्तशब्दं रातीति । रा +कः गौरादित्वात् ङीष् ।) अनृतवाक्यम् । कल्याणवादम् । पटहशब्दम् । इति मेदिनी । रे, १९८ ॥

टट्टर पुं, (टट् इत्यव्यक्तशब्दं रातीति । रा+ क ।) भेरीशब्दः । इति हेमचन्द्रः ॥

टल, अ वैक्लव्ये । इति कविकल्पद्रुमः ॥ (भ्वां परं-अकं-सेट् ।) अ, टालः टलः । विक्लवो विह्वलीभावः । इति दुर्गादासः ॥

टलन, क्ली, (टल+भावे ल्युट् ।) विक्लवः । टला इति भाषा ॥

टा, स्त्री, (टलति प्रचये भूकम्पादौ वा । टल+ड टाप् च ।) पृथिवी । इत्येकाक्षरकोषः ॥

टाङ्कार, पुं (टङ्कस्येव टाङ्कम् । टङ्क+अण् । टाङ्कं रातीति । रा+क ।) भावरीटः । इति त्रिकाण्डशेषः ॥

टार, पुं, (टां पृथ्वीं ऋच्छतीति । ऋ+अण् ।) अश्वः । तुरगः । इति हेमचन्द्रः ॥

टिक ऋ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) ऋ, अटिटेकत् । ङ, टेकते । इति दुर्गादासः ॥

टिटिभक, पुं (टिटीत्यव्यक्तशब्दं भणति । भण +ड । ततः स्वार्थे कन् ।) टिट्टिभपक्षी । इत्यमरटीका ॥

टिट्टिभ, पुं, (टिट्टीत्यव्यक्तशब्दं भणतीति । भण +ड ।) पक्षिविशेषः । टीटि इति भाषा । तत्पर्यायः । टीटिभकः २ । इति शब्दरत्नावली । टिट्टिभकः ३ । इत्यमरः । २।५।१५ । टिट्टिभः ४ । इति जटाधरः ॥ (यथा, मनुः । ५ । ११ ।
"अनिर्दिष्टांश्चैकशफांष्टिट्टिभञ्च विवर्जयेत् ।")
असौ दुष्टमलसारीचैकप्रभूतानाशविशेषः । यथा,
"स्त्री टिट्टिभानि पत्युष्टिट्टिभो भव दारुणः ।
मामुद्दिश्य च स्वकेन भरविभ्यति मारुत ॥"
इति मार्कण्डेये ५० अध्यायः ॥
(दक्षकन्यादनुदानवभ्रातास्तम । अयं हि महासुरविशेषः । यथा, महाभारते । १ । ६५ । ३१ ।
"टिट्टिभो विद्युतश्च धारयन्निकालयः ।"
रघुवंशे ।
"कर्णे कक्षरा मुखः कर्णे विमलकः ॥")

टिट्टिभक, पुं, (टिट्टिभ+स्वार्थे कन् ।) टिट्टिभपक्षी । इत्यमरः । २।५।१६ ॥ [टकार ॥

टिट्टिभिका स्त्री भङ्गुरीरोहिका । इति मार-

टिण्डिश पुं क्षुपविशेषः । टिण्डिश । इति टँडसी इति च भाषा । तत्पर्यायः । रोमशफल २ तिण्डिश ३ मुनिनिर्मित ४ । अस्य गुणाः । रुचिकारित्वम् । भेदकत्वम् । पित्तश्लेष्मापहारित्वम् । शीतलत्वम् । वातलत्वम् । रूक्षत्वम् । मूत्रलत्वम् च । इति भावप्रकाशः ॥

टिप, अ इरे । इति कविकल्पद्रुमः ॥ (चुरां परं-सकं-सेट् ।) अ, टेपयति । इरि प्रेरणे । इति दुर्गादासः ।

टिप्पनी, स्त्री (टेपयति ज्ञापयतीत्यर्था । टिप+करणे ल्युट् ङीप् च । पृषोदरादित्वात् साधुः ।) टीका । यथा,—
"कैयटप्रातर्न मता लीलावती सुटिप्पनी ।
भवीद्वेन सुवोधार्थं क्रियते मद्गुरोः सुतम् ॥")

टीक, ऋ ङ गत्याम् । इति कविकल्पद्रुमः । (भ्वां आत्मं सकं सेट् ।) ऋ, अटिटीकत् । ङ, टीकते । इति दुर्गादासः ॥

टीका, स्त्री, (टीक्यते गम्यते प्रविश्यते ज्ञायते अनया । टीक+करणे क । टाप् च ।) विवरणम् । इति त्रिकाण्डशेषः ॥

टुण्टुक पुं, श्योनाकवृक्षः । इत्यमरः । २।४।५६ ॥ कृष्णखदिरवृक्षः । इति शब्दचन्द्रिका ॥ (टुण्टु इत्यव्यक्तशब्देन कायति शब्दायते इति । कै+क ।) पक्षिविशेषः । इति शब्दरत्नावली । टुनटुनि इति भाषा । श्योनाकभेदः । इति राजनिघण्टुः ॥

टुण्टुक, त्रि, क्षीणः । इति मेदिनी ॥ क्रूरः । इति [illegible] ॥

टुण्टुका, स्त्री, टङ्कयावृक्षः । इति शब्दमाला ॥

टुण्डका, स्त्री शाल्मलीवृक्षः । इति शब्दचन्द्रिका ॥

टेरक, त्रि, वक्रचक्षुः । टेरा इति भाषा । तत्पर्यायः । वलिरः २ केकरः ३ केकर ४ । इति शब्दरत्नावली ॥

ट्वल, अ वैक्लव्ये । इति कविकल्पद्रुमः ॥ (भ्वां परं-अकं-सेट् ।) वकारद्वयः । अ ट्वालः ट्वलः । विक्लवो विह्वलीभावः । इति दुर्गादासः ॥

ठ

ठ, ठकारः । स व्यञ्जनद्वादशवर्णः टवर्गद्वितीयवर्णश्च । (अस्योच्चारणस्थानं मूर्द्धा ।) अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (अस्योच्चारणे जिह्वामध्येन मूर्द्धस्थानस्य स्पर्शः । विवारश्वासाघोषा महाप्राणश्च बाह्यप्रयत्नाः । महाप्राणमात्राकालः ।) तस्य वैदिकप्रकारो यथा —
"आलीकुण्डलिकाकारो रेखाविन्दुविभूषिता ।
निर्वाण मनसो नित्य चन्द्रसोमाख्य विधि ॥
मायादीनन्दुनिःशङ्कार परमेश्वरि ॥
ध्यानमस्य प्रवक्ष्यामि सावधान श्रुणुष्वर्थ ॥
पूर्णचन्द्रप्रभां देवीं विकचपङ्कजलोचनाम् ।
इन्द्रीवरप्रभां शान्तां मणिकामालेशोभिताम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
इति तन्त्रसारतन्त्रम् ॥ ● ॥
अस्य नामानि यथा, मातृकानिघण्टौ ।
"ठकारः चन्द्रमा देवी पूर्णचन्द्रो वृहद्ध्वनिः ।
पद्मदेवीमनुः सर्वं ममप्राणसम कदा ।
निर्विन्दुर्घटितं सर्वं चिन्तामणिर्पुरं सदा ॥"
तन्त्र ११ एकविंशन्नामानि यथा —
"ठः शून्यो मञ्जरी बीजं पाणिनी लाङ्गली क्षमा ।
वनजो नन्दनो जिह्वा सुचक्री पलकः सुधा ।
चतुर्थ कुण्डलो वह्निश्च चन्द्रमण्डलम् ।
इन्द्रचापकभावश्च वृषभो बृहद्ध्वनिः ॥
दक्षपादो विकृतिश्च ललाट वर्णशिखकः ।
हलयो मणिनी विष्णुर्भैरवी वार्चको ध्वनिः ॥"
इति नानातन्त्रशास्त्रम् ॥

ठ, पुं, शिवः । महाध्वनिः । चन्द्रमण्डलं इत्येकाक्षरकोषः । मण्डलं । शून्यम् । लोकगोचरः । इति मेदिनी । ठे १ ॥

ठक्कुर, पुं देवता । ठाकुर इति ख्यातः । यथा,
"श्रीरामनामशोभात् श्रीमान् हन्दरठक्कुरः ॥"
इत्युद्भटशेखरिता ॥

ठठं } अ, अनुकरणशब्दः । ठन् ठन् इति
ठठठं } भाषा । यथा, महानाटके । ५६ ।
"रामाभिषेके मदविह्वलाया
कक्षाच्च्युतो हेमघटस्तरुण्याः ।
सोपानमासाद्य करोति शब्दं
ठठं ठठं ठं ठठठं ठठं ठः ॥"

ठेर, त्रि, वृद्धः । यथा, का ठेरं न दहती । इति चाणक्यशर्मा पुस्तिभाषा ॥

ढ

ढ, ढकारः । स व्यञ्जनत्रयोदशवर्णः टवर्गतृतीयवर्णश्च । अस्योच्चारणस्थानं मूर्द्धा । इति व्याकरणम् ॥ (यथा, छिन्नामानृ । १० ।
"मूर्द्धन्या ऋटुरषा इत्या अनुस्वारा अजाः ॥")
अर्धीयवर्णमात्राकाल वैदिकप्रकारो यथा,
"अर्द्धाङ्गवामनो रेखा मध्ये माकुण्डिता तथा ।
अङ्गोमीयी प्रयाणो च क्रमद्रक्षण दक्षिणा ।
ब्रह्मरूपा तथा माया ध्यायते च ब्रह्मविद्यया ।
ध्यानमस्य प्रवक्ष्यामि श्रृणुष्वावहिता प्रिये ।
कामदेवमदाग्रां वरदायां वरदाम् ।
त्रिनेत्रां वरदां नित्यां धर्मकामार्थमोक्षदाम् ।
एवं ध्यात्वा ब्रह्मरूपां तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ ● ॥
अस्य नामानि यथा, मातृकानिघण्टौ ।
"ढकारं चन्द्रमापन्नं धन्यं विद्युद्धर्षमुणम्
पञ्चदेवमयं सर्वं मणिमायं सदा ।
त्रिशक्तिसहितं सर्वं त्रिविन्दुसहितं सदा ।
चतुर्ज्ञानमयं सर्वं आत्मादितत्त्वसंयुतम् ।
पीतविद्युल्लताकारं ढकारं प्रणमाम्यहम् ॥"
तन्त्र २१ चतुर्विंशन्नामानि च यथा,—
"ढः धारिणेश्वरो शङ्खध्वनिमाली नन्दिनी
निधिः ।
त्रैयाली दक्षपादाङ्गुलिमूलं घण्टो मतिः ।

दुर्गन्धी भटिली भीमा डिण्डिका पृथिवी सती ।
कोटरीति समा कान्तिनाभि स्वाती च
षोडशम् ॥"
इति नानातन्त्रशास्त्रम् ॥
(पदान्ते अस्य प्रथमोपस्थाने यस शोभा ।
यदुक्तं इन्दुमालाकरटीकायाम् ।
"ड शोभा डो विशोभा स्यादयस्तु
रं पदस्तु सुहृम् ॥")

ड, पुं (डयते उड्डीयते मरुता शुष्कखाकाशे यः । डी+बाहुलकात् डः ।) शिवः । (डीयते आकाशमार्गे नभोगुणत्वादिति । डी+डः ।) शब्दः । त्रासः । इत्येकाक्षरकोषः ॥ वाडवाग्निः । इति मेदिनी । डे, १ ॥

डङ्गरी, स्त्री, (ड शरीरपकारिणमन्तिमाध शिरसि धारयतीति । गृ+अच् । निपातनात् मुमागमः । ततो ङीष् ।) फलविशेषः । तत्पर्यायः । डाङ्गरी २ दीर्घनाल ३ दङ्गरी ४ डङ्गारी ५ नामशुष्की ६ राजदन्तफला ७ । अस्या गुणाः । शीतलत्वम् । रुचिकारित्वम् । दाहपित्तास्रदोषाश्मीमूत्ररोधनाशित्वम् । लघुत्वम् । गौल्यत्वञ्च । इति राजनिर्घण्टः ॥

डङ्गारी, स्त्री, (डङ्गरी पृषोदरादित्वात् दीर्घत्वम् ।) डङ्गरीफलम् । इति राजनिर्घण्टः ॥

डप, र क ङ प सङ्घाते । इति कविकल्पद्रुमः ॥ (चुरां आत्म-उभ च सक-सेट ।) पञ्चमवर्गीयतृतीयादिः । र क ङ डम्पयते । प, डम्पयति डम्पयते । अयमात्मनेपदीत्यन्ये । सङ्घातो राशीकरणम् । इति दुर्गादासः ॥

डप, क ङ प सङ्घाते । इति कविकल्पद्रुमः ॥ (चुरां आत्म-उभ च सक सेट ।) पञ्चमवर्गीयतृतीयादिः । क ङ, डापयते । प, डापयति डापयते । चुर पाठानेदयमपि । अयमात्मने परस्मैपदी । सङ्घातो राशीकरणम् । इति दुर्गादासः ॥

डभ, र क गोदे । इति कविकल्पद्रुमः ॥ (चुरां-पर सक सेट ।) पञ्चमवर्गीयतृतीयादिः । र क, डम्भयति । गोदः प्रेरणम् । इति दुर्गादासः ॥

डभ र क ङ प सङ्घे । इति कविकल्पद्रुमः ॥ (चुरां उभ सक सेट ।) पञ्चमवर्गतृतीयादिः । र क, डम्भयति डम्भयते । अयमात्मनेपदीति केचित् । सङ्घो राशीकरणम् । इति दुर्गादासः ॥

डम , पुं (डं शोषपोषिणाश्च मीति मानोति । मा +कः ।) वर्णसङ्करजातिविशेषः । डोम इति भाषा । चण्डाल्यां लेटात् जातः । इति ब्रह्मवैवर्त्तपुराणम् ॥

डमरं, स्त्री, (ड+लाभे अप् । मरं मरणमर्तं यास्मादकर्मकार्येणात् । डेन सहित मरम् ।) भीमाय पलायनम् । तत्पर्यायः । प्रसाशिका २ डिम्ब ३ डिम्भ ४ । इति शब्दरत्नावली ॥

डमर पुं (डेन भयेन म्रियते अरिः प्रणः ।) पलायनानन्तरम् । तत्पर्यायः । इत्यमरटीकायां भरतः ॥ तत्पर्यायः । डिम्ब २

विप्लव ३ । इत्यमरः । २ । ८ । ११ ॥ डिम्ब ४ विम्ब ५ डामर ६ । इति भरतः ॥ (यथाह गर्गः ।
"तत्समयोऽश्विकेतु च तु रुप शुद्धयावत्
प्रोक्तः ।
शिखथडाहक भाव्यां प्राज्ञाखी डमर-
भरकाय ॥")

डमरु, पुं (डमित्यव्यक्तशब्दं ऋच्छतीति । ऋ +"मृगय्वादयश्च ।" उणां १ । ३८ । इति कु-प्रत्ययेन निपातनात् साधुः ।) वाद्यभेदः । इत्यमरः । १ । ७ । ८ ॥ कापालियोगिवाद्यम् । इति भरतः ॥ मध्यक्षीणो शुटिकाद्वयालम्बितः । इति सारसुन्दरी ॥ (यथा, योगसारे २ परिच्छेदे ।
"धारयन् डमरु योगी यस्य कृपायमे स्थितः ॥")
चमत्कारः । इति त्रिकाण्डशेषः ॥

डयन स्त्री, (डीयते आकाशमार्गे गम्यतेऽनेनेति । डी+करणे ल्युट् ।) कर्णीरथः । (डी ङ नभो गतौ+भावे ल्युट् ।) नभोगतिः । इति हेमचन्द्रः । ४ । ३८४ ॥

डल्लक, स्त्री, वंशादिनिर्मितभाजनम् । डाला इति भाषा । यथा,—
"चिप्रतव वस्त्राणि डल्लकं वस्त्रयुगकम् ।
सभोज्यं सोपवीतञ्च सोपकार मनोहरम् ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

डवित्थ, पुं, काष्ठमयहस्ती । यथा —
"डित्थः काष्ठमयो हस्ती डवित्थस्तन्मयो मृगः ॥"
इति सुपद्मव्याकरणे विभक्तिपादः ॥
(दस्यार्थवन्मात्रशब्दविशेषः । यथा साहित्य दर्पणे । "चतुर्थं शब्दा एकव्यक्तिवाचिनो हरि हरडित्थडवित्थादयः ।")

डहु, पुं (दहति तापयति सर्वशरीरमिति । दह+मृगय्वादित्वात् कुप्रत्ययेन निपातनात् साधुः ।) वृक्षविशेषः । डेहुया इति मादार इति च भाषा । तत्पर्यायः । लकुचः २ लिकुचः ३ । इत्यमरः । २ । ४ । ३० ॥ अस्य गुणाः । गुरुत्वम् । विष्टम्भित्वम् । त्रिदोष शुक्रशुद्धिकारित्वञ्च । इति राजवल्लभः ॥

डहू, पुं, (डहुः । पृषोदरादित्वात् दीर्घः ।) डहुः । इति शब्दरत्नावली ॥

डा, स्त्री (डीयते नभोमार्गे गच्छतीति । डी +अन्येभ्योऽपीति डः स्त्रियां टाप् ।) डाकिनी । इति मेदिनी । डे १ ॥

डाकिनी, स्त्री, (डाक भयशब्दं करोति कुत्सितं करोतीति । डाक करणार्थे+इनि । ततो ङीप् ।) कालीगणविशेषः । यथा ब्रह्मवैवर्त्ते प्रकृतिखण्डे ।
"डाकच डाकिनीनाञ्च वेतालानां बिडालिभिः ।"
(डाकानां गणः । "ग्रहाश्च दृतिमेंतदः ।" ४ । २ । ४२ । इत्यत्र काशिकोक्त्या इनिः । डाकानां समूहः । इति सिद्धान्तकौमुदी ।)

डाङ्गरी स्त्री, (डङ्गरी पृषोदरादित्वात्साधुः ।) डङ्गरीफलम् । इति राजनिर्घण्टः ॥

डामर, पुं, शिवोक्तशास्त्रविशेषः । (यथा, काशीखण्डे । २९ । ७ ।
"डमरुमरुद्रहस्ता च डामरीशमहात्मका ।"
"डामरौ डामरतन्त्री महारुद्रदेवीभक्तस्य प्रतिपादकौ यन्थौ महारौद्रे शुभाशुभस्तोक्त प्रतिपादित मन्त्रमय महत्त्वहरौ यस्याः ॥"
इति तट्टीका ॥) स तु षड्विधः । तेषां नामानि श्लोकसङ्ख्या च यथा । योगडामरः २३,५३३ । शिवडामरः ११,००७ । दुर्गाडामरः ११,५०३ । सारस्वतडामरः ९,९०५ । ब्रह्मडामरः ७,१५ । गन्धर्वडामरः ६० ६० । इति वाराहीतन्त्रम् ॥ डमरः । इत्यमरटीकायां भरतः ॥ चमत्कारः । यथा । भूतानां डामरचमत्कारोऽस्मिन्निति भूतडामरग्रन्थनिर्वचने निरुक्तकारः ॥ (गर्वः । आटोपः । यथा गीतगोविन्दे । १२ । २२ ।
"मम रुचिरे चिकुरे कुरु मानद ! मानसज
ध्वजचामरे ।
रतिगलिते ललिते कुसुमानि शिखण्डि-
शिखण्डकडामरे ॥"
कोटचक्रविशेषः । यथा, समयामृते ।
"अथातः सम्प्रवक्ष्यामि कोटचक्रमिहाद्भुतम् ॥"
इत्युपक्रम्य —
"पञ्चमो गिरिकोटश्च षष्ठः कोटश्च डामरः ॥"
इत्युक्तवान् ।
अस्य विशेषविवृतिः चक्रशब्दे द्रष्टव्या ॥ क्षेत्रपालविशेषः । यथा, प्रयोगसारे ।
"भेदा एकोनपञ्चाशत् क्षेत्रपालस्य कीर्त्तिताः ॥"
इत्युपक्रम्य,—
"टङ्कपाणिस्तथा चान्धडामरश्च डामरः ॥")

डालिम , पुं, (दाडिम पृषोदरादित्वात् साधुः ।) दाडिमः । इत्यमरटीकायां भरतः ॥

डाहल, पुं, त्रिपुरदेशः । इति भूरिप्रयोगः ॥

डाहुक, पुं, दात्यूहपक्षी । इति जटाधरः ॥

डिङ्गर पुं डङ्गरः । क्षेपः । गतः । धूर्त्तः । सेवकः । इति शब्दरत्नावली ॥

डिण्डिम., पुं, (डिण्डीति शब्दं मानोति । मा+कः ।) वाद्यभेदः । इत्यमरः । १ । ७ । ८ ॥ डिमडिमि ख्यातः । इति भरतः । मादीश्वर इत्यपि ख्यातः । इति सारसुन्दरी ॥ (यथा, महाभारते । ७ । १६९ । ४४ ।
"भेरीपानवकान् सुधा डिण्डिमांश्च सहस्रशः ॥"
डिण्डिम इव आडम्बरवत्त्वादिति । अर्श आदित्वात् ।) कल्पाखनः । इति शब्दचन्द्रिका ॥ मादो मामला इति भाषा ॥

डिण्डिर पुं, (डिण्डिर पृषोदरादित्वात् साधुः ।) फेनः । इति हेमचन्द्रः । ४ । १३१ ॥

डिण्डिरमोदकं, क्ली, (मोदयतीति । मुद+ण्वुल् । डिण्डिर इव मोदकम् ।) गृञ्जनम् । इति राजनिर्घण्टः ॥

डिण्डिशः पुं, डिण्डिशः । टिंड इति भाषा ॥ (यथा भावप्रकाशे पूर्व्वखण्डे प्रथमभागे ।

म

म, मकारः। स पञ्चविंशव्यञ्जनवर्णः। पवर्गपञ्चमवर्णश्च। (अस्योच्चारणस्थानमोष्ठौ।) अस्योच्चारणयत्नं स्पृष्टम्। इति व्याकरणम्। (शिक्षाकारादिमते तु अस्योच्चारणे जिह्वाग्रेण नासिका च अन्तःप्रयत्नश्च स्पृष्टम्। अनुस्वारानुनासिकौ अल्पप्राणौ घोषवन्तौ। मातृकान्यासेऽस्य दक्षपार्श्वे न्यासः क्रियते। तन्त्रोक्तमन्त्राणाम्।) तस्य देवनागराकारो यथा —

"कुण्डलीत्रयसंयुक्ता रेखा शब्दसहाय ऋषेः।

वामादधोगता सैव पुनरूर्द्ध्वं गता प्रिये॥

ब्रह्मेशविष्णुरूपा सा चतुर्वर्गप्रदायिनी॥

ध्यानमस्य मकारस्य प्रवक्ष्यामि च तत् शृणु।

द्विभुजां वरदां रम्यां भक्ताभीष्टप्रदायिनीम्॥

रक्तवस्त्रपरीधानां धर्मकामार्थमोक्षदाम्।

एवं ध्यात्वा मकारं तु तन्मन्त्रं दशधा जपेत्॥"

इति वर्णोद्धारतन्त्रम्॥ ●॥

अस्य स्वरूपं यथा,—

"मकारं परमेशानि। या स्वयं परकुण्डली।

पीतविद्युल्लताकारं पञ्चदेवमयं सदा॥

पञ्चप्राणमयं देवि। सदा त्रिगुणसंयुतम्।

आत्मादितत्त्वसंयुक्तं महामोहप्रदायकम्॥"

इति कामधेनुतन्त्रम्॥

तस्य ४८ नामानि यथा,—

"मो विद्वान् रविर्मासिः कालो महाकालवाहनः।

जयो ब्रह्मा शशी कान्तो निर्मला वैनतेयकः॥

त्रिपुरा वाच्यः क्रोधः अन्तःश्रीमुखी मना।

विशेषो मानुषी सोमः प्रभाकरः कुमारकः॥

कालराहुः प्रधानश्च वीरो महामलश्च निर्मलः।"

इति नानातन्त्रशास्त्रम्॥

म, पुं, (माति परिमाति शिवाख्यामिति। मा + क। पृषोदरादित्वात् साधुः।) शिवः। विधाता। चन्द्रः। विष्णुः। यमः। कालः। युद्धे। समुद्रः। सुखम्। पानीयम्। इति मेदिनी। म, १॥

मख, गत्याम्। इति कविकल्पद्रुमः॥ (भ्वा० पर० सक० सेट्।) मखति। मखो यज्ञः। इति दुर्गादासः॥

मक्ष, रोषे। इति कविकल्पद्रुमः॥ (भ्वा० पर० सक० सेट्।) मक्षति। इति दुर्गादासः॥

मङ्क मण्डने। इति कविकल्पद्रुमः॥ (भ्वा० आत्म० सक० सेट्।) मङ्कते। मामङ्के। यौ मङ्कि इत्यत्र मकार्ण मङ्क पाठ इत्यादिवर्णनात्। अत्र दुर्गं व्याख्यातम्। इति दुर्गादासः॥

मङ्ख मण्डने। इति कविकल्पद्रुमः॥ (भ्वा० पर० सक० सेट्।) स मङ्खयति। मङ्खत्यपि। स्वरेतयोः ... अत्र मङ्खो मण्डनं ... इति दुर्गादासः। तेन मङ्ख पूर्व भ्वादिगण। यथा मङ्कयति ...

... इति माघः। मखस्य पुं। मखेषु मैव मखयिष्यति दीर्घमायुरिति मखादिः। इति दुर्गादासः॥

मङ्ग गत्यर्थे। इति कविकल्पद्रुमः॥ (भ्वा० पर० सक० सेट्।) मङ्गति। अभिधेयं मङ्गलम्। मङ्गति धवला। इति दुर्गादासः॥

मङ्घ, मण्डने। इति कविकल्पद्रुमः॥ (चुरा० पर० सक० सेट्।) स मङ्घयति। इति दुर्गादासः॥

मघ, ष ङ गतौ। इति कविकल्पद्रुमः॥ (भ्वा० आत्म० सक० सेट्।) ष, मघमः। ङ, मघते। इति दुर्गादासः॥

मच ५ ग शुद्धौ। इति कविकल्पद्रुमः॥ (भ्वा० पर० सक० सेट्।) म मच्यति। म मचुति। इति दुर्गादासः॥

मज, श्री शब्दे। गतौ। इति कविकल्पद्रुमः॥ (भ्वा० पर० सक० गतौ सक० अक० च सेट्।) श्री मज्जा। शब्दार्थो न भाषायाम्। गतिरिह मज्जनकार्यो मज्जनमात्रम्। मजति शुद्धं लोकः। मजन्ति धनिनो हृदा। अयमर्थोऽपि स्पष्टः कविकल्पद्रुमात् सोऽपि धातुपाठेऽपि सिद्धं दृष्टः। मज्जयति मज्जयति प्रसारयति। चतुष्कपाणिनीये मज्जनकार्यं कृतम्। इत्यादौ अयमेव अवगाहः तत्र ततो अवगाहनं करोतीति श्री स्वयम्। इति दुर्गादासः॥

मञ्च, ङ गतौ। इति। इति कविकल्पद्रुमः॥ (दिवा० आत्म० सक० सेट्।) ङ, मञ्चते। इति दुर्गादासः॥

मञ्ज, शब्दे। इति कविकल्पद्रुमः॥ (भ्वा० पर० अक० सेट्।) कौमुदीविधायकाः मञ्जोऽपि इत्थं पाठं वैयाकरणरोधात्। मञ्जति। इति दुर्गादासः॥

मठ ज मदे। इति कविकल्पद्रुमः॥ (भ्वा० पर० सक० सेट्।) ज, माठ मठः। मठति छात्रः। मठो इति केचित्। मठा इत्यर्थमिति माधवभट्टः। इति दुर्गादासः॥

मण, ज प ल शब्दे। इति कविकल्पद्रुमः॥ (भ्वा० पर० अक० सेट् ज्वलादि।) मणो रत्नम्। इति माघः। मुखावतंसमिति धर्मेण। ज, अमीमणत् अमणत्। ल, मणति मणिमिति। मणति दकार। स मणिमणित मणीति। इति दुर्गादासः॥

मथ, ङ मुनौ। इति कविकल्पद्रुमः॥ (भ्वा० आत्म० सक० च सेट्।) मुनिरिह मुनिमोदकारकम्। ङ, मथते मथन् मुनिरिह मन्थिकाया। मथते मनो मथ मुनिनिचर्दरो स्थ। इति दुर्गादासः॥

मन्थ य प ज ञौ मन्थे। इति कविकल्पद्रुमः॥ (दिवा० उभ० सक०-सनिट्।) य प मन्थति मथ्नाति। श्री मथ्नम्। इति दुर्गादासः॥

माथ, ष ङ आलोडने। इति दैवम्। इति कविकल्पद्रुमः॥ (भ्वा० आत्म० सक० सेट्।)

... कौमुदीविधायकाः मध्ये पाठं वैयाकरणरोधात्। ष, माथरात्। ङ, मादते। इति समाजे मदादेरस्यापि विषयः। अयोऽपि आगमचन्द्रे प्रवर्त्तितः इति किश्चित्। अन्य विशेषः। मनसि चिन्तयति इत्यर्थे। ... अस्यापि ... रूपं मेधा इति सनाथादिवृत्तौ प्रोक्तम्। ... मात्रास्येव तथा प्रयोगः। ... मन्त्रपाठापिदितः। आमिषि मिमाङ्गते प्रयोगः विभाषेति कश्चित्। इति दुर्गादासः॥

माथ, ष ङ वाधे। इति कविकल्पद्रुमः॥ (भ्वा० आत्म० सक० सेट्।) कौमुदीविधायकाः मध्ये अपि इत्थं पाठं वर्णविरोधात्। ष, माथः। ङ, माथते माथो मथतोरेवमाद्यमादि। इति दुर्गादासः॥

माङ्क च ङ मापे। मन्द इति पाठः। इति कविकल्पद्रुमः॥ (भ्वा० आत्म० सक० सेट्।) ष, अमीमपत्। ङ, मामते। इति दुर्गादासः॥

मिच्छ, मुच्छ्रे। इति कविकल्पद्रुमः॥ (भ्वा० पर० सक० सेट्।) मिच्छति। इति दुर्गादासः॥

मिज, इल ङ शुद्धौ। इति कविकल्पद्रुमः॥ (चुरा० आत्म० सक० सेट् इदित्।) शुद्धिरिह शब्दोच्चारणम्, ङ, मिञ्जते मिञ्जति। ल ङ, मिञ्जयते। इत्यत्र, मात्रा विभाषा गणस्य इति चतुर्भुजः। इति दुर्गादासः॥

मिथ जि इद् प श्री मेधे। गत्यां। इति कविकल्पद्रुमः॥ (भ्वा० उभ० सक० सेट्।) मि श मेथति मेथते। इद मन्थनम् अमेथीत्। श्री, मेथा। इति दुर्गादासः॥

मिद ष ङ स्नेहने। इति कविकल्पद्रुमः॥ (भ्वा० पर० सक०-सेट् इदित्।) निमित्तिविपर्ययः कौमुदीमते विध्नम्। सम्प्रदायेऽपि मदनधनम्। केचित्तु धातुविशेषमिति मारो मूढमतौ धातुः श्ववान्तम् समाहि चारी विधेर्यदर्थे। यथा, मेदिता मेदित्वा। मेदयति। भ्रष्टं तु चारित्र्य विवक्षा अस्त्रि। ष अदितो निन्दति। निन्दन्ति वृद्धं लोकाः। इति दुर्गादासः॥

मिद, षं ज मेदने। स्नेहने। इति कविकल्पद्रुमः॥ (भ्वा०-उभ० सक०-अक०-सेट् इदित्।) मेदते मेदयते। ष, मेदिता। ज, अमेदीत् मेदति स्नेहं लोकः। मिमिदे। इति दुर्गादासः॥

मिल, श मेले। इति कविकल्पद्रुमः॥ (तुदा० पर०-अक० सेट्।) मिलति। मिलन्ते मिलितः। ष, मिलति मिलितं कृषीं पृथिवीं मार्गशीर्षम्। इति दुर्गादासः॥

मिश द ईर्ष्ये। इति कविकल्पद्रुमः॥ (भ्वा० पर० सक० सेट्। इदित्।) मिंशति। द, मिमेशे। इति दुर्गादासः॥

ष्टिप, ष्ठीवे। इति कविकल्पद्रुमः। (भ्वां-परं-अक-सेट्।) ष्ठीवे यमाधौ। नेष्ठति योगी। निनि-ष्ठतुः। इति दुर्गादासः॥

ष्टिम, उ सेके। इति कविकल्पद्रुमः। (भ्वां-परं-सक-सेट्। उदित्वात् क्त्वावेट्।) उ, नेनिम्य निष्ट्रः। इति दुर्गादासः॥

ष्टिघ, ङ ट ल चुम्बने। इति कविकल्पद्रुमः। (स्वां-आत्म-सक-सेट्।) ल ट, निर्वे। ङ, निस्यते। इति दुर्गादासः॥

ष्टी, ञ प्रापणे। इति कविकल्पद्रुमः। (भ्वां-उभ-द्विक-अनिट्।) वोपदेवपाठो नादित्वेन प्रापण इति वात्रार्थे। प्रणयति। एवं सर्वत्र। प्रापणमिह नाप्तस्य रूपम्। तथा च। गुणाति लम्भयति च वेदविदपि नयज्ञः। इति क्रिया-विचल्पः। ञ, नयति नयते गां वन मोर मापय-तीत्यर्थः। इति दुर्गादासः॥

ष्टील, धर्म्मे। इति कविकल्पद्रुमः। (भ्वां-परं-अक-सक्र च सेट्।) अत्र इह सामर्थ्यभावच्छत्-कारत्व। नीलति मन्त्र समागतः। नीलति एष तत्त्वायः। इति दुर्गादासः॥

ष्टीव, क्षीवे। इति कविकल्पद्रुमः। (भ्वां-परं-अकं सेट्।) नीवति यो स्थूल स्यादित्यर्थः। इति दुर्गादासः॥

ष्टु, ञ स्तुतौ। इति कविकल्पद्रुमः। (अदां-परं-सक सेट्।) ञ, नौति। इति दुर्गादासः॥

ष्टुद ञ स्य औ प्रेरणे। इति कविकल्पद्रुमः। (तुदां-उभ-सकं-अनिट्।) ञ श, नुदति नुदते पर योधः। औ नोत्ता। इति दुर्गादासः॥

ष्टू, षि स्तवने। इति कविकल्पद्रुमः। (तुदां-परं-सकं सेट्।) कृषादेरिति यमिति परस्मैपदे। षि, नुवति। अनुवीत्। इति दुर्गादासः॥

ष्टिद, ञ ज अभिभवे। क्रन्दने। इति कविकल्पद्रुमः। (भ्वां-उभं-अकं-सक च सेट्।) अभिदि अमि-दाय। अ अनिनेदत्। ञ, नेदति नेदते रणार्थं वीरः। निनेदुः। इति दुर्गादासः॥

ष्टेष, अ ङ क्षये। इति कविकल्पद्रुमः। (भ्वां-आत्म-अकं सेट्।) अ, अनिनेषत्। ङ, नेषते निनेषे। क्षयो नतिः। इति दुर्गादासः॥०॥ इति धातव मुद्राधामौ दन्त्यनकारादयो धातवः सम्पूर्णः। श्रीमद्बन्धकामदा।

त

त, तकारः। स व्यञ्जनवर्णविशेषः। तवर्गप्रथम वर्णश्च। (अधमाचार्याणामिति।) अस्यो-च्चारणस्थानं दन्ताः। इति व्याकरणम्॥ (अस्यो-च्चारणे दन्ताग्रेण जिह्वाग्रस्य स्पर्शः। विवारश्वासघोषा अल्पप्राणाः। माहेश्वरसूत्रेषु सार्वत्रिकीयं व्यापकता बाह्यप्रयत्नाः। अघोषश्च अल्पप्राणश्च।) अस्य लेखनप्रकारो यथा,—

"आदौ बिन्दुसमो मध्ये कुण्डलीरूपमाश्रिता।
तस्याग्रामाता निखा मध्ये विद्यौ रेखयेति।
ध्यानमस्य प्रवक्ष्यामि शृणुष्व कमलानने॥
चतुर्भुजां महाभीमां महामोक्षप्रदायिनीम्।
रक्तां सोडशवर्षीयां रक्ताम्बरधरां पराम्।
नानालङ्कारभूषां वा सर्वसिद्धिप्रदायिनीम्।
एवं ध्यात्वा तकारन्तु तन्मन्त्रं दशधा जपेत्॥"

इति वर्णोद्धारतन्त्रम्॥०॥

अस्य स्वरूपं यथा कामधेनुतन्त्रे।

"तकारं चञ्चलापाङ्गि स्वयं परमकुण्डली।
पञ्चदेवात्मकं वर्णं पञ्चप्राणमयं सदा॥
त्रिशक्तिसहितं वर्णं आत्मादितत्त्वसंयुतम्।
त्रिबिन्दुसहितं वर्णं पीतविद्युत्समप्रभम्॥"

तस्य १२ नामानि यथा,—

"त पूतना हरिः शुद्धिः प्रसौ शक्तिकण्ठो भया।
वामस्फिक्वामकटी च कामिनी मध्यकर्णकः॥
न्यायाढ्नी तरुतुलश्च कामिका एकपृष्ठकः।
रत्नकञ्च क्षामसुखी वाराही मकरोऽक्षरः॥
शुभगोऽक्षरश्चा दुइखादश्च कोकपृष्ठकः।
गन्धो विश्वासवस्नपचातुरात्मा च सौख्यः॥
धर्माभिमुखश्चो आत्मिारतम्बमस्तपातुरा॥"

इति नानातन्त्रमान्तरम्॥

तं, क्ली स्त्री (त+भावे डः।) तरणम्। (तरति भवसागरमनेनेति। तृ+करणे डः।) पुण्यम्। इति मेदिनी। ते, १॥

त, पुं, (तरति सर्म्मेति वा क्षिपति कुथादिरूपं चौर्येण अपगतमिति। तर्द तस्य वा+डः।) चौरः। अमृतम्। पुच्छम्। क्रोडः। म्लेच्छः। इति मेदिनी। ते, १॥ गर्भः। मठः। इति शब्दरत्नावली॥ रत्नम्। सुगतः। योधः। गौरविवर्जित पुच्छम्। क्रोडपुच्छम्। इत्येकाक्षरकोषः॥

तक हसने। सहने। इति कविकल्पद्रुमः। (भ्वां-परं-सकं हासे अकं सेट्) तकति। इति दुर्गादासः॥

तक, इ बोधने। इति कविकल्पद्रुमः (भ्वां-परं-सकं सेट्।) दीप्त्या दुःखेन जीवनम्। इ, तङ्क्यते दरिद्रेण दुःखेन जीव्यते इत्यर्थः। तङ्कति दीनः दुःखेन जीवति इत्यर्थः। इति दुर्गादासः॥

तकित, त्रि, (तक+"निष्ठितादयश्च।" उणां। १। ९६। इति इतच् प्रत्ययः।) धूर्त्तः। इत्युणादिकोषः॥

तकिला, स्त्री, (तकित+टाप्।) औषधम्। इत्युणादिकोषः॥

तक्म, [न्], (तकं हासयतीति। तक+मन्।) आस्यः। (तक हसने+"सर्व्वधातुभ्यो मनिन्।" ४। ३। १४५। इत्युणादिकोषाः मन्।) ब्रह्मणैव।

तक्र, क्ली, (तनक्ति सङ्कोचयति दुग्धं यावत्। हनिदमेव "स्फायितञ्चीति।" "स्फायितञ्चि वञ्चि" इति उणां। २। १३। इति रक् अपूर्ण्णिनाशु घुम च।) घोलदुग्धम्। इत्यमरः। ४। ९। ६३॥ तत्पर्य्यायः। गोरसजम् २ घोलम् ३ काल-शेयम् ४ विलोडितम् ५ दण्डाहतम् ६ अरि-ष्टम् ७ कट्वरम् ८ उदश्वित् ९ मथितम् १० मज्जिम ११। इति राजनिर्घण्टः॥ तत्तु पञ्चविधम्। तेषां निमानि नामानि लक्षणानि च यथा,—

"ससरं निर्जलं घोलं मथितं त्वजलं स्मृतम्।
तक्रं पादजलं प्रोक्तमुदश्विदर्द्धवारिकम्॥
छच्छिका सारहीना स्यात्स्वच्छा प्रचुरवारिका॥"

तेषां गुणाः।

"वातपित्तहरं घोलं मथितं कफपित्तनुत्।
तक्रं ग्राहि कषायाम्लं स्वादुपाकरसं लघु॥
वीर्य्योष्णं दीपनं वृष्यं प्रीणनं वातनाशनम्।
ग्रहण्यादिमतां पथ्यं भवेत् संग्राहि लाघवात्॥
किञ्च स्वादु विपाकित्वान्न च पित्तप्रकोपकम्।
कषायोष्णविकासित्वाद्रौक्ष्याच्चापि कफापहम्॥
न तक्रसेवी व्यथते कदाचि-
न्न तक्रदग्धाः प्रभवन्ति रोगाः।
यथा सुराणाममृतं सुखाय
तथा नराणां भुवि तक्रमाहुः॥
उदश्वित् कफकृद्बल्यं श्रमघ्नं परमं मतम्।
छच्छिका शीतला लघ्वी पित्तश्रमतृषापहा॥
वातनुत् कफकृत् सा तु दीपनी लवणान्विता॥"

यथोद्धृतस्नेहतोऽर्द्धोद्धृतस्नेहानुद्धृतस्नेहतक्राणां गुणाः।

"समुद्धृतघृतं तक्रं पथ्यं लघु विशेषतः।
स्तोकोद्धृतघृतं तस्मात् गुरु वृष्यं कफापहम्॥
अनुद्धृतघृतं सान्द्रं गुरु पुष्टिकफप्रदम्॥"०॥

अथ दोषविशेषे व्याधिविशेषे च तक्र-विधिर्यथा।

"वातेऽम्लं सैन्धवोपेतं स्वादु पित्ते सशर्करम्।
पिबेत् तक्रं कफे चापि व्योषक्षारसमन्वितम्॥
हिङ्गुजीरयुतं घोलं सैन्धवेन सुसंस्कृतम्।
भवेदतीव वातघ्नमर्शोऽतीसारहृत् परम्॥
रुचिदं पुष्टिदं बल्यं बस्तिशूलविनाशनम्।
मूत्रकृच्छ्रे तु सगुडं पाण्डुरोगे सचित्रकम्॥"०॥

अथामयप्रकरणोक्ता।

"तक्रमार्त्तं यत्र चोष्णं हन्ति कष्टं करोति च।
शोथभगन्दराढ्ये गदजेषु प्रयुज्यते॥"०॥

अथ तक्रसेवननिषेधमाह।

"शीतकालेऽग्निमान्द्ये च तथा वातामयेषु च।
अरुचौ स्रोतसां रोधे तक्रं स्यादमृतोपमम्॥
तत्तु हन्ति गरच्छर्दिप्रसेकविषमज्वरान्।
पाण्डुमेदोग्रहण्यर्शोमूत्रग्रहभगन्दरान्॥
मेहं गुल्ममतीसारं शूलप्लीहोदरारुचीः।
श्वित्रकोष्ठगतव्याधीन् कुष्ठशोथतृषाकृमीन्॥"

अथानर्हदोषाः।

"नैव तक्रं क्षते दद्यान्नोष्णकाले न दुर्बले।
न मूर्च्छाभ्रमदाहेषु न रोगे रक्तपैत्तिके॥"०॥

अथ तक्रादीनां स्वादुनिर्णयः पित्तनुत्।

"आमं तु तक्रं सुतरां तक्रमानं प्रदाहकृत्॥"

इति भावप्रकाशः॥

("स्वल्पकिट्टेऽप्यनल्पे च तक्रं स्यादमृतोपमम्।
दीपनं कफवातघ्नं मन्दाग्निर्यः क्षयी च यः॥"
इति मथिततक्रगुणाः।
"माहिषं कफकृत् स्निग्धं शोथकृत् शोषणं गुरु।
प्लीहार्शोग्रहणीदोषे मूत्रकृच्छ्रे विनाशनम्॥"
इति माहिषतक्रगुणाः।
"छागलं लघु संस्निग्धं त्रिदोषशमनं परम्।
गुल्मार्शोग्रहणीशूल पाण्डामयविनाशनम्॥"
इति छागीतक्रगुणाः।
"तक्रस्य विविधं तक्रं कथ्यते यच्च भूतले।
यदायोगेन तत् सम्यक् युज्यते येषु रोगिषु॥
मधुरं तक्रं तत्रमहाविलम्ब तत।
शुक्रं तथा च तल्लोकेऽपि त्रिदोषघ्नम्॥
सर्वं लघु च पथ्यं च त्रिदोषशमनं परम्।
तत्र यत् पूर्वमम् कथितं बहुगौल्मिनाम्।
मधुरं तक्रं तत्रमहा लघु मथितं मतम्॥
शोथोदराशोग्रहणीपाण्डुरोगज्वरातुरे।
वमीष्वपि च पानार्थं सिद्ध्यैन्मेहिषु॥
चिरं च प्रीतं तक्रं पित्तरक्तविशोषणम्।
स्निग्धं तक्रं तथा पूर्वं पुष्टं बलप्रदम्।
मधुरं पित्तदोषघ्नं श्रमघ्नं परमं मतम्॥
अम्लं तक्रं सामं गुरु विद्यात् कफापहम्।
वातघ्नं दीपनं चापि मधुराम्लोपशान्तिकारकम्॥"
इति त्रिविधतक्रगुणाः।
"तक्रं चाति कषायाम्लं शीतोष्णं दीपनं लघु।
क्षमायासघ्नं त्रिदोषघ्नं गुल्मार्शोऽतिसारहम्॥
इति तक्रगुणाः प्रोक्ता न दद्यात् क्षतरोगिषु।
वाते मूर्च्छे च शीतार्ता भीरुकाये प्रदद्याच्च।
संतप्तामयसम्बन्धात् तथाच रक्तपित्ते।
न यत्नं तक्रमाचक्र करोति विविधान् गदान्॥"
इत्यादि तक्र विधिहम्।
इति वाचस्पति प्रथमभागे तक्रभागे ॥०॥)

तक्रकूर्चिका स्त्री, (तक्रजाता कूर्चिका।) तक्रयोगेन जातदुग्धस्य घना। छाना इति भाषा। अस्या गुणाः। मलस्तम्भनवातकारित्वम्। रुच्यत्वम्। गुरुत्वम्। इति राजवल्लभः॥
(यथा सुश्रुते सूत्रस्थाने ४५ अध्याये।
"याकिली शालमा कथा दुर्जरा तक्रकूर्चिका।")

तक्रमांस, क्ली, (तक्रयोगेन साधितं मांसम्।) व्यञ्जनविशेषः। तक्रलि इति पारस्य भाषा। तस्य पाकप्रकारो यथा,—
"मांसमेतत् हि तत्र तक्रमांसलिहेत् मध्यमेत्।
छागादि वककस्यापि तस्मादौ च मर्दयेत्॥
निष्कोष्णं कृत्वा तक्रान्ते तीव्रधूपं तथा।
दाडिमादियुते तक्रे मत्स्यकानि वारयेत्॥"
अस्य गुणाः।
"तक्रमांसं हि पाचनं च रुच्यं कफवातहम्।
बलदं शिशिरं स्निग्धं दीप्ताग्निमांसवर्धनम्॥"
इति पाकराजेश्वरः।

तक्राटः, पुं, (तक्रार्थं तद्धितप्रत्ययात्पाठयति। अट+अच्।) मन्थानदण्डः। इति हारावली। ११॥

तक्ष, त्वचने। इति कविकल्पद्रुमः। (भ्वां-पर-सकं-सेट।) त्वचो वरणम्। त्वचयति त्वचति इति यावत्। तक्षति काष्ठं तक्षको भवेत्। इति दुर्गादासः॥

तक्ष, ऊ तनूकृतौ। इति कविकल्पद्रुमः। (भ्वां-पर-सकं-वेट।) ऊ तक्षिष्यति तक्ष्यति। तनूकृतिस्तनूकरणम्। तक्षति काष्ठं तक्षा। इति दुर्गादासः॥

तक्ष, क्ष न तनूकृतौ। इति कविकल्पद्रुमः। (स्वां-पर-सकं-वेट।) तक्ष तनूकरणम्। क्ष, तक्षिष्यति तक्ष्यति। न, तक्ष्णोति काष्ठं तक्षा। इति दुर्गादासः॥

तक्षकः, पुं, (तक्षतीति। तक्ष+ण्वुल्।) पातालवासिनागाष्टकान्तर्गतनागविशेषः। स काद्रवेयः कश्यपात् कद्र्वां जातः। अस्य विषम् आस्फोटकं ज्वलयति। अयं परीक्षितं ददंश। इति पौराणिकाः॥ (अयं हि परमकाष्ठकारी भिक्षुकवेशेन परीक्षितराजसमीपं गत्वा तत्रत्यफलमध्ये कृमिरूपेण प्रविश्य तं ददंश। यथा, महाभारते। १।४।१२०।
"तक्ष तक्षको नाम सर्पराजः सुदारुणः। सरीसृप च नरेन्द्रं विद्वान् तक्षककृतं तथा सञ्जग्राह परवान् विषं महाविषं प्रविवेश॥" तक्ष तनूकरणे+"कृत् शिल्पिनि संज्ञायाम्।" उणां। ३।१४२। इति वुन्।) तक्षा। इत्यमरः। २।१०।९। विश्वकर्मा। इति शब्दरत्नावली॥ वृक्षभेदः। इति हैमचन्द्रः। सूत्रधारः। इति भरतटीकायामुज्ज्वलदत्तः। (अस्य भेदाः यथा यथैव विधु भवेत् तक्षको भविता ध्रुवम्। यथा, भागवते। ६।१४।४।
"तक्ष यथैव भवति तक्षको भविता ध्रुवम्।"
रैवते, त्रि। यथा, रामायणे। २।८०।२।
"तथा महत्त्वशक्त्येव मार्गिको दण्डपालकः।")

तक्षणं, क्ली, (तक्ष तनूकरणे+भावे ल्युट्।) तनूकरणम्। (यथा, मनुः। ५।११५।
"द्रवाणाञ्चैव सर्वेषां शुद्धिरुत्पवनं स्मृतम्।
प्रोक्षणं संहतानाञ्च दारवाणाञ्च तक्षणम्॥")

तक्षणी, स्त्री, (तक्ष्यतेऽनेनेति। तक्ष+करणे ल्युट्। टित्वात् ङीप्।) वास्यस्त्रम्। इति शब्दरत्नावली।

तक्षशिला, स्त्री, देशविशेषः। इति सिद्धान्तकौमुदी। (यथा, महाभारते। १।३।१९।
"तेनैव काले जनमेजयस्तथा धर्मराज च तथा आगत्य तक्षशिलां पौषधिलां जनमेजयः॥")

तक्षा [न्] पुं, (तक्ष्णोति तनूकरोतीति। तक्ष+"कनिन् युवृषितक्षिराजि" इत्यादि।" उणां। १।१५६। इति कनिन्।) तष्टा। इत्यमरः। २।१०।९।
(यथा, मनुः। १०।४८।
"आयोगवेन विप्रायां जायन्ते वर्णबाह्या नृणां।
अन्यत्र तक्षा वैदेहो तथाभ्यासे
तथा सिद्धो कदाचिदपि सिद्धे॥")

तग, इ स्खलने। खञ्जी। गत्यां। इति कविकल्पद्रुमः। (भ्वां-पर-सकं-अकं-सेट।) इ, तङ्ग्यते। इति दुर्गादासः॥

तगरं, क्लीवम्। तिनिसुक इति लोके प्रसिद्धम्। तगरमूल इति ख्यातम्। तत्पर्य्यायः। कालानुसारिकं १ वक्रम् २ कुटिलम् ३ शठम् ४ महोरगम् ५ नतम् ६ जिह्मम् ७ दीपनम् ८ नन्द्यावर्त्तम् १० इति रत्नमाला। विनम्रम् ११ कुञ्चितम् १२ नहुषाख्यम् १३ दण्डहस्तम् १४ बर्हिणम् १५ पिण्डीतगरकम् १७ पार्थिवम् १८ राजहर्षणम् १९ कालानुसारकम् २० वक्रम् २१ दीनम् २२। अस्य गुणाः। शीतलत्वम्। तिक्तत्वम्। दृष्टिदोषविषार्त्तिभूतोन्मादभयापहत्वम्। वातदोषघ्नत्वम्। इति राजनिघण्टुः॥ गन्धद्रव्यविशेषः। तस्य गुणाः।
"तगराद्वयमुष्णं तगरं कटुकं लघु स्निग्धम्।
वातं पित्तहरं दृष्टिदोषं च विषम्।
तमरद्वयमन्यं स्यात् वातं सितं लघु कषायम्।
विषापस्मारशूलाक्षिरोगदोषविनाशनम्॥"
इति भावप्रकाशः॥

तगरः, पुं, (तं क्रोडभावं गिरतीति। गॄ+अच्।) पुष्पवृक्षविशेषः। टगर इति भाषा। तत्पर्य्यायः। चित्रपुष्पः १। शातपर्णः २ कटुपत्रः ३। इति शब्दरत्नावली। (यथा, महाभारते। ११।१०४।७५।
"प्रियङ्गुचन्दनाभ्यां च बिल्वेन तगरेण च।
पृथगेताद्युलिम्पेत केसरेण च बुद्धिमान्॥")
मदनवृक्षः। इति राजनिर्घण्टः॥

तगरपादिकं, क्ली (तगरस्य पादो मूलमिव पादः पादो अस्येति कन्।) तगरम्। इति रत्नमाला॥

तङ्कः पुं स्त्री, (तङ्क+घञ्।) पाषाणदारकः। टाङ्गी इति भाषा। (तङ्क्यतेऽनेनेति+भावे घञ्।) वियोगादिजनितभयम्। भयम्। इति सिद्धान्तकौमुदीकायां भरतः॥

"तापत्यमथ वाशिष्ठमौर्व्वञ्चाख्यानमुत्तमम् ॥"

एतदुपाख्यानम् महाभारते आदिपर्व्वणि १७२ अध्याये द्रष्टव्यम् ॥)

तापन, पुं, (तापयतीति । तप + णिच् + कर्त्तरि ल्युः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ९ ॥ (यथा, महाभारते । ५ । ४६ । २ ।

"शुक्राद्ब्रह्म प्रभवति ब्रह्म शुक्रेण वर्द्धते ।
तच्छुक्रं ज्योतिषां मध्ये तप्तं तपति तापनम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥")

कामबाणः । इति जटाधरः ॥ (तदुक्तं,—
"सम्मोहनोन्मादनौ च शोषणस्तापनस्तथा ।
स्तम्भनश्चेति कामस्य पञ्च बाणाः प्रकीर्त्तिताः ॥")

सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥ (स्त्री, नरकविशेषः । यथा, याज्ञवल्क्ये । ३ । २२४ ।

"लोहचारकमेव तापनं संप्रतापनम् ॥"

भावे ल्युट् । तापकरणम् । यथा, सुश्रुते ।१।३१ ।

"तद्वमनधनदाहस्वेदतापनप्रदाहप्रभावकर-मिति ॥") तापयितरि त्रि ॥ (यथा, महाभारते । १ । १९ । २१ ।

"ततोऽमराणां निनदमावन्मात्तं
महासुरं चक्रमभिक्षतापनम् ॥")

तापिच्छ, स्त्री, तमालवृक्षम् । इति शब्दचन्द्रिका ॥ तेकपात इति भाषा ॥

तापस, त्रि, (तपोऽस्त्यस्येति । तपस् + "अण् च ।" ५ । २ । १ ३ । इति अण् । यद्वा, तपः शीलमस्य । "छत्रादिभ्यो णः ।" ४ । ४ । ६२ । इति णः ।) तपस्वी । इत्यमरः । २ । ७ । ४१ ॥ (यथा, मनुः । ६ । २७ ।

"तापसेष्वेव विप्रेषु यात्रिकं भैक्ष्यमाहरेत् ॥"

तपः सम्बन्धी । यथा, श्रीमद्भागवते । ३।१७।१ ।

"तापसं व्रतमास्थाय मन, दुःसहं च ॥")

पुं, दमनकवृक्षः । बकपक्षी । इति राजनिर्घण्टः ॥ (तपस्वीति । यथा, रघुः । १ । ४९ ।

"कान्तारतापसतरुस्तु कार्ष्णमुक्ष चिमनकः ।"
"इङ्गुदी तापसः स्नोत्वात् गुरुत्वात् कफवातहृत् परम् ।"
"कान्तारतापसविभू पङ्कलाङ्गली मता ।")

तापसतरु, पुं, (तापसप्रियस्तरुः ।) इङ्गुदी-वृक्षः । इत्यमरः । २ । ४ । ४६ । (इङ्गुदीशब्दे-ऽस्य विवरणं ज्ञातव्यम् ।)

तापसद्रुम, पुं (तापसप्रियो द्रुमः ।) इङ्गुदी वृक्षः । इति हेमचन्द्रः । ४ । २०८ । (पर्य्यायो-ऽस्य यथा,—
"इङ्गुदीऽङ्गारवृक्षश्च तिक्तकस्तापसद्रुमः ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

तापसद्रुमसन्निभा, स्त्री, (तापसद्रुमस्य सन्निभा यस्याः ।) गर्भदात्रीक्षुपः । इति राजनिर्घण्टः ॥

तापसप्रिय, पुं (तापसानां प्रियः ।) प्रियाल-वृक्षः । इति राजनिर्घण्टः ॥ (इङ्गुदीवृक्षः । यथा, वैद्यकरत्नमालायाम् ।
"दीप्तवृक्षोऽङ्गारवृक्ष इङ्गुदी तापसप्रियः ।")

तापसप्रिया, स्त्री (तापसानां प्रिया ।) द्राक्षा । इति राजनिर्घण्टः ॥ (द्राक्षाशब्देऽस्या गुणा-दयो ज्ञातव्याः ॥)

तापहरी, स्त्री, (तापं अन्तर्निगूढसन्तापं हर-तीति । हृ+बाहुलकात् टः । स्त्रियां ङीप् ।) व्यञ्जनविशेषः । यथा,—
"एते हरिमन्थयुक्ता भावार्था भर्जयेद्घृते ।
तण्डुलानपि निर्धौतान् घृतेन परिभर्जयेत् ।
सिद्धियोग्य जल तत्र प्रक्षिप्य कुशलः पचेत् ।
तत्रामलकसिद्धानि मात्रया तत्र निक्षिपेत् ।
एषां सिद्धा समाख्याता प्रोक्ता तापहरी बुधैः ।"
अस्या गुणाः ।
"भक्तापहरी बल्या हृद्या पित्तवमापहा ।
रुच्या तर्पणी हृद्या गुर्व्वी तत्र गुणा स्मृताः ।"
तापहरी इति लोके । इति भावप्रकाशः ॥
तापहारिणी त्रि ॥

तापिच्छ, पुं (तापिनं गमनं छादयति आच्छा-दयतीति । छद्+अन्येभ्योऽपीति डः । पृषो-दरादित्वात् साधुः ।) तमालवृक्षः । इत्यमरः । २ । ४ । ६८ । (यथा, गीतगोविन्दे । ११ । ११ ।
"अन्योऽन्यमिमिदनुन मयमेसादन्त्वचुच्छा-यभाम ।"
स्त्री, तापिच्छस्य पुष्पम् । पुष्पे मूलेऽपि लुक् । (द्वितीयं यथाऽस्मर्थैमिति पर्य्यवस्कम् ।) तापिच्छपुष्पम् । यथा, माघे । १ । २२ ।
"रथाङ्गपाणेः पटलेन रोचिषा-
मृषित्विषः संवलिता विरेजिरे ।")

तापिञ्ज, स्त्री, (तापिनं जयतीति । जि+डः ।) धातुमाक्षिकम् । इति राजनिर्घण्टः ॥

तापिञ्ज, पुं तापिच्छ । इत्यमरटीकायां भरतः ॥

तापी, स्त्री, (तापयतीति । तप+णिच्+अच् । गौरादित्वात् ङीष् ।) तापिनी नदी । सा दक्षिणसमुद्रवाहिनी विन्ध्यपर्व्वतादुद्भूता । इति राज-निर्घण्टः ॥ (यथा, मार्कण्डे । ११६ । २७ ।
"तापी पयोष्णी निर्विन्ध्या क्षिप्रा च ऋषभा नदी ।
विन्ध्यपादप्रसूतास्ता सर्व्वाः शीतजलाः शुभाः ॥"
इयं यमुनाख्या इति विष्णुपुराणम् । २ । ३ । ११ ।
"तापी शाखा च गोलोमी गोमती प्रालिता नदी ।
सरस्वती पुरा कद्रो नर्म्मदा पश्चिमाम्बुगा ॥
स्नाता जन यत्र प्रीत पितॄन् कामदायिनी ।
पापदोषहरं श्रेष्ठं कण्डुकुष्ठविनाशनम् ॥"
इति भारते प्रथमे स्थाने सप्तमेऽध्याये ॥) यमुना । इति त्रिकाण्डशेषः ॥

तापी, [न्] (तपोऽस्यास्तीति । तप+"अस इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) बुद्धः । इति त्रिकाण्डशेषः ॥ तापयुक्ते, त्रि ॥

ताप्य, क्ली, (तापे हितम् । ताप+यत् ।) धातु-माक्षिकम् । इति रत्नमाला ॥ इत्यपरे पुंलिङ्गो-ऽयम् । ४२१ । (यथा, भावप्रकाशे ।
"ताप्यस्य प्रयतिमय हे ताप्यस्यापयोजनम् ।")

ताप्यकं, क्ली, (ताप्यमेव । स्वार्थे कन् ।) माक्षि-कम् । इति राजनिर्घण्टः ॥ (माक्षिकशब्दे विवरणमस्य ज्ञेयम् ।)

ताप्युत्थरजक, क्ली, (ताप्युत्थात् जायते यस्य । कप् ।) माक्षिकधातुः । इति रत्नमाला ॥

ताम, पुं, (ताम्यत्यनेनेति । तम+करणे घञ् ।) भीषणः । दोषः । इत्युणादिकोषः ॥

तामरं, क्ली, (तामं ग्लानिं राति नाशयतीति । रा+कः ।) जलम् । घृतम् । इति भरतधृतकोषः ॥

तामरसं, क्ली, (तामरे जले सरतीति । सृ+डः । यद्वा बाहुलकात् असिर्न्नप्रत्ययः । ताम्यन्ति-रसः । धातोस्तुगागमश्च । विभाषा इति । उज्ज्वलदत्तः । ३ । ११७ ।) पद्मम् । (यथा, राजेन्द्रकर्णपूरे । ५४ ।
"तासां तामरसोदरे भगवतो धातुः प्रतापो स्थितिः ।")
स्वर्णम् । इत्यमरः । १ । १० । ३० । ताम्रम् । इति मेदिनी । से ५२ । (इदमपि सारस्वताद्यभिधेय । तत्र सपर्य्यादिक इन्द्र-शब्दे द्रष्टव्यम् ।)

तामलकी, स्त्री, भूम्यामलकी । इत्यमरः । २ । ४ । १४० । (यथा सुश्रुते उत्तरतन्त्रे ३९ अध्याये ।
"कटुकेन्द्रयवोशीरसेव्यैस्तामलकीयुतैः ।")

तामलिप्तं, क्ली } देशविशेषः । तमलुक इति
तामलिप्ती, स्त्री, } भाषा । तत्पर्य्यायः । ताम-लिप्तम् १ तामलिप्ती २ तमालिनी ३ स्तम्बपूः ४ विष्णुगृहम् ५ । इति हेमचन्द्रः । ४ । ४१ । तमोलिप्ती ६ वेलाकूलम् ७ तमालिका ८ । इति त्रिकाण्डशेषः ॥

तामसं, त्रि (तम इव । तमस्+अर्शआदित्वात् अच् ।) तमोगुणविशिष्टम् । तद्भेदो यथा,—
"त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥
यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ॥
यातयामं गतरसं पूतिपर्य्युषितञ्च यत् ।
उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥
विधिहीनमसृष्टान्नं मन्त्रहीनमदक्षिणम् ।
श्रद्धाविरहितं यज्ञं तामसं परिचक्षते ॥
मूढग्राहेणात्मनो यत् पीडया क्रियते तपः ।
परस्योत्सादनार्थं वा तत्तामसमुदाहृतम् ॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते ।
असत्कृतमवज्ञातं तत्तामसमुदाहृतम् ॥"
इति श्रीभगवद्गीतायां १७ अध्यायः ॥ * ॥
अपि च तत्रैव १८ अध्याये ।
"नियतस्य तु सन्न्यासः कर्म्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामसः परिकीर्त्तितः ॥
यत्तु कृत्स्नवदेकस्मिन् कार्य्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्पञ्च तत्तामसमुदाहृतम् ॥
अनुबन्धं क्षयं हिंसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म्म यत्तत्तामसमुच्यते ॥
अयुक्तः प्राकृतः स्तब्धः शठो नैष्कृतिकोऽलसः ।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते ॥
अधर्म्मं धर्म्ममिति या मन्यते तमसावृता ।
सर्व्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ॥
यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्म्मेधा धृतिः सा तामसी मता ॥
यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।
निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतम् ॥"

तामस, पुं, (तमस्तमोगुणः प्रधानमेनास्त्यस्येति । अण् ।) सर्पः । खलः । इति मेदिनी । स, ५५ । उलूकः । इति राजनिर्घण्टः । चतुर्थमनुः । स्वारोचिषमन्वन्तरे परिणामात् चिक्कोरकाराः । त्रिशिखनामा इन्द्रः । वैधृतयो देवाः । ज्योति-र्धामादयः सप्तर्षयः । वृषख्यातिनरादयोऽस्य मनु-पुत्राः । इति श्रीभागवतम् । ८ । १ । तमोगुण-युक्ते, त्रि । (यथा मनुः । १२ । ३३ ।
"लोभः स्वप्नोऽधृतिः क्रौर्य्यं नास्तिक्यं भिन्न-वृत्तिता ।
याचिष्णुता प्रमादश्च तामसं गुणलक्षणम् ॥")
तामसगुणो यथा । क्रोधः १ मोहः २ दर्पः ३ पराक्रमः ४ नीतिः ५ दुर्म्मतिः ६ मकट्टुः ७ इन्द्रियाणि ८ भक्षणं ९ । तामस-शास्त्राणि यथा । कणादगौतमशाक्यादिकृत-योगशास्त्रादि १ कल्पशास्त्रपाशुपतादि २ माध्यन्दिनभाष्यकृतशास्त्रादिकम् ३ वेदाद्बहि-र्भूतस्मृतिः ४ ॥ तामसपुराणानि यथा । मात्स्यम् १ कौर्म्मम् २ लैङ्गम् ३ शैवम् ४ स्कान्दम् ५ आग्नेयम् ६ । तामसस्मृतयो यथा । गौतमम् १ बार्हस्पत्यम् २ सांवर्त्तम् ३ याम्यम् ४ शाङ्ख्यम् ५ औशनसम् ६ । ० । इति पाद्मोत्तर-खण्डे यथा —
"मनुः शैवं शैवं तिक्तमिदं तथामतम् ।
मात्स्यं शैवं मार्कण्डं वामनं पाद्मं तथा ॥"

पौरोहित्यं याजनञ्च देवद्रव्योपजीवनम् ।
विष्णुसेवापराधञ्च तथा नामापराधकम् ॥
अयतुभतिपञ्च देवि । माङ्गल्यमाभिचारिकम् ।
पशुजीवादिहननं पातकञ्चोपपातकम् ॥
अतिपापं महापापमनुपातकमेव च ।
लोभं मोहमहङ्कारं कामं क्रोधं मदन्तथा ॥
एतदन्यत्परं कर्म गर्हितञ्च वरानने ॥
राजसं तामसं प्रोक्तं मया च मुनिभिः पुरा ॥"
इति पाद्मोत्तरखण्डम् ॥

तामसिकं, त्रि, (तमसा तमोगुणेन निर्वृत्तम् । तमस्+ठञ् ।) तामसम् । तमोगुणकार्य्यम् ॥

तामसी, स्त्री, (तमोऽन्धकारः प्राचुर्य्येण अस्ति अस्याम् । तमस्+अण् । स्त्रियां ङीप् ।) निशा । दुर्गा । इति मेदिनी । से ५५ ॥ जटामांसी । इति राजनिर्घण्टः ॥ (तमोगुणधर्म्मिणी । यथा, देवीभागवते । ३ । ८ । ५ ।
"सात्त्विकी राजसी चैव तामसी च तथा परा । श्रद्धा तु त्रिविधा प्रोक्ता मुनिभिस्तत्त्वदर्शिभिः ॥")

तामिस्रं, क्ली, (तमिस्रं अन्धकारततिरस्त्यत्रेति । तमिस्र+अण् ।) अन्धकारमयनरकम् । इति मनुः ॥ परवित्तापत्यकलत्रापहर्त्ता यमदूतैर्नीयते यत्र । इति श्रीभागवतम् ॥ (अन्धकारमये, त्रि । यथा, महाभारते । ३ । १६९ । १० ।
"तामिस्रं प्रथमं पक्षं शीतशोकभयो वध ॥"
अन्धकाररात्रिः । यथा, रघुः । १५ । २ ।
"नवखेव विधुरेश्याशामिवैव तामसम् ॥")

तामिस्रः, पुं, (तमिस्रं तमोगुणोत्थः क्रोधः प्रचुरतयाऽस्त्यस्येति । अण् ।) भोगेच्छाप्रतिघाते क्रोधः । इति श्रीभागवतटीकायां स्वामी ॥ (यथा, भागवते । ३ । १२ । २ ।
"ससर्ज्जाग्रेऽन्धतामिस्रमथ तामिस्रमादिकृत् ॥")

ताम्बूलं, क्ली, (तम+"खर्ज्जपिञ्जादिभ्य ऊरोलचौ ।" उणां । ४ । ९० । इति ऊलच् कुगागमो दीर्घश्च ।) पर्णम् । पान इति भाषा । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । मधुरत्वम् । क्षारत्वम् । कषायत्वम् । वातकृमिकफदुर्गन्धदोषनाशित्वम् । कामाग्निसन्दीपनत्वम् । स्त्रीसम्भोगभूषणत्वम् । प्रतिबन्धपाकशोणदर्शनकारित्वम् । मुखेऽस्थिते मुखे च प्रकाशत्वम् । प्राङ्गारमुखे कान्त्यत्वम् । सर्वेऽपि दुर्लभत्वञ्च । इति राजवल्लभः ॥ अपि च । तीक्ष्णत्वम् । पैत्तिककफनाशित्वम् । रुच्यत्वम् । दाहकारित्वञ्च ॥ ० ॥ तत्पत्रस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । कषायत्वम् । दाहकवातकफनाशित्वञ्च ॥ ० ॥ शुभ्रपत्रस्य गुणाः । श्वेतवातादिनाशित्वम् । पथ्यत्वम् । रुच्यत्वम् । दीपनत्वम् । पाचनत्वञ्च ॥ ० ॥ पक्वशीर्णाताम्रपर्णगुणाः । ग्राहरोचकत्व ... कारित्वम् ॥ त्रिदोषघ्नत्वम् ... । पाचनत्वम् । रुचिजननत्वम् । त्रिदोषापि मार्द्दवत्वञ्च ॥ ० ॥

"भिरामर्णं प्रोषित्य कुम्भाम्भसाम्भसा ।
प्रोर्ष्यं स्याद्रोगदम्भस्य भक्षिते तु सितासिते ॥
अनिशाय मुखे पर्णं पूगं स्वादयते नर ।
मतिभ्रमो दरिद्रः स्यादन्ते न स्मरते हरिम् ॥"
इति राजनिर्घण्टः ॥ ० ॥
"पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसम्भवः ।
चूर्णपर्णं हरेदायुः शिरा बुद्धिविनाशिनी ॥
तस्मादग्रञ्च मूलञ्च शिरां चैव विवर्ज्जयेत् ।
चूर्णपर्णं समायुक्तं ताम्बूलं भक्षयेद्बुधः ॥
पर्णाधिकं हरति गन्धमथाधिपूगं
रागं तथाधिकदलं सुगन्धिकारि ।
ताम्बूलमुत्तममिदं दशनाग्रभिन्न-
पर्णं निशास्वधिकमाधिकपत्रमाहुः ॥
ताम्बूलं न हितं प्रोक्तं शरीरे रुक्षदुर्बले ।
ज्वरार्त्तशोषपित्तास्रमूर्च्छाशिरोरोगिषु ॥
ताम्बूलाद्युपयोगात् स्यात्क्षोभपित्तानिलाक्षता ।
देहकेशद्विजाग्निश्रोत्रदृग्बलक्षयः ॥"
इति राजवल्लभः ॥ ० ॥
"विना पर्णं मुखे दत्त्वा गुवाकं भक्षयेद्यदि ।
तावद्भवति चाण्डालो यावद्गङ्गां न गच्छति ॥"
इति कर्म्मलोचनम् ॥ ० ॥
"ताम्बूलं विधवास्त्रीणां यतीनां ब्रह्मचारिणाम् ।
तपस्विनाञ्च विप्रेन्द्र । गोमांससदृशं ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥ ० ॥
अस्य नामानि गुणाश्च । यथा, भावप्रकाशे ।
"ताम्बूलवल्ली ताम्बूली नागिनी नागवल्लरी ।
ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरम् ॥
वश्यं तिक्तकटु क्षारं रक्तपित्तकरं लघु ।
बल्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम् ॥"
क्रमुकम् । इति मेदिनी । के, ९० ॥

ताम्बूलकरङ्कः, पुं, (ताम्बूलस्य ताम्बूलरक्षणाय यो करङ्कः ।) ताम्बूलपात्रम् । पानेर बाटा इति भाषा ॥ तत्पर्य्यायः । स्थगी २ । इति हेमचन्द्रः । ३ । ३५२ ॥

ताम्बूलदः, त्रि, (ताम्बूलं ददातीति । दा+क ।) ताम्बूलदाता । तत्पर्य्यायः । वागुलिकः २ । इति त्रिकाण्डशेषः ॥

ताम्बूलपत्रः, पुं, (ताम्बूलस्य पत्रमिव पत्रमस्य ।) पिण्डालुः । इति राजनिर्घण्टः ॥ (ताम्बूलपर्णं, क्ली । यथा सुश्रुते । १ । ४६ ।
"ताम्बूलपत्रं तीक्ष्णोष्णं कटुपित्तप्रकोपनम् ॥")

ताम्बूलरागः, पुं, (ताम्बूलस्य चर्व्वितताम्बूलस्य राग इव रागोऽस्य ।) मसूरः । इति शब्दचन्द्रिका ॥ ... ताम्बूलस्य रङ्गश्च ॥

ताम्बूलवल्लिका, स्त्री, (ताम्बूलस्य वल्ली लता स्वार्थे कन् टापि पूर्व्वह्रस्वश्च ।) ताम्बूली । इति शब्दरत्नावली ॥

ताम्बूलवल्ली, स्त्री, (ताम्बूलस्य वल्ली ।) ताम्बूललता । पानेर गाछ । इति भाषा ॥ तत्पर्य्यायः । ताम्बूली २ नागवल्ली ३ । इत्यमरः । २ । ४ । १२ ॥ नागिनी ४ पर्णलता ५ फणिलता ६ भुजगलता ७ सुरभिलता ८ भुजङ्गलता ९ । इति राजनिर्घण्टः ॥ ताम्बूलवल्लिका १० पर्णवल्ली ११ ताम्बूलिनी १२ । इति शब्दरत्नावली ॥ नागिनी १३ नागवल्लरी १४ । इति भावप्रकाशः ॥

ताम्बूली, स्त्री, (ताम्बूल+गौरादित्वात् ङीषादौ वा ङीप् ।) ताम्बूलवल्ली । इत्यमरः । २ । ४ । १२० ॥ (यथा, कथासरित्सागरे । ९ । ८२ ।
"ताम्बूलीश्च महाजालिमालातिलककुब्धिभिः ॥")

ताम्रं, क्ली, (ताम्यति आकाङ्क्षति इति । तमु काङ्क्षायाम्+"अमितम्योर्दीर्घश्च ।" उणां । २ । १६ । इति रक उपधाया दीर्घश्च ।) तैजसधातुविशेषः । तामा इति तांबा इति च भाषा ॥ तत्पर्य्यायः । ताम्रकम् २ शुल्वम् ३ म्लेच्छमुखम् ४ द्व्यष्टम् ५ वरिष्ठम् ६ उदुम्बरम् ७ । इत्यमरः । २ । ९ । ९७ ॥ द्विष्टम् ८ उदम्बरम् ९ औदुम्बरम् १० उडुम्बरम् ११ औडुम्बरम् १२ । इति तट्टीका ॥ तपनेष्टम् १३ अम्बकम् १४ अरविन्दम् १५ रविलोहम् १६ रविप्रियम् १७ रक्तम् १८ नैपालिकम् १९ रक्तधातुः २० मुनिपित्तलम् २१ अर्कम् २२ सूर्य्याङ्गम् २३ लोहितायसम् २४ । इति शब्दरत्नावली ॥ शुभ्रस्य तस्य गुणाः । मधुरत्वम् । कषायत्वम् । तिक्तत्वम् । विपाके कटुत्वम् । शीतलत्वम् । कफपित्तविबन्धशूलपाण्डूदरगुल्मनाशित्वञ्च । इति राजनिर्घण्टः ॥ अम्लत्वम् । सारकत्वम् । रोपणत्वम् । लघुत्वम् । लेखनत्वम् । अर्शोज्वरकुष्ठकासश्वासक्षयपीनसाम्लपित्तशोथकृमिनाशित्वम् । अल्पबृंहणत्वञ्च । इति भावप्रकाशः ॥ परिणामशूलशोथवायामशूलरोगनाशित्वम् । रुचिकारित्वम् । बलापुष्टिपुष्टिकारित्वं निल्शेषवने वमीमलिननाशित्वञ्च ॥ ० ॥ अशुद्धिहीनमूर्च्छाकम्पभ्रमशोषगोमियाधिभक्षी ... मथान्तदाहादि मथ्यदृष्टानामस्य गुणाः । वान्तिभ्रान्तिमूर्च्छाविदाहस्वेदपित्तनाशित्वम् । बलकारित्वञ्च ॥ ० ॥ अशोधितताम्रदोषाः । आयुःशुक्रबलनाशित्वम् । रोगवृद्धिकरहिंसकत्वम् । भ्रमक्लेदवान्तिरोगकुष्ठशूलविरेचनमेदोदाहविषाकारित्वम् । विषतुल्यत्वञ्च । इति गुणदोषाः ॥ ० ॥ तस्योत्पत्तिर्यथा —
"शुक्रं यत् कार्त्तिकेयस्य पतितं धरणीतले ।
तस्मात् ताम्रं समुत्पन्नमिदमाहुः पुराविदः ॥"
तस्य लक्षणं यथा,—
"जपाकुसुमसङ्काशं स्निग्धं मृदु घनं क्षमम् ।
लोहनागोज्झितं ताम्रं मारणाय प्रशस्यते ॥
कृष्णं रूक्षमतिस्तब्धं श्वेतञ्चापि घनासहम् ।
लोहनागयुतञ्चेति शुल्वं दुष्टं प्रकीर्त्तितम् ॥"
तस्य शोधनं विधिर्यथा,—
"नेपालोद्भवताम्रादि ताम्रमन्यत् प्रशान्तिदम् ।
निर्विषं न च विकारं नैव तस्मिन् च दृश्यते ॥
... न च कुष्ठादं ... न च पित्तादिदा
... यथावत् शोधयेत् ... ॥"
अथ तस्य मारणविधिर्यथा —
"सूक्ष्माणि ताम्रपत्राणि कृत्वा सन्धाय ... ।

चागरत्वममन्वेन तत सम्मे निनि क्षिपेत् ।
मार्दाय सगक दत्वा मामसन्वेन मर्दयेत् ।
तत तुल्य मथाप्ति चपरद्विगुणेन च ।
गन्धकमाषकेन तस्य कुर्य्यात् गोलकम् ।
तत पिष्टु च मीनाक्षीं चाङ्गेरीं पुनर्नवाम् ।
तत्स्वरसेन वादयन्ति वेमयेद्गुडूचीसिताम् ।
धत्वा तत्रास्क भाण्डे शरावेण च रोधयेत् ।
वालुकाभि प्रपूर्याथ विभूतिलवणाम्बुभि ।
दत्वा भाण्डमुखे मुद्रां ततचुल्यां निधापयेत् ।
क्रमवृद्धाग्निना सम्यक् यामद्वयामचतुष्टयम् ।
स्वाङ्गशीत समुद्धृत्य सद्वैश्वस्वकम्बे ।
सार्थेन यौगक तत्र निम्बवैश्वरवोदरे ।
गन्ध वेपसु कणस्य धर्मनीसुखमात्रक ।
पाक्य सम्पुटे पिम भस्म भवति निश्चितम् ।
वमनच विरेकश्च भ्रम क्लममथार्दयम् ।
विदाह स्वेदमूर्च्छादि च करोति कदाचन ।"

इति भावप्रकाश । ● ।

शुल्वभिम । अनुक्तवर्णे । इति वैद्यकर-
सेन्द्रसारसंग्रहे च । तद्गुणा, यथा,
("न विष विषमित्याहुस्ताम्रञ्च विषमुच्यते ।
एकदोषो विषे प्रोक्तो दोषास्ताम्रे प्रकीर्त्तिता ।
भ्रमो मूर्च्छा विदाहश्च स्वेदक्लेदौ वमिस्तथा ।
अरुचिश्चित्तसन्ताप एते दोषा विषोपमा ।
तस्मादिदम्पुटं ताम्र हि मार्गे रोगोपशान्तये ।
मृदुना वह्निरूपेण ताम्रपत्राणि धामयेत् ।
ततो पश्चाच्च निर्गुण्डीरसे क्षिपेत् पुन पुन ।
स्नानकरम् ।
गोमूत्रेण मर्दयेत्ताम्र ताम्रपत्र प्रपाचिता ।
शुध्यते ताम्र सन्देहो मारणाय कथ्यते ।

इति ताम्रशोधनम् । ● ।

अथ ताम्रमारणम् ।
सूतमेकं द्विधा गन्ध चार्मे मर्द्दयेत् कन्यया ।
तुल्यांशुक ताम्रपत्रं लिप्त्वा काष्ठौ निधापयेत् ।
सम्यक् शरावे धार्मे भस्मा निधापयेत् ।
चतुर्यामं वह्निना पाचयेत् कर्म्मणे ।
तत पुन पुनर्देय चाङ्गेरीं विमर्दयेत् ।
निपतेत् ताम सर्वेच सर्वरोगेषु योजयेत् ।

गन्धारकम् ।
कम भिषा हैमक्षयवीन
ताम्रार्द्ध गन्धक गुड्ज्वलन्तम् ।
यवामलार्द्धं पुटयेत् इडूका
पाचादिक मारयतेपि ताम्रम् ।

अन्यान्तरम् ।
शुद्ध ताम्रम्ल (निम्बु) पटेवा पाचित चमीरसे
कर्दमलिप्तं चुल्लिकयपथा निम्बुरसैश्च ।
तिर्य्यक्ताम्रमुपिता रसकशिलाभ्यां पुटाभ्यामयेत्तत
तुल्यां च वप भस्मं सुवर्णं पचागनीन पिषा ।
सुधा यथा —
कान्तिभास्वत्वेन सम्बकामुकामि
ताम्रमर्य
गतं केवलत्रपुरासकाशतापकमायपालकेन युञ्ज्यात् ।
मुक्तामाक्षिकमान्त्रपाशं विमलन सन्धुकसारिषकेन ।
घृत सौभाग्यभराव युक्तमलं मल्लादिना पाचयेत्
रात् ।
ताम्रतुल्य सरस्वते युक्ताक्षीरोदरायकम् ।
त्रिनिमूलामसाराधूर्णं चमकयो सवितामित् ।"

इति ताम्रमारणम् । ● ।

इति वैद्यकरसेन्द्रसारसंग्रहे ताम्रमारणाधि-
कारे ।)

ताम्र, पुं, (ताम्रवर्णेन वर्णोऽस्त्यस्य । अच् । ताम्रवर्णत्वादस्य तथात्वम् ।) कुष्ठरोगविशेष । इति कर्म्मविपाक । (द्वीपभेद । यथा, महाभारते । २ । ३१ । ६८ ।
"द्वीपं ताम्राह्वयञ्चैव पर्व्वत रामक तथा ।")

ताम्रक, क्ली, (ताम्र+स्वार्थे कन् तनामा वा कन् ।) ताम्रम् । इत्यमर । २ । ९ । ९७ ।

ताम्रकर्णी, स्त्री (ताम्रवर्णौ कर्णौ यस्या स्त्रियां ङीष् ।) अञ्जना नाम पश्चिमदिग्गजस्त्री-पत्नी । इत्यमर । १ । ३ । ५ ।

ताम्रकार, पुं, (ताम्र करोति ताम्रधातुभि पात्रादिकं निर्म्माणीति । कृ+अण् ।) वर्णसङ्करजातिविशेष । तत्पर्य्याय । ताम्रिक २ शौल्विक ३ ताम्रकुट्टक ४ । इति शब्दरत्नावली । अस्योत्पत्ति कंसकारशब्दे द्रष्टव्या ।

ताम्रकुट्टक, पुं, (ताम्र कुट्टयतीति । कुट्ट+ण्वुल् ।) ताम्रकार । इत्यमर । २ । १० । ८ ।

ताम्रकूट, पुं क्ली, (ताम्रमिश्रित कूटमिव ताम्रस्य कूटमिव वा ।) धूमविशेष । तामाक इति भाषा । यथा —
"धमिरा कालकूटच ताम्रकूटच सुस्तरम् ।
धर्म्मविधं मोर्च्यरच तारिका नरिका तथा ।
दृष्ट्वा निषिद्धदाथि यथा धर्म्मार्थो प्रिये ।"

इति कुलार्णवतन्त्रम् ।

ताम्रकृमि, पुं (ताम्रवर्ण कृमि कीट ।) इन्द्रगोपकीट । इति भूरिप्रयोग हारावली च ।

ताम्रगर्भ, क्ली, (ताम्र गर्भे उत्पत्तिस्थानमस्य ।) तुत्थम् । इति राजनिर्घण्ट ।

ताम्रचूड, पुं स्त्री, (ताम्रा ताम्रवर्णा चूडा यस्य ।) कुक्कुट । इत्यमर । २ । ५ । १७ ।
(यथा, महाभारते । १ । २२४ । २८ ।
"वनरक्षार्थिदारदत्ताम्रचूड धूर्म च ।
महादोषप्रतिमं कृत्वा शतशो भरम् ।"
यथा योगरत्ने ११ अध्याये शङ्खीनामम् ।
"ताम्रचूडस्य भक्ष्य रिह्वा सन्देहहतानाम् ।")
कुक्कुरद्रु । इति राजनिर्घण्ट ।

ताम्रचूडा, स्त्री, (ताम्र रक्तवर्णा चूडा यस्या रचोभवा ।) शारदकुमार । इति राजनिर्घण्ट ।

ताम्रदृ, स्त्री (ताम्रेव निर्म्मितं मृत्पात्रम् ।) ताम्रनिर्म्मितघटपात्रम् । यथा —
"दत्वा कुम्भ निखन्य वा कन्या देवानदन्तापितु ।
कावामिमतरस्य परिमाणात्म पावच ।
यद्वा ताम्रदृडे वा प्रस्तावितम् ।"

ताम्रपत्र, पुं, (ताम्र ताम्रवर्णं पत्रमस्य ।) जीवशाक । इति राजनिर्घण्ट । ताम्रनिर्म्मितपत्रे, क्ली ।

ताम्रपर्णी, स्त्री, दीर्घिकाभेद । इति मुद्रितपुस्तक । नदीविशेष । इति पुराणम् । (यथा, रघु । ४ । ५० ।
"ताम्रपर्णी समेतस्य मुक्तासारं महोदधे ।")

ताम्रपल्लव, पुं, (ताम्रवर्ण पल्लवमस्य ।) अशोकवृक्ष । इति राजनिर्घण्ट । (अस्य पर्य्याया यथा —
"अशोको हेमपुष्पश्च वञ्जुलस्ताम्रपल्लव ।
कङ्केलि पिण्डपुष्पश्च गन्धपुष्पो नटस्तथा ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

ताम्रपाकी, [न्] पुं (पचति इति । पच+णिनि । ताम्र ताम्रवर्ण पाक यस्मिन् इत्यपचतीति । इति ।) गर्द्दभाण्डवृक्ष । इति रत्नमाला ।

ताम्रपाली, स्त्री, (ताम्रो रक्तवर्ण पालो यस्या ईयोरसा ।) चमपदी । इति राजनिर्घण्ट । (हंसपदीशब्देऽस्या विवरण ज्ञातव्यम् ।)

ताम्रपुष्प, पुं, (ताम्रवर्ण पुष्पमस्य ।) कोविदार । इति भटाचार्य । (अस्य पर्य्याया यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"कोविदारश्चमरिक कुद्दालो युगपत्रक ।
कुद्दाली ताम्रपुष्पश्च स्वल्पकेसरी ।")
भूमिचम्पक । इति शब्दचन्द्रिका ।

ताम्रपुष्पिका स्त्री (ताम्रवर्णं पुष्पमस्या । कप् टापि अत इत्वम् ।) रक्तत्रिवृत् । इति राजनिर्घण्ट । (रक्तत्रिवृच्छब्देऽस्या विवरणम् ।)

ताम्रपुष्पी, स्त्री, (ताम्रवर्णं पुष्पमस्या इति । ङीष् ।) धातकी । (अस्या पर्य्याया यथा,—
"धातकी धातुपुष्पी च ताम्रपुष्पी च कुञ्जरा ।
सुभिक्षा बहुपुष्पी च वह्निज्वाला च सा स्मृता ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
पाटलावृक्ष । इति राजनिर्घण्ट । (अस्या यथा,—
"पाटलि पाटला मोघा मधुदूती फलेरुहा ।
कृष्णवृन्ता कुबेराक्षी कालस्थाल्यलिवल्लभा ।
ताम्रपुष्पी च कथिता परा स्थालीमपरा स्मृता ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)

ताम्रफल, पुं, (ताम्रं ताम्रवर्णं फलमस्य ।) अङ्कोटवृक्ष । इति राजनिर्घण्ट ।

ताम्रफला स्त्री, (ताम्रं ताम्रवर्णं फलमस्या ।) कुरालभा । (यथा भावप्रकाशे । अर्शोऽधिकारे कायचिकित्सायाम् ।
"भिन्नौ धात्री ताम्रपर्णी सशीती ।")
इन्द्रायु । इति राजनिर्घण्ट । कञ्चुरा । इति रत्नमाला । शिरार इति भाषा ।

ताम्रवर्ण, पुं, (ताम्रस्येव वर्णोऽस्य ।) शुक्र-रत्नकम् । इति राजनिर्घण्ट । (भारते द्वीपभेदः । यथा, मात्स्ये । ११३ । ७ ।

"भारतस्यास्य वर्षस्य नव भेदान् निबोध मे।
इन्द्रद्वीपः कशेरुश्च ताम्रवर्णो गभस्तिमान्॥")

ताम्रवर्णा, स्त्री, (ताम्रस्येव वर्णो यस्या इति। टाप्।) ओड्रपुष्पवृक्षः। इति शब्दचन्द्रिका॥

ताम्रवल्ली, स्त्री, (ताम्रवर्णा वल्ली। मध्यपदलोपी समासः।) मञ्जिष्ठा। इति रत्नमाला॥ चित्रकूटदेशप्रसिद्धा लता। तत्पर्य्यायः। ताम्रा १ ताम्री २ तमाली ३ तमालिका ४ ताम्रवल्ली ५ सुलोमा ६ शोधनी ७ तालिका ८। अस्या गुणाः। कषायत्वम्। कफदोषगुदकण्ठोत्थरोगनाशित्वम्। चक्षुःशुद्धिकारित्वञ्च। इति राजनिर्घण्टः॥

ताम्रवीजः, पुं, (ताम्रवर्णं वीजमस्य।) कुलत्थः। इति राजनिर्घण्टः॥

ताम्रवृक्षः, पुं, (ताम्रमिव रक्तवर्णो वृक्षः।) रक्तचन्दनम्। कुलत्थः। इति रत्नमाला॥

ताम्रवृन्तः, पुं, (ताम्रमिव रक्तवर्णं वृन्तमस्य।) कुलत्थः। इति त्रिकाण्डशेषः॥

ताम्रवृन्ता, स्त्री, (ताम्रमिव रक्तवर्णं वृन्तमस्याः इति टाप्।) कुलत्थिका। इति हेमचन्द्रः। ४।२४१॥

ताम्रशिखी, [न्] पुं स्त्री, (ताम्रवर्णा शिखा चूडा अस्यास्ति इनि।) कुक्कुटः। इति जटाधरः॥

ताम्रसार, क्ली (ताम्रवत् रक्तवर्णः सारोऽस्य।) रक्तचन्दनम्। इति रत्नमाला॥

ताम्रसारक, क्ली (ताम्रसार+स्वार्थे कन्।) रक्तचन्दनम्। इति राजनिर्घण्टः॥

ताम्रसारकः पुं, (ताम्रवत् रक्तवर्णः सारोऽस्येति कप्।) रक्तखदिरः। इति राजनिर्घण्टः॥

ताम्रा, स्त्री, (ताम्र+टाप्।) सैंहली। इति राजनिर्घण्टः॥ (प्रजापतेः कश्यपस्य पत्नी। दक्षसुता। यथा, मात्स्ये। ६।२।
"सुरभिर्विनता तद्वत् ताम्रा क्रोधवशा इरा॥"
अस्याः सन्ततिः पक्षिविशेषः। यथा,—
"चतुर्थी ताम्रा नामाष्टभागप्रमाणा विविधशिलाधातुविचित्रा॥" इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥)

ताम्राङ्गः पुं, वकवृक्षभेदः। इति शब्दमाला॥

ताम्राक्षः, पुं, (ताम्रे रक्ते अक्षिणी यस्य। अक्षिन्+समासे षच्।) कोकिलः। इति त्रिकाण्डशेषः॥ (ताम्रनयने, त्रि। यथा, भागवते। १।७।३१।
"तत आयान्तमभ्येत्य बद्धं पशुमिवानतम्।
कस्मादमरताम्राक्षं यद्वद् दयया सदा॥")

ताम्रार्द्धं, क्ली, (ताम्रमिवाभाति इति। आ+भा+क। ताम्रवर्णाभा अस्त्येति वा रक्तचन्दनात् तस्यालाभम्।) रक्तचन्दनम्। इति शब्दचन्द्रिका॥ (धर्मतीर्थविशेषः। यथा महाभारते॥ ७ अध्याये।
"रक्तकः विवर्धं प्राप्ता ताम्रार्थं निवसति॥")

ताम्रार्द्ध, क्ली, (ताम्रस्यार्द्धं अर्द्धभागमत्र। अनुसारवत् ताम्रार्द्धं अनुसारत्वादस्य इति वा।) कांस्यम्। इति त्रिकाण्डशेषः॥

ताम्रिक, पुं (ताम्र तत्पात्रादिनिर्म्माणं शिल्पमस्य। ताम्र+ठक्।) कंसकारः। इति शब्दरत्नावली॥ ताम्रनिर्म्मिते त्रि। यथा, कार्षिके ताम्रिके पथ। स्कन्द। २।६।८८॥ (यथा, मनुः। ८। १३६।
"कार्षापणस्तु विज्ञेयस्ताम्रिकः कार्षिकः पणः॥")

ताम्रिका, स्त्री, (ताम्रवद्वर्णाभा अस्त्यस्या इति ठन् ततः टाप्।) गुञ्जा। इति राजनिर्घण्टः॥ भाषरकाबाद्यम्। इति भूरिप्रयोगः॥

ताम्री, स्त्री, (ताम्रस्य विकारः। इति अण् ततो ङीप्।) वाद्यविशेषः। तत्पर्य्यायः। भाषरम्भा २ विकारिका ३। इति त्रिकाण्डशेषः॥

ताय ऋ ङ पालने। सन्ततौ। इति कविकल्पद्रुमः। (भ्वा०-आत्म०-सक०-सेट्।) सन्ततिर्विस्तारः। ऋ, अतत्तायत्। ङ, तायते विद्वान् सुधीः। इति दुर्गादासः॥

तायिक, पुं, (ताये पालने साधुरिति ठन्।) सन्निकाभिधदेशः। इति हेमचन्द्रः। ४।२४॥

तार, क्ली, (तार्य्यते विस्तार्य्यते इति। तॄ+णिच्+घञ्।) रूप्यम्। इति मेदिनी। रे, ३१॥ ("दन्तोष्ठौ सुधात धवलात कुन्दसन्निभम्। गुरुस्निग्धकुमारञ्च तारमुत्तममिष्यते॥" अथ शुद्धस्य तारस्य गुणा यथा—
"आयुः शुक्रं बलं हन्ति रोगसंघं करोति च।
अशुद्धञ्चाशुतस्मात्तं शुद्धमाप्यततो बुधैः॥"
अस्य मारणं यथा,—
"कण्टवेध्यं तारपत्रं दिव्याग्निगुणविद्रुतम्।
पातयेत् रसे गाढं रसवत् भस्मसात् भवेत्॥"
इति वैद्यकरसेन्द्रसारसंग्रहे तारमारणाधिकारे॥) शुक्ला। इति राजनिर्घण्टः॥ (यथा, हरिश्चन्द्रवंशे वैतालपञ्चविंशतिकायाम्।
"तारं सुवर्णं शुक्लञ्च तारम्॥"
"तारं मौक्तिकम्। तारशब्देनात्र मौक्तिकमेवोच्यते न तु रजतम्।" इति तट्टीका। गीतसिद्धिभेदः। यथा, "विद्यमानस्य तु तस्य विषाद् शाखाविशेष इति रमा शब्दाविशेष विद्यमानुपायनदा निरता गीतम् मध्यमन्द्रस्य कार्य्यापि हेतुमतया निम्नं हेतुम्या मध्यमर्थ्यता। तारकादीनां अध्ययनान्निवता चिन्ता धिष्ण्ये इति सम्प्रदायः। त्रिभिर्द्वादशसारभ्यामपि दाशो अष्टनावटयपटस्य गच्छेत् प्रथमगीतिसंज्ञकाः॥" इति नाम कौमुदी। अतिमध्यम्। इति मेदिनी। रे, ३१॥)

तार, पुं, वानरविशेषः। शुक्लविशेषः। शुद्धमौक्तिकम्। इति मेदिनी। रे, ३१॥ (तत्पर्य्यायाः भरताद्यावेव। तॄ+णिच्+घञ्। यद्वा तारयति मौक्तिकमपि इति श्रुत्वा। तॄ+णिच्+अच्। इत्युदाहरणम्, वाल्मीकिरामायणे। ४१ सर्गे।

"तारमेव मद्भवनमपि अवतारयाम्यहम्।
तमस्तारं इति ख्यातो यस्य सकार्य्याणवत्॥")
प्रणवः। इति तन्त्रम्॥ (यथा, महानिर्वाणतन्त्रे। ५।
"तारमेकं परमत्रिकामयपाशपात्र च विद्याबीजं तारं प्रवदन्ति पापं ये तारिता भवन्ति॥")
तारणम्। इति विश्वः॥ शुद्धवर्णम्। इति शब्दसारम्। (नक्षत्रम्। इति मेदिनी। रे ३१॥ अत्युच्चशब्दः। इति हेमचन्द्रः। ६।१८॥ यथा, नैषधटीकायाम्।
"इत्यादिरम्यं मन्दस्तु द्विगुणितविधो भवेत्।
स एव कण्ठमध्ये स्यात् तार इत्यभिधीयते॥"
विष्णुः। यथा, महाभारते। १३।१४९।११७।
"अधोक्षजः कारणं कालः सूरः शौरिर्जनेश्वरः॥"
वानरविशेषः। यथा महाभारते। ३।२८४।९।
"सुषेणः क्रथनश्चापि नदो नीलश्च वीर्य्यवान्।
विद्यासो गन्धमादनश्च सुग्रीवस्तारश्च विनतः॥"
दैत्यविशेषः। यथा, हरिवंशे। ४१। ९।
"तारस्तु क्रोधवितायमानः शरभश्च॥")
महादेवः।
"कालो निधिश्चरोऽथ स्थिरतनिकम्पकपदा
वामभाग
शुभादद्येव ददे त्रिपथगास्नीरो
गृहायमधार्यः।
मायाश्रीमृत् कर्द्दं सुरसुमित्रविशो ध्यानम्
सर्वधि
मीढा भौतं तारं सुरसुनियन्ते कृत्स्ने
तारतार॥"
इति शब्दार्णविस्तारदर्पणे १)

तार, त्रि, अत्युच्चशब्दविशिष्टः। इति मेदिनी। रे ३१॥ स्फुटितशिरोऽपि। निर्मलः। इति धरणि॥ (तारं शुभ्राकारमस्येति अच्। शुभ्रनिर्मलः। यथा, कथासरित्सागर। ७८।
"उदधि निहितधारो तारः कृता यतने
यत्रे॥")

तारक, क्ली, (तारयति कर्णौ नियतं कालमिति। तॄ+णिच्+ण्वुल्।) चक्षुः। इति मेदिनी। क, १०॥

तारक क्ली, स्त्री, (तारमेव। स्वार्थे कन्।) चक्षुस्तारा। नक्षत्रम्। इति मेदिनी। के, १॥

तारक, पुं, (तारयति दैत्यानिति। तॄ+णिच्+ण्वुल्।) तारकनामको दैत्यविशेषः॥ यथा,—
"तस्य तु तारकस्य हन्तारं कुमारस्य [illegible]।
[illegible] विहृता॥
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]"

अतधाता च गजेन्द्रकारको बाद नशिषु ।
हरिकेतुवशो भूत्वा चार्गयिष्यति प्रहरः ॥"

इति मात्स्ये ८७ अध्याये ॥

(गणरोऽन्यरविष्टि । कार्त्तिकेय एवं विदित
मान । यथा, मत्स्यपुराणे । १५१ । ५—११ ।
"यथाग्नौ नाम दैत्याऽभवत् पुत्रस्तु तारक ।
उग्रदुद्धाय्यमाय पुरैव न शक्यते ॥
तमसि वरलोभाय अनुभयनियोजिता ।
मोर्नम निम्नान् दृष्ट्वा सखा तिमारुणाय च ॥
तत्राभवत् आय दैवा । अहङ्कयाकन द्विशु ।
तुहिनाचलहीदितृभर्त्ता च्यवितानि दारकम् ॥
तत कार्त्तिकु कार्त्तिकेयन् दृष्ट्वा वै ग्रैलयो द्विज ।
गजेन्द्रो दर्वृत्तमी चल्पनारकाद्वलान्तरे ॥
तदेवास पद्मिन्तन रेतो दशाननपदम् ।
विदाम षडाननीशो अनील निरात तुने ॥
तलित तत परिहरे तमन् प्रदाभ्यहम् ।
तमानु च मधुद्युगो गृहो दिनकरप्रभ ।
स महाविक्रमो शाता निजघ्ने तारकासुरम् ॥"
अस्य विशेषविवरणम् तथैव । ४६ अध्यायमारभ्य
१५८ अध्यायेषु द्रष्टव्यम् ॥ तारयतीति । तृ +
णिच + ण्वुल ।) कर्णधारः । इति मेदिनी । क,
८८ ॥ भेलक । इति शब्दरत्नावली ॥ (तरणो-
पाय । यथा, कुवलयानन्दोपिकायाम् । ४।४०।
"कीर्त्तिदामस्मिन् कर्णाटसमकूले ।
त्रैविष्टपस्य मूर्द्धानि नैव भाति तारकम् ॥"
'तारयतीति तारकस्य तारकं तरणोपाय
नैव भाति ।" इति तट्टीका ॥ महादेव ।
यथा, महाभारते । १३ । १७ । ३५ ।
"नमस्ते नमस्ताय तारकाय तराय च ।
नमो मनाय यजिने तुणाय प्रभुताय च ॥")
उत्तारि, त्रि । इति मेदिनी । के, १० ॥ (यथा,
प्रबोधचन्द्रोदये । २ । २३ ।
"अवयन्ति भगवान् द्वादशाक्षरोऽये
भवभयकातरतारक प्रबोधम् ॥"
नेत्रतारापि चक्षुम् । यथा, श्री रामा
यणे । ६ । ४७ । ५३ ।
"तारीयो तारिकाः कांचित् कांचित् परम
भाषिताम् ॥")

तारकजित् पुं (तारकं तारकासुरं जयतीति ।
जि + क्विप तुगागमश्च ।) कार्त्तिकेयः । हेमचन्द्रः ।
२ । १ । १२३ ॥ (एतद्विवरण मात्स्ये १५८
अध्याये द्रष्टव्यम् ॥)

तारकब्रह्म, क्ली, (तारकं संसारसागरतारकं
ब्रह्म ।) षडक्षरमन्त्रविशेषः । यथा,—
"षडक्षरं महामन्त्रं तारकं ब्रह्म उच्यते ।
ये भवन्ति च तं भक्ता तैर्वा मुक्तिं सद्गतिः ॥
इमानां तस्य दुर्जेयाय मन्त्रसूत्रम् ।
मर्त्यस्यास्यामधुना भविष्यामीति मुक्तिदम् ॥
इमं मन्त्रं जपत्रितमभ्यन्तरे गतिद्रष्टा ।
भासं भयादन्नादुपास्तु अप्रमत्तान्निपलके ।
महतं तत्र तस्य कमलाकारमात्र शुभाय ।
ब्रह्मश्च श्रीरामतारकं तेन सत्त्वम् ॥

भूत्वा सारथी दिनमणी मनमार्गेविभास्वते ।
ततो हठात् चौरमासाद् तत्कुवारीन परं
पदम् ॥
अन्यत्रं क्रियते भव मन्त्रप्रभावात् मामधिमुक्ति ।
इति वरिष्ठा मां विप्रजितमध्यन्तरहस्यम् ॥"
इति पाद्मोत्तरखण्डे श्रीशिवं प्रति श्रीविष्णु-
वाक्यम् ॥ अपि च ।
"मुमुक्षूणां विमुक्त्यर्थं षडक्षरमितालिकं ।
अहं दिशामि ते मन्त्र तारकं ब्रह्मवाचकम् ॥
श्रीं श्रीरामरामरामेति तारकब्रह्मवर्णनि ।
कालम नामकीर्त्तनाय । पद ब्रह्म विनिर्मितम् ॥"
इति पाद्मोत्तरखण्डे श्रीरामं प्रति श्रीशिव
वाक्यम् ॥

तारका स्त्री, स्त्री, (तरति तारयति वा । तृ +
णिच + ण्वुल । टाप् । "तारका ज्योतिषि ।"
७ । ३ । ४५ । इत्यत्र वार्त्तिकोक्त्या न अत
इत्वम् ।) नक्षत्रम् । (यथा मार्कण्डेये ।५४।७१।
"अथ विन्दवो यथाम्भोधौ यथा वा दिवि
तारकाः ।
यथा वा चपलो धारा यद्वायां विकता यथा ॥")
कनीनिका । इति मेदिनी । के १०० ॥
(यथा, रघुः । ११ । ६८ ।
"कपिकोमदृशनाधिपस्य तत
मन्वयो कपतुर्भयतारकाम् ॥")
इन्द्रवारुण्यां स्त्री । इति राजनिर्घण्टः ॥

तारकारि, पुं, (तारकस्य तारकासुरस्य अरिः ।)
कार्त्तिकेयः । इति हेमचन्द्रः । २ । १२३ ॥

तारकिणी, स्त्री (तारका सन्त्यस्य । तारका +
इनि ङीप ।) रात्रिः । इति राजनिर्घण्टः ॥

तारकित, त्रि (तारकाः सञ्जाता अस्य । तारका
+ "तदस्य सञ्जातं तारकादिभ्य इतच् ।"
५ । २ । ३६ । इति इतच् ।) तारकाव्याप्तम् ।
यथा,—
"विनि निर्यातः ग्रहादि स्फुटदृक्गन्तु
कलानाथाधिपतारकितमम्बरः ॥"
इति नैषधम् ॥

तारकु, पुं (तारयतीति । तृ + णिच + उण् ।)
रिक्कः । इति शब्दरत्नावली ॥ (संसारसागरात्
तारयतीति । विष्णुः । यथा महाभारते ।१३ ।
१४८ । ९० ।
"अघ्राणिकतारयस्ता: शूरः शौरिर्जनेश्वरः ॥"
स्कन्दः । यथा, तत्रैव । १३ । १० । ११७ ।
"तारकस्तारको धाम सर्वभीमनितोभयः ॥"
क्ली अतिरसुप्तयोः पटादरन्ध्रपुरः । यथा,
ज्योतिस्तत्वे ।
"अतिरिंशच माथीन याम्यायाम यमीकृतम् ।
दुर्गां भवेत नामान्ते तारकं ग्रहदक्षिणे ॥"
तथाच हरमुखविताम् । ४ । १६ ।
"तारकं तदुर्भावेदिव
फलताहिकं रयं यादृशम् ॥"
तृ + णिच + भावे ल्युट् । उत्तारणम् । यदा
इत्वम् । यथा, भट्टिकाव्ये । ६ । ३ । ५६ ।

"तारकायामास्य दुस्तरस्य प्रयोगाय करात्र च ॥")
तरङ्गकारादिनादि त्रि ॥

तारटिनी, स्त्री (तारयतीति । तृ + णिच +
अनि ।) श्रीवेद । इति शब्दरत्नावली । ६८ ।

तारतण्डुल, पुं (तार इव शुक्लः तण्डुलो यस्य ।)
यवनालधान्य । इति राजनिर्घण्टः ।

तारतम्य, क्ली, तरतमयोर्भावः । (तरतम +
ष्यञ् ।) न्यूनाधिक्यम् । यथा,—
"निर्गुण निरवमेतयोर्द्वयो
स्तारतम्यविधिरान्यथैव ।
बोधनाय विधिना विविधिना
दैव एव नयदेवपरिताः ॥"
इत्यादुः ।

तारनी, स्त्री, (तरणी एव । स्वार्थे अण् ता-
दीप ।) तरणीद्वय । इति राजनिर्घण्टः ॥

तारपुष्प, पुं, (तारं रूप्यमिव शुभ्रं पुष्पं यस्य ।)
कुन्दवृक्ष । इति राजनिर्घण्टः ॥

तारल त्रि, (तरल एव । स्वार्थे अण् ।) विटः ।
इति भूरिप्रयोगः ॥

तारविमला, स्त्री, (तारं रूप्यमिव विमला ।)
धातुविशेषः । इति शब्दार्थकल्पतरुः ॥

तारशुद्धिकरं, क्ली, (तारस्य रजतस्य शुद्धिं करो
तीति । कृ + ट ।) सीसकम् । इति राज
निर्घण्टः ॥

तारा, स्त्री, पुं, (तारयतीति । तृ + णिच् + अच् ।)
नक्षत्रम् । हेमचन्द्रः । २ । ३ । २१ ॥ (यथा,
महाभारते । १ । २११ । २६ ।
"नभसीन्दो यथा तारा नक्षत्राणि दिवौ-
कस ॥")
यथाच कर्मलोचने ।
"हृष्कारं करो दृष्ट्वा तारको आदौ गृहे ।
तारितानि चाक्षरो परस्परो च पतन्ति ॥"
चक्षुस्तारा । इति मेदिनी । रे, ३१ ॥ दीर्घत्व
पर्यायः । त्रिभिषी २ कनीनिका ३ । इति
राजनिर्घण्टः ॥ तारका ३ । हेमचन्द्रः ।३।२४१॥
(यथा, कुमारसम्भवदीपिकायाम् । ४ । १६ ।
"तारे ज्योतिषि चक्षुषो दिविदृश्यमानयोः ॥")

तारा स्त्री (तारयति तारयतीति । तृ + णिच +
अच + टाप् ।) वृहस्पतिभार्या । इन्द्र-
भार्या । इति मेदिनी । रे ३१ ॥ (यथा, देवी
भागवते । १ । ११ । ७६ ।
"तम कारण विदिता तारापत्नं गुरुं गुरुम्")
बालिभार्या । सा सुषेणवानरकन्या । इति
रामायणम् ॥ (यथा महाभारते ।३।२८०।१६॥
"सुग्रीवस्तो यती बाली तारां तारापति
वन्द्र ।
उवाच वचनं शान्तो नो वानरपतिं ततः ॥")
बौद्धा । शक्ति । इति राजनिर्घण्टः ॥ ॥
द्वितीया शक्तिः । यथा,—
"कालिका भगवती देवी शिव लोकवर्णी ।
तारकत्वात् सदा तारा सुखमोक्षप्रदायिनी ॥
उपायोपार्जनी च नवाहकान्तारा प्रकीर्त्तिता ॥"

अस्या ध्यानं यथा,—
"प्रत्यालीढपदार्पिताङ्घ्रिशववद्घोराट्टहासा परा
खड्गेन्दीवरकर्त्रिखर्परभुजा हुङ्कारबीजोद्भवा ।
सर्व्वा नीलविशालपिङ्गलजटाजूटैकनागैर्युता
जाड्यं न्यस्य कपालके त्रिजगतां हन्त्युग्रतारा-
स्वयम् ॥"
अपि च ।
"प्रत्यालीढपदां घोरां मुण्डमालाविभूषिताम् ।
खर्व्वां लम्बोदरीं भीमां व्याघ्रचर्म्मावृतां कटौ ॥
नवयौवनसम्पन्नां पञ्चमुद्राविभूषिताम् ।
चतुर्भुजां लोलजिह्वां महाभीमां वरप्रदाम् ॥
खड्गकर्त्रिसमायुक्तसव्येतरभुजद्वयाम् ।
कपालोत्पलसंयुक्तसव्यपाणियुगान्विताम् ॥
पिङ्गोग्रैकजटां ध्यायेन्मौलावक्षोभ्यभूषिताम् ।
बालार्कमण्डलाकारलोचनत्रयभूषिताम् ॥
ज्वलच्चितामध्यगतां घोरदंष्ट्रां करालिनीम् ।
सावेशस्मेरवदनां स्त्र्यलङ्कारविभूषिताम् ॥
विश्वव्यापकतोयान्तःश्वेतपद्मोपरिस्थिताम् ॥"
अस्या दशाक्षरमन्त्रोक्तध्यानं यथा —
'श्यामवर्णां त्रिनयनां द्विभुजां वरपङ्कजे ।
दधानां बहुमालाभिर्बहुरूपाभिरावृताम् ॥
मुक्ताभिः गौरवदनां सौरमौलिं सुभूषणाम् ।
रत्नपादुकयान्यस्तपादाम्बुजयुगां स्मरेत् ॥'
इति तन्त्रसारः ॥
(अस्या बीजं यथा, "ह्रीँ स्त्रीँ हुँ फट् ॥")

तारापतिः, पुं, (तारायाः पतिः ।) शिवः । चन्द्रः । (यथा राजेन्द्रकर्णपूरे । १० ।
"प्रालेयाचलकन्यकाकुचतटीपर्य्यङ्कहार तारापते
दासाकान्त मविभ्रम भ्रम सदा निःशङ्कशङ्कि न्विच ॥")
वृहस्पतिः । वाली । सुग्रीवः । इति पुराणम् ॥
(यथा, नैषधे । १९ । ८ ।
'व्रजति कुमुदं दृष्ट्वा मोदं कुशेशयपीलये
भवति च मधौ दूरं तारापतौ च हताधिपि ।
लघु रघुपतेश्चापं मायामयीमिव रावण-
स्तिमिरनिकुरम्बं राति दिनादि गवाक्षि
राट ॥")

तारापथः, पुं, (ताराणां नक्षत्राणां पन्थाः । समासे अः ।) आकाशम् । इति हलायुधः ॥
(देवविशेषः । यथा रघुः । १३ । ६० ।
"अदूरे चन्द्रहेतुश्च तपसोऽध्यात्मवत्सलौ ।
प्रागमत् रघुनाथस्य पत्नी तारापथेश्वरी ॥"
"तारापथेश्वरी ।" इति वा पाठः ॥)

तारापीडः, पुं, (ताराणां नक्षत्राणाम् आपीडो मुकुटमिव ।) चन्द्रः । इति त्रिकाण्डशेषः ॥
(चन्द्रापीडनृपतेर्भ्रातृकरो राजा । यथा, राजतरङ्गिण्याम् । ४ । ११ ।
"तारापीडोऽपि समयं क्रमात् तत्राभ्यषेचत ।"
कादम्बरीवर्णितनायकपितुर्नाम । यथा कादम्बर्य्याम् । १ म पर्व्वे । "अथनाथ इव ... तारापीडो नाम राजा बभूव ॥")

ताराभूषा, स्त्री, (तारा नक्षत्राणि भूषा भूषणं यस्याः ।) रात्रिः । इति राजनिर्घण्टः ॥

ताराभ्रः, पुं, (तारो निर्म्मलोऽभ्र इव । शुभ्रवर्णत्वादस्य तथात्वम् ।) कर्पूरः । इति राजनिर्घण्टः ॥ (विवरणमस्य कर्पूरशब्दे ज्ञातव्यम् ॥)

तारामण्डलम्, पुं, (ताराणां नक्षत्राणां मण्डलं यत्र ।) शिवगृहविशेषः । इति शब्दरत्नावली ॥ (नक्षत्रमण्डले क्ली ॥)

तारारिः, पुं, (तारस्य रूप्यस्य अरिः । एतत्संसर्गेण रूप्यस्य चाकचिक्यादिकं विनश्यतीत्यस्य तथात्वम् ।) विटमाक्षिकः । इति हेमचन्द्रः । ४ । १२१ ॥

तारावती, स्त्री, चन्द्रशेखरराजपत्नी । सा च ककुत्स्थराजेन स्वपत्न्यां मनोन्मथिन्यां जाता । अस्या गिरिजांशत्वम् । यथा —
"इक्ष्वाकुवंशजो राजा ककुत्स्थो नाम धार्म्मिकः ।
भोगवत्यां राजधान्यां पृथ्वीं रिपुनिषूदनः ॥
सर्व्वलक्षणसम्पन्नो भूपालगुणसंयुतः ।
तस्य भार्य्या महाभागा भगदेवस्य पुत्त्रिका ॥
सा मनोन्मथिनी नाम्ना पूजिता पतिवत्सला ।
तस्याः पुत्त्रशतं जज्ञे देवगणाभमच्युतम् ॥
बलवीर्य्यसमायुक्तं ककुत्स्थनृपसत्तमात् ।
पुत्त्री न विदते तस्मात्तदर्थं सा यशस्विनी ॥
निश्चलं भक्तिभावेन चण्डिकां समपूजयत् ।
पूज्यमाना महादेवी चण्डिका राजभार्य्यया ॥
प्रसन्ना सा निशि स्वप्ने स्वप्ने चामवीदिदम् ।
योषिद्गणसमायुक्ता सार्व्वभौमस्य भाविनी ॥
नक्षत्रमालया युक्ता पुत्त्री तव भविष्यति ।
सापि स्वप्ने वरं प्राप्य मुदिताभून्नृपाङ्गना ॥
गर्भं दधार सा तस्याः गर्भे काले वितस्ति च ।
सा मनोन्मथिनी देवी प्रसूते मधुपक्षमे ॥
गर्भं दधौ महामत्वं चन्द्रिकेवाम्बरोत्करम् ।
सापूर्णे तु तत्र प्राप्ते तत्र नक्षत्रमालिनीम् ॥
सा मनोन्मथिनी देवी सुषुवे तनयां शुभाम् ।
तां दृष्ट्वा चारुसर्व्वाङ्गीं तारकाज्योतिरोपमां
शुभाम् ॥
ककुत्स्थो भार्य्यया सार्द्धमत्यन्तमुदितोऽभवत् ।
यत्नेनास्य कारवे भविता सा कनुन्नसाखा ॥
वर्द्धे मन्दिरे तस्य वर्द्धिता सुरसत्तमा ।
तेनैव चारुचिह्नेन तस्यास्तारावतीति वै ॥
नामाकरोत् पिता काले यथोक्ते नृपसत्तमः ।
कालक्रमेण सा बाला प्रतीता वरवर्णिनी ॥
सम्पूर्णयौवनोद्दिष्टा प्राप्य वैरेव माधवे ।
तामप्राप्तयौवनोद्दिष्टां दृष्ट्वा राजा मुनिः स च ॥
ककुत्स्थः कारयामास मनसैव स्वयम्वरम् ।
माघे मासि ससम्मे चन्द्रकाष्ठी शुभे दिने ॥
स्वयम्वरसभां चक्रे तारावत्याः पिता मुने ।
तस्मिन् काले समुद्रेऽस्मिन् राजा स्वयम्वरे ऽद्रवेत्तदा वै ॥
पूर्व्वं प्राग्ज्योतिषनाथ सखादेशश्च हम्माय च प्रति ।
ते राजानः समायाता पुत्त्रास्तत्र तारावतीकान्तः ॥
पूर्व्वमेव तस्य सुतारावलोका शासनम् ।
तत्र श्रुत्वा मात्स्यन्यदलन्द्रकुञ्चेवेन ॥
स्वयम्वरं स्वयमायान्द्वेशालङ्कारमण्डितः ।
एतस्मिन्नन्तरे राज्ञः कुमारी वरवर्णिनी ॥
वृद्धां धात्रीं निजां सम्यक् सम्पक्षेत्यालभाषिणीम् ।
स्वयंवरसभां द्रष्टुं माहिष्योर्न्तं सदस्यं प्रति ॥
स्वयम्वरसभां गत्वा चारुरूप गुणाश्रयम् ।
नृप निरूप्य भो धात्रि । मह्यमेव निवेदय ॥
एवं तां प्रेषयित्वाथ धात्रीं नृपतिपुत्त्रिका ।
सा मनोन्मथिनी मम प्रारापयति चण्डिकाम् ॥
तत्र प्रायान्महाभागा शुभा तारावती तदा ।
तत्र गत्वा महादेवीं प्रणम्य कालिकाह्वयाम् ॥
मातृस्तवाय भावेन न श्रान्ताकालमानसा ।
प्रणनाम महाभक्त्या वाक्यमेतदुवाच ह ॥
प्रणमामि महामायां योगनिद्रां जगन्मयीम् ।
सा मे प्रसीदतां गौरी चण्डिका भक्तवत्सला ॥
यदि सत्यं जगन्माता मे सदैव त्वं प्रपूजिता ।
तेन सत्येन सुभगा पतिर्मेऽस्य नृपोत्तमः ॥
स्वयम्वरोऽद्य भवतु प्रमोदं दरवत्सभे ॥
इति तस्या वचः श्रुत्वा चण्डिका वरमोहिनी ॥
मोहयन्ती नृपसुतां यथाकाले न वेत्ति च ।
अथ माहात्म्यप्रतिलिखिते सा समूतं वचः ॥
श्रीदेव्युवाच ।
यौवनस्य समयो योऽयं नाम्ना तु चन्द्रशेखरः ।
स मनोहररूपस्ते प्रियः स्वामी भविष्यति ॥
समिभूकसया शौर्ये विवृतं नृपसत्तम् ।
वरयस्व द्रुतं दोरे पत्नीत्वेन हृदयञ्जनम् ॥
अथाजगाम सा धात्री निरूप्य सहसा प्रति ।
तारावत्यास्तदाकार स्वस्य नृपवासम् ॥
दृष्ट्वा तामागतां धात्रीं प्रहृष्टा नृपते सुता ।
पप्रच्छ निभृतं कोऽयं को वा इत्यायातो नृप ॥
सा प्राह धात्री वचनात्तव नृपा विभाविता ।
चारुरूपाः कुलीनाश्च शास्त्रे शस्त्रे च पारगाः ॥"
"नृपा पुत्त्रभेदायास्ती निषदकसी वृषदूराधी ।
सर्व्वलक्षणसम्पन्नी देवालङ्कारमण्डिती ॥
तयोरपि वरः प्रत्यात् प्रमदावत्सनीतर ।
स एव ते पतिर्योग्यश्चिह्नितोऽस्ति सुन्दरि ॥
स त्वं वरय राजानं तव भाग्य शुभोदयम् ॥
धात्र्यास्तथैव वचः श्रुत्वा राजपुत्री जगाद ताम् ॥
मनुमाश्चचारिको भूत्वा निदर्शय नृपोत्तमम् ।
धात्रीर्थं तदा मात्स्यामातारावती तदा ॥
धात्र्या चानुमता श्रुत्वा चचाल वरभाजने ।
सभामध्ये स्थिरं मा तु विजृम्भ वरवर्णिनी ॥
मानिक्यादिमतीयोगाचाञ्चलाया प्रसादतः ।
तयोः प्रमदादिरूपाश्चान्या धात्रा निवेदिता ॥
इति विश्वमण्डला कलिकार्यार्थनायका ।
मतिं पूर्व्वमादं श्रुत्वा राजा तारावती ततो ॥
सर्व्वं मा मामती दृष्टो यस्मि च चन्द्रशेखरम् ।
वैवाहिकं विधिना स राजा चन्द्रशेखरः ।
तारावती तदा भार्य्या ककुत्स्थसुतां शुभाम् ।
संग्रह्य स्वपुराणां देवेभ्यो वैदिकेऽपि च ॥
मां वचनेन स्वाहा ततां तां सखीनां स्वकीयाम् ।
करवीरपुराणं हरये चन्द्रशेखरः ॥"
इति कालिकापुराणे ४८ अध्यायः ॥

तारिका, स्त्री (तारकैरिवतारा अस्त्यस्या इति। तारक + "अत इनिठनौ।" ५।२।११५। इति ठन्।) ताड़रस। ताड़ी इति भाषा। यथा,—
"वर्णिका ताण्डवूटस्य नाम्नूटस्य भूधरम्।
अधिवेर्ले सर्जुरपकारिका तारिका तथा।"
इति कुमारतन्त्रम्॥
(नटकस्त्री स्त्री। यथा, मनुः। ८। ३ ०।
"अभिज्ञो तु स्त्रिमायादिनया प्रव्रजितो मुनिः।
माडमा लिङ्गिवर्णेन न दाप्यानारिकं नरे।")
तारिणी स्त्री, (तारयतीति। तृ + णिच् + णिनि ङीप् च।) बुद्धदेवतागेह। तत्पर्य्यायः। तारा १ महाश्री २ ओङ्कारा ३ स्वाहा ४ श्री ५ मनोरमा ६ तारा ७ जया ८ अनन्ता ९ शिवा १० लोकेश्वरात्मजा ११ खदिरवासिनी १२ भद्रा १३ वैश्या १४ नीलसरस्वती १५ शङ्खिनी १६ महातारा १७ वसुधारा १८ धनन्दरा १९ त्रिलोचना २० लोचना २१। इति त्रिकाण्डशेषः॥ द्वितीया शक्तिः। यथा,—
"अथ भेदान् प्रवक्ष्यामि तारिण्याः सर्व्वसिद्धिदान्।
येषां विज्ञानमात्रेण जायन्मुक्तस्तु साधकः॥
कवितां लभते शुद्धामनर्गलां गुणं मनीषी।
पाण्डित्य सर्व्वशास्त्रेषु धर्म्मधर्म्मविवादे॥
राजद्वारे सभायाञ्च विवादे व्यवहारके।
सर्व्वत्र जयमाप्नोति इत्यात्मविरिवाद॥"
इति तन्त्रसारः॥
अस्या ध्यानं ताराशब्दे द्रष्टव्यम्॥
("तारा चोग्रा महोग्रा च वज्रा नीला सरस्वती।
कामेश्वरी भद्रकाली इत्यष्टौ तारिणी स्मृता॥"
इति मन्त्रकोषः॥
त्रि, उद्धारकर्त्री। यथा, मार्कण्डेये।
"तारिणी भवसागरोमारस्य दुर्गोऽहते।")
तारुण्य, क्ली, (तरुणस्य भावः। तरुण + भाव वादिभ्यां ष्यञ्।) यौवनम्। इत्यमरः। २। ६। ४०॥ (यथा, मार्कण्डेये। ७३। ७।
"हृष्टकोटिसम विस तारुण्याद्भुतकोटिनि।")
तारेय पुं, (तारायाः वालिपत्न्याः अपत्यं पुमान्।) तारा + ढक्।) वालिपुत्रः। इति जटाधरः॥ (यथा, रामायणे। ४। २०। १२।
"ऋक्ष्यपाल कथोंकि विस्मय बलवान् यत्रे।
वालिमपि तारेयसकमो नरोत्तमः॥"
इत्यर्च्चनयज्ञमान्दारायां दुर्गा सुधोऽसि।)
तार्किक, त्रि (तर्क वेत्ति अधीते वा। तर्क + ठक्।) तर्कशास्त्रवेत्ता। तत्त्वान्वेषकः। इति शब्दरत्नम्। स षड्विधो यथा। वैशेषिक १ बौद्धक्ष २ चार्वाक ३ नैयायिक ४ औपायिक ५ वार्त्तिक ६। इति हेमचन्द्रः। (यथा कथासरित्सागरे। ६१।
"द्वौ मे वैयाकरणौ प्रमाणा तार्किकस्य सूनौ।
आयुर्मूरि इ[illegible] अन्नप्रवादीनि मांसु दक्ष प्रदम्॥")
तार्ण, पुं (तृण एव। स्वार्थे अण्।) कलम्बः। यथा हैमप्रकाशः।

"अनय नरेण राजन् प्राहार्द्धविप्रधयमान्।
प्रहर्त्ता सर्व्वगोत्राणां तार्क्ष्यपुत्र इवाप्सि।"
(विनतायां जातः कश्यपपुत्रविशेषः। यथा, महाभारते। १। १०६। ७।
"तार्क्ष्यश्चारिष्टनेमिश्च गरुडश्चासितध्वजः।
अरुणश्चारुणिश्चैव वैनतेया अथस्मृताः॥")
तार्क्ष्यी, स्त्री, (तार्क्ष्य + गौरादित्वात् ङीष्।) पातालगरुडीलता। इति राजनिर्घण्टः॥
तार्क्ष्यं, क्ली, रसाञ्जनम्। इति मेदिनी। क्षे, २०॥
(यथास्य पर्य्याया वैद्यकरत्नमालायाम्।
"तार्क्ष्यं शैलं शौलजमेकमथर्वं रसाञ्जनम्॥")
तार्क्ष्य, पुं, (तृक्षस्य कश्यपस्य अपत्यम्। तृक्ष + "गर्गादिभ्यो यञ्।" ४। १। १०५। इति यञ्।) अश्वः। नागः। गरुडाग्रजः। गरुडः। इति मेदिनी। क्षे, २०॥ (यथा, रघुः। १६। ७७।
"अतीव तार्क्ष्यात् किल कालियेन
मणिं विसृष्टं यमुनौकसा यः॥"
तथाच भागवते। १। ८९। ६।
"प्रतिजग्राह तार्क्ष्याय इव
वज्रिणो इद्धमीनमाप्य॥"
"ब्रह्मस्य सुतो मदसात् भा तार्क्ष्य अस्ति अवि-
शाधं विदधात्।" इति मल्लतन्त्रे वामनः॥
"तार्क्ष्यो रथो गरुडो वा न चाप्सि रथात्॥"
इति वाजसनेयसंहिताभाष्ये महीधरः। २९। १९॥ अश्वमुनिविशेषः। यथा, महाभारते। ३। १८४। ८।
"अनुष्ठाविरिष्टनेमिश्च तार्क्ष्यस्तामसकस्तथा।"
तथाच तत्रैव। १२। २८८। ३।
"एवमुक्ताश्च तार्क्ष्य सर्व्वशास्त्रविशारदः।
विमृश्य सम्यगाख्याहौ तत्राभिमतवान्वीत्॥")
द्राक्षाद्यम्। स्वर्णम्। इति शब्दरत्नावली॥ अश्वकर्णद्रुमः। शाल्मलम्। इति हेमचन्द्रः। ४। २९८॥ (पक्षिविशेषः। यथा, महाभारते। ५। ६१। १६।
"अभङ्गा कौक्कुटकार्क्ष्यो यथाहा पक्षि" [धन॥"
महादेवः। यथा, महाभारते।१३।१७।९०।
"अश्वकौ तु दरिद्रास्य रुचिदेव सुमारह॥"
सर्पविशेषः। इति केचित्॥)
तार्क्ष्यज, क्ली (तार्क्ष्य गरुडे जातम् भाजते। यद्वा, तार्क्ष्ये पर्व्वते जायते इति। जन + ड।) रसाञ्जनम्। इति भावप्रकाशः॥
तार्क्ष्यध्वज, पुं, (तार्क्ष्यो गरुड़ ध्वजे यस्य।) विष्णुः। इति हेमचन्द्रः। २। १२८॥
तार्क्ष्यनायक, पुं, (तार्क्ष्याणां पक्षिणां नायकः। अमादुर्विनताव्ये विनायकुलपवासां बहुभार्य्याः तार्क्ष्यपुत्रः।) गरुड़। इति राज-निर्घण्टः॥ (तार्क्ष्यनाथकः। इति केचित्॥)
तार्क्ष्यप्रसव, पुं, (तार्क्ष्य पर्व्वते प्रसवोऽस्य।) अश्वकर्णद्रुमः। इति राजनिर्घण्टः॥
तार्क्ष्यशैल, क्ली, (तार्क्ष्योत्पत्तिः शैलम्। कर्म्म।) रसाञ्जनम्। इति राजनिर्घण्टः॥ (यथा, सुश्रुते चिकित्सितस्थाने ८ अध्याये।

"सिन्धूद्भवं चन्दनदारु नौव
सिन्धूत्थं वैद्यं तार्क्ष्यशैलम्॥")
तार्क्ष्यी, स्त्री (तार्क्ष्येण गरुडेन प्रिया। तस्य ङीप् च।) वनवल्लीविशेषः। इति शब्दरत्नावली॥
तार्त्तं, क्ली (तत्रत्यमिति। तत्र प्रतिपदमत्र + "वुञ्च।" ४। ४। १९९। इति यत्।) खरि-सारम्। (अस्य नामानि यथा,—
"खरिसार्त्तं ताम्रमार्त्तं मार्त्तं पैङ्गलमूलकम्।
पित्तलं रोगहरस्य तारकं पारलिहम्॥"
इति वैद्यकरत्नमालायां चाद्यमार्कण्डेय कारे॥)
ताम्रीयपत्रम् इति राजनिर्घण्टः। धूम्र शिखामणम्। इति हेमचन्द्रः। ४। १०९। (ताम्रस्य विकारः। "तालादिभ्योऽण्।" ४। ३। १५२। इत्यण् तार्णाद्यपि इति पाठे कीर्त्या अण्। यत्। इति सिद्धान्तकौमुदी। तालवृन्दम्। अस्य तत्र गुणः।) तालवृक्षः। (यथा, महाभारते। १। १०१। १।
"शिरोभिः पततः प्रायाज्ज्वलन्तीव त्वरोत्पत्तम्।
तालैरिव महाराज। वृन्ताद्भ्रष्टैरनेकशः॥")
ताल:, पुं, (तलति। तल + "ज्वलिति।" ३। १। १४०। इति णः।) तृणविशेषः। तत्पर्य्यायः। ताल द्रुम २ पत्री ३ दीर्घस्कन्ध ४ ध्वजद्रुम ५ तृण राज ६ मधुरस ७ मदाढ्य ८ दीर्घपादप ९ चिराङ्घ्रि १० तरुराज ११ दीर्घतरु १२ गुच्छपत्र १३ आसवद्रु १४। इति राजनिर्घण्टः॥ लेखपत्र १५ महोन्नत १६। इति शब्द प्रकाशः॥ अस्य गुणाः। मधुरत्वम्। शीत-लत्वम्। पित्तदाहश्रमापहत्वञ्च। ०। अस्य स्तम्भजः। कषायित्वरासक्षीवत्वापहत्वम्। मद कारित्वञ्च। ०। तद्बीजगुणाः। शीतलत्वम्। बलत्वम्। पित्तत्वम्। धातुवर्द्धनत्वम्। गुरुत्वम्। विदाहित्वम्। वातपित्तश्लेष्मरक्त-कारित्वञ्च। इति राजनिर्घण्टः॥ पित्तत्व मेदोविशुद्धिकारित्वम्। तृष्णादस्यम्। वसुरत्वम्। तत्रापि अत्युष्णकरात्मव। इति भावप्रकाशः॥ वातपित्तकफवर्द्धकत्वं मदकत्वम्। इति मूत्रम्। बृहत्त्वम्। चास्त्रुमप। इति राजवल्लभः॥ तद्बीजस्य अर्थात् तालमस्तकस्य गुणाः। मध्य करत्वम्। स्निग्धत्वम्। वातपित्तहरत्वम्। गुरु त्वञ्च॥ ०॥ तदर्द्धमात्रफलगुणाः। मधुरत्वम्। मृदुत्वम्। शीतलत्वम्। गुरुत्वञ्च। ०। तालतरुगुणाः। विषमार्द्दितम्। गुल्मञ्च कफवातदम्। गुरुत्वञ्च। इति राजनिर्घण्टः॥ तालफलस्य पक्वोत्पन्न। पित्तरक्तश्लेष्मवर्द्धन तरुवाताऽमृत विष्टम्भकारित्वम्। इति भाव प्रकाशः॥ कफलाभिरत्वम्। स्तम्भम्। ताल-मस्तः। पुष्पाहव। इति राजवल्लभः॥ तालजमतुर। श्रीफलम्। पत्रोद्भवादि क्षय। इति राजनिर्घण्टः॥ ०॥ तत्परश्च स्नायुः। विविधकरस्त्रम्। मधुरम।

श्लेष्मकारित्वम् । वातपित्तनाशित्वम् । गुरुत्वम् । मधुरत्वम् । शीतलत्वञ्च । इति भावप्रकाशः ॥ * ॥ तालशिरोगुणाः । स्वादुत्वम् । तिक्तत्वम् । कषायत्वम् । रक्तवातकृद्रोगनाशित्वम् । बलमांसशुक्रवृद्धिकारित्वञ्च । इति । राजवल्लभः ॥ * ॥

गीतकालक्रियामानम् । अत्र स्वर इयत् कालं गेय इयत् कालं विश्रमितं इयत् कालं द्रुतं इयत् कालं मध्यमिति बोधयितुं हस्तयोरितरेतराङ्गुल्याकुञ्चनप्रसारणादिक्रियाभिर्नियमितः गानगतयोरिति कालक्रिययोः प्रमाणं तालः । यद्वा इदमियद्वा कालं गेयमिति कालेनाङ्गुल्याद्याकुञ्चनादिक्रियामानं ताल इति । कालस्य एकादिमात्राद्युपाधेर्नियमितस्य क्रियायाः परिच्छेदहेतुस्ताल इति मधुः । कालेन गमनगानवादनक्रियाणां मानं तालः । तालादकरतालयो विरामस्ताल इत्यन्ये । इति भरतटीकायां भरतः ॥ * ॥ तस्योत्पत्तिर्यथा । गौरीहरयोर्नृत्येन तालो बभूव । तस्य कारणम् । क्रियाकालश्च । हरनृत्यस्य ताण्डवं गौर्या नृत्यस्य लास्यं इति यथा अर्थात् पुरुषनृत्यस्य ताण्डवं नाम्ना स्त्रीनृत्यस्य लास्यमिति नाम । ताण्डवस्याद्याक्षरेण लास्यस्याद्याक्षरेण च मिलिता ताल इति संज्ञा जाता । इति सङ्गीतशास्त्रम् ॥ * ॥ तस्य भेदा यथा,—

"चच्चत्पुट१ चाचपुट२ षट्पितापुत्रकस्तथा३ ।
उद्घट्ट४ सन्निपात५ कन्दुक६ कोकिलारव७ ।
राजकोलाहलो८ रङ्गविद्याधर९ शचीप्रियौ१० ।
पार्वतीलोचनो ११ राजचूडामणि १२ जयश्रियौ १३ ।
वादकाकुल१४ कन्दर्प१५ नलकूबर१६ दर्पण१७ ।
रतिलीलो १८ मोक्षपति १९ श्रीरङ्ग २० सिंहविक्रम २१ ।
दीपको २२ मल्लिकामोदो २३ गजलीलश्च २४ चर्चरी २५ ।
कुहक्का २६ विजयानन्दो २७ वीरविक्रम २८ टेङ्किकि २९ ।
रङ्गाभरण ३० श्रीकीर्ति ३१ वनमालि ३२ चतुर्मुखा ३३ ।
सिंहनन्दन ३४ नन्दीश ३५ चन्द्रबिम्ब ३६ द्वितीयका ३७ ।
जयमङ्गल ३८ गन्धर्व ३९ मकरन्द ४० त्रिभङ्गिक ४१ ।
रतिताल ४२ वसन्तश्च ४३ जगझम्पो ४४ गारुगि ४५ ।
कविशेखर ४६ घोषौ च ४७ हरवल्लभ ४८ भैरवौ ४९ ।
गतप्रत्यागतो ५० मल्लताली ५१ भैरवमस्तक ५२ ।
सरस्वतीकण्ठाभरण ५३ क्रीडा ५४ निःसारुकैव च ५५ ।
मुक्तावली ५६ रङ्गराज ५७ भरतानन्द ५८ दिमाइका ५९ ।
आदितालक ६ इत्यादि ताला भरतसम्मताः ।
सर्वेषामेव निगदिता अथैषां लक्षणं यथा ॥ ॥
अर्द्धमात्रं द्रुतं ज्ञेयमेकमात्रं लघु स्मृतम् ।
द्विमात्रञ्च गुरु ज्ञेयं त्रिमात्रञ्च प्लुतं मतम् ॥
ताले चच्चत्पुटे ज्ञेयं गुरुद्वन्द्वं लघुः प्लुतः १ ।
गुरुर्लघुः प्लुतश्चैव भवेच्चाचपुटाभिधे ॥ २ ॥
गलघ्वौ लगलाश्चैव षट्पितापुत्रके मताः ३ ।
उद्घट्टे तु गमगाः ४ सन्निपाते गुरुर्मतः ॥५॥
चतुर्विधः परिज्ञेयस्तालः कन्दुकनामकः ६ ।
पूर्वः सर्वः समश्चैव विषमश्चैव कथ्यते ॥
लचतुष्कं गलौ पूर्वे सर्वे बिन्दुद्वयं गुरुः ।
समाख्यस्तु समे ज्ञेयस्तालो विषमे भवेत् ॥
लचतुष्कं षट्लघवो गुरुर्बिन्दुचतुष्टयम् ।
षट्लघवो लघुश्चैव तालोऽयं कोकिलारवे ॥७॥
लचतुष्कं गगलप्लुतं राजन् लघु ।
लघुबिन्दुद्वयञ्चेति राजकोलाहलाभिधे ॥८॥
लद्वयं द्वौ द्रुतौ यत्र रङ्गविद्याधरे च तु ९ ।
लघूनि त्रीणि यत्र स्युर्गुरूणि त्रीणि यत्र वै ।
द्रुतद्वयञ्च यत्रापि स तालः स्याच्छचीप्रिये ॥१०॥
लद्वयं गुरुलौ बिन्दू द्रुतौ गौ द्रुतौ पुनः ।
यत्र तालः स विज्ञेयः पार्वतीलोचनाभिधः ॥११॥
राजचूडामणौ बिन्दुलघू बिन्दुलगौ मतौ ॥१२॥
दगलौ गौ गुरुश्चैव जयश्रीरिति कथ्यते ॥१३॥
द्रुतौ लघुचतुष्कञ्च गौ गौ द्रुतद्वयं लघुः ।
लचतुष्कं विना प्रोक्तः तालः स्याद्वादकाकुल ॥१४॥
द्रुतद्वयं लकारश्च कन्दर्पेऽपि प्रकीर्त्तितः ॥१५॥
चत्वारो गुरवो यत्र चत्वारः प्लुतका अपि ।
अन्तराणि चत्वारि तालोऽयं नलकूबरः ॥१६॥
बिन्दुद्वयं गुरुश्चैव भवेद्यत्र स दर्पणः ॥१७॥
रतिलीले विधातव्यं लघुद्वन्द्वं गुरुद्वयम् ॥१८॥
चत्वारो बिन्दवश्चादौ द्वौ विरामयुतौ तथा ।
चतुर्थवर्ज्जिता यत्र षोडश मोक्षपतिर्मतः ॥१९॥
श्रीरङ्गसंज्ञके ताले ममगा लप्लुतौ मतौ ॥२०॥
सिंहविक्रमताले तु लगौ लप्लुता गलौ ॥२१॥
द्रुतौ लघुः प्लुतश्चैव ताले दीपकनामनि ॥२२॥
ताले मल्लिकामोदे लद्वयं द्रुतचतुष्टयम् ॥२३॥
लचतुष्कं विरामान्तं गजलीले प्रकीर्त्तितम् ॥२४॥
[illegible] चर्चर्यां विरामान्तौ द्रुतौ लघुः ॥२५॥
द्रुतद्वन्द्वं भवेत्तालं कुहक्काख्ये लघुद्वयम् ॥२६॥
[illegible] विजयानन्दे लगलप्लुतास्तथा ॥२७॥
वीरविक्रमताले तु द्रुतौ लघू गुरुः प्लुतः ॥२८॥
टेङ्किका इत्यपि [illegible] ॥२९॥
[illegible] रङ्गाभरणसंज्ञके ॥३०॥
श्रीकीर्त्तिसंज्ञके ताले गुरुद्वन्द्वं लघुद्वयम् ॥३१॥
[illegible] वनमालिनि ॥३२॥
चतुर्मुखाभिधे ताले [illegible] प्लुत ॥३३॥
[illegible] ॥
[illegible] ॥३४॥
[illegible] ॥३५॥
[illegible] ॥३६॥
द्रुतद्वन्द्वं लकारश्च [illegible] ॥३७॥
सकारश्च यकारश्च जयमङ्गलनामनि ॥३८॥
चत्वारो गुरवो बिन्दुचत्वारश्च प्लुता अपि ।
बिन्दवो द्वादश लाश्च ताले गन्धर्वसंज्ञके ॥३९॥
मकरन्दे द्रुतद्वन्द्वं लघुद्वन्द्वमथो गुरुः ॥४०॥
गुरुलघू प्लुतश्चैव त्रिभङ्गिः परिकीर्त्तितः ॥४१॥
[illegible] रतितालस्य लक्षणं परितम् ॥४२॥
वसन्तताले [illegible] ॥४३॥
जगझम्पे गुरुश्चैको विरामान्तं लद्वयम् ॥४४॥
गद्रुतौ गौ द्रुतौ लश्च प्लुतौ गारुगि ॥४५॥
[illegible] कविशेखरे ॥४६॥
प्लुतः [illegible] लघु ।
लचतुष्कं विना प्रोक्तं यत्र घोष स उच्यते ॥४७॥
हरवल्लभताले च प्लुतौ लौ गौ च लम् ॥४८॥
भैरवे प्लुतौ गगौ गगौ प्लुतौ लघुश्च भैरवे ॥४९॥
गतप्रत्यागते ताले लौ गौ गौ लौ प्रकीर्त्तितौ ॥५०॥
चतुर्लघुमल्लताले विरामान्तं द्रुतद्वयम् ।
लगौ गौ लौ लगौ अथ [illegible] पुनः ॥५१॥
लचतुष्कं विना प्रोक्तं ताले भैरवमस्तके ॥५२॥
सरस्वतीकण्ठाभरणे गौ लघुश्च द्रुतद्वयम् ॥५३॥
एक एव प्लुतो यत्र क्रीडातालः स उच्यते ॥५४॥
द्रुतद्वयं विरामान्तं ताले निःसारुके मतम् ॥५५॥
[illegible] सविरामान्तं गौ पुनः [illegible] ।
प्लुतौ गः लघुः [illegible] मुक्तावली तु सा ॥५६॥
लगौ बिन्दुद्वयं गौ लौ रङ्गराजे प्रकीर्त्तितः ॥५७॥
द्रुतद्वयं सविरामान्तं गुरुः प्लुतद्वयं लघुः ।
यत्र ताले स विज्ञेयो भरतानन्दसंज्ञकः ॥५८॥
आदितालं लघुश्चैक इदानीं भरतो जगौ ॥५९॥
ममस्य [illegible] दाक्षकातालकं ॥६ ॥
एकादिकमात्रैस्ताले यतिर्मुखरुच्यते इमे ॥" * ॥

अथ प्रस्तारः ।

"गुरोः प्लुतादधोभागे तु गुर्वधोगतो लघुः ।
द्रुतं न्यसेदथाभावे [illegible] द्रुतात् तु परस्थितः ॥
पश्चाच्च कला यथारिक्तं प्रस्तारलक्षणम् ।
[illegible] धनात्मना मात्राभिर्मात्रभेदकात् ॥
तान् प्रस्तारभेदान् यावत् समस्तो भवेत् ॥"

अथ तालप्रस्तारे पिङ्गलमुनेः [illegible] अस्ति बाहुल्यभयान्नोक्ता ॥ * ॥

अथ मृदङ्गवाद्यादिषु तालवादनम् ।

"ताले विरामेण [illegible] अथ

लघुमात्रान् द्वौ च भावौ विभवैरुद्धृतौ [illegible]
[illegible] ।

[illegible]
[illegible]

[illegible]
[illegible] ।

[illegible]
[illegible]

[illegible]
[illegible] ।

[illegible]
[illegible]

याद्यौ मात्राद्वमात्रि द्रुतयुग्मि कपोतकैन्दवैन
यात ॥
इति तालध्यानप्रकार ॥ ॐ ॥
धीरङ्गो मणिवत्सकङ्कणकरो सुजातशीलध्वज
कीडावर्तुलसान्तरज्ञपुत्रो गम्भीरकीलाह्न ।
गान्धर्वोपचरितचतुर्मुखमगा या रामपूजामपि
याम्यं गाजमयज्ञ दिङ्कुञ्जव्रज् संयावकम् इति ।
अपि च ।
मन्दीमोऽङ्गतुर्मुखेन वक्षकायन्निमीलय
कन्दर्पो वनकृपस्य मुक्तिनी मन्दातिरूपे शुभे ।
कल्याण हिल कोडिमारसमझी याचौ मय
धीरधा
नानाशत्र सुरविनिन्दितम् यत्र धंसारयाया-
वनाम् ॥
स्थानौ च कलितकपनिमहसी विद्याधवैरचित
नौमिहर्पसम यमभ्रुवमया कोडोलमल
कौपर ।
तस्य श्रीमतुमङ्गलस्य भविनो सङ्गीतदामोदर
तालाय कारकोपतलावली यामकालीय
यातु ॥"॥
अथच ।
'आदावष्टतपा वसौ मध्य एकपद्धत ।
दशावतारमर्याद ब्रह्माद्यं तत परम् ॥
कपाहतालभेदा । आड् १ दोप २ कीर्ति ३
जयशेखर ४ मङ्गलम् ५ मध्यताल ६ चम्पकम् ७ लक्ष्मताल ८ । अथ वहुतालस्य भेदा ।
वीरविक्रम १ विपमल्लुन २ परम् ३ वीर
ठ्ठक ४ मकर ५ कम्पन ६ कामपानिह ७
कुरक्कुटम् ८ रससोपी ९ गजपुष्ट १०
झटका ११ । अथ मध्यतालभेदा । ब्रह्म १ विराम
ब्रह्म २ यज्ञयता ३ नम्रमापा ४ । अर्धमताल
भेदा । दस्पाद १ भैरवाली २ मदनरोगा ३
गुणामर्क ४ मधानी ५ एकमात्र ६ ।
अथ अहर्दैनालभेदा । विकृताल १ चम्पकमाला २ हैमतालय ३ चार्चरीपिक ४ चार
मार ५ यमाड ६ धराधरा ७ सुखताड ८
माधवना ९ वीरमल्ल १० ताण्डवी ११ एव
धारिता १२ भाता १३ नाट्टमाला १४ ।
भेदा लक्षणानि यथा,—
एकतालकृत शून्यं द्रुतम तानिका भवे ।
सङ्गीत पदमा भाद व्याहृताय प्रकीर्तिता १ ॥
एकतालस्य शून्यस्य क्रमेणापि त्रिधा भवेत् ।
द्विशून्य वक्रमिषे दोषाश्चम्य भवेत् एकम २ ॥
प्रथम द्रुतयं तार्दं मध्य एकतयादरे ।
कमादिद तालीनि भर्तानि संकीर्तिताः ३ ॥
वक्रगमयथा द्रुतं तथा लक्ष्मणाखरे ।
बह तथा विसर्जने वर्णितप्रमाविता ४ ॥
एकतालं भवेत् च क्रमेणापि चतुष्टयम् ।
द्विशून्य मध्यस्य कपोतो रविकर्णन्तम ५ ॥
प्रथमं द्रुतयेव तत्पर तानेकपद्य ।
इति द्रुतं तथा शून्य यथार्थं प्रकीर्तितम् ६ ॥
द्रुतम् प्रथमं तार्दं तत्परस्मैकमर्दम् ।

द्विरि च द्रुतम तार्दं रूपकं परिकीर्तितम् ७ ॥
एकताल तथा शून्य क्रमेण द्विविध भवेत् ।
द्विरि द्रुतपताकस्य मतार्द भवेत् यत्र ८ ॥
एकताल तथा शून्य क्रमेण त्रिविधं भवेत् ।
तत्परं द्रुतम तालमिश्रेमै वीरविक्रम १ ॥
द्रुमतार्दं तथा शून्य तत्पर द्रुमतालकम् ।
द्विरि च द्रुतयं तार्दं वामदविशरं स्मृतम् २ ॥
द्रुमतालस्य शून्यस्य एकतालस्य तत्परे ।
द्विवेकस्य विशून्यस्य विषम परम भवेत् ३ ॥
एकताल तथा शून्य क्रमेणापि त्रिधा भवेत् ।
द्रुतं द्रुतम पश्चात् स वीरदक्षक स्मृत ४ ॥
प्रथम एकतालस्य तत्पर शून्यमेककम् ।
द्विवेकस्य विरामस्य मङ्गलकस्य गतिर्यथा ५ ॥
वृद्धिपरिणामक्षयाख्या दशा यस्य। यद्वा, त्रीन् तापान् दस्यति नाशयतीति। दसुध+ मूलविभुजादित्वात् कः पृषोदरादित्वात् न-लोपः। यद्वा, त्रयाधिका त्रिंशत् दश परिमाणमस्य। समासे डच्। शाकपार्थिवादित्वात् मध्यलोपः।) देवः। इत्यमरः। १।१।७॥ (यथा, महाभारते। ३।८५।१९।
"ववन्ध परमप्रीतो ब्रह्मा च त्रिदशैः सह॥"
ते च अर्का द्वादश १२ रुद्रा एकादश ११ वसवोऽष्टौ ८ विश्वेदेवौ द्वौ २ एतद्योगेन त्रयस्त्रिंशत् ३३॥ त्रिंशत् परिमिते, त्रि। यथा, महाभारते। १।११३।२१।
"तत स कौरवो राजा विहृत्य
त्रिदशा निशाः॥")

त्रिदशदीर्घिका, स्त्री, (त्रिदशानां देवानां दीर्घिका।) स्वर्गङ्गा। इति हेमचन्द्रः। ४। १४७॥

त्रिदशमञ्जरी, स्त्री (त्रिदशप्रिया मञ्जरी यस्याः।) तुलसी। इति राजनिर्घण्टः॥ (तुलसीशब्देऽस्या गुणादयो व्याख्याताः॥)

त्रिदशायुध, क्ली, (त्रिदशानां देवानां आयुधम्।) वज्रम्। इति त्रिकाण्डशेषः॥

त्रिदशारिः, पुं, (त्रिदशानाममरिः शत्रुः।) असुरः। इति शब्दरत्नावली॥

त्रिदशालयः, पुं, (त्रिदशानां देवानां आलयः।) स्वर्गः। इत्यमरः। १।१।६॥ (यथा, महाभारते। १।७६।६६।
"गुरोश्च सकाशे तु दशवर्षशतानि सः।
अनुज्ञातः कचो गन्तुमियेष त्रिदशालयम्॥")
सुमेरुपर्व्वतः। इति हलायुधः॥

त्रिदशावासः, पुं, (त्रिदशानां सुराणां आवासो वासस्थानम्।) स्वर्गः। इति हलायुधः॥

त्रिदशाहारः, पुं, (त्रिदशानां आहारः।) अमृतम्। इति हलायुधः॥

त्रिदशेश्वरी स्त्री, (त्रिदशानामिन्द्रादिदेवाना मीश्वरी।) दुर्गा। यथा,—
'सुराङ्गालिरभा देवा नन्दिनी दुन्दुभिर्म्मता।
तथाच नन्दिनी नन्दी ईशत्वात् त्रिदशेश्वरी॥"
इति देवीपुराणे ४५ अध्यायः॥
(गङ्गा। यथा काशीखण्डे। २९।७२।
'तपस्वी तीर्थतीर्था च त्रिपथा त्रिदशेश्वरी॥")

त्रिदिनस्पृक्, [श्] पुं (त्रिदिनं चान्द्रदिनत्रयं स्पृशतीति। स्पृश+क्विप्।) चान्द्रत्र्यहः। यथा,
"तिथित्रयमेको दिनवार स्पृशति यत्र तद्-भवत्यवमदिनम्। त्रिदिनस्पृक् दिनत्रयस्पृशा इह।" इति ज्योतिस्तत्त्वम्॥

त्रिदिवः, पुं (त्रयो ब्रह्मविष्णुरुद्रा दीव्यन्त्यत्रेति। दिव+ "हलश्च।"३।३।१२१। इति घञ्। संज्ञापूर्व्वकत्वात् न गुणः। यद्वा, दीव्यन्तीति दिवाः। इगुपधज्ञेति कः। त्रयः सत्त्वरजस्तमोरूपाः दिवाः क्रीडका विलासका इत्यर्थः यत्र।
"तृतीया द्यौस्त्रिदिवः। सर्व्वं त्रिविधं इति

विषये संख्याशब्दस्य पूरणार्थत्व त्रिभागवत्।" इति शिशुपालवधटीकायां मल्लिनाथः। १। ५६।) स्वर्गः। इत्यमरः। १।१।६॥ (यथा, मनुः। ९।२५३।
"एवमाराधयन्नेतान् कण्टकानाञ्च शोधनात्।
नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः॥")
क्ली, आकाशः। इति हेमचन्द्रः॥

त्रिदिवा, स्त्री नदीभेदः। इति मेदिनी। वे, ३७॥ (यथा मत्स्यपुराणे। ११३। ३१।
"त्रिभामा ऋषिकुल्या च इक्षुदा त्रिदिवा
चला॥")

त्रिदिवेशः, पुं, (त्रिदिवस्य स्वर्गस्य ईशः।) देवः। इत्यमरः। १।१।७॥

त्रिदिवोद्भवा, स्त्री, (त्रिदिवादुद्भवो यस्याः।) सूक्ष्मैला। इति राजनिर्घण्टः॥ (गङ्गा। स्वर्गोद्भवमात्रे त्रि। इति युक्तयुक्तिशब्दार्थः॥)

त्रिदृक् [श्] पुं (तिस्रः दृशो नेत्राणि यस्य।) शिवः। इति हेमचन्द्रः। २।११०॥

त्रिदोषं, क्ली (त्रयाणां दोषाणां समाहारः।) दोषत्रयम्। वातपित्तकफरूपम्। इति राजनिर्घण्टः॥

त्रिदोषज, त्रि, (त्रिदोषाज्जायते इति। जन+ "पञ्चम्यामजातौ।" ३।२।९८। इति डः।) त्रिदोषजनितः। सन्निपातरोगः। यथा—
"चिरज्वरे वातकफोल्वणे वा
त्रिदोषजे वा दशमूलमिश्रः।
किरातत्तिक्तादिगणः प्रयोज्यः
शुद्ध्यर्थिने वा त्रिवृता विमिश्रः॥"
इति चक्रपाणिदत्तः॥
("दृष्ट्वा त्रिदोषजं घोरं ज्वरं प्राणापहारकम्।
तस्मादादौ कफस्यास्य शोधनं परिकीर्त्तितम्॥
न कुर्य्यात् पित्तशमनं यदीच्छेदात्मनो यशः।
कफो वातो बलीयांस्तु सद्यो हन्ति रुजातुरम्॥
लङ्घनं वमनं चापि स्वेदनं स्यात्त्रिदोषजे।
त्रिरात्रं पञ्चरात्रं वा दशरात्रमथापि वा॥
लङ्घनञ्च समुद्दिष्टं ज्ञात्वा दोषबलाबलम्।
कफं विशोधितं ज्ञात्वा ततो वातनिवारणम्॥
पित्तप्रशमनं कार्य्यं ज्ञात्वा पित्तस्य कोपनम्।
शोधनीयौ वातकफौ न तु पित्तं विनाशयेत्॥"
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये॥)

त्रिधा, अ, (त्रि+"संख्याया विधार्थे धा।" ५। ३।४२। इति धा।) त्रिप्रकारः। इति मुग्धबोधम्॥ यथा, वराहपुराणे।
"नारायणः परो देवः सत्स्वरूपो जनार्द्दनः।
त्रिधात्मा स भगवान् सर्व्वेषु परमेश्वरः॥"
(यथा महाभारते। १२। १३१। ७८।
"धर्म्मश्चार्थः समाहार्य्यौ धर्म्मलब्धं त्रिधा धनम्।
कर्त्तव्यं धर्म्मपरमं मानवेन प्रयत्नतः॥")

त्रिधातुः, पुं (त्रीन् धर्म्मार्थकामान् दधाति पुष्णातीति। धा+तुन्।) गणेशः। इति त्रिकाण्डशेषः॥ (त्रयाणां धातूनां समाहारः।) धातुत्रये, क्ली॥

त्रिधामा, [न्] पुं, (त्रीणि भूरादीनि सत्त्वादीनि वा धामानि स्थानानि यस्य।) विष्णुः। (यथा, मुकुन्दमालायाम्। ११।
"दृष्ट्वा तोये मदनपवनोद्धूतमोहोर्म्मिमाले
दारावर्त्ते सुतजनयथाग्राहसङ्घाकुले च।
संसाराख्ये महति जलधौ मज्जतां नस्त्रिधामन्।
पादाम्भोजे वरद! भवतो भक्तिनावं प्रयच्छ॥")
शिवः। अग्निः। मृत्युः। इति शब्दार्थकल्पतरुः॥ (दशमद्वापरस्य व्यासः। यथा, देवी-भागवते। १।३।२८।
"सारस्वतस्तु नवमे त्रिधामा दशमे तथा॥")
धामत्रये, क्ली स्त्री च॥ (क्ली, स्वर्गः। यथा, भागवते। २।२४।२०।
"इतो व्रजेन धाम्नैव त्रिधाम परमं ययौ॥"
"त्रिधाम तृतीयं धाम स्वर्गं तस्य परां काष्ठां सत्यलोकम्॥" इति तट्टीकायां स्वामी॥)

त्रिधारकः पुं, (तिस्रो धारा यस्य। ततः स्वार्थे संज्ञायां वा कन्।) गुन्द्रतृणम्। इति राज-निर्घण्टः॥ (त्रयाणां धारकाणां समाहारः।) धारकत्रये, क्ली॥

त्रिधारस्नुही, स्त्री, (त्रिषु भागेषु धारा यस्याः। सा एव स्नुही।) स्नुहीविशेषः। तत्पर्य्यायः। त्र्यस्रः २ धारास्नुही ३। इति राजनिर्घण्टः॥

त्रिनयनः पुं, (त्रीणि चन्द्रसूर्य्याग्निरूपाणि नयनानि यस्य। "क्षुभ्नादिषु च।" ८।४।३९। इति निषेधात् न णत्वम्।) शिवः। इति हला-युधः॥ (यथा महाभारते। १४।८।२७।
"त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम्॥")
नयनत्रये, क्ली॥ (लोचनत्रयविशिष्टे, त्रि। यथा मातृकाशरस्वतीध्याने।
"मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्ताम्बुजै-
र्बिभ्राणां विशदप्रभां त्रिनयनां वाग्देवता-
माश्रये॥")

त्रिनयना, स्त्री, (त्रीणि नयनानि यस्याः। टाप्।) दुर्गा। यथा देवीपुराणे ४५ अध्याये।
"पश्यन्ती चोपरं लोकं तथा ज्ञानार्णवं परम्।
नय सम्मार्गमेतद्धि त्रयी त्रिनयना मता॥"

त्रिनेत्रः, पुं, (त्रीणि नेत्राणि यस्य।) शिवः। यथा नैषधे। १।६।
"निपीयतस्याश्रविभूतिरोषिता
दिशो न कामप्रसरावरोधिनीम्।
दधार शास्त्राणि दृढं द्वयाधिका
विभक्तिनेत्राननरत्नशोभिकाम्॥"
तस्य प्रभाः। यथा मत्स्यपुराणे।
"ततः साधननागेशाग्निनेत्राम्बकृत् ध्रुवः।
कोटयश्चतुराशीतिरपरामरवर्ज्जिताः॥
वामः स्वर्ण्णमनग्रौकान् ब्रह्मणा विनिवारितः।
त्रैनेत्रिया भवन् दक्षिण्यरामरवर्ज्जिताः॥"

त्रिनेत्रचूडामणिः, पुं (त्रिनेत्रस्य महादेवस्य चूडामणिः शिरोभूषणम्।) चन्द्रः। इति त्रिकाण्डशेषः॥

[illegible]

[illegible]

[illegible]

चाप पाशाङ्कुशशरविलसद्बाहुयुग्मं पुष्पवाणान्
सद्विभ्राणां करसरसिजे रत्नमौलिं त्रिनेत्राम्।
हेमाभासां कुचभरनतां रत्नमञ्जीरकाञ्चीं
ग्रैवेयाद्यैर्ललितवितनुं भावयेच्छक्तिमाद्याम्॥
चामरादर्शताम्बूलकरण्डकसमुद्गकान्।
दधतीभिः सखीभिश्चेटीभिः परिवारिताम्॥
कल्याणकल्पवल्लीयं परमां साधकः स्मरेत्॥"
इति तन्त्रसारः॥

त्रिपुटी, [न्] पुं, (त्रिपुट इव आकारोऽस्य-स्येति। त्रिपुट+इनि।) एरण्डः। इति शब्दमाला॥

त्रिपुटी, स्त्री, (त्रीणि पुटानि यस्याः। गौरादित्वात् ङीष्।) त्रिवृता। इत्यमरटीकायां भरतः॥ (त्रयाणां प्राह्मग्राहकरूपाणां पुटानामाकाराणां समाहारः। "द्विगोः।" इति ङीप्। प्राह्मग्राहकरूपपुटत्रयम्। यथा पञ्चदश्याम्। ११। १४।
"भूतोत्पत्तेः पुरा भूमा त्रिपुटीद्वैतवर्जनात्।
प्राह्मग्राहकरूपा त्रिपुटी प्रलये हि नो॥")

त्रिपुटीफलः पुं (त्रिपुटी पुटत्रयं फले यस्य।) एरण्डः। इति हारावली। १ ८॥

त्रिपुण्ड्र, क्ली, (त्रयाणां पुण्ड्राणां इक्षुवत्कारणां समाहारः।) भस्मादिकृतकपालस्थतिर्यग्रेखात्रयम्। यथा,—
"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः॥
तस्मान्मृदापि कर्त्तव्यं ललाटेऽपि त्रिपुण्ड्रकम्॥"
इति तिथ्यादितत्त्वम्॥

ब्रह्माण्डपुराणे।
"ऊर्द्ध्वपुण्ड्रं मृदा कुर्य्यात् त्रिपुण्ड्रं भस्मना सदा।
तिलकं वै द्विजः कुर्य्यात् चन्दनेन यदृच्छया॥
ऊर्द्ध्वपुण्ड्रं द्विजः कुर्य्यात् क्षत्रियश्च त्रिपुण्ड्रकम्।
अर्द्धचन्द्रं च वैश्यश्च वर्त्तुलं शूद्रयोनिजः॥"
इत्याह्निकाचारतत्त्वम्॥
"शिवागमे दीक्षितैस्तु धार्य्यं तिर्य्यक्त्रिपुण्ड्रकम्।
विष्ण्वागमे दीक्षितस्तु ऊर्द्ध्वपुण्ड्रं विधारयेत्॥"
इति नागोजीभट्टकृतस्मृतिसंहिता॥
(यथा, शब्दचिन्तामणिधृतदेवीभागवतम्।
"येषां वपुर्मनुष्याणां त्रिपुण्ड्रेण विना स्थितम्।
श्मशानसदृशं तत् स्यान्न प्रेक्ष्यं पुण्यकृज्जनैः॥"
"त्रिपुण्ड्रं ये विनिन्दन्ति निन्दन्ति शिवमेव ते।
धारयन्ति च ये भक्त्या धारयन्ति तमेव ते॥
तिर्य्यग्रेखा प्रदृश्यन्ते ललाटे सर्व्वदेहिनाम्।
तथापि मानवा मूढा न कुर्व्वन्ति त्रिपुण्ड्रकम्॥")

त्रिपुण्ड्रक, क्ली, (त्रिपुण्ड्रमेव। स्वार्थे कः।) त्रिपुण्ड्रम्। यथा —
"दधा ललाटफलके भसितरेखात्रिपुण्ड्रकम्॥"
इति हारावली। ६२॥

त्रिपुर, क्ली, (त्रयाणां पुराणां समाहारः। तद्धितार्थेति समासः। पात्रादित्वात् स्त्रीत्वाभावः।) मयदानवनिर्म्मितं पुरत्रयम्। (यथा, महाभारते। ३। ४१। ३८।
"महात्मना शङ्करेण त्रिपुरं निहतं यदा।
तदैतदस्त्रं निर्म्मुक्तं येन दग्धा महासुराः॥")
पुरा असुरा देवैर्निर्जिताः सन्तो मायिनां परमाचार्य्यं मयं शरणमाययुः। स महायोगमने अदृश्यानि दुर्व्वितर्क्यपरिच्छदानि हैमीं रौप्यायसीमिति त्रीणि पुराणि निर्म्माय तेभ्यो ददौ। ते असुरास्ताभिः पुरीभिरलक्षिताः पूर्व्ववैरमनुस्मरन्तः सेश्वरान् त्रीन् लोकान् नाशयाञ्चक्रुस्ततः सेश्वरा लोका हरं उपासाञ्चक्रिरे। हरो मा भैष्टेति सुरान् आश्वास्य धनुषि शरं सन्धाय पुरेषु व्यसृजत्। ते शरैः स्पृष्टाः पुरौकसोऽसुराः अचेताः सन्तो निपेतुः। महायोगी मयस्तानसुरानानीय त्रिपुरस्थितसिद्धामृतरसकूपेऽक्षिपत् तेऽसुराः सिद्धरसस्पृष्टा वज्रशरीराः सन्त उदतिष्ठन् ततो विष्णुर्गौर्भूत्वा च वत्सो भूत्वा त्रिपुरं प्रविश्य रसकूपामृतं पपौ असुराः विष्णुमायया मोहिताः सन्तो न न्यषेधन् तदा विष्णुः स्वाभिः शक्तिभिः शम्भोर्युद्धोपकरणं रथसारथिधनुर्व्वाणादिकं व्यधात्। ततः शम्भुः सन्नद्धो रथमास्थाय शरं धनुषि सन्धाय मध्याह्नकाले त्रिपुरं ददाह। इति श्रीभागवतम्॥ (त्रीणि पुराणि यस्येति विग्रहे त्रिपुरासुरे, पुं। यथा, महाभारते। ७। २। ७६।
"आस्थाय स रथं दिव्यं सर्व्वदेवमयं शिवः।
त्रिपुरस्य वधार्थाय स्थाणुः प्रहरतां वरः॥")

त्रिपुरदहनः, पुं, (त्रिपुरं दहतीति। दह+ल्युः।) शिवः। इति हारावली। ८॥

त्रिपुरभैरवी, स्त्री (त्रिपुरा धर्म्मार्थकामानां दात्री। सा चासौ भैरवी चेति।) देवीविशेषः। तद्ध्यानादि यथा,—
"वैष्णवी मन्त्रसञ्जेद्र त्रिपुरायाश्च तं शृणु।
तस्यास्तु सर्व्वमन्त्राणि मयोक्तान्युत्तमानि वै॥
विमुक्तिस्तु यदुक्तानि तत्राद्यं वाग्भवं स्मृतम्।
द्वितीयं कामराजाख्यं मोहनञ्च तृतीयकम्॥
आद्यं द्विज वाग्भवञ्च चतुर्थं परिकीर्त्तितम्।
नेत्रबीजं द्वितीयन्तु द्वितीयं वाग्भवं तथा॥
आद्यं तत पञ्चमं प्रोक्तं चतुर्भिरपि चाक्षरैः।
नेत्रबीजं द्वितीयञ्च प्रथमं परिकीर्त्तितम्॥
द्वितीयं कामराजन्तु तृतीयं वाग्भवं तथा।
एभिस्त्रिभिश्च पञ्चमं तत्र षष्ठं परिकीर्त्तितम्॥
नेत्रबीजद्वितीयेन वाग्भवान्तेन सप्तमम्।
तदेव वाग्भवाग्रन्तु अष्टमं परिकीर्त्तितम्॥
वाग्भवं कामराजञ्च नेत्राभ्यां नवमं स्मृतम्।
कामराजं तथैवाद्यं द्वितीयञ्चैव मोहनम्॥
एकादशमिदं प्रोक्तं तद्वदन्तु वाग्भवम्।
द्वादशं कीर्त्तितं मन्त्रं शिवतत्त्रैपुरं मतम्॥
सम्भवन्तु त्रैपुरं मन्त्रं स्वस्वबीजसमन्वितम्।
प्राणादिपञ्च पञ्चादिर्यद्वि वाग्भवं स्मितः॥
आद्यं त्रिपुरभैरव्या बीजमाद्यं प्रकीर्त्तितम्।
उपान्त्यञ्च सदादिञ्च प्रथमाद्यं तथापरम्॥
चतुर्थस्वरबिन्द्वयुक्तञ्चैव द्वितीयकम्।
उमान्त्यञ्च सदादिञ्च षष्ठं शेषस्वरस्पृशा॥
धमाग्निबिन्दुसहिता सहितास्तु तृतीयकम्।
एतत्तन्त्रं विजानाति यो नरो भुवि भूमिप॥
सिद्धविद्याधरेभ्यश्च योऽधिको मन्त्रयो महान्।
एतत्त्रयोदश प्रोक्ता मन्त्रा मन्त्रेषु चोत्तमाः॥
विंशतेस्तु चतुर्भ्यः परार्द्धेते प्रकीर्त्तिताः।
विंशतिस्तु चतुर्णामाद्यमेतत् प्रकीर्त्तितम्॥"
तस्या ध्यानं यथा,—
"चतुर्भुजां रक्तवर्णां रक्तवस्त्रविभूषिताम्।
दक्षिणोर्द्ध्वे सव्यधारां विभ्रतीं पुस्तकोत्तमम्॥
अभयं वामहस्ताभ्यां वरञ्च दधतीं तथा।
सद्यश्छिन्नशिरश्छिन्नां त्रिनेत्रां मदगामिनीम्॥
पीनोत्तुङ्गस्तनयुगां विलसत्तास्यसुस्थिताम्।
स्मितप्रभिन्नवदनां सव्यालङ्कारसंयुताम्॥
तिष्ठन्तीं मुण्डमालाभिः शिरोवक्षःकटीषु च।
त्रिगुण त्रिगुणीभूते प्रत्येकं परिभूषिताम्॥
मदिराघूर्णनयनां रक्तदन्तच्छदद्वयाम्।
चिन्तयेद्वरदां देवीमेवं त्रिपुरभैरवीम्॥"
इति कालिकापुराणे ७० अध्यायः॥

त्रिपुरमल्लिका, स्त्री, (त्रीणि पुराणि इलावृतानि यस्याः। सा चासौ मल्लिका चेति।) पुष्पवृक्षविशेषः। त्रिपुरमालिका इति ख्याता। तत्पर्य्यायः। शेफाली २। इति त्रिकाण्डशेषः॥

त्रिपुरा, स्त्री (त्रीन् धर्म्मार्थकामान् पुरति पुरतो ददातीति। पुर अग्रगमने अथ अपदाने+"इगुपधेति।" ३। १। १३५। इति कः। ततष्टाप्।) देवीविशेषः। तन्मन्त्रध्यानादिकं यथा,—
"अद्भुत त्रिपुरामूर्त्तेः कामाख्यायास्तु पूजनम्।
एतस्या मूलमन्त्रन्तु पूर्व्वमुक्तं परं तथा॥
युवयोरिष्टयोः सम्यक् क्रमात्तु प्रतिपादितम्।
वाग्भवं कामराजन्तु कामदञ्चेति तत्त्रयम्॥
सर्व्वधर्म्मार्थकामादिसाधनं कृष्णचीप्सितम्।
त्रीन् यस्मात् पुरतो दद्यात् दुर्गा ध्याता महेश्वरी॥
त्रिपुरेति ततः ख्याता कामाख्या कामरूपिणी।
तस्यास्तु चापरं यादृक् कामाख्याया प्रकीर्त्तितम्॥
तेनैव आवनं कुर्य्यात् मूलमन्त्रेण साधकः।
त्रिकोणं मण्डलं चास्यास्त्रिपुरन्तु त्रिरेखकम्॥
मन्त्रन्तु चाक्षरं ज्ञेयं तथा रूपत्रयं पुनः।
त्रिविधा कुण्डलीशक्तिस्त्रिदेवानाञ्च सृष्टये॥
सर्व्वं त्रयं त्रयं यस्मात् तस्मात्तु त्रिपुरा मता॥७॥
रक्तं प्रथमं कृत्वा आद्यां मूर्त्तिं विचिन्तयेत्।
त्रिपादवर्ण्णं च हृदये तां मूर्त्तिं प्रथमं भैरव॥
सिन्दूरपुञ्जसदृशीं त्रिनेत्राञ्च चतुर्भुजाम्।
वामोर्द्ध्वे पुस्तकोरुकं हस्ताधः पुस्तकं तथा॥
दक्षिणोर्द्ध्वे पञ्चवाणाक्षमालां दधानां।
चतुर्णा कुब्जमालायां धृतोऽस्य कूर्म्मपाशानम्॥
त्रिधाय खड्गं हृदि तु समवायन संस्थिताम्॥
जटाजूटार्द्धचन्द्रेस्तु समानार्द्धशिरोरुहाम्।
सव्यां त्रिवलिभङ्गेन चारुमध्यां मनोहराम्।
सर्व्वालङ्कारसम्पूर्णां सर्व्वाङ्गसुन्दरीं शुभाम्॥
यद्भूमिपदम्भोजा सर्व्वलक्षणसंयुताम्।
एवन्तु प्रथमां ध्यात्वा त्रिपाटनं च चिन्तयेत्॥

[illegible]

[illegible]

[illegible]

मधुवातादिमन्त्रत्रयवेत्ता । यथा,—
“त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णं षडङ्गवित् ।”
इति पङ्क्तिपावनवर्णने मार्कण्डेयपुराणम् ।
३१ । २६ । तद्व्रतञ्च । तद्व्रताचरणेन यत्तद्-
भागी सोऽपि । इति मिताक्षरा । ● । आह्रि-
कतत्त्वमधुमन्त्रोच्चारणविधिर्यथा,—
“गायत्रीं त्रिः पठित्वा तु त्रिःपाठादि-
पुष्पिकाम् ।
मधुवाता इति तृचं जपित्वैतत् त्रिकं जपेत् ।”
इति आह्निकतत्त्वे मिताक्षराधृतयाज्ञवल्क्यवचनम् ।)
त्रिमार्गी, स्त्री, त्रयाणां मार्गाणां समाहारः ।
त्रिपथम् । इति व्याकरणम् ।
त्रिमुकुट, पुं, (त्रीणि मुकुटानीव शृङ्गाण्यस्य ।)
त्रिकूटपर्वतः । इति हेमचन्द्रः । ४ । ९६ ।
त्रिमुखः, पुं, (त्रीणि मुखानि यस्य ।) बुद्ध-
विशेषः । इति हेमचन्द्रः । २ । ४१ ।
त्रिमुखा, स्त्री, (त्रीणि मुखानि यस्याः ।) बुद्ध-
देवताभेदः । सा मायादेवी । तत्पर्य्यायः ।
मारीची २ वज्रकालिका ३ विकटा ४ वज्र-
वाराही ५ गौरी ६ मारिचया ७ । इति
त्रिकाण्डशेषः ।
त्रिमूर्त्ति, पुं, (तिस्रो मूर्त्तयो यस्य ।) बुद्धः ।
इति त्रिकाण्डशेषः । त्रि, ब्रह्मविष्णुशिवात्म-
मूर्त्तित्रयवान् । यथा —
“त्रिमूर्त्तये सकलक्षितिविनयकर्म्मणेऽपि तनुते ।”
इति शङ्कराचार्य्यः ।
(यथाच कुमारे । २ । ४ ।
“नमस्त्रिमूर्त्तये तुभ्यं प्राक् सृष्टेः केवलात्मने ।”)
त्रियष्टि, पुं, (त्रिषु वातपित्तकफात्मकेषु रोगेषु
यष्टिरिव तन्नाशकत्वात् ।) श्वेतपर्पटी । इति
रत्नमाला ।
त्रियामकं, क्ली, (त्रीन् धर्म्मार्थकामरूपान्
त्रिवर्गानपि यमयति नाशयतीति । यम+
णिच्+ण्वुल् ।) पापम् । इति शब्दमाला ।
त्रियामा, स्त्री, (त्रयो यामाः प्रहरा यस्याः ।
“त्रियामां रजनीं प्राहुस्त्यक्त्वाद्यन्तचतुष्टयम् ।”
इति वचनात् आद्यन्तयोरर्द्धयामयोर्दिवाकाल-
सदृशदिनप्रायत्वात् तथात्वम् ।) रात्रिः । (यथा,
हरिवंशे । १ २ । २९ ।
“स गतो यत्रिणां श्रेष्ठो दशार्द्धपूर्व्वदानवः ।
धैर्य्यरीत्य त्रियामास्तु यथा देवाश्च प्रभो ।”
त्रिप्रहरान्विते, त्रि । यथा, गो रामायणे ।
२ । १ । १७ ।
“त्रियामापि क्षपा तस्य सा रात्रिरभवत्तदा ।
तथा विलपतस्तस्य रात्रौ शतयामोपमा ।”)
हरिद्रा । इत्यमरः । २ । ९ । ४१ । यमुना ।
नीली । शब्दचन्द्रिका । इत्युणादिकोषः ।
त्रियुग, पुं (त्रीणि युगानि सत्यत्रेताद्वापर-
रूपाणि आविर्भावकालोऽस्य ।) विष्णुः । यथा,
भागवते । ७ । ९ । ३८ ।
“इत्थं नृतिर्य्यगृषिदेवझषावतारै-
र्लोकान् विभावयसि हंसि जगत्प्रतीपान् ।
धर्म्मं महापुरुष । पासि युगानुवृत्तं
छन्नः कलौ यदभवस्त्रियुगोऽथ स त्वम् ।”
“एकक्षणेन दशादिभिरष्टभिः श्लोकैर्भुक्त सन्न-
मानि रचयत् तद्वैयत्यदनु कलौ अपि न
स्थात् इति चतुर्थं हरति इत्यन्तिम विभावयसि
पालयसि हंसि घातयसि । कलौ तु तत्र करोषि
यतस्तदा त्वं छन्नोऽभवः सर्वज्ञैर्व्विना दुर्ज्ञानावि-
र्भावात् स त्वमतस्त्वं त्रियुग इति प्रसिद्धः ।”
इति तट्टीकायां श्रीधरस्वामी । (तथा च तत्रैव ।
३ । २४ । २६ ।
“स चावतीर्णं त्रियुगमाज्ञाय विबुधर्षभम् ।
विविक्त उपसङ्गम्य प्रणम्य समभाषत ।”)
वसन्तप्रावृट्शरद्रूपकालत्रये, क्ली । यथा, माघ
वसन्तसखितिथ्याम् । १२ । ७९ ।
“या ओषधीः पूर्व्वा जाता देवेभ्यस्त्रियुगं पुरा ।”
“कुमारस्य वाजसनेयी । त्रयाणां युगानां समा-
हारस्त्रियुगं त्रिकाल वसन्ते प्रावृषि शरदि
च ।” इति तद्भाष्ये महीधरः । सत्यत्रेताद्वापर-
रूपयुगत्रयम् । इति मनुटीका । १ । ८७ । १ ।
भाष्ये सायनः । षडैश्वर्य्यप्राप्तिनि त्रि । यथा,
महाभारते । १ । ५६ । ५ ।
“त्रियुगौ पुण्डरीकाक्षौ वासुदेवधनञ्जयौ ।”
“त्रियुगौ धर्म्मस्य भार्य्यायां मूर्त्तिसञ्ज्ञायां नर-
नारायणावीशौ कृतयुगे नरनारायणौ तावेव द्वापरान्ते
केशवार्ज्जुनौ इति पुराणपुरुषावेतौ वासुदेवा-
धनञ्जयाविति भावः । यद्वा, त्रीणि युगानि
युग्मानि षडैश्वर्य्याणि भगवन्तानि या यत्र-
त्वानि वा ययोस्तौ त्रियुगौ ।” इति तट्टी-
कायां नीलकण्ठः ।)
त्रियूह, पुं, कपिलाश्वः । इति हेमचन्द्रः । (यथा
अथर्व्ववेदे । ३ । १ २ ।
“नीलो नीलक त्रयाणस्त्रियूहः कपिलः
स्मृतः ।”)
त्रिरात्र क्ली रात्रित्रयम् । तिसृणां रात्रीणां
समाहारः । इति सिद्धान्तकौमुदीटीकायां
भरतः । (यथा, मनुः । ४ । ११९ ।
“उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षपणं
स्मृतम् ।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ।”)
त्रिरेखः, पुं (तिस्रो रेखा यत्र ।) शङ्खः । इति
हेमचन्द्रः । ४ । २७२ ।
त्रिलवण, क्ली, (त्रयाणां लवणानां समाहारः ।
पात्रादित्वात् न ङीप् ।) सैन्धवं विडं रुचकं
मिलितैतल्लवणत्रयम् । इति राजनिर्घण्टः ।
(“त्रिकटुत्रिफलाचैव त्रिक सामुद्रमौद्भिदम् ।
एकद्वित्रिचतुष्पञ्चलवणानि क्रमादिह ।”
इति वैद्यकपरिभाषा ।)
त्रिलोकी स्त्री, त्रयाणां लोकानां समाहारः ।
(“द्विगोः ।” ४ । १ । २१ । इति ङीप् ।)
लोकत्रयम् । यथा, भूर्लोकः भुवर्लोकः स्वर्लो-
कश्च । इति सिद्धान्तकौमुदीटीकायां भरतः ।
(यथा, भागवते । १ । ६ । ७ ।
“स वनदमने इव त्रिलोकी-
मन्दरो वासुदेवकथानी ।”)
त्रिलोकेश, पुं (त्रयाणां लोकानामीशः ।) सूर्य्यः ।
इति शब्दचन्द्रिका । (विष्णुः । यथा, महा-
भारते । १३ । १४९ । ८२ ।
“त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा
हरिः ।”
“त्रयो लोका आत्मा अस्य सोऽयं त्रिलोकात्
त्रिलोक इति त्रिलोकेशः ।” इति शाङ्करभाष्यम् ।
महादेवः । यथा, महाभारते । १३ । ८२७ ।
“त्रिपुरघ्न त्रिनयन त्रिलोकेश महौजसम् ।”
त्रिलोकाधिपतौ, त्रि । यथा तत्रैव । ३ । ८४ ।
१२७ ।
“अभिगम्य त्रिलोकेशं वरदं विष्णुमव्ययम् ।
अश्वमेधमवाप्नोति विष्णुलोकञ्च गच्छति ।”)
त्रिलोचन, पुं (त्रीणि चन्द्रसूर्य्याग्निरूपाणि
लोचनानि यस्य ।) शिवः । इत्यमरः ।१।१।३४।
(यथा, कुमारे । ५ । ७२ ।
“वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बालमृगाक्षि ! मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ।”
लोचनत्रयविशिष्टे, त्रि । यथा, माघे । १ । ७० ।
“स बाल आसीद्वपुषा चतुर्भुजो
मुखेन पूर्णेन्दुनिभस्त्रिलोचनः ।”)
त्रिलोचना स्त्री, (त्रीणि लोचनानि यस्याः ।)
बुद्धदेवीभेदः । इति त्रिकाण्डशेषः । दुर्गा च ।
(सा च मार्कण्डेयपुराणोक्ता । यथा, देवीमाहा-
त्म्ये । १२ । ६ । ६७ ।
“त्रिशूलवराभयधरा त्रिनेत्रा च त्रिलोचना ।”)
त्रिलोचनाष्टमी, स्त्री, (त्रिलोचनाय शिवाय
पूजार्थे या अष्टमी ।) ज्यैष्ठशुक्लाष्टमी-
रूपा । यथा,—
“ज्येष्ठे मासि इदमेव । कृत्वाष्टम्यां त्रिलोचनम् ।
यः पूजयति देवेशमीशलोके स गच्छति ।”
इति धनञ्जयकौमुदीधृतभविष्यपुराणवचनम् ।
अपि च ।
“ज्येष्ठे मासि सिते पक्षे अष्टम्यां महेश्वरि ।।
त्रिपार्श्वे च तद्दोषे वसते याव सद्गुरुः ।”
इत्युत्तरकामाख्यातन्त्रे ११ पटलः ।
त्रिलोचनी स्त्री (त्रीणि लोचनानि यस्याः ।)
दुर्गा । इति पुराणम् ।
त्रिलोहक, क्ली, (त्रयाणां लोहानां समाहारः ।)
सुवर्णं रजतं ताम्रं एतल्लोहत्रयम् । इति राज-
निर्घण्टः ।
त्रिलौही, स्त्री, (त्रीणि लोहानि स्वर्णरजता-
म्राणि । अण् । गौरादित्वात् ङीष् ।)
मुद्राविशेषः । यथा, अथ मन्त्रिणी त्रिलौह
त्रिलौही तथा त्रिमन्त्री ।
“सोमसूर्य्याग्निरूपा त्रिलौही लोहत्रय तथा ।
रौप्यमिन्दुः रवौ हेम हुताशनस्ताम्रसङ्ख्याकम् ।
लोहमाया वसुहिरा रसादशसर्वसम्पत् ।

[illegible]

त्रैपुर, पुं, (त्रिपुर एव। स्वार्थे अण्।) त्रिपुरदेशः। तत्पर्य्यायः। डाहलः २ चैद्यः ३ चेदिः ४। इति हेमचन्द्रः। ४। २२। (देशोऽयं कामरूपस्य सीमाप्रदेशः। यथा, कामाख्यातन्त्रे।
"कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतम्।
कामरूपाभिधो देशो गणेशगिरिमूर्द्धनि॥"
कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतं यावत्॥
त्रिपुरस्य राजा। यथा, महाभारते। २। ३१। ६५।
"माद्रीसुतस्ततः प्रायाद्विजयी दक्षिणां दिशम्।
त्रैपुरं स्ववशे कृत्वा राजानममितौजसम्॥
निजग्राह महाबाहुस्तरसा पौरवेश्वरम्॥"
तद्देशवासिनि, पुंभूम्नि। यथा मात्स्ये। ११२। ५३।
"तोशलाः कोशलाश्चैव त्रैपुरा वैदिशास्तथा॥"
त्रिपुराधिष्ठितासुरभेदे। यथा, हरिवंशे। १२९। ५४।
"येनोद्धतास्त्रैपुरा मायिनो वै
दग्धा घोरेण विततास्त्रा शरेण॥")

त्रैलोकी, स्त्री, (त्रिलोकी एव। चतुर्वर्णादित्वात् स्वार्थे ष्यञ्।) त्रिलोकी। यथा, मार्कण्डेये।
"त्रैलोक्यमेतदखिलं रिपुनाशनेन
त्रातं त्वया समरमूर्द्धनि तेऽपि हत्वा॥"

त्रैलोक्यविजया, स्त्री, (त्रैलोक्यस्य विजयो यस्याः। यतस्याः सेवनेन हि त्रैलोक्यमधीनमिव प्रतिभातीति ख्यातात् तथात्वम्।) भङ्गा। इति शब्दचन्द्रिका॥ भाङ् इति ख्याता॥

त्रैविद्य, पुं, (ऋग्वेदयजुर्व्वेदसामवेदरूपास्तिस्रो विद्या यस्येति त्रिविद्यस्तस्य स्वार्थे ष्यञ्। यद्वा तिस्रो विद्या अधीते वेद वा। "तदधीते तद्वेद।" ४।२।५९। इति अण्।) त्रिवेदज्ञः। त्रिविद्यावेत्ता। यथा। मनुः। १२। १११।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः।
त्रयश्चाश्रमिणः पूर्व्वे परिषत् स्याद्दशावरा॥"
(व्रतविशेषे, क्ली। यथा, मनुः। २। २८।
"स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः।
महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः॥"
"त्रैविद्याख्येन च व्रतेन।" इति तट्टीकायां कुल्लूकभट्टः। वेदत्रयप्रतिपाद्ये, त्रि। यथा, भागवते। ६। २। २४।
"धर्म्म भागवतं शुद्धं त्रैवेद्यञ्च गुणाश्रयम्॥"
"त्रैवेद्यं वेदत्रयप्रतिपाद्यं गुणाश्रयं यज्ञदानादि धर्म्मम्।" इति तट्टीकायां स्वामी॥)

त्रोटकी, स्त्री, रागिणीविशेषः। इति हलायुधः॥

त्रोटि, स्त्री, (त्रोटयति भिनत्ति अनयेति। त्रुटि + "अच इः।" उणा। ४। १३८। इति इः।) चञ्चुः। कट्फलम्। पक्षी। मत्स्यभेदः। इति मेदिनी। टे, १८॥

त्रोटिहस्त, पुं, (त्रोटिश्चञ्चुरेव हस्त इव भक्षणसाधनं यस्य।) पक्षी। इति शब्दचन्द्रिका॥

त्रोटी, स्त्री, (त्रोटि + कृदिकारादिति वा ङीष्।) चञ्चुः। इति शब्दरत्नावली॥

त्रोत्र, क्ली, (त्रायते शिष्यते नियम्यतेऽनेनेति। त्रै पालने + "अशित्रादिभ्य इत्रोत्रौ।" उणा। ४। १७२। इति उत्रः।) गवादिताडनदण्डः। पाँचनी इति ख्यातः। तत्पर्य्यायः। प्राजनम् २ तोदनम् ३ प्रवयणम् ४। गजस्य तोदनदण्डः। तत्पर्य्यायः। वेणुकम् २ वैणुकम् ३ इत्यमरभरतौ॥ अस्त्रम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥ शास्त्रप्रक्रिया। व्याधिभेदः। इति संक्षिप्तसारे उणादिवृत्तिः॥

त्रौक, ऋ ङ गत्याम्। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-सेट्।) पञ्चमस्वरी। रेफगर्भः। ऋ, अतुत्रौकत। ङ, त्रौकते। इति दुर्गादासः॥

त्र्यक्ष, पुं, (त्रीणि अक्षीणि नेत्राणि यस्य। ततः समासान्तप्रत्ययः।) शिवः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। १६। ११।
"आधसार महात्मानं त्र्यक्षं त्रिपुरमर्द्दनम्॥"
दैत्यविशेषः। यथा, भागवते। ७। २। ४।
"भो भो दानवदैतेया द्विमूर्द्धंस्त्र्यक्ष शम्बर॥
शतबाहो हयग्रीव नमुचे पाक इल्वल॥"
नेत्रत्रयविशिष्टे, त्रि। यथा, महाभारते। २। ४३। १।
"चेदिराजकुले जातस्त्र्यक्ष एष चतुर्भुजः॥")

त्र्यक्षर, पुं, (त्रीणि अक्षराणि यत्र।) घटकः। इति त्रिकाण्डशेषः॥ (त्रीणि अकारोकारमकारात्मकानि अक्षराणि यत्र। प्रणवादौ, त्रि। यथा, मनुः। ११। २६६।
'आद्यं यत्त्र्यक्षरं ब्रह्म त्रयी यस्मिन् प्रतिष्ठिता। स गुह्योऽन्यस्त्रिवृद्वेदो यस्तं वेद स वेदवित्॥'
छन्दोभेदे, स्त्री। यथा, वाजसनेयसंहितायाम्। ९। ३१।
"विष्णुस्त्र्यक्षरेण त्रीन् लोकानुदजयत्तानुज्जेषम्॥"
"विष्णुस्त्र्यक्षरेणाक्षरत्रयात्मकेन छन्दसा तान् तादृशान् मनुष्यानुज्जेषमधिकं जयेयम्।" इति वेददीपे महीधरः॥)

त्र्यङ्कट, स्त्री, (त्रिभिरङ्कैरङ्क्यते गम्यते इति। त्र्यङ्क + अट + अच्। शकन्ध्वादित्वात् लोपः।) शिक्यभेदः। धौताञ्जनी। इति मेदिनी। टे, ४४॥

त्र्यङ्कट, पुं, (त्रिभिरङ्कैरटतीति। अट + अच्।) धौताञ्जनी। शिक्यभेदः। ईश्वरः। इति हेमचन्द्रः॥

त्र्यञ्जन, क्ली, (त्रयाणां अञ्जनानां समाहारः।) अञ्जनत्रयम्। यथा कालाञ्जनं पुष्पाञ्जनं रसाञ्जनम्। इति राजनिर्घण्टः॥

त्र्यध्वगा, स्त्री, (त्रिषु अध्वसु मार्गेषु गच्छतीति। गम + डः।) गङ्गा। इति त्रिकाण्डशेषः॥

त्र्यम्बक, पुं, (त्रीणि अम्बकानि सोमसूर्य्याग्निरूपाणि नेत्राणि यस्य।) शिवः। इत्यमरः। १। १। ३५॥ (यथा ऋग्वेदे। ७। ५९। १२।
"त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम्॥"
"त्रयाणां ब्रह्मविष्णुरुद्राणामम्बकं पिता।" इति ऋग्वेदभाष्ये सायणः।) एकादशरुद्रान्तर्गतरुद्रः। यथा, मात्स्ये। ५। २९—३०।
"अजैकपादहिर्ब्रध्न्यो विरूपाक्षोऽथ रैवतः।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः।
एते रुद्राः समाख्याता एकादश गणेश्वराः॥")
शिवांशसम्भूतत्र्यम्बकनामकपौण्ड्रराजपुत्रः। यथा,
"अथ तिष्यासमायोगे गर्भे जातो यदा हरः।
अतस्त्र्यम्बकनामाभूत् प्रथितो लोकदेवयोः॥
स राजपुत्रः कौमारावस्थां प्राप यदा तदा।
सर्व्वशास्त्रार्थतत्त्वज्ञो निष्णातश्च बभूव ह॥
सवे शौर्य्ये प्रहरणे शास्त्रे शौर्य्ये च तासमः।
नान्योऽभूदपराद्धे ल। नो वा भूमौ भविष्यति॥
अभिषिच्याथ स राजा कुमारं धर्म्मतत्परम्।
दशपञ्चैकवर्षीयं यौवराज्यगुणैर्युतम्॥
तिसृभिः सह भार्य्याभिर्व्वनं प्राप्य विवेश ह।
इहलौकिकक्रियां कर्त्तुं राजा परमधार्म्मिकः॥
गते पितरि राज्यं स यशस्वी महाबलः।
सर्व्वां क्षितिं वशे चक्रेऽमात्यैः स चम्पकेश्वरः॥
सार्व्वभौमो नृपो भूत्वा राजभिः परिसेवितः।
अमरैरिव देवेन्द्रो विजहार श्रिया युतः॥
स च पौत्रसुतो भूत्वा त्र्यम्बकः प्राप्य निर्वृतिम्।
ब्रह्मावर्त्ताह्वये रम्ये करवीराह्वये पुरे॥
दृषद्वतीनदीतीरे राजा भूत्वा सुमोद ह॥"
इति कालिकापुराणे ८६ अध्यायः॥
अन्यत् चन्द्रशेखरशब्दे द्रष्टव्यम्॥

त्र्यम्बकसखः, पुं, (त्र्यम्बकस्य महादेवस्य सखा बन्धुः। "राजाहःसखिभ्यष्टच्।" ५। ४। ९१। इति टच्।) कुबेरः। इत्यमरः। १। १। ७१॥

त्र्यम्बका, स्त्री, (त्रीणि सोमसूर्य्याग्निरूपाणि अम्बकानि नेत्राणि यस्याः।) दुर्गा। यथा,—
"सोमसूर्य्यानलाख्यानि यस्या नेत्राणि अम्बिका।
तेन सा त्र्यम्बका देवी मुनिभिः परिकीर्त्तिता॥")
इति देवीपुराणे ४५ अध्यायः॥

त्र्यहस्पर्श, पुं, (त्र्यहं वासरत्रयं स्पृशतीति। स्पृश + पचाद्यच्।) त्रिदिनस्पृक्। तिथित्रयस्पर्शयुक्तमहः। इति ज्योतिषम्॥

त्र्यहस्पृश्, स्त्री, (त्र्यहं स्पृशतीति। स्पृश + "स्पृशोऽनुदके क्विन्।" ३। २। ५८। इति क्विन्।) त्र्यहस्पर्शः। तथा च वशिष्ठः।
"एकस्मिन् सावने त्वह्नि तिथीनां त्रितयं यदा।
तदा दिनक्षयः प्रोक्तस्तत्र साहस्रिकं फलम्॥
फलमिति वैदिककर्म्मपरम्॥
अधिमासे दिनपाते प्रसुप्ते हरौ भानुलङ्घिते
मासि।
यज्ञादि शुभं कुर्य्यान्नो माङ्गल्यं विवाहश्च॥
इति भीमपराक्रमः॥
दिनपाते दिनक्षये।
"त्र्यहस्पृशं नाम यदेतदुक्तं
तत्र प्रयत्नं कृतिभिर्व्विधेयम्।
विवाहयात्राशुभपुष्टिकर्म्म
धर्म्मं न कार्य्यं त्रिदिनस्पृशि तु॥"
इति ज्योतिस्तत्त्वम्॥

[illegible]

[illegible]

[illegible]

त्वक्पत्रं, क्ली, (त्वगिव पत्राण्यस्य ।) गुडत्वक् । इत्यमरः ।२।४।१३३॥ तेजपत्रम् । इति केचित् । इति भरतः ॥ तत्पर्य्यायः । उत्कटम् २ भृङ्गम् ३ त्वचम् ४ चोचम् ५ वराङ्गकम् ६ । इत्यमरः ।२।४।१३४॥ (यथा महाभारते ।१२।१७०।१८
"चन्दनागुरुमुख्यानि त्वक्पत्राणां पत्राणि च ॥"
यथा, सुश्रुते ।१।४४।
"रेचनं सुकुमाराणां त्वक्पत्रसहितोत्तमम् ॥")

त्वक्पत्री स्त्री, (त्वक्पत्र+गौरादित्वात् ङीष् ।) हिङ्गुपत्री । तत्पर्य्यायः । कारवी २ पृथ्वी ३ वाष्पीका ४ कबरी ५ पृथुः ६ । इत्यमरः ।२।९।४०॥ तनुपत्री ७ । इति भरतः ॥

त्वक्पुष्पं क्ली, (त्वचश्चर्म्मणः पुष्पमिव ।) रोमाञ्चः । इति त्रिकाण्डशेषः । किलासम् । इति हेमचन्द्रः ।३।१३१॥

त्वक्पुष्पिका स्त्री, (त्वक्पुष्पी+स्वार्थे कन् पूर्व्वह्रस्वः ।) किलासम् । इति त्रिकाण्डशेषः ॥ छुली इति भाषा ॥

त्वक्पुष्पी, स्त्री (त्वक्पुष्प+गौरादित्वात् ङीष् ।) किलासम् । इति जटाधरः ॥

त्वक्ष तनूकरणे । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् ।) त्वचो दारुचर्म्मणो वा तक्षणम् । त्वक्ष त्वचने इति माधवः । त्वचनं संवरणमिति रमानाथः । त्वक्षति काष्ठं चर्म्म वा भटः । इति दुर्गादासः ॥

त्वक्ष, छ कार्श्ये । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सकं-सेट् ।) छ, त्वक्षिष्यति त्वक्ष्यति । कार्श्यं कृशीकरणम् । त्वक्षति काष्ठं तक्षा । इति दुर्गादासः ॥

त्वक्सारः, पुं, (त्वचि सारो यस्य ।) वंशः । इत्यमरः ।२।४।१६०॥ (यथा, मनुः ।१०।३७।
"चण्डालात् पाण्डुसोपाकस्त्वक्सारव्यवहारवान् ॥"
वंशस्य मर्म्मणि । धेँधारि इति भाषा ॥ यथा सुश्रुते ।१।८।
"अशुष्काणि तु त्वक्सारस्फटिककाचकुरुविन्दजलौकानखपत्रगोजीशेफालिकाशाकपत्रकरीरवालाङ्कुलय इति ॥") गुडत्वक् । इति शब्दचन्द्रिका ॥ श्वेतकच्चः । रक्तवंशः । इति राजनिर्घण्टः ॥ (तवासीर इति भाषा ॥ यथा, माघः ।४।६१।
"त्वक्साररन्ध्रपरिपूरितलब्धगीति-
रस्मिन्नसौ मृदितपक्ष्मलरल्लकाङ्गः ॥")

त्वक्सारभेदिनी, स्त्री, (त्वचः सारं भिनत्तीति । भिद्+णिनि+ङीप् ।) क्षुद्रचञ्चुः । इति राजनिर्घण्टः ॥

त्वक्सारा, स्त्री (त्वक्सारो यत्र उत्पत्तिकारणत्वेनास्त्यस्याः अच् ततष्टाप् ।) वंशरोचना । इति राजनिर्घण्टः ॥ (वंशरोचनाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

त्वक्सुगन्धः पुं, (त्वचि सुगन्धः सद्गन्धो यस्य ।) नारङ्गः । इति भावप्रकाशः ॥

त्वक्सुगन्धा स्त्री, (त्वचि सुगन्धो यस्याः ।) एलबालुकनामगन्धद्रव्यम् । इति जटाधरः ॥

त्वग, इ कम्पे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-अक-गतौ सकं-सेट् ।)

त्वगङ्कुरः, पुं, (त्वचश्चर्म्मण अङ्कुर इव ।) रोमाञ्चः । इति त्रिकाण्डशेषः ॥

त्वगक्षीरी, स्त्री, (त्वक्क्षीरी । पृषोदरादित्वात् साधुः ।) तुगाक्षीरी । वंशलोचना । इति जटाधरः ॥

त्वग्गन्धः, पुं (त्वचि गन्धो यस्य ।) नागरङ्गः । इति राजनिर्घण्टः ॥

त्वग्जं, क्ली, (त्वचः जायते इति । जन+डः ।) रोम । रुधिरम् । इति राजनिर्घण्टः ॥

त्वग्दोषः पुं, (त्वचो दोषो दूषणं यस्मात् ।) कोठरोगः । इति राजनिर्घण्टः ॥ त्वग्जातरोगः । तदौषधं यथा,—
"मन्दोष्णतोयगौरोऽत्कपूयक्षु कनकस्य च ।
शिरीषाङ्गतसैन्धवस्य दारुद्वयौषधसारिकाम् ॥
मृद्दोषघ्नैव योऽयं च चर्म्मदोषश्च नश्यति ॥"
इति गारुडे १९४ अध्यायः ॥
स तु महारोगः । यथा, "महारोगाश्च पापरोगाश्चकाम्यतमरोगवत् । ते च उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दर उदरोऽश्मरी इत्यष्टौ पापरोगा महारोगाः ।" इति शुद्धितत्त्वम् ॥

त्वग्दोषापहा, स्त्री, (त्वग्दोषं रोगविशेषं अपहन्तीति । हन+ड ।) वाकुची । इति राजनिर्घण्टः ॥

त्वग्दोषारिः पुं, (त्वग्दोषस्य रोगविशेषस्य अरिः शत्रुः । तन्नाशकत्वात् तथात्वम् ।) हस्तिकन्दः । इति राजनिर्घण्टः ॥

त्वच, श संवृतौ । इति कविकल्पद्रुमः ॥ (तुदा-पर-सकं-सेट् ।) चकारान्तः । दन्त्यवर्गाद्यादिः । श, त्वचती त्वचन्ती । इति नवरत्नम् । त्वचति वसनेन देहं वीरः । इति दुर्गादासः ॥

त्वचं, क्ली, (प्रमया त्वचत्यङ्गमिति । अर्शआदित्वात् अच् ।) गन्धविशेषः । दारचिनी इति भाषा ॥ (यथा, सुश्रुते कल्पस्थाने १ अध्याये ।
"सोमराज्यन्विता श्वेता मधु काचोपकं मधुम् ॥")
तत्पर्य्यायः । त्वक् २ वल्कलम् ३ भृङ्गम् ४ वराङ्गम् ५ सुखशोचनम् ६ मुखकम् ७ शिरजम् ८ रम्यम् ९ सुरसम् १० रामवल्कम् ११ उत्कटम् १२ लब्धगन्धम् १३ पिच्छिलम् १४ बहुप्रियम् १५ कटपत्रम् १६ शकलवल्कम् १७ वरम् १८ शौचम् १९ । अस्य गुणाः । कटुत्वम् । शीतलत्वम् । कफकासविनाशित्वम् । शुक्रामशमनत्वम् । कण्ठशुद्धिकारित्वम् । लघुत्वम् । इति राजनिर्घण्टः ॥ वल्कलम् । चर्म्म । (यथा, हरिवंशे ।१०७।१११।
"वीरवृक्षाड्डोरविन्दाश्च अङ्केरोमाश्चकुञ्चकः ॥"
कञ्चुकः । खोलस् इति भाषा ॥ यथा, महाभारते ।१२।१३९।११।
"विमुक्तः सर्व्वपापेभ्यो मुक्तत्वच इवोरगः ॥")
गुडत्वक् । इति धरणिः ॥

त्वचा, स्त्री (त्वच+भावे टाप् । यद्वा, त्वचति संवृणोति सर्व्वशरीरमिति अच् ततष्टाप् ।) त्वक् । इति शब्दरत्नावली ॥

त्वचापत्रं, क्ली, (त्वचा त्वक् पत्रमिव यस्य ।) त्वक्पत्रम् । इति शब्दरत्नावली ॥

त्वचिष्ठः, त्रि, (अतिशयेन त्वग्वान् । त्वग्वत्+इष्ठन् । "विन्मतोर्लुक् ।" ५।३।६५। इति मतुपो लुक् ।) त्वचीयान् । अतिशयत्वग्विशिष्टः । इति व्याकरणम् ॥

त्वचिसारः, पुं (त्वचि सारो यस्य । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६।३।९। इति सप्तम्या अलुक् ।) वंशः । इत्यमरः ।२।४।१६१॥

त्वचिसुगन्धा, स्त्री (त्वचि सुगन्धो यस्याः । सप्तम्या अलुक् ।) सूक्ष्मैला । इति हारावली ।९०॥

त्वत् त्रि, (तनोतीति । तन+"तनोतेरन्श्च वः ।" उणा० २।६३। इति चकारात् क्विप् तुक् अनश्च वः ।) भिन्नः । इति जटाधरः ॥ (युष्मद्शब्दस्य पञ्चम्येकवचनस्य रूपम् ।) भवतः । इति व्याकरणम् ॥ तोमा हइते इति भाषा ॥

त्वञ्च, उ गतौ । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् । क्त्वावेट् ।) चकारद्वकारादि । उ, त्वचित्वा त्वक्त्वा । इतिगीतिः । इति दुर्गादासः ॥

त्वञ्च, उ ष मर्द्दने । इति कविकल्पद्रुमः ॥ (भ्वा-पर-सक-सेट् । क्त्वावेट् ।)

त्वदीय, त्रि, (तव इदम् । युष्मद्+छः । "प्रत्ययोत्तरपदयोश्च ।" ७।२।९८। इति मपर्य्यन्तस्य त्वादेशः ।) भवदीयम् । इति व्याकरणम् ॥ (यथा, रघुः ।३।५०।
"अतोऽयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः ॥")

त्वर, ञि ष म ङ सम्भ्रमे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-अक-सेट् ।) ञि त्वरितः तूर्णोऽस्ति । वा त्वरामहे त्वरमाणस्त्वराविभ्यो निष्ठायां वेमत्वेऽपि वेदेभूतादेभेदाद्यसेतद्गुणश्चमध्ये मध्यमे । ष, त्वरा । म त्वरयति । ङ, त्वरते । अत्र इह ओष्ठ्यमध्यमकारम् । भागनैतुमवता च तत्परे । इति दुर्गादासः ॥

त्वरणं क्ली, (त्वर+भावे ल्युट् ।) त्वरा । इति व्याकरणम् ॥ (त्वरते शीघ्रं गच्छतीति । त्वर+ल्यु । द्रुतगामिनि, त्रि । यथा अथर्ववेदे ।११।८।२८।
"आर्षेयीश्च ब्राह्मेयीश्च त्वरणाः कृष्णाश्च याः ॥")

त्वरा, स्त्री, (त्वरणमिति । त्वर+"षिद्भिदादिभ्योऽङ् ।" इति अङ् । ततः स्त्रीत्वात् टाप् ।) वेगः । तत्पर्य्यायः । सम्भ्रमः २ । इत्यमरः ।१।१।२६॥ आवेगः ३ त्वरिः ४ तूर्णिः ५ वेगः ६ । इति हेमचन्द्रः ।२।२२६॥ (यथा, महाभारते ।१।१७८।२७।
"अहतस्त्वं मया पूर्व्वं निर्जितो यौधिविश्व ।
सक्तो यातिरिति माभा वा त्वरा मरधि पुरः ॥")

त्र्यहैहिकः, त्रि, (त्र्यहाय पर्याप्तं धनमैहिकं यस्य । "तस्य भवः ।" ४ । ४ । ९९ । इति ठञ् । त्र्यहे दिवसत्रये पर्याप्त ऐहिकं धनं यस्य ।) दिवसत्रयनिर्वाहोचितधनयुक्तः । यथा,
"कुशूलधान्यको वा स्यात् कुम्भीधान्यक एव वा ।
त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा ॥"
इति मानवे । ४ । ७ ।
"कुशूलधान्यक इति । कुशूलो कोष्ठागारं धान्यादिसञ्चयस्थानं । तत्त्वादिनिर्मितधान्यागार- धान्यसञ्चयो भवेत् । अत्र कालविशेषापेक्षायाम् । यस्य त्रैवार्षिकं भक्तं पर्याप्तं भृत्यवृत्तये । अधिकं वापि विद्येत स सोमं पातुमर्हति ॥ इति मनूक्त एव कालो ग्राह्यः । तेन त्रिव- र्षनिर्वाहपर्याप्तधान्यसंग्रहवान् यविष्ठो यावता धान्यादिधनेन वर्षत्रयं समधिकं वा निर्वाहो भवति तावद्धनः कुशूलधान्यक उच्यते । अधिकवार्षिकधान्यादिधनः कुम्भी धान्यः । प्रायः मौलिकी क्रिया कुम्भात् मस्तात वार्षिकं भवेदिति याज्ञवल्क्येन यद- न्यस्य वार्षिकधनधान्यभृत्यतायाम् । मनुरपि यदा वानप्रस्थेन समाश्रिय एव वैश्येन समाधर्य रक्षति तदपेक्षया बहुधान्यधनस्य ग्रहिणः समुचित भवनमपेक्षा । मेधा- तिथिस्तु । यावता धान्यादिधनेन बहुभृत्य- दारादिमतस्त्रिवर्षं धनं संवत्सरं निर्वहति तावत् सञ्च- यान्वितस्यापि कुशूलधान्यक इत्यभिप्राय कुम्भी उष्ट्रिका षाण्मासिकधान्यादिसञ्चय कुम्भीधान्यक इति व्याख्यातवान् । गोविन्द- राजस्तु कुशूलधान्यक इत्येतद्व्याख्यान कोष्ठ- प्रमाणधान्यसञ्चयो वा स्यात् द्वादशाह- मात्रपर्याप्तधनः । कुम्भीधान्यक इत्येतद्व्याख्याने उष्ट्रिकाप्रमाणधान्यादिसञ्चयो वा षड्दिनमात्र- पर्याप्तधनः ।
द्वादशाह कुशूलेन कुम्भ्या द्विगुणेन च ।
त्र्यहमन्नं मासिकं धान्यं श्वस्तनं वा ।
त्र्यह दिवसत्रयपर्याप्तमैहिकं धान्यमात्मनैहिकं धनं यस्य स त्र्यहैहिकः तथा वा स्यात् दिव- सत्रयनिर्वाहोचितधन इत्यर्थः । श्वोभवं श्वस्तनं भक्तं तदस्यास्तीति अश्वस्तनिक एवं यथा मनु समाधः तथा वा भवेत् ।" इति कुल्लूकभट्टः ।
त्र्यार्षेयाः, पुं, (त्रयः आर्षेयाः । त्रि+ढक् । तत्र त्र्यार्षेयाः त्रयाणां वेदानामध्ययनरहिता- स्त्रयः पुत्राः ।) अन्धबधिरमूकाः । यथा,
"अन्धोऽपि ह्यत्र पदार्थं कर्माणि निष्पादयितुं न शक्नोति । तथा हि बधिरस्तथैव । तथा मूकोऽप्युच्चारणसमर्थो नास्ति इति त्रयाणां वेदानाम् । तत्र त्रैव तिस्रो विद्याः त्रयाणां वेदानामध्ययनरहितत्वात् अहो स्त्रयरूपेण नामत्रयपाठ त्र्यार्षेयत्वं समर्थितम् । (अस्य त्र्यार्षेया शब्दः । विशेषो ज्ञेयः ।)

त्र्याहिक, त्रि, (त्र्यहे भवः । त्र्यह+ठञ् ।) त्र्यहेऽहनि भवः । यथा, ऐकाहिकद्व्याहिक- त्र्याहिकचातुर्थिकप्रभृतिज्वरविषमज्वरः इत्यादि- ज्वरनिदानात्मकम् ।
("ऐकाहिको द्व्याहिकश्च त्र्याहिकश्च तथापरः ।
चैकान्तरश्चतुर्थोऽपि विषमो ज्वर उच्यते ॥"
इति हारीते चिकित्सितस्थाने द्वितीयेऽध्याये ।
अस्यौषधं यथा —
"दधि मन्थं द्रवत्र त्रिफलोषण पारदम् ।
गोपित्तया चमत्याच तत्तुल्येन भावयेत् ॥
मर्दयेत् एकयाम गुञ्जाचतुष्टयम् ।
चरयेत् ज्वरिणामात् त्र्याहिकज्वरनाशनाय ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥)
त्र्यूषण, क्ली, (त्रयाणां ऊषणानां समाहारः । पात्रादित्वात् क्लीबत्वं च ।) मिलितशुण्ठीपिप्पली- मरिचम् । इत्यमरः । २ । ९ । १११ । (यथा, शार्ङ्गधरे १९ अध्याये ।
"समांशे त्रिफलं ग्राह्यं त्र्यूषणं चोषणं तथा ॥")
त्र्यूषण, क्ली, (त्रयाणां ऊषणानां पिप्पलीमरिच- शुण्ठीनां समाहारः ।) त्र्यूषणम् । इत्यमर टीकायां भरतः ॥
("पिप्पलीमरिचं शुण्ठीत्रयमेतद्विमिश्रितम् ।
त्रिकटु त्र्यूषणं व्योषं कटुत्रयमथोच्यते ॥"
इति वैद्यकपरिभाषायाम् ॥
अस्य गुणा यथा,—
"त्र्यूषणं दीपनं हन्ति श्वासकासत्वगामयान् ।
गुल्ममेहकफस्थौल्यमेदःश्लीपदपीनसान् ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
(घृतविशेष । यथा, चरके चिकित्सास्थाने १८ अध्याये ।
"त्र्यूषणं त्रिफलां द्राक्षां काश्मर्याणि परूषकम् ।
द्वे पाठे देवदारुर्ज्यौ स्वगुप्तां चित्रकं शठीम् ॥
ब्राह्मीं तामलकीं मेदां काकनासां शतावरीम् ।
त्रिकण्टकं विदारीं च पिष्ट्वा कर्षसमं घृतात् ॥
प्रस्थं चतुर्गुणं क्षीरं सिद्धं कासहरं पिबेत् ।
ज्वरगुल्मारुचिप्लीहशिरोहृत्पार्श्वशूलनुत् ॥
कामलार्शोऽनिलाष्ठीलाक्षतशोषक्षयापहम् ।
त्र्यूषणं नाम विख्यातमेतद्घृतमनुत्तमम् ॥")
त्व, त्रि, (तनु+ड । "अन्येभ्योऽपि ।" ३ । २ । ७५ । इति ड्वादेशः ।) अन्यत् । तुभ्यं इति भाषा । त्वत्समस्य प्रथमैकवचनान्तत्वेऽपि विभक्तिं समाप्य । इति व्याकरणम् ॥
त्व, त्रि, (तनोति विस्तारयति ... "सर्वे- निघण्टु च ।" उणा । १ । ... इति ... किप् प्रत्ययः च । ...) ...
... । ... ।
... (...
... ...
"...
... ।

"...। ... । ...
... ।
... । ... ... ।
... ... ।
... ।" इति ... माधवे ॥)
त्वक्, [च्] स्त्री, (त्वचति संवृणोति मेदोऽस्थ्यादिकमिति । त्वच संवरणे+क्विप् । यद्वा तनोति विस्तारमेतीति । तन+"तनोतेरनश्च वः ।" उणा । २ । ६३ । इति चिक् प्रत्ययः अनश्च वः ।) इन्द्रियविशेषः । यथा,—
"पूर्वैरस्मिन्नताशुभ देहधातोः मतिर्वलम् ।
प्राणास्थिषु मांसरक्तप्रभवो त्रिदवो मतः ॥
तद्भूतकायसम्पूर्ण तोयदः कोऽपि च त्वक् ।
सप्तमास्याघ्राणसिद्धमतानि कारणम् ॥
तथाप्यत्र त्वचो धीमी मन्यते प्राणकारकम् ॥"
इति भाषापरिच्छेदः ॥
वल्कलम् । (यथा, रघुः । २ । १० ।
"अध्युषमामेध जटे कदाचित्
मर्दनं धैर्यं कुपितस्य मतस्य ॥")
गुडत्वक् । (यथा, वृहत्संहितायाम् । ७७ । १४ ।
"मधुकोरण्डकमांसी लवङ्गेलाक्षकत्वक्च ।
पटवास प्रवरोऽयं स्पर्शसुखश्चोपतिष्ठेत ॥")
चर्म । इति मेदिनी । चे ६ । अस्य पर्यायः । त्वचा २ । इत्यमरः । अजिनम् । त्वचः १ । इति तट्टीका । असृक् । वल्का १ । चर्म ६ । दुति ७ । इति ८ । इति शब्दरत्नावली । (यथा, रघुः । ३ । ३१ ।
"स वृत्तचूलश्चलकाकपक्षकै-
रमात्यपुत्रैः सवयोभिरन्वितः ।
लिपेर्यथावद्ग्रहणेन वाङ्मयं
नदीमुखेनेव समुद्रमाविशत् ॥"
चर्मणि । यथा, मनुः । ५ । ७८ ।
"महत्योऽपेक्षया भावात् अयस्कान्तादिरेखितः ।")
अयम् । इति राजनिर्घण्टः । दारचिनि इति भाषा ।
त्वक्कण्डुर, पुं, (त्वचः कण्डुरिव । त्वच्+र । व्रण कण्डुर ।) व्रणः । इति हारावली । १६६ ।
त्वक्क्षीरा, स्त्री, (त्वचः क्षीरमस्याः ।) वंशरोचना । इत्यमरः । २ । ९ । १०९ ।
(वंशरोचनाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)
त्वक्क्षीरी, स्त्री, (त्वचः क्षीरमस्य । गौरा- दित्वात् ङीष् ।) त्वक्क्षीरा । इति राज- निर्घण्टः । (यथा, सुश्रुते । १ । ३३ ।
"विदारीकन्दा त्वक्क्षीरी विदारी विदारः

त्वक्पत्रं, क्ली, (त्वगिव पत्रमस्य ।) गुडत्वक् । इत्यमरः ।२।४।१३४॥ तेजपत्रम् । इति केचित् । इति भरतः ॥ तत्पर्य्यायः । उत्कटम् २ भृङ्गम् ३ त्वचम् ४ चोचम् ५ वराङ्गकम् ६ । इत्यमरः ।२।४।१३४॥ (यथा महाभारते ।१२।१०।१८ "वल्कलाजिनवस्त्राणि त्वक्पत्राणां फलानि च ॥" यथा, सुश्रुते । १ । ४४ । "रेचनं सुकुमाराणां त्वक्पत्रमरिचाधिकम् ॥")

त्वक्पत्री स्त्री, (त्वक्पत्र+गौरादित्वात् ङीष् ।) हिङ्गुपत्री । तत्पर्य्यायः । कारवी २ पृथ्वी ३ बाष्पीका ४ कबरी ५ पृथुः ६ । इत्यमरः । २ । ९ । ४० ॥ तनुपत्री ७ । इति भरतः ॥

त्वक्पुष्पं स्त्री, (त्वचश्चर्म्मणः पुष्पमिव ।) रोमाञ्चः । इति त्रिकाण्डशेषः । किलासम् । इति हेमचन्द्रः । ३ । १३१ ॥

त्वक्पुष्पिका स्त्री, (त्वक्पुष्पी+स्वार्थे कन् पूर्व्वह्रस्वः ।) किलासम् । इति त्रिकाण्डशेषः ॥ छुली इति भाषा ॥

त्वक्पुष्पी, स्त्री (त्वक्पुष्प+गौरादित्वात् ङीष् ।) किलासम् । इति जटाधरः ॥

त्वच संवरणे । इति कविकल्पद्रुमः ॥ (भ्वां-पर सकं सेट ।) त्वचो धातुश्चर्म्मवाचो यद्वत्तम् । त्वच त्वचने इति माधवः । त्वचनं संवरणमिति रमानाथः । त्वचति कायं वर्म्मणा भटः । इति दुर्गादासः ॥

त्वच, ञ काश्यै । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सक-सेट ।) ञ, त्वक्षिष्यति त्वक्ष्यति । काश्यं तनूकरणम् । त्वचति काष्ठं तक्षा । इति दुर्गादासः ॥

त्वक्सारः, पुं, (त्वचि सारो यस्य ।) वंशः । इत्यमरः । २ । ४ । १६० ॥ (यथा, रघुः ।१०।१७ ।
"पवनात् पाण्डुपोमात्वक्सारस्तवसार-
यात् ॥"
वंशस्य भ्रमरि । हिंताडि इति भाषा ॥ यथा सुश्रुते । १ । ८ ।
"यज्ञयञ्चापि तु त्वक्सारस्फटिककाचकुरु-
विन्दजलौकानखपत्रतृणगोपालिका
शाकपत्रकरीराबालाङ्कुलय इति ॥") गुडत्वक् । इति शब्दचन्द्रिका ॥ शोभाञ्जनः । रक्तवंशः । इति राजनिर्घण्टः ॥ (तत्तार्थीय इति भाषा ॥ यथा माघः । ४ । ६१ ।
"त्वक्सारन्ध्रपरिपूरितलब्धगीति-
रस्मिन्नसौ मृदितपक्ष्मलरल्लकाङ्गः ॥")

त्वक्सारभेदिनी, स्त्री, (त्वचं सारं भिनत्तीति । भिद्+णिनि+ङीप् ।) क्षुद्रचञ्चुः । इति राजनिर्घण्टः ॥

त्वक्सारा, स्त्री (त्वक्सारो वंश उत्पत्तिकारणत्वेनास्त्यस्याः अच् ततष्टाप् ।) वंशरोचना । इति राजनिर्घण्टः ॥ (वंशरोचनाशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

त्वक्सुगन्ध पुं, (त्वचि सुगन्धः सद्गन्धो यस्य ।) नारङ्गः । इति भावप्रकाशः ॥

त्वक्सुगन्धा स्त्री, (त्वचि सुगन्धो यस्याः ।) एलवालुकनामगन्धद्रव्यम् । इति जटाधरः ॥

त्वग, इ कम्पे । गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-पर-अक-गतौ सकं सेट ॥)

त्वगङ्कुर, पुं, (त्वचश्चर्म्मणः अङ्कुर इव ।) रोमाञ्चः । इति त्रिकाण्डशेषः ॥

त्वगक्षीरी, स्त्री, (त्वक्क्षीरी । पृषोदरादित्वात् साधुः ।) तुगाक्षीरी । वंशलोचना । इति जटाधरः ॥

त्वग्गन्ध , पुं (त्वचि गन्धो यस्य ।) नागरङ्गः । इति राजनिर्घण्टः ॥

त्वग्जं, क्ली, (त्वचः जायते इति । जन+डः ।) रोम । रुधिरम् । इति राजनिर्घण्टः ॥

त्वग्दोष पुं, (त्वचो दोषो दूषणं यस्मात् ।) कोठरोगः । इति राजनिर्घण्टः ॥ त्वग्भाव-रोगः । तदौषधं यथा,—
"मन्दोष्णतोयेनोद्धर्त्तनपूर्व्वन्तु मधकस्य च ।
निशोशीरचिदेवस्य हरेद्दोषमधारिकाम् ॥
त्वग्दोषश्चैव चैत्र कर्म्मदोषश्च नश्यति ॥"
इति गारुडे १८४ अध्यायः ॥
स तु महारोगः । यथा, "महारोगाश्च चाप रोगाद्दशान्यतमरोगवत्" । ते च उन्मादस्त्वग्दोषो राजयक्ष्मा श्वासो मधुमेहो भगन्दर उदरोऽश्मरी इत्यष्टौ पापरोगा महारोगाः ।" इति शुद्धितत्त्वम् ॥

त्वग्दोषापहा, स्त्री, (त्वग्दोषं रोगविशेषं अप-हन्तीति । अप+हन+डः ।) वाकुची । इति राज निर्घण्टः ॥

त्वग्दोषारि पुं, (त्वग्दोषस्य रोगविशेषस्य अरिः शत्रुः । तन्नाशकत्वात् तथात्वम् ।) हस्तिकन्दः । इति राजनिर्घण्टः ॥

त्वच, श संवृतौ । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट ।) चकारयुक्तः । दन्त्यवर्गाद्यादिः । श, त्वचती त्वचन्ती । इति वचरत्नम् । त्वचति वनेन देहं वीरः । इति दुर्गादासः ॥

त्वच्, स्त्री, (त्वचति संवृणोतीति । चर्च्चादित्वात् अच् ।) चर्म्मविशेषः । दारचिनी इति भाषा ॥ (यथा, सुश्रुते कल्पस्थाने १ अध्याये । "लोमशान्तस्ता चेता मदा कालीयकं त्वचम् ॥") तत्पर्य्यायः । त्वक् २ वल्ककम् ३ भृङ्गम् ४ वराङ्गम् ५ सुगन्धोत्कटम् ६ प्रवणम् ७ चिह्न-जम् ८ रम्यम् ९ सुरभम् १० कामवल्लभम् ११ उत्कटम् १२ बहुगन्धम् १३ विष्णुवम् १४ वन-प्रियम् १५ वटपत्रम् १६ गन्धवल्कम् १७ वरम् १८ शीतम् १९ । अस्य गुणाः । कटुत्वम् । शीतलत्वम् । कफवातविषापहत्वम् । कुष्ठाम-घ्नत्वम् । कण्ठशुद्धिकारित्वम् । लघुत्वम् । इति राजनिर्घण्टः ॥ वल्कलम् । चर्म्म । (यथा, हरिवंशे । १०७ । ११६ ।
"श्रीवत्सवाहो रविस्तारात्त कर्दरोमा मधुत्वचः ॥"
मधुकः । खोलस् इति भाषा ॥ यथा, महाभारते । १२ । २३५ । ११ ।
"विमुक्ताः सर्व्वपापेभ्यो भुक्तत्वच इवोरगाः ॥")
गुडत्वक् । इति धरणिः ॥

त्वचा, स्त्री (त्वच्+भावे टाप् । यद्वा, त्वचति संवृणोति सर्व्वशरीरमिति अच् ततष्टाप् ।) त्वक् । इति शब्दरत्नावली ॥

त्वचापत्र, क्ली, (त्वचा त्वक् पत्रमिव यस्य ।) त्वक्पत्रम् । इति शब्दरत्नावली ॥

त्वचिष्ठ, त्रि, (अतिशयेन त्वच्वान् । त्वच्वत्+इष्ठन् । "विन्मतोर्लुक् ।" ५ । ३ । ६४ । इति मतुपो लुक् ।) त्वचीयान् । अतिशयत्वग्विशिष्टः । इति व्याकरणम् ॥

त्वचिसार पुं (त्वचि सारो यस्य । "हलदन्तात् सप्तम्याः संज्ञायाम् ।" ६ । ३ । ९ । इति सप्तम्या अलुक् ।) वंशः । इत्यमरः । २ । ४ । १६० ॥

त्वचिसुगन्धा, स्त्री (त्वचि सुगन्धो यस्याः । सप्तम्या अलुक् ।) सूक्ष्मैला । इति हारावली ।८७॥

त्वत् त्रि, (तनोतीति । तन+"तनोतेरनश्च व ।" उणा २ । ६३ । इति चकारात् क्विप् तुक् अनश्च च ।) भिन्नः । इति जटाधरः ॥ (युष्मद्शब्दस्य पञ्चम्येकवचनस्य रूपम् ।) भवत । इति व्याकरणम् । तोमा हइते इति भाषा ॥

त्वञ्च, उ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सक सेट । क्त्वावेट् ।) चकारयुक्तादिः । उ, त्वचित्वा त्वक्त्वा । इतिगोति । इति दुर्गादासः ॥

त्वञ्च, उ श सङ्कोचे । इति कविकल्पद्रुमः ॥ (रुधां-परं-सक सेट । क्त्वावेट् ।)

त्वदीय, त्रि, (तव इदम् । युष्मद्+छः । "प्रत्ययोत्तरपदयोश्च ।" ७ । २ । ९८ । इति मप-र्यन्तस्य त्वादेशः ।) भवदीयम् । इति व्याकरणम् ॥ (यथा, रघुः । ३ । ५० ।
"अतोऽयमश्वः कपिलानुकारिणा
पितुस्त्वदीयस्य मयापहारितः ॥")

त्वर, ञि ष म ङ सम्भ्रमे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्म-अक-सेट ।) ञि त्वरितः तूर्णो-ऽस्ति । षा त्वरामद्रवलयादिपुपाठविभ्यो भिदायां विकल्पेऽपि विदेवूपात्वभेदायमेतद्गुणसम्बन्धे सम्बन्धे । ष, त्वरा । म त्वरयति । ङ, त्वरते । स्वर इव शीघ्रमकुण्ठागमम् । धातूनेतुमथवा च तत्वरे । इति दुर्गादासः ॥

त्वरण स्त्री, (त्वर+भावे ल्युट् ।) त्वरा । इति व्याकरणम् । (त्वरते शीघ्रं गच्छतीति । त्वर+ल्युः । द्रुतगामिनि, त्रि । यथा, धर्म्मपर्व्वणि ।११। ८ । २८ ।
"वायवीयैश्च वाद्यैश्च त्वरणा भवनायपा ॥")

त्वरा स्त्री, (त्वरणमिति । त्वर+"षिद्भिदादिभ्योऽङ् ।" इति अङ् । ततः स्त्रीलिङ्गत्वात् टाप् ।) वेगः । तत्पर्य्यायः । सम्भ्रमः २ । इत्यमरः ।१। १ । २५ ॥ आवेगः ३ त्वरिः ४ तूर्णिः ५ संवेगः ६ । इति हेमचन्द्रः ।६।१३६॥ (यथा, महाभारते । १ । २०५ । २७ ।
"यद्वत्त्वं मया पूर्व्वं विज्ञितो वीरविक्रम ।
तत्कोऽयं वाञ्छितोऽर्थो मे त्वरा भवति पुत्र ॥")

त्वरि स्त्री, (त्वरणमिति। त्वर+भावे इन्।) त्वरा। इति हेमचन्द्रः। २।२१६॥

त्वरित त्रि (त्वर+क्त।) शीघ्रम्। (त्वरते स्मेति। त्वर+गत्यर्थाकर्म्मकेति कर्त्तरि क्त। यद्वा, त्वरा सञ्जाताऽस्य। त्वरा+तारकादित्वात् इतच्।) तद्विशिष्टे, त्रि। इत्यमरः।१।१।६८॥ (यथा, रघुवंशे। १। ? ।
"वयसा...त्वरिता गतिः॥")

त्वरितगति, त्रि (त्वरिता शीघ्रा गतिर्यस्य तथा त्वरितं कथितम्।) शीघ्रगामिविशेषः। तत्-पर्य्यायः। जित्वरः २। इत्यमरः।३।१।७०॥

त्वष्ट त्रि, (त्वक्षति तनूक्रियते स्मेति। त्वक्ष तनू करणे+क्त।) तनूकृत। छेदिता छोला इत्यादि भाषा। तत्पर्य्यायः। तष्टं २। इत्यमरः। ३।११।९९॥

त्वष्टा [ऋ] पुं (त्वेषति दीप्यतीति। त्विष दीप्तौ+"नप्तृनेष्टृत्वष्टृहोतृ..." उणा० २।९५। इति तृन् निपातनञ्च।) आदित्यविशेषः। (यथा महाभारते। १।६५।१५।
"धन्वन्तरिर्द्वादशान्यो मानुषा सुरवीरता।
...
भगो विवस्वान् पूषा च सविता दशमस्तथा।
एकादशस्तथा त्वष्टा द्वादशो विष्णुरुच्यते॥"
यते तु चाक्षुषस्य मन्वन्तरे तुषिता नाम देवा आसन्। वैवस्वतेऽन्तरे तु द्वादश आदित्याः। इति विष्णुपुराणे। १।१५।१३१—१३२॥ तथा मात्स्ये च। ६।३—४॥ त्वक्षति तनू करोति काष्ठादिकं शिल्पकार्य्येभ्यः। त्वक्ष+तृन्।) विश्वकर्म्मा। इति हेमचन्द्रः।२।९८॥ (यथा, माघे। १।२९।
"रथाङ्गपाणेः पटलेन रोचिषा
...त्वष्टा॥"
... विश्वकर्म्मा। यथा विष्णुपुराणे। १।१०।१२॥
"...
...
... भास्करे॥"
विश्वकर्म्मणः पुत्रविशेषः। यथा, विष्णुपुराणे। १।१५।१२०।
"तस्य पुत्रास्तु चत्वारस्तेषां नामानि मे शृणु।
...बुद्धिमान्॥"
प्रजापतिविशेषः। यथा, महाभारते। १।१।३२।
"त्वष्टा प्रजापतिश्चासीद् दक्षो ... महातपाः।
स पुत्रं वै त्रिशिरसमिन्द्रद्रोहात् किलासृजत्॥"
महादेवः। यथा, महाभारते। १३।१७।१।
"...")
चित्रानक्षत्राधिदैवः। इत्यमरः। ३।३।९८॥
... त्वष्टृदेवता। ... इति चर्म्म... भारते। १।११७।२८॥ ... इति भट्टे। ९।८५।१॥)

त्वाष्ट्रमन्त्र क्ली, (त्वाष्ट्रः मन्त्रः पारसिक प्रयत्नम्।) अर्कप्रयोगम्। ... भोग। यथा, "...यदि कारयेत् तत्र राजशत्रुप्रतिकार्ये मन्त्र-प्रयोगः स्यात्।" इति चित्रास्तुतिकामनायाम्॥

त्वाष्ट्री, स्त्री दुर्गा। यथा,—
"तुष्टा तुष्टी त्वष्टी मातुरस्य तुष्टी त्रिनामनी।
...त्वाष्ट्री देव प्रकीर्त्तिता॥"
इति देवीपुराणे ४५ अध्यायः॥

त्वाष्ट्र, पुं, (त्वष्टुरपत्यं पुमान्। अण्।) वृत्रासुरः। इति त्रिकाण्डशेषः॥ (यथा, श्रीमद्भागवते। ६।९।६।
"तत्रैव भ्रातृवध...त्वं च॥"
विश्वरूपः। यथा, भागवते। ६।७।१।
"हतः पुरोहितस्त्वाष्ट्रो ...॥"
त्वष्टृसम्बन्धिनि, त्रि। यथा, मार्कण्डेये।८१।६९।
"तवाविश्य...
...॥"
तथा भागवते। ६।१३।२६।
"...॥"
त्वष्टा अधिष्ठात्री देवतास्येति अण्। चित्रा नक्षत्रम्। यथा, वृहत्संहितायाम्। ७।११।
"धाता ... वायव्ये॥")

त्वाष्ट्री स्त्री, (त्वष्टा अधिष्ठात्री देवतास्याः। त्वष्टृ+अण्+ङीप्।) चित्रानक्षत्रम्। इति हेमचन्द्रः॥ (सूर्य्यस्य पत्नी।) ... इति शब्दरत्नावली॥ (यथा, महाभारते। १।६६।३५।
"त्वाष्ट्री तु सवितुर्भार्य्या वडवारूपधारिणी।
असूयत महाभागा सान्तरीक्षेऽश्विनावुभौ॥")
... इति त्रिकाण्डशेषः॥

त्विट्, [ष] स्त्री, (त्विष दीप्तौ+सम्पदादित्वात् क्विप्।) शोभा। (यथा, महाभारते। ६। ९।१०
"...॥")
प्रभा। (यथा, माघे। १।३।
"...॥")
वाक्। इति मेदिनी। ष, ११॥ व्यवसायः। विरोधा। इति विश्वः॥ (दीप्तिमन्ते त्रि। यथा ऋग्वेदे। ४।१०।५।
"...॥"
"... इत्यत्र चाक्षुष इति सहस्रदीप्तिः॥")

त्विष ... इति कविकल्पद्रुमः॥ (भ्वा-पर-सक-सेट् ... चौ, स्तिविषयत्। अ, अत्विषत्। ... इति दुर्गादासः॥

त्विषा, स्त्री, (त्विष+टाप्...।) दीप्तिः। इति शब्दरत्नावली॥

त्विषाम्पति, पुं, (त्विषां प्रभाणां पतिः। अलुक्।) सूर्य्यः। इत्यमरः।१।३।३०॥

त्विषि स्त्री (त्विष दीप्तौ+"इगुपधात् कित्।" उणा० ४।११९। इति इन् स च कित्।) किरणम्। इति हेमचन्द्रः। २।१४॥ (यथा, भट्टिः। ९।७१।९।
"...
...॥")

त्सर, छद्मगतौ। इति कविकल्पद्रुमः॥ (भ्वा-पर-सकं-अकं च सेट्।) ... त्सरति भूमिं छद्मना सर्पः। इति दुर्गादासः॥ (यथा, ऋग्वेदे। ८।६।८।
"यदा ...त्सरति ...॥")

त्सरु पुं (त्सरति कौटिल्यं गच्छतीति। त्सर+"भृमृशीङ्तॄचरित्सरि..." उणा० १।७। इति उः।) खड्गमुष्टिः। इत्यमरः।२।८।९॥ तत्पर्य्यायः। मुष्टिः २ इत्यमरटीकायाम्॥ इति शब्दरत्नावली॥ (यथा, ...प्रकाशम्। ३२१।
"...
...॥
...
...॥"
अथ। यथा, ऋग्वेदे। ५।२।१।
"मा नो वधीन्द्र... ॥"
"... इति ... भाष्ये॥)

थ

थ, थकारः। स व्यञ्जनवर्णः। सप्तदशव्यञ्जनवर्णः। अस्योच्चारणस्थानं दन्तः। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १०।
"...॥")
अस्य स्वरूपं यथा,—
"थकारं चञ्चलापाङ्गि कुण्डलीमोक्षरूपिणी।
त्रिशक्तिसहितं वर्णं त्रिविन्दुसहितं सदा॥
पञ्चदेवमयं वर्णं पञ्चप्राणात्मकं सदा।
... थकारं प्रणमाम्यहम्॥"
इति कामधेनुतन्त्रम्॥
(वर्णोद्धारतन्त्रे) अस्य ध्यानं यथा —
"...
...
...॥"

अस्य ध्यानादि यथा,—
"नीलवर्णां त्रिनयनां षड्भुजां वरदां पराम्।
पीतवस्त्रपरीधानां सदा सिद्धिप्रदायिनीम्॥
एवं ध्यात्वा थकारन्तु तन्मन्त्रं दशधा जपेत्।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा॥
तरुणादित्यसङ्काशं थकारं प्रणमाम्यहम्॥"
इति वर्णोद्धारतन्त्रम्॥ ७॥

अस्य नामानि यथा,—
"थः झिण्टीशो महाग्रन्थिर्ग्रन्थिग्राही भयानकः।
शिखी शिरश्छिन्नो दण्डी भद्रकाली शिलोच्चयः॥
कृष्णो बुद्धिर्विकर्मा च दक्षनासाधिपोऽमरः।
वरदा भोगदा केशो वामजानुश्चलोऽनलः॥
लोलोऽन्तधिनी गुहः शरचन्द्रविदारकः॥"
इति नानातन्त्रशास्त्रम्॥

थ क्ली, रक्षणम्। मङ्गलम्। साध्वसम्। इति मेदिनी। थे, १॥

थ, पुं, (थुड् संवृतौ+ड।) पर्व्वतः। भयरक्षकः। इति मेदिनी। थे, १॥ व्याधिभेदः। भयचिह्नम्। भक्षणम्। इति शब्दरत्नावली॥

थुड, श संवृतौ। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) श, थुडति। अथुडीत् तुथोड। इति दुर्गादासः॥

थुत्कारः पुं, (थुत्+भावे घञ्। थुदित्यव्यक्तशब्दस्य कारः करणं यत्र।) निष्ठीवनव्यापारानुकरणशब्दः॥

थुर्व्व, ई वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) पञ्चमस्वरी। ऊ, थुर्व्वति थुर्व्वः। ई, थूर्णः। इति दुर्गादासः॥

थुर्व्वणं, क्ली, हननम्। थुर्व्वधातोर्भावे अनट् (ल्युट्) निष्पन्नम्॥

थूथू, अ, निष्ठीवनव्यापारानुकरणशब्दः। यथा,— थूथूकृत्य वमन्निरञ्जनजनैर्दिवि शक्तिकथान्तरम्॥

थेथे, अ, वाद्यानुकरणशब्दविशेषः। इति सङ्गीतदामोदरः॥

थोडनं क्ली, संवरणम्। इति थुडधातोर्भावेऽनट् प्रत्यय (ल्युट्)॥

द

द, दकारः। स व्यञ्जनाष्टादशवर्णः तवर्गतृतीयवर्णश्च। अस्योच्चारणस्थानं दन्तः। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७।
"स्युर्मूर्द्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥")

अस्य स्वरूपं यथा,—
"दकारं शृणु चार्व्वङ्गि! चतुर्व्वर्गप्रदायकम्।
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा॥
त्रिशक्तिसहितं देवि! त्रिबिन्दुसहितं सदा।
आत्मादितत्त्वसंयुक्तं स्वयं परमकुण्डली॥
रक्तविद्युल्लताकारं दकारं हृदि भावय॥"
इति कामधेनुतन्त्रम्॥

अस्य ध्यानादि यथा,—
"ध्यानमस्य दकारस्य वक्ष्यते शृणु पार्व्वति!।
चतुर्भुजां पीतवस्त्रां नवयौवनभूषिताम्॥
अनेकरत्नघटितहारनूपुरशोभिताम्।
एवं ध्यात्वा दकारन्तु तन्मन्त्रं दशधा जपेत्॥"

अस्य नामानि यथा, नानातन्त्रशास्त्रे।
"दोऽत्रीशो धातकिर्धाता दाता दत्तः कलत्रकम्।
दीनः ध्यानश्च दानश्च भक्तिराह्लादनी धरा॥
सुषुम्ना योगिनी वद्यः कुण्डली वामगुल्फकः।
कात्यायनी शिवा दुर्गा लक्ष्मणा मा त्रिकण्टकी॥
स्वस्तिकः कुटिलारूपः शब्दधामा जितेन्द्रियः।
धर्म्मोद्बुद्धामदेवश्च क्षमा बहुगुणचला॥
हरिद्रापुरगामी च दक्षपार्श्वस्थिरेक्षकः॥"

द, स्त्री, (ददाति आनन्दमिति। दा+बाहुलकात् कः।) भार्य्या। इत्येकाक्षरकोषः॥

दः पुं, (दैप शुद्धौ वा दा दाने+बाहुलकात् कः।) अचलः। दत्तः। दाता। इति मेदिनी। दे, १॥ (दो छेदे+ड।) खण्डनम्। इति शब्दरत्नावली॥ (यथा, माघे। १९। ११४।
"दाददोदुद्ददुद्दादी दादादोदूददीददोः।
दुद्दादं दददे दुद्दे ददाददददोऽददः॥"
"ददाति इति दादो दानम्। ददातेः कर्म्मणि घञ्। दादं ददातीति दाददो दानप्रदः।" इत्यादौ मल्लिनाथकृतटीकायामर्थविशेषो बोद्धव्यः॥)

दंश, पुं (दशतीति। दन्श दशने+पचाद्यच्।) कीटविशेषः। डाँश इति भाषा। तत्पर्य्यायः। वनमक्षिका २। इत्यमरः। २।५।२७॥ गोमक्षिका ३ अरण्यमक्षिका ४ भम्भरालिका ५। इति शब्दरत्नावली॥ पांशुरः ६ दंशकः ७। इति हारावली॥ दुष्टमुखः ८ क्रूरः ९ तुदिका १०। इति राजनिर्घण्टः॥ (यथा, मनुः। १। ४५।
"स्वेदजं दंशमशकं यूकामक्षिकमत्कुणम्।
ऊष्मणश्चोपजायन्ते यच्चान्यत् किञ्चिदीदृशम्॥"
दशतीव शरीरमिति।) वर्म्म। (यथा, भागवते। ६। १८। ९।
"पराश्वस्य तपनीयोपकल्पं
महागदं काञ्चनचित्रदंशम्॥"
दन्श+भावे घञ्।) दंशनम्। इति मेदिनी। शे, ७॥
("रोमशा जायते दंशे कृष्णपातिशवव्यथकः॥"
इति सुश्रुते कल्पस्थाने षष्ठेऽध्याये॥)
दन्तः। इति हेमचन्द्रः। ३। २४८॥ खण्डनम्। (दन्तक्षतम्। यथा, आर्य्यासप्तशत्याम्। ५११।
"वर्णच्युतिर्न ललाटे न लुलितमङ्ग न चाधरे दंशः।
उत्पलमहारि नारि च न सदृशमायचतुरेण॥")
दोषः। मर्म्म। वर्म्मघातम्। इति विश्वः॥ (यथा
"सर्व्वैर्वासित वर्म्म शाखारदस्य दैशिकः।
दंशश्चोपरिवक्षीयादरिदावदुरङ्गके॥

शीतवर्म्मामनवच्छानां मधुराम्बतलेन च।
न गच्छति विषं वेगमरिष्टाभिर्निवारितम्॥"
इति सुश्रुते कल्पस्थाने पञ्चमेऽध्याये॥)
असुरविशेषः। यथा, महाभारते। १२। ३। १९।
"सोऽभवीदहमासं प्राक् दंशो नाम
महासुरः॥"
अयन्तु भृगुभार्य्यामपहरन् तच्छापात् मांसशोणिताशी कीटो जातः। ततः कदाचित् गुरौ परशुरामस्य निद्रां प्रतिपालयितुं कर्णस्य ऊरुदेशं निर्भिद्य शोणितं पीतवान्। ततः परशुरामेणास्य शापात् निर्म्मोचितः॥ एतद्विवरणन्तु तत्रैवाध्याये द्रष्टव्यम्॥)

दंशकः पुं (दशतीति। दन्श+ण्वुल्।) दंशः। इति हारावली। १२६॥ (भूपविशेषः। स तु कम्पनादेशाधिपतिः। यथा, राजतरङ्गिण्याम्। १७८।
"दंशकं कम्पनाधीशं प्रहन्तुं तत्र सङ्कुधि।
विहतो विषमाटायां निपत्य निहतः सखे॥")

दंशनकर्णादि, त्रि॥

दंशनं, क्ली, (दशतीव शरीरमिति। दन्श+ल्युः।) वर्म्म। (यथा, महाभारते। ३। २६८। १८।
"सन्नद्धश्च वर्म्म दयेन्द्रकल्पा
महान्ति चापानि च दंशनानि॥"
दन्श+भावे ल्युट्।) दन्तादिना खण्डनम्। इति हेमचन्द्रः॥ कामडान कुटकुटान इति भाषा। (यथा, महाभारते। ८। ८३। १४।
"दंशनघातिभिः सर्व्वैर्दारितश्च अनुवेमति॥")

दंशभीरुः, पुं स्त्री, (दंशात् वनमक्षिकातः भीरुः। भयशीलः।) महिषः। इति त्रिकाण्डशेषः॥

दंशमूल पुं, (दंशवद्दर्शं मूलमस्य।) शिग्रुः। इति राजनिर्घण्टः॥ (गुणादयोऽस्य शिग्रुशब्दे ज्ञातव्याः॥)

दंशितः त्रि, (दंशो वर्म्म सञ्जातोऽस्य परिहितत्वादिति। दंश+तारकादित्वात् इतच्।) वर्म्मितः। (यथा, महाभारते। ५। २९। २।
"महता बलचक्रेण परराष्ट्रावमर्द्दिना।
परस्परविघूर्णेन दंशितेन प्रतापवान्॥"
दशति इति। दन्श+णिच्+भावे क्तः।) दष्टः। इति हेमचन्द्रः॥ (भाषमाणः। यथा महाभारते। ४। ४०। ९।
"धारया यत्र वीरस्य एते भाषन्ति दंशिताः।
सुनामा सुपदश्चैव कस्यैतद्दृश्यतामम॥"
"दंशिता भाषमाणाः।" इति नीलकण्ठः॥)

दंशी, स्त्री, (अल्पो दंशः। अल्पार्थे ङीष्। यद्वा, दशतीति। दंश+अच्। गौरादित्वात् ङीष्।) क्षुद्रदंशः। इत्यमरः। २।५।२७॥ छोटडाँश इति भाषा॥

दंष्ट्रा, स्त्री (दशतेऽनयेति। दन्श+"दाम्नी शसेति।" ३।२।१८२। इति करणे ष्ट्रन्। यद्वा, "दन्शधातुः ष्ट्रन्।" उणा ४।१६०। इति ष्ट्रन्। गौरादिपाठे भिदामहीशब्दस्य पाठात् सिद्धौ ङीषोऽविषयत्वात् टाप्।) दन्त

विशेषः । वनशूकरः । दाढ़ा २ । इति हेम-
चन्द्रः । ३ । ४१० ॥ (यथा, मार्कण्डेये ।
१ । ९ ।
"यस्यास्तीव प्रचण्डोऽपि वज्रसि वर्ष्मा
वरावलम्बनम् ।
दंष्ट्राभ्यां महती मही क्षितिमात्मीयां यदे
वोदधौ ॥")
दंष्ट्रिका, स्त्री, (दंष्ट्रा शिखैवास्याः । दंष्ट्रा +
"ब्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति ठन् ।)
दाढ़िका । इति हेमचन्द्रः । ३ । २४० ॥
दंष्ट्री, [न्] पुं स्त्री, (प्रशस्ता दंष्ट्रा अस्यास्तीति ।
दंष्ट्रा + "ब्रीह्यादिभ्यश्च ।" ५ । २ । ११६ । इति
इनि ।) शूकरः । इत्यमरः । २ । ५ । २ ।
सर्पे । इति शब्दरत्नावली ॥ (यथा, रामा-
यणे । २ । ११ । २१ ।
"दिव्यानि दंष्ट्रिणः सर्वे वासयन्ति मृगपक्षिणः ।
महत्यस्याद्भुताहीना सभा दंष्ट्रा प्रभाम्यथा ॥")
दंष्ट्राविशिष्टे, त्रि । यथा,—
"दंष्ट्रिभिः शृङ्गिभिश्चापि मृता ये चैव
मानवाः ।
ये व्याघ्रैश्च हता मार्ग्गि राजन् प्राणैश्च वञ्चिताः ॥"
इति शुद्धितत्त्वे वह्निपुराणम् ॥
दर्ज्जं, क्ली, (उदक + दर्ज्जादित्वात् साधुः ।)
जलम् । इति त्रिकाण्डशेषः ॥
दक्ष, श हिंसे । गतौ । इति कविकल्पद्रुमः ।
(भ्वा०-आत्म०-सक०-सेट् ।) ऋदु इद् वीप्सार्थ-
कम् । श, दक्षते पन्नगद्वेषी । मीवीयूषयोर्वृद्धौ
ऋति दक्षः । इति दुर्गादासः ॥ (श्रोतर्थे
अकर्म्मकोऽयम् । यथा, ऋग्वेदे । २ । १ । ११ ।
"नमिद्वा धृतानिधाय दक्षते ।"
"दक्षते हरणाय समर्था भवति ।" इति तद्भाष्ये
सायनः ।)
दक्ष, क म ङ वृद्ध्यर्थे । इति कविकल्पद्रुमः ।
(भ्वा०-आत्म०-अक०-सेट् ।) म, अददक्ष अदादक्ष ।
दक्षं दक्षम् । दाक्षं दाक्षम् । मानुबन्धस्वा
दक्षणयोरपि दीर्घे । अमी तु दीर्घविधि
समर्थौ नादेयते । म, यथा । क्रीतलात् यद्वो
हितमेवेदमेवार्थ्यं भागुवन्धकरणमेवामला-
नित्यो भ इति सार्वभौमहृदयाख्याः । क,
दक्षते । शब्दार्थं मतिपदमो । इति दुर्गादासः ॥
दक्ष, पुं, (दक्षते यदितिरवग्य समर्थो भवतीति ।
दक्ष + अच् ।) प्रजापतिविशेषः । स ब्रह्मणो
दक्षिणाङ्गुष्ठजातः । तत्र प्रभाति मैथुनेन
प्रजा जाताः । यथा,—
"शरीरार्द्धं दक्षस्य मांसं विदधे प्रजापतिः ।
अङ्गुष्ठाद्दक्षिणादक्षः प्रजापतिरजायत ॥"
इति मत्स्यपुराणे । ३ । ८ ।
"यदा कर्म्मे चैतासो सदेव प्रजया क्रिया ।
तदा तु वामाङ्गात् दक्षः संजज्ञे ब्रह्मणः ॥
न वृद्धिमगमल्लोकस्तदा मैथुनयोगतः ।
तत दुःखवतश्चापि स्रष्टव्यमाप्य वदन् ॥"
इति च तत्रैव । ४ । १३–१४ ।
अस्य भार्य्या स्वायम्भुवमनुकन्या प्रसूतिः । अस्य
षोडशकन्या यथा, श्रद्धा १ मैत्री २ दया ३
शान्तिः ४ तुष्टिः ५ पुष्टिः ६ क्रिया ७ उन्नतिः
८ बुद्धिः ९ मेधा १० मूर्त्तिः ११ तितिक्षा १२
ह्रीः १३ स्वाहा १४ स्वधा १५ सती १६ ।
तत्र त्रिंशत्प्रसूतः । दक्षप्रजापतिरिदानीं
यज्ञमपि दक्षप्रदेशस्य पुत्रो भूत्वा वहन्मन्वन्तरे
प्रजाविधिकारः । स चन्द्रो धर्म्मादीनां
कन्या बहुभिरा प्रजापतिभ्यो ददावान् ।
धर्म्माय दश । कश्यपाय त्रयोदश । चन्द्राय
सप्तविंशतिं । कृशाश्वाय द्वे । भृगवे द्वे ।
अङ्गिरसे द्वे । इति श्रीभागवतम् । ७ ॥
तालवृक्षः । (यथा, पद्मे स्वर्गखण्डे २०
अध्याये ।
"ताम्बूलवर्णरसालो दक्षाभ्यां लिकुचावपि ।
नट्यनागाश्च पारिजाताति च विशायिता ॥")
कुक्कुटः । (यथा, अथर्ववेदे । प्रकृतिखण्डे ।
४ । ६० ।
"कणादो गौतमः कणः पाणिनिः शाकटायनः ।
ग्रन्थकार पाणिनिः दक्षः कात्यायन आपद्म ॥"
अर्थं त्रि धर्म्मप्रयोजकदानीकामप्रयोजनम् । यथा,
याज्ञवल्क्ये । १ । ५ ।
"पराशरव्यासशङ्खलिखिता दक्षगौतमौ ।
शातातपो वशिष्ठश्च धर्म्मशास्त्रप्रयोजकाः ॥")
वृषभः । हरमिनः । वहिः । इति विश्वः ॥
महेशः । इति शब्दरत्नावली ॥ (यथा, महा-
भारते । १३ । १७ । ११२ ।
"वृषिमान् सर्व्वमान् दक्षः सङ्कल्पश्च प्रमादिनः ।"
विष्णोर्नामविशेषः । यथा, महाभारते । १३ ।
१४९ । १११ ।
"अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।"
कुशलम् । इति विश्वः । २ । ८ । "दक्ष
दक्षौ उभयात् वदौ । दक्ष गतिहिंसनयोः ।
दक्षतिपूर्वकारार्थं । इति भानुदासो । अयन्तु
प्रकृतिभ्योऽपि निपो भवदेव निपातनं तथैव
प्रभव प्रौढ्याचितो वा भवति प्रकृतिभ्यः ।"
"दक्ष इति कर्म्मपदानां दक्षनाम अकारान्त
प्रति शब्देषमर्थानां प्रत्ययम् ।" इति मही-
धरो वेदभाष्ये । यथा, ऋग्वेदे । १।१५।१६ ।
"अ दक्षाणां दक्षपतिर्बभूव ।"
"योऽसि रैप्राणां कर्म्मणां बलानां दक्षपति-
र्बभूवाधिपतिर्बभूव ।" इति तद्भाष्ये सायनः ।
प्रवृद्धस्य कुमारसम्भवम् । यथा महा-
भारते । ५ । १ । १० ।
"मेवकन् कुलतो दक्षः धर्म्मज्ञः सोमवंशोद्भवः ॥")
त्रि, पटुः । इति मेदिनी । षे १३ । अस्य
पर्य्यायः चतुरशब्दे द्रष्टव्यः । (यथा महा-
भारते । १ । ७४ । १८ ।
"सा भार्य्या या गृहे दक्षा सा भार्य्या या प्रजा-
वती ।
सा भार्य्या या पतिप्राणा सा भार्य्या या
पतिव्रता ॥"
समर्थः । यथा, ऋग्वेदे । १ । १५ । १ ।
"दक्षाणि दक्ष वसवे रोदसी
गिरो होता मनुष्यो न दक्षः ।"
प्रवृद्धः । यथा, तत्रैव । १ । ११ । ६ ।
"दुर्गे दक्षं कृशनं निवाससे कृणवम् ।"
"दक्षं प्रवृद्धम् ।" इति तद्भाष्ये सायनः ।
दक्षिणः । अनुकूलम् । यथा, महानिर्वाणे ।
६ । ४४ ।
"प्राणायामं ततः कुर्य्याद् मदेन मलेन वा ।
मध्यमानामिकाभ्यां च दक्षहस्तस्य नासिके ॥")
दक्षकन्या, स्त्री, (दक्षस्य प्रजापतेः कन्या ।)
दुर्गा । इति त्रिकाण्डशेषः । दक्षकन्यायै
सती । या भवानीरूपका । तासां नामानि
यथा,—
"सती ख्यातिः स्मृतिः स्वाहा श्रद्धया सह
तथा ।
प्रीतिः क्षमा च सन्नतिः सम्भूतिश्च अनसूयी ।
कीर्त्तिर्लक्ष्मीस्तथा मेधा पुष्टिः श्रद्धा क्रिया मतिः ।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिर्वा कीर्त्तिरेव च
अरुन्धती बहुपुत्रा तथा प्राणगर्भवती ।
वहुकला च सुरूपा च याम्या विश्वा च वामा ।
अदितिश्च दितिश्चैव दनुः कालाः दनायुका ।
सिंहिका सुरसा कद्रुविनता सुरभिः खशा ।
क्रोधा इरा च ग्रीवा च रोहिण्या मनोरमा ।
पताङ्गन सिद्धिपोलिका धर्म्मोपाय भावय ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
(अस्यं द्वितीयजन्मनि प्राप्तियो भूत्वा यदि कन्या
अभवन्मात् । यथा, मत्स्यपुराणे । ५।१२ । ११ ।
"ततस्तेन विवर्द्धन्ते यदि कन्याः प्रजापतिः ।
ददौ स दश धर्म्माय कश्यपाय त्रयोदश ।
सप्तविंशति सोमाय चतस्रोऽरिष्टनेमिने ।
द्वे चैव बाहुपुत्राय द्वे कृशाश्वाय धीमते ।
द्वे चैवाङ्गिरसे तद्वत्तासां नामानि विस्तरम् ।
शृणुध्वं देवमातॄणां प्रजाविस्तरमादितः ॥"
एतासां नामानि तत्रैव द्रष्टव्यानि ।)
दक्षजा, स्त्री, (दक्षात् प्रजापतेर्जायते इति ।
जन + "सप्तम्यां जनेर्डः ।" ३ । २ । ९७ । इति
डः ।) दुर्गा । इति हेमचन्द्रः । (अश्विन्यादि
नक्षत्रे च ।)
दक्षसावर्णि, पुं, (दक्षस्य आत्मजो वामिश्च
सावर्णी यस्मिन् ।) मनुः । इति हेमचन्द्रः ।
(दक्षसावर्णि मनोः अन्तरं इति निर्दिष्टं)
दक्षसावर्णि पुं, नवममनुः । वारिधि नामक
आदमणामा प्रवक्तव्यतः । कुशपाद्य दक्ष ।
पारमरीचिगर्भादयो देवाः । द्युतिमत्प्रभृतयः सप्त
र्षयः । धृष्टकेतुदीप्तिकेतवः पञ्चहस्ताः मनुपुत्रा अभि-
ज्ञेयाः । इति श्रीभागवतम् ॥ (अस्य विशेष-
विवरणन्तु मार्कण्डेयपुराणे ८ अध्याये द्रष्टव्यः ।)
दक्षा, स्त्री, (दक्षते वर्द्धते भारवाहेन यद्दर्थं
मन्यन्तेऽसौ । दक्ष + अच् । टाप् ।) पृथिवी ।
इति मेदिनी । षे, १३ ।

दक्षाध्वरध्वंसकृत्, पुं, (दक्षाध्वरस्य दक्षयज्ञस्य ध्वंसं नाशं करोतीति । कृ + क्विप् तुगागमश्च ।) शिवः । इति हलायुधः ॥

दक्षाय्यः, पुं, (दक्षते कार्य्येषु समर्थो भवतीति । दक्ष + "श्रुदक्षिस्पृहिगृहिभ्य आय्यः ।" उणां ३।९६। इति आय्यः ।) गरुडः । गृध्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । (दक्ष वृद्धौ + आय्यः । त्रि, वर्द्धकः । यथा, ऋग्वेदे । १।९१। ३ ।

"शुचिष्ट्वमसि प्रियो न मित्रो
दक्षाय्यो अर्य्यमेवासि सोम ॥"

"अर्य्यमेवासाभिर्वृद्धिमाण सूर्य्य इव दक्षाय्योऽसि वर्द्धयिता अस्माकमसि ।" इति सायणः ॥ पूजनीयः । यथा, तत्रैव । ७।१।२।

"दक्षाय्यो यो दम आस नित्यः ॥"

"योऽग्निर्दमे गृहे दक्षाय्यः पूजनीयो हविर्भिः समर्द्धनीयो वा ।" इति तद्भाष्ये सायणः ॥)

दक्षिणः, त्रि, (दक्षते इति । दक्ष वृद्धौ + "द्रुदक्षिभ्यामिनन् ।" उणां । २।५०। इति इनन् ।) दक्षिणोद्भूतः । (दक्षिणदिग्भवः । यथा, रघुः । ४।८।

"स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ॥"

दक्षिणदिक्स्थितः । यथा, मनुः । ५।९२।

"दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ॥")

सरलः । (यथा महाभारते । ४।५।२०।

"दक्षिणो दक्षिणाचारो दिष्ट्या पैतामहात्
मधुः ॥")

परच्छन्दानुवर्त्ती । आरामः । इति मेदिनी णे ५ ।

("दक्षिणः सरलोदारपरच्छन्दानुवर्त्तिषु ।
वामेतरदक्षिणापाठोपन्यासप्रतिष्ठयोः ॥"
इति विश्वप्रकाशात् । णे, ४५ ।)

दक्षः । अपसव्यम् । इति हेमचन्द्रः ॥ डाहिन इति भाषा । (यथा, मनुः । २।६३ ।

"उद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः ॥")

दक्षिणहस्तप्रदाने दोषो यथा,—

"दक्षहस्तप्रदाता च सवर्णे सव्यकर्म्मसु ।
मृतो भवेद्धस्तहीनो मानवश्च ततः शुचिः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥ * ॥

दक्षिणहस्ते प्रतिषेधो यथा,—

"ओंकारमुच्चरन् प्राज्ञो दद्यादेवं प्रतुमोदकम् ।
सव्येनादक्षिणे हस्ते तदन्ते स्वस्ति कीर्त्तयेत् ॥"
इत्यादित्यपुराणम् ॥

(अदक्षिणः । यथा, भागवते । १।१४।१९।

"प्रसारः स्फुरति मां सव्यं दक्षिणं मन्यतोऽपरे ।
वाहाश्च पुरुषव्याघ्र । लक्षये रुदतो मम ॥")

पुं, चतुर्णां नायकानामन्यतमनायकविशेषः । तस्य लक्षणम् । (यथा, साहित्यदर्पणे । ३।३० ।

"एष त्वनेकमहिलासु समरागो दक्षिणः
कथितः ॥")

यथा च "सकलनायिकाविषयसमसहजानुरागः ।" अस्योदाहरणं यथा —

"अद्य पुरे स्फुरति मम बाहुः सखि
मयि दृष्टं कथय शुभं निवेदयामि ।
इत्याकर्ण्य नमनामुखी विमील्य
रोमाञ्चितेन वपुषा स्मितमधुतेन ॥"
इति रसमञ्जरी ॥ * ॥

(तन्त्रोक्ताचारविशेषे, स्त्री । यथा कुलार्णवे ५ खण्डे ।

"सर्व्वेभ्यश्चोत्तमा वेदा वेदेभ्यो वैष्णवं महत् ।
वैष्णवादुत्तमं शैवं शैवाद्दक्षिणमुत्तमम् ॥
दक्षिणादुत्तमं वामं वामात् सिद्धान्तमुत्तमम् ।
सिद्धान्तादुत्तमं कौलं कौलात् परतरं न हि ॥")

दक्षिणकालिका, स्त्री, (दक्षिणा अनुकूला कालिका ।) आद्याशक्तिः । यथा,—

"उर्द्धं वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधो
दक्षे चाभीवरञ्च त्रिजगदघहरे दक्षिणे कालिके च ।" इति तन्त्रसारः ॥

दक्षिणतः, अव्य, (दक्षिण + "दक्षिणोत्तराभ्यामतसुच् ।" ५।३।२८। इति अतसुच् ।) दक्षिणस्यां दिशि । इत्यमरटीकायां रायमुकुटः ॥ (यथा, मनुः । ३।९१ ।

"पृष्ठवास्तुनि कुर्व्वीत बलिं सर्व्वान्नभूतये ।
पितृभ्यो बलिशेषन्तु सर्व्वं दक्षिणतो हरेत् ॥"

दक्षिण + तसिल् । दक्षिणभागे । यथा महानिर्व्वाणतन्त्रे । ५।३८।

"पुरो दक्षिणतः कुर्य्यात् पूर्व्ववत् सुरपूजिते ॥")

दक्षिणतारं, क्ली, दक्षिणतीरम् । यथा, "दिक्-संख्येभ्यस्तीरस्य तारभावो वा । दक्षिणतारं दक्षिणतीरं उत्तरतारं उत्तरतीरम् ।" इति सिद्धान्तकौमुद्यां समासप्रकरणम् ॥

दक्षिणपूर्व्वा, स्त्री, (दक्षिणस्याः पूर्व्वस्याश्च दिशोऽन्तरालम् । "दिङ्नामान्यन्तराले ।" २।२।२६। इति समासः ।) पूर्व्वदक्षिणकोणः । इति व्याकरणम् ॥ (यथा, भागवते ।८।१८।२१।

"दिशि दक्षिणपूर्व्वस्यां दृष्टुं दक्षिणतो यजुम् ॥"

तद्दिग्भागस्थे, त्रि । यथा, आश्वलायनगृह्यसूत्रे । ४।५।११ ।

"दक्षिणपूर्व्वे अङ्गुष्ठाग्र आहवनीयं निदधाति ॥")

दक्षिणस्थः, पुं (दक्षिणे भागे तिष्ठतीति । स्था + कः ।) सारथिः । इत्यमरः । २।८।६० ॥ दक्षिणस्थिते, त्रि ।

दक्षिणा, स्त्री (दक्षते इति । दक्ष वृद्धौ + "द्रुदक्षिभ्यामिनन् ।" उणां । २।५०। इति इनन् । ततष्टाप् ।) दक्षिणदिक् । तत्पर्य्यायः । अवाची १ याम्या २ याम्यी ३ वैवस्वती ४ । इति राजनिर्घण्टः ॥ (यथा, कुमारे । ३।२५ ।

"दिक् दक्षिणा गन्धवहं मुखेन
व्यलीकनिश्वासमिवोत्ससर्ज्ज ॥")

दक्षिणवायुगुणाः । मधुरत्वम् । ... अविदाहित्वम् । बलवर्द्धनत्वम् । रक्तपित्तप्रशमनत्वम् । चक्षुष्यत्वम् । कान्तिमतिप्रदत्वम् । प्रस्तरायिकम् । विदाहित्वम् । अवमारुतकोपनत्वम् । गण्डूपदादिकीटानां जनकत्वञ्च । इति राजवल्लभः ॥ * ॥ अस्या दिशोऽधिपतयः वृषकन्यामकरराशयः । इति ज्योतिषम् ॥ यज्ञादिविधिदानम् । इति मेदिनी ॥ प्रतिष्ठा । इति हेमचन्द्रः ॥ यज्ञादिसम्पादकतन्त्राविहितदानम् । सा यज्ञपत्नी श्रीकृष्णदक्षिणांशसम्भूता । यथा,—

"कार्त्तिकीपूर्णिमायान्तु रासे राधामहोत्सवे ।
आविर्भूता दक्षिणांशात् कृष्णस्य तेन दक्षिणा ॥"

दक्षिणाया अदाने तस्या वृद्धिर्यथा,—

"यज्ञो दक्षिणया सार्द्धं पुत्त्रेण च फलेन च ।
कर्म्मिणां फलदाता चेत्युक्तं वेदविदो विदुः ॥
कृत्वा कर्म्म च तस्यैव तूर्णं दद्याच्च दक्षिणाम् ।
तत्कर्म्मफलमाप्नोति वेदैरुक्तमिदं शुभे ॥
कर्त्ता कर्म्मणि पूर्णे च तत्क्षणं यदि दक्षिणाम् ।
न दद्याद्ब्राह्मणेभ्यश्च दैवेनाज्ञानतोऽथ वा ॥
मुहूर्त्ते समतीते तु द्विगुणा सा भवेद्ध्रुवम् ।
एकरात्रे व्यतीते तु भवेत् शतगुणा च सा ॥
त्रिरात्रे तद्दशगुणा सप्ताहे द्विगुणा ततः ।
मासे लक्षगुणा प्रोक्ता ब्राह्मणानाञ्च वर्द्धते ॥
संवत्सरे व्यतीते तु सा त्रिकोटिगुणा भवेत् ।
कर्म्म तद्यजमानानां सर्व्वञ्च निष्फलं भवेत् ॥
स च ब्रह्मस्वापहारी न कर्म्मार्होऽशुचिर्नरः ।
दरिद्रो व्याधियुक्तश्च तेन पापेन पातकी ॥
तद्गृहाद्याति लक्ष्मीश्च शापं दत्त्वा सुदारुणम् ।
पितरो नैव गृह्णन्ति तद्दत्तं श्राद्धतर्पणम् ।
एवं सुराश्च तत्पूजां तद्दत्तामग्निराहुतिम् ॥ * ॥
दाता न दीयते दानं ग्रहीता च न याचते ।
उभौ तौ नरकं यातश्छिन्नरज्जुर्यथा घटः ॥
नार्पयेद्यजमानश्चेद्याचिताय च दक्षिणाम् ।
भवेद्ब्रह्मस्वापहारी कुम्भीपाकं व्रजेद्ध्रुवम् ॥
वर्षलक्षं वसेत्तत्र यमदूतेन ताडितः ।
ततो भवेत् स चाण्डालो व्याधियुक्तो दरिद्रकः ॥
पातयेत् पुरुषान् सप्त पूर्व्वांश्च सप्तजन्मनः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥ * ॥

नायिकाविशेषः । यथा —

"या गौरवं भयं प्रेम सद्भावं पूर्व्वनायके ।
न मुञ्चत्यन्यसक्तापि सा ज्ञेया दक्षिणा बुधैः ॥"
इति विष्णुपुराणटीकायां स्वामी ।

(अव्य, दक्षिणस्यां दिशि दक्षिणा दिशि वा । "दक्षिणादाच् ।" ५।३।३६। इति आच् । दक्षिणस्यां दिशि ।)

दक्षिणाग्निः, पुं, (दक्षिणः अनुकूलोऽग्निः ।) यज्ञाग्निविशेषः । इत्यमरः । २।७।१९। दक्षिणस्याः दिशोऽपि दक्षिणाग्नि । इति भरतः ॥ अस्य नामकरणम् । यथा —

"दत्तास्तु दक्षिणाकाले हविर्भूता यतोऽभवन् ।
अयमेव दक्षिणाभावं दक्षिणाग्निस्ततोऽभवत् ॥"
इति वराहपुराणम् ॥

दक्षिणाचलः, पुं (दक्षिणा दक्षिणस्यां दिशि दक्षिणे दक्षिणदेशे वा स्थितोऽचलः पर्व्वतः ।) मलयपर्व्वतः । इति हेमचन्द्रः । ४।९५ ॥

दक्षिणाचार, पुं, (दक्षिणोऽनुकूल आचारः।) आचारविशेषः। यथा,—
"तावत्कौलिको भूत्वा मध्यमात्मैव पूजयेत्।
स एव दक्षिणाचारः शिवो भूत्वा शिवं यजेत्॥"
रुद्रयामलेऽपि कल्पः।
(सदाचारोक्तकर्मादिकं मानाचारवत् कठोरतरं न। तथाच वाल्मीकिरामायणेऽपि दक्षिणाचारतत्त्वं।
"दक्षिणाचारतन्त्रोक्तं कर्मं तत्सुखैरेव हि॥"
दक्षिणोऽनुकूल आचारो व्यवहारो यस्य। [illegible] विशिष्टे, त्रि। यथा, महाभारते। ४। १। २०।
"दक्षिणो दक्षिणाचारो नित्यं मेधावान् प्रभुः॥")

दक्षिणात्, अ, (दक्षिणस्यां दक्षिणस्यां वा। दक्षिणस्यां दिशि दक्षिणस्यां दिशः दक्षिणा वा दिक् इति। "उत्तराधरदक्षिणादातिः।" ५। ३। ३४। इति आतिः।) दक्षिणस्यां दिशि। इत्यमरटीकायां रामाश्रमः॥

दक्षिणापथगमा, [न्] पुं (दक्षिणा दक्षिणस्यां दिशि च पन्था तत्र गच्छति।) जातिविशेषः। यथा, महाभारते। १२। २०७। ४१।
"दक्षिणापथजन्मानः सर्वे नरवरान्ध्रकाः।
गुहाः पुलिन्दाः शबराः चुचुका मद्रकैः सह॥
उत्तरापथजन्मानः कीर्तयिष्यामि तानपि।
यौनकाम्बोजगान्धाराः किराता बर्बरैः सह॥
एते पापकृतस्तात। चरन्ति पृथिवीमिमाम्।
श्वकाकबलगृध्राणां सधर्माणो नराधिप॥
नैते कृतयुगे तात। चरन्ति पृथिवीमिमाम्।
त्रेताप्रभृति वर्त्तन्ते ते जना भरतर्षभ॥"

दक्षिणाभिमुख, त्रि, (दक्षिणा दक्षिणस्यां दिशि मुखं यस्य।) दक्षिणदिङ्मुखः। यथा —
"अमावास्यां सदामाव दक्षिणाभिमुखोऽपि वा।
न कीर्त्तयेत् [illegible] [illegible]॥"
इति तिथ्यादितत्त्वम्॥

दक्षिणायन, क्ली, (दक्षिणा दक्षिणस्यां दिशि दक्षिणं मार्गं वा अयनम्।) सूर्यस्य दक्षिणायनम्। तत् श्रावणादिमासषट्कं भवति। इत्यमरः। ॥ यथा —
"कर्कटादिषु मासेषु दक्षिणायनमुच्यते।
उत्तरायणमुक्तं मकरादौ दिवाकरे॥ इति।
मकरादिमासषट्कं हि उत्तरं तथा दक्षिणं कर्कटादि षट्कं मासषट्कं दक्षिणायनम्॥"
इति [illegible] ज्योतिषे।

दिनमानादिकं तु [illegible] इति।

[illegible] पूर्वं [illegible]।
[illegible] तु॥
[illegible]।
[illegible]॥
[illegible]॥

अश्विनीप्रमुखं नक्षत्रं दक्षिणायनम्।
अयनांशेनैव विज्ञातव्यं सदा॥"
इति च ज्योतिस्तत्त्वम्॥

तत्र मासस्य धर्मं यथा —
"दाक्षायणं यत्र भवन् महाति
मठं कठोरं [illegible]।
[illegible]-
[illegible] प्रयाति॥"
इति कोष्ठीप्रदीपे॥

[illegible]। यथा —
"[illegible] दक्षिणायने।
[illegible] तथा परा॥"
इति तिथ्यादितत्त्वम्॥

अयनचक्र यथा,—
"यत्र भानुं विलिख्य [illegible] संक्रमयेत्
यदासि
[illegible] [illegible]
निरन्तरम्।
[illegible]-
[illegible]
[illegible] [illegible] [illegible]
[illegible]॥"
इति ज्योतिषम्॥
("[illegible] [illegible] दक्षिणायनस्य। तयोर्दक्षिणं [illegible] [illegible] [illegible]॥"
इति तत्त्वे उत्तरार्धे षष्ठाध्यायः॥)

दक्षिणाशा, [इ] पुं, (दक्षिणा दक्षिणस्यां आशा [illegible] यस्य।) [illegible]। इत्यमरः। २। १०। २४॥

दक्षिणार्ह, त्रि (दक्षिणामर्हतीति। अर्ह+ "अर्हः।" ३। २। १२। इत्यच्।) दक्षिणा योग्यः। [illegible] इति भरतः। तत्पर्यायः। दक्षिणीयः २ दक्षिण्यः ३। इत्यमरः। २। ७। २५॥

दक्षिणावर्त्तकी, स्त्री, (दक्षिणे आवर्त्तो यस्य। आ+वृत्+ ण्वुल्। गौरादित्वात् ङीष्।) वृश्चिकाली। इति राजनिर्घण्टः॥

दक्षिणावर्त्त, पुं, (दक्षिणावर्त्ता दक्षिणस्यां दिशि आवर्त्तः।) [illegible]। इति हेमचन्द्रः। २। २८॥

दक्षिणीय, त्रि, (दक्षिणामर्हतीति। दक्षिणा+ "कडङ्गरदक्षिणाच्छ च।" ५। १। ६९। इति छ।) दक्षिणार्हः। इत्यमरः। २। ७। २५।
(यथा रघुः। १५। ४४।
"[illegible] दक्षिणीयैः [illegible]।
[illegible]॥"
[illegible]। ८। ४।
"[illegible] [illegible] [illegible] [illegible]॥")

दक्षिणेन, अ, (दक्षिण+ "एनबन्यतरस्यामदूरेऽपञ्चम्याः।" ५। ३। ३५। इति एनप्।) दक्षिणदिशि। इति रामाश्रमः। (अस्य योगे द्वितीया भवति।) यथा,—
"दक्षिणेन गिरिं [illegible]।
[illegible]॥"
इति [illegible]॥
(क्वचित् द्वितीयाप्रयोगाभावोऽपि दृश्यते। यथा, महाभारते। ३। ८३। ३।
"दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिविष्टपे॥")

दक्षिणेर्म्मा, [न्] पुं (दक्षिणे ईर्म्म व्रणं यस्य। "दक्षिणेर्म्मा लुब्धयोगे।" ५। ४। १२६। इति अनिच्।) व्याधप्रहारात् दक्षिणाङ्गव्रणवान् मृगः। तत्पर्यायः। दक्षिणारुः २। इत्यमरः। २। १०। २४॥ (यथा, भट्टिः। ५। ४१।
"वनभुवि [illegible] दक्षिणेर्म्मा
[illegible]॥")

दक्षिण्य, त्रि, (दक्षिणामर्हतीति। "कडङ्गरदक्षिणाच्छ च।" ५। १। ६९। इति यत्।) दक्षिणार्हः। इत्यमरः। २। ७। २५। (यथा, भट्टिः। २। ४२।
"दक्षिण्यदक्षैः [illegible]
[illegible]॥")

दग्धं क्ली कातृणम्। इति शब्दमाला॥

दग्ध, त्रि, (दह्यते स्म इति। दह+क्त।) भस्मीकृतः। पोड़ा इति भाषा। तत्पर्यायः। प्लुष्ट २ उष्ट ३ प्लुष्ट ४। इत्यमरः। ३। १। ९६॥ (यथा, मनुः। ७। १७८।
"वीरैश्च बलिभिर्दृप्तैरथवा दग्धेन वा।
[illegible]॥"
"तथापाशमानं यथम्।
[illegible]।
[illegible]॥"
इति [illegible]॥
(शान्तम्। यथा, कुमारसम्भवे। ३। ५१।
"[illegible]
आपत्ते॥"
[illegible]। यथा [illegible]॥
"[illegible]।
[illegible]॥
[illegible]॥
[illegible]॥
[illegible] "[illegible]"॥")

दग्धकाक, पुं, (दग्ध इव कृष्णवर्णः काकः।) द्रोणकाकः। इति हेमचन्द्रः। ४। ३९८॥

दग्धर, पुं, (दग्धो रथ इव।) [illegible] इति शब्दमाला। (यथा, महाभारते। १। १७२। ३८।
"[illegible] [illegible]॥
[illegible]॥")

दग्धरुह पुं, (दग्धोऽपि रोहतीति । रुह+क ।) तिलकवृक्ष । इति राजनिर्घण्ट ॥

दग्धरुहा, स्त्री, (दग्धापि रोहतीति । रुह+क टाप ।) दग्धावृक्ष. । इति राजनिर्घण्ट ॥

दग्धा स्त्री, (दह्यते स्म दह था । दह+क्त । ततष्टाप् ।) सूर्यात्यक्ता दिक् । इति मेदिनी । दे ७ ॥ वृक्षविशेष । कुरुह इति ख्यात ॥ तत्पर्य्याय । दग्धरुहा २ दग्धिका ३ स्वर्वेरुहा ४ रोमशा ५ कर्णमूदला ६ भस्मरोहा ७ सुदग्धिका ८ । अस्या गुणा । कटुत्वम् । कषायत्वम् । उष्णत्वम् । कफवातनाशित्वम् । पित्तप्रकोपनत्वम् । जठरानलदीपनत्वञ्च । इति राजनिर्घण्ट ॥ * ॥

मासदग्धा यथा,—पौरचैत्रपौषयोर्द्वितीया ज्यैष्ठफाल्गुनयोश्चतुर्थी वैशाखश्रावणयो षष्ठी आषाढ़ाश्विनयोरष्टमी भाद्रपदमाघयोर्दशमी कार्त्तिकमार्गयोर्द्वादशी । अस्या प्रमाण यथा,

"द्वितीया मीनधनुषोश्चतुर्थी वृषकुम्भयो ।
मेषकर्कटयो षष्ठी कन्यामिथुनकेऽष्टमी ॥
दशमी वृश्चिके सिंहे द्वादशी मकरे तुले ।
दग्धिकाली न जीवन्ति यदि शुक्रसमो भवेत् ॥"

अस्या प्रतिप्रसवो यथा, वैशाखे शुक्ला षष्ठी ज्यैष्ठे कृष्णा चतुर्थी आषाढ़े शुक्लाष्टमी श्रावणे कृष्णा षष्ठी भाद्रे शुक्ला दशमी आश्विने कृष्णा दशमी कार्त्तिके शुक्ला द्वादशी अग्रहायणे कृष्णा दशमी पौषे शुक्ला द्वितीया माघे कृष्णा द्वादशी फाल्गुने शुक्ला चतुर्थी चैत्रे कृष्णा द्वितीया । एतत्प्रमाण यथा,—

"मेषे द्विनेत्रे शुयुगे वृगेन्द्रे
मूके धनु स्त्री कलसे च शुक्ला ।
कुलीरकन्याविष्णगास्यमीन-
हृषेषु कृष्णास्तिथय प्रदग्धा ॥" * ॥

दिनदग्धा यथा,—रविवारे द्वादशी सोमे एकादशी मङ्गले दशमी बुधे तृतीया वृहस्पतौ षष्ठी शुक्रे पञ्चदशी शनौ सप्तमी । एतत्प्रमाण यथा,

"मार्त्तण्डादिषु रामा पटसपञ्चमयस्तथा ।
दग्धास्ते तिथय प्रोक्ता क्रमादेते सप्तसप्तभि ॥"

इति ज्योतिःसारसंग्रह ॥

दग्धिका स्त्री, (कुत्सिता दग्धा । "कुत्सिते ।" ५ । ३ । ७४ । इति कन् ।) दग्धान्नम् । पोड़ा भात इति भाषा । चाँची इति ख्याता इति केचिदिति भरत ॥ तत्पर्य्याय । भिस्सटा १ । इत्यमर । २।९।४८ ॥ भिस्सिटा ३ भिस्सिटा ४ भिस्सिटा ५ भिस्सिका ६ । इति तट्टीकासार सुन्दरी ॥ दग्धावृक्ष । इति राजनिर्घण्ट ॥

दग्धेष्टका स्त्री, (दग्धा इष्टका ।) झामकम् । इति हारावली । २१४ ॥

दघ र यात्रे । अवने । इति कविकल्पद्रुम ॥ (भ्वां परं-सक सेट ।) र, दघ्नोते । अवन रक्षणम् । इति दुर्गादास ॥

दघ, व घातने । इति कविकल्पद्रुम ॥ (भ्वां परं-अक-सेट ।) व, दघ्नोति । दघ घाते । इति मौमरा पठन्ति । तेन तदर्थकल्पनमेवो-चितम् । ततश्च घातनमिति इन्ध्यधस्य पाणिनि-सूत्राद्विलेन सार्थे णौ रूप हननमित्यर्थं । किञ्च द्विधनपाठेनैवेष्टसिद्धे घातनपाठो द्विधास्ये-सार्थे स्यान्न वेति काकदन्तान्वेषणवद्विफल प्रयासमेव कातन्त्रादावसम्मतत्वात् । इति दुर्गादास ॥

दण्ड, त क ततूपाते । इति कविकल्पद्रुम ॥ (अदन्त चुरा पर सक सेट ।) तत्पातस्तद्दण्डपातनम् । क, दण्डयति दण्डापयति अपराधिन राजा । इति दुर्गादास ॥

दण्ड पुं क्ली (दण्डयति अनेनेति । दण्ड+अच् । यद्वा, दाम्यत्यनेनेति । दम्+"अमन्तात् ड ।" उणां १ । ११३ । इति ड ।) लगुड । इत्य-मर । ३ । ३ । ४१ ॥ (यथा हठयोगप्रदी-पिकायाम् । ३ । ११ ।

"यथा दण्डहत सर्पो दण्डाकार प्रजायते ॥")

तस्य धारणगुणा । तस्करत्व सम्प्रतिहतत्वम् । मृत्युनिषेधनत्वम् । अवष्टम्भनत्वम् । आयुष्य त्वम् । भयघ्नत्वञ्च । इति राजवल्लभ ॥ (यथा, चिकित्सितस्थाने चतुर्व्विंशेऽध्याये सुश्रुतेनोक्तम् ।

"पुन शरीरभवाशनिवाग्निभ्यो मयापहम् ।
अमत्यजनरोधघ्नं स्थविरे च प्रशस्यते ॥
मस्वातसावमनसो व्यधैर्य्यवीर्य्यविवर्द्धनम् ।
अवष्टम्भकरश्चापि भयघ्न दण्डधारणम् ॥")

मरव्यागतदण्डादि । यथा,—

"मरव्यागतयन्त्राश्च भूतानामभ्युक्षिणनम् ।
बहिर्व्वेदि च यद्दान दण्डमित्यभिधीयते ॥"

इति मोक्षधर्म्म ॥

(दण्डाकारत्वात् छत्रादीनामङ्गविशेष । यथा, वृहत्संहितायाम् । ७२ ।४,६ ।

"नृपराजपतिसमासा सेनापतिदण्डनायका-नाञ्च ।
दण्डोऽर्धपञ्चहस्त समपञ्चहस्तात्कविस्तार ॥"
"अन्येषाञ्च नराणां शीतातपवारणन्तु चतुर-स्रम् ।
समवृत्तदण्डयुक्त छत्र कार्य्यं तु विप्राणाम् ॥"

चामरादीनामङ्गविशेषश्च । यथा तत्रैव । ७२ । ३-४ ।

"अध्यर्द्धहस्तप्रमितोऽस्य दण्डो
हस्तोऽथवारत्निसमोऽपराम्य ।
कोशान्मुमात् काञ्चनरूप्यगुप्तात्
रत्नैर्व्विचित्रैश्च हिताय राज्ञाम् ॥
वल्लातपत्राङ्कुशवेत्रचाप-
वितानकुन्तध्वजचामराणाम् ।
व्यापीतसन्यौमधुरध्वजाना
सर्व्वेऽङ्गमेयैव हिताय दण्डा ॥"

ब्रह्मचारिधार्य्यलगुडाकारपदार्थ । यथा देवी भागवते । १ । १८ । ३१ । शुकं प्रति जनक स्योक्ति ।

"दण्डाजिनकृता चिन्ता यथा तव मनोऽपि च ।
तथैव राज्यचिन्ता मे चिन्तयानस्य मानद ॥"

यर्थभेदेन तत्प्रमाणादिकमुक्तम् । यथा, मनौ । २ । ४५ ४७ ।

"ब्राह्मणो वैल्वपालाशौ क्षत्त्रियो वटखादिरौ ।
पैलवौदुम्बरौ वैश्यो दण्डानर्हन्ति धर्म्मत ॥
केशान्तिको ब्राह्मणस्य दण्ड कार्य्य प्रमाणत ।
ललाटसम्मितो राज्ञ स्यात्तु नासान्तिको विश ॥
ऋजवस्ते तु सर्व्वे स्युरव्रणा सौम्यदर्शना ।
अनुद्वेगकरा नॄणा सत्वचो नाग्निदूषिता ॥"

बाणनिक्षेपकालीन स्थानविशेषे, क्ली । यथा, आग्नेयधनुर्व्वेदे ।

"तिर्य्यग्भूतो भवेद्वामो दक्षिणोऽपि भवेदृजु ।
गुल्फौ पार्ष्णिगतौ चैव स्थितौ यत्राङ्गुलान्तरौ ।
स्थान दण्ड भवेदेतत् द्वादशाङ्गुलमायतम् ॥")

दण्ड पुं (दण्डयत्यपराधिनमनेनेति । दण्ड+अच् । यद्वा, दाम्यति शान्ति करोत्यनेन । दम +ड ।) राज्ञां चतुर्थोपाय । (यथा, देवी-भागवते । १ । १० । २ ।

"विना दण्ड कथ राज्य करोति जनक किल ।
धर्म्मे न वर्त्तते लोको दण्डश्चेन्न भवेद् यदि ॥")

स च त्रिविध । वध अपचयश्च बन्धन ताडनादिश्च । इत्यमरटीकासारसुन्दरी ॥ तत्-पर्य्याय । साहसम् २ दम ३ । इत्यमर । २ । ८ । २१ । (दण्ड+भावे घञ् । दमनम् । (यथा, मनु । १२ । १० ।

"वाग्दण्डोऽथ मनोदण्ड कायदण्डस्तथैव च ॥"

दण्ड इवाचरतीति । दण्ड+क्विप् । ततो भावे घञ् ।) ऊर्द्ध्वस्थिति । दाड़ान इति भाषा । इति सारसुन्दरी ॥ व्यूहभेद । (अस्य अवयव-भेदादिक यथा, अग्निपुराणे २४१ अध्याये ।

"मध्यतोऽपि स्थितौ भागौ दण्डाख्ये बहुधा मता ।
तिर्य्यग्वृत्तिस्तु दण्ड स्यात् भोगोऽन्वावृत्ति-रेव च ॥
मध्यम सर्व्वतोवृत्ति पृथग्वृत्तिरसंहत ।
प्रदरो दृढकोऽसह्यश्चापो वैकुक्षिरेव च ॥
प्रतिष्ठ सुप्रतिष्ठश्च श्येनो विजयसञ्जयौ ।
विशालो विजय शूची स्थूणा कर्णचमूमुखौ ॥
सर्पास्यो वलयश्चैव दण्डभेदाश्च दुर्ज्जया ।
अतिक्रान्त प्रतिक्रान्त कक्षाभ्याञ्चैकपक्षत ॥
अतिक्रान्तस्तु पक्षाभ्यां त्रयोऽन्ये तद्विपर्य्यये ।
पक्षोरस्यैरतिक्रान्त प्रतिष्ठोऽन्यो विपर्य्यय ॥
स्थूणापक्षो धनुष्पक्षो द्विस्थूणो दण्ड ऊर्द्ध्वग ।
द्विगुणोऽन्तस्त्वतिक्रान्तपक्षोऽन्यस्य विपर्य्यय ॥
द्विचतुर्द्दण्ड इत्येते ज्ञेया लक्षणत क्रमात् ।
गोमूत्रिका हि सञ्चारी शकटो मकरस्तथा ॥")

प्रकाण्ड । अश्व । कोण । मन्थान । सैन्यम् । कार्ण्ण । दाँड़ी इति भाषा । मानभेद । काठा इति भाषा । ("हस्तैश्चतुर्भिर्भवतीह दण्ड ॥" इति लीलावती ॥) चण्डांशो पारिपार्श्विक । (यथा, महाभारते । ३ । ३ । ६८ ।

"दे च तेऽनुचरा कर्म्म मारोयान्तेऽनुमाभिता ।
माठरोऽदण्डनायाद्वालोकान् षष्टोऽव्यविष्टमाम ॥")

यम । अभिमान । इति मेदिनी । डे, १६ । यम-

मेदः । इति मेदिनी ॥ दण्डाकारावयुहः । इति
रामायणम् ॥ (यथा, हरिवंशे । १० । २२ ।
"दण्डपाणिरिव दण्डधीति गुरावय ।
यथकार महात्मा वै दण्डकारण्यमुत्तमम् ॥"
कोणवनुरस्त्रयोग्रयन्तीय यवामत्वाद-
पुनर्विशिव । यथा, महाभारते ।१।१७३।
"कोपदण्डोति यथाख यथापरत्वोऽयुर ।
दण्ड प्रदभिषिद्धाय च पायोतृपति पिती ॥"
विष्णु । यथा महाभारते । १३ । १४९ । १०२ ।
"महाहरो महर्षिरो दण्डो दमयिता दम ॥"
महादेव । यथा तत्रैव । १३ । १७ । १६ ।
"प्रचण्डाय दण्डाय महाघोरप्रयाय च ॥")
काल्पेयरलस्य प्रमाख यथा,—
"वटपत्रं मार्गमिल्लोकं ममोरं चतुरहृतम् ।
ताबमात्रे प्रादेशस्य कुलेष चतुरहूते ।
चायन्तरमूर्ध मार्गं तनकालं दण्डमेव च ॥"
इति मत्स्यपुराणे प्रमाणलक्षणम् ॥ ० ॥
अन्धार्थ प्रति दण्डोदते दण्डनिपातने च दोषो
यथा, प्रायश्चित्ततत्त्वे ।
विप्रक्रोदने प्राज्ञापत्यं विप्रपाते ॥"
"कौटव्ये दण्डा यथा —
लोभात्मोहाद्भयाल्लोभात् कामात् क्रोधात्तथैव च ।
अज्ञानाद्वालभावाच्च साक्ष्यं वितथमुच्यते ॥
एषामन्यतमे स्थाने य साक्ष्यमनृतं वदेत् ।
तस्य दण्डविशेषांस्तु प्रवक्ष्याम्यनुपूर्वशः ॥
लोभात् सहस्रं दण्ड्यस्तु मोहात् पूर्वन्तु साह-
सम् ।
भयाद्द्वौ मध्यमौ दण्डौ मैत्रात् पूर्वं चतुर्गुणम् ।
कामाद्दशगुणं पूर्वं क्रोधात्तु त्रिगुणं परम् ।
अज्ञानाद्द्वे शते पूर्णे बालिश्याच्छतमेव तु ॥
एतानाहुः कौटसाक्ष्ये प्रोक्तान् दण्डान् मनीषिभिः ।
धर्मस्याव्यभिचारार्थमधर्मनियमाय च ॥
कौटसाक्ष्यन्तु कुर्वाणान् त्रीन् वर्णान् प्रवासये-
नृपः ।
प्रवासयेद्दण्डयित्वा ब्राह्मणन्तु विवासयेत् ॥ ० ॥
दण्डस्य स्थानानि यथा,—
दशस्थानानि दण्डस्य मनुः स्वायम्भुवोऽब्रवीत् ।
त्रिषु वर्णेषु यानि स्युरक्षतो ब्राह्मणो व्रजेत् ॥
उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् ।
चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च ॥
अनुबन्धं परिज्ञाय देशकालौ च तत्त्वतः ।
सारापराधौ चालोक्य दण्डं दण्ड्येषु पातयेत् ॥"
अधर्मदण्डने दोषा यथा,—
अधर्मदण्डनं लोके यशोघ्नं कीर्तिनाशनम् ।
अस्वर्ग्यञ्च परत्रापि तस्मात्तत् परिवर्जयेत् ॥
अदण्ड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोति नरकञ्चैव गच्छति ॥ ० ॥
दण्डस्य प्रयोगार्थं क्रमो यथा,—
वाग्दण्डं प्रथमं कुर्याद्धिग्दण्डं तदनन्तरम् ।
तृतीयं धनदण्डन्तु वधदण्डमतः परम् ।
वधेनापि यदा त्वेतान्निग्रहीतुं न शक्नुयात् ।
तदैषु सर्वमप्येतत् प्रयुञ्जीत चतुष्टयम् ॥

दण्डस्य भेदा यथा,—
मन्वाद्यैर्हि स्मृतो वापि प्रथमं साहसं स्मृतम् ।
मध्यमं पञ्च विज्ञेयं सहस्रन्त्वेव चोत्तमम् ॥
अशीति दिने पञ्चाशति प्रथमं प्रतमर्हति ।
मध्यमे त्रिगुण दण्डमेतदुत्तमसाहसम् ॥ ० ॥
दोषविशेषकन्यादाने दण्डो यथा,—
यस्तु दोषवतीं कन्यामनाख्याय प्रयच्छति ।
तस्य कुर्यान्नृपो दण्डं स्वयं षण्णवतिं पणान् ॥
अकन्येति च यः कन्यां ब्रूयाद्द्वेषेण मानवः ।
स शतं प्राप्नुयाद्दण्डं तस्या दोषमदर्शयन् ॥ ० ॥
गवादीनां प्रहरणार्थं दण्डो यथा,—
यदि दीने परित्यक्ते सामात्योऽपि च वा नृपः ।
स पाण प्रयत्नवान् विवादान् धारयेत् पशून् ॥
चौर्यादिपरीमाणविवादे दण्डा यथा —
दीयमानमकर्माणमागमाश्च यश्च च ।
सामन्तप्रभवो दोषः कोऽयमायुधविनिश्चयः ।
सामन्ताश्चेत्कृषा ब्रूयुः सेतौ विवदतां नृणाम् ।
सर्वे पृथक् पृथग्दण्ड्या राज्ञा मध्यमसाहसम् ॥
मर्षे यद्गृहारामे क्षेत्रे वा भीषया हरन् ।
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्विशतो दमः ॥ ० ॥
वाक्पारुष्ये दण्डा यथा,—
शतं ब्राह्मणमाक्रुश्य क्षत्रियो दण्डमर्हति ।
वैश्योऽप्यर्द्धशतं द्वे वा शूद्रस्तु वधमर्हति ॥
पञ्चाशद्ब्राह्मणो दण्ड्यः क्षत्रियस्याभिशंसने ।
वैश्ये स्यादर्द्धपञ्चाशच्छूद्रे द्वादशको दमः ॥
समवर्णे द्विजातीनां द्वादशैव व्यतिक्रमे ।
वादेष्ववचनीयेषु तदेव द्विगुणं भवेत् ॥
एकजातिर्द्विजातींस्तु वाचा दारुणया क्षिपन् ।
जिह्वायाः प्राप्नुयाच्छेदं जघन्यप्रभवो हि सः ॥
नामजातिग्रहं त्वेषामभिद्रोहेण कुर्वतः ।
निक्षेप्योऽयोमयः शङ्कुर्ज्वलन्नास्ये दशाङ्गुलः ॥
धर्मोपदेशं दर्पेण विप्राणामस्य कुर्वतः ।
तप्तमासेचयेत्तैलं वक्त्रे श्रोत्रे च पार्थिवः ॥
श्रुतं देशञ्च जातिञ्च कर्म शारीरमेव च ।
वितथेन ब्रुवन् दर्पाद्दाप्यः स्याद्द्विशतं दमम् ॥
काणं वाप्यथवा खञ्जमन्यं वापि तथाविधम् ।
तथ्येनापि ब्रुवन् दाप्यो दण्डं कार्षापणावरम् ॥
मातरं पितरं जायां भ्रातरं तनयं गुरुम् ।
आक्षारयञ्छतं दाप्यः पन्थानं चाददद्गुरोः ॥
ब्राह्मणक्षत्रियाभ्यान्तु दण्डः कार्यो विजानता ।
ब्राह्मणे साहसः पूर्वः क्षत्रिये त्वेव मध्यमः ॥
विट्शूद्रयोरेवमेव स्वजातिं प्रति तत्त्वतः ।
छेदवर्जं प्रणयनं दण्डस्येति विनिश्चयः ॥ ० ॥
दण्डपारुष्ये दण्डा यथा,—
येन केनचिदङ्गेन हिंस्याच्चेच्छ्रेष्ठमन्त्यजः ।
छेत्तव्यं तत्तदेवास्य तन्मनोरनुशासनम् ॥
पाणिमुद्यम्य दण्डं वा पाणिच्छेदनमर्हति ।
पादेन प्रहरन् कोपात् पादच्छेदनमर्हति ॥
सहासनमभिप्रेप्सुरुत्कृष्टस्यापकृष्टजः ।
कट्यां कृताङ्को निर्वास्यः स्फिचं वास्यावकर्त्तयेत् ।
अवनिष्ठीवतो दर्पाद् द्वावोष्ठौ छेदयेन्नृपः ।
अवमूत्रयतो मेढ्रमवशर्द्धयतो गुदम् ॥

केशेषु गृह्णतो हस्तौ छेदयेदविचारयन् ।
पादयोर्दाढिकायाञ्च ग्रीवायां वृषणेषु च ॥
त्वग्भेदकः शतं दण्ड्यो लोहितस्य च दर्शकः ।
मांसभेत्ता तु षण्णिष्कान् प्रवास्यस्त्वस्थिभेदकः ॥
वनस्पतीनां सर्वेषामुपभोगो यथा यथा ।
तथा तथा दमः कार्यो हिंसायामिति धारणा ॥
मनुष्याणां पशूनाञ्च दुःखाय प्रहृते सति ।
यथा यथा महद्दुःखं दण्डं कुर्यात्तथा तथा ॥
अङ्गावपीडनायाञ्च व्रणशोणितयोस्तथा ।
समुत्थानव्ययं दाप्यः सर्वं दण्डमथापि वा ॥
द्रव्याणि हिंस्याद्यो यस्य ज्ञानतोऽज्ञानतोऽपि वा ।
स तस्योत्पादयेत्तुष्टिं राज्ञो दद्याच्च तत्समम् ॥
चर्मचार्मिकभाण्डेषु काष्ठलोष्ठमयेषु च ।
मूल्यात् पञ्चगुणो दण्डः पुष्पमूलफलेषु च ॥
यानस्य चैव यातुश्च यानस्वामिन एव च ।
दशातिवर्त्तनान्याहुः शेषे दण्डो विधीयते ॥
छिन्ननास्ये भग्नयुगे तिर्य्यक्प्रतिमुखागते ।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च ॥
छेदने चैव यन्त्राणां योक्त्ररश्म्योस्तथैव च ।
आक्रन्दे चाप्यपैहीति न दण्डं मनुरब्रवीत् ॥
यत्रापवर्त्तते युग्यं वैगुण्यात् प्राजकस्य तु ।
तत्र स्वामी भवेद्दण्ड्यो हिंसायां द्विशतं दमम् ॥
प्राजकश्चेद्भवेदाप्तः प्राजको दण्डमर्हति ।
युग्यस्थाः प्राजकेऽनाप्ते सर्वे दण्ड्याः शतं शतम् ॥
स चेत्तु पथि संरुद्धः पशुभिर्वा रथेन वा ।
प्रमापयेत् प्राणभृतस्तत्र दण्डो विचारितः ॥
मनुष्यमारणे क्षिप्रं चौरवत् किल्बिषं भवेत् ।
प्राणभृत्सु महत्स्वर्द्धं गोगजोष्ट्रहयादिषु ॥
क्षुद्रकाणां पशूनाञ्च हिंसायां द्विशतो दमः ।
पञ्चाशत्तु भवेद्दण्डः शुभेषु मृगपक्षिषु ॥
गर्द्दभाजाविकानाञ्च दण्डः स्यात् पञ्चमाषकः ।
माषकस्तु भवेद्दण्डः श्वशूकरनिपातने ॥
भार्या पुत्रश्च दासश्च शिष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥
पृष्ठतस्तु शरीरस्य नोत्तमाङ्गे कथञ्चन ।
अतोऽन्यथा तु प्रहरन् प्राप्तः स्याच्चौरकिल्बिषम् ॥
चौर्य्ये दण्डविशेषा,—
यस्तु रज्जुं घटं कूपाद्धरेद्भिन्द्याच्च यः प्रपाम् ।
स दण्डं प्राप्नुयान्माषं तच्च तस्मिन् समाहरेत् ॥
धान्यं दशभ्यः कुम्भेभ्यो हरतोऽभ्यधिकं वधः ।
शेषेऽप्येकादशगुणं दाप्यस्तस्य च तद्धनम् ॥
तथा धरिममेयानां शतादभ्यधिके वधः ।
सुवर्णरजतादीनामुत्तमानाञ्च वाससाम् ॥
पञ्चाशतस्त्वभ्यधिके हस्तच्छेदनमिष्यते ।
शेषे त्वेकादशगुणं मूल्याद्दण्डं प्रकल्पयेत् ॥
पुरुषाणां कुलीनानां नारीणाञ्च विशेषतः ।
मुख्यानाञ्चैव रत्नानां हरणे वधमर्हति ॥
महापशूनां हरणे शस्त्राणामौषधस्य च ।
कालमासाद्य कार्यञ्च राजा दण्डं प्रकल्पयेत् ॥
गोषु ब्राह्मणसंस्थासु छुरिकायाश्च भेदने ।
पशूनां हरणे चैव सद्यः कार्य्योऽर्द्धपादिकः ॥
सूत्रकार्पासकिण्वानां गोमयस्य गुडस्य च ।

दधः क्षीरस्य तक्रस्य पानीयस्य तृणस्य च ।
वेणुवैदलभाण्डानां लवणानां तथैव च ।
मृण्मयानाञ्च हरणे मृदो भस्मन एव च ॥
मत्स्यानां पक्षिणाञ्चैव तैलस्य च घृतस्य च ।
मांसस्य मधुनश्चैव यच्चान्यत् पशुसम्भवम् ॥
अन्येषाञ्चैवमादीनां मद्यानामोदनस्य च ।
पक्वान्नानाञ्च सर्व्वेषां तन्मूल्याद्द्विगुणो दमः ॥
पुष्पेषु हरिते धान्ये गुल्मवल्लीनगेषु च ।
अन्येष्वपरिपूतेषु दण्डः स्यात् पञ्च कृष्णलः ।
परिपूतेषु धान्येषु शाकमूलफलेषु च ॥
निरन्वये शतं दण्डः सान्वयेऽर्द्धशतं दमः ।
स्यात् साहसं त्वन्वयवत् प्रसभं कर्म्म यत् कृतम् ॥
निरन्वयं भवेत् स्तेयं हृत्वापव्ययते च यत् ।
यस्त्वेतान्युपकॢप्तानि द्रव्याणि स्तेनयेन्नरः ॥
तमाद्यं दण्डयेद्राजा यश्चाग्निं चोरयेद्गृहात् ।
येन येन यथाङ्गेन स्तेनो नृषु विचेष्टते ।
तत्तदेव हरेत्तस्य प्रत्यादेशाय पार्थिव ॥”* ॥
परदारहरणे दण्डो यथा,—
“परदाराभिमर्षेषु प्रवृत्तान् नॄन्महीपतिः ।
उद्वेजनकरैर्दण्डैश्छिन्नयित्वा प्रवासयेत् ॥
परस्य पत्न्या पुरुषः सम्भाषां योजयन् रहः ।
पूर्व्वमाक्षारितो दोषैः प्राप्नुयात् पूर्व्वसाहसम् ॥
परस्त्रियं योऽभिवदेत् तीर्थेऽरण्ये वनेऽपि वा ।
नदीनामपि सम्भेदे स सङ्ग्रहणमाप्नुयात् ॥
उपचारक्रिया केलिः स्पर्शो भूषणवाससाम् ।
सहखट्वासनञ्चैव सर्व्वं सङ्ग्रहणं स्मृतम् ॥
स्त्रियं स्पृशेददेशे यः स्पृष्टो वा मर्षयेत्तया ।
परस्परस्यानुमते सर्व्वं सङ्ग्रहणं स्मृतम् ।
अब्राह्मणः सङ्ग्रहणे प्राणान्तं दण्डमर्हति ॥
न सम्भाषां परस्त्रीभिः प्रतिषिद्धः समाचरेत् ।
निषिद्धो भाषमाणस्तु सुवर्णं दण्डमर्हति ॥
नैष चारणदारेषु विधिर्नात्मोपजीविषु ।
सज्जयन्ति हि ते नारीर्निगूढाश्चारयन्ति च ॥
किञ्चिदेव तु दाप्यः स्यात् सम्भाषां ताभिराचरन् ।
योऽकामां दूषयेत् कन्यां स सद्यो वधमर्हति ॥
सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः ।
कन्यां भजन्तीमुत्कृष्टं न किञ्चिदपि दापयेत् ॥
जघन्यं सेवमानान्तु संयतां वासयेद्गृहे ।
उत्तमां सेवमानस्तु जघन्यो वधमर्हति ॥
शुल्कं दद्यात् सेवमानः समामिच्छेत् पिता यदि ।
अभिषह्य तु यः कन्यां कुर्य्याद्दर्पेण मानवः ॥
तस्याशु कर्त्त्ये अङ्गुल्यौ दण्डञ्चार्हति षट्शतम् ।
सकामां दूषयंस्तुल्यो नाङ्गुलिच्छेदमाप्नुयात् ।
द्विशतन्तु दमं दाप्यः प्रसङ्गविनिवृत्तये ॥
कन्यैव कन्यां या कुर्य्यात्तस्याः स्याद्द्विशतो दमः ।
शुल्कञ्च द्विगुणं दद्याच्छिफाश्चैवाप्नुयाद्दश ॥
या तु कन्यां प्रकुर्य्यात् स्त्री सा सद्यो मौण्ड्यमर्हति ।
अङ्गुल्योरेव वा च्छेदं खरेणोद्वहनं तथा ॥
भर्त्तारं लङ्घयेद्या तु स्त्री ज्ञातिगुणदर्पिता ।
तां श्वभिः खादयेद्राजा संस्थाने बहुसंस्थिते ॥
पुमांसं दाहयेत् पापं शयने तप्त आयसे ।
अभ्यादध्युश्च काष्ठानि तत्र दह्येत पापकृत् ॥
संवत्सराभिशस्तस्य दुष्टस्य द्विगुणो दमः ।
व्रात्यया सह संवासे चाण्डाल्या तावदेव तु ॥
शूद्रो गुप्तमगुप्तं वा द्वैजातं वर्णमावसन् ।
अगुप्तमङ्गसर्व्वस्वैर्गुप्तं सर्व्वेण हीयते ॥
वैश्यः सर्व्वस्वदण्डः स्यात् संवत्सरनिरोधतः ।
सहस्रं क्षत्रियो दण्ड्यो मौण्ड्यं मूत्रेण चार्हति ।
ब्राह्मणीं यद्यगुप्तान्तु गच्छेतां वैश्यपार्थिवौ ।
वैश्यं पञ्चशतं कुर्य्यात् क्षत्रियन्तु सहस्रिणम् ॥
उभावपि तु तावेव ब्राह्मण्या गुप्तया सह ।
विप्लुतौ शूद्रवद्दण्ड्यौ दग्धव्यौ वा कटाग्निना ॥
सहस्रं ब्राह्मणो दण्ड्यो गुप्तां विप्रां बलाद्व्रजन् ।
शतानि पञ्च दण्ड्यः स्यादिच्छन्त्या सह सङ्गतः ॥
मौण्ड्यं प्राणान्तिको दण्डो ब्राह्मणस्य विधीयते ।
इतरेषान्तु वर्णानां दण्डः प्राणान्तिको भवेत् ॥
वैश्यश्चेत् क्षत्रियां गुप्तां वैश्यां वा क्षत्रियो
व्रजेत् ।
यो ब्राह्मण्यामगुप्तायां तावुभौ दण्डमर्हतः ॥
सहस्रं ब्राह्मणो दण्डं दाप्यो गुप्ते तु ते व्रजन् ।
शूद्रायां क्षत्रियविशोः साहस्रो वै भवेद्दमः ।
क्षत्रियायामगुप्तायां वैश्ये पञ्चशतं दमः ॥
मूत्रेण मौण्ड्यमृच्छेत्तु क्षत्रियो दण्डमेव वा ।
अगुप्ते क्षत्रियावैश्ये शूद्रां वा ब्राह्मणो व्रजन् ।
शतानि पञ्च दण्ड्यः स्यात् सहस्रन्त्वन्त्यज-
स्त्रियम् ॥ ० ॥
ऋत्विजं यस्त्यजेद्याज्यो याज्यञ्चर्त्विक् त्यजेद्
यदि ।
शक्तं कर्म्मण्यदुष्टञ्च तयोर्दण्डः शतं शतम् ॥
न माता न पिता न स्त्री न पुत्रस्त्यागमर्हति ।
त्यजन्नपतितानेतान् राज्ञा दण्ड्यः शतानि षट् ॥”
इति मनुः ॥ ० ॥
दण्डस्य मर्म्म यथा, युक्तिकल्पतरुः ।
“दण्डः संरक्षते धर्म्मं तथैवार्थं विधानतः ।
कामं संरक्षते यस्मात् त्रिवर्गो दण्ड उच्यते ॥
राजदण्डभयाल्लोकाः पापाः पापं न कुर्व्वते ।
यमदण्डभयादेके परलोकभयात्तथा ॥
दण्डश्चेन्न भवेल्लोके विभजन् साध्वसाधु वा ।
शूले मत्स्यानिवापक्ष्यन् दुर्ब्बलान् बलवत्तराः ॥
अपराधेषु भूपालो दण्डं कुर्य्याद्यथाविधि ।
अन्यथाकरणात्तस्मात् राजा भवति किल्विषी ॥
विरुद्धमपि वदन्तो दूता दण्ड्या न भूभृता ।
दूतहन्ता तु नरकमाविशेत् सचिवैः सह ॥
विपन्नवचनाद्दूतो दण्डं न चार्हति ।
विपन्नवचनाद्दण्डः स्वामिनं नरकं नयेत् ॥”
दण्डक, पुं स्त्री, (दण्ड इव कायतीति । कै + कः ।) छन्दोविशेषः । छन्दोभेदः । इत्यमरटीकायां रायमुकुटः ॥ अस्य विवरणं छन्दःशब्दे द्रष्टव्यम् ॥ (दण्डो दण्डः । “दण्डे ।” ५ । ३ । ८६ । इति कन् ।) पुरदण्डकः । सोँटा इति भाषा ॥ पुं, इक्ष्वाकुपुत्रः । यथा, भागवते । ९ । ६ । ४ ।
“व्रजतस्तु मनोर्वंशे दण्डाकृष्टीकृतः सुतः ।
तस्य पुत्रशतज्येष्ठो विकुक्षिनिमिदण्डकाः ॥”
एतन्नृपनिवेशस्थानञ्च दण्डकारण्यमिति ख्यातम् ॥
यथा, रामायणे । १ । १ । ४० ।
“रामस्तु पुनरालक्ष्य नागरस्य जनस्य च ।
तथागमनमेकाग्रो दण्डकान् प्रविवेश ह ॥”)
दण्डकन्दकः, पुं (दण्डवत् कन्दो मूलं यस्य । कप् ।) धरणीकन्दः । इति राजनिर्घण्टः ॥
दण्डका, स्त्री, (दण्डक + स्त्रीत्वविवक्षायां टाप् ।) वनस्थानम् । दण्डकारण्यम् । इति जटाधरः ॥ (यथा, रामायणे । २ । ३० । ३९ ।
“मम सन्नामति चेते ! नेतुं त्वां दण्डकावनम् ।
प्रविष्यामीति या त्वं मामश्रुयास्तु सुनिश्चिता ॥”)
दण्डकाकः, पुं (दण्डो यमदण्ड इव काकः । अशुभसूचकत्वादस्य तथात्वम् ।) द्रोणकाकः । इति हेमचन्द्रः ॥
दण्डढक्का, स्त्री, (दण्डताड्यमाना ढक्का ।) वाद्यविशेषः । दामामा इति नागरा इति च भाषा । तत्पर्य्यायः । नाली २ घटी ३ याम नाली ४ यमेढका ५ यामघोषः ६ । इति त्रिकाण्डशेषः ॥ दमामः ७ दुन्दुभिः ८ दुन्दु ९ गभीरिका १० । इति शब्दरत्नावली ॥
दण्डताम्री, स्त्री, (दण्डेन ताड्यमाना ताम्री ताम्रनिर्म्मितवाद्यम् ।) ताम्रीवाद्यम् । इति शब्दरत्नावली ॥
दण्डधरः, पुं, (दण्डस्य धरः । दण्डं धारयति । धृञ् धारणे + पचाद्यचि विवक्षिते । इत्युज्ज्वलदत्तः । ५।२१२ ।) यमः । इत्यमरः । १।१।६२ ॥ (यथा राजतरङ्गिण्याम् । ४ । ६५९ ।
“प्रचण्डदण्डतां दण्ड सख्या दण्डधराधिप ।
अकाण्डदण्डपाताय ययौ दण्डधरान्तिकम् ॥”)
राजा । इति जटाधरः ॥ (यथा, रघुः । ९ । ३ ।
“ध्वजनिपूरणसमर्थपतितं तं
समशुरं मनुदण्डधरान्वयम् ॥”)
त्रि, दण्डधारकः ॥ (शासकः । यथा, महाभारते । १२ । ५३ । ४३ ।
“एवमेतावता कार्य्यं नात्र दण्डधरस्तव ॥”
चतुर्थोपायप्रयुक्तः । यथा, भागवते । ४।२१।२२ ।
“अयं दण्डधरो राजा प्रजानामिह योजितः ॥”)
दण्डधारः पुं (दण्डं धरतीति । धृ + “कर्म्मण्यण् ।” ३ । २ । १ । इत्यण् ।) धर्म्मराजः । (यथा, गो° रामायणे । २ । ८८ । ७ ।
“उदीच्याश्च प्रतीच्याश्च दाक्षिणात्याश्च केवलाः ।
दण्डधाराश्च सततं राज्ञामनुचरास्तु ते ॥”)
प्रेताधिपः । इति मेदिनी । रे २९६ ॥ (धृतराष्ट्रपुत्रविशेषः । स तु क्रोधवशगणासुरस्यांशेन जातः । यथा, महाभारते ।१।६७।४८।
“क्रोधवर्द्धन इत्येव यस्तथा परिकीर्त्तितः ।
दण्डधार इति ख्यातः सोऽभवन्मनुजेश्वरः ॥”
एतद्राजभ्रातृविशेषः । यथा तत्रैव सम्भवपर्व्वणि । १ । ६७ । १२ ।
“विषहो बलवी माथी दण्डधारो बृहत्पद ॥”

नि, रक्तवर्ण । (यथा, राजतरङ्गिण्याम् । ३ । १ ८ ।
"रक्तधारे सवि घोरे । विनिवेशं प्रयाति । का वै देवी सा रक्ता मातरः ।")

रक्तपायिन्, पुं, (रक्तं शरीरं चतुर्थीयाय यत पाति । पी + णिनि ।) जलौका । स चतुरङ्ग-बलाधक्ष । इति शब्दरत्ना । १ । १८८ ।
(यथा, राजतरङ्गिण्याम् । ७ । ८९८ ।
"कन्दर्पे कारुभङ्गायां निषादी वद्धयोगिनी । क्षुपदं राजपुरीं राजा ससदरक्तपायकम् ।")

रक्तयोनि, स्त्री, (रक्तेन योनिरस्याः यस्या वा । यद्वा, रक्ता योनिर्यस्याः । यो + यग्नौदि शत्रे वा क्तिन् ।) अपस्मारम् । इत्यमरः । १ । ६ । ९ । तत्र स्त्रीणामप्रयोनौ योनिदोषाद् । इति भरतः ।
तस्य विशेषलक्षणं यथा,—
"रक्तेन योनौ दीनरक्तं वदन्ति वा पुनः ।
रक्तयोनिरिति ख्याता योनौ कामविवर्धते ॥
तत्र रक्तगन्धतयाक्षयायवर्णादिनिम् ।
तद्यथा —
"तस्या यामगन्धयाणं ब्रजचर्ये गुडद्रुमम् ।
यत्र मर्मान्तदेशाद्यै कामकेलीविवर्धिता ॥
विकस इति विरुपा, मम इव नयनपुरा ।
चतुर्थी योनि रक्ते च एव सर्वे एकान्तगुह्य ॥
योगत्वादि विचार्याऽन्य योनि मार्गे रक्तजा ।
आस इति स्थावरे विवर्तिन रक्तजा ॥
कामा दिव्यस्य कामकामुत्रायां रक्तैव च ।
महायोग कारकेरेव वहुधर्मो योनिश्च भागे ॥
कदी कार्मोनिवदी चैव दर्शं च सर्वतंत्र ॥
रक्तयोनिरिव विपुला विद्यन्ताश्च निर्दिता ॥
कामाद्रभ्या प्रसिद्धी रावणुमन्त्र सर्वनाम् ।
नारच विन्दयोनाय प्रविधि एवानि ॥
तन्मध्येऽन्यस्य तनौ रक्तस्य मातिव ।
उक्तेषु । मनसो नाम काङ्क्षेत्र महुमाङ्गना ॥
रक्तस्य वर्धनं रूनवशया मैदाम एव च ।
विमनश्चैव मकाव्य निद्रानिद्राय तत् वचम् ॥
कृमिस्य विविधाङ्गस्य योनौ प्रयत्नयोनिका ।
अन्न धन्वन्तरिनाम्न कार्यकेष्ट सर्ववर्धनम् ॥
कामाङ्गानस्य कथाविन्यासाय च विस्तर ॥
विकसो पर्वतकस्य मनादिवयश्च च ।
कामुत्रोऽस्य विवक्षायां कामु योनेः कतिच ।
कदर्थं प्रथमन्त्र विविधस्य वर्णितम् ॥
प्रकारश्चान्वकादस्य रक्तौघ दर्शितम्नि ।
प्रकाशेऽविवक्षयं पूर्वस्य वर्णिता ॥
एवं नाना धर्मोऽस्य कारणोऽस्य मातर ॥
विविधासवकालेव देविका इति चारम् ।
कवृजोन्नावि वर्धन । प्रकाशेऽपि कामस्य च ।
कहमालक्ष्मावेशारकथा विन्यस्त ॥
कर्ते नामवर्णा सामुद्रान्येषु वि भाग ।
काङ्क्षेवहुदलेव रक्तैः प्रकर्णितम् ॥
कामो आर्षेगुणत्वेन तथा पुष्टिमुखाय च ।
कन्दकन्दपरादानस्य कर्षिता चाक्षेपणम् ॥
कथया विंशत्यावि पुरावन्द्रवासितम् ।
पृथाय विनिवासिता विविध गुहकोयनम् ।
उद्यनाय विनाशाय गुरुर्द्धे गुयलायनम् ।
प्रत्याद्यो पश्चमे भागे तथैव मरतवम् ॥
कन्दकन्दर्पयोक तथैव कन्दकनम् ।
योग्या चावदयातस्य यशिदायत पावक ॥
तथा कालविधानस्य योगधार एव च ।
चौरैरादिकैर्योगे परशुराय योगनम् ॥
काण्डेरप्यैव प्रतिष्ठितकारके ।
योगिनुपोनित्रा च योगकर्मण्येव च ॥
द्रव्येन च नाभयो कामद्रावणेन च ।
कारादमेन भक्तस्य प्रसदोषावधेन च ।
भवाङ्गस्य च रावणस्य कामहर्षो मरणम् ।
पुत्रकामद्योगाय रावस्य च विवहम् ।
परिक्रमकालिनायां सम्यक् योक पवनम् ॥
कसमर्द्दे प्रतीपागताया चैव वशीकरणम् ।
ममहारं गुदद्वारस्य तथा कन्दकाद्रावणम् ॥
कतो कामायनोऽस्य यायो इत्यन्य भवद् ॥
कम्पनरोध गरल भूताशावासवेशनम् ।
कर्णेन्द्र कर्षि रावण यवन चातचित्रिता ॥
तथा रावणुमाचैव वैनाविनुशाय च ।
कारकाय विदध्य दुःखानाशायैव च ॥
दुर्दैविकस्य विविध इतिवैषाद्भोजिकाम् ।
मुद्रितस्य सर्वस्य प्रमादस्य च बन्धनम् ॥
कण्ठवर्णामो वनस्य तथैव च विरहनम् ।
महाम्बु विग्रहस्य माक्षिप्तो विविकतरा ॥
विवर्धिपस्य प्रमोदाय कामदेवगुह्यका ।
चतुर्थं कथमापाते तदेवाभ्यन्तरविहम् ॥
योगकादि ययोगादि कल्पकादि तथैव च ।
रक्तादि कुवयेन । कवयास्य चैव च ॥
कामधान्याकाया पार्श्वे विवश भरतवम् ॥
कामकाम्यापुराणाः योगयोगे वयमुखा ॥
पाकगर्भ्यो तयोपास रक्तपाहनेन च ।
विपक्षो पाक्रमणारम्पमहवैनैव च ॥
सर्वाणि विविधान्येव विनाशैवाय वर्णिता ।
भवमर्द प्रतीपात वैदनावाय भवनम् ।
चैत्ररथादस्य योगे कर्माभिकारणम् ॥
उदस्मापोऽस्य वनस्य नदीनामस्य वर्णना ।
मनावकाशकानां गिरीणां च दुर्गदिर ॥
करात्मनेव महात्मा धर्मदेव तथैव च ।
कमलस्य च मद्भर्न ध्यानैवादिपूजनम् ॥
विद्विवियोगस्य रात्रेर्मध्यस्य वर्णना ।
महानामकस्यैव शरीरस्य प्रकिया ॥
कामारम्भकस्यैव विमानारोहणमेव च ।
रक्तैव च चतुर्ष्वपि भवर्भ वधूरा विरः ॥
ज्ञानुबन्धे समावासी विद्या वैतनवारणा ।
प्रकल्याय गोपानं सर्वत्र हृदयविनय ॥
हस्तयोरत्नादं च । विकर्षेणावनमनम् ।
चरतां च विरावो वृष्णा रक्तपिनाकम ॥
चन्द्रविवक्षिणो पुष्टिस्य कलहस्य ।
एकत्रैव योगानां रक्षस्य च विग्रहम् ॥
प्रहरणं च वा विज्ञ रावणम् । कामद-
रतिकम ॥
रावणसंहिता चैव प्रयोगस्य दर्शनम् ।
दैवकालिनुभावस्य प्रयो कलपुर्वकम् ॥
प्रकैवाद्य कामस्य योगकामात्पूर्वकेन ।
उपायधाय विद्या च विविधा भूरिदक्षिण ॥
मन्त्रयोगक्रिया चाय मायादोषस्य वर्णन ।
पुष्प योगानामेव वशित्व विवरमकाम् ॥
दिव्यकामादिनोक्तस्य च कर्णरावकर्म च ।
तत् सर्वं रावणादपि च । नीतिशास्त्र वर्णिनम् ॥
एतत् सर्वा शुभ द्वार्वं तत च मनवा तद ।
वैवाहुमाय संपूर्णं सर्वेषां प्रयुक्तम् ॥
उपकाराय कामस्य विषमवासमवाय च ।
गच्छात वरप्रदा पुष्टिदा प्रभाविता ।
रक्तेन चर्चिता प्रिया योगरत्नकारिका ।
निधानमुख्यता साकामकुर्वदर्शनी ।"
इति महाभारते रावणम् ।
पुमो । यथा —
"सर्वावयवताशावे विप्रश्नविवासमकाः ।
रक्तमालकमाहापि रक्तयोनिरिति स्मृता ।"
इति देवीपुराणे ३८ अध्यायः ।

रक्तमोक्षण, पुं, (रक्तेन वक्तपारेव मोक्षणे यत्र ।) हारमाणः । इति शब्दरत्नावली ।

रक्तमालिन्, पुं (रक्ता माला यस्य ।) मन्त्रः ।
(यथा, भागवते । ६ । १० । १९ ।
"मरीचिवितैर्माल्यैः च कालिमालिभिः ।
महाद्मासिताश्वे रक्तमालिभिरम्बरम् ।")
कामोदयमिश्रमवर्दितः । स पूर्वमकथाय कविदेवमायां विवसाराय विवके कालो रक्तमालकरमकामदाय । यथा —
"भवक योगाम महायोनिदेवो
वरो वरार्थो विषदं यदा यदा ।
वैषम्य समाहे मम विषम भो
भवामुना रक्तवरो वराणाम ।
निवेशमहोऽपि कुरुमण्डल
सुमनोऽपि पुष्करणाव माधवि ।
मे रक्तमालोऽथ कामन्त्र पुरा
कमान् दमाद् सादि कमादयोऽपमताः ।"
"भक्तवामनोऽस्मरोगद्रक्ताद
कथामवायाव पुष्पिकायम ।
कमावर्त सामर एव ते कवेत्
तत्र भवती मम भक्त चादरात् ।
महाविषुणोऽपि विना मदेवी
मति न कामदेवति सर्वा ।
मवैः देवैः हि मन्थेन
गन्धमालो भव रक्तमालि ।"
इति कालिकायां ३९ अध्यायः ।
(महामायारूपधर्माद्योतनविशेषः । यथा
कर्णाः । १० । ४६ ।
"दृढौषधकैरण्डैः रक्तमालविवर्धितैः ।"
मयूरमालकमालिकमालियमरादिकतैः रक्तमाल्यं तार्ष्यं
चकार । यथा रामायणम् । ६ । ७ ।
"कर्णदिव्यं कमाल्यैश्च योगानि मालवमुनिवेदत
दृढयुक्ते रक्तमालैः दृढस्कन्धं शिरोऽद्रवत् ।"

दण्डधरे, त्रि । यथा, महाभारते । १।१६८।१८ ।
"भीमसेनो महाबाहुर्दण्डपाणिरिवान्तकः ।
प्रविवेश महासेनां मकरः सागरं यथा ॥")

दण्डपारुष्य, क्ली, (दण्डेन यत् पारुष्यं परुषता । दण्ड्यतेऽनेनेति दण्डो देहस्तेन यत् पारुष्यं विरुद्धाचरणमिति मिताक्षरा ।) राज्ञां व्यसनान्तर्गतव्यसनविशेषः । इति हेमचन्द्रः । ३ । ४१ ॥ अष्टादशविवादान्तर्गतविवादविशेषः । तत्तु ताडनादि । इति मनुटीकायां कुल्लूकभट्टः ॥ (यथा, मनुः । ८ । २७८ ।
"अत ऊर्द्ध्वं प्रवक्ष्यामि दण्डपारुष्यनिर्णयम् ॥")

दण्डपाल, पुं, (दण्डं शरीरं पालयतीति । पालि+अण् ।) क्षुद्रमत्स्यः । दाडिका इति भाषा । इति हारावली । १९० ॥ (दण्डेन पालयतीति । पालि+अच् ।) द्वारपालः ॥

दण्डपालक पुं, (दण्डपालवत् कायतीति । कै+कः ।) क्षुद्रमत्स्यः । इति हारावली । १९१ ॥

दण्डबालधि, पुं (दण्ड इव बालधिर्यस्य ।) हस्ती । इति शब्दरत्नावली ॥

दण्डभृत्, पुं (दण्डं चक्रभ्रमणार्थं लगुडादिकं बिभर्त्तीति । भृ+क्विप् तुगागमश्च ।) कुम्भकारः । इति त्रिकाण्डशेषः ॥ (दण्डं दमनं बिभर्त्तीति ।) दण्डधारके, त्रि ॥

दण्डयात्रा, स्त्री (दण्डाय शत्रुदमनाय या यात्रा प्रयाणम् ।) दिग्विजयः । प्रयाणम् । वरयात्रा । इति मेदिनी । रे २६५ ॥

दण्डयाम पुं (दण्डं यच्छतीति । यम+अण् ।) यमः । दिनम् । अगस्त्यः । इति मेदिनी । मे ३० ॥

दण्डरी, स्त्री, कर्कटीफलम् । इति राजनिर्घण्टः ॥

दण्डवादी, [न्] पुं, (दण्डेन वदतीति । वद+णिनि ।) द्वास्थः । द्वारपालः । इति हारावली । १२८ ॥ दण्डवक्तरि, त्रि ॥

दण्डवासी, [न्] पुं, (दण्डेन वसतीति । वस+णिनि ।) द्वारपालः । इति त्रिकाण्डशेषः ॥ ग्रामाधिकृतजनः । इति जटाधरः ॥

दण्डविष्कम्भ पुं, (दण्डं मन्थानदण्डं विष्कभ्नाति निबध्नाति यत्र । वि+स्कम्भ+अधिकरणे घञ् । "वेः स्कभ्नातेर्नित्यम्" इति षत्वम् ।) यत्र स्तम्भादौ आकर्षणार्थं रज्ज्वा दण्डो निबध्यते सः । घोलमथोंया खुँटी इति भाषा । तत्पर्य्यायः । कुवरः २ । इत्यमरः । २।९।७४ ॥

दण्डहस्तक पुं (यमविशेषत्वात् दण्ड इव हस्तः । ततः स्वार्थे कन् ।) कुटो । इति राजनिर्घण्टः ॥

दण्डपत्रा, स्त्री, (दण्ड इव दण्डो वृन्तरूपो यस्य ।) तगरपुष्पम् । इति राजनिर्घण्टः ॥

दण्डाजिन, क्ली दाम्भम् । इति शब्दार्थकल्पतरुः ॥ (कपटिनो बहिर्ब्रह्मचारिक यतीनां दण्डाजिनवत् धार्म्मिकत्वेन प्रतीयमानत्वात् तदर्थत्वोपचर्य्यते । दण्डश्च अजिनञ्च द्वयोः समाहारः । यतीनां दण्डं व्याघ्रचर्म्म च । यथा, देवीभागवते । ३ । १८ । ३१ ।
"दण्डाजिनकृता चिन्ता यथा तव वनेऽपि च ।
तथैव राज्यचिन्ता मे चिन्तयानस्य मानद ॥")

दण्डादण्डि, अ, (दण्डैश्च दण्डैश्च प्रहृत्य प्रवृत्तं युद्धम् । "इच् कर्म्मव्यतिहारे ।" ५ । ४ । १२७ । इति इच् ।) परस्परदण्डकरणकप्रहाररूपयुद्धम् । इति व्याकरणम् । लाठालाठि इति भाषा ॥

दण्डारः पुं, (दण्डं ऋच्छतीति । ऋ+अण् ।) यानम् । मत्तहस्ती । शरयन्त्रकम् । कुम्भकारस्य चक्रम् । इति मेदिनी । रे, १६८ ॥

दण्डाहत, क्ली, (दण्डेन आहतम् ।) घोलम् । इत्यमरः । २।९।५३ ॥ (दण्डेन ताडिते, त्रि ॥)

दण्डिकः पुं, (दण्डोऽस्यास्तीति । दण्ड+"अत इनिठनौ ।" ५ । २ । ११५ । इति ठन् ।) दण्डधारकः । छड़िबरदार इति आशाबरदार इति च भाषा । मत्स्यविशेषः । डानिकणा माछ इति भाषा । अस्य गुणाः । कफवायुपित्तनाशित्वम् । तिक्तत्वम् । लघुत्वञ्च । इति राजवल्लभः ॥ (दण्डदातरि नियामके त्रि । यथा, महाभारते । ६ । २१ । २६ ।
"न तत्र राजा राजेन्द्र ! न दण्डो न च दण्डिकः ।
स्वधर्म्मेणैव धर्म्मज्ञास्ते रक्षन्ति परस्परम् ॥")

दण्डिका स्त्री (दण्डपदार्थाकृतिरस्त्यस्याः । दण्ड+ठन्+टाप् ।) हारविशेषः । इति जटाधरः ॥ रज्जुः । यथा, अङ्गुल्योत्कर्षं दण्डिकां छिनत्ति । इति सुपद्मव्याकरणम् ॥ दण्डिका रज्जुरिति तट्टीकाकारः ॥

दण्डित, त्रि (दण्डः सञ्जातोऽस्येति । दण्ड+"तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५।२।३६। इति इतच् ।) कृतदण्डः । तत्पर्य्यायः । दापितः २ साधितः ३ । इति हेमचन्द्रः ॥

दण्डी, [न्] पुं, (दण्डोऽस्यास्तीति । दण्ड+"अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) जिनविशेषः । इति त्रिकाण्डशेषः ॥ (स तु कवीनामन्यतमः काव्यादर्शदशकुमारचरितादिग्रन्थप्रणेता । शङ्कराचार्य्यसमकालीनोऽयम् । यथा शङ्करविजये । १५ । १४१ ।

"स कथाभिरवन्तिषु प्रसिद्धान्
विबुधान् बाणमयूरदण्डिमुख्यान् ।
शिथिलीकृतदुर्म्मताभिमानान्
निजभाष्यश्रवणोत्सुकांश्चकार ॥")

यथा, कालिदासः ।
"जाते जगति वाल्मीके कविरित्यभिधीयते ।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥"
दमनकवृक्षः । इति राजनिर्घण्टः ॥ यमः । (यथा, महाभारते । १ । १९० । १७ ।

"स दण्डमादाय रिपुप्रमाथी
दण्डीव दण्डं निहराज उग्रम् ॥")

द्वाःस्थः । चतुर्थाश्रमी । (अस्य व्यवहारादिकं यदुक्तं मनौ । ६ । ४१ । ५८ ।

"आगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः ।
समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ।
सिद्धिमेकस्य सम्पश्यन् न जहाति न हीयते ॥
अनग्निरनिकेतः स्याद् ग्राममन्नार्थमाश्रयेत् ।
उपेक्षकोऽसङ्कुसुको मुनिर्भावसमाहितः ॥
कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥
नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्द्देशं भृतको यथा ॥
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥
अतिवादांस्तितिक्षेत नावमन्येत कञ्चन ।
न चेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित् ॥
क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ।
सप्तद्वारावकीर्णाञ्च न वाचमनृतां वदेत् ॥
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥
न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः ।
आकीर्णं भिक्षुकैर्वान्यैरागारमुपसंव्रजेत् ॥
कॢप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् ।
विचरेन्नियतो नित्यं सर्व्वभूतान्यपीडयन् ॥
अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥
अलाबुं दारुपात्रञ्च मृण्मयं वैदलं तथा ।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥
एककालं चरेद्भैक्ष्यं न प्रसज्येत विस्तरे ।
भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥
विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यात् मात्रासङ्गाद्विनिर्गतः ॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्व्वशः ।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥"

दण्डग्रहणादेव दण्डी । ब्राह्मणेष्वेव तिष्ठमानेषु दण्डग्रहणेन पथ्यवायी जायते । यदुक्तं महानिर्व्वाणतन्त्रे ११ पटले ।
"स्त्रीसार्थी यौवनग्रस्तकामार्त्तो परमेश्वरि ! ।
धर्म्मं हि विफलं तस्य स कुर्य्याद्दण्डधारणम् ।
विद्यते पितरौ देवि ! स कुर्य्याद्दण्डधारणम् ।
सत्यात् विफलं तस्य रौरवाख्यं गमिष्यति ॥
विद्यते बालभावेन यस्य कान्ता सुतस्तथा ।
सन्न्यासधारणं तस्य वृथा हि परमेश्वरि ! ॥
सगुरुञ्चापि शिष्यञ्च रौरवाख्ये प्रपद्यते ॥'
अधुनातनदण्डिनस्तु प्रायशः शङ्कराचार्य्यसम्प्रदायागताः अतस्तेषां निर्गुणब्रह्मोपासनैव परमो धर्म्मः । एते तु दण्डिनः प्रायशः परिच्छिन्नशिखाः कदाचन मात्राचारिणश्च । दण्डिनस्तु द्वारग्रहणपर्य्यन्तं भिक्षाटनादिकं विधाय दण्डान् परित्यज्य परमहंसाश्रमम्

वि, दण्डधरः । (शासकः । यथा, राजतरङ्गिण्याम् । ४ । १८ ।
“न्यक्षधारि मयि न्याय । क्षितिनेता प्रशासति । कौ वैरखेद्वयोः पारमेनायादाक्षमीदृशि ॥”)

दण्डनायकः, पुं, (दण्डं राज्ञां चतुर्थोपायं नयतीति । नी+ण्वुल् ।) सेनानी । स चतुरङ्गबलाध्यक्षः । इति हेमचन्द्रः । ३ । ३८८ ॥ (यथा राजतरङ्गिण्याम् । ७ । ९९८ ।
“कन्दर्पे कोटस्थानां भिन्नानां चलितो धृते ।
क्षुब्धम् राजपुरी राज्ञा जनचन्द्रदण्डनायकम् ॥”)

दण्डनीतिः, स्त्री, (दण्डेन नीयते या । यद्वा दण्डो नीयतेऽनयेति । नी+कर्म्मणि करणे वा क्तिन् ।) अर्थशास्त्रम् । इत्यमरः । १ । ६ । ५ ॥ तत्र चाणक्यादिप्रणीत नीतिशास्त्रम् । इति भरतः ॥ तस्य निरुक्तिर्यथा,—
“दण्डेन नीयते चेदं दण्डं नयति वा पुनः ।
दण्डनीतिरिति ख्याता त्रींल्लोकानभिवर्त्तते ॥
तच्च महत्तमशतसहस्राध्यायपरिमितम् ।
तद्यथा —
“ततोऽध्यायसहस्राणां शतं चक्रे स्वबुद्धिजम् ।
यत्र धर्म्मस्तथैवार्थः कामश्चैवाभिवर्णितः ।
त्रिवर्ग इति विख्यातो गण एष स्वयम्भुवा ।
चतुर्थो मोक्ष इत्येव पृथगर्थः पृथग्गुणः ।
मोक्षस्यापि त्रिवर्गोऽन्यः प्रोक्तः सत्त्वं रजस्तमः ।
स्थानं वृद्धिः क्षयश्चैव त्रिवर्गश्चैव दण्डजः ।
आत्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च ।
सहायाः कारणञ्चैव षड्वर्गो नीतिजः स्मृतः ।
त्रयी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ ।।
दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः ।
अमात्यरक्षा प्रणिधी राजपुत्त्रस्य लक्षणम् ।
चारश्च विविधोपायः प्रणिधिश्च पृथग्विधः ।
सामभेदप्रदानञ्च ततो दण्डश्च पार्थिव ।
उपेक्षा पञ्चमी चात्र कार्त्स्न्येन समुदाहृता ।
मन्त्रश्च वर्णितः कृत्स्नस्तथा भेदार्थ एव च ।
विभ्रमश्चैव मन्त्रस्य सिद्ध्यसिद्ध्योश्च यत् फलम् ।
सन्धिश्च त्रिविधाभिख्यो हीनो मध्यस्तथोत्तमः ।
भयसत्कारवित्ताख्यः कार्त्स्न्येन परिवर्णितः ।
यात्राकालाश्च चत्वारस्त्रिवर्गस्य च विस्तरः ।
विजयो धर्म्मयुक्तश्च तथार्थविजयश्च ह ।
आसुरश्चैव विजयस्तथा कार्त्स्न्येन वर्णितः ।
लक्षणं पञ्चवर्गस्य त्रिविधञ्चात्र वर्णितम् ।
प्रकाशश्चाप्रकाशश्च दण्डोऽथ परिशब्दितः ।
प्रकाशोऽष्टविधस्तत्र गुह्यश्च बहुविस्तरः ।
रथा नागा हयाश्चैव पादाताश्चैव पाण्डव ।।
विष्टिर्नावश्चराश्चैव देशिका इति चाष्टमम् ।
अङ्गान्येतानि कौरव्य ! प्रकाशानि बलस्य च ।
जङ्गमाजङ्गमाश्चोक्ताश्चूर्णयोगा विषादयः ।
स्पर्शे चाभ्यवहार्य्ये चाप्युपांशुस्त्रिविधः स्मृतः ।
अरिर्मित्रमुदासीन इत्येतेऽप्यनुवर्णिताः ।
कृत्स्ना मार्गगुणाश्चैव तथा भूमिगुणाश्च ह ।
आत्मरक्षणमाश्वासः स्पशानाञ्चान्ववेक्षणम् ।
कल्पना विविधाश्चापि नृनागरथवाजिनाम् ।
व्यूहाश्च विविधाभिख्या विचित्रं युद्धकौशलम् ।
उत्पातांश्च निपातांश्च सुयुद्धं सुपलायनम् ।
शस्त्राणां पायनं ज्ञानं तथैव भरतर्षभ ॥
बलव्यसनमुक्तञ्च तथैव बलहर्षणम् ।
पीडा चापत्कालश्च पत्तिज्ञानञ्च पाण्डव ॥
तथा खातविधानञ्च योगसञ्चार एव च ।
चौरैराटविकैश्चोग्रैः परराष्ट्रस्य पीडनम् ।
अग्निदैर्गरदैश्चैव प्रतिरूपककारकैः ।
श्रेणिमुख्योपजापेन वीरुधश्छेदनेन च ।
दूषणेन च नागानां आश्रयोत्पादनेन च ।
आराधनेन भक्तस्य प्रत्ययोपार्जनेन च ।
सप्ताङ्गस्य च राज्यस्य ह्रासवृद्धी समञ्जसम् ।
दूतसामर्थ्ययोगश्च राष्ट्रस्य च विवर्द्धनम् ।
अरिमध्यस्थमित्राणां सम्यक् प्रोक्तं प्रपञ्चनम् ।
अवमर्द्दः प्रतीघातस्तथा चैव बलीयसाम् ।
व्यवहारः सुसूक्ष्मश्च तथा कण्टकशोधनम् ।
श्रमो व्यायामयोगश्च त्यागो द्रव्यस्य सञ्चयः ।
अभृतानाञ्च भरणं भृतानाञ्चान्ववेक्षणम् ।
अर्थस्य काले दानञ्च व्यसने चाप्रसङ्गिता ।
तथा राजगुणाश्चैव सेनापतिगुणाश्च ये ।
कारणस्य त्रिवर्गस्य गुणदोषास्तथैव च ।
दुश्चेष्टितञ्च विविधं स्ववृत्तिश्चानुजीविनाम् ।
शङ्कितत्वञ्च सर्व्वस्य प्रमादस्य च वर्ज्जनम् ।
अलब्धलाभो लब्धस्य तथैव च विवर्द्धनम् ।
प्रदानञ्च विवृद्धस्य पात्रेभ्यो विधिवत्ततः ।
विसर्गोऽर्थस्य धर्म्मार्थं कामहेतुकमुच्यते ।
चतुर्थं व्यसनाघाते तथैवात्रानुवर्णितम् ।
क्रोधजानि तथोग्राणि कामजानि तथैव च ।
दशोक्तानि कुरुश्रेष्ठ ! व्यसनान्यत्र चैव ह ।
मृगयाक्षास्तथा पानं स्त्रियश्च भरतर्षभ ।।
कामजान्याहुराचार्य्याः प्रोक्तानीह स्वयम्भुवा ।
वाक्पारुष्यं तथोग्रञ्च दण्डपारुष्यमेव च ।
निग्रहो ह्यात्मनस्त्यागस्तथार्थदूषणमेव च ।
यन्त्राणि विविधान्येव क्रियास्तेषाञ्च वर्णिताः ।
अवमर्द्दः प्रतीघातः केतनानाञ्च भञ्जनम् ।
चैत्यद्रुमाणामत्रोक्तं रोधः कर्म्मान्तनाशनम् ।
अपस्कारोऽथ वपनं तथोपायाश्च वर्णिताः ।
पणवानकशङ्खानां भेरीणाञ्च युधिष्ठिर ! ॥
उपार्ज्जनञ्च द्रव्याणां परिमर्द्दश्च तानि षट् ।
लब्धस्य च प्रशमनं सतां चैवाभिपूजनम् ।
विद्वद्भिरेकीभावश्च दानहोमविधिज्ञता ।
मङ्गलालम्भनञ्चैव शरीरस्य प्रतिक्रिया ।
आहारयोजनञ्चैव नित्यमास्तिक्यमेव च ।
एकेन च यथोत्थेयं सत्यत्वं मधुरा गिरः ।
उत्सवानां समाजानां क्रियाः केतनजास्तथा ।
प्रत्यक्षाश्च परोक्षाश्च सर्व्वाधिकरणेष्वथ ।
वृत्तिर्भरतशार्दूल ! नित्यञ्चैवान्ववेक्षणम् ।
अदण्ड्यत्वञ्च विप्राणां युक्त्या दण्डनिपातनम् ।
अनुजीविस्वजातिभ्यो गुणेभ्यश्च समुद्भवः ।
रक्षणञ्चैव पौराणां राष्ट्रस्य च विवर्द्धनम् ।
मण्डलस्था च या चिन्ता राजन् ! द्वादशराजिका ।
द्वासप्ततिविधा चैव शरीरस्य प्रतिक्रिया ।
देशजातिकुलानाञ्च धर्म्माः समनुवर्णिताः ।
धर्म्मश्चार्थश्च कामश्च मोक्षश्चात्रानुवर्णितः ।
उपायश्चात्र लिप्सा च विविधा भूरिदक्षिण ! ॥
मूलकर्म्मक्रिया चात्र मायायोगश्च वर्णितः ।
दूषणं स्रोतसाञ्चैव वर्णितञ्च स्थिराम्भसाम् ।
यैर्यैरुपायैर्लोकस्तु न चलेदार्य्यवर्त्मनः ।
तत् सर्व्वं राजशार्दूल ! नीतिशास्त्रेऽभिवर्णितम् ।
एतत् कृत्वा शुभं शास्त्रं ततः स भगवान् प्रभुः ।
देवानुवाच संहृष्टः सर्व्वान् शक्रपुरोगमान् ।
उपकाराय लोकस्य त्रिवर्गस्थापनाय च ।
नवनीतं सरस्वत्या बुद्धिरेषा प्रभाविता ।
दण्डेन सहिता ह्येषा लोकरक्षणकारिका ।
निग्रहानुग्रहरता लोकाननुचरिष्यति ॥”
इति महाभारते राजधर्म्मः ॥

दुर्गा । यथा,—
“सदासमवसाये निकष्टविदाश्रया ।
दण्डनाद्दुष्टपापानां दण्डनीतिरिति स्मृता ॥”
इति देवीपुराणे ४५ अध्यायः ।

दण्डपांशुलः, पुं, (दण्डेन दण्डधारणेनैव पांशुलो नीचः ।) द्वारपालः । इति शब्दरत्नावली ॥

दण्डपाणिः, पुं (दण्डः पाणौ यस्य ।) यमः । (यथा, भागवते । ६ । १० । ११ ।
“यरौद्रिषेयमादिश न कश्चिनाद्देशेषु ।
तद्दण्डपाणिमार्द्दैः दण्डपाणिनिवेदनम् ॥”)
काशीस्थशिवगणविशेषः । स पूर्णभद्रयक्षपुत्त्रः हरिकेशनामा शिवमाराध्य शिवरूपेण काशीदण्डनायकत्वमवाप्तवान् । यथा,—
“भक्तस्य यक्षस्य तपोविशेषतो
हरो वराणां निकरं तदा ददौ ।
यक्षस्य धन्यस्य मम प्रियस्य भो
भवाद्भुना दण्डधरो वराक्रम ।
क्षिप्रं मदादि दुराक्रम्यकः
सुरालकः पुण्यजनाञ्च मत्प्रियः ।
त्वं दण्डनायक भव नामतोऽधुना
धन्यान् प्रजान् प्राणिसमाश्रयोत्कटः ॥”
“तदस्मात्त्वदेव वरात्तदराट्
कलामनाराध्य तवालिमाश्रयः ।
अभाजनं प्राप्य एष न चरेत्
ततः समर्थो मम भक्त आदरात् ।
मद्भक्तियुक्तोऽपि विना भवद्यां
मुक्तिं न काशीपतिसंस्थितोऽश्नुते ।
यत्तेषु देवेषु हि नायकेषु
तदग्रमाप्तो भव दण्डपाणे ! ॥”
इति काशीखण्डे ३२ अध्यायः ।
(जनमेजयवंशीयनृपविशेषः । यथा, मात्स्ये । ५० । ८७ ।
“वहीनरात्मजश्चैव दण्डपाणिर्भविष्यति ।”
अयन्तु मानवत्राधिकचत्वारिंशद्वर्षाणि राज्यं चकार । यथा, राजावल्याम् १ परिच्छेदे ।
“चत्वारिंशत् समाश्चैव षोडशाब्दानमाधिके ।
कुरुते दिवि सीमन्तो दण्डपाणिर्महीपतिः ॥”

दण्डधरे, त्रि । यथा महाभारते । १।१६६।२८।
"भीमसेनो महाबाहुर्दण्डपाणिरिवान्तकः ।
प्रविवेश महासेनां मकरः सागरं यथा ॥")

दण्डपारुष्यं, स्त्री, (दण्डेन यत् पारुष्यं परुषता । दण्ड्यतेऽनेनेति दण्डो देहस्तेन यत् पारुष्यं विरुद्धाचरणमिति मिताक्षरा ।) राज्ञां षट्-चत्वारिंशत्व्यसनविशेषः । इति हेमचन्द्रः । ३ । ४०२ ॥ अष्टादशविवादान्तर्गतविवाद-विशेषः । तत्तु ताडनादि । इति मनुटीकायां कुल्लूकभट्टः । (यथा, मनुः । ८ । ६०८ ।
"अत ऊर्द्ध्वं प्रवक्ष्यामि दण्डपारुष्यनिर्णयम् ॥")

दण्डपाल, पुं (दण्डं शरीरं पालयतीति । पालि + अण् ।) क्षुद्रमत्स्यः । दाड़िका इति भाषा । इति हारावली । १६० ॥ (दण्डेन पालयतीति । पालि + अण् ।) द्वारपाल ॥

दण्डपालकः पुं, (दण्डपालवत् कायतीति । कै + कः ।) मत्स्यभेदः । इति हारावली । १६१ ॥

दण्डपाणिः, पुं (दण्ड इव पाणिर्यस्य ।) यमः । इति शब्दरत्नावली ॥

दण्डभृत्, पुं (दण्डं चक्रभ्रमणार्थं लगुडादिकं बिभर्त्तीति । भृ + क्विप् तुगागमश्च ।) कुम्भ-कारः । इति त्रिकाण्डशेषः ॥ (दण्डं दमनं बिभर्त्तीति ।) दण्डधारके, त्रि ॥

दण्डयात्रा, स्त्री (दण्डाय शत्रुदमनाय या यात्रा प्रयाणम् ।) दिग्विजयः । प्रयाणम् । वर-यात्रा । इति मेदिनी । रे २६५ ॥

दण्डयामः, पुं (दण्डं यच्छतीति । यम + अण् ।) यमः । दिनम् । अगस्त्यः । इति मेदिनी । मे ६० ॥

दण्डरी, स्त्री, कर्कटीफलम् । इति राजनिर्घण्टः ॥

दण्डवासी, [न्] पुं, (दण्डेन वसतीति । वस + णिनि ।) दर्व्वटः । द्वारपालः । इति हारा वली । १२८ ॥ दण्डकर्त्तरि, त्रि ॥

दण्डवाही, [न्] पुं, (दण्डेन वहतीति । वह + णिनि ।) द्वारपालः । इति त्रिकाण्डशेषः । दण्डपाशाधिकरणश्च । इति जटाधरः ॥

दण्डविष्कम्भः पुं, (दण्डं मन्थानदण्डं विष्कभ्नाति निरुणद्धि यत्र । वि + स्कम्भ + अधिकरणे घञ् । पैः स्कम्नातेर्नित्यमिति षत्वम् ।) यत्र स्तम्भादौ आकर्षणार्थं रज्वा दण्डो निबध्यते सः । चौकसमोपा खुँटी इति भाषा । तत्-पर्य्यायः । कुठरः २ । इत्यमरः । २।६।७४ ॥

दण्डहस्तः पुं (वक्रविशेषत्वात् दण्ड इव हस्तः । ततः स्वार्थे कन् ।) गुरुः । इति राज निर्घण्टः ॥

दण्डहस्ता, स्त्री, (दण्ड इव हस्तो वृन्तरूपो यस्य ।) तगरपुष्पम् । इति राजनिर्घण्टः ॥

दण्डाजिन, क्ली दाम्भम् । इति शब्दार्थकल्प तरुः ॥ (कपटिनो वञ्चकप्रायस्यैव यतीनां दण्डाजिनवत् आश्रमलिङ्गत्वेन प्रतीयमानत्वात् तदर्थेऽप्यस्यैवं । दण्डश्च अजिनञ्च तयोः समाहारः । यतीनां दण्डः ज्ञातधर्म्मश्च । यथा, देवीभागवते । १ । १६ । ३१ ।
"दण्डाजिनकृता चिन्ता यथा तव वनेऽपि च ।
तथैव राज्यचिन्ता मे चिन्त्यमानस्य वा न वा ॥")

दण्डादण्डि, अ, (दण्डैश्च दण्डैश्च प्रहृत्य प्रवृत्तं युद्धम् । "इच कर्म्मव्यतिहारे ।" ५ । ४ । १२७ । इति इच् ।) परस्परदण्डकरणकप्रहाररूप-युद्धम् । इति व्याकरणम् ॥ लाठालाठि इति भाषा ॥

दण्डारः पुं, (दण्डं ऋच्छतीति । ऋ + अण् ।) वाहनम् । मत्तहस्ती । शरयन्त्रकम् । कुम्भ कारस्य चक्रम् । इति मेदिनी । रे, १६८ ॥

दण्डाहत, क्ली, (दण्डेन आहतम् ।) घोलम् । इत्यमरः ।२।६।५६ ॥ (दण्डेन ताड़िते, त्रि ॥)

दण्डिकः पुं, (दण्डोऽस्यस्येति । दण्ड + "अत इनि ठनौ ।" ५ । २ । ११५ । इति ठन् ।) दण्ड धारकः । छड़िबरदार इति आसावरदार इति च भाषा । मत्स्यविशेषः । काणिकया माछ इति भाषा । अस्य गुणाः । कफवातपित्त-नाशित्वम् । स्निग्धत्वम् । लघुत्वञ्च । इति राज-वल्लभः ॥ (दण्डदातरि नियामके च । यथा, महाभारते । ६ । ११ । २६ ।
"न तत्र राजा राजेन्द्र ! न दण्डो न च दण्डिकः ।
स्वधर्म्मेणैव धर्म्मज्ञ ! ते रक्षन्ति परस्परम् ॥")

दण्डिका स्त्री (दण्डवदायतिरस्त्यस्याः । दण्ड + ठन् + टाप् ।) हारविशेषः । इति जटाधरः ॥ रज्जुः । यथा, अङ्गुष्ठोत्कर्षं दण्डिकां छिनत्ति । इति मुग्धबोधव्याकरणम् ॥ दण्डिका रज्जुरिति तट्टीकाकारः ॥

दण्डितः, त्रि (दण्डः सञ्जातोऽस्येति । दण्ड + "तदस्य सञ्जातं तारकादिभ्य इतच् ।" ५।२।३६। इति इतच् ।) कृतदण्डः । तत्पर्य्यायः । शासितः २ शास्तिः ३ । इति हेमचन्द्रः ॥

दण्डी, [न्] पुं, (दण्डोऽस्यस्येति । दण्ड + "अत इनिठनौ ।" ५ । २ । ११५ । इति इनि ।) जिनविशेषः । इति त्रिकाण्डशेषः ॥ (स तु काव्या-दर्शनामकः काव्यादर्श-दशकुमारचरितादिग्रन्थ-प्रणेता । शङ्कराचार्य्यसमकालीनोऽयम् । यथा शङ्करविजये । १५ । १४ ।
"स कथाभिरवन्तिषु प्रसिद्धान्
विबुधान् बाणमयूरदण्डिमुख्यान् ।
शिथिलीकृतदुर्म्मताभिमानान्
निजभाष्यश्रवणोत्सुकांश्चकार ॥")
यथा, कालिदासः ।
"जाते जगति वाल्मीकौ कविरित्यभिधाभवत् ।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥"
दमनकवृक्षः । इति राजनिर्घण्टः ॥ यमः । (यथा, महाभारते । १ । १८ । १७ ।
"तं यममादाय रिपुप्रमाथी
दण्डीव दण्डं निजराज उग्रम् ॥")
द्वाःस्थः । चतुर्थाश्रमी । (अस्य व्यवहारादिक मनुक्तं यथा । ६ । ४१ ५८ ।
"अगारादभिनिष्क्रान्तः पवित्रोपचितो मुनिः ।
समुपोढेषु कामेषु निरपेक्षः परिव्रजेत् ॥
एक एव चरेन्नित्यं सिद्ध्यर्थमसहायवान् ।
सिद्धिमेकस्य सम्पश्यन्न जहाति न हीयते ॥
अनग्निरनिकेतः स्याद् ग्राममन्नार्थमाश्रयेत् ।
उपेक्षकोऽसङ्कुसुको मुनिर्भावसमाहितः ॥
कपालं वृक्षमूलानि कुचेलमसहायता ।
समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम् ॥
नाभिनन्देत मरणं नाभिनन्देत जीवितम् ।
कालमेव प्रतीक्षेत निर्द्देशं भृतको यथा ॥
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम् ।
सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ॥
अतिवादांस्तितिक्षेत नावमन्येत कञ्चन ।
न चेमं देहमाश्रित्य वैरं कुर्व्वीत केनचित् ॥
क्रुध्यन्तं न प्रतिक्रुध्येदाक्रुष्टः कुशलं वदेत् ।
सप्तद्वारावकीर्णाञ्च न वाचमनृतां वदेत् ॥
अध्यात्मरतिरासीनो निरपेक्षो निरामिषः ।
आत्मनैव सहायेन सुखार्थी विचरेदिह ॥
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया ।
नानुशासनवादाभ्यां भिक्षां लिप्सेत कर्हिचित् ॥
न तापसैर्ब्राह्मणैर्वा वयोभिरपि वा श्वभिः ।
आकीर्णं भिक्षुकैर्व्वान्यैरागारमुपसंव्रजेत् ॥
क्लृप्तकेशनखश्मश्रुः पात्री दण्डी कुसुम्भवान् ।
विचरेन्नियतो नित्यं सर्व्वभूतान्यपीडयन् ॥
अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ।
तेषामद्भिः स्मृतं शौचं चमसानामिवाध्वरे ॥
अलाबुं दारुपात्रञ्च मृण्मयं वैदलन्तथा ।
एतानि यतिपात्राणि मनुः स्वायम्भुवोऽब्रवीत् ॥
एककालं चरेद्भैक्ष्यं न प्रसज्जेत विस्तरे ।
भैक्ष्ये प्रसक्तो हि यतिर्विषयेष्वपि सज्जति ॥
विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने ।
वृत्ते शरावसम्पाते भिक्षां नित्यं यतिश्चरेत् ॥
अलाभे न विषादी स्याल्लाभे चैव न हर्षयेत् ।
प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनिर्गतः ॥
अभिपूजितलाभांस्तु जुगुप्सेतैव सर्व्वशः ।
अभिपूजितलाभैश्च यतिर्मुक्तोऽपि बध्यते ॥"
दण्डग्रहणादेव दण्डी । आश्रमादिषु विद्यमानेषु दण्डग्रहणेन प्रत्यवायो जायते । यदुक्तं महा निर्व्वाणतन्त्रे १३ पटले ।
"स्थितायां यौवनवत्कान्तायां परमेश्वरि ! ।
सर्व्वं हि विफलं तस्य यः कुर्य्याद्दण्डधारणम् ॥
जीवत पितरौ देवि ! यः कुर्य्याद्दण्डधारणम् ।
समाप्य विफलं तस्य रौरवाख्यं गमिष्यति ॥
विद्यते बालभावेन यस्य कान्ता सुतस्तथा ।
समाश्रयार्थं तस्य तथा हि परमेश्वरि ! ॥
अनुरक्तापि स्त्रियश्च रौरवाख्यं प्रपद्यते ॥"
अधुनातनदण्डिनस्तु प्रायशः शङ्कराचार्य्यसम्प्र दायानुगताः आत्मानं निर्गुणब्रह्मोपासकत्वेन परमो धर्मः । एते तु मुण्डितं मस्तकं परि त्यक्तशिखसूत्राः काषायवस्त्रधारिणश्च । दण्डिनस्तु शास्त्रसम्पन्नाः भिक्षाप्रियदर्शनाः दिक् विधाय दण्डान् परित्यज्य परमहंसाश्रममाश्र

मन्दं स्यादुत्कटविष्यन्दि दोषत्रयविवर्द्धनम् ।
यत् सम्यग् घनतां यातं व्यक्तस्वादुरसं भवेत् ।
स्वाद्वस्य गुणा ज्ञेयाः सामान्यदधिवज्जने ।
यत्तिरोहितमाधुर्य्यं व्यक्ताम्लञ्च तदम्लकम् ।
अम्लन्तु दीपनं पित्तरक्तश्लेष्मविवर्द्धनम् ।
तत्त्वम्लं दन्तरोमहर्षकण्ठादिदाहकृत् ।
अम्लञ्च दीपनं रक्तपित्तपुष्टिकरं परम् ।"
इति भावप्रकाशः ॥ * ॥
"लवणमधुरमपि शर्करासुगन्धि
कुसुमरसविहीनं नैतदश्नन्ति नित्यम् ।
न च शरदि वसन्ते नोष्णकाले न रात्रौ
न दधि कफविकारे पित्तदोषेऽपि शस्तम् ॥
त्रिकटुकयुतमेतद्दाडिमिकाचूर्णमिश्रं
कफहरमनिलघ्नं वह्निसन्धुक्षणञ्च ।
तुहिनशिशिरकाले सेवितञ्चातिपथ्यं
रचयति सुतरां तत् कान्तिमत्त्वञ्च पुंसाम् ।
दधिमधुरमीषदम्लं चाम्लञ्च चात्यम्लम् ।
यावद् यावन्मधुरं दोषहरं तावदुक्तमिदम् ।"
इति राजनिघण्टुः ॥ * ॥
"दधि यत् स्वादु तच्छेदि कफाभिष्यन्दकारकम् ।
दध्यम्लमतियद्रक्तदूषणं कफपित्तकृत् ।
स्निग्धं हि उत्कटविष्यन्दि मन्दजातं त्रिदोषकृत् ।
दधि सक्षारं रूक्षञ्च ग्राहि विष्टम्भि वातलम् ।
पीनसे चातिसारे च शीतके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ।"
इति राजवल्लभः ॥ * ॥
(ऋतुभेदे दधिविशेषगुणा यथा,—
"शारदं दधि गुर्व्वञ्च रक्तपित्तविवर्द्धनम् ।
शोथं तृष्णां ज्वरं शूलं करोति विषमज्वरम् ।
इति शारददधिगुणाः ॥ * ॥
गुरु स्निग्धञ्च मधुरं कफकृद्बलवर्द्धनम् ।
रुच्यं मेध्यञ्च हैमन्तं पुष्टिं तुष्टिविवर्द्धनम् ।
इति हैमन्तदधिगुणाः ॥ * ॥
शैशिरं लवणाम्लञ्च मधुरं गुरु रुच्यं च ।
हृद्यं बलकरं पित्तश्लेष्मापहरणं परम् ।
इति शैशिरदधिगुणाः ॥ * ॥
वासन्तं मधुरं स्निग्धं किञ्चिद्रूक्षं कफात्मकम् ।
बलवृद्धिकरं प्रोक्तं वसन्ते न प्रशस्यते ।
इति वासन्तदधिगुणाः ॥ * ॥
लघु चाम्लं भवेद्ग्रीष्मे चायुष्यं रक्तपित्तकृत् ।
शोषभ्रमपिपासाकृद्दधियुक्तं न पीडके ।
इति ग्रैष्मदधिगुणाः ॥ * ॥
वार्षिकं हितमम्लं प्रोक्तं दधि प्रशस्तं न दोषलम् ।
शोषवातश्रमान् हन्ति अमालीसारनाशनम् ।"
इति वार्षिकदधिगुणाः ॥ * ॥
"हिक्काश्वासप्रतिश्यायामातिसारे भगन्दरे ।
प्रशस्तं प्रोक्तं दधि क्षीणे लवणेन विमिश्रितम् ।
इति दधिभोजनविधिः ।" * ॥
इति हारीते प्रथमे स्थानेऽष्टमेऽध्याये ।
"रोचनं दीपनं वृष्यं स्नेहनं बलवर्द्धनम् ।
पाकेऽम्लमुष्णं वातघ्नं मङ्गल्यं बृंहणं दधि ।
पीनसे चातिसारे च शीतके विषमज्वरे ।
अरुचौ मूत्रकृच्छ्रे च कार्श्ये च दधि शस्यते ।"
"त्रिदोषं मन्दकं जातं वातघ्नं दधि शुक्रलम् ।"
इति चरके सूत्रस्थाने २७ अध्याये ।
"दधि तु मधुरमम्लमत्यम्लञ्चेति तत्कषायानुरसं स्निग्धमुष्णं पीनसविषमज्वरातिसारारोचकमूत्रकृच्छ्रकार्श्यापहं वृष्यं प्राणकरं माङ्गल्यञ्च ॥
महाभिष्यन्दि मधुरं कफमेदोविवर्द्धनम् ।
कफपित्तकृदम्लं स्यादत्यम्लं रक्तदूषणम् ।
विष्टम्भि मन्दविष्यन्दि मन्दजातं त्रिदोषकृत् ।
स्निग्धं विपाके मधुरं दीपनं बलवर्द्धनम् ।
वातापहं पवित्रञ्च दधि गव्यं रुचिप्रदम् ।
दध्याजं कफपित्तघ्नं लघु वातक्षयापहम् ।
दुर्नामश्वासकासेषु हितमग्नेश्च दीपनम् ।
विपाके मधुरं वृष्यं वातपित्तप्रसादनम् ।
बलासवर्द्धनं स्निग्धं विशेषाद्दधि माहिषम् ।
विपाके कटु सक्षारं गुरु भेदीष्टिकं दधि ।
वातमष्ठीलि कुष्ठानि क्रिमीन् हन्त्युदराणि च ।
दीपनं कफवातानां दुर्नाम्नाञ्चाधिकं दधि ।
दधि पाके च मधुरमत्यभिष्यन्दि दोषलम् ।
दीपनीयमचक्षुष्यं वाडवं दधि वातलम् ।
रूक्षमुष्णं कषायञ्च कफमात्रापहञ्च तत् ।
स्निग्धं विपाके मधुरं बल्यं सन्तर्पणं गुरु ।
चक्षुष्यमग्र्यं दोषघ्नं दधि नार्य्या गुणोत्तरम् ।
लघु पाके बलासघ्नं वीर्य्योष्णं पित्तनाशनम् ।
कषायानुरसं नाग्या दधि वर्चोविवर्द्धनम् ।
दध्नोऽन्युक्तानि यानीह गव्यादीनि पृथक् पृथक् ।
विज्ञेयमेषु सर्व्वेषु गव्यमेव गुणोत्तरम् ।
वातघ्नं कफकृत् स्निग्धं बृंहणं नातिपित्तकृत् ।
कुर्य्याद्भक्ताभिलाषञ्च दधि यत् सुपरिस्रुतम् ।
शृतात् क्षीरात्तु यज्जातं गुणवद्दधि तत् स्मृतम् ।
वातपित्तहरं रुच्यं धात्वग्निबलवर्द्धनम् ।
दध्नः सरो गुरुर्वृष्यो विज्ञेयोऽनिलनाशनः ।
वह्नेर्विधमनश्चापि कफशुक्रविवर्द्धनः ।
दधि त्वसारं रूक्षञ्च ग्राहि विष्टम्भि वातलम् ।
दीपनीयं लघुतरं सकषायं रुचिप्रदम् ।
शरद्ग्रीष्मवसन्तेषु प्रायशो दधि गर्हितम् ।
हेमन्ते शिशिरे चैव वर्षासु दधि शस्यते ।"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ।)
धारयकर्म्मरि, त्रि । इति मुग्धबोधम् ।

दधिकूर्चिका, स्त्री, (दधिजाता कूर्चिका ।) तक्रे दुग्धोष्णदुग्धे दध्यन्नसंयोगात् जाता । इति केचित् । उष्णदुग्धे दध्यम्लसंयोगात् जाता इत्यन्ये । छेना इति भाषा । अस्या गुणाः । वातनाशित्वम् । ग्राहित्वम् । रूक्षत्वम् । दुर्ज्जरत्वञ्च । इति राजवल्लभः । (पर्य्यायोऽस्याः यथा,—
"दध्ना सह पयः पक्वं यत् स्यात्तद्दधिकूर्चिका ।"
इति वैद्यकरत्नमालायाम् ।)

दधिचार, पुं, (दधि चालयति विलोडयतीति । दधि+चल+णिच्+अण् । लस्य रत्वम् ।) दधिमन्थनदण्डः । तत्पर्य्यायः । वैशाखः २ मन्थः ३ मन्थानः ४ । इति हारावली ॥ १३ ॥

दधिजं, क्ली, (दध्नो जायते इति । जन+"सप्तम्यां जनेर्डः ।" ३ । २ । ९७ । इति डः ।) नवनीतम् । इति राजनिर्घण्टः । (नवनीतशब्देऽस्य विशेषो ज्ञातव्यः ।)

दधित्थः, पुं, (दधिवर्णो रसः तिष्ठत्यस्मिन्निति । स्था + "सुपिस्थः ।" ३ । २ । ४ । इति कः । पृषोदरादित्वात् साधुः ।) कपित्थः । इत्यमरः । २ । ४ । २१ ॥ (यथा,—
"तद्वद्दधित्थबिल्वाभ्यां जम्बुमध्ये प्रपचेत् ।"
इति वाग्भटे चिकित्सितस्थाने नवमेऽध्याये ।
"दधित्थबिल्वचाङ्गेरीतक्रदाडिमसाधिता ।
पाचनी ग्राहिणी पेया सवाते पाञ्चमूलिका ।"
इति चरके सूत्रस्थाने द्वितीयेऽध्याये ।)

दधित्थाख्यः पुं, (दधित्थं आख्याति कपित्थं अनुकरोतीति । आ+ख्या+कः ।) सरलद्रवः । इति रत्नमाला । लोबान् इति भाषा ।

दधिधेनुः, स्त्री, (दधिनिर्म्मिता धेनुः ।) दानार्थं दध्यादिनिर्म्मिता धेनुः । यथा, वराहपुराणे ।
"दधिधेनोर्महाराज ! विधानं शृणु साम्प्रतम् ।
अनुलिप्ते महीभागे गोमयेन नराधिप ! ।
गोचर्म्ममात्रे तु पुनः पुष्पप्रकरशोभिते ।
कुशैरास्तीर्य्य वसुधां कृष्णाजिनकुशोत्तराम् ।
दधिकुम्भं सुसंस्थाप्य सदा धान्यचयोपरि ।
चतुर्थांशेन वत्सन्तु सौवर्णमुखमङ्कितम् ।
आच्छाद्य वस्त्रयुग्मेन पुष्पगन्धैस्तु पूजिताम् ।
नाशयाय कुलीनाय साधुवृत्ताय धीमते ।
वेदाग्निग्रन्थयुक्ताय दद्यात्तां दधिधेनुकाम् ।
पुच्छदेशोपविष्टस्तु दक्षिणाकर्णमात्रके ।
पादुकोपानहौ छत्रं दत्त्वा मन्त्रमुदीरयेत् ।
दधिकाशुतिमन्त्रेण दधिधेनुं प्रदापयेत् ।
एवं दधिमयीं धेनुं दत्त्वा राजर्षिसत्तम ! ।
एकाहारो दिनं तिष्ठेद्यश्च वृषनन्दन ! ।
दशमानो वसेद्राजन् चिरायुश्च द्विजोत्तम ! ।
दीयमानां प्रपश्यन्ति ते यान्ति परमां गतिम् ।
यत्र क्षीरवहा नद्यो यत्र पायसकर्द्दमाः ।
तत्र तत्र सिद्धाश्च गच्छन्ति येऽपरे ।
य इदं श्रावयेद्भक्त्या शृणुयाद्वापि मानवः ।
सोऽश्वमेधफलं प्राप्य विष्णुलोके स गच्छति ।"

दधिपुष्पिका, स्त्री, (दधीव शुभ्रं पुष्पमस्याः । कप् । टापि अत इत्वम् ।) श्वेतापराजिता । इति राजनिर्घण्टः ।

दधिपुष्पी, स्त्री (दधीव पुष्पमस्याः । जातित्वात् ङीष् ।) कोलशिम्बी । इति राजनिर्घण्टः ।

दधिफलः, पुं, (दधीव शुभ्रो रसः फले यस्य ।) कपित्थवृक्षः । इत्यमरः । २ । ४ । २१ ॥

दधिमण्डं पुं, (दध्नः मण्डः ।) मस्तु । इति रत्नमाला । मात् इति भाषा ।

दधिमण्डोदः पुं, (दधिमण्ड इव उदकं यस्य । उदकस्य उदादेशः ।) दधिसमुद्रः । (यथा, भागवते । ५ । १ । ३३ ।
"क्षीरोदेक्षुरसोदसुरोदघृतोदक्षीरोददधिमण्डोदशुद्धोदाः सप्त जलधयः ।") ।

दधिमुख पुं, (दधिवत् शुभ्रं मुखं यस्य ।) वानरविशेषः । स सुग्रीवश्वशुरः तस्य मधुवनपालकश्च । इति रामायणम् ॥ (यथा, महाभारते । ३ । २८२ । ७ । [वान् ॥"
'श्रीमान् दधिमुखो नाम हरिवृद्धोऽपि वीर्य्य
नागविशेषः । यथा, महाभारते । १ । ३५ । ८ ।
"सुरामुखो दधिमुखस्तथा विमलपिण्डकः ।"
अयन्तु दर्व्वीकराणां मध्ये प्रधानतमः । इति सुश्रुते कल्पस्थाने ४ अध्याये ।)

दधिमोदः, पुं, वानरः । इति त्रिकाण्डशेषः ॥

दधिस(श)क्तव, पु दध्नुपसिक्ताः सक्तवः । करम्भः । इत्यमरः । २ । ९ । ४८ ॥ दइछातु इति भाषा । नित्यबहुवचनान्तोऽयम् ॥ (यथा महाभारते । १३ । १०४ । ९१ ।
"न पाणौ लवणं विद्वान् प्राश्नीयान्न च रात्रिषु ।
दधिसक्तून् न भुञ्जीत वृथामांसञ्च वर्जयेत् ॥")

दधिसार, क्ली (दध्नः सारम् ।) नवनीतम् । इति हेमचन्द्रः । ३ । ७२ ॥

दधिस्वेद, पुं (दध्नः स्वेद ।) दधिचर । तत्पर्य्यायः । सरः २ दध्युत्तरगम् ३ कट्वरम् ४ । इति रत्नमाला ॥

दधिस्नेह, पुं, (दध्नः स्नेह इव ।) घोलम् । इति जटाधरः ॥

दधीच, पुं, दधीचिमुनिः । इति शब्दभेदप्रकाशः ॥ (यथा, महाभारते । १ । १३८ । १२ ।
"दधीचस्यास्थितो वज्रं कृतं दानवसूदनम् ॥")

दधीचि, पुं मुनिविशेषः । स अथर्व्वमुनेरौरसात् कर्द्दमकन्यायां शान्तिनाम्न्यां जातः । वृत्रवधार्थं देवैस्तस्यास्थ्ना वज्रं निर्म्मितम् । इति श्रीभागवतम् ॥ यथा —
'अतोऽस्थिभ्यो दधीचस्य निहन्तु त्रिदशद्विषः ।
तस्मात् यज्ञाद्विनिर्मुक्तो याच्यतां सुरसत्तमाः ॥
दधीचेऽस्थीनि देहीति तैर्ब्बभिगम्य याचनात् ।
तत् श्रुत्वा सहसा देवैर्याचितो मुनिभिस्तथा ॥
ददौ चास्थीनि देवेभ्यो दधीचिः सुमनास्तदा ।
प्राणायामं ततः कृत्वा देहं त्यक्त्वा शुभाक्षरान् ॥
सन्तकाशात् ययौ प्राप्तो येभ्यो नावर्त्तते पुनः ।
तस्यास्थिभिरथो शक्रः सम्प्रहृष्टमनास्तथा ॥
कारयामास दिव्यानि तानि प्रहरणान्युत ।
वज्राधिशूलचक्रञ्च परिघा विविधा गदाः ॥
विश्वकर्म्मा सुरास्त्राणि परिघाद्यायुधानि च ॥"
इति वह्निपुराणे दाधीचस्यास्थिनिर्णयनामाध्यायः ॥

दधीचास्थि, क्ली (दधीचेरस्थि ।) वज्रम् । हीरकम् । इति त्रिकाण्डशेषः ॥

दधृक् [ष्] त्रि (धृष्णोतीति । धृष प्रागल्भ्ये + "ऋत्विग्दधृगिति ।" ३ । २ । ५९ । इति क्विन् द्वित्वादिकञ्च निपात्यते ।) धृष्टः । इति त्रिकाण्डशेषः ॥ (प्रगल्भः । यथा, ऋग्वेदे । ५ । ११ । २ ।
"रातहव्यस्य सुष्टुतिं दधृक्स्तोमैर्मनामहे ॥")

दन, पुं, (ददाति जीवेभ्यः पापपुण्ययोरवश्यं ददातीति । दद दाने + बाहुलकात् नः ।) मनः । इति शब्दरत्नावली ॥

दध्याकर, पुं, (दध्नः आकर इव ।) दधिसमुद्रः । इति शब्दार्थकल्पतरुः ॥

दध्यानी, स्त्री, (दधिवत् शुभ्रतां आनयतीति । आ + नी + क्विप् ।) सुदर्शना । इति रत्नमाला ॥ सुदर्शनगुलञ्च इति भाषा । दएलए इति केचित् । मुराति इति केचित् । मदनमस्त इति हिन्दी भाषा ॥

दध्युत्तर, क्ली, (दध्नः उत्तरं शेषजातम् ।) दधिस्नेहः । इति शब्दचन्द्रिका ॥ (यथा हरिवंशे । ७८ । ६२ ।
"पयश्च सर्पिषश्चैव दध्नो दध्युत्तरस्य च ।
यथाकामं प्रदानाय भोज्यादिश्रयणाय च ॥")

दध्युत्तरग, क्ली, (दध्नः उत्तरं चरमावस्थां गच्छतीति । गम + ड ।) दधिस्नेहः । इति रत्नमाला ॥

दध्युद, पुं, (दधिरूपम् उदकं यस्य । उत्तरपदस्य च उदकस्योदादेशः ।) दधिसमुद्रः । इति जटाधरः ॥

दनु, स्त्री, काश्यपपत्नी । सा दक्षकन्या दानवमाता च । इति त्रिकाण्डशेषः ॥ (यथा, मत्स्यपुराणे ६ अध्याये ।
"काश्यपस्य प्रवक्ष्यामि पत्नीभ्यः पुत्रपौत्रकान् ।
अदितिर्दितिर्दनुश्चैव अरिष्टा सुरसा तथा ॥
सुरभिर्व्विनता तद्वत् ताम्रा क्रोधवशा इरा ।
कद्रुर्विश्वा मुनिस्तद्वत्तासां पुत्रान्निबोधत ॥"
"दनुः पुत्रशतं लेभे काश्यपाद् बलदर्पितम् ।
विप्रचित्तिः प्रधानोऽभूत् येषां मध्ये महाबलः ॥
द्विमूर्द्धा शकुनिश्चैव तथा शङ्कुशिरोधरः ।
अयोमुखः शम्बरश्च कपिलो वामनस्तथा ॥
मरीचिर्म्मघवांश्चैव इरा गर्भशिरास्तथा ।
विद्रावणश्च केतुश्च केतुवीर्य्यः शतह्रदः ॥
इन्द्रजित् सत्यजिच्चैव वज्रनाभस्तथैव च ।
एकचक्रो महाबाहुर्वज्राक्षस्तारकस्तथा ॥
असिलोमा पुलोमा च बिन्दुर्बाणो महासुरः ।
स्वर्भानुर्वृषपर्व्वा च एवमाद्या दनोः सुताः ॥"
दानवविशेषे, पुं । यथा, गौ रामायणे कबन्धस्योक्तौ । ३ । ७५ । २४ ।
"श्रियो मां मध्यमं पुत्रं दनुं नाम्ना च दानवम् ॥")

दनुज, पुं, (दनोर्जायते इति । जन + ड ।) असुरः । इत्यमरः । १ । १ । १२ ॥ (यथा, भागवते । ६ । ९ । ४ ।
"तवैव विभूतयो दितिदनुजादयश्चापि ॥")

दनुजद्विट्, [ष्] पुं (दनुजानां असुराणां द्विट् शत्रुः । यद्वा, दनुजान् द्वेष्टीति । द्विष + क्विप् ।) देवः । इति शब्दरत्नावली ॥ (दानवशत्रौ, त्रि । यथा प्रयोगरत्नमालायां शब्दप्रकरणस्यादौ ।
"नमो नन्दकुमाराय दनुजद्विषे ॥")

दनुषण्ड, पुं, (दनोः षण्डः पुत्रः ।) असुरः । इति जटाधरः ॥

दन्त, पुं, (दम + "हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन् ।" उणां । ३ । ८६ । इति तन् ।) अद्रिकटकः । कुञ्जः । इति मेदिनी । ते २१ ॥ [illegible] । इति त्रिकाण्डशेषः । चर्व्वणसाधनास्थि । दाँत इति भाषा । गर्भस्थस्य षष्ठे मासि शुक्राद्दन्तपङ्क्तिर्भवति । इति सुखबोधः ॥ तत्पर्य्यायः । रदनः २ दशनः ३ रदः ४ । इत्यमरः । २ । ६ । ९१ ॥ द्विजः ५ खदः ६ । इति शब्दरत्नावली ॥ * ॥ तत्सुखकारकौषधं यथा,—

हरितालादि ।

"हरितालं यवक्षारं पत्राङ्गं रक्तचन्दनम् ।
जाती हिङ्गुलकं लाक्षा पक्वतैलेन पेषयेत् ॥
हरीतकीकषायेण मृद्धा दन्तान् प्रवेशयेत् ।
दन्ताः सुवर्णोहिताः पुष्पश्वेता भवन्ति न संशयः ॥"

इति गारुडे १८३ अध्यायः ॥ * ॥

"शशमांसकौषधं धातक्याः कुसुमानि च ।
पिष्ट्वा तत् पयसा सार्द्धं कषायं धारयेन्मुखे ॥
स्निग्धाः श्वेताश्च दन्ताश्च भवन्ति विमलप्रभाः ॥"

इति तत्रैव १८५ अध्यायः ॥ * ॥

"मूलं गोक्षुरकस्यैव चर्व्वित्वा भौमलोहितम् ॥
दन्तकीटव्यथां गच्छेद्दन्तासुरविमर्द्दनम् ॥"

इति च गारुडे १९३ अध्यायः ॥ * ॥

दन्तजातस्य शुभाशुभफलं यथा,—
अथ जातभद्रादि । तत्र दन्तलक्षणम् ।

"जातः सदन्तः पितृमातृहन्ता
तातं निहन्यात् प्रथमे तु मासि ।
भ्राता द्वितीये सहजं तृतीये
मासि चतुर्थे शुभकारकः स्यात् ॥
मिष्टान्नभोगी सुभगः सुताढ्यो
षष्ठे सुखी पण्डितकल्पबुद्धिः ।
ततोऽधिकः स्यात् बलवान् इहगाढ्यो
मासेऽष्टमे वित्तसमैर्विहीनः ॥

सुरभतामौ नवमे ऋतुश्च दशमे तथा ।
एकादशे द्वादशे च सुखी च सुभगो भवेत् ॥
अष्टौ पुत्तलिकान् कृत्वा सुगन्धैर्गन्धकैस्तथा ।
मौलेषु संक्रमे चापि स्थापयेत् गुडपुष्पके ॥
स्नानं संक्रमणस्यापि शान्तोदकेन सम्मतम् ।
होमं विप्रार्चनञ्चैवमशुभे दन्तदर्शने ॥"

इति ज्योतिस्तत्त्वम् ॥

रतिक्रीडायां दन्तक्षतस्थानानि यथा —
"स्तनयोर्गण्डयोश्चैव ओष्ठे चैव तथाधरे ।
दन्ताघातं प्रकर्त्तव्यं कामिनीनां सुखावहम् ॥"

इति कामशास्त्रम् ॥ * ॥

अथ दन्तरोगाणां निदानादि यथा —
"शोणितं दन्तवेष्टेभ्यो यस्याकस्मात् प्रवर्त्तते ।
दुर्गन्धीनि सकृष्णानि प्रक्लेदीनि मृदूनि च ॥
दन्तमांसानि शीर्य्यन्ते पचन्ति च परस्परम् ।
शीतादो नाम स व्याधिः कफशोणितसम्भवः ॥ १ ॥
दन्तयोस्त्रिषु वा यस्य श्वयथुर्जायते महान् ।
दन्तपुप्पुटको नाम स व्याधिः कफरक्तजः ॥ २ ॥
स्रवन्ति पूयरुधिरं चला दन्ता भवन्ति च ।
दन्तवेष्टः स विज्ञेयो दुष्टशोणितसम्भवः ॥ ३ ॥
श्वयथुर्दन्तमूलेषु रुजावान् कफरक्तजः ।
लालास्रावी स विज्ञेयः शौषिरो नाम नामतः ॥
कण्डूमान् शौषिरो गदः । इति च माधवः ॥

दन्ताश्चलन्ति वेष्टेभ्यस्तालु चाप्यवदीर्य्यते ।
दन्तमांसानि पच्यन्ते मुखञ्च परितप्यते ॥
यस्मिन् स सर्व्वजो व्याधिर्म्महाशौषिरसंज्ञितः ॥ ५ ॥
दन्तमांसानि शीर्य्यन्ते यस्मिन् ष्ठीवति चाप्यसृक् ।
पित्तासृक्कफजो व्याधिर्ज्ञेयः परिदरो हि सः ॥ ६ ॥
वेष्टेषु दाहः पाकश्च ताभ्यां दन्ताश्चलन्ति च ।
आघट्टिताः प्रस्रवन्ति शोणितं दन्तवेदनाः ।
आध्मायन्ते स्रुते रक्ते मुखं पूति च जायते ।
यस्मिन्नुपकुशो नाम पित्तरक्तकृतो गदः ॥ ७ ॥
घृष्टेषु दन्तमांसेषु संरम्भो जायते महान् ।
भवन्ति दन्ताश्च चलाः स वैदर्भोऽभिघातजः ॥ ८ ॥
मारुतेनाधिको दन्तो जायते तीव्रवेदनः ।
खलिवर्द्धनसंज्ञोऽसौ जाते रुक् च प्रशाम्यति ॥ ९ ॥
हनौ हनौ प्रकुरुते वायुर्दन्तसमाश्रितः ।
करालान् विकटान् दन्तान् करालो न स सिध्यति ॥ १० ॥
हानव्ये पश्चिमे दन्ते महान् शोथो महारुजः ।
लालास्रावी कफकृतो विज्ञेयः सोऽधिमांसकः ॥ ११ ॥
दन्तमूलगता नाड्यः पञ्च ज्ञेया यथेरिताः ।
दीर्य्यमाणेष्विव रुजा यस्य दन्तेषु जायते ।
दालनो नाम स व्याधिः सदागतिनिमित्तजः ॥ १२ ॥
कृष्णश्छिद्रश्चलः स्रावी ससंरम्भो महारुजः ।
अनिमित्तरुजो वातात् स ज्ञेयः कृमिदन्तकः ॥ १३ ॥
वक्त्रं यत्र भवेद्वक्रं दन्तभङ्गश्च जायते ।
कफवातकृतो व्याधिः स भञ्जनकसंज्ञितः ॥ १४ ॥
शीतरूक्षप्रवाताम्लस्पर्शानामसहा द्विजाः ।
पित्तमारुतकोपेन दन्तहर्षः स नामतः ॥ १५ ॥
(दन्तमांसैर्मलैः सास्रैर्बाह्यान्तः श्वयथुर्गुरुः ।
सदाहरुक्स्रवेद्भिन्नः पूयास्रं दन्तविद्रधिः ॥)
मलो दन्तगतो यस्तु कफमारुतशोषितः ।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥ १६ ॥
कपालेष्विव दीर्य्यत्सु दन्तानां सैव शर्करा ।
कपालिकेति कथिता सदा दन्तविनाशिनी ॥ १७ ॥
योऽसृङ्मिश्रेण पित्तेन दग्धो दन्तस्त्वशेषतः ।
श्यावतां नीलतां वापि गतः स श्यावदन्तकः ॥" १८
इति माधवकरः ॥

दन्तक, पुं, (दन्त इव । स्वार्थे कन् ।) पर्व्वतशृङ्गम् । नागदन्तः । इति हेमचन्द्रः । ४ । १ ॥ (दन्त । इति अनुपसर्गोऽयं । भि दन्तेषु प्रचित । दन्त + इवार्थे प्रचित । ५ । ३ । ९६ । इति कन् ।)

दन्तकर्षण, पुं, (दन्तान् कर्षतीव । कृष् + ल्यु ।) जम्बीरः । इति शब्दरत्नावली ॥

दन्तकाष्ठ, क्ली, (दन्तधावनार्थं यत् काष्ठम् ।) विकङ्कतवृक्षः । इति राजनिर्घण्टः ॥ दन्तधावनार्थकाष्ठम् । तद्यथा वराहपुराणे ।
'दन्तकाष्ठस्य वक्ष्यामि समासेन प्रशस्तताम् ।
सर्व्वे कण्टकिनः पुण्याः क्षीरिणश्च यशस्विनः ॥"
महाभारते ।
"तिक्तं कषायं कटुकं सुगन्धि कण्टकान्वितम् ।
क्षीरिणो वृक्षगुल्माद्या भक्षयेद्दन्तधावनम् ॥"
निषिद्धकाष्ठानि यथा,—
"गुवाकतालहिन्तालास्तथा ताड़ी च केतकी ।
खर्ज्जूरनारिकेलौ च सप्तैते तृणराजकाः ॥
तृणराजशिरापर्णैर्यः कुर्य्याद्दन्तधावनम् ।
तावद्भवति चाण्डालो यावद्गङ्गां न पश्यति ॥"
तस्य स्थौल्यपरिमाणञ्चाह विष्णुः ।
"कनिष्ठाग्रसमं स्थौल्यं सकूर्च्चं द्वादशाङ्गुलम् ।
प्रातर्भुक्त्वा च यतवाक् भक्षयेद्दन्तधावनम् ॥"
मरीचिः ।
"द्वादशाङ्गुलन्तु विप्राणां क्षत्त्रियाणां नवाङ्गुलम् ।
अष्टाङ्गुलञ्च वैश्यानां शूद्राणान्तु षडङ्गुलम् ॥
चतुरङ्गुलमानेन नारीणां विधिरुच्यते ।
अन्तरप्रभवाणाञ्च षडङ्गुलमुदाहृतम् ॥"
इत्याह्निकतत्त्वम् ॥

दन्तकाष्ठक, क्ली, (इम्ब शाक काष्ठकम् । दन्तधावनयोग्यं काष्ठकम् ।) आहुल्यम् । इति राजनिर्घण्टः ॥

दन्तच्छद, पुं, (दन्ताश्छाद्यन्तेऽनेनेति । छद संवरणे + णिच् + "पुंसि संज्ञायां घः प्रायेण ।" ३ । ३ । ११८ । इति घः । "छादेर्घेऽद्व्युपसर्गस्य ।" ६ । ४ । ९६ । इति ह्रस्वः ।) ओष्ठः । इति हलायुधः ॥ (यथा, ऋतुसंहारे हेमन्तवर्णनायाम् । १२ ।
"दन्तच्छदैर्दन्तविघातचिह्नैः
स्तनैश्च पाण्यग्रकृताभिलेखैः ।
संसूच्यते निर्दयमङ्गनानां
रतोपभोगो नवयौवनानाम् ॥")

दन्तच्छदोपमा, स्त्री, (दन्तच्छदस्य ओष्ठस्य उपमा सादृश्यं यस्य । यद्वा, उपमीयतेऽनयेति उपमा । दन्तच्छदस्य उपमा सादृश्यमस्याम् ।) बिम्बी । इति राजनिर्घण्टः ॥

दन्तधावन, क्ली, (दन्तानां धावनम् ।) दन्तमार्ज्जनम् । (दन्तानां धावनं यस्मात् ।) दन्तकाष्ठम् । यथा गारुडे २१४ अध्याये ।
"उषःकाले तु सम्प्राप्ते शौचं कृत्वा यथार्थवत् ।
ततः स्नानं प्रकुर्व्वीत दन्तधावनपूर्व्वकम् ॥
मुखे पर्य्युषिते नित्यं भवत्यप्रयतो नरः ।
तस्मात् सर्व्वप्रयत्नेन भक्षयेद्दन्तधावनम् ॥
कदम्बबिल्वखदिरकरवीरवटार्ज्जुनाः ।
यूथी च बृहती जातिकरञ्जार्कातिमुक्तकाः ॥
जम्बूमधूकापामार्गशिरीषोदुम्बरासनाः ।
क्षीरिकण्टकिवृक्षाद्याः प्रशस्ता दन्तधावने ॥
कटुतिक्तकषायाश्च धनारोग्यसुखप्रदाः ।
प्रक्षाल्य भङ्क्त्वा च शुचौ देशे त्यक्त्वा तदाचमेत् ॥
अमावास्यां तथा षष्ठ्यां नवम्यां प्रतिपद्यपि ।
वर्ज्जयेद्दन्तकाष्ठन्तु तथैवार्कस्य वासरे ॥
अभावे दन्तकाष्ठस्य निषिद्धायां तथा तिथौ ।
अपां द्वादशगण्डूषैः कुर्व्वीत मुखशोधनम् ॥"
दन्तशुद्धि । तस्य विधिर्यथा,
'प्रातर्भुक्त्वा च
भक्षयेद्दन्तधावन
तस्य काष्ठानि यथा

दन्तकाष्ठार्थमर्थ्यं तु सर्व्वान् कण्टकिनोऽप्यमून् ।
खदिरश्च कदम्बश्च करञ्जश्च वटस्तथा ।
तिन्तिड़ी वेणुपृष्ठश्च आम्रनिम्बौ तथैव च ।
अपामार्गश्च बिल्वश्च अर्कश्चोदुम्बरस्तथा ।
एते प्रशस्ताः कथिता दन्तधावनकर्म्मणि ॥"
तस्य निषिद्धकाष्ठानि यथा —
"गुवाकतालहिन्तालखर्ज्जूरे केतकीद्रुमे ।
नारिकेलेन शाखया च न कुर्य्याद्दन्तधावनम् ॥"
तस्य दिग्भेदेन शुभाशुभफलं यथा,—
"नष्टं स्याद्दक्षिणास्येन पश्चिमास्येन चामयः ।
पूर्व्वास्येनोत्तरास्येन सम्पदो दन्तधावनात् ॥"
तस्य तिथिविशेषे निषेधो यथा,—
"प्रतिपद्दर्शषष्ठीषु नवम्येकादशीषु च ।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥"
दन्तधावनानन्तरं चक्षुःसेचनं यथा,—
"दन्तान् कृतमयो भूत्वा प्रातः सिञ्चेच्च लोचने ।
तोयपूर्णमुखस्तेन ह्यक्षिरोगान् प्रणोदति ॥"
रोगविशेषे दन्तकाष्ठवर्ज्जनं यथा,—
"अर्द्दिती कण्ठशूली च दन्तरोगी नवज्वरी ।
शोषी कासी च तृष्णार्त्तो दन्तकाष्ठं विवर्ज्जयेत् ॥"
तस्य गुणा यथा —
"निहन्ति वक्त्रवैरस्यं जिह्वादन्ताश्रितं मलम् ।
आरोग्यं रुचिमाधत्ते सद्यो दन्तविशोधनम् ॥"
इति राजवल्लभः ॥
"ततश्चोपस्पृशन् प्राज्ञः कुर्य्याद्दन्तस्य धावनम् ।
जिह्वाया आर्ज्जनञ्चापि दन्तच्छदनादिभिः ॥
दक्षिणाभिमुखो भूत्वा पश्चिमाभिमुखस्तथा ।
न दन्तधावनं कुर्य्यात् कुर्य्याच्चेत्पातकी भवेत् ॥
मध्यमानामिकाभ्याञ्च वृद्धाङ्गुष्ठेन च द्विज ।
दन्तस्य धावनं कुर्य्यात् तर्ज्जन्या न कदाचन ॥
अश्वत्थवटनिम्बानां धात्र्या काष्ठिकया बुधः ।
न दन्तधावनं कुर्य्यात्तथैवोदुम्बरस्य च ॥
नित्यक्रियायाश्च मिश्रस्तथा दन्तधावनम् ।
प्रभाते कुरुते प्राज्ञः सूर्य्योदयविवर्ज्जिते ॥
सूर्य्योदये द्विजश्रेष्ठ ! यः कुर्य्याद्दन्तधावनम् ।
नित्यक्रियाफलं तस्य धर्म्मश्चैव विनश्यति ।
यः स्नानसमये कुर्य्यात् कैमिने ! दन्तधावनम् ।
निराशाः पितरो यान्ति तस्य दत्ताः सुरास्तथा ॥
दन्तस्य धावनं कुर्य्याद्यो मध्याह्नपराह्णयोः ।
तस्य पुण्यं न गृह्णन्ति देवताः पितरो जलम् ॥
श्राद्धकाले पुष्करिण्यां न कुर्य्याद्दन्तधावनम् ।
तावदस्य च चण्डालो यावद्गङ्गां न पश्यति ॥
भगवत्सुदिने सर्व्वे यः कुर्य्याद्दन्तधावनम् ।
तद्दन्तकाष्ठं पितरो भुञ्जते शोणितं द्विज ॥
उपवासदिने विप्र ! पितृमातृदिने तथा ।
न च प्रक्षालयेत्प्राज्ञो दन्तधावनतत्परः ॥
मन्त्रेणैव मार्ज्जयेद्दन्तान् गण्डूषैर्द्वादशैस्तथा ।
विष्णोः ! काष्ठानि वर्ज्जयेत् ॥
निषिद्धानि च मुने ! ।
संपूज्य कामदं,जलम् ॥"

दन्तधावन, पुं (धावयत्यनेनेति । धावि+ल्युट् । दन्तानां धावनः ।) खदिरवृक्षः । गुच्छकरञ्जः । इति राजनिर्घण्टः । वकुलः । इति शब्दचन्द्रिका ।

दन्तपत्र क्ली, (दन्ता इव पत्राणि यस्य ।) कुन्दकम् । इति शब्दरत्नावली । (यथा कुमारे । ७ । २३ ।
"कर्णार्पितलोध्रकषायरूक्षे
गोरोचनाक्षेपनितान्तगौरे ।
तस्याः कपोले परभागलाभा-
द्वबन्ध चक्षूंषि यवप्ररोहः ॥"
"कर्णावसक्तामलदन्तपत्र
माता तदीय मुखमुन्नमय्य ।")

दन्तपत्रक, क्ली, (दन्त इव शुभ्रं पत्रं दलं यस्य । कप् ।) कुन्दपुष्पम् । इति शब्दचन्द्रिका ।

दन्तपुष्प क्ली, (दन्त इव शुभ्रं पुष्पमस्य ।) कतकफलम् । इति शब्दचन्द्रिका ।

दन्तफल क्ली (दन्त इव शुक्लं फलमस्य ।) कतकम् । इति शब्दचन्द्रिका ।

दन्तफल, पुं, (दन्त इव शुक्लं फलमस्य ।) कपित्थः । इति राजनिर्घण्टः ।

दन्तफला, स्त्री (दन्तवत् शुभ्रं फलं यस्याः । टाप् ।) पिप्पली । इति राजनिर्घण्टः ।

दन्तभाग, पुं, (दन्तयुक्तो भागः । शाकपार्थिवादिवत् समासः ।) गजाग्रभागः । गजस्य मुखात् स्कन्धपर्यन्तो योऽग्रभागः स दन्तसहितः । इत्यमरभरतौ ।

दन्तमल, क्ली, (दन्तजं दन्तस्य वा मलम् ।) दन्तलग्नकिट्टम् । तत्पर्य्यायः । पुष्पिका २ । इति हारावली । १८५ ।

दन्तमलिका, स्त्री, (दन्त इव शुक्लं मलमस्याः । कप्+टापि अत इत्वम् ।) दन्तीवृक्षः । इति शब्दरत्नावली ।

दन्तरोग, पुं, (दन्तस्य रोगः ।) दन्तामयः । तन्निदानादि दन्तशब्दे द्रष्टव्यम् । तस्यौषधं यथा,
"काकजङ्घाशिफामुखे मुखेन विधृते शिवे ।
चर्व्विता दन्तरोगाणां विनाशो हि भवेद्धर ॥"
दन्तरोगाणामित्यत्र दन्तकीटानामिति पुस्तकान्तरे पाठः । इति गारुडे १९८ अध्यायः ।
अपि च गारुडे १८९ अध्याये ।
"गुञ्जामूलकमुस्तीनां चारो हिङ्गुलनागरम् ।
शतपुष्पी वचा कुष्ठं दारु शिग्रु रसाञ्जनम् ॥
सौवर्च्चलं यवक्षारं क्षाम्रं सैन्धवं तथा ।
ग्रन्थिकं विड् मुस्तं मधु शुक्तं चतुर्गुणम् ॥
मातुलुङ्गरसञ्चैव कदलीरसमेव च ।
तैलमेभिर्विपक्तव्यं कर्णशूलापहं परम् ।
बाधिर्य्ये कर्णनादे च पूयस्रावे च दारुणे ।
पूरणादस्य तैलस्य क्रमयः कर्णयोः स्थिताः ॥
क्षिप्रं विनाशमायान्ति शशाङ्कर्षिता इव ॥
क्षारतैलमिदं श्रेष्ठं मुखदन्तामयापहम् ।"
अन्यच्च ।
"तैलं लाक्षारसं क्षीरं पृथक् प्रस्थमितं पचेत् ।
द्रव्ये पलमितैरेतैः क्वाथैश्चापि चतुर्गुणैः ।
लोध्रकट्फलमञ्जिष्ठापद्मकेशरपद्मकैः ।
चन्दनोत्पलयष्ट्याह्वैस्तैलं चाग्ने भृतम् ॥
दालनं दन्तचालञ्च दन्तभेदं कपालिकाम् ।
शीतादं पूतिवक्त्रञ्च विरसं विरसास्यताम् ॥
हन्यादाशु गदानेतान् कुर्य्याद्दन्तानपि स्थिरान् ।
लाक्षादिकमिदं तैलं दन्तरोगेषु पूजितम् ॥
इति लाक्षाद्यं तैलम् ।
अर्येहिमायचौ स्निग्धमवच कृमिदन्तकम् ।
तथा च पीलैर्वातघ्नैः स्नेहगण्डूषधारणैः ॥
भद्रदार्व्वादिवर्षाभूलेपैः स्विन्नैश्च भोजनैः ।
कृमिदन्तापहं कोष्णं हिङ्गुदन्तान्तरे स्थितम् ॥
इन्द्रवारुणिमूलं कष्णं च चाङ्गुलकण्टकारिकाक्वाथः ।
गण्डूषस्तैलयुतः कृमिदन्तकवेदनानाशनकः ॥
नीली वायसजङ्घा कटुतुम्बी मूलमेकैकम् ।
सञ्चर्व्य दशनविधृतं दशनकृमिपातनं प्राहुः ॥
स्नेहानां कवलाः कोष्णाः सर्पिषस्त्रैवृतस्य च ।
नियूहाश्चानिलघ्नानां दन्तहर्षप्रमर्द्दनाः ॥
स्नेहस्य धारणं नित्यं पक्वस्य सर्पिषः कवलं इष्यते ।
स्नैहिकोऽत्र हितो धूमो नस्यं स्नैहिकमेव च ।
पेया रसयवागूश्च क्षीरसन्तानिकाघृतम् ॥
शिरोवस्तिर्हितश्चापि क्रमो यश्चानिलापहः ।
अथ दन्तहर्षे ।
अच्छिन्नदन्तमूलानि शर्कराश्च हरेद्भिषक् ।
लाक्षाचूर्णैर्मधुयुतैस्ततस्तान् प्रतिसारयेत् ॥
दन्तहर्षक्रियाञ्चात्र कुर्य्यान्निरवशेषतः ।
कपालिका कृच्छ्रतमा तत्राप्येषा क्रिया हिता ॥
अत्र दन्तशर्करायाम् । एषा क्रिया दन्तहर्षक्रिया ।
चलान्यस्थानि शीतानि कृत्वाप्र दन्तधावनम् ।
तथाधिकठिनं भक्ष्यं दन्तरोगी विवर्ज्जयेत् ॥"
इति भावप्रकाशः ।

दन्तवस्त्र, क्ली, (दन्तानां वस्त्रमिवाच्छादकत्वात् ।) ओष्ठः । इति हेमचन्द्रः । ३ । २४५ ।

दन्तवासस् [स्] पुं, (दन्तस्य वासो वस्त्रमिवाच्छादकत्वात् ।) ओष्ठः । इति त्रिकाण्डशेषः । (यथा, कुमारे । ५ । ३४ ।
"अपि त्वदावर्ज्जितवारिसम्भृतं
प्रवालमासामनुबन्धि वीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते
तुल्यां यदारोहति दन्तवाससा ॥")

दन्तवीजक, पुं, (दन्ता इव वीजानि यस्य । ततः स्वार्थे कन् ।) दाडिमः । इति राजनिर्घण्टः ।

दन्तशठ, पुं (दन्तेषु शठ इव अम्लत्वजनकत्वात् ।) दन्तशठः । इत्यमरटीकायां मथुरानाथः ।

दन्तशठ, पुं, (दन्तेषु शठ इव अम्लत्वकारकत्वात् ।) जम्बीरः । कपित्थः । कर्म्मरङ्गः । नागरङ्गः । इति मेदिनी । ठे, १९ । (यथा, सुश्रुते । १ । ४६ ।
"ऐरावतं दन्तशठमम्लं शोणितपित्तकृत् ।")
अम्लः । इति हेमचन्द्रः । ६ । २४ ।

दन्तशठा, स्त्री (दन्तेषु शठा ।) चाङ्गेरी । इति मेदिनी । ठे, १९ । (यथा, भावप्रकाशे ।
"चाङ्गेरी चुक्रिका दन्तशठाम्बष्ठाम्ललोणिका ।")
क्षुद्राम्लिका । इति राजनिर्घण्टः ।

दन्तशर्करा स्त्री (दन्तस्य शर्करेव ।) दन्तरोगविशेषः । कफवायुशोषितदन्तगतमलम् । पाथुरि इति भाषा । (तस्य लक्षणं यथाह माधवकरः ।
"मलो दन्तगतो यस्तु कफमारुतशोषितः ।
शर्करेव खरस्पर्शा सा ज्ञेया दन्तशर्करा ॥"
यथा च सुश्रुते निदानस्थाने १६ अध्याये ।
"शर्करेव स्थिरीभूतो मलो दन्तेषु यस्य वै ।
सा दन्तानां गुणहरी तु विज्ञेया दन्तशर्करा ॥")
तस्यौषधं यथा,—
"गारचककटीमूलं पिष्टं वास्तोरकेन च ।
पीतं दिनत्रयेणैव नाशयेत् दन्तशर्कराम् ॥"
इति गारुडे १९ अध्यायः ।

दन्तशाण, पुं (दन्तानां शाण इव । चिक्कणताजनकत्वात् ।) मिस्सा (?) । इति त्रिकाण्डशेषः । मिषि इति भाषा ।

दन्तशिरा, स्त्री, (दन्तानां शिरा यत्र ।) माढी । इति शब्दरत्नावली ।

दन्तशूल, पुं, (दन्तस्य शूलं इव । शूलवेधनवद्वेदनादायकत्वात् ।) दशनवेदना । तस्यौषधम् ।
यथा,—
"चिपलानिम्बपत्राक्त कटुकारनधे घृतम् ।
पाययेच्चाधुना मिश्रं दन्तशूलोपशान्तये ॥"
इति गारुडे १७४ अध्यायः ।

दन्तहर्ष, पुं, (दन्तानां हर्षो यस्मात् ।) दन्तरोगविशेषः । इति माधवकरः । (अस्य लक्षणं यथा, सुश्रुते निदानस्थाने १६ अध्याये ।
"दशनाः शीतमुष्णञ्च सहन्ते स्पर्शनं न च ।
यस्य तं दन्तहर्षन्तु व्याधिं विद्यात् समीरणात् ॥"
दन्तस्थानि । यथा,—
"यस्य वै जातमात्रस्य हृदयं पीड्यते भृशम् ।
जायते दन्तहर्षश्च स गतायुरमादिशेत् ॥"
इति वायुपुराणम् ।)

दन्तहर्षक पुं (दन्तान् हर्षयतीति । हृष+णिच्+ण्वुल् ।) जम्बीरः । इति जटाधरः ।

दन्तहर्षण, पु (दन्तान् हर्षयतीति । हृष+णिच्+ल्युः ।) जम्बीरः । इति त्रिकाण्डशेषः ।

दन्ताघात, पु (दन्तानाहन्तीति । आ+हन+अच् ।) निम्बूकः । इति राजनिर्घण्टः । दशनाघातः । (यथा, गर्भेशखण्डे ।
"दन्ताघातविदारितारिरुधिरैः सिन्दूरशोभाकरम् ।")
रतिक्रीडायां तस्य स्थानानि दन्तशब्दे द्रष्टव्यानि ।

दन्तार्बुद, क्ली, पुं (दन्तस्य अर्बुदमिव ।) दन्तरोगभेदः । तत्पर्य्यायः । दन्तमांसम् २ दन्तशोफः ३ द्विजव्रणः ४ । इति राजनिर्घण्टः ।

दन्तायुध, पुं, (दन्त एव आयुधं यस्य ।) शूकरः । इति त्रिकाण्डशेषः ।

दन्तालिका, स्त्री (दन्तान् अलति भूषयतीति । अल+ण्वुल् । टापि अत इत्वम् ।) वल्गा । इति त्रिकाण्डशेषः ।

दन्तावल पुं (प्रशस्तौ दन्तौ अस्य । ५।२।११३।

तुलस्यामसुरभ्यास्य मदन आम्रवृक्षयोः ।
लौहजयस्यार्ज्जुनस्यापि भाण्डस्य च भृगोस्तथा ।
सुमेरोश्च समुद्राणां वायोश्च मलयस्य च ॥
धरस्याश्च दुर्गायाः पद्मायाश्च शुभस्तथा ।
सावित्र्याश्चैव गङ्गाया मनसायास्तथैव च ॥
ग्रामाधिष्ठातृदेव्याश्च प्रियायाः प्राकृतोऽपि च ।
प्राणाधिकाया राधाया अन्येषामपि का कथा ।
हत्वा दर्पञ्च सर्व्वेषां प्रसादञ्च चकार सः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

दर्पक पुं, (दर्पयति गर्व्वयति मोदयति वेति । दृप हर्षमोहनयोः + णिच् + ण्वुल् ।) कामदेवः । इत्यमरः । १ । १ । २६ ॥

दर्पण, क्ली, (दर्पयति सन्दीपयतीति । दृप + णिच् + ल्युः) चक्षुः । इति जटाधरः ॥ (भावे ल्युट् ।) सन्दीपनम् । इति दृपधात्वर्थदर्शनात् ॥

दर्पणः, पुं, क्ली, (दर्पयति सन्दीपयतीति । दृप + णिच् + "नन्द्यादिभ्य इति ।" ३ । १ । १३४ । इति ल्युः ।) रूपदर्शनाधारः । आर्शि इति भाषा । तत्पर्य्यायः । मुकुरः २ आदर्शः ३ । इत्यमरः । २ । ६ । १३९ ॥ आत्मदर्शः ४ वक्त्रः ५ दर्शनम् ६ प्रतिबिम्बकम् ७ । इति शब्दरत्नावली ॥ काक च ककरः ८ । इति जटाधरः ॥ (यथा, चाणक्ये । १०९ ।
"यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥")
अस्य गुणाः । आयुःश्रीकारित्वम् । पापनाशित्वञ्च । इति राजवल्लभः ॥ पुं, पर्व्वतभेदः । नदविशेषः । यथा,—
और्व्व उवाच ।
"तत्र पूर्व्वं महाराज । दर्पणो नाम पर्व्वतः ।
कुवेरो यत्र वसति धनमाली स्वयं सदा ।
अग्निमाक्षे मध्यभागे रोहिण्यो रोहिताकृतिः ।
पर्व्वतोत्तारिक पृष्ठ खष्ठतां याति तत्पश्चात् ॥
यस्मादिदूरे वसति दर्पणो नाम वै नदः ।
हिमाद्रिप्रभवो नित्य लौहित्यसदृशः फले ॥
यत्रतत्र हि कौशिक्य वर्त्तेर्व्वनकेऽपि ।
सर्व्वतीर्थोदके स्नात्वा आयमासाय सं सुतम् ॥
तस्य आमसहस्रं मासद्यस्य पाटनः ।
तेनाप दर्पणो नाम पुरा देवगणैः स्मृतः ॥
तस्मिन् स्नात्वा नदवरे योऽर्च्चयेद्दर्पणाचले ।
कुवेरं प्रतियत्तिश्यां कालिके शुभयत्नतः ॥
स याति अलकायामिव भूतिशतैर्युतः ॥"
इति कालिकापुराणे ८१ अध्यायः ॥

दर्पारम्भ, पुं, (दर्पस्य आरम्भः) अहङ्कारारम्भः । तत्पर्य्यायः । भटस्फाटः २ । इति जटाधरः ॥

दर्भ, पुं (दृणाति विदारयतीति । "दृदलिभ्यां भः ।" उणां ३ । १५१ । इति भः ।) कुशः । इत्यमरः ।२।४।१६६ ॥ उलूकदृणम् । इति रत्नमाला ॥ काशः । इति शब्दरत्नावली ॥ ● ॥
("कुशो दर्भस्तथा बर्हिः सूच्यग्रो यज्ञभूषणः ।
ततोऽन्यो दीर्घपत्रः स्यात् क्षुरपत्रस्तथैव च ॥
दर्भद्वयं त्रिदोषघ्नं मधुरन्तुवरं हिमम् ।
मूत्रकृच्छ्राश्मरीतृष्णावस्तिरुकप्रदरास्रजित् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
"दर्भाः पवित्रमित्युक्तास्तथैव पुरा विप्रैः समाख्याताः ।
गोकर्णमात्रास्तु कुशा मतच्छिन्नाः समूलकाः ।
पितृतीर्थेन देयाः स्युर्द्दर्भास्त्रामात्रकास्तथैव च ।
काशाः कुशा बल्वजाश्च तथान्ये तीक्ष्णरोमशाः ।
मौञ्जाश्च शाड्वलाश्चैव षट्दर्भाः परिकीर्त्तिताः ॥
सपिञ्जलाः सायाः तीक्ष्णरोमशाः इति वक्ष्यमाणो विशेषणम् । शाड्वला इति सर्व्वेषां विशेषणम् । तेन तेषामभावे शूकतृणप्रशस्तैर्व्वल्वज मलमुस्तवर्ज्जं सर्व्वतृणानीति गोभिलेन नडादि रिक्तकत्तृणानां निषेधो बोद्धव्यः । शूकानि फलपुष्पमञ्जर्य्यकाणि येषां तृणानां सन्ति तानि शूकतृणानि इति भट्टनारायणचरणाः । गोकर्णमितः वितस्ताङ्गुष्ठानामिकापरिमाणः ।
रत्निमात्राः शस्ता वै पितृतीर्थेन सम्मताः ।
उपमूले तथा लूनाः प्रस्तरार्थे कुशोत्तमाः ॥
इति वायुपुराणम् ॥ ● ॥
अच्छिन्नाग्रमप्याह हारीतः ।
पथि दर्भाश्चितौ दर्भा ये दर्भा यज्ञभूमिषु ।
स्तरणासनपिण्डेषु षट् दर्भान् परिवर्ज्जयेत् ॥
पिण्डार्थं ये स्तृता दर्भा यैः कृतं पितृतर्पणम् ।
मूत्रोच्छिष्टप्रलिप्ते च त्यागस्तेषां विधीयते ॥
धृते हते च विण्मूत्रे त्यागस्तेषां विधीयते ।
धृतैरिमुपलक्षणेन तृतीया धृतैर्दर्भैः पलायितैर्न पुनर्व्वेय ॥
नीवीमध्ये च ये दर्भा ब्रह्मसूत्रे च ये धृताः ।
पवित्रांस्तान् विजानीयाद्यथा कायस्तथा कुशाः ॥
आचम्य प्रयतो नित्यं पवित्रेण द्विजोत्तमः ।
नोच्छिष्टन्तु भवेत्तत्तु भुक्तशेषं विवर्ज्जयेत् ॥
इति समायिनमिश्रार्थे ॥ ● ॥
दर्भवटुकस्वरूपमाह रत्नाकरे यज्ञपार्श्वः ।
अनुक्तौ भवेदृत्तसा समकैस्तु विष्टरः ।
दक्षिणावर्त्तको ब्रह्मा वामावर्त्तस्तु विष्टरः ॥
प्रादेशदीर्घिकायाम् ।
सप्तभिर्ब्बाभिर्व्वापि आङ्गुलियतीडितम् ।
अङ्गारेणैव ग्रन्थेन द्विजः कुर्य्यात् कुशद्विजम् ॥
बर्हिरिव मर्म्मनिरिति कर्म्मोपदेशिन्यां भाष्यम् । दर्भस्वायिविशेषाभिधानं छन्दोगेतरपरम् ।
मन्त्रपातेष्टुन्नि शम्याच्च अर्घ्यं बकपटौ तथा ।
दर्भसंख्या न विहिता विष्टरास्तरणेष्वपि ॥
इति गोभिलपरिशिष्टवचनात् ।" इति आह्निकतत्त्वम् ॥

दर्भट क्ली (दृभ्यते निभृतस्थाने विरच्यते इति । दृभ ग्रन्थने + बाहुलकात् अटन् ।) निभृतगृहम् । इति त्रिकाण्डशेषः ॥

दर्भपत्र, पुं, (दर्भस्य कुशस्येव पत्राणि यस्य ।) काशः । इति राजनिर्घण्टः ॥

दर्भाह्वय, पुं, (दर्भं आह्वयते स्पर्द्धते सादृश्यात् । आ + ह्वे + अच ।) मुञ्जः । इति राजनिर्घण्टः ॥ (मुञ्जशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

दर्व्व, पुं, (दृणाति विदारयतीति । दृ + "कॄगॄशॄदॄभ्यो वः ।" उणां १ । १५४ । इति वः ।) राक्षसः । हिंस्रः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ (जातिविशेषः । यथा, महाभारते । ७ । ५१ । १२ ।
"कैरला दरदा दर्व्वाः शूरा वैयामकास्तथा ।
औदुम्बरा दुर्व्विभागा पारदा सह बाह्लिकैः ॥")
स्त्रियां टाप् । उशीनरपत्नीभेदः । यथा हरिवंशे । ३१ । २७ ।
"उशीनरस्य पत्न्यस्तु पञ्च राजर्षिवंशजाः ।
नृगा कृमी नवा दर्व्वा पञ्चमी च दृषद्वती ॥")

दर्व्वरीक, पुं, (दृ विदारे + "पर्व्वरीकादयश्च ।" उणां । ४ । २ । इति ईकन्प्रत्ययेन निपातनात् साधुः ।) इन्द्रः । वायुः । वाद्यभेदः । इति संक्षिप्तसारे उणादिवृत्तिः ॥

दर्व्वट पुं (दर्व्वाय हिंसायै अटतीति । अट + अच् । शकन्ध्वादित्वात् अलोपः ।) दण्डधारी । इति हारावली । १२८ ॥

दर्व्वि, स्त्री (दृणाति विदारयत्यन्नेनेति । दृ + "दृदृभ्यां विन् ।" उणां ४ । ५३ । इति विन् ।) अन्नादिदारकः । हाता इति भाषा । तत्पर्य्यायः । कम्बिः २ खजाका ३ । इत्यमरः । २ । ९ । ३४ । दर्व्वी ४ कलो ५ खजाकम् ६ । फणा । इति शब्दरत्नावली ॥

दर्व्विक पुं, (दर्व्वि + स्वार्थे कन् । अभिधानात् पुंस्त्वम् ।) दर्व्वी । इति त्रिकाण्डशेषः ॥

दर्व्विका स्त्री, (दर्व्वि + स्वार्थे कन् + टाप् ।) दार्व्विका । इत्यमरटीकायां रायमुकुटः । खजाका । इति त्रिकाण्डशेषः ॥ कज्जलम् । यथा,
"सौवीरं कामलं तुत्थं मयूरमक्षिकं तथा ।
दर्व्विका मेघनीलञ्च षडङ्गानि भवन्ति षट् ॥"
तल्लक्षणम् यथा कालिकापुराणे ६८ अध्याये ।
"अञ्जनन्तु सौवीरं कामलं प्रभावं तथा ।
मयूरमक्षिकं तत्र मेघनीलन्तु नीलकम् ॥
दृष्ट्वा निष्पाद्य चैतानि शिलायां नैमतीर्थदा ।
प्रदद्यात् सर्व्वदेवेभ्यो देवीभ्यश्चापि पृथक् ॥
दृतलोहादियोगेन तत्क्षारो दीपवह्निना ।
यदञ्जन जायते तु दर्व्विका परिकीर्त्तिता ॥

दर्व्वी, स्त्री (दर्व्वि + वा ङीष् ।) दर्व्विः । इति शब्दरत्नावली ॥ (यथा, उत्तरगीतायाम् । २ । १७ ।
"आलोड्य चतुरो वेदान् सर्व्वशास्त्राणि सर्व्वदा ।
योऽहं ब्रह्म न जानाति दर्व्वी पाकरसं यथा ॥")

दर्व्वीकर, पुं (दर्व्वीं फणां करोतीति कृ + "कृञो हेतुताच्छील्यानुलोम्येषु ।" ३ । २ । २० । इति टः । यद्वा दर्व्वी फणा कर इवास्य ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥ (यथा, सुश्रुते कल्पस्थाने चतुर्थेऽध्याये ।
"दर्व्वीकरा मण्डलिनो राजिमन्तश्च पन्नगाः ।
तेषु दर्व्वीकरा ज्ञेया विंशतिः षट् च पन्नगाः ॥"

"दर्व्वाङ्गलाङ्गलच्छत्रस्वस्तिकाङ्कुशधारिणः ।
ज्ञेया दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः ॥"
तत्र दर्व्वीकरभेदा यथा,—
"दर्व्वीकराः कृष्णसर्पो महाकृष्णः कृष्णोदरः श्वेतकपोतो महाकपोतो बलाहको महासर्पः शङ्खपालो लोहिताक्षो गवेधुकः परिसर्पः खण्डफणः ककुदः पद्मो महापद्मो दर्भपुष्पो दधिमुखः पुण्डरीको भ्रुकुटीमुखो विष्किरः पुष्पाभिकीर्णो गिरिसर्पः ऋजुसर्पः श्वेतोदरो महाशिरा अलगर्द्द आशीविष इति ॥"
तद्दष्टविषजनितलक्षणादिकं यथा,—
"तत्र दर्व्वीकरविषेण त्वङ्नयननखदशनवदनमूत्रपुरीषदंशकृष्णत्वं रौक्ष्यं शिरसो गौरवं सन्धिवेदना कटीपृष्ठग्रीवादौर्ब्बल्यं जृम्भणं वेपथुः स्वरावसादो घुर्घुरको जड़ता शुष्कोद्गारः कासश्वासौ हिक्का वायोरूर्द्ध्वगमनं शूलोद्वेष्टनं तृष्णा लालास्रावः फेनागमनं स्रोतोऽवरोधस्तास्ताश्च वातवेदना भवन्ति ॥" दर्व्वीकरदष्टानां विषवेगादिकमाह यथा,—
"तत्र सर्व्वेषां सर्पाणां विषस्य सप्तवेगा भवन्ति । तत्र दर्व्वीकराणां प्रथमे वेगे विषं शोणितं दूषयति तत् प्रदुष्टं कृष्णतामुपैति तेन कार्ष्ण्यं पिपीलिकापरिसर्पणमिव चाङ्गे भवति । द्वितीये मांसं दूषयति तेनात्यर्थं कृष्णता शोफो ग्रन्थयश्चाङ्गे भवन्ति तृतीये मेदो दूषयति तेन दंशक्लेदः शिरोगौरवं स्वेदश्चक्षुर्ग्रहणञ्च । चतुर्थे कोष्ठमनुप्रविश्य कफप्रधानान् दोषान् दूषयति । तेन तन्द्रा प्रसेकसन्धिविश्लेषा भवन्ति । पञ्चमे अस्थीन्यनुप्रविशति प्राणमग्निञ्च दूषयति तेन पर्व्वभेदो हिक्का दाहश्च भवति । षष्ठे मज्जानमनुप्रविशति ग्रहणीञ्चात्यर्थं दूषयति । तेन गात्राणां गौरवमतीसारो हृत्पीड़ा मूर्च्छा च भवति । सप्तमे शुक्रमनुप्रविशति व्यानञ्चात्यर्थं कोपयति । कफञ्च सूक्ष्मस्रोतोभ्यः प्रच्यावयति तेन श्लेष्मवर्त्तिप्रादुर्भावः कटिपृष्ठभङ्गश्च सर्व्वचेष्टाविघातो लालास्वेदयोरतिप्रवृत्तिरुच्छ्वासनिरोधश्च भवति ।'
अथ दर्व्वीकरदष्टस्य चिकित्सामाह तत्रैव ।
"दर्व्वीणां विषवेगे तु प्रथमे शोणितं हरेत् ।
द्वितीये मधुसर्पिर्भ्यां पाययेतागदं भिषक् ॥
नस्यकर्म्माञ्जने युञ्ज्यात् तृतीये विषनाशने ।
वान्तं चतुर्थे पूर्व्वोक्तां यवागूमथ दापयेत् ॥
शीतोपचारं कृत्वादौ भिषक् पञ्चमषष्ठयोः
दापयेच्छोधनं तीक्ष्णं यवागूञ्चापि कीर्त्तिताम् ॥
सप्तमे त्ववपीड़ेन शिरस्तीक्ष्णेन शोधयेत् ।
तीक्ष्णमेवाञ्जनं दद्यात् तीक्ष्णशस्त्रेण मूर्द्ध्नि च ।
कुर्य्यात् काकपदं चर्म्म सासृग्वा पिशितं
क्षिपेत् ॥")
खजाकाकारके त्रि ।
दर्श, पुं, (दृश्येते उपर्य्यधोभावापन्नसमसूत्रपातेन येन सूर्य्याचन्द्रमसावन्योन्यं दर्शो यत्र । दृश् + आधारे घञ् ।) अमावस्या । इत्यमरः । १ । ४ । ८ ॥

"सूर्य्योऽग्निश्चन्द्रसूर्य्यौ तु दर्शनाद्दर्श उच्यते ॥"
इति मत्स्यपुराणम् ॥
(अथ ग्रीवायां विवाहमन्त्रसन्नद्धसूत्रम् ।
यथा, भागवते । ६ । १८ । ३ ।
"धातुः कुहूः सिनीवाली राका चानुमतिस्तथा ।
सायं दर्शमथ प्रातः पूर्णमासमनुक्रमात् ॥"
दृश् + भावे घञ् ।) अवलोकनम् । इति मेदिनी । शे, ७ ॥ (यथा महाभारते । १२ । १४४ । ४५ ।
"दुर्द्दर्शाः केचिदाभान्ति नराः काष्ठमया इव ।
प्रियदर्शास्तथा चान्ये दर्शनादेव सौम्यता ॥")
महायज्ञयागविशेषः । स याजमानकः ।
यथा । "आग्नेयाष्टाकपालैन्द्रदध्यैन्द्रपयोयागा अमावास्यायां स च यावज्जीवं कर्त्तव्यः कौषीतकिकर्त्तव्यो मासमाध्यश्च ।" इति मलमासतत्त्वम् ॥
दर्शक, पुं (दर्शयति नृपादिसमीपागमनमर्थिनमिति । दृश् + णिच् + ण्वुल् ।) द्वारपालः । इत्यमरः । २ । ८ । ६ ॥ (जातिविशेषः । यथा, महाभारते । ६ । ९ । ५२ । [तथा ॥"]
"काश्मीराः सिन्धुसौवीरा गान्धारा दर्शका
त्रि दर्शयिता । (यथा कुमारे । ६ । ५२ ।
"विधिप्रयुक्तसत्कारैः स्वयं मार्गस्य दर्शकः ॥")
प्रवीणः । इति मेदिनी । के, १ २ ॥ (प्रकाशकः । यथा, हितोपदेशे । १ । ११ ।
"अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्व्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥"
दृश + ण्वुल् । द्रष्टा । यथा, महाभारते । १ । १६१ । १० ।
"स्नाय स्वापयितो नित्यं पितृदर्शकः ।
रामानृण्यं समर्थेत निःशेषं समापयेत् ॥")
दर्शत, पुं, (दृश्यते गगनमार्गे इति । दृश + "भृमृदृशीति ।" उणा । ३ । ११० । इति अतच् ।) सूर्य्यः । चन्द्रः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (दर्शनीये, त्रि । यथा, ऋग्वेदे । १ । ११४ । ७ ।
"मो विमत प्रवद्दर्षि दर्शतो दर्शः संदर्शी
पितु मा इव चय ॥")
दर्शन, क्ली, (दृश्यतेऽनेनेति । दृश + करणे ल्युट् ।) नयनम् । स्वप्नः । बुद्धिः । धर्म्मः । उपलब्धिः । दर्पणः । (दृश्यते यथार्थतत्त्वमनेनेति ।) शास्त्रम् । इति मेदिनी । ने, ७१ ॥ शास्त्रञ्च षड्विधम् । वैशेषिकन्यायमीमांसासांख्यपातञ्जलवेदान्ताख्यम् । एतानि तत्तच्छास्त्राणि वेदान् विचार्य कणादगौतमजैमिनिकपिलपतञ्जलिवेदव्यासाख्यैर्मुनिभिः कृतानि । दृष्टा । इक्षणम् । इति त्रिकाण्डशेषः । चाक्षुषज्ञानम् । देखा इति भाषा । तत्पर्य्यायः । निर्व्वर्णनम् २ निध्यानम् ३ आलोकनम् ४ ईक्षणम् ५ । इत्यमरः । ३ । २ । ३१ ॥ निभालनम् ६ । इति जटाधरः ॥ (यथा, मालत्याम् । १ । ६ । १० ।

"आहृत इव मे शीघ्रं दर्शनं याति चेतसि ॥")
पुण्यदर्शनानि यथा —
नन्द उवाच ।
"येषाञ्च दर्शने पुण्यं पापञ्च यस्य दर्शने ।
तत् सर्व्वं वद सर्व्वज्ञ ! श्रोतुं कौतूहलं हि मे ॥
श्रीभगवानुवाच ।
सुस्नातानां सतीनाञ्च वेश्यानाञ्च दर्शने ।
देवताप्रतिमादर्शात् तीर्थस्नायी भवेन्नरः ॥
स्वर्गस्य दर्शने भक्ता सतीनां दर्शने तथा ।
सन्न्यासिनां यतीनाञ्च तथैव ब्रह्मचारिणाम् ॥
भक्त्या गवाञ्च वह्नीनां गुरूणाञ्च विशेषतः ।
गजेन्द्राणाञ्च सिंहानां श्वेताश्वानान्तथैव च ॥
शुकानाञ्च पिकानाञ्च खञ्जनानान्तथैव च ।
हंसानाञ्च मयूराणां चाषाणां शङ्खपक्षिणाम् ।
वत्सप्रयुक्तधेनूनामश्वत्थानां तथैव च ।
पतिपुत्रवतीनाञ्च नराणां तीर्थयायिनाम् ॥
प्रदीपानां सुवर्णानां मणीनाञ्च विशेषतः ।
मुक्तानां हीरकाणाञ्च माणिक्यानां महामुने ।
तुलसीदलपुष्पाणां दर्शनं पापनाशनम् ।
फलानि धान्यान्नानि च दधि मधूनि च ॥
पूर्णकुम्भञ्च लाजाञ्च दर्पणं दर्भं चन्दनम् ।
मालाञ्च शुक्लपुष्पाणां दृष्ट्वा पुण्यं लभेन्नरः ॥
गोरोचनाञ्च कर्पूरं रजतञ्च सरोवरम् ।
पुष्पोद्यानं पुष्पितञ्च दृष्ट्वा पुण्यं लभेन्नरः ॥
देवार्च्चितं देवघटं सुगन्धिपवनं तथा ।
शङ्खञ्च दुन्दुभिं दृष्ट्वा सद्यः पुण्यं लभेन्नरः ॥
शुक्लपक्षस्य चन्द्रञ्च मौक्तिकं चन्दनं तथा ।
कस्तूरीं कुङ्कुमं दृष्ट्वा नन्द ! पुण्यं लभेन्नरः ॥
पताकामक्षयवटं तत्र देवोत्थितं शुभम् ।
देवालयं जलखातं दृष्ट्वा पुण्यं लभेन्नरः ॥
शक्तिं प्रवालं रजतं स्फाटिकं कुशमूलकम् ।
गङ्गामृत्तिं कुशं ताम्रं दृष्ट्वा पुण्यं लभेन्नरः ॥
पुराणपुस्तकं शुद्धं धर्म्मीयं विष्णुयन्त्रकम् ।
स्निग्धदूर्व्वाक्षतं रत्नं दृष्ट्वा पुण्यं लभेन्नरः ॥
तपस्विनं सिद्धमन्त्रं समुद्रं कृष्णसारकम् ।
यज्ञं महोत्सवं दृष्ट्वा सुपुण्यं लभते नरः ॥
गोमूत्रं गोमयं दुग्धं गोधूलिं गोष्ठगोष्पदम् ।
पक्वशस्यान्वितं क्षेत्रं दृष्ट्वा पुण्यं लभेन्नरः ॥
रुचिरां पद्मिनीं रम्यां सर्व्वोपरिमण्डनाम् ।
सुवेशकां सुवसनां दिव्यभूषणभूषिताम् ॥
वेश्यां क्षेमङ्करीं गन्धं बहुमाल्यं तदुत्तमम् ।
स्निग्धं परमान्नञ्च दृष्ट्वा पुण्यं लभेद्ध्रुवम् ॥
कार्त्तिकीपूर्णिमायाञ्च राधिकाप्रतिमां शुभाम् ।
संपूज्य दृष्ट्वा नत्वा च करोति जन्मखण्डनम् ॥
विष्णुमायां तथाश्विन्यामश्वे मासि सिते शुभे ।
शिवाधिष्ठितां दृष्ट्वा करोति जन्मखण्डनम् ॥
शिवरात्रौ च काश्याञ्च विश्वनाथस्य दर्शनम् ।
तत्रोपवासं पूजाञ्च कृत्वा स जन्मखण्डनम् ॥
जन्माष्टमीदिने भक्तो दृष्ट्वा मां विष्णुमायकम् ।
प्रकृष्टं पूजां तावच्च करोति जन्मखण्डनम् ।
उपोष्य ब्रह्मभूमौ च भारते , ताम्रजीवके ।
संपूज्य राधां माघे च करोति जन्मखण्डनम् ।

पौषे मासि शुक्लपक्षे यत्र तत्र स्थले नरः ।
मथुरायां प्रतिमां दृष्ट्वा करोति जन्मखण्डनम् ॥
स्नानात् भवेत्तस्य पुत्र पौत्रौ धनेश्वरः ।
उपोष्यैकादशीं स्नात्वा प्रभाते द्वादशीदिने ।
दृष्ट्वा काशीमपूर्णां करोति जन्मखण्डनम् ॥
दत्त्वा विष्णुपदे पिण्डं पितॄन् यत्र प्रपूजयेत् ।
पितॄणां ब्राह्मणश्चैव करोति जन्मखण्डनम् ॥
प्रयागे मुण्डनं कृत्वा यत्र पितॄन् प्रतर्पयेत् ।
उपोष्य नैमिषारण्ये करोति जन्मखण्डनम् ॥
उपोष्य पुष्करे स्नात्वा किम्वा बदरिकाश्रमे ।
संपूज्य शङ्करं मामेव करोति जन्मखण्डनम् ॥
भिक्षां कृत्वा च बदरीं भुक्त्वा बदरिकाश्रमे ।
दृष्ट्वा मत्प्रतिमां मन्त्री करोति जन्मखण्डनम् ।
गोलोकनाथं गोविन्दं दृष्ट्वा वृन्दावने च माम् ।
दृष्ट्वा संपूज्य नत्वा च करोति जन्मखण्डनम् ॥
भाद्रे दृष्ट्वा च सत्यस्य मामेव मधुसूदनम् ।
संपूज्य नत्वा भक्त्या च करोति जन्मखण्डनम् ॥
रथस्थं जगन्नाथं यो स्पृशति कर्मी नरः ।
संपूज्य भक्त्या नत्वा च करोति जन्मखण्डनम् ॥
उत्तरायणकाल्यां प्रयागे स्नानमाचरन् ।
संपूज्य नत्वा मामेव करोति जन्मखण्डनम् ॥
कार्त्तिकीपूर्णिमायाञ्च दृष्ट्वा मत्प्रतिमां शुभाम् ।
उपोष्य पूजां कृत्वा च करोति जन्मखण्डनम् ॥
गङ्गासागरसमीपे च माघ्याञ्च मां भजेत् धने ।
राधया सह मां दृष्ट्वा करोति जन्मखण्डनम् ॥
रामेश्वरं सेतुबन्धे आषाढ्यां पूर्णिमादिने ।
उपोष्य दृष्ट्वा संपूज्य करोति जन्मखण्डनम् ॥
जगन्नाथं दिनकरं कोणार्कं चोत्तरायणे ।
उपोष्य दृष्ट्वा संपूज्य करोति जन्मखण्डनम् ॥
कपिलकोटे सुवर्णे कलविङ्के सुशङ्करे ।
विश्वेश्वरे रामकोटे नन्दके पुण्यभद्रके ॥
पार्व्वत्यां प्रतिमां दृष्ट्वा कार्त्तिकेयं गणेश्वरम् ।
नन्दिनं शङ्करं दृष्ट्वा करोति जन्मखण्डनम् ॥
त्रिकूटे मणिभद्रे च पश्चिमोदधिसन्निधौ ।
सदुपोष्य विधिं प्राप्य मां दृष्ट्वा सन्निमानुमात् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

दर्शनीय, त्रि, (दृश्यते इति । दृश्+अनीयर् ।) मनोज्ञः । इति भरतः ॥ (यथा महाभारते । ११ । १५ । ३ ।
"अद्भुतयापि ददृशे दर्शनी पराक्रमेण या ।
तत्र स कुरवो भूतो दर्शनीयतमो नृपः ॥")
दृष्टव्यश्च । इति व्याकरणम् ॥ (यथा पञ्चतन्त्रे । ४ । ६ ।
"सुरोऽपि तत्र निद्रोऽपि दर्शनीयोऽपि दुर्जनः ।
यस्मिन् कुले समुत्पन्नो गजस्तत्र न जन्यते ॥")
दर्शयामिनी, स्त्री, (दर्शस्यामावास्याया इव यामिनी रात्रिः ।) तमिस्रा । अन्धकाररात्रिः । इति हेमचन्द्रः । २ । ५० ॥ (दर्शस्य यामिनी इति विग्रहे । अमावास्यारात्रिश्च ॥)
दर्शयिता, [ऋ] त्रि, (दर्शयतीति । दृश्+णिच् + "ण्वुल्तृचौ ।" ३ । १ । १३३ । इति तृच् ।) दर्शकः । (यथा, महाभारते । १ । ७ । ३ ।

"प्रसादये त्वामहमप्रमाय ।
सं गो गतिदर्शयिता च धीरः ॥")
प्रतीहारः । इति भरतः ॥
दर्शविपत्, [द्] पुं, (दर्शे अमावास्यायां विपत् प्रकाशाभावरूपा यस्य ।) चन्द्रः । इति हारावली । १९ ॥
दर्शित, त्रि, (दृश्+णिच्+क्त ।) दर्शनं कारितः । तत्पर्य्यायः । प्रकाशितः २ आविष्कृतः ३ प्रकटितः ४ । इति हेमचन्द्रः ॥ (यथा, आर्य्यासप्तशत्याम् । २५८ ।
"दर्शितवत्सनोत्कण्ठे अविच्छिन्नधारा पतति सत नयने ।
विपरीते घनधरदाम सखि पुरमथितं सुरम् ॥")
दल, क भेदे । इति कविकल्पद्रुमः ॥ (चुरां परं-सकं सेट् ।) क, दालयति गात्रं शस्त्रं । इति दुर्गादासः ॥
दल, त्रि भेदे । इति कविकल्पद्रुमः ॥ (भ्वां परं-सकं सकं च सेट् ।) त्रि, दलयत्यसौ कुशमुपा-गतः । इति सुराटिः । दालयति । भेदो विदारणम् । दलति कुठारः काष्ठम् । अभिभिन्नीभावे विकसने चायम् । श्रीमत्पद्मवाकुञ्ज-विदलत्कोरकलम्बध्वनिरिति महानाटकम् । दरविदलितमल्लीवल्लिचञ्चत्परागेति जयदेवः । इति दुर्गादासः ॥
दल, क्ली, (दलतीति । दल+अच् ।) अर्द्धम् । शकलम् । (यथा, मनुः । ८ । २९९ ।
"भार्य्या पुत्त्रश्च दासश्च शिष्यो भ्राता च सोदरः ।
प्राप्तापराधास्ताड्याः स्यू रज्ज्वा वेणुदलेन वा ॥")
शस्त्रीच्छदः । अपत्यम् । पत्रम् । इति मेदिनी । ल, २९ ॥ (यथा, आर्य्यासप्तशत्याम् । ४९२ ।
"कृत्वा रटितं तर्कैर्भिन्नदलेषु गाथये निहितः ।
दलदलदलकन्दलितमञ्जरीके सकलपञ्च ॥")
धनम् । इति शब्दरत्नावली ॥ तमालपत्रम् । इति राजनिर्घण्टः ॥ खड्गम् । इति कोषावली ॥ (पुं, इक्ष्वाकुकुलोत्पन्नपरिक्षिन्महाराजस्य पुत्त्रः । स च महाराजकन्यासम्भूतः । यथा महाभारते । ३ । १९० । ४४ ।
"अथ कस्यचित् कालस्य तस्यां कुमारास्त्रय-स्तस्य राज्ञः समभूवुः शलो दलो बलश्चेति ॥"
अन्यविशेषः । तत्पर्य्याया यथा —
"आलवाल मयामा स्याद्वालमथवा किंशुकः ।
राजाद्यन्तो मलपचो पक्षिकर्णो दलोद्भवः ॥"
इति वैद्यकरत्नमालायाम् ॥)
दलकोषः, पुं, (दलानीव कोषा यस्य । तत्र पुष्पेषु कोषाभावात् तथात्वम् ।) कुन्दपुष्पवृक्षः । इति शब्दमाला ॥
दलनिर्मोकः, पुं, (दलेन निर्मोकयतीति दलं वल्कलम् । तदेव निर्मोक इवाच्छादकमस्य ।) भूर्जवृक्षः । इति शब्दमाला ॥
दलनी, स्त्री, (दल्यते अनेनेति । दल + ल्युट् । ङीप् ।) लोष्टम् । इति शब्दरत्नावली ।
ढेला इति भाषा ॥ (दलति विदारयतीति । दल + कर्त्तरि ल्यु ङीप् च ।) भेदकर्त्री स्त्री । यथा, —
"सा दुर्गा भवभीतिदीर्घतिमिरश्रीलोकपदाधिनी
भूयाद्वः प्रतिपक्षपक्षदलनी चामुण्डवेशीला-शिनी ॥"
इति चिन्तामणिरतरङ्गिणी ॥
दलपः, पुं, (दल्यते असौ दलाति खनति वा । दल + "दधिकुटिदलिकटिलक्षिभ्यः कपन् ।" उणां । ३ । १४३ । इति कपन् ।) स्वर्णम् । शस्त्रम् । इत्युणादिकोषः ॥ (दलं पूर्वं पातीति । पा + कः । दलपतिः ॥)
दलपुष्पा, स्त्री, (दलानि पत्राण्येव पुष्पाण्यस्याः ।) केतकी । इति राजनिर्घण्टः ॥ (केतकीशब्देऽस्या विवरणं विज्ञेयम् ॥)
दलमारिणी, स्त्री, (मारोऽस्त्यस्या इति । मार + इनि । ङीप् च । दले पत्रे मारिणी ।) चेञ्चुः । इति रत्नमाला ॥
दलरुचि, पुं, (दलस्य रुचिरिव ।) कण्टकम् । इति हारावली । ८३ ॥
दलस्नसा, स्त्री (दलस्य स्नसा स्नायुः ।) पत्र शिरा । तत्पर्य्यायः । शाटिः २ । इति हेमचन्द्रः । ४ । १९ ॥
दलाढकः, पुं, (दलैराढक इव ।) वन्य जल-तिलः । हस्ती । गैरिकम् । फेनः । नागकम् । नागकेशरः । मरुवकः । इति मेदिनी । क, १८२ ॥ कुन्दः । करिकणः । शिरीषः । वात्या । इति हेमचन्द्रः ॥
दलाद्यः, पुं, (दलैन पत्रेण आढ्यः ।) पङ्कशृङ्गः । इति त्रिकाण्डशेषः । दलपत्र इति भाषा ॥
दलामल, क्ली, (दले अमलम् ।) मदनकमूलम् । दमनकः । इति मेदिनी । ले, १५५ ॥ मरुवकः । इति शब्दरत्नावली ॥
दलाम्ला, स्त्री, (स्वीयानि दलानि यस्याः ।) चुक्रम् । इति राजनिर्घण्टः ॥
दलि, स्त्री प (दलति इति । दल + "सर्वधातुभ्य इन्" उणां । ४ । ११७ । इति इन् ।) लोष्टम् । इति शब्दरत्नावली ॥ ढेला इति ढेला इति च भाषा ॥
दलिका, स्त्री, (दलति भिनत्तीति । दल + इन् + कर्त्तरि कन् ।) काष्ठम् । इति हेमचन्द्रः । ४ । १८८ ॥
दलित, त्रि, (दलमस्य जातम् । दल + तारका-दित्वात् इतच् । प्रफुल्लम् । इति हेमचन्द्रः । ४ । १८३ ॥ (दल+क्त ।) खण्डितम् । यथा —
दलितहाटकमेदुर्गकादिक्रमदीपिका । (यथा च मोहमुद्गरे । २ । १५ ।
"दलितकुचमध्याङ्गणाली
दधत समाश्लिष्य मोहरौ ॥"
विभिन्नम् । यथा आर्य्यासप्तशत्याम् । ३०७ ।
"लङ्घी मन्दार्गुणां कथं पल्लवम् मदपती कुल ॥")

दलेगन्धि, पुं, (दले गन्धो यस्य। समासान्त इत्। सप्तम्या अलुक् च।) सप्तपर्णवृक्षः। इति त्रिकाण्डशेषः॥

दल्भ, पुं, (दलति विशीर्णो भवत्यनेनेति। दल + "दलिभ्यां भः।" उणां। ३। १५१। इति भः।) प्रतारणा। पापम्। मुनिभेदः। इत्युणादिकोषः॥ चक्रम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

दल्मि, पुं, (दलति विदारयति असुरानिति। दल + "दल्मिः।" उणां। ४। ४७। इति मिः।) इन्द्रः। इति हेमचन्द्रः। २। ८६॥ (दल्यते अनेनेति।) वज्रम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

दव, र गतौ। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) र दन्वति। मजो गतिः। इति दुर्गादासः॥

दवः, पुं, (दुनोति पीडयतीति। दु + अप्।) वनम्। वनाग्निः। इत्यमरः। ३। ३। २५॥ (यथा, भागवते। ८। ६। १२।
"दृष्ट्वा गता निवृतिमद्य सर्व्वे
गजा दवार्त्ता इव गाङ्गमम्भः॥")
अग्निः। इत्यमरटीकायां नीलकण्ठः॥ (दु उपतापे + "ऋदोरप्।" ३। ३। ५७। इत्यप्।) उपतापः। इति केचित्॥

दवथु, पुं, (दवनमिति। टु दु उपतापे + "ट्वितोऽथुच्।" ३।३।८९। इति भावे अथुच्।) परितापः। इति जटाधरः॥ (यथा, काशीखण्डे। २९। ८९।
"दुरीन्दृक्षी दावाग्निर्दवथ्वेकभीरुधि।
दीनसत्त्वाभयमनी दाक्षी दवथुवैरिणी॥"
दूयतेऽनेनेति। करणे अथुच्।) चक्षुरादिदाहः। इति राजनिघण्टः॥

दवाग्नि, पुं, (दवानां वनानां अग्निः। यद्वा, दव एवाग्निः।) दावानलः। इति हलायुधः॥ (यथा, मेघदूते। ५५।
"यच्चेद्वायौ सरति सरलस्कन्धसङ्घट्टजन्मा
बाधेतोल्काक्षपितचमरीबालभारो दवाग्निः॥")

दविष्ठ, त्रि, (अयमेषामतिशयेन दूर इति। दूर + इष्ठन्। "स्थूलदूरयुवेति।" ६। ४। १५६। इति रस्य लुप् ऊकारस्य च गुणः।) सुदूरम्। अत्यन्तदूरवर्त्ति। इत्यमरः। ३। १। ६९॥

दवीयस्, [स्] त्रि, (इदमनयोरतिशयेन दूरम्। दूर + ईयसुन्। स्थूलदूरेत्यादिना साधुः।) सुदूरम्। इत्यमरः। ३। १। ६९॥ (यथा, प्रद्युम्नविजये। २। २६।
"कोऽयं समुद्रदवीयसमपीड्यमिम
न वेद पद्मासमपि स्फुमौलेः।
पातालपातालमपि प्रदृष्टं
न चावनौ सुन्दरि! येन को वा॥")

दश, र क लिपि। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) र क, दंशयति। लिपि दीप्तौ। इति दुर्गादासः॥

दश, इ क ङ दर्शे। दंशने। इति कविकल्पद्रुमः॥ (चुरां-आत्मं-सकं-सेट्।) इ क ङ, दंशयते। दर्शो दंशनम्। इति दुर्गादासः॥

दशन्, [न्] त्रि, (दशयति ईर्ष्यत इति। दशि + बाहुलकात् कनिन्। "दन्श दंशने। न लोपः।" इत्युज्ज्वलदत्तः। १। १५६।) संख्याविशेषः। द्विगुणितपञ्च १०। (यथा, महाभारते। ३। १३४। १७।
"दिशो दशोक्ताः पुरुषस्य लोके
सहस्रमाहुर्दशपूर्णं शतानि।
दशैव मासान् बिभ्रति गर्भवत्यो
दशैरका दश दाशा दशार्णाः॥")
दशसंख्यकानि यथा। हस्ताङ्गुलि १ शम्भुबाहु २ रावणमस्तकम् ३ अवतारः ४ दिक् ५ विश्वदेवः ६ अवस्था ७ चन्द्राश्वः ८ पङ्क्तिः ९। इति कविकल्पलता॥ बहुवचनान्तोऽयं शब्दः। तत्संख्याविशिष्टः। इत्यमरः। २। ६। ९१॥

दशकण्ठ, पुं, (दश कण्ठा गला यस्य।) रावणः। इति शब्दरत्नावली॥ (यथा, रघुः। ८। २९।
"दशपूर्व्वरथं यमाख्यया
दशकण्ठारिगुरुं विदुर्बुधाः॥")

दशकण्ठजित्, पुं, (दशकण्ठं रावणं जयतीति। जि + क्विप् तुक् च।) रामः। इति त्रिकाण्डशेषः॥

दशकन्धर, पुं, (दश कन्धरा ग्रीवा यस्य।) रावणः। इति हेमचन्द्रः। ३। ३७०॥ (यथा, भागवते। ९। १०। २३।
"असत्प्रसादरसनस्य कलया करेण
रक्षाकृतस्य अवतीर्य गुरोर्निदेशे।
तिष्ठन् वनं सदयितानुज आविवेश
यस्मिन् विरुध्य दशकन्धर आर्त्तिमार्च्छत्॥")

दशग्रीव, पुं, (दश ग्रीवा यस्य।) रावणः। इति शब्दमाला॥ (यथा, महाभारते। ३। २७४। १।
"दशग्रीवस्तु सर्व्वेषां श्रेष्ठो राक्षसपुङ्गवः।
महोत्साहो महावीर्य्यो महासत्त्वपराक्रमः॥")
एकादशमन्वन्तरीयसप्तर्षिनामकेन्द्रशत्रुविशेषः। यथा,—
"रुद्रपुत्रस्य ते पुत्राः सर्व्वसावर्णिकस्य तु।
सर्व्वगाः सुशर्म्मा च देवानीकः पुरुर्गुरुः॥
क्षेत्रवर्णा दृढेषुश्च आर्द्रकः पुत्रकस्तथा।
हविष्मांश्च हविष्यश्च वरुणो विश्वविस्तरः॥
विष्णुश्चैवाग्नितेजाश्च ऋषयः सप्त कीर्त्तिताः।
विहङ्गमाः कामगमा निर्म्माणरुचयस्तथा॥
एकैकस्त्रिंशकस्तेषां गणाश्चेन्द्रश्च वै वृषः।
दशग्रीवो रिपुस्तस्य श्रीरूपी घातयिष्यति॥"
इति गारुडे ८७ अध्यायः॥
(असुरविशेषः। यथा, महाभारते। २। ९। १३।
"दशग्रीवश्च बाली च मेघवासा दशावरः॥"
दमघोषस्य पुत्रविशेषः। यथा, हरिवंशे। ११६। २२।
"भीमघोषश्च पुत्रास्तु पञ्च भीमपराक्रमाः।
भगिन्यां वासुदेवस्य श्रुतश्रवसि जज्ञिरे।
शिशुपालो दशग्रीवो रैभ्योऽथोपदिशो बली॥")

दशति, स्त्री, (दशगुणिता दश। निपातनात् साधुः।) शतम्। इति महाभारते दानधर्म्मः॥ (यथा, महाभारते। १। १६। १३।
"कालेन महता कद्रूरण्डानां दशतीर्दश।
जनयामास विप्रेन्द्र! द्वे चाण्डे विनता तथा॥"
"यथा शत दशगुणिता भवतिस्तथा दश दश। दशा दशतः शतमित्यर्थः। दश दशतीः शतानीत्यर्थः॥" इति तत्र नीलकण्ठः॥)

दशधा, अव्य, (दशानां प्रकारः। दश + "संख्याया विधार्थे धा।" ५। ३। ४२। इति धा।) दशप्रकारम्। इति व्याकरणम्॥ (यथा, मनुः। ९। १५२।
"सर्व्वं वा रिक्थजातन्तु दशधा परिकल्प्य च।
धर्म्यं विभागं कुर्व्वीत विधिनानेन धर्म्मवित्॥")

दशन, क्ली, (दश्यते इव शरीरमनेनेति। दन्श + करणे ल्युट्। दशनेति निर्द्देशात् न लोपः।) कवचम्। शिखरे, पुं। इति मेदिनी। ने ७४॥

दशन, पुं, क्ली, (दश्यतेऽनेनेति। दन्श + ल्युट्। दशनेति निर्द्देशात् अत्र करणेऽपि न-लोपः।) दन्तः। इत्यमरभरतौ॥ (यथा, रघुः। ५। ५२।
"उवाच वाग्मी दशनप्रभाभिः
संवर्द्धितोरःस्थलतारहारः॥")

दशनवासस्, [स्] क्ली, (दशनानां वास इव आच्छादकत्वात्।) ओष्ठः। इत्यमरः। २। ६। ९॥

दशनाढ्या, स्त्री, (दशनैः आढ्यो यस्याः। एतत् सेवनेन हि दन्तस्य दार्ढ्यात् अस्य तथात्वम्।) शुक्लिका। इति शब्दचन्द्रिका॥

दशनोच्छिष्ट, पुं, निश्वासः। (दशनेन उच्छिष्टः।) अधरचुम्बनम्। इति मेदिनी। टे ६२। दन्तक्षते, त्रि॥

दशपारमिताधर, पुं, बुद्धः। इति हेमचन्द्रः। २। १४७॥

दशपुर, क्ली, (दश पुराणि पिपर्त्तीति। पॄ + कः।) कैवर्त्तीमुस्तकम्। इत्यमरः। २। ४। १३१॥ (दश पुरो यत्र। "ऋक्पूरब्धूःपथामानक्षे।" ५। ४। ७४। इति अः।) देशभेदः। स मालवदेशैकभागः। पुरभेदः। इति मेदिनी। रे, २११॥ (यथा, मेघदूते। ४९।
"कुन्दक्षेपानुगमधुकरश्रीमुषामात्मबिम्बं
पात्रीकुर्व्वन् दशपुरवधूनेत्रकौतूहलानाम्॥")

दशपूरम्, क्ली, (दश शिरः पूरयतीति। पूर + अण्।) दशपुरम्। इत्यमरटीकायां भरतः॥

दशबल, पुं, (दशसु बलं यस्य। यद्वा, दानशीलक्षमावीर्य्यध्यानप्रज्ञाबलानि च।

उभयञ्च प्रतिविधानं दशवृद्धन्यादि च ।"
इति वचनात् दश वर्णानस्य ।) शूद्रः । इत्यमरः । १ । १ । १४ ।

दशभुजा, स्त्री, (दश भुजा बाहवो यस्याः ।) दुर्गा । यथा, कालिकापुराणे ५८ अध्याये ।
"इतिहासं पुराकल्पे मनोः स्वायम्भुवेऽन्तरे ।
प्रादुर्भूता दशभुजा देवी दैत्यविनाशाय वै ।
कृष्णा त्रेतायुगस्यादौ जगतो हितकाम्यया ।
पुराकल्पे यथा वृत्तं प्रतिकल्पं तथा तथा ॥
प्रवर्त्तते स्वयं देवी दैत्यानां नाशनाय वै ।
प्रतिकल्पं भवेन्नामो रावणस्यापि रक्षसः ॥
तथैव जायते युद्धं तथा त्रिदशरक्षसोः ।
एवं रामस्य हस्ताच्च रावणस्य वधस्तथा ।
भवितव्यानि भूतानि तथा देवी प्रवर्त्तते ।
पूजयन्ति सुराः सर्व्वे वर्षे गौरीमावास्यपि ॥
तथैव च नराः सर्व्वे कुर्य्युः पूजां यथाविधि ॥"
(दशबाहुविशिष्टे, त्रि । यथा कात्यायनीतन्त्रे महाकाल्या ध्यानम् ।
"दशवक्त्रा दशभुजा दशपादाञ्जनप्रभा ।
विशालया राजमाना त्रिंशल्लोचनमालया ॥")

दशभूमिग, पुं, (दशसु भूमीषु दानादिविषयेषु गच्छतीति । गम + डः ।) बुद्धः । इति हेमचन्द्रः । २ । १४७ ।

दशभूमीश, पुं, (दशसु भूमीषु दानादिषु ईष्टे प्रभवतीति । ईश् + क ।) बुद्धः । इति त्रिकाण्डशेषः ।

दशम, त्रि, (दशानां पूरणः । दशन् + "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् । "नान्तादसंख्यादेर्मट् ।" ५ । २ । ४९ । इति मट् ।) दशसंख्यायाः पूरणः । इति व्याकरणम् ॥ दशम इत्यादि भाषा । (यथा ऋग्वेदे । १ । १५८ । ६ ।
"दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे ॥")

दशमी, स्त्री (दशम + ङीप् ।) तिथिविशेषः । सा चन्द्रस्य दशमकलाक्रियारूपा तदुपलक्षितकालपरा वा । इति तिथ्यादितत्त्वम् ॥ एषा धर्म्मस्य तिथिरतिप्रिया । यथा,—
"दशमी च तिथिस्तस्यामनीव दयिता भवेत् ।
तस्यां दध्याशनो यस्तु सुमनी भवति नरः ॥
तस्य पापक्षयं तातु कुर्म्मस्यहरणञ्च ॥"
इति वराहपुराणम् ॥ * ॥
तत्र जातस्य फलं यथा, कोष्ठीप्रदीपे ।
"विद्याविनोदी धनपुत्रयुक्तः
प्रलम्बकण्ठो मदनाधिकश्च ।
उदारचित्तः सुभगो दयालुः
प्रसूतिकाले दशमी यदि स्यात् ॥"
शिशुलालका । मरणावस्था । अतिप्रवयोऽवस्था । इति माघटीकायां भरतः ॥ (दशम भागः दशमी । यथा, मनुः । २ । ८ ।
"मासि नष्टचतुर्थी च विद्धा नाविद्धा चैव पञ्चमी ।
एवं वाक्यैव दशमी स्मृता ॥")

दशमी, [न्] त्रि, (दशम + "वयसि पूरणात् ।" ५ । २ । १३० । इति इनिः ।) अतिवृद्धः । नवतेरूर्द्ध्वं दशमोऽवस्थाविशेषः स विद्यते अस्येति । इत्यमरभरतौ ॥

दशमीस्थ, त्रि, (दशम्यामवस्थायां तिष्ठतीति । स्था + कः ।) क्षीणरागः । स च अन्तिमावस्थापन्नः । वृद्धः । स च अतिवृद्धो भवतीत्यपि गतमानः । इत्यमरभरतौ ॥ गताधनम् । इति हेमचन्द्रः ॥

दशमुख, पुं, (दश मुखानि यस्य ।) रावणः । इति त्रिकाण्डशेषः ॥ (यथा, गीतगोविन्दे । १ । ११ ।
"वितरसि दिक्षु रणे दिक्पतिकमनीयं
दशमुखमौलिबलिं रमणीयम् ॥")

दशमुखान्तक, पुं, (दशमुखस्य रावणस्य अन्तकः ।) श्रीरामः । इति शब्दरत्नावली ॥

दशमूत्रक, क्ली, (दशानां मूत्रकाणां समाहारः ।) हस्तिमहिषोष्ट्रगवाजमेषाश्वगर्दभमानुषमानुषीणां दशानां मूत्रम् । इति राजनिर्घण्टः ॥ (एतद्गुणा यथा सुश्रुते । १ । ४५ ।
"गोमहिष्यजाविगजहयखरोष्ट्राणां तीक्ष्णानि कटून्युष्णानि तिक्तानि लवणानुरसानि लघूनि शोधनानि कफवातक्रिमिमेदोविषगुल्मार्शउदरकुष्ठशोथारोचकपाण्डुरोगहराणि हृद्यानि दीपनानि च सामान्यतः । भवन्ति चात्र ।
"लघु सर्वं कटुतीक्ष्णोष्णं लवणानुरसं लघु ।
शोधनं कफवातघ्नं क्रिमिमेदोविषापहम् ॥
अर्शोजठरगुल्मघ्नं शोथारोचकनाशनम् ।
पाण्डुरोगहरं भेदि हृद्यं दीपनपाचनम् ॥
गोमूत्रं कटु तीक्ष्णोष्णं सक्षारत्वान्न वातलम् ।
लघ्वग्निदीपनं मेध्यं पित्तलं कफवातजित् ॥
शूलगुल्मोदरानाहविरेकास्थापनादिषु ।
मूत्रप्रयोगसाध्येषु गव्यं मूत्रं प्रयोजयेत् ॥
दुर्नामोदरशूलेषु कुष्ठमेहाविशुद्धिषु ।
आनाहशोफगुल्मेषु पाण्डुरोगे च माहिषम् ॥
कासश्वासापहं शोषकामलापाण्डुरोगनुत् ।
कटुतिक्तान्वितं छागमीषन्मारुतकोपनम् ॥
आव्यं श्लेष्मव्याधिघ्नं पर्णीयरोगे हितम् ।
यथारविलासकट्टतुक्तं वातग्रहविकारनुत् ।
दीपनं कटुतीक्ष्णोष्णं वातचेतोविकारनुत् ।
आश्वं कफहरं मूत्रं क्रिमिदद्रुषु शस्यते ॥
सतिक्तं लवणं भेदि वातघ्नं पित्तकोपनम् ।
तीक्ष्णं क्षारे किलासे च नागं मूत्रं प्रयोजयेत् ॥
गरचेतोविकारघ्नं तीक्ष्णं ग्रहणिरोगनुत् ।
दीपनं गार्दभं मूत्रं क्रिमिवातकफापहम् ॥
शोफकुष्ठोदरोन्मादमारुतक्रिमिनाशनम् ।
अर्शोघ्नं कारभं मूत्रं मानुषञ्च विषापहम् ॥")

दशमूल, क्ली, (दशानां मूलानां समाहारः । पात्रादित्वात् न ङीप् ।) पाचनविशेषः । यथा,—
"बिल्वश्योनाकगम्भारीपाटलागणिकारिकाः ।
दीर्घं स्वल्पपञ्चमूलमिदं महत् ।
शालपर्णी पृश्निपर्णी बृहतीद्वयगोक्षुरम् ।
वातपित्तहरं वृष्यं कनीयः पञ्चमूलकम् ।
उभयं दशमूलन्तु सन्निपातज्वरापहम् ।
कासे श्वासे च तन्द्रायां पार्श्वशूले च शस्यते ।
पिप्पलीचूर्णसंयुक्तं कण्ठहृद्ग्रहनाशनम् ॥"
इति सुखबोधः ॥

दशयोगभङ्ग, पुं, (दशयोगस्य भङ्गः ।) यात्रादिकर्मणि वर्जनीयविशेषः । अथ तदुद्देशः । यथा,—
"तिथ्यङ्कवेदैकदशोनविंश-
भैकादशाष्टादशविंशभाश्च ।
रसोऽद्रिसप्तद्युतिकाश्च
योगा दशैते दशयोगभङ्गः ॥"
अस्यार्थः । कृत्तिकाश्लेषाविशाखाद्युत्तरफल्गुरविशुततभषाद्रर्यौयगि यदि रवी चन्द्रः स्यु तदा दशयोगभङ्गः स्यात् ॥ अस्य प्रतिप्रसवो यथा,—
आद्यपादे स्थिते सूर्य्ये तुरीयांशं विवर्ज्जयेत् ।
द्वितीयस्थे तृतीयञ्च विपरीतमतोऽन्यथा ॥"
इति ज्योतिषतत्त्वम् ॥

दशरथ, पुं, (दशसु दिक्षु गतो रथो यस्य ।) सूर्य्यवंशीयराजविशेषः । स अयोध्याधिपतिः । अस्योत्पत्तिर्यथा —
सौराष्ट्रदेशीयोऽजभिक्षुनामद्विजपत्नी कलहानाम्नी सा सर्व्वदा कलहात् भर्त्ता प्रेतत्वं गता सा कदाचित् भ्रमन्ती धर्म्मदत्तनाम्ना द्विजेन स्पृष्टा तत्पुण्योपमार्ज्जनं तत्कालस्मृतपूर्ब्बजन्मवृत्तान्त पापमात्मनः परिहृत्य तमुवाच हे द्विज । मयि दयां कुरु यतः कथं मुक्तिं प्रयास्यामि । धर्म्मदत्त उवाच तीर्थदानव्रतादिभिः पापानि नश्यन्ति । तेषु ते नाधिकारः तथापि कार्त्तिकव्रतस्य पुण्यार्द्धं ददामि इत्युक्त्वा तुलसीमिश्रितजलेन तामभिषिच्य द्वादशाक्षरमन्त्रं श्रावयामास । ततः सा दिव्यरूपा अभवत् । तदा सा दिव्यं विमानमारुह्य विष्णुगणपुण्यशीलसुशीलाभ्यां सह तद्विमाने आरोहिता । धर्म्मदत्तो द्विमाने तौ गणौ च दृष्ट्वा अतिभक्त्या भूमौ पपात पुण्यशीलसुशीलौ तमुत्थाप्य प्रशस्य ऊचतुः त्वमेतत्पुण्यात् भार्य्याभ्यां सह वैकुण्ठं यास्यसि । तत्र बहुवर्षसहस्राणि स्थित्वा पुनरत्र सूर्य्यवंशोद्भवदशरथनामा राजा भविष्यसि अयोध्यायां तत्र भार्य्याद्वययुतं त्वां विष्णुः पुत्रत्वेन शोभयिष्यति । इति पाद्मे कार्त्तिकमाहात्म्यम् ॥

दशरूपभृत्, पुं, (दश मत्स्यकूर्म्मवराहादीनि रूपाणि बिभर्त्तीति । भृ + क्विप् तुगागमश्च ।) विष्णुः । इति शब्दचन्द्रिका ॥ (दशावतारशब्देऽस्य विवृतिर्ज्ञेया ॥)

दशवाजी, [न्] पुं, (दश वाजिनो रथे यस्य ।) चन्द्रः । इति हेमचन्द्रः । २ । १८ ।

दशहरा, स्त्री (दश जन्मान्तरीयपापानि हरति, दश दशजन्मकृतानि वा पापानि हरतीति । हृ + "हरतेरनुद्यमनेऽच् ।" ३ । २ । ९ । इत्यच् ।

सनातन।) ज्यैष्ठशुक्लदशमी। यथा, ब्रह्मपुराणब्रह्मवैवर्त्तयोः ।

"ज्यैष्ठस्य शुक्लदशमी संवत्सरमुखी स्मृता।
तस्यां स्नानं प्रकुर्व्वीत दानञ्चैव विशेषतः ॥
यां काञ्चित् सरितं प्राप्य दद्याद्दर्भतिलोदकम्।
मुच्यते दशभिः पापैः सुमहापातकोपमैः ॥
अत्र केवलदशम्यां नदीमात्रे दशकरणकतिल-तर्पणाङ्गकस्नानाद्दशविधपापक्षयः फलम्।
एवं दानादावपि। वस्तुतस्तु वक्ष्यमाणभविष्ये जाह्नवीपदश्रवणात् हेतुमन्निगदस्वरसाच्च अत्र वैवर्त्तेऽपि सरित्पदं जाह्नवीपरम्। अन्यथा नानाविधिः स्यात्। यां काञ्चिदिति तु जाह्नवी-स्तावकम्। अन्यथा कूपस्नानेऽपि दशविधपापक्षयः स्यात्। मन्त्रलिङ्गे जाह्नवीतिपदश्रवणाच्च। गङ्गामधिकृत्य वाक्ये।
'शुक्लपक्षस्य दशमी ज्यैष्ठे मासि द्विजोत्तम !।
हरते दश पापानि तस्माद्दशहरा स्मृता ॥
अत्र केवलदशम्यां दशविधपापक्षयः फलम्।
भविष्ये।
'ज्यैष्ठशुक्लदशम्यान्तु हस्तयोगेन जाह्नवी।
हरते दश पापानि तस्माद्दशहरोच्यते ॥
दशपापानीति दशजन्मकृतानीति। विशिष्टयोग-माह वराहपुराणे यम ।
'ज्यैष्ठे मासि सिते पक्षे दशम्यां हस्तयोगतः।
दशजन्माघहा गङ्गा दशपापहरा स्मृता ॥
अत्र दशजन्मकृतदशविधपापक्षयः फलम्।
'प्राप्ते कर्म्मणि नानेको विधातुं शक्यते गुणः।
अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः' ॥
इति न्यायेन हस्तयोगस्य नाप्राप्तत्वाद्गुणविधिः। दशमीविधिर्विशिष्टविधि तत्राभावे स्नानम्। उभयदिने न लाभे परदिन एव। अत्रापि पूर्व्वदिने वक्ष्यमाणकुञ्जवारलाभे तत्रापि स्नान-दानादीनि यत्नाभावात्। तत्र पूर्व्वदिने तथा-विधस्नानं कृत्वा परदिने केवलदशम्यामपि दश-विधपापक्षयकामेन स्नातव्यम्। ब्रह्म।
'ज्यैष्ठे मासि सितिसुतदिने शुक्लपक्षे दशम्यां हस्ते शैलान्निरगमदियं जाह्नवी मर्त्त्यलोकम्।
पापान्यस्यां हरति च तिथौ सा दशेत्याहुरार्य्याः पुण्यं दद्यादपि शतगुणं वाजिमेधायुतस्य ॥
भौमवारहस्तायुक्तशुक्लदशम्यां गङ्गास्नाना-द्दशविधपापक्षयशतगुणवाजिमेधायुतजन्यपुण्य-समपुण्यं फलम्। रामार्च्चकवाल्मीकि ।
'अदत्तानामुपादानं हिंसा चैवाविधानतः ।
परदारोपसेवा च कायिकं त्रिविधं स्मृतम् ॥
पारुष्यमनृतञ्चैव पैशुन्यञ्चापि सर्व्वशः ।
असम्बद्धप्रलापश्च वाङ्मयं स्याच्चतुर्व्विधम् ॥
परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम् ।
वितथाभिनिवेशश्च त्रिविधं कर्म्म मानसम् ॥
एतानि दश पापानि प्रशमं यान्तु जाह्नवि !।
स्नानेन मम ते देवि ! जले विष्णुपदोद्भवे !॥
विष्णुपादार्घ्यसम्भूते गङ्गे ! त्रिपथगामिनि !।
धर्म्मद्रवीति विख्याते पापं मे हर जाह्नवि !॥
अत्र मन्त्रेण प्रणवपूर्व्वकाण्येतानि सामान्य-स्नानमन्त्रान्ते मज्जनस्यादौ पाठ्यानि। यागानु-ष्ठानामन्ते अभिनिवेश इति न्यायात् मन्त्रान्ते कर्म्मसन्निपात इति न्यायात् मन्त्रान्ते कर्म्मा दीनि सन्निपातयेत् व्याप्तजन्मीयात् ॥ • ॥
हिंसापैशुन्यादिभेदमाह कामधेनौ देवलः ।
'कायेन मनसा वाचा वध्या प्राणिनो पुनः ।
यः प्रवर्त्तयति द्वेषात् सा हिंसेति समासतः ॥
यन्नार्थं नाप्रयोज्यं प्रयुक्ता नरपुङ्गव।
भयानासैव हिंसायमगस्त्यो ह्याचरत् पुरा ॥
यदपि परुषवचनमपवादः पैशुन्यमनृतं तथा।
तासां निष्ठुरवचनमिति वाङ्मयानि षट्। परेषां देशजातिकुलविद्याधिक्यरूपवृत्ताचारपरिच्छ-दशरीरकर्म्मजीविनां प्रत्यक्षदोषवचनं परुषम्।
'यथान्यत् क्रोधसन्तापत्रासकृज्जनने यत्।
परुषं तच्च विज्ञेयं यथान्यच्च तथाविधम् ॥
पत्तुषमिति शुभाश्च वचनं भाषयेति च।
प्रशंसानिन्दने देवाल परवाम विधिष्यते ॥ • ॥
तेषामेव परुषवचनानां परोक्षसद्भाषणमप-वादः ॥ • ॥
गुणवत्परिवन्धुभ्यात्मिनस्वकाभिः अर्थोपघातार्थं दोषोपाख्यानं पैशुन्यम् ॥ • ॥
अनृतं द्विविधं असत्यमसत्वादश्चेति ॥ • ॥
'देशकालप्रसङ्गाच्च परार्थपरिकल्पनात्।
नर्म्महासप्रसङ्गाच्च भाषणं चपभाषणम् ॥ • ॥
गुह्याङ्गमैथुनं प्राणां वचनं निष्ठुरं विदुः।
यद्यद्वा वचो नीचं स्त्रीपुंसोर्मिथुनाश्रयम् ॥•॥
एवं वह्निविकल्पस्य दुष्टसन्नयो भाषणात्।
एकः यत्तस्य वा क्रूरमनर्थं प्रतिपद्यते।
अनवद्यं निन्दनं प्रशंसानिन्दनम्। तथाप्यत्र चात्रोभयवृद्धयोरविरोधः। समपालापसमत्व मिदमादरेयं भावघ्नापवादयोरैक्यात् निष्ठुरस्य परुषान्तर्भावाच्च। असम्बद्धप्रलापश्चभाषणयोः पर्य्यायत्वात् नार्थान्तरम्। अभिध्यानमपहर णायचिति शेषः। वितथे असत्यभूते वस्तुनि अभिनिवेशः पुनः पुनः सङ्कल्पः।" इति तिथ्यादितत्त्वम् ॥ • ॥ अपि च।
"अथ ज्येष्ठशुक्लदशमी दशहरा। तदुक्तं हेमाद्रौ ब्राह्मे।
"ज्यैष्ठे मासि सिते पक्षे दशमी हस्तसंयुता।
हरते दश पापानि तस्माद्दशहरा स्मृतेति ॥
वाराहेऽपि।
'दशमी शुक्लपक्षे तु ज्यैष्ठे मासि कुजेऽहनि।
अवतीर्णा यतः स्वर्गाद्धस्तर्क्षे च सरिद्वरा।
हरते दश पापानि तस्माद्दशहरा स्मृतेति ॥•॥
स्कान्दे तु दशयोगा उक्ताः। यथा –
'ज्यैष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः।
व्यतीपाते गरानन्दे कन्याचन्द्रे वृषे रवौ।
दशयोगे नरः स्नात्वा सर्व्वपापैः प्रमुच्यते। इति।
अत्र बुधभौमयोः कल्पभेदेन व्यवस्था। इयञ्च यथैव योगबाहुल्यं सैव ग्राह्या। योगाधिक्ये फलाधिक्यात् ॥•॥
ज्यैष्ठे मलमासे सति तत्रैव दशहरा कार्य्या न तु शुद्धे।
'दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु।
इति हेमाद्रौ ऋष्यशृङ्गोक्तेः ॥ • ॥
तथा स्कान्दे।
'यां काञ्चित् सरितं प्राप्य दद्याद्दर्भतिलोदकम्।
मुच्यते दशभिः पापैः स महापातकोपमैः ॥
अत्र विशेषः काशीखण्डे।
'ज्यैष्ठे मासि सिते पक्षे प्राप्य प्रतिपदं तिथिम्
दशाश्वमेधिके स्नात्वा मुच्यते सर्व्वपातकैः ॥
एवं सर्व्वासु तिथिषु क्रमस्नायी नरोत्तमः।
आशुक्लपक्षदशमीं प्रतिजन्माघसुमुच्यते ॥
तथा।
'लिङ्गं दशाश्वमेधेशं दृष्ट्वा दशहरातिथौ।
दशजन्मार्जितैः पापैस्त्यज्यते नात्र संशयः ॥
तथा भविष्योत्तरकाशीखण्डयोः।
'निशायां जागरं कृत्वा समुपोष्य च भक्तितः।
पुष्पैर्गन्धैश्च नैवेद्यैः फलैश्च दशसंख्यया ॥
तथा दीपैश्च ताम्बूलैः पूजयेत श्रद्धयान्वितः।
स्नात्वा भक्त्या तु जाह्नव्यां दशकृत्वो विधानतः ॥
दशप्रसृतिकृष्णांश्च तिलान् सर्पिश्च वै जले।
सक्तुपिण्डान् गुडपिण्डान् दद्याच्च दशसंख्यया ॥
ततो गङ्गातटे रम्ये हैम्यां रूप्यमयीं वा तथा।
गङ्गायाः प्रतिमां कृत्वा वक्ष्यमाणस्वरूपिणीम् ॥
संस्थाप्य पूजयेद्देवीं तदलाभे मृदापि वा।
अथ तत्राष्टदलञ्चैव लिखेत् पिष्टेन वै हविः ॥
वक्ष्यमाणेन मन्त्रेण कुर्य्यात् पूजां विधानतः।
नारायणं महेशञ्च ब्रह्माणं भास्करं तथा ॥
भगीरथञ्च नृपतिं हिमवन्तं नगेश्वरम्।
गन्धपुष्पादिभिः सम्यक् यथाशक्ति प्रपूजयेत् ॥
दशप्रस्थान् तिलान् दद्यात् दशविप्रेभ्य एव च।
दशप्रस्थान् यवान् दद्यात् दशधेनूर्गवीश्वरा ॥
मत्स्याः कच्छपमण्डूकाः। पक्ष्यश्च। सुहितास्त्वपि सर्व्वे स्मृतमिति मत्स्यायने उक्तम्।
'मत्स्यकच्छपमण्डूकमकरादिजलेचरान्।
कारयित्वा यथाशक्ति स्वर्णेन रजतेन वा ॥
तन्त्राणि पिष्टमयानभ्यर्च्च्य कुसुमादिभिः।
गङ्गायां प्रक्षिपेद्दान्यदीपादीन् प्रवाहयेत् ॥
पुष्पाद्यैः पूजयेद् गङ्गां मन्त्रेणानेन भक्तितः।

ॐ नमः शिवायै नारायण्यै
दशहरायै गङ्गायै नमो नमः ।

इति मन्त्रन्तु यो मर्त्यो दिने तस्मिन् दिवानिशम्।
जपेत् पञ्चसहस्राणि दशधर्म्मफलं लभेत् ॥•॥
काशीखण्डे मन्त्र उक्तः।
'नमः शिवायै प्रथमं नारायण्यै पदं ततः।
दशहरायै पदमिति गङ्गायै मन्त्र एव वै ॥
स्वाहान्तः प्रणवादिश्च भवेद्विंशाक्षरो मनुः।
पूजा दानं जपो होमश्चैव मनुना स्मृतः' । इति
अथ गङ्गास्तोत्रपाठमपि दशहरायां कुर्य्यात्।
तदुक्तं भविष्ये।
गङ्गा दशम्यामेतच्च स्तोत्रं गङ्गाजले स्थितः।
यः पठेत् दशकृत्वस्तु दरिद्रो वापि वाक्यकः ॥

सोऽपि तत्फलमाप्नोति गङ्गां यः पूजयेत्तथा ।” इति
ज्येष्ठप्रतिपदादिदशमीपर्य्यन्तदिनदशकव्यापा
पठनीयमिति शिष्टाः । अत्र पाठोऽपि विस्तर-
स्तोत्राणि च भङ्गलतविम्बपत्रीवतोऽर्थेय ।
विस्तरभीतस्तु न लिख्यते ॥ * ॥ एवं कुर्वत
फलमुक्तं काशीखण्डे ।
‘एवं कृत्वा विधानेन वित्तशाठ्यविवर्ज्जितः ।
सुपपापी वस्त्रमायैर्दशभावे प्रमुच्यते ॥
तस्मात् कामानवाप्नोति शिवे च सह लीयते ॥
इति ।
अस्यां सेतुबन्धरामेश्वरस्य प्रतिष्ठादिकत्वात् विशे-
षेण पूजा कार्या । तदुक्तं स्कान्दे सेतुमाहात्म्ये ।
‘ज्यैष्ठे मासि सिते पक्षे दशम्यां बुधहस्तयोः ।
गरानन्दे व्यतीपाते कन्याचन्द्रे वृषे रवौ ॥
दशयोगे महापुण्ये लिङ्गरूपधरं हरम् ।
रामो वै स्थापयामास शिवलिङ्गमनुत्तममिति ॥”
इति निर्णयसिन्धुद्वितीयपरिच्छेदधृतवच-
नम् । किञ्च ।
‘अतः परं तु नृपते दशम्यां ज्यैष्ठके सिते ।
दशपापहरायाथ अदत्तादानकस्य च ॥
हिंसायाश्च विधिना परदारोपसेवनम् ।
पारुष्यानृतपैशुन्यासम्बद्धस्य भाषणम् ॥
परद्रव्याभिध्यानस्य मनसानिष्टचिन्तनम् ।
एतद्दशपापनाशाय गङ्गास्नानं करोम्यहम् ॥”
इति गारुडे २१५ अध्यायः ॥ * ॥
अपरञ्च ।
“ज्यैष्ठे दशहरायान्तु विष्णोरिति नृप ! शृणु ।
यथा वा विधिना कार्य्या हरेर्विष्णोर्नृपे यथा ॥
प्रयत्नात् पार्थिव कुर्य्यात् प्रतिमां काञ्चनीं हरेः ।
अथ तैजसमयीं चापि दार्व्वीं वा शिलामयीम् ॥
प्रतिष्ठां विधिवत्तस्याः कुर्य्याद्विप्र पुरोहित ।
तां समाप्य सुरागारे स्वयं वा यत्नतः शुचिः ॥
वासुदेवस्य बीजेन पूर्व्वोक्तविधिना तथा ।
अन्नोपचारैर्भक्त्या तु वासुदेवं प्रपूजयेत् ॥
पूजान्ते संस्कृते वह्नौ जुहुयाद्धि तिलान् द्विज ।
आज्ये चरुं तु जुहुयाज्जुहुयाच्च हरेः सुधीः ॥
संपूज्य वासुदेवन्तु होमं कृत्वा ततो द्विज ।
शुभस्थानगते तान्तु प्रतिमां सत्वरं नयेत् ॥
प्रतिमायाः समीपे तु द्वौ स्पृष्ट्वा दक्षिणपाणिना ।
प्राणप्रतिष्ठां कुर्व्वीत तस्यां मन्त्रैर्वै हरेः ।
कृतायान्तु प्रतिष्ठायां प्राणानां पृथक् पृथक् ।
विष्णोः प्राणास्तां प्रतिमामायान्ति नियतं ध्रुवम् ॥
प्राणेभ्यश्चाप्यतिश्च अन्यदेवस्य विष्णवे भवेत् ।
अकृतायां प्रतिष्ठायां प्राणानां प्रतिमासु च ।
यथा पूर्व्वं तथा भाव अर्च्चायां न विष्णुता ॥
अन्येषामपि देवानां प्रतिमास्वपि पार्थिव ।
प्राणप्रतिष्ठा कर्त्तव्या तस्यां देवत्वसिद्धये ॥
अन्यथैव तु दार्व्वं स्यात् शिला दारु यथा शिला ।
अन्यच्च मृण्मयं स्यात् प्राणस्थापनमन्तरा ।
वासुदेवस्य बीजेन नाडीन्यासक्रमेण च ।
तस्यैव प्राणसंस्थार्थं प्रतिष्ठामाचरेद्धरेः ॥
तस्यैव दशमेऽह्नि पूजा अत्र च भक्तितः ।
एभिर्मन्त्रैः प्रतिष्ठाञ्च तदन्येऽपि समाचरेत् ॥
अङ्गे न्यासः प्रतिष्ठाञ्च अङ्गे न्यासं चरेत् च ।
अङ्गे देवस्य षडङ्गे न्यासमिति यजुश्चरन् ॥
अङ्गमन्त्रैश्च मन्त्रैर्दिक्पालैरेव च ।
प्राणप्रतिष्ठां सर्व्वत्र प्रतिमासु समाचरेत् ॥
प्रतिमापूजने कुर्य्यात् तत्रापि च मन्त्रवित् ।
प्राणप्रतिष्ठां प्रथमं पूजाभागविशुद्धये ॥
अथवा प्राणप्रतिष्ठान्तु प्रतिमापूजनादृते ।
न कश्चित्तु बुधः कुर्य्यात् हत्वा कर्म्ममनुष्ठयात् ॥
विष्णोरिष्टिर्मिता हत्वा दशम्यां पार्थिवोत्तम ।
तस्यामेव तु पूर्णायां प्रतिमां स्थापयेत्तत ।
एवं दशहरायान्तु सर्व्वेष्टिं पार्थिवो हरेः ।
सर्व्वान् कामानवाप्नोति निर्व्विघ्नोऽपि स
जायते ॥”
इति कालिकापुराणे ८८ अध्यायः ॥

दशा, स्त्री, (दशतीव । दंश + बाहुलकादौणा-
दिकः अः । अवयवदशकेति निर्द्देशात् अनि-
ष्वपि नलोपः । यद्वा दशति इति । गुरोश्चेत्य-
तः टाप् ।) अवस्था । (यथा पञ्चतन्त्रे । १ । ३८२ ।
“आपदि येनोपकृतं येन च हसितं दशासु
विषमासु ।
उपकृत्य तयोरुभयोः पुनरपि जातं नरं मन्ये ॥”)
दीपवर्त्तिः । (यथा कुमारे । ४ । ३० ।
“अहमस्य दशेव पश्य मा-
मविषह्यव्यसनेन धूमिताम् ॥”)
वस्त्रान्ते वस्त्रपाशोऽर्थे शब्दः । इति मेदिनी ।
षे, ८ । (यथा, मनुः । ३ । ४४ ।
“वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने ॥”)
चित्तम् । इत्यजयपालः ॥ * ॥ शरीरस्य दश
दशा यथा,—
गर्भवासः १ जन्म २ बाल्यम् ३ कौमारम् ४
पौगण्डम् ५ यौवनम् ६ स्थाविर्य्यम् ७ जरा ८
प्राणरोधः ९ नाशः १० । इति मोक्षधर्म्मे
टीकायां नीलकण्ठः ॥ * ॥ कामजदशदशा यथा,
“अभूदाभासतस्य नयन प्रकृतिर्भावना च
व्यावृत्तिः स्यात्तस्य विषयपरामर्शतश्चेतसोऽपि ।
निर्लज्जत्वं तदनु तनुता निद्रयाऽतस्तपोऽङ्ग-
व्यादौ मूर्च्छा तदनु मरणं स्मरस्य प्रकर्षेण ॥”
इत्यलङ्कारमाला ॥ * ॥
अन्यौ नरस्य यथोक्तायुः दशाश्चरप्रक-
भोग्यारम्भादिविधिः । तत्र वासरिकी दशा
यथा,—
“इह सर्व्वस्य दशा सैषा धान्यो दशपदश्च ।
अजावत्सकारके पीडा बुधे यस्य च सौम्यता ॥
धनेश्वरे दश प्रोक्ता गुरोरेकोनविंशतिः ।
राहोरष्टादशवर्षाणि भार्गवस्यैकविंशतिः ॥” * ॥
अष्टोत्तरीमतनक्षत्रविशेषघटितदशानां दशा
नियमो यथा —
“कृत्तिकादित्रये सूर्य्यः अष्टौ रौद्रचतुष्टये ।
मघादावुत्तरे भौमा बुधो ज्येष्ठचतुष्टये ॥
अनुराधात्रये शौरिर्जीवः पूर्व्वचतुष्टये ।
धनिष्ठादित्रये राहुः भृगुः शुभचतुष्टये ॥ * ॥
कर्मीपङ्क्रमीमाक्लिम्यासि मदरा कुमाम् ।
गुरुचन्द्रमसञ्चारो यदेक्षितपदप्रदाः ॥”
दशाफलम् ।
“उद्विग्नचित्तपरिखेदितचित्तनाथ-
मीममहायनदीविमज्जाभिघातैः ।
सञ्चोभितः स्वजनबन्धुवियोगदुःखै-
र्भानोर्दशा भवति कष्टकरी नराणाम् ॥ १ ॥
सौख्यं विभर्ति वरवाहनवाचनाल-
कीर्त्तिप्रतापबलवीर्य्यसमन्वितश्च ।
मिष्टान्नपानशयनासनभोजनानि
चान्द्री ददाति धनधान्यसमृद्धिमेवम् ॥ २ ॥
शस्त्राभिघातशस्त्रभयरैञ्जयोऽ
पित्तज्वरं विकलताञ्च यदि करोति ।
चौर्य्याग्निदाहभयभङ्गविपत्तिरोगं
कीर्त्तिप्रतापयशदा च दशा कुजस्य ॥ ३ ॥
दिव्याङ्गनावदनपङ्कजषट्पदत्वं
लीलाविलासधनधान्यसुभोजनञ्च ।
नानाप्रकारविभवागमकौशलर्द्धि-
श्चिह्नं भवेद्बुधदशासु सुतादिवृद्धिः ॥ ४ ॥
मिथ्याप्रवादवशबन्धनकार्य्यहानि-
शान्तिप्रवर्द्धयुक्तप्रियसुहृद्वियोगैर्विशेषैः ।
मैत्रे च वैरमभिवाञ्छति वैरयुक्त
कष्टादिपापरत्यासु शनैश्चरस्य ॥ ५ ॥
रम्यं यदा विभवभव्यसमागतश्रीः
प्राप्नोति सौख्यवनपार्थिवभूतियुक्तम् ।
धर्म्मार्थकामसुखभोगविधायिनीयं
यावद्गुरुस्य हि दशा पुरुषो हि तावत् ॥ ६ ॥
मुक्ता विहीनगतिमातृवियोगदुःख-
गतार्द्धसिद्धिभयभङ्गविषादशोकम् ।
धनापहृद्भयदेहगतं करोति
राहोर्दशा भवति जीवनसंशयाय ॥ ७ ॥
नानाप्रभावविभवं प्रमदाविलास-
श्वेतातपत्रगजवाजिसुवर्णलाभम् ।
शृङ्गारलालसमपूर्वमनोरथञ्च
शौक्रीन्द्रा भवति निश्चितराजलक्ष्मीः ॥ ८ ॥
रवेरन्तर्दशा मासाः ४ मस पलम् ।
उद्विग्नचित्तपरिखेदितचित्तनाथ-
मीमप्रवासधनभीतिमहाभिघातम् ।
दुःखामयोग्रधनमनानि चैव
भानोर्दशा प्रकुरुते स्वयु राजपीडाम् ॥ १ ॥
सोमस्य मासाः १० पलम् ।
सद्यद्वट्टयमार्गं भैक्ष्यादानि भवन्ति च ।
कुर्वीत कष्टरोगापी भानोरन्तर्दशा नृणाम् ॥ २ ॥
मङ्गलस्य मासाः ३ दिनम् १० पलम् ।
सर्व्वेषां तिलकी भूपः सम्पदं पुत्रपादकम् ।
प्राप्नोति धनधान्यानि रवेरन्तर्गते कुजे ॥ ३ ॥
बुधस्य मासाः ११ दिनम् १० पलम् ।
व्याधिं स्वकुलमित्रं वर्म्मार्तो विवर्द्धिका ।
नाशं च सर्वकार्याणि भानोरन्तर्गते बुधे ॥ ४ ॥
शनेर्मासाः ६ दिनम् १० पलम् ।
कलत्रं मित्रमायासं शत्रुपीडां पराभवम् ।
चौरि करोति दैवज्ञ भानोरन्तर्दशा शनेः ॥ ५ ॥

गुरोर्वर्ष १ दिनम् २० फलम् ।
धर्मार्थकामसम्भावनानि हरन्ति विबुधार्चितः ।
कुग्रादिशोकपङ्कजञ्च भानो माकन्दशागतः ॥६॥
शनेर्मासाः ८ फलम् ।
धनुभ्रातृभयं देहे चाराभीतिसतस्करात् ।
कुरुते सिंहिकासूनु रविपाकदशां गतः ॥७॥
शुक्रस्य वर्ष १ मासौ २ फलम् ।
कोष्ठपीडाशिरोरोगज्वरान् शूलादिदाहजान् ।
शोकं करोति भृगुज शशिपाकदशां गतः ॥८॥
एवं वर्षाः ६।०। चन्द्रस्य स्थूलदशावर्षाः १५
मर्योनामदशावर्षे २ मासः १ फलम् ।
कन्याद्रिमनिवरदानगजाश्वतत्र
वेशम्बरानजवीर्यसमन्वितानि ।
मिष्टान्नपानशयनासनभोजनानि
चान्द्री दशा प्रभुरकाञ्चनभूमिलाभौ ॥
कुजस्य वर्ष १ मासः १ दिनानि १ फलम् ।
पित्तप्रोत्थितपीडाश्च चौरादीनां भयन्तथा ।
मङ्गलं कुरुते नित्यं विधोरन्तर्दशां गतः ॥
बुधस्य वर्षौ २ मासाः ४ दिनानि १० फलम् ।
सर्वत्र द्रव्यलाभश्च गजाश्वगोधनानि च ।
चन्द्रस्य कुरुते सौख्यं विधोरन्तर्दशागतः ॥
शनेर्वर्ष १ मासाः ४ दिनानि २० फलम् ।
बन्धुक्लेशं प्रमाप्नोति व्यसनं शोकसम्पदम् ।
विवादं कुरुते सौरिश्चन्द्रस्यान्तर्दशागतः ॥
गुरोर्वर्षौ २ मासाः ७ दिनानि २० फलम् ।
दानधौम्यानि सम्भोगं वस्त्रालङ्कारभूषणम् ।
कुरुते विबुधाचार्यो विधोरन्तर्दशागतः ।
राहोर्वर्षं १ मासाः ८ फलम् ॥
वह्निशत्रुभयं दुःखं शोकं बन्धुधनक्षयम् ।
कुरुते राहुरत्यर्थं चन्द्रपाकदशागतः ॥
शुक्रस्य वर्षौ २ मासाः ११ फलम् ।
सेवते परनारीभिरतो वस्त्राणि वर्धते ।
सुखाकरं मणिप्राप्तिर्विधोरन्तर्गते सिते ॥
रवेर्मासाः ९ फलम् ।
ऐश्वर्यं बहुसौख्यञ्च व्याधिनाशमरिक्षयम् ।
कृपतेजो रविः कुर्याद्विधो पाकदशागतः ॥
एवं वर्षाः १५।०। कुजस्य स्थूलदशावर्षाः ८ ।
तस्यान्तर्दशामासाः ७ दिनानि ३।२०। फलम् ।
क्रूराभिचारलयबन्धभयानि धत्ते
चिन्तातुरं विकलमूत्रकृच्छ्रधनञ्च ।
चौराग्निभीतिधनहानिशरीरपीडा
कृष्णादिभागविषयश्च दशा कुजस्य ॥
बुधस्य वर्षौ १।३।१।२०। फलम् ।
परमैश्वर्यसन्तुष्टं सनाथितसुखाश्रयम् ।
करोति सोमपुत्रश्च कुजस्यान्तर्दशागतः ॥
शनेर्मासाः ८।२६।४। फलम् ।
रिपुचौरविभीतिश्च रोगमन्दत्वमश्नम् ।
महाकलहजो क्लेशः कुजस्यान्तर्गते शनौ ॥
गुरोर्वर्षे १।४।२३।४। फलम् ।
पुष्पधूपान्नवस्त्रादिनैवेद्यपूजनम् ।
कृषिजलघनप्राप्ति कुजस्यान्तर्गते गुरौ ॥
राहोर्मासाः १०।२०। फलम् ।
चात्मकार्यापहरणे बन्धचौरादिसाध्वसम् ।
कुरुते सिंहिकापुत्रो भौमस्यान्तर्दशागतः ॥
शुक्रस्य वर्ष १।६।२०। फलम् ।
धनवृद्धिं सुखार्थञ्च नानावस्त्रं परस्त्रियम् ।
प्राप्नोति विपुलां लक्ष्मीं कुजस्यान्तर्गते भृगौ ॥
रवेर्मासाः ५।६। फलम् ।
नानाद्रव्यञ्च सौख्यञ्च भूमिलाभमथापि वा ।
नृपपूजामवाप्नोति कुजस्यान्तर्गते रवौ ॥
सोमस्य वर्षं १।१।१। फलम् ।
धनलाभं सुखं भोगं शरीरारोग्यमेव च ।
शोकान्तमामवाप्नोति क्षितिजान्तर्गते विधौ ॥
एवं वर्षाः ८।०। बुधस्य स्थूलदशावर्षाः १७।
तस्यान्तर्दशा २।८।३।२०। फलम् ।
दिव्याङ्गनावदनपङ्कजषट्पदत्व
लीलाविलासवरभोगसुखोदयञ्च ।
नानाप्रकारविभवागमकोषवृद्धि
चित्तं सृजेद्बुधदशा प्रबलाश्च सिद्धिम् ॥
शनेर्वर्ष १।५।२६।४०। फलम् ।
मासद्वेषकला पीडा विरोधो बन्धुभिः सह ।
विद्यागमनचैव बुधस्यान्तर्गते शनौ ॥
गुरोर्वर्षौ २।११।२६।४। फलम् ।
व्याधिशत्रुभयत्यक्तो धनाढ्यो नृपवल्लभः ।
लभेद्भार्यां सुपुत्रञ्च बुधस्यान्तर्गते गुरौ ॥
राहोर्वर्ष १।१।२। फलम् ।
बन्धुनाशं मनस्तापं देशत्यागञ्च बन्धनम् ।
करोति बहुदुःखानि बुधस्यान्तर्गतस्तमः ।
शुक्रस्य वर्षौ ३।३।२०। फलम् ।
धनाढ्यं बन्धुपुत्रञ्च धर्मार्थञ्च धनागमम् ।
कुरुते दानपायार्थी बुधपाकदशागतः ॥
रवेर्मासाः ११ दिनानि १०। फलम् ।
श्रिया परमया युक्तो गजवाजिधनान्वितः ।
प्रभाकरः करोत्याशु बुधपाकदशागतः ॥
सोमस्य वर्षौ २।४।१। फलम् ।
कण्टकादिप्रवेशश्च शृङ्गिभ्यो भयमेव च ।
निशाकरः करोत्याशु बुधपाकदशागतः ॥
कुजस्य वर्ष १।३।३।४। फलम् ।
कफपित्तप्रसङ्गानां शिरःपीडां भयावहाम् ।
माहेयः कुरुते शोकं बुधस्यान्तर्दशागतः ॥
एवं वर्षाः १७।०। शनेः स्थूलदशावर्षाः १०।
तस्यान्तर्दशामासाः ११।३।२। फलम् ।
मिथ्याप्रवादवधबन्धविरोधपर्व
चौरादिभूपतिजकष्टममतिसम्पदाम् ।
आयासनिन्दितमपि चान्यकार्यहानि
मन्दोदशा प्रकुरुते विपुलं नराणाम् ॥
गुरोर्वर्ष १।९।३।२। फलम् ।
देवताद्विजसम्मानं नानाप्राप्तिं करोति च ।
सुखसौभाग्यमाप्नोति मन्दस्यान्तर्गतो गुरुः ॥
राहोर्वर्ष १।१।१। फलम् ।
अपाङ्गयं ज्वरं घोरं दुःखञ्च प्राणसंशयम् ।
धनक्षयं कुरुते शनेरन्तर्गतस्तमः ॥
शुक्रस्य वर्ष १।११।१। फलम् ।
सुखदुःखमुखैः पूर्णो भार्याविजयसमन्वितः ।
सर्वं सुखञ्च लभते सौरस्यान्तर्गते सिते ॥
रवेर्मासाः ६।२०। फलम् ।
परदाराभिगमनं करोति सुरदीधितिः ।
जीवनस्य च सन्देहं शनेरन्तर्दशागतः ॥
सोमस्य वर्ष १।४।२। फलम् ।
स्त्रीनाशं कुक्षिरोगञ्च कफवित्तज्वरं तथा ।
बन्धुद्वेषञ्च कुरुते मन्दोरन्तर्दशागतः ॥
कुजस्य मासाः ८।२६।४। फलम् ।
देहवैकल्यं महारोगं नानादुःखानि भ्रामणम् ।
धननाशञ्च कुरुते शनेरन्तर्दशागतः ॥
बुधस्य वर्षं १।६।२६।४। फलम् ।
आरोग्यं विजयं राज्यं बहुवित्तानि सम्पदः ।
करोति स्वादरं लोके शनेरन्तर्दशागतः ॥
एवं वर्षाः १०।०। गुरोः स्थूलदशावर्षाः १९।
तस्यैवान्तर्दशावर्षाः ३।४।३।२। फलम् ।
राज्यादरं सकलवित्तधिनाथभोगान्
मर्यादसौख्यमनधान्यसमाश्रयञ्च ।
विद्याप्रवादवररत्नसुखार्थभोग-
सिद्धिं दशा सुरगुरोः कुरुते प्रियत्वम् ॥
राहोर्वर्षौ २।१।१०। फलम् ।
बन्धुद्वेषं कथावादं स्थानभ्रंशं निराश्रयम् ।
कलहं कारयेद्राहुर्गुरोरन्तर्दशागतः ॥
शुक्रस्य वर्षाः ३।८।१०। फलम् ।
कलहं बन्धुभिः सार्द्धं वित्तनाशं मनश्चलितम् ।
स्त्रीवियोगश्च कुरुते जीवस्यान्तर्गते सिते ॥
रवेर्वर्षं १। दिनानि ९। फलम् ।
बहुमित्रं बहुधनं सौभाग्यं राजवल्लभम् ।
कुरुते भास्करः प्रायः गुरोरन्तर्दशागतः ॥
सोमस्य वर्षौ २।७।२०। फलम् ।
भोगाढ्यो बहुभाग्यः स्यान्निपुरोगविवर्जितः ।
नृपतुल्यो भवत्येव गुरोरन्तर्दशागतः ॥
कुजस्य वर्षं १।४।२६।४०। फलम् ।
तीव्रज्वररोगो रिपोर्दम्भा गणवह्निभयं तथा ।
सुखसौभाग्ययुक्तः कुजे चान्तर्गते गुरौ ॥
बुधस्य वर्षौ २।११।२६।४। फलम् ।
सुखाढ्यकः सुखी दुःखी शत्रुवृद्धिः पुनः पुनः ।
देवार्चनपरो नित्यं जीवस्यान्तर्गते बुधे ॥
शनेर्वर्षं १।८।३।२। फलम् ।
वेश्याजनाश्रयात् सौख्यं भवेद्वित्तविवर्जितः ।
शुभशीलसमो नित्यं गुरोरन्तर्गते शनौ ॥
एवं वर्षाः १९।०। राहोः स्थूलदशावर्षाः
१२। तस्यान्तर्दशावर्षं १।४। फलम् ।
भार्याविरुद्धविरोधविवादबन्ध-
प्रत्याभिघात...
धनासर्वं...
राहोर्द...
शुक्रस्य वर्षौ २...
शिरोरोगं कुर्वे...
चाश्वे बन्धो...
रवेर्मासाः ८।...
शिरोरोगमयं चो...
हृदयदिनाश कुर्य...

दभ्रं, क्ली, (दम्भ+बाहुलकात् रक् ।) अल्पम् । यथा, श्रीभागवते । १० । ८७ । १८ ।
"उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः ।
परिसरपद्धतिं हृदयमारुणयो दहरम् ।"
"आरुणयस्तु आधारात् हृदयस्थं दहरं सूक्ष्म मेवोपासते ।" इति तट्टीकायां श्रीधरस्वामी ॥

दभ्र', पुं, (दभ्नोति अल्पमपि नाम्नैव अल्पाप-यतीति । दम्भ+रक् ।) समुद्रः । स्वल्पम् । भ्राता । बालकः । इति विश्वमेदिन्यौ ॥

दह्र', पुं, (दहतीति । दह+"स्फायितञ्चीति ।" उणां २ । १३ । इति रक् ।) वह्निः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ दावानलः । इत्युणादिकोषः ॥ नरकम् । भल्लूकः । इति संक्षिप्तसारे उणादिवृत्तिः ॥ हृदयाकाशम् । यथा, श्रीभागवते । ३ । १२ । ४४ ।
"आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिस्तथैव च ।
एवं व्याहृतयश्चासन् प्रणवो ह्यस्य दह्रतः ।"
"दह्रत हृदयाकाशात् ।" इति तट्टीकायां श्रीधरस्वामी ॥ ✱ ॥ अन्तरम् । यथा, तत्रैव ।४।१।३६।
"पुलस्त्योऽजनयत् पत्न्यामगस्त्यञ्च हविर्भुवि ।
सोऽन्यजन्मनि दह्राग्निर्विश्रवाश्च महातपाः ।"
"दह्राग्नि जठराग्नि ।" इति श्रीधरस्वामी ॥

दा, दाने । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सक-अनिट् ।) दा तु दाने दाण दाने अविशेषोऽयम् । अस्यैव यच्छादेशः । यच्छति । इति दुर्गादासः ॥

दा, डु ञ ि दाने । इति कविकल्पद्रुमः ॥ (ह्वा-उभ-सक-अनिट् ।) डु, दत्रिमम् । ञ ि, ददाति दत्ते । इति दुर्गादासः ॥

दा, प लवने । इति कविकल्पद्रुमः ॥ (अदा-पर-सक-अनिट् ।) प दाति । भूमिच्छेदः । केचित्तु दाप लवने इति पठित्वा पित्त्वाद्दा-धाभावे यनादौ दायते इत्यादि मन्यन्ते । अमते तु पित्त्वाभावाद्दाधञ्चात् दीयते इत्येव । इति दुर्गादासः ॥

दा, स्त्री, (दा+क्विप् ।) शोधनम् । दानम् । छेदः । सन्तापः । रक्षा । इति मेदिनी । दे, १ ॥

दाक', पुं, (ददाति दक्षिणामिति । दा+"कृदाधारार्च्चिकलिभ्यः कः ।" उणां ३।४० इति कः) यजमानः । इत्युणादिकोषः ॥ दाता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

दाक्षक स्त्री, (दक्ष+वुञ् ।) दक्षस्य सङ्घः । इत्यमरटीकायां रायमुकुटः ॥ (दाक्षीणां विषयो देशः । दाक्षि+"राजन्यादिभ्यो वुञ् ।" ४ । २ । ५३ । इति वुञ् । दाक्षिविषये । इति व्याकरणम् ॥)

दाक्षायणी, स्त्री, (दक्षस्यापत्यं स्त्री । दक्ष+फिञ् । शार्ङ्गरवादित्वात् ङीष् ।) अश्विन्यादयो देवपत्न्यः सप्तविंशतिताराः । इत्यमरः । १ । ३ । २१ ॥ दुर्गा । इति मेदिनी । णे, ९६ ॥ रोहिणीनक्षत्रम् । इति हेमचन्द्रः ॥ (दक्षकन्यामात्रम् । यथा, मार्कण्डेये । ५० । ५१ ।
"तुष्टिर्मेधा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदशी ।
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः ।"
अदितिः । यथा, महाभारते । १ । ७५ । ८ ।
"त्रयोदशानां पत्नीनां या तु दाक्षायणी वरा ।
मारीचः कश्यपस्तस्यामादित्यान् समजीजनत् ।"
कद्रूः । विनता । यथा, तत्रैव । १ । २९ । ६ ।
"अमृतं परया प्रीत्या पर मारं महोदये ।
कद्रूश्च विनता चैव दाक्षायण्यौ विशाम्पते ।")
"दक्षश्च तेषामारभ्य प्रजाः सम्यग्विवर्द्धिताः ।
तत्र दाक्षायणीपुत्त्राः सर्व्वे देवाः यथाक्रमम् ।
वसवोऽष्टौ च रुद्राश्च आदित्या मरुतस्तथा ।
याभिर्दृष्टाय संवीक्ष्य गौरी दत्ताय श्रद्धया ।
दुहितासौ पुरा याहि रुद्रेणोढा महात्मना ।
सा च दाक्षायणी दत्ता पुनर्भूत्वा शुभोत्तमा ।"
इति वराहपुराणम् ॥
दन्तीवृक्षः । इति रत्नमाला ॥ ✱ ॥

दाक्षायणीपतिः, पुं (दाक्षायणीनाम् अश्विन्यादि-नक्षत्राणां पतिः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥

दाक्षायणीरमणः, पुं (रमयतीति । रम+ल्युः । दाक्षायणीनां रमणः ।) चन्द्रः । इति हलायुधः ॥

दाक्षाय्य', पुं, (दक्षाय्य एव । स्वार्थे अण् ।) गृध्रः । इत्यमरः । २ । ५ । २१ ॥

दाक्षिकन्था, स्त्री, (दाक्षीणां कन्था । "संज्ञायां कन्थोशीनरेषु ।" २ । ४ । २० । इति उशीनरत्वाभावात् न क्लीवता ।) बाह्लीकस्य नाम ग्रामः । इति नपुंसकलिङ्गसंग्रहटीकायां भरतः ॥

दाक्षिणात्य', त्रि, (दक्षिणा दक्षिणस्यां दिशि भवः । दक्षिणा+"दक्षिणापश्चात्पुरसस्त्यक् ।" ४ । २ । ९८ । इति त्यक् ।) दक्षिणदेशोद्भवः । इति शब्दार्थकल्पतरुः ॥ (यथा महाभारते । २ । ३११ । ३ ।
"प्राच्याश्च दाक्षिणात्याश्च प्रतीच्योदीच्य वासिनः ।")
नारिकेलः । इति राजनिर्घण्टः ॥

दाक्षिण्यं, क्ली, (दक्षिणस्य भाव । दक्षिण+ष्यञ् ।) अनुकूलता । इति हेमचन्द्रः । ६ । १११ (परवत्ता । यथा, आर्य्यासप्तशत्याम् ।६ ११ ।
"सौभाग्यं दाक्षिण्यात् ... परेण तस्मै-नाम् ।
वामाङ्गमेव ... मित्रे निवेशिता ।"
परच्छन्दानुवर्त्तनम् । यथा, रघुः । १ । ३१ ।
"तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ॥"
भाषविधौ । तत्
"दाक्षाय वाम...
असाधारणी दिवं
अपि च ।

विधिवत् आमदानान्ते क्रमेण यष्टिपूजनम् ।
क्रियते यत्तदानेन तद्दाक्षिण्यमिहोच्यते ।
सर्व्वेषु सिद्धदेवादौ यथाहूय दक्षिणा ।
देवी च दक्षिणा यस्मात्तस्माद्दाक्षिण्यमुच्यते ॥"
इति कालिकापुराणे ७७ अध्यायः ॥

दाक्षिणार्हं, त्रि । इत्यमरः ।२।७।५ ॥ (दक्षिणे भवम् । दक्षिण+अण् । दक्षिणभवे । दक्षिणदिक्सम्बन्धिनि च । यथा, आर्य्यासप्तशत्याम् । ३८२ ।
"दाक्षिण्यात् दक्षिणा दयितं वा माधवमेव मधुमत्या ।")

दाक्षीपुत्त्र', पुं, (दाक्ष्याः पुत्त्रः ।) पाणिनिमुनिः । इति त्रिकाण्डशेषः ॥ (यथा, नैषधे ।१९।६१।
"दाक्षीपुत्त्रस्य तन्त्रे ध्रुवमभवदसौ कोऽप्यधीती कपोतः ।")

दाक्षेय', पुं (दाक्ष्या अपत्यं पुमान् । दाक्षी+"स्त्रीभ्यो ढक् ।" ४ । १ । १२० । इति ढक् ।) पाणिनिमुनिः । इति हेमचन्द्रः । ३ । ५१६ ॥

दाक्ष्य क्ली (दक्षस्य भावः कर्म्म वा । दक्ष+ष्यञ् ।) दक्षता । निपुणता । दक्षशब्दात् भावे ष्यञ्प्रत्ययः । (यथा, महाभारते ।५।१६२ ।
"दानं दाक्ष्यं श्रुतं शौर्यं ह्रीः कीर्त्तिर्बुद्धिरुत्तमा ।
सन्नतिः श्रीर्धृतिस्तुष्टिः पुष्टिश्च नियताच्युते ।")

दाडक', पुं, (दालयति सुखाभ्यवहारयोग्यं विचूर्णीकरोतीति । दल+णिच्+ण्वुल् । डलयोरैक्यम् ।) दन्तः । इति शब्दार्थकल्पतरुः ॥

दाडिम', त्रि, (दलनमिति दालः । तेन निर्वृत्तः । भावप्रत्ययान्तादिमप् । डलयोरैक्यम् ।) एला । इति मेदिनी मे, ४४ ॥ फलवृक्षविशेषः । (यथा, देवीभागवते । १ । १९ । ८ ।
"दाडिमैर्नारिकेलैश्च मातुलुङ्गकपित्थकम् ॥")
तत्पर्य्याय । करकः २ । इत्यमरः । २।४।६४ ॥ पिण्डपुष्पः ३ दाडिमः ४ फलषाडवः ५ स्वाद्वम्लः ६ पिण्डीरः ७ फलशाडवः ८ शुकवल्लभः ९ । इति त्रिकाण्डशेषः ॥ रक्तपुष्पः १० । इति रत्नमाला ॥ दाडिमीसारः ११ कुट्टिमः १२ फलखाडवः १३ मृद्धमाच्छोऽपि । रक्तबीजः १४ सुफलः १५ दन्तबीजकः १६ मधुबीजः १७ कुचफलः १८ रोचनः १९ मणिबीजः २० वल्कफलः २१ दन्तपत्रः २२ सुनीलः २३ नीलपत्रः २४ । अस्य गुणाः । मधुराम्लत्वम् । कषायत्वम् । वातपित्तकफविनाशित्वम् । रोचनत्वम् । दीपनत्वम् । लघुत्वम् । उष्णत्वम् । शीतलत्वम् । बलकारित्वञ्च । इति राजनिर्घण्टः ॥ गुरुत्वम् । अक्षादिपित्तशान्तिकारित्वम् । अस्य कोमलत्वम् । अस्य पित्ताविरोधित्वञ्च ॥ ✱ ॥
मधुरञ्चाम्लमेव च ।
तत् त्रिदोषघ्नं पित्तकफापहम् ।"
इति राजवल्लभः ॥
अम्लं पथ्यम् । इति राज
माधुर्य्यं दन्तस्थायकम् ।

मधुरं स्वादु त्रिदोषघ्नं तृड्दाहज्वरनाशनम् ।
हृत्कण्ठमुखरोगघ्नं तर्पणं शुक्रलं लघु ।
कषायानुरसं ग्राहि स्निग्धं मेधाबलावहम् ।
स्वाद्वम्लं दीपनं रुच्यं किञ्चित् पित्तकरं लघु ।
अम्लन्तु पित्तजनकमम्लं वातकफापहम् ।"
इति भावप्रकाशः ।

दाडिमपुष्पक, पुं, (दाडिमस्य पुष्पमिव पुष्पं यस्य । कन् ।) रोहितकवृक्षः । इत्यमरः । २ । ४ । ४८ । रोहडा इति ख्यातः । (अस्य पर्य्याया यथा वैद्यकरत्नमालायाम् । "रोही रोहितकः प्लीहशत्रुर्दाडिमपुष्पकः ।")

दाडिमप्रिय, पुं (दाडिमफलं प्रियं यस्य ।) शुकपक्षी । इति शब्दरत्नावली ॥

दाडिमभक्षक, पुं, (भक्षयतीति । भक्षि + ण्वुल् । भक्षणो भक्षकः । दाडिमस्य भक्षकः ।) कीरपक्षी । इति शब्दचन्द्रिका ॥ (दाडिमभक्षके, त्रि ॥)

दाडिमीसार, पुं, (दाडिमीं दाडिमीशब्दं सरति प्राप्नोतीति । दाडिमी + सृ + अण् ।) दाडिमः । इति राजनिर्घण्टः ॥

दाडिम, पुं, दाडिमः । इति त्रिकाण्डशेषः ॥ (दाडिमशब्देऽस्य विशेषो ज्ञातव्यः ॥)

दाढा, स्त्री, (दैप शोधने दा दाने वा + क्विप् । दे शुद्धै दानाय वा ढौकते इति । ढौक + ड ।) दन्तविशेषः । तत्पर्य्यायः । दंष्ट्रा १ जम्भः २ । इति हेमचन्द्रः । ३ । २४७ ॥ प्रार्थना । समूहः । इति शब्दार्थकल्पतरुः ॥

दाढिका स्त्री, (दाढायै कर्णसमूहाय प्रभवतीति । ठक् ततष्टाप् ।) शरीरावयवविशेषः । दाड़ि इति भाषा । (यथा, मनुः । ८ । २८३ ।
"पादयोर्दाढिकायाञ्च ग्रीवायां वृषणेषु च ।"
"दाढिकायां श्मश्रुणि ।' इति तट्टीकायां कुल्लूकभट्टः । दाढा + स्वार्थे कन् कापि अत इत्वञ्च ।) दाढिका । इति हेमचन्द्रः । ३ । २४७ ॥

दाण्डाजिनिक, त्रि (दण्डाजिनेन शाठ्येन दम्भेन वा अर्थानन्विच्छतीति । दण्डाजिन + "अयःशूलदण्डाजिनाभ्यां ठक्ठञौ ।" ५ । २ । ७६ । इति ठञ् ।) कुहकः । इति हेमचन्द्रः । ३ । ४१ ॥

दात त्रि, (दायते स्म इति । दा लवने + क्तः) छिन्नम् । इत्यमरः । ३ । १ । १ ६ ॥ (दैप शोधने कर्म्मणि क्त । शुद्धम् ।)

दाता, [ऋ] त्रि, (ददातीति । दा दाने + "ण्वुल्तृचौ ।" ३ । १ । १३३ । इति तृच् ।) दानकर्त्ता । तत्पर्य्यायः । दायः १ सुपिरः २ । इति त्रिकाण्डशेषः ॥ (यथा ऋग्वेदे । ७ । २० । २ ।
"कर्त्ता सुदासे अह वा उ लोकं
दाता वसु मुहुरादाशुषे भूत् ।")

दात्यूह, पुं स्त्री, (दाप् लवने + क्तिन् । दातिं रवं ऊहते इति । दाति + ऊह + अण् । यद्वा दो अवखण्डने क्तिन् । दातिं वहतीति । वह + क + ऊट । दित्यूहः । ततः स्वार्थे अण् । तत "दविकादिशब्दादित्यनादेशोपसख्यानात्" ७ । ३ । १ । इति अत्वम् ।) पक्षिविशेषः । डाउक इति भाषा । तत्पर्य्यायः । कालकण्ठकः २ । इत्यमरः । २ । ५ । २१ ॥ अत्यूहः ३ दात्यौहः ४ कालकण्ठः ५ मायङ्गः ६ शितिकण्ठः ७ कनाटुरः ८ । इति शब्दरत्नावली ॥ काकमद्गुः ९ । इति त्रिकाण्डशेषः ॥ (यथा, मनुः । ५ । १२ ।
"सारसं रज्जुवालञ्च दात्यूहं शुकसारिके ॥"
(अस्य गुणा यथा —
"दात्यूहो मरुतश्च नाशनकरो हृष्योऽतिशुक्रप्रदः
श्लेष्मा सर्व्वगुणः प्रमोदशमनः तुष्टिप्रदो वातहा ॥"
इति हारीते प्रथमेऽस्थाने एकादशेऽध्याये ॥)
"प्रावृट्काले सुखी भूत्वा को वा कुत्र न गच्छति ।
इति वदति दात्यूहः को वा को वा क वा क वा ॥"
इत्युद्भटः ॥)
जलकाकः । इति राजनिर्घण्टः ॥ चातकः । इति मेदिनी । हे, १७ ॥ मेघः । इति शब्दरत्नावली ॥

दात्यौह, पुं, स्त्री, (दित्यौह + स्वार्थे अण् । देविकाशिंशपेत्यादिना आत्वम् ।) दात्यूहः । इति शब्दरत्नावली ॥

दान, क्ली (दानि दाति वानेनेति । दो अवखण्डने दा लवने वा + "दाम्नीशसेति ।" ३ । २ । १८२ । इति ष्ट्रन् । दाम्भ्यमुन्नस्त्वीति मन् वा ।) अस्त्रविशेषः । इति भरतः ॥ दा इति काण्डा इति च भाषा । तत्पर्य्यायः । लवित्रम् २ । इत्यमरः । ७ । ६ । १३ ॥ छेदकोशम् ३ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ५ । १५४ । ७ ।
"समूषपिटकाः सर्व्वे सदात्राङ्कुशतोमराः ॥"
भावे मन् । दानम् । यथा, ऋग्वेदे । १ । ११ । ६ ।
"तद्वां दात्रं महिकीर्त्तेन्यम्" ।
"तद्दात्र दानम् महि महदतिगम्भीरम् ।" इति तद्भाष्ये सायनः ॥ दानकर्त्तरि त्रि । यथा, वाजसनेयसंहितायाम् । १ । ६ ।
"सोमस्य दात्रमसि ।")

दात्री, स्त्री, (ददातीति । दा + तृच् + ङीप् ।) दानकर्त्री । इति व्याकरणम् ॥ (गङ्गा । यथा, काशीखण्डे । २९ । ५८ । तस्याः सहस्रनामकीर्त्तने ।
"दीनसन्तापशमनी दात्री दवथुवैरिणी ।")

दात्व, पुं, (ददातीति । दा + "कनिदाग्भ्युन्मिनि ।" उण्वां ४ । १ ४ । इति त्वन् ।) दाता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (क्ली, यज्ञकर्म्म । इत्युज्ज्वलदत्तः ॥)

दाधिक, त्रि, (दध्नि दध्ना वा संस्कृतं दध्ना चरति दधि + "चरति ।" ४ । ४ । ८ । इति ठक् । (दध्ना उपसिक्तम् । "दध्नष्ठक्" । ४ । २ । १८ । इति ठक् वा ।) दधिसंस्कृतवस्तु । इति हेमचन्द्रः । ३ । ७४ ॥ (औषधविशेषे क्ली । यथा, सुश्रुते उत्तरतन्त्रे । ४२ ।
"बीजपूररसोपेतं सपिन्धिवतुरन्वम् ।
साधितं दाधिकं नाम गुल्मघ्नं प्रीहशूलनित् ।")

दान, न खण्डने । हिंसि । इति कविकल्पद्रुमः ॥ (भ्वा उभ सक सेट ।) अनुस्वारवत्सन्निपातमम् । न दीदांसति दीदांसते काष्ठं यज्ञाङ्गं कश्चिद् करोतीत्यर्थः । अनुभावः इति विद्यानिवासः । दीदांसति साधुः । ऋजुः स्यादित्यर्थः । छेदे दानति दानते । इति वोपदेवः । सन् तिबादयो न स्युरिति रमानाथः । इति दुर्गादासः ॥

दान, क्ली, (दा दाने दो अवखण्डने दैप शोधने भावादौ ल्युट् ।) गजमदः । (यथा, माघे । ५ । ३७ ।
"दानं ददत्यपि जलैः सहसाधिरूढे
को विद्यमानगतिरासितुमुत्सहेत ॥"
"दीयते इति दानं धनं मदश्च ।" इति तट्टीकायां मल्लिनाथः ॥) पालनम् । छेदनम् । शुद्धिः । इति मेदिनी । ने, १ ॥ दन्तकोटरकोटजमधु । अस्य गुणाः । रूक्षत्वम् । दीपनत्वम् । कफच्छर्दिमेहनाशित्वञ्च । इति राजवल्लभः ॥ देवताद्युद्देश्यकस्वस्वत्वध्वंसपूर्ब्बक परस्वत्वापादनकत्यागः (?) स्वस्वत्वमोचनम् । तत्पर्य्यायः । त्यागः २ विहापितम् ३ उत्सर्ज्जनम् ४ विसर्ज्जनम् ५ विश्राणनम् ६ वितरणम् ७ स्पर्शनम् ८ प्रतिपादनम् ९ प्रादेशनम् १० निर्व्वपणम् ११ अपवर्ज्जनम् १२ अंहतिः १३ । इत्यमरः । २ । ७ । २९ ॥ दायः १४ । इति त्रिकाण्डशेषः ॥ प्रदानम् १५ ददनम् १६ वियाणनम् १७ दत्तिः १८ अहती १९ उत्सर्गः २० अतिसर्ज्जनम् २१ स्पर्शः २२ विसर्गः २३ प्रवणम् २४ प्रदेशनम् २५ । इति शब्दरत्नावली ॥ * ॥ तस्य लक्षणादि यथा,—
"अर्थानामुदिते पात्रे श्रद्धया प्रतिपादनम् ।
दानमित्यभिनिर्द्दिष्टं व्याख्यानं तस्य वक्ष्यते ॥
सम्प्रदानस्यापादकस्त्यागो दानमिति ॥ * ॥
दाता प्रतिग्रहीता च श्रद्धा देयञ्च धर्म्मयुक् ।
देशकालौ च दानानामङ्गान्येतानि षड्विदुः ॥
मनसा पात्रमुद्दिश्य भूमौ तोयं विनिक्षिपेत् ।
विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते ॥
परोक्षे कल्पितं दानं पात्राभावे कथं भवेत् ।
गोत्रजेभ्यस्तथा दद्यात् तदभावेऽस्य बन्धुषु ॥
यदा तु न सकुल्यः स्यान्न च सम्बन्धिबान्धवाः ।
दद्यात् सजातिशिष्टेभ्यस्तदभावे जले क्षिपेत् ॥
स्नात्वा शुद्धे सुचौ देशे गोमयेनोपलेपिते ।
ध्यात्वा प्रसन्नः शुद्धं दानं दद्यात् यदीप्सितम् ॥ * ॥
दत्त्वा गां दशगुर्दद्यात् दश दद्याच्च गोशती ।
शतं सहस्रगुर्दद्यात् सहस्रं बहुगोधनः ।
यायाज्येमपि पात्रमिच्छं किन्न दीयते ।
इच्छानुरूपो विभवः कदा कस्य भविष्यति ॥
अप्राप्यमभिलेत प्रथमेनार्जितं धनम् ।
स्वल्पं वा विपुलं वापि देयमित्यभिधीयते ॥ * ॥
विक्रयश्चैव दानञ्च न नेयाः स्युरनिच्छवः ।
दाराः पुत्राश्च सर्व्वस्वमात्मन्येव च योजयेत् ।
आपत्काले तु कर्त्तव्यं दानं विक्रय एव वा ।
अन्यथा न प्रवर्त्तेत इति शास्त्रविनिश्चयः ॥ * ॥
यद्दो दानं तदा कापि कर्त्ता च गुरवस्तथा ।

दमित । इत्यमरः । ३ । १ । ४२ ॥ (यथा,
महाभारते । १ । २२२ । ४६ ।
"तथैवाश्वतरीयाश्च दान्तानां वातरंहसाम् ।"
दान्तेन निर्वृत्तम् । दान्त+"तेन निर्वृत्तम् ।"
४ । २ । ६८ । इति अण् । दन्तनिर्म्मितम् ।
यथा, महाभारते । ५ । ४६ । ५ ।
"रुचिरैरासनैस्तीर्णां काञ्चनैर्दारवैरपि ।
अक्षावापमयैर्दान्तैः शास्तीर्णैर्भासुरच्छदैः ॥")
दाता । इति संक्षिप्तसारे उणादिवृत्तिः ॥
पुं, दमनकवृक्षः । तिनिशवृक्षः । इति राज-
निर्घण्टः ॥ (विदर्भराजपुत्त्रविशेषः । यथा,
महाभारते । ३ । ५३ । ८—९ ।
"तस्मै प्रसन्नो दमनः सभार्य्याय वरं ददौ ।
कन्यारत्नं कुमारांश्च त्रीनुदारान् महायशाः ॥
दमयन्तीं दमं दान्तं दमनञ्च सुवर्च्चसम् ।"
स्त्री अप्सरोविशेषः । यथा महाभारते ।
१३ । १९ । ४५ ।
"विद्युता प्रशमी दान्ता विद्योता रतिरेव च ।")
दान्ति, स्त्री, (दम+क्तिन् । "अनुनासिकस्य क्विझलोः क्ङिति ।"
६ । ४ । १५ । इति दीर्घः ।) तपःक्लेशसहि-
ष्णुता । तत्पर्य्यायः । दमथः २ दमः ३ ।
इत्यमरः । ३ । २ । १ ॥
दापित, त्रि, (दाप्यते स्म इति । दा+णिच्+
कर्म्मणि क्तः ।) साधितः । इत्यमरः ॥३।१।८ ॥
धनादिना आयत्तीकृतः । इति भरतः ॥ मुक्टौ
इति स्वातं यत्रौ दत्त च इति रमानाथः ॥
दण्डितः । इति विद्याविनोदः ॥ शोधितद्रव्यम् ।
इति मथुरानाथः ॥ दायित इति पाठोऽपि ।
इति क्वचित्पुस्तकोत्तमौ ॥
दाम [न्] स्त्री क्ली, (दीयते इति । दा दाने
दो अवखण्डने वा+"सर्व्वधातुभ्यो मनिन् ।"
उणा । ४ । १४५ । इति मनिन् ।) यथैकस्मिन्
बहुग्रन्थयुक्ते अनेकगावो बध्यन्ते तत् । दाउनि
इति दौँडा इति च भाषा । तत्पर्य्यायः ।
सन्दानम् २ । इत्यमरः । २ । ९ । ७३ ॥
रज्जुः । इति दामोदरशब्ददर्शनात् । (यथा भाग-
वते । १ । ८ । ३१ ।
"गोप्याददे त्वयि कृतागसि दाम तावत्
या ते दशाश्रुकलिलाञ्जनसम्भ्रमाक्षम् ।
वक्त्रं निनीय भयभावनया स्थितस्य
सा मां विमोहयति भीरपि यद्बिभेति ॥"
माला । यथा, माघे । ३ । ५० ।
"चलमल्लिकुलविनिमिश्रदाम
भ्रियस्स्थिता क्षितिभृतस्सत्या ॥"
दातरि, त्रि । यथा, ऋग्वेदे । ६ । ४४ । ७ ।
"स प्रत्नमानुर्विभाय ते दावो दामा मनीनाम् ।"
"दाम्नो प्रवेद्य दामा दाता भवति ।" इति
तद्भाष्ये सायणः ॥)
दामकर्म्म, [न्] क्ली, (दमनो दमनकस्यावशि-
ष्टाँस्तत्समये दामन तदुपलक्षणकर्म्म यत्र
कर्म्मणि ।) दमनभञ्जनविधिः । स चैत्रशुक्लचतु-
र्द्दश्यां । इति तिथ्यादितत्त्वम् ॥
दामनी, स्त्री, (दामैव । दामन्+स्वार्थे प्रज्ञा-
दित्वात् अण् । "अन् ।" ६ । ४ । १६७ । इति
प्रकृतिभावः । "टिड्ढाणञिति ।" ४ । १ । १५ । इति
ङीप् ।) पशुबन्धनरज्जुः । तत्पर्य्यायः । पशु-
रज्जुः २ । इत्यमरः । २ । ९ । ७३ ॥ (यथा,
हरिवंशे । ६५ । २४ ।
"कौबेराद्धेयमादाय दामनीपाशपाणिना ।")
दामलिप्त, क्ली, तमोलिप्तदेशः । इति हेमचन्द्रः ।
४ । ४५ ॥
दामा स्त्री, (दामन्+"डाबुभाभ्यामन्यतर-
स्याम् ।" ४ । १ । १३ । इति पक्षे डाप् ।)
दाम । इति भरतः ॥
दामाञ्चन, क्ली, (दामाञ्चनम् । पृषोदरादित्वात्
साधुः ।) अश्वादेः पादबन्धनरज्जुः । इति
हेमचन्द्रः । ४ । ३१७ ॥
दामाञ्चल, क्ली, (दाम्नः अञ्चलमिव ।) एक-
प्रकाशिष्टबन्धः । अश्वादिपादबन्धनरज्जुः । इति
हारावली । ६१ ॥ (यथा, माघे । ५ । ६१ ।
"हस्तु धरोयपरिपारकमात्ममाया
दामाञ्चलस्खलितलोलपदं तुरङ्गाः ॥")
दामोदर, पुं, ("दमादिसाधनेनोदारा उत्कृष्टा
मतिर्यया तया गम्यत इति दामोदरः । 'दाम्ना
दामोदरं विदुः' । इति भगवद्वचनात् । यद्वा
दाम्ना उदरे बद्ध इति वा दामोदरः ।
'दामानि लोकनामानि तानि यस्योदरान्तरे ।
तेन दामोदरो देवः श्रीधरस्तु रमाश्रितः ।
इति वा ।" इति विष्णुसहस्रनामभाष्ये शङ्करः ॥
५३ ॥ तथा, महाभारते । ५ । ७० । ८ ।
"देवानां स्वप्रकाशत्वात् दमाद्दामोदरं विदुः ।")
विष्णुः । इत्यमरः । १ । १ । १८ ॥ (दाम रज्जु-
रुदरे यस्य । श्रीकृष्णः । यथा, महाभारते ।
१ । १९ । १९ ।
"दामोदरौ भ्रातरावप्यपीर्च्चौ
हलायुधं बाल्यमिव बभाषे ॥"
यशोदयाम्बो उदरदेशे दाम्ना बद्ध आसीत् अतो
ऽस्य तथा नाम । यथा हरिवंशे । ६७ । १४, २६ ।
"दाम्ना चैवोदरे बद्धा प्रत्यबन्धदुलूखले ।
यदि शक्नोऽसि गच्छेति तमुक्त्वा कर्म साकरोत् ।"
"स च तेनैव नाम्ना तु कृष्णो वै दामबन्धनात् ।
गोष्ठे दामोदर इति गोपीभिः परिगीयते ॥")
भूतार्त्तवृक्षविशेषः । इति हेमचन्द्रः । ४ । १३ ॥
(शालग्रामशिलाविशेषः । तल्लक्षणं यथा, मत्स्य
पुराणे ।
"स्थूलो दामोदरो ज्ञेयः सूक्ष्मचक्रो भवेत् तु यः ।
चक्रे तु मध्यदेशेऽस्य पूजितः सुखदः सदा ।"
अस्य अन्यद्विवरणं शालग्रामशब्दे द्रष्ट-
व्यम् ॥ ॥ काश्मीरस्य नृपविशेषः । यथा, राज-
तरङ्गिण्याम् । १ । ६३ ।
"गते प्रशान्तकाले तस्मिन् शक्रशिवे गते ।
श्रीमान् दामोदरो नाम नृपस्तुद्भवत् जिष्णुः ।")
दाम्भिक, पुं क्ली, (दम्भेन चरतीति । दम्भ+
"चरति ।" ४ । ४ । ८ । इति ठक् ।) बक
पक्षी । इति राजनिर्घण्टः ॥ दम्भयुक्ते त्रि ।
(यथा, मनुः । ४ । १९५ ।
"धर्म्मध्वजी सदा लुब्धश्छाद्मिको लोकदम्भकः ।"
"पापरोग्यभिशस्तश्च दाम्भिको रसविक्रयी ॥")
दाय, ङ ञ दाने । इति कविकल्पद्रुमः ॥ (भ्वा-
आत्म- सक- सेट् ।) ङ अददायत् । ञ, दायते ।
इति दुर्गादासः ॥
दायः, पुं (दीयते इति । दा दाने+घञ् । "आतो
युक्चिण्कृतोः ।" ७ । ३ । ३३ । इति युक् ।)
यौतुकादिदेयधनम् । (यथा, महाभारते । ५ ।
९१ । १ ।
"दायन्तु विविधं तस्मै प्रददौ गदतोऽग्रजः ।
यथार्थं दाशभिदस्य महात्मा प्रमथप्रभः ॥")
कन्यादानकाले जामात्रादिभ्यो धनभिन्नारो
ब्राह्मणादिभ्यश्च यद्द्रव्यं दीयते तत् । इति
भरतः ॥ तत्पर्य्यायः । हरणम् २ । इत्यमरः ।
२ । ८ । २८ ॥ पितृधनभागधनम् । विभजन
विभक्तधनम् । (यथा मनुः । ९ । १६३ ।
"औरसो विभजन् दायं पित्र्यं पञ्चममेव वा ।"
विभागार्हधनमात्रम् । यथा, तत्रैव । ९ । ७० ।
"अनन्तर प्रतीपेन द्विजन्मी योषितं प्रति ।
उदुत्सव प्रतरासैना दायं कृत्वा न धर्षयेत् ॥"
दा दाने+भावे घञ् ।) दानम् । इति मेदिनी ।
ये, ३ ॥ (यथा मनुः । ८ । १९९ ।
"असमैषा हतो यस्तु दायो विक्रय एव वा ।
अकृतः स तु विज्ञेयो व्यवहारे यथा स्थितिः ॥")
स्थानम् । (दो छेदे+घञ् ।) खण्डनम् । इति
शब्दरत्नावली ॥ वधः । इत्यजयपालः ॥ (ददा-
तीति । दा+"श्याद्व्यधेति ।" ३ । १ । १४१ ।
इति णः । दातरि, त्रि । इति व्याकरणम् ॥)
दायक, त्रि, (ददातीति । दा+ण्वुल् ।) दाता ।
यथा । बलाद्रिमतिदायक इति भक्तिरत्नाकरे
विष्णुः ॥ (यथा च महाभारते । ३ । १९३ ।
३३ ।
"तावतां गोसहस्राणां फलं प्राप्नोति दायकः ॥")
दायबन्धु पुं (दाये बन्धुः ।) भ्राता । इति शब्द
रत्नावली ॥
दायभाग पुं, (दायस्य भागः ।) धनस्वामिनैव
सम्बन्धिधनविभागः । पूर्व्वस्वामिसम्बन्धा-
धीनं तत्स्वाम्युपरमे यत्र द्रव्ये स्वत्वं तत्र निरूढो
दायशब्दस्तस्य विभागः । एकदेशमात्रे
भूहिरण्यादावुत्पन्नस्य स्वत्वस्य विनिगमना
प्रमाणाभावेन वैशेषिकव्यवहारानर्हतयाव्य-
वस्थितस्य गुटिकापातादिना व्यञ्जनम् । अथवा
विशेषेण सर्व्वं आत्मसात्करणं वा । यत्र चैवं
दायोत्पत्त्यादिकं प्रकृतव्यवहारस्य तथापि तत्तत्
कालविशेषव्यवहारदोषभयेन भाग उच्यते ॥ ॥
अथ दायाधिकारक्रमे पुत्त्राधिकारिणः ।
तदभावे सत्पत्न्यादौ पौत्त्रप्रपौत्त्राधिकारः । तद-
भावे भौत्रस्य । तदभावे प्रपौत्त्रस्य । अत्र
पितृपौत्त्रयोरभावे विभागानर्हपौत्त्रयोः पुत्त्रैक-
यत्र तुल्याधिकारः । तदभावे पत्नी धनाधि-
कारिणी । तदभावे दुहितुः पत्नी धनं दद्यात्

एवं न तु तस्य दानाधमनविक्रयान् कर्त्तुमर्हति। किन्तु भर्त्तुरौर्द्धदेहिकक्रियार्थं दानादिकमप्यनुमतम्। धर्म्मार्थमशक्तौ आधमनमप्यनुमतं तदशक्तौ विक्रयणमपि। भर्त्तुरौर्द्धदेहिकक्रियार्थमर्थाशुक्त्य भर्त्तृसपिण्डभर्त्तृसुतभर्त्तृदौहित्रधन्नान् भर्त्तृभागिनेयभर्त्तृमातुलेभ्यो दद्यात्। एतेषामभावे स्वपितृकुले दद्यात्। पत्न्यभावे दुहिता। तत्रापि प्रथमं कुमारी। अत्राय विशेषः कन्या वाग्दत्ताधिकारात् पश्चात् परिणीता सती अविद्यमानपुत्रा यदि मृता तदा तत्पितृदाये सपुत्रायाः सम्भावितपुत्रायाः भगिन्यास्तुल्याधिकारः। कुमार्य्यभावे चोढ़ायाः पुत्रवत्याः सम्भावितपुत्रायाश्च तुल्याधिकारः। एतयोरेकतराभावे अन्याधिकारिणी। एतयोरभावेऽपि बन्ध्यापुत्रहीनविधवयोर्नाधिकारः। सर्व्वदुहित्रभावे दौहित्रस्याधिकारः। तदभावे पितुरधिकारः। तदभावे मातुरधिकारः। तदभावे सोदरस्याधिकारः। सोदराभावे सजातीयवैमात्रेयाधिकारः। तदभावे सोदरभ्रातृपुत्राणामधिकारः। संसर्गे असंसर्गिसोदरभ्रातृपुत्रेषु संसर्गिभ्रातृपुत्रस्याधिकारः। एवं असंसर्गिवैमात्रेयभ्रातृपुत्रे सति संसर्गिवैमात्रेयभ्रातृपुत्रस्याधिकारः। यदा त्वसंसर्गी सोदरभ्रातृपुत्रः संसर्गी चासोदरभ्रातृपुत्रस्तदा तयोर्युगपदधिकारः। यदा पुनः सोदरवैमात्रेयभ्रातृपुत्रौ संसर्गिणावसंसर्गिणौ वा तदा उभयत्रैव सोदरभ्रातृपुत्रस्याधिकारः। भ्रातृपुत्राभावे भ्रातृपौत्रस्याधिकारः। अत्रापि सोदरवैमात्रेयभ्रातृपुत्रवत् क्रमो बोध्यः। भ्रातृपौत्राभावे पितृदौहित्रस्याधिकारः। अत्र सोदरभगिनीपुत्रवैमात्रेयभगिनीपुत्रयोस्तुल्यवदधिकारः। पितृदौहित्राभावे पितामहस्याधिकारः। पितामहाभावे पितामह्या अधिकारः। पितामह्यभावे पितृव्यस्याधिकारः। तदभावे पितृव्यपुत्रस्याधिकारः। तदभावे पितृव्यपौत्रस्याधिकारः। पितृव्यपौत्राभावे पितामहदौहित्रस्याधिकारः। पितामहदौहित्राभावे पितृव्यदौहित्रस्याधिकारः। तदभावे प्रपितामहस्याधिकारः। तदभावे प्रपितामह्या अधिकारः। तत्र पितामहभ्राताधिकारी। तदभावे पितामहभ्रातृपुत्रः। तदभावे पितामहभ्रातृपौत्रः। ततः प्रपितामहदौहित्रोऽधिकारी। ततः पितामहभ्रातृदौहित्रोऽधिकारी। तदभावे मातामहः। तदभावे मातुलः। तदभावे मातृभ्रात्रीयः। तदभावे मातुलपुत्रः। तदभावे मातुलपौत्रः। एतेषामभावे सकुल्याः। सकुल्योऽपि द्विविधः अधस्तन ऊर्द्ध्वतनश्च तत्र प्रपौत्रपुत्रादयोऽधस्तनाः वृद्धप्रपितामहादयश्च ऊर्द्ध्वतनास्तत्राप्यादावधस्तनानां सकुल्यानां क्रमेणाधिकारः। तेषामभावे ऊर्द्ध्वतनानां क्रमेणाधिकारः। एवंविधसकुल्याभावे समानोदकाः। तदभावे आचार्य्यः। तदभावे शिष्यः तदभावे सहवेदाध्यायिसब्रह्मचारिणः। तदभावे ग्रामस्थाः सगोत्राः। तदभावे तथाविधाः समानप्रवराः। उक्तपर्य्यन्ताभावे तद्ग्रामस्थास्त्रैविद्यादिगुणयुक्ता ब्राह्मणा धनाधिकारिणः। एतेषामभावे ब्राह्मणधनवर्ज्जं राजाधिकारी। ब्राह्मणधनस्य तु गुणवद्ब्राह्मणपर्य्यन्ताभावे ब्राह्मणान्तरस्य ग्रामान्तरस्थस्यापि अधिकारः। वानप्रस्थयतिब्रह्मचारिणां धनं धर्म्मभ्रातृसच्छिष्याचार्य्या गृह्णीयुः। तदभावे एकत्रवासी एकाश्रमी वा गृह्णीयात्। ब्रह्मचारी च द्विविधः नैष्ठिक उपकुर्व्वाणश्च। तत्र नैष्ठिकधने आचार्य्यस्याधिकारः। उपकुर्व्वाणस्य तु धनं पित्रादिभिरेव ग्राह्यम्। इति पुंधनाधिकारिणः ॥ * ॥

अथ स्त्रीधनाधिकारक्रमः।

तत्र कुमारीधने प्रथमं सोदरभ्राताधिकारी। तदभावे माता तदभावे पिता। अन्यदत्तधने वरोऽधिकारी ॥ * ॥

अथोढ़ास्त्रीधनाधिकारक्रमनिरूपणार्थं तद्धनं निरूप्यते। विवाहकाले लब्धं यौतुकधनम् १ भर्त्तृगृहं नीयमाना पितृमातृकुलात् यद्धनं लभते तत् २ भर्त्तृदत्तम् ३ भ्रातृदत्तम् ४ पितृदत्तम् ५ मातृदत्तम् ६ द्वितीयविवाहार्थिना पूर्व्वस्त्रियै पारितोषिकं यद्दत्तं तत् ७ अन्वाध्यादनम् ८ शुल्ककरणम् ९ शय्यान्तिकर्म्मिरूपशिल्पिपरिचारभृत्यादिभ्यो सह्यादिनिष्पादनाद्भुतकार्यविषयान्येभ्यो यद्धनं लब्धं तत् १० पुत्रदत्तम् ११ मातुलादिदत्तम् १२ विवाहात् परतः पित्रादिना भर्त्रादिना च यद्दत्तम् १३। भर्त्तृदत्तस्थावरातिरिक्तानामेतेषां धनानां स्त्री दानादिकं कर्त्तुमर्हति ॥ * ॥

तदेवं स्त्रीधने निरूपिते तस्यां मृतायां तद्धनाधिकारी निरूप्यते। तत्र यौतुकधने कुमार्य्याः प्रथममधिकारः। तदभावे वाग्दत्तायाः तदभावे चोढ़ायाः पुत्रवत्याः सम्भावितपुत्रायाश्च युगपदधिकारः। तदभावे बन्ध्याविधवयोस्तुल्यवदधिकारः। तत्र कुमारी वाग्दत्ता भ्राताधिकारानन्तरं परिणीता सती पश्चाद्बन्ध्यात्वेनावधृता पुत्रमृतत्वाद्वैव विधवा भूता वा तदा तस्यां मृतायां तत्संक्रान्तमातृधने तद्भगिन्यौ पुत्रवतीसम्भावितपुत्रयोरभावे बन्ध्याविधवयोरप्यधिकारः। सर्व्वदुहित्रभावे पुत्रस्याधिकारः। पुत्राभावे दौहित्रोऽधिकारी दौहित्राभावे पौत्रः। तदभावे प्रपौत्रः। तदभावे सपत्नीपुत्रः। तदभावे सपत्नीपौत्रः। तदभावे सपत्नीप्रपौत्रः। एतत्पर्य्यन्ताभावे ब्राह्मदैवार्षगान्धर्व्वप्राजापत्याख्यविवाहपञ्चकलब्धयौतुकधने भर्त्तुरधिकारः। भर्त्तुरभावे भ्रातुः। तदभावे माताधिकारिणी। तदभावे पिता। सपत्नीप्रपौत्रपर्य्यन्ताभावे आसुरराक्षसपैशाचाख्यविवाहत्रिकलब्धयौतुकधने तु प्रथमं मातुरधिकारः। तदभावे पितुः। पितुरभावे भर्त्ता। अथायौतुकस्त्रीधनाधिकारिक्रमः। तत्र विवाह पूर्व्वापरकालपितृदत्तयौतुकाभ्यामतिरिक्तस्त्रीधने कन्यापुत्रयोर्युगपदधिकारः। तयोरेकतराभावे अन्यतरस्य तद्धनं तयोर्द्वयोरभावे ऊढ़ायाः पुत्रवत्याः सम्भावितपुत्रायाश्च तुल्यवदधिकारः। एतयोरेकतराभावे अन्यस्या अधिकारः। एतयोर्द्वयोरभावे पौत्रः। पौत्राभावे दौहित्रः। तदभावे प्रपौत्रः। तदभावे सपत्नीपुत्रः तदभावे सपत्नीपौत्रः। तदभावे सपत्नीप्रपौत्रोऽधिकारी। ततो बन्ध्या विधवा च तुल्यवदधिकारिण्यौ। एतयोरेकतराभावे चान्यतरस्याः। बन्ध्याविधवापर्य्यन्ताभावे यौतुकवत् ब्राह्मादिविवाहपञ्चकविवाहितायाः धने भर्त्तृभ्रातृमातृपितॄणां क्रमशोऽधिकारः। विवाहकाले तत्पूर्व्वापरकाले वा स्त्रियै यद्धनं पित्रा दत्तं तत्र धने प्रथमं कुमार्य्याः तदनन्तरमूढ़योः पुत्रवतीसम्भावितपुत्रयोः। तदनन्तरं बन्ध्याविधवयोश्चाधिकारः। सर्व्वदुहित्रभावे पुत्रादेर्यौतुकधनान्तरवत् क्रमेणाधिकारः। ततो ब्राह्मादिविवाहपञ्चकलब्धयौतुकधनेषु पितृपर्य्यन्ताभावे आसुरादिविवाहत्रिकलब्धयौतुकधनेषु च भर्त्तृपर्य्यन्ताभावे देवरादेरधिकारः। तदभावे देवरभ्रातृश्वशुरयोः सुतानां युगपदधिकारः। एतेषामभावे स्वपित्रोऽपि भगिनीपुत्रः। तदभावे भर्त्तृभागिनेयः। तदभावे भ्रातृसुतः। तदभावे जामाता। जामातृपर्य्यन्ताभावे सपिण्डानन्तर्य्यक्रमेण श्वशुरभ्रातृश्वशुरादीनां सपिण्डानामधिकारः। सपिण्डाभावे सकुल्याः समानोदकाः सगोत्राः समानप्रवराश्च पुंधनवत् क्रमेणाधिकारिणः। एतत्पर्य्यन्ताभावे ब्राह्मणीधने स्वग्रामश्रोत्रियादेरधिकारः। क्षत्त्रियादिधने राज्ञ एवाधिकारः। इति स्त्रीधनाधिकारिणः ॥ * ॥

अथ विभागानर्हाधिकारिणः।

क्लीबपतितजात्यन्धजडबधिरोन्मत्तपङ्गुमूकमर्भूपितृद्विट्निरिन्द्रियौपपातिकाचिकित्स्यरोगार्त्ताः। पतितवर्ज्जं एते भरणीयाः। पतितपुत्रवर्ज्जमेतेषां पुत्रा यदि निर्दोषाः तदांशभागिनः। क्लीबादीनां अपुत्रा भार्य्या यदि सच्चरित्रा भर्त्तव्या। एषां दुहितरो विवाहपर्य्यन्तं भरणीयाः ॥ * ॥

अथ विभाज्याविभाज्यधननिर्णयः।

तत्र पैतामहं पित्रर्ज्जितं साधारणधनोपघातेनार्ज्जितञ्चेति त्रिविधं धनं सर्व्वैरेव विभाज्यम्। किन्तु तत्रार्ज्जकस्य द्व्यंशौ अन्येषामेकैकांशः। साधारणधनानुपघातेन शौर्य्यप्राप्तं धनं एवं साधारणधनानुपघातेनार्ज्जितविद्याधनं पितृमित्रादिप्रसादादिना लब्धं धनं भार्य्याप्राप्तिकाले लब्धं धनं मित्रतामात्रं धनं आनिन्द्यकर्म्मं एतान्यविभाज्यानि। विद्याधनन्तु समविद्यापितृविद्येभ्यो देयं एवं यदि विद्याभ्यसतो भ्रातुः कुटुम्बमपरो भ्राता अपत्यमपरोदाय भार्य्यां बिभर्त्ति तदा तद्विद्यार्ज्जितधने तस्यापि अपरभ्रातुरंशित्वम्। कुटुम्बात् पित्रादि-

समविद्यार्ज्जितधने तु सर्व्वेषां समानसमांशित्वम् । विद्याधनं यथा, परेण भवान् मम सुपुत्रयतु तस्मै भवते धनानि दास्य इति प्रतिज्ञां तत्र अधीतशास्त्रेण यत् प्राप्तं धनं तन्न तत् । अध्यापितशिष्यात् प्राप्तम् । शास्त्रार्थकरणेन यजमानाद्दक्षिणादिरूपं लब्धं धनम् । यत्किञ्चित् विद्यया प्रश्ने कृते तत्र शास्त्रप्रश्नस्य परितोषादपरिमितम् किञ्चिद्धनं ददाति तत् । यो ज्ञानेन ज्ञानार्थं मम धनं समर्पयति तस्मै सुवर्णादिकमिदं दास्यामीत्युक्ते तस्य सम्प्रश्नपणजीय प्राप्तम् । पाण्डित्ये कुलचिन्तायां विद्यमानेषु ज्ञायकस्याधमागतयोर्यद्ब्रू स्वरूपेण यल्लब्धम् । शास्त्राद्येषु स्वज्ञानप्रकाश्य प्रतिपक्षान् जित्वा यल्लब्धम् । तथाध्ययनाद्याद व्यवहारे वा परं निर्ज्जित्य यल्लब्धम् । एकस्मिन् द्रव्ये बहुभिः कृते वा व्याख्याने यद्धनं लब्धं तेन प्रकट पदाधिकेन यल्लब्धम् । शिल्पकरणोपयोगकारादिभिः शिल्पिभिस्तुल्यादधिकेन यल्लब्धम् । द्यूतेनापि परं निर्ज्जित्य यल्लब्धम् । एतानि अविभाज्यानि ॥ * ॥

क्रमादभ्यागतं द्रव्यमन्येन हृतं यदि दायादानामनुमत्या तेषामेकतरेण साधारणधनानुपघातेन स्वशक्त्यार्ज्जितधनेन च यद्युद्धरति तदा तदुद्धारकस्यैव । भूमिस्तु यदि पूर्व्वं हृता उद्धृता तदा स तुरीयांशं लब्ध्वा अवशिष्टभागत्रयं सर्व्वे सम विभजेत् । अयं निष्कर्षः विभक्तैरविभक्तैर्वा साधारणधनानुपघातेनात्मशक्त्याहृतमेव येन यदर्ज्जितं तदर्ज्जकस्यैव न तु तद्विभाज्यमितरैः । किन्तु विद्यास्थानमात्रे विशेष इत्युक्तं प्राक् मातामहेन । अध्यापयेन यत्नात्संस्कारं यत्नादि वाहन अलङ्कारादिकृतमपात्रं निजार्ज्जितं समभिव्यक्तं दासीव्यतिरिक्ता स्त्री गोप्रचारं इत्यादीनि साध्यकृतपक्षिगामादीनि किन्तु तत् साधारणे तदुपयोगाय एव यदाचारादौ उपयुक्त द्रव्यमभोजनपात्रादि न विभजनीयं येन यदुपनीतं तस्यैव । पुस्तकन्तु सर्व्वेषां पाठ्य किन्तु पण्डितेन स्वकृतसङ्ग्रहतुल्यादन्यादृशं ग्रन्थमेव वा स्वयं उपनीतं धनं लिखितं प्रियदीपयुक्त इव साधिकानां तथापि पुस्तकस्य विभाज्यत्वाः । पितरि जीवति यस्मिन् भार्य्यां यत् यदीयाः अपत्यं कृतं तत्र न विभागः तदपरस्यापि सम्बन्धे यथा तथा ॥ * ॥

अथ पत्न्यविभागक्रमाधिकारी सम्यगेव लिख्यते ।

पितुर्भ्रातृपितृव्यादीनामपत्यानां सह विभक्तः सन् पुत्रादभ्युत्थाय पूर्व्वं कृतविभागस्यैव तत्र एवं तस्य एवं मदनत्वं तत्प्रापयति तदन्यथा ऽप्यवयविभेदतारम्भ उच्यते । अथ संसृष्टविभागः । तत्र भ्रातृणां समेषां तुल्यांशभागित्वात् पैतामहधनविभागे मध्ये संसृष्टादेव यद्यपि भूतपूर्व्वमधिकारात् । तदभावे तदपरिष्ठा

सवर्णायामिति क्रम ॥*॥ एवं यदा पिता पुत्रान् विभज्य यथाशास्त्रं भागं दत्तवान् पुत्रे च यदा मरणं प्राप्ते एव पुत्रान्तरमुत्पाद्य स्वतरत्ता विभागान्तरमात्र एव तद्धनाधिकारी न पूर्व्वविभक्तः एव पूर्व्वम्मात्रविभागोऽपि विभक्तस्य नाधिकारः । यदि तु येन केनचित् पुत्रेण भक्तः सन् पिता मृत तदा तेन संसृष्टविभक्तभ्रातृभ्यां सर्व्वं विभाज्य यथा धने तदर्द्धेऽपि । यदविभक्त समभावात् स्त्रियो पुत्रा विभक्तात्तदभावात् विभक्तस्याद्विशेषेण पुनर्विभज्य स्वांशं गृह्णीयात् न तु विभक्तस्यैव तत्र पितृतः शिल्पम् ॥*॥

अथ पितृकृतविभागो लिख्यते ।

तत्र पितृकृतविभागस्तत्र स्वोपार्ज्जितधने पितुरिच्छैव नियामिका । पितामहधने तु शास्त्रमेव नियतिमशक्ता तदिच्छा नियामिका । स्वोपार्ज्जितधने पिता इच्छया धनं प्रदातुं कस्मैचित् कस्मैचिदधिकं कस्मैचिदल्पं दातुमर्हति । पैतामहधनविभागे तु पिता स्वयमभागेन यथोक्ता पुत्रेभ्य एकैकांशं दद्यात् । किन्तु पैतामहमपि राजप्रसादादिना पितृ स्वाच्छन्द्य भूमिनिबन्धादि पितृदायलब्धे न स्वाच्छन्द्यम् । स्वार्ज्जितधनविभागे पिता अपुत्रपत्नीभ्यः पुत्रतुल्यांशो देयः यदि ताभ्यः स्त्रीधनं न दत्तं स्त्रीधने दत्ते तदर्द्धं देयम् । पुत्रपुत्रविभागे तु पितातुल्यभागः ॥*॥ शूद्रस्य दासीपुत्रोऽपि पितुरिच्छया परिणीतस्त्रीजातपुत्रेण सह तुल्याधिकारी सति पितरि तत्प्राप्ताधिकारी । तथाविधभ्रात्रभावे दौहित्रे चासति पितुः सर्व्वधनाधिकारी सति दौहित्रे तेन सह तुल्याधिकारी ॥*॥ पितरि मृते मातरि जीवन्त्यां पुत्राणां विभागो न धर्म्मः यदि जीवन्त्यां मातरि विभागं कुर्व्वन्ति तदा मातापि पुत्रतुल्यांशभागिनी । स्त्रीधनरक्षणार्थं किञ्चित् वा यावज्जीवनादिना भर्त्त्रा । एवं पितामहधने पौत्रैर्विभज्यमाने पितामही पौत्रतुल्यांशभागिनी ॥*॥ औरसेन दत्तकादीनां विभागे औरसस्य सार्द्धोऽर्द्धं दत्तकादेरेकैकांशित्वम् । विभागस्तु पितादेरभिन्नं स्वयं परिशोध्य तन्न्यासेऽधिकस्य कर्त्तव्यः । अशक्तैस्तथा विभज्य वा तदृणं परिशोधनीयम् । एकेन भ्रात्रान्येन शत्रुभिर्ना तथा यद्यधिकं भुक्तं तत्र च विभागकाले विभागतश्चे परिशोधनीयम् । किन्तु स्वत्वानभिज्ञस्य पितृभागधनस्यैव विभाग कार्य्यः ॥*॥ अत एव भ्रातृभगिनीनां पैतृकधनेन संस्कारः कर्त्तव्यः । विभागकाले केनचित् पुत्रस्य यथाशास्त्रं भागं कर्त्तव्यः । भ्रमादिना तथाशास्त्रीयविभागान्तरस्य पुनः शास्त्रीयविभागः कार्य्यः ॥*॥

अथ निर्द्दिष्टमतस्य विभागः ।

विभक्तस्य दायादानां स्वार्ज्जितस्य पितृकाला नन्तरामत्य पत्न्यादुहितृदनन्तरं दायाधिकारिणोऽपि पौत्रप्रपौत्रादिना वा तथापि दृष्ट्वा क्रमागतत्वात् यथाशास्त्रं हरणं निर्णीतं दिन।

तथा नवत्वा पितृव्यासनिषिद्धो द्वैमातृकेन तु धनित्वातुर्यस्मिन्नेव सहधनविभागादौ । साधारणधनेऽपि स्वांशमात्र कर्त्तव्यम् । इति श्रीरघुनन्दनभट्टाचार्य्यकृतदायतत्त्वम् ॥*॥

"ईशस्य भागं संयम्य धर्म्मो धामदत्तो ऽयम् ।
उपरि स्थान् स तेनैव दायभाग प्रकल्पयेत् ॥"

इति दायतत्त्वम् ॥

दायविभागः, पुं, (दायस्य विभागः ।) दायभागः । यथा । "किं दायस्य विभागो विभक्तावयवस्य पिता दायेन सह विभागोऽपहृतम् ।" इति श्रीमद्भागवतम् ॥

दायादः, पुं, (आदत्ते इति । आ+दा+"आत चोपसर्गे ।" ३।१।१३६ । इति कः । दायस्य आदः प्राप्तिः ।) सपिण्डः । पुत्रः । इत्यमरः । ३।३।८८ । (यथा, महाभारते । १ । ८५ । २ ।
"पुत्रत्वे तु कर्त्ता मामङ्ग भार्गवस्य विधीयते ।
कनीयान् मम दायादो पुत्रो येन धरा मम ॥")

दायादी, स्त्री, (दाय आदत्ते इति । आ+दा+क । स्त्रियां ङीप् ।) कन्या । इति शब्दरत्नावली ॥

दायितः, त्रि, (दाय दाने+णिच्+क्त ।) दापितः । दण्डमर्षीयार्थो भवन् ॥

दारकः, पुं, (दारयति नाशयति यश्च पितुः मिति । दॄ+णिच्+ण्वुल् ।) पुत्रः । इति हेम चन्द्रः ।३।१८६ ॥ (यथा, महाभारते ।१।७४।१३ ।
"कस्यैते दारका राजन् देवपुत्रोपमाः शुभाः ।
वर्च्चसा रूपतश्चैव सदृशा मे मतास्तव ॥")
ग्रामकः । इति मेदिनी । के, १५ ॥ (यथा, महाभारते । १ । ८१ । १६ ।
"प्रतिष्ठां मातरश्चैव तथा बान्धव दारकाः ।")
शावक । इति शब्दार्थकल्पतरुः ॥ ग्राम-शूकरः । इति राजनिर्घण्टः ॥

दारकः, त्रि (दारयतीति । दॄ+णिच्+ण्वुल् ।) भेदकः । इति मेदिनी । के, १५ । (यथा —
"अधीयन्नुत्तमकरान् दारके
करोति तत्र यथैव दारकम् ।"
इति वैद्यकचक्रपाणिसङ्ग्रहे नाडीविचारे ।")

दारकर्म्म, क्ली, (दाराय यदर्थं यत् कर्म्म ।) विवाहः । इति त्रिकाण्डशेषः । (यथा देवीभागवते । १ । १४ । २६ ।
"दारकर्म्म ततो भार्या शुकाय धर्म्मविचक्षण ।")

दारणं, क्ली (दारयति नाशयति अन्धकारमेनेति । दॄ+णिच्+करणे ल्युट् ।) कतकम् । इति शब्दचन्द्रिका । (दॄ+णिच्+भावे ल्युट् ।) विदारणम् । यथा "दारुणारणये" ममायनम् इति सीतायाम् । (प्रयोजन्तु क्षतस्य दारणम् अवधपिहन । यथा, सुश्रुते । १ । ११ ।
"चिरविलोडितः पक्वो दारको वा यथा रके ।
कर्मोत्तमाङ्गानां हरीतकी च दारणम् ॥
दारणानि च या या चापरो वा दारणं परम् ।"
दारयतीति । दॄ+णिच्+कर्त्तरि ल्युट् । विदारके, त्रि । यथा, महाभारते । ८ । ३८ । १० ।
"यमायम प्रियं वाक्यं विदीर्णमपि दारणम् ।")

दारद पुं, (दरदे देशविशेषे भवः । दरद+अण् ।) दरददेशोद्भवविषभेदः । इत्यमरः । १ । ८ । ११ ॥ पारदः । हिङ्गुलम् । इति मेदिनी । दे, ३१ ॥ समुद्रः । इति हारावली । ५६ ॥

दारबलिभुक्, पुं, (दारैः पत्नीभिः सह बलिं भुङ्क्ते इति । भुज+क्विप् ।) चक्रवाकः । इति त्रिकाण्डशेषः ॥

दाराः, पुं, (दारयन्ति भ्रातृबन्धूनिति । दृ+“दारजारौ कर्त्तरि णिलुक् च ।” ३ । ३ । २० । इत्यस्य वार्त्तिकोक्त्या घञ् णिलुक् च ।) भार्य्या । बहुवचनान्तोऽयम् । इत्यमरः । २ । ६ । ६ ॥ (यथा महाभारते । १ । १५९ । ३७ ।
“आपदर्थे धनं रक्षेत् दारान् रक्षेत् धनैरपि ।
आत्मानं सततं रक्षेत् दारैरपि धनैरपि ॥”)

दारा, स्त्री, (दारयति भ्रातृबन्धूनिति । दृ+णिच्+अच्+टाप् ।) दाराः । इत्यमरटीकायां भरतः ॥ (यथा, भागवते । ७ । १४ । ११ ।
“धर्म्मकामात्मनो दारा कुर्य्यात् सत्यपरो यतः ॥”)

दारि, स्त्री (दारयतीति । दृ+णिच्+इन् ।) विदारकः । इति शब्दार्थकल्पतरुः ॥

दारिका, स्त्री, (दारक+टापि अत इत्वम् ।) कन्या । इति जटाधरः ॥ (यथा, हरिवंशे । ४१ । १५८ ।
“अरिष्टं वृषभं केशिं पूतनां दैत्यदारिकाम् ॥”)

दारित, त्रि, (दार्य्यते स्मेति । दृ+णिच्+क्त ।) कृतदारणः । तत्पर्य्यायः । भिन्नः २ भेदितः ३ । इत्यमरः । ३ । १ । १० ॥ विदारितः ४ । इति शब्दरत्नावली ॥ (यथा, महाभारते । ३ । १०७ । ४८ ।
“अंशुमानेवमुक्तस्तु सगरेण महात्मना ।
जगाम दुःखात् तं देशं यत्र वै दारिता मही ॥”)
ताडितः । यथा, कालिकापुराणे ८ अध्याये ।
“ततः सुदर्शनो राजा गदया दारितोऽपतत् ॥”)

दारिद्र्य, क्ली (दरिद्रस्य भावः । दरिद्र+ष्यञ् ।) दरिद्रता । यथा,—
“प्रक्षीय दारिद्र्यदरिद्रतां नृप ।”
इति नैषधे । १ । १५ ॥
(यथा मृच्छकटिके १ अङ्के ।
“दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम् ।
अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम् ॥”)
त्रियकारान्तोऽप्ययम् ॥

दारी, स्त्री, (दारयति पदतलमिति । दृ+णिच्+“अच इः ।” उणां ४ । १३८ । इति इन् । कृदिकारादिति पक्षे ङीष् ।) क्षुद्ररोगविशेषः । बिवाई इति लोके । तल्लक्षणम् यथा,—
“परिक्रमणशीलस्य वायुरत्यर्थरूक्षयोः ।
पादयोः कुरुते दारीं सरुजां तलसंश्रिताम् ॥”
तच्चिकित्सा यथा —
“पादयोर्विध्येत्सिरां प्राज्ञो मोचयेत्तत्र शोणितम् ।
स्वेदस्नेहोपपन्नौ च पादौ वा लेपयेन्मुहुः ।
मधूच्छिष्टवसामज्जासर्ज्जक्षारैः प्रलेपनम् ॥”

क्षारो यवक्षारः ।
धन्वाक्षसिन्धूद्भवयोश्चूर्णं मधुघृतप्लुतम् ।
निर्भिद्य कटुतैलाक्तं हितं पादप्रमार्ज्जने ॥
मधुच्छिष्टकगैरिकघृतगुडसर्ज्जरसैर्धूप शाल-
निर्यासैः ।
गैरिकसहितैर्लेपः पादस्फुटनापहः सिद्धः ॥
मधुच्छिष्टकं मोम । प्रथमं गैरिकं शिलाजतु ।
द्वितीयं गैरिकं गद इति लोके । शालनिर्यासः राल ।
उष्णोदकस्य सेकेन मार्य्यकं चार्य्यवारिणा ।
त्रिफला कटुतैलञ्च पथ्याहारी न सम्भवेत् ॥
इति धत्तूरतैलम् ।” इति भावप्रकाशः ॥

दारु क्ली पुं, (दीर्य्यते इति । दृ+“दृसनिजनीति ।” उणां । १ । ३ । इति ञुण् ।) काष्ठम् । इत्यमरभरतौ ॥ (यथा महाभारते । १ । १४५ । ११ ।
“अस्मि लेपे घृतञ्चैव जतु दारूणि चैव हि ।
तस्मिन् वेश्मनि सर्व्वाणि निक्षिपेथाः समन्ततः ॥”)

दारु, स्त्री (दृ+ञुण् ।) देवदारु । (यथा, सुश्रुते उत्तरतन्त्रे । १७ ।
“दारुपत्रककुष्ठैर्भिरेवमेव कृतोऽपि वा ॥”
अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
“सुरदारु द्रुकिलिमं सुराह्वं भद्रदारु च ।
दैवकाष्ठं पीतदारु देवदारु च दारु च ॥”)
पित्तलम् । इति मेदिनी । रे, ४७ ॥

दारु, त्रि (दृ+ञुण् ।) शिल्पी । दाता । इति धरणी ॥ (यथा, ऋग्वेदे । ७ । ६ । १ ।
“इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि ॥”
“दारुं पुरां भेत्तारं वन्दे ।” इति तद्भाष्ये सायनः ॥)
दाता । इति त्रिकाण्डशेषः ॥

दारुक, क्ली, (दारु+स्वार्थे कन् ।) देवदारु । इति राजनिर्घण्टः ॥

दारुक, पुं, श्रीकृष्णसारथिः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । २ । ५ । २८ ।
“दारुकेण च सूतेन सहितो देवकीसुत ॥”
योगाचार्य्यविशेषः । स तु महादेवस्य अवतारविशेषः । यथा, शिवपुराणे वायुसंहितायाम् । २ । १० । ४ ।
“जटामाली चाट्टहासो दारुको लाङ्गली तथा ॥”)

दारुकदली, स्त्री, (दारुवत् कठिना कदली ।) वनकदली । इति राजनिर्घण्टः ॥

दारुका, स्त्री, (दारुणा काष्ठेन कायतीति । कै+क । टाप् ।) काष्ठमयपुत्तली । काठेर पुतुल इति भाषा । तत्पर्य्यायः । पुत्रिका २ दारुजी ३ शालभञ्जिका ४ शालभञ्जी ५ पाञ्चाली ६ । इति शब्दरत्नावली । दारुपुत्रिका ७ कुरुटी ८ दारुगर्भा ९ । इति हारावली । ७१ ॥

दारुगन्धा, स्त्री, (दार्व्विव गन्धो यस्याः ।) चीडानामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

दारुगर्भा स्त्री (दारुमयो गर्भो यस्याः ।) दारुमयी । इति हारावली । ७१ ॥

दारुज, पुं, (दारुणो जायते इति । जन+ड ।) मर्द्दलः । इति शब्दरत्नावली ॥ काष्ठनिर्म्मिते, त्रि ॥ (यथा, कालिकापुराणे । ६७ अध्याये ।
“आसनं प्रथमं दद्यात् पौष्पं दारुजमेव वा ॥”)

दारुण, पुं (दारयतीति । दृ+णिच्+“कृदृदारिभ्य उनन् ।” उणां ३ । ५३ । इति उनन् ।) चित्रकः । इति राजनिर्घण्टः ॥ भयानकरसः । (विष्णुः । यथा, महाभारते । १३ । १४९ । ७४ ।
“सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ॥”
“सन्मार्गविरोधिनां दारणात् (खण्डकत्वात्) दारुणः ।” इति तद्भाष्ये शङ्करः ॥) भयङ्करे, त्रि । इत्यमरः । १ । ७ । २० ॥ (यथा, देवीभागवते । ५ । ४ । २७ ।
“हाहाकारो महानासीत् सम्प्रहाराच्च दारुणः ।
उत्पपात ततः सिंहो कृपणोपरि दारुणः ॥”)
कठोरः । यथा, तत्रैव । १ । ४ । ५२ ।
“दारुणं देहदमनं सर्व्वलोकभयङ्करम् ॥”)

दारुणक, स्त्री (दारुणवत् कायतीति । कै+क ।) मस्तकजातक्षुद्ररोगविशेषः । लोके रूसी इति ख्यातः । तस्य लक्षणमाह ।
“दारुणा कण्डुरा रूक्षा केशभूमिः प्रजायते ।
मारुतश्लेष्मकोपेन विद्याद्दारुणकन्तु तत् ॥
दारुणा कठिना ।”
तस्य चिकित्सा यथा —
“कार्य्यो दारुणके रक्ते प्रलेपो मधुसंयुतः ।
प्रियालबीजमधुककुष्ठमाषैः सर्षपैः ॥
आम्रबीजं तथा पथ्या द्वयं स्यात् मात्रया समम् ।
दुग्धेन पिष्टः लेपोऽयं दारुणं हन्ति दारुणम् ॥
दुग्धेन खादेत् बीजं प्रलेपाद्दारुणं हरेत् ।
गुञ्जाफलैः शृतं तैलं भृङ्गराजरसेन च ॥
कण्डूदारुणहृत् कष्टकपालव्याधिनाशनम् ॥”
इति गुञ्जातैलम् ।” इति भावप्रकाशः ॥
(अथ भृङ्गराजतैलम् ।
“भृङ्गराजत्रिफलोत्पलशारि
लोहपुरीषयुतान्वितकारि ।
तैलमिदं पच दारुणहारि
कुञ्चितकेशघनस्थितकारि ॥”
इति वैद्यकचक्रपाणिसङ्ग्रहे क्षुद्ररोगाधिकारे ॥)

दारुनिशा, स्त्री, (दारुभूता निशा हरिद्रा ।) दारुहरिद्रा । इति रत्नमाला ॥ (अस्या गुणा यथा,—
“दार्व्वी निशावद्गुणा किन्तु नेत्रकर्णास्यरोगनुत् ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

दारुपत्री स्त्री, (दारुणः पत्रमिव पत्रमस्याः । ङीष् ।) हिङ्गुपत्री । इति राजनिर्घण्टः ॥

दारुपीता, स्त्री, (दारुणा पीतेव । काष्ठप्रधानत्वात् तथात्वम् ।) दारुहरिद्रा । इति राजनिर्घण्टः ॥

दारुपुत्रिका, स्त्री (दारुमयी पुत्रिका ।) दारुका । इति हारावली । ७१ ॥

दारुमुख्याह्वया, स्त्री, (दारुमुख्यमाह्वयति स्पर्द्धते इति । आ+ह्वे+खश् ।) गोधा । इति राजनिर्घण्टः ॥

दार्व्विका, स्त्री, (दार्व्वि विका प्रकारेव ।) लक । दारुचिनि इति भाषा । तत्तामगुणा ।
"तत्काथोत्थ तु घनुजक यत्र तथा दार्व्विका मता ।
उक्ता दार्व्विका धात्री तिक्ता वान्तिनिपातनुत् ।
सुरभि मुकक्षा बला सूक्ष्मोपल्लवामहा ॥"
इति भावप्रकाशः ॥

दारुमयी, स्त्री, (दारुमयी स्त्री ।) दारवा । इति त्रिकाण्डशेषः ॥

दारुहरिद्रा, स्त्री, (दारुप्रधाना हरिद्रा ।) स्वनामख्यातवृक्षविशेषः । तत्पर्य्यायः । पीतद्रु २ कालेयक ३ हरिद्रु ४ दार्व्वी ५ पचम्पचा ६ पर्जनी ७ । इत्यमरः ।२।४।१०२॥ पीतिका ८ पीतदारु ९ निरदाला १० कामिनी ११ कटङ्कटेरी १२ पर्ज्जन्या १३ पीता १४ दारुनिशा १५ कालीयकम् १६ कामवती १७ दारुपीता १८ कर्क्कटिनी १९ दारु २० निशा २१ हरिद्रा २२ । इति शब्दरत्नावली । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । व्रणमेहकण्डूविषवत्त्वोदोषविषनाशित्वञ्च । इति राजनिर्घण्टः ॥ कफपित्तशोषनाशित्वम् । विशेषेण नेत्राभिष्यन्दनाशित्वञ्च । इति राजवल्लभः ॥

दारुद्रावक पुं, (यथा द्रव प्रतिसर्पति । "द्रव प्रतिघाते ।" ३।१।१८६। इति क । दारुणो द्रावकः ।) काष्ठनिर्म्मितपक्षः । काठठोकरा पाखी इति भाषा । तत्पर्य्यायः । शतपत्रः २ । इत्यमरः । २ । ५ । १४

दार्घसत्र, त्रि, (दीर्घसत्रे भवः । दीर्घसत्र+अण् । "दैविकाशिंशपेति ।" ७।३।१। इति आकार आत् ।) दीर्घसत्रयागे भवः । इति सिद्धान्तकौमुदी ॥

दार्ढ्य, क्ली, (दृढस्य भावः । दृढ+"वर्णदृढादिभ्यः ष्यञ् च ।" ५।१।१२३। इति ष्यञ् ।) दृढता । (यथा, पञ्चतन्त्रम् । ६ । १०४ ।
"वाक्यान्यपि यथाप्राप्तं दार्ढ्यार्थोऽनाकारणानि हि ॥")

दार्दुर, क्ली, दक्षिणावर्त्तशङ्खः । जलम् । भाजनम् । इति शब्दार्थकल्पतरुः । दर्दुरपर्य्यायः ॥

दार्भट, क्ली, चित्रविशेषः । इति भारतावली ।१६८

दार्व्वाद, पुं, (दार्व्वन् कर्दमस्थः यस्य ।) मयूरः । इति शब्दकल्पमत ॥

दार्व्वाघाट, पुं, (दारु काष्ठं आहन्तीति । आ+हन्+"दारावाहनोऽणन्त्यस्य च टः संज्ञायाम् ।" ३।२।४९। इत्यस्य वार्त्तिकोक्त्या अण् टश्चान्तादेशः ।) शतपत्रकपक्षी । इत्यमरः । २ । ५ । १७ । काठठोकरा इति भाषा । (यथा, महाभारते । १ । ७ । १८ ।
"दार्व्वाघाटशताकीर्णं नानारुतविनादितम् ॥")

दार्व्वाघाप, पुं, (दार्व्वि आघातो यस्मात् ।) दार्व्वाघाटपक्षी । इति शब्दरत्नावली ॥

दार्व्विका, स्त्री, (दारयतीति । दॄ+उणादिका साधुः । दार्व्वी च दारुहरिद्रावाचकः । तस्य स्वार्थे कन् टाप् पूर्व्वह्रस्वश्च ।) काथोद्भवतुत्थम् । गोजिह्वा । इत्यमरः । २ । ४ । ११८ ॥

दार्व्विपत्रिका, स्त्री, (दार्व्व्या पत्रमिव पत्रं यस्याः । दार्व्विपत्त्रा तत स्वार्थे कन् टापि अत इत्वम् ।) गोजिह्वा । इति रत्नमाला ॥

दार्व्वी, स्त्री (दारयति । दॄ+"उल्वादयश्च ।" उणा ४ । ९७ । इति निपातनात् साधुः ।) दारुहरिद्रा । (अस्याः पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"कटङ्कटेरी दार्व्वी स्यात्तथा दारुनिशेति च ।
पचम्पचा दारुहरिद्रा च पर्ज्जनी च पचम्पचा ॥"
अस्या गुणा यथा —
"दार्व्वी निशागुणा किन्तु नेत्रकर्णास्यरोगनुत् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
गोजिह्वा । इति मेदिनी । वे, ११ । देवदारु । हरिद्रा । इति विश्वः ॥

दार्व्वीक्वाथोद्भव, क्ली, (दार्व्व्याः दारुहरिद्रायाः क्वाथादुद्भवो यस्य ।) रसाञ्जनम् । इति राजनिर्घण्टः । रसाञ्जनमोहनम् । इति रत्नमाला ॥

दार्षद, त्रि, (दृषदि पिष्टः । दृषद्+"संस्कृतम् ।" ४ । २ । १६ । इत्यण् ।) दृषत्पिष्टः । इति सिद्धान्तकौमुदी ॥

दाल, क्ली, (दलेभ्यः सञ्चितम् । दल+अण् । यदुक्तम्,—
"वल्मीकमध्ये तिष्ठन्ति पुष्पात् मधु पत्रोपरि स्थितम् ।
मधुदालकजातश्च तद्दालं मधु कीर्त्तितम् ॥")
वनमधु । इति शब्दार्थकल्पतरुः ॥ वल्मीकोत्पन्नकारणमाक्षिकोद्भवं वृक्षकोटरान्तरभवं मधु । अस्य गुणाः । कटुत्वम् । कषायत्वम् । अम्लत्वम् । मधुरत्वम् । पित्तप्रकोपकारित्वञ्च । इति राजनिर्घण्टः ॥

दाल, पुं (दले भवः । दल+अण् ।) कोद्रवः । इति हेमचन्द्रः ॥

दालक, पुं, स्थावरविषभेदः । इति हेमचन्द्रः । ४ । ५६६ ॥

दाला, स्त्री, (दलति स्फुटतामापद्यते । दल+अण्+टाप् ।) महाकालः । इति भावप्रकाशः ॥

दालिका, स्त्री, (दाल्येव । स्वार्थे कन् टाप् अत इत्वम् ।) महाकालः । इति भावप्रकाशः ॥

दालिम, पुं, (दाडिम । डस्य लः ।) दाडिमः । इत्यमरटीकायां भरतः ॥

दाली, स्त्री, (दाल्यते इति । दल+णिच्+अच् । गौरादित्वात् ङीष् ।) देवदाली लता । इति राजनिर्घण्टः ॥

दाल्भ्य, पुं, (दल्भस्य मुनेर्गोत्रापत्यम् । "गर्गादिभ्यो यञ् ।" ४ । १ । १०५ । इति यञ् ।) ऋषिविशेषः । (यथा, महाभारते । ७ । ८ । १२ ।
"यो दाल्भ्य वकः पुरा मन्त्रैरेनाञ्जनम् कृतः ॥")

दाल्भि, पुं (दलनाति मनुष्यादीन् । दल+णिच्+बाहुलकात् निः ।) वज्रः । इति त्रिकाण्डशेषः ॥

दाव, पुं, (दुनोति उपतापयतीति । दु+"दुन्योरनुपसर्गे ।" ३।१।१४२। इति णः ।) वनम् । (यथा महाभारते ।१।२२४।६।
"इदमिन्द्रस्य सदा दावं खाण्डवं परिरक्षति ॥")
वनवह्निः । इत्यमरः । १ । १ । ५६ ॥ (यथा, महाभारते । ३ । ६६ । १ ।
"उत्सृज्य दमयन्तीं तु नलो राजा विशाम्पते ।
ददर्श दावं दह्यन्तं महान्तं गहने वने ॥")
अग्निः । इत्यमरटीकायां नीलकण्ठः ॥ उपतापः । इति भरतधृतहलायुधकोषः ॥

दावाग्नि, पुं, (दावोद्भवोऽग्निः । शाकपार्थिवादिवत् समासः ।) वनोद्भवाग्निः । तत्पर्य्यायः । दवाग्नि २ दावानल ३ । इति शब्दरत्नावली ॥ दव ४ दाव ५ । इत्यमरः । १ । १ । ५६ ॥ (यथा, महाभारते । १ । १६६ । १५ ।
"दावाग्निभूतस्त्वं वसु पार्थिवं दह ॥")

दावानल, पुं, (दावोद्भवः अनलः । दाव एवानलो वा ।) दावाग्निः । इति शब्दरत्नावली ॥ (यथा, कथासरित्सागरे । २६ । ६९ ।
"मदादाराणामनलस्य सुधाद्रवमिवाभ्रने ॥")

दाविक, त्रि, (देविकायां भवः । अण् । "दैविकाशिंशपेति ।" ७ । ३ । १ । इति आकार आत् ।) देविकानदीसम्भवः । इत्यमरः । २ । १० । ११ ॥

दाश, क ङ क दाने । इति कविकल्पद्रुमः ॥ (चुरां आत्म सकं सेट् ।) द्वितीयस्वरी । क, अद-दाशत् । ङ ङ दाशयते । इति दुर्गादासः ॥

दाश, ऋ ण दाने । इति कविकल्पद्रुमः ॥ (भ्वां उभ सकं सेट् ।) ऋ, अददाशत् । ण, दाशति दाशते । इति दुर्गादासः ॥

दाश, न र हिंसने । इति कविकल्पद्रुमः ॥ (स्वां-पर-सकं सेट् ।) द्वितीयस्वरी । न, दाश्नोति । र वैदिकः । इति दुर्गादासः ॥

दाश पुं (दाशते ददाति धनिनेभ्यः मत्स्यान् । दाश दाने+पचाद्यच् ।) धीवरः । इत्यमरटीकायां रमानाथः ॥ (दशति हिनस्ति मत्स्यानिति । दंश+"दंशेश्च ।" उणा ५ । ११ । इति टः नलोपश्च ।) धीवरः । यथा देवीभागवते । २ । १ । ३९ ।
"मत्स्यगन्धेति नाम्ना वै गुणेन समजायत ।
विवर्द्धमाना दाशस्य गृहे सा वासवी शुभा ॥")

दाशपुर, क्ली, (दाशान् कैवर्त्तान् पिपर्त्ति पालयतीति । पॄ+क । "उदोष्ठ्यपूर्व्वस्य ।" ७ । १ । १०२ । इति उत्वम् ।) दशपुरम् । इत्यमरटीकायां स्वामी ॥

दाशरथ, पुं, (दशरथस्यापत्यम् । तस्येदमित्यणादेशश्चापत्यार्थे अण् ।) श्रीरामः । इति शब्दरत्नावली ॥ (यथा, महानाटके ।
"प्रदीयतां दाशरथाय मैथिली ॥"
दशरथसम्बन्धिनि, त्रि । यथा भट्टिः । ६ । ५४ ।
"कस्माद्भवद्दाशरथे न कालम् ॥")

दाशरथि, पुं, (दशरथस्यापत्यं पुमान् । "अत इञ् ।" ४ । १ । ९५ । इतीञ् ।) श्रीरामः

इति हेमचन्द्रः ॥ (यथा, रामायणे । ५।४५।११।
"यथा यथा दाशरथिर्धर्म्ममेवाश्रितोऽभवत् ।
तथा तथा प्रकृतयो रामं पतिमकामयन् ॥")
दाशार्हः, पुं, (दाश्र दाने + भावे घञ् । दाशं दानमर्हतीति । अर्ह + अच् ।) विष्णुः । इति हेमचन्द्रः ॥ (यथा महाभारते ।१३।१४९।६७।
"विनयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः ॥")
दशार्हदेशजश्च ॥
दाशेरकः, पुं, मालवदेशः । इति त्रिकाण्डशेषः ॥
दाश्मः त्रि, (दाशति ददातीति । दाश + बाहुलकात् मन् ।) दाता । इति जटाधरः ॥
दाश्वान्, [स्] त्रि, (दाश्र दाने + "दाश्वान् साह्वान् मीढ्वांश्च ।" ६।१।१२। इति क्वसुप्रत्ययेन निपातनात् साधुः ।) दत्तवान् । इति मुग्धबोधम् ॥ (यथा, रघुः । १४ । ७१ ।
"तस्मै मुनिर्दोहदलिङ्गदर्शी
दाश्वान् सुपुत्राशिषमित्युवाच ॥")
दास, ऋ ञ दाने । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ऋ, अददासत् । ञ, दासति दासते । इति दुर्गादासः ॥
दास, ऋ प वधे । इति कविकल्पद्रुमः ॥ (स्वां-परं-सकं-सेट् ।) ऋ वैदिकः । प दास्नोति । इति दुर्गादासः ॥
दासः पुं, (दस्यतीति । दसि + "दसेष्टटनौ न आत् ।" उणां ५ । १० । इति टः नकारस्य चाकारः) शूद्रः । (यथा, ऋग्वेदे ।२।१२।४।
"यो दासं वर्णमधरं गुहाकः ॥")
अधुना कायस्थानां उपाधिविशेषः । स तु घटविह मौलिकानामन्यतमः । यथा, कुलदीपिकायाम् ।
"गौड़ेशौ कीर्त्तिमन्तश्चिरथततिरला मौलिका ये हि सिद्धा-
स्ते दत्ता सेनदासा करगुहपालिता पालिताः सिंहदेवाः ॥')
धीवरः । धीवरः । इति मेदिनी । से, ६ ॥ दानपात्रम् । इति विश्वः ॥ शूद्राणां नामान्तप्रयोज्यपद्धतिविशेषः । यथा,—
"शर्म्मान्तं ब्राह्मणस्योक्तं वर्म्मान्तं क्षत्रियस्य च ।
गुप्तदासात्मकं नाम प्रशस्तं वैश्यशूद्रयोः ॥"
इत्युद्वाहतत्त्वम् ॥ * ॥
दास्यते दीयते भूतिभक्त्यादिकं यस्मै सः । चाकर इति भाषा । तत्पर्य्यायः । भृत्यः २ दासेरः ३ दासेयः ४ गोप्यकः ५ चेटकः ६ नियोज्यः ७ किङ्करः ८ प्रैष्यः ९ भुजिष्यः १० परिचारकः ११ । इत्यमरः । २ । १० । १७ ॥ प्रेष्यः १२ भेषः १३ जेषः १४ । इति भरतः ॥ परिकर्म्मी १५ पारिषदः १६ सहायः १७ उपस्थाता १८ सेवकः १९ अभिसरः २० अनुगः २१ । स पञ्चदशविधः । यथा नारदः ।
"गृहजातस्तथा क्रीतो लब्धो दायादुपागतः ।
अनाकालभृतस्तद्वदाहितः स्वामिना च यः ॥
मोक्षितो महतश्चर्णात् युद्धे प्राप्तः पणे जितः ।
तवाहमित्युपगतः प्रव्रज्यावसितः कृतः ॥
भक्तदासश्च विज्ञेयस्तथैव वड़वाहृतः ।
विक्रेता चात्मनः शास्त्रे दासाः पञ्चदश स्मृताः ॥"
गृहजातः । गृहजातो दास्यां सुतः । दायादुपागतः क्रमागतः । अनाकालभृतः दुर्भिक्षपोषितः । स्वामिना आहितो बन्धकीकृतः । मोचितः ऋणमोचनेनाङ्गीकृतदासः । तवाहमित्युपगतः स्वयं दासत्वेन उपगतः । प्रव्रज्यावसितः प्रव्रज्याप्रच्युतः । कृतः केनचिन्निमित्तेन एतावत्कालपर्य्यन्तं तवाहं दास इति कृतसमयः । भक्तदासः सर्व्वदापि भक्तार्थमङ्गीकृतदासः । वड़वाहृतः वड़वा दासी तल्लोभादङ्गीकृतदासः । इति मिताक्षरालङ्कारकृतक्रमसम्यक् ॥ तस्य कर्म्म यथा,—
"कर्म्मापि द्विविधं ज्ञेयमशुभं शुभमेव च ।
अशुभं दासकर्म्मोक्तं शुभं कर्म्मकृतां स्मृतम् ॥
गृहद्वाराशुचिस्थानरथ्यावस्करशोधनम् ।
गुह्याङ्गस्पर्शनोच्छिष्टविण्मूत्रग्रहणोज्झनम् ॥
अशुभं कर्म्म विज्ञेयं शुभमन्यदतः परम् ॥"
इति मिताक्षरायां नारदः ॥
"विप्रस्य किङ्करा भूपा वैश्यो भूपस्य भूमिप ॥
सर्व्वेषां किङ्कराः शूद्रा ब्राह्मणस्य विशेषतः ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥
दासनन्दिनी स्त्री, (दासस्य धीवरस्य नन्दिनी ।) सत्यवती । इति शब्दरत्नावली ॥
दासपुरं, क्ली, (दासान् धीवरान् पूरयतीति । पूर + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् ।) कैवर्त्तीमुस्तकम् । इति शब्दरत्नावली ॥
दासिका स्त्री, (दासति ददाति आत्मानमिति । दास दाने + ण्वुल् । टापि अत इत्वम् ।) दासी । इत्यमरटीकायां भरतः ॥
दासी, स्त्री, (दासति ददात्यात्मानमिति । दास + अच् । गौरादित्वात् ङीष् ।) झिण्टी । इति मेदिनी । से, ४ ॥ तत्पर्य्यायः । कर्म्मकरी २ । इति मुग्धबोधम् ॥ दासपर्य्यायशब्दाः स्त्रीलिङ्गे अपि तत्पर्य्यायशब्दाः भवन्ति ॥ (यथा, देवीभागवते । १ । २ । ७२ ।
"न गता च वधूलग्नं प्रेष्या सर्व्वहिता तथा ।
तस्याञ्च विदुरो जातो दास्यां धर्म्मांशतः शुभः ॥")
काकजङ्घा । नीलाम्लानः । नीलझिण्टी । इति राजनिर्घण्टः ॥ नीलझिण्टी । इति रत्नमाला ॥ वेदी । इति विश्वः ॥ (दास + ङीष् ।) शूद्रपत्नी कैवर्त्तपत्नी च ॥ (जनीभेदः । यथा, महाभारते । ६ । ९ । ३१ ।
"सुरसां समतां दासीं धात्मन्यां वरवास्फुलीम् ॥")
दासीघटः, पुं (दासीभिरानीयो घटः । मध्यपदलोपिसमासः ।) जनन्यां महापातकिनः परित्यागार्थं सपिण्डसमानोदकभिन्नकर्त्तृक भिन्नतदासीभाजनपेयजलपूर्णघटः । तस्य दानं यथा मनुः । ११ । १८३—१८५ ।
"पतितस्योदकं कार्य्यं सपिण्डैर्बान्धवैर्बहिः ।
निन्दितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसन्निधौ ॥
दासीघटमपां पूर्णं पर्य्यस्येत् प्रेतवत् पदा ।
अहोरात्रमुपासीरन्नशौचं बान्धवैः सह ॥
निवर्त्तेरंश्च तस्मात्तु सम्भाषणसहासने ।
दायाद्यस्य प्रदानञ्च यात्रा चैव हि लौकिकी ॥"
"पतितस्येति । महापातकिनो जीवत एव प्रेतस्योदकक्रिया वक्ष्यमाणरीत्या सपिण्डैः समानोदकैश्च ग्रामाद्बहिर्गत्वा ज्ञात्यृत्विग्गुरुसन्निधाने रिक्तायां नवम्यां तिथौ दिनान्ते कर्त्तव्या ॥ दासीति । सपिण्डसमानोदकनियुक्ता दासी उदकपूर्णं घटं प्रेतवदिति दक्षिणाभिमुखीभूय पादेन क्षिपेत् । यथा स निरुदको भवति तद्वत् । सपिण्डाः समानोदकैः सहाहोरात्रमशौचमाचरेयुः ॥ निवर्त्तेरन्निति । तस्मात् पतितात् सपिण्डादीनां सम्भाषणमेकासनोपवेशनञ्च तस्मै ऋक्थप्रदानं लौकिकव्यवहारो निमन्त्रणादिरूपो लोकाचारः एतानि निवर्त्तेरन् ॥" इति कुल्लूकभट्टः ॥
दासीसभं क्ली, (दासीनां सभा । "अशाला च ।" २ । ४ । २४ । इति क्लीवत्वम् ।) दास्याः सभा । इत्यमरः । १ । ५ । २० ॥
दासेयः, पुं, (दास + स्वार्थे ढक् ।) दासः । इत्यमरः । २ । १० । १७ ॥ कैवर्त्तः । इति शब्दरत्नावली ॥ (दास्याः अपत्यमिति ।) दासीसुते त्रि ॥
दासेयी, स्त्री, (दासेय + स्त्रियां ङीप् ।) सत्यवती । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । १ । ६९ ।
"समीक्ष्य राजा दासेयीं कामयामास शान्तनुः ॥")
दासेरः, पुं (दास्याः अपत्यम् । ढ्रक् ।) दासः । इत्यमरः । २ । १० । १७ ॥ कैवर्त्तः । इति शब्दरत्नावली ॥ (दास + बाहुलकात् एरन् ।) उष्ट्रः । दासिकापत्ये, त्रि । इति मेदिनी । रे, १६९ ॥
दासेरकः, पुं, (दासेर + स्वार्थे कन् ।) उष्ट्रः । इति राजनिर्घण्टः ॥ (यथा, माघे । ५ । ६६ ।
"दासेरकः सपदि सम्वलितं निषादै-
र्विप्रं पुरा पतगराडिव निर्जगार ॥")
दासेरयः । इति धारावली । २४८ ॥ (जातिभेदः । यथा, महाभारते । ६ । ४० । ४६ ।
"दशार्णकाः प्रयागाश्च दासेरकगणैः सह ॥")
दास्यं, क्ली, दासस्य भावः । (दास + ष्यञ् ।) दासत्वम् । यथा,—
"अर्च्चनं वन्दनं मन्त्रजपः सेवनमेव च ।
स्मरणं कीर्त्तनं शश्वद्गुणश्रवणमीप्सितम् ॥
निवेदनं स्वस्य दास्यं नवधा भक्तिलक्षणम् ॥"
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥
दास्यमानः त्रि, दायातेः कर्म्मणि स्यमानच्प्रत्ययेन निष्पन्नः । भविष्यद्दानकर्म्मविषयम् । इति व्याकरणम् । "अपि च जननिर्मितिदास्यमानं विज्ञानानि यथा ।" इति दिनानन्दनम् ॥
दाहः, पुं (दह + भावे घञ् ।) दहनम् । भस्मीकरणम् । (यथा, मार्कण्डेये । ६ । २३ ।
"तन्नाशञ्च इर्षाति कार्य्येषु चक्रतुर्मिता

सम्पाणीयैरपरे पञ्चकदारादा पञ्चगा क्रिया ।")
अथ प्रेतस्नानविधिर्यथा,—
"गतप्राणं ज्ञात्वा पुत्रादिः स्नात्वा शवं तत्र स्नापयेत् । ततो गन्धाद्यं स्नापयित्वा वाससा नवशरीरमाच्छाद्य नीरोगकुशास्तीर्णायां भूमौ दक्षिणाशिरसं स्थापयेत् । ततो शवशिरस्थ,
ॐ गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः ।
कुरुक्षेत्रञ्च गङ्गाञ्च यमुनाञ्च सरिद्वराम् ॥
कौशिकीं चन्द्रभागाञ्च सर्वपापप्रणाशिनीम् ।
भद्रावकाशां गण्डकीं सरयूं पनसां तथा ॥
वैनवञ्च वराहञ्च तीर्थं पिण्डारकं तथा ।
पृथिव्यां यानि तीर्थानि सरितः सागरांस्तथा ॥
इति चिन्तयित्वा पुनः स्नापयेत् । वस्त्रान्तरं परिधाप्य उत्तरीयमुत्तरीयञ्च दत्त्वा चन्दनादिभिरालिप्य कर्णनासिकादिनवद्वारेषु सुवर्णखण्डं निक्षिपेत् ततो पञ्चमारेखा स्पृष्ट्वा दद्यात् । यज्ञकाष्ठे आमपात्रस्य तद् भाण्डं पलाशेन अथवा मिक्षायेमयमिमयेत् । ततोऽभिदाता पुत्रादिश्चिताभूमौ गत्वा तद् भाण्डं तिलयुक्तं मिश्रम्नैतिककैश्चापि उत्सृजेत् । सा यथा,—गोमयेनोपलिप्तायां भूमौ पातितवामजानुः प्राचीनावीती कुशमूलेन ॐ अपहता असुरा रक्षांसि वेदिषद इत्यनेन दक्षिणाग्रे रेखां कुर्यात् तदुपरि कुशमादाय ॐ दक्षिण मम पौत्र गतोरेभि पथिभिः पूर्वैर्यथिभि-र्देवयानपथे भव रक्षिते न सर्वतोर नियम्य स्थापयेत् तत्तिलसलिलपात्र वामहस्ता-द्गृहीतदक्षिणहस्तेन ॐ अद्यामुकगोत्र प्रेता मुकदेवशर्मन्नवनेनिक्ष्व । ॐ अद्यामुकगोत्र प्रेतामुकदेवशर्मन्नेतत्तेऽपअवनिक्ष्व इति वामहस्तक्षालनपात्रोदकेन सतिल-दक्षिणहस्तेन दद्यात् कुशोपरि दद्यात् । पिण्डपात्रपालकवलेन तदुपरि प्रथमशीतलं पूर्णं अन्नादिभिः यामगीतपक्वान्नं नामादर्शमिति विधिः । तत पुत्रादिः स्नात्वा चितां रचयित्वा तत्र दाहकर्म कुर्यात् । तदुपरि काष्ठचयरचित-दक्षिणशिरसं वामजानुनिपतितं पुत्रादिः स्वीन । दाक्षिणात्यानपैत्रेण यामगीतरेखां उत्तराभिमुखम् । ततो दिवापादयितुमना अग्नेः कुशायन संस्कृत्य कर्म दद्यात् इति मन्त्रं भाव्यापि पठीत्वा
ॐ कृत्वा तु दुष्करं कर्म जानता वाप्यजानता ।
मृत्युकालवशं प्राप्य नरं पञ्चत्वमागतम् ॥
धर्माधर्मसमायुक्तं लोभमोहसमावृतम् ।
दहेयं सर्वगात्राणि दिव्यान् लोकान् स गच्छतु ॥
इति पठित्वा त्रिः प्रदक्षिणं कृत्वा दक्षिणामुखं शिरः स्थाने दद्यात् । स्त्रीदाहे वामजिह्वेन मुख-ञ्च ज्वालयेत् । ततो दग्धे सति प्रादेश-प्रमाणा अष्टकाष्ठिका गृहीत्वा चिताग्नौ सप्त वारान् प्रदक्षिणीभूय एककाष्ठिका दग्धेन क्रमेण चितायां प्रक्षिपेत् । तत कुठारेण प्रहार दत्त्वा नमस्तुभ्यमिति मन्त्रं पठन् पठित्वा चितामारुह्य ... अपरि साम्प्रदायिका पापप्रक्षालनार्थं ... पाद शवं न दहेत् प्रवपमन्थितमादि शमशान यावद्दाहस्तावच्छेषो दद्यात् । आत्मनो दग्ध-स्यास्थ स्वस्थानादानः सतिलमवगाह्य जल-पूर्णकुम्भं वामस्कन्धे धारयित्वा इषीकादिभिरभिमन्त्र्य स्थापयित्वा इत्येव विधेय । गर्भस्थाम्नु गर्भं निःसार्य श्मशानान्तरे निखन्य तस्याः दाहं कारयेत् । ततो जलसमीपं गत्वा पुत्रादय सवर्णदायादिकं स्नापयेयुः । उदक करिष्याम इति तेन च कुर्य्यात् । ते पैत्र-पितृगुरुवर्गं प्रेते कुर्य्युः मैतत्क्षिप्नूदकं तर्पणं दत्त्वा यज्ञकुशादिकं मर्दयेत् । तत परिहित वस्त्र प्रक्षाल्य तदेव परिधाय प्राचीनावीतिनो दक्षिणामुखाः ॐ अपन प्रेतपत्नीपतिनैव मन्त्रेण नामगोत्रनामोच्चारणपूर्वकं आर्द्रवस्त्रा एकैकाञ्जलिं प्रेतायोदकं दक्षिणा-मुखाः ददत्युरापयेयुः । तत ॐ अद्यामुकगोत्र प्रेतमुक देवशर्मन् तर्पयामीति प्रेताय प्रयोग यजुर्वेदिनान्तु अद्यामुकगोत्र प्रेतामुकदेवशर्मन्नेत-त्तेऽतिलोदकं ध्यायेति । एकाञ्जलिदानमाच-मनं च अञ्जलिद्वयदाने पुनरादित्यय । तत पुत्र-स्नात्वा स्नानादुत्थाय बालपुरःसरं कार्य्यम् ।
तत शाद्वले उपविश्य,
मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् ।
य करोति स सम्मूढो जलबुद्बुदसन्निभे ॥
गच्छन्त्यम्नौ प्रायः कायो यदि पञ्चत्वमागत ।
कर्मभिः स्वशरीरोत्थैस्तत्र का परिदेवना ॥
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तञ्च जीवितम् ॥
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यं हि क्रिया कार्य्या विधानतः ॥
इति चिन्तयित्वा तत्पुरतः स्वगृहं निम-वृक्षादि दन्तैः खादयित्वा गत्वा पार्श्वे प्रस्थित पत्रसहितां स्पृष्ट्वा अन्यैव गृहं प्रविशेत् । प्रवेशे दूर्वां स्पृष्ट्वा अग्निं स्पृष्ट्वा स्पृष्ट्वा इति अपि स्पृष्ट्वा तत्पश्चात् प्रविशेत् गृहं क्षुर्म-स्थिनं पिपीलिका त्रिवारं स्पृष्ट्वा गोमयमुन्नयं गौरसर्षप-मपि स्पृष्ट्वा बालपुरःसरा गृह विशेत् । स्था-नैरलवणान्नं रात्रौ भक्षयेत् रात्रौ शयनं भूमौ विदधि । आशौचान्तं यावत्प्रत्यहं तत्पुरतः प्रतिदिनं पिण्डं दद्यात् ।" इति शुद्धितत्त्वम् ॥

दाहक, पुं, (दहतीति । दह + ण्वुल् ।) चित्रक । रक्तचित्रक । इति राजनिर्घण्टः । दाह-कर्त्तरि, त्रि । (यथा, मार्कण्डेये । ९२ । ८५ ।
"दैत्यैस्तत्रन्यदागच्छन्ति दहनदाहकाः ।
दाहकाः सर्वभूतानां च दग्धवान्तु महादिवा ॥")
उष्णगुणः । यथा, राजनिर्घण्टे ।
"कार्ष्णिक पविविंशत्सु स्वाप्यजलदतेजस्वम् ।
दाहकं मानुषं पित्त. वक्त्र हमार्दवं परम् ।")

दाहज्वर, पुं (दाहप्रधानो ज्वरः ।) दाहव्याप्ति युक्तज्वररोग । तदौषधम् । यथा,—
"पीतं कषिकमामलकं मधुविशदीव हे ।
दाह विनाशयेद्दाहज्वरस्य परमेश्वर ॥"
इति गारुडे १८९ अध्याय ।

दाहन, स्त्री, (दह + णिच् + भावे ल्युट् ।) भस्मी करणप्रेरणम् । दाहकराण इति भाषा । (यथा ऋग्वेदे । प्रशस्तिवचने । १ । १३ ।
"वर्णो कलुषतश्चैव दाहनादादिसम्पन्नो ।")

दाहसर, पुं, (दाहार्थं ध्रियते शवोऽत्रेति । धृ + अप् ।) श्मशानम् । इति त्रिकाण्डशेषः ॥

दाहहरण, क्ली, (दाहस्य हरणं यस्मात् ।) वीरणमूलम् । इति शब्दचन्द्रिका ॥

दाहागुरु, क्ली (दाहाय यदगुरु ।) सुगन्धिद्रव्य विशेष । तत्पर्याय । दाहागुरु १ गन्ध काष्ठम् २ धूपागुरु ३ तैलागुरु ४ पूरम् ५ धनवत्सम्भम् ६ । अस्य गुणाः । कटुत्वम् । उष्ण त्वम् । केशवर्द्धनत्वम् । वर्ण्यत्वम् । कफदोषना शित्वम् । सततसौगन्ध्यविस्तारकारित्वञ्च । इति राजनिर्घण्टः ॥

दिक्, [श्] स्त्री, (दिशति अवकाशं ददाति या । दिश + "ऋत्विग्दधृगिति ।" ३ । २ । ५९ । इति क्विन् प्रत्ययेन साधु ।) पूर्व्वपश्चिमदक्षि णोत्तरादिस्थानम् । तत्पर्याय । ककुप् १ काष्ठा २ आशा ३ हरित् ४ । इत्यमरः । १ । ३ । ५ ॥ निर्देशिनी ५ दिशा ६ ककुभ ७ हरिता ८ शी १० । इति शब्दरत्नावली ॥ अपि च । अन्ता १ अवाचा २ उपरा ३ आशा ४ काष्ठा ५ व्योम ६ ककुभ ७ हरित ८ इत्यष्टौ दिङ्नामानि । इति वेदनिघण्टौ १ अध्याय ॥ अस्या व्युत्पत्तिर्यथा,—
"दशैवनाराधि सङ्गाति पूर्व्वस्य पश्चिमाम् ।
इति देशो निर्दिशत्येव यदा या दिगिति स्मृता ।"
तस्या पर्यायो यथा ।
"विश्वस्याग्रदमायुष्य प्राचिका मेरुदोषतः ।
धर्माधिष्ठको यस्या सर्व्वोपाच्युत वर ॥"
इति शब्दमाला ॥ ७ ॥
सा दशधा यथा । पूर्व्वा १ आग्नेयी २ दक्षिणा ३ नैरृती ४ पश्चिमा ५ वायवी ६ उत्तरा ७ ऐशानी ८ ऊर्द्ध्वम् ९ अध १० ॥ ० ॥ तासां उत्पत्तिर्यथा,—

महातपा उवाच ।
"सृष्टु दाक्षमर्यादेन प्रजापाय । कल्पादिमात् ।
यदा निमा स्यात्पुरमा आविर्भूत प्रतिबोधिते ॥
सङ्क स्यात सहितास्थितौ श्रोत्राभ्यां ।
विनाम्बुकल्पो का मे प्रजा एवा परिस्थितिः ॥
तं विभागच्छन्त कामार्थं प्रयाति ।
प्रादुर्भूता श्रोत्राभ्यो दश कन्या महाप्रभाः ।
पूर्व्वा च दक्षिणा चैव प्रतीची चोत्तरा तथा ।
ऊर्द्ध्वाध दश सत्कन्या कन्या स्वार्थतारा हृष ॥
तासां मध्ये समस्तस्तु कन्या महाभागा ।
सा यामन्धी महाभागा मार्कण्डेन मनस्विना ॥

सा जगृ प्रथमाद्देव प्रजापतिमकल्मषम् ।
अवकाशन्तु मे देहि देवदेव प्रजापते ॥
यत्र तिष्ठामहे सर्व्वा भर्त्तृभिः सहिताः सुखम् ।
पतयश्च महाभाग ! देहि मेऽव्यक्तसम्भव ! ॥
ब्रह्मोवाच ।
ब्रह्माण्डमेतत् सुश्रोण्यः शतकोटिप्रविस्तरम् ।
तस्यान्ते स्वेच्छया तुष्टा उच्यतां मा विलम्बथ ॥
भर्त्तॄंश्च वः प्रयच्छामि सृष्ट्वा रूपस्विनोऽनघाः ।
यथेष्टं गम्यतां देव्यो यस्या यो रोचतेऽधुना ॥
एवमुक्ताश्च ताः सर्व्वा यथेष्टं प्रययुस्तदा ।
ब्रह्मा ससर्ज्ज तूर्णं तान् लोकपालान् महा-
बलान् ॥
दृष्ट्वा तु लोकपालांस्तु ताः कन्याः पुनराज्ञयन् ।
विवाहं कारयामास ब्रह्मा लोकपितामहः ॥
एकामिन्द्राय स प्रादादग्नयेऽन्यां यमाय च ।
निरृताय च दद्याय वरुणाय महात्मने ॥
वायवे धनदेशाय ईशानाय च सुव्रत ।।
ऊर्द्ध्वं स्वयमधिष्ठाय शेषायाधोऽव्यवस्थिताम् ॥
एवं दत्त्वा पुनर्ब्रह्मा तिथिं प्रादात् दिशां पुनः ।
दशमीं भगवांस्तस्तु अर्द्धनाम्नोदनः प्रभु ॥
तत्प्रभृति ता देव्यः सेन्द्राद्या परि-
कीर्त्तिता ॥”
इति वराहपुराणम् ॥ *॥

न्यायमते अस्याः सर्व्वगतत्वम् । परममहत्त्व-परिमाणत्वम् । दूरान्तिकादिधीहेतुत्वम् । नित्यत्वम् । एकत्वेऽपि उपाधिभेदात् प्राच्यादिव्यपदेशभाक्त्वम् । अस्या गुणाः । संख्या १ परिमिति २ पृथक्त्वम् ३ संयोग ४ विभाग ५ । इति भाषापरिच्छेदः ॥ (सामान्यम् । यथा, रघुः । १ । ४३ ।
“समबन्धयोगाणां दिग्विय सम्यक्कीर्त्तिता ।”)

दिक्क, पुं, (दिशि कायते शब्दायते इति । कै + कः ।) करभः । इति शब्दरत्नावली ॥

दिक्कर, पुं, (दिशः आदेशं करोति उपदेशादि तत्वात् । कृ + टः ।) युवा । इति माघटीका हारकोषः ॥ (महादेवः । यथा, कालिकापुराणे । ८२ अध्याये ।
“दिक्करस्तस्य प्रोक्तस्तथा प्रभुश्च दिक्करः ।”)

दिक्करवासिनी, स्त्री, (दिक्करे शम्भौ वसतीति । वस + णिनि + ङीप् ।) देवीविशेषः । यथा
“एवं दिक्करवासिन्याः कथितः पूर्व्ववत् क्रमः ।
यं श्रुत्वा नाशुभं किञ्चिदाप्नोति मनुजो नरः ॥
दिक्करगस्तस्य प्रोक्तस्तथा प्रभुश्च दिक्करः ।
तस्मिन्नध्युषिता देवी तस्माद्दिक्करवासिनी ॥”
इति कालिकापुराणे ८२ अध्यायः ॥

दिक्करिका, स्त्री, (दिक्करिणो दिग्गजस्य यथा शत् कायते शोभते इति । दिक्करिन् + कै + कः । टाप् ।) नदीविशेषः । यथा,—
“अस्ति नाटकशैले तु नदी मानससन्निभम् ।
यत्र भार्गे शैलपुत्र्या जलक्रीडा सदा हर ।
कुरुते नरशार्दूल । सरःपद्मप्रशोभिते ।
तस्य प्रथामप्रपूर्व्वभागाच्च सरित्पयम् ॥
अवतीर्य्य प्रयात्येव दक्षिणं सागरं प्रति ।
तस्य पश्चिमभागे तु नदी दिक्करिकाह्वया ॥
दिग्गजसम्भवजाता तेन दिक्करिका स्मृता ॥”
इति कालिकापुराणे ८२ अध्यायः ॥

दिक्करी, स्त्री, (दिक्कर + ङीष् ।) युवती । इति हेमचन्द्रः । ३ । १७५ ॥

दिक्पति, पुं, (दिशां पतिः ।) दिगधीश्वरः । तद्यथा । प्राच्यधिपो रविः । अग्निकोणाधिपः शुक्रः । दक्षिणाधिपः कुजः । नैरृतकोणाधिपो राहुः । प्रतीच्यधिपः शनिः । वायुकोणाधिपश्चन्द्रः । उत्तराधिपो बुधः । ईशानकोणाधिपो गुरुः । तस्य प्रमाणं यथा,—
“सूर्य्यः शुक्रः क्षमापुत्त्रः सैंहिकेयः शनिः शशी ।
सौम्यस्त्रिदशमन्त्री च प्राच्यादिदिगधीश्वराः ॥”
इति ज्योतिस्तत्त्वम् ॥

दिक्पाल, पुं, (दिशः पालयतीति । दिश् + पालि + अण् ।) पूर्व्वादिदशदिशां पालकः । यथा,— पूर्व्वस्यां दिशि इन्द्रः । अग्निकोणे वह्निः । दक्षिणस्यां दिशि यमः । नैरृतकोणे निरृतिः । पश्चिमस्यां दिशि वरुणः । वायुकोणे मरुत् । उत्तरस्यां दिशि कुवेरः । ईशानकोणे ईशः । ऊर्द्ध्वदिशि ब्रह्मा । अधोदिशि अनन्तः । इति पुराणम् ॥ यथा, पद्मपुराणे ।
“यजार्थयन्ति विधिना दिक्पालांस्तु कर्म्मिणः ।
तत्र प्रपूजयद्देवं विधि भागवतं शुभम् ॥”

दिक्शूल, क्ली, (दिशि शूलमिव ।) दिग्विशेष-गमने निषिद्धवारः । यथा,—
पश्चिमायां शुक्ररवी । उत्तरस्यां बुधमङ्गलौ ।
पूर्व्वस्यां शनिसोमौ । दक्षिणस्यां बृहस्पतिः ।
तथा च ।
“शुक्रादित्यदिने न वारुणदिशं न ज्ञे कुजे चोत्तरां
मन्देन्द्वोश्च दिने न शक्रककुभं याम्यां गुरौ न
व्रजेत् ।
शूलानीति विलङ्घ्य यान्ति मनुजा ये वित्त-
लाभाशया
अस्ताशाः पुनरापतन्ति यदि ते शक्रेण तुल्या
अपि ॥”
इति ज्योतिःसारसंग्रहः ॥

केषाञ्चिन्मते ।
“——————सौरे गुरौ दक्षिणाम् ।
ईशाने ज्वलने चैव नैरृते मारुते तथा ।
न गच्छेत् सुराचार्य्ये शनौ च रविशुक्रयोः ॥”
इति शुद्धबोधः ॥

दिगम्बर, पुं, (दिगेव अम्बरं वस्त्रं यस्य । उलङ्गत्वात् तथात्वम् ।) शिवः । क्षपणः । (स तु जैनविशेषः । यथा, मच्छदशाम् । ६ । ८८ ।
“दिगम्बरा मध्यमलमाञ्छरायादमलम्भम् ।
चैतन्यमाश्रिद्दरेरागतामपनुतेरपि ॥”)
तमः । इति मेदिनी । रे, २६७ ॥ (नग्ने, त्रि । यथा पञ्चतन्त्रे । ५ । १४ ।
“एकाकी गृहसन्त्यक्तः पाणिपात्रो दिगम्बरः ।
सोऽपि सम्बाध्यते लोके तृष्णया पश्य कौतुकम् ॥”)

दिगम्बरी, स्त्री, (दिगम्बर + ङीष् ।) दुर्गा । दिगम्बरस्य पत्नी । इति शब्दार्णवः ॥ नग्ने, त्रि । इत्यमरः । ३ । १ । ३८ ॥ (यथा, कालीध्याने ।
“महामेघप्रभां श्यामां तथा चैव दिगम्बरीम् ॥”)

दिग्गज, पुं, (दिशो गजः ।) दिग्हस्ती । यथा —
“ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजाः ॥”
इत्यमरः । १ । ३ । ४ ॥
एते क्रमेण पूर्व्वाद्यष्टदिशां हस्तिनः ॥

दिग्ध, पुं, (दिह्यते लिप्यते स्म विषादिना इति । दिह + क्तः ।) विषाक्तबाणः । तत्पर्य्यायः । लिप्तकः २ । इत्यमरः । २ । ८ । ८८ ॥ (यथा, रामायणे । २ । ६० । २३ ।
“सा विद्धा बहुभिर्बाणै र्दिग्धैरिव गजाङ्गना ॥”)
स्नेहः । अग्निः । इति हेमचन्द्रः ॥ प्रबन्धः । इत्यजयपालः ॥

दिग्ध, त्रि, (दिह + क्त ।) लिप्तः । इति मेदिनी । धे, ७ ॥ (यथा, भट्टिः । ३ । २१ ।
“सचन्दनोशीरमृणालदिग्धः
शोकाग्निनागाद् द्युनिवासभूयम् ॥”)

दिग्वासा, [स्] पुं (दिगेव वासो वस्त्रं यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११२ ॥ (यथा महाभारते । १३ । १७ । ४१ ।
“गजकर्णो गणपति र्दिग्वासाः काम एव च ॥”)
नग्ने, त्रि ॥ (यथा, मनुः । ११ । २ २ ।
“स्नात्वानुविद्धो दिग्वासाः प्राणायामेन शुध्यति ॥”)

दिग्विजय, पुं, (दिशां दिक्स्थितलोकानां विजयः ।) विद्यया युद्धेन वा दिशां जयः । यथा शङ्कर-दिग्विजयः पाण्डवदिग्विजय इत्यादि ॥

दिङ्क, पुं (स्फोटनकाले दिङ् इति कृत्वा कायति शब्दायते इति । कै + कः ।) उत्कुणविशेषः । इति शब्दार्थकल्पतरुः ॥

दित, त्रि, (दीयते स्मेति । दो अवखण्डने + क्तः “द्यतिस्यतीति ।” ७ । ४ । ४० । इति इत्वम् ।) छिन्नम् । इत्यमरः । ३ । १ । १ २ ॥

दिति, स्त्री, दैत्यमाता । सा दक्षकन्या (यथा महाभारते । १ । ६५ । १२ ।
“अदिति र्दितिर्दनुः काला दनायुः सिंहिका
तथा ॥”)
इयं काश्यपपत्नी च । (दो + भावे क्तिन् ।) खण्डनम् । इति मेदिनी । ते, २४ ॥ राजविशेषे, पुं । इति शब्दरत्नावली ॥ (दातरि त्रि । यथा, ऋग्वेदे । ४ । २ । ११ ।
“राये च नः स्वपत्याय देव दितिञ्च रास्वा-
दितिमुरुष्य ॥”
“दितिं दातारं च रास्व देहि ।” इति तद्भाष्ये सायनः ।)

दितिज, पुं, (दितेर्जायते इति । दिति + जन + डः ।) दैत्यः । इति हेमचन्द्रः । २ । ११२ ॥ (यथा, महाभारते । १ । ६२१ । १० ।
“अतश्च कर्त्ता दितिजान्तकश्च
पीता रिपूणां प्रभवः सुराणाम् ॥”)

[illegible]

सा जगु प्रणम्यादेव ब्रह्माणममितकल्मषम् ।
भयकामन्तु नो देहि देवदेव प्रजापते ॥
यत्र तिष्ठामहे सर्व्वा भर्त्तृभिः सहिता वयम् ।
मतयश्च महाभाग ! देहि नोऽव्यक्तसम्भव ! ॥
ब्रह्मोवाच ।
ब्रह्माण्डमेतत् सर्व्वोर्थं शतकोटिप्रविस्तरम् ।
तस्यान्ते स्वेच्छया तुष्टा उष्यतां मा विलम्बथ ॥
भर्त्तृंश्च व प्रयच्छामि सृष्ट्वा रूपाणि शोभनाः ।
यदेष गम्यतां देशो यस्या यो रोचतेऽधुना ॥
एवमुक्तास्तु ताः सर्व्वा यथेष्टं प्रययुस्तदा ।
ब्रह्मा ससर्ज्ज तूर्णं तान् लोकपालान् महा-बलान् ॥
दृष्ट्वा तु लोकपालांस्तु ताः कन्याः पुनराययुः ।
विवाहं कारयामास ब्रह्मा लोकपितामहः ॥
एकामिन्द्राय स प्रादादग्नयेऽन्यां यमाय च ।
निर्ऋताय च देवाय वरुणाय महात्मने ॥
वायवे धनदेशाय ईशानाय च सुव्रत ! ।
ऊर्द्ध्वं स्वयमधिष्ठाय शेषायाधोव्यवस्थिताम् ॥
एवं दत्त्वा पुनर्ब्रह्मा तिथिं प्रादात् दिशां पुनः ।
दशमीं मनुनावस्तु यद्दैगाम्नोदन प्रभुः ॥
तत्प्रभृति ता देव्यः इन्द्राद्याः परि-कीर्त्तिताः ॥"
इति वराहपुराणम् ॥ ८ ॥

न्यायमते अस्याः सर्व्वगतत्वम् । परममहत्त्व परिमाणम् । दूरान्तिकादिधीहेतुत्वम् । नित्यत्वम् । एकत्वेऽपि उपाधिभेदात् प्राच्यादिव्यपदेशभाक्त्वम् । अस्याः गुणाः । संख्या १ परिमितिः २ पृथक्त्वम् ३ संयोगः ४ विभागः ५ । इति भाषापरिच्छेदः ॥ (सामान्यम् । यथा, सुश्रुते । १ । ४२ ।
"समवाययोगात्तां दिशिव सम्प्रकीर्त्तिता ॥")

दिक्क, पुं, (दिशि कायते शब्दायते इति । कै+क ।) करभः । इति शब्दरत्नावली ॥

दिक्कर, पुं, (दिशः आदेशं करोति उत्साहान्वितत्वात् । कृ+टः ।) युवा । इति माघटीकाधृतकोषः ॥ (महादेवः । यथा, कालिकापुराणे । ८२ अध्याये ।
"दिक्करवासवश्रीकण्ठस्तथा प्रभुश्च दिक्करः ॥")

दिक्करवासिनी, स्त्री, (दिक्करे प्रभौ वसतीति । वस+णिनि+ङीप् ।) देवीविशेषः । यथा
"एवं स्मिरवासिन्या कथितं पूर्ववत् क्रमः ।
य श्रुत्वा मानुषं किञ्चिदाप्नोति मनसि रत ॥
दिक्करवासवश्रीकण्ठस्तथा प्रभुश्च दिक्करः ।
तत्सिमध्युषिता देवी तस्माद्दिक्करवासिनी ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

दिक्करिका, स्त्री, (दिक्करिणो दिग्गजस्य सदा स्नात् कायते शोभते इति । दिक्करिन्+कै+क । टाप् ।) नदीविशेषः । यथा,—
"अस्ति नाटकपर्व्वते तु सरो मानसवत्प्रभम् ।
यत्र भाति मैथुनया जलक्रीडां सदा हरः ॥
कुरुते नरशार्दूल ! स्नानपूजनयोगिभिः ।
तस्य पश्चाच्च पूर्व्वभागेभ्यश्च परिस्तयम् ॥
अवतीर्य्य प्रयात्येव दक्षिणं सागरं प्रति ।
तस्य पश्चिमभागे तु नदी दिक्करिकाह्वया ।
दिग्गजयौवनजाता तेन दिक्करिका स्मृता ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

दिक्करी, स्त्री, (दिक्कर+ङीप् ।) युवती । इति हेमचन्द्रः । ३ । १७५ ॥

दिक्पति, पुं, (दिशां पतिः ।) दिगधीश्वरः । तद्यथा । प्राच्यधिपो रविः । अग्निकोणाधिपः शुक्रः । दक्षिणाधिपः कुजः । नैरृतकोणाधिपो राहुः । प्रतीच्यधिपः शनिः । वायुकोणाधिपश्चन्द्रः । उत्तराधिपो बुधः । ईशानकोणाधिपो गुरुः । तस्य प्रमाणं यथा,—
"सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी ।
सौम्यस्त्रिदशमन्त्री च प्राच्यादिदिगधीश्वराः ॥"
इति ज्योतिस्तत्त्वम् ॥

दिक्पाल, पुं, (दिशः पालयतीति । दिश्+पालि+अण् ।) पूर्व्वादिदशदिशां पालकः । यथा । पूर्व्वस्यां दिशि इन्द्रः । अग्निकोणे वह्निः । दक्षिणस्यां दिशि यमः । नैरृतकोणे निरृतिः । पश्चिमस्यां दिशि वरुणः । वायुकोणे मरुत् । उत्तरस्यां दिशि कुबेरः । ईशानकोणे ईशः । ऊर्द्ध्वदिशि ब्रह्मा । अधोदिशि अनन्तः । इति पुराणम् ॥ यथा पद्मपुराणे ।
"यथार्थयन्ति विधिना दिक्पालांस्तु कर्म्मिणः ।
तत्र प्रपूजयेद्देवं विधिं भागवतं शुभम् ॥"

दिक्शूल, क्ली, (दिशि शूलमिव ।) दिग्विशेषगमने निषिद्धवारः । यथा —
"पश्चिमायां शुक्ररवी । उत्तरस्यां बुधमङ्गलौ ।
पूर्व्वस्यां शनिसोमौ । दक्षिणस्यां बृहस्पतिः ।"
तथा च ।
"शुक्रादित्यदिने न वारुणदिशं न ज्ञे कुजे चोत्तरां
मन्देन्द्वोश्च दिने न शक्रककुभं याम्यां गुरौ न व्रजेत् ।
शूलानीति विलङ्घ्य यान्ति मनुजा ये चित्त लाभाशया
अर्थाः पुनरागतानि यदि ते शक्रेण तुल्या अपि ॥"
इति ज्योतिःसारसंग्रहः ॥

केषाञ्चिन्मते ।
"————बौधे गुरौ दक्षिणाम् ।
ईशाने च्यवने चैव नैऋत्ये मारुते तथा ।
न गन्तव्यं सुरायाम्यां प्रतीच्यां रविशुक्रयोः ॥"
इति सुखबोधः ॥

दिगम्बर, पुं, (दिगेव अम्बरं वस्त्रं यस्य । उलङ्गत्वात् तथात्वम् ।) शिवः । क्षपणः । (स तु जैनविशेषः । यथा, पञ्चतन्त्रम् । ५ । ८२ ।
"दिगम्बरा मध्यमलमातुरामाः मलाकम् ।
चैतन्यधामिमहदैरामनायपुनैरपि ॥")
तमः । इति मेदिनी । र, २६७ ॥ (नग्ने, त्रि । यथा पञ्चतन्त्रे । ५ । १४ ।
"एकाकी गृहसन्त्यक्तः पाणिपात्रो दिगम्बरः ।
सोऽपि सम्बाध्यते लोके तृष्णया पश्य कौतुकम् ॥")

दिगम्बरी, स्त्री, (दिगम्बर+ङीप् ।) दुर्गा । दिगम्बरस्य पत्नी । इति कुलार्णवः ॥ नग्ने, त्रि । इत्यमरः । ३ । १ । ३९ ॥ (यथा, कालीध्याने ।
"महाभेघप्रभां श्यामां तथा चैव दिगम्बरीम् ॥")

दिग्गज, पुं, (दिशो गजः ।) दिग्हस्ती । यथा —
"ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः ।
पुष्पदन्तः सार्व्वभौमः सुप्रतीकश्च दिग्गजाः ॥"
इत्यमरः । १ । ३ । ४ ॥
एते क्रमेण पूर्व्वाद्यष्टदिशां हस्तिनः ॥

दिग्ध, पुं, (दिह्यते लिप्यते स्म विषादिना इति । दिह+क्तः ।) विषाक्तबाणः । तत्पर्य्यायः । लिप्तकः २ । इत्यमरः । २ । ८ । ८८ ॥ (यथा रामायणे । २ । १० । २३ ।
"सा विद्धा बहुभिर्बाणैर्दिग्धैरिव गजाङ्गना ॥")
स्नेहः । अग्निः । इति हेमचन्द्रः ॥ प्रबन्धः । इत्यजयपालः ॥

दिग्ध, त्रि, (दिह+क्त ।) लिप्तः । इति मेदिनी । ध, ७ ॥ (यथा, भट्टिः । ६ । २१ ।
"सचन्दनोशीरमृणालदिग्धं
शोकाग्निनागाद् दुरितावभुग्नम् ॥")

दिग्वासाः, [स्] पुं (दिश एव वासो वस्त्रं यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११४ ॥ (यथा महाभारते । १३ । १७ । ४१ ।
"गजहा दैत्यहा दिग्वासाः कामः एव च ॥")
नग्ने, त्रि ॥ (यथा, मनुः । ११ । २०२ ।
"स्नात्वा तु विप्रो दिग्वासाः प्राणायामेन शुध्यति ॥")

दिग्विजय, पुं, (दिशां दिक्स्थितलोकानां विजयः ।) विद्यया शौर्येण वा दिशां विजयः । यथा शङ्करदिग्विजयः पाण्डवदिग्विजय इत्यादि ॥

दिङ्क, पुं (स्फोटनकाले दिङ् इति शब्दं कायति शब्दायते इति । कै+क ।) उत्कुणविशेषः । इति शब्दार्थकल्पतरुः ॥

दित, त्रि, (दीयते स्मेति । दो अवखण्डने+क्त "द्यतिस्यतीति ।" ७ । ४ । ४० । इति इत्वम् ।) छिन्नम् । इत्यमरः । ३ । १ । १०१ ॥

दिति, स्त्री, दैत्यमाता । सा दक्षकन्या (यथा, महाभारते । १ । ६५ । १२ ।
"अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा ॥")
दय कश्यपपत्नी च । (दो+भावे क्तिन् ।) खण्डनम् । इति मेदिनी । ति, २४ ॥ दातरि त्रि पुं । इति शब्दार्थकल्पतरुः ॥ (दातरि, त्रि । यथा, ऋग्वेदे । ४ । २ । ११ ।
"रायो च नः स्वपत्याय देव दितिं च रास्व
दितिमुरुष्य ॥"
"दितिं दातारं च दास्व देहि ।" इति तद्भाष्ये सायणः ।)

दितिजः, पुं, (दितेर्जायते इति । दिति+जन+ड ।) दैत्यः । इति हेमचन्द्रः । २ । १२४ ॥ (यथा, महाभारते । १ । ६५ । १० ।
"अवसत् कर्मा दितिजानामकर्त्ता
सेवां दितिपूर्वा प्रवर")

दितिसुत, पुं, (दितेः सुतः।) दैत्यः। इत्यमरः। १।१।१२॥ (यथा, देवीभा०।९।१५।
"दितिसुतसुरैः प्राचीनोऽस्तु न किं कथयताम्।")

दित्य, पुं, (दितौ भवः। दिति+यत्।) दैत्यः। इति शब्दरत्नावली॥ (दितिसम्बन्धिनि, त्रि। यथा, वाजसनेयसंहितायाम्।१४।१०।
"दित्यवाड्वयो विराट् छन्दः।"
"दोग्ध्र्यलक्षण दितिरूपम्। दितिं खण्डन भवति दित्यं धार्यं वहति दित्यवाट्।" इति तद्भाष्ये महीधरः।)

दिद्युत्, त्रि, (द्योतते दीप्यतेऽसौ। द्युत्+"द्युतिगमिजुहोतीनां द्वे च।" ३।२।१७८। इत्यस्य वार्त्तिकोक्त्या क्विपि द्वित्वे "द्युतिस्वाप्योः सम्प्रसारणम्।" ७।४।६७। इत्यभ्यासस्य सम्प्रसारणम्।) दीप्तिविशिष्टः। इति सायणः। (स्त्री, दीप्तिः। यथा, ऋग्वेदे।२।११।७।
"दधावमा अवतो दिद्युतो दिवः।"
"धावमा विधमा नानाप्रकारा दिद्युत दीप्तिः तत अभवत्।" इति तद्भाष्ये सायणः। वज्रम्। इति निघण्टुः।२।२०। यथा ऋग्वेदे। १।६६।७।
"अस्तुन दिद्युत्त्वेषप्रतीका।")

दिधिषाय्य, पुं, (दधाति धारयतीति। धा+"दधिषाय्य।" उणा० ३।९०। इति आय्य प्रत्ययो द्वित्वं इत्वं षुक् च।) धारयितव्यः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः। (धारके, त्रि। यथा, ऋग्वेदे।२।४।१।
"मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जने जातवेदाः।"
"दिधिषाय्यो धारयिता भूत्।" इति तद्भाष्ये सायणः। उज्ज्वलदत्तस्तु "दधिषाय्य" इति पठित्वा दधिसूर्याणि धार्यते इति धाष्येन दधिषाय्यो इत्यम् व्याख्यातवान्।)

दिधिषु, पुं, (दिधिं धैर्यं स्यतीति। षो+बाहुलकात् कु। यद्वा, दिधिषूं आत्मन इच्छतीति। क्यच्। आत्मन इच्छत्। क्विप्। बाहुलकात् ह्रस्वः।) द्विरूढापतिः। इत्यमरः।२।६।२३॥ (गर्भाधाता। यथा, ऋग्वेदे।१०।१८।८।
"हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ।"
"दिधिषोर्गर्भस्य निधातुः।" इति तद्भाष्ये सायणः। यथा च भागवते।९।९।३६।
"ब्राह्मणी वीक्ष्य दिधिषुं पुरुषादेन भक्षितम्। शोचन्त्यात्मनमुर्वीशमशपत् कुपिता सती॥"
"दिधिषुं भर्तारम्।" इति श्रीधरः।) द्विरूढायाम् स्त्री। इति शब्दरत्नावली। (धारके त्रि। यथा, ऋग्वेदे।१०।११४।१।
"अन्यानां न ये अंशवो कामदो दिधिषवो न एव सुदावन।"
"यथा दिधिषवो न धनानां धारका इव।" इति तद्भाष्ये सायणः।)

दिधिषू, स्त्री, (दधाति गर्भं यस्यां दिधिं धैर्यं स्यन्ति अस्यां खलु अयनेनेति। दा वा धा+"धान्ये नुक् च।" उणा०।१।९५। इति क्विप् तस्य वा।) द्विरूढा। वारद्वयविवाहिता स्त्री। तत्पर्यायः। दिधीषूः २ पुनर्भूः ३ दिधिषुः ४। इति शब्दरत्नावली॥ विवाहितायां कनिष्ठायां ज्येष्ठा अविवाहिता ज्येष्ठा भगिनी। यथा, उद्वाहतत्त्वे।
"ज्येष्ठायां विद्यमानायां कन्यायामुह्यतेऽनुजा। सा चाग्रेदिधिषूर्ज्ञेया पूर्वा च दिधिषूः स्मृता॥"
(धारके, त्रि। यथा, ऋग्वेदे।१।७१।१।
"इयमूर्ज नमनस्य योनिमादिद्वसौ दिधिषो विभक्ता।")

दिधिषूपति, पुं, दिधिषूर्द्विरूढा तस्याः पतिः स्वामी। द्विरूढापतिः। (यथा मनुः।३।१७३।
"भ्रातुर्मृतस्य भार्यायां योऽनुरज्येत कामतः। धर्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः॥")

दिन, क्ली, (द्यति खण्डयति अन्धकारमिति। दो छेदे+"बहुलमन्यत्रापि।" उणा० २।४८। इति नक्।) कालविशेषः। तत्पर्यायः। घस्रः २ अहः ३ दिवसः ४ वासरः ५। इत्यमरः।१।४।२॥ भास्वरः ६ दिवा ७। इति राजनिर्घण्टः॥ वारः ८ अह्नः ९ द्युः १० अपिदकम् ११। इति शब्दरत्नावली॥ (यथा, रघुः।१।७५।
"दिनेषु गच्छत्सु नितान्तपीवरं तदीयमानीलमुखं स्तनद्वयम्॥")
तत्तु मनुष्याणां षष्टिदण्डात्मकम्। पितॄणामेकमासात्मकम्। देवानामेकवत्सरात्मकम्। ब्रह्मणो दिव्यद्विसहस्रयुगात्मकम्। मनुष्याणां सहस्रवत्सरदिनात्मकं वा परिमितम्। इति पुराणम्। तच्च मनुष्याणां चौर-पाषण्डचाण्डालादिवर्जितम् चतुर्विधम्। यथा,—
"सावनं द्युसौरं चान्द्रं नाक्षत्रं सविता सदाम्। भवेत्॥ १॥
उदयादुदयाद्भानोः सावनं तत् प्रकीर्तितम्॥ २॥
तिथिरेकेन दिवसश्चान्द्रमासं प्रकीर्तितम्॥ ३॥
भानुद्राये वारं च वाचीगार्ग सौरमांशिकम्॥ ४॥
नक्षत्रवासरमणी तु षष्ठ्यांशेको च बिमचक्रु पोमस्तुकम्॥"
दिन, क्ली, (दो छेदे+इनच्।) धर्मविशेषः। तद्विधिश्चपर्याय। तस्यो १ मुहु २ भानु ३ वासरम् ४ अवराग्नि ५ ग्रह ६ भक्त ७ दृष्ट ८ नियम् ९ निशा १० विवे दिवे ११ हरिर्दिनं १२। इति हारमालापचमाला॥ इति पैरविन्दी। अथोक्ताः। १०। पिंड भाद्रपदादिकृष्णपक्षस्यानिमन्याति। यथा,—
"भाद्रपदकृष्णपक्षे कन्यामनुभक्षयता। निशायां तस्य दिनानां दिनाम्भस्य निशाकरः॥"
इति ज्योतिस्तत्त्वम्।

दिनकर, पुं, (करोतीति। कृ+अच्। दिनस्य करः।) सूर्यः। इति हेमचन्द्रः।२।११॥ (यथा कुमारसम्भवे।१।३३।
"दिनकरपरितोषोपायान् यौवनानि कन्याम् विरहात् मयि हृदये धारमाणा धताना॥")

दिनकरात्मजा, स्त्री, (दिनकरस्य सूर्यस्य आत्मजा।) यमुना। इति भरतधृतः॥

दिनकेसर, पुं, (दिनस्य केसर इव।) अन्धकारः। इति शब्दरत्नावली॥

दिनज्योतिस्, [स्] क्ली, (दिनस्य ज्योतिः।) आतपः। इति राजनिर्घण्टः॥

दिनदुःखित, पुं, स्त्री, (दिने दिवसे दुःखितः। दिवाभागे वियोगित्वात्तथात्वम्।) चक्रवाकः। इति शब्दरत्नावली॥

दिनप्रणी, पुं (दिनं प्रणयतीति। प्र+नी+क्विप्।) सूर्यः। इति त्रिकाण्डशेषः॥ (अर्कवृक्षः। तत्पर्यायत्वात्।)

दिनबल, पुं (दिने बलं यस्य।) पञ्चमषष्ठमसप्तमाष्टमैकादशद्वादशराशयः। इति ज्योतिषम्॥ (धनुर्मकरमिथुना इति हरमालाकः।)

दिनमणि, पुं, (दिनस्य मणिरिव।) सूर्यः। इति त्रिकाण्डशेषः॥ (यथा गीतगोविन्दे ।११।
"दिनमणिमण्डलमण्डन। भवखण्डन। मुनिजनमानसहंस। जय जय देव हरे॥"
अर्कवृक्षः। तत्पर्यायत्वात्।)

दिनमुखी, [न्] पुं, (दिनस्य मुखं मध्यमस्य। दिनस्य आदिकालोऽस्य तथात्वम्।) पूर्वाह्णः। उषाकालः। इति त्रिकाण्डशेषः॥

दिनांश, पुं, (दिनस्य अंशः।) प्रातर्मध्याह्नपराह्णसायाह्नादि। इति राजनिर्घण्टः॥

दिनादि, पुं, (दिनस्य आदिः।) प्रभातम्। इति राजनिर्घण्टः॥

दिनान्त, पुं, (दिनस्य अन्तः।) सायम्। दिनावसानम्। इत्यमरः।१।४।३॥ (यथा, कुमारसम्भवे।१।११।
"दिवाकराद्रक्षति यो गुहासु लीनं दिवाभीतमिवान्धकारम्॥")

दिनान्तक, पुं, (दिनस्य अन्तकः नाशकः।) अन्धकारः। इति त्रिकाण्डशेषः॥

दिनावसान, क्ली, (दिनस्य अवसानं यत्र।) दिनान्तः। इति हेमचन्द्रः।२।५४॥ (यथा, रघुः।१।५२।
"दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः॥")

दिनिका, स्त्री, (दिनं तत्कर्मसम्बन्धि वेतनम्। दिन+ठन्।) एकदिवसकर्मवेतनम्। इति शब्दमाला॥

दिन्व, स प्रीणने। इति कविकल्पद्रुमः। (भ्वा०-पर०-सक०-सेट्।) स, दिन्वति। बहुलैः शास्त्रीयम्। इति दुर्गादासः॥

दिभ, इ व म इ। इति कविकल्पद्रुमः। (चुरा०-पर०-सक०-सेट्।) इ व, दिम्भयति। सर्प इव कृमम्। इति दुर्गादासः॥

दिम्प, प म संघाते। इति कविकल्पद्रुमः। (चुरा० उभ० सक० सेट्।) पञ्चमस्वरादिरयम्। कुर्विक-

स्तौ। म क, दिम्बयति दिम्बयते। सङ्घातो राशीकरणम्। एष केचिन्न मन्यते। इति दुर्गादासः।

दिलीप, पुं, सूर्य्यवंशीयराजविशेषः। सूर्य्यवंशे दिलीपनामानौ द्वौ नृपौ जातौ एकः अंशुमतः पुत्रः भगीरथपिता अपरः दशरथप्रपितामहश्च। इति रामायणम्। (यथा च हरिवंशे। १५। १२ १४,२३-२५।

'सुतः पञ्चजनस्यासीदंशुमानाम वीर्य्यवान्।
दिलीपस्तनयस्तस्य खट्वाङ्ग इति विश्रुतः॥
येन स्वर्गादिहागम्य मुहूर्त्तं प्राप्य जीवितम्।
त्रयोऽनुसन्धिता लोका बुद्ध्या सत्येन चानघ॥
दिलीपस्य तु दायादो महाराजो भगीरथः।
यः स गङ्गां सरिच्छ्रेष्ठामवातारयत प्रभुः॥'
"अजमित्रस्य धर्म्मात्मा विद्वान् दुलिदुहोऽभवत्।
दिलीपस्तनयस्तस्य रामस्य प्रपितामहः॥
दीर्घबाहुर्द्दिलीपस्य रघुर्नाम्नाभवत् सुतः।
अयोध्यायां महाराजो रघुश्चासीन्महाबलः॥
अजस्तु रघुतो जज्ञे अजाद्दशरथोऽभवत्।
रामो दाशरथिर्जज्ञे धर्म्मात्मा सुमहायशाः॥")

दिलीपराट्, [ज्] पुं, (दिलीप एव राट् राजा।) दिलीपराजः। इति त्रिकाण्डशेषः॥

दिवीर, क्ली, त्रिलोक्न्यूकम्। इति हारावली। २५।

न्दि इ प्रीतौ। इति कविकल्पद्रुमः। (भ्वां-परं-अक-सेट्।) इ, दिन्वति। प्रीतिरिह प्रीतौ करणम्। दिन्वति लोकः पितरम्। इति दुर्गादासः।

न्दि क अर्द्दे। इति कविकल्पद्रुमः। (चुरां-परं-सक-सेट्।) क, दैवयति। अर्द्द इह पीडनमिति मैत्रेयः। याचन गमन वति रमानाथः। इति दुर्गादासः।

दिव, क इ परिकूजने। इति कविकल्पद्रुमः। (चुरां-आत्म-अक-सेट्।) क इ, परिदेवयते कश्चित्तस्य रावे न दुःखितः। इति हलायुधः। इति दुर्गादासः।

दिव, य उ जिगीषिच्छयोः। मयौ। द्युतौ। क्रीडायाम्। गतौ। इति कविकल्पद्रुमः। (दिवां-परं-अकं-सक-च-सेट्। उदित्वात् क्त्वावेट्।) य, दीव्यति। उ, देवित्वा द्यूत्वा। दीव्यमानं जितान् बालान्। इति भट्टौ साक्षीकृत्य अनु माघः। मणिमर्वहारः स्तुतिश्च। व्यवहारस्तु क्रयविक्रयरूपः। द्यूताशेवाकगेलः। क्रीडायाम् दीव्यते करणस्य निश कर्म्मत्वम्। तत्र द्वितीयाविभक्तिरेव विभाव्यते। इति चातुर्दायिकम्। तेन अक्षा दीव्यन्ते ह्याविका इति कर्म्मणि प्रत्ययः स्यात्। अपरैर्दीव्यते ह्याभिरिति भावे प्रत्ययो न स्यात् अपरैर्द्देवयति ह्याभिः दुर्लभिप्राप्यानामस्य कर्त्तुं कर्म्मत्वं न स्यात्। तैनाद्य नयदासं क्षीव स्वगाधोपमा। इति भट्टौ तु तेनेनिकस्य दृष्टापरैव न तु दीव्यते। गत्यर्थकर्म्मकत्वात् रामगिरिप्रसारितकर्त्तुः कर्म्मत्वम्। इति दुर्गादासः।

दिव, क्ली, (दीव्यन्त्यस्मिन्निति। दिवु क्रीडायाम् + घञर्थे अधिकरणे क।) स्वर्गः। (यथा, देवीभागवते। ५। ३। १।

"गच्छ वीर। महाबाहो दूतत्वं कुरु मेऽनघ॥
ब्रूहि शक्रं दिवं गत्वा निःशङ्कः सुरसन्निधौ॥")

आकाशम्। इति मेदिनी। वे ११॥ वनम्। दिवा। इति हेमचन्द्रः। २। ५२॥

दिवस, पुं, क्ली, (दीव्यन्त्यत्रेति। दिव + "दिव कित्।" उणां। ३। १२१। इति असच् स च कित्।) दिनम्। इत्यमरः। १। ४। २॥ (यथा आर्य्यासप्तशत्याम्। २७८।

"द्राघयता दिवसानि त्वदीयविरहेण तीव्रतापेन।
ग्रीष्मेणेव नलिन्या जीवनमप्यौषत तस्याः॥")

दिवसकर, पुं, (करोतीति। कृ + अच्। दिवसस्य करः।) सूर्य्यः। इति हेमचन्द्रः। २। ११॥ (यथा, आर्य्यासप्तशत्याम्। ६१८।

"सुन्दर सखी दिवसकरबिम्बे सुदिनाग्ररेखेव॥")

दिवसमुख, क्ली, (दिवसस्य मुखम्।) प्रभातम्। इति हलायुधः॥

दिवसेश, पुं (दिवः पतिः। अलुक्समासः।) इन्द्रः। इत्यमरः। १। १। ४५॥ (यथा, महाभारते। ५। १२। ८।

"इन्द्राणीमानयिष्यामो यदि न्यक्षि दिवस्पते॥")

दिवस्पृथिव्यौ, स्त्री, (द्यौश्च पृथिवी च। "दिवश्च पृथिव्याम्।" ६। ३। ३। इति दिवो दिवसादेशः।) रोदसी। स्वर्गभूम्यौ। इति हेमचन्द्रः। ४। ४॥ द्विवचनान्तोऽयम्। (यथा ऋग्वेदे। २। २। ३।

'त ईवा शुभ्रे रजस ऋदस दिवस्पृथिवी-
ररति न्यैरिरे॥")

दिवा, अ, दिनम्। इत्यमरः। ३। ४। ६॥ (यथा, महाभारते। २। ११। ३४।

"यथा सभा मुहूर्त्ताश्च दिवा रात्रिस्तथैव च॥")

दिवा [न्] पुं (दीव्यन्त्यस्मिन्निति। दिव + "कनिन् युवृषीति।" उणां। १। १५६। इति सूत्रे "बहुलवचनात् कैयकादपि कनिन्।" इति उज्ज्वलदत्तोक्त्या कनिन्।) दिनम्। इत्युणादिकोषः॥

दिवाकर, पुं, (दिवा दिनं करोतीति। कृ + 'दिवाविभेति। ३। २। २१। इति टः।) सूर्य्यः। (यथा देवीभागवते। २। ६। १८।

'उदितश्च तदा भानुश्छाया हतो दिवाकरः॥")

अर्कवृक्षः। इत्यमरः॥ काकः। पुष्पविशेषः। इति शब्दचन्द्रिका॥

दिवाकीर्त्ति, पुं, (दिवा दिवसे एव कीर्त्तिर्यस्य। रात्रौ चौरकर्म्मनिषेधात्।) नापितः। चण्डालः। ('रात्रौ न विचरेयुस्ते ग्रामेषु नगरेषु च।
दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः॥"
१०। ५४। इति मनुवचनात् अस्य दिवाचरत्वात् तथात्वम्। यथा, मनुः। ५। ८५।

"दिवाकीर्त्तिमुदक्याञ्च पतितं सूतिकां तथा।
शवन्तत्स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुध्यति॥"
महाभारते शान्तिपर्व्वणि। ८८। ८७।

"दीक्षितो वा दिवाकीर्त्तिः पण्डितो वापण्डितः।
मुख्यो मे सोमपीथायां अशाप्य मनिकपि
काम्॥")

उलूकः। इति हेमचन्द्रः। ४। ४८७॥

दिवाटन, पुं, (दिवा अटतीति। अट गतौ + ल्युः।) काकः। इति शब्दार्थकल्पतरुः। (चाण्डालः। "दिवा चरेयुः कार्य्यार्थं चिह्निता राजशासनैः।" १०। ५४। इति मनुशासनात्।)

दिवातन त्रि, (दिवा भव। दिवा + "सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।" ४। ३। २३। इति ट्युः तुट् च।) दिनभवः। यथा, भट्टिः। ५। ६५।

"सायन्तनीं तिथिप्रण्यः पङ्कजानां दिवातनीम्।
कान्तिं कान्त्या सदाकान्त्या हेपयन्तीं शुचि
स्मिता॥"

दिवान्ध पुं, (दिवा दिवसे अन्धः।) पेचकः। इति त्रिकाण्डशेषः। (यथा पञ्चतन्त्रे। ३। ७५।

"यत् मयूरहंसकोकिलचक्रवाकशुककारण्डवहारीतकचातकादिषु पक्षिप्रधानेषु विद्यमानेषु तस्य दिवान्धस्य करालवक्त्रस्याभिषेकः क्रियते नैतत् मम मतम्॥") दिवान्धे, त्रि। यथा,—

"दिवान्धाः प्राणिनः केचिद्रात्र्यन्धास्तथापरे।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टयः॥"
इति चण्डी॥

दिवान्धा स्त्री, (दिवा दिवसे अन्धा।) चर्म्मचटा पक्षी। इति राजनिर्घण्टः॥

दिवान्धकी, स्त्री, (दिवा अन्धकी दर्शनक्रियावर्जिता।) छुछुन्दरी। इति पुराणम्॥

दिवाभीत, पुं, (दिवा दिवसे भीतः।) उलूकः। कुमुदाकरः। चौरः। इति मेदिनी। ते, १८७। (दिवसभीते, त्रि। यथा, कुमारे। १। १२।

'दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्॥')

दिवाभीति, स्त्री, (दिवा दिवसे भीतिर्भयं यस्य।) पेचकः। इति शब्दरत्नावली॥

दिवामणि, पुं (दिवा दिवसस्य मणिरिव।) सूर्य्यः। इति शब्दरत्नावली॥

दिवामध्य, क्ली, (दिवा दिवसस्य मध्यम्।) मध्याह्नः। इति हेमचन्द्रः। २। ५३॥

दिवास्वापा स्त्री, (दिवा दिवसे स्वापो निद्रा यस्याः।) चर्म्मचटा पक्षी। इति राजनिर्घण्टः॥

दिवि, पुं (दीव्यतीति। दिवु क्रीडायाम् + "इगुपधात् कित्।" उणां ४। ११८। इति इन् स च कित्।) चाषपक्षी। इति शब्दमाला॥

दिविज, त्रि, (दिवि स्वर्गे जायते इति। दिवि + जन + डः। "प्रावृट्शरत्कालदिवां जे।" ६। ३। १५। इति सप्तम्या अलुक्।) स्वर्गीयः। इति पक्षिसारः॥

दिविन्द् [द] पुं, (दिवि दीव्यतीति। नह + क्विप्। सप्तम्या अलुक्। सम्प्र।) देवः।

दितिसुत, पुं (दितेः सुतः ।) दैत्यः । इत्यमरः । १ । १ । १२ ॥ (यथा, नैषधे । १८ । १५ ।
"दितिसुतगुरुः प्राच्यैर्योऽर्हुं न किं कथवत्तम ।")

दित्य, पुं, (दितौ भवः । दिति+यत् ।) दैत्यः । इति शब्दार्थकल्पतरुः ॥ (द्विवर्षे गवादौ, स्त्री । यथा, वाजसनेयसंहितायाम् ।१४।१ ।
"दित्यवाड्वयो विराट् छन्दः ।"
"दोऽवखण्डने क्तिन्प्रत्ययः । दितिं खण्डनं अर्हति दित्यं धान्यं वहति दित्यवाट् ।" इति तद्भाष्ये महीधरः ।)

दिद्युत्, त्रि, (द्योतते दीप्यतीति । द्युत+"द्युतिगामिजुहोतीनां द्वे च ।" ३ । २ । १७८ । इत्यस्य वार्त्तिकोक्त्या क्विपि द्वित्वे "द्युतिस्वाप्योः सम्प्रसारणम् ।" ७ । ४ । ६७ । इत्यभ्यासस्य सम्प्रसारणम् ।) दीप्तिविशिष्टः । इति मुग्धबोधम् ॥ (स्त्री, दीप्तिः । यथा, ऋग्वेदे ।२।१३।७।
"यथाशमा अशनो दिद्युतो दिवः ।"
"अशमा विशमा नानाप्रकारा दिद्युत दीप्तीरवाग् अजनयः ।" इति तद्भाष्ये सायणः । वज्रम् । इति निघण्टुः ।५२ । यथा, ऋग्वेदे । १ । ६६ । ७ ।
"अस्तुर्न दिद्युत्त्वेषप्रतीका ।")

दिधिषाय्य, पुं (दधाति धारयतीति । धा+"दिधिषाय्य ।" उणां ३ । ९७ । इति आय्य धातोर्द्वित्वं इत्व षुक् च ।) धारयितव्यः ॥ इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (धारके, त्रि । यथा, ऋग्वेदे । २ । ४ । १ ।
"मित्र इव यो दिधिषाय्यो भूद्देव आदेवे जने जातवेदाः ।"
"दिधिषाय्यो धारयिता भूत् ।" इति तद्भाष्ये सायणः ॥ उज्ज्वलदत्तस्तु "दधिषाय्य" इति उणादिसूत्रं कल्पयित्वा दधिपूर्वात् स्यतेराय्य प्रत्यय इति व्याख्याय दधिषाय्यो घृतम् इत्युक्तवान् ।)

दिधिषु, पुं, (दिधिं धैर्य्यं स्यतीति । षो+बाहुलकात् कुः । यद्वा, दिधिषूः आत्मन इच्छतीति । सुप आत्मनः क्यच् । क्विप् । बाहुलकात् ह्रस्वः ।) द्विरूढापतिः । इत्यमरः ।२।६।२३। (गर्भाधानकर्त्ता । यथा, ऋग्वेदे । १ । । १८ । ८ ।
"हस्तग्राभस्य दिधिषोस्तवेदं पत्युर्जनित्वमभि सं बभूथ ।"
"दिधिषोर्गर्भस्य निधातुः ।" इति तद्भाष्ये सायणः । यथा च भागवते । ९ । ९ । ३९ ।
"ब्राह्मणी वीक्ष्य दिधिषुं पुरुषादेन भक्षितम् ।
शोचन्त्यात्मानमुर्व्वीशमशपत् कुपिता सती ॥"
"दिधिषुं गर्भाधानकर्त्तारम् ।" इति श्रीधरः ।) द्विरूढायाम् स्त्री । इति शब्दरत्नावली ॥ (धारके त्रि । यथा, ऋग्वेदे । १० । ७८ । ५ ।
"अश्वासो न ये ज्येष्ठास आशवो दिधिषवो न रथ्यः सुदानवः ।"
"तथा दिधिषवो न वहनौ धारका इव ।" इति तद्भाष्ये सायणः ।)

दिधिषूः, स्त्री, (दधाति पापं यद्वा दिधिं धैर्य्यं इच्छन्त्यैर्भक्त्यात् स्यति खण्डयतीति । दा धा षो+"अन्दूदृम्भूजम्बू ।" उणां १ । ९५ । इति कूप्रत्ययेन साधुः ।) द्विरूढा । भ्रातृपविवाहिता स्त्री । तत्पर्य्यायः । दिधीषूः २ पुनर्भूः ३ दिधिषुः ४ । इति शब्दरत्नावली ॥ विवाहितायां कनिष्ठायां सत्यां अविवाहिता ज्येष्ठा भगिनी । यथा, उद्वाहतत्त्वे ।
"ज्येष्ठायां विद्यमानायां कन्यायामुह्यतेऽनुजा ।
सा चाग्रेदिधिषूर्ज्ञेया पूर्व्वा च दिधिषूः स्मृता ॥"
(धारके, त्रि । यथा, ऋग्वेदे । १ । ७१ । ३ ।
"दधन्नृतं धनयन्नस्य धीतिमादिदर्य्यो दिधिष्वो विभृत्राः ।")

दिधिषूपतिः, पुं, दिधिषूर्द्विरूढा तस्याः पतिः स्वामी । द्विरूढापतिः । (यथा मनुः । ३ । १७३ ।
"भ्रातुर्मृतस्य भार्य्यायां योऽनुरज्येत कामतः ।
धर्म्मेणापि नियुक्तायां स ज्ञेयो दिधिषूपतिः ॥")

दिन, क्ली, (द्यति खण्डयति महाकालमिति । दो छेदे+"बहुलमन्यत्रापि ।" उणां २ । ४९ । इति नक् ।) कालविशेषः । तत्पर्य्यायः । घस्र २ अहः ३ दिवसः ४ वासरः ५ । इत्यमरः ।१। ४ ।२॥ भास्वरः ६ दिवा ७ । इति राजनिर्घण्टः ॥ वारः ८ अहकः ९ द्युः १० अहकम् ११ । इति शब्दरत्नावली ॥ (यथा, रघुः । ३ । ८ ।
"दिनेषु गच्छत्सु नितान्तपीवरं
तदीयमानीलमुखं स्तनद्वयम् ।")
तत्तु मनुष्यमाने षष्टिदण्डात्मकम् । पितृमाने गौणचान्द्रमासात्मकम् । दैवमाने वत्सरात्मकम् । ब्रह्ममाने द्विसहस्रचतुर्युगात्मकम् । मनुष्यमाने ब्रह्मणो दिनस्य संख्या ।८,६४ ,० , ० । इति पुराणम् ॥ तदेव मनुष्याणां सौरसावनचान्द्रनाक्षत्रभेदेन चतुर्विधम् । यथा,—
"सावनं स्याद्दिनं षष्टिदण्डं सूर्य्योदयादुदया-वधि भवेत् ॥ १ ॥
सूर्य्यादेरुदयाद्राशेर्भोगमितं सौरवासरम् ॥ २ ॥
तिथिनैकेन दिवसश्चान्द्रमाने प्रकीर्त्तितः ॥ ३ ॥
आवर्त्ते स्मात् प्राञ्चैश्च नक्षत्रदिवसात्मकम् ॥ ४ ॥
सौम्ययात्राकर्म्मणि तु सर्व्वक्रियावच्छिन्नदिनमुक्तम् ॥

दिन, क्ली, (दो छेदे+इनच् ।) सूर्य्यकिरणाभिव्याप्तकालः । तद्वैदिकपर्य्यायः । वस्तोः १ द्युः २ भानुः ३ वासरम् ४ स्वसराणि ५ घ्रंसः ६ घर्म्मः ७ घृणः ८ दिनम् ९ दिवा १० दिवेदिवे ११ द्यविद्यवि १२ । इति द्वादशाहर्नामानि । इति वेदनिघण्टौ १ अध्यायः । ९ । सिंह-कन्यातुलावृश्चिककुम्भमीनलग्नानि । यथा,—
"अजगोमिथुनं कर्किधन्विमृगास्तथा ।
निशाख्या स्युरतोऽन्ये वै दिवाख्या दिवाबलाः ॥"
इति ज्योतिषतत्त्वम् ॥

दिनकर, पुं (करोतीति । कृ+अच् । दिनस्य करः ।) सूर्य्यः । इति हेमचन्द्रः । २ । ११ ॥ (यथा, ऋतुसंहारे । १ । २२ ।
"दिनकरपरितापात् क्षीणतोया समन्तात्
विदधति भयमुच्चैर्वीक्ष्यमाणा वनान्ताः ।")

दिनकरात्मजा, स्त्री, (दिनकरस्य सूर्य्यस्य आत्मजा ।) यमुना । इति हलायुधः ॥

दिनकेशर, पुं, (दिनस्य केशर इव ।) अन्धकारः । इति शब्दरत्नावली ॥

दिनज्योतिः, [स्] क्ली, (दिनस्य ज्योतिः ।) आतपः । इति राजनिर्घण्टः ॥

दिनदुःखित, पुं, स्त्री, (दिने निशि दुःखितः । दिवाभागे वियोगित्वात्तथात्वम् ।) चक्रवाकः । इति शब्दरत्नावली ॥

दिनप्रणी, पुं (दिनं प्रणयतीति । प्र+नी+क्विप् ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (अस्य रूपं । सुधीशब्दवत् ।)

दिनबल, पुं (दिने बलं यस्य ।) पञ्चमसप्तमाद्यैकादशद्वादशराशयः । इति ज्योतिषम् ॥ (सर्व्वगुणयुक्तमयदा । इति हस्ताम्बुजम् ।)

दिनमणि, पुं, (दिनस्य मणिरिव ।) सूर्य्यः । इति त्रिकाण्डशेषः ॥ (यथा, गीतगोविन्दे । १ । १७ ।
"दिनमणिमण्डलमण्डन ! भवखण्डन !
मुनिजनमानसहंस ! जय जय देव हरे ! ॥"
अर्कशब्दे । पर्य्यायो ज्ञातव्यः ।)

दिनमूर्द्धा, [न्] पुं, (दिनस्य मूर्द्धा मस्तकमिव । दिनस्य आदित्योदयकारकत्वात्तथात्वम् ।) पूर्व्वाद्रिः । उदयाचलः । इति त्रिकाण्डशेषः ॥

दिनांशः, पुं, (दिनस्य अंशः ।) प्राह्णमध्याह्नापराह्णसायाह्नादिः । इति राजनिर्घण्टः ॥

दिनादि, पुं, (दिनस्य आदिः ।) प्रभातम् । इति राजनिर्घण्टः ॥

दिनान्त, पुं, (दिनस्य अन्तः ।) सायम् । दिवावसानम् । इत्यमरः । १ । ४ । ३ ॥ (यथा, ऋतुसंहारे । १ । १ ।
"दिनान्तरम्योऽभ्युपशान्तमन्मथो
निदाघकालोऽयमुपागतः प्रिये ॥")

दिनान्तक, पुं, (दिनस्य अन्तः नाशकः ।) अन्धकारः । इति त्रिकाण्डशेषः ॥

दिनावसान, क्ली, (दिनस्य अवसानं यत्र ।) दिनान्तः । इति हेमचन्द्रः । २ । ५४ ॥ (यथा, रघुः । २ । ४५ ।
"दिनावसानोत्सुकबालवत्सा
विसृज्यतां धेनुरियं महर्षेः ॥")

दिनिका, स्त्री, (दिनं तन्मात्रवेतनमस्त्यस्याः । दिन+ठन् ।) एकदिवसवेतनकर्म्मायत्तम् । इति शब्दमाला ॥

दिन्व, क व प्रीतौ । इति कविकल्पद्रुमः ॥ (भ्वां-पर-सकं सेट् ।) क व, दिन्वति । प्रीतिरिह प्रीणीकरणम् । इति दुर्गादासः ॥

दिभ, इ क नोदे । इति कविकल्पद्रुमः ॥ (चुरां-पर-सकं सेट् ।) इ क, दिम्भयति । नोद ईरणम् । इति दुर्गादासः ॥

दिम्प, ञ क संघाते । इति कविकल्पद्रुमः ॥ (चुरां-उभं सकं-सेट् ।) ओष्ठ्यपवर्गीयोपधः । इदित्-

भरी। जक, दिम्ययति दिम्ययते। भद्वामो राघीकरणम्। एव केचित मन्यते। इति दुगादास।

दिलीप, पुं, सूर्य्यवंशीयराजविशेष। सूर्य्यवंशे दिलीपनामानौ द्वौ नृपौ जातौ। एक अंशुमत्सुत भगीरथपिता अपर दशरथप्रपितामहश्च। इति रामायणम्। (यथा च हरिवंशे।१५।१२।१४,२३।२५।

"सुत पञ्चजनस्यासीदंशुमान्नाम वीर्य्यवान्।
दिलीपस्तनयस्तस्य खट्वाङ्ग इति विश्रुत।
येन स्वर्गादिहागत्य मुहूर्त्तं प्राप्य जीवितम्।
त्रयोऽनुसन्धिता लोका बुद्ध्या सत्येन चानघ॥
दिलीपस्य तु दायादो महाराजो भगीरथ।
य स गङ्गां सरिच्छ्रेष्ठामवातारयत प्रभु॥"
"अजमित्यस्य धर्म्मात्मा विद्वान् दुलिन्दुरोऽभवत्।
दिलीपस्तनयस्तस्य रामस्य प्रपितामह॥
दीर्घबाहुर्दिलीपस्य रघुर्नाम्नाऽभवत् सुत।
अयोध्यायां महाराजो रघुराधीत महाबल॥
अजस्तु रघुतो जज्ञे अजाद्दशरथोऽभवत्।
रामो दशरथात् जज्ञे धर्म्मात्मा सुमहायशा॥")

दिलीपराट्, [ज्] पुं (दिलीप एव राट् राजा।) दिलीपराज। इति त्रिकाण्डशेष।

दिवार, स्त्री, प्रिमौनमृणम्। इति हारावली।२५।

दिव इ प्रीतौ। इति कविकल्पद्रुम। (भ्वां परं सक-सेट।) इ, दिन्वति। प्रीतिरिह प्रीतीकरणम्। दिन्वति लोकं पितरम्। इति दुर्गादास।

दिव क अर्द्दे। इति कविकल्पद्रुम। (चुरां परं सक सेट।) क, देवयति। अर्द्द इह पीडनमिति मैत्रेय। यातनं गमनं चेति रमानाथ। इति दुर्गादास।

दिव, क ङ परिकूजने। इति कविकल्पद्रुम। (चुरां आत्मं सक सेट।) क ङ, परिदेवयते कश्चित्तस्य रात्रे न दुःखित। इति हलायुध। इति दुर्गादास।

दिव, य उ विजिगीषद्युतौ। स्तौ। द्युतौ। क्रीडायाम्। गतौ। इति कविकल्पद्रुम। (दिवां-परं अकं सक च सेट। उदित्वात् क्त्वावेट।) य, दीव्यति। उ, देवित्वा द्यूत्वा। दीव्यमानं जितात् द्यूतात्। इति भट्टौ साक्षौ च प्रत्युदाहर। मनिष्यवहार स्तुतिश्च। व्यवहारस्तु क्रयविक्रयरूप। द्यूताविवाकामक। क्रीडायाश्च दीव्यते करणस्य नित्य कर्म्मत्वम्। तत्र पञ्चम्यादिविभक्तिरेव विभाषयति। इति वाम-दायिकम्। तेन अथवा पौतान्ते द्वार्येव इति कर्म्मणि प्रत्यय स्यात्। अपिनौयते द्वाविंशेति भाव प्रत्ययो न स्यात् अपरे वाति द्वावेव गुरुरितिवाद्यमानस्य कर्त्तृ कर्म्मत्व न स्यात्। तैताइश्चवचनं अधीच गमलोचना। इति भट्टौ तु देवितकस्य दुद्धारिव न तु दीव्यत। ल्युडाद्दर्भावत्वात् रामदिव्यमाणकर्तृं कर्म्मत्वम्। इति दुर्गादास।

दिव, स्त्री, (दीव्यन्त्यस्मिन्निति। दिवु क्रीडायाम्+ घञर्थे अधिकरणे क।) स्वर्ग। (यथा, देवीभागवते।५।११।

"गच्छ वीर। महाबाहो भूतलं कुरु मेऽभय॥
मुहि पक्ष दिवं गत्वा निःशङ्कं सुरसन्निधौ॥")
आकाशम्। इति मेदिनी। वे ११। वनम्। दिवा। इति हेमचन्द्र।२।५२।

दिवस, पुं, क्ली, (दीव्यत्यत्रेति। दिव+"दिव कित्।" उणा।३।१२१। इति असच् स च कित्।) दिनम्। इत्यमर।१।४।२। (यथा आर्य्यासप्तशत्याम्।२७८।

"प्रापयता दिवसानि त्वदीयविरहेण तीव्रतापेन।
धीतौ यदेव मलिना जीवनमस्याश्च तस्या॥")

दिवसकर, पुं, (करोतीति। कृ+अच्। दिवसस्य कर।) सूर्य्य। इति हेमचन्द्र।२।११।
(यथा, आर्य्यासप्तशत्याम्।६३८।

"सुन्दर यतो दिवसकरदिने सुनिर्माल्यारेखेया॥")

दिवसमुख, क्ली, (दिवसस्य मुखम्।) प्रभातम्। इति हलायुध।

दिवसपति, पुं (दिवस पति। अनुक्तप्राय।) सूर्य्य। इत्यमर।१।३।३१। (यथा, महाभारते।५।१२।८।

"इन्द्राणीमानयिष्यामो यदि त्वमपि दिवसपते॥")

दिवस्पृथिव्यौ स्त्री, (द्यौश्च पृथिवी च। "दिवसश्च पृथिव्याम्।"६।३।३। इति दिवो दिवसादेश।) रोदसी। द्यावाभूम्यौ। इति हेमचन्द्र।४।४। द्विवचनान्तोऽयम्। (यथा ऋग्वेदे।१।२।३।

"त देवा बुध्ने रजस सुदंस स दिवस्पृथिव्यो-
ररति न्येरिरे॥")

दिवा, व्य, दिवसम्। इत्यमर।३।४।६। (यथा, महाभारते।२।११।३४।

"यथा तथा मुहूर्त्तेन च दिवा रात्रिस्तथैव च॥")

दिवा [न्] पुं, (दिव्यत्यस्मिन्निति। दिव+"कनिन् युवृषीति।" उणा।१।१५६। इति सूत्रे "बहुलवचनात् केवलादपि कनिन्।" इति उज्ज्वलदत्तोक्त्या कनिन्।) दिवसम्। इत्युणादिकोष।

दिवाकर, पुं, (दिवा दिनं करोतीति। कृ+ "दिवाविभेति।"३।२।२१। इति ट।) सूर्य्य। (यथा देवीभागवते।२।६।१८।

"उदितश्च तदा भानुस्तमो हत्वा दिवाकर॥")
अर्कवृक्ष। इत्यमर। काक। पुष्पविशेष। इति शब्दचन्द्रिका।

दिवाकीर्त्ति पुं, (दिवा दिवसे एव कीर्त्तिर्यस्य। रात्रौ चौरकर्म्मनिषेधात्।) नापित। चण्डाल। ("रात्रौ च विचरेयुस्ते ग्रामेषु नगरेषु च।
दिवा चरेयु कार्य्यार्थं चिह्निता राजशासने॥"
१।६६। इति मनुवचनात् अस्य दिवाचरत्वात् तथात्वम्।) यथा, मनु।५।८५।

"दिवाकीर्त्तिमुदक्याञ्च पतितं सूतिकां तथा।
शवं तत्स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुद्ध्यति॥"
तथाच काशीखण्डे।८६।८०।

"दौवारिको वा दिवाकीर्त्ति पक्षिणो वाप्य-
पक्षिण।
मुक्तो मे मोक्षदौवार्य्यां समाप्य सविकार्य्य-
काम॥")
उलूक। इति हेमचन्द्र।३।४२०।

दिवाटन, पुं, (दिवा अटतीति। अट गतौ+ ल्यु।) काक। इति शब्दार्थकल्पतरु।
(चाण्डाल। "दिवाचरेयु कार्य्यार्थं चिह्निता राजशासने।"१०।५४। इति मनुशासनात्।)

दिवातन त्रि, (दिवा भव। दिवा+"सायचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च।"४।३।२३। इति ट्यु तुट् च।) दिनभव। यथा, भट्टि।५।६५।

"सायन्तनीं तिथिप्रण्य पङ्कजानां दिवातनीम्।
कान्तिं कान्त्या सदानत्या ह्रेपयन्ती शुचि
स्मिता॥"

दिवान्ध पुं, (दिवा दिवसे अन्ध।) पेचक। इति त्रिकाण्डशेष। (यथा पञ्चतन्त्रे।३।७५।
'यत् मयरहंसकोकिलचक्रवाकशुककारण्डवहारीतकदात्यूहादिषु पक्षिप्रधानेषु विद्यमानेषु तस्य दिवान्धस्य करालवक्त्रस्याभिषेक क्रियते नैतत् मम मतम्।") दिवान्धे, त्रि। यथा,—
"दिवान्धा प्राणिन केचिद्रात्रावन्धास्तथापरे।
केचिद्दिवा तथा रात्रौ प्राणिनस्तुल्यदृष्टय॥"
इति चण्डी।

दिवान्धा स्त्री, (दिवा दिवसे अन्धा।) चर्म्मचटका पक्षी। इति राजनिर्घण्ट।

दिवाभिसारिका, स्त्री, (दिवा अभिसारिका।) नायिकाविशेष। इति पुराणम्।

दिवाभीत पुं (दिवा दिवसे भीत।) उलूक। कुमुदाकर। चौर। इति मेदिनी। ते, १२०।
(दिवसभीते, त्रि। यथा कुमारे।१।१२।

"दिवाकराद्रक्षति यो गुहासु
लीनं दिवाभीतमिवान्धकारम्॥")

दिवाभीति, स्त्री, (दिवा दिवसे भीतिर्भयं यस्य।) पेचक। इति शब्दरत्नावली।

दिवामणि, पुं (दिवा दिवसस्य मणिरिव।) सूर्य्य। इति शब्दरत्नावली।

दिवामध्य, क्ली, (दिवा दिवसस्य मध्यम्।) मध्याह्न। इति हेमचन्द्र।२।५३।

दिवासया स्त्री, (दिवा दिवसे स्वापो निद्रा यस्या।) चर्म्मचटका पक्षी। इति राजनिर्घण्ट।

दिवि, पुं (दीव्यतीति। दिवु क्रीडायाम्+ "इगुपधात् कित्।" उणा।४।११८। इति इन् स च कित्।) चाषपक्षी। इति शब्दमाला।

दिविज, त्रि, (दिवि स्वर्गे जायते इति। दिवि+ जन+ड। "प्रावृट्शरत्कालदिवां जे।"६।३।१५। इति अलुक्।) स्वर्गीय। इति कविकल्पलता।

दिविष्ठ [द] पुं, (दिवि सीदतीति। सद्+ क्विप्। षत्वम्।) देवता।

इत्यमरः ।१।१।७॥ (यथा, गीतगोविन्दे ।९।११।
"धाम्नामिन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरा-
दानम्रैर्मुकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दीवरम् ॥"
स्वर्गवासिनि, त्रि । यथा, अथर्ववेदे ।१८।४।८०।
"यथा पितृभ्यो दिविषद्भ्यः ॥")

दिविष्ठ, त्रि (दिवि स्वर्गे तिष्ठतीति । स्था+क । अलुक् । "अम्बाम्बगोभूमीति ।" ८ । ३ । ९७ । इति षत्वम् ।) स्वर्गस्थः । इति शब्दसारः ॥) (यथा, महाभारते ।३।१ ।२४।
"ततो हस्तानि यमस्य तुष्टे पै
प्रययौ तद्गृहं त्रिदिवं दिविष्ठः ॥"
क्वचित् अलुक्समासेऽपि दृश्यते । यथा, भागवते ।४।२१।२२।
"कस्मा दिविस्थोऽखिलदृग्भिरस्मि महीय
विदेश वह्निः ध्यायन्ती भक्तपादम् ॥")

दिवी, स्त्री (दिव+इन् । कृदिकारादिति वा ङीष् ।) उपजिह्विकाकीट । इति हारावली । १९० ॥

दिवौका, [स्] पुं, (द्यौः स्वर्गः आकाशो वा ओको यस्य ।) देवः । चातकः । इति मेदिनी । से ५४ ॥

दिवोदास, पुं, (दिवः स्वर्गात् दासो दानं यस्य ।) काशीराज । स चन्द्रवंशीयभीमरथराजपुत्रः । इति मत्स्यपुराणम् ॥
("अथोऽसौ भगवान् देवमिन्द्राद्धन्वन्तरिः पुरा ।
आगत्य पृथिवीं काश्यामासीत् बाहुजवेश्मनि ॥
नाम्ना तु सोऽभवत् ख्यातो दिवोदास इति क्षितौ ॥"
"ततस्तु वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ।
तत्र नाम्ना दिवोदासः काशिराजोऽस्ति बाहुजः ।
स हि धन्वन्तरिः साक्षादायुर्वेदविशारदः ॥"
"अथ धन्वन्तरिं सर्वे बाह्मणस्याश्रमे स्थितम् ।
भगवन्तं सुरश्रेष्ठं मुनिभिश्चतुर्भिः स्तुतम् ॥
काशिराजं दिवोदासं तेऽपश्यन् विनयान्विताः ।
आगताश्च इति सन्तः दिवोदासो यशोधनः ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
'अथ खलु भगवन्तममरवरमृषिगणपरिवृत-माश्रमस्थं काशिराजं दिवोदासं धन्वन्तरि-मौपधेनववैतरणौरभ्रपौष्कलावतकरवीर्यगोपुर-रक्षितसुश्रुतप्रभृतय ऊचुः ।'
इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये ॥)

दिवोद्भवा, स्त्री, (दिवि वने उद्भवो यस्याः ।) एला । इति शब्दार्थकल्पतरुः ॥ (दिवि स्वर्गे उद्भवो यस्य ।) दिविजाते, त्रि ॥

दिवौकस् [स्] पुं, (दिवं स्वर्गं आकाशो वा ओको यस्य ।) देवः । इत्यमरः ।१।१।७। (यथा, महाभारते ।३।८४।११३।
"दिवौकसां पुष्करिणीं समासाद्य नराधिप ।।
न दुर्गतिमवाप्नोति वाजिमेधञ्च विन्दति ॥")
चातकः । इति मेदिनी । से ५४ ॥ स्वर्गवासिनि, त्रि । यथा, महाभारते ।१।६३।८।
"यां तु विश्वसहवपुषं कामजामिव तां नृप ।
ददर्श मणि गच्छन्तो वसून् देवान् दिवौकसः ॥")

दिव्य, क्ली, (दिवि वने भवम् । दिव+यत् ।) लवङ्गम् । इति मेदिनी । य, ३१ ॥ हरिचन्दनम् । इति राजनिर्घण्टः ॥ शपथः । तद्भेदा यथा दिव्यतत्त्वे बृहस्पतिः ।
"घटोऽग्निरुदकञ्चैव विषं कोषश्च पञ्चमम् ।
षष्ठञ्च तण्डुलाः प्रोक्ताः सप्तमं तप्तमाषकम् ॥
अष्टमं फालमित्युक्तं नवमं धर्म्मजं स्मृतम् ।
दिव्यान्येतानि सर्व्वाणि निर्दिष्टानि स्वयम्भुवा ॥"
एषां विवरणं तत्तच्छब्दे ज्ञेयम् परीक्षाशब्दे च द्रष्टव्यम् ॥*॥ गङ्गाजलस्पर्शपूर्व्वकशपथस्थले मिथ्याकथने दोषश्च यथा —
"ब्रह्मणो वचनं श्रुत्वा ज्ञानेशो ज्ञानिनां वरः ।
गङ्गातोयं करे धृत्वा स्वीकारञ्च चकार सः ॥
गङ्गातोयमुपस्पृश्य मिथ्या यदि वदेज्जनः ।
स याति कालसूत्रञ्च यावद्वै ब्रह्मणो वयः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥*॥
गङ्गाजलादिस्पर्शपूर्व्वकशपथे दोषो यथा ।
"तथा गङ्गोदकं ताम्रं गोमयं शालग्रामं तथा ।
सत्यं वा यदि वासत्यं यदि दिव्यं करोति यः ॥
कर्त्ता च रौरवं याति तथा कारयिता प्रिये ।।
उभयोः पुनरावृत्तिर्नरयोनिषु नास्ति वै ॥
तस्मान्नास्ति पुनरावृत्तिर्याम्यशूकरयोनिषु ।
दिव्यं कर्त्तुं कारयितुमपूर्णा तथा यथा ॥
गायत्रीरहितस्यापि नरकाघोरदोत्तरम् ॥"
इति गायत्रीतन्त्रे पञ्चमपटलः ॥

दिव्य, त्रि, (दिवि भवः । यत् ।) मनोज्ञः । दिवि भवः । इति मेदिनी । ये, ३१ ॥ (यथा विष्णुपुराणे । १।९।१४ ।
'दिव्यमाल्याम्बरधरा स्नाता भूषणभूषिता ।
पश्यतां सर्व्वदेवानां ययौ वक्षःस्थलं हरेः ॥")

दिव्य पुं (दिवि वने भवः । दिव+यत् ।) यवः । गुग्गुलुः । इति राजनिर्घण्टः ॥ भावविशेषः । यथा,—
"अथ भावत्रयं देवि ! दिव्यवीरपशुक्रमात् ।
दिव्यस्तु देववत् प्रायो वीरश्चोद्धतमानसः ॥
सत्यत्रेताद्वापरेषु दिव्यभावविनिश्चयः ।
त्रेताद्वापरपर्य्यन्तं वीरभावं इतीरितम् ॥
मद्यं मत्स्यं तथा मांसं मुद्रां मैथुनमेव च ।
श्मशानसाधनं भद्रे ! चितासाधनमेव च ॥
एतत्ते कथितं सर्व्वं दिव्यवीरमतं प्रिये ।।
दिव्यवीरमतं नास्ति कलिकाले सुलोचने ! ॥"
इति कालीविलासतन्त्रम् ॥
नायकभेदः । यथा,—
"अथ तासां दिव्या अदिव्या दिव्यादिव्याभेदेन गणनया द्विपञ्चाशदधिकशतद्वयं भेदा भवन्ति । दिव्या इन्द्राण्यादयः । अदिव्या मालत्यादयः । दिव्यादिव्या द्रौपद्यादय इति वदन्ति तन्न तत्र अवस्थाभेदेनैव नायिकानां भेदात् जातिभेदेन भेदस्वीकारे अनन्तताधिका नामिव नायकानामप्यानन्त्यं स्यात् । यथा हि इन्द्रादयो दिव्याः । अदिव्या माधवादयः । दिव्यादिव्या अर्जुनादयः ।" इति रसमञ्जरी ॥ (शालनस्य पुत्राणामन्यतमः । यथा, भागवते । ९ । २४ । ६ ।
"भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोऽन्धकः ।
सात्वतस्य सुताः सप्त महाभोजश्च मारिष ॥")

दिव्यकुण्ड, क्ली, (दिव्यं पुण्यप्रदत्वात् उत्कृष्टं कुण्डमिति कर्म्मधारयः ।) कामरूपे सोभकशैल-पूर्व्वभागस्थपुष्करिणीविशेषः । यथा —
"तद्दक्षिणे महाशैलः सोभको नाम नामतः ।
तस्मिन् गिरौ शिलापृष्ठे वसते देवी चर्च्चिका ॥
मधुपुष्करिणी नाम्ना मध्ययोनिस्वरूपिणी ।
शङ्करं मधुभिर्देवी योनिभिः मधुवत् क्रमम् ॥
स्थिता रमयितुं तत्र नित्यमेव शिवाङ्गिना ।
तच्छैलपूर्व्वभागात्तु कान्ता नाम महानदी ॥
दक्षिणं सागरं याति प्रथमा चोत्तरस्रवा ।
दिव्यकुण्डं महाकुण्डं तच्छैलोपत्यकां गता ।
सुस्थितस्तत्र स्नात्वा तु तां देवीं परिपूजयेत् ।
दिव्यकुण्डे नरः स्नात्वा मधुपुष्करिणीं शिवाम् ॥
यः पूजयेन्महाभागः स योनौ न हि जायते ॥"
इति कालिकापुराणे ८१ अध्यायः ॥

दिव्यगन्ध क्ली (दिव्यो मनोहरो गन्धोऽस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥ (लवङ्गशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

दिव्यगन्ध, पुं, (दिव्यः गन्धो यस्य ।) गन्धकः । इति राजनिर्घण्टः ॥ (गन्धकशब्देऽस्य विवृतिर्विज्ञेया ॥)

दिव्यगन्धा, स्त्री (दिव्यो गन्धोऽस्याः ।) स्थूलैला । महाचञ्चुशाकः । इति राजनिर्घण्टः ॥

दिव्यगायन, पुं (दिव्यः स्वर्गीयः गायनः ।) गन्धर्व्वः । स्वर्गगायकः । इति शब्दरत्नावली ॥

दिव्यचक्षुस् [स्] त्रि, (दिव्यमलौकिकं चक्षुर्यस्य ।) ज्ञानचक्षुः । यथा, नीलकण्ठकोषे ।
"नमस्तुभ्यं विरूपाक्ष ! नमस्ते दिव्यचक्षुषे ।"
क्ली ज्ञानात्मकचक्षुः । यथा —
"न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥"
इति श्रीभगवद्गीतायाम् । ११ । ८ ॥ "अतो दिव्यमलौकिकं ज्ञानात्मकं चक्षुस्तुभ्यं ददामि ।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥ (दिव्यं स्वर्गीयं मनोज्ञं वा चक्षुः ।) स्वर्गीयचक्षुः । सुन्दरलोचनम् । ज्ञानचक्षुः । चशमा इति भाषा । इति लोकप्रसिद्धम् ॥ (पुं, दिव्ये मनोज्ञे चक्षुषी यस्य । यथा, दिव्यं चक्षुर्नेत्रं यस्मात् । तन्नामकस्य ... इत्युपलिम्पनात् तथात्वम् ।) मर्कटः । इति शब्दमाला ॥ रागान्धः । त्रि (दिव्ये आकाशभूते चक्षुषी यस्य ।) अन्धः । (दिव्ये सुन्दरे चक्षुषी यस्य ।) सुलोचनः । इति मेदिनी । से ६८ ॥

दिव्यतेजा, [स्] स्त्री, (दिव्यं स्वर्गीयं दैवतुल्यं तेजो यस्याः । अस्याः सेवनेन दिव्यतेजोवत्तेजआधायकत्वात् तथात्वम् ।) ब्राह्मी । इति राजनिर्घण्टः ॥ (दिव्यं तेजो यस्य । अलौकिकतेजस्के त्रि ।)

दिव्यदोहदं त्रि, (दिव्यः स्वर्गीयः दोहदम् अभिलाषो यत्र ।) उपयाचितम् । देवदेयवस्तु । इति त्रिकाण्डशेषः ॥ यथा हारावली । ९१ ॥
"यद्दीयते तु देवेभ्यो मनोराज्यस्य सिद्धये ।
उपयाचितकं दिव्यदोहदं तद्विदुर्बुधाः ॥"

दिव्यपञ्चामृतं, क्ली, (पञ्चानां अमृतानां तत्तुल्यस्वादुगुणवद्द्रव्याणां समाहारः पञ्चामृतम् । दिव्यं पञ्चामृतमिति कर्म्मधारयः ।) मिलितगव्याज्यगव्यदधिगव्यक्षीरमाक्षिकशर्कराचयम् । इति राजनिर्घण्टः ॥

दिव्यपुष्पः, पुं, (दिव्यं मनोरमं पुष्पं यस्य ।) करवीरः । इति राजनिर्घण्टः ॥

दिव्यपुष्पा, स्त्री, (दिव्यानि मनोज्ञानि पुष्पाण्यस्याः ।) महाद्रोणा । इति राजनिर्घण्टः ॥

दिव्यपुष्पिका, स्त्री, (दिव्यपुष्प + संज्ञायां कन् टाप् अत इत्वञ्च ।) लोहितवर्णार्कवृक्षः । इति रत्नमाला ॥

दिव्ययमुना, स्त्री, (दिव्या यमुना तत्तुल्यफलप्रदत्वात् ।) कामरूपे ललितकाया नद्याः पूर्व्वभागस्थनदीविशेषः । यथा,—
"तस्या नद्याः पूर्व्वभागे गङ्गेव फलदायिनी ।
माघन्तु सकलं मासं तस्यां स्नात्वा नरोत्तमः ॥
तथा ललितकायाञ्च नरः निर्व्वाणमाप्नुयात् ।
ततः पूर्व्वं परा देवी नाम्ना या चरिद्रुतमा ॥
महती दिव्ययमुना यमुनावत् फलप्रदा ।
दक्षिणादिवसम्भूता दक्षिणोदधिगामिनी ॥
तस्यान्तु कार्त्तिकं मासं स्नात्वा मोक्षमवाप्नुयात् ॥"
इति कालिकापुराणे ८१ अध्यायः ॥

दिव्यरत्नं, क्ली, (दिव्यं चिन्तामात्रं तदर्थप्रदायकं पारलौकिकं रत्नम् ।) चिन्तामणिः । इति शब्दार्थकल्पतरुः ॥

दिव्यरथः, पुं, (दिव्यः स्वर्गीयः अन्तरीक्षचरो वा रथः ।) व्योमयानम् । देवविमानः । इति शब्दरत्नावली ॥

दिव्यरसः, पुं, (दिव्यो रस इति नित्यकर्म्मधारयः ।) पारदः । इति राजनिर्घण्टः ॥

दिव्यलता, स्त्री, (दिव्या वनभवा लता ।) मूर्व्वालता । इति राजनिर्घण्टः ॥

दिव्यवस्त्रः, पुं, (दिव्यं वस्त्रमिव । अभिमानात् दीप्तम् ।) सूर्य्यशोभा । इति शब्दरत्नावली ॥ (दिव्यं सुन्दरं वस्त्रमस्य ।) सुन्दरवस्त्रयुक्ते, त्रि । (दिव्यं सुन्दरं वस्त्रम् ।) क्ली सुन्दरवस्त्रम् । ॥ दिवि भवम् । यत् । दिव्यं वस्त्रमिति कर्म्मधारयः ।) दिविभववस्त्रम् ॥

दिव्यसारः पुं (दिव्यो मनोज्ञः सारो यस्य ।) शालवृक्षः । इति राजनिर्घण्टः ॥

दिव्या, स्त्री, (दिवि भवा । मनोज्ञगुणवत्त्वात् दिव्येवेत्यर्थः ।) धात्री । इति मेदिनी । ये ११ ॥ वन्ध्या कर्क्कोटकी । शतावरी । महामेदा । ब्राह्मी । स्थूलजीरकः । श्वेतदूर्व्वा । हरीतकी । मुरा । इति राजनिर्घण्टः ॥

दिव्या, स्त्री, (दिवि भवा । यत् । ततष्टाप् ।) नायिकाभेदः ॥ (सा च इन्द्राण्यादिः ॥)

दिव्यादिव्यः पुं, (दिव्यः स्वर्गीयः अदिव्यश्च ।) नायकभेदः ॥ (स च अर्ज्जुनादिः ॥)

दिव्यादिव्या स्त्री, (दिव्या अदिव्या च ।) नायिकाभेदः । अस्याः प्रमाणं दिव्यशब्दे द्रष्टव्यम् । उपदेवीविशेषः । इति शब्दार्थकल्पतरुः ॥

दिव्योदकं क्ली (दिव्यमान्तरीक्षमुदकम् ।) आकाशजलम् । तत्पर्य्यायः । खवारि २ आकाशसलिलम् ३ व्योमोदकम् ४ अन्तरीक्षजलम् ५ । अस्य गुणाः । त्रिदोषनाशित्वम् । मधुरत्वम् । पथ्यत्वम् । परमरुच्यत्वम् । अतिदत्वम् । तृष्णाश्रममोहमदहारकत्वम् । मायापेक्षिगुणत्वञ्च ॥ अनागतस्य तस्य गुणाः । सर्व्वेषां देहिनां त्रिदोषशमकत्वम् । सद्योभूमिस्थस्य तस्य गुणः । कलुषत्वम् । दोषदायकत्वञ्च । चिरस्थितस्य गुणाः । लघुत्वम् । स्वच्छत्वम् । पथ्यत्वम् । स्वादुत्वम् । सुखावहत्वञ्च । इति राजनिर्घण्टः ॥

दिव्योपपादुकः, त्रि, (दिवि भवः । दिव + "द्युप्रागपागुदक्प्रतीचो यत् ।" ४।२।१०१। इति यत् । उपपद्यते इति । उप + पद् + "लषपतपदस्थेति ।" ३।२।१५४ । इति उकञ् । ततो दिव्यश्चासौ उपपादुकश्चेति ।) देवता । इत्यमरः ।३।१।५० ॥ ("मातृपित्रादिकारणनिरपेक्षाः अदृष्टवशतेभ्यो जाता ये देवास्ते दिव्योपपादुका उच्यन्ते ।" इति शब्दार्थचिन्तामणिः ॥)

दिव्यौघः, पुं, (दिव्यानां स्वर्गीयगुरूणामोघः समूहो यत्र ।) गुरुविशेषः । यथा शक्तिरत्नाकरतन्त्रे ।
"महादेवो महाकालस्त्रिपुरश्चैव भैरवः ।
दिव्यौघा गुरवः प्रोक्ता दिव्यौघान् कथयामि ते ॥"
अपि च ।
"अथ तारागुरून् वक्ष्ये छन्दाकरुणाप्रदान् ।
खड्गकेशी व्योमकेशी नीलकण्ठो वृषध्वजः ॥
दिव्यौघान् विद्धि दान् बुधः । महाज्ञानवतो हराः ॥"
अपि च ।
"प्रभु वरद । महादेव । गुरून् दुर्गामनक्षरान् ।
परमात्मा परानन्दः परमेष्ठी शुभोदय ॥
हाथ काल कलानाथो दिव्यौघा भैरवा दिव्या ॥"
इति तन्त्रसारः ॥

दिश, श्री ज श्र वोधे । इति कविकल्पद्रुमः ॥ (तुदां उभं सकं अनिट् ।) श्री, अदिक्षत् । ज श्र दिशति दिशते । श्राप इति अधियं समवायेन स्थाप अपि स्वम् । धातूनाम् नेकार्थत्वादोप इव दानमात्रापणं वा । दिदेश कौतुकाय समस्तमेवेति रघुः । कथनेऽप्ययम् । धर्म्मं दिशति दैशिकः । इति दुर्गादासः ॥

दिशा, स्त्री, (दिश + टाप् ।) दिक् । इति शब्दरत्नावली ॥ (यथा महाभारते । ४ । ५१ । १८ ।
"अत्र मध्ये यथार्कस्य रश्मयस्तिग्मतेजसः ।
दिशासु च तथा राजन् । न सङ्ख्याताः शरा मम ॥")

दिशा, [स्] स्त्री, (दिशतीति । दिश + बाहुलकात् असुन् ।) दिक् । इत्यमरटीकायां मथुरानाथः ॥

दिश्य त्रि, (दिशि भवमिति । दिश + "दिगादिभ्यो यत्" ।४।३।५४। इति यत् ।) दिग्भववस्तु । इत्यमरः ।१।३।२ ॥

दिष्टं, क्ली, (दिशति इष्टानिष्टफलं ददातीति । दिश + "क्तिच्क्तौ च संज्ञायाम् ।" ३।३।१७४। इति क्त ।) भाग्यम् । इत्यमरः । १ । ४ । २८ ॥ (यथा महाभारते । १४ । ५३ । १६ ।
"ततस्ते निधनं प्राप्ताः सर्व्वे सस्वतबान्धवाः ।
न दिष्टमभ्यतिक्रान्तुं शक्यं बुद्ध्या बलेन वा ॥"
दिश + कर्म्मणि क्त ।) उपदिष्टे, त्रि । इति त्रिकाण्डशेषः ॥ (कथिते च । यथा, भट्टिः ।८।१२।
"गाङ्गेयदिष्टं विरहं दधन्तं
रामोऽपि मायाजनमस्पृशन्तु ॥")

दिष्टः, पुं, (दिशतीति । दिश + संज्ञायां क्त ।) कालः । इत्यमरः । १ । ४ । १ ॥ (वैवस्वतमनोः पुत्रविशेषः । यथा भागवते । ८ । १३ । २ ।
"नरिष्यन्तोऽथ नाभागः सप्तमो दिष्ट उच्यते ॥")
दारुहरिद्रा । इति शब्दमाला ॥

दिष्टान्तः, पुं (दिष्टस्य भाग्यस्य अन्तो यत्र ।) मरणम् । इत्यमरः ।२।८।११६। (यथा, महाभारते ।१।५८।२०।
"भोजयित्वा तु तान् सर्व्वान् सपत्नान् अक्षौहिणीन् ।
जगाम काले धर्म्मात्मा दिष्टान्तं पुरुषर्षभः ॥")

दिष्टिः स्त्री, (दिश + क्तिन् संज्ञायां क्तिच् वा ।) हर्षः । परिमाणम् । इति मेदिनी । टे, १८ ॥

दिष्ट्या, अ (दिश्यतीति शब्दादित्वात् आर्षे क्तिच् दिष्टम् । दैवेन ख्यायते । ख्यै + क्विप् । लुमन् । संज्ञापूर्व्वकत्वात् अद्युक्त न । यद्वा, दिश्यते इति । दिश + "अघ्न्यादिभ्यश्चेति" "बहुलमन्यत्रापि" ।) आनन्दः । इत्यमरः ।३।४।१ ॥ भाग्येन । यथा —
"दिष्ट्या ! तं कुशलिनं परं दृष्टवान् ॥"
इति श्रीभागवतम् ॥

दिष्णु, त्रि, (ददातीति । दा + बाहुलकात् इष्णु ।) दाता । इत्युणादिकोषः ॥

दिह, ज ल श्री लेपे । इति कविकल्पद्रुमः ॥ (अदां उभं सकं अनिट् ।) दिह उपचये इति प्राञ्चः । उपचयोऽत्र वर्द्धनसंस्कारश्च । स च देहं दिग्धे इह प्रतिदिनमुपचितं करोतीत्यर्थः । देग्धि वीजं शस्यम् । रूपकं । उपचितं करोतीत्यर्थः । श्री, दिग्धवान् इति दुर्गादासः ॥

दी, ङ ओ क्षये। इति कविकल्पद्रुमः॥ (दिवा०-आत्म०-अक० सेट्।) ओ, दीनः। ङ य, दीयते। इति दुर्गादासः॥

दीक्ष, ङ मौण्ड्ये। इज्यायाम्। व्रतादेशे। इति कविकल्पद्रुमः॥ (भ्वा० आत्म० अक० व्रतादेशे सक० च सेट्।) मौण्ड्यं मुण्डितमस्तकीभावः। इज्या यजनम्। व्रतादेशो नियमव्रतादिग्रहणमीत्यर्थः। इह दीक्षते वटुमभिषिक्तमस्तकं स्यादित्यर्थः। दीक्षते यजो यजतीत्यर्थः। दीक्षते धार्म्मिको नियमात् स्यादित्यर्थः। दीक्षते पण्डितो जनं मन्त्रमुपदिशतीत्यर्थः। दीक्षते पुत्र विप्रं उपनयतीत्यर्थः। इति दुर्गादासः॥

दीक्षणीयेष्टि स्त्री, (दीक्षणीया इष्टिः।) यज्ञविशेषः। सत्यर्थ्याय। सौमिकी २। इति हेमचन्द्रः। ३।४८७॥

दीक्षा स्त्री, (दीक्ष + भावे अ। स्त्रियां टाप्।) यजनम्। पूजनम्। इत्यजयपालः॥ व्रतसंग्रहः। इति हेमचन्द्रः। ३।४८७॥ गुरुमुखात् स्वेष्टदेवमन्त्रग्रहणम्। (एतन्निरुक्तिर्यथा, योगिनीतन्त्रे। ७।४१॥

"ददाति दिव्यं ज्ञानं क्षिणुयात् पापबन्धनम्।
तेन दीक्षेति विख्याता मुनिभिस्तत्त्वपारगैः॥")

यथा च, —

"दीयते ज्ञानमत्यर्थं क्षीयते पापसञ्चयः
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तत्त्ववेदिभिः॥
दिव्यभावं यतो दद्यात् कुर्य्यात् पापस्य सङ्क्षयम्।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः॥
उच्यते प्रथमं तत्र लक्षणं गुरुशिष्ययोः॥"

इत्यत्र गुरुशिष्ययोर्लक्षणं सतत्स्थले द्रष्टव्यम्॥ योगिनीतन्त्रे।

"पितुर्मन्त्रं न गृह्णीयात् तथा मातामहस्य च।
सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च॥"

रुद्रयामले।

"न पत्नीं दीक्षयेद्भर्त्ता न पिता दीक्षयेत् सुताम्।
न पुत्रञ्च तथा भ्राता भ्रातरं न च दीक्षयेत्॥
सिद्धमन्त्रो यदि पतिस्तदा पत्नीं स दीक्षयेत्।
शक्तित्वेन वरारोहे। न च सा त्वन्यथा भवेत्॥"

तथा गन्धर्व्वविमर्शिन्याम्।

"पत्युर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः।
विविक्ताश्रमिणो दीक्षा न सा कल्याणदायिका॥"

इत्यादिनिषेधवचनादेभ्यो मन्त्रं न गृह्णीयादिति। इति तु सिद्धेतरविषयम्। सिद्धमन्त्रो न दुष्यतीति वचनात्॥*॥ मत्स्यसूक्ते।

"तीर्थाचारवतो भक्तो ज्ञानवान् गुणमाश्रितः।
नित्यसिद्धो यति र्यातो गुरुः स्याद्गौतिको ऽपि च॥"

सिद्धयामले।

"यदि भाग्यवशेनैव सिद्धविद्यां लभेत् प्रिये।
तदैव तान्तु दीक्षेत त्यक्त्वा गुरुविचारणम्॥"

गन्धर्व्वविमर्शिन्याम्।

"प्रमादाच्च तथाज्ञानात् पितुर्दीक्षां समाचरेत्।
प्रायश्चित्तं तदा कृत्वा पुनर्दीक्षां समाचरेत्॥"

पितुरित्युपलक्षणम्। मातामहादीनामपि। प्रायश्चित्तञ्च व्युत्क्रमविशेषः। सर्व्वत्र तथा दर्शनात्। तथा च स्मृतिः।

"दत्वाद्दत्तमपि धर्म्मकल्पनकारिणी।"

श्रीक्रमेऽपि।

"मनुर्विप्रश्च दातव्यो ज्येष्ठपुत्राय धीमते॥"

मत्स्यसूक्ते।

'निर्व्वीर्य्यञ्च पितुर्मन्त्रं प्रोक्ते ग्राह्ये न दुष्यति।'

इति कौलिकमन्त्रदीक्षापरम्। योगिनीतन्त्रे ग्रन्थादिविद्यामधिकृत्य दीक्षाभिधानात्। यद्वा प्राप्ते तारादिविद्यायां मत्स्यसूक्ते तथा प्रतिपादनात्। तथा च।

"स्ववंशतस्तपस्यानेकजन्मप्रभावे
भवति यदि मनुष्यो गुर्व्वधीनश्चिराय।
कथमपि मनुमेनं प्राप्य शिष्यं परस्मै
निजकुलतिलकाय ज्येष्ठपुत्राय दद्यात्॥" इति।

महातीर्थे उपरागे सति सर्व्वत्र न दोषः। तथा च विष्णुयामलमधिकृत्य।

"साधु पृष्टं त्वया भद्रान्। वक्ष्यामि शृणु तत्त्व।
मध्याह्न कथितं पूर्व्वं पतिव्रताय महात्मने।
यतिस्तोऽपि स्वमीश्वराय मनुर्विन्द्रे दत्तवान् स्वयम्।
प्रसन्नहृदय स्वल्पं पिता मे चक्रवर्त्तिनः।
कुरुक्षेत्रे महातीर्थे उपरागे च दत्तवान्॥"

इत्यादि वैशम्पायनवचनादिसत्तर्ग्रन्थे प्राबल्यं प्रतिपादनात्॥*॥ योगिनीतन्त्रे।

"निर्व्वीर्य्यञ्च पितुर्मन्त्रं तथा मातामहस्य च।
स्वप्नलब्धं स्त्रिया दत्तं संस्कारेणैव शुध्यति॥"

मनुः।

"साध्वी चैव सदाचारा गुरुभक्ता जितेन्द्रिया।
सर्व्वमन्त्रार्थतत्त्वज्ञा सुशीला पूजने रता॥
गुरुयोग्या भवेत् सा हि विधवापरिवर्ज्जिता।
स्त्रियो दीक्षा शुभा प्रोक्ता मातुश्चाष्टगुणा स्मृता॥"

इन्तु गुरोरुपाधिगमनपरम्। तथा च भैरवीतन्त्रे।

"स्त्रीयमन्त्रोपदेशे तु न कुर्य्याद्गुरुचिन्तनम्।"

मातुरित्युपाधितोऽन्यस्य मातृपादितं शुभफलदमित्यर्थः। सिद्धमन्त्रविषयं वा। वस्तुतस्तु योगिनीतन्त्रे स्त्रीपरं विधवापरम्। एकवाक्यतावलात्। दीक्षायां विधवादीनामधिकारं विधिमयति रुद्रयामले।

"विधवाया सतादेशात् कन्याया पितुराज्ञया।
नाधिकारः स्वतो नार्य्या भार्य्याया भर्त्तुराज्ञया॥"

योगिनीतन्त्रे।

"स्वप्नलब्धे तु कलसे गुरोः प्राणं निवेशयेत्।
वटपत्रे कुङ्कुमेन लिखित्वा ग्रहणं शुभम्॥
ततः शुद्धिमवाप्नोति चान्यथा विफलं भवेत्॥"

इदन्तु गुरोरभावे तत्पत्ते सम्भावे व गृह्णीयात् तत्र तु नियमो न वीति नारदवचनात्॥*॥ तथा विद्याधराचार्य्यधृतनारदवचनम्।

"सिद्धेश्वरदीक्षमानात्कृत्यद्युक्तया।
समानैर्द्विजातिस्त्राता पादानां गुरुनामा॥
गौडः प्रतिष्ठावीर गौरा मागधा केरला-
स्तथा।
कोशलाश्च दशार्णाश्च गुरवः सप्त मध्यमाः॥
कर्णाटनर्म्मदारेवाकच्छातीरोद्भवास्तथा।
कालिङ्गाश्च कम्बोजाः काम्बोजाश्चाधमा
मताः॥"*॥

तथा।

"शैवाच्छैवो वैष्णवो ग्राह्यः शैवे शैवश्च शाक्तिके।
शाक्त एव प्रशस्तोऽपि सर्व्वत्र दीक्षाकामी न संशयः॥"

दीक्षां विना जपस्य दुष्टत्वात् प्रथमं सा निरूप्यते।

"दिव्यं ज्ञानं यतो दद्यात् कुर्य्यात् पापस्य सङ्क्षयम्।
तस्माद्दीक्षेति सा प्रोक्ता मुनिभिस्तन्त्रवेदिभिः॥"

मन्त्रलक्षणमाह। पिङ्गलामते।

"मननं विश्वविज्ञानं त्राणं संसारबन्धनात्।
यतः करोति संसिद्धिं मन्त्र इत्युच्यते ततः॥"

साम्यञ्च।

"मननात्त्रायते यस्मात्तस्मान्मन्त्रः प्रकीर्त्तितः॥"

सर्व्वाश्रमेषु दीक्षायाः आवश्यकत्वम्। तथा च।

"दीक्षामूलं जपं सर्व्वं दीक्षामूलं परं तपः।
दीक्षामाश्रित्य निवसेत् यत्र कुत्राश्रमे वसन्॥
अदीक्षिता ये कुर्व्वन्ति जपपूजादिकाः क्रियाः।
न भवन्ति प्रिये। तेषां शिलायामुप्तबीजवत्॥
देवि। दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः।
तस्मात् सर्व्वप्रयत्नेन गुरुणा दीक्षितो भवेत्॥
अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत्।
तस्माद्दीक्षां प्रयत्नेन मन्त्री कुर्य्यात् तान्त्रिकात्॥
अन्ने ह्यन्ना तु मन्ते वै यो गच्छति वरानने।
सम्यक्‌पातकयेव विष्ठुतिर्मैव जायते।
नादीक्षितस्य कार्य्यं स्यात्तपोभिर्नियमव्रतैः।
न तीर्थगमनेनापि न च शारीरयन्त्रणैः॥"

मनुस्मृतौ।

"अदीक्षितानां मर्त्त्यानां दोषं शृणु वरानने।।
अन्नं विष्ठासमं तस्य जलं मूत्रसमं स्मृतम्॥
तत्कृतं तस्य वा श्राद्धं सर्व्वं याति ह्यधोगतिम्॥"

शूद्रस्य मन्त्रविशेषनिषेधमाह।

"प्रणवाद्यं न दातव्यं मन्त्रं शूद्राय सर्व्वथा।
आत्ममन्त्रं गुरोर्मन्त्रं मन्त्रं चाक्षमालकम्॥
स्वाहाप्रणवसंयुक्तं शूद्रे मन्त्रं ददाति च।
शूद्रो निरयमाप्नोति ब्राह्मणो यात्यधोगतिम्॥"

श्रुतिरपि। "सावित्रीं प्रणवं यजुर्लक्ष्मीं स्त्रीशूद्रो यदि जानीयात् स मृतोऽधो गच्छति।" इति॥*॥

विशेषमाह वाराहीये।

"गोपालस्य मनुर्देयो नृसिंहस्यापि यादवे।
तदुपमन्त्राणापि सर्व्वेषां शर्व्वरीयस्य मन्त्रकाः॥
एषां दीक्षाधिकारी स्यादन्यथा पापमाप्नुयात्॥"

इति॥*॥ गोविन्दवृन्दावने।

"अदीक्षितस्य मरणे प्रेतत्वं न च मुच्यति॥"

नवरत्नेश्वरे।

"सर्व्वेषामपि दीक्षायां मुक्तिः करामलकवत्।
अविरोधात् भवन्त्येव मन्त्रसिद्धिकरास्तु भक्तयः॥"

तथा ।
"उपपातकलक्षाणि महापातककोटयः ।
क्षणात् दहति देवेशि दीक्षा हि विधिना कृता ॥"
यामले ।
"आगमोक्तविधानेन कलौ देवान् यजेत् सुधीः ।
न हि देवाः प्रसीदन्ति कलौ चान्यविधानतः ॥"
अतः सद्गुरोराहितदीक्षः सर्व्वकर्म्माणि साधयेत् ॥ * ॥ तन्त्रान्तरोक्तमन्त्रदीक्षेति । तथा च सारदायाम् ।
"ज्ञात्वारराशिकोष्ठानामनुकूल्यान् भजेन्मनून् ।"
तथा सारसंग्रहीये ।
"ताराचक्रं राशिचक्रं नामचक्रं तथैव च ।
अत्र चैत् शत्रुणो मन्त्रो नाम्यचक्रं विचारयेत् ।"
इति तु प्रधानतया बोद्धव्यम् । तथा च ।
"अनिमन्त्र न गृह्णीयात् अकुलश्च तथैव च ।"
इत्यादिवचनात् तत्तच्चक्रविचारस्य आवश्यकत्वात् प्रथमं तन्निरूप्यते ॥ * ॥ तत्र सिद्धचारश्चते ।
"नृसिंहार्कवराहाणां प्रासादप्रणवस्य च ।
सपिण्डाक्षरमन्त्राणां सिद्धादीन्नैव शोधयेत् ॥
स्वप्नलब्धे स्त्रिया दत्ते मालामन्त्रे च त्र्यक्षरे ।
वैदिकेषु च मन्त्रेषु सिद्धादीन्नैव शोधयेत् ॥" * ॥
मालामन्त्रस्तु सारसंग्रहीये ।
"विंशत्यर्णाधिका मन्त्रा मालामन्त्राः प्रकीर्त्तिताः ।
नपुंसकस्य मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥
हंसस्याष्टाक्षरस्यापि तथा पञ्चाक्षरस्य च ।
एकद्वित्र्यक्षरस्यापि सिद्धादीन्नैव शोधयेत् ॥
तथा एकाक्षरस्य मन्त्रस्य मालामन्त्रस्य पार्व्वति ॥
वैदिकस्य च मन्त्रस्य सिद्धादीन्नैव शोधयेत् ॥" * ॥
तथा मुण्डमालातन्त्रे ।
"काली तारा महाविद्या षोडशी भुवनेश्वरी ।
भैरवी छिन्नमस्ता च विद्या धूमावती तथा ॥
बगला सिद्धविद्या च मातङ्गी कमलात्मिका ।
एता दश महाविद्याः सिद्धविद्याः प्रकीर्त्तिताः ॥"
मालिनीविजये ।
"अथ वक्ष्ये तु या या महाविद्या महीतले ।
दीक्षाकालेऽस्य शुद्धाद्याः सर्व्वा हि फले सह ॥
काली नीला महादुर्गा त्वरिता छिन्नमस्तका ।
वाग्वादिनी चान्नपूर्णा तथा प्रत्यङ्गिरा पुनः ॥
कामाख्यावासिनी बाला मातङ्गी शैलवासिनी ।
इत्याद्याः सकला विद्याः कलौ पूर्णफलप्रदाः ॥
सिद्धमन्त्रतया चात्र शुभदेवाघदिक्रमः ।
तथा चैता महाविद्याः कलिदोषान्न बाधिताः ॥"
चामुण्डातन्त्रे ।
"कली काली तथा तारा भैरवी छिन्नमस्तका ।
चिकुटा त्रिपुटा दुर्गा तथा महिषमर्द्दिनी ।
कामाख्या च चामुण्डा महाविद्याः प्रकी-
र्त्तिताः ।
नात्र सिद्धाद्यपेक्षास्ति न स्वप्नविचारणा ॥
कालादिशोधनं नास्ति न चामित्रादिदूषणम् ।
सिद्धविद्यातया चात्र युगसेवापरिश्रमः ॥
नास्ति विधिप्रकारोऽपि । दुःसाधार्ध्यं कथञ्चन ॥'
इत्यादिवचनादेषु विचारो नास्ति । वस्तुतस्तु इदं प्रथमपरम् । सर्व्वत्र विचारस्यावश्यकत्वम् । दुष्टमन्त्रग्रहात् कदाचिद्वैरिमन्त्रस्य ग्रहणात् प्रायशः सन्तापोऽस्य उत्पद्यते ।" इति तु साम्प्रदायिकाः ॥ * ॥ अथ कुलाकुलचक्रम् । राशिचक्रम् । नक्षत्रचक्रम् । अकथहचक्रम् । अकडमचक्रम् । ऋणिधनिचक्रम् । एतानि चक्रशब्दे तत्तच्छब्दे च द्रष्टव्यानि ॥ * ॥

अथ दीक्षाकालनियमः ।

"मन्त्रारम्भस्तु चैत्रे स्यात् समस्तपुरुषार्थदः ।
वैशाखे रत्नलाभः स्यात् ज्यैष्ठे तु मरणं भवेत् ।
आषाढ़े बन्धुनाशः स्यात् पूर्णायुः श्रावणे भवेत् ।
प्रजानाशो भवेद्भाद्रे आश्विने रत्नसञ्चयः ॥
कार्त्तिके मन्त्रसिद्धिः स्यात् मार्गशीर्षे तु तद्भवेत् ।
पौषे तु शत्रुपीड़ा स्यात् माघे मेधाविवर्द्धनम् ॥
फाल्गुने सर्व्वकामाः स्युर्मलमासं विवर्ज्जयेत् ।"
चैत्र इति गौणार्थविषयम् । गौतमीयोक्तत्वात् । मधुमासे भवेद्दीक्षा दुःखाय मरणाय चेति वचनप्रामाण्यञ्च । तथा,—
"ज्यैष्ठे क्षयप्रदा विद्या आषाढ़े सुखसम्पदः ।"
इति योगिनीहृदयाराधाढ़े श्रीविद्यायां न दोषः ।
अत्र च मासः सौर एव । सौरे मासि शुभा दीक्षा न चान्द्रे न च तारके । इति गौतमीयात् ५ अध्यायात् ॥
वैशम्पायनसंहितायाम् ।
"मन्त्रस्यारम्भणं मेषे धनधान्यप्रदं भवेत् ।
वृषे मरणमाप्नोति मिथुने सन्ततिनाशनम् ॥
कर्कटे सर्व्वसिद्धिः स्यात् सिंहे मेधाविनाशकम् ।
कन्यायां लक्ष्मीवृद्धिः स्यात् तुलायां सर्व्वसिद्धयः ॥
वृश्चिके स्वर्णलाभः स्यात् धनुर्मानविनाशनम् ।
मकरः पुण्यदः प्रोक्तः कुम्भो धनधान्यदः ॥
मीने तु सप्तमे विद्धि एष मासविधिक्रमः ॥"
अपिप्रपञ्चमाह । रुद्रयामले ।
"कार्त्तिकाश्विनवैशाखमाघेऽथ मार्गशीर्षके ।
फाल्गुने श्रावणे दीक्षा पुरश्चर्या प्रशस्यते ॥"

अथ वारनियमः ।

"रविवारे भवेद्वित्तं सोमे शान्तिर्भवेत् किल ।
आयुरङ्गारके हन्ति तत्र दीक्षां विवर्ज्जयेत् ॥
बुधे सौन्दर्य्यमाप्नोति ज्ञानं स्यात्तु बृहस्पतौ ।
शुक्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे ॥"

अथ तिथिनियमः ।

आगमकल्पद्रुमे ।
"प्रतिपत्सु कृता दीक्षा ज्ञाननाशकरी मता ।
द्वितीयायां भवेज्ज्ञानं तृतीयायां शुचिर्भवेत् ॥
चतुर्थ्यां वित्तनाशः स्यात् पञ्चम्यां बुद्धिवर्द्धनम् ।
षष्ठ्यां ज्ञानक्षयं विद्धि सप्तमी सुखमीरिता ॥
अष्टम्यां बुद्धिनाशः स्यात् नवम्यां वपुषः क्षयः ।
दशम्यां राजसौभाग्यमेकादश्यां शुचिर्भवेत् ॥
द्वादश्यां सर्व्वसिद्धिः स्यात् त्रयोदश्यां दरिद्रता ।
तिर्य्यग्योनिश्चतुर्द्दश्यां दीक्षया नात्र संशयः ॥
पक्षान्ते धर्म्मवृद्धिः स्यात् अध्यायं विवर्ज्जयेत् ।
श्वेताम्बरप्रतिपदि भूकम्पोल्कानिपातने ॥
एतान्यन्यांश्च दिवसान् गुरुकार्य्ये परित्यजेत् ।
द्वितीया पञ्चमी चैव षष्ठी चैव विशेषतः ॥
द्वादश्यामपि कर्त्तव्यं त्रयोदश्यामथापि वा ।"
इति यत् त्रयोदशी विधानं तद्विद्याविषयकामार्थमन्यत्रादित्वात् ।
"पञ्चमी सप्तमी षष्ठी द्वितीया पूर्णिमा सिता ।
त्रयोदशी तु दशमी प्रशस्ता सर्व्वकामदा ॥"
इति सनत्कुमारवचनात् ॥ * ॥
शिवविषये सम्प्रयोगिविशेषमाह ।
"शुक्लपक्षे दशमी सप्तमी च विशेषतः ।
निन्द्या सदैव षष्ठी स्यादिति शैवागमान्तरे ॥"

अथ नक्षत्रनियमः ।

"अश्विन्यां सुखमाप्नोति भरण्यां मरणं ध्रुवम् ।
कृत्तिकायां भवेद्दुःखी रोहिण्यां वाक्पति-
र्भवेत् ॥
मृगशीर्षे सुखावाप्तिरार्द्रायां बन्धुनाशनम् ।
पुनर्व्वसौ धनाढ्यः स्यात् पुष्ये शत्रुविनाशनम् ॥
अश्लेषायां भवेन्मृत्युर्म्मघायां दुःखमोचनम् ।
सौन्दर्य्यं पूर्व्वफल्गुन्यां प्राप्नोति च न संशयः ॥
ज्ञानञ्चोत्तरफल्गुन्यां हस्तायाञ्च धनी भवेत् ।
चित्रायां ज्ञानसिद्धिः स्यात् स्वात्यां शत्रुविना-
शनम् ॥
विशाखायां सुखञ्चानुराधायां बन्धुवर्द्धनम् ।
ज्येष्ठायां सुतहानिः स्यात् मूलायां कीर्त्तिवर्द्धनम् ॥
पूर्व्वाषाढ़ोत्तराषाढ़े भवेतां कीर्त्तिदायिके ।
श्रवणायां भवेद्दुःखी धनिष्ठायां दरिद्रता ॥
बुद्धिः शतभिषायां स्यात् पूर्व्वभाद्रे सुखी भवेत् ।
सौख्यं चोत्तरभाद्रे च रेवत्यां कीर्त्तिवर्द्धनम् ॥"
आश्लेषामघयोर्निषेधस्तु शिवमन्त्रेतरविषये ।
तथा च ।
"आर्द्रायां कृत्तिकायाञ्च मन्त्रारम्भः प्रशस्यते ।
शिवस्य तथाश्लेषायां मन्त्रारम्भो यथाक्रमम् ॥"
तन्त्रान्तरे ।
"अश्विनीभरणीस्वातीविशाखाहस्तभेषु च ।
ज्येष्ठोत्तराश्रयेष्वेवं कुर्य्यात् कथाभिषेचनम् ॥"
इति ज्येष्ठाभरणीयोग्रिधानं तत्रागमविषयकमत्रापि बोध्यम् ॥ * ॥

अथ योगादिनियमो तिथ्यादौ ।
"शुभः सिद्धश्च प्रीतिश्च सुधर्म्मस्तथा वरम् ।
प्रीतिः सौभाग्ययोगश्च हर्षणश्च तथा परम् ॥
वृद्धिश्च तथा योगः सर्व्वमन्त्रशुभावहः ॥"
रुद्रयामले ।
"बवश्च कौलवश्चैव तैतिलश्च गरस्तथा ।
वणिजश्च एतेषां च यात्राः शुभदाः स्मृताः ।
करणानि शुभान्येव मन्त्रेष्वेव च भावतः ॥"

अथ करणनियमः ।

"ववबालवकौलवतैतिलगरवणिजानाम् ।
करणानि शुभान्येव मन्त्रेष्वेव भवन्ति ॥"

अथ लग्ननियमः ।

"वृषे सिंहे च कन्यायां धनुर्मीनेऽपि लग्नके ।
कन्यायां च मीने च कुर्य्याद्दीक्षां सुलग्नकम् ॥"

तथा,—
"सिद्धस्य विष्णुमन्त्रे शिवमन्त्रे चर शुभम् ।
द्विःस्वभावगते लग्ने शक्तिमन्त्रे प्रशस्यते ॥"
आगमसंहितायाम् ।
"त्रिषडायगताः पापाः शुभाः केन्द्रत्रिकोणगाः ।
दीक्षायान्तु शुभाः सर्व्वे मन्त्रज्ञा धर्म्मनायकाः ॥"

अथ पक्षनियमः ।

"शुक्लपक्षे भवेद्दीक्षा कृष्णेऽप्यापञ्चमाद्दिनात् ।
तिथिष्वपि मासेषु विशेषो समभिहितः ॥"
रत्नावल्याम् ।
"षष्ठी भाद्रपदे कृष्णे तथा कृष्णचतुर्द्दशी ।
कार्त्तिके नवमी शुक्ला मार्गे शुक्ला तृतीयिका ।
पौषे तु नवमी शुक्ला माघे शुक्ला चतुर्थिका ।
फाल्गुने नवमी शुक्ला चैत्रे कामचतुर्द्दशी ।
वैशाखे चाक्षया चैव ज्यैष्ठे दशहरा तिथि ।
आषाढ़े पञ्चमी शुक्ला श्रावणे कृष्णपञ्चमी ।
एतानि दश पर्व्वाणि सौधकोटिफलं लभेत् ।
अत्र दीक्षा प्रकर्त्तव्या न मासञ्च परीक्षयेत् ।
न वारं न च नक्षत्रं न तिथ्यादिकदूषणम् ।
न योगकरणञ्चैव शुक्रास्तञ्च भाषितम् ॥"
अन्यच्च मतम् ।
"चैत्रे त्रयोदशी शुक्ला वैशाखैकादशी सिता ।
ज्यैष्ठे चतुर्द्दशी कृष्णा आषाढ़े नागपञ्चमी ।
श्रावणैकादशी भाद्रे रोहिणीसहित दशमी ।
आश्विने च महापुण्या महाष्टम्यष्टमीष्टदा ।
कार्त्तिके नवमी शुक्ला मार्गशीर्षे सिते तथा ।
षष्ठी चतुर्द्दशी पौषे माघेऽप्येकादशी सिता ।
फाल्गुन च सिता षष्ठी चैति कालविनिर्णयः ॥"
योगिनीतन्त्रे ।
"अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः ।
रविसङ्क्रान्तिदिवसे युगाद्यायां हरेर्द्दिने ।
मन्वन्तरासु सर्व्वासु महापूजादिने तथा ।
चतुर्थी पञ्चमी चैव चतुर्द्दश्यष्टमी तथा ।
नियमः शुभदः प्रोक्तो दीक्षायामन्यकर्म्मसु ॥"
इत्याश्विनवचनात् चतुर्द्दश्यष्टमीति शक्तिविषयम् ।
चतुर्थीति गणेशविषयम् । तन्त्रकल्पोक्तात् ।
"निन्दितेष्वपि मासेषु दीक्षोक्ता ग्रहणे शुभा ।
सूर्य्यग्रहणकालस्य समानो नास्ति भूतले ॥
तिथिश्चैव महादेवि ! दीक्षायामन्यकर्म्मणि ।
तत्र यद्यत् कृतं सर्व्वमनन्तफलदं भवेत् ॥
रविग्रहणमध्ये चैव सोमस्य ग्रहणे तथा ।
तत्र लग्नादिकं किञ्चिन्न विचार्य्यं कदाचन ॥
रविग्रहमध्ये चैव नान्यदन्वेषितं भवेत् ।
न वारतिथिमासादिशोधनं सर्व्वपर्व्वणि ॥"
एवं चन्द्रग्रहेऽपि । तथा रुद्रयामले ।
"न कुर्य्यात्कालिकीं दीक्षामुपरक्ते विभावसौ ।
न कुर्य्याद्वैष्णवीं तान्तु यदि चन्द्रमसो ग्रहः ॥"
तच्च गोपालश्रीविद्येतरविषयम् ।
"कमपि पुण्ययोगस्य ग्रहणे चन्द्रसूर्य्ययोः ॥"
इति गौतमीयात् ।
"सूर्य्यग्रहणकाले च नान्यदन्वेषितं भवेत् ॥"
इति योगिनीहृदयाच्च ॥ * ॥

सारदायां तु विशेषो यथा —
"दीक्षाकालं प्रवक्ष्यामि शीलतन्त्रानुसारतः ।
कृष्णपक्षस्य चाष्टम्यां शुभे लग्ने शुभे दिने ।
पूर्व्वभाद्रपदा युक्ते मित्रतारादिसंयुते ।
अथवा अनुराधायां रेवत्यां वा प्रशस्यते ॥
वानीयाष्टोभयस्थान मन्त्रस्य यत्र च प्रति ।
इषे चैव विशेषेण कार्त्तिके च विशेषतः ॥"
यामले ।
"श्रीमता काशीबीजानि मायी दीर्घश्च योमनुः ।
कृष्णस्योपगते नाम्नो कृष्णा शक्तिफलप्रदा ॥
अमावास्या सोमवारे भौमवारे चतुर्द्दशी ।
सप्तमी रविवारे च कृष्णपक्षमते समा ॥"
कुलार्णवे ।
"सप्तमी रविवारे च सोमे दशम्येव च ।
चतुर्थी बुधवारे च अष्टमी च बृहस्पतौ ॥
देवपर्व्वसमा ह्येतास्तासु दीक्षां समाचरेत् ॥"
यामले ।
"पुण्यतीर्थे कुरुक्षेत्रे देवीपीठचतुष्टये ।
प्रयागे श्रीगिरौ काश्यां कालाकालं न शोधयेत् ॥"
विष्णुयामले ।
"दर्शादेव समारभ्य यावत् स्यान्नवमी तिथिः ।
तावत्तासु बुधैर्द्दीक्षा सर्व्वाभीष्टफलप्रदा ॥
शुक्लपक्षे विशेषेण तत्रापि तिथिरष्टमी ।
तत्रापि शारदी दुर्गा यत्र देवी यजेद्यत्र ॥
तत्र दीक्षा प्रकर्त्तव्या मासचारीन शोधयेत् ॥"
तथा ।
"बोधने चैव मायायाः कालाकालं न शोधयेत् ॥
अशोकाख्याष्टमी यत्र रामाख्या नवमी तथा ।
अपि माघवार्षिके यत्र ख्यातितिथिरष्टमी ॥
गुरोराज्ञानुरूपेण दीक्षा कार्य्या विशेषतः ॥"
समयाचारतन्त्रे ।
"युगाद्यायां जन्मदिने विवाहदिवसे तथा ।
विषुवायनयोर्द्दर्शे नैव किञ्चिद्विचारयेत् ॥"
तथा,—
"शिष्यानाहूय गुरुणा कृपया दीयते यदा ।
तत्र लग्नादिकं किञ्चिन्न विचार्य्यं कदाचन ॥
सर्व्वे वारा ग्रहाः सर्व्वे नक्षत्राणि च राशयः ।
यस्मिन्नहनि सन्तुष्टो गुरुः सर्व्वे शुभावहाः ॥"
सारसंग्रहे योगिनीतन्त्रे च ।
"ग्रहणे च महातीर्थे नास्ति कालस्य निर्णयः ।
गयायां भास्करक्षेत्रे विरजे चन्द्रपर्व्वते ॥
चट्टले च मतङ्गे च तथा कन्याश्रमेषु च ।
न दक्षिणायने दोषस्तीर्थेष्वेतेषु पार्व्वति ! ॥"
वाराहीतन्त्रे ।
"शुक्रोऽस्ती यदि वा दृश्यो गुर्व्वादित्यो भवेद्यदि ।
स्वप्नलब्धविधिष्वेषु तदा दोषो न विद्यते ॥" * ॥
अथ विद्यासु सर्व्वासु कालादिविचारो नास्ति ।
तदुक्तं मुण्डमालातन्त्रे ।
"कालादिशोधनं नास्ति न चामित्रादिदूषणम् ।"
अथ मालाविषयो मालाशब्दे द्रष्टव्यः । पर-
पदस्य तच्छब्दे द्रष्टव्यम् । कलावतीदीक्षा कला-
वतीशब्दे द्रष्टव्या ।

अथ पञ्चायतनीदीक्षा । यामले ।
"भवानीञ्च यदा मध्ये ऐशान्यामच्युतं यजेत् ।
आग्नेय्यां पार्व्वतीनाथं नैरृत्यां गणनायकम् ॥
वायव्यां तपनञ्चैव पूजाक्रम उदाहृतः ।
यदा तु मध्ये गोविन्दं ऐशान्यां शङ्करं यजेत् ॥
आग्नेय्यां गणनाथञ्च नैरृत्यां तपनं तथा ।
वायव्यामम्बिकाञ्चैव भोगमोक्षैकभूमिकाम् ॥
शङ्करञ्च यदा मध्ये ऐशान्यामच्युतं यजेत् ।
आग्नेय्यां तपनञ्चैव नैरृत्यां गणनायकम् ॥
वायव्यां पार्व्वतीञ्चैव सर्व्वमोक्षप्रदायिनीम् ।
आदित्यञ्च यदा मध्ये ऐशान्यां शङ्करं यजेत् ।
आग्नेय्यां गणनाथञ्च नैरृत्यां केशवं यजेत् ॥
वायव्यामम्बिकां देवीं जगदाधारभूमिकाम् ॥
गणनाथं यदा मध्ये ऐशान्यां केशवं यजेत् ।
आग्नेय्यामीश्वरञ्चैव नैरृत्यां तपनं तथा ॥
वायव्यामीश्वरीञ्चैव पूजयेन्मोक्षदायिनीम् ।
व्यस्ताः समञ्चिता देवा हि सर्व्वोत्तमप्रदाः ॥"
तथा च गणेशविमर्शिन्याम् ।
"शम्भौ मध्यगते हरीनहरभूदयो हरौ शङ्करे
भास्वे नागमुखा रवौ हरगणेशाम्बिकाः
स्थापिताः ।
देव्यां विष्णुहरैकदन्तरवयो लम्बोदरेऽजेश्वरे
माया शङ्करभानवोऽतिसुखदा यद्यास्तु ते
स्थापिताः ॥"
रामार्च्चनचन्द्रिकायां गौतमीये च ।
"यदा तु मध्ये गोविन्द आग्नेय्यां गणनायकम् ।
नैरृत्यां हंसमभ्यर्च्य वायव्यामर्च्चयेच्छिवाम् ॥
ऐशान्यां शङ्करं चैव भोगमोक्षफलाप्तये ॥" इति ।
यदङ्गदेवतायाः पूजने आग्नेय्यादौ गणेशादि
पूजनमुक्तं तदागमोपासकविषयमिति केचित् ।
वस्तुतो वैकल्पिकमिति सम्प्रदायः ॥ एतेषां
पूजनन्तु गौतमीये ।
"गन्धादिभिरुपाभ्यर्च्य मुद्राबन्धनमेव च ।
विश्वसन्तो अपेक्षन्ते नमस्कृत्य समापयेत् ॥" * ॥
अङ्गदेवतापूजाकालस्तु पीठपूजानन्तरम् ।
तथा च सनत्कुमारतन्त्रे ।
"पीठस्यार्च्चनमङ्गदेवचयनं चावरणिका तथा
आवाहं निजसङ्गिकावरणकं ध्यानं प्रभोः
पूजनम् ॥"
अत्र इति पुष्पाञ्जलिं दत्त्वा अङ्गदेवान् समर्च्चयेत् ।
तत्तु प्रतिष्ठितयन्त्रादिविषयम् ॥ * ॥ –
यन्त्रातिरिक्ताधारे पूजने तु कुलावल्याम् ।
"एकपीठे पृथक्पूजां विना यस्तु करोति यः ।
अङ्गाङ्गित्वं परित्यज्य [illegible] ॥"
यच्च ।
"आधारे देवतान्यासपूर्व्वं चान्यदेवताम् ।
उभाभ्यां लभते शापं मन्त्री तस्य न सिद्ध्यति ॥"
तदतदतिरिक्तविषयम् ॥ * ॥
सर्व्वेषामङ्गमन्त्राणां सिद्धादिविचारो नास्ति ।
तथा च,
"सिद्धादिशोधनं नैव अङ्गस्य इति राघव
श्यामादौ तु पञ्चायतनमात्र ।

तथा च रुद्रयामले ।
"शाक्तमार्गे भैरवीतारायां छिन्नमस्तासु भैरवे ।
मन्त्रघोषे तथा रौद्रे पञ्चाङ्गे नेष्यते बुधैः ॥
उपविद्यासु सर्व्वासु घटकर्म्मादिषु साधने ।
नाम्न दीक्षाद्यपेक्षास्ति नानाङ्गादिप्रपूजनम् ॥"
तन्त्रसारे ।
"उपविद्यासु सर्व्वासु तथा प्रयोगसाधने ।
दीक्षां विनैव कर्त्तव्य उपदेशः सदैव हि ॥" * ॥
अथ सङ्क्षेपदीक्षा ।
"सुमुहूर्त्ते सर्व्वतोभद्रे नवं कुम्भं निधाय च ।
सोदकं गन्धपुष्पाभ्यामर्च्चितं वस्त्रसंयुतम् ॥
सर्व्वौषधिनवरत्नपञ्चपल्लवसंयुतम् ।
ततो देवार्च्चनं कृत्वा जुहुयादष्टोत्तरं शतम् ॥"
पञ्चपल्लवमिति । पनसाम्राश्वत्थवटबकुलानि ।
तथा च वाशिष्ठे ।
"पनसाम्रं तथाश्वत्थं वटं बकुलमेव च ।
पञ्चपल्लवमित्युक्तं मुनिभिस्तन्त्रवेदिभिः ॥" * ॥
नवरत्नमिति ।
"मुक्तामाणिक्यवैदूर्य्यं गोमेदान् वज्रविद्रुमौ ।
पद्मरागं मरकतं नीलञ्चेति यथाक्रमात् ॥" * ॥
निबन्धे ।
"शिष्यं स्वलङ्कृतं पश्चात् सम्यगासनमुपवेशयेत् ।
मन्त्रित प्रोक्षणीतोयैः शान्तिकुम्भजलैस्तथा ॥
मन्त्रमष्टोत्तरशतं मन्त्रैरभिषेचयेत् ॥"
अष्टशतम् अष्टोत्तरशतम् ।
"अथ सम्पाद्यैकं हस्तं शिरसि धारयन् ।
सर्व्वोऽस्त्विति मतान् दद्यात् तत शिष्योऽर्च्चयेद्गुरुम् ॥"
यद्वा दीक्षान्तरम् । शङ्खमभ्यर्च्च्य मायान् सदम्भारदशाह मूलेन शिरसि करं निधाय अष्टौ वारान् कर्णे जपेत् । तथा च ।
"तथाऽथवा कश्चिदेकमभ्यर्च्च्य यथाविधम् ।
मन्त्रमुखाभिधिध्याष्टवारं मूलेन केवलम् ॥
निधायाष्टौ जपन् कर्णे उपदेशो स्वयं विधिः ॥"
इति सङ्क्षेपदीक्षा ॥
उपदेशान्तरमाह । विश्वसारे ।
"चन्द्रसूर्य्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये ।
मन्त्रमात्रप्रकथनमुपदेशः स उच्यते ॥"
विश्वसारे ।
"महादीक्षा तथा दीक्षा उपदेशस्तत परम् ।
युगे युगे च कर्त्तव्या उपदेशः कलौ युगे ॥"
इति श्यामानन्दतन्त्रसारः ।

दीक्षान्त, पुं, (दीक्षाया प्रधानयागस्य अन्त अन्तोऽवयवविशेषो यत्र ।) अवभृथः । इत्यमरः । २।७।२७ ॥ "प्रधानयागो दीक्षा तस्या अन्त समापको योऽपरो यज्ञो न्यूनत्वादिदोषशान्त्यर्थ प्रधानयागस्य पूरणार्थं प्रतिज्ञार्थं क्रियते सोऽवभृथ उच्यते । अवदीन विमर्शि योषयतीति नाप्नोति यज । यज्ञावशेषे याने चावभृथः । यज्ञावशेषे स्नानं यत् तदेवावभृथं विदुरिति विकाण्डशेष । यज्ञान्ते तमवभृथाभिषेकपूतमिति रघुः ।" इत्यमरटीकायां भरतः ।

दीक्षित, त्रि, (दीक्ष+कर्त्तरि क्तः । यद्वा, दीक्षा सञ्जाता अस्येति । तारकादित्वात् इतच् ।) सोमपानविशिष्टयागकर्त्ता । यथा । स सोमपति दीक्षित । इत्यमरः । २।७।८ ॥ "स व्रती सोमपानवति अध्वरे यजमान सन् दीक्षित उच्यते । अन्यत्राप्युपचारात् । दीक्ष मौञ्जीज्योपनयननियमव्रतादेशेषु क्त दीक्षाशब्दादितो वा ।" इति तट्टीकायां भरतः ॥ * ॥ गुरुमुखान्मन्त्रग्रहीतमन्त्रः । यथा,—
"अदीक्षिता ये कुर्व्वन्ति जपपूजादिकाः क्रियाः ।
न भवन्ति प्रिये । तेषां शिलायामुप्तबीजवत् ॥
देवि । दीक्षाविहीनस्य न सिद्धिर्न च सद्गतिः ।
तस्मात् सर्व्वप्रयत्नेन गुरुणा दीक्षितो भवेत् ।
अदीक्षितोऽपि मरणे रौरवं नरकं व्रजेत् ॥"
इति तन्त्रसारः ॥ * ॥
काम्पिल्लनगरस्थयज्ञदत्तनामकब्राह्मणः । यथा,
"आसीत् काम्पिल्लनगरे सोमयाजिकुलोद्भवः ।
दीक्षितो यज्ञदत्ताख्यो यज्ञविद्याविशारदः ॥
वेदवेदाङ्गवेदान्तवेदाचारचञ्चुरः ।
राजमान्यो बहुधनो वदान्य कीर्त्तिभाजनः ॥
अग्निशुश्रूषणरतो वेदाध्ययनतत्परः ॥"
इति स्कान्दे काशीखण्डे गन्धवत्युपाख्याने नाम १३ अध्याय ॥ * ॥ (सोमदीक्षः । यथा, महाभारते । २ । ७१ । १ ।
"तत पराजिता पार्था वनवासाय दीक्षिताः ।
अजिनान्युत्तरीयाणि जगृहुश्च यथाक्रमम् ॥")

दीक्षितृ, [ऋ] पुं, (दीक्ष+"सुदीक्षदीक्षश्च ।" ३।२।१५३ । इति तृच बाधित्वा शीलार्थे तृच ।) सोमयाजी । इति केचित् ॥ दीक्षाविशिष्ट । दीक्षधातो कर्त्तरि तृचप्रत्ययेन निष्पन्न ॥

दीक्षितायनी, स्त्री, (दीक्षित तन्नामख्यातब्राह्मण एव अयनं गतिर्यस्या । स्त्रियां टित्वात् ङीप् ।) काम्पिल्लनगरस्थदीक्षितनामकब्राह्मणपत्नी । यथा, काशीखण्डे १३ अध्याये ।
"महापतिव्रता धन्यक पत्नी प्रोवाच तामथ ।
दीक्षितायनि ! कुत्रासि क ते गुणनिधिः सुत ॥
अथ तिष्ठतु किन्तेन क सा मम शुभोर्म्मिका ।
अङ्गीकृर्णनकाले या त्वया मेऽङ्गुलिका कृता ।
नवरत्नमयीं शीघ्र तामानीय प्रयच्छ मे ।
इति श्रुत्वाथ तद्वाक्यं भीता सा दीक्षितायनी ॥"

दीदिवि, पुं स्त्री, (दिव्यन्यनेनेति । दिव+"दिवो द्वे दीर्घश्चाभ्यासस्य ।" उणा । ४ । ५५ । इति क्विन् अभ्यासस्य दीर्घश्च ।) अन्नम् । इत्यमरः । २ । ९ । ४८ ॥ (दीव्यतीति क्विन् ।) बृहस्पती पुं । इति मेदिनी । वे, ३० ॥ (स्वर्गे भक्ते च । इत्युणादिवृत्तौ उज्ज्वलदत्त ॥)

दीदिवि, त्रि, (दिव+क्विन् ।) उदित । इति शब्दरत्नावली ॥ (पुंनपुंसकलिङ्ग । यथा, ऋग्वेदे । १ । १ । ८ ॥
"राजन्तमध्वराणां गोपामृतस्य दीदिविम् ॥"
"दीदिविं मोक्षुक्येन श्रय वा दोतकम् ।" इति तद्भाष्ये सायण ॥)

दीधिति, स्त्री, (दीधीते दीप्यते इति । दीधी+ सञ्ज्ञायां क्तिन् । इट । "अयस्तानेवाम् ।" इति वार्त्तिकछत्रान "यीवर्णयोर्दीधीवेव्योः ।" ७।४।५३ । इति अन्त्यस्य लोपः ।) किरणः । इत्यमरः । १ । ४ । ३३ ॥ (यथा रघुः । ३ । २२ ।
"पुपोष वृद्धिं हरिदश्वदीधिते-
रनुप्रवेशादिव बालचन्द्रमा ॥")

दीधी, ङ ङ शु च देवने । दीप्तौ । इति कविकल्पद्रुमः ॥ (अदा०-आत्म०-अक०-सेट् ।) दीधमध्य । ङ वैदिकः । ङ शु, दीधीते । च, अदीधयत् । बहुलग्रहणादिति परस्मैपदे अनुषङ्गिरिति अत् उत्स्वरूपस्वामिति गुणः । इति दुर्गादास ॥

दीन स्त्री, (दीयते सा इति । दी+क्तः । तस्य निष्ठा तस्य न ।) तगरपुष्पम् । इति राजनिर्घण्टः ॥
(अस्य पर्य्यायो यथा—
"कालानुसारिवा वक्रं तगरं कुटिलं शठम् ।
महोरगं नतं जिह्मं दीनं तगरपादिकम् ॥"
इति वैद्यकरत्नमालायाम् ॥)

दीन, त्रि, (दीयते स्मेति । ङी दीङ क्षये+ "गत्यर्थाकर्म्मकेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्त । "ओदितश्च ।" ८ । २ । ४५ । इति निष्ठातस्य न । यद्वा, दी+"इण्षिञ्जिदीङुष्यविभ्यो नक् ।" उणा । ३ । २ । इति नक् ।) दरिद्र । इत्यमरः । ३ । १ । ४८ ॥ (यथा, मनौ । ८ । २३८ ।
"परेषु दीनवती दीक्षा सर्व्वधर्म्मविवर्ज्जिता ॥")
भीत । इति मेदिनी । ने, २१ ॥ (दुःखित । यथा, रघुः । २ । २५ ।
"सम धतोद्धृतिगुणानि तस्य
दिनानि दीनोद्धरणोचितस्य ॥")

दीना, स्त्री, (दीन+टाप् । भयेन भीतभीतेव लक्ष्यत्वात् तथात्वम् ।) मूषिकस्त्री । इति मेदिनी । ने १ ॥

दीनार, पुं, (दीयते इति । दी+"दीङो नुट् च ।" उणा । ३ । १४ । इति आरन् नुट् च ॥) स्वर्णभूषा । मुद्रा । इत्युणादिकोष ॥ (यथा पञ्चतन्त्रे १ । १२६ ।
"अथ प्राणयापदेशः पञ्चानि तावद्दीनारदैक करोति दत्त्वान् ॥") निष्कपरिमाणम् । इत्यमरः । ३ । ३ । १३ ॥ सुवर्णकर्षद्वयम् । इति तट्टीकासारसुन्दरी ॥ अष्टगवशताराद्य मानमस्तु । कौलिकः । द्वात्रिंशद्रत्तिकापरिमित काञ्चनम् । इति भरत ॥

दीप, ई ङ य ल दीप्ने । इति कविकल्पद्रुम ॥ (दिवा-आत्म-अक-सेट् ।) दीपस्तुल्यत्वीभावः । ई, दीप्तः । ङ य, दीप्यते शिखि वह्निमा । ल, अदीदिपत् अदिदीपत् । इति दुर्गादासः ॥

दीप, पुं, (दीप्यते दीपयति वा स्व परश्चेति । दीप दीपि वा+"इगुपधज्ञाप्रीकिर क ।" ३।१।१३५ । इति क ।) दशासम्बन्धविशिष्ट । तत्पर्य्याय । प्रदीप २ स्नेहाश ३ दीपक ४ कज्जलध्वज ५ दिशान्तर ६ दशाकर्ष ७

ज्योतिष्मान् ७ दशाधन ८ दीपातिलक ९ दीपाख्य ११ नयनोत्सव १२ । इति शब्द-रत्नावली ॥ (यथा, मनौ । ४ । २२९ ।
"वारिदस्तृप्तिमाप्नोति सुखमक्षय्यमन्नदः ।
तिलप्रदः प्रजामिष्टां दीपदश्चक्षुरुत्तमम् ॥")
तदर्थं तैलादिनियमो यथा,—
"घृतं तैलञ्च दीपार्थे तैलान्यन्यानि वर्जयेत् ।"
इत्यादि वह्निपुराणे आह्निकनैमित्तिकाध्याय ॥
अन्यच्च ।
"पुरश्चरणकाले च दीपं दद्यात्तु भैरव ॥
दीपेन लोकान् जयति दीपस्तेजोमयः स्मृतः ।
चतुर्वर्गप्रदो दीपस्तस्माद्दीपैर्यजेत् श्रिये ॥"
इत्युपक्रम्य,—
' घृतप्रदीपः प्रथमस्तिलतैलोद्भवस्तत ।
सार्षपः फलनिर्यासजातो वा राजिकोद्भवः ॥
दधिजश्चान्नजश्चैव प्रदीपाः सप्त कीर्त्तिताः ।
पद्मसूत्रभवा दर्भगर्भसूत्रभवाथवा ।
शणजा वादरी वापि फलकोषोद्भवाथवा ।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधाः स्मृताः ॥
तैजसं राजतं लौहं मार्त्तिकं नारिकेलजम् ।
तृणध्वजोद्भवं वापि दीपपात्रं प्रशस्यते ॥
दीपवृक्षाश्च कर्त्तव्यास्तैजसाद्याश्च भैरव ।
वृक्षेषु दीपो दातव्यो न तु भूमौ कदाचन ॥
सर्व्वसहा वसुमती सहते न त्विदं द्वयम् ।
अकार्य्यपादघातञ्च दीपतापं तथैव च ॥
तस्माद्यथा तु पृथिवी तापं नाप्नोति वै तथा ।
दीपं दद्यान्महादेव्यै अन्येभ्योऽपि च भैरव ॥
कुर्व्वन्तु दीपशीतार्थं यो दीपं तु क्षमेश्वर ।
स तापतापं नरकमाप्नोत्येव शतं समाः ॥
सुव्रतवर्त्तिसंयुक्तैर्ध्यानैरेभिर्मनोहरैः ।
मध्याह्ने वृषकोटौ तु दीपं दद्यात् प्रयत्नतः ॥
सन्ध्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात् ।
न स दीप इति ख्यातो ह्योघवह्निस्तु स स्मृतः ॥
नेत्राह्लादकरः स्वर्चिर्दूरतापविवर्ज्जितः ।
सुशिखः शब्दरहितो निर्धूमो नातिह्रस्वकः ॥
दक्षिणावर्त्तवर्त्तिस्तु प्रदीपः प्रीतिवृद्धये ।
दीपवृक्षस्थितो वापि ग्रहस्तम्भपुरितो ॥
दक्षिणावर्त्तवर्त्ती तु चारुदीप्तः प्रदीपकः ।
उत्तमः प्रोच्यते पुत्र ! सर्व्वतुष्टिप्रदायकः ॥
इत्येव कथितो दीपो मध्यमः परिकीर्त्तितः ।
निर्द्दीपः पात्रतैलाभ्यामधमः परिकीर्त्तितः ॥
शार्ष्णं वा वादरं वार्क्षं लौहं सलिलमेव वा ।
उभयस्मात्तु नो दद्यात् वर्त्तिकायाश्च साधकः ॥
उभाभ्यां सलिलेनैव सततं प्रीतिवृद्धये ॥ ० ॥
वोधयं दीपश्च यस्य वर्त्तिकायाँ न चारयेत् ।
न निर्व्वापयेत्तु दीपं कैश्चित् इत्यादिकान् ।
हत्वा निर्व्वापयेद्दीपं तामिस्रं नरकं व्रजेत् ।
यथामध्याह्निनिर्व्वाणे बन्धे, मासान्तरं च यः ।
प्रदीपं नैव कुर्य्यात्तु हत्वा पक्षे विनीदति ।
असिपात्रेऽथवा रम्ये मुर्ब्वाद्यपवाचिनि ॥
नैव दीपः प्रदातव्यो विद्वद्भिः प्रीतिवृद्धये ।
नैव (भयोपयद्दीपं कदाचिदपि मत्त, ॥

सततं लक्षयोपेतं देवायैतत्प्रकल्पितम् ।
न हरेच्चज्ञानतो दीपं तथा लोभादिना नरः ॥
दीपहर्त्ता भवेदन्धः काणो निर्व्वापको भवेत् ।
उद्दीपदीपग्रन्थिस्य मात्स्यकाञ्चनयुक्तस्य ।
विश्वस्याद्भुपवेदाय दीपमाला निवेदयेत् ।
अक्षतं नैव दीपार्थे क्षरातिद्धृति चोतुर्थयेत् ।
प्रसादार्थं स दद्याद्गन्धपादाद्युपकल्पितम् ।
एवं वा कथितो दीपो धूपश्च प्रकृतं शृणु ॥"
इति कालिकापुराणे ६८ अध्यायः ।
माघे पञ्चविंशत्तमदीपविधिर्यथा —
"दीपं दद्यात् पञ्चवर्त्ती प्रकर्षं तैलेनैव च ।"
इति योगिनीतन्त्रे प्रथमभागे ६ भागे ६ पटलः ।
कार्त्तिकमासे दीपदानस्य माहात्म्यं यथा,—
"शृणु दीपस्य माहात्म्यं कार्त्तिके च हरि-
प्रिय ॥
यस्य यत्नमात्रेण दीपदाने मतिर्भवेत् ।
स एषपदे शुक्लपक्षे गङ्गायाँ यमुनायाम् ।
तुलागतस्य यत् पुण्यं तद्भूयो दीपदानतः ॥
यत्नेन दीपकं यस्तु तिष्ठतैव च पुनः ।
ज्वालयेन्नृपतिशार्दूल ! अश्वमेधेन तस्य किम् ॥
तेनेष्टं क्रतुभिः सर्व्वैः कृतं तीर्थावगाहनम् ।
दीपदानं कृतं येन कार्त्तिके केशवाग्रतः ॥
तावद्गर्ज्जन्ति पापानि दैहेऽस्मिन् मुनि-
सत्तम ॥
यावत् कार्त्तिकमासेन दीपदानं कृतं भवेत् ।
तावद्गर्ज्जन्ति पुण्यानि कर्म्मणि सर्व्वं रक्षतः ।
यावत्तु ज्वलतो दीपः कार्त्तिके केशवाग्रतः ।
भूयोऽपि पितृभिर्गाथा गीता महात्मने ॥
भविष्यन्ति कुलेऽस्माकं कदापि ते सुता इति ।
कार्त्तिके दीपदानेयें तोषयिष्यन्ति केशवम् ।
अपि वक्ष्य भविष्यन्ति कुले सुचरिता सुताः ।
दीपदानं कार्त्तिके ये दास्यन्ति चरितुष्टिदम् ।
गयायां पिण्डदानेन स्नात्वा न चौधन सुते ।
तेषामपि कार्त्तिके दत्तो दीपस्तुष्टिकरो हरेः ।
दीपं दास्यन्ति ये पुत्रास्तुल्यं महागायिन ।
कार्त्तिके धर्म्मनिष्ठेन । नरकादुद्धृता वयम् ॥
मन्त्रहीनं क्रियाहीनं शुचिहीनं जनार्द्दन ॥
सर्व्वं सम्पूर्णतां यातु कार्त्तिके दीपदानतः ।
यतेनैव हि मन्त्रेण दीपं यच्छन्त्यनेकृत ॥
मधुसूदनतुष्ट्यर्थं कार्त्तिके हरिपूजनः ॥"
इति पाद्मे उत्तरखण्डः ॥
अपि च ।
"हास्यते देवदेवाय दीपपुष्पानुलेपनम् ।
अपि मे स कुले भूयादेकादश्यां तिथौ नरः ॥
कार्त्तिकमुपवासन्तु पञ्चपातकनाशिनम् ।
इत्थं पितृणां वचनं श्रुत्वा नृपतिसत्तम ॥
ददौ च दीपान् विधिवत् विष्णोरायतने बलिः ।
शुभमर्त्तैश्च पूर्णान् दीपान् कृतसौकिकान् ॥
सघृतस्य तमैवैव मधुकालविधानतः ।
दीपप्रदानमरणाच्च नरार्जितमेक्षकाद ।
गौराँ सभार्य्यमाकन्दं । विष्णुलोकमवाप्नुत ॥"
इति वामनपुराणम् ॥

दीपं प्रदद्या वैष्णवमीकरस्थे दोषो यथा —
"दीपं यश् प्रदद्याद्यो देवि ! मम कर्म्माणि कारयेत् ।
सत्त्वापराधान्ते भूमे ! पापं प्राप्नोति मानवः ।
तत्कृतं मन्महाभागे ! कथ्यमानं मयानघे ॥
जायते वाहनार्ति कुष्ठी मान्धपरिप्लुतः ।
चाण्डालस्य गृहे तत्र एकेन च संशयः ।
एवं भूत्वा तु तत्र कर्म्मा मम पोषके नष्टो यदि ।
महाकल्पेन जायेत शुद्धिं भागवत यदि ।
प्रायश्चित्तं प्रवक्ष्यामि दीपस्य धर्म्मं नाशनि ।
तरन्ति मनुजा येन सत्र चाण्डालयोनिषु ।
पञ्च कृत्वादि मासस्य शुक्लपक्षे च द्वादशी ।
चतुर्भक्तनाहारमाकाशशयने क्षपेत् ॥
दीपं दद्यादपराह्णे तरन्ति मनुजा शुचि ।
शुचिर्भूत्वा यथान्यायं मम कर्म्म यदि स्थितः ।
एतत्ते कथितं देवि ! धर्म्मतां दीपकस्य तु ।
अपराधोऽयमन्येन यद् हत्वा लभते शुभम् ॥"
इति वराहपुराणम् ॥ ० ॥
पुरुषस्य दीपनिर्व्वाणे दोषो यथा,—
"दीपनिर्व्वापणात् पुंस कुष्माण्डच्छेदनात् स्त्रियः ।
अचिरेणैव कालेन वंशनाशो भवेद्ध्रुवम् ॥०॥
देवार्थे कल्पितदीपस्य निर्व्वाणे दोषो यथा,—
नैव निर्व्वापयेद्दीपं देवार्थमुपकल्पितम् ।
दीपहर्त्ता भवेदन्धः काणो निर्व्वापको भवेत् ॥"
इत्येकादशीतत्त्वे कालिकापुराणम् ।
कार्त्तिकचतुर्दश्यां नरकनिवृत्तये दीपदान
यथा,—
"नरकाय प्रदातव्यो दीपः संपूज्य देवता ।"
इति तिथितत्त्वधृतलिङ्गपुराणम् ॥ ० ॥
पृथिव्यां दीपो न संस्थाप्यः । यथा,—
"सर्व्वसहा वसुमती सहते न त्विदं द्वयम् ।
अकार्य्यपादघातञ्च दीपतापस्तथैव च ॥"
इत्येकादशीतत्त्वधृतकालिकापुराणम् ।
दीपकः त्रौ, (दीपयतीति । दीप + णिच् + ण्वुल् ।)
अर्थालङ्कारः । दीपकारके त्रि । इति मेदिनी ।
के १०४ । कुङ्कुमम् । इति शब्दरत्नावली ॥ ० ॥
अर्थालङ्कारस्य लक्षणं यथा —
"प्रस्तुतानां प्रस्तुतानामथैषां वा यदा भवेत् ।
एकधर्माभिसम्बन्धः स्यात्तदा तुल्ययोगिता ॥
अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥
यथा माघे
बलावलेपादधुनापि पूर्व्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा ।
सती च योषित् प्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि ॥"
इति साहित्यदर्पणे ।१०।६४
अपि च काव्यचन्द्रिकायाम् ।
"यादिक्रियायुक्तत्वधर्मेण यद्येव तु ।
एकत्र वर्त्तिना सर्व्वाकार्य्यो दीपकमेव तु ॥"
यथा,—
अमलकमलकान्तिस्फीतिलक्षकाणि ।
मन्दचन्द्रमालोऽपि तरन्ति हृदयं इयाम् ॥

दीपक, पुं, (दीपयति जठराग्निमिति । दीपि+ ण्वुल् ।) यमानी । इति रत्नमाला । (गुणा-श्चास्य यमानीशब्दे ज्ञेयाः ।) शोषमस्तकः । इति शब्दरत्नावली । दीपः । (यथा, ब्रह्माण्ड पुराणे ।
"विष्णुवेश्मनि यो दद्यात् कार्त्तिके मासि दीपकम् ।
अग्निष्टोमसहस्रस्य फलमाप्नोति मानवः ॥")
श्येन पक्षिजाल्ये पक्षिणो यष्ट्यां च । इति हेमचन्द्रः । ४ । ४ ८ । बाज इति शिकरा इति च भाषा । रागविशेषः । अयं हनूमन्मते षड्रागेषु द्वितीयरागः । ग्रीष्मेचाग्निगतः । अस्य जातिः सम्पूर्णा । ग्रहस्तु षड्जस्वरः । गान-समयस्तु ग्रीष्मर्त्तौ मध्याह्नः । अस्य रूपं यथा । वर्णो रक्तः । वस्त्रं पाटलवर्णम् । गजभूषण हस्तमुक्तामाल्यम् । मत्तहस्त्यारूढोऽयम् । बहु-स्त्रीपरिवृतश्च । कस्यचिन्मते । अन्यथा दीप निर्वापणेनान्धकारमयं यत्र स्थाने स्त्रीभी रमते । अस्य रागिण्यः पञ्च यथा । देशी १ कामोद २ नट ३ केदारा ४ कानरा वा कर्णाटी ५ । पुत्राश्चाष्टौ यथा । कुन्तल १ कमल २ कलिङ्ग वा कलिङ्ग ३ चम्पक ४ कुसुम वा कुसुम ५ राम ६ लहित ७ हिमाल ८ । भरतमते अस्य रागिण्यो यथा । केदारा १ गौरा २ गौड ३ गुर्ज्जरी ४ बङ्गाली ५ । तन्मते पुत्रा यथा । कुसुम १ टङ्क २ नट नारायण ३ सिन्धुगरा ४ क्षिरोदन ५ रघुमङ्गला वा रमणमङ्गला ६ मङ्गलाष्टक ७ अङ्कारू वा आहाना ८ । इति सङ्गीतदर्पणे हिन्दीस्थगीतशास्त्रसम्मतः ॥ (तालविशेषः । यथा, सङ्गीतदामोदरे ।
"प्लुतो लघु प्लुतश्चैव ताले दीपकनामनि ॥")

दीपकिट्टं, क्ली, (दीपस्य किट्टम् ।) दीपज्वाल-कज्जलम् । इति शब्दार्थकल्पतरुः ॥

दीपकूपी, स्त्री, (दीपस्य कूपीव तैलधारकत्वात् ।) दीपवर्त्तिः । पलिता इति भाषा । तत्पर्य्यायः । स्नेहाशी २ दीपखोरी ३ विशाखिका ४ । इति शब्दमाला ॥

दीपखोरी, स्त्री, (दीपं खोरयति गत्याघात करोति स्थिरीकरोतीति । खोर् गतिप्रतिघाते+ णिच्+अच् । गौरादित्वादिह ङीष् ।) दीप कूपी । इति शब्दमाला ॥

दीपध्वजः, पुं क्ली, (दीपस्य ध्वज इव ।) कज्ज लम् । इति जटाधरः ॥

दीपनं, क्ली, (दीपयति वह्निमिति । दीप+णिच् +ल्यु ।) तगरमूलम् । इति रत्नमाला ॥ कुङ्कुमम् । इति त्रिकाण्डशेषः ॥ (मन्त्रसंस्कार विशेषः । यथा, शारदातिलके ।
"मन्त्राणां दश कथ्यन्ते संस्काराः सिद्धिदायिनः ।
जननं जीवनं पश्चात्ताडनं बोधनं तथा ॥
अथाभिषेको विमलीकरणाप्यायने तथा ।
तर्पणं दीपनं गुप्तिर्दशैता मन्त्रसंस्क्रियाः ॥"
"तारमायारमायोगो मनोर्दीपनमुच्यते ॥")

दीपनः, पुं, (दीप्यते इति । दीप+ल्यु ।) मयूर-शिखा । (दीप+णिच्+ल्यु ।) शालिञ्चशाकः । इति शब्दचन्द्रिका ॥ कासमर्द्दः । पलाण्डुः । इति राजनिर्घण्टः ॥ दीपयितरि, त्रि ॥ (यथा, ऋतुसंहारे । १ । ३ ।
"सुवासितं हर्म्म्यतलं मनोरमं
प्रियामुखोच्छ्वासविकम्पितं मधु ।
सुतन्त्रिगीतं मदनस्य दीपनं
शुचौ निशीथेऽनुभवन्ति कामिनः ॥")

दीपनी, स्त्री, (दीप्यते जठरवह्निरनया । दीप+ णिच्+ल्युट् । स्त्रियां ङीप् ।) मेथिका । (अस्याः पर्य्याया यथा,—
"मेथिका मिथिनी मेथिर्दीपनी बहुपत्रिका ।
बोधिनी गन्धबीजा च ज्योतिर्गन्धफला तथा ॥
वल्लरी चन्द्रिका मन्था मिश्रपुष्पा च कैरवी ।
कुञ्चिका बहुपर्णी च पीतबीजा मुनिच्छदा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
पाठा । यमानी । इति राजनिर्घण्टः ॥

दीपनीयः, पुं, (दीप्यते जठरवह्निरनेनेति । दीप+ णिच्+अनीयर् ।) यमानी । इति राज निर्घण्टः । दीपनयोग्ये, त्रि । (यथा सुश्रुते । १ । ४५ ।
"दीपनीयमचक्षुष्यं वातघ्नं दाह नाशनम् ॥")
औषधगणविशेषः । यथा,—
"पिप्पली पिप्पलीमूलं चव्यचित्रकनागरम् ।
दीपनीयः स्मृतो वर्गः कफानिलगदापहः ॥"
इति चरकः ॥

दीपपादपः, पुं (दीपस्य पादप इव ।) दीप वृक्षः । इति शब्दार्थकल्पतरुः ॥

दीपपुष्पः, पुं, (दीप इव पुष्पं यस्य ।) चम्पक वृक्षः । इति राजनिर्घण्टः ॥

दीपवती स्त्री, (दीपवत् तेजस्विनं अस्त्यस्या इति । दीप+मतुप् । मस्य वः ।) कामाख्यायां नदीविशेषः । यथा,—
और्व्व उवाच ।
"शान्तनी कथिता या तु नदी ममस्थलस्थिता ।
तस्याः पूर्व्वं समाख्याता नदी दीपवती मता ॥
एषा च हिमवज्जाता हिन्दवी दीपवत्तम ।
शिव देवमनुष्येषु भन्तीं दीपवती स्मृता ॥
दीपवत्याः पूर्व्वतस्तु मन्दाटो नाम पर्व्वतः ॥"
इति कालिकापुराणे ८२ अध्यायः ॥

दीपवृक्षः, पुं, (दीपस्य वृक्ष इव आधारः ।) दीपा धारः । पिलसुज इति देलका इति च भाषा । तत्पर्य्यायः । दीपतरुः २ ज्योतिर्वृक्षः ३ । इति त्रिकाण्डशेषः ॥ दीपपादपः ४ । इति शब्दार्थ-कल्पतरुः ॥ (यथा, महाभारते । १२ । २ ५५ ।
"यथा प्रदीप्तः पुरतः प्रदीपः
प्रकाशमन्यस्य करोति दीप्यन् ।
तथेह पञ्चेन्द्रियदीपवृक्षा
ज्ञानप्रदीप्ताः परवन्त एव ॥")

दीपशिखा स्त्री (दीपस्य शिखा कारणत्वेन अस्त्यस्याः । अच् । टाप् ।) कज्जलम् । इति शब्दार्थकल्पतरुः ॥ (दीपस्य शिखा ।) प्रदीप ज्वाला ॥ (यथा, रघुः । ६ । ६७ ।
"सञ्चारिणी दीपशिखेव रात्रौ
यं यं व्यतीयाय पतिंवरा सा ॥")

दीपशृङ्खला, स्त्री, (दीपानां शृङ्खलेव ।) दीपाली । इति हारावली । १२४ ।

दीपान्विता, स्त्री, (दीपैरन्विता युक्ता ।) गौण-चान्द्रकार्त्तिकस्यामावास्या । यथा, भविष्य पुराणम् ।
"येयं दीपान्विता राजन् ! ख्याता पञ्चदशी भुवि ।
तस्यां दद्यात् यदन्नं पितॄणां वै महालये ॥
पञ्चदशी अमावास्या । अमावास्यामधिकृत्य ।
दीपमालाश्च कर्त्तव्याः शक्त्या देवगृहेषु च ।
रथ्यापणश्मशानेषु नदीपर्व्वतधातुषु ॥
इति ब्रह्मपुराणोक्तनानास्थानदीपदानेन दीपा-न्विता ख्याता येयमिति विशेषणात् ।" इति आह्निकतत्त्वम् ॥०॥ तत्र कर्म्माणि यथा—
"प्रदोषसमये लक्ष्मीं पूजयित्वा यथाक्रमम् ।
दीपवृक्षास्तथा कार्य्याः शक्त्या देवगृहेष्वपि ॥
चतुष्पथे श्मशानेषु नदीपर्व्वतधातुषु ।
वृक्षमूलेषु गोष्ठेषु चत्वरेषु गृहेषु च ॥
वस्त्रैः पुष्पैः शोभितव्याः क्रयविक्रयभूमयः ।
दीपमालापरिक्षिप्ते प्रदोषे तदनन्तरम् ॥
ब्राह्मणान् भोजयित्वादौ विभज्य च बुभुक्षि-तान् ।
अलङ्कृतेन भोक्तव्यं नववस्त्रोपशोभिना ॥
स्निग्धैर्मुग्धैर्विदग्धैश्च बान्धवैर्भृत्यकैः सह ॥"
इति तिथितत्त्वम् ॥
तत्र श्यामापूजाप्रमाणं यथा,—
"दीपान्विता पार्व्वणाय स्मृता कालार्थनाय च ।
महानिशि द्वितीयं स्यात् पूर्व्वेद्युर्वापराह्नयोः ॥
महानिशि व्याप्तव्याप्तयोः पूर्व्वेद्युरेव द्वितीय कालार्थेन स्यात् इत्यर्थः । प्रथमं पार्व्वणं द्वितीय कालार्थनमिति द्वितीयशब्दस्य तात्पर्य्यम् ।"
इति स्मृतिसारसङ्ग्रहधृतयोगिनीतन्त्रम् ॥०॥
अपरञ्च ।
"दीपोत्सवे चतुर्द्दश्यां अमिषा या भवेत् कुहूः ।
तस्यां या तामसी रात्रिः सोच्यते कालरात्रिका ॥
तस्यां पूजा प्रकर्त्तव्या काली तारा भियङ्करी ॥"
इति कालीकुलसद्भावः ॥

दीपाली, स्त्री, (दीपानां आली श्रेणी ।) दीप माला । तत्पर्य्यायः । दीपशृङ्खला २ । इति हारावली । १२४ ॥ (दीपानां आली यत्र ।) दीपान्वितामावास्या । तत्पर्य्यायः । यक्ष-रात्रिः २ । इति त्रिकाण्डशेषः ॥

दीपिका, स्त्री, (दीपयति प्रकाशयति पदार्थानिति । दीप+णिच्+ण्वुल् । टापि अत इत्वम् ।) अनिरूपितार्थपदार्थप्रकाशकशास्त्रादि-ग्रन्थविशेषः । यथा अर्थ प्रकाश निर्णयेऽनि प्रतिपदीकरणे च शोभिते । तत्त्वार्थादि सन्दिग्धपदार्थे दीपिका क्रियते । तत्त्वदीपिका शब्द-कल्पद्रुमादिदीपिका दृष्टा । रात्रौ-

विशेष । या चिन्तोकरागस्य मती । अस्या ध्यान यथा,—

"प्रदोषकाले घटसम्पूतिष्ठा
प्रदीप्तहस्तावखगावचया ।
सीमन्तसिन्दूरविराजमाना
सुरत्नमाल्या किल दीपिकेयम् ॥"

तस्या गानकाल सायाह्न । इति सङ्गीत-दामोदर ॥ (प्रदीप । यथा, रघु ।८।७ ।

"स ललितकुसुमप्रवालशय्यां
ज्वलितमहौषधिदीपिकासनाथाम् ॥")

प्रकाशिकायाम्, त्रि ॥

दीपिता, [ऋ] त्रि (दीपयतीति । दीप+णिच्+तृच ।) दीप्तिकर्त्ता । इति व्याकरणम् ॥

दीप्र, क्ली, (दीप्यते दीप्तो+क्त । "श्वीदितो निष्ठायाम् ।" ७।२।१४। इति नेट ।) स्वर्णम् । हिङ्गु । इति राजनिर्घण्टः ॥ (अस्य शब्दे हिङ्गुशब्दे च विवृतिरस्य ज्ञेया ॥)

दीप्त, पुं, (दीप+क्त ।) निम्बुक । सिंह । इति राजनिर्घण्ट ॥ (नासागतरोगविशेष । यथा, सुश्रुते उत्तरतन्त्रे २२ अध्याये ।

"घ्राणे भृशं दाहसमन्विते तु
विनिःसरेद्धूम इवेह वायु ।
नासा प्रदीप्तेव च यस्य जन्तो-
र्व्याधिस्तु त दीप्तमुदाहरन्ति ॥"

अस्य प्रतिषेधमाह तत्रैव २४ अध्याये ।

"दीप्ते रोगे पैत्तिक सविधान
कुर्य्यात् सर्व्वं स्वादु यच्छीतलञ्च ॥")

दीप्त त्रि, (दीप+क्त ।) दिभासित । दग्ध । ज्वलित । इति मेदिनी । ते, २५ ॥ (यथा, हरिवंशे । १६८ । ३ ।

"तत प्रकृतयो दीप्ता व्यमाच सूरभाषित ।
दीप्तायां दिशि मावन्तो भयमावेदयन्ति मे ॥")

दीप्तक क्ली, (दीप्तमेव । स्वार्थे कन् ।) स्वर्णम् । इति राजनिर्घण्ट ॥

दीप्तजिह्वा, स्त्री पुं, (दीप्ता जिह्वा यस्या ।) उल्कामुखी शृगाली । इति हारावली ।७८। (प्रदीप्तजिह्वे, त्रि । यथा महाभारते । १। २१८ । ३० ।

"दीप्तास्यो दीप्तजिह्वश्च सम्प्रदीप्तमहाननः ॥")

दीप्तपिङ्गल, पुं (दीप्त पिङ्गलश्च । दीप्त अथ सङ्गत् पिङ्गलो वा ।) सिंह । इति राजनिर्घण्ट ॥

दीप्तरस, पुं (दीप्त उज्ज्वलो रसो यस्य ।) किञ्चुलुक । इति शब्दचन्द्रिका ॥

दीप्तलोचन पुं, (दीप्ते लोचने नेत्रे यस्य ।) विड़ाल । इति राजनिर्घण्ट ॥

दीप्तलोह क्ली, (दीप्त लोहमिव ।) कांस्यम् । इति राजनिर्घण्ट ॥

दीप्ता स्त्री (दीप्त+टाप ।) लाङ्गलिकावृक्ष । इति रत्नमाला । ज्योतिष्मती । सातला । इति राजनिर्घण्ट ॥

दीप्ताक्ष, पुं, (दीप्ते अक्षिणी यस्य ।) विड़ाल । इति शब्दरत्नावली ॥ (प्रदीप्तनेत्रे, त्रि । यथा, महाभारते । १ । २१८ । ३० ।

"दीप्तास्यो दीप्तजिह्वश्च सम्प्रदीप्तमहाननः ॥")

दीप्ताग्नि पुं (दीप्त अग्निर्जठराग्निर्यस्य ।) अगस्त्य । इति त्रिकाण्डशेष ॥ (प्रदीप्तो वह्नि । यथा, भट्टि । २ । ४ ।

"सधूमदीप्ताग्निरुचीनि रेजु
स्ताम्रोत्पलान्याकुलषट्पदानि ॥")

तीक्ष्णजठराग्नियुक्ते, त्रि ॥ (यथा, सुश्रुते । १ । २ ।

"बालत्वोऽल्पतया वापि दीप्ताग्नेस्तवयसस्तु च ॥")

दीप्ताङ्ग, पु, (दीप्त भासितमङ्गमस्य ।) मयूर । इति शब्दरत्नावली ॥

दीप्ति, स्त्री, (दीप+क्तिन् ।) दीपनम् । तत्-पर्य्याय । प्रभा २ रुक् ३ रुचि ४ त्विट् ५ भा ६ भा ७ छवि ८ द्युति ९ दीधिति १० शोचि ११ । इत्यमर ।१।४।३४। माधुर्य्यस्य तीव्रता । स्त्रियां अयत्नजगुण । इति हेमचन्द्र ।२।१६।

"कान्तिरेव वयोभोगदेशकालगुणादिभि ।
उद्दीपितातिविस्तार प्राप्ता चेद्दीप्तिरुच्यते ॥"
इत्युज्ज्वलनीलमणि ॥

(यथा, साहित्यदर्पणे । ३ । १३१ ।

"कान्तिरेवातिविस्तीर्णा दीप्तिरित्यभिधीयते ॥")

लाक्षा । कांस्यम् । इति राजनिर्घण्ट ॥

दीप्तिक, पुं, (दीप्त्या कायतीति । कै+क ।) दुग्धपाषाणवृक्ष । इति राजनिर्घण्ट ॥

दीप्तोपल, पु, (दीप्त सूर्य्यकिरणसम्पर्कात् ज्वलित उपल ।) सूर्य्यकान्तमणि । इति राजनिर्घण्ट ॥

दीप्य, पुं (दीपाय अग्निदीपनाय हितमिति । दीप+"तस्मै हितम् ।" ५।१।५। इति अपूपादित्वात् पक्षे यत् ।) यमानी । (अस्य पर्य्यायो यथा,—

"यमानी दीप्यको दीप्यो भूतिकश्च यमानिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

जीरक । इति राजनिर्घण्ट ॥ (दीपाय साधु रिति । दीप+"तत्र साधु ।" ४ । ४ । ९८ । इति यत् ।) मयूरशिखा । अजटा इति ख्याता । इत्यमर । २ । ४ । १११ ॥

दीप्यक, स्त्री, (दीपाय हित साधुरिति वा । दीप+यत् । तत स्वार्थे कन् ।) अजमोदा । यमानी । (यथा भावप्रकाशे शूलरोगाधिकारे ।

"सैन्धव चन्दनं कुष्ठ दीपकञ्च सम पृथक् ॥")

मयूरचूड़ा । इति मेदिनी । के, १ ५ ॥

दीप्यक, पु, (दीप्य+संज्ञायां स्वार्थे वा कन् ।) अलङ्कार । यमानी । (अस्य पर्य्याया यथा,—

"यमानी दीप्यको दीप्यो भूतिकश्च यमानिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

लोमशमस्तक । इति भरतद्विरूपकोष ॥ (अज मोदा । तत्पर्य्यायो यथा,—

"अजमोदा खराश्वा च मायूरो दीप्यकस्तथा ।
तथा ब्रह्मकुशा प्रोक्ता कारवी लोचमस्तका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमभागे ॥)

दीप्र, त्रि, (दीप्यते इति । दीप+"नमिकम्पिस्म्यजसकमहिंसदीपो र ।" ३ । २ । १६७ । इति र ।) दीप्तिविशिष्ट । इति व्याकरणम् ॥ (यथा कथासरित्सागरे । २५ । १२५ ।

"क्वचित् क्वचिच्चिताज्योतिर्दीप्रदीपप्रकाशितम् ॥")

दीयमान, त्रि (दीयते इति । दा+कर्म्मणि शानच ।) वर्त्तमानदानकर्म्मविषयवस्तु । इति व्याकरणम् । यथा, छन्दश्चिन्तामणौ ।

"विद्याधौतमवद्यशून्य अमरा सत्सङ्गके ।
पूर्व्वसञ्चितमिष्ट दीयमानं न क्षीयते ॥"
इति विष्णादितत्त्वम् ।

दीर्घ, त्रि, (दृणातीति । दॄ विदारणे+बाहुल कात् घञ् ।) आयतम् । इत्यमर । ३।१।६८। (यथा मेघदूते । १ १ ।

"दीर्घीकुर्व्वन् पटु मदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषाय ।
यत्र स्त्रीणां हरति सुरतग्लानिमङ्गानुकूल
शिप्रावात प्रियतम इव प्रार्थनाचाटुकार ॥" [sic: best reading of printed lines: "दीर्घोच्छ्रास समधिकतरोत्कण्ठिता दूरवर्त्ती सङ्कल्पैस्तै विशति विधिना वैरिणा रुद्ध मार्ग ॥"])

दीर्घ, पुं, (दॄ+बाहुलकात् घञ् ।) शालवृक्ष । (यथा वैद्यकरत्नमालायाम् ।

"सालोऽश्वकर्ण क्षुद्रिको वह्नो दीर्घो लता द्रुम ॥")

दृणकट । इति रत्नमाला । रामशर । उष्ट्र । इति राजनिर्घण्ट । पञ्चमवर्णमात्राकालोच्चार्य्य । यथा । इषिवक्रवर्णावसानविषुवचो दीर्घ । इति ज्योतिस्तत्त्वम् ॥ द्विमात्रवर्ण । तद्यथा । आ ई ऊ ॠ ॡ ए ऐ ओ औ । गुरुवर्ण । इति व्याकरणम् ॥ (दीर्घलक्षणं यथा,—

"एकमात्रो भवेद्ध्रस्वो द्विमात्रो दीर्घ उच्यते ।
त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनञ्चार्द्धमात्रकम् ॥")

दीर्घकणा, स्त्री, (दीर्घा कणेति नित्यकर्म्मधारय ।) गौरजीरक । इति राजनिर्घण्ट ॥

दीर्घकण्टक, पुं (दीर्घ कण्टकोऽस्य ।) बर्व्वुर । इति राजनिर्घण्ट ॥

दीर्घकन्धर, पुं, (दीर्घ कन्धरोऽस्य । कप् ।) बकपक्षी । इति शब्दचन्द्रिका ॥

दीर्घकन्दक, क्ली, (दीर्घ कन्दो यस्य । कप् ।) मूलकम् । इति राजनिर्घण्ट ॥ (मूलकशब्देऽस्य गुणादयो विज्ञेया ॥)

दीर्घकन्दिका स्त्री (दीर्घकन्दक+टाप अत इत्वञ्च ।) मुषली । इति राजनिर्घण्ट ॥

दीर्घकन्धर, पु (दीर्घ कन्धरो यस्य ।) बक । इति राजनिर्घण्ट ॥

दीर्घकाण्ड, पु (दीर्घ, काण्डो यस्य ।) गुण्डतृणम् । इति राजनिर्घण्ट ॥

दीर्घकाण्डा स्त्री, (दीर्घ काण्डोऽस्या ।) पाताल गरुड़ीलता । इति राजनिर्घण्ट ॥

दीर्घकील पुं, (दीर्घ कील शल्याकारो यस्य ।) अङ्कोठवृक्ष । इति राजनिर्घण्ट ॥

दीर्घकीलक, पुं (दीर्घकील+स्वार्थे कन् ।) अङ्कोठ वृक्ष । इति जटाधर ॥

दीर्घकूर्च्च क्ली, (दीर्घ कूर्च्चमग्रम् ।) राजान्नम् । इति राजनिर्घण्ट ॥

दीर्घकेश, पुं, (दीर्घा केशा इव लोमान्यस्य ।) भल्लूकः । इति राजनिर्घण्टः ॥ (देशभेदः । यथा बृहत्संहितायाम् । १४ । २६ ।
"एकविलोचनशूलिकदीर्घग्रीवास्यकेशाश्च ॥"
दीर्घाः केशा यस्य ।) आयतकेशे त्रि ॥ (स्त्रियां वा ङीष् स्वाङ्गत्वात् । यथा, महानाटके ॥९१॥
"बिम्बोष्ठी चारुनेत्रा गजपतिगमना दीर्घकेशी सुमध्या ॥")

दीर्घकोशिका, स्त्री, (दीर्घं कोशो यस्याः । ततः स्वार्थे कन् टाप् अत इत्वञ्च ।) दीर्घकोषिका । इत्यमरटीकायां भरतः ॥

दीर्घकोषिका, स्त्री (दीर्घः कोषोऽस्याः । कापि अत इत्वम् ।) भिक्षायिका । झिनुक इति ख्याता । तत्पर्य्यायः । दुर्नामा २ । इत्यमरः । १ । १० । २५ ॥

दीर्घगति, पुं, (दीर्घा आयतस्थानव्यापिनी गतिः पादविक्षेपो यस्य ।) उष्ट्रः । इति राजनिर्घण्टः ॥

दीर्घग्रन्थि, पुं (दीर्घो ग्रन्थिः पर्व्वास्य ।) गजपिप्पली । इति राजनिर्घण्टः ॥ (विवृतिरस्य गजपिप्पलीशब्दे विज्ञेया ॥)

दीर्घग्रीव, पुं, (दीर्घा ग्रीवास्य ।) उष्ट्रः । इति हेमचन्द्रः ।४।३२१॥ क्रौञ्चः । इति राजनिर्घण्टः ॥ (देशभेदः । यथा बृहत्संहितायाम् । १४ । २६ ।
"एकविलोचनशूलिकदीर्घग्रीवास्यकेशाश्च ॥")

दीर्घघाटिक, पुं, (दीर्घा घाटास्यास्तीति । ठन् ।) उष्ट्रः । इति शब्दरत्नावली ॥

दीर्घजङ्गल, पुं, (दीर्घं यथा तथा जङ्गलो गतिशीलः ।) मञ्जानमत्स्यः । इति शब्दमाला ॥

दीर्घजङ्घ, पुं, (दीर्घा जङ्घास्य ।) बकः । इति त्रिकाण्डशेषः ॥ उष्ट्रः । इति जटाधरः ॥ आयतजङ्घायुक्ते, त्रि ॥

दीर्घजिह्व, पुं, (दीर्घा जिह्वा यस्य ।) सर्पः । इति हेमचन्द्रः । ४ । ३६९ ॥ (दानवविशेषः । यथा, महाभारते । १ । ६५ । ३ ।
"भरिष्ठश्च वनायुश्च दीर्घजिह्वश्च दानवः ॥"
स्त्रियां टाप् । राक्षसीविशेषः । यथा, महाभारते । ३ । २८६ । ४४ ।
"हरयो भार्गौ ललाटाक्षीं दीर्घजिह्वा-
मजिह्मिकाम् ॥")

दीर्घतरु, पुं, (दीर्घश्चासौ तरुश्चेति कर्म्मधारयः ।) तालः । इति शब्दार्थकल्पतरुः ॥

दीर्घतिमिषा स्त्री, (दीर्घतिमिष । अभिधानात् स्त्रीत्वम् ।) कर्कटी । इति शब्दमाला ॥

दीर्घतुण्डा स्त्री, (दीर्घं तुण्डं यस्याः ।) छुछुन्दरी । इति कोषान्तरम् ॥

दीर्घतृण पुं, (दीर्घं तृणमिति नित्यकर्म्मधारयः । अभिधानात् पुंस्त्वम् ।) पल्लिवाहः । इति राजनिर्घण्टः ॥

दीर्घदण्ड, पुं, (दीर्घो दण्ड इव काण्डावच्छेदेन ।) एरण्डवृक्षः । इति भावप्रकाशः ॥

दीर्घदण्डक, पुं, (दीर्घदण्ड + स्वार्थे कन् ।) एरण्डवृक्षः । इति जटाधरः ॥

दीर्घदण्डी स्त्री, (दीर्घदण्ड + गौरादित्वात् ङीष् ।) गोरक्षी । इति राजनिर्घण्टः ॥

दीर्घदर्शी, [न्] पुं, (दीर्घं दीर्घात् वा पश्यतीति । णिनिः ।) पण्डितः । इत्यमरः । २ । ७ । ६ ॥ गृध्रः । इति शब्दरत्नावली ॥ भल्लूकः । इति राजनिर्घण्टः ॥ दूरदर्शके, त्रि ॥ (यथा, महाभारते । २ । ३८ । ४३ ।
"स हि धर्म्मं पुरस्कृत्य दीर्घदर्शी परं हितम् ॥")

दीर्घदृष्टि, पुं, (दीर्घा दृष्टिर्ज्ञानमस्य ।) दीर्घदर्शी । इति हलायुधः ॥

दीर्घद्रु, पुं, (दीर्घश्चासौ द्रुश्चेति कर्म्मधारयः ।) तालवृक्षः । इति शब्दचन्द्रिका ॥

दीर्घद्रुम, पुं (दीर्घो द्रुम इति नित्यकर्म्मधारयः ।) शाल्मलिः । इति राजनिर्घण्टः ॥

दीर्घनाद, पुं, (दीर्घो दूरगो नादोऽस्य ।) शङ्खः । इति राजनिर्घण्टः ॥

दीर्घनाल, क्ली, (दीर्घं नालमस्य ।) दीर्घरोहिषकम् । इति राजनिर्घण्टः ॥

दीर्घनाल पुं, (दीर्घं नालं यस्य ।) तृणगुन्द्रः । यावनालः । इति राजनिर्घण्टः ॥

दीर्घनिद्रा स्त्री, (दीर्घा निद्रेति नित्यकर्म्मधारयः ।) मृत्युः । इति हेमचन्द्रः । २ । २३८ ॥ (यथा, मार्कण्डेये । ७ । १२ ।
"सोऽद्य सत्कार्मुकाक्षेपविदीपितदिगन्तरैः ।
शरैर्विभिन्नसर्व्वाङ्गो दीर्घनिद्रां प्रवेक्ष्यति ॥")

दीर्घपटोलिका स्त्री, (दीर्घा पटोलिका ।) लताफलविशेषः । धुँधुल इति भाषा । अस्य गुणाः । स्निग्धत्वम् । कटुत्वम् । विष्टम्भित्वम् । गुरुत्वम् । वातपित्तश्लेष्मविभेदकारित्वम् । मधुरत्वम् । शीतलत्वञ्च । इति राजवल्लभः ॥

दीर्घपत्र, पुं, (दीर्घं पत्रमस्य ।) राजपलाण्डुः । विष्णुकन्दः । हरिदर्भः । कुन्दरः । तालः । इति राजनिर्घण्टः ॥ कपीलुः । इति भावप्रकाशः ॥ (इक्षुभेदः । यथा, सुश्रुते सूत्रस्थाने ४५ अः ।
'कान्तारस्तापसेक्षुश्च काष्ठेक्षुः सूचिपत्रकः ।
नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोशकृत् ॥")

दीर्घपत्रक, पुं, (दीर्घपत्र + स्वार्थे कन् ।) रक्तलशुनः । एरण्डः । विम्बकः । वेतसः । इति राजनिर्घण्टः ॥ करीरवृक्षः । इति शब्दचन्द्रिका ॥ जलजमधूकः । इति जटाधरः ॥ लशुनः । इति हेमचन्द्रः । ४ । २५२ ॥ (इक्षुभेदः । यथा, सुश्रुते सूत्रस्थाने ४५ अः ।
"सूचिपत्रो नीलपोरो नैपालो दीर्घपत्रकः ।
वातलाः कफपित्तघ्नाः सकषाया विदाहिनः ॥")

दीर्घपत्रा, स्त्री, (दीर्घपत्र + टाप् ।) चिमाञ्चिका । पाकुलिपाभेदः । (यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"शालिपर्णी स्थिरा सौम्या त्रिपर्णी पीवरी गुहा ।
विदारिगन्धा दीर्घाङ्गी दीर्घपत्रांशुमत्यपि ॥")
कुशतृणम् । इति रत्नमाला । मधुरा । केतकी । कोकोत्थुपः । इति राजनिर्घण्टः ॥ (विषामरपर्य्याय उद्भिद्भेदः । यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे ।
"चिञ्चा चञ्चुचञ्चुकी च दीर्घपत्रा घनिष्ठका ॥")

दीर्घपत्रिका, स्त्री, (दीर्घपत्र + स्वार्थे कन् टाप् अत इत्वञ्च ।) श्वेतवचा । घृतकुमारी । शालपर्णी । इति राजनिर्घण्टः ॥

दीर्घपत्री, स्त्री, (दीर्घपत्र + गौरादित्वात् ङीष् ।) पलाशीलता । महाचञ्चुशाकः । इति राजनिर्घण्टः ॥

दीर्घपर्णी, स्त्री (दीर्घं पर्णमस्याः । गौरादित्वात् ङीष् ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥ (पृश्निपर्णीशब्देऽस्या विवरणं ज्ञातव्यम् ॥)

दीर्घपल्लव, पुं, (दीर्घः पल्लवो यस्य ।) शणवृक्षः । इति राजनिर्घण्टः । आयतच्छदे, क्ली । तद्वति, त्रि ॥

दीर्घपाद, पुं, (दीर्घौ पादावस्य । समासे अन्त्यलोपः ।) कङ्कपक्षी । इति शब्दरत्नावली ॥

दीर्घपाद् पुं (दीर्घौ पादौ यस्य । समासान्तविधेरनित्यत्वात् अन्त्यलोपाभावश्च ।) कङ्कपक्षी । इति हेमचन्द्रः । ४ । ४० ॥

दीर्घपादप पुं, (दीर्घश्चासौ पादपश्चेति नित्यकर्म्मधारयः ।) तालः । पूगः । इति राजनिर्घण्टः ॥

दीर्घपृष्ठ पुं, (दीर्घं पृष्ठं यस्य ।) सर्पः । इत्यमरः । १ । ८ । ८ ॥

दीर्घफल, पुं, (दीर्घं फलं यस्य ।) आरग्वधवृक्षः । इति राजनिर्घण्टः ॥ (अस्य पर्य्यायो यथा,—
"आरग्वधो राजवृक्षः शम्पाकश्चतुरङ्गुलः ।
आरेवतो व्याधिघातः कृतमालः सुवर्णकः ॥
कर्णिकारो दीर्घफलः स्वर्णाङ्गः स्वर्णभूषणः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

दीर्घफलक, पुं, (दीर्घफल + स्वार्थे कन् ।) अगस्त्यवृक्षः । इति राजनिर्घण्टः ॥ (गुणादयोऽस्य अगस्त्यशब्दे व्याख्याताः ॥)

दीर्घफला, स्त्री, (दीर्घाणि फलानि यस्याः ।) कपिलद्राक्षा । जतुका । इति राजनिर्घण्टः ॥

दीर्घबाला, स्त्री, (दीर्घं बालो यस्याः ।) चमरी । इति राजनिर्घण्टः ॥

दीर्घमारुत, पुं, (दीर्घः अधिकशब्दकारी मारुतो निःश्वासवायुर्यस्य ।) हस्ती । इति त्रिकाण्डशेषः ॥

दीर्घमूल, क्ली (दीर्घं मूलं यस्य ।) लामज्जकम् । इति राजनिर्घण्टः ॥

दीर्घमूल पुं, (दीर्घं मूलं यस्य ।) मोरटलता । बिल्वान्तरवृक्षः । इति राजनिर्घण्टः ॥

दीर्घमूलक क्ली, (दीर्घमूल + स्वार्थे कन् ।) मूलकम् । इति राजनिर्घण्टः ॥

दीर्घमूला, स्त्री, (दीर्घं मूलं यस्याः । टाप् ।) श्यामालता । शालपर्णी । इति रत्नमाला ॥ (यथा सुश्रुते । १ । १८ ।
"प्रियङ्गु समङ्गाधातकी पुन्नाग [illegible]

ओषधस्रपाञ्चजस्रमीक्षयोतोऽञ्जनप्रवेशद-
योऽवश्यको दीर्घमला चेति ।”)

दीर्घगली, स्त्री (दीर्घं गलमस्याः । ङीष् ।) दुरालभा । इति शब्दमाला ॥

दीर्घरद, पुं, (दीर्घौ रदौ दन्तौ यस्य ।) शूकरः । इति त्रिकाण्डशेषः ॥ आयतदन्ते, त्रि ॥

दीर्घरसन, पुं, (दीर्घा रसना जिह्वा यस्य ।) सर्पः । इति शब्दचन्द्रिका ॥

दीर्घरागा, स्त्री, (दीर्घः अधिककालस्थायी रागो यस्याः ।) हरिद्रा । इति राजनिर्घण्टः ॥

दीर्घरात्र, क्ली, (दीर्घा प्रचुरा रात्रयः यस्मिन् । अर्द्धं आदित्वात् अच ।) चिरकालम् । इति त्रिकाण्डशेषः ॥ (पुं दीर्घा चासौ रात्रिश्चेति विग्रहे । “सर्व्वैकदेशसंख्यातपुण्यवर्षाद्दीर्घात्रेः ।” इति मुग्धबोधसूत्रात् अ । पुंस्त्वमभिधानात् ।) दीर्घा निशा च ॥

दीर्घरोमा, [न्] पुं (दीर्घाणि रोमाणि यस्य ।) भल्लूकः । इति शब्दार्थकल्पतरुः ॥ (महादेवस्य भूतानामन्यतम । यथा, हरिवंशे भविष्यपर्व्वणि ।१४।२।
“तस्यानु समनव्यन्त भूतसङ्घा सहस्रशः ।”
“दीर्घरोमा दीर्घग्रीवो दीर्घबाहुर्गिरिक्षम ।”)

दीर्घरोहिषक, क्ली, (दीर्घं रोहिषम् । तत स्वार्थे अज्ञाते वा कन् ।) कतृणभेदः । सुगन्धितृण विशेषः । बड़ रोहिष इति भाषा । तत्पर्य्याय । कटुकाख्यम् २ कटुच्छन्दम् ३ पलेरम् ४ दीर्घनालम् ५ तिक्तसारम् ६ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । कफवातभूतघ्न विषनाशित्वम् । प्रथमसन्निदोषघ्नत्वञ्च । इति राजनिर्घण्टः ॥

दीर्घवंश, पुं, (दीर्घो वंश इव ।) नलः । इति राजनिर्घण्टः ॥ आयते वंशे कुले च ॥

दीर्घवक्त्र पुं, स्त्री, (दीर्घं वक्त्रं मुखं यस्य ।) हस्ती । इति शब्दमाला ॥ (लम्बवक्त्रे त्रि ॥)

दीर्घवल्लिका, स्त्री, कुम्भीरः । इति शब्दार्थकल्पतरुः ॥

दीर्घवल्ली, स्त्री (दीर्घा वल्ली ।) महेन्द्रवारुणी । पातालगरुडी । पलाशी । इति राजनिर्घण्टः ॥ आयता लता च ॥

दीर्घवृन्त पुं, (दीर्घं वृन्तं यस्य ।) श्योनाक वृक्षः । इत्यमरः ।२।४।५७॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
“श्योनाको भूतपुष्पश्च पूतिवृक्षो शुकिद्रुमः ।
दीर्घवृन्तश्च कट्वङ्गो महाकटुकटोऽचरः ।”)

दीर्घवृन्तक, पुं, (दीर्घवृन्त+स्वार्थे कन् ।) श्योनाकः । इति शब्दमाला ॥ श्योनाकभेदः । इति राजनिर्घण्टः ॥ (श्योनाकशब्देऽस्य विवरणं ज्ञातव्यम् ।)

दीर्घवृन्ता, स्त्री, (दीर्घं वृन्तं यस्याः इन्द्रचिर्भिटी । इति राजनिर्घण्टः ॥

दीर्घवृन्तिका, स्त्री (दीर्घं वृन्तं यस्याः । कप् । टापि अत इत्वम् ।) इन्द्रपर्णी । इति शब्दचन्द्रिका ॥

दीर्घशर पुं, (दीर्घः शरः ।) यावनालः । इति राजनिर्घण्टः ॥

दीर्घशाख, पुं, (दीर्घा शाखा यस्य ।) शणवृक्षः । इति राजनिर्घण्टः ॥ शालवृक्षः । इति शब्दचन्द्रिका ॥

दीर्घशाखिका, स्त्री, (दीर्घा शाखा यस्याः । कापि अत इत्वम् ।) गोजाम्बीलुप । इति राजनिर्घण्टः ॥

दीर्घशिम्बिक, पुं, (दीर्घा शिम्बिर्यस्य । कप ।) चणः । इति राजनिर्घण्टः ॥

दीर्घशूकक, क्ली, (दीर्घं शूकं यस्य । कप ।) राजान्नम् । इति राजनिर्घण्टः ॥

दीर्घसक्थ, त्रि (दीर्घे सक्थिनी यस्य । “बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ।” ५ । ४ । ११३ । इति षच ।) दीर्घोरु । इति व्याकरणम् ॥

दीर्घसक्थि, क्ली, (दीर्घे सक्थिनी यस्य । स्वाङ्गादि त्वस्यैव न षच् ।) शकटम् । इति व्याकरणम् ॥

दीर्घसत्र क्ली, (दीर्घं बहुकालसाध्यं सत्रम् ।) यज्ञविशेषः । (यथा, भागवते । १ । १ । २१ ।
“कलिमागतमाज्ञाय क्षेत्रेऽस्मिन् वैष्णवे वयम् ।
आसीना दीर्घसत्रेण कथायां सक्षणा हरेः ।”)
तीर्थविशेष । इति शब्दार्थकल्पतरुः ॥ (यथा महाभारते । ३ । ८२ । १ ९—१ ४ ।
“ततो गच्छेत राजेन्द्र ! दीर्घसत्रं यथाक्रमम् ।
यत्र ब्रह्मादयो देवाः सिद्धाश्च परमर्षयः ।
दीर्घसत्रमुपासन्ते दीक्षिता नियमव्रताः ॥
गमनादेव राजेन्द्र ! दीर्घसत्रमरिन्दम ।
राजसूयाश्वमेधाभ्यां फलं प्राप्नोति मानवः ।”)

दीर्घसुरत पुं (दीर्घं बहुकालव्यापकं सुरतं मैथुनं यस्य ।) कुक्कुरः । इति त्रिकाण्डशेषः ॥

दीर्घसूत्र, त्रि, (दीर्घेण बहुकालेन सूत्रं कार्य्यारम्भो यस्य ।) चिरक्रियः । इत्यमरः ।३।१।१७।
“अदीर्घसूत्रश्च भवेत् सर्व्वकर्म्मसु पार्थिव ।
दीर्घसूत्रस्य नृपतेः कर्म्महानिर्ध्रुवं भवेत् ।
रागे दर्पे च माने च द्रोहे पापे च कर्म्मणि ।
अप्रिये चैव कर्त्तव्ये दीर्घसूत्रः प्रशस्यते ।”
इति मत्स्यपुराणम् ॥
(आयततन्तुकम् । यथा माघे । १ । ६१ ।
“मेरुकाशुक्लविलम्बमध्वनी
दीर्घसूत्रमकरोत् परिधानम् ।”)
विस्तृते तन्तौ, स्त्री ॥

दीर्घसूत्री [न्] त्रि, (दीर्घेण बहुकालं व्याप्य कर्म्मारम्भोऽस्यास्तीति । दीर्घसूत्र+इनि ।) दीर्घसूत्रः । इति हलायुधः ॥ (यथा, गीतायाम् । १८ । २८ ।
“विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते ।”)

दीर्घस्कन्ध, पुं, (दीर्घः स्कन्धो यस्य ।) तालवृक्षः । इति राजनिर्घण्टः ॥

दीर्घा, स्त्री, (दीर्घ+टाप् ।) पृश्निपर्णी । इति राजनिर्घण्टः ॥ (अस्याः पर्य्याया यथा —
“पृश्निपर्णी पृथक्पर्णी लाङ्गुली क्रोष्टुपुच्छिका ।
धावनिः कलशी तन्वी गुहा क्रोष्टुकमेखला ।
दीर्घा शृगालविन्ना च शीघ्रपर्णी चित्रपुच्छिका ।
दीर्घपत्रा अतिगुहा पृथिला चित्रपर्णिका ।”
इति वैद्यकरत्नमालायाम् ।)

दीर्घाध्वग, त्रि, (दीर्घमध्वानं गच्छतीति । गम+डः ।) लेखहारः । याउड़िया इति भाषा । उष्ट्रे, पुं । इति मेदिनी ॥ गे, ५० ॥

दीर्घायु, [स्] पुं, (दीर्घं आयुर्यस्य ।) शाल्मलिवृक्षः । काकः । जीवकवृक्षः । मार्कण्डेयः । चिरजीविनि, त्रि । इति मेदिनी । षे, ५५ ॥ (यथा महाभारते । ७ । ५० । १४ ।
“दीर्घायुषः प्रजाः सर्व्वाः ध्रुवा न म्रियते तत्र ।”)
“तत्र अथापाणि पाद पार्श्वपृष्ठस्तनाग्रदशन-वदनस्कन्धललाट दीर्घाङ्गुलिपर्व्वोच्छ्वासप्रेक्षण बाहुं विस्तीर्णभ्रूस्तनान्तरोरस्क ह्रस्वजङ्घामेढ्रग्रीवं गम्भीरसत्त्वस्वरनाभिमनुच्चैर्बद्धस्तनमुपचितमहारोमशकर्ण पश्चान्मस्तिष्कं स्नातानुलिप्तं मूर्द्धानुपूर्व्वा विशुष्यमाणशरीरं पश्चाच्च विशुष्यमाणहृदयं पुरुषं जानीयाद्दीर्घायुः खल्वयमिति ।”
“गूढ़सन्धिशिरास्नायुः संहताङ्गः स्थिरेन्द्रियः ।
उत्तरोत्तरसुक्षेत्रो यः स दीर्घायुरुच्यते ।
गर्भात् प्रभृत्यरोगो यः शनैः समुपचीयते ।
शरीरज्ञानविज्ञानैः स दीर्घायुः समासतः ।”
इति सुश्रुते सूत्रस्थाने ३५ अध्याये ।)

दीर्घायुध, पुं, (दीर्घं आयुधः ।) कुन्तास्त्रम् । इति त्रिकाण्डशेषः ॥ (दीर्घौ आयुधौ इव दन्तौ यस्य ।) शूकरः । इति शब्दमाला ॥

दीर्घायुष्य:, पुं, (दीर्घं आयुष्यं जीवनं यस्य ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

दीर्घालर्क पुं, (दीर्घः अलर्क इव ।) श्वेतमन्दारकः । इति राजनिर्घण्टः ॥

दीर्घिका स्त्री, (दीर्घैव । दीर्घा+अज्ञातार्थे कन् । टापि अत इत्वम् ।) विस्तृतघनपरिमितजलाशयः । दीघि इति भाषा । तत्पर्य्यायः । वापी २ । इत्यमरः ।१।१ ।२८। (यथा, रघु । १६ । १३ ।
“वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः ॥”)
[Note: verse reading uncertain]
“क्रीडायते मधुकराः
मदाहत कोकनदीर्घिकायाम् ।”)
तज्जलगुणाः । गुरुत्वम् । कटुत्वम् । क्षारत्वम् । पित्तलत्वम् । कफवातनाशित्वञ्च । विह्नपत्री । इति राजनिर्घण्टः ॥

दीर्घेङ्गार, पुं, (दीर्घा इङ्गार ।) कङ्करी । इति राजनिर्घण्टः ॥

दीर्ण त्रि, (दृ विदारे+क्तः ।) विदारितः । (यथा, गो रामायणे । २ । ६८ । २८ ।
“आयसं हृदयं नूनं राममातुरसंहतम् ।
यत्र दीर्णं प्रिये पुत्रे वनवासाय निर्गते ।”)
भीतः । इति मेदिनी । णे, १६ ॥ (यथा, महाभारते । ६ । ३ । ७६ ।
“एको दीर्णं दारयति सिंहो हस्तिशतान्यपि ।
तां दीर्घामनु दीर्यन्ते योधाः शूरतरा अपि ।”)

दीवि, पुं, किकीदिविः । इति शब्दमाला ॥

दु, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां परं सकं अनिट् ।) दवति । इति दुर्गादासः ॥

दु, ट श्री न उपतापे। इति कविकल्पद्रुमः ॥ (स्वां-पर-सकं अकं च अनिट्।) टु, दवथुः। ओ, दूनः। न, दुनोति। उपताप इहोपतप्तीभावः उपतप्तीकरणञ्च। भक्त्येन दुनोमीति जयदेवः। यत्प्रकर्षे सति कार्यकारं दुनोति निगम्यतया स्म चेतः। इति कालिदासः। इति दुर्गादासः ॥

दु, [र्] अ, निषेधः। दुःखम्। निन्दा। अस्य क्षेपणम्। इति दुर्गादासधृतपुरुषोत्तमदेवः ॥

दु, [स्] अ, शोभनाभावम्। कोपः। इति दुर्गादासधृतमेदिनी ॥

दुःकूल, पुं (दुर्दुष्टं तच्चनकं कूलं रोधो यस्मात्। एतद्भूपतया तटस्य विप्लवात् अस्य तथात्वम्।) चोरकाख्यगन्धद्रव्यम्। इति राजनिर्घण्टः ॥

दुःख, तु क तत्क्रियायाम्। इति कविकल्पद्रुमः ॥ (अदन्त-चुरा-पर-सक-सेट्।) विघातमथः।
"काले सद्विलतालये घनपीनपयोधरे।
कान्त सर्व्वगुणोपेतो बालेन्दू रे न लभ्यते ॥"
इति विन्दुच्युतकम्। अस्यार्थः। तडिल्लतालयरूपे सति घनसघनमेघे काले कमनीय सर्व्वगुणोपेतो बालेन्दुः खे आकाशे न लभ्यते पक्षे हे बाले सर्व्वगुणोपेत कान्तः पतिर् रेण लभ्यते। दुःखयति दुःखापयति। महैल्यमथः। इति केचित्। तत्कृतिर् सकरणम्। इति दुर्गादासः ॥

दुःख, क्ली, (दुष्टं दुष्टं खनतीति। खन+ड। यद्वा, दुःखयतीति। दुःख+पचाद्यच्।) असुखम्। इति त्रिकाण्डशेषः ॥ (रोगः। यथा, भावप्रकाशे अर्शोरोगाधिकारे।
"भेकाभः पीड्यते दुःखे शोणितस्रवणभ्रमैः ॥"
"दुःखे रोगे।" इति तट्टीका ॥) मनोधर्म्मविशेषः। न्यायमते आत्मगुणभेदः। तत्र अधर्म्मजन्यः सर्व्वेषां प्रतिकूलम्। इति भाषापरिच्छेदः ॥ तत्पर्य्यायः। पीडा २ बाधा ३ व्यथा ४ अमानस्यम् ५ प्रसूतिजम् ६ कष्टम् ७ कृच्छ्रम् ८ आभीलम् ९। इत्यमरः ॥१।१।०।३॥ अर्त्तिः १० आर्त्तिः ११ पीडनम् १२ अपबाधा १३ बाधनम् १४ आमनस्यम् १५ आमानस्यम् १६ विबाधनम् १७ पीडितम् १८ विहेठनम् १९। इति शब्दरत्नावली ॥ * ॥
"सुखं दुःखञ्च पर्य्यन्तं शोकञ्च मङ्गलालयम्।
भवा इतश्च तत्त्वञ्च योगिनामपि दुर्लभम्॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥ * ॥
(दुःखन्तु आध्यात्मिकाधिदैविकाधिभौतिकभेदात् त्रिविधम्। यदुक्तं तत्त्वकौमुद्याम्। "दुःखत्रयाभिघातात्।" इति।
"दुःखानां त्रयं दुःखत्रयं तत् खलु त्रिविधं आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च। तत्र आध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम्। मानसं कामक्रोधलोभमोहभयेर्ष्याविषादविषयविशेषादर्शननिबन्धनम्। सर्व्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। बाह्योपायसाध्यं दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च। तत्र आधिभौतिकं मानुषपशुपक्षिमृगसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनम्। तदेतत्प्रत्यात्मवेदनीयं दुःखं रजःपरिणामभेदो न शक्यते प्रत्याख्यातुम्। तदनेन दुःखत्रयेणान्तःकरणवर्त्तिना चेतनाशक्तेः प्रतिकूलतयाभिसम्बन्धोऽभिघात इति। एतावता प्रतिकूलवेदनीयत्वं जिहासाहेतुरुक्तम् ॥")
"दुःखमेव प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे ॥
उषितेनोपचारेण दुःखं मोक्षविनाशनम् ॥
अहङ्कारकृतो नित्यं नरो मोहेन चावृतः।
ये मां नैव प्रपद्यन्ते ततो दुःखतरन्तु किम् ॥
सर्व्वाशी सर्व्वविक्रेता नमस्कारविवर्जितः।
ये च मां न प्रपद्यन्ते ततो दुःखतरन्तु किम् ॥
सर्व्वाणि तु सिद्धानि पाकभेदन्तु कारयेत्।
अवैश्वदेवं नरोऽश्नाति तत्र दुःखतरन्तु किम् ॥
प्राप्तकाले वैश्वदेवे दृष्टमतिथिमागतम्।
अदत्त्वा तस्य यो भुङ्क्ते तत्र दुःखतरन्तु किम् ॥
अधर्म्मनिरतस्तु वैश्ये परदाराभिमर्द्दकः।
परोपतापी मन्दात्मा तत्र दुःखतरन्तु किम् ॥
अप्रशस्तानि कर्म्माणि यदि सेवति नरः।
मृत्युकालवशं प्राप्तस्य दुःखतरन्तु किम् ॥
हस्त्यश्वरथयानानि गच्छमानानि पश्यति।
न वै तत्प्राप्यते पृष्ठे तत्र दुःखतरन्तु किम् ॥
अश्नन्ति पिष्टितं केचित् घृतशालिसमन्वितम्।
शुष्कान्नं केचिदश्नन्ति तत्र दुःखतरन्तु किम् ॥
परवस्त्रावृता शय्यां समारोहन्ति भूषिताः।
केचित् तृणेषु शेरन्ते ततो दुःखतरन्तु किम् ॥
विद्वान् सतो गुणश्चैव सर्व्वशास्त्रविशारदः।
केचिन्मूर्खाश्च दृश्यन्ते तत्र दुःखतरन्तु किम् ॥
विद्यमाने धने केचित् कृपणा भोगवर्जिताः।
दरिद्रो जायते दाता तत्र दुःखतरन्तु किम् ॥
पुरुषस्य द्वये भार्य्ये तयोरेकां प्रशंसयेत्।
एकापि दुर्भगा तत्र ततो दुःखतरन्तु किम् ॥
लब्ध्वा तु मानुषीं योनिं पञ्चभूतसमन्विताम्।
मामेव न प्रपद्यन्ते ततो दुःखतरन्तु किम् ॥
लब्ध्वा ब्राह्मणभावञ्च यदि धर्म्मं न मन्यते।
पापकर्म्मरता ह्यन्ते ततो दुःखतरन्तु किम् ॥
एतत्ते कथितं भद्रे ! दुःखकर्म्मविनिश्चयम्।
सर्व्वभूतहितार्थाय यत्त्वया परिपृच्छितम् ॥"
इति वराहपुराणम् ॥ * ॥
दुःखानि यथा,—
पारतन्त्र्यम् १ आधिः २ व्याधिः ३ मानच्युतिः ४ मृत्युः ५ कुभार्य्या ६ वैरम् ७ कृपणसेवा ८ कुग्रामनिवसनम् ९ बहुकन्या १० दारिद्र्यम् ११ परगृहवासः १२ वर्षाप्रवासः १३ भार्य्याद्वयम् १४ कुवस्त्रम् १५ दुष्टकलत्रकत्वम् १६। इति कविकल्पलता ॥ (तद्विशिष्टे, त्रि। इत्यमरः। १।४।२६। यथा हरिवंशे। २६६। ५९।
"सुसुखा न च दुःखा वा न प्रीता नच वर्जिताः॥")

दुःखदोहा, स्त्री (दुःखेन दुह्यते इति। दुह+"खल्वोऽन्तु।" ३।३।१२६। इति खल्।) दुर्दोहगवी। तत्पर्य्यायः। करटा २। इति हेमचन्द्रः। ४।३३५ ॥

दुःखित, त्रि, (दुःखं सञ्जातमस्येति तारकादित्वादितच्।) यद्वा दुःखयतेः कर्म्मणि क्तप्रत्ययः। दुःखी। (यथा, मनौ। ९। २८८।
"बन्धनानि च सर्व्वाणि राजमार्गे निवेशयेत्।
दुःखिता यत्र दृश्येरन् विकृताः पापकारिणः॥")
भावे क्ते, दुःखम्। तत्र क्ली ॥

दुःखी, [न्] त्रि, (दुःखमस्यास्तीति इनि।) दुःखान्वितः। दुःखितः। यथा,—
"दुःखिनोऽदुःखिनो वापि प्राणिनो लब्धचक्षुषः।
आत्मवत् परिपश्यन्ति ते यान्ति परमां गतिम् ॥
त्यक्तात्मसुखभोगेच्छाः सर्व्वसत्त्वसुखैषिणः।
भवन्ति परदुःखेन साधवो नित्यदुःखिताः ॥"
इति वह्निपुराणे धर्म्मोपाख्याननामाध्यायः ॥)

दुःषमम्, अ, (दुर् + सम यथा। "तिष्ठद्गुप्रभृतीनि च।" इत्यव्ययीभावः। "सुविनिर्दुर्भ्यः सुपि।" ८।३।८८। इति षत्वम्।) निन्दनीयम्। तत्पर्य्यायः। निःषमम् २ असमम् ३। इत्यमरः। ३।४।१४ ॥

दुःषमम्, त्रि (दुःषमम्। बाहुलकात् मान्तभावः।) असमञ्जसम्। इति त्रिकाण्डशेषः ॥

दुःषहा, स्त्री, (दुःखेन सह्यतेऽसौ। दुः+सह+अच्। टाप् च।) नागदमनी। इति राजनिर्घण्टः ॥ (दुःसहे त्रि। यथा, रघुः। ११।२०।
"राममन्मथशरेण ताडिता
दुःसहेन हृदये निशाचरी।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा॥")

दुःषाधी, [न्] पुं, (दुष्टं कार्य्यं साधयतीति। दुः+साधि+णिनि।) दौवारिकः। इति शब्दरत्नावली ॥

दुःसाध्य, त्रि, (दुःखेन साध्यते इति। दुः+साध+ण्यत्।) दुःखनिष्पाद्यः। दुःखेन साध्यते निष्पाद्यते यः ॥ (यथा, पञ्चतन्त्रे। १।२५८।
"ततो दुर्गाश्रयो दुःसाध्यो रिपुर्भवति॥")

दुःस्थ, त्रि, (दुर्दुष्टं दुःखेन वा तिष्ठतीति। स्था+क।) दुर्गतः। मूर्खः। दुःखेन तिष्ठति यः। इति मेदिनी। थे ८॥ (यथा मालत्याम्। १।१६।१४।
"मां दुःस्थमपमलमपि पौरुषेण
सम्पादयन् यदुत दर्शितविभवत्वम्॥")
दुःखः। इति शब्दार्थकल्पतरुः ॥

दुःस्पर्श, पुं, (दुःखेन स्पृश्यते इति। दुः+स्पृश+"ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्।" ३।३।१२६। इति कर्म्मणि खल्।) दुरालभा। इत्यमरः। २।४।९१॥ (अस्य पर्य्याया यथा,—
"यासो यवासो दुःस्पर्शो धन्वयासो दुरालभा।"
इति वैद्यकरत्नमालायाम्।) कण्टकारी। इति राजनिर्घण्टः। स्पर्शकठोरे, त्रि। इति मेदिनी। शे, २१। (यथा, भागवते। ३।१०।६।

"रथी मार्गे सद्रथस्य पृष्ठकारान्नीरयन् रहः ।
उन्मूलयन्नगमहीन् यास्यामीको रथध्वजः ॥")

दुःस्पर्शा स्त्री, (दुःखेन स्पृश्यते इति । स्पृश + खल + टाप् च ।) कपिकच्छुः । आकाशवल्ली । कण्टकारी । (अस्याः पर्य्याया यथा,—
"कण्टकारी तु दुःस्पर्शा क्षुद्रा व्याघ्री निदिग्धिका । कण्टालिका कण्टकिनी धावनी दृष्टती तथा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
दुरालभा । इति राजनिर्घण्टः ॥

दुःस्फोटः पुं, (दुःखेन स्फोटयतीति । स्फोटि + अच् ।) शस्त्रभेदः । इति हेमचन्द्रः ॥ ३ । ४५१ ॥

दुकूल, क्ली, (दुष्ट कूलति आवृणोतीति । कूल + "इगुपधज्ञाप्रीकिरः कः ।" ३।१।१३५ । इति कः । पृषोदरात् साधुः । यद्वा दु + "अविपि ऋादिभ्य उलोचौ ।" उणां । ४ । ९० । इति ऊलच् । धातोः कुक् च ।) क्षौमवस्त्रम् । (यथा, रघौ । ७ । १९ ।
"दुकूलवासाः स वधूसमीपं
निन्ये विनीतैरवरोधरक्षैः ॥")
सूक्ष्मवस्त्रम् । इति मेदिनी । ले ११ ॥

दुगूलम् क्ली, (दुकूलं पृषोदरात् कस्य गः ।) दुकूलम् । पट्टवस्त्रम् । इति हेमचन्द्रः । ३ । ३३३ ॥

दुग्धम्, क्ली, (दुह्यते स्मेति । दुह + कर्म्मणि क्तः ।) क्षीरादिलक्षणानि एतच्छब्दस्थविशेषे । दुध इति भाषा । तत्पर्य्यायः । क्षीरम् २ पीयूषम् ३ ऊधस्यम् ४ स्तन्यम् ५ पयः ६ अमृतम् ७ । इति राजनिर्घण्टः । बालजीवनम् ८ । इति भावप्रकाशः । अस्य सामान्यगुणाः । स्वादुरसत्वम् । स्निग्धत्वम् । ओजःकारित्वम् । धातुवर्द्धनत्वम् । वातपित्तहरत्वम् । वृष्यत्वम् । श्लेष्मलत्वम् । गुरुत्वम् । शीतलत्वम् । पित्तवातद गुणगुणत्वञ्च ॥ ॥ गोदुग्धगुणाः । प्राणधारकत्वम् । वयःपुष्टबलशुक्रकारित्वम् । मेध्यत्वम् । रक्तपित्तरोगराजनाशित्वम् । रसायनत्वञ्च ॥ ॥ छागीदुग्धगुणाः । मधुरत्वम् । शीतलत्वम् । मलबन्धविकारित्वम् । रक्तपित्तविकारश्वासकास सर्व्वदोषनाशित्वञ्च ॥ ॥ मेषीदुग्धगुणाः । गुरुत्वम् । स्वादुत्वम् । स्निग्धत्वम् । उष्णत्वम् । कफपित्तनाशित्वञ्च ॥ ॥ माहिषदुग्धगुणाः । अतिस्निग्धत्वम् । निद्राकारित्वम् । वह्निनाशित्वञ्च ॥ ॥ उष्ट्रीदुग्धगुणाः । रूक्षत्वम् । उष्णत्वम् । शोथवातकफनाशित्वम् ॥ ॥ अश्वादुग्धगुणाः । बलकरत्वम् । मधुराम्लरसत्वम् । लघुत्वञ्च ॥ ॥ हस्तिनीदुग्धगुणाः । मधुरत्वम् । पुष्टिकारित्वम् । कषायानुरसत्वम् । गुरुत्वञ्च ॥ ॥ मानुष्यदुग्धगुणाः । प्राणधारकत्वम् । शरीरहितकारित्वम् । हृद्यत्वम् । तर्पणकरत्वञ्च ॥ ॥ प्रातःकाले गोदुग्धस्य गुणाः । गुरुत्वम् । विष्टम्भित्वम् । दुर्जरत्वम् । तस्मात् सूर्य्योदयात् परं याम यामार्द्धमेव वा उषित्वा पयो ग्राह्यम् । ततश्च दोषघ्नं लघु ॥ ॥ दिवसकालावसानेषु गव्यं दोषघ्नम् । इक्षुभक्षकगोदुग्धं शीतवसन्तग्रीष्मर्त्तौ गोदुग्धं च प्रशस्तम् ॥ ॥ इक्षुभक्षकमाषपर्णभक्षकधेनुगोदुग्धं मन्दमध्यमा हितकारकम् ॥ ॥ पक्वशितदुग्धगुणाः । गुरुत्वम् । विष्टम्भित्वम् । दुर्ज्जरत्वञ्च ॥ ॥ अपक्वदुग्धगुणाः । प्रायोऽभिष्यन्दित्वम् । गुरुत्वञ्च ॥ ॥ अतीव क्वथितमायत्वम् । अतशीतं पित्तनाशनम् । धारोष्णं दुग्धम् अमृततुल्यम् । स्त्रीस्तन्यदुग्धं विना अन्यसर्व्वं दुग्धं श्राव्यम् । अपक्वदुग्धं निष्पीतं भवेत् इति ख्यातं दुग्धस्य श्राव्यम् ॥ ॥ दुग्धाग्रगुणाः । चक्षुर्हितत्वम् । बलकारित्वम् । पित्तनाशित्वम् । रसायनत्वञ्च ॥ ॥
"शुक्राव्यवलपिच्छावकुलत्थयवमाषैः ।
क्षीरदधिमाषैश्च प्राप्य क्षीरं विरुध्यते ॥"
इति राजवल्लभः ।

अथ चतुर्व्विधक्षीरगुणाः ।
"वैष्यादिकं पथ्यतमं प्रदोषे
क्षीरं जनानां शृतशीतमाहुः ।
दोहान्तशीतं महिषीपयस्तु
गव्यन्तु धारोष्णमिदं प्रशस्तम् ॥
इष्ट हृद्यमपि वर्द्धनकरं पूर्व्वाह्णपीतं पयो
मध्याह्नेऽनलदायकं रतिकरं लक्ष्म्या विच्छेदनम् ।
बाल्ये वह्निकरं ततो बलकरं वीर्य्यप्रदं वार्द्धके
रात्रौ क्षीरमनेकदोषशमनं सेव्यं ततः सर्व्वदा ॥
क्षीरं सद्भूर्निचितयोषितं य-
दशमैत्तद्विमति प्रयाति ।
यस्मात् दीप कुरुते तदूर्ध्व
विशेषम स्वादुमित रयाणाम् ॥
जीर्णज्वरे कपि शोषे क्षीरं स्वादुशीतमतम् ।
तदेव तरुणे प्रोक्तं विषवद्धन्ति मानुषम् ॥
क्षीरकायगुणः ।
चतुर्थभागं सलिलं निधाय
यथावदुष्णावर्त्तितशुभ्रम पत् ।
धर्म्मामयघ्नं बलपुष्टिकारि
वीर्य्यप्रदं क्षीरमतिप्रशस्तम् ॥
अथ पूर्व्वाह्णकाले स्वादुपराह्णे तु माहिषम् ।
क्षीरं कार्य्यकेर पथ्य मद्रा बालाय सर्व्वदा ॥
क्षीरं न सद्यौव कदाप्युत्तमं
तस्य चैतद्धयीन वार्द्धम् ।
पिष्टान्नधान्यकमाषहृद्य
कोमृतकोकान्नवादिकेष ॥
तथा च,
मत्स्यमांसगुडकण्वलके
कुष्ठमावहति सेवितं पयः ।
शाकजाम्बवरव्यादिवीर्य्य
मारयत्यनुपमान् पयस्तु ॥ ॥
स्निग्ध पीतं गुरु क्षीरं धर्म्मकार्य्ये न सेवयेत् ।
रोगापि कुरुते मन्दे मन्दाग्निं नष्टैव च ॥
विशीर्णाधिका सैव सुपक्वं साविक पयः ।
दुग्धानि नातः सर्व्वे बलपुष्टिविवर्द्धनम् ॥
क्षीरं मधाद्यकादैर्मधुरं चारं मधप्रकृतानाम् ।
कफञ्च पित्तदाहं करोति रक्तामयं कुरुते ॥ ॥
मधुरं निर्दोषमसन क्षीरं मध्यप्रकृतानाम् ।
सलवणमधुरं क्षीरं पित्तानलनं विरसहृताभाम् ।
गुरुहीन निःसारं क्षीरं प्रथमप्रसूतानाम् ।
मध्यमवयसां रसायनमुत्तममिदं दुर्ल्लभन्तु हृदा भाग ॥
तासां मध्यमयातुर्यं गुणिनीनाञ्च मनु मय ।
तद्वापि लवणं क्षीरं मधुरं पित्तनाशकृत् ॥ ॥
दुग्धाञ्च शीतलं स्वादु रुच्यं बलकरं गुरु ।
वातपित्तापहं वृष्यं हृद्यं रक्तवर्द्धनम् ॥"
इति राजनिर्घण्टः ॥ ॥

अथ भावप्रकाशोक्तसामान्यदुग्धगुणाः ।
"दुग्धं सुमधुरं स्निग्धं वातपित्तहरं परम् ।
सद्यः शुक्रकरं शीतं सात्म्यं सर्व्वशरीरिणाम् ॥
जीवनं बृंहणं बल्यं मेध्यं वाजीकरं परम् ।
वयः स्थापकमायुष्यं सन्धिकारि रसायनम् ॥
विरेकवान्तिवस्तीनां सुष्ठमोजोविवर्द्धनम् ।
जीर्णज्वरे मनोरोगे शोषमूर्च्छाभ्रमेषु च ॥
ग्रहण्यां पाण्डुरोगे च दाहे तृषि हृदामये ।
शूलोदावर्त्तगुल्मेषु वस्तिरोगे गुदाङ्कुरे ॥
रक्तपित्तातिसारे च योनिरोगे श्रमे क्लमे ।
गर्भस्रावे च सततं हितं मुनिवरैः स्मृतम् ॥
बालवृद्धक्षतक्षीणाः क्षुद्व्यवायकृशाश्च ये ।
तेभ्यः सदातिशयितं हितमेतदुदाहृतम् ॥"
इति भावप्रकाशः ॥

(दुग्धोत्पत्तिविवरणं यथा,—
"यद् यदाहारजातन्तु रसं क्षीरमिहोच्यते ।
सर् बलञ्च शुक्रञ्च तथा पित्तेन वर्द्धितम् ॥
पाचितं जाठरे वह्नौ पित्तेन सह सञ्चितम् ।
पश्चमांसं शिरायाम क्षीरं तद्धि प्रजायते ॥
तेन क्षीरमिति ख्यातमपि षोमारमर्श मय ।
यान्तं धर्म्मभूतानां जीवनं बलकारकम् ॥
नारीस्तु सप्रधायम मममूह पितरं प्रभ ।
कथ रसस्य सम्प्राप्तिः कथं पचोयति विभो ॥
कथ रक्तस्य सम्प्राप्तिः क्षीरं मासुममोयते ।
काथ सन्न कुमारीणां कन्यानां न कथ भवेत् ॥
एवं पृष्टो महादेवः प्रीतात्मा मुनिपुङ्गव ।
कान्ते कनमरुं प्रश्न परिपृष्टं भिषग्वर ॥
सितासितं तथा रक्तं पित्तेन पाकतो मतम् ।
रक्तं श्वेतत्वमायाति तथा क्षीरं सित भवेत् ॥
क्षीरकाय कुमारीणां कन्यानां न कथ भवेत् ।
अबलात्वाद्यल्पशरत्वात् क्षीरं न जायते ॥
कन्यानां क्षीरकायस्तु नाडीन परिपूरिता ।
क्षीरञ्च न भवेत्तत्कारागीवधादिकं सत ॥
प्रसूताद्ध च नारीषु यदेन तत्र जायते ।
तेन स्रोतो विशुद्धिः स्यात् क्षीरमार्ग प्रवर्त्तते ॥
तस्मात् सद्यः प्रसूतायां जायते श्लेष्मि मयः ।
तेन नाडिस्त्रमायाति सकाशात् परिवर्त्तयेत् ॥
पयश्चापिहतं नारीणां कफदोषकारणम् ॥"
इति हारीते प्रथमे स्थाने अष्टमेऽध्याये ॥)
(अमृतम् । तत्पर्य्यायाश्च यथा,—
"अमृत क्षामर्थं दुग्धम् ।" इति च वैद्यकरत्नमालायाम् ॥

दुग्ध, त्रि, (दुह + क्त ।) प्रपूरितः । इति मेदिनी । धे, ८ ॥ क्षतदोहः । (यथा, हरिवंशे ।२।४५।
"तेनेयं गौर्महाराज ! दुग्धा शस्यानि भारत ! ॥"
दुह + भावे क्त ।) दोहने, क्ली ॥

दुग्धकूपिका, स्त्री, (दुग्धकूपः आधगर्भेऽस्त्यस्याः इति । दुग्धकूप + ठन् । टाप् ।) पिष्टकविशेषः । यथा,—
"तण्डुलचूर्णं विमिश्रितमम्भोरेव सान्द्रपिष्टेन ।
दुग्धकूपिकां विरच्य तास्तु पचेत् सर्पिषा सम्यक् ॥
अथ तां कीलितमध्यां घनमथना पूर्णगर्भाश्च ।
शुद्धसुशृतसदृशीं तमसा तेन पक्वसदनाश्च ।
अतिपाकशुद्धपाके अपयेत् कर्पूरवासिते
शुभ्रस्य ॥"
अस्या गुणाः ।
"अथ दुग्धकूपिका या बल्या पित्तानिलापहा ।
वृष्या शीता गुर्वी शुक्रकरी तर्पणी रुच्या ।
विदधाति कायपुष्टिं हरति दूरमसारिक्षीरम् ॥"
इति भावप्रकाशस्य पूर्वखण्डे २ भागे ॥

दुग्धतालीयं, क्ली, (दुग्धस्य तालाय प्रतिष्ठायै हितम् । दुग्धताल + छः ।) दुग्धाग्रम् । क्षीरफेनः । इति मेदिनी । ये, १११ ॥ दुग्धाग्रम् । इति हेमचन्द्रः ॥

दुग्धपाचन क्ली, (पच्यतेऽस्मिन्निति । पच + अधिकरणे ल्युट् । दुग्धस्य पाचनं पात्रम् ।) दुग्धपाकपात्रम् । तत्पर्य्यायः । पचकम् २ । इति हारावली । २२ ॥

दुग्धपाषाणः, पुं, (दुग्धं क्षीरं पाषाण इव कठिनं यस्य ।) द्रव्यविशेषः । खिरगोला इति भाषा । तत्पर्य्यायः । दुग्धपाषाणक २ दुग्धाश्मा ३ क्षीरी ४ गोमेदसन्निभः ५ पयोभः ६ दौग्धिकः ७ दुग्धी ८ क्षीरपत्र ९ । अस्य गुणाः । रुच्यत्वम् । ईषद्रुक्षत्वम् । ज्वरपित्तहृद्रोगमूत्रकृच्छ्राश्मरीविनाशित्वञ्च । इति राजनिर्घण्टः ॥

दुग्धपुच्छी स्त्री, (दुग्धवत् शुभ्रं पुच्छं गर्भदेशो यस्याः । गौरादित्वात् ङीष् ।) क्षुपविशेषः । दुग्धपेया इति ख्याता । तत्पर्य्यायः । शिवकान्ता २ निद्रा ३ भद्रा ४ नवहूरी ५ । इति शब्दचन्द्रिका ॥

दुग्धफेनः, पुं, (दुग्धस्य फेन इव फेनो यस्य ।) क्षीरडिण्डीरः । तत्पर्य्यायः । मार्जारः २ । इति राजनिर्घण्टः ॥

दुग्धफेनी, स्त्री, (दुग्धवत् शुभ्रः फेनो यस्याः । गौरादित्वात् ङीष् ।) क्षुद्रक्षुपविशेषः । तत्पर्य्यायः । पयःफेनी २ फेनदुग्धा ३ पयस्विनी ४ लूतारिः ५ क्षवकेशुशी ६ गोजापर्णी ७ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । शिशिरत्वम् । विषव्रणापहत्वम् । बल्यत्वम् । शुक्ला रसायनमत्र । इति राजनिर्घण्टः ॥

दुग्धबीजा, स्त्री, (दुग्धवत् शुभ्रं बीजं यस्याः ।) धारवाबादहतासमकुर्भिपिटः । अस्या गुणाः । सुमधुरत्वम् । दुर्जरत्वम् । वीर्य्यपुष्टिदायित्वञ्च । इति राजनिर्घण्टः ॥

दुग्धाग्रं, पुं, (दुग्धवत् शुभ्रं अग्रं मेघं विन्दुविशेषो यस्य ।) उपलविशेषः । इति शब्दार्थकल्पतरुः ॥

दुग्धाब्धितनया, स्त्री, (दुग्धाब्धेः क्षीरसमुद्रस्य तनया ।) लक्ष्मीः । इति कविकल्पलता ॥

दुग्धाश्मा, [न्] पुं, (दुग्धं क्षीरं अश्मा प्रस्तर इव कठिनं यस्य ।) दुग्धपाषाणः । इति राजनिर्घण्टः ॥

दुग्धिका स्त्री (दुग्धं निर्यासो बहुलतया विद्यते यस्याः । दुग्ध + ठन् । टाप् च ।) क्षुपविशेषः । दुधी इति दुधाक्षीर इति च भाषा । तत्पर्य्यायः । स्वादुपर्णी २ क्षीरावी ३ क्षीरिणी ४ दुग्धी ५ क्षीरी ६ क्षीरविषाणिका ७ । इति शब्दरत्नावली ॥ अस्या गुणाः । उष्णत्वम् । गुरुत्वम् । रूक्षत्वम् । वातलत्वम् । गर्भकारित्वम् । स्वादुक्षीरत्वम् । कटुत्वम् । तिक्तत्वम् । मलमूत्रोपघातकारित्वम् । मधुरत्वम् । स्वादुत्वम् । विष्टम्भित्वम् । वृष्यत्वम् । कफकुष्ठकृमिनाशित्वञ्च । इति भावप्रकाशः ॥ क्षुपभेदः । गन्धिका इति ख्याता । तत्पर्य्यायः । उत्तमा २ पुष्पघला ३ उत्तमघटिनी ४ । इति रत्नमाला ॥

दुग्धिनिका, स्त्री, रक्तापामार्गः । इति राजनिर्घण्टः ॥

दुग्धी, स्त्री, (दुग्धं क्षीरं बहुलतया अस्त्यस्या इति । अर्श आद्यच् । ततो गौरादित्वात् ङीष् ।) क्षीरावी । इति मेदिनी । धे ८ ॥ (पर्य्यायोऽस्या यथा, वैद्यकरत्नमालायाम् ।
"उत्तमा दुग्धिका दुग्धी पयोत्तमा प्रतिमधपि ॥")
दुग्धपाषाणः । इति राजनिर्घण्टः ॥

द्रुघ्नकः, पुं, (द्रु उपतापे + भावे क्विप् तुक् च । द्रुत् उपतापः । तन्निराकरणे घ्नोतीति । घ्न + पचाद्यच् ।) सुरागामयमण्डपम् । विहारावपचाषकः । इति मेदिनी । के, १०५ ॥

दुघि, स्त्री (दुघि + बाहुलकात् क ।) दुर्बि । कच्छपी । इत्यमरटीकायां रायमुकुटः ॥

दुण्डुक, त्रि, दुष्टचित्तः । इति शब्दार्थकल्पतरुः ॥

दुण्डुभः, पुं, (दोहति भञ्जतीति । दुह भञ्जने + "उभः किन् कुकिर्दुण्डिभ्याः कपुत्थो रन्नोपश्च ।" १ । ४४० । इति उज्ज्वलदत्तोक्त्या साधुत्वात् उभः अत् रलोपश्च ।) डुण्डुभसर्पः । इत्यमरादिकोषः ॥ (यथा महाभारते ।(।१५४।१७०।
"अरसीपो महारौद्रो माधसञ्जपदुण्डुभाम् ।"
"प्रोक्षितौ बहवो घोरा मोचिपार्श्वसदौम ॥")

दुदमः, पुं, (दुर् दुष्टो दमः । हनोऽन्तरादित्वात् रलोपः ।) वरिनुपकाकुः । इत्यमरः । २ । ३ । १४८ ॥

दुन्दमः पुं, (दुन्द इत्यव्यक्तशब्देन मवति शब्दायते इति । मव शब्दे + अच् ।) दुन्दुभिः । इति शब्दरत्नावली ॥

दुन्दु, पुं, वसुदेवः । इति त्रिकाण्डशेषः । दुन्दुभिवादनम् । इति शब्दरत्नावली ॥

दुन्दुभिः, पुं, (दुन्दु इत्यव्यक्तशब्देन भातीति । भा + बाहुलकात् कि ।) डक्कानिका । तत्पर्य्यायः । भेरी २ आनकः ३ । इत्यमरः । १ । ७ । ६ ॥ (यथा, महाभारते । १ । १२३ । ६६ ।
"आकाशे दुन्दुभीनाश्च बभूव तुमुलः स्वनः ॥")
वरुणः । दैत्यभेदः । इति मेदिनी । भे, १६ ॥ (दानवविशेषः । यथा, हरिवंशे । ३ । ८१ ।
"अभवन् दनुपुत्राश्च शतं तीव्रपराक्रमाः ।"
"प्रकृत्यर्थौ विराधश्च गवेष्ठी दुन्दुभिस्तथा ॥")
रक्षोभेदः । पाशभेदः । इति शब्दरत्नावली ॥ विषम् । इति हेमचन्द्रः । २ । २ ७ ॥ (कुक्कुरवंशीयस्य अन्धकस्य पुत्रः । यथा भागवते । ९ । २४ । २० ।
"अन्धकाद्दुन्दुभिस्तस्मादविद्योतः पुनर्वसुः ॥"
क्रौञ्चद्वीपाधिपतेर्द्युतिमतः पुत्राणामन्यतमः । क्रौञ्चद्वीपस्य देशभेदश्च । यथा, मत्स्ये २६ अध्याये ।
"मुनिश्च दुन्दुभिश्चैव सुता द्युतिमतस्तु वै ।
तेषाञ्च नामभिर्देशाः क्रौञ्चद्वीपाश्रयाः स्मृताः ॥"
"मुनेस्तु मुनिर्देशो वै दुन्दुभेर्दुन्दुभिः स्मृतः ॥"
पर्व्वतविशेषः । यथा, मत्स्यपुराणे ।१२१।१२।
"स एव दुन्दुभिर्नाम शतासमपर्व्वतसन्निभः ।
शब्दकस्तु पुरा वधिन् दुन्दुभिस्ताडितः
सुरैः ॥"
असुरविशेषः । यथा रामायणे । ४ । ९ । ४ ।
"मायावी नाम तेजस्वी पूर्व्वजो दुन्दुभेः सुतः ।
तेन तस्य महद्वैरं वालिनः स्त्रीकृतं पुरा ॥")

दुन्दुभि, स्त्री, अक्षः । पाशकः । इत्यमरः । १ । २ । १६५ ॥ अक्षे पाशकविषये दानविशेषो वित्ति इति ख्याताः । इति केचित् ॥ अक्षविन्दुत्रिकद्वयम् । इति रमणः ॥ विन्दुत्रिकचतुष्टयात्मकसर्व्वशुद्धादिपदसूचीपकरणे पाशटो इति ख्याता । इति केचित् ॥ इति तट्टीकायां भरतः ॥

दुन्दुमारः पुं, धुन्धुमारः । इति शब्दार्थकल्पतरुः ॥

दुरक्षं, क्ली, (दुर्दुष्टमक्षम् ।) दुर्नामम् । इति त्रिकाण्डशेषः ॥

दुरध्वः, पुं (दुर्दुष्टोऽध्वा । "उपसर्गादध्वनः ।" ५ । ४ । ८५ । इति अच् ।) कुपथः । इत्यमरः । २ । १ । १६ ॥

दुरभिग्रहः पुं, (दुःखेन अभिग्रहणेन गृह्यतेऽसौ इति । दुर् + अभि + ग्रह + खल् ।) अपामार्गः । इति राजनिर्घण्टः ॥ (दुरभि + ग्रह + कर्म्मणि खल् ।) दुःखग्राह्ये, त्रि ॥

दुरभिग्रहा स्त्री, (दुरभिग्रह + टाप् ।) कपिकच्छुः । दुरालभा । इति राजनिर्घण्टः ॥

दुराकः, पुं, (दुनोतीति । टु दु उपतापे + "आक सखादि च तु किन् ।" १ । २१९ । इति उज्ज्वलदत्तोक्त्या साधुत्वात् आकप्रत्ययेन निपातनात् साधुः ।) म्लेच्छभेदः । इत्युणादिकोषः ॥

दुराचारः, पुं, (आचर्य्यते इति भावे घञ् । दुर् दुष्ट आचारः इति प्रादिसमासः ।) निन्द्याचरणम् । यथा, अध्यात्मरामायणे ।
"प्राप्ते कलियुगे घोरे नराः पुण्यविवर्जिताः ।
दुराचाररताः सर्व्वे सत्यवार्त्तापराङ्मुखाः ॥"

(दुष्ट आचारो यस्य ।) निन्दिताचारवति, त्रि । (यथा, देवीभागवते । १ । ११ । २६ ।
"महापातकयुक्तस्य दुराचारोऽतिनिन्दित ।")
दुराधर्ष पुं, (दुष्टान् यज्ञविघ्नकारिराक्षसादीन् आधर्षति दूरीकरोतीति । धृष + अच् ।) गौर सर्षप । इति राजनिर्घण्टः । (विष्णु । यथा महाभारते । १३ । १४९ । ९७ ।
"अग्रजमो दुराधर्षः सत्यः कृतिरात्मवान् ।"
"दैत्यादिभिर्धर्षयितुं न शक्यते इति दुराधर्षः ।" इति तद्भाष्ये शङ्कर । दुःखेन आ इषदपि धर्षयितुमशक्य इति । धृष + "ईषद् दुः-सुषु-" । ३ । ३ । १२६ । इति खल् ।) अधर्षणीय, त्रि । (यथा, महाभारते । ६ । १८ । ३२ ।
"भीमसेनो गदां भीमां प्रकर्षन् परिघोपमाम् ।
प्रमथंश्च महासैन्यं दुराधर्षो महामनाः ॥")
दुराधर्षा, स्त्री (दुराधर्ष + स्त्रियां टाप् ।) कुटुम्बिनीवृक्षः । इति राजनिर्घण्टः ॥
दुरारुह , पुं, (दुःखेन आरुह्यते इति । दुर + आ + रुह + "अन्येभ्योऽपि" कर्म्मणि क ।) बिल्व । नारिकेल । इति राजनिर्घण्टः । (दुःखात् आरोहणीये त्रि । यथा, महाभारते । १ । १३० । ७१ ।
"स तां लताप्रतानाग्रां प्रवृद्धिं पुरुषर्षभ ।
यात परमाम्भोज पर्व्वत सुदुरारुहम् ॥")
दुरारुहा, स्त्री (दुरारुह + टाप् ।) खर्ज्जुरी । इति राजनिर्घण्टः ॥
दुरारोह पुं स्त्री, (दुःखेन आरुह्यते इति । रुह + कर्म्मणि खल् ।) खर्ज्जुर । इति राजनिर्घण्टः । दुःखारोहणीये त्रि । (यथा महाभारते । ३ । ५ । १४ ।
"इह वृद्धे महर्षीन्द्र । महती महती द्रुमौ ।
भौमशाखा दुरारोहा स्वसमेय समीपत ॥")
दुरारोहा, स्त्री (दुरारोह + टाप् ।) शाल्मलिवृक्ष । इति विकाण्डशेषः ॥ खर्ज्जूरी । इति राजनिर्घण्टः ॥
दुरालभा, स्त्री (दुःखेन आलभ्यते स्पृश्यते कण्टकित्वात् या सा । दुर + आ + लभ + खल् + टाप् । आलभविभिर्न्नित्यममात् न नुम् ।) स्वनामख्यात-कण्टकगुल्मक्षुपविशेष । स यवासभेद । हिङ्गुया इति ख्याता । तत्पर्य्याय । दुरालभा १ धन्वयास २ ताम्रमूला ३ कच्छुरा ४ दुःस्पर्शा ५ धन्वी ६ धन्वयवासक ७ प्रबोधनी ८ स्वल्प-दला ९ विरूपा १० दुरभिग्रहा ११ दुर्लभा १२ दुराधर्षा १३ । इति राजनिर्घण्टः ॥ यास १४ यवास १५ दुःस्पर्श १६ कुनाशक १७ रोदनी १८ अनन्ता १९ बहुमान्या २० । इत्य-मर । २ । ४ । ९२ ॥ समुद्रान्ता २१ । ताम्रा २२ । इति भावप्रकाश ॥ मरुद्भव २३ । प्रबोध २४ अनन्ता २५ । इति शब्दरत्नावली ॥ निद-ग्धिका २६ । इति जटाधर ॥ (यवासस्य अन्यपर्य्याया ।) अस्या गुणा । मधु-

रत्वम् । ज्वरघ्नत्वम् । वमिपित्तविसर्पदेहदाहाधि-क्यघ्नत्वम् । इति राजनिर्घण्टः ॥ कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । सारत्वम् । अम्लत्वम् । मधुरत्वम् । वातगुल्मप्रमेहनाशित्वञ्च । इति राजनिर्घण्टः ॥
"यवासस्य गुणैस्तुल्या बुधैरुक्ता दुरालभा ॥"
इति भावप्रकाशः ॥
(गङ्गा । यथा, काशीखण्डे । २९ । ७८ ।
"दीप्तरूपा दीर्घदृष्टिर्दीप्ततोया दुरालभा ॥")
दुरालभनीये, त्रि ॥
दुरालम्भा, स्त्री (दुःखेन आलभ्यते इति । दुर + आ + लभ + खल् + नुम् च ।) दुरालभा । इति राजनिर्घण्टः ॥ (यथा, महाभारते । १२ । ८७ । ११ ।
"तीक्ष्णवीर्य्यास्तु भूतानां दुरालम्भाः सक-ण्टकाः ।
रसभूयिष्ठवर्णाच्च तस्मात् तैरुपचारयेत् ॥")
दुरालाप , पुं, (दुष्ट आलाप इति प्रादिसमास ।) गालि । इति शब्दार्थकल्पतरु ॥
दुरासद, त्रि, (दुःखेन आसद्यते इति । दुर + आ + सद् + "ईषद् दुःसुषु-" ३।३।१२६ । इति खल् ।) दुष्प्राप्य । यथा,—
"दुरासदो दुर्विषहो भूतानां च बभूव ह ॥"
इति श्रीभागवतम् ॥
(यथा च, देवीभागवते । १ । १० । ३२ ।
"धर्म्मस्य पुरतः प्राप्ते कामभावे दुरासदे ॥"
(दुष्प्रधृष्य । यथा, माघे । १६ । ३० ।
"घनवारिनिभेदु राजसा
परितो नागकदम्बशैलम ।
नगरेषु भवन्तु तावका
परिकीर्णा भवनैःमहाद्रिभि ॥")
दुरित, क्ली, (इण गतौ + क्त । दुरितेन गमनं नरकादिदुर्गतिप्राप्तियस्मात् ।) पापम् । इत्य-मरः । १ । ४ । २३ ॥ (यथा, रघौ । ८ । २ ।
"दुरितैरपि कर्त्तुमात्मसात्
प्रयतन्ते नृपसूनवो हि यत् ॥")
तद्वति, त्रि ॥
दुरितदमनी, स्त्री (दुरितं पापं दम्यते यया इति । दम + करणे ल्युट् । ङीप् च ।) शमी । इति राजनिर्घण्टः । (दम + ल्यु ।) पापनाशिनी च ॥
दुरितकृत्, पुं, (दुरितम् अभिचारयज्ञं करोतीति । दुरित + कृ + क्विप् तुगागमश्च ।) अभिचार-कर्त्ता । तस्य नरक यथा,—
"इष्टापूर्त्तविलुप्तं कृत्वा स्वधर्म्मत्यक्ता च य ।
स याति क्रिमिभक्ष्ये वै क्रमीशि च दुरितकृत् ॥"
इति विष्णुपुराणे । २ । ६ । १३ ॥
"दुरितकृत् अभिचारकर्त्ता ।" इति तट्टीका ॥
दुरिष्ट त्रि (दुर + इष्ट ।) अतिमन्द । अयम् कठोरैर्वा अनिष्टयज्ञ द्विविष्ट । इति शाकटायनम् ॥
दुरीषणा स्त्री, (दुर्दुष्टा ईषणा इच्छाभिप्रायत्वम् । प्रादिसमास ।) शाप । इति शब्दरत्नावली ॥

दुरूह त्रि,(दुःखेन ऊह्यते इति । दुर + ऊह + कर्म्मणि खल् ।) दुर्वितर्क्य । यथा,—
"काव्यप्रकाशस्य दुरूहपदानी
गदाधरो व्याकुरुते प्रयत्नात् ॥"
इति गदाधरभट्टाचार्य्यकृतकाव्यप्रकाशटीका ॥
दुरोदर क्ली (दुःदुःखमोक्षमस्मादुदरं यस्य । दुष्ट मुदरमस्य वा । पृषोदरादित्वात् साधु ।) द्यूत भेद । पाशकक्रीडा । इत्यमरः ।२।१०।४४ ॥ (यथा, वक्रोक्तिपञ्चाशिकायाम् । २६ ।
"धर्म्मं किं न तनुषे दुरोदरभिन्नेन स्वायतेऽर्थसङ्ग ॥")
दुरोदर, पुं (दुष्टं दुःखं वा यस्मात् उदरं यस्य ।) द्यूतकृत् । (यथा महाभारते । २ । ५६ । ८ ।
"दुरोदरा विहिता ये तु तत्र
महात्मना धृतराष्ट्रेण राज्ञा ॥")
पण । इति मेदिनी । रे, २६० ॥
दुर्ग, क्ली, (दुःखेन गम्यतेऽत्र । दुर + गम + "सुदुरोरधिकरणे ।" ३ । २ । ४८ । इत्यस्य वार्त्तिकोक्त्या ड ।) पर्व्वतादिभिर्दुर्गमं पुरम् । इत्यमरः । २ । ८ । १७ ॥ गड इति कैल्ला इति च भाषा । तत्पर्य्याय । कोट्टम् २ । यथा —
"स्कन्धावारो राजधानी कोट्टदुर्गं पुनः समे ॥"
इति हेमचन्द्र ॥
"अथ कोट्टो राजधानी राजधान्यभिख्यापि ।"
इति शब्दरत्नावली ।
"दुर्गं दुर्ग्गमधिष्ठानं कोट्टोऽस्त्री राजधान्यपि ।"
इति जटाधर ॥
तत्तु बहुविधम् । यथा,—
"षड्विधं दुर्गं नृप कुर्व्वीत यत्नादेकतमं नृप ।
धन्वदुर्गं महीदुर्गं नरदुर्गं तथैव च ।
वार्क्षञ्चैवाम्बुदुर्गञ्च गिरिदुर्गञ्च पार्थिव ॥
सर्व्वेषामेव दुर्गाणां गिरिदुर्गं प्रशस्यते ॥
दुर्गञ्च परिखोपेतं वप्राट्टालकसंयुतम् ।
शतघ्नीयन्त्रमुख्यैश्च शतशश्च समावृतम् ॥"
इति मत्स्ये १६१ अध्याय ॥
राजधातुकरणावलम्बनम् तच्छुभाशुभलक्षणञ्च यथा,—
"दुर्गान्तु सततं कुर्य्यात् प्राकाराट्टालतोरणै ।
दुर्गाश्रमराजाना दुर्ग्गं दुर्गाश्रय चरेत् ॥
दुर्गं यत्र नृपस्यास्ति निम्न दुर्गं प्रशस्यते ।
शतमेको योधयति दुर्गस्थो यो धनुर्धर ॥
शतं दश सहस्राणि तस्मात् दुर्गं प्रशस्यते ।
अब्दुर्गं भूमिदुर्गं च वृक्षदुर्गं तथैव च ।
अरण्यवनदुर्गञ्च श्रेष्ठञ्च परिखावृतम् ।
दुर्गं कार्य्यं बुधैस्तत्र यथायोग्य प्रदर्शित ॥
दुर्गं कुर्व्वन् पुरं कुर्य्यात् त्रिकोणं धनुराकृति ।
वर्त्तुलं वा चतुरस्रं वा नान्यथा नगरं चरेत् ।
मृदङ्गाकृति दुर्गञ्च सततं कुलनाशनम् ॥
यथा राजधराधस्य मध्ये दुर्गा स्थिता पुरा ॥
यत्र पुरी प्रोक्तिताश्च तिस्रो दुर्गे प्रतिष्ठितम् ।
अतस्तत् सर्व्वाकारमतो भद्रक्रिया मता ॥
धीमान् प्राकाराणां मध्ये नगरं पत्तनान्वितम्
इति यद्गच्छते राजपक्षश्च अष्ट भविष्यति ॥

यथापोऽथाद्य भूप ! पुरमिषाकुभूभुजाम् ।
वभूराकृति तथापि ततोऽभूद्विजयप्रदम् ॥
दुर्गभूमौ यतेद्दुर्गा दिक्पालांश्चैव शारत ।
पूजयित्वा विधानेन जय भूप समाप्नुयात ॥
अतो दुर्गं शुभं कुर्य्यात सततं जयवृद्धये ॥"
इति कालिकापुराणे राजनीतिविशेषे ८५ अः ॥
(शैलभेदः । यथा, कालिकापुराणे । ७४ अः ।
"यत्र दुर्गाकयं शैल शिवस्यास्ते मनोहरम् ॥")

दुर्गः पुं, असुरभेदः । य हत्वा चण्डिकाया दुर्गेति नामाभूत् । इति काशीखण्डम् ॥ (यथा, हरिवंशे । १६४ । ९ ।
"विन्ध्यवासिनीं दुर्गेशीं रणदुर्गां रणप्रियाम् ॥"
विष्णुः । यथा, महाभारते । १३ । १४९ । ९६ ।
"दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥")
गुग्गुलुः । इति राजनिर्घण्टः ॥ (दुःखेन गम्यते अत्रेति । दुर् + गम् + अधिकरणे डः ।) दुर्गमे, त्रि । इति मेदिनी । गे ९ ॥

दुर्गकारक, क्ली (निकटस्थवेष्टनेन दुर्गं करोतीति । कृ + "ण्वुल्तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) वृक्षविशेषः । इति शब्दमाला । दुर्गकर्त्तरि त्रि ॥

दुर्गत, त्रि, (दुरं दुरवस्थां गच्छति स्मेति । दुर् + गम् + "गत्यर्थाकर्म्मकश्लिषेति ।" ३ । ४ । ७२ । इति कर्त्तरि क्तः ।) दरिद्रः । इत्यमरः । ३ । १ । ४९ ॥ (यथा आर्य्यासप्तशत्याम् । २९६ ।
"दुर्गतगृहिणी तनये कथयन्ती प्रियतमे च
रागमयी ।
मुग्धा दत्ताभियोगं न मन्यते न प्रतिक्षिपति ॥")

दुर्गति स्त्री, (दुष्टा क्लेशदायिनी गतिः ।) नरकः । इत्यमरः । १ । ९ । १ ॥ (यथा देवीभागवते । ४ । १२ । ६८ ।
"कृत्वा यज्ञं विधानेन दत्त्वा पुण्यं समार्ज्जितम् ।
समाहर महाराज ! पितरं दुर्गतिं गतम् ॥")
दारिद्र्यम् । इति मेदिनी । ते, ११५ ॥ (यथा, महाभारते । १३ । ७ । ८ ।
"कथं भवान् दुर्गतिमीदृशीं गतो
नरेन्द्र तद्ब्रूहि किमेतदीदृशम् ॥')

दुर्गतिनाशिनी स्त्री (दुर्गतिं नाशयतीति । नश + णिच + णिनि + ङीप ।) दुर्गा । यथा,—
"ब्रह्माण्डविजयस्यास्य कवचस्य प्रजापतिः ।
ऋषिश्छन्दश्च गायत्री देवी दुर्गतिनाशिनी ॥'
इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥

दुर्गन्ध क्ली, (दुर्दुष्टो गन्धो यस्य ।) सौवर्चललवणम् । इति हेमचन्द्रः । ४ । २० ॥

दुर्गन्ध, पुं, (दुष्टो गन्धः ।) दुष्टगन्धः । तत्पर्य्यायः । पूतिगन्धिः २ । इत्यमरः । १ । ५ । १० ॥ (यथा, सुश्रुते । १ । १० ।
"सुगन्धं वेत्ति दुर्गन्धं दुर्गन्धस्य सुगन्धिताम् ।
यो वा गन्धान् न जानाति गतासुं तं विनिर्दि-
शेत् ॥")
आम्रातकः । इति शब्दचन्द्रिका ॥ पलाण्डुः । इति भावप्रकाशः ॥ (दुष्टो गन्धो यत्र ।) दुर्गन्धयुक्ते, त्रि । (यथा, मार्कण्डेये । ८ । ८१ ।
"अथाजगाम त्वरितो धर्म्मश्चाण्डालरूपधृक् ।
दुर्गन्धी विकृतो रूक्षः श्मश्रुलो दन्तुरो घृणी ॥")

दुर्गन्धी, [न्] त्रि, (दुर्गन्धोऽस्यास्तीति । दुर्गन्ध + इनि ।) दुर्गन्धयुक्तः । इत्यमरटीकायां रायमुकुटः ॥ (यथा मनुः । ६ । ७६ ।
"अस्थिस्थूणं स्नायुयुतं मांसशोणितलेपनम् ।
चर्म्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ॥")

दुर्गपुष्पी, स्त्री, (दुर्गं दुष्प्राप्यं पुष्पं यस्याः । जातित्वात् ङीष ।) वृक्षविशेषः । केयपुष्पा इति ख्याता । तत्पर्य्यायः । मानसी २ वाणपत्री ३ केशधारिणी ४ । इति शब्दचन्द्रिका ॥

दुर्गम त्रि (दुःखेन गम्यते इति । दुर् + गम + "ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ।" ३ । ३ । १२६ । इति खल् ।) दुर्गः । दुःखेन गमनीयस्थानादि । इति शब्दमाला ॥ (यथा महाभारते । ६ । १४ । ३५ ।
"पार्थिव कोऽभ्यरक्षत गच्छन्तो दुर्गमां गतिम् ॥"
दुःखेन गम्यते ज्ञायते इति । दुर्ज्ञेयः । यथा, महाभारते । १३ । १४ । २९५ ।
"नमो वृषभनाथाय गर्व्वेन्द्रगमनाय च ।
दुर्गमाय नमस्तुभ्यमगम्यगमनाय च ॥"
पुं विष्णुः । यथा, तत्रैव । १३ । १४९ । ९६ ।
विष्णुसहस्रनामकीर्त्तने ।
"दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥"
असुरविशेषः । यथा, मार्कण्डेये । ९१ । ४४ ।
"तत्रैव च वधिष्यामि दुर्गमाख्यं महासुरम् ॥"
क्ली, वनम् । सङ्कटस्थलम् । यथा, महाभारते । १ । ८१ । ३० ।
"राजाय नाहुषस्तात दुर्गमे पाणिमस्पृशत् ॥")

दुर्गलङ्घन, पुं, (दुर्गं दुर्गमस्थानं मरुभूम्यादि लङ्घ्यतेऽनेनेति । लङ्घि + करणे ल्युट् ।) उष्ट्रः । इति हेमचन्द्रः । ४ । १० ॥

दुर्गसञ्चर, पुं, (दुर्गं दुर्गमस्थानं नद्यादिपरपारं सञ्चर्य्यतेऽनेनेति । सम् + चर + पुंसीति घः ।) सङ्क्रमः । इत्यमरः । ३ । २ । २५ ॥ साँको इति भाषा ॥

दुर्गसञ्चार, पुं (दुर्गं नद्यादिपारदुर्गमस्थानं सञ्चर्य्यते गम्यतेऽनेनेति । सम् + चर + घञ् ।) दुर्गसञ्चरः । इत्यमरटीकायां स्वामी ॥

दुर्गा, स्त्री (दुःखेन गम्यते प्राप्यतेऽसौ । गम + अन्येष्वपि दृश्यते । इति डः । दुःखेन गम्यते ज्ञायतेऽस्यामिति । दुर् + गम + "सुदुरोरधिकरणे ।" ३ । २ । ४८ । इत्यस्य वार्त्तिकोक्त्या डः । ततष्टाप् ।) नीली । इति मेदिनी । गे, ९ ॥ अपराजिता । इति शब्दचन्द्रिका ॥ श्यामापक्षी । इति राजनिर्घण्टः ॥ (नववर्षा कुमारी । यथा, देवीभागवते । ३ । २६ । ४३ ।
"नववर्षा भवेद्दुर्गा सुभद्रा दशवार्षिकी ॥"
अस्याः पूजाफलमाह । तत्रैव । ३ । २६ । ५ ।
"दुःखदारिद्र्यनाशाय संग्रामे विजयाय च ।
क्रूरशत्रुविनाशाय तथोग्रकर्म्मसाधने ॥
दुर्गाञ्च पूजयेद्भक्त्या परलोकसुखाय च ॥"
अस्याः पूजामन्त्रं यथा तत्रैव । ३ । २६ । ६० ।
"दुर्गा त्रायति भक्तं या सदा दुर्गार्त्तिनाशिनी ।
दुर्ज्ञेया सर्व्वदेवानां तां दुर्गां पूजयाम्यहम् ॥' ।
हिमालयकन्या । सा शिवभार्य्या गणेशकार्त्तिकेयमाता च । तत्पर्य्यायः ।
उमा २ कात्यायनी ३ गौरी ४ काली ५ हैमवती ६ ईश्वरा ७ शिवा ८ भवानी ९ रुद्राणी १० सर्व्वाणी ११ सर्व्वमङ्गला १२ अपर्णा १३ पार्व्वती १४ मृडानी १५ चण्डिका १६ अम्बिका १७ । इत्यमरः । १ । १ । ३८ ॥ शारदा १८ चण्डी १९ चण्डवती २० चण्डा २१ चण्डनायिका २२ गिरिजा २३ मङ्गला २४ नारायणी २५ महामाया २६ वैष्णवी २७ महेश्वरी २८ महादेवी २९ हिण्डी ३० ईश्वरी ३१ कोट्टवी ३२ षष्ठी ३३ माधवी ३४ नगनन्दिनी ३५ जयन्ती ३६ भार्गवी ३७ रम्भा ३८ सिंहरथा ३९ सती ४० भ्रामरी ४१ दक्षकन्या ४२ महिषमर्द्दिनी ४३ हेरम्बजननी ४४ सावित्री ४५ कृष्णपिङ्गला ४६ वृषाकपायी ४७ लम्बा ४८ हिमशैलजा ४९ कार्त्तिकेयप्रसूः ५० आद्या ५१ नित्या ५२ विद्या ५३ शुभङ्करी ५४ सात्त्विकी ५५ राजसी ५६ तामसी ५७ भीमा ५८ नन्दनन्दिनी ५९ महामायी ६० शूलधरा ६१ सुनन्दा ६२ शुम्भघातिनी ६३ । इति शब्दरत्नावली ॥ ह्री ६४ पर्व्वतराजतनया ६५ हिमालयसुता ६६ महेश्वरवनिता ६७ । इति कविकल्पलता ॥ सत्या ६८ भगवती ६९ ईशाना ७० सनातनी ७१ महाकाली ७२ शिवानी ७३ हरवल्लभा ७४ उग्रचण्डा ७५ चामुण्डा ७६ विधात्री ७७ आनन्दा ७८ महामात्रा ७९ महामुद्रा ८० माकरी ८१ भौमी ८२ कल्याणी ८३ कृष्णा ८४ मानदात्री ८५ मदालसा ८६ मानिनी ८७ चार्व्वङ्गी ८८ वाणी ८९ ईशा ९० वलेशी ९१ भ्रमरी ९२ भूष्या ९३ फाल्गुनी ९४ यती ९५ ब्रह्ममयी ९६ भाविनी ९७ देवी ९८ अचिन्त्या ९९ त्रिनेत्रा १०० त्रिशूला १०१ चर्च्चिका १०२ तीव्रा १०३ नन्दिनी १०४ नन्दा १०५ धरित्रिणी १०६ मातृका १०७ चिदानन्दस्वरूपिणी १०८ मनस्विनी १०९ महादेवी ११० निद्रारूपा १११ भवानिका ११२ तारा ११३ नीलसरस्वती ११४ कालिका ११५ उग्रतारा ११६ कामेश्वरी ११७ सुन्दरी ११८ भैरवी ११९ राजराजेश्वरी १२० भुवनेशी १२१ त्वरिता १२२ महालक्ष्मी १२३ राजीवलोचनी १२४ धनदा १२५ वागीश्वरी १२६ त्रिपुरा १२७ ज्वालामुखी १२८ वगलामुखी १२९ सिद्धविद्या १३० अन्नपूर्णा १३१ विशालाक्षी १३२ सुभगा १३३ सगुणा १३४ निर्गुणा १३५ धवला १३६ गीतिः १३७ गीतवाद्यप्रिया १३८ अट्टालवासिनी १३९ अट्टहासिनी १४० घोरा १४१ प्रेमा १४२ वटेश्वरी १४३ कीर्त्तिदा १४४ बुद्धिदा १४५ अवीरा १४६ पण्डितालयवासिनी १४७ मण्डिता १४८ संवत्सरा १४९ कृष्णरूपा १५० [illegible]

प्रिया १५१ सुगमा १५२ कामिनी १५३ कामरूपा १५४ पुण्यदा १५५ विष्णुचक्रधरा १५६ पञ्चमा १५७ वृन्दावनस्वरूपिणी १५८ अयोध्यारूपिणी १५९ मायावती १६० जीमूतवसना १६१ जगन्नाथस्वरूपिणी १६२ कृत्तिवसना १६३ त्रियामा १६४ जमलार्ज्जुनी १६५ यामिनी १६६ यशोदा १६७ यादवी १६८ जगती १६९ कृष्णजाया १७० सत्यभामा १७१ सुभद्रिका १७२ लक्ष्मणा १७३ दिगम्बरी १७४ पृथुका १७५ तीक्ष्णा १७६ आचारा १७७ अक्रूरा १७८ जाह्नवी १७९ गण्डकी १८० ध्येया १८१ जृम्भणी १८२ मोहिनी १८३ विकारा १८४ अक्षरवासिनी १८५ अंशका १८६ पत्रिका १८७ पवित्रिका १८८ तुलसी १८९ अतुला १९० जानकी १९१ वन्द्या १९२ कामना १९३ नारसिंही १९४ गिरीशा १९५ साध्वी १९६ कल्याणी १९७ कमला १९८ कान्ता १९९ शान्ता २०० कुला २०१ वेदमाता २०२ कर्म्मदा २०३ सन्ध्या २०४ त्रिपुरसुन्दरी २०५ रासेशी २०६ दक्षयज्ञविनाशिनी २०७ अनन्ता २०८ धर्म्मेश्वरी २०९ चक्रेश्वरी २१० खञ्जना २११ विदग्धा २१२ कुब्जिका २१३ चित्रा २१४ सुलेखा २१५ चतुर्भुजा २१६ राका २१७ प्रज्ञा २१८ ऋद्धिदा २१९ तापिनी २२० तपा २२१ सुमन्त्रा २२२ दूती २२३ । इति दुर्गासहस्रनामामृतम् ॥

अथ दुर्गानाम्नो व्युत्पत्तिर्यथा,—

'दुर्गो दैत्ये महाविघ्ने भवबन्धे कुकर्म्मणि ।
शोके दुःखे च नरके यमदण्डे च जन्मनि ॥
महाभयेऽतिरोगे चाप्याशब्दो हन्तृवाचकः ।
एतान् हन्त्येव या देवी सा दुर्गा परिकीर्त्तिता ॥"

अपि च ।

"दैत्यनाशार्थवचनो दकारः परिकीर्त्तितः ।
उकारो विघ्ननाशस्य वाचको वेदसम्मतः ॥
रेफो रोगघ्नवचनो गश्च पापघ्नवाचकः ।
भयशत्रुघ्नवचनश्चाकारः परिकीर्त्तितः ॥
स्मृत्युक्तिश्रवणाद्यस्या एते नश्यन्ति निश्चितम् ।
ततो दुर्गा हरेः शक्तिर्हरिणा परिकीर्त्तिता ॥
दुर्गेति दैत्यवचनोऽप्याकारो नाशवाचकः ।
दुर्गं नाशयति या नित्यं सा दुर्गा वा प्रकीर्त्तिता ॥
विपत्तिवाचको दुर्गश्चाकारो नाशवाचकः ।
तं ननाश पुरा तेन बुधैर्दुर्गा प्रकीर्त्तिता ॥" ३ ।

अस्याः ध्यानं यथा, नन्दं प्रति श्रीकृष्णवाक्यम् ।

"आद्या नारायणी शक्तिः सृष्टिस्थित्यन्तकारिणी ।
करोति च सदा सृष्टिं यया ब्रह्मा निदेशतः ॥
यया पाति च विश्वञ्च यया हरिः प्रजापतिः ।
यया विना जगन्नास्ति मया दत्ता शिवाय या ॥
दया निद्रा च क्षुत्तृष्णा श्रद्धा क्षमा धृतिः ।
तुष्टिः पुष्टिस्तथा शान्तिर्लज्जाधिदेवता हि या ॥
वैकुण्ठे या महालक्ष्मीर्गोलोके राधिका सती ।
मर्त्त्ये लक्ष्मीश्च क्षीरोदे दक्षकन्या सती च या ॥
या दुर्गा शैलकन्या दैत्यदुर्गतिवारिणी ।
स्वर्गलक्ष्मीश्च दुर्गा सा गृहिणां च गृहे गृहे ॥
या वाणी सा च सावित्री विप्राधिष्ठातृदेवता ।
वह्नौ या दाहिकाशक्तिः प्रभाशक्तिश्च भास्करे ॥
शोभाशक्तिः पूर्णचन्द्रे जले शक्तिश्च शीतता ।
शस्यप्रसूतिशक्तिश्च धारणा च धरासु या ॥
ब्राह्मण्यशक्तिर्विप्रेषु देवशक्तिः सुरेषु या ।
तपस्विनां तपस्या या गृहिणां गृहदेवता ॥
मुक्तिशक्तिश्च मुक्तानां माया सांसारिकस्य या ।
मद्भक्तानां भक्तिशक्तिर्मयि भक्तिप्रदा सदा ॥
नृपाणां राज्यलक्ष्मीश्च वणिजां लाभरूपिणी ।
पारे संसारसिन्धूनां तरी दुस्तरतारिणी ॥
सतां बुद्धिस्वरूपा च मेधाशक्तिस्वरूपिणी ।
व्याख्याशक्तिः श्रुतौ शास्त्रे दानशक्तिश्च दातृषु ॥
पतिव्रतानां स्त्रीभक्तिः पतिभक्तिः सतीषु च ।
एवंरूपा च या शक्तिर्मया दत्ता शिवाय या ॥"

अपि च, शङ्करं प्रति पार्व्वतीवाक्यम् ।

'वैकुण्ठेऽहं महालक्ष्मीर्गोलोके राधिका स्वयम् ।
शिवाहं शिवलोकेऽपि ब्रह्मलोके सरस्वती ॥
अहं निहत्य दैत्यांश्च दक्षकन्या सती पुरा ।
हिमेन्द्रस्य पुरा लब्धा या चाहं शैलकन्यका ॥
रक्तबीजस्य युद्धे च काली च सर्व्वभीहरा ।
सावित्री वेदमाताहं सीता जनककन्यका ॥
रुक्मिणी द्वारवत्याञ्च भारती भीष्मकन्यका ।
सुदाम्ना श्रावितो दैवात् स्वभावसुतानुगा ॥
धर्म्मपत्नी च तपसा पुण्ये वृन्दावने वने ॥" ३ ।

अपरञ्च शर्व्वं प्रति पार्व्वतीवाक्यम् ।

"एकाहं राधिकारूपा गोलोके रासमण्डले ।
रासशून्यश्च गोलोकः परिपूर्णं कृतं मया ॥
परिपूर्णतमायाश्च तव वक्षःस्थलस्थिता ।
तवाज्ञया महालक्ष्मीरहं वैकुण्ठवासिनी ॥
सरस्वती च तत्रैव वामपार्श्वे हरेरपि ।
तवाहं मनसा जाता सिन्धुकन्या तवाज्ञया ॥
सावित्री वेदमाताहं कलया विधिसन्निधौ ।
तेजःसु सर्व्वदेवानां पुरा सत्ये तवाज्ञया ॥
अधिष्ठानं कृतं मया धृतं नित्यं शरीरकम् ।
शुम्भादयश्च दैत्याश्च निहताश्चावलीलया ॥
दुर्गं निहत्य दुर्गाहं त्रिपुरा त्रिपुरे वधे ।
निशुम्भशुम्भयोश्चैव रक्तबीजविनाशिनी ॥
तवाज्ञया दक्षकन्या सती सत्यस्वरूपिणी ।
योगेन त्यक्त्वा देहञ्च शैलजाहं तवाज्ञया ॥
सदा दत्ता शङ्कराय गोलोके रासमण्डले ।
विष्णुभक्तिरहं तेन विष्णुमाया च वैष्णवी ॥
नारायणस्य मायाहं तेन नारायणी स्मृता ।
कृष्णप्राणाधिकाहञ्च प्राणाधिष्ठातृदेवता ॥
सर्व्वाधिकेन रूपेण जननी राधिका स्वयम् ।
तवाज्ञया पञ्चधाहं पञ्चप्रकृतिरूपिणी ॥
कलाकलांशभावाच्च देवपत्नी गृहे गृहे ॥" ३ ।

अथ तस्याः पूजाप्रकारः ।

'प्रथमे पूजिता सा च कृष्णेन परमात्मना ।
वृन्दावने च सृष्ट्यादौ गोलोके रासमण्डले ॥
मधुकैटभभीतेन ब्रह्मणा सा द्वितीयतः ।
त्रिपुरप्रेषितेनैव तृतीये त्रिपुरारिणा ॥
भ्रष्टश्रिया महेन्द्रेण शापाद्दुर्व्वाससः पुरा ।
चतुर्थे पूजिता देवी भक्त्या भगवती सदा ॥
तदा मुनीन्द्रैः सिद्धेन्द्रैर्देवैश्च मुनिमानवैः ।
पूजिता सर्व्वविश्वेषु बभूव सर्व्वतः सदा ॥
तेजःसु सर्व्वदेवानामाविर्भूता पुरा मुने ।
सर्व्वे देवा ददुस्तस्यै शस्त्राणि भूषणानि च ॥
दुर्गादयश्च दैत्याश्च निहता दुर्गया तया ।
दत्त्वा स्वाराज्यं देवेभ्यो वरञ्च यदभीप्सितम् ॥
कल्पान्तरे पूजिता सा सुरथेन महात्मना ।
राज्ञा मेधसः शिष्येण मृण्मय्याञ्च सरित्तटे ॥
मेषादिभिश्च महिषैः कुक्कुटैश्च गण्डकैः ।
छागैर्मेषैश्च कूष्माण्डैः पक्षिभिर्बलिभिर्मुने ॥
वेदोक्तानि च द्रव्याणि दत्त्वा वस्तूनि षोडश ।
धूपं च कवचं ध्यात्वा संपूज्य च विधानतः ॥
राजा लब्ध्वा परीहारं वरं प्राप यथेप्सितम् ।
मुक्तिं सम्प्राप वैश्यश्च संपूज्य च सरित्तटे ॥
तुष्टाव राजा वैश्यश्च साश्रुनेत्रः पुटाञ्जलिः ।
विससर्ज्ज च मृण्मयीं गम्भीरे निर्म्मले जले ॥
मृण्मयीं क्षमयीं दृष्ट्वा जलधौतां नराधिप ।
रुरोद तत्र वैश्यश्च तदा साकारं ययौ ॥
स्नात्वा देवश्च वैश्यश्च पुष्करे दुष्करं तपः ।
कृत्वा जगाम गोलोकं दुर्गादेवीवरेण च ॥
राजा ययौ स्वराज्यञ्च पुष्टं निष्कण्टकं बली ।
भोगञ्च बुभुजे भूप षष्टिवर्षसहस्रकम् ॥
भार्य्यां तथार्थं धनञ्च पुत्रं च कालयोगतः ।
मनुर्ब्बभूव सावर्णिश्चापि च पुष्करे तपः ॥
इत्येवं कथितं वत्स! समासेन यथागमम् ।
दुर्गोपाख्यानमखिलं किं भूयः श्रोतुमिच्छसि ॥"

इति ब्रह्मवैवर्त्तपुराणम् ॥

अथ दुर्गापूजाविधिः ।

"शरत्काले महापूजा क्रियते या च वार्षिकी ।
वासन्ती या महापूजा चतुःकर्म्ममयी शुभा ॥
सा तिथिनयमासाद्य कुर्य्यात्तन्त्रविधानतः ।"

चतुःकर्म्ममयी स्नपनपूजनबलिदानहोमरूपा सा च प्रतिवर्षं कर्त्तव्या ।

'हिमरौद्रे चरे चैव वर्षे कुम्भगते रवौ ।
पर्व्वे पर्व्वे विधातव्यं स्नापनञ्च विचक्षणैः ॥
यो मोहादथवालस्याद्देवीं दुर्गां महोत्सवे ।
न पूजयति दम्भाद्वा द्वेषाद्वाप्यथ भैरव ॥
क्रुद्धा भगवती तस्य कामानिष्टान् निहन्ति वै ।'

नित्या चाकरणे प्रत्यवायश्रुतेश्च सा पूजा नित्या । नित्यमभिलषितफलश्रुतेः काम्या च ।

यथा,—

'लभेत परमामायुर्विभूतिं दिविवैभवम् ।
एवमन्येऽपि नरा देव्याः कार्य्यं प्रपूजनम् ॥
विभूतिमतुलां लब्धुं चतुर्व्वर्गप्रदायकम् ।'

काम्यतया पूजने तु नवम्यादिकल्पपूजाविधिः । तदङ्गत्वात् कृष्णनवम्यादिप्रतिपदादिषष्ठ्यादिसप्तम्यादिमहाष्टम्यादिकेवलमहाष्टमीकेवलमहानवमीपूजाख्याः कल्पा उक्ताः । तत्कल्पस्योत्तरमपि न प्रतिबन्धकम् । ७ । सा पूजा त्रिविधा । यथा,—

शारदी चण्डिकापूजा त्रिविधा परिकीर्त्तिता ।

सात्त्विकी राजसी चैव तामसी चेति विश्रुता ।
सात्त्विकी जपयज्ञाद्यैर्नैवेद्यैश्च निरामिषैः ।
माहात्म्यं भगवत्याश्च पुराणादिषु कीर्त्तितम् ।
पाठस्तस्य जपः प्रोक्तः पठेद्देवीमनास्तथा ।
देवीसूक्तजपश्चैव यज्ञो वह्निषु तर्पणम् ।
राजसी बलिदानैश्च नैवेद्यैः सामिषैस्तथा ।
सुरामांसाद्युपाहारैर्जपयज्ञैर्विना तु या ।
विना मन्त्रैस्तामसी स्यात् किरातानाञ्च सम्मता ।
ब्राह्मणैः क्षत्रियैर्वैश्यैः शूद्रैरन्यैश्च सेवकैः ।
एवं नानाम्लेच्छगणैः पूज्यते सर्व्वदस्युभिः ।
अथ वाप्यन्यतो वापि पूजयेत् पूजयेत वा ।
सर्व्वेषाञ्च तपोयोगाद्ध्यानाच्चातिशयनात् ।
आभिरूप्याच्च विम्बानां देव सान्निध्यमृच्छति ।

अथ नवम्यादिकल्पः ।

‘इषे मास्यसिते पक्षे कन्याराशिगते रवौ ।
नवम्यां बोधयेद्देवीं क्रीडाकौतुकमङ्गलैः ॥
ज्येष्ठानक्षत्रयुक्तायां षष्ठ्यां बिल्वाभिमन्त्रणम् ।
सप्तम्यां मूलयुक्तायां पत्रिकायाः प्रवेशनम् ॥
पूर्व्वाषाढ़ायुताष्टम्यां पूजाहोमाद्युपोषणम् ।
उत्तरेण नवम्यान्तु बलिभिः पूजयेच्छिवाम् ॥
श्रवणेन दशम्यान्तु प्रणिपत्य विसर्ज्जयेत् ।
प्रतिपद कन्यार्के कर्त्तव्यत्वानुपपत्ते सिंहार्केऽपि बोधन तुलार्केऽपि स्थापनादिकं क्रियते चान्द्रत्वाश्रयणात् कन्यार्के मलमासे न तदारभ्यते यदि पूर्व्वमारब्धं तदा मलमासेऽपि पूजादेवीमाहात्म्यपाठादिकं प्रत्यहं कर्त्तव्यमेव ।
‘यावद्भूर्वायुराकाशं जलं वह्निशशिग्रहाः ।
तावच्च चण्डिकापूजा भविष्यति सदा भुवि ॥
तत्र कृष्णनवम्यां देवकल्पोक्तेन पूर्व्वाह्णे बोधनम् । उभयदिने पूर्व्वाह्णे नवमीलाभे पूर्व्वदिने आर्द्रादि दोषे तु पूर्व्वार्द्धं विना दिवामात्रे तुल्यादरं विनापि परदिने बोधनं उभयदिने पूर्व्वाह्णे नवम्यालाभे पूर्व्वदिने बोधनं तुल्यात् ।
‘कन्यादिमीनपर्य्यन्ता यत्र सम्प्राप्यते शिव ।
तत्र बोधः प्रकर्त्तव्यो देव्या राज्ञा शुभप्रदः ॥
बोधनमन्त्रो यथा,—
इषे मास्यसिते पक्षे नवम्यामार्द्रयोगतः ।
श्रीवृक्षे बोधयामि त्वां यावत् पूजां करोम्यहम् ।
ऐं रावणस्य वधार्थाय रामस्यानुग्रहाय च ।
अकाले ब्रह्मणा बोधो देव्यास्त्वयि कृतः पुरा ॥
अहमप्याश्विने तद्वद्बोधयामि सुरेश्वरीम् ।
शक्रेणापि च सम्बोध्य प्राप्तं राज्यं सुरालये ॥
तस्मादहं त्वां प्रतिबोधयामि
विभूतिराज्यप्रतिपत्तिहेतोः ।
यथैव रामेण हतो दशास्य-
स्तथैव शत्रून् विनिपातयामि ॥
षष्ठीबोधने तु आश्विनमासीयषष्ठ्यां सायाह्ने बोधयाम्यत इति पठनीयम् । ० ।

अथ प्रतिपदादिकल्पः ।

‘आश्विने शुक्लपक्षे तु कर्त्तव्यं नवरात्रकम् ।
प्रतिपदादिक्रमेणैव यावच्च नवमी भवेत् ।
प्रतिपदादितत्तत्तिथिषु तत्क्रमाच्च भविष्ये ।
‘केशसंस्कारद्रव्याणि प्रदद्यात् प्रतिपद्दिने ।
पट्टडोरं द्वितीयायां केशसंयमहेतवे ।
दर्पणञ्च तृतीयायां सिन्दूरालक्तकं तथा ।
मधुपर्कं चतुर्थ्यान्तु तिलकं नेत्रमञ्जनम् ।
पञ्चम्यामङ्गरागञ्च शक्त्यालङ्करणानि च ।
षष्ठ्यां बिल्वतरौ बोधं सायं सन्ध्यासु कारयेत् ।
सप्तम्यां प्रातरानीय गृहमध्ये प्रपूजयेत् ।
उपोषणमथाष्टम्यामष्टम्यां प्रपूजनम् ।
नवम्यामुग्रचण्डायास्तद्देवार्थेन दिवा ।
पूजा च बलिदानञ्च तद्वच्चात्र प्रपूजयेत्
कुमारी पूजनीया च भूषणीया च भूषणैः ॥
सम्पूज्य प्रेषणं कुर्य्यात् दशम्यां शाबरोत्सवैः ।
अनेन विधिना यस्तु देवीं प्रीणयते नरः ॥
कल्पवत् पालयेत्तञ्च देवी सर्व्वापदि स्थितम् ।
पुत्रदारधनर्द्धीनां सख्या तस्य न विद्यते ।
भुक्त्वा परमान् भोगान् प्रेत्य देवीगणो भवेत् ॥

अथ षष्ठ्यादिकल्पः ।

‘बोधयेद्बिल्वशाखायां षष्ठ्यां देवीं फलेषु च ।
सप्तम्यां बिल्वशाखान्तामाहृत्य प्रतिपूजयेत् ॥
पुनः पूजां तथाष्टम्यां विशेषेण समाचरेत् ।
जागरञ्च स्वयं कुर्य्यात् बलिदानं महानिशि ॥
प्रभूतबलिदानञ्च नवम्यां विधिवच्चरेत् ।
ध्यायेद्दशभुजां देवीं दुर्गामन्त्रेण पूजयेत् ॥
विसर्ज्जनं दशम्यान्तु कुर्य्याद्वै शाबरोत्सवैः ।
धूलिकर्दमविक्षेपैः क्रीडाकौतुकमङ्गलैः ॥
भगलिङ्गाभिधानैश्च भगलिङ्गप्रगीतकैः ।
भगलिङ्गाद्यभिधानैश्च कुर्य्याच्च दशमीदिने ॥ ० ।
नवमीबोधनासामर्थ्ये षष्ठ्यां सायं बोधनं यथा,
‘षष्ठ्यां बिल्वतरौ बोधं सायंसन्ध्यासु कारयेत् ।
षष्ठ्यां बोधनासम्भवसम्भवेऽपि नवम्यादिपूर्व्वदिने सायं षष्ठीलाभे एकादेशोभयकल्पः यदा तु पूर्व्वदिने सायं षष्ठीलाभः परदिने सायं विना षष्ठी लाभस्तदा पूर्व्वेद्युर्बोधनं परदिने सायमामन्त्रणम् । अन्यदा तूभयदिने सायं षष्ठीलाभस्तदा परेऽह्नि षष्ठ्यां बोधनम् । उभयदिने सायं षष्ठ्यभावे पूर्व्वाह्णेऽपि षष्ठ्यां बोधनम् । आमन्त्रणमन्त्रस्तु ।
मेरुमन्दरकैलासहिमवच्छिखरे गिरौ ।
जातः श्रीफलवृक्ष त्वमम्बिकायाः सदा प्रियः ॥
श्रीशैलशिखरे जातः श्रीफलः श्रीनिकेतनः ।
नेतव्योऽसि मया गच्छ पूज्यो दुर्गास्वरूपतः ॥
सायं षष्ठ्यान्तु कर्त्तव्यं मन्त्रेणामन्त्रणं तथा ।
षष्ठ्यभावेऽपि कर्त्तव्यं सप्तम्यामपि नारद ॥ ० ।

अथ सप्तम्यादिकल्पः ।

आश्विने शुक्लपक्षे तु सप्तम्यादिदिनत्रये ।
मम पूजा विशेषेण कर्त्तव्या मम नारद ॥
विधिञ्च तत्र वक्ष्यामि शृणु पुत्र ! समाहितः ।
सप्तम्यां पत्रिकापूजा दशादिवसभिर्युता ॥
महीमयी च प्रतिमा पूजायुग्मकरार्थे ।
अष्टमी वा महापूजा तिथिः प्रीतिकरी मम ॥
कुर्य्याच्च महास्नानं पञ्चामृतजलैस्तथा ।
गायनैश्च वाद्यैश्च नृत्यादैर्गीतवादिभिः ॥
औषधीभिश्च सर्व्वाभिर्भृङ्गारैः कलशैस्तथा
पुष्परत्नादितोयैश्च गन्धैर्मलयजैस्तथा ॥
गीतवादित्रनादेन स्नापयेन्मां च भक्तितः ।
पूजा षडुपचारैश्च नैवेद्यैश्च मनोहरैः ॥
विल्वपत्रैर्घृताक्तैश्च सिद्धधान्यादिसंयुतैः ।
जुहुयाच्चाग्निमिति यस्तु तस्य पुण्यफलं शृणु ।
संसारे यानि सौख्यानि काम्यानि नरपुङ्गव ॥
दीर्घमायुर्यशः पुत्र विपुलं धनधान्यकम् ।
लभते मत्प्रसादेन स्वर्गे मम पुरे वसेत् ।
बलिञ्च विविधैर्दद्यो मत्प्रीतये नरैः ॥
अनेन विधिना यस्तु नवमीमतिवाहयेत ।
भुङ्क्ते च विपुलान् भोगानन्ते शिवपुरं व्रजेत् ॥
ततः सप्तम्यां मूलयुक्तायां केवलायां वा पूर्व्वाह्णे पत्रीप्रवेशः उभयत्र पूर्व्वाह्णे सप्तमीलाभे परत्र
‘शुक्लाद्या सर्व्वदा श्रेष्ठा सप्तमी पार्व्वतीप्रिया ।
रवेरुदयमीक्षन्ते न तत्र तिथियुग्मता ॥
पूर्व्वाह्णे नवपत्रिका शुभकरी धर्म्मार्थसिद्धिप्रदा
आरोग्यं धनदा करोति विजयं चण्डीप्रवेशे शुभा ।
मध्याह्ने जनपीडनक्षयकरी संग्रामघोरप्रदा
सायाह्ने बधबन्धनानि कलहं सन्तापदा सर्व्वदा ॥
सप्तम्यामस्तगायां यदि विशति गृहं चण्डिका दीपकाले
राज्ञः सप्ताङ्गराज्यं जनसुसमखिलं हन्ति मन्त्रानुरोधात् ।
तस्मात् सूर्य्योदयस्था वरमतिशुभदा सप्तमी प्राप्य देवीं
भूपालो वेशयेत्तां सकलजनहिता राष्ट्रवर्द्धे विधाय ॥
लिङ्गस्थां पूजयेद्देवीं मण्डलस्थां तथैव च ।
पुस्तकस्थां महादेवीं पावके प्रतिमासु च ।
चित्रे च त्रिशिखे खड्गे जलस्थाञ्चापि पूजयेत् ॥
स्नाता यथाविधि विशोधितकायवाङ्मनाश्च
सन्ध्यामपास्य वरदञ्च प्राणायामो यत्रदिन-
दर्शोऽथवापि महाष्टमी नवमीतिथ गुरुश्च सप्त ।
‘कन्यास्थिते रवावीशे शुक्लाष्टम्यां प्रपूजयेत् ।
सोपवासो निशार्द्धे तु महाविभवविस्तरैः ॥
पूजां समारभेद्देव्या मघाया वाऽर्द्धेऽपि वा ।
पशुघातश्च कर्त्तव्यो गन्धकाख्यकस्तथा ॥
उत्तराभे पशुघातश्च कर्त्तव्य इति श्रुतिः ।
‘अष्टम्यां रुधिरैर्मांसैः कुसुमैश्च सुगन्धिभिः ।
पूजयेद्बहुजातीयैर्बलिभिर्भोजनैः शिवाम् ॥
इति कालिकापुराणात् ।
‘अष्टम्यां बलिदानेन पूजनाप्तो भवद्गुणम् ।
इति देवीपुराणीयं बलिपूजार्थकल्पपरम् ।
तत्पूजायाः उभयतिथ्येकतन्त्रेण तदुक्ति स्तत्र नवम्यां बलिदानमात् । तत्पूजापि तदन्त कालिकापुराणे तत्स्थानान्तरम् ।
‘अष्टमीनवमीसन्धौ क्षणोऽपि शुभ वर्त्तते ।
तत्र पूज्या सर्व्वं दुःख । योगिनीगणसंयुता ॥
अथवा महाष्टम्यां पूजयाश्च समाचरेत् ।
यथा तथैव पूजाभ्यो यतो देवी प्रमुच्यते ॥

नखेन प्रतिपूजयेद्भगवतीं चण्डीं प्रचण्डाट्टहा-
साट्टाहासगणार्घ्यसंतर्पिता भक्त्या मया
राध च ।
कामाख्यादकमञ्ज्वलिततधिरे छागा नवम्यां
बलिं
मनसं मधञ्च तिमिच दशमीं संप्राप्य संप्रेषयेत् ॥
अथवा प्रवेशादिविषयान्तराच या क्रिया ।
तिथावुदयगामिन्यां सर्व्वा कार्य्येति द्रुम ॥
अधोदयकालीनघटिकामात्रतिथौ सम्बन्धपूजा
नाथामर्थ्ये कालिकापुराणम् ।
'अष्टम्यां कन्योदितायां पूजा यदि कर्त्तुं न शक्यति ।
उपचारोऽथवा दातुं पञ्चैतान् वितरेत्तदा ॥
गन्धं पुष्पञ्च धूपञ्च दीपं नैवेद्यमेव च ।
अभावे गन्धपुष्पाभ्यां तदभावे च भक्तितः ॥
अष्टमीपूजा कथिता तथा षष्ठ्यादिकं पुनः ।
प्रातरावाहयेद्देवीं प्रातरेव प्रवेशयेत् ।
प्रातः प्रातश्च संपूज्य प्रातरेव विसर्ज्जयेत् ॥
अथ प्रातःपदं पूर्व्वाह्णपरम् ।
'इतौ प्रपूजयेद्देवीं षष्ठ्यादिदिवसत्रये ।
प्रातर्व्वा मध्याह्नेऽभिमतां हृष्टहृष्टमनास्तिथौ ।
अपराह्णे नवाद पूजयेनो प्रदक्षस्य निश्चितम् ।
यथा कालिकापुराणम् ।
'उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् ।
यथा तथैव पूतात्मा व्रती देवीं प्रपूजयेत् ॥
नवम्यां बलिदानन्तु कर्त्तव्यं वै यथाविधि ।
जपं होमञ्च विधिवत् कुर्य्यात्तत्र विभूतये ॥
अथ नवम्यां होमस्तु पूर्व्वाषाढायुताष्टम्यां
पूजाहोमाद्युपोषणं इति स्मृतिश्च उभयत्र एक-
तरस्मिन् वा होमः आरब्धा पूजायां नवम्यामेव
दक्षिणा देया ॥ ० ॥
अथाष्टम्यादिदेवसनवाष्टमी केवलमहानवमी-
कृत्या यथा,—
'भद्रकाली मठे तत्र तत्र प्रपूजयेद् द्विज ।
आश्विने शुक्लपक्षस्य चाष्टम्यां नियतात्मवान् ॥
उपोषितो द्वितीयेऽह्नि पूजयन् पुनरेव ताम् ॥
इति विष्णुधर्म्मोत्तरम् ।
'यस्त्विहाश्वयुजाष्टम्यां नवम्यां चाथ साधक ।
पूजयेद्वरदां देवीं महामायेव पैतृका ॥
इति कालिकापुराणम् ॥ ० ॥
दुर्गाया ध्यानं यथा —
'जटाजूटसमायुक्तामर्द्धेन्दुकृतशेखराम् ।
लोचनत्रयसंयुक्तां पूर्णेन्दुसदृशाननाम् ॥
अतसीपुष्पवर्णाभां सुप्रतिष्ठां सुलोचनाम् ।
नवयौवनसम्पन्नां सर्व्वाभरणभूषिताम् ॥
सुचारुदशनां तद्वत् पीनोन्नतपयोधराम् ॥
त्रिभङ्गस्थानसंस्थानां महिषासुरमर्द्दिनीम् ॥
मृणालायतसंस्पर्शदशबाहुसमन्विताम् ।
त्रिशूलं दक्षिणे ध्येयं खड्गं चक्रं क्रमादधः ।
तीक्ष्णबाणं तथा शक्तिं दक्षिणेषु विचिन्तयेत् ।
खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च ॥
घण्टां वा परशुं वापि वामतः सन्निवेशयेत् ।
अधस्तान्महिषं तद्वद्विशिरस्कं प्रदर्शयेत् ॥
शिरश्छेदोद्भवं तद्वद्दानवं खड्गपाणिकम् ।
हृदि शूलेन निर्भिन्नं निर्यदन्त्रविभूषितम् ॥
रक्तरक्तीकृताङ्गञ्च रक्तविस्फुरितेक्षणम् ।
वेष्टितं नागपाशेन भ्रुकुटीभीषणाननम् ॥
सपाशवामहस्तेन धृतकेशञ्च दुर्गया ।
वमद्रुधिरवक्त्रञ्च देव्याः सिंहं प्रदर्शयेत् ॥
देव्यास्तु दक्षिणं पादं समं सिंहोपरिस्थितम् ।
किञ्चिदूर्द्ध्वं तथा वाममङ्गुष्ठं महिषोपरि ॥
प्रसन्नवदनां देवीं देवदानवदर्पहाम् ।
प्रसन्नवदनां देवीं धर्म्मकामफलप्रदाम् ।
स्तूयमानञ्च तद्रूपममरैः सन्निवेशयेत् ॥
उग्रचण्डा प्रचण्डा च चण्डोग्रा चण्डनायिका ।
चण्डा चण्डवती चैव चण्डरूपातिचण्डिका ॥
आभिः शक्तिभिरष्टाभिः सततं परिवेष्टिताम् ।
चिन्तयेत् सततं दुर्गां धर्म्मकामार्थमोक्षदाम् ॥
इति ध्यात्वा मन्त्राचमनपूर्व्वकषोडशोपचारा-
दिना बलिदानादिभिः पूजयित्वा आवरण
पूजयेत् ॥ ० ॥

अथ दशमीकृत्यम् ।
'संपूज्य प्रेषयेत् कुर्य्याद्दशम्यां शाबरोत्सवैः ।
देवीमाकाशवेद्यां विसर्ज्जनविधिनाथ पूजारत्ना-
करे देवीपुराणम् ।
'भक्ष्या निष्प्रदीपाद्यैर्भूताभृत्यादिमङ्गलैः ।
धोषधौभिश्च केयाभिः धर्म्मधौर्वेर्य्यवादिभिः ॥
नवम्यां मन्त्रकाले तु मानाकाले विधीयते ।
न कुर्य्यात् भक्त्या वीर ! देव्याः शीराधनं नरः ॥
भगभिङ्गादिभिर्व्वदिर्न्ब्रह्मद्वेषः पुष्यते ।
यावतो दिवसान् वीर ! कृते नीराजनं तथा ॥
तावत्कालपदार्थानि दुर्गालोके महीयते ।
यस्तु कुर्य्यात् मन्त्रैश्च स्वर्गलोके महीयते ॥ ० ॥
तद्दिने अपराजितापूजनम् । यथा,—
'आश्विने शुक्लपक्षस्य दशम्यां पूजयेन्नया ।
एकादश्यां न कुर्व्वीत पूजनञ्चापराजितम् ॥
तद्दिने यात्रा यात्रां कुर्य्यात् । यथा —
'दशमीं च समुल्लङ्घ्य प्रस्थानं कुरुते नृपः ।
तस्य संवत्सरं राज्ये न क्वापि विजयो भवेत् ॥
नवमस्थौ खञ्जनादिदर्शनम् यथा,—
'कार्य्यचन्द्रागुरुपमागमे भ्रमण्ं कैवित्य्यरा-
च्छ्या ।
शुभाशुभपरीक्षार्थं देवपितृं नियमेन कुर्य्यात् ॥ ० ॥
खञ्जनदर्शनफलादि यथा,—
'खञ्जनस्तु शिवे यथा दिशा लक्षणं यात्रा
कृप पश्येत् ।
तथा प्रयातस्य विप्रमरालिर्न्ययमुपैति ॥
तत्रा नीराजन राजा बलवृद्ध्यै यथाक्रमम् ।
शोभनं खञ्जनं पश्येत् जलगोगोष्ठसमीपतः ॥
'पद्मेषु गोषु गजवाजिमहोरगेषु
राज्योदयप्रमुदता नविनाशयेव
भस्मास्थिकेशनखलोमतुषेषु दृष्टो
दुःखानि यच्छति बहूनि खलु खञ्जरीटः ॥
अशुभं शकुनं दृष्ट्वा देवमण्डपपूजनम् ।
दानं कुर्व्वीत कुर्य्याच्च चार्य्यमशौरिपिबेत् ॥

अथ त्रिपञ्चकम् ।
'शैलाशेखरपाशैर्मा बोला भगवतीं शिवाम् ।
लोलोद्भवे प्रविष्टं क्रीडाकौतुकमङ्गले ॥
परेशीभिर्म्मती यस्तु मदं चाचिपती तु सः ।
तस्य दद्या भगवती प्रार्थं दद्यात मुदावधम् ॥"
इति विष्णादित्यदुर्गापौत्तले ।
विसर्ज्जनमन्त्रो यथा,—
"दुर्गे देवि जगन्मातः ! स्वस्थानं गच्छ पूजिते ।
संवत्सरव्यतीते तु पुनरागमनाय वै ॥
निमज्जामि ते देवि त्वं यज्ञिकाप्रतिमा शुभा ।
पुत्रायुधनवृद्ध्यर्थं स्थापितासि जले मया ॥" ० ॥
विसर्ज्जनानन्तरं शान्तकलस आदिकृतस्थापक
तत्र घटस्थजलेन दक्षिणमैवजमानमभि
विञ्चेत् । यथा —
"ॐ उत्तिष्ठ ब्रह्मणस्पते देवा यज्ञेनानुमहे उप
प्रयन्तु मरुतः सुदानव इन्द्रप्राशुर्भवासचा ॥
ॐ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणः प्रभुः ॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ।
आखण्डलोऽग्निर्भगवान् यमो वै नैरृतस्तथा ॥
वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः ॥
ब्रह्मणा सहितो शेषो दिक्पालाः पान्तु ते सदा ॥
कीर्त्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्षमा मतिः ।
बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः ॥
एतास्त्वामभिषिञ्चन्तु धर्म्मपत्न्यः सुव्रताः ।
आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥
ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ।
ऋषयो मुनयो गावो देवमातर एव च ॥
देवपत्न्योऽध्वरा नागा दैत्याश्चाप्सरसां गणाः ।
अस्त्राणि सर्व्वशस्त्राणि राजानो वाहनानि च ॥
औषधानि च रत्नानि कालस्यावयवाश्च ये ।
सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥
देवदानवगन्धर्व्वा यक्षराक्षसपन्नगाः ॥
एते त्वामभिषिञ्चन्तु धर्म्मकामार्थसिद्धये ॥"
इति ब्रह्मवैवर्त्तपुराणपद्धतिः ॥ ० ॥
अथ दुर्गानाममाहात्म्यम् ।
"तकारस्य द्वितीयोऽर्थः पद्मस्वरसंयुतः ।
कथयस्य द्वितीयोऽर्थो वह्निस्थोपरि स्थितः ॥
द्वितीयस्वरसंयुक्तं नामेदं परिकीर्त्तितम् ।
आरोग्यस्य च सम्पत्तेरायुषश्च च सम्पदे ॥
नामेदं परमो देतुस्सुखस्य भयघातिनाम् ।
धनिकार्थं विशेषेण महापातकिनामपि ॥
विनाशयेत विघ्नेन नामसंस्मरणं प्रिये ! ॥
परदाररतोऽपि स्यात् परद्रव्यापहारकः ।
सोऽपि पापात् प्रमुच्येत यदि स्यात्तादिवाक्ष्यतः ॥
महापापा सुरापानं स्तेयं गुर्व्वङ्गनागमः ।
गतिघ्नोऽपि विमुच्येत यदि नाम करेत् सुधीः ॥"
इति दयनामकः ॥
"दुर्गा दुर्गेति दुर्गेति नमनाम यदं महत् ।
यो भवेत् चतुर्दशं च रं |भौरमाङ्ग च मानवः ।
लक्षोकृपात्ते महत्रीजे महापिशाचे महत्रौ ।
महाकुनी महाधोरे महाभयसंकटे ॥

य इदं शृणुयान्नित्यं दुर्गानाम्नां शतं पठेत् ।
स जीवन्नेव देहेऽस्मिन् जीवन्मुक्तो भवेद्ध्रुवम् ॥"
इति मुण्डमालातन्त्रम् ।

दुर्गाध्यक्ष, पुं, (दुर्गस्य अध्यक्ष ।) दुर्गरक्षक । तस्य लक्षणं यथा —
"अनाहार्य्यश्च शूरश्च तथा प्राज्ञः कुलोद्भवः ।
दुर्गाध्यक्षः स्मृतो राज्ञः उद्युक्तः सर्व्वकर्म्मसु ॥"
इति मात्स्ये २१५ अध्यायः ।

दुर्गानवमी, स्त्री, (दुर्गाया पूजोपलक्षिता नवमी ।) कार्त्तिकशुक्लनवमी । सा चेतायुगाद्या । तत्र जगद्धात्रीपूजा कर्त्तव्या । यथा, योगिनीतन्त्रे ।
"कार्त्तिकेऽमलपक्षे तु नवम्याञ्च विधिवत् ।
प्रणवाद्य जगद्धात्रीं पूजयेद्दीपमालया ॥
तन्त्रान्तरे ।
'त्रिकालं पूजयेद्दुर्गां मधुनैकाचरेण च ।
नानाबलिविधानेन गीतवाद्यपुरः सरम् ॥
कार्त्तिकस्य सिते पक्षे नवम्याञ्च विधिवत् ।
तस्यैव साधकश्रेष्ठो लभेदाज्यमकण्टकम् ॥
कुब्जिकातन्त्रे ।
'कार्त्तिके शुक्लपक्षे तु नवम्यां जगदम्बिकाम् ।
दुर्गां प्रपूजयेत्सम्यक् धर्म्मकामार्थसिद्धये ॥
शक्तियामलतन्त्रे ।
'कार्त्तिकस्य सिते पक्षे नवम्यां जगदीश्वरीम् ।
त्रिकालमेककालं वा वर्षे वर्षे प्रपूजयेत् ॥
निर्म्माय प्रतिमां सम्यक् जगद्धात्र्या विधानतः ।
पूजयित्वा परदिने प्रतिमां तां विसर्ज्जयेत् ॥
एवं कृत्वा चक्रवर्त्ती भवेत् साधकसत्तम ।
पुत्रपौत्रधनैश्वर्य्ययुतश्च भवेत् पुरी ॥
दारदासीगणैर्युक्तो मुक्तः स्यात् पापसङ्कटात् ।
विधिवतो वहयुतां नवमीं प्राप्य साधकः ।
पूजयित्वा जगद्धात्रीं लभते वाञ्छितं फलम् ॥
भविष्ये ।
'मासैश्चतुर्भिर्यत्पुण्यं विधिना पूज्य चण्डिकाम् ।
तत् फलं लभते वीर ! नवम्यां कार्त्तिकस्य च ॥"
इति तिथितत्त्वम् ॥

दुर्गाङ्ग, पुं, (दुर्गाया आज्ञा आख्या आज्ञा यस्य ।) भूमिजगुग्गुलु । इति राजनिर्घण्टः ॥

दुर्घोष, पुं, (दुष्टः घोषो निनादो यस्य ।) भल्लूकः । इति राजनिर्घण्टः ॥ निन्दितरवे । तद्वति, त्रि ॥

दुर्ज्जन, त्रि, (दुष्टो जनः । "कुगतिप्रादयः ।" २ । २ । १८ । इति समासः ।) खलः । इत्यमरः । ३ । १ । ४० ॥ (यथा, चाणक्यशतके । २४—२५ ।
"दुर्ज्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥
दुर्ज्जनः परिहर्त्तव्यो विद्ययालङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥")

दुर्जय, पुं (दुःखेन जीयतेऽसौ । जि जये + खल् ।) कार्त्तवीर्य्यराजस्य ज्येष्ठनामनृपः । इति कूर्म्मपुराणम् ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । ८६ ।
"समावर्त्तो निवृत्तात्मा दुर्ज्जयो दुरतिक्रमः ।"
दानवविशेषः । यथा महाभारते ॥१।६५।२२।
"असिलोमा च केशी च दुर्ज्जयश्चैव दानवः ।"
राक्षसविशेषः । यथा, रामायणे ।६।७५।१ ।
"स दृष्ट्वा निहतं पूर्व्वं राक्षसा अपि निर्ययुः ।
दुर्ज्जयः कालकाश्च प्रघसः कालिकामुखः ॥")
त्रि, दुर्ज्जेयः । (यथा, देवीभागवते ।५।८।२२।
"वरदानेन धातुः स दुर्ज्जयो मधुसूदन ! ॥")

दुर्ज्जरा, स्त्री, (दुःखेन जीर्य्यतीति । दुर् + जॄ + घञ् । तत्टाप् ।) ज्योतिष्मतीलता । इति राजनिर्घण्टः ॥ त्रि, दुर्ज्जरः ॥ (यथा, सुश्रुते ।।१४६।
"स्वादु पाकरसं प्रायः दुर्ज्जरं हरिमन्थजम् ॥"
दुर्ज्जय । यथा, देवीभागवते । १ । १८ । २६ ।
"दुर्ज्जरं मामकाज्ञानं न शान्तिमुपयाति मे ॥")

दुर्ज्जात, क्ली, (दुःखेन यथा तथा जातम् । प्रादिसमासः ।) व्यसनम् । (यथा रघुः ।।१३।७२।
"दुर्ज्जातबन्धुरयमृक्षहरीश्वरो मे
पौलस्त्य एष समरेषु पुरः प्रहर्त्ता ॥")
असमञ्जसम् । इति त्रिकाण्डशेषः ॥ असम्यग्जाते, त्रि । इति मेदिनी । ते, ११४ ॥ (यथा, महाभारते । १२ । २२४ । ३३ ।
"दौष्कुलेयस्तथाऽऽढ्यो दुर्ज्जातः प्रक उच्यते ॥")

दुर्द्दान्त, पुं, (दुःखेन दान्तो दमितः ।) कलहः । पशुखरः । इति राजनिर्घण्टः ॥ अशान्ते, त्रि । (यथा, माघे । १२ । २९ ।
"दुर्द्दान्तमुत्क्रम्य निरस्तसादिनं
सहासहाकारमलोकयज्जनः ॥")

दुर्द्दिन, क्ली, (दुष्टं दिनम् ।) मेघाच्छन्नदिनम् । इत्यमरः । १ । ३ । १२ ॥ (यथा, हरिवंशे । १६० । १८ ।
"तुमुलं दुर्द्दिनञ्चासीत् सविद्युत्स्तनयित्नुमत् ।
तद्दुर्द्दिनतलं भित्त्वा नारदः प्रत्यदृश्यत ॥"
घनान्धकारः । यथा कुमारे । ६ । ४३ ।
"यत्रौषधिप्रकाशेन नक्तं दर्शितसञ्चरा ।
अनभिज्ञास्तमिस्रायां दुर्द्दिनेष्वभिसारिकाः ॥")
वृष्टिः । यथाह शाश्वतः ।
"घनान्धकारे वृष्टौ च दुर्द्दिनं कथ्यते बुधैः ॥"
(यथा रघुः । ४ । ४१ ।
"द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्द्दिनम् ।
सन्नद्धवाताद इव प्रतिपेदे जयश्रियम् ॥"
कुत्सितदिनम् ।)
"सुदिनं दुर्द्दिनञ्चैव धर्म्मं कर्म्मेति [illegible]
तत् कर्म्म तपसो साध्यं कर्म्मसाध्य [illegible]
इति ब्रह्मवैवर्त्ते श्री[illegible]
"यदुत्तम[illegible]
तद्दिनं दुर्द्दिनं मन्ये मेघा[illegible]
(दुर्द्दिनं यदे[illegible]
च । हर्षकुले[illegible]
यथा हरिवंशे ।
"अन्तरे दुर्द्दिने
तथा [illegible]

दुर्द्दुरूट, पुं, (दोधवीति दुर्[illegible] मिति । दोधि + माडू[illegible] खाडुः ।) नास्तिकः । इति [illegible] ॥
दुर्द्धरा, स्त्री, लता[illegible] । इति [illegible] ॥
दुर्द्दम, पुं (दुर्द्दमो [illegible]) [illegible] राजविशेषः ।
दुर्द्ध(र्द्ध)र पुं, (दुःखेन ध्रियते [illegible]
"[illegible]
१२६ । इति [illegible]
र्षभः । इति मेदिनी । [illegible]
तक । इति [illegible]
वैषादिविशेषः । [illegible]
"दुर्द्धरं दुर्द्धर[illegible]
([illegible]
१११ । १० ।
"[illegible]
दुर्म्मदे दुर्द्धर [illegible]
पाकर [illegible]
प्रमथा[illegible]
११२ । १८ ।
"दुर्द्धर [illegible]
[illegible]
[illegible] ।ये
[illegible])
[illegible] ।
[illegible] स्त्री ।
[illegible] (यथा,
[illegible] यथा ।
[illegible] ॥")
[illegible] दुर्द्ध
दुर् + धृ + णी +
[illegible] । शूकरः ।
[illegible] २०१ । पविनीतमाने
[illegible] । ५ । १० ।
[illegible] दुर्गा [illegible]
[illegible] पौऽपि [illegible]
[illegible] ॥")
[illegible] दुर्द्धर्ष यस्य ।) दुर्गम ।
[illegible] तव देवि । [illegible] ॥"
[illegible]

दुःसम्प्रवेष्योपि, त्रि । (यथा महाभारते । ६ । १० । ६ ।
"दुर्नामा नाम दुर्द्धर्षो द्वितीयो वैमवर्म्मत ।"
दुर्न्नय । तथा तत्रैव । १ । १३४ । ८७ ।
"तत्र प्रीतमना भीमो राक्षसानिव स युधि ।
प्रत्यभाषत दुर्म्मेधं पाण्डवानां महारथम् ।")

दुर्न्नष्ट पुं, (दीलयति उत्तुषयति मुक्तादिक-मिति । दुल क उत्क्षेपे + बाहुलकात् क्रुट-प्रत्ययेन साधु । यद्वा रः ।) मुक्ति विना गुरु-वाक्यममन्यमानः । इति शब्दबोधनी ।

दुर्नाम [न्] क्ली, (दुष्टं नाम यस्य ।) अर्शो-रोगः । इति राजनिर्घण्टः । (यथा सुश्रुते । १ । ४५ ।
"उष्णञ्च कफपित्तघ्नं लघु वातानुलोमनम् ।
दुर्नामश्वासकासेषु हितमग्नेः प्रदीपनम् ।"
चिकित्सित्रञ्जयोरन्योर्न्यमुपेया,—
"कटुकलवणोष्णानि विदाहीनि गुरूणि च ।
शीतवातिलतोयेन व्यायामप्रमदीभया ।
यानवायामयोगाश्च दुर्नाम प्रिपतसम्भवम् ॥
अध्ययनमातानि शौवादनश्च
श्रीमाद्वात्यद्वार्षसयनाश ।
गोदयाच्यवारितसमितिश्चितेन
दुर्नामा सम्मायते ऽरीप्रदीपात् ॥"
इति हारीते चिकित्सितस्थाने द्वादशेऽध्याये ।
चिकित्सा यथा —
"योगाय्यवन्वरचिह्रनिशाभयाली
चूर्णं गुडेन सहितम्तु सदोपयोज्यम् ।
दुर्नामकुष्ठगरशोथहलीमकस्था-
नवोचयन्नबलतो क्रिमिपाण्डुताश ॥"
इति योगाद्यचूर्णम् ।
यचेद्वारिक्वादुर्गेयि कट्फलार्कमल्लातकम् ।
सवानिम्बपलाशीषपूतितलकलिङ्गकं ।
स कारयेत्पिवेर्वेस्त धिग्र दुर्नाममेवहत् ।
घृत विश्रुतं नाम योगिरत्नेन भाषितम् ॥
इति सिद्धार्थकं घृतम् ।"
इति वैद्यकचक्रपाणि संग्रहे अर्शोऽधिकारे ।
"यद्येन शीरस्य कल्क प्रमाणे पुटपाकवत् ।
अशात् सर्वेष्वस्य दुर्नामविनिवृत्तये ॥"
"शूर्णोतता शोडश शूरणस्य
भागास्ततोऽर्द्धेन च चित्रकस्य ।
महौषधाद्द्वौ मरिचस्य चैको
गुडेन दुर्नामजयाय पिण्डी ॥"
इति शूरणपिण्डी ।
इति माभटे चिकित्सास्थाने अष्टमेऽध्याये ।
"मांसभूरश्मभल्लातविडङ्गैर्व्योषमन्वितम् ।
विडङ्गयसमायुक्तं लीढ दुर्नामनाशनम् ।
इति भाबाद्य लौहम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे अर्शोऽधिकारे ।
"अर्शः स्वस्य नाम्ना वेशां दुर्नामविपच्यता ।
तेषु प्रतिसन्धी वायुर्दयाश्च सविशतै ।
तनो वातेन सम्पन्न ज्योतिर्मद्युक्ति देहिनाम् ॥"
इति सुश्रुते निदानस्थाने द्वितीयेऽध्याये ।)

दुर्नामकं, स्त्री (दुर्नाम + स्वार्थे संज्ञायां वा कन् ।) अर्शोरोगः । इत्यमरः । २ । ६ । ५४ । (यथा —
"सनासरादब्धरराचदारकं
गुडेन यो मोदकमत्तुमारकम् ।
अशेषदुर्नामकरोगदारकं
करोति वृद्ध सहसैव दारकम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे अर्शोऽधिकारे ।)

दुर्नामा, [न्] पुं, स्त्री, (दुर्निन्दितं नाम यस्य ।) दीर्घकोषिका । इत्यमरः । १ । १० । २२ । झिनुक इति भाषा ।

दुर्नामारि, पुं (दुर्नाम्न अर्शोरोगस्य अरिः शत्रुः ।) शूरणः । इति राजनिर्घण्टः ।

दुर्नाम्नी, स्त्री, (दुर्निन्दितं नाम यस्याः । ङीप् ।) दुर्नामा । इति शब्दरत्नावली ।

दुर्म्बल, त्रि, (दुर्निन्दितं बलं यस्य ।) कृशः । तत्पर्यायः । अमांसः २ क्षातः ३ । इत्यमरः । २ । ६ । ४४ । पातः ४ म्लानः ५ छितः ६ अबलः ७ । इति शब्दरत्नावली । (यथा देवीभागवते । १ । ८ । ५६ ।
"सबलो जयमाप्नोति दैवाच्चपति दुर्म्बलः ।"
शिथिलः । यथा, रघुः । ५ । १९ ।
"आर्यीपयर्यि प्रति दुर्म्बलाय
तमिन्नयोपद्द परतप्तयिषा ।"
दुर्म्बला । यथा, मनुः । ७ । १११ ।
"अटिलयानमधीयानं दुर्म्बलं क्लिन्नवाससा ।
याचयन्ति च ये पूर्वाश्च मात्रेव भोजयेत ।")

दुर्म्बला, स्त्री, (दुष्टं बल्यर्थं बलं यस्याः ।) अम्बुशिरीषिका । इति भावप्रकाशः ।

दुर्भगा, स्त्री, (दुष्टं भगं भाग्यं यस्याः ।) पति-सौभाग्यरहिता । दुया इति भाषा । तत्पर्यायः । विरक्ता २ । इति त्रिकाण्डशेषः । विरता ३ निक्षा ४ सौभाग्यरहिता ५ । इति शब्दरत्ना-वली । (यथा, भागवते । १ । १० । २६ ।
"योषिद्वृता साध्वी दुर्भगेवोत्सिता सती ॥"
भाग्यहीने, त्रि । यथा, महाभारते । १ । १७ । ७ ।
"कर्मभिः सहते सा तु दुर्भगा समपद्यत ।")

दुर्भिक्ष, क्ली, (भिक्षाया अभावः ।) भिक्षाया अप्राप्तिकालः । अकाल इति भाषा । यथा,
"दुर्भिक्षमल्पं सारकं विराय ।" इत्युद्भटः ।
भिक्षायाः प्रायो भिक्षुकानामित्रयोभावसम्भावः ।
यद्देशे यत्काले तद्देशतत्कालभोज्यमन्नादिक
न भवति तद्देशे तदा सस्यमानलभ्यमानात्
दुर्भिक्षं जातमिति व्यवहारस्यो परिहिरिरि । तत्-
कारणमपि यथा,—
"राष्ट्रभङ्गश्च दुर्भिक्षं तस्करैरुपपीडनम् ।
भायोत्पादिवलं घोरं प्रमादिनि च वासने ॥ ११ ॥
दुर्भिक्षं जायते घोरं सर्वोपद्रवसंयुतम् ।
अवग्रहे समाख्याता यदि संवत्सरे प्रिये ॥ १२ ॥
क्षयिण्डोऽत्र प्रमोदो देवि संशिसकतस ।
दुर्भिक्षं सर्वदोषैश्च व्यवहारो विनश्यति ॥ १३ ॥
दुर्भिक्षं जायते सर्वा मेदिनी दुष्यति प्रिये ॥
प्रभेदे रुग्भिः दोषाणि पीडिताः मानवाः तथा ॥ १४ ॥
दुर्भिक्षं जायते घोरं प्राणोषधिक्षयीकृतम् ।
अनके च समाख्याता यत्र वार्त्ता विचारके ॥ १५ ॥
देशभङ्गः सदुर्भिक्षं समासात् कथयाम्यहम् ।
पिङ्गले चारुसर्वाङ्गि ! दुर्भिक्षं सर्वशालटे ॥ १६ ॥
दुर्भिक्षं मध्यमं प्रोक्तं व्यवहारो न वर्त्तते ।
भवेदे मध्यमा दृष्टिर्दुर्भिक्षं कालसंज्ञिते ॥ १७ ॥
दुर्भिक्षं मरणं घोरं धान्यौषधिक्षयीकृतम् ।
पापरोगी भवेद्देवि ! रक्ताक्षेऽमरवन्दिते ॥ १८ ॥
रोगो मरणदुर्भिक्षं विरोधोपद्रवाकुलम् ।
क्रोधे तु विषमं सर्वं समाख्यातं वरप्रिये ॥ १९ ॥
मेदिनी चलते देवि । सर्वभूतं चराचरम् ।
देशभङ्गश्च दुर्भिक्षं क्षये सञ्जायते प्रजा ॥
जीवाटे जायते देवि दायक्षि कोद्भवि तथा ।
दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये ॥" ६ ।
इति ज्योतिस्तत्त्वधृतस्वरोदयात्तत्तत्संवत्सरविशेष-
फलबोधकभविष्यपुराणीयवचनानि ॥ * ॥
अद्भुतेऽपि दुर्भिक्षं भवति यथा,—
"मांसाशिनो समादाय प्राकारादूर्द्ध्ववायसाः ।
श्वा प्रस्तरोऽथवा मध्ये पुरस्य प्रविशन्ति चेत् ॥
विकिरन्ति तथाद्यौ च यान्यार्थं वा भवेत् भवेत् ।
चोरेभ्य स्यात्तो भीश्च मरणञ्च समागमः ॥
सन्ताप्य महाघोरो दुर्भिक्षं मरकस्तथा ।
अद्भुतानि प्रवदन्ते तत्र देशस्य विद्रवः ।
अकाले फलपुष्पाणि देशविद्रवकारणम् ॥"
इति ज्योतिस्तत्त्वम् ॥ * ॥
"समायीधिविभिन्नावस्थायी दोषाभाव इति वार
कवानकरणम् ॥ कौर्म्मे ।
मल्लं घोरं समाख्यात दुर्भिक्षं चाप्युपस्थिते ।
विवाहादौ वताव्याव विद्युता पार्थिवेष्विह ॥
सन्नरौध समाख्यात ग्रामादिष्वपि तथा ।"
इति शुद्धितत्त्वम् ॥
अपि च मार्कण्डे ७२६ अध्याये ।
"दुर्भिक्षयुक्तराष्ट्रे च भ्रातरः सततेऽपि वा ।
नियमाश्च न दुष्यन्ति दानधर्म्मरताशया ॥
दीक्षिताचाभिषिक्ताश्च व्रतोपवासाश्रया ।
दीक्षाकाले विवाहादौ देवद्रोणे निमज्जिते ॥
पूर्वसङ्कल्पिते चापि नाशौचं कालवर्जिते ॥"

दुर्मना, [स्] त्रि, (दुष्टं मनो यस्य ।) चिन्ता-व्याकुलचित्तः । तत्पर्यायः । विमनाः २ अन्तर्म्मनाः ३ । इत्यमरः । ३ । १ । ८ । (यथा भागवते । १ । ६ । १८ ।
"रूपं भगवतो यत्तन्मनः कान्तं शुचापहम् ।
अपश्यन् सहसोत्तस्थौ वैक्लव्याद्दुर्म्मना इव ॥"
दुर्म्मनायमानः । इति राजनिर्घण्टः । (दुष्टं मनः इति विग्रहे । दुर्म्मनस्, क्ली । यथा, रामायणे । ५ । ३१ । २ ।
"यदि तु मां न द्रक्ष्यन्ति भरतो राज्यशासनम् ।
प्राप्य दुर्म्मनसा घोरं तर्ज्जनं च विशिष्यते ॥")

दुर्म्मरा, स्त्री, (मृ + भावे अप् । दुष्टेनैव मर मरणं यस्याः । छिन्नायामपि पुनःपुनरोदग-मनत्वात् ।) दूर्वा । इति जटाधरः । श्वेत दूर्वा । इति राजनिर्घण्टः ।

दुर्म्मुखः, पुं, (दुर्निन्दितं मुखं यस्य ।) वानरविशेषः । (यथा, रामायणे । ४ । ३९ । ३३ ।
"अयुतेन वृतश्चैव सहस्रेण शतेन च ।
ततो यूथपतिर्वीरो दुर्म्मुखो नाम वानरः ॥")
नागभेदः । इति मेदिनी । खे, ९ ॥ (यथा, हरिवंशे । ३ । ११४ ।
"कुहरः पुष्पदन्तश्च दुर्म्मुखः सुमुखस्तथा ॥")
शम्भ । इति हेमचन्द्रः ।३।१५॥ (सर्पः । इति त्रिकाण्डशेषः । २ । ३ । ५९ ॥) महिषासुरसैनापतिविशेषः । यथा, मार्कण्डेये । ८३ । १९ ।
"दुर्द्धरं दुर्म्मुखञ्चोभौ शरैर्निन्ये यमक्षयम् ॥"
(नृपविशेषः । यथा महाभारते ।२ । ४ । २१ ।
"सङ्ग्रामजिद्दुर्म्मुखश्च उग्रसेनश्च वीर्य्यवान् ॥"
धृतराष्ट्रस्य पुत्रविशेषः । यथा, तत्रैव ।१।११७।३।
"दुर्म्मर्षणो दुर्म्मुखश्च दुष्कर्णः कर्ण एव च ॥"
राक्षसविशेषः । यथा, भागवते ।९ । १० । १८ ।
'रक्षःपतिस्तदवलोक्य निकुम्भकुम्भ-
धूम्राक्षदुर्म्मुखसुरान्तनरान्तकादीन् ॥"
यक्षविशेषः । इति महापुराणम् ॥ अश्वपतेरमात्यविशेषः । यथा, महानाटकपतिलोके । ११ ।
"घटकोटाभिद्य वटस्य वकुलगणसुतः पाश्चा-
दुष्पाभीरवान्
विभाव्या प्रमदावसा एषुमधापोत्पासहस्र-
स्त्विष ।
आमोदः पुरतः प्रमोदसुहृदौ स चाभितो
दुर्म्मुखः
पश्चात्पार्श्वगतोऽस्य विघ्न इति मो यो विश
चाखेति च ॥"
वर्षविशेषः । यथा, ज्योतिस्तत्त्वधृतभविष्यपुराणवचनम् ।
"दुर्धामसंवत्सरे देवि ! सर्वशस्यमहार्घता ।
व्यवहाराश्च नश्यन्ति दुर्भिक्षे दुर्म्मुखाः प्रजाः ॥")
दुर्म्मुख, त्रि (दुष्टं सभञ्जकं मुखं मुखनिःसृतवचनादिकं यस्य ।) अप्रियवादी । तत्पर्य्यायः । मुखरः २ अबद्धमुखः ३ । इत्यमरः ।३।१।३६॥ (अप्रियदर्शनः । यथा, कथासरित्सागरे । १२ । ५२ ।
"पङ्के वशमकस्यापि स्नेह श्वशुरदुर्म्मुखम् ॥")
दुर्म्मूला स्त्री, (दुष्टं मित्रं मूलम् । यादिसमासः ।) मत्स्यभेदम् । इति लोकप्रसिद्धम् ॥
दुर्म्मेधाः, त्रि, (दुर्निन्दिता मेधा धारणावती बुद्धिर्यस्य । "नित्यमसिच् प्रजामेधयोः ।" ५ । ४ । १२२ । इति असिच् ।) मन्दमेधाः । इति व्याकरणम् । (यथा, महाभारते ।३।१०।५८।
"न किञ्चिद्बुद्धा दुर्म्मेधास्तस्मै किञ्चिदभाव
सुतः ॥")
दुर्म्मोहः, पुं, (दुर्निन्दितो मोहो यस्मात् ।) काकतुण्डी । इति राजनिर्घण्टः ॥
दुर्य्योधन, पु (दुःखेन युध्यतेऽसौ । युध+ "भाषायां शासियुधीति ।" युच् ।) स्वनामख्यातकुरुवंशीयप्रधानराजविशेषः । स धृतराष्ट्रस्य पुत्रः कुरुपाण्डवयुद्धे भीमेन हतः । तत्पर्य्यायः । कुरुराट् २ गान्धारेयः ३ सुयोधनः ४ । इति त्रिकाण्डशेषः ॥ (अयं कलेरंशेन पृथिव्यामवतीर्णः । यथा, महाभारते ।१ । ६७।८८-८९।
"कलेरंशस्तु सञ्जज्ञे भुवि दुर्य्योधनो नृपः ।
दुर्बुद्धिर्दुर्म्मतिश्चैव कुरूणामयशस्करः ॥
जगतो यस्तु सर्व्वस्य विद्विष्टः कलिपूरुषः ।
य सर्व्वां घातयामास पृथिवीं पृथिवीपते ॥")
दुर्लभ त्रि, (दुःखेन लभ्यते इति । दुर+लभ+ "ईषद्दुःसुष्विति ।" ३ । ३ । १२६ । इति खल् ।) दुष्प्रापः । इति मेदिनी । भे १६ ॥ यथा,—
"दुर्लभं प्राकृतं वाक्यं दुर्लभः क्षेमकृत् सुतः ।
दुर्लभा सदृशी भार्य्या दुर्लभः स्वजनः प्रियः ॥"
इति चाणक्ये । ५४ ॥
अतिप्रशस्तः । इति शब्दरत्नावली ॥
"सर्व्वत्र सुलभा गङ्गा त्रिषु स्थानेषु दुर्लभा ।
हरिद्वारे प्रयागे च गङ्गासागरसङ्गमे ॥"
इति कूर्म्मपुराणम् ॥
प्रियः । इति हेमचन्द्रः ॥
दुर्लभः, पुं, (दुर+लभ+खल् ।) कर्चूरः । इति मेदिनी । भे १६ ॥ कच्चूरः । इति राजनिर्घण्टः ॥ (विष्णुः । यथा महाभारते । १३ । १४९ । ८६ ।
"दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ॥"
"दुर्लभतया दुर्लभः ।
'अनेकजन्मसहस्रेषु तपोदानसमाधिभिः ।
नराणां क्षीणपापानां कृष्णभक्तिः प्रजायते ।
इति वचनात् भक्त्या लभ्य इति भगवद्वचनाच ।"
इति तत्र शाङ्करभाष्यम् ॥)
दुर्लभा स्त्री, (दुर्लभ+टाप् ।) श्वेतकण्टकारी । दुरालभा । इति राजनिर्घण्टः ॥
दुर्व्व, ई वधे । इति कविकल्पद्रुमः ॥ (भ्वा-पर सक-सेट । ईदित्वात् निष्ठायामनिट् ।) पञ्चमस्वरी । दूर्व्वः दुर्वी दुरः । इ, दूर्णः । इति दुर्गादासः ॥
दुर्व्वच त्रि (दुःखेन उच्यते । दुर+वच+खल् ।) दुःखकथ्यम् । यथा भारविः ।२ । २ ।
"अपि वागधिपस्य दुर्व्वचं
वचनन्तद्विदधीत विस्मयम् ॥"
दुर्व्वच, [स्] क्ली, (दुर्निन्दितं वचः ।) मन्दवाक्यम् । यथा —
"अथवा दुर्व्वचो भ्रातर्मेघाः स्तारिततोरितम् ॥"
रघुवंशः ॥
(दुष्टवक्तरि, त्रि ॥)
दुर्व्वर्ण्णं, क्ली (दुःखान्वितः सुवर्णादपेक्षया वर्णो यस्य ।) रजतम् । इत्यमरः । २ । ९ । ९६ ॥ (यथा, माघे । ४ । २८ ।
"दुर्व्वर्णभित्तिरिह सान्द्रसुधासवर्णा ॥")
एलवालुकम् । इति मेदिनी । णे ४२ ॥ कुत्सितवर्णे, त्रि । (यथा भागवते । ९ । १३ । ११ ।
"प्राणैर्हीनेन दुर्व्वर्णं मार्षिषस्ति वापरः ॥")
दुर्व्वर्ण्णक, क्ली, (दुर्व्वर्ण+स्वार्थे कन् रूप्यं वा कन् ।) रजतम् । इति हेमचन्द्रः ।
दुर्व्वाक, [च्] त्रि (दुष्टा वाक् यस्य ।) कद्वदः । इति हेमचन्द्रः । ३ । ११ ॥ (यथा, अथर्व्ववेदे । ४ । १७ । ५ ।
"दुर्णाम्नी सर्व्वा दुर्व्वाचस्ता अस्मन्नाशयामसि ॥")
दुर्दुष्टा वाक् ।) दुष्टवाक्ये, स्त्री ॥ (यथा, महाभारते । ७ । ७४ । ८८ ॥
"अतीव जल्पन् दुर्व्वाचो भवतीह विहेठकः ॥")
दुर्व्वाद, पुं (दुष्टो वादः ।) स्तुतिपूर्व्वकदुर्व्वाक्यम् । इति जटाधरः ॥ निन्दितवाक्यञ्च ॥
दुर्व्वासाः [स्] पुं, (दुष्टं निगूढमिथुनं वासः इव धर्म्मावरणत्व यस्य । तथा च महाभारतवचनम् ।
"निगूढमिथुनं धर्म्मं य स दुर्व्वाससं विदुः ॥")
मुनिविशेषः । स अत्रिमुनिपुत्रः शङ्करांशजातः । इति श्रीभागवतम् ॥ (यथा, विष्णुपुराणे । १ । ९ । २ ।
"दुर्व्वासाः शङ्करस्यांशश्चचार पृथिवीमिमाम् ॥")
तत्पर्य्यायः । कुमारस्वि २ । इति त्रिकाण्डशेषः ॥ तस्य भार्य्या और्व्वमुनिकन्या कन्दली । इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥ (महादेवः । यथा महाभारते । १३ । १७ । ६९ । तस्य सहस्रनामकीर्त्तने ।
"सामप्रसादो दुर्व्वासाः सर्व्वसाधुनिषेवितः ॥"
दुर्निन्दितं वासो वस्त्रं यस्य ।) मन्दवस्त्रयुक्ते, त्रि ॥ (यथा ऋग्वेदे । ७ । १ । १९ ।
"मा नो अग्नेऽवीरते परा दा दुर्व्वाससेऽमतये मा नो अस्यै ॥")
दुर्व्विध, त्रि, (दुर्दुष्टा विधा यस्य ।) दरिद्रः । इत्यमरः । ३ । १ । ४९ ॥ खलः । इति मेदिनी । धे ११ ॥ मूर्खः । इति शब्दरत्नावली ॥ (यथा, गो रामायणे । २ । ११ ९ । ६ ।
"प्राप्तेष्वर्थेषु सत्त्वेषु विद्यमानेषु दुर्व्विधाः ।
बुद्धिमान्तो विना माया निरयाय प्रवर्त्तन्ति हि ॥")
दुर्व्विनीतः पुं, (वि+नी+भावे क्त । दुष्टं विनीतं विनयो यस्य । यद्वा, दुर्+वि+नी+क्त ।) अविनीताश्वः । तत्पर्य्यायः । शूकलः २ । इति हेमचन्द्रः । ४ । ३ ११ ॥ अविनीतमात्रे त्रि ॥ (यथा, पञ्चतन्त्रे । ३ । १७ ।
"कुपुत्रोऽपि भवेत् पुंसां हृदयानन्दकारकः ।
दुर्व्विनीतः कुरूपोऽपि मूर्खोऽपि व्यसनी
खलः ॥")
दुर्व्वृत्त त्रि, (दुर्दुष्टं वृत्तं चरित्रं यस्य ।) दुर्जनः । यथा,—
"दुर्व्वृत्तवृत्तशमनं तव देवि ! शीलम् ॥"
इति चण्डी ॥
दुर्वृत्ते, क्ली । (यथा महाभारते ।१।११।१० ।
"दुर्व्वृत्त वार्त्तेरारवात्सत्वात् मनस्वानि ॥")
दुर्हृत्, [द्] त्रि, (दुष्टं हृदयं यस्य । "सुहृद्दुर्हृदौ मित्रामित्रयोः ।" ५।४।१५० । इति निपातनात् हृदयस्य हृद्भावः ।) शत्रुः । इत्यमरः । २ । ८ । १० ॥ (यथा, मार्कण्डेये । ३६ । ११ ।

"मित्राणामुपकाराय दुष्करं साधनाय च ।")
दुष्करिणी, त्रि । (यथा, महाभारते ।१।२१३।१५।
"आयसारमयं नूनं हृदयं मम दुष्करं ।
यन्नौ यदेनौ हृष्टाय प्रतिनौ नावदीर्यते ।")
दुष्कृदय, त्रि, (दुष्टं हृदयं यस्य । अप्रभुत्वेन न हृद्भाव ।) दुष्टान्तःकरणः । इति शब्दार्थकल्पतरुः ।
दुल, क उत्क्षेपे । इति कविकल्पद्रुमः । (चुरां-पर सक-सेट ।) क, दोलयति धूलिं वायुः । इति दुर्गादासः ।
दुलिः, पुं, (दोलतीति । दुल+"इगुपधात् कित् ।" उणां ४ । ११८ । इति इन् ।) मुनिविशेषः । कमठाम् स्त्री । इति मेदिनी । ले, २६ ।
दुली, स्त्री, (दुल+इन् । वा ङीप् ।) दुलिः । इत्यमरटीकायां भरतः ।
दुश्चरः, पुं, (दुःखेन चरतीति । दुर्+चर+अच् ।) भल्लूकः । इति हारावली । ११२ । भल्लूकः । इति राजनिर्घण्टः । (दुःखेन चर्य्यते इति । खल ।) दुर्गमे, त्रि । (यथा, रामायणे । ३ । ४६ । ७ ।
"प्रविष्टो सीतया सार्द्धं दुश्चरं दण्डकं वनम् ।"
दुश्चरणीय, त्रि । यथा, महाभारते । १२ । ५३ । ६ ।
"तपश्चराद्य विधिं माप । दुश्चरं दुर्बलेन्द्रियैः ।")
दुश्चर्म्मा, [न्] पुं, (दुष्टं चर्म्म यस्य ।) अप्रावृत मेढ्रः । "यथा दुश्चर्म्मा गुरुतल्पगः ।" इति स्मृतिः । तत्पर्य्यायः । शिपिविष्टः २ । खल्वाट ३ शिपिविष्टः ४ । इति हेमचन्द्रः । ३ । ११८ । कोठरामः । इति राजनिर्घण्टः ।
दुश्चिक्य, स्त्री, लग्नात् तृतीयस्थानम् । यथा —
"दश मैघूरणमारम्भं मत्सभे याम्रिनमन्मथे
दानथापि सुहृद्युत्ये तु शिशुकं पातालसम्भोऽपि च ।
दुश्चिक्य बहुसे वदन्ति सुमयो रिपुंघ तनो द्वादशि षट्कोण रिपुमन्दिरे नवमगे भाग्यं त्रिकोणं पुनः ।"
इति दीपिका ।
दुश्च्यवनः, पुं, (दुःखेन च्यवनं बहुकालानन्तरं पतनं यस्य । दुर्दैवच्यवनं प्रियो यस्य । प्रियेन अभिभूतत्वात् तथात्वम् । यद्वा दुःखेन च्यवते इति । च्यु गतौ + "हन्दपि गतर्थेभ्यः ।" ३ । ३ । १५८ । इति युच् ।) इन्द्रः । इत्यमरः । १ । १ । ४० । (अतिपात्यो त्रि । यथा, ऋग्वेदे । १० । ११ । १५ ।
"इन्द्रकारेश दुश्च्यवनेन भज्मना ।")
दुष, ईर य ओं वैकृते । इति कविकल्पद्रुमः । (दिवां परं-अक-अनिट ।) वैकृतमशुद्धिभावः । इर, अदुषत् अदुक्षत् । अकारानुबन्धादिभावस्य इ इत्यर्थः । य, दुष्यति लोकः प्रमादात् । ओं, दोषः । इति दुर्गादासः ।
दुष्कर, क्ली, (दुःखेन क्रियते इति । ख+खल ।) आकाशम् । इति शब्दार्थकल्पतरुः । (भावे खल ।) दुःखेन करणम् । (कर्म्मणि खल ।) दुःखेन क्रियमाण, त्रि । इति मुग्धबोधम् । (यथा देवीभागवते । ५ । १ । ६ ।
"यत् तव कृतं सहायेन वासुदेवेन दुष्करम् ।
विष्णोरवतारेण भिवस्याराधन कृतम् ।")
दुष्कर्म्म, [न्] क्ली (दुष्टं कर्म्म ।) पापम् । यथा,
"दुष्कर्म्मजा नृणां रोगा यान्ति चैव क्रमात् क्षयम् ।
जपैः सुरार्च्चनैर्होमैर्दानैस्तेषां शमो भवेत् ।"
इति शातातपीयकर्म्मविपाकः ।
(निन्दितकर्म्मा । दुष्टं कर्म्म अस्येति विग्रहे । दुष्कर्म्मकारके, त्रि । यथा, महाभारते । ५ । १६७ । ७ ।
"ततो यास्यति दुष्कर्म्मा नरके शाश्वती समाः ।")
दुष्कुलीनः पुं चौरनामगन्धद्रव्यम् । इति शब्द-रत्नावली । (दुष्कुले भवः । दुष्कुल+खः ।) दुष्कुलोद्भवे, त्रि । इति शब्दार्थकल्पतरुः । (यथा, महाभारते । ५ । ३८ । ४६ ।
"दुष्कुलीनः कुलीनो वा मर्य्यादां यो न लङ्घयेत् ।")
दुष्कृतं, क्ली, (दुष्टं कृतम् ।) पापम् । इत्यमरः । १ । ४ । २३ । तत्तु तत्कृत्यमरणानन्तरं तैन सह गच्छति । यथा,—
"गृहादर्थाः निवर्त्तन्ते श्मशानादपि बान्धवाः ।
सुकृतं दुष्कृतं चोभे गच्छन्तमनुगच्छतः ॥
तस्माद्धितं समासाद्य देयाद्वा पौरुषादपि ।
दद्यात् सम्यक् द्विजातिभ्यः कीर्त्तनानि च कारयेत् ।"
इति वह्निपुराणे यमाध्वगमनाध्यायः ।
(दुष्कृते, त्रि । यथा, महाभारते ।८।३३।१९०।
"दुष्प्राज्ञस्याप्रसादेन दुष्कृतेन च कर्म्मणा ।
मनुपाय बहूनि संख्या यत् स्त्री भवराघवा ।")
दुष्क्रीत त्रि, (दुष्टं क्रीयते स्म इति । दुर्+क्री+क्त ।) महार्घम् । यथा,—
"क्रीत्वा रुग्णेन यो दद्याद् दुष्क्रीतं मन्यते क्रयी ।
विक्रेतुः प्रतिदेयन्तत् तस्मिन्नेवाह्न्यविक्षतम् ।"
इति प्रायश्चित्ततत्त्वे नारदः ।
दुष्पुरः क्ली, (दुष्टं खनति आविष्करोतीति । खन+डः । "डश्च ।" ३ । २ । ४८ । इति विसर्गस्य षः ।) दुःखम् । इत्यमरटीकायां भरतः ।
दुष्खदिरः पुं, (दुष्टः खदिरः इति प्रादिसमासः ।) खदिरभेदः । तत्पर्य्यायः । काम्बोजी २ । कामकण्टकः ३ गोरटः ४ अमरः ५ घनतरः ६ बहुसारः ७ सारखदिरः ८ महासारः ९ सुगन्धिः १० । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । रक्तदोषशोथकण्डूति विषमीपललरक्तोन्मादभूतज्वरनाशित्वञ्च । इति राजनिर्घण्टः ।
दुष्ट, क्ली, (दुष+क्त ।) कुष्ठम् । इति शब्दचन्द्रिका । कुड इति ख्यातम् ।
दुष्ट, त्रि (दुष्यतीति+दुष+कर्त्तरि क्त ।) दुर्जनः । अधमः । इति जिनः । (यथा, महाभारते ।१।२३४।११ ।
"महाकुलीनाभिरपापिकाभिः
स्त्रीभिः सतीभिश्च पराक्रमज्ञ ।
प्रजावता पौत्रवता महात्मना
पौराय दुष्टाय प्रजा च भार्य्याः ।)
दुष्टदमः, पुं, (दुष्टो दम इति कर्म्मधारयः ।) दन्तो ह्यमुष्य । गृह्या मद इति भाषा । तत्पर्य्यायः । गर्ल ९ । इति हेमचन्द्रः ।३।४२८।
दुष्टा, स्त्री, (दुष्यति या शीलिदोषैरिति । दुष+क्त+टाप् ।) पुंश्चली । इति शब्दरत्नावली ।
दुष्ठु, अ (दुर् निन्दितं तिष्ठतीति+दुर्+स्था+"अपदुःसुषु स्थः ।" उणां । १।२६ । इति कुः । "सुषमादिषु च ।" ८।३।९८ । इति षत्वम् ।) निन्दा । इत्यमरः । ३ । ४ । १८ ।
दुष्ठु त्रि, (दुर्निन्दितं तिष्ठतीति+दुर्+स्था+कु प्रत्ययः ।) अविनीतः । इत्युणादिकोषः ।
दुष्पत्रः, पुं (दुष्टानि पत्राणि यस्य ।) चोरनामगन्धद्रव्यम् । इत्यमरः ।२।४।१२८ ।
दुष्प्रधर्षिणी, स्त्री, (दुःखेन प्रधृष्यते इति । प्र+धृष+णिनि स्त्रियां ङीप् । यद्वा, भावार्थे दुष्प्रधर्षीति सुप् ।) वार्त्ताकी । इत्यमरः । २ । ४ । ११४ । (पुं, धृतराष्ट्रपुत्रभेदः । यथा, महाभारते । १ । ६७ । ९४ ।
"विन्दानुविन्दौ दुर्द्धर्षः सुबाहुर्दुष्प्रधर्षणः ।"
दुःखेन धर्षणीये, त्रि । यथा, रामायणे । ३ । १८ । ९ ।
"प्रविश्य चाश्रमपदं तत्रापि दुष्प्रधर्षणम् ।
तदेवाश्रमपदं प्रविवेश निवेदितुम् ।")
दुष्प्रधर्षा, स्त्री, (दुःखेन प्रधृष्यते इति । प्र+धृष+अच्+टाप् ।) दुरालभा । खर्ज्जूरी । इति राजनिर्घण्टः । (पुं, धृतराष्ट्रपुत्रभेदः । यथा, महाभारते । ६ । ६१ । ९५ ।
"उग्रो भीमरथो भीमो वीरबाहुरलोलुपः ।
दुर्मुखो दुष्प्रधर्षश्च विवित्सुर्विकटः समः ।"
(दुःखेन पराभवनीये त्रि । यथा महाभारते । ५ । १५१ । ४६ ।
"सागरप्रतिमं राजन् दुष्प्रधर्षं दुरासदम् ।")
दुष्प्रधर्षिणी, स्त्री, (चीनप्रभृति दुःखेन धृष्यते इति । धृष्+आभीक्ष्ण्ये णिनि ।) दुष्प्रधर्षा । इत्यमरटीकायां भरतः । कण्टकारी । इति राजनिर्घण्टः । ठक्ती । इति भावप्रकाशः ।
दुष्प्रवेशा, स्त्री (दुःखेन प्रविश्यते इति । प्र+विश्+कर्म्मणि खल् । टाप् च ।) कन्थारी वृक्षः । इति राजनिर्घण्टः । (दुष्प्रवेशनीये, त्रि । यथा, रामायणे । ६ । ६ । ९ ।
"कृत्वा चौरमात्मना प्राकारा कन्दरा समाकुलाम्
दुष्प्रवेशां दुराराध्यं धर्म्मसङ्कटवर्त्तिनम् ।")
दुष्मन्त, पुं, (दुष् दोषवती मन्यते इत्युणादिकः । दुष+मन्+झ । निपातनात् साधुः ।) चन्द्रवंशीयराजविशेषः । स दैत्यिकः । तस्य पुत्रो भरतोऽभवत् । ऐलस्य वंशे सर्वज्ञो भरतो महायशाः । इति हेमाद्रितम् । (यथा, महाभारते ।१।६८।१।
"पौरवाणां वंशकरो दुष्मन्तो नाम वीर्य्यवान् ।

पृथिव्याश्चतुरन्ताया गोप्ता भरतसत्तम ॥”
विवरणमस्य तट्ट्याधात् विस्तरशो द्रष्टव्यम्। दुष्यन्त इत्यपि पाठः ॥)

दुःस्पर्शः, पुं (दुःखेन स्पृश्यते इति। दुर्+स्पृश+कर्म्मणि खल्। विसर्गस्य वा लोपः।) दुरालभा। इत्यमरटीकायां भरतः ॥ (पर्य्यायोऽस्य यथा,
“यासो यवासो दुःस्पर्शो धन्वयासः कुनाशकः।
दुरालभा दुरालम्भा समुद्रान्ता च रोदिनी ॥
गान्धारी कच्छुरानन्ता कषाया हरविग्रहा ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
दुःखस्पर्शे, त्रि ॥

दुःस्थः, पुं, (दुःखेन तिष्ठतीति। दुः+स्था+कः।) कुक्कुरः। कुक्कुटः। इति शब्दार्थकल्पतरुः ॥ (दुःस्थिते, त्रि। यथा भट्टौ। २। ३८।
“वशिवन्ध्ये जनाधिपमंस्थे
पक्षेऽन्यसं दैत्यकुल विजिघ्ये।
कथ्यान्तदुःस्था वसुधा तयोर्वै
येनैव भारोऽस्ति गुरुर्न तस्य ॥”)

दुह, हर् अर्द्दने। इति कविकल्पद्रुमः ॥ (भ्वां-पर सक सेट।) हर्, अदुहत् अदोहीत्। अर्द्दनमिह वध। इति दुर्गादासः ॥

दुह, ज न औ दुहि। इति कविकल्पद्रुमः ॥ (अदां-उभ-सक अनिट।) ज्ञ क दोहनम्। तच्च मलीकरणमिति धातुपारायणिकाः। ज न, दोग्धि दुग्धे गां दुग्ध गोपः। स्वयं प्रस्नुवत्याः धेनोरुपयुक्ता वत्सभावस्य पचति मेदिनीति किराते वत्सभोति कर्म्मणो विद्यमानतया कर्म्मकर्तृत्वाभावात् स्खलितमित्येके। दुहादेरप्रधानकर्म्मविषये कर्म्मकर्तृत्वे प्रधानकर्म्मप्रयोगो दुग्धे वारः। इति कुलचन्द्रः। वस्तुतः तु अलपवा-वयोऽपि प्रयत्नमिति वचनात् पयःदुग्धो कर्म्मणि विद्यमानेऽपि कर्म्मकर्तृत्वम्। इति दुर्गादासः ॥

दुहिता, [ऋ] स्त्री, (दोग्धि विवाहादिकाले धनादिकमाकृष्य गृह्णातीति। यद्वा, दोग्धि गा इति। बाल्यकाले कन्यासु एव गोदोहनभार स्थितेस्तथात्वम्। दुह+“नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ।” उणां। २। ९६। इति तृच्। निपातनात् गुणाभावः।) कन्या। इत्यमरः। २। ६। २८। कन्यादानपात्राणि यथा,—
“लब्धा वरीयो कामस्य हयोति कामिनी परम्।
वराय तु कुलीनाय शुद्धायाग्निने तथा ॥
दरिद्राय च मूढाय योगिने कुत्सिताय च।
अत्यन्तकोपयुक्ताय चात्यन्तदुर्मुखाय च ॥
चापलायाङ्गहीनाय चान्धाय बधिराय च।
जडाय चैव मूकाय क्लीवतुल्याय पापिने ॥
ब्रह्मघ्नो लभेत् सोऽपि यः स्वकन्यां ददाति च।
शान्ताय गुणिने चैव यूने च विदुषेऽपि च ॥
वैष्णवाय सुतां दत्त्वा दशवाजिफलं लभेत् ॥” ०॥
कन्याविक्रये दोषो यथा,—
‘यः कन्यापालनं कृत्वा करोति विक्रयं यदि।
विपदा धनलोभेन कुम्भीपाकं स गच्छति ॥
कन्यामूत्रपुरीषञ्च तत्र भक्षति पातकी।
कृमिभिर्दंशितः काकैर्यावदिन्द्राश्चतुर्दश ॥
मृतश्च व्याधयोनौ च स लभेज्जन्म निश्चितम्।
विक्रीणीते मांसभारं वहत्येवं दिवानिशम् ॥”
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥
कन्यादानफलं यथा,—
“दशवाजिसमा कन्या दीयते ब्राह्मणाय सत्।
वेदज्ञाय पवित्राय चाप्रतिग्रहशालिने ॥
सन्ध्यापूतवेदपाठकारिणे सत्यवादिने।
अक्षौ भरता कन्या च दशवापीफलप्रदा ॥
त्रिसन्ध्याकारिणे सत्यवादिने यज्ञशालिने।
वेदज्ञाय च विप्राय दत्ताशुफलदायिनी ॥
प्रतिग्रहवर्ज्जिताय सन्ध्याहीनाय नित्यशः।
मूढाय दत्ता कन्या च सा चतुःफलदायिनी ॥
परान्नपरिपुष्टाय याचकाय द्विजाय च।
शठाय सन्ध्याहीनाय वाप्येकफलदा सुता ॥
धर्म्मसन्ध्यास्नानविहीनाय शठाय च।
विप्रोद्भवाय दत्ता या चाप्यर्द्धफलदा सुता ॥
पापिने शूद्रजाताय विप्रवेशोद्भवाय च।
दत्ता चाण्डालतुल्याय कन्या सा नरकप्रदा ॥
विष्णुभक्ताय विदुषे विप्राय सत्यवादिने।
जितेन्द्रियाय दत्ता या विंशद्वापीफलप्रदा ॥
[illegible] दिव्यरूपं विधाय च।
एवम्भूताय दत्त्वा च मोदते विष्णुमन्दिरे ॥
दत्त्वा कन्यां सुशीलाय वराय वरयेऽथवा।
नारायणस्वरूपश्च भवेदत्र सुतो ध्रुवम् ॥
विष्णुभक्तो यदा कन्यां ददाति विष्णुप्रीतये।
स लभेद्धरिदास्यञ्च ध्रुवं विप्रोद्भवाय च ॥” ०॥
विवाहानन्तरं कन्याया भर्तृगृहगमनसमये पित्रादीनां रोदनं शास्त्रसिद्धम्। यथा दुर्वासा अत्र शौर्वकन्यायाः कन्दल्या विवाहे।
“कन्यासमर्पणं कृत्वा मोहाद्रुरोद च।
कन्यामदाप्य शुचि स्वकन्याविरहातुरः ॥
अपत्यभेदशोकौघः ज्ञानारामं न शुचति।
यदीन पैतरीं प्राप्य बोधयामास कन्यकाम् ॥
[illegible] शोकयुताम् ॥”
इति ब्रह्मवैवर्त्ते [illegible] ॥

दुहितृपतिः, पुं (दुहितुः सुतायाः पतिः। “विभाषा स्वसृपत्योः।” ६। ३। २४। इति विभक्त्यलुक्।) जामाता। इत्यमरटीकासारसुन्दरी ॥

दुह्या, स्त्री, (दुह्यते इति। दुह+“एतिस्तुशास्वृदृजुषः क्यप्।” ३। १। १०९। इत्यत्र “शंसि दुहिगुहिभ्यो वा।” इति काशिकोक्तेः क्यप्।) दोहनयोग्यम्। दोह्यम्। इति व्याकरणम् ॥

दू, औ ङ य खेदे। इति कविकल्पद्रुमः ॥ (दिवां-आत्म-अकं-च सेट।) दीर्घ इह उप-[illegible]। औ, दून। ङ य, दूयते देहो जनः। इति चतुर्भुजः। मां हृद् धाम्ना दूयते इति रघुः। इति दुर्गादासः ॥

दूडभः त्रि, (दुःखेन दभ्यते इति। दुर्+दम्भ+खल्। “दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वञ्च।” ६। ३। १०९। इत्यत्र वार्त्तिकेनोत्वं भस्य ढत्वञ्च।) [illegible]। विपद्ग्रस्तः। इति [illegible] ॥ (दुरत्यः। यथा ऋग्वेदे। १। १५। ६।
“ध्रुव इव धृतव्रतमिवावच्छूळभम् ॥”
“दूडभ दुरेव शत्रुभिर्वा विनाशयितुमशक्य-मित्यर्थः।” “दूडभ इत्य भक्षीकरणे दुःखेन दभ्यते इति दुरेव इत्युपदिव्यादिवादुरित्युप-पदे दभे खल् प्रत्ययो बहुलमिवुकारस्य ऊकारो रेफस्य लोपः दकारस्य डकारो धकारस्य च भकारः ॥” इति तद्भाष्ये सायनः ॥)

दूडाशः, त्रि, (दुःखेन दाश्यते यः। दुर्+दाशृ+खल्। “पृषोदरादीनि यथोपदिष्टम्।” ६। ३। १०९। इत्यत्र “दुरो दाशनाशेति।” वार्त्तिकोक्त्या ऊत्वं डत्वञ्च।) पीडायुक्तः। इति सिद्धान्तकौमुदी ॥ (यथा, अथर्ववेदे। ११। १। १।
“ब्रह्मणो वच्छाकने येना दूडाशो अस्यसि ॥”)
दन्त्यसान्तोऽपि ॥

दूढ्यः, त्रि, (दुःखेन ध्यायतीति। दुर्+ध्यै+खल्। “दुरो दाशनाशदभध्येषूत्वमुत्तरपदादेः ष्टुत्वञ्च।” ६। ३। १०९। इत्यस्य वार्त्तिकोक्त्या ऊत्वं ढत्वञ्च।) अधमः। इति सिद्धान्तकौमुदी ॥

दूणाशः, त्रि, (दुःखेन नाश्यते असौ। दुर्+नाशि+खल्। “दुरो दाशनाशेति।” ६। ३। १०९। इत्यस्य वार्त्तिकोक्त्या ऊत्वं णत्वञ्च।) दुःखेन नष्टः। इति सिद्धान्तकौमुदी ॥ (नाशयितुमशक्यः। यथा, ऋग्वेदे। ८। ६२। १२।
“यो दूणाशो वनुष्यता ॥”)

दूतः, पुं, (दूयते सन्तापमानादिनेति। दू+“दुतनिभ्यां दीर्घश्च।” उणां। ३। ९०। इति क्तः दीर्घश्च।) वार्त्ताहरः। तत्पर्य्यायः। सन्देशहरः २। इत्यमरः। २। ८। १६। वार्त्तिकः साधकः ३। इति शब्दरत्नावली ॥ तस्य लक्षणं यथा,—
“यथोक्तवादी दूतः स्याद्देशभाषाविशारदः।
शक्तः क्लेशसहो वाग्मी देशकालविभागवित् ॥
विज्ञातदेशकालश्च दूतः स स्यात् महीक्षितः।
वक्ता नयस्य यः काले स दूतो नृपतेर्भवेत् ॥”
इति मत्स्यपुराणम् ॥
अपि च।
“मेधावी वाक्पटुः प्राज्ञः परचित्तोपलक्षकः।
धीरो यथोक्तवादी च एष दूतो विधीयते ॥”
इति चाणक्ये। १०६ ॥
अन्यच्च।
“परेङ्गितज्ञः परवाक्यार्थेष्वपि तत्त्ववित्।
धरेन्द्रधर्म्मतिर्धीरो दूतः स्यात् [illegible] ॥
दूतमेव प्रकुर्वीत सर्व्वशास्त्रविशारदम्।
इङ्गितज्ञ तदा [illegible]
[illegible]
[illegible] दूतो राजः [illegible]।
दूत एव हि सन्धत्ते भिनत्त्येव च संहतान्।
[illegible] तथा [illegible] ॥

दूताख्योऽमात्यमुख्ये सर्वे पादाङ्गुष्ठार्पिते ।
विस्मर्यापि कार्यवशात् प्राप्य न करोति च ॥
मिताक्षः कार्यमात्रोक्तौ न कुर्यादुत्तरोत्तरम् ।
यदोक्तवादी सन्देशहारको शेषहारक ॥
तत्र दूतो प्रशस्तेन निगमयेदुत्तरोत्तरम् ।
मात्राभिर्येन भूपाय भाटैर्निमज्जयन्ति ॥
दूतो हि न लिखेत् किञ्चित् विशेषात् चिन्ति-
तं प्रियम् ।
एकग्रामेऽपि न ब्रूयात् स्वामिनः कापि
वैप्रियम् ॥"
इति युक्तिकल्पतरुः ॥ * ॥
अथ दूते पञ्चगुणाः । निजप्रभुनिष्ठ श्रीचिह्नो
मधकरत्वम् १ प्रभुचोभकरचेष्टा २ अघ-
श्रीयता ३ दक्षता ४ निर्भयत्वम् ५ । इति कवि
कल्पलता ॥ (वेदकोऽभिदूतो यथा,—
"मातरीपकरादेव दूतो याति भिषक्पते ।
तस्य परीक्षा कार्या वैद्य यत्नतो मद ॥
स्वप्नावस्थं बधिरञ्च वामनं
खिन्नञ्च कृष्णं हृषितञ्च श्रीयम् ।
मातुः सुखार्त्तं मानसञ्च दीर्घं
प्रकृत्य वै वैद्यविदो वदन्ति ॥"
"यः वाक्येषु क्रोधनभाषणादि
भिन्नविनष्टोत्तरपीतकञ्च ।
सते न प्रशस्ताः प्रवदन्ति धीराः
दूता विकारं प्रतिषेधयन्ति ॥
यः काष्ठवस्त्रोद्धृतपाशपाणि-
श्चापातुरो दीनवचांसि रोदिति ।
प्रक्लिन्नवेशोऽप्रमनोज्ञकोऽपि
गर्न्तार्तश्चाप्यशुभकारिदूतः ॥"
"अकटकन्योद्धतश्च चक्रपादेन तिष्ठति ।
तस्मान्नाक्रन्दवादी यो न प्रस्तो वैद्यकर्मणि ॥
यथा तथापि श्रीहिञ्च व्याधितोत्थाय सृष्टति ।
मार्गे प्रसार्य तिष्ठति मस्तके विन्यसेत करम् ॥
भिनत्ति काष्ठकाष्ठञ्च तृणं स्फोटयते क्वचित् ।
अथवा भूतले नाद्ये तृणं वा कृषति पुनः ॥
भूमिं लिखति पादेन रेखां वापि करोति यः ।
निर्गत्य वा कुरुते वस्तु च दूतोऽरिष्टकारकः ॥
यः श्वेतवस्त्रासनपूर्णपाणि-
श्चन्दनताम्बूलसुमः प्रयुक्तः ।
प्रियस्तथा मागधकः सुधीन
प्रशाधिकशाङ्गती सुहाय ॥"
"स्याद्यारोग्यदूतोऽमय बद्धश्लिष्टमेदमाम्भिश
ग्रामी
इत्युक्ते वैद्य प्रकृत्य प्रवदति निपुण मातिरोधे
न चोक्तम् ।
उत्तिष्ठति प्रयातं कुरु वचनमिदं दीर्घवार्तां
तथोऽपि
माद्यैः स्वार्थं प्रहर कुसुमसहृदयं रोगिणां
रेहदाभम् ।
पूर्वोऽरिष्टं कलापाय प्रदातृ प्रातकाशिराः ।
वन्दित वैद्यमाप्य रोगिन्नाय सुखावहम् ॥
धवलसङ्कोऽमधिवोऽपि कार्यं याव तुमामिनम् ।
गन्ध प्रामदाः याचा वैद्यपादाय प्राप्नये ॥
योऽभिवादयापि वैद्यस्य चर्मं प्रपृच्छति पुनः ।
फल ददाति पुष्पं वा रोगिणाय सुखावहम् ॥
तस्य चौत्र कथा प्राणिनिश्च दूता इदं विदुः ।
किमत्र बहुनोक्तेन राघो दूत सुखावह ॥"
इति भावे चेत् द्वितीयस्याष्ट षष्ठोऽध्याये ॥)

दूतघ्नी स्त्री, (दु उपताप+भावे औणादिकत
दीर्घश्च । दूतं उपतापं हन्तीति । हन+टक ।
ङीप ।) कदम्बपुष्पी । इति शब्दचन्द्रिका ॥

दूति स्त्री, (दूयते मायकादिवार्ताहरणा
दिनेति । दु+बाहुलकात् ति दीर्घश्च । इत्यु
ज्ज्वलदत्तः । ४।१०८ ।) दूती । इति शब्दरत्ना
वली ॥ (यथा, रघुः । १८ । ५३ ।
"प्रतिलतिरथवाभ्यो दूतिसन्दर्शिताभ्यः
समधिकतरदृप्ता शुद्धसन्तानकामे ॥")

दूतिका, स्त्री, (दूतिरेव । स्वार्थे कन् । ततष्टाप् ।)
दूती । इति शब्दरत्नावली ॥ (यथा, पञ्च
तन्त्रे । १ । १७८ ।
"असुको कुक्कुटरिव वयं व्यावाहूतिका ।
दूतिका परकार्येषु यथो दोषाः स्वयं कृताः ॥")

दूती, स्त्री, (दूति । कृदिकारादिति वा ङीष् ।)
सारिका । इति राजनिर्घण्टः ॥ दौत्यकर्मणि
नियुक्ता स्त्री । स्त्रीपुंसो सन्देशप्रापिका । तत्
पर्यायः । सञ्चारिका २ । इत्यमरः । २ । ६ ।
१७ ॥ दूति ३ दूतीका ४ दूतिका ५ । इति
शब्दरत्नावली । (यथा, आर्यासप्तशत्याम् ।२८ ।
"दयितप्रहिता दूतीमाकलय्य करेण तस्यि
मध्यभागे ।
लीलातुलककलाभिर्दूरादसौराङ्गि । कथयति ॥")
दौत्यव्यापारपारङ्गमा । तस्याः संघट्टनविरह-
निवेदनाद्योनि कर्माणि । इति रसमञ्जरी ॥
(सद्गुणा यथा, शाहित्यदर्पणे । ३ । १२६-
१२७ ।
"दूत्य सखी नटी दासी धात्रेयी प्रतिवेशिनी ।
बाला प्रव्रजिता कारूः शिल्पिन्याद्याः स्वयं
तथा ॥
कलाकौशलमुत्साहो भक्तिश्चित्तज्ञता स्मृतिः ।
माधुर्यं नर्मविज्ञानं वाग्मिता चेति तद्गुणाः ।
एता अपि यथौचित्यादुत्तमाधममध्यमाः ॥")

दूतीका, स्त्री, दूती । इति शब्दरत्नावली ॥

दूत्य, क्ली, (दूतस्य भावः कर्म वा । दूत+"दूत
वणिग्भ्यां च ।" ४।१।१२६। इत्यत्रेति वार्त्ति
कोक्त्या य । मेदिन्यां तु "दूतस्य भागकर्मणी ।"
४ । ४ । १२ । इति च ।) दूतकर्म । (यथा
हरिवंशे । १ । ८ । ३१ ।
"दूत्यञ्च यथाशाभिरुद्दि न तत्करिष्यसि ॥"
तथा च ऋग्वेदे । १ । १६१ । १ ।
"किमीयते दूत्यम् ॥") दूतस्य भावः । इत्यमरः ।
२।८।१६ ॥ दूतस्य भावः । इति मेदिनी । य,१२॥

दून, त्रि, (क्तो दू ङ ष रिदे+क्त । "ओदि
तश्च ।" ८ । २ । ४५ । इति निष्ठातस्य न ।
यद्वा, दु गतौ+क्त । "दुग्वोर्दीर्घश्च ।" इति

वार्त्तिकोक्त्या तस्य न दीर्घश्च ।) तपापीडितः
तापः । इत्यमरः । ३ । १ । १०२ ॥ पश्चात्तप्तः ।
यथा, नैषधे । २ । ५३ ।
"पितेन दूने रसने सितापि
तिक्तायते हंसकुलावतंस ! ॥"

दूरं, त्रि, (दुर् दुःखेनेयते प्राप्यते इति । दुर्+
इण्+"दुरीणो लोपश्च ।" उणां २ । २० । रक्
धातोर्लोपश्च ।) अनिकटम् । अप्रत्यासन्नम् ।
तत्पर्यायः । विप्रकृष्टम् २ । इत्यमरः । ३ । १ ।
६८ ॥ असन्नम् ३ । इति शब्दरत्नावली ॥
(यथा, किरातार्जुनीये । १ । ३१ ।
"शरीरस्य गुणानाञ्च दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥")
आरे १ पराके २ पराचैः ३ आरे ४ परा-
वतः ५ । इति पञ्च दूरनामानि । इति वेद
निघण्टौ ३ अध्याये ॥

दूरदर्शन, पुं (दूरेऽपि दर्शनं दृष्टिर्यस्य ।) गृध्रः ।
इति राजनिर्घण्टः ॥ (दूरदर्शी, त्रि । यथा भाग
वते । १ । ११ । ८
"अहो सनाथा भवता स्म यद्वयं
त्रैविष्टपानामपि दूरदर्शनम् ।
प्रेमस्मितस्निग्धनिरीक्षणाननं
पश्येम रूपं तव सर्वसौभगम् ॥")

दूरदर्शी, [न्] पुं (दूरात् दूरमपि वा पश्यतीति ।
दृश्+णिनि ।) पण्डितः । इत्यमरः । ३ । ४ ।
५ ॥ इति सिद्धान्तकौमुदी । दीर्घदर्शिनि, त्रि ।

दूरदृक्, [श्] पुं, (दूरं दूराद्वा पश्यतीति । दृश्+
क्विप् ।) पण्डितः । इति शब्दरत्नावली । गृध्रः ।
इति हेमचन्द्रः । ४ । ४०१ ॥ दीर्घदर्शिनि, त्रि ।

दूरमूल, पुं, (दूरे अनिकटे मूलं यस्य ।) मुञ्ज
तृणम् । इति राजनिर्घण्टः ॥

दूरवेधी, [न्] त्रि, (वेधोऽस्यास्तीति । दूरं ।
दूरात् वेधी ।) दूरात् लक्ष्यभेदकः । तत्पर्यायः ।
दूरापाती २ । इति हेमचन्द्रः । ३ । ४३७ ॥

दूरीकृतधन, त्रि, (दूरे ईरितं ईरितं यस्य ।)
किङ्करः । इति शब्दमाला ॥

दूर्य्य क्ली (दूरे परित्याज्यम् । दूर+यत् ।) विष्ठा ।
इति शब्दरत्नावली ॥ (दूराय रागपूरीषे
साय साधु इति यत् ।) मलो । इति राज
निर्घण्टः ॥

दूर्वा स्त्री, (दूर्वति दूर्वाते वा । दुर्व हिंसायाम्+
अच् घञ् वा । "अकर्त्तरि च ।" ३।३।१९ ।
इति दीर्घः ।) तृणविशेषः । तत्पर्यायः ।
शतपर्विका १ सहस्रवीर्या २ भार्गवी ३ रुहा ४
अनन्ता ५ । इत्यमरः । २।४।१५८ ॥ शितपर्णी ७
दुर्मरा ८ । बहुवीर्या ९ हरिता १० हरि
ताली ११ कच्छवहा १२ ॥ सुतापा पर्याय ।
शतवीर्या १ महौषधी २ शतकाण्ड ३
भीलोमी ४ । इति जटाधरः ॥ शतपर्वा ६
विजदूर्वा ६ शिवा ७ । इति रत्नमाला ॥ अमृता ८
अमृतापरा ९ । इति शब्दरत्नावली ॥ (यथा
महाभारते । १ । ११० । १८ ।

"कृपाकारेण दूर्व्वेयं बक्तीर्णेव च भूरियम् ।")
अस्या गुणः । रक्तपित्तकफुलगदोषनाशित्वम् ।
इति राजवल्लभः ॥

दूर्व्वाष्टमी, स्त्री, (दूर्व्वा तद्रूपा गौरी तत्प्रिया अष्टमी ।) भाद्रशुक्लाष्टमी । तत्र कर्त्तव्यव्रतविधि र्यथा —
"श्रावण् भाद्रपदे मासि शुक्लाष्टम्यामुपोषितः ।
दूर्व्वां गौरीं गणेशञ्च फलाकारं शिवं यजेत् ॥
फलपुष्पादिभिः सर्व्वैः शम्भुं नम शिवाय च ।
अविच्छिन्नसन्तानवती भक्त्या यथा ॥"
इति भविष्यपुराणवचनम् ॥ ॥
तद्व्रतप्रयोगविधिर्यथा,—
पूर्व्वदिने संयमं विधाय तद्दिने प्रातः स्नानमाचरेत् आचमनं चोपविश्यासनं आचम्य कासनाद्य सर्व्वार्घं दत्त्वा सङ्कल्पं कुर्य्यात् । विष्णुर्नमोऽद्य भाद्रे मासि शुक्ले पक्षे अष्टम्यां तिथावारभ्यामुकगोत्रा श्रीअमुकी मह्लोकावधि करणकसुखसौभाग्याविच्छिन्नपुत्रपौत्रादिलाभपूर्व्वकब्रह्मलोकप्राप्तिकामा श्रीविष्णुप्रीतिकामा वा भविष्यपुराणोक्ताष्टावर्षे निष्पादितदूर्व्वाष्टमीव्रतमहं करिष्ये । इति सङ्कल्प्य सूक्तं पठित्वा घटस्थापनादिकं विधाय गणेशादिदेवताः सम्पूज्य ध्यानं कुर्य्यात् । ० । यथा,—
"नीलोत्पलदलश्यामं चतुर्ब्बाहुं किरीटिनम् ।
शङ्खचक्रगदापद्मधारिणं वनमालिनम् ॥
श्रीवत्सलक्ष्मोपेतं श्रिया वायया समन्वितम् ॥"
इति ध्यात्वा स्वशिरसि पुष्पं दत्त्वा मानसैरुपचारैः सम्पूज्यावाहनं तथा पुनर्ध्यात्वावाह्य पाद्यादिभिः पूजयेत् । एतत् पाद्यं ॐ विष्णवे नमः । एवं क्रमेण संपूज्य आवरणदेवताः पूजयेत् । यथा ॐ पृथ्व्यै नमः । एवं दुर्गायै गौर्य्यै श्रियै सरस्वत्यै भद्रायै दित्यै अदित्यै सुधियायै फलन्यायै मन्दोदर्य्यै शुभमायै शाण्डिल्यै जयायै विजयायै रमायै रौद्रायै रेवत्यै दमयन्त्यै शीलायै रुक्मिण्यै रमायै वासुदेवाय देवक्यै विष्णवे महादेवाय सर्व्वेभ्यो देवेभ्यः सर्व्वाभ्यो देवीभ्यः । ततो दूर्व्वां ध्यायेत् । ० ।
ॐ नीलोत्पलदलश्यामां सर्व्वदेवशिरोधृताम् ।
विष्णुदेहोद्भवां पुण्यामन्त्रैरभिविषिताम् ॥
सर्व्वदेवाश्रयां दूर्व्वाममरां विष्णुरूपिणीम् ।
दिव्यगन्धवदाभां धर्म्मार्थकाममोक्षदाम् ॥
एवं ध्यात्वा षोडशोपचारैः पूजयेत् ।
एतमासनं ॐ दूर्व्वायै नमः । एवं क्रमेण सम्पूज्य अक्षयत्रियुक्तदोरकं फलानि नैवेद्य नीतान्ति दत्त्वा प्रणमेत् ।
"त्वं दूर्व्वेऽमृतनामासि पूजितासि सुरासुरैः ।
सौभाग्यसन्ततिं दत्त्वा सर्व्वकार्य्यकरी भव ॥
यथा शाखाप्रशाखाभिर्व्विस्तृतासि महीतले ।
तथा ममापि सन्तानं देहि त्वमजरामरम् ॥"
ततो भोजनसुदृढ्यर्थं । डोरकं वामहस्ते बद्धा कथां शृणुयात् । ० ।

अथ कथा ।
युधिष्ठिर उवाच ।
"व्रतमेकं समाचक्ष्व विचार्य्य मधुसूदन ! ।
येन सन्ततिविच्छेदो जायते न कदाचन ॥
श्रीकृष्ण उवाच ।
मासि भाद्रपदेऽष्टम्यां शुक्लपक्षे युधिष्ठिर ! ।
दूर्व्वाष्टमीव्रतं नाम या करोति पतिव्रता ॥
न तस्याः क्षयमाप्नोति सन्तानं याप्यमीदृशम् ।
वर्द्धते वर्द्धते नित्यं यथा दूर्व्वा तथा कुलम् ॥
युधिष्ठिर उवाच ।
कथमेषा समुत्पन्ना कस्माद्दूर्व्वा चिरायुषी ।
कस्माद्वन्द्या पवित्रा च लोके धन्या महीतले ॥
केन वा तद्व्रतं देव ! चरितं केन केशव ! ॥
श्रीकृष्ण उवाच ।
क्षीरोदसागरे पूर्व्वं मथ्यमाने सुरार्थिना ।
विष्णुना बाहुजङ्घाभ्यां विधृतो मन्दरो गिरिः ।
भ्रमता तेन वेगेन रोमाण्याघर्षितानि वै ।
ऊर्म्मिभिस्तानि रोमाणि चोत्क्षिप्तानि तटान्तरे ॥
अजायत शुभा दूर्व्वा रम्या हरितशाद्वला ।
एवमेषा समुत्पन्ना दूर्व्वा विष्णुतनूद्भवा ॥
तस्या उपरि विन्यस्तं मथितामृतमुत्तमम् ।
देवदानवगन्धर्व्वयक्षविद्याधरोरगैः ॥
तत्र येऽमृतकुम्भस्य निपतुर्व्वारिबिन्दवः ।
तैरियं अमृतमाधाय दूर्व्वा चैवाजरामरा ॥
वन्द्या पवित्रा देवेषु सर्व्वदाभ्यर्थिता तथा ।
पूजयेत् प्रयत्नेन ह्यर्व्वानाविधैरपि ।
अष्टम्यां गन्धपुष्पैस्तु धूपाद्यैर्दीपकैस्तथा ।
नानाफलैस्तथा भक्ष्यैर्मोदकैर्लड्डुकैस्तथा ॥
नारङ्गैश्च फलैर्देवीजम्बीरैः शोभनैः ।
दध्यक्षतैः पयोभिश्च धूपनैवेद्यदीपकैः ॥
अनेनैवानेन स्तवेन ! ध्यायन् कथितं मया ।
त्वं दूर्व्वेऽमृतनामासि वन्दितासि सुरासुरैः ।
सौभाग्यं सन्ततिं दत्त्वा सर्व्वकार्य्यकरी भव ।
यथा शाखाप्रशाखाभिर्व्विस्तृतासि महीतले ॥
तथा ममापि सन्तानं देहि त्वमजरामरम् ।
एवमेव पुरा पार्थ ! पूजिता विष्णुपत्निभिः ॥
सैवा पत्नीभिरन्याभिः भगिनीभिस्तथैव च ।
पूजिता च तथा गौर्य्या देव्या रम्भा श्रिया तथा ॥
सरस्वत्या भद्रया च दित्याऽदित्या शुभोत्तया ।
विन्ध्यगया वरुणया दक्षया सुधोत्तया ॥
मन्दोदर्य्या चण्डिकया मायया रौद्रया तथा ।
ब्रह्मलोके च रेवत्या दमयन्त्या सुशीलया ॥
रुक्मिण्या सत्यया च रम्भया मित्रविन्दया ।
मेनकया मेनकया तथैव सावित्र्यादिभिः ॥
स्त्रीभिरभ्यर्थिता दूर्व्वा सौभाग्यसुखदायिनी ।
भार्त्तासि सुचिरत्वाभिर्दूर्व्वा संपूजिता चरेत् ॥
दत्ता प्रियाणि विप्रेभ्यः धनानि विविधानि च ।
तिलपिष्टानि शाल्यन्नपक्वपिष्टानि पायसम् ॥
भोजयित्वा सुहृद्भिश्च समन्वितस्तथा ।
ततो गृहीत्वा फलं सर्व्वं भक्त्या समाहिता ।
वाचा चैव प्रकुर्व्वीत व्रतानामुत्तमम् ।
सर्व्वेषां सुखसौभाग्यपुत्रपौत्रादिभिर्युता ।
ब्रह्मलोके चिरं स्थित्वा चतुर्व्वर्गं गता पुनः ।
वसति रमया सार्द्धं यावच्चन्द्रदिवाकरौ ॥
भैयाष्टतेऽम्बरतले विमले च पक्षे
माद्याष्टमीव्रतमनो नभसीह कुर्य्युः ।
दूर्व्वां तदन्ततिले प्रतिपूजयेयु-
स्ताः प्राप्नुयुः सकलसिद्धिसमृद्धिवृद्धिम् ॥"
इति भविष्योत्तरे दूर्व्वाष्टमीव्रतकथा समाप्ता ॥

दूलिका, स्त्री (दूली+स्वार्थे कन् । टाप् पूर्व्व ह्रस्वश्च ।) नीली । इति शब्दरत्नावली ॥

दूली, स्त्री, (दूर दूरपर्य्यन्तमस्या यातीति । दूर+अच् । रस्य लः । गौरादित्वात् ङीष् ।) नीली । इति शब्दरत्नावली ॥

दूष्य, क्ली (दूष्यते इति । भावे क्विप् । दूः खेदस्तां ध्यायते अनाभूतत्वात् पर्य्यायमस्यतीति । दू+ध्यै+क ।) दूष्यम् । पटमण्डपम् । इत्यमरटीकायां सारसुन्दरी ॥

दूषक, त्रि, (दूषयतीति । दुष+णिच्+"ण्वुल्तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) दोषोत्पादकः । तत्पर्य्यायः । पातकः २ । इति त्रिकाण्डशेषः ॥ (यथा, मनौ । ८ । २१२ ।
"कूटशासनकर्त्तॄंश्च प्रकृतीनाञ्च दूषकान् ।
स्त्रीबालब्राह्मणघ्नांश्च हन्याद्द्विट्सेविनस्तथा ॥")

दूषण, पुं (दूषयतीति । दुषि+ल्यु ।) रावणभ्रातृखरसेनापतिः । इति रामायणम् ॥ (यथा, रघुः । १२ । ४६ ।
"अवध्यनेन काकुत्स्थः प्रयुक्तमथ दूषणम् ।
न चक्षमे शुभाचारः स दूषणमिवात्मनः ॥"
दूषि+भावे ल्युट् ।) दोषः, क्ली ॥ (यथा, देवीभागवते । १ । १० । २४ ।
"पतितोऽहं स्वयं पित्रा दूषणं कस्य दीयते ॥")

दूषणारिः पुं, (दूषणस्य राक्षसस्य अरिः ।) श्रीरामः । इति शब्दरत्नावली ॥

दूषिः, स्त्री, (दूषयतीति । दुष+णिच्+"सर्व्वधातुभ्य इन् ।" उणा । ४ । ११७ । इति इन् ।) दूषिका । इति शब्दरत्नावली ॥

दूषिका, स्त्री, (दूषि+स्वार्थे कन् । टाप् । यद्वा दूषि+ण्वुल्+टाप् अत इत्वञ्च ।) नेत्रमलम् । इत्यमरः । २ । ६ । ९० ॥ पिचुटि इति भाषा ॥ तत्पर्य्यायः । पिचोड्कम् २ दूषिः ३ दूषी ४ । इत्यमरटीकायां भरतः ॥ दूषीका ५ पिच्चटः ६ पिच्यटः ७ । इति शब्दरत्नावली ॥ (यथा, मनौ । ५ । १३५ ।
"वसाशुक्रमसृङ्मज्जामूत्रविट्घ्राणकर्णविट् ।
श्लेष्माश्रु दूषिका स्वेदो द्वादशैते नृणां मलाः ॥")
तूलिका । इति मेदिनी । के १०५ ॥ (दूषकस्त्री स्त्री । यथा, महाभारते । १३।११।१० ।
"स्त्रियाश्चापवादिन्या विप्रकृतिः कान्तदूषिका ।
अपि या भवते नैव नतु भर्त्ता प्रहृष्यति ॥")

दूषित, त्रि (दुष+णिच्+क्त ।) आरोपितदोषः । (यथा, महाभारते । १ । १३० । २६ ।

"ततो मयान्तिकं यस्य विधाय दृढ़बन्धनाम्।
दूषितं बहुधा भावो युवराजस्य मानुष॥")
मैथुनापवादयुक्तः। तत्पर्य्यायः। अभिशस्तः १ वाच्यः २ चारितः ३। इति हेमचन्द्रः।३।१००॥ चारितः ४। इति शब्दरत्नावली॥

दूषिता, स्त्री, (दूषित+टाप्।) दूषयमाणा कन्या। तत्पर्य्यायः। धर्षिता २ अपकारिणी ३ अभिसारिका ४। इति शब्दरत्नावली॥

दूषी, स्त्री, (दूषि+"कृदिकारादक्तिनः।" वा ङीष्।) दूषिका। इत्यमरटीकायां भरतः॥

दूषीका, स्त्री, (दूषयतीति+दूषि+"अनिदूषि भ्यामीकन्।" उणां ४।१६। इति। ईकन् ततष्टाप्।) दूषिका। इति शब्दरत्नावली॥

दूषीविष, क्ली, (दूषयतीति। दूषि+बाहुलकात् कः। तत् कर्म्मधारयः।) जीवयाद्भिरजीर्णं विषम्। इति हेमचन्द्रः।४।१९॥ स्थावरजङ्गमकृत्रिमविषाणां शरीरस्थितविषम्। अभावतो गुणहीनं विषम्। अस्य गुणः। उदररोग-मोहगुल्माग्निपरमेहकारित्वम्। इति राजवल्लभः॥ यथा,—

"जीर्णं विषघ्नौषधिभिर्हतं वा
दावाग्निवातातपशोषितं वा।
स्वभावतो वा गुणविप्रहीणं
विषं हि दूषीविषतामुपैति॥'
इति माधवकरः॥

दूष्य, क्ली (दूष्यते इति। दुष+णिच्+"अचो यत्।" ३।१।९७। इति यत्। "दोषो णौ।" ६।४।९०। इति ऊपधाया ऊत्वम्।) वस्त्रम्। वस्त्रगृहम्। इति मेदिनी। ये, ३१। पूयम्। इति हेमचन्द्रः।४।२८८॥

दूष्यः, त्रि, (दुष+णिच्+यत्।) दूषणीयः। इति मेदिनी। ये ३१॥ (यथा, महाभारते।१२।१६१।१९।
"क्षोदक्षम पुष्कलक्षावाचि विवादयत्नवर्त्तं विदेत्।
अदूष्या हि स्त्रियो रत्नमाप इवेव धर्मतः॥"
विष्णुः। इति मिताक्षरीया।१।३।११२॥ यथा, कामन्दकीयनीतिसारे।६।८।
"राज्योपघातं कुर्व्वाणा ये पापा राजवल्लभाः।
एकैकशः संहता वा दूष्यांस्तान् परिचक्षते॥")

दूष्या, स्त्री, (दूष्यते इति। दुष+णिच्+यत्+टाप्।) हस्तिकक्षरज्जुः। काचदड़ि इति भाषा। तत्पर्य्यायः। कक्ष्या २ वरत्रा ३। इति हेम चन्द्रः।४।३१८॥ चूषा ४। इत्यमरः।२।८।४१॥

ह, ड ह आदरे। इति कविकल्पद्रुमः। (तुदा आत्म अनं अनिट्।) आदर। प्रीज्ञा कर्म्मम्। ह ह द्रियते गुरुं लोकः। आदृङरोऽयमि त्येके। इति दुर्गादासः॥

दृक्, [श्] स्त्री, (पश्यत्यनेनेति। दृश्+करणे क्विप्।) चक्षुः। इत्यमरः।२।६।९३॥ (यथा नाटिकायाम्।
"कदा दृश प्रपश्यत्व जीवयति दृशैव या।
विकस्यन्त्य कटिकैरैयं शु०रामदोषमा॥"

भावे क्विप्।) दर्शनम्। बुद्धिः। इति मेदिनी। शे ८॥ (यथा, भागवते।२।८।५।
"तो माधायम्य हृदयारव सम्मतो
प्रमथविभ्रमविधिमपा भवेत्॥")

दृक, [क्] त्रि (पश्यतीति। दृश्+कर्त्तरि क्विप्।) बोधकः। इति मेदिनी। शे, ८॥ (यथा भागवते।४।२२।८।
"यथा सर्व्वदृशं सर्व्व आकाशं येऽस्य वैनम॥"
माता। इति शब्दरत्नावली॥

दृर्ण, क्ली (भीर्य्यते इति। दृ विदारे+बाहुलकात् कक् प्रत्ययः।) छिद्रम्। इति सिद्धान्तकौमुद्यां उणादिवृत्तिः॥

दृक्काय, पुं, मेषादेः। इति ज्योतिषम्॥

दृक्कर्ण, पुं, (दृशौ नेत्रायेव कर्णौ यस्य।) सर्पः। इति हेमचन्द्रः।४।३६८॥ यदाह कश्चित्।
"दृक्कर्णौ सप्तक धिया यदचिय वाची ममौता
गुरु
सुधांशुर्गौतमो कुलीनामयनी पाञ्ची भगवाशकः।
धारी चक्रधरो वणो मधुलिहो चालाटिको
लम्पट
भीमद्भोज। भवन्तु विप्रतिरमो भट्टीयो
दैवतः॥")

दृक्काण, पुं मेषादेः। इति ज्योतिषम्॥

दृक्प्रसादा स्त्री (दृशौ नेत्रौ प्रसादयतीति। दृश्+प्र+सद्+णिच्+अच्।) कुलत्था। कुलत्थाञ्जनम्। इति राजनिर्घण्टः॥

दृक्प्रिया, स्त्री, (दृशोर्नेत्रयोः प्रिया।) शोभा। इति राजनिर्घण्टः॥

दृक्श्रुति, पुं (दृशौ एव श्रुती कर्णौ यस्य।) सर्पः। इति हलायुधः॥

दृक्क्षाय, पुं (दृशोर्नयनयोः क्षयः अधिष्ठाता देवः।) सूर्य्यः। इति शब्दार्थकल्पतरुः॥

दृक्काण पुं, क्षमाज्ञानमतजोलविशेषः। यथा,
'मत्रल्लिके चाध स्वल्लिके चाक्ष जीनको इलो गयो पौर्त पर्यं दृष्कर्ष कार्यं तत् पूर्व्व दृशादौ त्रिविभक्तं कार्यं यथा दृगोलानलधातिपदेव एव यदुनोदादेवमेव दृक्कर्णम्। यो यो यस्रो यत्र यत्र वर्त्तते तस्र तत्रापि यदि धान्येदमेव विधाय दृगन्यायदृहादिर्कं बुधः बोधम्। अथवा एकक एकमदौ दृक्कर्णादि दर्शयेत्। तथाहम विविभक्तयस्त्र तत्र दृक्पीय मकर्ण सवित् तत्रावे कुर्म्मन्दृष्येर्विकारर्प बहुः तत्सविकायारमेव सगौलादृश्चिद्दृक्कयना मते दृक्कोर्णं दर्शयेत्। आदौ सत्रिवृत्तौ संवसमावेदोलवतौ, कालिमदभारदौ विच धले च दृक्कोर्ण। यतोऽस्या कुम्भायमाद्दा दृपदेवादि द्विजोनभाताति भनौभृत्वादि तत्रोगतिमिद्विवादि चतुष्टये सीलवर्षे कलदशोपकरण इति दृक्कोण रूपं।" इति सिद्धान्तशिरोमणिः॥

दृग्विष पुं, (दृशि नेत्रे विषं यस्य।) सर्पः। इति हेमचन्द्रः।४।३७०॥

दृढ़, क्ली, (दृह वृद्धौ+तप्रत्ययेन निपातनात् साधुः।) लौहम्। इति शब्दचन्द्रिका। अति शयः। इत्यमरः।३।१।७६॥

दृढ़, त्रि, (दृह+क्त। निपातनात् साधुः।) स्थूलः। अतिशयः। प्रगाढ़ः। (यथा, देवी भागवते।१।६।११।
"तदाकाशे श्रुतं तत्र्या वाक्येन सुमनोहरम्।
यद्वीतव्य तत्क्षाभ्यां तद्वाभ्यां दृढ़ं तत्॥")
बलवान्। इति मेदिनी। ढे, २॥ कठिनः। इत्यमरः।३।१।४४॥

दृढ़, पुं छन्दोभेदः। यथा,—
"दृढ़ मौद्गीव च्छवी विमलपत्रयुक्ता।
विद्यावक प्रतिपाल कविता च दृढ़का॥"
तल्लक्षणं यथा —
"दृढ़ाण्य छायाद्वन्द्व तावि च पञ्चजीवके।
चतुर्दशाक्षरैर्युक्त प्रस्तारे परिकीर्त्तितः॥"
इति छन्दोरत्नाकरः॥
(धृतराष्ट्रस्य पौत्रश्च पुत्रविशेषः। यथा, हरि वंशे।७।८३।
"ततेष धर्मवृद्धिश्च तत्सया निर्मेघो दृढ़ः।
दीर्घसेन सनी दुक्षा अमरं तु भयोदधि॥")

दृढ़कण्टक, पुं, (दृढ़ानि कठिनानि कण्टकानि यस्य।) क्षुद्रकण्टकवृक्षः। इति शब्दचन्द्रिका। बलदाँइ इति भाषा॥

दृढ़काण्ड, स्त्री, (दृढ़ं काण्डं यस्याः।) दीर्घरोहि षकम्। इति राजनिर्घण्टः॥

दृढ़काण्ड पुं, (दृढ़ं कठिनं काण्डं यस्य।) वंशः। इति राजनिर्घण्टः॥

दृढ़काण्डा, स्त्री, (दृढ़ं कठिनं काण्डो यस्याः।) पातालगरुडीलता। इति राजनिर्घण्टः॥

दृढ़क्षुरा, स्त्री, (दृढ़ं क्षुर इवाग्रभागो यस्याः। यद्वा, दृढ़ क्षुर इव सक्षमाया इति अर्द्ध चादित्वोऽपि तत्तटाप्।) बल्वजा। इति राज निर्घण्टः॥

दृढ़ग्रन्थिका, स्त्री (दृढ़ं ग्रन्थिर्यस्याः। अप्। तत इापि अत इत्वम्।) गन्धदूर्वा। इति शब्द चन्द्रिका॥

दृढ़ग्रन्थि, पुं, (दृढ़ो ग्रन्थिर्यस्य।) वंशः। इति राजनिर्घण्टः॥

दृढ़च्छद, स्त्री, (दृढ़ाश्छदो यस्य।) दीर्घरोहिषकम्। इति राजनिर्घण्टः॥

दृढ़ताङ्ग, पुं (दृढ़ाङ्गत्वेन।) मत्स्यः। इति राजनिर्घण्टः॥

दृढ़त्वच, पुं, (दृढ़ं कठिनं त्वक् यस्य।) गुञ्ज तृणम्। इति राजनिर्घण्टः॥

दृढ़त्वचा स्त्री, (दृढ़ं त्वचं यस्याः।) बल्वजा। इति राजनिर्घण्टः॥

दृढ़नाभ, [ष] पुं, (दृढ़ा नाभिर्यस्य।) नाराचा स्त्रः। इति राजनिर्घण्टः॥

दृढ़नेत्र, पुं, (दृढ़ यथा तथा दृढ़ंते"य। दृह+ क्तिच।) अस्त्रमुक्तिदेशः। इति शब्दार्थकल्प तरुः। लाङ्गर इति भाषा॥

दृढनीर, पुं, (दृढं प्रचुरं नीरं यस्मिन्निति ।) नारिकेलवृक्ष । इति राजनिर्घण्ट ॥

दृढपत्र, पुं, (दृढानि कठिनानि पत्राणि यस्य ।) वंश । इति राजनिर्घण्ट ॥

दृढपर्णी, स्त्री, (दृढानि पर्णानि यस्याः । गौरादित्वात् ङीष् ।) पद्मला । इति राजनिर्घण्ट ॥

दृढपादा, स्त्री, (दृढ पादो मूलं यस्याः ।) यवतिक्ता । इति राजनिर्घण्ट ॥

दृढपादी, स्त्री (दृढः कठिनः पादो मूलं यस्याः । गौरादित्वात् ङीष् ।) भूम्यामलकी । इति राजनिर्घण्ट ॥

दृढप्ररोह, पुं, (दृढः प्ररोहोऽङ्कुरो यस्य ।) प्लक्षवृक्ष । इति राजनिर्घण्ट ॥

दृढफल, पुं, (दृढं कठिनं फलं यस्य ।) नारिकेलवृक्ष । इति राजनिर्घण्ट ॥

दृढबन्धिनी, स्त्री, (दृढं यथा तथा बध्नातीति । बन्ध+णिनि । ङीप् ।) श्यामालता । इति शब्दचन्द्रिका ॥

दृढमुष्टि, पुं, (दृढा मुष्टिर्धारणाय यस्य ।) खड्ग । (दृढा दानाद्यभावात् कठिना मुष्टिर्यस्य ।) कृपणे, त्रि । इति त्रिका । टे ६५ ॥ (दृढमुष्टिधारक । यथा, हरिवंशे । २ । ८८ । 'निगृह्णीत कन्धरायां मिथुना दृढमुष्टिना ।')

दृढमूल, पुं, (दृढं मूलं यस्य ।) मुञ्जतृणम् । मन्थानकतृणम् । इति राजनिर्घण्ट ॥ नारिकेल । इति शब्दार्थकल्पतरु ॥

दृढरङ्गा, स्त्री, (दृढः स्थिरः रङ्गो रागो यस्याः ।) स्फटी । इति राजनिर्घण्ट ॥

दृढलता, स्त्री (दृढा कठिना लता ।) पातालगरुडी । इति राजनिर्घण्ट ॥

दृढलोमा, [न्] पुं, (दृढानि लोमानि यस्य ।) शूकर । इति शब्दचन्द्रिका ॥ कठिनलोमयुक्ते, त्रि ॥

दृढवल्कल, पुं, (दृढं वल्कलं त्वग् यस्य ।) लकुच । पूग । इति राजनिर्घण्ट ॥

दृढवल्का, स्त्री (दृढं वल्कं यस्याः ।) अम्बष्ठा । इति राजनिर्घण्ट ॥

दृढवीज, पुं, (दृढं वीजमस्य ।) चक्रमर्द । बदर । बब्बुर । इति राजनिर्घण्ट ॥

दृढसन्धि, त्रि, (दृढः स्थूलः सन्धिर्यस्य ।) निविड । तत्पर्याय । सहत २ । इत्यमर । ३ । १ । ७० ॥

दृढसूत्रिका, स्त्री, (सूत्रमस्यस्या इति । सूत्र+ठन् । दृढा कठिना सूत्रिका चेति कर्मधारय ।) मूर्वा । इति शब्दचन्द्रिका ॥

दृढस्कन्ध, पुं (दृढः स्कन्धो यस्य ।) क्षीरिकावृक्ष । इति जटाधर । (दृढस्कन्धविशिष्टे त्रि ।)

दृढाङ्ग, क्ली, (दृढम् अङ्गं यस्य । सर्व्वेतरमण्यपेक्षया कठिनत्वात् तथात्वम् ।) हीरकम् । इति राजनिर्घण्ट । (कठिनाङ्गविशिष्टे, त्रि ।)

दृत, त्रि (दृ+क्त ।) आदृत । आदरार्थ दृधातो कर्म्मणि क्तप्रत्ययेन निष्पन्न ॥

दृता, स्त्री, (म्रियते क्षेति । दृ+कर्म्मणि क्त । टाप् । भिन्नाभिन्नेषु व्याधिप्रयोगेषु छलादरत्वा न्यस्या तथात्वम् ।) चौरक । इति शब्दचन्द्रिका ॥

दृति, पुं, (दृणातीति । दृ विदारे+"दृणाते-र्ह्रस्वश्च ।" उणा ।४।१८३। इति ति ह्रस्वश्च ।) चर्म्मपुटक । अस्य पर्य्याय । खल्ल २ । इति हेमचन्द्र । ४ । ८१ ॥ (यथा, मनु । २ । ९९ ।
"इन्द्रियाणान्तु सर्व्वेषां यद्येकं क्षरतीन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम् ॥")
मत्स्य । इति मेदिनी । ते, २६ ॥ (गलकम्बल । यथा महाभारते । १३ । ७८ । १८ ।
"सबलसां पीवरीं दत्त्वा दृतिकण्ठामलङ्कृताम् ।
वैश्रवणस्य सदन स्थाने श्रेष्ठ प्रपद्यते ॥"
"दृतिकण्ठां प्रलम्बगलकम्बलाम् ।" इति तट्टीकायां नीलकण्ठ ॥ मेघ । इति निघण्टु ।१।१०॥ यथा ऋग्वेदे । ७ । १०३ । २ ।
"दिव्या आपो अभि यदेनमायन्
दृतिं न शुष्कं सरसी शयानम् ॥")

दृतिधारक, पु (दृतिश्चर्म्मपुटकस्तदाकारं धारय तीति । धारि+"ण्वुल् तृचौ ।" ३।१।१३३। इति ण्वुल् ।) वृक्षविशेष । आकनमाता इति भाषा । तत्पर्य्याय । आवन्ती २ मर्षि कारा ३ वामन ४ । इति शब्दचन्द्रिका ॥

दृतिहरि, पुं (दृतिं चर्म्ममयपात्रं हरतीति । दृति+हृ+"हरतेर्दृतिनाथयो पशौ ।" ३।२। २५ । इति इन् ।) कुक्कुर । इति मुग्धबोधव्याकरणम् ॥

दृन् य, हिंसा । इति मुग्धबोधटीकायां दुर्गादास ॥

दृन्फ प म उत्क्लेशे । इति कविकल्पद्रुम । (तुदां पर सक सेट ।) दृन्फगुफगुम्फादि । पाणिमञ्जरी । प म, दृम्फति । म, दृफति चौर राजा क्षिप्रातीक्ष्ण । ददम्फ ददर्फ । इति दुर्गादास ॥

दृन्भू स्त्री (दृम्फतीति । दृन्फ+"दन्भूहन्भू जम्बूकम्बूकफेलूकर्कन्धूदिधिषू ।" उणा ।१।९५। इति कूप्रत्ययान्ता निपातित ।) चक्र । वज्रम् । इति मेदिनी । भे, ५ ॥ (क्वचित् दृम्भूरिति पाठोऽपि दृश्यते ।)

दृन्भू, पु (दृन्फ+क्व । निपातनात् साधु ।) यमम् । सूर्य्य । इति हेमचन्द्र । राजा । इति शब्दरत्नावली । अन्तक । इति पञ्चिप्रकारे उणादिवृत्ति ॥

दृप, त्रि सन्दीपने । इति कविकल्पद्रुम । (चुरां पक्षे भ्वां पर सकं सेट ।) त्रि, दर्पयति दर्पति । इति दुर्गादास ॥

दृप ज य उ र ष हर्षे । गर्व्वे । इति कविकल्पद्रुम । (दिवां-उभ सकं सेट ।) ज, दृप्तो ऽस्ति । य दृप्यति । उ, नावैष्णव दर्पाति । र ष, अदृपत् अदर्पीत् अद्राप्सीत् अदार्प्सीत् । इति दुर्गादास ॥

दृफ, श बाधे । इति कविकल्पद्रुम । (तुदां पर सकं सेट ।) श, दृफति दर्पिता । बाधनं विघ्नति । इति दुर्गादास ॥

दृप्त त्रि, (दृप्यतीति । दृप+वर्त्तमाने कर्त्तरि क्त ।) गर्व्वित । इति धरणि ॥ (यथा, महाभारते । १ । १ । १६२ ।
"यदाश्रौषं कालकेयास्ततस्ते
पौलोमानो वरदानाच्च दृप्ताः ।
देवैरजेया निर्जिताश्चार्ज्जुनेन
तदा नाशंसे विजयाय सञ्जय ॥")

दृप्र, त्रि, (दृपति बाधते इति । दृप्+"स्फायि-तञ्चीति ।" उणा । २ । १३ । इति रक ।) दृप्त । इत्युणादिकोष । (बलवान् । इत्युज्ज्वलदत्त ।)

दृफ, प श उत्क्लेशे । इति कविकल्पद्रुम । (तुदां पर सक-सेट ।) प श, दृम्फति । श, दृफति चौर राजा क्षिप्रातीक्ष्ण । ददर्फ । इति दुर्गादास ॥

दृब्ध, त्रि (दृभ्यते ग्रथ्यते इति । दृभ+कर्म्मणि क्त ।) ग्रथित । इत्यमर । ३ । १ । ८६ ॥ (दृभ+कर्त्तरि क्त ।) भीत । इति भयार्थ दृभधातुदर्शनात् ॥

दृभ, ई क्रि भये । इति कविकल्पद्रुम । (चुरां-पक्षे भ्वां अक-सेट ।) क्रि, दर्भयति दर्भति । ई, दृब्ध । रमानाथस्तु दृभी इति धातुद्वयं मत्वा दारयति दरति भाययति भयति इत्याह । इति दुर्गादास ।

दृभ श ई क्रि गुम्फने । इति कविकल्पद्रुम । (तुदां चुरां पक्षे भ्वां सक सेट ।) श, दृभति । ई, दृब्ध । क्रि दर्भयति दर्भति । गुम्फनं ग्रन्थनम् । इति दुर्गादास ॥

दृम्प, ञ क इ सङ्घाते । इति कविकल्पद्रुम । (चुरां उभ आत्म च सक-सेट ।) चौरादिकोऽयम् । धातुमञ्जरी । ञ क, दृम्पयति दृम्पयते । इ दृम्पन । सङ्घातो राशीकरणम् । एष केचिन्न मन्यते । इति दुर्गादास ॥

दृम्भू स्त्री, (दृम्फति सिञ्चतीति । दृन्फ+"यन्दृम्भूचर्मिति ।" उणा । १ । ९६ । इति कू । निपातनात् साधु ।) सर्प । इति सिद्धान्तकौमुद्यामुणादिवृत्ति ॥

दृम्भू, स्त्री, (दृम्फतीति+दृन्फ+कू । निपातनात् साधु ।) दृम्भू । इति सिद्धान्तकौमुद्यामुणादिवृत्ति ॥

दृश, इर् भ्वां प्रेक्षे । इति कविकल्पद्रुम । (भ्वां पर सकं अनिट ।) इर अदृशत् अद्राक्षीत् । औ, द्रष्टा । प्रेक्षणमालोकनम् । पश्यति चक्षुर्लोक । मन प दृशे च गौ इति कर्म्मणि आत्मनेपदम् । कञ्चिद्दृशोऽहं परमेश्वरं विद्धते भागवत । स दृश्यति मनस्ताऽऽश्चर्य्यात् । इति दुर्गादास ॥

दृषत्, [द्] स्त्री (दृणाति । दृणोऽन्तादित्वात् साधु ।) पाषाण । इत्यमर । २ । ३ । ४ ॥ निर्व्वेदमञ्जिशाकाम् । राजकौमुदी । पे, १९ ।

इषद्वती, स्त्री, (इषत् गमनाशोऽस्त्यस्यामिति। इषत्+मतुप् मस्य व।) नदीविशेषः। सा आर्य्यावर्त्तस्य पूर्व्वसीमा। (यथा महाभारते। ३। ८३। ४।
"दक्षिणेन सरस्वत्या दृषद्वत्युत्तरेण च।
ये वसन्ति कुरुक्षेत्रे ते वसन्ति त्रिविष्टपे॥")
कात्यायनी। इति मेदिनी। ते १४८॥
इषा, स्त्री, (इष्+पामिकटाप्।) चक्षुः। इति शब्दचन्द्रिका॥
इषाकाल्पं, क्ली, (इषा इषया वा आकाश अभिलषणीयम्।) पद्मम्। इति शब्दचन्द्रिका॥
इषार्त्तं क्ली, (इष्यते अनेनेति। इष+आ-मच।) ज्योतिः। इति मेदिनी। मे, ७५॥
इषास, पुं, (माष्यतीति। इष्+"इषियुधि-इन्धि" उणां। २। ९। इति आसच। स च कित्।) आचार्य्यः। इत्युणादिकोषः॥ लोकपालः। प्राज्ञः। उपाध्यायः। इति धरणिप्रकारे उणादिवृत्तिः। विरोचनः। इति मेदिनी। से, ७१॥ (इष्यते इति। कर्म्मणि आसच। इष्यमाणे, त्रि। यथा, ऋग्वेदे। १। ४५। ८।
"इषासो ष्वक्त अग्नितया मधौदुर्भयभागं मिति क्षयाम।")
इषि, ｝स्त्री, (इष्यतेऽनयेति। इष्+इन्। स च
इषी, ｝कित्। पक्षे ङीष्।) चक्षुः। इति शब्द रत्नावली॥ (यथा,—
"किं सम्भृत वधिरयोर्विषयाप्रयोगे
मध्ये इषी चलति यत्र इषिः स्थिता मे॥"
इति भागवते। ५। २। १४।
नैतस्य पुरुषः। यथा, भागवतपुराणम्। २।२५।
"तदभावात् संयोगाभावो ध्यानं तद्दृशे मैव ध्यानम्।"
"तस्या अविद्याया अभावात् नाशात् संयोगा-भावः संयोगस्य नाशो भवतीति सिद्धम्। तस्य ध्यानं संयोगविगमः। इषिः पुरुषस्य कैवल्यं मुक्तिरिति चोच्यते।" इत्यमरतिः। यथा, तत्रैव। २। २०।
"तदा इषिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः।"
इषिमात्र इति इत्यपरिष्वेन विशेषेण परामृष्टः।" इति भाष्यम्। दर्शनम्। यथा, ऋग्वेदे। १। ७०। १।
"एवा सुधा च तस्यो विराजोऽर्णव आतो इषये नो अक्रान्।"
"इषये दर्शनाय" इति तद्भाष्ये सायनः॥")
इषोपमं क्ली, (इषाया मैत्रस्य उपमा यत्र।) कौतपदम्। इति शब्दचन्द्रिका॥
इष्यं त्रि (इष्यते इति। इष्+कर्म्मणि क्यप्।) दर्शनीयम्। इष्टव्यम्। इति व्याकरणम्। (यथा, महाभारते। १। ११। ६।
"एष वै कमलोद्दिष्टो यत्र इष्टा सरस्वती।"
आदर्शवती, स्त्री। यथा, शाकिमदर्पणे। ६।१।
"इष्टमधमनेकेन पुरुष व्याघ हिमाक्ति लक्ष्यम्।
इष्टं अभाभिनैर्वं मधुस्वरारोप्यानुपलक्षम्।")

इष्, [ष्] स्त्री, (इष्यते अयायिनेति। इष+"इषादि भ्यश्च।" उणा १। १४१। इति आदि पुत कुत्सम्।) पाषाणः। (यथा, मेघदूते। ५०।
"तस्य सत क्वचिद् यदक्ष्यासहर्षैस्मोदे प्रश्वनुसिद्धैरुपचितवर्णी भक्तिनम्रः परीयाः॥")
निर्व्विकल्पिका। इति मेदिनी। दें, १९॥
("मार्ष निरस्मि सुनिश्च पुनश्च मद् पाश्चिलम्।"
इति रघुते रघुसारे ४६ च॥)
इषत्सार, क्ली, (इषद्वा पाषाणस्य सार इव सारो यस्य।) लौहविशेषम्। इति राजनिर्घण्टः॥
इष्ट, क्ली, (इष+कर्म्मणि क्त।) अपरपक्षश्चयजनम्। इत्यमरः। २। ८। १०। ईप्सिते, त्रि। यथा, मार्कण्डेये।
"इष्टदीपेऽपि विषये ममत्वासङ्गचेतसः।"
इष्टगन्धः, [स्] क्ली (इष्टः गन्धो यस्य।) वालु-कायाः। तत्पर्य्यायः। सिध्मा २। इत्यमरः। ५। ६। ८। शौद्रः। इति राजनिर्घण्टः॥
इष्टार्थ, पुं (इष्ट अर्थो विषयो येषाम्।) उदाहरणम्। (यथा, माघे। ७। ३१।
"अभिधीना परेषापि मस्किणा न मत्तामगाम। पूर्वसज्जोद्याकाङ्क्षी इष्टार्थोऽभ महालय॥")
प्राकृतम्। मरणम्। इति मेदिनी। ते, १११॥
(अलङ्कारविशेषः। यथा, साहित्यदर्पणे। १०। ६८८।
"इष्टार्थस्तु धनमात्र वस्तुनः प्रतिबिम्बनम्॥"
यथामेऽक्षेति प्रतिवस्तुपमायमस्त्वेद। अयमपि साधर्म्येऽवैधर्म्याभ्यां द्विधा। क्रमेणोदाहरणं यथा,—
अविदितगुणापि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।
अनधिगतपरिमलापि हि हरति दृशं मालती माला॥")
इष्टि, स्त्री, (यजनमनेनेति। यज+करणे क्तिन्।) यज्ञः। इत्यमरः। २। ७। १३। (यथा, शाकुन्तले। १। १८।
"हता इष्टिमयोदहारि कुरुते नाकाप्यनाभाषिता॥")
वृद्धिः। (इष्+भावे+क्तिन्।) एषणम्। इति मेदिनी। टे, १०॥ (यथा, मनुः। ६। ३६।
"इष्टिपूर्त्तं निवेत् मातृ सत्पूत भर्त्तं पिवेत्॥")
मृत्ताबी इष्टिकयणम्। यथा,
तृतीयवर्षे दशमवर्षे च प्राणे पूर्ब्बदिरिष्यौषी मारदष्टिः। चतुर्थवर्षे नवमवर्षे च दृष्टौ पूर्ब्ब दृष्टिर्मेषाङ्गुदृष्टिः। चतुर्थवर्षे अष्टमवर्षे च कुम्भस्य पूर्ब्बदर्शनं विमानदृष्टिः। सप्तमवर्षे समैदो पूर्णदृष्टिः। पञ्चमवर्षे नवमे वर्षे द्वादशे च दाहो पूर्ब्बदृष्टिः। द्वितीये दशमे च त्रिपाददृष्टिः। तृतीये षष्ठे चतुर्थे अष्टमे पाद दृष्टिः॥०॥ पञ्चाबी दृष्टामावविशेषो यथा —
त्रिदिनमध्ये दशमाद्ये च दाशोऽर्द्धभाग। चिन्तिममध्ये त्रिकोणे षष्ठे दशमाद्ये द्वादशे

चाष्टमे च दृष्टाभाव ॥०॥ दृष्टौ दृष्टमांशे यथा,—
"तृतीये दशमे चैव पाददृष्टिरुदाहृता।
अर्द्धदृष्टिश्च नवमे पञ्चमे च प्रकीर्त्तिता॥
चतुर्थे चाष्टमे चैव मारोन्या परिकीर्त्तिता।
सप्तमे परिपूर्णा च सम्मन्त्रैर्व प्रकल्पते॥
तृतीयान्यममाशाक्षि पश्यन् पूर्णचक्षुरः।
त्रिकोणमात् गुरुश्चैव चतुर्थाष्टमगात् कुजः॥
शतमदनमयाश्चौ पूर्णदृष्टिः शरारे
पुंगमकरममराश्चौ दृष्टिमात्राधवाक।
पहचरिपुचतुर्थेऽष्टमे चाङ्घ्रिदृष्टि
स्थितिमवनसुमात्य मैव कर्णं हि दासी॥
स्वस्थानञ्च द्वितीयञ्च एकमेकादशञ्च यत्।
द्वादशाञ्च न पश्यन्ति सर्व्वे पश्यन्ति ते ग्रहाः॥"
इति ज्योतिषतत्त्वम्॥
इष्टिकृत्, स्त्री, (इष्टिं इष्टिवाद करोतीति। कृ+क्विप् तुगागमश्च। अतोऽस्याभिका चोकार्ता मिश्राकर्षकत्वादस्य तथात्वम्।) आग्नपदम्। इति शब्दचन्द्रिका। (एतत्कारके त्रि।)
इष्टिकार्त्तं क्ली, (इष्टौ दायमाय छलमिव। यतोऽस्य शोभाभावाभाय तथात्वम्।) कृत्यपदम्। इति शब्दरत्नावली॥
इष्टिगन्ध, पुं (इष्टा गुरुणी गन्धश्च यस्य। गुच्छम् च अश्वादि+घञ्।) बालादिकम्। इति शब्दमाला॥
इष्टिपशु, पुं (इष्टेश्चतुरो पशुरिव।) अश्वः। इति शब्दरत्नावली॥
इष्टिश्येन, पुं, (इष्टेर्श्येन।) कराघः। इति त्रिकाण्डशेषः॥
इष, इषौ। इति कविकल्पद्रुमः। (भ्वा-पर-अक-सेट्।) धममसरो इषति। इति दुर्गादासः॥
इष, ष इषौ। इति कविकल्पद्रुमः। (भ्वा-पर-अक-सेट्।) धममघरो। ष, इ घ्री। इति दुर्गादासः॥
इषिर, त्रि इषधातोः कर्त्तरि क्तेन निपात्यः। इष्टः प्राप्तः॥
ई ङ गिमि। इति कविकल्पद्रुमः। (भ्वा पर अक सेट्।) ङि, इक्कति ईञ्च ईञ्चि। मिमि मदे। इति दुर्गादासः॥
ई ञ मिमि। इति कविकल्पद्रुमः। (भ्वा-पर-अक सेट्।) ञ, ईर्च्यत। मिच मदे। इति दुर्गादासः॥
ई, ष मि विदारे। इति कविकल्पद्रुमः। (भ्वा क्रा च पर-अक सेट्।) ष ईर्ष्मति। मि इक्कति ईञ ईञ। इति दुर्गादासः॥
ई ङ गतौ। इति कविकल्पद्रुमः। (भ्वा आत्म-सक-अनिट्।) ङ, ईगात् यो दशौ नियम्। इति रमानाथः। इति दुर्गादासः॥
ईरीयमाण, त्रि, पुनःपुनरतिशयेन वा ईयते यः। (ईर+यङ्+शानच्।) अतिशय ईर्यमाणः। इति व्याकरणम्॥
ईय, त्रि, (इ+"अचो यत्।" ३। १। ९७। इति यत्। "ईद्यति।" ६। ४। ६५। इति

देन ।) दातव्यम् । दानीयम् । इति व्याकरणम् । यथा, हितोपदेशे । १ । ३६ ।
"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
र्दैवेन देयमिति कापुरुषा वदन्ति ।")

देव, ऋ ङ देवने । इति कविकल्पद्रुमः । (भ्वा-आत्म-अक सेट् ।) देवनमिह क्रीडा । ऋ अदिदेवत् । ङ, देवते बालः कन्दुकेनेत्यमिति हलायुधः । देवनमिह रोदनमिति भट्टमल्लः । इति दुर्गादासः ॥

देव, क्ली (दीव्यत्यनेनेति । दिव + करणे घञ् ।) इन्द्रियम् । इति मेदिनी । वे, १२ ॥ (यथा, मुण्डकोपनिषदि । ३ । १ । ८ ।
"न चक्षुषा गृह्यते नापि वाचा
नान्यैर्देवैस्तपसा कर्म्मणा वा ।
ज्ञानप्रसादेन विशुद्धसत्त्व-
स्ततस्तु तं पश्यते निष्कलं ध्यायमानः ॥")

देव, पुं (दीव्यति आनन्देन क्रीडतीति । दिव + अच् ।) देवता । (यथा, मनुः । ३ । ११७ ।
"देवानृषीन् मनुष्यांश्च पितॄन् गृह्याश्च देवताः ।
पूजयित्वा ततः पश्चात् गृहस्थः शेषभुग् भवेत् ॥")
काष्ठोक्तौ राजा । इत्यमरः । १ । ७ । १३ ॥ राजा । (यथा कादम्बर्य्याम् । १८ ।
"सकलभूतलरत्नभूतोऽयं वैशम्पायनो नाम शुकः । सर्व्वरत्नानामुदधिरिव देवो भाजनमिति कलैनमादायास्मत्स्वामिदुहिता देवपाद-मूलमायाता तदयमात्मीयः क्रियतामिति ॥')
मेघः । इति मेदिनी । वे १२ ॥ (यथा महाभारते । १ । २१५ । २३ ।
"देवे गुहाके खुपिते च धीमे
इवे च यथर्त्तुकालयुक्तम् ॥"
केचित्तु देवशब्देन इन्द्र इति व्याचक्षते ।)
पारदः । इति राजनिर्घण्टः ॥ मूर्खसंज्ञा-नृपाधिपैः । यथा, स्मृतिः ।
'देवपूर्ब्बं नराख्यं स्यात् शर्म्मवर्म्मादिसंयुतम् ॥'
(ऋत्विक् । यथा, ऋग्वेदे । ८ । ८६ । ६ ।
"महा देवानां पदवी कवीनां
ऋषिर्व्विप्राणां महिषो मृगाणाम् ॥"
"देवानां द्योतकानामृत्विजां मध्ये मह्यम् ऋत्विक्प्रधानीयो भवति ।" इति तद्भाष्ये सायनः ॥) कायस्थादीनां पद्धतिविशेषः । तस्य विवरणं कायस्थशब्दे द्रष्टव्यम् ॥ (त्रि, दाता । द्योतयिता । दीपयिता । यथा, ऋग्वेदे ।१।१।१।
'अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ॥'
"देवशब्दो दानदीपनद्योतनादिनामान्यतमसद्भावात् । यज्ञस्य दाता दीपयिता द्योतयिता वाग्निरित्युक्तं भवति ।" इति तद्भाष्ये सायनः ॥ विष्णुः । यथा महाभारते । १३ । १४९ । ५३ ।
"उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ॥"
"दीव्यति यत् क्रीडति सर्गादिभिः विजिगीषति असुरान् व्यवहरति सर्व्वभूतेष्वात्मतया द्योतते स्तूयते स्तुत्यैः गच्छति सर्व्वत्रेति वा देवः । एतावान् इति नामशतात् ॥' इति तद्भाष्ये शङ्करः ।

II

महादेवः । यथा, महाभारते ।१३।१७।८७
"महाधनुर्धरो देवः अङ्गकारी सुबान्धवः ॥")

देवक पुं, यदुवंशीयराजविशेषः । स श्रीकृष्णस्य मातामहः । इति श्रीभागवतम् ॥ (अयन्तु गन्धर्व्वपतेरंशावतारः । यथा, महाभारते । १ । ६७ । ६८ ।
"यस्त्वासीद्देवको नाम देवराजसमद्युतिः ।
स गन्धर्व्वपतिर्म्मुख्यः क्षितौ जज्ञे नराधिप ॥')

देवकर्द्दम, पुं, (देवप्रियः कर्द्दम इव ।) सुगन्धिद्रव्यविशेषः । स श्रीखण्डागुरुकर्पूरकुङ्कुमैः मिश्रितैर्भवति । इति राजनिर्घण्टः ॥

देवकात्मजा, स्त्री, (देवकस्य आत्मजा कन्या ।) देवकी । इति शब्दरत्नावली ॥

देवकाष्ठ, क्ली, (देवप्रियं काष्ठम् ।) देवदारु । इति रत्नमाला ॥ देवदारुभेदः । तत्पर्य्यायः । पूतिकाष्ठम् २ भद्रकाष्ठम् ३ शुक्रकाष्ठकम् ४ स्निग्धदारुकम् ५ काष्ठदारु ६ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । रूक्षत्वम् । श्लेष्मानिलापहत्वञ्च । इति राजनिर्घण्टः ॥

देवकिरी, स्त्री,(देवं मेघं किरतीति । कॄ + "इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः । गौरादित्वात् ङीष् ।) मेघरागस्य भार्य्या । यथा,—
'ललिता मालसी गौरी नाटी देवकिरी तथा ।
मेघरागस्य रागिण्यो भवन्तीमाः सुमध्यमाः ॥"
अस्याः स्वरूपं यथा,—
"भ्रमन्ती नन्दने श्यामा पुष्पप्रचयतत्परा ।
बाला देवकिरी ज्ञेया करार्पितसखीकरा ॥"
इति सङ्गीतदामोदरः ॥

देवकी, स्त्री, (देवक + ङीष् ।) देवकराजकन्या । सा वसुदेवपत्नी श्रीकृष्णमाता । तत्पर्य्यायः । देवकी २ कृष्णजननी ३ देवकात्मजा ४ । इति शब्दरत्नावली ॥ इयं कश्यपपत्नी अदितेरंशजाता । यथा,—
'देवकी रोहिणी चेमे वसुदेवस्य धीमतः ।
रोहिणी सुरभिर्देवी अदितिर्देवकी त्वभूत् ॥"
अपि च ।
"कश्यपो वसुदेवश्च देवमाता च देवकी ।
पूर्ब्बपुण्यफलेनैव संप्राप श्रीहरिं सुतम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

देवकीनन्दन, पुं, (देवक्याः नन्दनः ।) श्रीकृष्णः । इति शब्दरत्नावली ॥ (यथा, भागवते । १ । ८ । २१ ।
"कृष्णाय वासुदेवाय देवकीनन्दनाय च ।
नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥'
अभिरीकारस्य ह्रस्वोऽपि दृश्यते । यथा, महाभारते । २ । २४ । २१ ।
"नैतच्चित्रं महाबाहो । त्वयि देवकिनन्दने ॥")

देवकीपुत्र, पुं, (देवक्याः पुत्रः ।) श्रीकृष्णः । इति हेमचन्द्रः । २ । १३२ ॥ (यथा भागवते ।
"शुश्राव देवकीपुत्रामल्पवो नाथ बन्धनम् ।
कंसस्य निन्दमानस्य भक्ता । तच्छुद्धं चन्म ॥")

देवकुसुमा, स्त्री, महानीलः । इति राजनिर्घण्टः ॥

देवकुल क्ली, (देवाय कौलतीति । कुल संस्त्याने + कः ।) विनायकुलम् । इति हारावली । १८० ॥ देउल इति भाषा ॥ (यथा, कथासरित्सागरे । १२ । १२७ ।
"सोऽथ दारिद्र्यसन्तापात् नारायणायतन ।
निराहारः स्थितोऽकार्षीत् गत्वा देवकुले तपः ॥")
अस्य विवरणं चैत्यशब्दे द्रष्टव्यम् ॥

देवकुसुम, क्ली, (देवप्रियं कुसुमं पुष्पं यस्य ।) लवङ्गम् । इत्यमरः । २ । ६ । १२५ ॥

देवखात, क्ली, (देवेन खातम् । अकृत्रिमत्वादस्य तथात्वम् ।) देवखातकम् । इत्यमरटीकायां भरतः ॥ (यथा मनुः । ४ । २ ३ ।
"नदीषु देवखातेषु तडागेषु सरःसु च ।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च ॥")

देवखातक, क्ली, पुं (देवखातमेव । स्वार्थे कन् ।) अकृत्रिमजलाशयः । अपौरुषेयं देवकृत-मित्यन्ये । इति सुभूतिः ॥ नागादिकृतत्वमकृत्रिम-मिति स्वामी ॥ तत्पर्य्यायः । आतालम् २ । इति भरतः ॥ अखातम् । इत्यमरः । १ । १ । २७ ॥ देवनिर्म्मितम् ४ । इति शब्दरत्नावली । गुहा । इत्यमरटीकायां भरतः ॥

देवखातविल, क्ली, (देवखातं अकृत्रिमं विलम् । निम्नकर्म्मधारयः ।) गुहा । इत्यमरः ।२।३।६॥

देवगन्धा, स्त्री, (देवप्रियो गन्धो यस्याः ।) महामेदा । इति राजनिर्घण्टः ॥

देवगान्धारी स्त्री श्रीरागस्य भार्य्या । यथा,
"गान्धारी देवगान्धारी मालवश्रीश्च सारवी ।
रामकिरिरपि रागिण्यः श्रीरागस्य प्रिया इमाः ॥'
इति सङ्गीतदामोदरः ॥
अस्या गानसमयः शिशिरर्त्तौ तृतीयप्रहरा-वधिरात्र्यर्द्धपर्य्यन्तम् ॥

देवगायन, पुं (देवानां गायनः ।) गन्धर्व्वः । इति हेमचन्द्रः । २ । ९७ ॥

देवगिरी स्त्री रागिणीविशेषः । इति हलायुधः ॥ सा सोमेश्वरमते वसन्तरागस्य भार्य्या हनुमन्मते मेघस्य । भरतमते हिन्दोलरागस्य भार्य्या । हनुमन्मते तु नटरागस्य भार्य्या । अस्याः स्वरूपं यथा, अङ्गभिरामवनमालाश्च उपस्थितेषु भागवतभावना श्रीपतिस्मितधृता मतपारश्चना द्रष्टाभ्यो च । अस्या गानसमयः शरत्तौ दिवावधिप्रहरावधिरात्र्यर्द्धपर्य्यन्तम् ॥

देवगुरु, पुं (देवानां गुरुः ।) बृहस्पतिः । इति पुराणम् ॥ (देवानां गुरुः पिता । कश्यपः । यथा, हरिवंशे । २१८ । ८ ।
"ददृशुस्तं कश्यपं तत्र मुनिं दीप्तमग्निशिखम् ।
आदौ देवगुरुं सिद्धमिव विवस्वतामुषिः ॥")

देवगृह क्ली, (देवानां रत्नादीनां गृहमिव ।) तन्त्रकादीनां चन्द्रोदयगृहम् । यथा —
"अन्धकारद्वारे गृहं सर्व्वगन्धधूपैर्वासयेत् ।
तानि देवगृहाणि च सम्यग् धूपादिभिर्वासयेत् ॥"
इति मत्स्यपुराणम् ॥

देवालयः । (यथा, कुमारसम्भवे । ३ । १ ।
"गृहे देवगृहे दक्षिणद्वारस्य रचितम् ।")

देवचिकित्सकौ, पुं, (देवानां चिकित्सकौ ।) अश्विनीकुमारौ । इति हलायुधः । द्विवचनान्तोऽयम् ॥

देवच्छन्दः पुं, (देवैश्छाद्यते आच्छाद्यते इति । छद् + घञ् ।) हारविशेषः । स शतयष्टिकः । इत्यमरः । २ । ६ । १०५ ॥ चतुरशीतियष्टिकोऽयमिति केचित् । इति भरतः ॥ (यथा, बृहत्संहितायाम् । ८१ । ३२ ।
'शतमष्टयुतं हारो देवच्छन्दो ह्यशीतिरेकयुता ।
अष्टाष्टकोऽर्द्धहारो रश्मिकलापश्च नवषट्कः ॥')

देवजग्धं क्ली, (देवैरद्यते इति । अद् + क्त । "अदो जग्धिर्ल्यप्ति किति ।" २ । ४ । ३६ । इति जग्ध्यादेशः ।) कत्तृणम् । इति हेमचन्द्रः । ४ । २५० ॥

देवजग्धकं क्ली (देवजग्ध + स्वार्थे कन् ।) कत्तृणम् । इत्यमरः । २ । ४ । १६६ ।

देवट त्रि, (दीव्यतीति । दिव + "शकादिभ्योऽटन् ।" उणां । ४ । ८१ । इति अटन् ।) शिल्पी । इत्युणादिकोषः ॥

देवद्री, स्त्री, (देव देवत्वम् अञ्चति अतिक्रामतीति । अञ्च + क्विन् । ... गौरादित्वात् ङीष् ।) गङ्गाधिका । इति हारावली । ८६ ॥

देवतरुः, पुं, (देवानां तरुः ।) मन्दारः । पारिजातः । सन्तानः । कल्पवृक्षः । हरिचन्दनम् । इत्यमरः । १ । १ । ५३ ॥ चैत्यद्रुमः । इति त्रिकाण्डशेषः ॥

देवता स्त्री, (देव एव । स्वार्थे तल् ।) देव इति ख्याता भवति या । तत्पर्यायः । अमरः २ निर्जरः ३ देवः ४ त्रिदशः ५ विबुधः ६ सुरः ७ सुपर्वा ८ सुमनाः ९ त्रिदिवेशः १० दिवौकाः ११ आदितेयः १२ दिविषत् १३ लेखः १४ अदितिनन्दनः १५ आदित्यः १६ ऋभुः १७ अस्वप्नः १८ अमर्त्यः १९ अमृतान्धाः २० बर्हिर्मुखः २१ क्रतुभुक् २२ गीर्वाणः २३ दानवारिः २४ वृन्दारकः २५ दैवतम् २६ । इत्यमरः । १ । १ । ७-९ ॥ आशाराक्षः २७ ऊर्ध्वदृक् २८ धुसत् २९ नैकः ३० स्वर्गी ३१ द्योगः ३२ निलिम्पः ३३ दिविचारी ३४ विरः ३५ । इति शब्दरत्नावली ॥ तासां संख्या त्रयस्त्रिंशत्कोटयः । यथा,—
"त्रयस्त्रिंशत् विबुधाः सर्वे यत्रास्माकं सर्वे यत्र ।
कैलासे तत्र त्रिदशकोटीर्वाञ्छा यथा भव ॥"
इति काशीखण्डम् ॥ ० ॥

गणदेवता यथा,—
"आदित्यविश्ववसवस्तुषिताभास्वरानिलाः ।
महाराजिकसाध्याश्च रुद्राश्च गणदेवताः ॥
आदित्या द्वादश प्रोक्ता विश्वेदेवा दश स्मृताः ।
विश्वेदेवा दश प्रोक्ता साध्या द्वादश कीर्त्तिताः ।
आभास्वराश्चतुःषष्टिर्वातास्तु पञ्चाशदूनकाः ।
महाराजिकनामानो द्वे शते विंशतिस्तथा ।
रुद्रा एकादश प्रोक्ता वसवोऽष्टौ समीरिताः ॥"
इति शब्दरत्नावली ॥ ० ॥

तेषां चत्वारो वर्णा यथा,—
"आदित्याः क्षत्रियास्तेषां विशश्च मरुतस्तथा ।
अश्विनौ च स्मृतौ शूद्रौ तपस्युग्रे समाहितौ ॥
स्मृतास्त्वाङ्गिरसो देवा ब्राह्मणा इति निश्चयः ।
इत्येतत् सर्वदेवानां चातुर्वर्ण्यं प्रकीर्त्तितम् ॥"
इति महाभारते मोक्षधर्मः ॥ ० ॥

वैष्णवानां पञ्चदेवता यथा,—
"यत्र यत्र सुराः पूज्या नवग्रहादास्तु कर्म्मिणाम् ।
विष्णुर्वै तत्र तत्र वैष्णवानां हि देवता ॥
विष्वक्सेन गणपति धर्म्मादीनामतः परम् ।
यजन्ते वसुतन्त्रादौ यद्वैव पूज्यवेदयाः ॥"
इति पाद्मे उत्तरखण्डम् ॥ ० ॥

देवषट्क यथा,—
"गणेशञ्च दिनेशञ्च वह्निं विष्णुं शिवं शिवाम् ।
देवषट्कञ्च संपूज्य नमस्कृत्य विशेषतः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

अपि च ।
"आदित्य गणनाथञ्च देवीं रुद्रं यथाक्रमम् ।
नारायणं विशुद्धाख्यमन्ते च कुलदेवताः ॥"
इत्याह्निकतत्त्वम् ॥ ० ॥

प्रतिविदेशस्य उपास्यदेवता यथा —
"या यस्याभिमता पुंसः सा हि तस्यैव देवता ।
किन्तु कार्यविशेषेण पूजिता चेष्टदा नृणाम् ॥
विद्यार्थिनां यथा सार्थं नित्यं चुम्बना शुभा ।
नृपाणां दैवतं विष्णुस्तथैव च पुरन्दरः ॥
विप्राणामग्निरादित्यो ब्रह्मा चैव पिनाकधृक् ।
देवानां दैवतं विष्णुर्दानवानां त्रिशूलधृक् ॥
गन्धर्व्वाणां तथा सोमो यक्षाणामपि कथ्यते ।
विद्याधराणां वाग्देवी साध्यानां भगवान् हरिः ॥
रक्षसां शङ्करो रुद्रः किन्नराणाञ्च पार्व्वती ।
ऋषीणां दैवतं ब्रह्मा महादेवश्च शूलभृत् ॥
मनूनां स्यादुमा देवी तथा विष्णुः सभास्करः ।
गृहस्थानाञ्च सर्व्वे स्युर्ब्रह्मा वै ब्रह्मचारिणाम् ॥
वैखानसानामर्कः स्याद्यतीनाञ्च महेश्वरः ।
भूतानां भगवान् रुद्रः कुष्माण्डानां विनायकः ॥
सर्व्वेषां भगवान् ब्रह्मा देवदेवः प्रजापतिः ।
इत्येवं भगवान् ब्रह्मा स्वयं देवोऽभ्यभाषत ॥"
इति कूर्म्मपुराणम् ॥ ० ॥

ग्रामादिदेवगृहदेवता यथा,—
तत्रादावश्यानि । पूर्व्वदक्षिणपश्चिमोत्तर भागस्थायिन्यो विघ्नहराख्या भगवती देवता पुष्पोऽग्निगोचरा भवानी धनदा नाम्नी पुर स्तूपोर्द्धगा । तत्र निघ्नन्ती शुभा । अत्र अग्र स्थापनार्थमनवनिषेवादग्रतम शोभनः । अथ ग्रामादिदेवतानिर्णयः । तत्र प्रथमः । प्राक् प्रागुत्तरेशानाग्नेया वायव्यपश्चिमयाः पूर्व्व भागादयः । तत्र कल्पार्थ च सुन्दरम् अथ देवस्थानेषु शिवमन्दिरं गोपुरविभागत्रा विभागे । तत्र विष्णुः शुभः । तत्र यथापि रूपान्तरकर्माणि पुण्ड्रमित्यादि । तत्र चण्ड

शोभनः । तत्रादेशका इत्यत्र देवस्थ शोभनः तथा देवता गणेशपितृदेवतादेवस्य शोभनः । इति ज्योतिषम् ॥
(देव + स्वार्थे तल् । देवत्वम् । यथा ऋग्वेदे । १ । ७३ । ६ ।
'स्तनयन्तः समारम्भ तस्मात् पुरमिदं पुरम् ।
सा मां देवा देवतया पुरं मधुमन्मत्तम् ॥'
"हे देवा देवौ द्योतमानौ तौ त्वौ युवं युवां मोऽस्माकं मधुमत् प्रीतिमुत्पादनं कुरुतम् । केनेति उच्यते । देवतया देवत्वेन आत्मनः देवत्वस्थेनेत्यर्थः ।" इति तद्भाष्ये सायणः ॥)

देवताडः पुं (देवा भोगस्थाने इति । ताड् + अच् ।) वृक्षविशेषः । देवताड इति ख्यातः । तत्पर्यायः । जीमूतः २ गरः ३ गरी ४ शैलाटः ५ । इत्यमरः । २ । ४ । ९८ ॥ आखरी ६ सराकरी ७ गरागरी ८ । इति तट्टीकायां भरतः ॥ देवताडी ९ आखुविषहा १० । इति जटाधरः ॥ आखुः ११ विषनिघ्नः १२ सदाफलः १३ कर्णमः १४ एवाकः १५ दूरताडकः १६ । इति रत्नमाला ॥ (देवो यज्ञानां ताडयतीति । ताड़ि + कर्मणि अच् ।) राहुः । अग्निः । इति मेदिनी । डे, ३८ ॥ भाषकलता । इति त्रिः ॥

देवताडकः, पुं (देवताड़ + स्वार्थे कन् ।) देवताडः । इति रत्नमाला ॥

देवताधिपः, पुं (देवतानां अधिपः ।) इन्द्रः । इति शब्दरत्नावली ॥

देवत्वं क्ली (देवस्य भावः कर्म वा । "तस्य भावस्त्वतलौ ।" ५ । १ । ११९ । इति त्वः ।) देवभूयम् । देवसायुज्यम् । इत्यमरः । ३ । ४ । ५४ ॥ देवस्य भावः कर्म वा । इति मधुसूदनचक्रवर्त्ती ॥

देवदत्ता, स्त्री, (देवाद् देवेभ्यो दत्ता ।) नागवला । इति राजनिर्घण्टः ॥

देवदत्तः, पुं शुद्धात्मा । इति त्रिकाण्डशेषः । अर्ज्जुनस्य शङ्खः । (यथा, महाभारते । ६ । २५ । १५ ।
"पाञ्चजन्यं हृषीकेशो देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्म्मा वृकोदरः ॥")
शरीरस्थपञ्चवायुमध्ये वायुविशेषः । इति सम्मोहनतन्त्रम् ॥ विजृम्भते देवदत्तः स्वेदितश्चास्य । इति शारदातिलकटीका ॥
(दिवा दत्तं दत्ताद्रिणि । 'दिवश्च' च कर्म्म याम् ।" ६ । ३ । १०४ । इति आदिः । "दो दद्घोः ।" ७ । ४ । ४६ । इति ददादेशः ।) कश्चिद्व्यक्तिः । यथा, देवदत्ताद्यं द्वादशमं सर्व्वासिप्रमाणिकामाधाय प्रतिनमस्कार । इति कुमारस्य ॥ (नागभेदः । यथा महाभारते । १ । ३५ । ११ ।
"त्रस्तोऽप्यपरान् नागान् नामतोऽनवमात्रानतोऽपराः ।
महादेवेन धनञ्जयपुत्रः इत्यादि ।
महाहेमन्तदा महामहिमा महाबला
विनयात् ॥" इति दत्त ति । यथा,
"अन्यानामसौ देवदत्तं प्रवरस्य ॥

असिनायाधुद्रमनमश्वैश्चर्य्यगुणान्वितः ।”

इति कल्किपुराणेऽनुभागवते भविष्ये कल्कि-जन्मोपक्रमणे २ अध्यायः ॥)

देवदत्ताग्रज, पुं, (देवदत्तस्य अग्रजो ज्येष्ठः ।) बुद्धः । इति हेमचन्द्रः । २ । १५१ ।

देवदाली स्त्री, (देव शोधने + भावे ल्युट् । देवनस्यैव दानं शुद्धिर्यस्याः । गौरादित्वात् ङीष् ।) घोषकाकृतिः । धुन्धुलघोषा इति भाषा । इति रत्नमाला ॥

देवदारु, क्ली (देवानां दारु । तेषां प्रियत्वात् ।) वृक्षविशेषः । (यथा, महाभारते । ३ । १०८ । १० ।

“वनानि देवदार्वणां मेघानामिव वागुराः ।”)

तत्पर्य्यायः । शक्रपादपः २ परिभद्रकः ३ भद्रदारु ४ द्रुकिलिमम् ५ पीतदारु ६ दारु ७ पूतिकाष्ठम् ८ । इत्यमरः । २ । ४ । ५४ ॥ सुरदारु ९ दारुकम् १० स्निग्धदारु ११ अमरदारु १२ शिवदारु १३ शाम्भवम् १४ भूतहारि १५ भवदारु १६ भद्रवत् १७ इन्द्रदारु १८ मस्तदारु १९ सुरभूरुह २० । इति भावप्रकाशः ॥ सुराह्वम् २१ देवकाष्ठम् २२ । इति रत्नमाला ॥ अस्य गुणाः । तिक्तत्वम् । रूक्षत्वम् । श्लेष्मानिलभूतदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ लघुत्वम् । स्निग्धत्वम् । उष्णत्वम् । कटुपाकित्वम् । विबन्धाध्मानशोथामतन्द्राहिक्काज्वरास्रप्रमेहपीनसश्लेष्मकासकण्डूसमीरनाशित्वञ्च । इति भावप्रकाशः ॥ तस्य स्नेहगुणाः । कान्तिदत्वम् । आमशैत्यविषघ्नत्वं प्रमेहज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ ज्वरकृच्छ्रतापशोषघ्नत्वं विषनाशित्वञ्च । इति राजवल्लभः ॥

देवदारु पुं, (देवप्रियं दारु यत्र ।) अगाममध्यात् दृढः । स च पार्व्वतीप्रियः । यथा,—

“अमुं पुरः पश्यसि देवदारुं
पुत्त्रीकृतोऽसौ वृषभध्वजेन ।
यो हेमकुम्भस्तननिःसृतानां
स्कन्दस्य मातुः पयसां रसज्ञः ॥”

इति रघौ । २ । ३६ ।

देवदालिका स्त्री, (देवदालीव कायतीति । कै + कः । टाप् पूर्व्वह्रस्वः ।) महाकालः । इति राजनिर्घण्टः ॥

देवदाली, स्त्री (देवेन मेघोदयेन दालो दलनं यस्याः । गौरादित्वात् ङीष् ।) लताविशेषः । बन्दाल इति घघरबेल इति च हिन्दीभाषा । गराघातपुष्पहन्त्रा । (यथा, सुश्रुते, सूत्रस्थाने । ३९ अध्याये ।

“कोशातकी सप्तला शङ्खिनी देवदालीकारवेल्लिका चेत्युभयतो भागहराणि ॥”)

तत्पर्य्यायः । जीमूतकः २ कट्टफला ३ गरा ४ गरी ५ वेणी ६ महाकोषफला ७ कटफला ८ घोषा ९ कर्कटी १० विषघ्ना ११ वृश्चिकी १२ गरागरी १३ तस्करी १४ आखुविषहा १५ दाली १६ रोमशफलिका १७ कुरुचिका १८ सुतकीर्णी १९ देवताड़ः २० ॥ अस्या गुणाः । तिक्तत्वम् । उष्णत्वम् । कटुत्वम् । पाण्डुकफ-द्रुनामश्वासकासकामलाभूतनाशित्वञ्च । तस्याः फलस्य गुणाः । तिक्तत्वम् । कृमिश्लेष्मगुल्मशूलार्शोवातघ्नत्वम् । वमनत्वञ्च ।

“पीता गरा खरस्पर्शा विषघ्नी गरनाशिनी ।”

इति राजनिर्घण्टः ।

तन्नामगुणाः । यथा भावप्रकाशे ।

“देवदाली तु वेणी स्यात् कर्कटी च गरागरी ।
देवताड़ो वृत्तकोशस्तथा जीमूत इत्यपि ॥
पीतापरा खरस्पर्शा विषघ्नी गरनाशिनी ।
देवदाली रसे तिक्ता कफार्शःशोथपाण्डुता ॥
नाशयेद्वामनी तिक्ता श्वासहिक्काभिमिश्रज्वरान् ।
देवदालीफलं तिक्तं कृमिघ्नं विनाशनम् ॥
सततं गुल्मशूलघ्नमर्शोघ्नं वातजित् परम् ॥”

देवदासी, स्त्री, (देवं इन्द्रियं दासीति दस्यतीति । देव + दास् + अच् । गौरादित्वात् ङीष् ।) वनबीजपूरकः । इति राजनिर्घण्टः । (देवाय क्रीडार्थे दासी इव ।) वेश्या । इति शब्दार्थकल्पतरुः । (देवपरिचारिका च ।)

देवदीप, पुं, (देवं दीप्तिशीलं दीपयति प्रकाशयति वुद्धिस्थं करोतीति । दीप + णिच् + अच् । यद्वा, देवेषु इन्द्रियेषु दीपः प्रकाशकः ।) लोचनम् । इति शब्दरत्नावली ॥

देवदुन्दुभि, पुं (देवानां दुन्दुभिरिव पवित्रकत्वात् ।) शङ्खभेदः । स दक्षिणावर्त्तः । इति रत्नमाला ॥ देवानां दुन्दुभिवाद्यञ्च ॥

देवदूती, स्त्री (देवानिन्द्रियाणि दूयन्ते उपतापयन्तीति । दू ङ उपतापे + “क्तिच्क्तौ च संज्ञायाम् ।” ३ । ३ । १७४ । इति क्तिच् ततो ङीष् ।) वनबीजपूरकः । इति राजनिर्घण्टः ॥

देवदेव, पुं (दीव्यतीति । दिव + अच् । देवानां देवेषु वा देवः श्रेष्ठत्वात् ।) शिवः । (यथा, महाभारते । १ । १ । ३६ ।

“प्रदाध्येपमस्कृत्य देवदेवं
किरातरूप भाम्बकं तोषयं युद्धे ।”)

ब्रह्मा । इति शब्दरत्नावली ॥ (यथा, देवीभागवते । १ । ५ । १८ ।

“स यत्नो सन्दिदधाय देवदेवः सनातनः ।”

“देवदेवो महेश्वरः ।” तद्दीका । विष्णुः । यथा देवीभागवते । १ । ४ । ३५ ।

“कारकः सर्व्वलोकानां देवदेवं जगद्गुरुम् ।
वासुदेव जगन्नाथ तप्यमानं नहन्तमः ॥”

गणेशः । यथा, कथासरित्सागरे । २ । ५५ ।

“अस्तीह प्रमदोद्याने तरुराज्यमध्यगः ।
तद्वयासो वरद देवदेवो विनायकः ॥”)

देवद्रोणी स्त्री देवयात्रा । इति हारावली ।१४९।

(देवानां द्रोणी द्रोणाकारत्वात् अवन्यस्य गात्रम् । शिवलिङ्गादीनामवगाहनपात्रम् । यथा प्रायश्चित्ततत्त्वे रघुनन्दनकृतसमध्यवचनम् ।

‘देवद्रोण्यां विहारे च कूपोद्यानवने च ।
एषु स्नेषु जिष्णात् प्रायश्चित्त न विद्यते ।

“देवद्रोणी सपत्नीविष्णुादिस्थानगाहनम् ।”

इति रघुनन्दनः ॥)

देवद्र्यङ्, [च्] त्रि, (देवानञ्चति पूजयतीति । अञ्चु गतिपूजनयोः + “ऋत्विग्दधृक्” इति । ३ । २ । ५९ । इति क्विन् । “विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये ।” ६ । ३ । ९२ । इति अद्र्यादेशः ।) देवपूजकः । देवसमीपगन्ता । इत्यमरः । ३ । १ । ३४ ॥

देवधान्य, क्ली (देवदेयं धान्यमिति मध्यलोपी समासः ।) धान्यविशेषः । देधान इति भाषा । जोयार इति हिन्दीभाषा । तत्पर्य्यायः । यवनालः २ योनलः ३ जूर्णाह्वयः ४ जोन्नाला ५ बीजपुष्पिका ६ । इति हेमचन्द्रः । ४ । २४४ ॥

देवधूप, पुं, (देवप्रियो धूप इति मध्यलोपी समासः ।) गुग्गुलुः । इति रत्नमाला ॥

देवन, क्ली, (दिव् + भावे ल्युट् ।) व्यवहारः । जिगीषा । क्रीडा । इति मेदिनी । ने, ७६ ॥ (दीव्यति अस्मिन्निति अधिकरणे ल्युट् ।) लीलोद्यानम् । इति त्रिकाण्डशेषः । (दीव्यति अनेनेति । दिव + करणे ल्युट् ।) पद्मम् । इति शब्दचन्द्रिका । परिदेवनम् । इत्यमरटीकायां भरतः । द्युतिः । स्तुतिः । कान्तिः । गतिः । शोकः । इत्यमरटीकायां मथुरेशः । द्यूतम् । इति स्वामी । (यथा, मनौ । ९ । २२२ ।

“प्रकाशमेतत् तास्कर्य्यं यद्देवनसमाह्वयौ ।
तयोर्नित्यं प्रतीघाते नृपतिर्यत्नवान् भवेत् ॥”)

देवन, पुं (दीव्यत्यनेनेति । दिव + करणे ल्युट् ।) पाशकः । इत्यमरः । २ । १० । ४५ ॥

देवनन्दी, [न्] पुं (देवमिन्द्रं नन्दयतीति । नन्दि + णिनि ।) इन्द्रद्वारपालः । इति हेमचन्द्रः । २ । ९ ॥

देवनल पुं (देव आकारवर्णातिशयेन श्रेष्ठो नलः ।) नलभेदः । तत्पर्य्यायः । देवनालः २ महानलः ३ वन्यः ४ नलोत्तमः ५ स्थूलनालः ६ सालदलः ७ सुरनालः ८ सुरदुमः ९ । अस्य गुणाः । अतिमधुरत्वम् । उष्णत्वम् । ईषत् कषायत्वम् । नलादधिकवीर्य्यत्वम् । रक्तमोक्षप्रदत्वञ्च । इति राजनिर्घण्टः ।

देवना, स्त्री, (दिव + भावे युच् टाप् च ।) क्रीडा । सेवा । इति शब्दरत्नावली ॥

देवनाल पुं, (देवो दीप्तिशील श्रेष्ठो वा नालः ।) देवनलः । इति राजनिर्घण्टः ॥

देवपति, पुं (देवानां पतिः ।) इन्द्रः । इति हेमचन्द्रः । २ । ८७ । (यथा, महाभारते । ३ । २१ । ३३ ।

“सह भ्रात च धर्मेण पुरन्दर कर्णैमिति ।
कौपहं विहरिष्यामि सह देवपतिर्यथा ॥”)

देवपत्नी स्त्री, (देवानां पत्नीव प्रियत्वमावहित्वात् ।) मधुकन्दम् । इति त्रिकाण्डशेषः । (देवानां पत्नी ।) देवभार्या । (यथा महाभारते । १२ । १४ । १८ ।

“देवानां मातरः सर्व्वा देवपत्न्यः सकन्यकाः

देवपथः, पुं (देवानां पन्थाः। "ऋक्पूरब्धूःपथा मानक्षे।" ५। ४। ७४। इति अः।) देवानां पन्थाः। तत्पर्य्यायः। छायापथः २ सोमधारा ३ नभःसरित् ४। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३। २६८। २०।
"दिवो देवपथो ह्येष यत्र गच्छन्ति मानवाः॥"
तीर्थविशेषः। यथा महाभारते। ३। ८५। ४५।
"ततो देवपथं गत्वा नियतो नियताशनः।
देवसत्रस्य पुण्यं तदवाप्नोति मानवः॥")

देवपर्णं क्ली (देवानां प्रियं पर्णमस्य।) सुरपर्णम्। इति राजनिर्घण्टः॥

देवपुत्रिका स्त्री, (देवानां पुत्रिकेव प्रियत्वात्।) एला। इति राजनिर्घण्टः॥

देवपुत्री, स्त्री, (देवानां पुत्रीव प्रियत्वात्।) एला। इति जटाधरः॥

देवपूः [र] स्त्री (देवानां पूः पुरी।) अमरावती। इति जटाधरः॥

देवप्रश्नः पुं (देवानां प्रश्नो यत्र।) नक्षत्रादिघटितनिरूपणा। तत्पर्य्यायः। उपश्रुतिः २। इति हेमचन्द्रः। ५। १०७॥

देवप्रियः, पुं, (देवानां प्रियः।) पीतभृङ्गराजः। वकपुष्पः। इति राजनिर्घण्टः॥

देवबला, स्त्री, (देवप्रिया बला।) सहदेवी। नागबला। इति राजनिर्घण्टः॥

देवब्रह्मा [न्] पुं (देवेषु ब्रह्मा इव। देवर्षित्वात् तथात्वम्।) नारदर्षिः। इति हेमचन्द्रः। ३। ५११॥

देवभवनं क्ली, (देवानां भवनं गृहमिव। एतस्य आश्वत्थस्य तथात्वम्।) अश्वत्थः। इति शब्दचन्द्रिका॥ स्वर्गः॥ (देवप्रतिमा तिष्ठति तत्र॥)

देवभूः पुं (दिवं देवत्वं भवन प्राप्नोतीति। भू प्राप्तौ + क्विप्।) देवः। इति शब्दरत्नावली॥ (देवानां भूमिर्भूमिवद्यत्र।) स्वर्गः॥

देवभूतिः, स्त्री (देवात् देवलोकात् भूतिरुत्पत्तिर्यस्याः।) मन्दाकिनी। इति शब्दरत्नावली॥ (देवानां भूतिरिति विग्रहे। देवैश्वर्य्यम्॥)

देवभूयं क्ली (देवस्य भावः। भू + "भुवो भावे।" ३। १। १०७। इति क्यप्।) देवत्वम्। देव भावत्वम्। इत्यमरः। २। ७। ५२॥

देवमणिः पुं, (देवप्रियो मणिः।) अर्थात्। (देवो दानवप्रीता मणिः॥) कौस्तुभः। अश्वस्य कर्णे रोमावर्त्तः। इति मेदिनी। णे ८०॥ (यथा, शिशुपालवधे। १। ४।
"उदयति विततोर्द्ध्वरश्मिरज्जा-
वहिमरुचौ हिमधाम्नि याति चास्तम्।
वहति गिरिरयं विलम्बिघण्टा-
द्वयपरिवारितवारणेन्द्रलीलाम्॥")
महादेवः। इति राजनिर्घण्टः॥

देवमाता [तृ] स्त्री, (देवानां माता।) अदितिः। इति त्रिकाण्डशेषः॥ (यथा भागवते। ६। ६। ३१।
"अदितिर्देवमोऽनुमता
विद्युत्प्रभा इव देवमातृ॥"
देवमातृकमात्रम्। यथा महाभारते। १। ६। ११।
"देवपत्नी देवकन्या देवमातर एव च॥")

देवमातृकः, त्रि, (देवो वृष्टिमेघ इव प्रजागणस्य पालकत्वात् माता यस्य। कप्।) वृष्ट्यम्बुसम्पन्नीहिपालितदेशः। इत्यमरः। २। १। १२॥ (यथा महाभारते। २। ५। ७७।
"कच्चिद्राष्ट्रे तडागानि पूर्णानि च बृहन्ति च।
भागशो विनिविष्टानि न कृषिर्देवमातृका॥")

देवमानकः, पुं (देवेषु मानो यस्य। कप्। संज्ञायां कन् वा।) कौस्तुभमणिः। इति शब्दरत्नावली॥

देवमायः, पुं (देवाय भूतस्य श्रीकृष्णाय यो माघः। अत्र हि धृतेरौपवस्य प्रादुर्भावात् गर्भस्य श्रीकृष्णादिमात् तथात्वम्।) गर्भस्थावस्थायाः। तत्पर्य्यायः। गर्भादिमः २। इति त्रिकाण्डशेषः॥ देवानां माघः। स मनुष्यमाने पितृदेवानकः॥

देवयजिः, पुं (देवान् यजति इति। यज + "सर्व्वधातुभ्य इन्।" उणा। ४। ११७। इति इन्।) देवपूजकः। सुनि। यथा, भट्टि। ७। ३४।
"यष्टो हिवान् देवयजीन् निवसा॥"

देवयज्ञः, पुं, (देवानां यज्ञः।) होमः। इति हेमचन्द्रः। ३। ४७९॥ (यथा मनुः। ३। ९१।
"ऋषियज्ञं देवयज्ञं भूतयज्ञञ्च सर्व्वदा॥")

देवयात्रा स्त्री, (देवानां यात्रा।) देवगमनम्। तत्पर्य्यायः। दनकोष्ठी २। इति हारावली। १४८॥ देवोत्सवादि॥ (यथा, कथासरित्सागरे। ७५। १२१।
"एकदा देवयात्रायां तत्र महत्यामागते।
अनादैवो महामत्स्यः स्वानिमात् दर्शयाम् ममात्॥")

देवयानं, क्ली (देवानां यानम्।) देवविमानम्। देवरथः। इति शब्दार्थकल्पतरुः॥ (त्रि, देव प्रापणीयम्। यथा ऋग्वेदे। १। १६२। ४।
"यद्धविष्यमृतुशो देवयानं
त्रिर्मानुषाः पर्य्यश्वं नयन्ति॥"
देवयानकम्। यथा तत्रैव। ७। ७६। २।
"प्र मे पन्था देवयाना अदृश्र-
न्नमर्धन्तो वसुभिरिष्कृतासः॥")

देवयानी, स्त्री शुक्राचार्य्यकन्या। सा ययातिराज पत्नी। इति नीलकण्ठम्॥ (इयं किल बृहस्पतिपुत्रः कचो देवकार्य्यार्थं सञ्जीवन विद्यार्थी शुक्रसमीपमागतः। देवयानी तं पुत्रार्थं मनोहरदर्शनाञ्च दृष्ट्वा अतिप्रीतिम् ऐव। कचस्तु गुरुकन्यानियं यत्ता पालितस्ता गदामि न चापि तर। अतः शप्त्वा देवयानी ताम् "न ते विद्या सिद्धिमेवं सम्भविष्यति" इति शशाप। कचस्तु निरपराधो अपि शप्तस्तां शशाप "ब्राह्मणो न ते भर्त्ता भविष्यति" इत्येवं शशाप। अथ सा वार्षपर्वण्याः सख्या सह जलविहारमिति चैत्र। अथ कदाचित् शर्मिष्ठया देवयानीं जलकेलिप्रसङ्गे वस्त्रविनिमयात् हुताः। देवयानी सौन्दर्य्याति शुक्रस्य दुहिता शर्मिष्ठायास्तु पुत्रीत्वात् ताम् हर्षिता। इति कूपे प्रक्षिप्ता। अथ तदा ययातिः मृगयां पालयन् मृगोऽसि तत्र समागम्य शान्तम्। अथ देवयानी कूपात् तस्या निष्क्रम्य मानस धर्मं भिक्षायितवती। अथ शर्मिष्ठा स्वपितुरपि गच्छता वृषपर्व्वासुरराजो भीतभक्त्या शर्मिष्ठां कन्यापञ्चशतसहितां दासीत्वे प्रदाय शुक्रस्य देवयान्याश्च प्रसादनाय। अथ कदाचित् देवयानी पित्रा ययाति पतिम्। स्त्रीणां देव सह विजहार। अथवा पुत्रौ द्वौ यदुतुर्वसू चैव।
गच्छति काले देवयानी राज्ञा सह वन गता शर्मिष्ठायाः कुमारान् क्रीडतस्त्रय पुत्रौ दृष्ट्वा शर्मिष्ठागर्भे जातांश्च तान् विज्ञाय क्रु पितरस्था विद्रुषोप प्रतियातवती। शुक्रस्तु ययातिं तदर्थमानिनीं विदित्वा राजानं जरया योजयामास। एतद्विषये विस्तृतविवरणस्तु महाभारते। १। ७८ - ८३। अध्यायेषु द्रष्टव्यम्॥)

देवयुः, त्रि, (देवं याति उपासनया प्राप्नोतीति। या + "मृगय्वादयश्च।" उणा। १। ३८ इति कुः।) धार्म्मिकः। (यथा ऋग्वेदे। १। १५३। १।
"तवेद्द्विषमभिपादो व्यश्नानः वर्य्ये यत्र देव
देवी रश्मि॥"
"देवयो देवं यौतिमनुमारः विश्वानन्द
दक्षकी वहशान्तिभि प्राप्नुवित्वको नरः।"
इति तद्भाष्ये सायनः॥) लोकयात्रिकः। इति मेदिनी। ये ८१। देवे, पुं। इति शब्दरत्नावली॥

देवयोनिः पुं, स्त्री देवे इव योनिर्वैकाशगुणो यस्य सः। तद्भेदाः, विद्याधराः १ अप्सरसः २ यक्षाः ३ राक्षसाः ४ गन्धर्वाः ५ किन्नराः ६ पिशाचाः ७ गुह्यकाः ७ सिद्धाः ८ भूतानि १०। इत्यमरः। १। १। ११॥ (देवानां योनिः। देव कारणम्। यथा महाभारते। ३। ११४। २४।
"अग्निरापो हि शुक्रमेव। देवयोनिरसौ वनी।
कुमार्यापरिक्रीडन्। न यक्ष्यौ नाभिवर्द्धि॥")

देवरः पुं (दीव्यतीति। दिव क्रीडायाम् + "अर्त्तिकमिभ्रमिचमिदेविवासिभ्यश्चित्।" उणा। ३। १३२। इति अरः।) पत्युः कनिष्ठभ्राता। देवीर इति भाषा। ("देवा अपत्यं द्वितीयो वर उच्यते।" इति निरुक्ते। ३। १५।) तत्पर्य्यायः। देवा २। इत्यमरः। २। ६। ३५॥ देवृ ३ देवार ४ देवन ५। इति जटाधरः॥ सुरामा ६ देवरो ७। इति शब्दरत्नावली॥ (यथा मनुः। ९। ५९।
"देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ्नियुक्तया।
प्रजेप्सिताधिगन्तव्या सन्तानस्य परिक्षये॥")
देवरस्य भार्या तु श्वश्रूः। इति स्मृतिः॥

देवरथः, पुं, (देवानां रथः ।) देवानां विमानम् । इति हलायुधः ॥ स च पुष्पकादिः ॥

देवराजः पुं (देवानां राजा । "राजाहःसखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) इन्द्रः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते ।१।८६।७।
"देवराजसमो ह्यासीत् ययातिः पृथिवीपतिः ।")
तस्य नामानि यथा,—
"इन्द्रः सुरपतिः शक्रो दितिजः पवनाग्रजः ।
सहस्राक्षो भगाङ्कश्च कश्यपाङ्गज एव च ॥
विडौजाश्च सुनासीरो मरुत्वान् पाकशासनः ।
जयन्तजनकः श्रीमान् शचीशो दैत्यसूदनः ॥
वज्रहस्तः कामसखा गौतमीव्रतनाशनः ।
वृत्रहा वासवश्चैव दधीचिदेहभिक्षुकः ॥
जिष्णुश्च वामनभ्राता पुरुहूतः पुरन्दरः ।
दिवस्पतिः शतमखः सुत्रामा गोत्रभिद्विभुः ॥
लेखर्षभो बलारातिर्जम्भभेदी सुराश्रयः ।
सङ्क्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः ॥
आखण्डलो हरिहयो नमुचिप्राणनाशनः ।
वृद्धश्रवा वृषश्चैव दैत्यदर्पनिषूदनः ॥
षट्चत्वारिंशन्नामानि पापघ्नानि विनिश्चितम् ।"
इति ब्रह्मवैवर्त्ते जन्मखण्डम् ॥

देवरातः, पुं, (दै + क्तः । देवेन श्रीकृष्णेन रातः रक्षितः ।) परिक्षित् राजा । इति श्रीभागवतम् ॥ धारधपक्षिविशेषः । इति शब्दार्थकल्पतरुः ॥ (विश्वामित्रपुत्रः । यथा हरिवंशे । २७ । ४७ ।
"विश्वामित्रस्य पुत्रास्तु देवरातादयः स्मृताः ।"
एतन्निवृत्तिर्येयथा भागवते । ९ । १६ । ३२ ।
"यो रातो देवयजने देवैर्गाधिषु तापसः ।
देवरात इति ख्यातः शुनःशेफस्तु भार्गवः ॥"
निमेर्वंशस्य पुत्रः । यथा, रामायणे । १ । ७१ । ८ ।
"देवरात इति ख्यातो निमेर्ज्येष्ठो महीपतिः ।"
युधिष्ठिरस्य सभास्थक्षत्रियाणामन्यतमः । यथा, महाभारते । २ । ४ । २६ ।
"पाण्डुरो देवरातश्च भोजो भीमरथश्च यः ।")

देवर्षिः पुं, (देव ऋषिश्च । देवानां ऋषिर्वा ।) सुरर्षिः । तद्यथा । नारदः १ अत्रिः २ मरीचिः ३ भरद्वाजः ४ पुलस्त्यः ५ पुलहः ६ क्रतुः ७ भृगुः ८ वशिष्ठः ९ प्रचेताः १० । इत्यमरटीका सारसुन्दरी ॥ (यथा, महाभारते । १९ । ३१ । ३१ ।
"देवर्षिचरितं गार्ग्य त्वया मैत्रेय चिकितुषितम् ।")
तुम्बुरुभरतादिः । इति तट्टीकायां भरतः ॥ कुम्बारादिः । इति त्रिकाण्डशेषः ॥ (नारदः । यथा, महाभारते । १२ । १७ । १४४ ।
"देवान्देवो दर्शयिष्यत्यारुरवर्पदः ।")

देवलः पुं, (देवं लाति गृह्णाति जीविकार्थेत्वेनेति । देव + ला आदाने + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) देवाजीवः । जीविकार्थं यो देवान् प्रतिपालयति । इत्यमरः । २ । ७ । ११ । पूजारि वामन इति भाषा । देवोपजीवकजीवी । यथा —
"देवोपजीवकजीवी च देवलश्च प्रकीर्त्तितः ॥"
इति ब्रह्मवैवर्त्तपुराणम् ॥
"चिकित्सकान् देवलकान् मांसविक्रयिणस्तथा ।
विपणेन च जीवन्तो वर्ज्याः स्युर्हव्यकव्ययोः ॥"
इति मनुः । ३ । १५२ ॥
"देवलः प्रतिमापरिचारकः वर्त्तनार्थत्वेनैतत् कर्म्म कुर्व्वतोऽयं निषेधः न तु धर्म्मार्थम् । देवकोशोपजीवी च नाम्ना देवलको भवेदिति देवलवचनात् ।" इति तट्टीकायां कुल्लूकभट्टः ॥ * ॥ (दीव्यति आनन्देनेति । दिव् + "वृषादिभ्यश्चित् ।" उणां १ । १०८ । इति कलच् ।) धार्म्मिकः । इत्युणादिकोषः ॥ नारदमुनिः । इति त्रिकाण्डशेषः ॥ (रलयोरैक्यात् ।) देवरः । इति शब्दरत्नावली ॥ धर्म्मशास्त्रवक्ता मुनिविशेषः । इति भगवद्गीता ॥ स असितमुनिपुत्रः रम्भाशापेनाष्टावक्रो बभूव । इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥ (अयन्तु वेदव्यासस्य शिष्यः । यथा, देवीभागवते । १ । ३ । ३ ।
"असितो देवलश्चैव वैशम्पायन एव च ।
जैमिनिश्च सुमन्तुश्च गताः सर्व्वे तपोधनाः ॥"
प्रत्यूषस्य वसोः पुत्रः । यथा, विष्णुपुराणे । १ । १५ । ११५ ।
"प्रत्यूषस्य विदुः पुत्रमृषिं नाम्नाथ देवलम् ।")

देवलकः पुं (देवल एव । स्वार्थे कन् ।) देवलः । इति जटाधरः ॥ (यथा, महाभारते ।१३।७२।१६।
"आह्वायका देवलका नक्षत्रग्रामयाजकाः ।
एते ब्राह्मणचाण्डाला महापथिकपञ्चमाः ॥")

देवलता, स्त्री, (देवप्रिया लता ।) नवमल्लिका । इति शब्दचन्द्रिका ॥

देवलाङ्गुलिका, स्त्री, (देवयति परिदेवयत्यनेनेति । देव + णिच् + घञ् । देवं लाङ्गुलिकं मूलं यस्याः ।) वृश्चिकालिः । इति राजनिर्घण्टः ॥

देवलोकः, पुं, (देवानां लोकः ।) स्वर्गः । इति त्रिकाण्डशेषः ॥ (यथा देवीभागवते ।४।२।२६।
"तस्मात् सर्व्वं भवत्यत्र देवलोकजयाय वै ।")
अपि च । मत्स्यपुराणे ।
"भूर्लोकोऽथ भुवर्लोकः स्वर्लोकोऽथ महर्जनः ।
तपः सत्यञ्च सप्तैते देवलोकाः प्रकीर्त्तिताः ॥")

देववक्त्रं क्ली, (देवानां वक्त्रम् । तद्द्वारैव यज्ञाग्नौ हव्यादिभोजनात् तथात्वम् ।) अग्निः । इति शब्दचन्द्रिका ॥ देवानां मुखञ्च ॥

देववर्द्धकिः पुं (देवानां वर्द्धकिस्तक्षा ।) विश्वकर्म्मा । इति हेमचन्द्रः । २ । ९६ ॥

देववल्लभः, पुं, (देवानां वल्लभः प्रियः ।) पुन्नागवृक्षः । इत्यमरः । २ । ४ । २५ ॥

देववृक्षः, पुं (देवप्रियो वृक्षः ।) सप्तच्छदः । मन्दारवृक्षः । गुग्गुलुः । इति मेदिनी । षे, ३२ ॥ अयमिह देवलकमर्क्षे पुं दर्भ्यः ॥

देवव्रतः पुं, (देव आदित्यदेवदामिन्द्रप्रधान व्रतम् व्रतं यस्य । यद्वा, देवस्येव व्रतं स्थिर प्रतिज्ञा यस्य ।) भीष्मः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । १ । २ । १९ ।
"पिताद्दत्तं गतो राज्ये स्थापयामास वीर्य्यवान् ।
स्वयं न कृतवान् राज्यं तस्माद्देवव्रतोऽभवत् ॥")
देवानां व्रतञ्च ॥

देवशेखरः, पुं, (देवः क्रीडापरः शेखरो यस्य ।) दमनकः । इति राजनिर्घण्टः ॥ देवानां मस्तकञ्च ॥

देवश्रुतः, पुं, (देवेषु श्रुतः विख्यातः ।) ईश्वरः । शास्त्रम् । नारदः । इति शब्दार्थकल्पतरुः ॥ (शुक्रस्य पुत्रविशेषः । यथा, देवीभागवते । १ । १९ । ४१ ।
"स तस्माज्जनयामास पुत्रांश्चतुर एव हि ।
कृष्णं गौरप्रभञ्चैव भूरिं देवश्रुतं तथा ॥")

देवश्रेणी, स्त्री (देवानां श्रेणीव ।) मूर्व्वा । इति राजनिर्घण्टः ।

देवसभा स्त्री, (देवानां सभा ।) देवानां समाजः । तत्पर्य्यायः । सुधर्म्मा २ । इत्यमरः । १ । १ । ५१ ॥ सुभा ३ । सुधर्म्मा [न्] ४ । इति शब्दरत्नावली ॥ सुधर्म्मी ५ । इत्यमरटीकायां भरतः ॥

देवसभ्यः, त्रि, (देवस्य क्रीडायाः सभा तस्यां सीदतीति । यत् ।) क्रीडासभासदः । तत्पर्य्यायः । सभिकः २ । इति त्रिकाण्डशेषः ॥ देवानामाश्रिकश्च ॥

देवसर्षपः, पुं (देवप्रियः सर्षपः ।) सर्षपभेदः । तत्पर्य्यायः । सुघाघः २ मदनः ३ रक्तकलकः ४ सुरसर्षपकः ५ सूक्ष्मपत्रः ६ निस्तुषसर्षपः ७ कुररान्ध्रिः ८ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातशिरोरोगामयनाशित्वम् । रुच्यत्वञ्च । इति राजनिर्घण्टः ॥

देवसहा, स्त्री, (सहते या । सह + अच् + टाप् । देवस्य सहा ।) स्थलपद्मिनी । भिषाञ्जनम् । इति विश्वः ॥

देवसात्, अ (देवाय देयं देवाधीनं वा करोतीति । देव + सात् ।) सकलवस्तु देवमात्रमयः । देवाधीनम् । देवदेयम् । यथा,—
"सात्यधीनदेवविषयेषु अनुस्वरपूर्व्वपदस्थभृधातुषु परेषु पत्वानुक्रमणो भवति । देयोऽपि पूर्व्वोक्तधातुषु परेषु सातप्रत्ययोऽपि । यथा देवाय देयं करोति देवसात्करोति ।" इति मुग्धबोधव्याकरणम् ॥ (यथा, महाभारते । ७ । १८७ । ५८ ।
"जित्वा वा बहुभिर्दैत्यभूर्द्दत्तभूरिदक्षिणैः ।
हत्वा वा देवसाद्भूत्वा लोकान् प्राप्स्यसि पुष्कलान् ।")

देवसायुज्यं, क्ली (देवेन सायुज्यं संमिलनम् ।) देवत्वम् । इत्यमरः । २ । ७ । ५२ ॥

देवसेना स्त्री, (देवाय क्रीडार्थं सेना ।) सदम् । इति हेमचन्द्रः । ३ । ५६८ ॥

देवसेना, स्त्री दक्षकन्या । इति मेदिनी । ने १८७ ॥ (प्रजापतेः कन्या । इति महाभारतम् । ३ । २२३ । ११ ।) सा षष्ठी । (यथा ब्रह्मवैवर्त्ते पुराणे प्रकृतिखण्डे । १ । ७१—७४ ।

"प्रभाती सम्प्रदाया सा देवसेना च नारद।
मातृकासु पूज्यतमा सा च षष्ठी प्रकीर्त्तिता॥
शिशूनां प्रतिविश्वेषु प्रतिपालनकारिणी।
तपस्विनी विष्णुभक्ता कार्त्तिकेयस्य कामिनी॥"
इयं हि षष्ठी यथा कार्त्तिकेयस्य पत्नी जाता तद्विवरणं महाभारते।३।२२३ अध्यायमारभ्य विस्तरशो द्रष्टव्यम्॥) देवानां सेना। इति हेमचन्द्रः॥ (यथा, महाभारते।१।१२२।९।
"देवसेना दानवैर्या मथ्यमाना महात्मन।
पालयेद्भीमसामित्र स त्रैव पुरुषो मया॥")
देवसेनापति, पुं, (देवसेनायाः पतिः।) कार्त्तिकेयः। इति शब्दरत्नावली॥
देवस्व, क्ली, (देवस्य स्वं धनम्।) देवसम्बन्धि धनम्। यथा,—
"अभक्ष्यं गुरोर्द्रव्यं देवस्वं परस्य च।
कृत्वा दत्तानि शुल्केन स प्रेतो जायते ध्रुवम्॥"
इति महाभारते पञ्चप्रेतोपाख्यानम्॥
(यथा च मनुः।११।२६।
"देवस्वं ब्राह्मणस्वं वा लोभेनोपहिनस्ति यः।
स पापात्मा परे लोके गृध्रोच्छिष्टेन जीवति॥"
यज्ञशीलधनम्। यथा मनुः।११।२०।
"यज्ञार्थं धनमीशानां देवस्वं तद्विदुर्बुधाः॥")
देवहू, पुं (देव+भावे क्विप्। देवानां हूयन्ते अस्मिन्निति।) वामकर्णः। यथा
"चापयत्यां पश्चादस्य विवस्वती वधूरसम्।
पितृहूर्देवहूम्य कर्ण उत्तरो देवहूः स्मृतः॥"
इति श्रीभागवते।४।२८।१२॥
(त्रि, देवानाह्वयतीति। ह्वे+कर्त्तरि क्विप्। देवानां आह्वाता। यथा, वाजसनेयसंहितायाम्।१७।६९।
"देवहूर्यज्ञ आ च वक्षत् सुम्नहूर्यज्ञ आ च वक्षत्॥")
देवा, [न्] पुं, (दीव्यतीति। दिव+"श्वन्" उणा॰।१।१००। इति वन्।) देवरः। अमरः।२।६।३२। (यथा ऋग्वेदे।१०।८५।४६।
"सम्राज्ञी श्वश्र्वां भव ननान्दरि सम्राज्ञी अधि देवृषु॥")
देवामनि। इति वैयाकरणा उणादिवृत्तौ॥
देवा, स्त्री (दीव्यते अनया। दिव+अच्। ततः टाप्।) पद्मचारिणी। अतसी। इति शब्दचन्द्रिका॥ (स्पृक्का। अस्याः पर्य्याया यथा, वैद्यकरत्नमालायाम्।
"स्पृक्का दिव्या देवा निलका ह्यबलाथ वा।
भव पेशी मधुरसा मर्म्मा निद्रधनीति च॥")
देवाजीव, त्रि, (देवेन देवप्रतिमादिविषये आजीवतीति। आ+जीव+अण्।) देवलः। इत्यमरः।२।१०।११॥
देवाजीवी, [न्] त्रि, (देवेन आजीवतीति। आ+जीव+णिनि।) देवलः। देवप्रतिमोपजीवी ब्राह्मणः॥
देवाट, पुं (अट गतौ+भावे घञ्। देवानां अटाः गमनं यत्र।) तीर्थविशेषः। यथा,
"यदा यत्रो मूलपाणिर्गौरीपतिवि पुरस्कृतः।
शिवलिङ्गं तद्धिस्थाय देवस्तत्रैव संस्थितः।
देवानामटनार्थेन देवाट इति विश्रुतम्॥"
इति वराहपुराणम्॥
देवात्मा, [न्] पुं (देव आत्मा अधिष्ठातृदेवता यस्य।) अश्वत्थः। इति शब्दचन्द्रिका॥
देवानांप्रिय पुं स्त्री, (देवानां प्रियः। "देवानां प्रिय इति च मूर्खे।" ६।३।२१। इत्यस्यैव वार्त्तिकोक्त्या अलुक्। छागस्य पशुत्वादेव मूर्खत्वं बोध्यम्।) छागः। इति त्रिकाण्डशेषः॥ त्रि, मूर्खः। इति हेमचन्द्रः।३।१७॥
देवापि, पुं, प्रतीपराजपुत्रः। स सुमेरुसमीपे कलापग्रामे योगी भूत्वा अद्यापि स आस्ते पुनः चन्द्रवंशं पुनः मरुयुगे भावयिष्यति। इति श्रीभागवतम्॥ स च कुष्ठी प्रजाभिरपयातः। इति मत्स्यपुराणम्॥ (यथा, महाभारते।१।९५।४४—४५।
"प्रतिश्रवसः प्रतीपः प्रतीपस्य तु त्रयः पुत्रा देवापिः शान्तनुर्बाह्लीकश्च। देवापिस्तु बाल एवारण्यं विवेश। शान्तनुस्तु महीपालो बभूव॥"
निरुक्ते तु अयं ऋष्टिषेणस्य पुत्रः। यथा, निरुक्ते।२।१०।
"देवापिश्चार्ष्टिषेणः शन्तनुश्च कौरव्यौ भ्रातरौ बभूवतुः। स शन्तनुः कनीयानभिषेचयाञ्चक्रे देवापिस्तपः प्रतिपेदे। ततः शन्तनो राज्ये द्वादश वर्षाणि देवो न ववर्ष। तमूचुर्ब्राह्मणा अधर्मस्त्वया चरितो ज्येष्ठं भ्रातरमन्तरित्याभिषेचितं तस्मात्ते देवो न वर्षतीति। स शन्तनुर्देवापिं शिशिक्ष राज्येन। तमुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति। तस्यैतद्वर्षकामसूक्तम्॥" तथा च ऋग्वेदे।१०।९८।५।
"आर्ष्टिषेणो होत्रमृषिर्निषीदन् देवापिर्देवसुमतिं चिकित्वान्॥")
देवाभीष्टा, स्त्री, (देवानामभीष्टा प्रिया।) ताम्बूली। इति शब्दचन्द्रिका॥
देवायतन, क्ली, (देवानामायतनं गृहम्।) देवालयः। यथा, कूर्मपुराणे।
"न देवायतनं गच्छेत् कदाचिच्चाप्रदक्षिणम्।
न पीडयेद्वा वस्त्राणि न देवायतनेष्वपि॥")
देवायुध क्ली (देवस्य इन्द्रस्य आयुधम्।) इन्द्रधनुः। इति हेमचन्द्रः।२।८९॥ देवायुधम्॥
देवार्ह, क्ली, (देवमर्हतीति। अर्ह+अच्।) सरलद्रुमः। इति राजनिर्घण्टः॥
देवाला, स्त्री (देवाल+टाप्।) महादेवी लता। इति राजनिर्घण्टः॥
देवालय पुं (देवानामालय आश्रयः।) स्वर्गः। (यथा, देवीभागवते।१।३।८।
"... देवालये ... ॥")
देवगृहम्। इति शब्दार्थकल्पतरुः॥ (यथा पारिभद्रस्य।१।८६।
"... वरम्॥"
देवावृ? स्त्री, (देवानपि आक्रामति आक्रमतीति। आ+क्रा+ड।) रात्रिशेषः। इति हलायुधः॥
देवावास, पुं, (देवानां आवासो वासस्थानम्।) अश्वत्थवृक्षः। इति त्रिकाण्डशेषः॥
देवाश्व, पुं (देवस्य इन्द्रस्य अश्वः।) उच्चैःश्रवाः। इति हलायुधः॥
देविका, स्त्री, (दीव्यतीति। दिव+ण्वुल्। टापि अत इत्वम्।) नदीविशेषः। इति शब्दरत्नावली॥ तस्याः परिमाणं यथा,—
"अर्द्धयोजनविस्तारां पञ्चयोजनमायताम्।
एतावद्देविकामाहुर्देवर्षिपरिसेविताम्॥"
इति वाराहे भूमिखण्डम्॥
(इयं हिमवत्पार्श्वे स्थिता। इति मार्कण्डेयपुराणम्।५७।१८। अस्याः ... इति कालिकापुराणम्। २६ अ। इयं तीर्थस्थानानामन्यतमा। अत्र वरं स्नात्वा महादेवं समभ्यर्च्य यथाशक्ति चरुं निवेद्य सर्वकामसमृद्धस्य यज्ञस्य फलं लभते। इति महाभारतम्।३।८२।९९। इयं हि पीठस्थानानाम् अन्यतमा। अत्र भगवती नन्दिनी रूपेण विराजते। यथा, देवीभागवते।७।३०।६९।
"हरिश्चन्द्रे ... नन्दिनी देविकातटे॥"
युधिष्ठिरस्य पत्नीविशेषः। यथा, महाभारते।१।९५।७६।
"युधिष्ठिरस्तु गोवासनस्य शैब्यस्य देविकां नाम कन्यां स्वयंवरे लेभे। तस्यां पुत्रं जनयामास यौधेयं नाम॥") धुस्तूरः। इति भावप्रकाशः॥ देवसम्बन्धिनि, त्रि॥
देविन्, त्रि (दीव्यति आनन्दैरिति। दिव+ "सुप्यजातौ णिन्ताच्छील्ये।" ३।२।७८। इति णिनिः।) आक्षिकः। इत्युणादिकोषः॥
देवी स्त्री, (दीव्यतीति। दिव+अच् ततो ङीप्।) दुर्गा। इति मेदिनी॥ (यथा, मार्कण्डेये।८१।१।
"देव्या हता तत्र महासुरेन्द्रा
... ॥")
कृताभिषेका राजपत्नी। इत्यमरः।२।८।५। पत्नी। (यथा, भागवते ...
"... देवी ... ॥")
स्पृक्का। इति मेदिनी। वे।१२। (देवस्य पत्नी। ङीप्।) नाट्योक्तौ राजपत्नी। यथा ...
"देवनाथ ... ॥"
... हरीतकी। ... पाठा। ... इति राजनिर्घण्टः॥ (...

त्रिपुरे । स तु अयत्नेनैवागतः । यथा, शक्तिकोपनिषदि ।

"त्रिपुरातापनं देवि त्रिपुराकूटभावना ।")

देवीकोट, पुं, (देव्याः कोटो दुर्गमिव ।) बाण- पुरम् । इति त्रिकाण्डशेषः ॥

देवेज्य, पुं, (देवानामिज्यः पूज्यः ।) बृहस्पतिः । इति शब्दरत्नावली ॥

देवेष्ट, पुं, (देवानामिष्टः प्रियः ।) महामेदा । गुग्गुलुः । इति राजनिर्घण्टः ॥ देववाञ्छिते, त्रि ॥

देवेष्टा, स्त्री (देवानामिष्टा ।) वनबीजपूरकः । इति राजनिर्घण्टः ॥

देवोद्यानं, क्लो, (देवानां उद्यानं वनम् ।) देवानां वनम् । तद्यथा । वैभ्राजम् । मिश्रकम् । मिश्र- कावणम् । चैत्ररथम् । इति त्रिकाण्डशेषः ॥

देश पुं, (दिश्यते निर्दिश्यते इति । दिश निर्देशे + कर्म्मणि घञ् ।) भूगोलभागविशेषः । इति सिद्धान्तमञ्जरी ॥ जनपदे जनपदसमुदाये जनपदैकदेशे सजलनिर्जलस्थानमात्रे च । इत्थं भरतटीकायां भरतः ॥ स त्रिविधः । जाङ्गल अनूप साधारणश्च । तत्पर्य्यायः । जनपदः १ नीवृत् २ विषयः ३ उपवर्त्तनम् ४ । इति राजनिर्घण्टः ॥ प्रदेशः ५ राष्ट्रम् ६ । इति शब्दरत्नावली ॥ * ॥ अथ देशे वर्णनीयानि । रत्नम् १ खनिः २ द्रव्यम् ३ पण्यम् ४ धान्यम् ५ करोद्भवः ६ दुर्गग्रामः ७ जनाधिक्यम् ८ नदी- मातृकतादि ॥ * ॥ अथ ग्रामे वर्णनीयानि । धान्यम् १ लता २ वृक्षाः ३ घटः ४ पशुपुष्टिः ५ चैत्यम् ६ अरघट्टः ७ केदारः ८ ग्रामेयीमुग्धत्वम् ९ विभ्रमः १० । इति कविकल्पलता ॥ * ॥

अथ मध्यदेशीयजनपदा यथा —

"तत्रेमे कुरुपाञ्चालाः शाल्वाश्चैव सजाङ्गलाः ।
शूरसेना भद्रकारा बोधकाः सपटच्चराः ॥
मत्स्याः किराताः कुल्याश्च कुन्तयः काशि- कोशलाः ।
आवन्ताश्च कलिङ्गाश्च मूकाश्चैवान्धकैः सह ॥
मध्यदेशा जनपदाः प्रायशः परिकीर्त्तिताः ॥"

अथ उदीच्या देशा यथा,—

"वाह्लीका वाटधानाश्च आभीराः कालतोयकाः ।
अपरान्ताश्च शूद्राश्च पह्लवाश्चात्मखण्डिकाः ॥
गान्धारा यवनाश्चैव सिन्धुसौवीरमद्रकाः ।
शका द्रुह्याः पुलिन्दाश्च पारदा हारमूर्त्तिकाः ॥
रामठाः कण्टकाराश्च कैकया दशमानिकाः ।
क्षत्त्रियोपनिवेशाश्च वैश्यशूद्रकुलानि च ॥
आत्रेयोऽथ भरद्वाजः प्रस्थलाः सदशेरुकाः ।
लम्पकास्तलगानाश्च सैनिकाः सह जाङ्गलैः ॥
एते देशा उदीच्यास्तु प्राच्यान् देशान्निबोधत ॥"

अथ प्राच्या देशा यथा,—

"अङ्गवङ्गा मद्गुरका अन्तर्गिरिबहिर्गिराः ।
ततः प्लवङ्गा मातङ्गा यमका मल्लवर्णकाः ॥
सुह्मोत्तराः प्रविजया भार्गवाङ्गेयमालवाः ।
प्राग्ज्योतिषाश्च पुण्ड्राश्च विदेहास्ताम्रलि- प्तकाः ॥
शाल्वा मागधगोनर्द्दाः प्राच्या जनपदाः स्मृताः ॥"

अथ दक्षिणापथदेशा यथा,—

"तथापरे जनपदा दक्षिणापथवासिनः ।
पाण्ड्याश्च केरलाश्चैव चोलाः कुल्यास्तथैव च ॥
सेतुका मुषिकाश्चैव कुपथा वनवासिकाः ।
महाराष्ट्रा माहिषका कलिङ्गाश्चैव सर्व्वशः ॥
कावेराश्च सहैषीकैराटव्याः शबरास्तथा ।
पुलिन्दा विन्ध्यमौलेया वैदर्भा दण्डकैः सह ॥
कुलीयाश्च शिरालाश्च रूपसास्तापसैः सह ।
तथा तैत्तिरिकाश्चैव सर्व्वे कारस्करास्तथा ॥
नासिकाद्याश्च ये चान्ये ये चैवान्तरनर्म्मदाः ।
भानुकच्छाः समाहेयाः सह सारस्वतैस्तथा ॥
कच्छीयाश्च सुराष्ट्राश्च आनर्त्ताश्चार्व्वुदैः सह ।
इत्येते अपरान्ताश्च शृणु ये विन्ध्यवासिनः ॥"

अथ विन्ध्यवासिदेशा यथा —

"मालवाश्च करूषाश्च मेकलाश्चोत्कलैः सह ।
उत्तमार्णा दशार्णाश्च भोजाः किष्किन्धकैः सह ॥
तोषलाः कोशलाश्चैव त्रैपुरा वैदिशास्तथा ।
तुमुरास्तुम्बुराश्चैव पटुमा नैषधैः सह ॥
अनूपास्तुण्डिकेराश्च वीतिहोत्रा अवन्तयः ।
एते जनपदाः ख्याता विन्ध्यपृष्ठनिवासिनः ॥"

पर्व्वताश्रयिदेशा यथा,—

"अतो देशान् प्रवक्ष्यामि पर्व्वताश्रयिणश्च ये ।
निहारा हंसमार्गाश्च कुपथा अपथाः खशाः ॥
कुपप्रावरणाश्चैव ऊर्णा दर्व्वाः समुद्गकाः ।
त्रिगर्त्ता मण्डलाश्चैव किराताश्चामरैः सह ॥"

इति मत्स्यपुराणम् ॥

अपि च ।

"देशव्यवस्था देवेशि ! कथ्यते शृणु तत्परा ।
वैद्यनाथं समारभ्य भुवनेशान्तगं शिवे ॥
तावदङ्गाभिधो देशो यात्रायां न हि दुष्यति ।
रत्नाकरं समारभ्य ब्रह्मपुत्रान्तगं शिवे ॥
वङ्गदेशो मया प्रोक्तः सर्व्वसिद्धिप्रदर्शकः ।
जगन्नाथात् पूर्व्वभागात् कृष्णातीरान्तगं शिवे ॥
कलिङ्गदेशः संप्रोक्तो वाममार्गपरायणः ।
कलिङ्गदेशमारभ्य पञ्चाद्योजन शिवे ॥
दक्षिणस्यां महेशानि ! कालिङ्गः परिकीर्त्तितः ।
तुमजस्य समारभ्य यावद्देशो जनार्दन ।
तावत् केरलदेशः स्यात् तन्मध्ये सिद्धकेरलः ।
रामेश्वरात् चट्टेशात् कर्णकेरलनामकः ।
जनस्थानसमारभ्य यावत् स्यात्तथ परे ॥
तावत् सर्व्वप्रभाभा तु केरलः परिकीर्त्तितः ।
शारदामठमारभ्य कुङ्कुमाद्रितटान्तकम् ॥
तावत् काश्मीरदेशः स्यात् पञ्चाशद्योजना- त्मकम् ॥
कालेश्वरं श्वेतगिरिं त्रैपुरं नीलपर्व्वतम् ।
कामरूपाभिधो देशो गणेशगिरिमूर्द्धनि ।
त्रियकं समारभ्य दक्षे चोत्तरगो शिवे ॥
मार्त्तण्डतीर्थं देवेशि ! चोलद्वैतविवासिनी ।
तावद्देशो महाराष्ट्र कर्णाटमात्रिगोचरः ॥
जगन्नाथादूर्द्ध्वभागमर्व्वाक् श्रीभ्रमराम्बिकात् ।
तावदुत्कलाभिधो देशः सौराष्ट्रं शृणु सादरम् ।
कोङ्कणात् पश्चिमे तीर्थे समुद्रप्रान्तगोचरम् ।
हिङ्गुलाद्यान्तको देवि । दशयोजनदेशगः ॥
सौराष्ट्रदेशो देवेशि ! तथा तु गुर्जराभिधः ।
श्रीशैलन्तु समारभ्य चोलेशान्मध्यभागतः ॥
तैलङ्गदेशो देवेशि ! ध्यानाध्ययनतत्परः ।
सुराम्बिकां समारभ्य मलयाद्र्यन्तगं शिवे ॥
मलयालाभिधो देशो मन्त्रसिद्धिप्रवर्त्तकः ।
रामनाथं समारभ्य श्रीरङ्गान्तं विशेश्वरि ॥
कर्णाटदेशो देवेशि ! साम्राज्यभोगदायकः ।
ताम्रपर्णीं समासाद्य शैलाद्यशिखरोद्गतः ॥
अवन्तीसंज्ञको देशः कालिका तत्र तिष्ठति ।
भद्रकालीमहापूर्व्वे रामदुर्गाच्च पश्चिमे ।
श्रीविदर्भाभिधो देशो वैदर्भी तत्र तिष्ठति ॥
गम्भीरात् पूर्व्वभागे तु द्वारकातो हि दक्षिणे ।
मरुदेशो महेशानि ! उद्योतपत्तिपरायणः ॥
श्रीकोङ्कणादधोभागे तापीतः पश्चिमे परे ।
आभीरदेशो देवेशि ! विन्ध्यशैले व्यवस्थितः ॥
अवन्तीतः पूर्व्वभागे गोदावर्य्यास्तथोत्तरे ।
मालवाख्यो महादेशो धनधान्यपरायणः ॥
द्रविडतैलङ्गयोर्मध्ये चोलदेशः प्रकीर्त्तितः ।
लम्बकर्णाश्च ते प्रोक्ता लद्देशो चामरे भवेत् ॥
कुरुदेशात् पश्चिमे तु तथा चोत्तरभागतः ।
इन्द्रप्रस्थाच्च देशानि दशयोजनकद्वये ॥
पाञ्चालदेशो देवेशि ! सौन्दर्य्यगर्व्वभूषितः ।
पाञ्चालदेशमारभ्य म्लेच्छाद्दक्षिणपूर्व्वतः ॥
काम्बोजदेशो देवेशि ! वाजिराशिपरायणः ।
वैदर्भदेशादूर्द्ध्वञ्च इन्द्रप्रस्थाच्च दक्षिणे ॥
मरुदेशात् पूर्व्वभागे वैराटः परिकीर्त्तितः ।
काम्बोजादधभागे तु इन्द्रप्रस्थाच्च पश्चिमे ॥
पाण्डुदेशो महेशानि ! महाशूरत्वकारकः ।
गण्डकीतीरमारभ्य चम्पारण्यान्तकं शिवे ॥
विदेहभूः समाख्याता तैरभुक्ताभिधः स तु ।
काम्बोजदेशमारभ्य महाम्लेच्छात् पूर्व्वके ॥
वाह्लीकदेशो देवेशि ! अश्वोत्पत्तिपरायणः ।
तप्तकुण्डं समारभ्य रामक्षेत्रान्तकं प्रिये ॥
किरातदेशो देवेशि ! विन्ध्यशैलेऽवतिष्ठति ।
करतोयां समारभ्य हिङ्गुलाद्यान्तकं शिवे ॥
सुवलादेशो देवेशि ! महाविद्यापरायणः ।
हिङ्गुलाद्यं समारभ्य मक्केशान्तं महेश्वरि ॥
खुरासानाभिधो देशो म्लेच्छमार्गपरायणः ।
तन्मध्ये चोत्तरे देवि ! ऐराकः परिकीर्त्तितः ॥
काश्मीरन्तु समारभ्य कामरूपात्तु पश्चिमे ।
भोटान्तदेशो देवेशि ! मानसेशाच्च दक्षिणे ॥
मानसेशादपूर्व्वे चीनदेशः प्रकीर्त्तितः ।
कैलासन्तु समारभ्य मध्ये दशगते परे ॥
अमरस्थो महेशानि ! महाचीनाभिधो भवेत् ।
पटेश्वरं समारभ्य योगीशान्तं महेश्वरि ॥
नेपालदेशो देवेशि ! हिमवन्मध्यगः प्रिये ।
मल्लेश्वरं समारभ्य महारण्यान्तकं शिवे ॥
हिमवद्गर्भगो देशः पर्व्वते तिष्ठति शिवे ।
वङ्गदेशं समारभ्य भुवनेशान्तगं शिवे ॥

सौवीरेशि समाख्यात सर्वविद्याविशारदे ।
गोकर्णेशात् पूर्वभागे आर्य्यावर्त्तात्तु चोत्तरे ॥
मैनाकात् पश्चिमे तु महापूर्णाच सर्वत ।
महाकोशलदेशश्च सर्वैश्वर्य्यप्रदायकः ॥
कालेश्वरं समारभ्य गण्डकीप्रान्तकं शिवे ।
मगधाख्यो महादेशो यात्रायां न हि दुष्यति ॥
दक्षिणोत्तरभेदेन क्रमात् कीकटमागधौ ।
चरणाद्रिं समारभ्य गृध्रकूटान्तकं शिवे ॥
तावत् कीकटदेशः स्यात् तदन्तर्मागधो भवेत् ।
नगनगप्रान्तकं यावत् परिकीर्त्तितः ॥
कामगिरिं समारभ्य द्वारकान्तं महेश्वरि ॥
श्रीकृष्णनाभिनो देशो दुर्ब तत्र महेश्वरि ॥
कामगिरेर्दक्षभागे मरुदेशात्तथोत्तरे ।
कुरुदेशः समाख्यातः सुराणां रमणि च ॥
चपाम्बां समारभ्य कोटिदेशस्य मध्यगे ।
मद्रमाणदशा हि कीटका परिकीर्त्तितः ॥
कुरुक्षेत्रात् कामरूपात् मध्यभागे तु केकय
मागधात् दक्षभागे तु विन्ध्यात् पश्चिमतः शिवे ॥
गौरीकाभिधो देश सर्वसम्पत्प्रदायकः ।
पश्चिमापुरमारभ्य कृष्णशैलाच्च दक्षिणे ॥
पाञ्चालात् पूर्वभागे तु कुरुदेशः प्रकीर्त्तितः ।
मरुदेशात् पूर्वभागे कामादिदक्षिणे शिवे ॥
सिन्धुनाम्नो महादेशः सर्वदेशोत्तमोत्तमः ।
सिन्धुदेशात् पूर्वभागे कामरूपात्तथोत्तरे ॥
कम्बोजदेशो देवेशि । वरवारायणः परः ।
महेश्वरात् पूर्वभागे मधुमाद्युत्तरे शिवे ॥
कच्छदेशः समाख्यातः सुदेशः सन्तु सादरम् ।
कुशिनाद्युत्तरे भागे कच्छाच पश्चिमे शिवे ॥
मत्स्यदेशः समाख्यातो मत्स्यबाहुल्य
कारकः ।
वैराटपाण्ड्ययोर्मध्ये पूर्वे चम्पकमेव तु ।
मद्रदेशः समाख्यातो माद्रीदा तत्र तिष्ठति ॥
गुर्जरात् पूर्वभागे मकरात् पश्चिमे शिवे ॥
सौवीरेश्वरो देवेशि । सर्वदेशप्रधानम ।
अवन्तीत पश्चिमे तु वैरागादिकरोत्तरे ॥
माठदेशः समाख्यातो वर्वरं तत्र पार्वति ॥
मायापुरं समारभ्य सप्तशृङ्गात्तथोत्तरे ।
वर्वराख्यो महादेशः सेवते तत्र सादरम् ।
कच्छादेशमारभ्य मकाख्यं परमेश्वरि ॥
नैऋत्यां महादेशः पर्णी तिष्ठति शिवे ॥
इति षट्पञ्चाशद्देशा मया प्रोक्ता महेश्वरि ॥
दशभाग्यपि देवेशि । देशभेदा प्रकीर्त्तिताः ।
कोटिश एते देवेशि दश तुल्या प्रकीर्त्तिता ।
एतत्सर्व्वं सावधानं सम्यग्बुद्धे ।
इति संक्षेपतः प्रोक्तं किमन्यत् श्रोतुमिच्छसि ॥"
इति शक्तिसङ्गमतन्त्रे ७ पटलः ॥

देशकः, त्रि, (दिशतीति । दिश आदेशे + "ण्वुल्तृचौ ।" ३ । १ । १३३ । इति ण्वुल् ।) शास्ता ।
इति हेमचन्द्रः । ३ । १३२ ॥
"तथाकामप्रवृत्तस्य वासु धर्मस्य देशकः ।
मनु देशिकस्य छाया विलम्बे समागते ॥"
इति मार्कण्डेये । १८ । १७ ॥

देशकारी, स्त्री, रागिणीविशेषः । हनुमन्मते मेघरागस्य भार्या । अस्या जातिः षाडव ग्रहं षड्जस्वरः गायनसमय वर्षाशरदि दिवाभागे । अस्याः स्वरूपम् इन्द्रवल्लीतिलकोत्तमा कनक-पद्माक्षी पार्श्वगतमौवारी विम्बोष्ठी मुक्ताहारवक्षी कर्णचम्पककलिकाश्री चारु हारा चापेन सहोपविष्टा भावभावकटाक्षान् कुर्व्वती । सङ्गीतदर्पणमते अस्या गायनस्य प्रातःवर्णदौराशिकला सह । अस्याः स्वरूप चापकेन सह केलिकौतुकरता प्रमत्तकेशभारा विगलदम्बरपूर्व्वचन्द्रानना चम्पकराजिताङ्गी चापवकलमधुरितहारिकुच कमलनयना चतुर भाषिणी । इति सङ्गीतशास्त्रम् ॥

देशरूप, क्ली, (दिश्यते इति । दिश् + कर्म्मणि घञ् । देशस्य देशवृत्तिदशकालमात्राविधिरिद प्रमाणस्य रूपम् । यद्वा देशस्य देशाद्रूपकारस्य रूपम् ।) उचितम् । इत्यमरः । ३ । ८ । ९३ ॥ (यथा, महाभारते । १२ । १७ । ५ ।
"शौचमप्रसव्यपथस्य यथा धर्म्मं प्रकीर्त्तितम् ।
तथा देशरूपेण सन्ध्योपास्ते भारत ! ॥")

देशाख्यो, स्त्री, रागिणीविशेषः । हनुमन्मते हिन्दोलरागस्य द्वितीयरागिणी । तस्या जातिः षाडव ग्रहं गान्धारस्वरः गायनसमय वर्षाकाले पूर्व्वाह्ण । अस्याः स्वरूपम् । शुभ्रा गौरी पद्महस्ता कोपना कलनिमिवा रोमहर्षा शिवायिवरपानकारा नखान् प्रकटयन्ति बाहुवरा वर्षमध्यितकपालविलम्बस्तनी कर्णदा मत्तसीमन्तिनीनायका च । राग-मालामते तु तस्याः स्वरूप भ्रमवत् परस्पर मल्लक्रीडायां नियुक्ता । सा क्रीडामल्लाभी गुणधरवरराजपौषमूर्च्छितसारादिरूपा । कलिकाप्रधाने वसन्तरागस्य भार्या । सङ्गीत दर्पणमते अस्या जाति औडव । अस्याः स्वरूपं कर्पूरादपि कमनीयाङ्गी कमलदलवि-नयना कुङ्कुमा रचिता अतिगौरा किञ्चित् नकुलिता दीर्घकेशा मल्लहृतिमौलिवी च । इति सङ्गीतशास्त्रम् ॥

देशान्तर, क्ली (अन्यो देशः । मयूरव्यंसकादि-त्वात् समासः ।) मे . .
देशान्तरदेशयोरन्तरयोजनम् । इति सिद्धान्त
स्यम् । धि उज्जयिन्याः रेखामेका लङ्कायाः
दिक्का यत्र भागतो
इति दृष्टः । तत्र द्विविधं दृष्टं
द्वितीयं रेखापूर्वं तज्जन्यं ज्ञानम् ।
"देशेन सर्वोदयभाविताः
देशान्तरेण गुणयेत्।
स्फुटान्तरं स्फुटरं स्यात्
भान्तरं तज्जन्यं ज्ञानम् ।"
इति सिद्धान्तशिरोमणिः ।
देशान्तरपरिमाणाप्रकाशम् ।
"भानौ यत्र परिमितौ ।
महाचक्रान्तरं तत्र सर्वत्रातिरेकम् ।
देशमानमतीव तत्र नियतं शब्दोऽपि मदीयं ।
ततु देशान्तरं भौमं प्रदेशे सर्वभुवः ॥
स्वस्थानीय पा वार्त्ता यत्र न शूद्रीपतः ॥
इत्यादि ।
देशान्तरं नद्यन्तिके यदियोजनमात्रकात् ।
पर्वतादिव्यवधानेऽपि विप्रदेशे तदेव च ॥"
इत्युद्वाहतत्त्वम् ॥
"ग्रामीरदशयोजनानामादियोजनाविभिरन्तरमुक्त
व्यापेन दशं व्याख्यायते विषयदेशैरिदं विप्र
योजनाभ्यन्तरे द्वितयदेशेरिदं तद्यदि दश
देशैरिदं समानिषड्योजनोपरि प्रार्थितादि
महानद्यादिव्यवधानेऽपि षड्योजनोपरि
वेदेयम् ।" इति स्मृतिचिन्तामणिः ॥

देशिक, पुं, (देशे भवित इति । देश + ठञ् ।) पथिकः । इति हेमचन्द्रः । ३ । १५७ ॥ (यथा, महाभारते । ७ । ५ । १ ।
"यद्देशिको यथा मार्गं सर्वं पश्यन् पश्यति ।
तथा यस्य सदा देशा सर्वोत्तमोत्तमः स्मृताः ॥")
गुरुः । यथा देशिको मन्त्रकेन इत्यादि ॥
(यथा, महाभारते । ११ । १३० । ३९ ।
"धर्म्मार्थौ निमिषं भावात् च आदिष्टति धर्म्मे
भाव ।
प्रणतिहि सर्वेषां धर्मकामं सर्वत्र ॥")

देशिनी, स्त्री, (दिशतीति । दिश आदेशे + णिनि । स्त्रियां ङीप् ।) तर्ज्जनी । इति शब्द रत्नावली । (यथा माधवकविर्विरचितायाम् ।
१ । १८ ।
"कविताधैर्यमङ्गुलिन्यस्य करस्थ च ।
प्रभावनिधिमण्डलदेशिनीमाणिक्यमाना ॥")

देशी, स्त्री, रागिणीविशेषः । हनुमन्मते दीपक रागस्य भार्या । अस्या जातिः षाडव ग्रह षड्जस्वरः गायनसमय ग्रीष्मर्त्तौ मध्याह्न । अस्याः स्वरूपं शुभ्रा नारी रचितमणि सुन्दरा यौवनादैव कामातुरा नवी चापलप कामारसमानस निपुणतरा च । मतान्तरे तु देवरागस्य पत्नी । सङ्गीतदर्पणमते हिन्दोल रागस्य भार्या । तस्याः गायनसमय वासन्त
समय । तस्या

१।५४। इति यत्।) देशभवे। यथा राजतरङ्गिण्याम्। ३।८।
"भोगाय देश्यभिक्षूणां चक्रभास्वाम्बरप्रभा।")
देष्णुः, त्रि, (ददातीति। दा + "गादाभ्यामिष्णुच्।" उणा ४।१६। इति इष्णुच्।) दाता। दुहम। इति हेमचन्द्रः। दायक। इति संक्षिप्तसारे उणादिवृत्तिः।
देह, पुं क्ली (देग्धि प्रतिदिनम्। दिह वृद्धौ + घञ्।) शरीरम्। इत्यमरः। २।६।७१। व्यायमस्त पृथिव्या देहं योनिजम् अयोनिजञ्च। योनिजं जरायुजमण्डजञ्च। अयोनिजं स्वेदजो-द्भिदादिकम्। नारकिणां शरीरमप्ययोनिजम्। जलीयं देहमयोनिजं वरुणलोके प्रसिद्धम्। तैजसं देहमयोनिजं सूर्यलोके प्रसिद्धम्। वायवीयं देहमयोनिजं सदैव पिशाचादीनाम्। इति सिद्धान्तमुक्तावली। * ।
अथ नरकभोगदेहविवरणम्। तत्र यमं प्रति सावित्रीप्रश्नः।
"स्वदेहे भस्मसाद्भूते यान्ति लोकान्तरं नराः।
केन देहेन वा भोगं भुञ्जते च शुभाशुभम्॥
सुचिरं क्लेशभोगेन कथं देहो विनश्यति।
देहो वा किंविधो ब्रह्मन्। तन्मे व्याख्यातुमर्हसि॥"
यमस्योत्तरम्।
"शृणु देहविवरणं कथयामि यथागमम्।
पृथिवी वायुराकाशस्तेजस्तोयमिति स्फुटम्॥
देहिनां देहबीजञ्च स्रष्टुः सृष्टिविधौ परम्।
पृथिव्यादिपञ्चभूतैर्यो देहो निर्मितो भवेत्॥
स कृत्रिमो नश्वरश्च भस्मसाच्च भवेदिह।
वृद्धाङ्गुष्ठप्रमाणश्च यो जीवपुरुषः सति॥
बिभर्ति सूक्ष्मदेहन्तं तद्रूपं भोगहेतवे।
स देहो न भवेद्भस्म ज्वलदग्नौ यमालये॥
जले न नष्टो देही वा प्रहारे सुचिरे कृते।
न शस्त्रे च न चास्त्रे च न तीक्ष्णकण्टके तथा॥
तप्तद्रवे तप्तलौहे तप्तपाषाण एव च।
प्रतप्तप्रतिमाश्लेषेऽप्यत्युच्चपतनेऽपि च॥
न च दग्धो न भग्नश्च भुङ्क्ते सन्तापमेव च।
कथितं देहवृत्तान्तं कारणञ्च यथागमम्॥"
इति ब्रह्मवैवर्त्तपुराणम्।
ईश्वरस्येहस्य प्रमाणं यथा,—
"यस्मिन् गुह्यतमं देहं सर्व्वेषां तत्त्वदर्शिनः।
प्रविष्टा मम सायुज्यं लभन्ते योगिनोऽव्ययम्॥"
इति कूर्म्मपुराणम्।
देहकोषः, पुं, (देहस्य कोष इव आवरकत्वात्।) पक्ष। इति शब्दचन्द्रिका। पाखा इति भाषा॥
देहक्षयः, पुं, (देहस्य क्षयो क्षयहेतुत्वात्।) रोग। इति शब्दचन्द्रिका।
देहदः, पुं, (देहं ददाति यद्वा दायति यतति शोधयतीति। दा दाने दैप् शोधने वा + "आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) पारद। इति राजनिर्घण्टः। (देहदातरि, त्रि।)
देहदुर्गन्धता, स्त्री, (देहस्य दुर्गन्धता) शरीरदौर्गन्ध्यम् तत्प्रायश्चित्तं यथा,—
"अब्जुनस्य च पुष्पाणि जम्बुपत्राणि च।
सर्व्वाण्यपि च सङ्क्षेपो देहदुर्गन्धतां हरेत्॥"
इति गारुडे १९४ अध्यायः॥
देहधारकं क्ली क्ली, (देहं धारयतीति। धारि + "ण्वुल्तृचौ।" ३।१।१३३। इति ण्वुल्।) अस्थि। इति हेमचन्द्रः। ३।२९०॥
देहधिः, पुं, (देहो धीयते अस्मिन्निति। देह + धा + आधारे किः।) पक्ष। इति शब्दचन्द्रिका। पाखा इति भाषा॥
देहधृक्, [ष्] पुं, (देहे धृष्णोति सञ्चरतीति। धृष + क्विप्।) वायु। इति शब्दचन्द्रिका॥ (यथा, सुश्रुते। २।१।
"वायुर्यो वक्त्रसञ्चारी स प्राणो नाम देहधृक्॥")
देहभृत्, पुं (देहं बिभर्त्तीति। देह + भृ + क्विप् तुगागमश्च।) जीव। इति हेमचन्द्रः। ६।२॥ (यथा, रघौ। ८।५१।
"धिगिमां देहभृतामसारताम्॥")
देहयात्रा, स्त्री, (देहस्य यात्रा लोकान्तरगमनम्।) यमपुरीगमनम्। मरणम्। (देहाय देहरक्षणाय या यात्रा उद्यमादि।) भोजनम्। इति मेदिनी। रे, २६८॥ (यथा, भागवते। ४।२१।२।
"सतीव भर्त्तुर्व्रतधर्म्मनिष्ठया
शुश्रूषया चारवदेहयात्रया।
नाविन्दतार्त्तिं परिकर्शिताऽपि सा
प्रेयस्करश्लाघनमानमिष्टं ति॥")
देहला, स्त्री, (देहं लाति देहस्य पुष्टिं ददातीति। देह + ला + क टाप्। सेवनेन प्रथमं पुष्टि-बलादिप्रदानादस्यास्तथात्वम्।) मद्यम्। इति शब्दचन्द्रिका॥
देहलिः, पुं, (दिह + भावे घञ्। देहो लेपस्तं लाति गृह्णातीति। देह + ला + बाहुलकात् किः।) देहली। इति शब्दरत्नावली॥
देहली स्त्री (देहं लेपं लातीति। देह + ला + "आतोऽनुपसर्गे कः।" ३।२।३। इति कः। गौरादित्वात् ङीष्।) द्वारपिण्डी। इत्यमरः। २।२।१२॥ द्वारपिण्डिका। द्वारस्थानम्। इति केचित्। चौकाठ इति ख्याता इति कश्चित्। अथ उडुम्बरम्। गतशिलायां अधोदारुपाषाणो वा। इति स्वामी। इत्यमरटीकायां भरतः॥ (यथा, मेघदूते। ८७।
"शेषान् मासान् गमनदिवसस्थापितस्यावधेर्वा विन्यस्यन्ती भुवि गणनया देहलीदत्तपुष्पैः।")
देहसारः, पुं (देहस्य सार।) मज्जा। इति राजनिर्घण्टः॥
देहात्मवादी, [न्] त्रि (देहमेवात्मान वद-तुं शीलमस्येति। वद + णिनि।) चार्व्वाक। तन्मते मतम्। शरीरमेवात्मा प्रत्यक्षसिद्धत्वात् स्थूलोऽहं कृशोऽहमित्यादिप्रत्ययाच्च। जन्मतो मरणपर्य्यन्तं तस्मादन्यो नास्तीति मतम्। अत्र प्रमाणम्। देहमात्रं चैतन्यविशिष्टमात्मेति प्राकृताः। इति शारीरिकसूत्रभाष्यम्।
अपि च।
"आत्मापि देहाद्यतिरिक्तमूर्त्ति-
र्भोक्ता स लोकान्तरितः फलानाम्।
आशेयमाकाशतरोः प्रसूनात्
प्रथीयसः स्वादुफलप्रसूतौ॥"
इति प्रबोधचन्द्रोदये।
देहिका, स्त्री, (देग्धीति। दिह वृद्धौ + ण्वुल्। टापि अत इत्वम्।) कीटविशेष। तत् पर्य्याय। वटिः २ उपदिका ३। इति त्रिकाण्डशेषः। उपजिह्विका ४ उपदीका ५ उद्देहिका ६ दिवी ७। इति शब्दावली॥
देही, [न्] (देहोऽस्यास्तीति। देह + इनि।) शरीरी। प्राणी। अस्य गुणा यथा,—
"बुद्ध्यादिषट्कं सङ्ख्यादिपञ्चकं भावना तथा।
धर्म्माधर्म्मौ गुणा एते आत्मनः स्युश्चतुर्दश॥"
अयं इन्द्रियाद्यधिष्ठाता पुण्यपापाश्रय। ज्ञानसुखादियोगतो मानसप्रत्यक्षविषय। परदेहादौ प्रवृत्त्यादिनानुमेय। अहमित्याकार-प्रत्ययाश्रय। मनोमात्रस्य गोचर। विभुः परममहत्त्ववान्। इति भाषापरिच्छेदः।
तथा च। श्रीभगवद्गीतायाम्।
"देही नित्यमवध्योऽयं देहे सर्व्वस्य भारत।
तस्मात् सर्व्वाणि भूतानि न त्वं शोचितुमर्हसि॥"
अपि च।
"देहिनोऽस्मिन् यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति॥"
दै, प शोधने। इति कविकल्पद्रुमः। (भ्वां पर-स्मैं अनिट।) पिबाद्यात्त्वाभावे पचादौ दायति इत्यादि। शोधनमिह शुद्धीकरणम्। दायति ताम्रमग्निं लोकः। अपपूर्व्वं शुक्लीभावे (अव अवदात।) निष्टप्तिः श्वेतते शीलिषु शुक्लीभवदायति। इति भट्टमल्लः। इति दुर्गादासः।
दैतेयः, पुं, (दितेरपत्यं पुमान्। दिति + "स्त्रीभ्यो ढक्।" ४।१।१२०। इति ढक्।) दैत्य। इत्यमरः। १।१।१२। (यथा हरिवंशे। १८२।७६।
"अथ वाद्यं महावाहो। दैतेय देवपूजित॥
यदयमप्यचोऽप्यस्मि तत् कर्म्म कथमोकृत॥")
दैत्य, पुं, दितेरपत्यं ("दित्यदित्यादित्यपत्युत्तर-पदाण्ण्यः।" ४।१।८५। इति ण्यः।) असुर। इत्यमरः। १।१।१२। (यथा, मनुः। १२।४८।
"तापसा यतयो विप्रा ये च वैमानिका गणाः।
नक्षत्राणि च दैत्याश्च प्रथमा सात्त्विकी गतिः॥")
(दितिसम्बन्धिनि, त्रि।)
दैत्यगुरुः, पुं, (दैत्यानां गुरुः।) शुक्र। इत्यमरः। १।३।२५। (यथा, हलायुधकोषे १। ३।१०।
"आदायमाकन्दमत्रस्य
मधुपयान् दैत्यगुरुः पीते॥")
दैत्यदेवः, पुं (दैत्यानां देवः।) वरुण। इति त्रिकाण्डशेषः। वायु। इति हेमचन्द्रः। ३।१६३।

दैत्यनिषूदन, पुं (निषूदयतीति । नि + सूदि + ल्युः । दैत्यानां निषूदनः नाशकः ।) विष्णुः । इति पुराणम् ॥

दैत्यपुरोधा [स्] पुं (दैत्यानां पुरोधाः पुरोहितः ।) शुक्रः । इति हारावली ॥ १६ ॥

दैत्यमाता, [ऋ] स्त्री, (दैत्यानां माता ।) दितिः । इति त्रिकाण्डशेषः ॥ (दैत्यमातृमात्रम् । यथा, हरिवंशे । १६६ । १२ ।
"अनिर्दिष्टनिन्दुघ्येव विहिता दैत्यमातरः ॥")
दैत्यारिमात्रवर्त्तिनि, त्रि ॥

दैत्यमेदज, पुं, (दैत्यमेदसः जायते इति । दैत्यमेद + जन् + ड ।) भूमिजगुग्गुलुः । इति राजनिर्घण्टः ॥ पृथिव्याम्, स्त्री । मधुकैटभमेदजातत्वात् ॥

दैत्ययुगं, क्ली (दैत्यानां युगम् ।) दैत्यानां युगविशेषः । तत् दवयदितिमार्जित द्वादशसहस्र वर्षाणि । मनुष्यमानेन चतुर्युगमयंलक्षम् । इति शब्दार्थकल्पतरुः ॥

दैत्या स्त्री, (दितेरियमिति अण् । ततष्टाप् ।) सुरानामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२३ ॥ चर्म्मौषधिः । इति मेदिनी । य, १९ ॥ मदम् । इति त्रिकाण्डशेषः ॥ दैत्यमाता च ॥

दैत्यारिः, पुं (दैत्यानामरिः ।) विष्णुः । इत्यमरः । १।१।१८ ॥ (यथा, पञ्चतन्त्रे । ५ । ९८ ।
"दैत्यारिः कमलाकुचाञ्चलकरोद्घाटितहार-
स्रजः ।
वैकुण्ठाधिपतेरिव भुजङ्ग पुन का नाम प्राप्त
यथा ॥")
देवता । इति मेदिनी । रे, १०० ॥

दैत्याहोरात्र, पुं, (दैत्यानामहोरात्रः ।) दैत्यानां दिनरात्रिद्वयम् । स मनुष्यमानेन वर्षैकमात्रः । इति शब्दार्थकल्पतरुः ।

दैन्यं क्ली (दीनस्य भावः । ष्यञ् ।) दीनता । (दिवसे दिवसे दृश्यम् । दिन + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) दिवसभवादि, त्रि ।

दैनन्दिनं, त्रि, (दिने दिने भव इत्यर्थे निपातनात् साधुः ।) दिनंदिने भवम् । (यथा, भागवते । ३ । ११ । २४ ।
"एष दैनन्दिनः सर्गो ब्राह्मस्त्रैलोक्यवर्त्तनः ।
तिर्य्यङ्नृपितृदेवानां सम्भवो यत्र कर्म्मभिः ॥")
क्रियाविशेषणे प्रतिदिवसम् । इति सिद्धान्तकौमुदी ॥

दैनन्दिनप्रलयः, पुं (दैनन्दिनस्य प्रलयः ब्रह्मणो दिनावसानभवत्वात् ।) प्रलयविशेषः । यथा,—
"चतुर्युगसहस्राणि ब्रह्मणो दिनमुच्यते ।
तावत्येव निशा तस्य ... ब्राह्मी निशा
युगे ॥
... ... ।
... ... ।
... ... ।
... ... ।
... ... ।
... ... ।

तस्य ब्राह्मीनिशायाञ्च गुरुलक्षण उच्यते ।
दैवाच सुरबद्धेन तत्र राजा सरादय ॥
सर्वं निर्दग्धदावाग्नेर्भस्मो जात एव च ।
सर्वं ह्रादशमार्गेष अज्वमलिते पेव हि ॥
सर्वं प्रलयमाप्ते च गते च प्रलया हम ।।
दैनन्दिनस्तु प्रलयो वेदेषु परिकीर्त्तितः ॥
अन्यो दातिन्ध या प्रोक्ता वेदविद्भिः पुरातनैः ।
तत्र सर्वे प्रलयाद्य ब्रह्माद्या दिविवासिनः ॥
आदित्या वसवो रुद्रा मनिबन्धा मानवादयः ॥
सर्वो ब्रह्मपदे च ब्रह्मणो रामनादय ॥
नारदेशौ कौमदत्ते पैवादिवर्णादिव ।
इन्द्रसूर्य्य स्तुतिताभूपाले कश्यपः ॥
काक्षीवतः पक्षवे च सर्वे नदाद्य तत्र वै ॥
ब्रह्मलोकान्तर्गतं सर्वं जलं नागालयादयः ।
ब्रह्मलोकं यदु सर्वं ब्रह्मलोकादयस्तथा ॥
गते दैनन्दिने प्रलये स्वीकाच स्वस्थ पुनः ।
एवं प्रलाङ्गपत्य्यर्त्तं परमायुश्च ब्रह्मणः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥

दैनार, त्रि, दीनारमितजकरत्नादयः । दीनारे भवं दानारहडिर नेति (कम) व्याख्यातः ॥

दैनिको, स्त्री, (दिने भवः । दिन + "कालात् ठञ् ।" ४ । ३ । ११ । इति ठञ् । गौरादि-त्वात् ङीष् ।) दिनभृतिः । एकदिवसभो-ग्यतम् । इति सम्पतमं स्था ॥ (दिनभवं, त्रि ।)

दैन्य, क्ली (दीनस्य भावः । दीन + ष्यञ् ।) कार्पण्यम् । इति हेमचन्द्रः ।४।२२१ ॥ दीनता । यथा,
"याचनादैन्यपरास्य प्रह्वं ब्रजाद्यानते भिक्षोर्
ब्रह्म
र्म्म ह्यविलम्बितो सुयाचितं दद्यद्वीक्ष स्वयं
साम् ॥"
इति पुराणसिन्धु ॥
(व्यभिचारीभावविशेषः । यथा साहित्यदर्पणे । ३ । १९१ ।
"दौर्गत्याद्यैरनौजस्यं दैन्यं मलिनतादिकृत् ॥")

दैर्घ, त्रि दीर्घसम्बन्धि । दीर्घस्य इदं (अण्) व्याकरणे ॥

दैर्घ्य, क्ली (दीर्घस्य भावः । दीर्घ + ष्यञ् ।) दीर्घत्वम् । तत्पर्य्यायः । आयामः २ । आरोहः ३ । इत्यमरः । २ । ६ । ११४ ॥ आरोहकार्य्ये आनाह इति भरतः ॥ (यथा, रघुवंशे । ११ । ११ ।
"अवराह्नो भक्तेषु
द्विगुणा मार्ग्गवायुनोऽधितया ।
तर्द्दूरभवा मनस्क
नदा यथा दैत्यमादायं ॥")

दैर्घीय, पुं, दिनोनवेदायस्यां सहू । दिर्घविका यस मि चिकवर (इत्र)॥

दैव, क्ली, (देवानिदम् । देव + "तस्येदम् ।" ४ । ३ । १२० । इत्यण् ।) दैवकृतम् । तत्पर्य्यायः । ... ॥ १ ॥ ७ ॥ १ ॥ १ ॥
(क ... ॥
"... ॥")

देवमयदिवि त्रि । यथा,—
"भवौषधीप्रितारौ यस्य देवताद्यनुदितोदितैः ।
द्रविणोदाः, [स्] पुं, अग्निः । अस्य निरुक्तिर्यथा,—
"द्रविणं बलमित्युक्तं धनञ्च द्रविणं तथा ।
ददाति तद्द्वयमेव द्रविणोदास्ततो भव ॥"
इति वराहपुराणम् ॥
(धनप्रदे, त्रि । यथा, ऋग्वेदे । १ । १५ । ७ ।
"द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे ॥"
"कोऽयम् इन्द्र द्रविणोदा धनप्रदम् । यद्वा धनप्रेरयिता सोमं पिबतु इति शेषः । तमेव अर्थं यास्क एव निवक्ति,—द्रविणोदाः कस्मात् धनं द्रविणमुच्यते यदेनदभिद्रवन्ति बलं वा द्रविणं यदेनेनाभिद्रवन्ति तस्य दाता द्रविणोदास्तस्यैव भवति द्रविणोदा द्रविणं च इत्यादि आर्य्यं यास्कोक्तो निर्वचनप्रकारः यत्तिमेव यथोक्तं ग्रन्थः । द्रविणोदाः द्रुदक्षिभ्यामिनन् निषिद्धे दानुभावोऽन्यिवशब्दः तद्ददातीति द्रविणोदाः । क्विपचाभि क्विप् । पूर्व्वपदस्य सकारोपजनश्छान्दसः । कर्तृकर्म्म । उदुत्तरपदप्रकृतिस्वरत्वम् । देवनिष्ठे सकारेणैकवाक्यतापत्तौ द्वितीयायाः सुकादेशः । अथवा द्रविणमात्मन इच्छन्ति द्रविणस्यन्ति । द्रव आत्मन अथ सर्व्वप्रातिपदिकेभ्यो लालसायां सुगागमश्च इति अथ सत्ते सुगागमः द्रविणस्यतेः अमन्तादिभ्याश्च क्विप् । अतो लोपः । कोऽयम न स्यात्भिवद्भवतीति तस्य असिद्धत्वात् प्रतिषेधाद्यलोप एवंद्रविणसशब्दो धनवाचकः । द्रविणस्यात्स्यति यदेधनशब्दो मोपधयतोऽर्थे तस्य उपधाय इत्यर्थादनाभिनि लालसायां क्विपिति क्विप् । एव द्रविणो शब्दः सकारान्तो भवति । तथा हि द्रविणोदसा प्रथमा-भवमाणिनेकतो अनवस्थाप उपधादीर्घ अथ द्रविणोदसशब्दः भिन्नवाक्यत्वे आर्षं प्रथमा । एकवाक्यत्वे तु प्रत्ययस्य द्वितीयार्थे भवति द्रविणस इत्यादिषु आत्मनेपदी द्रविणसः सोम ऐवमेव सकारोपजनश्छान्दसः । आद्युदात्तत्वम् नियमेन स्वितम् । कालविशेषप्रयोगेणैकवाक्यत्वपक्षे तु मत्वन्तात् क्विप् । अतो लोपः पूर्व्ववत् । अत्र तु पदे कपालिनोऽन्यत्वनोऽन्यत्वे प्राप्ते अत्ययेनाद्युदात्तत्वम् ॥" इति सायनः ॥)

द्रवीकरणम् क्ली, अद्रवस्य द्रवकरणम् । इति च्विप्रत्ययेन साध्यम् । गलान इति भाषा ।

द्रव्यम् क्ली, (द्रोरिव । द्रु + "द्रोश्च भव्ये ।" ५ । ४ । १ ३ । इति यत्प्रत्ययेन निपातनात् साधु ।) वस्तु । (यथा मनुः । ७ । ९६ ।
"एकमेव दहत्यग्निर्नरं दुरुपसर्पिणम् ।
कुलं दहति राजाग्निः सपशुद्रव्यसञ्चयम् ॥")
तस्य क्रियाविशिष्टे नवधुरादिभेदेन प्रवृत्तिं यथा —
"द्रव्याश्रयिणरावेव प्रशस्तानि क्रियाविधौ ।
अतो गुणवत्त्वादिप्रायात्समवायिकारणम् ॥"
इति शारदामयराघवादिकाभाषा ॥

("केचिदाचार्य्या ब्रुवते द्रव्यं प्रधानं कस्मात्-अवस्थितत्वादिह खलु द्रव्यम् अवस्थितम्। न रसादयो यथा ये वर्णे ये रसादयस्ते पक्वे न सन्ति। नित्यत्वाच्च नित्यं हि द्रव्यमनित्या गुणा यथा कल्कादिप्रविभागः स एव सम्पन्नरसगन्धो व्यापन्नरसगन्धो वा भवति। स्वजात्यवस्थानाच्च यथा हि पार्थिवं द्रव्यमन्यभावं न गच्छत्येवं शेषाणि। पञ्चेन्द्रियग्रहणाच्च पञ्चभिरिन्द्रियैर्गृह्यते द्रव्यं न रसादयः। आश्रयत्वाच्च द्रव्यमाश्रिता रसादयो भवन्ति। आरम्भसामर्थ्याच्च द्रव्याश्रित आरम्भो यथा विदारिगन्धादिमाहृत्य सङ्क्षुद्य विपचेदित्येवमादिषु न रसादिष्वारम्भः। शास्त्रप्रामाण्याच्च शास्त्रे हि द्रव्यं प्रधानमुपदेशे हि योगानां यथा मातुलुङ्गाग्निमन्थौ चेति न रसादय उपदिश्यन्ते। क्रमापेक्षितत्वाच्च रसादीनां रसादयो हि द्रव्यक्रममपेक्षन्ते यथा तरुणे तरुणाः सम्पूर्णे सम्पूर्णा इति। एकदेशसाध्यत्वाच्च द्रव्याणामेकदेशेनापि व्याधयः साध्यन्ते यथा महावृक्षक्षीरेणेति तस्माद्द्रव्यं प्रधानं द्रव्यलक्षणन्तु क्रियागुणवत्समवायिकारणमिति।"

"पाको नास्ति विना वीर्य्याद्वीर्य्यं नास्ति विना रसात्।
रसो नास्ति विना द्रव्याद्द्रव्यं श्रेष्ठतमं स्मृतम्॥"
"जीवसंज्ञा गुणा येऽष्टौ तेऽपि द्रव्याश्रयाः स्मृताः।
रसेषु न वसन्त्येते निर्गुणास्तु गुणाः स्मृताः॥
द्रव्ये द्रव्याणि यस्मात्तु विपच्यन्ते न षड्रसाः।
श्रेष्ठं द्रव्यमतो ज्ञेयं शेषा भावास्तदाश्रयाः॥"
इति सुश्रुते। १। ४ ।)

पित्तलम्। वित्तम्। पृथिव्यादि। विलेपनम्। क्लीवम्। भेषजम्। भव्यम्। (द्रोर्विकारः। "द्रोश्च।" ४। ३। १६१। इति यत्।) द्रुमविकारे त्रि। इति मेदिनी। ये, २८॥ (द्रुमावयवः। इति सिद्धान्तकौमुदी।) जतु। विनयः। इति हेमचन्द्रः॥ मद्यम्। यथा,—
"मद्यञ्च पिबेद्द्रव्यम्। इति कात्यायनमतम्॥
न्यायमते तन्नवविधं यथा,—
"क्षित्यप्तेजोमरुद्व्योमकाला दिग्देहिनो मनः।"
तेषां साधर्म्यादि यथा,—
"क्षित्यादीनां नवानान्तु द्रव्यत्वगुणयोगिता।
क्षितिर्जलं तथा तेजः पवनो मन एव च॥
परापरत्वमूर्त्तत्वक्रियावेगाश्रया अमी।
कालखात्मदिशां सर्व्वगतत्वं परमं महत्॥
क्षित्यादिपञ्चभूतानि चत्वारि स्पर्शवन्ति हि।
द्रव्यारम्भश्चतुर्षु स्यादथाकाशशरीरिणाम्॥
अव्याप्यवृत्तिः क्षणिको विशेषगुण इष्यते।
रूपद्रवत्वप्रत्यक्षयोगि स्यात् प्रथमं त्रिकम्॥
गुरुणी द्वे रसवती द्वयोर्नैमित्तिको द्रवः।
आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः॥"
इति भाषापरिच्छेदः॥

द्रव्यहस्तस्याचान्तिदोषादोषौ यथा,—
"उच्चावचानपानेषु द्रव्यहस्तो भवेन्नरः।
भूमौ निक्षिप्य तद्द्रव्यमाचम्याभ्युक्षयेत्तु तत्॥
तैजसं वै समादाय यद्युच्छिष्टो भवेद्द्विजः।
भूमौ निक्षिप्य तद्द्रव्यमाचम्याभ्युक्षयेत्तु तत्॥
यद्यद्द्रव्यं समादाय भवेदुच्छेषणान्वितः।
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात्॥
वस्त्रादिषु विकल्पः स्यात्तत्संस्पृश्याचमेदिह।
अरण्येऽनुदके रात्रौ चौरव्याघ्राकुले पथि।
कृत्वा मूत्रपुरीषं वा द्रव्यहस्तो न दुष्यति॥"
इति कूर्म्मपुराणम्॥

द्रा क स्वप्ने। पलायने। इति कविकल्पद्रुमः॥ (अदां परं अकं अनिट्।) स्वप्नो निद्रा। निपूर्व्व एव निद्रायामिति रमानाथः। क, निद्राति निद्राणः। द्राति चौरः पलायते इत्यर्थः। इति दुर्गादासः॥

द्राक् व्य (द्रातीति। द्रा+बाहुलकात् कुः।) द्रुतम्। शीघ्रम्। इत्यमरः। १। ४। २॥ (यथा, नैषधे। ३। २।
"आकस्मिकः पक्षपुटाहतायाः
क्षितिस्तदा यः स्वन उच्चचार।
द्रागन्यविन्यस्तदृशः स तस्याः
सम्भ्रान्तमन्तःकरणं चकार॥")

द्राख ऋ काङ्क्षे। घोरवृत्ते। इति कविकल्पद्रुमः॥ (भ्वां परं सकं अकञ्च सेट्।) रेफयुक्तः। घोरवृत्तमिह तिरश्चामेव घोरशब्दः। ऋ, द्राङ्क्षति काकः। समध्यपाठेनैवेष्टसिद्धे एतस्य दन्त्यमध्यो धेदेश्चारणभेदाय। इति दुर्गादासः॥

द्राक्षा, स्त्री, (द्राङ्क्षते काङ्क्षते इति। द्राक्षि काङ्क्षि+अच्। आगमशास्त्रस्यानित्यत्वात् न लोपः।) फलविशेषः। दाख इति किसमिस इति च भाषा। आङ्गूर इति यवनभाषा। तत्पर्य्यायः। मृद्वीका २ गोस्तनी ३ स्वाद्वी ४ मधुरसा ५। इत्यमरः। २। ४। १०७॥ चारुफला ६ कृष्णा ७ प्रियाला ८ तापसप्रिया ९ गुच्छफला १० रसाला ११ अमृतफला १२ हारा १३ चापफला १४। इति जटाधरः॥ रसा १५। इति शब्दरत्नावली॥ अस्या गुणाः। अतिमधुरत्वम्। अम्लत्वम्। शीतपित्तार्त्तिदाहमूत्रकृच्छ्रनाशित्वम्। चक्षुष्यम्। वृष्यत्वम्। सन्तर्पणत्वञ्च। इति राजनिर्घण्टः॥ स्निग्धत्वम्। श्रमशमकारित्वम्। बृंहणम्। तृष्णावायुरक्तपित्तक्षतक्षयनाशित्वञ्च। इति राजवल्लभः॥

द्राड ङ भेदार्थे। इति कविकल्पद्रुमः॥ (भ्वां परं सकं सेट्।) दन्त्यवर्गतृतीयोपधः। रेफयुक्तः। ङ, अदद्राडत्। भासार्थे शोभायाम्। इति दुर्गादासः॥

द्राघ ङ ऋ आयामसामर्थ्ये। इति कविकल्पद्रुमः॥ (भ्वां आत्मं सकं-दीर्घीकरणे अकं सेट्।) घम ऊर्ध्वः। आयामो दीर्घीकरणम्। सामर्थ्यम्। ऋ, अदद्राघत्। ङ द्राघते बलः। द्राघते वत्सो दीर्घं करोतीत्यर्थः। द्राघते भारं वाही समर्थः स्यादित्यर्थः। इति दुर्गादासः॥

द्राघिमा, [न्] पुं, दीर्घस्य भावः। (दीर्घ+इमनिच्। "प्रियस्थिरस्फिरोरुबहुलेति।" ६। ४। १५७। इति द्राघादेशः।) दीर्घत्वम्। इति व्याकरणम्॥ भूगोलस्य दीर्घता। इत्याधुनिकज्योतिर्विदः॥

द्राघिष्ठः, त्रि, (अतिशयेन दीर्घः इति। दीर्घ+इष्ठन्। दीर्घस्य द्राघादेशः।) अतिदीर्घः। इत्यमरः। ३। १। ११२॥

द्राख, ऋ ङ शोषे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं सेट्।) रेफयुक्तः। ऋ, अदद्राखत्। ङ, द्राखते। शोषो विभेदे। इति दुर्गादासः॥

द्राणः, त्रि, (द्रा+कर्त्तरि क्तः। निष्ठातस्य नः। णत्वञ्च।) सुप्तः। पलायितः॥

द्रापः पुं, (द्रापयतीति। द्रा+णिच्। पुगागमः। द्रापि+अच्।) पङ्कः। आकाशम्। कपर्द्दी। मूर्खः। इति शब्दार्थकल्पतरुः॥

द्रामिलः पुं, (द्रमिलाख्यो देशोऽभिजनोऽस्येति। अण्।) चाणक्यमुनिः। इति हेमचन्द्रः। ३। ५१८॥

द्रावः पुं द्रुधातोर्भावे घञ्प्रत्ययः। गमनम्। क्षरणम्। अनुतापः॥

द्रावकम्, क्ली, (द्रवति द्रावयति वा। द्रु द्रावि वा+ण्वुल्।) सिक्थकम्। इति राजनिर्घण्टः॥ प्लीहरोगस्य औषधविशेषः। (यथा —
"स्फटिकारीद्वयञ्चैव पलं द्विपलिकं तथा।
नरसारं पलं देयं टङ्कणञ्च पलार्द्धकम्॥
कासीसं शाणयुग्मञ्च प्रत्येकं तच्च चूर्णितम्।
अपक्वकक्षकारं कर्षमानं पृथक् पृथक्॥
अपामार्गोऽथ तस्यापि तथा कुष्माण्डकस्य च।
रम्भाबल्कलजं क्षारं प्रत्येकं चाष्टमाषकम्॥
उक्तचूर्णीकृतं चैतत् निक्षिप्य कमठीं सुधीः।
सर्व्वमेतत् सुनिक्षिप्य रौद्रे स्थाप्य दिवसत्रयम्॥
आनीय काचपात्रस्थं तत् पाचयेत् भिषक्।
प्रहरार्द्धं ततो ज्वाला मालकाष्ठादिना मृदु।
सुरभि काचकुम्भे च ततो ज्वालां विवर्द्धयेत्॥
शीते गते तदुद्धृत्य प्रक्षिपेच्च वराटकम्।
वराटे द्रवतां याते तत् कर्म्मसु योजयेत्॥
द्रावकस्य मरीचस्य मात्रया च भक्षणम्।
गुल्मैक स्थापयेच्चापि यकृतं मान्द्यमेव च॥
अपूर्व्वेण वा देयं शोषशूले विशेषतः।
पञ्चमेन हृतं नूनं दुष्टानामुपजीवितम्॥"
इति वैद्यककल्पतरौ प्लीहयकृद्रोगा-धिकारे।) अस्य अन्यद् विवरणं महाद्रावकशब्दे द्रष्टव्यम्॥

द्रावकः, पुं, (द्रवति चन्द्रांशुसम्पर्केणेति। द्रु+ण्वुल्।) चन्द्रमणिः। (द्रावयतीति। द्रु+णिच्+ण्वुल्।) विदग्धः। (द्रवति स्यन्दते इति। द्रु+ण्वुल्।) मोहकः। इति मेदिनी। के, १३३॥ छिद्रम्। इति शब्दमाला॥ चौरः। इति शब्दरत्नावली॥ (द्रावि+ण्वुल्।) हृदयग्राही। इन्द्रवल्कः। इति धरणिः॥

द्रावकगणः, पुं, (द्रावकः गणो यस्य।) टङ्कणः। इति राजनिर्घण्टः॥

द्रावकरः, पुं (द्रावं द्रवत्वादिकं करोति धातुयोगेनेति। द्राव+कृ+ट।) श्वेतटङ्कणम्। इति राजनिर्घण्टः॥

द्रावणं, क्ली (द्रावयति जलमलं सम्पर्कमात्रेणेति। द्रु+णिच्+ल्यु।) कतकफलम्। इति रत्नमाला। निर्म्मली इति भाषा॥ (द्रावि+ल्युट्।) विद्रावणञ्च॥ (द्रावयतीति। द्रावि+ल्यु। पलायनकारयितरि, त्रि। यथा, महाभारते। ८।१४।१७।

"स देवपुत्रो रथसत्तमो नो
दुराधर्षो द्रावणश्चाप्यरीणाम्॥")

द्राविका, स्त्री (द्रावक+टाप्। अत इत्वञ्च।) लाला। इति शब्दरत्नावली॥

द्राविडः त्रि, (द्राविडो देशोऽभिजनोऽस्येति। अण्।) देशविशेषजातः। (यथा महाभारते। ८।१२।१४।
"सात्वतैश्चेकितानश्च द्राविडैः सैनिकैः सह॥")
पञ्चद्राविडाः। यथा, द्राविडः १ कर्णाटः २ गुर्ज्जरः ३ महाराष्ट्रः ४ तैलङ्गः ५। यथा, स्कान्दपुराणे।
"कर्णाटाश्चैव तैलङ्गा गुर्ज्जरा राष्ट्रवासिनः।
आन्ध्राश्च द्राविडाः पञ्च विन्ध्यदक्षिणवासिनः॥"
सङ्कीर्णभेदः। वेधमुख्यः। इति मेदिनी। डे, ३॥ कर्च्चूरः। इति राजनिर्घण्टः॥

द्राविडकं क्ली, (द्रविडे देशे भवं। अण्। ततः संज्ञायां कन्।) विड्लवणम्। इति राजनिर्घण्टः॥

द्राविडकः पुं, (द्राविड एव। स्वार्थे कन्।) वेधमुख्यकः। इत्यमरः। २।४।१३५। शियाच षष्ठी इति भाषा॥

द्राविडभूतिकः, पुं, (द्राविडे देशे भूतिरुत्पत्तिः स्थानं यस्य। कप्।) द्राविडकः। इति शब्दरत्नावली॥

द्राविडी, स्त्री, (द्रविडे भवा। द्रविड+अण्। ङीप्।) एला। इति राजनिर्घण्टः॥ (इयं एला तु गुजराती इति ख्याता॥ अस्याः पर्य्यायो यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे।
"सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी द्राविडी
त्रुटिः॥")

द्राव्य त्रि, (द्रु+ण्यत्।) अवश्यगमनीयम्। अवश्यक्षरणीयम्। अवश्यद्रवणीयम्। इति दुधातोरवश्यम्भावार्थे ण्यत्प्रत्ययः॥

द्राह ङ जागरे। निक्षेपे। इति कविकल्पद्रुमः॥ (भ्वा-आत्म-अक-सेट।) ऋ, अदद्राहत्। ङ, द्राहते। इति दुर्गादासः॥

द्रु, द्रुतौ। गतौ। इति कविकल्पद्रुमः॥ (भ्वा-परं-सक-अनिट्।) द्रवति। इति दुर्गादासः॥

द्रु र श उपतापे। इति कविकल्पद्रुमः॥ (स्वा-परं-अकं-सकं च अनिट्।) र, वैदिकः। श, द्रुणोति। उपताप इह उपतप्तीभावः उपतापो वरणञ्च। इति दुर्गादासः॥

द्रुः, पुं (द्रवति ऊर्द्ध्वं गच्छतीति। द्रु+मितद्र्वादित्वात् डुः।) वृक्षः। इत्यमरः। २।४।५॥ (यथा मनुः। ७।१३१।
"आददीताथ षड्भागं द्रुमांसमधुसर्पिषाम्॥")
गतौ, स्त्री। इति शब्दरत्नावली॥

द्रुकिलिमं, क्ली, (किलतीति किलिमम्। किल श्वैत्यक्रीडनयोः+बाहुलकात् किमच्। द्रुषु वृक्षेषु किलिमम्।) देवदारुवृक्षः। इत्यमरः। २।४।५३॥ (अस्य पर्य्यायो यथा वैद्यकरत्नमालायाम्।
"देवदारुद्रुकिलिमं सुराह्वं भद्रदारु च।
देवकाष्ठं पीतदारु देवदारु च दारु च॥")

द्रुघणः, पुं, (द्रुः वृक्षो हन्यतेऽनेनेति। द्रु+हन+"करणेऽयोविद्रुषु।" ३।३।८२। इति अप् घनादेशश्च। "पूर्व्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्। द्रुममयो घन इति वा।) मुद्गरः। इत्यमरः। २।८।९१॥ स्वधारादिरहिताकारलौहमयास्त्रभेदः। इति भरतः॥ (वैशम्पायनोक्तधनुर्व्वेदमतेऽयं परशुवल्लोहाग्रम्। यदुक्तम्।
"द्रुघणश्चायताग्रः स्यात् वक्रग्रीवो वृहच्छिराः।
मध्याग्रहस्तलीनुष्टिर्मुष्टिर्मितागलः॥'
अस्य चतस्रः क्रियाः। यथा —
'उत्थानं प्रपातश्च स्फोटनं दारणं तथा।
चत्वार्य्येतानि द्रुघणे कथितानि मितानि वै॥"
द्रुः संसारस्तं हन्तीति। अनेनेति।) ब्रह्मा। कुठारः। इति मेदिनी। णे, ५३॥ भूमिचम्पकः। इति शब्दचन्द्रिका॥ द्रुघणोऽपि॥

द्रुड मज्जने। इति कविकल्पद्रुमः॥ (तुदां-परं-अक-सेट।) रेफयुक्तः। मज्जनमिति मग्नधातो रूपम्। द्रुडति भ्रमरो जले। दुद्रोडिषति। इति दुर्गादासः॥

द्रुड, शि मज्जने। इति कविकल्पद्रुमः॥ (तुदां-परं-अक-सेट।) शि, द्रुडति अद्रुडीत् दुद्रोड। एषः कैश्चिन्न मन्यते। रमानाथस्तु कुटादिमेव मन्यते। इति दुर्गादासः॥

द्रुण श कौटिल्ये। गतौ। वधे। इति कविकल्पद्रुमः॥ (तुदां-परं-सक-सेट।) द्रुणवर्णोऽयं तालव्यादिः। श, द्रुणति दुद्रोणिषति। कैश्चित् कुटिलीकरणम्। इति दुर्गादासः॥

द्रुणा, स्त्री, (द्रुणति हिनस्तीति। द्रुण+"इगुपधेति।" ३।१।१३५। इति कः।) धनुः। खड्गः। इति हेमचन्द्रः॥ ४।२००॥

द्रुणः, पुं, (द्रुणति हिनस्तीति। द्रुण+कः।) वृश्चिकः। भृङ्गः। इति हेमचन्द्रः। ४।२००॥ त्रि, पिशुनः। इति शब्दमाला॥

द्रुणसः त्रि, (द्रुरिव दीर्घा नासिका यस्य। "अञ्नासिकायाः संज्ञायां नसं चास्थूलात्।" ५।४।११८। इति अच्। नसादेशश्च। "पूर्व्वपदात् संज्ञायामगः।" ८।४।३। इति णत्वम्।) दीर्घनासिकायुक्तः। इति अभिधानव्याकरणम्॥

द्रुणहः, पुं (द्रुणं खड्गं हन्ति गच्छतीति। हन गतौ+डः।) खड्गपिधानम्। इति हारावली। १९५॥

द्रुणा, स्त्री, (द्रुण हिंसागत्योः+कौटिल्येऽपि। अच्। टाप्।) ज्या। इति हेमचन्द्रः। ३।४४९॥

द्रुणिः, स्त्री, (द्रुणति जलादिकमिति। द्रुण गतौ+"इगुपधात् कित्।" उणां। ४।११९। इति इन्।) द्रोणी। इत्यमरटीकायां भरतः॥

द्रुणी स्त्री, (द्रुण+इन्। वा ङीप्।) कर्णजलौका। कच्छपी। इति लिङ्गादिसंग्रहे अमरभरतौ॥ काष्ठाम्बुवाहिनी। इति द्रोणीशब्दटीकायां भरतः॥

द्रुतः, त्रि, (द्रवति स्मेति। द्रु+गत्यर्थेति कर्त्तरि क्तः।) आतपद्रवीभावद्रुतघृतादि। तत्पर्य्यायः। अवदीर्णम् २ विलीनम् ३ विद्रुतम् ४। इत्यमरः। ३।१।१०॥ शीघ्रम्। (यथा, महाभारते। १३।२६।८१।
"कादम्बिनीभिः सुमनोहराभि
र्हंसाभिरत्यर्थवशुज्ज्वलाभिः।
गङ्गोर्म्मिभिर्भानुमतीभिरिद्धाः
सहस्रशोऽभ्रप्रतिमा भवन्ति॥")
विद्रवम्। पलायितम्। इति मेदिनी। ते, २४॥ (यथा रघुः। ९।५९।
"अन्वाय स द्रुतवराहकुलस्य मार्गं
सुव्यक्तमार्द्रपदपङ्क्तिभिरायताभिः॥")

द्रुतं, क्ली, (द्रु+क्त।) नृत्यविषयकशीघ्रगमनम्। तत्पर्य्यायः। क्षिप्रम् २। इत्यमरः। १।७। ६८॥ शीघ्रलयः। इति मधुः॥ द्रुतगीतादौ भवन्ति गच्छन्ति प्रसारयन्ति भावार्थे कर्त्तर्य्योऽत्र। इति भरतः॥ शार्ङ्गे।
"द्रुताभ्यसने द्रुतं प्रयोगाद्यं तु मध्यमाम्।
शिष्याणामुपदेशार्थं विलम्बितं समाचरेत्॥"
इति वेदव्यासः॥
(शीघ्रम्। यथा, मनुः। ८।१०२।
"अध्यायानेव मध्यमान् शिष्याशीघ्रमिव
द्रुतम्॥"
क्रियाविशेषणत्वादस्य क्लीवता॥)

द्रुतः पुं, (द्रवति स्म ऊर्द्ध्वमिति। द्रु+क्तः।) द्रुमः। इति धरणिः॥

द्रुनखः, पुं, (द्रोः वृक्षस्य नख इव। अग्रभागात् अस्य प्रकाशत्वात्।) कण्टकम्। इति त्रिकाण्डशेषः॥

द्रुपदः पुं, पञ्चालदेशीयचन्द्रवंशीयराजविशेषः। तस्य कन्या द्रौपदी। पुत्रौ शिखण्डिधृष्टद्युम्नौ। इति महाभारतम्॥ (क्ली, यूपकाष्ठम्। यथा, ऋग्वेदे। १।२४।१३।
"शुनःशेपो ह्यह्वद्गृभीतस्त्रिष्वादित्यं द्रुपदेषु बद्धः।"
"द्रुपदेषु त्रो काष्ठमयपादेषु पदबन्धनेषु बद्धः।" इति तद्भाष्ये सायनः॥ काष्ठपादुका। यथा, वाजसनेयसंहितायाम्। २०।२०।
"द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव॥"
"द्रुपदं काष्ठमयं पादुका यथा पादुकां त्यक्त्वा एवम् भवन्।' इति महीधरः॥)

द्रुपदा, स्त्री कक्। सा च वैदिकमन्त्रविशेषः। यथा दधिक्राव्णस्य वाजादावाजिन्त्यर्थ आचमनम्।

"भुक्तोच्छिष्टस्तथाचान्तश्चाण्डालं श्वपचेन वा।
प्रमादात् स्पृशेद्यश्चेत् तस्य कुर्य्याद्विशोधनम्।
गायत्र्यष्टसहस्रन्तु द्रुपदां वा शतं जपेत्॥"
इत्याह्निकाचारतत्त्वम्॥

द्रुमः, पुं (प्रशस्ता द्रवः शाखा सन्त्यस्य अवयवेष्वपि वर्त्तन्ते इति न्यायात् द्रु शाखा विद्यतेऽस्य। "द्युद्रुभ्यां मः।" ५।२।१०८। इति मः।) वृक्षः। इत्यमरः।२।४।५॥ (यथा, मनुः। ८।२५५।
"निभयन्तु भवेद्यस्य राष्ट्रं बाहुबलाश्रितम्।
तस्य तद्वर्द्धते नित्यं सिच्यमान इव द्रुमः॥")
पारिजातः। कुवेरः। इति मेदिनी। म, १५॥ (स्वनामख्यातः किम्पुरुषेश्वरः। यथा, महाभारते।२।१०।२८।
"द्रुमः किम्पुरुषेशश्च उपास्ते धनदेश्वरम्॥"
स्वनामख्यातनृपविशेषः। स तु शिविनामदैत्यस्यांशात् जातः। यथा, तत्रैव।१।६७।८।
"यस्तु राजन्! शिविर्नाम दैतेयः परिकीर्त्तितः।
द्रुम इत्यभिविख्यातः स आसीद्भुवि पार्थिवः॥"
रुक्मिणीगर्भजातः कृष्णस्य पुत्रविशेषः। यथा, हरिवंशे।११६।६।
"चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च॥")

द्रुमनखः, पुं, (द्रुमस्य नख इव।) कण्टकम्। इति हारावली॥

द्रुमरः, पुं, (द्रुम्रियतेऽनेनेति। मृ+करणे अप्।) कण्टकम्। इति हारावली।६१॥

द्रुमव्याधिः पुं (द्रुमस्य व्याधिरिव।) लाक्षा। इति राजनिर्घण्टः॥

द्रुमशीर्षः स्त्री (द्रुमस्य शीर्षमिव शीर्षं यस्य।) कुट्टिमभेदः। यथा,—
"कपिशीर्षं द्रुमशीर्षं तथा चास्योटशीर्षकम्।
इति कुट्टिमभेदाः स्युः शाब्दिकैः समुदाहृताः॥"
इति शब्दरत्नावली॥
(द्रुमस्य शीर्षम् इति विग्रहे क्लीवम्॥)

द्रुमश्रेष्ठः, पुं (द्रुमेषु तरुश्रेष्ठेषु श्रेष्ठः।) तालवृक्षः। इति शब्दार्थकल्पतरुः॥ द्रुमश्रेष्ठश्च॥

द्रुमामयः, पुं (द्रुमस्य आमयो व्याधिः।) लाक्षा। इत्यमरः।२।६।१२५॥

द्रुमारिः पुं (द्रुमस्य अरिः। तद्धातकत्वात् तथात्वम्।) हस्ती। इति राजनिर्घण्टः॥

द्रुमाश्रयः पुं (द्रुमः आश्रयो यस्य।) सरटः। इति राजनिर्घण्टः॥ द्रुमाश्रितमात्रेषु, त्रि॥

द्रुमेश्वरः पुं (द्रुमेषु ईश्वरः श्रेष्ठः।) तालवृक्षः। इति शब्दार्थकल्पतरुः॥ (द्रुमाणां ओषधीनामीश्वरः।) चन्द्रः। इति हरिवंशः॥

द्रुमोत्पलः, पुं, (द्रुमे उत्पलमिव पुष्पं यस्य।) कर्णिकारवृक्षः। इत्यमरः।२।४।६॥

द्रुवयः स्त्री (द्रोः काष्ठस्य विकारभूतं प्रस्थादिपरिमाणम्। द्रु+"माने वयः।"४।३।१६२। इति वयः।) परिमाणम्। इत्यमरः।३।५।८९॥ (द्रुविकारेऽपि। यथा, अथर्ववेदे।५।२।१९।
"ऋषिं हत्वा नाभिदुह्वो विरक्षः॥")

द्रुसल्लकः, पुं, (द्रुः सल्लक इव।) पियालवृक्षः। इति शब्दरत्नावली॥

द्रुह, ऋ य ऊ जिघांसे। इति कविकल्पद्रुमः॥ (दिवां-परं-अकं-वेट्।) जिघांसा इहाविनेष्टाचरणमिति विद्यानिवासः। ऋ, अदुहत्। य, द्रुह्यति खलः साधवे। ऊ, द्रोहिष्यति ध्रोक्ष्यति। इति दुर्गादासः॥

द्रुहः, पुं, (द्रुह्यति धनादिलाभाशया पितृविनाशं चिन्तयतीति। द्रुह+"इगुपधज्ञेति।"३।१।१३५। इति कः।) पुत्रः। इति शब्दार्थकल्पतरुः॥ (द्रोहकारके त्रि। यथा, ऋग्वेदे।७।१०४।१७।
"गन्तमप द्रुहा तन्व गूहमाना।"
"या रात्री नक्तं रात्री द्रुहा द्रोहेण युक्ता।"
इति तद्भाष्ये सायनः॥)

द्रुहणः, पुं, (द्रु अवतारणमिति हन्तीति। हन्+अच्। "पूर्व्वपदात् संज्ञायामगः।"८।४।३। इति णत्वम्।) ब्रह्मा। इति भरतद्विरूपकोषः॥

द्रुहिणः, पुं, (द्रुह्यति दुष्टेभ्य इति। द्रुह+"बहुलमन्यत्रापि।" उणा २।४९। इति इनन्। गुणाभावश्च।) ब्रह्मा। इत्यमरः।१।१।१७॥ (यथा, देवीभागवते।१।८।२८।
"द्रुहिणो सृष्टिशक्तिश्च हरौ पालनशक्तिता॥")

द्रुही, स्त्री (द्रुह्यति पितृत्वे विवाहकालीनधनापहारकारित्वा। द्रुह+कः। ततो ङीष्।) दुहिता। इति शब्दार्थकल्पतरुः॥

द्रू, ज ग ण वधे गतौ। इति कविकल्पद्रुमः॥ (क्र्यां-क्र्यां-च-उभ-सक-सेट्।) ज ण, द्रूणाति द्रूणीते। ग ण, द्रूणाति द्रूणीते। इति दुर्गादासः॥

द्रूः, पुं (द्रवति सवतीति। द्रु+"क्विप् वचि-प्रच्छीति।" उणा २।५७। इति क्विप् दीर्घश्च।) स्वर्णम्। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः॥

द्रूघणः, पुं (द्रुघण। पृषोदरादित्वात् साधुः।) द्रुघणः। इति भरतद्विरूपकोषः सङ्ग्रहकारश्च॥

द्रूणः, पुं, (द्रूणः। पृषोदरादित्वात् दीर्घः।) द्रुणः। वृश्चिकः। इति शब्दार्थकल्पतरुः॥

द्रेक ऋ ङ स्वनोत्साहे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-अकं-सेट्।) स्वनः शब्दः। उत्साहः औद्धत्यम्। द्रेकते शुकः। ऋ, अदिद्रेकत्। इति दुर्गादासः॥

द्रेक्का } पुं, लग्नस्य तृतीयांशविभागः। यथा
द्रेक्काणः } ज्योतिषम्।
"अथ स्वनवमांशे ये राशीकाण्डिन्यशा।
इ द्रेक्काणाभिधा ज्ञेया द्रेक्काणा इव हि॥"

द्रै, स्वप्ने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-अनिट्।) द्रायति। इति दुर्गादासः॥

द्रोणः पुं स्त्री (द्रवति। द्रु+"कॄवृजॄसिद्रुपन्यनिस्वपिभ्यो नित्।" उणा ३।१०। इति नः।) आढकचतुष्टयपरिमाणम्। आढकचतुष्टयम्। इति शब्दरत्नावली॥ १२ सेर इति लौकिकमानम्। तत्पर्य्यायः। घटः २ कलसः ३ उन्मानम् ४ नल्वकः ५ अर्मणः ६। इति वैद्यकपरिभाषा॥ "द्रोणस्तु खार्य्याः खलु षोडशांशः।" इति लीलावती॥ (अरणीकाष्ठम्। यथा, ऋग्वेदे।६।२।८।
"क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः।"
"हे अग्ने! क्रत्वा कर्म्मणा मन्थनरूपेण द्रोणे द्रुमे काष्ठे अरण्यां विद्यमानः सन् अज्यसे हि।" इति तद्भाष्ये सायनः॥ काष्ठनिर्म्मितकलशः। यथा, तत्रैव।९।६०।२।
"यो द्रोणे परय सहस्रधारं पुनानाय अञ्जनो अभूषन्।"
"द्रोणे द्रोणकलशे सहस्रधारं अञ्जनः सञ्जनो अभूषन्।" इति सायनः॥ द्रुममयरथः। इति निरुक्तम्।५।२६॥ यथा ऋग्वेदे।१।११४।२।
"आ वो रथम् रथयो द्रोणमस्तु॥"
"द्रोणं द्रुममयं रथमस्तु।" इति सायनः॥)

द्रोणः पुं, (द्रोणः कलसः उत्पत्तिस्थानत्वेनास्त्यस्य। द्रोण+अच्।) द्रोणाचार्य्यः। (अयं कुरुपाण्डवानां आचार्य्यः। अस्य पिता भरद्वाजः। अस्य जन्मवृत्तान्तं यदुक्तं महाभारते।१।१३१।९।११।
"गङ्गाद्वारं प्रति महान् बभूव भगवानृषिः।
भरद्वाज इति ख्यातः सततं संशितव्रतः॥
सोऽभिषेक्तुं ततो गङ्गां पूर्व्वमेवागमन्नदीम्।
महर्षिभिर्भरद्वाजो हविर्धाने चरन् पुरा॥
ददर्शाप्सरसं साक्षात् घृताचीमाप्लुतामृषिः।
रूपयौवनसम्पन्नां मदृप्तां मदालसाम्॥
तस्याः पुनर्नदीतीरे वसनं व्यपकर्षत।
व्यपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे ततः॥
तत्र संसक्तमनसो भरद्वाजस्य धीमतः।
ततोऽस्य रेतश्चस्कन्द तदृषिर्द्रोण आदधे॥
ततः समभवद्द्रोणः कलशे तस्य धीमतः।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्व्वशः॥
अग्निवेशं महाभागं भरद्वाजः प्रतापवान्।
प्रत्यपादयदाग्नेयमस्त्रमस्त्रविदांवरः॥
अग्नेस्तु जातः स मुनिस्ततो भरतसत्तम।
भारद्वाजं तदाग्नेयं महास्त्रं प्रत्यपादयत्॥"
अस्य पुत्रः अश्वत्थामा इत्यभिधः। अयं हि भारतयुद्धे दुर्य्योधनस्य पक्षमवलम्ब्य पाण्डवैः सार्द्धं युद्धमकरोत्। तत्र पूर्व्वं भीष्मस्य निधनानन्तरं सेनापतिपदमवाप्य पञ्चदशदिवसान् युद्धं कृत्वा अयं धृष्टद्युम्नेन निहतः। तत्र इदं वाक्यं युधिष्ठिरेण उक्तम् अश्वत्थामा हतो इति कुञ्जरः। यथा महाभारते।७।१९२।६५।
"न तस्यासीदसत्यं यस्तु भीमसेनेरितं तदा।
युधिष्ठिरेण ... ॥
अश्वत्थामा हत इति शब्दमुच्चैश्चकार ह।
... हत इत्यपि॥")

अथाप्यन्यत्रापि ।

"यावत् प्रमाणं नगरं हि राज्ञो
ततो भवेदुत्तममध्यमान्त्यम् ।
त्रिभागहीनं द्वयगुणोत्तरेण
निवेशनानां चरणोपनीतम् ॥"

गर्गस्तु ।

"यत्राष्टविधं द्वन्द्वं प्रोच्यते गरुडोत्तमम् ।
नाभ्याशेनातिरिच्येत मन्दद्वन्द्वं विशेषतः ॥
अन्येषु दैवाद् भिन्नेषु मन्दद्वन्द्वात् अपेक्षया ।
मन्दद्वन्द्वे हि भिन्ने हि न चाप्यत् कार्मकार-
कम् ॥"

भोजस्तु ।

"यत्रैव वैरिद्वन्द्वं च विलीना विषमाश्च ताः ।
अप्रवेशापवर्ग्यं महच्छ्रुतम् विदुः ॥"

इति भोजराजकृतयुक्तिकल्पतरुः ॥

द्वन्द्व, पुं, (द्वौ द्वौ सहाभिव्यक्तौ इति । निपातनात् साधु । नार्थे द्वन्द्व इति निर्देशात् पुंस्त्वम् ।) रोगविशेषः । समासभेदः । इति शब्दरत्नावली ॥ स तु भिन्नार्थानां पदानां समासः । चार्थे द्वन्द्व इत्यस्य सूत्रस्य लक्षणा । स इतरेतरयोगसमाहारभेदेन द्विधा भवति । इतरेतरद्वन्द्वो यथा । हरिश्च हरश्च हरिहरौ । अत्र प्रत्येकपदप्राधान्यात् द्विस्ववहुत्वं चेत्यन्तलिङ्गभाक्त्वञ्च भवति । समाहारद्वन्द्वो यथा । शाकं च सूपं च द्वयोः समाहारः शाकसूपम् । अत्र संहतेरेकत्वादेकवचनं नित्यं क्लीबलिङ्गत्वञ्च भवति । इति मुग्धबोधम् ॥ (यद्गुल,— [भागः ॥")
"द्वन्द्वो द्विगुरपि चाहं मद्गृहे नित्यमव्ययी

द्वन्द्वचर, पुं, (द्वन्द्वेन चरतीति । चर + अच् ।) चक्रवाकः । इति हेमचन्द्रः । ४ । ३८६ ॥ (यथा, रघुः । ११ । ६७ ।
"आवबन्धो भाति गगनाभिकाङ्क्षी
भङ्गी ध्रुवौ द्वन्द्वचरौ स्थलानाम् ।
लाताति स्तनावयवोपमाना
मधुरवर्णौति विलासिनीनाम् ॥")

द्वन्द्वचारी, [न्] पुं, (द्वन्द्वेन चरतीति । चर + णिनि ।) चक्रवाकः । इति त्रिकाण्डशेषः ॥

द्वन्द्वज, पुं, (द्वन्द्वात् जायते इति । जन + ड ।) द्विदोषजरोगः । इति निदानम् ॥ कलहा-
न्यतौ च ॥

द्वय स्त्री, (द्वौ अवयवौ यस्य । द्वि + "संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् । "द्वित्रिभ्यां तयस्यायज्वा ।" ५ । २ । ४३ । इति तयस्यायच् ।) द्व्यात्मकम् । दुइ इति भाषा । तत्पर्यायः । उभौ २ द्वौ ३ युगलम् ४ द्वितयम् ५ युगम् ६ द्वैतम् ७ यमम् ८ द्वन्द्वम् ९ युगपत् १० यमलम् ११ यामलम् १२ । इति हेमचन्द्रः । ६ । ५८ ॥

द्वयाग्नि पुं, (द्वयो द्विरूपोऽग्निर्यत्र ।) द्रव्यभेदः । रांचिता इति भाषा । तत्पर्यायः । चान्द्र २ शुक्लाग्नि ३ । इति शब्दचन्द्रिका ॥

द्वयातिग, त्रि, (द्वयं अतिगच्छति अतिक्रामतीति । अति + गम + ड ।) रजस्तमोगुण-शून्यः । सत्त्वगुणयुक्तः । इत्यमरः । २ । ७ । ४५ ॥

द्वा, [र्] स्त्री, (द्वारयतीति । द्वृ वरणे + णिच् + बाहुलकात् क्विप् ।) द्वारम् । इत्यमरः । २ । २ । १६ ॥ (यथा, भागवते । ३ । ५ । १ ।
"द्वारि द्युनद्या ऋषभः कुरूणां
मैत्रेयमासीनमगाधबोधम् ॥")
उपायः । यथा, ग्रामद्वारा भवेत्तदुक्तिरिति ग्रामशास्त्रम् ॥

द्वाःस्थ, पुं, (द्वारि तिष्ठतीति । स्था + क ।) द्वारपालः । इति शब्दरत्नावली ॥ (यथा, भागवते । १ । १८ । ३४ ।
"सायमद्य चतुर्दश्यां द्वाःस्थौ निरुध्य ते ।
स कथं तद्गृहे द्वाःस्थः सभाण्डं भोक्तुमर्हति ॥")
नन्दिकेश्वरः । इति भूरिप्रयोगः ॥

द्वाःस्थित, त्रि, (द्वारि स्थितः ।) द्वारपालः । इत्यमरकोषशब्दरत्नावल्यौ ॥

द्वाःस्थितदर्शक, त्रि, (द्वाःस्थितं अनु पश्यतीति । दृश् + ण्वुल् ।) द्वारपालः । इत्यमरटीकायां भरतः ॥

द्वाःस्थितदर्शी, [न्] त्रि, (द्वारि स्थितं अनु पश्यतीति । दृश + णिनि ।) द्वारपालः । इति भरतधृतरभसः रमानाथश्च ॥

द्वाचत्वारिंशत् स्त्री, (द्व्यधिका चत्वारिंशत् । द्विशब्दस्य वा आत्वम् ।) द्विचत्वारिंशत् । इति व्याकरणम् ॥ ४२ बयालिश इति भाषा ॥

द्वात्रिंशत् स्त्री, (द्व्यधिका त्रिंशत् । "द्व्यष्टनः संख्यायामिति ।" ६ । ३ । ४७ । इति आत्वम् ।) द्व्यधिकत्रिंशत् संख्या । तत्संख्येयाश्च । ३२ बत्रिश इति भाषा । यथा, द्वात्रिंशत्प्रमिते भार्या अनुत्रिंशद्युगले मृत्युमित्यादि ज्योतिस्तत्त्वम् ॥

द्वात्रिंशदक्षरी, [न्] पुं, (द्वात्रिंशदक्षराणि सन्ति अस्य । बाहुलकात् इनि ।) मन्त्रः । इति त्रिकाण्डशेषः ॥

द्वात्रिंशल्लक्षणोपेत, पुं, (द्वात्रिंशल्लक्षणैरुपेतः ।) महापुरुषः । इति शब्दार्थकल्पतरुः ॥ तल्लक्ष-णानि यथा,—
"दाम चक्रं शङ्ख वटश्चापि शिरोरुहयुत्तं
तुङ्गता
विस्तारस्त्रिषु सूक्ष्मता त्रिषु तथा गम्भीरता
च त्रिषु ।
दैर्घ्यं पञ्चसु किञ्च पञ्चसु करे । रक्तता
पञ्चसु
द्वात्रिंशद्वरलक्षणं कथयतो गात्रेषु समा-
ख्यातं ॥"

इति श्रीहरिभक्तिरसामृतसिन्धुः ॥

"दाम इति । श्रीमद्व्रजेश्वरं प्रति कस्यचित् अत वचो गोपस्य वाक्यमिदम् । अत्रतु नैमित्त सामुद्रकलक्षणपरीक्षितदर्शनपरेषु पञ्चसु पञ्च-सुक्ष्मलक्षणादिकाठिन्यरोगेषु । किन्तु कठिनत्वं द पञ्चसु । केचित् कठिनत्वं स्थिरं पठन्ति । पुर्वत्रिषु गौरत्वदानेष्वपि । पुर्वत्रिषु नाभि स्वरसत्त्वेषु । पञ्चसु नासाक्षिद्वयहनुजानुषु । पञ्च पञ्चसु अक्षिकोणकरतलपादतलनखौष्ठेषु । तथैव महापुरुषलक्षणं सामुद्रकप्रसिद्धं । द्वात्रिंशद्वराणि तत्तल्लक्षणानि अन्येषामपि सौभाग्यदानि यस्य स भोगेषु कर्मसु भगवदवतारादिषु व्यक्तानामधिकाधिकानि भावः ।" इति श्रीजीवगोस्वामिविरचिता दुर्गम-सङ्गमनीनाम्नी टीका ॥

द्वादश, [न्] त्रि, (द्व्यधिका दश । "द्व्यष्टनः इति ।" ६ । ३ । ४७ । इति आत्वम् ।) द्व्यधिका दश । १२ बार इति भाषा । द्वादशसंख्या तत्संख्येयाश्च । अयं नित्यबहुवचनान्तः । त्रिलिङ्गे समानरूपः । इति व्याकरणम् ॥ द्वादशसंख्यावाचकानि यथा । सूर्यः १ मासः २ राशि ३ संक्रान्तिः ४ गुह बाहु ५ आदित्यः ६ गुहनेत्रम् ७ राजमण्डलम् ८ । इति कविकल्पलता ॥

द्वादश, त्रि, (द्वादशानां पूरणः । "तस्य पूरणे डट् ।" ५ । २ । ४८ । इति डट् ।) द्वादशानां पूरणः । इति व्याकरणम् ॥ बारइ इति भाषा । (यथा मनुः ।
"गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ॥"
महादेवः । यथा महाभारते । १३ । १७ । ८९ ।
"द्वादशस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः ॥")

द्वादशकर पुं, (द्वादश कराः भुजा यस्य ।) बृहस्पतिः । इति त्रिकाण्डशेषः ॥ कार्त्तिकेयश्च ॥

द्वादशपत्रक, क्ली, (द्वादश अक्षराणि पत्राणि इव यस्य ।) योगविशेषः । यथा,—
"पितामहेनापि तत् पुरा साध्यं अश्विनोः रतम् ।
सनत्कुमार प्रोवाच योगं द्वादशपत्रकम् ।
शिखास्थान्तु ओंकारं मेधोऽस्य शिरसि स्थितः ।
माघो नैयायिकगामी च प्रथमं पत्रकं स्मृतम् ॥
नकारं शिरसि प्रोक्तो ह्यमोऽस्य शिरसि स्थितः ।
ज्येष्ठमासश्च तत् पत्रं द्वितीयं परिकीर्तितम् ॥
मोकारो भुजयोर्युग्मं मिथुनं तत्र संस्थितम्
मासं आषाढ़नामा च तृतीयं पत्रकं स्मृतम् ॥
भकारो नेत्रयुग्मं कर्कटकश्च संस्थितः ।
मासः श्रावण इत्युक्तश्चतुर्थं पत्रकं स्मृतम् ॥
गकारो हृदयं प्रोक्तं सिंहो वसति तत्र च ।
माघो भाद्रपदा प्रोक्तः पञ्चमं पत्रकं स्मृतम् ॥
वकारं कवचं विद्यात् कन्या तत्र प्रतिष्ठिता ।
मासश्चाश्वयुजो नाम षष्ठं तत्पत्रकं स्मृतम् ॥
तेकारमस्त्रग्रामश्च तुलाराशिस्तथाश्रयः ।
मासश्च कार्त्तिको नाम सप्तमं पत्रकं स्मृतम् ॥
वाकारो नाभिसंयुक्तं वृश्चिकस्तत्र च स्थितः ।
माघो मार्गशिरो नाम अष्टमं पत्रकं स्मृतम् ॥
सुकारो जघनं प्रोक्तं धनुस्तस्य सन्धितः ।
पूर्वेऽपि नवमो मासः नवमं परिकीर्तितम् ॥
देकारश्चोरुयुग्मञ्च मकरोऽप्यत्र संस्थितः ।
माघो निर्दिष्टो मासः पत्रं दशमं स्मृतम् ।
वाकारो जानुयुग्मञ्च कुम्भश्चापि संस्थितः ।

मन्त्रं फाल्गुन प्रोक्तं तदेकादशतत्परम् ।
मार्गो दकारो मीनो हि स चैव वसति शुभे ॥
इदन्तु द्वादश प्रोक्तं मन्त्रे वै केशवस्य हि ।
द्वादशारस्तथा चक्र यन्नाभिर्हितुकस्तथा ।
त्रियत्नकर्मणेषु तपोक्तः परमेश्वरः ।
एतत्तवोक्तं देवस्य रूपं द्वादशपत्रकम् ।
यस्मिन् ज्ञाते सुनियतः न भूयो मरणं भवेत् ॥”
इति वामनपुराणेऽष्टपञ्चाशत्तमोऽध्यायः ॥

द्वादशलोचनः, पुं, (द्वादश लोचनानि नेत्राणि यस्य । षडाननत्वादेवास्य तथात्वम् ।) कार्त्तिकेयः । इति त्रिकाण्डशेषः ॥

द्वादशांशुः, पुं, (द्वादश अंशवः किरणानि यस्य ।) बृहस्पतिः । इति भूरिप्रयोगः ॥ (यदुक्तं मात्स्ये । १२७ । ५५ ।
“लोहितो नवरश्मिस्तु स्थानमापन्नस्तस्य वै ।
ह्रस्वन्तु द्वादशरश्मीक हरिदाभस्तु वेधसः ॥”)

द्वादशाक्षः, पुं, (द्वादश अक्षीणि यस्य ।) कार्त्तिकेयः । (द्वादशविषयेषु अधिपो यस्य ।) बुद्धः । इति हेमचन्द्रः । २ । १४८ ॥ (कार्त्तिकेयस्य अनुचरविशेषः । यथा, महाभारते । ९ । ४५ । ५६ ।
“एकाक्षो द्वादशाक्षश्च तथैवैकजटः प्रभुः ॥”)

द्वादशाक्षरमन्त्रः, पुं, (द्वादश अक्षराणि यस्य । तादृशो मन्त्रः ।) द्वादशवर्णात्मकविष्णुविषयकमन्त्रविशेषः । यथा —
“नमो भगवते वासुदेवायेत्योङ्कारपूर्व्वकम् ।
महामन्त्रमिमं प्राहुस्तत्त्वज्ञा द्वादशाक्षरम् ॥”
इति पाद्मे क्रियायोगसारः ।

द्वादशात्मा, पुं, (द्वादश मासकर्म्मादिविषयान् आख्यातीति । ख्या कथने + क ।) बुद्धः । इति त्रिकाण्डशेषः ॥

द्वादशाङ्गुलः पुं, (द्वादश अङ्गुलयः परिमाणं यस्य । “तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः” । ५ । ४ । ८६ इति अच् ।) वितस्तिः । इत्यमरः । २ । ६ । ८४ ॥

द्वादशात्मा, [न्] पुं, (द्वादश आत्मानो मूर्त्तयो यस्य ।) सूर्य्यः । (यथा महाभारते । ३ । ३ । २६ ।
“द्वादशात्मारविन्दाक्ष पिता माता पितामहः ॥”)
अर्कवृक्षः । इत्यमरः ॥

द्वादशायुः [स्] पुं, (द्वादशवत्सरपरिमितं आयुः यस्य ।) कुक्कुरः । इति शब्दमाला ॥

द्वादशार्च्चिः, [स्] पुं (द्वादश अर्च्चींषि किरणानि यस्य ।) बृहस्पतिः । इति हेमचन्द्रः । २ । ३४ ॥

द्वादशी स्त्री, (द्वादश + डिट्वात् ङीप् ।) तिथिविशेषः । सा चन्द्रस्य द्वादशकलाक्रियारूपा । सा च विष्णुतिथिः । यथा —
“वैष्णवश्चामिनी दर्शे सन्ध्यौऽस्तु यदा तिथिः ।
द्वादशी च तिथिस्तोऽस्तु कारवणी च कालतः ॥
कृष्णपक्षे भवेद्यस्तु द्वादश्यां तदुपवासकः ।
सहवासी स भवतु पुमान् स्त्री वा विदित ॥”
मार्गशीर्षीया मत्स्यद्वादशी मत्स्यद्वादशी १ पौषी कूर्म्मद्वादशी २ माघी वराहद्वादशी ३ फाल्गुनी नृसिंहद्वादशी ४ चैत्री वामनद्वादशी ५ वैशाखी जामदग्न्यद्वादशी ६ ज्यैष्ठी रामद्वादशी ७ आषाढी कृष्णद्वादशी ८ श्रावणी बुद्धद्वादशी ९ भाद्री कल्किद्वादशी १० आश्विनी पद्मनाभद्वादशी ११ कार्त्तिकी नारायणद्वादशी १२ । एतासां नाम यत्कीर्त्तनम् । एतत्करणे महाफलम् । इति वराहपुराणम् ॥

अथ पिपीतकद्वादशी । नारदीये ।
“वैशाखे शुक्लपक्षे तु द्वादशी वैष्णवी तिथिः ।
तस्यां शीतलतोयेन स्नापयेत् केशवं शुचिः ॥”
इयं पिपीतकद्वादशी । अथ ।
“मद्यीयमेता कन्या यद्यमी मास्मीयुता ।
पवन्नोपासनायेह महामाहुर्मनीषिणम् ।
एकादश्यां प्रकुर्व्वन्ति उपवासं मनीषिणः ।
उपासनाय द्वादश्यां विष्णोरुद्दिश्य तथा ॥”
इति भविष्यपुराणेन एकादश्युपवासासमर्थे द्वादश्यां विष्णुपासनाया उक्तत्वात् । अस्माभि तथा धन्यवन्तीति नाम प्रमादरः । द्वादशी पक्षे नूपवासानन्तरं निर्णयं पूर्वेति । इय पूर्व्ववचनोक्ता मद्युता धन्नी । आषाढादिद्वादशीषु शयनादिकम् ॥ * ॥

अथ श्रवणद्वादशी ।
सा भाद्रशुक्लद्वादश्यामेव सम्भवति । “भविष्योत्तरे ।
‘द्वादशी श्रवणोपेता सर्व्वपापहरा तिथिः ।
बुधवारसमायुक्ता तत्र शतगुणा भवेत् ।
तामुपोष्य समाप्नोति द्वादशद्वादशीफलम् ।
उभयान्ते तत्राभि तु एकादशीयुतैव याह्या ।
‘द्वादशी च प्रकर्त्तव्या एकादश्यान्विता विभो ।
सदा कार्य्या च विद्वद्भिर्विष्णुभक्तैश्च मानवैः ॥’
इति स्कान्दात् ॥
यदा त्रिकादश्यामेव श्रवणा तदा तामुपवसेत् ।
तथा च नारदः ।
‘सा कार्त्तिकेयपद प्रोक्ता पुण्या श्रवण योगतः ।
तामेव समुपोष्य कुर्यात् श्रवणद्वादशीं विना ।
भविष्योत्तरेऽपि ।
‘एकादशी यदा तु स्यात् श्रवणेन समन्विता ।
विजया सा तिथा प्रोक्ता भक्तानां विजयप्रदा ।
तिथिनक्षत्रसंयोग उपवासो यदा भवेत् ।
तावदेव न भोक्तव्यं यावन्नैकस्य सङ्क्षयः ॥
विद्धेयं मनीषाय । अवशं बहुत यदि ।
तिथिनक्षत्रैः भोजनं द्वादश्यां नैव लङ्घयेत् ।
तिथिमध्ये एकादश्यां तिथ्यन्ते भोजनं
द्वादश्यां पारणेऽस्तु च । अथ पिङ्गद्वादशीमिषादि । यत्र निकादश्युपवासान्तर श्रवण
नाक्ति दर्शन्ते द्वादशी श्रवण न्दीवरादस्व
माह मन्दरेवर्णे ।
‘महाद्वादशीमुप्नोद्धैव द्वादशी श्रवणोन्वितैः ।
न ताव तिथितिन्दा श्राद्धमपर्दं तथा कुरु ।
अथ श्रवणे यदि पूर्व्वे वैव कृष्णादशमान्तर
मिति स्मृति । द्वादश्यवसरेण पूर्व्वोपवास
उपवासानन्तरारम्भे विधिलोपो न भवेत् अर्थं चैतुमाह उभयोरित्यादि । उभयोरुपवासाशामर्थ्ये तु श्रवणद्वादशीमेवोपोष्या । तथा च स्मृतिः ।
वरमेकादशीं मुक्ता द्वादशीं समुपोषयेत् ।
पूर्व्वोपवासजं पुण्यं सर्व्वं प्राप्नोत्यसंशयम् ॥
उपोष्य द्वादशीं पुण्यां विष्णुऋक्षेण संयुताम् ।
एकादश्युद्भवं पुण्यं नरः प्राप्नोत्यसंशयम् ॥
द्वादश्युपवासः कार्य्यः । तथा च मार्कण्डेयपुराणम् ।
‘द्वादश्यामुपवासेन शुद्धात्मा नृप । सर्व्वदा ।
चक्रवर्त्तित्वमतुलं संप्राप्नोत्यतुलां श्रियम् ॥”
कार्त्तिकशुक्लद्वादशी मन्वन्तरा । “तथा च भविष्यमत्स्ययोः ।
‘अश्वयुक्शुक्लनवमी द्वादशी कार्त्तिकी तथा ।
इत्यादिवचनात् ।” इति तिथितत्त्वम् ॥ * ॥
“अथ चापदशुक्लद्वादशी श्रवणद्वादशी । तस्योपोष्य विष्णुप्रतिकामोऽसकद्वादश्यां विष्णुपूजयेत् इति सङ्कल्प्य यथाविधि आपाद्य यथाशक्त्युपचारेण संपूज्य वक्ष्यमाणमिदं पुष्पाञ्जलि प्रदद्यात् ।
ॐ श्रवणस्तु यत्क्षितिविजया सञ्चरत ततम् ।
भक्तवत्सलयादेव तदवस्थमिहास्तु मे ॥
यथा त्वत्र जगत् सर्व्वं त्वमेव पुरुषोत्तम ॥
ततोऽभिनान्दसकलानि व्रतानि मम सन्तु वै ।
इति मार्षं दत्त्वा दद्यात् ।” इति कृत्यचन्द्रिका ॥
भैमीपरद्वादशी वटतिलावटम् । यथा विष्णुधर्म्मोत्तरे ।
“समभ्यर्च्च्य प्रहरे माघी माघि प्रयान्ति ॥
एकादश्यां सिते पक्षे भीमवायो विशेषतः ।
द्वादश्यां वटतिलानां कृत्वा पापात् प्रमुच्यते ।
तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी ।
तिलस्य दाता भोक्ता च षट्तिली नावसीदति ॥
अस्तु वटतिली भूमा एकादश्यां प्रमुच्यते ।
चिरदत्तसहस्राणि सत्याद्वै मर्त्त्यलोके ॥”
अथ गोविन्दद्वादशी ।
“फाल्गुने शुक्लपक्षे तु पुष्यर्क्षे द्वादशी यदि ।
गोविन्दद्वादशी नाम महापातकनाशिनी ॥”
अत्र गङ्गायां पद्मपुराणोक्तो मन्त्रः ।
“महापातकसंज्ञानि यानि पापानि सन्ति मे ।
गोविन्दद्वादशीं प्राप्य तानि मे हर जाह्नवि ॥”
इति तिथ्यादितत्त्वम् ॥

अथ द्वादशीमाहात्म्यम् ।
“कुरुक्षेत्र समं कश्चिद्वादशी
भूलोकमाधारकर्त्तृ दिदं कथम् ।
कृत्वा द्वादशी धन्य स्वर्गे
ज्ञानी एको धन्यद्वादशी ॥”
इति कल्पद्रुमः ।

द्वापरः पुं (द्वयोः परः तृतीयः प्रकारान्तर वाचक शब्दः । पृषोदरादित्वात् साधुः ।) सन्देहः । (द्वौ वर्षपृथुकौ रत्नसौ यत्र ।) युगविशेषः । इत्यमरः । १ । ४ । १६१ ॥ अस्य परिमाणादि यथा —

अम्बरीष उवाच ।
"कीदृशाय प्रदातव्यं महादानं द्विजातये ।
विद्वते वा निराधारे साधारेऽविदुषे मुने ॥
एतन्मे ब्रूहि सर्व्वज्ञ यथातथ्यं द्विजोत्तम ।
उपाध्यायश्च संपन्नो दातारं दानमेव हि ॥"
वशिष्ठ उवाच ।
"जात्या कुलेन वृत्तेन स्वाध्यायेन श्रुतेन च ।
एभिर्युक्तो हि यस्तिष्ठेत् नित्यं स द्विज उच्यते ॥
न जातिर्न कुलं राजन् ! न स्वाध्यायः श्रुतं न च ।
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥"
इति वह्निपुराणे प्रेतोपाख्याननामाध्यायः ॥
क्षत्त्रियः । वैश्यः । इति मेदिनी । जे, १० ॥
(यथा, याज्ञवल्क्ये । १ । ३९ ।
"मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ।
ब्राह्मणक्षत्त्रियविशस्तस्मादेते द्विजाः स्मृताः ॥"
दन्तः । (यथा,—
"न छिन्द्यान्नखरोमाणि दन्तैर्नोत्पाटयेन्नखान् ।" इति चरके सूत्र
स्थानेऽष्टमेऽध्याये ।) अण्डजः । स पक्षिसर्पमत्स्यादिः । इत्यमरः । ३ । ३ । ३ ॥ (यथा, रघुः । १२ । २९ ।
"येन द्विजा मसीमस्तस्य विन्दास्तनौ द्विजः ।")
तुम्बुरुवृक्षः । इति राजनिर्घण्टः ॥ द्विजातौ, त्रि ॥
द्विजकुत्सित, पुं, (द्विजानां द्विजेषु वा कुत्सितः । द्विजानां तद्धर्म्मनिषेधात् तथात्वम् ।) श्लेष्मातकवृक्षः । इति राजनिर्घण्टः शब्दमाला च ॥
द्विजदास, पुं, (द्विजानां दासः ।) शूद्रः । इति राजनिर्घण्टः ॥ द्विजानां दासे, त्रि ॥
द्विजन्मा [न्] पुं, (द्वे जन्मनी यस्य ।) ब्राह्मणः ।
(यथा, देवीभागवते । ५ । ५ । ३ ।
"पतीनां मुखजः प्राप्त सन्तोषो हि द्विजन्मनाम् ॥")
दन्तः । पक्षी । इति शब्दरत्नावली ॥ क्षत्त्रियः । वैश्यश्च । त्रि द्विजन्मसंयुक्तः । (द्वाभ्यां जाय मानः । यथा, ऋग्वेदे । १ । १४० । २ ।
"अभिद्विजन्मा त्रिवृदन्नमृज्यते
संवत्सरे वावृधे जग्धमी पुनः ॥"
"द्वाभ्यामरणीभ्यां जायमानत्वात् मन्त्र मथने
नाधानसंस्कारेण चोत्पन्नत्वात् द्विजन्मत्वम् ।"
इति तद्भाष्ये सायणः ।)
द्विजपति, पुं, (द्विजानां पतिः ।) चन्द्रः । इति त्रिकाण्डशेषः ॥ (यथा, देवीभागवते । १ । १९ । ३९ ।
"क्रूराणि वैरमाणेऽनि भावयन्ति हृदयम्
श्रुत्वा द्विजपतिं धीमं निरतं सत्याद्वृतम् ॥")
द्विजप्रपा, स्त्री, (द्विजानां पक्षिणां प्रपा ।) आलवालम् । तत्पर्य्यायः । गलम् १ त्रिशम् २ नवम् ३ । इति त्रिकाण्डशेषः ॥
द्विजप्रिया स्त्री, (द्विजानां यज्ञिकब्राह्मणादीनां प्रिया ।) सोमलता । इति राजनिर्घण्टः ॥
द्विजस्य प्रियवस्तुनि, त्रि ॥
द्विजबन्धु पुं, (द्विजस्य बन्धुरिव ।) जनाभिक स अवैश्वादिः । यथा,—
"स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा ।"
इति स्मृतिः ॥

द्विजब्रुव पुं, (आत्मानं द्विजं ब्रूते इति । ब्रू + क । ब्राह्मणब्रुवः । स च जातिमात्रोपजीवी ब्राह्मणः । इति हेमचन्द्रः । ३ । ५१८ ॥ यथा —
"अव्रतानामनधीयानं यत्र भैक्षचरा द्विजाः ।
तं ग्रामं दण्डयेद्राजा चौरभक्तप्रदं हि तत् ॥"
इति स्मृतिः ॥
द्विजराज, पुं, (द्विजानां राजा । "राजाहः-सखिभ्यष्टच् ।" ५ । ४ । ९१ । इति टच् ।) चन्द्रः ।
(यथा, देवीभागवते । १ । ११ । ७० ।
"द्विजराजस्तु संश्रुत्वा भर्त्तोर्व्वचनमद्भुतम् ।
दत्तवतर्प्रियां भार्य्यां गुरोगर्भवतीं शुभाम् ॥")
कर्पूरः । इत्यमरः ॥ अनन्तः । गरुडः । इति मेदिनी । जे ३९ ॥
द्विजलिङ्गी, [न्] पुं, (द्विजस्य लिङ्गं चिह्नमस्यास्तीति । इनिः ।) क्षत्त्रियः । इति त्रिकाण्डशेषः ॥ ब्राह्मणवेशधारिणि, त्रि ॥ (यथा, मनुः । ९ । २२४ ।
"द्यूतं समाह्वयञ्चैव यः कुर्य्यात् कारयेत वा ।
तान् सर्व्वान् घातयेद्राजा शूद्रांश्च द्विजलिङ्गिनः ॥")
द्विजवण पुं (द्विजस्य दन्तस्य व्रण इव ।) दन्तार्बुदः । इति राजनिर्घण्टः ॥
द्विजव्रण, पुं, (द्विजे व्रणः ।) दन्तव्रणः । इति शब्दचन्द्रिका ॥ परवटी इति भाषा ॥
द्विजसेवक, पुं, (द्विजानां सेवकः ।) शूद्रः । इति शब्दरत्नावली ॥ विप्रसेवाकर्त्तरि, त्रि ॥
द्विजा, स्त्री, (द्विजायते इति । जन् + डः । टाप् ।) रेणुकानामगन्धद्रव्यम् । इत्यमरः । २ । ४ । १२२ ॥
(अस्याः पर्य्यायो यथा,—
"रेणुका राजपुत्त्री च नन्दिनी कपिला द्विजा ।
भस्मगन्धा पाण्डुपुत्त्री स्मृता कौन्ती हरेणुका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
भार्गी । इति मेदिनी । जे, ९ ॥ पालङ्की । इति शब्दचन्द्रिका ॥
द्विजाङ्गी, स्त्री (द्विजस्य पक्षिणोऽङ्गमिव अङ्गं यस्याः । ङीष् ।) कटुका । इति राजनिर्घण्टः ॥
द्विजाति, पुं (द्वे जाती यस्य ।) ब्राह्मणः । इत्यमरः । २ । ७ । ४ ॥ (यथा, महाभारते । १ । ७४ । ९१ ।
"वेदेष्वपि वदन्तीमं मन्त्रवाक्यं द्विजातयः ।")
अण्डजः । इति मेदिनी । ते ११३ ॥ क्षत्त्रियः । वैश्यः । यथा,—
"शूद्रो द्विजातिभिर्ज्जातो न भूमेर्भागमर्हति ।"
इति स्मृतिः ॥
(यथा च मनुः । १० । ४ ।
"ब्राह्मणः क्षत्त्रियो वैश्यस्त्रयो वर्णा द्विजातयः ।
चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः ॥")
द्विजायनी, स्त्री, (द्विजं अयनी प्रापयतीत्ययनी । अय + कर्त्तरि ल्युट् । स्त्रियां ङीप् ।) यज्ञोपवीतम् । इति शब्दरत्नावली ॥
द्विजालय, पुं (द्विजानां पक्षिणामालयः ।) कोटरम् । इति शब्दचन्द्रिका । द्विजानां गृहञ्च ॥

द्विजिह्व, पुं (द्वे जिह्वे यस्य ।) सर्पः । (अस्य पर्य्यायो यथा वैद्यकरत्नमालायाम् ।
'व्याडश्चाशीविषः सर्पो द्विजिह्वोऽहिः सरीसृपः ।
चक्षुःश्रवा दन्दशूको गूढपात्पवनाशनः ॥")
सूचकः । इत्यमरः । ३ । ३ । १४१ ॥ (यथा, माघे । १ । ६२ ।
"परस्य मर्म्माविधमुज्झतां निज-
द्विजिह्वतादोषमजिह्मगामिभिः ।")
खलः । इति मेदिनी । वे, १२ ॥ चौरः । दुःसाध्यः । इति शब्दरत्नावली ॥ (रोग विशेषः । यथा सुश्रुते निदानस्थाने १४ अध्याये ।
"शोथो द्विजिह्वः खलु रोग एष
विवर्ज्जयेदागतपाकमेनम् ॥"
त्रि, जिह्वाविशिष्टः । यथा, महाभारते ।
१ । ३४ । २४ ।
"द्विजिह्वाश्च कृता सर्पा गरुडेन महात्मना ।")
द्विजोत्तम पुं (द्विजेषु उत्तमः ।) ब्राह्मणः ।
इति हलायुधः ॥ (यथा, मनुः । २ । ४८ ।
"भवत्पूर्ब्बं चरेद्भैक्षमुपनीतो द्विजोत्तमः ॥")
द्विट्, [ष्] पुं, (द्वेष्टीति । द्विष + क्विप् ।) शत्रुः । इत्यमरः । २ । ८ । ११ ॥ (यथा, महाभारते । ७ । १६ । ४७ ।
"तस्मिन् जीवति पापिष्ठे सैन्धवे मम द्विषि ।
तत् कथं कृतवान् सख्य कथं निद्रां निषेवसे ॥")
द्वेष्टरि, त्रि । (यथा, रघौ । ३ । ४५ ।
"विरोधकारणेन सदा मखद्विषः-
क्वया नियम्या ननु दिव्यचक्षुषा ॥")
द्विठ, पुं, अग्निजाया । स्वाहा । विसर्गः । इति तिलकादीयरत्नम् ॥ ठकारद्वयम् ॥
द्वितयं, स्त्री, (द्वौ अवयवौ अस्य । द्वि + "संख्याया अवयवे तयप् ।" ५ । २ । ४२ । इति तयप् ।)
द्वयम् । इति हेमचन्द्रः । ६ । ५० । १९ ॥
(यथा भागवते । ५ । २२ । ४ ।
"अत ऊर्द्ध्वमङ्गारकोऽपि योजनलक्षद्वितय उप लभ्यमानस्त्रिभिस्त्रिभिः पक्षैरेकैकशो राशीन् द्वादशानुभुङ्क्ते ।" द्विसंख्याविशिष्टे, त्रि ।
यथा, रघुः । ८ । ९ ।
"हुमगादमतां हिमसारे
यदि वायौ द्वितयेऽपि ते चलाः ॥")
द्वितीय त्रि, (द्वयोः पूरणम् । द्वि + "द्वेस्तीयः ।" ५ । २ । ५४ । इति तीयः ।) द्वयम् । इति हेमचन्द्रः । ६ । १०७ ॥ (यथा, रघुः । ७ । ३९ ।
"तथा विदुमा मुखम ग्रहकर्तुं
द्वितीयगामी न हि शब्द एव नः ॥")
द्वितीय, पुं, (द्वयोः पूरणः । आत्मनो द्वितीयत्वादेः तथात्वम् ।) पुत्रः । इति त्रिकाण्डशेषः ॥
द्वितीया स्त्री (द्वितीय + टाप् ।) गेहिनी । भार्य्या । इत्यमरः । २ । ६ । ६ ॥ तिथिविशेषः । सा चन्द्रस्य द्वितीयकलाक्रियारूपा । शुक्लपक्षे द्वितीयो मात्रामं ब्राह्मणसिद्धः । इति ज्योति षम् ॥ सा च यादिनीकुमारयोर्जन्मतिथि यथा,—

भद्रोवाच ।
"रूप कान्तिरनौपम्य मिष्टत्वं सर्व्ववस्तुषु ।
धामपत्नञ्च लोकेषु सर्व्वमेतद्भविष्यति ॥
महातपा उवाच ।
एतत् सर्व्वं द्वितीयायामश्विभ्यां भद्रया पुरा ।
दत्त यस्मात्ततस्तेषां तिथीनामुत्तमा तिथिः ॥
एतस्यां रूपकामस्तु पुष्पाहारो भवेन्नरः ।
संवत्सरं शुचिर्नित्यं सुरूपी भवेन्नरः ॥
अश्विभ्यां ये गुणाः प्रोक्तास्ते तस्यापि भवन्ति च ॥"
इति वराहपुराणम् ॥

अथ जातफलम् ।
"निखिलगुणगभीरो दानशीलो दयालु
स्वकुलकुमुदचन्द्रः स्वच्छचित्तोऽतिशूरः ।
निजभुजबलगर्व्वाच्छादितारातिवर्गो
भवति विपुलकीर्त्तिर्यो द्वितीयाप्रसूतः ॥"
इति कोष्ठीप्रदीपः ॥

अथ रथद्वितीया । स्कन्दपुराणे ।
"आषाढ़स्य सिते पक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ॥
यात्रोत्सवं प्रवर्त्त्याथ प्रीणयेच्च द्विजान् बहून् ।
ऋक्षाभावे तिथौ कार्य्या सदा सा प्रीतये मम ॥
सा यात्रा । मां जगन्नाथम् ॥

अथ मनोरथद्वितीया ।
सा आषाढ़शुक्लद्वितीया । 'मनोरथद्वितीयायां दिवा वासुदेवार्च्चनं रात्रौ चन्द्रोदयेऽर्घ्यदानं नक्तञ्च भोजनान्तिकम् ॥' यथा विष्णुधर्म्मोत्तरे ।
'देवमभ्यर्च्य पुष्पैस्तु धूपदीपानुलेपनैः ।
उद्गच्छतश्च चन्द्रस्य दद्यादर्घ्यं समाहितः ॥
नक्तं भुञ्जीत च नरो यावत्तिष्ठति चन्द्रमाः ।
अस्तं गते न भुञ्जीत व्रतभङ्गभयान्नरः ॥'

अथ भ्रातृद्वितीया । लिङ्गपुराणे ।
'कार्त्तिके तु द्वितीयायां शुक्लायां भ्रातृपूजनम् ।
या न कुर्य्याद्विनश्यन्ति भ्रातरः सप्तजन्मनि ॥
सप्ता इति शेषः ॥ महाभारते ।
'कार्त्तिके शुक्लपक्षे तु द्वितीयायां युधिष्ठिर ! ।
यमो यमुनया पूर्व्वं भोजितः स्वगृहे स्वयम् ॥
तस्मां निजगृहे पार्थ ! न भोक्तव्यमतो बुधैः ।
यत्नेन भगिनीहस्ताद्भोक्तव्यं पुष्टिवर्द्धनम् ॥
दानानि च प्रदेयानि भगिनीभ्यो विधानतः ॥'
तथा ।
यमञ्च चित्रगुप्तञ्च यमदूतांश्च पूजयेत् ।
अर्घ्यश्चात्र प्रदातव्यो यमाय सहजद्वये ॥
सहजः सप्तभगिनीभ्योऽधिकम् । अर्घ्यमन्त्रः ।
ॐ एह्येहि मार्त्तण्डज पाशहस्त
यमान्तकालोकधरामरेश ! ।
भ्रातृद्वितीयाकृतदेवपूजां
गृहाण चार्घ्यं भगवन्नमस्ते ॥
प्रणाममन्त्रः ।
ॐ धर्म्मराज नमस्तुभ्यं नमस्ते यमुनाग्रज ।
पाहि मां किङ्करैः सार्द्धं सूर्य्यपुत्र नमोऽस्तु ते ॥
यमुनाया मन्त्रः यमुनां स्तुवीत ।
ॐ यमस्वस्रर्नमस्तेऽस्तु यमुने लोकपूजिते ।
वरदा भव मे नित्यं सूर्य्यपुत्रि ! नमोऽस्तु ते ॥
अत्र दत्त्वा पठति ।
भ्रातस्तवानुजाताहं भुङ्क्ष्व भक्तमिदं शुभम् ।
प्रीतये यमराजस्य यमुनाया विशेषतः ॥
ज्येष्ठा तथा पूर्ब्बजाताहमिति वदेत् ।
तथा यमद्वितीयायां याम्यायां मरणं भवेत् ॥
अशून्यद्वितीया यथा ।
प्रबोधे च द्वितीयाकाले प्रेतपक्षे गते तु या ।
या च कोजागरे जाते चैत्रापक्षा परेऽपि या ॥
चातुर्म्मास्ये समाप्ते च द्वितीया या भवेत्तिथिः ।
महाशून्यश्चेताः पुराणे परिकीर्त्तिताः ॥"
इति तिथितत्त्वम् ॥
"प्रपयोमाधमासस्य द्वितीयां परिवर्ज्जयेत् ॥"
इति विष्णुपुराणम् ॥

द्वितीयाकृत, त्रि, (द्वितीय कथय कृतमिति । "संख्या द्वितीयतृतीयशम्बबीजात् कृषौ ।" ५ । ४ । ५८ । इति डाच् ।) वारद्वयकृष्टक्षेत्रम् । इत्यमरः ।२।९।९। दोचषा भूइ इति भाषा ॥

द्वितीयाभा, स्त्री, (द्वितीया हरिद्रावत् आभा-तीति । आ+भा+क ।) दारुहरिद्रा । इति शब्दचन्द्रिका ॥

द्विधा, अ, (द्वौ वा प्रकारौ वा । "संख्याया विधार्थे धा ।" ५ । ३ । ४२ । इति धा ।) द्विप्रकारम् । इति मुग्धबोधम् ॥ (यथा, देवीभागवते । १ । ११ । ५ ।
"यथा दीपप्रभोपाधिर्भाति दर्पणे द्विधा ।
दर्शनेऽर्करश्मौ वा प्रतिबिम्बं तथावयोः ॥")

द्विधागति, पुं, (द्विधा द्विप्रकारा गतिर्यस्य ।) कुम्भीरः । इति हेमचन्द्रः ।४।४१७॥ द्विप्रकार-गत्युक्ते, त्रि ॥

द्विधातु, पुं, (द्वौ धातू यस्य । ऐश्वर्य्यद्वैतन्यद्वैताख्य तथात्वम् ।) गणेशः । इति शब्दरत्नावली । (द्वौ धातू ताम्रादिधातुद्वयं यत्र ।) धातुद्वये, त्री ॥

द्विधात्मक, क्ली, (द्विधा आत्मा यस्य । कप् ।) जातीकोषम् । इति शब्दचन्द्रिका ॥

द्विधालेख्य, पुं, (द्विधा लिख्यते यत्र । लिख+आधारे ण्यत् ।) द्विधालेख्यम् । इति राजनिर्घण्टः । द्विप्रकारलेखनीये त्रि ॥

द्विनग्नक, पुं, (द्विरितीयो नग्नक इव ।) दुश्चर्म्मा । इति हेमचन्द्रः ॥

द्विप, पुं (द्वाभ्यां शुण्डमुखाभ्यां पिबतीति । पा+क ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा, माघे । ३ । ६० ।
"तिलोमदद्विपस्तम्बरथैर्दीर्घैः
हिमैरथमाधमयामभूपे ॥")
पुं, नागकेशरः । इति रत्नमाला ॥

द्विपथ क्ली, (द्वयोः पथोः समाहारः । तद्धिता-र्थेत्यादिना समासः । "ऋक्पूरब्धूःपथामानक्षे ।" ५ । ४ । ७४ । इति अः ।) पथद्वयम् । दोमाता पथ इति भाषा । तत्पर्य्यायः । चत्वरम् २ । इति हेमचन्द्रः । ४ । ५२ ॥ द्वौ पन्थानौ यस्मिन् द्वये, त्रि ॥

द्विपद, पुं, (द्वे पदे यस्य ।) मनुष्यः । (यथा, महाभारते । १ । ७४ । ५६ ।
"मानुषो द्विपदां श्रेष्ठो गौर्वरिष्ठश्चतुष्पदाम् ॥")
देवः । पक्षी । राक्षसः । यथा प्रश्नसारे ।
"द्विपदेऽपि चतुर्भेदा नृदेवपक्षिराक्षसाः ॥"

द्विपदराशि, पुं (द्वे पदे यस्य । स चासौ राशि-श्चेति ।) मिथुनम् । तुला । कुम्भः । कन्या । धनुष पूर्व्वार्द्धम् । यथा ज्योतिस्तत्त्वे ।
"मिथुनतुलाघटकन्याद्विपदाख्या धनुषपूर्व्व-भागश्च ॥"

द्विपमद, पुं (द्विपस्य हस्तिनो मदः ।) हस्ति-मदः । इति राजनिर्घण्टः ॥

द्विपर्णी, स्त्री (द्वे द्वे पर्णे यस्याः । ङीप् ।) वन-कोली । इति रत्नमाला ॥ पत्रद्वययुक्ते त्रि ॥

द्विपात्, [द्] त्रि, द्वौ पादौ यस्य सः । (पादस्य पाद्भावः ।) पादद्वययुक्तः । इति मुग्धबोध-व्याकरणम् ॥

द्विपाद्य क्ली, (द्वौ पादौ परिमाणमस्य । "दण्ड-पादमासकुमारात् यत् ।" ११ । ३४ । इति यत् ।) द्विगुणदण्डः । इत्यमरः । २ । ८ । २७ ॥

द्विपायी [न्] पुं (द्वाभ्यां शुण्डमुखाभ्यां पिब-तीति । पा+णिनि ।) हस्ती । इति भरत-धृतो । २७ ॥

द्विपुट, पुं (द्वौ पुटौ यस्य ।) राजभेदः । तत्-पर्य्यायः । अष्टकर्णः २ । इति हेमचन्द्रः । २ । ३१८ ॥

द्विबिन्दु पुं, (द्वौ बिन्दू यत्र ।) विसर्गः । यथा,
विसर्गद्विबिन्दुमात्रो वर्णौ शकारौ वर्णौ च ।
इति मुग्धबोधव्याकरणम् । जन्मनुर्बर ॥

द्विमन्त्रक, पुं (द्वाभ्यां मन्त्राभ्यां जायते इति । जन+ड ।) ब्राह्मणः । इति हेमचन्द्रः ।३।४६५ ॥

द्विमुख, पुं, (द्वे मुखे यस्य ।) राजसर्पः । इति रत्नाकरः । द्वयमुखयुक्ते, त्रि ।

द्विमुखा स्त्री, (द्वे मुखे यस्याः ।) जलौका । इति शब्दरत्नावली । जोंक इति भाषा । पर्य्यायः ।

इति हलायुधः । जोँक इति भाषा । (यथा सुश्रुते उत्तरतन्त्रे । ४४ अध्याये ।
"चरन्ती द्विरसनाग्रेण धमन्येते पुरोगमा ।")
द्विरसनाशिन्, पुं, (द्विरसनं अश्नाति भक्षयति ।) सर्पविशेषः । ग्राँखिनी इति भाषा । तत्पर्य्यायः । अहिरिपुः २ रेखाभिः ३ रोजवपः ४ द्विरसन ५ सर्पभुक् ६ । इति हलायुधः ॥
द्विरसनोरग, पुं, (द्विरसन उरगः सर्पः ।) राजसर्पः । इति जटाधरः ॥
द्विरङ्ग, त्रि, (द्वौ रङ्गौ यस्य । "द्विबिभ्यां च सूर्द्ध्नः ।" ५ । ४ । ११५ । इति षः ।) मस्तकद्वययुक्तः । इति मुग्धबोधव्याकरणम् ॥ (यथा, भट्टिः । ४ । ४१ ।
"बहुसूर्द्धा द्विसूर्द्धा च त्रिसूर्द्धा च हता न्यधेः ।")
द्विरद, पुं स्त्री, (द्वौ रदौ दन्तौ प्रधानतया यस्य ।) हस्ती । इत्यमरः । २ । ८ । ३४ ॥ (यथा महाभारते । ७ । २६ । ७० ।
"शोभयन् तथा सेनां द्विरद नलिनीमिव ।
धनञ्जय भुजगया साधु सात्त्विकपूजयम् ॥")
द्विरदान्तक, पुं, (द्विरदानां हस्तिनां अन्तकः ।) सिंहः । इति राजनिर्घण्टः ॥
द्विरशन, क्ली (द्विवारमशनं भोजनम् ।) वारद्वयभोजनम् । यथा,—
"सुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्त्यवासिनां नित्यम् ।
अहनि च तमस्विन्यां सार्द्धप्रहरयामान्तः ॥"
इति तिथ्यादितत्त्वम् ॥
द्विरसन, पुं (द्वे रसने जिह्वे यस्य ।) सर्पः । इति हारावली । १५ ॥
द्विरागमन, क्ली, (द्विवारं विवाहात् परं आगमनं भर्त्तृगृहे इत्यर्थः ।) विवाहानन्तरं वध्वाः पितृगेहात् पतिगृहे पुनरागमनम् । यथा, नारायणपद्धतौ ।
"उत्ते मासि यथा गेहात् पितुः पतिगृहं प्रति ।
पुनरागमनं वध्वास्तद्द्विरागमनं विदुः ॥"
तस्य शुभकालादिर्नाभिन्नं यथा । दीपिकायाम् ।
"रवौ गुरुशोणितघटालवृषतुलनर्गौ क्ष्माभिर्विरह्वे धनुं
षष्ठ्यन्त्य प्रतिलोमभे गुरुमन्ये भाभावेशोविदे ।
सप्तांशगुरु तिरयेक नववृषाभाप्रेथौ पति
कुर्व्यादकपुरादिषु प्रतिभागेन चलितं दोषं बुधाः ।
पैशागारे कुष्णकुसुमयौ ममशो वा यदि स्यात्
काश्च शुद्धी न भवति यत्र धवलो वापि शुक्रः ।
मैत्री कुम्भेऽलिनि च न भवेत् भास्करेणैव तथापि
ज्वाभी भद्रेश्वरि भवनं वैद्युतेन्द्रमन्दिर भवम् ।
भवनगौचरयोमले स्थिततो नाक गते भानवी
सूर्य्ये कीटघटाजगे शुभदिने दर्पे च कन्येतर ।
द्विजा च प्रतिकामगी गुरुसिती कोमस्य शुद्धौ तथा
चामीनां शुभमालिकी कमलभूर्नियोऽनुभवा मोदते ॥
एकग्रामे चतुर्ग्रामे दुर्भिक्षे राष्ट्रविप्लवे ।
प्रतिशा कौमारावायाः शुद्धः शुक्रो न दुष्यति ॥"
यथा,—
"काश्यपेषु वशिष्ठेषु भृग्वादिष्वत्रिषु तु च ।
भारद्वाजेषु वात्स्येषु प्रतिशुक्रो न दोषभाक् ॥"
श्रीपतिच त्रिपातो प्रवेता ।
"पुष्यादित्यमवीरत्यादिति वसुमच्युत्तरारेवती
तारानायकरोहिणीषु शुभदे मेषालिकुम्भे रवौ ।
वारे जिष्णुसितेन्दुविशु शुभदे तारे च शुद्धे विधौ
कन्यामकरमीनतौलिवृषभे स्यात् स्त्रिया
द्विरागमः ॥"
ज्योतिःसारसंग्रहे ।
"विवाहमासि प्रथमे वध्वा नागमनं यदि ।
तदा सर्व्वमिदं चिन्त्य युगायुग्मे विचक्षणैः ॥"
श्राद्धचिन्तामणौ ।
"युग्मे युग्मसमे वर्षे युग्मर्क्षे द्व्यादिके ।
यद्यामे द्वारके वर्षे पतिं कल्पि द्विरागमे ॥"
भतृसङ्कर्षे ।
"सुताः पिबन्ति कन्या भुक्ते स्वामिनं यदि ।
सौभाग्य जायते तस्याः प्रवदन्ति कुलनायिकाः ॥"
इति ज्योतिस्तत्त्वम् ॥
निबन्धेषु ।
"विवाहमासि प्रथममनागताया वध्वा अष्टमदशमद्वादशेष्वर्षेषु कालशुद्धौ मेषकुम्भवृषभोषे चापगुरुपन्तिमवारे रविशुद्धौ सोमबुधगुरुशुक्रान्यतमवारे चन्द्रताराशुद्धौ रोहिणीपुनर्वसुमघाशिरःपुष्योत्तरात्रयहस्तास्वातीधनिष्ठारेवतीषु तिथिभिन्नकरणेषु निषिद्धतरयोगेषु कन्यामिथुनतुलामीनलग्नेषु द्विरागमनम् ।
शास्त्रनिषिद्धे बुधवारेऽपि निषिद्धः ।
प्रत्युद्यदितुसमागमनं गमनमभिनवनारीणाम् ।
यमभपि यात्रादीनां न बुधो बुधवारे कुर्य्यात् ॥"
इति समयप्रकाशः ॥
द्विराप, पुं, (द्विर्द्विवारं सुखशुण्डाभ्यामित्यर्थः आपः जलं पिबतीति । पा + क ।) हस्ती । इति शब्दमाला ॥
द्विराषाढ, पुं (द्वि आषाढः ।) मिथुनस्थरव्यारब्धशुक्लप्रतिपदादिमलमासद्वयम् । स च आषाढमलमासे भवति । यथा, ज्योतिषे ।
"मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥"
भविष्ये च ।
"माघादिषु षट्केषु मासि दर्शद्वयं यदा ।
द्विराषाढः स विज्ञेयः शेते तु श्रावणेऽच्युतः ॥"
इति मलमासतत्त्वम् ॥
अन्यच्च ।
"पौर्णमास्या द्वय यत्र पूर्व्वाषाढाद्वयं भवेत् ।
द्विराषाढः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥"
इति राढदेश आचार ॥
द्विरुक्त, त्रि, (द्विर्द्विवारं यथा तथा उक्तः ।) द्विवारकथितः । यथा । द्विरुक्तपदाद्वि त्रि । इति मुग्धबोधव्याकरणम् ॥
द्विरुक्ति, स्त्री, (वच + क्तिन् । द्विर्द्विवारं उक्तिः ।) द्विवारकथनम् । इति व्याकरणम् ॥
द्विरूढा, स्त्री, (ऊढ्यते इति । वह + कर्म्मणि क्तः । द्विः ऊढा विवाहिता ।) द्विवारविवाहिता । तत्पर्य्यायः । दिधिषूः २ पुनर्भूः ३ । इति हेमचन्द्रः । ३ । १९८ ॥
द्विरूप, पुं, (द्वौ रूपौ आकारौ यत्र ।) द्व्याकारशब्दानि । यथा । द्विरूपकोषादि । द्विवारमन्याहर्त्ति । यथा । द्विरूपचक्राणिपाद । रूपद्वययुक्ते, त्रि ॥
द्विरेफ, पुं स्त्री (द्वौ रेफौ रकारवर्णौ यस्य भ्रमर नाम्नि ।) भ्रमरः । (यथा, कुमारे । ३ । २७ ।
"निवेशयामास मधुर्द्विरेफान्
नामाक्षराणीव मनोभवस्य ॥")
बर्ब्बरे त्रि । इत्यमरः ॥
द्विवर्षा, स्त्री, (द्वौ वर्षौ वयःपरिमाणमस्याः । द्विवर्ष + आर्हीयष्ठक तस्य लुक् च ।) द्विहायनी । द्विवत्सरवयस्का गौः । इत्यमरः । २ । ९ । ६७ ॥
द्विवर्षिका स्त्री, (द्विवर्षैव । स्वार्थे कन् । टापि "प्रत्ययस्थादिति ।" ७ । ३ । ४४ । इति अत इत्वम् ।) द्विवर्षा गौः । इति हेमचन्द्रः । ४ । ३३८ ॥
द्विवर्षीण, त्रि (द्वौ वर्षौ वयःपरिमाणमस्य । द्विवर्ष + ख ।) द्विहायनः । द्विवर्षवयस्कः । इति सिद्धान्तकौमुदीव्याकरणम् ॥
द्विवार्षिक त्रि, (द्विवर्षे भवः । ठञ् ।) द्विवर्षे भवः । वत्सरद्वयजातः । इति व्याकरणम् ॥
द्विवाहिका, स्त्री, (द्वाभ्यां पार्श्वाभ्यां वाहयतीति । वह + णिच् + ण्वुल् । टापि अत इत्वम् ।) दोला । इति शब्दमाला ॥
द्विविद, पुं वानरविशेषः । इति हेमचन्द्रः । (अयं हि नरकासुरस्य मित्रम् । यथा, विष्णुपुराणे । ५ । ३६ । २ ।
"नरकस्यासुरेन्द्रस्य देवपक्षविरोधिनः ।
सखाभवन्महावीर्य्यो द्विविदो नाम वानरः ॥"
स तु बलरामेण हतः । यथा तत्रैव । ५ । ३६ । २२ ।
"ततो बलेन कोपेन मुष्टिना मूर्द्ध्नि ताडितः ।
पपात रुधिरोद्गारी द्विविदः क्षीणजीवितः ॥"
श्रीरामस्य सचिववानरयोरन्यतमः । यथा, महाभारते । ३ । २८८ । ३१ ।
"मैन्दश्च द्विविदश्चैव धूम्रो नीलो विभावसुः ।
जाम्बवानुपरागश्च सुग्रीवः सचिवाः स्मृताः ॥")
"महेन्द्रशिखरे तौरे द्विविदो नाम वानरः ।
पैकाद्दिक्षुस्वरः चलितस्य नामाद्गतौ रिपुस्वनात् ॥"
इति ज्योतिषम् ॥
द्विवेशरा स्त्री, (द्वौ वेशौ गमनागमनस्थानरूपौ राति ददातीति । रा दाने + क ।) लघुरथः । तत्पर्य्यायः । कम्री २ कर्णी ३ । इति हारावली । १६२ ॥
द्विश [स्] अ, (द्वि + "संख्यैकवचनाच्च वीप्सायाम् ।" ५ । ४ । ४३ । इति वीप्सायां शस् ।) द्वौ द्वौ । इति वीप्सार्थे अव्ययम् । (यथा सुश्रुते । १ । ३१ ।
"द्विशो वा बहुशो वापि माला रोषितश्चारयेत् ॥")

द्विशफः, पुं, (द्वौ द्वौ शफौ यस्य ।) विभक्तखुरः । यथा, श्रीभागवते । ३ । १० । २२ ।
"गौरजो महिषः कृष्णः शूकरो गवयो रुरुः ।
द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ॥"

द्विष, ल अ औ वैरे । इति कविकल्पद्रुमः ॥ (अदा०-उभ०-सक०-अनिट् ।) ल अ, द्वेष्टि द्विष्टे । औ, अद्विक्षत् । द्विषन्ति मन्दाश्चरितं महात्मनाम् । इति कुमारे । इति दुर्गादासः ॥

द्विषतीतापः त्रि, (द्विषतीं सपत्नीं तापयतीति वा । द्विषती+तप+अच् । तप+णिच्+अच् वा ।) स्त्रीशत्रुतापकः । इति संक्षिप्तसारव्याकरणम् ॥

द्विषत्, [द्] त्रि, (द्वेष्टीति । द्विष+"द्विषोऽमित्रे ।" ३ । २ । १३१ । इति शतृ ।) शत्रुः । इत्यमरः ।२।८।१० ॥ (यथा, माघे । २ । १ ।
"यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरम् ॥")

द्विषन्तपः त्रि,(द्विषन्तं तापयतीति । तप+णिच्+"द्विषत्परयोस्तापेः ।" ३ । २ । ३९ । इति खच् । "खचि ह्रस्वः ।" ६ । ४ । ९४ । इति ह्रस्वः । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् । तत संयोगान्ततकारलोपः ।) शत्रुतापः । शत्रुतापजनकः । इति संक्षिप्तसारव्याकरणम् ॥

द्विष्ट, क्ली, (द्विष+क्त ।) ताम्रम् । ताम्रम् । इत्यमरटीकायां रायमुकुटः ॥ द्वेषविषये त्रि । (यथा, भाषापरिच्छेदे । १५१ ।
"निवृत्तिस्तु भवेद्द्वेषात् द्विष्टसाधनताधियः ॥"
तथा च ।
"यथोक्तं दुष्टमुष्टिः पापाचारसमागमात् ।
द्विष्टं सुवितमन्नाद्य पूर्ति चान्न विवर्जयेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अः ॥

द्विष्ठ, त्रि, द्वयोस्तिष्ठति यः । (द्वि+स्था+क ।) उभयस्थः । यथा । संयोगस्य द्विष्ठत्वमिति न्याय दीप ॥

द्विसप्ततिः, स्त्री, (द्व्यधिका सप्ततिः । "विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम् ।" ६ । ३ । ४९ । इति पक्षे न आत्वम् ।) द्व्यधिकसप्ततिः । इति ज्योतिषम् । ७२ बाहात्तर इति भाषा ॥ (यथा मनुसंहितायाम् । ७ । १५७ ।
"प्रत्येकं कथिता ह्येताः सङ्क्षेपेण द्विसप्ततिः ॥")

द्विसहस्राक्षः, पुं,(द्विगुणानि सहस्राणि अक्षीणि यस्य । बहुव्रीहौ ।) अनन्तदेवः । इति हेमचन्द्रः ॥

द्विसीत्य, त्रि (द्विवारं सीतया कर्षितम् । द्विसीता+"नौ वयोधर्म्मेति ।"४ । ४ । ९१ । इति यत् ।) वारद्वयकर्षितक्षेत्रम् । दोचसा भूँइ इति भाषा । तत्पर्य्यायः । द्विगुणाकृतम् २ द्वितीयाकृतम् ३ शम्बाकृतम् ४ सम्बाकृतम् ५ द्विहल्यम् ६ । इत्यमरभरतौ ।

द्विहृदया, स्त्री, (द्विकृदिव हृदयं यस्याः तत्कुतः ।) द्वे हृदये यस्याः । यथा,—
"द्विधाभवं द्युर्त्तं गर्भे दौहृदमिष्यते ।
गर्भवत्याः प्रियाण्यतः भवद्भिच दीयेरने ॥
अप्रदानेन गर्भस्य विनाशं विरूपतामेव वा ।
तस्मात् प्रदातव्यं प्रियं तस्या हितार्थिना ।"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥

द्विहल्य त्रि, (द्विवारं हलेन हृष्टम् । द्विहल+"नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु ।" ४ । ४ । ९१ । इति यत् ।) द्विधाकृष्टक्षेत्रम् । इत्यमरः । २ । ९ । ९ ॥

द्विहन्, [न्] पुं (द्वाभ्यां मुखहस्ताभ्यां हन्तीति । हन+क्विप ।) हस्ती । इति शब्दरत्नावली ॥

द्विहायनी, स्त्री (द्वौ हायनौ वत्सरौ वयःक्रमौ यस्याः । "दामहायनान्ताच्च ।" ४ । १ । २७ । इति ङीप ।) द्विवर्षा गौः । इत्यमरः । २ । ९ । ६८ ॥ (द्विवर्षवयस्के, त्रि । यथा, मनुः । ११ । १३४ ।
"शुक्रं द्विहायनं दद्यात् क्रौञ्चं हत्वा त्रिहायनम् ॥")

द्वीन्द्रियग्राह्यः, पु (द्वाभ्यामिन्द्रियाभ्यां ग्राह्यः ।) इन्द्रियद्वयग्रहणीयगुणः । स तु संख्यादिसप्तकद्रवत्वस्नेहरूपः । यथा,—
"संख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ।
एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दकाः ॥"
इति भाषापरिच्छेदः ॥

द्वीप, क्ली (द्वीपवर्षो इयर्ति इति । ऋ गतौ+बाहुलकात् प ।) व्याघ्रचर्म । इति दीपिशब्द-टीकायां भरतः ॥

द्वीपः पुं क्ली, (द्विगता द्वयोर्दिशोर्वा गता आपो यत्र । शाकादिगोलकस्यापरं द्वयोरित्युक्तेऽपि चतुर्दिक्षु इति सिद्धिः ।"ऋक्पूरब्धूरिति ।"५।४।७४ । इति अत् । "द्व्यन्तरुपसर्गेभ्योऽप ईत् ।" ६।३।९७ । इति ईत् ।) वारिमध्यतटम् । जलवेष्टितभूमिः । तत्पर्य्यायः । अन्तरीपम् २ । इत्यमरः ।१।१०।८॥ द्वीपोत्पत्तिर्यथा । यः सुमेरुं प्रदक्षिणीकुर्व्वन् भगवान् आदित्यः पृथ्वीं प्रकाशयति अर्द्धं तमसा आवृणोति । तदा भगवदुपासनोपचितातिपुरुषप्रभावः प्रियव्रतो राजा सूर्य्यरथसमवेगेन ज्योतिर्म्मयरथेन रजनीमपि दिनं करिष्यामीति प्रतिज्ञां कृत्वा सप्तवारं द्वितीय सूर्य्य इव सूर्य्यमनुपर्य्यक्रामत् । तस्य रथचक्रनेमिपरिखाताः सप्तसिन्धव आसन् । यैरेव सिन्धुभिः पृथिव्याः सप्त द्वीपाः कृताः । ते जम्बु १ प्लक्ष २ शाल्मलि ३ कुश ४ क्रौञ्च ५ शाक ६ पुष्कर ७ संज्ञकाः । तेषां पूर्व्वस्य पूर्व्वस्मादुत्तरोत्तरो द्विगुणेन विस्तारमानेन परिमाणम् । ते सिन्धुभ्यो बहिःसम र्चिताः । यथा सिन्धुभ्यो बहिरेकैकशो द्वीपाः एवं द्वीपाः तामपि सर्व्वं विस्तरः । स प्रियव्रतः परिवर्द्धी तस्मै भ्राम्यमाणानां च सर्व्वेषामपि द्विगुणपरिमाणमुद्दिश्य पुरीषपरिसरेणेत्यादि स्वसुताः कुरुते तेन प्रतापात् यथायथ्यमेव एकैकस्मिन् द्वीप एकैकमभिषेचयति स्म । इति श्रीभागवतीयपञ्चमस्कन्धात् सङ्कलितम् ॥ * ॥

अपि च ।
"प्रियो भगवत्पुत्र आसीद्युगमुत्तानपादस्तथा ।
मेधातिथिर्वपुष्मांश्च ज्योतिष्मान् द्युतिमान् भव्यः ।
सवनश्चेति पुत्रास्ते प्रियव्रतस्य पार्थिव ।
स्वायम्भुवेऽन्तरे पूर्व्वमाद्ये त्रेतायुगे तदा ।
प्रियव्रतस्य पुत्रैस्तैः पौत्रैः स्वायम्भुवस्य तु ।
प्रियव्रतात् प्रजावन्तो वीरात् कन्याव्यजायत ।
कन्या सा तु महाभागा कर्द्दमस्य प्रजापतेः ।
कन्ये द्वे दशपुत्राश्च सम्राट् कुक्षिश्च ते उभे ।
मेधाग्निबाहुमित्रास्तु त्रयो योगपरायणाः ।
जातिस्मरा महाभागा न राज्याय मनो दधुः ।
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान् ।
द्वीपेषु तेषु धर्म्मेण द्वीपांस्तांश्च निबोध मे ।
जम्बुद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता ।
प्लक्षद्वीपेश्वरश्चापि तेन मेधातिथिः कृतः ।
शाल्मले तु वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये ।
क्रौञ्चद्वीपे द्युतिमन्तं भव्यं शाकाह्वये सुतम् ।
पुष्कराधिपतिञ्चैव सवनं कृतवान् सुतम् ॥"
इति मार्कण्डेयपुराणम् ॥

"भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥
शाकं ततः शाल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति ॥"
इति सिद्धान्तशिरोमणिः ॥

द्वीपकर्पूरजः, पुं, (द्वीपकर्पूरात् जायते इति । जन+ड ।) चीनकर्पूरः । इति राजनिर्घण्टः ॥

द्वीपखर्ज्जूर, स्त्री, (द्वीपजातम् खर्ज्जूरम् ।) महापारेवतम् । इति राजनिर्घण्टः ॥

द्वीपज, स्त्री, (द्वीपात् जायते इति । जन+ड ।) महापारेवतम् । इति राजनिर्घण्टः ॥

द्वीपवती, स्त्री, (द्वीपं अस्त्यस्या इति । द्वीप+मतुप् मस्य व । ङीप ।) नदी । (यथा, महाभारते । १ । ७ । २८ ।
"अलङ्कृत द्वीपवती मालिन्या रम्यतीरया ।")
भूमिः । इति मेदिनी । ते १९८ ॥

द्वीपवान्, [त्] पुं, (द्वीपोऽस्त्यस्य इति । द्वीप+मतुप् मस्य व ।) समुद्रः । नदः । इति मेदिनी । ते १९८ ॥

द्वीपशत्रु, पुं, (द्वीपस्य द्वीपिनः शत्रुः ।) शतावरी । इति राजनिर्घण्टः । (शतावरीशब्देऽस्य विवरणं ज्ञातव्यम् ।)

द्वीपिका, स्त्री, (द्वीपी द्वीपी व्याघ्रवत् कण्टका इति । द्वीप+ठन् ।) शतावरी । इति राजनिर्घण्टः ॥

द्वीपिनखः पुं (द्वीपिनो व्याघ्रस्य नख ।) व्याघ्रनख । इति राजनिर्घण्टः । (स तु बालानां रक्षार्थम् विधेयः । यथा, कादम्बर्य्याम् ।
"कण्ठे मदनमञ्जरीकायाः...")

द्वीपिशत्रु, पुं, (द्वौ अपि अस्य शत्रुः ।) पशु जन्तो । इति शब्दरत्न ॥

द्वीपी, [न्] पुं (द्वीपं चर्म्म अस्यास्तीति । द्वीप+"अत इनिठनौ ।" ५।२।११५ । इति इनि ।)

इति हलायुधः । कोँच इति भाषा । (यथा सुश्रुते उत्तरतन्त्रे । ५४ अध्याये ।
"चरन्ती द्विरसनीव नसिवेत पुरीषजा ।")

द्विरसनाशि पुं, (द्विरसनं अश्नि भक्षः ।) सर्पविशेषः । घाँडिनी इति भाषा । तत्पर्यायः । अहीरणि २ राजाहि ३ राजसर्प ४ द्विमुखः ५ सर्पभुक् ६ । इति हलायुधः ।

द्विरसनोरग, पुं, (द्विरसनः उरगः सर्पः ।) राजसर्पः । इति जटाधरः ।

द्विमूर्द्ध, त्रि, (द्वौ मूर्द्धानौ यस्य । "द्वित्रिभ्यां ष मूर्द्ध्नः ।" ५ । ४ । ११५ । इति षः ।) मस्तकद्वययुक्तः । इति मुग्धबोधव्याकरणम् । (यथा, भट्टि । ४ । ४१ ।
"बहुमूर्द्धा द्विमूर्द्धेव त्रिमूर्द्धा चाहतो रणे ।")

द्विरद पुं स्त्री, (द्वौ रदौ दन्तौ प्रधानतया यस्य ।) हस्ती । इत्यमरः । २ । ८ । ३४ । (यथा महाभारते । ७ । २६ । २७ ।
"गोभयर्न्नं यथा सेनां द्विरद नलिनीमिव ।
धनञ्जय भुजगता साधु वाञ्छिन्नपूजयत् ।")

द्विरदान्तक पुं, (द्विरदानां हस्तिनां अन्तकः ।) सिंहः । इति राजनिर्घण्टः ।

द्विरशन, क्ली (द्विवारमशनं भोजनम् ।) वारद्वयभोजनम् । यथा,—
"मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम् ।
अहनि च तमस्विन्यां सार्द्धप्रहरयामान्तः ।"
इति तिथ्यादितत्त्वम् ।

द्विरसन, पुं (द्वे रसने जिह्वे यस्य ।) सर्पः । इति हारावली । १५ ।

द्विरागमन, क्ली, (द्विवारं विवाहात् परं आगमनं स्वामिगृहे इत्यर्थः ।) विवाहानन्तरं वध्वाः पितृगेहात् पतिगृहे पुनरागमनम् । यथा, नारायणसंहितौ ।
"वर्षे पार्थिवगेहात् पितुः पतिगृह प्रति ।
पुनरागमनं वध्वास्तद्द्विरागमनं विदुः ॥"
तस्य शुभकालादिकादि यथा । दीपिकायाम् ।
"रवोऽड्गाणिघटालिवृषगते काले विशुद्धे भृगौ चन्द्रे प्रतिलोमगे शुभदिने यात्राप्रवेशोचिते । नक्षत्रेषु निरीक्ष्य श्रवणमृगाश्विन्यौ पति कुम्भादिकपुरादितु प्रतिभगोर्निरस्ति दोष बुधाः । मेषाद्यागते कुम्भकुसमयोः अस्तमितौ या यदि स्यात् काले शुद्धो न भवति यदा गङ्गतो चापि शुक्रः । मेषे कुम्भेऽलिनि च न भवेत् भास्करे गगनाभि अर्भो भवेऽहनि सततं पञ्चभेस्ताद्विदं धाम । अलगौरिरगाभवे न्निभतो नास्ति मत आगत वर्षे कौटुम्बगणे शुभदिवे पश्चे च क्लमेतरे । विवाह च प्रतिलोमतो बुधविशौ कौलस्य शुक्रौ तथा
नारीणां शुक्रहानिरी नवमूर्तिशोकुलका मोदते ।
कन्यायाः बहुहानि दुर्भिक्षं राष्ट्रविप्लवे ।
चलिता दौवलाशाका दूर सर्वा न दुःखा ।"

यथा,—
"काम्येषु यमिश्रेषु भगादिप्यान्निरंसु च ।
भारद्वाजेषु वासुकेषु प्रतिशुक्रो न दोषभाक् ॥"
श्रीपतिमहितायां प्रचेताः ।
"पुष्यादिप्यगभीस्थाहिति पत्युत्पत्तुरास्थितगो- सारागायकरोधिवीषु शुभदे मेषालिकुम्भे रवौ । वारेन्दिष्यसितेन्दुविज्ञषु शुभदे तारे प्रशस्ते तिथौ कन्यामस्यमीनतो विलग्नभि स्यात्पुनरा-गमनः ॥"
ज्योतिःसारसङ्ग्रहे ।
"विवाहमाधि प्रथम वध्वा नागमनं यदि ।
तदा सर्व्वमिदं चिन्त्य पुनरागमने विचक्षणैः ॥"
कार्य्यचिन्तामणौ ।
"अष्टे चन्द्रपदे वर्षे अनुरथ दशाप्तिके ।
समाने द्वादशे वर्षे पति हन्ति द्विरागमे ॥"
भावप्रकाशे ।
"भुक्ता पितृगृहे कन्या शुक्रे स्वामिगृहे यदि ।
दौर्भाग्य जायते तस्याः प्रयाति कुलनायिका ॥"
इति ज्योतिस्तत्त्वम् ।
निर्णयस्तु ।
"विवाहमाधि प्रथममवागतायाः वध्वाः प्रथम-दशमद्वादशेविषमर्षे कालशुद्धौ वैशाखमागमाषे फाल्गुनाव्यतममासि रविशुद्धौ सौमबुधगुरु-शुक्राव्यतमवारे चन्द्रताराशुद्धौ रोहिणीपुन-र्वसुमृगशिरःपुष्योत्तरात्रयहस्तास्वातीधनिष्ठा-रेवतीषु सितिभिन्नकरणेषु निषिद्धतरयोगेषु कन्यामिथुनतुलामीनलग्नेषु द्विरागमनम् । कस्यचिन्मते बुधवारोऽपि निषिद्धः ।
इत्थिद्विरागमनं गमनमभिनवनारीणाम् ।
श्रवणमपि धान्यादौ न बुधो बुधवारे कुर्यात् ॥"
इति सत्तत्त्वमुक्तावली ।

द्विराप पुं, (द्विर्द्विवारे मुखशुण्डाभ्यामित्यर्थः । आपः जलानि पिबतीति । पा + कः ।) हस्ती । इति शब्दमाला ।

द्विराषाढ़, पुं (द्वि आषाढ़ः ।) मिथुनस्थरव्या-रब्धशुक्लप्रतिपदादिकर्क्कस्थरविसमाप्यदर्शः । स च आषाढ़मलमासो भवति । यथा, ज्योतिषे ।
"मिथुनस्थो यदा भानुरमावास्याद्वयं स्पृशेत् ।
द्विराषाढ़ः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥"
निर्णये च ।
"माधवादिषु षट्केषु मासि दर्शद्वयं यदा ।
द्विराषाढ़ः स विज्ञेयः शेते तु श्रावणेऽच्युतः ॥"
इति मलमासतत्त्वम् ।
अन्यच्च ।
"पौर्णमास्या द्वयं यत्र पूर्व्वाषाढ़ाख्य भवेत् ।
द्विराषाढ़ः स विज्ञेयो विष्णुः स्वपिति कर्कटे ॥"
इति गारुडे ६ अध्यायः ।

द्विरुक्त, त्रि, (द्विर्द्विवारं यथा तथा उक्तः ।) द्विवारकथितः । यथा । द्विरुक्तप्रचारी त्रि । इति मुग्धबोधव्याकरणम् ।

द्विरुक्ति स्त्री, (वच + क्तिन् । द्विर्द्विवारं उक्तिः ।) द्विवारकथनम् । इति संक्षिप्तसारः ।

द्विरूढ़ा, स्त्री, (ऊह्यते इति । वह + कर्म्मणि क्तः । द्विः ऊढ़ा विवाहिता ।) द्विवारविवाहिता । तत्पर्यायः । दिधिषूः २ पुनर्भूः ३ । इति हेमचन्द्रः । ३ । १९८ ।

द्विरूप, पुं, (द्वौ रूपौ आकारौ यस्य ।) द्व्याकार शब्दादि । यथा । द्विरूपकोषादि । द्विवार रूपप्राप्ति । यथा । द्विरूपप्राप्तादिपाठः । रूपद्वययुक्ते, त्रि ।

द्विरेफ, पुं स्त्री (द्वौ रेफौ रकारवर्णौ यस्य भ्रमर नाम्नि ।) भ्रमरः । (यथा, कुमारे । ३ । २७ ।
"मधु द्विरेफः कुसुमैकपात्रे
पपौ प्रियां स्वामनुवर्त्तमानः ॥")
बर्बरे त्रि । इत्यमरः ।

द्विवर्षा, स्त्री, (द्वौ वर्षौ वयःपरिमाणमस्याः । द्विवर्ष + "आर्हीयष्ठक तस्य लुक् च ।) द्विवर्षा । द्विवर्षवयस्का गौः । इत्यमरः । २ । ९ । ६८ ।

द्विवर्षिका स्त्री, (द्विवर्षैव । स्वार्थे कन् । टापि "प्रत्ययस्थादिति ।" ७ । ३ । ४४ । इति अत इत्वम् ।) द्विवर्षा गौः । इति हेमचन्द्रः । ४ । ३३४ ।

द्विवर्षीण, त्रि (द्वौ वर्षौ वय परिमाणमस्य । द्विवर्ष + खः ।) द्विवार्षिकः । द्विवर्षवयस्कः । इति पाणिनीयव्याकरणम् ।

द्विवार्षिक त्रि, (द्विवर्षे भवः । ठञ् ।) द्विवर्षे भवः । वत्सरद्वयजात । इति व्याकरणम् ।

द्विवाहिका, स्त्री, (द्वाभ्यां पार्श्वाभ्यां वाहयतीति । वह + णिच् + ण्वुल् । टापि अत इत्वम् ।) दोला । इति शब्दमाला ।

द्विविद, पुं वानरविशेषः । इति हेमचन्द्रः । (अयं हि नरकासुरस्य मित्रम् । यथा, विष्णुपुराणे । ५ । ३६ । २ ।
"नरकस्यासुरेन्द्रस्य देवपक्षविरोधिनः ।
सखाभवन्महावीर्य्यो द्विविदो नाम वानरः ॥"
स तु बलरामेण हतः । यथा तत्रैव । ५ । ३६ । २२ ।
"ततो बलेन कोपेन मुष्टिना मूर्द्ध्नि ताडितः ।
पपात रुधिरोद्गारी द्विविदः क्षीणजीवितः ॥"
मैन्दस्य चायमनुजः । यथा, महाभारते । २ । २५४ । १३ ।
"मैन्दश्च द्विविदश्चैव हनूमांश्चानिलात्मजः ।
जाम्बवानृक्षराजश्च सुग्रीव सचिवाः कृताः ॥")
"मङ्गमस्योत्तरे तीरे द्विविदो नाम वानरः ।
देवाविकल्परं हन्ति तस्य नामानुकीर्त्तनात् ॥"
इति ज्योतिषम् ।

द्विवेसरा, स्त्री, (द्वौ वेसरौ गमनकारकावश्वौ दाति ददातीति । दा दाने + क ।) लघुरथः । तत्पर्यायः । गन्त्री २ कम्बी ३ । इति हारावली । १६० ।

द्विश: [स्] अ, ("द्वि + "संख्यैकवचनाच्च वीप्सायाम् ।" ५ । ४ । ४३ । इति वीप्सायां शस् ।) द्वौ द्वौ । इति वीप्सार्थे नामसूचकम् । (यथा, रघुः । १ । ४१ ।
"द्विशो वा वहूनी यदि प्रामा दोषेऽन्या-देव ।")

द्विपथः, पुं, (द्वौ द्वौ पन्थौ यत्र ।) द्विपदपथः । यथा, श्रीभागवते । ३ । १० । २२ ।
"गौरुष्ट्रो महिषः कृष्णः शूकरो गवयो रुरुः ।
द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम ॥"

द्विष, ल ञ औ वैरे । इति कविकल्पद्रुमः । (अदा-उभं सकं अनिट् ।) ल ञ, द्वेष्टि द्विष्टे । औ, अद्विक्षत् । द्विषन्ति मन्दाश्चरितं महात्मनाम् । इति कुमारः । इति दुर्गादासः ॥

द्विषन्तपः, त्रि, (द्विषन्तं तपति तापयतीति वा । द्विषत्+तप+खच् । तप+णिच्+खच् वा ।) शत्रुसन्तापकः । इति संक्षिप्त-सारव्याकरणम् ॥

द्विषत् [त] त्रि, (द्वेष्टीति । द्विष+"द्विषो-ऽमित्रे ।" ३ । २ । १३१ । इति शतृ ।) शत्रुः । इत्यमरः ।२।८।१० ॥ (यथा, माघे । २ । १ ।
"यियक्षमाणेनाहूतः पार्थेनाथ द्विषन्मुरम् ॥")

द्विषन्तपः त्रि (द्विषन्तं तापयतीति । तप+णिच्+"द्विषत्परयोस्तापेः ।" ३ । २ । ३९ । इति खच् । "खचि ह्रस्वः ।" ६ । ४ । ९४ । इति ह्रस्वः । "अरुर्द्विषदजन्तस्य मुम् ।" ६ । ३ । ६७ । इति मुम् । ततः संयोगान्ततकारलोपः ।) शत्रुतापः । शत्रुतापजनकः । इति संक्षिप्तसार-व्याकरणम् ॥

द्विष्ट, क्ली, (द्विष+क्तः ।) ताम्रम् । इत्यमरटीकायां रायमुकुटः ॥ द्वेषविषये त्रि । (यथा, भाषापरिच्छेदे । १५१ ।
"निवृत्तिस्तु भवेद्वेषात् द्विष्टसाधनताधियः ॥"
तथाच ।
"यथोक्तं दुष्कृतं पापं पापकृत्यमथोच्यते ।
द्विष्टं युक्तितमस्माद्धि पूर्तिं चार्थं विवर्जयेत् ॥"
इति सुश्रुते सूत्रस्थाने ४६ अः ॥

द्विष्ठ, त्रि, द्वयोस्तिष्ठति यः । (द्वि+स्था+कः ।) उभयस्थः । यथा । संयोगश्च द्विष्ठस्तथैव च भगदीपः ॥

द्विसप्ततिः, स्त्री, (द्व्यधिका सप्ततिः । "विभाषा चत्वारिंशत्प्रभृतौ सर्व्वेषाम् ।" ६ । ३ । ४९ । इति पक्षे न आत्वम् ।) द्व्यधिकसप्ततिः । इति ज्योतिषम् । ७२ बाहात्तर इति भाषा ॥ (यथा मनुसंहितायाम् । ७ । १५७ ।
"एताः प्रकृतयो मूलं मण्डलस्य समासतः ॥
अष्टौ चान्याः समाख्याता द्वादशैव तु ताः स्मृताः ॥
प्रत्येकं कथिता ह्येता संक्षेपेण द्विसप्ततिः ॥")

द्विसन्धानः, पुं, (द्विसन्धि अधीष्टि यस्य । बहु-व्रीहिः ।) अर्ज्जुनदेवः । इति हैमचन्द्रः ।

द्विसीत्यं, त्रि, (द्विवारं सीतया कर्षितम् । द्विसीता+"नौ वयोधर्म्मेति ।"४ । ४ ।९१ । इति यत् ।) वारद्वयहलकृष्टक्षेत्रम् । दोचसा भूँइ इति भाषा । तत्पर्य्यायः । द्विगुणाकृतम् २ द्वितीयाकृतम् ३ शम्बाकृतम् ४ सम्बाकृतम् ५ द्विहल्यम् ६ । इत्यमरभरतौ ॥

द्विसुखिज्ञान, क्ली, (द्विसुखितं द्विपक्षम् अत्र तद्गुणम् ।) द्वि सिद्धलक्षणम् । यथा,—
"द्विसिद्धमर्थं सुमुक्त शृणु देवविशेषके ।
माध्यन्दिनस्त विप्रार्थो भवर्षेषु निवेदने ॥
ब्रह्मरात्रिपर्णीनाश्च विप्राणामध्यवारिणाम् ।
ताम्बूलञ्च यथा मध्यम् । तथैव यत्नतो ध्रुवम् ॥"
इति ब्रह्मवैवर्त्ते ब्रह्मखण्डम् ॥

द्विहल्यं त्रि, (द्विवारं हलेन कृष्टम् । द्विहल+"नौवयोधर्म्मेति ।" ४ । ४ ।९१। इति यत् ।) द्विसीत्यक्षेत्रम् । इत्यमरः । २ । ९ । ९ ॥

द्विहा, [न्] पुं (द्वाभ्यां शुण्डदन्ताभ्यां हन्तीति । हन+क्विप् ।) हस्ती । इति शब्दरत्नावली ॥

द्विहायनी, स्त्री (द्वौ हायनौ वत्सरौ वय उम्मौ यस्याः ।"दामहायनान्ताच्च ।" ४।१।२७ । इति ङीप् ।) द्विवर्षा गौः । इत्यमरः । २ । ९ । ६८ ॥ (द्विवर्षवयस्के, त्रि । यथा, मनुः । ११।१३७ ।
"शुक्के द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनम् ॥")

द्वीन्द्रियग्राह्य, पुं (द्वाभ्यामिन्द्रियाभ्यां ग्राह्यः ।) इन्द्रियद्वयग्राह्यगुणः । स तु सङ्ख्यादिपञ्च-सप्तकत्वैकारक्तरूपः । यथा,—
"सङ्ख्यादिरपरत्वान्तो द्रवत्वं स्नेह एव च ।
एते तु द्वीन्द्रियग्राह्या अथ स्पर्शान्तशब्दका ॥"
इति भाषापरिच्छेदः ॥

द्वीप, क्ली, (द्वीपवर्ती इयते इति । इ गतौ+बाहु-लकात् प ।) व्याघ्रचर्म्म । इति दीपिकावृन्द-टीकायां भरतः ॥

द्वीपः पुं क्ली, (द्विर्गता द्वयोर्दिशोर्वा गता आपो यत्र । आकाशविशेषकत्वाच्च द्वयोरित्युक्तेऽपि चतुर्दिक्षु इति सिद्धम् ।"ऋक्पूरब्धूरिति । ५।४।७४ । इति अत् । "द्व्यन्तरुपसर्गेभ्योऽप ईत् ।" ६।३।९७ । इति ईत् ।) वारिमध्यतटम् । जल-वेष्टितभूमिः । तत्पर्य्यायः । अन्तरीपम् २ । इत्यमरः ।१।१० ।८॥ द्वीपोत्पत्तिर्यथा । सूर्य्यं सुमेरुं प्रदक्षिणीकुर्व्वन् यदा इदमं प्रकाशयति तदा तमसा व्याप्नोति । तत्र भगवदुपासनोपचितातिपुरुषप्रभावः प्रियव्रतो राजा सूर्य्यं रथगमवेगेन ज्योतिर्म्मयरथेन रजनीमपि दिनं करिष्यामीति प्रतिज्ञां कृत्वा सप्तवारं द्वितीय सूर्य्य इव सूर्य्यमनुपर्य्यक्रामत् । यस्य रथचक्र-नेमिपरिखाताः सप्ताब्धयः आसन् । यैरेव सिन्धुभिः पृथिव्याः सप्त द्वीपाः कृताः । ते जम्बु १ प्लक्ष २ शाल्मलि ३ कुश ४ क्रौञ्च ५ शाक ६ पुष्कर ७ संज्ञकाः । तेषां पूर्व्वस्य यद्विस्तारः मानं उत्तरतस्ततो द्विगुणेन विस्तारमानेन परिमाणम् । ते सिन्धुभ्यो बहिःसम रचिताः । यथा सिन्धुभ्यो बहिरेकैकशो द्वीपाः एवं द्वीपा अपि बहिः सिन्धवः । स प्रियव्रतः बर्हिष्मती जायायां जनितानात्मजान् आग्नीध्रादिसप्त-पुत्रान् हिरण्यरेतोऽन्तान् एतेषां सप्ताङ्गिरसो नाम राज्ञां प्रभावान् यथायथं एकैकस्मिन् द्वीपे एकैक-मधिपतिं विदधे । इति श्रीभागवतीयपञ्चम-स्कन्धात् सङ्गृहीतम् ॥ ० ॥

अपि च ।
"मनोः स्वायम्भुवस्यासन् दश पुत्रास्तु तत्समाः ।
यैरियं पृथिवी सर्व्वा सप्तद्वीपा सपत्तना ।
ससमुद्राकरवती प्रतिवर्षं निवेशिता ।
स्वायम्भुवेऽन्तरे पूर्व्वमाद्ये त्रेतायुगे तदा ॥
प्रियव्रतस्य पुत्रैस्तैः पौत्रैः स्वायम्भुवस्य तु ।
प्रियव्रतात् प्रजावन्तौ वीरात् कान्याभ्यजायत ॥
कन्या सा तु महाभागा कर्द्दमस्य प्रजापतेः ।
कन्ये द्वे दश पुत्राश्च सम्राट् कुक्षिश्च ते उभे ॥
मेधाग्निबाहुमित्राद्यास्त्रयो योगपरायणाः ।
जातिस्मरा महाभागा न राज्याय मनो दधुः ॥
प्रियव्रतोऽभ्यषिञ्चत्तान् सप्त सप्तसु पार्थिवान् ।
द्वीपेषु तेषु धर्म्मेण द्वीपांस्तांश्च निबोध मे ॥
जम्बुद्वीपे तथाग्नीध्रं राजानं कृतवान् पिता ।
प्लक्षद्वीपेश्वरश्चापि तेन मेधातिथिः कृतः ॥
शाल्मले तु वपुष्मन्तं ज्योतिष्मन्तं कुशाह्वये ।
क्रौञ्चद्वीपे द्युतिमन्तं हव्यं शाकाह्वये सुतम् ॥
पुष्कराधिपतिश्चैव सवनं कृतवान् सुतम् ॥"
इति मार्कण्डेयपुराणम् ॥

"भूमेरर्द्धं क्षारसिन्धोरुदक्स्थं
जम्बुद्वीपं प्राहुराचार्य्यवर्य्याः ।
अर्द्धेऽन्यस्मिन् द्वीपषट्कस्य याम्ये
क्षारक्षीराद्यम्बुधीनां निवेशः ॥
शाकं ततः शाल्मलमत्र कौशं
क्रौञ्चञ्च गोमेदकपुष्करे च ।
द्वयोर्द्वयोरन्तरमेकमेकं
समुद्रयोर्द्वीपमुदाहरन्ति ॥"
इति सिद्धान्तशिरोमणिः ॥

द्वीपकर्पूरजः, पुं, (द्वीपकर्पूरवत् जायते इति । जन+डः ।) चीनकर्पूरः । इति राजनिर्घण्टः ॥

द्वीपखर्ज्जूर, स्त्री, (द्वीपजातम् खर्ज्जूरम् ।) महा-पारेवतम् । इति राजनिर्घण्टः ॥

द्वीपजा, स्त्री, (द्वीपात् जायते इति । जन+डः ।) महापारेवतम् । इति राजनिर्घण्टः ॥

द्वीपवती, स्त्री, (द्वीपः अस्त्यस्या इति । द्वीप+मतुप् मस्य वः । ङीप् ।) नदी । (यथा, महा-भारते । १ । ७ । २८ ।
"सशैलवनसंयुक्ता द्वीपवत्या मालिन्या रम्यसैरथा ।")
भूमिः । इति मेदिनी । ते, १९८ ॥

द्वीपवान्, [त्] पुं, (द्वीपोऽस्त्यस्य इति । द्वीप+मतुप् मस्य व ।) समुद्रः । नदः । इति मेदिनी । ते १९८ ॥

द्वीपशत्रुः, पुं, (द्वीपस्य व्याघ्रस्य शत्रुः ।) शतावरी । इति राजनिर्घण्टः । (शतावर्य्यां द्वीपशत्रुरस्य विव-रणं ज्ञातव्यम् ।)

द्वीपिका, स्त्री, (द्वीपी द्वीपी शाकतया अस्त्यस्या इति । द्वीप+ठन् ।) शतावरी । इति राज-निर्घण्टः ॥

द्वीपिनखः, पुं, (द्वीपिनो व्याघ्रस्य नखः ।) व्याघ्रनखः । इति राजनिर्घण्टः । (स तु बालानां कण्ठभूषण-विशेषः । यथा, अध्यात्मरामायणे ।१।३।४८ ।
"कण्ठे स्वर्णमणिव्रातमध्यद्वीपिनखाञ्चितम् ।")

द्वीपिशत्रुः, पुं, (द्वीपिनो व्याघ्रस्य शत्रुः ।) शत-मूली । इति जटाधरः ॥

द्वीपी, [न्] पुं, (द्वीपं चर्म्म अस्त्यस्येति । द्वीप+"अत इनि ठनौ ।" ५।२।११५ । इति इनि ।)

विषयः । शत्रुः । इति राजनिर्घण्टः ॥ (यथा, रामायणे । २ । ८४ । ७ ।
"नानाव्यायामवैद्दीपितदृष्टद्रव्यगमयैह त ॥")
द्वीप्य, त्रि, द्वीपे भव इत्यर्थे यत्प्रत्ययः ॥ ("तत्र भवः ।" ४ । ३ । ५३ । इति यत् ।) द्वैप्यः । (यथा, वाजसनेयसंहितायाम् । १६ । ३१ ।
"नमो नादेयाय च द्वीप्याय च ॥")
द्विष अप्रीतौ । इति कविकल्पद्रुमः ॥ (अदां-परं-सकं-अनिट् ।) वकारोपधः । द्वेष्टि । खगण अपर गणम् । परस्मै इति प्राञ्चः । परस्मैपदी आत्मनेपदी चेति गोविन्दभट्टः । इति दुर्गादासः ॥
द्वेधा, अ, (द्वि + "संख्याया विधार्थे धा ।" ५ । ३ । ४२ । इति धा । "एधाच ।" ५ । ३ । ४६ । इति तस्य एधाच ।) द्विप्रकारम् । इति व्याकरणम् ॥
द्वेषः, पुं (द्विष + भावे घञ् ।) शत्रुता । तत्पर्य्यायः । वैरम् २ विरोधः ३ विद्वेषः ४ द्वेषणम् ५ । इति शब्दरत्नावली ॥ (यथा, मनुः । ४ । १६३ ।
"नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम् । द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्जयेत् ॥")
अस्य कारणं दुःखानुभवनाज्ञानम् । इति भाषापरिच्छेदः ॥ स च आत्मनो विशेषगुणः । इति सिद्धान्तमुक्तावली ॥ तदनुवर्त्तित्वनिषेधो यथा, श्रीभगवद्गीतायाम् । ३ । ३४ ।
"इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ । तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ ॥"
"इन्द्रियस्येन्द्रियस्येति वीप्सया सर्व्वेषामिन्द्रियाणां प्रत्येकमित्युक्तम् । अर्थे स्वस्वविषये अनुकूले रागः प्रतिकूले द्वेषः इत्येवं रागद्वेषौ व्यवस्थितौ अवश्यम्भाविनौ ।" इति तट्टीकायां श्रीधरस्वामी ॥
द्वेषण, क्ली (द्विष + भावे ल्युट् ।) द्वेषः । इति शब्दरत्नावली ॥ (यथा, महाभारते । ५ । ८१ । २७ ।
"अकस्मादेव पार्थानां द्वेषणं नोपपद्यते ॥")
द्वेषणः, त्रि (द्विष + "क्रुधमण्डार्थेभ्यश्च ।" ३ । २ । १५१ । इति युच् ।) शत्रुः । इत्यमरः । ३ । १ । १० ॥ (यथा, महाभारते । १२ । १६८ । २५ ।
"प्राज्ञो द्वेषणः क्रोधी निर्भयः मदबलाः ॥")
द्वेषी [न्] त्रि, (द्वेष्टि तच्छीलः । द्विष + "सम्पृचा— घिनुण् ।" ३ । २ । १४२ । इति घिनुण् ।) शत्रुः । इति हेमचन्द्रः । ३ । ३९३ ॥ (यथा, रघुः । १० । ७३ ।
"तथापि बहुधा नाम तत्कारिद्वेषिणो ग्रहः ॥")
द्वेष्टा, [ऋ] त्रि, (द्वेष्टीति । द्विष + तृच् ।) विद्वेषकर्त्ता । इति द्विषधातोस्तृच्प्रत्ययेन साधु ॥ (यथा महाभारते । १ । ८९ । ९ ।
"द्वेष्टारमस्य नैवाहुर्न च द्वेष्टि न याचते ॥")
द्वेष्य, त्रि, (द्वेषमर्हः । यत् ।) द्वेषविषयः । विद्वेष्यः । तत्पर्य्यायः । अप्रियः २ । इत्यमरः । ३ । १ । ४९ ॥ (यथा, महाभारते । ३ । १६ । १० ।
"सुखं वा यदि वा दुःखं द्वेष्यं वा यदि वा प्रियम् । यथावत् धर्म्ममाचष्ट श्रुत्वा धारयामि यत् मतम् ॥"
द्विष्यते यावदिति । द्विष + ण्यत् । शत्रुः । यथा, रघुः । १ । २८ ।
"द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम् । त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥")
द्वैगुणिक, त्रि (द्विगुणार्थं दत्तं द्विगुणम् । तत् प्रयच्छति द्विगुणं गृहीत्वा एकगुणं ददातीत्यर्थः । द्विगुण + "प्रयच्छति गर्ह्यम् ।" ४ । ४ । ३० । इति ठक् ।) वृद्ध्याजीवः । इति हेमचन्द्रः । ३ । १४४ ॥ द्विगुणं गृह्णाति यः इत्यर्थे ष्णिक प्रत्ययः ॥
द्वैत, क्ली, (द्विधा इतं द्वीतम् । तस्य भावः । प्रज्ञादित्वात् अण् । स्वार्थे अण् वा ।) द्वयम् । इति हेमचन्द्रः । ६ । ६ ॥ (यथा भागवते । ६ । १५ । १० ।
"विमोको मत्प्रसन्नता कल्पितमद्वैतमय । शोकमोहभयद्वेषे मायामुपलभ्य न ॥")
शोकादिद्वन्द्वम् । एकात्मनोऽपासितमोह इति तट्टीकायां श्रीधरस्वामी ॥ (वनविशेषः । द्वैतवनम् । यथा, किराते । १ । १ ।
"स वर्णिलिङ्गी विदितः समाययौ युधिष्ठिरं द्वैतवने वनेचरः ॥"
"द्वैतवने द्वैताख्ये तपोवने । यद्वा, द्वे इते गते यस्मात् तत् द्वीतम् । द्वीतमेव द्वैतं तच्च तद्वनञ्चेति तथोक्तम् । शोकमोहादिरहिते इत्यर्थः ॥" इति तट्टीकायां मल्लिनाथः ॥)
द्वैतवादी, [न्] त्रि, (द्वैतं जीव ईश्वरश्चेति द्वयं वदतीति । वद + णिनि ।) जीवेश्वरयोर्भेदवादी । ईश्वरातिरिक्तजीववक्ता । तस्य मतं यथा परमात्मनो जीवात्मा पृथक् तस्मात् क्रियाभिन्नतो प्रकृतिरतिरिक्ता कैवल्यकाले प्रकृतिरुद्धस्त्वे पर्य्यवसिता एवं जीवश्च पृथक् । अत्र प्रमाणम् ।
"जन्मकर्म्मविशेषाणां प्रतिनियमादयुगपत्प्रवृत्तेश्च । पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्चैव ॥"
इति सांख्यमतम् ॥
सर्व्वेश्वरः सर्व्वज्ञः परमात्मा एक एव । जीवः प्रतिशरीरं भिन्नः नित्यश्च । इति गौतममतम् ॥
इह प्रकृतौ जीवेतरस्य प्रतिपादनात् तयोर्द्वैतं नाभिमतम् । भेदोऽनुपपत्तेर्भेदव्यपदेशाच्च प्रकृतेरपि अपदेशादाकाशोऽप्याकाशादि असदृशाद्दोषमाणमात्सिद्धाश्चेति उभेभ्योऽपि तयोर्द्वैतमिष्यमाणम् । इति गोविन्दभाष्यमतम् ॥
यथा द्वैतमते बुद्धिरेव प्रमाणं कृत्वा मन् भवति तदेव ब्रह्मात्मविचारप्रतिपादकश्रुतीनां स्यात् प्रयोजनम् । इति रामानुजमतञ्च ॥
द्वैतीयीक, त्रि, (द्वितीय + तीयादीकक् । स्वार्थे वा ईकक् ।) द्वितीयः । यथा,—
"द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥"
इति नैषधम् । २ । ११० ॥
द्वैध, अ, (द्वि + "संख्याया विधार्थे धा ।" ५ । ३ । ४२ । इति धा । "द्व्येकयोर्धमुञ् ।" ५ । ३ । ४५ । इति धा स्थाने धमुञ् ।) द्विप्रकारम् । इति व्याकरणम् ॥ (यथा, हरिवंशे । १ । १० ।
"तद्धमकरोद्द्वैधं दिवं भुवमथापि च ॥"
क्ली "चतुर्वर्णादीनां स्वार्थे उपसंख्यानम् ।" इति स्वार्थे ष्यञ् । राज्ञां षड्गुणानामन्यतमः । इत्यमरः । २ । ८ । १८ ॥) एकत्र अभिप्रायेण द्विधा इति द्वौ प्रकारौ द्वैधं निपातितम् । इत्यमरटीकायां भरतः ॥ (तच्च द्विविधम् । यथा, मनुः । ७ । १६७ ।
"बलस्य स्वामिनश्चैव स्थितिः कार्य्यार्थसिद्धये । द्विविधं कीर्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः ॥")
विवादः । इति त्रिकाण्डशेषः ॥ (द्विप्रकारम् । यथा, मनुः । ८ । ७३ ।
"बहुत्वं परिगृह्णीयात् साक्षिद्वैधे नराधिपः । समेषु तु गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान् ॥"
त्रि । यथा, "पचि द्वैधानि छ्यानि ।" इति सिद्धान्तकौमुदी ॥)
द्वैप,पुं,(द्वीपिनो विकारः द्वैपम् । द्वीप + "प्राणिरजतादिभ्योऽञ् ।" ४ । ३ । १५४ । इति अञ् । तेन परिवृतः । "द्वैपवैयाघ्रादञ् ।" ४ । २ । १२ । इत्यञ् ।) द्वीपिचर्म्मावृतरथः । इत्यमरः । २ । ८ । ५३ ॥ द्वीपसम्बन्धिनि व्याघ्रचर्म्मसम्बन्धिनि च त्रि ॥ (यथा, सुश्रुते चिकित्सितस्थाने ८ अध्याये ।
"द्वैपं चर्म्म अथवा मातङ्गं वा भित्त्वा स्फोटे तैलयुक्तं प्रदेयम् ॥")
द्वैपायन, पुं, (द्वीप अयनं जन्मस्थानं यस्य । स एव । स्वार्थे प्रज्ञादित्वात् वा अण् ।) व्यासः । इति हेमचन्द्रः । ३ । ५११ ॥ (अस्योत्पत्तिविवरणं यथा महाभारते । १ । ६३ । ८४—८५ ।
"इति सत्यवती हृष्टा लब्ध्वा वरमनुत्तमम् । पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा ॥ जज्ञे च यमुनाद्वीपे पाराशर्य्यः स वीर्य्यवान् । स मातरमनुज्ञाप्य तपस्येव मनो दधे ॥ स्मृतोऽहं दर्शयिष्यामि कृत्येष्विति च सोऽब्रवीत् । एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात् । न्यस्तो द्वीपे स यद्बालस्तस्माद्द्वैपायनः स्मृतः ॥"
ह्रदविशेषः । यत्र दुर्य्योधनः पाण्डवभयात् आत्मानं स्तम्भयित्वा स्थितः । यथा, महाभारते । ९ । ३१ । २ ।
"आसाद्य च कुरुश्रेष्ठ ! तदा द्वैपायनं ह्रदम् । स्तम्भितं धार्त्तराष्ट्रेण दृष्ट्वा तं सलिलाशयम् । वासुदेवमिदं वाक्यमब्रवीत् कुरुनन्दनः ॥")
द्वैप्य, त्रि, (द्वीपे भवम् द्वीपस्य इदम् वा । द्वीप + "द्वीपादनुसमुद्रं यञ् ।" ४ । ३ । १० । इति यञ् ।) द्वीपभवादि । द्वीपसम्बन्धि इत्यर्थे

द्वीपभवेषु साध्यम्। इति व्याकरणम्॥ (यथा, माघे। ३। ७६।
"विक्रीय दिश्यानि धनान्युरूणि
द्वैप्यानसावुत्तमलाभभाजः।
तरीषु तत्रत्यमफल्गुभाण्डं
सांयात्रिकानावपतोऽभ्यनन्दत्॥")

द्वैमातुर, पुं, (द्वयोर्मात्रोरपत्यम्। द्विमातृ+ "मातुरुत्संख्यासंभद्रपूर्व्वायाः।" ४। १। ११५। इति अण् उच्च।) गणेशः। इत्यमरः। १। १। ४१॥ (अस्य द्विमातृकतया स्कन्दपुराणे गणेशखण्डे उक्ता यथा,—
"आविर्भविष्ये सदने वरेण्यस्य महीपतेः।
देवोऽसुरवधायाय विप्रस्याशु महात्मने।
पालनाय स्वभक्तानां साधूनाञ्च भूसुराः॥
शिव उवाच।
इत्युक्त्वा पुष्पकागर्भं प्रविवेश तदैव सः।
आगते नवमे मासि प्रासूत पुष्पका शिशुम्॥
चतुर्बाहुमिभास्यञ्च दन्तुरं रक्तवर्णकम्।
आयुधानि च चत्वारि बिभ्रतं तेजसान्वितम्॥
दृष्ट्वा सा क्रन्दनं चक्रे किमिदमेतत् किमागतम्।
श्रुत्वा चाक्रन्दनं तस्या वरेण्यः कम्पतो ययौ॥
दृष्ट्वा बालकं सोऽपि विस्मितः स्वक्स तेजसे।
उवाच सेवकान् राजा त्यजतैनं सरोवरे॥
शिशुमादाय ते याताः पार्श्वस्वेवाश्रमे शुभे।
आश्रमे स शिशुं त्यक्त्वा ययुः सर्वे निजं पुरम्॥
अपरस्मिन् दिने पाराशरिः स्नानाय चागतः।
तेनैव दृष्टस्तेन बालकोऽद्भुतदर्शनः॥
आश्चर्यमकरोच्चैव भयभीतस्तथाभवत्।
आयासे येन मे सकलमरिष्टहरदायिनीम्॥
तपसा तु फलं दातुमीशो मे प्रतर्पितुम्।
दर्शितुं धर्म्मलोकानां परमात्मा विभेच्छया॥
सुन्दरो बालकः कोऽयं कोऽयमीशो वदिः।
नीत्वा स्वमाश्रमं चैनं पालयिष्ये प्रयत्नतः॥
इत्युक्त्वा चाङ्के बालमालिलिङ्ग तदा मुनिः।
तमानीतं मुनेः पत्नी दृष्ट्वा दीपवत्सला॥
उवाच निजभर्त्तारं सुप्रसन्नमनामुखा॥
दीपवत्सलोवाच।
किमानीतं भवत् स्वामिन् भयमाश्चर्य्यकारकम्।
इह वैनायकं रूपं ममाभाति द्विजर्षभ॥
इदमेव शिवं साक्षात् इदमेव तपःफलम्।
इदमेव परं ब्रह्म योगिभिर्ध्येयं सनातनम्॥
इदमेव परं तेज आदित्ये यत्प्रतिष्ठितम्।
इदमेव हि वेदान्ता नेति नेति प्रचक्षते॥
शिव उवाच।
इत्युक्त्वा हर्षसम्पन्ना भर्त्तुरादाय बालकम्।
स्तन्यपानं ददौ सस्नेहं तत्र सा दीपवत्सला।
द्वितीयाचन्द्रवद्बालो वृद्धिं यातो दिने दिने॥")
जरासन्धः। इति मेदिनी। रे, २९८॥ (अस्य द्विमातृकत्वकारणं जरासन्धशब्दे द्रष्टव्यम्॥) द्विमातृजे, त्रि। इति हेमचन्द्रः। ३। २१॥ (यथा, राजतरङ्गिण्याम्। ४। ६९९।
"भिन्नजीता ययोर्भावोद्वैमातुरयोः पुरः॥")

द्वैमाषक, पुं, (द्वे माषके इव पञ्चार्थौ द्विमाषकः। स एव स्वार्थे अण्।) षष्टीहद्वयलोद्भूत-धान्यभक्तो देशः। इति राजनिर्घण्टः॥

द्वैवीया, स्त्री, (दैवम् ईम् अगच्छतीति। क।) मानसहोमिदः। इति राजनिर्घण्टः॥

द्व्यक्षरं, क्ली, (द्वयोरक्षरयोः समाहारः।) अक्षरद्वयम्। द्वयोरक्षरम्। (द्वे अक्षरे यत्र।) अक्षरद्वययुक्तशब्दादौ, त्रि॥ (यथा भागवते। २। ९। ६।
"स चिन्तयन् द्व्यक्षरमेकदाम्भ-
स्युपाशृणोद्विर्गदितं वचो विभुः॥")

द्व्यङ्गुल, त्रि, (द्वे अङ्गुली प्रमाणमस्य। "तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः।" ५। ४। ८६। इति अच्।) अङ्गुलिद्वयपरिमितम्। यथा, ज्योतिस्तत्त्वे।
"अर्काङ्गुलाय मध्यमा काष्ठी द्व्यङ्गुलगर्त्तिका।
शङ्कुच्छाया भवेत्तत्र तच्छायां परिकल्पयेत्॥"
द्वयोरङ्गुल्योः समाहारः इति वाक्ये अङ्गुलिद्वयमात्रे, क्ली। इति मुग्धबोधम्॥ (द्वे अङ्गुली यस्य इति विग्रहे। "अङ्गुलेर्दारुणि।" ५। ४। ११४। इति षच्। द्व्यङ्गुलं दारु। इति व्याकरणम्॥)

द्व्यञ्जल, त्रि, (द्वावञ्जली परिमाणमस्य ("द्विगोष्ठंश्च।" ५। ४। १२। इति टच्।) अञ्जलिद्वयपरिमितम्। द्वयोरञ्जल्योः समाहारः इति वाक्ये अञ्जलिद्वयमात्रे, क्ली। इति मुग्धबोधम्॥

द्व्यणुक, क्ली, (द्वौ अणू कारणे यस्य। कप्।) परमाणुद्वयसमवेतद्रव्यम्। परमाणुद्वयात्मकम्। तच्च प्रत्यक्षादिविषयम्। यथा, भाषापरिच्छेदे। ३८।
"विषयो द्व्यणुकादिस्तु ब्रह्माण्डान्त उदाहृतः॥"
तस्य परिमाणमणिमम्। यथा,—
"अणित्वं द्व्यणुकादौ तु संख्याजन्यमुदाहृतम्॥"
इति भाषापरिच्छेदे। १११॥

द्व्यन्य, त्रि, द्वाभ्यामन्यः इति पञ्चमीतत्पुरुषे कृते। द्विभिन्नः। द्वे अन्ये यस्य। इति बहुव्रीहौ। द्विभिन्नकः। द्वयोरन्ययोः समाहारः। इति वाक्ये, क्ली॥

द्व्यर्थ, त्रि, (द्वौ अर्थौ यस्य।) अर्थद्वययुक्तशब्दादिः। अस्य प्रमाणं राघवपाण्डवीयादिग्रन्थे द्रष्टव्यम्॥

द्व्यष्ट, क्ली, (द्विमक्ष्ये द्वे अश्नुते इति। अश+अष्टपेति क्त। इत्यमरः।) ताम्रम्। इत्यमरः। २। ९। ९७॥

द्व्याह, पुं, अहद्वयम्। द्वे अहनी समाहृते। इति पुंलिङ्गसंग्रहे भरतः॥

द्व्यात्मक, पुं, (द्वौ रूपौ आत्मानौ यस्य।) मिथुनकन्याधनुर्मीनराशयः। यथा, ज्योतिस्तत्त्वे।
"चरस्थिरद्व्यात्मकनामधेया
मेषादयोऽमी क्रमशः प्रदिष्टाः॥"

द्व्याह्निक, त्रि, (द्व्यहे भवः। ठञ्। बाहुलकात् न ऐच्।) दिनद्वयभवः। द्व्यहे भव इत्यर्थे द्विकप्रत्ययः॥

घ

घ, घकारः। स कवर्गचतुर्थो वर्णो व्यञ्जनोऽविसर्गः। अस्योच्चारणस्थानं कण्ठः। इति व्याकरणम्॥ (यथा, शिक्षायाम्। १७।
"हस्ता स्तुतलथा सुता।" इति।) अस्य स्वरूपं यथा —
"घकारं परमेशानि कुण्डली मोक्षरूपिणी।
आत्मादितत्त्वसंयुक्तं पञ्चदेवमयं सदा।
पञ्चप्राणमयं देवि त्रिशक्तिसहितं सदा।
त्रिबिन्दुसहितं वर्णं घकारं हृदि भावय॥
पीतविद्युल्लताकारं चतुर्वर्गप्रदायकम्॥"
इति कामधेनुतन्त्रम्॥
"त्रिकोणरूपरेखायां त्रयो देवा वसन्ति च।
विश्वेश्वरी विश्वमाता वामतः स्कन्धतः स्थिता॥"
इति वर्णोद्धारतन्त्रम्॥
अस्य ध्यानं यथा —
"महाकृष्णां मेघवर्णां रक्ताम्बरधरां पराम्।
वरदां शोभनां रम्यां चतुर्वर्गप्रदायिनीम्॥
एवं ध्यात्वा घकारन्तु तन्मन्त्रं दशधा जपेत्॥"
अस्य नामानि यथा—
"घो घण्टाकर्णः स्वाहा चालवी योगिनीप्रियः।
मीनेशः ग्रहिणी सोऽथ नागशो विश्वभावनी॥
त्रिवक्त्रा घर्घरा शिवा नेत्रद्रुम प्रियो मतिः।
पीतवासा त्रिवर्णा च धाता कामध्वजः॥
घन्टाक्षो मोहनो लज्जा चपलश्चेश्वरो धरा।
ग्रामपादाङ्गुष्ठमूलं ध्येता सुरपुरं भगः॥
सुधात्मा दीर्घजङ्घश्च घनेशो घनसङ्घयः॥"
इति नानातन्त्रशास्त्रम्॥

घ, क्ली, (दधाति सुखमिति। धा+डः।) घनम्। इति मेदिनी। घे १॥

घः, पुं, (दधाति धरति विश्वमिति। धा+डः।) ब्रह्मा। (दधाति निधिमिति।) कुबेरः। (दधाति जीवानां शुभाशुभमिति।) धर्म्मः। इति मेदिनी। घे १॥

घक्क, क गात्रने। इति कविकल्पद्रुमः॥ (चुरां-पर-सक-सेट।) कोपधः। गात्रन मर्द्दीकरणम्। क, घक्कयति पापं गङ्गा। इति दुर्गादासः॥

घट, पुं, (घ इव घटति गच्छति प्राप्नोति तोलनेनेति। घ+अट+अण्। शकन्ध्वादित्वात् साधु।) तुला। इत्यमरः। ३। ५। १०॥ तराजु इति दाड़ा इति च भाषा। (अस्य निरुक्तिर्यथा,—
"घकाराद्धर्मसंदिष्टं टकारात् कुटिलं नरम्।
धृतो धारयते यस्मात् घटस्तेनाभिधीयते॥"
इति दिव्यतत्त्वधृतवचनम्॥)
तुलाराशिः। यथा, ज्योतिस्तत्त्वे।
"सिंहो वृषश्च मेषश्च कन्या धन्वी घटो घटः।
घकारादीनां त्रिकोणानि कथितानि राशय
क्रमात्॥"
तुलापरीक्षा। इति परीक्षातत्त्वम्॥

अस्य निरूप्य तुलाग्रस्थं प्रत्ययम् ॥ (धर्म्मः ।
इति विष्णुनारदौ । यथा,—
'धर्म्मेयेन घट पूर्व्वं गत्वा शिरोऽथ पूजयेत ।"
इति दिव्यतत्त्वधृतवचनम् ।)

घटक पुं, (घटेन तुलया कायतीति । कै + क ।) चतुर्द्दशपञ्चकपरिमाणम् । द्विपञ्चारिप्रमाणिका । इति लीलावती । नन्दिवृक्ष । तत्पर्य्यायो यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"धवो घटो नन्दिवृक्ष स्थिरो गौरो धुरन्धरः ॥

घटपरीक्षा, स्त्री (घटस्य तुलायाः परीक्षा ।) तुलापरीक्षा । तत्र घटोत्पत्तिविधिर्यथा । 'पितामह ।
'छित्त्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्व्वकम् ।
प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः ॥
यूपवदिति यूपच्छेदनविधिवन्मन्त्रपूर्व्वकमिति दिव्य' । सा च ७० स्वचिते मन्त्र छिन्धीरिति- च्छेदनमन्त्रविधानादिरूपा इति व्यवहार- प्रदीपः ॥
मन्त्र सौम्यो वनस्पत्यच्छेदने जप्य एव च ।
चतुरस्रा तुला कार्य्या दृढा ऋज्वी तथैव च ॥
कटकानि च देयानि त्रिषु स्थानेषु चायसम् ।
कटकानि वलयानि ।
चतुर्हस्ता तुला कार्य्या पादौ चोपरि तत्समौ ।
अत्र साधारणत्वेन प्रादेशाधिकाष्टौ हस्ता ग्राह्या । यथा—
'चतुर्विंशत्यङ्गुलाद्यो हस्त तस्य विदुः ।
मध्यमस्तरुभि' कक्षा मात्राङ्गुलमितीरितम् ॥
यवानां तण्डुलीलतानाम् ।
यवानां तण्डुलैरेकमङ्गुलं चाष्टभिर्भवेत् ।
यदीयमानेशैचक्षुरङ्गुर्नि प्रागिरङ्गुणे ॥
इति कालिकापुराणात् ॥
प्रमाणन्तु पार्श्वेन यथागमम् । 'अङ्गुला पार्श्वं सञ्चिता । इति कात्यायनवचनात् । ● ।
अनयोरन्तरमाह कालिकापुराणम् ।
'अन्तरञ्चैव हस्तानां मध्यमं धाममिष्यते ।
कल्पास बहुभिरत्रिमङ्गुलं शुभिस्तथा ॥
कल्पास बनिवहम् । पादौ स्तम्भौ । उपरि अपि कोमरि । तत्समौ चतुर्हस्तायितौ । हस्तद्वय उपरितत्समौ उपरि तत्समं काष्ठान्तरं ययो पादयोस्तौ । ● । अवमध्यमाह व्यास ।
हस्तद्वय निखेयन्तु प्रोक्त तत्समयोर्द्वयो ।
षड्हस्तन्तु तयो प्रोक्त प्रमाणं परिमाणत ॥
तत्समयो स्तम्भयो' । षड्हस्तं निखातहस्त- द्वयन् वर्ज्जं चतुर्हस्तायितावपि हस्तचतुष्टय- मित्यर्थ ।
'अन्तरन्तु तयोर्हस्तौ भवेदध्यर्द्धमेव वा ।
तयो स्तम्भयो । हस्तावन्तरं हस्तद्वयपरि- मितमध्यन्तरं । अध्यर्द्धं सार्द्धहस्तद्वयम् । एतत्तु प्राकनीत्वा कार्य्या पञ्चहस्तायता तुला । इति दिव्यतत्त्वधृतवचनात्तुलाविधानम् । व्यवहारसौमित्यापीतम् । ● ।
अथ मध्यादीनपि विधि' । पितामह ।
'तुलाद्वय निरीयन्तु पादयोरुभयोरपि ।
अथ हस्तद्वय स्तम्भिकाभ्यन्तरे । हस्तचतुष्टय- स्य मध्ये तु । तथा,—
'तोरणे च तथा कार्य्ये पार्श्वयोरुभयोरपि ।
घटादुन्नतरे स्यातां नित्यं दशभिरङ्गुलैः ।
अवलम्बौ च कर्त्तव्यौ तोरणाभ्यामधोमुखौ ॥
मृण्मयौ सूत्रसम्बद्धौ घटमस्तकचुम्बिनौ ।
प्राङ्मुखौ निश्चलं कार्य्यं शुचौ देशे घटस्तथा ॥
नारद ।
शिक्यद्वय समासाद्य घटकर्कटयोर्द्दृढम् ।
एकत्र शिक्ये पुरुषमन्यत्र तुलयेच्छिलाम् ॥
पितामहः ।
'प्राङ्मुखान् कल्पयेत् दर्भान् शिक्ययोरुभयोरपि ।
पश्चिमे तोलयेत् कार्य्ये तस्मिन् स्तम्भिकां शुभाम् ॥
पिटके पूरयेत्तस्मिन् इष्टकाभस्मपांशुभिः ॥
अथ स्तम्भिकेष्टकाधारपांशुर्ना विकल्प ।
'परीक्षका नियोक्तव्यास्तुलामानविशारदाः ।
वणिजो हेमकाराश्च कांस्यकारास्तथैव च ।
कार्य्यं परीक्षकैर्नित्यमवलम्बसमो घट ॥
उदकञ्च प्रदातव्यं घटस्योपरि पण्डितैः ।
यस्मिन् प्लवते तोयं स विज्ञेय समो घट ॥
तोलयित्वा नरं पूर्व्वं पश्चात्तमवतार्य्य तु ।
घटन्तु कारयेन्नित्यं पताकाध्वजशोभितम् ॥
तत आवाहयेद्देवान् विधिनानेन मन्त्रवित् ।
वादित्रतूर्य्यघोषैश्च गन्धमाल्यानुलेपने ॥
प्राड्विवाक प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ।
प्राड्विवाकसमाख्या तु पृच्छतीति प्राट विवेचय- तीति विवाक । इति व्यवहारमातृका । ● ।
तथा च बृहस्पति ।
विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च ।
प्रियपूर्व्वं प्रागभिभाषते प्राड्विवाकस्तत स्मृत ॥
यद्युक्तन्तु प्राड्विवाकसमाख्यामाह कात्यायन ।
'व्यवहाराश्रितं प्रश्नं पृच्छति प्राड्विति स्थिति' ।
विवेचयति यस्तस्मात् प्राड्विवाक इति स्मृत ।'
अभिप्रश्न पृच्छतीति प्राट तदनुरूपं दिव विविनक्ति इति विवाक' । प्राट चासौ विवाक- श्चेति कर्म्मधारय । ● ।
अस्य कार्य्यमेव नवग्रहपूजामाह मत्स्यपुराणम् ।
नवग्रहमखं कृत्वा तत कर्म्म समारभेत् ।
अन्यथा फलद पुंसां न काम्य जायते क्वचित् ।
ततश्च प्राड्विवाक पूर्व्वं कार्य्यं पृष्ट्वा विनिर्दि- शेच्च विश्वयत् । ततोऽभिषुक्त तोलयित्वा अव- तार्य्य घनादावाहनादि कुर्य्यात् । पितामह ।
'एवमेवं समस्तान् धर्म्मं दिवि क्वचित् समाविशेत् ।
लोकपालांश्च सम्पूज्य गन्धादिभिः यथाविधि ॥
आवाह्य च घटे धर्म्मं पश्चादङ्गानि विन्यसेत् ।
अङ्गानि परिवारदेवता ।
'इन्द्रं पूर्व्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा ।
वरुणं पश्चिमे भागे कुबेरं चोत्तरे तथा ॥
अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ॥●॥
इन्द्र पीतो यम श्यामो वरुण स्फटिकप्रभ ।
कुबेरश्च सुवर्णाभो वह्निश्चापि सुवर्णाभ ।
तथैव निरृतिः श्यामो वायुर्धूम्रः प्रशस्यते ।
ईशानस्तु भवेद्रक्त एवं ध्यायेत् क्रमादिमान् ।
ब्रह्मा चैव भवेद्रक्त एवं ध्यायेत् क्रमादिमान् ।
इन्द्रस्य दक्षिणे पार्श्वे वसूनाराधयेद्बुधः ।
धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥ ● ।
देवेशेशानयोर्मध्ये आदित्यानां तथा गणम् ।
धाताऽर्य्यमा च मित्रश्च वरुणांशुर्भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्ज्जन्यो दशमः स्मृतः ।
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ।
इत्येते द्वादशादित्या नामभिः परिकीर्त्तिताः ।
अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ।
वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः ।
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ।
भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः ।
स्थाणुर्भवश्च भगवान् रुद्रास्त्वेकादश स्मृताः ।
महायशा' निर्ऋतिमितिभगवानीति विशेषणानि ।
'प्रेतेशरक्षोमध्ये मातृस्थानं प्रकल्पयेत् ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डा गणसंयुता ॥
गणसंयुतेति विशेषणम् ॥ ● ।
निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः ।
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ।
श्वसन स्पर्शनो वायुरनिलो मारुतस्तथा ।
प्राण प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्त्तिताः ।
घटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः ।
एतासां देवतानाञ्च स्वनाम्ना पूजनं विदुः ।
विधिवमाह मत्स्यपुराणम् ।
'ओङ्कारादिनमोऽन्तैश्च स्वनामभिः प्रकीर्त्तितम् ।
स्वनाम चतुर्थ्यन्ता तत्र इत्यभिधीयते ॥
अनेनैव विधानेन गन्धपुष्पं निवेदयेत् ।
एकैकस्य प्रकर्त्तव्यं यथोद्दिष्टं क्रमेण तु ।
अत्र इत्यभिधानादनेनेवैतेनैकाराङ्गनेव इद- मर्घ्यं ओं सतुकाय नमः इति वोध्यं न तु इमां पाद्यं प्रकल्पयामि नमः इति मिताक्षरोक्तम् । प्रमाणाभावाद्व्यवधानाच्च । पितामह ।
'भूषणार्थं प्रधानार्थं तथा चान्यदिवं क्रमात् ।
अस्मादि पश्चादभ्यर्च्य भूषणानुपकल्पयेत् ।
गन्धादिना नैवेद्यान्तां परिचर्य्यां प्रकल्पयेत् ।
एतत् सर्व्वं प्राड्विवाक कुर्य्यात् । यथा —
'प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः ।
श्रुतवृत्तोपसम्पन्न शान्तचित्तो विमत्सरः ।
सत्यसन्धः शुचिर्दक्षः सर्व्वप्राणिहिते रतः ।
उपोषितः शुद्धवासाः कृतदन्तादिधावनः ।
सर्व्वासां देवतानाञ्च पूजां कुर्य्याद्यथाविधि ॥
इत्यस्यानुकूल्येनाह नारद ।
'ऋग्भिर्यजुर्भिः सामभिर्धूपदीपाक्षतादिभिः ।
अर्च्चयेत्तु घटं पूर्व्वं ततः शिरोऽथ पूजयेत् ॥
घट धर्म्मम् । तथा च विष्णुनारदौ ।
'धर्म्मपक्षस्थितश्च घट इत्यभिधीयते ।'
शिरःशिरोपरिरोपितम् । धारयेत्तु सर्व्वज्ञ इति

ऽयः । मिताक्षरायान्तु यर्म्मपूर्व्वक एव इत्यत्र
विषयः । तथा,—
'चतुर्द्दिक्षु ततो होमः कर्त्तव्यो वैष्णवादिभिः ।
आज्येन हविषा चैव समिद्भिर्होमसाधने ।
सावित्र्या प्रणवेनैव स्वाहान्तेनैव होमयेत् ॥
सावित्र्या गायत्र्या । तेन प्रणवादिका गायत्री
स्वाहान्ता पुनः स्वाहाकारान्तं प्रणवस्थाने
समिदाज्यचरून् प्रत्येकमष्टोत्तरशतं जुहुयादिति
मिताक्षरा । वस्तुतस्तु गायत्रीहोमे योजनीया
मन्त्राः ।
'प्रणवव्याहृतिभ्याञ्च स्वाहान्ते होमकर्म्मणि ।
तेन प्रणवादिका व्याहृतिका गायत्र्यन्ते
स्वाहाकारान्ता पुनः प्रणवस्थाने आज्य
पायसमिश्रो मिलित्वा अष्टोत्तरशतं जुहुयात्
वाचनात । अतएव दैवतैक्ये हि हविष्यत्वा
त्सर्व्वमानुष्ठानम् । ऐन्द्रं दध्यमावास्यायामैन्द्रं
पयोऽमावास्यायामिति श्राद्धविवेकः ॥ * ॥
यत्तु यथाङ्गलाद्दाने ।
पञ्चम्यादिक्षदर्भः पायसं निर्म्मितचरुम् ।
एकस्मिन्नेव कुण्डे च गृहपतौ निवेदयेत् ॥
मन्त्रयमभिघार्य्यान्ते सम्पातितोपरि तथा ॥
इति मत्स्यपुराणात् ।
चतुर्णां होतॄणां मध्ये यथो गुरुः पञ्चम्यादिभ्यो
ग्रामं कुर्व्वीत आज्यं करोति स एव पञ्चम्याय
आदित्याय खदेभ्यस्तत्सम्मे पायसं मन्त्रा
समिदाज्यमन्त्रातिलाश्च प्रत्येकं जुहुयादिति
भूपालप्रभृतिभिरुक्तम् । तद्गुरु तद्दर्व्वादिति
तदेकाभ्यां प्रत्येकद्वयेन होमविधानात् । अत
एव रत्नाकरकल्पतरुः जुहुयादित्युक्ता तद्वदिति
पञ्चाग्न्यादि जुहुयादित्युक्तम् । अतएव छन्दोग
सर्व्वे वाचस्पतिमिश्रप्रभृतिभिस्त्वादिहोमश्च
पायसपूर्व्वहोमार्थमपि क्वाथ्यां मिलिताभ्यां यत्
त्रिविधहोमा विहिताः । अपरन्तु ।
'होमो यदादिपूजायां शतमष्टाधिकं भवेत् ।
अष्टाविंशतिरष्टौ वा शक्त्यैवमथापि वा ॥
इति दृष्टपुराणीयादिवचनात् अष्टाष्टमा
संख्या ज्ञेया । एवं मत्स्यपुराणे ।
'मत्स्य रावणम् महाबाहो सकामान्तु यो विधिः ।
नवानां परितो मन्त्रादिमात्रादिमेखला ॥
मन्त्र यत्र चाथवा मध्ये योनिवक्त्रा कृपातल ।
इति मत्स्यादिकल्पतरुः,—
'स्वल्पाध्येकाग्निमत्स्कार्य्यो वितस्त्याष्टाङ्गली कुभिः ।
इति वचनादस्यापि अशक्तावेकाग्निविधिरिति
वदन्ति । अत प्राड्विवाकहस्तेनैव होमः ।
'स्थित्वा सर्व्वकार्य्याणि प्राड्विवाकः समाचरेत् ।
अभावे यथावस्तु सोपवासो द्विजात्मजः ॥
इति मिताक्षराधृतपितामहवचनात । अभ्यस्य
यजमानमात्रम् । न चात्र भिन्नशाखिनाश्च
भिन्नाः दशकालभिद्वाप्रयुक्तिकल्पनमिति वाच्यम् ।
आचमनमावस्थ नामाद्युद्धारपाठविधानेन कश्य
नानुपपत्तेः । तथा च मनुः ।
'वराम्यधोन्ध वदौ वा वेद यापि यथाक्रमम् ।
अविप्लुतब्रह्मचर्य्यो गृहस्थाश्रममाचरेत् ॥ इति ।
प्रायश्चित्तहोमस्तु सामगानां महाव्याहृतिभिः ।
'यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत् ।
चतस्रस्तत्र कर्त्तव्याः स्त्रीपाणिग्रहणे यथा ॥
अपि वाज्ञानविज्ञेया प्राणायामापि व्याहृतिः ।
व्याहृत्या विवेकपोऽथ प्रायश्चित्तविधिः स्मृतः ॥
इति छन्दोगपरिशिष्टात् ॥
न तु प्राज्यायनहोमो भवदेवभट्टोक्तः । विधि
कल्प इत्यनेन तस्य निराधात् । भट्टनारायणा
दिभिरप्रमाणीकृतत्वाच्च ॥ * ॥ पितामहः ।
'तोलयित्वा नरं पूर्व्वं तस्मात्तदवतार्य्य च ।
प्राड्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ॥
एह्येहि भगवन् धर्म्म ! दिव्ये ह्यस्मिन् समाविश ।
सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥
तथाऽयमभियुक्तश्च वेशयित्वा तु पत्रके ।
मन्त्रेणानेन सहितं कृत्वास्य शिरोगतम् ॥
आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्म्मोऽपि जानाति नरस्य वृत्तम् ॥
इमं मन्त्रविधिं तस्य सर्व्वदिव्येषु योजयेत् ।
आवाहनञ्च देवानां तथैव परिकल्पयेत् ॥ * ॥
घटमामन्त्रयेच्चैव विधिनानेन मन्त्रवित् ।
त्वं घट ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् ॥
धकाराद्धर्म्ममूर्त्तिस्त्वं टकारात् कुटिलं नरम् ।
धृतो भावयसे यस्माद्धटस्तेनाभिधीयते ॥
त्वं वेत्सि सर्व्वभूतानां पापानि सुकृतानि च ।
त्वमेव देव ! जानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ।
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि ॥ * ॥
वेशनप्रकारमाह नन्दिपुराणम् ।
शुभे नक्षत्रदिवसे शुभे राशिनिरूपिते ।
वेशयेत् पूर्व्वदेशात् हस्तत्रयसमागतात् ।
पूर्व्वाभिमुखो भूत्वा लिपिज्ञो लेखकोत्तमः ।
निरोधो हस्तमात्रोऽथ मध्येपत्रविधारणे ॥
मत्स्यपुराणञ्च ।
'श्रीमन्तिमान् सुसम्पन्नान् धर्म्मविज्ञातान् समान् ।
अभयान् वेशयेद्यस्तु स नरो वेशकः स्मृतः ॥
इति दानसागरः ।
धारयसे इत्यत्र भावयसे इति पाठोऽप्युपयुक्तः ।
तथा हि । कुटिलं पापिनं अधर्म्मोपपन्नं वा ।
आद्ये पापिनमित्यनेनापत्यार्थाभिधानमनुपपन्न
त्वद्गता शुद्धस्यापि ज्ञापनात् द्वितीये पूर्व्व
पिण्डस्थैन ज्ञापनानुपपत्तिः । तस्मात् कुटिलं
व्यवहाराभिशस्तं धारयसे इत्येवार्थः । अतएव
उपसंहारे संशयादस्मान्निस्तुक्तम् । अतएव
कालिकापुराणेऽपि । मानुषाञ्जातं त्वयैवोक्त
मिति ॥ * ॥ स्तानिश्चयव्यवहारदीपिकयो-
र्विष्णुः । घटश्च समयेन पठनीयात् तुलाधारकश्च ।
'धर्म्मपर्य्यायवचनः घट इत्यभिधीयते ।
त्वमेव घट जानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ।
तदेनं संशयादस्माद्धर्म्मतस्त्रातुमर्हसि ॥
ब्रह्मणा ये स्मृता लोका ये लोकाः कूटसाक्षिणः ।
तुलाधारस्य ते लोकास्तुलां धारयतो मृषा ॥
समयेन त्वमेव घट इत्यादिनियमेन । घट एतौ-
यान् योजयेत् । तुलाधारकश्च ब्रह्मणा ये इत्या
दिना नियमेनैव च । अत नानामुनिप्रणीत-
मन्त्राणाम् एकतरपाठानां समानप्रयोजनानां
यत्नोऽपि विकल्पः इति ग्रन्थगौरवात्तेन
लिखिताः । अभिशस्तप्राड्विवाकपाठानान्तु
द्वयोर्नां समुच्चयः । पितामहः ।
'नित्यं देयानि दिव्यानि शुचये चार्द्रवाससे ।
शुचये नगमरकाधौतपरीक्षाय । चलित
प्रति याज्ञवल्क्योऽपि कलिकायां नारदः ।
'हस्तपदेषु सर्व्वेषु कुर्य्याद्वक्ष्माणि च ।
ताम्येव पुनरालोक्य ततो विज्ञविवेचिती ॥
इत्यपि विधौ हस्तपतितौ हस्तचरणसन्धादिना
चिह्नं कृत्वा पतनान्तर आत न वा इति
ज्ञातव्यमिति गुरवो यतिनो दिव्याधिकारः ।
नारदः ।
'अहोरात्रोषिते स्नाते आर्द्रवाससि मानवे ।
पूर्व्वाह्ने सर्व्वदिव्यानां प्रदानमनुकीर्त्तितम् ॥ * ॥
घटानुमन्त्रणात् प्रागपि पुनस्तोलनमाह
कालिकापुराणम् ।
'उपोषितं तथा स्नातं ततस्तं प्रथमं तुलाम् ।
धर्म्मोत्थ कारयेद्देवताभ्यामनुमन्त्रयेत् ॥'
याज्ञवल्क्यः ।
'तुलाधारणविद्वद्भिरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो रेखां कृत्वावतारितः ॥
त्वं तुले सत्यधामासि पुरा देवैर्विनिर्म्मिता ।
तत् सत्यं वद कल्याणि ! संशयान्मां विमोचय ॥
यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय ।
शुद्धश्चेद्गमयोर्द्ध्वं मां तुलामित्यभिमन्त्रयेत् ॥
तुलाधारणाभिज्ञैर्वणिगादिभिः स्वर्णकारादि-
प्रतिमानसमीकृततुलाधिरूढः अभियुक्तो
दिव्याधिकारी । येन सन्निवेशेन प्रतिमानसमी-
करणदशायां यत्र पादादयो व्यवस्थिताः स्निग्ध-
रञ्जकेन तत्र पाण्डुलेखेनाङ्कयित्वा पिटकादव
तारितः त्वन्तुले इति मन्त्रेण तुलां प्रार्थयेत् । सत्ये
सन्दिग्धार्थस्य स्वरूपं वद इत्यर्थः । यापक्रत-
सत्यवादी शुद्धश्च सत्यवादी । मन्त्रश्चायं स्मार्त्त
पौराणिकत्वात् शूद्रेऽपि साध्य । येन मन्त्रपाठं
शूद्रस्येति छन्दोगाह्निकधृतस्मृतौ वेदेति विशे-
षणात् श्राद्धविश्वदेवादौ तु विशेषतो नमस्कार
मन्त्रविधानात् आगममन्त्रोऽपि निषिद्धः । प्रप-
ञ्चस्तु तिथितत्त्वेऽनुसन्धेयः । स्त्रीपरीक्षायामपि
अविकृत एव प्रयोज्यः । दिव्यानीह विमुक्तये
इत्यनेन सन्दिग्धार्थसन्देहनिवृत्तिफलकतयाविशे-
षेण स्त्रीपुंसकदिव्यविधानेन मानुषः शुद्धि
मिच्छतीत्यनेन च प्रकृतावूह्यायोगात् । अतएव
मर्त्तौ समस्ताण्य नो धिक्षीति मन्त्रे हिरण्यपक्षो-
यजमानस्य शूद्रयोगेऽपि न हिरण्यवर्णोदय
रत्युक्तम् ॥ * ॥ धनस्य प्रतिनिधेयस्य मोक्षाय

अत्र विस्तरस्तु तुलाशब्दे द्रष्टव्यः । (धर्म्मः । इति विष्णुनारदौ । यथा,—
"आधयेत् घटं पूर्व्वं तत' शिरसि पूरयेत् ।"
इति दिव्यतत्त्वधृतवचनम् ।)
...क, पुं, (घटेन तुलया कायतीति । कै + कः ।) चतुर्द्दशपलपरिमाणम् । द्विपलादिप्रदत्तिका । इति लीलावती । नन्दिघ्नः । तत्पर्य्यायो यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
'घटो घटी नन्दिघ्नः स्थिरो गौरो गुरुस्तथा ।'
परीक्षा, स्त्री, (घटस्य तुलायाः परीक्षा ।) तुलापरीक्षा । तत्र घटोत्पत्तिविधिर्यथा । पितामहः ।
'छित्त्वा तु यज्ञियं वृक्षं यूपवन्मन्त्रपूर्व्वकम् ।
प्रणम्य लोकपालेभ्यस्तुला कार्य्या मनीषिभिः ॥
यूपवदिति यूपच्छेदनविधिवन्मन्त्रिकमपातादि कार्य्यं । सा च ७ँ सवितृ मेन छिन्दोति लिखेत्मन्त्रविशेषादिक्रमा इति व्यवहारप्रदीपः ।
मन्त्रः सौम्यो वानस्पत्यश्छेदने जप्य एव च ।
चतुरस्रा तुला कार्य्या दृढा ऋज्वी तथैव च ॥
कटकानि च देयानि त्रिषु स्थानेषु चार्थवत् ।
कटकानि वलयानि ।
चतुर्हस्ता तुला कार्य्या पादौ चोपरि तत्समौ ।
अत्र धाराधरमित्र हारदातिलकोक्तौ हस्तौ मानम् । यथा —
चतुर्विंशत्यङ्गुलानां हस्त तत्त्वविदो विदुः ।
यवानामष्टभिः कथितं मानाङ्गुलमितीरितम् ॥
यवानां तण्डुलानाम् ।
यवानां तण्डुलैरेकमङ्गुलं चाष्टभिर्भवेत् ।
अष्टोत्तरशतैस्तस्य चतुर्व्विंशतिरङ्गुलैः ॥
इति कालिकापुराणात् ॥
प्रमाणन्तु पार्थिवं यथागम् । 'अनुपदा' पाद तर्जिता । इति कात्यायनवचनात् ॥ ● ॥
अनयोरन्तरमाह कालिकापुराणम् ।
'अन्तरञ्चैव भवेत्तत्र मध्यमं धर्म्मवित्तमे ।
अत्राह बहुभिर्दिव्यमङ्गुलं तुलिकानाम् ॥
अन्तर वर्णितम् । पादौ स्तम्भौ । उपरि स्तम्भ शीर्षादि । तत्पदौ चतुरस्रादिवत् । तस्मात् उपरितनयो उपरि तत्पदं कातातारं यथो मानयोः ॥ ● ॥ स्तम्भप्रमाणमाह व्यासः ।
हस्तद्वयं निखिनयात्र पादत्र स्तम्भयोरयो ।
नङ्गलातु तथा चात्र प्रमाणं परिमाणतः ॥
तुलावशे स्तम्भयो । षडष्ट निखातहस्त-द्वयेन सार्द्धं अथातुरिप्रभावादि हस्तचतुष्टयमित्यर्थः ।
'अन्तरन्तु तयोर्हस्तौ भवेन्नाधिक एव वा ।
तयोः स्तम्भयोः । हस्तान्तरं हस्तद्वयमति-क्रमन्तरमित्यर्थः । अपरञ्च वाह्नहस्तकम् ।
एतत् प्रामाण्योक्तम् कार्य्या धर्म्मव्यवस्थापनात् तुला । इति मिताक्षरव्यवहारवाचस्पत्यादिमतम् । व्यवहारदीपिकादिध्वनम् ॥ ● ॥
अथ घटारोपणविधिः । पितामहः ।
'हस्तद्वयं निखेयन्तु पादयोरुभयोरपि ।
अत्र हस्तद्वयं पतिचाम्भकार । हस्तचतुष्टयं गर्भश्चो ।दि । तथा,—
'तोरणे च तथा कार्य्ये पाद्ययोरुभयोरपि ।
घटादुच्चतरे स्यातां नित्यं दशभिरङ्गुलैः ।
अवलम्बौ च कर्त्तव्यौ तोरणाभ्यामधोमुखौ ।
मृन्मयौ सूत्रसम्बद्धौ घटमस्तकचुम्बिनौ ।
भास्करो निश्चलं कार्य्यं सुधीं हर घटस्तथा ।
नारदः ।
शिक्यद्वयं समासाद्य घटककटयोर्दृढम् ।
एकस्मिन् शिक्ये पुरुषमन्यस्मिंस्तुलयेच्छिलाम् ॥
पितामहः ।
'प्राङ्मुखान् कल्पयेद् दर्भान् शिक्ययोरुभयोरपि ।
पश्चिमे तोलयेत् कर्त्तं अन्यस्मिन् मृत्तिकां शुभाम् ॥
पिटकं पूरयेत्तस्मिन् इष्टकाग्रावपांशुभिः ।
अत्र मृत्तिकेष्टकाग्रावपांशूनां विकल्पः ।
'परीक्षका नियोक्तव्यास्तुलामानविशारदाः ।
वणिजो हेमकाराश्च कांस्यकारास्तथैव च ।
कार्य्यं परीक्षकैर्नित्यमवलम्बगतो घटः ।
उन्मानं प्रदातव्यं घटस्योपरि पण्डितैः ।
यस्मिन् भवेत् तोये च विज्ञेयः समो घटः ।
तोलयित्वा नरं पूर्व्वं पश्चात्तमवतार्य्य तु ।
घटन्तु कारयेन्नित्यं पताकाध्वजशोभितम् ।
ततः आवाहयेद्देवान् विधिनानेन मन्त्रवित् ।
वादित्रतूर्य्यघोषैश्च गन्धमाल्यानुलेपनैः ।
प्राङ्मुखः प्राञ्जलिर्भूत्वा प्राड्विवाकस्ततो वदेत् ॥'
प्राड्विवाकसमाख्या तु पृच्छतीति प्राट विवेचयतीति विवाक । इति व्यवहारमातृका ॥ ● ॥
तथा च बृहस्पतिः ।
विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च ।
प्रियपूर्व्वं प्राग्वदति प्राड्विवाकस्ततः स्मृतः ॥
वस्तुतस्तु प्राड्विवाकसमाख्यामाह कात्यायनः ।
'व्यवहाराश्रितं प्रश्नं पृच्छति प्राडिति स्थितिः ।
विवेचयति यस्तस्मिन् प्राड्विवाक इति स्मृतः ॥'
अभियुक्तं पृच्छतीति प्राट तद्वचनं दिव्यं विविनक्ति इति विवाकः । प्राट चासौ विवाकश्चेति कर्म्मधारयः ॥ ● ॥
अत्र कालिकापुराणमाह मत्स्यपुराणम् ।
नवग्रहमखं कृत्वा ततः कर्म्म समारभेत् ।
अन्यथा यदि दुर्गा न कार्य्यं वापनं क्वचित् ।
ततश्च प्राड्विवाकः पूर्व्वं कार्य्यं पश्चात्तु निवेदितं च विनयेत् । ततोऽभियुक्तं तोलयित्वा धर्म्म तत्र प्रतीकादाहादि कुर्य्यात् । पितामहः ।
'एह्येहि भगवन् धर्म्म दिव्ये ह्यस्मिन् समाविश ।
सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥
आवाह्य च घटे धर्म्मं पश्चादङ्गानि विन्यसेत् ।
अङ्गानि पूर्व्वद्वारदेवता ।
'इन्द्रं पूर्व्वे तु संस्थाप्य प्रेतेशं दक्षिणे तथा ।
वरुणं पश्चिमे भागे कुवेरं उत्तरे तथा ।
अग्न्यादिलोकपालांश्च कोणभागेषु विन्यसेत् ॥
इन्द्रः पीतः यमः श्यामो वरुणः स्फटिकप्रभः ।
कुवेरस्तु सुवर्णाभो वह्निश्चापि सुवर्णभः ।
तथैव निरृतिः श्यामो वायुर्धूम्रः प्रशस्यते ।
ईशानस्तु भवेद्रक्तः एवं ध्यायेत् क्रमादिमान् ॥
इन्द्रस्य दक्षिणे पार्श्वे वसूनारोपयेद्बुधः ।
धरो ध्रुवस्तथा सोम आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥ ● ॥
देवेशेशानयोर्मध्ये आदित्यानां तथागमम् ।
धाताऽर्य्यमा च मित्रश्च वरुणोंऽशुर्भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्जन्यो दशमः स्मृतः ।
ततस्त्वष्टा ततो विष्णुरजघन्यो जघन्यजः ।
इत्येते द्वादशादित्या नामभिः परिकीर्त्तिताः ।
अजघन्यो जघन्यजः । इति विष्णोर्विशेषणम् ॥ ● ॥
'अग्नेः पश्चिमभागे तु रुद्राणामयनं विदुः ।
वीरभद्रश्च शम्भुश्च गिरिशश्च महायशाः ।
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ।
भुवनाधीश्वरश्चैव कपाली च विशाम्पतिः ।
स्थाणुर्भवश्च भगवान् रुद्राश्चैकादश स्मृताः ।
महायशाः विशाम्पतिश्चैति पिमिकापि ।
'प्रेतेशरक्षसोर्मध्ये मातृस्थानं प्रकल्पयेत् ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ।
वाराही चैव माहेन्द्री चामुण्डा गणसंयुता ।
गणसहितेति विशेषणम् ॥ ● ॥
निर्ऋतेरुत्तरे भागे गणेशायतनं विदुः ।
वरुणस्योत्तरे भागे मरुतां स्थानमुच्यते ।
श्वसनः स्पर्शनो वायुरनिलो मारुतस्तथा ।
प्राणः प्राणेशजीवौ च मरुतोऽष्टौ प्रकीर्त्तिताः ।
धटस्योत्तरभागे तु दुर्गामावाहयेद्बुधः ।
एतासां देवतानाञ्च स्वनाम्ना पूजनं विदुः ।
विशेषमाह मत्स्यपुराणम् ।
'ओङ्कारादिनमोयुक्तं नमस्कारान्तकीर्त्तितम् ।
स्वनाम सर्व्वसत्त्वानां मन्त्र इत्यभिधीयते ।
अनेनैव विधानेन गन्धपुष्पं निवेदयेत् ।
एकैकस्य प्रकर्त्तव्यं यथोद्दिष्टं क्रमेण तु ।
अत्र इत्यभिधानादनेनैवोच्चारणेन इदं गन्धं ओमिन्द्राय नमः इति दीपं च तु धर्म्मा धार्य्यं प्रकल्पयामि नमः इति मिताक्षरोक्तम् ।
प्रमाणाभावादनन्यथाच । पितामहः ।
भूषावसानं धर्म्माय दत्त्वा चार्घ्यादिकं क्रमात् ।
अर्घ्यादि मन्त्रादङ्गानां भूषान्तमुपकल्पयेत् ।
गन्धादिकां देवतानां परिचर्य्यां प्रकल्पयेत् ।
ततः कर्म्म प्राड्विवाकः कुर्य्यात् । यथा —
'प्राड्विवाकस्ततो विप्रो वेदवेदाङ्गपारगः ।
श्रुतवृत्तोपसम्पन्नः शान्तचित्तो विमत्सरः ।
सत्यसन्धः शुचिर्दक्षः सर्व्वप्राणिहिते रतः ।
उपोषितः शुद्धवासाः कृतदन्तादिधावनः ।
सर्व्वासां देवतानाञ्च पूजां कुर्य्याद्यथाविधि ।
इत्यनन्तरमभिषेकमाह नारदः ।
'इत्येतैश्च मान्त्रैश्च सुपदीपावचादिभिः ।
आचरेत् घटं पूर्व्वं ततः शिरसि पूरयेत् ।
घटे धर्म्मम् । तथा च विष्णुनारदौ ।
'धर्म्मपर्य्यायवचनं घट इत्यभिधीयते ।'
शिरःपत्रारोपणम् । धर्म्मदिवस धर्म्मेण इत्या-

मय । मितात्तरायान्तु धर्मपूर्वक एव दृत्तक नियम । तथा,—

'चतुर्दिन्तु तथो होम कलशो विन्यसेत् ।
आन्देय इविषा चैव समिद्भिर्ज्योत्याथवे ॥
सावित्रा प्रथवैव व्याहत्तीभेव योषयेत् ।

सावित्रा गायत्र्या । तेन प्रथवादिनो नाधिको युत्तार्थं पुनः व्याहाकारान्त प्रत्यहत्त्वार्थं समिदाज्यचरून् प्रत्येकमष्टोत्तरशतं जुहुयादिति मितात्तरा । वस्तुतस्तु गायत्रीहोमे योगियाज्ञवल्का ।

'प्रणवव्याहृतिभ्याञ्च स्वाहान्ते होमकर्मणि ।
तेन प्रणवान्विता व्याहृतिका गायत्रीयुक्तार्थं स्वाहाकारान्त पुनः प्रत्यहत्त्वार्थं चाज्य पायसमिधो मिलित्वा अष्टोत्तरशतं जुहुयात् साधवात् । अतएव देवतैक्ये हि दधिपयसो रुभेकाधुदानम् । ऐन्द्रं दध्यमावास्यायामैन्द्रं पयोऽमावास्यायामिति श्राद्धविवेकः ॥ ० ॥ यत्तु घटलाङ्गल्यदानमे ।

'घटलाङ्गल्यदिभ्यः पायसं विनिवेदयेत् ।
इत्यादि कुण्डे च गुरुधर्मे विवेन्येन ॥
पलाप्रसमिदादीन्दं तर्पितलोहिता ॥
इति मत्स्यपुराणात् ।

चतुर्थो होमतुत्यमधौ धर्मो गुरु धर्मव्यान्धि होमं कुर्मीति व्यात्वा करोति स एव धर्मध्याय आदित्याय रुद्रेभ्य इत्यादिकमे पायसं पलाप्रसमिदाज्यतिलाञ्च प्रत्येकं जुहुयादिति भूनाथप्रभृतिभिरुक्तम् । तद्युक्तं तद्वर्णयिति तद्देवाभ्यां प्रत्येकद्रव्येण होमविधानात् । अत एव रत्नाकरस्थितिस्य जुहुयादित्युक्ता तद्वदिति पलाप्रसादि जुहुयादित्युक्तम् । अतएव दुर्गोत्सवे वाचस्पतिमिश्रप्रभृतिभिरष्टादिहोमप्रव पायसपूर्णहोमद्रव्यविकाभ्यां मिलिताभ्यां पत्र मिलितहोमो विहितः । अयस्ती तु ।

'होमो पत्रादिपूजायां घृतमष्टाधिकं भवेत् ।
अष्टाविंशतिरष्टौ वा प्रत्यधत्तमथापि वा ॥
इति देवीपुराणीयादिवचनप्रमाणात् यथासम्भवा ज्ञेया । एवं मत्स्यपुराणे ।

मत्स्य राजन् महाबाहो तडागादिषु यो विधिः ।
वेदाद्य परितो गन्तारविमानानिमन्त्रणाः ॥
भव सम्भावा यत्र योनिवक्षु इपालय ।

इति यथादिकृत्यानुक्त्या,—

'आलयाद्यौश्च निमन्त्रणादोर्विनम्राम्याहते भूमि ॥
इति इत्यादचापि अन्यत्रावैकाग्निविधिरिति वदन्ति । अन प्राड्विवाकमन्त्रेणैव होमः ।

'न्यैद्धु सर्वकार्याणि प्राड्विवाकः समाचरेत् ।
अभ्यर्चनं यथान्यायं सोमवासो उपास्यया ॥

इति मितात्तराधृतपितामहवचनात् । अध्वर्यु यजमानमाध्यम् । न चात्र भिन्नप्रतिज्ञान्त्विमो रथकारवङ्गिद्वाप्रयुक्तिकल्पनति वाच्यम् । ब्राह्मणमात्रस्य मन्त्राध्यापनाध्यायनेन कल्प नानुपपत्तेः । तथा च मनुः ।

'वेदानधीत्य वेदौ वा वेद वापि यथाक्रमम् ।

अविप्लुतब्रह्मचर्यो गृहस्थाश्रममाचरेत् ॥ इति ।
प्रायश्चित्तहोमस्तु व्याहृतीभिर्महाव्याहृतिभिः ।
'यत्र व्याहृतिभिर्होमः प्रायश्चित्तात्मको भवेत् ।
चतस्रस्तत्र कर्तव्याः स्त्रीपाणिग्रहणे यथा ॥
अपि व्याहृतिभिर्होमः प्रायश्चित्तेऽपि चाहुतिः ।
तत्रापि विकल्पोऽयं प्रायश्चित्तविधिः स्मृतः ॥
इति छन्दोगपरिशिष्टात् ॥

न तु व्याप्तायव होमो भवदेवभट्टोक्तः । किन्तु कल्प इत्यनेन तस्य निरासात् । भट्टनारायणादिभिरप्रमाणीकृतत्वाच्च ॥ ० ॥ पितामहः ।

'तोलयित्वा नरं पूर्वं तस्मात्तमवतार्य च ।
प्राड्विवाकः प्राञ्जलिभूत्वा प्राड्विवाकस्ततो वदेत् ॥
एहोहि भगवन् धर्म । दिव्ये ह्यस्मिन् समाविश ।
सहितो लोकपालैश्च वस्वादित्यमरुद्गणैः ॥
तथार्थमभियुक्तस्य वेशयित्वा तु पत्रके ।
मन्त्रेणानेन सहितं कृत्वा तच्च शिरोगतम् ॥

आदित्यचन्द्रावनिलोऽनलश्च
द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च सन्ध्ये
धर्मोऽपि जानाति नरस्य वृत्तम् ॥

इमं मन्त्रविधिं कृत्वा सर्वदिव्येषु योजयेत् ।
आवाहनञ्च देवानां तथैव परिकल्पयेत् ॥ ० ॥
धर्माभिमन्त्रितधटं विधिनानेन मन्त्रवित् ।
त्वं घट ब्रह्मणा सृष्टः परीक्षार्थं दुरात्मनाम् ॥
धकाराद्धर्ममूर्त्तिस्त्वं टकारात् कुटिलं नरम् ।
धृतो भावयसे यस्माद्घटस्तेनाभिधीयसे ॥
त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च ।
त्वमेव देव ! जानीषे न विदुर्यानि मानवाः ॥
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ।
तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि ॥ ० ॥

शेषमत्रप्रकारमाह नन्दिपुराणम् ।
शुभे नक्षत्रदिवसे शुभे राश्युदये तथा ।
वेशयेत् पूज्यदेवस्थान् सम्प्रकल्प्याद्भुतान् ॥
पूर्वेद्युर्विवशो भूत्वा लिखित्वा शेषकोशम् ।
शिरोधो इत्यवाक्ष्य धर्मोपन्यासधारकम् ॥
मत्स्यपुराणञ्च ।

'धौतान्तितान् सुखप्रश्नान् धर्मशीलान् समान् ।
अयथान् वेशयेद्यस्तु स नरो लेखकः स्मृतः ॥
इति दानसागरः ॥

धारयसे इत्यत्र भावयसे इति पाठोऽनुपयुक्तः । तथा हि । कुटिलं पापिनं सुग्रीवपयन् वा । आद्ये पापिनमिदंतावच्छाभिधानमनुपपन्न स्वगताः शुद्धस्यापि भावनात् द्वितीये पूर्वं सिद्धत्वेन भावनानुपपत्तेः । तस्मात् कुटिल व्यवहाराभियुक्त धारयसे इत्येवार्थः । अपएव उपसंहारे संशयादस्मादित्युक्तम् । अतएव कालिकापुराणेऽपि । मानुषञ्चोन्नति तथोक्त मिति ॥ ० ॥ स्तुतिमुक्तयवहारप्रतीयिकयो विष्णु । घटश्च समयेन यष्टोयात तुलाधारकञ्च ।

'धर्मपर्यायवचनैर्घट इत्यभिधीयसे ।
त्वमेव घट जानीषे न विदुर्यानि मानवाः ।
व्यवहाराभिशस्तोऽयं मानुषः शुद्धिमिच्छति ।

तदेनं संशयादस्माद्धर्मतस्त्रातुमर्हसि ।
अज्ञा ये स्युस्ता लोका येलोकाः कूटसाक्षिणः ।
तुलाधारस्य ते लोकास्तुलां धारयतो मृषा ॥

समयेन समेव घट इत्यादिन्यभेन । घट यष्टोयात् योजयेत् । तुलाधारकश्च ब्रह्मा च इत्यान्विता नियमेनैव । अथ नानातुलिवर्तिन मत्तानाम् एकतरपाथ्यानां समानप्रयोजनानां धर्मोद्विवृत्तिकल्प इति मत्स्योदयाते न लिखिता । अभियुक्तप्राड्विवाकपाथ्याकाणां कर्तव्यानां समुच्चयः । पितामहः ।

'भिन्न दयानि दिनानि शुचये चाद्यवाससः ।
शुचये यजमानस्याग्नीचरादिदाय । वतिन प्रति याज्ञवल्क्यैर्विकलिकायां नारदः ।

'हल्लपातेषु सर्वेषु कुर्याद्गुप्तदानि च ।
सायौन पुनरालपेद्धस्तौ विष्टाधिविनतौ ॥
दत्वाविविधौ हवनसतिनौ हवनवतमलकादिना विहितं हत्वा चतालरः वाल न वा इति मानवमिति तुसरां वतिनो दिव्याधिकारः । नारदः ।

'अहोरात्राधिते जाते आर्द्रवाससि मानवे ।
पूर्वाह्णे सर्वदिव्यानां प्रदानमनुकीर्तितम् ॥ ० ॥
घटानुमन्त्रणात प्रागपि पुनर्नोलनमाह कालिकापुराणम् ।

'उत्तोलितं तथा चाप्त स्त्रोपम प्रथम तुलाम् ।
गन्धोक्ष कारयेद्देवामस्ताभ्यादुन्नमदेत् ॥'
याज्ञवल्क्यः ।

'तुलाधारस्य विद्वद्भिरभियुक्तस्तुलाश्रितः ।
प्रतिमानसमीभूतो रेखां कृत्वावतारितः ॥
त्वं तुले सत्यधामासि पुरा देवैर्विनिर्मिता ।
तत् सत्यं वद कल्याणि ! संशयान्मां विमोचय ॥
यद्यस्मि पापकृन्मातस्ततो मां त्वमधो नय ।
शुद्धश्चेद्गमयोर्द्ध्वं मां तुलामित्यभिमन्त्रयेत् ॥
तुलाधारस्याभिमर्शेर्लिखितादिभिः पाषाणादिप्रतिमानसमीकृततुलाधिरूढः अभियुक्तो दिव्याधिकारी । येन सन्निवेशेन प्रतिमानसमीकरणायां यत्र भागयो यवस्थिता मित्र-रत्नवत्र तत्र पाद्भुवरोगाहयित्वा पिटकादव तारितः सम्यकति सलेन तुलां प्रापयेत । सर्वे सन्दिग्धापस्य स्वरूप वद इमयं । पापलम्-मन्नवारी शुद्धश्च सन्नवारी । मन्त्रञ्चाय ज्ञान पौराणिकत्वात् शूद्रैरपि पाठ्यः । वेग्नमत्रपर्वो शूद्रस्येति छन्दोगाह्निकधृतस्मृतौ वेदेति विशेषणात् आहविश्वदेवादौ तु विशेषतो नमस्कार मन्त्रविधानात् ज्ञानमन्त्रोऽपि निषिद्ध । प्रपञ्चस्तु तिथितत्त्वेऽनुसन्धेयः । स्त्रीपरीक्षायामपि वचिकृत एव प्रयोज्यः । दिव्यानीह विशुद्धये इत्यनेन सन्दिग्धापसन्देहनिवृत्तिफलकतयाविहितस्य स्त्रीपुरुषकर्तृकदिव्यविधानस्य मानुषः शुद्धिमिच्छतीत्यनेन च प्रकृतापूर्वायोगात् । अतएव पत्नीं सम्बोध्य नो घटोऽतिः मन्त्रे दिवकुपमोह यजमानकर्तृकप्रयोगेऽपि न दिवकुवचनोह इत्युक्तम् ॥ ० ॥ घटस्थप्रतिमायाः

तस्य भस्म शोधाय श्रावकसाद्य नादन् ।
'घमुमदच धनममभियुक्त यथाक्रम ।
संयाम मर्दि मरुषे नास्य देयो यथाक्रमम् ।
देयो न्यायविहित माकृतावेनेति चैव ॥ ० ॥
तत्र शिरोऽवर्धितपत्रक शोधं कर घटे पुन-
रारोपयेत् । पुनरारोपयेत्तदिति शिरोऽथ
शिरश्वश्कमिति वारम्भात् । तुलारोपितश्च
नर विमाडोपचककाल प्रतथयगुर्नपराधा
वगयोऽयम् ।
'मा कान्ति पनस्यान्ते मध्याकार्ये देहे स्थाश्री ।
कान्त न्यू हस पूर्णे पञ्च भवा राश्रौ चैव ।
शुध्यास प्राच्यैवपौसी राजू कर प्राधा
समाहारी वस्तयान्ते यत्रैकाली कलया ।
इति श्लोकस्य पश्चात् पाठयोगकाल पश्चमता
अक्ष यावत् तावत स्थापयेत् । यथा स्मृतिः ।
'ज्योतिर्विदमाधाय येष्टं कुर्यात् कालपरीक्ष
णम् ।
विनाद' मध्य विघ्नया घटीमात्राकालकोविदै ।
नतकालश्च ज्ञातिधि ।
दशगुर्वक्षरा प्राय घट प्राधा स्याद्विनादिका ।
मासां मता पत्ती सौपादोऽराव घटिकाक्षया ।
तथा मता ॥ ० ॥ पितामह' ।
मालिया मापया येष्टा यथाहरार्थवादिन ।
मानिन सुचयोऽतुष्ट्या नियानुषा दूरैव तु ।
शुधवि माचिक धर्मे शुद्धाशुद्धौ इमे तथा ।
तुलितो यदि वर्द्धेत स शुद्धः स्यात न संशयः ।
समो वा हीयमानो वा न विशुद्धो भवेन्नरः ।
स्वल्पदोषः समो ज्ञेयो बहुदोषस्तु चोपरी ।
अनर्थं मतिभारे ध्यानिद्रगादिना । चौर्यं
महिष्मप्राशिना ॥ ० ॥ तम पुनश्चोऽदमाह
इत्यादि ।
'घटेऽभियुक्तस्तुलितो हीयमानो विमाद्धुत्वात् ।
तत्क्षणात् पुनस्तोल्यो वर्द्धितो विजयी भवेत् ॥
शोधं मनस्येवाहीआरोऽपि प्रमाणेष्वभिल
मार्गं तथैव पुनस्तोलयेत् । अङ्गुवैगुण्यसमा-
वनायामु प्रयोगाकारणमिति । यद्रा बाहुबल्य
मानहरणारणक एव कमादीनां छिद्रादि
सम्भावद्वि' ।
कक्षच्छेदे तुलाभङ्गे घटकर्कटयोस्तथा ।
रज्जुच्छेदे घनभङ्गे च तथैवाशुद्धिमादिशेत् ॥
इति इह्मस्मृतिवचनात् ।
अथ प्रियलक्षणम् । घटककटी तुलायां त्रिका
मारोशीर्षहस्तमायस्कोणनी लकटप्रयद्भिमौ ।
अध मार' । सम्भयोरुपरि निविष्टतुलामार
भद्र इति विनाशका । दारुमयोमाक कौलक ।
इति चन्द्रापुष । सभद्रककर्णितं पारिमाण ।
यन्त्र तु हस्तमात्रमारमेन दर्शितं भट्टकारा
पुनरारोपयेत् । शिक्यालिप्यवेदाभिर पुनरा
रोपयेदभिमिति यावी । तत्र ।
'नलिकपुरोहितमायशस्तिका अभिष नोपदेव ।
धर्म बहरेषमा दाना तुल्ता सामान मनोरमा ।
मतृतो कोशैतद्यादि सकलभुवाम पल्टे ॥ ० ॥
सन्य मत्तुप । प्राड्वाको लोकपालादिपम-
स्कारपूर्वक पयाशास्त्रपथा तुलां कुर्यात् ।
तत्र चतुरस्त्रौ सुदृढौ स्तम्भौ तथा चतुर्हस्त
प्रमाणेन दक्षिणोत्तरयोर्दिशोर्हस्तद्वयनिखनने
सम्य यद्वारकीलकायसमायोक्तपरि मध्ये पाच
द्वये च विहितच्छिद्र मध्यच्छिद्रविनिवेशितलोहा
कुशयद्धर्भ निधाय उपरि कीलकस्य सनपद्मक
मध्यक्रियाद्वृतेन तुलामध्यवलयालोहाङ्कुशं
मञ्जुलाग । एवच मध्ये स्तम्भयोरन्तरा तिर्यक
तुलादण्डस्थिताति तुलाचलिताभ्यामायसकील
कास्यो शिक्यद्वयरज्जुबन्धन कुर्यात् । तुलायां
पार्श्वयो प्राकप्रमुखकरित्रोस्तोरणस्तम्भौ तुलायां
दशाङ्गुलोच्छ्रायौ कार्यो तोरणयोरुपरि तच
समुद्गौ चतुष्पादाधोमुखौ घटमस्तकचुम्बितौ
चत्वारौ कार्यौ । यथावलम्बविन्यासाभ्यां तुला
यामवलोकनार्थमिव पीयं तथा चतुर्दारापि ।"
इति दिव्यतत्त्वम् ॥ ० ॥ अस्य प्रयोगस्तुलाशब्दे
द्रष्टव्य ॥
घटी, स्त्री, (घट+अच । वियायवात् वस्त्र ट ।
गौरादित्वात् ङीष ।) चोरवस्त्रम् । इति मेदिनी ।
टे १८ ॥ कौपीनम् । इति त्रिकाण्डशेष ॥
घटीराग, स्त्री, (घट्या चोरवस्त्रस्य रागम् ।)
गभाधानानन्तरस्त्रीसम्प्रदानकचोरवस्त्ररागम् ।
यथा, ज्योतिःसारसंग्रहे ।
"स्वल्पधनवस्त्रेषु पुष्यादिषुत्तरासु च ।
अनुयोग्य घटी दया सौम्यवारे शुभे तिथौ ॥"
घस, भावे । इति कविकल्पद्रुमः । (भ्वा परं
अक सेट ।) घसति भस्त्रा । इति दुर्गादास ॥
घसूट, पुं, (घपति विचलीव प्रज्ञतिम् । घि+बाहुल
कात् अट्च । पृषोदरादित्वात् साधु ।) घुसृण ।
इति हेमचन्द्र । ३ । २१० ॥ (यथा, काशी
खण्डे । २८ । ८३ ।
"घर्माधर्मगुणच्छिन्नी बहुरङ्गसमन्विता ॥")
घन दवे । इति कविकल्पद्रुम ॥ (भ्वा परं अक
सेट ।) घनति स्वरः । इति दुर्गादास ॥
घन नि र थाने । इति कविकल्पद्रुम ॥ (क्रा
परं अक सेट ।) धान्ननिह धान्यक्रिया । र,
वैदिक । नि, इयति भूमियोमिततृणाद्यति
दवाय । इति दुर्गादास ॥
घर्म, पुं, (घरति दीप्यति । घृ दवे+मक्षम ।)
स्वेदमात्रम् । इति शब्दरत्नावली ॥ गोष्ठम् ।
इति मेदिनी । मे, १२ ॥ (यथा हरिवंशे । ७१ । ११ ।
"ऋतुत्रयेषु मासान्ते कालयन्तो घर्माद च ॥")
जोषमात्र । (इयति धान्यादिकामृणादय-
तीति । घस+अच । यद्वा, घरति तृणमिति ।
घृ+"वृङ्भिर्माभ्यो विधान् मक् ।"इत्यौणादि।
रक्षम"बाहुलकात् केवलादपि मक् ।"तहेतुः
एतेनैव मक ।) आतपम् । (यथा, ऋग्वेदे ।
"घर्मे विश्वर्णमो कुर्वन्ति वयसि
घर्मे रायसं आसना विचरन्ति ।
इहेन्द्र घर्मो वर्णित यशूर्हि चोदि
घर्मावसाय प्रपारमाणपत्रम् ॥")
तनुघर्माय' । प्रथमम् १ तिलम् २ शायतिवम् ३
रिकथम् ४ अक्षमम् ५ वस ६ शिरस्थम् ७
सैविभम् ८ मुषम् १० धर्मे ११ रा १२ तिसद
१३ । इत्यमरः । २ । ८ । ८० ॥ आयनम् १४
लम्भौ १५ भोगम् १६ यम्न १७ हवि १८
सी १९ घवघामीम् २० । इति राजनिर्घण्टः ॥
दे २१ भोम २२ । इति जटाधरः ॥ तन् २३ ।
इति शब्दरत्नावली ॥ तस्य वैदिकपर्यायाः ।
मघम् १ रेकम २ रिकथम् ३ वेन ४ वरिव ५
श्वात्रम् ६ रत्नम् ७ रयि ८ क्षत्रम् ९ भग १०
मीळ्हम् ११ गय १२ द्युम्नम् १३ इन्द्रियम् १४
वसु १५ राय १६ राध १७ भोजनम् १८
तना १९ नृम्णम् २० बन्धु २१ मेधा २२ यश
२३ ब्रह्म २४ द्रविणम् २५ श्रव २६ वृत्रम् २७
ऋतम् २८ । इत्यष्टाविंशतिरेव धननामानि ।
इति वैदनिघण्टौ २ अध्याय ॥ ० ॥
तत्त्रिविध यथा,—
"शुक्लं त्रिविधं चैव शुक्लं शबलमेव च ।
कृष्णञ्च तस्य विज्ञेयो विभाग सप्तधा पुन ॥
क्रमागतं प्रीतिदायं प्राप्तञ्च सह भार्यया ।
अविशेषेण सर्वेषां धनानां त्रिविधं धनम् ॥
वैशेषिकं धनं ज्ञेयं ब्राह्मणस्य त्रिलक्षणम् ।
प्रतिग्रहोपात्तं शिष्यात् याज्यात् तथा नृप ॥
त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकं धनम् ।
युद्धोपलब्धं करजं दण्डप्राप्तं तथा नृप ॥
वैशेषिकं धनं दृष्टं वैश्यस्यापि त्रिलक्षणम् ।
कृषिगोरक्षवाणिज्यं शूद्रस्यैभ्यश्चानुग्रहात् ॥
कुसीदकृषिवाणिज्यं प्रकुर्वीत स्वयं कृतम् ।
आपत्काले स्वयं कुर्वन्नैनसा युज्यते द्विजः ॥"
इति मार्कण्डेये २१६ कूर्मोक्ते २१० अध्याय ॥ ० ॥
धनमानिनो दायशब्दे द्रष्टव्य । धनानामिनो
यथा,—
"धुक्तवामनखाग्राणां सौवर्णानां निरीक्षणमपि ।
उक्तानानां तपस्तानां धनमानो न विद्यते ॥
मध्याहकालसमाख्याता नाम शक्तिरिता ।
यतादृतीयथैव देव भार्यभागहरा हि ते ॥"
इति वामनपुराणे ७६ अध्याय ॥ ० ॥
धनप्रद यथा,—
"धन दायाद्या राजन् । भार्या दासकाश्च पुत्र ।
यत्ते समधिगच्छन्ति यस्य ते तस्य तद्धनम् ॥"
इति मात्स्ये ११ अध्याय ॥ ० ॥
धनस्य चाञ्चल्यमाह यथा,—
"अदेयाद्विविधं चाम प्राप्ता इति कथ्यते ।
न तस्य हरते साक्षात् यो यस्य हरते धनम् ॥"
इति कूर्मे ५८ अध्याय ॥ ० ॥
"धनदानादनवोदं प्रकरोति सादितं धनम् ।
भक्त वा बहुलं वा वै देवमिश्रमिवोचत ॥"
धनदानार्थं महीभूरादिदानम् । धनेश्वर धन
श्रेष्ठाधनम् ॥ ० ॥ तालभ्यर्थ यथा —
"प्राणैश्चतुर्णमोर्धनैर्मानदमपनायन ।
धामैरोपाधिनं प्रभु तत् तर्ह धनप्राहन ॥"
धनिकत् धावतया श्रोऽपेयति । धान्ता धर

पौष्कदा । प्रतिग्रहेण लब्धमस्त्यादिना । शाब-
लीय वाणिज्यकर्षिर्णोद्युतादिना । कृष्णेन
शाकवर्गेण शूद्रादिना । तस्य तामसम् ॥ * ॥
राजसस्य यथा,—
'कुसीदकृषिवाणिज्यशुल्कशिल्पानुवृत्तिभिः ।
कृतोपकारादाप्तञ्च राजसं समुदाहृतम् ॥
अद्भुततरा त्रिधा ॥ * ॥ सात्त्विकस्य यथा—
'श्रुतशौर्य्यतपःकन्याशिष्ययाज्यान्वयागतम् ।
धनं सप्तविधं शुद्धं मुनिभिः समुदाहृतम् ॥
श्रुतेनाध्ययनेन । शौर्य्येण युद्धादिना । तपसा जप-
होमदेवार्च्चादिना । कन्यागतं कन्यया सहागतं
श्वशुरादिभ्यो लब्धम् । शिष्यागतं गुरुदक्षिणादिना ।
याज्यागतं याजनलब्धम् । अन्वयागतं दाया-
देभ्यो लब्धम् । शुद्धं सात्त्विकम् ।" इति शुद्धितत्त्वे
दक्षवचनम् ॥ * ॥ धनप्रयोगनक्षत्राणि यथा,
अश्विनी । पुनर्वसुः । पुष्या । उत्तरफल्गुनी ।
हस्ता । पूर्व्वाषाढ़ा । उत्तराषाढ़ा । श्रवणा ।
धनिष्ठा । शतभिषा । उत्तरभाद्रपद् । रोहिणी ।
इति ज्योतिषम् ॥ * ॥ धनप्रयोगनिषेधो यथा,

"आद्य धनञ्जनमदितिमघ
प्रमुहर्य्य मालपूर्वं सदैव ।
कार्य्यं न चैत्रे धनप्रयोगो
दत्तो मघे याचकस्य न देयम् ॥"

इति समयप्रदीपः ॥

अर्थप्रशंसा यथा,—
"अर्थेभ्योऽथ प्रवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः ।
क्रियाः सर्व्वाः प्रवर्त्तन्ते पर्व्वतेभ्य इवापगाः ॥
अर्थेन हि विहीनस्य पुरुषस्याल्पचेतसः ।
विच्छिद्यन्ते क्रियाः सर्व्वा ग्रीष्मे कुसरितो यथा ॥
सोऽयमर्थं परित्यज्य सुखकामः सुखैधितः ।
पापमाचरते कर्त्तुं तदा दोषः प्रवर्त्तते ॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः ॥
यस्यार्थाः स च विक्रान्तो यस्यार्थाः स च बुद्धिमान् ।
यस्यार्थाः स महाभागो यस्यार्थाः स गुणाधिकः ॥
अर्थस्यैते परित्यागे दोषाः प्रव्याहृता मया ।
राज्यमुत्सृजता वीर ! येन बुद्धिस्त्वया कृता ॥
यस्यार्था धर्म्मकामार्थास्तस्य सर्व्वं प्रदक्षिणम् ।
अधनेनार्थकामेन नार्थः शक्यो विचिन्वता ॥
हर्षः कामश्च दर्पश्च धर्म्मः क्रोधः शमो दमः ।
अर्थादेतानि सर्व्वाणि प्रवर्त्तन्ते नराधिप ॥
येषां नश्यत्ययं लोकश्चरतां धर्म्मचारिणाम् ।
तेऽर्थास्त्वयि न दृश्यन्ते दुर्द्दिनेषु यथा ग्रहाः ॥"
इति रामायणे युद्धकाण्डे श्रीरामं प्रति लक्ष्मणस्य वाक्यम् ॥ * ॥

अर्थनिन्दा यथा,—

"अर्थमनर्थं भावय नित्यं
नास्ति ततः सुखलेशः सत्यम् ।
पुत्त्रादपि धनभाजां भीतिः
सर्व्वत्रैषा विहिता रीतिः ॥"

इत्यादि मोहमुद्गरे द्रष्टव्यम् ॥ * ॥

अक्षुण्णार्थं भगवता धनहरणम् । यथा,—
"राजन् यमनुगृह्णामि हरिष्ये तद्धनं शनैः ।
ततोऽधनं त्यजन्त्यस्य स्वजना दुःखदुःखितम् ॥"
इति श्रीभागवतम् ॥

धनकेलिः, पुं, (धने केलिः क्रीड़ा यस्य ।) कुवेरः । इति त्रिकाण्डशेषः ॥

धनच्छू, स्त्री, (धनं छ्यति नाशयतीति । छो म भूमौ + बाहुलकात् ऊ ।) करेणुपर्णी । इति त्रिकाण्डशेषः ॥

धनञ्जयः, पुं, (धनं जयति धनाद्यर्पयतीति । जि + खच् + मुम् । "धनमिच्छेत् हुताशनात् ।" इत्युक्तेरस्य तथात्वम् ।) अग्निः । चित्रकवृक्षः । इत्यमरः ॥ १ । १ । ५६ ॥ (धनं जयति अरीन् विजित्य आनयतीति । जि + खच् + मुम् च ।) अर्ज्जुनः । (अस्य निरुक्तिर्यथा, महाभारते । ४ । ४४ । १३ ।
"सर्व्वान् जनपदान् जित्वा वित्तमादाय केवलम् ।
मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनञ्जयम् ॥")
नागभेदः । स तु कद्रुपुत्त्राधिपतिः । (यथा, महाभारते । ५ । ८ । ८ ।
"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ ।
मणिमान् कुण्डधारश्च कर्कोटकधनञ्जयौ ॥")
देहवातः । स च शरीरपोषकवायुभेदः । इति मेदिनी । ये, १९ ॥ ("धनञ्जयः पोषणकरः ।" इति वेदान्तसारः । ११ ॥
"न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः ॥"
इति सुबोधिनी ।)
"धनञ्जयश्च बोधि महारजतपावक ।
कपाटे पोरधि स्कन्धे हरि भामी सगन्धिषु ॥"
इति सारस्वतटीकायां रामभट्टः ॥
अर्ज्जुनवृक्षः । इति रत्नमाला ॥ * ॥ (मोच-विधिष । तद्गोत्रे, त्रि । यथा, महाभारते । २ । ११ । २० ।
"धनञ्जयानामृषभः सुधामा धामगोऽभवत् ॥"
विष्णुः । यथा, महाभारते । १३ । १४९ । ८२ ।
"अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ॥"
"यत् दिग्विजये धनं प्रभूतमानयत्तेन धनञ्जयः ।
'पाण्डवानां धनञ्जयः ।' इति भगवद्वचनात् ।"
इति शाङ्करभाष्यम् ॥ शोकसंहारस्य पाठः ।
यथा, देवीभागवते । १ । २ । १ ।
"अस्यार्थक पथान्धे श्लोकथे तु धनञ्जयः ॥")

धनदः, पुं, (धनं ददाति पालयतीति । दै ड पालने + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) कुवेरः । इत्यमरः । १ । १ । ७२ ॥ (यथा, देवीभागवते । ५ । २ । ४ ।
"निवेदय यशोत्थानि जितेन्द्र वरद प्रभुम् ।
धनदं पावकञ्चैव चन्द्रसूर्य्यौ विरिञ्चि च ॥"
ब्रह्मा चास्य तपसा सन्तुष्टः तं धनेशं चकार । यथा, अध्यात्मरामायणे । ७ । १ । १८ ।
"ददौ तत्तपसा तुष्टो ब्रह्मा तस्मै वरं शुभम् ।
मनोऽभिलषितं तस्य धनेशत्वमखण्डितम् ॥")
हिज्जलवृक्षः । इति राजनिर्घण्टः ॥ (धनद-
आत्यधिलोकाध्यक्षेति अथ । हिमवत एक-
देशः । यथा, महाभारते । १३ । १८ । २६ ।
"धनदं समतिक्रम्य हिमवन्तञ्च पर्व्वतम् ॥"
धनं ददातीति । दा + क ।) दातरि, त्रि । इति मेदिनी । दे, १९ ॥ (यथा, कामन्दकीय नीतिसारे । १ । २१ ।
"उद्वेजयति भूतानि क्रूरवाक् धनदोऽपि सन् ॥")

धनदाक्षी, स्त्री, (धनदस्य कुवेरस्य अक्षि इव पिङ्गलं पुष्पं यस्याः । अच् समासे । स्त्रियां ङीष् ।) लताकरञ्जः । इति राजनिर्घण्टः ॥

धनदानुजः, पुं, (धनदस्य कुवेरस्य अनुजः कनिष्ठः ।) रावणः । इति शब्दरत्नावली ॥ (यथा, रघुः । १० । ५१ ।
"निष्कृत्य सत्वरामाणां बधाय धनदानुजः ।
रामेषु निहितं मेने पदं दृष्ट्वा स्वसङ्गरम् ॥")

धनदायी, [न्] पुं, (धनं ददाति उपासकायेति । दा + णिनि । "धनमिच्छेत् हुताशनात् ।" इति वचनादस्य तथात्वम् ।) अग्निः । इति शब्दरत्नावली ॥ धनदातरि, त्रि ॥

धनन्दा, स्त्री, (धेन धनेन भक्ते आनन्दं ददातीति । दा + क ।) बुद्धशक्तिभेदः । इति त्रिकाण्डशेषः ॥

धनपतिः पुं, (धनानां पतिः ।) कुवेरः । इति धनञ्जयः ॥ (यथा, महाभारते । २ । १९ । ३ ।
"तथा धनपतेर्येषां गुह्यका रक्षपालकाः ॥")
अस्य उत्पत्तिर्यथा—
महातपा उवाच ।
"शृणु चान्यां धनपतेरुत्पत्तिं पापनाशिनीम् ।
यथा वायुः शरीरस्थो धनदः सम्बभूव ह ॥
आद्यं शरीरं यत्तस्मिन् वायुरन्तःस्थितोऽभवत् ।
प्रयोजनान्मूर्त्तिमत्त्वमादिशन् देवदेवता ॥
तत्रान्तःस्थस्य वायोस्तु उत्पत्तिः कीर्त्यते मया ।
तां शृणुष्व महाभाग ! कथ्यमानां मयानघ ! ॥
ब्रह्मणः सृजतः सृष्टिं मुखाद्वायुर्विनिर्ययौ ।
प्रचण्डशर्करावर्षी तं ब्रह्मा प्रत्यषेधयत् ॥
मूर्त्तो भवस्व शान्तश्च तमोक्तो मूर्त्तिमान् भवत् ।
सर्व्वेषाञ्चैव देवानां यद्वित्तं फलमेव च ॥
तत् सर्व्वं पाहि येनोक्तः तस्माद्धनपतिर्भवेत् ।
तस्य ब्रह्मा ददौ तुष्टस्तिथिमेकादशीं प्रभुः ॥
तस्यामनग्निपक्वाशी यो भवेन्नियतः शुचिः ।
तस्यास्तु धनदो देवस्तुष्टः सर्व्वं प्रयच्छति ॥
एषा धनपतेर्मूर्त्तिः सर्व्वकिल्बिषनाशिनी ।
य एतां शृणुयाद्भक्त्या पुरुषः पठतेऽपि वा ॥
सर्व्वकामानवाप्नोति स्वर्गलोकञ्च गच्छति ॥"
इति वराहपुराणम् ॥

धनपिशाचिका, स्त्री, (धने पिशाचीव ।) धनाशा । तत्पर्य्यायः । तृष्णा २ । इति हारावली । १२५ ॥

धनपिशाची, स्त्री, (धने पिशाचीव ।) तृष्णा । धनलोभः । इति त्रिकाण्डशेषः ॥

धनप्रिया स्त्री, (धनवत् प्रिया ।) काकजम्बूः । इति राजनिर्घण्टः ॥

धनव्ययः, पुं, (धनानां व्ययः ।) दानभोगादि ।
यथा वह्निपुराणे ।
“अविद्यौषधयो वेदा दत्तान्युक्तानि धनम् ।
रतिपुत्रफला दारा दत्तभुक्तफलं धनम् ॥”
इति वह्निपुराणे दानविधिनामाध्यायः ॥

धनवती, स्त्री (धनमस्या अस्तीति । धन+मतुप् । मस्य वः । स्त्रियां ङीप् ।) धनिष्ठानक्षत्रम् । इति जटाधरः ॥

धनवान्, [त्] त्रि, (धनमस्यास्तीति । धन+मतुप् । मस्य वः ।) धनविशिष्टः । धनी । इति हलायुधः ॥ (यथा रामायणे ।२।६७।१८।
“नाराजके जनपदे धनवन्तः सुरक्षिताः ।
शेरते विवृतद्वाराः कृषिगोरक्षजीविनः ॥”)

धनस्यकः पुं गोक्षुरः । इति शब्दचन्द्रिका ॥ (आत्मनः धनमिच्छतीति । धन+क्यच् । “सर्वप्रातिपदिकेभ्यः क्यचि लालसायां सुगसुकौ ।” ६ । १ । ५१ । इत्यस्य वार्त्तिकोक्त्या सुक् । ततो धनस्य इति नामधातुः+ण्वुल् । लालसया धनेच्छौ त्रि ।)

धनहरी स्त्री, (धनं हरतीति । हृ+“हरतेरनुद्यमनेऽच् ।” ३ । २ । ९ । इति अच् । गौरादित्वात् ङीष् ।) चोरनामगन्धद्रव्यम् । तत्पर्य्यायः । चोरकी २ चण्डा ३ क्षेम ४ दुष्पत्र ५ गणहासक ६ । इत्यमरः । २ । ४ । १२८ । कुम्भीरः ७ निशाचर ८ क्रौधपुष्पक ९ । इति शब्दरत्नावली । चौरक १० कितव ११ कोरक १२ । इति जटाधरः ॥ धनहारके चौरे, त्रि ॥

धनाधिपः, पुं (धनानामधिपः ।) कुबेरः । इत्यमरः । १ । १ । ७१ ॥ (यथा, देवीभागवते । ९ । ७ । १८ ।
“अद्वैतं साम्प्रतं येन मते यज्ञे धनेश्वरी ।
यथा धनाधिपः प्राप्तो धनं धर्म्मे भयातुरः ॥”)
अस्य ध्यानं यथा,—
“कुबेरञ्च प्रवक्ष्यामि कुङ्कुमाभामनुत्तमम् ।
तारकैर्भूषितं विमानवरगं शुभम् ।
गदाधरञ्च कर्त्तव्यं वरदं मुकुटान्वितम् ।
चतुर्भुजविमानस्थं मेषस्थं वापि कारयेत् ॥
वर्द्धनं पीनवक्षं गुह्यकैः परिवारितम् ।
महोदरं महाकायं महारत्नधनान्वितम् ॥
गुह्यकेशप्रभिर्युक्तं धनव्ययकरैस्तथा ॥”
इति मत्स्यपुराणम् ॥

धनाध्यक्षः, पुं (धनानामध्यक्षः ।) कुबेरः । इति हलायुधः ॥ (यथा अध्यात्मरामायणे । ७ । ५ । ३० ।
“तत्र गुह्यो दशग्रीवो जगाम धनदालयम् ।
विजित्य धनाध्यक्षं जहारोपवनं पुष्पकम् ॥”)
धनाधिकृत । तहसीलदार इति ख्याताधि इति च भाषा । तस्य लक्षणं यथा,—
“कोषस्थाधिपतीनां रक्षार्थं विधाय च ।
विद्यान् धनसुधारक्षामवाचाप्य धनं यदा ।
विद्युत्त्वाप्रभस्य धनाध्यक्ष, प्रकीर्त्तितः ॥

आयुधागारेषु सर्व्वेषु धनाध्यक्षसमा नराः ।
धनागारेषु च तथा कर्म्मान्ताः पृथिवीपतेः ॥”
इति मत्स्यपुराणे १८९ अः ॥

धनाशा, स्त्री, (धनानां आशा ।) धनलोभः ।
यथा विष्णुपुराणे तथा हरिवंशे । १ । ३६ ।
“जीर्य्यन्ति जीर्य्यतः केशा दन्ता जीर्य्यन्ति जीर्य्यतः ।
धनाशा जीविताशा च जीर्य्यतोऽपि न जीर्य्यति ॥”

धनाश्री, स्त्री, रागिणीविशेषः । धानश्री इति भाषा । हनुमन्मते श्रीरागस्य तृतीयभार्य्या । अस्या जातिः षाड़वः । षड्जः ऋषभवर्ज्जः । गानसमयः दिवसीयद्वितीयप्रहरः कस्यचिन्मते दिवावसानम् । रागमालायामस्या रूपं वियोगिनी रमणी रक्तवसना चित्रदर्शनतत्परा दुर्बला तथा च एकाकिनी पङ्कजदलश्यामोपविष्टा वदनी । कल्लिनाथमते मेघरागस्य चतुर्थभार्य्या । भरतमते मालकोषपुत्रमारुरागस्य पत्नी । इति सङ्गीतशास्त्रम् ॥

धनिकः, पुं, (धनिका कायतीति । कै+कः ।) धन्याकम् । इति मेदिनी । के १६ । अस्मिन्नर्थे स्त्रीलिङ्गमिति राजनिर्घण्टः । (धनमस्यास्तीति । ठन् ।) धवः । इति हेमचन्द्रः ॥

धनिकः, त्रि, (धनं अस्यास्तीति । “अत इनिठनौ ।” ५ । २ । ११५ । इति ठन् ।) साधुः । धनी । इति मेदिनी । के, १६ । (यथा कथासरित्सागरे । ६ । ११७ ।
“पूर्णकरञ्जकानां साहसपूर्णरत्नपूरनभोगानाम् ।
धनिकयशोऽनुपनानां युक्तिरात्मेव सन्धानाम् ॥”
उत्तमर्णः । यथा, मनुः । ८ । ४७ ।
“अधमर्णार्थसिद्ध्यर्थमुत्तमर्णेन चोदितः ।
दापयेद्धनिकस्यार्थमधमर्णाद्विभावितम् ॥”)

धनिका, स्त्री (धनिक+टाप् ।) साधुनारी । इति मेदिनी । के १६ । वधूः । इति हेमचन्द्रः । युवती । इति शब्दरत्नावली । प्रियङ्गुवृक्षः । इति शब्दचन्द्रिका ॥

धनिष्ठा, स्त्री, (अतिशयेन धनवती । धन+इष्ठन्+टाप् ।) अश्विन्यादिसप्तविंशतिनक्षत्रान्तर्गतत्रयोविंशनक्षत्रम् । तत्पर्य्यायः । श्रविष्ठा २ । इत्यमरः । १ । ३ । २२ । वसुदैवता ३ । इति ज्योतिषम् । भूमि ४ विभावसु ५ धनवती ६ । इति जटाधरः ॥ अस्याः फलं यथा,—
“सत्कारोपरि समागमे धनि
सङ्गीतप्रिये धनवत्ये ।
दानी कार्म्मुकभृच्चैव धनवान्
धारोपाधितमस्य च स्थिरः ॥”
इति कोष्ठीप्रदीपः ॥
इत्थं जातस्य फलम् ।
“मानारथमानस्यजातीचो
धनाधिकारी बलवान् स्यात् ।
शतभुजश्च ...
... ॥”
इति कोष्ठीप्रदीपः ॥

धनी, [न्] त्रि (धनमस्यास्तीति । धन+इनि ।) धनवान् । (यथा, देवीभागवते । ६ । १४ । ११ ।
“गया च धनिनां कार्य्या मुक्तिं यच्छेत्यथा
मुदे ॥”)
तत्पर्य्यायः । इभ्यः २ आढ्यः ३ । इत्यमरः । ३ । १ । १० ॥ यथा, कूर्म्मपुराणे १९ अः ।
“आढ्यो वा दौर्गितो वापि यथेष्टानतिथीन्
भवेत् ।
सो भवत्पूर्णकामोऽत्र ममाभिमतेन प्रयोजितः ॥”
“एष शरीरं ताड्यं गृह्णाति काले उच्यते ॥”
इति हेमचन्द्रः ॥
(उत्तमर्णः । यथा, मनुः । ८ । ६१ ।
“यादृशा धनिभिः कार्य्या व्यवहारेषु साक्षिणः ।
तादृशान् सम्प्रवक्ष्यामि यथावाच्यमृतं च तैः ॥”)

धनीका, स्त्री, युवती । इति शब्दरत्नावली ॥

धनीयकं क्ली (धनाय हितम् । धन+छः । स्वार्थे कन् ।) धन्याकम् । इति शब्दरत्नावली ॥

धनुः, पुं, (धनतीति । धन+“भृमृशीतॄचरित्सरितनिधनिमिमस्जिभ्य उः ।” उणां । १ । ७ । इति उः ।) चापः । (यथा, किरातार्ज्जुनीये ।
“धनुर्ग्रहविग्रहोऽपि निर्जितः किं करिष्यति ।”)
राशिविशेषः । पियालवृक्षः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

धनुः, [स्] पुं, (धन+“अर्त्तिपॄवपीति ।” उणां २ । ११८ । इति उसि स च नित् ।) पियालवृक्षः । धनुर्द्धरे, त्रि । इति मेदिनी । से, ५६ ॥

धनुः, (स्) क्ली, (धनतीति । धन शब्दे+“अर्त्तिपृवपीति ।” उणां २ । ११८ । इति उसि स च नित् ।) शरनिक्षेपकास्त्रम् । धनुक इति भाषा । तत्पर्य्यायः । चापः २ धन्व ३ शरासनम् ४ कोदण्डम् ५ कार्म्मुकम् ६ इष्वासः ७ । इत्यमरः । २ । ८ । ८३ ॥ अस्त्रम् ८ गुणी ९ शरावापः १० द्रुणम् ११ चित्रका १२ । इति त्रिकाण्डशेषः । धन्वम् १३ धनुः १४ । इति जटाधरः । तारकम् १५ लस्तकम् १६ । इति शब्दरत्नावली । तस्य लक्षणं यथा,—
“धनुस्तु त्रिविधं प्रोक्तं शार्ङ्गं चार्द्रं तथैव च ।
कोमलं वंशसम्भूतं श्रेष्ठं मुख्यं तथोत्तमम् ।
सुवर्णमणिभिरलङ्कृतं समाहृत्य यत्नतो धनुः ।
विधौ हस्तिदन्तं शृङ्गं सम्मार्जयेत् ॥”
इति युक्तिकल्पतरुः ॥
धनुर्विद्यारम्भदिनं यथा —
“अश्विनीमृगमाघासु पुष्ये च हस्तिभे धनी ।
प्रवृत्ते चापविद्यायाः आरम्भः शुभदो मतः ॥”
इति ज्योतिःसारसंग्रहः ॥
विद्यारम्भोक्तनक्षत्रेषु च शुभानि ॥
(अस्योत्पत्तिर्यथा धनुर्वेदे महोदधि ... दत्तम् । अतो द्व योऽष्टु कर्म्म ... प्रभावेण वैश्वानरेण ।
“अपि पूर्व्वं यदा यज्ञे दुर्द्धरसमरान्वितः ।
भगवानशङ्करो योगाद् विश्वं कारयत् ।
वज्रपातायुधानां सदैव कथा यथा ।

तस्मात् सप्ताधि चापानि इत्यादि तत्र पुस्तके ॥"
तस्य प्रमाणं यथा, शार्ङ्गधरे ।
"चतुर्विंशाङ्गुलो हस्तश्चतुर्हस्तं धनुः स्मृतम् ।
तद्वेत्यामत्रं चापं मर्म्मसम्पूर्णं द्रुमम् ॥"
तथा आग्नेयधनुर्वेदे ।
"धनुश्चत्वा धनुः श्रेष्ठं विधिः शार्ङ्गस्तु मध्यमम् ।
कनिष्ठन्तु विधिः प्रोक्तं निबन्धेन पदातिना ॥"
धनुस्तु शार्ङ्गवाहिन्येव द्विविधम् । यथा, युक्ति-कल्पतरौ ।
"धनुस्तु द्विविधं प्रोक्तं शार्ङ्गं वांशं तथैव च ॥"
एतयोः प्रकारमाह धनुर्वेदः ।
"शार्ङ्गिकं त्रिनतं प्रोक्तं वेणवं सर्व्वकामिकम् ॥"
शार्ङ्गधनुः प्रमाणमाह तत्र शार्ङ्गधरे ।
"शार्ङ्गं पुनर्धनुर्दिव्यं तद्विष्णोः परमायुधम् ।
वितस्तिसप्तमानं विभिन्नं विश्वकर्म्मणा ॥
न स्वर्गे न च पाताले न भूमौ कस्यचित् करे ।
तद्धनुः प्राप्यते नैव पुरुषोत्तमम् ॥
पौरुषेयन्तु यच्छार्ङ्गं चतुस्तदपरोऽभितम् ।
विनिर्मितं सार्द्धधिक निर्मितं धनुषोत्तमम् ॥
स्थौल्ये दीर्घे धनुः शार्ङ्गं सर्व्वधातुमयान्वितम् ।
इत्येवमत्र प्रतीतौ वीरा चापं प्रकीर्त्तितम् ॥'
वांशधनुः प्रमाणमाह तत्रैव ।
"त्रिपर्व्वं पञ्चपर्व्वं वा सप्तपर्व्वं प्रकीर्त्तितम् ।
नवपर्व्व कोदण्डं चतुर्द्धा शुभकारकम् ॥
चतुःपर्व्व षट्पर्व्वं अष्टपर्व्वं विवर्जयेत् ॥"
"अतिजीर्णमपक्वं च ज्ञातिधृष्टं तथैव च ।
दग्धं छिद्रं न कर्त्तव्यं बाह्याभ्यन्तरदाहकम् ॥
गुणहीनं गुणाक्रान्तं काण्डान्तेषु समन्वितम् ।
ग्रन्थिभिन्नं कृशं तथाग्रे तथैव च ॥"
"अपक्वं भङ्गमाप्नोति अतिजीर्णन्तु कर्कशम् ।
ज्ञातिधृष्टन्तु सोढव्यं कलहो बान्धवैः सह ॥
दग्धेन दह्यते गेहं छिद्रं युद्धविनाशनम् ।
बाह्ये लक्ष्यं न लभ्येत तथैवाभ्यन्तरेऽपि च ॥
हीने तु संस्थिते चापे भयाते भग्नकारकम् ।
आक्रान्ते च गुणे चापि न लक्ष्यं प्राप्यते ध्रुवम् ॥'
"स्वर्णग्रन्थिकग्रन्थिधनुर्वारिकरं धनुः ।
दग्धं निर्विनिर्मुक्तं धर्म्मकार्यकरं स्मृतम् ॥"
उपक्षेपकधनुरः प्रकारमाह तत्रैव ।
"उपक्षेपक चापं वैशवं सद्धिरस्तुकम् ।
निष्कीर्णपृष्ठवर्द्धित हस्तश्रोविकृत तु तत् ॥"
आयुधविशेष । यथा, चतुर्वर्गप्रदीपिकायाम् । १ । २६ ।
"माराङ्कुशौ तु पाशश्च खट्वाङ्गा घण्टावधि ।
धनुराकर्षकुम्भाद्यैरायशस्तुष्यती ॥"॥
चतुर्हस्तपरिमाणम् । काठा इति भाषा । यथा,
"चतुर्विंशाङ्गुलो हस्तश्चतुर्हस्तं धनुः स्मृतम् ॥"
इति चन्द्रप्रज्ञप्तम् ।
मेषाद्द्वादशराशिगतगैरतमरराशिः । तत्
पर्य्यायः । तौक्षिक २ । इति दीपिका । अस्य
देवता पूर्व्वार्द्धमनुष्याकारशेषार्द्धाश्वाकारधनु-
र्धारी पुरुषः । स चलत्पूर्व्वार्द्धाङ्गप्रदेशोत्
दासाद्यममशादेव भवति । स च श्रीकाधनः

पीतः सर्व्वर्णो वा पर्व्वतचरः महाशब्दकरः
पूर्व्वदिक्स्वामी हस्वः दृढः क्षत्रियवर्णः
उग्रः पित्तप्रकृतिरिति धर्म्मसन्तान धनु-
र्योगश्च अस्मिराशि ॥ ० ॥ तत्राशिजात-
फलं यथा, "क्रोधी कृतज्ञ पुण्यमतिः शुचि
प्राज्ञः सुखी धर्म्मयोगाकारी च ॥" इति
जातकचन्द्रिकादयः ॥ ० ॥ अपि च ।

"बहुकलाकुशलः प्रबलो महान्
विमलताकलितः सखोलिभाक् ।
मनसरे हि धनुर्धरगी नरो
धनकरो न करोति धनव्ययम् ॥"

तल्लग्नजातफलं यथा,—
"धनुर्लग्ने वलतृपमो नीतिमान् धनवान् सुखी ।
कुलमध्ये प्रधानश्च प्राज्ञः सर्व्वत्र पोषकः ॥"
इति कोष्ठीप्रदीपः ॥

धनुःपटः, पुं (धनुष इव पटो विस्तारो यस्य ।) पियालवृक्षः । इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्य यथा,—

"पियालस्तु सरस्कन्धश्चारो बहुलवल्कलः ।
राजादनस्तापसेष्टः सन्नकद्रुधनुःपटः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

धनुःशाखा, स्त्री, (धनुरिव शाखा यस्याः ।) मूर्व्वा । इति शब्दचन्द्रिका ॥

धनुःश्रेणी, स्त्री, (धनुष श्रेणीव ।) मूर्व्वा । महेन्द्रवारुणी । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्या वैद्यकरत्नमालायाम् ।

"तेजनी तिक्तवल्ली देवा तिक्ताङ्की स्ववाणमथा ।
धनुःश्रेणी मधुरसा मूर्व्वा निम्बवल्लीति च ॥")

धनुर्गुणा, स्त्री, (धनुषो गुणो यस्याः ।) मूर्व्वा । इति शब्दचन्द्रिका ॥ (मूर्व्वाशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

धनुर्द्रुम, पुं, (धनुषो द्रुमः ।) वंशः । इति राज-निर्घण्टः ॥

धनुर्धर, पुं, (धरतीति । धृ+अच् । धनुषो धरः ।) धनुर्धारी । तीरन्दाज इति भाषा । तत्पर्य्यायः । धन्वी २ धनुष्मान् ३ धानुष्कः ४ निषङ्गी ५ अस्त्री ६ तूणी ७ धनुर्भृत् ८ । इति हेमचन्द्रः । ३ । ४३५ ॥ (यथा, महाभारते । १ । १३४ । २० ।

"प्रयतिष्ये तथा कर्त्तुं यथा नान्यो धनुर्द्धरः ।
त्वत्समो भविता लोके सत्यमेतत् ब्रवीमि ते ॥"

धृतराष्ट्रस्य पुत्रविशेषः । यथा, महाभारते । १ । ११७ । ११ ।

"कवची निषङ्गी पाशी च कुण्डधारी धनुर्धरः ।)

धनुर्धारी [न्] त्रि, (धनुर्धरतीति । धृ+णिनि ।) धनुर्धरः । तस्य लक्षणं यथा —

"शूरश्च बलयुक्तश्च गजाश्वरथकोविदः ।
धनुर्धारी भवेद्राज्ञः सर्व्वक्लेशसहः शुचिः ॥"
इति मत्स्यपुराणे १८९ अः ॥

धनुर्भृत्, पुं, (धनुर्बिभर्त्तीति । भृ+क्विप् ।) धनुर्धरः । इति हेमचन्द्रः । ३ । ४३५ ॥ (यथा, रघुः । ८ । ११ ।

"अथानिमेषकरणेन वल्गिना
विजयत विजयं तस्य धनुर्भृतः ॥")

धनुर्मध्य क्ली, (धनुषो मध्यम् ।) चापमध्यभागः । तत्पर्य्यायः । लस्तकः २ । इत्यमरः । २ । ८ । ८५ ॥

धनुर्माला स्त्री, (धनुषो माला श्रेणीव ।) मूर्व्वा । इति शब्दचन्द्रिका ॥

धनुर्यास, पुं, (धनुरिव यासः ।) धन्वयासः । दुरालभा । इत्यमरटीकायां रायमुकुटः ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।

"यासो यवासो दुःस्पर्शो धनुर्यासो दुरालभा ॥")

धनुर्लता स्त्री, (धनुषो लतेव ।) सोमवल्ली । इति राजनिर्घण्टः ॥

धनुर्वृक्ष, पुं (धनुषो वृक्षः ।) धन्वनवृक्षः । (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।

"धन्वन पिच्छिलत्वक् च धनुर्वृक्षश्च धन्वनः ॥")
वंशः । भल्लातकः । अश्वत्थः । इति राज-निर्घण्टः ॥

धनुर्वेद, पुं, (धनूंषि उपलक्षणेन धनुरादीन्यस्त्राणि विदन्ति जानन्त्यनेनेति । विद्+करणे घञ् ।) धनुर्विद्याबोधकशास्त्रम् । तत्तु यजुर्वेदस्योपवेदः । इति चरणव्यूहः ॥ (यथा, मधुसूदनसरस्वतीकृतप्रस्थानभेदे ।

"यजुर्वेदस्योपवेदो धनुर्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः । तत्र प्रथमो दीक्षापादः । द्वितीयः संग्रहपादः । तृतीयः सिद्धिपादः । चतुर्थः प्रयोगपादः । तत्र प्रथमे पादे धनुर्लक्षणमधिकारिनिरूपणञ्च कृतम् । तत्र धनुःशब्दश्चापे रूढोऽपि चतुर्विधायुधवाचको वर्त्तते । तच्च चतुर्विधम् । मुक्तममुक्तं मुक्तामुक्तं यन्त्रमुक्तञ्च । तत्र मुक्तं चक्रादि । अमुक्तं खड्गादि । मुक्तामुक्तं शल्यावान्तरभेदादि । यन्त्रमुक्तं शरादि । तत्र मुक्तमस्त्रमित्युच्यते । अमुक्तं शस्त्रमित्युच्यते । तदपि ब्राह्मवैष्णवपाशुपतप्राजापत्याग्नेयादि भेदादनेकविधम् । एवं साधिदैवतेषु समन्त्रेषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियकुमाराणां तदनुयायिनाञ्च ते सर्व्वे चतुर्विधाः । पदातिरथगजतुरगारूढाः । एवं दीक्षाभिषेकशाकुनमङ्गलकरणादिकञ्च सर्व्वमपि प्रथमे पादे निरूपितम् । सर्व्वेषामस्त्रशस्त्रविशेषाणामाचार्य्यस्य लक्षणपूर्व्वकं संग्रहणं संग्रहपादे द्वितीये दर्शितम् । गुरुसम्प्रदायसिद्धानां शस्त्रविशेषाणां पुनः पुनरभ्यासो मन्त्रदेवतासिद्धिकरणादिकं तृतीये पादे । एवं देवतार्च्चनाभ्यासादिभिः सिद्धानां अस्त्रशस्त्रविशेषाणां प्रयोगश्चतुर्थे पादे निरूपितः ॥")

धनुष्कर, पुं (धनुः करोतीति । धनुस्+कृ+"दिवाविभेति ।" ३ । २ । २१ । इति टः ।) धनुः करे यस्य इति व्यधिकरणबहुव्रीहिसमासो वा । धानुष्कः ॥

धनुष्पट, पुं, (धनुष इव पटो विस्तारो यस्य ।) पियालवृक्षः । इत्यमरः । २ । ४ । ३५ ॥

धनुष्मान्, [त्] पुं (धनुर्विद्यते यस्य । धनुस्+मतुप् ।) धनुर्धरः । इत्यमरः । २ । ८ । ६८ ॥

(यथा, रघु । ७ । ४६ ।
"इतो निवृत्तो कवचो धनुष्मान्
इह स राघवमेकवीरः ।")

धन , क्लो, (धन धान्ये शब्दे वा + "इविध्वमिगति
भ्योनि ।" उणा° १ । ८७ । इति रु ।) धनु ।
इति जटाधरः । धान्यपर्य्याये धनुरिति च पुं ।
इति संक्षिप्तसारोणादिवृत्तिः ॥

धन्यक क्लो, धन्याकम् । इत्यमरटीकायां भरतः ॥

धनेश्वर , पुं, (धनानामीश्वरः ।) कुबेरः । इति
हलायुधः । २ । १ ॥ (यथा, महाभारते ।
१ । १२८ । १२ ।
"अवहुः सम्प्रयाताथि स्वानि स्वानि गृहाणाथा ।
कालदृष्ट यमो राजन् । महाक्षेव धनेश्वरः ।"
विष्णुः । यथा, तत्रैव । १३ । १४८ । ६१ ।
"वसुदो वसुप्रदो वसुर्धी रत्नगर्भो धनेश्वरः ।"
मुग्धबोधटीकायां दुर्गादासेन धृतम् ।
"विद्वनेशतयागानो भिषकश्रीपतिश्च ।
वोपदेवश्चकारेदं विप्रो वेदपदास्पदम् ॥")

धन्य , पुं, (धनाय हितः । धन + यत् ।) अश्वकर्ण
वृक्षः । इति राजनिर्घण्टः ॥

धन्य , त्रि (धनाय हितः । धन + यत् ।) पुण्य
वान् । सुकृती । इत्यमरः । ३ । १ । ३ ॥
"मनामा पुरुषो धन्य पितृनामा च मध्यमः ।
अधमो मातृनामा च मातृनामाधमाधमः ॥"
इति भागीपद्ममुनिपदम् ॥

धन्यशब्दार्थं यथा —
सनत्कुमार उवाच ।
"त्रिलोकीं धातुकामस्थे कश्यपः प्रगयीभवः ।
भीरुश्च कापिलस्त्वम दृष्टा तु तौ च सुस्थितः ।
निःसारितो रावणश्च सौतेन च महात्मना ।
धन्योऽसीति मयोक्तश्च मार्ग धन्य उवाच सः ।
चौरादयाहरो धन्यो धन्यो यश महिषा ।
मनाग् धन्योऽसि चौरेण । सिंहोक्तो वाक्यमेव च ।
धन्या वसुमती धवी यत्रैव यत्र मानता ।
धन्याधि वसुधयुक्ता मामेवक्लिशाव मा ।
धन्योऽसमो मसाधारः स्थायी मामपालिषु ।
धन्योऽसीष्यत धर्मो धन्या माक्तुवाच म ।
धन्यश्च भगवान् ब्रह्मा विधाता जगतामपि ।
धन्योऽपि यज्ञ माना च धन्यो मातृमुवाच मः ।
धन्यो महेश्वरो देवो योगीश्वराणां गुरोर्गुरुः ।
धन्योऽसीयुत इत्युक्तं धन्यो मातृमुवाच सा ।
ईश्वरो महेश्वरो देवो धवानां पदतः परः ।
देवं धन्यो माम्योऽसौऽसौ मसन्नितस्या ॥
मार्गं धन्यो सुनिर्दिष्टं । स्थानसंयुक्तं च मः ।
धन्या दिव्यास्र चरम: कस्यापि मद्य्यमध्यगा ।
मघाहृदयाय ते वेदा मन्त्र तत्र मधौविश्वः ।
यत्र प्रदाय मामापेऽहुता देवा मवा तप ।
धन्यतुरिं च वर्ण यथा मध्यमेव चाधुतम्
वर्ण मनक्षानामादौ धन्योऽचलं भवत् ।
समाहृत्य स महान्ति मन्त्र यज्ञ महाताहे ।
धन्योऽसि धन्यवोऽसौऽसुततमा मदा विभो
धन्युर्वे च यत्र यथा मन्त्र क्षमे ग्रर्थं इवं । ।

शुभकन्याधि धर्म्म स नाह धन्यमुवाच ताम् ।
कौशल्य परमात्मा च धन्यो माऽन्यश्च निश्चितम् ॥
धन्योऽधीति मयोक्तश्च रविषाभिः ऋषेभि च ।
इत्यक्तो भगवानाख्य कथित धर्म्मवारकम् ॥"
इति ब्रह्मवैवर्त्ते गौरीशङ्करनगाले ८० अः ॥
(धन जन्मा । धन + "धनराज तस्मा ।" ५ । ४ ।
८४ । इति यत् । धनलब्धा । पुं धनस्य सिमित
धर्योगो वसुमान् वा । "गोदः योऽहरमामहि
माशाम्यादयम् ।" ५ । १ । १८ । इति यत् ।)

धन्यतन क्लो, (धन्य धनजनक प्रगत् ।) धन
जनकमन्त्रविशेषः । कुबरः पूर्व्वं शूद्र आसीत्
एतदुक्त कृत्वा धनपतिरभूत् । इति वराह-
पुराणम् ॥

धन्या, स्त्री, (धन्य + टाप् ।) आमलकी । इति
मेदिनी । ये, ६६ ॥ धन्याकम् । इति हेमचन्द्रः ।
४ । ८१ ॥ (मता कन्या । हयमेव धुवस्य मत्नी ।
यथा, मत्स्यपुराणे । ४ । ३८ ।
"धन्या नाम मनोः कन्या ध्रुवात् शिष्टमजीजनत् ॥")

धन्याक, क्लो (धन्यते अन्नादिभिरिति । धन +
"पिनाकादयश्च ।" उणा° ४।१५। इत्याकप्रत्ययेन
निपातनात् साधु ।) धनिया इति ख्यात द्रव्यम् ।
तत्पर्य्याय । छत्रा २ वितुन्नकम् ३ कुस्तुम्बुरु ४ ।
इत्यमरः । २ । ६ । ३८ ॥ धान्यकम् ५ धन्यम् ६
धनिकम् ७ धनीयकम् ८ कुस्तुम्बुरी ९ धान्या
कम् १० तुम्बुरु ११ धन्या १२ तुम्बुरी १३ धनी-
यकम् १४ । इति भरतधृतकोषान्तरम् ॥ धान
कम् १५ धान्यम् १६ धानेयम् १७ धनिका १८
छत्राधान्यम् १९ सुगन्धि २० शाकयोग्यम् २१
सूक्ष्मपत्रम् २२ जनप्रियम् २३ धान्यबीजम् २४
बीजधान्यम् २५ वेधकम् २६ । इति राज
निर्घण्टः । कुनटी २७ धेनिका २८ धन्यकम्
२९ धाना ३० धानेयकम् ३१ । इति भावप्रकाशः ॥
अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । कषा
यत्वम् । पित्तज्वरकासवृष्णावमिकफापहत्वम् ।
दीपनत्वञ्च । इति राजनिर्घण्टः ॥ स्निग्धत्वम् ।
वृष्यत्वम् । मूत्रलत्वम् । लघुत्वम् । तिक्तत्वम् ।
कटुत्वम् । वीर्य्योष्णकारित्वम् । पाचनत्वम् । रोच
नत्वम् । ग्राहित्वम् । त्रिदोषनाशित्वम् । विशेष
दाहश्वासार्शःकृमिनाशित्वञ्च ॥
"धान्यकं तद्गुणं स्वादु विशेषात् पित्तनाशनम् ।"
इति ।
"द्रितार्यो याप सविष भाग्यके यत्नमात्रेन्...

धनीने ...
...निघण्टु हरा...
राजनिघण्टः

धन, [नु]
...
...

...

कटुभेदात्तु मधुरो धनवा धनधारिणः ॥"
इति गरुडे यश्चमाषे ७० अः ॥)

धन्व, स्त्री, (धनतीति । धन शब्दे + "उक्षादयश्च ।"
उणा° ४ । ६५ । इति कनप्रत्ययेन निपातनात्
साधु ।) धनुः । इत्यमरटीकायां भरतः ॥
(यथा महाभारते । ७ । २०० । ३१ ।
"धनुर्धराय देवाय प्रियधन्वाय धन्विने ।
धन्वन्तराय धनुषे धन्वाचार्याय ते नमः ॥")

धन्वङ्ग पुं, (धनोरङ्गमिव अङ्गं यस्य ।) वृक्ष
विशेषः । इति भावप्रकाशः ॥ धामिनी इति
हिन्दी भाषा । तत्पर्य्यायगुणाः ।
"धन्वङ्गस्तु धनुर्वृक्षो गोत्रवृक्षः सुतेजनः ।
धन्वङ्गः कफनिलक्षकाषमधुरो लघुः ।
स बल्यो बलकृद्रूक्षस्तिक्तदाहहरोऽपि च ॥"
इति भावप्रकाशः ॥
पुस्तकान्तरे धन्वनोऽपि पाठः ॥

धन्वदुर्ग क्लो (धन्वना निर्जलदेशेन वेष्टितं
दुर्गम् ।) चतुर्दिक्षु मरुवेष्टितपञ्चयोजनपरि
मितस्थलरूपम् । निर्जलदुर्गम् । इति महा
भारते राजधर्म्मः ॥ (यथा मनुः । ७ । ७० ।
"धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्षमेव वा ।
नृदुर्गं गिरिदुर्गं वा समाश्रित्य वसेत् पुरम् ॥")

धन्वन पुं, (धन्वति गच्छति शत्रून् गच्छतीति । धन्व गतौ
औणादिकः + क्युन् ।) वृक्षविशेषः । इति रत्न
माला ॥ धामनि इति भाषा । (यथा, रामा
यणे । २ । ५३ । ८ ।
"धन्वनामलकैर्लोध्रैर्वेत्रवेतसभावितैः ॥")
तत्पर्य्याय । रक्तकुसुमः २ धनुष्पटः ३ महा
वल ४ इत्यादयः ५ विषिमनः ६ रूक्षयानु
वन ७ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् ।
कषायत्वम् । कफवातापहत्वम् । ग्राहकत्वम् ।
धारित्वम् । रक्तातिसारनाशकत्वञ्च । इति राज
निर्घण्टः ॥ (पश्ने, क्लो । यथा, महाभारते ।
३ । १११ । १७ ।
"कुटजाधौतैरुदुम्बराणि
प्रियालान्यां कामकारं कुरुष्व ।")

धन्वन्तरि, पुं (धनुः शल्यशास्त्रं तस्य अन्तं पारं
विकित्सायास्तस्य अन्तं गच्छतीति ।
इयर्त्तीति + "इन्” उणा° ४ । ११८ । इति
इः ।) वैद्यः । स सागरमन्थनात् । यथा —
"अथ वर्षसहस्रेण आयुर्वेदमयः पुमान्
...दण्डकमण्डलू च धारयन्
... च भागवतपुराणम्
... ॥
... ।
...मभ्याय ॥"
... ।
...नाम् ।
...
... अध्यायः ॥

काश्यप । "काश्यस्य काशिराजस्य तस्य दीर्घतमाः पुत्रोऽभूत् । धन्वन्तरिस्तु दीर्घतमसोऽभूत् । स हि संसिद्धकार्य्यकरणः सकलसम्भूतिष्वशेषज्ञानवित् । भगवता नारायणेन चातीतसम्भूतौ तस्मै वरो दत्तः । काशिराजगोत्रेऽवतीर्य्य त्वमष्टधा सम्यगायुर्वेदं करिष्यसि । यज्ञभागभुक् च भविष्यसीति । तस्य च धन्वन्तरेः पुत्रः केतुमान् केतुमतो भीमरथः । तस्यापि दिवोदासः ।" इति विष्णुपुराणम् । ४ । ८ । ४-११ ॥ सकार्ये । "संसिद्धकार्य्यकरणः जरादिरहितदेहेन्द्रियः । भवतादेहेन्द्रिय इति वा । सकलसम्भूतिषु सर्व्वेष्वपि जन्मसु । अशेषज्ञानवित् सर्व्वशास्त्रवित् । अतीतसम्भूतौ क्षीराब्धौ जन्मनि । अष्टधा अष्टाङ्गमायुर्वेदम् । तदुक्तं लघुवाग्भटे ।
कायबालग्रहोर्द्ध्वाङ्गशल्यदंष्ट्राजरावृषान् ।
अष्टावङ्गानि तस्याहुश्चिकित्सा येषु संश्रितेति ।"
इति तट्टीकायां स्वामी । ७ । दिवोदासः । इति त्रिकाण्डशेषः ॥ (धन्वन्तरिप्रादुर्भावो यथा,
"एकदा देवराजस्य दृष्टिर्निपतिता भुवि ।
तत्र तेन नरा दृष्टा व्याधिभिर्भृशपीडिताः ॥
तान् दृष्ट्वा हृदयं तस्य दयया परिपीडितम् ।
दयार्द्रहृदयः शक्रो धन्वन्तरिमुवाच ह ॥
धन्वन्तरे सुरश्रेष्ठ भगवन् किञ्चिदुच्यते ।
योग्यो भवसि भूतानामुपकारपरो भव ॥
उपकाराय लोकानां केन किं न कृतं पुरा ।
त्रैलोक्याधिपतिर्विष्णुरभून्मत्स्यादिरूपवान् ॥
तस्मात्त्वं पृथिवीं याहि काशीमध्ये नृपो भव ।
प्रतीकाराय रोगाणामायुर्वेदं प्रकाशय ॥
इत्युक्त्वा सुरशार्दूलः सर्व्वभूतहितैषया ।
समस्तमायुषो वेदं धन्वन्तरिं यथाक्रमम् ॥
अधीत्य चायुषो वेदमिन्द्राद्धन्वन्तरिः पुरा ।
आगत्य पृथिवीं काश्यां जातो बाहुजवेश्मनि ॥
नाम्ना तु सोऽभवत् ख्यातो दिवोदास इति क्षितौ ।
बाल एव विरक्तोऽभूच्चचार सुमहत्तपः ॥
यत्नेन महता ब्रह्मा तं काश्यामकरोन्नृपम् ।
ततो धन्वन्तरिर्लोके काशीराजोऽभिधीयते ॥
हिताय देहिनां लोके संहिता विहितामुना ।
अयं शिष्यादिभिर्लोकान् चिकित्सामास पाठयन् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
विक्रमादित्यराजस्य नवरत्नान्तर्गतरत्नविशेषः ।
यथा —
"धन्वन्तरिक्षपणकामरसिंहशङ्कु-
वेतालभट्टघटकर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥'
इति नवरत्नम् ॥
(धनोऽधनुर्वेदस्य अन्तमन्वेतीति । महादेवः । यथा, महाभारते । १३ । १७ । १३ ।
"धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा ॥")

धन्वन्तरिग्रस्ता, स्त्री, (धन्वन्तरिणा ग्रस्ता ।) कटुकी । इति शब्दचन्द्रिका ॥

धन्वयवासः, पुं, (धन्वदेशोद्भवो यवासः ।) दुरालभा । इत्यमरटीकायां भरतः ॥ (दुरालभाशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

धन्वयवासकः, पुं, (धन्वयवास + स्वार्थे कन् ।) दुरालभा । इति राजनिर्घण्टः ॥

धन्वयासः, पुं (धन्वदेशोद्भवो यासः यवासः ।) दुरालभा । इत्यमरः । २ । ४ । ९१ ॥

धन्वा, [न्] पुं, (धन्वति जलाभावं गच्छतीति । धन्व + "कनिन् युवृषि" इति उणा° १ । १५६ । इति कनिन् ।) मरुदेशः । इत्यमरः । २ । १ । ५ ॥ (यथा, ऋग्वेदे । ६ । ३३ । ४ ।
"घर्म्मं न धन्वन्नभि मे मदाय यजा मादयुदैव भासि यत्नी ।"
धन्वानम् । अथवान् उदकमपि । यथा, ऋग्वेदे । १ । १६८ । ५ ।
"धन्वच्युत इषां न यामनि पुरुप्रैषा अहन्यो नैतशः ।"
"धन्वच्युतो न धन्वच्युद्गन्तोऽन्तरिक्षस्य मध्यमेन स्यन्दते उन्नतस्थानियो मेघा इव ।" इति तद्भाष्ये सायनः ।)

धन्वी, [न्] त्रि, (धनुरस्यास्तीति । व्रीह्यादित्वात् इनिः ।) धनुर्धरः । इत्यमरः । २ । ८ । ६९ ॥ (यथा कुमारे । ३ । १० ।
"कुर्य्यां हरस्यापि पिनाकपाणे-
र्धैर्य्यच्युतिं के मम धन्विनोऽन्ये ॥")
विदग्धः । इति विश्वः ॥

धन्वी, [न्] पुं (धन्वमस्त्यस्येति । धन्व + इनि ।) दुरालभा । अर्ज्जुनवृक्षः । (अस्य पर्य्यायो यथा —
"धन्वी धनञ्जयः पार्थो नदीजः ककुभोऽर्ज्जुनः ।"
इति वैद्यकरत्नमालायाम् ॥)
बकुलः । इति राजनिर्घण्टः ॥ पार्थः । इति त्रिका० ॥ (विष्णुः । यथा, महाभारते । १३ । १४९ । २२ ।
"ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः ।"
महादेवः । यथा तत्रैव । १३ । १७ । ४२ ।
"कमण्डलुधरो धन्वी बाणहस्तः कपालवान् ।"
तामसमनोः पुत्रविशेषः । यथा, हरिवंशे । ७ । २३ ।
"तपोरतिरकल्माषस्तन्वी धन्वी परन्तपः ।
तामसस्य मनोरेते दश पुत्रा महाबलाः ॥")

धम ध्माने । ध्वाने । इति कविकल्पद्रुमः ॥ (भ्वा-परं-सक-सेट् ।) धमति । ध्माधातुरूपम् । इति दुर्गादासः ॥

धमः, त्रि, (धमतीति । धम + अच् ।) अग्निसंयोगकर्त्ता । शब्दकर्त्ता । इति धमधातोः पचादित्वादच्प्रत्ययेन साध्यः ॥

धमकः, पुं, (धमतीति । ध्मा शब्दाग्निसंयोगयोः + "ध्मो धम च ।" उणा° २ । ३५ । इति क्वुन् धमादेशश्च ।) कर्म्मकारः । इत्युणादिकोषः ॥

धमनः, पुं, (धम्यतेऽग्निरनेनेति । ध्मा + करणे ल्युट् ।) नलः । इत्यमरः । २ । ४ । १६२ ॥ (अस्य पर्य्यायो यथा,—
"नल पोटगलः शून्यमध्यश्च धमनस्तथा ।"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥ धमतीति । धम + ल्यु ।) भस्त्राध्मापके क्रूरे च त्रि । इति मेदिनी । ने, ७८ ॥

धमनिः, स्त्री, (धम्यते इति । धम + "अर्त्तिसृधृधम्यश्यवितॄभ्योऽनिः ।" उणा° २ । १०२ । इति अनि ।) धमनी । इति शब्दरत्नावली ॥ (यथा, अथर्व्ववेदे । ६ । ९० । २ ।
"यास्ते शतं धमनयोऽङ्गान्यनु विष्ठिताः ।"
महास्नायुर्हृदस्य पत्नी । सा तु वातादि-रसवहा च नाडी । यथा भागवते । ६ । १८ । १९ ।
"बालस्य धमनिभिर्व्याप्तं वातादिपरिवर्जितम् ।"
धमनिर्नालिकायां । ग्रीवायां हरिद्रायां । गम्यते ध्मायतेऽग्निरनया । ध्मायते वा विग्रहे वाद्य वाद्यविभागेन । यद्वा, 'धमति इति वधकर्म्मसु पठितं धमति हन्त्यनया प्राणाक्षेपादिरूपयेति । वाक् । शब्दः । इति निघण्टुः । १ । ११ । यथा, ऋग्वेदे । २ । ११ । ८ ।
"दूरे पारे वाणीं वर्द्धयन्त
इन्द्रेषितां धमनिं पप्रथन्नि ॥")

धमनी, स्त्री, (धमनि + वा ङीष् ।) नाडी । (यथा महाभारते । १२ । ३१४ । १७ ।
"दश विद्याद्धमन्योऽत्र पञ्चेन्द्रियगुणावहाः ।
याभिः सूक्ष्माः प्रतायन्ते धमन्योऽन्याः सहस्रशः ॥"
यथा,—
"ओजोवहाः शरीरे या विधम्यन्ते समन्ततः ।
येनौजसा वर्त्तयन्ति प्रीणिताः सर्व्वदेहिनः ॥
यदृते सर्व्वभूतानां जीवितं नावतिष्ठते ।
यत्सारमादौ गर्भस्य योऽसौ गर्भरसाद्रसः ॥
संवर्त्तमानं हृदयं समाविशति यत् पुरा ।
यस्य नाशात्तु नाशोऽस्ति धारि यद्धृदयाश्रितम् ॥
यच्छरीररसस्नेहः प्राणा यत्र प्रतिष्ठिताः ।
तत्फला विविधा जाताः फलन्तीति महाफलाः ॥
ध्मानाद्धमन्यः स्रवणात् स्रोतांसि सरणात्
सिराः ॥"
इति चरके सूत्रस्थाने त्रिंशेऽध्याये ॥
"चतुर्विंशतिर्धमन्यो नाभिप्रभवा अभिहिताः । तत्र केचिदाहुः सिराधमनीस्रोतसामविभागः सिराविकारा एव धमन्यः स्रोतांसि चेति । तत्तु न सम्यक् । अन्या एव हि धमन्यः स्रोतांसि च सिराभ्यः कस्मात् व्यञ्जनान्यत्वात् मूलसन्नियमात् कर्म्मवैशेष्यादागमाच्च केवलन्तु परस्परसन्निकर्षात् सदृशागमकर्म्मत्वात् सौक्ष्म्याच्च विभक्तकर्म्मणामविभाग इव कर्म्मसु भवति ।
तासान्तु नाभिप्रभवाणां धमनीनामूर्द्ध्वगा दश दश चाधोगामिन्यश्चतस्रस्तिर्य्यग्गाः । ऊर्द्ध्वगाः शब्दस्पर्शरूपरसगन्धप्रश्वासोच्छ्वासजृम्भितक्षुद्धसितकथितरुदितादीन् विशेषानभिवहन्त्यः शरीरं धारयन्ति । तास्तु हृदयमभिप्रपन्नास्त्रिधा

जायन्ते तासाम्। तासान्तु कलानां प्रथमा मांसधरा नाम यस्यां मांसे शिराः स्नायवो धमन्यः स्रोतांसि च प्रताना भवन्ति। यथा विसमृणालानि वर्द्धन्ते पङ्कोदकस्थानि तथा शिरादीनि मांसे वर्द्धन्ते। द्वितीया रक्तधरा मांसस्याभ्यन्तरतः तस्यां शोणितं विशेषतश्च शिरासु यकृत्प्लीह्नोश्च भवति। तासामभिहतं मांसं क्षते सत्यस्मिन् शोणितं प्रसिच्यते यथा क्षीरवृक्षात्। तृतीया मेदोधरा मेदो हि सर्वभूतानामुदरस्थमण्वस्थिषु च महत्सु मज्जा भवति। स्थूलास्थिषु विशेषेण मज्जा त्वभ्यन्तराश्रिता। अथेतरेषु सर्वेषु सरक्तं मेद उच्यते। शुद्धमांसस्य यः स्नेहः सा वसा परिकीर्त्तिता। चतुर्थी श्लेष्मधरा सर्वसन्धिषु प्राणभृतां भवति। पञ्चमी पुरीषधरा नाम याभ्यन्तरे कोष्ठमाश्रिता मलमभिविभजते पक्वाशयस्था। षष्ठी पित्तधरा या चतुर्विधमन्नपानमामाशयात् प्रच्युतं पक्वाशयोपस्थितं धारयति। सप्तमी शुक्रधरा या सर्वप्राणिनां सर्वशरीरव्यापिनी।

"यथा पयसि सर्पिस्तु गूढश्चेक्षौ रसो यथा। शरीरेषु तथा शुक्रं नृणां विद्याद्भिषग्वरः॥"

इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये॥) पृथिवी। इत्यमरः॥ पर्व्वतः। भीमः। इति हेमचन्द्रः। ४। ९४॥ पृथिव्यां। इति राजनिर्घण्टः॥ कच्छपः। इति भावप्रकाशः॥

धर्म्मिष्ठ पुं (धरणीति। धृ+अच्। मिश्र-ष्ठीति। मिश्र+क। पृषोदरादित्वात् साधुः।) तत् कर्म्मधारयः।) श्वेतश्चन्द्रः। इत्य-मरः। ३। ५। ५०॥ स्वाहा इति भाषा। गुरुत्वं प्राण्डीबर्हिरलक्षणविशिष्टः कर्पूरवृत्ताविति बहु शीतलत्वात्। इति भरतः॥ (यथा, नैष-धचरिते। ५। १९।

"श्रद्धुरं जलममायुतसप्तरूपमालिनि-भ्रमाभास्वरकारितधराधरणाम्॥")

धर पुं, (धरति पर्वतांश्च। धृ+अच्।) पर्वतः। (यथा, माघे। ४। १८।

"अपूर्व भरं कुसुमौघ धौ रम उत्पुष्पशेखरमभूत॥")

कार्पासतूलकः। कूर्म्मराजः। वसुभेदः। इति मेदिनी। रे, ३८॥ (यथा, हरिवंशे। १। ४८।

"आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः। प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः॥"

महादेवः। यथा, महाभारते। १३। १७। १०४।

"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः।"

विष्णुः। यथा, तत्रैव। १३। १४९। ९९।

"सर्व्वकामधरो नित्यं प्रमाता धाता धरो ध्रुवः।"

धारके, त्रि। यथा, शार्ङ्गधरः।)

धरण, स्त्री (धरतीति। धृ+ल्युट्।) मानभेदः। स तु दशपलपरिमितकालकरः। इति लीलावती। पञ्चसुवर्णः। इति वैद्यकम्। ("अथ संधानवाचका सर्ज्जोपहितविवेकम्।"

इति सुश्रुते चिकित्सितस्थाने ३१ अः।

धृ+ल्युट्।) धारणम्। इति मेदिनी। णे, ५६॥ (यथा कुमारे। ६। ८०।

"यथाद्रिपाणिग्रहणेन सह भार धारणोद्भवम्॥")

धरणः पुं (धृ+ल्युट्।) जगत्पतिः। लोकः। धान्यम्। दिवाकरः। इति हेमचन्द्रः॥ सेतुः। इति त्रिकाण्डशेषः॥ (वैद्यकसंहितायाम्। यथा पुण्यस्त्रके प्रथमाध्याये धान्वन्तरीये।

"मासैश्चतुर्भिः धान्य आहरणं व विधाय।")

धरणि, स्त्री (धरति जगदादीनिति। धृ+"अर्त्ति सृधृभ्योऽनिः।" उणां २। १०२। इति अनि।) पृथिवी। इत्यमरः। २। १। २॥ (यथा, महाभारते। १२। १३५। ३।

"ज्योतिर्धरणि वाग्बुद्धि सर्व्वमेकात्मकं विदुः॥")

धरणिधर, पुं, (धरतीति। धृ+अच्। धरण्याः धरः।) विष्णुः। इति शब्दरत्नावली॥ (कच्छपः। पर्व्वतः। शेषः। इति कुवलयानन्दटीका॥)

धरणी स्त्री, (धरणि+ङीष्।) पृथिवी। इति मेदिनी। णे, ५१॥ (यथा, विष्णुपुराणे। १। ४। ३१।

"धरा तु भागशो यामदंष्ट्राग्रविन्यस्तं तम्।")

शाल्मलिकन्दः। इति शब्दचन्द्रिका॥ नाड़ी। कदम्बिनी। धातुरक्तकाम्। मार्गणीयं च धीर पत्नी। उत्तमत्वं। मन्दत्वं। मधुरत्वम्। धवलत्वम्। कषायत्वम्। रोगनाशकम्। गुरुत्वम्। क्षमाविसर्जनवज्ज्वलसन्धानशक्तिमात्रम्। इति राजनिर्घण्टः॥

धरणीकन्द, पुं (धरणी इव कन्दः।) धरणी कारकन्दविशेषः। इति राजनिर्घण्टः॥

धरणीकीलक, पुं, (धरण्याः पृथिव्याः कीलक इव।) पर्व्वतः। इति शब्दरत्नावली॥

धरणीधर, पुं (धरण्याः धरः।) विष्णुः। इति हेमचन्द्रः। २। १३१॥ (यथा, महाभारते। १३। १४९। ३४।

"अज सर्व्वेश्वरः सिद्धः सिद्धिः सर्व्वादिरच्युतः।" वृषाकपिरमेयात्मा सर्व्वयोगविनिःसृतः॥" कच्छपः। इति राजनिर्घण्टः। शेषः। यथा "धर धरणीधरेश्वर"... पर्व्वते, त्रि। यथा, रघुवंशे। ११। ८४।

"हेमाभपीतशङ्ख भवा विभवार्थे हरशिरम्। वर्षेण द्रावकं हित्वा धरणीधरम्॥")

धरणीपूर, पुं, (धरणीं पूरयति प्लावयतीति। पूर+अच्।) समुद्रः। इति शब्दरत्नावली॥

धरणीप्लव पुं (प्लु+भावे अप्। धरण्या पृथिव्या इव प्लावो यस्मात्।) समुद्रः। इति त्रिकाण्डशेषः॥

धरणीश्वर पुं, (धरण्याः ईश्वरः।) शिवः। इति शब्दरत्नावली॥

धरणीसुता, स्त्री, (धरण्याः सुता।) सीता। इति हेमचन्द्रः। २। १४७॥ (तदुत्पत्तिकथा यथा कालिकापुराणे ३८ अध्याये।

"चारयन्नेव हलमिमं महाभूमिं ततो नृपः। कर्षन् हालेनमां चक्रे तदाऽङ्गुलिं तदा चाग्रम्। तद्भूमिमध्यदेशे तु सुभगा कन्या महाधिरा। जेतुं राजा तदा तत्र हलेनाक्रम्य शुभ्रताम्। तावानुवा जातमानानां धरणीसुता कथम्। समाहृत्य बहुवर्षं भौमं भारदं पुनम्॥"

हरिवंशे।

यथा सुता यथा सुता यथा त्वमम्। मन्दोदरा। ह्लादिनी गौरवाद्भूमि मुक्तालक्षणाद्भुतम्॥")

धरा, स्त्री, (धरति जीवमवर्तमानादिभिः। धृ+अच्। यद्वा, ध्रियते ईश्वरेण इति। धृ+अप्। टाप्।) पृथिवी। इत्यमरः। २। १। २॥ (यथा देवी-भागवते। ३। १३। ७।

"बालरूपश्च धरा मृता यत्ते विवादयोरिह॥")

गर्भाशयः। मेदः। इति मेदिनी। रे, ११॥ नाड़ी। इति राजनिर्घण्टः॥ महापापविशेषः। तद्यथा—

"अन्यान् संप्रवक्ष्यामि महापापस्वरूपम्। पापस्य भारं पृथ्यामतुल्यविभागतः। भारेण पृथिवी देवी समुद्रोपसमस्त्रितीव। सर्वावरावर्त्तयतो मध्ये देवपापमिवागत। बोधयामास कौन्ती च यथावदसंवादात्। नरोत्तमसत्रीदीप्ता च शताक्रन्दबतनाम्। मर्यादं शमनावोदा बहुधातपदवैपद। दृष्ट्वा पतदपेक्ष पृथ्वीमात्ररहितम्। प्रजान्तं वा कुर्यात् विमुचेत वृद्धौ वा। कुर्यात् मन्तवातुपदमनोऽपि विरहान्। गुणापुरमार्गे कुर्माम्भोदैवादृतं हन। असिद्धं दमायाद्भूतवाह्यवर्णिकम्। यदीमव्रविपर्यासा मितदेवं विमवैन। स्थापनानि सत्ता नरादय। नकाद्री पुरुषस्व धर्मान् पत्नववः। विनायकं भीतिं कर्माणि विविधानि च। नदीशुभानि दर्शनवैवत्सरमनतानि च। इदं दत्तनामानं चार्थयत्पुण्ड्रकम्। शुक्लमात्मानमर्थम् पुरुषाण्यनि च। हर्षितं नाम हत्वा कर्मोऽनुमत्त्वाति। गुरूत्तमानाभ्याय स्थानानि पाहरीषेव। सर्वी अस्तु स्वयं सर्वे समानं सर्व। अयं च मर्यादाने च गुरु वद्धनत॥)

वहन् धारयती यस्मादस्माद्धात्रीव निर्म्मिता ।
वसुन्धरा ततो जाता तस्मात् पाहि श्यामलेवात् ।
चतुर्भुजोऽपि मार्कण्डेयमात्प्तश्च तथापरे ।
भवनाये भगवतान् पाहि जनार्द्दनमान् ।
तथैव ब्रह्मीभीर्दिष्टे त्रिये गौरीति कीर्त्तिता ।
मातृतो ब्रह्मा पार्श्वस्थापुस्थ पद्म दत्ती प्रभा ।
बुद्धिहंसश्ची ख्याता मैत्रा सुविद्ध संस्थिता ।
त्रिम वामलिप्ता यथायनो विश्वम्भरा स्थिता ।
धृति क्षमा स्थिरा सौम्यो पृथ्वी वसुमनी तथा ।
रत्नाभिमुखैभि पाहि देवि । जनार्द्दनमात् ।
एतद्धाम तां देवीं ब्राह्मणेभ्यो निवेदयेत् ।
धराहं या चतुर्भोर्न गुरुत प्रतिपादयेत् ।
देवदेवाय सन्निभाय प्रतिपद्य विसर्जयेत् ।
अनेन विधिना यस्तु दद्याद्देवीं धरां नृप ।
पुण्यकाले तु सम्प्राप्ते स पदं याति वैष्णवम् ।
विमानेनार्कवर्णेन किङ्किणीजालमालिना ।
नारायणपुरं गत्वा कल्पत्रयमथो वसेत् ।
निजपुण्यक्षयाच्च मार्त्येऽस्मिन्नवनीयम् ।
इति पठति य इत्थं यः शृणोति च नित्यं
मतिमपि च ददाति देवपूजायतनात् ।
त्रिभुवनपदमुपैति क्लेशमुक्तः
सुरगणपरिवारः सेव्यते चामरौघैः ।"

इति मत्स्यपुराणे २५८ अः ।

धराकदम्ब, पुं, (धरायां कदम्बे जात कदम्ब ।) धाराकदम्बः । इति शब्दरत्नावली । १०० ।

धराक्रम पुं (५ स्ता भाक्रम ।) पाडक्रमः । इति हेमचन्द्रः । (गरुडपुराण । इति काशिका पुराण १० अध्याय । स्त्रियां टाप् । भौमा ।)

धराधर पुं, (धरायाः धरो धारक ।) विष्णुः । (यथा, महाभारते । १३ । १४९ । ९३ ।
"एनेषा मेधजो धन्य सत्यमेधा धराधर ।"
"महेन्द्रत्वे हिरण्यादैश्वर्धां धरां धरणीति धराधर ।" इति शाङ्करभाष्यम् ।) पर्व्वतः । इति मेदिनी । रे २९८ । (यथा, हरिवंशे । २०४ । २१ ।
"धराधराश्च वसुधा धातारश्च धराधराः ।"
धरायाः उद्धारकर्त्तरि, त्रि । यथा भागवते । ४ । १७ । ३५ ।
"स वीरमूर्त्तिः समभूद्धराधरो
यो मां पयस्युग्रशरो जिघांससि ।")

धरामर, पुं, (धरायाः पृथिव्या अमरो देवः ।) ब्राह्मणः । यथा —
'येन श्रुत भागवत पुराणं
नारायणो मे पुरुषः पुराणः ।
श्रुते कृत येन धरामराणां
तेन कृतं जन्म नराधमानाम् ।"
इति पौराणिकाः ।

धरित्री, स्त्री, (धरति जीवजातमिति ध्रियते इति वा । धृ + "अर्त्तिलूधूसूखनिसहचर इत्रः ।" उणां ४।१०७) इति इत्र । गौरादित्वात् ङीष् ।) पृथिवी । इत्यमरः । २ ।१। २ । (यथा, रघु । १४ । ५४ ।

"नाभ्यर्च्चिताभ्यसमपि धरित्रीं
त्वय्येव भीता यदुपा जगाम ।")

धरिमन्, [न्] पुं (ध्रियते इति मीयतेऽनेनेति । धृ + "हृभृधृसृस्तृशृभ्य इमनिच् ।" उणां ४ । १४७। इति इमनिच् ।) रूपम् । इत्युणादिकोषः । तुला । यथा, मनुः । ८ । ३२१ ।
"तथा धरिमर्मयानां शतादभ्यधिके वधः ।"

धरुण, पुं, (धरतीति । धृ + बाहुलकात् उनन् ।
"धृञ् धारणे । वैकुण्ठ च इति निम् । धारे विष्णुः कृपूतश्च । धारयति जगत् ।" इति एकाक्षरकोषः । १ ।१७ । ९४ ।) ब्रह्मा । स्वर्गः । नीरम् । (निघण्टुमते, स्त्री । यथा, ऋग्वेदे । १ ।५ । ६ ।
"यथा भिर्मो धरुणेष तस्थौ ।")
धमानम् । इति मेदिनी । णे ५५ । (आधारः । यथा, वाजसनेयसंहितायाम् । ८ । ५१ ।
"उपहूतस्य भगवो मम धरुणम् ।"
धारक त्रि । यथा, ऋग्वेदे । १० । १११ । ४ ।
"स धारयो धरुणं वसूनाम् ।"
"तस्मै सूर्याय धरुण धारक धर्त्तारं धरुणाधारम् । इति तद्भाष्ये सायनः ।)

धर्णस, त्रि, धृष्णोति कर्म्मभिः सर्वमग्नेन साध्यम् । धारकीयम् स्तोतव्यम् पतनीयम् । भावे स्त्री ।

धर्त्र, क्ली, (धरति ध्रियते वा । धृ + "हुयामाश्रुभसिभ्यस्त्रन् ।" उणां ४ । १६६ । इति त्रन् ।) गृहम् । इत्युणादिकोषः । यज्ञः । धर्म्मः । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः । (धारक, त्रि । यथा, वाजसनेयसंहितायाम् । १ । १८ ।
"धर्त्रमसि दिवं दृंहार्न्तरिक्षं दृंह ।"
"दिवं धर्त्रमसि । त्वं एव धारकमसि ।" इति वेददीपः ।)

धर्म्म, पुं क्ली (धरति लोकान् ध्रियते पुण्यात्मभिरिति वा । धृ + "अर्त्तिस्तुसुहुसृधृक्षि ।" उणां १ । १४८ । इति मन् ।) सुभादृष्टम् । (यथा, हितोपदेशे । १ । ९८ ।
"एक एव सुहृद्धर्म्मो निधनेऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्व्वमन्यत्तु गच्छति ॥")
तत्पर्य्यायः । पुण्यम् २ श्रेयः ३ सुकृतम् ४ वृषः ५ । इत्यमरः । १ । ४ । २४ ॥ न्यायः । स्वभावः । आचारः । उपमा । क्रतुः । (यथा, महाभारते । १४ । ८८ । २१ ।
"ततः प्रवर्त्ते यज्ञस्य यथावत् द्विजसत्तमाः ।
चक्रुर्विधिवदाज्ञानां यथावद्विधिवत् द्विजाः ।")
अहिंसा । उपनिषत् । इति मेदिनी । मे, २६ । दानादिके, स्त्री । इति हेमचन्द्रः । (यथा, याज्ञवल्क्ये ।
"प्राणायामस्तथा ध्यानं प्रत्याहारोऽथ धारणा ।
तारश्चैव योगेऽस्मिन् षट् धर्म्माः प्रकीर्त्तिताः ।")

धर्म्म, पुं, (धृ + मन् ।) यमः । यमः । सोमपः । इति मेदिनी । मे १६ । धनुः । अर्हन् । इति हेमचन्द्रः । ६ । १५ । देवताविशेषः । स ब्रह्मणः दक्षिणस्तनाज्जातः । (यथा मत्स्यपुराणे । ३ । १० ।
"अङ्गुष्ठाद्दक्षिणाद्दक्ष प्रजापतिरजायत ।
धर्म्मस्तनान्तादभवत् हृदयात् कुसुमायुधः ।")
तस्य भार्य्याः दक्षस्य त्रयोदशकन्याः । तत्र पतद्धर्म्मपत्नीनि यथा । श्रद्धायां कामम् १ मैत्र्यां प्रसादः २ दयायां अभयम् ३ शान्त्यां सुखम् ४ तुष्ट्यां मुदं ५ पुष्ट्यां गर्व्वं ६ क्रियायां योगं ७ उन्नत्यां दर्पं ८ बुद्ध्यां अर्थं ९ मेधायां स्मृतिं १० तितिक्षायां क्षेमम् ११ । १२ ह्रियां प्रश्रयम् १३ । इति श्रीभागवतम् । ४ । अपि च ।
"श्रद्धा लक्ष्मीर्धृतिस्तुष्टिः पुष्टिर्मेधा तथा क्रिया ।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदशी ।
पत्न्यर्थं प्रतिजग्राह धर्म्मो दाक्षायणीः प्रभुः ।"
विष्णुपुराणमते सिद्धिस्थाने ऋद्धिरुक्ता तुल्यम् । तासामपत्यानि यथा —
"श्रद्धा कामं चले दर्पं नियमं धृतिरात्मजम् ।
सन्तोषञ्च तथा तुष्टिर्लोभं पुष्टिरसूयत ।
मेधा श्रुतं क्रिया दण्डं नयं विनयमेव च ।
बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजम् ।
व्यवसायं प्रजज्ञे वै क्षेमं शान्तिरसूयत ।
सुखं सिद्धिर्यशः कीर्त्तिरित्येते धर्म्मसूनवः ।
कामाद्रतिः सुतं हर्षं धर्म्मपौत्रमसूयत ।" ५ ।
अधर्म्मवंशो यथा, मार्कण्डेयपुराणे ।
'हिंसा भार्य्या त्वधर्म्मस्य तस्यां जज्ञे तथानृतम् ।
कन्या च निकृतिस्ताभ्यां सुतौ द्वौ नरकं भयम् ।
माया च वेदना चैव मिथुनं त्विदमेतयोः ।
भयाज्जज्ञेऽथ वै माया मृत्युं भूतापहारिणम् ।
वेदना स्वसुतञ्चापि दुःखं जज्ञेऽथ रौरवात् ।
मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्च जज्ञिरे ।
दुःखोत्तराः स्मृता ह्येते सर्व्वे चाधर्म्मलक्षणाः ।
नैषां भार्य्यास्ति पुत्त्रो वा सर्व्वे ते ह्यूर्द्ध्वरेतसः ।"
धर्म्मोत्पत्तिर्यथा, वराहपुराणे ।
धृज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां पर सक सेट् ।) धर्जति । इति दुर्गादासः ॥

धृष, इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां परं सक सेट् । इदित् ।) धृंषति । इ, धृंक्ष्यति । इति दुर्गादासः ॥

धृत, त्रि, ध्रियते स्म । धृ + क्तः कर्मणि कर्त्तरि च यथायोग्यम् । गृहीतम् । आप्तम् । धृतं धृतं दर्शि गात्रा । (यथा, महाभारते । १ । ७४ । १२ ।
"अधमोऽपि यस्य उद्धृत्य तथा मतम् ।
बन्धोऽयमाहमाहि भयेन ध्रियते ॥")
अवस्थितः । पतितः इति यावत् । स्थितः । (स्त्रीभिः । स्थितिः । यथा महाभारते । ७ । १६ । ७८ ।
"धृतो वानरध्वजाः प्रतिष्ठन्ताः । ...")

"दृष्टोऽस्य समयो धनुः केतुसत्याक्रमकुलात ।
धारयिष्यति शास्त्रारक्षस्य धर्मोद्धतो भृतः ॥")

धृतराष्ट्र, पुं (धृतं राष्ट्रं येन ।) दुर्योधनपिता । स अम्बिकायां पाण्डुभ्रातुः विचित्रवीर्यक्षेत्रे व्यासाज्जातः । इति महाभारते । १ । ६५ । ११ ॥ (अयं हि गन्धर्वपतेर्हंसस्य अवतारः । यथा, महाभारते । १ । ६७ । ८४ ।
"अरिष्टायास्तु यः पुत्रो हंस इत्यभिविश्रुतः ।
स गन्धर्वपतिर्जज्ञे कुरुवंशविवर्द्धनः ॥")
सुराजा । नागभेदः । इति मेदिनी । रे, २७ । (यथा महाभारते । २ । ९ । ९ ।
"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ ॥")
पक्षिभेदः । इति विश्वमेदिनी । (जनमेजय पुत्रविशेषः । यथा, विष्णुपुराणे । ४ । २० । २१ ।
"अथापरोऽपि परिक्षित् जनमेजयोऽथ चक्रम ।"
बलिराजस्य पुत्रविशेषः । यथा, हरिवंशे । ३ । ७१ ।
"अयं पुत्रशतज्येष्ठो बाणश्च महाबलः ।
धृतराष्ट्रश्च सूर्यश्च चन्द्रांशुश्चन्द्रतापनः ॥"
जनमेजयस्य ज्येष्ठपुत्रः । यथा, महाभारते । १ । ९४ । ५४ ।
"जनमेजयस्य तनया भुवि ख्याता महाबलाः ।
धृतराष्ट्रः प्रथमजः पाण्डुर्बाह्लीक एव च ॥")

धृतराष्ट्री, स्त्री, (धृतराष्ट्रस्य पत्नी । ङीष् ।) हंसपत्नी । इति मेदिनी । रे, २०९ ॥ (यथा, महाभारते । १ । ६६ । ५७, ५८ ।
"काकीं श्येनीं तथा भासीं धृतराष्ट्रीं तथा शुकीम् ।
ताम्रा तु सुषुवे देवी पञ्चैता लोकविश्रुताः ॥"
"धृतराष्ट्री तु हंसांश्च कलहंसांश्च सर्वशः ।
चक्रवाकांश्च भद्रे तु जनयामास चैव तु ॥"
हंसपत्नीभार्या । इति हेमचन्द्रः ॥)

धृतिः, पुं, (ध्रियते इति । धृ + क्तिन् । अभिधानात् पुंस्त्वम् ।) यज्ञः । इति मेदिनी । ति, ३८ ॥ (विश्वेदेवविशेषः । यथा, महाभारते । १३ । ९१ । ३ ।
"बलः धृतिर्विपाप्मा च पुण्यकृत् पावनस्तथा ॥"
यदुवंशीयबभ्रुपुत्रविशेषः । विजयस्य पुत्रः । यथा, हरिवंशे । ३१ । ९९ ।
"विजयस्य धृतिः पुत्रस्तस्य पुत्रो धृतव्रतः ॥"
निमिवंशीयवीतहव्यपुत्रः । यथा, भागवते । ९ । १३ । २६ ।
"सुधृतेस्तु सुतो धृष्टकेतुर्वीतहव्यो धृतिस्ततः ॥"
बभ्रुवंशीयमधुपुत्रः । इति विष्णुपुराणे । ४ । १४ । १३ । "दीर्घबाहुः धृतिः पुत्रो ..."

"वसुप्रमाणस्तु पीनो धृतिश्च मध्योऽतिरिक्तस्तु प्रमाणः ।")
धारणम् । इति मेदिनी । ति, ५८ । धैर्य्यम् । इति हेमचन्द्रः । २ । २३३ ॥ (अस्य यथा कात्यायनश्रौतसूत्रे । २ । २ । ८ ।
"रायस्पोषे धृतिं मुद्गलपुत्राः ।")
षोडशमात्राक्रान्तगणसमयोरष्टमात्रका । इति भरतः । अष्टादशाक्षरपादच्छन्दोमात्रम् । इति छन्दोमञ्जरी ॥ ० ॥ धृतियोगजातफलं यथा,—
"धृतियोगप्रसूतस्तु भवेत् संभृतमानसः ।
मानुषः समायाय पुण्यात्मा विनयान्वितः ॥"
इति कोष्ठीप्रदीपः ॥
धारणा । सा त्रिधा । यथा —
"धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः ।
योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्त्विकी ॥
यया तु धर्म्मकामार्थान् धृत्या धारयतेऽर्जुन ।
प्रसङ्गेन फलाकाङ्क्षी धृतिः सा पार्थ राजसी ॥
यया स्वप्नं भयं शोकं विषादं मदमेव च ।
न विमुञ्चति दुर्मेधा धृतिः सा तामसी मता ॥"
इति श्रीभगवद्गीतायाम् । १८ । ३३ ॥

धृत्वरी, स्त्री, (धृञ् + "वनो र च ।" ४ । १ । ७ । इति ङीप् रश्चान्तादेशः ।) भूमिः । इति कविप्रयोगादिदर्शितम् ॥
धृत्वा, [न्] पुं, (धरतीति । धृ + "अन्येभ्योऽपि दृश्यन्ते ।" उणा० ४ । ११३ । इति क्वनिप् ।) धर्म्मः । विप्रः । समुद्रः । आकाशम् । मेधावी । विष्णुः । इति उज्ज्वलदत्तोणादिवृत्तिः ॥
धृष ञि क्षि मर्षे । कोप इति यावत् । इति कविकल्पद्रुमः ॥ (तुदा० पर० सक० सेट् ।) ञि, धर्षितः धृष्टः तेन । क्षि, धर्षणं धर्षति । मर्षे इह अभिमर्षः । इति भट्टमल्लः । न धर्षति निशा धृष्टः । तमेव धर्षयितुं यत्नात् प्रतिभूयतीति हलायुधः । इति दुर्गादासः ॥
धृष उ सङ्घाते । हिंसे । इति कविकल्पद्रुमः ॥ (भ्वा० पर० संघाते अक० हिंसे सक० सेट् । उदित्त्वात् क्त्वावेट् ।) उ, धर्षित्वा धृष्ट्वा । संघर्षति । मनुष्यः । इति दुर्गादासः ॥
धृष क ड प्रसहने । इति कविकल्पद्रुमः ॥ (चुरा० आत्म० सक० सेट् ।) प्रसहनमभिभवः प्रसह्यकर्म । क ड, धर्षयते वह्निं मयः । इति दुर्गादासः ॥
धृष, ञि धा न प्रागल्भ्ये । इति कविकल्पद्रुमः ॥ (स्वा० पर० अक० सेट् ।) ञि, धृष्टोऽस्ति । धा, धर्षितं धृष्टं तेन । न, धृष्णोति गुरोरग्रे यः । इति हलायुधः । इति दुर्गादासः ॥
धृष, पुं (धृष्णोतीति । धृष् + "इगुपधज्ञाप्रीकिरः कः ।" उणा० १ । ३४ । इति कः ।) दक्षः । दनुजादिकोषः । सभालः । प्रगल्भः । इति संक्षिप्तसारोणादिवृत्तिः ॥
धृष्ट, त्रि (धृष + क्तः ।) प्रगल्भः । इति शुद्धबोधव्याकरणम् ॥ (यथा, भागवते । ५ । १२ । ७ ।
"अगम्य गोप्राय विकल्पमानो
न योगाद्ध्वहभागत धृष्टः ।")
निर्लज्जः । तत्पर्य्यायः । धृष्णक् २ वियातः ३ । इत्यमरः । ३ । १ । २५ ॥ धृष्णुः ४ दृप्तः ५ । इति त्रिकाण्डशेषः । धर्षितः ६ । इति शब्दरत्नावली ॥ चतुर्विधनायकान्तर्गतनायकविशेषः, पुं । तस्य लक्षणं यथा, "भूयो निःशङ्कः कृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणः ।" इति रसमञ्जरी ॥ (चेदिवंशीयकुले पुत्रः । यथा, हरिवंशे । ३६ । २८ ।
'कुन्तेर्धृष्टः सुतो जज्ञे रथपृष्ठः प्रतापवान् ।"
वैवस्वतमनोः पुत्रविशेषः । यथा, भागवते । ८ । १३ । २ ।
"मनुर्विवस्वतः पुत्त्रः श्राद्धदेव इति श्रुतः ।
सप्तमो वर्त्तमानो यस्तदपत्यानि मे शृणु ॥
इक्ष्वाकुर्नभगश्चैव धृष्टः शर्य्यातिरेव च ।"
धृष्णुरिति क्वचित् पाठः ।)
धृष्टा, स्त्री, (धृष्यति स्मेति । धृष प्रागल्भ्ये + क्तः । टाप् ।) असती । इति शब्दरत्नावली ॥
धृष्णक्, [ज्] त्रि (धृष्णोतीति । धृष प्रागल्भ्ये + "ऋत्विग्दधृक् ।" ३ । २ । ५९ । इत्यत्र "धृषेश्च ।" इति कात्यायनोक्तेः क्विन् ।) निर्लज्जः । इत्यमरः । ३ । १ । २५ ॥
धृषि, पुं (धर्षति अभिभवति अन्धकारमिति । धृष् अभिभवे + बाहुलकात् किः । न च कित् ।) किरणः । इत्यमरः । १ । ३ । ३३ ॥
धृष्णु त्रि (धृष्णोतीति । धृष + "त्रसिगृधिधृषिक्षिपेः क्नुः ।" ३ । २ । १४० । इति क्नुः ।) धृष्टः । इति त्रिकाण्डशेषः ॥ (यथा, ऋग्वेदे । ६ । २९ । ५ ।
"न हि त्वा शूरो न तुरो न धृष्णु
र्न त्वा योधो मन्यमानो युयोध ॥")
पुं, कार्त्तिकः । इति शब्दचन्द्रिका ॥ (वैवस्वतमनुपुत्रः । यथा हरिवंशे । १० । १ ।
"मनोर्वैवस्वतस्यासन् पुत्त्रा वै नव तत्समाः ।
इक्ष्वाकुश्चैव नाभागो धृष्णुः शर्य्यातिरेव च ॥"
सावर्णस्य मनोः पुत्रविशेषः । यथा, तत्रैव । ७ । ६० ।
'वरिष्ठुराम्यो धृष्णुश्च राजन् सुमतिरेव च ।
सावर्णस्य मनोः पुत्रा भविष्या दश भारत ॥"
अन्धकवंशोद्भवकुकुररायस्य पुत्रः । यथा, तत्रैव । ३७ । १८ ।
"कुकुरस्य सुतो धृष्णुर्धृष्णोस्तु तनयस्तथा ।
कपोतरोमा तस्याथ तैत्तिरिस्तनयोऽभवत् ॥"
कवेः पुत्रविशेषः । यथा, महाभारते । १३ । ८५ । १३३ ।
"कविः काव्यश्च धृष्णुश्च बुद्धिमानुशनास्तथा ।
भृगुश्च विरजाश्चैव काशी चोग्रश्च धर्म्मवित् ॥
अष्टौ कविसुता ह्येते सर्व्वमेभिर्जगत्ततम् ॥")
धे, ट पाने । इति कविकल्पद्रुमः ॥ (भ्वा० पर० सक० अनिट् ।) धयति । ट, स्त्रियामीपः । स्तनन्धयी । इति दुर्गादासः ॥
धेन, पुं, (धीयते इति धयति स्तनादिति वा । धेट पाने + "धेट इच ।" उणा० ३ । ११ । इति न इचान्तादेशः ।) समुद्रः । इति हेमचन्द्रः ॥ नदः । इति मेदिनी ॥
धेना, स्त्री, (धेन + टाप् । "टित्त्वेऽपि सर्व्वत्र ङीप् । इति हरदत्तोक्तेन ङीप् ।" इति कश्चित् ।) नदी । (इयादिर्लिट प्रागपि धात्वर्थेन एवा भावलोपौ दधाता समभिधेय वाक्प्रनेना लौकिकाय वा । यद्वा, धेट पाने 'धेट इच' इति नप्रत्ययः इकारस्यैकारादेशः गुणः । धयन्ति तामिति धेना । पानमत्र स्वीकारः । यद्वा आस्वादः । धीयते पीयते आस्वाद्यते पानेन धयन्ति प्राणामिति धेना ।" इति दयराजयज्वा । १ । ११ । ३८ ।) भारतीभेदः । इति हेमचन्द्रः ॥ (यथा, ऋग्वेदे । ३ । १ । ९ ।
"अस्य धारा अक्षरन्न धेनाः ।"
'धेना माध्यमिका वाचश्च विक्षरन्ति ।" इति तद्भाष्ये सायनः ॥)
धेनिका, स्त्री (धेनो नदः । तस्य अवयवा अवसमीपस्थानम् । स उत्पत्तिस्थानत्वेनास्त्यस्या इति । धेन + ठन् । टाप् ।) धन्याकम् । इति भावप्रकाशः ॥
धेनु, स्त्री, (धयति क्रोडे सुतान् धीयते वत्सैरिति वा । धेट पाने + "धेट इच ।" उणा० ३ । ३४ । इति नु इचान्तादेशः ।) नवप्रसूता गौः । तत्पर्य्यायः । नवसूतिका २ । इत्यमरः । २ । ९ । ७१ ॥ नवप्रसूतिका ३ । इति शब्दरत्नावली ॥ दानीयदशधेनवो यथा —
"यास्तु पापविनाशिन्यः पठ्यन्ते दश धेनवः ।
तासां स्वरूपं वक्ष्यामि नामानि च नराधिप ॥
प्रथमा गुडधेनुः स्याद्घृतधेनुरथापि वा ।
तिलधेनुस्तृतीया च चतुर्थी जलसंज्ञिका ॥
क्षीरधेनुश्च विख्याता मधुधेनुरथापि वा ।
सप्तमी शर्कराधेनुर्दधिधेनुरथाष्टमी ॥
रसधेनुश्च नवमी दशमी स्यात् स्वरूपतः ।
कुम्भाः स्युर्द्रवधेनूनामितरासान्तु राशयः ॥
सुवर्णधेनुमप्यत्र केचिदिच्छन्ति मानवाः ।
नवनीतेन रत्नेन तथान्ये तु महर्षयः ॥
एतदेव विधानं स्यात्त एवोपस्कराः स्मृताः ।
मन्त्रावाहनसंयुक्ताः सदा पर्व्वणि पर्व्वणि ॥
यथाश्रद्धं प्रदातव्या भुक्तिमुक्तिफलप्रदाः ।
गुडधेनुप्रसङ्गेन सर्व्वास्तावन्मयोदिताः ॥
अशेषयज्ञफलदाः सर्व्वपापहराः शुभाः ।
व्रतानामुत्तमं यस्माद्विशोकद्वादशीव्रतम् ॥
तदङ्गत्वेन चैवात्र गुडधेनुः प्रशस्यते ।
अयने विषुवे पुण्ये व्यतीपातेऽथवा पुनः ॥
गुडधेन्वादयो देयास्तूपरागादिपर्व्वसु ॥"
इति मत्स्यपुराणे ८२ अध्यायः ॥
पृथक्पृथक् धेनूनां दानविधयस्तत्तच्छब्दे द्रष्टव्याः ॥ ० ॥
अथ कपिलाधेनुदानादिफलम् ।
सौतोवाच ।
"अतःपरं प्रवक्ष्यामि कपिलाधेनुमुत्तमाम् ।

यनुष्टदाचमदी याति विष्णुलोकमनुत्तमम् ।
पूर्ब्बोक्तेन विधानेन दद्याद्द्विज स्वनुष्ठकाम् ।
सर्व्वालङ्कारसंयुक्तां सर्व्वरत्नसमन्विताम् ॥
कपिलायाः शिरोग्रीवे सर्व्वतीर्थानि भामिनि ॥
पितामहनियोगाच्च तिष्ठन्ति हि नित्यशः ॥
प्रातरुत्थाय यो मर्त्त्यः कपिलागलमस्तकात् ।
च्युतन्तु भक्त्या गृह्णीत शिरसा वन्दते स्वयम् ॥
स तेन पुण्ययोगेन तत्क्षणाद्धतकिल्बिषः ।
त्रिंशद्वर्षकृतं पापं दहत्यग्निरिवेन्धनम् ॥
प्रत्युत्थाय यो मर्त्त्यः कुर्य्यात्तस्याः प्रदक्षिणम् ।
प्रदक्षिणीकृता तेन पृथिवी स्यात् वसुन्धरे ॥
प्रदक्षिणेन चैकेन श्रद्धायुक्तेन नरसत्तम ।
दशवर्षकृतं पापं तस्य नश्यति तत्क्षणम् ॥
कपिलायास्तु मूत्रेण स्नात्वा चैव शुचिव्रतः ।
गङ्गादिषु तीर्थेषु स्नातो भवति मानव ॥
तेन स्नानेन चैकेन भावयुक्तेन वै नरः ।
यावज्जीवकृतात् पापात् मुच्यते नात्र संशयः ॥
गोसहस्रन्तु यो दद्यादेकाञ्च कपिलां नरः ।
सममेतत् पुरा प्राह ब्रह्मा लोकपितामहः ॥
गवामस्थि न लङ्घेत मृते मध्ये न दूषयेत् ।
यावन्त्यस्थीनि तं गत्वा तावत् पुण्येषु पूर्य्यते ॥
गवां कण्डूयनं चैव यत्नश्च परिपालनम् ।
तृष्णाशीतप्रदानञ्च भयरोगाभिपालने ॥
दशोदकानि यो दद्यात् क्षुधितानां गवाह्निकम् ।
सोऽश्वमेधफलं दिव्यं लभते मानवोत्तम ॥
विमानैर्विविधैर्दिव्यैः कन्याभिरभिवीजिते ।
धीयमानस्तु गन्धर्व्वैर्दीप्यमानो यथायथम् ॥" * ॥
एकादशप्रकारकपिलालक्षणं यथा,—
"सुवर्णकपिला पूर्व्वा द्वितीया गौरपिङ्गला ।
तृतीया चैव रक्ताक्षी चतुर्थी गुडपिङ्गला ॥
पञ्चमी बहुवर्णा स्यात् षष्ठी च श्वेतपिङ्गला ।
सप्तमी श्वेतपिङ्गाक्षी अष्टमी कृष्णपिङ्गला ॥
नवमी पाटला ज्ञेया दशमी पुच्छपिङ्गला ।
एकादशी खुरश्वेता एताश्च सर्व्वलक्षणाः ॥
सर्व्वलक्षणसंयुक्ता सर्व्वालङ्कारसुन्दरी ।
आवाह्याथ च दातव्या सर्व्वसुखप्रदायिनी ।
भुक्तिमुक्तिप्रदा दैवी विष्णुलोकप्रदायिनी ॥"
इति कपिलामाहात्म्यम् ॥ * ॥
अथोभयमुखीधेनुदानादिविधानम् ।
धरोवाच ।
"अतः परं महाराजोभयमुख्या महायश ।
विधानं यद्वदस्वेह । श्रवणे कथितं पुरा ।
तदहं सम्प्रवक्ष्यामि तव पुण्यफलं मत ॥
धरण्युवाच ।
यदा च कपिला नाम वत्सं प्रसूयते प्रभो ।
वामपेशु कन्या पुन्यायां वा श्रेय कपिलात्मजा ।
विदन्त्य यदि का मोक्षा सद्यस्तत्क्षमयैव वा ॥
प्रसूयमाना दातव्या देव पुण्यं फलं यतः ।
दर्शितव्याञ्च बीजं विचारेण जनार्द्दन ॥
श्रीवराह उवाच ।
शृणुष्व भद्रे । यत्नेन कथयामि यथागमम् ।
यं शुभा सर्व्वपापेभ्यो मुच्यते नात्र संशयः ॥

कपिला अग्निहोत्रार्थे यज्ञार्थे च वरानने ॥
उद्धृत्य सर्व्वतेजांसि ब्रह्मणा निर्म्मिता पुरा ॥
पवित्राणां पवित्रञ्च मङ्गलानाञ्च मङ्गलम् ।
पुण्यानां परमं पुण्यं कपिला च वसुन्धरे ॥
तपसाञ्च तपश्चाग्र्यं व्रतानां व्रतमुत्तमम् ।
दानानामुत्तमं दानं निधीनां निधिमक्षयम् ॥
पृथिव्यां यानि तीर्थानि गुह्यान्यायतनानि च ।
पवित्राण्यथ पुण्यानि सर्व्वलोकेषु सुन्दरि ॥
होतव्यान्यग्निहोत्राणि सायं प्रातर्द्विजातिभिः ।
कपिलाया घृतेनेह दध्ना क्षीरेण वा पुनः ॥
जुहुते अग्निहोत्राणि ब्राह्मणा विधिवत् सदा ।
पूजयन्त्यतिथींश्चैव परां गतिमुपागताः ॥
ते यान्त्यादित्यवर्णेन विमानैर्हि यशस्विनः ॥
सर्व्वमङ्गलमध्ये च ब्रह्मणा निर्म्मिता पुरा ॥
कपिला या भिन्नवर्णा सर्व्वलोकप्रदायिनी ।
सिद्धिबुद्धिकरी देवी कपिलाख्या स्वरूपिणी ॥
पूर्व्वोक्ता यास्तु कपिलाः सर्व्वमङ्गलसंयुताः ।
एतासाञ्च महाभागा कपिलास्तु वरानने ॥
अन्या दृष्टा महाभागा तारयन्ति न संशयः ।
सङ्ग्रहेषु प्रशस्ता च सर्व्वपापप्रणाशिनी ॥
अग्निपुच्छा चाग्निमुखी अग्निलोमानलप्रभा ।
तथाग्नेयी सदा देवी सर्व्वयज्ञप्रवर्त्तिनी ॥" * ॥
शूद्रात् कपिलाप्रतिग्रहे दोषो यथा,—
"ब्राह्मणाः कापिलां शूद्रात् कामतः प्रतिगृह्णते ।
पतितः स द्विजातीनां चाण्डालसदृशो हि सः ॥
न तस्मात् प्रतिगृह्णीयात् शूद्रादेव प्रतिग्रहम् ।
दूरात् प्रतिहरेत्तां च अभिहत्य वसुन्धरे ॥
सर्व्वकाले हि धर्म्मो वै कपिला पितृकर्म्मणि ।
अवध्याश्चाप्रतिग्राह्या शूद्रात्तेनापकर्म्मिणः ॥
तिष्ठन्ति यावत् कपिला तावत्तिष्ठेत् पितामहः ।
भूमौ पतन्ति जायन्ते विड्भुजश्चिरम् ॥" * ॥
शूद्रस्य कपिलाक्षीरादिपाने दोषो यथा,—
"तस्याः क्षीरं दधिं वापि नवनीतमथापि वा ।
उपभुञ्जन्ति ये शूद्रास्तेषां गतिमतो शृणु ॥
कपिलाक्षीरिणः शूद्राः पूरा गच्छन्ति रौरवम् ।
रौरवे तु महाघोरे वर्षकोटिशतं भवेत् ॥
ततोऽपि मुक्ताः जायन्ते श्वानयोन्यां भवन्ति ते ।
श्वानयोन्या विमुक्तस्तु विष्ठायां जायते कृमिः ॥
विष्ठास्थानेषु पतिता दुर्गन्धेषु च नित्यशः ।
भूयो भूयः आत्मजातमथापि न विन्दति ॥
ब्राह्मणश्चैव यो विद्वान् कृष्णलोको प्रतिपद्यम् ।
तान् पञ्चकमिश्राणां पितरस्तस्य धीयते ॥
न च विप्रेषु समाधिस्थ चैवेयार्थं विदेत् ।
स विप्रो वर्ज्जनीयो हि दूरात् ब्राह्मणोऽधरे ॥
यस्तेन सह सम्भाषणाद्वैरतापनं भवेत् ।
प्राजापत्यं चरेत् कृच्छ्रं तेन शुध्यति न हि च ॥'
अथोभयमुखीधेनुविधानमाह ।
"उभयं प्रसूयमानस्य वत्सस्य तु पूर्व्वते ।
तिमध्येन भूमिदाने योनिमध्यात्प्रदर्शिते ।
आवेद्याथ गृहीताय ब्राह्मणाय प्रशान्तये ।
यावद्वत्सशिरो दृष्टं तावत् प्रतिपादयेत् ।
कनिष्ठाङ्गमयता वै दातव्या च हिरण्यके ।

यावद्वत्सस्य पादौ द्वौ मुखं योन्यां प्रदृश्यते ।
तावत् सा पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति ।
धेन्वा यावन्ति रोमाणि गात्रेषु च वसुन्धरे ॥
तावद्वर्षकोट्यस्तु ब्रह्मादिभिरभिवन्दिताः ।
वसन्ति ब्रह्मलोके वै ये च वै कपिलाप्रदाः ॥
सुवर्णशृङ्गीं च कृत्वा रौप्यखुरादिमालया ।
कांस्यदोहनकं दत्त्वा सुवर्णं रौप्यमेव च ।
कपिलायास्तदा पुच्छं ब्राह्मणस्य करे न्यसेत् ।
उदकञ्च करे दद्याद्यथा शुद्धचेतसा ॥
ससमुद्रगुहा तेन सशैलवनकानना ।
रत्नपूर्णा भवेद्दत्ता पृथिवी नात्र संशयः ।
पृथिवीदानतुल्येन दानेनैतेन मानवः ।
अस्मिन् दाने पितृभिर्विष्णुलोकं परमं पदम् ॥
ब्रह्महत्यारी गोघ्नश्च भ्रूणहा पापदूषकः ।
महापातकयुक्तोऽपि ब्रह्मघ्नो ब्रह्मदूषकः ॥
निन्दको ब्राह्मणानाञ्च तथा कन्याविदूषकः ।
एतैः पातकयुक्तोऽपि सद्यो दानेन शुध्यति ।
यश्चोभयमुखीं दद्यात् प्रभूतकनकान्विताम् ।
तद्दिने पयसाहारः पायसेनापि वा भवेत् ।
दुग्धस्य भक्षणैर्वापि सक्तुनापि भामिनि ॥
महापातकजातानि यथाग्निश्च सदहनम् ॥
यथाशक्ति प्रणम्याथ विप्राद्वै विसर्ज्जयेत् ।
इमां महाभयहर्त्रीमुभयञ्च प्रयोऽस्तु वै ।
मम वंशविवृद्ध्यर्थं सदा श्रीकारी भव ॥"
गोशरीरे देवतानिर्देशो यथा,—
"शृङ्गेषु भवतो देवौ ब्रह्माविष्णू सरस्वती ।
खुरमध्ये तु गन्धर्व्वा खुराग्रे तु पन्नगाः ।
सर्व्वसन्धिषु साध्याश्च चन्द्रादित्यौ तु लोचने ।
ककुदि सर्व्वनक्षत्राः लाङ्गूले धर्म्म आश्रितः ।
अपाने सर्व्वतीर्थानि प्रस्रावे जाह्नवी नदी ।
नानाद्वीपसमाकीर्णा चत्वारः सागरास्तथा ।
ऋषयो रोमकूपेषु गोमये पद्मधारिणी ।
रोमसु वसति विद्या च सर्व्वविद्यावशंवदम् ।
धैर्य्यं धृतिश्च शान्तिश्च पुष्टिर्वृद्धिस्तथैव च ।
स्मृतिर्मेधा तथा लज्जा वपुः कीर्त्तिरेव च ।
विद्या शान्तिर्मतिश्चैव सन्नतिः परमा तथा ।
गच्छन्तीमनुगच्छन्ति एता गां वै न संशयः ।
यत्र गावो जगत्तत्र देवदेवपुरोगमाः ।
यत्र गावस्तत्र लक्ष्मीः सत्यधर्म्मश्च प्राञ्जलः ।
सर्व्वदेवैस्तु ता गावस्त्रिदशैरभिसंस्तुताः ।
गावः पवित्रा मङ्गल्या देवानामपि दैवतम् ।
यस्ताः शुश्रूषते भक्त्या स पापेभ्यः प्रमुच्यते ॥"
इति वराहपुराणम् ।

धेनुक पुं, (धिनोति प्रीणाति । "धेः कन्" उणा० ३ । ३९ । इति कन् ।) असुरविशेषः । स च बलदेवेन हतः । इति श्रीभागवते १५ अध्यायः ॥ (अयन्तु गर्द्दभरूपी तालवनकृतावासोऽत्यन्तबलवानासीत् । यथा, हरिवंशे । ६८ । १—२१ ।
"तालवनमद्दृश्येतां गोपवेषौ वनगामिनौ ।
गिरिं गोवर्द्धनं रम्यं वसुदेवसुतावुभौ ।
[illegible]

एवमुक्त्वा तु तौ वीरौ रम्यं तालवनं महत् ।
तौ तालवनमध्ये तु रम्ये तालवने रतौ ।
धेनुं परमधीरौ तु वृषपोताविवोद्धतौ ॥
स तु देशः समः स्निग्धः सुमहान् कृष्णमृत्तिकः ।
दर्भप्रायस्थलीभूतो लोष्टपाषाणवर्जितः ।
तालैस्तैर्विपुलस्कन्धैरुच्छ्रितैः श्यामपर्व्वभिः ।
फलाग्रशाखिभिर्भाति नागहस्तैरिवोच्छ्रितैः ॥
तत्र दामोदरो वाक्यमुवाच वदताम्वरः ।
अहो तालवने पक्वैर्मोदितीयं समन्ततः ॥
साङ्कर्षण ! सुगन्धीनि पक्वानि रसवन्ति च ।
पक्वतालानि पतितौ पातयामो लघुक्रमौ ॥
यद्येषामीदृशो गन्धो माधुर्य्यमप्यनपकम् ।
रसवान्नकल्पेव भवितव्यं मे मतिः ।
दामोदरवचः श्रुत्वा रौहिणेयो हसन्निव ।
पातयन् पक्वतालानि चालयामास तांस्तरून् ।
तत् तालवनं भवानसीर्थं दुरतिक्रमम् ।
निर्म्मनुष्यमुपद्रवे पुरुषादालयोपमम् ।
दारुणो धेनुको नाम दैत्यो गर्दभरूपधृक् ।
खरयूथेन महता वृतः समनुधावति ।
स तालवनं घोरं गर्दभः परिरक्षति ।
नृपक्षिश्वापदगणांस्त्रासयानः सुदुर्मतिः ॥
तालशब्दं स तं श्रुत्वा संघुष्टं फलपातजम् ।
नामृष्यत संक्रुद्धस्तालबलमिव द्विपः ॥
शब्दानुसारी संक्रुद्धो दर्पाविद्धसटाननः ।
स्तब्धाक्षो हेषितपटुः खुरैर्निर्दारयन्महीम् ॥
आविद्धपुच्छो हृषितो व्यात्तानन इवान्तकः ।
आपतन्नेव ददृशे रौहिणेयमवस्थितम् ॥
तालानां तमधो दृष्ट्वा सध्वजाकारमव्ययम् ।
रौहिणेयं खरो दुष्टः सोऽदशद्दशनायुधः ॥
पद्भ्यामुभाभ्यां दुष्टः पश्चिमाभ्यां पराङ्मुखः ।
जघानोरसि दैत्येन्द्रो रौहिणेयं निरायुधम् ॥
ताभ्यामेव स पद्भ्यां वै ग्रहीत्वा दैत्यगर्दभम् ।
आवर्त्तितमुखस्कन्धं प्रैरयत्तालमूर्द्धनि ॥
स भग्नोरुकटिग्रीवो भग्नपृष्ठो दुराकृतिः ।
खरस्तालफलैः सार्द्धं पपात धरणीतले ॥
तं दृष्ट्वा गतप्राणं पतितं गौरव गर्दभम् ।
ज्ञातींस्तथापरांस्तस्य सुवरावलि चाक्षिपत् ॥
सा भूमिर्गर्दभैर्दैत्यैस्तालैः पक्वैश्च पातितैः ।
बभासे छन्नवसुधा द्यौरिवाभ्रकुलाम्बरा ॥
तस्मिन् गर्दभदैत्ये तु सानुगे विनिपातिते ।
रम्यं तालवनं तद्धि भूयो रम्यतरं बभौ ॥”
गोपविशेषः । यथा, महाभारते । ३ । ८४ । ८१—८३ ।
“ततो गच्छेत राजेन्द्र ! धेनुकं लोकविश्रुतम् ।
एकरात्रोषितो राजन् ! प्रयच्छेत्तिलधेनुकाम् ॥
सर्व्वपापविशुद्धात्मा सोमलोकं व्रजेद्ध्रुवम् ।
तत्र चिह्नं महाराज ! अद्यापि हि न संशयः ॥
कपिला सह वत्सेन पर्व्वते विचरत्युत ।
सवत्सायाः पदान्यस्या दृश्यन्तेऽद्यापि भारत ! ॥
तेषूपस्पृश्य राजेन्द्र ! पदेषु नृपसत्तम ! ।
यत्किञ्चिदशुभं पापं तत् प्रणश्यति भारत ! ॥”)
षोडशरतिबन्धान्तर्गतबन्धविशेषः । यथा —
“स्त्री स्थित्वा धरणीविन्यस्तकरां सुभ्रूं रमेत पुमान् ।
लाङ्गुलिनं चालयेद्गौर्बन्धोऽयं धेनुकः स्मृतः ॥”
इति रतिमञ्जरी ॥
(अपरविवरणं यथा —
“न्यस्तहस्तयुगला निजे पदे
धेनुरेति कटिसङ्गतकामा ।
यत्र तौ यदि वृषैरधोत्सुकौ
धेनुकं तदुदितं प्रिये ! ॥”)

धेनुकसूदन, पुं, (धेनुकं गोरूपधारिणमसुरविशेषं सूदयति बलराम-द्वारेति । सूद + णिच् + ल्यु ।) श्रीकृष्णः । इति त्रिकाण्डशेषः ॥ (बलरामः । इति पुराणम् ॥)

धेनुका, स्त्री (धेनुरिव प्रतिभाति । धेनु + कन् । टाप् ।) हस्तिनी । (धेनुरेव । स्वार्थे कन् ।) गौः । इति मेदिनी । के, १८६ ॥ यथा, महाभारते । ७ । ७६ । १८ ।
“इमां ते तरुणीं भार्य्यां सदाधिभिरभिप्लुताम् । कथं धारयिष्यामि विवत्सामिव धेनुकाम् ॥”)

धेनुदुग्ध, क्ली, (धेनोर्दुग्धमिव शुभ्रं फलमस्य ।) चिर्भिटम् । इति राजनिर्घण्टः ॥ (धेनोर्दुग्धम् ।) गोक्षीरम् ॥

धेनुदुग्धकर, पुं, (करोति वर्द्धयतीति । कृ + अच् । धेनोर्दुग्धस्य करः । एतद्भक्षणेन धेनुदुग्धवृद्धिकरत्वं तथात्वम् ।) गर्जरः । इति राजनिर्घण्टः ॥

धेनुष्या, स्त्री, (धेनु + “धेन्वायां धेनुष्या ।” ४ । ४ । ८९ । इति सूत्रेण यत्प्रत्ययेन निपातनात् साधुः ।) बन्धके स्थिता गौः । इत्यमरः । २ । ९ । ७२ ॥ यां बन्धकेन दत्त्वा धनं पीतवान् सा । सौरभेयी वा या दुग्धव्यपर्ने स्थिता सा धेनुष्या इति ख्याता । इति भरतः ॥

धैनुकं, क्ली, (धेनूनां समूहः । “अचित्तहस्तिधेनोष्ठक् ।” ४ । २ । ४७ । इति ठक् ।) धेनुसमूहः । इत्यमरः । २ । ९ । ६ ॥ (स्त्रीणां करणभेदः । इति मेदिनी । के ९६ ॥)

धैर्य्यं, क्ली, (धीरस्य भावः कर्म्म वा । धीर + ष्यञ् ।) धीरता । धीरस्य भाव इत्यर्थे ष्यञ्-प्रत्ययः । तस्य लक्षणं यथा,—
“स्थिरा चित्तोन्नतिर्या तु तद्धैर्य्यमिति कीर्त्त्यते ॥”
इत्युज्ज्वलनीलमणिः ॥
(इदं नायकस्याष्टगुणान्तर्गतम् । यथा साहित्यदर्पणे । ३ । ५८ ।
“शोभा विलासो माधुर्य्यं गाम्भीर्य्यं धैर्य्यतेजसी । ललितौदार्य्यमित्यष्टौ सत्त्वजाः पौरुषा गुणाः ॥”
तल्लक्षणं यथा, तत्रैव । ३ । ६१ ।
“व्यवसायादचलनं धैर्य्यं विघ्ने महत्यपि ॥”
उदाहरणं यथा,—
“श्रुताप्सरोगीतिरपि क्षणेऽस्मिन्
हरः प्रसङ्ख्यानपरो बभूव ।
आत्मेश्वराणां न हि जातु विघ्नाः
समाधिभेदप्रभवो भवन्ति ॥”)

धैवत, पुं, (धीमतामयम् । धीमत् + अण् । पृषोदरादित्वात् मस्य वत्वम् ।) सप्तस्वरान्तर्गतस्वरः । स तु नारदमते अश्वस्वरतुल्यः । (अश्वस्तु धैवतं रौतीति वचनात् ॥) मतान्तरे भेकस्वरतुल्यः । अस्योत्पत्तिस्थानं ललाटम् । व्याकरणमते दन्तः । अथ जातिवर्णौ । अस्य जातिः षाडवः । अस्य तानम् ७२ प्रस्तारस्थानम् ४८ प्रस्तारेण १४,५६० भवन्ति । इति सङ्गीतशास्त्रम् ॥
“मरुत् नाभेरधोभागं बस्तिं प्राप्योर्द्ध्वगः पुनः ।
धावन्निव च यो याति कण्ठदेशं स धैवतः ॥
अस्य श्रुतयस्तिस्रः । इति सङ्गीतदामोदरः ॥
(यथा च सङ्गीतदर्पणे । १ । ५१ ।
“मदन्ती रोहिणी रम्येत्येता धैवतसंश्रयाः ।”
अस्य ऋषिकुले उद्भवः । क्षत्रियो जातिः । पीतो वर्णः । श्वेतद्वीपे जन्म । ऋषिस्तुम्बुरुः । गणेशो देवता । उष्णिक् छन्दः । बीभत्सभयानकरसयोरुपयोगित्वम् । इति सङ्गीतदर्पणम् ॥)

धोड़, पुं (धोरति चातुर्य्येण गच्छतीति । धोर गतिचातुर्य्ये + डः । रस्य डत्वम् ।) सर्पविशेषः । धोंड़ा इति भाषा । तत्पर्य्यायः । राजिलः २ डुण्डुभः ३ डुण्डुमः ४ । इति शब्दरत्नावली ॥

धोर ऋ गतिचातुर्य्ये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) ऋ, अदुधोरत् । गतौ चातुर्य्यं गतिचातुर्य्यम् । धोरत्यश्वो धोरन्त्याकाशा विनीता यस्य सारथ्याः । इति दुर्गादासः ॥

धोरण, क्ली (धोरति गच्छत्यनेनेति । धोर + करणे ल्युट् ।) सर्व्ववाहनम् । हस्त्यश्वरथदोलादि । इत्यमरः । २ । ८ । ५८ ॥ (धोर + भावे ल्युट् ।) अश्वप्रथमगतिः । तत्पर्य्यायः धौरितकम् २ धौर्य्यम् ३ धोरितम् ४ । इति हेमचन्द्रः । ४ । ३१८ ॥

धोरणि, स्त्री, (धोरति क्रमशः प्राप्नोतीति । धोर + अनिः ।) परम्परा । इति जटाधरः ॥

धोरित, क्ली, (धोर + क्तः ।) धौर्य्यम् । अश्वप्रथमगतिः । इति हेमचन्द्रः । ४ । ३१९ ॥

धोरितक, क्ली, (धोरितम् अश्वप्रथमगतिरूपेण कायतीति । कै + कः ।) धौरितकम् । इत्यमरटीकायां रमानाथः ॥

धौत, त्रि (धावति स्म इति । धाव + कर्म्मणि क्तः ।) क्षालितम् । धोया इति भाषा । तत्पर्य्यायः । निर्णिक्तम् २ शोधितम् ३ मृष्टम् ४ क्षालितम् ५ । इति हेमचन्द्रः । ६ । ७३ ॥
“देवधौतं क्रिया धौतं यद्धौतं रत्नवेन च ।
अधौतं तद्विजानीयादुग्रा दलितमध्यमे ॥”
इति कर्म्मलोचनम् ॥

धौत, क्ली (धाव + क्तः ।) रूप्यम् । इति राजनिर्घण्टः ॥

धौतकट, पुं, (धौतः कटः । नित्यकर्म्मधारयः ।) शणरचितभाजनम् । थोकड़ा इति ख्याति । तत्पर्य्यायः । स्योनः २ स्यूतः ३ प्रसेवकः ४ । इति

जटाधरः ॥ स्कन्द ५ ध्यान ६ । इति भरत धृतकोषान्तरम् ॥
धौतकौशेय क्ली (कोषाज्जायत इति । कोष+ ढञ्+ञ । धौतं कौशेयम् ।) पत्रोर्णम् । इति शब्दरत्नावली ॥
धौतकौषे(शे)य क्ली (धौतं क्षालितं कौषेयम् ।) पत्रोर्णम् । इत्यमरः । २ । ६ । ११२ ॥ कौषेय मेव धौतं प्रक्षालितं पत्रोर्णम् । वटलकुचादि पत्रैस्तु क्रिमिभिस्तन्तवाया उत्तमात् पत्रमल्लिनी कृता पत्रैति पत्रोर्णम् । इति भरतः ॥
धौतशिलं, क्ली (धौतेव शिला यस्य ।) स्फाटिकम् । इति त्रिकाण्डशेषः ॥
धौमक, पुं (धूमे धूमप्रधानदेशे भवः । धूम+ "धूमादिभ्यश्च ।" ४ । २ । १२७ । इति वुञ् ।) देशविशेष । इति केचित् ॥
धौर पुं धवहयः । इति भावप्रकाशः ॥
धौरितक, क्ली, (धोरितक+प्रज्ञादित्वात् अण् ।) अश्वानां पञ्चविधगमनान्यतमगतिविशेषः । इत्यमरः । २ । ८ । ४८ । तत्र चतुरक मन्दिरा- न्तर्हित गाम इति ख्यातं ततोऽधिका चतुरा गतिः । इति भरतः ॥
धौरेय त्रि, (धुरं वहतीति । "धुरो यड्ढकौ ।" ४ । ४ । ७७ । इति ढक् ।) रथशकटादि भारवाहः । इत्यमरः । २।८।६५ ॥ धनतुरि, पुं । इति राजनिर्घण्टः ॥
धौर्त्तिक, त्रि, धूर्त्तसैन्यम् । धूर्त्तस्य भावः । इति धूर्त्तशब्दात् ठक्प्रत्ययेन निष्पन्नम् ॥
धौर्त्य, क्ली, (धूर्त्तस्य कर्म । धूर्त्त+ष्यञ् ।) धूर्त्तस्य प्रपञ्चनम् । इति हेमचन्द्रः । ३ । ११९ ॥
ध्मा अग्निपूर्णे । शब्दे । इति कविकल्पद्रुमः ॥ (भ्वा पर सक अनिट् ।) मूर्त्तिरिति धात्वुपाय न्तेष । अग्निपूरितिश्चेयमास । ध्मा धात्वीय पतितेत्वभाः । धमति शङ्खं वणिक् अग्नि संयुक्तं करोतीत्यर्थः । धमति शङ्खं जनः शब्दं करोतीत्यर्थः । अग्निपूर्णसंज्ञी च । रुधिरेण धमेः

धारणाविषये एकप्रत्ययसन्ततिः । इति हेमचन्द्रः । १ । ८४ ॥ अद्वितीयवस्तुनि विच्छिद्य विच्छिद्यान्तरिन्द्रियवृत्तिप्रवाहः । इति वेदान्तसारः ॥ * ॥ यथा, विष्णुपुराणे ।

"तद्रूपप्रत्यये चैकसन्ततिश्चान्यनिस्पृहा ।
तद्ध्यानं प्रथमैरङ्गैः षड्भिर्निष्पाद्यते नृप ॥"

अस्यार्थः । "तद्रूपस्य धारणाविषयस्य वस्तुनः प्रत्यया यस्याः सन्ततौ सा एकाग्रचित्ता सन्ततिः । अन्यनिस्पृहा विषयान्तरेणानन्तरीयमाणा । विजातीयप्रत्ययान्तरितः सजातीयप्रत्ययप्रवाहो ध्यानमित्यर्थः । तच्च प्रथमैर्यमादिभिर्धारणान्तैः षड्भिरङ्गैर्निष्पाद्यते ।" इति तट्टीका ॥ * ॥

श्रीलक्ष्म उवाच ।

"सर्वे देवा प्रार्थयिता यावन्तोऽर्च्चितधारिणः ।
अष्टमात्रा निबद्धैषा सन्ध्यानाशुरोधनः ॥"

इति ब्रह्मवैवर्त्ते गणेशखण्डम् ॥

ब्रह्मचिन्ता । यथा, गारुडे ४९ अध्याये ।

"ब्रह्मात्मचिन्ता ध्यानं स्यात् धारणा मनसो धृतिः ।
अहं ब्रह्मेत्यवस्थानं समाधिर्ब्रह्मणः स्थितिः ॥"

अपि च ।

"प्राणायामैर्द्वादशभिर्यावत्कालो धृतो भवेत् ।
यत्तावत्कालपर्य्यन्तं मनो ब्रह्मणि धारयेत् ।
तस्यैव ब्रह्मणा प्रोक्तं ध्यानं द्वादश धारणाः ।
द्वादशध्यानपर्य्यन्तं मनो ब्रह्मणि यो नरः ।
सुष्टे तु च यतो शुद्धः समाधिः सोऽभिधीयते ।
ध्येयात्तु चलते यस्य मनोऽभिध्यायतो भृशम् ।
प्राण्यावधिहतं काल यावत् सा धारणा स्मृता ।
ध्येये यस्य मनो यस्य ध्येयमेवानुपश्यति ।
नान्यं पदार्थं जानाति ध्यानमेतत् प्रकीर्त्तितम् ।
ध्येये मनोनिश्चलतां याति ध्येयं विचिन्तयन् ।
यत्तद्ध्यानं परं प्रोक्तं मुनिभिर्ध्यानचिन्तकैः ।
ध्येयमेव हि सर्व्वत्र ध्याता तन्मयतां गतः ।
पश्यति द्वैतरहितं समाधिः सोऽभिधीयते ॥"

इति गारुडे ४९० ॥

द्वीपकपोतचौरवनान्तकपुत्रपुरुषव्रतबन्धु रक्षकुञ्जरवासुबकगोमौरमन्दारकनकभूमादि पुत्रादभिरवष्वेति ।")
ध्यामा [न्] पुं, (ध्यै+ "आतो मनिन्क्वनिब्वनिपश्च ।" उणां ४ । १५ । इति मनिन्प्रत्ययेन सिद्धम् । बाहु ।) परिमाणम् । विस्तारम् । क्ली । इत्युणादिकोषः ॥
ध्येय त्रि (ध्यायते इति । ध्यै+यत् ।) ध्यानीय । ध्यानीय । चिन्तनीय । यथा,—

"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ॥"

इति गीतानारायणमाहात्म्यम् ॥

ध्यै चिन्तने । इति कविकल्पद्रुमः ॥ (भ्वा पर सक अनिट् ।) ध्यायति विष्णुं योगी । इति दुर्गादासः ॥
ध्रज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वा पर सकं सेट् ।) ध्रजति । इति दुर्गादासः ॥
ध्रण, ह रते । इति कविकल्पद्रुमः ॥ (भ्वा पर सकं सेट् । इदित् ।) ह, ध्रणति । इति दुर्गादासः ॥
ध्रस ध्वाने । इति कविकल्पद्रुमः । (भ्वा पर अकं-सेट् ।) ध्रसति मृदङ्गः । इति दुर्गादासः ॥
ध्रस क उत्क्षेपे । उञ्छे । इति कविकल्पद्रुमः ॥ (चुरा परं सकं सेट् ।) क, ध्रासयति । इति दुर्गादासः ॥
ध्रस श उ उञ्छे । इति कविकल्पद्रुमः ॥ (क्र्या पर-सकं सेट् । पवादिवत् प्रायेव ।) श, ध्रस्नाति ग्राम्य दीनः । उ, ध्रसित्वा ध्रस्ता । इति दुर्गादासः ॥
ध्राख, ऋ काङ्क्षे । शोषणे । इति कविकल्पद्रुमः ॥ (भ्वा परं सक-सेट् ।) देवपुत्र । शोषणमिह तिरस्कारेण शोषणमपि । ऋ काङ्क्षेत यथो । समाप्यपाठेनैवेदमिह स्मरत इत्युभयो रेव कारकमेदार्थं । इति दुर्गादासः ॥
ध्राङ्क्ष, ञ काङ्क्षायें । इति कविकल्पद्रुमः ॥ (भ्वा

ध्राङ्क्षि, पुं, (ध्राङ्क्षते घोरं भक्षतीति । ध्राङ्क्ष+ "सर्व्वधातुभ्य इन् ।" उणां ।४।११८। इति इन् ।) पुष्पचय । इत्युणादिकोषः ॥

ध्रिज गतौ । इति कविकल्पद्रुमः ॥ (भ्वां परं सकं सेट ।) ध्रेजति । इति दुर्गादासः ॥

ध्रु नि } स्थैर्य्ये । गत्यां । इति कविकल्पद्रुमः ॥
ध्रु शि } (भ्वां तुदां च स्थैर्य्ये अकं-गत्यां सकं परं अनिट ।) द्वौ दीर्घयुक्तौ । आद्यो दीर्घान्त इति कश्चित् । नि, ध्रुतोऽस्ति । शि ध्रुवति अध्रुवीत् । ध्रुवति शैलः । इति दुर्गादासः ॥

ध्रुवं, क्ली, (ध्रुवति स्थिरीभवतीति । ध्रु+"ध्रुव क ।" उणां । २ । ६१ । इत्यत्र । "बाहुलकात् ध्रु स्थैर्य्ये अतोऽपि कः ।" इत्युज्ज्वलदत्तोक्त्या कः ।) निश्चितम् । (यथा, शाकुन्तले १ अङ्के ।
"ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥")
तर्कः । इति मेदिनी । वे, १३ ॥ आकाशम् । इति हेमचन्द्रः ॥

ध्रुव, त्रि, (ध्रु गतिस्थैर्य्ये+बाहुलकात् कः ।) शाश्वतम् । प्राञ्चतम् । इति मेदिनी । वे, १३ ॥ स्थिरम् । निश्चितम् । इति हेमचन्द्रः ।६।९८ ॥ (यथा, चाणक्यशतके । ६३ ।
"यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ॥")

ध्रुवः पुं, (ध्रुवति स्थिरीभवतीति । ध्रु+बाहुलकात् कः ।) शङ्कुः । वटः । (यथा महाभारते । १३ । १७ । १३ ।
"धाता मित्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥")
विष्णुः । (यथा महाभारते । १३ ।१४९।१८ ।
"हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ।")
वटः । उत्तानपादजः । (अस्य विवरणन्तु पश्चात् द्रष्टव्यम् ।) वसुभेदः । (यथा, मात्स्ये । ५ । २१ ।
"आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥")
योगभेदः । इति मेदिनी । वे, १३ ॥ (यथा, ज्योतिषे ।
"गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ॥")
स्थाणुः । इत्यमरः । ३ । ३ । ८ ॥ परारिपक्षी । इति त्रिकाण्डशेषः । ध्रुवकः । इति सङ्गीतदामोदरः ॥ ॥ (रोहिणीगर्भे वसुदेवाज्जात पुत्रविशेषः । यथा भागवते ।९।२४।४६।
"बलं गदं सारणञ्च दुर्म्मदं विपुलं ध्रुवम् ।
वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥"
पाण्डवपक्षीय कश्चित् क्षत्रियवीरः । इति महाभारते । ७ । १५६ । ३० ॥ नहुषस्य पुत्रविशेषः । यथा, महाभारते । १ । ७५ । ३ ।
"यतिं ययातिं संयातिमायातिमयतिं ध्रुवम् ।
नहुषो जनयामास षट् सुतान् प्रियवाससि ॥"
पुरुवंशीयरौद्राश्वस्य पुत्रविशेषः । यथा, भागवते । ९ । २० । ४ ।
"ऋतेयो रन्तिनावोऽभूत् त्रयस्तस्यात्मजा नृप ! ।
सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥"
होमादानविशेषः । यथा, श्राद्धचिन्तामणौ ।
"आधारावाज्यभागौ च होमश्चाग्निमुखावधि ।"
(?) इति च इध्मघा यथा,—
"ध्रुवं ... (?)" — [illegible]
"द्वावुत्तरौ स्थिरसौ द्वौ द्वौ द्वौ इत्यूर्ध्व
इत्यूचे ।
एको भावे स्वपाने च इध्माहर्त्ता ध्रुवा
स्मृता ॥"
यज्ञीयपात्रविशेषः । यथा, कात्यायनश्रौत सूत्रे । ८ । ५ । १७ ।
"सञ्चमानसो महचमसा ध्रुवात् ॥")
नासाग्रम् । तत्तु आगमज्ञाः पश्यति । यथा
"अधश्चार्ता ध्रुवश्चैव विष्णोश्चापि पदानि च ।
आयुष्मन्तुर्व्वी पश्येत्तु षष्ठं मातृमण्डलम् ॥
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते ।
विष्णोः पदानि भ्रूमध्ये नेत्रयोर्मातृमण्डलम् ॥"
इति काशीखण्डे । १२ । ११—१३ ॥

ध्रुवस्योत्पत्तिर्यथा,—
"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु ।
द्वौ पुत्रौ सुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव ॥
तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः ।
अभीष्टायामभूद्ब्रह्मन् ! पितुरत्यन्तवल्लभः ॥
सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज ! ।
स नातिप्रीतिमांस्तस्यामभूद्यस्या ध्रुवः सुतः ॥
राजासनस्थितस्याङ्कं पितुर्भ्रातरमाश्रितम् ।
दृष्ट्वोत्तमं ध्रुवश्चक्रे तमारोढुं मनोरथम् ॥
प्रत्यक्षं भूपतिस्तस्याः सुरुच्या नाभ्यनन्दत ।
प्रणयेनागतं पुत्रमुत्सङ्गारोहणोत्सुकम् ॥
सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकम् ।
पुत्रं पितुस्तथारूढं सुरुचिर्वाक्यमब्रवीत् ॥
क्रियते किं त्वया वत्स ! महानेष मनोरथः ।
अन्यस्त्रीगर्भजातेन ह्यसम्भूय ममोदरे ॥
उत्तमोत्तममप्राप्यमविवेको हि वाञ्छसि ।
सत्यं सुतस्त्वमप्यस्य किन्तु न त्वं मया धृतः ॥
एतद्राजासनं सर्व्वभूभृत्संश्रयकेतनम् ।
योग्यं ममैव पुत्रस्य किमात्मा क्लिश्यते त्वया ॥
उच्चैर्मनोरथस्तेऽयं मत्पुत्रस्येव किं वृथा ।
सुनीत्यामात्मनो जन्म किं त्वया नावगम्यते ॥ ...
उत्सृज्य पितरं बालस्तच्छ्रुत्वा मातृभाषितम् ।
जगाम कुपितो मातुर्निजाया द्विज ! मन्दिरम् ॥
तं दृष्ट्वा कुपितं पुत्रमीषत्प्रस्फुरिताधरम् ।
सुनीतिरङ्कमारोप्य मैत्रेयेदमभाषत ॥
वत्स ! कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति ।
कोऽवजानाति पितरं तव यस्तेऽपराध्यति ॥
इत्युक्तः सकलं मात्रे कथयामास तद्यथा ।
सुरुचिः प्राह भूपालप्रत्यक्षमतिगर्व्विता ॥
सुनीतिरुवाच ।
सुरुचिः सत्यमाहेदं स्वल्पभाग्योऽसि पुत्रक ! ।
न हि पुण्यवतां वत्स ! सपत्नैरेवमुच्यते ॥
यदि ते दुःखमत्यर्थं सुरुच्या वचनात्तव ।
तत् पुण्योपचये यत्नं कुरु सर्व्वफलप्रदे ॥
पराशर उवाच ।
निर्जगाम ततो मातुरित्युक्त्वा मातरं ध्रुवः ।
पुरात् निगम्य ततस्तद्बाह्योपवनं ययौ ॥
स ददर्श मुनींस्तत्र सप्त पूर्व्वागतान् ध्रुवः ।
निर्जगाम वनात्तस्मात् प्रणिपत्य स तानृषीन् ॥
मधुसंज्ञं महापुण्यं जगाम यमुनातटम् ।
यत्रैव देवदेवस्य सान्निध्यं हरिमेधसः ॥
सर्व्वपापहरे तस्मिन् तपस्तीर्थे चकार सः ।
पराङ्मुखेन संयोज्य यदा च वसुधां स्थितः ।
तदा समस्तवसुधा चचाल सह पर्व्वतैः ॥
भगवानपि सर्व्वात्मा तन्मयत्वेन तोषितः ।
गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः ॥
औत्तानपादे भद्रन्ते तपसा परितोषितः ।
वरदोऽहमनुप्राप्तो वरं वरय सुव्रत ! ॥
ध्रुव उवाच ।
भगवन् सर्व्वभूतेश ! सर्व्वस्यास्ते भवान् हृदि ।
किमज्ञातं तव स्वामिन् ! मनसा यन्मयेप्सितम् ॥
नैतद्राजासनं योग्यमजातस्य ममोदरात् ।
इति गर्व्वादवोचन्मां सपत्नी मातुरुच्चकैः ॥
आधारभूतं जगतः सर्व्वेषामुत्तमोत्तमम् ।
प्रार्थयामि प्रभो ! स्थानं त्वत्प्रसादादतोऽव्ययम् ॥
श्रीभगवानुवाच ।
त्रैलोक्यादधिके स्थाने सर्व्वताराग्रहाश्रयः ।
भविष्यति न सन्देहो मत्प्रसादाद्भवान् ध्रुव ! ॥
सूर्य्यात् सोमात् तथा भौमात् सोमपुत्राद्बृहस्पतेः ।
सितार्कतनयादीनां सर्व्वर्क्षाणां तथा ध्रुवम् ॥
सप्तर्षीणामशेषाणां ये च वैमानिकाः सुराः ।
सर्व्वेषामुपरि स्थानं तव दत्तं मया ध्रुव ! ॥'
इति विष्णुपुराणे १ अंशे ११ अध्यायः ॥ ॥

ध्रुवयोगजातफलं यथा,—
"भवेन्नरेशे वाग्मी सदा सत्त्वयुक्तो
धरित्रीपतिः कार्य्यदक्षोऽभिमन्यन् ।
ध्रुवाख्ये प्रसूतिर्भवेत्तस्य कीर्त्ति-
र्दिगन्ते नितान्तं भवेच्चावदातं ॥"
इति कोष्ठीप्रदीपः ॥ ॥

ध्रुवगणो यथा । उत्तरफल्गुनी १ उत्तराषाढ़ा २ उत्तरभाद्रपद ३ रोहिणी ४ । इति ज्योतिषम् ॥ ॥ ताराविशेषः । यथा,—
"मेरोरुभयतो मध्ये ध्रुवतारे नभःस्थिते ।
निरक्षदेशसंस्थानामुभये क्षितिजाश्रिते ॥
अतो नाक्षोच्छ्रयस्तासु ध्रुवयोः क्षितिजस्थयोः । (?)
पर्य्यन्तसौ तदद्धा यत्र कर्षा च ततः क्रमम् ॥'
इति सूर्य्यसिद्धान्ते १२ अध्यायः ॥

ध्रुवकः, पुं (ध्रुव+स्वार्थे कन् ।) स्थाणुः । इति हेमचन्द्रः । ४ । १८८ ॥ गीताङ्गविशेषः । ध्रुया इति भाषा । तस्य लक्षणं यथा,—
"उत्तमः षट्पदः प्रोक्तो मध्यमः पञ्चमः स्मृतः ।
कनिष्ठश्चतुर्भिः स्याद्ध्रुवकोऽयं मयोदितः ॥
उक्तं द्विखण्डमुद्ग्राहे द्विखण्डं ध्रुवके मतम् ।
ततो द्विखण्डमाभोगे तालमानरसैः सह ॥
आभोगे कविनाम स्यात्तथा नायकनाम च ।
उद्ग्राहं प्रथमं गीत्वा ध्रुवं गायेत्ततः परम् ॥
ततोऽन्तरा ध्रुवस्तस्मादाभोगो ध्रुवको ततः ।
उद्ग्राहः प्रथमं पादः कथितः पूर्व्वसूरिभिः ।
गीत्वा पूर्व्वपदं न्यासो यत्र स ध्रुवको मतः ।
यत्रैव कविनाम स्यात् स आभोग इतीरितः ।
ध्रुवकादिषु सर्व्वेषु भवेदेवंविधः क्रमः ॥"
स तु षोड़शविधः । यथा—
"जयन्तः शेखरोत्साहौ मधुरो निर्म्मलस्तथा ।

कुमारं समनक्षेव गान्धर्वमधिप्रत् ।
तुरगः कृमन्ते पादो कान्धों भयमदन ।
तिमका नखिनश्वेति ध्रुवका षोडश स्मृता ।
एकान्धापदपदादैकैकाक्षरवर्द्धिते ।
सर्वैर्भवा षोडश स्युः षड्विंशत्यक्षरावधि ।
द्विगुणैरक्षरैरेव षड्भेदाश्च निवेशयेत् ।
षड्पादध्रुवकाणामेतैरिति षट्पदनिकय ।
पदपादे तु ध्रुवके पद्भिर्द्वितेन तद्गुण ।
चतुष्पादे तु ध्रुवके दृश्यमन्त्रेण तद्गुण ॥"

इति सङ्गीतदामोदरः ॥

ध्रुवका, स्त्री (ध्रुवक+टाप् ।) ध्रुवका । ध्रुपा इति भाषा । सदा । इत्युणादिकोषः ॥

ध्रुवा स्त्री, (ध्रुवमनयेति । ध्रु स्थैर्ये+बाहुलकात् क । ततष्टाप् ।) स्रुक् । यज्ञपात्रविशेषः । इत्यमरः । ३।७।२५ ॥ मूर्वा । शालपर्णी । गौतमः । इति मेदिनी । वे, १६ ॥ ध्रुपा इति भाषा । साध्वी स्त्री । इति शब्दरत्नावली ॥

ध्रेक ऋ ह स्वने । उत्साहे । इति कविकल्पद्रुमः ॥ (भ्वां आत्म-अक सेट् ।) रेफवान् । स्वरयुक्तो । उत्साहो वर्द्धिरित्यन्ये । ध्रौक्यमिति गोस्वामी । ऋ, अदिध्रेकत् । ए, ध्रेकते लोक शब्दायते उत्साहयति वेत्यर्थः । अनेकोत्साह धनादृत्साह । इति केचित् । तन्मते स्वनेनोत्साहयति इत्यर्थे । इति दुर्गादासः ॥

ध्रै, तृप्तौ । इति कविकल्पद्रुमः ॥ (भ्वां पर अक अनिट् ।) रेफोपधः । ध्रायति लाभालोके प्रीतः स्यादित्यर्थः । इति दुर्गादासः ॥

ध्वंसः पुं (ध्वन्स+भावे घञ् ।) नाशः । यथा,— प्रध्वंसाभावमिति सिद्धान्तमुक्तावली ॥ (यथा, मालत्याम् । १ । ११७ ।
"दयितमपि मालति
ध्वंसध्वजो भवेत् धीराणाम् ।
शोणितपदमिव लिखितं
दिग्दाहमेवोद्गतं विद्युत् ॥")

ध्वंसनं क्ली, (ध्वंस+भावे ल्युट् ।) नाशः । (यथा, भागवते । ४ । १ । ७१ ।
"इति ह वाव स भगवानिन्द्रादीन्‌देवान्यथापि त्रैविध्यविकारोपाधिविवृत्तमपि ध्वंसनतया परात्मभावेन भजता इति ।") स्खलनम् । पतनम् । इति भरतधृतोणादिवृत्तिः । (ध्वंसनशीलः । ध्वंस+णिच्+क्त । ध्वंसकः त्रि । यथा, महाभारते । ५ । १५६ । २
"ध्वंसितानि ध्वस्तानि विनाशाय शाश्वतीनाम् ।
सचेष्टानि च युद्धानि ध्वंसनं प्रदहन्निव ॥")

ध्वंसी [न्] पुं, (ध्वंसते विनश्यतीति । ध्वंस+णिनिः ।) पर्वतमसरेणुः । इति शब्दरत्नावली ॥ (ध्वंसनशीलः । ध्वंस+णिनि ।) ध्वंसकः, त्रि । यथा,—
प्रासादाद्रौ च नगरे च ध्वंसी विनश्यति ।
धनदेशश्च विनश्यति ध्वंसी प्रभावाद्धि ॥"
इति वैद्यकपरिभाषा ॥

ध्वज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां पर सकं सेट् ।) दन्त्यवर्गयुक्तः । ध्वजति । इति दुर्गादासः ॥

ध्वज इ गतौ । इति कविकल्पद्रुमः ॥ (भ्वां पर सक सेट् । इदित् ।) दन्त्यवर्गयुक्तः । इ, ध्वञ्जति । इति दुर्गादासः ॥

ध्वजः, पुं, (ध्वजो ध्वजोऽस्त्यस्येति । ध्वज+अर्शआदि त्वादच् ।) शौण्डिकः । इति मेदिनी । जे १० ॥ (यथा, मनु । ४ । ८५ ।
"दशसूनासमं चक्रं दशचक्रसमो ध्वजः ।
दशध्वजसमो वेशो दशवेशसमो नृपः ॥")

ध्वजः, पुं क्ली, (ध्वजति पताकायुक्तो भवतीति । ध्वज+पचाद्यच् ।) पताका । (यथा, पञ्चतन्त्रे । १ । १२ ।
"किं तेन जातु जातेन मातुर्यौवनहारिणा ।
आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा ॥")
चिह्नम् । मेढ्रम् । (यथा सुश्रुते चिकित्सित स्थाने १९ अध्याये ।
"निरुन्धेत्तु निरां धातुमतस्तोये पीडयेत् ध्वजम् ॥")
चिह्नम् । इति मेदिनी । जे, ११ ॥ (यथा, महाभारते । १ । ३१ । १० ।
"स वक्षे यावन्त विष्णोर्ध्वजं महाबलम् ।
अहं च पक्षे भगवानुपरि स्थास्यतीति तम् ॥")
गर्वः । दर्पः । इति शब्दरत्नावली । पूर्वादिग्गृहम् । इति हेमचन्द्रः । पताकादण्डः । तत् पर्यायः । केतनम् २ । इत्यमरटीकायां भरतः ॥ (यथा, महाभारते । ७ । २० । ६ ।
"ततोऽर्जुनः शुभ्रमाल्य तिग्मं धनुर्गिरापुरे ।
ध्वजं धनुष्याय तदा सुरान्धः समाहतान ॥")
अथ ध्वजलक्षणम्,—
"ध्वजादिह विलोक्यानां दृष्टो ध्वज इति स्मृतः ।
सपताको निष्पताकः स ज्ञेयो द्विविधो बुधैः ॥
पताका साद्धदैर्घ्येण दृश्यते पृथिवीभुजाम् ।
सपताकध्वजस्यापि सदा चर्ची परिस्थितिः ॥
जयन्ती भवा नाम चैत्र धामाद्यमथापि ।
वंशोद्‌ भवः काष्ठः श्लाघ्यः धाताद्यधामकस्तथा ।
नैवो नैमोऽपरा ह्रदस्था वैराग्यदायक ।
सत्त्वादिवृक्षशाखां षडेतद्धपक्वातितः ॥
एतेषामेव वृक्षाणां दण्डः सर्वत्रिकारकः ॥"
श अ च ट त प य श ॥
"प्रयाणाय सताकाद्रु चरौव पताकिना ।
पताकायां हस्ताङ्गविभाषा पदाभिधा ॥
अया च विजया भीमा चपला वैजयन्तिका ।
दीर्घा विशाला लोला च ज्ञेया दशैकदण्डिता ।
मरिणाध पाटङ्गैरु नवस्य निम ।
हस्तः पञ्चाशता दैर्घ्यं वीणाइव कर्पूर ।
रक्तैव पताकाणां दस्तन्तपताकि ।
यथा दिव्य प्रभामणमह्यम् ।
कलशो इन्द्रधनु मस्ताको यथाक्रमम् ।
अष्टाविंशतिरूपकालीनां संप्रकाशिता ॥
यथादिवृक्षा का भीमा चपला स्त्रीमन्वा ।
भूषः विंशो हस्ते हीनो चतुर्भि द्विदशो
शुभाम् ॥

कमादियुक्ता विनीता राज्ञो गैधादमङ्गला ।
पञ्चः केको गुरुकाली जयादीनां यथाक्रमम् ॥
श्यामादिविधमायुक्ता मा चैवा चर्मदण्डता ।
श्यामस्वर्णपर्याय विवाधा तथा सितम् ॥
चतुर्षी वैरवर्णपञ्चिन्नमसितक्रमात् ।
सदर्पे यदि विन्यस्तो पताकादितमं भवेत् ॥
इयं हि सर्वतो भद्रा पताका चक्रवर्तिनः ।
सहजा पूर्ववर्णक्षेत्र प्रमाणं विधिवोदितम् ॥
आलकं राजत्रं ताम्र नानाधातुमयं क्रमात् ।
कुम्भादिकं प्रशस्ति पताकायां महीभुजाम् ।
तथापि रत्नविन्यासो विधेयो राजसत्तमः ।
चतुर्भिर्मौक्तिकाद्युक्ता पैत्र कर्मजिद्विद्या ।
तदा जैत्रकरी नाम सा पताका विधीयते ॥
मकरोऽथ नत सिंहो गजो वाजी ध्वज दुर्गः ।
शुचिर्वेति मधुद्विषस्याश्वादिनरत्र राजाम् ॥
इति भोज पताकानां निवाय एवमोभयाम् ॥"
अथ निष्पताकध्वजः ।
"पूर्ववद्दण्डनियमभङ्ग दैर्घ्य विधिक्रमम् ।
दृष्ट्वा यथापि महा कुम्भस्य विद्रो दमः ॥
निष्पताको ध्वजो राज्ञां चतुर्भिरेते सुविहितैः ।
अथ कपालो विजय श्रीकलश हि क्रमात् ।
राज्ञः पूर्ववर्णात्मक कलशादं भवोनितम् ।
चतुर्थकामोगेन सहस्रादिकतापतेः ।
वैको पादो मयूरपङ्क्तिविधानां महीभुजाम् ।
अनायैषु विधेयानि यथापि विधासमन्वतम् ॥
मध्यः कुम्भस्य विज्ञो मासिक्य यथाक्रमात् ।
उपर्युपरितो धेया निष्पताके महीभुजाम् ।
अथ पाहुप शाखिर्यत्तु वदिदन्तासुकम् ।
एतादिदिदृष्ट्वैपादा कुम्भ सर्वाविकारकः ।
अंशयोः गुजा वंशो पाविवस्य यथाक्रमम् ।
मणय महाराजम भौमो वैदूर्यमेव च ।
अधारामयविद्रुमस्मायैनो तालु यथाक्रमम् ।
कनक रजत सुगम त्रिविधानां महीभुजाम् ।
निष्पताकध्वजस्यापि गिमीण मौम ध्यात् ।
पताका सविशाद्यैवां अर्थापि मामवदिनो ।
अथ ध्वजो विग्राणानो त्रिविधस्तत्रापि ।
सर्वेन नामरं गामि विशेषा सर्वदाभर ॥
इति राज्ञो मनुद्रव्यवेभो ध्वज उच्यते ।
चौहे विशालवत्वेभोज नामोक्त हस्तदम्भाग्यम् ।
इतश्चैकपञ्चदश ध्वजो दशविधा मतः ।
महदाधिपत्यस्य पातुप्रागुनादिभः ।
च महदाधिपत्यानो प्रभावमयदि ।
यदि कोऽपि दैवो ध्वजो विद्रावितः ॥
तथापि ध्वजस्यादिविधय, पूर्वविधा ।
विष्णोः विचर वैच निष्पताकध्वजौ स्यतौ ।
महत्तदृष्ट्वा विशुभयो पथकालिनम् ।
गतपराजयं हि प्राधान्ये विजय ॥
निर्णाययजगोद्गत विघ्नोर्थं मोहमुत्ता ।
श्लाघ्यस्य सर्वमात् चिरं द्रुममासुदात् ॥
धो ध्वजस्यादराद्‌गृहिणपानि प्रापत ।
स विरोचेर्न्यं यत्नेन नरः कोपि कुर्वं नम् ॥
इति युक्तिकल्पतरुः ॥

मात्स्ये ।

'घण्टाविनादसहितोऽथ विचित्रवर्णं
सिन्दूरवर्णमुदितेन जयेन चार्द्धम् ।
यः कारयेत् सुरवरे विधिवद्ध्वजाढ्यं
कीर्त्तिं च भजति यदा दिवि पूज्यते च ॥"

ध्वजयष्टारोपणमाह हयशीर्षपञ्चरात्रम् ।
"अथ वक्ष्ये प्रकारेणो विस्तारं ध्वजयष्टिकः ।
सर्वे तावच्च धारं च कृत्वा ह्यपि शोभनम् ॥
प्रासादस्य च विस्तारो मानं दण्डस्य कीर्त्तितम् ।
ध्वजदण्डस्य पैत्रा दिक् ऐशान्यां दिशि दैविके ॥
स्थापनीयाय वायव्ये साम्प्रत ध्वजदण्डके ।
पट्टकार्पासकौशेयैर्ध्वजं कुर्य्यात् सुशोभनम् ॥
एकवर्णं द्विवर्णं वा चित्रवर्णमथापि वा ।
किङ्किणीजालकोपेतं वह्निपत्रविभूषितम् ।
मुक्तादिरत्नैर्विचित्रं ध्वजपटं कारयेत् ध्वजम् ॥
दण्डाग्रात् हस्तौ यावत् करोति विस्तारेण तु ।
महाध्वजस्तु विज्ञात धर्मकामप्रदं शुभम् ॥
ध्वजेन रहितो विप्र प्रासादस्तु वृथा भवेत् ।
पूजाहोमादिकं धर्म्मं ध्वजाद्यं यत् कृतं नरैः ॥"

लिङ्गपुराणे च ।
"देवेभ्यश्च यदि दद्याद् वाहनैश्चैव शोभितम् ।
तदर्द्धेन सुवर्णस्य दण्डस्य तद्विचित्रितम् ।
विष्णवे गरुडाङ्कं तु दुर्गायै सिंहचिह्नितम् ।
कार्यं ध्वजपताकाद्यं तथा न कदाचन ॥"

मत्स्यपुराणमाह नारदपञ्चरात्रे ।
"उत्तेजस्थापनं कृत्वा गुहाशेषं तथाग्नि ।
ध्वजमाहृत्य भूमौ गरुडाद्यं प्रतिष्ठितम् ॥
प्रतिमापि च तथा वै कुम्भान्तो महात्मनः ।
विमाने पञ्चशतं कर्त्तव्यो विमलान्तकः ॥"

विष्णुधर्म्मोत्तरे ।
"प्रतिमाश्च द्विजो दद्यात् ध्वजं विष्णुपैत्रकः ।
निर्दिष्टान् मासानि महायानकमानपि ॥"

इति प्रतिष्ठातत्त्वम् ॥ ● ॥

अथ ध्वजविषुविधिः ।
"सिंहारूढा त्वसे यस्य श्वेतस्य पिङ्गला यथा ।
दाराभ्यां पूज्यते नृप । न तस्य रिपुजं भयम् ॥
कपिध्वजा महामाया धर्म्मायुर्विनाशिनी ।
वृषे यथेप्सितं दद्यात् कथितं मयैव उत्तमम् ॥
यष्टौ विद्यार्थकामस्तु वह्निस्थां सुतामिष्टदा ।
गजस्थस्य महामाया सर्व्वरोगविनाशिनी ।
मयूरस्था महामारी प्रमथेन ध्वजस्थिता ।
करिणा सर्व्वकार्य्येषु नृपे कार्य्या विमुक्तिनी ॥
मकरस्था वर्षिका देव्या धनकामार्थमोक्षदा ।
प्रेतस्था सर्व्वभयहा विश्व मन्त्रनिपातनात् ॥
पूजिता चन्द्रार्द्धकमलोत्पलकरोत्करा ।
भवते सिद्धकामस्य चिह्नाय संयमस्थिता ॥
गन्धपुष्पार्च्चितं कृत्वा वस्त्रैरपि सुपरिधितम् ।
फलमालाविषयवस्त्रविचित्रमालाविभूषितम् ॥
शोभनं उच्छ्रयेत्तस्य पताकां वा मनोरमाम् ॥
चामरं कलशं प्रशस्तमातपत्र चितानकम् ।
भवते सिद्धकामस्य नृपस्य फलदायकम् ॥
नमो विश्वेश्वरि दुर्गे ! चामुण्डे चण्डधारिणि ॥

अतं गण्डूपिच्छामि यशोधारां सुखावहाम् ॥"

अथ ध्वजदानविधिः ।

विश्वेश्वर उवाच ।

"महर्षे या महाभागा ब्रह्मविष्णुपरायणा ।
गदतं श्रोतुमिच्छामि ध्वजदान विधानतः ॥

अगस्त्य उवाच ।

यथा त्वं पृच्छसि नृप । तथा शृणुष्व मन्मुखे ।
एतत् पूर्व्वं तथा शिव ब्रह्मणीन प्रकाशितम् ॥
शृणुष्व भावयुक्तस्य गदतश्च महात्मन ।
कथयामि महाध्यायं ध्वजदानं महाफलम् ॥

शुक्र उवाच ।

देवा ध्वजप्रमाणस्तु विधिस्तस्य तावगम् ।
दीयते च यथा नाथ । तद्वीक्ष मयीपि न ॥

ईश्वर उवाच ।

ध्वजार्थं लब्ध्वा वापि ध्वज कैव विविधात् ।
नवं दृढञ्च दृश्यन्च प्रासादाद्दण्डपद्धितम् ।
श्वेतं चान्य पटं शुभ्रं पीतं वा धातुकं च वा ॥
तस्मिन् पटे लिखेत् चिह्नं धर्मलक्षणलक्षितम् ।
दीयमानं सह चान्दैश्च हैमकेयूरादृढमयम् ॥
प्रासादाद्दोलमानन्तु पिति विस्तरत करम् ।
ध्वजाग्रादेव कर्त्तव्या दण्डेऽपि दृढ दैवता ॥
धर्मा वादस्थानमीव लाञ्छिता पचरेत च ।
किङ्किणीजालमध्येन घण्टारवसुशोभिता ॥
तुरगामी महाप्रभ घण्टारत्नान्विताम् ।
महामङ्गलशब्देन वत्स ध्वजान् प्रपूजयेत् ॥
सुगन्धपुष्पैर्दिव्यैर्धूपैर्दीपैर्विचित्रैः ।
कन्यकां प्राशयन् भोज्यं दधिपायसमाकरे ॥
भूतानाञ्च बलिं दत्त्वा तथा सद्धरोपयेत ॥
धर्म्मकामाध्याप्नोति विद्याधरपतिर्भवेत् ।
मोदते विविधान् भोगान् सर्व्वविद्यार्थपारगः ॥
यत्र दा देवं दीप्य वा वार्षं पावयत्यपि स्वकम् ।
कारयेन्नगरानन्तु महाकीर्त्तिमतामदम् ॥
मण्डपञ्चकराङ्गुलस्वस्तिकाश्चमपन्दरम् ।
एवंविधं तत् कृत्वा गमन्ता पूजयेत्सुखम् ॥
कोदवाय प्रविदध सर्व्वसङ्गविवर्जित ।
कन्यका पूजयेत् तु विप्रान् वेदविदस्तत ॥
देया भक्त्या यदा त्वागच्छिन्ना बहुधा हता ।
वै यथाप्रार्थितसौम्या ध्वजारोहणकर्मणि ॥
कन्या देवा स्वयं प्रीता कन्याद्वरानुभूमिनी ।
यावन्यतयोनि ख्यातापदेवी सुरारिहा ॥
द्विजो भक्त्या शिवो विष्णुः सर्वोयमतदर्पणः ।
पूजितेषु यत्र शुभ्र सर्व्वदेवात्र प्रभवा ॥
दानात्विकल्पयावानान्तु चाग्र दयन्तु प्रार्थिता ।
यथा सर्व्वगता देवी सद्भूमिप्रार्थयं भवेत् ॥
नानाभक्ताचलसमिद्धूलितपृथक्विचित्रान्वितम् ।
बलिं वै धर्म्मभूतिभ्यो दधिपिष्टं निवेदयेत् ॥
चन्दनोदकं तथा मधु च सर्विधामपरापि वा ।
चित्रं दार्भ्यं समारोप्य सर्व्वमङ्गलसन्नितम् ॥
यन्ध्वभिमहाताल्पकालकालपतिकापरम् ।
ध्वस्य शिव पर ध्यायेद्यावत्र पूर्व्वकल्पितम् ।
एवञ्च वस्त्रवीत सर्व्वाभरणभूषितम् ।
देवा मद्गणानं ध्वज दीपायामपि विपर्चित ॥

मध्ये विचित्रवस्त्राद्यं शोभनं गन्धैर्विभूषितम् ।
ध्वजदान महादानं सर्व्वपापोपशमं मतम् ॥
यावन्तो दीयते शुक्र । ध्वजः प्रासादमूर्द्धनि ।
तावत्तु न भवेद्वृथ । प्रासादो दैवताध्वित ॥
शून्यध्वजं यदा भूता नानागन्धर्वराक्षसाः ।
विशन्ति महाप्रासादे नानाभावाच्च कुर्व्वते ॥
तस्माद्दैवतदण्डागुरमन्तपताके ।
उच्छ्रिता प्राणिनाभाय ध्वजा शुक्र । मना-
ङ्किता ॥
न हि चान्यद्वरदानादुत्तमं भारते क्वचित् ।
दानमिदञ्च बुद्ध्य देवा दीपनार्थे च ॥
अनेन विधिना यस्तु ध्वजं शुक्र । निवेदयेत् ।
सर्व्वकामानवाप्नोति स नरः श्रियतो भवेत ॥
सद्य रवमिषप्रभावादपि पापरता नराः ।
विमुक्ताः सर्व्वपापेभ्यो दिवं यान्ति न संशयः ॥
राजा चानेन विधिना दीर्घामायुरराक्षतान् ।
प्राप्य चक्रवर्त्तिभावत्वं धर्म्मविहारतो ॥
भावाद्योऽपि महिमाख्याय ध्वजयष्टिं समुच्छ्रयेत् ।
न तस्य सङ्कटे शुक्र । बाधयो न च दैवके ।
नैव ग्रहपीडा भवेन्न्यां न समुच्छ्रयेन ॥"

इति देवीपुराणम् ॥

ध्वजद्रुमः, पुं, (ध्वज इव उन्नतो द्रुमः । दीर्घत्वात् तथात्वम् ।) तालवृक्षः । माकन्दः । इति राजनिघण्टुः ॥

ध्वजप्रहरणः पुं, (ध्वज प्रहरति नाशयति ध्वजं कोति । प्र+हृ+ल्यु । ध्वजस्य प्रहरणो वा ।) वायुः । इति शब्दरत्नावली ॥

ध्वजभङ्गः, पुं, (ध्वजस्य मेढ्रस्य भङ्गः ।) क्लीवत्वजनकरोगविशेषः । तस्य निदानं यथा,—
"अत्यम्लवणक्षारविरुद्धासात्म्यभोजनात् ।
तथाम्बुपानाद्विषमात् पिष्टान्नगुरुभोजनात् ॥
दधिक्षीरानूपमांससेवनाद्व्याधिकर्षणात् ।
कन्यायोगमनाच्चापि योनिगमनादपि ॥
दीर्घरोगां चिरोत्सृष्टां तथैव च रजस्वलाम् ।
दुर्गन्धां दुष्टयोनिश्च तथैव च परिस्रुताम् ॥
ईदृशीं प्रमदां मोहात् यदि गच्छति मानवः ।
चतुष्पदाभिगमनाच्छेफसश्चाभिघातत ।
अधावनाच्च मेढ्रस्य शस्त्रदन्तनखक्षतात् ॥
काष्ठप्रहारनिर्व्वेगशूकानाञ्च निषेवणात् ।
रेतसश्च प्रतीघातात् ध्वजभङ्गः प्रवर्त्तते ॥"

इति चरकः ॥ ● ॥

तस्य चिह्नं यथा —
"श्वयथुर्वेदना मेढ्रे रागश्चाप्युपलक्ष्यते ।
तीव्रोऽभवं श्वयथोर्मेढ्रं धूमायतीव च ॥"

इति वाग्भटः ॥ ● ॥

अपि च ।
"तैस्तैर्भावैरशुद्धेव रिरंसोमनसि स्थिते ।
ध्वज पतत्यतो नृणां क्लैब्यं समुपजायते ॥
भयशोकाञ्च पञ्चकैरतिमात्रोपसेविते ।
शौक्रधातुक्षयाद्दृष्ट क्लैब्यं तदपरं स्मृतम् ॥
अतिव्यवायशीलो यो न च वाजीक्रियारतः ।
ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम् ॥

अथाध यद्दश शैव श्मीर्ष्व गौत्रवध यत् ।
यथाध्याये विशिष्टार्थे कार्ये यात्रिकरो
विधि ॥

तस्य विविधमा यथा, वैदर्के ।
"सुवर्णसुवर्णशुभाधिपुष्पा
वृतं योगयोगे प्रवृत्त समस्तम ।
ध्वजौ वा द्वारौ भवेत् प्राकृत
छत्रा वैभवं यदिमायुधम् ॥
विधौ द्विवैतौ समुन्न तुषिर
त्रिधैर्यं सुराध्याय इन्द्रोपदेशात् ।
समुन्नाधानान्यप्रत्यो विपुल
शुभ यदि दाया युक्त वैण्युक्तम् ॥
यदा प्राकृत सदा योगयोगे
भवेत् पार्थिवो भर्ग दर्शिताम् ।
प्रवेशाद्विद्युत पुनस्तापि युत
विनाशे यत्स्था सदा तेन वैरा ॥
सदा प्रहलादीयन्तं सम्य
वितायानेतिष्ठदृष्टं योगराज ॥"

ध्वजवान्, [त्] त्रि, (ध्वजोऽस्यास्तीति । ध्वज + मतुप् । मस्य वः ।) केतुयुक्तः । ब्राह्मणो मादक पानपिता मद्यैव ध्वजं कपालमाराय शौण्डिकध्वजेन । यथा,—
"शिरःकपाली ध्वजवान् भिक्षाशी कर्म वेदयन् ।
ब्रह्महा द्वादशाब्दानि मिताशी शुद्धिमाप्नुयात् ॥
अन्यथा तथा सर्वशिरोऽध्वज मित सद्भाव-
मात् धर्माविरोधात्मकपालमद्यकारोपित-
ध्वजमुद्रया यशोधन ॥" इति मिताक्षरा ।
(ध्वज शौण्डिकविक्रयिताञ्च चिह्नमस्येति ।
शौण्डिकः । यथा, मनुः । ४ । ८५ ।
"न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः ।
सूनाचक्रध्वजवतां वेशेनैव च जीवताम् ॥")

ध्वजिनी स्त्री, (ध्वजोऽस्त्यस्याः । ध्वज + इनि ।
ङीप् ।) सेना । इत्यमरः । २ । ८ । ७८ ॥
(यथा रघुः । ७ । ४० ।
"स्पृष्टमानाः प्रायुधवाहिनी
मुखे प्रहरणविनोदजातिः ।
बभुः विक्रम परमार्थमरता
ध्वजोविताबानेव मनोरथा ॥")

ध्वजी, [न्] पुं (ध्वजोऽस्त्यस्येति । ध्वज + "व्रीह्या-
दिभ्यश्च ।" ५।२।११६ । इति इनि ।) ब्राह्मणः ।
पर्वतः । रथः । सर्पः । शौण्डिकः । इति मेदिनी ।
ने, ७७ । मयूरः । इति राजनिर्घण्टः । अश्वः ।
इति हेमचन्द्रः ॥ (यथा बृहत्संहितायाम् । ११ । ३१ ।
"दण्डीह शङ्खध्वजचामरान्विता ॥"
ध्वजविशिष्टे, त्रि । यथा, महाभारते । १ ।
७४ । ३८ ।
"रथावध्वजाभ्यामपि रथिनौ ध्वजिनावपि ।"
चिह्नयुक्ते च । यथा, मनुः । ११ । ९३ ।
"सुरापानापनुत्त्यर्थं बालवासा जटी ध्वजी ।")

ध्वजोत्थानं, क्ली (ध्वजस्य इन्द्रध्वजस्य उत्थानम् ।) शक्रोत्थानम् । इति त्रिकाण्डशेषः ।
तत्तु भाद्रशुक्लद्वादश्यां भवति । इति स्मृतिः ।

ध्वण, ध्वाने । इति कविकल्पद्रुमः । (भ्वां परं
अकं सेट् ।) णकारयुक्तः । ध्वणति मृदङ्गः ।
इति दुर्गादासः ॥

ध्वन रु श शब्दे । इति कविकल्पद्रुमः । (अदन्त
चुरां परं अकं सेट् ।) रुन्दोपधः । मातृका
ईर्षो यथागादृश्य शब्दे अप्रातिपदिकः अथ
अयत प्रायेण तथायतशब्दे इति बोध्यम् ।
ध्वनयति मृदङ्गः । इति दुर्गादासः ॥

ध्वन, मि रवे । इति कविकल्पद्रुमः । (भ्वां परं-
अकं सेट् ।) णकारयुक्तः । मि, ध्वनयति
ध्वानयति मृदङ्गः । इति दुर्गादासः ॥

ध्वन, पुं, (ध्वन ध्वाने + भावे बाहुलकात् अप् ।)
शब्दः । इति भरतद्विरूपकोषः ॥

ध्वनमोदी, [न्] पुं, (ध्वनेन शब्देन मोदयतीति ।
मुद + णिनि ।) भ्रमरः । इति शब्दरत्नावली ॥

ध्वनि, पुं, (ध्वननमिति । ध्वन + "खनिकष्यज्य-
सीति ।" उणां ४ । १४० । इति इः ।) शब्दः ।
इत्यमरः । १ । ६ । २२ ॥ मृदङ्गादिशब्दः ।
यथा —
"शब्दो ध्वनिश्च वर्णश्च मृदङ्गादिभवो ध्वनिः ।
कण्ठसंयोगजन्मानो वर्णास्ते कादयो मताः ॥"
इति भाषापरिच्छेदः ॥
(ध्वनतीति । ध्वन + अधिकरणे इः ।)
उत्तमकाव्यम् । यथा —
"इदमुत्तममतिशयिनि व्यङ्ग्ये वाच्याद्ध्वनिर्बुधैः
कथितः ।"
इति काव्यप्रकाशः ॥
(यथाच साहित्यदर्पणे । ४ । १–२ ।
"वाच्यातिशयिनि व्यङ्ग्ये ध्वनिस्तत् काव्यमुत्तमम् ।
वाच्यादधिकचमत्कारिणि व्यङ्ग्यार्थे ध्वन्यतेऽस्मि-
न्निति व्युत्पत्त्या ध्वनिर्नामोत्तमं काव्यम् ॥
भेदौ ध्वनेरपि द्वावुदीरितौ लक्षणाभिधामूलौ ।
अविवक्षितवाच्योऽन्यो विवक्षितान्यपरवाच्यश्च ॥
तत्राविवक्षितवाच्यो नाम लक्षणामूलो ध्वनिः ।
लक्षणामूलत्वादेवात्र वाच्यमविवक्षितं बाधित
स्वरूपम् । विवक्षितान्यपरवाच्यस्त्वभिधामूलः ।
अत एवात्र वाच्यं विवक्षितम् । अन्यपरं व्यङ्ग्य-
निष्ठम् । अत्र हि वाच्योऽर्थः स्वरूपं प्रकाशयन्नेव
व्यङ्ग्यार्थस्य प्रकाशकः । यथा प्रदीपो घटस्य ।
अभिधामूलस्य बहुविषयतया पश्चान्निर्देशः ॥"
अनयोरपि भेदा सन्ति । तौ तु तत्रैव चतुर्थ-
परिच्छेदे विशेषतो द्रष्टव्याः ॥)

ध्वनिग्रह पुं (ग्रह + भावे अप् । ध्वनेः शब्दस्य
ग्रहो ग्रहणं यस्मात् ।) श्रोत्रम् । इति त्रिकाण्ड-
शेषः । शब्दग्रहणञ्च ॥

ध्वनित त्रि (ध्वन्यते स्मेति । ध्वन + क्त ।)
ध्वनितः । कृतशब्दः । इति भरतः ।
शब्दितम् । स्तनितं च । इत्यमरः । ३ । १ ।
८९ । यथा रघुवंशे । २ । ५८ ।
"तमाह शोकोत्कटहृदयमात्मानमिव ।
स इदं प्रोक्तमिदं विनयावनतः सदा गतिरिवामन ॥")
ध्वनितवाद्यगुणानामादिष ॥

ध्वनिनाला, स्त्री (ध्वनेर्वाद्यविशेष नाल यस्याः ।)
वीणा । वेणुः । काहला । इति मेदिनी । ले,
१३५ ॥

ध्वनिविकारः, पुं (ध्वनेर्विकारः ।) काकुः ।
शोकभयादिना शब्दविकृतिः । इति हेमचन्द्रः ।
६ । ३६ ॥

ध्वन्स, उ ष इ गतौ । भ्रंशे । इति कविकल्पद्रुमः ॥
(भ्वां आत्मं गतौ सकं-भ्रंशे अकं सेट् । क्त्वा-
याम् इड्वेट् ।) उ ध्वंसित्वा ध्वस्त्वा । ष,
ध्वसनम् । इ ध्वंसते । भ्रंशः अधःपतनम् ।
इति दुर्गादासः ॥

ध्वस्त, त्रि, (ध्वंस्यते स्मेति । ध्वन्स भ्रंशे + क्तः ।)
च्युतम् । गलितम् । इत्यमरः । ३ । १ । १०४ ॥
(यथा, भागवते । ७ । ७ । १० ।
"प्रशोषितैश्च भवतां दृषदस्ताम् ।")
नष्टम् । (यथा, मनुः । ७ । १११ ।
"सुधया पीड्यमानोऽपि न विश्वसेत्प्रत्यक्षम् ।
निराकृतस्वजनार्थं सुराहस्तोऽपि तिष्ठति ॥")

ध्वा(ध्मा)क्ष, इ काङ्क्षे । घोररुते । इति कविकल्प-
द्रुमः । (भ्वां परं सकं-अकं च सेट् ।) घोररुत
मिह तिरश्चामेव घोरशब्द । इ, ध्वा(ध्मा)ङ्क्षति
काकः । ममध्यपाठेनैव सिद्धे ध्वाङ्क्षदण्डको वै
वृथात्मनेपदार्थे । इति दुर्गादासः ॥

ध्वा(ध्मा)ङ्क्ष, पुं (ध्वा(ध्मा)ङ्क्षति घोरं रौतीति ।
ध्वा(ध्मा)क्षि घोररुते + अच् ।) काकः । (यथा
मत्स्यपुराणे ६ अध्याये ।
"शुभाशुभफलो ध्वा(ध्मा)ङ्क्ष आदित्याभिमुख
स्थितः ।
इति घोरवती वाणी चतुर्थीसमर्थम् ॥")
मत्स्यमांसहा । इत्यमरः । २ । ५ । २४ ॥
तक्षक । भिक्षुकः । इति मेदिनी । क्ष १६ ॥

ध्वाङ्क्षजङ्घा, स्त्री, (ध्वाङ्क्षस्य जङ्घेव आकृतिर्यस्याः ।)
काकजङ्घा । इति राजनिर्घण्टः ॥

ध्वाङ्क्षजम्बूः स्त्री (ध्वाङ्क्ष काकप्रिया जम्बूः
जम्बूः । यद्वा ध्वाङ्क्षप्रिया जम्बूः ।) काकजम्बूः ।
इति राजनिर्घण्टः ॥

ध्वाङ्क्षतुण्डी, स्त्री (ध्वाङ्क्षस्य तुण्डमिवाकृतिः फलं
यस्याः । ध्वाङ्क्षतुण्ड + अच् । ततो ङीष् ।)
काकनासिका । इति राजनिर्घण्टः ॥

ध्वाङ्क्षदन्ती स्त्री,(ध्वाङ्क्षस्य दन्त इवाकृतिर्यस्याः ।
अच् । ङीप् ।) काकदुम्बरी । इति राज-
निर्घण्टः ॥

ध्वाङ्क्षनखी, स्त्री (ध्वाङ्क्षस्य नखमिवाकृतिः
फलमस्याः । अच् । ङीष् ।) काकतुण्डी । इति
राजनिर्घण्टः ॥

ध्वाङ्क्षनाशनी स्त्री, (ध्वाङ्क्ष नाशयति नाशि णिच् ।)
काकोदुम्बरिका । इति राजनिर्घण्टः ॥

ध्वाङ्क्षमाचिका स्त्री, (ध्वाङ्क्ष मायते माचि । मच +
णिच । ङीष् ।) काकमाची । इति भावप्रकाशः ॥

ध्वाङ्क्षनासा, स्त्री (ध्वाङ्क्षस्य नासा इव यस्याः
फलम् ।) काकनासिका । इति राज-
निर्घण्टः ॥

ध्वाङ्क्षनाशिनी, स्त्री (ध्वाङ्क्षस्य नाशिका इव फलं यस्याः ।) काकनासिका । इति राजनिर्घण्टः ॥

ध्वाङ्क्षपुष्टः, पुं, (ध्वाङ्क्षेण काकेन पुष्टः प्रतिपालितः ।) कोकिलः । इति शब्दरत्नावली ॥

ध्वाङ्क्षमाची स्त्री, (ध्वाङ्क्षान् काकान् मचति पूजयति फलदानेनेति । मच पूजायाम् + अच् । गौरादित्वात् ङीष् ।) काकमाची । इति राजनिर्घण्टः ॥

ध्वाङ्क्षवल्ली, स्त्री, (ध्वाङ्क्षवत् वल्ली लता ।) काकमाची । इति राजनिर्घण्टः ॥

ध्वाङ्क्षादनी स्त्री (अदति भक्षयति या सा । अद + ल्युट् । स्त्रियां ङीप् । ध्वाङ्क्षाणां काकानामदनी ।) काकतुण्डी । इति राजनिर्घण्टः ॥

ध्वाङ्क्षाराति पुं (ध्वाङ्क्षाणामरातिः शत्रुः ।) पेचकः । इति हलायुधः ॥

ध्वाङ्क्षी, स्त्री, (ध्वाङ्क्षवन्नासिकाऽस्याः । अच् । ङीष् ।) कच्छोलिका । इति मेदिनी । षे, १६ ॥

ध्वाङ्क्षोली, स्त्री, काकोली । इति राजनिर्घण्टः ॥

ध्वानः, पुं, (ध्वन + भावे घञ् ।) शब्दः । इत्यमरः । १ । ७ । २२ ॥ (यथा, राजतरङ्गिण्याम् । ३ । १८ ।
"प्रयाणाक्रन्दितध्वानो न च घोरो ऽभ्यभायत ॥")

ध्वान्तं, क्ली, (ध्वन + "क्षुब्धस्वान्तध्वान्तेति ।" ७ । २ । १८ । इति क्तप्रत्ययेन निपातनात् साधु ।) अन्धकारः । इत्यमरः । १ । ८ । ३ ॥ (यथा, भागवते । ३ । ८ । २४ ।
"अथातपत्रायुतमस्तरत्न-
द्युभिर्हतध्वान्तयुगान्ततोये ॥")

नन्दयन्त, त्रि, (नन्दयतीति। नन्दि+"तॄभूवहीति।" उणा ३। १२८। इति झच स च कित्।) आनन्दजनकः। इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥
नन्दा, स्त्री, (नन्दयतीति। नन्दि+अच्+टाप्।) गौरी। अलिञ्जरः। माठा इति भाषा। तिथिविशेषः। सा च उभयपक्षयोः प्रतिपत्षष्ठ्येकादश्यः। इति मेदिनी। दे, ६॥ (यथा —
"नन्दा भद्रा जया रिक्ता पूर्णा प्रतिपदः क्रमात्॥"
इति ज्योतिषम्।)
ननान्दा। इति शब्दरत्नावली॥ सम्पत्। इति हेमचन्द्रः॥ ७॥ दुर्गाया नन्दानामकारण यथा,—
"रुरुराजा भवे मया पुत्रदेवौ च चालयीत।
तथा देवि। मतङ्गार्य्यं कल्पकल्पान्तरेऽपि च॥
भविष्यं भविताचास्य असुरस्य विनाशनम्।
रुरुराजा ततो नन्दा सर्वे देवाश्च पार्थिव।॥
यथागताश्चतो चामुण्डेषी स्थाप्य हिमे गिरौ।
संस्थाप्य नन्दिता यस्मान्नन्दा तु सा भवेत्॥"
इति वराहपुराणम्॥ *॥
अपि च।
"नन्दते सुरलोकेषु नन्दनी यत्तोऽपरा।
हिमाचले महापुण्ये नन्दा देवी ततः स्मृता॥"
तस्या माहात्म्यादि यथा,—
"यथा गङ्गा नदीनाञ्च उत्तमत्वे व्यवस्थिता।
तादृगमत्वे नन्दा उत्तमत्वेन संस्थिता॥
माघे भाद्रपदे देवि। शुक्लपक्षे यदा तदा।
तस्यैषा भावकानाहि ध्यायता न सदा च॥
तियाश्च पञ्चवामस्य पौत्री कुर्यात् सुलोचने।
न गच्छन्ति यतः सिद्धा किं पुनर्मानुषादयः॥
विभवाद्धता काचित् विभवात्प्रतीक्षिता

निषङ्गिणी नन्दा इति नामभिः स्मृता प्रजाजनैः ।"
इति देवीपुराणम् ॥
(कामधेनुविशेषः । यथा, वह्निपुराणे कामधेनु-दाननामाध्याये ।
"नन्दा सुनन्दा सुरभी सुशीला सुमनास्तथा ।
विनीता प्रथमाः पञ्च उक्तास्तासां गुणान्वितम् ॥"
अमरा दानविधिषु कामधेनुमहे स्मृता ॥
धर्म्मपुत्रस्य हर्षस्य पत्नी । ज्यानन्दमानपत्या एकादशयाम् । यथा, महाभारते । १ । ६६ । ३२ ।
"नन्दा तु भार्या हर्षस्य यासु लोकाः प्रतिष्ठिताः ॥"
मार्कण्डेयपुराणोक्तदेवीविशेषः । यथा, मार्कण्डेये । ९१ । ४१ ।
"नन्दा च भगवती चैव स्तुतीया परिकीर्त्तिता ॥"
"एतां यत्रमयामासां प्रतिवर्षं द्विजोत्तम ।
भावयन्ति वर्षं धर्मं मार्कण्डेयपरीक्षणम् ॥"
हिमालयपर्वतविशेषः । यथा, लिङ्गकर्म्मप्रकाश * अध्याये ।
"नन्दस्य नदिराजस्य भवनं शोभनं शुभम् ॥")
नन्दाश्रमः, पुं, (नन्दस्य आश्रमः ।) तीर्थविशेषः । इति शब्दरत्नावली । (यथा, मात्स्ये १११ अध्याये ।
"पुराणपुरुषो नन्दाश्रमः दीप्यमानाश्रमः ॥")
दुर्गानाम, स्त्री ॥
नन्दि, पुं, स्त्री, (नन्दयतीति । नन्द् + "सर्व्व-धातुभ्य इन् ।" उणां ४ । ११७ । इति इन् ।) द्यूताङ्गम् । (भावे इन् ।) आनन्दः । (यथा, महाभारते । २ । १८ । ११ ।
"जीवन्ती महालक्ष्मीः सम्पाधिपती शुभा ।
मालानिवीभिर्निवहैः गुणमग्ने यथा शची ॥"
एतदर्थं स्त्रीलिङ्गोऽपि दृश्यते । यथा तत्रैव । २ । १११ । ५० ।
"यतो मे भूपती नन्दिवर्द्धनमस्पनीयि ॥")
नन्दिकेश्वरः, पुं । इति मेदिनी । दे, ८ ॥ (यथा, महाभारते । १३ । १४ । २०४ ।
"पुरस्ताच्चैव देवस्य नन्दिं पश्याम्यवस्थितम् ।
शूलं विष्टभ्य तिष्ठन्तं द्वितीयमिव शङ्करम् ॥")
विष्णुः । यथा महाभारते ।१३।१४९।७८ ।
"अनन्दः नन्दनो नन्दः सत्यधर्म्मा त्रिविक्रमः ॥"
(महादेवः । यथा तत्रैव । १३ । १७ । ७३ ।
"विमलश्च विमलश्च नन्दिर्नन्दिकरो हरिः ॥")
नन्दिकः पुं (नन्द आनन्दे "क्वुन्शिल्पिसंज्ञयोरिति । नन्द + क्वुन् ।) नन्दीवृक्षः । इति शब्दरत्ना-वली । (नन्दिरेव । स्वार्थे कन् ।) आनन्दः ।
नन्दिका, स्त्री (नन्द आनन्दे अकृत्य-र्थेऽपि । क्वुन् ।) जलाधारविशेषः । इति शब्दमाला । (नन्दा + स्वार्थे कन् । टापि अत इत्वम् ।) प्रतिपदा । इति शब्दरत्नावली । नन्दोक्तिः । यथा किरातार्ज्जुनीये ।
"नवार्द्रमेघो दत्ता इव नवाङ्कुरशालिनं नन्दिकाम् ॥"
नन्दिकेश्वरश्च ॥

नन्दिकेश्वरः पुं (नन्दिक ईश्वरः ।) शिवद्वार-पालः । तत्पर्यायः । नन्दी १ शालङ्कायन २ शालङ्कायनिः ३ । इति त्रिकाण्डशेषः । नन्दी-श्वरः ४ तण्डुः ५ । इति हेमचन्द्रः ॥ (यथा, हरिवंशे । १८२ । ५६ ।
"नमो नन्दि महादेव त्राहि मामीश्वर प्रिय ।
नन्दिकेश्वर सर्वादि सर्वाधारा इति स्थित ॥")
उपपुराणविशेषश्च ॥
नन्दिघोषः पुं (नन्दिरानन्दजनको घोषो यस्य ।) अर्ज्जुनस्य रथघोषः । नान्दीघोषः । इति हेमचन्द्रः । ४, ४१ ॥ महावाद्यध्वनिश्च ॥ (स्व घोषयुक्ते त्रि । यथा, महाभारते । १३ । १०७ । १०६—१०८ ।
"यथाविधि तु निष्ठां च पारिषेकभोजनम् ।
यस्तु द्वादशमासांस्तु पञ्चकं भावयेन्नरः ।
शिवसायुज्ययुक्तेषु मेषशिखरवासिते ।
स रथैर्नन्दिघोषैश्च पृष्ठतो ह्यनुगम्यते ।
देवकन्याधिरूढैश्च काञ्चनैर्विमलैः शुभैः ।
विमानशतसंस्थानाय सुमनोहरम् ।
तत्र कल्पसहस्रं वै वसते स्त्रीशताकुले ।
सुधारसोपजीवी च ह्यमृतापरमृतम् ॥")
नन्दितरुः, पुं, (नन्दिरानन्दजनकस्तरुः ।) धव-वृक्षः । इति भावप्रकाशः ॥
नन्दिनी स्त्री, (नन्दयतीति । नन्दि + णिनि । ङीप् ।) रेणुका । इति राजनिर्घण्टः ॥ (अस्याः पर्य्यायो यथा, भावप्रकाशे ।
"रेणुका राजपुत्री च नन्दिनी कपिला द्विजा ॥"
जटामांसी । तत्पर्यायो यथा, वैद्यकरत्न-मालायाम् ।
"क्रव्यं नन्दिनी पेशी मांसी तपस्विनी जटी ।
किराती च कपिला लोमशा तु तपस्विनी ॥")
उमा । गङ्गा । ननान्दा । वशिष्ठधेनुः । इति मेदिनी । ने, ८९ ॥ सा च धेनुः सुरभिकन्या । यथा दिलीपं प्रति वशिष्ठवाक्यम् ।
"पुरा शक्रमुपस्थाय तवोर्वीं प्रति यास्यतः ।
आसीत् कल्पतरुच्छायामाश्रिता सुरभिः पथि ॥
धर्म्मलोपभयाद्राज्ञीमृतुस्नातामिमां स्मरन् ।
प्रदक्षिणक्रियार्हायां तस्यां त्वं साधु नाचरः ॥
अवजानासि मां यस्मादतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ॥"
"इति वादिन एवास्य होतुराहुतिसाधनम् ।
अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ॥"
इति रघुः । १ । ७५-८२ ॥
इमामेवाराध्य अनपत्यो दिलीपो रघुनामानं वंशप्रवर्त्तकं पुत्रं लब्धवान् ॥ * ॥
दौहित्र्यां सुरभ्यां कश्यपाज्जाता एषा वरुणपुत्रस्य वशिष्ठस्य होमधेनुः । वसुभिरपहृता इत्युपाख्यानं यथा, महाभारते । १ । ९९ । १६—४१ ॥
"अथ तद्वनमाजग्मुः कदाचिद्भरतर्षभ ।
पृथ्वाद्या वसवः सर्वे देवा देवर्षिसेवितम् ॥
ते सदारा वने तस्मिन् विचेरुरभितः प्रियाः ।
रेमिरे रमणीयेषु पर्वतेषु वनेषु च ।

तेषामेकस्य भार्या तु वसूनां वासवोपम ॥
सा चरन्ती वने तस्मिन् गां ददर्श सुमध्यमा ।
नन्दिनीं नाम राजेन्द्र ! सर्वकामधुगुत्तमाम् ।
सा विस्मयसमाविष्टा शीलद्रविणसम्पदा ।
द्यवे वै दर्शयामास तां गां गोवृषभेक्षण ।
आपीनाञ्च सुदोग्ध्रीञ्च सुवालधिमुखां शुभाम् ।
उपपन्नां गुणैः सर्वैः शीलेनानुत्तमेन च ।
एवं गुणसमायुक्तां वसवे वसुनन्दिनी ।
दर्शयामास राजेन्द्र ! पुरा पौरवनन्दन ! ॥
द्यौस्तदा तां तु दृष्ट्वैव गां गजेन्द्रेन्द्रविक्रम ! ॥
उवाच राजंस्तां देवीं तस्या रूपगुणान् वदन् ।
एषा गौरुत्तमा देवी वारुणेरसितेक्षणा ।
ऋषेस्तस्य वरारोहे ! यस्येदं वनमुत्तमम् ।
अस्याः क्षीरं पिबेन्मर्त्यः स्वादु यो वै सुमध्यमे ! ॥
दशवर्षसहस्राणि स जीवेत् स्थिरयौवनः ।
एतत् श्रुत्वा तु सा देवी नृपोत्तम ! सुमध्यमा ।
तमुवाचानवद्याङ्गी भर्त्तारं दीप्ततेजसम् ।
अस्ति मे मानुषे लोके नरदेवात्मजा सखी ।
नाम्ना जिनवती नाम रूपयौवनशालिनी ।
उशीनरस्य राजर्षेः सत्यसन्धस्य धीमतः ।
दुहिता प्रथिता लोके मानुषे रूपसम्पदा ।
तस्या हेतोर्महाभाग ! सवत्सां गां ममेप्सिताम् ।
आनयस्वामरश्रेष्ठ ! त्वरितं पुण्यवर्द्धन ! ॥
यावदस्याः पयः पीत्वा सा सखी मम मानद ! ॥
मानुषेषु भवत्वेका जरारोगविवर्ज्जिता ।
एतन्मम महाभाग ! कर्त्तुमर्हस्यनिन्दित ! ।
प्रियं प्रियतरं ह्यस्मान्नास्ति मेऽन्यत् कथञ्चन ।
एतत् श्रुत्वा वचस्तस्या देव्याः प्रियचिकीर्षया ।
पृथ्वाद्यैर्भ्रातृभिः सार्द्धं द्यौस्तदा तां जहार गाम् ।
तया कमलपत्राक्ष्या नियुक्तो द्यौस्तदा नृप ! ॥
ऋषेस्तस्य तपस्तीव्रं न शशाक निरीक्षितुम् ।
हृता गौः सा तदा तेन प्रपातस्तु न तर्कितः ।
अथाश्रमपदं प्राप्तः फलान्यादाय वारुणिः ।
न चापश्यत गां तत्र सवत्सां काननोत्तमे ।
ततः स मृगयामास वने तस्मिंस्तपोधनः ।
नाध्यगच्छच्च मृगयंस्तां गां मुनिरुदारधीः ।
ज्ञात्वा तथापनीतां तां वसुभिर्दिव्यदर्शनः ।
ययौ क्रोधवशं सद्यः शशाप च वसूंस्तदा ।
यस्मान्मे वसवो जह्रुर्गां वै दोग्ध्रीं सुवालधिम् ।
तस्मात् सर्वे जनिष्यन्ति मानुषेषु न संशयः ।
एवं शशाप भगवान् वसूंस्तान् मुनिसत्तमः ॥
वशं कोपस्य संप्राप्त आपवो भरतर्षभ ! ।
शप्त्वा च तान् महाभागस्तपस्येव मनो दधे ।
एवं स शप्तवान् राजन् ! वसूनष्टौ तपोधनः ।
महाप्रभावो ब्रह्मर्षिर्देवान् रोषसमन्वितः ।
अथाश्रमपदं प्राप्ता ते वै भूयो महात्मनः ।
शप्ताः स्म इति जानन्त ऋषिं तमुपचक्रमुः ।
प्रसादयन्तस्तमृषिं वसवः पार्थिवर्षभ ! ॥
लेभिरे न च तस्मात्ते प्रसादमृषिसत्तमात् ।
आपवात् पुरुषव्याघ्र ! सर्वधर्म्मविशारदात् ।
उवाच च स धर्म्मात्मा शप्ता यूयं धरादयः ।
अनु संवत्सरात् सर्वे शापमोक्षमवाप्स्यथ ।

अयन्तु यत्कृते पूर्व मया प्रोक्तः स वत्स्यति ।
हीनातो मानुषे लोके दीर्घकालं स्वकर्मणा ॥
मानुषं तथिकोऽपीति पुराणं श्रुतो महत्तपम् ।
न चैवास्ति समोऽन्यो मानुषेषु महात्मना ॥
भविष्यति च धर्मात्मा धर्मशास्त्रविशारदः ।
पितुः प्रियहिते युक्तः स्त्रीभोगान् वर्जयिष्यति ॥")
तस्याः प्रभावो यथा,—
"वशिष्ठस्याश्रमपदं ब्रह्मस्थानमनुत्तमम् ।
अपश्यज्जयतां श्रेष्ठो विश्वामित्रो महामनाः ॥
ततो वशिष्ठो भगवान् कथान्ते सुनिसत्तम ।
विश्वामित्रमिदं वाक्यमुवाच प्रहसन्निव ॥
आतिथ्यं कर्त्तुमिच्छामि बलस्यास्य महाबल ।
तव चैवाप्रमेयस्य यथार्हं प्रतिगृह्यताम् ॥
सत्क्रियान्तु भवानेतां प्रतीच्छतु मयोद्यताम् ।
राजंस्त्वमतिथिश्रेष्ठः पूजनीयः प्रयत्नतः ॥
एवमुक्तो महातेजा वशिष्ठो जपतां वरः ।
आजुहाव ततः प्रीतः कल्माषीं धूतकल्मषाम् ।
एह्येहि शबले क्षिप्रं शृणु चापि वचो मम ॥
एवमुक्ता वशिष्ठेन शबला शत्रुसूदन ।
विदधे विविधान् कामान् यस्य यस्य यथेप्सितान् ॥
ततो नृपवरो राजा सान्तःपुरपुरोहितः ।
युक्तः परमहर्षेण वशिष्ठमिदमब्रवीत् ॥
गवां शतसहस्रेण दीयतां शबला मम ।
एवमुक्तस्तु भगवान् वशिष्ठो मुनिसत्तमः ।
विश्वामित्रेण धर्मात्मा प्रत्युवाच महीपतिम् ।
नाहं शतसहस्रेण नापि कोटिशतैर्गवाम् ।
राजन् दास्यामि शबलां राशिभी रजतस्य वा ॥
कामधेनुं वशिष्ठोऽपि यदा न त्यजते मुनिः ।
तदास्य शबलां राजा विश्वामित्रोऽकर्षत ॥
तस्या हुम्भारवाज्जाताः काम्बोजा रविसन्निभाः ।
ऊधसस्त्वथ सञ्जाताः पह्लवाः शस्त्रपाणयः ॥
योनिदेशाच्च यवनाः शकृद्देशाच्छकास्तथा ।
रोमकूपेषु च म्लेच्छा हारीताः सकिरातकाः ॥
तैस्तैर्निषूदितं सैन्यं विश्वामित्रस्य तत्क्षणात् ।
सपदातिगजं साश्वं सरथं रघुनन्दन ! ॥"
इति रामायणे आदिकाण्डम् ॥
(एतद्विवरणं महाभारते । १ । १७७ अध्याये च विस्तरशो द्रष्टव्यम् ॥ कन्या यथा, हरिवंशे । १०६ । ७ ।
"मैत्री गोकुलसम्भूता नन्दगोपस्य नन्दिनीम् ।"
आनन्दजनने पराऽपि । यथा महाभारते । १ । ९९ । १६ ।
"सर्वे गुणसमायुक्ता वसवे वसुनन्दिनी ।
दर्शयामास राजेन्द्र ! पुरा पौरवनन्दन ॥"
"वसुनन्दिनी वसुप्रिया ।" इति नीलकण्ठः ॥
स्कन्दानुचरमातृगणविशेषः । यथा महाभारते । ९ । ४६ । ५ ।
"नन्दा माहानाम्नी राजन् ! कुमारानुचरानिमान् ॥"
"वसुदामा सुदामा च विशोका नन्दिनी तथा ।"
तीर्थविशेषः । यथा, महाभारते । ३ । ८४ । १३५ ।
"नन्दिन्याञ्च समासाद्य कूपं देवनिषेवितम् ।
नरमेधस्य यत् पुण्यं तदाप्नोति नराधिप ! ॥"

स्वाहिरुनिमाता । इति हेमचन्द्रः । ३ । ५१६ ॥ पयोदप्रापरवर्त्तिविशेषः । अस्य विवरणं छन्दः शब्दे द्रष्टव्यम् । दुर्गा । इयन्तु देविकातटे पीठस्थाने विराजते । यथा देवीभागवते । ७ । ३३ । ६९ ।
"शिवकुण्डे शुभा नन्दा नन्दिनी देविकातटे ।")
नन्दिनीतनयः, पुं (नन्दिन्यास्तनयः ।) व्याडि मुनिः । स च अभिधानकारकः । इति हेम चन्द्रः । ३ । ५१६ ॥
नन्दिनीसुतः, पुं, (नन्दिन्याः सुतः ।) व्याडिमुनिः । इति जटाधरः ॥
नन्दिवर्द्धनः पुं, (नन्दिं वर्द्धयतीति । वृध + णिच् + ल्युः ।) शिवः । (नन्दिं आनन्दं वर्द्धयतीति ।) पक्षान्तः । पुत्रः । इति मेदिनी । ने, २६८ ॥ (यथा गो रामायणे । २ । ९९ । १४ ।
'सुषुवे यमभिप्रायं कौशल्या नन्दिवर्द्धनम् ।")
मित्रम् । इति शब्दरत्नावली । (विमानविशेषः । यथा, विश्वकर्मप्रकाशे । ६ अध्याये ।
"विमानं छन्दकं तद्वदनेकशिखरान्वितम् ।
स चाष्टभूमिकस्तद्वत् समन्तानन्दिवर्द्धनः ॥'
निमिवंशीयनृपविशेषः । इति भागवतम् । ९ । १३ । १४ ।) आनन्दवर्द्धके, त्रि । (यथा, हरिवंशे । ६८ । २९ ।
'तस्य तस्य महाबाहो गोपानां नन्दिवर्द्धन ! ।
इन्द्रतामेव वै विद्धि सर्वेषां त्रिदशप्रभो ॥")
नन्दिवृक्षः, पुं (नन्दिरानन्दसाधनको वृक्षः । यद्वा, नन्द + इन् । तस्य वृक्षः ।) नन्दीवृक्षः । इति शब्दरत्नावली । (पर्य्यायोऽस्य यथा वैद्यकरत्नमालायाम् ।
"नन्दिवृक्षो मेषशृङ्गी तथा मेषविषाणिका ।
चतुर्भद्रकपक्षश्च मेढ्रशृङ्गी मदद्रुमा ॥")
नन्दी, स्त्री, दुर्गा । यथा, देवीपुराणे ।
"सुराः स्तुवन्ति यदा देवा नन्दिनी दुन्दुभिस्वना ।
तेनाथ नन्दिनी नन्दी देवानां निरीश्वरी ॥'
नन्दी [न्] पुं, (नन्द आनन्दोऽस्यास्तीति । इनिः ।) गर्द्दभाण्डवृक्षः । (यथा,—
"कषीतं कुष्ठकं नन्दी ग्रथिता प्रक्षिपादती ।
कठिनं मधुकं शीतं सकोषाप्तकगन्धभृत् ॥
तिक्तं पाके कटुग्राही वातलं कफपित्तजित् ॥"
इति वाभटे । ११ ६ अध्याये ।) वटवृक्षः । इति मेदिनी । नी, ८६ ॥ शिवगणविशेषः । स च त्रिविधः । यथा,—
"आद्यः कनकनन्दी च गिरिकाख्यो द्वितीयकः ।
सोमनन्दी तृतीयस्तु विज्ञेया नन्दिनस्त्रयः ॥"
इति वह्निपुराणे गणभेदनामाध्यायः ॥
शिवद्वारपालः । स शिलादस्य शालङ्कायनमुनिपुत्रः । यथा,—
"अन्यच्च ते प्रवक्ष्यामि परं गुह्यं वसुन्धरे ! ।
शालङ्कायनस्य तु सुमेरौ यत्रैव मम सुतम् ॥
तं प्राप्यामि परं भावं यत्वा देवो महेश्वरः ।
शुद्धस्फटिकवर्णं रूपं धृत्वा हरिकुशावतम् ॥
शालङ्कायनपुत्रस्य योगमायासमन्वितः ।
प्राप्नोति स न जानाति दधिच पार्श्वमाश्रितः ॥
मायायोगबलोपेतस्तयाऽसौ वै शूलपाणिनः ।
रूपवान् गुणवांश्चैव वपुषाग्निसमप्रभः ॥
स तु न जायते जातः ममैवाराधने स्थितः ।
अथ नन्दी प्रसादात् महादेवाज्ञया हृतिम् ॥
उत्तिष्ठ मुनिशार्दूल ! सफलस्ते मनोरथः ।
यदर्थमाराधितोऽसि प्रसन्ने प्राप्नुहि मां प्रभो ! ॥
त्वया तपः समारब्धमीश्वरेण समं सुतम् ।
प्राप्स्यामीति ततो मत्तः सदृशोऽन्यो न कश्चन ॥
शिवार्च्चयति तदाह वै जातोऽस्मि स्वयमेव हि ॥"
इति वराहपुराणम् ॥
स एव कल्पान्तरे शिलादस्य शिलादमुनेः पुत्रः । यथा,—
"कलाप बदरीवने यत्र नन्दी महायशाः ।
पीतवस्त्रो महादेवो देवा यत्र पिनाकधृक् ॥
इत्वा चाक्षमालाञ्च यत्नप्रयत्नमेव च ।
अभूदृषिः स धर्मात्मा शिलादो नाम धर्मवित् ॥
आराधयन् महादेवं पुत्रार्थं वृषभध्वजम् ।
तस्य वर्षसहस्रान्ते तप्यमानस्य विश्वकृत् ॥
शर्व्वः सोमार्द्धविहसो वरदोऽस्मीत्यभाषत ।
स वव्रे वरमीशान वरेण्यं गिरिजापतिम् ॥
अयोनिजं मृत्युहीनं तथा पौत्रोमयान्वितम् ।
तथास्त्विति भगवान् देवा सह महेश्वरः ॥
पश्यतस्तस्य विप्रर्षेरन्तर्धानं गतो शिवः ।
ततो यियक्षुः स्वां भूमिं शिलादो धर्मवित्तम ॥
चकर्ष लाङ्गलेनोर्व्वीं भित्त्वादृश्यत शोभनः ।
संवर्त्तकानलप्रख्यः कुमारः प्रहसन्निव ॥
रूपलावण्यसम्पन्नस्तेजसा भासयन् दिशः ।
कुमारस्तुल्योऽप्रतिमो मेघगम्भीरया गिरा ॥
शिलाद तात तातेति प्राह नन्दी पुनः पुनः ।
तं दृष्ट्वा नन्दिनं जातं शिलादः परिषस्वजे ॥
मुनिभ्यो दर्शयामास ये तदाश्रमवासिनः ॥"
इति कूर्म्मे ४ अध्यायः ॥
(हिंसप्रतिमाश्मनीलिककायसागामन्यतमः । यथा, षटकारिकायाम् ।
"गुरुः कीर्त्तिमयः कुलनन्दी प्रोज्ञो धनुर्यः ॥)
नन्दीमुखी स्त्री, (नन्दी मुखे यस्याः । ङीष् ।) तन्द्रा । इति हेमचन्द्रः । २ । २२७ ॥
नन्दीवृक्षः पुं, (नन्दि + वा ङीष् । नन्द्याः वृक्षः । नन्दीजनको वृक्षो वा ।) सौगन्धप्रशस्तिसुगन्धि वृक्षविशेषः । तत्पर्य्यायः । तूणीकः २ तूणकः ३ तूणी ४ पीतकः ५ कच्छपः ६ नन्दी ७ कुठेरकः ८ कामः ९ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शीतत्वम् । पित्तरक्तादिदोषोऽपि ......कुष्ठनाशित्वम् । सुगन्धित्वम् । पृथिवीयत्वञ्च । इति राजनिघण्टुः ॥ ६ ॥ अस्य नाम्नोऽपि गौरवात् स्वनामप्रसिद्धो वृक्षः । इति भरतः ॥ तु द्व इति ख्यातो वृक्ष इति केचित् । तत्पर्य्यायः । तुन्नः २ कुबेरकः ३ कूणिः ४ कच्छः ५ कान्तलकः ६ । इत्यमरः । २ । ४ । १२८ ॥ तुणिः ७ । इति भरतः ॥ नन्दिवृक्ष ८ कूणि ८ ।

वन्दिन ११, नन्दिकरक १२। इति शब्द रत्नावली ॥१॥ देवदारुवृक्षः। इति रत्नमाला। ब्यालीवृक्षः। इति भावप्रकाशः॥

नन्दीश, पुं (नन्दी ईश्वः।) नन्दी। इति हेम चन्द्रः ॥२।१४॥ भरतोक्तगणताले भेदः। यथा —
"अंदुनन्दननन्दीशपदविन्यासिद्वितीयका।"
तत्र लक्षणं यथा —
"गौ लघुश्चेत् द्रुतस्तावे नन्दीश्वरे मतः।"
इति सङ्गीतदामोदरः।
(नन्दिनो नाम्नाऽस्य ईशः। इति शिवस्य विच।)

नन्दीश्वर, पुं, (नन्दिनो गणविशेषस्य ईश्वरः।) शिवः। इति शब्दरत्नावली। नन्दीतालः। इति सङ्गीतदामोदरः। (नन्दी ईश्वरः।) शिवद्वारपालः। तस्य शिवपार्श्वप्राप्तकारणं यथा —
"तत्रैवासौ शापे नन्दी नाम महामुनिः।
आदिदेशाप्यस्य धर्मं तत्रेव तपसामम्॥
तत्स्तु महान् शैलकन्ये शिवाय प्रददुः।
तपाय च यत्र आत्मानं परं प्रभुः॥
महत् हर्षेण विधिना। शक्तिमद्भि महात्मने॥
तास्ते धर्मान् प्रवक्ष्यामि दुर्लभान्यपि नारद।
दृष्टवोऽथो भगवता शर्मेण तपस्विनम्।
ग्रीवाच वरद देवं मधुरेणाक्षरात्मना।
यदि प्रीतोऽपि भगवन् । भद्रोऽद्यमा मम।
अनुग्राह्य कर्तुं देव भयाद्रक्ष सदापि॥
यथा नाथ भीरुरक्षणि नित्यं महेश्वर॥
तथाहं भक्तिमिच्छामि धर्ममुमापते मयि।
तत्तु वचनं श्रुत्वा नन्दिनः च महेश्वरः।
प्रत्युवाच तं प्रीत्या तो मधुरया गिरा।
सहस्राक्षो मन्येतावत् धर्मवृषभेण।
अनिन्द्यमि च मद्देवी देवतानुविधिः॥
सर्वेषैव शरीरेण जरामरणवर्जितः।
दुःखादिपरमात्मा से देवेनाधिपतिः सदा।
सार्धशतं गणेश्वर सत्यवाची द्विजोत्तम॥
नन्दीश्वर इति ख्यातो भविष्यसि न संशयः।
अकुतश्चित् देवानां। देवाधिपं समवः।
सर्वं गणपतिना सोऽपि स्थानमाराधिपोऽभवत्॥
आदिदेवानन्देश्वरं समस्तानि समन्ताः।
ततः समभिसम्भूतः प्रवरं चान्तराधिप॥
ततो देवि च मां देवि महामह च मामहम्।
आवयोरन्तरं विधिरप्रतिविमर्दितः।
द्वारे तु पश्यसि नित्यं यथा सर्वं यमाधिप॥
ततेव स्थिता यानि महादाधिप कर्ता॥"
इति वराहपुराणम्।

नन्द्योत्तरा, [स्] स्त्री, (नन्द् + इत् + मा वीप। नन्दे वाक्यार्थं यः पदः।) नन्दोत्तरः। इति शब्दमाला।

नन्द्यावर्त्त, पुं, (नन्दिकस्य आवर्त्तो यत्र।) देवगृहविशेषः। इत्यमरः ।२।२।१०। तस्य लक्षणं यथा,—
"दक्षिणास्वलिन्दस्य तु पश्चिमादार्तम्।
कृष्णौ च मेत्तरच्छाय नन्द्यावर्त्तं प्रदर्श्य तत्॥"
इति भरतधृतवाक्यम्।
समरतुमः। इति विश्वः। मतान्तरे। तगर पुष्पम्। तगरादितम्। अपराजिता विष्णुक्रान्तादिरपि।
इति राजनिघण्टुः।

नपुंसकं, क्ली (न स्त्री न पुमान्। "नपुंसकस्य निर्देशः।" ६।३।७५। इति निपातनात् स्त्रीपुंसयोः पृथक् भावत्वात्।) क्लीवम्। इत्यमरः। ३।६।३८। हिजिड़ा इति भाषा। तस्य लक्षणं यथा,—
"उभयोर्योनिसामान्ये भावहीनं नपुंसकम्॥"
इति सुश्रुतः। ५।
(नपुंसको भवेदिति भावयोगात् पुंलिङ्गोऽपि भवति। यथा, भ प्रणाली। १।१६५।
"परहितमयादितः बहुमाया नपुंसकाः।
अधेय विधर्मं मानि भाया शाश्वता
भजा।")

नपुंसकस्य भेद लिङ्ग यथा,—
"नपुंसकं यदा गर्भो भविष्यति द्वैरातिनि।
तदा भवत पार्श्वे दुरुक्षुद्वैर सदृशम्॥"
नपुंसकं विशेषाभाव।
"व्याधितस्य कुत्सितस्य कुमीलद्रेष्यकस्य।
बानी समृद्धा वाहस्य मम्भो भूमषदः।
देवी कथयाधाव।
"विषेषु सम्प्रयोगेभ्यसादित्व दूषयो भवेत्।
स शुक्रं प्राप्य वमति भगोऽस्तित्वमदम्।
यः पूतियोनी भावस्य च हि मीनमिलो भवेत्।
यो गुणेभ्यश्च धर्मात् दुरा चोत् पुंसत् प्रवर्तते।
स कुम्भीक इति ज्ञेयो सुरतेन्दिय च स्तुतः॥
दृष्ट्वा व्यवायमन्येषां व्यवाये यः प्रवर्तते।
ईर्ष्यक स तु विज्ञेयो षण्ढस्तिष्यच च स्तुतः।
यो भार्यायामृतौ मोहादङ्गनेव प्रवर्तते।
तत स्त्रीचेष्टिताकारो जायते षण्ढसंज्ञकः॥"
इति भावप्रकाशः।
(अस्य निर्णयो यथा,—
"मनसोऽन्यच्च वचने वदः सोऽयमभिधेयः।
नपुंसकमिति ख्यातं न स्त्री न पुरुषो वदेत्॥"
"समदोषविकाराणि सहजा निरोशानि।
कार्यो भवेत्यत्र नपुंसकलक्षणम्॥"
इति हारीते हारीतसंहितायां प्रथमेऽध्याये॥)

नप्ता, [तृ] पुं (न पतन्ति पितरो येन। नञ् + "नप्तृनेष्टृत्वष्टृ।" उणा। २। ९६। इति तृच् प्रत्ययेन निपातनात् साधुः।) दुहितृसुतः। पुत्रस्य पुत्रः। नाति इति भाषा। तत्पर्यायः। पौत्रः २। पुत्रस्य पुत्र २। इति हेमचन्द्रः। (यथा, महाभारते। १। ७४। ५०।
"यथ सुतस्य भवार देवतानां पूर्वं शची।
स्त्रीषु बहु नित्यमत्र तात पुत्री दाराः॥")

नप्त्री, स्त्री, (नप्तृ + "ऋन्नेभ्यो ङीप्।" ४। १। ५। इति ङीप्।) दुहितुः पुत्री। नातिनी इति भाषा। तत्पर्यायः। पौत्री २ सुतात्मजा ३। इत्यमरः। २। ६। २८। यथा च रत्निका ४।

इति इभ्यः। सुतस्य तनयात्मजायाः पुत्रस्य पुत्रात्मजायाः पौत्री आत्मज पौत्रोऽपि नप्ता। इत्यमरटीकायां भरतः॥

नभ, पुं (नभति हिनस्ति शीतादीनिति। णभ हिंसायाम् + पचाद्यच्।) श्रावणमासः। इति शब्दरत्नावली। (हिरण्यकशिपोः पुत्रविशेषः। इति हरिवंशे। ३। १। तथैव मन्वन्तरदेवविशेषः। इति च तत्रैव। ७। १८। कृष्णस्य एकतमः पुत्रः। इति च हरिवंशे। ११। २०।)

नभ, [स्] क्ली, (नह्यते मेघैरिति। णह बन्धने + "नहेर्दिवि भश्च।" उणा ४। २१। इति असुन् भश्चान्तादेशः।) आकाशम्। इत्यमरः। १। २। १। (यथा, मनुः। ३। ९०।
"अदिशोदमसादित्य मार्गे मारूकान्यथ।
सोपदर्शं च वारिणा च कृष्णं नभसो समम्॥")

नभःकान्ती, [न्] पुं, (नभः कान्तं शरत्कान्तं भवतीति। इति।) सिंह। इति शब्दमाला।

नभःप्राण, पुं (नभसः प्राण इव।) वायुः। इति त्रिकाण्डशेषः।

नभसद्, [द्] पुं, (नभसि सीदतीति। सद् + क्विप्।) देवः। इति त्रिकाण्डशेषः।

नभःसरित्, स्त्री, (नभस सरित् नदी।) मन्दाकिनी। इति त्रिकाण्डशेषः।

नभःस्थित, पुं (नभसि स्थितः।) नरकविशेषः। इति हेमचन्द्रः। ६।२४। आकाशस्थिती, त्रि।

नभश्चक्षुः, पुं, (नभसश्चक्षुरिव।) सूर्यः। इति शब्दमाला।

नभश्चमस पुं (नभसश्चमस इव।) चन्द्रः। विद्यापुर। इन्द्रजालम्। इति हेमचन्द्रः। ३, ३०।

नभश्चर, पुं, (नभसि चरतीति। चर + ट।) पक्षी। विद्याधरः। (गन्धर्वादि।) यथा, रघुः। १८। ६।
"नभश्चरैर्गीतयशाः स देव
पारियात्रवतामसूत् तनयम्॥")
मेघ। वायुः। इति हेमचन्द्रः। ३, ४८२। (आकाशचारिणि त्रि। यथा, कुमारे। ६। ४९।
"विमानगमनाद्विविध नभसा
नभश्चरैरिव स्फुरत्तिव वा॥")

नभस्य, क्ली (नभति आर्द्रीभवतीति। नभ + "णभ्य जनितारोऽसुन्।" उणा। ४। १८९। इति असुन्।) आकाशम्। यथा। नभसां जे वृष्टिः पदं निवेदयन्ति। (पुं वर्षाः। इत्यादौ शर्वरीकालजातम्। यथा, रघौ। ६। १६।
"नभोग्रहाणां नभसा वर्षं सवेर नभसैव॥")

नभसङ्गम, पुं (नभसं गच्छतीति। गम + खच् मुम् च। नभसं गमः।) पक्षी। इत्यमरः। २। ५। ३३।

नभस्तलं, पुं क्ली, (नभसस्तलम् ।) गगनमण्डलम् । यथा, नैषधे । २ । ६८ ।
"महीधिपतिधारया द्रवाद्
गमया लोकविलोचनामयी ।
इह हेमकपालिकालयम्
कथयामासविभो नभस्तले ॥"

नभस्यः, पुं, (नभसि मेघाय साधुः । नभस् + "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् ।) भाद्रमासः । इत्यमरः । १ । ४ । १७ ॥ (यथा, हरिवंशे । १५९ । १ ।
"नभो नभस्योऽथ निरीक्ष्य माधि
कामप्रदा तोयदशब्दकोशम् ॥")

नभस्वान्, [त्] पुं, (आकाशमस्त्यस्येति श्रुतेः नभः उत्पत्तिकारणत्वेनास्त्यस्येति । नभस् + मतुप् मस्य वः ।) वायुः । इत्यमरः । १ । १ । ६६ ॥ (यथा, रघुः । ४ । ८ ।
"स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ॥")

नभाः, [स्] पुं, (नभति हिनस्ति कीटादीनिति । नभ + "सर्व्वधातुभ्योऽसुन् ।" उणां ४ । १८८ । इति असुन् ।) श्रावणमासः । (यथा, रघुः । १२ । २९ ।
"स जहार तयोर्मध्ये मैथिलीं लोकशोषणः ।
नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे ॥")
मेघः । घ्राणम् । वर्षा । बिसतन्तुः । पतद्ग्रहः । इति मेदिनी । से २६ ॥ पलितशीर्षम् । इति धरणी ॥

नभाक्, क्ली (नभ्नाति व्याप्नोतीति । नभ + "पिनाकादयश्च ।" उणां । ४ । १५ । इति आक ।) तमः । इत्युणादिकोषः ॥

नभोगजः, पुं, (नभसि आकाशे गज इव ।) मेघः । इति त्रिकाण्डशेषः ॥

नभोगतिः, स्त्री (नभसि गतिर्गमनम् ।) आकाशगमनम् । यथा,—
"प्रडीनोड्डीनसण्डीनडयनानि नभोगतौ ॥"
इति हेमचन्द्रः । ४ । ३९४ ॥

नभोदुहः, पुं, (नभसः दोग्धि प्रपूरयति भूतादिकमिति । दुह प्रपूरणे + क ।) मेघः । इति शब्दमाला ॥

नभोद्वीपः, पुं (नभसि द्वीप इव ।) मेघः । इति शब्दमाला ॥

नभोधूमः, पुं, (नभसि धूम इव ।) मेघः । इति शब्दमाला ॥

नभोनदी, स्त्री, (नभसो नदी ।) स्वर्गङ्गा । इति भूरिप्रयोगः ॥

नभोमणिः, पुं, (नभसो मणिरिव ।) सूर्य्यः । इति हेमचन्द्रः । २ । ८ ॥

नभोमण्डलदीप पुं, (नभोमण्डले दीप इव ।) चन्द्रः । यथा तिथ्यादितत्त्वे ।
"नभोमण्डलदीपाय शिरोरत्नाय धूर्ज्जटेः ।
कलाभिर्व्वर्द्धमानाय नमश्चन्द्राय चारवे ॥"

नभोऽम्बुपः, पुं, (नभसः अम्बु जलं पिबतीति । पा + कः ।) चातकपक्षी । इति हेमचन्द्रः । ४ । ३९५ ॥

नभोरजः [स्] क्ली, (नभसो रज इव ।) अन्धकारः । इति शब्दमाला ॥

नभोरेणुः, स्त्री, (नभसि रेणुरिव ।) कुज्झटिका । इति त्रिकाण्डशेषः ॥

नभोलयः, पुं (नभसि लयो यस्य ।) धूमः । इति शब्दरत्नावली ॥

नभ्य, त्रि नभसेदमित्यर्थे ण्यप्रत्ययः । नभसम्बन्धि । (नाभये हितम् । नाभि + "उगवादिभ्यो यत् ।" ५ । १ । २ । इति यत् । "नाभि नभञ्च ।" इति नभादेशः । रथाङ्गम् । "नभ्योऽक्षः । नभ्यमञ्जनम् । रथनाभावेवेदम् ।" इति सिद्धान्तकौमुदी ॥)

नभ्राट्, [ज्] पुं (न भ्राजते इति । भ्राज दीप्तौ + क्विप् ।) मेघः । इति हेमचन्द्रः । २ । ७८ ॥

नम, [स्] अ, (नम शब्दनयोः + भावे असुन् ।) नतिः । इत्यमरः । ३ । ४ । १८ ॥ (यथा, मार्कण्डेये ।
"नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥"
क्लीवलिङ्गेऽपि दृश्यते । यथा, भागवते । ३ । १२ । ४२ ।
"विधेम चास्यै नमसा सह त्वया
यस्यां स्वतेजोऽग्निमिवारणावधाः ॥")
त्यागः । वज्रम् । इत्युणादिकोषः ॥ (क्ली, अन्नम् । इति निघण्टुः । २ । ७ ॥ वज्रम् । इति निघण्टुः । २ । २० ॥ स्तोत्रम् । यथा, ऋग्वेदे । ७ । ६६ । १ ।
"एता वो वश्मि नमसोर्जो नपातमा हुवे ॥")

नमतः, पुं, (नम्यते इति । नम + "भृम्दृशि यजीति ।" उणां । ३ । ११० । इति अतच् ।) प्रभुः । धूमः । नटः । इत्युणादिकोषः ॥

नमसः पुं, (नमतीति । नम + "अत्यविचमि तमीति ।" उणां । ३ । ११७ । इति असच् ।) अनुकूलः । इत्युणादिकोषः ॥

नमसितः, त्रि, (नमः कृतमिति । नमस् + "नमोवरिव ।" ३ । १ । १९ । इति क्यच् । क्तः । "यस्य विभाषा ।" ६ । ४ । ५० । इति वा यलोपः ।) कृतनमस्कारः । पूजितः । तत्पर्य्यायः । नमस्यितः २ अपचितः ३ अर्चितः ४ अर्च्चितः ५ अपचितः ६ । इत्यमरः । ३ । १ । १०१ ॥

नमस्कारः, पुं (नमः शब्दस्य कारः करणं यत्र ।) विषभेदः । इति शब्दचन्द्रिका ॥ (नमः करणम् । नमस् + कृ + घञ् ।) नतिः । स च त्रिविधः । कायिकः वाचिकः मानसिकश्च । यथा,—
"कायिको वाचिकश्चैव मानसस्त्रिविधः स्मृतः ।
नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः ॥"
कायिकादिरपि त्रिविधो यथा —
"प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ ।
जानुभ्यां धरणीं गत्वा शिरसा स्पृश्य मेदिनीम् ॥
क्रियते यो नमस्कार उत्तमः कायिकस्तु सः ॥
जानुभ्याञ्च क्षितिं स्पृष्ट्वा शिरसा स्पृश्य मेदिनीम् ।
क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः ॥
पुटीकृत्य करौ शीर्षे दीयते यद्यथा तथा ।
अस्पृष्ट्वा जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते ॥
या स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः ।
क्रियते भक्तियुक्तैर्वा वाचिकस्तूत्तमः स्मृतः ॥
पौराणिकैर्व्वैदिकैर्वा मन्त्रैर्या क्रियते नतिः ।
मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा ॥
यत्तु मानुषवाक्येन नमनं क्रियते सदा ।
स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ ॥
इष्टमध्यानिष्टगतैर्मनोभिस्त्रिविधं पुनः ।
नमनं मानसं प्रोक्तमुत्तमाधममध्यमम् ॥
त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः ।
कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः ॥
अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः ।
प्रणाम इति विज्ञेयः स पूर्व्वं प्रतिपादितः ॥"
इति कालिकापुराणे ७० अध्यायः ॥ ॥
रात्रौ तन्निषेधो यथा,—
"रात्रौ नैव नमस्कुर्य्यात्तेनाशीरभिचारिका ।
अतः प्रातः परं दत्वा प्रयोक्तव्ये च ते उभे ॥"
इति महाभारतमिति केचित् ॥
नतिकरणम् । तत्तु करशिरःसंयोगादि । स्वाम कवबोधकथाभारविशेषः । इति मुग्धबोधटीकायां दुर्गादासः ॥
"सर्व्वं चापि नमस्कुर्य्यं सर्व्वावस्थासु सर्व्वदा ।"
अभिवादयेदित्यनुवृत्तौ प्रयतः । चाप्रयताय प्रयतश्च । इति शुद्धितत्त्वम् ॥
"स्त्रियो नमस्या वृद्धाश्च वयसा पर्द्दुरेव ताः ।"
इति छान्दोग्यपरिशिष्टः ॥ ॥
"देवं विप्रं गुरुं दृष्ट्वा न नमेद्यस्तु सम्भ्रमात् ।
स कालसूत्रं व्रजति यावच्चन्द्रदिवाकरौ ॥
ब्राह्मणञ्च गुरुं दृष्ट्वा न नमेद्यो नराधमः ।
यावज्जीवनपर्य्यन्तमशुचिस्त्यवनो भवेत् ॥"
इति ब्रह्मवैवर्त्ते गीब्रह्मचण्डखण्डम् ॥
"देवतायतनं दृष्ट्वा दृष्ट्वा तु दण्डिनस्तथा ।
नमस्कारं न कुर्य्याद्यः प्रायश्चित्ती भवेन्नरः ॥
सभायां यज्ञशालायां देवतायतनेषु च ।
प्रत्येकन्तु नमस्कारो हन्ति पुण्यं पुराकृतम् ॥
उपविश्य नमेत् शूद्रो दीर्घायुर्भव यो वदेत् ।
स शूद्रो नरकं याति ब्राह्मणो याव्यचोगतिम् ॥
दूरस्थं जलमध्यस्थं धावन्तं मदगर्व्वितम् ।
क्रोधवन्तं विजानीयात् नमस्कारञ्च वर्ज्जयेत् ॥
पुष्पहस्तो वारिहस्तस्तैलाभ्यङ्गो जलस्थितः ।
आशी कर्त्ता नमस्कर्त्ता उभयोर्नरकं भवेत् ॥"
इति कर्म्मलोचनम् ॥ ॥
"मातुः पितुः कनीयांश्च न नमेद्वयसाधिकः ।
नमस्कुर्य्याद्गुरोः पत्नीं भ्रातृजायां विमातरम् ॥"
यम ।
"अभिवादयतः पूर्व्वमाशिषं न प्रयच्छति ।
प्रद्युम्नः भवेत्तस्य तस्कन्द्राग्रं प्रपद्यते ॥
स्वस्तीति ब्राह्मणे ब्रूयात् आयुष्मानिति क्षत्रिये ।
वर्द्धतामिति वैश्येषु शूद्रे आरोग्यमेव च ॥"
इति सम्भाषतत्त्वम् ॥ ॥

यवकद्वाय मिथ्यां ते ते निरयगामिनः ।
यावत्ता पूजवाचैव यन्पामाय पूजवा ।
ये प्रवर्त्तमनाचैव ते वै निरयगामिनः ॥
शनिकन्य सङ्कल्पं दानचैव याति ॥
निन्दन्ति तथाद्धाया मरकगामिनः ।
निवमवन्धाराय विमायेव पूजिव ।
जामिश्र निमाचैव वरा निरयगामिनः ॥
कन्याद् ललनिर्मेयं ज्ञानमर्त्तं जनमयम् ।
मिद्धिं जयन्ति ते वै निरयगामिनः ॥
मूलवद्धाराय निष्पदीयाय मायया ।
मांविद्यमाज्ञयाय ते वै निरयगामिनः ॥
देवविधिमित्र्यैव देवदाचैव पूजवा ।
देवानां विनाशाचैव ते वै निरयगामिनः ॥
मैथुनिकायवा दायम् । विराविकायकाय ये ।
चौदविकायवाचैव ते वै निरयगामिनः ॥
चाण्डालमलदाद्धाय पूनिवायाय ये नरा ।
विवर्मेतमिव चौदन्ति ते वै निरयगामिनः ॥
ब्राह्मणानां नतायेव ब्रह्मदाय ब्रह्मागते ॥
विक्राय यान्ति ब्राह्मण ते वै निरयगामिनः ॥
ज्ञानविज्ञायदावैव चाराध्य मदीयते ॥
वदान्यानां पदुवार्यैव ते वै निरयगामिनः ॥
विश्वासिनः प्रवृत्तिर्माधि सर्वेषां मवृत्तयः ॥
ये मातृपितृसुवान्ति ते वै निरयगामिनः ॥
धर्मोदाय दानानां धनिकमानयरा ॥
वमपीयामदातारस्ते वै निरयगामिनः ॥
प्राणान् दानादय महान् योषिदाममवेदि
तान् ।
मर्म्मण ज्ञानवका ये ते वै निरयगामिनः ॥
वाणावापय पुष्पाणं दावाचैव ये नराः ।
जपलज्ञ मद्यसन्तो ते वै निरयगामिनः ॥
दर्वीन्तु कविन दायन । प्राप्यधर्माविंशतयम् ।
विषमय पुत्र कथा धर्मसंमाचरेत् ॥"

इति पाद्मे भूखण्डे ६६ अध्यायः ॥

नरकविशेषगामिनादियो यथा,—
"कुम्भीपाकं तथा याति यचादीत् यो वदेत् ।
ब्रह्मस्वहर्ता पति च नरो याति रौरवम् ॥
भूपदा दुष्टदानं च यौवन मुनिसत्तम ॥
भाजि ते नरके रौद्रे यमदूतैर्विरोधितः ॥
सुरापो ब्रह्महा वर्णा सुवर्णस्तेय च गुरुदे ।
प्रयाति नरो वश ते अवर्णतुरीन वै ॥
दाक्षवदेव्य्या तादी सर्वेव पूजकरम् ।
गुरुणा भवनामी याति दायकदंश च ॥
वायौ विमलद्युत्पव देवदीदिनी ।
तपवीत तु श्रवणो वध मर्व्व यदिव वेद ॥
'वैतरी' वय ।
कुशी मूत्रभर्त्ति मत्ता मदाराति निष्ठते ।
वेतालपा पूजकी वा ब्राह्मणो वराहम ॥
वैतरूप्ता वश वैतरुङ्गक च ।
अतराष्ट्रमी वश ताथे व श्व वत्तयं विज ॥
धौवी निमौवे वर्त्त नर्मादय पूजवावा ।
देवयुवन्तुत्र देवा दयद्विशेषा च च ॥
स नर्प नामवी वे शर्म्मा व पुरीदवन ॥

विदेवगपिणीय वसु धर्मदायि बदायम् ।
वाचामयौ व मातुर्ये परदार्त च योषेद ॥"
'पदकाति प्रश्रेयम कारी मरके ।'
कारोति कलिनी वसु वसु वह्नमार्त्तमन ॥
प्रयाति तौ निरुपते नरके भयदायके ।
अवपूजनिविधौतारो नरके यान्ति योनिषु ॥
अवाचाचरमनाय तथा वद्धमनमम ।
वैतौ पुत्रविकीयं याति निवावमवर ॥
'वैतौ यावयवती । पुत्रादीव मवृधिवा वध
वध निवाववम ।
लाभामितत्वायाय विशाची वदवश च ।
विहिता ब्राह्मणी याति तमेव नरकं द्विज ॥
मातवप्रसूरदाय अपरार्थविवर्वमान ।
मातवयक याति तमेव नितवात ॥
यद्वीतयोदी वेदा पुत्राती परदासा ।
यवी मांसवक्षेव धर्मचारी च यो द्विज ॥
'यकौ योषिति आदानात कुम्म मदमाश्री
मांविदो मयूदीयती । यद्वा,—
मांविदेयुवती नामी मीर्वमिपाकेत मदम ।
तपवीयति महाप्रा व वे नर्दमव याता ॥
इति स्मृतिः ॥
धर्मचारी ययादिनोमितायमन्तु आमावाचा-
दिविहितव्रतः ।
आवादशी सितवान् प्राकृतव्यासधाव ।
वधिरायां पत्नमेन याम्रं विविधेन च ये ॥
मद्यपा यादतना च याति वैतरणी नरः ।
देवमायादिकार्या मयाप्यादिवश ये ॥
ते तत्र याम्रदीपाय कुम्भवादिविवश ये ।
आमिषचर्व याति नरकानीं प्रति म ॥
चौरविदो मयपायी वह्निमार्गे वसन्ति वै ।
याम्यते द्विज । ततेव धर्माचर्यो वदिंद ॥
श्रवेषु योगवो वध अपमार्दिवश च ।
सर्वदवानतामधे वनामवाचभादि ॥
विवावमेतु वत्सलि वे नरा अकायादक ।
कुमरयायिता वे च ते यान्ति यमौकसे ॥
वशी यान्ति च नरकं प्रतयोग वदयम ।
वितु दुष्युवर्मेन्त बदनै दाममारम ॥
मर्देव याताविनादि तथा चादि वदम ।
कुम्भनो याति पुढ्यैवरकायनमायाद ॥
यवन्ममयवयुष वम कुर्मन्ति वे नरा ।
धर्मार्थ मावा वाया निर्मिवदसान्ति वै ॥
यमपिदायिव याम्रो वारवीदवि देवता ।
देवदायौ तु याव धर्मादव वर्मत्ति वदवाक ॥
वाववता धवयावाध्य यनिता मयवी वरा ।
यत्मेवा विवदावयवो मिवाय मवानमम ॥
वदवमाया यवमा दितौ बाहुमयाया ।
मम कृत्य मदाभाग । मनवश्रयवावदा ॥
मानवो भवन वर्गे नास्ति वरते वक ।
यानकृपाति वदतं वार्याद्यंवमभ्रयाम ॥"

इति विष्णुपुराणे । २ । ६ । ७-३१ ॥
अपि च ।

"नयद वन विधियानां वदीनां विधिवा वर्त

या मयन मदायाव । या पुत्रा मोदनात्
दम ॥
महविव महापाकं कवर्य यानवच च ।
यदी वुद्धिमोदेव योऽपि वयुषा पर ।
कालयातिव वदवी ममहूतैर्निदारके ।
तातिन्ये यान्ति तावत् मावज्जलदवदम ॥
दम माहुवदुता कुर्वन्ति वदवदत्त ।
पायमीयव यम्पयतो वाचिन्तु दौवरीन ।
तव सुधा महाद्धर्म माहवर्य मंनवति ।
योमादिविधिर्म तव पुत्राभावदं महत् ॥
भूमदोदे नियादेवे देवं महुवमवद ।
पुत्रादि यादविदा वौश्रवाविदावे वनेत ।
वे नरा दव अनारा वर्य कुर्वन्ति वे नरा ।
ते रौरवे निपाकनी मातवनी वहनिषय ॥
य यादवाय भुयाया वयवादानि मनसम ।
मवाडौदवयी तु मानवी च ममावद ।
यो वै निवन्तु वनवं प्रावव देवि यावदा ।
वाचवदां मवाभुदे योषवादविदाने ॥
वायंव पतुरीयाति मनो वदे वदौति च ।
वाववमयवादि मवनी मदविदुरे ॥
यो भूमी भुवनीय दवदीनमु दवदीदु ।
करोति मावनवादि देवदवं दिवौदुद ।
व सहदत्तवे दे पोवनी यमदनदे ॥
यवादवातु योवौदु याचवी पापुदाये ।
मादयानां मदो मे तु वव विवे वदयन्तु ।
वर्णि वा सदवी योदावपनि मवादव ।
ते परमाकृतौ च मावनौ च मवादेवा ॥
योवदि यवयुमादाव अयुरवादि वौदुप ।
च वैदाय व सुदुदे दयानि दवनामु ॥
व यवदेव नरके हमावयवंदवी ।
वनायन्ते वदो यद्यु विदवनारीवादेदु ॥
ब्राह्मण वा मदाद्रक व दि नरके यदित ।
य वदव ब्रह्मादि नाम कामनि नदवीद ॥
यावदा कानिदं वर्ग विवृते यो दवनिय ॥
य दुगादवदे याति मायदवयवदुदय ॥
यवादवामु योवौदु याचवी वर्णवदुप ।
यामान्य दयुदी दवा दुव नवौ अनियावे ।
याचन दन अवदनी नि माह वदेद्ददे ।
कमवी विनावदाद वदवान वदुपुवा ॥
वावा दव मन दर्द दर्वं पूर्वावुम दवम ।
दवदुनयनं मवात विवाहुमवदेवदुम ॥
य बाहुयी निवमदे कुवौदावदेनिवर्दव ।
यो यमनो विवर्द माहादुर्याविद्धावाव प्राप्त
वेद ।

तं नरा विदुवा मूर्ख नदिदुमव कुर्वते ।
ते कमाविद्यवदेवं पुत्रानव वदमवदुत ।
ते वैतरणी दनिता मदिद वनवदवत ।
पुत्रवी व विदर्व तमा मदा ताववशवादयो ॥
पुरीदे विमवदेव मवादु अवतन्नमा ।
ते दुक्लवायवान वे पूर्व वन्मपद दवी ।
वैपुदे नरके मदन वर्णौन वमानदिवा ॥
ते यवाम्री विदर्व यदुदा वायदिन वनेवव ।

देव कुण्डासु ते मात्रा देव पानेषु तत्परा ॥
ये चौरा वह्निना दुष्टा नरदा ग्रामनुष्ठका ।
सारमेयादने ते वै पात्यन्ते घातकान्विता ॥
कूटधाल पदयहा पुरुष पापसम्भृत ।
पारकीयन्तु द्रव्य यो दत्ति प्रथमं मनी ॥
स चीचिनरके पापी श्रवासमत् पतत्यध ।
तत्र दुःख महद्भुक्त्वा पापिसी योनिमाप्नुयात् ॥
यो नरो देवतागारात् सुरां पिबति मद्यपी ।
तस्मापयति लोहस्य रसं धर्मस्य किङ्करा ॥
यो गुरुजनमभ्येत्य अविद्याचारदर्पित ।
स क्षत पात्यते ह्यारच्चकोऽधोमुख पुमान ॥
विश्वासघातं कुर्वन्ति ये नरा धर्मनिष्कृता ।
शूलप्रोते तु नरके पात्यन्ते बहुयातना ॥
यैर्न श्रुता रामकथा न परोपकृति कृता ।
तेषां सर्वाणि दुःखानि भवन्ति नरकान्तरे ॥
अत्र पाप्य सुरा भूयश्चास्य यत्र इतीर्यते ।
ये दुःखिनो रोगयुता नरकान्तमात्सु ते ॥"

इति पाद्मे पातालखण्डे ४८ अध्याय ॥

(अथ महारौरवादिनरकाख्यानम् । यथा,मार्के
ण्डेये । १२ । ३ ११ ।

पुत्र उवाच ।

"रौरवस्ते समाख्यात प्रथम नरको मया ।
महारौरवसंज्ञन्तु शृणुष्व नरकं पित ॥
योजनानां सहस्राणि सप्त पञ्च समन्तत ।
तत्र ताम्रमयी भूमिरधस्तस्य हुताशन ॥
तत्तापतप्ता सर्वाद्या प्रोद्यदिन्दुसमप्रभा ।
विभाति महारौद्रा दर्शनस्पर्शनादिषु ॥
तस्यां बद्ध कराभ्याञ्च पद्भ्याञ्चैव यमानुगै ।
मुच्यते पापकृन्मध्ये लुठमान स गच्छति ॥
काकैर्बकैर्वृकोलूकैर्वृश्चिकैर्मशकैस्तथा ।
भक्ष्यमाणस्तथा गृध्रैर्द्रुतं मार्गं विकृष्यति ॥
दह्यमान पितर्मातर्भ्रातस्तातेति चाकुल ।
वदत्यसकृदुद्विग्नो न शान्तिमधिगच्छति ।
एवं तस्मान्नरैर्मोक्षो प्राप्तिकाम्यैरवाप्यते ।
वर्षायुतायुतै पाप यै कृतं दुष्टबुद्धिभि ॥
तथान्यस्तु तमो नाम सोऽतिशीत स्वभावत ।
महारौरववद्दीर्घस्तथा च तमसा वृत ॥
शीतार्त्ताश्च धावन्तो नराश्चमसि दारुणे ।
परस्परं समासाद्य परिरभ्याश्रयन्ति च ॥
दन्ताश्चैवाच भज्यन्ते शीतार्त्तिपरिकम्पिता ।
क्षुत्तृष्णा प्रबला तत्र तथैवान्येऽप्युपद्रवा ॥
हिमखण्डवहो वायुर्भिनत्त्यस्थीनि दारुण ।
मज्जासृग्गलितमश्नन्ति क्षुधान्विता ॥
धिलिह्यमाना भ्राम्यन्ते परस्परसमागमे ।
एवं तत्रापि सुमहान् क्लेशस्तमसि मानवे ॥
प्राप्यते ब्राह्मणश्रेष्ठ । यावद्दुष्कृतसञ्चय ॥
निकृन्तन इति ख्यातस्ततोऽन्यो नरकोत्तम ।
तस्मिन् कुलालचक्राणि भ्राम्यन्त्यविरतं पित ॥
तेष्वारोप्य निकृन्तन्ते कालसूत्रेण मानवा ।
यमानुगाङ्गुलिस्थेन आपादतलमस्तकम् ।
न चैषां जीवितभ्रंशो जायते द्विजसत्तम ॥
छिन्नानि तेषां शतश खण्डान्यैक्यं व्रजन्ति च ।
एवं वर्षसहस्राणि छिद्यन्ते पापकर्म्मिण ॥
तावद्यावदशेष वै तत्पाप हि चय गतम् ।
अप्रतिष्ठञ्च नरक श्रूयतां गदतो मम ॥
यत्रस्थैर्नारकैर्दुःखमसह्यमनुभूयते ।
तान्येव तत्र चक्राणि घटीयन्त्राणि चान्यत ॥
दुःखस्य हेतुभूतानि पापकर्म्मकृतां शृणु ।
चक्रेष्वारोपिता केचिद्भ्राम्यन्ते तत्र मानवा ॥
यावद्वर्षसहस्राणि न तेषां स्थितिरन्तरा ।
घटीयन्त्रेषु चैवान्यो बद्धस्तोये यथा घटी ॥
भ्राम्यन्ते मानवा रक्तमुद्गिरन्त पुन पुन ।
अन्त्रैर्मुखविनिष्क्रान्तैर्नेत्रैरश्रुविलम्बिभि ॥
दुःखानि ते प्राप्नुवन्ति यान्यसह्यानि जन्तुभि ॥
असिपत्रवनं नाम नरक शृणु चापरम् ।
योजनानां सहस्रं यो ज्वलदग्न्याकुलावनि ॥
तप्ता सूर्यकरैश्चण्डैर्यत्रातीव सुदारुणै ।
प्रपतन्ति सदा तत्र प्राणिनो नरकौकस ॥
तन्मध्ये च वनं रम्यं स्निग्धपत्रं विभाव्यते ।
पत्राणि तत्र खड्गानां फलानि द्विजसत्तम ॥
श्वानश्च तत्र सबला स्वनन्त्यायुतशोभिता ।
महावक्त्रा महादंष्ट्रा व्याघ्रा इव भयानका ॥
ततस्तद्वनमालोक्य शिशिरच्छायमग्रत ।
प्रयान्ति प्राणिनस्तत्र तीव्रतृट्परिपीडिता ॥
हा मातर्हा तात । इति क्रन्दन्तोऽतीव

दुःखिता ।

दह्यमानाङ्घ्रियुगला धरणीस्थेन वह्निना ॥
तेषां गतानां तत्रापि पवनोऽतीवभीरव ।
प्रवाति तेन पात्यन्ते तेषां खड्गान्यथोपरि ॥
तत पतन्ति ते भूमौ ज्वलत्पावकसञ्चये ।
लेलिह्यमाने चान्यत्र व्याप्ताशेषमहीतले ॥
सारमेयास्तत शीघ्रं घातयन्ति शरीरत ।
तेषामङ्गानि रुक्तानि नैकान्यतिभीषणा ॥
असिपत्रवनं तात । मयैतत् कीर्त्तितं तव ।
अत भरं भीमतरं तप्तकुम्भं निबोध मे ॥
समन्ततस्तप्तकुम्भा वह्निज्वालासमावृता ।
ज्वलदग्निचयोद्वृत्ततैलायश्चूर्णपूरिता ।
तेषु दुष्कृतकर्म्माणो याम्यै क्षिप्ता ह्यधोमुखा ॥
क्वाथ्यन्ते विस्फुटद्गात्रगलन्मज्जजलाविला ।
स्फुटत्कपालनेत्रास्थिच्छिद्यमाना विभीषणै ॥
गृध्रैरुत्पाट्य मुच्यन्ते पुनस्तेष्वेव वेगितै ।
पुनः सिमसिमायन्ते तैलेनैक्यं व्रजन्ति च ॥
द्रवीभूतै शिरोगात्रस्नायुमांसत्वगस्थिभि ।
ततो याम्यैर्नरैराशु दर्व्या सङ्घट्टिता ॥
क्वथ्यन्ते महातैले मथ्यन्ते पापकर्म्मिण ।
एष ते विस्तरेणोक्तस्तप्तकुम्भो मया पित ॥")

नरककुण्ड क्ली, (नरकस्य कुण्डम् ।) यातनास्थानम् । तद्यथा यम उवाच । "नरकाणाञ्च कुण्डानि सन्ति नानाविधानि च । नानापुराणभेदेन नामभेदानि तानि च ॥ विस्तृतानि गभीराणि क्लेशदानि च जीविनाम् । भयङ्कराणि घोराणि हे वत्से । कुत्सितानि च ॥ षडशीतिश्च कुण्डानि संयमन्याञ्च सन्ति च । निबोध तेषां नामानि प्रसिद्धानि श्रुतौ सति ॥" इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे । २७ । २८ अध्यायौ ॥

तत्र नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिन	
वह्निकुण्डम्	१	कटुवाचा बान्धवदग्धकृत्	१
तप्तकुण्डम्	२	ब्राह्मणातिथिभोजनादर	२
क्षारकुण्डम्	३	निविद्धान्ने वस्त्रे क्षारयोजक	३
विट्कुण्डम्	४	मधूहत्यापहारक	४
मूत्रकुण्डम्	५	परतडागं खनित्वोत्सृष्टक	५
श्लेष्मकुण्डम्	६	एकाकी मिष्टभोजी	६
गरकुण्डम्	७	पितृमातृगुरुभार्यादपोषक	७
दूषिकाकुण्डम्	८	अतिथि दृष्ट्वा वक्रचक्षु कारी	८
वसाकुण्डम्	९	विप्राय दत्त्वा तद्द्रव्यमन्यस्मै दाता	९
शुक्रकुण्डम्	१	परस्त्रीगामी परपुंगामिनी च	१
असृक्कुण्डम्	११	गुर्व्वादिताडकस्तद्रक्तपातकारकश्च	११
अश्रुकुण्डम	१२	हरिगुणकीर्त्तनश्रवणकाले सगद्गद अश्रुपातक	
		...	१२
गात्रमलकुण्डम्	१३ ,	मन्दद्रव्यपिता गात्रमलकारी च	१३
कर्णविट्कुण्डम्	१४	बधिरोपहासक	१४
मज्जकुण्डम्	१५	लोभात् प्राणिजमारं जीवहन्ता	१५

नरककुण्डनामानि		पापभेदात् कुण्डविशेषगामिन	
मांसकुण्डम्	१६	अर्थलोभात् कन्याविक्रायक	१६
नखकुण्डम्	१७	आशौचकालादिषु स्पर्शभयाभी	१७
लोमकुण्डम्	१८		१८
केशकुण्डम्	१९	सकेशपार्थिवशिवलिङ्गार्चक	१९
अस्थिकुण्डम्	२	विष्णुपदे पितृपिण्डादाता	२०
ताम्रकुण्डम्	२१	गुर्व्विणीगामी	२१
लौहकुण्डम्	२२	ऋतुस्नातावीरयोरगामी	२२
तीक्ष्णकण्टककुण्डम्	२३	कटुवाचा स्वामिताडिका	२३
विषकुण्डम्	२४	विषेण जीवनहन्ता	२४
धर्म्मकुण्डम्	२५	स्वधर्म्महीनेन देवद्रव्यग्राहक	२५
तप्तसुराकुण्डम्	२६	शूद्राद्व्रात शूद्रान्नभोजी	२६
प्रतप्ततैलकुण्डम्	२७	दण्डेन दयताडक	२७
कुम्भकुण्डम्	२८	कुम्भीरादवक्षिपवीनहन्ता	२८
	२९	मनुष्याशनविप्रो वृथामांसभुक हरिनैवेद्य शुकञ्च	२९

नरककुण्डनामानि		यत्पापात् कुण्डनिपतनानि	
पूयकुण्डम्	३०	शूद्रयाजी तत्पाकादकश्च मद्यव्यापारी च ब्राह्मणः	३०
सर्पकुण्डम्	३१	[illegible] हन्ता	३१
मशककुण्डम्	३२	विधिं त्यक्त्वा मशकहन्ता	३२
दंशकुण्डम्	३३	विधिं त्यक्त्वा कीटहन्ता	३३
गरलकुण्डम्	३४	मधुपान् हन्ता मधुहारी	३४
वज्रदंष्ट्रकुण्डम्	३५	[illegible]	३५
वृश्चिककुण्डम्	३६	[illegible] प्रतारकः	३६
शरकुण्डम्	३७	खड्गधारी [illegible] शस्त्रादिहरि अतिथिहीनश्च ब्राह्मणः	३७
शूलकुण्डम्	३८		३८
खड्गकुण्डम्	३९		३९
गोलकुण्डम्	४०	[illegible] प्रजापीडकः	४०
नक्रकुण्डम्	४१	[illegible] हन्ता	४१
काककुण्डम्	४२	[illegible]	४२
सञ्चालकुण्डम्	४३	[illegible] चौरः	४३
वाजकुण्डम्	४४	ताम्रलौहचौरः	४४
वज्रकुण्डम्	४५	देवद्रव्यचौरः	४५
तप्तपाषाणकुण्डम्	४६	देवद्विजयोः [illegible] चौरः	४६
तीक्ष्णपाषाणकुण्डम्	४७	देवद्विजयोः [illegible] चौरः	४७
लालाकुण्डम्	४८	[illegible] च	४८
मसीकुण्डम्	४९	[illegible] च ब्राह्मणः	४९
चूर्णकुण्डम्	५०	देवद्विजयोः [illegible] चौरः	५०
चक्रकुण्डम्	५१	[illegible] हन्ता [illegible]	५१
वक्रकुण्डम्	५२	[illegible]	५२
कूर्मकुण्डम्	५३	[illegible] ब्राह्मणः	५३
ज्वालाकुण्डम्	५४	[illegible]	५४
भस्मकुण्डम्	५५		५५
दग्धकुण्डम्	५६	[illegible]	५६
तप्तसूर्मिकुण्डम्	५७	[illegible]	५७
असिपत्रकुण्डम्	५८	[illegible] च	५८
क्षुरधारकुण्डम्	५९	[illegible]	५९

नरककुण्डनामानि		पापभेदात् कुण्डनिपतनानि	
सूचीमुखकुण्डम्	६०	[illegible]	६०
गोकामुखकुण्डम्	६१	[illegible] चौरः	६१
नक्रमुखकुण्डम्	६२	[illegible] चौरः	६२
गजदंशकुण्डम्	६३	[illegible] चौरः	६३
गोमुखकुण्डम्	६४	[illegible]	६४
कुम्भीपाककुण्डम्	६५	[illegible]	६५
कालसूत्रकुण्डम्	६६	[illegible] च	६६
अवटोदकुण्डम्	६७	[illegible]	६७
अरुन्तुदकुण्डम्	६८	[illegible]	६८
पांशुभोजकुण्डम्	६९	[illegible]	६९
पाशवेष्टकुण्डम्	७०	[illegible]	७०
शूलप्रोतकुण्डम्	७१	[illegible]	७१
प्रकम्पनकुण्डम्	७२	[illegible] च	७२
उल्कामुखकुण्डम्	७३	[illegible]	७३
अन्धकूपकुण्डम्	७४	[illegible]	७४
वेधनकुण्डम्	७५	[illegible]	७५
दण्डताडनकुण्डम्	७६	[illegible]	७६
जालबन्धकुण्डम्	७७	[illegible]	७७
देहचूर्णकुण्डम्	७८	[illegible]	७८
दलनकुण्डम्	७९	[illegible]	७९
शोषणकुण्डम्	८०	[illegible]	८०
कषकुण्डम्	८१	[illegible]	८१
शूर्पकुण्डम्	८२	[illegible]	८२
ज्वालामुखकुण्डम्	८३	[illegible]	८३
जिह्मकुण्डम्	८४	[illegible] च	८४
धूमान्धकुण्डम्	८५	[illegible]	८५
नागवेष्टनकुण्डम्	८६	[illegible] च ब्राह्मणः	८६

नरकजित्, पुं, (नरकं तन्नामानम् असुरं जितवान् । जि + क्विप् । तुक् च ।) विष्णुः । इति त्रिकाण्डशेषः ॥

नरकस्थिता, स्त्री, (नरकस्य अधिष्ठात्री देवता ।) वैतरणी । नद्यन्तरम् । [illegible] ॥ इति शब्दरत्नावली ॥

नरकागतः, त्रि (नरकात् आगतः ।) नरकागतः । यथा —

"नरकात् [illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ।
[illegible] ॥
[illegible] ॥"

तच एव क्रमो दृष्टो गोसुवर्णादिचारिणाम् ।
विश्वासघाती मत्कश्च गता च नरकान् बहून् ।
कनिष्ठिन्यो क्रुते च सन्द्राधि यमज्ञातये ।
परनिन्दाकृतघ्नश्च परमर्माविघातकम् ।
नैष्ठुर्य्यं निर्घृणत्वञ्च परदारोपसेवनम् ।
परस्वहरणाशौच देवतानाञ्च कुत्सनम् ।
निकृत्या वञ्चनं नृणां कार्पण्यञ्च नृणां वध ।
उपलक्षणानि जानीयात् मुक्तानां नरकादनु ।"
प्रसङ्गात् स्वर्गागतलक्षणमप्याह ।
"दया भूतेषु संवाद परलोकं प्रतिक्रिया ।
सत्य भूतहिता वोक्तिर्वेदप्रामाण्यदर्शनम् ।
गुरुदेवर्षिपूजा च केवल,साधुसङ्गम ।
सत्क्रियाभ्यसन मैत्री सज्जिता लक्षण विदु ।
अष्टाङ्गयोगविज्ञानात् प्राप्नोत्यात्यन्तिक लयम् ।"
इति गारुडे कर्म्मविपाक २१८ अध्याय ।

नरकस्था स्त्री, (नरके तिष्ठतीति । स्था+"सुपि स्थ ।"३।२।४। इति क ।) वैतरणी नदी । इति हेमचन्द्र । ४ । १५२ । निरयस्थिते, त्रि । यथा,
"नरकस्थोऽपि देहं वै न पुनस्त्यक्तुमिच्छति ।"
इति श्रीभागवतम् ।

नरकान्तक, पुं (नरकस्य तन्नाम्न असुरस्य अन्तक ।) विष्णु । इति पुराणम् । (यथा, मुकुन्दमालायाम् । ७ ।
"दिवि वा भुवि वा ममास्तु वासो
नरके वा नरकान्तक । प्रकामम् ।
अवधीरितशारदारविन्दौ
चरणौ ते मरणेऽपि चिन्तयामि ।")

नरकामय, पुं, (नरक आमय इव यस्य ।) प्रेत । इति शब्दरत्नावली । (नरकस्य आमय ।) निरयरोगश्च ।

नरकीलक, पुं, (नरेषु कीलक इव निन्द्यत्वात् ।) गुरुघ्न । सप्रयाय । गुरुहा २ । इति हेमचन्द्र । ३ । ५२२ ।

नरगण पुं, (नरस्य गणो यस्मात् ।) नक्षत्रगण विशेष । तत्रक्षत्राणि । यथा,—
"प्रसामात्मिनाश्विनीहरिगुरुपौष्णानु-
राधादिति
स्वाती रोहिणि चोत्तरात्रि भरणी पूर्वात्रि
भानि क्रमम् ।
...ज्ञाप्रेयविप्राप्रा...कश्यापत्यर्मिषधान्या
कथ्यन्ते मुनिभिर्यथाक्रमममाद्देवा नरा
राक्षसा ।"
इति दीपिका ।
अस्य फलम् । यथा कोष्ठीप्रदीपे ।
"मानुष्ये मृदुकर्म्मभक्तमना भीतान्वितो
भोगुत ।'
(नराणां गण ।) नरसमूह ।

नरङ्ग, पुं, (न्यासि प्रापयतीति । नृ+"पतादे रङ्गच ।" इति उणादिकोषटीकाधृतसूत्रात् अङ्गच ।) वरण्डक । नारङ्गा इति भाषा । (नु पुरुषस्य अङ्गम् ।) मेहने, क्ली । इत्यु णादिकोष ।

नरदेव, पुं (नरो देव इव ।) राजा । इति हला युध । (यथा, हरिवंशे । १९ । ६२ ।
"देवोपा पुत्र उत्पयति नरदेव । धनञ्जयात् ।")

नरनारायणौ, पुं, (नरश्च नारायणश्च तौ ।) ऋषिविशेषौ । तावेव श्रीकृष्णार्जुनौ सम्भूतौ । इति महाभारतम् । (यथा देवीभागवते । ४ । ५ । १९ ।
"नरनारायणौ चैव चेरतुस्तप उत्तमम् ।
प्रालेयाद्रिं समागम्य तीर्थे वदरिकाश्रमे ।")
तयोरुत्पत्तिर्यथा —
"अथ विनयतस्तस्य शाम्भ गता जगाद्देन ।
सत् धर्म्मं स्थापयामास वराहवपुषो स्थितम् ।
ततो देहपरित्यागं कर्त्तु समभवद्यदा ।
तदा दत्तार्द्धभागेन नरश्च महाबलम् ।
शरभो भगवान् भर्गो द्विधा मध्ये चकार ह ।
नरश्चेद्विधाभूते नरभागेन तस्य तु ।
नर एव महातपस्वी दिव्यरूपी महाद्युति ।
तस्य पश्चार्द्धभागेन नारायण इति श्रुत ।
अभवत् स महात्मा मुनिरूपी जगद्गुरु ।
नरो नारायणश्चोभौ हरिरेषु महामतौ ।
ययो मनाग दृश्यं प्राप्ते पदे तप तु च ।"
इति कालिकापुराणे २९ अध्याय ।
कल्पभे- दौ धर्म्मपुत्रौ । यथा,—
"धर्म्मस्य दक्षदुहितर्य्यजनिष्ट मूर्त्त्यां
नारायणो नर इति स्वतप प्रभाव ।
दृष्ट्वात्मनो भगवतो नियमावलोप
देव्यस्त्वनङ्गपृतना घटितुं न शेकु ।"
इति श्रीभागवते । २ । ७ । ६ ।
(अनयोर्विशेषविवरणन्तु देवीभागवते ४ स्कन्धस्य ५ अध्यायमारभ्य द्रष्टव्यम् ।)

नरपति पुं, (नरान् पातीति । पा+डति । नराणां पतिर्वा ।) राजा । इति शब्दरत्नावली । (यथा, रघु । २ । ७५ ।
"नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरभिनिविष्ट लोकपालानुभावै ।")

नरप्रिय पुं (नराणां प्रिय ।) नीलवृक्ष । इति राजनिघण्ट । नरस्य प्रियवस्तुनि, त्रि ।

नरभू, स्त्री, (नराणां मनुष्याणां भूर्भूमि ।) भारतवर्ष । इति त्रिकाण्डशेष । नरोत्पत्तिश्च ।

नरभूमि, स्त्री, (नराणां मनुष्याणां भूमि ।) भारतवर्ष । इति शब्दरत्नावली ।

नरमानिनी, स्त्री, (नरं पुरुषमिव मन्यते इति । मन+णिनि +ङीप ।) श्मश्रुयुक्तनारी । इति त्रिकाण्डशेष ।

नरमानिका, स्त्री, (नर मन्यते या । मन+ ण्वुल् । टापि अत इत्वम् ।) नरमानिनी । इति शब्दरत्नावली ।

नरमाला, स्त्री, (नराणां तन्मुण्डानां माला ।) मनुष्यमुण्डमाला । यथा मार्कण्डेये । ८७ । ६ ।
"विचित्रखट्वाङ्गधरा नरमालाविभूषणा ।"

नरमालिनी, स्त्री, (नरस्येव माला केशसमूहो मुखेऽस्त्यस्या इति । इनि+ङीप । यद्वा, नरमानिनी प्रयोगाद्वरोधात् नियातनेन नस्य लत्वम् ।) श्मश्रुयुक्तनारी । इति हेमचन्द्र । ३ । १९५ । (नरस्य तन्मुण्डस्य मालाऽस्त्यस्या इति ।) नरमालायुक्ता ।

नरमेध, पुं (मिध हिंसायाम्+भावे घञ् । नराणां पुरुषाणां मेधो हिंसनं यत्र ।) नर पशुकयज्ञविशेष । (प्रकोऽयं वाजसनेय- संहितायाम् ३ —३१ अध्यायेषूदितः । तत्र अधिकार्य्यादिकं १ अध्याये वेददीपे उक्तम् । यथा,—
"ब्राह्मणराजन्ययोरतिष्ठाकामयो पुरुषमेध संज्ञको यज्ञो भवति । सर्व्वभूतान्यतिक्रम्य स्थानमतिष्ठा । चैत्रशुक्लदशम्यामारम्भ । अत्र चत्वारिंशद्दीक्षा भवन्ति द्वादशोपसद पञ्च सुत्या इति चत्वारिंशद्दिनै सिध्यति । अत्र यूपैकादशिनी भवति एकादशाग्निषोमीया पशवो भवन्ति तेषाञ्च प्रतियूपं मध्यमे वा यूपे यथेच्छं नियोजनम् । आश्वेन षडहदक्षिणेन देव सविसरिति प्रत्यृचं तिस्र आहुतीराहव- नीये जुहोति ।") स तु कलौ वर्ज्जनीय । यथा,—
"सद्दयापाणिपीकार्यं कमण्डलुविधारणम् ।
द्विजानामसवर्णासु कन्यास्पयमस्तथा ।
देवरेण सुतोत्पत्तिर्मधुपर्के पशोर्वध ।
मांसादनं तथा श्राद्धे वानप्रस्थाश्रमस्तथा ।
दत्तायाश्चैव कन्याया पुनर्दानं वरस्य च ।
दीर्घकाल ब्रह्मचर्य्यं नरमेधाश्वमेधकौ ।
महाप्रस्थानगमनं गोमेधश्च तथा मख ।
इमान् धर्म्मान् कलियुगे वर्ज्ज्यानाहुर्मनीषिण ।"
इत्युद्वाहतत्त्वे ब्रह्मनारदीयम् ।

नरवाहन, पुं, (नरो वाहनं यस्य । "हलदन्तात् सप्तम्या संज्ञायाम्" इति न णत्वम् । "शुभादिषु च ।" ८ । ४ । ३९ । इति न णत्वम् ।) कुबेर । इत्यमर ।१।१।७२। (यथा, रघु । ९ । ११ ।
"विजयदुन्दुभितां ययुरर्णवा
घनरवा नरवाहनसम्पद ।"
नृपतिविशेष । यथा, राजतरङ्गिण्याम् । ५ । २१६ ।
"सोऽमुष्मै सह निर्दोष अपात् सोदरस्पृहया ।
शूर दाम्बाभिसारेश ग्रन्थ्यां नरवाहनम् ।")
पुरुषयानविशिष्टे, त्रि । (यथा, महाभारते । २ । ८९ । ५ ।
"सखे धनपतिश्चैव कुबेरो नरवाहन ।")

नरविष्वण पुं (नरं विष्वणति भक्षयतीति । वि+ ष्वण+अच् ।) राक्षस । इति त्रिकाण्डशेष ।

नरसार पुं, (नरवत् शुक्ल सारो यस्य ।) उपरस विशेष । नौसादर इति निशादल इति च भाषा । तस्य पर्य्याय । यथा रत्नमालायाम् ।
"चिल्लो नौसादरश्चैव चुल्लिकालवणं तथा ।"
"हिरन्तो गोपक चिल्लो वोलो गन्धरसो रस ।
तस्य शुद्धिर्यथा,—
"नरसारो भवेच्छुद्धश्चूर्णतोये विपाचित ।
दोलायन्त्रेण यत्नेन भिषग्भिर्योगविद्वर ।'
इति सारचन्द्रिका ।

[illegible]

[illegible]

[illegible]

तेन पुण्या नदी ज्ञेया ब्रह्महत्यापहारिणी ।
नर्म्मदायां जलं पीत्वा अर्च्चयित्वा वृषध्वजम् ।
दुर्गतिञ्च न गच्छन्ति तस्य तीर्थप्रभावतः ॥
एतत्तीर्थं समासाद्य यस्तु प्राणान् परित्यजेत् ।
सर्व्वपापविशुद्धात्मा प्रयाति रुद्रमन्दिरम् ॥
जलप्रवेशं यः कुर्य्यात् तस्मिंस्तीर्थे नराधिप ! ।
हंसयुक्तेन यानेन रुद्रलोकं स गच्छति ॥
यावच्चन्द्रश्च सूर्य्यश्च हिमवांश्च महोदधिः ।
गङ्गाद्याः सरितो यावत्तावत् स्वर्गे महीयते ॥
अनशनन्तु यः कुर्य्यात्तस्मिंस्तीर्थे नराधिप ! ।
गर्भवासे तु राजेन्द्र ! न पुनर्जायते नरः ॥"
इति मात्स्ये १८५ । १८६ अध्यायौ ॥

सा च पुरुकुत्सभार्य्या । तस्याः स्मरणे विषनाशो भवति । यथा, "उरगपतयश्च नर्म्मदायै वरं ददुः । यस्तेऽनुस्मरणसमवेतं नामग्रहणं करिष्यति न तस्य सर्पविषं भविष्यतीति । अत्र च ।
"नर्म्मदायै नमः प्रातर्नर्म्मदायै नमो निशि ।
नमोऽस्तु नर्म्मदे तुभ्यं त्राहि मां विषसर्पतः ॥"
इति विष्णुपुराणे । ४ । ३ । ९—१० ॥

नल, अ बन्धे । इति कविकल्पद्रुमे सुभूपतौ भरतः ॥ (भ्वां-परं-सकं-सेट् ।)

नलं, क्ली, (नलतीति । नल + अच् ।) पद्मम् । इति राजनिर्घण्टः ॥

नलः, पुं, (नल बन्धे + पचाद्यच् ।) तृणविशेषः । तत्पर्य्यायः । धमनः २ पोटगलः ३ । इत्यमरः । २ । ४ । १६२ ॥ नालः ४ नडः ५ शुषिरन्ध्रः ६ कीचकः ७ दीर्घवंशः ८ शून्यमध्यः ९ विभीषणः १० छिद्रान्तः ११ नदुमत्रः १२ वंशपत्रः १३ षड्गह्वरः १४ नालवंशः १५ । अस्य गुणाः । शीतत्वम् । कषायत्वम् । मधुरत्वम् । वस्तिकारित्वम् । रक्तपित्तप्रशमनत्वम् । दीपनत्वम् । वीर्य्यवृद्धिदत्वञ्च । इति राजनिर्घण्टः ॥ तन्नामगुणाः ।
"नलः पोटगलः शून्यमध्यश्च धमनस्तथा ।
नलस्तु मधुरस्तिक्तः कषायः कफरक्तजित् ॥
उष्णो हृद्वस्तियोन्यर्त्तिदाहपित्तविसर्पहृत् ॥"
इति भावप्रकाशः ॥

सूर्य्यवंशीयनिषधराजपुत्रः । यथा,—
"अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः ।
नलस्तु नैषधस्तस्मान्नभास्तस्मादजायत ॥"
वीरसेनराजपुत्रः । यथा, मात्स्ये १२ अध्याये ।
"नलौ द्वावेव विख्यातौ वंशे कश्यपसम्भवे ।
वीरसेनसुतस्तद्वन्नैषधश्च नराधिपः ॥"
(तथा, हरिवंशे । १५ । २४ ।
"नलौ द्वावेव विख्यातौ पुराणे भरतर्षभ ! ।
वीरसेनात्मजश्चैव यश्चेक्ष्वाकुकुलोद्वहः ॥"
एतौ द्वावेव सूर्य्यवंशीयौ ।) चन्द्रवंशीयनिषधराजपुत्रः । (अयन्तु दमयन्तीपतिः ।) यथा, दमयन्तीं प्रति नलवाक्यम् ।
"सुधांशुवंशस्य करीरमेव मां
निगृह्य किमाधि मयेपथि यथा ॥"
इति नैषधे ॥

(यथा, महाभारते । ३ । ५३ । १ ।
"आसीद्राजा नलो नाम वीरसेनसुतो बली ।
उपपन्नो गुणैरिष्टै रूपवानश्वकोविदः ॥"
अयं वीरसेनस्तु चन्द्रवंशीयवीरसेनाद्भिन्न इति ज्ञातव्यम् ॥ * ॥

आसीत् पुरा निषधाधिपतिश्चन्द्रवंशीयो नलो नाम राजा । गच्छति काले स हि हंसमुखात् विदर्भेश्वरभीमराजकन्यां दमयन्तीं त्रिभुवनैकसुन्दरीमाकर्ण्य हंसमुखादेवावगतनलसौन्दर्य्यां तन्मनस्कां दमयन्तीं स्वयंवरविधिना इन्द्रादिदेवसन्निधावेव उपयेमे । अस्य इन्द्रसेननामा पुत्र आसीत् । दमयन्तीपरिणयकामुकः कलिस्तु दमयन्तीमलभमानः नलं प्रति रुष्टः सञ्जातः । अथ कलिप्रविष्टशरीरोऽयं भ्रात्रा पुष्करेण सह द्यूतक्रीडनात् सर्व्वस्वमहारयत् । तत स राज्यच्युतो दमयन्त्या सह वनं गतवान् । कलिस्तु अत्र दमयन्तीसहवासात्तमपहृत्य दमयन्त्या सह एनं वियोजयितुमियेष । अथ कदाचित् क्लान्त्याभिभूतचित्तोऽयं नलः सुप्तां दमयन्तीं विसृज्य परित्यज्य पलायाञ्चक्रे । दमयन्ती तु प्रबुध्य बहु विलप्य च पथिकसार्थवाहेन सह मातृष्वसृगृहं गतवती । नानाविधक्लेशात् परिक्षिप्ता सा तत्र कालमपि अविज्ञाता तद्भवने तस्थौ । अथ दमयन्तीपिता भीमनृपतिर्दमयन्त्या अन्वेषणाय दूतान् नियोजयामास । दूतास्तु चिह्नविशेषैर्दमयन्तीं परिज्ञाय भीमाय न्यवेदयन् । भीमस्तु तां स्वगृहमानयत् । नलस्तु दमयन्तीं परित्यज्य गच्छन् दावानलमध्यगतं कर्कोटकनागं विपद उज्जहार । कर्कोटकस्तु नलस्य मङ्गलं कर्त्तुमिच्छन् शरीरस्थमस्य कलिं दृष्ट्वा कलिमेव भृशं सन्तापयामास । नलस्तु विवर्णः कुब्जाकारत्वमापन्नवान् । ततोऽसौ ऋतुपर्णस्य राज्ञः सारथ्ये नियुक्त आसीत् । अथ गच्छति काले दमयन्ती पितृगृहस्था नलान्वेषणाय ब्राह्मणान् सम्प्रेष्य कथञ्चित् ऋतुपर्णसारथिं नलमेवाशङ्क्य पुनः स्वयंवरमिषेण सारथिं ऋतुपर्णं पितृवेश्मनि आनयामास । दमयन्ती तु पाकादिकौशलेनान्यजनावेद्येन ऋतुपर्णसारथिं नलं विज्ञाय स्वसमीपमानयामास । अथ कलिपरित्यक्तेन नलेन स्वसौन्दर्य्ये प्राप्ते भैम्या सह मेलनं सञ्जातम् । भीमनृपतिस्तु एतत् सर्व्वमाकर्ण्यातिप्रसन्नो जामातरं प्रेषयामास च तं बहुसमारोहेण निषधदेशान् प्रति । ततोऽथ स्वदेशमागम्य भ्रातरं पुष्करं पुनर्द्यूताय आहूय पराजित्य च स पुनर्लब्धराज्यो दमयन्त्या सह सुखमुवास । एतद्विवरणविस्तृतिस्तु महाभारते वनपर्व्वणि ५३—७८ अध्यायेषु विशेषतो द्रष्टव्या ॥ * ॥) वानरविशेषः । स तु ऋतध्वजसुनिघापात् वानरदेहपरिकल्पितविश्वकर्म्मौरसेन घृताच्यप्सरसो गर्भे गोदावरीतीरे जातः । इति वामने ६९ अध्यायः ॥ (अयन्तु रामचन्द्रेण समुद्रमध्ये सेतुं बबन्ध । यथा अध्यात्मरामायणे । ६ । ४ । ८४—८६ ।
"ततोऽब्रवीद्रघुश्रेष्ठं सागरो विनयान्वितः ।
नलः सेतुं करोत्वस्मिन् जले मे विश्वकर्म्मणः ॥
सुतो धीमान् समर्थोऽस्मिन् कार्य्ये लब्धवरो हरिः ।
कीर्त्तिं जानन्तु ते लोकाः सर्व्वलोकमलापहाम् ।
इत्युक्त्वा राघवं नत्वा ययौ सिन्धुरदृश्यताम् ।
ततो रामस्तु सुग्रीवलक्ष्मणाभ्यां समन्वितः ।
नलमाज्ञापयच्छीघ्रं वानरैः सेतुबन्धने ॥")
निषधेशः । इति मेदिनी । ले, २० ॥ दैत्यविशेषः । यथा,—
"दैत्यदानवयोगाश्च तथाचोग्रपराक्रमाः ।
सिंहिकाया इति ख्याताश्चत्वारोऽत्र महाबलाः ॥
वायुः प्रवाच बलवान् नलश्चैव तथा बकः ।
वातापिर्नमुचिश्चैव इल्वलः स्वसृमस्तथा ॥
अञ्जको नरकश्चैव कालनाभस्तथैव च ।
शरमाणस्तथा चैव शरकल्पश्च वीर्य्यवान् ॥"
इति मत्स्यपुराणे ६ अध्यायः ॥

नलकं, क्ली, (नल इव प्रतिकृतिः । "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) शरास्थि । इति हेमचन्द्रः । ३ । २८९ ॥ (यथा, सुश्रुते निदानस्थाने १५ अध्याये ।
"तद्यथाशीति मण्यको भग्नको नलकानि तु ॥")

नलकिनी, स्त्री, (नलकानि सन्त्यस्याः । नलक + इनि । ङीप् ।) जङ्घा । इति हेमचन्द्रः । ३ । २७८ ॥

नलकील, पुं, (नलवत् कीलो यत्र ।) जानु । इति हेमचन्द्रः । ३ । २७८ ॥

नलकूबरः, पुं, कुबेरपुत्रः । इत्यमरः । १ । १ । ७१ ॥ (यथा, राजेन्द्रकर्णपूरे । ६९ ।
"विलोकनक्षणादिमे न नलकूबरे न स्मरे
किमन्यदन्यतद्गतैरपि न दृश्यते प्राप्यते ।
अयं नयनगोचरं व्रजति येद्गृहाद्भूतलं
समस्तमयीमनो मधुपमानदः प्रार्थये ॥")
स भ्राता मणिग्रीवेण सह वारुणीं पीत्वा कैलासोपवने गङ्गायां स्त्रीजनैः क्रीडितवान् । अर्धनग्नौ तौ दृष्ट्वा नारदः शशाप । तच्छापेन तौ यमलार्जुनौ भूत्वा श्रीवृन्दावने आसतुः । ततो दामोदरेण शापनिर्मुक्तौ तं नुत्वा स्वपदं जग्मतुः । इति श्रीभागवतीयदशमस्कन्धः ॥

नलदं, क्ली, (नलं द्यति अवखण्डयतीति । दो + कः ।) पुष्परसः । उशीरम् । (यथा, किराते । ५ । २५ ।
"इह सिन्धवश्च वरणावरणाः
करिणां मुदे सनलदानलदाः ॥")
जटामांसी । इति मेदिनी । दे २१ ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"नलदं नन्दिनी पेशी मांसी तक्कुटा जटी ।
किरातिनी च जटिला लोमशा तु तपस्विनी ॥"
नलं ददातीति । दा + आतोऽनुपेति कः ।) नलदातरि, त्रि ॥

[illegible] पुं, [illegible] । इति [illegible] ॥

[illegible] ([illegible] + [illegible] ।) [illegible] । इति [illegible] ॥

धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः ॥"
इति मलमासतत्त्वम् ॥
नवाम्बर, क्ली (नवं नूतनमम्बरं वस्त्रम् ।) नूतनवस्त्रम् । इत्यमरः । २ । ६ । ११२ ॥ (यथा, समयप्रदीपे ।
"श्रीर्भे रवौ सततमम्बुभिरार्द्रमिन्दौ
भौमे शुचं बुधदिने च भवेद्धनाय ।
ज्ञानाय मन्त्रिणि भृगौ प्रियसङ्गमाय
मन्दे मलाय च नवाम्बरधारणं स्यात् ॥")
नवार्चि, [स्] पुं (नव अर्च्चींषि यस्य ।) मङ्गलग्रहः । इति त्रिकाण्डशेषः ॥ (स्त्री, नवं नूतनं अर्च्चिः ।) नवशिखा ॥ (नव अर्च्चींषि इति विग्रहेण तु नवसंख्याकिरणार्थे बहुवचनम् ॥)
नवाह, पुं (नवं अहः । समासे टच् ।) नवदिनम् । प्रतिपत्तिथि । इति त्रिका ॥
नविका, स्त्री, (नवोऽस्त्यस्या इति । नव+ठन्+टाप् । नवि नवं कायति इति वा ।) नवयुवती । इति स्त्रीप्रकरणे दुर्गादासः ॥
नवीन, त्रि, (नव एव । नव+"नवस्य नू आदेशो-स्नप्तनप्खाश्च प्रत्ययाः वक्तव्याः ।" ५ । ४ । ३० । इत्यस्य वार्त्तिकोक्त्या खः स्वार्थे च ।) नूतनम् । इत्यमरः । ३ । १ । ७७ ॥ (यथाह गदाधरः ।
"गदाधरविनिर्म्मिता विविधदुष्टतर्काटवी
नवीनपदवीयुजः विदुषां सतां धीमताम् ॥")
नवोढा, स्त्री, (नवा नूतना ऊढा) नवविवाहिता । तत्पर्य्यायः । वधूः २ जनी ३ । इति जटाधरः ॥ नवपरिणीता ४ दिवरी ५ नवयौवना ६ । इति साराणवी । १५४ ॥ मुग्धानायिकाभेदः । तस्या लक्षणं यथा ।"लज्जाभयपराधीनरतिर्नवोढा ॥ तस्या उदाहरणं यथा रसमञ्जर्य्याम् ।
"हस्तागतापि न शराप्तये नैव कुरुते
पृष्टापि न ददाति मानं वचनं सुमनसि ।
कुटिल नयनाञ्चलाभ्यां पिबति नमनारोपितसमया
नवोढा वाढारं रमयति च संतापयति च ॥"
नवोदक, क्ली, (नवमुदकम् ।) नूतनजलम् । यथा, मिताक्षरायां स्मृतिः ।
"स्नाति नवोदकं सर्व्वं न मासमन्तःसलिलं यत् ।
अकाले तु दशाहानि पीत्वा नाद्यादतः परम् ॥"
इति शुद्धितत्त्वम् ॥
तन्निमित्तकं श्राद्धं कर्त्तव्यम् । यथा शातातपः ।
"नवोदके नवान्ने च गृहप्रच्छादने तथा ।
पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च ।
तस्माद्दद्यात् सदा युक्तो विद्वत्सु ब्राह्मणेषु च ॥
नवोदके वर्षोपक्रमे । आगते दवार्वित यावत् ।
'आर्द्रादितो विशाखान्तं रविचारेण वर्षति ।'
इति वचनोक्तमागतत्वात् ॥
'प्राविट्कालो यमामाति दीव्यद्भ्यगते रवौ ।
वार्षीकं चमभायोगे कर्मयोगं वदाम्यहम् ॥
इति यवमालाचा ॥
दीपमार्ग ॥ ० ॥ नवोदकमाहस्य चाचकाद्य लात् नवोदकादिकभिधिनाय दीपिकायाम् ।
'नवोदकं जलादिकथ नन्दा
पक्षचन्दारो सितवासरश्च ।
श्राद्धं हरीरन्द्रकराश्वमैत्र-
पुष्येषु च श्राद्धविधानमिष्टम् ॥
सितवासर शुक्रवारम् । भम राशि । कर्म्म इव मघपुष्यश्रवणविशाखामूलारेवतीयुत्तराद्योत्तरा चित्रपरोहिण्य । तत्पञ्चे चेमनोदकयानकालस्तरोभयो श्राद्धयोरभ्यान् सिद्धि ।" इति तिथ्यादितत्त्वम् ॥
नवोद्धृत, क्ली, (नवमुद्धृतम् ।) नवनीतम् । इत्यमरः । २ । ९ । ५२ ॥ नूतनोत्थिते, त्रि ॥
नव्य, त्रि, (नूयते स्तूयते इति । णु स्तुतौ+"अचो यत् ।" ३ । १ । ९७ । इति यत् । यद्वा, नव एव । "प्रज्ञादिभ्यो यत् ।" ५ । ४ । ३८ । इति स्वार्थे यत् ।) नूतनम् । इत्यमरः । ३ । १ । ७७ ॥ (यथा, ऋग्वेदे । १ । ५५ । १६ ।
"नव्या नव्या युवतयो भवन्तीर्महद्देवानामसुरत्वमेकम् ॥"
स्तुत्यम् । यथा ऋग्वेदे । ५ । १२ । ६ ।
"कथा नो अग्न ऋतयन्नृतेन
भुवो नवेदा उचथस्य नव्यः ॥")
स्त्री, स्तुतिः । णु स्तुतौ भावे अघ्न नवमन्दात् स्वार्थे वे निष्पन्ना ॥
नव्य, पुं, (नूयते इति । णु+यत् ।) रक्तपुनर्नवा । इति राजनिर्घण्टः ॥
नशाक, पुं (नश्यतीति । नश नाशे+"नाक राशादि च तु कित् ।" ४ । २२१ । इति उणादि कोषटीकाधृतसूत्रात् आक ।) काकभेदः । द्रोणादिकाकः ॥
नष्टिता, [त्र] त्रि नाशनशील । इति नशधातो र्णादि तृन्प्रत्ययनिष्पन्नः ॥
नक्षत्रमधुसिका स्त्री, (नक्षत्री प्रद्राति यन्यति धेनुका । स्व । ततष्टाप् ।) स्वतप्तगुणा । तत्पर्य्याय । नडः २ स्वतप्तुमिता ३ । इति हैमचन्द्रः । ३ । १८५ ॥
नश्वर, त्रि (नश्यतीति । नश+"इण्नशजिसर्त्तिभ्यः क्वरप् ।" ३ । २ । १६३ । इति क्वरप् ।) नाशप्रतियोगी । ध्वंसयोग्य । इति नशधातोः कर्त्तरि क्वरप्प्रत्ययनिष्पन्नः ॥ (यथा, भागवते । ५ । १८ । ३ ।

"यद्यपि विश्व कवयः स्म गम्बर
यतन्ति व्याख्यातुमिदो विपश्चितः ।
तथापि शृण्वन्ति तवान मायया
सुविमिर्ने कृष्णमन नमोऽस्मि तम् ॥")

नष्ट, त्रि, (णश+क्त ।) अन्यप्रतिहितः । तत्पर्य्यायः । तिरोहितः २ । इत्यमरः । ३ । १ । ८८ ॥ (यथा, पञ्चतन्त्रे । १ । ३०८ ।
"नष्टे भ्रष्टमतिज्ञाना गाढं प्रोत्साहिता पश्यता ।
पतिव्रताय गच्छन्ती विशेषोऽयं मतः स्मृतः ॥"
अधमः । यथा मानवे । ८ ।
"यथा नष्टा दिवा नष्टा यमुना इव पार्थिवाः ।
मत्स्याः प्रविशन्ति नष्टा निम्नगासु कुलस्त्रियः ॥"
पलायितः । यथा, हरिवंशे । १०४ । २९ ।
'ततस्ते तु सहसैव नष्टा चापपुरात् तथा ।
मारीचिप्रियं विशीर्णन्ती पूज्यन्ती समीपगान् ॥"
पलायित । यथा, रत्नावल्याम् ।
'नष्ट वर्षवरैर्मनुष्यगणनाभावादपास्य त्रपाम् ॥"
निष्फलः । यथा मनुः । ३ । १८० ।
"नष्ट देवलके दत्तं अप्रतिष्ठन्तु वार्धुषौ ॥")
वाधानयः । यथा । 'योगो नष्टः परन्तप ॥"
इति श्रीभगवद्गीता । भावे क्तः ।

नष्टचन्द्र, पुं, (नष्टो दृश्यश्च ।) भाद्रमासस्य शुक्लचतुर्थ्यामुदितचन्द्रः । यथा —
"नष्टचन्द्र न द्रष्टव्य भाद्रे मासि सितासिते ।
चतुर्थ्यामुदितोऽप्येव प्रतिषिद्धो मनीषिभिः ॥
चन्द्रतारापथं दृष्ट्वा कलङ्कमिथ्याप्करम् ।
तस्मै ददाति वै मन्त्रं जानाति यदि मन्त्रवित् ।
अजानन्नथवा दृष्ट्वा मन्त्रपूतं जलं पिबेत् ।
यदा शुद्धो भवेत् सद्यो निष्कलङ्को भवेत्तथा ॥
'सिंहः प्रसेनमवधीत् सिंहो जाम्बवता हतः ।
सुकुमारक मा रोदीस्तव ह्येष स्यमन्तकः ॥
इति मन्त्रं पूतजलं साधुः पिबेदिदम् ॥
दृष्ट्वा तारा गुरोः पत्नी नवयौवनसंयुता ।
रत्नभूषणभूषाढ्या रत्नसिंहासनस्थिता ॥
सुश्रोणी सस्मिता रम्या सुन्दरी सुमनोहरा ।
कस्तूरीकुङ्कुमैर्युक्ता मालतीमाल्यभूषिता ।
सिन्दूरबिन्दुना सार्द्धं चारुचन्दनबिन्दुभिः ।
कस्तूरीबिन्दुनाढ्या च मालमध्यस्थलोज्ज्वला ॥
वह्निशुद्धांशुकेनैवमग्निशौचेन भूषिता ।
सुपक्वबिम्बसमा सुधापक्वफलोपमा ॥
प्रभावदाववृक्षापि नानामाल्यमनोहरा ।
रत्नकुण्डलयुग्मेन चारुगण्डस्थलोज्ज्वला ॥
कामिनीकमनीया या गजेन्द्रमन्दगामिनी ।
सुकोमला चन्द्रमुखी कामाधारा च कामुकी ॥
कलिमन्दाकिनीतीरे याता स्नातुं मनोहरा वरा ।
श्यामली सुदती सा मदनं मनसोऽस्त्रजी ॥
दृष्ट्वा तत्राथ धर्मात्मा मदनोन्मादपीड़ितः ।
भार्ये चतुर्थ्यामवदच्च तदा देवस्य गृह ॥ ।
चक्रे चन्द्रेण संस्पृष्ट्वा रमणीं रतिकां वधूम् ।
रत्नपारोहधामाय जगौ धृत्वा च तारकाम् ॥
कामान्मोद कामिनीनां समाश्लिष्य चुचुम्ब च ।
अङ्गारं वर्णमुद्दिश्य तस्याः सुरप्रिया ॥

तारकोवाच ।
त्यज मां त्यज मां चन्द्र । सुरेषु कुलपांशन ॥ ।
गुरुपत्नीं व्यवायीच्च पतिव्रतपरायणाम् ॥
गुरुपत्नीमघ्नन्ने ब्रह्महत्याशतं लभेत् ।
पुरुषस्य सम मातापि धैर्यं कुरु सुरेश्वर ॥ ।
धिक् त्वां मृषा सुरगुरुः कर्मभिर्भूतः करिष्यति ।
गुरुपत्नी विश्रब्धो यदि सा च पतिव्रता ॥
ब्रह्महत्याशतं तस्मा सद्भ्रमं लभेत् ।
प्रमादिकत्व प्रियस्य श्रियो मनुस्वामिनी भवाना
सधर्मी दुर्गा पापिष्ठ । मामेव मातरं भज ।
दास्यामि शापं तुभ्यं यदि मां मन्यसे त्यजि ॥
विलक्ष नारायणं साक्षं समासुतुष्टदयम् ।
प्रणाम तारा कोपेन निन्दाशा या पतिव्रता ॥
राहुग्रस्तो भवत्तस्य पापयुक्तो भवान् भव ।
कलङ्की यक्ष्मणा यातो भविष्यसि न संशयः ॥
चन्द्रमेवं तत्र गृत्वं कामदेवं प्रयाति यः ।
तेजस्विना केवलं भस्मीभूतो भविष्यसि ॥
चन्द्रस्तारां रसोल्लास च प्राणांश्च रमणप्रजा । ।
क्रोड़े निधाय प्रययौ वक्ष्मी त्वां सुनिश्चितताम् ॥
निर्जने निर्जने रम्ये शैले शैले मनोहरे ।
तत्र रन्तुं सुरतेन च कोलाहल समागतम् ॥
प्रशान्य चर्च्चित्वा च चन्द्रस्तां सुरतं ययौ ।
मुक्त्वा चौषधामाय ववन्द नीतिपूर्व्विका ॥

शुक उवाच ।
यदि वत्स । प्रवक्ष्यामि गुरवे देहि तारकाम् ।
गुरुपत्नीं मातृवदीं मत्र मङ्गलादिषी ॥ ।
कुरु पापक्षयोपाय निश्चितं महात्मना ।
माताविद गुरुपत्नीनां यद्यपि भवेत् च ।
ब्रह्महत्यायदानाको पातकं लभते जन ।
कुम्भीपाके पचति च यावद्ब्रह्मण शतम् ॥
इहस्मृतिस्थ तेजसां त्वां भग्नोऽस्मि मोक्षम् ।
स चकार जनानृदूत निर्बन्धिन देवतां ॥
उत्तथ्यपत्नीं दृष्ट्वा च पुरा देवे चकारपि ।
मनुष्यतिः प्राप्तोऽप्येव परवन्ता प्रिया सती ॥"
"उत्तमापणतरे मध्ये बोधिता कवि रीत्या ।
सामादाय विद्यामार्थं तारकायादिनं मम ॥ ।
मन्त्रं च परमाणोधे चकार च सम्प्रभम् ॥
प्रमुक्तं नीतिशुक्लय नारायणाय वादयि ॥
दत्वा तस्मै मानस्यं निष्पाप चकार स ।
दत्वा तत्रापि मृत्तं यमाय देहमेव ददौ ॥
नीरोदे स्नापयित्वा च प्राणप्रियेण शङ्करः ।
चकार चन्द्र निष्पापं ब्रह्मणा वन्दिते मुनिम् ॥
योगेन चन्द्र योगीन्द्रो हिरण्यं चकार च ।
दत्वाक्षं कपाटं च योऽप्यद्रि मलिन पुर ॥
जलधम् महाद्वीपं वमूव चन्द्रिकार ।
कथाद्रौ सम्भिताच्च कलङ्की देवदावि ॥
ब्रह्मणा च शपीति देवानां प्रचकार च ।
तच्छरीरच्च क्षीरोदे ब्रह्मणा च धर्मिणम् ॥
क्षीरोदादिपि जलया सह चीरोदेदेवाहे ।
अभिषञ्चेष्टं तच्च मनानां च नष्टे मम ॥
भगवान्मुर चन्द्र निष्पापो देवतासि ।
ब्रह्मा च मन्त्रान् सम्पूरनिषेकचकार तम्
उत्पाद च रुद्रादेवी निमयं दयवदादि ॥

महादेव उवाच ।
महामान नन्द पुत्र । त कुरु सविनय तुरा ।
पश्चात् चन्द्रमसैव यम्यागत्ने भविष्यति ॥
यत्र पतिव्रतायाथं कर्मभोदय को सुरि ।
मयाप्रिया चन्द्रस्य प्रतिकारो भविष्यति ॥
यस्माद्दानचतुष्यात्तु गुरुपत्नी यथा कृता ।
तस्मात्तस्य द्वयं पश्य । पापहन्तो हुमि हुमि ॥
मा शक्ताः सौभाग्ये कामे कल्पकोटिशतैरपि ।
अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ॥
देवमानि दें चन्द्र । कर्मभोगो न नश्यति ।
प्रायश्चित्तात् संदेशो हृतमेव भविष्यति ॥
तारापतये चन्द्र । कलङ्कयन्मण्डले ।
अकालात निश्चय भविष्यति हुमि हुमि ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे । ८० अः ८८ ॥

नष्टचेष्टता, स्त्री, (नष्टा चेष्टा यस्य । तस्य भावः । तल् ।) प्रलयः । इत्यमरः । १ । ७ । ११ ॥ शोकाग्निना परिष्कन्नाम्बी नष्टचेष्टता तत्र प्रलय इत्येवैव प्रलयं प्रोक्तं च वा दिवि ध्वनः । प्रलयः सात्त्विको भावः गर्भेष्वयः । इति धर्मसम् ॥ इन्द्रियाणामिन्द्रियचेष्टा नाश प्रलयं इत्यर्थः । इति भरत ॥ ईहा शून्यता च ॥

नष्टाग्नि, पुं, (नष्टः प्रमादात् निर्वाणमागत अग्निर्यस्य ।) प्रमादादिना प्रमादादिना कारणान्तरेण वा अग्निहोत्रो निर्वाणाग्नि स । तत्पर्य्यायः । वीरहा २ । इत्यमरः । २ । ७ । ११ ॥

नष्टाग्निसूर्य, स्त्री, (नष्टस्य चौरैरपहृतस्य वस्तुन अवाप्ति लब्धा सूत्रमिव ।) लब्धिप्राप्तिनीलनष्टम् । तत्पर्य्यायः । लाबुक २ । इति चारावली । १९८ ॥

नष्टेन्दुकला, स्त्री, (नष्टा इन्दुकला यस्याम् ।) कुहूः । इत्यमरः । १ । ४ । ९ ॥

नसा, स्त्री, (नस्+आ टाप् । नसते कुटिला भवतीति । नस कौटिल्ये+अच् । टाप् ।) नासिका । इति शिक्षाटीका ।

नस्त, पुं, (नसते कुटिलतां प्राप्नोतीति । नस्+क्त । बाहुलकात् इडभाव ।) नासिका । इति शब्दमाला ॥ (यथा, महाभारते । १ । १११ । १० ।
"शेषाश्च तथैव कोलाच्छाय समन्तात् ।
प्रादुरासन् महारौद्रा धूम्रा भास्कराद्विव ॥")
नस्ते, अ । इति शब्दमाला । यथाविरलतो नस्तोऽपि यथा —
"प्रणिपत्य नदीकूल नश्यं प्रचलकाता ।
शिरोविरेचनार्थेन दर्शकर्मा तु पश्यता ॥
देवस्तुष्टान् धैर्यो दातव्यं नस्तं प्रयच्छेत् ।
नस्तं निषिक्तं विद्यात् प्रतिमर्शं प्रमाणतः ॥
प्रतिमर्शश्च नस्यार्थं करोति न च दोषकृत् ।
दोषघ्नं वाक्यस्य स्नायव्यो हिता मम ॥
नस्तोऽपि दोषे नस्तारक्तौ कृतकार्य्य ॥

स्नेहार्थं शून्यशिरसां ग्रीवास्कन्धोरसां तथा ।
बलार्थं दीयते स्नेहो नस्यशब्दोऽत्र वर्त्तते ।
नस्यस्य स्नैहिकस्यात्र द्वयावाचौ तु बिन्दव ।
प्रत्येकशो नस्तकयोर्मात्रामिति विनिश्चयः ॥"
इति वैद्यकपरिभाषा ॥
"शुक्तिश्च पाणिशुक्तिश्च मात्रास्तिस्रः प्रकीर्त्तिताः ।
द्वात्रिंशद्बिन्दवश्चात्र शुक्तिरित्यभिधीयते ॥
द्विशुक्ती पाणिशुक्तिश्च देयाश्च कृशलेश्वरे ।
तैलं कफे च वाते च केवले पवने वसाम् ॥
दद्यान्नस्यं सदा पित्ते मज्जानं च समारुते ।
ध्मापनं रेचनं चूर्णं युञ्ज्यात् सुखवायुना ॥
षडङ्गुलद्विमुखया नाड्या भेषजगर्भया ।
स हि भूरितरं दोषं चलत्वादपकर्षति ॥
शिरोविरेचनद्रव्यैः स्नेहैर्वा तैः प्रसाधितैः ।
शिरोविरेचनं दद्यात् रोगेष्वेतेषु बुद्धिमान् ॥
गौरवे शिरसः शूले जाड्ये स्यन्दे गलामये ।
शोथगण्डक्रिमिग्रन्थिकुष्ठापस्मारपीनसे ॥
तोयमद्यगरस्नेहपीतानां पातुमिच्छताम् ।
भुक्तभक्तशिरःस्नातस्नातुकामस्रुतासृजाम् ॥
नवपीनसवेगार्त्तसूतिकाश्वासकासिनाम् ।
शुद्धानां दत्तवस्तीनां तथा नात्तवदुर्द्दिने ॥
अन्यत्रात्ययिके व्याधौ नैषां नस्यं प्रयोजयेत् ।
न नस्यं न्यूनसप्ताब्दे नातीताशीतिवत्सरे ।
न चोनाष्टादशे धूमः कवलो नोनपञ्चमे ॥
न शुद्धिर्नूनदशमे न चातिक्रान्तसप्ततौ ।
आजन्ममरणं शस्तः प्रतिमर्षस्तु बस्तिवत् ॥"
इति सारकौमुदी ॥

नस्ता, स्त्री, (नस+टाप् ।) नासायाः छिद्रम् । इति मल्लिनाथकृतटीकायां भरतः ।
"नस्ताभ्यन्तराभ्यां कणदाहादिभिर्नरे ।
अनिन्द्यातिवाहाभ्यां वधे चान्द्रायणं चरेत् ॥"
इति स्मृतिः ॥

नस्तित, पुं, (नस्ता नासाच्छिद्रं जाता अस्य । तारकादित्वादितच् ।) नासानिर्विद्धरज्जुवलीवर्दादिः । नाकफोंड़ा गरु इति भाषा । तत्पर्य्यायः । नस्योतः २ । इत्यमरः । २ । ९ । ६३ ॥

नस्योत, पुं, (वेञ् तन्तुसन्ताने + भावे क्त । नसि नासिकायां ऊतं वयनं यस्य ।) नस्तितः । इत्यमरटीकायां रमानाथः ॥

नस्य, क्ली, (नासिकायै हितम् । नासिका + यत् । नसादेशश्च ।) नासिकादेयचूर्णादि । तत्पर्य्यायः । ध्माणम् २ नावनम् ३ । इति रत्नमाला ॥ यथा वैद्यकपरिभाषायाम् ।
"स्नेहनं रेचनं नस्यं निरूहश्चानुवासनम् ।
एवं पञ्चविधं कर्म्म मात्रा तस्य प्रवक्ष्यते ॥"
नासाद्वारा देयौषधविशेषः । यथा,—
"पक्त्वे द्वे गन्धसाराणां क्वाथेन द्रोणमम्भसाम् ।
चतुर्भागावशेषेण तैलप्रस्थं विपाचयेत् ॥
काश्मिकस्याढकं दत्त्वा पिष्टान्येतानि दापयेत् ।
पुनर्नवां गोक्षुरकं सैन्धवं शुण्ठ्यं वचा ॥
सरलं सुरदारुञ्च दन्ती कण्टकारिका ।
नस्यमानाद्भरत्येव सर्व्वमूलं चतुर्विधम् ॥"
इति गारुडे १९८ अध्यायः ॥
अपि च ।
"पिप्पलीकल्कयष्टीकुस्तुम्बुरु देवदारु च ।
मञ्जिष्ठा त्रिफला श्वेता शिरीषो रजनीद्वयम् ॥
प्रियङ्गुनिम्बत्रिकटु गोमूत्रेणावघर्षितम् ।
नस्यमालेपनञ्चैव स्नानमुद्वर्त्तनं तथा ॥
अपस्मारविषोन्मादशोषालक्ष्मीज्वरापहम् ।
भूतेभ्यश्च भयं हन्ति राजद्वारे च शासनम् ॥"
इति गारुडे १९९ अध्यायः ॥
(यथा च ।
"नस्यन्तत् कथ्यते धीरैर्नासाग्राह्यं यदौषधम् ।
नावनं नस्यकर्म्मेति तस्य नामद्वयं मतम् ॥
नस्यभेदो द्विधा प्रोक्तो रेचनं स्नेहनन्तथा ।
रेचनं कर्षणं प्रोक्तं स्नेहनं बृंहणं मतम् ॥
कफपित्तानिलध्वंसे पूर्व्वमध्यापराह्णके ।
दिनस्य गृह्यते नस्यं रात्रावप्युत्कटे गदे ॥
नस्यं अनेहोऽन्नभक्ते दुर्दिने चापि तर्पणे ।
तथा नवप्रतिश्यायी गर्भिणी गरदूषितः ॥
अजीर्णी दत्तवस्तिश्च पीतस्नेहोदकासवः ।
क्रुद्धः शोकाभिभूतश्च तृषार्त्तो वृद्धबालकौ ॥
वेगावरोधी श्रान्तश्च स्नातुकामश्च वर्ज्जयेत् ।
अष्टवर्षस्य बालस्य नस्यकर्म्म समाचरेत् ॥
अशीतिवर्षादूर्द्ध्वञ्च नावनं नैव दीयते ।
अथ रेचनं नस्यं प्राज्ञः तैलैः सुतीक्ष्णकैः ॥
तीक्ष्णभेषजसिद्धैर्वा स्नेहैः क्वाथैः रसैस्तथा ।
नासिकारन्ध्रयोरष्टौ षट् चत्वारश्च बिन्दवः ॥
प्रत्येकं रेचने योज्या मुख्यमध्यान्त्यमात्रया ।
नस्यकर्म्मणि दातव्यं प्रायेण तीक्ष्णमौषधम् ॥
चिक्कुः स्यादर्द्धमात्रस्तु माषकः सैन्धवं मतम् ।
क्षीरं चैवाष्टमात्रं स्यात् पानीयञ्च त्रिकार्षिकम् ॥
कार्षिकं मधुरं द्रव्यं नस्यकर्म्मणि योजयेत् ॥
अवपीडः प्रधमनं द्वौ भेदावपरौ स्मृतौ ।
शिरोविरेचनस्थाने तौ तु देयौ यथायथम् ॥
कल्कीकृतादौषधाद्यः पीडितो निःसृतो रसः ।
सोऽवपीडः समुद्दिष्टस्तीक्ष्णद्रव्यसमुद्भवः ॥
षडङ्गुला द्विवक्त्रा या नाडी चूर्णन्तया धमेत् ।
तीव्रद्रव्यं मितं वक्त्रवाते प्रधमनं हितम् ॥
कफरुद्धगते रोगे कफजे स्वरसंक्षये ।
अरोचके प्रतिश्याये शिरःशूले च पीनसे ॥
शोथापस्मारकुष्ठेषु नस्यं वैरेचनं हितम् ।
भीरुस्त्रीकृशबालानां नस्यं स्नेहेन शस्यते ॥
गलरोगे सन्निपाते निद्रायां विषमज्वरे ।
मनोविकारे क्रिमिषु युज्यते चावपीडनम् ॥
अत्यन्तोत्कटदोषेषु विसंज्ञेषु च दीयते ।
चूर्णं प्रधमनं धीरैस्तद्धि तीक्ष्णतरं यतः ॥
नस्यं स्याद्गुडशुण्ठीभ्यां पिप्पल्या सैन्धवेन च ।
जलपिष्टेन तेनाशु कण्ठनासाशिरोगदाः ॥
हनुमन्यागलोद्भूता नश्यन्ति भुजपृष्ठजाः ।
मधूकसारकृष्णाभ्यां वचा मरिचसैन्धवैः ॥
नस्यं कोष्णाम्बुभिः पिष्टं दद्यात् संज्ञाप्रबोधनम् ।
अपस्मारे तथोन्मादे सन्निपातेऽपतन्त्रके ॥"
इति मध्यखण्डे विंशोऽध्याये शार्ङ्गधरेणोक्तम् ॥
"नस्यकर्म्म यथाकालं यो यथोक्तं निषेवते ।
न तस्य चक्षुर्न घ्राणं न श्रोत्रमुपहन्यते ॥
न स्युः श्वेता न कपिलाः केशाः श्मश्रूणि वा पुनः ।
न च केशाः प्रलुप्यन्ते वर्द्धन्ते च विशेषतः ।
मन्यास्तम्भः शिरःशूलमर्द्दितं हनुसंग्रहः ।
पीनसार्द्धावभेदौ च शिरःकम्पश्च शाम्यति ।
सिराः शिरःकपालानां सन्धयः स्नायुकण्डराः ।
नावनप्रीणिताश्चास्य लभन्तेऽभ्यधिकं बलम् ॥
मुखं प्रसन्नोपचितं स्वरः स्निग्धः स्थिरो महान् ।
सर्व्वेन्द्रियाणां वैमल्यं बलं भवति चाधिकम् ॥
न चास्य रोगाः सहसा प्रभवन्त्यूर्द्ध्वजत्रुजाः ।
जीर्य्यतश्चोत्तमाङ्गे च जरा न लभते बलम् ॥"
इति चरके सूत्रस्थाने पञ्चमेऽध्याये ॥
"औषधमौषधसिद्धो वा स्नेहो वा नासिकाभ्यां दीयत इति नस्यं तद्द्विविधं शिरोविरेचनं स्नेहनञ्च । तद्द्विविधमपि पञ्चधा । तद्यथा । नस्यं शिरोविरेचनं प्रतिमर्शोऽवपीडः प्रधमनञ्च । तेषु नस्यं प्रधानं शिरोविरेचनञ्च नस्यविकल्पः प्रतिमर्शः शिरोविरेचनविकल्पोऽवपीडः प्रधमनञ्च । ततो नस्यशब्दः पञ्चधा नियतः । तत्र यः स्नेहनार्थं शून्यशिरसां ग्रीवास्कन्धोरसाञ्च बलजननार्थं दृष्टिप्रसादजननार्थं वा स्नेहो विधीयते तस्मिन् वैशेषिको नस्यशब्दः । तत्तु नस्यं एवं वाताभिभूते शिरसि दन्तकेशश्मश्रुप्रपातदारुणकर्णशूलकर्णक्ष्वेडतिमिरस्वरोपघातनासारोगास्यशोषावबाहुकाकालजवलीपलितप्रादुर्भावदारुणप्रबोधेषु वातपैत्तिकेषु मुखरोगेष्वन्येषु च वातपित्तहरद्रव्यसिद्धेन स्नेहेनेति ॥"
"तत्रेन द्विविधमप्युभयतोऽह्नकाले पूर्व्वाह्णे श्लेष्मरोगिणां मध्याह्ने पित्तरोगिणामपराह्णे वातरोगिणाम् ॥"
इति सुश्रुते चिकित्सितस्थाने ४ अध्याये ॥)
नासायां हिते तत्सम्बन्धिनि च त्रि । प्रघने, पुं । इति संक्षिप्तसारव्याकरणम् ॥

नस्या, स्त्री, (नासिकायै हिता । नासिका + "शरीरावयवाद्यत् ।" ५ । १ । ६ । इति यत् ततो नसादेशः ।) नासिका । यथा,—
"घ्राणं गन्धवहा घोणा नासा च नासिका ॥"
इति भरतधृतवाचस्पतिः ॥
(नासाग्रच्छिद्रम् । इति कश्चित् ।)

नस्योतः, पुं, (नस्यया नासारज्ज्वा ऊतः ।) नस्तितः । इत्यमरः । २ । ९ । ६३ ॥ (यथा, महाभारते । ३ । ३ । २६ ।
"मणिः सूत्र इव प्रोतो नस्योत इव गोवृषः ॥")

नहि, अ, निषेधः । (यथा —
"इह सम्बा दूरादुपगमे हन्त मलयात्
तदङ्गे त्वद्देहे विनयवति । नेष्यामि रजनीम् ।
समीरेणोत्क्रेय नवकुसुमिता चूतलतिका
धुनाना मूर्द्धानं नहि नहि नहीत्येव कुरुते ॥"
इत्युद्भटः

न्मात्र । तत्पर्य्यायः । अ च मी १ च ४ । इत्यमरः । अस ५ अना ६ ना ७ । इति भरतः ॥ (यथा महाभारते । ४ । ५४ । ११ ।
"नहि विद्मो गतिं तेषां वाम हि नरधाम ॥")

नहुष, पुं (नह्यते इति । नह + "पुंषिमिषिकलिभ्य उषच ।" उणां । ४ । ७५ । इति कर्म्मणि वा उषच ।) नागभेदः । (यथा, महाभारते । १ । ३५ । ८ ।
"नागः कर्कोटकश्चैव शङ्खो वालशिखस्तथा । निष्टानको हेमगुहो नहुषः पिङ्गलस्तथा ॥")
चन्द्रवंशीयराजविशेषः । इति मेदिनी । षे, २८ ॥ स च पुरूरवसो पौत्रः आयुषः सुतः । इति पुराणम् ॥ (अयं हि अगस्त्यशापात् अजगरत्वमापन्नो वनमध्ये बहुकालं स्थितवान् तत्र कदाचित् भीमं प्रगृह्य युधिष्ठिरात् शापमुक्तः । एतद्विवरणं यथा, महाभारते । ३ । १८१ । ३३—३५ ।
"अहं हि दिवि दिव्येन विमानेन चरन् पुरा ।
अभिमानेन मत्तः सन् कञ्चिन्नान्यमचिन्तयम् ॥
ब्रह्मर्षिदेवगन्धर्व्वयक्षराक्षसपन्नगाः
करान्मम प्रयच्छन्ति सर्व्वे त्रैलोक्यवासिनः ॥
चक्षुषा यं प्रपश्यामि प्राणिनं पृथिवीपते ।
तस्य तेजो हराम्याशु तद्धि दृष्टेर्बलं मम ॥
ब्रह्मर्षीणां सहस्रं हि उवाह शिविकां मम ।
स मामपनयो राजन् ! भ्रंशयामास वै श्रियः ॥
तत्र ह्यगस्त्यः पादेन वहन् स्पृष्टो मया मुनिः ।
अगस्त्येन ततोऽस्म्युक्तो ध्वंस सर्पेति वै रुषा ॥
ततस्तस्माद्विमानाग्र्यात् प्रच्युतश्च्युतभूषणः ।
प्रपतन् बुबुधेऽऽत्मानं व्यालीभूतमधोमुखम् ॥
अयाचं तमहं विप्रं शापस्यान्तो भवेदिति ।
प्रमादात् सम्प्रमूढस्य भगवन् ! क्षन्तुमर्हसि ॥
ततः स मामुवाचेदं प्रपतन्तं कृपान्वितः ।
युधिष्ठिरो धर्म्मराजः शापात्त्वां मोक्षयिष्यति ॥
अभिमानस्य घोरस्य पापस्य च नराधिप ! ।
फले क्षीणे महाराज ! फलं पुण्यमवाप्स्यसि ॥
ततो मे विस्मयो जातस्तद्दृष्ट्वा तपसो बलम् ।
ब्रह्म च ब्राह्मणत्वञ्च येन त्वाहमचूचुदम् ॥
सत्यं दमस्तपो दानमहिंसा धर्म्मनित्यता ।
साधकानि सदा पुंसां न जातिर्न कुलं नृप ! ॥
अरिष्ट एष ते भ्राता भीमसेनो महाबलः ।
स्वस्ति तेऽस्तु महाराज ! गमिष्यामि दिवं पुनः ॥
वैशम्पायन उवाच ।
इत्युक्त्वाजगरं देहं त्यक्त्वा स नहुषो नृपः ।
दिव्यं वपुः समास्थाय गतस्त्रिदिवमेव हि ॥")
(नह्यति बध्नाति भूतानि मायया । विष्णुः । यथा, महाभारते । १३ । १४९ । ४७ ।
"इष्टो विशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः ॥")

नहुषाख्या स्त्री, (नहुष आख्या यस्याः ।) तगरपुष्पम् । इति राजनिर्घण्टः ॥

नहुषात्मज पुं, (नहुषस्य आत्मजः ।) ययाति राजा । इति पुराणम् ॥ (ययातिशब्देऽपि दृश्यते । तथाहि महाभारते । १ । ७८ । १३ ।
"अथ तं देवयानीतो ययातिर्नहुषात्मजः ॥")

ना, व (नह्य बध्यते + बाहुलकात् डा ।) नहि । अभावः । इत्यमरटीकायां भरतः ॥

ना, [न] पुं, (नयति नीयते वा । नी प्रापणे + "नयतेर्डिच ।" उणां २ । १ । इति ऋ प्रत्ययः । स च डित् ।) पुरुषः । इत्यमरः । २ । ६ । १ ॥ (यथा, माघे । २ । ४२ ।
"विधाय वैरं सामर्षे नरोऽरौ य उदासते ।
प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् ॥")

नाक, पुं, (न कं सुखमिति अकं दुःखम् । तन्नास्त्य-स्मिन् ।) स्वर्गः । इत्यमरः । १ । १ । ६ ॥ (यथा, भट्टिः । १ । ४ ।
"धर्म्मार्थिभ्यो नाकसदो वरेण्यः ॥"
नभः । इति निघण्टुः । १ । ४ ॥ यथा महाभारते । १ । १७२ । ६ ।
"स एष दिवि धिष्ण्येन नाकं व्याप्नोति तेजसा ॥"
स्त्री, अप्सरोविशेषः । यथा, महाभारते । ६ । ८६ । ४ ।
"काञ्चनीकस्तुल्य नाकमप्सरसां तथा ।
पर्व्वतं नाकं घोरमाक्रम्योरुकमदमम् ॥
एतेऽपि सर्व्व एव मम यान्ति भावना ॥"
क्षत्त्रियजातिविशेषः । यथा, वायुपुराणे ।
"नव नाकास्तु भोक्ष्यन्ति पुरीं चम्पावतीं नृपाः ॥")

नाकनाथ, पुं, (नाकस्य स्वर्गस्य नाथः ।) इन्द्रः । इति त्रिकाण्डशेषः ॥

नाकनायक पुं (नाकस्य नायकः ।) इन्द्रः । यथा, नैषधे ५ सर्गे ।
"स ययौ विधिनाप्यगाधं
नाकनायकसङ्केतमसाय ॥"

नाकनायकपुरोहित पुं, (नाकनायकस्य इन्द्रस्य पुरोहितः ।) बृहस्पतिः । यथा,—
"शौर्य्यमानबहुवर्द्धितो
नाकनायकपुरोहित शुभ ॥"
इति ज्योतिस्तत्त्वम् ॥

नाकी [न्] पुं, (नाकः स्वर्गो वासस्थानत्वेना-स्त्यस्येति । नाक + इनि ।) देवता । इति हेमचन्द्रः ॥ (यथा रघुवंशे । ८ ।
"देवतार्थं नाकिनो भुवि भूत्वा लोके पुरे भोगिनाम् ॥")

नाकु पुं, (नमतीति । नम + "नमेः कुः" इति उः प्रत्ययः ककार आगमश्च ।" उणां १ । १८ । इति उः प्रत्ययः ककार आगमश्च ।) वल्मीकः । इत्यमरः । २ । १ । १४ ॥ मुनिविशेषः । पर्व्वतः । इति मेदिनी के, २७ ॥

नाकुल, पुं (नकुलस्य गोत्रापत्यम् । नकुल + "तस्यापत्यम् ।" ४ । १ । ९२ । इत्यण् ।) सहदेवः ।) नकुलपुत्रः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । १ । ९० । ८६ ।
"सुतरां कुञ्जवाचैव स्तुतायां नह नाकुले ।
नकुलः शतानीकं नाम पुत्रं व्यजायत ॥"
तत्पर्य्यायः, स्त्री । यथा, कूर्म्मपुराणे ।
"इयं धर्म्मोऽपि यो राज्ञो नाकुलेन सुराणीका ।
मथारं मोक्षमाप्नोति कैलासे दिविनि ॥
नामाय नाकुलं नाम भैरवं पूर्ब्बपश्चिमम् ।
मथराय भानुमत सभाजाति यदृच्छ ॥"
नकुलस्येदम् । तस्येदमित्यण् ।) नकुलसम्बन्धिनि ॥ (न आकुलः इति विग्रहे । अनाकुलः ॥)

नाकुली स्त्री, (नकुलेन इष्टा सेविता वा । नकुल + अण् + ङीप् ।) कुक्कुटीकन्दः । रास्ना । चविका । इति मेदिनी । ले, १०१ ॥ यवतिक्ता । श्वेतकन्द-कारी । सर्पविशेषः । नाग इति भाषा ॥ तत्पर्य्यायः । सपाक्षी १ सुगन्धा २ रस-पत्रिका ३ ईश्वरी ४ नागगन्धा ५ अहिभुक् ६ सरमा ७ सर्पादनी ८ व्याघ्रगन्धा ९ । अस्य गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । विषदोषादिविषनाशित्वञ्च । इति राजनिर्घण्टः ॥

नाक्षत्र, स्त्री (नक्षत्रस्येदमिति । नक्षत्र + "तस्ये-दम् ।" ४ । ३ । १२० । इति अण् ।) नक्षत्र-सम्बन्धि । (यथा, धर्म्मविष्णुः । ५ । ११ ।
"भगणभ्रमण दिनम् नाक्षत्रं दिनमुच्यते ।
नक्षत्राणां मासस्तु त्रिंशता परिकीर्त्तितः ॥")

नाक्षत्रिक पुं । स च द्विविधः । सप्तविंशति-नक्षत्रात्मक एकः । यथा, विष्णुधर्म्मोत्तरे ।
"नक्षत्रचारमसमाधि चैको
मासेन कुर्व्वाद्भसमाप्नुवन्नास ॥"
सप्तविंशतिनक्षत्रात्मकेन ।
"चन्द्रोऽर्द्धपरिवर्त्तेन भानां सङ्घ चीयते ।
सप्तविंशतिनक्षत्राणां नाक्षत्र । अन्य
प्रयोगेन नक्षत्रचारो । अभ्यन्तरे इतिमैन
नारायणो मनोद्भुतहारे च । यथा, योगे-
श्वराणाम् ।
"नाक्षत्रमासे यदि कार्य्यं भावो भौमाद्यभेदतो ।
स भाव कर्म्मणो नाम मनोद्भूतपत्रपतः ॥"
द्वितीय मलिदृक्ताक्षत्रपदप्रसङ्गे ज्ञातव्यम्
नियमायाः । यथा, सूर्य्यसिद्धान्ते । १ । १२ ।
"नाक्षत्रस्तु नक्षत्रहोरात्रं प्रचक्ष्यते ।
तत्त्रिंशता भवेन्मासः सावनोऽर्कोदयैस्तथा ॥"
द्वितीयस्य प्रयोगे व्याकरणवाक्यम् । यथा,
"प्रार्थयेत् सुतं नाक्षत्रेऽपर्वे चन्द्रमाद्दिवम् ॥"
इति मलमासतत्त्वम् ॥

नाक्षत्रिक, पुं, (नक्षत्राणामयम् । नक्षत्र + ठञ् ।)
नाक्षत्रमासः । यथा, ज्योतिःसारसंग्रहे ।
"नक्षत्रमासस्यैव नाक्षत्रिक उदाहृतः ॥"

नाक्षत्रिकी, स्त्री (नाक्षत्रिक + ङीप् ।) नक्षत्र दशा । यथा ।"कल्यौ नाक्षत्रिकी दशा ।" इति ज्योतिषम् । अस्या विवरणं महादशाशब्दे द्रष्टव्यम् ।
अन्त्यदशाशब्देऽपि ॥

नाग, स्त्री, (नगे पर्व्वते भवम् । नग + अण् ।)
रङ्गम् । सीसकम् । (अस्य पर्य्यायो यथा —
"नागं सङ्गसकं सीसं सिन्दूरेपि गवलम् ॥"
इति वैद्यकरत्नमालायाम् ॥)
करणविशेषः । इति मेदिनी । गे, ८ । तत्र
करणशब्दे द्रष्टव्यम् । यथा,—

"नागोद्भवो नागधनाभिलाषी
मन्दोऽतिकालो निरतो कुशीलः ।
क्रोधाग्निसन्तापितबन्धुवर्गो
भवेदिह स्यात् किल रङ्गभूमौ ॥"
इति कोष्ठीप्रदीपः ॥

रङ्गसीसकार्थे क्वचित् पुंलिङ्गोऽपि दृश्यते । पाक-शोधयोस्तयोर्दोषो यथा —
"पाकहीनौ नागवङ्गौ कुष्ठगुल्मरुजाकरौ ।
मेहपाण्डुकरौ वातकफश्लेष्मकरौ पुनः ॥"
तयोर्मारणं यथा —
"अश्वत्थचिञ्चात्वक्चूर्णं चतुर्थांशेन निःक्षिपेत् ।
खर्परे विद्रुते नागे लौहदर्व्या च चालयेत् ॥
यामैकेन भवेद्भस्म तत्तुल्याञ्च मनःशिलाम् ।
काञ्जिकेन द्वयं पिष्ट्वा पचेद्गजपुटेन च ॥
स्वाङ्गशीतं पुनः पिष्ट्वा शिलया काञ्जिकेन च ।
पुनः पुटेच्छरावाभ्यामेवं षष्टिः पुटैर्म्रियेत् ॥"
नागः सिन्दूरवर्णाभो म्रियते सर्वकार्यकृत् ।
सतिक्तमधुरो नागो स्मृतो भवति भक्षणात् ॥
आयुःकीर्त्तिं वीर्य्यवृद्धिं करोति सेवनाद् यदा ।
रोगान् हन्ति मृतो नागो वङ्गवद्गुणकारकः ॥"
इति सुखबोधः ॥

नागः, पुं, (नगे भवः । नग+अण् । यद्वा, दंश यस्मात् विषाग्निनेति । दंश+"दंशेर्नो लोपो नश्च ।" उणा० ५ । ६१ । ग । अस्य लोपः । दस्य न । न ञ्जुन्तात् नकारस्य ना ।) पन्नगः । (यथा विष्णुपुराणे । १ । ८ । ८६ ।
"नयश्च विष नागाः क्षीरोदश्च ह्रदास्थितम् ॥")
हस्ती । (यथा, रघुः । ४ । ८३ ।
'भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यः ॥')
क्रूराचारे । मेघः । नागकेशरः । पुन्नागः । नागदन्तकः । मुस्तकः । देहानिलभेदः ।
"उद्गारे नाग इत्युक्तो नीलजीमूतसन्निभः ॥"
इति सारदातिलकटीका ॥
उत्तरपदस्थिते श्रेष्ठः । इति मेदिनी । गे १० ॥ (सीसकम् । अस्योत्पत्तिर्नामानि गुणाश्च । यथा भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"दृष्ट्वा भोगिसुतां रम्यां वासुकिस्तु मुमोच यत् ।
वीर्य्यं जातस्ततो नागः सर्व्वरोगापहो नृणाम् ॥"
"नागस्तु नागशततुल्यबलं ददाति
व्याधिं विनाशयति जीवनमातनोति ।
वह्निं प्रदीपयति कामबलं करोति
मृत्युञ्च नाशयति सन्ततसेवितः सः ॥
पारदेव शीघ्रं किलवङ्गनागौ
कुष्ठानि गुल्मांश्च तथातिकष्टान् ।
मधुप्रमेहानिलसादशोफ
भगन्दरादीन् कुरुतः प्रयुक्तौ ॥")
ताम्बूली । देशभेदः । इति नानार्थटीकायां भरतः ॥ पर्व्वतविशेषः । (यथा विष्णुपुराणे । २ । २ । २८ ।
"शङ्खकूटोऽथ ऋषभो हंसो नागस्तथापरः ।
कालञ्जराद्याश्च तथा उत्तरे केशराचलाः ॥")
नगे गिरौ वृक्षादिषु वा भवः । न अचर-तीति अगः न अगाः नागाः इति वा । सतक्ष-कर्कोटप्रभृतिर्देवयोनिर्मनुष्याकारः पश्चात्कुण्डल-युक्तः । इति भरतः ॥ तत्पर्य्यायः । काद्रवेयः । २ । इत्यमरः । १ । ८ । ४ ॥ नागोत्पत्तिर्यथा,—
"ब्रह्मणा मनसा सृष्टो मरीचिरिति कारणम् ।
प्रथमं मनसा ध्यातस्तस्य पुत्त्रस्तु काश्यपः ॥
तस्य दाक्षायणी भार्य्या कद्रुर्नाम शुचिस्मिता ।
मारीचो जनयामास तस्यां पुत्त्रान् महाबलान् ॥
अनन्तं वासुकिञ्चैव कम्बलञ्च महाबलम् ।
कर्कोटकञ्च राजेन्द्र । पद्मं चान्यं सरीसृपम् ॥
महापद्मं तथा शङ्खं कुलिकञ्चापराजितम् ।
एते कश्यपदायादाः प्रधानाः परिकीर्त्तिताः ।
एतेषान्तु प्रसूत्या तु इदमापूरितं जगत् ॥
कुटिलाः क्रूरकर्म्माणस्तीक्ष्णास्योत्कविषोल्बणाः ।
दृष्ट्वा दहन्ति मनुजान् भस्म कुर्व्व क्षणाद्ध्रुवम् ॥
प्रजागामी यथा सर्पो मनुष्याणां नराधिप ।
अहन्यहनि जायेत क्षयः परमदारुणः ॥
आत्मनस्तु क्षयं दृष्ट्वा प्रजाः सर्व्वाः समन्ततः ।
जग्मुः शरण्यं शरणं परमं परमेश्वरम् ॥
इमं चैवार्थमुद्दिश्य प्रजाः सर्व्वा महीपते ।
ऊचुः कमलजं देवं पुराणं ब्रह्मसञ्ज्ञितम् ॥
देवा ऊचुः ।
देव देवेश लोकानां प्रभवे परमेश्वर ।
त्राहि नस्तीक्ष्णदंष्ट्रेभ्यो भुजगानां महात्मनाम् ॥
अहन्यहनि वै देव । पश्यन्त्युरगा दृशा ।
मनुष्यं पशुरूपं वा तत् सर्व्वं भस्मसाद्भवेत् ॥
त्वया सृष्टिः कृता देव क्षीयते सा भुजङ्गमैः ।
एतज्ज्ञात्वा तु यद्युक्तं तत् कुरुष्व महामते ॥
ब्रह्मोवाच ।
अहं रक्षां विधास्यामि भवतीनां न संशयः ।
व्रजध्वं स्वानि धिष्ण्यानि प्रजापालाः सताध्वसाः ॥
एवमुक्ता प्रजास्तेन ब्रह्मणाव्यक्तजन्मना ।
आगतासु प्रजास्वाशु आहूय भुजङ्गमान् ॥
शशाप परमक्रुद्धो वासुकिप्रमुखांस्तदा ।
ब्रह्मोवाच ।
यतो मत्प्रभवानित्थं क्षयं नयत मानुषान् ॥
भवान्तरे तथान्यस्मिन् मातुः शापात् सुदारुणात् ।
भविता वः क्षयो घोरो नूनं स्वायम्भुवान्तरे ॥
एवमुक्तास्तु वेपन्तो ब्रह्मणा भुजगोत्तमाः ।
निपत्य पादयोस्तस्य इदमूचुर्महात्मनः ॥
नागा ऊचुः ।
भगवन् । कुटिला जातिरस्माकं भवता कृता ।
विषोल्वणत्वं क्रूरत्वं दृग्दशत्वञ्च वेधसा ॥
अस्माभिस्त्वया देव इदानीं प्रशमय प्रभो ॥
ब्रह्मोवाच ।
यदि नाम मया सृष्टा भवन्तः कुटिलाशयाः ।
तत् किं मनुष्यानित्थं भक्षयध्वं गतव्यथाः ॥
नागा ऊचुः ।
मर्य्यादां कुरु देवेश । स्थानञ्चैव पृथक् पृथक् ।
नागानां वचनं श्रुत्वा देवो वचनमब्रवीत् ॥
अहं करोमि वो नागाः समयं मनुजैः सह ।
तदेकमनसः सर्व्वे शृणुध्वं मम शासनम् ॥
पातालं वितलञ्चैव सुतलाख्यं तलात्मकम् ।
दत्तं वै वसुकामानां गृहं तत्र गमिष्यथ ॥
तत्र भोगान् बहुविधान् भुञ्जाना मम शासनात् ।
तिष्ठध्वं सप्तमं यावद्रात्र्यन्तगे पुनः पुनः ॥
ततो वैवस्वतस्यादौ काश्यपेया भविष्यथ ।
दायादाः सर्व्वदेवानां सुपर्णस्य च धीमतः ॥
तदा प्रसूतिः सर्व्वा भोक्ष्यते चित्रभानुना ।
भवतां नैव दोषोऽयं भविष्यति न संशयः ॥
ये वै क्रूरा भोगिनो दुर्विनीता
स्तेषामन्तो भविता नान्यथैतत् ।
काले प्राप्ते भक्षयध्वं दशध्वं
तथा परान् चापकृतो मनुष्यान् ॥
मन्त्रौषधैर्गारुडमण्डलैश्च
बद्धैर्ये मानवा ये चरन्ति ।
तेषां भीतैर्वर्त्तितव्यं न चान्य
चिन्त्यं कार्य्यं चान्यथा वो विनाशः ॥
इतीरिते ब्रह्मणा ते भुजङ्गा
जग्मुः स्थानं ह्यात्मनायं हि सर्व्वे ।
तस्थुर्भोगान् भुञ्जमानाः समस्तान्
रसातले लीलया संस्थितास्ते ॥
एवं शापं ते तु लब्ध्वा प्रसादञ्च चतुर्मुखात् ।
तस्थुः पातालनिलये दुःखितेनान्तरात्मना ॥
एतत् सर्व्वञ्च पञ्चम्यां तेषां जातं महात्मनाम् ।
अतस्त्वियं तिथिर्धन्या सर्व्वपापहरा शुभा ॥
एतस्यां संयतो यस्तु अम्लन्तु परिवर्ज्जयेत् ।
क्षीरेण स्नापयेन्नागांस्तस्य यास्यन्ति मित्रताम् ॥"
इति वराहपुराणम् ॥

एषां शिवभूषणप्रमाणं यथा,—
"वासुक्याद्याश्च ये सर्पा यथास्थानञ्च ते हरन् ।
भवपाशकृतस्य शिरोबाहादिषु द्रुतम् ॥"
इति कालिकापुराणे शिवविवाहे १८ अः ॥
कम्बलाश्वतरनागयोः सरस्वत्या गानपरागाप्ति-विवरणं यथा,—
"एवं स्तुता तदा देवी विष्णोर्जिह्वा सरस्वती ।
प्रत्युवाच महात्मानं नागमश्वतरं ततः ॥
सरस्वत्युवाच ।
वरन्ते कम्बलभ्रातः ! प्रयच्छाम्युरगाधिप ! ।
तदुच्यतां प्रदास्यामि यत्ते मनसि वर्त्तते ॥
अश्वतर उवाच ।
सहायं देहि देवि ! त्वं पूर्व्वं कम्बलमेव मे ।
समस्तस्वरसम्बन्धयोः सम्प्रयच्छ च ॥
सरस्वत्युवाच ।
सप्त स्वरा ग्रामरागाः सप्त पन्नगसत्तम ! ।
गीतकानि च सप्तैव तावतीश्चापि मूर्च्छनाः ॥
तानाश्चैकोनपञ्चाशत्तथा ग्रामत्रयञ्च यत् ।
एतत् सर्व्वं भवान् गाता कम्बलश्चैव ते सखा ॥
ज्ञास्यते मत्प्रसादेन भुजङ्गेन्द्र परन्तप ।
चतुर्विधं पदं तालं त्रिप्रकारं लयत्रयम् ॥
यतित्रयं तथा तोद्यं मया दत्तं चतुर्विधम् ।
एतद्भवान् मत्प्रसादात् पन्नगेन्द्राद्य च यत् ॥
अस्यान्तर्गतमायत्तं स्वरव्यञ्जनयोश्च यत् ।
तदशेषं मया दत्तं भवतः कम्बलस्य च ।

यथा नागस्य भूर्लोके मातावै पाति यत्नत ॥
पतिव्रतायाः श्रवणं च सर्वस्यात्र भविष्यति ।
मनसा देवलोके च भूर्लोके चैव यत्नतः ॥
दृष्टा या सदा देवी सर्वसिद्धा सरस्वती ।
चामामन्त्रेण सद्यो नागस्य कामचेष्टया ॥"

इति मार्कण्डेयपुराणम् ॥

नागियर्षशब्दागमने दोषो यथा —
"नव यत्नाताम् सर्वांश्च हन्ति यो नागवाधम् ।
अष्टकूपान्तर्गतं पाप भविता तस्य निश्चितम् ॥
मनसा दम्पतिचित्ते यः करोति दुःखनाशकम् ।
द्विगुण ब्रह्महत्याया भविता तस्य निश्चितम् ॥
नन्दीयाश्वतिरुदेवा पाप तथा सुदारुणम् ।
बलात्मृगयमी दानिभविता तस्य निश्चितम् ॥
एवं सर्वमपि कालधर्मं यास्यति मद्विषा ॥"
इति ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे ११८ अः ॥
वास्तुनागशुद्धिर्यथा —

"वास्तुप्रमाणेन तु नागदेव
नामेन दिशि सन्तु निवासकानाम् ।
विभिन्नु मासे पविरेव पात्र
तं वास्तुनागं प्रवदन्ति सिद्धाः ॥
भाद्रादिके वामदक्षिणशिरा स्यात्
मार्गशीर्षेषु विष्णु माघमार्गे ।,
प्रकाशशिरा स्यात् अनु नागनाडी
ज्येष्ठादिकैर्वैरशिरा च नागः ॥

नाडिं याते भवेन्मृत्युः पृष्ठे स्यात् पुत्रभार्ययोः ।
जयनैःपेच्छं शिरस्तु धर्मसमस्ततोदरे ॥
अत नागोदरगुह्ये वै पीडा संवत्सरादिके ।
विचार्य पूर्वतो दीर्घं कुर्यात्तां सौम्यदक्षिणम् ॥
कश्चिद्विधिभागी तु वरमेक स्व भुवा ।
न कोपिद्ध यत्र कुर्यात्सामाकर्षं नापि साधनं ॥
काष्ठे च प्रदत्तानि स्थाप्याः दिपुभय भवेत् ।
मध्ये च धर्मदात् स्थापनादिनदर्शयेत् ॥"

इति ज्योतिस्तत्त्वम् ॥

नागकन्द, पुं (नाग इव कन्द मूल यस्य । इव अकालादेव सदाममम् ।) हस्तिकन्द । इति राजनिर्घण्टः ॥

नागकर्ण, पुं, (नागकर्ण इव आकृतिः पर्णं यस्य । अच् ।) रक्तैरण्ड । इति राजनिर्घण्टः ॥

नागकिञ्जल्क, क्ली, (नागस्येव किञ्जल्को यस्य ।) नागकेशरकुसुमम् । इति राजनिर्घण्टः ॥

नागकुमारिका स्त्री (नागस्य कुमारीव । स्वार्थे कन् टाप् पूर्वह्रस्वश्च ।) गुडूची । मञ्जिष्ठा । इति राजनिर्घण्टः ॥

नागकेशर पुं (नागस्येव केशरोऽस्य ।) नाग केशरवृक्ष । इति भरत ॥ (यथा, चरके सिद्धिस्थाने १० अध्याये ।
"नागकेशरक एला पद्मकं चन्दनैस्तथा ॥")

नागकेसर, पुं, (नागस्येव केसरो यस्य ।) पुष्पवृक्षविशेष । नागेश्वर इति भाषा । तत्पर्यायः । चाम्पेयः केसरः नागकञ्जल्कः । इत्यमरः । २।४।६६ ॥ नागः ५ काञ्चनाह्वयः ६ । इति भरते । क्लिञ्जलक ७ नागकिञ्जल्क ८ नागाह्वय ९ हेमः १२ स्थिर १३ कपिकेसर १४ सुवर्णकेसर १० । अस्य गुणाः । कषायत्वम् । लघुत्वम् । तिक्तत्वम् । कफपित्तविषनाशकत्वम् दुर्गन्धिदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ तस्य गुणा ।

"नागपुष्पः स्मृतो नाग केसरो नागकेसरः ।
चाम्पेयो नागकिञ्जल्कः कथितः काञ्चनाह्वयः ॥
नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम् ।
ज्वरकण्डूतृषास्वेदच्छर्दिहृल्लासनाशनम् ॥
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥"
विशालतर्ज नागकेसरपुष्पं चतुष्कालतर्ज भवति यथा, —
"सर्वेतादमकेसुपत्रैस्त्वसुगन्धिस्थितालकम् ।
नागकेसरसंयुक्तं चतुर्ज्जातकमुच्यते ।
तद्वद्धये रोचकं रूक्ष तीक्ष्णोष्णं मुखगन्धहृत् ।
लघु पित्ताग्निकृदवर्णं कफवातविषापहम् ॥"

इति भावप्रकाश ॥

नागगन्धा स्त्री, (नागस्य गन्ध इव गन्धो यस्या ।) नाकुलीकन्द । इति राजनिर्घण्टः ॥ (नाकुली शब्देऽस्या विवरणं ज्ञातव्यम् ॥)

नागगर्भ क्ली (नागः सीसकं गर्भो उत्पत्ति कारणं यस्य ।) सिन्दूरम् । इति राजनिर्घण्टः ॥

नागघ्नी, स्त्री (नागस्य धर्षणं हन्ति कारण पर्णं यस्या ।) नागदमनी । इति राजनिर्घण्टः ॥

नागज, क्ली, (नागात् सीसकात् जायते इति । जन + ड ।) सिन्दूरम् । इति राजनिर्घण्टः ॥ रङ्गम । इति हेमचन्द्रः । ४ । १०८ ॥ नाग जाते त्रि ॥

नागजिह्वा स्त्री, (नागस्य सर्पस्य जिह्वेव ।) सारिवा । अनन्तमूलम् । इति रत्नमाला ॥

नागजिह्विका, स्त्री, (नागस्य जिह्वेव रक्तवर्णा यस्या । कप् । टापि अत इत्वम् ।) मनःशिला । इत्यमरः । २ । ९ । १०८ ॥ (अस्या पर्याय ।
"मनःशिला मनोगुप्ता मनोज्ञा नागजिह्विका ।
नैपाली कुनटी गोला शिला दिव्यौषधि स्मृता ॥"

इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)

नागजीवन, क्ली, (नागः सीसकं जीवनं यस्य ।) वङ्गम । इति हेमचन्द्रः । ४ । १०८ ॥

नागदन्त पुं, (नागस्य गजस्य दन्त ।) हस्ति दन्त । (यथा, महाभारते । १२ । ९८ । १९ ।
"हैमं चर्म्म तथा नागदन्तावयवम् ॥"
नागस्य सर्पस्य दन्त इव अग्रमस्यास्तीति अच् ।) गृहात् निर्गतदारु । इति मेदिनी । ते ४ । ६ ॥ दोसिया इति खुटी इति च भाषा ॥

नागदन्तक, पुं (नागदन्त + स्वार्थे कन् ।) नाग दन्त । (नागदन्तेव कायति ॥ कै + क ।) भित्तिनिर्गतदारु । तत्पर्याय । नियूह ९ । इति जटाधरः ॥

नागदन्तिका, स्त्री, (नागस्य दन्त इव इ. मूलादिकाकृतिः यस्य । टाप् ।) वृश्चिकाली । इति रत्नमाला । विछुटी इति भाषा ॥

नागदन्ती, स्त्री, (नागस्य दन्त इव इ. प्रभावाकारे यस्याः । ङीष् ।) कुम्भा । श्वेतशिखा । इति मेदिनी । ते ४४ ॥ हातिशुण्डा इति भाषा । श्वेतस्य पर्याय । विदलाटे पर्णपुष्पी २ विषघ्नी ३ गुच्छपुष्पा ४ दमदनाख्या ५ कार्ष्णी ७ कामदूतिका ८ । इति रत्नमाला ॥ श्वेतपुष्पा ९ लघुपुष्पा १० विषघ्नी ११ नागस्फोता १२ विशालाक्षी १३ नागकर्णा १४ विषघ्ना १५ सर्पपुष्पी १६ शुक्लपुष्पी १७ सादृशा १८ प्रतदन्तिका १९ सितपुष्पी २० सङ्गदन्ती २१ मादिनी २२ । अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । वातकफगुल्मशूलोदरक्रिमिश्वासारोचकनाशित्वञ्च । इति राजनिर्घण्टः ॥

नागदमनी स्त्री, (नागा दम्यन्तेऽनयेति । दम + णिच् + ल्युट् + ङीप् ।) बृहत्पत्रविशेष । तत्पर्यायः । नागपु ९ नागदमी ३ हेमा ४ रक्तपुष्पा ५ नागधरी ६ मदनी ७ पुतदा ८ नुतदा ९ । अस्या गुणा । तिक्तत्वम् । उष्णत्वम् । कटुत्वम् । विषदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥ तस्या गुणाः ।
"विषघ्नी नागदमनी बला मोदा विषापहा ।
नागघ्नी नागपत्रा महायोगेश्वरीति च ॥
बला मोदा कर्णिका लघु निकषपाहरा ।
कुष्ठकण्डूत्रणान् हन्ति नागपैत्याश्च सर्वम ॥
सर्वान् दुःखप्रशोषक्ति च विद्यते देवी ।
सर्वं सर्वेच कुरुते प्रकारा शुभं यथा ॥"

इति भावप्रकाश ॥

नागदन्तोपम, क्ली, (नागदन्तस्य नागफलस्य उपमा यस्य ।) गन्धतृणम् । इति रत्नमाला ॥ (गन्ध शब्देऽस्य विवरणं ज्ञातव्यम् ॥)

नागदु, पुं (नागानां द्रुम ।) स्नुहीवृक्ष । इति शब्दचन्द्रिका । सिज इति भाषा ॥

नागनिर्यूह पुं, (नाग इव निर्यूहो नागदन्त ।) नागदन्तक । इति जटाधर ॥

नागपञ्चमी स्त्री (नागानां पूजनार्था पञ्चमी । मध्यपदलोपिसमास ।) श्रावणे शुक्ला पञ्चमी । तत्र मनसापूजा कर्त्तव्या । यथा —
"देवीपुराणे ।
'सुप्ते जनार्दने कृष्णे पञ्चम्यां भवनाङ्गने ।
पूजयेन्मनसादेवीं स्नुहीविटपसंस्थिताम् ॥
मनसापि सर्वे क्रोधा देवे सर्वेभ्यः शमम् ।
पूजनार्थं यथा यत्नं पञ्चम्यां च शुक्लके ॥
सर्वपापे विमुच्येत । पुत्रैश्च विवर्द्धते ।
देवीं इन्ति भयादीन् कर्त्तव्या ।
देवी सर्वत्र नागानां च व्यवदरात्रुक्षेण ।
यश्चपञ्चमी पूजयन्नागानन्यान् स्नाताः ॥

क्षीरं सर्पिस्तु नैवेद्यं देयं सर्पविषापहम् ॥
मनसाध्यानम्। यथा मत्स्यपुराणे।
'श्वेतामुक्तामहोर्मी प्रभवदवदनां पावकाभ्निं
यदाभ्यां
कृष्णाकुञ्चाहदारां मदचिततवसां सर्वदां सर्म
देव।
फेराक्षां मल्लिताङ्गीं कनकमणिमयैर्भूषणैस्तै
रमेशे-
वेन्द्रोऽर्कं नागमालामुरुकुचयुगलां भोगिनीं
कामरूपाम् ॥'
पुराणान्तरे।
'अनन्तो वासुकिः पद्मो महापद्मोऽथ तक्षक।
कुलीर कर्कटः शङ्खो ह्यष्टौ नागाः प्रकीर्तिताः ॥
शेषः पद्मो महापद्मः कुलिकः शङ्खपालकः।
वासुकिस्तक्षकश्चैव कालीयो मणिभद्रकः ॥
ऐरावतो धृतराष्ट्रः कर्कोटकधनञ्जयौ ॥
शारदेऽपि।
'अनन्तं वासुकिं शङ्खं पद्मं कम्बलमेव च।
तथा कर्कोटकं नागं धृतराष्ट्रञ्च शङ्खकम् ॥
कालीयं तक्षकञ्चापि पिङ्गलं मणिभद्रकम्।
यजेन्नागविताशाताम् दद्यात्तां दिवं व्रजेत् ॥'
अत्र च।
योऽसौ चानन्तरूपेण ब्रह्माण्डं सचराचरम्।
पुष्पवद्धारयेन्मूर्ध्नि तस्मै नित्यं नमो नमः ॥
इत्यनेन प्रथमपूजनं मत्स्यपुराणोक्तनागानां पूज
येत् ॥ रत्नाकरे।
'पिचुमर्दस्य पत्राणि पञ्चमीपयोदरे।
खादयापि तत्स्थीयाद् ब्राह्मणांश्चैव भोजयेत्।
पिचुमर्दस्य निम्बस्य ॥" इति तिथ्यादितत्त्वम् ॥
नागपत्रा, स्त्री, (नागदमन पत्रं यस्याः। टाप्।)
नागदमनी। इति भावप्रकाश ॥
नागपत्री, स्त्री, (नागवत् पत्रं यस्याः। ङीष्।)
लक्ष्मणा। इति राजनिर्घण्टः ॥
नागपद, पुं, (नागवत् पदे स्थानं यस्य।) षोडश-
रतिबन्धान्तर्गतद्वितीयबन्धः। तस्य लक्षणं
यथा,—
"नारी स्कन्धे यदा दत्त्वे चिपेल्लिङ्गं भगे लघु।
कामयेत् कामुको नारीं बन्धो नागपदो मतः ॥"
इति रतिमञ्जरी ॥
नागपाश, पुं, (नागपाश इव आकृतिरस्य
स्तीति। अच्।) वरुणास्त्रम्। (नागः पाश
इव।) वरुणायुधः। इति मेदिनी। शे, ४५ ॥
"पाशेऽयार्वणभागु नागपाश इति स्मृतः।
तत्पाद्यप्रियो स्यान्नागपाशमथापि वा ॥"
इत्यागमः ॥
"वैष्टित नागपाशेन भृकुटीभीषणाननम् ॥"
इति दुर्गापुराणोयदुर्गाध्यानम् ॥
नागपाशक, पुं, (नागपाश इव प्रतिकृतिः। "इवे
प्रतिकृतौ।" ५। ३। ९६। इति कन्। यद्वा
नागपाश इव कायतीति। कै+कः।) रति
बन्धविशेषः। तस्य लक्षणं यथा,—
"जङ्घाद्वयमध्यस्थौ करभ्यां धारयेत् कुचौ।
रमेत्तु मदितं कामी बन्धोऽयं नागपाशकः ॥"
इति रतिमञ्जरी ॥
नागपुर, क्ली, (नागनामकं पुरम्। शाकपार्थि-
वादिवत् समासः।) देशविशेषः। तद्विवरणं
यथा —
"जटाजूटात् समारोहं मेरोस्तकाञ्चनोद्गमम्।
देवैः परिवृता गङ्गा हिमकूटस्य पर्वतम् ॥
मन्दरञ्चैव कैलासं हिमवन्तञ्च पर्वतम्।
नागानामालयं रोधाय सलीलो नाम दानवः ॥
पार्श्वतः स्थितमास्थाय वर्णाश्रमात् प्रतीद्विषां।
ततो भगीरथो राजा आराधयामास कौशिकम् ॥
स तुष्टः प्रददौ नागं वाहनं स भगीरथः।
समारुह्यागमत्तत्र यत्र यद्वा भगीरथी ॥
तेन नागेन स दैत्यं विदार्य स सङ्गतः।
शतधा तं समाधाय गङ्गास्रोतस्ततो गतः ॥
महोगस्तं समायेद्य स पावनामसाह्वयम् ॥
तस्मात् याचटनाङ्गिका अभूत्नागपुरं परम् ॥"
इति वह्निपुराणे गङ्गावतरणनामाध्यायः ॥
नागपुष्प, पुं, (नागस्य हस्तिनो मदगन्धयुक्तं
पुष्पं यस्य।) पुन्नागवृक्षः। नागकेशरः।
(यथा महाभारते। ३। १५८। ४।
"पुन्नागैर्नागपुष्पैश्च लकुचैः पनसैस्तथा ॥")
चम्पकः। इति मेदिनी। पे, २५ ॥ (पुन्नाग
पुष्पे तु क्ली। तत्र गुणा यथा,—
"नागपुष्पं कषायोष्णं रूक्षं लघ्वामपाचनम्।
ज्वरकण्डूतृषास्वेदच्छर्दिहृल्लासनाशनम् ॥
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
नागपुष्पफला, स्त्री, (नागस्य नागकेशरस्येव पुष्प
फले यस्याः।) कूष्माण्डी। इति राजनिर्घण्टः ॥
नागपुष्पिका, स्त्री, (नागस्य पुष्पमिव पुष्प
यस्याः। कप्। टापि अत इत्वम्।) स्वर्ण
यूथी। इति राजनिर्घण्टः ॥
नागपुष्पी, स्त्री, (नागस्य नागकेशरस्य पुष्पमिव
पुष्पं यस्याः। ङीष्।) नागदमनी। इति भाव
प्रकाश। (पर्यायोऽस्या यथा, भावप्रकाशस्य
पूर्वखण्डे प्रथमे भागे।
"नागपुष्पी श्वेतपुष्पा नागिनी रामदूतिका ॥"
अस्या गुणा। यथा,—
"नागिनी रोचनी तिक्ता तीक्ष्णोष्णा कफपित्त
हृत् ॥")
नागफल, पुं, (नागस्य पुन्नागस्येव फलं यस्य।)
पटोलः। इति राजनिर्घण्टः ॥
नागबन्धु, पुं, (नागानां हस्तिनां बन्धुरिव प्रिय
त्वात्।) अश्वत्थवृक्षः। इति शब्दचन्द्रिका ॥
नागानां बान्धवश्च ॥
नागबल, पुं, (नागानामिव बलं यस्य।) भीम
सेनः। इति त्रिकाण्डशेषः ॥ (अस्य नाग-
बलप्राप्तिकथा। यथा, महाभारते। १। १२८।
६२—७।
"एवमुक्तस्तदा नागो वासुकिं प्रत्यभाषत।
यदि नागेन्द्र! तुष्टोऽसि किमस्य धनसञ्चये ॥
रसं पिबेत् कुमारोऽयं त्वयि प्रीते महाबल।
बलं नागसहस्रस्य यस्मिन् कुण्डे प्रतिष्ठितम् ॥
यावत् पिबति बालोऽयं तावदस्मै प्रदीयताम्।
एवमस्त्विति तं नागं वासुकिः प्रत्यभाषत ॥
ततो भीमस्तदा नागैः कृतस्वस्त्ययनः शुचिः।
प्राङ्मुखश्चोपविष्टः स रसं पिबति पाण्डवः ॥
एकोच्छ्वासात्ततः कुण्डं पिबति स्म महाबलः।
एवमष्टौ स कुण्डानि ह्यपिबत् पाण्डुनन्दनः ॥
ततस्तु शयने दिव्ये नागदत्ते महाभुजः।
अशेत भीमसेनस्तु यथासुखमरिन्दमः ॥"
तथा च तत्रैव। १। १२९। १९—२१।
"ततोऽष्टमे तु दिवसे प्रत्यबुध्यत पाण्डवः।
तस्मिंस्तदा रसे जीर्णे सोऽप्रमेयबलो बली ॥
तं दृष्ट्वा प्रतिबुद्धन्तं पाण्डवं ते भुजङ्गमाः।
सान्त्वयामासुरव्यग्रा वचनञ्चेदमब्रुवन् ॥
यत्ते पीतो महाबाहो! रसोऽयं वीर्यसम्भृतः।
तस्मान्नागायुतबलो रणेऽधृष्यो भविष्यति ॥")
हस्तितुल्यबलश्रति च।
नागबला (नागस्येव बलं यस्याः।) बलाभेदः।
गोरक्ष चाउलिया इति गुलशकरी इति काकड़ी
इति च भाषा। (यथा, गारुडे १७९ अध्याये।
"अब्दं नागबला चूर्णं श्वासकासादिहृद्भवेत् ॥")
तत्पर्यायः। गाङ्गेरुकी २ भषा ३ हृस्वगवे-
धुका ४। इत्यमरः। २। ४। ११७। गाङ्गे-
रुकी ५ गोरक्षतण्डुला ६। इति भरतः ॥ भद्रो-
दनी ७ खरगन्धा ८ चतुःपला ९ महोदया १०
महापत्रा ११ महाशाखा १२ महाफला १३
विश्वदेवा १४ अरिष्टा १५ देवदण्डा १६ महा
गन्धा १७ घण्टा १८। अस्या गुणाः। मधु-
रत्वम्। कषायत्वम्। उष्णत्वम्। गुरुत्वम्।
कण्डूतिकुष्ठवातघ्नपित्तनाशित्वञ्च। इति राज
निर्घण्टः ॥ स्निग्धत्वम्। आयुष्यत्वम्। बल्य-
त्वम्। ग्राहित्वम्। कफक्षयरोगेषु हित-
त्वञ्च। इति राजवल्लभः ॥
नागभृत्, पुं, (नागं क्रूरधारी अम् बिभर्त्ति
आत्माभरमिति। भृ+क्विप्।) कुकुन्दरः। इति
त्रिकाण्डशेषः ॥
नागमल्ल, पुं, (नागेषु हस्तिषु मल्लः।) ऐरावतः।
इति शब्दरत्नावली ॥
नागमाता, [ऋ] स्त्री, (नागानां हस्तिनां
मातेव भूषकत्वात्।) मनःशिला। इति हेम-
चन्द्रः। ४। १२६ ॥ (नागानां सर्पाणां माता।)
मनसादेवी। इति शब्दरत्नावली ॥ (यथा,
ब्रह्मवैवर्त्ते। २। १। ६०।
"नागेश्वरस्यानन्तस्य भगिनी नागपूजिता।
नागेश्वरी नागमाता सुन्दरी नागवाहिनी ॥"
सुरसा। इयं हि वायवीतनयसमये हनुमत-
परीक्षार्थं देवैराज्ञप्ता तस्य विघ्नमाचरितुं मता
तेन वञ्चिता च। यथा रामायणे। ५।१।१४९।
"ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः।
अब्रुवन् सूर्यसङ्काशां सुरसां नागमातरम् ॥"
यथा, च अध्यात्मरामायणे। ५। १। १८—२४।

सिद्धाभिष्टुत देवा गन्धर्वा वायुवेगम ।
परीक्षणार्थं सत्त्वस्य वानरस्येदमब्रुवन् ॥
गच्छत्येष महासत्त्वो वानरो वायुविक्रमः ।
लङ्कां प्रवेष्टुं शक्तो वा न वा जानीमहे बलम् ।
एवं विचार्य नागानां मातरं सुरसाभिधाम् ।
अब्रुवन्देवतास्त्वं कौतूहलसमन्वित ॥
गच्छ त्वं वानरेन्द्रस्य किञ्चिद्विघ्नं समाचर ।
ज्ञात्वा तस्य बलं बुद्धिं पुनरेहि त्वरान्विता ॥
इत्युक्ता सा ययौ शीघ्रं हनुमद्विघ्नकारणात् ।
आवृत्य मार्गं पुरतः स्थित्वा वानरमब्रवीत् ॥
एहि मे वदनं शीघ्रं प्रविशस्व महामते ! ।
देवैस्त्वं कल्पितो मह्यं क्षुधासम्पीडिताकुल ॥
तामाह हनुमान् मातरहं रामस्य शासनात् ।
गच्छामि जानकीं द्रष्टुं पुनरागम्य सत्वरः ॥
रामाय कुशलं तस्याः कथयित्वा त्वदाननम् ।
निवेक्ष्ये देहि मे मार्गं सुरसायै नमोऽस्तु ते ॥
इत्युक्ता पुनरेवाह सुरसा क्षुधिताननम् ।
प्रविश्य गच्छ मे वक्त्रं नो चेत् त्वां भक्षयाम्यहम् ॥
इत्युक्तो हनुमानाह मुखं शीघ्रं विदारय ।
प्रविश्य वदनं तेऽद्य गच्छामि त्वरयान्वितः ॥
इत्युक्त्वा योजनायामदेहो भूत्वा पुरः स्थितः ।
दृष्ट्वा हनुमतो रूपं सुरसा पञ्चयोजनम् ।
मुखं चकार हनुमान् द्विगुणं रूपमादधत् ॥
ततश्चकार सुरसा योजनानाञ्च विंशतिम् ।
वक्त्रं चकार हनुमांस्त्रिंशद्योजनसम्मितम् ॥
ततश्चकार सुरसा पञ्चाशद्योजनायतम् ।
वक्त्रं तदा हनूमांस्तु बभूवाङ्गुष्ठसन्निभः ॥
प्रविश्य वदनं तस्याः पुनरेत्य पुरः स्थितः ।
प्रविष्टो निर्गतोऽहं ते वदनं देवि ! ते नमः ॥
एवं वदन्तं दृष्ट्वा सा हनूमन्तमथाब्रवीत् ।
गच्छ साधय रामस्य कार्यं बुद्धिमतां वर ! ॥
देवैः सम्प्रेषिताहं ते बलं जिज्ञासुभिः कपे ! ॥
दृष्ट्वा सीतां पुनर्गत्वा रामं द्रक्ष्यसि गच्छ भो ! ॥”
काण्ड । इति महाभारतम् ।)

नागमारः पुं, (नागं मारयतीति । नग+मिष+अच् ।) केदराख्य । इति त्रिकाण्डशेषः ॥ हस्तिमारके नगमारके च त्रि ॥

नागयष्टिः, स्त्री, (नागार्थिता यष्टिः ।) पुष्करिण्यादिखननकाष्ठविशेषः । इति भाषा । तत्पर्य्यायः । नागाचला २ । इति जटाधरः ॥ (यथा, कृषिसौरे ।
“शैवलं शालकत्वेव पुमांसं नागवेष्टनम् ।
पङ्कजं पङ्कजेनैव विस्फोटेनाथ शालिनम् ॥
परीक्षार्थे हस्ते नागयष्टिः प्रकीर्त्तिता ।
धनञ्चोदर्ते यष्टा तस्मात् कुर्य्यात् यष्टिं
सम् ॥”)

नागरं क्ली, (नगरे भवम् । नगर+अण् ।) शुण्ठी । इत्यमरः । २ । ९ । ३८ ॥ (अस्य गुणा यथा —
“नागरं दीपनं वृष्यं ग्राहि हृद्यं विबन्धनुत् ।
रुच्यं लघु स्वादुपाकं स्निग्धोष्णं कफवातजित् ॥”
इ १ भागे सुश्रुते हरीतक्यादौ ।
यथा च सुश्रुते । १४६ अध्याये ।
“शुण्ठीमरिचपाठ्यं मरीचं नागरं तथा ।
चन्द्रिका च इमं मत्तो विज्ञया ज्वरनं विदुः ॥”)
मुस्ता । इति मेदिनी । रे, १०२ ॥ रसाञ्जनम् । इति विश्वः ॥ (क्वचित् पुं ।) नागरदेशोद्भवस्य ॥

नागरः, पुं, (नगरे विदग्धजनसमूहे भवोऽसौ इति । अण् ।) देवरः । इति त्रिकाण्डशेषः ॥ नागरङ्गः । इति शब्दरत्नावली ॥ त्रि, (नगरे भवः । “तत्र भवः ।” ४।३।५३ । इत्यण् ।) विदग्धः । (यथा, आर्य्यासप्तशत्याम् । ३४६ ।
“नागर गौरीशिरसो यामिन्याणि भूषिता
सुतनुः ।
कज्जलं न कलोदरलोचनसम्भूषितानीति ॥”)
नगरोद्भवः । इति मेदिनी । रे, १०२ ॥ (यथा, देवीभागवते । ५ । ६ । ६६ ।
“नागरा नगराद्दृष्टुं सर्वे तत्र समाययुः ॥”
नगरसम्बन्धी । यथा, महाभारते । ३।६।१५५ ।
“ममापैहस सर्वे वै यथायथं नागरम् ॥”)

नागरकः, पुं, (नागर एव । स्वार्थे कन् । यद्वा नागरेण खायतीति । कै+कः ।) रतिबन्धविशेषः । यथा,—
“उत्सङ्गोपरि स्थित्वा योषिदूरुद्वयं यदि ।
धीर्ये धृत्वा करावाय रमते नागरको मतः ॥”
इति रतिमञ्जरी ॥

नागरङ्गं, क्ली, (नागरतं रङ्गम् ।) सिन्दूरम् । इति हेमचन्द्रः ।४।१२० । नागरस्य फलविशेषः ॥

नागरघनः, पुं (नागर एव घनो मुस्ता ।) नागरमुस्ता । इति राजनिर्घण्टः ॥ (नागरमुस्ताशब्देऽस्य विवृतिर्ज्ञातव्या ॥)

नागरङ्गः, पुं, (नागस्य नागरसमूहस्य चित्तरञ्जनं रङ्गो यस्य ।) वृक्षविशेषः । नारङ्गीलेबुर गाछ इति भाषा । इत्यमरः । २ । ४ । ३७ । तत्पर्य्यायः । नारङ्गः २ नागरङ्ग ३ नागरः ४ ऐरावतः ५ नागवङ्गः ६ वक्राधिवासी ७ । इति शब्दरत्नावली । तत्फलगुणाः । सुरभित्वम् । विशदे गुरुत्वम् । दुर्जरत्वम् । अम्लत्वम् । वैशद्युत्वम् । हृद्यत्वम् । वातविनाशित्वम् । तद्वीजरसगुणः । रुचित्वम् । वातहर त्वम् । इति राजवल्लभः ॥

नागरमुस्ता स्त्री, (नागर इव मुस्ता ।) मुस्ताविशेषः । नागरमुथा इति भाषा । तत्पर्य्यायः । नागरोत्था १ नागरादिघनसंज्ञा २ कलापिनी ३ नादेयी ४ चूडाला ५ पिण्डमुस्ता ७ शिशिराह्वा ८ उच्चटा ९ भद्रमुस्ता १० अर्बुदा ११ पुरुषा १२ पूर्वकोटिसंज्ञा १३ कलापिनी १४ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । शीतत्वम् । दीपनत्वम् । कफपित्तज्वरातिसारारुचिविकारादिनाशित्वञ्च । इति राजनिर्घण्टः ॥

नागराजः, पु (नागानां राजा । “राजाहःसखिभ्यष्टच् ।” ५ । ४ । ९१ । इति टच् ।) शेषः । वासुकिः । यथा कविरहस्ये ।
“नागानां नागराज भुजगपुङ्गवयो रत्र नागकीर्तिम् ।”

नागराह्वं, क्ली (नागरमिति आह्वा आख्या यस्य ।) शुण्ठी । इति राजनिर्घण्टः ॥ (विवृतिरस्याः शुण्ठीशब्दे ज्ञातव्या ॥)

नागरी स्त्री, (नगरे भवा । नगर+अण्+ङीप् ।) स्नुही । इति शब्दचन्द्रिका ॥ विदग्धा नारी । यथा, उद्भटः ।
“इन्दीवरीति चरतु न कथं वञ्चको नागरीणि ।”
नागरपत्नी । नगरभवे, त्रि ॥

नागरुकः, पुं, (नागं रवणे नागरुकं ...।) नागरङ्गः । इति शब्दरत्नावली ॥

नागरेणुः, पुं (नागस्य सीसकस्य रेणुः ।) सिन्दूरम् । इति राजनिर्घण्टः ॥

नागरेयक त्रि, (नगरे भवः नगरादिभ्यो ढञ् । “कत्त्र्यादिभ्यो ढकञ् ।” ४ । २ । ९५ । इति ढकञ् ।) नगरसम्भवो । नगरवासिनि निपातनात् स्वार्थे च ॥

नागलता स्त्री, (नाग इव दीर्घा लता ।) ताम्बूलम् । इति त्रिकाण्डशेषः ॥

नागलोकः, पुं, (नागानां लोकः ।) पातालम् । इत्यमरः ।१।८।१ । (यथा, हरिवंशे ।८५।४ ।
“रसातले च दृष्टं नागलोकमिदं यथा ।”)

नागवल्लरी, स्त्री, (नाग इव दीर्घा वल्लरी ।) नागवल्ली । इति भावप्रकाशः ॥

नागवल्लिका, स्त्री, (नागवल्ली+स्वार्थे कन् ।) नागवल्ली । इति रत्नमाला ॥

नागवल्ली स्त्री, (नाग इव दीर्घा वल्ली लता ।) ताम्बूली । इत्यमरः । २ । ४ । १२० ॥ अस्याः पर्य्यायाः ताम्बूलवल्लीशब्दे गुणाश्च ताम्बूलशब्दे द्रष्टव्याः । सा च श्रीवाटीअम्लवाटीसिंहवाटिकाप्रमुख स्थानभेदादेव भिन्ना ।

“श्रीवाटीवा दीर्घपत्रवाटिका
सामान्यं पानि काये पुष्टि च ।
मैवाटी मधुरा तीक्ष्णा वातपित्तकफापहा ।
रसाढ्या च रसा पथ्या विपाके शिशिरा स्मृता ॥
सामान्यवाटी कटुकाम्लपाका
तीक्ष्णा सुपाका सुखपाकवर्णी ।
विदाहनिवारणिवारणी च
विरेचना वातविनाशनी च ।
अम्लो मधुरा तीक्ष्णा कटुकश्च पाचनी ।
दुर्जरदाहपातारा रुचिकारिणी परा ॥”
अन्यच्च ।
“सुवासरी मधुरा पविका
सुपक्वपूर्णाभिरपि नितम्बा ।
प्रकर्षणीया मधुरा पिच्छिला
सन्दीपनी दुष्करा च कला ।
शिशिरा वातमलापहारी ।
वाता माधवरा शशिसमद्युता सदा विना
दाहकृत्
विदोरेकवरा हरीतकी सदा दुःखार्दितेषी ।

स्त्रीसौभाग्यविवर्द्धिनी मदकरी श्रेया सदा वल्लभा
गुह्याभागविदर्भजिच्च कथिता या मालवे सु-
स्थिता ॥
अग्निपुष्पशिखा नाम कषायोष्णा कटुस्तथा ।
मलापहर्त्री कफघ्नी पित्तकृद्वातनाशिनी ॥
दैवलीया कटुस्तीक्ष्णा कृष्णा दीर्घदला च या ।
कफवातहरा रुच्या कटुर्दीपनपाचनी ॥"
इति राजनिर्घण्टः ॥

नागवारिकः, पुं, (नागानां हस्तिनां वारो वारणम् । स कार्य्यत्वेनास्त्यस्येति । नागवार + ठन् ।) राजकुञ्जरः । हस्तिपः । गजस्थराजः । (नागानां सर्पाणां वारो वारणमस्त्यस्येति ।) गरुडः । मयूरः । इति मेदिनी । के, २१० ॥

नागवीटः, पुं, (नाग इव विश्लेषेण एटति इतस्ततो भ्रमतीति । वि + इट गतौ + "इगुपधेति ।" ३ । १ । १३५ । इति कः ।) टाइरः । इति त्रिकाण्डशेषः ॥ थावरा इति ख्यातः ॥

नागवीथी, स्त्री, (नागस्येव वीथी पन्थाः ।) अश्विन्यादिनक्षत्रत्रयघटितचन्द्रस्यागमनमार्गोत्तरभागस्य पथविशेषः । यथा,—
"अर्मयह्नायां वीथ्येव स्थानानि द्विजसत्तम ।
स्थानं जारद्गवं मध्यं तथैरावतमुत्तरम् ।
वैश्वानरं दक्षिणतो निर्दिष्टमिह तत्त्वतः ॥
तत्रैव मध्यभागादर्शितमार्गत्रय प्रत्येकं वीथीत्रयेण त्रिधा भिद्यते । तथाहि अश्विन्यादित्रयमेकैकं नागवीथी गजवीथी ऐरावती चेत्युत्तरमार्गे वीथीत्रयम् । तथाचोक्तम् ।
अश्विनी कृत्तिका याम्या नागवीथीति शब्दिता ॥"
इति विष्णुपुराणे । २ । ८ । ७८ श्लोकटीकायां श्रीधरस्वामी ॥ कश्यपपत्नीविशेषः । यथा —
"नागवीथी च यामिन्याम् ।" इति मत्स्यपुराणे द्वितीयोऽध्यायः ॥ (धर्मस्य यामिपत्नीगर्भजाता कन्या । यथा, मत्स्यपुराणे । ५ । १८ ।
"लम्बायां घोषनामानो नागवीथी तु यामिजा ॥")

नागशुण्डी, स्त्री, (नागस्य शुण्डवत् आकृतिरस्य अस्तीति । अच् । ततो गौरादित्वात् ङीष् ।) [illegible] । इति राजनिर्घण्टः ॥

नागसम्भवं, क्ली (नागात् सीसकात् सम्भवो यस्य ।) सिन्दूरम् । इत्यमरः । २ । ९ । १०५ ॥

नागसुगन्धा, स्त्री (नागस्येव सु शोभनो गन्धो यस्याः ।) भुजङ्गाक्षी । सर्पसुगन्धा । इति भरतधृतस्वामी ॥ (रास्नाभेदः । तत्पर्य्यायो यथा,—
"नाकुली सुरसा नागसुगन्धा गन्धनाकुली ।
नकुलेष्टा भुजङ्गाक्षी सर्पाङ्गी विषनाशिनी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नागस्तोकः, क्ली, (नागस्य नागविषस्य स्तोकमल्पता यत्र । कप् । स्थावरविषत्वादेवास्य तथात्वम् ।) वत्सनाभः । इति राजनिर्घण्टः ॥

नागस्फोता, स्त्री, (नाग इव स्फोता ।) दन्ती । नागदन्ती । इति राजनिर्घण्टः ॥

नागहनुः, पुं, (नागस्य हस्तिनो हनुरिव ।) नखनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥

नागहन्त्री, स्त्री, (नागान् हन्तीति । हन + तृच् + ङीप् ।) वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥

नागाख्यः, पुं, (नाग एव आख्या यस्य ।) नागकेशरः । इति त्रिकाण्डशेषः ॥

नागाञ्चला, स्त्री, नागयष्टिः । इति जटाधरः ॥

नागाञ्जना, स्त्री, हस्तिनी । (नागस्येव अञ्जनं लक्ष्मवत्त्वं यस्याः ।) नागयष्टिः । इति मेदिनी । ने, १८८ ॥

नागाधिपः, पुं, (नागानां अधिपः ।) अनन्तः । इति हेमचन्द्रः । ४ । ३७१ ॥

नागान्तकः, पुं, (नागानां अन्तको विनाशकः ।) गरुडः । इत्यमरः । १ । १ । ३१ ॥

नागारातिः, पुं, (नागानां अरातिः शत्रुः ।) वन्ध्याकर्कोटकी । इति राजनिर्घण्टः ॥

नागालाबुः, स्त्री, (नाग इव अलाबुः ।) कुम्भतुम्बी । इति राजनिर्घण्टः ॥

नागाशनः, पुं, (अश्नातीति । अश + ल्युः । नागानां अशनो भक्षकः ।) गरुडः । इति हारावली । १० ॥

नागाह्वं, क्ली, (नागस्य आह्वा नाम आह्वा यस्य ।) हस्तिनापुरम् । इति त्रिकाण्डशेषः ॥

नागाह्वा, स्त्री, (नाम नागकेशरं आह्वयते स्पर्द्धते इति । आ + ह्वे + अच् । टाप् ।) लक्ष्मणाकन्दः । इति राजनिर्घण्टः ॥

नागी, स्त्री (नागस्य स्त्री पत्नी । नाग + जातेरिति स्त्रीत्वार्थे ङीष् ।) नागपत्नी । इति मुग्धबोधम् ॥ (अस्याः दधिगुणा यथा,—
"लघु पाके बलाधानं वीर्योष्णं पित्तनाशनम् ।
कषायानुरसं नाग्या दधि सर्व्वं विषघ्नकम् ॥"
इति सुश्रुते सूत्रस्थाने ४५ अध्याये ।)

नागोदं, क्ली, (नागवदुदरं यस्मात् । पृषोदरादित्वात् रलोपः ।) उदरत्राणम् । इति हेमचन्द्रः । ३ । ४३९ ॥

नागोदरं, क्ली, (नागवत् इभवदुदरं यस्मात् ।) उरस्त्राणम् । इति हारावली । १८८ ॥ (गर्भिण्या गर्भोपद्रवविशेषः । यथा, सुश्रुते शारीरस्थाने । १० अध्याये ।
"शुक्रशोणितं वायुनाभिप्रपन्नमस्त्रान्तजीवमाध्मापयत्युदरं तत् कदाचित् यदृच्छया उपशान्तं नैगमेषापहृतमिति भाषन्ते । तमेव कदाचित् प्रलीयमानं नागोदरमित्याहुः । तत्रापि क्षीणवत् प्रतीकारः ॥")

नाचिकेतः, पुं, नचिकेताः । अग्निः । यथा,—
"स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो
प्रब्रूहि तं श्रद्दधानाय मह्यम् ।
स्वर्गलोका अमृतत्वं भजन्त
एतद्द्वितीयेन वृणे वरेण ॥
प्र ते ब्रवीमि तदु मे निबोध
स्वर्ग्यमग्निं नचिकेतः प्रजानन् ।
अनन्तलोकाप्तिमथो प्रतिष्ठां
विद्धि त्वमेतं निहितं गुहायाम् ॥
लोकादिमग्निं तमुवाच तस्मै
या इष्टका यावतीर्वा यथा वा ।
स चापि तत्प्रत्यवदद्यथोक्तं
अथास्य मृत्युः पुनरेवाह तुष्टः ।
तमब्रवीत् प्रीयमाणो महात्मा
वरं तवेहाद्य ददामि भूयः ।
तवैव नाम्ना भवितायमग्निः
सृङ्कां चेमामनेकरूपां गृहाण ॥
त्रिणाचिकेतस्त्रिभिरेत्य सन्धिं
त्रिकर्म्मकृत्तरति जन्ममृत्यू ।
ब्रह्मजज्ञं देवमीड्यं विदित्वा
निचाय्येमां शान्तिमत्यन्तमेति ॥
त्रिणाचिकेतस्त्रयमेतद्विदित्वा
य एवं विद्वांश्चिनुते नाचिकेतम् ।
स मृत्युपाशान् पुरतः प्रणोद्य
शोकातिगो मोदते स्वर्गलोके ॥"
इति कठोपनिषदि प्रथमा वल्ली । १६ । १८ ॥
(ऋषिविशेषः । अस्य विवरणं यथा, महाभारते । १३ । ७१ । २—२१ ।
"अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ऋषेरुद्दालकेर्व्वाक्यं नाचिकेतस्य चोभयोः ॥
ऋषिरुद्दालकिर्दीक्षामुपगम्य ततः सुतम् ।
त्वं मामुपचरस्वेति नाचिकेतमभाषत ॥
समाप्ते नियमे तस्मिन् महर्षिः पुत्त्रमब्रवीत् ।
उपस्पर्शनसक्तस्य स्वाध्यायाभिरतस्य च ॥
इध्मा दर्भाः सुमनसः कलशश्चातिभोजनम् ।
विस्मृतं मे तदादाय नदीतीरादिहाव्रज ॥
गत्वानवाप्य तत् सर्व्वं नदीवेगसमाप्लुतम् ।
न पश्यामि तदित्येवं पितरं सोऽब्रवीन्मुनिः ॥
क्षुत्पिपासाश्रमाविष्टो मुनिरुद्दालकिस्तदा ।
यमं पश्येति तं पुत्त्रमशपत् स महातपाः ॥
तथा स पित्राभिहितो वाग्वज्रेण कृताञ्जलिः ।
प्रसीदेति ब्रुवन्नेव गतसत्त्वोऽपतद्भुवि ॥
नाचिकेतं पिता दृष्ट्वा पतितं दुःखमूर्च्छितः ।
किं मया कृतमित्युक्त्वा निपपात महीतले ॥
तस्य दुःखपरीतस्य स्वं पुत्त्रमनुशोचतः ।
व्यतीतं तदहःशेषं सा चोग्रा तत्र शर्व्वरी ॥
पित्र्येणाश्रुप्रपातेन नाचिकेतः कुरूद्वह ।
प्रास्पन्दच्छयने कौश्ये वृष्ट्या सस्यमिवाप्लुतम् ॥
स पर्य्यपृच्छत् पुत्त्रं श्लाघ्यं पर्य्यागतं पुनः ।
दिव्यैर्गन्धैः समादिग्धं क्षीणस्वप्नमिवोत्थितम् ॥
अपि पुत्त्र जिता लोकाः शुभास्ते स्वेन कर्म्मणा ।
दिष्ट्या चासि पुनः प्राप्तो नहि ते मानुषं
वपुः ॥
प्रत्यक्षदर्शी सर्व्वस्य पित्रा पृष्टो महात्मना ।
स तां वार्त्तां पितुर्मध्ये महर्षीणां न्यवेदयत् ॥
कुर्व्वन् भवच्छासनमाशु यातो
ह्यहं विशालां रुचिरप्रभावाम् ।
वैवस्वतीं प्राप्य सभामपश्यं
सहस्रशो योजनहैमभौमाम् ॥
दृष्ट्वैव मामभिमुखमापतन्तं
देहीति स ह्यासनमादिदेश ।

वैदग्धगोष्ठ्यादिभिरद्भुतैश्च
अलङ्कृतं पुष्पसमाजमासीत् ।
तत्रस्थम् तु नन्दकेशेवोष
इतः सहस्त्रैरभिगम्यमानः ।
पुत्रोऽपि ते विजयं धनञ्जय ।
आकारवैमानसं तान् विधाय ।
यस्मिन्नसौ न प्रमोऽपि यौद्ध
यश परीमाद च मानसद्वा ।
जित्वा महीमादिवमानतीत्वा
न स्वल्पमप्यत्र विचक्षणोऽस्तु ।
इदन्ते च पतिताम्बरस्य तात
प्रायश्चसो तव पुत्रस्य कस्य ।
हराधि किन्नापि मनःप्रकीर्ण
प्रियातिपेशव कामान् इवोष्ठ ।
तैर्न हताश्चमदर्श प्रमवाय
प्रागितासि ते विजय दुर्दिनेशाम् ।
इच्छाम्यहं पुण्यहातो धनञ्जय
लोकान् बहु यदि तैर्हि वदाव ।
पार्थं समारोप्य तु मां च देवा
वाहेऽपुंसां तुम्भ आशुमत्तः ।
नन्दनं धामाम तत्राकुलोकान्
यमीतमा पुरुहूतो विवेश । ।”)

नाविकेतु पुं, धनि । इति त्रिकाण्डशेषः ॥

नाट पुं, (नट+भावे घञ ।) नृत्यम् । देश-विशेषः । कर्णाटक इति ख्यातः । इति शब्द-रत्नावली । (तद्देशवासिनि, त्रि, यथा, राज-तरङ्गिण्याम् । १ । ३०२ ।
“चाहल चोलकर्णाटलाटादींश्च नरेश्वरान् ।”)

नाटकं, क्ली, (नाटयतीति । नट+णिच्+ण्वुल् ।) गद्यपद्यात्मकभाषाभिनयप्रधानविशेषः । तत्-पर्य्यायः । प्रकरणम् २ । इति त्रिकाण्ड-शेषः ॥ तस्य लक्षणं यथा,—
“नाटकं ख्यातवृत्तं स्यात् पञ्चसन्धिसमन्वितम् ।
विलासर्द्ध्यादिगुणवद्युक्तं नानाविभूतिभिः ॥
सुखदुःखसमुद्भूतिनानारसनिरन्तरम् ।
पञ्चादिका दशपरास्तत्राङ्काः परिकीर्त्तिताः ॥
प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान् ।
दिव्योऽथ दिव्यादिव्यो वा गुणवान्नायको मतः ॥
एक एव भवेदङ्गी शृङ्गारो वीर एव वा ।
अङ्गमन्ये रसाः सर्वे कार्य्यो निर्वहणेऽद्भुतः ॥
चत्वारः पञ्च वा मुख्याः कार्य्यव्यापृतपूरुषाः ।
गोपुच्छाग्रसमाग्रन्तु बन्धनं तस्य कीर्त्तितम् ॥”
इति साहित्यदर्पणे । ६ । २४० ॥

अपि च ।
“नाटकं ख्यातवृत्तं स्यात् नायको भूपतिर्भवेत् ।
ईदृशश्च यशोऽस्य मतः कथकोऽस्य ॥
नाटीति मतः प्राक् नाटकं लक्षणम् ।
अन्यद् दैवतमध्ये नाटके नाटकं मतम् ॥
गोपुच्छाग्रसमग्रं च नायकोऽत्र उदात्तकी ।
शृङ्गारं वीरं वा नाटकस्य रसम् ॥
दृश्यं कथा नायिका च कार्यं तु दशरूपकम् ।
स्यात् नवरस अष्टाङ्क पञ्चरूपं सम्मतम् ॥
प्रख्यातोत्पन्नमाद्यं रसमयं राजर्षिवंशोद्भवं
पादु सभ्यजनाश्रितं जनमन तत्पुररञ्जनकम् ।
भावाद्यैरतिसुन्दरं प्रतिनयप्राप्तावकाशं भवद्-
दशभिश्चाप्यभयपर्य्यवसितं प्रख्यातमाद्यं नाटकम् ॥”
अन्ये तु ।
“देवतानां मनुष्याणां राज्ञां लोकमहात्मनाम् ।
पूर्व्ववृत्तानुचरितं प्रधानोदात्तनायकम् ॥
प्रवेशकविकम्भादिविभिः सन्धिभिरन्वितम् ।
ललिताङ्कयोऽद्भुत शुद्धसंयोगैर्युतम् ॥
नटनर्त्तकनाटकवाद्यैरलङ्कृतम् ।
नानाविलासलीलाभिः कर्म्मचित्रभिरन्वितम् ॥
नानाभावरसैः ख्यातं नाटकं कवयो विदुः ।
त्रिविधं विदितं लक्ष्म नाटकं कवितम् ॥
आरम्भश्च प्रयत्नश्च प्राप्तिः सम्भव एव च ।
नियता च फलप्राप्तिः फलयोगस्तथापरः ॥
इत्यवस्थापञ्चकं स्यात् नाटके कार्य्यवस्तुनः ।
सम्पूर्णं प्राकृतं भाषामर्धविभ्रमा गिरः ।
नान्ते विधाना प्रज्ञा इमा भाषा इहोत्तमाः ॥
भाषाविभावाविशेष प्राकृतन्तु चतुर्द्दश ।
सामभाषान्विता भाषा शौरसेनी च मागधी ।
बाह्लीका दाक्षिणात्या च भाषा यत्र च प्राकृते ॥
इत्याद्यास्तीर्व्याप्ता नाट्यमध्ये विभूषिता ।
सर्व्वार्थीविभाषाणां विभाषा अत्र कीर्त्तिताः ॥
ग्रैवेयी शौरसेनी च आवती पाञ्चालमागधी ।
द्राविडी प्राच्यदेशी च भूतभाषा प्रकीर्त्तिता ॥
वैदर्भी मागधी लाटी कार्णाटी गौडमालवी ।
पाञ्चाली सप्तभाषाः स्युर्हि इति भिन्नाः ॥
एवमादयस्तासां काव्ये नाटके बुधैः ।
राजविदूषकानां ता नैव दृश्ये यथा मताः ॥
उदाहरणम् । सदाचिन्तैश्चतुर्वर्गार्थे मन्त्रौ बलदेवचरित काविदासाभिज्ञानशकु-न्तलादि । इति नाटकलक्षणम् ।” इति सङ्गीतदामोदरः ॥

नाटक, पुं (नटति नृत्यति देवयोर्निमित्त । नट+ण्वुल् । तत्र स्वार्थे कन् । यद्वा, नाटयतीति नट+णिच्+ण्वुल् ।) नाट्यशास्त्रधर्म्मज्ञनटः । यथा,—
“एवमाभ्यां नाटके दैवे प्रहृष्टक महासमम् ।
विश्व रमति सर्व्वप्रकारधर्माः तु धार्म्मिकी ।”
इति कालिकापुराणम् ॥
(नाटकाचार्य्यः । यथा रामायणे । २ । ६ । १४ ।
“नटनर्त्तकसंघानां गायकानाञ्च शृण्वताम् ।”
नटतीति । नट+ण्वुल् ।) नर्त्तके, त्रि । इति व्याकरणम् ॥

नाटाम्र पुं, तालवृक्षः । नृत्यस्थानः । पर्य्यायः ४, विषघ्नः ॥ गुरुसारः ॥ राजवेदिता ॥ यथा पत्रः । वैद्य ७ । इति त्रिकाण्डशेषः ॥

नाटार, पुं (नट्या नर्त्तक्या अपत्यम् । “नाट-कुलीनाम् ।” ४ । १ । ११ । इति अरक् ।) नट्या अपत्यम् । इति मुग्धबोधव्याकरणम् ॥

नाटिका, स्त्री, (नाटक+टापि अत इत्वम् ।) नाटकविशेषः । यथा,—
“नाटिका क्लृप्तवृत्ता स्यात् स्त्रीप्राया चतुरङ्किका ।
प्रख्यातो धीरललितस्तत्र स्यान्नायको नृपः ॥
स्यादन्तःपुरसम्बद्धा सङ्गीतव्यापृताथवा ।
नवानुरागा कन्यात्र नायिका नृपवंशजा ॥
सम्प्रवर्त्तेत नेताऽस्यां देव्यास्त्रासेन शङ्कितः ।
देवी पुनर्भवेज्ज्येष्ठा प्रगल्भा नृपवंशजा ॥
पदे पदे मानवती तद्वशः सङ्गमो द्वयोः ।
वृत्तिः स्यात् कैशिकी स्वल्पविमर्शाः सन्धयः पुनः ॥”)

नाटेय, पुं (नट्या अपत्यम् । नटी+ढक् ।) नटीपुत्रः । इति मुग्धबोधव्याकरणम् ॥

नाटेर, पुं, (नट्या अपत्यमिति । नटी+ढ्रक् ।) नटीपुत्रः । इति हेमचन्द्रः । ३ । ५१२ ॥

नाट्य क्ली, (नटानां कर्म्म । नट+“गुणवचन-ब्राह्मणादिभ्यः कर्म्मणि च ।” ५ । १ । १२४ । इति ष्यञ् ।) नृत्यगीतवाद्यम् । तत्पर्य्यायः । तौर्य्यत्रिकम् २ । इत्यमरः । १ । ७ । १० ॥ (यथा कुमारसम्भवे । ६ । ४ । १० ।
“नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम् ।”)
नटानां धर्म्मः । इति व्याकरणम् ॥ तस्य लक्षणादिकं यथा । शृङ्गारः १ हास्यः २ करुणः ३ रौद्रः ४ वीरः ५ भयानकः ६ बीभत्सः ७ अद्भुतः ८ शान्तः ९ । इति नवरसाः । नाट्ये अष्टौ रसाः । भावादयः । ८ । नाट्यलक्षणं यथा —
“देवतादिचरितानुकरणं नाट्यमुच्यते ।
चतुर्व्विधाभिनयसंयुक्तं नाट्यं तदुच्यते ॥
नैकोऽपि नाट्यविधिरत्र कथितो यद्यत्र संदृश्यते
स्थानविशेषेण वर्णानां नाट्यं प्रदृश्यते ॥
यो यत्र दर्शितो भावः स तं नाट्ये विनिर्दिशेत् ।
यत्र शब्दो विकारः स्यान्नाट्यं तत्र न दृश्यते ॥”

नाट्योत्पत्तिर्यथा,—
"इत्यनुभूयते ब्रह्मा शङ्करेणाभ्यर्थितः पुरा ।
चतुरास्याच्च वेदेभ्यो नाट्यवेदन्तु पञ्चमम् ॥
उपवेदोऽयं वेदानां चत्वारः कथिताः स्मृतौ ।
तत्रोपवेदो गान्धर्वः शिवेनोक्तः स्वयम्भुवे ॥
तेनापि भरतायोक्तस्तेन मर्त्त्ये प्रचारितः ।
शिवाज्जयोर्भरताल्लक्षणादस्य प्रयोजकाः ॥"
इति सङ्गीतदामोदरः ॥

नाट्यधर्म्मिका, स्त्री, (नाट्यधर्म्मोऽस्त्यस्याः क्रियायाः इति ठन् ।) दर्शमार्गप्राप्तोक्तनाट्यम् । यथा, हेमचन्द्रः ।
"गीतवाद्यनृत्यमयं नाट्यं तौर्य्यत्रिकञ्च तत् ।
समीत प्रियवार्य्येऽस्मिन् प्राप्तोक्तिं नाट्य
धर्म्मिका ॥"

नाट्यप्रियः, पुं, (नाट्यं प्रियं यस्य ।) शिवः । इति हेमचन्द्रः । २ । ११२ ॥

नाट्यशाला, स्त्री, (नाट्यस्य नृत्यगीतादेः शाला गृहम् ।) प्रासादद्वारसमीपगृहम् । नाट मन्दिर इति भाषा । यथा,—
"नाट्यशाला च कर्त्तव्या द्वारदेशसमाश्रया ॥"
इति गरुडपुराणम् ॥

नाट्यालङ्कारः, पुं, (नाट्यस्य अलङ्कारः ।) नाट्यभूषणहेतुः । स तु त्रयस्त्रिंशत्प्रकारः । यथा,—
"सिद्धिर्मनोरथोऽभीष्टो निरुक्तिश्च विशेषणम् ।
गुणातिपात उद्दिष्टविचारप्राप्तिनीतयः ॥
अभिप्रायः परीहारो गर्वश्चानुनयो तथा ।
अपापत्तिः प्रतिषिद्धश्च दाक्षिण्यं प्रियभाषणम् ॥
अभिमानाख्यानमन्यो ह्यथोभीर्द्यमाश्रयाः ।
पश्चात्तापः स्पृहाक्रन्दौ कपटञ्च प्रवर्त्तनम् ॥
उत्तेजनञ्च हृतान्नं प्रोत्साहश्च अपि ।
समयोऽनुरचातो विमलोक्तिः परीवयः ॥
परीवादोऽस्पृक्तसिद्धिराच्छादनसमायकौ ।
प्रोत्साहन सुखातर्के उपपत्त्यनुतर्कयोः ॥
निवेदनञ्च साहाय्य याचना पृच्छा विशेषणम् ।
अभिमानञ्च आरूप्य गुणकीर्त्तनसूत्रयः ॥
निर्व्वेयत्रातिशयो भूषादैन्यनिदर्शनम् ।
मानादेशश्च सन्नियमसीहाबीविवर्य्यकाः ॥
प्रलेश उपदिष्टो वैरुद्ध्यद्विमिता अमी ।
अलङ्कारा मता नित्यं नाटकादिषु सूरिभिः ॥"
इति सङ्गीतदामोदरः ॥
(साहित्यदर्पणमते चतुस्त्रिंशत् नाट्यालङ्काराः । यथा, तत्रैव । ६ । २०—२३२ ।
"आशीराक्रन्दकपटाक्षमागर्व्वोद्यमाश्रयाः ।
उत्प्रासन स्पृहाक्षोभपश्चात्तापोपपत्तयः ॥
आशंसाध्यवसायौ च विसर्पोल्लेखसंज्ञितौ ।
उत्तेजनं परीवादो नीतिरर्थविशेषणम् ॥
प्रोत्साहनञ्च साहाय्यमभिमानोऽनुवर्त्तनम् ।
उत्कीर्त्तनं तथा याचना परीहारो निवेदनम् ॥
प्रवर्त्तनाख्यानयुक्तिप्रहर्षाश्चोपदेशनम् ।
इति नाट्यालङ्कृतयो नाट्यभूषणहेतवः ॥
आशीरिष्टजनाशंसाक्रन्दः प्रलपितं शुचा ।
कपटं मायया यत्र रूपमन्यद्विभाव्यते ॥
अक्षमा सा परिभवः स्वल्पोऽपि नाभिसह्यते ।
गर्व्वोऽवलेपजं वाक्यं कार्य्यस्यारम्भ उद्यमः ॥
ग्रहणं गुणवत्कार्य्यहेतोराश्रय उच्यते ।
उत्प्रासनन्तूपहासो योऽसाधौ साधुमानिनि ॥
आकाङ्क्षा रमणीयत्वाद्वस्तुनो या स्पृहा तु सा ।
अधिक्षेपवचःकारी क्षोभः प्रोक्तः स एव तु ॥
मोहावधीरितार्थस्य पश्चात्तापः स एव तु ।
उपपत्तिर्मता हेतोरुपन्यासोऽर्थसिद्धये ॥
आशंसनं स्यादाशंसा प्रतिज्ञाध्यवसायकः ।
विसर्पो यत्समारब्धं कर्म्मानिष्टफलप्रदम् ॥
कार्य्यदर्शनमुल्लेख उत्तेजनमितीष्यते ।
स्वकार्य्यसिद्धयेऽन्यस्य प्रेरणाय कठोरवाक् ॥
भर्त्सना तु परीवादो नीतिः शास्त्रेण वर्त्तनम् ।
उक्तस्यार्थस्य यत्तु स्यादुत्कीर्त्तनमनेकधा ।
उपालम्भस्वरूपेण तत् स्यादर्थविशेषणम् ॥
प्रोत्साहनं स्यादुत्साहगिरा कस्यापि
योजनम् ।
साहाय्यं सङ्कटे यत् स्यात् सानुकूल्यं परस्य च ॥
अभिमानः स एव स्यात् प्रश्रयादनुवर्त्तनम् ।
अनुवृत्तिर्भूतकार्य्याख्यानमुत्कीर्त्तनं मतम् ॥
याचना तु क्वापि याचनाया स्वयं दूतमुखेन वा ।
परीहार इति प्रोक्तः कृतानुचितमार्ज्जनम् ॥
अवधीरितकर्त्तव्यकथनन्तु निवेदनम् ।
प्रवर्त्तनन्तु कार्य्यस्य यत् स्यात् साधुप्रवर्त्तनम् ॥
आख्यानं पूर्व्ववृत्तोक्तिः युक्तिरर्थावधारणम् ।
प्रहर्षः प्रमदाधिक्यं शिक्षा स्यादुपदेशनम् ॥"
एतेषामुदाहरणन्तु तत्रैव द्रष्टव्यम् ॥)

नाट्योक्तिः, स्त्री, (नाट्ये नृत्यगीतादौ या उक्तिः ।) नाटकविषयकवचः । नटानां कर्म्म नाट्यं तस्योक्तिः नाट्योक्तिः । इति भरतः ॥ तद्यथा । आर्य्येति ब्राह्मणम् । नृपेति महाराजेति । धर्म्मी हञ्जेति । वीरं चण्डे इति । चेटीं हञ्जे इति । स्वामिनमार्य्यपुत्त्रेति । राजश्यालं राष्ट्रियेति । समानं हलो इति । राजानं देवेति । सार्व्वभौमं भट्टेति । भगिनीपतिमावुत्तेति सम्बोधयेत् । इति सङ्गीतदामोदरः ॥ गणिकायाम् अज्जुका । विदति भावः । जनके आवुकः । कुमारे युवराजभर्त्तृदारकौ । राज्ञि देवभट्टारकौ । राजसुतायां भर्त्तृदारिका । कृताभिषेकायां राज्ञां देवी । इतरासु राज्ञीषु भट्टिनी । अवध्योक्तौ अब्रह्मण्यम् । मातरि अम्बा । बालायां वासुः । आर्य्ये मारिषः । ज्येष्ठाभगिन्यां अत्तिका । पितायां निर्म्मियाम । इत्यमरः । १।७।११—१५ ॥ (यथाच साहित्यदर्पणे । ६ । १५४—१६ ।
"अश्राव्यं खलु यद्वस्तु तदिह स्वगतं मतम् ।
सर्व्वश्राव्यं प्रकाशं स्यात्तद्भवेदपवारितम् ॥
रहस्यन्तु यदन्यस्य परावृत्य प्रकाश्यते ।
त्रिपताककरेणान्यानपवार्य्यान्तरा कथाम् ॥
अन्योन्यामन्त्रणं यत् स्याज्जनान्ते तज्जनान्तिकम् ।
किं ब्रवीषीति यत् नाट्ये विना पात्रं प्रयुज्यते ॥
श्रुत्वेवानुक्तमप्यर्थं तत् स्यादाकाशभाषितम् ॥
दत्तां सिद्धाञ्च सेनाञ्च वेश्यानां नाम दर्शयेत् ।
दत्तप्रायाणि वणिजां चेटचेट्योस्तथा पुनः ॥
वसन्तादिषु वर्ण्यस्य वस्तुनो नाम यद्भवेत् ।
नाम कार्य्यं नाटकस्य गर्भितार्थप्रकाशकम् ।
नायिकानायकाख्यानां संज्ञाप्रकरणादिषु ।
नाटिकासट्टकादीनां नायिकाभिर्विशेषणम् ।
प्रायेण ण्यन्तकः साधिर्गमे स्थाने प्रयुज्यते ॥
राजा स्वामीति देवेति भृत्यैर्भट्टेति चाधमैः ।
राजर्षिभिर्वयस्येति तथा विदूषकेण च ॥
राजन्नित्यृषिभिर्वाच्यः सोऽपत्यप्रत्ययेन च ।
स्वेच्छया नामभिर्विप्रैर्विप्र आर्य्येति चेतरैः ॥
वयस्येत्यथवा नाम्ना वाच्यो राज्ञा विदूषकः ।
वाच्यौ नटीसूत्रधारावार्य्यनाम्ना परस्परम् ॥
सूत्रधारं वदेद्भाव इति वै पारिपार्श्विकः ।
सूत्रधारो मारिषेति हण्डे इत्यधमैः समाः ॥
वयस्येत्युत्तमैर्हंहो मध्यैरार्य्येति चाग्रजः ।
भगवन्निति वक्तव्याः सर्व्वैर्देवर्षिलिङ्गिनः ॥
वदेद्राज्ञीञ्च चेटीञ्च भवतीति विदूषकः ।
आयुष्मन्रथिनं सूतो वृद्धं तातेति चेतरे ॥
वत्स पुत्त्रक तातेति नाम्ना गोत्रेण वा सुतः ।
शिष्योऽनुजश्च वक्तव्योऽमात्य आर्य्येति चाधमैः ॥
विप्रैरयममात्येति सचिवेति च भण्यते ।
साधो इति तपस्वी च प्रशान्तश्चोच्यते बुधैः ॥
स्वगृहीताभिधः पूज्यः शिष्याद्यैर्विनिगद्यते ।
उपाध्यायेति चाचार्य्यो महाराजेति भूपतिः ॥
स्वामीति युवराजस्तु कुमारो भर्त्तृदारकः ।
सौम्य भद्रमुखेत्येवमधमैस्तु कुमारकः ॥
वाच्या प्रकृतिभी राज्ञः कुमारी भर्त्तृदारिका ।
पतिर्यथा तथा वाच्या ज्येष्ठमध्याधमैः स्त्रियः ॥
हलेति सदृशी प्रेष्या हञ्जे वेश्याऽज्जुका तथा ।
कुट्टिन्यम्बेत्यनुगतैः पूज्या च जरतीजनैः ॥
आमन्त्रणैश्च पाषण्डा वाच्याः स्वसमयागतैः ।
शकादयश्च सम्भाष्या भद्रदत्तादिनामभिः ॥
यस्य यत् कर्म्म शिल्पं वा विद्या वा जातिरेव वा ।
तेनैव नाम्ना वाच्योऽसौ ज्ञेयाश्चान्ये यथोचितम् ॥")

नाडिः, स्त्री, (नाडयतीति । नड भ्रंशे + णिच् + इन् ।) नाडी । इत्यमरटीकायां भरतः ॥

नाडिकं, क्ली, (नाडिरिव प्रतिकृतिः । नाडि + "इवे प्रतिकृतौ ।" ५ । ३ । ९६ । इति कन् ।) कालशाकम् । इति भावप्रकाशः ॥

नाडिका, स्त्री, (नाडी एव । स्वार्थे कन् ।) घटार्द्धः । घड़ि इति भाषा । तत्पर्य्यायः । सावारिका २ घटिका ३ । इति हेमचन्द्रः । २।५१ ॥ घटिकाप्रमाणोपायो यथा,—
"निमेषो मानुषो योऽयं मात्रामात्रप्रमाणकः ।
तैः पञ्चदशभिः काष्ठा त्रिंशत् काष्ठास्तथा कला ॥
नाडिका तु प्रमाणेन कला दश च पञ्च च ।
उन्मानेनाम्भसः सा तु पलान्यर्द्धत्रयोदश ॥
हेममाषैः कृतच्छिद्रा चतुर्भिश्चतुरङ्गुलैः ।
मागधेन प्रमाणेन जलप्रस्थस्तु स स्मृतः ॥"
इति विष्णुपुराणम् ॥

"नैमित्तिकार्थं प्रथमं पिण्डमिति वैवाहिकादेव प्रथमो ग्रीष्मेव कन्याप्रदानमनुकल्पयन्ति निमेष इति कश्चित्। मात्रैव मात्रं प्रमाणं यस्य। स्व मात्रमक्षरोच्चारणकालपरिमितो हि निमेषः। निमेषकालतुल्या हि मात्रा चपूचरुप आहिता प्रकाशोत्तिः। नाडिकाद्यायोपायमाह। तन्मात्रेण नाडीन। अस्मात् तन्मात्रेण वक्ष्यो भवेत्। नानैदुक्ताय पानम्। षड्भिः पाते भवो इमनाडोद्धारिभवः। तम्मात्रद्वैध वटितानि नाडीद्वादशदलानि या नाडिका। नाडहाद्य मन्ताम्बविभिन्नपात्रैय वा नाडिका प्रागभि सर्वं। कि प्रमाण तत् पात्रं कार्यं तदाह मानथैव प्रमाणेन जलप्रस्थस्तु सम्मृत इति। नाडद्वादशपलपत्रे हि मानपरिमाणस्य पूर्णे। तन्मानाय पात्रं कार्यमित्यर्थात् सिद्धम्। यद्यु तथापि मानेन सर्वं नाडिकामाने क्रियागदि चतुरस्रात् नाडिकामाह क्रियाविशेषे। प्रयाति निमित्त पैमिति। मानं चतुरङ्गुलं। ईषो माषैश्चतुर्भिश्चतुरङ्गुलैः प्रमाणाशेषैः विद्धं प्रमाणिकम्। एतदुक्तं भवति चतुर्द्वादशपलताम्रमय मानप्रस्थार्धमितमहापात्रं माषैः चतुर्भिश्चतुरङ्गुलदीर्घशलाकया कृताय- च्छिद्रं जले न्यस्तं तेन छिद्रेण यावता कालेन पूर्यते तावान् कालो नाडिकेति। तथा च गुरुः। हाभ्यां द्वादशपलताम्रमावं चतुर्भिश्चतुरङ्गुलैः। सुवर्णमानैः कृतच्छिद्रं यावत् प्रस्थजलप्लुतम्।") इति तट्टीकायां श्रीधरस्वामी। (यथा सूर्य- सिद्धान्ते। १। ११।

"नाडीषष्ट्या तु नाक्षत्रमहोरात्रं प्रकीर्तितम्।" यथा नाडिका स्मृता।"

"नाडिमितैति। षट्पलमाषैरेतैः पानीयपूर्णं भवति पात्रं षष्ट्या नाडीभिः नाक्षत्रमहः।" इति तट्टीका।)

नाडिकेल, पुं, (नाडिकेलः। एतत् दृश्यम्।) नारिकेलः। इत्यमरटीकायां भरतः॥

नाडिचीर, क्ली, (नाडिरिव चीरं यत्र।) निर्व- यनम्। इति हारावली। ४११। मतो इति भाषा॥

नाडिन्धम, पुं, (नाडीं धमनीं धमतीति। ना ध्मधारणयोर्नदी + "नाडीमुष्ट्योश्च।" ३। २। ३०। इति खश्। "नाडीभस्त्रोति।" ६। ३। ६६। इति मुमागमः। "सिध्मधातोः।" ७। ३। ७८। इति धमादेशः।) स्वर्ण- कारः। इत्यमरः। २। १०। ८। (उन्मीलन- निरोधात् नाडीमुदि नाडीमतिशयेन धमति यः सन्ताप्यते।) स्वर्णकारे, त्रि। यथा, माघे। ५। ६१।

"बालेन्दुवक्त्राण्यविकासभावा- द्बभुः पलाशान्यतिलोहितानि। सद्यो वसन्तेन समागतानां नखक्षतानीव वनस्थलीनाम्॥")

नाडिन्धम, त्रि, (नाडीं धमति। ध्मा + "नाडीमुष्ट्योश्च।" ३। २। ३०। इति खश्।)

"निर्गमनमार्ग।" १। ३। ११। इति सूत्रं।) नाडीपात्रकर्ता। इति शब्दार्थरत्नाकरम्।

नाडिपत्त्र, क्ली, (नाडिरिव पत्त्रं यस्य।) नाडी- शाकम्। इति शब्दमाला॥

नाडी, स्त्री (नाडि + "कृदिकारादक्तिनः।" इति वा ङीष्।) नालम्। शाकान्तरम्। (नाली पा इति भाषा। यथा, सुश्रुते चिकित्सितस्थाने १० अध्याये।

"तत्रातिमात्रममत्रमुपातिरिक्तमथ नाडीव अदर्शति तैर मता तु नाडी।"

इत्यनन्तरमता नाडी यथा, तत्रैव ११ अध्याये। "नासाप्रणाली त्रयमत्र विज्ञेय भोऽधिमांसकः। इत्यनन्तरमता नाडी पत्र शैषा उदीरिता॥") शिरा। अजशृङ्गी। कृष्णपर्णी। वटमूल- काण्डं। इति मेदिनी। डे, ११। शिरापर्य्याय यथा। धमनिः २ शिरा ३। इत्यमरः। २। ६। ६४। नाडि ४ नालि ५ नाडी ६ धमनी ७ शिरा ८। इति भरतः। धरणी ९ धरा १० तन्त्रकी ११ जीवितज्ञा १२ शिरा १३। इति राजनिर्घण्टः। ॥ ॥ कायनाडी त्रिविधा। एका वातवहा। अपरा पित्तरक्तशिरस- वाहिनी। अपरा श्लेष्मारसवाहिनी। इति भरतः। "सा तु गर्भाशयात्मकस्य गर्भनिर्गम"श्चै- मैवति।" इति शब्दरत्नावली। (यथा, मोक्षधर्मे च अध्याये।

भीष्म उवाच।

"नाडीभिर्नाडिकाभिर्नाडीनामातनव प्रसिद्धम्। प्रधानां नौसमिच्छामि तद्‍रूप मन्ति प्रभो॥

वशिष्ठ उवाच।

कोटिस्तु तिस्रः सार्धाश्च नाडीशतवर्तेन तु सर्वदा॥ प्रधानाः च तथा नाड्यः विश्वधनाड्यः शिराः। पञ्चैव च तथा नाड्यो मध्यतः प्रकीर्तिताः। सुषुम्नादीनामधिगन्तव्याः प्रकीर्तिताः। वाम पार्श्वे तथा वक्त्रे तथैव दक्षिणेऽपि च। वामाङ्गे स्थितं सर्वं शरीरे नाडयः स्थिताः॥ ईडा च पिङ्गला चैव सुषुम्ना त्रिविधा मता। अलम्बुषा च यशस्विनी च नाड्यः प्रकीर्तिताः। कुहूश्च हस्तिजिह्वा चैव गान्धारी च विश्वोदरा। शङ्खिनी च तथा मिश्रा दशैता नाड्यः प्रकीर्तिताः। मता नाड्यः शरीरेषु। इत्येवमादि प्रधानाः॥")

नाडीज्ञानम्।

"नाडीविज्ञानं नाड्यो हि सूक्ष्मा प्रकाश वक्ष्यते।

नाभिकन्दादधो नाड्यो विस्तृताः सर्वतो दिशम्। विज्ञेयाः षष्ठ्यधिकाः शरीरे प्रकीर्तिताः। देहे प्रधाना नाड्यस्ताः सप्तबहुविस्तराः।

तत्रापि वक्ष्यमाणाः प्राणवहा कुक्कुटाण्डे च कर्णिकारादेव देहे। सामर्थ्यं नाडीष्वपि तथा वज्रा नाडी तु बद्धवा। मध्यमा सुषुम्ना इव नाडी विनिर्गता॥"

स्तम्भितमिव नासिकाग्रे मध्य- काय पूर्वापि विरामसमतांश्च। तन्त्रान्तरे सन्ति पञ्चाश्च वायवः पवना- न्नाड्यो वहन्ति तेन समस्ताः। दक्षिणे नाडी कायात् शिवमार्गी धर्मग नाडी वामनासा स्वरात्मसदनं। स्व संलग्ना नाडी बद्धा एव तामग्निविस्फारिता। नाडी मध्ये एवैति एतस्मा एव नारायणस्य नाम्ना दक्षिणेति मायाखे पुरुषाख्या। तद्यथा। नाडी नाडी क्रिया योगा नाडी पुरुष इति। इति प्रोक्तो मया देवि। नाडीद्वयं दक्षिणेन। नाडीमध्ये तु स्त्रीपुरुषयोरवसरात् ज्ञातव्या नाडी परीक्षा। वामनाडी च स्थानेषु। अङ्गे तु प्रतिष्ठिता। यद्यपि वामा दक्षिणस्य भागस्य नाडी वामे तु दक्षिणे वाम्यं पार्श्वे अनुसरेत्। नाड्या तु वक्ष्ये॥ ॥

परीक्षाप्रकारमाह।

करेण रोगार्तिनिपीडितस्य पीडाय दक्षिणबाहुमूले। अङ्गुष्ठमूलेऽपि निधाय तत्र नाडीं प्रयत्नेन सदा परीक्षेत्।

करेण करेण। रोगार्तिनिपीडितस्य रोगाकुलस्य। रोगार्ता शारीरिकदुःखयुक्ता अपरे यथा स्वास्थ्या भवति कथितम्। नाम इति महाकविभिरपि वाचनि परीक्ष्यते। तत्र प्रशस्तं दक्षिण नाडी हस्त्रे पीडितं कारयेत्। अन्यत्र पीडितमपि न तु परीक्षाकाले मन्यते। इति सर्वा प्राणिनां परीक्षा मत्वा प्रयत्नेन। कर्तव्या सम्यक् तदा परीक्षायोः वामपाण्यङ्गुष्ठमूले प्रयत्नेन। कर्तव्यं परीक्षणं तद्युक्तम्।

अङ्गुष्ठस्य तु मूले या धमनी जीवसाक्षिणी। तस्या गतिवशाद् विद्यात् सुखं दुःखं च देहिनाम्। प्रथमं मानिर्देशेन वातं तदनन्तरम्। मध्ये पित्तं विजानीयात् अन्ते श्लेष्माणमेव च। रोगाभिधाने प्रशस्तं वामा वामस्य दक्षिणा॥

परीक्षणप्रकार।

वातं पित्तं कफं द्वन्द्वं सन्निपातं तथैव च। साध्यासाध्यविवेकं च सर्वं नाडी प्रकाशयेत्। अङ्गुलीनां त्रिकं न्यस्य। नाडीविशेषेण विविधं वर्णं। सर्वं सन्निपाते च तदन्तर। सिद्धान्तं नाडीप्रकारे प्रथम प्रोक्तं॥ ॥ अथ नाडीगमनमाह।

"गते प्रभवमाथवा कफवातेऽन्तरं। शुभाशुभ नाडीरोगे प्रशस्तं रोगिणः। पाददि प्राविश्य कण्ठे तथा गच्छेत् ॥।

निषिद्धकालमाह ।
सद्यः स्नातस्य भुक्तस्य क्षुत्तृष्णातपशीलिनः ।
व्यायामाक्रान्तदेहस्य सम्यङ्नाडी न बुध्यते ॥
तैलाभ्यङ्गे च सुप्ते च तथा च भोजनान्तरे ।
तथा न ज्ञायते नाडी यथा दुर्गतरा नदी ॥
सुप्ते निद्राकाले भोजनान्तरे भोजनमध्ये भोजनावसाने च । वातमूत्राद्यवरोधकरोगे नापि विधिः ॥ ० ॥
अथ वातादिस्वभावक्रममाह ।
आदौ च वहते वातो मध्ये पित्तं तथैव च ।
अन्ते च वहते श्लेष्मा नाडिकात्रयलक्षणम् ॥
आदाविति कपोतिपीडितदिनोयसस्ति । न तु तज्जनौनिर्नेभावे स्थानभेदस्य कुत्राप्यनुक्तत्वात् ॥ ० ॥
सुस्थनाडीगतार्थमाह ।
भूलतागमनप्राया स्वच्छा स्वास्थ्यमयी शिरा ।
प्रायेति बाहुल्येन । स्वच्छा परितो बाध रहिता । स्वास्थ्यमयी सुस्थतावर्त्मिका च । तथा ।
प्रातः स्निग्धमयी नाडी मध्याह्ने चोष्णतान्विता ।
सायाह्ने धावमाना च चिरादोगविवर्जिता ॥
चिरादिति अतीतानागतयोर्द्वयोरप्युक्तिः यथा चिरातीतमेव ॥ ० ॥
वातादीनां क्रमेण गतिमाह ।
वाताद्वक्रगता नाडी चपला पित्तवाहिनी ।
स्थिरा श्लेष्मवती ज्ञेया मिश्रिते मिश्रिता भवेत् ॥
वक्रेति वायोस्तिर्य्यग्गमनशीलत्वात् वहतीति । एवं तत्प्रकोपादिना वातान्दोलितरपि ज्ञातव्या । चपलेति वह्नेरूर्द्ध्वज्वलनादुत्प्लुत्य चला । स्थिरेति जलस्य शैत्यगमनादूर्द्ध्वया । मिश्रिते मिश्रिता भवति । तेन द्विदोषजे उभयचिह्ना । सर्व्वजे सर्व्वचिह्नेति । चपलता स्थिरतयोः समय भेदेनाविरोधः ॥ ० ॥
उक्तवातादिधामान्यस्य क्रमेण विशेषमाह ।
सर्पजलौकादिगतिं वदन्ति विबुधाः प्रभञ्जनेन नाडीम् ।
पित्ते च काककलविकमण्डूकादिगतिं विदुः सुधियः ॥
राजहंसमयूराणां पारावतकपोतयोः ।
कुक्कुटादिगतिं धत्ते धमनी कफसङ्गता ॥
आन्दिना वाति हधिकागतिर्दोषायिता । आदि- शब्देन पित्ते कलिङ्गकचटकादिगतिः । कफे गजवराहादिगतिः ॥ ० ॥
द्वन्द्वस्यापि क्रमेणैव भेदानाह ।
मुहुः सर्पगतिं नाडीं मुहुर्भेकगतिं तथा ।
वातपित्तद्वयोद्भूतां प्रवदन्ति विचक्षणाः ॥
भुजगादिगतिश्चैव राजहंसगतिं धराम् ।
वातश्लेष्मसमुद्भूतां भाषन्ते तद्विदो जनाः ॥
मण्डूकादिगतिं नाडीं मयूरादिगतिं तथा ।
पित्तश्लेष्मसमुद्भूतां प्रवदन्ति मनीषिणः ॥
त्रिदोषजामप्याह ।
उरगादिलावतित्तिरवर्त्तिकादीनां गतिमनु- वातादीनाञ्च सन्निपातमाधत्ते ॥
क्रमेण धमनी सन्निपातमाधत्ते ॥

क्रममिति न्यूनाधिकतानिरास ॥ क्रमगत्या तु साध्यासाध्यत्वम् । तथा —
लावतित्तिरिवर्त्तीकगमनं सन्निपाततः ।
कदाचिन्मन्दगा नाडी कदाचिच्छीघ्रगा भवेत् ।
त्रिदोषप्रभवे रोगे विज्ञेया हि भिषग्वरैः ।
पित्तक्रमतया स्फुटसाध्यत्वमसाध्यत्वञ्च ॥ ० ॥
सामान्यतः सुखसाध्यत्वमाह ।
यदार्थं धातुमाप्नोति तदा नाडी तथा गतिः ।
तथापि सुखसाध्यत्वं नाडीज्ञानेन बुध्यते ॥
अयमर्थः । अपराह्णादौ नाडी वातोल्वणा प्रथमं वातगत्यैव वहति ततो यथायथ पित्तादि- गत्या न तु पित्तोल्बणत्वे वातादिगत्या तदा सुखसाध्यत्वं व्यतिरेकेण व्यतिरेकः । तदुक्तमन्ये ।
नाडी यथाकालगतिस्वभावा
प्रकोपशान्त्यादिभिरेव भूयः ॥ ० ॥
असाध्यक्रममाह ।
मन्दं मन्दं शिथिलशिथिलं व्याकुलं व्याकुलं वा
स्थित्वा स्थित्वा वहति धमनी याति नाशञ्च सूक्ष्मा ।
नित्यं स्थानात् स्खलति पुनरप्यङ्गुलिं संस्पृशेद्वा
भावैरेवं बहुविधविधैः सन्निपातादसाध्या ॥
मन्दं मन्दं मुहुरुत्कट अप्रखरमिति यावत् । शिथिलेति स्पष्टनतिरूपम् । व्याकुलेति चल चरितत्वात् । नाशञ्च धनुषये । स्थित्वा स्थित्वेत्यादिना च तद्वैव गतिः । नाशमदर्श नम् । गच्छति कदाचिन्नाडीस्पन्दोऽपि न सम्भा व्यते इत्यर्थे । सूक्ष्मेति यदि लभ्यते तदा तथैवा- नित्यं प्राय स्थानमङ्गुष्ठमूल तस्मात् स्खलति कदापि तत्र न स्पन्दते इत्यर्थे । तदुक्तम् । हन्ति च स्थानविच्युतेति स्थित्वा स्फुरती क्वापि । पुनरपीति किञ्चिदविलम्बेन अङ्गुलीमङ्गुलीमन्त लेषमित्यर्थकृपयैर्बहुभिर्भावविधैर्म्मैः । उक्तञ्चान्यत्र ।
महातापेऽपि शीतत्वं शीतत्वे तापिता शिरा ।
नानाविधगतिर्यस्य तस्य मृत्युर्न संशयः ॥
महत्याधयाश्चपित्तादिजततापनिरासः शीतत्व इत्यपि मन्देति सम्बध्यते । तथा,—
त्रिदोषे स्पन्दते नाडी मृत्युकालेऽपि निश्चला ।
निश्चला स्पन्दसामान्याभाववती । अतीसारादौ हस्तपादादिस्वेदादिना स्पन्दोपलम्भात् । तथा ।
पूर्व्वं पित्तगतिं प्रभञ्जनगतिं श्लेष्माणमाविभ्रतीं
स्वस्थानभ्रमणं मुहुर्व्विदधतीं चक्राधिरूढामिव ।
तीव्रत्वं दधतीं कलापि गतिका सूक्ष्मत्वमातन्वतीं
नोऽसाध्यां धमनीं वदन्ति सुधियो नाडीगति- ज्ञानिनः ॥
अयमर्थः । पूर्व्वमिति क्रमविपर्य्ययेण पित्तादिगति गतीं वारं वारमेवं क्रमेण चक्रोपरिभ्राम्यमाणा- मिव । तथा तीव्रत्वमतिशयवेगं एवञ्च कदाचि- दपूर्व्वगमनाम् । तयोत्तरोत्तर लक्षणाभावा दृश्यतीति विशिष्टो हेतुः । तथा चान्यत्र ।
"नासुधा च शिराऽक्रमा या चैवं मोह नाशिनी ।

या च सूक्ष्मा च वक्रा च तामसाध्यां विदु- र्बुधाः ॥
असुधा सहजतोऽप्युष्णतरा एतन्निषेधता वा कदाचिदिति स्थिरा प्रणिधानेनैव गम्यमान- स्पन्दा च । मांसवाहिनी मांसाधार इव गति- मती लगुडप्रायेति । तदुक्तं मांसेन लगुडा कृतिः । मांसेन सम वहतीति न युक्तं तद्रूप- परिज्ञापकप्रकारस्यानुक्तत्वात् । इयमपि त्रिदोषबोधनाय । या च सूक्ष्मा च वक्रा चेति एतन्निष नाड्यन्तरमिति ॥ ० ॥
असाध्यत्वापवादमाह ।
भारप्रवाहमूर्च्छाभयशोकप्रमुखकारणान्नाडी ।
सम्मूर्च्छितापि गाढं पुनरपि सा जीवितं धत्ते ॥
चिरतरबहुलभारोद्वहनेन वा विषवेगधारा- पाहिवधिरदर्शनादिजनितमूर्च्छया वा राज चाण्डालदर्शनादिभयेन वा पुत्रादिविरह- जनितशोकातिरेकेण वा सम्मूर्च्छितापि अति- निःस्पन्दापि । गाढमिति सुतरां कारणादियोग- ऽपीत्यर्थः । पुनरिति साध्यतां यातीत्यर्थः । भावानां हर्षादीनां प्रवाह इति न युक्तं भय शोकयोः पृथग्विधानात । प्रसङ्गेनैव हेतु- न्तराभिधानम् । तदुक्तम् ।
क्षतिः सन्निपातो भेदी गदमुक्तश्च यो नरः ।
ज्ञायते विज्ञयस्तस्य न किञ्चिन्मृत्युकारकम् ॥
क्षतिः उच्चादितः सन्निपातः अस्थ्यादिसन्धानेन सहितः भेदी अतीसारवान् गदमुक्तो यस्मा- द्दिनान्तरमध्येन वा मुक्तभयवान् । विज्ञयो- ऽसाध्यत्वानुमानं ज्ञान्यति नाशयतीति । कारण प्रागुक्तं तत्तदेव । अन्यच्चापि ।
तथा भूताभिषङ्गेऽपि त्रिदोषवदुपस्थिता ।
समाङ्गा वहते नाडी तथा च न क्रम गता ॥
अपमृत्युन रोगाङ्गा नाडी तत्सन्निपातवत् ।
भूताभिषङ्गे तथा भूतसामान्याभिषङ्गे च देव ग्रहादौ नाडी सन्निपातधर्म्मशालिनी उप- स्थिता । आभासत एव भवति न तु तद्वत्फल प्रदा । भेदमाह । समेति वातपित्तकफस्वभाव- क्रमवती तथाक्रमं व्यतिक्रम न गता । तस्मा- देव अपमृत्युः अपगतो मृत्युयस्याः सा तथा । परमार्थतः सन्निपातवदपि सन्निपातजन्या न स्यात् इति । तदुक्तम् ।
स्वस्थानहीने शोके च हिमाक्रान्ते च निर्गदा ।
भवन्ति निश्चला नाड्यो न किञ्चिच्च दूषण- मिति ॥
स्वस्थानहीन उच्चादितः पतने । अङ्गुष्ठमूलत- श्चरत्व इति युक्ताय । निर्गदा रोगरहिताः निर्गदा अपि निश्चला भवन्ति । दूषणमसाध्यत्व मम । अन्यैः त्वाहुः ।
क्षीणे वातकफे दुष्टे पित्ते वहति दारुणम् ।
पित्तस्थाने विजानीयात् भेषजं तस्य कारयेत्
दिति ॥
अयमर्थः । वातकफाभ्यां नाडी
दुष्ट ८।

नित निवमेनैव वहति तदा तदुपनिवारणार्थं चिकित्सां कुर्यात्। अन्यथा न स्यादिति भावः। अथ कश्चित्।

अशक्यमपरं यावदुन्मत्ता चोत्कटामणी।
नाडीविधिनुसारतोऽपि नाडीलक्षणमिति क्वचित्
दितिः।

तत्र नाडीचक्रं बहुधा व्यभिचारदर्शनात्। कालं च ज्ञानविधुरैरत्र चक्रारव्यापोऽतस्य बुद्धिरत्र निरूप्ये। ॥ ॥ प्रकृतान् कालनिर्णयमाह।
भूधराधुगमाकारा नाडी देहस्य संस्थिता।
तिर्यग्गा चोत्तरा यान्ति आगान्ते शरके भवेत्।
कदाचित् मध्यीभूतारव्या तथा तच्छिथिलाति-मध्यवक्रगमना च। कदाचित् जवत् यदि पुनः तच्छिथिलवक्रगमना च इति वेदि दैव शुद्धस्थानो भिन्न। तत्र कदाचित् भवतामतिवक्रगमन यदा गच्छति। वैद्योऽपि देवकमनस्येव लीन दैवोऽपि यदा मूर्च्छा चोपा-न्मा कदाचन क्षणं स्यात् यदा द्वितीये माधि विवत इति। तथा,—
यथाऽस्थापि वैद्य प्राणानां वमती यथात्।
समाहारकार्ये तत्र यद्यपि ज्ञोपलक्षितं॥
यथापि दिनं हतं हतं न तु कदाचिदिति। प्राणानां मधुरमध्यमागमनम्। प्रोषेति तथाचकमपि नु नाचिद सरकाय चिरजीवेषये। तथा,—
विमर्दितमस्या नाडी ज्वरदाहेन तापिताम्।
निरीक्ष्य यमपमनां तत्र मधुर्निमजात्॥
यदा निरन्तरं ज्वरदाहतापो देवस्य नाशा।
निरोधिति। यदिमानामनुपगत एव भवति॥
तथा,—
निरोधार्थ हृदिस्थे पादे तदा चैवा विशिष्टा।
सती नाडी वहेन्नित्यं तनयति दिनपूर्वकम्॥
अतिन्तु समरक्षीण वहीवादिनैव तु।
अन्येव यान्ती विज्ञं पुनरेवापि चाप्नुयात्।
ताभ्यां इन्द्रप्रयासानां बहुभवति विधानम्॥
इति च इति पुन। विधानं याम एव तपेति जन्मेव विधिवतो विधिवज्ञानाम्। यदि चोभयमापति यदी पुरोभागे भिन्न यदा वहति तदा दिवसत्रयं याम अमरस्य दरिद्रस्य कप प्रभवानि शुभ एव यदि वहति तदेव दिनेन। अन्ये तमेव कालकवाले कदाचित् च यान्ती मरणं लक्षण इति समाचये। विशं यान पुनराहुतो गच्छे कदाचि कालि तदा तत्कारणस्य कारणकारणस्य एव मधुरीति।
तथा,—
क्षिप्रा नाडी युते यत्र विद्युद्योतिनिरीक्षते।
दिनैक जीवितं तस्य द्वितीये म्रियते ध्रुवम्॥
शिखिकण्ठतया क्षिप्रा क्षिप्रा विद्युल्लतेव
चिर लक्ष्ये विरीय इष्टदर्शनात्तुं निमिषं॥
यदा,—
असमानिर्गता नाडी-यदा वहति नाम वा।
ज्वाला च हृदये यैवा तदा ज्वालायं-
ग्रिणि॥

न वैति क्षिप्रा क्षिप्रेव। इत्यत्र पच्यात्र तत्त्वसूक्ष्मगमनात्मकस्यांवादिदं वाचि तत्कार्ये भवेयतो यथायथमार्गमपिनिवेशमान इति वैद्य प्रज्ञयति मन्दगौरवभयात्। मन्दं मन्दमिति यत्नेन च च भूधराधमनाकारेति विवक्षे तत्र नाडीकारिकमरवेवितत्वात्। यन्त्रमिदं सर्वदोष एव वैदितव्यं ज्वरमाणे तु मम एवेति।" इति नाडीपरीक्षायां द्वितीयोद्देशः ॥ ॥
अथ रोगेषु विशेषयोगेषु प्रधानतया प्रथमं ज्वरविशेषकमाह। तत्र ज्वरपूर्वरूपे।
"उष्णवैव नाडीनां भवति मन्थरा प्रभा।
अथ प्रकृती याति ज्वरदाहोऽभिभूयते॥
धातुपातितबद्धेव भवति सर्ववेदना॥
ज्वरलक्षणमाह।
ज्वरकोपे च धमनी धीरा वेगवती भवेत्।
उष्णा शिराततो याति ज्वरो वातप्रभावा विना।
उष्णा वेगधरा नाडी ज्वरकोपे प्रजायते॥
अन्यत्र च।
ज्वरे च वक्रा धावन्ती तथा च मदता भवे।
रसमात्रे निशि प्रातः श्रीमदिरा यथा॥
तत्रापि विशेषमाह।
सौम्या सूक्ष्मा स्थिरा मन्दा नाडी सहज
वातजा।
कूष्णा च कठिना सीत्रा स्पन्दते गौरमायदे।
द्रुता च सरला दीर्घा शीतज्वरे भवेत्।
श्रीमायवर्जं नाडी कठिनाच चला तथा।
मन्दागौरिनातिनरी स्वस्थक मधोर्निम्नम्।
नाडी लघुतरा मन्दा शीतला वैदरोपया॥
कुन्भमाह।
चपला तरला सूक्ष्मा कठिना वातपित्तजा।
ईषत् तरतो सूक्ष्मा मन्दा स्यात् श्लेष्मवातजा॥
निरन्तरं सरे यत्र मध्ये शान्तिवालकम्।
स्पन्दमानसदृश तत्र नाडी स्यात् पित्तकफिमा॥
स्वस्था क्षीणा स्थिरा नाडी निद्रोत्थिकर्फदा।
प्रकृतयाह।
मध्ये करे वहेन्नाडी यदि सन्निपाते ध्रुवम्।
तदा नूनं ज्वरश्च रुधिरसूचिता मता॥
आगन्तुकज्वरभेदमाह।
भूतज्वरे चैव इच्छाविभिन्ना
प्रयाति नाडी हि यथाऽभिषामतः।
तथा,—
ऐकाहिकैव ज्वरे मतुरे
स्वकारत्नमा विषमज्वरेण।
द्वितीयके याति कपोतपूर्वे
प्रयाति तथा चपि त्रिकेण॥
अन्यत्रापि।
कफा वेगधरा नाडी ज्वरकोपे प्रजायते।
चतुर्थकेषु मार्गविपाकतेषु च॥
भवेत् चोपसृष्टे नाडी प्रगाथा वेदनाद्यै॥
प्रकृतमाह।
कामादि अधिष्टे चैव विकारो जायते।
कम्पादि प्रजातमृदा क्षिप्रा मध्यति विनष्टे॥

कामे वैश्यमाह।
कामेऽपि तु भवेन्नाडी कठिना चाति वा।
प्रथमा च द्रुता गुर्वा कठिना च दशवै॥
तत्र विशेषमाह।
पक्वाशये पुष्टिश्वोषा मन्दं मन्दं वहेत्सदा।
अपक्वपूर्णा भवेत् चोक्ता तुल्यो कामा तदेवं॥
प्रकृतकालप्रज्ञानमाह।
पुष्टिकोऽस्तु काकारे दाधि च कटुगाहिनि।
पौरे च विशिष्टा वेगा मधुरे भेकगामिनि।
इत्यादिप्रकारकारे कपाचुमाश्रितिधोऽवे।
वातपित्तकफदेव नाडी वहति विषमम्॥
अथ रसज्ञानम्।
मधुरे वहिमन्दा तिक्ते स्याद्भूतगामिनी।
अम्ले कोष्णा प्लवगति कटुके भृङ्गसन्निभा॥
कषाये कठिना श्यामा लवणे सरला द्रुता।
एवं द्वित्रिचतुर्योगे नानाधर्मवती यदा॥
तदा,—
स्वेदाभिलसिता नाडी कोमला कठिनादपि।
इत्यत्र काठिन्ये कोमला कठिनापि च॥
चीर्णे रसमयश्रेव निशि पुष्टेव नाडी।
अथ धमन्यामनुगमनमाह।
मन्दाग्नि चोक्षधातौ नाडी मन्दतरा भवेत्॥
तदुक्तम्।
चीर्णधातौ च मन्दाग्नौ नाडी चोक्षणा ध्रुवम्।
तथा —
मन्दोऽग्नौ चोष्णा याति नाडी हंसगति-
वहेत्॥
अन्यैस्तु।
कामाग्नेः पुष्टितश्चैव
भवति नाड्योऽप्यनुगामिनागा।
आहारमात्रादुपवासतो वा
तदैव नाडी सुखमापमाना॥
प्रवृत्तिरोगलिङ्गानमाह।
अथो भवन्ति रोगार्थिष्ठा वैद्यो मता।
प्रकृतायुर्वेदागमाह।
पादे च कोष्ठमना कौ भक्षसर्वलता।
तथापि धर्मेण वेदे अथवा पवनोऽनवे।
तथा,—
निद्रेण द्राग्वा यद्वोधदेव
निशीथकवा भ्रमितादिकेषु।
शिराभिवातो हृदया वातपि-
त्तादिकादि उदुना भवे च ॥ ॥
अथ विशेषकाद्यम्।
विशेषे तच्चनाडीगती शिरोगतिस्तापाद्।
स्निग्धविशालेन च भवन्ति निजस्य प्रयाः॥
वृद्धाशय चक्रपूर्णप्रमाणमाह।
आशाषी गच्छद्धे च भवेन्नाडी जरिक्ता॥
शूलप्रदानमाह।
वातेन शुक्रेन मदान्वितेन
क्रोधेन वक्त्रा हि शिरा चलन्ती।
अन्यन्यतो निरन्तरितेन
नाडी न सूते न च पुष्पदाः॥ ॥

अथ प्रमेहज्ञानम् ।
प्रमेहे ग्रन्थिरूपा वा सुतरां साममूत्रवि ॥ * ॥
विषविदम्भसूक्ष्मज्ञानमाह ।
उत्तानितुमुरूपा विषविदिकायां
विदम्भसूत्रेण च वक्ररूपा ।
अन्यथपातेन चाधः स्फुरन्ती
उत्तानभेदिन्यथसामिकाये ॥ * ॥
गुल्मे विशेषमाह कश्चित् ।
गुल्मेन कम्पोऽथ पराक्रमेण
पारावतस्येव गतिं करोति ॥ * ॥
अथ भगन्दरज्ञानम् ।
प्रभायाँ कठिने देहे प्रयाति पैत्तिक क्रमम् ।
भगन्दराभ्यन्तरस्य नाडीव्रणविशेषे ।
प्रयाति वातिक इव नाडी मायकदम्भिनी ॥
अथ बालादिज्ञानम् ।
बालस्य शून्याभिहतस्य जन्तो
वैशारदाद्याकुलितस्य भूय ।
गतिं विपत्तेर्धमनी गमन्द
मरालमानस कपोल्स्थान ।
क्षारोगादिकमपि रक्तान्त्रादिकमथ ज्ञानम् ।
कश्चित्प्रकर्षात्तस्मात् कश्चिदौचिन्त्यमात्रत ।
अन्दितात् कश्चित् कालात सूक्ष्मगन्धिवत ॥
नाडीपरिचयज्ञान प्रायशो नैव दृश्यते ।
तेन धात्रा मयाप्तं यत् समाधियुतानि ।'
इति श्रीमद्रावणकविराजकृते नाडीप्रकाशे
द्वितीयोद्योत ॥
नाडीक, पुं, (नाडीव कायतीति । कै+क ।) शाकविशेषः । नाटशाक इति नालिताशाक इति च भाषा ॥ तत्पर्य्यायः । पट्टशाक २ नाडीशाक ३ । अस्य गुणा । रक्तपित्तनाशित्वम् । विष्टम्भित्वम् । वातकोपनत्वञ्च । इति भावप्रकाशः ॥
नाडीकलापक, पुं, (नाडीनां नाडीसमानानां कलाप समूहो यत्र । कप् ।) सर्पाक्षी । इति भावप्रकाशः ॥
नाडीकेल, पुं, (नारिकेल । पृषोदरादित्वात् साधु ।) नारिकेल । इति शब्दरत्नावली ॥
नाडीच, पुं, (नाड्या चीयते इति । चि+बाहुलकात् ड ।) शाकविशेषः । नालिता इति भाषा । तत्पर्य्यायः । कैशुकम् २ पेयुली ३ पट्ट ४ नियराचण ५ । इति त्रिकाण्डशेष ॥
"नाडीचशाक द्विविधं तिक्तं मधुरमेव च ।
रक्तपित्तहरं तिक्तं क्रिमिकुष्ठविनाशनम् ।
मधुरं पिच्छिलं शीतं विष्टम्भि कफवातकृत् ॥"
इति राजवल्लभ ॥
नाडीचरण, पु, (नाडीचरणौ यस्य ।) पक्षी । इति त्रिकाण्डशेष ॥
नाडीजङ्घ पुं, (नाडीवत् जङ्घा यस्य ।) काक । इति त्रिकाण्डशेष ॥ मुनिविशेष । यथा ।
"नाडीजङ्घ सुरगुरुनिर्म्मितः शकुरकारी
मासाभ्रमा न शुभफलदा पौषमाघौ न प्राप्य ।"
इति मलमासतत्त्वम् ॥
वकविशेष । यथा, महाभारते । १२ । १६८ । १८—२ ।
"ततोऽस्तं भास्करे याते सन्ध्याकाल उपस्थिते ।
आजगाम स्वभवनं ब्रह्मलोकात् खगोत्तम ॥
नाडीजङ्घ इति ख्यातो दयितो ब्रह्मण
सखा ।
वकराजो महाप्राज्ञः काश्यपस्यात्मसम्भव ॥"
नाडीतरङ्ग, पुं, (नाड्यां नालायां तरङ्गो यस्य ।) काकोल । हिण्डक । रतिहिण्डक । इति मेदिनी । गे, ५८ ॥
नाडीतिक्त, पुं, (नाड्या तिक्त ।) नेपालनिम्ब । इति राजनिर्घण्ट ॥ (नेपालनिम्बशब्देऽस्य विवृतो ज्ञेय ॥)
नाडीदेह, पुं (नाडीसारो देहो यस्य । अस्थिसारत्वात् तथात्वम् ।) भृङ्गी । इति त्रिकाण्डशेष ॥
नाडीनक्षत्र क्ली, (नाडीस्थित नक्षत्रम् ।) नरस्य जन्मनक्षत्रादशमयोविंशतितमयोश्च नक्षत्राणि । तत्र पूर्वोक्तानि जाति देशाभिषेकनक्षत्राणि च । यथा,—
"जन्माद्य कर्म्म ततोऽपि दशम सांघातिकं
षोडशकम्
सामुदायिकमष्टादशं विनाशञ्च त्रयोविंशम् ।
मानसमेव पञ्चविंशं मानसकं नर षडभम्
स्यात् ।
नवनक्षत्रो नृपति जात्यादिदेशाभिषेकर्क्षै ॥' * ॥
नामगम् ।
"पूर्वाणि याम्यमघनानि
दास्त्रानि पौष्णेन सहोत्तराणि ।
सपौष्णमिदं मित्रमिन्द्रनक्षत्र
प्रजापतेश्च शतभिषानाम् ।
आग्नेयहस्ताभिजिन्त्यभानि
सारस्वतादे प्रभविष्णुताथाम् ।
देशर्क्षं देशनामभम् । नाडीनक्षत्राणि ॥ * ॥
दैवा देशाद्यानि व्याप्तानि उपतापिनि ।
कन्यध कर्म्मणा बानि पीडा भवति मानवे ॥
क्लेशदचिन्तत्यको हानि सांघातिके तथा ।
अनर्थे सामुदायिके मित्र द्रव्यक्षय ।
वैनाशिके विनाश स्यादित्यर्थविषयपदाम् ॥
नाडीनक्षत्रफलम् ॥ * ॥
जातिभे कुलनाशः स्याद्वन्धनध्वाभिषेकभे ।
देशभे देशभङ्गः स्यात् करेर्वै शुभे शुभम् ॥
यदि राजाभिषेको भवति तत्राभिषेकनिकं भम् । ख इ उ ए लतिका । को य वि तु राशिष्वौत्थादि देशभम् ।
सर्व्वेषां पीडायां दिनमेवमुपोषितोऽगन्ध जुहुयात् ।
मामिना चौरतरो बासिद्धिरमदाहशाइरल ।
इति ज्योतिस्तत्त्वम् ॥
नाडीनिपद पुं (नाडीसारा निपदौ यस्य । अस्थिसारत्वात् तथात्वम् ।) भृङ्गी । इति हेम चन्द्र । २ । १४३ ॥
नाडीव्रण, पुं (नाडीवत्सपो व्रण ।) सर्व्वाङ्ग गलदव्रण । नालो घा इति भाषा । इत्यमर । २ । ६ । ५४ । तस्य निदानं यथा,—
"य शोथमाममिति मत्वा उपेक्षतेऽज्ञो
यो वा व्रण प्रचुरपूयमसाधुवृत्त ।
अभ्यन्तरं प्रविशति प्रविदार्य तस्य
स्थानानि पूर्वविहितानि तत स पूय ॥
तस्यातिमात्रगमनाद्गतिरिष्यते तु
नाडीव यद्वहति तेन मता तु नाडी ॥" * ॥
वातादिदोषभेदेन तस्य रूपाणि यथा,—
"दोषैस्त्रिभिर्भवति सा पृथगेकशश्च
सम्मूर्च्छितैरपि च शल्यनिमित्ततोऽन्या ।
तत्रानिलात् परुषसूक्ष्ममुखी सशूला
फेनानुविद्धमधिकं स्रवति क्षपासु ॥
पित्तात्तृषाज्वरकरी परिदाहयुक्ता
पीतं स्रवत्यधिकमुष्णमहः सु चापि ।
ज्ञेया कफाद्बहुघनार्जुनपिच्छिलास्रा
स्तब्धा सकण्डुररुजा रजनीप्रवृत्ता ॥
दाहज्वरश्वसनमूर्च्छनवक्त्रशोषा
यस्यां भवन्त्यभिहितानि च लक्षणानि ।
तामादिशेत् पवनपित्तकफप्रकोपात्
घोरामसुक्षयकरीमिव कालरात्रिम् ॥
दोषत्रयाभिहितलक्षणदर्शनेन
तिस्रो गतीर्व्यतिकरप्रभवास्तु विद्यात् ॥"
शल्यनिमित्तजस्य यथा,—
"नष्टं कथञ्चिदनुमार्गमुदीरितेषु
स्थानेषु शल्यमचिरेण गतिं करोति ।
सा फेनिलं मथितमच्छमसृग्विमिश्रं
सूष्णं करोति सहसा सरुजञ्च नित्यम् ॥"
अथासाध्यकष्टसाध्ययोर्लक्षणं यथा,—
'नाडी त्रिदोषप्रभवा न सिध्येत्
शेषाश्चतस्रः खलु यत्नसाध्या ॥"
इति माधवकर ॥ * ॥
"त्रिवृत्त्रिफला शम्बूकं क्षीरं समाक्षिकम् ।
हन्ति सद्य क्रमीकृत्य नाडीव्रणभगन्दरान् ॥
इति गरुडपुराणम् ॥
(अस्य चिकित्साकारं यथा,—
"नाडीनां गतिमन्विष्य शस्त्रेणापाट्य कर्म्मवित् ।
सर्व्वव्रणक्रमं कुर्य्यात् शोधनं रोपणादिकम् ॥
नाडीं वातकृतां साधु पाटितां लेपयेद्भिषक् ।
प्रत्यक् पुष्पीफलयुतैस्तिलैः पिष्टैः प्रलेपयेत् ॥
पैत्तिकीं तिलमञ्जिष्ठानागदन्तीनिशायुगैः ।
श्लैष्मिकीं तिलयष्ट्याह्वनिकुम्भारिष्टसैन्धवैः ।
शल्यजां तिलमध्वाज्यैर्लेपयेच्छिन्नशोधिताम् ।
आरग्वधनिशाकालाचूर्णाज्यक्षौद्रसंयुता ।
सूत्रवर्त्तिर्व्रणे योज्या शोधनी गतिनाशनी ॥
घोणान्तलङ्गलकलापपलानि
पुराणं च तक्र लवणेन युक्तम् ।
कुर्व्वन्नाडीन ५ दैव कल्की
वर्त्ताकृतो चापि परेण नाडीन ॥
वर्त्तिका मागधिकसयुक्त
नाडीप्रयुक्त सवणोत्तम वा ।

[illegible]

इति [illegible] ।

नन्द, स्त्री, ([illegible] । नम+[illegible] । [illegible] ।) [illegible] । इति [illegible] ।

नाथ, ऋ ङ आशिषि । उपतापे । ऐश्वर्ये । इति कविकल्पद्रुमः । ([illegible]) [illegible] ।

नाथ पुं (नाथति [illegible] । नाथ+अच् ।) [illegible] । इति [illegible] ॥ १६ ॥ (यथा रामायणे । [illegible])

"[illegible]"

नाथवान्, [त्] त्रि (नाथो विद्यतेऽस्येति । नाथ+मतुप् । मस्य वः ।) पराधीनः । इत्यमरः ॥ [illegible]

"[illegible]"

नाथहरि, पुं ([illegible]) [illegible] ।

नाद, पुं (नद शब्दे+भावे घञ् ।) शब्दः । [illegible]

"[illegible]"

[illegible]

नादः

"[illegible]"

इति [illegible] ॥

[illegible]

इति [illegible] ।

"[illegible]"

[illegible]

"[illegible]"

पावकेनेरितः सोऽयं क्रमादूर्ध्वपथे चरन् ।
अतिसूक्ष्मध्वनिं नाभौ हृदि सूक्ष्मं गले पुनः ॥
पुष्टं शीर्षे त्वपुष्टञ्च कृत्रिमं वदने तथा ।
आविर्भावयतीत्येवं पञ्चधा कीर्त्त्यते बुधैः ॥"
"नकारं प्राणनामानं दकारमनलं विदुः ।
जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते ॥"
अयन्तु योगिसंवेद्य एव । अस्य अवस्थादिकं यदुक्तं हठयोगप्रदीपिकायाम् । ४ । ६५-१०७ ।
"अशक्यतत्त्वबोधानां मूढानामपि सम्मतम् ।
प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते ॥
श्रीआदिनाथेन सपादकोटि
लयप्रकाराः कथिता जयन्ति ।
नादानुसन्धानकमेकमेव
मन्यामहे मुख्यतमं लयानाम् ॥
मुक्तासने स्थितो योगी मुद्रां सन्धाय शाम्भवीम् ।
शृणुयाद्दक्षिणे कर्णे नादमन्तःस्थमेकधीः ॥
श्रवणपुटनयनयुगलघ्राणमुखानां निरोधनं कार्य्यम् ।
शुद्धसुषुम्नासरणौ स्फुटममलः श्रूयते नादः ॥
आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम् ॥
अथारम्भावस्था ।
ब्रह्मग्रन्थेर्भवेद्भेदो ह्यानन्दः शून्यसम्भवः ।
विचित्रः क्वणको देहेऽनाहतः श्रूयते ध्वनिः ॥
दिव्यदेहश्च तेजस्वी दिव्यगन्धस्त्वरोगवान् ।
सम्पूर्णहृदयः शून्य आरम्भी योगवान् भवेत् ॥
अथ घटावस्था ।
द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः ।
दृढासनो भवेद्योगी ज्ञानी देवसमस्तदा ॥
विष्णुग्रन्थेस्ततो भेदात् परमानन्दसूचकः ।
अतिशून्ये विमर्दश्च भेरीशब्दस्तदा भवेत् ॥
तृतीयायां तु विज्ञेयो विहायो मर्दलध्वनिः ।
महाशून्यं तदा याति सर्व्वसिद्धिसमाश्रयम् ॥
चित्तानन्दं तदा जित्वा सहजानन्दसम्भवः ।
दोषदुःखजराव्याधिक्षुधानिद्राविवर्ज्जितः ॥
रुद्रग्रन्थिं यदा भित्त्वा शर्व्वपीठगतोऽनिलः ।
निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत् ॥
एकीभूतं तदा चित्तं राजयोगाभिधानकम् ।
सृष्टिसंहारकर्त्तासौ योगीश्वरसमो भवेत् ॥
अस्तु वा मास्तु वा मुक्तिरत्रैवाखण्डितं सुखम् ।
लयोद्भवमिदं सौख्यं राजयोगादवाप्यते ॥
राजयोगमजानन्तः केवलं हठकर्म्मिणः ।
एतानभ्यासिनो मन्ये प्रयासफलवर्ज्जितान् ॥
उन्मन्यवाप्तये शीघ्रं भ्रूध्यानं मम सम्मतम् ।
राजयोगपदं प्राप्तुं सुखोपायोऽल्पचेतसाम् ॥
सद्यः प्रत्ययसन्धायी जायते नादजो लयः ॥
नादानुसन्धानसमाधिभाजां
योगीश्वराणां हृदि वर्द्धमानम् ।
आनन्दमेकं वचसामगम्यं
जानाति तं श्रीगुरुनाथ एकः ॥
कर्णौ पिधाय हस्ताभ्यां यः शृणोति ध्वनिं मुनिः ।
तत्र चित्तं स्थिरीकुर्य्याद्यावत्स्थिरपदं व्रजेत् ॥
अभ्यस्यमानो नादोऽयं बाह्यमावृणुते ध्वनिम् ।
पक्षाद्विक्षेपमखिलं जित्वा योगी सुखी भवेत् ॥
श्रूयते प्रथमाभ्यासे नादो नानाविधो महान् ।
ततोऽभ्यासे वर्द्धमाने श्रूयते सूक्ष्मसूक्ष्मकः ॥
आदौ जलधिजीमूतभेरीझर्झरसम्भवाः ।
मध्ये मर्द्दलशङ्खोत्था घण्टाकाहलजास्तथा ॥
अन्ते तु किङ्किणीवंशवीणाभ्रमरनिःस्वनाः ।
इति नानाविधा नादाः श्रूयन्ते देहमध्यगाः ॥
महति श्रूयमाणेऽपि मेघभेर्य्यादिके ध्वनौ ।
तत्र सूक्ष्मात् सूक्ष्मतरं नादमेव परामृशेत् ॥
घनमुत्सृज्य वा सूक्ष्मे सूक्ष्ममुत्सृज्य वा घने ।
रममाणमपि क्षिप्तं मनो नान्यत्र चालयेत् ॥
यत्र कुत्रापि वा नादे लगति प्रथमं मनः ।
तत्रैव सुस्थिरीभूय तेन सार्द्धं विलीयते ॥
मकरन्दं पिबन् भृङ्गो गन्धं नापेक्षते यथा ।
नादासक्तं तथा चित्तं विषयान्नहि काङ्क्षते ॥
मनोमत्तगजेन्द्रस्य विषयोद्यानचारिणः ।
नियन्त्रणे समर्थोऽयं निनादनिशिताङ्कुशः ॥
बद्धन्तु नादबन्धेन मनः सन्त्यक्तचापलम् ।
प्रयाति सुतरां स्थैर्य्यं छिन्नपक्षः खगो यथा ॥
सर्व्वचिन्तां परित्यज्य सावधानेन चेतसा ।
नाद एवानुसन्धेयो योगसाम्राज्यमिच्छता ॥
नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते ।
अन्तरङ्गकुरङ्गस्य वधे व्याधायतेऽपि च ॥
अन्तरङ्गस्य यमिनो वाजिनः परिघायते ।
नादोपास्तिरतो नित्यमवधार्य्या हि योगिना ॥
बद्धं विमुक्तचाञ्चल्यं नादगन्धकजारणात् ।
मनः पारदमाप्नोति निरालम्बाख्यखेऽटनम् ॥
नादश्रवणतः क्षिप्रमन्तरङ्गभुजङ्गमः ।
विस्मृत्य सर्व्वमेकाग्रः कुत्रचिन्नहि धावति ॥
काष्ठे प्रवर्त्तितो वह्निः काष्ठेन सह शाम्यति ।
नादे प्रवर्त्तितं चित्तं नादेन सह लीयते ॥
घण्टादिनादसक्तस्तब्धान्तःकरणहरिणस्य ।
प्रहरणमपि सुकरं शरसन्धानप्रवीणश्चेत् ॥
अनाहतस्य शब्दस्य ध्वनिर्य उपलभ्यते ।
ध्वनेरन्तर्गतं ज्ञेयं ज्ञेयस्यान्तर्गतं मनः ।
मनस्तत्र लयं याति तद्विष्णोः परमं पदम् ॥
तावदाकाशसङ्कल्पो यावच्छब्दः प्रवर्त्तते ।
निःशब्दं तत्परं ब्रह्म परमात्मेति गीयते ॥
यत्किञ्चिन्नादरूपेण श्रूयते शक्तिरेव सा ।
यस्तत्त्वान्तो निराकारः स एव परमेश्वरः ॥
सर्व्वे हठलयोपाया राजयोगस्य सिद्धये ।
राजयोगसमारूढः पुरुषः कालवञ्चकः ॥
तत्त्वं बीजं हठः क्षेत्रमौदासीन्यं जलं त्रिभिः ।
उन्मनी कल्पलतिका सद्य एव प्रवर्त्तते ॥
सदा नादानुसन्धानात् क्षीयन्ते पापसञ्चयाः ।
निरञ्जने विलीयेते निश्चितं चित्तमारुतौ ॥
शङ्खदुन्दुभिनादञ्च न शृणोति कदाचन ।
काष्ठवज्जायते देह उन्मन्यावस्थया ध्रुवम् ॥
सर्व्वावस्थाविनिर्म्मुक्तः सर्व्वचिन्ताविवर्ज्जितः ।
मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः ॥" ॥
सङ्गीतशास्त्रविशेषः । अयन्तु द्रुतरागे

पुंस । न्यायतत्त्वयोर्ग्रन्थयोः प्रणेता । अस्य वाचस्पत्यं दर्शितमस्मदग्रे ॥)

नादेयं, क्ली, (नद्या नदस्य वा इदं तत्र भवं वा । नदी वा नद + ढक् ।) सैन्धवलवणम् । इति रत्नमाला ॥ सौवीराञ्जनम् । इति राजनिर्घण्टः ॥ नदीनदसम्बन्धिजलादौ त्रि । यथा,—
("नादेयं नादेयं शरदि वसन्ते च नादेयम् ।
पानीयं पानीयं शरदि वसन्ते च पानीयम् ॥"
इति वैद्यकराजवल्लभीयद्रव्यगुणे ॥)
"नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम् ॥"
अस्य गुणाः । यथा, भावप्रकाशे ।
'नादेयमुदकं रूक्षं वातलं लघु दीपनम् ।
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत् ॥"
(न आदेयमिति विग्रहे अग्राह्ये त्रि । यथा,—
"सौगन्ध्यहीनं नादेयं पुष्पं कान्तमपि क्वचित् ॥")

नादेयः, पुं, (नद्यां भवः । नदी + ढक् ।) काशतृणम् । वानीरवृक्षः । इति राजनिर्घण्टः ॥

नादेयी, स्त्री, (नद्यां भवा । "नद्यादिभ्यो ढक् ।" ४।२।९७। इति ढक् ततो ङीप् ।) अम्बुवेतसः । भूमिजम्बुका । वैजयन्तिका । इत्यमरः । २ । ४ । ६५ ॥ नागरङ्गः । जवा । अङ्कुटः । इति मेदिनी । दे ८६ ॥ अग्निमन्थः । (अस्याः पर्य्यायो यथा
"अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका ।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
काकजम्बूः । इति राजनिर्घण्टः ॥

नाध, ऋ ङ नाधे । इति कविकल्पद्रुमः ॥ (भ्वा-आत्म-सकं-सेट् ।) ऋ, अननाधत् । ङ, नाधते । नाधो दयाशीरैश्वर्य्योपतापाः । इति दुर्गादासः ॥

नाना, अ, (न + "विनञ्भ्यां नानाञौ न सह ।" ५ । २ । २७ । इति नाञ्प्रत्ययः ।) अनेकार्थम् । (यथा, मनुः । ९ । १४८ ।
"बह्वीषु चैकजातानां नानास्त्रीषु निबोधत ॥")
उभयार्थम् । विनार्थम् । इति मेदिनी । ने, ३५ ॥
(यथा, मुग्धबोधे । [वर ॥')
"न नाना शम्भुना रामात् वर्त्तेताऽयोऽप्यतो

नानाकन्दः, पुं, (नाना बहवो कन्दा यस्य ।) पिण्डालुः । इति राजनिर्घण्टः ॥ बहुमूलकः ॥ (बहुमूलयुक्ते, त्रि ॥)

नानाध्वनिः, पुं (नाना ध्वनिर्यत्र । नानाविधो ध्वनिर्वा ।) काहलावंशवीणादिशब्दः । इति हारावली । २३८ ॥

नानारूप त्रि, (नाना रूपाणि यस्य ।) अनेकप्रकारः । तत्पर्य्यायः । विविधः १ बहुविधः २ पृथग्विधः ३ । इत्यमरः । ३ । १ । ८९ ॥ (यथा, मनुः । ९ । ३८ ।
"भूमावप्येककेदारे कालोप्तानि कृषीवलैः ।
नानारूपाणि जायन्ते बीजानीह स्वभावतः ॥
नानारूपाणि इति विग्रहे । बहुविधरूपे क्ली ।
यथा श्रीरामायणे । १ । ६ । ३१ ।
"नानारूपैर्वृक्षजातैः हरेरिव महाद्रुमाः ॥")

[illegible]

नामापराधयुक्तानां नामान्येव हरन्त्यघम्।
अविश्रान्तप्रयुक्तानि तान्येवार्थकराणि च॥
नामैकं यस्य वाचि स्मरणपथगतं श्रोत्रमूलं गतं वा
शुद्धं वाशुद्धवर्णं व्यवहितरहितं तारयत्येव सत्यम्।
तच्चेद्देहद्रविणजनतालोभपाषण्डमध्ये
निक्षिप्तं स्यान्न फलजनकं शीघ्रमेवात्र विप्र!॥"
इति श्रीहरिभक्तिविलासः॥

नामापराधी, [न्] त्रि, (नामापराधोऽस्यास्तीति। इनि।) नामापराधकर्त्ता। यथा,—
"नाम्नो बलाद्यस्यापराधान् य कुरुतेऽनिशम्।
नामापराधकर्त्ता सो याति चाधमधोगतिम्॥
विनाशयति नामभ्योऽपराधं नामतो जनः।
नामापराधी लभते स्वादाम्रमथेति नारकी॥
माधवो दुःखदः पापी भवमाप्नो हरेः स्मृतः।
नामापराधी मनुजो मुने। भवति नारकी॥
अपराधाननुक्रम्य विदूरयति नामभिः।
नाम्नोऽह लोकः कुर्वंस्ताश्च पापाद्धमाधमः॥"
इति पाद्मोत्तरखण्डे १२ अध्यायः॥

नाय, पुं, (नीयतेऽनेनेति। नी+"श्रिणीभुवो ऽनुपसर्गे।" ३।३।२४। इति करणे घञ्।) नयः। नीतिः। इत्यमरः। ३।२।८॥ (यथा, भट्टिः। ७।३६।
"यात धूय यमधार्यं दिश नायेन दक्षिणाम्॥"
नी+भावे घञ्।) प्रापणम्। इति नीधातु-दर्शनात्॥ (नयति प्रापयतीति। नी+"दुन्यार-नुपसर्गे। ३।१।१४२। इति णः। उपायः। यथा, भट्टिः। ६।८२।
"नाय कोऽत्र स येन स्यो वताद्य विगतज्वरः॥"
नेतरि त्रि। यथा, ऋग्वेदे। ६।२४।१०।
"स्वस्य नायमवसे अभीक इतो वा तमिन्द्र पाहि रिषः॥")

नायकः, पुं, (नयति प्रापयतीति। नी+ण्वुल्।) नेता। (यथा, गीतायाम्। १।७।
"नायका मम सैन्यस्य संज्ञार्थं तान् ब्रवीमि ते॥")
श्रेष्ठः। (यथा भागवते। ४।७।१९।
"तदुपागतमालक्ष्य सर्वे सुरगणादयः।
प्रणेमुः सहसोत्थाय ब्रह्मेन्द्रत्र्यक्षनायकाः॥")
हारमध्यमणिः। इति मेदिनी। के, ११॥
अग्रे सरिकः। सेनापतिः। इति त्रिकाण्डशेषः॥ (यथा, महाभारते। ३।२२२।४।
"वध्यमानं बलं दृष्ट्वा बहुधासो पुरन्दरः।
असैन्यनायकार्थाय चिन्तामाप भृशं तदा॥")
शृङ्गारसाधकः। स च त्रिविधः। पतिरुपपति-र्वैशिकश्चेति। विधिवत् पाणिग्राहकः पतिः। अनुकूलदक्षिणधृष्टशठभेदेन पतिश्चतुर्द्धा। सार्व-कालिकपराङ्गनापराङ्मुखत्वे सति सर्वकाल-मनुरक्तोऽनुकूलः। सकलनायिकाविषयसमसहा-नुरागो दक्षिणः। भूयो निःशङ्कः कृतदोषो-ऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणो धृष्टः। कामिनीविषयकपटपटुः शठः। आचार-हानिहेतुः पतिरुपपतिः। बहुलवेश्याभोगीय रसिको वैशिकः। वैशिकस्तूत्तममध्यमाधम-भेदात् त्रिविधः। दयिताजनप्रकोपेऽपि उप-चारपरायण उत्तमः। प्रियायाः प्रकोपे य प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनो भावं गृह्णाति स मध्यमः। भयलज्जाशून्य कामक्रीडायामनवगतकृत्याकृत्यविचारोऽधमः॥॥ मानी चतुरश्च शठ इत्यन्तर्भवति। वाक्चेष्टा-व्यङ्ग्यसमागमश्चतुरः। प्रोषितपतिरुपपतिर्वैशि-कश्च भवति। अनभिज्ञनायको नायकाभास एव। तेषाञ्च नर्मसचिवपीठमर्द्दविटचेटक-विदूषकभेदाच्चतुर्धा। कुपितस्त्रीप्रसादकः पीठ-मर्द्दः। नर्मसचिवोऽप्ययमेव। कामतन्त्रकला-कोविदो विटः। सन्धानचतुरश्चेटकः। अङ्गादि-वैकृतैर्हासकारी विदूषकः॥॥ तेषामष्ट सात्त्विकगुणाः। यथा,—
"स्वेदः स्तम्भोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः।
वैवर्ण्यमश्रुप्रलयावित्यष्टौ सात्त्विका गुणाः॥"॥
तेषां दशावस्था यथा,—
"अभिलाषश्चिन्ता स्मृतिश्च गुणकीर्त्तनम्।
उद्वेगश्च प्रलापश्च उन्मादो व्याधिरेव च।
जडता निधनञ्चैव दशावस्थाः प्रकीर्त्तिताः॥"
इति रसमञ्जरी॥
(अस्य लक्षणभेदादिकं यथा, साहित्यदर्पणे। ३।३१—३८।
"त्यागी कृती कुलीनः सुश्रीको रूपयौवनोत्-साही।
दक्षोऽनुरक्तलोकस्तेजोवैदग्ध्यशीलवान् नेता॥
धीरोदात्तो धीरोद्धतस्तथा धीरललितश्च।
धीरप्रशान्त इत्ययमुक्तः प्रथमश्चतुर्भेदः॥
अविकत्थनः क्षमावानतिगम्भीरो महासत्त्वः।
स्थेयान् निगूढमानो धीरोदात्तो दृढव्रतः कथितः॥
मायापरः प्रचण्डश्चपलोऽहङ्कारदर्पभूयिष्ठः।
आत्मश्लाघानिरतो धीरैर्धीरोद्धतः कथितः॥
निश्चिन्तो मृदुरनिशं कलापरो धीरललितः स्यात्।
सामान्यगुणैर्भूयान् द्विजादिको धीरप्रशान्तः स्यात्॥"
एषाञ्च शृङ्गारिरूपत्वे भेदानाह तत्रैव। ३।३९—४४।
"एभिर्दक्षिणधृष्टानुकूलशठरूपिभिस्तु षोडशधा।
एषु त्वनेकमहिलासु समरागो दक्षिणः कथितः॥
कृतागा अपि निःशङ्कस्तर्जितोऽपि न लज्जितः।
दृष्टदोषोऽपि मिथ्यावाक् कथितो धृष्टनायकः॥
अनुकूल एकनिरतः शठोऽयमेकत्र बद्धभावो यः।
दर्शितबहिरनुरागो विप्रियमन्यत्र गूढमाचरति॥
एषाञ्च त्रैविध्यात् सर्वेषामुत्तममध्याधमत्वेन।
उक्ता नायकभेदाश्चत्वारिंशत्तथाष्टौ च॥'
एषामनुचरादयोऽन्ये तत्रैव द्रष्टव्याः॥)

नायकाधिपः, पुं, (नायकानां नेतॄणां सेनापतीनां वा अधिपः।) नरेन्द्रः। राजा। इति शब्द-रत्नावली॥

नायिका, स्त्री, (नयति या। नी+ण्वुल्। टाप् अत इत्वञ्च।) दुर्गाशक्तिः। सा अष्टधा। यथा,—
"ततोऽष्टनायिका देवी यन्त्रं परिपूजयेत्।
उग्रचण्डां प्रचण्डाञ्च चण्डोग्रां चण्डनायिकाम्॥
अतिचण्डाञ्च चामुण्डां चण्डां चण्डवतीं तथा।
पद्मे चाष्टदले चैता प्रागादिक्रमतस्तथा।
यथोपचारैः सम्पूज्य भैरवाद्यष्टदेवताः॥"
इति प्रकृतिखण्डे ६१ अध्यायः॥

शृङ्गाररसालम्बनविभावरूपा नारी। सा च त्रिविधा। स्वीया परकीया सामान्यवनिता चेति। तत्र स्वामिन्येवानुरक्ता स्वीया। स्वीयापि त्रिविधा। मुग्धा मध्या प्रगल्भा च। तत्र अङ्कुरितयौवना मुग्धा। सा च ज्ञातयौवना अज्ञातयौवना च। सैव क्रमशो लज्जाभय-पराधीनरतिर्नवोढा। सैव क्रमशो जात-प्रश्रया विश्रब्धनवोढा। समानलज्जामदना मध्या। एषैव चातिप्रश्रयादतिविश्रब्धनवोढा। पतिमात्रविषयकेलिकलापकोविदा प्रगल्भा। मध्याप्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे। धीरा अधीरा धीराधीरा चेति। व्यङ्ग्य-कोपप्रकाशा धीरा। अव्यङ्ग्यकोपप्रकाशा अधीरा। व्यङ्ग्याव्यङ्ग्यकोपप्रकाशा धीराधीरा। एते धीरादयस्त्रयो भेदा द्विधा भवन्ति। ज्येष्ठा कनिष्ठा च। परिणीतत्वे सति भर्त्तुरधिकस्नेहा ज्येष्ठा। परिणीतत्वे सति भर्त्तुर्न्यूनस्नेहा कनिष्ठा॥ अप्रकटपरपुरुषानुरागा परकीया। सा च द्विविधा। परोढा कन्यका च। गुप्ता विदग्धा लक्षिता कुलटा अनुशयाना मुदिताप्रभृतीनां परकीयायामेवान्तर्भावः। गुप्ता त्रिविधा। वृत्त-सुरतगोपना च। वर्त्तिष्यमाणसुरतगोपना। वर्त्त-मानसुरतगोपना च। विदग्धा द्विविधा। वाग्वि-दग्धा क्रियाविदग्धा चेति। अनुशयाना त्रिविधा। वर्त्तमानस्थानविघट्टनेन भाविस्थानाभावशङ्कया स्वानधिष्ठितसङ्केतस्थले भर्त्तुर्गमनानुमानेन॥॥ वित्तमात्रोपाधिकसकलपुरुषाभिलाषा सामान्य-वनिता। एता अन्यसम्भोगदुःखिता। वक्रोक्ति-गर्व्विता मानवत्यश्च तिस्रो भवन्ति। वक्रोक्ति-गर्व्विता द्विविधा। प्रेमगर्व्विता सौन्दर्य्यगर्व्विता च। मानवती यथा। प्रियापराधसूचिका चेष्टा मानः। स च लघुमध्यमो गुरुश्चेति। अल्पा-पनेयो लघुः। कष्टापनेयो मध्यमः। कष्टतमा-पनेयो गुरुः॥॥ एताः षोडश अष्टाभिरव-स्थाभिः प्रत्येकमष्टविधाः। प्रोषितभर्त्तृका खण्डिता उत्कण्ठिता कलहान्तरिता विप्र-लब्धा वासकसज्जा स्वाधीनपतिका अभिसा-रिका चेति गणनादष्टाविंशत्यधिकं शतं भेदा भवन्ति। तासामुत्तममध्यमाधमगणनया चतु-रधिकाशीतित्रिशतभेदा भवन्ति। तथाच दिव्या अदिव्या दिव्यादिव्या इति गणनया द्विसहस्रा-ष्टाधिकमनन्ततरसहस्रभेदा भवन्ति। इति रस-मञ्जरी॥ ॥

यथा ।

"यच किञ्चिज्जगत् सर्वं दृश्यते श्रूयतेऽपि वा ।
अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः

स्थितः ॥"

तथा ।

"यतो वेदाः पुराणानि विद्या मन्त्राश्च सर्वशः ।
सर्वाणि च भूतानि नारायणेऽपि प्रवर्तते ।
तेन सर्वं जगत् व्याप्तं तस्मान्नारायणः स्मृतः ॥"

इत्यादिकमस्याधिकं नारायणोपनिषदि द्रष्टव्यम् इति नारायण । दशमस्कन्धे भगवत ॥ ७ ॥
("नाराणामयनाच्चापि ततो नारायणः स्मृतः ।
इति महाभारते । ५ । ७० । १० ।)

अस्य शब्दो यथा,—

"किन्नरश्च विद्याधरो हिमुखश्च चतुर्मुखः ।
अष्टभुजश्च पैङ्गलो नारायणो हिमुखश्च सपत् ।
चतुर्भुजश्च यत्रो च नारायणाश्च वल्लभी ।
तद्रूपं च पृथग्भूतं नैव तेषां नारायणप्रियः ॥"

इति ब्रह्मवैवर्ते प्रकृतिखण्डे ४१ अध्याय ।

तस्य ध्यानं यथा,—

"ध्येयः सदा सवितृमण्डलमध्यवर्त्ती
नारायणः सरसिजासनसन्निविष्टः ।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥"

इत्यादिप्रकरणम् ॥

अपि च ।

"सुदर्शनमहापद्मं शङ्खमत्स्यादिकम् ।
गदाकौस्तुभवनमालाश्रीवत्सपदाङ्कितम् ।
शङ्खोऽरिशङ्खगदाचक्रधरं परम् ।
पीताम्बरधरं श्यामं प्रसन्नवदनं परम् ।
केयूरकुण्डलधरं किरीटमुकुटोज्ज्वलम् ।
चिन्तयेत् सततं ध्याने देवमादिमनन्तकम् ।
विभावयेत् चिदानन्दं सर्वसाक्षिणमच्युतम् ।
सर्वशक्तिं देवेशं विष्णुं प्रभुं सनातनम् ॥"

इति कालिकापुराणे ८९ अध्याय ।

तन्नामोच्चारणं यथा —

"नारायणानुस्मरणात् सर्वपापैः प्रमुच्यते ।
कर्मणां भक्तियुक्तेन जातिं प्राप्नोति निर्मलाम् ॥"

इति वराहपुराणम् ॥

"अच्युतानन्तगोविन्द नामोच्चारणभेषजम् ।
नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥"

इति पद्मपुराणे १६ अध्याय ॥

"नारायणेति मन्त्रोऽस्ति वागस्ति वशवर्त्तिनी ।
तथापि नरके घोरे पतन्तीति किमद्भुतम् ॥"

इति महाभारतम् ॥

तस्य तुलसीपत्रपूजादि यथा —

ईश्वर उवाच ।

"शृणुष्व देवि वक्ष्यामि तुलस्याः पूजने फलम् ।
अन्यत्र तत्र तत्रापि हि तुलस्याः प्रशंसनम् ।
या दृष्टा निखिलाघसङ्घशमनी स्पृष्टा वपुःपावनी ।
रोगाणामभिवन्दिता निरसनी सिक्तान्तकत्रासिनी ।
प्रत्यासत्तिविधायिनी भगवतः कृष्णस्य संरोपिता ।
न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः ।
तुलसीं ये विचिन्वन्ति धन्यास्ते करपल्लवाः ।
केशवार्थं कलौ ये च रोपयन्तीह भूतले ।
किं करिष्यति संरुष्टो यमोऽपि सह किङ्करैः ।
तुलसीदलेन देवेशः पूजितो येन दुःखहा ।
मिथ्या वदामि नाहं तत् नारायणं प्रति भो ।
नारायणं प्रपद्यन्ते तुलसीपत्रपूजया ।
सर्वत्रैव हरिः पूज्यः तुलस्या पुष्पकेण वा ।
तुलसीदलमादाय प्रदक्षिणं करोति यः ।
पदे पदेऽश्वमेधस्य फलं प्राप्नोति मानवः ।
अर्च्चयित्वा तुलस्या च प्रणम्य पुरुषोत्तमम् ।
न पुनर्जायते मर्त्यः संसारे दुःखसागरे ।
तुलसीकाननं यत्र यत्र पद्मवनानि च ।
वसन्ति वैष्णवा यत्र तत्र सन्निहितो हरिः ।
तुलसीगन्धमादाय यत्र गच्छति मारुतः ।
दिशो दश पुनात्याशु भूतग्रामांश्चतुर्विधान् ।
तुलसीकानने यस्तु मुहूर्त्तमपि विश्रमेत् ।
जन्मकोटिकृतात् पापात् मुच्यते नात्र संशयः ।
तुलसीमञ्जरीभिर्यः कुर्यात् हरिहरार्च्चनम् ।
न स गर्भगृहं याति मुक्तिभागी भवेन्नरः ।
पुष्पान्तराणि सन्त्येव तुलसीसदृशं न हि ।
तुलसीपत्रमादाय यः पूजयति केशवम् ।
स याति परमं स्थानं यत्र गत्वा न शोचति ।"

इति पद्मपुराणे क्रियायोगसारे २१ अध्याय ।

मिदं वस्तु प्रमादात् दृष्टा दि कोऽपि मानव ।
मायामावशदप्रमादात् तुलसीमाला च सदा ।
सर्वमङ्गलदायिनी च सा भवानि मानव ।
सर्वदेवादिदेवेशो यस्तां तुलसीमालां धृत्वा ।
सर्वाणि कुर्वते यस्तु हरिपादे पुनः पुनः ।
भोजनार्थमिदं चैव तच्च तुलसीपत्रं सदा ।
सर्वं विष्णुं कथयन् मनसा च परिमाणमेव ।
यस्य यानि प्रमादाद्दृष्टानि तुलसीमालया सदा ।
दायादप्रभृतिभिर्यो दद्यात् शिरोमणिम् ।
सर्वत्र विष्णुः सदा यस्य तस्य तुलसीमाला धृता ।
कर्मणा चैव तुलसी च निवास तत्र प्रसादतः ।"

तत्र पीतवस्त्रधारणादि यथा —

"कदाचित् कलहो येन विरा । वसति प्रयत्न

सत् ।

सर्वेश्वराणां यस्तु निर्देशं प्रयच्छन्तु ।
कार्पासं पट्टसूत्रं च सर्वमत्र प्रभुताम् ।
भक्तप्रभायो कुरुते सर्वविभावयत्तु च ।
सर्वजगत्पिता पा मां भवति प्रभुताम् ।
भवदर्शनैः सिद्धो च भावयामि शिरसा ।
मोक्षदायकं शिरो च मां भवति प्रभुताम् ।
सिद्धचारण यस्तु कुरुते सद्गुणैः ।
दुर्लभदायविनिर्मुक्त प्रमां भवति प्रभुताम् ।
दानशीलोऽयं यस्तु वैष्णवोत्तम वैभवम् ।
कुरुते भावनामपि । स मां भवति प्रभुताम् ।
विद्यां देवतार्चनं यत्नमेव मानव ।
करोति यस्तु विधिवत् । स मां भवति प्रभुताम् ।
भावयमाणैर्विद्यो वै च कमलार्चनमपि च ।
चामरवाहुधरा वै च नैवं तुलसीमालां सदा ।
सर्वाणि सन्तानेन विधाने यानि वै सदा ।
पञ्चवक्त्रं वाहनमपि वै वैष्णवं तुलसीमालां सदा ।
हिरण्मयाय वै सदा अर्घ्यमपि च वहन्ति वै ।
विभावयामि वै च नैवं तुलसीमालां सदा ।
वै च श्रीरोहिणीसमायुतो पुण्यमहात्म्य वै ।
अश्वमेधादिभिः वै च नैवं तुलसीमालां सदा ।
सर्वाणि सुकर्माणि यानि वै भित्रकादय ।
देवपितृमनुष्याणां वै च नैवं तुलसीमालां सदा ।
पञ्चाननो सहितो वै श्रीवत्सं धारयेच्छ सदा ।
सर्वलोकहिता वै नैवं तुलसीमालां सदा ।
भाग्यपुण्यहरा वै च वै च मित्रतो विष्णु ।
कामेश्वरश्च वै इत्थं नैवं तुलसीमालां सदा ।
विद्यो मेरुर्वै वै च कुबेरे कर्ममोक्षणम् ।
इत्यमृतं शिवं सर्वं नैवं तुलसीमालां सदा ।
वै च दद्यात् सर्वं श्रीतारतम्यानि सर्वम् ।
प्रभावाय सदा ये ते सर्वं सम्पदो भुवि ।
भगवतः प्रीयते वै च कुबेरो विनिर्मोक्षणम् ।
श्रीवत्सप्रकाशो वै नैवं तुलसीमालां सदा ।
कार्त्तिके मेरुवे देवनारायणो दिनस्य दिव ।
न ते कश्चिद्विनिन्दते । नैवं तुलसीमालां सदा ।
समुद्रस्य चित्तं तैः कर्मभिः दृष्टमात्रम् ।
विष्णुश्च वैभवं वै च नैवं तुलसीमालां

सदा ।"

इति क्रियायोगसारे २१ अध्याय ।

भक्त्याविधिपूजनम् । यथा,—

"नारायणं विना न कोऽपि भक्तिर्नियमः शिवः ।
दायादः परमन्नाथो दातारो श्रीयमूर्त्तिमान् ।
तत्र प्रसन्न पूजा तत्र तैवात् भोगम् ।
दानो नारायणो दाता दिवोऽथ दिव्योऽप्यद्वय ।
पूर्वं श्रीकृष्णस्तत्त्व पूजा नारायणाख्यम् ।
आदित्य सर्वाधिपतिप्रभावः दीप्तम् ।
विज्ञानं विधानतः सदा सर्वलोकेषु ।
अनुगाम भवामय । मायया सर्वमात्मम् ।
विद्वेषोऽयं भयप्रदायोऽक्षमतामिष्ट ।
यदीयमायां विधुरा सदाभावादिपरमः ॥"

इति पैङ्गलोपनिषदि ब्रह्मवैवर्ते प्रकृतिखण्डे ।

ग्रैवेयकोदय । यथा,—

"मङ्गलं कवयन्ति नाम नारायणाख्यं मयम् ।
नारायणेति मन्त्रोऽयं सर्वकामफलप्रदः ।
कुम्भीपाकं तत्र नैवं सर्वमन्तराय ।
कर्मणो भगवान् चायाधो प्राप्य भवेत् ॥"

इति महाभारते । ५ । ७० अध्याय ।

सर्वेश्वरविशिष्टः । यथा —

"भक्तीयं दयामुनिश्रीनारद सर्वो
नारायणो भव इति वरमण्यमाप्य ॥"

इति श्रीभागवते । ६ । ७ । ६ ।

"दृश्यनिधनमात्रैकं नाम नारायणो भवेत् ॥"

इति मनियमः ।

(शब्दप्रकृतौ प्राकृतप्रादेशिकधर्मविशेष । अथ मूलिकापरिचय ।

"सर्वं नारायणो देवो विश्वनारायणप्रियः ।"

पूर्वोक्तविवक्षित । यथा, नारायणादि ग्रन्थ रोगाधिकारे ।

"शतावरी मधुरा शाकं त्रिफला चोदुम्बरा ।
नारी त्रिफलीपत्रकश्च सर्वो रसा ।
दशमाता गोदुग्धे पोषं सर्वोषधी च त्रिफला ।
द्वौ भागौ पोषार्थं सर्वं कुर्यात् करपत्रकं ।
त्रिदुष्टत्वं सर्वत्रैव सर्वस्य शास्त्रं भवेत् ।
विद्यं द्वितीयं त्रिफलं नाम्ना नारायणं शुभम् ।
एतत् नारायणं नाम्ना चूर्णं च प्रभावतः ।
सर्वं प्रमेहं विनाशं रक्तं त्रिदोषमपहरेत् ।
सर्वरोगाधिकं चैव गुल्मप्लीहोदरान् हरेत् ।
भगन्दरं हरेत् चूर्णं नाम्नैव प्रवदन्ति ।
हिक्कां श्वासं विजयं शूलं सर्वं कुर्यादिदं ।
शतावरी सर्वरोगं हरेत् मधुना मतः ।
अर्शांसि भगन्दरं नाम्ना कास्ति कासं भवेत् ।
मूत्रं मूत्रकृच्छ्रं दोषं सर्वं तत्र वर्ते ।
प्रदरं सर्वरोगं मर्त्यं सर्वं सिद्धि ।
सर्वेषु चिकित्सितेषु वैद्यश्चेतो नारायणं ॥"

नारायणप्रिय अश्वो (बलपूर्वकं पूर्वं करोति ।

सर्वेश्वरनारायणविष्णुप्रियं त्रिलोकनाथप्रमदा

गिरिमालानाम् । यथा सर्वपुराणे ।

"गन्धाक्षतानि च मान्यं नारायणमयं सदा ।
यत्र नारायणं सर्वं नाम सर्वं सर्वगम ।"
"यत्र विशेषं त्रिलोकं नारायणं त्रिविधं

सर्वं

अथ प्रतिपदि राजन्! विक्रीता जाह्नवी भवेत्।
विक्रीतायाञ्च जाह्नव्यां विक्रीतोऽभूज्जनार्द्दनः।
जनार्द्दने च विक्रीते विक्रीतं भुवनत्रयम्॥
कोऽपि न जायते तस्य निःसम्बन्धप्रसङ्गतः॥"
तत्र वर्ज्ज्यानि यथा,—
"दीक्षाञ्च देवपूजाञ्च जप गङ्गातटे चरेत्।
गुप्तदानं विधायापि चारित्रोऽप्यमाचरेत्॥
श्राद्धञ्च तर्पणञ्चैव परोपकारकर्म्म च।
परोद्दिष्टञ्च मनसा मलक्षयञ्च दापनं।
स्तवपाठञ्च मौनञ्च मौनालापविवर्ज्जनम्॥
जलमं वारिपानञ्च कर्त्तव्यं नत्वभावतः।
एतानि त्रिंश कर्म्माणि चैवं नारायणिं चरेत्॥'
इति ब्रह्मवैवर्त्तपुराणे ४६ अध्यायः॥
अवशिष्टं गङ्गाशब्दे द्रष्टव्यम्॥

नारायणतैल, क्ली (नारायणाख्यं तैलम्।) औषध-पक्वतैलभेद। तत्त्रिविधम्। स्वल्प बृहत् महच्च। यथा,—
"बिल्वाग्निमन्थश्योनाकपाटलापारिभद्रकाः।
प्रसारण्यश्वगन्धा च बृहती कण्टकारिका॥
बला चातिबला चैव श्वदंष्ट्रा सपुनर्नवा।
एषां दशपलान् भागान् चतुर्द्रोणेऽम्भसः पचेत्॥
पादशेषे परिस्राव्य तैलपात्रं प्रदापयेत्।
शतपुष्पा देवदारु मांसी शैलेयकं वचा॥
चन्दनं तगरं कुष्ठं एलापर्णी चतुष्टयम्।
रास्ना तुरगगन्धा च सैन्धवं सपुनर्नवम्॥
एषां द्विपलिकान् भागान् पेषयित्वा विनि-
क्षिपेत्।
शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत्॥
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम्।
पाने वस्तौ तथाभ्यङ्गे भोज्ये चैव प्रशस्यते।
अश्वो वा वातभग्नो गजो वा यदि वा नरः॥
पङ्गुश्च पीठसर्पी च तैलेनानेन सिध्यति।
अधोभागे च ये वाताः शिरोमध्यगताश्च ये।
दन्तशूले हनुस्तम्भे मन्यास्तम्भे गलग्रहे॥
यस्य शुष्यति चैकाङ्गं गतिर्यस्य च विह्वला।
क्षीणेन्द्रिया नष्टशुक्रा ज्वरक्षीणाश्च ये नराः॥
बधिरा लल्लजिह्वाश्च मन्दमेधस एव च।
अल्पप्रजा च या नारी या च गर्भं न विन्दति॥
वातार्त्तौ वृषणौ येषामन्त्रवृद्धिश्च दारुणा।
एतत्तैलवरं तेषां नाम्ना नारायणं स्मृतम्॥"
इति स्वल्पनारायणतैलम्॥ १॥ *॥
"शतावरी चांशुमती पृश्निपर्णी शटी बला।
एरण्डस्य च मूलानि बृहत्याः पूतिकस्य च॥
गवेधुकस्य मूलानि तथा सहचरस्य च।
एषां दशपलान् भागान् जलद्रोणे विपाचयेत्॥
पादशेषे रसे पूते गर्भं चैनं समावपेत्।
पुनर्नवा वचा दारु शताह्वा चन्दनागुरु॥
शैलेयं तगरं कुष्ठं एला मांसी स्थिरा बला।
अश्वाह्वा सैन्धवं रास्ना पलार्द्धानि च पेषयेत्।
गव्याजपयसी द्वौ द्वौ प्रस्थौ दत्त्वा प्रदापयेत्॥
शतावरीरसप्रस्थं तैलप्रस्थं विपाचयेत्।
अस्य तैलस्य सिद्धस्य शृणु वीर्य्यमतः परम्॥
अश्वानां वातभग्नानां कुञ्जराणां तथा नृणाम्।
तैलमेतत् प्रयोक्तव्यं सर्व्ववातनिवारणम्॥
आयुष्मांश्च नरः पीत्वा निश्चयेन दृढो भवेत्।
गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी तथा॥
हृच्छूलं पार्श्वशूलञ्च तथैवार्द्धावभेदकम्।
अपचीं गण्डमालाञ्च वातरक्तं हनुग्रहम्॥
कामलां पाण्डुरोगञ्च अश्मरीञ्चापि नाशयेत्।
तैलमेतद्भगवता विष्णुना परिकीर्त्तितम्।
नारायणमिति ख्यातं वातान्तकरणं शुभम्॥"
इति बृहन्नारायणतैलम्॥ २॥ *॥
"बिल्वाश्वगन्धा बृहती श्वदंष्ट्रा
श्योनाकवाट्यालकपारिभद्रम्।
क्षुद्रा कठिल्लातिबलाग्निमन्थ-
मूलानि चैषां सरलीयुतानाम्॥
मूलं विदध्यादथ पाटलीनां
प्रत्येकमेषां प्रवदन्ति तज्ज्ञाः।
अथाढकस्य विधिवोद्धृताश्च
द्रोणैश्चतुर्भिरेव पक्वाः॥
पादावशेषेण रसेन तेन
तैलाढकाभ्यां सममेव दुग्धम्।
छागस्य गोश्च दद्यादेव तुल्यं
सेकश्च सम्यग्विदधीत सुबुद्धिः॥
दद्याच्छतावर्य्यार्य्यास्तु सुतैलाभ्यां
तैलेन तुल्यं पुनरेव तत्र।
रास्नाश्वगन्धा द्विदारु कुष्ठ
पर्णी चतुष्कागुरुकेशराणि॥
सिन्धूत्थमांसी रजनीद्वयञ्च
शैलेयकं चन्दनपुष्कराणि।
एला च यष्टी तगराम्बुदञ्च
भङ्गाह्ववासास्तु वचा पलाशम्॥
स्थौणेयवृश्चीरकचोरकाख्यै-
रेभिः समस्तैर्द्विपलप्रमाणैः।
कर्पूरकाश्मीरमृगाह्वयानां
दद्यान् सुगन्धाय वदन्ति केचित्॥
प्रत्येकमेषां गन्धविचारणार्थं
चूर्णीकृतानां द्विपलप्रमाणम्।
आलोड्य सम्यग्विधिवद्विपक्वं
नारायणं नाम महच्च तैलम्॥ *॥
सर्व्वैः प्रकारैर्विधिवत् प्रयोज्य-
मभ्यङ्गपानैर्वस्तिकर्म्मादिकानाम्।
ये पङ्गवः पीठविसर्पिणश्च
पक्षाङ्गहीनाद्दितवश्यमानाः।
बाधिर्य्ययुक्ता अपवाहुकाश्च
मन्याहनुस्तम्भशिरोगदार्त्ताः।
शुक्ला नराश्चै बलवत्युक्ताः
सद्योऽस्य तैलस्य सकला भवन्ति॥
वन्ध्या च नारी लभते च पुत्रं
वीरोपमं सर्व्वगुणोपपन्नम्।
प्रत्याध्मानं कोष्ठगतं च वाते
वृद्धौ विधेयं मदनादिकानाम्॥
जिह्वाविजे दन्तगते च शूले
चोन्मादकौब्जे ज्वरकम्पितानाम्।
प्राप्नोति लक्ष्मीं प्रमदाप्रियत्वं
जीवेच्चिरं चापि भवेद्युवेव॥
देवासुरे युद्धवरे समीक्ष्य
वायुक्षिप्रभग्नाश्वशरीरं सुरांश्च।
नारायणेनापि स्वहस्तकार्य्यं
समागतैर्विहितन्तु तैषाम्॥"
इति महानारायणतैलम्॥३॥ इति सुखबोधः॥

नारायणप्रिय, पुं, (नारायणस्य प्रियः। नारायणः प्रियो यस्य इति वा।) शिवः। यथा,—
"नारायणप्रियमनङ्गमदापहारं
वाराणसीपुरपतिं भज विश्वनाथम्॥'
इति शिवस्तोत्रम्॥

नारायणबलि, पुं, (नारायणाय नारायणमुद्दिश्य देयो बलिः।) जलमृतिकादीनां प्रायश्चित्तात्मककर्म्मविशेषः। यथा। "नारायणबलिस्तु द्वैमात्रायद्वारेणोच्यते। यथादौ क्रियानिबन्धे गारुडे तथुक्तत्वात्।
'कार्य्यं पुरुषसूक्तेन मन्त्रैर्वा वैष्णवैरपि।
दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरन्॥
अनादिनिधनो देवः शङ्खचक्रगदाधरः।
अक्षयः पुण्डरीकाक्ष प्रेतमोक्षप्रदो भव॥
इति शुक्लैकादश्यां देवकाले सङ्कल्प्य अमुकगोत्रस्यामुकस्य दुर्म्मरणजनितपापक्षयार्थं और्द्ध्वदेहिककर्म्मप्रदानयोग्यतासिद्ध्यर्थं नारायणबलिं करिष्ये। इति सङ्कल्प्य ब्रह्माणं विष्णुं शिवं यमं प्रेतं पञ्चकुम्भेषु स्थापयेत्।
'विष्णुः स्वर्णमयः कार्य्यो ब्रह्मा ताम्रमयस्तथा।
ब्रह्मा रौप्यमयश्चात्र यमो लौहमयो भवेत्।
प्रेतो दर्भमयः कार्य्यः'। इति गारुडोक्तासु मूर्त्तिषु हैमीषु वा प्रतिमासु षोडशोपचारैः पुरुषसूक्तेनाभ्यर्च्यापि प्रतिष्ठाप्य चरुं पुरुषसूक्तेन श्रप्त्वा नारायणायेत्यमिति हुत्वा दैवतानामग्रे दक्षिणाग्रदर्भेषु विष्णुरूपं प्रेतं स्मरन् नाम गोत्राभ्यां मधुघृततिलयुतान् दशपिण्डान् दद्यात्। पयसैव अमुकगोत्र अमुकशर्म्मन् प्रेत विष्णुरूपाय ते पिण्ड उपतिष्ठतामिति दत्त्वा कुर्य्यात् पुरुषसूक्तेनाभिमन्त्र्य यत्ते यममिति सूक्तेन पिण्डानद्यमस्य च प्रक्षेपेण चाभिमन्त्र्यार्च्चा सुगन्धैर्मायमसुरगौर्ब्बि विष्णुरूपं प्रेतं तर्पयामीति पुरुषसूक्तेन प्रत्यृचं तर्पयित्वा एकमामात्रं ब्रह्माणं एकं दद्यात्। मन्त्रस्तु।
ब्रह्मविष्णुमहादेवा यमश्चैव सकिङ्करः।
बलिं गृहीत्वा कुर्व्वन्तु प्रेतस्य च शुभां गतिमिति॥
मितामतराया सोमवत्यां तस्मिन् उक्तम्। तत प्रतिन्वित विविध वल प्रकारामधुयुक्तता। च च निवेद्य मिश्राबध्वार्थ्या सदा शिवा रात्री तत्र मन्त्र पद्य या विप्रानिमन्त्र्यौपोषितः आमन्त्र सत्ता श्वोभूते कुर्व्वीत मम कथूलकौदिव विधिना श्राद्धयुक्त करिष्ये इत्युक्त्वा मत्रिस्य विप्रपमप्रेतान् स्मरन् विप्रान् ... दिन स्थाने चैव विष्णु स्मरन् ...

[illegible]

नारीकवच, पुं, [illegible]

नारीकेल, पुं, [illegible]

नारीकेली, स्त्री, [illegible]

नारीतीर्थ, क्ली, [illegible]

नारीतरङ्गक, पुं, [illegible]

नारीदूषण, क्ली, [illegible]

नारीष्ट, क्ली, [illegible]

नार्यङ्ग, पुं, [illegible]

नाल, क्ली, [illegible]

नालवंश, पुं, [illegible]

नाला, स्त्री, [illegible]

नालि, स्त्री, [illegible]

नालिक, पुं, [illegible]

[illegible]

नालिका, स्त्री, [illegible]

नालिकेर, पुं, [illegible]

नालिजङ्घ, पुं, [illegible]

नालिता, स्त्री, [illegible]

नाली, स्त्री, [illegible]

नालीक, पुं, [illegible]

घन्त्राङ्गम्। चक्रधर, स्त्री। इति मेदिनी। ले, ११०॥ (न अलीकमिति। सत्यम्। यथा, वक्रोक्तिपञ्चाशिकायाम्। ४२।
"नालीकाक्ष्यमेतदथ वचनं वाचालय कि
मद ॥")

नालीकिनी, स्त्री, (नालीकसमूहस्य। इति। नालीक। इनि। ङीप।) पद्मसमूह। इति शब्दरत्नावली॥

नालीव्रण, पुं, (नालीगतो व्रण।) नाडीव्रण। इति शब्दरत्नावली॥

नाविक, पुं, (नावा तरतीति। नौ+"नौद्व्यच ठन्।" ४।४।७। इति ठन्। नौरस्त्यस्येति। "व्रीह्यादिभ्यश्च।" ५।२।११६। इति ठन् वा।) कर्णधार। इत्यमर। १।१०।१२॥ (यथा, महाभारते। ८।७७।७५।
"भिन्ननौका यथा राजन्! द्वीपमासाद्य निर्वृता।
भवन्ति पुरुषव्याघ्र! नाविका कालपर्यये॥")

नाव्य, त्रि, (नावा तार्य्यम्। नौ+"नौवयो धर्म्मेति।" ४।४।९१। इति यत्।) नौका गम्यदेशादि। इत्यमर।१।१०।१०॥ (यथा, रघु। ४।३१।
"मरुपृष्ठान्युदम्भांसि नाव्या सुप्रतरा नदी।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार स॥"
नवस्य भाव। नव+ष्यञ्।) नवत्वम्॥

नाश, पुं (नश+भावे घञ्।) पलायनम्। निधनम्। (यथा महाभारते। १।१२।१६।
"मित्राद्धत्यादभिमुक्तोऽत्र मध्ये तपोधना।
देवयाने भयो नाश पितृनामेव निश्चय॥")
अनुपलम्भ। अदर्शनम्। इति मेदिनी। शे, ८। परिभ्रंशि। इति हेमचन्द्र। २।२३८॥
जीवानां नाशहेतुर्यथा,—
"सङ्गात् सञ्जायते काम कामात् क्रोधोऽभि
जायते।
क्रोधाद्भवति सम्मोह सम्मोहात् स्मृतिविभ्रम।
स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात् प्रणश्यति॥"
इति श्रीभगवद्गीता॥

कुलनाशकारणं यथा—
"अकृतात् दारदार्य्याच्च तथाभक्ष्यस्य भक्षणात्।
अश्रौतधर्म्माचरणात् क्षिप्र नश्यति वै कुलम्॥
अश्रोत्रिये वेददानात् वृषलेषु तथैव च।
विहिताचारहीनेषु क्षिप्र नश्यति वै कुलम्॥"
इति कौर्म्मे उपविभागे १५ अध्याय॥

नाशस्य पूर्व्वरूपाणि यथा—
अग्निरुवाच।
"नाशस्य पूर्व्वरूपाणि जगतां कथयस्व मे।
यथा राष्ट्रं तथा राज्ञां त्वं हि सर्व्वं वदिष्यसि॥
गर्ग उवाच।
दुष्टाचारनियमात् परित्यजति देवता।
ततोऽपरागाद्देवानामुत्पन्नं प्रवर्त्तते॥
दिव्यान्तरीक्षं भौमञ्च त्रिविधं परिकीर्त्तितम्।
ग्रहर्क्षवैकृतं दिव्यमन्तरीक्षं निबोध मे॥
उल्कापातो दिशां दाहः परिवेषस्तथैव च।
गन्धर्व्वनगरञ्चैव वृष्टिश्च विकृता च या।
एवमादीनि लोकेऽस्मिन् नाशमार्गं विनिर्द्दिशेत्॥
चर स्थिरत्वं भूमौ च भूकम्पश्चापि भूमिज।
जलाशयानां वैकृत्यं भौमं तदपि कीर्त्तितम्॥"
इति मत्स्ये २३ अध्याय॥

नाशी [न्] त्रि, (नाशोऽस्त्यस्येति। नाश+इनि।) नाशविशिष्ट। नाशशब्दादस्त्यर्थे इन्प्रत्ययनिष्पन्न॥

नासत्यौ पु (नास्ति असत्यं ययोस्तौ। "नभ्राण नपादिति।" ६।३।७५। इति नञ् प्रकृतिभाव।) अश्विनीकुमारौ। नित्यद्विवचनान्तोऽयम्। इत्यमर। १।१।५४॥ एतौ शूद्रौ। यथा,
"आङ्गिरा क्षत्रियाणाञ्च वैश्यास्तु मरुतस्तथा।
अश्विनौ तु स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ॥
स्मृतास्त्वाङ्गिरसो देवा ब्राह्मणा इति निश्चय॥"
इति महाभारते मोक्षधर्म्मे॥
("तस्माद्दक्षप्रजापतेरिन्द्र कर्म्मायत्वेनानि महायात्।
आयुर्वेदं निखिलं तौ यथावत् प्रतिपेदिरे॥
नासत्यौ सहयत्नेन तस्मिन्... किल चक्रतु।
आयुर्व्वेदं यथाधीतं दत्त्वा सत्यमपि॥
नासत्याभ्यामधीत्यैव आयुर्व्वेदं शतक्रतु।
अध्यापयामास बहूनात्रेयप्रमुखान् मुनीन्॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

नासा स्त्री (नासते शब्दायते इति। नास शब्दे +"गुरोश्च हल।" ३।३।१०३। इति अ। ततष्टाप्। नासत्यनयेति। नास+करणे घञ् वा।) नासिका। नाक इति भाषा। सा च नभस्थबालकस्य षष्ठमासे भवति। इति सुखबोध। तस्या शुभाशुभलक्षणं यथा,—
"शुकनास सुखी स्याच्च शुष्कनासोऽतिजीवनम्।
छिन्नाग्रकूपनास स्यादगम्यागमने रत॥
दीर्घनासे च सौभाग्यं चौरः स्यात् कुञ्चितेन्द्रिय।
स्त्रीमृत्युश्चिपिटनासः स्वल्पभाग्यवतो भवेत्॥
अग्रवक्रा सुपुटा च अवक्रा च नृपेश्वरे।
क्रूरे दक्षिणवक्रा स्याद्दनिमाश्च ऋजु सहत॥"
इति गरुडपुराणम्॥
द्वारोपरिस्थितदारु। भान् काठ इति कपालि इति च भाषा। इत्यमर। २।२।१३॥ नासक इत्य। इति राजनिर्घण्ट॥

नासाच्छिन्नी, स्त्री, (छिद+भावे क्त। नासायां छिन्नं छेदो यस्या। ङीप।) पुच्छिकामत्सी। इति त्रिकाण्डशेष॥

नासादारु, क्ली (नासायै यद्दारु। नासेव दारु इति वा।) द्वारोर्द्धस्थितकाष्ठम्। इत्यमर टीकायां स्वामी। कपालि इति भाषा॥

नासारोग, पुं, (नासाया रोग।) नासिका व्याधि। "अथ नासारोगाधिकार। तत्र नासारोगाणां नामानि सङ्ख्याचाह।
अपीनसः पीनस प्रोक्त पूतिनस्यस्तत परम्।
नासापाकोऽथ गदित पूयशोणितमेव च
क्षवथुर्भ्रंशथुर्दीप्त प्रतीनाह परिस्रव।
नासाशोष प्रतिश्यायाः पञ्च अर्श्शांसि च।
अर्ब्बुदानि च चत्वारि शोथाश्चत्वारितानि च।
रक्तपित्तानि नासाया चतुस्त्रिंशद्गदा स्मृता॥
तेषु पीनसस्य लक्षणमाह।
आनह्यते शुष्यति यस्य नासा
प्रक्लेदमायाति च धूप्यते च।
न वेत्ति यो गन्धरसांश्च जन्तु
र्जुष्टं व्यवस्येदिह पीनसेन॥
आनह्यते आनद्धेवोच्छ्वसितकर्षेणावध्यते अवरुद्धा इति यावत्। प्रक्लेदं आर्द्रताम्। धूप्यते सन्तप्यते। गन्धरसान् गन्धान् सुरभीनसुरभींश्च न वेत्ति। नासाया आस्यसम्बन्धं तत्र हेतु। तथा रसान् मधुरादींश्च न वेत्ति। नासारोगा इत्यकरोदिति इत्यनया अपि दुष्टे। अत्रस्तेन जानीयात्। अपीनसपीनसौ द्वावपि शब्दौ स्त॥ ०॥ अनुक्तलक्षणप्रत्यायमाह।
तथानिलश्लेष्मभवं विकारं
ब्रूयात् प्रतिश्यायसमानलिङ्गम्।
स विकार पीनस प्रतिश्यायसमानलिङ्ग वात श्लेष्मकप्रतिश्यायतुल्यलक्षणम्॥
पूतिनस्यमाह।
दोषैर्व्विदग्धैर्गलतालुमूले
सन्दूषितो यस्य समीरणस्तु।
निरेति पूतिर्मुखनासिकाभ्यां
स पूतिनस्यं प्रवदन्ति रोगम्॥
दोषै पित्तकफरक्तै। अत्र रक्तस्यापि दोषत्व दोषसाहचर्य्यात्। विदग्धैर्दुष्टै। सन्दूषित पूतिभाव नीत। पूतिनस्य नासायां भवो नस्यो वायु पूतिर्नस्यो यत्र स पूतिनस्यकम्॥ ०॥
नासापाकमाह।
घ्राणाश्रित पित्तमरूंषि कुर्य्यात्
यस्मिन् विकारे बलवांश्च पाक।
तं नासिकापाकमिति व्यवस्येत्
विक्लेदकोथावथवापि यत्र॥
विक्लेद आर्द्रता। कोथ पूतिभाव॥ ०॥
पूयरक्तमाह।
दोषैर्व्विदग्धैरथवापि जन्तो
र्ल्ललाटदेशेऽभिहतस्य तैस्तै।
नासा स्रवेत् पूयमसृग्विमिश्रं
तं पूयरक्तं प्रवदन्ति रोगम्॥
क्षवथुमाह।
घ्राणाश्रिते मर्म्मणि सम्प्रदुष्टो
यस्यानिलो नासिकया निरेति।
कफानुयातो बहुशोऽतिशब्द
स्तं रोगमाहु क्षवथु नराख्या॥
घ्राणाश्रिते मर्म्मणि शृङ्गाटके॥ ०॥
दोषज क्षवथुमभिधायागन्तु क्षवथुमाह।
तीक्ष्णोपयोगादतिजिघ्रतो वा
भावान् कटूनर्कनिरीक्षणाद्वा।
सूत्रादिभिर्व्वा तरुणास्थिमर्म्म-
ण्युद्घट्टितेऽन्य क्षवथुर्निरेति॥
तीक्ष्णोपयोगात् राजिकादिभक्षणात्। अक्र-
निरीक्षणात् सूर्य्यदर्शनात् तेन कफशिरोविरेचनात्।

हिङ्गुगुग्गुलुनिम्बस्य लिकचनस्य प्रयत्नतः ।
धूमं चक्षुरोगघ्नं भक्षपुष्पस्य निर्दिशेत् ॥ ७ ॥
मल्लीकुटजकाविडङ्गद्राक्षाकल्ककषायवत् ।
तैलं पक्वमथान्द वा न स्यात् सप्तधानाग्रसम् ॥ ८ ॥
नस्य हितं निम्बरसाञ्जनाभ्यां
दोषे शिरः स्वेदनमल्पमन्नम् ।
मस्ते जलं चीरजलावसेकान्
प्रसन्ति सुप्तीन च शुक्रयं ॥ ९ ॥
नासासाव ब्राह्मीयूषमुक्त
नाभ्या इव पे च षाडाच मथ्या ।
तोन्था धूमा दैश्याम्लिकाभ्यां
मांसं मार्ज पथ्यमन्नान्शितानि ॥ १० ॥
प्रतिश्यायेषु सर्वेषु मद्य वातविवर्जितम् ।
पक्वं याष्ट्यात्मेन शिरसो पष्टा हितम् ॥ ११ ॥
विडङ्ग सैन्धवं हिङ्गुगुग्गुलु समन शिला ।
वचेन्तचूर्णमाघ्राय प्रतिश्याय विनाशयेत् ॥ १२ ॥
वृतनेत्रामायुक्त शक्तुधूमं पिबेन्नरः ।
मधूम स्यान्नि निम्रायकाणविकाचर पर ॥ १३ ॥
प्रतिश्यायेषु सर्वेषु शीतलं परमौषधम् ।
प्रतिश्याय विनेदुष्णं सर्वास्वरमायुतम् ॥ १४ ॥
सानुपानकवर्यं वा प्रेष वा कृष्णजीरकम् ।
ह्यजीरकमन्न क्रमौषौ ॥ १५ ॥
पु भक्त जयापय तैलसैन्धवसंयुतम् ।
प्रतिश्यायेषु सर्वेषु शीतिलं परमौषधम् ॥
जवाम त्रिभया भद्धेन पायत् । शिशिर
भुक्तम् ॥ १६ ॥
त्रिफला शिग्रुवीजानि विडङ्गमरिचानि च ।
अपामार्ग प्रयुक्तोऽय प्रतिश्यायविनाशने ॥ १७ ॥
शिरसोऽभ्यञ्जने स्नेहैस्वेदैस्योष्णभोजनैः ।
वमनैर्घृतपानैश्च नाश्यथा समुपाचरेत् ॥ १८ ॥
क्रिमिघ्ना ये क्रमाः प्रोक्तास्तान् वै क्रिमिषु योजयेत् ।
नानाविधि क्रिमिघ्नानि भेषजानि च बुद्धिमान् ॥ १९ ॥
रक्तपित्तानि शोथाय तथाशोर्भ्यर्बुदानि च ।
नासिकायां सुरेतेषां सा सु कुर्यात चिकित्सितम् ॥
पञ्चधूमकणान्तधीरसलाक्षसैन्धवैः ।
सिद्धं शिरोविरेचनैः तैलं नासागतं हितम् ॥"
इति भावप्रकाशे मध्यखण्डे चतुर्थभागः ॥
(अथातो नासारोगविज्ञानीयमध्यायं व्याख्यास्यामः ।
"अवश्यायानिलरजो भाष्यातिस्वप्नजागरैः ।
नीचात्युच्चोपधानेन पीतेनान्येन वारिणा ॥
अत्यम्बुपानरमणच्छर्दिवाष्पग्रहादिभिः ।
क्रुद्धा वातोल्वणा दोषा नासायां स्त्यानतां गताः ॥
जनयन्ति प्रतिश्यायं वर्धमानं क्षयप्रदम् ।
तत्र वातात् प्रतिश्याये मुखशोषो भृशं क्षवः ॥
नासोपरोधनिस्तोदशङ्खशिरोव्यथाः ।
कीटका इव सर्पन्ति मन्यते परितो भुवौ ॥
स्वरसादश्चिरात् पाकः शिशिराच्छकफस्रुतिः ।
पित्तात्तृष्णाज्वरघ्राणपिटिकासम्भवभ्रमाः ॥
नासाग्रपाको रूक्षोष्णताम्रपीतकफस्रुतिः ।
कफात्कासोऽरुचिः श्वासो वमथुर्गात्रगौरवम् ॥
माधुर्यं वदने कण्डूः स्निग्धशुक्लकफस्रुतिः ।
सर्वजो लक्षणैः सर्वैरकस्माद्वृद्धिशान्तिमान् ॥
दुष्टं नासा शिराः प्राप्य प्रतिश्यायं करोत्यसृक् ।
उरसः सुप्तता ताम्रनेत्रत्वं श्वासपूतिता ॥
कण्डूः श्रोत्राक्षिनासासु पित्तोक्तञ्चात्र लक्षणम् ।
सर्व एव प्रतिश्याया दुष्टतां यान्त्युपेक्षिताः ॥
यथोक्तोपद्रवाधिक्यात् स सर्वोऽपि दुष्टनामकः ।
सामिसादज्वरश्वासकासोरःपार्श्ववेदनः ॥
कुप्यत्यकस्माद्बहुशो मुखदौर्गन्ध्यशोफकृत् ।
नासिकाक्लेदसंशोषशुद्धिरोधकरो मुहुः ॥
पूयोपमासितासृक्तग्रथितश्लेष्मसंस्रुतिः ।
मूर्च्छन्ति चात्र क्रिमयो दीर्घस्निग्धसिताणवः ॥
पक्वलिङ्गानि तेष्वङ्गलाघवं क्षवथोः शमः ।
श्लेष्मा सङ्घातवान् पीतो ज्ञानञ्च रसगन्धयोः ॥
तीक्ष्णघ्राणोपयोगार्कराश्मिसूत्रतृणादिभिः ।
वातकोपिभिरन्यैर्वा नासिकातरुणास्थनि ॥
विघट्टितेऽनिलः क्रुद्धो रुद्धः शृङ्गाटकं व्रजेत् ।
निवृत्तः कुरुतेऽथासौ क्षवथुं स भृशं क्षवम् ॥
शोषयन्नासिकास्रोतः कफञ्च कुरुतेऽनिलः ।
शूकपूर्णाभनासात्वं कृच्छ्रादुच्छ्वसनं ततः ॥
स्मृतोऽसौ नासिकाशोषो नासानाहे तु जायते ।
नद्धत्वमिव नासायाः श्लेष्मरुद्धेन वायुना ॥
निःश्वासोच्छ्वाससंरोधात् स्रोतसी संवृते इव ।
पचेन्नासापुटे पित्तं त्वङ्मांसं दाहशूलवत् ॥
स घ्राणपाकः स्रावस्तु तत्संज्ञः श्लेष्मसम्भवः ।
अच्छो जलोपमोऽजस्रं विशेषान्निशि जायते ॥
कफः प्रवृद्धो नासायां रुद्धा स्रोतांस्यपीनसम् ।
कुर्यात् सघुर्घुरश्वासं पीनसाधिकवेदनम् ॥
अवेरिव स्रवत्यस्य प्रक्लिन्ना तेन नासिका ।
अजस्रं पिच्छिलं पीतं पक्वं सिङ्घाणकं घनम् ॥
रक्तेन नासा दग्धेव बाह्यान्तःस्पर्शनासहा ।
भवेद्धूमोपमोच्छ्वासा सा दीप्तिर्दहतीव च ॥
तालुमूले मलैर्दुष्टैर्मारुतो मुखनासिकात् ।
श्लेष्मा च पूतिर्निर्गच्छेत् पूतिनासं वदन्ति तम् ॥
निचयादभिघाताद्वा पूयासृङ्नासिका स्रवेत् ।
तत् पूयरक्तमाख्यातं शिरोदाहरुजाकरम् ॥
पित्तश्लेष्मावरुद्धोऽन्तर्नासायां शोषयन्मरुत् ।
कफं स शुष्कपुटतां प्राप्नोति पुटकन्तु तत् ॥
अर्शोऽर्बुदानि विभजेत् दोषलिङ्गैर्यथायथम् ।
सर्वेषु तत्कृच्छ्रमुक्तं पीनसः प्रततं क्षवः ॥
सानुनासिकवादित्वं पूतिनासः शिरोव्यथा ।
अष्टादशानामित्येषां यापयेद्दुष्टपीनसम् ॥"
इत्युत्तरस्थाने षोडशोऽध्याये वाभटेनोक्तम् ॥
"शुद्धसूतं समादाय गन्धभागद्वयं तत ।
त्रिभागं टङ्कणञ्चापि विषभागचतुष्टयम् ॥
पञ्चभागं यथा देयं मरिचस्य प्रयत्नतः ।
शृङ्गबेररसे पिष्ट्वा गुडिका चणरक्तिका ॥
अनुपानं हितं योज्यं सर्वरोगप्रशान्तये ।
जलदोषोद्भवे रोगे नवज्वरे जलोदरे ॥
सन्निपातेषु रोगेषु नासायां पीनसेऽपि ।
प्रस्वापे प्रति चैव उपदंशे भगन्दरे ॥
नाडीव्रणे ज्वरे चैव गलदन्तविघातके ।
पञ्चाननरसो योज्यः सर्वरोगप्रशान्तये ॥
इति पञ्चाननो रसः ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे नासारोगाधिकारः ॥)

नासाञ्चु, पुं, (नासायै अलतीति । अल + उण् ।) कट्फलद्रुमः । इति शब्दचन्द्रिका ॥ (कट्फलशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

नासासंवेदनः पुं, (संविद्यतेऽनेनेति । सम् + विद् + ल्युट् । नासायाः संवेदनः पीडानाशकः ।) काकोदुम्बरलता । इति राजनिर्घण्टः ॥

नासिकन्धम, त्रि, (नासिकां धमति शब्दायमानां करोतीति । नासिका + ध्मा + "नासिकास्तनयोर्ध्माधेटोः ।" ३ । २ । २९ । इति खश् । "खित्यनव्ययस्य ।" ६ । ३ । ६६ । इति पूर्व्वपदस्य ह्रस्वः । ततो मुम् ।) नासिकां शब्दायमानां करोति यः । नासिकया शब्दकर्त्ता च । नासिकोपपदात् ध्माधातोः खश्प्रत्यये धमादेशे निष्पन्नः । इति व्याकरणम् ॥

नासिकन्धय, त्रि, (नासिकां नासास्थजलं धयति पिबतीति । नासिका + धे ट पाने + "नासिकास्तनयोर्ध्माधेटोः ।" ३ । २ । २९ । इति खश् । ततो पूर्व्वपदस्य ह्रस्वत्वे मुम् च ।) नासिकया पिबति यः । नासिकया पानकर्त्ता । नासिकोपपदाद्धेटधातोः खश्प्रत्ययेन निष्पन्नः । इति व्याकरणम् ॥

नासिका, स्त्री, (नासते शब्दायते इति । नास शब्दे + "क्वुन् शिल्पिसंज्ञयोः ।" २ । १ । १२३ । इति क्वुन् । टापि अत इत्वम् ।) घ्राणेन्द्रियम् । नाक इति भाषा । तत्पर्य्यायः । घ्राणम् २ गन्धवहा ३ घोणा ४ नासा ५ । इत्यमरः । २ । ६ । ८९ ॥ शिङ्घिनी ६ । इति राजनिर्घण्टः ॥ नासिक्यम् ७ नस्या ८ गन्धनाली ९ गन्धज्ञा १० नक्रा ११ । इति शब्दरत्नावली ॥ (यथा मनुः । २ । ९ ।
"श्रोत्रं त्वक् चक्षुषी जिह्वा नासिका चैव पञ्चमी ।
पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ॥")
तस्याः शब्दो घोनकारः । यथा,—
"प्रयाति रावणं दृष्ट्वा तस्मिन् महति वानरे ।
नासापूर्यैस्तु घोनकारैर्विप्रक्षिपायुधवत्के ॥
इति नारसिंहे ४५ अध्यायः ॥

नासिकामल, क्ली, (नासिकाया मलम् ।) नासास्थितमलम् । शिकनि इति भाषा । तत्पर्य्यायः । सिङ्घाणकम् २ सिङ्घाणम् ३ शिङ्घणम् ४ । इति शब्दरत्नावली ॥ सिङ्घाणम् ५ । इति भरतः ॥

नासिक्य क्ली, (नासिका एव । नासिका + स्वार्थे ष्यञ् ।) नासिका । इति त्रिकाण्डशेषः ॥ (त्रि नासिका + "शुण्डिकादिभ्योऽण् ।" ४ । ३ । ७६ । इति चकाराद्यन्यदपि । नासिकाभिजनादौ । नासिकायां भवम् । "शरीरावयवाद्यत् ।" ५ । १ । ६ । इति यत् । नासाभवे च ।)

[illegible]

निःश्रेयस, क्ली, (निश्चितं श्रेयः । "अचतुरविचतुरेति ।" ५ । ४ । ७७ । इति निपातनात् साधुः ।) शुभम् । (यथा, भागवते । १।१।४ ।
"इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
उत्तमश्लोकचरितं चकार भगवानृषिः ।
निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं परम् ॥")
मोक्षः । (यथा, मनुः । १२ । ८३ ।
"वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणाञ्च संयमः ।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ॥")
विद्या । अनुभावः । भक्तिः । इति शब्दरत्नावली ॥

निःश्रेयसः, पुं, (निर्निश्चितं श्रेयो मङ्गलं यस्मात् ।) शङ्करः । इति मेदिनी । से, ५६ ॥

निःषमम्, व्य, (निर्गतं समं यत्र । 'तिष्ठद्गुप्रभृतीनि च ।' २ । १ । १७ । इत्यव्ययीभावत्वम् । सुषिनिरुभ्यः इति षत्वम् ।) निन्दा । तत्पर्य्यायः । गह्यम् । दुःषमम् ३ । इत्यमरः । ३ । ४ । १४ ॥ खेदः । इति शब्दरत्नावली ॥

निःसङ्गः, त्रि, (निर्नास्ति सङ्गो यस्य ।) मेलनरहितः । यथा, विष्णुपुराणे । ४ । २ । ५१ ।
"मत्स्यस्य सङ्गादभवच्च यो मे
सुतादिरागो मुषितोऽस्मि तेन ।
निःसङ्गता मुक्तिपदं यतीनां
सङ्गादशेषाः प्रभवन्ति दोषाः ॥'
फलानभिनिवेशवान् । यथा —
"कर्म्मैव कुर्व्वाणो निःसङ्गोऽर्पितमीश्वरे ।
नैष्कर्म्यसिद्धिं लभते रोचनार्था फलश्रुतिः ॥'
इति मलमासतत्त्वे श्रीभागवतैकादशस्कन्धवचनम् ॥

निःसन्धिः, त्रि, (निर्नास्ति सन्धिर्यत्र ।) दृढः । इति त्रिकाण्डशेषः ॥ सन्धिरहितश्च ॥

निःसम्पातः, पुं, (निर्नास्ति सम्पातो गमनागमनं यत्र ।) निशीथः । इति त्रिकाण्डशेषः ॥ (गमनागमनपरिशून्ये, त्रि । यथा, हरिवंशे । ८ । ११—१४ ।
"तेन दुष्टप्रचारेण दूषितं सकलं महत् ।
न भूमिगोचरैर्वापि सेव्यते वनचारिभिः ।
निःसम्पातं कृतं पश्चात्तेन तद्वनमाश्रयः ॥")

निःसरणम्, क्ली, (निर्+सृ+ल्युट् ।) मरणम् । उपायः । गेहादिमुखम् । निर्व्वाणम् । निर्गमः । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । ३ । ७ । २८ ।
"गर्भवासे महद्दुःखं दशमासनिवासनम् ।
तथा निःसरणे दुःखं योनियन्त्रेऽतिदारुणे ॥")

निःसारः, पुं, (निर्गतः सारो यस्मात् ।) शाखोटवृक्षः । इति शब्दचन्द्रिका ॥ श्योनाकभेदः । इति राजनिर्घण्टः ॥ सारहीने, त्रि । यथा,—
"मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् ।
यः करोति स सम्मूढो जलबुद्बुदसन्निभे ॥"
इति शुद्धितत्त्वम् ॥
"जगत् सर्व्वमिदं निःसारमनित्यं दुःखभाजनम् ।
उत्पद्यते च पापेन प्रचासेन विपद्यते ।
यथैवोत्तप्यते सारान्निःसारं जगदक्षया ।
पुनस्तस्मिन् विलीयन्ते महाप्रलयसङ्गमे ॥
चतुर्मूर्त्तिप्रलयाभ्यान्तु जगति सारतो हरिः ।
शुम्भे दशयामास भावेन जगतां पतिः ॥"
इति कालिकापुराणे १७ अध्यायः ॥

निःसारणम्, क्ली, (निर्+सृ+णिच्+भावे ल्युट् ।) निःसरणम् । (निःसार्य्यतेऽनेनेति । निर्+सृ+णिच्+करणे ल्युट् ।) गृहादीनां प्रवेशनिर्गमनपथः । इति शब्दरत्नावली ॥

निःसारा, स्त्री, (निर्नास्ति सारो यस्याः ।) कदलीवृक्षः । इति राजनिर्घण्टः ॥

निःसारितः, त्रि, (निर्+सृ+णिच्+कर्म्मणि क्तः ।) बहिष्कृतः । तत्पर्य्यायः । अपसृतः २ निष्कासितः ३ । इति जटाधरः ॥ साराभाववांश्च ॥

निःस्नेहः, त्रि, (निर्नास्ति स्नेहो यस्य ।) स्नेहशून्यः । यथा । निःस्नेहं कीटदूषितमित्यादि स्मृतिः ॥ (यथा, रामायणे । २ । ४८ । ७ ।
'अहो दशरथो राजा निःस्नेहः स्वसुते प्रति ॥"
रसहीनः । यथा, मनुः । ५ । ८७ ।
"नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ॥'
तैलविहीनः । यथा, पञ्चतन्त्रे । १ । ९१ ।
"शिरसा विधृता नित्यं स्नेहेन परिपालिता ।
केशा अपि विरज्यन्ते निःस्नेहाः किं न सेवकाः ॥")

निःस्नेहा, स्त्री, (निर्गतः स्नेहो रसो यस्याः ।) अतसी । इति त्रिकाण्डशेषः ॥ (अनुरागरहिते, त्रि । यथा, पञ्चतन्त्रे । ४ । ४७ ।
"यदर्थे स्वकुलं त्यक्तं जीवितार्द्धञ्च हारितम् ।
सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥')

निःस्रावः, पुं, (निःस्रवतीति । निर्+स्रु+ण ।) भक्तरसः । भक्तसमुद्भवमण्डः । माड़ इति फेन् इति च भाषा ॥ तत्पर्य्यायः । आचामः २ मासरः ३ । इत्यमरहेमचन्द्रौ ॥

निःस्वः, त्रि, (निर्नास्ति स्वं धनं यस्य ।) दरिद्रः । इत्यमरः । ३ । १ । ४९ ॥ तस्य लक्षणं यथा,—
"स्थूलाकारा विरूक्षौ च वक्रौ पादौ शिरालकौ ।
संशुष्कौ पाण्डुरनखौ निःस्वस्य विरलाङ्गुली ॥"
इति गारुडे सामुद्रकम् ॥ ज्ञातिरहितश्च ॥

निकटं, त्रि, (नि समीपे कटतीति । नि+कट+अच् ।) अदूरम् । तत्पर्य्यायः । समीपम् २ आसन्नम् ३ सन्निकृष्टम् ४ सनीडम् ५ । इत्यमरः । ३ । १ । ६६ ॥ अभ्याशः ६ सदेशः ७ अन्तः ८ अन्तिकः ९ समर्य्यादः १० सवेशः ११ अभ्यर्णः १२ अभ्यग्रः १३ सविधः १४ उपकण्ठः १५ अभितः १६ । इति शब्दरत्नावली ॥ (यथा, शान्तिशतके । ३ । २ ।
"दिवसरजनीकूलच्छेदैर्मताङ्गिरतोरत
वहति निकटे कालः स्रोतःसमं त्यजादरम् ।
इह हि पततो नास्त्यालम्बो न चापि निवर्त्तनं
तदिह महतां कोऽयं मोहो यदत्र महाविलः ॥")
तद्वैदिकपर्य्यायः । तलित् १ आसात् २ अम्बरम् ३ तुर्वशे ४ अस्तमीके ५ आके ६ उपाके ७ अर्वाके ८ अन्तमानाम् ९ अवमे १० उपमे ११ । इत्येकादशान्तिकनामानि । इति वेदनिघण्टौ २ अध्यायः ॥

निकरः, पुं, (निकरोति व्याप्नोतीति । नि+कृ+अच् ।) समूहः । इत्यमरः । २ । ५ । ३९ ॥ (यथा, कलाविलासे । ९ । २६ ।
"इत्थान्निधुगमधुरैरमत्रसगलण रह कृत्वा ।
यज्ञाति कनकनिकरं शून्यकामसमीरणे याप ॥")
सारः । न्याय्यधनम् । निधिः । इति मेदिनी । रे १०२ ॥

निकर्षणं, क्ली, (निनास्ति कर्षणं यत्र ।) सन्निवेशः । इत्यमरः । २ । २ । १९ ॥ पत्तनान्त्यादिपरिच्छिन्नप्रदेशः । इति भरतः ॥ पूर्व्वादिगावच्छिन्नग्रहाणामपीति कलिङ्गः ॥ पुरादेर्व्वहिर्निर्गमभूमिः । इति स्वाम्यादयः ॥ ग्रामप्रान्तस्थितनिवेशः । इति सारसुन्दरी ॥

निकषः, पुं, (निकषति घर्षति स्वर्णादिकं यत्रेति । नि+कष+"गोचरसञ्चरेति ।" ३ । ३ । ११९ । इति घकारात् घ ।) शाणः । इत्यमरः । २ । १० । ३२ ॥ कष्टिपाथर इति भाषा ॥ (यथा, रघुः । १७ । ४६ ।
"निकषे हेमरेखेव श्रीरासीदनपायिनी ॥') ।

निकषा, स्त्री (निकषति हिनस्तीति । कष हिंस+पचाद्यच् । ततष्टाप् ।) राक्षसमाता । इत्यमरः ॥ सा सुमालिकन्या विश्रवसो भार्य्या च । इति रामायणम् ॥

निकषा, व्य, (नि+कष गतौ+"आ समिन् निकषिभ्याम् ।' उणां । ४ । १७४ । इति आ ।) निकटम् । इत्यमरः । ३ । ४ । १९ ॥ (यथा माघे । १ । ६८ ।
"पयोधिमाबद्धचलज्जलाविलं
विलङ्घ्य लङ्कां निकषा हनिष्यति ॥")
मध्यम् । इति मेदिनी । षे ७९ ॥

निकषात्मजः, पुं, (निकषाया आत्मजः ।) राक्षसः । इत्यमरः । १ । १ । ६२ ॥

निकसः, पुं, (निकषति घर्षति स्वर्णादिकं यत्र । नि+कस+घ ।) निकषः । इत्यमरटीकायां भरतः ॥

निकामं, क्ली (नि+कम इच्छायाम्+घञ् ।) इष्टम् । यथेप्सितम् । इत्यमरः । २ । ८ । ५७ ॥ (यथा, देवीभागवते । १ । ७ । ४ ।
'कुर्व्वन्ति सर्व्वे । भजनं सकलं निकामं
ज्ञात्वा समस्तजनवन्द्यं किल कामधेनुम् ॥)

निकायः, पुं (निचीयते इति । नि+चि+"सङ्घे चानौत्तराधर्य्ये ।" ३ । ३ । ४२ । इति घञ् । आदेश्च कः ।) लक्ष्यम् । सधर्म्मिप्राणिसङ्घः । (यथा महाभारते । १ । १२७ । ३५ ।
"तथा देवनिकायानां सङ्घाश्च दिवौकसाम् ॥")

नासिक्यकं, क्ली (नासिक्यमेव। नासिक्य+स्वार्थे कन्।) नासिका। इति शब्दमाला॥

नासिक्यौ, पुं, (नासिकायां भवौ। नासिका+"शरीरावयवाच्च यत्।"५।१।६। इति यत्।) अश्विनीकुमारौ। द्विवचनान्तोऽयम्। इति हेमचन्द्रः।२।५६॥

नासीरं, क्ली (नासृ शब्दे+भावे क्विप्। नासा शब्देन ईर्ते गच्छतीति। ईर गतौ+क। तथाशब्दोच्चारणेन समन्तादस्य गमनम्।) नायकस्याग्रेसारिणी सेना। (यथा नैषध-चरिते।२१।१४।

'नासीरपाथःपतिरस्ति तव प्रतीपी
मौलीन्द्रनामिव पुरान्धिरुपद्रवस्तु।
यामभुर पुरन्ध्रभयप्रभाव
समा भियस्त निशताध्वमनुदय।

तथा च, राजेन्द्रकर्णपूरे।३८।

"नासीरप्रसरन्ति निकषपटिरे भूमण्डले
मौक्तिक
प्रसारन्ति सुधाकरान्ति गगनोत्सङ्गे भवत्
कोशय।")

नास्पती, पुं। इति शब्दरत्नावली॥

नास्ति अ, अस्तित्वाभाववत्। अविद्यमानता। इति नास्तिन्नामशब्दटीकायां भरतः॥ नाइ इति भाषा। यथा चाणक्ये।

"नास्ति विद्यासमं चक्षुर्नास्ति सत्यसमं तपः।
नास्ति नास्ति न चास्त्येव देहि देहि पुनः पुनः॥"

नास्तिक, पु, (नास्ति परलोक ईश्वरो वेति मतिर्यस्य। "अस्तिनास्तिदिष्टं मतिः।" ४।४।६०। इति ठक्। यद्वा, नास्ति परलोको यज्ञादिफलं ईश्वरो यज्ञादिद्वारा कर्मफलदाता वा इति वदति कै शब्दे+क।) वाचकः। ईश्वरनास्तित्ववादी। वेदप्रामाण्यवादी। (यथा, मनुः।२।११।

'योऽवमन्येत ते मूले हेतुशास्त्राश्रयाद्द्विजः।
स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः॥"

तथा च तत्रैव।३।१५०।

'ये स्तेनपतितक्लीबा ये च नास्तिकवृत्तयः।
तान् हव्यकव्ययोर्विप्राननर्हान् मनुरब्रवीत्॥"

तथाच तत्रैव।८।२२,३८।

'यद्राष्ट्रं शूद्रभूयिष्ठं नास्तिकाक्रान्तमद्विजम्।
विनश्यत्याशु तत्कृत्स्नं दुर्भिक्षव्याधिपीडितम्॥"

"अवमन्तारमर्थानां नास्तिकं विप्रलम्भकम्।
अर्थधर्मापहर्तारं नृप विद्धाद्धि वर्जितम्॥")

तत्पर्य्यायः। बार्हस्पत्य १ चार्वाक २ लौकायतिक ३। इति हेमचन्द्रः।३।५२६॥ स च षड्विधः। माध्यमिक १ योगाचार २ सौत्रान्तिक ३ वैभाषिक ४ चार्वाक ५ दिगम्बरः ६॥

नास्तिकता स्त्री (नास्तिकस्य भावः। नास्तिक+तल्।) कुमन्त्रणादोषकथनम्। तत्पर्य्यायः। मिथ्यादृष्टिः २। इत्यमरः।१।५।३॥ "नास्तिकत्वं नास्ति परलोक इत्यादिक कायति नास्तिकः। तद्धर्मो नास्तीति मन्यते इति निक्को वा तस्य भावो नास्तिकता स्त्रौ भावे इति तः। नास्ति सुकृतं नास्ति परलोक इति बुद्धिर्नास्तिकता।" इति भरतः॥ (यथा, महाभारते।१२।१०३।१५।

"प्रमाणाप्रमाणको मोहस्तथा धर्माधर्मात्मकः।
तमागमालिकता चैव दुराचारश्च जायते॥")

नास्तिका पुं, नास्तिकश्च। इति शब्दचन्द्रिका॥

नास्य, त्रि, नासायां भवम्। (नासा+"शरीरावयवात् यत्।"५।१।६। इति यत्।) नासा-भवम्। यथा मनुः।८।२९१।

"छिन्ननास्ये भिन्नयुगे तिर्य्यक्प्रतिमुखागते।
अक्षभङ्गे च यानस्य चक्रभङ्गे तथैव च॥"

नाह, पुं, (णह बन्धने+भावे घञ्।) बन्धनम्। कूटम्। इति मेदिनी। ह ५॥

नाहल पुं, (नाह पर्वतशिखरादिकं लाति आश्रयत्वेन गृह्णाति च। ला+क।) म्लेच्छ-जातिविशेषः। इति हेमचन्द्रः।४।५६८॥

नाहुषि, पु, (नहुषस्य अपत्यं पुमानिति। नहुष+"अत इञ्।"४।१।९५। इति इञ्।) ययातिराजः। इति भूरिप्रयोगः॥

नि अ, उपसर्गविशेषः। अस्यार्था यथा। निषेधः। निश्चयः। इति मुग्धबोधटीकायां दुर्गादासः॥ विरहः। आधिक्यम्। निक्षेपः। बन्धः। नीचः। कौशलम्। उपरमः। सामीप्यम्। आश्रयः। दानम्। मोक्षः। अन्तर्भावः। बन्धनम्। राशिः। भावः। विन्यासः। इति मेदिनी। नि ३॥

निः [र्] अ (शृणातीति। शॄ वधे+क्विप्। "ऋत इद्धातोः।"७।१।१००। इति धातो रकारस्य इत्।) निश्चयः। निषेधः। इति मेदिनी। रे, ६६॥ (अभावः। यथा, हरिवंशे। भविष्यपर्वणि।८।८०।

"नास्तिकाय समाक्षीक्ष्य मठम् ब्रह्म सनातनम्।
निर्भाग्यो यथा दीपं मोक्षयेन् प्रजयं सदा॥")

निः, [स्] अ निश्चयः। निषेधः। बाहुल्यम्। अतीतम्। इति मेदिनी। सि, ८०॥

निःकासित, त्रि, (निर् वा निस्+कस्+णिच्+क्त।) निष्कासितः। बहिष्कृतः। ते तु कत्वर्थे इति विभाषया विसर्गस्य सकाराभावः। इति व्याकरणम्॥

निःक्रामित, त्रि, (निर् वा निस्+क्रम+णिच्+क्त।) निष्क्रामितः। इत्यमरटीकायां भरतः॥

निःप्रभ, त्रि, (निर्गता प्रभा कान्तिर्यस्य यस्मात् वा।) कान्तिशून्यः। यथा,—

"अवतारे षोडशमे पश्यन् ब्रह्मद्रुहो नृपान्।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रामकरोन्महीम्॥"

इति श्रीभागवतप्रथमस्कन्धः॥

निःश्रम, त्रि, निश्रमः। विगतः श्रमो यस्येति समासे ते तु कत्वर्थे इति विभाषया विसर्गस्य सकाराभावः। इति व्याकरणम्॥

निःशब्द, त्रि (निर्गतः शब्दो यस्मात्।) शब्द-रहितः। चुप् इति भाषा। यथा मार्कण्डेय-पुराणे।

"निःशब्दं कारयित्वा तु नृपतिः प्राह मातरौ॥"

(यथा च हठयोगप्रदीपिकायाम्।४।१०२।

"यावन्नाकाशसङ्कल्पो यावच्छब्दः प्रवर्त्तते।
निःशब्दं तत् परं ब्रह्म परमात्मेति गीयते॥")

निःशलाक, त्रि, (निर्गता शलाका यस्मात् शलाकाया निर्गतो वा।) रहः। निर्जनम्। इत्यमरः।२।८।२२॥

निःशल्या, स्त्री, (निर्गतं शल्यं यस्याः।) दन्ती वृक्षः। इति राजनिर्घण्टः॥

निःशूक पुं (निर्गतः शूको यस्य।) शुक-शालिः। इति राजनिर्घण्टः॥

निःशेष, त्रि (निर्गतः शेषो यस्मात्।) समस्तम्। सम्पूर्णम्। इत्यमरः।३।१।६५॥ (यथा हठयोगप्रदीपिकायाम्।४।१९।

"उत्पन्नशक्तिबोधस्य त्यक्तनिःशेषकर्मणः।
योगिनः सहजावस्था स्वयमेव जायते ततः॥")

शेषरहितश्च॥

निःशोध त्रि, (निर्गतः शोधो यस्मात्। शोधात् निर्गतमिति वा। निरादय इति समासः।) शोधितम्। ह्रदम्। इत्यमरः।३।१।५६॥

निःश्रयणी, स्त्री, (निश्चितं श्रीयते आश्रीयते उपर्य्यनेन। नि+श्रि+करणे ल्युट्। टित्वात् ङीप्।) काष्ठघटितसोपानम्। काठेर सिडी इति भाषा। तत्पर्य्यायः। निःश्रेणिः २ अधिरोहिणी ३ निःश्रेणी ४ निःश्रयणी ५। इति शब्दरत्नावली॥

निःश्रयिणी, स्त्री (निःश्रयति आश्रयति गृहमस्यामिति। निः+श्रि+ङीप्।) निःश्रयणी। इति शब्दरत्नावली॥

निःश्रेणि, स्त्री, (निश्चिता श्रेणिः सोपान-पङ्क्तिर्यत्र।) अधिरोहिणी। (यथा, रघुः।१५।१०।

"चक्रे त्रिदिवनिःश्रेणिः सरयूरनुयायिनाम्॥")

खर्ज्जूरीवृक्षः। इति मेदिनी। णि, १७॥ (घोटकविशेषः। यथा, शकुलाचार्य्यविरचिते ३ अध्याये।

"उपर्य्युपरि यस्य स्याद्रोमावर्त्तो वलिके भवेत्।
निःश्रेणिः स तु विज्ञेयो वाहकस्य क्षयङ्करः॥")

निःश्रेणिका, स्त्री, (निःश्रेणिरिव आकृतिरस्त्यस्य। निःश्रेणि+कन्। टाप्।) तृणविशेषः। निन्धेरी इति कोङ्कणे प्रसिद्धा। तत्पर्य्यायः। सुनिरुका १ बलदायी २। अस्या गुणाः। गोरक्षणम्। उष्णत्वम्। पशूनामत्यन्तहितत्वञ्च। इति राजनिर्घण्टः॥ (निःश्रेणिरेव। स्वार्थे कन्। अधिरोहिणी। यथा कुमारसम्भवे।८।६१।

"मातृका शुक्रं प्राप्य प्रथमं न संस्पृशेत्।
निःश्रेणिकायाम् अतिरः परं ईश् निष्ठ॥")

निःश्रेणी, स्त्री, (निःश्रेणि+कृदिकारादिति वा ङीष्।) निःश्रयणी। इति शब्दरत्नावली॥

निःश्रेयस, क्ली, (निश्चितं श्रेयः । "अचतुर विचतुरेति ।" ५ । ४ । ७७ । इति निपातनात् साधुः ।) शुभम् । (यथा, भागवते । १।१।४० ।
"इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
उत्तमश्लोकचरितं चकार भगवानृषिः ।
निःश्रेयसाय लोकस्य धन्यं स्वस्त्ययनं महत् ॥")
मोक्षः । (यथा, मनुः । १२ । ८३ ।
"वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणाञ्च संयमः ।
अहिंसा गुरुसेवा च निःश्रेयसकरं परम् ॥")
विद्या । अनुभावः । भक्तिः । इति शब्दरत्नावली ॥

निःश्रेयस पुं, (निश्चितं श्रेयो मङ्गलं यस्मात् ।) शङ्करः । इति मेदिनी । से, ५६ ॥

निःषमम्, अ, (निगतं समं यत्र । "तिष्ठद्गुप्रभृतीनि च ।" २ । १ । १७ । इत्यव्ययीभावत्वम् । सुषिनिदुर्भ्य इति षत्वम् ।) निन्दा । तत्पर्यायः । गर्हणम् । दुःषमम् २ । इत्यमरः । ३ । ४ । १४ ॥ शोकः । इति शब्दरत्नावली ॥

निःसङ्ग त्रि (निर्गतः सङ्गो यस्य ।) सङ्गरहितः । यथा, विष्णुपुराणे । ४ । २ । ५१ ।
"मत्स्यस्य सङ्गादभवच्च यो मे
सुतादिरागो मुषितोऽस्मि तेन ।
निःसङ्गता मुक्तिपदं यतीनां
सङ्गादशेषाः प्रभवन्ति दोषाः ॥"
फलानभिनिवेशवान् । यथा,—
"यत्नोऽयमेव कुर्वाणो निःसङ्गोऽपि तपोऽश्वरे ।
नैष्कर्म्यसिद्धिं लभते रोचनाया फलश्रुतिः ॥"
इति मलमासतत्त्वे श्रीभागवतैकादशस्कन्धवचनम् ॥

निःसन्धि त्रि, (निर्गतः सन्धिर्यस्य ।) दृढः । इति त्रिकाण्डशेषः ॥ सन्धिरहितश्च ॥

निःसम्पातः पुं (निर्गतः सम्पातो गमनागमनं यत्र ।) निशीथः । इति त्रिकाण्डशेषः ॥ (गमनागमनपरिशून्ये, त्रि । यथा, हरिवंशे । ८ । १३—१४ ।
"तेन दुन्दुधुमारेण दूषितं सहसा महत् ।
न श्रुभिर्गोधिनेनापि सेव्यते वनराजिभिः ।
निःसम्पातः कृतः सम्यक्पातेन महीयसाश्रयः ॥")

निःसरण, क्ली (निर् + सृ + ल्युट् ।) मरणम् । उपायः । गेहान्निःसरणम् । निर्वाणम् । निर्गमः । इति हेमचन्द्रः ॥ (यथा, देवीभागवते । ४ । २ । २८ ।
"गर्भवासे महद्दुःखं दशमासनिवासनम् ।
तथा निःसरणे दुःखं योनियन्त्रेऽतिदारुणे ॥")

निःसारः, पुं, (निर्गतः सारो यस्मात् ।) शाखोटवृक्षः । इति शब्दचन्द्रिका ॥ श्योनाकवृक्षः । इति राजनिघण्टः ॥ साररहिते, त्रि । यथा,—
"मानुष्यं कदलीस्तम्भनिःसारं सारमार्गणम् ।
यः करोति स सम्मूढो जलबुद्बुदसन्निभे ॥"
इति सुहितत्त्वम् ॥
"जगत् सर्वमिदं निःसारमनित्यं दुःखभाजनम् ।
उत्पद्यते पुनरेव वादेन ह्युपरोपयते ॥
यथैवोत्पद्यते सारान्निःसारं जगदक्षयात् ।
पुनस्तस्मिन् विलीयन्ते महाप्रलयसङ्गमे ॥
उत्पत्तिप्रलयाभ्यान्तु जगति सारता हरेः ।
शम्भवे स्थापयामास भावेन जगतां पतिः ॥"
इति कालिकापुराणे ७७ अध्यायः ॥

निःसारण, क्ली, (निर् + सृ + णिच् + भावे ल्युट् ।) निःसरणम् । (निःसार्य्यतेऽनेनेति । निर् + सृ + णिच् + करणे ल्युट् ।) गृहादीनां प्रवेशनिर्गमादिपथः । इति शब्दरत्नावली ॥

निःसारा, स्त्री, (निर्गतः सारो यस्याः ।) कदलीवृक्षः । इति राजनिघण्टः ॥

निःसारित, त्रि, (निर् + सृ + णिच् + कर्म्मणि क्तः ।) बहिष्कृतः । तत्पर्य्यायः । अपध्वस्तः २ निष्कासितः ३ । इति जटाधरः ॥ साराभाववान् ॥

निःस्नेह, त्रि, (निर्गतः स्नेहो यस्य ।) स्नेहशून्यः । यथा । निःस्नेहः कीटदूषितमित्यादि शस्त्रनि ॥ (यथा, रामायणे । २ । ४८ । ७ ।
"अहो दशरथो राजा निःस्नेहः स्वसुतं प्रति ।"
रसहीनः । यथा, मनुः । ५ । ८७ ।
"नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति ।
आचम्यैव तु निःस्नेहं गामालभ्यार्कमीक्ष्य वा ॥"
तैलविहीनः । यथा, पञ्चतन्त्रे । १ । ९१ ।
"शिरसा विधृता नित्यं स्नेहेन परिपालिता ।
केशा अपि विरज्यन्ते निःस्नेहाः किं न सेवकाः ॥")

निःस्नेहा स्त्री, (निर्गतः स्नेहः रसो यस्याः ।) अतसी । इति त्रिकाण्डशेषः ॥ (अनुरागरहिते, त्रि । यथा, पञ्चतन्त्रे । ४ । ४७ ।
"यदर्थं स्वकुलं त्यक्तं जीवितार्द्धञ्च हारितम् ।
सा मां त्यजति निःस्नेहा कः स्त्रीणां विश्वसेन्नरः ॥")

निःस्राव, पुं, (निःस्रवतीति । निर् + स्रु + ण ।) भक्तरसः । भक्तसमुद्भवमण्डः । माड इति पिच् इति च भाषा ॥ तत्पर्य्यायः । आचामः २ मासरः ३ । इत्यमरहेमचन्द्रौ ॥

निःस्व, त्रि, (निर्गतं स्वं धनं यस्य ।) दरिद्रः । इत्यमरः । ३ । १ । ४९ ॥ तस्य लक्षणं यथा,—
"कपाकारा विरूक्षाश्च वक्राः पाण्डुनखाः करौ ।
स्फुटितौ पादकरजौ निःस्वस्य विरलाङ्गुली ॥"
इति गारुडे शारीरकम् ॥
ज्ञातिरहितश्च ॥

निकटं, त्रि, (नि समीपे कटतीति । नि + कट + अच् ।) अदूरम् । तत्पर्य्यायः । समीपम् २ आसन्नम् ३ सन्निकृष्टम् ४ सनीडम् ५ । इत्यमरः । ३ । १ । ६६ ॥ अभ्यासः ६ सवेशः ७ सदेशः ८ अन्तिकः ९ समर्य्यादः १० सदृक्षः ११ अभ्यर्णः १२ अभ्याशः १३ समिधा १४ उपकण्ठः १५ अभितः १६ । इति शब्दरत्नावली ॥ (यथा, शान्तिशतके । ३ । २ ।
"दिवसरजनीजुलब्धे पनाडिकाघटितं
वहति निकटं कालं स्रोतःसमं न्यायतरम् ।
दृष्ट्वा हि पतता नास्याप्यभो न चापि निवर्त्तते
तदिह महतां कीय मोदो यदेव महाविशः ॥"
तद्देशिकपर्य्यायः । तन्त्रितः १ आसनः २ अभ्यासः ३ अविदूरः ४ अवसमीके ५ आके ६ उपाके ७ अर्वाके ८ अन्तमानाम् ९ अवमे १० उपमः ११ । इत्येकादशान्तिकनामानि । इति वैदिकनिघण्टौ ७ अध्यायः ॥

निकर, पुं (निकरोति व्याप्नोतीति । नि + कृ + अच् ।) समूहः । इत्यमरः । २ । ५ । ३९ ॥ (यथा, कलाविलासे । २ । २६ ।
"दृष्ट्वाग्निमुग्धमुद्रितसमन्नसवलन रूह ज्ञात्वा ।
यच्छाति कमकनिकर तुच्छजनानां वदी माप ॥")
सारः । न्यायद्रव्यम् । निधिः । इति मेदिनी । रे, १०२ ॥

निकर्षण, क्ली, (निरन्तं कर्षणं यत्र ।) सन्निवेशः । इत्यमरः । २ । २ । १९ ॥ पत्तनादिषु स्थाप्यादिपरिच्छिन्नप्रदेशः । इति भरतः ॥ पुरप्रान्तादवशिष्टप्रदेशक्रमयोगिति कश्चित् ॥ पुराद्बहिर्विहरणभूमिः । इति स्वाम्यादयः ॥ ग्रामप्रान्तनिवेशः । इति सारसुन्दरी ॥

निकष, पुं, (निकषति घर्षति स्वर्णादिकं यत्रेति । नि + कष + "गोचरसञ्चरेति ।" ३ । ३ । ११९ । इति घकारात् घः ।) शाणः । इत्यमरः । २ । १० । ३२ ॥ कष्टिपाथर इति भाषा) (यथा, रघुः । १७ । ४६ ।
"निकषे हेमरेखेव श्रीरासीदनपायिनी ॥") ।

निकषा, स्त्री (निकषति हिनस्तीति । कष हिंस + पचाद्यच् । ततष्टाप् ।) राक्षसमाता । इत्यमरः ॥ या सुमालिकन्या विश्रवसो भार्या च । इति रामायणम् ॥

निकषा, अ, (नि + कष गतौ + "सा समिनिकषाभ्याम् ।" उणां । ४ । १७४ । इति आः ।) निकटम् । इत्यमरः । ३ । ४ । १९ ॥ (यथा माघे । १ । ६८ ।
"पयोधिमाबद्धचलज्जलाविलं
विलङ्घ्य लङ्कां निकषा हनिष्यति ॥")
मध्यम् । इति मेदिनी । षे, ७९ ॥

निकषात्मज पुं, (निकषाया आत्मजः ।) राक्षसः । इत्यमरः । १ । १ । ६६ ॥

निकस पुं (निकषति घर्षति स्वर्णादिकं यत्र । नि + कष + घ ।) निकषः । इत्यमरटीकायां भरतः ॥

निकाम, क्ली, (नि + कम इच्छायाम् + घञ् ।) इष्टम् । यथेप्सितम् । इत्यमरः । ३ । ९ । ५० ॥ (यथा, देवीभागवते । १ । ७ । ४ ।
"कुर्व्वन्ति हरि भजन सकलं निकामं
ध्यात्वा समस्तभवनी किल कामरेणुम् ॥")

निकाय पुं (निचीयते इति । नि + चि + "सङ्घे चानौत्तराधर्य्ये ।" ३ । ३ । ४२ । इति घञ् । आदेश्च कः ।) लक्षम् । सधर्म्मिप्राणिसमूहः । (यथा महाभारते । १ । १२७ । ३५ ।
"तथा देवनिकायानां सिद्धानाञ्च दिवौकसाम् ॥")

महतामो गृहपयः । (यथा, श्रीकण्ठचरिते । ६ । १८ ।
"गौरवर्णिमनुमनोनिकाय
कायायमप्रथमादपीक ॥")
निलयः । (यथा, मनु । १ । ११ ।
"इति मनूक्तु सर्वामामेषगन्‌ भूरितेजस ।
दयात्‌ हैवनिकायांश्च महर्षीं चामितौजस ॥")
परमात्मा । इति मेदिनी । ये, ८७ ॥
निकाय्य, पुं, (निचीयतेऽस्मिन्‌ धान्यादिकमिति । नि+चि+"पाय्यसान्नाय्यनिकाय्येति ।" ३ । १ । १२९ । इति ण्यत्प्रत्ययेन निपातनात्‌ साधुः ।) गृहम्‌ । इत्यमरः । २ । २ । ५ ॥ (यथा, भट्टिः । ६ । ९ ।
"न प्रजाग्नौ स्त्र कश्चिन्निकाय्य तेऽधितिष्ठति ।
दैवकार्यविघाताय धर्मद्रोही महोदये ॥")
निकार, पुं, (नि+कृ+घञ्‌ ।) विप्रकारः । अपकारः । उत्कारः । धान्यस्योर्द्धक्षेपणम्‌ । इत्यमरभरतौ ॥ क्लेशकारः । इति स्वामी ॥ धिक्कारः । इति शब्दमाला ॥
निकारणं, क्ली, (निकारयति क्लिश्नात्यनेनेति । नि+कृ+णिच्‌+ल्युट्‌ ।) मारणम्‌ । वधः । इत्यमरः । २ । ८ । ११२ ॥
निकाश त्रि, (निकाशते शोभतेऽनेन इति । काश दीप्तौ+करणे ल्युट् ।) नीकाशः । इत्यमरटीका ॥ (तालव्यशकारान्तोऽपि दृश्यते ॥)
निकुञ्चक, पुं, (निकुञ्चतीति । नि+कुञ्च कौटिल्ये+ण्वुल्‌ ।) परिमाणविशेषः । कुडव-पादः । स च प्रसृत इति ख्यातः । इति भरत-धृतवैद्यकम्‌ ॥ वानीरवृक्षः । इति भावप्रकाशः ॥ (अम्लवेतस । तत्पर्यायो यथा —
"निकुञ्चकः परिव्याधो नादेयो जलवेतसः ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥)
निकुञ्चितं, क्ली, (नि+कुञ्च+क्त ।) नृत्ये हस्तादिचालनविशेषः । यथा —
"नाकुञ्चितं कम्पितञ्च धुतं विधुतमेव च ।
परिवाहितमाधूतमवधूतं तथाञ्चितम्‌ ॥
आकुञ्चितं परावृत्तमुत्क्षिप्तञ्चाप्यधोगतम्‌ ।
ललितं चेत्यपि ज्ञेयं त्रयोदशविधं शिरः ॥"
इति सङ्गीतदामोदरः ॥
निकुञ्ज, पुं क्ली, (नितरां कौ पृथिव्यां जायते इति । जन्‌+ड । पृषोदरादित्वात्‌ साधुः ।) कुञ्जम्‌ । इत्यमरः । २ । ४ । ८ । (यथा आर्य्यासप्तशत्याम्‌ । ४८१ ।
"रचिते निकुञ्जपदवीमिन्दुकपाले ददाति बाध श्रम ।
पञ्जिनमपि हासेरनवागतदुर्लं वधूरम्यम्‌ ॥")
निकुञ्जिकाम्ला, स्त्री, (निकुञ्जिका कुञ्जोद्भवा अम्ला ।) कुञ्चिकाख्यजलविशेषः । तत्पर्यायः । कुञ्जिका २ कुञ्जवल्ली ३ । अस्य गुणाः शीतत्वो मधुरत्वं । इति राजनिर्घण्टः ॥
निकुम्भ पुं, कुम्भकर्णपुत्रः । (यथा, रामायणे । ६ । ७५ । ११ ।
"स कुम्भश्च निकुम्भश्च कुम्भकर्णात्मजावुभौ ।
प्रेष्यमाणौ यक्षुत्तौ राक्षसैर्बहुभिः सह ॥")
दन्तिवृक्षः । इति मेदिनी । भे, १० ॥
(अस्य पर्यायो यथा —
"निकुम्भो दन्तिका प्रत्यक्‌श्रेणी मकूलकः ।
दन्ती रक्तचन्दनकोऽपि चित्रा च स्तोकसम्भवः ॥"
इति वैद्यकरत्नमालायाम्‌ ॥)
(प्रह्लादस्य पुत्रविशेषः । यथा महाभारते । १ । ६५ । १९ ।
"प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्वत्र भारत ।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत ॥"
इमौ पुत्रावामन्तकः । यथा तत्रैव । १ । ६५ । ७५ ।
"निपातितो निकुम्भस्य कुम्भं कपटरूपधा ।
प्रद्युम्नः प्रणमत्येव यथा मन्मथो तथा ।
मते ख्याताः दानोमंत्र दानवा परिकीर्त्तिताः ॥"
सूत्रकारस्य भृत्यविशेषः । इति सङ्ग्राहि ग्रन्थे । १४ । ३३ ॥ महादेवस्य पार्षदविशेषः । यथा हरिवंशे । ९९ । ७५ ।
"भार्य्यां विष्णुमहामाय निकुम्भमिदमब्रवीत्‌ ।
गच्छेश्वरपुरीं गत्वा शून्यां वाराणसीं कुरु ॥"
यथा च रघु । २ । ३५ ।
"अवेहि मां किङ्करमष्टमूर्त्तेः
कुम्भोदरं नाम निकुम्भमित्रम्‌ ॥"
स्कन्दस्य सैनिकविशेषः । यथा, महाभारते । ९ । ४५ । ५७ ।
"तस्य नामानि चान्यानि श्रृणु स्कन्दस्य सैनिकाः ।
विविधायुधसम्पन्नाश्चित्राभरणवर्म्मिणः ।
शङ्कुकर्णो निकुम्भश्च पद्मः कुमुद एव च ॥"
दानवविशेषः । यथा, हरिवंशे । १४ । २ ।
"षट्पुरादिर्दानवश्च दमनश्चाथ दानवः ।
दानवश्च निकुम्भोऽभूत्‌ षट्पुरादप्यरं बली ॥")
निकुम्भाख्यबीजं, क्ली (निकुम्भाख्यस्य दन्तिका-वृक्षस्य बीजम्‌ बीजं यत्र ।) जयपालः । इति राजनिर्घण्टः ॥ (जयपालशब्देऽस्य गुणादिकं ज्ञेयम्‌ ॥)
निकुम्भिला, स्त्री लङ्कापश्चिमद्वारवर्त्तिगुहान्तर्गत-स्थानविशेषः । यथा सङ्गीतदामोदरे ।
"करोत्यात्मसमं सर्वं यथा यत्र निकुम्भिलम्‌ ।
प्राप्य वानरौ यत्र मेघनादः पुरा कृतः ।
यतो भवेत्‌ करणं यत्र तत्र मेघनादोऽभवत्‌ प्रभुः ।
निकुम्भिला पश्चिमाशायां निकुम्भिला विराजते ।
निकुम्भिला इन्द्रजिता जावत यज्ञमुत्तमम्‌ ॥"
निकुम्भी, स्त्री (निकुम्भ+गौरादित्वात्‌ ङीष्‌ ।) दन्तीवृक्षः । इति राजनिर्घण्टः ॥
निकुरम्ब क्ली (निकुरतीति । नि+कुर+अम्बच्‌ बाहुलकात्‌ अम्बच् ।) समूहः । इत्यमरः । २ । ५ । ३९ । (पुंलिङ्गेऽपि दृश्यते । यथा श्रीकण्ठ-चरिते । १८ । ३ ।
"कारणमत्र निविड़तरभावो
दशति येन निकुरम्ब इवाम्बुधाः ॥")
निकृत, त्रि, (नि+कृ+क्त ।) विप्रकृतः । शठः । इत्यमरः । ३ । १ । ४६ ॥ वञ्चितः । नीचः । इति मेदिनी । ते, ११६ ॥
निकृति, स्त्री (नि+कृ+क्तिन्‌ ।) भर्त्सनम्‌ । क्षेपः । शठः । शाठ्यम्‌ । इति हेमचन्द्रः । ४, ११८ ॥ (यथा, किराते । १ । ४५ ।
"न समयपरिरक्षणं क्षमं ते
निकृतिपरेषु परेषु भूरिधाम्नः ॥")
दैन्यम्‌ । इति शब्दरत्नावली ॥
निकृष्ट, त्रि, (नि+कृष+क्त ।) अधमः । इत्यमरः । ३ । १ । ५४ ॥ आकृष्टे निम्ने । इति भरतः ॥
निकेत, पुं, (निकेतति निवसत्यस्मिन्निति । नि+कित निवासे+अधिकरणे घञ्‌ ।) निकेतनम्‌ । इत्यमरटीकायां भरतः ॥ (यथा देवीभाग-वते । ४ । ११ । १२ ।
"गच्छ विष्णु त्वया धाममूर्द्ध्वं दृष्टेश मे ।
निकेतं कार्त्तिकेयस्य महागमनकारणात्‌ ॥")
निकेतनं क्ली, (निकेतति निवसत्यस्मिन्निति । नि +कित+अधिकरणे ल्युट्‌ ।) गृहम्‌ । इत्य-मरः । २ । २ । ४ ॥ (यथा देवीभागवते । १ । २० । ४२ ।
"विशन्तिकेतनं सा तेन रम्यं प्राक्तनिकेतनम्‌ ।
उवाच स वरारोहा राजानं मनसन्मितम्‌ ॥")
पलाण्डु, पुं । इति शब्दचन्द्रिका ॥
निकोचक, पुं (निकोचति शब्दायते । नि+कुच शब्दे+ण्वुल्‌ ।) अङ्कोटवृक्षः । इत्यमरः । २ । ४ । २९ ॥ (यथा, सुश्रुते । १ । ४६ ।
"वाताममाक्षोडाभिषुकाभिषुवपिषुनिकोचकोरु माणकप्रभृतीनि ॥" क्वचित्‌ स्त्रीलिङ्गेऽपि दृश्यते । यथा,—
"वाताममाक्षोडाभिषुकं मुकूलकनिकोचकम्‌ ।
उरुमाणं प्रियालञ्च बृंहणं गुरुशीतलम्‌ ॥"
इति वाग्भटे सूत्रस्थाने षष्ठे ऽध्याये ॥)
निकोठक, पुं, (निकोचक+पृषोदरादित्वात् चस्य ठः ।) निकोचकः । इत्यमरटीकायां भरतः ॥ (यथा,—
"तिल पिण्याकविकृती निकोठका
किलाटपिण्डकञ्च शुष्कशाकता ।
कुसुम्भविरूढकपर्याटकी
निकोठकाद्याः कफपित्तदूषणाः ॥
कर्कारुतालास्थिसर्षपस्थिता
शुष्कशाकं मनुष्यभयात्‌ वर्जयेत्‌ ॥"
इति चरके सूत्रस्थाने सप्तविंशेऽध्याये ॥)
निक्वण पुं, (नि+क्वण शब्दे+"क्वणो वीणायाञ्च ।" ३ । ३ । ६५ । इति अप्‌ ।) वीणाया क्वणाद्यश्च निःस्वादे शब्दः । तत्पर्यायः । निक्वाणः २ क्वाणः ३ क्वणः ४ क्वणनम्‌ ५ । इत्यमरः । १, ७ । २४ ॥ प्राणिप्रभवमनुष्यादेः शब्दस्य प्रकाराः ६ प्रवण ७ इत्यादयः प्रयोगाः सन्ति । आदिमा गुणाय मुखाय उपकार उपवेश इत्यादय । इति भरतः ॥

निक्वाण, पुं, (नि+क्वण शब्दे+भावे घञ्।) निक्वणः। इत्यमरः। १। ७। २४॥

निखर्व्वं, क्ली, (निखर्व्वति बहुसङ्ख्यां गच्छतीति। नि+खर्व्व गतौ+पचाद्यच्।) दशखर्व्वसङ्ख्या। लक्षकोटयः। इति लीलावती हेमचन्द्रश्च॥ (यथा महाभारते। २। ६१। ९। "शतार्व्वुदं महापद्मं निखर्व्वं कोटिरेव च॥") पुंलिङ्गोऽप्ययम्। यथा। शङ्खं तस्मात् निखर्व्वं खेत्यादि॥

निखर्व्व, त्रि, (निगतो खर्व्वः।) वामनः। इति हेमचन्द्रः। ३। ११८॥

निखिल, त्रि, (निर्गतं खिलं शेषो यस्मात्।) समस्तम्। इत्यमरः। ३। १। ६५॥ (यथा देवीभागवते। १। २। ४।
"निखिलमलनाशनं नाममात्रं कामदम्
प्रकटय भगवत्या नामयुक्तं पुराणम्॥")

निगड, पुं क्ली, (निगलति बध्नातीति। नि+गल+अच्। लस्य डत्वम्।) हस्तिनां लौहमयपादबन्धोपकरणम्। इति भरतः॥ बाँदु इति निगडका इति च ख्यातः॥ तत्पर्य्यायः। शृङ्खल २ अन्दुक ३। इत्यमरः। २। ८। ४१॥ शृङ्खीर ४ अन्दु ५। इति शब्दरत्नावली॥ (यथा माघे। ५। ४८।
"बन्धाभराणि परितो निगडान्यलावीत्
स्वातन्त्र्यमुज्ज्वलमवाप करेणुराजः॥")

निगडित, त्रि, (नि+गल+क्त। लस्य डत्वम्। यद्वा, निगडो जातोऽस्येति। तारकादित्वात् इतच्।) बद्धः। इति हेमचन्द्रः। ३। ९। ३॥

निगण, पुं, होमधूमः। इति त्रिकाण्डशेषः॥

निगद, पुं, (नि+गद भाषे+"नौ गदनदपठस्वनः।" ३। ३। ६४। इति अप्।) भाषणम्। कथनम्। तत्पर्य्यायः। निगाद २। इत्यमरः। ३। २। १९॥ (यथा, भागवते। ५। ३। १६।
"इति निगदेनाभिष्टूयमानो भगवाननिमिषऋषभो वर्षधराभिवादिताभिवन्दितचरणः सदयमिदमाह॥") उच्चैर्जपः। यथा। निगदस्तु जपैर्वैद्य इत्यागमः॥

निगम, पुं, (निगमे पुर्य्यां भवः। निगम+"तत्र भवः।" ४। ३। ५३। इत्यण्। संज्ञापूर्व्वकत्वात् वृद्ध्यभावः।) वाणिक्॥ (निगच्छन्त्यस्मिन्निति। नि+गम+"गोचरसञ्चरेति।" ३। ३। ११९। इति घप्रत्ययेन साधुः।) पुरी। कटः। (निगम्यते ज्ञायतेऽनेनेति।) वेदः। (यथा, देवीभागवते। १। ५। ४९।
"कथङ्कारं वाचा सकलनिगमागोचरगुण-
प्रभावं त्वं यस्मात् स्वयमपि न जानासि
परमम्॥")
वणिक्पथः। हट्ट इति यावत्। इति मेदिनी। मे, ४५॥ निश्चयः। (यथा "तस्या एव प्रतिज्ञाया हेतुभिर्दृष्टान्तोपनयनिगमैः स्थापना।" इति चरके विमानस्थानेऽष्टमेऽध्याये॥) बाधा। इति हेमचन्द्रः। ४। ३८॥ (उपद्रवः। यथा, भागवते। १। ५। ३८।
"इमं स्वनिगमं ब्रह्मन्नवेत्य मदनुष्ठितम्।
अदान्मे ज्ञानमैश्वर्य्यं स्वस्मिन् भावञ्च केशवः॥")

निगर, पुं, (नि+गॄ+"ऋदोरप्।" ३। ३। ५७। इति भावे अप्।) भोजनम्। इति राजनिर्घण्टः॥

निगरण, क्ली, (नि+गॄ भक्षणे+भावे ल्युट्।) भक्षणम्। इति मेदिनी। णे, ८९॥

निगरण, पुं, (निगीर्य्यते भक्ष्यतेऽनेनेति। नि+गॄ+करणे ल्युट्।) गलः। इति मेदिनी। णे, ८९॥ होमधूमः। इति शब्दरत्नावली॥

निगाद, पुं, (नि+गद भाषे+भावे घञ्।) कथनम्। इत्यमरः। ३। २। १९॥

निगार, पुं, (नि+गॄ भक्षणे+भावे घञ्।) निगरणम्। भक्षणम्। इत्यमरः। ३। २। ३०॥

निगाल, पुं, (निगलति भक्ष्यतेऽनेनेति। नि+गल भक्षणे+करणे घञ्।) अश्वगलोद्देशः। इत्यमरः। २। ८। ४८॥ (यथा, अश्ववैद्यके। ३। १४।
"घण्टाबन्धसमीपस्थो निगालः परिकीर्त्तितः।
अधस्ताच्च निगालस्य गलमाहुर्मनीषिणः॥")

निगालवान्, पुं, (निगालोऽस्त्यस्येति। निगाल+मतुप् मस्य व।) अश्वः। इति शब्दचन्द्रिका॥

निगु, पुं, (निगम्यते विद्यतेऽनेनेति। नि+गम+बाहुलकात् कुः।) मनः। इति त्रिकाण्डशेषः॥ मलम्। मूलम्। मनोज्ञम्। चित्रकर्म्म। इति संक्षिप्तसारोणादिवृत्तिः॥

निगूढ, पुं, (निगुह्यते संव्रियते इति। नि+गुह+क्त। "यस्य विभाषा।" ७। २। १५। इति। नेट्।) वनशूकः। इति हेमचन्द्रः। ४। २३९॥ गुप्ते त्रि। यथा,—
'आर्त्तो विभुः परमनिर्वृत एव मौनी
प्रभ्मोदिति त्रिजगतोऽमरचित्तवृत्तिः।
अत्तनिगूढनयनानलचाटुकस्त्र
जानाति कः स्वयमतः परमेश्वरोऽसि॥"
उद्भटः॥

निग्रह, पुं, (नियमेन ग्रहणमिति। नि+ग्रह+"ग्रहवृदृनिश्चिगमश्च।" ३। ३। ५८। इति अप्।) अनुग्रहाभावः। इत्यमरः। ३। २। ३१॥ (यथा, मनुः। ७। १७५।
'निग्रहं प्रकृतीनाञ्च कुर्य्याद् योऽरिबलस्य च।
उपसेवेत तं नित्यं सर्व्वयत्नैर्गुरुं यथा॥")
दण्डनम्। (यथा, महाभारते। १। ११९। ७४।
"धन्यौ च कर्णदुर्य्योधनाभ्यां
बुद्धिं कृतां निग्रहे कृष्णस्य॥")
भर्त्सनम्। सीमा। इति मेदिनीकरहेमचन्द्रौ॥ (निराकरणम्। यथा रघुः। ८। २५।
"दिनमुखानि रविर्हिमनिग्रहै-
र्विमलयन् मलयं नगमत्यजत्॥"
दण्डः। यथा रघुः। ११। ५५।
'ते चतुर्थसहितास्त्रयो बभुः
सूनवो नवबधूपरिग्रहात्।
सामदानविधिभेदनिग्रहाः
सिद्धिमन्त इव तस्य भूपतेः॥")
चिकित्सा। इति राजनिर्घण्टः॥ विष्णुः। यथा, महाभारते। १३। १४९। ९४।
"प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः॥"
("सर्व्वं प्रजाः निगृह्णातीति निग्रहः।" इति शाङ्करभाष्यम्॥ महादेवः। इति महाभारतम्। १३। १७। ६४॥)

निग्राह, पुं, (नि+ग्रह+"आक्रोशेऽवन्योर्ग्रहः।" ३। ३। ४५। इति घञ्।) निग्रहः। आक्रोशः। यथा। निग्राहस्ते भूयात्। इति संक्षिप्तसारव्याकरणम्॥ (यथा च भट्टिः। ७। ४३।
"संहृष्टायात्तु वैदेह्यां निग्राहो बोऽधवानरैः॥")

निघ, पुं, (नियमितं निर्व्विशेषेण वा हन्यते ज्ञायते इति। नि+हन+"निघो निमितम्।" ३। ३। ८७। निपातनात् साधुः।) विम्बसमः। समन्तात् तुल्यारोहपरिणाहः। इत्यमरभरतौ॥

निघण्टिका, स्त्री, गुलञ्चकन्दः। इति राजनिर्घण्टः॥

निघण्टु, पुं, (निघण्टति शोभते इति। घण्ट दीप्तौ+"मृगय्वादयश्च।" उणा। १। ३८। इति कुप्रत्ययेन साधुः।) नामसंग्रहः। इति हेमचन्द्रः। २। १७९॥

निघस, पुं, (अदनमिति। नि+अद भक्षणे+"नौ ण च।" ३। ३। ६०। इति अप्। "घञपोश्च।" २। ४। ३८। इति घस्लादेशः।) आहारः। इत्यमरः। २। ९। ५६॥

निघाति, स्त्री, (निहन्यतेऽनयेति। नि+"वसि वपियजीति।" उणा। ४। १२४। इति इञ् तत कुत्वम्।) लौहधानी। लौहमयदण्डः। इत्युणादिकोषः॥

निघुष्ट, क्ली, (निघुष्यते स्मेति। नि+घुष+भावे क्त।) घुष्टम्। घोषणम्। इति शब्दरत्नावली॥

निघृष्व, पुं, (नि+घृषु सङ्घर्षे+"सर्व्वनिघृष्वरिष्वेति।" उणा। १। १५३। इति वन्प्रत्ययान्तनिपातनात् साधुः।) खुरः। इत्युणादिकोषः॥ वायुः। खरः। मार्गः। वराहः। इति संक्षिप्तसारोणादिवृत्तिः॥ (क्षुद्रः। इति निघण्टुः। ३। २॥)

निघ्न, त्रि, (निहन्यते नियम्यते इति। नि+हन+घञर्थे क। निपातनादेवास्य तथात्वम्।) अधीनः। इत्यमरः। ३। १। १६॥ (यथा, रघुवंशे। १४। ५८।
'आश्वास्य रामावरजः सतीं ताम्
आख्यातवाल्मीकिनिकेतमार्गः।
निघ्नस्य मे भर्तृनिदेशरौक्ष्यं
देवि! क्षमस्वेति बभूव नम्रः॥")
अङ्गूरणम्। इति लीलावती॥ (यथा सूर्य्यसिद्धान्ते। १। २९।
"पुनर्दान्तनिघ्नाप्त लभ्यते यत्र यत्र

पुं। क्षत्रियवंशविशेषः। यथा, हरिवंशे। १५। २१।
"बभ्रुरणात्प्रत्यो निम्नो निचुम्पो सभूत् ॥")
निचय पुं (नि+चि+"एरच्।" ३।३।५६। इत्यच्।) समूहः। (यथा, महाभारते।१।२।६।
"ब्राह्मणेभ्यो राज्ञो निचयान् महतो
ऽपि च ॥")
निश्चयः। इति शब्दरत्नावली॥
निचिकी, स्त्री, (नितरां चायति शोभते इति। कै+क। गौरादित्वात् ङीष्।) नैचिकी। उत्तमा गौः। इत्यमरटीकायां भरतः॥
निचित, त्रि (निश्चयेन चीयते स्मेति। नि+चि+क्त।) पूरितम्। व्याप्तम्। इति हेमचन्द्रः। ४। ९८। (यथा महाभारते।३।१७९।४।
"प्रसन्नमानसं विधात्रे दर्व्यैर्निचितं महीम्॥"
सञ्चितम्। यथा, भावप्रकाशे व्यानवाताधिकारे।
'वायु' प्रकृष्टो निचित बलाश
शुद्धपथमागहितावृतश्च॥"
स्त्रीलिङ्गे, स्त्री। यथा महाभारते।१।८।१८।
'आभिर्वै विदित्वा लब्धा निचिता राजिमा
रस्थीम्॥")
निचुल पुं (निचालति वस्त्रमूर्ध्वतीति। नि+चुल+'इगुपधज्ञेति।" ३।१।१३५। इति क।) हिज्जलवृक्षः। इत्यमरः।२।४।६१॥ (पर्य्यायोऽस्य यथा—
"हिज्जलो दिव्यनामापि निचुलश्चाम्बुजस्तथा॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)
वेतसवृक्षः। इति राजनिर्घण्टः॥ निचोलः। इति हेमचन्द्रः।४।२११॥
निचुलक, स्त्री (निचुल इव प्रतिकृतिः। "इवे प्रतिकृतौ।" ५।३।९६। इति कन्।) निचोलकम्। इति शब्दरत्नावली। १८२॥
निचोल, पुं (निचोल्यते इति। नि+चुल+घञ्।) प्रच्छदपटः। इत्यमरः। गिलाफ इति भाषा। तत्पर्य्यायः। निचुलः २। उत्तरच्छदः ३। प्रच्छदपटः ४। इति हेमचन्द्रः। ३। ३४॥ (यथा, राजतरङ्गिण्याम्। ३। २४८।
"सकलश्यामलिकाश्रितविपुलतमोत्थिता।
काशीलसन्तानिव नीलनिचोलाच्छादिता इव॥")
निचोलक, पुं (निचोल इव कायतीति। कै+क।) भटादीनां कञ्चुकाख्यः। तत्पर्य्यायः। कूर्पासः २। वारबाणः ३। कञ्चुकः ४। इति हेमचन्द्रः। ३। ४३१॥
निच्छवि, स्त्री (निश्चिता छविः कान्तिर्यत्र।) तीरभुक्तिदेशः। इति त्रिकाण्डशेषः॥ तिरहुत इति भाषा॥
निच्छिवि पुं, वर्णसङ्करजातिविशेषः। इति मनुः। यथा,—
"झल्लो मल्लश्च राजन्याद्व्रात्यान्निच्छिविरेव च।
नटश्च करणश्चैव खसो द्रविड एव च॥"
इति मनुः।१०।२२॥

निज त्रि, (नियमेन जायते इति। नि+जन+ड।) स्वकीयम्। (यथा, हितोपदेशे।
"अयं निजः परो वेति गणना लघुचेतसाम्॥")
नित्यम्। इत्यमरः। ३। ३। ३२॥
निट, [क्] स्त्री, (नितरां म्लायति तनूकरोति धारामिति। म्लै+क। पृषोदरादित्वात् साधुः।) निम्ना। यथा,—
"बालावेषा निम्नाभ्रा च वालतीयी तमा-
निम्नौ॥"
इति रामायणे किष्किन्धाकाण्डे॥
(यथा मनुः। ८। ६०।
"निधानानि नियुक्तस्तु गताक्षौ धामयतो निधिः।
प्रकाशमुपास्यतः पुनर्न हिताय कथञ्चन॥")
निडीन, क्ली (नीचैर्डीनं गमनमस्यामिति।) पक्षिगतिविशेषः। (यथा, महाभारते।८।४१।२६।
"निडीनमथ सण्डीनं निपातडीनमपि च॥")
प्रयाणम्। इति जटाधरः॥
निडिका, स्त्री, कलायविशेषः। सियोडा इति भाषा। तत्पर्य्यायः। शतीला २ तिपुटा ३। इति शब्दचन्द्रिका॥
नितम्ब, पुं, (नितरां ताम्यति आकाङ्क्षते कामुकेनेति। तमु आकाङ्क्षायाम्+उल्बादयश्चेति साधुः। यद्वा, नितम्बति पीडयति कामकं चित्तमिति। नि+तम्ब हिंसायाम्+अच्।) स्त्रीकट्याः पश्चाद्भागः। इत्यमरः।२।६।७४॥ पाछा इति भाषा॥ (यथा, माघे। ११। ५।
"विपुलतरनितम्बाभोगरुद्धे रमण्याः
शयितुमनवकाशः शीतवीचिप्रकाशम्॥")
स्कन्धः। रोधः। कटकः। (यथा भट्टिकाव्ये। २। ८।
"गिरेर्नितम्बे मरुता विभिन्नं
तोयावशेषेण हिमाभमभ्रम्॥")
कटिमात्रम्। इति मेदिनी। बे, १९॥ (यथा, ऋतुसंहारे।
"नरव्याजिप्रिया सम्दे नितम्बस्थानसाधिता।
गुरुणां सन्निधानेऽपि कः कुर्व्वति सहस्मृ॥")
नितम्बिनी स्त्री (अतिशयितौ नितम्बौ यस्या इति। नितम्ब+"अत इनिठनौ।"५।२।११५। इति इनि स्त्रियां ङीप्।) प्रशस्तनितम्बविशिष्टा। इत्यमरः।२।६।४॥ (यथ, आर्य्यासप्तशत्याम्। ६११।
"वेणुपदैरपि मरुता विनिर्मितैर्भानि गामं
शोभायै।
दुरवनितम्बमगुणवद्रमणीय हरति नितम्बिनी-
जनम्॥")
स्त्रीमात्रम्। इति शब्दरत्नावली। (यथा, कुमारसम्भवे। ३। ७।
"नवाम्बुगण्डाभरणा नितम्बा
कर्त्तुं सरः पाण्डविहारभूमिम्॥"
नितम्बि इवे, त्रि। यथा, रघुः। ९। ६।
"लोभाज्जात्त्वया सुपीडये
मलयानमरैत्रिभोति॥")

नितरां, [म्] अ, (नि+तरप्+"किमेत्तिङव्ययघादाम्।" ५।४।११। अमुप्रत्ययः।) सततम्। यथा—
"नारीन्द्रियो नागमनाभिलाषी
वक्त्रोदिताल्लो नितरां कुलीनः॥"
इति कोष्ठीप्रदीपः॥
नितल, क्ली (नितरां तलमधोभागो यस्मिन्।) सप्तपातालान्तर्गतपातालविशेषः। इति शब्दरत्नावली॥
नितान्त, क्ली, (नितान्तमतीति। तम+कर्म्मणि क्त। "अनुनासिकस्येति।" ६।४।१५। इति दीर्घः।) अतिशयः। (यथा, कुमारसम्भवे। ५। ३।
"कियाच्चिरं श्राम्यसि गौरि विद्यते
नितान्तदीर्घैर्जनिता तपोभिः॥")
तद्वति, त्रि। इत्यमरः। १। १। ७०॥
नित्य, क्ली, (नियमेन भवम्। नि+"त्यब्नेर्ध्रुवे।"४।२।१०४। इति त्यप्।) निरन्तरक्रिया सततम्। तत्पर्य्यायः। सततम् २ अनारतम् ३ अश्रान्तम् ४ सन्ततम् ५ अविरतम् ६ अनिशम् ७ अनवरतम् ८ अजस्रम् ९। इत्यमरः। १। १। ६९॥ प्रसक्तम् १० अश्रान्तम् ११ अनुकूलम् १२। इति जटाधरः॥ तद्वति, त्रि। इत्यमरः॥ प्रत्यवायजनकाभावप्रतियोगि। यथा सन्ध्योपासनादिकर्म्म नित्यम्। अवश्यकं भावाप्रतियोगि। यथा, मतान नित्यम्। अथ ध्वंसाप्रागभावाप्रतियोगि। यथा, नित्य जीवात्मा। अध्वंसक्रियमाणविधिबोधितम्। यथा, प्रातःसन्ध्यादि नित्यम्। अत्र पञ्चमहायज्ञाः। यथा नित्या क्रिया॥
नित्य, त्रि, (नियमेन भवः। नि+"त्यब्नेर्ध्रुवे।" ४।२।१०४। इत्यत्र "त्यब्नेर्ध्रुव इति वक्तव्यम्।" इति वार्त्तिकोक्त्या त्यप्।) शाश्वतः। तत्पर्य्यायः। ध्रुवः २ ध्रुवः ३ सनातनः ४ सनातनः ५। इत्यमरः। ३।१।७२॥ (यथा, महाभारते। १। १०। २।
"इमां शान्तिं परमां बुद्धिं पुरैव श्रुत्वा जनम्।
नित्यात्मानम् महात्मानं शाश्वतं पुरुषर्षभ॥")
समुद्रः, पुं। इति राजनिर्घण्टः॥
नित्यकर्म्मन्, [न्] क्ली (नित्यं कर्म्म।) प्रत्यवायजनकाभावप्रतियोगिकर्म्म। इति स्मृतिः॥ तद्यथा,—
"नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकं तथा।
गृहस्थस्य त्रिधा कर्म्म तन्निबोध मम पुत्रक॥
अहन्यहनि निर्दिष्टं अग्निहोत्रादि नित्यकम्।
नैमित्तिकं यथा चान्यत् पुत्रजन्मक्रियादिकम्॥
नित्यनैमित्तिकं ज्ञेयं पर्व्वश्राद्धादि पण्डितैः॥"
इति मार्कण्डेयपुराणम्॥
तस्यापि शास्त्रे यथा,—
"नित्यानि कर्म्माणि विप्र। तस्य श्राद्धादिकर्म्मदम्।
अकुर्व्वन् विहितं कर्म्म प्रत्यवायी भवेत्ततः।
प्रायश्चित्तेन महता शुद्धिमाप्नोति मानवः।
तस्मात् नित्यक्रियाहानि कर्त्तव्या मनीषिभिः॥"

तत्कृत्य क्रियाहानिर्यस्य पुंसोऽभिजायते ।
तस्यावलोकनात् सूर्य्यो निरीक्ष्यः साधुभिः सदा ॥
दृष्टे स्नात्वा सचेलस्य शुद्धिर्दीप्तमतेर्भवेत् ।
पुंसो भवति तस्योक्ता न शुद्धिः पापकर्म्मणः ॥"
इति विष्णुपुराणे ३ अंशे १८ अध्यायः ॥ ० ॥
सूतकादौ नित्यकर्म्माकरणविधिर्यथा —
"जातके मरणे जाते नित्यकर्म्म न चाचरेत् ।
नैमित्तिकञ्च तद्वच्च समस्तं न चाचरेत् ॥
सूतके च सुतृप्तेऽपि सुरकर्म्मणि मैथुने ।
धूमोद्गारे तथा वान्तौ नित्यकर्म्माणि सन्त्यजेत् ॥
सर्व्वे भुक्ते तथाजीर्णे च नैव भुक्त्वा च किञ्चन ।
कर्म्म कुर्य्यान्नरो नित्यं स्नात्वा स्नात्वा तथा ॥
पत्रं पुष्पञ्च ताम्बूलं भेषजं तेन कल्पितम् ।
कन्दादिमिष्टान्नञ्च फलं भुक्त्वा न चाचरेत् ॥
जलस्यापि नरस्येह भोजनान्नियमाहृते ।
नित्यक्रिया निवर्त्तेत यच्च नैमित्तिके सदा ॥
जम्बीरं गुड़पाकञ्च लवणं कर्पूरादिकम् ।
कामाद्भुक्त्वैव सर्व्वत्र नित्यकर्म्माणि सन्त्यजेत् ॥
विदेशस्थः क्रियापूर्व्वं प्रमोदनित्यको दिनं ।
यावद्दूनृत्तरवप्रयन्तं मनसापि न चाचरेत् ॥
महागुरुनिपाते तु काम्यं किञ्चिन्न चाचरेत् ।
ज्ञालिष्य प्रत्ययतञ्च श्राद्धं देवगुरुञ्च यत् ॥
गुरुमालिष्य विप्रञ्च प्रहरेत् च पालिता ।
न कुर्य्यान्नित्यकर्म्माणि रैत याति च भैरव ॥"
इति कालिकापुराणे ५४ अध्यायः ॥
नित्यचौर, क्ली, (नित्य कालाकालाभावतो राग प्राप्तत्वात् यदा तदा चौरम् ।) वैधेतरचौरम् । रागप्राप्तश्मश्रुच्छेदनम् । यथा —
"चन्द्रोदिते तिथावृक्षे शुभेऽन्नेऽहन्यपि नरः ।
नित्यचौरं प्रकुर्व्वीत जन्मभाद्ये न तु क्वचित् ॥"
इति ज्योतिःसारसार ॥ ० ॥
रामकार्च्चनेऽपि तु ।
"न क्षामसाममतीतमुकभूषितानां-
मभ्यक्तसुस्नरणकालनिवासनानाम् ।
सन्ध्या निशायामितिरुद्धाकदिनेषु रिक्तौ
चौरं हितं प्रतिपदृषि न चापि विष्टाम् ॥"
इति ज्योतिस्तत्त्वम् ॥ ० ॥
तत्र मासाः गौराः भाद्रपौषचैत्रा निषिद्धाः जन्ममासोऽपि निषिद्धः सन्तरे विहिताः । वारस्तु बुधसोमयोर्विहितः । साम्प्रतं मङ्गल वारोऽपि । तिथयस्तु नन्दारिक्तापूर्णिमामावास्याष्टमीभिन्ना विहिताः । नक्षत्राणि रेवत्यश्विनी पुष्य धनिष्ठा ज्येष्ठा श्रवणा स्वाती हस्ता मृगशिरः शतभिषा पुनर्व्वसु चित्रा । राजा देश दिशादेश विवाह व्रतधृतकार्य्ये च कृत्य मौसे यज्ञकर्म्मणि गर्भिण्यां निषिद्धमासानपि कायम् । यज्ञकर्म्मनिषिद्धेऽपि दिने ।
क्षेत्रवमानतपुर पाटलिपुत्र पुरीमध्ये च
मासम् ।
नितिमदिनेषु सततं चौरविधौ भवति
कल्याणम् ॥"
रघुनाथ कामम् । इति ज्योतिषम् ॥

नित्यगति, पुं, (नित्य गतिरस्यास्ति ।) वायुः । इति हेमचन्द्रः । ४ । १७२ ॥ (यथा, महाभारते । ७ । ४५ । २२ ।
'यथा वायुर्नित्यगतिर्जलदान् शतशोऽम्बरे ॥')
नित्यदा, अ, (नित्य+दाच् ।) सर्व्वदा । यथा,—
"पुण्यं मधुवनं तत्र सान्निध्यं नित्यदा हरेः ॥"
इति श्रीभागवते ४ स्कन्धे ॥
नित्यदान क्ली, (नित्य दैनन्दिनं दानम् ।) प्रतिदिनकर्त्तव्यदानम् । यथा, गरुड़पुराणे ।
"नित्यं नैमित्तिकं काम्यं विमलं दानमीरितम् ।
अहन्यहनि यत् किञ्चिद्दीयतेऽनुपकारिणे ॥
अनुद्दिश्य फलं तत् स्याद्ब्राह्मणाय तु नित्यकम् ॥"
नित्यप्रलय, पुं, (नित्य प्रलयः ।) चतुर्व्विध प्रलयान्तर्गतप्रलयविशेषः । यथा,—
"नित्यं सदैव जातानां यो विनाशो दिवानिशम् ॥"
इति विष्णुपुराणे १ अंशे ७ अध्यायः ॥
"सन्ध्ये दीपज्वालावत् कालक्रमेण जातानां दिवानिशं यो विनाशः स नित्यः ॥" इति तट्टीकायां स्वामी ॥
नित्ययौवना, स्त्री, (नित्य स्थिरं यौवनं यस्याः ।) द्रौपदी । इति हेमचन्द्रः । ३ । १७४ ॥ (नित्यं यौवनं यस्यास्ति ।) स्थिरयौवने त्रि ॥
नित्यवैकुण्ठ, पुं, (नित्यः सनातनो वैकुण्ठः ।) विष्णोः स्थानविशेषः । यथा,—
"ऊर्द्ध्वं नभसि सर्व्वेशो नित्यवैकुण्ठ एव च ।
आत्माकाशसमो नित्यो विस्तृतश्चन्द्रबिम्बवत् ॥
ईश्वरेच्छासमुद्भूतो निर्लक्ष्यश्च निराश्रयः ।
आकाशवत् सुविस्तारश्चाम्बुलक्षणनिर्म्मितः ॥
तत्र नारायणः श्रीमान् वनमाली चतुर्भुजः ।
लक्ष्मीसरस्वतीगङ्गातुलसीपतिरीश्वरः ॥
सुनन्दनन्दकुमुदपार्षदादिभिरन्वितः ।
सर्व्वेशः सर्व्वसिद्धेशो भक्तानुग्रहकारकः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १५ अध्यायः ॥
नित्या, स्त्री, (नित्य+टाप् ।) पार्व्वती (यथा, मार्कण्डेये । ८५ । ८ ।
"रौद्रायै नमो नित्यायै गौर्य्यै धात्र्यै नमो नमः ॥") मनसा देवी । इति शब्दरत्नावली ॥ शक्तिविशेषः । अस्या मन्त्रो यथा —
"वाग्भवं कामबीजञ्च नित्यक्लिन्ने मदद्रवे ।
मदे वह्निवधूमेन्तो वाग्भवाद्योऽयमीरितः ॥"
ध्यानं यथा, —
"अर्द्धेन्दुमौलिममलाममराभिवन्द्या-
मम्भोजपाशसृणिपूर्णकपालहस्ताम् ।
रक्ताङ्गरागवसनाभरणां त्रिनेत्रां
ध्यायेच्छिवस्य वनितां मदविह्वलाङ्गीम् ॥'
इति तन्त्रसारः ॥
(तन्त्रविशेषः । यथा महानिर्व्वाणतन्त्रे ।
'तन्त्रमधिकं नीलं नित्यातन्त्रं शिवागमम् ॥')
नित्यानध्याय, पुं (नित्यं सर्व्वदा यदा तदा अनध्यायः अध्ययनाभावः ।) सर्व्वदा वक्ष्यमाणोद्यत निर्व्वाहकालादि । यथा —

"इमान्नित्यमनध्यायानधीयानो विवर्ज्जयेत् ।
अध्यापनञ्च कुर्व्वाणः शिष्याणां विधिपूर्व्वकम् ॥
कर्णश्रवेऽनिले रात्रौ दिवा पांशुसमूहने ।
एतौ वर्षास्वनध्यायावध्यायज्ञाः प्रचक्षते ॥
विद्युत्स्तनितवर्षेषु महोल्कानाञ्च सम्प्लवे ।
आकालिकमनध्यायमेतेषु मनुरब्रवीत् ॥
एतांस्त्वभ्युदितान् विद्याद् यदा प्रादुष्कृताग्निषु ।
तदा विद्यादनध्यायमनृतौ चाभ्रदर्शने ॥
निर्घाते भूमिचलने ज्योतिषाञ्चोपसर्ज्जने ।
एतानाकालिकान् विद्यादनध्यायानृतावपि ॥
प्रादुष्कृतेष्वग्निषु तु विद्युत्स्तनितनिःस्वने ।
सज्योतिः स्यादनध्यायः शेषे रात्रौ यथा दिवा ॥
नित्यानध्याय एव स्याद्ग्रामेषु नगरेषु च ।
धर्म्मनैपुण्यकामानां पूतिगन्धे च सर्व्वदा ॥
अन्तर्गतशवे ग्रामे वृषलस्य च सन्निधौ ।
अनध्यायो रुद्यमाने समवाये जनस्य च ॥
उदके मध्यरात्रे च विण्मूत्रस्य विसर्ज्जने ।
उच्छिष्टः श्राद्धभुक् चैव मनसापि न चिन्तयेत् ॥
प्रतिगृह्य द्विजो विद्वानेकोद्दिष्टस्य केतनम् ।
त्र्यहं न कीर्त्तयेद्ब्रह्म राज्ञो राहोश्च सूतके ॥
यावदेकानुदिष्टस्य गन्धो लेपश्च तिष्ठति ।
विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्त्तयेत् ॥
शयानः प्रौढपादश्च कृत्वा चैवावसक्थिकाम् ।
नाधीयीतामिषं जग्ध्वा सूतकाद्यन्नमेव च ॥
नीहारे बाणशब्दे च सन्ध्ययोरेव चोभयोः ।
अमावास्याचतुर्द्दश्योः पौर्णमास्यष्टकासु च ॥
अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्द्दशी ।
ब्रह्माष्टकापौर्णमास्यौ तस्मात्ताः परिवर्ज्जयेत् ॥
पांशुवर्षे दिशां दाहे गोमायुविरुते तथा ।
श्वखरोष्ट्रे च रुवति पङ्क्तौ च न पठेद्द्विजः ॥
नाधीयीत श्मशानान्ते ग्रामान्ते गोव्रजेऽपि वा ।
वसित्वा मैथुनं वासः श्राद्धिकं प्रतिगृह्य च ॥
प्राणि वा यदि वाप्राणि यत् किञ्चित् श्राद्धिकं
भवेत् ।
तदालभ्याप्यनध्यायः पाण्यास्यो हि द्विजः
स्मृतः ॥
चौरैरुपद्रुते ग्रामे सम्भ्रमे चाग्निकारिते ।
आकालिकमनध्यायं विद्यात् सर्व्वाद्भुतेषु च ॥
उपाकर्म्मणि चोत्सर्गे त्रिरात्रं क्षेपणं स्मृतम् ।
अष्टकासु त्वहोरात्रमृत्वन्तासु च रात्रिषु ॥
नाधीयीताश्वमारूढो न वृक्षं न च हस्तिनम् ।
न नावं न खरं नोष्ट्रं नेरिणस्थो न यानगः ॥
न विवादे न कलहे न सेनायां न सङ्गरे ।
न भुक्तमात्रे नाजीर्णे न वमित्वा न शुक्तके ॥
अतिथिञ्चाननुज्ञाप्य मारुते वाति वा भृशम् ।
रुधिरे च स्रुते गात्राच्छस्त्रेण च परिक्षते ॥
सामध्वनावृग्यजुषी नाधीयीत कदाचन ।
वेदस्याधीत्य वाप्यन्तमारण्यकमधीत्य च ॥
ऋग्वेदो देवदैवत्यो यजुर्वेदस्तु मानुषः ।
सामवेदः स्मृतः पित्र्यस्तस्मात्तस्याशुचिर्ध्वनिः ॥
एतद्विद्वन्तो विद्वांसस्त्रयीनिष्कर्षमन्वहम् ।
क्रमतः पूर्व्वमभ्यस्य पश्चाद्वेदमधीयते ॥

ध्रुवमक्षमालाम्बरादम्बमबनुसारसुभि ।
कक्षान्तरे विशालमध्यायमवसितम् ॥
...वेश बध्वैविग्रमतभ्यायौ प्रयसत ।
...ध्यायमूमिवाम्युडामात्रानवामुर्थि द्विज ॥"
इति मागवते । ४ । १ ९—१७० ॥
निदर्शितवस्तुनिदर्श पुं, (निदर्शितं वस्तुनो यथोचितेन विवरणम् ।) प्रकृते किञ्च वस्तु ...निदर्शनमिति विवरणम् । इति वैद्यकसार ॥
निदर्शभैरवी, स्त्री (निदा सहाय्यया प्रसिद्धा भैरवी ।) भैरवीविशेषः । अस्या ध्यानान्तिक ...भैरव ध्यानादिकम् ॥ ध्यानं यथा —
"बालार्कप्रभां देवीं ...।
...वाणपुस्तकधारिकाम् ॥
...मिलवर्षीवराम् ।
पाशाङ्कुशौ पुस्तकञ्च तथा च जपमालिकाम् ॥'
इत्यादि ग्रन्थ । इति तन्त्रसार ॥ (अस्या बीज यथा, 'हसकलरडें' 'हसकलरडों' हसकलरडौ ॥)
निद स्त्री, (नेदतीति । निद कुत्सायाम् + "गुपधज्ञेति ।" ३ । १ । १३५ । इति क ।) विषम् । इति शब्दचन्द्रिका ॥
निदद पुं (निदाय विधान दाति पलायते इति । दा + आतोऽनुपसर्गे कः इति क प्रत्ययेन साधु ।) मनुष्यः । इति शब्दचन्द्रिका ॥ (निन्दति इद यदीति विग्रहे । इदरोगादीन्, त्रि ॥)
निदर्शन, क्ली, (निदर्श्यतेऽनेनेति । नि + दृश + ल्युट् ।) दृष्टान्त । उदाहरणम् । यथा —
'तत्र यावदि इष्टान्तस्थले प्राकविन्दने ॥"
इति मायावटीकायां भरत ॥
('दृष्टान्तेन प्रमाणेन पश्य सन्निदर्शनम् । यथाभियायुक्तः क्वचित् ...मध ...दृष्टौ प्रमा इति ।" इत्युत्तरतन्त्रे पञ्च विंशतितमेऽध्याये सुश्रुतेनोक्तम् ॥)
निदर्शना, स्त्री,(निदर्श्यतेऽनेनेति । नि + दृश + णिच् + युच् । टाप् ।) काव्यालङ्कारविशेषः । तस्य लक्षणम् ।
"सम्भवन्वस्तुसम्बन्धोऽसम्भवन्वापि कुत्रचित् ।
यत्र बिम्बानुबिम्बत्वं बोधयेत् सा निदर्शना ॥'
उदाहरणं यथा, इत्यादि ।
"उन्नतेन शशिना ... ।
...।
(साहित्यदर्पणे । १० । ७ ।
...।
अत्र बिम्बानुबिम्बत्व बोधयेत् सा निदर्शना ॥
अत्र सम्भवद्वस्तुसम्बन्धनिदर्शना । यथा —
...
...।
...
...॥
अत्र ...

...स्वरूपायात् । स च ...।
बोधयति । ...।
यथा,—
'कलयति कुवलयमाला
ललितं कुटिलः कटाक्षविक्षेपः ।
अधरः किसलयलीला
माननमस्याः कलानिधिविलासम् ॥
अत्रानयस्य धर्म कथमन्यो वहतीति कटाक्षविक्षेपादीनां कुवलयमालाललितादीनाञ्च ...ललितादिकमसम्भवत् कटाक्षविक्षेपादि कुवलयमालादेव बिम्बप्रतिबिम्बभावं बोधयति । यथा वा ।
'प्रयाति तव राजेन्द्र । ...।
राजहंसगति पद्भ्यामाननेन शशिद्युति ॥
अत्र पद्भ्यामसम्भवद्राजहंसगतिर्धारणमनुपपन्नमिति तयोस्तद्धर्मत्वं कल्प्यते । स चासम्भवन् राजहंसगतिमिव गतिं च धत्ते ।
अनेकवाक्यगा यथा —
'इदं किलाव्याजमनोहरं वपुः
तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥
अत्र ...
...नीलोत्पलपत्रधारया शमीलताछेदनेन ...
बिम्बप्रतिबिम्बभावे पर्यवस्यति । यथा वा ।
'...।
...॥
अत्र ...
...प्रथम ...।
'क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥
अत्र ...
...। यथा,—
...।
...॥
अत्र ...
...।
...।
'...
...।
...
...॥
अत्र ...॥)

निदाघ पुं, (नितरां दह्यते ऽत्र कालेन वा । नि + दह + घञ् । न्यङ्क्वादित्वात् कुत्वम् ।) ग्रीष्मकालः । (यथा, रघु । १० । ८३ ।
"स प्रभावी ...।
...॥")
उष्णम् । घर्मः । इत्यमरमेदिनीकरौ ॥ (यथा रघु । १९ । ४२ ।
"...।
...॥")
निदाघे वर्षणीयानि यथा । पाटलपुष्पम् १ मल्लिकापुष्पम् २ ताप ३ खर ४ पथिकशोष ५ वायु ६ ... ७ ... ८ ... ९ ... १० ... ११ ...पाकः १२ । इति कविकल्पलता ॥
("...।" इति सुश्रुते ... षष्ठेऽध्याये ॥
"निदाघविसर्गैः प्रकृत्या ...।
...।
...॥
...॥"
इति ... सुश्रुतेनोक्तम् ॥)
निदाघकर पुं (निदाघः उष्णः करा किरणा यस्य । निदाघस्य उष्णस्य करो वा ।) सूर्यः । इति हारावली । ११ ॥
निदाघकाल पुं, (निदाघ इव कालः । निदाघस्य कालो वा ।) ग्रीष्मः । स तु ज्यैष्ठाषाढात्मकः । यथा,—
"...
...।
...
निदाघकाल ...॥"
इति ऋतुसंहारे । १ । १ ॥
निदान, क्ली, (नि निश्चयं दीयतेऽनेनेति । नि + दा + करणे ल्युट् ।) आदिकारणम् । इत्यमरः । १ । ४ । २८ । (यथा रघु । १ । ७१ ।
"निदानमिक्ष्वाकुकुलस्य सन्ततेः
सुदक्षिणा ...॥")
कारणम् । ... । (यथा, ...
१ । २९ । ९ ।
"...निदानम् ॥"
(नि + दा छेदे + भावे ल्युट् ।) ... इति मेदिनी । नि,८४ ॥ (नि + दैप् शोधने + भावे ल्युट् ।) शुद्धि । ... । ... इति हेमचन्द्र । ... । ... । ...

लक्षणम् ५ आदानम् ६ रोगहेतुः ७ । इति राजनिर्घण्टः ॥ * ॥

"निदानं पूर्व्वरूपाणि रूपाण्युपशयस्तथा ।
सम्प्राप्तिश्चेति विज्ञानं रोगाणां पञ्चधा स्मृतम् ॥
निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः ।
निदानमाहुः पर्य्यायैः प्राग्रूपं येन लक्ष्यते ॥"
इति माधवकरः ॥

("इति कर्त्तव्यताको रोगोत्पादकहेतुर्निदानम् ।'
इति तन्निबन्धव्याख्याने विजयेनोक्तम् ॥

"इह खलु हेतुर्निमित्तमायतनं कर्त्ता कारणं प्रत्ययः समुत्थानं निदानमित्यनर्थान्तरम् । तत्त्रिविधं असात्म्येन्द्रियार्थसंयोगः प्रज्ञापराधः परिणामश्चेति । अतस्त्रिविधविकल्पा व्याधयः प्रादुर्भवन्त्याग्नेयसौम्यवायव्याः ।" इति निदानस्थाने प्रथमेऽध्याये चरकेणोक्तम् ॥ पैलमुनिकृत चिकित्साग्रन्थविशेषः । यथा, ब्रह्मवैवर्त्ते । १ । १६ । २१ ।

"पैलो निदानं कृतवान् सर्व्वधर्म्मं परम् ।
हेतुनिर्णयतन्त्रञ्च चकार कुम्भसम्भवः ॥")

निदिग्ध, त्रि (नितरां दिह्यते स्मेति । दिह उपचये + क्त ।) लेपादिना वर्द्धितम् । तत्पर्य्यायः । उपचितम् २ । इत्यमरः । ३ । १ । ८९ ॥

निदिग्धा, स्त्री, (निदिग्ध + टाप् ।) एला । इति शब्दचन्द्रिका ॥ (विवृतिरस्या एलाशब्दे ज्ञातव्या ॥)

निदिग्धिका, स्त्री, (निदिग्धा + स्वार्थे संज्ञायां वा कन् । कापि अत इत्वम् ।) एला । इति शब्दचन्द्रिका ॥ (यथा, सुश्रुते । ३ । १० ।
"कपित्थबिल्वतोविल्वपटोलेषु निदिग्धिका ॥")
कण्टकारिका । इत्यमरः । २ । ४ । ९३ ॥
(अस्याः पर्य्यायो यथा —
"अग्निक्रान्ता क्षुद्री व्याघ्री भण्टाकी च निदिग्धिका ।
धिङ्गी धामनिका क्षुद्रा बृहती कण्टकारिका ॥"
इति वैद्यकरत्नमालायाम् ॥)

निदिध्यासनं स्त्री, (पुनः पुनरतिशयेन वा निध्यायतीति । नि + ध्यै + सन् । ततो भावे ल्युट् ।) पुनः पुनः स्मरणम् । अद्वितीयवस्तुनि सन्ताकारा कारितायाः बुद्धेः सजातीयप्रवाहः । इति वेदान्तसारः ॥

निदेश, पुं (नि + दिश + घञ् ।) आज्ञा । इत्यमरः । ३ । ८ । २५ ॥ (यथा, देवीभागवते । २ । १० । ४८ ।
"प्रभूतुस्तान् द्विजान् मत्वा निदेशं भूपतेर्ययौ ॥")
कथनम् । उपान्तम् । इति मेदिनी । शे, २१ ॥ (यथा मनुः । २ । १९७ ।
"पराङ्मुखस्याभिमुखो दूरस्थस्यैत्य चान्तिकम् ।
प्रणम्य तु शयानस्य निदेशे चैव तिष्ठतः ॥")
भाजनम् । इति धरणिः ॥

निदेशिनी स्त्री, (निदिशतीति । नि + दिश + णिनि ङीप् ।) दिक् । इति राजनिर्घण्टः ॥

निदेष्टृ, [ऋ] त्रि (निदिशतीति । नि + दिश + तृच् ।) निदेशकर्त्ता । निदिशति इति तुन् मतान्तरे तृचा निष्पन्नः । इति मुग्धबोधमतम् ॥

निद्रा, स्त्री (निन्द्यते इति । निदि कुत्सायाम् + "निन्देर्नलोपश्च ।" उणां । २ । १७ । इति रक् नलोपश्च ।) नेत्रमनःसंयोगः । इति जगदीशः ॥ सुप्तप्रायस्यावस्था । इति चण्डीटीकायां नागभट्टः ॥ घुम इति भाषा ॥ तत्पर्य्यायः । शयनम् २ स्वापः ३ स्वप्नः ४ संवेशः ५ । इत्यमरः । १ । ७ । ३६ ॥ सुप्तिः ६ स्वपनम् ७ । इति शब्दरत्नावली ॥ यथाकाले सेवितनिद्रागुणाः । धातुसाम्यत्वम् । अतन्द्रितत्वम् । पुष्टिवर्णबलोत्साहाग्निदीप्तिकारित्वञ्च ॥ * ॥ दिवास्वप्नगुणः । स्निग्धत्वम् । हृष्टशूलहिक्काजीर्णातिसारिणां हितत्वञ्च ॥ * ॥ आसीनप्रचलायितस्य उपविश्य निद्राप्राप्तौ लायमानस्य गुणः । अरूक्षत्वम् । अनभिष्यन्दित्वञ्च ॥ * ॥ निद्रासात्मीकृतानां दिवा रात्रौ च स्वपतां जाग्रतां वा दोषो न भवति । इति राजवल्लभः ॥ * ॥
निद्राहीना यथा,—
"कुतो निद्रा दरिद्रस्य परप्रेष्यकरस्य च ।
परनारीप्रसक्तस्य परद्रव्यहरस्य च ॥" * ॥
सुखनिद्रा यथा, —
"सुखं स्वपित्यनृणवान् व्याधिमुक्तश्च यो नरः ।
सावकाशस्तु यो भुङ्क्ते यस्तु दारैर्न सङ्गतः ॥"
इति गारुडे नीतिसारः ॥
("सत्त्वाच्च तम एव स्यात् जायते स्वपते प्रभुः ।
तमसा प्रावृतो देही चोष्मा च शून्यताश्रितः ॥
देहे विश्रमते यस्मात्तस्मान्निद्रा प्रकीर्त्तिता ।
वातार्द्धे च भ्रुवोर्मध्ये कीयते चान्तरात्मका ॥
तस्माद्धेतो भवेत्तत्र निद्राया लौकिके क्रियाम् ॥"
इति शारीरस्थाने प्रथमेऽध्याये हारीतेनोक्तम् ॥
"निद्रायत्तं सुखं दुःखं पुष्टिः कार्श्यं बलाबलम् ।
वृषता क्लीबता ज्ञानमज्ञानं जीवितं न च ॥
अकालेऽतिप्रसङ्गाच्च न च निद्रा निषेविता ।
सुखायुषी पराकुर्य्यात् कालरात्रिरिवापरा ॥"
इति वाग्भटे सूत्रस्थाने सप्तमेऽध्याये ॥
"पुण्डरीकेण सदृशं हृदयं स्यादधोमुखम् ।
जाग्रतस्तद्विकसति स्वपतश्च निमीलति ॥
निद्रान्तु वैष्णवीं पाप्मानमुपदिशन्ति सा स्वभावत एव सर्व्वप्राणिनोऽभिस्पृशति । तत्र यदा संज्ञावहानि स्रोतांसि तमोभूयिष्ठः श्लेष्मा प्रतिपद्यते तदा तामसी नाम निद्रा सम्भवत्यनवबोधिनी सा प्रलयकाले । तमोभूयिष्ठानामहःसु निशासु च भवति । रजोभूयिष्ठानामनिमित्तम् । सत्त्वभूयिष्ठानामर्द्धरात्रे । क्षीणश्लेष्मणामनिलबहुलानां मनःशरीराभितापवतां नैव सा वैकारिकी भवति ॥
हृदयं चेतनास्थानमुक्तं सुश्रुत देहिनाम् ।
तमोऽभिभूते तस्मिंस्तु निद्रा विशति देहिनाम् ॥
निद्राहेतुस्तमः सत्त्वं बोधने हेतुरुच्यते ।
स्वभाव एव वा हेतुर्गरीयान् परिकीर्त्तितः ॥
पूर्व्वदेहानुभूतांस्तु भूतात्मा स्वपतः प्रभुः ।
रजोयुक्तेन मनसा गृह्णात्यर्थान् शुभाशुभान् ॥
करणानान्तु वैकल्ये तमसाभिप्रवर्द्धिते ।
अस्वपन्नपि भूतात्मा प्रसुप्त इव चोच्यते ॥
सर्व्वर्त्तुषु दिवास्वापः प्रतिषिद्धोऽन्यत्र ग्रीष्मात् ॥"
इति सुश्रुते शारीरस्थाने चतुर्थेऽध्याये ॥)

निद्राण, त्रि (नि + द्रा + क्त । "संयोगादेरातो धातोर्यण्वतः ।" ८ । २ । ४३ । इति तस्य नः ।) निद्रागतः । तत्पर्य्यायः । शयितः २ । इत्यमरः । ३ । १ । ३१ ॥ (यथा आर्य्यासप्तशत्याम् । ५९६ ।
'विहितविविधानुबन्धो मानोन्नतयाऽवधीरितो मानी ।
लभते कृतप्रबोधः स जागरित्वेव निद्राणः ॥")

निद्रालु, त्रि (निद्रातीति । नि + द्रा + "स्पृहि गृहीति ।" ३ । २ । १५८ । इति आलुच् ।) निद्राशीलः । निद्रा विद्यते अस्य शीलत्वेनास्तीत्यालुः । इत्यमरटीकायां भरतः ॥ तत्पर्य्यायः । स्वप्नक् २ शयालुः ३ । इत्यमरः । ३ । १ । ३३ ॥ तन्द्रालुः ४ । इति जटाधरः ॥ (यथा, पञ्चतन्त्रे । ५ । ४१ ।
"काणं विरूपं बधिरं निद्रालुमपि चौरिकाम् ।
निष्कालीनञ्च रोगाढ्यो जीवितं योऽत्र वाञ्छति ॥")

निद्रालुः स्त्री, (निद्रा हेतुत्वेनास्त्यस्या इति । निद्रा + बाहुलकात् आलुः ।) वार्त्ताकी । वनबर्व्वरिका । इति राजनिर्घण्टः ॥ नलीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥

निद्रावृक्ष, पुं, (निद्राया वृक्ष इव ।) अन्धकारः । इति शब्दमाला ॥

निद्रासञ्जननं, क्ली (निद्रां सञ्जनयतीति । सम् + जन + णिच् + ल्युः ।) श्लेष्मा । इति शब्दमाला ॥

निधनं, क्ली (नि + धा + "कृपृवृजिमन्दिनिधाञ्भ्यः क्युः ।" उणां । २ । ८१ । इति क्युः ।) नाशः । तत्तु अदर्शनं मरणञ्च । (यथा, विष्णुपुराणे । १ । १३ । ७३ ।
"एकस्मिन् यत्र निधनं प्रापिते दुष्टकारिणि ।
बहूनां भवति क्षेमं तस्य पुण्यप्रदो वधः ॥")
कुलम् । तत्तु कुलस्थानं कुलसूत्रञ्च । इत्यमरभरतौ ॥

निधन, पुं क्ली (नि + धा + क्यु ।) मरणम् । इत्यमरः । २ । ८ । ११६ ॥ वधतारा । सा तु जन्मनक्षत्रात् सप्तमी तारा । यथा "जन्म सम्पद्विपत् क्षेम प्रत्यरि साधको वध इत्यादि" । प्रत्यरौ लवणं दद्यान्निधने तिलकाञ्चनम् । इति ज्योतिस्तत्त्वम् ॥ (निर्गतं धनं यस्य ।) धनहीने, त्रि ॥

निधान, क्ली (निधीयतेऽस्मिन्निति । नि + धा + आधारे ल्युट् ।) निधिः । इति हेमचन्द्रः । ४ । १६ ॥ (यथा, पञ्चतन्त्रे । २ । १६४ ।
"कन्दैः फलैर्मुनिवरा गमयन्ति कालं
सन्तोष एव पुरुषस्य परं निधानम् ॥")
आधारः । यथा —

कोऽप्यासीन्निषादः स्वामी यथैवाद्य वृकोदरः ॥"
इति कथापञ्जी ॥

निपानं, क्ली (निपीयतेऽस्मिन्निति । नि+पा+आधारे ल्युट् ।) कूपसमीपस्थितशिलादिनिर्म्मितपशुपानाधारजलकूपोद्धृतजलस्थानम् । इति भरतः ॥ तत्पर्य्यायः । आहावः २ । इत्यमरः । १ । १० । २६ ॥ निपानकम् ३ । इति शब्दरत्नावली ॥ गोदोहनपात्रम् । इति त्रिकाण्डशेषः ॥ (जलाशयमात्रम् । यथा विष्णुसंहितायाम् । ६४ । १ । "परनिपानेषु न स्नानमाचरेत् ।")

निपुण, त्रि, (नि+पुण राशीकरणे+क ।) कार्य्यक्षम । (यथा, नागानन्दे सूत्रधारोक्तिः ।
"द्वैधयोर्निपुण अपि परिमर्षणा गुण ग्राहिणी ।"
अन्यच, देवीभागवते । १ । ५ । ५६ ।
"न ते रूपं वेत्ति सकलभुवने कोऽपि निपुणो न नाम्नां संख्यां ते कथितुमिह योग्योऽस्ति भुवने ।")
तत्पर्य्यायः । प्रवीण २ अभिज्ञ ३ विज्ञ ४ निष्णात ५ शिक्षित ६ वैज्ञानिक ७ कृतमुख ८ कृती ९ कुशल १० । इत्यमरः । ३ । १ । ४ ॥ सत्यावान् ११ मतिमान् १२ कृशाग्रीयमतिः १३ कृष्टिः १४ विदुरः १५ बुधः १६ दक्षः १७ नैरिष्ठ १८ ज्ञानी १९ सुधीः २० विद्वान् २१ हस्तकला २२ विपश्चित् २३ विदग्धः २४ चतुरः २५ प्रौढः २६ प्रौढा २७ विशारदः २८ सुमेधाः २९ सुमतिः ३० कोविदः ३१ मेधावान् ३२ विज्ञः ३३ विदः ३४ । इति राजनिर्घण्टः ॥ वैज्ञानिकः ३५ कृतमी ३६ । इति शब्दरत्नावली ॥

निफला स्त्री (निष्फलं फलं यस्याः ।) ज्योतिष्मती । इति भावप्रकाशः ॥ (ज्योतिष्मतीशब्देऽस्या गुणाद्यो ज्ञातव्याः ॥)

निफेनं, क्ली (निर्गतः फेनो यस्मादिति ।) अफेनम् । इति राजनिर्घण्टः ॥

निबद्धं, क्ली, (नितरां बद्धं तालतयादिभिर्बद्धं यत्र ।) गीतम् । इति शब्दरत्नावली ॥

निबन्धः, पुं (निबध्नातीति । नि+बन्ध+अच् ।) आनाहरोगः । मलस्य वृत्तिः । इति हेमचन्द्रः । निबन्धनम् । इति जटाधरः ॥ बन्धनम् । यथा —
"दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।"
इति श्रीभगवद्गीता ॥
(यथा, भागवते । ६ । २ । ३६ ।
"आत्मपदं क्वापि निबन्धनकारं
गृहस्थानां लोकपदानुकीर्तनात् ।")

निबन्धनं, क्ली, (निबध्यतेऽनेनेति वा । नि+बन्ध+ल्युट् ।) हेतुः । इति हेमचन्द्रः ॥ उपनाहः । न तु वीणातन्त्रीनिबन्धनोपन्यासः । इत्यमरः । १ । ७ । ७ ॥ (नि+बन्ध+भावे ल्युट् ।) बन्धनम् ॥

निबन्धा, [न्धृ] पुं निबन्धकर्त्ता । ग्रन्थकर्त्ता । इति व्याकरणम् ॥

निबन्धितः, त्रि, बद्धः । निबन्धोऽस्य जात इत्यर्थे इतच्प्रत्ययनिष्पन्नः ॥

निबर्हणं क्ली (निबर्हते इति । नि+बर्ह+ल्युट् ।) मारणम् । इत्यमरः । २ । ८ । ११२ ॥ (यथा, मार्कण्डेयपुराणे । ८१ । ७२ ।
"शृणोति चरितं यश्च दुष्टदैत्यनिबर्हणम् ।")

निभः, त्रि, (नियतं भातीति । नि+भा+क ।) सदृशः । इत्यमरः । ३ । १० । ३८ ॥ (यथा, रघुवंशे । १ । ९ ।
"मधुरपुण्डरीकाक्ष कालातमनिभाङ्गकम् ।
निर्व्वर्त्त्य प्रारम्भमिव प्रारब्धसुखदर्शनम् ।")
प्रकाशः । व्याजे पुं । इति शब्दरत्नावली ॥

निभालनं, क्ली, (नि+भल+णिच्+भावे ल्युट् ।) दर्शनम् । इति त्रिकाण्डशेषः ॥

निभूतं त्रि, (नि+भू+क्त ।) अतीतम् । भूतकालः । इति राजनिर्घण्टः ॥

निभृत, त्रि, (नि+भृ+क्त ।) विनीतः । निर्जनः । यथा,—
"निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम् ।"
इति श्रीगीतगोविन्दे । २ । ११ ॥
(अचलप्रचारम् । यथा रघुवंशे । ८ । १५ ।
"अभवन्निभृतेन्द्रिया सुधा
उदितार्केव समापरोच तत् ॥")

निमज्जथुः, पुं (नि+मस्ज+अथुच् ।) शयनम् । यथा, भट्टिः ।
"तस्यै कान्तान्तरे शार्द्धं मम्लौ वर्षं धिग्निमज्जथुम् ॥"

निमज्जनं क्ली, (निमज्जतेऽनेनेति । नि+मस्ज+भावे ल्युट् ।) स्नानम् । अवगाहनम् । यथा,
"शान्तिं सम्प्रजनकम्पनिमेषं
सञ्चमत्प्रवनितो जनदेव ।
कोऽपि च स्वयं तद्गमनान्ते
इङ्गितज्ञमनयेमि सुधायाम् ॥"
इति नैषधे पञ्चमसर्गे ॥

निमन्त्रणं, क्ली (निमन्त्र्यते इति । नि+मन्त्र+ल्युट् ।) नियोगविशेषः । "अथ यस्याकरणे प्रत्यवायस्तन्निमन्त्रणम् । यथा, इह भुञ्जीत भवान् । यस्याकरणे प्रत्यवायो न स्यात् तदामन्त्रणम् । यथा इह भुञ्जीत भवान् । इति निमन्त्रणामन्त्रणयोर्भेदः ।" इति मुग्धबोधटीकायां दुर्गादासः ॥

निमयः, पुं (निमीयतेऽनेनेति । नि+मि+"एरच् ।" ३ । ३ । ५६ । इत्यच् ।) विनिमयः । इत्यमरः । २ । ९ । ८० ॥ (यथा, महाभारते । १२ । ७८ । ७ ।
"नक्षेत्रादस्य निमयं न प्रार्थयति गायकः ।
निमयेन् चक्रमात्रेण भोजनार्थाय भारत ॥")

निमिः, पुं, इक्ष्वाकुराजपुत्रः । तस्य विशेषविवरणं यथा,—
"निमिर्न्नाम सुतः ख्यातः इक्ष्वाकोर्दूतसम्भवः ।
सप्तम्यां रेभ्यायनाम वसिष्ठो यज्ञसम्भवः ॥
तस्य पुत्रमकुर्व्वन्त प्रमादं स मुनिर्नृपम् ।
विदेहस्त्वं भवस्वेति शापमिष्टान्मदी नृपः ॥
अन्योन्यशापाय तयोर्विमदी? विदेहकौ ।
जग्मतुः शापभावाय ब्रह्माणं प्रति मन्त्रकम् ॥
अथ ब्रह्म आदेशाल्लोचनेषु यथाविधि ।
निमेषाः प्रत्युत लोकानां तद्विधानाय भारत ॥"
इति मत्स्यपुराणे ६१ अध्यायः ॥ ७ ॥
मतान्तरं यथा —
"निमिः सहस्रवत्सरं सत्रमारेभे । वसिष्ठञ्च होतारं वरयामास । तमाह वसिष्ठः । अहमिन्द्रेण पञ्चवर्षशतं यागार्थं प्रथमतो वृतः । अनन्तरं प्रतिपालय भवान् आगमिष्यामीत्युक्ते सोऽपि तथाऽस्तु एवमेवाग्रे गौतमादिभिर्यागमकरोत् । समाप्ते चामरपतियागे त्वरावान् वसिष्ठ आजगाम । तत्कर्म्मकर्त्तृत्वं गौतमस्य दृष्ट्वा अयं विदेहो भविष्यतीति शापं ददौ । निमेः शरीरे कष्टो नतमिव तस्थौ । अध्वर्यमाणो भगवत्कायात् गतान् देवान् अभिव्याजह्रुः । यजमानाय वरो दीयमानीति । एवैव हन्तिनो निमिराह । कलेवरमिति सत्रमध्य? दुःखमस्ति यच्छरीरात्मनो वियोगे भवति । तन्नहमिच्छामि सकललोकेषु वस्तुम् । न पुनः शरीरग्रहणं कर्त्तुमिच्छामि सर्व्वलोकानां नेत्रेषु निवासमिच्छामि । ततो भूतानामुन्मेषनिमेषौ च कृतौ ।" इति विष्णुपुराणे ४ अंशे ५ अध्यायः ॥

निमित्तं, क्ली, (नि+मिद्+क्त । यद्वापूर्व्वकस्य मत्वम् ।) हेतुः । (यथा देवीभागवते ।१।१४।
"किं निमित्तं महाभाग ! निःस्पृहस्य च मां प्रति ।
आत आगमनं मुनि कार्य्यं तन्मुनिगताम् ।")
चिह्नम् । इत्यमरः ।३।३।७६। शकुनः । यथा,
"निमित्तानि च पश्यामि विपरीतानि केशव ।"
इति श्रीभगवद्गीता ॥

निमित्तार्थे, क्ली (निमित्त+अस्त्यर्थे कप् ।) निमित्तविषयानागतम् । शुभशकुनः । इति शब्दमाला ॥ निमित्तार्थ ॥

निमित्तकारणं, क्ली, (निमित्तं कारणम् ।) समवायिकारणासमवायिकारणान्यत् भिन्नम् । इत्यनेकधा कारणम् । यथा । घटं प्रति कुलाल दण्डचक्रसलिलसूत्रादि । इति भाषापरिच्छेदे सिद्धान्तमुक्तावली ॥

निमित्तकृत्, पुं, (निमित्तं करोति शुभाशुभशकुनं करोतीति । कृ+क्विप् ।) काकः । इति राजनिर्घण्टः ॥

निमित्तवित् [द्] पुं, (निमित्तं शुभाशुभकारणं वेत्तीति । विद्+क्विप् ।) दैवज्ञः । गणकः । इति हेमचन्द्रः । ३ । १४६ ॥

निमिषः पुं, विष्णुः । यथा, महाभारते । १३ । १४९ । ३६ ।
"निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ॥"
(निमिषतीति । नि+मिष+"इगुपध न ।"

३।२।१३५। इति क।) काणविशेषः। चक्षु-र्निमीलनम्। इति मेदिनी। षे, ३६॥ (यथा, महाभारते। १।१८९।१९।

"सव्यञ्च चक्रे निमिषान्तरेण
शरांश्च जग्राह दशार्द्धसंख्यान्॥"

वर्त्मगतरोगविशेषः। यथा, सुश्रुते उत्तरतन्त्रे ३ अध्याये।

"निमेषणीः शिरा वायुः प्रविष्टो वर्त्मसंश्रयाः।
चालयेदतिवर्त्मानि निमेषः स गदो मतः॥")

निमीलनं, क्ली (निमील्यतेऽनेनेति। नि+मील+करणे ल्युट्।) मरणम्। (नि+मील+भावे ल्युट्।) निमेषः। इति हेमचन्द्रः। ३। २४२। (यथा, कलाविलासे। १। ४७।

"नयननिमीलनमूकं सुचिरं ध्यानार्द्धपूर्णजनि-
तम्।
दम्भतरुं शुचिकुसुमं सुखसुमनस्ताश्च फले
फलितम्॥"

कालविशेषः। यथा, सूर्य्यसिद्धान्ते। ४। १७।

"तद्वदेव विमर्द्दार्द्धनाडिकाद्यैर्दिवश्च्युते।
निमीलनोन्मीलनाख्ये भवतो सकलग्रहे॥")

निमीलिका, स्त्री, (निमीलयतीति। नि+मील+णिच्+ण्वुल्। टापि अत इत्वम्।) व्याजः। इति शब्दरत्नावली॥ (यथा, राजतरङ्गिण्याम्। ६। ७३।

"मोतस्य मण्डलेशस्य वेलावित्तस्य भूभुजा।
देवी कामयमानस्य चक्रे गजनिमीलिका॥")

निमीलनञ्च॥

निमेयः, पुं, (निमीयते परिमीयते इति। नि+मा माने+"अचो यत्।" ३।१।९७। इति यत्। "ईद्यति।" ६।४।६५। इति ईत्।) नैमेयः। परीवर्त्तः। इत्यमरटीकायां भरतः॥ (परिवर्त्तनीये, त्रि। यथा, महाभारते। १२। ५१।८।

"मार्द्दं घृतमध्वेव निमेयं पार्थिवर्षभ।
दीयतां सदृशं गव्यमभावे सह निमयः॥")

निमेषः, पुं, (नि+मिष+भावे घञ्।) पक्ष्मस्पन्दनकालः। पलक इति भाषा। तत्पर्य्यायः। निमिषः २ दृष्टिनिमीलनम् ३। इति शब्दरत्नावली॥ पुंसो यावता कालेनाक्षिस्पन्देन विकाशानन्तरं पक्ष्माकुञ्चनं जायते स निमेषः। इत्यमरटीकायां भरतः॥ *॥

"अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्त्तितः।
द्वौ निमेषौ त्रुटिर्नाम द्वे त्रुटी तु लवः स्मृतः॥"
इत्यग्निपुराणम्॥

(पक्ष्मस्पन्दनम्। यथा, रघुः। २। १९।

"पपौ निमेषालसपक्ष्मपङ्क्ति-
रुपोषिताभ्यामिव लोचनाभ्याम्॥"

रोगविशेषः। यथा सुश्रुते चिकित्सितस्थाने। १९ अध्याये।

"भेषजञ्च निमेषे या ख्याता कार्य्यं प्रयोगतः।
श्रमते दक्षपालश्च सात्रावन्याद्युपन्यात्॥'
क्षणमध्यासमयविशेषः। इति नीलकण्ठः॥

यथा, महाभारते। १। १९। १९।

"उलूकश्च सनाभ्यश्च निमेषेण च पत्रिराट्।
प्रदरेण च संग्रामं चकार पुलिनेन च॥")

निमेषकृत्, स्त्री, (निमेषं करोतीति। कृ+क्विप्। यद्वा, कृ+भावे क्विप्। निमेषे निमेषमात्रकाले कृत् स्फुरणकार्य्यं यस्याः।) विद्युत्। इति शब्दमाला॥

निमेषरुक्, [च्] पुं, (निमेषेण निमेषकालं व्याप्य अर्थं रोचते दीप्यते इति। रुच दीप्तौ+क्विप्।) खद्योतः। इति त्रिकाण्डशेषः॥

निम्नं, त्रि, निकृष्टा म्ना अभ्यासः शीलमस्य। (यद्वा, निकृष्टं म्नायतीति। म्ना+क।) नीचम्। निचु इति नावाल इति च भाषा। तत्पर्य्यायः। गभीरम् २ गम्भीरम् ३। इत्यमरः। ३।१।६५। गभीरकम् ४। इति शब्दरत्नावली॥ (यथा, कुमारे। ५। ५।

"क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्॥"

पुं, अनमित्रपुत्त्रः। स तु सत्राजित्प्रसेनयोः पिता। यथा, भागवते। ९। २४। १२।

"शिनिस्तस्यानमित्रस्य निम्नोऽभूदनमित्रतः।
सत्राजितः प्रसेनश्च निम्नस्याथासतुः सुतौ॥")

निम्नगा, स्त्री, (निम्नं गच्छतीति। गम+ड। टाप्।) नदी। इत्यमरः। १। १० । ३०॥ (यथा, मनुः। ९। २२।

"यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा॥")

नीचगामिनि, त्रि॥

निम्बः, पुं, (निम्बति स्वास्थ्यं ददातीति। निम्ब+अच्।) वृक्षविशेषः। निम् इति भाषा। तत्पर्य्यायः। अरिष्टः २ सर्व्वतोभद्रः ३ हिङ्गुनिर्य्यासः ४ मालकः ५ पिचुमर्द्दः ६। इत्यमरः। २।४।६२। अर्कपादपः ७। इति हेमचन्द्रः॥ कैटर्य्यः ८ वरत्वचः ९ छर्द्दिघ्नः १०। इति रत्नमाला॥ प्रभद्रः ११ पारिभद्रकः १२ काकफलः १३ कीरेष्टः १४ नेता १५ सुमनाः १६ विशीर्णपर्णः १७ यवनेष्टः १८ पीतसारकः १९ शीतः २०। इति राजनिर्घण्टः॥ पिचुमन्दः २१ तिक्तकः २२। इति भावप्रकाशः॥ कीकटः २३ पूकमालकः २४। इति जटाधरः॥ अस्य गुणाः। शीतत्वम्। तिक्तत्वम्। कफव्रणकृमिवमिशोथशान्तिकारित्वम्। बलासबहुविधपित्तदोषहृदयविदाहनाशित्वञ्च। इति राजनिर्घण्टः॥ लघुत्वम्। ग्राहित्वम्। कटुपाकित्वम्। अग्निवातकारित्वम्। अहृद्यत्वम्। श्रमतृट्कासज्वरारुचिपहृत्कृमिकुष्ठहृल्लासमेहनाशित्वञ्च। तत्पत्रगुणाः। नेत्रहितकारित्वम्। कृमिपित्तविषसर्व्वारोचककुष्ठनाशित्वम्। वातलत्वम्। कटुपाकित्वञ्च। तत्फलस्य गुणाः। रसे तिक्तत्वम्। पाके कटुत्वम्। भेदनत्वम्। स्निग्धत्वम्। लघुत्वम्। उष्णत्वम्। कुष्ठगुल्मार्शःकृमिमेहनाशित्वञ्च।

"निम्बः शीतो लघुर्ग्राही कटुपाकोऽग्निवातकृत्।
अहृद्यः श्रमतृट्कासज्वरारुचिकृमिप्रणुत्॥
व्रणपित्तकफच्छर्द्दिकुष्ठहृल्लासमेहनुत्।
निम्बपत्रं स्मृतं नेत्र्यं कृमिपित्तविषप्रणुत्॥
वातलं कटुपाकञ्च सर्व्वारोचककुष्ठनुत्।
नैम्बं फलं रसे तिक्तं पाके तु कटु भेदनम्॥
स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शःकृमिमेहनुत्॥"
इति भावप्रकाशः॥ *॥

तत्तैलगुणाः। नात्युष्णत्वम्। कृमिकुष्ठकफव्रणदोषप्रशमकत्वम्। अतिशोफहारित्वम्। पित्तलत्वञ्च। इति राजनिर्घण्टः॥ *॥

"निम्बं पित्तकफच्छर्द्दिव्रणहृल्लासकुष्ठनुत्।"
निम्बपत्रं इति वा पाठः॥ *॥

"करञ्जनिम्बजं तैलं कृमिकुष्ठप्रमेहजित्।
निम्बतैलन्तु कुष्ठघ्नं तिक्तं कृमिहरं परम्॥"
इति राजवल्लभः॥

अथ महानिम्बः। वकायेन इति हिन्दीभाषा। तत्पर्य्यायगुणाः। यथा भावप्रकाशे।

"महानिम्बः स्मृतो द्रेका रम्यको विषमुष्टिकः।
केशमुष्टिर्निम्बरकः कार्मुकः कीर इत्यपि॥
महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः।
कफपित्तश्रमच्छर्द्दिकुष्ठहृल्लासरक्तजित्॥
प्रमेहश्वासगुल्मार्शोमूषिकाविषनाशनः॥"

(षष्ठ्यां तिथौ तद्भक्षणे तिर्य्यग्योनित्वं स्यात्। इति तिथितत्त्वम्॥)

निम्बकः, पुं, (निम्ब इव। स्वार्थे कन्।) निम्बवृक्षः। इति भूरिप्रयोगः॥ (षष्ठ्यां तद्भक्षणनिषेधो यथा, तिथितत्त्वे।

"कलङ्की जायते बिल्वे तिर्य्यग्योनिश्च निम्बके॥")

निम्बतरुः, पुं (निम्ब इव तरुर्वृक्षः।) मन्दारवृक्षः। इत्यमरः। २। ४। २६॥

निम्बबीजः, पुं (निम्बस्य बीजमिव बीजं यस्य।) राजादनीवृक्षः। इति राजनिर्घण्टः॥

नि(म्बु)म्बूकः, पुं, (निम्बति सिञ्चतीव रुचिमिति। निम्ब सेचने+बाहुलकात् ऊकः। स्वार्थे कन्।) फलविशेषः। कागजी लेबु इति भाषा। तत्पर्य्यायः। अम्लजम्बीरः २ वह्निः ३ दीप्यः ४ वह्निबीजः ५ अम्लसारः ६ दन्ताघातः ७ शोधनः ८ जन्तुमारी ९ निम्बूः १० रोचनः ११। (यथा, भावप्रकाशे पूर्व्वखण्डे १ भागे।

"निम्बूः स्त्री निम्बुकः क्लीबे निम्बूकमपि कीर्त्ति-
तम्॥")

तत्फलगुणाः। अत्यम्लत्वम्। कटुत्वम्। उष्णत्वम्। गुल्मामवातकासदपार्श्वकण्ठनिष्ठीवहरत्वम्। चाक्षुर्हितकारित्वम्। नष्टरुच्यत्वम्। परिपक्वे अतीव रुच्यत्वञ्च। इति राजनिर्घण्टः॥ पाचनत्वम्। लघुत्वम्। कृमिसमूहोदरव्यथानाशित्वम्। तीक्ष्णत्वम्। वातपित्तकफशूलिनो हितत्वम्। कष्टनष्टरुचिरोचनत्वम्। त्रिदोषवह्निक्षयवातरोगनिपीडितानां विषविक्लवानां मन्दवह्नौ बद्धगुदे विषूचिकायाञ्च प्रदेयम्। इति भावप्रकाशः॥ *॥

बोड्मारी विचार ध्यात् सर्वेभ्यः प्रयोरदे ।"
इति कलापमञ्जरी ।

निपानं क्ली (निपीयते अस्मिन्निति । नि+पा+आधारे ल्युट् ।) कूपसमीपस्थितादिनिर्म्मितपशु-पानाधारकुण्डोद्धृतामुस्थानम् । इति भरतः ॥ तत्पर्य्यायः । आहावः । इत्यमरः । १।१०।२६॥ निपानकम् १ । इति शब्दरत्नावली । गोदोहन-भाण्डम् । इति त्रिकाण्डशेषः ॥ (जलाशय-मात्रम् । यथा विष्णुसंहितायाम् । 64 । 1 । "परनिपानेषु न स्नानमाचरेत् ।")

निपुणः, त्रि, (नि+पुण शुभकर्म्मणि+क ।) कार्य्य-क्षमः । (यथा, नागानन्दे प्रथमाङ्के ।
"दैवज्ञो निपुण यदि परिवदत्येवा ध्रुव
यादिनी ।"
अन्यच्च, श्रीभागवते । 1 । 5 । 16 ।
"न वै जन जातु सकलभुवने कोऽपि निपुणो
न मान्यो मर्त्यो वै कथितुमिह योग्योऽस्ति
पुरुष ।")
तत्पर्य्यायः । प्रवीणः 2 अभिज्ञः 3 विज्ञः 4 निष्णातः 5 शिक्षितः 6 वैज्ञानिकः 7 कृत-मुखः 8 कृती 9 कुशलः 10 । इत्यमरः ॥3।1।4॥ प्रत्यागतः 11 मतिमान् 12 कृताभ्यासमति 13 दक्षः 14 चतुरः 15 बुधः 16 दक्षः 17 सदिष्ठः 18 लब्धः 19 शुची 20 विद्वान् 21 सत्कर्म्मा 22 विचक्षणः 23 विज्ञः 24 चतुरः 25 प्रौढः 26 प्रौढा 27 विशारदः 28 सुमेधाः 29 सुमतिः 30 तीक्ष्णः 31 प्रेक्षावान् 32 विबुधः 33 विदग्धः 34 । इति राजनिर्घण्टः । पिशाचिकः 35 कुशली 36 । इति शब्द-रत्नावली ॥

निपता स्त्री (निरूप वर्णं यस्याः ।) ज्योति-ष्मती । इति भावप्रकाशः । (ज्योतिष्मतीशब्दे ऽस्या गुणादयो ज्ञातव्याः ।)

निर्वेवं, क्ली, (निरूपः वेदो यस्मादिति ।) अवेदम् । इति राजनिर्घण्टः ॥

निबद्धं क्ली, (नितरां बध्यते तालकमादिभिरित्य-र्थः यत् ।) गीतम् । इति शब्दरत्ना-वली ॥

निबन्धः, पुं, (निबध्नातीति । नि+बन्ध+अच् ।) आनाहरोगः । मूत्रस्य रोधः । इति हेम-चन्द्रः । निबन्धनः । इति जटाधरः । बन्धनम् । यथा —
"दैवी सम्पद्विमोक्षाय निबन्धायासुरी मता ।"
इति श्रीभगवद्गीता ॥
(यथा, भागवते । 6 । 2 । 46 ।
"नातःपरं कर्म्मनिबन्धकृन्तनं
मुमुक्षतां तीर्थपदानुकीर्त्तनात् ।")

निबन्धनं, क्ली (निबध्यतेऽनेनास्मिन् वा । नि+बन्ध+ल्युट् ।) हेतुः । इति हेमचन्द्रः । उपनाहः । स तु वीणायास्तन्त्रीनिबन्धनाधारः । इत्यमरः । 1 । 7 । 7 । (नि+बन्ध+भावे ल्युट् ।) बन्धनम् ।

निबन्धा, [ऋ] पुं निबन्धकर्त्ता । ग्रन्थकर्त्ता । इति व्याकरणम् ।

निबन्धित त्रि, बद्ध । निबन्धोऽस्य जात इत्यर्थे इतच्प्रत्ययनिष्पन्नः ।

निबर्हणं क्ली (निबर्हति इति । नि+बर्ह+ल्युट् ।) मारणम् । इत्यमरः । 2 । 8 । 112 ॥ (यथा, मार्कण्डेयपुराणे । 81 । 76 ।
"सुरेषु यदि मां मत्वा दुष्टदैत्यनिबर्हणम् ।")

निभः, त्रि, (नितरां भातीति । नि+भा+क ।) सदृशः । इत्यमरः । 3 । 1 । 68 । (यथा, रघुवंशे । 10 । 9 ।
"प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ।")
प्रकाशः । व्याजे पुं । इति शब्दरत्नावली ॥

निभालनं, क्ली, (नि+भल+णिच्+भावे ल्युट् ।) दर्शनम् । इति त्रिकाण्डशेषः ।

निभूतं त्रि, (नि+भू+क्त ।) अतीतम् । भूत-कालः । इति राजनिर्घण्टः ॥

निभृतः, त्रि, (नि+भृ+क्त ।) विनीतः । निश्चलः । यथा,—
"निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम् ।"
इति गीतगोविन्दे । 2 । 11 ॥
(असमग्रासम् । यथा रघुवंशे । 8 । 15 ।
"नमया निभृतञ्जना तुला
हरिताङ्केन समादरोप तत् ।")

निमज्जथुः, पुं (नि+मस्ज+अथुच् ।) शयनम् । यथा, भट्टिः ।
"तल्पे कान्तान्तरे नार्हन् गमिष्यसि धिग्निमज्जथुम् ।"

निमज्जनं क्ली, (निमज्जतेऽनेनेति । नि+मस्ज+भावे ल्युट् ।) स्नानम् । अवगाहनम् । यथा
"नास्ति जन्यजनकव्यतिभेद-
सत्यमन्नजनितो जनदेहः ।
वीक्ष्य वः खलु तनुममृतान्ते
हृद्रमज्जनमपैमि सुधायाम् ।"
इति नैषधे पञ्चमसर्गः ।

निमन्त्रणं, क्ली (निमन्त्र्यते इति । नि+मन्त्र+ल्युट् ।) नियोगविशेषः । "अथ यस्याकरणे प्रत्यवायस्तन्निमन्त्रणम् । यथा, इह सुग्रीव भवान् । यस्याकरणे प्रत्यवायो न स्यात् तत् आमन्त्रणम् । यथा इह सुशील भवान् । इति निमन्त्रणामन्त्रणयोर्भेदः ।" इति मुग्धबोध-टीकायां दुर्गादासः ।

निमयः, पुं, (निमीयतेऽनेनेति । नि+मि+"एरच् ।" 3 । 3 । 56 । इत्यच् ।) विनिमयः । इत्यमरः । 2 । 9 । 80 । (यथा, महाभारते । 12 । 78 । 7 ।
"पक्वान्नस्य निमयं न प्रशंसन्ति साधवः ।
निमयेन् सहमानेन भीजनार्थाय भारत ।")

निमिः, पुं, इक्ष्वाकुराजपुत्रः । तस्य निमेषे स्थिति-कारणं यथा,—
"निमिनाम सुत आसीत् पुरा ख्यातपराक्रमः ।
सभान्तरेऽश्वयागाय वसिष्ठो ब्रह्मणः सुतः ।
तत्र पुत्रो महाभाग बाह्याय च मुनिर्गतः ।
विरताय भवत्यत्र सप्तशताब्दो गुरुः ।
अन्योऽयमापाद्य गौतमोऽपरो वशिष्ठः ।
जगतुः प्राप्य मामाद महाय भवान पतिम् ।
यत्र ब्रह्मन् वादिष्ठो लोकेषु वर्त्तते ।
निमेषः स्मृतः लोकानां तद्विनाशाय भारत ।"
इति मत्स्यपुराणे 61 अध्यायः ॥
मतान्तरं यथा —
"निमिः सहस्रवत्सरं सत्रमारेभे । वशिष्ठञ्च होतारं वरयामास । तमाह वशिष्ठः । अह-मिन्द्रेण पञ्चवर्षशतयागार्थं प्रथमतरं वृतः । अनन्तरं प्रतिपालय भविष्यामीत्युक्ते सोऽपि तत्कालमेवान्यैर्गौतमादिभिर्यागमकरोत् । समाप्ते चामरपतियागे त्वरावान् वशिष्ठ आजगाम । तत्कर्म्मकरणं गौतमस्य दृष्ट्वा स्वपते विदेहो भविष्यतीति शापं ददौ । निमिः शरीरं धन्यो ज्वलमिव तत्याज । यज्ञसमाप्तौ भागग्रहणाय समागतान् देवान् ऋत्विज ऊचुः । यजमानाय वरो दीयतामिति । देवैश्च छन्दितो निमिराह । भगवन्तः सकलसंसारदुःखहन्तारो वियोगे भवति । तन्नहमिच्छामि सकललोकनेत्रेषु वस्तुम् । न पुनः शरीरग्रहणं कर्त्तुमिच्छामि एवैरयमशेषभूतानां नेत्रेषु वासितः । ततो भूतान्युन्मेषनिमेषं चक्रुः ।" इति विष्णुपुराणे चतुर्थांशे 5 अध्यायः ॥

निमितं, क्ली, (नि+मिद्+क्त । पृषोदरादित्वात् साधुः ।) हेतुः । (यथा, श्रीभागवते ।5।1।4।
"किं निमित्तं महाभाग ! नि स्पृहस्य च मे प्रति ।
भावं ग्रामणि प्रभुं कार्ये तन्मे निवेदय ।")
चिह्नम् । इत्यमरः ।3।3।76। शकुनः । यथा,
"निमित्तानि च पश्यामि विपरीतानि केशव ।"
इति श्रीभगवद्गीता ॥

निमित्तत्वं, क्ली (निमित्त+भावार्थे त्व ।) निमित्तविषयज्ञानम् । शुभलग्न । इति शब्द-माला । निमित्तश्च ।

निमित्तकारणं, क्ली, (निमित्तं कारणम् ।) समवायिकारणासमवायिकारणाभ्यां भिन्नं तृतीयकारणम् । यथा । घटं प्रति कुलाल-दण्डचक्रसलिलसूत्रादि । इति भाषापरिच्छेद-सिद्धान्तमुक्तावली ॥

निमित्तकृत्, पुं (निमित्तं शकुनेन शुभाशुभसूचकं करोतीति । कृ+क्विप् ।) काकः । इति राज-निर्घण्टः ॥

निमित्तविद् [द्] पुं (निमित्तं शुभाशुभसूचकं वेत्तीति । विद्+क्विप् ।) दैवज्ञः । गणकः । इति हेमचन्द्रः । 3 । 146 ।

निमिषः, पुं, विष्णुः । यथा महाभारते । 13 । 149 । 36 ।
"निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः ।"
(निमिषतीति । नि+मिष+"इगुपधेति ।"

४।१।१४५। इति कः।) कालविशेषः। चक्षुर्निमीलनम्। इति मेदिनी। षे, ३८॥ (यथा, महाभारते।१।१९८।१८।

"सज्यञ्च चक्रे निमिषान्तरेण
शरांश्च जग्राह दशाशु राजन्॥"

वर्त्मगतरोगविशेषः। यथा, सुश्रुते उत्तरतन्त्रे ३ अध्याये।

"निमेषणीः सिरा वायुः प्रविष्टो वर्त्मसंश्रयाः।
चालयेदतिवर्त्मानि निमिषः स गदो मतः॥")

निमीलन, क्ली, (निमील्यतेऽनेनेति। नि+मील+करणे ल्युट्।) मरणम्। (नि+मील+भावे ल्युट्।) निमेषः। इति हेमचन्द्रः।३।२४२॥ (यथा, कलाविलासे।१।४०।

"नयननिमीलनमुकुलं सुचिरं सामोदपूर्णजल-
सिक्तम्।
दम्भतरु सुफलकुसुमं सुखमृतमाशाशते
फलितम्॥"

कालविशेषः। यथा, सूर्य्यसिद्धान्ते।४।१०।

"तदैव विमर्द्दार्द्धनाडिकाहीनसंयुते।
निमीलनोन्मीलनाख्ये भवेतां सकलग्रहे॥")

निमीलिका, स्त्री, (निमीलयतीति। नि+मील+णिच्+ण्वुल्। टापि अत इत्वम्।) व्याजः। इति शब्दरत्नावली॥ (यथा, राजतरङ्गिण्याम्।६।७३।

"शीताद्रौ मल्लेशस्य वेलावित्तस्य भूभुजा।
देवी कामयमानस्य चक्रे गजनिमीलिका॥")

निमीलनञ्च॥

निमेय, पुं, (निमीयते परिमीयते इति। नि+मा माने+"अचो यत्।" ३।१।९७। इति यत्। "ईद्यति।" ६।४।६५। इति ईत्।) नैमेयः। परीवर्त्तः। इत्यमरटीकायां भरतः॥ (परिवर्त्तनीये, त्रि। यथा, महाभारते।१२।५१।८।

"नाहं शक्तस्तवैव निमेयं पार्थिवर्षभ।
दीयतां यद्वयं मूल्यमस्माकं सह विक्रय॥")

निमेष, पुं, (नि+मिष+भावे घञ्।) पक्ष्मस्पन्दनकालः। पलक इति भाषा॥ तत्पर्य्यायः। निमिषः २ दृङ्निमीलनम् ३। इति शब्दरत्नावली॥ पुंसो यावत्कालमनलसितमनेन विकाशप्रसारं पक्ष्माकुञ्चनं जायते स निमेषः। इत्यमरटीकायां भरतः॥ *॥

"अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्त्तितः।
द्वौ निमेषौ त्रुटिर्नाम द्वे त्रुटी तु लवः स्मृतः॥"
इत्यग्निपुराणम्॥

(पक्ष्मस्पन्दनम्। यथा, रघुः।२।१९।

"पपौ निमेषालसपक्ष्मपङ्क्ति-
रुपोषिताभ्यामिव लोचनाभ्याम्॥"

रोगविशेषः। यथा, सुश्रुते चिकित्सितस्थाने। १८ अध्याये।

"नेत्रकार्य्ये निमेषे वा कुर्य्यात् कार्य्यं प्रमाणतः।
जनयेत् दन्तपालस्य तालोचाप्यापुपनयनम्॥"

सुखासनस्थानविशेषः। इति नीलकण्ठः॥ यथा, महाभारते।१।३२।१९।

"उलूकाभ्याञ्च सहसा निमेषेण च पक्षिराट्।
प्रहसेन च संग्रामं चकार पुलिनेन च॥")

निमेषकृत्, स्त्री, (निमेषं करोतीति। कृ+क्विप्। यद्वा, कृ+भावे क्विप्। निमेषे निमेषमात्रकाले कृत् स्फुरणक्रिया यस्याः।) विद्युत्। इति शब्दमाला॥

निमेषरुक्, [च्] पुं, (निमेषेण निमेषकालं व्याप्य रोचते दीप्यते इति। रुच् दीप्तौ+क्विप्।) खद्योतः। इति त्रिकाण्डशेषः॥

निम्न, त्रि, निकृष्टं म्ना अभ्यासः शीलमस्य। (यद्वा, निकृष्टं म्नायतीति। म्ना+क।) नीचम्। निचु इति नावाल इति च भाषा॥ तत्पर्य्यायः। गभीरम् २ गम्भीरम् ३। इत्यमरः।१।१०।१५॥ गभीरकम् ४। इति शब्दरत्नावली॥ (यथा, कुमारे।५।५।

"क ईप्सितार्थस्थिरनिश्चयं मनः
पयश्च निम्नाभिमुखं प्रतीपयेत्॥"

पुं, अनमित्रपुत्त्रः। स तु सत्राजित्प्रसेनयोः पिता। यथा, भागवते।९।२४।१२।

"शिनिस्तस्यानमित्रश्च निम्नोऽभूदनमित्रतः।
सत्राजितः प्रसेनश्च निम्नस्याथाभवत् सुतौ॥")

निम्नगा, स्त्री, (निम्नं गच्छतीति। गम+ड। टाप्।) नदी। इत्यमरः।१।१०।३०॥ (यथा, मनुः। ९।२२।

"यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा॥")
नीचगामिनि, त्रि॥

निम्बः, पुं, (निम्बति स्वास्थ्यं ददातीति। निम्ब+अच्।) वृक्षविशेषः। निम् इति भाषा। तत्पर्य्यायः। अरिष्टः २ सर्व्वतोभद्रः ३ हिङ्गुनिर्य्यासः ४ मालकः ५ पिचुमर्द्दः ६। इत्यमरः।२।४।६२॥ यवकपादपः ७। इति हेमचन्द्रः॥ कैटर्य्यः ८ वरत्वचः ९ छर्द्दिघ्नः १०। इति रत्नमाला॥ प्रभद्रः ११ पारिभद्रकः १२ काकफलः १३ कीटकः १४ नेता १५ सुमनाः १६ विशीर्णपर्णः १७ यवनेष्टः १८ पीतसारकः १९ शीतः २०। इति राजनिर्घण्टः॥ पिचुमन्दः २१ तिक्तकः २२। इति भावप्रकाशः॥ कीकटः २३ शूकमालकः २४। इति जटाधरः॥ अस्य गुणाः। शीतत्वम्। तिक्तत्वम्। कफव्रणक्रिमिवमिशोथशान्तिकारित्वम्। बलासवह्निविषपित्तदोषहृदयदाहनाशित्वञ्च। इति राजनिर्घण्टः॥ लघुत्वम्। ग्राहित्वम्। कटुपाकित्वम्। अग्निवातकारित्वम्। अहृद्यत्वम्। श्रमतृट्कासज्वरारुचिकृमिहृत्कुष्ठक्षतमेहनाशित्वञ्च। तत्पत्रगुणाः। नेत्रहितकारित्वम्। क्रिमिपित्तविषसर्व्वारोचककुष्ठनाशित्वम्। वातलत्वम्। कटुपाकित्वञ्च। तत्फलगुणाः। रसे तिक्तत्वम्। पाके कटुत्वम्। भेदनत्वम्। स्निग्धत्वम्। लघुत्वम्। उष्णत्वम्। कुष्ठगुल्मार्शःक्रिमिमेहनाशित्वञ्च।

"निम्बः शीतो लघुर्ग्राही कटुपाकोऽग्निवातनुत्।
अहृद्यः श्रमतृट्कासज्वरारुचिकृमिप्रणुत्॥
व्रणपित्तकफच्छर्द्दिकुष्ठहृल्लासमेहनुत्।
निम्बपत्रं स्मृतं नेत्र्यं कृमिपित्तविषप्रणुत्॥
वातलं कटुपाकञ्च सर्व्वारोचककुष्ठनुत्।
नैम्बं फलं रसे तिक्तं पाके तु कटु भेदनम्॥
स्निग्धं लघूष्णं कुष्ठघ्नं गुल्मार्शःकृमिमेहनुत्॥"
इति भावप्रकाशः॥ *॥

तत्तैलगुणाः। नात्युष्णत्वम्। क्रिमिकुष्ठकफव्रणदोषप्रकृतिशोभाकारित्वम्। पित्तलत्वञ्च। इति राजनिर्घण्टः॥ *॥

"निम्बः पित्तकफच्छर्द्दिव्रणहृल्लासकुष्ठनुत्।"
निम्बपत्रं इति वा पाठः॥ *॥

"करञ्जनिम्बजफलं कृमिकुष्ठप्रमेहजित्।
निम्बतैलन्तु कुष्ठघ्नं तिक्तं कृमिहरं परम्॥"
इति राजवल्लभः॥

अथ महानिम्बः। बकाइन इति हिन्दीभाषा। तत्पर्य्यायगुणाः। यथा भावप्रकाशे।

"महानिम्बः स्मृतो द्रेका रम्यको विषमुष्टिकः।
केशमुष्टिर्निम्बरकः कार्म्मुकः जीव इत्यपि॥
महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः।
कफपित्तक्रिमिच्छर्द्दिकुष्ठहृल्लासरक्तजित्॥
प्रमेहश्वासगुल्मार्शोमूषिकाविषनाशनः॥"

(षष्ठ्यां तिथौ तद्भक्षणे तिर्य्यग्योनित्वं स्यात्। इति तिथितत्त्वम्॥)

निम्बकः, पुं, (निम्ब एव। स्वार्थे कन्।) निम्बवृक्षः। इति भूरिप्रयोगः॥ (षष्ठ्यां तद्भक्षणनिषेधो यथा तिथितत्त्वे।

"कलङ्की जायते बिल्वे तिर्य्यग्योनिश्च निम्बके॥")

निम्बतरुः, पुं (निम्ब इव तरुर्वृक्षः।) मन्दारवृक्षः। इत्यमरः।२।४।२६॥

निम्बबीजः, पुं (निम्बस्य बीजमिव बीजं यस्य।) राजादनीवृक्षः। इति राजनिर्घण्टः॥

नि(म्बु)म्बूक, क्ली, (निम्बति सिञ्चतीव रसैरिति। निम्ब सेचने+बाहुलकात् ऊकः प्रत्ययः। ततः कन्।) फलविशेषः। कागजी लेबु इति भाषा॥ तत्पर्य्यायः। अम्लजम्बीरः २ वह्निः ३ दीप्यः ४ वह्निबीजः ५ अम्लसारः ६ दन्ताघातः ७ शोधकः ८ जन्तुमारी ९ निम्बः १० रोचनः ११। (यथा, भावप्रकाशे पूर्व्वखण्डे १ भागे।

"निम्बूः स्त्री निम्बुकं क्लीवे निम्बूकमपि कीर्त्तितम्॥")

तत्फलगुणाः। अम्लरसत्वम्। कटुत्वम्। उष्णत्वम्। गुल्माढ्यवातवातपार्श्वकशूलविच्छर्द्दि-दरत्वम्। आमहरिकारित्वम्। लघुत्वम्। मरिचेन सहितं तस्य तु तथैव च। इति राजनिर्घण्टः॥ पाचनत्वम्। लघुत्वम्। क्रिमिसमूहोदरव्यथनाशित्वम्। तीक्ष्णत्वम्। वातपित्तकफशूलिनो हितत्वम्। कष्टनष्टरुचिरोचनत्वम्। त्रिदोषवह्निक्षयवातरोगनिपीडितानां विषविह्वलानां मन्दे वह्नौ बद्धगुदे विसूचिकायाञ्च प्रदेयम्। इति भावप्रकाशः॥ *॥

निरशन, क्ली, (निर् + अश + ल्युट्।) भोजना-भावः। अनशनम्। (निर्गतम् अशनं भोजना-न्नं यस्मात्। भोजनरहिते त्रि।)

निरस, त्रि, (निर्गतो रसो यस्मात्।) नीरसः। पुं रसाभावः। रसस्य अभावः इति अव्ययीभाव-समासनिष्पन्नः॥

निरसन, क्ली, (निरस्यते क्षिप्यते इति। निर् + अस + ल्युट्।) प्रत्याख्यानम्। इत्यमरः।१।५।७१। (यथा, महाभारते।१४।८।१९।
"स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनं तत।
नियतो वर्त्तयामास प्रजाहितचिकीर्षया॥")
वधः। निष्ठीवनम्। इति मेदिनी। ने, १८१॥

निरसा, स्त्री, (निर्गतो रसो यस्याः।) निःश्रेणिका तृणम्। इति राजनिर्घण्टः॥

निरस्त, त्रि, (निर् + अस् + क्त।) प्रेषित-बाणः। त्वरितः। त्वरितोदितम्। ष्ठीवितम्। शारितस्य। निराकरणविशिष्टः। तत्पर्य्यायः। प्रत्यादिष्टः २ प्रत्याख्यातः ३ निराकृतः ४ निरस्तः ५ विप्रलब्धः ६। इत्यमरः।३।१।४०॥ प्रतिक्षिप्तम् ७ अपविद्धम् ८। इति हेमचन्द्रः॥ निष्ठ्यूतः। प्रेषितः। संत्यक्तः। प्रतिहतः। इति मेदिनी। ते, ११०॥ (यथा, हितोपदेशे।१।४८।
"यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते॥"
यथाच मार्कण्डेयपुराणे।७८।२१।
"आयान्ती वह्निकूटाभा सा निरस्ता मया त्वया॥")

निराकरण, क्ली, (निर् + आ + कृ + ल्युट्।) निवारणम्। निरसनम्। इति निराकरिष्णुशब्दटीकायां भरतः॥

निराकरिष्णु, त्रि, (निराकरोतीति तच्छीलः। निर् + आ + कृ + "अलंकृञ्निराकृञिति।" ३।२।१३६। इति इष्णुच्।) निराकरणशीलः। तत्पर्य्यायः। क्षिप्नुः २। इत्यमरः।३।१।३०॥ (यथा, भट्टिकाव्ये।२।११।
"निराकरिष्णुर्वर्त्तिष्णुर्वर्द्धिष्णुः परितो रणम्॥")

निराकार, पुं, (निर्गत आकारो देहादिरूपो यस्मात्। निरस्य इति समासः।) परमेश्वरः। ब्रह्म। यथा,—
"साकारञ्च निराकारं सगुणं निर्गुणं प्रभुम्।
सर्वाधारञ्च सर्वञ्च स्वेच्छारूपं नमाम्यहम्॥"
अपि च।
"तत्र सद्ब्रह्म भगवान् निराकारो निरामयः।
निर्लिप्तो निर्गुणः साक्षी स्वात्मारामः परात्परः॥
ध्यायन्ते योगिनः सर्वे [illegible]।
वैष्णवाश्चैव साकारं कमनीयं मनोहरम्॥
[illegible] मनोहरम्।
[illegible] परम्॥
त्रिभङ्गं [illegible] किशोरं श्यामसुन्दरम्।
[illegible] रत्नभूषणभूषितम्॥
एवं तद्रूपमतुलं [illegible]।
ध्यायन्ति योगिनो यत्तु [illegible]॥"
अपि च।
"यो निर्लिप्तः स निर्लिप्तः [illegible]।
[illegible] निर्गुणः [illegible]॥
[illegible]॥
[illegible]।
ध्यायन्ति योगिनस्तस्य शुद्धं ज्योतिःस्वरूपिणम्।
[illegible] निर्गुणं प्रकृतेः परम्॥
वैष्णवास्तं न मन्यन्ते तद्भक्ताः [illegible]।
[illegible] तेजस्विनं विना॥
ज्योतिरभ्यन्तरे नित्यं शरीरं श्यामसुन्दरम्।
[illegible] विभूषितम्॥
एवं भक्ताश्च ध्यायन्ति [illegible]।
यामिनो योगरूपञ्च काले भक्तिविशारदः॥
ज्योतिरभ्यन्तरे मूर्त्तिं भजन्ति [illegible] प्रभोः॥"
इति ब्रह्मवैवर्त्ते गणपतिखण्डे।४२।१७।१९ अः॥
तस्य निराकारादिनामानि यथा,—
"[illegible] एव च।
ज्योतिःस्वरूपो भगवान् निर्गुणो मतः॥
[illegible] निराकारो निरङ्कुशः।
निःशङ्को निर्लिप्तो निराधारो निरामयः [illegible]।
निरुपाधिश्च निर्लिप्तो निरीहो निधनान्तकः।
[illegible] पूर्णकामो [illegible] च॥
सुभगो दुर्भगो [illegible] दुराराध्यो दुरत्ययः।
[illegible]॥
नित्यानि [illegible] प्रातरुत्थाय यः पठेत्।
[illegible]॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ७ अध्यायः॥
आकारशून्ये, त्रि॥

निराकृत, त्रि, (निर् + आ + कृ + क्त।) प्रत्याख्यातः। निरस्तः। इत्यमरः।३।१।४०॥

निराकृति, स्त्री (निर् + आ + कृ + क्तिन्।) निर-सनम्। निराकरणम्। इत्यमरः।१।५।१२॥ (निर्गता आकृतिर्यस्मादिति।) अस्वाध्याये अध्ययनशून्ये ३ त्रि। इति मेदिनी। ते, १०६॥ (पुं पञ्चमहायज्ञानुष्ठानरहितः। यथा, मनुः।३।१५४।
"षण्डो च धनुधारश्च परिवेत्ता निराकृतिः॥"
"निराकृतिः पञ्चमहायज्ञानुष्ठानरहितः।
तथा च [illegible]।
निराकर्णामराणां [illegible] निराकृतिः॥"
इति कुल्लूकभट्टः॥
"निराकृति [illegible] [illegible]
[illegible]। अथवा [illegible]। [illegible]
[illegible]। [illegible]
[illegible]।" इति मेधातिथिः॥ क॥)
शोभनमनुष्य। यथा, हरिवंशे।७।६१।
"[illegible] निराकृतिः॥")

निराकार, त्रि, निर्गतः आकारो यस्य सः। अशरीरः। आकारशून्यः॥

निरातपा, स्त्री, (निर्गत आतपो यस्याः।) रात्रिः। इति शब्दचन्द्रिका। आतपशून्ये, त्रि॥

निराबाध, त्रि, (निर्गता आबाधा प्रतिबन्धो यस्मात्।) पराभावादिरहितः। यथा,—
"[illegible] निराबाधं [illegible]।
[illegible]।
निराबाधं [illegible]
पश्यन्ति।" इति मिताक्षरा॥

निरामय, त्रि, (निर्गत आमयो व्याधिर्यस्मात्।) रोगरहितः। तत्पर्य्यायः। वार्त्तः २ कल्यः ३। इत्यमरः।२।६।५७॥ नीरुक् ४ पटुः ५ उल्लाघः ६ लघुः ७ अगदः ८ निरातङ्कः ९। अनातङ्कोऽपि पाठः। इति राजनिर्घण्टः॥ (यथा, रघुः।१।६३।
"निरामयाणां [illegible]॥"
उपद्रवशून्यः। यथा, महाभारते।१।१२०।११।
"इह [illegible] निरामयम्।
[illegible]॥"
रोगनाशकः। यथा, मुकुन्दमालायाम्।२१।
"[illegible]।
निरामयं [illegible]॥")

निर्व्वार्य्य, त्रि, (निश्चयेन व्रियते इति । निर् + वृ + "ऋहलोर्ण्यत् ।" ३ । १ । १२४ । इति ण्यत् ।) उत्साहिनः सम्पूर्णकार्य्यकर्त्ता । इत्यमरः । ३ । १ । १६ ॥ "नयविक्रमसम्पन्नो निर्भयो नाम महाबलः । प्राज्ञः परन्तपः शूरः स निर्व्वार्य्य उच्यते ।" इति भरतः ॥ सर्वानन्दीयञ्च ॥
निर्व्वासन क्ली (निर् + वस + णिच् + ल्युट् ।) वधः । इत्यमरः । २ । ८ । ११३ ॥ नगरादेर्बहिष्कर णम् । इति मेदिनी । ने, १८९ ॥ (यथा महाभारते । ५ । ६ । ५८ ।
"निर्व्वासनञ्च नगरात् प्रव्रज्या च परन्तप ।
नानाविधानां दुःखानामभिज्ञानि जनार्द्दन ॥")
निर्व्वाह, पुं, (निर् + वह + घञ् ।) निष्पत्तिः । समाप्तिः । यथा । "अतिथ्या कर्म्मनिर्व्वाहे सहायभावेनात्यतिथ्यनुप्रवेशादुपकारकत्वाच्च ।" इति तिथितत्त्वम् ॥ अपि च ।
"यावता स्यात् स्वनिर्व्वाहः स्वीकुर्य्यात्तावदर्थवित् ।
आधिक्ये न्यूनतायाञ्च च्यवते परमार्थतः ॥"
इति भक्तिरसामृतसिन्धौ नारदीयपुराणम् ॥
निर्व्वाहण, क्ली (निर् + वह + स्वार्थे णिच् + ल्युट् ।) निर्व्वहणम् । नाट्योक्तौ प्रस्तुतकथा समाप्तिः इत्यमरटीकायां भरतः ॥
निर्व्विकल्पक, क्ली, (निर्गतो विकल्पो नानाविध कल्पना यस्मात् । कप् ।) प्रकारताविशेष्यता-नापन्नसम्बन्धानवगाह्यतीन्द्रियज्ञानम् । यथा,—
"तत्प्रमाणाप्रमाणापि ज्ञानं यन्निर्व्विकल्पकम् ।
प्रकारतादिशून्यं हि सम्बन्धानवगाहि यत् ॥"
"ज्ञानं यन्निर्व्विकल्पाख्यं तदतीन्द्रियमिष्यते ॥"
इति च भाषापरिच्छेदः ॥
निर्व्विकल्पसमाधिः, पुं, (निर्व्विकल्पः समाधिः ।) मातृमानादिभिर्लये अद्वितीयवस्तुनि सदा काराकारितया बुद्धिवृत्तेरतितरामेकीभावेना वस्थानम् । इति वेदान्तसारः ॥
निर्व्विकार, त्रि, (निर्गतो विकारो विकृतिर्यस्मात् ।) विकारशून्यः । यथा —
"राम विद्धि परं ब्रह्म सच्चिदानन्दमद्वयम् ।
आनन्दं निर्म्मलं शान्तं निर्व्विकारं निरञ्जनम् ॥"
इत्यध्यात्मरामायणम् ॥
निर्व्विण्ण त्रि (निर् + विद + क्तः । निर्व्विण्ण स्योपसङ्ख्यानात् नस्य णत्वम् पूर्व्वस्य दृत्वम् ।) निर्व्वेदविशिष्टः । निर्व्वेदयुक्तः । यथा,—
"यदृच्छया मत्कथादौ जातश्रद्धस्तु यः पुमान् ।
न निर्व्विण्णो नातिसक्तो भक्तियोगोऽस्य सिद्धिदः ॥"
इति भक्तिरसामृतसिन्धुः ॥
निर्व्विन्ध्या स्त्री (निर्गता विन्ध्यादिति निःसृतत्वात् ।) विन्ध्यपर्व्वतनिःसृतनदीविशेषः । इति श्रीभागवते । ५।१९ अः ॥ (यथा मेघदूते । १ ।
"निर्व्विन्ध्यायाः पथि भव रसाभ्यन्तरं सन्निपत्य ॥")
निर्व्विषा स्त्री, (निर्गतं विषं यस्याः ।) तृण विशेषः । निर्व्विषी इति भाषा । तत्पर्य्यायः । अपविषा २ निर्व्विषी ३ विषहा ४ विषापहा ५ विषहन्त्री ६ विषाभावा ७ अविषा ८ विष वैरिणी ९ । अस्या गुणाः । कटुत्वम् । शीत त्वम् । कफवातास्रशोषनाशित्वम् । अनेकविध व्रणत्वम् । सर्व्वविषध्नकारित्वञ्च । इति राज निर्घण्टः ॥
निर्व्विष्ट त्रि (निर् + विश + क्त ।) कृतनिर्व्वेश प्राप्तः । यथा श्रीभागवते ।
"यत्र लिङ्गमरक्तः तपाप्नो नाभिमन्यते ।'

निन्दा । यथा, भागवते । ६ । ९ । ११ ।
"अंशभिरेतैः निर्व्वादं सहन्ते भूतेषु तद्-
गुणान् ।"
निरवधिः । प्रत्यादिष्टोक्ति । यथा । "अदृष्टे
निर्व्वादे कर्म्मणां निर्व्विघ्नम् परिवेत्ता भवति ।"
इत्युद्वाहतत्त्वम् ।
निर्व्वीजा, स्त्री, (निर्गतं बीजं यस्याः ।) काकली
द्राक्षा । इति राजनिर्घण्टः ।
निर्व्वीर, त्रि, (निर्गतो वीरो यस्मात् ।) वीर
शून्यम् । यथा —
"शापार्थं न च दग्धुं न च हन्तुं नोत्सहित
श्रमेण
वैवस्वतेन समरगुरुणो निर्व्वीरमुर्व्वी
कृतम् ।"
इति महानाटकम् ।
निर्व्वीरा, स्त्री (निर्गतो वीरः पतिः पुत्रो वा
यस्याः ।) अवीरा । पतिपुत्रविहीना । इति
हेमचन्द्रः । ३ । १८३ ।
निर्वृतिः, स्त्री, (निर्+वृ+क्तिन् ।) सुस्थितिः ।
अस्तङ्गमनम् । सुखम् । इति मेदिनी । ते,
१९० । (यथा देवीभागवते । १ । १८ । १८ ।
"जनक दृष्टं मया राज्यं भवता महात्मन ।
न निर्वृतिं परां प्राप्य विदुरश्चमतिरिव ।")
मोक्षः । मृत्युः । इति हेमचन्द्रः । ६ । ७१ ।
(समाप्तिः । यथा, रघुः । १ । ३१ ।
"भूतेषोः प्रदिग्धे हृदये धर्मं याति सभीयः ।
भूपरपुरावृत्ते मिथ विप्रकार्येणि निर्वृतिम् ।"
निरभ्रनभोमार्गे मुक्ते, ह । यथा, भागवते ।
८ । २४ । ९ ।
"अपराह्ण कृषिः कृपणेऽभूत् हरिवाक्याय
निर्वृतिः ।")
निर्वृत्त, त्रि, (निर्+वृत्+क्त ।) निष्पन्नः । इत्य
मरः । ३ । १ । १०० । (यथा रघु ।१।८७ ।
"का नष्ट कर्म्मण्यनिर्वृत्तेऽपि पचत्यन्नं कर्म्मणे ।")
निर्वृत्ति, स्त्री (निर् + वृत् + क्तिन् ।) निष्पत्तिः ।
यथा च ।
"यथा कृष्णेन तेजसा यथा चाहरित्परीता ।
निर्वृत्तिरामसुतायाः संयाम्यान्तिरामतिः ।"
इति मायावादः ।
(निर्गता वृत्तिर्यस्मात् इति ।) वृत्तिहीने, त्रि ।
निर्व्वेदः, पुं, (निर् + विद् + घञ् ।) आत्मावमान
नम् । इति हेमचन्द्रः । (यथा, देवीभागवते ।
३ । १९ । १७ ।
"द्विवेदेऽद्य सर्वे वीर्यं यच्च राज्यं महाबल ।
निर्व्वेदं परमं प्राप्तेः प्राप्तः सर्वं यथाक्रमम् ।")
स तु तत्त्वज्ञानापद्विरहेर्ष्यादिभ्यः
स्वावमानना ज्ञानात्मकः । यथा —
"निर्व्वेदः आपदमाश्रितैर्न प्राणानि तिष्ठति
इव ।"
इति रसमञ्जरी ।
तत्र तत्त्वज्ञानाद्यथा —
"भवत्कामकलेन्द्रहसेन्द्रः निर्व्वेद आत्माराम ।"
तत्त्वज्ञानजम् । यथा —
"सम्पदिह च्छायामानस्यापि भूतपायविच्छिन्ना ।
दयितामत्तक्षोभेन सम्प्राप्तो मया ।"
इति साहित्यदर्पणम् ।
परमोऽयम् । यथा,—
"तत्त्वं वक्रावभासितः निर्व्वेदात्मरागात्रात्मीयत च ।
आत्मानं परिपालय दुःखार्त्तेन च मया ।"
इति मोक्षधर्म्मे ।
वैराग्यम् । यथा, श्रीमद्भगवद्गीतायाम् ।
"तदा गन्तासि निर्व्वेदं श्रोतव्यस्य श्रुतस्य च ।"
(निर्गतो वेदो यस्मादिति ।) वेदरहिते, त्रि ।
निर्व्वेशः, पुं, (निर्+विश्+भावे घञ् ।)
भृतिः । भोगः । इत्यमरः । ३ । २ । ४१ ।
"भृतिर्निर्व्वेश भोगः सुखं मूल्यमभ्यवहारो वा ।"
इति भरतः । (यथा, भागवते । ६ । ७ । ७ ।
"अथ हि तद्विर्व्वेशो कर्म्मणोऽद्य हतात्मा ।
महाभवहार विकटो नाम सञ्ज्ञाय द्वे ।")
मूर्च्छनम् । इति मेदिनी । शे ४२ । विवाह ।
निर्पूर्व्वविशधातुर्निर्व्वाहार्थे । इति ख्यातिः ।
निर्व्वेशनं, स्त्री, (निरतं वेशनम् ।) मार्क्-
णीयम् । इति हारावली । २१३ । (निर्गतं
वेदनं यस्मात् ।) वेदनारहिते त्रि ।
निर्व्यथन, स्त्री, (निर्+व्यथ+भावे ल्युट् ।)
छिद्रम् । इत्यमरः । १ । ८ । ९ । सर्वाधार ।
निर्व्यथित यवनम् ।
निर्व्यूढ़, त्रि, (निर्+वि+वह+क्त ।) त्यक्तम् ।
इति त्रिकाण्डशेषः । समाप्तम् । यथा,—
"अवतारमनु यत् कर्म निर्व्यूढ़मतिशोभनम् ।"
इति कथासरित् ।
(स्थिरम् । यथा, "कोऽसौ पतिप्रत्याहृतेन
निर्व्यूढ़ कार्य्यं दृष्टान्त तन्निर्व्यूढ़ं व्यपनिर्व्यत्ययात्
पर्व्वतेनिर्व्वेयोगात्कलात् ।" तथा, च राज
तरङ्गिण्याम् । ४ । ७२ ।
"स एव सुरनिर्व्यूढ़ा सुर्वं सम्भ्रमम् ।
निर्व्यात्मकार्य्याद्विर्व्यूढ़प्रमाणादिव्यस्तात्मतरम् ।")
निर्व्वहणं, क्ली, (निर्व्वाहेन करणम् । निर्+वह+
ल्युट् ।) समाप्तिः । यथा कुमारस्य ।
"तत्र निर्व्वहणार्थं कर्म्मणोऽस्य भारत ।
दुःखित व्यावदिनां समृत्यं दुःखितं भवेत् ।"
(वहनम् । यथा भागवते । ७ । ७ । २७ ।
"देवनिर्व्वहणं भाग पर्याप्तोऽपरो विभो ।")
निःशेषेण वहनम् ।
निर्व्वाहः, पुं, (निर्+वह+घञ् ।) प्रवृत्तस्य
साधनम् । इति भरतः । समर्थनम् । यथा
करणम् ४ । इत्यमरः । ३ । २ । १० । तत्र
सम्पादनम् । यथा, साहित्यदर्पणे ।
"कार्य्यारम्भनिर्व्वाहादारम्भेणार्थ
दुर्लभत्वम् अर्थान्तरं तु कार्य्या ।"
त्यागः । इति शब्द० । (समाप्तिः वर्त्तनम् । इति
शब्दार्थः । यथा, कथा० । ७ । ९ । १६ ।
"इदं विरमन्त्रो वै मनीषिषु वच यत्नम् ।
ममोच्चतरं निर्व्वाहमनेकधा वर्त्तनं त्वम् ।")
मदिदार्थिनेन । यथा —
"न निर्हारं विना कुर्य्यात् कुलमा क्रमतः ।
चकारेति च सर्व्वाहि यत्र सद्विवाहता ।"
इति मनुः ।
निर्हारी, [न्] त्रि, (निःशेषेण हरति दूरं गन्ध
मिति । निर्+हृ+णिनि ।) दूरगामिगन्धः ।
इत्यमरः । १ । ५ । ११ । (यथा, महाभारते ।
१२ । १८४ । ३० ।
"इष्टश्चानिष्टगन्धश्च मधुरः कटुरेव च ।
निर्हारी संहतः स्निग्धो रूक्षो विशद एव च ।")
निर्ह्रादः पुं, (निर्+ह्राद अव्यक्तशब्दे+घञ् ।)
ध्वनिः । इत्यमरः । १ । ६ । २१ । (यथा
रघुवंशे । १ । ३९ ।
"स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ।")
निलयः, पुं (निलीयते अस्मिन्निति । नि+ली+
"एरच्।" ३।३।५६ । इति अधिकरणे अच् ।)
गृहम् । इत्यमरः । २ । २ । ५ । (यथा, रघु
वंशे । २ । २६ ।
"एषा स्पृहणापि विलासराशि
ज्ञात्वा दिगन्ते निलयाय गन्तुम् ।"
आश्रयस्थानम् । यथा भागवते । ७ । ६ । १६ ।
"स भूतनिलयो देवः सुपर्णसुपर्णवत् ।")
निलिम्पः, पुं, (निलिम्पतीति । नि+लिप+"नौ
लिम्पेरिति ।" ३।१।१३८ । इत्यस्य वार्त्तिको
क्त्या श । मुचादित्वान्नुम् ।) देवः । इति त्रिकाण्ड
शेषः ।
निलिम्पनिर्झरी, स्त्री, (निलिम्पानां देवानां निर्झरी
नदी ।) गङ्गा । यथा —
"जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी ।"
इत्यादिरावणकृतशिवस्तोत्रम् ।
निलिम्पा, स्त्री, (नि+लिप+श । मुचादित्वा
न्नुम् । स्त्रियां टाप् ।) गोजाली । इति त्रिकाण्डशेषः ।
निलिम्पिका, स्त्री, (निलिम्पा एव । स्वार्थे कन्
टापि अत इत्वम् ।) गोजाली । इति हेम
चन्द्रः । ३ । ३३५ ।
निलीनं, त्रि, (निःशेषेण लीनं संलग्नम् । नि+
ली+क्त ।) नितरां लीनम् । संलग्नम् ।
(यथा भट्टिः । ७ । ३ ।
"सन्ति नानाद्रि च लेषमध्ये
कृत्ये वनेऽस्मिन् निलीनसङ्गे ।
साधुः निवातस्य च भावौ
मायोपवासकृतिपाद्दोक्त ।"
निवर्त्तनं, क्ली, (नि+वृत+भावे ल्युट् ।) निवृ
त्तिप्रकाशनम् । इति शब्दरत्नावली । (यथा,
महाभारते । १२ । ८९ । ७ ।
"अवश्यं कर्म्मभिर्नाम अपर विरतवागुरा ।
तत्रैवान्तः कर्म्मणा तीर्थकन्दलमिश्रम् ।")
निवरा, स्त्री, (नियतं व्रियते इति । नि+वृ+
"ग्रहवृदृनिश्चिगमश्च ।" ३।३।५८ । इति कर्म्म
ण्यप् । स्त्रियाम् ।) कुमारी । अविवाहिता । ।
इति त्रिकाण्डशेषः ।

निवसतिः, स्त्री (निवसन्त्यस्मिन्निति। नि+वस+ "वहिवस्यर्त्तिभ्यश्चित्।" उणा० ४। ६०। इति अतिच्।) गृहम्। इति शब्दरत्नावली॥

निवसथः, पुं, (निवसन्त्यस्मिन्निति। नि+वस् आधारे अथच्।) ग्रामः। इति हेमचन्द्रः। ४। ३९॥

निवसनं, क्ली, (वस्यतेऽनेन। नि+वस+आधारे ल्युट्।) गृहम्। इति शब्दरत्नावली॥ वस्त्रम्। इति हलायुधः॥ (यथा, गो रामायणे।२।१७।
"द्वितीये च परीधाने चीरमादाय मैथिली।
चीरस्याकुशला देवी धर्म्यनिवसने शुभा॥")

निवहः, पुं, (नितरां वहतीति। नि+वह+पुंसीति घः।) समूहः। इत्यमरः। २। ५। ३९॥
(यथा, पञ्चतन्त्रे। १। ८।
"सुकुलं कुशलं सुजनं
विहाय कुलकुशलशीलविकलेऽपि।
आढ्ये कल्पतराविव
नित्यं रज्यन्ति जननिवहाः॥"
नितरां वहतीति। नि+वह+पचाद्यच्।) सप्तवायुमध्ये वायुविशेषः। यथा,—
"निवहो यत्र वातेषु कोपाच्चित्र सुखप्रदः।
न प्रवहो न च वहः प्रमादो न प्रभञ्जनः॥"
इति ज्योतिषम्॥

निवातः, त्रि, (नितरां वाति गच्छत्यत्र। नि+वा+अधिकरणे क्तः।) आश्रयः। निवासः। (निवृत्तो वातो यस्मिन्।) अवातः। वातशून्यः। (यथा रघुवंशे। ३। १७।
"निवातपद्मस्तिमितेन चक्षुषा
नृपस्य कान्तं पिबतः सुताननम्।
महोदधेः पूर इवेन्दुदर्शनात्
गुरुः प्रहर्षः प्रबभूव नात्मनि॥")
शस्त्राभेद्यवर्म्म। शस्त्रेण न भिद्यते यत् वर्म्म कवचम्। इत्यमरभरतौ। २। ८। ६४॥

निवातकवचः, पुं, दैत्यविशेषः। स तु हिरण्यकशिपोः पौत्रः ह्रादपुत्रः। इत्यग्निपुराणम्॥ (निवातं शस्त्राभेद्यं कवचं येषामिति। दानवविशेषाः, पुलिन्दा बहुसहस्राणाः। ते तु इन्द्रादिदेवार्ज्जुनेन निहताः। यथा, महाभारते। ३। १६८। ७—७२।
"ततो मामब्रवीदिन्द्रः प्रहृष्टो बलवृत्रहा।
नाविषह्यतमं ह्यस्ति किञ्चिल्लोकेषु विद्यते॥
निवातकवचा नाम दानवा देवशत्रवः।
समुद्रकुक्षिमाश्रित्य दुर्गे प्रतिवसन्त्युत॥
तिस्रः कोट्यः समाख्याताः तुल्यरूपबलप्रभाः।
तांस्तत्र जहि कौन्तेय! गुरुस्तेऽसौ भविष्यति॥"
एतद्विवरणविस्तृतिस्तु तत्रैव विशेषतो द्रष्टव्या॥)

निवापः, पुं, (नितरामुप्यते इति। नि+वप+घञ्।) पित्रोद्देशकदानम्। तत्पर्य्यायः। पितृदानम् १। इत्यमरः। २।७।३१॥ पितृतर्पणम् २। इति हेमचन्द्रः। ३। ४०॥ निवपनम् ३ पितृदानकम् ४। इति शब्दरत्नावली॥ (यथा रघुवंशे। ८। ८६।
"अपशोकमनाः कुटुम्बिनी-
मनुगृह्णीष्व निवापदत्तिभिः॥")
दानमात्रम्। यथा। "येभ्यो निवापाञ्जलयः पितॄणाम्।" इति भरतः॥ (लुप्यते चीयमानमिति। बीजम्। इति नीलकण्ठः॥ यथा, महाभारते। १। १०८। ६।
"अधर्म्मं प्रमदा नाथ निवापं बहुवार्षिकम्।
ततो विप्र! ग्रहास्यामि न तु वर्म्मं सत्कुलम्॥")

निवारः, पुं, निवारणम्। इति निपूर्व्ववृधातोः भावे अप्प्रत्ययनिष्पन्नः॥

निवारणं, क्ली, (नि+वृ+णिच्+करणे ल्युट्।) निषेधेन वारणम्। निराकरणम्। यथा,—
"यद्यावली धर्म्मे इतीतरस्थितो
न मन्यते तस्य निवारणं जनः॥"
इति श्रीभागवते प्रथमस्कन्धः॥

निवारितः, त्रि, (नि+वृ+णिच्+क्तः।) कृतनिवारणः। यथा,—
"निवारितास्तेन महीतलेऽखिले
निरीतिभावं गमितोऽतिवृष्टयः॥"
इति नैषधे। १। ११॥

निवास, ग स च्छूत्याम्। इति कविकल्पद्रुमः॥ (अदन्त चुरां-पर-सकं-सेट्।) अनिनिवासत्। छादनम्। निवासयति शरीरं चीनांशुकमिति हलायुधः। इति दुर्गादासः॥

निवासः, पुं (निवसति अस्मिन्। नि+वस+अधिकरणे घञ्।) गृहम्। इति हेमचन्द्रः। ४। ५७॥ (यथा, विष्णुपुराणे। १। १२। ८४।
"तत्र तत्र प्रजानां हि निवासं समरोचयत्॥"
आश्रयस्थानम्। यथा, भागवते। १। ११। २७।
"श्रियो निवासो यस्योरः पानपात्रं मुखं दृशाम्।
बाहवो लोकपालानां सारङ्गाणां पदाम्बुजम्॥"
वस्त्रम्। यथा, हरिवंशे। १८३। ४८।
"नमस्ते निवासाय नमस्ते पीतवाससे॥"
भावे घञ्। वासः। यथा, महाभारते। १। १८६। ६।
"कुम्भकारस्य शालायां निवासं चक्रिरे तदा॥")

निवासी, [न्] त्रि, (निवसतीति। नि+वस्+णिनिः।) निवासविशिष्टः। निवासकर्त्ता। यथा,—
"ते तु कादम्बवनानि दैवतः पतितत्तुर्कव।
यथा काचीनदीतीरे काम्यकवननिवासिनः॥"
इति काव्योदयः॥

निविडः, त्रि, (नितरां विडतीति। नि+विड आक्रोशे+कः।) निरवकाशम्। तत्पर्य्यायः। निरन्तरम् २ निबिरीसम् ३ घनम् ४ सान्द्रम् ५ नीरन्ध्रम् ६ बहुलम् ७ दृढम् ८ गाढम् ९ अविरलम् १०। इति हेमचन्द्रः। ६। ७५॥ (यथा आर्य्यासप्तशत्याम्। ३२०।
"निविडजटिलोरुयुगलो न्यायोपमलसार्पित-
जघनाम्॥"
यथा, च रघुवंशे। ९। ५८।
"तमपरेऽपि मृगेन्द्र शरान् सुधन्वी
कवाकलेव विभिदे निविडोऽपि मुष्टिः॥"
नासिकाया नतम्। नि+"नेर्बिडचबिरीसचौ।" ५।२।३२। इति बिडच्। अत्र टीटम्। "सद्योगात् नासिका निबिडा।" इति सिद्धान्तकौमुदी॥)

निविरीसं, त्रि, (नि नता नासिका यस्य। "नेर्बिडचबिरीसचौ।" ५। २। ३२। इति बिरीसच्। अवटीटः। इति व्याकरणम्॥) निविडम्। इति जटाधरः॥ (यथा, माघे।७।२।
"उभयमपि निविरीसनितम्बभारखेदि॥")

निविष्टः, त्रि, (नि+विश+क्तः।) निवेशयुक्तम्। (यथा, कुमारसम्भवे। ५। ३१।
"भवन्ति साम्येऽपि निविष्टचेतसां
वपुर्विशेषेष्वतिगौरवाः क्रियाः॥")
आविष्टम्। प्रविष्टम्। यथा —
"उडुगणपरिवारो नायकोऽप्योषधीना-
ममृतमयशरीरः कान्तियुक्तोऽपि चन्द्रः।
भवति विकलमूर्त्तिर्मण्डलं प्राप्य भानोः
परसदननिविष्टः को लघुत्वं न याति॥"
इत्युद्भटः॥
(आबद्धम्। यथा, देवीभागवते। ९। १९। ३५।
"यद्दोऽहमिति मे बुद्धिर्नोपसर्पति चिन्तनम्।
संसारबन्धनाबद्धे निविष्टा हृद्गामिनी॥"
स्थितम्। यथा, रामायणे। १। ५। ५।
"कोशलो नाम मुदितः स्फीतो जनपदो महान्।
निविष्टः सरयूतीरे प्रभूतधनधान्यवान्॥")

निवीतं, त्रि (निव्ययते स्मेति। नि+व्येञ् आच्छादने+क्तः। सम्प्रसारणम्।) आच्छादनवस्त्रम्। उड़नी इति भाषा। तत्पर्य्यायः। प्रावृतम् २। कण्ठलम्बितयज्ञसूत्रे, क्ली। इत्यमरः। २। ७। ५०॥ यथा,—
"उपवीतं भवेन्नित्यं निवीतं कण्ठसज्जनम्॥"
इति कूर्म्मपुराणम्॥

निवीती, [न्] पुं, (निवीतमस्यास्तीति।) निवीतयुक्तः। कण्ठलम्बितयज्ञसूत्रविशिष्टः। यथा,—
"प्राचीनावीती पैत्र्ये निवीती च मनुष्यके।
मनुष्यादिप्रयोगेषु अभिषुताद्यर्थे तथा॥'
इत्याह्निकतत्त्वम्॥

निवृतं, त्रि (नितरां व्रियते आच्छाद्यते स्मेति। नि+वृ+क्तः।) निवीतम्। उड़नी इति भाषा॥ इत्यमरटीकायां स्वामी॥ परिवेष्टितम्। इति हेमचन्द्रः॥

निवृत्तः, त्रि (नि+वृत्+क्तः।) निवृत्तिविशिष्टः। विरतः। यथा, श्रीभागवते। १०। १। ४।
"निवृत्ततर्षैरुपगीयमाना-
द्भवौषधाच्छ्रोत्रमनोऽभिरामात्।
क उत्तमश्लोकगुणानुवादात्
पुमान् विरज्येत विना पशुघ्नात्॥"

निवृत्तात्मा, [न्] पुं, (शरीरबन्धनात् निवृत्त आत्मा स्वरूपं यस्येति।) विष्णुः। (यथा महाभारते। १३। १४९। ९८।
"आवर्त्तनो निवृत्तात्मा संवृतः सम्प्रमर्द्दनः॥")

निवृत्तिः, स्त्री, (नि+वृत+क्तिन्।) निर्वृतिः। अप्रवृत्तिः। तत्पर्य्यायः। उपरमः २

स्वरति । उपरति । आरति । इति हेम चन्द्रः । (यथा, मत्स्यपुराणे १६६ अध्याये ।
"शान्तोदकश्च सततं मानसश्चापि यः स्मृतः ।
शान्तो निवृत्तः कामाद्यैर्ध्यायति पुरुषं हरिम् ॥")
प्रवृत्तिराहित्यम् । यथा, "प्रवृत्तमाचिता निवृत्तं प्रयोगम् ग्रामभाव इव साधिर्गतिरिता करणात् भाव्यमानो निवृत्तिरुच्यते ।" इत्येवं व्यतीतस्य कामादिकरणविचारः ।

निवेदनं क्लो (निवेदनं विज्ञापनमिति । नि + विद् + ल्युट् ।) आवेदनम् । विज्ञापनम् । समर्पणम् । यथा,—
"तस्य कौशलं विदः कारणं मार्जितम् ।
"आर्षेयं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।
इति पुंसार्पिता विष्णौ भक्तिश्चेन्नवलक्षणा ॥"
इति श्रीभागवतम् । ७ । ५ । २३ ॥

निवेदितं, त्रि, (नि + विद् + णिच् + क्तः ।) ज्ञापितम् । यथा, भविष्यपुराणे ।
"मया निवेदितं सर्वं यथाह परमेश्वर ॥"

निवेश, पुं (नि + विश + घञ् ।) विन्यासः । (निविशन्त्यस्मिन्निति । अधिकरणे घञ् ।) शिविरम् । (यथा, महाभारते । १ । ७ । ६ ।
"तत्र रथनिवेशोऽभूत्प्रावृड्लिङ्गमिव गोचरम् ॥")
उद्वाहः । इति मेदिनी । शे, ३१ ॥ (यथा, महाभारते । १ । २३ । १ ।
"ततो निवेशाय तदा स विप्रः संशितव्रतः ।
महोत्पाताय दारार्थं न च दारानविन्दत ॥")
विन्यासम् । इति शब्दरत्नावली ॥ (यथा, किरातार्जुनीये । १ । १६ ।
"निवेशार्थं मार्गं प्रजानामनुपात्यहिता तदा ।
मिनई समनुयात परिवर्तमानेन च ॥")

निवेशनं क्लो, (निविशन्त्यस्मिन्निति । नि + विश + अधिकरणे ल्युट् ।) गृहम् । इति अमर-रः ॥ (यथा, देवीभागवते । १ । ५३ । ३८ ।
"कियद्वैकं सुत गोत्र मामामीयां गृहम् ।
सत्यार्थं सम्पादयिष्यति दारा निवेशनम् ॥")
नगरम् । इति हेमचन्द्रः ॥ (यथा, रामायणे । ७ । ७६ । १७ ।
"को हि वर्षं बहुसाहं पार्थिवस्य निवेशने ।
न विवासे कृत तत्र मरणं न हि मन्यते ॥")
प्रवेशः । निवेशनस्य प्राशस्त्यम् । अमरे ॥ (नि + विश + णिच् + भावे ल्युट् ।) स्थापनम् । यथा रामायणे । ७ । ७८ । १७ ।
"निवेशय महाबाहो भरतं मद्वचनेन ।
सूरस्य ग्रामविषय सम्पद्य निवेशने ॥"
निवेशिते, त्रि । यथा, भट्टिः भारवि वर्णितः । १८ । ११ ।
"स्त्राकार्षिताम् पुण्यं वसुमेदिनिवेशितम् ।
सवनो जलदं (विशो सुख सम्पादके यथा ।")

निवेष्टितं, त्रि (नि + विष्ट + कर्मणि क्त ।) निवेष्टितम् । वद । मधुकरकरकृतापरिस्फुट ते निवेष्टिते इति भावे क्तिः । इति भरत भाषा नाम्ना ।

निवेष्टः, त्रि, (नि + विष्ट + क्तन् ।) निवेष्टनीयः । यथा, वाचटोवाचो महादमः । इत्यस्य च तामां निवेष्टनामादिति प्रकृते ॥ (यथा, हरि वंशे । ११८ । ४८ ।
"तस्य तु प्रकाशार्थे निवेष्टा सविता ॥"
घोषणोत्सव । यथा महाभारते । १ । ६६ । १६ ।
"सदाह रायसिष्टोविदेह इति मे मति ॥"
"निवेष्टा आत्मनार्थ घोषणोत्सव ।" इति नील-कण्ठो नीलकण्ठः । निवेष्टा) यथा, महा-भारते । २ । १९२ । ८ ।
"मधोनिवेष्टा प्रथमं तपोऽर्थं
भीमो महाबाहुरविन्यकर्मा ।"
"निवेष्टा निवासः ।" इति तत्र नीलकण्ठः ।)

निशठ, पुं, बलदेवपुत्रः । यथा, "बलदेवोऽपि रेवत्यां निशठोल्मुकौ पुत्रावजनयत् ।" इति विष्णुपुराणे । ४ अंशे १५ अध्यायः ॥

निशमनं, क्लो, (नि + शम + णिच् + ल्युट् ।) दर्शनम् । श्रवणम् । इति मेदिनी । ने, १२८ ॥

निशा स्त्री, (निश्यति प्राणि तनूकरोति व्यापारान् इति । नि + शो + क । टाप् ।) रात्रिः । तत्पर्यायः । रात्रिः २ रजनी ३ शर्वरी ४ क्षणदा ५ त्रियामा ६ क्षपा ७ यामिनी ८ दोषा ९ तमी १० भौती ११ तमस्विनी १२ वासतेयी १३ उषा १४ यामवती १५ तमा १६ विभावरी १७ । इति शब्दरत्नावली ॥ अथ दिवा दाशिरथी इत्यादि । (यथा, ऋतुसंहारे । १ । ९ ।
"निशासु हर्म्येषु निशासु योषितां
सुखप्रसुप्तानि मुखानि चन्द्रमाः ।
विलोक्य निरुत्सुकमत्रभेदितरे
विभावरी याति दिवैव चाल्पताम् ॥")
हरिद्रा । दारुहरिद्रा । इति मेदिनी । शे, ५ ॥
(अस्याः पर्यायो यथा,—
"हरिद्रा काञ्चनी पीता निशाख्या वरवर्णिनी ।
क्रिमिघ्नी हलदी योषित्प्रिया हट्टविलासिनी ॥"
इति वैद्यकरत्नमालायाम् ॥)
मेषवृषमिथुनकर्कटधनुर्मकरराशयः । यथा,—
"मृगकर्कटयुग्मानि गोवृषौ निशाह्वयाः ।
निशाह्वयाः स्मृता ह्येते दिवाख्याः दिवाबलाः ॥"
इति ज्योतिस्तत्त्वम् ॥

निशाकर, पुं (निशां करोतीति । निशा + कृ + "दिवाविभानिशेति ।" ३ । २ । २१ । इति ट ।) चन्द्रः । इत्यमरटीका ॥ (यथा, कथासरित् । २ । ४० ।
"दृष्टिन्यादधदोर्धर्मवीर्यै
श्चन्द्रमुखदर्शनसम्पत् ।
अविश्वासाद्विशीलत्व सत्सरत्नी
रुदेत्यसौ रथकरामास इ मति ॥")
कुक्कुरः । इति शब्दरत्नावली ॥ (निशाकर-इति वैद्यके प्रयुक्तम् ॥ अस्य । अमर्कोऽस्य । अश्वा, महाभारते । ११ । १० । ७७ ।
"दारुकस्य, माहात्म्ये निशाकर ॥")

निशाटन पुं (निशायां राक्षसो अटन ।) उलूकपक्षी । तत्पर्यायः । अकराजम च इति हेमचन्द्रः ॥

निशाचर पुं, (निशायां रात्रौ चरतीति । निशा + चर + "चरेष्टः ।" ३ । २ । १६ । इति ट ।) राक्षसः । (यथा, रघुः । १० । ३१ ।
"अवेहि तस्मात् शत्रून्मे त्रिदिवस्थ रावणात् ।
मानापचारप्रदमानीतनास्तारणे निशाचरे ॥")
शृगालः । पेचकः । सर्पः । इति मेदिनी । रे, २७२ ॥ चक्रवाकः । इति शब्दरत्नावली ॥ भूतः । इति धरणिः ॥ चौरकः । इति राज निर्घण्टः ॥ (महान् गन्धयुक्तः शिवः । अत्र वद इति वैद्यकेऽपि भवति ।
"निशाचरो यमदूतः कितवो मत्वरक्षकः ।
रोचको मधुरस्निग्धः कटुपाके कटुस्तथा ।
तीक्ष्णो गुरुः विषो बलि ग्रहवृद्धहरो निशाहः ।
इत्यादिभिर्योगैरौषधयस्मिन्निशासनात् ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥
महादेवः । यथा, महाभारते । १३ । १७ । ९१ ।
"महाक्रौर महाकायो महाजेयो निशाचरः ॥")
रात्रिचरमात्रे, त्रि ॥

निशाचरी, स्त्री (निशायां चरतीति । चर + ट । ङीप् ।) कुलटा । इति मेदिनी । रे, २७१ ॥ केशिनीनामगन्धद्रव्यम् । इति शब्द चन्द्रः । राक्षसी । यथा,—
"आलिङ्गितनिशाचरी सम महासारासि निशा निरर्गलं निरानन्दमधुनिद्धरायणाद्योऽधिनामा ।
शिष्यो मन्युना तमो मुकर इव विश्रामित्रं अयोदयसमर्थं सम्यक् चैतन्यं सृजती ॥"
प्रबोधचन्द्रोदय ।
(यथा च रघुः । ११ । २० ।
"तावतानल्पयलेऽपि भाविता
दृश्यते कृतवे निशाचरी ।
अभवद्धरिचन्द्रोपविता
श्रीनिशोपमर्थं गमयन् वा ॥"
"अथ ताडकाया अधिकारिकता तमाह रामिणी राक्षसि । निशाद चरतीति निशाचरी राक्षसी अधिकारिका च ।" इति तत्र मल्लिनाथः ॥)

निशाचर्म, [न्] क्लो, (निशायाश्चर्मेव आवरकत्वात् ।) अन्धकारः । इति त्रिकाण्डशेषः ॥

निशाजलं, क्लो (निशोद्भवं जलम् । मध्यपद लोपिसमासः ।) हिमम् । इति त्रिकाण्डशेषः ॥

निशाट, पुं, (निशायां रात्रौ अटतीति । अट + अच् ।) पेचकः । इति हेमचन्द्रः । ४ । ३९० ॥ निशाचरे, त्रि ॥

निशाटन पुं (निशायां अटति निशायां भ्रमणं करोतीति वा । अट + ल्युट् ।) घूकपक्षी । इति शब्दचन्द्रिका ॥ (राक्षसः इति ।)

निशाटनः, पुं (निशायां अटतीति । अट अनी + क्यु ।) पेचकः । इत्यमरटीका ॥ निशाचरे त्रि ॥

निशातः, त्रि (नि+शो तनूकरणे+क्त। "शाच्छो-रन्यतरस्याम्।" ७। ४। ४१। इति पक्षे इत्वाभावः।) शाणितः। इति हेमचन्द्रः॥

निशाटः, पुं (निशायां अटति भ्रमतीति। अट्+अच्।) पेचकः। इत्यमरटीकायां रमानाथः॥ त्रि, निशाचरः॥

निशादिः, स्त्री (निशाया आदिर्यत्र।) सन्ध्या। इति राजनिर्घण्टः॥

निशान्तः, क्ली, (नितराम् शाम्यति विश्राम्यतेऽस्मिन्निति। नि+शम्+अधिकरणे क्तः।) गृहम्। इत्यमरः। २। २। ५॥ (यथा, रघुः। १६। ४०।

"तस्याः स राजोपपदं निशान्तं कामीव कान्ताहृदयं प्रविश्य॥"

निशाया अन्तो यत्र।) उषा। (यथा, मनुः। ४। ९९।

"न निशान्ते परिश्रान्तो ब्रह्माधीत्य पुनः स्वपेत्॥")

शान्ते, त्रि। इति मेदिनी। ते, ११८॥

निशान्धा, स्त्री (निशायां अन्धयति उपघातं करोति आत्मानमिति। अन्ध उपघाते+अच्+टाप्।) जतुकालता। इति राजनिर्घण्टः॥ (निशायां अन्धः।) रात्र्यन्धे, त्रि॥

निशापतिः, पुं, (निशायाः पतिः।) चन्द्रः। (यथा, सूर्य्यसिद्धान्ते। २। ४७।

"स्वमन्दभुक्तिसंशुद्धा मध्यभुक्तिर्निशापतेः। दोर्ज्यान्तरादिकं कृत्वा भुक्तावृणधनं भवेत्॥")

कर्पूरः। इत्यमरः॥ (निशायामेव पतिरिति विग्रहे क्वचित् अप्रकाशप्रेमा उपपतिरपि। यथा, आर्य्यासप्तशत्याम्। ३५२।

"प्रातर्यद्यपि निशापतिः स तापं सुधाभयो हरति। यदि मां इन्दिवर इव सखि। स न विकस्वहि सेवयति॥")

निशापुष्पं, क्ली, (निशायां रात्रौ पुष्प्यति विकसतीति। पुष्प विकासे+अच्।) उत्पलम्। इति राजनिर्घण्टः॥

निशाबलः, पुं, (निशायां रात्रौ बलं यस्य।) मेषवृषमिथुनकर्कटधनुर्मकरराशयः। इति ज्योतिषम्॥

निशाभङ्गा, स्त्री, (निशा हरिद्रा तद्वत् भङ्गो यस्याः।) दुग्धपुच्छी। इति शब्दचन्द्रिका॥ दुग्धफेणा इति भाषा॥

निशामणिः पुं, (निशाया मणिरिव।) चन्द्रः। इति त्रिकाण्डशेषः॥

निशामनं क्ली, (नि+शम+णिच्+ल्युट्।) दर्शनम्। आलोचनम्। इति मेदिनी। ने, १९०॥ श्रवणम्। इति हेमचन्द्रः। ३। २४॥

निशामृगः, पुं (निशाचरो मृगः पशुः।) शृगालः। इति शब्दरत्नावली॥

निशारणं, क्ली, (नि+शॄ हिंसे+णिच्+ल्युट्।) मारणम्। इत्यमरः। २। ८। ११२॥ (निशाया रणम्।) रात्रियुद्धम्॥ (निशायाम् रणः शब्दः।) राजहंसे, पुं॥

निशारत्नं, क्ली, (निशाया निशायां वा रत्नमिव।) चन्द्रः। इति हेमचन्द्रः। २। १९॥

निशारुकः, पुं रूपकभेदः। यथा,—

"द्रुतं पौतोऽथ सपदो विभवश्चतुरक्रमः। निशारुकः प्रतिताले कथितो सप्तरूपकाः॥"

तस्य लक्षणं यथा—

"लघुद्वन्द्वं गुरुद्वन्द्वं लघ्वाद्यतालकः स्मृतः। चतुर्विंशतिवर्णैस्तु रसे चास्ते निशारुकः॥"

तालविशेषः। यथा,—

"प्रविश्य नर्त्तको रङ्गं विकीर्य्य कुसुमादिकम्। निशारुकेण तालेन कोमलं नृत्यमाचरेत्॥"

इति सङ्गीतदामोदरः॥

निशावनः, पुं, (निशामपि अन्धकारजनकं वनं यस्य।) शणः। इति राजनिर्घण्टः॥

निशावर्षं क्ली, (निशायां वृष्टं सञ्चयः।) रात्रिसञ्चयः। बहुनिशा। इति शब्दरत्नावली॥

निशावेदी, [न्] पुं (निशां निशापरिमाणं वेत्ति वेदयति वा। विद् वा वेदि+णिनिः।) कुक्कुटः। इति हेमचन्द्रः। ४। ३९॥

निशाहासः, पुं, (निशायां रात्रौ हासो हासो विकाशो यस्य।) कुमुदम्। इति त्रिकाण्डशेषः॥

निशाह्वा, स्त्री, (निशाया आह्वा आख्या आह्वा यस्याः।) हरिद्रा। इत्यमरः। २। ९। ४१॥

निशितं, क्ली (नि+शो+क्तः। "शाच्छोरन्यतरस्याम्।" ७। ४। ४१। इति इत्वम्।) लौहम्। इति राजनिर्घण्टः॥

निशितः, त्रि (नि+शो+क्त।) शाणितः। इत्यमरः। ३। १। ९१॥ (यथा, महाभारते। १। १३४। ९५।

"तस्याश्वसमकालन्तु बीभत्सुर्निशितैः शरैः। शरार्द्धं चन्द्रमिर्तीक्ष्णं समुमभ्यस्ताडयत्॥")

निशिपुष्पा स्त्री (निशि पुष्प्यति विकाशते इति। पुष्प+अच्। टाप्।) शेफालिका। इति त्रिकाण्डशेषः॥

निशिपुष्पिका स्त्री (निशिपुष्पा+स्वार्थे कन्।) शेफालिका। इति शब्दरत्नावली॥

निशिपुष्पी, स्त्री, शेफालिका। निशि रात्रौ विकसितं पुष्पमस्याः इति व्युत्पत्त्या मध्यपदलोपः समस्या अलुक् च ततो जातित्वे ङीप्॥

निशीथः, (नितरां शेतेऽत्रेति। नि+शी+"निशीथगोपीथावगथाः।" उणा। २। ९। इति थकप्रत्ययेन निपातनात् साधुः।) अर्द्धरात्रः। इत्यमरः। १। ४। ६। (यथा रघुः। ५। ११।

"निशीथदीपाः सहसा हतत्विषो बभूवुरालेख्यसमर्पिता इव॥")

रात्रिमात्रम्। इति मेदिनी। थे, ४। (यथा, ऋतुसंहारे। १। २।

"सुतन्त्रीगीतं मदनस्य दीपनं शुचौ निशीथेऽनुभवन्ति कामिनः॥")

निशीथिनी, स्त्री (निशीथोऽस्त्यस्या इति। इनिः। ङीप्।) इत्यमरः। १। ४। ४॥

निशीथिनीनाथः, पुं, (निशीथिन्या नाथः।) चन्द्रः। इति हलायुधः॥

निशीथ्या, स्त्री, रात्रिः। इति भूरिप्रयोगः॥

निशुम्भः, पुं, (नि+शुम्भ हिंसायाम्+भावे घञ्।) वधः। इति हेमचन्द्रः। ३। ३६३॥ दानवविशेषः। यथा,—

"कश्यपस्य दनुर्नाम भार्य्यासीद्‌द्विजसत्तम। तस्यास्तु द्वौ सुतावास्तां सहस्राक्षाद्बलाधिकौ॥ ज्येष्ठः शुम्भ इति ख्यातो निशुम्भश्चापरोऽसुरः। तृतीयो नमुचिर्नाम महाबलसमन्वितः॥"

इति वामनपुराणे ५२ अध्यायः॥

(अयं हि भगवत्या निहतः। इति मार्कण्डेयपुराणम्। अपरोऽसुरविशेषः। यदुक्तं मार्कण्डेये। ९१। ३६—३७।

"वैवस्वतेऽन्तरे प्राप्तेऽष्टाविंशतिमे युगे। शुम्भो निशुम्भश्चैवान्यावुत्पत्स्येते महासुरौ॥ नन्दगोपगृहे जाता यशोदागर्भसम्भवा। ततस्तौ नाशयिष्यामि विन्ध्याचलनिवासिनी॥")

निशुम्भनं क्ली, (नि+शुम्भ हिंसायाम्+भावे ल्युट्।) मारणम्। इति हलायुधः॥

निशुम्भमर्द्दिनी स्त्री, (निशुम्भं मर्द्दयतीति। मर्द्द+णिनि। ङीप्।) दुर्गा। इति हेमचन्द्रः॥

निशुम्भशुम्भमथनी, स्त्री, (निशुम्भं शुम्भञ्च मथ्नातीति। मन्थ विलोडने+ल्युः। नलोपः। ततो ङीप्।) दुर्गा। यथा, देवीपुराणे।

"निशुम्भशुम्भमथनी हर्षो वेदेषु गीयते॥"

निशुम्भी, [न्] पुं, (निशुम्भो मोक्षणाद्योऽस्त्यस्येति। इनिः।) बुद्धविशेषः। तत्पर्य्यायः। वीरभद्रः २ वैभवः ३ भद्रभवः ४ देवः ५ वज्रकपाली ६ शशिशेखरः ७ वज्रटीकः ८। इति त्रिकाण्डशेषः॥

निशैतः, पुं, (निशायामपि इतं ईषद्गमनं यस्य।) पक्षः। इति त्रिकाण्डशेषः॥

निश्चयः, पुं (निश्चीयतेऽनेनेति। निर्+चि+"एरच्।" ३। ३। ५६। इति अच्।) निःसंशयज्ञानम्। तत्पर्य्यायः। निर्णयः २। इत्यमरः। १। ५। ३॥ निर्णयनम् निश्चयः ४। इति शब्दरत्नावली॥ (यथा, देवीभागवते। १। १९। ३१।

"देहोऽयं मम बन्धोऽयं न ममेति च मुक्तता। तथा धनं गृहं राज्यं न ममेति च निश्चयः॥")

"तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः॥"

इति भाषापरिच्छेदः॥

(अर्थालङ्कारविशेषः। तल्लक्षणादिकं यथा, साहित्यदर्पणे। १०। ५६।

"अन्यन्निषिध्य प्रकृतस्थापनं निश्चयः पुनः॥"

उदाहरणं यथा—

"वदनमिदं न सरोजं नयने नेन्दीवरे एते। इह सविधे मुग्धदृशो मधुकर। न मुधा परिभ्राम्य॥")

निश्चला, स्त्री, (निश्चलतीति। निर्+चल+अच्। टाप्।) शालपर्णी। इति

[illegible]

निखला, पुं, (निमगतम् ... यस्य ।) ... इति ... ।

[illegible]

निचायक त्रि, (... । निर + चि + ...) ...

[illegible]

निचायन, पुं, ... इति मेदिनी । के, १२४ ।

[illegible]

निषादी, [न्] पुं, (निषीदत्यवश्यमिति । नि+सद्+आवश्यके णिनिः ।) हस्त्यारोहः । इत्यमरः । २ । ८ । ५९ ॥ माहुत् इति भाषा ॥ (यथा, माघे । ५ । ४१ ।
"प्रच्यावदन्तिमिहिरांशुकदूरमिम
निर्ग्याविनिर्भिदद्यन्त चलित निषादी ॥"
उपविष्टे, त्रि । यथा रघुः । १ । ५२ ।
"आतपात्ययसङ्क्षिप्तनीवारासु निषादिभिः ।
मृगैर्वर्त्तितरोमन्थमुटजाङ्गनभूमिषु ॥")

निषिद्ध त्रि, (निषिध्यते स्मेति । नि+षिध+क्त ।) निषेधविषयम् । यथा —
"तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्य्यात्तर्पणं तिलमिश्रितम् ॥"
इति तिथितत्त्वम् ॥
निषिद्धकर्म्माणि यथा,—
मान्धातोवाच ।
"बूहि कर्म्माणि घोराणि निषिद्धानि द्विजोत्तम ।
निषिद्धमपि यच्चैवं तदेव प्रभो वद ॥
नारद उवाच ।
ब्राह्मणस्य प्रवृत्तिश्चैव
सविस्तरीयं प्रभुवाचश्च ।
शुश्रूषयश्चापि तथार्यशीलो-
दकार्थमेतत् परमं मामकस्य ॥
रामपैच्य लक्षिणं जीवनस्य वधिष्यया ।
कौटिल्यं कौलटीयश्च कुसीदश्च विवर्ज्जयेत् ॥
शूद्रो राजन् । स भवति धर्म्मापितो दुराचरः ।
वृषलीं रमते यस्तु पिशुनो मर्म्मघातका ॥
ग्रामप्रेष्यो विकर्म्मा च यो द्विजश्चरिताश्रुतः ।
वेदानपि पठन् शूद्रे सम स परिकीर्त्तितः ।
सर्व्वेषु वर्णेषु योऽभ्यो वैदिके तान्त्रिकेऽपि च ॥
निर्म्मयादे चाशुचौ क्रूरकर्मे
हिंसात्मके ब्रह्मधर्म्मे व्यपे ।
स्वयञ्च कन्यञ्च न देयमेव
नाभय दत्त विपल करोत ॥
ब्राह्मणानां करादानं विना वैवाहिकश्च यः ।
प्रतिग्रहः स निन्द्योऽत्र परञ्च चासुलभः ॥
शूद्रे पलायमचैव गया मातरतारिषु ।
अपात्र प्रजानाथ दाने धर्म्मे विरक्तता ॥
कानीना सहोढश्च ब्राह्मणानामनादरः ।
समागतानामधर्म्मात तेषां कर्म्मान्वेषणम् ॥
अयानाय परीहासो निषिद्धं चाश्रमस्य नाम् ॥
वेदानां धनलोभेन मिथ्याशास्त्रप्रकाशनम् ।
अपालनं पशूनाञ्च अनिन्द्या विभवे सति ॥
शूद्राणाञ्च महाराज ! त्वयैव वचनमः ।
शुश्रूषो ब्रह्मणस्य ज्ञानशास्त्रकर्म्मणः ॥
आभ्यन्तरासनाग्न्यश्च शूद्रस्य आसीनने ॥
कन्याकरदानानि दम्भधर्म्ममस्य च ॥
आश्रमा विहिता यत्र धर्म्मविना निरा
श्रिमम् ॥"
इति पाद्मे खण्डे २७ अध्यायः ॥

अपि च ।
"यस्तु भागवतान् दृष्ट्वा भूत्वा भागवतः शुचिः ।
अभ्युत्थानं न कुर्व्वीत स्वस्थ वैनापि द्विजिनः ॥
यश्च कन्यां पिता दत्त्वा न प्रयच्छति तां पुनः ।
चाटौ पितृगयाश्चैव द्विजिता नाम संशयः ॥
भार्य्यां प्रियसखीं ये तु यार्थीं त्यजन्ति निर्घृणाः ।
न ते मुक्तां प्राप्नुवन्ति दिवसा दुरयोनिजाः ॥
ब्रह्मघ्नश्च सुरापश्च गोघ्नश्च सतपापकाः ।
एतान् मिथ्यान् विवर्ज्जेत उक्ता ये चान्य पातकाः ॥
शाकपत्रे न भोक्तव्य न च्छेत्तव्यं कदाचन ।
अश्वत्थो वटश्चैव न च्छेत्तव्यौ कदाचन ॥
न च्छेत्तव्यो विल्वश्च उडुम्बरश्च कदाचन ।
कर्म्मण्याश्चैव ये वृक्षा न च्छेत्तव्याः कदाचन ।
यदीच्छसि परां सिद्धिं मोक्षधर्म्मं सनातनम् ।
भक्ष्याभक्ष्यञ्च ते प्रिय वेदितव्यं सदा मते ॥ —
करारङ्गं वधः प्रसः पनसाश्चोडुम्बरस्य च ।
सद्योभवो भवन्तेन अभक्ष्याः पूतिवासिकाः ॥
न भक्षयीत वाराहं मांसं मत्स्यस्य सर्व्वशः ।
अभक्ष्याः मत्स्यमेहिते दीक्षितादि न च प्रभ ॥
परिवादं न कुर्व्वीत न हिंसां वा कदाचन ।
पैशुन्यञ्च न कर्त्तव्यं स्तेयं वापि कदाचन ॥
अतिथिं स्वागतं दृष्ट्वा दूराच्चागमनं क्वचित् ।
सविभागस्तु कर्त्तव्यो येन केनापि पुत्रक ! ॥
गुरुपत्नीं राजपत्नीं ब्राह्मणीं वा कदाचन ।
मनसापि न गन्तव्या यत्र विष्णुः प्रभावति ॥
कनकादीनि रत्नानि यौवनस्था च कामिनी ।
सर्व्व चित्त न कर्त्तव्यमेवं विष्णुः प्रभावति ॥
दृष्ट्वा परस्य भार्य्यानि आत्मनो घ्नघ्नसापा ।
तत्र मन्युर्न कर्त्तव्य एष धर्म्मः सनातनः ॥"
इति वराहपुराणम् ॥
(निवारितम् । यथा देवीभागवते । २ । ६ । १६ ।
"मा मा मा मेति बहुधा निषिद्धोऽपि तथाग्रहम् ।
आलिलिङ्ग प्रियां दैवात् पपात धरणीतले ॥")

निषेकः, पुं (निषिच्यते प्रक्षिप्यते इति । नि+षिच+घञ ।) गर्भाधानम् । इति निषेकादि शब्दटीकायां भरतः ॥ * ॥
"निषेकाद्भवेत् पत्नी गुरुभर्त्ता शुभाशुभम् ।
सर्व्वाङ्गिण्यमनश्च सम्भेदाद्य यथा ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ११ अध्यायः ॥
(यथा, मनुः । २ । १६ ।
"निषेकादिश्मशानान्तो मन्त्रैर्यस्योदितो विधिः ।
तस्य शास्त्रेऽधिकारोऽस्मिन् ज्ञेयो नान्यस्य कस्य-
चित् ॥"
क्षरी रेतः । यथा, मनुः । ४ । १५१ ।
"दूरादावसथान्मूत्रं दूरात् पादावसेचनम् ।
उच्छिष्टान्न निषेकञ्च दूरादेव समाचरेत् ॥"
"निषिच्यते इति निषेकं रेतश्चोत्सृजेत् ।"
इति तट्टीकायां कुल्लूकभट्टः ॥ (क्षरणम् ।
यथा, रघुः । ८ । ६८ ।
"मदुतैर्भिवैकविन्दुना
सह दीपार्चिषमेति मेदिनीम् ॥")

निषेकादिकृत, पुं, (निषेकादि गर्भाधानादि करोतीति । निषेकादि+कृ+क्विप् ।) गर्भाधानादिकर्त्ता । स्वार्दिना सीमन्तोन्नयनादिसंस्कारविधानादेश्च पुरुष तत्कर्त्ता पितान्निवेत स्यात् । इत्यमरभरतौ ॥

निषेधः पुं, (नि+षिध+घञ ।) प्रतिषेधः । निवृत्तिः । विधिविपरीतः । यथा,—
"विधोर्मा पूर्व्वता नाम कर्म्मोद्देशात्तो सदा ।
निषेधस्तु निवृत्तात्मा कालमात्रमपेक्षते ॥"
इति तिथितत्त्वम् ॥

निषेवणं, क्ली, (नि+सेव+भावे ल्युट ।) सेवा । यथा, भागवते । १ । २ । १६ ।
"शुश्रूषोः श्रद्दधानस्य वासुदेवकथारुचिः ।
स्यान्महत्सेवया विप्राः पुण्यतीर्थनिषेवणात् ॥"

निषेव्य, त्रि, (नि+सेव+भावे ण्यत् ।) सेवनीयः । यथा भागवते । १ । १९ । २२ ।
"पृथ्वीन्द्र इव विश्वात्मा निषेव्यो हिमवानिव ॥"

निष्क क ह मासे । इति कविकल्पद्रुमः ॥ (चुरां आत्म सक सेट ।) मङ्गलवचनम् । क ह निष्कयते स्वर्ण वणिकः । इति दुर्गादासः ॥

निष्कः, पु क्ली, (निश्चयेन कायति शोभते इति । निस्+कै+आतश्चेति कः ।) कलायः सुवर्णः । चारि मोहर इति भाषा ॥ यथा, मनुः । ८ । १३७ ।
"सरलानि दश तेषु शतमानस्तु राजतः ।
चतुःसौवर्णिको निष्को विज्ञेयस्तु प्रमाणतः ॥"
चाटशततुलम् । हेम । उरोभूषणम् । (यथा, रामायणे । १ । ६ । ११ ।
"नाकुण्डली नामुकुटी नास्रग्वी नाल्पभोगवान् ।")
पलम् । दीनारः । इत्यमरः । २ । ९ । ११४ ॥ अस्य टीका यथा । "प्रास्तीयमोऽष्टमाषकपरिमितः स्वर्ण सुवर्णं तेषां सुवर्णानां शताधिकशतम् । हेम रुक्ममात्रम् । उरोभूषणं वक्षोऽलङ्कारः । पलं प्रास्तीयमानविशेषः । उरोभूषणं दशपलं हेम यदेति केचित् । दीनारः सन्ध्यत्रयसारार्थे मानमस्तु सुवर्ण निष्क । केचित्तु दीनारं इति पदं इत्यस्य विशेषणम् । दीनारे पक्षे लौकिक-पक्षे न तु शास्त्रीये इत्याहुः । तन्मास्तु द्वात्रिंशद्रक्तिकापरिमितं काञ्चनं दीनारः । तथाहि ।
'दीनारो रोपकैर्द्वात्रिंशद्भिः परिकीर्त्तितः ।
सुवर्णस्य षोडशतमो भागो रोपक उच्यते ॥'
इति विष्णुगुप्तः ॥
सुवर्णोऽशीतिरक्तिकापरिमितः काञ्चनं तस्य षोडशतमो भागः पञ्चमाषाधिकपञ्चरक्तिकायां रोपकः तद्द्वात्रिंशता द्वात्रिंशद्रक्तिकापरिमितं हेम दीनारः इति पर्य्यवसतीत्याहुः ।" इति भरतः ॥ * ॥ कर्षः । सुवर्णम् । इति हेमचन्द्रः । वक्षोभूषा । इति जटाधरः । माषकन्तुलम् । इति वैद्यकपरिभाषा ॥ (यथा,
"स्नानादुपादाय प्रायः न निष्कदद् यस्य च ॥"
इति पूर्व्वखण्डे प्रथमेऽध्याये शार्ङ्गधरसंहिता ॥)

ईर्ष्याशी । (नदीविशेषः । यथा रामायणे । २।११।२२ ।
"कौशिकीन्तु समतीत्य निश्चलां गच्छती यथा ।
रघुर्वीरिति मिश्रिता हिमवत्पार्श्वनिश्चला ।")
अचपल, त्रि । यथा,—
"निश्चलन्तु तव गेहे निवसतां सिन्धुपुत्री ।"
इत्याद्युद्भटः ।

निश्चलाङ्गः, पुं, (निश्चलमङ्गं यस्य ।) वकः । इति राजनिघण्टुः ॥ पर्वतादिः । चलन रहिते, त्रि ॥

निश्चायकः, त्रि, (निश्चिनोतीति । निर + चि + ण्वुल् ।) विषयकर्त्ता । निर्णायकः । यथा अनुमानिमत्त्वनिश्चायकत्वमन्ते न हेतुत्वमिति व्याप्तिपञ्चमाथुरी ।

निश्चारकः, पुं, (निश्चरतीति । निर + चर + ण्वुल् ।) पुरीषयमः । वायुः । स्वच्छन्दम् । इति मेदिनी । के, १६६ ॥

निश्छिद्र, त्रि (निर्गतानि छिद्राणि यस्मात् ।) छिद्ररहितः । यथाह कश्चित् ।
"मध्यं सुतनं भवत्त कुमारी । गर्व्वस्त्र चारौ
कुचा
निश्छिद्रौ बहुभोगकोऽविहृतरौ रात्रिन्दिवा
सुप्रभाकः ।
कार्म्याकाम्यविचारणाविरहितौ माधायमाणे यत्ने
हन्ता सर्व्वजनस्य मङ्क्षु परयौ मर्म्मोत्पिर
कौन्तु ।"

निश्चीयमान, त्रि, (निर — चि + कर्म्मणि शानच् ।) निश्चयविषय । यथा । तत्तु तथापि एवकारस्य निश्चायमानत्वेन सार्पत्वाभावात् कुम्भ प्रकृतिस्त्वामिति शब्दशक्तिप्रकाशिकाटीकायां राम भद्रः ।

निश्चुक्क स्त्री, (निःशेषेण चुक्कयम् ।) इक्ष शाकम् । इति शब्दचन्द्रिका । मिष्टी इति भाषा ।

निश्चेष्ट त्रि, (निर्गता चेष्टा यस्मात् ।) चेष्टा-रहितः । निश्चेष्टितः । यथा,—
"गजघण्टानिर्घोषैर्दैत्यो निश्चेष्टोऽभवत् ।
श्वासरावो व्यपगतः सशब्दो व्यवसाये ।"
इति श्रीभागवते दशमे ।

निश्वासः, पुं (नि + श्वस + भावे घञ् ।) बहि-र्मुखश्वासः । तत्पर्य्यायः । प्राण १ दक्ष २ । इति हेमचन्द्रः । (यथा, ब्रह्मवैवर्त्ते । ५।१।५८ ।
"संहृत्य सर्व्वब्रह्माण्ड स्फुरा निश्वासमात्रतः ।")

निश्वासपरीक्षा स्त्री, (निश्वासस्य परीक्षा ।) दिव्यपरीक्षाविशेषः । यथा,—
"सहसाऽविलसद्भिस्तु दुरादि हिमधनाः ।
शीर्णाग्रमायमाना स्वभावरिह मञ्जिताम् ।
निश्वासाख्या गतप्रायां श्रीणां वाध्यप्रतीक्षिणाः ।
निश्वासदूषिताया हि तत्त्वमात्रमात्र ।
मेव पाण्डुरगी दीपा मीन पाण्डुपत्त्व हि ।
दलमारिदामोक्षि सदृश्वानि स्फुरे ।
तत् तुरकर्म्मे विशेष रौद्र दीपविनिश्चितम् ।"
इति महाप्रदुरराणम् ।

निषङ्गः पुं (निषजन्ति अस्मिन् शरा यत्र । नि + सन्ज + अधिकरणे घञ् ।) तूणीरः । इत्य मरः । २ । ८ । ८८ ॥ (यथा, रघुः । ९ । ६ ।
"ततो मृगेन्द्रस्य मृगेन्द्रगामी
वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गा-
दुद्धर्त्तुमैच्छत् प्रसभोद्धृतारिः ।")
सङ्गः । इति मेदिनी । गे, ३ ॥

निषङ्गथि, पुं, (नि + सञ्ज + "शी सञ्जेरथिन् ।" उणां । ४ । ८७ । इति थाथे थथिन् । निपातात् कुत्वम् । तत् कत्वम् ।) समासितः । आलि ङ्गनम् । इत्युणादिकोषः । ४ । १११ ॥ धन्वी । रथः । स्कन्धः । शयन् । सारथिः । इति धर्णिसंग्रहाणां-श्रीलिङ्गः । (आलिङ्गके, त्रि । इत्युज्ज्वलदत्तः ॥)

निषङ्गी, [न्] पुं स्त्री (निषङ्गोऽस्त्यस्येति । निषङ्ग + इनि ।) धनुर्द्धरः । इत्यमरः । २ । ८ । ६९ । (यथा रघुः । ७ । ५६ ।
"रथी निषङ्गी कवची धनुष्मान्
दृप्तः स राजन्यकमेकवीरः ।"
खड्गवान् । खड्गधारी । इति महा भारतम् । १ । ११७ । ११ ।)

निषण्णः, त्रि, (निषीदति स्मेति । नि + सद् + गत्यर्थेति क्तः । "रदाभ्यां निष्ठातो नः पूर्व्वस्य च दः ।" ८ । २ । ४२ । इति निष्ठातस्य धातो-र्दकारस्य च नः ।) उपविष्टः । यथा —
"पारावतध्वनी श्रीरैवतकाचलमानीके ।
निषण्णा मङ्गले पुष्पा मनो हैमे शिवा इति ।"
इति शिखरिणीशतकम् ।

निषण्णिका स्त्री (निषण्ण + स्वार्थे कन्) शान्ति-मण्डपम् । इति शब्दरत्नावली ।

निषदः, पुं, (निषीदन्ति बहु स्वादयः स्वरा यत्र । नि + सद् + बाहुलकात् अच् ।) निषादस्वरः । इत्यमरटीकायां स्वामी । (स्वनामख्यातपर्व्वत विशेषः । यथा महाभारते । २ । ९ । १५ ।
"महाहरिस्तुमीनश्च निषदीप यशोधरः ।")

निषद्या स्त्री, (निषीदत्यस्यामिति । नि + सद + "संज्ञायां समजनिषदेति ।" ३ । ३ । ९९ । इति अधिकरणे क्यप् ।) पण्यविक्रयशाला । इत्यमरः । २ । २ । २ ॥ हट्टः । हाटो । इति भरतः ॥ क्षुद्रखट्वा । इति शब्दकल्पद्रुम ॥

निषद्वरः, पुं, (निषीदन्ति निमज्जन्ति अस्मिन् जना अस्मिन्निति । नि + सद् विशरणे गतौ + "भौ वरे ।" उणां । २ । १२४ । इति ष्वरच् । "सदि-रप्रतेः ।" ८ । ३ । ६६ । इति षत्वम् ।) कर्द्दमः । इत्यमरः । १ । १० । ९ ॥

निषद्वरी, स्त्री, (नि + सद विशरणे + अधिकरणे ष्वरच् । टिड्डात् ङीप् ।) रात्रिः । इति मेदिनी । रे, ३०१ ॥

निषधः, पुं पर्व्वतविशेषः । इत्यमरः । २ । ३ । २ ॥ स तु इलावृतस्य दक्षिणे हरिवर्षस्य सीमा पर्व्वतः । नारायणः अनुगमीकमोतुपि ।

हिमकूटपर्व्वतविशेषे । इति हेमचन्द्रः ॥ स्कन्धे ११ अध्याये । कठिनम् । देशविशेषः । (यथा, महाभारते । ३ । ५६ । ३ ।
"बहवो दिवि सूरो निषधेषु महीपतिः ।")
तद्देशीयराजः । इति मेदिनी । धे, ११ ॥ निषादस्वरः । इति हेमचन्द्रः । ६ । २० ॥ (रामपौत्रे दशरथपौत्रभेदे । यथा, हरि-वंशे । १५ । २६ ।
"रामस्य तनयो जज्ञे कुश इत्यभिविश्रुतः ।
अतिथिस्तु कुशाज्जज्ञे निषधस्तस्य चात्मजः ।")

निषादः, पुं, (निषीदति पापमस्मादिति । यद्वा निषीदन्ति पापमत्र । नि + सद् + कर्त्तरि अधिकरणे वा घञ् ।) चण्डालः । इत्यमरः । २ । १० । २० ॥ धीवरः । तत्पर्य्यायः । म ? । अपि पुराणे ।
"मध्यमाने ततो राजन् ऊरौ प्रभाङ्कुरान् ।
ह्रस्वोऽतिमात्रः समभवद्वाहुके हि । ।
वै सर्व्वे निश्चलं तस्थौ निषीदेत्यब्रुवंस्तदा ।
निषादवंशकर्त्ता च बभूव सुविक्रमः ।
धीवरानसृजत् चापि वेणकल्मषसम्भवान् ।
ये चान्ये विन्ध्यनिलयाः तुषाराः खरकास्तथा ।
अधर्म्मरतयो ये च विद्धि तान् वेणकल्मषान् ।"
पारिभाषिकलक्षणं यथा, मार्कण्डेयपुराणे ।
"ब्राह्मणात् शूद्रायां यः स पारशव उच्यते ।
शूद्रायामब्राह्मणात् च नाकाशोऽधमो नरः ।"
धीवरविशेषः । इति मेदिनी । दे, १३ ॥ (निषीदन्ति बहुस्वादयः स्वरा यत्र । नि + सद् + घञ् ।) सप्तस्वरान्तर्गतस्वरः । स तु कण्ठदेशे स्थितः मनुष्यस्वरः । अस्योच्चारणस्थानं ललाटम् । आकारवती दत्ता । अस्य पैत्रमर्षं । पञ्चस्वरासा मध्ये जाप । अस्य जातिः कन्या । अस्य कूटवादा १०२० । प्रस्तारस्तानम् ६६ वश्रेषिष २८२४० भवन्ति । अस्य वर्णः कर्व्वुरतुल्यः । अन्यचेतरवे । स्थानं पुष्कर-द्वीपः । देवता सूर्यः । वारः शनिः । समय निशान्ते ८ दण्ड—२४ पलानि । अस्य श्रुति उग्रा क्षोभिणी च । मूर्च्छना मन्दरस्याश्च । सप्तस्थानि मत्तकृता । तत्रत्यानि मौमना च । निषादस्वरान्वितां रागिण्यौ काशिरसी मधुरी च । आरतरागमतौ । विकलाङ्गोऽयम् । नीलायां शेरताविवृतृष्णायमर्षणे । एतत्-स्वराङ्कृतीयाक्ष शिरस्तन्तामयोगस्यौनिषा-दस्याद भवति । इति सङ्गीतशास्त्रम् । ॥ ।
"षड्जारवं मयूरोऽस वदा वर्षे मनोहरः
निषीदन्ति यतो जीव निषादस्तेन कथ्यते ।
जगत पयसे वृषे माधवे सुतनो भवः ।
अश्वो वैवर्ते विदो वै मांसारनिषादके ।"
इति सङ्गीतचन्द्रोदय ।
(अस्य अघुर्वेदे उत्पत्तिः । वैश्यो जातिः । विचित्रो वर्णः । पुष्करद्वीपे जन्म । ऋषि-तुम्बुरुः । ऋर्व्वो देवता । जगती छन्दः । करुणे उपयोगित्वम् । इति सङ्गीतदर्पणम् ॥)

बुद्धियोगः । सामर्थ्यम् । निगतिः । इति माघटीकायां मल्लिनाथः ॥ प्रत्युपकारः । विनिमयः । यथा, माघे । १ । ५० ।

"सतृणमिव स पृथ्वीं भक्ततामस्य
वरप्रदानस्य चकार शूलिनः ।
त्रसत्तुषाराद्रिसुताससम्भ्रम
स्वयङ्ग्रहाश्लेषसुखेन निष्क्रयम् ॥"

(विक्रयः । यथा, मनुः । ९ । ४६ ।
"न निष्क्रयविसर्गाभ्यां भर्त्तुर्भार्य्या विमुच्यते ॥")

निष्क्रान्त, त्रि, (निर् + क्रम + क्तः ।) निर्गतः । यथा, मार्कण्डेये । ८७ । ५ ।
"भ्रुकुटीकुटिलात्तस्या ललाटफलकाद्द्रुतम् ।
काली करालवदना विनिष्क्रान्तासिपाशिनी ॥"
(यथा च महाभारते । १२ । २ । ४५ ।
"निष्क्रान्ते मयि ...याम्यि तथा सन्निहितेऽनघे ।
नातिचिरेऽपक्रान्ताय प्रसाद्य यदाह तव ॥")

निष्क्रियं, क्ली, (निर्गता क्रिया यस्य ।) ब्रह्म । यथा, वेदान्तसूत्रभाष्यम् ।
"निष्क्रियं निर्गुणं शान्तं निरवद्यं निरञ्जनम् ॥"
क्रियाशून्ये, त्रि । यथाह कश्चित् ।
"वस्त्रनाभि यदि सन्ति वपूंषि
प्रेमरञ्जुहतवञ्चनमत्यत् ।
दासमेतदिनपुत्रोऽपि यद्भुवि
निष्क्रियो भवति पङ्कजवद्व ॥"

निष्क्वाथः, पुं, (निष्क्वथ्य क्वाथो यस्य ।) मांसादिक्वाथः । झोल इति भाषा । तत्पर्य्यायः । रसकः २ । इति हेमचन्द्रः । ३ । ७७ ॥

निष्टः, पुं (वर्णाश्रमादिभ्यो निर्गतः । निस् + "अपघाते च ।" ३ । २ । १४ । इत्यस्य "निसो गतौ ।" इति वार्त्तिकोक्त्या मपः । "इण्वादीनां सन्निति ।" ८ । ३ । १ १ । इति षत्वम् ।) म्लेच्छजातिविशेषः । इति हेमचन्द्रः । ५ । ५९८ ॥ (पुक्कसादि । इति महीधरः । यथा, वाजसनेयसंहितायाम् । १ । २१ ।
"य मे निष्टो यमभाष्यो निचखान ॥"
"हे सर्वे शब्दसंघातयोः । निरतं ध्यायति मनसाद्रूपेण यत्र यत्न इति निष्टः । यद्वा, निर्गत शरीरात् ध्यायति विलीनो भवतीति निष्टः पुक्कसादि । यद्वा, निर्गतो वर्णाश्रमेभ्यो निष्टश्चण्डालादिः । निसो गते इति वार्त्तिकेन निस उपसर्गाद्गत्यर्थे मप् इति काशिकायाम् ।" इति तत्र वेददीपः ॥)

निष्ठ, त्रि, (निरतं तिष्ठतीति । नि + स्था + कः ।) स्थितः । निर्तिष्ठतीति व्याख्यातोऽनुपसर्गनिष्ठः ॥

निष्ठा, स्त्री, (निरतं तिष्ठतीति । नि + स्था + "आतश्चोपसर्गे ।" ३ । ३ । १०६ । इति कः । "उपसर्गादिति ।" ८ । ३ । ६५ । इति षत्वम् ततष्टाप् ।) निष्पत्तिः । नाशः । (यथा भागवते । ३ । १२ । ८ ।
"यदा चिताद्देव चराचरस्य
विदाम निष्ठां प्रभवञ्च नित्यम् ॥")

अन्तः । निर्वहणम् । इत्यमरः । ३ । ३ । ४ ॥ याचना । इति मेदिनी । ठे, ६ ॥ क्तक्तवतू प्रत्ययौ । इति कविकल्पद्रुमटीकायां दुर्गादासः ॥ (यथा "क्तक्तवतू निष्ठा । १ । १ । २६ । एतौ निष्ठासंज्ञौ स्तः ।" इति सिद्धान्तकौमुदी ।) धर्म्मादौ श्रद्धा । यथा,—
"निष्ठया हि प्रतिष्ठा स्यादनिष्ठस्य कुतः कुलम् ।
प्राप्नोति नैष्ठिकः स्वीयं धर्म्मं जातु न चेतरः ।
एकस्य देवस्य विधाय मन्त्र
मेकं परस्मिन्नपि तस्य ।
तदा भवेन्मुक्तिरनैष्ठिकत्वा-
न्निष्ठाविहीनस्य न चापि सिद्धिः ॥"
इति वैद्यकुलतत्त्वे भरतमल्लिकः ॥

प्राप्यम् । यथा,—
"भगवन्त हरिं प्रायो न भजन्त्यात्मवित्तमाः ।
तेषामशान्तकामानां का निष्ठाविजितात्मनाम् ॥")
इति श्रीभागवतैकादशस्कन्धपञ्चमाध्यायश्लोकटीकायामाश्रयां श्रीधरस्वामी । (नि + स्था + क्विप् । स्थितिः । यथा, ऋग्वेदे । १ । ३१ । १० ।
"जाति निष्ठामनुगौर्भूत वीरान् ॥"
"निष्ठां पूर्ब्बं यथास्थितिम् ।" इति सायणः ।)

निष्ठानं, क्ली (नि + स्था + करणे ल्युट् ।) व्यञ्जनम् । इत्यमरः । २ । ९ । ११५ ॥ (यथा, रामायणे । २ । ९१ । ६७ ।
"प्राणेश्चापि च पाराद्यैर्निष्ठानवरसंचये ।
फलनिर्यूहसंसिद्धैः सूपैर्गन्धरसान्वितैः ॥")

निष्ठित, त्रि, (नि + स्था + क्तः ।) निरतं स्थितम् । यथा भागवते । २ । ७ । ३६ ।
"देवद्विषां निगमवर्त्मनि निष्ठितानां
पूर्भिर्मयेन विहिताभिरदृश्यतूर्भिः ।
लोकान् घ्नतां मतिविमोहमतिप्रलोभं
वेषं विधाय बहुभाष्यत औपधर्म्यम् ॥"
"देवद्विषां दैत्यानां निष्ठितानां निरतं स्थितानाम् ।" इति श्रीधरस्वामी । (निष्ठा जाता अस्येति । तारकादित्वादितच् ।) निष्ठाविशिष्टः । निश्चयेन स्थितश्च ॥ (सम्पन्नजातः । यथा, रामायणे । ६ । १ । १३ ।
"रक्षिता तस्य सैन्यस्य स्वबलस्य च रक्षिता ।
वेदवेदाङ्गतत्त्वज्ञो धनुर्वेदे च निष्ठितः ॥")

निष्ठीवः, पुं, (नि + ष्ठिव + भावे घञ् । पृषोदरादित्वात् दीर्घः ।) निष्ठीवनम् । इति त्रिकाण्डशेषः ॥ (यथाह वाभटः ।
"निष्ठीवः पार्श्वतो यायादेकस्मात् निमोक्षणम् ॥")

निष्ठीवनं, क्ली, (नि + ष्ठिव + भावे ल्युट् । ष्ठिवु सिवोरुर्ड्डिति दीर्घौ वेति वामी । पृषोदरादित्वाद्दीर्घ इति मुकुटः ।) थूत्कारादीनां मुखेन वमनम् । थूक इति थुथु इति च भाषा । तत्पर्य्यायः । निष्ठेवः २ निष्ठ्युतिः ३ निष्ठेवनम् ४ । इत्यमरः । २ । ४ । ६८ ॥ निष्ठेवः ५ । निष्ठेवम् ६ । इति तट्टीका ॥ (यथा, मार्कण्डेयपुराणे । ३५ । ७० ।
"क्षुतेऽवलीढे वान्ते च तथा निष्ठीवनादिषु ।
कुर्य्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनम् ॥")

निष्ठुर, त्रि, (नि + स्था + मद्गुरादयश्चेति उरच् ।) परुषम् । कठिनम् । इत्यमरः । ३ । १ । ७६ ॥ (यथा, माघे । ५ । ४९ ।
"जज्ञे जनैर्मुकुलिताक्षमनाददाने
संरब्धहस्तिपकनिष्ठुरचोदनाभिः ॥")

निष्ठ्यूत, त्रि,(नि + ष्ठिव + क्तः । "च्छ्वोः शूडिति ।" ६ । ४ । १९ । इत्यूठ् ।) क्षिप्तम् । इत्यमरः । ३ । १ । ८७ ॥

निष्ठ्युति, स्त्री, (नि + ष्ठिव + क्तिन् । "च्छ्वोः शूडिति ।" ६ । ४ । १९ । इत्यूठ् ।) निष्ठीवनम् । इत्यमरः । २ । ४ । ६८ ॥

निष्ठेवः, पुं (नि + ष्ठिव् + घञ् ।) निष्ठीवनम् । इत्यमरः । २ । ४ । ६८ ॥

निष्ठेवनं क्ली, (नि + ष्ठिव + भावे ल्युट् ।) निष्ठीवनम् । इत्यमरः । २ । ४ । ६८ ॥

निष्णात, त्रि, (निरतं स्नाति स्मेति । नि + स्ना + क्तः । "निनदीभ्यां स्नातेः कौशले ।" ८ । ३ । ८९ । इति षत्वम् ।) विज्ञः । निपुणः । इत्यमरः । ३ । १ । ४ ॥ (यथा, सुश्रुते सूत्रस्थाने तृतीयेऽध्याये ।
"यस्तु कर्म्मसु निष्णातो धार्ष्ट्याच्छास्त्रबहिष्कृतः ।
स सत्सु पूजां नाप्नोति वधञ्चार्हति राजतः ॥")
पारं गतः । यथा, भागवते १ । ४ । २१ ।
"वैशम्पायन एवैको निष्णातो यजुषामुत ॥"

निष्पक्व, त्रि (निरतं पक्वम् ।) क्वथितकषायमांसदुग्धजलादि । इति भरतः ॥ तत्पर्य्यायः । क्वथितम् २ । इत्यमरः । ३ । १ । ९५ ॥ पक्वान्नशून्यश्च ॥

निष्पताकध्वजः, पुं स्त्री राज्ञां पताकाशून्यस्य चिह्नः । इति युक्तिकल्पतरुः ॥ तद्विवरणं ध्वजशब्दे द्रष्टव्यम् ॥

निष्पत्तिः स्त्री (निर् + पद + क्तिन् ।) समाप्तिः । सिद्धिः । यथा,—
"क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् ।
विवक्ष्यते यदा तत्र करणत्वं तदा स्मृतम् ॥"
इति रामतर्कवागीशकृतकारिका ॥
(नादस्यावस्थाविशेषः । यथा, हठयोगप्रदीपिकायाम् । ४ । ६९ ।
"आरम्भश्च घटश्चैव तथा परिचयोऽपि च ।
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम् ॥"
तथा तत्रैव । ४ । ७६ ।
"रुद्रग्रन्थिं यदा भित्त्वा शर्व्वपीठगतोऽनिलः ।
निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत् ॥")

निष्पवनिः, स्त्री (निष्पव + क्त + भावे क्तिन् + टाप् ।) यवमाहृतिः । अक्षमापीड़ा । इति हेमचन्द्रः । ६ । ८ ॥

निष्पत्रिका स्त्री, (निष्पत्रमस्याः अस्तीति । ठन् ।) करीरवृक्षः । इति राजनिघण्टुः ॥

निष्पदयान, क्ली, (निष्पद पदरहितं यानम् ।) पदरहितयानम् । यथा नौकादिकम् । इति

षोडशद्रम्मः । षोल काहन इति भाषा । (यथा, लीलावत्याम् । २ ।

"वराटकानां दशकद्वयं यत्
सा काकिणी ताश्च पणश्चतस्रः ।
ते षोडश द्रम्म इहावगम्यो
द्रम्मैस्तथा षोडशभिश्च निष्कः ॥")

निष्कन्ध , पुं, (निर्गतः कन्धः स्कन्धो यस्य ।) वरुणवृक्षः । इति शब्दचन्द्रिका ॥

निष्कर्ष पुं, (निर् वा निस् + कृष् + भावे घञ् ।) निश्चय । यथा अस्यार्थे निष्कर्षं इत्यादावमरादिकथाद्यादिव्यवहाराणां मूलं वा । (कराग्रे प्रमाणीकरणम् । इति नीलकण्ठः । यथा, महाभारते । ५ । १२ । ११ ।

"अनुकर्षञ्च निष्कर्षं व्याधिपावकमूर्च्छनम् ।
सर्वमेव च तत्रासीद्धर्मभिन्ने युधिष्ठिरे ॥")

निष्कल, त्रि, (निर्गता कला यस्मात् ।) कलाशून्यम् । (यथा, महाभारते । ३ । ३८ । ९ ।

"सततञ्चापि दृष्टाश्च मतिमन्तश्च मानवाः ।
दृश्यन्ते निष्कला यत्र प्रणीताः स्वेषु कर्मभिः ॥")

नष्टवीर्य्यम् । इति मेदिनी । ले, १३ । ब्रह्म । यथा,—

"निष्कलस्याद्वितीयस्य निष्कलस्याशरीरिणः ।
उपासकानां कार्य्यार्थं ब्रह्मणो रूपकल्पना ॥"

इत्येकादशीतत्त्वे चाभरणवचनम् ॥ आधारे, पुं । इति शब्दचन्द्रिका ॥

निष्कला, स्त्री, (निर्गता कला यस्याः ।) विगतार्त्तवा । इति शब्दरत्नावली ॥ वृद्धा । इति राजनिर्घण्टः ॥

निष्कली, स्त्री, (निष्कल + ङीष् ।) गतार्त्तवा । निवृत्तरजस्का । इति शब्दरत्नावली ॥

निष्कालक , पुं, (निष्कालयतीति । निर् + कालि + ण्वुल् ।) मुण्डितलोमा घृताभ्यक्तः प्रायश्चित्ताद्यर्थ । यथा । मुण्डितलोमकेशेन घृताभ्यक्तेन च कार्य्यम् । निष्कालको घृताभ्यक्तस्तम्भी भूमौ परिवर्त्य मरणात् पूतो भवतीति विज्ञायते । इति वशिष्ठस्मरणात् । इति मिताक्षरा ॥

निष्काश , पुं, (नितरां काशते शोभते प्रासादादिरिति । निर् + काश + अच् ।) प्रासादाद्युपस्थानम् । इति महाभारते राजधर्म्मः ॥ वाला इति वारान्दा इति च भाषा ॥

निष्काषित, त्रि, (निर् वा निस् + काश + णिच् + क्त ।) निष्काशित । इत्यमरटीकायां भरतः ॥

निष्कासित, त्रि, (निस् + कस + णिच् + क्त ।) बहिष्कृत । दूरीकृत । तत्पर्य्याय । अवकृष्टः । इत्यमरः । ३ । १ । ४८ ॥ निःसारित । स्थान घटाधर ॥ निर्गमित । स्थापित । अधिकृत । इति मेदिनी । ते, २०२ ॥

निष्कुट पुं (कुटात् गृहात् निष्क्रान्तः ।) गृहसमीपोपवनम् । इत्यमरः । २ । ४ । ९ ॥ (क्वचित् क्लीबेऽपि दृश्यते । यथा, महाभारते । १२ । ६८ । ११ ।

"परिखाश्चैव कौरव्य । प्रतोलीर्निष्कुटानि च ।
सङ्क्रमांश्च प्रपश्येत गुप्तमेतद्युधिष्ठिर ! ॥")

क्षेत्रम् । (यथा, महाभारते । २ । ५१ । ८ ।

"इन्द्रकृष्टैर्वर्त्तयन्ति धान्यैर्ये च नदीमुखे ।
समुद्रनिष्कुटे जाताः पारेसिन्धु च मानवाः ॥")

कपाट । इति मेदिनी । टे, ४८ । वप्राट । इति हारावली ॥ पायाणामहल इति पारस्यभाषा ॥

निष्कुटि, स्त्री, (कुट कौटिल्ये + "इगुपधात् कित् ।" उणा० ४ । ११९ । इति इन् । निर्गता कुटिः कौटिल्यं यस्याः ।) एला । इत्यमरः । २ । ४ । १२५ ॥ (पर्य्यायोऽस्या यथा,—

"एला स्थूला च बहुला पृथ्वीका त्रिपुटापि च ।
भद्रैला बृहदेला च चन्द्रबाला च निष्कुटिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

निष्कुटी, स्त्री, (निष्कुटि + कृदिकारादिति वा ङीष् ।) निष्कुटिः । इत्यमरटीकायां भरतः । २ । ४ । १२५ ॥

निष्कुम्भ, पुं, (निस् + कुम्भ + अच् ।) दन्तीवृक्षः । इत्यमरटीकायां रायमुकुटः ॥ (निर्गतः कुम्भो यस्मात् ।) कुम्भशून्ये, त्रि ॥

निष्कुषित, त्रि, (निस् + कुष + क्त ।) निष्कासित । यथा —

"शाकैर्निष्कुषितं नभिः कवलितं चौर्य्यैर्भि
राज्ञाजितम् ॥"

इत्यादि वाल्मीकिकृतगङ्गास्तोत्रम् ॥

निष्कुह पुं, (नितरां कुहयति इति । कुह विस्मापने + पचाद्यच् ।) वृक्षकोटरम् । इत्यमरः । २ । ४ । १३ ॥

निष्कृति, स्त्री, (निर् + कृ + क्तिन् ।) निर्मुक्तिः । निस्तारः । यथा,—

"ब्रह्मघ्ने चैव मित्रघ्ने सुरापे गुरुतल्पगे ।
सर्व्वेषु विहिता सद्भिः कृतघ्ने नास्ति निष्कृतिः ॥"
इति प्रायश्चित्ततत्त्वम् ॥

(ऋषिविशेषे, पुं । यथा, महाभारते । ३ । २१८ । १४ ।

"आक्रोशतां भूतानां यः करोतीह निष्कृतिम् ।
अग्निः स निष्कृतिर्नाम शोभयन्नभिषेवितः ॥")

निष्क्रम, पुं, (निष्क्रम्यतेऽनेनेति । निस् + क्रम + घञ् । "नोदात्तोपदेशस्येति ।" ७ । ३ । ३४ । इति न वृद्धिः ।) धीशक्तिः । इत्यमरः । १ । ५ । २५ ॥ निर्गमः । (यथा, कथासरित्सागरे । २५ । ६१ ।

"कञ्चित् कालं प्रतीक्षे च प्रासादमस्य निष्क्रमम् ।
तृतीयेऽह्नि गतेऽप्यद्य यात्यैतस्य वि
नाशः ॥")

दुष्कुलम् । इति मेदिनी । मे, ३१ ॥ निष्क्रमणसंस्कारः ।

"षष्ठेऽथवाष्टमे नाम चतुर्थे मासि निष्क्रमः ॥"
इति याज्ञवल्क्यः । १ । १२ ॥

(क्रमरहिते, त्रि । यथा, पञ्चदश्यां मायाख स्तबके ।

"निष्कलं निष्क्रमं प्राप्तं सच्चिदानन्दविग्रहम् ॥")

तद्गुणं मन्त्रयेन्नात्मा नावमात्यं मन्त्रयेत् ॥
चरन्ते निःस्वनादेवाः न सान्निध्यो नराधिप ।
विमल राजानाम पशून् शुचान् वै षादि
तावता ॥
चक्षुदेशमार्गेषु मनुष्याश्च वनौकसा ।
दूषयन्ति सभायेह इमात्यो यत्र मायते ॥

न तच्छक्यं समासात् दर्शनैर्मुनिवरैरपि ।
दण्डार्हांस्तु दण्डयेद्दण्डैरदण्ड्यान् रक्षयेदिह ।
अदण्ड्यनृपो दण्ड्यानदण्ड्यांश्चापि दण्डयन् ।
नृपतिर्बाधितो प्राप्य घोरं किल्बिषमाप्नुयात् ॥ ८ ॥
दुर्गेषु सततं कुर्यात् प्राकारान् नगरोत्तमे ।
दूषितानगरादारात् दूरे दुर्गाश्रयं चरेत् ॥
दुर्गे बलं नृपाणां तु नित्यं दुर्गं प्रशस्यते ।
शतमेकं योधयति दुर्गस्थो यो धनुर्धरः ॥
शतं दशसहस्राणि तस्माद्दुर्गं प्रशस्यते ।
जलदुर्गं भूमिदुर्गं वनदुर्गं तथैव च ।
आरण्यवनदुर्गाख्यं शैलं परिकीर्तितम् ।
दुर्गं कार्यं नृपतिना यथायोग्यं स्वदेशतः ॥
दुर्गं दुर्गेण युक्तं प्रकृत्याभिनवं धनुर्दलति ।
वह्नि वा चतुर्भिर्वा नान्यथा चाचरेत् ॥
अपहार्यं दुर्गस्य सततं कुर्यात् कारयेत् ।
यथा रावणराजस्य लङ्का दुर्गा स्थिता पुरा ॥
मध्ये पूरे स्थापिता तेन दुर्गे प्रतिष्ठितम् ।
नगरस्य प्राकाररतो भवः स्थिता यदि ॥
कौमार्या माल्यराजस्य भवने पञ्चकोटकम् ।
दिवि यद्वर्तते रागाकृत भवद् भविष्यति ॥
तथापि उपाश्रयं भूप । पुरमिन्द्रस्य मुक्तकम् ।
सम्राजति तथापि ततो भूरिजयप्रदम् ॥
दुर्गभूमौ यतेद्दुर्गी निकपालोऽभय द्वारतः ।
पूर्वमित्रा विधानेन अर्थं भूपः समाश्रयात् ।
ततो दुर्गं नृपः कुर्यात् सततं बलवत्तये ॥ ० ॥
न माक्षयान् यदा राजा कदाचिदवसाद्यति ।
अवमत्य नृपो विप्रान् वैश्यान् तु शुभागमेत् ॥
न विरोधस्तु ते कार्यं तानि तेषां न चाचरेत् ।
ज्ञानकामेन सततं तानेव परिपूजयेत् ॥
नैवां निन्दा प्रकुर्वीत नाभ्यसूयां समाचरेत् ।
एवं नृपो यथायुक्तिकृत्सकलसत्तमः ।
अप्रमादी चाचरेत् सर्वं यथा धर्मविदां वर ॥
प्रेत्येह लभते सिद्धिं प्राप्नोति सुखभोगवान् ।
पितृलोकविश्रान्तो ते पुत्रानपि योजयेत् ॥
नृपस्य च सतताय सततं च विचारयेत् ।
स्वतन्त्रो भूपतनयो विनाशं याति निश्चयम् ॥
निर्धिकारेण सततं तस्य ते परिपूजयेत् ।
भोजने शयने याने नृपयानेऽथ चीवरे ॥
नियोजयेत् सदा चारान् भूपः कामविवर्जिते ।
स्वतन्त्राः स्त्रियो नित्यं दाम्पत्ये सम्भवन्ति हि ।
तस्मात् कुमारं मर्त्यैर्योग्यैः भिन्नमनोदरे ।
योजयित्वा नियुञ्जीत यौवराज्याय योग्यया ।
अन्तःपुरस्थितैस्तु सततं विशेषयेत् ।
भूपसुतस्य भार्यायां धनि वारि तथैव च ।
सर्वं विहितं सचिवानुपधया सदा ॥
पुत्रायां गुणवित्ताद्यैर्माल्याकामादि भूपते ।
जनयत् राज्यनीतिज्ञे तस्माच्च न क्वचित् ॥
यथाज्येष्ठान् विशेषेस्तु तपोज्ञानैः योजयेत् ।
एवं राजा महाभागो राज्यनीतिं विधिवान् ।
कुर्वन् धीरानं सदा भूपती भिन्नमूर्त्ती ॥"
इति कालिकापुराणे राजनीतिविधिर्न॰
अध्याय ॥ ० ॥

अथवा नीतिसारप्रकरणमध्यवर्त्तिनीति मयूखहितोपदेशपञ्चतन्त्रमहाभारतीय राजधर्म्मादौ द्रष्टव्यम् ।

नीतिघोष, पुं, (नीतिरेव नीत्यात्मको वा घोषो रथो यस्येति ।) बृहस्पतिरथः । इति त्रिकाण्डशेषः ॥ (नीतिर्नयस्य घोषः ।) नयघोषणम् ।

नीतिसारः, पुं (नीतिरेव सारो यस्येति ।) इन्द्रं प्रति बृहस्पत्युक्तनीतिशास्त्रविशेषः । अथ चाणक्यसंग्रहमूलम् । गरुडपुराणे अष्टाध्यायमस्ति । बाहुल्यभिया तत् समुदायं न लिखित्वा अष्टानामध्यायानां प्राथमिकाः श्लोका लिख्यन्ते । यथा,—

"सद्भिः सङ्गं प्रकुर्व्वीत सिद्धिकामः सदा नरः ।
नासद्भिरिह लोकाय परलोकाय वा हितम् ॥१॥
आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥२॥
यो ध्रुवाणि परित्यज्य अध्रुवाणि च सेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥३॥
राज्यं पालयते नित्यं सत्यधर्म्मपरायणः ।
निर्ज्जित्य परसैन्यानि क्षितिं धर्म्मेण पालयेत् ॥४॥
भृत्या बहुविधा ज्ञेया उत्तमाधममध्यमाः ।
नियोक्तव्या यथार्हेषु त्रिविधेष्वेव कर्म्मसु ॥५॥
गुणवन्तं नियुञ्जीत गुणहीनं विवर्ज्जयेत् ।
पण्डितैश्च गुणाः सर्व्वे मूर्खे दोषाश्च केवलम् ॥६॥
न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
कारणादेव जायन्ते मित्राणि रिपवस्तथा ॥७॥
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम् ।
कुबन्धुञ्च कुदेशञ्च दूरतः परिवर्ज्जयेत् ॥"८॥
इति गारुडे ॥

नीथ, पुं (नयति प्रापयतीति । नी+"हनि कुषिनीरमिकाशिभ्यः क्थन् ।" उणां २ । २ । इति क्थन् ।) नियन्ता, प्रापयिता । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥ (नी+भावे क्थन् । नयनम् । इति उज्ज्वलदत्तः ॥ यथा ऋग्वेदे । १ । १ ०। १२ ।

"सहस्रनीथा शतनीथ ऋभ्वा ।"

स्तोत्रम् । यथा, ऋग्वेदे । ३ । १२ । ५ ।

"नीथाविदो जरितारः ।"

"नीथाविन्स्तोत्राभिज्ञा ।" इति तद्भाष्ये सायनः ॥)

जले, स्त्री । इति संक्षिप्तसारोणादिवृत्तिः । (नीयतेऽनेनेति । करणे+क्थन् । प्रापकहेतुभूते त्रि । यथा, ऋग्वेदे । २ । २ ३ । ५ ।

"प्र च यन्नस्त्रा नीथादसि ।"

'यद्यस्मा नीथा नयनहेतुभूता स्यात् सा पदवी प्रकाशयसि ।' इति तद्भाष्ये सायनः ॥)

नीध्र क्ली, (नितरां ध्रियते इति । नि+धृ+ मूल विभुजादित्वात् क ।) वलीकम् । वनम् । नेमिः । चन्द्रः । रेवतीनक्षत्रम् । इति हेमचन्द्रः । नीव्रमपि पाठः ॥

नीप पुं, (नी+'पानीविषिभ्यः पः ।' उणां ३ । २३ । इति प । बाहुलकात् गुणाभावः ।) कदम्बः । इत्यमरः । २ । ४ । ४२ ॥ (यथा, ऋतुसंहारे । ३ । १३ ।

"अद्य कान्ताकूटजार्ज्जुनसर्ज्जनीपान् संपन्नदावुपगता कुसुमोद्गमश्री ।"

क्वचित् क्ली । यथा,—

"नीपं शतावर्कं पीलु तृणशून्यं विकङ्कतम् ।
प्राचीनामलकञ्चैव दोषघ्नं गरहारि च ॥"

इति चरके सूत्रस्थाने अन्नविधिरध्याये ।

"गरदोषहरं नीपं प्राचीनामलकं तथा ॥"

इति सुश्रुते सूत्रस्थाने ४६ अध्याये ॥) धाराकदम्बः । इति राजनिर्घण्टः ॥ बन्धूकवृक्षः । नीलाशोकवृक्षः । इति मेदिनी । पे, ८ ॥

नीयमान, त्रि (नीयते इति । नी+कर्म्मणि शानच ।) प्राप्यमाणम् । यथा, कालिकापुराणे ।

"नीयमानो न गच्छेद्यस्त्वरितर्भीमरथ तदा ॥"

नीर, क्ली, (नयति प्रापयति स्थानात् स्थानान्तरमिति । नी प्रापणे+"स्फायितञ्चीति ।' उणां २ । १३ । इति रक् । यद्वा, "अग्नेरापः ।" इति श्रुतेः निर्गतं रादग्नेरिति "अहृगोऽपि स्वैक्ष्य अत्यम् ।" इति सूत्रे निपातो दीर्घश्चाद्यम्नित्यादेरित्वादिति वा । "ढ्रलोपे पूर्व्वस्य दीर्घोऽणः ।" ६ । ३ । १११ । इति ढलोपे पूर्व्वदीर्घः ।) जलम् । इत्यमरः । १ । १० । ४ ॥ (यथा गीतगोविन्दे । १ । ५ ।

"कलयति विलयमयी बलिमद्भुतवामन
पदनखनीरजनितजनपावन ।
केशव धृतवामनरूप
जय जगदीश हरे ।")

रसः । इत्युणादिकोषः ॥ नीरे अग्निप्रक्षेपादि यथा, गरुडपुराणे ।

'निष्ठीवाद्युदकस्त्रीमूत्रविड्याव्यसु च सन्त्यजेत् ॥'

(अस्य मानविधेयता विधीयते यथा,—

"याप्युष्णमजात् प्रवदन्ति धीरा
नीरं समाजेन निरस्तदोषम् ।
यत् नीयमानञ्च महायसौवा
बलप्रदं पथ्यतरं प्रदिष्टम् ॥"

"विष्ठूत्रि क्रिमिनीलिका विषयुतं तप्तं घनं फेनिलं दन्तग्राह्यमनार्त्तवं हि सलिलं दुर्गन्धि नै
शस्तिलम् ।
नानाजीवविमिश्रितं गुरुतरं पर्णौघपङ्काविलं चन्द्रार्काद्युपगोपितं न च पिबेन्नीरं सदोषाश्रितम् ॥"

इति चारीते प्रथमस्थाने सप्तमोऽध्यायः ॥)

नीरज क्ली, (नीरे जले जायते इति । जन+ ड ।) कुष्ठौषधिः । (यथा, सुश्रुते चिकित्सितस्थाने । २५ ।

'मलयं कौटजकोऽञ्जनञ्च
यष्ट्याह्वयं नीरजमासिनं च ।")

पद्मम् । इति मेदिनी । जे, २४ ॥ (यथा, अमरुशतके । ४ ।

"नील जल नटीननीरजवने नील मधु
छेप्स्यया ।")

मुक्ता । इति राजनिर्घण्टः ॥ जलजाते, त्रि ॥

नीरजः, पुं, (नीरे जायते इति । जन+ड ।) उद्बिलावः । इति शब्दरत्नावली ॥ उशीरे । इति राजनिर्घण्टः ॥ (महादेवः । यथा, महाभारते । १३ । १७ । १४६ ।

"उद्भिस्त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः ॥")

नीरजः, [स्] त्रि (निर्गतः रजो धूलिः कुसुमपरागादिर्वा यत्र ।) निर्धूलिदेशपुष्पादि । (यथा, महाभारते । १३ । ८१ । २ ।

"सर्व्वा मणिमयी भूमिः सर्व्वकाञ्चनवालुका ।
सर्व्वतुसुखसंस्पर्शा निष्पङ्का नीरजा शुभा ।")

अरजस्कायाम् स्त्री ॥

नीरत, त्रि, (निर्गतं रतं रमणं यस्मात् ।) विरतः । रमणाभाववान् । यथा —

"दिशि दिशि नीरतरङ्गो नीरतरङ्गो ममापि
हृदयेऽयः ।
अन्यासा सखि वर्षा ययाऽपि पापु वावदो
दोषः ॥"

इत्युद्भटलक्षणपद्धतिः ॥

नीरद, पुं, (नीरं जलं ददातीति । नीर+दा+ कः ।) मेघः । यथाह घटकर्परः ।

"निचितं खमुपेत्य नीरदैः प्रियहीना हृदयावनीरदैः ।"

मुस्तकम् । इति राजनिर्घण्टः ॥ (निर्गताः रदा दन्ता यस्य ।) रदशून्ये, त्रि । यथा —

"आस्वाद्य विरसमेव विरहितवधूनां मदूनि
मांसानि ।
करवालमिषेण मन्ये निष्ठीवति नीरदोऽस्थीनि ॥"

इत्युद्भटः ॥

नीरधि, पुं, (नीराणि धीयन्तेऽस्मिन्निति । नीर+ धा+"कर्म्मण्यधिकरणे च ।" ३ । ३ । ९३ । इति कि ।) समुद्रः । इति शब्दरत्नावली ॥

नीरनिधि पुं, (नीराणि निधीयन्तेऽत्रेति । नीर +नि+धा+कि ।) समुद्रः । इति शब्दरत्नावली ॥ (यथा, माघे । ३ । ७ ।

"पारे जल नीरनिधेरपश्य-
न्मुरारिरानीलपलाशराशी ।")

नीरन्ध्र, त्रि (निर्गतं रन्ध्रं छिद्रं यस्मिन् ।) घनम् । इति हेमचन्द्रः । ६ । ८३ । (यथा, माघे । ८ । ३ ।

"नीरन्ध्रद्रुमशिशिरां भुवं व्रजन्तीः
सामञ्जु सङ्घरिव कौतुकात् करेणा ।
पश्चान्न समभिनाकुलीकृताभी
प्रासानामनुद्भिन्नरासिरन्धरात्रे ।")

छिद्ररहितम् । यथा,—

"श्रीमनाथ तवार्जितोज्जितयशः चन्द्रप्रकाशली-
भारामेव विधिर्न्विधितहरमत्र चार लग्नैये
गुंफे ।
नीरन्ध्रामवलोक्य तामपि ततो नाना गुणाना-
मतो
उत्पतिस्तुर्यंपथान्तरे धर्म्मदरलाकाश-
जालका ।"

इति काशीनाथः ॥

नीरस, पुं, (निर्गतो रसो यस्य ।) दाडिमः । इति हारावली ॥ (निर्गतो रसो यस्य ।) रसशून्ये त्रि । यथा,—
"ब्रह्मचारी वेद कवि' काव्ये जात रसमयं भ्रमन् ।
स एव वेदब्रह्मचारी नीरसं धर्म्ममेव तत् ॥"
इति माघ' ॥

नीराखु, पुं (नीरस्य आखु ।) उद्र । उदि- वराल इति भाषा । तत्पर्य्याय' । जलनकुल' २ जलबिडाल ३ जलाखु ४ । इति हारावली । ७१ । उद्र ५ जलाखु' ६ नीरज ७ नकुल ८ । इति शब्दरत्नावली ॥

नीराजन, क्ली, } नीराजना, स्त्री, } (राज दीप्तौ+ल्युट् । निःशेषेण राजनं यत्र । निर्+राज+णिच्+"ण्यासश्रन्थो युच् ।" ३ । ३ । १०७ । इति भावे युच् ।) वाहनायुधादि- ष्विषीकराजनं यत्र सा नीराजना । नीरस्य शान्त्युदकस्य अजनं क्षेपो यत्र सा नीराजना वा । इत्यमरटीकायां भरत ॥ * ॥
तद्विधानं यथा,—
"शरत्काले महाष्टम्यां दुर्गायाः परिपूजनम् ।
नीराजनं दशम्यान्तु कुर्य्याद्वै बलवृद्धये ॥
विधिं नीराजनस्याथ शृणु पार्थिवसत्तम ॥
कृतेन येन चान्यानां भजनानामपि चेष्टनम् ॥
आश्विने शुक्लपक्षे या तृतीया स्वातियोगिनी ।
ऐशान्यां स्वपुरस्यैव गृह्णीयात् स्थानमुत्तमम् ॥
नीराजनं तत्र कुर्य्यात् सप्तमे दिवसेऽष्टमे ।
नीराजनस्य कालस्तु पूर्व्वमुक्तस्तु वै मया ॥
विधानमथ शृणु मे तत्त्वतो भविष्यसि ।
एकं कृत्वा मण्डपन्तु तोरणमेव वा ॥
पूजयेत् सप्तदिवसान् गन्धपुष्पादिकैः शुभैः ।
तृतीयादौ पूजयित्वा नयेत् पञ्चमसप्तमम् ॥
चेष्टां निरूपयेत्तस्य नागस्याथ शुभाशुभम् ।
परदाहविमर्द आरम्भो यदि पद्मावती ॥
म्रियते राजपुत्रस्तु यदि चाभूमि गच्छति ।
नीयमानो न गच्छेच्चेद्व्याधिश्चौरभयं तदा ॥
तथैव दुःखमाप्नोति कुर्य्याद्वयो यदि ।
मत्तकालाभिमुख' शुभैर्गत्वाऽऽलयां जयेद्रिपून् ॥
उत्तानस्य दक्षिणपादस्तु यदाऽन्यो भवेत् पुरा ।
तदा जयेत् समस्तांश्च नृपतिर्विजयेद्रिपून् ॥
प्रातर्नीराजनं कुर्य्याद्दशम्यां नृपसत्तम ॥
तदभावे तु द्वादश्यां तद्धामेव समाचरेत् ॥
आश्विने पञ्चदश्यां वा तदभावे तु पार्थिव ।
ऐशान्यां स्वपुरस्योत्तरे समागेन षोडश ।
हस्तमात्रं विपुलं कुर्य्याद्वै तत्र तोरणम् ।
द्वात्रिंशद्धस्तमानन्तु यथाशोभमविस्तृतम् ॥
मध्यार्द्धे मण्डपं कुर्य्यात् मध्ये वेदिं विनिर्म्मितेत् ।
वेदायां चरतस्याश्च वेदिं कुर्य्यादनुत्तमाम् ॥
तत्र संस्थाप्य चावाह्य पूजितव्या पुरोहिते ।
अश्वत्थोदुम्बरप्लक्षवटशाखाभिरेव तु ॥
मालाभिर्भालाहितैश्चैव वन्यैश्चापि विभूषयेत् ।
तोरणस्य कपाटे दद्यात्तथा नानाविधैर्मणैः ॥
भल्लातकशालिभिश्च विद्यार्थं चैवमस्य तु ।
लज्जरेयी निवधीयात् पुटिभ्रामरन्दस्तैव च ॥
वेष्टनं मण्डपं कृत्वा दिक्पालांश्च नवग्रहान् ।
विश्वेदेवांस्तु मन्त्रेश्च विष्णुप्रकारात् प्रपूजयेत् ॥
भान्यैश्चिलेभ पुष्पैश्च मिश्रीकृत्य पुरोहित' ।
इमैस्तु मण्डपस्यैव प्रश्नोत्तरं तथैव च ॥
पुष्पभूतस्य विष्णोश्च होमं समाक्रमाचरेत् ।
एकैकस्य सहस्रं वा अष्टोत्तरशतश्च वा ॥
कुर्य्यात्तु प्रत्यहं होमं चतुर्व्वर्गस्य सिद्धये ।
समिधश्चापि होतव्या' पलाशं खदिरं तथा ॥
औदुम्बरं च काश्मर्य्यमश्वत्थञ्च पुरोहित' ।
औषधान् राजतान् चापि मालिकान् वा यथे-
च्छया ॥
कुर्य्यात्तु कलसानष्टौ पत्रपल्लवयोजितान् ।
सिन्दिंसैव घटेष्वेव सभङ्गं हरितालकम् ।
चन्दनञ्च तथा कुष्ठं प्रियङ्गुञ्च मनःशिलाम् ।
अञ्जनञ्च हरिद्राञ्च श्वेतां दूर्व्वां तथैव च ॥
भल्लातकं पूर्णकोषं सहदेवीं शतावरीम् ।
यवां नागकुसुमां सोमराजीं सुगन्धिकाम् ॥
तुल्यञ्च करवीरञ्च तुलसीदलमेव च ।
एतानि च क्षिपेत्तेषु कलसानां पुरोहित' ॥
कनकैरमुभैश्वराजभि' सुकसुधी तथा ।
कर्त्तव्यौ प्राक्क्रियामेण नीराजनविधौ नृप ॥
एवं सम्प्राप्यमृत्यं पूजाभिर्वन्वैश्च तथा ।
पूर्व्वोक्तान् पूजयित्वा तु नृप' समाक्रमाचरेत् ॥
यावन्नीराजनं कुर्य्यात्तावद्राजा वसेद्गृहे ।
रात्रौ न यज्ञभूमौ तु निवसेच्छान्तिमिच्छुक' ॥
आरोहयेत्तु तुरगं गजं वा तत्र पार्थिव ।
यावत् सम्प्रापयेन्नागं यानगान्यैन वै व्रजेत् ॥
मल्लैर्नानाविधैश्चैव मधुमायमथावर्के ।
मोदकैर्मांसं वलिं कुर्य्याद्राजपञ्चगव्यमपि ॥
पूर्व्वोक्तानान्तु देवानां सप्ताहं यावदुत्तमम् ।
अष्टमेऽह्नि तु देवांस्तु पूजयेत्तोरणान्तरे ॥
छायापुत्रं महाबाहुं द्विभुजं कृष्णवर्णकम् ।
अज्वलन्तं गृध्रस्थञ्च भीमाकृतिरूपञ्च भास्वता ॥
कृष्णां वामकरे बिभ्रद्दक्षिणे वरं पुन' ।
पञ्चकूर्म्मञ्च वक्ष्ये च कलसायां निवाणं मयसितम् ॥
इत्येवमुक्तं देवानां प्रतिमायां घटेऽपि वा ।
सूर्य्यपूजाविधानेन पूजयेत्तोरणान्तरे ॥ * ॥
पूजयित्वा तु रेवन्तं द्विरदं तुरगन्तथा ।
आश्वत्थामरञ्चैतं च भूषणदर्पणसम्मितम् ॥
सुवर्णाहर्निर्मिताश्च निर्म्मितकलसादिभि ।
हुतान्तु होमशक्लस्य वेदाग्न्यामन्वेदिकाम् ॥
पूर्व्वं हुत्वा यथेन्द्रगजमानं पृथक् पृथक् ।
नीयमाने ततो राज्ञि पूर्व्वोक्तञ्च निमित्तकम् ।
यज्ञारोपितं नृपतिः पश्चं वैश्यधारयेत् ।
होमकुण्डस्योत्तरस्थां वेदाङ्गे चर्म्मणि स्थितः ॥
देवविदा चाश्वविदा सहितो वीक्ष्य दैवतम् ।
नीरागं तुरगाश्वान् भक्तांश्चैव तूर्णामिमोम् ॥
दद्यात् पुरोहितस्तत्र संस्तब्धं प्राशिमनके ।
तत्पश्चाद्यदि क्षितिपतदाश्रपाद्गा वमं च च ॥
तदा स्यात् कर्म्मसंसाध्यं विपरीतमतोऽन्यथा ॥
प्रासादं कुसुमयोर्मार्च्यो मङ्गलाञ्च चटोदकं ।
आज्ञायाधाय तुरगान् गजान् भूषणं वैदिकान् ।
दर्पाञ्च कल्पभिक्षितं प्राशितं मौक्तिकैस्तथा ॥
सेचयन् सहितैर्विप्रैश्चतुरङ्गं पुरोहित' ।
दिक्पालानां ग्रहाणाञ्च मन्त्रैश्चैव सबेयणे ॥
बहुधा चाभिविन्यस्य तत्र सौवर्णदर्पणम् ।
दीपयित्वा नृपश्चक्रिक ततो गन्धमयैव च ॥
राजपुत्रांस्तथामात्यानन्यानपि च मानवान् ।
कल्पयन् द्विजश्चाद्भुत सर्व्वानेव तु दर्पयेत् ॥
चतुरङ्गबलस्यापि सल्लेखं सान्तिपौष्टिके ।
स्वलब्ध प्राज्ञं कृत्वा कमिचारकमाङ्कके ।
हरिं भूतेन वित्ता त शिर' सह गेन हैदयेत् ॥
आपाद्य' वाचिकां पश्चादभिमन्त्र्य नृपाय वै ॥
दैन्द्रे प्राभाकरैर्मन्त्रैर्दैशादकं स्वयं पुन ।
तमनेन तु मन्त्रेण समारुह्य नृपस्तदा ॥
गच्छेद्दुरपुष्पान्तु दिश धर्म्मधनैर्वृत ।
अन्तिकपुरोहितादयैव सर्व्वे एव नृपस्तदा ॥
अनुगच्छेयुरभ्यथा निमित्तानि विलोकयन् ।
यान्भक्षितैस्तुरगैश्चाराजमञ्च तथा ॥
गच्छन्नीराजने राजा दारयन्निव मेदिनीम् ।
मणिविद्रुममुक्ताद्यैस्त्वर्णरत्नैररङ्कृत' ।
क्रोधमात्र ततो गत्वा पूर्व्वद्वारेण पार्थिव ॥
स्वपुरं प्रविशेदिन्द्रैः वायात् पुरोहित' ।
तत्र गत्वा दधिवाञ्च हिरण्यमौ तथा तिलम् ।
दत्त्वा पश्चाद्द्विजेभ्यस्तु पदाद्धानानि शक्तित' ॥
एवं नीराजनं कृत्वा बलानाञ्च महीपति ।
चिरेण च स्थितां लक्ष्मीं नृपति प्राप्नुयात्तथा ॥
समन्तात्बलर्थकाल धामदोषेष वैश्य ।
येन सर्व्वेण वहसे शक्रं तेनेह मां वह ॥
येन सर्व्वेण रेवन्तं येन सर्व्वेण भास्करम् ।
वहसि तेन सर्व्वेण विजयाय वहस्व माम् ॥
आपाद्य नृपमन्त्राभ्यामश्वारोहणमाचरेत् ।
आरह्यापि मन्त्राद्यत्तु शक्रगो चरयेत्तः ॥
मणिनी च ततो भूपं मध्वोपरि स्थितम् ।
कुर्म्मीयत वधितार्थं वाभि' सह समर्थयेत् ॥
षष्ठे तु भूमिपतये तृतीयायां नीराजने ।
हतवन्नं यदि चारोहेत तत्र बुध्यति शीघ्रम् ॥
शलके शतके वापि पार्थिवस्तु यथा तथा ।
बहु नीराजनं कुर्य्यात्तत्कालञ्च विधितः ॥
वहु'योर्यं भवेद्दाक्षं यवहारविलोकने ।
तथा विनाशिने षष्ठे परदाहविमर्द्दने ।
अपमौ सहितो राजनीराजनकर्म्मी मया ॥"
इति कालिकापुराणे ८८ अध्याय ॥ * ॥
(निर्+राज+भावे ल्युट् ।) निर्मञ्छनम् । आरति इति भाषा । तत्र पञ्चनीराजनं यथा,
"पञ्चनीराजनं कुर्य्यात् प्रथमं दीपमालया ।
द्वितीयं सोदकाब्जेन तृतीयं धौतवाससा ॥
चूताश्वत्थादिपत्रैश्च चतुर्थं परिकीर्त्तितम् ।
पञ्चमं प्रणिपातेन साष्टाङ्गेन यथाविधि ॥"
इति काशीखण्डम् ॥
तत्र वर्त्तिकादिप्रमाणं यथा —
"कुङ्कुमागुरुकर्पूरघृतचन्दननिर्म्मिता ।
वर्त्तिका सप्त वा पञ्च कृत्वा वा दीपनीरजनम् ॥

कुर्य्यात् घृतप्रदीपेन प्रत्यब्दादिपराधके ।
हरे पञ्चप्रदीपेन बन्धुभी भक्तितत्परः ॥"
इति पाद्मोत्तरखण्डे १७ अध्यायः ॥*॥
अथ नीराजनमाहात्म्यम् ।
स्कान्दे ब्रह्मनारदसंवादे ।
"बहुवर्त्तिसमायुक्तं ज्वलन्तं केशवोपरि ।
कुर्य्यादारात्रिकं यस्तु कल्पकोटिं वसेद्दिवि ॥
कर्पूरेण तु यः कुर्य्याद्भक्त्या केशवमन्दिरे ।
आरात्रिकं मुनिश्रेष्ठ ! प्रविशेद्विष्णुमव्ययम् ॥"
तद्वाक्यञ्च ।
"दीपेनैव सकर्पूरं कार्य्यमारात्रिकं शुभं ।
कृष्णस्य वसते लोके सप्तकल्पानि माधव ॥"
तत्रैव शिवोमासंवादे ।
"मन्त्रहीनं क्रियाहीनं यत् कृतं पूजनं हरेः ।
सर्व्वं सम्पूर्णतामेति कृते नीराजने शिवे ॥"
हरिभक्तिसुधोदये ।
"दृष्ट्वा नीराजनं विष्णोर्दीपावल्या सुराजया ।
तमोविकारं जयति किमु तत्कारको भवः ॥"
अन्यत्र च ।
"कोटयो ब्रह्महत्यानामगम्यागमकोटयः ।
दहत्यालोकमात्रेण विष्णोः सारात्रिकं मुखम् ॥
यच्च दीपस्य माहात्म्यं पूर्व्वं लिखितमस्ति तत् ।
ज्ञेयं सर्व्वमथापि प्रायेणाभिहितोऽन्ययोः ।
अत आरात्रिकस्याथ महानीराजनाख्यकम् ।
ज्ञेयं दीपवत् सर्व्वैर्ज्ञेयमारात्रिकञ्च यत् ॥"
तदुक्तं श्रीपुलस्त्येन विष्णुधर्म्मे ।
"धूपं चारात्रिकं पश्येत् कराभ्याञ्च प्रवन्दते ।
कुलकोटिं समुद्धृत्य याति विष्णोः परं पदम् ॥"
बह्वागमे च ।
"नीराजनञ्च यः पश्येद्देवदेवस्य चक्रिणः ।
सप्तजन्मानि विप्रः स्यादन्ते च परमं पदम् ॥"
इति हरिभक्तिविलासः ॥
अवशिष्टं आरात्रिकशब्दे द्रष्टव्यम् ॥

नीरिन्दु, पुं, (नि+ईर कम्पने+भावे क्विप् । नीरा नितरां कम्पनेन इन्दति सुभगेन शोभते इति । इदि परमैश्वर्य्ये+उन् ।) अश्मास्फोटवृक्षः । इति शब्दचन्द्रिका । आर्द्रथोहा इति भाषा ॥

नीरुज, [ज्] पुं स्त्री, (निर्+रुज+भावे क्विप् ।) रोगाभावः । तत्पर्य्यायः । स्वास्थ्यम् २ वार्त्तम् ३ अनामयम् ४ आरोग्यम् ५ । (रुज्+भावे क्विप् । निर्गता रुक् रोगो यस्य ।) रोगशून्ये, त्रि । तत्पर्य्यायः । पटुः २ उल्लाघः ३ वार्त्तः ४ कल्यः ५ । इति हेमचन्द्रः ।३।११२॥ (यथा, सुश्रुते चिकित्सितस्थाने २५ अध्याये ।
"एतेन पाल्यो वहन्ति नीरुजो निरुपद्रवाः ॥")

नीरुजा, स्त्री (निर्गता रुजा रोगो यस्मात् ।) कुष्ठौषधिः । इति जटाधरः ॥

नीरुज त्रि, (निर्गता रुजा रोगो यस्य ।) रोगाभाववान् । यथा शाम्बपुराणे ।
"शाम्बोऽपि नारदादेव श्रुत्वा सर्व्वावधारणम् ।
बभूवासौ नीरुजः कीर्त्तिमाप्तोऽरोगात् सुदुस्तरात् ॥"

नीरूप, त्रि, (निर्गतं रूपमस्मात् ।) रूपाभाववैशिष्टम् । यथा । नीरूपस्यापि कालस्य इन्द्रियवेद्यत्वाभ्युपगमेनेति वेदान्तपरिभाषा ॥

नीरेणुक, त्रि, (निर्गतो रेणुः पांशुर्यस्मात् । कप् ।) धूलिशून्यभूम्यादिः । यथा । नीरेणुकभूरभूदिति वसुधरलाकरः ॥

नीलं, क्ली, (नीलतीति । नील+अच् ।) नीली । इति मेदिनी । ले २२ ॥ काचलवणम् । तालीशपत्रम् । विषम् । सौवीराञ्जनम् । (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"सुवीरजं पार्व्वतीयं सौवीरं नीलमञ्जनम् ॥")
तुत्थम् । इति राजनिर्घण्टः ॥ नृत्याङ्गहारोपाश्रितकरणान्तर्गतकरणविशेषः । इति सङ्गीतदामोदरः ॥

नील, पुं, पर्व्वतविशेषः । स तु इलावृतस्योत्तरतो रम्यकवर्षस्य सीमापर्व्वतः । प्रागायत उभयतः क्षीरोदावधि द्विसहस्रयोजनपृथुः । अयुतयोजनोत्सेधः । इति श्रीभागवते ५ स्कन्धे १६ अध्यायः ॥ (तथाच विष्णुपुराणे ।२।२।१०।
"नीलः श्वेतश्च शृङ्गी च उत्तरे वर्षपर्व्वताः ।
लक्षप्रमाणौ द्वौ मध्यौ दशहीनास्तथापरे ॥"
"लक्षप्रमाणौ द्वौ प्राक्पश्चिमतो दैर्घ्येण निषधनीलौ । यद्यपि जम्बुद्वीपस्य मण्डलाकारस्य लक्षयोजनप्रमाणत्वात् तन्मध्ये रेखायामेव लक्षप्रमाणत्वं निषधनीलौ तु तन्मध्यरेखातो दक्षिणोत्तरयोः सहस्रयोजनसहस्रान्तरितत्वादीषन्न्यूनौ तथापि स्थूलदृष्ट्या लक्षप्रमाणाविति उक्तम् ॥" इति तट्टीकायां स्वामी ॥*॥
(नीलाञ्जनस्य । तत्पर्य्यायो यथा —
"नीलः स्यान्नीलपर्णिका ॥"
इति वैद्यकरत्नमालायाम् ॥)
मणिविशेषः । नीलम् इति पारस्यभाषा ॥ अस्याधिष्ठातृदेवता शनिः । यथा,—
"माणिक्यमुक्ताफलविद्रुमाणि
गारुत्मतं पुष्पकवज्रनीलम् ।
गोमेदवैदूर्य्यकमर्कतः स्यू
रत्नान्यथोऽज्ञस्य मुदे सुवर्णम् ॥"
इति मुहूर्त्तचिन्तामणिः ॥
तत्पर्य्यायः । सौरिरत्नम् २ नीलाश्मा ३ नीलोपलः ४ तृणग्राही ५ महानीलः ६ सुनीलकः ७ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । कफपित्तानिलापहत्वम् । शरीरे धृते सौरिश्चेद्वरदो भवति । इति राजनिर्घण्टः ॥*॥
अथ इन्द्रनीलमणेरुत्पत्तिपरीक्षादि यथा,—
"तत्रैव सिंहलवधूकरपल्लवाग्र-
व्यालूनबालतवलीकुसुमप्रवाले ।
देशे पपात दितिजस्य नितान्तकान्त-
प्रोत्फुल्लनीरजसमद्युतिनेत्रयुग्मम् ।
तत्प्रत्ययादुभयशोभनवीचिभासा
विस्तारिणी जलनिधेरुपकच्छभूमिः ।
प्रोद्भिन्नकेतकवनप्रतिबद्धलेखा
सान्द्रेन्द्रनीलमणिरत्नवती विभाति ॥
तत्रासिताब्जदलभृङ्गबलाभिभृङ्ग-
शार्ङ्गायुधाभहरकण्ठकलायपुष्पैः ।
शुक्लेतरैश्च कुसुमैर्गिरिकर्णिकाया-
स्तस्मिन् भवन्ति मणयः सदृशावभासाः ॥
अन्ये प्रसन्नपयसः पयसां निधातु-
रम्बुत्विषः शिखिगलप्रतिमास्तथान्ये ।
नीलीरसप्रभवबुद्बुदभाश्च केचित्
केचित्तथा समदकोकिलकण्ठभासः ॥
एकप्रकारा विलसन्तः शोभावभासिनः ।
जायन्ते तत्र तस्मिन् इन्द्रनीला महागुणाः ॥
मृत्पाषाणशिलाच्छिद्रकर्कराभाससंयुताः ।
अभ्रिकापटलच्छायावर्णदोषैश्च दूषिताः ॥
त एव हि जायन्ते मणयस्तत्र भूरयः ।
शास्त्रवेदितधियस्तान् प्रशंसन्ति सूरयः ॥
धार्य्यमाणस्य ये दृष्टाः पद्मरागमणेर्गुणाः ।
धारणादिन्द्रनीलस्य तानेवाप्नोति मानवः ॥
यथा च पद्मरागाणां जातिकर्म्मभयं भवेत् ।
इन्द्रनीलेष्वपि तथा द्रष्टव्यमविशेषतः ॥
परीक्षाप्रत्ययैर्यैश्च पद्मरागः परीक्ष्यते ।
स एव प्रत्यया दृष्टा इन्द्रनीलमणेरपि ॥
यावन्तश्च क्रमेरन्धि पद्मरागः पयोगतः ।
इन्द्रनीलमणिस्तस्मात् क्रमेण सुमहत्तरम् ॥
तथापि न परीक्षार्थं गुणानामतिवृद्धये ।
मणिरग्नौ समाधेयः कथञ्चिदपि कश्चन ॥
अग्निमात्रापरिज्ञाने दाहदोषैश्च दूषितः ।
सोऽनर्थाय भवेद्भर्त्तुः कर्त्तुः कारयितुस्तथा ॥
काचोत्पलकरवीरस्फटिकाद्या इह बुधैः सवै-
दूर्य्याः ।
कथिता विजातय इमे सदृशा मणिनेन्द्रनीलेन ॥
गुरुभावकठिनभावावेतेषां नित्यमेव विज्ञेयौ ।
काचादृपपाण्डुरविशदभावौ विशेषेण ॥
इन्द्रनीलो यदा कश्चिद् बिभर्त्ति ताम्रवर्णताम् ।
रक्तनीलौ तथा ज्ञेयौ करवीरोत्पलप्रभौ ॥
यस्य मध्यगता भाति नीलस्येन्द्रायुधप्रभा ।
तदिन्द्रनीलमित्याहुर्महार्घं भुवि दुर्लभम् ॥
यस्तु वर्णस्य भूयस्त्वात् क्षीरे शतगुणे स्थितः ।
नीलतां तनयेत् सर्व्वं महानील स उच्यते ॥
यत् पद्मरागस्य महागुणस्य
मूल्यं भवेन्माषसमुन्मितस्य ।
तदिन्द्रनीलस्य महागुणस्य
सुवर्णसंख्यातुलितस्य मूल्यम् ॥"
इति गरुडपुराणे इन्द्रनीलपरीक्षा ॥*॥
वानरान्तरः । इति मेदिनी । ले, २१ ॥ नीलवृक्षः । नीलौषधिः । निधिविशेषः । लाञ्छनम् । इति हेमचन्द्रः ॥ मञ्जुघोषः । इति त्रिकाण्डशेषः ॥ वटवृक्षः । इति राजनिर्घण्टः ॥ नीलवर्णे, त्रि । इत्यमरः ॥ (यथा, देवीभागवते । ३ । ८ । १८ ।
"नील वस्त्रयुतैश्च पाण्डुराश्च महाद्युते ॥") ।
नीलवर्णवस्तूनि यथा । शुकः १ शैवालम् २ दूर्व्वा ३ वालतृणम् ४ बुधः ५ वंशाङ्कुरः ६ मरकतः ७ इन्द्रनीलमणिः ८ इन्द्रवारुणि

इति कविकल्पलता ॥ अजमीढस्य राज्ञ नीलिन्यां पत्न्यां जात पुत्र । यथा । "अजमीढस्य नीलिनी नाम पत्नी तस्यां नीलसंज्ञ पुत्रो ऽभवत् ।" इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (माहिष्मतीवासी नृपतिविशेषः । अयिन्तु अस्य दुहितरमुपयम्य परेणैव छन्दमात्र पावकपार्श्वमयपात्रो दत्तवान् । सम्प्रति काले माद्रेय सहदेवस्तु दिग्विजयक्रमेण अस्य नगर मनराध्य वैश्वानरात् अभयमवाप्तवान् । ततो ऽश्ववाहनं सुधा प्राप्तिमवाप । एतद्विवरण महाभारते । २ । ३१ । अध्याये विस्तरतो द्रष्टव्यम् ॥ ७ ॥ नागविशेषः । यथा महाभारते । १ । ३५ । ७ ।
"नीलानीलौ तथा नागौ कल्माषशबलौ तथा ।"
नीलक, क्ली, (नीलमेव । स्वार्थे कन् ।) काच लवणम् । वर्त्तलोहम् । अश्वनकृषि, पुं । इति राजनिर्घण्टः ॥
नीलकण्ठ, पुं, (नीलः नीलवर्णः कण्ठो यस्य ।) शिवः । (यथा महाभारते । १ । १८ । ४३—४४ ।
"ततोऽथ मोहितं यस्य गन्धमाघ्राय तद्विषम् ।
प्राप्यलोकरक्षार्थं ब्रह्मणो वचनाच्छिवः ।
दधार भगवान् कण्ठे मन्त्रमूर्त्तिर्महेश्वरः ।
तदा प्रभृति देवस्तु नीलकण्ठ इति श्रुतः ॥")
मयूरः । इत्यमरः । ३ । ३ । ३६ ॥ (यथा, मेघदूते । ७९ ।
"यामध्यास्ते दिवसविगमे नीलकण्ठः सुहृद्वः ।")
पीतसारः । दात्यूहः । ग्रामचटकः । खञ्जरीटः । इति हेमचन्द्रः ॥ मूलकी, स्त्री । इति राजनिर्घण्टः ॥ ७ ॥ दिक्पतरागे नीलकण्ठ-दर्शनविधिर्यथा,—
"कृत्वा नीराजनं राजा बलवृद्ध्यै यथाबलम् ।
शोभनं खञ्जनं पश्येत् जलगोगोष्ठसन्निधौ ॥"
दर्शनानन्तर नमस्कारमन्त्रो यथा,—
"नीलग्रीव शुभग्रीव सर्वकामफलप्रद ।
पृथिव्यामवतीर्णोऽसि खञ्जरीट । नमोऽस्तु ते ॥
त्वं योगयुक्तो मुनिपुत्रकस्त्वम्
अदर्शनामेषि शिखोद्गमेन ।
त्वं दृश्यसे प्रावृषि निर्गतायां
त्वं खञ्जनाश्चर्यमयो नमस्ते ॥"
दर्शनविशेषोपदिस्थितस्य तस्य दर्शनफलं यथा,—
"अक्षेषु गोषु गजवाजिमहोरगेषु
राज्यप्रदः कुशलदः शुचिशाद्वलेषु ।
भस्मास्थिकेशनखलोमतुषेषु दृष्टो
दुःखं ददाति बहुधा खलु खञ्जरीटः ॥"
दिग्विशेषे फल यथा,—
"दिश प्रकाश कार्यसिद्धिरतुला प्राक् पूर्वायां भय
याम्यामनिष्ट सुरदिशि कलिलाभः सम्प्रजाये ।
वारुण्यां स्त्रीसमागमप्रधानिल दिग्भागगा चोत्तरे
ऐशान्यां मरणं ध्रुवं विगर्हितं दिग्भागगे खञ्जने ॥"
अशुभाशुभदर्शनप्रायश्चित्त यथा,—
"अशुभं खञ्जनं दृष्ट्वा देवब्राह्मणपूजनम् ।
दानं कुर्वीत कृष्णाय स्नानं सर्वौषधीजले ॥"
इति तिथ्यादितत्त्वे दुर्गोत्सवतत्त्वम् ॥
(नीलग्रीवस्तम्भः । अस्य पर्यायो यथा,—
"नीलकण्ठः नीलग्रीवः नीलाङ्गः प्रियकोऽरुणः ।"
इति वैद्यकरत्नमालायाम् ॥)
नीलकण्ठाक्ष, क्ली, (नीलकण्ठो महादेवस्तत् प्रियोऽक्षो यत्र ।) रुद्राक्षम् । इति राज निर्घण्टः ॥ (नीलकण्ठः खञ्जनस्य अक्षिणीव अक्षिणी यस्य । बहुव्रीहिः ।) खञ्जनाक्षि त्रि ॥
नीलकन्द, पुं (नीलः कन्दो मूलं यस्य ।) महिष-कन्दकः । तत्पर्यायः । कन्दाख्यः २ वनवासी ३ विषकन्दः ४ महिषीकन्दः ५ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । कफवातामयतृष्णाघ्न भाषितत्वम् । रुच्यत्वम् । विजश्च वश्य महा-सिद्धिकरत्वञ्च । इति राजनिर्घण्टः ॥ नील वर्णत्वञ्च ॥
नीलकमल, क्ली (नील कमल पद्मम् ।) नील वर्णपद्मम् । तत्पर्यायः । उत्पलम् २ नील पङ्कजम् ३ नीलपद्मम् ४ नीलाब्जम् ५ । अस्य गुणाः । शीतलत्वम् । स्वादुत्वम् । सुगन्धित्वम् । पित्तनाशित्वम् । रुच्यत्वम् । रसायने श्रेष्ठत्वम् । देहदार्ढ्यकेशदत्वञ्च । इति राजनिर्घण्टः ॥ नील वर्णत्वञ्च ॥
नीलकुन्तला, स्त्री, (नीलाः नीलवर्णाः कुन्तला यस्याः ।) गौर्याः सखीविशेषः । यथा,—
"सखी रत्नप्रभा नाम कलाभिर्गुणिविश्रुता ।
या विजयाभिधा प्राग् सखी सा नीलकुन्तला ॥"
इति बृहद्धर्म्मपुराणे २४ अध्यायः ॥
नीलकुरण्टक:, पुं, (नील कुरण्टक ।) नील झिण्टी । इति रत्नमाला ॥ (विवृतिरस्य नील-झिण्टीशब्दे ज्ञातव्या ॥)
नीलक्रान्ता, स्त्री, (नीलेन नीलवर्णेन क्रान्ता ।) विष्णुक्रान्ता । इति राजनिर्घण्टः ॥
नीलक्रौञ्च पुं, (नील क्रौञ्च ।) नीलबकः । तत्पर्यायः । नीलाङ्गः २ दीर्घग्रीवः ३ अति जागरः ४ । इति राजनिर्घण्टः ॥
नीलगणेश, पुं (नीलो नीलवर्णो गणेशः ।) नीलवर्णगणपतिः । इति भूतडामरः ॥ अपि च ।
"नीलाय नक्तस्तोलस्थायार्धविनाशिने ।
गणेशाय नमो नीलकमलामलकान्तये ॥"
इति मीनाक्षी ॥
नीलग्रीव पुं (नीला नीलवर्णा ग्रीवा यस्य ।) महादेवः । इति हलायुधः ॥ (यथा, महा भारते । ३ । ३९ । ७४ ।
"देवदेव महादेव नीलग्रीव जटाधर ॥")
नीलवर्णग्रीवायुक्ते, त्रि ॥
नीलङ्गु, पुं, (निश्चयेन अङ्गतीति । नि+अगि गतौ+"खष्ट्यधोर्नीलङ्गुश्च" उणा० १ । ३७ । इति कुप्रत्ययेन निपातनात् पूर्वदीर्घे साधुः ।) अतिकृष्णमधुमक्षिकाः । इत्यमरटीकायां भरतः ॥ क्रिमिविशेषः । शृगालः । इति मेदिनी

नील्यादिगुणादिदर्शिता ॥ (अमरटीका । गहनम् । इति विश्वः । नी, ५० ॥)
नीलचर्म्म [न्] स्त्री, (नील चर्म्म फलत्वक् यस्य ।) परूषकम् । इति राजनिर्घण्टः ॥ (नीलञ्च तत् चर्म्म चेति ।) नीलवर्णाजिनम् ॥ (नीलचर्म्मपरिहिते, त्रि ॥)
नीलज, क्ली (नीलात् जायते इति । जन+ड ।) वर्त्तलोहम् । इति राजनिर्घण्टः ॥ नीलजाते, त्रि ॥ (स्त्री, नीलात् नीलपर्व्वतात् जायते इति । वितस्ता नदी । यथा, राजतरङ्गिण्याम् । ५ । ९४ ।
"प्रायाच्छ्रीगुणवल्लेन सुर्व्यं गाङ्गतरङ्गिणा ।
मनोरमा वहना निर्मिता नीलजा चरित् ॥")
नीलझिण्टी, स्त्री (नीला नीलवर्णा झिण्टी ।) नीलवर्णझिण्टीपुष्पवृक्ष । तत्पर्यायः । नील कुरण्टः २ नीलकुसुमा ३ बाणा ४ बाणा ५ दासी ६ कण्टकार्त्तगला ७ । अस्या गुणाः । कटु त्वम् । तिक्तत्वम् । दन्तामयशूलवातकफकास त्वगदोषनाशित्वञ्च । इति राजनिर्घण्टः ॥
नीलतरु, पुं, (नीलतरु ।) नारिकेल । इति राजनिर्घण्टः ॥
नीलताल, पुं (नीलस्ताल ।) हिन्ताल । तमाल । इति राजनिर्घण्टः ॥
नीलदूर्व्वा, स्त्री, (नीला दूर्व्वा ।) हरितदूर्व्वा । तत्पर्यायः । हरिता २ शाद्वली ३ श्यामा ४ शीता ५ शतपर्व्विका ६ अनन्ता ७ पूता ८ शतवल्शि ९ अनुग्रवल्लिका १० प्रिया ११ विष्णु१२ मङ्गला१३ पथ्या१४ सुभगा१५ भूतघ्नी१६ शतमूला१७ महौषधी१८ शिवा१९ गौरी २० श्यामा २१ ॥ (यथा निघण्टौ चास्य लक्षणं ।
"नीलदूर्व्वा स्मृता श्यामा शाद्वलं हरितं तथा ।
शतपर्व्वा शीतकुम्भी शीतला मालती तथा ॥")
अस्या गुणाः । हिमत्वम् । तिक्तत्वम् । मधु-रत्वम् । तुवरत्वम् । लघुत्वम् । रक्तपित्ताति सारकफवातज्वरनाशित्वञ्च । भूतबाधादि दोषघ्नत्वम् । शोणितदत्वञ्च । इति राजनिर्घण्टः ॥ (अस्याः पर्यायान्तरं गुणान्तरञ्च यथा —
"नीलदूर्व्वा रुहानन्ता भार्गवी शतपर्व्विका ।
शष्पं सहस्रवीर्य्या च शतवल्ली च कीर्त्तिता ॥
नीलदूर्व्वा हिमा तिक्ता मधुरा तुवरा हरेत् ।
कफपित्तास्रवीसर्पतृष्णादाहत्वगामयान् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
नीलध्वज, पुं (नील नीलवर्ण ध्वज इव ।) तमालवृक्ष । इति राजनिर्घण्टः ॥ (नीलो ध्वजो यस्य ।) राजविशेषः । अस्य पुरी माहि ष्मती । भार्य्याज्वाला । कन्या स्वाहा अग्नौ प्रदत्ता ।
"अत्र तस्य नृपो राजन् । पुरी माहिष्मती वरा ।
नीलध्वजेन वीरेण रक्षिता द्युमतिश्वरान् ॥
नीलध्वजस्य महिषी ज्वालानाम्नी शुभस्वना ।
स्वाहा कन्या प्रदत्ता या सुन्दरी धर्म्मतत्परा ॥"

इति जैमिनिभारते आश्वमेधिके पर्व्वणि १५ अध्यायः । नीलध्वजाविशिष्टे, त्रि ॥

नीलनिर्गुण्डी, स्त्री, (नीला निर्गुण्डी ।) नीलसिन्धुवारः । इति राजनिर्घण्टः ॥

नीलनिर्य्यासक, पुं, (नीलः निर्य्यासो यस्य । कप् ।) नीलासनवृक्षः । इति राजनिर्घण्टः ॥ श्यामवर्णनिर्य्यासश्च ॥

नीलपङ्क, क्ली, (नीलं पङ्कमिव ।) अन्धकारः । इति त्रिकाण्डशेषः ॥ श्यामवर्णकर्दमश्च ॥

नीलपत्र, क्ली, (नीलं पत्रं पुष्पदलं यस्य ।) इन्दीवरम् । इति शब्दचन्द्रिका ॥ नीलवर्णपत्रयुक्ते, त्रि ॥

नीलपत्र, पुं, (नीलानि पत्राणि यस्य ।) गुण्ड्रतृणम् । अश्मन्तकवृक्षः । नीलासनवृक्षः । दाडिमः । इति राजनिर्घण्टः ॥

नीलपद्म, क्ली, (नीलं पद्मम् ।) नीलकमलम् । इति शब्दचन्द्रिका ॥ (नीलकमलशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

नीलपिङ्गला, स्त्री, (नीला पिङ्गला चेति कर्म्मधारयः ।) गोजातिविशेषः । यथा,—
"गवां जातिन्तु वक्ष्यामि शृणुष्वैकमना द्विज ! ।
प्रथमा गौरकपिला द्वितीया गौरपिङ्गला ॥
तृतीया रक्तकपिला चतुर्थी नीलपिङ्गला ।
पञ्चमी शुक्लपिङ्गाक्षी षष्ठी तु शुक्लपिङ्गला ॥
सप्तमी चित्रपिङ्गाक्षी अष्टमी बभ्रुरोहिणी ।
नवमी श्वेतपिङ्गाक्षी दशमी श्वेतपिङ्गला ॥
तादृशान्येऽप्यनड्वाहः कपिलास्तु प्रकीर्त्तिताः ॥"
इति बृहद्धर्म्मपुराणे उत्तरखण्डे १५ अध्यायः ॥

नीलपिच्छ, पुं, (नीलं पिच्छं यस्य ।) श्येनपक्षी । इति राजनिर्घण्टः ॥

नीलपुनर्नवा, स्त्री, (नीला पुनर्नवा ।) श्यामवर्णपुनर्नवाशाकम् । नीलगदहपूर्णा इति हिन्दी भाषा ॥ तत्पर्य्यायः । नीला २ श्यामा ३ श्यामाख्या ४ नीलवर्षाभूः ५ । अस्या गुणाः । तिक्तत्वम् । कटुत्वम् । उष्णत्वम् । रसायनत्वम् । हृद्रोगपाण्डुश्वयथुश्वासवातकफनाशित्वञ्च । इति राजनिर्घण्टः ॥

नीलपुष्प, क्ली, (नीलं पुष्पमस्य ।) ग्रन्थिपर्णम् । इति भावप्रकाशः ॥ (नीलञ्च तत् पुष्पञ्चेति ।) नीलवर्णकुसुमञ्च ॥

नीलपुष्प, पुं, (नीलं पुष्पं यस्य ।) नीलभृङ्गराजः । नीलाम्लानः । इति राजनिर्घण्टः ॥

नीलपुष्पा, स्त्री, (नीलं पुष्पं यस्याः ।) विष्णुक्रान्ता । इति राजनिर्घण्टः ॥

नीलपुष्पिका, स्त्री, (नीलं पुष्पं यस्याः । कप् । कापि अत इत्वम् ।) अतसी । इति राजनिर्घण्टः ॥ नाली । इति रत्नमाला ॥

नीलपुष्पी, स्त्री, (नीलं पुष्पं यस्याः । ङीष् ।) नीलदूर्व्वा । इति रत्नमाला ॥ (शेफालिका । तत्पर्य्यायो यथा —
"नीलपुष्पी तु निर्गुण्डी शेफाली सुवहा च सा ॥"
अतसी । तत्पर्य्यायो यथा,—
"अतसी नीलपुष्पी च पार्व्वती स्यादुमा क्षुमा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

नीलफला, स्त्री, (नीलं फलं यस्याः ।) जम्बूः । इति राजनिर्घण्टः ॥

नीलभृङ्गराज, पुं, (नीलो भृङ्गराजः ।) नीलवर्णभृङ्गराजः । नीलकेशरिया इति नीलभीमरिया इति च भाषा । तत्पर्य्यायः । महाभृङ्गः १ महानीलः २ सुनीलकः ४ नीलपुष्पः ५ श्यामलः ६ । अस्य गुणाः । तिक्तत्वम् । उष्णत्वम् । चक्षुष्यत्वम् । केशरञ्जनत्वम् । कफामयशोफश्वित्रनाशित्वम् । रसायनत्वञ्च । इति राजनिर्घण्टः ॥

नीलमणि, पुं, (नीलो मणिः ।) स्वनामख्यातमणिः । तत्पर्य्यायः । मसारः २ । इति हारावली ॥ १८५ ॥ अस्य विवरणं नीलशब्दे द्रष्टव्यम् ॥

नीलमाधव, पुं, (नीलो नीलवर्णो माधवः । नीलपर्व्वतस्थो माधवो वा ।) विष्णुः । जगन्नाथः । यथा,—
"प्रेषितोऽस्मि हरि द्रष्टुमहमस्य नीलमाधवम् ।
दृष्ट्वा यावत् सुचरितं वार्त्तां नेष्यामि सोऽप्यहम् ॥"
इत्युत्कलखण्डे ७ अध्यायः ॥

नीलमाष, पुं, (नीलो नीलवर्णो माषः ।) राजमाषः । इति राजनिर्घण्टः ॥

नीलमौलिक, पुं, (नीलमौलं नीलवर्णनिमीलनमस्यास्तीति । नीलमौल+ठन् ।) खद्योतः । इति शब्दमाला ॥

नीलम्लानिका, स्त्री, (नीला नीलवर्णा म्लानिकेव ।) पुष्पकाशीशम् । इति राजनिर्घण्टः ॥ छायामयान्तश्च ॥

नीललोह, क्ली, (नीलं नीलवर्णं लोहम् ।) वर्त्तलोहम् ।) इति राजनिर्घण्टः ॥

नीललोहित, पुं, (नीलश्चासौ लोहितश्चेति । "वर्णो वर्णेन ।" २ । १ । ६९ । इति समासः । नीलः कण्ठे लोहितश्च केशेष्विति स्वामी ।) शिवः । इत्यमरः । १ । १ । ३५ ॥ (यथा, कुमारे । २ । ५७ ।
"संयुगे सांयुगीनं तमुद्यन्तं प्रसहेत कः ।
अंशादृते निषिक्तस्य नीललोहितरेतसः ॥")
चैत्रे मासि तस्य व्रतविधानं यथा —
"चैत्रे शिवोत्सवं कृत्वा नृत्यगीतमहोत्सवैः ।
स्नात्वा त्रिसन्ध्यं रात्रौ च हविष्याशी जितेन्द्रियः ॥
क्रमशश्च भगवति प्रथमे नीललोहिते ।
उपोष्य कृत्वा पक्षाभ्यां व्रतमेतत् समर्पयेत् ॥"
इति माघकल्पे बृहद्धर्म्मपुराणम् ॥
कल्पविशेषः । इति महाभारतम् ॥ (अस्य विवरणं कल्पशब्दे द्रष्टव्यम् ॥) नीलरक्तमिश्रितवर्णश्च ॥

नीललोहिता, स्त्री, (नीला लोहिता च ।) भूमिजम्बुः । इति शब्दचन्द्रिका ॥ शिवा च ॥

नीलवर्षाभू, स्त्री, (नीला नीलवर्णा वर्षाभूः ।) नीलपुनर्नवा । इति राजनिर्घण्टः ॥ तद्भेदे, पुं ॥

नीलवल्ली, स्त्री, (नीला नीलवर्णा वल्ली ।) वन्दाकम् । इति रत्नमाला ॥

नीलवसन, पुं, (नीलं वसनं वस्त्रं यस्य ।) शनैश्चरः । इति हारावली । १२ ॥ (बलरामः । परिधेयनीलवस्त्रत्वादस्य तथात्वम् ॥) नीलवस्त्रयुक्ते, त्रि ॥

नीलवस्त्र, पुं, (नीलं वस्त्रं यस्य ।) बलरामः । इति हेमचन्द्रः । २ । १३६ ॥ (नीलं वस्त्रम् ।) नीलवर्णवसने, क्ली । यथा,—
"स्त्रीक्रीडाशयनीयादौ नीलवस्त्रं न दुष्यति ।
नीलीवस्त्रं न धृत्वैव नीलीमभिरयं दृशेत् ॥"
इति गारुडे प्रायश्चित्ताध्यायः ॥
तस्य धारणप्रायश्चित्तादि यथा । यत्र भविष्यपुराणम् ।
"स्वयम्भेति महाबाहो ! नीलीरक्तस्य धारणात् ।
वाससो मध्यमाद्भूत ! गन्तो मम शतत्रयम् ॥
पालनाद्विक्रयाच्चैव उद्वृत्तैरुपजीवनात् ।
पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति ॥
नीलीरक्तेन वस्त्रेण यत् कर्म्म कुरुते द्विजः ।
स्नानं दानं तपो होमः स्वाध्यायः पितृतर्पणम् ॥
वृथा तस्य महाबाहो नीलीवस्त्रस्य धारणात् ।
नीलीरक्तं यदा वस्त्रं कश्चिद्विप्रस्तु धारयेत् ।
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥
इदमशाने । स्नाने तु द्वैगुण्यम् । अस्यापवादः ।
नीलीव्यवहारापवादः ।
स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यति ॥
इति प्रायश्चित्तविवेकः ॥

नीलवासाः, पुं, (नीलं वासो वस्त्रं यस्य ।) शनिग्रहः । इति त्रिकाण्डशेषः ॥ (नीलवस्त्रयुक्ते, त्रि । यथा, हरिवंशे । ८२ । ४३ ।
"श्रीमद्धलिकमस्त्राणं प्रपश्यामि भोगिनम् ।
सहस्रशिरसं देवमनन्तं नीलवाससम् ॥")

नीलदूर्वा, स्त्री, (नीला नीलवर्णा दूर्वा ।) नीलदूबा । नीलवर्णदूबा इति भाषा ॥ तत्पर्य्यायः । अम्लानी १ नीलपुष्पी २ शतलोमशा ३ । इति रत्नमाला ॥ (यथा,—
"नीलदूर्वारसैस्तैलसिन्धुकाञ्जिकसंयुतम् ।
बहुशः पूरणात् कर्णे निहन्ति कृमिपातनम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे कर्णरोगाधिकारे ॥)

नीलवृक्ष, पुं, (नीलो वृक्षः ।) [illegible] । तत्पर्य्यायः । नीलः २ वातारिः ३ शोफनाशनः ४ नरनामा ५ नयद्रुमः ६ नवाम्रः ७ नरप्रियः ८ । अस्य गुणाः । कटुत्वम् । कषायत्वम् । उष्णत्वम् । मधुरत्वम् । वाताध्मानानाहनाशित्वञ्च । इति राजनिर्घण्टः ॥

नीलवृन्तक, क्ली, (नीलवर्णं वृन्तं यस्य । कप् ।) तूलम् । इति राजनिर्घण्टः ॥

नीलवृष, पुं, श्यामवर्णवृषः । उत्सर्गविहितः । तल्लक्षणं यथा —
"लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां स नीलो
इति

अपि च ।
"लोहितो यस्तु वर्णेन मुखे पुच्छे च पाण्डुरः ।
श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥"
तत्रोत्सर्गे गयाश्राद्धादिफलञ्च यथा,—
"एष्टव्या बहवः पुत्त्रा यद्येकोऽपि गयां व्रजेत् ।
यजेत वाश्वमेधेन नीलं वा वृषमुत्सृजेत् ॥"
इति देवीपुराणम् ॥

नीलद्रुमा, स्त्री, (नीलं नीलवर्णं पुष्पपत्रादिकं द्रवति प्रसूते इति । द्रु + इगुपधेति कः । ततष्टाप् ।) मार्गीकी । इति राजनिर्घण्टः ॥ (मार्गीकीशब्देऽस्या गुणाः पर्य्यायाश्च ज्ञेयाः ॥)

नीलपद्मं, क्ली, पद्मविशेषः । यथा,—
"वसु नीलोत्पलं देवं महाराजाधिराजकम् ।
एकान्तरितनक्षत्रा यस्मिन् दृश्यन्ते ग्रहाः ।
वेष्टन्ते च पदं यानि नीलपद्ममिदं स्मृतम् ॥"
इति मातृकाभेदतन्त्रे ८१ अध्यायः ।
नीलभाण्डिकामयश्च ॥

नीलभृङ्गु, पुं, (नीलः भृङ्गुः ।) शोभाञ्जनः । इति राजनिर्घण्टः ॥

नीलसार, पुं, (नील सारो यस्य ।) तिन्दुक वृक्षः । इति राजनिर्घण्टः ॥

नीलसिन्धुवार, पुं (नीलः सिन्धुवारः ।) कृष्णवर्णसिन्धुवारवृक्षः । नीलसिन्दुवार इति भाषा । तत्पर्य्यायः । नीलवला २ नीलनिर्गुण्डी ३ नीलसिन्धुकः ४ सिन्धुकः ५ कपिका ६ भूतकेशी ७ इन्द्राणी ८ नीलिका ९ नीलनिर्गुण्डी १० । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । तिक्तत्वम् । रूक्षत्वम् । कासश्लेष्मशोफसमीरणाध्मानप्रदराध्मानाशित्वञ्च । इति राजनिर्घण्टः ॥

नीला, स्त्री,(नीलो वर्णोऽस्त्यस्या इति । अच् । ततष्टाप् ।) नीलवर्णमक्षिका । इत्यमरः । २ । ५ । २६ ॥ नीलपुनर्नवा । नीली । इति राजनिर्घण्टः ॥ (कुलक । तत्पर्य्यायो यथा —
"कुलको मरुतरक्ताक्षसुपुष्पोऽतिविषञ्च ।
महाधवा वारुकाक्षा नीलाकृतमञ्जुषा ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥
"नीलाक्षासौवीरतु नीलवीरा नीलपुष्पीलता प्रतानबहुला ।" इति चरके चिकित्सितस्थाने । १ अध्याये ॥ नदीविशेषः । यथा,—
"देवा दशरथी भाषा पुनरत्र पुर्व्ववाहिनी ।"
इति ब्रह्मोक्ते प्रथमख्याने धर्म्मेऽध्याये ॥
यथा च महाभारते । ६ । ९ । १९ ।
"नीलां धुनिवरीश्चैव महानदीम् ॥")
महाराक्षसस्य स्त्री । इति ब्रह्मवैवर्त्तपुराणे ११६ ॥

नीलाङ्क, पुं, (नीलमङ्गं यस्य ।) चारवस्त्री । चातकपक्षी । इति राजनिर्घण्टः ॥

नीलाङ्गु, पुं, (निमरो निधृतीति । नि + लिगि गतौ + कु । केचित् धातुपक्षमपाशींचमाहुः । एतन्मतसहितोऽयं धातुपक्षमाहरेवेत्यम् ।) क्रिमिः । इत्यमरः । २ । ५ । १३ । अमरमाला स्त्री । इति मेदिनी । गे, ३० । भ्रमरम् । इति त्रिक ।

नीलाञ्जनं, क्ली, (नीलमञ्जनम् ।) सौवीराञ्जनम् । (यथा, भगवन्तोऽपि गणेश्वरप्रणामपञ्चकम् ।
"नीलाञ्जनचयप्रख्यं रविपुत्रं यमाग्रजम् ।
छायामार्त्तण्डसम्भूतं वन्दे भक्त्या शनैश्चरम् ॥")
तत्तु उपधातुविशेषः । अस्य गुणाः । कटुत्वम् । धातुसञ्जरीतिनेत्ररोगप्रधरादहनाशित्वम् । उष्णत्वम् । रसायनत्वम् । तिक्तत्वम् । भेदकत्वञ्च । इति राजवल्लभः ॥ (अस्य शोधनविधिर्यथा,—
"नीलाञ्जनं चूर्णयित्वा जम्बीरद्रवभावितम् ।
दिनैकमातपे शुद्धं भवेत् कार्य्येषु योजयेत् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे मारणाधिकारे ॥) तुत्थम् । इति राजनिर्घण्टः ॥

नीलाञ्जसा, स्त्री, (नीलं मेघं अञ्जयतीति । अञ्ज + णिच् + असुन् ।) विद्युत् । इति जटाधरः ॥

नीलाञ्जनी, स्त्री (नीलवत् अञ्जयत्यनयेति । अञ्ज + करणे ल्युट् । ततो ङीप् ।) कालाञ्जनी क्षुपः । इति राजनिर्घण्टः ॥

नीलाञ्जसा, स्त्री, अप्सरोभेदः । नदीविशेषः । विद्युत् । इति मेदिनी । से, १७ ॥

नीलापराजिता, स्त्री, (नीला अपराजिता ।) नीलवर्णापराजितालता । तत्पर्य्यायः । नील-पुष्पी २ महानीला ३ नीलगिरिकर्णिका ४ गवादनी ५ व्यक्तगन्धा ६ नीलस्यन्दा ७ नीलाद्रिकर्णी ८ । अस्या गुणाः । शिशिरत्वम् । तिक्तत्वम् । रक्तातिसारज्वरदाहच्छर्द्दिभ्रममदश्वासोन्मादातिवाताधिकाशामकत्वञ्च । इति राजनिर्घण्टः ॥

नीलाभ्र, क्ली, (नीलमभ्रमिति कर्म्मधारयः ।) नीलमेघमम् । इति शब्दमाला ॥ (नीलोत्पलम्बशब्देऽस्य विवृतिर्ज्ञेया ॥)

नीलाम्बर क्ली, (नीलमम्बरमिव । नीलमम्बरतीति वा । अवि + अरच् ।) तालीशपत्रम् । इति राजनिर्घण्टः ॥ (नीलञ्च तदम्बरञ्चेति । नील वस्त्रञ्च ॥)

नीलाम्बर, पुं (नीलमम्बरं यस्येति ।) बलदेवः । राक्षसः । शनैश्चरः । इति मेदिनी । रे २०४ ॥ नीलवस्त्रयुक्ते त्रि ॥

नीलाम्बुजन्म [न्] क्ली, (अम्बुनि जन्माऽस्य । तत नीलवर्णं अम्बुजन्मेति ।) नीलोत्पलम् । इत्यमरः । १ । १० । ३७ ॥

नीलाम्लान, पुं, (आम्लायति पयाकाशमिति । आ + म्ला + ल्युट् । नीलो नीलवर्ण आम्लानः ।) पुष्पवृक्षभेदः । काला दारिका इति हिन्दी भाषा । तत्पर्य्यायः । नाली २ झिण्टी ३ बाणा ४ कालीसुमा ५ नीलपुष्प ६ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । कफमारुतशूलकण्डूकुष्ठशोफव्रणनाशित्वञ्च । इति राजनिर्घण्टः ॥

नीलाम्बी, स्त्री, (नीला अम्बी ।) क्षुपभेदः । मकरपद्मक इति हिन्दी भाषा । तत्पर्य्यायः । नीलमिलोढी २ कृष्णाम्बी ३ दीर्घदण्डिका ४ । अस्या गुणाः । मधुरत्वम् । शीतत्वम् । कफवातहरत्वञ्च । इति राजनिर्घण्टः ॥

नीलाम्र, पुं, (नीलवर्णं आम्रमिति कर्म्मधारयः ।) आम्रभेदः । तत्पर्य्यायः । अधिमाम्र २ श्यामल-वृक्ष ३ । अस्य गुणाः । मधुरत्वम् । शीतलत्वम् । पित्तदाहश्रमनाशित्वञ्च । इति राजनिर्घण्टः ॥

नीलाश्म, [न्] पुं (नीलवर्णः अश्मा प्रस्तर भेदः ।) नीलमणिः । इति राजनिर्घण्टः ॥

नीलासन, पुं, (नीलवर्णः असनो वृक्षभेदः ।) असनवृक्षविशेषः । पियाशालभेदः । तत्पर्य्यायः । नीलबीजः २ नीलपत्रः ३ शुभ्रवल्कः ४ नीलद्रुमः ५ नीलसार ६ नीलनिम्बा यः ७ । अस्य गुणाः । कटुत्वम् । शीतत्वम् । कषायत्वम् । श्लेष्मकण्डूदद्रुनाशित्वम् । सारकत्वम् । तत्र त्रिलक्ष्म श्रेष्ठञ्च । इति राजनिर्घण्टः ॥ हस्तिबन्धविशेषः । यथा —
"लिङ्गोपरिस्थिता नारी धृत्वा हस्ता यदद्वयम् ।
कुर्य्यात् रतिं यथा च बन्धो नीलासनो मतः ॥"
इति रतिमञ्जरी ॥

नीलिका स्त्री, (नीलक + टाप् । कापि अत इत्वम् । नीलैव स्वार्थे कन् टाप् पूर्ब्बह्रस्वः । इति केचित् ।) नीलसिन्धुवारः । इति राजनिर्घण्टः ॥ नीलिनी । (पर्य्यायोऽस्या यथा —
"नीली तु नीलिनी तूणी कालदोला च नीलिका ।
रञ्जनी श्रीफली तुत्था ग्रामीणा मधुपर्णिका ॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता ॥"
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ॥) शेफालिका । इति मेदिनी । के ११९ ॥ नेत्ररोगविशेषः । यथा —
"दोषे तृतीयमितौ तिमिरेऽङ्गीकृते भवति दृष्टिः ।
तिमिराख्यः स वै दोषश्चतुर्थपटलं गतः ॥
रुणद्धि सर्व्वतो दृष्टिं लिङ्गनाशमतः परम् ।
अस्मिन्नपि तमोभूते नातिरूढे महागदे ॥
चन्द्रादित्यौ सनक्षत्रावन्तरीक्षे च विद्युतः ।
निर्म्मलानि च तेजांसि भ्राजिष्णूनि च पश्यति ।
स एव लिङ्गनाशस्तु नीलिकाकाचसंज्ञितः ॥"
क्षुद्ररोगभेदः । यथा,—
"क्रोधायासप्रकुपितो वायुः पित्तेन संयुतः ।
सहसा मुखमागत्य मण्डलं विसृजत्यतः ॥
नीरुजं तनुकं श्यावं मुखे व्यङ्गं तमादिशेत् ।
कृष्णमेवं गुणं गात्रे मुखे वा नीलिकां विदुः ॥"
इति माधवकरः ॥
कलङ्क अपरः । यथा "भूमैन्दवा इव कीटर जलद नीलिका इत्यादि ।"
इति ज्वरप्रकरणे विजयरक्षितः ॥
क्षुद्ररोगविशेषः । तल्लक्षणं यथा —
"कृष्णमेवं गुणं वक्त्रे गात्रे वा नीलिकां विदुः ।"
एवं गुणं नीरुजं तनुकं श्यावम् ॥
तच्चिकित्सा यथा,—
"सिराव्यधैः प्रलेपैश्च तथाभ्यङ्गैश्च पाणिजैः ।
न्यच्छं नीलिकां वापि व्यङ्गञ्च तिलकालकम् ॥
वटाङ्कुरा मसूराश्च प्रलेपान्मुखगा नराः ।
यष्टिर्मञ्जिष्ठया सेयं प्रलेपो मधुयुक्तया ॥

अथवा केशरं शुक्ता प्रायश्च रुधिरेण च ।
भृङ्गराजस्वरसेनाम्लेन च पेषिता ॥
कालीयकस्य लेपस्तु हरेद्व्यङ्गञ्च नीलिकाम् ।
अर्कक्षीरहरिद्राभ्यां मर्दयित्वा प्रलेपनात् ॥
मुखकार्ष्ण्यं शमं याति चिरकालोद्भवं ध्रुवम् ।
मधुरे क्षीरपिष्टैर्लिप्तमास्यं घृतान्विते ॥
सप्तरात्रात् भवेत् सद्यं पुण्डरीकदलोपमम् ।
वटस्य पाण्डुपत्राणि मालती रक्तचन्दनम् ॥
कुष्ठं कालीयकं लोध्रमेभिर्लेपं प्रयोजयेत् ॥
युवानपिडकानाशु व्यङ्गनाश विनाशनम् ।
स्याद्देनेन मुखच्छायि वर्णितं नीलिकादिभिः ॥
कालीयकं कलम्बक इति लोके । युवानपिडका युवानन तम पिडका पृषोदरादित्वात्कारलोपः ।
कुङ्कुमं चन्दनं लोध्रं पतङ्गं रक्तचन्दनम् ।
कालीयकमुशीरञ्च मञ्जिष्ठा मधुयष्टिका ॥
पत्रकं पद्मकं कुष्ठं पद्मं गोरोचना निशा ।
लाक्षा दारुहरिद्रा च गैरिकं नागकेशरम् ॥
पलाशकुसुमञ्चापि प्रियङ्गुश्च वटाङ्कुराः ।
मालती च मधूच्छिष्टं वचया सुरभिर्मया ॥
चतुर्गुणपयःपिष्टैरेतैरक्षमितैः पृथक् ।
पचेत्कल्केन वैद्यस्तैलेन प्रस्थद्वयोन्मितम् ॥
सदाभ्यङ्गादतत्राङ्ग नीलिकया सह ।
तिलकं मशकं व्यङ्गं गात्रदेशस्थदूषिकाम् ॥
पद्मिनीकण्टकं चापि हरेच्चतुर्मासि तथा ।
बिम्बाङ्कुरं पूर्णचन्द्रमण्डलसुन्दरम् ॥
पतङ्गं पलम् इति लोके । कालीयकं कलम्ब इति लोके । सुरभिर्मया महाभरी इति लोके । कुङ्कुमाद्यं तैलम् ।" इति भावप्रकाशः ॥

नीलिनी स्त्री, (नीलः प्रशस्ततयास्त्यस्या इति । इनि । ततो ङीप् ।) नीलीवृक्षः । इत्यमरः । २ । ४ । ९६ ॥ (पर्य्यायोऽस्या यथा वैद्यकरत्नमालायाम् ।
'नीलिनीष्टमलात्मी स्यादन्ता कोटरपुष्प्यपि ।
स्थाने नीलपुष्पा स्यान्नीलपुष्प्यतिलोमशा ॥'
यथा च ।
"नीली तु नीलिनी तूली कालदोला च नीलिका ।
रञ्जनी श्रीफली तुत्था ग्रामीणा मधुपर्णिका ॥
क्लीतका कालकेशी च नीलपुष्पा च सा स्मृता ।
नीलिनी रेचनी तिक्ता केशा मोहभ्रमापहा ॥
उष्णा चन्दुदरप्लीहवातरक्तकफानिलान् ।
आमवातमुदावर्त्तं मदञ्च विषमुद्धृतम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।)
ग्रामविपुटा । इति शब्दरत्नावली ॥
अजमीढस्य पत्नी । इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ (तथा च हरिवंशे । ३२ । ३५ ।
"अजमीढस्य पत्न्यस्तु तिस्रो रूपसमन्विताः ।
नलिनी केशिनी चैव धूमिनी च वराङ्गना ॥")

नीली स्त्री, (नीलो निष्पाद्यत्वेनास्त्यस्याः इति । नील + अच् ततो ङीष् ।) इत्यमरः । नीलेर गाछ इति भाषा ॥ तत्पर्य्यायः । काला २ क्लीतकिका ३ ग्रामीणा ४ मधुपर्णिका ५ रञ्जनी ६ श्रीफली ७ तुत्था ८ तूणी ९ दोला १० नीलिनी ११ । इत्यमरः । २ । ४ । ९४ ॥ नीला १२ तूली १३ मेदी १४ मेला १५ । इति भरतः ॥ नीलपत्री १६ राज्ञी १७ नीलिका १८ नीलपुष्पी १९ काली २० श्यामा २१ शोधनी २२ श्रीफला २३ ग्राम्या २४ भद्रा २५ भारवाही २६ मोचा २७ क्लम्बा २८ अश्मकेशी २९ महाफला ३० असिता ३१ क्लीतनी ३२ केशी ३३ चारटिका ३४ गन्धपुष्पा ३५ श्यामलिका ३६ रङ्गपत्री ३७ महावला ३८ स्थिररङ्गा ३९ रङ्गपुष्पी ४० तूली ४१ तूलिका ४२ नीलिका ४३ । इति शब्दरत्नावली ॥ अस्या गुणाः । कटुत्वम् । तिक्तत्वम् । उष्णत्वम् । केश्यत्वम् । कासकफमरुद्विषोदरवातगुल्मजन्तुज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ नीलिकारोगः । इति मेदिनी । ले, ४९ ॥

नीलीरागः, पुं, स्थिरप्रेमपुरुषः । तत्पर्य्यायः । स्थिरसौहृदः २ । इति हेमचन्द्रः । ३ । १४ ॥ (नीलीवद्रागो रागः ।) नीलवर्णः । इति नीलशब्दस्य भावार्थे शब्दरत्नावली ॥ नायकनायिकयोः पूर्व्वरागविशेषः । यथा,—
"नीलीकुसुम्भमञ्जिष्ठा पूर्व्वरागोऽपि च त्रिधा ।"
तत्र नीलीरागः ।
"न चातिशोभते यन्नापैति प्रेम मनोगतम् ।
नीलीरागः स विज्ञेयो यथा श्रीरामसीतयोः ॥"
इति साहित्यदर्पणम् ॥

नीलोत्पल क्ली, (नीलं नीलवर्णमुत्पलमिति ।) नीलवर्णोत्पलम् । नीलशुँदि फुल इति भाषा । तत्पर्य्यायः । उत्पलकम् २ कुवलयम् ३ इन्दीवरम् ४ कन्दोत्थम् ५ सौगन्धिकम् ६ सुगन्धम् ७ कुवलकम् ८ असितोत्पलम् ९ ॥ (यथा, भागवते । ५ । २४ । १० ।
"भयकुचोल्लसत्कुमुदनीरनीरजकुसुमकुवलयकह्लारनीलोत्पललोहितशतपत्रादिवनेषु ।")
अस्य गुणाः । अतिस्वादुत्वम् । शीतत्वम् । सुरभित्वम् । सौख्यकारित्वम् । पाके अत्यन्ततिक्तत्वम् । रक्तपित्तहरत्वञ्च । इति राजनिर्घण्टः ॥

नीलोत्पली [न्] पुं, (नीलोत्पलं नीलोत्पलबीजं मणीन्द्ररश्मिप्रभाय धारणार्थमस्त्यस्य इति इनिः ।) मञ्जुघोषः । इति त्रिकाण्डशेषः ॥

नीवरः पुं, (नयन्त्यात्मानं यत्र कुर्व्वन्ति देहयात्रां निर्व्वाहयन्तीति । नी + "छित्वरच्छत्वरेति ।" उणां ३ । १ । इति ष्वरच्प्रत्ययेन निपातनात् गुणाभावात् साधुः ।) भिक्षुः । इत्युणादिकोषः ॥ वणिजकम् । वास्तव्यम् । इति मेदिनी । रे १०५ ॥ परिव्राट् । पङ्कः । जले, क्ली । इति सङ्क्षिप्तसारोणादिवृत्तिः ॥

नीवाकः, पुं, (नितरां नियतं वा उच्यते इति । नि + वच + घञ् कुत्वं उपसर्गस्य दीर्घत्वं च ।) महार्घताशिलाघादिना जनानामाभ्यन्तरतिमयः । शुभाश्रयाधिक्यम् । क्रमाक्रमारः । धान्यादिना विक्रयेन परिच्छेदनम् । इति भरतः ॥ तत्पर्य्यायः । प्रयामः २ । इत्यमरः । २ । ९ । ७३ ॥

नीवारः पुं, (नि + वृ + घञ् उपसर्गस्य दीर्घत्वं च ।) तृणधान्यभेदः । इत्यमरः । २ । ९ । २५ ॥ उड़ीधान इति बङ्गभाषा । तीनी इति हिन्दीभाषा । तत्पर्य्यायः । अरण्यधान्यम् २ मुनिधान्यम् ३ तृणोद्भवम् ४ अरण्यशालिः ५ । (यथा, शाकुन्तले । १ अङ्के ।
"नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरूणा-
मधः ॥")
अस्य गुणाः । मधुरत्वम् । स्निग्धत्वम् । पवित्रत्वम् । पथ्यत्वम् । लघुत्वञ्च । इति राजनिर्घण्टः ॥ तस्यान्यगुणाः ।
"प्रसाधिका तु नीवारस्तृणान्नमिति च स्मृतम् ।
नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत् ॥"
इति भावप्रकाशः ॥

नीवि, स्त्री, (निव्ययति निवीयते वा । नि +
नीवी, व्येञ् + "नौ व्यो यलोपः पूर्व्वस्य च दीर्घः ।" उणां । ४ । १३५ । इति इञ् यलोपः नियमस्य दीर्घत्वञ्च । ततः कृदिकारादिति वा ङीष् ।) परिपणम् । वणिजां मूलधनम् । राजपुत्रादेर्बन्धकः । इति सुभूति ॥ स्त्रीकटीवस्त्रबन्धः । कोँचड़ी इति भाषा । (यथा, महाभारते । २ । ६७ । १९ ।
"एकवस्त्रा अधोनीवी रोदमाना रजस्वला ॥")
स्त्रीशुद्रस्य धुस्कटीपश्चदर्शेऽपि । इत्यमरटीकायां भरतः । तथा च । "नीवीं विस्रस्य परिधानवस्त्रस्य दामाङ्गग्रन्थिं मोचयित्वा आचमनमाह बौधायनः ।" इति यजुर्व्वेदिश्राद्धतत्त्वम् । मूलस्य पिण्डादिनाहि मोटकबन्धनम् । इति मधुरेशः ॥

नीवृत्, पुं, (नियतं वर्त्तते यत्रान्न जनपदः इति । नि + वृत + अधिकरणे क्विप् । "नहिवृतिवृषिव्यधिरुचिसहितनिषु क्वौ ।" ६ । ३ । ११६ । इति पूर्व्वपदस्य दीर्घः ।) जनपदः । इत्यमरः । २ । १ । ८ ॥
"दे अङ्गवङ्गकलिङ्गपञ्चालमगधकोशलादौ मण्डलेन स्यात् ग्रामसमष्टिः ।" इति भरतः ॥

नीध्र, क्ली (नितरां ध्रियते इति । नि + धृ + बाहुलकात् कप्रत्ययेन साधुः ।) छदिप्रान्तभागः । छाँच इति भाषा । तत्पर्य्यायः । वलीकम् २ पटलप्रान्तम् ३ । इत्यमरः । नीव्रम् । इति भरतः ॥ नेमिः । चन्द्रः । रेवती नक्षत्रम् । वनम् । इति मेदिनी । रे, ५६ ॥

नीशारः, पुं, (नि:शीर्य्य नितरां वा शीर्य्यते हिमवातादयोऽनेन आच्छादनं वा । शॄ + घञ् । उपसर्गस्य दीर्घत्वञ्च ।) हिमानिलनिवारकप्रावरणम् । इत्यमरः । २ । ६ । ११८ ॥ हिमानिलप्रावरणं सर्व्वं सक्कृतम् । इति रमानाथः ॥ कानात् । इति नयनानन्दः ॥ मशारि इति कश्चित् । कारुपटः । कानात् इति कश्चित् । इति भरतः ॥ (यथा,—
"गौरिकाजननीशारः प्रावेश शिशिरे हरः ॥"
इति सिद्धान्तकौमुदी । ३ । ३ । ५१ ।
इत्यस्य वृत्तौ ॥)

नीहार, पुं (निह्रियते इति । नि+हृ+घञ् । उपसर्गस्य घञीति दीर्घत्वम् ।) घनीभूतमिहिरम् । तत्पर्य्यायः । अवश्यायः २ तुषारः ३ तुहिनम् ४ हिमम् ५ प्रालेयम् ६ मिहिका ७ । इत्यमरः । १ । ३ । १८ ॥ खजलम् ८ हिमा-जलम् ९ । इति त्रिकाण्डशेषः ॥ मिहारः १० मिहिका ११ । इति शब्दरत्नावली ॥ (यथा, महाभारते । १ । २२८ । २ ।
"शाश्वतं च तव कर्म्म प्राह्णो वह्निभिः शरैः । प्राच्छादयदमेयात्मा नीहारेणेव चन्द्रमाः ॥")
अस्य गुणः । कफवायुवर्द्धकत्वम् । इति राज-वल्लभः ॥

नु अ, (नौति नुदति वा । नु नुद वा+मिता-द्य कर्म्मादित्वात् डुः ।) वितर्कः । (यथा शाकुन्तले । १ ।
"किम्मध्यमरश्मिलाञ्छनकमहा-
धामनि वर्त्मनि वसति नु वाजिमर्त्त्यैः ॥")
अपमानः । विकल्पः । (यथा, महाभारते । ५ । १७५ । ३ ।
"किं नु मद्योऽन्यथात्मानमस्य भाग्य दुरासदम् ॥")
अनुनयः । अतीतः । प्रश्नः । (यथा, महा-भारते । ३ । ६२ । १९ ।
"अथ नु दर्शनीयं क्षुधितं श्रमकर्षितम् ॥")
हेतुः । अपदेशः । इति मेदिनी । अव्यये, ४१ ॥

नु, पुं अनुस्वारः । इति बोपदेवः । यथा,—
"नुयो पूर्व्वेण सम्बद्धो नुषी तु परगामिनी ।"
इति दुर्गादासः ॥

नुड, शि वधे । इति कविकल्पद्रुमः ॥ (तुदां कुटां परं सकं सेट् ।) शि, नुडति पशुं नीः नुनोड । इति दुर्गादासः ॥

नुत, त्रि (णु ञ स्तुतौ+क्तः ।) स्तुतम् । यथा,—
"तं वेदशास्त्रपरिनिष्ठितशुद्धबुद्धिं
चर्माम्बरं सुरमुनीन्द्रनुतं कवीन्द्रम् ।
कृष्णत्विषं कनकपिङ्गजटाकलापं
व्यासं नमामि शिरसा तिलकं मुनीनाम् ॥"
इति पुराणम् ॥

नुति, स्त्री, (णु+भावे क्तिन् ।) स्तुतिः । इत्यमरः । १ । ६ । ११ ॥ (यथा, भर्त्तृहरिः ।
"परगुणनुतिभिः स्वान् गुणान् ख्यापयन्तः ॥")
पूजा । इति शब्दरत्नावली ॥

नुत्त, त्रि, (नुद+क्तः । "नुदविदोन्देति ।" ८ । २ । ५६ । इति पाक्षिको नत्वाभावः ।) क्षिप्तः । प्रेरितः । इत्यमरः । ३ । १ । ८७ ॥

नुन्न, त्रि, (नुद+क्तः । निष्ठातस्य पूर्व्वस्य च नत्वम् ।) नुत्तः । इत्यमरः । ३ । १ । ८७ ॥ (यथा, माघे । १ । ५७ ।
"प्रभञ्जनेनोभिरवधूतो गतौ
दिदृक्षया नुन्नमनुत्तमं मनः ॥")

नू, त्रि, नू शि स्तवे+कर्म्मणि क्विप् । स्तुतः । इति व्याकरणम् ॥

नूतन, त्रि, (नव एव । "नवस्य नूरादेशो त्नप्तनप्खाश्च प्रत्ययाः ।" ५ । ४ । ३० । इत्यस्य वार्त्तिकोक्त्या तनप् नवस्य नूरादेशश्च ।) अपुरातनम् । तत्पर्य्यायः । प्रत्यग्रः २ अभिनवः ३ नव्यः ४ नवीनः ५ नवः ६ नूत्नः ७ । इत्यमरः । ३ । १ । ७७ ॥ प्रत्यग्रः ८ अर्व्वाचीनः ९ । इति हेमचन्द्रः । ६ । ८४ ॥ अभ्यर्णः १० प्रतिनवः ११ । इति जटाधरः ॥ (यथा, रघौ । ८ । १५ ।
"प्रशमस्थितपूर्व्वपार्थिवं
कुलमभ्युद्यतनूतनेश्वरम् ॥")

नूत्न, त्रि, (नव एव । नव+त्नप् नूरादेशश्च ।) नूतनः । इत्यमरः । ३ । १ । ७८ ॥ (यथा, ऋग्वेदे । ७ । १८ । २० ।
"न त इन्द्र सुमतयो न रायः
संचक्षे पूर्व्वा उषसो न नूत्नाः ॥"
"न नूत्ना नवतराश्च ।' इति सायनभाष्यम् ॥")

नूद, पुं (नुदति रोगादिकमिति । नुद+"इगुपधज्ञाप्रीकिरः कः ।" ३ । १ । १३५ । इति कः । पृषोदरादित्वात् दीर्घः ।) ब्रह्मदारुवृक्षः । इत्यमरः । २ । ४ । ४२ ॥ (ब्रह्मदारुशब्देऽस्य विशेषोऽवगन्तव्यः ॥)

नूनं, अ, (नु ऊनयतीति । ऊन परिहाणे+अम् ।) तर्कः । यथा, ओजसापि खलु नूनमनूनम् । अर्थनिश्चयः । (यथा, देवीभाग-वते । १ । ९ । ११ ।
"अनीदृशं तथा प्रोक्तं कामिनो मोहदं तथा । न भविष्यति नूनमनया वैरकथया ॥")
अवधारणम् । यथा, नूनं हन्ति स रावणम् । इत्यमरभरतौ ॥ तारतम्यम् । वाक्यपूरणम् । इति मेदिनी ॥

नूपुर, पुं, क्ली, (नू+क्विप् । नुवि पुरति इति । पुर अग्रगमने+"इगुपधेति ।" ३ । १ । १३५ । इति कः ।) चरणालङ्कारभूषणम् । मेवुर इति भाषा । तत्पर्य्यायः । पादाङ्गदम् २ तुला-कोटिः ३ मञ्जीरः ४ हंसकः ५ पादकटकः ६ । इत्यमरः ॥ पदाङ्गदम् ७ । इति शब्दरत्नावली ॥ (यथा मार्कण्डेये । ८२ । २५ ।
"नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमम् ॥"
"गुणवानपि सौरभ्यात् पादे स्फुरति नूपुरः । हारस्तु मृगभाषिन् कण्ठमनां गतः ॥"
इत्युद्भटः ॥)

नृकेशरी, [न्] पुं (केशरः प्रादुर्भावोऽस्यास्तीति इति । ना चासौ केशरी चेति ।) नरसिंहाव-तारः । इति पुराणम् ॥ (ना केशरीवेति उप-मितिसमासः इति "सिंहव्याघ्रादयश्चाद्या पुंसि श्रेष्ठार्थवाचकाः ।" इत्यमरोक्तेः । पुरुषश्रेष्ठः ॥)

नृग, पुं राजविशेषः । यथा, श्रीभागवते ।
"नृगो नाम नरेन्द्रोऽहमिक्ष्वाकुतनयः प्रभो ॥"
(अस्य दानप्रकरणे कदाचिद् गोदानसमये अविज्ञानात् ब्रह्मस्वापहारित्वात् कृकलासत्वप्राप्तिः वासुदेवेनोद्धारादिकथा च महाभारते । १३ । ६ । अध्यायस्य प्रथम-श्लोकान्तमवगन्तव्या ॥ नृन् जीवान् गच्छति प्राप्नोति आवाति येन सुदृश्या परमात्मा ॥)

नृचक्षाः [स्] पुं, (नृन् चष्टे भक्षणेन पश्यतीति । चक्ष ङ दर्शने+"सर्व्वधातुभ्योऽसुन्" उणा० ४ । १८८ । इत्यसुन् । यद्वा, "चक्षेर्बहुलं शिच्च ।" उणा० ४ । २३२ । इत्यसि । असयोऽस्मिन् न ख्याञादेशः ।) राक्षसः । इति हेमचन्द्रः । २ । १०१ ॥ (नृन् चष्टे पश्यतीति नृ+चक्ष+असुन् । नृन् चष्टे पश्यति जानातीत्यर्थे । इत्यु यथा, ऋग्वेदे । १० । १ ७ । ४ ।
"प्रतधारं वायुमर्कं स्वर्विदं
नृचक्षसस्ते अभिचक्षते हविः ॥"
"नृचक्षसः नृणां द्रष्टृन्यानिन्द्रादीन् देवान् ।" इति भाष्ये सायनः ॥ नृणां कर्म्मणि नृणां मध्ये कर्म्मणां द्रष्टा । यथा, ऋग्वेदे । ३ । १५ । ८ ।
"अदाभ्यः सिन्धुमर्य्यां नृचक्षाः ॥")

नृचक्षु, [स्] पुं, (नृणां प्रजानामां चक्षुरिव ।) सुनीथराजपुत्रः । इति महाभारतम् ॥ (यथा, भागवते । ९ । २२ । ४१ ।
"सुनीथस्तस्य भविता नृचक्षुर्यत् सुखीनलः ॥"
विष्णुपुराणे तु । ४ । २१ । ९ ।
"तस्यापि सुनीथः सुनीथात् ततो नृचक्षुः ॥")

नृत, य नर्त्ते । इति कविकल्पद्रुमः ॥ (दिवां परं-अकं सेट् ।) य, नृत्यति नर्त्तकः । इति दुर्गा-दासः ॥

नृति, स्त्री, (नृत् नर्त्तने+"इगुपधात् कित् ।" उणा० ४ । ११९ । इति इन् स च कित् ।) नर्त्तनम् । इति शब्दरत्नावली ॥ (यथा, ऋग्वेदे । १ । १८ । ३ ।
"आवो न्यगाय नृतये भराय
सासीम यातु प्रतर दधानाः ॥")

नृतु, पुं, (नृत्यतीति । नृत+बाहुलकात् कुः ।) नर्त्तकः । इत्युणादिकोषः ॥ (यथा, ऋग्वेदे । ८ । ४ । ९ ।
"इन्द्र यथा ह्यस्ति तेऽपरीतं नृतो शवः ॥"
नृत्यवेति । अधिकरणे कुः ।) भूमिः । देहे । क्षितिः । इति संक्षिप्तसारोणादिवृत्तिः ॥

नृत्तं, क्ली, (नृत्+भावे क्तः ।) नृत्यम् । इत्यमर-टीकायां भरतः ॥ (यथा, [illegible] । ५ । ७६ ।
"नृत्तप्रयोगवरतानां
षड्जस्वरगीतपर्व्वितानाम् ॥")

नृत्य, क्ली, (नृत्+"ऋदुपधाच्चाक्लृपिचृतेः ।" ३ । १ । ११० । इति क्यप् ।) तालमानरसा-श्रयसविलासाङ्गविक्षेपः । नाच इति भाषा । तत्पर्य्यायः । लास्यम् २ नर्त्तनम् ३ नाट्यम् ४ ताण्डवम् ५ नर्त्तनम् ६ । इत्यमरः । १ । ७ । १० ॥ नृत्तम् ७ । उद्धतं नृत्तं ताण्डवम् । सुकुमारन्तु लास्यम् । भावाश्रयं नृत्यम् । तालमानाश्रयं नृत्तमिति भेदोऽत्र ज्ञातव्यः । इति भरतः ॥ नाट-कनाट्यं ८ लासकम् ९ नृतिः ११ इति शब्दरत्नावली ॥ तत्र करणादि यथा,—
"हस्तयोः प्रयोगो महाकलापसम्भावश्च ।
हरिहरकावानिरिणो नृत्यमनुष्ठ मुखे ॥"

ताण्डवञ्च तथा लास्यं द्विविधं नृत्यमुच्यते ।
पेवलिबहुरूपञ्च ताण्डवं द्विविधं मतम् ॥
अङ्गविक्षेपबाहुल्यं तथाभिनयशून्यता ।
यत्र सा पेवलिस्तस्य सञ्ज्ञा देशीति लोकतः ॥
छेदनं भेदनं यत्र बहुरूपा सुखावली ।
ताण्डवं बहुरूपन्तु नायिकागणसङ्गतम् ॥ • ॥
छुरितं यौवनञ्चेति लास्यं द्विविधमुच्यते ।
यत्राभिनयहावैर्भावै रसैरालिङ्गचुम्बने ॥
नायिकानायकौ रङ्गे नृत्यतश्छुरितं हि तत् ।
मधुरं बहुलीलाभिर्नटीभिर्यच्च नृत्यते ।
वशीकरणविद्याभं तल्लास्यं यौवतं मतम् ॥ • ॥
गेयादुत्तिष्ठते वाद्यं वाद्यादुत्तिष्ठते लयः ।
लयतालसमारब्धं ततो नृत्यं प्रवर्त्तते ॥"
इति सङ्गीतदामोदरः ॥
अल्पस्य नृत्यं वर्ज्यम् । यथा,—
"नृत्यं गीतमल्पञ्च शिल्पिनाञ्चस्य रूपतः ।
धार्म्मिकाणाञ्च नृत्यं कृत्यमन्यद्विवर्ज्जयेत् ॥"
इति मार्कण्डेयपुराणम् ।
विष्णुपद्ये नृत्यफलं यथा,—
"नृत्यमानस्य वक्ष्यामि तत्फलं शृणु वसुन्धरे ।
मनुजा येन गच्छन्ति छित्त्वा संसारसागरम् ॥
विंशद्वर्षसहस्राणि त्रिंशद्वर्षशतानि च ।
पुष्करद्वीपमासाद्य मोदते वै यदृच्छया ॥
पुष्कराच्च परिभ्रष्टः स्वच्छन्दगमनालयः ।
फलं प्राप्नोति सुश्रोणि ! मम कर्म्मपरायणः ॥
रूपवान् गुणवान् शूरः शीलवान् सम्पदि
स्थितः ।
मद्भक्तश्चैव जायेत संसारपरिमोचितः ॥"
इति वाराहे शौकरमाहात्म्यम् ॥
"दृष्ट्वा सम्पूजितं देवं नृत्यमानोऽग्रतः स्थितः ।
अथ श्रयमति शुद्धं परं ब्रह्म स गच्छति ॥"
स्कन्दपुराणम् ॥
अपि च । द्वारकामाहात्म्ये श्रीभागवते ।
"यो नृत्यति प्रहृष्टात्मा भावैर्बहुसुभक्तितः ।
स निर्द्दहति पापानि मन्वन्तरशतैरपि ॥"
हरिभक्तिसुधोदये ।
"बहुधोत्सार्यते हर्षाद्विष्णुभक्तस्य नृत्यतः ।
पद्भ्यां भूमेर्दिशोऽक्ष्णोर्दोर्भ्यां चामङ्गलं दिवः ॥"
विष्णुधर्म्मोत्तरे ।
"नृत्यं दत्त्वा तथाप्नोति रुद्रलोकमसंशयम् ।
स्वयं नृत्येन सम्पूज्य तस्यैवानुचरो भवेत् ॥"
अन्यत्र च नारदोक्तौ ।
"नृत्यतां श्रीपतेरग्रे तालिकावादनैर्भृशम् ।
उड्डीयन्ते शरीरस्थाः सर्व्वे पातकपक्षिणः ॥"
इति हरिभक्तिविलासः ॥

नृदेव, पुं, (नृषु नरेषु मध्ये देवः । ना देव इव इत्युपमितसमासो वा ।) राजा । यथा, नैषधे । १ । २३ ।
"अधाननमालाविपुलातपत्रे-
दैवा नृदेवाय गिरो न भेजुः ॥"

नृधर्म्मा, [न्] पुं, (नृभ्य इव धर्म्मो यस्य । "धर्म्मादनिच् केवलात् ।" ५ । ४ । १२४ । इति अनिच् ।) कुवेरः । इति हेमचन्द्रः । २ । १०३ ॥ नरधर्म्मयुक्ते, त्रि ॥

नृप, पुं, (नॄन् नरान् पाति रक्षतीति । नृ + पा रक्षणे + "आतोऽनुपसर्गे कः ।" ३ । २ । ३ । इति कः ।) नरपतिः । इत्यमरः । २ । ८ । १ ॥
तस्य लक्षणं यथा,—
"चतुर्योजनपर्य्यन्तमधिकारी नृपस्य च ।
यो राजा तच्छतगुणः स एव मण्डलेश्वरः ।
तत्सहस्रगुणो राजा राजेन्द्रः परिकीर्त्तितः ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ८६ अः ॥
तत्प्रभावो यथा,—
"अपुत्रस्य नृपः पुत्रो निर्धनस्य धनं नृपः ।
अमातुर्जननी राजा अतातस्य पिता नृपः ॥
अनाथस्य नृपो नाथो अभर्त्तुः पार्थिवः पतिः ।
अभ्रातस्य नृपो भ्राता नृप एव नृणां सखा ॥
सर्व्वदेवमयो राजा तस्मात्तामवमये नृप ॥"
इति कालिकापुराणे ५० अध्यायः ॥
नृपदर्शनदिनं यथा । तत्र तिथयः शुभाः । वाराः शनिमङ्गलभिन्नाः । नक्षत्राणि उत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपदरोहिणीपुष्याश्विनीहस्ताचित्रानुराधाश्रवणधनिष्ठारेवतीज्येष्ठाश्रवणाः । लग्नानि मिथुनकन्याधनुर्मीनवृषभसिंहवृश्चिकानि । तत्र चन्द्रः शोभनः । इति ज्योतिषम् ॥

नृपकन्द, पुं, (नृपप्रियः कन्दः । कन्दानां नृपः श्रेष्ठो वा । राजदन्तादिवत् समासः ।) राजपलाण्डुः । इति राजनिर्घण्टः ॥

नृपतिः, पुं, (नॄन् पातीति । पा रक्षणे + डतिः । यद्वा नृणां पतिः ।) राजा । (यथा, मनुः । ७ । १३ ।
"अतस्तु विपरीतस्य नृपतेरखिलात्मनः ।
संक्षिप्यते यशो लोके घृतविन्दुरिवाम्भसि ॥")
कुवेरः । इति शब्दरत्नावली ॥

नृपतिवल्लभः, पुं, (नृपतीनां वल्लभः प्रियः ।) औषधविशेषः । नृपवल्लभ इति ख्यातः । यथा,
"जातीफलं लवङ्गाब्दमेलाटङ्गणरामठम् ।
जीरकञ्च यमानी च विश्वभेषजपत्रकम् ॥
लौहभस्म रसं गन्धं ताम्रं प्रत्येकशः पलम् ।
मरिचं त्रिपलं दत्त्वा छागदुग्धेन पेषयेत् ॥
धात्रीरसेन वा पिष्ट्वा वटिकां कुरु यत्नतः ।
श्रीमन्मथनाथेन विचिन्त्य परिनिर्म्मितः ॥
सर्व्वपर्व्वेषु धार्य्यं रसो नृपतिवल्लभः ।
अष्टादशवटीं खादेत् प्रविश्य सर्व्वदायकः ॥
हन्ति मन्दानलं सर्व्वमामदोषं विसूचिकाम् ।
शोथगुल्मोदराष्ठीलायकृत्पाण्डुकफामकम् ॥
हृच्छूलं कक्षशूलञ्च वस्तिशूलञ्च कामलाम् ।
शिरःशूलं कटीशूलमानाहमोहशूलकम् ॥
कासश्वासामवातञ्च श्लीपदं शोथमर्द्दनम् ।
गलगण्डं गण्डमालामम्लपित्तञ्च गद्भोम् ॥
क्रिमिकुष्ठानि हरति वातरक्तं भगन्दरम् ।
धनवृद्धातीसारं पक्षघातं प्रमेहकम् ॥
अम्लरीं स्तनशूलञ्च मन्याघातमपस्मरम् ।
ज्वरं जीर्णज्वरं कष्टं तन्द्रालस्यं वमिं भ्रमिम् ॥
दाहविद्रधिहिक्काञ्च अङ्गमर्द्दमरुक्तथा ।
धातुस्थं सर्व्वमेहञ्च दशहृद्विदधकान् ॥
उरुस्तम्भं रक्तपित्तं गुदभ्रंशादिपि स्तनाम् ।
कर्णनासाक्षिरोगांश्च दन्तरोगञ्च यौनजम् ॥
स्थौल्यञ्च शीतपित्तञ्च स्थावराणि विषाणि च
वातपित्तकफोत्थांश्च द्वन्द्वजान् सान्निपाति-
कान् ॥
सर्व्वरोगचयान् हन्ति वज्राङ्ग इव पापहा ।
बलवर्णकरो ह्येष आयुष्यो वीर्य्यवर्द्धनः ॥
इदं वाजीकरं श्रेष्ठं षण्मासाभ्यसिद्धिदम् ।
अरोगी दीर्घजीवी स्यात् रोगी रोगं विमुञ्चति ।
रसस्यास्य प्रसादेन सुबुद्धिर्जायते नरः ॥"
इति रसावली ॥

नृपद्रुम, पुं, (नृपप्रियो द्रुमो वृक्षः ।) आरग्वधः । राजादनीवृक्षः । इति राजनिर्घण्टः ॥

नृपप्रिय, पुं, (नृपाणां प्रियः ।) वेणुवंशः । इति शब्दचन्द्रिका । पेड़ बाँस इति भाषा । राजपलाण्डुः । राजाम्रः । शालिधान्यम् । आम्रम् । इति राजनिर्घण्टः ॥

नृपप्रियफला, स्त्री, (नृपप्रियं फलं यस्याः ।) वार्त्ताकी । इति राजनिर्घण्टः ॥

नृपप्रिया, स्त्री, (नृपाणां प्रिया ।) केतकी । राजखर्ज्जूरी । इति राजनिर्घण्टः ॥

नृपबदरः, पुं, (नृपप्रियो बदरः ।) राजबदरवृक्षः । तत्फले क्ली । इति राजनिर्घण्टः ॥

नृपमन्दिर, क्ली, (नृपस्य मन्दिरम् ।) राजगृहम् । तत्पर्य्यायः । सौधम् २ । इति हेमचन्द्रः । ४ । ५९ ॥

नृपमाङ्गल्यक, क्ली, (नृपस्य माङ्गल्यं मङ्गलं यस्मात् इति । कप् ।) आहुल्यवृक्षः । इति राजनिर्घण्टः ॥

नृपलक्ष्म, [न्] क्ली, (नृपस्य लक्ष्म चिह्नम् ।) राजच्छत्रम् । इत्यमरः । २ । ८ । ३१ । राजचिह्नञ्च ॥

नृपलिङ्गधरः, पुं, (धरतीति । धृ + अच् । नृपलिङ्गस्य धरः ।) राजवेशधारी । यथा,—
"विजयायानतो वीरः कलिं दिग्विजये क्वचित् ।
नृपलिङ्गधरं शूद्रं घ्नन्तं गोमिथुनं पदा ॥"
इति श्रीभागवते । १ । १६ ॥

नृपवल्लभ, पुं, (नृपाणां वल्लभः प्रियः ।) राजाम्रः । इति राजनिर्घण्टः । राजप्रिये त्रि ॥

नृपवल्लभा, स्त्री, (नृपस्य वल्लभा ।) दैविकापुष्पम् । इति राजनिर्घण्टः । राजमहिषी च ॥

नृपसभ, क्ली, (नृपाणां सभा । "सभा राजामनुष्यपूर्व्वा ।" २ । ४ । २३ । इति क्लीवत्वम् ।) नृपाणां सभा संसद्गृहम् । इत्यमरभरतः ॥

नृपात्मजा, स्त्री, (नृपस्य आत्मजेव । राजकन्यावत् तत्समत्वात् ।) कटुतुम्बी । इति रत्नमाला ॥ (नृपस्य आत्मजा कन्या ।) राजकन्या । यथा,
"अथसमरं भीमनृपात्मजाया
हृदि पतिर्न प्रविवेश देवः ॥"
इति नैषधे १ ॥

नृपाध्वर, पुं, (नृपाणामध्वरो यज्ञः ।) राजसूययज्ञः । इति त्रिकाण्डशेषः ॥

नृपान्न क्ली, (नृपप्रियं अन्नम् ।) राजान्नमाम-धान्यम् । इति राजनिर्घण्टः ॥ राज भोज्यञ्च ॥

नृपाभीर, क्ली, (अभीरयति उपयाति भोजन-कालमिति । अभि+ईर्+अ । नृपस्य अभीर भोजनकालसूचकवाद्यविशेषः ।) भक्तूर्य्यम् । राजभोजनकालीनवाद्यविशेषः । इति त्रिकाण्ड-शेषः ॥

नृपामय, पुं (आमयानां नृप । राजदन्तादि वत् पूर्व्वनिपातः ।) राजयक्ष्मा । क्षयरोगः । इति राजनिर्घण्टः ॥ (नृपस्य आमयो व्याधिः ।) राज्ञो रोगश्च ॥

नृपावर्त्त, पुं, (नृप इव आवर्त्तते इति । आ+ वृत+अच ।) राजावर्त्तमणिम् । इति राज निर्घण्टः ॥

नृपासन, क्ली (नृपस्य आसनम् ।) राजासनम् । तत्पर्य्यायः । भद्रासनम् २ सिंहासनम् ३ । इत्यमरः । २ । ८ । ३१ ॥ (यथा, भागवते । १ । १ । १८ ।
"यत्राभिषिच्य स्वतपस्तनैर्भो
नृपासनाद्यां परिकल्प्य दूरात् ।")

नृपाह्वय, पुं, (नृपं आह्वयति स्पर्द्धतेति । आ+ ह्वे+अच् ।) राजपलाण्डुः । इति राज निर्घण्टः ॥ नृपनामा च ॥

नृपोचित, पुं (नृपाणामुचितो योग्यः ।) राज माषः । इति राजनिर्घण्टः । राजयोग्ये, त्रि ॥

नृयज्ञ, पुं, (नॄ मनुष्याणां यो यज्ञः ।) अतिथिसेवा । यथा मनु । ३ । ७० ।
"अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥"

नृवराह, पुं (नॄ आर्त्तो वराहश्चेति ।) वराह रूपधृग्भगवदवतारः । यथा,—
"नृवराहस्य वर्णाभिर्व्वर्णाणि प्रतिष्ठिता ।
कृषिकर्म तथा प्रोक्ता सम्यग्वीर्य्यं महात्मन ॥"
स एव श्वेतवराहः । तथा,—
"श्रीवराहं त्वमव्याघ्रात्मैव च सुराचनं ।
अविशामि न सन्देहो स्व प्रज्ञ। नराधिप ॥"
इति कालिकापुराणे ६० अध्यायः ॥
अपि च ।
"देवदानवयोर्मध्ये नृवराहमाचरेत्
पितामहमतः यथा कश्यपोऽपि ।
दृष्ट्वा यथा विद्युतमाशु कृष्णं
यत्तमानोऽपि गिरिं सुमेरु ॥
न जन्मना नरजामेव
प्रोवाच देवं नृवराहमर्च्चि ।
प्रजापति तियुमिर्मं विष्णु
नृसिंह च आदि च्च समाप्नुहि ॥"
इति कालिकापुराणम् ॥

नृशंस त्रि, (नॄन् नरान् शंसति हिनस्तीति । नृ+शंस हिंसायाम्+"कर्म्मण्यण् ।" ३।२।१। इत्यण् ।) क्रूरः । परद्रोही । इत्यमरः । ३ । १ । ४६ । (यथा, महाभारते । ३ । १६२ ।
"ये नृशंसा दुराचाराः प्राणिनां प्राणनाशकाः ।
उद्वेजनीया भूतानां व्याला इव भवन्ति ते ॥")

नृसिंह, पुं, (ना चासौ सिंहश्चेति । नरसिंह शब्दवत्प्रशस्यो श्रेष्ठश्च तथात्वम् ।) विष्णुः । इति त्रिकाण्डशेषः । विष्णोर्दशावतारान्तर्गतः चतुर्थ अवतारः । तस्य ध्यानं यथा,—
"सिंहस्य हस्ता वदनं सुरारेः
सदा कराभ्यामुदरं विदार्य्य ।
चक्रं दधानं भगवत्यरूपं
नमो नमो देवपतिं नृसिंहम् ॥"
इत्यग्निपुराणम् ॥
महाविष्णुः । तस्यपूजादि यथा,—
अथ नृसिंहमन्त्राः । विश्वे ।
"अथ मन्त्रं प्रवक्ष्ये पूर्व्वं महाविष्णुमनुत्तमम् ।
क्षकारं प्रणवाद्यं तु अन्तर्गतमूर्द्धमीरयेत् ॥
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ।
नमाम्यहमिति प्रोक्तो मन्त्रराजस्तु उत्तमः ॥
अयं मन्त्रो मायापुटितोऽपि भवति तदा कर्म-स्तम्भः । तथा च विश्वे
"इन्द्रमायापुटितश्चेत् स्यात् कर्म्मकामफलप्रदः ।"
अस्य पूजा प्रातःकृत्यादिपैठिकन्यासपीठमन्त्रान्तं विधाय अर्घ्यादिस्थापनं कुर्य्यात् । शिरसि ब्रह्मणे ऋषये नमः । मुखेऽनुष्टुप्छन्दसे नमः । हृदि नृसिंहाय देवतायै नमः । तत षडङ्गन्यासः ।
"चतुर्भिश्चैव वर्णैः शिरस्तात्र्यक्षिरयते ।
शिरशाक्षिभिः षड्भिः शिखा बहुभिः कवचमीरितम् ॥
द्वादशभिर्नेत्र प्रोक्तं अस्त्रं स्यात् करशाखरे ॥"
ततो मन्त्रन्यास ।
"शिरोललाटनेत्रेषु मुखबाहुषु दृग्बिले ।
सन्धिषु कुक्षौ हृदये कण्ठे पार्श्वयोः पृष्ठ ॥
अपराङ्गे च ककुदि न्यसेद्वर्णान् यथाक्रमम् ॥"
ध्यानम् ।
"माणिक्याद्रिसमप्रभं निजरुचा संत्रस्तरक्षोगणं जानुन्यस्तकराम्बुजं त्रिनयनं रत्नोल्लसद्भूषणम् । बाहुभ्यां धृतशङ्खचक्रमनिशं दंष्ट्रोग्रवक्त्रोल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयं वन्दे नृसिंहं विभुम् ॥
एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं कृत्वा पैठिकपीठपूजां कृत्वा पुनर्ध्यात्वा आवाहनादि पञ्चपुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजा-मारभेत । केशरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च अङ्गानि पूजयेत् । यथा ओम् श्रीं हृदयाय नमः । महाविष्णु शिरसे स्वाहा । ज्वलन्तं सर्वतोमुखं शिखायै वषट् । नृसिंहं भीषण कवचाय हुं । भद्र मृत्युमृत्यु नेत्रत्रयाय वौषट् । नमाम्यहं अस्त्राय फट् । तत पूर्व्वादि दलेषु गरुड़ शङ्करं शेषं शतानन्दं प्रागादि दिक्षु श्रियं ह्रियं धृतिं पुष्टिं च दलाग्रेष्वर्च्चयेत् पूजयेत् । तदनु इन्द्रादीन् वज्राद्यांश्च संपूज्य धूपादिविसर्ज्जनान्तं कर्म्म समापयेत् । अस्य पुरश्चरणं द्वात्रिंशल्लक्ष जप । तथा च ।
"द्वात्रिंशल्लक्षं जपेन्मन्त्रं पायसाक्तं हुनेत् ।
अथ कौमोदकीं शङ्खगदे धरेत् पूजयेत ॥"
तत इन्द्रादीन् वज्रादींश्च संपूज्य धूपादिभिः सार्व्वा क्रमेण समापयेत् । अस्य पुरश्चरणं बत्तीसलक्षजप । तथा च ।
"बत्तीसलक्षं जपेन्मन्त्रं घृतेन कुङ्कुमाक्तम् ।
मधुयुक्तं सशर्करं तीलकेलासहा द्रवम् ॥"
मन्त्रान्तरं यथा,—
"एकारो बिन्दुमाक्षेत् नृसिंहस्याक्षिका ।
एकाक्षरो महः प्रोक्त कर्म्मकामफलप्रदः ॥"
अस्य पूजा प्रातःकृत्यादिपैठिकन्यासान्तं विधाय कर्म समाचरेत् । शिरसि अत्रये ऋषये नमः । गायत्री छन्दो नृसिंहो देवता क्षकारो बीजं ईकार शक्तिः सकलदेवाख्या बीजमयी कल्पना । अस्य पुरश्चरणमष्टलक्षजपः । तथा च । षडङ्गं षडीर्घयुक्तेनादि ॥ ७ ॥
मन्त्रान्तरं यथा । विश्वे ।
"वदेदग्निशक्तं वीजं नृसिंहं दीर्घयुक्तम् ।
एकाक्षरो महः प्रोक्तो सकलां कामदा मनुः ।"
अत्र ब्रह्मा ऋषिर्गायत्री छन्दो नृसिंहो देवता वह्नीन्दुवीजरीबीजाद्यकल्पना । ध्यानादिकं पूर्व्ववत् । अस्य पुरश्चरणमष्टलक्षजप ।

"वज्रनखाय विद्महे तीक्ष्णदंष्ट्राय धीमहि । तन्नो नृसिंहः प्रचोदयात् ।
मन्त्रान्तरं यथा —
"मायाः प्रतिमैश्चैतद्रक्षो वर्णाक्षरं महः ।
षडक्षरो बरदो कथितः सर्व्वकामदः ॥"
अस्य पूजा प्रातःकृत्यादिपैठिकन्यासपीठन्यासान्तं पीठमन्त्रं विधाय अर्घ्यादिस्थापनं कुर्य्यात् । शिरसि ब्रह्मणे ऋषये नमः । मुखे पङ्क्ति छन्दसे नमः । हृदि नृसिंहाय देवतायै नमः । तत षडङ्गन्यासः । ह्रां अङ्गुष्ठाभ्यां नमः । ह्रीं तर्जनीभ्यां स्वाहा । ह्रूं मध्यमाभ्यां वषट् । ह्रैं अनामिकाभ्यां हुं । ह्रौं कनिष्ठाभ्यां वौषट् । ह्रः करतलपृष्ठाभ्यां फट् । एवं हृद यादिषु । ततो ध्यानम् ।
"कोपारक्तोज्ज्वलाक्षं विरचितविकटं भीमदंष्ट्रं
निशितं
पाशादार्यास्त्रमुद्यत्प्रतिहततिमिरं सिंहदेहं
नाथम् ।
शुभ्र चक्रासिचापाङ्कुशकुलिशगदाशङ्खपाशावगाढ्य
हस्तं
भीमं तीक्ष्णोग्रदंष्ट्रं भजितवरविकरालमीडे
नृसिंहम् ॥"

दयुजस्य जपेन्मन्त्रमित्यादिवचनात् ।" इति तन्त्रसारः ॥ * ॥ योगप्रसिद्धासनविशेषः ।
तस्य लक्षणं यथा, रतिमञ्जर्य्याम् ।
"पादौ समीक्ष्य योनौ च हस्ताक्षिप्तप्रपीडनम् ।
स्तनयोर्व्वेष्टयेन्नार्य्या बन्धो नृसिंहसंज्ञकः ॥"
(स्वनामख्यातनृपविशेषः । यथा, सह्याद्रिखण्डे । ३१ । ४० ।
"नागात् नृसिंहभूपालस्ततस्तो गाढ़भावकः ।"
ना सिंह इव इत्युपमितसमासः ।) नरश्रेष्ठः ।
(यथा, महाभारते । ८ । ५९ । २४ ।
"दृष्ट्वा महार्हैः क्रतुभिर्नृसिंहाः
सन्त्यज्य देहान् सुगतिं प्रपन्नाः ॥")

नृसिंहचतुर्द्दशी, स्त्री, (नृसिंहप्रिया नृसिंहव्रतोपलक्षिता वा चतुर्द्दशी ।) वैशाखशुक्लचतुर्द्दशी । तत्र व्रतविधिर्यथा —
"वैशाखस्य चतुर्द्दश्यां शुक्लायां श्रीनृकेशरी ।
जातस्तदस्यां तत्पूजोत्सवं कुर्व्वीत सव्रतम् ॥"
अथ श्रीनृसिंहचतुर्द्दशीव्रतनियमाः । नारसिंहपुराणे श्रीभगवन्नृसिंहप्रह्लादसंवादे व्रतविधिकथने ।
"वर्षे वर्षे तु कर्त्तव्यं मम सन्तुष्टिकारकम् ।
महागुह्यमिदं श्रेष्ठं मानवैर्भवभीरुभिः ॥"
किञ्च ।
"विज्ञाय मद्दिनं यस्तु लङ्घयेत् स तु पापभाक् ।
एवं ज्ञात्वा प्रकर्त्तव्यं मद्दिने व्रतमुत्तमम् ।
अन्यथा नरकं याति यावच्चन्द्रदिवाकरौ ॥" * ॥
तत्राधिकारिनिर्णयः । तत्रैव ।
"सर्व्वेषामेव लोकानामधिकारोऽस्ति मद्व्रते ।
मद्भक्तैस्तु विशेषेण कर्त्तव्यं मत्परायणैः ॥" * ॥
अथ तन्माहात्म्यम् । तत्रैव ।

श्रीप्रह्लाद उवाच ।
"नमस्ते भगवन् विष्णो नृसिंहवपुषे नमः ।
त्वद्भक्तोऽहं सुरश्रेष्ठ त्वां पृच्छामि च तत्त्वतः ॥
स्वामिंस्त्वयि ममोत्पन्ना भक्तिर्म्मे तु विधा कथम् ।
कथं ते दयितो जातः कारणं वद मे प्रभो ॥"

श्रीनृसिंह उवाच ।
"कथयामि महाप्राज्ञ शृणुष्वैकाग्रमानसः ।
भक्तेस्तु कारणं वत्स ! प्रियत्वस्य च तत् पुरा ॥
पुराकल्पे त्वमभूर्विप्र किञ्चित्त्वं नाध्यधीतवान् ।
नाम्ना च वसुदेवो हि वेश्यायां तत्परो ह्यभूः ॥
तस्मिन् जन्मनि नैव त्वं चकर्थं सुकृतं कियत् ।
एकं तु मद्व्रतं चैकं वेश्यासङ्गतिलालस ॥
मद्व्रतस्य प्रभावेण भक्तिर्जाता तवेदृशी ।"

श्रीप्रह्लाद उवाच ।
"श्रीनृसिंहाच्युत स्वामिन् कस्य पुत्त्रेण किं कृतम् ।
वेश्यायां वर्त्तमानेन कथं तद्धि कृतं मया ॥
आख्याहि विस्तरेणेदं वक्तुमर्हसि साम्प्रतम् ।"

श्रीनृसिंह उवाच ।
"पुरावन्तीपुरे ह्यासीद्ब्राह्मणो वेदपारगः ।
तन्नाम वसुशर्म्मेति सर्व्वलोकेषु विश्रुतम् ॥
नित्यं सोमक्रियामेव करोति द्विजसत्तम ।
ब्रह्मक्रियासु सततं सर्व्वासु निज तत्परः ॥
अग्निष्टोमादिभिर्यज्ञैरिष्टाः सर्व्वे सुरोत्तमाः ।
तेनापि विद्यमानेन न कृतं दुष्कृतं कियत् ॥
तस्य भार्य्या सुशीलाभूद्विख्याता भुवनत्रये ।
पतिव्रता सदाचारा पतिभक्तिपरायणा ॥
जज्ञिरे च सुताः पञ्च तस्यां द्विजवरात्ततः ।
सदाचाराः सुविद्वांसः पितृभक्तिपरायणाः ॥
तेषां मध्ये कनिष्ठस्त्वं वेश्यायां तत्परः सदा ।
तां यमिनेश्यमानेन सुरापानं कृतं त्वया ॥
सदा पापरतस्त्वं हि नाशयाध्ययनं भ्रमम् ।
विलासिनीगृहे नित्यं वसतिश्चाभवत्तव ॥
एकदा तद्गृहे ह्यासीत्तया सह महान् कलिः ।
तत्र कलहभावेन भोजनं न कृतं त्वया ॥
अज्ञानान्मद्व्रतं चक्रे व्रतानामुत्तमं मम ।
तया सह विवादेन रात्रौ जागरणं कृतम् ॥
वेश्यया अपि तत् सर्व्वं प्रसङ्गात्तु तया कृतम् ।
रात्रौ जागरणं तस्याः सञ्जातं कामशोधनम् ॥
उभयोर्मद्व्रतं जातमज्ञानादबुद्धिपूर्व्वकम् ।
तेन पीयूषतेजाढ्य मोदन्ते दिवि देवताः ॥
चराचरं तु ततो ब्रह्मा चक्रे मद्व्रतमुत्तमम् ।
मद्व्रतस्य प्रभावेण निर्म्मितं सचराचरम् ॥
ईश्वरेणापि तच्चीर्णं वधार्थं त्रिपुरस्य च ।
महिम्नैव व्रतस्यास्य त्रिपुरं विनिपातितम् ॥
अन्यैश्च बहुभिर्देवैर्ऋषिभिश्च पुरातनैः ।
राजभिश्च महाप्राज्ञैर्व्विहितं व्रतमुत्तमम् ॥
एतद्व्रतप्रभावेण सर्व्वे सिद्धिमुपागताः ॥
वेश्यापि मत्प्रिया जाता त्रैलोक्ये सुखचारिणी ।
ईदृशं मद्व्रतं वत्स ! त्रैलोक्ये चैव विश्रुतम् ॥
धूर्त्तायाश्च विलासिन्या व्रतमेतदुपस्थितम् ।
प्रह्लाद ! तेन ते भक्तिर्म्मयि जाता ह्यनुत्तमा ।
सा वेश्या त्वप्सरा जाता दिवि भोगाननेकशः ।
भुक्त्वा कामं विलीना तु सा प्रह्लाद विवेश माम् ॥
कार्य्यार्थमवतारस्ते मच्छरीरात् पृथक् तव ।
विधाय सर्व्वकार्य्याणि शीघ्रं मयि गमिष्यसि ॥
य इदं व्रतमप्यत्र न विधास्यन्ति मानवाः ।
न तेषां पुनरावृत्तिः कल्पकोटिशतैरपि ॥
अपुत्रो लभते पुत्रान्मद्भक्तांश्च सुवर्च्चसः ।
दरिद्रो लभते लक्ष्मीं धनदस्य च यादृशी ॥
तेजस्कामो लभेत्तेजो राज्यैषी राज्यमुत्तमम् ।
आयुष्कामो लभेदायुर्यादृशञ्च शिवस्य च ॥
स्त्रीणां व्रतमिदं साधु पुत्त्रदं भाग्यदं तथा ।
अवैधव्यकरं तासां पुत्रशोकविनाशनम् ॥
धनधान्यकरञ्चैव पतिप्रियकरं शुभम् ।
सार्व्वभौमसुखं तासां न्यूनञ्चापि भवेत्ततः ॥
स्त्रियो वा पुरुषा वापि कुर्व्वन्ति व्रतमुत्तमम् ।
तेभ्यो ददाम्यहं सौख्यं भुक्तिमुक्तिफलं तथा ॥
बहुनोक्तेन किं वत्स ! व्रतस्यास्य फलस्य हि ।
मद्व्रतस्य फलं वक्तुं नाहं शक्तो न शङ्करः ।
ब्रह्मा चतुर्भिर्व्वक्त्रैश्च नालं व्याख्यातुमीश्वरः ॥'
किञ्च तत्रैव व्रतविधिकथने ।
"यदा यदा प्रवृत्तिः स्यात् पातकस्य कलौ युगे ।
तदा तदा विधास्यन्ति मद्व्रतं विरलं जनाः ॥
मद्व्रतस्य विधाने च मलिनं स्यात् दुरात्मनाम् ।
यदा पापरतानान्तु पुण्याख्यो विक्रमैरपि ॥
विधानेन प्रकर्त्तव्यं माधवे मासि मद्व्रतम् ।
मासे भूतदिने वत्स ! सर्व्वपापप्रणाशनम् ॥
येनैव क्रियमाणेन सद्य[illegible] ।
नाशयेत्तु यथा वर्च्चसि मानुषाणां महात्मनाम् ॥"
तत्रैव च ।
"य इदं शृणुयान्नित्यं व्रतं पापप्रणाशनम् ।
तस्य श्रवणमात्रेण ब्रह्महत्या व्यपोहति ॥
पवित्रं परमं गुह्यं कीर्त्तयेद्यस्तु मानवः ।
सर्व्वान् कामानवाप्नोति व्रतस्यास्य फलं लभेत् ॥"
अथ तद्व्रतदिननिर्णयः । आगमे ।
"वैशाखे शुक्लपक्षे च चतुर्द्दश्यां महातिथौ ।
सायं प्रह्लादधिक्कारमर्षिस्तु परो हरिः ॥
सद्यः कटकटाशब्दविद्रावितसभाजनः ।
लीलया स्तम्भगर्भादुद्भूतः सम्प्रभीषणः ॥
नृहरिर्व्वरदातारं भक्तः सम्पूजयेत् ।
महापुण्यतमायाश्च सायं विष्णुं प्रपूजयेत् ॥"
इति नारसिंहे ।
"वैशाखशुक्लपक्षस्य चतुर्द्दश्यां समाचरेत् ।
मज्जन्मसम्भवं पुण्यं व्रतं पापप्रणाशनम् ॥"
किञ्च ।
"स्वातीनक्षत्रयोगे तु शनिवारे हि मद्व्रतम् ।
सिद्धयोगस्य योगे च लभ्यते दैवयोगतः ॥
सर्व्वैरेतैस्तु संयुक्तं हत्याकोटिविनाशनम् ।
केवलञ्च प्रकर्त्तव्यं मद्दिनं सुखकाङ्क्षिभिः ।
वेधेन तु कर्त्तव्या कारयित्वा चतुर्द्दशी ॥"
अथ तद्व्रतविधिः । तत्रैव ।
"प्रातरुत्थाय कुर्व्वीत नियमं मनसा चरन् ।
मामेव मद्दिने वत्स ! दन्तधावनपूर्व्वकम् ॥"
नियममन्त्रम् ।
'श्रीनृसिंह महोग्रस्त्वं दयां कुरु ममोपरि ।
अद्याहं ते विधास्यामि व्रतं निर्व्विघ्नतां नय ॥
व्रतस्थेन न वक्तव्यं मद्दिने पापिभिः सह ।
मिथ्यालापो न कर्त्तव्यः समग्रफलकाङ्क्षिभिः ॥
स्त्रियं दूरं विहायोच्चैर्व्रतस्थेन महात्मना ।
स्मरणं मम कर्त्तव्यं मद्दिने सकले शुभे ॥
ततो मध्याह्नवेलायां नद्यादौ विमले जले ।
गृहे वा देवखाते वा तडागे वातिशोभने ॥
वैदिकेन च मन्त्रेण स्नानं कुर्य्याद्विचक्षणः ।
मृत्तिकागोमयेनैव तथा धात्रीफलेन वा ॥
तिलैश्च सर्व्वपापघ्नैः स्नानं कृत्वा महात्मभिः ।
परिधाय शुचिर्व्वस्त्रे नित्यकर्म्म समाचरेत् ॥
ततो गृहे समागत्य स्मरन् मां भक्तितत्परः ।
गोमयेन विलिप्याथ कुर्य्यादष्टदलाम्बुजम् ॥
कलसं तत्र संस्थाप्य ताम्रं रत्नसमन्वितम् ।
तस्योपरि न्यसेत् पात्रं तण्डुलैः परिपूरितम् ॥
हैमीं मूर्त्तिन्तु तत्रैव स्थाप्य लक्ष्म्या सहैव च ।
पलेन वा तदर्द्धेन तदर्द्धार्द्धेन वा पुनः ॥
यथाशक्त्या तथा काम्यं वित्तशाठ्यविवर्ज्जितैः ।
पञ्चामृतेन वै स्नाप्य पूजनन्तु समाचरेत् ॥
ततो ब्राह्मणमाहूय तमाचार्य्यमलोलुपम् ।
कुर्य्याद्ब्रह्मकमाहूय प्राज्ञं दान्तं जितेन्द्रियम् ।

तेनैव कारयेत् पूजां तद्वा यात्रानुसारतः ।
पाषाणदारुधातूनां पूजां कुर्य्याद्यथा व्रतम् ॥"
तथाचान्ये प्रकारः पूजनीयः । तथा चागमे ।
'प्रभाते विमलायां वा शिवे पुण्या चतुर्दशी ।
पूजयेत्तत्र यत्नेन हरिं प्रह्लादमेव च ॥"
इत्युपक्रमे ।
"मण्डपे कारयेत्तत्र पुष्पस्तवकशोभितम् ।
तन्मध्येऽङ्कुरे पुष्पे पुष्पैश्चैव यथाविधि ।
उपचारैः षोडशभिर्मन्त्रैर्नामभिस्तथा ।
मत्पौराणिकैर्मन्त्रैः पूजनीयो विधिवत् ॥"
तत्र चन्दनमन्त्रः ।
'चन्दनं शीतलं दिव्यं चन्दनकुङ्कुमान्वितम् ।
ददामि ते प्रयुक्तं हि नृसिंह परमेश्वर ॥"
पुष्पमन्त्रः ।
"कालोद्भवानि पुष्पाणि तुलस्यादीनि वै प्रभो ।
पूजयामि नृसिंह त्वां लक्ष्म्या सह नमोऽस्तु ते ॥"
धूपमन्त्रः ।
"कालागुरुमयं धूपं सर्व्वदेवसुखावहम् ।
करोमि ते महाविष्णो ! धर्म्मकामार्थवृद्धये ॥"
दीपमन्त्रः ।
"दीपः पापहरः प्रोक्तस्तमसां राशिनाशनः ।
दीपेन लभते तेजस्तस्माद्दीपं ददामि ते ॥"
नैवेद्यमन्त्रः ।
"नैवेद्यं सौख्यदं चारु भक्ष्यभोज्यसमन्वितम् ।
ददामि ते रमाकान्त सर्व्वपापक्षयं कुरु ॥"
अर्घ्यमन्त्रः ।
"नृसिंहाच्युत देवेश लक्ष्मीकान्त जगत्पते ।
अनेनार्घ्यप्रदानेन सफला स्युर्मनोरथाः ॥"
पुनरावाहनम् ।
"पीताम्बर महाविष्णो प्रह्लादभयनाशन ।
यथा भूतार्च्चनं नाथ यथोक्तफलदो भवेत् ॥
रात्रौ जागरणं कुर्य्यात् गीतवादित्रवर्त्तनैः ।
पुराणपठनं हृष्टः प्रोक्तं शक्रशापकम् ॥
ततः प्रभातसमये स्नात्वा कृत्वा कृताञ्जलिः ।
पूर्व्वोक्तेन विधानेन पूजयेच्च प्रयत्नतः ॥"
किञ्च ।
"मद्वंशे ये नरा जाता ये जनिष्यन्ति मत्पुरः ।
तांस्त्वमुद्धर देवेश दुःसहाद्भवसागरात् ॥
पातकार्णवमग्नस्य व्याधिदुःखाम्बुवारिधेः ।
नीचैस्तु परिभूतस्य महादुःखगतस्य मे ॥
करावलम्बनं देहि शेषशायिन् जगत्पते ।
श्रीनृसिंह रमाकान्त भक्तानां भयनाशन ॥
क्षीराम्बुधिनिवास त्वं चक्रपाणे जनार्द्दन ।
व्रतेनानेन मे देव भुक्तिमुक्तिप्रदो भव ॥
एवं प्रार्थ्य ततो देवं विसृज्य च यथाविधि ।
उपहारादिकं सर्व्वमाचार्य्याय निवेदयेत् ॥
दक्षिणाभिः समभ्यर्च्य ब्राह्मणांश्च विसर्ज्जयेत् ।
एवं व्रतसमाप्तिर्भोक्तव्यं सह बन्धुभिरिति ॥"
इति श्रीनृसिंहपुराणोक्तिः १८ विलासः ॥

नृसेनं क्ली सेने, (नृणां सेना । "विभाषा सेने ।"
२ । ४ । २५ । इति पाक्षिकं क्लीवत्वम् ।) नृणां
सेना । इत्यमरः । २ । ५ । ३० ॥

नृसोमः, पुं (ना सोमश्चन्द्र इव । उपमितसमासः ।) नरश्रेष्ठः । यथा, रघौ । ५ । ५९ ।
"तमेकुपल्लवमपद्मविभ
सोमोद्भवायाः सरितो नृसोमः ।
उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रम्
प्रयाह तस्मादुपपीतमानः ॥"

नृहरिः, पुं, (ना चासौ हरिश्चेति ।) नृसिंहावतारः । यथाह जयदेवः ।
"तवे च विरक्तरे मम सौमकूर्म
कोलोऽभवत्सुदर्शितमकरन्दया ।
योऽभूदयं महतापत्रद्युकृत
वक्षो भगाय भविता प्रहरिष्यतारीम् ॥"
(यथा च भागवते । ७ । ८ । २० ।
"स सत्यनामी निखिलोऽपमृह्य
षट्पञ्चकोशो नृहरिर्महासुरः ॥")

नॄ गि नये । कविकल्पद्रुमः ॥ (क्र्यां-पां-परं-सकं-सेट् ।) गि, नृणाति नीर्णं नीर्णि । नीति प्रापणा । इति दुर्गादासः ॥

नॄ, स नये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) स, नरति । नीतिः प्रापणा । इति दुर्गादासः ॥

नेजकः पुं, (णिज शुद्धौ + ण्वुल् ।) निर्णेजकः । रजकः । (यथा मनौ । ८ । ३९६ ।
"शाल्मलीफलके श्लक्ष्णे नेनिज्यान्नेजकः शनैः ।
न च वासांसि वासोभिर्निर्हरेन्न च वासयेत् ॥"
(शोधके, त्रि ।)

नेता, [ऋ] पुं, (नयतीति । नी + तृच् ।) प्रभुः । इत्यमरः । ३ । १ । १० ॥ (यथा, रघौ । २ । ७१ ।
"शशाममोपवाणी नेतुरेभ्रमवेष्टनीयिका ॥")
निम्बवृक्षः । इति राजनिर्घण्टः ॥ प्रापके, त्रि ।
(यथा महाभारते । ५ । ६६ । ६ ।
"चिन्त्य स्यादुर इव मातलिर्न नित्यम् ।
रथो नेता हि मम मे दानार्थोऽपि भग-
वान्नाम् ॥")

नेत्रं क्ली, (नीयते अनेन इति नीयते । "दाम्नी-
शसेति ।" ३ । २ । १८२ । इति करणे ष्ट्रन् ।)
चक्षुः । (यथा, मनु । ४ । ६७ ।
"नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम् ।
न पश्येत् प्रसवन्तीञ्च तेजस्कामो द्विजोत्तमः ॥")
वस्त्रं । धौतवस्त्रम् । इत्यमरः । ३ । ३ । १८५,
३ । ३ । १८८ ॥ मन्थगुणः । (यथा, महाभारते ।
१ । १८ । १३ ।
"मन्थानं मन्दरं कृत्वा तथा नेत्रञ्च वासुकिम् ।
देवा मथितुमारब्धाः समुद्रं निधिमम्भ-
साम् ॥")
वृक्षमूलम् । रथः । नेतरि, त्रि । इति मेदिनी ।
रे, ६३ ॥ (यथा, महाभारते । ५ । ५० । ३ ।
"स्तवे गाढ इव नावनेता
नागस्य पौरे अधवे निमग्नः ॥")
नाडी । इति विश्वः । वस्त्रभेदः । इति
राजनिर्घण्टः ॥

नेत्रच्छदः, पुं, (नेत्रे छादयतीति । छद +
णिच् + क । ततो ह्रस्व ।) नेत्रपिधायकचर्म-
पुटः । चक्षुर पाता इति भाषा । तत्पर्य्य
पक्ष्मन्त्र भाषायाँ पक्ष्म । १ । १ । १२ ॥

नेत्रपर्य्यन्तः, पुं, (नेत्रयोः पर्य्यन्तः प्रान्तः ।)
अपाङ्गः । इति राजनिर्घण्टः ॥ तदवच्छिन्ने, त्रि ।

नेत्रपिण्डः, पुं, (नेत्रे पिण्ड इव पिण्ड इवास्य इति ।)
बिडालः । इति हारावली । ८३ ॥ चक्षुर्गोल-
कश्च ॥

नेत्रपुष्करा स्त्री (नेत्रयोः पुष्करं यथा यस्याः सा
नेत्रपुष्करं यथा ।) रुद्रजटा । इति राजनिर्घण्टः ॥

नेत्रमीनः, स्त्री (नेत्रमीनमिवास्य मीनरूप
यस्याः । ततः पृषोदरादित्वात् साधु रूपम् ।
क्वचित् नेत्रमीना इति वा पाठः ।) पयस्विनी
लता । इति राजनिर्घण्टः ॥

नेत्रयोनिः, पुं (नेत्राणि योनिभिन्नानि यस्य ।
सहस्रयोनय एव सहस्राक्षाणि आसन् यत्र
अहल्याघर्षणे । नेत्राणि योनय इवास्येति
वा ।) इन्द्रः । इति शब्दमाला । (नेत्र आदि
सौवर्ण योनिषु पूर्वविकारत्वं यस्य ।) चन्द्र
नेत्रोद्भवत्वात् चन्द्र ॥

नेत्ररञ्जनं, क्ली, (रञ्जयतीति रञ्जि । रञ्ज + ल्युट्
ल्युट् । नेत्रस्य रञ्जनम् ।) कज्जलम् । यथा,—
"शृणु त्वं कथितो भूप प्रसङ्गो नेत्ररञ्जनम् ।
येन तुष्यति कामाख्या त्रिपुरा भैरवी तथा ॥
सौवीरं याम्यजं पुष्पं मयूरमिन्दुं तथा ।
दर्भिका नेत्ररञ्जनं चक्षुष्माणि भवन्ति वै ॥
महेन्द्रस्तु सौवीरं याम्यजं प्रकारणया ।
मयूरमिन्दुं तथा नेत्रनीलस्तु तैजसम् ॥
वह्नि निगाद्य पैतानि त्रिनाभौ तैजसं यथा ।
प्रदद्यात् सर्वदेवेभ्यो देवीभ्यश्चापि पूजक ॥
ब्रह्मविष्णुशिवेभ्यश्च ताम्रादौ दीपवर्त्तिना ।
महत्त्वं याती सु दर्भिका मत्स्येन्द्रिता ॥
सर्व्वाभावे तु रुद्रादिदेवेभ्यो दर्भिकाञ्जनम् ।
महामाया जगद्धात्री कामाख्या त्रिपुरा तथा ॥
स्वाङ्गेषि महालेप चक्षुभिरपि वराङ्गने ।
त्रिपुरा भारत कुर्य्यात्कामाख्यायै तदन्तरम् ॥
भारती लक्ष्मीं पुनो भैरवी त्रिपुराञ्जनम् ।
न प्रयच्छेद्यो नरो धायदो नेत्ररञ्जनम् ॥
न पूजापचमाप्नोति कल्पान्तैर्दिनाङ्गने ॥
चतुर्वर्ग्गप्रदो भूप कामद नेत्ररञ्जनम् ।
तस्माद्दद्यादिदं देवादिभ्यो भक्तितो नर ॥
इति ते कथितो भूपशोभो नेत्ररञ्जनम् ॥"
इति कालिकापुराणे ६७ अध्यायः ॥

नेत्ररोगः, पुं, (नेत्रस्य चक्षुषो रोगः ।) चक्षु
रोगः । तस्य निदानं यथा,—
"उष्णाभितप्तस्य जलप्रवेशाद्
दूरेक्षणात् स्वप्नविपर्य्ययाच्च ।
स्वेदाद्रजोधूमनिषेवणाच्च
छर्द्देर्विघातादतिवमनाच्च ॥
द्रवान्नपानातिनिषेवणाच्च
विण्मूत्रवातक्रमनिग्रहाच्च ।

प्रसक्तसंरोदनशोककोपा-
च्छिरोऽभिघातादतिमद्यपानात् ।
तथा ऋतूनाञ्च विपर्य्ययेण
क्षयाभिघातादतिमैथुनाच्च ।
वाष्पग्रहात् सूक्ष्मनिरीक्षणाच्च
नेत्रे विकारान् जनयन्ति दोषाः ॥
वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः ।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥”
तस्य सम्प्राप्तिर्यथा,—
“निस्तोदनस्तम्भनरोमहर्ष-
सङ्घर्षपारुष्यशिरोऽभितापाः ।
विशुष्कभावः शिशिराश्रुता च
वाताभिपन्ने नयने भवन्ति ॥
दाहप्रपाकौ शिशिराभिनन्दा
धूमायनं वाष्पसमुच्छ्रयश्च ।
उष्णाश्रुता पीतकनेत्रता च
पित्ताभिपन्ने नयने भवन्ति ॥
उष्णाभिनन्दा गुरुताक्षिशोथः
कण्डूपदेहावतिशीतता च ।
स्रावो मुहुः पिच्छिल एव चापि
कफाभिपन्ने नयने भवन्ति ॥
ताम्राश्रुता लोहितनेत्रता च
राज्यः समन्तादतिलोहिताश्च ।
पित्तस्य लिङ्गानि च यानि तानि
रक्ताभिपन्ने नयने भवन्ति ॥”
इति माधवकरः ॥
(अस्य निदानादिपूर्व्वक लक्षणं चिकित्सा च यथा,—
“उष्णाभितापरकटुकैरभिघातेन वा पुनः ।
क्रमशश्शीर्षाणि रोगाः कुर्व्वन्ति नेत्रयोः ॥
सहजा ये परा ज्ञेया वक्ष्यामि तस्य लक्षणम् ।
रुक् च कण्डूश्च तोदश्च शुष्कशोथाश्च वातिकः ।
वातिके द्विविधानीयात् पैत्तिके प्रस्रवं परम् ।
सरक्तञ्च नेत्रे च उष्णस्रावश्च पैत्तिके ।
शोथकण्डू सन्निपाते शीतकाङ्क्षी कफात्मके ॥
रक्तजो भिन्नलिङ्गश्च सर्व्वजो सान्निपातिकः ।
एतद्धि लक्षणं ज्ञात्वा चोपचारं प्रयुञ्ज वै ।
शुण्ठी सुराष्ट्रजसुधा सह काञ्जिकेन
पोट्टेन भावनमिदं सहपैत्तिके च ।
श्लेष्मोद्भवे त्रिफलकल्कमिदं प्रदद्य
मस्तैस्तथा कथितमत्र भिषग्वरैस्तु ॥
शुण्ठी शटी च रजनी त्रिफला च निम्बा
पत्राणि सैन्धवयुतानि सुकाञ्जिकेन ।
ध्रुवं पचन्ति नयने च सर्व्वाभिपाके
रक्तोद्भवे च सकले च तथा प्रशस्तम् ॥
वस्तिकं दारु निशाद्य धूमो
वचाद्य सर्व्वाभयसैन्धवेन ।
प्रलेपनं श्लेष्मभवे विकारे
सवातिके वा हितमेव शस्तम् ॥
शुण्ठी सैन्धवतक्रेण ताम्रभाजे विघर्षितम् ।
अपामार्गस्य मूलं वा मूलं धुस्तूरकस्य वा ॥
अञ्जनञ्च हितं तेषां वातनेत्रामयापहम् ॥
दुग्धेन पय नवनीत यष्टीविमर्दिताश्च
संयोज्या ।
त्रिफला गुडसंयुक्ता सेवन कफनेत्ररोगघ्नम् ।
शुण्ठी सैन्धवयुक्ता मात्राधिका ताम्रभाजने इदम् ।
इमा प्रतिगाञ्जनका भिन्दन्ति सर्व्वांश्च नेत्रगदान् ॥
वातपित्तकफदोषसम्भवान्
नेत्रयोर्बहुविधाञ्च सत्वरात् ।
एक एव हरति प्रयोजितः
त्रिफलाजरसः समाक्षिकः ॥”
इति हारीते चिकित्सितस्थाने ४४ अध्यायः ।)

नेत्ररोगहा [न्] पुं, (नेत्ररोगं हन्तीति । हन् + क्विप् ।) वृश्चिकालीक्षुपः । इति राजनिर्घण्टः ॥ नेत्ररोगनाशके, त्रि ॥

नेत्रामय पुं, (नेत्रस्य आमयो रोगः ।) चक्षूरोगः । तस्य निदानं यथा —
“वातात् पित्तात् कफाद्रक्तादभिष्यन्दश्चतुर्विधः ।
प्रायेण जायते घोरः सर्व्वनेत्रामयाकरः ॥”
इति माधवकरः ॥
(अस्य लक्षणं यथा —
“अल्पाश्रुताऽनुपदेहता च
प्रशान्ततोदातिरुजश्च वातात् ।
पित्तात्तु दाहार्त्तिरुजोऽतिरागाः
पीतोऽतिरेकः सुभृशोष्णमश्रु ॥
गुर्व्वोपदेहो बहुपिच्छिलाश्रु
नेत्रं कफात् स्यात् गुरुता सकण्डूः ।
सर्व्वाणि रूपाणि तु सन्निपाता-
न्नेत्रामयाः षण्णवतिस्तु भेदात् ॥
तेषामभिव्यक्तिरभिप्रदिष्टा
शालाक्यतन्त्रेषु चिकित्सितञ्च ।
पराधिकारे तु न विस्तरोक्तिः
शस्तेति तेनात्र न नः प्रयासः ॥”
इति चिकित्सितस्थाने षड्विंशतितमेऽध्याये चरकेणोक्तम् ॥)

नेत्राम्बु, क्ली (नेत्रस्य अम्बु जलम् ।) अश्रु । इत्यमरः । २ । ६ । ९३ ॥

नेत्रारि, पुं, (नेत्रस्य अरिः शत्रुः ।) सेहुण्डवृक्षः । इति राजनिर्घण्टः ॥

नेत्री, स्त्री, (नीयतेऽनयेति । नी + “दाम्नी-शसेति ।” ३ । २ । १८२ । इति करणे ष्ट्रन् । षित्वात् ङीष् ।) लक्ष्मीः । नाडी । इति शब्द-रत्नावली ॥ नदी । इति मेदिनी । रे, ९४ ॥ (नयतीति । नी + तृच् + ङीप् ।) प्राप-यित्री । (नियन्त्री । इति नीलकण्ठः ॥ यथा, महाभारते । ५ । १६ । १२ ।
“तस्य मे भवती नेत्री भविष्यत्सु निदर्शिनी ॥”)

नेत्रोपमफल, पुं (नेत्रोपमं नयनतुल्यं फलं यस्य ।) वातादः । इति भावप्रकाशः ॥ बादाम इति भाषा ॥

नेत्रौषध, क्ली, (नेत्रस्य औषधम् ।) पुष्पकासीसम् । इति राजनिर्घण्टः ॥ चक्षुरोगौषधमात्रञ्च ॥

नेत्रौषधी, स्त्री, (नेत्रस्य औषधी ।) अजशृङ्गी । इति रत्नमाला ॥ कोना इति भाषा ॥

नेदिष्ठ, त्रि (अयमेषामतिशयेनान्तिकः । अन्तिक + “अतिशायने तमबिष्ठनौ ।” ५ । ३ । ५५ । इति इष्ठन् । “अन्तिकबाढयोर्नेदसाधौ ।” ५ । ३ । ६३ । इति नेदादेशः ।) अन्तिकतमम् । अतिनिकटम् । इत्यमरः । ३ । १ । ६८ । (यथा, ऋग्वेदे । ४ । १ । ५ ।
“स त्वं नो अग्नेऽवमो भवोती नेदिष्ठो अस्या
उषसो व्युष्टौ ॥”
यथाच उद्धवसन्देशे । १ ।
“सोत्कण्ठोऽभूदभिमतकथां संश्रितुं कंसभेदी
नेदिष्ठाय प्रणयलहरी बह्वागुह्याय ॥”)
निपुणम् । इति राजनिर्घण्टः ॥ अङ्कोटवृक्षे, पुं । इति जटाधरः ॥

नेदीयस् [स्] त्रि, (अयमनयोरतिशयेनान्तिकः । अन्तिक + ईयसुन् । नेदादेशः ।) नेदिष्ठः । अत्यन्तसमीप । इति जटाधरः ॥ (यथा, सर्व्व-दर्शनसंग्रहे आर्हतदर्शने ।
“न चेदमिदानीन्तनेष्वपि दवीयान् मध्योऽपरो नेदीयान् दीर्घो बाहुरिति व्यवहारस्य निरा-बाध आगमकालात् ॥”)

नेप , पुं, (नयति प्रापयति शुभमिति । नी + “पानीविषिभ्यः पः ।” उणा । ३ । २३ । इति पः ।) पुरोहितः । उदकम् । इति संक्षिप्त-सारोणादिवृत्तिः ॥

नेपथ्य, क्ली, (नी + विच् + गुप् । नेता तस्य पथ्यम् ।) वेषः । इत्यमरः । २ । ६ । ९९ ॥ (यथा, रघुः । १४ । ९ ।
“रामेन्द्रनेपथ्यविधायिशोभा
तस्योदितासीत् पुनरुक्तदोषा ॥”)
अलङ्कारः । रङ्गभूमिः । इति मेदिनी । ये, ८८ ॥
(यथाह भरतः ।
“वाक्यसाधनतया यत्र पात्रं नैव प्रवेक्ष्यति ।
नेपथ्यमिति प्राकाशी प्रयोज्य तत्र नाटके ॥”)

नेपाल, पुं, स्वनामप्रसिद्धदेशः । इति जटाधरः ॥ (यथा शक्तिसङ्गमतन्त्रे ।
“जटेश्वरं समारभ्य योगेशान्तं महेश्वरि ! ।
नेपालदेशो देवेशि ! साधकानां सुसिद्धिदः ॥”)

नेपालनिम्ब, पुं, (नेपालोद्भवो निम्बः ।) नेपाल-देशोद्भवनिम्बः । तत्पर्य्यायः । नेपालः २ ज्वर-निम्बः ३ ज्वरान्तकः ४ नाडीतिक्तः ५ निदारिः ६ सन्निपातरिपुः ७ । अस्य गुणाः । शीतत्वम् । उष्णत्वम् । गोमसादित्वम् । लघुत्वम् । तिक्तत्वम् । अतिकफपित्तशोथहृद्दाहज्वरापह-त्वञ्च । इति राजनिर्घण्टः ॥

नेपालिका स्त्री, (नेपाले उत्पत्तिरस्या इति । नेपाल + ठन् + टाप् ।) मनः-शिला । इति राजनिर्घण्टः ॥

नेम पुं (नयतीति । नी + “अर्त्तिस्तुसुहिति ।” उणा । १ । १३९ । इति मन् ।) कालः । अवधिः । शालम् । प्राकारः । कैतवम् । इति मेदिनी । मे, १९ ॥ अर्द्धम् । गर्त्तः । इति हेमचन्द्रः । ६ । ७ ॥ सायादि । छन्दः । इति

शब्दरत्नावली । सायकाल । स्फुरम् । अर्द्धम् ।
इति मणिप्रथारोकादिरागि ॥

नेमि, स्त्री, (नयति चक्रमिति । नी+"नियो मि ।" उणा० । ४ । ४३ । इति मि ।) चक्रप्रधिः । रथचक्रस्य भूमिस्पर्शिभागः । तत्पर्य्यायः । प्रधिः २ । इत्यमरः । २ । ८ । ५६ ॥ नेमी ३ । इति भरतः ॥ (यथा रघुः । १ । १७ ।
"मनोऽभिरामाः शृण्वन्तौ रथनेमिस्वनोन्मुखैः । षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ॥")
कूपोपरिस्थकाष्ठाभागः । इति भरतः ॥ (प्रान्तभागः । यथा, रघुः । ८ । १० ।
"अथवर्द्धितरथेन च मेदिनी-
मुदधिनेमिमधिज्यशरासनः ॥")
भूमिकृत्कूपवप्रः । इत्यन्ये । कूपस्य समीपे रज्ज्वाकर्षणार्थं त्रिदारुयन्त्रकम् । इति स्वामी ॥ तत्पर्य्यायः । त्रिका २ । इत्यमरः । १ । १० । २७ ॥
कूपमिक्षटनमारम्भस्थानम् । यथा,—
"नेमिर्नेमीत्रिका चैव स्यात् कूपान्तिकमध्यगे ॥"
इति शब्दरत्नावली ॥

नेमि, पुं, जिनविशेषः । इति हेमचन्द्रः । १ । २८ ॥ तिनिशवृक्षः । इत्यमरः । २ । ४ । २६ ॥ मधुरादौ तिनाश इति ख्यातः ॥ (दैत्यविशेषः । यथा, भागवते । ८ । २१ । १८ ।
"ते विप्रचित्ति र्हि राहो मे नेमे सूयतां वरा । मा युध्यत निवर्त्तध्वं न नः कालोऽयमर्थकृत् ॥"
नयति प्रभूत् विनाशमिति । नी+"नियो मि ।" उणा० ४ । ४३ । इति मि । यथा । इति हितोपदेशः । २ । ९ ।)

नेमिचक्रः, पुं परीक्षितवंश्य अधिसीमकृष्णस्य पुत्रः । स हस्तिनापुरे गङ्गया हृते कौशाम्ब्यां वत्स्यति । इति श्रीभागवते । ९ । २२ । ३९ ॥ (अस्यैव राज्यप्राप्तिसमयनिर्देशो यथा, रामायणपर्व्वणि ३ अध्याये ।
"अथ प्राप्ते शुभे नक्षत्रे विजयम् ... । ... तथा ... ॥
... ॥")

नेमी [न्] पुं (नेम अस्यास्तीति । नेम+इनि ।) तिनिशवृक्षः । इत्यमरटीकायां भरतः ॥

नेमी स्त्री (नेमि+वा ङीष् ।) नेमिः । इत्यमरटीकायां भरतः ॥ (तिनिशवृक्षः । पर्य्यायो यथा,—
"स्यन्दनस्तिनिशो नेमी ——।"
इति वैद्यकरत्नमालायाम् ॥)

नेष्टृ, [ऋ] पुं, (नयति शुभमिति । नी+"नप्तृनेष्टृत्वष्टृ..." उणा० २ । ९६ । इति तृन्प्रत्ययेन साधुः ।) ऋत्विक् । इति संक्षिप्तसारोणादिवृत्तिः ॥ (अग्निदेवः । इति सायणः । यथा ऋग्वेदे । १ । १५ । ३ ।
"अभि यज्ञं गृणीहि नो ग्नावो नेष्टः पिब ऋतुना ॥")

नैकटिक, त्रि, (निकट+"निकटे वसति ।" ४ । ४ । ७३ । इति ठक् ।) निकटवर्त्ती । यथा,—
"ग्रामेष्वप्रमादीप्राप्य ग्रामं परिपूजयन् ।
पञ्चरात्राद्यष्टराद्वैकटिकाश्रमात् ॥"
इति भट्टिः । ४ । १२ ॥

नैकट्य, क्ली, निकटस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । निकटत्वम् ॥ (यथा कथासरित्सागरे । १५ । १२५ ।
"यावत्ते तव नैकट्यात् धर्म्यं च सहधर्म्मिणी ।
तावत् ... विनोदाय च गम्यताम् ॥")
निकटभवे, त्रि ॥

नैकभेद, त्रि, (न एको भेदोऽस्येति ।) उच्चावचम् । अनेकप्रकारः । इत्यमरः । ३ । १ । ८३ ॥

नैकषेय, पुं (निकषाया अपत्यमिति । निकषा+ढक् ।) निकषापुत्रः । राक्षसः । इति हलायुधः ॥

नैगम, पुं, (निगमे भवः । स्वार्थे अण् ।) उपनिषत् १ वणिक् । (यथा, रामायणे । २ । ७७ । २१ ।
"एवं दशरथः प्रीतो ब्राह्मणा नैगमास्तथा ।"
"नैगमा वणिजः ।" इति तट्टीकायां रामानुजः ॥) नागरः । इति मेदिनीशब्दरत्नावल्यौ ॥ नयः । (यथा महाभारते । १२ । १० । ३ ।
"नैको प्रतिविधानार्थं प्रवक्ष्याम्यथ नैगमम् ॥") ऋषिः । इति हेमचन्द्रः । १ । ५२१ ॥ त्रि निगमसम्बन्धि ॥ (निगमप्राप्तमित्यादि । यथा, महाभारते । १३ । १६० । ४ ।
"द्विजेभ्यो वेदवृद्धेभ्यो नैगमेभ्यश्च निश्चयः ॥")

नैचिक, क्ली, (नीच+ठक् ।) गोः शिरोदेशः । इति हेमचन्द्रः । ४ । ३३६ ॥

नैचिकी स्त्री, (नीचैश्चरतीति ठक् । यद्वा निचि कर्णयोः शिरोदेशः । तत्र स्वार्थे कन् । प्रज्ञादि ... ततो गौरादित्वात् ङीष् ।) उत्तमा गौः । इत्यमरः । २ । ९ । ६७ ॥

नैज, त्रि, (निजस्येदमिति । निज+अण् ।) निजसम्बन्धि । स्वीयम् । यथा —
"ब्रह्मास्त्रस्य च संरम्भं ... पाचीनम् ।
... च मात्रस्य नैजं ... च ॥"
इति श्रीभागवते १० स्कन्धे ... ॥
(यथा च हरिवंशे भविष्ये । ११ । ८ ।
"स दृष्टा ... नैजं ... वर ॥")

नैद्र, क्ली, निद्रम् । निद्रस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥ (निद्रसम्बन्धि । निद्रस्य समूहो वा ॥)

नेपाल, पुं, (नेपाले नेपालदेशे भवः । अण् ।) नेपालनिम्बः । इति राजनिर्घण्टः ॥ नेपालदेशसम्बन्धिनि, त्रि ॥ (भूमिनिम्बः । यथा, भावप्रकाशे पूर्वखण्डे प्रथमभागे ।
"किरातक्तोऽन्यो नैपाल सोऽर्द्धतिक्तो ज्वरान्तकः ॥"
रघुनाथपुरी । यथा तत्रैव २ भागे । कण्ठरोगाधिकारे ... ॥
"... नैपालो ... ।
... ॥")

नैपालिक, क्ली, (नेपाले नेपालदेशे भवम् । इति ठक् ।) ताम्रम् । इति राजनिर्घण्टः ॥ (ताम्रशब्देऽस्य गुणादिकं ज्ञातव्यम् ॥)

नैपाली, स्त्री, (नेपाले भवा इत्यण् ङीप् च ।) नवमल्लिका । (नेवारि इति लोके । यथास्याः पर्य्यायः ।
"नैपाली कथिता सप्तला ... ॥"
इति भावप्रकाशस्य पूर्वखण्डे प्रथमे भागे ॥) मनःशिला । (अस्याः पर्य्याया यथा,—
"मनः शिला मनोगुप्ता मनोह्वा नागजिह्विका ।
नैपाली कुनटी गोला शिलाद्रिव्यौषधिः स्मृता ॥"
इति भावप्रकाशः । १ । १ ।)
शेफालिका । इति मेदिनी । ले, १०४ ॥ नीली । इति शब्दरत्नावली ॥

नैपुण, क्ली (निपुणस्य भावः कर्म्म वा इति । "युवादिभ्योऽण् ।" ५ । १ । १३० । इत्यण् ।) नैपुण्यम् । यथा, माघे । १६ सर्गे ।
"प्रकटान्यपि नैपुणं महत्
परवाच्यानि चिराय गोपितुम् ।
विपरीतमयातसौ गुणान्
अथ ... ॥"
(यथा महाभारते । १३ । १८ । ८१ ।
"वैश्यो लाभं प्राप्नुयान्नैपुणञ्च
शूद्रो गतिं ... तथा ... ॥")

नैपुण्य, क्ली, (निपुणस्य भावः कर्म्म वा । "गुणवचनब्राह्मणादिभ्यः कर्म्मणि च ।" ५ । १ । १२४ ।
इति ष्यञ् ।) निपुणता । निपुणस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् । यथा,—
"... ।
... नैपुण्यं ... ॥"
इति रामायणे सुन्दरकाण्डे १० सर्गे ॥

नैमित्तिक, त्रि, (निमित्तादागतं निमित्तभवं वा । इति ठञ् ।) निमित्तजन्यम् । यथा,—
"नैमित्तिकानि काम्यानि निपतन्ति यथा यथा ।
तथा तथैव कार्य्याणि न कालं ... ॥"
इति मलमासतत्त्वम् ॥
मात्स्यपुराणोक्तविधिना ... नैमित्तिकम् ... इत्यादि । यथा,—
"नित्यनैमित्तिके कुर्य्यात् ... ।
... ॥"
इति ... ॥
(निमित्तं वेत्ति निमित्तशास्त्रमधीते वा इति ठक् । ... ।)

नैमित्तिकक्रिया, स्त्री, (नैमित्तिकी चासौ क्रिया चेति ।) निमित्तजन्यकर्म्म ... । यथा,—
"नित्या नैमित्तिकी काम्या क्रिया ... ।
... ॥"
तत्रैव ... ॥
यदैतत्कर्म ... नैमित्तिकं ... ।
... ॥

जातस्य जातकर्म्मादि क्रियाकाण्डमशेषतः ।
पुत्त्रस्य कुर्व्वीत पिता श्राद्धञ्चाभ्युदयात्मकम् ॥"
इति विष्णुपुराणे ३ अंशे ९ अध्यायः ॥
(यथा, मार्कण्डेये । १ । १ ।
"नित्यं नैमित्तिकञ्चैव नित्यनैमित्तिकन्तथा ।
यज्ञस्यास्य तु यत् कर्म्म तन्निबोधाम पुत्त्रक ॥")

नैमित्तिकदान, क्ली, (निमित्तमाश्रित्य दीयते इति दा+भावे ल्युट् । अस्य निरुक्तिर्यथा ।) निमित्तविषयकाधिकारिकर्त्तव्यदानम् । यथा,—
"यत्तु पापोपशान्त्यर्थं दीयते विदुषां करे ।
नैमित्तिकं तदुद्दिष्टं दानं सद्भिरनुष्ठितम् ॥"
इति गरुडपुराणम् ॥

नैमित्तिकलय, पुं, (नैमित्तिकः ब्रह्मणो दिवावसाननिमित्तकत्वात् यो लयः ।) प्रलयविशेषः । यथा —
"चतुर्युगसहस्रान्ते ब्राह्मो नैमित्तिको लयः ।
अनावृष्टिश्च कल्पान्ते जायते शतवार्षिकी ॥
उत्तिष्ठन्ति तदा रौद्रा दिवि सप्त दिवाकराः ।
ते तु पीत्वा जलं सर्व्वं शोषयन्ति जगत्त्रयम् ॥
भूर्भुवःस्वर्महर्ल्लोकस्तस्या यान्ति जनं जनाः ।
रुद्रो भूत्वा ततो विष्णुः पातालानि दहत्यधः ॥
विष्णुर्द्दहति लोकांश्च सुरासुरोरगान् क्रमात् ।
वर्षन्ति च ततस्तत्र नानावर्णा महाघनाः ॥
विष्णुस्तेन शतं याति वर्षाणां वायुरूपिणः ।
विष्णुरेकार्णवे पीत्वा सर्व्वं ब्रह्मस्वरूपकः ।
शेतेऽनन्तासने विष्णुर्नष्टे स्थावरजङ्गमे ।
सुप्तो युगसहस्रं स जगद्भूयोऽसृजद्धरिः ॥"
इति गरुडपुराणम् ॥
(तथा च भागवते । ८ । २४ । ७ ।
"आसीदतीतकल्पान्ते ब्राह्मो नैमित्तिको लयः ॥")

नैमित्तिकस्नान, क्ली, (नैमित्तिकञ्च तत् स्नानञ्चेति । निमित्तवशात् निमित्तमाश्रित्य विधीय स्नानमित्यर्थः ।) विशिष्टनिमित्तवदधिकारिकर्त्तव्यस्नानम् । यथा —
"चाण्डालशवयूपादि स्पृष्ट्वा स्नातो रजस्वलाम् ।
स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तत् ॥"
इति गरुडपुराणम् ॥

नैमिषारण्य, क्ली, (निमिषान्तरमात्रेण निहतं आसुरं बलं यत्र तत्तत्र नैमिषं अरण्यमिति ।) अरण्यविशेषः । तदुत्पत्तिर्यथा —
"तत्र चक्रेण तत्सैन्यमासुरं दीर्णतां यथा ।
निमिषान्तरमात्रेण भस्मसाद्बहुधा कृतम् ॥
एवं कृत्वा ततो देवो मुनिं गौरमुखं तदा ।
उवाच निमिषेणेदं निहतं दानवं बलम् ॥
अरण्येऽस्मिंस्ततस्त्वेतन्नैमिषारण्यसंज्ञितम् ।
भविष्यति यथार्थं वै ब्राह्मणानां विशेषतः ॥"
इति वराहपुराणे गौरमुखं प्रति भगवद्वाक्यम् ॥ अपि च ।
"देशं च सम्प्रवक्ष्यामि यस्मिन्देशे चरिष्यथ ।
यथा मनोमयं चक्रं स दृष्ट्वा तानुयात च ॥
क्षिप्रमेतत्तथा चक्रमनुव्रजत मा चिरम् ।
यत्रास्य नेमिः शीर्य्येत स देशः पुरुषर्षभ ॥
ततो मुमोच तच्चक्रं ते च तत् समनुव्रजन् ।
तस्य वै व्रजतः क्षिप्रं यत्र नेमिरशीर्य्यत ॥
नैमिषं तत् स्मृतं नाम्ना पुण्यं सर्व्वत्र पूजितम् ।
सिद्धचारणसङ्कीर्णं यक्षगन्धर्व्वसेवितम् ॥
स्थानं भगवतः शम्भोरेतन्नैमिषमुत्तमम् ।
अत्र देवाः सगन्धर्व्वाः सयक्षोरगराक्षसाः ।
तपस्तप्त्वा पुरा देवा लेभिरे प्रवरान् वरान् ॥"
इति कौर्म्मे ४ अध्याये षट्कुलीयान् प्रति ब्रह्मवाक्यम् ॥ (क्वचित् नैमिषारण्योऽपि पाठो दृश्यते तत्र तु ब्रह्मणा विसृष्टस्य मनोमयचक्रस्य नेमिः शीर्य्यते यत्रेति व्युत्पत्त्या नैमिषं नैमिषमेव नैमिषं तच्च तदरण्यमिति बोध्यम् । तथा च वायवीये ।
"एतन्मनोमयं चक्रं मया सृष्टं विसृज्यते ।
यत्रास्य शीर्य्यते नेमिः स देशः तपसः शुभः ॥
इत्युक्त्वा सूर्य्यसङ्काशं चक्रं सृष्ट्वा मनोमयम् ।
प्रणिपत्य महादेवं विससर्ज्ज पितामहः ॥
तेऽपि हृष्टतमा विप्राः प्रणम्य जगतां प्रभुम् ।
प्रययुस्तस्य चक्रस्य यत्र नेमिर्व्यशीर्य्यत ॥
तद्वनं तेन विख्यातं नैमिषं मुनिपूजितम् ॥"
तथा च देवीभागवते । १ । २ । २८-३२ ।
"कलिकालविभीताः स्मो नैमिषारण्यवासिनः ।
ब्रह्मणा च समादिष्टाश्चक्रं दत्त्वा मनोमयम् ॥
कथितं तेन नः सर्व्वान् गच्छन्त्वेतस्य पृष्ठतः ।
नेमिः सशीर्य्यते यत्र स देशः पावनः स्मृतः ॥
कलेस्तत्र प्रवेशो न कदाचित् सम्भविष्यति ।
तावत् तिष्ठन्तु तत्रैव यावत् सत्ययुगं पुनः ॥
तच्छ्रुत्वा वचनं तस्य गृहीत्वा तत्सुचालकम् ।
चालयन्निर्गतस्तूर्णं सर्व्वदेशदिदृक्षया ॥
प्रेक्षमाणश्चालयंश्च नेमिः शीर्णोऽत्र पश्यतः ।
तेनेदं नैमिषं प्रोक्तं क्षेत्रं परमपावनम् ॥")

नैमेय, पुं, (नि+मेङ् प्रणिदाने+भावे यत् इति यत् । ततः स्वार्थे प्रज्ञाद्यण् । निमातुमा निम्यामिति केचित् ।) परिवर्त्तः । विनिमयः । इत्यमरः । २ । ९ । ८ ॥

नैयग्रोध, क्ली, ("न्यग्रोधस्य विकारः तत् प्लक्षादिभ्योऽण् ।" ४ । ३ । १६४ । इत्यण् । तस्य विधानसामर्थ्यात् फले न लुक् । "न्यग्रोधस्य च केवलस्य ।" ७ । ३ । ५ । इति न ऐजागमश्च ।) न्यग्रोधफलम् । इत्यमरः । २ । ४ । १८ ॥ न्यग्रोधजातपत्रादि । इति बोपदेवरामतर्कवागीशौ ॥

नैयङ्कव, त्रि, (न्यङ्कोर्विकार इति । "प्राणिरजतादिभ्योऽञ् ।" ४ । ३ । १५४ । इति विकारेऽञ् ।) न्यङ्कुमृगजातचर्म्मादि । इति बोपदेवरामतर्कवागीशौ ॥

नैयत्य, क्ली, (नियतस्येदं इति । नियत+ष्यञ् ।) नियतत्वम् । नियतस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥

नैयायिक, पुं, (न्यायं गोतमादिप्रणीतं तर्कशास्त्रविशेषं अधीते वेत्ति वा । न्याय+"क्रतूक्थादिसूत्रान्ताट्ठक् ।" ४ । २ । ६० । इति ठक् ।) न्यायवेत्ता । न्यायाभिज्ञः । तत्पर्य्यायः । आक्षपादः २ आन्वीक्षिकः ३ आधि० ४ । इति जटाधरः ॥
(यथा, महाभारते । १ । ७ । १६९ ।
"नैयायिकानां मुख्येन वरुणस्यात्मजेन च ।
पराजितो यत्र बन्दी विवादेन महात्मना ॥")

नैरन्तर्य्य, क्ली, (निरन्तरस्य भाव इति । निरन्तर+ष्यञ् ।) निरन्तरत्वम् । निरन्तरस्य भाव इत्यर्थे ष्यञ्प्रत्ययनिष्पन्नम् ॥ (यथा मनौ । ८ । २७१ श्लोकस्य टीकायां कुल्लूकभट्टः ।
"ये च ददति वाचपि नैरन्तर्य्यादपराधगोचरा तैलया पातयेत् ॥")

नैराश्य, क्ली, (निराशस्य निरभिलाषस्य भाव इति । निराश+ष्यञ् ।) आशाया अभावः । यथा,—
"आशा हि परमं दुःखं नैराश्यं परमं सुखम् ।
आशया पिङ्गला वेश्या तस्या जन्म निरर्थकम् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे ६७ अः ॥
(यथा महाभारते । १ । २२५ । १ ।
"स तु नैराश्यमापन्नः सदा ग्लानिसमन्वितः ।
पितामहमुपागच्छत् संक्रुद्धो हव्यवाहनः ॥")

नैरुक्त, त्रि, (निरुक्तमधीते निरुक्ते भवं वा । "ऋगयनादिभ्यः ।" ४ । ३ । ७३ । इति अण् ।) निरुक्तसम्बन्धि । यथा, "ब्रह्मणः कुण्डमिति यस्य ठ न व इति नैरुक्तम् ॥" इति रामतर्कवागीशः ॥
(निरुक्तं शास्त्रविशेषं वेत्ति अधीते वा । निरुक्तवेत्ता । यथा, मनुः । १२ । १११ ।
"त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्म्मपाठकः ।")

नैरृत, पुं, (निरृतेरिदम् । इत्यण् ।) राक्षसः । (यथा, महाभारते । १ । ६६ । ५५ ।
"तस्यापि निरृतिर्भार्य्या नैरृता येन राक्षसाः ॥")
पश्चिमदक्षिणकोणाधिपतिः । इत्यमरः । १ । २ । ३ । २ ॥ ज्योतिषमते तत्कोणाधिपतिः राहुः । यथा,—
"सूर्य्यः शुक्रः क्षमापुत्रः सैंहिकेयः शनिः शशी ।
सौम्यस्त्रिदशमन्त्री च प्राच्यादिदिगधीश्वराः ॥"
इति ज्योतिषतत्त्वम् ॥

नैरृती, स्त्री, (निरृतेरियमिति । निरृतिर्देवताऽस्या वा । अण् ङीप् च ।) अवाचीप्रतीच्योर्मध्या दिक् । नैरृतकोणः । इति राजनिर्घण्टः जटाधरश्च ॥ (यथा, मनुः । ११ । १०५ ।
"स्वयं वा शिश्नवृषणावुत्कृत्याधाय चाञ्जलौ ।
नैरृतीं दिशमातिष्ठेदानिपातादजिह्मगः ॥")

नैर्गुण्य, क्ली, (निर्गुणस्य भावः कर्म्म वा । निर्गुण+ष्यञ् ।) निर्गुणत्वम् । यथा, भागवते । २ । १ । ९ ।
"परिनिष्ठितोऽपि नैर्गुण्ये उत्तमश्लोकलीलया ।
गृहीतचेता राजर्षे आख्यानं यदधीतवान् ॥"
(यथा, महाभारते ।

नैष्किक, पुं, (निष्कं शतं दीनारं सहस्रं वा नियुक्तः । निष्क+"तत्र नियुक्तः ।" ४।४।६९। इति ठक् ।) टङ्काध्यक्ष । इत्यमरः ।२। ८।७। टङ्कपतिः । मुद्रकार्य्याधिकृतः । टङ्कस्य स्वर्णं तस्याध्यक्षः । इति भरतः ॥ (त्रि, निष्केण क्रीतं निष्कस्य विकारो वा । "क्रीत-वत् परिमाणात् ।" ४।३।१५६। इत्यत्र वैयात् "असमासे निष्कादिभ्यः ।" ५।१।२०। इति ठक् । निष्कक्रीत । निष्कविकारे ।)

नैष्ठिक, त्रि, (निष्ठा विद्यतेऽस्येति । निष्ठा+ अत इनिठनौ इति ठन् ।) ब्रह्मचर्य्यं इमरणं यावत् "गुरुकुले यो वसति सः । यथा,—
नैष्ठिको ब्रह्मचारी तु वसेदाचार्य्यसन्निधौ ।
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥
अनेन विधिना देहं सादयन् विजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥"
इति गरुडपुराणम् ॥
(यथा, महाभारते । १ । १५२ । ४७ ।
"प्रणयाश्मविस्तारं न प्रज्ञा सर्म्मदायदा ।
मानुं लोकविधि वीरा नैव वा नैष्ठिकी मतिः ॥")

नैसर्गिक, त्रि, (निसर्गादागतः । निसर्ग+ठञ् ।) स्वाभाविकः । (यथा, रघुः । ५ । ३० ।
"अथ तदीक्षितः तदन्त योग्य
सद्य नैसर्गिकमुन्नतत्वम् ।")
यथाच कल्किपुराणे २६ अध्याये ।
"दृष्ट्वामशक्यामिव मत्तिः स तथा प्रसोमप्लम ।
नष्टा वा निरृदिता रामच्छिवा नैसर्गिकी तव ॥"

नैस्त्रिंशिक, त्रि, (निस्त्रिंशः खड्गः प्रहरण-मस्य । निस्त्रिंश+"प्रहरणम् ।" ४।४।५७। इति ठक् ।) खड्गधारी । निस्त्रिंशेन प्रह-रति य । तत्पर्य्यायः । असिहेतिः २ । इत्य-मरः । २ । ८ । ७० । आसिधीतिकः ३ । इति शब्दरत्नावली ॥

नो अ, (नञ्+उ ।) नहि । अभाव । इत्य-मरः । ३ । ४ । ११ ॥ (यथा, अमरोषमशत-कोत्ते । ७ ।
"नो दृष्टं यातिसारं प्रतिदिनमशनं प्रक्षपाया-
मुलाश्वम् ॥")

नोधा, [स्] पुं (नुवन्ति स्तुवन्ति इति । नु+"नुवो धुट् च ।" उणा० ४ । २२५ । इति असि धुट् च । यद्वा, नवं दधातीति । नव+धा+असुन् । नवशब्दस्य नोभावश्च । इति यास्कः ।) ऋषि-भेदः । ऋग्वेदादिकोक्तः । (यथा, ऋग्वेदे । १ । ६१ । १४ ।
"उवा वैनवस्य वाप्रुयाम कोऽपि
नदोऽ कुमरीयम सन्धा ॥")

नोनमाला, [स्] त्रि, (न ऊन मालेव तिष्ठतीति । मा+अच ।) दुरम्ल । न ऊन कर्मणि तिष्ठति स सः । शोणाङ्घ्रिकः । यथा,—
"मधुवाणी त्रिवार्देही नोऊनमाला त्रिवासव ।
नाडूनदपकारी च चैव पञ्चधिव श्लाय ॥"
इति [illegible]

नौ स्त्री, (नुद्यतेऽनयेति । नुद प्रेरणे+"ग्लानुदि-भ्यां डौ ।" उणा० २ । ६४ । इति डौ ।) नौका । इत्यमरः ।१ । १० । १० ॥ यथा, महा-भारते । १ । १४० । ४–५ ।
"ततः स प्रेषितो विद्वान् विदुरेण नरस्तदा ।
पार्थानां दर्शयामास मनोमारुतगामिनीम् ॥
सर्ववातसहां नावं यन्त्रयुक्तां पताकिनीम् ।
शिवे भागीरथीतीरे नरैर्विश्रम्भिभिः कृताम् ॥"
एतेन यन्त्रचालिता नौका प्रतीयते । अतएव नौका इति इष्टिमबोट इति च ख्याता प्रसिद्धा ॥

नौका, स्त्री, (नौरेव । नौ+स्वार्थे कन् ।) जलादि-सन्तरणार्थकाष्ठादिनिर्म्मितयानविशेष । नावि-इप । इति भिकालसीप । तत्पर्य्यायः । नौः २ तरिका ३ तरणि ४ तरण्डी ५ तरि ६ तरी ७ तरन्ती ८ तरण्ड ९ वहित्रिका १० उडुपम् ११ द्रोणि १२ वाह्या १३ शाक्षिकः १४ वहित्रम् १५ पोत १६ । इति शब्दरत्नावली ॥ वहन १७ । इति धरणिः ॥ *॥
अथ विधिर्युक्तिकल्पतरौ ।
"नौकाढ ऽन्विषद् यान तथा सनत्कुमारः ।
अश्वादिवत्तु वर्णनं यस्य सर्व्वं प्रतिष्ठितम् ॥
अत एव नौकायानं ख्यापितो भवतो भवेत् ॥"
अथ कालः ।
"कुमारवैनाशिविजकमधोगे
चरे विलग्ने मकरादिषट्के ।
अपीरन्यमप्रातिरेकतोऽर्थे
वदन्ति नौकाघटनानि कर्म्म ॥ * ॥
अश्विन्युद्रुतिवाणीनियुक्ता-
मित्रधनाप्तवर्गे सुभगवर्गे ।
साहस्रधीमसिद्धीन्द्रनियुक्ते
नौगमनं शुभदं गुरुवारे ॥" * ॥
"कुबेराशुर्वैदश्चिता सम्प्राशिता धुराश्रया ।
शमादौदेव हन्ति नैवा काष्ठं चतुर्विधम् ॥"
तद्यथा,—
"लघु यत् कोमलं काष्ठं सुघटं ब्रह्मजाति तत् ।
दृढाङ्गं लघु यत् काष्ठमघटं क्षत्रजाति तत् ॥
कोमलं गुरु यत् काष्ठं वैश्यजाति तदुच्यते ।
दृढाङ्गं गुरु यत् काष्ठं शूद्रजाति तदुच्यते ॥
लक्षणद्वययोगेन द्विजाति काष्ठसङ्ग्रह ।
क्षत्रियकाष्ठैर्घटिता भोजमते सुखसम्पद् नौका ।
अन्यैर्लघुभिः सुदृढैर्विदधति न सुदृढं
नौकाम् ॥
विभिन्नजातिद्वयकाष्ठजाता
न श्रेयसे नापि सुखाय नौका ।
